जगद्गुरु श्रीमध्वाचार्याः

JAGADGURU ŚRĪ MADHVĀCĀRYA

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

SGDF
Sri Gurgeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

ಸಾತೇನಹಳ್ಳಿಯ ಶ್ರೀ ಶಾಂತೇಶ

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थ(पूर्णप्रज्ञ)भगवत्पादाचार्यविरचित

श्रीसर्वमूलान्तर्गत

गीताप्रस्थानग्रन्थौ

१. गीताभाष्यम् (गीतायुतम्) १ - ११४

२. गीतातात्पर्यनिर्णयः ११५ - १८२

SGDF

Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

गीताभाष्यम्

(भगवद्गीतायुतम्)

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ देवं नारायणं नत्वा सर्वदोषविवर्जितम् ॥ परिपूर्णं गुरूंश्चान्गीतार्थं वक्ष्यामि लेशतः ॥ १ ॥ नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान्व्यासोऽवततार । ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद्वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च सर्वप्राणिनामवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां महाभारतसंहितामचीक्लृपत् । तच्चोक्तं । "लोकेशा ब्रह्मरुद्राद्याः संसारे

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥ मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १ ॥ संजय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥ पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥ अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् । पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥ युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।

SGDF
Sri Gangeshwari Digital Foundation

क्लेशिनं जनम् । वेदार्थाज्ञमधीकारवर्जितं च स्त्रियादिकम् । अवेक्ष्य प्रार्थयामासुर्देवेशं पुरुषोत्तमम् । ततः प्रसन्नो भगवान्व्यासो भूत्वा च तेन च । अन्यावताररूपैश्च वेदानुक्तार्थभूषितम् । केवलेनात्मबोधेन दृष्टं वेदार्थसंयुतम् । वेदादपि परं चक्रे पंचमं वेदमुत्तमम् ॥ भारतं पंचरात्रं च मूलरामायणं तथा । पुराणं भागवतं चेति संभिन्नः शास्त्रपुंगव" इति नारायणाष्टाक्षरकल्पे । "ब्रह्मापि तन्न जानाति ईषत्सर्वोपि

नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७॥ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥९॥ अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥ अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥ संजय उवाच ॥ तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः । सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१२॥ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः । सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥ ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ । माधवः पाण्डवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥ पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः । पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥१५॥ अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः । नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥ काश्यश्च परमेष्वासः शिखण्डी च महारथः । धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते । सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् ॥ १८ ॥ स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् । नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥ अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः । प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २० ॥ हृषीकेशं तदा वाक्यमिदमाह महीपते ॥ अर्जुन उवाच ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥ यावदेतान्निरीक्षेऽहं योद्धुकामानव-

SGDF
Sri Gangeshwari Digital Foundation

जानति। बह्वर्थमृषयस्तत्तु भारतं प्रवदन्ति ही"त्युपनारदीये। "ब्रह्माद्यैः प्रार्थितो विष्णुर्भारतं स चकार ह। यस्मिन्दशार्थाः सर्वत्र न ज्ञेयाः सर्वजन्तुभिरि"ति नारदीये। "भारतं चापि कृतवान्पंचमं वेदमुत्तमम्। दशावरार्थं सर्वत्र केवलं विष्णुबोधकम्। परोक्षार्थं तु सर्वत्र वेदादप्युत्तमं तु यदि"ति स्कान्दे। "यदि विद्याच्चतुर्वेदान्सांगोपनिषदान्द्विजः। न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः। इतिहास-

---

स्थितान्। कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः। धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवाच ॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत। सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्। उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥२५॥ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्। आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि। तान्समीक्ष्य स कौंतेयः सर्वान्बन्धूनवस्थितान् ॥ २७ ॥ कृपया परयाविष्टो विषीदन्निदमब्रवीत्। अर्जुन उवाच॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥ सीदन्ति मम गात्राणि मुखं च परिशुष्यति। वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥ गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते। न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३० ॥ निमित्तानि च पश्यामि विपरीतानि केशव। न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च। किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ ३२ ॥ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च। त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः। मातुलाः श्वशुराः पौत्राः श्यालाः संबन्धिनस्तथा ॥ ३४ ॥ एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन। अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥ निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन। पाप-

SGDF
Sri Gangeshwari Digital Foundation

पुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति ॥ मन्वादि केचिद्ब्रुवते ह्यास्तिकादि तथा परे । तथोपरिचराद्यन्ये भारतं परिचक्षते ॥ भारतं सर्ववेदाश्च तुलामारोपिताः पुरा । देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः ॥ व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् । महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ॥ निरुक्तमस्य यो वेद

मेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥ तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् । स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३७॥ यद्यप्येते न पश्यन्ति लोभोपहतचेतसः । कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् । कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः । धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥ अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः । स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥४१॥ संकरो नरकायैव कुलघ्नानां कुलस्य च । पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः । उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥ अहो बत महत्पापं कर्तुं व्यवसिता वयम् । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥ संजय उवाच ॥ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥ संजय उवाच ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् । विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥ श्रीभगवानुवाच ॥ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ

SGDF
Sri Gargeshwari Digital Foundation

सर्वपापैः प्रमुच्यते । यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ॥
विराटोद्योगसारवानि "त्यादि तद्वाक्यपर्यालोचनया ऋषिसंप्रदायात्
" को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवे "दित्यादिपुराणग्रन्थान्तरगत-
वाक्यार्थान्यथानुपपत्त्या नारदाध्ययनादिलिङ्गैश्चावसीयते । कथमन्यथा
भारतनिरुक्तिज्ञानमात्रेण सर्वपापक्षयः? । प्रसिद्धश्च सोऽर्थः । कथं चास्य
न कर्तुं शक्यते ? । ग्रन्थान्तरगतत्वाच्च नाविद्यमानस्तुतिः । न च कर्तु-
रेव । इतरत्रापि साम्यात् । तत्र च सर्वभारतार्थसंग्रहां वासुदेवार्जुन-
संवादरूपां भारतपारिजातमधुभूतां गीतामुपनिबबन्ध । तच्चोक्तम् ।
" भारतं सर्वशास्त्रेषु भारते गीतिका वरा । विष्णोः सहस्रनामापि ज्ञेयं
पाठ्यं च तद्द्वयमि 'ति महाकौर्मे । " स हि धर्मः सुपर्याप्तो ब्रह्मणः
पदवेदन " इत्यादि च । तत्र सेनयोर्मध्ये बांधवादिमोहजालसंवृतं
विषीदंतमर्जुनं भगवानुवाच ॥ प्रज्ञावादान् स्वमनीषोत्थवचनानि ।

परंतप ॥३॥ अर्जुन उवाच ॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥ गुरूनहत्वा हि महानु-
भावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके । हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥५॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा
जयेम यदि वा नो जयेयुः । यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः
प्रमुखे धार्तराष्ट्राः ॥ ६ ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्म-
संमूढचेताः । यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां
त्वां प्रपन्नम् ॥७॥ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रि-
याणाम् । अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥८॥
संजय उवाच ॥ एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः । न योत्स्य इति
गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥ तमुवाच हृषीकेशः प्रहसन्निव
भारत । सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥ श्रीभगवानुवाच ॥
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गतासूनगतासूंश्च नानु-

SGDF
Sri Gargeshwari Digital Foundation

कथमशोच्याः । गतासून् । किमिति । न त्वेवाहम् ॥ ईश्वरनित्यत्व-स्याप्रस्तुतत्वाद्दृष्टान्तत्वेनाह । न त्वेवेति । यथाहं नित्यः सर्ववेदान्तेषु प्रसिद्धः एवं त्वमेते जनाधिपाश्च नित्याः । देहिनो भाव एतद्भवति । तदेवासिद्धमिति चेन्न । देहिनोऽस्मिन्यथा कौमारादिशरीरभेदेपि देही तदीक्षिता सिद्धः । एवं देहान्तरप्राप्तावपीक्षितृत्वात् । न हि जडस्य शरीरस्य कौमाराद्यनुभवः संभवति । मृतस्यादर्शनात् । मृतस्य वाय्वा-द्यपगमादनुभवाभावः । अहं मनुष्य इत्याद्यनुभवाच्चैतत्सिद्धमिति चेन्न । सत्येवाविशेषे देहे सुप्त्यादौ ज्ञानादिविशेषादर्शनात् । समश्चाभिमानो मनसि । काष्ठादिवच्च । श्रुतेश्च । प्रामाण्यं च प्रत्यक्षादिवत् । न च बौद्धादिवाक्यवत् । अपौरुषेयत्वात् । न ह्यपौरुषेये पौरुषेयाज्ञानादयः कल्पयितुं शक्याः । विना च कस्यचिद्वाक्यस्यापौरुषेयत्वं सर्वसमयाभि-मतधर्माद्यसिद्धिः । यश्च तौ नांगीकुरुते नासौ समयी । अप्रयोजक-त्वात् । मास्तु धर्मोऽनिरूप्यत्वादिति चेन्न । सर्वाभिमतस्य प्रमाणं विना निषेद्धुमशक्यत्वात् । न च सिद्धिरप्रामाणिकस्येति चेन्न । सर्वाभिमते-रेव प्रमाणत्वात् । अन्यथा सर्ववाचिकव्यवहारासिद्धेश्च । न च मया श्रुतमिति तव ज्ञातुं शक्यं । अन्यथा वा प्रत्युत्तरं स्यात् । भ्रांतिर्वा तव-स्यात् । सर्वदुःखकारणत्वं वा स्यात् । एको वान्यथा स्यात् । रचितत्वे च धर्मप्रमाणस्य कर्तुरज्ञानादिदोषशंका स्यात् । न चादोषत्वं स्ववाक्ये-नैव सिद्ध्यति । न च येन केनचिदपौरुषेयमित्युक्तमुक्तवाक्यसमं । अनादिकालपरिग्रहसिद्धत्वात् । अतः प्रामाण्यं श्रुतेः । अतः कुतर्के धीर स्तत्र न मुह्यति । अथवा जीवनाशं देहनाशं वापेक्ष्य शोकः ? । न ताव-ज्जीवनाशं । नित्यत्वादित्याह । नत्वेवेति । नापि देहनाशमित्याह । देहिन इति ।

शोचन्ति पण्डिताः ॥११॥ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतःपरम् ॥ १२ ॥ देहिनोऽस्मिन्यथा देहे

SGDF
Sri Gargeshwari Digital Foundation

यथा कौमारादिदेहहानेन जरादिप्राप्तावशोकः एवं जीर्णादिदेहहानेन देहांतरप्राप्तावपि ॥ तथापि तद्दर्शनाभावादिना शोक इति चेन्नेत्याह । मात्रास्पर्शा इति । मीयंत इति मात्रा विषयाः तेषां स्पर्शाः संबंधाः त एव शीतोष्णसुखदुःखदाः । देहे शीतोष्णादिसम्बन्धाद्धि शीतोष्णाद्यनुभव आत्मनः । ततश्च सुखदुःखे । न ह्यात्मनः स्वतो दुःखादिः संभवति । कुतः । आगमापायित्वात् । यद्यात्मनः स्वतः स्युः सुप्तावपि स्युः । अतो यतो मात्रास्पर्शा जाग्रदादावेव ते संति नान्यदेति तदन्वयव्यतिरेकित्वात्तन्निमित्ता एव नात्मनः स्वतः । आत्मनश्च तैर्विषयविषयिभावसंबंधादन्यः संबंधो नास्ति । न चागमापायित्वेपि प्रवाहरूपेण नित्यत्वमस्ति । सुप्तिप्रलयादावभावादित्याह । अनित्या इति । अतश्चात्मनो देहाद्यात्मभ्रम एव सुखदुःखकारणं । अतस्तद्विमुक्तस्य बंधुमरणादिदुःखं न भवति । अतोऽभिमानं परित्यज्य तान् शीतोष्णादींस्तितिक्षस्व ॥ अतः प्रयोजनमाह । यं हीति । यमेते मात्रास्पर्शा न व्यथयंति । पुरि शयमेव संतं । शरीरसंबंधाभावे सर्वेषामपि व्यथाभावात्पुरुषमिति विशेषणं । कथं न व्यथयंति ? । समदुःखसुखत्वात् । तत्कथं ? । धैर्येण ॥ नित्य आत्मेत्युक्तं । किमात्मैव नित्य आहोस्विदन्यदपि । अन्यदपि तत्किमित्यत आह । नासत इति । असतः कारणस्य सतो ब्रह्मणश्चाभावो न विद्यते । "प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तमे"ति वचनाच्छ्रीविष्णुपुराणे । पृथग्विद्यत इत्यादरार्थः । असतः कारणत्वं

कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥
मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥ यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥ नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽतस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

SGDF
Sri Gargeshwari Digital Foundation

च "सदसद्रूपया चासौ गुणमय्याऽगुणो विभुरि"ति श्रीभागवते। असतः सदजायतेति च। अव्यक्तेश्च। संप्रदायतश्चैतत्सिद्धमित्याह। उभयोरपीति। अंतो निर्णयः॥ किं बहुना। यद्देशतोऽनंतं तन्नित्यमेव वेदाद्यन्यदपीत्याह। अविनाशीति। नापि शापादिना विनाश इत्याह। विनाशमिति। अव्ययं च तत्॥ भवतु देहस्यापि कस्यचिन्नित्यत्वमिति नेत्याह। अंतवंत इति। अस्तु तर्हि दर्पणनाशात्प्रतिबिंबनाशवदात्मनाश इत्यत आह। नित्यस्येति। शरीरिण इति ईश्वरव्यावृत्तये। न च नैमित्तिकनाश इत्याह। अनाशिन इति। कुतः। अप्रमेयेश्वरसरूपत्वात्। न ह्युपाधिर्बिंबसन्निध्यनाशे प्रतिबिंबनाशः सति च प्रदर्शके। स्वयमेवात्र प्रदर्शकः। चित्त्वात्। नित्यश्चोपाधिः कश्चिदस्ति। "प्रतिपत्तौ विमोक्षस्य नित्योपाध्या स्वरूपया। चिद्रूपया युतो जीवः केशवप्रतिबिंबक" इति भगवद्वचनात्॥ व्यवहारस्तु भ्रांत इत्याह। य एनमिति। कुतः। उक्तहेतुभ्यो नायं हंति न हन्यते। न हि प्रतिबिंबस्य क्रिया। स हि बिंबक्रिययैव क्रियावान्। ध्यायतीवेति श्रुतेश्च॥ अत्र मंत्रवर्णोप्यस्तीत्याह। न जायत इति। न चेश्वरज्ञानवद्भूत्वा भविता। तद्धि "तदैक्षत"। "देशतः कालतो योसाववस्थातः स्वतोन्यतः। अविलुप्तावबोधात्मे"त्यादिश्रुतिस्मृतिसिद्धं। कुतः। अजादिलक्षणेश्वरसरूपत्वात्। शाश्वतः सदैकरूपः। पुरं देहमणतीति पुराणः। तथापि न हन्यते हन्यमानेपि देहे॥ अतो य एवं वेद स कथं कं घातयति हन्ति वा।

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्। विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति॥ १७॥ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ १८॥ य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥१९॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे॥ २०॥ वेदाविना-

SGDF
Sri Gangeshwari Digital Foundation

अविनाशिनं नैमित्तिकनाशरहितं । नित्यं स्वाभाविकनाशरहितं । अथवा अविनाशिनं दोषयोगरहितं । नित्यं सदाभाविनं । इति सर्वत्र विवेकः । दोषयुक्तपुरुषादिषु नष्टशब्दप्रयोगात् ॥ देहात्मविवेकार्थं दृष्टांतमाह । वासांसीति ॥ स्वतः प्रायोनिमित्तैश्चाविनाशिनोपि केनचिन्निमित्त-विशेषेण स्यात् । ककच्छेदवत् इत्यतो विशेषनिमित्तानि निषेधति । नैनमिति ॥ वर्तमाननिषेधात्स्यादुत्तरत्रेत्यत आह । अच्छेद्य इति । वर्तमानादर्शनाद्युक्तमयोग्यत्वमिति सूचयति वर्तमानापदेशेन । कुतोऽ-योग्यता नित्यसर्वगंतादिविशेषणेश्वरसरूपत्वात् । शाश्वत इत्येकरूपत्व-मात्रमुक्तम् । स्थाणुशब्देन नैमित्तिकमन्यथात्वं निवारयति । नित्यत्वं सर्वगतत्वविशेषणम् । अन्यथा पुनरुक्तेः । ऐक्योक्तावप्यनुक्तविशेषणो-पादानान्नेश्वरैक्ये पुनरुक्तिः । युक्ताश्च बिंबधर्माः प्रतिबिंबेऽविरोधे । तत्ता च "रूपं रूपं प्रतिरूपोबभूव" "आभास एव चे"त्यादिश्रुति-स्मृतिसिद्धा । न चांशत्वविरोधः । तस्यैवांशत्वात् । न चैकरूपैवांशता । प्रमाणं चोभयविधवचनमेव । न चांशस्य प्रतिबिम्बत्वं कल्प्यम् । गाध्यादिष्वप्यंशबाहुरूप्यदृष्टेरितरत्रादृष्टेः । स्थाणुत्वेपि तदैक्षतेत्याद्य-विरुद्धमीश्वरस्य । उभयविधवाक्यात् । अचिन्त्यशक्तेश्च । न च माय-यैकम् । "त्वयीश्वरे ब्रह्मणि नो विरुध्यते" । "न योगित्वादीश्वर-त्वात्" । "चित्रं न चैतत्त्वयि कार्यकारण" इत्याद्यैश्वर्येणैव विरुद्ध-धर्माविरोधोक्तेः । महातात्पर्याच्च । मोक्षो हि महापुरुषार्थः । तत्रापि

शिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽप-राणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥२२॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥ २३ ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥ अव्यक्तोऽय-

SGDF
Sri Gargeshwari Digital Foundation

मोक्ष एवार्थः । "अन्तेषु रेमिरे धीरा न ते मध्येषु रेमिरे । अन्त-प्राप्तिं सुखं प्राहुर्दुःखमन्तरमेतयोः" । "पुण्यचितो लोकः क्षीयत" इत्यादिश्रुतिस्मृतिभ्यः । स च विष्णुप्रसादादेव सिध्यति । "वासुदेव-मनाराध्य को मोक्षं समवाप्नुयात्" । "तुष्टे तु तत्र किमलभ्य-मनन्त ईशे" । "तत्प्रसादादवाप्नोति परां सिद्धिं न संशयः" । "येषां स एव भगवान्दययेदनन्तस्सर्वात्मना श्रितपदो यदि निर्व्यलीकम् । ते वै विदन्त्यतितरन्ति च देवमायां नैषां ममाहमिति धीः श्वसृगालभक्ष्ये" । "तस्मिन्प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरल-मल्पकास्ते" । "ऋते यदस्मिन्भव ईश जीवास्तापत्रयेणोपहता न शर्म । आत्मँल्लभन्ते भगवंस्तवांघ्रिच्छायांशविद्यामत आश्रयेम" । "ऋते भवत्प्रसादाद्धि कस्य मोक्षो भवेदिह" । "तमेवं विद्वानि" त्यादि-श्रुतिस्मृतिभ्यः । स चोत्कर्षज्ञानादेव भवति । लोकप्रसिद्धेः । लोक-सिद्धमविरुद्धमन्यत्राप्यङ्गीकार्यम् । अहल्याजारत्वाद्यपि 'दोषकृतोपि ते न बहुतरो लेप आसीदि'त्युत्कर्षमेव वक्ति । बहुनरकफलोह्यसौ । "तस्य न लोम च न मीयत" इति श्रुत्यन्तराच्च । "यो मामेव-मसंमूढो जानाति पुरुषोत्तम"मिति तदुक्तेश्च । "सत्यं सत्यं पुनः सत्यं शपथैश्चापि कोटिभिः । विष्णुमाहात्म्यलेशस्य विभक्तस्य च कोटिधा । पुनश्चानन्तधा तस्य पुनश्चापि ह्यनन्तधा । नैकांशसममाहात्म्याः श्रीशेष-ब्रह्मशंकरा"इति नारदीये । अन्योत्कर्ष ऐक्यं च । "तथैव सर्व-शास्त्रेषु महाभारतमुत्तमम्" । "कोह्यन्यः पुंडरीकाक्षान्महाभारत-कृद्भवेदि"त्यादिग्रन्थान्तरसिद्धोत्कर्षमहाभारतविरुद्धम् । तत्र हि । "नास्ति नारायणसमं न भूतं न भविष्यति एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम्" । "यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः" । "न त्वत्समोस्त्यभ्यधिक" इत्यादिषु साधारणप्रश्नावसर एव महान्त-मुत्कर्षं विष्णोर्वक्ति । अन्यत्र यत्किंचिदुक्तावप्यसाधारण एवावसरे ।

SGDF
Sri Gargeshwari Digital Foundation

तद्धि अग्न्यादेरपि वेदादावस्ति। "त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः"। "विश्वस्मादिन्द्र उत्तर" इत्यादिषु। तद्ग्रन्थविरोधाच्च। तथा हि स्कान्दे शैवे। "यदन्तरं व्याघ्रहरीन्द्रयोर्वने यदन्तरं मेरुगिरीन्द्रविन्ध्ययोः। यदन्तरं सूर्यसुरेज्यबिम्बयोस्तदन्तरं रुद्रमहेन्द्रयोरपि॥ यदन्तरं सिंहगजेन्द्रयोर्वने यदन्तरं सूर्यशशांकयोर्दिवि। यदन्तरं जाह्नविसूर्यकन्ययोस्तदन्तरं ब्रह्मगिरीशयोरपि॥ यदन्तरं प्रलयजवारिविप्रुषोर्यदन्तरं स्तम्बहिरण्यगर्भयोः। स्फुलिंगसंवर्तकयोर्यदन्तरं तदन्तरं विष्णुहिरण्यगर्भयोः॥ अनन्तत्वान्महाविष्णोस्तदन्तरमनन्तकम्। माहात्म्यसूचनार्थाय ह्युदाहरणमीरितम्॥ तत्समो ह्यधिको वापि नास्ति कश्चित्कदाचन। एतेन सत्यवाक्येन तमेव प्रविशाम्यह"मित्याद्याह। तत्रैव शिवं प्रति मार्कण्डेयवचनम्। "संसारार्णवनिर्मग्न इदानीं मुक्तिमेष्यसी"त्यादि। पाद्मे शैवे मार्कण्डेय कथाप्रबन्धे शिवान्निषिध्य विष्णोरेव मुक्तिमाह। "अहं भोगप्रदो वत्स मोक्षदस्तु जनार्दन" इत्यादि। समब्राह्मविरोधाच्च। वेदश्चेतिहासाद्यविरोधेन योज्यः। यदि विद्यादिति वचनात्। अनिर्णयाच्चेन्द्रादिशंकयाऽन्यथा। तत्रापीष्टसिद्धिः। नामवैशेष्यात्। अतो भगवदुत्कर्ष एव सर्वागमानां महातात्पर्यम्। तथापि स्वतःप्रामाण्यात्सन्नेवोच्यते। अविरोधात्। न च प्रमाणसिद्धस्यान्यत्रादृष्ट्यापह्नवो युक्तः। धर्मवैचित्र्यादर्थानाम्। स्वतःप्रामाण्यानङ्गीकारे मानोक्तावप्यदोषत्वं च साधयेदित्यतिप्रसङ्गः। अनन्यापेक्षया च तत्परत्वं सिद्धमागमानां। 'नारायणपरा वेदाः'। 'सर्वे वेदा यत्पदमामनन्ति'। 'वासुदेवपरा वेदा' इति। नचैतद्विरुद्धम्। ईश्वरनियमात्। अनादौ च तत्सिद्धम्। द्रव्यं कर्म च कालश्चेत्यादौ। प्रयोजकत्वं तु पूर्वोक्तन्यायेन। अतस्सिद्धमेतत्। तच्चानन्यापेक्षाचिन्त्यशक्तित्व एव युक्तम्। अतो न मायामयमेकम्। अचलत्वं त्वप्रहर्षमनानन्दमदुःखमसुखं अप्रज्ञं

SGDF
Sri Gargeshwari Digital Foundation

असद्वा इत्यादिवत् । क्रियादृष्टेः । तपो मे हृदयं साक्षात्तनुर्विद्या क्रिया कृतिरित्याद्युक्तेः । अतश्च न मायामयं सर्वम् । ऐश्वर्यादिवाचिभगशब्देनैव संबोधनाच्च 'तं त्वा भगे'त्यादौ । स्वरूपत्वाच्च न मायामयत्वं युक्तम् । 'विज्ञानशक्तिरहमासमनन्तशक्तेः' । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे'' । 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे''त्यादिवचनात् ॥ अतएवाव्यक्तादिरूपः ॥ अस्त्वेवमात्मनो नित्यत्वं तथापि देहसंयोगवियोगात्मकजनिमृती स्त एवेत्यत आह । अथ चेति ॥ कुतोऽशोकः । नियतत्वादित्याह । जातस्येति ॥ तदेव स्पष्टयति । अव्यक्तादीनीति ॥ देहयोगवियोगस्य नियतत्वादात्मनश्चेश्वरसरूपत्वात्सर्वथाऽनाशान्नशोकःकार्य इत्युपसंहर्तुमैश्वरं सामर्थ्यं पुनर्दर्शयति । आश्चर्यवदिति । दुर्लभत्वेनेत्यर्थः । तद्धि आश्चर्य

मचिन्त्योयमविकार्योऽयमुच्यते । तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् । तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ २६ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिवेदना ॥ २८ ॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥ देही नित्यमवध्योऽयं देहे सर्वस्य भारत । तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥३१॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं । सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥ ३२ ॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥ अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् । संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥३४॥ भयाद्रणा-

SGDF
Sri Gargeshwari Digital Foundation

लोके । दुर्लभोपीश्वरसरूपत्वात्सूक्ष्मत्वाच्चात्मनस्तद्दृष्टा ।। सांख्यं ज्ञानं । शुद्धात्मतत्वविज्ञानं सांख्यमित्यभिधीयत'इति भगवद्वचनाद्व्याससमृतौ । योग उपायः । 'दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धय' इति प्रयोगाद्भागवते । नेतरौ सांख्ययोगावुपादेयत्वेन विवक्षितौ । कुत्र चित्सामस्त्येन । कर्मयोग इत्यादिप्रयोगाच्च । निन्दितत्वाच्चेतरयोर्मोक्षधर्मेषु भिन्नमतत्वमुक्त्वा पंचरात्रस्तुत्या । वेदानां त्वेकार्थत्वान्न विरोधः । पार्थक्यं तु सांख्याद्यपेक्षया युक्तम् । तत्रैव चित्रशिखण्डिशास्त्रे पंचरात्रमूले वेदैक्योक्तेश्च । एवमेव सर्वत्र सांख्ययोगशब्द उपायवाचको वर्णनीयः । युक्तेश्च । ज्ञानं हि जैवमुक्तम् । उपायश्च वक्ष्यते । बुध्यतेऽनयेति बुद्धिः । सांख्यविषयो यया वाचा बुध्यते सा वागभिहितेत्यर्थः ।। योग इमां बुद्धिं शृण्वित्युक्तम् । बह्वयो हि बुद्धयो मतभेदात् । तत्कथमेकत्र निष्ठां करोमीत्यत आह । व्यवसायात्मिकेति । सम्यग्युक्तिनिर्णीतानां मतानामैक्यमेवेत्यर्थः ।। स्युरवैदिकानि मतानि अव्यवसायात्मकानि न तु वैदिकानि । तेपि हि केचित्कर्माणि स्वर्गादिफलान्येवाहुरित्यत आह । यामिमामिति । यामाहुस्तयेत्यन्वयः ।

दुपरतं मंस्यंते त्वां महारथाः । येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥ अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः । निंदन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं । तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥ एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥ यामिमां पुष्पितां

SGDF
Sri Gargeshwari Digital Foundation

मोक्षफलमपेक्ष्य स्वर्गादिपुष्पयुक्तां वाचं प्रवदन्ति। वेदवादरताः। कर्मादिवाचकवेदवादरताः। वेदैर्यन्मुखत उच्यते तत्रैव रताः। नान्यदस्तीतिवादिनः। 'परोक्षविषया वेदाः'। 'परोक्षप्रिया इव हि देवाः'। 'मां विधत्तेभिधत्ते मामि'त्यादिभिः पारोक्ष्येण प्रायो भगवन्तं वदन्ति। भोगैश्वर्यगतिं प्रति। तत्प्राप्तिं प्रति तत्प्राप्तिफला एव वेदा इति वदन्तीत्यर्थः। तेषां सम्यग्युक्तिनिर्णयात्मिका बुद्धिः। समाधौ समाध्यर्थे न विधीयते। सम्यङ्निर्णीतार्थानां हीश्वरे मनस्समाधानं सम्यग्भवति। तद्धि मोक्षसाधनं। उक्तं चैतदन्यत्र। "न तस्य तत्वग्रहणाय साक्षाद्वरीयसीरपि वाचस्समासन्। स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यादि"ति॥ तां योगबुद्धिमाह। त्रैगुण्यविषया इत्यादिनेतरदपोह्य। वेदानां परोक्षार्थत्वात्त्रिगुणसम्बन्धि स्वर्गादि प्रतीतितोऽर्थ इव भाति। "परोक्षवादी वेदोयमि"ति ह्युक्तम्। अतः प्रातीतिकेऽर्थे भ्रान्तिं मा कुर्वित्यर्थः। "वादो विषयकत्वं च मुखतो वचनं स्मृतमि"त्यभिधानम्। न तु वेदपक्षो निषिध्यते। "वेदे रामायणे चैव पुराणे भारते तथा। आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते"। "सर्वे वेदा यत्पदमामनन्ति"। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनो रुचिरेव च। वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्यय" इति वेदानां सर्वात्मना विष्णुपरत्वोक्तेः। तद्विहितस्य तद्विरुद्धस्य च धर्माधर्मत्वोक्तेश्च॥ तथापि काम्यकर्मिणां

वाचं प्रवदन्त्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्। क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ ४३॥ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्। व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ४४॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन। निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥ ४५॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान्सर्वेषु वेदेषु

SGDF
Sri Gangeshwari Digital Foundation

फलं ज्ञानिनां न भवतीति साम्यमेवेत्यत आह। यावानर्थ इति। यथा यावानर्थः प्रयोजनमुदपाने कूपे भवति तावान् सर्वतः संप्लुतोदकेऽन्तर्भवत्येव। एवं सर्वेषु वेदेषु यत्फलं तद्विजानतोपि ज्ञानिनो ब्राह्मणस्य फलेंऽतर्भवति। ब्रह्माणतीति ब्राह्मणः। अपरोक्षज्ञानी। स हि ब्रह्म गच्छति। विजानत इति ज्ञानफलत्वं तस्य दर्शयति॥ कामात्मनां निन्दा कृता कथम्। एषां स्वर्गकामो यजेतेत्यादौ कामस्यापि विहितत्वादित्यत आह। कर्मण्येवेति। त इत्युपलक्षणार्थम्। तव ज्ञानिनोपि न फलकामकर्तव्यता किम्वन्येषाम्। नत्वस्ति केषांचिन्न तेऽस्तीति। स हि ज्ञानी नरांश इन्द्रश्च। मोहादिस्त्वभिभवादेः। यदि तेषां शुद्धसत्त्वानां न स्याज्ज्ञानं क्वान्येषाम्?। उपदेशादेश्च सिद्धं ज्ञानं तेषाम्। पार्थार्ष्टिषेणेत्यादि ज्ञानिगणनाच्च। कामनिषेध एवात्र। फलानि ह्यस्वातन्त्र्येण भवन्ति। न हि कर्मफलानि कर्माभावे यत्नतोपि भवन्ति। भवन्ति च काम्यकर्मिणो विपरीतप्रयत्नेप्यविरोधे। अतः कर्माकरण एव प्रत्यवायो न तु ज्ञानादिना वाऽकामनया फलाप्राप्तौ। अतः कर्मण्येवाधिकारः। अतस्तदेव कार्यम्। न तु कामेन ज्ञानादिनिषेधेन वा फलप्राप्तिः। कामवचनानां तु तात्पर्यं भगवतैवोक्तम्। रोचनार्था फलश्रुतिः। "यथा भैषज्यरोचनमि"त्यादि भागवते। अतएव कामी यजेतेत्यर्थः। न तु कामीभूत्वेत्यर्थः। "निष्कामं ज्ञानपूर्वं चे"ति वचनात्। वक्ष्यमाणेभ्यश्च "वसन्ते वसन्ते ज्योतिषा यजेते"त्यादिभ्यश्च। अतो मा कर्मफलहेतुर्भूः। कर्मफलं तत्कृतौ हेतुर्यस्य स कर्मफलहेतुः स मा भूः। तर्हि न करोमीत्यत आह। मा त इति। कर्माकरणे स्नेहो मास्त्वित्यर्थः। अन्यफलाभावेऽपि मत्प्रसादाख्यफलभावात्। इच्छा च तस्य युक्ता। "वृणीमहे ते परितोषणाये"त्यादि महदाचा-

---

ब्राह्मणस्य विजानतः॥४६॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि॥४७॥ योगस्थः कुरु कर्माणि

SGDF
Sri Gangeshwari Digital Foundation

रात्। अनिन्दनाद्विशेषत इतरनिन्दनाच्च। सामान्यं विशेषो बाधत इति च प्रसिद्धम्। सर्वानानय नैकं मैत्रमित्यादौ। "अतो नैकात्म्यतां मे स्पृहयन्ति केचित्" "भक्तिमन्विच्छन्तः" "ब्रह्मजिज्ञासा" "विज्ञाय प्रज्ञां" "द्रष्टव्य" इत्यादिवचनेभ्यः। स्वार्थसेवकं प्रति न तथा स्नेहः। किं ददामीत्युक्ते सेवादियाचकं प्रति बहुतरः स्नेह इति लोकप्रसिद्धन्यायाच्च भक्तिज्ञानादिप्रार्थना कार्येति सिद्धम्॥ पूर्व श्लोकोक्तं स्पष्टयति। योगस्थ इति। योगस्थ उपायस्थः। संगं फल-स्नेहं त्यक्त्वा। तत एव सिद्ध्यसिद्ध्योः समो भूत्वा। स एव च मयोक्तो योगः॥ इतश्च योगाय युज्यस्वेत्याह। दूरेणेति। बुद्धि-योगाज्ज्ञानलक्षणादुपायात्। दूरेण अतीव। अतो बुद्धौ शरणं ज्ञाने स्थितिम्। फलं कर्मकृतौ हेतुर्येषां ते फलहेतवः॥ ज्ञानफलमाह। बुद्धियुक्त इति। सुकृतमप्यप्रियं मानुष्यादिफलं जहाति। न बृहत्फलमप्युपासनादिनिमित्तम्। "न ह्यस्य कर्म क्षीयते" "अवि-दित्वास्मिँलोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवती"त्यादिश्रुतिस्मृतिभ्यः। अतः कर्मक्षयश्रुतिरज्ञानिविषया सर्वत्र। उभयक्षयश्रुतिरप्यनिष्टविषया। न हीष्टपुण्यक्षये किंचित्प्रयोजनम्। न चेष्टनाशो ज्ञानिनो युक्तः। इष्टाश्च केचिद्विषयाः। "स यदि पितृ-लोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति" "प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवानि ब्राह्मणानां" "स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा"। "अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते"। "कामान्नीकामरूप्यनुसञ्चरन्" "स एकधा भवती"त्यादिश्रुतिभ्यः। बहुत्वेप्यात्मसुखस्य पुनरिष्टत्वात्कर्मसुखे न विरोधः। अनुभवशक्तिश्चे-

---

सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ ४८॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय। बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ ४९॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

SGDF
Sri Gargeshwari Digital Foundation

श्वरप्रसादात्। श्रुतेश्च। न च शरीरपातात्पूर्वमेतत्। "स तत्र पर्येति"। "एतमानन्दमयमात्मानमुपसंक्रम्ये"त्याद्युत्तरत्र श्रवणात्। न चैकीभूत एव ब्रह्मणा सह। "मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि"त्यादिनिन्दनान्मोक्षधर्मे। परिहारे पृथग्भोगाभिधानाच्च। शुकादीनां पृथग्दृष्टेश्च। "जगद्व्यापारवर्जमि"ति ऐश्वर्यमर्यादोक्तेश्च। "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता" इति च। उपाधिनाशे नाशाच्च प्रतिबिम्बस्य। न चैकीभूतस्य पृथग्ज्ञाने मानं पश्यामः। आसं दुःखी नासमिति ज्ञानविरोधाच्चेश्वरस्य। अनेन रूपेणेति च। भेदाभावात्। न च प्रतिबिम्बस्य बिम्बैक्यं लोके पश्यामः। उपाधिनाशे मानं वा। "मग्नस्य हि परेऽज्ञान" इति दुःखात्मकत्वोक्तेश्च। यावदात्मभावित्वादित्युपाधिनित्यत्वाभिधानाच्च। अतोऽन्यवचनं प्रतीयमानमप्यौपचारिकम्। दृष्टाश्च ते भगवतो भिन्ना नारदेन। प्रतिशाखं च 'स एकधे'त्यादिषु भेदेन प्रतीयन्ते। विरोधे तु युक्तिमतामेव बलवत्त्वम्। युक्तयश्चात्रोक्ता मग्नस्य हीत्यादयः। अतो जले जलैकीभाववदेकीभावः। उक्तं च "यथोदकं शुद्धे शुद्धं" "यथा नद्य" इत्यादौ। तत्राप्यन्योन्यात्मकत्वे वृद्ध्यसम्भवः। अस्ति चेषत्समुद्रेऽपि द्वारि। महत्त्वादन्यत्रादृष्टिः। "ता एवापो ददौ तस्य स ऋषिः शंसितव्रत" इति महाकौर्मे समर्थानां भेदज्ञानाच्च। "नैव तत्राप्नुवन्त्येते ब्रह्मेशानादयः सुराः। यत्ते पदं हि कैवल्यमि"ति निषेधाच्च नारदीये। सविचारश्च निर्णयः कृतो मोक्षधर्मेषु। बलवांश्च सविचारो निर्णयो वाक्यमात्रात्। अतो "यत्र नान्यत्पश्यती"त्याद्यपि तदधीनसत्तादिवाचि। अन्यथा कथमैश्वर्यादि स्यात्?। न च तन्मायामयमित्युक्तम्। अन्यथा कथं तत्रैव स एकधेत्यादि ब्रूयात्?। न च न ह वै सशरीरस्येत्यादि विरोधः। वैलक्षण्यात्तच्छरीराणाम्। अभौतिकानि हि तानि। नित्योपाधिविनिर्मितानीश्वरशक्त्या। तथा चोक्तम्। "शरीरं जायते

SGDF
Sri Gargeshwari Digital Foundation

तेषां षोडश्या कलयैव चे''ति नारायणाष्टाक्षरकल्पे। वदन्ति च लौकिकाद्वैलक्षण्येऽभावशब्दम्। 'अप्रहर्षमनानन्दं' 'सुखदुःखबाह्य' इत्यादिषु। निरुक्त्यभावाच्च न तानि शरीराणि। तथा हि श्रुतिः। 'अशारीतिरेतच्छरीरमभवदि''ति। न हि तानि शीर्णानि भवन्ति। ''सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे''तिवचनात् साम्यात्प्रयोगः। प्रयोगाच्च। ''अनिन्द्रिया अनाहारा अनिष्पन्दाः सुगन्धिनः''। 'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामि''त्यादि दृष्टदेहेष्वेव। न चैषाऽन्या गौणी मुक्तिः। ''बहुनाऽत्र किमुक्तेन यावच्छ्वेतं न गच्छति। योगी तावन्न मुक्तः स्यादेष शास्त्रस्य निर्णय''इत्यादित्यपुराणे तदन्यमुक्तिनिषेधात्। ये त्वत्रैव भगवन्तं प्रविशन्ति तेऽपि पश्चात्तत्रैव यान्ति। योग्यत्वं चात्र विवक्षितम्। युधिष्ठिरप्रश्न इतरनिन्दनाच्च। सायुज्यं च ग्रहवत्। तदुक्तेश्च। ''भुञ्जते पुरुषं प्राप्य यथा देवग्रहादयः। तथा मुक्तावुत्तमायां बाह्यान्भोगांस्तु भुञ्जत'' इति नारायणाष्टाक्षरकल्पे। अतोऽनिष्टस्यैव मोक्षः। सोऽस्त्येव सर्वात्मना। ''अदुःखं'' ''सर्वदुःखविवर्जिताः'' ''अशोकमहिमं'' ''यत्र गत्वा न शोचती''त्यादि श्रुतिभ्यः। विशेषवचनाभावाच्च। येषां त्वीषद्दृश्यते ते न सायुज्यं प्राप्ताः। सामीप्याद्येव तेषाम्। अतः प्रारब्धकर्मशेषभावात्तद्भुक्त्वा सायुज्यं गच्छन्ति। तच्चोक्तम्। ''सङ्कर्षणादयः सर्वे स्वाधिकारादनन्तरम्। प्रविशन्ति परं देवं विष्णुं नास्त्यत्र संशय'' इति व्यासयोगे। अतोऽनिष्टस्य सर्वात्मना वियोगः। ''परब्रह्मत्वमिच्छामि परमात्मञ्जनार्दने''त्यादिना ब्रह्मादिभिरपि प्रार्थितत्वात्। ''न मोक्षसदृशं किञ्चिदधिकं वा सुखं क्वचित्। ऋते वैष्णवमानन्दं वाङ्मनोगोचरं महदि''त्यादेश्च ब्रह्मादिपदादप्यधिकतमं सुखं च मोक्ष इति सिद्धम्। अतो योगाय युज्यस्व। ज्ञानोपायाय। तद्धि कर्मकौशलम्।

तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥ कर्मजं बुद्धियुक्ता

SGDF Sri Gargeshwari Digital Foundation

हरति । प्रायः सर्वान्प्रजहाति । शुकादीनामपीषद्दर्शनात् । ‘ त्वत्पाद-भक्तिमिच्छन्ति ज्ञानिनस्तत्वदर्शिन ’ इत्युक्तेस्तामिच्छन्ति । यदा-त्विन्द्रादीनामाग्रहो दृश्यते तदाऽभिभूतं तेषां ज्ञानम् । तच्चोक्तम् । ‘आधिकारिकपुंसां तु बृहत्कर्मत्वकारणात् । उद्भवाभिभवौ ज्ञाने ततोऽन्येभ्यो विलक्षणा ’ इति । अत एव वैलक्षण्यादनधिकारिणामा-ग्रहादि चेदस्ति न ते ज्ञानिन इत्यवगन्तव्यम् । न चात्र समाधिं कुर्वतो लक्षणमुच्यते । ‘यः सर्वत्रानभिस्नेह’ इति स्नेहनिषेधात् । न हि समाधिं कुर्वतस्तस्य शुभाशुभप्राप्तिरस्ति । असम्प्रज्ञातसमाधेः । सम्प्रज्ञा-तेत्वविरोधः । तथापि न तत्रैवेति नियमः । ‘ कामादयो न जायन्ते ह्यपि विक्षिप्तचेतसाम् । ज्ञानिनां ज्ञाननिर्धूतमलानां देवसंश्रयादि’ति स्मृतेः । मनोगता हि कामाः । अतस्तत्रैव तद्विरुद्धज्ञानोत्पत्तौ युक्तं हानं तेषामिति दर्शयति। मनोगतानिति। विरोधश्चोच्यते ‘रसोप्यस्य परं दृष्ट्वा निवर्तत’ इति। न चैत(द)दृष्ट्याऽपलपनीयम् । पुरुषवैशेष्यात्। आत्मना परमात्मना परमात्मन्येव स्थितः सन् । आत्माख्ये तस्मिन् स्थितस्य तत्प्रसादादेव तुष्टिर्भवति । ‘ विषयांस्तु परित्यज्य रामे स्थितिमतस्ततः । देवाद्भवति वै तुष्टिर्नान्यथा तु कथंचने’त्युक्तं हि नारायणरामकल्पे । अतो नात्मा जीवः ॥ तदेव स्पष्टयत्युत्तरैः श्लोकैस्त्रिभिः । एतान्येव ज्ञानोपायानि च । तच्चोक्तम् । ‘ तद्धि जिज्ञासुभिः साध्यं ज्ञानिनां यत्तु लक्षणमि’ति । शोभनाध्यासो रागः । ‘ रसो रागस्तथा रक्तिः शोभना-ध्यास उच्यत ’ इत्यभिधानम् ॥ सर्वत्रानभिस्नेहत्वाच्छुभाशुभं प्राप्य नाभिनन्दति न द्वेष्टि ॥ न चैतल्लक्षणं ज्ञानमयत्नतोऽपि भवतीत्याहो-

---

स्तदोच्यते ॥ ५५ ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतराग भयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् । नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा

SGDF
Sri Gargeshwari Digital Foundation

त्तरैः श्लोकैः। निराहारत्वेन विषयभोगसामर्थ्याभाव एव भवति। इतरविषयाकाङ्क्षाभावो वा। रसाकाङ्क्षादिर्न निवर्तते। स त्वपरोक्षज्ञानादेव निवर्तत इत्याह। विषया इति। 'इन्द्रियाणि जयन्त्याशु निराहारा मनीषिणः। वर्जयित्वा तु रसनामसौ रस्ये तु वर्धत' इति वचनाद्भागवते। रसशब्दस्य रागवाचित्वाच्च ॥ अपरोक्षज्ञानरहितज्ञानिनोऽपि साधारणयत्नवतोऽपि मनो हरन्तीन्द्रियाणि। पुरुषस्य शरीराभिमानिनः। को दोषस्ततः? प्रमाथीनि प्रमथनशीलानि पुरुषस्य। तर्ह्यशक्यान्येवेत्यत आह। तानीति। बहुयत्नवतः शक्यानि। अतो यत्नं कुर्यादित्याशयः। युक्तो मयि मनोयुक्तः। अहमेव परः सर्वस्मादुत्कृष्टो यस्य स मत्परः। फलमाह। वशे हीति ॥ रागादिदोषकारणमाह परिहाराय श्लोकद्वयेन। संमोहोऽकार्येच्छा। तथा हि मोहशब्दार्थ उक्त उपगीतासु। 'मोहसंज्ञितम्। अधर्मलक्षणं चैव नियतं पापकर्मस्वि'ति। तथाचान्यत्र 'सम्मोहोऽधर्मकामिते'ति। स्मृतिविभ्रमः प्रतिषेधादिस्मृतिविनाशः। बुद्धिविनाशः सर्वात्मना दोषबुद्धिनाशः। विनश्यति नरकाद्यनर्थं प्राप्नोति। तथा ह्युक्तम्। 'अधर्मकामिनः शास्त्रे विस्मृतिर्जायते यदा। दोषादृष्टेस्तत्कृतेश्च नरकं प्रतिपद्यत' इति ॥ इन्द्रियजयफलमाहोत्तराभ्यां श्लोका-

---

प्रतिष्ठिता ॥ ५८ ॥ विषया विनिवर्तन्ते निराहारस्य देहिनः। रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥ यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः। इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः। वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥ ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते। सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥ क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्। आत्मवश्यैर्विधेयात्मा

SGDF
Sri Gurgeshwari Digital Foundation

तदुपायमाह । कर्मजमिति । कर्मजं फलं त्यक्त्वा । अकामनया ईश्वराय समर्प्य बुद्धियुक्ताः सम्यग्ज्ञानिनो भूत्वा पदं गच्छन्ति । सयोगकर्म ज्ञानसाधनं तन्मोक्षसाधनमिति भावः ॥ कियत्पर्यन्तमवश्यं कर्तव्यानि मुमुक्षुणैवं कर्माणीत्याह । यदेति । निर्वेदं नितरां लाभम् । प्रयोगात् "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्ये"त्यादि । न हि तत्र वैराग्यमुपपद्यते । तथासति पाण्डित्यादिति स्यात् । न च ज्ञानिनां भगवन्महिमादिश्रवणे विरक्तिर्भवति । "आत्मारामा हि मुनयो निर्ग्रन्था अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिरि"तिवचनात् । अनुष्ठानाच्च शुकादीनाम् । न च तेषां फलं नास्ति । तस्यैव महत्सुखत्वात्तेषाम् । "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किम्वन्तकासिलुलितात्पततां विमानादि"त्यादि वचनात् । तेषामप्युपासनादिफलस्य साधितत्वात् । तारतम्याधिगतेश्च । तथाहि । यदि तारतम्यं न स्यात् । 'नात्यन्तिकं विगणयन्त्यपि ते प्रसादम्' । 'नैकात्म्यतां मे स्पृहयन्ति केचित्' । 'एकत्वमप्युत दीयमानं न गृह्णन्ती'ति मुक्तिमप्यनिच्छतामपि मोक्ष एव फलं तमिच्छतामपि स भवति सुप्रतीकादीनामिति कथमनिच्छतां स्तुतिरुपपन्ना स्यात् ? । वचनाच्च । 'यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे । तथा मुक्तिविशेषोऽपि ज्ञानिनां लिंगभेदने' । 'योगिनां भिन्नलिंगानामाविर्भूतस्वरूपिणाम् । प्राप्तानां परमानन्दं तारतम्यं सदैव ही'ति । 'न त्वामतिशयिष्यन्ति मुक्तावपि कथञ्चन । मद्भक्तियोगाज्ज्ञानाच्च सर्वानतिशयिष्यसी'ति च । साम्यवचनं तु प्राचुर्यविषयं दुःखाभावविषयं च । तथा चोक्तम् । 'दुःखाभावः परानन्दो लिंगभेदः समा मताः । तथापि परमानन्दो

हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानभेदात्तु भिद्यत' इति नारायणाष्टाक्षरकल्पे। अतो न वैराग्यं श्रुतादावत्र विवक्षितम्। न च संकोचे मानं किंचित्। विद्यमान इतरत्र प्रयोगे। महद्भिः श्रवणीयस्य श्रुतस्य च वेदादेः फलं प्राप्स्यसीत्यर्थः ॥ तदेव स्पष्टयति। श्रुतिविप्रतिपन्नेति। पूर्वं श्रुतिभिर्वेदैर्विप्रतिपन्ना विरुद्धा सती वेदार्थानुकूलेन तत्त्वनिश्चयेन विपरीतवाग्भिरपि निश्चला भवति। ततश्च समाधावचला बुद्धिर्ब्रह्मप्रत्यक्षदर्शनेन भेरीताडनादावपि परमानन्दमग्नत्वात्। तदा योगमवाप्स्यसि उपायसिद्धो भवसीत्यर्थः ॥ स्थिता प्रज्ञा ज्ञानं यस्य स स्थितप्रज्ञः। भाष्यतेऽनयेति भाषा लक्षणमित्यर्थः। उक्तं लक्षणमनुवदति लक्षणान्तरं पृच्छामीति ज्ञापयितुं समाधिस्थस्येति। कं ब्रह्माणमीशं रुद्रं च वर्तयतीति केशवः। तथाहि निरुक्तिः कृता हरिवंशेषु रुद्रेण कैलासयात्रायाम्। 'हिरण्यगर्भः कः प्रोक्त ईशः शंकर एव च। सृष्ट्यादिना वर्तयति तौ यतः केशवो भवानि'ति वचनान्तराच्च। किमासीत किं प्रत्यासीत। नचार्जुनो न जानाति तल्लक्षणादिकम्। 'जानन्ति पूर्वराजानो देवर्षयस्तथैव च। तथापि धर्मान्पृच्छन्ति वार्तायै गुह्यवित्तये। न ते गुह्याः प्रतीयन्ते पुराणेष्वल्पबुद्धिना'मितिवचनात् ॥ गमनादिप्रवृत्तिर्नात्यभिसन्धिपूर्विका मत्तादिप्रवृत्तिवदिति 'या निशे'त्यादिना दर्शयिष्यन् तल्लक्षणं प्रथमत आह। प्रजहातीति। एवं परमानन्दतृप्तः किमर्थमेवं प्रवृत्तिं करोतीति प्रश्नाभिप्रायः। प्रारब्धकर्मणेषत्तिरोहितब्रह्मणो वासनया प्रायोऽल्पाभिसन्धि पूर्विका गमनादिवृत्तयः संभवन्तीत्याशयवान्परि-

---

निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥ अर्जुन उवाच ॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥ श्रीभगवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञ-

SGDF
Sri Gurgeshwari Digital Foundation

भ्याम् । विषयाननुभवन्नपि । विधेय आत्मा मनो यस्य सः । जितात्मेत्यर्थः । प्रसादं मनः प्रसादम् । कथं प्रसादमात्रेण सर्वदुःखहानिः ? । प्रसन्नचेतसो हि बुद्धिः पर्यवतिष्ठति । ब्रह्मापरोक्ष्येण सम्यक्स्थितिं करोति । प्रसादो नाम स्वतोऽपि प्रायो विषयागतिः ॥ प्रसादाभावे दोषमाहोत्तराभ्यां श्लोकाभ्याम् । नहि प्रसादाभावे युक्तिः चित्तनिरोधः । अयुक्तस्य च बुद्धिः सम्यग्ज्ञानं नास्ति । तदेवोपपादयति । न चायुक्तस्येति । शान्तिर्मुक्तिः । 'शान्तिर्मोक्षोऽथनिर्वाण'-मित्यभिधानात् ॥ कथमयुक्तस्य भावना न भवति ? । आह । इन्द्रियाणामिति । अनुविधीयते क्रियते नन्वीश्वरेणेन्द्रियाणामनु बुद्धिर्ज्ञानमित्यादिवक्ष्यमाणत्वात् । प्रज्ञां प्रज्ञानम् । उत्पत्स्यदपि निवारयतीत्यर्थः उत्पन्नस्याप्यभिभवो भवति ॥ तस्मात्सर्वात्मना निगृहीतेन्द्रिय एव ज्ञानीति निगमयति । तस्मादिति ॥ उक्तं लक्षणं पिण्डीकृत्याह । या निशेति । या सर्वभूतानां निशा परमेश्वरस्वरूपलक्षणा । यस्यां सुप्तानीव न किंचिज्जानन्ति । तस्यामिन्द्रियसंयमयुक्तो ज्ञानी जागर्ति सम्यगापरोक्ष्येण पश्यति परमात्मानमित्यर्थः । यस्यां विषयलक्षणायां भूतानि जाग्रति तस्यां निशायामिव सुप्तः प्रायो न जानाति । मत्तादिवद्गमनादि प्रवृत्तिः । तदुक्तम् । 'देहं तु तन्नचरमं' 'देहोपि दैववशग' इति

प्रसादमधिगच्छति ॥ ६४ ॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६ इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति

SGDF
Sri Gangeshwari Digital Foundation

श्लोकाभ्याम् । मननयुक्तो मुनिः । पश्यत इत्यस्य साधनमाह ॥ तेन विषयानुभवप्रकारमाह । आपूर्यमाणमिति । यो विषयैरापूर्यमाणोऽप्यचलप्रतिष्ठो भवति नोत्सेकं प्राप्नोति न च प्रयत्नं करोति न चाभावे शुष्यति । न हि समुद्रः सरित्प्रवेशाप्रवेशनिमित्तवृद्धिशोषौ बहुतरौ प्राप्नोति प्रयत्नं वा करोति । स मुक्तिं प्राप्नोतीत्यर्थः॥ एतदेव प्रपञ्चयति। विहायेति । कामान् विषयान् निस्स्पृहतया विहाय यश्चरति भक्षयति । भक्षयामीत्यहंकारममकारवर्जितश्च स हि पुमान् स एव च मुक्तिमधिगच्छतीत्यर्थः ॥ उपसंहरति। एषेति। ब्राह्मी स्थितिः ब्रह्मविषया स्थितिर्लक्षणम् । अन्तकालेऽप्यस्यां स्थित्वैव ब्रह्म गच्छति । अन्यथा जन्मान्तरं प्राप्नोति । यं यं वापीति वक्ष्यमाणत्वात् । ज्ञानिनामपि सति प्रारब्धकर्मणि शरीरान्तरं युक्तम् । 'भोगेन त्वितर' इति ह्युक्तम् । सन्ति हि बहुशरीरफलानि कर्माणि कानिचित् । 'सप्तजन्मनि विप्रः स्यादि'त्यादेः । दृष्टेश्च ज्ञानिनामपि बहुशरीरप्राप्तेः । तथा ह्युक्तम् । 'स्थितप्रज्ञोपि यस्तूर्ध्वः प्राप्य रौद्रं पदं ततः । साङ्कर्षणं ततो मुक्तिमगाद्विष्णुप्रसादत ' इति गारुडे । 'महादेव परे जन्मंस्तव मुक्तिर्निरूप्यत' इति नारदीये। निश्चितं फलं च ज्ञानम्। 'तस्य तावदेव चिरं' 'यदु चनार्चिषमेवाभिसम्भवती'त्यादिश्रुतिभ्यः। न च कायव्यूहापेक्षा। 'तद्यथैषीकातूलं' 'तद्यथा पुष्करपलाशे 'ज्ञानाग्निः सर्वकर्माणी'ति वचनेभ्यः । प्रारब्धे त्वविरोधः । प्रमाणाभावाच्च । न च तच्छास्त्रं प्रमाणम् । 'अक्षपादकणादानां सांख्ययोगजटाभृताम् । मतमालम्ब्य ये वेदं दूषयन्त्यल्प-

---

यद्वत् । तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७० ॥ विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः । निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति। स्थित्वाऽस्यामन्तकालेऽपि ब्रह्म निर्वाणमृच्छति ॥७२॥ इतिश्रीमद्भगवद्गीतासूपनिषत्सु ब्र०साङ्ख्ययोगो नाम द्वितीयोऽध्यायः॥

SGDF
Sri Gangeshwara Digital Foundation

चेतस' इति वचनात्। यत्र तु स्तुतिः तत्र शिवभक्तानां स्तुतिपरत्वमेव न सत्यत्वम्। न हि तेषामपीतरग्रन्थविरुद्धार्थे प्रामाण्यम्। तथाह्युक्तम्। 'एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति। त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय। अतथ्यानि वितथ्यानि दर्शयस्व महाभुज। प्रकाशं कुरु चात्मानमप्रकाशं च मां कुर्वि'ति वाराहे। 'कुत्सितानि च मिश्राणि रुद्रो विष्णुप्रचोदितः। चकार शास्त्राणि[च] विप्रर्षयस्तत्प्रचोदिताः। दधीच्याद्याः पुराणानि तच्छास्त्रसमयेन तु। चक्रुर्वेदैश्च ब्राह्माणि वैष्णवान्विष्णुवेदतः। पंचरात्रं भारतं च मूलरामायणं तथा। तथा पुराणं भागवतं विष्णुवेद इतीरितः। अतः शैव पुराणानि योज्यान्यन्याविरोधत' इति नारदीये। अतो ज्ञानिनां भवत्येव मुक्तिः। भीष्मादीनां तु तत्क्षणे मुक्त्यभावः। स्मरंस्त्यजतीति वर्तमानापदेशो हि कृतः। तच्चोक्तम्। 'ज्ञानिनां कर्मयुक्तानां कायत्यागक्षणो यदा। विष्णुमाया तदा तेषां मनो बाह्यं करोतिही'ति गारुडे। न चान्येषां तदा स्मृतिर्भवति। 'बहुजन्मविपाकेन भक्तिज्ञानेन ये हरिम्। भजन्ति तत्स्मृतिं त्वंते देवो याति न चान्यथे'त्युक्तेर्ब्रह्मवैवर्ते। निर्वाणमशरीरम्। 'कायो बाणं शरीरं चे'त्यभिधानात्। 'एतद्बाणमवष्टभ्ये'ति प्रयोगाच्च। निर्वाणशब्दप्रतिपादनमनिन्द्रिया इत्यादिवत्। कथमन्यथा सर्वपुराणादिप्रसिद्धाऽऽकृतिर्भगवत उपपद्यते ?। न चान्यद्भगवत उत्तमं ब्रह्म। 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'। 'भगवन्तं परं ब्रह्म परंब्रह्म जनार्दनः'। 'परमं यो महद्ब्रह्म'। 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः'। 'योऽसावतीन्द्रियग्राह्यः'। 'नास्ति नारायणसमं न भूतं न भविष्यति'। 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रय' इत्यादिभ्यः। न च तद्ब्रह्मणो शरीरत्वादेतत्कल्प्यम्। तस्यापि शरीरश्रवणात्। 'आनन्दरूपममृतम्'। 'सुवर्णज्योतिः'। 'दहरोऽस्मिन्नन्तर आकाश' इत्यादिषु। यदि रूपं न

SGDF
Sri Gangeshwari Digital Foundation

स्यात् । आनन्दमित्येव स्यात् । न त्वानन्दरूपमिति । कथं च सुवर्णरूपत्वं स्यादरूपस्य? कथं दहरत्वम्? दहरश्च 'केचित्स्वदेहे'त्यादौ रूपवानुच्यते । 'सहस्रशीर्षा पुरुषः' । 'रुग्मवर्णं कर्तारम्' । 'आदित्यवर्णं तमसः परस्तात्' 'सर्वतः पाणिपादं तत्' । 'विश्वतश्चक्षुरि'त्यादि वचनात । विश्वरूपाध्यायादेश्च रूपवानवसीयते । अतिपरिपूर्णतमज्ञानैश्वर्यवीर्यानन्दश्रीशक्त्यादिमांश्च भगवान् । 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' । 'यः सर्वज्ञः' । 'आनन्दं ब्रह्मणः' । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' । 'अनादिमध्यान्तमनन्तवीर्यम्' । 'सहस्रलक्षामितकान्तिकान्तम्' । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' । 'विज्ञानशक्तिरहमासमनन्तशक्तेः' । 'तुर्यं तत्सर्वदृक्सदा' । 'आत्मानमन्यं च स वेद विद्वान्' । 'अन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः' । 'ऐश्वर्यस्य समग्रस्य' । 'अतीव परिपूर्णं ते सुखं ज्ञानं च सौभगम्' । 'यच्चात्ययुक्तं स्मर्तुं वा शक्तः कर्तुमतः पर'इत्यादिभ्यः । तानि सर्वाण्यन्योऽन्यस्वरूपाणि । 'विज्ञानमानन्दं ब्रह्म' । 'यस्य ज्ञानमयं तपः' । 'स मा भग प्रविश स्वाहा' । 'न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा' । 'नयोगित्वादीश्वरत्वात्सत्यरूपाच्युतो विभुः' । 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः' । 'ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षर' इति पैङ्गिखिलेषु । 'देहोऽयं मे सदानन्दो नायं प्रकृतिनिर्मितः । परिपूर्णश्च सर्वत्र तेन नारायणोऽस्म्यहमि'त्यादि ब्रह्मवैवर्ते । तदेव लीलया चासौ परिच्छिन्नादिरूपेण दर्शयति मायया । 'न च गर्भेऽवसद्देव्या न चापि वसुदेवतः । न चापि राघवाज्जातो न चापि जमदग्नितः । नित्यानन्दोऽद्वयोऽप्येवं क्रीडतेऽमोघदर्शन' इति पाद्मे । 'न वै स आत्माऽऽत्मवतामधीश्वरो भुंक्ते हि दुःखं भगवान्वासुदेवः' । 'सर्गादेरीशिताऽजः परमसुखनिधिर्बोध-

SGDF
Sri Gargeshwari Digital Foundation

रूपोऽप्यबोधं लोकानां दर्शयन्यो मुनिसुतविहृतात्मप्रियार्थे जगाम'। 'स ब्रह्मवन्द्यचरणो नरवत्प्रलापी स्त्रीसंगिनामिति रतिं प्रथयंश्चचार'। 'पूर्तैरचिन्त्यवीर्यो यो यश्च दाशरथिः स्वयम्। रुद्रवाक्यमृतं कर्तुमजितो जितवत्स्थितः' 'योऽजितो विजितो भक्त्या गांगेयं न जघान ह'। 'न चाम्बां ग्राहयामास करुणः कोपरस्तत' इत्यादिभ्यश्च स्कान्दे। न तत्र संसारसमानधर्मा निरूप्याः। यत्र च परावरभेदोऽवगम्यते। तत्राज्ञबुद्धिमपेक्ष्यावरत्वम्। विश्वरूपमपेक्ष्यान्यत्र। तच्चोक्तम्। 'परिपूर्णानि रूपाणि समान्यखिलरूपतः। तथाप्यपेक्ष्य मन्दानां दृष्टिं त्वामृषयोऽपि तु। परावरं वदन्त्येवं ह्यभक्तानां विमोहनमि'ति गारुडे। न चात्र किंचिदुपचरितादि वाच्यम्। अचिन्त्यशक्तेः पदार्थवैचित्र्याच्चेत्युक्तम्। 'कृष्णरामादिरूपाणि परिपूर्णानि सर्वदा। न चाणुमात्रं भिन्नानि तथाप्यस्मान्विमोहसी'त्यादेश्च नारदीये। तस्मात्सर्वदा सर्वरूपेष्वपरिगणितानन्तगुणगणं नित्यनिरस्ताशेषदोषं च नारायणाख्यं परं ब्रह्मापरोक्षज्ञान्यृच्छतीति सिद्धम्॥ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये द्वितीयोऽध्यायः॥ २॥ ॥ ॥

ॐ॥ आत्मस्वरूपं ज्ञानसाधनं चोक्तं पूर्वत्र। ज्ञानसाधनत्वेनाकर्म विनिन्द्य कर्म विधीयत उत्तराध्याये॥ कर्मणो ज्ञानमत्युत्तममित्यभिहितं भगवता 'दूरेण ह्यवरं कर्मे'त्यादौ। एवं चेत्किमिति कर्मणि घोरे युद्धाख्ये नियोजयसि? निवृत्तधर्मान्विनेत्याह। ज्यायसीति। कर्मणः सकाशाद्बुद्धिर्ज्यायसी चेत्ते मता तर्हि॥ ज्यायस्त्वेऽपि बुद्धेराधिकारिकत्वात्त्वं कर्मण्यप्यधिकृत इति तत्र नियोक्ष्यामीत्याशयवान्भगवानाह।

अर्जुन उवाच॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन। तत्किं कर्मणि घोरे मां नियोजयसि केशव॥ १॥ व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे। तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥२॥ श्रीभगवानुवाच॥ लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।

SGDF
Sri Gargeshwari Digital Foundation

लोक इति। द्विविधा अपि जनाः सन्ति। गृहस्थादिकर्मत्यागेन ज्ञाननिष्ठाः सनकादिवत्। तत्स्था एव ज्ञाननिष्ठाश्च जनकादिवत्। मद्धर्मस्था एवेत्यर्थः। साङ्ख्यानां ज्ञानिनां सनकादीनां योगिनामुपायिनां जनकादीनाम्। ज्ञाननिष्ठा अप्याधिकारिकत्वादीश्वरेच्छया लोकसंग्रहार्थत्वाच्च ये कर्मयोग्या भवन्ति तेऽपि योगिनः। निष्ठा स्थितिः। त्वं तु जनकादिवत्सकर्मैव ज्ञानयोग्यो न तु सनकादिवत्तत्त्यागेनेत्यर्थः। सन्ति हीश्वरेच्छयैव कर्मकृतः प्रियव्रतादयोऽपि ज्ञानिन एव। तथा ह्युक्तम्। 'ईश्वरेच्छया विनिवेशितकर्माधिकार' इति॥ इतश्च नियोक्ष्यामीत्याह। न कर्मणामिति। न कर्मणां युद्धादीनामारम्भेण नैष्कर्म्यं निष्कर्मतां काम्यकर्मपरित्यागेन प्राप्यत इति मोक्षं नाश्नुते। ज्ञानमेव तत्साधनं न तु कर्माकरणमित्यर्थः। कुतः? । पुरुषत्वात्। सर्वदा स्थूलेन सूक्ष्मेण वा पुरेण युक्तो ननु जीवः। यदि कर्माकरणेन मुक्तिः, स्यात्स्थावराणाम्। न चाकरणे कर्माभावान्मुक्तिर्भवति। प्रतिजन्मकृतानामनन्तकर्मणां भावात्। न च सर्वाणि कर्माणि भुक्तानि। एकस्मिन् शरीरे बहूनि हि कर्माणि करोति। तानि चैकैकानि बहुजन्मफलानि कानिचित्। तत्र चैकैकानि कर्माणि भुञ्जन्प्राप्नोत्येव शेषेण मानुष्यम्। ततश्च बहुशरीरफलानि कर्माणीत्यसमाप्तिः। तच्चोक्तम्। 'जीवंश्चतुर्दशादूर्ध्वं पुरुषो नियमेन तु। स्त्री वाप्यनूनदशकं देहं मानुषमार्जते। चतुर्दशोर्ध्वजीवीनि संसारश्चादिवर्जितः। अतोऽवित्त्वा परं देवं मोक्षाशा क्व महामुन' इति ब्राह्मे। यदि सादिः स्यात्संसारः पूर्वकर्माभावादतत्प्राप्तिः। अबन्धकत्वं त्वकामेनैव भवति। तच्च वक्ष्यते 'अनिष्टमिष्ट'मिति। ननु निष्कामकर्मणः फलाभावान्मोक्षः स्मृतः। 'निष्कामं ज्ञानपूर्वं तु निवृत्तमिति चोच्यते। निवृत्तं सेवमानस्तु ब्रह्माभ्येति

ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३॥ न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते। न च संन्यसनादेव सिद्धिं समधिगच्छति ॥४॥

SGDF
Sri Gangeshwari Digital Foundation

सनातनमि'ति मानवे। अतस्तत्साम्यादकरणेऽपि भवतीत्यत आह। नचेति। संन्यासः काम्यकर्मपरित्यागः। 'काम्यानां कर्मणां न्यासं संन्यासमि'ति वक्ष्यमाणत्वात्। अकामकर्मणामन्तःकरणशुद्धिद्वारा ज्ञानान्मोक्षो भवति। तच्चोक्तम्। 'कर्मभिः शुद्धसत्त्वस्य वैराग्यं जायते हृदी'ति भागवते। विरक्तानामेव च ज्ञानमित्युक्तम्। 'न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्। स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यादि'ति। न तु फलाभावात्। कर्माभावात्। अतो न कर्मत्याग एव मोक्षसाधनम्। यत्याश्रमस्तु प्रायत्यार्थो भगवत्तोषणार्थश्च। अप्रयतत्वमेव हि प्रायो गृहस्थादीनां, इतरकर्मोद्योगात्। अप्रयतानां च न ज्ञानम्। तथाहि श्रुतिः। 'नाशान्तो नासमाहित' इति। महांश्च यत्याश्रमे तोषो भगवतः। तथा ह्याह। 'यत्याश्रमं तुरीयं तु दीक्षां मम सुतोषिणीमि'ति नारायणाष्टाक्षरकल्पे। आधिकारिकास्तु तत्स्था एव प्रायत्ये समर्थाः। स एव च महान् भगवत्तोषः। तच्चोक्तम्। 'देवादीनामादिराज्ञां महोद्योगेऽपि नो मनः। विष्णोश्चलति तद्भोगोऽप्यतीव हरितोषणमि'ति पाद्मे॥ न तु कर्माणि सर्वात्मना त्यक्तुं शक्यानीत्याह। न हीति॥ तथापि शक्तितस्त्यागः कार्य इत्याह। कर्मेन्द्रियाणीति। मन एव प्रयोजकमिति दर्शयितुमन्वयव्यतिरेकावाह। मनसा स्मरन्मनसा नियम्येति। कर्मयोगं स्ववर्णाश्रमोचितम्। न तु गृहस्थकर्मैवेति नियमः। संन्यासादिविधानात्। सामान्यवचनाच्च॥ अतो नियतं वर्णाश्रमोचितं कर्म कुरु॥

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ ५॥ कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते॥ ६॥ यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन। कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥७॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः। शरीरयात्राऽपि च ते

SGDF
Sri Gangeshwari Digital Foundation

'कर्मणा बध्यते जन्तुरि'ति कर्म बन्धकं स्मृतमित्यत आह । यज्ञार्थादिति । कर्म बन्धनं यस्य लोकस्य स कर्मबन्धनः । यज्ञो विष्णुः । यज्ञार्थं सङ्गरहितं कर्म न बन्धकमित्यर्थः । मुक्तसङ्ग इति विशेषणात् । 'कामान्यः कामयत' इति श्रुतेश्च । 'अनिष्टमिष्टमि'ति वक्ष्यमाणत्वाच्च । 'एतान्यपि तु कर्माणी'ति च । 'तस्मान्नेष्टियाजुकः स्यादि'ति च विशेषवचनत्वे समेऽपि विशेषणं परिशिष्यते ॥ अत्रार्थवादमाह । सह यज्ञा इति ॥ हेत्वन्तरमाह । अन्नादिति । यज्ञः पर्जन्यान्नत्वात्तत्कारणमुच्यते । पूर्वयज्ञविवक्षायां च तस्य चक्रप्रवेशो न भवति । तद्ध्यापाद्यं कर्मविधये । न तु साम्यमात्रेणेदानीं कार्यम् । मेघचक्राभिमानी च पर्जन्यः । तच्च यज्ञाद्भवति । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा' इति स्मृतेः । उभयवचनादादित्यात्समुद्राच्चाविरोधः । अतश्च यज्ञात्पर्जन्योद्भवः सम्भवति । यज्ञो देवतामुद्दिश्य द्रव्यत्यागः । कर्मेतरक्रिया ॥ कर्म ब्रह्मणो जायते । 'एष ह्येव(एनं)साधु कर्म कारयति' । 'बुद्धिर्ज्ञानमि'त्यादिभ्यः । न च मुख्ये सम्भाव्यमाने पारम्पर्येणौपचारिकं कल्प्यम् । न च जडानां

न प्रसिद्ध्येदकर्मणः ॥ ८ ॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥१०॥ देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥ इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥१२॥ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ ॥ १३ ॥ अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः । यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥ एवं प्रवर्तितं चक्रं

SGDF
Sri Gangeshwari Digital Foundation

स्वतः प्रवृत्तिः सम्भवति । 'एतस्य वा अक्षरस्ये'त्यादि सर्वनियमनश्रुतेश्च । 'द्रव्यं कर्म च कालश्चे'त्यादेश्च । अचिन्त्यशक्तिश्चोक्ता । जीवस्य च प्रतिबिम्बस्य बिम्बपूर्वैव चेष्टा । 'न कर्तृत्वमि'त्यादिनिषेधाच्च । अक्षराणि प्रसिद्धानि तेभ्योऽभिव्यज्यते परं ब्रह्म । अन्यथा अनादिनिधनमचिन्त्यं परिपूर्णमपि ब्रह्म को जानाति? न च रूढिं विना योगाङ्गीकारो युक्तः । परामर्शाच्च तस्मात्सर्वगतं ब्रह्मेति । न ह्येकशब्देन द्विरुक्तेन भेदश्रुतिं विना वस्तुद्वयं कुत्रचिदुच्यते । तानि चाक्षराणि नित्यानि । 'वाचा विरूपनित्यया' । 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा' । 'अतएव च नित्यत्वमि'त्यादिश्रुतिस्मृतिभगवद्वचनेभ्यः । दोषश्चोक्तः सकर्तृकत्वे । न चाबुद्धिपूर्वमुत्पन्नानि । तत्प्रमाणाभावात् । निःश्वसितशब्दस्त्वक्लेशाभिप्रायो नाबुद्धिपूर्वाभिप्रायः । 'सोऽकामयते'त्यादेश्च । 'इष्टं हुत'मित्यादिरूपप्रपञ्चेन सहाभिधानाच्च । महातात्पर्यविरोधाच्च । तच्चोक्तं पुरस्तात् । न ह्यस्वातन्त्र्येणोत्पत्तिकर्तुः प्राधान्यम् । अस्वातन्त्र्यं च तदमतिपूर्वकत्वेन भवति । यथा रोगादीनां पुरुषस्य तज्ज्ञत्वेऽपि । उत्पत्तिवचनान्यभिव्यक्त्यर्थान्यभिमानिदेवताविषयाणि च । नित्येत्युक्त्वोत्सृष्टेतिवचनात् अभिव्यञ्जके कर्तृवचनं चास्ति । 'कृत्स्नं शतपथं चक्र' इति । कथमादित्यस्था वेदास्तेनैव क्रियन्ते? वचनमात्राच्च निर्णयात्मकशारीरकोक्तं बलवत् । शास्त्रं योनिर्यस्येति तु शास्त्रयोनित्वम् । जन्माद्यस्येत्युक्ते प्रमाणं हि तत्रापेक्षितम् । न तु तस्य जातत्वं वेदकारणत्वं वा । न हि वेदकारणत्वं जगत्कारणत्वे हेतुः । न हि विचित्रजगत्सृष्टेर्वेदसृष्टिरशक्या सृज्यत्वे । न च सर्वज्ञत्वे । यदि वेदस्रष्टा सर्वज्ञः किमिति न जगत्स्रष्टा? तस्माद्वेदप्रमाणकत्वमेवात्र विवक्षितम् । अतो नित्यान्यक्षराणि । यत एवं परम्परया यज्ञाभिव्यङ्ग्यं ब्रह्म तस्मात्तन्नित्यं यज्ञे प्रतिष्ठितम् ॥ तानि चाक्षराणि भूताभिव्यङ्ग्यानीति चक्रम्

SGDF
Sri Gargeshwari Digital Foundation

॥ तदेतज्जगच्चक्रं यो नानुवर्तयति स तद्विनाशकत्वादघायुः। पापनिमित्तमेव यस्यायुः सोऽघायुः ॥ तर्ह्यतीव मनःसमाधानमपि न कार्यमित्यत आह। यस्त्विति। रमणं परदर्शनादिनिमित्तं सुखम्। तृप्तिरन्यत्रालम्बुद्धिः। सन्तोषस्तज्जनकं सुखम्। 'सन्तोषस्तृप्तिकारणमि'त्यभिधानात्। परमात्मदर्शनादिनिमित्तं सुखं प्राप्तः। अन्यत्र सर्वात्मनाऽलम्बुद्धिः। महच्च तत्सुखम्। तेनैवान्यत्रालम्बुद्धिरिति दर्शयति। आत्मन्येव च सन्तुष्ट इति। तत्स्थ एव सन्सन्तुष्ट इत्यर्थः। नान्यत्किमपि सन्तोषकारणमित्यवधारणम्। आत्मना तृप्तः। न ह्यात्मन्यलम्बुद्धिर्युक्ता। तद्वाचित्वं च 'वयं तु न वितृप्याम उत्तमश्लोकविक्रमैरि'ति प्रयोगात्सिद्धम्। अध्याहारस्त्वगतिका गतिः। 'आत्मरतिरेवे'त्यवधारणादसम्प्रज्ञातसमाधिस्थस्यैव कार्यं न विद्यते। 'स्थितप्रज्ञस्यापि कार्यो देहादिर्दृश्यते यदा। स्वधर्मो मम तुष्टयर्थः सा हि सर्वैरपेक्षिते'ति वचनाच्च पञ्चरात्रे। अन्यदाऽन्यरतिरपीषत्सर्वस्य भवति। न च तत्रालम्बुद्धिमात्रमुक्तम्। आत्मतृप्त इति पृथगभिधानात्। कर्तृशब्दः कालावच्छेदेऽपि चायं प्रसिद्धः। 'यो भुंक्ते स तु न ब्रूयादि'त्यादौ। अतोऽसम्प्रज्ञातसमाधावेवैतत्। मानव इति ज्ञानिन एवासम्प्रज्ञातसमाधिर्भवतीति दर्शयति। मनु अवबोधन इति धातोः। परमात्मरतिश्चात्र विवक्षिता। 'विष्णावेव रतिर्यस्य क्रिया तस्यैव नास्ति ही'ति वचनात् ॥ तस्य कर्मकाले वक्तव्योऽहमिति कश्चित्प्रत्युक्त्वा तत्कृतावात्मरत्यधिकः समोऽर्थो वा नास्ति। न च सन्ध्याद्यकृतौ कश्चिद्दोषोऽस्ति। न चैतदपहाय सर्वभूतेषु कश्चित्प्रयोजनाश्रयः। अर्थो येन दर्शनादिना भवति सोऽर्थव्यपाश्रयः। ज्ञानमात्रेण प्रत्यवायो

नानुवर्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥१७॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य

SGDF Sri Gargeshwari Digital Foundation

यद्यपि न भवति । तदर्जुनस्यापि सममिति न तस्य कर्मोपदेशयोग्ये तद्भवति । ईषत्प्रारब्धानर्थसूचकं च तद्भवति । महच्चेद्वृत्रहत्यादिवत् ॥ यतोऽसंप्रज्ञातसमाधेरेव कार्याभावः तस्मात्कर्म समाचर ॥ आचारोऽप्यस्तीत्याह । कर्मणैवेति । कर्मणा सह कर्म कुर्वत एवेत्यर्थः । कर्म कृत्वैव ततो ज्ञानं प्राप्येति वा । न तु ज्ञानं विना । प्रसिद्धं हि तेषां ज्ञानित्वं भारतादिषु । 'तमेवं विद्वानमृत इह भवती' त्यादिश्रुतिभ्यश्च । अत्रापि कर्मणां ज्ञानसाधनत्वोक्तेश्च बुद्धियुक्ता इति । गत्यन्तरं च 'नान्यःपंथा' इत्यस्य नास्ति । इतरेषां ज्ञानद्वाराऽप्यविरोधः । यत्र च तीर्थाद्येव मुक्तिसाधनमुच्यते । 'ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा । अथवा स्नानमात्रेण गोमत्यां कृष्णसन्निधावि' त्यादौ । तत्र पापादिमुक्तिः । स्तुतिपरता च । तत्रापि हि कुत्रचिद्ब्रह्मज्ञानसाधनत्वमेवोऽच्यते । अन्यथा मुक्तिं निषिध्य 'ब्रह्मज्ञानं विना मुक्तिर्न कथञ्चिदपीष्यते । प्रयागादेस्तु या मुक्तिर्ज्ञानोपायत्वमेव ही' त्यादौ । न च तीर्थस्तुतिवाक्यानि तत्प्रस्तावेऽप्युक्तं ज्ञाननियमं घ्नन्ति । यथा कश्चिद्दक्षं भृत्यं प्रत्युक्तान्ययमेव हि राजा किं राज्ञे' त्यादीनि । यथाऽऽह भगवान् । 'यानि तीर्थादिवाक्यानि कर्मादिविषयाणि च । स्तावकान्येव तानि स्युरज्ञानां मोहकानि वा ॥ भवेन्मोक्षस्तु मद्दृष्टेर्नान्यतस्तु कथञ्चने' ति नारदीये । अतोऽपरोक्षज्ञानादेव मोक्षः । कर्म तु तत्साधनमेव ॥ स यद्वाक्यादिकं प्रमाणं

सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥ तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥ २० ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥ यदि ह्यहं न

SGDF
Sri Gargeshwari Digital Foundation

कुरुते, यदुक्तप्रकारेण तिष्ठतीत्यर्थः ॥ विद्वदविदुषोः कर्मभेदमाह । प्रकृतेरिति । प्रकृतेर्गुणैरिन्द्रियादिभिः । प्रकृतिमपेक्ष्य गुणभूतानि हि तानि । तत्सम्बन्धीनि च । न हि प्रतिबिम्बस्य क्रिया ॥ कर्मभेदस्य गुणभेदस्य च तत्ववित् । गुणा इन्द्रियादीनि गुणेषु विषयेषु ॥ प्रकृतेर्गुणेषु इन्द्रियादिषु सम्मूढाः । इन्द्रियाद्यभिमानाद्विषयादिसङ्गः । गुणकर्मसु विषयेषु कर्मसु च । 'शब्दाद्या इन्द्रियाद्याश्च सत्वाद्याश्च शुभानि च । अप्रधानानि च गुणा निगद्यन्ते निरुक्तिगैरि'त्यभिधानात् । सत्त्वाद्यङ्गीकारे 'गुणा गुणेष्वि'त्ययुक्तं स्यात् । अतः सर्वाणि कर्माणि मय्येव सन्न्यस्य भ्रान्त्या जीवेऽध्यारोपितानि मय्येव विसृज्य भगवानेव सर्वाणि कर्माणि करोतीति मत्पूजेति च । आत्मानमधिकृत्य यच्चेतस्तदध्यात्मचेतः । सन्न्यासस्तु भगवान्करोतीति । निर्ममत्वं नाहं करोमीति ॥ फलमाह । ये म इति । ये

वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवतन्ते मनुष्याः पार्थ सर्वशः ॥२३॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । सङ्करस्य च कर्तास्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ २५ ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥ प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु । तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥२९॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥ ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥३१॥ येत्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि

SGDF
Sri Gargeshwari Digital Foundation

त्वेवं निवृत्तकर्मिणस्तेऽपि मुच्यन्ते ज्ञानद्वारा किम्वपरोक्षज्ञानिनः। न तु साधनान्तरमुच्यते। 'निवृत्तादीनि कर्माणि ह्यपरोक्षेशदृष्टये। अपरोक्षेशदृष्टिस्तु मुक्तौ किञ्चिन्न मार्गते ॥ सर्वं तदन्तराऽधाय मुक्तये साधनं भवेत्। न किञ्चिदन्तराऽधाय निर्वाणायापरोक्षदृगि'ति ह्युक्तं नारायणाष्टाक्षरकल्पे। अत एव समुच्चयनियमो निराकृतः॥ एवं चेत्किमिति ते मतं नानुतिष्ठन्ति लोका? इत्यत आह। सदृशमिति। प्रकृतिः पूर्वसंस्कारः ॥ तथापि शक्तितो निग्रहः। निग्रहात्सद्यः प्रयोजनाभावेऽपि भवत्येवातिप्रयत्नत इत्याशयवानाह। इन्द्रियस्येति। तथा ह्युक्तं 'संस्कारो बलवानेव ब्रह्माद्या अपि तद्वशाः। तथापि सोऽन्यथा कर्तुं शक्यतेऽतिप्रयत्नत' इति॥ तथाप्युग्रं युद्धं कर्मेत्यत आह। श्रेयानिति॥ बहवः कर्मकारणाः सन्ति। क्रोधादयः कामश्च। तत्र को बलवानिति पृच्छति। अथेति अथेत्यर्थान्तरं। तयोर्न वशमागच्छेदिति प्रश्नप्रापकम्॥ यस्तु बलवान्प्रवर्तकः स एष कामः क्रोधोऽप्येष एव। तज्जन्यत्वात्। 'कामात्क्रोधोऽभिजायत' इति ह्युक्तं। यत्रापि गुरुनिन्दादिनिमित्तः क्रोधः तत्रापि भक्ति निमित्तानिन्दाकामनिमित्त एव। ये त्वन्यथा वदन्ति ते सङ्करान्न सूक्ष्मं जानन्ति। उक्तं च। 'ऋते कामं न कोपाद्या जायन्ते हि कथञ्चने'ति। महाशनः। महद्धि कामभोग्यम्। महाब्रह्महत्यादि

नष्टानचेतसः ॥ ३२॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि। प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥ इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५॥ अर्जुन उवाच। अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६॥ श्रीभगवानुवाच। काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो

SGDF
Sri Gargeshwari Digital Foundation

कारणत्वान्महापाप्मा । सर्वपुरुषार्थविरोधित्वाद्वैरी । कथं विरोधी सः? । इदमनेनावृतम् । यथा धूमेनाग्निरावृतः प्रकाशरूपोऽप्यन्येषां सम्यगदर्शनाय तथा परमात्मा । यथाऽऽदर्शो मलेनावृतोऽन्याभिव्यक्तिहेतुर्न भवति तथान्तःकरणं परमात्मादेर्व्यक्तिहेतुर्न भवति कामेनावृतम् । यथोल्बेनावृत्य बद्धो भवति गर्भः तथा कामेनावृतो जीवः ॥ शास्त्रतो जातमपि ज्ञानं परमात्मापरोक्ष्याय न प्रकाशते कामेनावृतं ज्ञानिनोऽपि किम्वल्पज्ञानिनः? । कामरूपेण कामाख्येन नित्यवैरिणा । दुष्पूरेण दुःखेन हि कामः पूर्यते । न हीन्द्रादिपदं सुखेन लभ्यते । यद्यपीन्द्रादिपदं प्राप्तः पुनर्ब्रह्मादिपदमिच्छतीत्यलंबुद्धिर्नास्तीत्यनलः । उक्तं च । 'ज्ञानस्य ब्रह्मणश्चाग्नेर्धूमो बुद्धेर्मलं तथा। आदर्शस्याथ जीवस्य गर्भस्योल्बो हि कामक' इति ॥ वधार्थं शत्रोरधिष्ठानमाह । इन्द्रियाणीति । एतैर्ज्ञानमावृत्य बुध्यादिभिर्हि विषयगैर्ज्ञानमावृतं भवति ॥ हताधिष्ठानो हि शत्रुर्नश्यति ॥ शत्रुहनन आयुधरूपं ज्ञानं वक्तुं ज्ञेयमाह । इन्द्रियाणीति । 'असङ्गज्ञानासिमादाय तरातिपारमि'ति ह्युक्तम् । शरीरादिन्द्रियाणि पराणि उत्कृष्टानि । न केवलं बुद्धेः परः श्रुत्युक्तप्रकारेणाव्यक्तादपि । 'अव्यक्तात्पुरुषः पर' इति

महापाप्मा विद्ध्येनमिह वैरिणं ॥ ३७ ॥ धूमेनाव्रियते वह्निर्यथाऽदर्शो मलेन च। यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं ॥ ३८ ॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा। कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥ इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते। एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥ तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ। पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥ जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र०कर्मयोगो

SGDF
Sri Gargeshwari Digital Foundation

(हि श्रुतिः)। न च तत्र तत्रोक्तैकदेशज्ञानमात्रेण भवति मुक्तिः। सार्वत्रिकगुणोपसंहारो हि भगवता गुणोपसंहारपादेऽभिहितः। 'आनन्दादयः प्रधानस्ये'त्यादिना। तथा चान्यत्र। 'अपौरुषेयवेदेषु विष्णु वेदेषु चैव हि। सर्वत्र ये गुणाः प्रोक्ताः सम्प्रदायागताश्च ये॥ सर्वैस्तैः सह विज्ञाय ये पश्यन्ति परं हरिम्। तेषामेव भवेन्मुक्तिर्नान्यथा तु कथञ्चने'ति गारुडे। तस्मादव्यक्तादपि परत्वेन ज्ञेयः। न चात्र जीव उच्यते। 'रसोऽप्यस्य परं दृष्ट्वा निवर्तत'इत्युक्तत्वात्। 'अविज्ञाय परं मत्तो जयः कामस्य वै कुत' इति च। अतः परमात्मज्ञानमेवात्र विवक्षितम्। आत्मानं मनः आत्मना बुद्ध्या॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये तृतीयोऽध्यायः ॥ ३ ॥

ॐ॥ बुद्धेः परस्य माहात्म्यं कर्मभेदो ज्ञानमाहात्म्यं चोच्यतेऽस्मिन्नध्याये॥ पूर्वानुष्ठितश्चायं धर्म इत्याह। इममिति॥ 'मयि सर्वाणी'त्युक्तं तन्माहात्म्यमादितो ज्ञातुं पृच्छति। अपरमिति॥ न तर्ह्यनादिर्भवानित्यत आह। अजोऽपीति। अव्यय आत्मा देहोऽपीत्यव्ययात्मा। 'अनन्तं विश्वतो मुखमि'ति रूपविशेषणमुत्तरत्र। 'एतन्नानावताराणां

नाम तृतीयोऽध्यायः॥ श्रीभगवानुवाच। इमं विवस्वते योगं प्रोक्तवानहमव्ययम्। विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवं परम्पराप्राप्तमिमं राजर्षयो विदुः। स कालेनेह महता योगो नष्टः परन्तप ॥२॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः। भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥ अर्जुन उवाच। अपरं भवतो जन्म परं जन्म विवस्वतः। कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥ श्रीभगवानुवाच। बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥ अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

निधानं बीजमव्ययमि'ति च। 'जगृह' इति तु व्यक्तिः। युक्तयस्तूक्ताः। आत्माऽनादित्वं तु सर्वसमम्। कथमनादिनित्यस्य जनिः ?। प्रकृतिं स्वामधिष्ठाय। प्रकृत्या जातेषु वसुदेवादिषु। तयैव तेषां जात इव प्रतीयत (ये) इत्यर्थः। न तु स्वतंत्रामधिष्ठायेत्याह। स्वामिति। 'द्रव्यं कर्म चे'ति ह्युक्तम्। सा हि तत्रोक्ता। ततः सर्वसृष्टेः। आत्ममायया आत्मज्ञानेन। प्रकृतेः पृथगभिधानात्। 'केतुः केतश्चितिश्चित्तं मतिः क्रतुर्मनीषा माये'त्यभिधानम्। सृष्टिकारणया तेषां शरीरादिसृष्ट्वा विमोहिकया जात इवाजात एव प्रतीयते वा। उक्तं च। 'महदादेस्तु माता या श्रीर्भूमिरिति कल्पिता। विमोहिका च दुर्गाख्या ताभिर्विष्णुरजोऽपि हि। जातवत्प्रथते ह्यात्मचिद्बलान्मूढचेतसामि'ति। ईश्वर ईशेभ्योऽपि वरः। तच्चोक्तम्। 'ईशेभ्यो ब्रह्मरुद्रश्रीशेषादिभ्यो यतो भवान्। वरोऽतईश्वराख्या ते मुख्या नान्यस्य कस्य चिदि'ति ब्रह्मवैवर्ते। 'समर्थ ईश इत्युक्तस्तद्वरत्वात्त्वमीश्वर'इति च॥ न जन्मनैव परित्राणादिकं कार्यमिति नियमः। तथापि लीलया स्वभावेन च यथेष्टचारी। तथा ह्युक्तम्। 'देवस्यैष स्वभावोऽयम्'। 'लोकवत्तु लीलाकैवल्यम्'। 'क्रीडतो बालकस्येव चेष्टां तस्य निशामय'। 'अरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनन्तवीर्यः'। 'पूर्णोऽयमस्यात्र न किञ्चिदाप्यं तथापि सर्वाः कुरुते प्रवृत्तीः। अतो विरुद्धेषुमिमं वदन्ति परावरज्ञा मुनयः प्रशान्ता' इत्याद्यृग्वेदखिलेषु॥ पृथङ्मुक्त्युक्तिः सर्वज्ञाननियमदर्शनार्थम्। न तु तावन्मात्रेण मुक्तिरित्युक्तम्। 'वेदाद्युक्तं तु सर्वं यो ज्ञात्वोपास्ते सदा

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥७॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥८॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥९॥

SGDF
Sri Gangeshwari Digital Foundation

हि मां । तस्यैव दर्शनपथं यामि नान्यस्य कस्यचिदि'त्युक्तेश्च महाकौर्मे । अत्रोक्तस्यैतज्ज्ञात्वैव जन्म नैतीति गतिः । नान्यस्य कस्यचिदिति विशेषणात् । तत्त्वत इति विशेषणाच्च सर्वज्ञानमापतति । यत्रैवं भवति तत्र तत्त्वत इति विशेषणे न विरोधः । उक्तं च । 'एकं च तत्त्वतो ज्ञातुं विना सर्वज्ञतां नरः । न समर्थो महेन्द्रोऽपि तस्मात्सर्वत्र जिज्ञसेदि'ति स्कान्दे ॥ सन्ति च तथा मुक्ता इत्याह । वीतरागेति । मन्मया मत्प्रचुराः । सर्वत्र मां विना न किञ्चित्पश्यन्तीत्यर्थः । न च मद्भजनमात्रेण मुक्तिर्भवत्यन्यदेवतादिरूपेण । तथापि सर्वेषा मानुरूप्येण फलं ददामीत्याह । ये यथेति । सेवयामि फलदानेन न तु गुणभावेन । कथमयं विशेष इत्यत आह । मम वर्त्मेति । अन्यदेवता यजन्तोऽपि मम वर्त्मैवानुवर्तन्ते । सर्वकर्मकर्तृत्वाद्भोक्तृत्वाच्च मम । 'येऽप्यन्यदेवताभक्ता' इति हि वक्ष्यति । यो देवानां नामधा एक एवेति श्रुतिः । भगवानेव च तत्राभिधीयते । 'अजस्य नाभावध्येकमर्पितमि'ति लिङ्गात् ॥ कुतो मम वर्त्मानुवर्तन्ते ? क्षिप्रं हि । अतएव हि फलप्राप्तिः । 'तस्मात्ते धनसनय'इति हि श्रुतिः ॥ अहमेव हि कर्तेत्याह । चातुर्वर्ण्यमिति । चतुर्वर्णसमुदायः । सात्त्विको ब्राह्मणः । सात्त्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्र इति गुणविभागः । कर्मविभागस्तु शमो दम इत्यादिना वक्ष्यते । क्रियायां वैलक्षण्यात्कर्ताऽप्यकर्ता । तथा हि श्रुतिः । 'विश्वकर्मा विमना' इत्यादि । 'तनुर्विद्या क्रिया कृतिरि'ति च ।

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः । बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥ काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । तस्य कर्तारमपि

SGDF
Sri Gangeshwari Digital Foundation

साधितं चैतत्पुरस्तात् ॥ अत एव च न मां कर्माणि लिम्पन्ति । इतश्च न लिम्पन्तीत्याह । न मे कर्मफले स्पृहेति । इच्छामात्रं त्वस्ति न तु तत्राभिनिवेशः । तच्चोक्तम् । 'आकाङ्क्षन्नपि देवोऽसौ नेच्छते लोकवत्परः । न ह्याग्रहस्तस्य विष्णोर्ज्ञानं कामो हि तस्य त्वि'ति । न च केचिन्मुक्ता भवन्तीति क्रमेण सर्वमुक्तिः । तथा हि श्रुतिः । 'ज्ञात्वा तमेनं मनसा हृदा च भूयो न मृत्युमुपयाति विद्वानि'ति 'कथं वा इत्यनन्ता इत्यनन्तवदिति होवाचे'ति ॥ एवं ज्ञात्वापि कर्मकरणे आचारोऽप्यस्तीत्याह । एवमिति । पूर्वतरं कर्म पूर्वभावीत्यर्थः ॥ कर्म कुर्वित्युक्तम् । तस्य कर्मणो दुर्विज्ञेयत्वमाह सम्यग्वक्तुम् । किं कर्मेति ॥ न केवलं तज्ज्ञात्वा मोक्ष्यसे ज्ञात्वैवेत्याशयवानाह । कर्मण इति । तच्चोक्तम् । 'अज्ञात्वा भगवान्कस्य कर्माकर्म विकर्मकम् । दर्शनं याति हि मुने कुतो मुक्तिश्च तद्विने'ति । अकर्म कर्माकरणम् । कर्माकर्मान्यद्विकर्म निषिद्धं कर्म बन्धकत्वात् । ततो विविच्य कर्मादि बोद्धव्यमित्यादि । न च शापादिना कवयोऽप्यत्र मोहिताः । अशक्यं चैतज्ज्ञातुमित्याह । गहनेति ॥ कर्मादिस्वरूपमाह । कर्म-णीति । कर्मणि क्रियमाणे सत्यकर्म यः पश्येद्विष्णोरेव कर्म नाहं चित्प्रतिबिम्बः किञ्चित्करोमीति । अकर्मणि सुप्त्यादावकरणावस्थायां परमेश्वरस्य यः कर्म पश्यति अयमेव परमेश्वरः सर्वदा सर्वसृष्ट्यादि

मां विद्ध्यकर्तारमव्ययम् ॥१३॥ न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा । इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ॥ १४ ॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः । कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥ किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः । तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तः

SGDF
Sri Gargeshwari Digital Foundation

करोतीति । स बुद्धिमान् ज्ञानी स एव च युक्तो योगयुक्तः । सर्वाकरणात्स एव च कृत्स्नकर्मकृत् । कृत्स्नफलवत्त्वात् ॥ एतदेव प्रपञ्चयति । यस्येत्यादि श्लोकपञ्चकेन । उक्तप्रकारेण ज्ञानाग्निदग्धकर्माणम् ॥ न च कामसङ्कल्पाभावेनालम् । असङ्गं स्नेहं च त्यक्त्वा । ज्ञानस्वरूपमाह पुनः । नित्यतृप्त इति । नित्यतृप्तनिराश्रयेश्वरसरूपोऽहमस्मीति तथाविधः ॥ कामादित्यागोपायमाह । निराशीरिति । यतचित्तात्मा भूत्वा निराशीरित्यर्थः । आत्मा मनः । परिग्रहत्यागोऽनभिमानं । नैव किञ्चित्करोतीत्यस्याभिप्रायमाह । नाप्नोति किल्बिषमिति ॥ यतचित्तात्मनो लक्षणमाह । यदृच्छालाभेति । कथं द्वन्द्वातीतत्वमित्यत आह । समः सिद्धाविति ॥ उपसंहरति । गतसङ्गस्येति । गतसङ्गस्य फलस्नेहरहितस्य । मुक्तस्य शरीराद्यनभिमानिनः । ज्ञानावस्थितचेतसः । परमेश्वरज्ञानिनः ॥ ज्ञानावस्थितचेतस्त्वं स्पष्टयति । ब्रह्मार्पणमिति । सर्वमेतद्ब्रह्मेत्युच्यते । तदधीनसत्ताप्रतीतित्वात् । न तु तत्स्वरूपत्वात् । उक्तं हि । 'त्वदधीनं यतः सर्वमतः सर्वो भवानिति । वदन्ति मुनयः सर्वे न तु सर्वस्वरूपत' इति पाद्मे । 'सर्वं तत्प्रज्ञानेत्रमि'ति च । 'एतं ह्येव बह्वृचा'इत्यादि च । समाधिना सह ब्रह्मैव कर्म ॥ यज्ञभेदानाह । दैवमित्यादिना । दैवं भगवन्तम् । स एव तेषां यज्ञः । भगवदुपासनम् ।

कृत्स्नकर्मकृत् ॥ १८ ॥ यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥ त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥२०॥ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥२१॥ यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥२२॥ गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥२३॥ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥ दैवमेवापरे यज्ञं योगिनः पर्युपासते । ब्रह्माग्नावपरे

SGDF
Sri Gangeshwari Digital Foundation

यज्ञमितिक्रियाविशेषणं । नान्यत्तेषामस्ति यतीनां केषाञ्चित् । यज्ञं भगवन्तं । 'यज्ञेन यज्ञं' । 'यज्ञो विष्णुर्देवते'त्यादि श्रुतिभ्यः । यज्ञेन प्रसिद्धेनैव । यज्ञं प्रतिजुह्वतीति सर्वत्र समं तं यज्ञमित्यादौ । उक्तं च । 'विष्णुं रुद्रेण पशुना ब्रह्मा ज्येष्ठेन सूनुना । अयजन्मानसे यज्ञे पितरं प्रपितामह' इत्यादि ॥ आत्मसंयमाख्योपायाग्नौ ॥ द्रव्यं जुह्वतीति द्रव्ययज्ञाः । तपः परमेश्वरार्पणबुद्ध्या तत्र जुह्वतीति तपोयज्ञा इत्यादि । इदं तपो हविः एतद्ब्रह्माग्नौ जुहोमि तत्पूजार्थमिति होमः । तदर्पण एव च होमबुद्धिः ॥ अपरे प्राणायामपरायणाः प्राणमपाने जुह्वति अपानं च प्राणे । कुम्भकस्था एव भवन्तीत्यर्थः ॥ नियताहारत्वेनैव प्राणशोषात् प्राणान्प्राणेषु जुह्वति । 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनी'त्यादि श्रुत्युक्तप्रकारेण वा । अन्यदपि ग्रन्थान्तरे सिद्धं । 'यदस्याल्पाशनं तेन प्राणाः प्राणेषु वै हुता' इति । ब्रह्मणः परमात्मनो मुखे । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे'ति हि वक्ष्यति । मानसवाचिककायिककर्मजा एव हि ते सर्वे । एवं ज्ञात्वा तानि कर्माणि कृत्वा विमोक्ष्यसे । युद्धं परित्यज्य यन्मोक्षार्थं करिष्यसि तदपि कर्म । अतो विहितम् न त्याज्यमिति

यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति । शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६ ॥ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथा परे । स्वाध्यायज्ञानयज्ञाश्च यतयः शंसितव्रताः ॥ २८ ॥ अपाने जुह्वति प्राणं प्राणेऽपानं तथा परे । प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति । सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥ यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनं । नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥ एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे । कर्मजान्विद्धि

SGDF
Sri Gargeshwari Digital Foundation

भावः ॥ अखिलमुपासनाद्यङ्गयुक्तम् । ज्ञानफलमेवेत्यर्थः ॥ इदानीमपि ज्ञान्येव ॥ तथाप्यभिभवान्मोहः । मा तूक्ता । येन ज्ञानेन मय्यात्मभूते सर्वभूतान्यथो तस्मादेव मोहनाशात्पश्यसि ॥ करणभूतं ज्ञानं स्तौति पुनः श्लोकत्रयेण ॥ तत्साधनं विरोधिफलं च तदुत्तरैरुक्त्वोपसंहरति ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीता भाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

ॐ ॥ तृतीयाध्यायोक्तमेव कर्मयोगं प्रपञ्चयत्यनेनाध्यायेन ॥ यदृच्छालाभसन्तुष्ट इत्यादिना संन्यासम् । कुरु कर्मैवेत्यादिना कर्मयोगं

तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप । सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ॥ ३४ ॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव । येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः । सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥ श्रद्धावाँल्लभते ज्ञानं मत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति । नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥ योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् । आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥ तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः । छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ॥ ४२ ॥ इति श्रीमद्भगवद्गीता० ज्ञानयोगो नाम चतुर्थोऽध्यायः ॥ ॥ ४ ॥ अर्जुन उवाच ॥ सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि । यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥ श्रीभगवानुवाच ॥ सन्न्यासः

SGDF
Sri Gurgeshwari Digital Foundation

च। नियमनादिना सकललोककर्षणात्कृष्णः। तच्चोक्तम्। 'यतः कर्षसि देवेश नियम्य सकलं जगत्। अतो वदन्ति मुनयः कृष्णं त्वां ब्रह्मवादिन' इति महाकौर्मे। संन्यासशब्दार्थं भगवानेव वक्ष्यति। अयं प्रश्नाभिप्रायः। यदि संन्यासः श्रेयोऽधिकः स्यात्तर्हि संन्यासस्यैतद्विरोधि युद्धमिति॥ नायं संन्यासो यत्याश्रमः। द्वन्द्वत्यागात्तु संन्यासान्मत्पूजैव गरीयसी'ति वचनात्। 'तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदि'ति च। 'संन्यासस्तु तुरीयो यो निष्क्रियाख्यः सधर्मकः। न तस्मादुत्तमो धर्मो लोके कश्चन विद्यते। तद्भक्तोऽपि हि यद्गच्छेत्तद्गृहस्थो न धार्मिकः। मद्भक्तिश्च विरक्तिस्तदधिकारो निगद्यते। यदाधिकारो भवति ब्रह्मचार्यपि प्रव्रजेदि'ति नारदीये। 'ब्रह्मचर्यादेव प्रव्रजेत्'। 'यदहरेव विरजेदि'ति च। 'संन्यासे तु तुरीये वै प्रीतिर्मम गरीयसी। येषामत्राधिकारो न तेषां कर्मेति निश्चय' इत्यादेश्च ब्राह्मे। अतो नात्राश्रमः संन्यास उक्तः॥ संन्यासशब्दार्थमाह। ज्ञेय इति। संन्यासस्य निःश्रेयसकरत्वं ज्ञापयितुं तच्छब्दार्थं स्मारयति। ज्ञेय इति॥ संन्यासो हि ज्ञानान्तरङ्गत्वेनोक्तो 'न तस्य तत्वग्रहणाये'त्यादौ। अतः कथं सोऽवम इत्यत आह। साङ्ख्ययोगाविति। उभयोरप्यन्तरङ्गत्वेनाविरोधः। 'अग्निमुग्धो ह वै धूमतान्तः स्वं लोकं न प्रतिजानाति'। 'मा वः पदव्यः पितरस्मदाश्रिता या यज्ञशालासनधूमवर्त्मनामि'त्यादि काम्यकर्मविषयमिति भावः। ये त्वन्यथा वदन्ति ते बालाः॥ एकमपी-

---

कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते॥२॥ ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति। निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥३॥ साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥४॥

SGDF
Sri Gangeshwari Digital Foundation

त्यस्याभिप्रायमाह । यत्साङ्ख्यैरिति । योगिभिरपि ज्ञानद्वारा ज्ञानफलं प्राप्यत इत्यर्थः ॥ इतश्च संन्यासाद्योगो वर इत्याह । संन्यासस्त्विति । योगाभावे मोक्षादिफलं न भवति । अतः कामजयादिदुःखमेव तस्य । मोक्षाद्येव हि फलं अन्यत्फलमल्पत्वादफलमेवेत्याशयः । तच्चोक्तं । 'विना मोक्षफलं यत्तु न तत्फलमुदीर्यत' इति पाद्मे । यत्तु महाफलयोग्यं तस्याल्पं फलमेव न भवति । यथा पद्मरागस्य तण्डुलमुष्टिः । महाफलश्च योगयुक्तश्चेत्संन्यास इत्याह । योगयुक्त इति । मुनिः संन्यासी । तच्चोक्तं । 'स हि लोके मुनिर्नाम यः कामक्रोधवर्जित' इति ॥ एतदेव प्रपञ्चयति । योगयुक्त इति । सर्वभूतात्मभूतः परमेश्वरः । यच्चाप्नोतीत्यादेः । स आत्मभूतः स्वस्य समीपं प्रत्यादानादिकर्ता यस्य स सर्वभूतात्मभूतात्मा ॥ संन्यासं स्पष्टयति पुनः श्लोकद्वयेन ॥ संन्यासयोगयुक्त एव च कर्मणा न लिप्यत इत्याह । ब्रह्मणीति । साधननियमस्योपचारत्वनिवृत्त्यर्थं पुनः पुनः फलकथनम् ॥ एवं चाचार इत्याह । कायेनेति ॥ पुनर्युक्त्यादिनियमनार्थं युक्तायुक्तफलमाह । युक्त इति । युक्तो योग-

---

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥ सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः । योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥ नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यन्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥ ८ ॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥ ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥ कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥११॥ युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबद्ध्यते ॥ १२ ॥

SGDF
Sri Gangeshwari Digital Foundation

युक्तः ॥ पुनः संन्यासशब्दार्थं स्पष्टयति । सर्वकर्माणीति । मनसेति विशेषणादभिमानत्यागः ॥ न च करोति वस्तुत इत्याह । न कर्तृत्वमिति । प्रभुर्हि जीवो ज़डमपेक्ष्य ॥ ज्ञानमेवाज्ञाननाशकमित्याह । ज्ञानेनेति । प्रथमज्ञानं परोक्षं । अपरोक्षज्ञानाव्यवहितसाधनमाह । तद्बुद्धय इति । परमेश्वरस्वरूपाणां सर्वत्र साम्यदर्शनं चापरोक्षज्ञानसाधनमित्याशयवानाह । विद्येति ॥ तदेव स्तौति । इहैवेति ॥ संन्यासयोगज्ञानानि मिलित्वा प्रपञ्चयत्यध्यायशेषेण । पुनर्योगस्याधिक्यं स्पष्टयति । बाह्यस्पर्शेष्विति । कामरहितः आत्मनि यत्सुखं विन्दति स एव ब्रह्मयोगयुक्तात्मा चेत्तदेवाक्षयं सुखं विन्दति । ब्रह्मविषयो योगो ब्रह्मयोगः । ध्यानादियुक्तस्यैवात्मसुखमक्षयमन्यथा नेत्यर्थः ॥ संन्यासार्थं कामभोगं निन्दयति । ये हीति ॥ तत्परित्यागं प्रशंसति । शक्नोतीति । कामक्रोधोद्भवं वेगं सोढुं शक्नोति ।

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्नकारयन् ॥ १३ ॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः । गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥ इहैव तैर्जितः स्वर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥ बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखं । स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥ शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ॥

SGDF
Sri Gangeshwari Digital Foundation

शरीरविमोक्षणात्प्राग्यथा मनुष्यशरीरे सोढुं सुशकं तथा नान्यत्रेति भावः। ब्रह्मलोकादिस्तु जितकामानामेव भवति॥ ज्ञानिलक्षणं प्रपञ्चयत्युत्तरैः श्लोकैः। आरामः परदर्शनादिनिमित्तं सुखं। अत्र तु परमात्मदर्शनादिनिमित्तं तत्। सुखं तूपद्रवक्षये व्यक्तं। अत्र तु कामादिक्षये व्यक्तमात्मसुखं। स्वयं ज्योतिष्ट्वाद्भगवतस्तद्व्यक्तेरन्तर्ज्योतिः। सर्वेषामन्तर्ज्योतिष्ट्वेऽपि व्यक्तेर्विशेषः। असम्प्रज्ञातसमाधीनां बाह्यादर्शनात्। दर्शनेप्यकिञ्चित्करादेवशब्दः। उक्तं चैतत्। 'दर्शनस्पर्शसंभाषाद्यत्सुखं जायते नृणां। आरामः स तु विज्ञेयः सुखं कामक्षयोदितमि'ति नारदीये। 'स्वज्योतिष्ट्वान्महाविष्णोरन्तर्ज्योतिस्तु तत्स्थित' इति च। अन्तः सुखत्वादेः कारणमाह। ब्रह्मणि भूत इति॥ पापक्षयाच्चैतद्भवतीत्याह। लभन्त इति। क्षीणकल्मषा भूत्वा छिन्नद्वैधायतात्मानः। द्वेधाभावो द्वैधं संशयो विपर्ययो वा। तच्चोक्तं। 'विपर्ययः संशयो वा यद्द्वैधं त्वकृतात्मनां। ज्ञानासिना तु तच्छित्वा मुक्तसङ्गः परं व्रजेदि'ति। छिन्नद्वैधास्त एवाऽयतात्मानो दीर्घमनसः सर्वज्ञा इत्यर्थः। तत एव छिन्नद्वैधाः। तच्चोक्तं। 'क्षीणपापा महाज्ञाना जायन्ते गतसंशया' इति। छिन्नद्वैधाः यतात्मान इति वा॥ सुलभं च तेषां ब्रह्मेत्याह। कामक्रोधेति। अभितः सर्वतः॥ ध्यानप्रकारमाह। स्पर्शानित्यादिना। बाह्यान्स्पर्शान्बहिः कृत्वा। श्रोत्रा-

---

कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥ २३॥ योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥ २४॥ लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥ २५॥ कामक्रोधवियुक्तानां यतीनां यतचेतसाम्। अभितो ब्रह्म निर्वाणं वर्तते विदितात्मनाम्॥ २६॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः। प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥ २७॥ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।

SGDF
Sri Gangeshwari Digital Foundation

दीनि योगेन नियम्येत्यर्थः । चक्षुर्भ्रुवोरन्तरे कृत्वा । भ्रुवोर्मध्यमवलोकयन्नित्यर्थः । उक्तं च । 'नासाग्रे वा भ्रुवोर्मध्ये ध्यानी चक्षुर्निधापयेदि'ति । प्राणापानौ समौ कृत्वा कुम्भके स्थित्वेत्यर्थः ॥ ध्येयमाह । भोक्तारमिति ॥ इति श्रीमदानन्दतीर्थभगवत्पदाचार्यविरचिते गीताभाष्ये पञ्चमोऽध्यायः ॥ ५ ॥

ॐ ॥ ज्ञानान्तरङ्गं समाधियोगमाहानेनाध्यायेन ॥ विवक्षितं संन्यासमाह योगेन सह । अनाश्रित इति । चतुर्थाश्रमिणोऽप्यग्निः क्रिया चोक्ता दैवमेवेत्यादौ । 'अग्निर्ब्रह्म च तत्पूजा क्रिया न्यासाश्रमे स्मृते'ति च । तस्मान्निरग्निरक्रियः संन्यासी योगी च न भवत्येव ॥ संन्यासोऽपि योगान्तर्भूत इत्याह । यं संन्यासमिति । कामसङ्कल्पाद्यपरित्यागे कथमुपायवान्स्यादित्याशयः ॥ कियत्कालं कर्म कर्तव्यमित्यत आह । आरुरुक्षोर्मुनेरिति । योगमारुरुक्षोः उपायसम्पूर्तिमिच्छोः । योगारूढस्य सम्पूर्णोपायस्य । अपरोक्षज्ञानिन इत्यर्थः । कारणं परमसुखकारणं । अपरोक्षज्ञानिनोऽपि समाध्यादिफलमुक्तं । तस्य सर्वोपशमेन समाधिरेव कारणं प्राधान्येनेत्यर्थः । तथापि यदा भोक्तव्योपरमस्तदैव सम्यगसम्प्रज्ञातसमाधिर्जायते । अन्यदा तु भगवच्चरितादौ स्थितिः । तच्चोक्तं । 'ये त्वां पश्यन्ति भगवंस्त एवं

विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः ॥ ५ ॥

श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥ यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव । न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव

SGDF
Sri Gargeshwari Digital Foundation

सुखिनः परं । तेषामेव तु सम्यक्च समाधिर्जायते नृणां । भोक्तव्य-कर्मण्यक्षीणे जपेन कथयापि वा ॥ वर्तयन्ति महात्मानस्त्वद्भक्तास्त्व-त्परायणा' इति ॥ योगारूढस्य लक्षणमाह । यदेति । सम्यगन-नुषङ्गस्तस्यैव भवति । उक्तं च । 'स्वतो दोषलयो दृष्ट्वा त्वितरेषां प्रयत्नत' इति ॥ स च योगारोहः प्रयत्नेन कर्तव्य इत्याह । उद्धरेदित्यादिना ॥ कस्य बन्धुरात्मेत्याह । बन्धुरात्मेति । आत्मा मनः । आत्मनो जीवस्य आत्मना मनसा । आत्मानं जीवं । आत्मैव मनः । आत्मना बुध्द्या । जीवेनैव वा । स हि बुध्द्या विजयति । उक्तं च । 'मनः परं कारणमामनन्ति' । 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' । 'उद्धरेन्मनसा जीवं न जीव-मवसादयेत् । जीवस्य बन्धुः शत्रुश्च मन एव न संशयः' । 'जीवेन बुद्ध्या हि यदात्मनो जितं तदा बन्धुः शत्रुरन्यत्र चास्य । ततो जयेद्बुद्धिबलो नरस्तद्देवे च भक्त्या मधुकैटभारावि'त्यादि ब्रह्मवैवर्ते । अनात्मनः अजितात्मनः पुरुषस्य । अजितमनस्कस्य । सदपि मनोऽ-नुपकारीत्यनात्मा । सन्नपि भृत्यो यस्य न भृत्यपदे वर्तते स ह्यभृत्यः । तस्यात्मा मन एव शत्रुवच्छत्रुत्वे वर्तते ॥ जितात्मनः फलमाह । जितात्मन इति । जितात्मा हि प्रशान्तो भवति । न तस्य मनः प्रायो विषयेषु गच्छति । तदा च परमात्मा सम्यक् ह्याहितः

शमः कारणमुच्यते ॥ ३ ॥ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते ॥ ४ ॥ उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥ बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः । अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥ जितात्मनः प्रशान्तस्य परमात्मा समाहितः । शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः । युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥८॥

SGDF
Sri Gangeshwari Digital Foundation

सन्निहितो भवति। अपरोक्षज्ञानी स भवतीत्यर्थः। अपरोक्षज्ञानिनो लक्षणं स्पष्टयति। शीतोष्णेत्यादिना। शीतोष्णादिषु कूटस्थः। ज्ञानविज्ञानतृप्तात्मा विजितेन्द्रिय इति कूटस्थत्वे हेतुः। विज्ञानं विशेषज्ञानं। अपरोक्षज्ञानं वा। तच्चोक्तं। 'सामान्यैर्यैं त्वविज्ञेया विशेषा मम गोचराः। देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितम्'। 'श्रवणान्मननाच्चैव यज्ज्ञानमुपजायते। तज्ज्ञानं दर्शनं विष्णोर्विज्ञानं शम्भुरब्रवीत्'। 'विज्ञानं ज्ञानमङ्गादेर्विशिष्टं दर्शनं तथे'त्यादि। कूटस्थो निर्विकारः। कूटवत्स्थित इति व्युत्पत्तेः। कूटमाकाशः। 'कूटं खं विदलं व्योम संधिराकाश उच्यत'इत्यभिधानात्। योगी योगं कुर्वन्। युक्तो योगसम्पूर्णः एवं भूतो योगानुष्ठाता योगसम्पूर्ण उच्यत इत्यर्थः॥ स एव च सर्वस्माद्विशिष्यते। साधुपापादिषु समबुद्धिः। जीवचितः परमात्मनः सर्वस्य तन्निमित्तत्वस्य च सर्वत्रैकरूप्येण। चिद्रूपा एव हि जीवाः। विशेषस्त्वन्तःकरणकृतः। सर्वेषां च साधुत्वादिकं सर्वमीश्वरकृतमेव स्वतो न किञ्चिदपि। उक्तं चैतत्सर्वं। 'स्वतः सर्वेऽपि चिद्रूपाः सर्वदोषविवर्जिताः। जीवास्तेषां तु ये दोषास्त उपाधिकृता मताः। सर्वं चेश्वरतस्तेषां न किञ्चित्स्वत एव तु। समा एव ह्यतः सर्वे वैषम्यं भ्रान्तिसम्भवम्। एवं समानजीवास्तु विशेषो देवतादिषु। स्वाभाविकस्तु नियमादत एव सनातनः। असुरादेस्तथा दोषा नित्याः स्वाभाविका अपि। गुणदोषौ मनुष्याणां नित्यौ स्वाभाविकौ मतौ। गुणैकमात्ररूपास्तु देवा एव सदा मता'इति ब्राह्मे। न तु साधुपापादीनां पूजादिसाम्यम्। तत्र दोषस्मृतेः। 'समानां विषमा पूजा विषमाणां समा तथा। क्रियते येन देवोऽपि स्वपदाद्भ्रश्यते पुमानि'ति पाद्मे। 'वित्तं बंधुर्वयः कर्म विद्याचैव तु पञ्चमी। एतानि मान्यस्थानानि

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु। साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥ ९॥ योगी युञ्जीत सततमात्मानं रहसि स्थितः। एकाकी

SGDF
Sri Gangeshwari Digital Foundation

गरीयो ह्युत्तरोत्तरमि'ति वामने। 'गुणानुसारिणीं पूजां समां दृष्टिं च यो नरः। सर्वभूतेषु कुरुते तस्य विष्णुः प्रसीदति। वैषम्यमुत्तमत्वं तु ददाति नरसश्चयात्। पूजाया विषमा दृष्टिः समा साम्यं विदुःखजमि'ति ब्रह्मवैवर्ते। सुहृदादिषु शास्त्रोक्तपूजादिकृतिरन्यूनाऽनधिका या साऽपि समा। तदप्याह। 'यथा सुहृत्सु कर्तव्यं पितृशत्रुसुतेषु च। तथा करोति पूजादि समबुद्धिः स उच्यत' इति गारुडे। प्रत्युपकारनिरपेक्षयोपकारकृत्सुहृत्। क्लेशस्थानं निरूप्य यो रक्षां करोति स मित्रं। अरिर्वधादिकर्ता। कर्तव्ये उपकारे अपकारे च य उदास्ते स उदासीनः। कर्तव्यमुभयमपि यः करोति स मध्यस्थः। अवासितकृद्द्वेष्यः। आह चैतत्। 'द्वेष्योऽवासितकृत्कार्यमात्रकारी तु मध्यमः। प्रियकृत्प्रियो निरूप्यापि क्लेशं यः परिरक्षति। स मित्रमुपकारं तु ह्यनपेक्ष्योपकारकृत्। यस्ततः स सुहृत्प्रोक्तः शत्रुश्चापि वधादिकृदि'ति॥ समाधियोगप्रकारमाह। योगी युञ्जीतेत्यादिना। युञ्जीत समाधियोगयुक्तं कुर्यात्। आत्मानं मनः॥ योगं समाधियोगं युञ्ज्यात्॥ निर्वाणपरमां शरीरत्यागोत्तरकालीनां॥ अनशनादिनिषेधोऽशक्तस्य। उक्तं हि 'निद्राशनभयश्वासचेष्टातन्द्र्यादिवर्जनं। कृत्वा

यतचित्तात्मा निराशीरपरिग्रहः॥ १०॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥ ११॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः। उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥ १२॥ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥ प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥ युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः। शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ १५॥ नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः। न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ १६॥ युक्ताहार-

SGDF
Sri Gangeshwari Digital Foundation

निमीलिताक्षस्तु शक्तो ध्यायन्प्रसिध्यती'ति नारदीये ॥ युक्ताहार-विहारस्य । सोपायाऽहारादेः । यावता श्रमाद्यभावो भवति तावदाहारादेरित्यर्थः ॥ आत्मनि भगवति ॥ आत्मनो योगं भगवद्विषयं योगं ॥ आत्मना मनसा । आत्मनि देहे । आत्मानं भगवन्तं पश्यन् ॥ तत्त्वतो भगवद्रूपात् ॥ दुःखसंयोगो येन वियुज्यते स दुःखसंयोगवियोगः । न केवलमुत्पन्नं दुःखं नाशयति उत्पत्तिमेव निवारयतीति दर्शयति संयोगशब्देन । निश्चयेन योक्तव्यः योक्तव्य एव बुभूषुणेत्यर्थः ॥ सर्वान् सर्वविषयान् । अशेषतः एकविषयोऽपि कामः स्वल्पः कादाचित्कोऽपि न कर्तव्य इत्यर्थः । मनसैव नियन्तुं शक्यते नान्येनेत्येवशब्दः ॥ बुद्धेः कारणत्वं मनोनिग्रहे आत्मरमणे च ॥ यतो यतः यत्र यत्र । 'यतो यतो धावती'त्यादिप्रयोगात् ।

विहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥ यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता । योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥ यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥ सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् । वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः ॥ २१ ॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः । यस्मिन्स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥ २२ ॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् । स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥ २३ ॥ सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः । मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥ शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ २५ ॥ यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥ प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

SGDF
Sri Gangeshwari Digital Foundation

आत्मन्येव वशं नयेत् । आत्मविषय एव वशीकुर्यादित्यर्थः ॥ पूर्वश्लोकोक्तं प्रपञ्चयति । एवं युञ्जन्निति ॥ ध्येयमाह । सर्वभूतस्थमिति । सर्वभूतस्थमात्मानं परमेश्वरं । सर्वभूतानि चात्मनि परमेश्वरे । तं च परमेश्वरं ब्रह्मतृणादावैश्वर्यादिना साम्येन पश्यति । तच्चोक्तं । 'आत्मानं सर्वभूतेषु भगवन्तमवस्थितं । अपश्यत्सर्वभूतानि भगवत्यपि चात्मनी'ति । 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरमि'ति च ॥ फलमाह । यो मामिति । तस्याहं न प्रणश्यामीति सर्वदा योगक्षेमवहः स्यामित्यर्थः । स च मे न प्रणश्यति सर्वदा मद्भक्तो भवति । सत्यपि स्वामिन्यरक्षत्यनाथः । एवं भृत्येऽप्यभजत्यभृत्य इति हि प्रसिद्धिः । उक्तं च । 'सर्वदा सर्वभूतेषु समं मां यः प्रपश्यति । अचला तस्य भक्तिःस्याद्योगक्षेमं वहाम्यहमि'ति गारुडे ॥ एतदेव स्पष्टयति । सर्वभूतस्थितमिति । एकत्वमास्थितः सर्वत्रैक एवेश्वर इति स्थितः । सर्वप्रकारेण वर्तमानोऽपि मय्येव वर्तते । एवमपरोक्षं पश्यतो ज्ञानफलं नियतमित्यर्थः । तथापि प्रायो नाधर्मं करोति । कुर्वतस्तु महच्चेद्दुःखसूचकं भवतीत्युक्तं पुरस्तात् । आह च । 'कदाचिदपि नाधर्मे बुद्धिर्विष्णुदृशां भवेत् । प्रमादात्तु कृतं पापं स्वल्पं भस्मीभविष्यति । आदिराजैस्तथादेवैर्ऋषिभिः क्रियते कियत् । बाहुल्यात्कर्मणस्तेषां दुःखसूचकमेव तदि'ति ॥ साम्यं प्रकारान्तरेण व्याचष्टे । आत्मौपम्येनेति ॥

युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ॥ ३० ॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥३१॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥ अर्जुन

SGDF
Sri Gargeshwari Digital Foundation

एतस्य योगस्य स्थिरां स्थितिं न पश्यामि मनसश्चलत्वात्। उक्तं च। 'मनसश्चञ्चलत्वाद्धि स्थितिर्योगस्य वै स्थिरा । विनाऽभ्यासान्न शक्या स्याद्वैराग्याद्वा न संशय' इति व्यासयोगे ॥ न च कदाचित्स्वयमेव मनो नियम्यते। 'शुभेच्छारहितानां च द्वेषिणां च रमापतौ। नास्तिकानां च वै पुंसां सदा मुक्तिर्न जायत' इति निषेधाद्ब्राह्मे ॥ अयतिरप्रयत्नः॥ योगस्य जिज्ञासुरपि ज्ञातव्यो मया योग इति यस्यातीवेच्छा सोऽपि। शब्दब्रह्मातिवर्तते परं ब्रह्म प्राप्नोतीत्यर्थः ॥ नैकजन्मनीत्याह। प्रयत्नादिति। जिज्ञासुर्ज्ञात्वा प्रयत्नं करोति।

उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन। एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥ चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥ श्रीभगवानुवाच ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलं। अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो दुष्प्राप इति मे मतिः। वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः। अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्ट-श्छिन्नाभ्रमिव नश्यति। अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः। त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥ श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते। न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योग-भ्रष्टोऽभिजायते ॥ ४१ ॥ अथवा योगिनामेव कुले भवति धीमताम्। एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम्। यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः। जिज्ञासुरपि योगस्य शब्द-ब्रह्मातिवर्तते ॥ ४४ ॥ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः। अनेक-

SGDF
Sri Gangeshwari Digital Foundation

एवमनेकजन्मभिः संसिद्धोऽपरोक्षज्ञानीभूत्वा परां गतिं याति । आह च । 'अतीवश्रद्धया युक्तो जिज्ञासुर्विष्णुतत्परः । ज्ञात्वा ध्यात्वा तथा दृष्ट्वा जन्मभिर्बहुभिः पुमान् । विशेन्नारायणं देवं नान्यथा तु कथश्चने'ति नारदीये ॥ ज्ञानिभ्यो योगज्ञानिभ्यः । तपस्विभ्यः कृच्छ्रादिचारिभ्यः । उक्तं च । 'कृच्छ्रादेरपि यज्ञादेर्ध्यानयोगो विशिष्यते । तत्रापि शेषश्रीब्रह्मशिवादिध्यानतो हरेः । ध्यानं कोटि-गुणं प्रोक्तमधिकं वा मुमुक्षुणामि'ति गारुडे । 'अज्ञात्वा ध्यायिनो ध्यानाज्ज्ञानमेव विशिष्यते । ज्ञात्वा ध्यानं ज्ञानमात्राद्ध्यानादपि तु दर्शनं । दर्शनाच्चैव भक्तेश्च न किञ्चित्साधनाधिकमि'ति नारदीये ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये षष्ठोऽ-ध्यायः ॥ ६ ॥

ॐ ॥ साधनं प्राधान्येनोक्तमतीतैरध्यायैः । उत्तरैस्तु षड्भि-र्भगवन्माहात्म्यं प्राधान्येनाह ॥ आसक्तमनाः अतीवस्नेहयुक्तमनाः । मदाश्रयः भगवानेव मया सर्वं कारयति । स एव च मे शरणं । तस्मिन्नेव चाहं स्थित इति स्थितः । असंशयं समग्रमिति क्रिया-विशेषणं ॥ इदं मद्विषयं ज्ञानं । विज्ञानं विशेषज्ञानं ॥ दौर्लभ्यं

जन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवा-र्जुन ॥ ४६ ॥ योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे अभ्यासयोगो नाम षष्ठोऽ-ध्यायः ॥ ६ ॥

श्रीभगवानुवाच ॥ मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः । असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥ ज्ञानं तेऽहं सविज्ञान-मिदं वक्ष्याम्यशेषतः । यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

SGDF
Sri Gangeshwari Digital Foundation

ज्ञानस्याह । मनुष्याणामिति ॥ प्रतिज्ञातं ज्ञानमाह । भूमिरित्यादिना । महतोऽहंकार एवान्तर्भावः ॥ अपरा अनुत्तमा । वक्ष्यमाणामपेक्ष्य । जीवभूता श्रीः । जीवानां प्राणधारिणी । चिद्रूपभूता सर्वदा सती । एतन्महद्भूतमिति श्रुतिः । जगाद च । 'प्रकृती द्वे तु देवस्य जडा चैवाजडा तथा । अव्यक्ताख्या जडा सा च सृष्ट्या भिन्नाष्टधा पुनः । महान्बुद्धिर्मनश्चैव पञ्चभूतानि चेति हि । अवरा सा जडा श्रीश्च परेयं धार्यते यया । चिद्रूपा सा त्वनन्ता च अनादिनिधना परा । यत्समं तु प्रियं किञ्चिन्नास्ति विष्णोर्महात्मनः । नारायणस्य महिषी माता सा ब्रह्मणोऽपि हि । ताभ्यामिदं जगत्सर्वं हरिः सृजति भूतराडि'ति नारदीये ॥ न केवलं ते जगत्प्रकृती मद्वशे इत्येतावन्मदैश्वर्यमित्याह । अहमिति । प्रभावादेः सत्ताप्रतीत्यादिकारणत्वात्तद्भोक्तृत्वाच्च प्रभव इत्यादि । तथा च श्रुतिः । 'सर्वकामः सर्वकर्मा सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर' इति । आह च । 'स्रष्टा पाता च संहर्ता नियन्ता च प्रकाशिता । यतः सर्वस्य तेनाहं सर्वोऽसीत्यृषिभिः स्तुतः । सुखरूपस्य भोक्तृत्वान्न तु सर्वस्वरूपतः । आगमिष्यत्सुखं चापि तच्चास्त्येव सदापि तु । तथाऽप्यचिन्त्यशक्तित्वाज्जातं सुखमतीव चे'ति नारदीये ॥ अहमेव परतरः । मत्तोऽन्यत्परतरं न किञ्चिदपि । इदं ज्ञानं । रसोऽहमिति

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥ मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥ रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥ पुण्यो

SGDF
Sri Gargeshwari Digital Foundation

विज्ञानं ॥ अन्नादयोऽपि तत एव ॥ तथापि रसादिस्वभावानां साराणां च स्वभावत्वे सारत्वे च विशेषतोऽपि स एव नियामकः । न त्वबादिनियमानुबद्धो रसादिस्तत्सारत्वादिश्चेति दर्शयति । अप्सु रस इत्यादिविशेषशब्दैः । भोगश्च विशेषतो रसादेरिति । उपासनार्थं च । उक्तं च गीताकल्पे । 'रसादीनां रसादित्वे स्वभावत्वे तथैव च । सारत्वे सर्वधर्मेषु विशेषेणापि कारणम् । सारभोक्ता च सर्वत्र यतोऽतो जगदीश्वरः । रसादिमानिनां देहे स सर्वत्र व्यवस्थितः । अबादयः पार्षदा ध्येयः स ज्ञानिनां हरिः । रसादिसम्पत्त्या अन्येषां वासुदेवो जगत्पतिरि'ति । 'स्वभावो जीव एव च' । 'सर्वस्वभावो नियतस्तेनैव किमुतापरम् । न तदस्ति विना यत्स्यान्मया भूतं चराचरमि'ति च । धर्माविरुद्धः कामरागविवर्जितमित्याद्युपासनार्थम् । उक्तं च गीताकल्पे । 'धर्माविरुद्धकामेऽसावुपास्यः काममिच्छता । विहीने कामरागादेर्बले च बलमिच्छता । ध्यातस्तत्र त्वनिच्छद्भिर्ज्ञानमेव ददाति स' इत्यादि । पुण्यो गन्ध इति भोगापेक्षया च । तथा च श्रुतिः । 'पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति' । 'ऋतं पिबन्तौ सुकृतस्य लोक'इत्यादिका । ऋतं च पुण्यं । 'ऋतं सत्यं तथा धर्मः सुकृतं चाभिधीयत'इत्यभिधानात् । 'ऋतं तु मानसो धर्मः सत्यं स्यात्स प्रयोगग' इति च । न चा'नश्नन्नन्यो अभिचाकशीति' । 'अन्यो निरन्नोऽपि बलेन भूयानि'त्यादिविरोधः । स्थूलानशनोक्तेः । आह च सूक्ष्माशनम् । 'प्रविविक्ताहारतर इवैष भवत्यस्माच्छारीरादात्मन' इति । न चात्र जीव उच्यते । शारीरा-

---

गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥ बलं बलवतामस्मि कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

SGDF
Sri Gargeshwari Digital Foundation

दात्मन इति भेदाभिधानात् । स्वप्नादिश्च शारीर एव । 'शारीरस्तु त्रिधा भिन्नो जाग्रदादिष्ववस्थितेरि'ति वचनाद्वारुडे । अस्मादितीश्वरव्यावृत्त्यर्थम् । 'शारीरौ तावुभौ ज्ञेयौ जीवश्चेश्वरसंज्ञितः । अनादिबन्धनस्त्वेको नित्यमुक्तस्तथाऽपर'इति वचनान्नारदीये । भेदश्रुतेश्च । सति गत्यन्तरे पुरुषभेद एव कल्प्यो न त्ववस्थाभेदः । आह च । 'प्रविविक्तमुच्यतो ह्यस्माच्छारीरात्पुरुषोत्तमः । अतोऽभोक्ता च भोक्ता च स्थूलाभोगात्स एव त्वि'ति गीताकल्पे ॥ न त्वहं तेष्विति तदनाधारत्वमुच्यते । उक्तं च । 'तदाश्रितं जगत्सर्वं नासौ कुत्रचिदाश्रित'इति गीताकल्पे ॥ तर्हि कथमेवं न ज्ञायस इत्यत आह । त्रिभिरिति । तादात्म्यार्थे मयट् । तच्चोक्तं । 'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधे'ति । न हि गुणकार्यभूता माया । गुणमयीति च वक्ष्यति । सिद्धं च कार्यस्यापि तादात्म्यं । 'तादात्म्यं कार्यधर्मादेः संयोगो भिन्नवस्तुनोरि'ति व्यासयोगे । भावैः पदार्थैः । सर्वे भावा दृश्यमाना गुणमया एत इति दर्शयति । एभिरिति । ज्ञानिव्यावृत्त्यर्थमिदमिति । गुणमयदेहादिकं दृष्ट्वेश्वरदेहोऽपि तादृश इति मायामोहित इत्यर्थः । जगाद च व्यासयोगे । 'गौणान्ब्रह्मादिदेहादीन्दृष्ट्वा विष्णोरपीदृशः । देहादिरिति मन्वानो मोहितोऽज्ञो जनो भृशमि'ति । एभ्यो गुणमयेभ्यः । 'गुणेभ्यश्च परमि'ति वक्ष्यमाणत्वात् । 'केवलो निर्गुणश्चे'त्यादि श्रुतिभ्यश्च । त्रैगुण्यवर्जितमिति चोक्तम् ॥ कथमनादिकाले मोहानत्ययो बहूनामित्यत आह । दैवीति । अयमाशयः । माया ह्येषा मोहिका । सा च सृष्ट्यादि-

---

ये चैव सात्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥ दैवीह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥१४॥

SGDF
Sri Gangeshwari Digital Foundation

क्रीडादिमद्देवसंबन्धित्वादतिशक्तेर्दुरत्यया । तथा हि देवशब्दार्थे पठन्ति । 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्वि'ति । कथं दैवी? मदीयत्वात् अहं हि देव इति । अब्रवीच्च । 'श्रीर्भूर्दुर्गेति या भिन्ना महामाया तु वैष्णवी । तच्छक्त्यनन्तांशहीना ऽथापि तस्याश्रयात्प्रभोः । अनन्तब्रह्मरुद्रादेर्नास्याः शक्तिकलापि हि । तेषां दुरत्ययाप्येषा विना विष्णुप्रसादत' इति व्यासयोगे । तर्हि न कथञ्चिदत्येतुं शक्यत इत्यत आह । मामेवेति । अन्यत्सर्वं परित्यज्य मामेव ये प्रपद्यन्ते । गुर्वादिवन्दनं च मय्येव समर्पयन्ति । स एव च तत्र स्थित्वा गुर्वादिर्भवतीत्यादि पश्यन्ति । आह च नारदीये । 'मत्सम्पत्त्या तु गुर्वादीन्भजन्ते मध्यमा नराः । मदुपाधितया तांश्च सर्वभूतानि चोत्तमा' इति । 'आचार्यचैत्यवपुषा स्वगतिं व्यनङ्क्षि'इति च ॥ तर्हि किमिति सर्वे नात्यायन्नित्यत आह । न मामिति । दुष्कृतित्वान्मूढाः । अतएव नराधमाः । अपहृतज्ञानत्वाच्च मूढाः । अतएवासुरं भावमाश्रिताः । स च वक्ष्यते प्रवृत्तिं च निवृत्तिं चेत्यादिना । अप्रहारोऽभिभवः । उक्तं चैतद्व्यासयोगे । 'ज्ञानं स्वभावो जीवानां मायया ह्यभिभूयत' इति । असुषु रता असुराः । तच्चोक्तं नारदीये । 'ज्ञानप्रधाना देवास्तु असुरास्तु रता असावि'ति ॥ एकस्मिन्नेव भक्तिरित्येकभक्तिः । तच्चोक्तं गारुडे । 'मय्येव भक्तिर्नान्यत्र एकभक्तिः स उच्यत' इति ॥ बहूनां जन्मना-

---

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥ चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् । आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।

SGDF
Sri Gangeshwari Digital Foundation

मन्ते ज्ञानवान्भवति । तच्चोक्तं ब्राह्मे । 'जन्मभिर्बहुभिर्ज्ञात्वा ततो मां प्रतिपद्यत' इति ॥ प्रकृत्या स्वभावेन । 'स्वभावः प्रकृतिश्चैव संस्कारो वासनेति चे'त्यभिधानात् ॥ यां यां ब्रह्मादिरूपां तनुं । उक्तं च नारदीये । 'अन्तो ब्रह्मादिभक्तानां मद्भक्तानामनन्त'तेति । 'मुक्तश्च कां गतिं गच्छेन्मोक्षश्चैव किमात्मक' इत्यादेः परिहारसन्दर्भाच्च मोक्षधर्मेषु । 'अवतारे महाविष्णोर्भक्तः कुत्र च मुच्यत' इत्यादेश्च ब्रह्मवैवर्ते ॥ को विशेषस्तवान्येभ्य इत्यत आह । अव्यक्तमिति । कार्यदेहादिवर्जितम् । तद्वानिव प्रतीयस इत्यत आह । व्यक्तिमापन्नमिति । कार्यदेहाद्यापन्नं तच्चोक्तं । 'सदसतः परं' । 'न तस्य कार्यं' । 'अपाणिपादः' । 'आनन्ददेहं पुरुषं मन्यन्ते गौणदैहिकमि'त्यादौ । भावं याथार्थ्यम् । तथाऽब्रवीच्च । 'याथातथ्यमजानन्तः परं तस्य विमोहिता' इत्यादि ॥ अज्ञानं च मदिच्छयेत्याह । नाहमिति । योगेन सामर्थ्योपायेन मायया च । मयैव मूढो नाभिजानाति । तथाऽऽह पाद्मे । 'आत्मनः प्रकृतिं चैव लोकचित्तस्य बन्धनम् । स्वसामर्थ्येन देव्या च कुरुते स महेश्वर' इति ॥ न च

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः । तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥ यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२ ॥ अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् । देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥ अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः । परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः । मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥ वेदाहं समतीतानि वर्तमानानिचार्जुन । भविष्याणि च भूतानि मां तु वेद न

SGDF
Sri Gargeshwari Digital Foundation

मां माया बध्नातीत्याह । वेदेति । न कश्चनातिसमर्थोऽपि स्वसामर्थ्यात् ॥ द्वन्द्वमोहेन सुखदुःखादि विषयमोहेन । इच्छाद्वेषयोः प्रवृद्धयोः न हि किञ्चिज्ज्ञातुं शक्यम् । कारणान्तरमेतत् । सर्गे सर्गकाले आरभ्यैव । शरीरे हि सतीच्छादयः । पूर्वं त्वज्ञानमात्रं ॥ विपरीताश्च केचित्सन्तीत्याह । येषामिति ॥ जरामरणमोक्षायेत्यन्यकामनिवृत्त्यर्थं मोक्षे सक्तिस्तुत्यर्थं वा न विधिः । 'मुमुक्षोरमुमुक्षुस्तु वरो ह्येकान्तभक्तिभागि'तीतरस्तुतेर्नारदीये । नात्यन्तिकमिति च । 'देवानां गुणलिङ्गानामानुस्राविककर्मणां । सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या । अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी । जरयत्याशु या कोशं निगीर्णमनलो यथे'ति भागवते लक्षणाच्च । आह च । 'सर्वे वेदास्तु देवार्था देवा नारायणार्थकाः । नारायणस्तु मोक्षार्थे मोक्षो नान्यार्थ इष्यते । एवं मध्यमभक्तानामेकान्तानां न कस्यचित् । अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमि'ति गीताकल्पे । त एव च विदुः । 'यमेवैष वृणुत' इति श्रुतेः ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये सप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥ ॥ ॥

कश्चन ॥ २६ ॥ इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत । सर्वभूतानि संमोहं सर्गे यान्ति परन्तप ॥ २७ ॥ येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् । ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥ जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः । प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥३०॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे ०ज्ञानविज्ञानयोगोनाम सप्तमोऽध्यायः ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

ॐ ॥ मरणकाले कर्तव्यगत्याद्यस्मिन्नध्याय उपदिशति ॥ परममक्षरं ब्रह्म । वेदादिशङ्कानिवृत्त्यर्थमेतत् । आत्मन्यधि यत्तदध्यात्मम् । आत्माधिकारे यत्तदिति वा । तथा हि । जैवः स्वभावः । स्वाख्यो भावः स्वभाव इति व्युत्पत्त्या जीवो वा स्वभावः । सर्वदाऽस्त्यैवैकप्रकारेणेति भावः । अन्तःकरणादिव्यावृत्त्यर्थो भावशब्दः । न ह्येकप्रकारेण स्थितिरन्तःकरणादेः । विकारित्वात् । स्वशब्द ईश्वरव्यावृत्त्यर्थः । भूतनां जीवानां भावानां जडपदार्थानां चोद्भवकरेश्वरक्रिया विसर्गः । विशेषेण सर्जनं विसर्ग इत्यर्थः ॥ भूतानि सशरीरान् जीवानधिकृत्य यत्तदधिभूतम् । क्षरो भावः विनाशिकार्यपदार्थः । अव्यक्तान्तर्भावेऽपि तस्याप्यन्यथाभावाख्यो विनाशोऽस्त्येव । तच्चोक्तं । 'अव्यक्तं परमे व्योम्नि निष्क्रिये सम्प्रलीयत' इति । 'तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे'ति च । 'विकारोऽव्यक्तजन्म ही'ति च स्कान्दे । पुरि शयनात्पुरुषो जीवः । स च सङ्कर्षणो ब्रह्मा वा । स सर्वदेवानधिकृत्य वर्तते पतिरित्यधिदैवतम् । देवाधिकारस्थ इति वा । सर्वयज्ञभोक्तृत्वादेरधियज्ञः । अन्योऽधियज्ञोऽग्न्यादिः प्रसिद्ध इति देह इति विशेषणम् । 'भोक्तारं यज्ञतपसां' । 'त्रैविद्या मां' । 'येऽप्यन्यदेवताभक्ताः' । 'एतस्य वा अक्षरस्य प्रशासने गार्गि' । 'ददतो मनुष्याः प्रशंसन्ति यजमानं देवा' इत्यादेः । 'कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैश्रेयसं पदमि'त्यादिपरिहाराच्च मोक्षधर्मे । भगवांश्चेत्तद्धोक्तृत्वादेरधियज्ञत्वं सिद्धमिति

अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम । अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन । प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥ श्रीभगवानुवाच ॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥ अधिभूतं क्षरो भावः पुरुषश्चाधि-

SGDF
Sri Gargeshwari Digital Foundation

कथमित्यस्य परिहारः पृथङ्नोक्तः। सर्वप्राणिदेहस्थरूपेणाधियज्ञः। अत्रेति स्वदेहनिवृत्त्यर्थम्। न हि तत्रेश्वरस्य नियन्तृत्वं पृथगस्ति। नात्रोक्तं ब्रह्म भगवतोऽन्यत् । ते ब्रह्मेत्युक्त्वा साधिभूताधिदैवं मां साधियज्ञं च ये विदुरिति परामर्शात्। तस्यैव च प्रश्नात्। साधियज्ञमिति भेदप्रतीतेस्तन्निवृत्त्यर्थमधियज्ञोऽहमित्युक्तं। मामित्यभेदसिद्धेरक्षरमित्येवोक्तं। आह च गीताकल्पे। 'देहस्थविष्णुरूपाणि अधियज्ञ इतीरितः। कर्मेश्वरस्य सृष्ट्याख्यं तच्चापीच्छाद्यमुच्यते। अधिभूतं जडं प्रोक्तमध्यात्मं जीव उच्यते। हिरण्यगर्भोऽधिदैवं देवः सङ्कर्षणोऽपि वा। ब्रह्म नारायणो देवः सर्वदेवेश्वरेश्वर'इति। 'यथाप्रतीतं वा सर्वमत्र नैव विरुद्ध्यत' इति। स्कान्दे च। 'आत्माभिमानाधिकारस्थितमध्यात्ममुच्यते । देहाद्बाह्यं विनातीव बाह्यत्वादधिदैवतम्। देवाधिकारगं सर्वं महाभूताधिकारगम् । तत्कारणं तथा कार्यमधिभूतं तदन्तिकादि'ति । महाकौर्मे च। 'अध्यात्मं देहपर्यन्तं केवलात्मोपकारकम्। सदेहजीवभूतानि यत्तेषामुपकारकृत्। अधिभूतं तु मायान्तं देवानामधिदैवतमि'ति ॥ मद्भावं मयि सत्ताम्। निर्दुःखनिरतिशयानन्दात्मिकाम् । तच्चोक्तं। 'मुक्तानां च गतिर्ब्रह्मन् क्षेत्रज्ञ इति कल्पित' इति मोक्षधर्मे ॥ स्मरन्पुरुषस्त्यजतीति भिन्नकालीनत्वेऽप्यविरोध इति मन्दमतेः शङ्का मा भूदित्यन्तइति विशेषणम्। सुमतेर्नैव शङ्काऽवकाशः। स्मरंस्त्यजतीत्येककालीनत्वप्रतीतेः। दुर्मतेर्दुःखान्न स्मरंस्त्यजतीति भविष्यति शङ्का। 'त्यजन्देहं न कश्चित्तु मोहमाप्नोत्यसंशयमि'ति स्कान्दे। 'तस्य हैतस्य हृदय-

---

दैवतं। अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥४॥ अन्तकाले च मामेव स्मरन्मुक्त्वा कलेबरं। यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥५॥ यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेबरं। तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥६॥ तस्मात्सर्वेषु कालेषु मामनुस्मर

SGDF
Sri Gargeshwari Digital Foundation

स्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामती'ति हि श्रुतिः। सदा तद्भावभावित इत्यन्तकाले स्मरणोपायमाह। भावोन्तर्गतं मनः। तथाऽभिधानात्। भावितत्वमतिवासितत्वम्। 'भावनात्वतिवासने' त्यभिधानात्॥ सदा तद्भावभावितत्वं स्पष्टयति। अभ्यासेति। अभ्यास एव योगोऽभ्यासयोगः। दिव्यं पुरुषं पुरिशयं पूर्णं च। 'स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृत-मि'ति श्रुतेः। दिव्यं सृष्ट्यादिक्रीडायुक्तम्। दिवु क्रीडेतिधातोः॥ ध्येयमाह। कविमिति। कविं सर्वज्ञम्। 'यः सर्वज्ञ इति श्रुतिः। 'त्वं कविः सर्ववेदनादि'ति ब्राह्मे। धातारं धारणपोषणकर्तारम्। डु धाञ् धारणपोषणयोरिति धातोः। 'धाता विधाता परमोतसंदृगि'ति च श्रुतिः। ब्रह्मा स्थाणुरित्यारभ्य 'तस्य प्रसादादिच्छन्ति तदादिष्ट-फलां गतिमि'त्यादि च मोक्षधर्मे। तमसोऽव्यक्तात्परतः स्थितम्। 'तमसः परस्तादि'ति। 'अव्यक्तं वै तमः परस्ताद्धि स तत' इति पिप्पलादशाखायाम्। मृत्युर्वा व तमः 'मृत्युर्वै तमो ज्योतिरमृत-मि'ति श्रुतेः॥ वायुजयादियोगयुक्तानां मृतिकाले कर्तव्यमाह विशेषतः प्रयाणकाल इति। वायुजयादिरहितानामपि ज्ञानभक्ति-वैराग्यादिसम्पूर्णानां भवत्येव मुक्तिः। तद्वतां त्वीषज्ज्ञानाद्यसम्पूर्णाना-मपि निपुणानां तद्बलात्कथञ्चिद्भवतीति विशेषः। उक्तं च भागवते। 'पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये। वैराग्य-सारं प्रतिलभ्य बोधं यथाञ्जसा त्वाऽपुरकुण्ठधिष्ण्यम्। तथा परे

युध्य च। मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्॥ ७॥ अभ्यासयोग युक्तेन चेतसाऽनन्यगामिना। परमं पुरुषं दिव्यं याति पार्थानु-चिन्तयन्॥ ८॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः॥ सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्॥ ९॥ प्रयाण-काले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव। भ्रुवोर्मध्ये प्राण-

F

SGDF
Sri Gangeshwari Digital Foundation

त्वात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् । त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया त' इति । 'ये तु तद्भाविता लोक एकान्तित्वं समाश्रिताः । एतदभ्यधिकं तेषां तत्तेजः प्रविशन्त्यु-ते'ति च मोक्षधर्मे । 'सम्पूर्णानां भवेन्मोक्षो विरक्तिज्ञानभक्तिभिः । नियमेन तथापीरजयादियुतयोगिनाम् । वश्यत्वान्मनसस्त्वीषत्पूर्व-मप्याप्यते ध्रुवमि'ति व्यासयोगे ॥ तदेव सङ्ग्येयं प्रपञ्चयति । यदक्षरमित्यादिना । प्राप्यते मुमुक्षुभिरिति पदं स्वरूपम् । पद गताविति धातोः । 'तद्विष्णोः परमं पदमि'ति श्रुतेश्च । 'गीयसे पदमित्येव मुनिभिः पद्यसे यत' इति च नारदीये ॥ ब्रह्मनाडीं विना यद्यन्यत्र गच्छति तर्हि विना मोक्षं स्थानान्तरं प्राप्नोतीति सर्वद्वाराणि संयम्य । 'निर्गच्छंश्चक्षुषा सूर्यं दिशः श्रोत्रेण चैव ही'त्यादिवचना-द्व्यासयोगे । मोक्षधर्मे च । हृदि नारायणे । 'ह्रियते त्वया जग-द्यस्माद्धृदित्येवं प्रभाषस' इति पाद्मे । न हि मूर्ध्नि प्राणो हृदि मनसः स्थितिः सम्भवति । 'यत्र प्राणो मनस्तत्र तत्र जीवः परस्तथे'ति व्यासयोगे । योगधारणामास्थितः । योगभरण एवाभियुक्त इत्यर्थः ॥ नित्ययुक्तस्य नित्योपायवतः । योगिनः परिपूर्णयोगस्य ॥ तत्प्राप्तिं स्तौति । मामिति । परमां सिद्धिं गता हि त इति तत्र हेतुः ॥

मावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं ॥ १० ॥ यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥ ११ ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥ अनन्यचेताः सततं यो मां स्मरति नित्यशः । तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां

SGDF
Sri Gangeshwari Digital Foundation

महामेरुस्थब्रह्मसदनमारभ्य न पुनरावृत्तिः । तच्चोक्तं नारायणगोपालकल्पे । 'आमेरुब्रह्मसदनादाजनान्न जनिर्भुवि । तथाप्यभावः सर्वत्र प्राप्यैव वसुदेवजमि'ति ॥ मां प्राप्य न पुनरावृत्तिरिति स्थापयितुमव्यक्ताख्यात्मसामर्थ्यं दर्शयितुं प्रलयादि दर्शयति । सहस्रयुगेत्यादिना । सहस्रशब्दोऽत्रानेकवाची । 'सा विश्वरूपस्य रजनी'ति श्रुतिः ॥ द्विपरार्धप्रलय एवात्र विवक्षितः । 'अव्यक्ताद्व्यक्तयः सर्वा' इत्युक्तेः । उक्तं च महाकौर्मे । 'अनेकयुगपर्यन्तमहर्विष्णोस्तथा निशा । रात्र्यादौ लीयते सर्वमहरादौ च जायत' इति । 'यः सर्वेषु भूतेष्वि'ति वाक्यशेषाच्च ॥ अव्यक्तो भगवान् । यं प्राप्य न निवर्तन्त इति मामुपेत्येत्युक्तस्य परामर्शात् । 'अव्यक्तं परमं विष्णुमि'ति प्रयोगाच्च गारुडे । धाम स्वरूपम् । 'तेजः स्वरूपं च गृहं प्राज्ञैर्धामेति गीयत' इत्यभिधानात् ॥ परमसाधनमाह । पुरुष इति ॥ यत्कालाद्यभिमानिदेवतागता आवृत्त्यनावृत्ती गच्छन्ति ता आह । यत्रेत्यादिना । काल इत्युपलक्षणम् । अग्न्यादेरपि वक्ष्यमाणत्वात् ॥ ज्योतिरर्चिः । 'तेऽर्चिषमभि-

---

गताः ॥ १५ ॥ आब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥ सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७ ॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञिके ॥ १८ ॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते । रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः । यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥ अग्निर्ज्योतिरहः

SGDF
Sri Gargeshwari Digital Foundation

सम्भवन्ती'ति हि श्रुतिः। तथा च नारदीये। 'अग्निं प्राप्य ततश्चार्चिस्ततश्चाप्यहरादिकमि'ति। अभिमानिदेवताश्चाग्न्यादयः। कथमन्यथा अह्न आपूर्यमाणपक्षमिति युज्यते?। 'दिवादिदेवताभिस्तु पूजितो ब्रह्म याति ही'ति च ब्राह्मे। मासाभिमानिभ्योऽयनाभिमानी च पृथक्। तच्चोक्तं गारुडे। 'पूजितस्त्वयनेनासौ मासैः परिवृतेन ही'ति। अहरभिजिता शुक्लपौर्णमास्या अयनं विषुवा सह॥ तच्चोक्तं ब्रह्मवैवर्ते। 'साह्ना मध्यंदिनेनाथ शुक्लेन च सपूर्णिमा। सविष्वाचायनेनासौ पूजितः केशवं व्रजेदि'ति॥ एते सृती सोपाये ज्ञात्वाऽनुष्ठाय न मुह्यति। तच्चाह स्कान्दे। 'सृती ज्ञात्वा तु सोपाये अनुष्ठाय च साधनम्। न कश्चिन्मोहमाप्नोति नचान्या तत्र वै गतिरि'ति॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये अष्टमोऽध्यायः ॥ ८॥ ॥ ॥ ॥ ॥ ॥

ॐ॥ सप्तमाध्यायोक्तं स्पष्टयत्यस्मिन्नध्याये॥ राजविद्या प्रधानविद्या। प्रत्यक्षं ब्रह्मावगम्यते येन तत्प्रत्यक्षावगमम्। अक्षेष्विन्द्रियेषु प्रति प्रति स्थित इति प्रत्यक्षः। तथाच श्रुतिः। 'यः प्राणे

शुक्लः षण्मासा उत्तरायणं। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ २४॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥ २५॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्यया ऽऽवर्तते पुनः॥ २६॥ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन॥ २७॥ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्। अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥ २८॥ इति श्रीमद्भगवद्गीता० अक्षरपरब्रह्मयोगोनामाष्टमोऽध्यायः॥ ८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रीभगवानुवाच॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे। ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्। प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥ २॥

SGDF
Sri Gurgeshwari Digital Foundation

तिष्ठन्प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' । 'यो वाचि तिष्ठन्यश्चक्षुषि तिष्ठन्नि'त्यादेः । 'य एषोऽन्तरक्षिणि पुरुषो दृश्यत' इति च । 'अंगुष्ठमात्रः पुरुषोंऽगुष्ठं च समाश्रित' इति च । 'त्वं मनस्त्वं चन्द्रमास्त्वं चक्षुरादित्य' इत्यादेश्च मोक्षधर्मे । 'स प्रत्यक्षः प्रति प्रति हि सोऽक्षेष्वक्षवान्हि स भवति य एवं विद्वान्प्रत्यक्षं वेदे'ति सामवेदे वारुणशाखायां । धर्मो भगवान् तद्विषयं धर्म्यम् । सर्वं जगद्धत्त इति धर्मः । 'पृथिवी धर्ममूर्धनी'ति प्रयोगान्मोक्षधर्मे । 'भार-भृत्कथितो योगी'ति च । 'भर्ता सन् भ्रियमाणो बिभर्तीति च श्रुतिः । 'धर्मो वा इदमग्र आसीन्न पृथिवी न वायुर्नाकाशो न ब्रह्मा न रुद्रो न देवा न ऋषयः सोऽध्यापयदि'ति च सामवेदे बाभ्रव्य-शाखायाम् । प्रत्यक्षावगमशब्देनापरोक्षज्ञानसाधनत्वमुक्तम् ॥ तज्ज्ञाना-द्याह । मयेति । तर्हि किमिति न दृश्यत इत्यत आह । अव्यक्त-मूर्तिनेति ॥ मत्स्थत्वेऽपि यथा पृथिव्यां स्पृष्टा स्थितानि न तथा मयीत्याह । न चेति । 'न दृश्यश्चक्षुषा चासौ न स्पृश्यः स्पर्शनेन चे'ति हि मोक्षधर्मे । संज्ञासंज्ञ इति च । ममात्मा देह एव भूत-भावनः । 'महाविभूतो माहात्म्यशरीर' इति हि मोक्षधर्मे ॥ मत्स्थानि न च मत्स्थानीत्यस्य दृष्टान्तमाह । यथाऽकाशस्थित इति । न ह्याकाश-स्थितो वायुः स्पर्शाद्याप्नोति ॥ ज्ञानप्रदर्शनार्थं प्रलयादि प्रपञ्चयति ।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप । अप्राप्य मां निवर्तन्ते मृत्यु-संसारवर्त्मनि ॥ ३ ॥ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥ यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति

SGDF
Sri Gangeshwari Digital Foundation

सर्वभूतानीत्यादिना। प्रकृत्यवष्टम्भस्तु यथा कश्चित्समर्थोऽपि पादेन गन्तुं लीलया दंडमवष्टभ्य गच्छति। 'सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसी'ति मोक्षधर्मे। 'सर्वभूतगुणैर्युक्तं दैवं मां ज्ञातुमर्हसी'ति च। विदित्वा सप्तसूक्ष्माणि षडङ्गं च महेश्वरम्। प्रधानविनियोगस्थः परं ब्रह्माधिगच्छती'ति च। 'न कुत्रचिच्छक्तिरनन्तरूपा विहन्यते तस्य महेश्वरस्य। तथापि मायामधिरुह्य देवः प्रवर्तते सृष्टिविलापनेष्वि'त्यृग्वेदखिलेषु। 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रह' इति भागवते। 'अथ कस्मादुच्यते परं ब्रह्म बृहति बृंहयति चे'त्यथर्वणे। 'पराऽस्य शक्तिर्विविधैव श्रूयत' इति च। 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि। न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमापे'त्यादेश्च। प्रकृतेर्वशादवशं। 'त्वमेवैतत्सर्जने सर्वकर्मण्यनन्तशक्तोऽपि स्वमाययैव। मायावशं चावशं लोकमेतत्तस्मात्स्रक्ष्यस्यत्सि पासीश विष्णो' इति गौतमखिलेषु ॥ उदासीनवन्नतूदासीनः। तदर्थमाह। असक्तमिति। 'अवाक्यनादर' इति हि श्रुतिः। 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये'ति भागवते। यस्यासक्त्यैव सर्वकर्मशक्तिः कुतस्तस्य सर्वकर्मबन्ध इति भावः। 'न कर्मणा वर्धते नो कनीयानि'ति हि श्रुतिः। यः कर्मापि नियामयति कथं च तत्तं बध्नाति ? ॥ उदसीनवदिति चेत्स्वयमेव प्रकृतिः सूयत इत्यत आह। मयेति। प्रकृतिसूतिद्रष्टा कर्ताहमेवेत्यर्थः। तथा च श्रुतिः। 'यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यससर्ज भूम्यामि'ति॥ तर्हि

मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥ न च मां तानि कर्माणि निबध्नन्ति धनञ्जय। उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥ मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्। हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥ अवजानन्ति मां

SGDF
Sri Gargeshwari Digital Foundation

केचित्कथं त्वामवजानन्ति ? । का च तेषां गतिरित्यत आह । अवजानन्तीत्यादिना । मानुषीं तनुं मूढानां मानुषवत्प्रतीतां न तु मनुष्यरूपां । उक्तं च मोक्षधर्मे । 'यत्किञ्चिदिह लोके वै देहबद्धं विशां पते । सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः । ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् । भूतान्तरात्मा वरदः सगुणो निर्गुणोऽपि च । भूतप्रलयमव्यक्तं शुश्रूषुर्नृपसत्तमे'ति । अवतार-प्रसङ्गे चैतदुक्तं । अतो नावताराश्च पृथक्शङ्क्याः । 'रूपाण्यनेकान्य-सृजत्प्रादुर्भावभवाय सः । वाराहं नारसिंहं च वामनं मानुषं तथे'ति तत्रैव प्रथमसर्गकाल एवावताररूपविभक्त्युक्तेः । अतो न तेषां मानुषत्वादिर्विना भ्रान्तिम् । भूतं महदीश्वरं चेति भूतमहेश्वरम् । तथा हि बाभ्रव्यशाखायाम् । 'अनाद्यनन्तं परिपूर्णरूपमीशं वराणा-मपि देववीर्यमि'ति । 'अस्य महतो भूतस्य निःश्वसितमि'ति च । 'ब्रह्मपुरोहित ब्रह्मकायिक महाराजिके'ति च मोक्षधर्मे ॥ तेषां फल-माह । मोघाशा इति । वृथाशाः । भगवद्द्वेषिभिराशासितमामुष्मिकं न किञ्चिदाप्यते । यज्ञादिकर्माणि च तेषां वृथैव । ज्ञानं च केनापि ब्रह्मरुद्रादिभक्त्याद्युपायेन न कश्चित्पुरुषार्थ आमुष्मिकस्तैराप्यत इत्यर्थः । वक्ष्यति च । 'तानहं द्विषतः क्रूरान्संसारेष्वि'त्यादि । मोक्षधर्मे च । 'कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् । मज्जन्ति पितर-स्तस्य नरके शाश्वतीः समाः । यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं हरिम् । कथं स न भवेद्द्वेष्य आलोकान्तस्य कस्यचिदि'ति । 'सर्वोत्कृष्टे ज्ञानभक्ती हि यस्य नारायणे पुष्करविष्टराद्ये । सर्वावमो द्वेषयुतश्च तस्मिन्भ्रूणानन्तघ्नोऽप्यस्य समो न चैवे'ति सामवेदे शाण्डिल्य-शाखायाम् । 'द्वेषाच्चैद्यादयो नृपाः' । 'वैरेण यन्नृपतयः शिशुपाल-

---

मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं

SGDF
Sri Gargeshwari Digital Foundation

पौंड्रसाल्वादयो गतिविलासविलोकनाद्यैः । ध्यायन्त आकृतधियः शयनासनादौ तत्साम्यमीयुरनुरक्तधियः पुनः किमि'त्यादि तु भगवतो भक्तप्रियत्वज्ञापनार्थं । नित्यध्यानस्तुत्यर्थं च । स्वभक्तस्य कदाचिच्छापबलाद्द्वेषिणोऽपि भक्तिफलमेव भगवान्ददातीति । भक्ता एव हि ते पूर्वं शिशुपालादयः शापबलादेव द्वेषिणः । तत्प्रश्ने पूर्वपार्षदत्वशापादिकथनाच्चैतज्ज्ञायते । अन्यथा किमिति तदप्रस्तुतमुच्यते? । भगवतः साम्यकथनं तु द्वेषिणामपि द्वेषमनिरूप्य पूर्वतनभक्तिफलमेव ददातीति ज्ञापयितुम् । 'न मे भक्तः प्रणश्यती'ति वक्ष्यति । न च भावो भवकरणमित्यादिविरोधः । द्वेषभाविनां द्वेष एव भवतीति हि युक्तम् । अन्यथा गुरुद्वेषिणोऽपि गुरुत्वं भवतीत्याद्यनिष्टमापद्यते । न चाकृतधीत्वे विशेषः । तेषामेव हिरण्यकशिप्वादीनां पापप्रतीतेः । 'हिरण्यकशिपुश्चापि भगवन्निन्दया तमः । विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावत' इति । 'यदनिन्दत्पिता मह्यं(मे त्वां) त्वद्भक्ते मयि चाघवानि'त्यारभ्य 'तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघादि'ति प्रह्लादेन भगवतो वरयाचनाच्च । बहुषु ग्रन्थेषु निषेधः । कुत्रचिदेव तदुक्तिरिति विशेषः । यस्मिंस्तदुच्यते तत्रैव च निषेध उक्तः । महातात्पर्यविरोधश्चोक्तः पुरस्तात् । अयुक्तिमद्वचो युक्तिमन्त्येव बलवन्ति वाक्यानि । युक्तयश्चोक्ता अन्येषां । न चैतेषां काचिद्गतिः । साम्येऽपि वाक्ययोर्लोकानुकूलमेव बलवत् । लोकानुकूलं च भक्तप्रियत्वं नेतरत् । उक्तं च तेषां पूर्वभक्तत्वम् । 'मन्येऽसुरान्भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तानि'त्यादि । अतो न भगवद्द्वेषिणां काचिद्गतिरिति सिद्धम् । द्वेषकारणमाह । राक्षसीमिति ॥ नेतरे द्विषन्तीति दर्शयितुं देवानाह । महात्मान इत्यादिना ॥

चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥ सततं

SGDF
Sri Gargeshwari Digital Foundation

सर्वत्रैक एव नारायणः स्थित इत्येकत्वेन। पृथक्त्वेन। सर्वतो वैलक्षण्येन। 'बहुधा हि तस्यरूपमाभाति। शुक्लमिव लोहितमिवाथो नीलमथार्जुनमि'ति हि सनत्सुजाते। दैवमेवापर इत्युक्तप्रकारेण बहवो वा बहुधा॥ प्रतिज्ञातं विज्ञानमाह। अहं क्रतुरित्यादिना। क्रतवोऽग्निष्टोमादयः। यज्ञो देवतामुद्दिश्य द्रव्यत्यागः। 'उद्दिश्य देवान्द्रव्याणां त्यागो यज्ञ इतीरित' इत्यभिधानात्॥ गम्यते मुमुक्षुभिरिति गतिः। तथा हि सामवेदे वासिष्ठशाखायाम्। 'अथ कस्मादुच्यते गतिरिति? । ब्रह्मैव गतिस्तद्धि गम्यते पापविमुक्तै'-रिति। साक्षादीक्षत इति साक्षी। तथाहि बाष्कलशाखायां। 'स साक्षादिदमद्राक्षीद्यदद्राक्षीत्तत्साक्षिणः साक्षित्वमि'ति। शरणमाश्रयः संसारभीतस्य। परमं यः परायणमिति ह्युक्तम्। 'नारायणं महाज्ञेयं विश्वात्मानं परायणमि'ति च। संहारकाले प्रकृत्या जगदत्र निधीयत इति निधानम्। तथा ह्यृग्वेदखिलेषु। 'अपश्यमप्यये मायया विश्वकर्मण्यदो जगन्निहितं शुभ्रचक्षुरि'ति। सत्कार्यं असत्कारणम्। 'सदभिव्यक्तरूपत्वात्कार्यमित्युच्यते बुधैः। असदव्यक्तरूपत्वात्कारणं चापि शब्दितमि'त्यभिधानात्। 'असच्च सच्चैव च यद्विश्वं सदसतः परमि'ति च भारते॥ तथापि मद्भजनमेवान्यदेवताभजनाद्वरमिति

कीर्तयन्तो मां यतन्तश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥ १४॥ ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते। एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम्॥ १५॥ अहं क्रतुरहं यज्ञः स्वधाऽह-महमौषधम्। मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्॥ १६॥ पिताऽह-मस्य जगतो माता धाता पितामहः। वेद्यं पवित्रमोंकार ऋक्सामयजु-रेव च॥ १७॥ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्। प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥ १८॥ तपाम्यहमहं वर्षं निगृह्णा-म्युत्सृजामि च। अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥ १९॥ त्रैविद्या

SGDF
Sri Gangeshwari Digital Foundation

दर्शयति । त्रैविद्या इत्यादिना ॥ अनन्याः अन्यदचिन्तयित्वा । तथा हि गौतमखिलेषु । 'सर्वं परित्यज्य मनोगतं यद्विना देवं केवलं शुद्धमाद्यं । ये चिन्तयन्तीह तमेव धीरा अनन्यास्ते देवमेवाविशन्ती'ति । 'कामं लोकेन(कालेन)महता एकान्तित्वात्समाहितैः । शक्यो द्रष्टुं स भगवान्प्रभासन्दृश्यमण्डल' इति मोक्षधर्मे । नित्यमभितः सर्वतो युक्तानाम् ॥ तर्ह्यहं क्रतुरित्याद्यसत्यमित्यत आह । येऽपीति ॥ कारणमाहाविधिपूर्वकत्वे । अहं हीति ॥ फलं विविच्याह । यान्तीति ॥ दुर्बलैस्त्वं पूजयितुमशक्यो महत्त्वादित्याशङ्क्याह । पत्रमिति । न त्वविहितपत्रादि । तस्यापराधत्वोक्तेर्वाराहादौ । भक्त्यैवाहं तुष्ट इति भावः । 'भक्तप्रियं सकललोकनमस्कृतं चे'ति भारते । 'एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः । एकान्तभक्तिर्गोविन्दे यत्सर्वत्रात्म-दर्शनम्' ॥ अतो यत्करोषि ॥ तर्हि स्नेहादिमत्वादल्पभक्तस्यापि कस्यचिद्बहुफलं ददासि । विपरीतस्यापि कस्यचिद्विपरीतमित्यत आह ।

मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति । एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥२१॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥२२॥ येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥२३॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥ यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥ समोऽहं

SGDF
Sri Gargeshwari Digital Foundation

समोऽहमिति। तर्हि न भक्तिः प्रयोजनमित्यत आह। ये भजन्तीति। 'मयि ते तेषु चाप्यहमि'ति मम ते वशास्तेषामहं वश इति। उक्तं च पैङ्गिखिलेषु। 'ये वै भजन्ते परमं पुमांसं तेषां वशः स तु ते तद्वशाश्चे'ति। तद्वशा एव ते सर्वे सर्वदा। तथापि बुद्धिपूर्वकत्वाबुद्धिपूर्वकत्वेन भेदः। उद्धवादिवच्छिशुपालादिवच्च। तच्चोक्तं तत्रैव। 'अबुद्धिपूर्वं योऽवशस्तस्य ध्यानात्पुनर्वशो भवते बुद्धिपूर्वमि'ति॥ न भवत्येव प्रायस्तद्भक्तो दुराचारस्तथापि बहुपुण्येन यदि कथञ्चिद्भवति तर्हि स साधुरेव मन्तव्यः॥ कुतः? क्षिप्रं भवति धर्मात्मा। देवदेवांशादिष्वेवं चैतद्भवति। उक्तं च शाण्डिल्यशाखायाम्। 'नाविरतो दुश्चरितान्नाभक्तो नासमाहितः। सम्यग्भक्तो भवेत्कश्चिद्वासुदेवेऽमलाशयः। देवर्षयस्तदंशाश्च भवन्ति क्व च ज्ञानत' इति। अतोऽन्यः कश्चिद्भवति चेद्दाम्भिकत्वेन सोऽनुमेयः। साधारणपापानां तु सत्सङ्गान्महत्यपि कथञ्चिद्भक्तिर्भवति। साधारणभक्तिर्वेतरेषाम्। 'स शठमतिरुपयाति योऽर्थतृष्णां तमधमचेष्टमवैहि नास्य भक्तमि'ति हि श्रीविष्णुपुराणे। 'सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसामि'ति च। 'वेदास्त्वधीता मम लोकनाथ तप्तं तपो नानृतमुक्तपूर्वम्। पूजां गुरूणां सततं करोमि परस्य गुह्यं न च भिन्नपूर्वम्। गुप्तानि चत्वारि यथागमं मे शत्रौ च मित्रे च समोऽस्मि नित्यम्। तं चापि देवं शरणं प्रपन्न एकान्तभावेन भजाम्यजस्रम्। एतैर्विशेषैः परिशुद्धसत्त्वः

सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥ क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति। कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥ मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२॥ किं पुनर्ब्राह्मणाः पुण्या

SGDF
Sri Gangeshwari Digital Foundation

कस्मान्न पश्येयमनन्तमेनमि'ति मोक्षधर्मे आचारस्य च साधनत्वो-क्तेश्च । ज्ञानाभावे च सम्यग्भक्त्यभावात् । तथा हि गौतमखिलेषु । 'विना ज्ञानं कुतो भक्तिः कुतो भक्तिं विना च तदि'ति । 'भक्तिः परे स्वानुभवो विरक्तिरन्यत्र चैतत् त्रिकमेककालमि'ति भागवते ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये नवमोऽध्यायः ९॥

ॐ ॥ उपासनार्थं विभूतीर्विशेषकारणत्वं च केषाञ्चिदनेना-ध्यायेनाह॥ प्रीयमाणाय । श्रुत्वा सन्तोषं प्राप्नुवते ॥ प्रभवं प्रभावम् । मदीयां जगदुत्पत्तिं वा । तद्वशत्वात्तस्येत्युच्यते । यद्यस्ति तर्हि देवा-दयो जानन्ति सर्वज्ञत्वादतो नास्तीति भावः । 'अहमादिर्हीं'ति तूत्पत्ति-रपि यस्य वशा कुतस्तस्य जनिरिति ज्ञापनार्थम् । 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथे'ति चोक्तम् । उक्तं चैतत्सर्वमन्यत्रापि । 'को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूवे'ति । 'न तत्प्रभावमृषयश्च देवा विदुः कुतोऽन्येऽल्पधृतिप्रमाणा'इत्यृग्वेदखिलेषु । अन्यस्त्वर्थो 'योमाम-जमि'ति वाक्यादेव ज्ञायते ॥ अनश्चेष्टयिता सर्वस्येत्यनादिः । अजत्वेन सिद्धेरितरस्य ॥ तत्प्रथयति । बुद्धिरित्यादिना । कार्याकार्यविनिश्चयो

भक्ता राजर्षयस्तथा। अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैव-मात्मानं मत्परायणः ॥ ३४ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ०राज-विद्याराजगुह्ययोगोनाम नवमोऽध्यायः ॥ ९ ॥ ॥ ॥ ॥

श्रीभगवानुवाच ॥ भूय एव महाबाहो श्रृणु मे परमं वचः। यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरम् । असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥ बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः । सुखं दुःखं

SGDF
Sri Gangeshwar Digital Foundation

बुद्धिः । ज्ञानं प्रतीतिः । 'ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिर्णय' इत्यभिधानं । दम इन्द्रियनिग्रहः । शमः परमात्मनिष्ठता 'शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रह' इति भागवते ॥ तुष्टिरलम्बुद्धिः । 'अलम्बुद्धिस्तथा तुष्टिरि'त्यभिधानात् ॥ पूर्वे सप्तर्षयः । 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्च महातेजा' इति मोक्षधर्मोक्ताः । ते हि सर्व पुराणेषूच्यन्ते । चत्वारः प्रथमाः स्वायम्भुवाद्याः । तेषां हीमाः प्रजाः न हि भविष्यतामिमाः प्रजा इति युक्तम् । विभागः प्राधान्यं च प्राथमिकत्वादेव भवति । गौतमखिलेषु चोक्तम् । 'स्वायम्भुवं रोचिषं च रैवतं च तथोत्तमम् । वेद यः स प्रजावानि'ति । पूर्वेभ्यो ह्युत्तरा जायन्त इति च तेषां प्राधान्यम् । अजातेषु च ज्यैष्ठ्यम् । तापसस्य भगवदवतारत्वादनुक्तिः । तच्च भागवते प्रसिद्धम् । मानसत्वं च सर्वेषां मनूनामुक्तं भागवते । 'ततो मनून्ससर्जान्ते मनसा लोकभावनानि'ति । अन्यपुत्रत्वं त्वपरित्यज्यापि शरीरं तद्भवति । प्रमाणं चोभयविधवाक्यान्यथानुपपत्तिरेव । पूर्व इति विशेषणाच्चैतत्सिद्धिः । मत्तो भावो येषां ते मद्भावाः । (ये) एते ब्रह्मणो मनसा जातास्ते मत्त एव जाता इति भावः ॥ सन्ति च भजन्तः केचिदित्याह । अहमित्यादिना ॥ ब्रह्म

भवो भावो भयं चाभयमेव च ॥ ४ ॥ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा । मद्भावा मानसा जाता एषां लोक इमाः प्रजाः ॥६॥ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः । सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥७॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८ ॥ मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् । कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ९॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्या-

SGDF
Sri Gargeshwari Digital Foundation

परिपूर्णम् । 'अथ कस्मादुच्यते परं ब्रह्म बृहति बृंहयति चे'ति श्रुतिः । बृह बृहि वृद्धाविति पठन्ति । 'परमं यो महद्ब्रह्मे'ति च । विविधमासीदिति विभुः । तथा हि वारुणशाखायाम् । 'विभु प्रभु प्रथमं मेहनावत' इति 'स ह्येव प्राभवद्विविधोऽभवदि'ति । 'सोऽकामयत बहु स्यांप्रजायेये'त्यादेश्च ॥ विभूतयो विविधभूतयः ॥ न जायतेऽर्दयति च संसारमिति जनार्दनः । तथा च बाभ्रव्यशाखायाम् । 'स भूतः स जनार्दन' इति 'स ह्यासीत्स नासीत्सोऽर्दयती'ति ॥ विष्णुः सर्वव्यापित्वप्रवेशित्वादेः । विष्लृ व्याप्तौ विश प्रवेशन इति च पठन्ति । 'गतिश्च सर्वभूतानां प्रजानां चापि भारत । व्याप्तौ मे रोदसी पार्थ कान्तिश्चाभ्यधिका मम । अधिभूतनिविष्टश्च तदिच्छुश्चास्मि भारत । क्रमणाच्चाप्यहं

त्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥ अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ ॥१२॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव । न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥ स्वयमेवात्मनाऽत्मानं वेत्थ त्वं पुरुषोत्तम । भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥ वक्तुमर्हस्यशेषेण दिव्याह्यात्मविभूतयः । याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥ कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् । केषु केषु च भावेषु चिन्त्योऽसि भगवान्मया ॥ १७ ॥ विस्तरेणात्मनो योगं विभूतिं च जनार्दन । भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥ श्रीभगवानुवाच ॥ हन्त ते कथयिष्यामि दिव्याह्यात्म विभूतयः । प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥ आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इन्द्रियाणां मनश्चास्मि भूताना-

SGDF
Sri Gangeshwari Digital Foundation

पार्थ विष्णुरित्यभिसंज्ञित' इति मोक्षधर्मे ॥ सुखरूपः पाल्यते लीयते च जगदनेनेति कपिलः । 'प्रीतिः सुखं कमानन्द' इत्यभिधानात् । 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'ति च । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति(ज्ञा)जायमानं च पश्येत्' । 'सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ती'ति बाभ्रव्यशाखायाम् ॥ आनन्दरूपत्वात्पूर्णत्वाल्लोकरमणत्वाच्च रामः । 'आनन्दरूपो निष्परिमाण एष लोकश्चैतस्माद्रमते तेन राम' इति शाण्डिल्यशाखायां । रश्चामश्चेति व्युत्पत्तिः ॥

मस्मि चेतना ॥ २२ ॥ रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसां । वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् । सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४ ॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः । गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं । ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥ आयुधानामहं वज्रं धेनूनामस्मि कामधुक् । प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥ अनन्तश्चास्मि नागानां वरुणो यादसामहं । पितॄणामर्यमा चास्मि यमः सम्यमतामहम् ॥ २९ ॥ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् । मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥ पवनः पवतामस्मि रामः शस्त्रभृतामहं । झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥ सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन । अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥ अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च । अहमेवाक्षयः कालो धाताऽहं विश्वतो मुखः ॥ ३३ ॥ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां । कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥ बृहत्साम तथा साम्नां गायत्री छन्दसामहम् । मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥ द्यूतं छलयतामस्मि तेज-

SGDF
Sri Gargeshwari Digital Foundation

आच्छादयति सर्वं वासयति वसति(च)सर्वत्रेति वासुः । देवशब्दार्थ उक्तः पुरस्तात् । 'छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहमि'ति मोक्षधर्मे । विशिष्टः सर्वस्मादासमन्तात्स एवेति व्यासः । तथा चाग्नेयशाखायाम् । 'स व्यासो वीति तमब्रवै विः सोऽधस्तात्स उत्तरतः स पश्चात्स पूर्वस्मात्स दक्षिणतः स उत्तरत इती'ति । 'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित'इति च ॥ मया विना यद्भूतं स्यात्तन्नास्ति । 'विश्वरूप अनन्तगति(ते)रनन्तभाग अनन्तग अनन्त' इत्यादि मोक्षधर्मे ॥ यद्यद्विभूतिमदिति विस्तरः । विष्ण्वादीनि तत्स्वरूपाण्येव । अन्यानि तु तेजोयुक्तानि । तथा च पैङ्गिखिलेषु । 'विशेषका रुद्रवैन्येन्द्रदेवराजन्याद्या अंशयुता अन्यजीवाः । कृष्णव्यासौ रामकृष्णौ च रामकपिलौ यज्ञप्रमुखाः स्वयं स' इति । 'स एवैको भार्गवदाशरथिकृष्णाद्यास्त्वंशयुता अन्यजीवा' इति गौतमखिलेषु । 'ऋषयो मनवो देवा मनुपुत्रा महौजसः । कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः । एते स्वांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमि'ति भागवते ऋष्यादीनंशयुतत्वेनोक्त्वा वराहादीन्स्वरूपत्वेनाह । तुशब्द एवार्थे । अन्यस्तु विशेषो न क्वाप्यवगतः । अंशत्वं तत्राप्यव-

---

स्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ॥ ३६ ॥ वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः । मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥ दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् । मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥ यच्चापि सर्वभूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥ नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप । एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥ यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥ ४१ ॥

SGDF
Sri Gargeshwari Digital Foundation

गतम् । 'उद्धवर्हात्मनः केशावि'ति । मृडयन्तीति बहुवचनं चायुक्तम् । न ह्यन्तरान्यदुक्त्वा पूर्वमपरामृश्य तत्क्रियोच्यमाना दृष्टा कुत्रचित् ॥ किमिति वक्ष्यमाणप्राधान्यज्ञापनार्थम् । न तूक्तनिष्फलत्वज्ञापनाय । तथासति नोच्येत । 'अज्ञात्वैनं सर्वविशेषयुक्तं देवं परं को विमुच्येत बन्धादि'ति च ऋग्वेदखिलेषु । त्वं तु बहुफलप्राप्तियोग्य इति तवेति विशेषणम् । अन्यस्तुत्यर्थत्वेन प्रसिद्धश्चैकत्र किंशब्दः । 'रागद्वेषौ यदि स्यातां तपसा किं प्रयोजनम् । तावुभौ यदि न स्यातां तपसा किं प्रयोजनमि'त्यादौ । प्राधान्यं च प्रसिद्धमेकत्र दर्शनात्सर्वत्र भगवद्दर्शनस्य 'यो मां पश्यति सर्वत्रे'त्यादौ ॥ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये दशमोऽध्यायः ॥ १० ॥

ॐ ॥ यथा श्रुते ध्यानं शक्यं तथा स्वरूपस्थितिरनेनाध्यायेनोच्यते ॥ प्रभुः समर्थः । 'नास्ति तस्मात्परं भूतं पुरुषाद्वै सनातना-

---

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ०विभूतियोगो-नाम दशमोऽध्यायः ॥ १० ॥ ॥ ॥ ॥ ॥

अर्जुन उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् । यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया । त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥ एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर । द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो । योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥ श्रीभगवानुवाच ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा । बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् । मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

SGDF
Sri Gurgeshwari Digital Foundation

दि'ति मोक्षधर्मे। 'प्रभुरीशः समर्थश्चे'त्यभिधानम्॥ हरिः सर्वयज्ञादि भागहारित्वात्। 'इडोपहूतं गेहेषु हरे भागं क्रतुष्वहम्। वर्णो मे हरितः श्रेष्ठस्तस्माद्धरिरिति स्मृत' इति मोक्षधर्मे॥ सर्वाश्चर्यमयं सर्वाश्चर्यात्मकम्॥ सहस्रशब्दोऽनन्तवाची। तदपि पाकशासनविक्रम इत्यादिवत्प्रत्यायनार्थमेव। तथाहृग्वेदखिलेषु। 'अनन्तशक्तिः परमोऽनन्तवीर्यः सोऽनन्ततेजाश्च ततस्ततोऽपी'ति। महातात्पर्याच्च प्राबल्यम्। न च परिमाणोक्त्या किञ्चित्प्रयोजनम्॥ अनेकशब्दोऽनन्तवाची। अनन्तबाहुमिति च वक्ष्यति। 'सर्वतः पाणिपादन्तदि'त्यादि च। 'विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्। सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एक'इत्यृग्वेदे। 'विश्वतश्चक्षुरुतविश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्। सम्बाहुभ्यां नमति सम्पतत्रैर्द्यावापृथिवीजनयन्देव एक'इति यजुर्वेदे। विश्वशब्दश्चानन्तवाची। 'सर्वं समस्तं विश्वं च अनन्तं पूर्णमेव चे'त्यभिधानात्।

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥८॥ सञ्जय उवाच॥ एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः। दर्शयामास पार्थाय परमं रूपमैश्वरम्॥९॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्। अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्॥१०॥ दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्। सर्वाश्चर्यमयं देवमनन्तं विश्वतो मुखम्॥११॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता। यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः॥१२॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥१३॥ ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः। प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥१४॥ अर्जुन उवाच॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्। ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्॥१५॥ अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्। नान्तं न मध्यं

SGDF
Sri Gurgeshwari Digital Foundation

'अनन्तपादं तमनन्तबाहुमनन्तवक्त्रं पुरुषं रूपमेकमि'ति बाभ्रव्यशाखायाम् । महत्त्वाद्युक्तिस्तु तदात्मकत्वेनापि भवति । अन्यथा'ऽनादिमत्परं ब्रह्मे'त्याद्ययुक्तं स्यात् । एकत्रानन्तान्यस्य रूपाणीत्यनन्तरूपः । अन्यत्र त्वपरिमाण इति । उक्तं ह्युभयमपि । 'परात्परं यन्महतो महान्तं यदेकमव्यक्तमनन्तरूपमि'ति यजुर्वेदे । अव्यक्तस्यानन्तत्वादेव महतो महत्वेऽपरिमेयत्वं सिध्यति । 'महान्तं च समावृत्य प्रधानं समवस्थितम् । अनन्तस्य न तस्यान्तः सङ्ख्यानं चापि विद्यत' इत्यादित्यपुराणे । तानि चैकैकानि रूपाण्यनन्तानि चैकत्र भवन्ति । 'असङ्ख्याता ज्ञानकास्तस्य देहाः सर्वे परिमाणविवर्जिताश्चे'त्यृग्वेदखिलेषु । 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते । उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभावि'ति । 'कृष्णस्य गर्भजगतोऽतिभरावसन्नपार्ष्णिप्रहारपरिरुग्णफणातपत्रमि'ति च भागवते । न चैतदयुक्तम् । अचिन्त्यशक्तित्वादीश्वरस्य । 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदि'ति श्रीविष्णुपुराणे । 'नैषा तर्केण मतिरापनेये'ति च श्रुतिः । अतिप्रसङ्गस्तु महातात्पर्यवशाद्वाक्यबलाच्चापनेयः । न हि घटवत्कश्चिदपि पदार्थो न दृष्ट इत्येतावता प्रमाणदृष्टः स निराक्रियते । केषुचित्पदार्थेषु वाक्यव्यवस्था अचिन्त्यशक्तित्वाभावादङ्गीक्रियते । 'गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्रशङ्का । चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाङ्गैर्हि तथा प्रतीताः । एवं परेऽन्यत्र श्रुताश्रुतानां गुणागुणानां च क्रमाद्व्यवस्थे'ति जाबालखिलश्रुतेश्च । उपचारत्वपरिहाराय न मध्यमिति । अन्यथाऽऽद्यन्ताभावेनैव तत्सिद्धेः । विश्वरूपः पूर्णरूपः । 'स विश्वरूपोऽनूनरूपो यतोऽयं सोऽनन्तरूपो न हि नाशोऽस्ति तस्ये'ति शाण्डिल्यशाखायाम् ॥ अनलार्कद्युतिमित्युक्ते मितत्वशङ्कामपाकरोति ।

न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम् ॥ १६ ॥ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् । पश्यामि त्वां

SGDF
Sri Gangeshwari Digital Foundation

अप्रमेयमिति ॥ शशिसूर्यनेत्रमित्यप्यहं क्रतुरित्यादिवत् । 'तदङ्गजाः सर्वसुरादयोऽपि तस्मात्तदङ्गेत्यृषिभिः स्तुतास्त' इत्यृग्वेदखिलेषु । 'चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायते'त्यादि च। बहुरूपत्वाद्ब्रह्माश्रयत्वं च तेषां युक्तम् ॥ 'मातापित्रोरन्तरङ्गः स एकरूपेण चान्यैः सर्वगतः स एक'इति वारुणश्रुतेः एकेनैव रूपेण द्यावापृथिव्योरन्तरं व्याप्तो भवति। पश्य मे पार्थ रूपाणीति बहूनि रूपाणि प्रतिज्ञातानि। मातापितरौ च पृथिवीद्यावौ । 'मा नो माता पृथिवी दुर्मतौ धात्' । 'मधु द्यौरस्तु नः पिते' त्यादि प्रयोगात् । न तु नियमतो भयप्रदं तत्स्वरूपम् । नारदस्य तदभावात् । केषाश्चित्तथा दर्शयति भगवान् । 'प्रीयन्ति केचित्तस्य रूपस्य दृष्टौ बिभेति कश्चिदभ्यसे सर्वतृप्तिरि'ति वारुणशाखायाम् । न तु तं सर्वे पश्यन्ति । अदृष्ट्वापि तन्निरूप्यभये द्रष्टुस्तथा प्रतिभाति। तथा च गौतमखिलेषु । 'दृष्ट्वा देवं मोदमाना अदृष्ट्वाऽप्येतद्भयाद्बिभ्यतो दृष्टवत्ते । पश्यन्ति तन्न्यस्तचक्षुर्मुखांस्तु

दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥ त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्। त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥ अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् । पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्॥ १९ ॥ द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः। दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्॥ ॥ २० ॥ अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति। स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ ॥२१॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च। गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्। बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥ २३ ॥ नभः स्पृशं दीप्तमनेकवर्णं

SGDF
Sri Gurgeshwari Digital Foundation

तस्मिन्नेवैते मनसो गतत्वादि'ति ॥ धर्मान्तरज्ञानार्थमेव को भवानिति पृच्छति। यथा कश्चित्किञ्चिन्नामादिकं जानन्नपि जातिज्ञानार्थं पृच्छति कस्त्वमिति । यदि' तमेव न जानाति तर्हि विष्णवित्येवं सम्बोधनं न स्यात् । त्वमक्षरमित्यादि च ।। कालशब्दो जगद्बन्धनच्छेदनज्ञानादि-सर्वभगवद्धर्मवाची । कल बन्धने, कल च्छेदने, कल ज्ञाने, कल काम-धेनुरिति च पठन्ति । प्रसिद्धश्च स शब्दो भगवति । 'नियतं काल-पाशेन बद्धं शक्र विकत्थसे । अयं स पुरुषः श्यामो लोकस्य हरति प्रजाः । बध्वा तिष्ठति मां रौद्रः पशून्रशनया यथे'ति मोक्षधर्मे ।

व्यात्ताननं दीप्तविशालनेत्रम् । दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २४ ॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि। दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवा-वनिपालसङ्घैः । भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योध-मुख्यैः ॥ २६ ॥ वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि। केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ ॥ २७ ॥ यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति । तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥ यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः। तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥ लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः । तेजोभिरापूर्यजग-त्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद। विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः। ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धं। मयैवैते निहताः पूर्वमेव

SGDF
Sri Gangeshwari Digital Foundation

विष्णुना बद्धो बलिर्वक्ति। 'विष्णौ चाधीश्वरे चित्तं धारयन्कालविग्रह' इति भागवते। प्रवृद्धः परिपूर्णोऽनादिर्वा। 'ऋतं च सत्यं चाभीद्धादि' तिं हि श्रुतिः। 'एतन्महद्भूतमनन्तमि'ति च। 'प्र विष्णुरस्तु तवसस्तवीयांस्त्वेषं ह्यस्य स्थविरस्य नामे'ति च। न तु वर्धनम्। 'नासौ जज्ञान न मरिष्यति नैधतेऽसावि'ति भागवते। 'यस्य दिव्यं हि तद्रूपं क्षीयते वर्धते न चे'ति मोक्षधर्मे। न कर्मणेति तु कर्मणापि न, किन्तु स्वयमिति। लोकान्समाहर्तुमिह विशेषेण प्रवृत्तः। श्रात्रादींश्वर्त इत्यपिशब्दः। प्रत्यनीकत्वं तु परस्परतया। सर्वेऽपि न भविष्यन्ति। अक्षौहिण्यादिभेदेन वहुवचनं च युक्तम्॥ योऽस्य शिरश्छिन्नं भूमौ पातयति तच्छिरो भेत्स्यतीति तत्पितुर्वराज्जयद्रथोऽपि विशेषेणोक्तः। (प्र)सवरा वासवी शक्तिरिति कर्णः॥ यदेतद्वक्ष्यमाणं तत्स्थाने युक्तमेवेत्यर्थः। अग्नीषोमाद्यन्तर्यामितया जगद्धर्षणादेर्हृषीकेशः। केशत्वं त्वंशूनां तन्नियतत्वादेः। प्रमाणं तु शशिसूर्यनेत्रमित्यत्रोक्तम्। हृषीकाणामिन्द्रियाणामीशत्वाच्च हृषीकेशः। तेषां विशेषत ईशत्वं च 'यः प्राणे तिष्ठन्नि'त्यादौ सिद्धम्। 'न मे हृषीकाणि पतन्त्यसत्पथ' इत्यादिप्रयोगाच्च। इतरोऽर्थो मोक्षधर्मेषु सिद्धः। 'सूर्याचन्द्रमसौ शश्वत्केशैर्मे अंशुसंज्ञितैः। बोधयंस्थापयंश्चैव जगदुत्पद्यते पृथक्। बोधनात्स्थापनाच्चैव जगतो हर्षसम्भवात्। अग्नीषोमकृतैरेभिः कर्मभिः पाण्डुनन्दन। हृषीकेशोऽहमीशानो वरदो लोकभावन'इति॥ कथं स्थान इति तदाह। कस्मादि-

---

निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधमुख्यान्। मया हतांस्त्वं जहि मा व्यथिष्ठा युद्ध्यस्व जेताऽसि रणे सपत्नान्॥ ३४॥ सञ्जय उवाच॥ एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी। नमस्कृत्य भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥ ३५॥ अर्जुन उवाच॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च। रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः॥ ३६॥ कस्माच्च ते न

SGDF
Sri Gargeshwari Digital Foundation

त्यादिना । पूर्णश्चासावात्मा चेति महात्मा । आत्मशब्दश्चोक्तो भारते । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यत'इति । तत्परं सदसतोः परम् । 'असच्च सच्चैव च यद्विश्वं सदसतः परमि'ति च भारते ॥ एकस्त्वमेव कारयिता नान्योऽ

नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे । अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं । वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च । नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ॥ ३९ ॥ नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व । अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति । अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥ यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु । एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥ पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् । नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः ॥४३॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् । पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥ अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे । तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव । तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् । तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः । एवं रूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्

SGDF
Sri Gurgeshwari Digital Foundation

स्त्यथापि ॥ स्वकं रूपं तु भ्रान्तप्रतीत्या । अन्यथा तदपि स्वकमेव । प्रमाणानि तूक्तानि पुरस्तात् ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये एकादशोऽध्यायः ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥

ॐ ॥ अव्यक्तोपासनाद्भगवदुपासनस्योत्तमत्वं प्रदर्श्य तदुपायं प्रदर्शयत्यस्मिन्नध्याये ॥ तदुपासनमपि मोक्षसाधनं प्रतीयते । 'श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रावि'ति । 'अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यत' इति च । अव्यक्तं च महतः परम् । 'महतः परमव्यक्तमि'त्युक्तपरामर्शोपपत्तेः । 'उपास्य तां श्रियमव्यक्तसंज्ञां भक्त्या मर्त्यो मुच्यते सर्वबन्धैरि'ति सामवेदे आग्निवेश्यशाखायाम् । महच्च माहात्म्यं तस्या वेदेषूच्यते । 'चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते । तस्यां सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयमि'ति । 'चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्त' इति च ।

ममेदम् । व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९॥ सञ्जय उवाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः । आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥ अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन । इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ॥ ५२ ॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥ भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ ५४ ॥ मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ५५ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु० विश्वरूपदर्शनयोगोनामैकादशोऽध्यायः ॥ ११ ॥ ॥ ॥ ॥ ॥

SGDF
Sri Gangeshwari Digital Foundation

'अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैरि'त्यारभ्य 'अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्। मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं। अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्। अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा उ। अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वं १ न्तः समुद्रे। परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूवे'त्यादि च। 'त्वया जुष्टः स ऋषिर्भवति देवि त्वया ब्रह्मा गतश्रीरुत त्वये'ति च। इति शङ्का कस्यचिद्भवति। अतो जानन्नपि सूक्ष्मयुक्तिज्ञानार्थं पृच्छति। एवमिति। एवंशब्देन दृष्टश्रुतरूपं मत्कर्मकृदित्यादिप्रकारश्च परामृश्यते। अव्यक्तं प्रकृतिः। 'महतः परमव्यक्तमि'ति प्रयोगात्। 'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्। प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवदि'ति भागवते। अक्षरं च तत्। 'अक्षरात्परतः पर' इति श्रुतेः। परं तु ब्रह्म न हि भगवतोऽन्यत्। 'आनन्दमानन्दमयेऽवसाने सर्वात्मके ब्रह्मणि वासुदेव' इति भागवते। रूपं चेदृशं साधितं पुरस्तात्। उपासनं च तथैव कार्यं। 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादि'त्यारभ्य 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत' इति हि साभ्यासा। आदित्यवर्णत्वादिश्च न वृथोपचारत्वेनाङ्गीकार्यः। तथाच सामवेदे सौकरायणश्रुतिः। 'स्थाणुर्ह वै प्राजापत्यः स प्रजापतिं पितरमेत्योवाच। मुमुक्षुभिः साधुभिः पूतपापैः किमु ह वै तारकं तारवाच्यम्। ध्यानं च तस्यास्तरुचेः कथं स्याद्ध्येयश्च कः पुरुषोऽलोमपाद इति। तं होवाच। एषविष्णुस्तारको

अर्जुन उवाच॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥१॥ श्रीभगवानुवाच॥

SGDF
Sri Gangeshwari Digital Foundation

ऽलोमपादो ध्यानं च तस्याप्तरुचेर्वदामि । सोऽनन्तशीर्षो बहुवर्णः सुवर्णो ध्येयः स वै लोहितादित्यवर्णः । श्यामोऽथ वा हृदये सोऽष्टबाहुरनन्तवीर्योऽनन्तबलः पुराण' इति । अरूपत्वादेस्तु गतिरुक्ता पुरस्तात् । पुरुषभेदश्च प्रश्नादौ प्रतीयते । 'त्वां पर्युपासते ये चाप्यक्षरमि'त्यादौ ॥ भवन्तु त्वदुपासका एवोत्तमाः । इतरेषां तु किं फलमित्यत आह । ये त्वित्यादिना । अनिर्देश्यत्वं चोक्तं भागवते मायायाः । 'अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चय' इति । ईश्वरस्तु दैवशब्देनोक्तो दैवमन्ये पर इत्यत्र । उक्तं च सामवेदे काषायणश्रुतौ । 'नासदासीन्नो सदासीत्तदानीमि'ति 'न महाभूतं नोपभूतं तदासीदि'त्याद्यारभ्य तम आसीत्तमसा गूळ्हमग्र' इति । 'तमो ह्यव्यक्तमजरमनिर्देश्यमेषा ह्येव प्रकृतिरि'ति । सर्वगाऽचिन्त्यादिलक्षणा च सा । तथा हि मोक्षधर्मे । 'नारायणगुणाश्रयादजरादतीन्द्रियादग्राह्यादसम्भवतः असत्यादहिंस्राल्ललामाद्वितीयप्रवृत्तिविशेषादवैरादक्षयादमरादक्षरादमूर्तितः सर्वस्याः सर्वकर्तुः शाश्वततमस' इति । 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत' इति मानवे । 'कूटस्थोऽक्षर उच्यत' इति वक्ष्यति । कूट आकाशे स्थिता कूटस्था । 'आकाशे संस्थिता ह्येषा ततः कूटस्थिता मते'त्यग्वेदखिलेषु । 'सा सर्वगा निश्चला लोकयोनिः सा चाक्षरा विश्वगा विरजस्के'ति सामवेदे गौपवनशाखायाम् ॥ कथं तर्हि त्वदुपासकानामुत्तमत्वमित्यत आह । क्लेश इति । अव्यक्ता गतिर्दुःखं ह्यवाप्यते । गतिर्मार्गः । अव्यक्तो-

---

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥ सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां । अव्यक्ता हि गतिर्दुःखं देहवद्भिर-

SGDF
Sri Gurgeshwari Digital Foundation

पासनद्वारको मत्प्राप्तिमार्गो दुःखमाप्यत इत्यर्थः । अतिशयोपासन-सर्वेन्द्रियातिनियमनसर्वत्रसमबुद्धित्वसर्वभूतहितेरतत्वातिसुष्ठ्वाचारसम्यग्विष्णुभक्त्यादिसाधनसन्दर्भमृते नाव्यक्तापरोक्ष्यम् । तदृते च न विष्णुप्रसादः । सत्यपि तस्मिन्न सम्यग्भगवदुपासनमृते । नर्ते च तं मोक्षः । विनाऽव्यक्तोपासनं भवत्येव भगवदुपासकानां मोक्ष इति क्लेशिष्ठोऽयं मार्ग इति भावः । तथाप्यपरोक्षीकृताव्यक्तानां सुकरं भगवदुपासनमित्येतावत्प्रयोजनम् । तत्रापि योऽव्यक्तापरोक्ष्ये प्रयासः तावता प्रयत्नेन यदि भगवन्तमुपास्ते ऊनेन वा तदा भगवदापरोक्ष्यमेव भवतीति द्वितीयमधिकम् । इन्द्रियसंयमाद्यूनभावे सत्युपासकस्यापि देवी नातिप्रसादमेतीति । देवस्तु तानि साधनानि भक्तिमतस्स्वयमेवाप्रयत्नेन ददातीति चातिसौकर्यमिति भक्तानां भगवदुपासने इतरत्र क्लेशोऽधिकतरः । तदेतत्सर्वं पर्युपासते सन्नियम्याधिकतर इति परि-सं-तरप्शब्दैः प्रतीयते । सामवेदे माधुच्छन्दसशाखायां चोक्तम् । 'भक्ताश्च येऽतीव विष्णावतीवजितेन्द्रियाः सम्यगाचारयुक्ताः । उपासते तां समबुद्धयश्च तेषां देवी दृश्यते नेतरेषाम् । दृष्टा च सा भक्तिमतीव विष्णौ दत्वोपास्तौ सर्वविघ्नांश्छिनत्ति । उपास्य तं वासुदेवं विदित्वा ततस्ततः शान्तिमत्यन्तमेती'ति । उक्तं च सामवेदे अयास्यशाखायाम् । 'प्रसन्नो भविता देवः सोऽव्यक्तेन सहैव तु । यावता तत्प्रसादो हि तावतैव न संशयः । न तत्प्रसादमात्रेण प्रीयते स महेश्वरः । तस्मिन्प्रीते तु सर्वस्य प्रीतिस्तु भवति ध्रुवम् । यद्यप्युपासनाधिक्यं तथापि गुणदो हि सः । मुक्तिदश्च स एवैको नाव्यक्तादिस्तु कश्चने'ति । 'ममात्मभावमिच्छन्तो यतन्ते परमात्मन' इति च मोक्षधर्मे श्रीवचनम् । 'धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि । प्रश्रिते दानशीले च सदैव निवसाम्यहमि'ति च । महतः परं तु ब्रह्मैव । तथा हि भगवता सयुक्तिकमभिहितम् । 'वदतीति चेन्न

SGDF
Sri Gargeshwari Digital Foundation

प्राज्ञो हि'। 'त्रयाणामेव चैवमुपन्यासः प्रश्नश्चे'त्यादि। तमिति पुल्लिङ्गाच्चैतत्सिद्धिः। महतः परत्वं त्वव्यक्तपरस्य भवत्येव। तथाचाग्निवेश्यशाखायाम्। 'अनाद्यनन्तं महतः परं ध्रुवमि'ति। 'परो हि देवः पुरुहूतो महत्त' इति। न चाव्यक्तस्वरूपं भगवता निषिद्धम्। भारतादौ साधितत्वात्। 'शरीररूपकविन्यस्तगृहीतेरि'त्यादौ साङ्ख्यप्रसिद्धं प्रधानं निषिध्य वैदिकमव्यक्तमेवोक्तम्। तथाच सौकरायणश्रुतिः। 'शरीररूपिका साऽशरीरस्य विष्णोर्यतः प्रिया सा जगतः प्रसूतिरि'ति। सुव्रतानां क्षिप्रं महदैश्वर्यं देवी ददाति न देव इति विशेषः। 'सुवर्णवर्णां पद्मकरां च देवीं सर्वेश्वरीं व्याप्तजटां च बुध्वा। सैवेति वै सुव्रतानां तु मासान्महाविभूतिं श्रीस्तु दद्यान्न देव'इत्यृग्वेदखिलेषु॥ मदुपासकानां भक्तानां न कश्चित्क्लेश इति दर्शयति। ये त्वित्यादिना। उक्तं च सौकरायणश्रुतौ। 'उपासते ये पुरुषं वासुदेवमव्यक्तादेरीप्सितं किं नु तेषामि'ति। 'तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदैवताः। अहमेव गतिस्तेषां निराशीः कर्मकारिणामि'ति मोक्षधर्मे॥ अज्ञानपूर्वादभ्यासाज्ज्ञानमेव विशिष्यते। ज्ञानमात्रात्सज्ज्ञानं ध्यानम्। तथा च सामवेदे अनभिम्लानशाखायाम्। 'अधिकं केवला-

---

वाप्यते॥५॥ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते॥६॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्॥७॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥८॥ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥९॥ अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥ अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥११॥ श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।

SGDF
Sri Gangeshwari Digital Foundation

भ्यासाज्ज्ञानं तत्सहितं ततः । ध्यानं ततश्चापरोक्ष्यं ततः शान्तिर्भविष्यती'ति । ध्यानात्कर्मफलत्याग इति स्तुतिः । अन्यथा कथमसमर्थोऽसीत्युच्येत ? । 'तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत' इति चोक्तम् । 'सर्वाधिकं ध्यानमुदाहरन्ति ध्यानाधिके ज्ञानभक्ती परात्मन् । कर्माफलाकाङ्क्षमथो विरागस्त्यागश्च न ध्यानकलाफलार्ह' इति काषायणशाखायाम् । वाक्यसाम्येप्यसमर्थविषयत्वोक्तेस्तात्पर्याभाव इतरत्र प्रतीयते । ध्यानादिप्राप्तिकारणत्वाच्च त्यागस्तुतिर्युक्ता । केवलध्यानात्फलत्यागयुक्तं ध्यानमधिकम् । ध्यानयुक्तस्त्याग एवात्रोक्तः । अन्यथा कथं त्यागाच्छान्तिरनन्तरमित्युच्यते ? । कथं च ध्यानादाधिक्यम् ? । तथा च गौपवनशाखायाम् । 'ध्यानात्तु केवलात्त्यागयुक्तं तदधिकं भवेदि'ति । न हि त्यागमात्रानन्तरमेव मुक्तिर्भवति । भवति च ध्यानयुक्तात् । केवलत्यागस्तुतिरेवमपि भवति । यथाऽनेन युक्तो जेता नान्यथेत्युक्ते । सर्वारम्भपरित्यागी शुभाशुभपरित्यागीत्यादेः सामान्यविशेषव्याख्यानव्याख्येयभावेनापुनरुक्तिः ॥ हर्षादिभिर्युक्त इत्युक्ते कादाचित्कमपि भवतीति यो न हृष्यतीत्यादि ।

ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १३ ॥ सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः । मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥ १४ ॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः । हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः । सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥ यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति । शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ॥ समः शत्रौ च मित्रे च तथा मानापमानयोः । शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥ तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन

SGDF
Sri Gargeshwari Digital Foundation

उपचारपरिहारार्थं पूर्वम्। आधिक्यज्ञापनार्थं भक्त्यभ्यासः। ये तु सर्वाणि कर्माणीत्यादेः प्रपञ्च एषः ॥ पिण्डीकृत्योपसंहरति। ये तु धर्म्यामृतमिति। धर्मो विष्णुस्तद्विषयं धर्म्यम्। धर्म्यं मृत्यादिसंसार-नाशकं चेति धर्म्यामृतम्। श्रदास्तिक्यम्। 'श्रन्नामास्तिक्यमुच्यत' इत्यभिधानात्। तद्दधानाः श्रद्दधानाः॥ इति श्रीमदानन्दतीर्थभगवत्पा-दाचार्यविरचिते गीताभाष्ये द्वादशोऽध्यायः ॥ १२ ॥ ॥ ॥

ॐ ॥ पूर्वोक्तज्ञानज्ञेयक्षेत्रपुरुषान्पिण्डीकृत्य विविच्य दर्शय-त्यनेनाध्यायेन ॥ यद्विकारि येन विकारेण युक्तम्। यतश्च यत् यतो याति प्रवर्तते। स च प्रवर्तकः। यतश्च यदित्यस्मात्प्रवर्तते। क्षेत्रमिति-वचनम्। स च य इति स्वरूपमात्रम् ॥ ब्रह्मसूत्राणि शारीरकसूत्राणि॥ इच्छादयो विकाराः॥ स च यो यत्प्रभावश्चेति वक्तुं तज्ज्ञानसाधना-न्याह। अमानित्वमित्यादिना। आत्माल्पत्वं ज्ञात्वाऽपि महत्त्वप्रदर्शनं

केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु० भक्तियोगोनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ ॥ ॥ ॥ ॥

अर्जुन उवाच ॥ प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च। एतद्वे-दितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ १ ॥ श्रीभगवानुवाच ॥ इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥ ॥ २ ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ ३ ॥ तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्। स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ४ ॥ ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्। ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ५ ॥ महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ६ ॥ इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ७ ॥ अमानित्वमदम्भित्व-

SGDF
Sri Gargeshwari Digital Foundation

दम्भः । 'ज्ञात्वाऽपि स्वात्मनोऽल्पत्वं दम्भो माहात्म्यभावनमि'ति ह्यभिधानम् । आर्जवं मनोवाक्कायकर्मणामवैपरीत्यम् ॥ सक्तिः स्नेहः । स एवातिपक्वोऽभिष्वङ्गः । 'स्नेहः सक्तिः स एवातिपक्वोऽभिष्वङ्ग उच्यत' इत्यभिधानम् ॥ तत्त्वज्ञानार्थदर्शनम् । अपरोक्षज्ञानार्थं शास्त्रदर्शनम् ॥ परं ब्रह्मेति स च य इति प्रतिज्ञातमुच्यते । अन्यच्च प्रभाव इति । आदिमद्देहादिवर्जितमनादिमत् । अन्यथाऽनादीत्येव स्यात् ॥ सर्वेन्द्रियाणि गुणांश्चाभासयतीति सर्वेन्द्रियगुणाभासम् । इन्द्रियवर्जितत्वाद्यर्थ उक्तः पुरस्तात् । विकारान्तर्भावाज्ज्ञानसाधनं प्रथमत उक्तम् । बहुत्वात्साधनात्युपयोगात्प्रभावः ॥ यतश्च यदिति वक्तुं प्रकृतिविकारपुरुषान्सङ्क्षिप्याह । गुणाः सत्त्वादयः । तेषामल्पो विशेषो लयात्सर्गे

महिंसा क्षान्तिरार्जवं । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥८॥ इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ९ ॥ असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥१०॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ ११ ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं। एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ॥१२॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १३ ॥ सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १५ ॥ बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १६ ॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितं । भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १७ ॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १८ ॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १९ ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी

SGDF
Sri Gargeshwari Digital Foundation

इति विकाराः पृथगुक्ताः । 'कार्याकार्यगुणास्तिस्रो यतः स्वल्पोद्भवा जनावि'ति माधुच्छन्दसशाखायाम् ॥ कार्यं शरीरम् । 'शरीरं कार्यमुच्यत' इत्यभिधानम् । कारणानीन्द्रियाणि । भोगोऽनुभवः । स हि चिद्रूपत्वादनुभवति । प्रकृतिश्च जडत्वात्परिणामिनी । 'कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः । भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परमि'ति भागवते ॥ यतश्च यदित्याह । उपद्रष्टेति । अनुमन्ता अन्वनुविशेषतो निरूपकः ॥ पुरुषः सुखदुःखानामिति जीव उक्तः । पुरुषं प्रकृतिं चेति जीवेश्वरौ सहैवोच्येते । अन्यत्र महातात्पर्यविरोधः । उत्कर्षे हि महातात्पर्यम् । तथा हि सौकरायणश्रुतिः । 'अवाच्योत्कर्षे महत्वात्सर्ववाचां सर्वन्यायानां च महत्तत्परत्वम् । विष्णोरनन्तस्य परात्परस्य तच्चापि ह्यस्त्येव न चात्र शङ्का । अतो विरुद्धं तु यदत्र मानं तदक्षजादावथवापि युक्तिः । न तत्प्रमाणं कवयो वदन्ति न चापि युक्तिर्ह्यूनमतिर्हि दृष्टेरि'ति । अतो युक्तिभिरप्येतदपलापो न युक्तः । अतो यया युक्त्या विद्यमानत्वादि कल्पयति साऽप्याभासरूपेति सदेव माहात्म्यं वेदैरुच्यत इति सिद्ध्यति । अवान्तरं च तात्पर्यं तत्रास्ति । उक्तं च तत्रैव । 'अवान्तरं तत्परत्वं च सत्वे महद्वाप्येकत्वाच्च तयोरनन्त' इति । श्यामत्वाद्यभिधानाच्च । युक्तं च पुरुषमतिकल्पितयुक्त्यादेराभासत्वम् । अज्ञानसम्भवात् । न तु स्वतः प्रमाणस्य वेदस्याभासत्वम् । अदर्शनं च सम्भवत्येव पुंसां बहूनामप्य-

---

उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ २० ॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २१ ॥ पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् । कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २२ ॥ उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २३ ॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह । सर्वथा वर्तमानोऽपि न स

SGDF
Sri Gangeshwari Digital Foundation

ज्ञानात् । तर्ह्यस्मदनधीतश्रुत्यादौ विपर्ययोऽपिस्यादिति वाच्यम् । यतस्तत्रैवाह । 'नैतद्विरुद्धा वाचो नैतद्विरुद्धा युक्तय इति ह प्रजापतिरुवाच प्रजापतिरुवाचे'ति । तद्विरुद्धं जीवसाम्यम् । आभास एव चेति चोक्तम् । 'जनमेजय उवाच । बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु । को ह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति । वैशम्पायन उवाच । नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह । बहूनां पुरुषाणां हि यथैका योनिरुच्यते । तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमि'ति मोक्षधर्मे । न चैतत्सर्वं स्वप्नेन्द्रजालवत् । 'वैधर्म्याच्च न स्वप्नादिवदि'ति भगवद्वचनम् । न च स्वप्नादिवदेकजीवकल्पितत्वे मानं पश्यामः । विपर्यये मा तूक्ता द्वितीये । उक्तं चायास्यशाखायाम् । 'स्वप्नो ह वा अयं चञ्चलत्वान्न च स्वप्नो न हि विच्छेद एतदिती'ति । नायं दोषः । नहीश्वरस्य जीवैक्यमुच्यते । जीवस्य हीश्वरैक्यमिति ध्येयम् । तदपि न निरुपाधिकम् । अतो न प्रतिबिम्बत्वविरोध्यैक्यम् । तथा च माधुच्छन्दसश्रुतिः । 'ऐक्यं चापि प्रातिबिम्ब्येन विष्णोर्जीवस्यैवैतदृचयो वदन्ती'ति । अहंग्रहोपासने च फलाधिक्यमाग्निवेश्यश्रुतिसिद्धम् । 'अहंग्रहोपासकस्तस्य साम्यमभ्याशो ह वा अश्नुते नात्र शङ्के'ति । 'तदीयोऽहमिति ज्ञानमहंग्रह इतीरित' इति वामने । 'तद्वशत्वात्तु सोऽस्मीति भृत्यैरेव न तु स्वत' इति च । प्रातिबिम्ब्येन सोऽस्मि भृत्यश्चेति भावना । तथाह्ययास्यशाखायाम् । 'भृत्यश्चाहं प्रातिबिम्ब्येन सोऽस्मीत्येवं ह्युपास्यः परमः पुमान्स'इति । प्रातिबिम्ब्यं च तत्साम्यमेव ॥ साङ्ख्येन वेदोक्तभगवत्स्वरूपज्ञानेन । कर्मिणामपि श्रुत्वा ज्ञात्वा ध्यात्वा दृष्टिः । श्रावकाणां च ज्ञात्वा ध्यात्वा । साङ्ख्यानां च ध्यात्वा ।

भूयोऽभिजायते ॥ २४ ॥ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना । अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ २५ ॥ अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥२६॥

SGDF
Sri Gangeshwari Digital Foundation

तथा च गौपवनश्रुतिः । 'कर्मकृच्चापि तच्छ्रुत्वा ज्ञात्वा ध्यात्वाऽनु-
पश्यति । श्रावकोऽपि तथा ज्ञात्वा ध्यात्वा ज्ञान्यपि पश्यति । अन्यथा
तस्य दृष्टिर्हि कथञ्चिन्नोपजायत' इति । अन्य इत्यशक्तानामप्युपायदर्श-
नार्थम् ॥ पुनश्च प्रकृतिपुरुषेश्वरस्वरूपं साम्यादिधर्मयुक्तमाह । याव-
दित्यादिना ॥ आत्मानं चाकर्तारं यः पश्यति स पश्यति ॥ एकस्थ-
मेकस्मिन्नेव विष्णौ स्थितम् । तत एव च विष्णोर्विस्तारम् ॥ न च
व्ययादिस्तस्येत्याह । अनादित्वादिति । सादि हि प्रायो व्ययि गुणा-
त्मकं च । न करोतीत्यादेरर्थ उक्तः पुरस्तात् । न लौकिकक्रियादि-
स्तस्य । अतो 'न प्रज्ञमि'त्यादिवदिति ॥ भूतेभ्यः प्रकृतेश्च मोक्ष-
साधनम् अमानित्वादिकम् ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य-
विरचिते गीताभाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि
भरतर्षभ ॥ २७ ॥ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं । विनश्यत्स्व-
विनश्यन्तं यः पश्यति स पश्यति ॥ २८ ॥ समं पश्यन्हि सर्वत्र
समवस्थितमीश्वरम् । न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां
गतिम् ॥ २९ ॥ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः । यः
पश्यति तथात्मानमकर्तारं स पश्यति ॥ ३० ॥ यदा भूतपृथग्भाव-
मेकस्थमनुपश्यति । तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ ३१ ॥
अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः । शरीरस्थोऽपि कौन्तेय न
करोति न लिप्यते ॥ ३२ ॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथाऽत्मा नोपलिप्यते ॥ ३३ ॥ यथा प्रकाशयत्येकः
कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥
॥ ३४ ॥ क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा । भूतप्रकृतिमोक्षं च
ये विदुर्यान्ति ते परम् ॥ ३५ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु० क्षेत्र-
क्षेत्रज्ञयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥

SGDF
Sri Gargeshwari Digital Foundation

ॐ ॥ साधनं प्राधन्येनोत्तरैरध्यायैर्वक्ति ॥ महद्ब्रह्म प्रकृतिः । सा च श्रीभूदुर्गेति भिन्ना । उमासरस्वत्याद्यास्तु तदंशयुता अन्य-जीवाः । तथा च काषायणश्रुतिः । 'श्रीर्भूर्दुर्गा भगवती तु माया सा लोकसृतिर्जगतो बन्धिका च । उमा वागाद्या अन्यजीवास्तदंशा-स्तदात्मना सर्ववेदेषु गीता'इति । मम योनिरिति गर्भाधानार्था योनिः । न तु माता । वाक्यशेषात् । तथा हि सामवेदे शार्कराक्ष-श्रुतौ । 'विष्णोर्योनिर्गर्भसन्धारणार्था महामाया सर्वदुःखैर्विहीना । तथात्मानं दुःखिवन्मोहनार्थं प्रकाशयन्ती सह विष्णुना से'ति । अतः सीतादुःखादिकं सर्वं मृषाप्रदर्शनमेव । तथा कूर्मपुराणे । 'न चेयं भूः' । तथा च सौकरायणश्रुतिः । 'अन्या भूर्भूरियं तस्य छाया-भूताऽवमा सा हि भूतैकयोनिरि'ति । 'अवाप स्वेच्छया दास्यं जगतां प्रपितामही'त्याद्यनभिम्लानश्रुतिः । मत्स्यपुराणोक्तमपि स्वेच्छयैव । महद्ब्रह्मशब्दवाच्याऽपि प्रकृतिरेव । 'महती ब्रह्मणी द्वे तु प्रकृतिश्च महेश्वर'इति तत्रैव ॥ बन्धप्रकारं दर्शयति साधनानुष्ठानाय सत्व-मित्यादिना ॥ रज इति तृष्णासङ्गयोः समुद्भवम् । तयोः कारणम् ॥

श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् । यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ ॥ २ ॥ ममयोनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥ सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः । तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥ सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥ तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् । तन्नि-बध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥ सत्त्वं

SGDF
Sri Gargeshwari Digital Foundation

अज्ञानं जायते यतस्तदज्ञानजम् । 'प्रमादमोहौ तमस' इति वाक्यशेषात् ॥ रजसस्तु फलं दुःखमित्यल्पसुखं दुःखं । तथा हि शार्कराक्षशाखायां । 'रजसो ह्येव जायते मात्रया सुखं दुःखं तस्मात्तान्सुखिनो दुःखिन इत्याचक्षत' इति । अन्यथा दुःखस्यातिकष्टत्वात् । तमोऽधिकत्वं रजसो न स्यात् ॥ परिणामिकर्तारं गुणेभ्योऽन्यं न पश्यति । अन्यथा 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमि'ति श्रुतिविरोध इति । 'नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभु-रि'ति मोक्षधर्मे ॥ प्रायो न द्वेष्टि न काङ्क्षति । तथा हि सामवेदे

सुखे सञ्जयति रजः कर्मणि भारत । ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ ९ ॥ रजस्तमश्चाभिभूय सत्त्वं भवति भारत । रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥ सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥११॥ लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा । रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ ॥१२॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च । तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥ यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् । तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥ रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥ कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् । रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥ सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥ ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥ नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् । जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुन उवाच ॥ कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥ श्रीभगवानुवाच ॥ प्रकाशं च प्रवृत्तिं

SGDF
Sri Gangeshwari Digital Foundation

भाल्लवेयशाखायां । 'रजस्तमःसत्वगुणान्प्रवृत्तान्प्रायो न च द्वेष्टि न चापि काङ्क्षते । तथापि सूक्ष्मं सत्त्वगुणं च काङ्क्षेद्यदि प्रविष्टं सुतमश्च जह्यादि'ति । 'न हि देवा ऋषयश्च सत्त्वस्था नृपसत्तम । हीनाः सत्त्वेन सूक्ष्मेण ततो वैकारिका मताः । कथं वैकारिको गच्छेत्पुरुषः पुरुषोत्तममि'ति मोक्षधर्मे । 'सात्विकः पुरुषव्याघ्र भवेन्मोक्षार्थनिश्चित' इति च ॥ तुल्यत्वार्थ उक्तः पुरस्तात् ॥ ब्रह्मवत् प्रकृतिवत् भगवत्प्रियत्वं ब्रह्मभूयं । न तु तावत्प्रियत्वं । किन्तु प्रियत्वमात्रं । 'बद्धो वाऽपि तु मुक्तो वा न रमावत्प्रियो हरेरि'ति पाद्मे । भूयाय भावाय ॥ ब्रह्मणो मायायाः । इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ॥

ॐ ॥ संसारस्वरूपतदत्ययोपायविज्ञानान्यस्मिन्नध्याये दर्शयति ॥ ऊर्ध्वो विष्णुः । 'ऊर्ध्वपवित्रो वाजिनी वस्वमृतमस्मि

च मोहमेव च पाण्डव । न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ ॥ २२ ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते । गुणा वर्तन्त इत्येवं योऽवतिष्ठति नेङ्गते ॥ २३ ॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः । तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४ ॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥ मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥ ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु॰गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥ अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । अधश्च मूलान्यनुसन्ततानि

SGDF
Sri Gurgeshwari Digital Foundation

द्रविणꣳसवर्चसमि'ति हि श्रुतिः। ऊर्ध्वः उत्तमः सर्वतः। अधो निकृष्टं। शाखा भूतानि। श्वोऽप्येकप्रकारेण न तिष्ठतीत्यश्वत्थः। तथापि न प्रवाहव्ययः। पूर्वब्रह्मकाले यथा स्थितिस्तथा सर्वत्रापीत्यव्ययता। फलकारणत्वाच्छन्दसां पर्णत्वं। न हि कदाप्यजाते पर्णे फलोत्पत्तिः॥ अव्यक्तेऽपि सूक्ष्मरूपेण सन्ति शरीरादौ च भूतानीत्यधश्चोर्ध्वं च प्रसृताः। गुणैः सत्वादिभिः। प्रतीतिमात्रसुखत्वात्प्रवालाः विषयाः। मूलानि भगवद्रूपादीनि। भगवानपि कर्मानुबन्धेन हि फलं ददाति। तथाच भाल्लवेयशाखायां। 'ब्रह्म वा अस्य पृथङ्मूलं प्रकृतिः स मूलं सत्त्वादयोऽर्वाचीनमूलं। भूतानि शाखाः छन्दांसि पत्राणि देवनृतिर्यश्चश्च शाखाः। पत्रेभ्यो हि फलं जायते। मात्राः शिफाः। मुक्तिः फलममुक्तिः फलं। मोक्षो रसोऽमोक्षो रसः। अव्यक्ते च शाखाः व्यक्ते च शाखाः। अव्यक्ते च मूलं व्यक्ते च मूलं। एषोऽश्वत्थो गुणालोलपत्रो न स्थीयते न न स्थीयते। न ह्येष कदाचनान्यथा जायते नान्यथा जायत'इति॥ यथास्थितस्तथा नोपलभ्यते। अन्तादिर्विष्णुः। 'त्वमादिरन्तो जगतोऽस्य मध्यमि'ति भागवते। 'अनाद्यन्तं परं ब्रह्म न देवा ऋषयो विदुरि'ति मोक्षधर्मे। असङ्गशस्त्रेण सङ्गराहित्यसहितेन ज्ञानेन। 'ज्ञानासिनोपासनया सितेने'ति भागवते। छेदश्च विमर्श एव। ततश्च तस्यैवावन्धकं भवति। तथा हि। मूलस्थं ब्रह्म प्रतीयते। तच्चोक्तं। तच्छ्रुतावेव 'विमर्शो ह्यस्य छेदः स तं न बध्नाति बध्नाति चान्यानि'ति। तदर्थं च तमेव प्रपद्ये प्रपद्येत। तच्चोक्तं तत्रैव। 'स तं वै प्रपद्येत यं वै प्रपद्य न शोचति न हृष्यति न जायते न म्रियते तद्ब्रह्ममूलं तच्छित्सुरि'ति। 'नारयणेन

कर्मानुबन्धीनि मनुष्यलोके॥ २॥ न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा। अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा॥ ३॥ ततः परं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः।

SGDF
Sri Gangeshwari Digital Foundation

दृष्टश्च प्रतिबुद्धो भवेत्पुमानि'ति मोक्षधर्मे। छेदनोपायो ह्यत्राकाङ्क्षितः। न च भगवतोऽन्यः शरण्योऽस्ति ॥ साधनान्तरमाह। निर्मानेति ॥ स्वरूपं कथयति। न तदित्यादिना ॥ कर्षतीत्युक्ते जीवस्य स्वातन्त्र्यं प्रतीतं तन्निवारयति। शरीरमित्यादिना। यत् यदा शरीरमवाप्नोति उत्क्रामति च जीवस्तदेश्वरः एतानि गृहीत्वा संयाति। 'यत्र यत्रैव संयुक्तो धाता गर्भं पुनः पुनः। तत्र तत्रैव वसति न यत्र स्वयमिच्छती'ति हि मोक्षधर्मे। 'भावाभावावपि जानन् गरीयो जानामि श्रेयो न तु तत्करोमि। आशासु हर्म्यासु हृदासु कुर्वन्यथा नियुक्तोऽस्मि तथा वहामी'ति च। 'हत्वा जित्वापि मघवन्यः कश्चित्पुरुषायते। अकर्ता त्वेव भवति कर्ता त्वेत्र करोति तदि'ति च। 'तद्यथा हानः सुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जद्याती'ति च श्रुतिः। 'वाङ्मनसि सम्पद्यते' मनः प्राणे 'प्राणस्तेजसि' तेजः परस्यां देवतायामि'ति च। गन्धानिव सूक्ष्माणि ॥ भोगोऽस्यापि साधितः पुरस्तात्। इन्द्रियद्वारा हि सोऽपि भुङ्क्ते। 'तद्य इमे वीणायां गायन्त्येतं ते गायन्ती'ति च श्रुतिः। गुणान्वितमेव भुङ्क्ते। 'न ह वै देवान्पापं गच्छती'ति श्रुतिः ॥ तर्हि किमिति न दृश्यत इत्यत आह। उत्क्रामन्तमित्यादिना ॥ यतन्तो ज्ञानं प्राप्य। अकृतात्मानो अशुद्धबुद्धयः ॥ पूर्वोक्तमेव ज्ञानं प्रपञ्चयति।

तमेवचाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥ निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः। द्वन्द्वैर्विमुक्ता सुखदुःख संज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥ न तद्भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥६॥ ममैवांशो जीवलोके जीवभूतः सनातनः। मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च। अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥ उत्क्रामन्तं स्थितं

SGDF
Sri Gargeshwari Digital Foundation

यदादित्यगतमित्यादिना ॥ गां भूमिम् ॥ वेदनिर्णयात्मिका मीमांसा वेदान्तः । तथा च सामवेदे प्राचीनशालश्रुतिः । 'स वेदान्तकृत्स कालक' इति 'स ह्येव युक्तिसूत्रकृत्स कालक' इति ॥ क्षरभूतानि ब्रह्मादीनि । कूटस्थः प्रकृतिः । तथा च शार्कराक्षश्रुतिः । 'प्रजापतिप्रमुखाः सर्वजीवाः क्षरोऽक्षरः पुरुषो वै प्रधानं । तदुत्तमं चान्यमुदाहरन्ति जालाजालं मातरिश्वानमेकमि'ति ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये पञ्चदशोऽध्यायः ॥ १५ ॥

वापि भुञ्जानं वा गुणान्वितं । विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥ यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितं । यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलं । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ॥१२॥ गामाविश्य च भूतानि धारयाम्यहमोजसा । पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥ सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥ यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ । एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु०पुराणपुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ ॥ ॥ ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ ॐ ॥ पुमर्थसाधनविरोधीन्यनेनाध्यायेन दर्शयति ॥ तपो ब्रह्मचर्यादि । 'ब्रह्मचर्यादिकं तप'इत्यभिधानं ॥ पैशुनं परोपद्रवनिमित्तदोषाणां राजादेः कथनम् । 'परोपद्रवहेतूनां दोषाणां पैशुनं वचः । राजादेस्तु मदाद्धीतेरदृष्टिर्दर्प उच्यते'इत्यभिधानं । लौल्यं रागः । 'रागो लौल्यं तथा रक्तिरि'त्यभिधानात् । अचापलं स्थैर्यं । 'चपलश्चञ्चलोऽस्थिर'इत्यभिधानात् ॥ क्षमा तु क्रोधाभावेन सहापकर्तुरनपकृतिः । 'अक्रोधदोषकृच्छत्रोः क्षमावान्स निगद्यत' इत्यभिधानात् ॥ दैवीं सम्पदमभिजातः । प्रतिजातः ॥ जगतः सत्यं प्रतिष्ठा ईश्वरश्च विष्णुस्तद्विपरीत्येनाहुः । 'तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमि'ति हि श्रुतिः । 'द्वे वा व ब्रह्मणो रूपे मूर्तं चामूर्तं च मर्त्यं चामृतं च स्थितं च सच्च यच्च त्यच्चे'ति । 'तस्योपनिषत्सत्यस्य सत्यमि'ति । 'एषह्येवैतत्सादयति यामयति चेती'ति प्राचीनशालश्रुतिः। परस्पर सम्भवो ह्युक्तः अन्नाद्भवन्तीत्यादिना ॥ दुष्पूरो हि कामः । 'पाताल

श्रीभगवानुवाच ॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम् ॥ २ ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ ३ ॥ दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥ ४ ॥ दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता । मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव॥५॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः। न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥ असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ ८ ॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जग-

SGDF
Sri Gargeshwari Digital Foundation

इव दुष्पूरो मां हि क्लेशयते सदे'ति हि मोक्षधर्मे ॥ मामात्मपरदेहेष्विति। न कस्यचिद्विष्णुः कारयिता यदिस्यान्मामपीदानीं कारयत्वित्यादि। 'ईश्वरो यदि सर्वस्य कारकः कारयीत मां। अधेति वादिनं ब्रूयात्सदाऽधो यास्यसीति हे'ति सामवेदे यास्कश्रुतिः॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये षोडशोऽध्यायः ॥१६॥

तोऽहिताः ॥ ९ ॥ काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः। मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥ चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः। कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः। ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥ १२ ॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १४ ॥ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥ अनेकचित्तविभ्रान्ता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६ ॥ आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः। यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१७॥ अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः। मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८ ॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१॥ एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥२३॥ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥२४॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु०दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः ॥ १६ ॥

SGDF
Sri Gargeshwari Digital Foundation

ॐ॥ गुणभेदान्प्रपञ्चयत्यनेनाध्यायेन ॥ शास्त्रविधिमुत्सृज्य अज्ञात्वैव । 'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मने'तिविधिरुत्सृष्टो हि तैः । 'ये वै वेदं न पठन्ते न चार्थं वेदोज्झितांस्तान्विद्धि सानूनबुद्धीनि'ति माधुच्छन्दसश्रुतिः । अन्यथा तामसा इत्येवोच्येत । न तु विभज्य । यदि सात्त्विकास्तर्हि नोत्सृष्टशास्त्राः । न हि वेदविरुद्धो धर्मः । 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदामि'ति हि स्मृतिः । 'वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्यय'इति च भागवते ॥ अतो विभज्याह । त्रिविधेत्यादिना ॥ सत्त्वानुरूपा चित्तानुरूपा । यो यच्छ्रद्धः स एव सः । सात्त्विकश्रद्धः सात्त्विक इत्यादि । कः सात्त्विकश्रद्ध इत्यादि विभज्याह । यजन्त इत्यादिना ॥ भगवत्कर्शनं नामाल्पत्वदृष्टिरेव । 'यो वै महान्तं परमं पुमांसं नैवं द्रष्टा कर्शकः सोऽतिपापी'ति ह्यनभिम्लानश्रुतिः ॥ आसुरो निश्चयो येषां त आसुरनिश्चयाः । 'देवास्तु सात्त्विकाः प्रोक्ता दैत्या राजसतामसा' इति ह्याग्निवेश्यश्रुतिः ॥ प्रीतिरानन्तरिका । हृद्यत्वं दर्शने । स्थिराश्च न तदैव पक्वा भवंति ।

अर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः । तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥ श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥ यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः । प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४ ॥ अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥ कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥ आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥८॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।

SGDF
Sri Gurgeshwari Digital Foundation

तथा ह्याज्यादयः ॥ सौम्यत्वमक्रौर्यं । 'अक्रूरः सौम्य उच्यत' इत्यभिधानं । मौनं मननशीलत्वं । 'बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरि'ति हि श्रुतिः । 'एतेन हीदं सर्वं मतं यदनेन हीदं सर्वं मतं तस्मान्मुनिस्तस्मान्मुनिरित्याचक्षत' इति भाल्लवेयश्रुतिः । कथं चान्यथा मानसं तपः स्यात् ?॥ पुनश्च कर्मादीतिकर्तव्यताविधानार्थमर्थवादमाह । ओं तत्सदित्यादिना । परस्य ब्रह्मणो ह्येतानि नामानि । 'ओतं जगद्यत्र स्वयं च पूर्णो वेदोक्तरूपोऽनुपचारतश्च । सर्वैः शुभैश्चापि युतो न चान्यैरों तत्सदित्येनमथो वदन्ती'ति ह्यृग्वेदखिलेषु । द्वितीयपाद-

---

आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥ यातयामं गतरसं पूति पर्युषितं च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥ अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥ अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् । इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥ विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥ सत्कारमानपूजार्थं तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥ ओं तत्सदिति

SGDF
Sri Gargeshwari Digital Foundation

स्तच्छब्दार्थः। 'सदेव सोम्येदमग्र आसीदि'ति च। 'ओमिति ब्रह्मे'ति च। तेन ब्रह्मणा। आत्मपूजार्थम्। वेदविधिर्व्यञ्जनम्। मा तूक्ता पुरस्तात्॥ तत्फलं मे स्यादित्यनभिसन्धाय॥ सद्भावशब्देन प्रजननं सूचितं। ओमित्युक्त्वाऽनभिसन्धाय फलं यज्ञदानतपआदिकृतामतिप्रीतेर्नामसाम्याद्ब्रह्मैव निष्पादितं भवतीत्याशयः। तथा च ऋग्वेदखिलेषु। 'ॐ यज्ञाद्या निष्फलं कर्म तत्स्यात्सद्वै तदर्थं कर्म वदन्ति वेदाः। तच्छब्दानां सन्निधेर्ब्रह्मप्रीतेस्तद्रूपत्वाज्जनितं ब्रह्म तस्ये' ति॥ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये सप्तदशोऽध्यायः ॥१७॥

ॐ॥ पूर्वोक्तं साधनं सर्वं संक्षिप्योपसंहरत्यनेनाध्यायेन॥ फलानिच्छयाऽकरणेन वा काम्यकर्मन्यासः संन्यासः। त्यागस्तु फलत्याग एव। तथा हि प्राचीनशालश्रुतिः। 'अनिच्छयाऽकर्मणा वापि काम्यन्यासो न्यासः फलत्यागस्तु त्याग'इति॥ मनीषिण इति विशे-

---

निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥ २३॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥ २४॥ तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते। कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥ २७॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥२८॥
॥ इति श्रीमद्भगवद्गीता० श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥

अर्जुन उवाच। संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश पृथक्केशिनिषूदन॥१॥ श्रीभगवानुवाच। काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। सर्वकर्मफलत्यागं त्यागं प्राहुर्मनीषिणः॥ २॥ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।

SGDF
Sri Gangeshwari Digital Foundation

षणात्पूर्वपक्षोऽपि ग्राह्य एव । फलत्यागेन त्यागो विवक्षितो यज्ञादेस्त-त्पक्षे । 'यस्तु कर्मफलत्यागी'ति च वक्ष्यति । अत एक एवायं पक्षः ॥ तत्प्रकारं चाह । निश्चयमित्यादिना । यज्ञभेद उक्तो द्रव्ययज्ञ इत्या-दिना । दाने त्वभयदानमन्तर्भवति । एतेषां मध्ये यत्किञ्चिद्यज्ञादिकं कर्तव्यमेवेत्यर्थः । अन्यथा 'ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तथा । यदीच्छेन्मोक्षमास्थातुमुत्तमाश्रममाश्रयेदि'त्यादिव्यासस्मृतिविरोधः । ज्ञानयज्ञविद्याऽभयदानब्रह्मचर्यादितपसो हि ते । अतो यद्वचोऽन्यथा प्रतीयते अधिकारिभेदेन तद्योज्यं । अन्यथेतरेषां गत्यभावात् ॥ अन्यस्त्यागार्थो न युक्तइत्याह । न हीति ॥ त्यागं स्तौति अनिष्ट-मिति ॥ पुनः संन्यासं प्रपञ्चयितुं कर्मकारणान्याह । पञ्चेत्यादिना । साङ्ख्ये कृतान्ते ज्ञानसिद्धान्ते ॥ अधिष्ठानं देहादिः । कर्ता विष्णुः ।

यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥३॥ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम । त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥ ४ ॥ यज्ञ-दानतपःकर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५॥ एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७॥ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८॥ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन । सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥ नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥ अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२॥ पञ्चैतानि महा-बाहो कारणानि निबोध मे । साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्म-

SGDF
Sri Gurgeshwari Digital Foundation

स हि सर्वकर्तेत्युक्तं । जीवस्य चाकर्तृत्वे प्रमाणमुक्तं । करणमिन्द्रियाणि । चेष्टाः क्रियाः । हस्तादिक्रियाभिर्हि होमादिकर्माणि जायन्ते । ध्यानादेरपि मानसी चेष्टा कारणं । पूर्वतनी चेष्टाऽपि संस्कारकारणत्वेन भवति । दैवमदृष्टं । तथा चायास्यश्रुतिः । 'देहो ब्रह्माथेन्द्रियाद्याः क्रियाश्च तथाऽदृष्टं पञ्चमं कर्महेतुरि'ति ॥ केवलं निष्क्रियं । 'एनं केवलमात्मानं निष्क्रियत्वाद्वदन्ति ही'ति तत्रैव ॥ तज्ज्ञानं स्तौति । यस्येति । यस्त्वीषद्बध्यते स ईषदहङ्कारी च ॥ एवं तर्हि न पुरुषमपेक्ष्य विधिः । अकर्तृत्वादित्यत आह । ज्ञानमिति । त्रिविधा कर्मचोदना । एतत्त्रिविधमपेक्ष्य कर्मविधिरिति त्रिविधेत्युच्यते । कारणानि सङ्क्षिप्याह । करणमिति । कर्मसङ्ग्रहः कर्मकारणसङ्क्षेपः । अधिष्ठानादि करण एवान्तर्भूतम् । तथा ह्यृग्वेदखिलेषु । 'ज्ञानं ज्ञेयं ज्ञानिनं चाप्यपेक्ष्य विधिरुत्थितः । करणं चैव कर्ता च कर्मकारणसङ्ग्रह'इति । अकर्तृत्वेऽपि विधिद्वारेश्वरप्रसादादिच्छोत्पत्त्योक्तकारणैः कर्मद्वारा पुरुषार्थो भवतीति । ईश्वराधीनत्वेऽपि विधिद्वारा नियतस्तेनैव । यदि चेच्छादिर्जायते तर्हि कारितमेवेश्वरेण । फलं च नियतं । वस्तुतोऽकर्तृत्वेप्याभिमानिकं कर्तृत्वं तस्यैव । स्वातन्त्र्यं च जडमपेक्ष्येति न प्रवृत्तिविधिवैयर्थ्यं । सर्वं चैतदनुभवोक्तप्रमाणसिद्धिमिति न पृथक्प्रमाणमुच्यते ॥ पुनः

णाम् ॥ १३॥ अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४॥ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५॥ तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६॥ यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥१७॥ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना । करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥१८॥ ज्ञानं कर्म

SGDF
Sri Gangeshwari Digital Foundation

साधनप्रथनाय गुणभेदानाह । ज्ञानमित्यादिना । गुणसङ्ख्याने गुणगणनप्रकरणे ॥ एकं भावं विष्णुं ॥ परकृतं दोषं दीर्घकालकृतमप्यनुचितं यः सूचयति स दीर्घसूत्री । 'परेण यः कृतो दोषो दीर्घकालकृतोऽपि वा । यस्तस्य सूचको दोषाद्दीर्घसूत्री स उच्यत'-इत्यभिधानात् ॥ यथार्थत्वनियमाभावो राजस्याः । अन्यथा तामस्या

च कर्ता च त्रिधैव गुणभेदतः । प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥ १९ ॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥२२॥ नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥ यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः । क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥ अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म तत्तामसमुदाहृतम् ॥ २५ ॥ मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥२७॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु । प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९ ॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥ यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥३१॥ अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥ यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन । प्रसङ्गेन

SGDF
Sri Gangeshwari Digital Foundation

भेदाभावात् ॥ नैष्कर्म्यसिद्धिं । नैष्कर्म्यफलां योगसिद्धिम् । यथा येनोपायेन सिद्धिं प्राप्तो ब्रह्माप्नोति तथा निबोध । या सिद्धिर्ज्ञानस्य

फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥३५॥ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥ यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥ विषयेन्द्रियसंयोगाद्य-त्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥ यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्ता-मससुदाहृतम् ॥ ३९ ॥ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥ शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्म-कर्म स्वभावजम् ॥ ४२ ॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४४॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बि-षम् ॥ ४७ ॥ सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् । सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥४८॥ असक्तबुद्धिः सर्वत्र जितात्मा विगत-स्पृहः । नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे । समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥ बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥ विविक्तसेवी

SGDF
Sri Gargeshwari Digital Foundation

परा निष्ठा ॥ ब्रह्मभूयाय कल्पते । ब्रह्मणि भावो ब्रह्मभूयं । ब्रह्मणि स्थितिः । सर्वदा तन्मनस्कतेत्यर्थः ॥ पुनरन्तरङ्गसाधनान्युक्त्वोपसंहरति । सर्वकर्माणीत्यादिना ॥ परोक्षवचनं तु द्रोणं प्रति भीमवचनवत् ॥ धर्मत्यागः फलत्यागः । कथमन्यथा युद्धविधिः ? । 'यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयत' इति चोक्तम् ॥

लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ ॥ ५२ ॥ अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥ सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि । अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥५८॥ यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥ स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा । कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६० ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥ तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया । विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥ इदं ते नातपस्काय नाभक्ताय कदाचन । न

SGDF
Sri Gargeshwari Digital Foundation

पूर्णादोषमहाविष्णोर्गीतामाश्रित्य लेशतः । निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये अष्टादशोऽध्यायः ॥ १८ ॥ गीताभाष्यं सम्पूर्णम् ॥ ॥

चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः । भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः । ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥ श्रद्धावाननसूयश्च श्रृणुयादपि यो नरः । सोऽपि मुक्तः शुभाँल्लोकान् प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा । कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय ॥ ७२ ॥ अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३ ॥ सञ्जय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः । संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् । योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥ राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् । केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः । विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥ ॥ ७७ ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

श्री गीतातात्पर्यनिर्णयः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् । नारायणं नमस्कृत्य गीतातात्पर्यमुच्यते ॥ 'शास्त्रेषु भारतं सारं तत्र नामसहस्रकं । वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा । न भारतसमं शास्त्रं कुत एवानयोः समम् । भारतं सर्ववेदाश्च तुलामारोपिताः पुरा । देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः । व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् । महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते । स्वयं नारायणो देवैर्ब्रह्मरुद्रेन्द्रपूर्वकैः । अर्थितो व्यासतां प्राप्य केवलं तत्त्वनिर्णयम् । चकार पञ्चमं वेदं महाभारतसंज्ञितमि'ति ब्रह्माण्डे । तत्र साक्षादिन्द्रावतारमुत्तमाधिकारिणमात्मनः प्रियतममर्जुनं क्षत्रियाणां विशेषतोऽपि परमधर्मं नारायणद्विट्तदनुबन्धिनिग्रहं बन्धुस्नेहादधर्मत्वेनाशङ्क्य ततो निवृत्तप्रायं स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मस्तद्विरुद्धः सर्वोऽप्यधर्मो भगवदधीनत्वात्सर्वस्येति बोधयति भगवान्नारायणः । सर्वं चैतदत्रैवावगम्यते । 'अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसी'त्यादिना युद्धस्य स्वधर्मत्वम् । 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः । श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् । मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।

SGDF
Sri Gargeshwari Digital Foundation

मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे। सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच'-इत्यादिना स्वधर्मेणैव भगवदाराधनस्यैव कर्तव्यत्वं तदन्यस्य त्याज्यत्वं च। 'नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा। भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपे'त्यादिना विष्णुभक्तेरेव सर्वसाधनोत्तमत्वं परोक्षापरोक्षज्ञानयोर्ज्ञानिनोऽपि मोक्षस्य तदधीनत्वं च। 'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पाण्डवे'त्यादिना भक्तस्यापि तत्कर्म विकर्मत्यागश्च। 'कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतमि'त्यादिना ज्ञानिनोऽपि भगवत्कर्म। 'सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः। इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्। दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता। मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव। महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्। (दर्शयात्मानमव्ययं) दर्शयामास पार्थाय परमं रूपमैश्वरमि'त्यादिना ऽर्जुनस्योत्तमाधिकारित्वमपरोक्षज्ञानित्वं च। 'न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्वशः। यो मामजमनादिं च वेत्ति लोकमहेश्वरम्। असम्मूढः स मर्त्येषु सर्व-पापैः प्रमुच्यते। बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः। महर्षयः सप्त पूर्वे। एतां विभूतिं योगं च। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः। तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयामि। तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति। ज्ञानं तेऽहं सविज्ञानमिदं

SGDF
Sri Gargeshwari Digital Foundation

वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव। इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे। ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्। राजविद्या राजगुह्यम्। मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः। भूतभृन्न च भूतस्थः। न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः। परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत। ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च। शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च। द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः। यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत। इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत। न मे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यमि'त्यादिना सर्वस्माद्भगवतो भेदः सर्वस्य तदधीनत्वं, तस्यानन्याधीनत्वं, सर्वोत्तमत्वं, सर्वगुणपूर्णत्वं, सर्वशास्त्राणां तत्परत्वं, तथा तज्ज्ञानादेव मोक्ष इत्यादि। 'अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता'। 'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन्। यदात्मनः सुनियतमानन्दोत्कर्षमाप्नुयात्। भक्त्या प्रसन्नः परमो दद्याज्ज्ञानमनाकुलम्। भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत्। ततोऽपि भूयसीं भक्तिं दद्यात्ताभ्यां विमोचयेत्। मुक्तोऽपि तद्वशो नित्यं भूयो भक्तिसमन्वितः।

SGDF
Sri Gangeshwari Digital Foundation

साध्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम् । ब्रह्मरुद्ररमादिभ्योऽप्युत्तमत्वं स्वतन्त्रताम् । सर्वस्य तदधीनत्वं सर्वसद्गुणपूर्णताम् । निर्दोषत्वं च विज्ञाय विष्णोस्तत्राखिलाधिकः । स्नेहो भक्तिरिति प्रोक्तः सर्वोपायोत्तमोत्तमः । तेनैव मोक्षो नान्येन दृष्ट्यादिस्तस्य साधनम् । अधमाधिकारिणो मर्त्या मुक्तावृष्यादिकाः समाः । अधिकार्युत्तमा देवाः प्राणस्तत्रोत्तमोत्तमः । नैव देवपदं प्राप्ता ब्रह्मदर्शनवर्जिताः । तिरोहितं तथाप्येते शृण्वन्ति क्रीडयाऽथवा । बहुवारतदभ्यासात्तिरोभावोऽपि नो भवेत् । यथा व्यासानुशिष्टानां देवानां क्षत्रजन्मनाम् । पार्थानामतिरोधानं ज्ञानं सुस्थिरतां गतम्'। 'अस्य देवस्य मीह्लुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विना वि रावत्'। 'एको नारायण आसीन्न ब्रह्मा न च शङ्करः'। 'स मुनिर्भूत्वा समचिन्तयत्तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा' इति । 'एको नारायण आसीन्न ब्रह्मा नेशानः'। 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः'। 'यं यं कामयते विष्णुस्तं ब्रह्माणं च शङ्करम् । शक्रं सूर्यं यमं स्कन्दं कुर्यात्कर्ताऽस्य न कश्चित्'। 'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम् । अवान्तरं तत्परत्वं तदन्यत्सर्वागमानां पुरुषार्थस्ततोऽत' इति पैङ्गिश्रुतिः । 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति'। 'अनन्तगुणमाहात्म्यो निर्दोषो भगवान्हरिः । न समो वाऽधिको वाऽपि विद्यते तस्य कश्चन'। 'नासीन्न च भविष्यो वा परतः स्वत एव चे'त्यादि श्रुतेश्च । 'यस्त्वात्मरतिरेव स्यादि'त्यादि तु मुक्तविषयं । 'यस्त्वेवात्मरतो मुक्तः कार्यं तस्यैव नास्ति हि । तस्मात्कुर्वीत कर्माणीत्याह कृष्णोऽर्जुनं स्मयन्नि'ति च स्कान्दे । ज्ञानयोगेन साङ्ख्यानामित्यादि तु बाह्यकर्मसङ्कोचापेक्षया । 'न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।

SGDF
Sri Gangeshwari Digital Foundation

शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः । एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्' । 'ज्ञानी च कर्माणि सदोदितानि कुर्यादकामः सततं भवेत। न सर्वकर्मणां त्यागः कस्यचिद्भवति क्वचित्। त्यागिनो यतयोऽपि स्युः सङ्कोचाद्बाह्यकर्मणामि'त्यादि । 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिन'इत्यादि चोत्पन्नज्ञानतिरोभावनिवृत्त्यर्थम् ॥ (इत्युपोद्घातः)

प्रकर्षेण जानन्तीति प्रज्ञाः तदवादः प्रज्ञावादः। प्राज्ञमतविरुद्धवादं वदसि। कथं ?। गतासून् ॥११॥ बन्धुस्नेहाद्धि त्वया स्वधर्मनिवृत्तिः क्रियते । तत्र देहनाशभयात्किं वा चेतननाशभयात् ? । देहस्य सर्वथा विनाशित्वान्न तत्र भये प्रयोजनम् । न च चेतननाशभयात्। तस्याविनाशित्वादेव। न तावत्परमचेतनस्य मम नाशोऽस्ति। एवमेव तवान्येषां च। 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानि'त्यादिश्रुतेः। 'स्वदेहयोगविगमौ नाम जन्ममृती पुरा। इष्येते ह्येव जीवस्य मुक्तेर्न तु हरेः क्वचिदि'ति स्कान्दे । ईश्वरस्यापि युद्धगतत्वान्मोहात्तस्याप्युभयविधानित्यत्वशङ्काप्राप्तौ तदपि निवार्यते। न त्वेवाहमिति। यद्यप्येषा शङ्काऽर्जुनस्य नास्ति तथापि प्राप्तलोकोपकारार्थं भगवता निवार्यते। एकान्ते कथयन्नपि व्यासरूपेण तदेव लोके प्रकाशयिष्यति हि ॥१२॥ मम स्वकीयदेहान्तरप्राप्तिरपि नास्तीति दर्शयितुं देहिन इति विशेषणं। भवदादीनां सा भविष्यतीत्यपि शोको न कर्तव्यः। देहस्येदानीमप्यन्यथात्वदर्शनात् ॥१३॥ तददर्शनादिनिमित्तं सोढव्यमित्याह। मात्रास्पर्शा इति। विषयसम्बन्धाः ॥ १४ ॥ फलमाह। यं हीति। न केवलमव्यथामात्रेणामृतत्वं किन्तु पुरुषम्। 'पुरु ब्रह्म गुणाधिक्यात्तज्ज्ञानात्पुरुषः स्मृत' इति प्रवृत्ते। पुरु सरणात्पुरुष इत्यर्थः॥ १५ ॥ न च युद्धात्परलोकदुःखमिति शोकः।

SGDF
Sri Gangeshwari Digital Foundation

असत्कर्मणः सकाशाद्भावो नास्ति सत्कर्मणः सकाशादभावो नास्तीति नियतत्वात्। 'सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचकाः। अभाववाचिनः शब्दाः सर्वे ते दुःखवाचका' इति शब्दनिर्णये। 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यत' इति वक्ष्यमाणत्वात्। 'असन्नेव स भवति असद्ब्रह्मेति वेद चेदि'त्यादेश्च। अन्तो निर्णयः। न चाविद्यामानविद्यमानयोरुत्पत्तिनाशनिषेधकोऽयं श्लोकः। प्रत्यक्षविरोधात्। सन्निति व्यवह्रीयमाणमेव पदार्थस्वरूपमुत्पत्तेः प्राङ्नाशोत्तरं च नास्तीति सर्वलोको व्यवहरति। न च विपर्यये किञ्चिन्मानम्। इदं तु वाक्यमन्यथासिद्धम्। 'आद्यन्तयोः सर्वकार्यमसदेवेति निश्चितम्। यद्यसन्न विशेषोऽत्र जायते कोऽत्र जायते। व्यक्तावपि समं ह्येतदनवस्थाऽन्यथा भवेत्। एवं नाशेपि बोद्धव्यमतो सन्नेव जायते। तथाप्यभेदानुभवात्कार्यकारणयोः सदा। भेदस्य चाविशेषेण देहोऽगात्क्षितितामिति। व्यवहारो भवेद्यस्माद्बल्येवानुभवः सदे'ति ब्रह्मतर्के। न च सदसद्विलक्षणं किञ्चिदस्तीत्यत्र किञ्चिन्मानम्। न चासतः ख्यात्ययोगात्सतो बाधायोगादुभयविलक्षणं भ्रान्तिविषयम्। असतः ख्यात्ययोगादितिवदतोऽसतः ख्यातिरभून्न वा। यदि नाभून्न तत्ख्यातिनिराकरणम्। यद्यभूत्तथापि। न चासतोऽसत्वेन भ्रान्तौ सत्वेन च ख्यातिर्नास्तीत्यत्र किञ्चिन्मानम्। असद्व्यवहारलोपप्रसङ्गाच्च। यदविद्यमानं रूपं तस्य सत्त्वेन प्रतीतेरेव भ्रान्तित्वाच्च। अनिर्वचनीयत्वपक्षेऽपि सदिदं रजतमित्यविद्यमानसत्त्वप्रतीतिं विना न हि भ्रान्तित्वम्। भ्रान्तिसत्त्वाङ्गीकारेऽप्यभ्रान्तं सदिदं रजतमित्यविद्यमानसत्वप्रतीतौ हि प्रवर्तते। तस्मादुभयविलक्षणं न किञ्चित्। 'विश्वं सत्यं'। 'यच्चिकेत सत्यमित्'। 'कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्य' इत्यादि श्रुतेश्च॥१६॥ यद्यपि नित्यत्वं जीवस्याप्यस्ति। तथापि

SGDF
Sri Gangeshwari Digital Foundation

सर्वप्रकारेणाविनाशित्वं विष्णोरेवेति तुशब्दः। 'अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता। नाशश्चतुर्विधः प्रोक्तस्तदभावो हरेः सदा। तदन्येषां तु सर्वेषां नाशाः केचिद्भवन्ति ही'ति महावाराहे। 'देशतः कालतश्चैव गुणतश्च त्रिधा ततिः। सा समस्ता हरेरेव नह्यन्ये पूर्णसद्गुणा' इति परमश्रुतिः ॥१७॥ शरीरिणां तु देहहान्यादिनाशो विद्यत एव। 'येन सर्वमिदं ततमि'ति तस्यैव लक्षणकथनात्। न जीवानां देशतो गुणतश्च पूर्णता। अनिच्छया देहहान्यादेरेव दुःखावाप्तिः सिद्धा तस्मादनाशिनोऽप्रमेयस्य विष्णोः पूजार्थं युध्यस्व। तत्प्रसादाधीनत्वाद्दुःखनिवृत्तेः सुखस्य च। 'ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। तेषामहं समुद्धर्ते'त्यादेः। जीवपक्षे नित्यस्योक्ता इत्युक्तत्वादनाशिन इति पुनरुक्तिः। 'अविनाशि, येन सर्वमिदं ततमि'त्युक्तस्यैवानाशिनोऽप्रमेयस्येति प्रत्यभिज्ञानाच्च। 'इमे देहा' इतिविशेषणान्नित्यश्चिदानन्दात्मकः स्वरूपभूतो देहो मुक्तानामपि विद्यत इति ज्ञायते। 'न वर्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः। श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः। सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः। प्रवालवैडूर्यमृणालवर्चसां परिस्फुरत्कुण्डलमौलिमालिनाम्। भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनां। विद्योतमानप्रमदोत्तमाभिः सविद्युदभ्रावलिभिर्यथा नभ' इति हि भागवते। 'चिदानन्दशरीरेण सर्वे मुक्ता यथा हरिः। भुञ्जते कामतो भोगांस्तदन्तर्बहिरेव चे'ति परमश्रुतिः।

न च जीवेश्वरैक्यं मुक्तावपि। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च'। 'यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान्कामान्सह

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मणा विपश्चिता' । 'एतमानन्दमयमात्मानमुपसङ्क्रम्य । इमाँ-ल्लोकान्कामान्नीकामरूप्यनुसञ्चरन् । एतत्सामगायन्नास्ते' । 'सर्वे नन्दन्ति यशसा गतेन सभासाहेन सख्या सखायः । किल्बिषस्पृत्पितुषणि-र्ह्येषामरं हितो भवति वाजिनाय' । 'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः' । 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभि-निष्पद्यते स तत्र पर्येति जक्षन्क्रीडन्रममाणः' । 'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' । 'मुक्ताः प्राप्य परं विष्णुं तद्देहं संश्रिता अपि । तारतम्येन तिष्ठन्ति गुणैरानन्दपूर्वकैः । भूपा मनुष्यगन्धर्वा देवाः पितर एव च । आजानेयाः कर्मदेवास्तत्त्वदेवाः पुरन्दरः । शिवो विरिञ्च इत्येते क्रमाच्छतगुणोत्तराः । मुक्तावपि तदन्ये ये भूपाच्छतगुणावराः । न समो ब्रह्मणः कश्चिन्मुक्तावपि कथञ्चन । ततः सहस्रगुणिता श्रीस्ततः परमो हरिः । अनन्तगुणि-तत्वेन तत्समः परमोऽपि न' । 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधी'-त्यादि मोक्षानन्तरमपि भेदवचनेभ्यः । न च 'यत्र त्वस्य सर्वमात्मैवा-भूत्तत्केन कं पश्येत्' । 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति' । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' । 'अविनाशित्वान्न तु तद्द्वितीय-मस्ति । ततोऽन्यद्विभक्तं यत्पश्येत्' । 'परमं ब्रह्म वेद ब्रह्मैव भवति' । 'तत्त्वमस्यहं ब्रह्मास्मीत्या'दि श्रुतिविरोधः । 'संज्ञानाशो यदि भवेत्किं मुक्त्या नः प्रयोजनम् । मोहं मां प्रापयामास भवानत्रेति चोदितः । याज्ञवल्क्यः प्रियामाह नाहं मोहं ब्रवीमि ते । भूतजज्ञानलोपः स्यान्निजं ज्ञानं न लुप्यते । न च ज्ञेयविनाशः स्यादात्मनाशः कुतः पुनः । स्वभावतः पराद्विष्णोर्विश्वं भिन्नमपि स्फुटम् । अस्वातन्त्र्या-द्भिन्नमिव स्थितमेव यदेदृशम् । तदा घ्राणादिभोगः स्यात्स्वरूपज्ञान-

SGDF
Sri Gargeshwari Digital Foundation

शक्तितः । तदात्मानुभवोऽपि स्यादीश्वरज्ञानमेव च । यदाऽन्यं न विजानाति नात्मानं नेश्वरं तथा । पुरुषार्थता कुतस्तु स्यात्तदभावाय को यतेत् । तस्मात्स्वभावज्ञानेन भिन्ना विष्णुसमीपगाः । भुञ्जते सर्वभोगांश्च मुक्तिरेषा न चान्यथा । यन्न पश्येत्परो विष्णुर्द्वितीयत्वेन स स्वतः । तद्द्वितीयं न भवति प्रादुर्भावात्मकं वपुः । प्रधानपुरुषादन्यद्यत्तस्माद्भिन्नमीश्वरः । विभक्तत्वेन नियतं यस्मात्पश्यति सर्वदा । पश्यन्नेव यतो विष्णुस्तदभेदं न पश्यति । चेतनाचेतनस्यास्य नाभेदोऽस्ति ततोऽमुना । न हि ज्ञानविलोपोऽस्ति सर्वज्ञस्य परेशितुः । ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः । प्रकृतिः परमं ब्रह्म परमं महदच्युतः । नैव मुक्ता न प्रकृतिः क्वापि तद्विष्णुवैभवम् । प्राप्नुवन्त्यपि तज्ज्ञानान्निजं ब्रह्मत्वमाप्यते । यद्यस्य परमेशित्वं तदा स्याद्दुःखिता कुतः । दुःखी चेत्कुत ईशत्वमनीशो ह्येव दुःखभाक् । कुतः सर्वविदोऽज्ञत्वं क्व भ्रमोऽप्यज्ञतां विना । तस्मान्नैवेश्वरो जीवस्तत्प्रसादात्तु मुच्यते । अहेयत्वादहंनामा भगवान्हरिरव्ययः । ब्रह्मासौ गुणपूर्णत्वादस्म्यसावसनान्मितेः । असनादसिनामाऽसौ तेजस्त्वात्त्वमितीरितः । सर्वैः क्रियापदैश्चैवं सर्वैर्द्रव्यपदैरपि । सर्वैर्गुणपदैश्चैव वाच्य एको हरिः स्वयम् । युष्मत्पदैः प्रातियोग्यात्तद्युतैश्च क्रियापदैः । अस्मत्पदैरान्तरत्वात्क्रियार्थैश्च तदन्वयैः । परोक्षत्वात्तत्पदैश्च मुख्यवाच्यः स एव तु । सर्वान्वेदानधीत्यैव प्रज्ञाधिक्येन हेतुना । श्वेतकेतुरहङ्कारात्प्रायशो नास्मि मानुषः । देवो वा केशवांशो वा नैषा प्रज्ञाऽन्यथा भवेत् । एवं महत्त्वबुद्ध्यैव दर्पपूर्णोऽभ्यगात्पितुः । सकाशमकृताचारं तं दृष्ट्वा स्तब्धमब्रवत् । पितोवाच कुतः पुत्र स्तब्धता त्वामुपागता । प्रायो नारायणं देवं नैव त्वं पृष्टवानसि । यस्मिञ्ज्ञाते त्वविज्ञातज्ञानादीनां फलं भवेत् । प्राधान्यात्सदृशत्वाच्च तदधीनमिति स्फुटं । तत्सृष्टं चेति विज्ञातं फलवद्धि भवेज्जगत् । स्वातन्त्र्येणास्य

SGDF
Sri Gangeshwari Digital Foundation

विज्ञानं मिथ्याज्ञानमनर्थकृत्। यथाचैवैकमृत्पिण्डज्ञानादेः सदृशत्वतः। मृन्मयं तदकार्यं च ज्ञातं मृदिति वै भवेत्। यथैव मृत्तिकेत्यादि नित्यनामप्रवेदनात्। वाचाऽरब्धमनित्यं तु ज्ञातं तन्मूलमित्यपि। एवं कारणभूतोऽसौ भगवान्पुरुषोत्तमः। प्रधानश्च स्वतन्त्रश्च तन्मूलमखिलं जगत्। तदाधारं विमुक्तौ च तदधीनं सदा स्थितम्। स सूक्ष्मो व्यापकः पूर्णस्तदीयमखिलं जगत्। तस्मात्तदीयस्त्वमसि नैव सोऽसि कथञ्चन। यथा पक्षी च सूत्रं च नानावृक्षरसा अपि। यथा नद्यः समुद्रश्च यथा वृक्षपरावपि। यथा धानाः परश्चैव यथैव लवणोदके। यथा पुरुषदेशौ च यथाऽज्ञज्ञान-दावपि। यथा स्तेनापहार्यौ च तथा त्वं च परस्तथा। भिन्नौ स्वभा-वतो नित्यं नानयोरेकता क्वचित्। एवं भेदोऽखिलस्यापि स्वतन्त्रात्पर-मेश्वरात्। परतन्त्रं स्वतन्त्रेण कथमैक्यमवाप्नुयात्। स जीवनामा भगवान्प्राणधारणहेतुतः। उपचारेण जीवाख्या संसारिणि निगद्यते। तदधीनमिदं सर्वं नान्याधीनः स ईश्वरः। जीवेश्वरभिदा चैव जडेश्वर-भिदा तथा। जीवभेदो मिथश्चैव जडजीवभिदा तथा। जडभेदो मिथश्चेति प्रपञ्चो भेदपञ्चकः। विष्णोः प्रज्ञामितं यस्माद्द्वैतं न भ्रान्ति-कल्पितम्। अद्वैतः परमार्थोऽसौ भगवान्विष्णुरव्ययः। परमत्वं स्वतन्त्रत्वं सर्वशक्तित्वमेव च। सर्वज्ञत्वं परानन्दः सर्वस्य तदधीनता। इत्यादयो गुणा विष्णोर्नैवान्यस्य कथञ्चन। अभावः परमद्वैते सन्त्येव ह्यपराणि तु। विकल्पो विनिवर्तेत कल्पितो यदि केनचित्। अद्वैतं ज्ञानिनां पक्षे न तस्माद्विद्यते क्वचिदि'त्यादिश्रुतिभ्योऽर्थान्तरस्यैवावगत-त्वात्। एकपिण्डनामधेयेतिशब्दानां वैयर्थ्यं चान्यथा। न चैक विज्ञानेन सर्वविज्ञानं तत्पक्षे। न हि शुक्तिज्ञो रजतज्ञ इति व्यवहारः। नवकृत्वोऽपि भेद एव दृष्टान्तोक्तेश्च। तस्मादतत्त्वमसीत्येवोच्यते। ऐतदात्म्यमित्येतदात्मसम्बन्धि। तत्स्वामिकम्। त्वमपि तदैतदात्म्य-

SGDF
Sri Gangeshwari Digital Foundation

मेवासि न सोऽसीति वा । तदिति लिङ्गसाम्यं चात्र । अविद्यमानमेवेश्वरं सृष्ट्यादिकं चाप्राप्तमेवात्मनो भिन्नत्वेन प्रापयित्वा तन्निषेधे कथं श्रुतेरुन्मत्तवाक्यत्वं न स्यात् ? । अनुवादोऽपि यदिदं वदन्ति तन्न युज्यत इत्यादिवाक्यं परिहारे विशेषयुक्तिं च विना न दृष्टः । अतिप्रसङ्गश्चान्यथा । अभेदानुवादेन भेदोपदेशः किमिति न स्यात् ? । सर्वशाखान्ते भेदोक्तेश्चैतदेव युक्तम् । 'नासंवत्सरवासिने प्रब्रूयात् नाप्रवक्त्र इत्याचार्या आचार्याः' । 'अहं विश्वं भुवनमभ्यभवाम्' । 'अनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ब्रह्मविदो विदुः' । 'नमो विष्णवे महते करोमि' । 'पश्यन्त्यात्मन्यवस्थितमि'त्यादि । नचेश्वरस्तद्भेदो वा प्रत्यक्षादिसिद्धः । तत्पक्षे त्वैक्यादेरपि मिथ्यात्वात्स्वरूपस्य च सिद्धत्वाद्व्यर्थैव श्रुतिः । लक्षितस्वरूपस्यापि न स्वरूपाद्विशेषः । निर्विशेषत्वोक्तेः । मिथ्याविशेषोक्तौ चाप्रामाण्यं श्रुतेः । मिथ्यात्वं च मिथ्यैव तेषाम् । अतः सत्यत्वं सत्यं स्यात् । उपाधिकृतभेदेऽप्युपाधेर्मिथ्यात्वे त्वप्राप्तमेवोपाधिभेदं प्रापयित्वा पुनर्निषिध्यत इति स एव दोषः । सत्योपाधिपक्षेऽपि हस्तपादाद्युपाधिभेदेऽपि भोक्तुरेकत्वदृष्टेरेकेनैवेश्वरेण सर्वोपाधिगतं सुखं दुःखं भुज्येतेत्येवमादयो दोषाः समा एव । अचेतनानामनुभवाभावान्न तत्साम्यम् । अतो जीवेश्वरयोर्भेद एवेति सिद्धम् ॥ १८ ॥

य एनं जीवं वेत्ति हन्तारं स्वातन्त्र्येण । अन्यथा मया हतांस्त्वं जहीत्यादिविरोधः । चेतनं प्रति य एनमिति परमात्मनोऽपि समम् ॥ १९ ॥ जीवेश्वरयोर्नित्यत्वे मन्त्रवर्णोऽप्यस्तीत्याह । न जायते म्रियत इति । अयं ना परमपुरुषो भूत्वा विद्यमान एव देहसम्बन्धरूपेणापि भविता न । मरणं तु देहवियोग इति प्रसिद्धमेव । न हि घटादीनां मरणव्यवहारः । स्वरूपानाशः कैमुत्येनैव सिद्धः । अयं जीवोऽप्यजो नित्यश्च । अन्यथा पुनरुक्तेः । शाश्वतश्च । न

SGDF
Sri Gargeshwari Digital Foundation

कदाचिदस्वातन्त्र्यादिकं जीवस्वरूपं जहाति। 'अल्पशक्तिरसार्वज्ञं पारतन्त्र्यमपूर्णता। उपजीवकत्वं जीवत्वमीशत्वं तद्विपर्ययः। स्वाभाविकं तयोरेतन्नान्यथा स्यात्कथञ्चन। वदन्ति शाश्वतावेतावत एव महाजना' इति महाविष्णुपुराणे। पुराण्यणति गच्छतीति पुराणः ॥ २० ॥ अविनाशिनं शरीरापायादिवर्जितम्। नित्यं स्वरूपतः। एनं परमेश्वरं। 'कर्तृत्वं तु स्वतन्त्रत्वं तदेकस्य हरेर्भवेत्। तच्चाव्ययं तस्य जानन्कथं कर्ता स्वयं भवेदि'ति परमश्रुतिः। अन्यथा अविनाशिनं नित्यमिति पुनरुक्तिः ॥२१॥ जीवस्यापि शरीरसंयोगवियोगावेव जनिमृती यतस्ततो न दुःखकारणमित्याह। वासांसीति ॥२२॥ कारणतोऽपि नेश्वरस्यान्यथात्वमित्याह। नैनं छिन्दन्तीति ॥ २३ ॥ अच्छेद्यत्वादिकं जीवस्यापि तत्समित्याह। अच्छेद्योऽयमिति। नित्यं सर्वगते स्थितः अणुश्चायमिति सर्वगतस्थाणुः। सर्वगतो विष्णुस्तदधीनत्वादिकं तत्स्थत्वम्। हेतुतोऽपि तत्स्थत्वान्न चलतीत्यचलः। नादेन शब्देन सह वर्तत इति सनादन एव सनातनः। 'नित्यं सर्वगते विष्णावणुर्जीवो व्यवस्थितः। न चास्य तदधीनत्वं हेतुतोऽपि विचाल्यते। निषेधविधिपात्रत्वात्सनातन इति स्मृत' इति महाविष्णुपुराणे। अच्छेद्योऽयमित्यादिपुनरुक्तिश्चान्यथा। यस्मिन्नयं स्थितः सोऽव्यक्ताचिन्त्यादिरूपः। एवं ज्ञातः परमेश्वरः सर्वदुःखनाशं करोतीति नानुशोचितुमर्हसि। 'तेषामहं समुद्धर्ते'त्यादेः। 'न त्वेवाहं जातु नासं न त्वमि'त्युभयोरपि प्रस्तुतत्वात्। देहिनः शरीरिणः देहीतिविशेषितत्वाच्च जीवस्य तत्र तत्र। 'अविनाशि तु। येन सर्वमिदं ततम्। अनाशिनोऽप्रमेयस्य। न म्रियते। भूत्वा भविता न। अविनाशिनम्। अव्ययम्। अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमि'त्यादि परमात्मनश्च। न हि जीवेन ततं सर्वम्। न च मुख्यतोऽप्रमेयोऽसौ। न च न म्रियते। न चाविनाशिनं नित्यमिति नित्यत्वातिरिक्तमविनाशित्वं तस्य। न चाव्यक्तत्वमविकार्यत्वं च मुख्यम्। न च भूत्वा

SGDF
Sri Gangeshwari Digital Foundation

भविता वा नेति देहस्याप्यनुत्पत्तिः । परमात्मनस्तु देहवियोगादिक-मपि नास्तीत्यविनाशि त्वित्यादिविशेषणम् । यस्मादेवंभूतस्तस्मात्स एव स्वतन्त्रः । तदधीनमन्यत्सर्वम् । अतः स एव सर्वपुरुषार्थदः । अतस्तत्पूजा सत्कर्मैव । अतस्तदर्थं युध्यस्व । अन्येषां त्वन्तवन्त एव देहाः । प्राकृतदेहिनश्च । अतोऽस्वतन्त्रत्वान्न हन्तुं तेषां सामर्थ्यम् । नित्यत्वान्न हन्यते च । तस्माद्धन्ता हत इति मन्यमानौ न विजानीतः । यस्मादयमेव परमेश्वरः शरीरवियोगरूपेणापि न म्रियते तत्संयोग-रूपेणापि न जायते जीववत्कदापि । अतः स एव स्वतन्त्रत्वात्सर्वस्य हन्ता । जीवस्तु तेन शरीरे हन्यमाने स्वयं न हन्यत इत्येतावत् । अतएवमविनाशित्वादेः स्वातन्त्र्यात् सर्वकर्तारं परमात्मानं यो वेद स कथं घातयति हन्ति वा ? । वाससो जरावत्स्वशरीरजरादावस्वातन्त्र्य-दर्शनात्सर्वत्रास्वातन्त्र्यं ज्ञातव्यं जीवस्य । ईश्वरस्य तु देहस्यापि च्छेदा-देरभावात्स्वातन्त्र्यम् । नैनं छिन्दन्तीति च्छेदनाद्यभावः साक्षादेव दर्शयितुं शक्यते स्वदेहस्येति वर्तमानापदेशः । छेदनादिकं त्वीश्वरो मोहाय मृषैव दर्शयति ॥ २४ ॥ सर्वगतश्चेत्परमात्मा किमिति तथा न दृश्यत इत्यतो वक्ति । अव्यक्तोऽयमिति । कथमेतद्युज्यते ? । अचिन्त्यशक्तित्वात् । न च सा शक्तिः कदाचिदन्यथा भवति । अवि-कार्यत्वात् । यानि यान्यस्य रूपाणि तानि सर्वाण्यप्येवं भूतानीति दर्शयितुमेनमयमित्यादिपृथग्वचनम् । जीवे तु सर्वजीवेष्वनुगमार्थम् । सर्वं चैतच्छ्रुतिसिद्धम् । 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षर' इति पैङ्गिश्रुतिः । 'अदेहो देहवांश्चैकः प्रोच्यते परमेश्वरः । अप्राकृतशरीरत्वाददेह इति कथ्यते । शिरश्चरणबाह्वादिविग्रहोऽयं स्वयं हरिः । स्वस्मान्नान्यो विग्रहोऽस्य ततश्चादेह उच्यते । स्वयं स्वरूपवान्यस्माद्देहवांश्चोच्यते ततः । शिर-श्चरणबाह्वादिः सुखज्ञानादिरूपकः । स च विष्णोर्न चान्योऽस्ति

SGDF
Sri Gurgeshwari Digital Foundation

यस्मात्सोऽचिन्त्यशक्तिमान्। देहयोगवियोगादिस्ततो नास्य कथञ्चन। गुणरूपोऽपि भगवान् गुणभुक्च सदा श्रुतः। अहमित्यात्मभोगो यत्सर्वेषामनुभूयते। अभिन्नोऽपि विशेषोऽयं सदाऽनुभवगोचरः। विशेषोऽपि हि नान्योऽतः स च स्वस्यापि युज्यते। नानवस्था ततः क्वापि परमैश्वर्यतो हरेः। युक्तायुक्तत्वमपि हि यदधीनं सदेष्यते। प्रमाणावगते तत्र कुत एव ह्ययुक्तते'त्यादि परमश्रुतिः। 'गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्र शङ्का। चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाङ्गीहिं तथा प्रतीता' इत्यादि चर्ग्वेदे सौपर्णशाखायाम्। 'एकमेवाद्वितीयं' 'नेह नानास्ति किञ्चन'। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'। 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति'। 'मत्स्यकूर्मादिरूपाणां गुणानां कर्मणामपि। तथैवावयवानां च भेदं पश्यति यः क्वचित्। भेदाभेदौ च यः पश्येत्स याति तम एव तु। पश्येदभेदमेवैषां बुभूषुः पुरुषस्ततः। अभेदेऽपि विशेषोऽस्ति व्यवहारस्ततो भवेत्। विशेषिणां विशेषस्य तथा भेदविशेषयोः। विशेषस्तु स एवायं नानवस्था ततः क्वचित्। प्रादुर्भावादिरूपेषु मूलरूपेषु सर्वशः। न विशेषोऽस्ति सामर्थ्ये गुणेष्वपि कदाचन। मत्स्यकूर्मवराहाश्च नृसिंहवटुभार्गवाः। राघवः कृष्णबुद्धौ च कल्किव्यासैतरेयकाः। दत्तो धन्वन्तरिर्यज्ञः कपिलो हंसतापसौ। शिंशुमारो हयास्यश्च हरिः कृष्णश्च धर्मजः। नारायणस्तथेत्याद्याः साक्षान्नारायणः स्वयम्। ब्रह्मरुद्रौ शेषविपौ शक्राद्या नारदस्तथा। सनत्कुमारः कामभवोऽप्यनिरुद्धो विनायकः। सुदर्शनाद्यायुधानि पृथ्वाद्याश्चक्रवर्तिनः। इत्याद्या विष्णुनाऽविष्टा भिन्नाः संसारिणो हरेः। तेष्वेव लक्ष्मणाद्येषु त्रिष्वेवं च बलादिषु। नरार्जुनादिषु तथा पुनरावेश उच्यते। स्वल्पस्तु पुनरावेशो धर्मपुत्रादिषु प्रभोः। एतज्जानाति यस्तस्मिन्प्रीतिरभ्यधिका हरेः। सङ्करज्ञानिनस्तत्र पातस्तमसि च ध्रुवमि'त्यादि महावराहे ॥२५॥

SGDF
Sri Gangeshwari Digital Foundation

तिष्ठतु तावदयं विस्तारः। यावन्मोक्षं जीवस्य जन्ममरणे स्वयमेव मन्यसे न तु नियमेन। तथापि तावन्मात्रेणापि ज्ञानेन शोचितुं नार्हसि। 'नित्यं सनातनं प्रोक्तं नित्यं नियतमेव चे'ति शब्दनिर्णये। अत्र तु नियतम्। 'जातस्य हि ध्रुव'-इति प्रकाशनात् ॥ २६ ॥ तस्मान्नात्राश्चर्यबुद्धिः कर्तव्या ॥२७॥२८॥ किं तर्ह्याश्चर्यो भगवानेवेत्याह। आश्चर्यवदिति। आश्चर्यमेव सन्तमेन-माश्चर्यवत्पश्यति न पुनरनाश्चर्यम्। 'गगनं गगनाकारं सागरः साग-रोपम'इत्यादिवत्। 'आश्चर्यो भगवान्विष्णुर्यस्मान्नैतादृशः क्वचित्। तस्मात्तद्गोचरं ज्ञानं तद्गोचरवदेव त्वि'ति ब्रह्मतर्के। अनाश्चर्यवदप्य-सुरादयः पश्यन्तीति कश्चिदिति विशेषणम् ॥२९॥ देही कुतोऽवध्यः ? यस्मादयमीश्वरः सर्वस्य जीवस्य सूक्ष्मे स्थूले च देहे रक्षकत्वेनावस्थितः अत एवावध्यः। न स्वसामर्थ्यं कस्यापि। 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये'ति हि भागवते। 'तत्र तत्र स्थितो विष्णुर्नित्यं रक्षति नित्यदा। अनित्य-दैवानित्यं च नित्यानित्ये ततस्ततः। भावाभावनियन्ता हि तदेकः पुरुषोत्तम' इति पाद्मे ॥३०॥३६॥ जित्वा स्वर्गं महीं च। 'ये युध्यन्ते प्रधनेषु शूरास' इति श्रुतेः ॥३७॥३८॥ सम्यक् ख्यातिर्ज्ञानं साङ्ख्यम्। युज्यतेऽनेनेति योगस्तदुपायः। 'सम्यक्तत्त्वदृशिः साङ्ख्यं योगस्त-त्साधनं स्मृतमि'ति शब्दनिर्णये। 'ब्रह्मतर्कस्तर्कशास्त्रं विष्णुना यत्समीरितम्। अक्षपादकणादौ च साङ्ख्ययोगौ च हैतुकाः। बौद्ध-पाशुपताद्यास्तु पाषण्डा इति कीर्तिताः। मीमांसा त्रिविधा प्रोक्ता ब्राह्मी दैवी च कार्मिकी। ब्रह्मतर्कं च मीमांसां सेवेत ज्ञानसिद्धये। वैदिकज्ञानवैरूप्यान्नान्यत्सेवेत पण्डित'इत्यन्यसाङ्ख्ययोगयोर्निषिद्ध-त्वान्नारदीये। साङ्ख्यस्य निरीश्वरत्वादुक्तत्वाच्चेश्वरस्य। साङ्ख्यैर्योगैश्च विहितहिंसाया अप्यनर्थहेतुत्वाङ्गीकारात्। अत्र तु युद्धविधानाच्च

SGDF
Sri Gargeshwari Digital Foundation

मोक्षार्थत्वेनैव कर्मबन्धं प्रहास्यसीति । परमसाङ्ख्ययोगयोश्चोक्तार्थत्वेनैव न विरोधः ॥ ३९ ॥ 'प्रारम्भमात्रमिच्छा वा विष्णुधर्मे न निष्फला । न चान्यधर्माकरणाद्दोषवान्विष्णुधर्मकृदि'त्याग्नेये । 'स्वोचितेनैव धर्मेण विष्णुपूजामृते क्वचित् । नाप्रवृत्तिः प्रवृत्तिर्वा यत्र धर्मः स वैष्णवः । एनं धर्मं च देवाद्या वर्तन्ते सात्त्विका जनाः । एष कार्तयुगो धर्मः पाञ्चरात्रश्च वैदिकः । तत्प्रीत्यर्थं विनाऽन्यस्मै नोदबिन्दुं न तण्डुलम् । दद्यान्निराशीश्च सदा भवेद्भक्तश्च केशवे । नैतत्समेऽधिके वाऽपि कुर्याच्छङ्कामपि क्वचित् । जानीयात्तदधीनं च सर्वं तत्त्ववित्सदा । यथाक्रमं तु देवानां तारतम्यविदेव च । एष भागवतो मुख्यस्त्रेतादिषु विशेषतः । एष धर्मोऽतिफलदो विशेषेण पुनः कलौ । एवं भागवतो यस्तु स एव हि विमुच्यते । त्रैविद्यस्त्वपरो धर्मो नानादैवतपूजनम् । तत्रापि विष्णुर्ज्ञातव्यः सर्वेभ्योऽभ्यधिको गुणैः । समर्पयति यज्ञाद्यमन्ततस्त्वेव विष्णवे । त्रैविद्यधर्मा पुरुषः स्वर्गं भुक्त्वा निवर्तते । पुनः कुर्यात्पुनः स्वर्गं याति यावद्धरेर्वशे । सर्वान्देवान्प्रविज्ञाय तत्कर्मैव सदा भवेत् । सम्यक्तत्वापरिज्ञानादन्यकर्मकृतेरपि । स्वर्गादिप्रार्थनाच्चैव रागादेश्चापरिक्षयात् । सदा विष्णोरस्मरणात्त्रैविद्यो नाप्नुयात्परम् । क्रमेण मुच्यते विष्णौ कर्माण्यन्ते समर्पयन् । यदि सर्वाणि नियमाज्जन्मभिर्बहुभिः शुभैः । परं विष्णुं न यो वेत्ति कुर्वाणोऽपि त्रयीक्रियाः । नासौ त्रैविद्य इत्युक्तो वेदवादी स उच्यते । वादो विवादः सम्प्रोक्तो वादो वचनमेव च । वेदोक्ते विष्णुमाहात्म्ये विवादात्पठनादपि । अथवा निरर्थकात्पाठाद्वेदवादी स उच्यते । वेदवादरतो न स्यान्न पाषण्डी न हैतुकी । तेभ्यो याति तमो घोरमन्धं यस्मान्न चोत्थितिः । अनारम्भमनन्तश्च नित्यदुःखं सुखोज्झितम् । वव्रं यद्वेदगदितं यत्र यान्त्यसुरादयः । बुद्धिर्निर्णीततत्त्वानामेका विष्णुपरायणा । बहुशाखाह्यनन्ताश्च बुद्धयोऽव्यवसायिनामि'ति ब्रह्म-

SGDF
Sri Gargeshwari Digital Foundation

वैवर्ते ॥४०॥४१॥ अन्यवसायबुद्धिः केषाम् ? । यां वाचमविपश्चितः प्रवदन्ति । तयाऽपहृतचेतसाम् । बुद्धिर्व्यवसायात्मकत्वेन समाधानेन वर्तते । 'यथावस्तु तथा ज्ञानं तत्साम्यात्सममीरितम् । विषमं त्वन्यथा-ज्ञानं समाधानं समस्थितिः । न तद्भवत्यसद्वाक्यैर्विषमीकृतचेतसाम् । स्वर्गादिपुष्पवाद्येव वचनं यदचेतसाम् । न मन्यन्ते फलं मोक्षं विष्णु-सामीप्यरूपकम् । फलदं च न मन्यन्ते तं विष्णुं जगतः पतिम् । भोगैश्वर्यानुगत्यर्थं क्रियाबाहुल्यसन्तताम् । बहुसंसारफलदामन्ते तमसि पातिनीम् । यां वदन्ति दुरात्मानो वेदवाक्यविवादिनः । तया सम्मोहितधियां कथं तत्त्वज्ञता भवेदि'ति च । 'इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे सुकृते तेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ती'ति चाथर्वणीयश्रुतिः । 'वेदवादरतो न स्यान्न पाषण्डी न हैतुकी'ति हि भागवते । 'ये न जानन्ति तं विष्णुं याथातथ्येन संशयात् । जिज्ञासवश्च नितरां श्रद्धावन्तः सुसाधवः । निर्णेतॄणामभावेन केवलं ज्ञानवर्जिताः । ते याज्ञिकाः स्वर्गभोगक्षये यान्ति मनुष्यताम् । यैर्निश्चितं परत्वं तु विष्णोः प्रायो न यातनाम् । ब्रह्महत्यादिभिरपि यान्त्याधिक्ये चिरं न तु । विशेष एव तेषां तु तदन्येषां विपर्ययः । ये तु भागवताचार्यैः सम्यग्यज्ञादि कुर्वते । बहि-र्मुखा भगवतो निवृत्ताश्च विकर्मणः । दक्षिणातर्पितानां तु ह्याचार्याणां तु तेजसा । यान्ति स्वर्गं ततः क्षिप्रं तमोऽन्धं प्राप्नुवन्ति च । तदन्ये नैव च स्वर्गं यान्ति विष्णुबहिर्मुखा' इति नारदीये ॥ ४२ ॥ ४४ ॥ त्रैगुण्याख्यं विषं यापयन्ति अपगमयन्तीति त्रैगुण्यविषयाः । 'आश्रित्य वेदांस्तु पुमांस्त्रैगुण्यविषहारिणः । निस्त्रैगुण्यो भवेन्नित्यं वासुदेवैकसंश्रय' इति च । 'सत्त्वं साधुगुणाद्विष्णुरात्मा सन्ततिहेतुत' इति च । सन्ततविष्णुस्मरणं नित्यसत्त्वस्थत्वम् । परमात्मा मम स्वामीतिज्ञानमात्मवत्त्वम् । तेनैक्यज्ञानं निवारयति । विरुद्धयोग-

SGDF
Sri Gargeshwari Digital Foundation

क्षेमेच्छावर्जितः । अन्यथोत्थानादेरप्ययोगात् ॥ ४५ ॥ 'उद्रेका-त्पातृराहित्यादनत्वाच्चाखिलस्य च । प्रलयेऽप्युदपानोऽसौ भगवान्हरि-रीश्वरः । प्रकृतिर्बुद्बुदरूपेण सर्वमावृत्य तिष्ठति । प्रलयेऽतो लयं प्राहुः सर्वतः संप्लुतोदकमि'ति च । 'यावत्प्रयोजनं विष्णोः सकाशात्साधकस्य च । धर्ममोक्षादिकं तावत्सर्ववेदविदो भवेत् । वेदार्थनिर्णयो यस्मा-द्विष्णोर्ज्ञानं प्रकीर्तितम् । ज्ञानात्प्रसन्नश्च हरिर्यतोऽखिलफलप्रद' इति च । सर्वतः संप्लुतोदकेऽप्युद्रिक्तः पालकवर्जितः । कालाद्यनश्च यो विष्णुस्तस्माद्यावत्फलं तावत्सर्ववेदेषु विशेषज्ञस्यैव भवतीत्यर्थः । सर्वे हि विष्णोरन्ये प्रलयकाले नोद्रिक्ताः । ये चोद्रिक्ता मुक्ता रमा च तेऽपि न पालकवर्जिताः, विष्णुपाल्यत्वात् । न च मुक्ताः कालादि-चेष्टकाः । नचोद्रिक्तत्वं तेषां तद्वत् । अत उदपानो विष्णुरेव । प्रलये विशेषतोऽपि । 'आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनाऽस । तम आसीत्तमसा गूढमग्रे प्रकेतं सलिलं सर्वमा इदम्' । 'आपो वा इदमग्रे सलिल आसीत्सलिल एको द्रष्टाऽद्वैतो भवती'त्यादिश्रुतिभ्यः ॥४६॥ कर्माधिकारिण एव त्वदादयो जीवाः । फलं तु मदायत्तमिति भावः । मा कर्मफलहेतुर्भूः नेश्वरोऽहमिति भावं कुरु । 'एष उ एव शुभाशुभैः कर्मफलैरेनं संयोजयति न स्वयं संयुक्तो भवति यदेनं कर्मफलैः संयोजयति न स्वयं संयुक्तो भवति तस्मादन्य एवासौ भगवान्वेदितव्य' इति पैङ्गिश्रुतिः ॥ ४७ ॥ सङ्गं फलस्नेहम् ॥ ४८ ॥ बुद्धौ जातायामपि विष्णुमेव शरण-मन्विच्छ । 'अज्ञानां ज्ञानिनां चैव मुक्तानां शरणं हरिः । तं ये स्वैक्येन मन्यन्ते सर्वभिन्नं गुणोच्छ्र्यात् । कृपणास्ते तमस्यन्धे निपतन्ति न संशयः । न तेषामुत्थितिः क्वापि नित्यातिशय-दुःखिनाम् । गुणभेदविदां विष्णोर्भेदाभेदविदामपि । देहकर्मादिषु तथा प्रादुर्भावादिकेऽपि वा । स्वोद्रिक्तानां तदीयानां निन्दां कुर्वन्ति

SGDF
Sri Gargeshwari Digital Foundation

येऽपि च। सर्वेषामपि चैतेषां गतिरेषा न संशय' इति नारदीये॥ ॥ ४९ ॥ यथावद्विष्णुं ज्ञात्वा तदर्थत्वेन कर्मकरणमित्येतत्कर्मकौशलमेव योगः। भगवज्ज्ञानमेव बुद्धिः ॥ ५० ॥ ५१ ॥ निर्वेदं नितरां लाभम्। 'बुद्धिमोहो यदा न स्यादन्यथाज्ञानलक्षणः। श्रोतव्यश्रुतसाफल्यं तदा प्राप्नोति मानवः। श्रुतिमार्गं प्रपन्ना तु तदर्थज्ञाननिश्चला। समाधानेन तु पुनरापरोक्ष्याच्च निश्चला। विष्णौ प्राप्स्यति तद्योगं मुक्तो भूत्वा तदश्नुत'इति च। श्रुतौ विशेषेण प्रतिपन्ना ॥५२॥५३॥ का भाषा ?। कथं भाष्यते ?। कैर्गुणैः ?। समाधिस्तस्य विषमबुद्धिवर्जितस्य ॥ ५४ ॥ 'सर्वकामनिवृत्तिस्तु जानतो न कथञ्चन। अनिषिद्धकामितैवातो ह्यकामित्वमितीर्यते। अपरोक्षदृशोऽपि स्याद्यदा नास्त्यपरोक्षदृक्। क्वचिद्विरुद्धकामोऽपि यथाऽयुध्यद्धरो हरिम्। अतोऽनभिभवो यावद्दृशस्तावन्निगद्यते। स्थितप्रज्ञस्तथाप्यस्य कादाचित्क्यपि या दृशिः। नियमेनैव मोक्षाय भवेद्योग्या भवेद्यदि। अयोग्या भक्तिजाता चेत्क्रमान्मुक्त्यै भवेत्तथे'ति च। आत्मनि विष्णौ, आत्मना विष्णुना। तत्प्रसादादेव तुष्टः ॥५५॥ रसो रागः ॥५९॥ संमोहान्मिथ्याज्ञानात्। ज्ञातमप्यन्यथा स्मर्यते। वाक्यार्थानामन्यथा स्मरणान्निर्णीतं ज्ञानमपि नश्यति ॥६२॥६३॥ शान्तिर्भगवन्निष्ठा। 'शमो मन्निष्ठते'ति हि भागवते ॥६४—६६॥ 'देवेभ्योऽन्ये यदा ब्रह्म पश्यन्त्यन्यन्न दृश्यते। निशायामिव सुव्यक्तं यथान्यैर्ब्रह्म नेयते। आश्चर्यवस्तुदृग्यद्वद्व्यक्तमन्यन्न पश्यति। ऐकाग्र्याद्वा सुखोद्रेकाद्देवाः सूर्यवदेव च। प्रायशः सर्ववेत्तारस्तत्रापि ह्युत्तरोत्तरमि'ति ब्रह्मतर्के ॥६९॥ 'भुञ्जानोऽपि हि यः कामान्मर्यादां न तरेत्क्वचित्। समुद्रवद्धर्ममयीं नासौ कामी स उच्यते। केति कुत्सितवाची स्यात्कुत्सितं मानमेव तु। कामो मोक्षविरोधी स्यान्न सर्वेच्छा विरोधिनी'ति च। न च सर्वेच्छाभावे जीवनं भवति।

SGDF
Sri Gargeshwari Digital Foundation

'शान्तिर्मोक्षो यतो ह्यत्र विष्णुनिष्ठा भवेद्ध्रुवे'ति च ॥ ७० ॥ निषिद्धस्पृहाऽभावमात्रेण सर्वविषयान्विहाय । 'अस्वरूपे स्वरूपत्वमति-रेव ह्यहंकृतिः । त्याज्या सर्वत्र ममता ज्ञात्वा सर्वं हरेर्वश' इति च ॥ ॥ ७१ ॥ ब्राह्मी ब्रह्मविषया । ज्ञानिनामप्यन्तकालेऽन्यमनसां प्रारब्धकर्मभावाज्जन्मान्तरम् । प्रारब्धकर्मनाशकाले नियमेन भगव-त्स्मृतिर्भवति । ततो मोक्षश्च । 'यं यं वापि स्मरन्भावमि'ति हि वक्ष्यति । बाणं शरीरम् । 'अभावाज्जडदेहस्य विष्णुर्निर्बाण उच्यते । भिन्नदेहाभावतो वा स सहस्रशिरा अपी'ति च ॥ ७२ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये द्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥

हरिः ॐ । ज्ञानं योगश्चोक्तौ । तत्र कर्मयोगं विशेषतः प्रपञ्चयत्यनेनाध्यायेन । दूरेण ह्यवरं कर्मेति प्रश्नबीजं । ज्ञानप्रचुरो योगो ज्ञानयोगः । कर्मप्रचुरोऽन्यः । 'साङ्ख्या ज्ञानप्रधानत्वा-द्देवाश्च यतयस्तथा । मुख्यसाङ्ख्यास्तत्र देवा ज्ञानमेषां महद्यतः । बहुकर्मकृतोऽप्येते ततोऽपि बहुवेदनात् । मुख्यसाङ्ख्या इति ज्ञेया-स्तदन्ये कर्मयोगिनः । ज्ञानिनोऽप्यतिबाहुल्यात्कर्मणः कर्मयोगिनः । नोभयं तद्विना कश्चित्पुमान्हि पुरुषार्थभाक् । न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् । न च ज्ञानं विना कर्म पुरुषार्थकरं भवेदि'ति ब्रह्मवैवर्ते । निष्ठा पर्यवसितिर्मुक्तिः । 'ज्ञानिनो मोक्षनियमस्तथापि शुभकर्मणा । आनन्दवृद्धिरन्येन ह्रासो ज्ञानं तु कर्मणे'ति परमश्रुते'र्न कर्मणा न प्रजया धनेने'त्यादिविरोधो न । अन्यथा 'न कर्मणा-मनारम्भादि'त्याद्युभयसमवाक्यशेषविरोधश्च । समत्वं च 'न हि कश्चिदि'त्यादेः । 'नान्यः पन्था'इत्यपि ज्ञानमृते न मोक्ष इत्येवाह ॥ ॥३॥४॥ 'कर्तृत्वं द्विविधं प्रोक्तं विकारश्च स्वतन्त्रता । विकारः प्रकृतेरेव विष्णोरेव स्वतन्त्रते'ति पैङ्गिश्रुतेः 'कार्यते ह्यवश'इत्यत्रावशो

SGDF
Sri Gargeshwari Digital Foundation

विष्णुवशः । 'अः इति ब्रह्मे'त्यादि श्रुतेः ॥५॥ कर्मणा बध्यते जन्तुरित्यादिकमप्यवैष्णवकर्मविषयमित्याह । यज्ञार्थादिति । 'ज्ञो नाम भगवान्विष्णुस्तं यात्युद्देश एष यः । स यज्ञ इति सम्प्रोक्तो विहिते कर्मणि स्थित'इति बर्कश्रुतिः ॥९॥ 'जननात्परसस्यादेः पर्जन्यो मेघसन्ततिः । स यज्ञात्कर्मणः सोऽपि समस्तं कर्म केशवात् । स नित्योऽप्यक्षरततिरूपाद्वाक्याद्धि गम्यते । वाक्यमुच्चार्यते भूतैस्तान्यन्नात्तच्च मेघतः । तस्मात्सर्वगतो विष्णुर्नित्यं यज्ञे प्रतिष्ठितः । एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः । स पापो विश्वहन्तृत्वान्नरके मज्जति ध्रुवम् । वाचिको मानसो यज्ञो न्यासिनां तु विशेषतः । वनस्थस्याक्रतुर्यज्ञः क्रत्वादिर्गृहिणोऽखिलः । शुश्रूषाद्यात्मको यज्ञो विहितो ब्रह्मचारिणः । विद्याऽभयादिदानं च सर्वेषामपि सम्मतम् । गृहिणो वित्तदानं तु वनस्थस्यान्नपूर्वकम् । सर्वैः कार्यं तपो घोरमिति सर्वे त्रिकर्मिण'इति नारदीये । ब्रह्माक्षरशब्दार्थयोर्व्यत्यासे 'तस्मात्सर्वगतं ब्रह्मे'ति प्रत्यभिज्ञाविरोधश्चक्रकाऽप्रवेशश्च ॥ १४--१६ ॥ तृप्तिसन्तोषशब्दयोः पर्यायत्वेऽपि परमात्मना तृप्तः परमात्मनि तृप्त-इति विशेषः । 'विष्णुप्रसादाद्रतिमांस्तृप्तो विष्णुप्रसादतः । विष्णावेवातितृप्तश्च मुक्तोऽसौ विध्यगोचर'इत्याग्नेये । 'रतिरानन्द उद्दिष्टस्तृप्तिस्तु कृतकृत्यता । प्रीतिस्तु द्विविधः स्नेहः कर्मजो निज एव चे'ति शब्दनिर्णये । 'सन्तोषस्तृप्तिरापूर्तिः प्रीतिः पर्यायवाचका' इत्यभिधानम् ॥ १७ ॥ यस्मादमुक्तस्य कार्यमस्त्येव तस्मादसक्तः । असक्त आचरन्नेव यस्मात्परमाप्नोति । मुक्तस्यैव कार्यं नास्तीत्येवकारार्थोऽपि यस्त्विति तुशब्देनावगतः । 'तस्मात्कर्म समाचारे'त्युपसंहारविरोधश्चान्यथा । 'ब्रह्मनिष्ठा ब्रह्मरता ब्रह्मज्ञानसुतर्पिताः । पाण्डवानां च मुक्तानामन्तरं किञ्चिदेव ही'ति भविष्यत्पर्ववचनाच्च नार्जुनस्यामुख्याधिकारिता । आत्मरतिरेव स्यादित्येवशब्देन मुक्ता-

SGDF
Sri Gurgeshwari Digital Foundation

नामेभ्यो विशेषो दर्शितः। एषां कदाचिद्दुःखाभासस्यापि भावात् ॥
॥ १९ ॥ 'सहैव कर्मणा सिद्धिमास्थिता जनकादयः। ज्ञाननिष्ठा अपि ततः कार्यं वर्णाश्रमोचितमि'ति च। 'अज्ञानां ज्ञानदं कर्म ज्ञानिनां लोकसङ्ग्रहात्। अद्धैव तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा ॥ २० ॥
ममैव केवलं नास्ति केनाप्यर्थस्तथाप्यहम्। कर्मकृल्लोकरक्षार्थं तस्मात्कुर्वीत मत्पर'इति कृष्णसंहितायाम्। 'रक्षया वाथ सृष्ट्या वा संहृत्यादेर्न तु क्वचित्। अर्थो विष्णोस्तथाप्येष स्वभावात्सर्वकर्मकृत्। मत्तो नृत्तादिकं यद्वत्कुर्यात्सुखविशेषतः। परमानन्दरूपत्वात्कुर्याद्विष्णुस्तथैव त्वि'ति बर्कश्रुतिः ॥ २२ ॥ 'नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलम्। तथापि मत्कृता पूजा तत्प्रसादेन नान्यथा। तद्भक्तिस्तत्फलं मह्यं तत्प्रसादः पुनः पुनः। कर्मन्यासो हरावेवं विष्णोस्तृप्तिकरः सदा। यस्मात्स्वतन्त्रकर्तृत्वं विष्णोरेव न चान्यगम्। तदधीनं स्वतन्त्रत्वं स्वावरापेक्षयैव तु। जीवस्य विकृतिर्नाम कर्तृत्वं जडसंश्रयम्। पुमान्दोग्धा च गौर्दोग्ध्री स्तनो दोग्धेतिवत्क्रमादि'ति ब्रह्मतर्कवचनादीश्वरजीवप्रकृत्यादीनां कर्तृत्वमकर्तृत्वं च विभागेन ज्ञातव्यं सर्वत्र। 'क्वचित्स्वभावः प्रकृतिः क्वचिच्च त्रिगुणात्मिका। क्वचित्प्रकृष्टकर्तृत्वाद्भगवान्प्रकृतिर्हरिरि'ति शब्दनिर्णये। 'स्वभावतस्त्रिधा जीवा उत्तमाधममध्यमाः। उत्तमास्तत्र देवाद्या मर्त्यमध्यास्तु मध्यमाः। अधमा असुराद्याश्च नैषामस्त्यन्यथा भवः। शरीरमात्रान्यथात्वे स्वजातिं पुनरेष्यति। उत्तमा मुक्तियोग्यास्तु सृतियोग्यास्तु मध्यमाः। अपरेऽन्धतमोयोग्याः प्राप्तिः साधनपूर्तितः। पूर्त्यभावेन सर्वेषामनादिः संसृतिः स्मृता। नैव पूर्तिश्च सर्वेषां नित्यकालहरीच्छया। अतोऽनुवर्तते नित्यं संसारोऽयमनादिमान्। अतोऽधमानां जीवानां मिथ्याज्ञानादयोऽखिलाः। स्वाभाविका गुणा ज्ञेया मध्यमर्त्येषु मिश्रिताः। तत्वज्ञानं विष्णुभक्तिरित्याद्या देवतादिषु।

SGDF
Sri Gargeshwari Digital Foundation

कार्यते ह्यवशः कर्म सर्वैस्तैः प्राकृतैर्गुणैः। स्वाभाविकगुणानेतान्हेतुं कृत्वैव विष्णुना। कर्मसु क्रियमाणेषु कर्ताऽहमिति मूढधीः। मन्यते तत्वविद्विष्णोर्गुणा इच्छादयस्तु ये। स्वाभाविकेषु जीवस्य कामाद्येषु सदैव तु। प्रेरकत्वेन वर्तन्ते स्वातन्त्र्यं मम न क्वचित्। इति मत्वा न सक्तः स्यात्प्रीतोऽस्य भवति प्रभुः। स्वभावगुणसम्मूढा ज्ञानादिगुणवत्तरम्। स्वातन्त्र्येणैव कर्तारं चात्मानं प्रतिजानते। तान्गुणान्कर्म तच्चैव विष्णवधीनं न ते विदुः। तेष्वयोग्येषु तत्वज्ञस्तत्त्वं नातिप्रकाशयेत्। वदेद्विवादरूपेण नोपदेशात्मना क्वचित्। सभारूपेण वा ब्रूयात्पृष्टेऽव्यक्तिकृदेव वा। बुद्ध्वाप्यसौ यतो नित्यं स्वभावानुगचेष्टितः। स्वभावं यान्ति भूतानि निग्रहः किं करिष्यती'त्यादि प्रकाशसंहितायाम् ॥ २७ ॥ ३५ ॥ परमेश्वरादेवेभ्यश्चार्वाक्तनप्रेरकं पृच्छति। अथ केनेति ॥ ३६ ॥ 'अखिलप्रेरको विष्णुर्ब्रह्माद्यास्तदवान्तराः। असुरा अशुभेष्वेव कामादेरभिमानिनः। तत्र कामः कालनेमिः सर्वं धूममलोल्बवत्। शुभमध्याधमजनं क्रमादावृत्य तिष्ठति। महाशनस्य तस्येदं नालं तेनानलोऽग्निवत्। भुञ्जान इन्द्रियाविष्टो ज्ञानास्त्रेणैव हन्यत' इति ब्रह्मतर्के। ज्ञानावरणरूपेणेदमावृणोतीत्यावृतं ज्ञानमिति पुनराह। न केवलं दुष्पूरो नालमिति मन्यते चेत्यनलः। 'अग्नेरप्यनलः कामो यन्नालमिति मन्यत' इति च ॥ ३७ ॥ ४१ ॥ 'सर्वेभ्यः प्रवरा देवा इन्द्राद्या इन्द्रियात्मकाः। तेभ्यो मनोभिमानी तु रुद्रस्तस्मात्सरस्वती। बुद्ध्यात्मिका ततो ब्रह्मा महानात्मा परः स्मृतः। अव्यक्तरूपा लक्ष्मीश्च वराऽतोऽतो हरिः स्वयम्। न तत्समोऽधिको वेति ह्यानुपूर्वी प्रकीर्तिता। यथाक्रमप्रबोधेन नाश्याः कामादिशत्रवः। प्राप्यते च परं स्थानं विष्णोरतुलमञ्जसे'ति च। न 'चेन्द्रियेभ्यः परा ह्यर्था रुद्रोऽहंकृतिरूपक' इत्यादिविरोधः। 'सर्वाभिमानिनो देवाः सर्वेपि ह्युत्तरोत्तरम्। आधिक्यं

SGDF
Sri Gargeshwari Digital Foundation

वक्तुमेवैषां पृथक्स्थानमुदीर्यते । आधिक्यक्रम एवात्र शास्त्रतात्पर्य-मिष्यते । स्थानेषु त्ववरेषां च परे सन्ति न चेतरे । तथापि पितुरर्थो यः पुत्रस्याप्युपचर्यते । अव्यक्तादिपदार्थानां सर्वे तदभि-मानिन' इति च । 'यत्र ह क्व च पुत्रस्य तत्पितुर्यत्र वा पितु स्तद्वा पुत्रस्येत्येतदुक्तं भवती'त्यादि श्रुतेश्च । 'बहुवाचिनां शब्दानां लिङ्ग-प्रकरणादिभिः । प्रवृत्तिहेतोश्चाधिक्यान्निर्णयोऽर्थेषु गम्यत' इति शब्दनिर्णये । 'लिङ्गादिसाम्यं यत्र स्यात्प्रयोगाधिक्यमेव तु । निर्णायकं भवेत्तत्र तेन स्यात्सुबहुश्रुत' इति ब्रह्मतर्के ॥ ४२ ॥ इति श्रीमदानन्द-तीर्थभगवत्पादा० गीतातात्पर्यनिर्णये तृतीयोऽध्यायः ॥ ३ ॥ ॥

हरिः ॐ ॥ उक्तयोर्ज्ञानकर्मणोरुभयोर्विशेषविस्तरात्मकोऽय-मध्यायः । 'ब्रह्मरुद्रेन्द्रसूर्याणां यद्दत्तं विष्णुना पुरा । पञ्चरात्रात्मकं ज्ञानं व्यासोऽदात्पाण्डवेषु तत् । तेषामेवावतारेषु सेनामध्येऽर्जुनाय च । प्रादाद्गीतेतिनिर्दिष्टं सङ्क्षेपेणायुयुत्सवे । यथा कुर्वन्ति कर्माणि यथा जानन्ति देवताः । सर्वे कार्तयुगाश्चैव नृपाश्च मनुपूर्वकाः । ज्ञातव्यं चैव कर्तव्यं यथा सर्वैर्मुमुक्षुभिः । त्रेतादित्रिषु जातैश्च गीतायां तदुदाहृतम् । पाण्डवाद्याः क्षेमकान्ताः करिष्यन्ति च जानते । तथैव तेन गीताया नास्ति शास्त्रं समं क्वचित् । वेदार्थपूर्वकं ज्ञेयं पञ्चरात्रं यतोऽखिलम् । तत्सङ्क्षेपश्च गीतेयं तस्मान्नास्याः समं क्वचिदि'ति ब्रह्मवैवर्ते ॥ १ ॥ 'जानन्तोऽपि विशेषार्थज्ञानाय स्थापनाय वा । पृच्छन्ति साधवो यस्मात्तेन पृच्छसि पार्थिवे'त्याग्नेयवचनान्नार्जुनो भगवन्तं न जानाति ॥ ४ ॥ आत्ममायया आत्मेच्छया । प्रकृतिं स्वामधिष्ठाय स्वभावम् । 'देवस्यैष स्वभावोऽयमि'त्यादिश्रुतेश्च । अत एव स्वशब्देन विशेषणं 'प्रकृतिं स्वामवष्टभ्ये'त्यादिषु । 'मयाऽ-ध्यक्षेण प्रकृति'रित्यादिषु तु न स्वशब्दः । 'प्रकृतिं विद्धि मे परामि'त्यादिषु सम्बन्धित्वेन प्रतीतेरन्या । अत्र तु स्वशब्दः स्वरूप-

SGDF
Sri Gargeshwari Digital Foundation

वाची। स्वभाव इत्यत्रापि स्वाख्यो भावः स्वभावः। भावशब्दस्तु सम्बन्ध्याशङ्कानिवृत्तये। स्वस्वभाव इति तु स्वस्वरूपमितिवदुपचारत्वाशङ्कां निवर्तयति। 'स्रष्टृत्वादिस्वभावत्वात्स्वेच्छया विष्णुरव्ययः। सृष्ट्यादिकं करोत्यद्धा स्वयं च बहुधा भवेदि'ति नारायणश्रुतिः ॥६॥ 'येषां गुणानां ज्ञानेन मुक्तिरुक्ता पृथक्पृथक्। वेदेषु चेतिहासेषु सा तु तेषां समुच्चयात्। एवमेव शमादीनां नान्यथा तु कथञ्चने'ति ब्रह्मवैवर्तवचनाज्जन्म कर्म चेत्यादिषु न तावन्मात्रेण मोक्षः ॥ ९ ॥ 'मयं प्रधानमुद्दिष्टं प्राधान्यं यैर्हरेर्मतम्। भगवन्मयास्ते विज्ञेयास्ते मुच्यन्ते न चापर' इति च। मयि भावो मद्भावः ॥ १० ॥ तथैव भजामि। तदनुसारिफलदानरूपेण। अन्यदेवतायाजिनामपि मत्समर्पणेन वैष्णवमार्गानुवर्तनेनैव सम्यक् फलं भवति। 'अन्यदैवतपूजाऽपि यस्मिन्नन्ते समर्पिता। स्वर्गादि फलहेतुः स्यान्नान्यथा तं भजेद्धरिमि'त्याग्नेये ॥११॥ 'सत्वसत्वाधिकरजोरजोभिस्तमसा तथा। वर्णा विभक्ताश्चत्वारः सात्विका एव वैष्णवा' इति च। कर्मविभागं शमो दम इत्यादिना वक्ष्यति। 'वैष्णवाः सात्विका एव तामसा एव चापरे। दौर्लभ्यसुलभत्वेन तेषां वर्णादिभिन्नते'ति च। 'स्वाभाविको ब्राह्मणादिः शमाद्यैरेव भिद्यते। योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम्। विष्णुभक्तिश्चानुगता सर्ववर्णेषु विश्पतिम्। आरभ्य हीयतेऽथापि भेदः स्वाभाविकस्तत' इति नारदीये। 'कर्ताऽपि भगवान्विष्णुरकर्तेति च कथ्यते। तस्य कर्ता यतो नान्यः स्वतन्त्रत्वात्परात्मन' इति च। अपिशब्दो गुणसमुच्चयार्थः। कर्ता मे नास्तीत्यपि विद्धीति ॥ १३ ॥ जीवाभेदनिवृत्त्यर्थं मामिति विशेषणम् ॥ १४ ॥ कर्मापि नो मत्त इति बोद्धव्यमित्यादि ॥ १७ ॥ कर्मणि जीवे अस्वातन्त्र्यादकर्म। कर्मविधिफलयोरभावात्। अकर्मणि विष्णौ। स्वातन्त्र्यात्सर्वकर्तृत्वम्। 'करोऽस्मिन्मीयत इति कर्म जीव उदाहृतः। विधिशब्देनामितत्वा-

SGDF
Sri Gargeshwari Digital Foundation

दकर्म भगवान्हरिरि'ति नारदीये । करइति सकारान्तोऽदृष्टवाची । क्रियावाची वा । तदधीनत्वात् । प्रसिद्धश्च जीवे कर्मशब्दः पञ्चरात्रे । कृत्स्नफलत्वात्कृत्स्नकर्मकृत् ॥ १८ ॥ अनिराश्रयो भगवदाश्रयत्वात् । मुक्तस्य स्वातन्त्र्याभिमानात् ॥ १९--२३ ॥ कथमभिमानत्यागः ? । ब्रह्मार्पणमित्यादि । ब्रह्मण्यर्पणं ब्रह्मार्पणम् । ब्रह्मणो हविः । ब्रह्मणोऽग्नौ । ब्रह्मणः कर्मसमाधिना सह । समाधिरपि तदधीनइत्यर्थः । 'एकः स्वतन्त्रो भगवांस्तदीयं त्वन्यदुच्यत'इति भारते ॥ २४ ॥ दैवं विष्णुमेव यज्ञ इत्युपासते । स्वभोग्यत्वात्स्वयमेव यज्ञः । ब्रह्माख्याग्नौ क्रियायज्ञं तेनैव यज्ञाख्येन विष्णुना समर्पयन्ति ॥२५॥ तत्पूजात्वेन श्रोत्रादिसंयमं कुर्वन्ति । तत्पूजात्वेन विषयान्भुञ्जते ॥ २६ ॥ तत्पूजात्वेनेन्द्रियादिसंयमं कुर्वन्ति । यज्ञेनैवेति सर्वत्राप्यन्वीयते । 'तेनैव तं पूजयेद्वा विहितैर्वाऽन्यसाधनैः । स एव विष्णोर्यज्ञः स्यान्मानसो वा सबाह्यक' इति ब्रह्मवैवर्ते ॥ २७ ॥ श्रोत्रादीनित्यादिष्विज्यानुक्तेरिज्योऽन्य इति शङ्कां निवारयति । वितता ब्रह्मणो मुख इति । 'सर्वयज्ञैः परब्रह्म याज्यं विष्ण्वाख्यमव्ययमि'ति च ॥३२॥ सर्वं कर्माखिलमासमन्तादल्पं ज्ञाने परिसमाप्यते ज्ञाने जाते पूर्यते । 'समाप्तविद्यान्धनुषि श्रेष्ठान्यांत्सप्त मन्यस' इतिवत्समाप्तिशब्दोऽत्र पूर्तिवाची । ज्ञानासिनाऽऽत्मनः । 'छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठे'ति पुनर्योगकथनात् ॥ ३३ ॥ 'ज्ञानं तेऽहं सविज्ञानमि'ति वक्ष्यमाणत्वात्स्वयमेवोपदेक्ष्यति ॥ ३४ ॥ आत्मनि व्याप्ते मयि । अथो तस्माद्व्याप्तत्वादेव ॥३५॥ आत्मवन्तं परमात्मभक्तम् ॥ ४१ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥

हरिः ॐ ॥ योगसंन्यासयोर्लक्षणं स्पष्टयत्यनेनाध्यायेन । योगसंन्यस्तकर्माणमित्यादौ न्यासशब्दः सर्वकर्मत्यागविषय इत्याशङ्क्य

SGDF
Sri Gangeshwari Digital Foundation

योगसंन्यासयोर्भिन्नपुंनिष्ठत्वाभिप्रायेण पृच्छति । संन्यासमिति ॥१॥ एकपुंयोग्यावेतौ तयोर्मध्ये योग एव विशिष्ट इति परिहाराभिप्रायः । उभौ समुच्चितौ । 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगत' इति वक्ष्यमाणत्वात् ॥ २ ॥ द्वेषादिवर्जनमेव संन्यासशब्दार्थो न यत्याश्रमोऽत्राभिप्रेत इत्याह । ज्ञेय इति । न च 'काम्यानां कर्मणां न्यासमि'त्यनेन विरोधः । तेनापि सहितस्य न्यासत्वात् । न च त्यागस्य पृथग्वचनाद्विरोधः । कुरुपाण्डववन्न्यासावान्तरभेदत्वात्त्यागस्य ॥३॥ बालास्तु न्यासशब्देन यत्याश्रममेव स्वीकृत्य तत्स्थानामेव साङ्ख्यशब्दोदितज्ञानाधिकारो गृहस्थानामेव योगशब्दोदितकर्माधिकार इति मन्यन्ते । तन्न पण्डिता मन्यन्ते । कुतः ? यस्माज्ज्ञानमार्गं कर्ममार्गं च सम्यगास्थित उभयोरपि फलं प्राप्नोति ॥ ४ ॥ तस्माज्ज्ञानिनां कर्माप्यनुष्ठेयम् । कर्मिणामपि गृहस्थानां ज्ञातव्यो भगवान् । न हि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति । 'निष्कामं ज्ञानपूर्वं च निवृत्तमिह चोच्यते । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् । बुद्ध्याऽविहिंसन्पुष्पैर्वा प्रणवेन समर्चयेत् । वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः । मुक्तिरस्तीति नियमो ब्रह्मदृग्यस्य विद्यते । तस्याप्यानन्दवृद्धिः स्याद्वैष्णवं कर्म कुर्वतः । कर्म ब्रह्मदृशा हीनं न मुख्यमिति कीर्तितम् । तस्मात्कर्मेति तत्प्राहुर्यत्कृतं ब्रह्मदर्शिना । एतस्मान्न्यासिनां लोकं संयान्ति गृहिणोऽपि हि । ज्ञानमार्गः कर्ममार्ग इति भेदस्ततो न हि । तस्मादाश्रमभेदोऽयं कर्मसङ्कोचसम्भव'इति व्यासस्मृतेः ॥ ५ ॥ 'मोक्षोपायो योग इति तद्रूपो न्यास एव तु । विष्ण्वर्पिततया भद्रो नान्यो न्यासः कथञ्चने'त्याग्नेये । विष्ण्वर्पितत्वादियोगरूपत्वं विना केवलकर्मत्यागो नरकफल एव । 'यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डवे'ति वक्ष्यमाणत्वात् । योगविशेषत्वान्न्यासस्य पृथगुक्तिः ॥ ६ ॥ सर्वभूतात्मभूतात्मेति

SGDF
Sri Gargeshwari Digital Foundation

मुख्ययोगः । 'आदानात्सर्वभूतानां विष्णुरात्मा प्रकीर्तितः । सर्वभूतात्मभूतात्मा तत्र भूतमनाः पुमानि'ति च ॥ ७ ॥ यथा न्यासस्य योगरूपत्वं तथाऽह नैव किञ्चिदित्यादिना । 'विष्णुनाऽर्थेष्वीरितानि मन आदीनि सर्वशः । वर्तन्तेऽन्यो न स्वतन्त्र इति जानन्हि तत्वविदि'ति च ॥ ८ ॥ ९ ॥ तत्पूजात्मकानि तत्कृतानि मम शुभार्थमिति ब्रह्मण्याधानम् । स्वातन्त्र्याभावापेक्षयैव जीवस्याकर्तृत्वम् । 'स्ववन्दनं यथा पित्रा कारितं शिशुकर्तृकम् । एवं पूजा विष्ण्वधीना भवेज्जीवकृतेत्यपी'ति प्रवृत्तेः । अतो मनसैव कर्मन्यासोऽस्वातन्त्र्यापेक्षया ॥ १० ॥ १३ ॥ यथा पितृदत्तं पालकत्वं राजपुत्राणां एवं परमात्मदत्तं क्रियास्वातन्त्र्यलक्षणं कर्तृत्वम् । क्रियानिष्पन्नधर्मादिरूपकर्मणि स्वातन्त्र्यं च जीवानामप्यस्तीत्याशङ्कां परिहरति । न कर्तृत्वमित्यादिना । क्रियायामदृष्टोत्पादने फले च स्वातन्त्र्यं लोकस्य न सृजतीश्वर इत्यर्थः । अन्यथा लोकस्येति विशेषणं व्यर्थम् । जनपदे निवसतां तद्वित्तभोजिनामप्याधिपत्यादानान्न दत्ता जनपदा राज्ञा स्वपुत्राणाभितिवत्कर्मफलादिसंयोगिनामपि तत्स्वातन्त्र्यादानान्न सृजतीति युज्यते । स्वयमेव भवति भावयति चेति स्वभावो भगवान् । स्वभावत्वात्स्वयमेव कर्तृत्वादिषु प्रवर्तते । 'स्वातन्त्र्याद्भगवान्विष्णुः स्वभाव इति कीर्तितः । तत्स्वातन्त्र्यं कदाप्येष नान्यस्य सृजति क्वचित् । स्वातन्त्र्यादेव पापादिसम्बन्धः कुर्वतोऽपि न । अज्ञानावृत्तबुद्धित्वादीदृशं तं न जानत' इति महावाराहे । 'अहं सर्वस्य प्रभवः' । 'तपाम्यहमहं वर्षं निगृह्णामि' । 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' । 'न ऋते त्वत्क्रियते किश्चनारे' । 'देवस्यैष स्वभावोऽयम्' । 'लोकवत्तु लीलाकैवल्यमि'त्यादेर्नास्यास्वाभाविकं कर्तृत्वमकर्तृत्वं वा । विपरीतप्रमाणाभावाच्च । अनिर्वाच्यनिरासादेव च निरस्तोऽयं पक्षः । न च सर्वविशेषराहित्यवादिनां शून्यवादा-

SGDF
Sri Gangeshwari Digital Foundation

त्कश्चिद्विशेषः। न हि सर्वविशेषरहितमित्युक्ते तदस्तीति सिध्यति। वाच्यत्वलक्ष्यत्वास्तित्वादीनामपि विशेषत्वात्। अन्यथाऽस्ति ब्रह्मेत्यादीनां शब्दानामपि पर्यायत्वादयो दोषाः। व्यावर्त्यविशेषश्च व्यावृत्तविशेषनिबन्धन एव। अन्यथा वैयर्थ्यमेव स्यात्। न च सर्वशब्दावाच्यस्य लक्ष्यत्वम्। न च सर्वप्रमाणागोचरमस्तीत्यत्र किञ्चिन्मानम्। नास्तित्वं तु सप्तमरसादिवददर्शनात्सिध्यति। स्वप्रकाशत्वं च नामानं सिध्यति। स्वयं प्रकाशत्वं च ततोऽतिरिक्तं चेद्विशेषाङ्गीकारः। न चेत्तदेव प्रमाणगोचरम्। तत्प्रमाणभावे परप्रकाशत्वमात्रनिरासे स्वप्रकाशत्वे प्रमाणाभावादप्रकाशत्वमेव स्यात्। अर्थतः सिद्धिरित्यर्थापत्तितः सिद्धिस्तत्प्रमाणतः सिद्धिर्वा। उभयथाऽपि प्रमेयत्वमेव स्यात्। स्वप्रकाशशब्देन स्वमितत्वानङ्गीकारात्परमितत्वानङ्गीकाराच्चासिद्धिरेव। प्रकाशइत्युक्तेऽपि स्वमन्यं वा किञ्चित्प्रकाश्यं विना न दृष्ट एव भोजनादिवत्। कर्तृकर्मविरोधश्चानुभवविरुद्धः। ज्ञानं च ज्ञेयं ज्ञातारं च विना न दृष्टम्। अतः शून्यवादान्न कश्चिद्विशेषः। अतोऽनन्तदोषदुष्टत्वादुपरम्यते। 'हरिः स्वभावतः कर्ता सर्वमन्यत्तदीरितम्। अतः सा कर्तृता तस्य न कदाचिद्विनश्यती'ति पैङ्गिश्रुतिः ॥१४॥ 'विषमेष्वपि जीवेषु समो विष्णुः सदैव तु। यत्तृणादिगतस्यापि गुणाः पूर्णा हरेः सदेति च ॥१८॥१९॥ इदानीमपि परमात्मनि स्मृतमात्रे सुखं विन्दतीति यत्तदा स एव सम्यगुक्तः किमु ब्रह्मणि भूतः। अन्यथा पुनर्ब्रह्म गच्छतीति विरोधाच्च। अन्तस्सुखादिकं च ब्रह्मदर्शनात् ॥२४॥ 'अमुक्तो मुक्तसादृश्यान्मुक्त एव हि तत्वदृक्। किमु मुक्तिगतस्तस्माज्ज्ञानमेवाधिकं नर' इति नारदीये ॥२७॥२८॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये पञ्चमोध्यायः ॥

॥ ५ ॥　　॥　　॥　　॥　　॥

हरिः ॐ ॥ ध्यानमत्रोच्यते। 'स ब्रह्मनिष्ठस्तु यतिर्महात्मा

SGDF
Sri Gargeshwari Digital Foundation

शरीरमग्निं च मुखे जुहोती'त्यादेर्न यतेरप्यनग्नित्वम् । आत्म-समारोपणाच्च ॥ १ ॥ योगविशेष एव संन्यास इत्यर्थः ॥ २ ॥ सम्पूर्णोपायो योगारूढः । 'नानाजनस्य शुश्रूषा कर्माख्या करवन्मितेः । योगार्थिना तु सा कार्या योगस्थेन हरौ स्थितिः । तेनापि स्वोत्त-मानां तु कार्याऽन्यैरखिलेष्वपि । शक्तितः करणीयेति विशेषोऽसिद्ध-सिद्धयोः । प्राप्तोपायस्तु सिद्धः स्यात्प्रेप्सुः साधक उच्यते । तस्य प्राण्युपकारेण सन्तुष्टो भवतीश्वरः । सिद्धोपायेन विष्णोस्तु ध्यान-व्याख्यार्चनादिकम् । कार्यं नान्यत्तस्य तेन तुष्टो भवति केशव' इति प्रवृत्तवचनान्न विरोधः । 'शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रह'इति भागवते ॥ ३ ॥ कथं नानुषज्जते सर्वसङ्कल्पसंन्यासी ? । मयि सर्वाणि कर्माणीत्युक्तत्वात् । 'मदधीनमिदं ज्ञात्वा मत्संन्यासीति चोच्यत' इति च ॥४॥ 'उद्धरेतैव संसाराज्जीवात्मानं परात्मना । विष्णुर्बन्धुः सतां नित्यं परात्मा ह्यसतामरिः । तत्प्रसादजया भक्त्या जितो यस्य वशे त्विव । वर्तते तस्य मित्रं स तदन्यस्य च शत्रुवदि'ति च । परमात्मा समाहित इति वाक्यशेषात् ॥ ५ ॥ ६ ॥ 'सर्वत्र विष्णो-रुत्कर्षज्ञानं ज्ञानमितीर्यते । तद्विशेषपरिज्ञानं विज्ञानमिति गीयत' इति च ॥ ७ ॥ ८ ॥ 'यस्य यत्र यथा वृत्तिर्विहिता वर्तनं तथा । ज्ञानं वाऽपि समत्वं तद्विषमत्वमतोऽन्यथे'ति महाविष्णुपुराणे । 'अनिमित्तस्नेहवांस्तु सुहृज्ज्ञात्वोपकारकृत् । मित्रं वधादिकृदरिर्द्वेष्य-स्त्वप्रियमात्रकृत् । उदासीनः स्नेहवतोऽप्यस्नेही तत्कृतमनुकृत् । मध्यस्थ इति विज्ञेयः सुहृदेषु विशिष्यत' इति नारदीये ॥ ९ ॥ आत्मानं विष्णुम् । आत्मना तत्प्रसादेन ॥२०॥ ब्रह्मणि भूतम् ॥२७॥ सर्वभूतेषु स्थितं परमात्मानम् ॥२९॥ सर्वत्र विष्णुरेक इति स्थितः ॥ ॥ ३१ ॥ अतो विष्णवनुवर्तिषु स्ववत्स्नेहः कर्तव्यः ॥ ३२ ॥ अयतिरप्रयत्नः । प्रयत्नाद्यतमानस्त्विवति वाक्यशेषात् । योगशब्द-

SGDF
Sri Gargeshwari Digital Foundation

स्योपायार्थत्वेप्यत्रोपायविशेष एव ध्यानयोगादिर्विवक्षित इति न विरोधः ॥ ३८ ॥ 'मोक्षोपायस्य जिज्ञासुरपि केवलपाठकात् । विशिष्टः किमु तद्विद्वान्किं पुनर्यस्तदास्थित' इति परमयोगे ॥ ४४ ॥ 'तपसश्चैव यज्ञादेर्ध्यानमेव विशिष्यते । अज्ञानिध्यानतो ज्ञानं ध्यानं सज्ञानमप्यतः । तत्रापि मय्यभक्तस्य नान्यध्यानं प्रयोजकम् । अन्यसामान्यविद्यो मे यश्चान्यं नेति पश्यति । अवरत्वदृगुदासीनो विद्वेषी चेत्यभक्तयः । मद्भक्तोऽपि हि कार्यार्थं यो ध्यायेदन्यदेवताम् । परिवारतामृते तस्मात्केवलं मदुपासकः । वरोऽन्यान्मदधीनांश्च सर्वान् जानन्विशुद्धधी'रिति दत्तात्रेयवचनम् ॥४६॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये षष्ठोऽध्यायः ॥

हरिः ॐ ॥ भगवन्महिमा विशेषत उच्यते । 'अनन्तानां तु जीवानां यतन्ते केचिदेव तु । मुक्त्यै तेषु च मुच्यन्ते केचिन्मुक्तेषु च स्फुटम् । केचनैव हरिं सम्यग्ब्रह्मरुद्रादयो विदुः । अन्येषां यावता मुक्तिस्तावज्ज्ञानं हरौ परमि'ति पाद्मे । 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामत' इति भागवते । 'सर्वे मुक्ता हरौ भक्तास्तेषु ब्रह्मैव मुख्यतः । विष्णोः परमभक्तस्तु तस्माज्जीवघनो मत' इति सत्तत्त्वे ॥ ३ ॥ 'अचेतना चेतनेति द्विविधा प्रकृतिर्मता । त्रिगुणाऽचेतना तत्र चेतना श्रीर्हरिप्रिया । ते उभे विष्णुवशगे जगतः कारणे मते । पिता विष्णुः स जगतो माता श्रीर्या त्वचेतना । उपादानं तु जगतः सैव विष्णुबलेरिते'ति च । मत्तोऽन्यत्परतरं नास्ति परतरस्त्वहमेवेत्यर्थः । अन्यथाऽन्यदिति व्यर्थम् । 'अवरा दुःखसम्बन्धाज्जीवा एव प्रकीर्तिताः । नित्यनिर्दुःखरूपत्वात्परा श्रीरेकलैव तु । दुःखासम्पीडितत्वाच्च मध्यमो वायुरुच्यते । अनन्याधीनरूपत्वादसमाधिकसौख्यतः । तत्तन्त्रत्वाच्च सर्वस्य विष्णुः परतरो मतः । अभावादन्तराऽन्यस्य

SGDF
Sri Gurgeshwari Digital Foundation

त्विहैकार्थौ तरप्तमौ । यस्याः सम्बन्धयोग्यत्वाज्जीवा अप्यवरा मताः । तस्या जडायाः प्रकृतेरवरत्वे क्व संशयः । अथावरतरा ये तु विमुखाश्चेतना हरेः । नित्यदुःखैकयोग्यत्वान्न ह्येतत्स्यादचेतने । अतः परतरं विष्णुं यो वेत्ति स विमुच्यते । मुक्तस्तु स्यात्पराभासः सुनित्यसुखभोजनात् । तत्रापि तारतम्यं स्यात्तेषु ब्रह्माऽधिको मतः । विष्णोराधिक्यसंवित्तिः सर्वस्माज्ज्ञानमुच्यते । एवं विविच्य तज्ज्ञानं विज्ञानमिति कीर्तितम् । एतच्च तारतम्येन वर्तते केशवादिषु । मुख्यविज्ञान्यतो विष्णुः किञ्चिद्विज्ञानिनोऽपरे ॥ ७ ॥ सोऽप्सु स्थित्वा रसयति रसनामा ततः स्मृतः । सूर्यचन्द्रादिषु स्थित्वा प्रभानामा प्रभासनात् । वेदस्थः प्रणवाख्योऽसावात्मानं यत्प्रणौत्यतः । खे स्थितः शब्दनामाऽसौ यच्छब्दयति केशवः ॥८॥ पुण्यापुण्यं गन्धयति स्वयं पुण्यो धरास्थितः । तेजयत्यग्निसंस्थः सन्भूतस्थो जीवनप्रदः । तपस्विस्थस्तपयति ॥ ९ ॥ व्यञ्जनाद्बीजसंज्ञितः । बोधनाद्बुद्धिनामासौ बुद्धिमत्सु व्यवस्थितः ॥ १० ॥ नित्यपूर्णबलत्वाच्च बलं कामविवर्जितम् । अरागजबलश्चैव स्थानेभ्योऽन्येष्वयोजनात् । एतादृशबलात्मासौ बलिनां बलदः स्वयम् । वेति पूर्णत्ववाची स्यात्तद्रतेर्बलमुच्यते । प्रायो हि कामिता अर्था धर्मं हन्युर्हरिः पुनः । न धर्महानिकृत्किं तु कामितो धर्मवृद्धिकृत् । धर्माविरूद्धकामोऽतो विष्णुर्भूतेषु संस्थितः । एवं स सर्वतश्चान्यः स्वतन्त्रश्चैव सर्वगः । व्यवस्थयैव सर्वेषां सर्वदा सर्वदः प्रभुः ॥ ११ ॥ ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । तत एव न चान्यस्मात्तदायत्तमिदं न सः । अन्यायत्तः ॥ १२ ॥ अचेतनया तन्मेयत्वाच्च मायया । लक्ष्म्या ॥१३॥ वशगया लोको विष्णुनैव विमोहितः । ये तु विष्णुं प्रपद्यन्ते ते मायां तां तरन्ति हि । लक्ष्मीः सा जडमाया या देवता ते उभे अपि । विष्णोर्वशे ॥१४॥ ततोऽनन्यभक्त्या तं शरणं व्रजेत् । यादृशी तत्र भक्तिः स्यात्तादृश्य-

SGDF
Sri Gargeshwari Digital Foundation

न्यत्र नैव चेत् । अनन्यभक्तिः सा ज्ञेया विष्णावेव तु सा भवेत् । अन्येषु वैष्णवत्वेन लक्ष्मीब्रह्महरादिषु । कुर्याद्भक्तिं नान्यथा तु तद्वशा एव ते यतः ॥ १७ ॥ एवं जानंस्तमाप्नोति नान्यथा तु कथञ्चन ॥ १८ ॥ पूर्णं वस्तु यतो ह्येको वासुदेवो न चापरः । एवं विद्दुर्लभो लोके ॥१९॥ यत्सर्वं मिश्रयाजिनः । विष्णुं तत्परमज्ञात्वा रमाब्रह्महरादिकान् । यजन्नपि तमो घोरं नित्यदुःखं प्रयाति हि । अज्ञानां तु कुले जातो यावद्विष्णोः समर्चनम् । विष्णुतत्वं न जानीयात्तावत्सेवा पृथक्कृता । विद्याद्यैहिकभोगाय यदि बुद्ध्वा पुनर्न तु । परिवारतामृते कुर्यादन्यदेवार्चनं क्वचित् । अजानता कृतं त्यक्तं न दोषाय भविष्यति । जन्मादिप्रदमेव स्यात् ॥ २० ॥ अत्यागे पुनरेव तु । क्षिप्रं च ज्ञापयत्येव भगवान्स्वयमेव तु । यदि जन्मान्तरे स्वीयो निमित्तीकृत्य कञ्चने'त्यादि च ॥ २२ ॥ मत्त एवेति तान्विद्धीत्युपसंहाराच्च । तत्तत्कारणत्वात्तत्तन्नामेत्यवसीयते । 'मयि सर्वमिदं प्रोतमि'ति भेदेनैवोपक्रमाच्च ॥८--१२॥ आप्नोति विष्णुमित्येवात्मशब्दो ज्ञानिनि । 'यच्चाप्नोति यदादत्त' इत्यादेः । आस्थितः स हि मां प्रपद्यते इत्यादिवाक्यशेषाच्च ॥ १८ ॥ बहूनां जन्मनामन्ते ज्ञानवान्भवति । ततो मां प्रपद्यते । वासुदेवः सर्वमिति पूर्णमिति जानन् । प्रपद्यन्तेऽन्यदेवता इति वाक्यशेषे भेददर्शनाच्च । 'देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपी'ति च ॥ १९ ॥ 'ज्ञात्वा परत्वं विष्णोस्तु पृथग्देवान्यजन्नरः । याति देवांस्तदज्ञात्वा तम एव प्रपद्यते । तथापि यावदन्यैस्तु साम्यं हीनत्वमेकताम् । न निश्चिन्वन्ति जायन्ते संसारे ते पुनःपुनरि'ति च ॥ २३ ॥ 'अव्यक्तः परमात्माऽसौ व्यक्तो जीव उदाहृतः । मन्यते यस्तयोरैक्यं स तु यात्यधरं तम'इति च ॥ २४ ॥ 'यथात्मानं हरिर्वेत्ति तथाऽन्ये नैव तं विदुः । जानन्ति किञ्चित्क्रमशो रमाद्यास्तत्प्रसादत' इति च ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ २६ ॥ द्वन्द्वमोहो मिथ्याज्ञानम् । 'तमस्तु शार्वरं विद्यान्मोहश्चैव विपर्यय' इति च भारते । जीवेश्वरादिकं द्वन्द्वं तद्विषयो मोहो द्वन्द्वमोहः । संमोहस्तदाग्रहः । 'तदाग्रहो महामोहः क्रोधस्तामिस्र उच्यत' इत्युक्तत्वात् । सर्गे सर्गकाल एव । 'जीवधर्मानीश्वरे तु यो जीवेष्वैश्वरानपि । विद्याज्जीवेश्वरैक्यं वा द्वन्द्वमोही स उच्यत' इत्याग्नेये ॥ २७ ॥ तद्ब्रह्मेत्युक्तेऽन्यत्वशङ्कां निवारयति । साधिभूताधिदैवमिति ॥ २९ ॥ ३० ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये सप्तमोऽध्यायः ॥ ७ ॥

हरिः ॐ ॥ उक्तव्याख्यानपूर्वकं ब्रह्मप्राप्तिरुच्यते । तदितिविशेषणाद्ब्रह्मेत्युक्तमन्यदेव । प्रकृत्यादीनां मध्ये यत्किञ्चित् । उपरि साधियज्ञं चेति चशब्दादधिभूतादिसहितत्वेन विष्णुज्ञानमन्यदेवेति संशयः किन्तद्ब्रह्मेतिप्रश्नकारणम् । परमाक्षरं विष्णुरेव मुख्यतः प्रसिद्धत्वात्तथैव परिहरति । अज्ञानां तदपि ज्ञापयितुं तथैव परिहारः । पुनरहमिति नोक्तमित्याशङ्क्याऽव्यक्तं व्यक्तिमापन्नमिति विष्णावेव प्रयुक्तेनाव्यक्तशब्देनाव्यक्तोऽक्षर इत्युक्त इति परिह्रियते । ये चाप्यक्षरमव्यक्तमित्यत्र तु पृथक्प्रश्नादुपासकयोः फलतारतम्यकथनात्कूटस्थोऽक्षर उच्यत इत्युक्ताक्षरादपि चोत्तम इति विष्णोरुत्तमत्वकथनाच्चान्यदेवेत्यवसीयते । अधियज्ञोऽहमेवेति साधियज्ञमित्युक्त्या प्राप्तभेदनिवृत्त्यर्थं, तस्यैव सर्वप्राणिदेहस्थितरूपान्तरापेक्षया सहितत्वं युज्यते । 'प्राणिनां देहगो विष्णुरधियज्ञ इतीरितः । स एव व्याप्तरूपेण ब्रह्मेति परिकीर्त्यते । तैस्तैरधिकयाज्यत्वाद्बृंहितत्वाच्च हेतुतः । अध्यात्मं तत्स्वभावो यदधिकः परमात्मगः । पुंसां सजडभावानां सर्गः कर्म हरेः स्मृतम् । भूताधिकत्वतो जीवा अधिभूतमितीरिताः । अधिको दैवतं विष्णुरेव यस्यास्तु सा रमा । पुरुप्राणाऽधिदैवाख्या त्वितिज्ञेयमिदं नरैरि'ति तत्त्वविवेके । कथं

SGDF Sri Gargeshwari Digital Foundation

रूपोऽधियज्ञ इतिप्रश्नस्त्वहमेवेत्युक्तत्वात्तल्लक्षणोक्त्यैव परिहृतः ॥ ॥ १ ॥ ४ ॥ मद्भावं मयि भावम् । सदा तद्भावभावितानामेव स्मरंस्त्यजतीति केवलं तत्कालस्मरणं भवति । न चेत्स्मरतोऽपि समाधिस्थस्खलनवत्पूर्वकर्मानुसारिस्मृत्या तत्प्राप्तिरेव भवति । अपरोक्षज्ञानिनां प्रारब्धकर्मावसाने स्मरंस्त्यजतीति भवत्येव । 'प्रयाणकालेऽपि च मां ते विदुरि'त्युक्तत्वात् । युक्तचेतस इति विशेषणान्नित्यं स्मरतामेवापरोक्षज्ञानं जायते । 'भक्त्या ज्ञानान्निषिद्धानां त्यागान्नित्यं हरिस्मृतेः । अरागाद्विहितात्यागादित्येतैरेव संयुतैः । अपरोक्षदर्शनं विष्णोर्जायते नान्यथा क्वचिदि'ति सत्तत्वे ॥ ५ ॥ ६ ॥ तमसः परस्तादप्राकृतदेहः ॥ ९ ॥ मन आदीनां ब्रह्मणि चरणं ब्रह्मचर्यं ॥ ॥ ११ ॥ एकाक्षरवाच्यत्वादेकाक्षरं परं ब्रह्म ॥ १३ ॥ 'नियमाज्जन्मनोऽभावो मुक्तस्यैव तथापि तु । महर्लोकमतीतानां न जन्मांशलयौ विना । तत्राप्यवश्यं तत्स्थानं तैः क्षिप्रं पुनराप्यत' इति पाद्मे ॥ १६ ॥ सहस्रमिति बह्वेव । ब्रह्मणः परब्रह्मणः । 'अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञक' इति वाक्यशेषात् । न हि विरिश्चाहन्येव सर्वव्यक्तिलयः । 'नित्यस्यापि हरेः कालो द्विपरार्धात्मकस्त्वयम् । अहश्चासौ निमेषश्चेत्यप्रवृत्त्योपचर्यत' इति च ॥ १७-२२ ॥ यत्र कालाभिमानिदेवतासु मृत्यनन्तरं प्रयाताः । अग्निज्योतिर्धूमानामकालाभिमानित्वेऽपि कालप्राचुर्यात्काल इत्युच्यते । 'अग्निर्ज्योतिरिति द्वेधा वह्नेः पुत्रो व्यवस्थितः । तं प्राप्य याति ब्रह्मिष्ठो दिवसाद्यभिमानिन' इति सत्तत्वे । तत्कालमरणविवक्षायामग्निज्योतिर्धूमानामयोगः । 'अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोती'ति विदुषो दक्षिणायनमरणेऽप्यपुनरावृत्त्या ब्रह्मप्राप्तिश्रुतेः ।

SGDF
Sri Gargeshwari Digital Foundation

'विद्वान्ब्रह्म समाप्नोति यत्र तत्र मृतोऽपि सन्नि'ति पाद्मे ॥२३-२६॥ 'मार्गौ ब्रह्म च यः पश्येत्साक्षादेवापरोक्षतः ॥२७॥ सर्वपुण्यातिगोऽमुह्यन्यात्यसौ ब्रह्म तत्परमि'ति च ॥२८॥ इति श्रीमदानन्दतीर्थभगवत्पादा० गीतातात्पर्येऽष्टमोऽध्यायः ॥८॥ ॥ ॥ ॥

हरिः ॐ ॥ सप्तमोक्तं प्रपञ्चयति । 'विष्णुगान्यप्यतत्स्थानि भूतान्येष ह्यसङ्गत' इति च । ममात्मा मम देह एव । तदनन्यत्वात् । देहस्याचेतनत्वशङ्कानिवृत्तये ममात्मेत्याह ॥४-५॥ 'अध्यक्षोऽधिपतिः प्रोक्तो यदक्षाण्यस्य चोपरी'ति शब्दनिर्णये ॥१०॥ मानुषीं मनुष्यसदृशीं । 'तन्वा विष्णुरनन्योऽपि स्वाधीनत्वात्तदाश्रित' इति च । 'ब्रह्मरुद्ररमादीनां साम्यदृष्टिरनन्यता । प्रादुर्भावगतस्यापि दोषदृष्टिरपूर्णता । धर्मदेहावतारादेर्भेददृष्टिश्च सङ्करः । अवतारेष्विति ज्ञेयमवज्ञानं जनार्दने ॥ ११ ॥ सर्वं मोघं शुभं तस्य योऽवजानाति केशवम् । अधरं याति च तमः प्रादुर्भावगतोऽप्यतः । ज्ञेयः केवलचिद्देहो निर्दोषः पूर्णसद्गुण' इति भविष्यत्पर्वणि ॥ १२ ॥ 'एकमूर्तिश्चतुर्मूर्तिरथवा पञ्चमूर्तिकः । द्वादशादिप्रभेदो वा पूज्यते सज्जनैर्हरि'रिति च ॥ १३--१५ ॥ 'अर्च्यत्वादृक्समत्वाच्च निजरूपेषु साम सः । याज्यत्वात्स यजुर्यज्ञः सार्वज्ञात्पुरुषोत्तमः । क्रतुः कृतिस्वरूपत्वात्स्वधाऽनन्यधृतो यतः । मानात्त्रातीति मन्त्रोयमुष्टानां निधिरौषधम् । आज्यायस्त्वादाज्यनामा दर्भो दरधरो यतः । आहूतत्वाद्धुतं चायमग्निर्नेताऽगतेर्यत' इत्यादि च । 'तत्तत्पदार्थभिन्नोऽपि तत्तन्नामैवमच्युतः । स्वातन्त्र्यात्सर्वकर्तृत्वाद्गुणानन्त्याच्च केवलमि'ति च । 'ओमित्याक्रियते यस्मादोङ्कारो भगवान्हरिरि'ति च । 'पातीति स पिता मानान्माता यत्स पितुर्महान् । पितामहो निधातृत्वान्निधानं भीतरक्षणात् । शरणं व्यञ्जनाच्चैव बीजमित्युच्यते प्रभुरि'ति च । प्रलयकाले संहर्तृत्वात्प्रलयः । अन्यदाऽपीति मृत्युः ।

SGDF
Sri Gargeshwari Digital Foundation

'प्राणगः प्राणधर्ता यदमृतं प्रविलापयन्। विश्वं प्रलय इत्युक्तो मृत्युरन्यत्र मारणादि'ति च। 'सत्साधुगुणपूर्णत्वादस्मान्नान्यो गुणाधिकः। यतोऽतो सदितिप्रोक्तं विष्ण्वाख्यं परमं पदमि'ति शब्दनिर्णये ॥१६--१९॥ 'अनन्यदेवतायागाद्भक्त्युद्रेकादकामनात्। सदा योगाच्च वैशिष्टयं त्रैविद्याद्वैष्णवादपि। स्याद्धि भागवतस्यैव तेन ब्रह्मादयोऽखिलाः। अश्वमेधादिभिर्यज्ञैरपि केशवयाजिनः। वैष्णवा इति बुद्ध्यैव मानयन्त्यन्यदेवता' इत्याग्नेये। 'सम्यग्गुणगणज्ञाना-दुपासा पर्युपास्तने'ति च। मामिष्ट्वा प्रार्थयन्त इत्युक्तत्वाज्ज्ञानन्तोऽपि नाभितो जानन्ति तत्वेन। 'सर्वदेववरत्वेन यो न जानाति केशवम्। तस्य पुण्यानि मोघानि याति चान्धं तमो ध्रुवमि'ति च। 'मोघाशा मोघकर्माण' इत्युक्तत्वाच्च न केवलाज्ञविषयं मिथ्याज्ञानिविषयं वा'च्य-वन्ति त' इत्यादि। अतः सर्वाधिक्यं विष्णोर्ज्ञात्वाऽपि ब्रह्मादीनां तत्परिवारत्वादिकमजानतामिदं फलम् ॥२०--२४॥ 'नास्य भक्तोऽपि यो द्वेष्यो न चाभक्तोऽपि यः प्रियः। किन्तु भक्त्यनुसारेण फलदोऽतः समो हरिरि'ति पाद्मे। प्रीत्या मयि ते ॥ २९ ॥ 'पापादिकारिताश्चैव पुंसां स्वाभाविका अपि। विप्रत्वाद्यास्तत्र पुण्याः स्वाभाव्या एव मुक्तिगाः। यान्ति स्त्रीत्वं पुमांसोऽपि पापतः काम-तोऽपि वा। न स्त्रियो यान्ति पुंस्त्वं तु स्वभावादेव याः स्त्रियः। पुंसा सहैव पुंदेहे स्थितिः स्याद्वरदानतः। तज्जन्मनि वराः पाप-जाताभ्यो निजसत्स्त्रियः। सर्वेषामपि जीवानामन्त्यदेहो यथा निजः। मुक्तौ तु निजभावः स्यात्कर्मभोगांस्ततोऽपि चे'तिभविष्यत्पर्ववचना-त्पापयोनयः पुण्या इति विशेषणम् ॥३२-३३॥ इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्ये नवमोऽध्यायः ॥९॥

हरिः ॐ ॥ उपलक्षणार्थं सुरगणा इत्यादि ॥२॥ अनस्याप्यादि-रनादिः ॥ ३ ॥ 'बुद्धिर्बोधनिधित्वात्तदन्तःकरणमुच्यत' इति शब्द-

SGDF
Sri Gangeshwari Digital Foundation

निर्णये ॥४॥ 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्च महातेजाः पूर्वं सप्तर्षयः स्मृता'इति ब्राह्मे । 'मनवो बोधवैशेष्याद्देवा ब्रह्मादयः स्मृताः । विप्रादिवर्णभेदेन चत्वारो बहवोऽपि ते । दीनत्वाद्देवनामानस्त्वन्ये ब्रह्मादिनामकाः । अवैष्णवकृतो यज्ञो दीनैर्देवैस्तु भुज्यते । वैष्णवैस्तु कृतो यज्ञो देवैर्हि मनुनामकैः । मरीच्याद्यास्तु तत्पुत्रा मानवा नामतः स्मृताः । तत्पुत्रपौत्रा मुनयस्तथा मानवमानवाः । तेभ्यो मनुष्या इत्येषा सृष्टिर्विष्णोः समुत्थिते'ति महाविष्णुपुराणे ॥ ६ ॥ 'युज्यते येन योगोऽसावुपायः शक्तिरेव चे'ति च । विशिष्टभवनं विभूतिः । महत्त्वं विविधभवनं वा । योगः सामर्थ्यम् ॥७॥ भजन्ते मामित्यनेन जीवेश्वरैक्यशङ्कां निवर्तयति ॥ ॥ ८ ॥ मद्गतप्राणा मद्विषयचेष्टाः ॥ ९ ॥ 'येषां विष्णुस्वरूपाणां सन्निधेरन्यवस्तुषु । विशिष्टत्वं स्वजातेः स्याद्विभूत्याख्यानि तानि तु । ब्रह्मनामा ब्रह्मगतः सर्वदैवतसश्रयात् । आधिक्यहेतुर्भगवान्सामस्थः सामनामकः । आधिक्यहेतुर्वेदेभ्यस्तथाऽश्वत्थस्थितो हरिः । उत्कर्ष-हेतुर्वृक्षेभ्यो य एवाश्वत्थनामक' इत्यादि विभूतितत्त्वे । केषु केषु च भावेष्वित्युक्तत्वाच्च ब्रह्मादिजीवेभ्योऽन्यदेव विभूतिरूपम् । 'द्विविधं वैभवं रूपं प्रत्यक्षं च तिरोहितम् । कपिलव्यासकृष्णाद्यं प्रत्यक्षं वैभवं स्मृतम् । भिन्नं ब्रह्मादिजीवेभ्यो जडेभ्यश्चापि तद्गतम् । स्वजा-त्याधिक्यदं तेषां तत्तिरोहितवैभवमि'त्यादि च । 'आत्मा ततगुणत्वेन रवज्ञेयो यतो रविः । उदवन्मेघचलनान्मरीचिः साम साम्यतः । सुखात्सुखत्वात्तु शशी वेदो वेदनतो हरिः । वासवर्ती वासवोऽसौ चेतो नेता तु चेतना । पालकैर्वननीयत्वात्पवनो बोधनान्मनः । पावकः शोधनान्मेरुरीरो यन्मास्य सागरः । सारस्य गरणात्स्कन्दो जगतः स्कन्दनाद्भृगुः । भर्जनाज्जपयज्ञश्च जातपो याज्य एव च । अश्वाकारस्थितोऽश्वत्थ ऐरं श्रीश्च तदाश्रयः । ऐरावतो नराणां

SGDF
Sri Gargeshwari Digital Foundation

यद्द्यात्सर्वं स नारदः। ह्रीश्रीसमाश्रयत्वाच्च हिमालय इतीरितः। वर्ज्यत्वादरिभिर्वज्रो वैनतेयो नतास्पदः। वासुकिर्वाससुखदः कन्दर्पः सुखभेदपः। अर्यमा ज्ञेयमातृत्वात्काल आकलनादपि। वरुणो वरणाद्द्वन्द्वो द्विरूपोऽन्तर्बहिर्यतः। मकरो मानकर्तृत्वाद्यमः संयमनाद्विभुः। प्रल्हादः स महानन्दो मृगेन्द्रो मृगयत्पतिः। जाह्नवी जहतां स्थानमध्यात्मं चात्मनां पतिः। विद्या ज्ञप्तिस्वरूपत्वाद्वादो वाच्यत्वतो हरिः। कीर्त्यो वक्ताऽश्रयः कीर्तिर्वाक् श्रीरिति च नामकः। स्मरणीयः स्मृतिर्मेधा क्षमारूपस्तथेर्यते। द्यूतं क्रीडापरत्वाच्च गायत्री त्राति गायकान्। सत्वं साधुगुणत्वाच्च दण्डनाद्दण्ड उच्यते। बृहत्सारोऽप्यमेयश्च बृहत्सामोशनोशतेः। शुभाशुभज्ञानकरः कुसुमाकर ईरितः। ज्ञानं ज्ञानात्मतो मौनं मुनीड्यो नीतिरानयन्। मार्गाणामन्तगत्वात्तु मार्गशीर्षः प्रकीर्तितः। सुखं पिबल्लीलयैव कपिलो व्यास एव च। विशिष्टत्वाद्विष्णुनामा विशिष्टप्राणसौख्यतः। एवं नानागुणो विष्णुर्नानानामभिरीरितः। नानाप्राण्यादिसंस्थश्च विभूतिरितिशब्दितः। शश्यादिषु विजातीयस्वाम्यदः सारदः क्वचित्। शर्वादिषु सजातीयश्रैष्ठ्यदत्वेन संस्थितः। शक्रोशनार्जुनाद्येषु सजातीयैकदेशतः। देवेष्वप्यधिको ब्रह्मा यतो विष्णोरनन्तरः। कवित्वादिगुणेष्वेव यत्समो नास्ति कश्चन। तथा भीमश्च पार्थेषु ज्ञानं च ज्ञेषु चोत्तमम्। सुदर्शनं चायुधेषु वेदेष्वृग्वेद उच्यत' इत्यादि विभूतितत्वे। क्वचित्साम्न आधिक्यमभिमान्यपेक्षया। 'ऋचः श्रीर्गीरुमाद्याश्च साम्नःप्राणशिवादय' इत्याद्यभिमानिभेदात्। तत्रापि यथायोग्यम् ॥ २१--३८ ॥ मम तेजोंऽशेन संयुक्तं भवति ॥ ४१ ॥ किं ज्ञातेनेति वक्ष्यमाणस्याधिकफलत्वज्ञापकमेव। अन्यथोक्तेरेव वैयर्थ्यात्। 'अन्याधिक्यज्ञापनार्थं शुभं चाक्षिप्यते क्वचित्। न तावताऽस्य निन्द्यत्वं ज्ञेयैवान्यवरिष्ठता। उभयं मिलितं चैव ततोऽ-

SGDF
Sri Gargeshwari Digital Foundation

प्यधिकशोभनमि'ति च ॥४२॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये दशमोऽध्यायः ॥१०॥ ॥

हरिः ॐ ॥ आत्मानमव्ययम् । परमं रूपमैश्वरम् । 'सर्वाश्चर्यमयं देवमनन्तं विश्वतो मुखमि'त्यादिरूपविशेषणाच्च रूपस्येश्वरसाक्षात्स्वरूपत्वं नित्यत्वं तत एव चिदानन्दाद्यात्मकत्वं च सिद्धम् । मम देह इत्युक्तत्वाच्चादित्यादीनां भेदः सिद्धः । 'मे रूपाणि' 'सर्वतोऽनन्तरूपं' 'द्रष्टुमिच्छामि ते रूप'मित्यादेश्चैकस्यैवाभिन्नानन्तरूपत्वं च ॥ 'एकं रूपं हरेर्नित्यमचिन्त्यैश्वर्ययोगतः । बहुसङ्ख्यागोचरं च विशेषादेव केवलम् । अभावो यत्र भेदस्य प्रमाणावसितो भवेत् । विशेषो नाम तत्रैव विशेषव्यवहारवान् । विशेषोऽपि स्वरूपं स स्वनिर्वाहक एव च । द्रव्यात्मना स नित्योऽपि विशेषात्मैव जायते । नित्या एव विशेषाश्च केचिदेवं द्विधैव सः । वस्तुस्वरूपमस्त्येवेत्येवमादिष्वभेदिनः । विशेषोऽनुभवादेव ज्ञायते सर्ववस्तुषु । न चाविशेषितं किञ्चिद्वाच्यं लक्ष्यं तथा मितम् । विशिष्टस्य स्वतोऽन्यत्वे स्वस्यामेयत्वहेतुतः । नैव ज्ञेयं विशिष्टं च मानाभावाच्च नो भवेत् । स्वयमित्यपि हि स्वत्वविशेषेण विवर्जितम् । न ज्ञेयं तद्विशेष्यं च तथैवेत्यनवस्थितिः । अभेदे न विरोधोऽस्ति ज्ञाताज्ञातं यतोऽखिलम् । तदेव ज्ञातरूपेण ज्ञातमज्ञातमन्यथा । अभिन्नस्य विशिष्टत्वान्न दोषद्वयमप्युत । एकत्वानुभवाच्चैव विशेषानुभवादपि । तज्ज्ञानानुभवाच्चैव न दोषद्वयसम्भवः । भेदाभेदौ च तौ नैव कर्तृभोक्तृविशेषणे । मदन्य इत्यनुभवो यतो नैवास्ति कस्यचित् । भेदो विशेषणस्यापि नान्तरस्य क्वचिद्भवेत् । शुद्धस्वरूपइत्यादावभेदस्यैव दर्शनात् । अपृथग्दृष्टिनियमाद्बलज्ञानादिकस्य च । ऐक्यं बाह्यविशेषाणां पृथक्दृष्टयैव तन्न तु । विशेषहेत्वभावेऽपि द्वैविध्यं कल्प्यते यदि । कल्पनागौरवाद्यास्तु दोषास्तत्रातिसङ्गताः । नैकत्वं नापि

SGDF
Sri Gangeshwari Digital Foundation

नानात्वं नियमादस्त्यचेतने। भेदाभेदावनुभवादतस्तत्रान्यथागतेः। एकोऽहमन्यतोऽन्यश्चेत्येवमेव व्यवस्थितौ। भेदाभेदौ चेतनेषु तस्मान्नैकप्रकारता। एकमित्येव यज्ज्ञातं बहुत्वेनैव तत्पुनः। पटाद्यं ज्ञायते यस्माद्भेदाभेदौ कुतो न तत्। तन्तुभ्योऽन्यः पटः साक्षात्कस्य दृष्टिपथं गतः। अनन्यश्चेत्तन्तुभावे पटाभावः कुतो भवेत्। न चात्मनि विशेषोऽत्र दृष्टान्तत्वं गमिष्यति। शुद्धोऽहंप्रत्ययो यस्मात्तत्राभेदप्रदर्शकः। अत्रावयवभेदेन स्यादेव ह्यनवस्थितिः। न चानवयवं वस्तु क्वचित्स्यान्मानगोचरम्। पूर्वापरादिभेदेन यतोंऽशोऽस्यावगम्यते। उपाधिरप्येकदेशसम्बद्धः सन्तमेव हि। ज्ञापयेद्भेदमखिलं ग्रसन्स विभजेत्कथम्। तस्माद्गुणादिकमपि नास्त्यनंशतया क्वचित्। भावाभावव्यवहृतेर्विद्यमानेऽपि वस्तुनि। भेदाभेदौ गुणादेश्च जडे वस्तुनि संस्थितौ। चेतने शक्तिरूपेण गुणादेर्भाव इष्यते। सुप्तोऽयं बलवान्विद्वानित्यादिव्यवहारतः। न चैवं शक्तिरूपेण जडे व्यवहृतिः क्वचित्। एकमेवाद्वितीयं तन्नेह नानास्ति किञ्चन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति। इत्यादिश्रुतिमानाच्च परमैश्वर्यतस्तथा। सर्वं तु घटते विष्णौ यत्कल्याणगुणात्मकमि'त्यादि ब्रह्मतर्के ॥ १--१४ ॥ कमलासने ब्रह्मणि स्थितं रुद्रम्। 'विष्णुं समाश्रितो ब्रह्मा ब्रह्मणोऽङ्कगतो हरः। हरस्याङ्गविशेषेषु देवाः सर्वेऽपि संस्थिता'इति पाद्मे ॥ १५ ॥ द्यावापृथिव्योरन्तरमेकेनैव रूपेण व्याप्तम्। नान्तं न मध्यमित्युक्तत्वात्पुनरनादिमध्यान्तमिति गुणानन्त्यापेक्षया। त्वया ततं विश्वमनन्तरूपेति कालापेक्षया। स्वयमन्तं विद्यमानमपि न पश्यतीत्याशङ्क्य त्वया ततं विश्वमित्याह। अन्यत्तात्पर्यज्ञापनायाभ्यासरूपम्। 'सर्वं समाप्नोषि ततोऽसि सर्व'इति सर्वं खल्विदं ब्रह्मेत्यादिषु

SGDF
Sri Gargeshwari Digital Foundation

सर्वशब्दव्याख्यानरूपम् । 'त्रिलोकेषु स्थितैर्भक्तैरर्जुनाय प्रदर्शितम् । दृष्टं विष्णोर्विश्वरूपं स्वयोग्यत्वानुरूपतः । प्रायः सहैव पार्थेन प्रायो भीताश्च तेऽखिलाः । दर्शनाभ्यासतो दृष्टिरानन्दोद्रेककदा भवेत् । तस्मिन्काले तु भूमेश्च भारहारार्थमुद्यमात् । उग्रत्वमिव सर्वत्र न भीतिर्ब्रह्मदर्शिनाम् । अर्जुनादधिका ये तु तेषां भीतिर्न चाभवत् । श्रीब्रह्मरुद्रपूर्वाणां कृष्णाया भीमरामयोरि'त्याग्नेयवचनाद्दृष्ट्वाऽद्भुतं रूपमित्यादि युज्यते । मुक्ताः सुरसङ्घा विशन्ति । 'प्रवेशो निर्गमश्चैव मुक्तानां स्वेच्छया भवेदि'ति ब्रह्माण्डे । अन्यचेष्टां कुर्वतामपि भगवच्चेष्टयैव प्रलयोदके प्रजानां प्रवेशवत्प्रवेशो युज्यते । सेनामध्यतो भगवन्मुखानामुभयाभिमुखत्वाच्चोभे सेने तत्र प्रविशतः । ये तु तस्मिन्मुहूर्ते मरिष्यन्ति तेषां दशनान्तरे चूर्णितमपि शिरः सूक्ष्मदृष्टिगोचरत्वान्मानुषदृष्ट्या तथा न दृश्यते । यथा भिन्नमपि घटादिकं यावत्पृथङ्न पतति तावन्मन्ददृष्टीनां न ज्ञायते । यथा पुरूरवसो जराऽश्विभ्यामेव दृष्टा ॥ १९--२७ ॥ विशेषगुणकर्मविषय एव प्रश्नः । विष्णविति सम्बोधनात् ॥ ३१ ॥ 'कालः कलितसम्पूर्णसद्गुणत्वाज्जनार्दनः । संहारात्सर्ववित्त्वाद्वा सर्वविद्रावणेन वे'ति महावाराहे । अपिशब्देन भ्रात्रादीनप्यूते ॥ ३२ ॥ जयद्रथस्य पितुर्वरादेव विशेषः । निहता निहतप्रायाः । पश्चादर्जुनेऽपि स्थित्वा स एव हनिष्यति ॥ ३३--३४ ॥ 'वायुर्बलज्ञानयोगाच्छशाङ्कोऽतिसुखाङ्कितः । इन्द्रः स परमैश्वर्यादिति नानाभिधो हरिरि'ति च । एकः सर्वोत्तमोऽप्यसत्कृतः । 'एकः सर्वाधिको ज्ञेय एक एव करोति यदि'ति च ॥ ४२ ॥ तेनैव रूपेण भवेत्यनन्तरूपगोपनेन तदेव प्रकाशयेत्यर्थः । 'पञ्चाननं चिन्त्यमचिन्त्यरूपं पद्मासनं गोपितविश्वरूपमि'ति वैहायससंहितायाम् ॥ ४६ ॥ 'विश्वनामा स भगवान्यतः पूर्णगुणः प्रभुरि'ति पाद्मे । त्वदन्येन न दृष्टपूर्वमित्यनेन तेनैवेन्द्र-

SGDF
Sri Gargeshwari Digital Foundation

शरीरेण दृष्टमिति ज्ञायते । त्वदन्येनेति त्वदवरापेक्षया । तैरपि तद्वन्न दृष्टमित्येव । 'विश्वरूपं प्रथमतो ब्रह्मापश्यच्चतुर्मुखः । तच्छतांशेन रुद्रस्तु तच्छतांशेन वासवः । यथेन्द्रेण पुरा दृष्टमपश्यत्सोऽर्जुनोऽपि सन् । तदन्ये क्रमयोगेन तच्छतांशादिदर्शिन'इति ब्रह्माण्डे ॥ ४७ ॥ वेदादिभिरपि त्वदवरेणैवं द्रष्टुमशक्यम् । अन्यथा दृष्ट्वाऽद्भुतं रूपमित्यादिविरोधः ॥ ४८ ॥ स्ववत्क्रियत इति स्वकं रूपम् । विश्वरूपमज्ञानां स्वरूपवन्न दर्शयति । एतदज्ञानामपि तथैव दर्शयतीति विशेषः । अन्यथा द्रष्टुमिच्छामि ते रूपमिति विरुद्धं स्यात् । 'परावरविभेदस्तु मुग्धदृष्टिमपेक्ष्य तु । प्रादुर्भावस्वरूपाणां विश्वरूपस्य च प्रभोः । अन्यथा न विशेषोस्ति व्यक्तिर्ह्यज्ञव्यपेक्षये'ति च ॥५०॥ किञ्चिन्मनुष्यवद्दृश्यमानत्वान्मानुषम् ॥ ५१ ॥ ये दर्शनकाङ्क्षिणस्तैरपीदानीं दृष्टं प्रायः ॥ ५२ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये एकादशोऽध्यायः ॥११॥

हरिः ॐ ॥ साधननिर्णयोऽत्र । 'श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति । श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ' । 'उपासिता मुक्तिदा सद्य एव ह्यस्येशाना जगतो विष्णुपत्नी । या श्रीर्लक्ष्मीरौपला चाम्बिकेति ह्रीश्चेत्युक्ता संविदग्र्या सुविद्ये'त्यादिश्रुतिभ्यः । 'श्रीः सुतुष्टा हरेस्तोषं जनयेत्क्षिप्रमेव तु । अतुष्टा तदतुष्टिं च तस्माद्ध्येयैव सा सदा' । 'अव्यक्तं प्रकृतिं प्राहुः कूटस्थं चाक्षरं च ताम् । प्रधानमिति च प्राहुर्महापुरुष इत्यपि । तां ब्रह्म महदित्याहुः परं जीवं परां चितिम् । तस्यास्तु परमो विष्णुर्यो ब्रह्म परमं महदि'तिब्रह्माण्डवचनाच्चाव्यक्तोपासनान्मोक्षाशङ्कया पृच्छति । कूटस्थोऽक्षर उच्यत इत्युत्तरवचनात्कूटस्थमचलमित्यत्राप्युक्तेरव्यक्तशब्दश्चित्प्रकृतिवाची । अन्यथा 'ये त्वां पर्युपासते' 'ये चाप्यक्षरं' 'तेषां के योगवित्तमा'इति भेदेन

SGDF
Sri Gargeshwari Digital Foundation

प्रश्नानुपपत्तिः। 'परं ब्रह्म परं धाम पवित्रं परमं भवानि'ति तेनैवोक्तत्वात्। ये तु 'ते मे युक्ततमा मताः' 'मय्येव मन आधत्स्वे'-त्यादौ भगवतोक्तेऽप्यव्यक्तोपासकानामाधिक्यं वदन्ति ते त्वपलापकत्वादतीवसाहसिका इति सुशोच्या एव। 'न चलेत्स्वात्पदाद्यस्मादचला श्रीस्ततो मते'त्याग्नेये। 'सूक्ष्मत्वादप्रसिद्धत्वाद्गुणबाहुल्यतस्तथा। अनिर्देश्यौ तथाऽव्यक्तावचिन्त्यौ श्रीश्च माधव' इति नारदीये ॥१॥ 'अविष्णुज्ञैरतद्भक्तैस्तदुपासाविवर्जितैः। शपेदुपासिताऽप्येषा श्रीस्तांस्तद्धरितत्ववित्। तद्भक्तस्तमुपास्यैव श्रियं ध्यायीत नित्यदा। तेन तुष्टा तु साऽच्छिद्रं दद्याद्विष्णोरुपासनम्। ततस्तद्दर्शनान्मुक्तिं यात्यसौ नात्र संशयः। तथापि सर्वपरमां सर्वदोषविवर्जिताम्। ज्ञात्वा श्रियं तत्परमं तत्पतिं पुरुषोत्तमम्। विज्ञायोपासते नित्यं ते हि युक्ततमा मताः। यतः क्लेशोऽधिकस्तेषां पृथक् श्रियमुपासताम्। विष्णुना सहिता ध्याता सा हि तुष्टिं परां व्रजेत्। अन्यथा तु पुनर्विष्णोः श्रीपतित्वेन चिन्तनम्। अच्छिद्रमेव कर्तव्यमिति मुक्तिश्चिराद्भवेत्। तस्मादक्लेशतो मुक्तिः क्षिप्रं विष्णुमुपासतामि'ति परमश्रुतिः। युक्ततमाः साधकतमाः। 'विष्णोरन्यं न स्मरेद्यो विना तत्परिवारताम्। तदधीनतां वाऽनन्ययोगी स परिकीर्तित' इति च। अन्तवत्तु फलं तेषामित्यादिनाऽन्यदेवतोपासनायाः पूर्वं निन्दितत्वाल्लक्ष्म्यास्त्वतिसामीप्याद्विशेषमाशङ्क्य तदुपासनाविषय एव प्रश्नः कृतः ॥ २--६ ॥ 'वैष्णवान्येव कर्माणि यः करोति सदा नरः। जपार्चामार्जनादीनि स्वाश्रमोक्तानि यानि च। स तत्कर्मेति विज्ञेयो योऽन्यदेवादिपूजनम्। कृत्वा हरावर्पयति स तु तद्योगमात्रवान्। तत्र पूर्वो विशिष्टः स्यादादिमध्यान्ततः स्मृतेः। अवान्तरे च नियमाद्विष्णोस्तद्दासताऽस्य यत्। मनसा वर्ततेऽन्योऽपि यथाशक्ति हरिस्मृतेः। पूर्वोक्त योग्यो भवति यदि नित्यं तदिच्छति ॥

SGDF
Sri Gangeshwari Digital Foundation

॥८--११॥ असम्यग्ज्ञानिनो ध्यानाज्ज्ञानमेव विशिष्यते। ज्ञात्वा ध्यानं ततस्तस्मात्तत्फलेच्छाविवर्जितम्। तस्माज्ज्ञानाद्भवेन्मुक्तिस्त्यागाद्ध्यानयुता स्फुटमि'ति च। शान्तिर्मुक्तिः ॥१२॥ अवैष्णवसर्वारम्भपरित्यागी। सर्वारम्भाभिमानत्यागेन फलत्यागेन भगवत्समर्पणरूपेण च त्यागी। 'सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः'। 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसे'त्यादेः। 'भक्तिं ज्ञानं च वैराग्यमृते यो नेच्छति क्वचित्। शुभाशुभपरित्यागी विद्वद्भिः कीर्तितो हि स' इति च। 'प्रायः सुखादिषु समः प्रायो हर्षादिवर्जितः। तथोच्यते यथाऽल्पस्वो निःस्व इत्युच्यते जनैः। न हि मुख्यतया साम्यं कस्यचित्सुखदुःखयोः। न च हर्षादिसंत्यागो यावन्मुक्तिः कुतश्चने'ति च। 'हृतिर्मदादधर्माय हर्षो नाम प्रकीर्तित' इति शब्दनिर्णये। व्यस्तेन प्रियाः समस्तेनातीवप्रियाः। भक्तिस्तु व्यस्तेष्वप्युक्तैव। 'यस्मान्नोद्विजत' इत्यत्रापि स चेत्यनेन भक्तिरनुषज्यते। धर्मसाधनं धर्म्यं तदेवामृतसाधनममृतं धर्म्यामृतम् ॥२०॥

इति श्रीमदानन्द० श्रीमद्भगवद्गीतातात्पर्यनिर्णये द्वादशोऽध्यायः॥१२॥

हरिः ॐ॥ सर्वार्थसङ्क्षेपोऽयम्। 'हिंसाहेतुश्च जीवस्य परेण प्रेर्यते च यत्। अव्यक्तादिशरीरं तु तत्क्षेत्रं क्षीयतेऽत्र यत्। इच्छा द्वेषः सुखं दुःखं देहोऽव्याप्तिश्च चेतसः। तद्विकारा इति ज्ञेयाश्चिद्रूपेच्छादिमिश्रिताः। विकारेच्छादिनिर्मुक्तश्चिन्मात्रेच्छादिसंयुतः। मुक्त इत्युच्यते जीवो मुक्तिश्च द्विविधा मता। चिन्मात्रद्वेषदुःखे च देहो मिथ्यादृगात्मकः। निषिद्धेच्छा च यत्र स्युर्नित्या सा मुक्तिरासुरी। चिन्मात्रा वैष्णवी भक्तिर्देहः सम्यग्दृगात्मकः। सुखमिच्छाऽनुकूला च धृतिर्दैवीति सा मते'ति नारायणश्रुतिः। 'क्षेत्रज्ञो भगवान्विष्णुर्न ह्यन्यः क्षेत्रमञ्जसा। वेत्त्यसौ भगवान् ज्ञेयो व्यक्ताव्यक्तविलक्षणः। स तु जीवेषु सर्वेषु बहिश्चैव व्यवस्थितः। विलक्षणश्च

SGDF
Sri Gangeshwari Digital Foundation

जीवेभ्यः सर्वेभ्योऽपि सदैव च। सर्वतः पाणिपादादिर्यतः पाण्यादिशक्तिमान्। केशादिष्वपि सर्वत्र कृष्णकेशो हि यादवः। अणोरणुतरै रूपैः पाणिपादादिसंयुतैः। सर्वत्र संस्थितत्वाद्वा सर्वतः पाणिपादवान्। सर्वेन्द्रियाणां विषयान्वेत्ति सोऽप्राकृतेन्द्रियः। यतोऽतोऽनिन्द्रियः प्रोक्तो यन्न भिन्नेन्द्रियोऽथवा। गुणैः सत्वादिभिर्हीनः सर्वकल्याणमूर्तिमान्। अन्यथाभावराहित्यादचरश्चर एव च। चरणात्सर्वदेशेषु व्याप्तोऽणुर्मध्यमस्तथा। सर्वगत्वात्समीपे च दूरे चैवान्तरे च सः। अनन्ताव्ययशक्तित्वात्तदन्यत्र विरोधिनः। सन्ति सर्वे गुणास्तत्र न च तत्र विरोधिन'इति च। न च जीवस्य क्षेत्रज्ञनाम। 'क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचिता अनित्याः। आविर्हिताश्चापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तु'रिति भागवते। अत एतद्यो वेत्तीत्युक्ते जीवस्यापि किञ्चिज्ज्ञानात्तत्प्राप्तेस्तन्निराकरणार्थं क्षेत्रज्ञं चापि मां विद्धीत्याह। अन्यथैतद्यो वेत्तीत्युक्तेनैव सिद्धत्वात्क्षेत्रज्ञं चापीति व्यर्थम्। भेदपक्षे तु नामनिरुक्त्यर्थमेतद्यो वेत्तीति। सर्वाभेदमपि केचिद्वदन्तीति क्षेत्रं च ज्ञश्चेति व्युत्पत्तिं निवारयति। क्षेत्रज्ञं मां सर्वक्षेत्रेषु स्थितत्वेन विद्धीत्यर्थः। तत्पक्षे तु यो वेत्तीत्युक्त ईश्वरस्यापि क्षेत्रज्ञत्वं सिद्धमेव। सर्वाभेदविवक्षायां च सर्वं क्षेत्रमिति वक्तव्यं क्षेत्रेष्विति व्यर्थम्। न च तत्पक्षे मामित्यस्य कश्चिद्विशेषः। किं त्वेक एव क्षेत्र इति वक्तव्यम् ॥ ३ ॥ यतश्च यत्। यतः परमेश्वरानुमतेरिदं याति प्रवर्तते स चानुमन्ता यः। अनुसारिणी मतिरनुमतिः प्रेरणरूपा। 'प्रेरणानुमतिः प्रोक्ता क्वचित्संवाद उच्यते। प्रेरकत्वात्तु भगवाननुमन्ता प्रकीर्तित' इति च। उपद्रष्टानुमन्ता चेत्यनेनैवानुमतिरनुमन्ता चोक्तः। ज्ञेयं यत्तदित्यादिना यत्प्रभाव इत्यपि ॥ ४ ॥ चेतना चित्तव्याप्तिः। 'सङ्घातो देह उद्दिष्टश्चित्तव्याप्तिस्तु चेतने'ति च ॥ ७ ॥ तत्वज्ञानविषयस्य विष्णोरपरोक्षदर्शनं

SGDF
Sri Gurgeshwari Digital Foundation

तत्वज्ञानार्थदर्शनम् । ज्ञायतेऽनेनेति ज्ञानम् । ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्या एतज्ज्ञानमिति प्रोक्तमिति ज्ञानसाधनं ज्ञानं चोक्तम् ॥ १२ ॥ अनादीत्युक्ते स्वयं कारणं न भवतीत्याशङ्का स्यादिति तन्निवृत्त्यर्थ-मनादिमदित्याह । 'मुख्यतो गुणपूर्णत्वात्परं ब्रह्म जनार्दनः । मूर्तामूर्तव्यतीतत्वान्न सन्नैवासदुच्यत' इति च । 'मूर्तं सदवगम्यत्वा-दज्ञेयत्वादसत्परम् । पुंसामर्थ्यादगम्यत्वात्सर्ववेदप्रसिद्धितः । विलक्षणः सदसतोर्भगवान्विष्णुरव्यय' इति च ॥ १३ ॥ ज्ञानेन मुक्तौ प्राप्य-त्वाज्ज्ञानगम्यम् । 'स्वयमेवात्मनाऽऽत्मानं वेत्थेति स्वज्ञेयत्वाज्ज्ञेयम् । अन्यज्ञेयत्वस्य ज्ञेयं यत्तदिति पूर्वमेवसिद्धत्वात् । कर्तृकर्मविरोध-वादिमतं निराकरोत्युत्तरज्ञेयशब्देन । 'स्ववेत्ता वेदनं च स्वं स्वेन वेद्यश्च केशवः । परस्य वेत्ता वित्तिश्च वेद्यश्च स्यात्परैः क्वचित् । तत्प्रसादं विना कश्चिन्नैव वेत्तुं हि शक्नुयात् । स्ववेदनेऽन्यवित्तौ वा नासावन्यदपेक्षते । स्वप्रकाश इति प्रोक्तस्तेनैकः पुरुषोत्तमः । जीवानां स्वप्रकाशत्वं तत्प्रसादात्स्ववेदनमि'ति च ॥१८॥ मद्भावाय मयि भावाय ॥ १९ ॥ प्रकृतिं पुरुषं चेत्यत्र पुरुषशब्देन जीवपरयोः प्रकृतिशब्देन चेतनाचेतनप्रकृत्योः स्वीकारायोभावपीति । विकाराणां सत्वादीनां चोपादानत्वविवक्षया प्रकृतिसम्भवत्वम् । स्वातन्त्र्यं तु परमेश्वरस्यैव । उपद्रष्टानुमन्ता चेत्यादि वक्ष्यमाणत्वात् । गुणानां च विकारत्वेऽप्यधिकविकारत्वविवक्षयाऽन्येषां विकारांश्च गुणांश्चेति पृथगुक्तिः ॥ २० ॥ 'स्वदेहेन्द्रियहेतुत्वं यज्जीवस्य स्वकर्मभिः । आवृत्य विष्णुतत्वं तद्धेतुश्चित्प्रकृतिर्मता । जीवस्य सुखदुःखानां भोगशक्तिप्रदः सदा । परमः पुरुषो विष्णुः सर्वकर्ताऽपि सन्सदा । विशेषकर्ता केषाञ्चिदुक्तो यद्वद्विकुण्ठपः । उच्यते सर्वपालोऽपि विशेषेण स्वकर्मणे'ति च । परमेश्वरस्यैव सर्वकर्तृत्वेऽपि भोक्तृत्वदाने देव्या अल्पप्रवृत्तिरिति दर्शयितुमुच्यत इति स्थानद्वयेऽप्युक्तम् ।

SGDF
Sri Gangeshwari Digital Foundation

कर्तृत्वेऽपि स एव मुख्यहेतुः । तथापि भोक्तृत्वापेक्षया तस्या अधिकप्रवृत्तिरिति कर्तृत्वे हेतुः प्रकृतिरुच्यत इति सर्वहेतुत्वेऽपि विष्णोः प्रकृतेर्जीवं प्रति भोक्तृत्वदानेऽल्पप्रवृत्तिरिति पुरुषो भोक्तृत्वे हेतुरुच्यत इति विशेषहेतोरेवमुच्यते । मुख्यतस्तु सर्वहेतुत्वं विष्णोरेवेति भावः । पुरुषः प्रकृतिस्थ इत्यत्र पुरुषशब्दो जीवे । उभयोरपि पुरुषशब्देन पूर्वं प्रस्तुतत्वात् । यथायोग्यमुपपत्तेः ॥ २१ ॥ कार्यकारणसम्बन्धं भोगं च मिथ्येतिवदतां निराकरणायाह । पुरुषः प्रकृतिस्थो हीति । हीत्यनुभवविरोधं दर्शयति तेषाम् । न हि ज्ञानाज्ञानसुखदुःखादिविषयस्यान्तरानुभवस्य भ्रान्तित्वं क्वचिद्दृष्टम् । न चास्य मिथ्यात्वे किञ्चिन्मानम् । शरीरमारभ्यैव ह्यपरोक्षभ्रमो दृष्टः । तत्रापि बलवत्प्रमाणविरोधादेव भ्रान्तित्वं कल्प्यम् । साक्षिसिद्धस्यापि भ्रान्तित्वाङ्गीकारे येन सर्वस्य भ्रान्तित्वमभ्रान्तित्वं चात्मनोऽवगतं तदपि प्रमाणमात्मैव । व्यवहारतोऽप्यस्तीत्यत्र प्रमाणाभावात् । भ्रान्तिरभ्रान्तिर्वा न किञ्चित्सिध्यति । अनुभवो भ्रान्त इत्युक्ते भ्रान्तत्वे प्रमाणं तत्प्रामाण्यं च कुतः सिध्येत् ? । व्यवहारतः सर्वमङ्गीकुर्म इत्युक्ते व्यवहारो व्यवहर्ता च कुतः सिद्धः ? । प्रतीतित इत्युक्ते सैव कुतः ? । स्वत इत्युक्ते स्वस्य भ्रान्तित्वे प्रतीतिं विनैव प्रतीतिरस्तीति भ्रान्तिः स्यात् । स्वाभावोऽपि स्यात् । स्वयमस्मीति च भ्रमः स्यात् । निरालम्बनो भ्रमो नोपपद्यत इत्यस्यापि भ्रमत्वोपपत्तेः । तत्प्रमाणमप्यप्रमाणमेव । प्रमाणत्वभ्रम इति न किञ्चित्सिध्यति । भ्रम इत्यस्यैव भ्रमत्वेऽन्यस्याभ्रमत्वमेव भवति । सुखदुःखादिविषयं ज्ञानमात्मस्वरूपमेवेति तस्य भ्रमत्वे छद्मना विनैव शून्यवादो भवति । न हि वृत्तिज्ञानविषयमज्ञानादिकं तेषामपि । भ्रमस्य चाविद्याकार्यत्वाङ्गीकारादात्मस्वरूपस्याप्यविद्याकार्यत्वं स्यात् । दुर्घटत्वं भूषणमित्युक्ते दुर्घटत्वं

SGDF
Sri Gangeshwari Digital Foundation

सुघटत्वं चोभयं भूषणमस्माकमित्युत्तरम्। न हि प्रमाणसिद्धस्य दुर्घटत्वे सुघटत्वेवाऽपवादो दृष्टः। दुर्घटत्वं भूषणमिति वदद्भिरात्मनोप्यविद्यात्वमङ्गीकृत्य तदयुक्तमित्युक्ते तत्रापि भूषणत्वं किमिति नाङ्गीक्रियते?। अतिसुकरत्वात्। न चात्मनोऽप्यविद्यात्वं वदतां तेषामुत्तरम्। अतोऽनन्तदोषदुष्टत्वाद्धीति प्रसिद्ध्यैव भगवता निराकृताः। अस्य जीवस्य सदसद्योनिजन्मसु कारणं सत्वादिगुणसङ्गः॥२२॥ स्वतन्त्रकारणं तु परमेश्वर एवेत्याह। उपद्रष्टाऽनुमन्तेति। 'सर्वेभ्य उपरि द्रष्टा यदुपद्रष्टृनामकः। स्वातन्त्र्यात्स्वानुकूलेन मत्या प्रेरयति स्म यत्। अनुमन्तेति कथितः स्वयं प्रभुरजो हरिः। महाशक्तिर्यतो विष्णुर्महेश्वर इतीरितः। परमत्वाच्च तस्यैव ह्यनुमन्तृत्वमुच्यते। स एव सर्वदेहेषु देहिनोऽन्यो व्यवस्थित' इति च। मां विद्धि सर्वक्षेत्रेष्विति देहेऽप्युक्तः। तेनाहमेव स इति दर्शयति॥२३॥ 'द्विविधं पुरुषं चैव प्रकृतिं द्विविधामपि। सह तत्तद्गुणैः सम्यग्ज्ञात्वा पश्यति यः पुमान्। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते। अनादियोग्यताभेदात्पुंसां दर्शनसाधनम्। नानैव तत्र विष्णोस्तु प्रसादाद्वैष्णवं वपुः। स्वयं विज्ञायते किञ्चिच्छ्रूयते किञ्चिदन्यतः॥२४॥ तथा ज्ञात्वा हरिं ध्यात्वा स्वान्तः पश्यन्ति केचन। ऋषयः केचिदृषयो नारदाद्या बहिस्त्वपि। देवा विष्णुप्रसादेन लब्धसत्प्रतिभाबलात्। सर्वं क्रमेण विज्ञाय प्रतिभास्पष्टताक्रमात्। पश्यन्ति बहिरन्तश्च विष्णुं ध्यानमृतेऽपि तु। येषां ध्यानमृते दृष्टिस्तेषां ध्यानेऽपि दर्शनम्। स्यादेव साङ्ख्ययोगास्ते देवा ब्रह्माऽधिकोऽत्र च। केचित्तु क्षत्रियवरा अश्वमेधादिकर्मभिः। यजन्तो भक्तिमन्तश्च यज्ञभागार्थमागतम्। श्रवणप्रतिभाभ्यां च स्मरन्तः पुरुषोत्तमम्। पश्यन्ति॥२५॥ अन्ये तथाऽन्येभ्यः सर्वं श्रुत्वानुमत्य च। उपास्यैव तु पश्यन्ति नान्यथा

SGDF
Sri Gargeshwari Digital Foundation

तु कथञ्चन। ऋषीत्राङ्गस्तथाऽऽरभ्य प्रतिभाऽभ्यधिका क्रमात्। यावद्ब्रह्मा ब्रह्मणस्तु प्रायो नाप्रतिभासितम्। विष्णोः प्रीत्यर्थमेवास्य श्रोतव्यं प्रायशो हरेः। अन्येषां श्रवणाज्ज्ञानं क्रमशो मानुषोत्तरम्। अत्यल्पप्रतिभानत्वान्मानुषाः श्रुतवेदिनः। सर्वे ते दर्शनात्तस्मा-त्स्वयोग्यान्मुक्तिगामिन' इति च। अन्येषामपि किञ्चिच्छ्रवणे विद्यमानेऽपि मनुष्याणामत्यल्पप्रतिभानत्वाच्छ्रुत्वाऽन्येभ्य इति विशेषणम्। मनुष्याणां प्रतिभामूलप्रमाणापेक्षा प्रायो न सम्यगु-त्पद्यतेऽल्पा चेति श्रुतिपरायणा इति। 'अश्रुतप्रतिभा यस्य श्रुति-स्मृत्यविरोधिनी। विश्रुता नृषु जातं च तं विद्याद्देवसत्तमम्। यश्च स्वमुखमानेन नवार्धो देहवान्पुमान्। अष्टमानवती स्त्री च षण्णव-त्यंगुलौ पुनः। दशतालौ सप्तपादौ विद्यात्तौ च सुरोत्तमौ। यावत्पञ्चाङ्गुलोनं तद्देवमानं क्रमात्परम्। पादे त्वङ्गुलमात्रोनं तदूनं चतुरङ्गुलम्। यावद्देवोपदेवानां पादे चोनाङ्गुलं पुनः। तावन्मनुष्य-मानं स्यात्ततोऽधस्त्वासुरं स्मृतम्। द्विचत्वार्यधिकं तस्मात्षण्णव-त्यङ्गुलादधः। ज्ञेयमङ्गुलमानं तदुपदेवादिषु स्फुटम्। देवेष्ववर-वज्ज्ञेयमृषीणां चक्रवर्तिनां। यावद्यावत्प्रियो विष्णोस्तावत्स्त्रीपुंस्वरू-पिणः। हरेः सादृश्यमस्य स्यादनादिक्रमसुस्थिरमि'ति च॥ २६॥

क्षेत्रक्षेत्रज्ञसंयोगादित्यत्र क्षेत्रं श्रीः। 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहमि'ति वक्ष्यमाणत्वात्। 'अव्यक्तं च महद्ब्रह्म प्रधानं क्षेत्रमित्यपि। उच्यते श्रीः सदा विष्णोः प्रिया निर्दोषचिद्घना। सा हि न व्यज्यते विष्णुरत्र क्षेतिमहागुणा। जीवोत्तमा च तैस्तैस्तैः शब्दैरेकाऽभिधीयते। महान्ब्रह्मा जीवमहान्परात्मप्रेरिताः क्रियाः। अहं कर्तेति येनायं जीवो मंस्यत्यसौ शिवः। अहंकार इति प्रोक्तो जीवाहंमतिकृद्यतः। उमा बुद्धिरिति ज्ञेया शब्दादिज्ञानदा यतः। मतिदो मन उद्दिष्ट इंद्रः स्कन्दोऽपि तत्सुतः। श्रोत्रं तु श्रावयंश्चन्द्रः

SGDF
Sri Gurgeshwari Digital Foundation

स्पर्शो वायुसुतो मरुत् । चक्षुः सूर्यश्चक्षयति जिह्वा वारिपतिर्हृतेः । अश्विनौ घ्राणमाघ्रातेर्वागग्निर्वचनादपि । हस्तौ वायुसुतौ ज्ञेयौ मरुतौ हानिलाभयोः । पादौ तु विष्णुनाऽऽविष्टौ यज्ञशंभू शचीसुतौ । पदनादेव पायुश्च भुक्तस्यैवाप्ययाद्यमः । संतत्युपस्थितिकृतेरुपस्थः स शिवो मनुः । विनायकस्तथाकाशो निरावृत्या प्रकाशनात् । प्रधानवायुजो भूतवायुर्नाम्ना मरीचिकः । अग्निश्च पृथिवी चैव प्रसिद्धौ वरुणो जलं । अदनात्प्रथनाज्जन्मलयहेतोस्तथाऽभिधाः । शब्दाद्याः पञ्च शिवजाः शब्दनात्स्पर्शनादपि । रूपणाद्रसनाच्चैव गन्धनाच्च तथाऽभिधाः । सुखं धृतिश्चेतना च सुखनाद्धिधृतेरपि । चेतोनेतृत्वतश्चैव मुख्यवायुः सरस्वती । श्रीश्चेच्छा चैव सा वायोः पत्नी त्वेवं धृतिर्मता । इच्छादानाच्च सैवेच्छा स्थानभेदात्तु देवताः । पृथक्पृथक्च कथ्यन्ते लक्ष्म्याद्या उदिता अपि । दुःखद्वेषौ कलिश्चैव द्वापरौ ब्रह्मणः सुतौ । प्रवरावसुराणां तौ संघातश्चेतनाः परे । एतैरभिमतं यच्च तत्तन्नाम्नाऽभिधीयते चेतनाचेतनं त्वेतत्सर्वं क्षेत्रमितीरितं । क्षितिरेतद्भगवतो यदतः क्षेत्रमीर्यते । क्षिणोति त्राति चैवैतदतो वा क्षेत्रमुच्यते । क्षितिं कृत्वा त्राति चैतदतो वा क्षेत्रमीरितं । एतस्मात्क्षीणमेतेन त्रातमित्यथवा पुनः । इच्छाद्यानां क्षेत्रनाम्नामपि नामान्तरं स्मृतं । विकार इति यस्मात्ते विशेषविकृतिस्थिताः । विशेषात्क्रियते यस्माद्विकारः कार्यमन्तिमं । विगतं करणं चात्र पुनर्नाशमृते यतः । तत्सम्बन्धाद्विकाराख्या इच्छाद्या अभिमानिनः । एतत्सर्वं सर्वदैव निर्दोषेणैव चक्षुषा । प्रेरयन्नेव जानाति तत्क्षेत्रज्ञो हरिस्तत' इति च । 'यस्यात्मा शरीरमि'त्यादिश्रुतेश्चेतनस्या 'पीदं शरीरं कौन्तेये'ति शरीरत्वोक्तिर्युज्यते । 'सत्वं जीवः क्वचित्प्रोक्तः क्वचित्सत्वं जनार्दनः । सत्वं नाम गुणः क्वापि क्वचित्साधुत्वमुच्यत' इति शब्दनिर्णये । 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वमि'ति च पैङ्गिश्रुतिः । जनी प्रादुर्भाव इति-

SGDF
Sri Gangeshwari Digital Foundation

धातोर्जीवस्यापि शरीरे व्यक्त्यपेक्षया जनिर्युज्यते ॥२७॥ जीवेषु दुःखयोगादिरूपेण विनश्यत्स्वप्यतथाभूतं । 'दुःखयोगादिरूपेण जीवेषु विनशत्स्वपि । दुःखयोगादिरहितः सर्वजीवेष्ववस्थितः । गुणैः सर्वैः समो नित्यं न हीनो हीनगोऽपि सन् । इति पश्यति यो विष्णुं स एव न तमो व्रजेदि'ति पाद्मे ॥ २८-२९ ॥ प्रकृत्य स्वयमेव प्रारभ्य विष्णुना क्रियमाणानि । विष्णोर्नान्यः पूर्वप्रेरक इति । 'पूर्वं तु बादरायणो हेतुव्यपदेशादि'ति भगवद्वचनात् । 'द्रव्यं कर्म च कालश्चे'ति च । 'स्वयं प्रकृत्या भगवान्करोति निखिलं जगत् । नैव कर्ता हरेः कश्चिदकर्ता तेन केशव' इति च स्कान्दे । तेनेति प्रस्तुतत्वादेव सिद्धं । 'अहं सर्वस्य प्रभवः' । 'स हि कर्ता' । 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्' । 'जन्माद्यस्य यतः' । 'मत्त एवेति तान्विद्धी'त्यादि सकलप्रमाणविरोधश्चान्यथा । प्रकृत्यैव चेति चशब्दात्तेनैवेति सिध्यति । 'प्रकृतेन क्रियायोगं चशब्दः क्वचिदीरयेत् । क्वचित्समुच्चयं ब्रूयात्क्वचिद्दौर्लभ्यवाचक' इति शब्दनिर्णये । प्रकृतेः कर्तृत्वं 'रचनानुपपत्तेश्च नानुमानमि'त्यादिभगवद्वचनेन निरस्तं । 'न ऋते त्वक्रियते किञ्चनार' इति च । केवलप्रकृतेः कर्तृत्वाङ्गीकारे चशब्दो व्यर्थः । 'तत एव च विस्तारमि'ति वाक्यशेषविरोधश्च । 'अहं बीजप्रदः पिते'ति वक्ष्यमाणमत्रापि क्षेत्रक्षेत्रज्ञसंयोगादिति प्रकृतमिति तेनापि विरोधः । अचेतनं करोतीति स्वोक्तिविरोधश्च । 'इच्छापूर्वं क्रियादानं कर्तृत्वं मुख्यमीरितमि'ति पैङ्गिश्रुतिः । विकारलक्षणं कर्तृत्वं तु प्रकृतेरङ्गीकृतमेव । तथापि लक्ष्मीपरमेश्वरमुक्तचेष्टासु तदभावात्सर्वश इत्यस्य सङ्कोचप्राप्तिः । 'अचेतनाश्रितं कर्म विकारात्मकमीरितं । यत्तु केवलचित्संस्थं प्रत्यभिज्ञाप्रमाणतः । अविकारात्मकं ज्ञेयं तन्न तत्प्राकृतं भवेदि'ति च ॥३० ॥ 'एकविष्ण्वाश्रितानां तु जीवानां भेदमेव यः । ततः परस्परं चैव तारतम्येन पश्यति । विष्णोरेव च विस्तारं जगतः

SGDF
Sri Gargeshwari Digital Foundation

स विमुच्यत' इति च ॥ ३१ ॥ शरीरस्थो जीवः । 'स्वप्नेन शरीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती' ति श्रुतेः। 'शरीरस्थस्तु संसारी शरीराभिमतेर्मतः । विष्णुः शरीरगोऽप्येष न शरीरस्थ उच्यते । शरीराभिमतिर्यस्मान्नैवास्यास्ति कदाचन । तद्गतानां तु दुःखानां भोगोऽभिमतिरुच्यते । तदभावान्नाभिमानी भगवान्पुरुषोत्तम' इति च । अनादित्वान्निर्गुणत्वात्परमात्मा जीवोऽपि न किमुत जडं न भवतीति । शरीरोत्पत्तिलक्षणमप्यादिमत्त्वं परस्य नास्तीति विशेषः । जीवस्य हि तदस्तीति । सत्वादिगुणसम्बन्धश्च । सर्वं करोति परमात्मा तथापि न लिप्यते । वादिप्रसिद्धत्वादेवेष्टापूर्तं मन्यमाना वरिष्ठमित्यादिवन्निषेधः । 'कुर्वाणोऽपि यतः सर्वं पुण्यपापैर्न लिप्यते । जन्ममृत्यादिरहितः सत्वादिगुणवर्जितः । विष्णुस्तद्विपरीतस्तु जीवोऽतस्तौ पृथक्सदे'ति च ॥ ३२ ॥ 'स एष नेति नेती' त्यादि च । जीवानामचेतनप्रकृतेर्मोक्षं भूतप्रकृतिमोक्षं ॥ ३५ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये त्रयोदशोऽध्यायः ॥ १३ ॥　॥　॥　॥　॥

हरिः ॐ॥ क्षेत्रक्षेत्रज्ञसंयोगस्पष्टीकरणपूर्वकं त्रैगुण्यं विविच्य दर्शयति । 'योनिर्भार्या तथा स्थानं योनिः कारणमेव चे'ति शब्दनिर्णये । अत्र योनिर्भार्या । 'तस्मिन् गर्भं दधाम्यहमि'ति वाक्यशेषात् ॥ ३ ॥ एतेभ्यः सत्वादिगुणेभ्योऽन्यं कर्तारमीशं यदा पश्यति तदैवायं ना पुरुषः । अन्यथा पशुसमः । न केवलमन्यत्वेन पश्यन्ना । तं कर्तारं विष्णुं किं तु गुणेभ्य उत्तमत्वेन च । कथं स एव ना ? यस्मान्मद्भावं सोऽधिगच्छति ॥ १९ ॥ 'महालक्ष्मीरिति परा भार्या नारायणस्य या । प्रकृतिर्नाम सा ज्ञेया प्रकर्षेण करोति यत् । तस्यास्तु त्रीणि रूपाणि सत्वं नाम रजस्तमः । सृष्टिकाले विभज्यन्ते सत्वं श्रीः सद्गुणप्रभा । रजो रञ्जनकर्तृत्वाद्भूः सा सृष्टिकरी

SGDF
Sri Gargeshwari Digital Foundation

यतः । यदावेशादियं पृथ्वी भूमिरित्येव कथ्यते । जीवानां ग्लपना-द्दुर्गा तम इत्येव कीर्तिता । एताभिस्तिसृभिर्जीवाः सर्वे वद्धा अमुक्तिगाः ॥५॥ सर्वान्बध्नन्ति सर्वाश्च तथापि तु विशेषतः । श्रीर्देवबन्धिका नृणां भूर्दैत्यानां तथाऽपरा । एताभ्योऽन्यं परं चैव विष्णुं ज्ञात्वा विमुच्यते । सामर्थ्यातिशयादासां नैताभ्यो विद्यते परः । इति यावद्विजानाति तावत्तं नृपशुं विदुः । तस्मादाभ्योऽधिकगुणो विष्णु-र्ज्ञेयः सदैव चे'ति महाविष्णुपुराणे ॥६-१८॥ रजसस्तु फलं दुःखामित्यत्र दुःखमिति दुःखमिश्रं सुखं । 'दुःखं दुरिति संप्रोक्तं खं नाम सुखमुच्यत' इति शब्दनिर्णये । 'कर्मणो राजसस्योक्तं दुःख-मिश्रं सुखं फलं । अज्ञानजं तामसस्य नित्यदुःखं फलं विदुरि'ति स्कान्दे ॥१६॥ 'लोकस्थितान्प्रकाशादीन्प्रायो न द्वेष्टि नेच्छति । स्वयं प्रकाशी मोहोज्ज्ञस्तथापि पुनरिच्छति । विष्णोः प्रकाशं तं चापि नित्यभक्त्याभिसेवते । सुखदुःखादिभावेऽपि विष्णुभक्तौ समः सदा । अर्थार्थं वा प्रियार्थं वा निन्दादीनां भयादपि । न विष्णुभक्तिह्रासोऽस्य किंतु साम्यमथोन्नतिः । अवैष्णवारम्भवर्जी विष्णुं याति न संशय'इति च । उदासीनवदित्युक्तेश्च न केवलोदासीनत्वं । नेङ्गत इत्युदासीन-वृत्तिनिषेधः । सर्वारम्भपरित्यागीति विशेषप्रयोजनापेक्षयाऽपि ना-वैष्णवारम्भ इति । 'इङ्गनं क्षणिकं कर्म दीर्घमारम्भ उच्यत' इति शब्दनिर्णये । 'लक्ष्म्यादिभिः कृतो बन्धो योऽनादिः पुरुषस्य तु । तमत्येतीह यो विद्वान्स विज्ञेयो गुणात्ययी'ति च प्रवृत्ते । तत्कृत-बन्धात्ययात्तदधिकविष्णुप्राप्तेश्च तदत्ययीत्युच्यते । यथा द्वारपाल-मतीत्य राजानं गच्छतीति । ब्रह्मणि भूयं ब्रह्मभूयं । ब्रह्मेति प्रकृता महालक्ष्मीः । 'अतीत्य त्रीणि रूपाणि महालक्ष्मीं प्रपद्यते । तया त्वनुगृहीतोऽसौ वैष्णवो विष्णुगो भवेदि'ति च ॥२२-२६॥ ब्रह्मप्राप्तो मत्प्राप्त एव भवतीत्याह । ब्रह्मणो हीति । मदवियोगात्तस्या

SGDF
Sri Gargeshwari Digital Foundation

अपि मत्स्थ एव भवतीत्यर्थः। तथापि मत्प्राप्तिक्रमविवक्षया तदुक्तिः। एकांतिकस्य सुखस्य मोक्षस्य ॥२७॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये चतुर्दशोऽध्यायः ॥१४॥

हरिः ॐ॥ त्रयोदशोक्तं विविच्य दर्शयति। 'पृथङ्मूलं हरिस्तस्य जगद्वृक्षस्य भूमिवत्। सत्वादियुक्ते चिदचित्प्रकृती मूलभागवत्। अत्रापि चिदचिद्योगो वृक्षवत्सम्प्रकीर्तितः। पृथिवीदेवतावत्तद्धरिर्मृद्वदचेतना। उत्तमत्वात्तु मूलानामूर्ध्वमूलस्त्वयं स्मृतः। नीचास्ततो महदहंबुद्ध्यो भूतसंयुताः। शाखाश्छन्दांसि पर्णानि काममोक्षफले ह्यतः। कारणेषु स्थितं कार्यं व्याप्तं कार्येषु कारणं। अन्योन्यसंयुताः शाखा मूलानि तु सदैव तु। विषयादर्शनीयत्वात्प्रवालसदृशा मताः। जगद्वृक्षोऽयमश्वत्थो ह्यश्ववच्चश्चलात्मकः। अव्ययोऽयं प्रवाहेण ॥१-२॥ स्वसक्तज्ञानहेतिना। विष्णोः सम्यक्पृथग्दृष्टिनामच्छेदनभाक्सदा। अव्यक्तादिसमस्तं तु नेति नेत्यादिवाक्यतः। बोधेनैव पृथग्विष्णोः कृत्वा मृग्यः स केशवः ॥३॥ तमेवाद्यं प्रपद्येत यदंशाभासको ह्ययं। जीवराशिः समस्तोऽपि ब्रह्मरुद्रेन्द्रपूर्वकः ॥४॥ किञ्चित्सादृश्यमात्रेण भिन्नोऽप्यंश इवोच्यते। ईश्वरस्तु यदा त्वस्य शरीरं विशति प्रभुः। मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति। शब्दादीन्प्रत्यथ यदा जीवमादाय यात्यतः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥७-८॥ भुङ्क्ते हरिः शुभान् भोगानिन्द्रियेषु व्यवस्थितः। पूर्णानन्दोऽपि भगवान्क्रीडया भुङ्क्त एव तु ॥९-१०॥ सौम्यत्वात्सोमनामासौ सोममण्डलगः सदा। स एवाग्निस्थितो विष्णुर्नाम्ना वैश्वानरः सदा। सर्वेषां स नराणां यदुपजीव्यः सदैव च। स एव व्यासरूपेण वेदान्तकृदुदाहृतः। ब्रह्मरुद्रादयः सर्वे शरीरक्षरणात्क्षराः। श्रीरक्षरात्मेत्युदिता नित्यचिद्देहका यतः। चेतनाचेतनस्यास्य राशेः संस्थापकत्वतः। कूटस्थ

SGDF
Sri Gargeshwari Digital Foundation

आत्मा सा ज्ञेया परमात्मा हरिः स्वयं । क्षराक्षरात्मनोर्यस्मादुत्तमः स सदाऽनयोः । पुरुषोत्तमनाम्नाऽतः प्रसिद्धो लोकवेदयोरि'ति नारायणश्रुतिः ॥ १३-१८ ॥ इति श्रीमदानन्दतीर्थभगव० गीतातात्पर्यनिर्णये पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ ॥ ॥

हरिः ॐ ॥ देवासुरलक्षणं । 'येऽतिमानेन मन्यन्ते परमेशोऽहमित्यपि । मिथ्या जगदिदं सर्वं भ्रमजत्वान्न तिष्ठति । मिथ्यात्वान्नेश्वरोऽस्यास्ति परेभ्योऽपि न जायते । स्वस्मिन्नपि तथान्यस्मिन्नियन्ताऽन्य इतीरिते । प्रद्विषन्त्यसुरास्ते तु सर्वे यान्त्यधरं तमः । अयोग्येशत्वकामाच्च लोभाच्चात्मसमर्पणे । तत्ववेदिषु कोपाच्च तमस्तेषां न दुर्लभं । अक्षागमानुमानां च स्वोक्तेरपि विरोधिनः । यस्मात्ततोऽसुरा ज्ञेया एवमन्येऽपि तादृशाः ॥८-२१॥ ये तु विष्णुं परं ज्ञात्वा यजन्ते नान्यदेवताः । प्रत्यक्षाद्यविसंवादिज्ञानादेव विमुक्तिगा' इति ब्रह्मवैवर्ते ॥१॥ निबन्धाय नीचस्थानेऽन्धतमसि बन्धाय । 'सर्गाणां सुबहुत्वेपि शुभाशुभफलाधिकौ । देवासुराख्यौ द्वावेव गंधर्वाद्यास्तदन्तराः । मुक्तिगा एव विज्ञेया देवा एव विमुक्तिगा' इति च । विमोक्षायेत्यत्र वीत्युपसर्गादेव मोक्षनानात्वं ज्ञायते । 'देवासुरनरत्वाद्या जीवानां तु निसर्गतः । निसर्गो नान्यथा तेषां केनचित्क्वचिदेव वा । देवाः शापबलादेव प्रल्हादादित्वमागताः । अतः पुनश्च देवत्वं ते यांति निजमेव तु । हेतुतः सोऽन्यथाभावो रक्तता स्फटिके यथा । अतो नित्यश्च नाप्येष स्वभावविनिवर्तकः । किंत्वाक्रम्यैव तं तिष्ठेद्देवसर्गस्ततो हि सः । अशोच्य एव विज्ञेयो मोक्षयोग्यो हरेः प्रिय' इति च ॥५-६॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये षोडशोऽध्यायः ॥ १६ ॥ ॥ ॥

हरिः ॐ ॥ सदसत्कर्मविवेकः । सत्वानुरुपा जीवानुरूपा । अतो ये सात्विकश्रद्धास्ते सात्विका इति ज्ञेया अन्येऽन्य इति ।

SGDF
Sri Gargeshwari Digital Foundation

श्रद्धामयः श्रद्धारूपः ॥ ३ ॥ 'श्रद्धा स्वरूपं जीवस्य तस्माच्छ्रद्धा विभेदतः । उत्तमाधममध्यास्तु जीवा ज्ञेयाः पृथक्पृथक् । स्वरूपभूता श्रद्धैव तमोगानां विमोक्षिणाम् । शिष्यते संसृतिस्थानां श्रद्धारूपं मनोऽपरम् । तत्र स्वरूपश्रद्धैव व्यज्यते प्रायशः क्वचित् । सात्विकस्य तमोरूपा श्रद्धान्तःकरणात्मिका । सात्विकी तामसस्यापि भूयस्त्वात्तद्विविच्यते । श्रद्धेत्यास्तिक्यनिष्ठोक्ता सा येषां देवतोत्तमे । विष्णौ तद्भक्तबुद्ध्यैव रमाब्रह्मादिकेषु च । ते सात्विका इति ज्ञेयास्तैरिष्टं विष्णुरेव तु । श्रीश्च साध्यक्षविद्याख्या ब्रह्मेन्द्राद्याश्च देवताः । विबुधत्वात्तु मन्वाख्या भुञ्जते प्रीतिपूर्वकम् । व्यामिश्रयाजिनो ये तु विष्ण्वाधिक्ये ससंशयाः । स्वरूपमात्रे देवानां श्रद्धायुक्ताश्च सर्वदा । राजसास्ते तु विज्ञेयास्तैरिष्टं यक्षराक्षसाः । दीनत्वाद्देवनामानो ब्रह्मेन्द्रादिसनामकाः । गृह्णन्ति ये हरिं त्वन्यदेवादिसममेव तु । नीचं ब्रह्माद्यनन्यं वा मन्यन्ते नेति चाखिलं । तत्तच्छ्रद्धायुतास्ते तु तामसाः परिकीर्तिताः । भूतप्रेतास्तु तैरिष्टं शिवस्कन्दादिनामकाः । साक्षाच्छिवपरीवारा भुञ्जते ह्यतितामसाः । मोक्षः साङ्कल्पिकः स्वर्गो भूतादित्वं फलं क्रमात् । त्यक्त्वाऽपि शास्त्रविहितं मिथ्याज्ञानविवर्जिताः । भक्त्या विष्णुं यजन्ते ये निषिद्धाचरणोज्झिताः । तेऽपि यान्ति हरिं शास्त्रविधानस्थाः कुतः पुनः ॥ ४ ॥ अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः । अकृशानपि लक्ष्म्यादीन्देवान्विष्णुपरायणान् । विष्णुं च सर्वदेहस्थं कृशत्वेन विजानते । तेषामल्पगुणत्वेन कल्पनात्ते तमो ध्रुवं । यान्ति ज्ञेयाश्च ते दैत्याः पिशाचा वाथ राक्षसाः ॥ ५-६ ॥ अन्नैश्चैवाथ यज्ञाद्यैः प्रायो ज्ञेया इमे नराः । सात्विकाः सात्विकान्कुर्युर्यस्मादन्ये तथेतरान् ॥ ७--२२ ॥ ॐ तत्सदिति यद्विष्णोर्नामत्रयमुदाहृतम् । प्रसिद्धं वैदिकं तस्मात्कर्म तद्विषयं हि सत् । तत्राश्रद्धाकृतं तस्मादस-

SGDF
Sri Gangeshwari Digital Foundation

दित्येव कीर्त्यते। विप्रा वेदाश्च यज्ञाश्च यस्मादोताः परस्परम्। विहिता विष्णुना तेन विष्णुरोमिति कीर्तितः। ओतमस्मिन्निदं सर्वमिति चोक्तः स ओमिति। तस्मादोमिति यज्ञादीन्प्रवर्तन्ते हि वैदिकाः। अनोंकृतं ह्यासुरं स्याद्यत्तस्मादोंकृतं त्वपि। ॐकारार्थ-हरेः सम्यगज्ञानादासुरं भवेत्। फलं त्वनभिसन्धाय तद्ब्रह्म स्यान्ममास्पदम्। इति यत्क्रियते कर्म तन्नामाऽतो जनार्दनः। अभिसन्धितं हि तत्प्रोक्तं ततं वा स्वगुणैः सदे'त्यादि च ॥२३--२८॥

'मयं प्रधानमुद्दिष्टं स्वरूपं कार्यमेव चे'ति शब्दनिर्णये। शास्त्रविहित-मपि भगवच्छ्रद्धाविहीनमसदेवेति वक्ष्यति। अश्रद्धया हुतमिति। भगवच्छ्रद्धाविरहितत्वादेव चाशास्त्रविहितं भवति। 'विष्णुभक्ति-विधानार्थं सर्वं शास्त्रं प्रवर्तत' इति पैङ्गिश्रुतिः ॥३॥ स्थिराः स्थिरगुणा घृतादयः। कट्वादीनामप्यारोग्यरसाद्यर्थत्वेन सात्विकत्वमेव। रस्यादीनामपि राजसत्वमनारोग्यादिहेतुत्वे। 'दुःखशोकामयप्रदा' इत्युक्तेः। सत्वं साधुभावः। भवति हि सोऽपि शुच्यन्नात्। 'हृद्यं पश्चान्मनोहारि प्रियं तत्कालसौख्यदम्। सुखं तु दीर्घसुखदं रस्यमभ्याससौख्यदमि'ति शब्दनिर्णये ॥८॥ रूक्षं नीरसं तीक्ष्णं सर्षपादि ॥९॥ 'यामान्तरितपाकं तु यातयाममितीर्यते। क्वचिच्च गतसारं स्यान्नियम्यं यातमस्य यदि'ति च। पूर्वं स्वादु पश्चादन्यथा-जातं गतरसम्। 'शुद्धभागवतानां तु स्वभावापेक्षयैव तु। स्वादुत्वादि विजानीयात्पदार्थानां न चान्यथे'ति सूदशास्त्रे ॥१०॥ 'यागात्तु राजसात्स्वर्गः साङ्कल्पिक उदाहृतः। लोकः स दीनदेवानां सनाम्नां वासवादिभिः। विष्णावश्रद्धयाऽयोग्यकामाच्चैषां पुनर्भवेत्। नरकं च विना यज्ञं राजसं नरलोकगाः। निषिद्धं कर्म कुर्युश्चेदीयुस्ते नरकं ध्रुवम्। कदाचित्सात्विकाः कुर्युः कर्म राजसतामसम्। अन्येऽन्यच्च तथाप्येषां स्थितिः स्वाभाविकी पुनः। स्वं स्वं कर्म तु सर्वेषां सदैव

SGDF
Sri Gargeshwari Digital Foundation

स्यान्महत्फलम् । अन्यदल्पफलं चैव बाहुल्यं तेषु लक्षणमि'ति पाद्मे ॥ ॥४॥ मौनं मननम् ॥ १६ ॥ युक्तैर्भगवदर्पणादियुक्तैः । युक्तैरिति दानादिषु सर्वत्र समम् ॥ १७ ॥ सत्सम्बन्धित्वादेव कर्मादि सत् । ॐतत्सदितिनाम्नां विष्णौ प्रसिद्धत्वात् । 'स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यते' । 'अनोंकृतमासुरं कर्मे'ति श्रुतेरनोंकृतस्यासुरत्वप्रसिद्धेः । 'अनर्थज्ञोदितो मन्त्रो निरर्थस्त्राति मानतः । यन्मन्त्रस्तेन कथितो मन्त्रार्थो ज्ञेय एव तदि'ति पैङ्गिश्रुतेश्च । तदर्थत्वेन फलानभिसन्धिपूर्वककर्मण एव सात्विकत्वाच्च । तद्भक्त्या तत्स्मरणपूर्वकमेव कर्म सदन्यदसदेवेति भावः ॥ २३ ॥ राजसस्याप्यसदन्तर्भाव एव । विष्णुश्रद्धारहितत्वात् । 'सात्विकं मोक्षदं कर्म राजसं सृतिदुःखदम् । तामसं पातदं ज्ञेयं तत्कुर्यात्कर्म वैष्णवमि'त्याग्नेये ॥ २८ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये सप्तदशोऽध्यायः ॥ १७ ॥　॥　॥　॥　॥

हरिः ॐ ॥ सर्वाध्यायोक्तधर्मस्य समासतो निर्णयात्मकोऽनुक्तत्रैगुण्यवादी चायम् । मनीषिण इत्युक्तत्वात्तेऽप्यनिन्द्याः । अतस्त्याज्यं दोषवदित्यस्यार्थः 'सङ्गं त्यक्त्वा फलं चे'ति ॥ ३ ॥ द्रव्ययज्ञादीनां मध्ये स्वोचितो यज्ञो विद्यादानादिषु स्वोचितं दानं स्वोचितं तपश्च सर्वैर्वर्णाश्रमिभिरन्यैश्च कार्यमेवेत्यर्थः । विष्णुनाम स्वाध्यायोऽन्त्यानां सत्योपवासादि तपश्च ॥ ५ ॥ सङ्गफलत्यागमृते स्वरूपत्यागः कार्य इति मिथ्याज्ञानाख्यमोहात् । 'स्वयज्ञादीन्परित्यज्य निरयं यान्त्यसंशयमि'ति पाद्मे ॥ ७ ॥ मोहं विना दृष्टदुःखमित्येव । दुःखशब्देन केवलं मानसम् । कायक्लेशस्य पृथगुक्तेः । 'दुःखं तु मानसं ज्ञेयमायासो बाह्य उच्यते । विशेषस्य विवक्षायामन्यथा सर्वमेव त्वि'ति शब्दनिर्णये ॥ ८ ॥ 'न द्वेष्टचकुशलं कर्म केवलं दृष्टदुःखदम् । जन्मान्तरकृते पुण्ये न सज्जेत्सात्विकश्चले । यः सम्यक्त-

SGDF
Sri Gangeshwari Digital Foundation

त्वविद्विष्णोस्तदर्पणधियैव तु । फलेच्छावर्जितः ॥ १० ॥ तस्य कर्म बन्धाय नो भवेत् । बहुलं चेदल्पदोषं यावदेवापरोक्षदृगि'ति च । अन्येषामिष्टम् । अस्य तु त्यागित्वादेव नेष्टम् । 'ज्ञानादेर्मोक्षभोग्याच्च नान्यत्स्यात्कर्मणः फलम् । त्यागिनस्तत्त्वसंवेत्तुरन्येषां तदृते फलमि'ति च । केवलकाम्यकर्मणां परापेक्षयाप्यकरणमित्येतावांस्त्यागात्संन्यासस्य विशेष इत्यत्यागिनां प्रतियोगित्वेन न्यासिन उक्ताः । त्यागित्वं तेषामपि ह्यस्ति । 'परेच्छयापि ये काम्यं कर्म कुर्युर्न तु क्वचित् । न्यासिनो नाम तेऽन्येभ्यः फलत्यागिभ्य उत्तमा' इति च ॥ १२ ॥ 'कथितं परमं साङ्ख्यं कपिलाख्येन विष्णुना । सेश्वरं वैदिकं साक्षाज्ज्ञेयमन्यदवैदिकमि'ति च । अधिष्ठानं शरीरादि ॥ ॥ १३--१४ ॥ 'स्वातन्त्र्यमीश्वरे वेत्ति नैवात्मनि कदाचन । ईश्वराधीनमेवात्मन्स्वातन्त्र्यं तु जडान्प्रति । तारतम्येन लक्ष्म्यादेर्जीवान्प्रति च सर्वशः । यस्तदर्थं समुत्पन्नो यथा रुद्रो यथा यमः । हत्वाऽपि स इमांल्लोकान्न हन्ति न निबध्यते । अज्ञस्तदर्थं जातोऽपि वध्यते दैत्यवद्ध्रुवम् । अपरोक्षदृङ्ङ जातो यस्तदर्थं मुक्तिगं सुखम् । ह्रसेत्तस्य परोक्षज्ञः किञ्चिद्दोषेण लिप्यत' इति च । अस्वातन्त्र्यज्ञानाद्धन्मीति भावोऽन्यस्य नास्तीति न हन्ति । अन्यस्य भावोऽस्तीति विशेषः । बुद्धिर्यस्य न लिप्यत इति । रागान्न हन्ति किन्तु धर्मबुद्ध्या । 'स्वातन्त्र्यं मन्यमानस्य रागाद्धर्मं च कुर्वतः । तन्निमित्तस्तु दोषः स्याद्गुणस्तु स्यात्स्वकर्मज' इति च । 'सम्प्रेरयतुरीशस्य कर्मस्वखिलचेतना । ज्ञातृज्ञेयज्ञानरूपा प्रेरणा सा स एव यत् । स्वरूपेणैव नित्या सा विशेषात्मतया भवेत् । विशेषोऽपि स्वरूपेण नित्यश्च स्याद्विशेषतः । स्वनिर्वाहकता यस्मान्नानवस्था विशिष्टवत् । विशेष्यस्य विशिष्टस्याप्यभेदेऽप्यविवादिनि । विशेषोऽस्त्येव नात्रास्ति ह्यनवस्था कदाचन । ज्ञातुरन्योऽहमिति तु कस्याप्यनुभवो न हि । अस्मि ज्ञातैवाहमिति

SGDF
Sri Gangeshwari Digital Foundation

भेदस्तस्मात्तयोः कुतः । पश्यामीति विशेषोऽयमिदानीं मे समुत्थितः । इत्याद्यनुभवाद्भेदो न विशेष्यविशिष्टयोः । विशेषणं तु द्विविधं विशेषाख्यं तथेतरत् । विशेषमणयेद्येन प्रोक्तं तेन विशेषणम् । विशेषोऽपि-विशेषस्य स्वस्यैव गमको भवेदि'त्यादि तत्वविवेके ॥ १७ ॥ सङ्ग्रहः पञ्चकारणानां सङ्क्षेपः । अधिष्ठानस्य करणेऽन्तर्भावात् । दैवशब्दोदितेश्वरस्यैव मुख्यकर्तृत्वात्स्वतन्त्रास्वतन्त्रकर्त्रोः कर्तृशब्देनैवोक्तेस्त्रैविध्यम् । कर्म चेष्टा ॥१८॥ एवं गुणसङ्ख्याने परमसाङ्ख्यशास्त्रे ॥१९॥ 'अस्तित्वाद्भूतनामभ्यः सर्वजीवेभ्य एव च । मुक्तेभ्योऽपिपृथक्त्वेन विष्णोः सर्वत्रगस्य च । ऐक्येन च स्वरूपाणां प्रादुर्भावादिकात्मनाम् । तारतम्येन जीवानां भेदेनैव परस्परम् । जडेभ्यश्चैव जीवानां जडानां च परस्परम् । तेभ्यो विष्णोश्च सम्यक्तल्लक्षणज्ञानपूर्वकम् । ज्ञानं सात्विकमुद्दिष्टं यत्साक्षान्मोक्षकारणम् ॥ २० ॥ विष्णोरन्यस्य याथार्थ्यज्ञानं राजसमुच्यते । यदि विष्णुं न जानाति यदि वा मिश्रतत्त्ववित् ॥ अन्यथाकरणीयत्वात्कार्याख्यं जीवमेव यः । अकार्यं ब्रह्म जानाति स एवाखिलमित्यपि । एकजीवपरिज्ञानात्कृत्स्नज्ञोऽस्मीति मन्यते । युक्तिविज्ञानराहित्यात्स्वपक्षस्याप्ययुक्ततः । अयुक्ततामेव गुणं मन्यते चाल्पदर्शनः । अतत्त्वार्थं जगद्ब्रूते तत्त्वार्थज्ञानवर्जनात् । स मुख्यतामसज्ञानीत्येकैकेनापि किं पुनः । सर्वैरेतैर्विशेषैश्च युक्तः पापतमाधिक' इति पाद्मे । पृथक्त्वेन तु यज्ज्ञानमित्यस्य व्याख्या नानाभावानित्यादि । सर्वगतमेकमीश्वरं न जानातीत्येतावतैव राजसत्वम् । एकस्य कृत्स्नवज्ज्ञानमेव तामसम् । मुक्तत्वादिरूपेणान्यथाकरणीयत्वात्पराधीनत्वेनाल्पस्य जीवस्य स्वातन्त्र्यादिगुणपूर्णत्वात्कृत्स्नेन ब्रह्मणैक्यज्ञानं च महातामसम् । किं पुनस्तावन्मात्रं सर्वमिति ज्ञानम् । किं पुनस्तत्राप्येकजीवादन्यत्किमपि नास्तीत्यहैतुकं ज्ञानं सर्वमपि तामसम् । किमु तदेवोक्तलक्षणम् । अतत्त्वार्थवत्सदसद्वैलक्षण्याद्यन्यथार्थकल्पना-

SGDF
Sri Gargeshwari Digital Foundation

युक्तमेव तामसम् । किमु तदेवोक्तविशेषणैर्युक्तम् । प्रायोऽल्पज्ञानमपि तामसम् । अज्ञानबहुलत्वात्किमु तदेवोक्तमिथ्याज्ञानबहुलमित्यपुनरुक्तिः । एकस्मिन्सर्वज्ञानं कार्ये जीवे पूर्णं ब्रह्मेति सक्तं ज्ञानं निर्युक्तिकं च । अतत्त्वार्थकल्पनायुक्तं अल्पज्ञानं च पृथक्पृथक्तामसानीति वा । मायावादे त्वेतानि समस्तानि । अन्यत्रापि त्वहैतुकत्वादिकं विरुद्धवादेषु समं सर्वेषु ॥२१-२२॥ 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसे'त्युक्तत्वात् 'ये मे मतं' 'ये त्वेतदि'ति च तस्य मोक्षसाधनस्याकरणे प्रत्यवायस्य चोक्तेर्भगवदर्पितत्वेन सर्वकर्मकरणं तस्य विष्णोः सर्वपरमत्वज्ञानं च नियतमेवेति ज्ञायते । अध्यात्मचेतसेत्युक्तत्वात्तत्स्वरूपयाथार्थ्यज्ञानादि । 'ये तु सर्वाणि कर्माणी'त्येतस्मिंश्छ्लोकेऽध्यात्मचेतस्त्वस्य मत्पराः अनन्येनैव योगेन ध्यायन्त इति व्याख्यातत्वात् । एवं सर्वमपि भगवद्भक्तियुक्तमेव सात्विकम् ॥ २३ ॥ सर्वस्य भगवदधीनत्वज्ञानादेवानहंवादी ॥ २६ ॥ 'भगवद्भक्तिसामर्थ्यात्प्रकृष्टो न कृतो हि यः । स प्राकृतो दीर्घसूत्री कुर्यां पश्चादिति स्मरन्नि'ति शब्दतत्त्वे । प्राप्तकालस्य कर्मणो दीर्घकालेनैव कृतिं सूचयन्दीर्घसूत्रीत्यर्थः । 'अलसो दीर्घसूत्री च सत्वयुक्तामसो मतः । अयुक्तो राजसः स्तब्धः प्राकृतो नैकृतिकः शठः । एकैकेनैव दोषेण प्रोक्तस्तामसतामसः । दुर्नरत्वं च तिर्यक्त्वं तमश्चैतत्फलं क्रमादि'ति च ॥ २८ ॥ 'किञ्चिद्यथावद्धर्मादीनयथावच्च पश्यति । यया बुद्ध्या राजसी सा मिथ्यादृक्त्वेव तामसी'ति च । 'वैष्णवो भक्तियोगो यस्तद्युक्ता सात्विकी धृतिरि'ति च । विहितविषयैवेत्यव्यभिचारिणी । स्वप्नं भयमित्यादि सर्वनिषिद्धोपलक्षणं । 'तत्तत्सात्विकमेव स्याद्यद्वृद्धाः प्रचक्षते । निन्दन्ति तामसं तत्तद्राजसं तदुपेक्षितमि'ति भागवते । 'महात्मानस्तु मां पार्थ' । 'अभयं सत्वसंशुद्धिरि'त्यादिना वृद्धाश्चोक्ताः ॥ ३०-३५ ॥ 'विष्णोः प्रसादात्स्वमनःप्रसादात्सात्विकं सुखमि'ति

SGDF
Sri Gargeshwari Digital Foundation

पाद्मे ॥ ३७ ॥ सत्वं जीवजातम् । मुक्तानां गुणातीतत्वात्पृथिव्यां दिवि देवेषु चेति शेषः । 'यथेष्टं सञ्चरन्तोऽपि मुक्ता भूम्यादिगा न तु । ग्रामस्था अपि न ग्राम्या वैलक्षण्याद्धि सज्जनाः । नराधमास्तामसेषु सात्विकास्तत्र राजसाः । दैत्यभृत्या महादैत्या मुख्यतामसतामसाः । राजसास्तु नरास्तत्र विप्रा राजससात्विकाः । तत्रस्थ शुद्धसत्वास्तु परहंसाः प्रकीर्तिताः । हंसो बहूदः कुटिजो वनस्थो नैष्ठिको गृही । क्रमाद्रजोऽधिका बाह्यं कर्मैषामधिकं यतः । धर्माः परमहंसानां ब्राह्मा एव शमादिकाः । देवादेः कर्मबाहुल्यं न लिङ्गं रजसः क्वचित् । नहि विष्णोश्चलेत्तेषां मनः कर्मकृतामपि । अन्येषां चलचित्तत्वात्प्रायः स्यात्कर्म राजसम् । यदि तत्स्मारकं विष्णोर्विद्यात्सात्विकमेव तु । धर्मार्थहिंसनाग्निश्च विशेषो ब्रह्मचारिणः । पैतृकं चापि यतितो दारास्तु गृहिणस्ततः । असङ्गो ग्राम्यसंत्यागः पश्वहिंसा गृहस्थतः । वनस्थस्य विशेषोऽयं सर्वेषामितरत्समम्' इति च । सात्विकाः स्वल्परजसः क्षत्रियाः सत्वराजसाः । वैश्याः शूद्रा अतिस्वल्पसत्वाधिक्येन तामसाः । ये तु भागवता वर्णास्तेषां भेदोऽयमीरितः । सत्वाधिकः पुल्कसोऽपि यस्तु भागवतः सदा । त्रैविद्यमात्रा विष्णोर्ये सर्वाधिक्ये ससंशयाः । अन्याधिक्यं न मन्यन्ते श्रीशाद्राजसतामसाः । अज्ञा विष्णौ द्वेषहीनाः सर्वे राजसतामसाः । पितृगन्धर्वपूर्वाश्च मुनयो देवता इति । सात्विकास्त्रिविधास्तत्र श्रेष्ठा एवोत्तरोत्तराः । देवा इन्द्रो विरिञ्चाद्या इति त्रेधैव देवताः । क्रमोत्तराः शिवो वाणी ब्रह्मा चैवोत्तरोत्तराः । सत्वसत्वमहासत्वसूक्ष्मसत्वश्चतुर्मुखः । यस्माद्यावद्धिमुक्तिः स्यान्मुक्तावेवं सुखक्रम' इति च । विष्णौ किञ्चित्प्रीतियुक्तास्तामसमध्ये सात्विका नराधमा इत्यर्थः । राजसानां मध्ये सात्विका एव भागवता विप्रादयः । राजसस्थ सात्विकेष्वेव शुद्धसात्विकाः किञ्चिद्रजोयुक्तसात्विकाः समरजोयुक्तसात्विकाः सत्वात्किञ्चिदूनतमोयुक्तसात्विका

SGDF
Sri Gangeshwari Digital Foundation

इति वर्णभेदः। सत्वप्रधानत्वादेतानारभ्योत्तरोत्तरं सर्वेऽपि मोक्षयोग्याः। सत्वात्सञ्जायते ज्ञानमित्यादेः। 'सत्वाधिको मोक्षयोग्यो योग्योऽन्धतमसस्तथा। तम उत्तरो रजोभूयान्त्समो वा सृतिपात्रक' इति ॥४०॥ 'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं विप्रकर्म स्वभावजम्। एते गुणाः किञ्चिदूना विप्रात्क्षत्रिय एव च। अधिका वा ब्राह्मणेभ्यः केषुचिच्चक्रवर्तिषु। ऋषयस्त्वेव विज्ञेयाः कार्तवीर्यादयो नृपाः। शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षत्रियेऽन्ये गुणा अपि। क्षत्रियोनब्रह्मगुणो वैश्यः कृष्यादिजीवनः। तत ऊनः शमाद्यैर्यः शुश्रूषुः शूद्र उच्यते। अधिकाश्चेद्गुणाः शूद्रे ब्राह्मणादिः स उच्यते। ब्राह्मणोऽप्यल्पगुणकः शूद्र एवेति कीर्तितः। नरोऽपि यो देवगुणो देवो ज्ञेयो नृतां गत' इति च। 'स्वकर्मणा तमभ्यर्च्ये'ति वचनात्क्षत्रियादिष्वपि शमाद्यनुवृत्तिर्ज्ञायते। न हि शमादिकं विना तस्याभितोऽर्चनं भवति। सम्यक्शमादिभिरर्चनं ह्यभ्यर्चनम्। न च शमादीन्विना सिद्धिं विन्दति। 'यज्ञदानतपःकर्म न त्याज्यमि'त्युक्तत्वाच्च। 'शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रह' इति भागवते। न क्षत्रियादिभिरपि शौचतपःशमादिभिर्हीनैर्भवितव्यमिति तत्तद्धर्मेषूच्यते। युक्ता ह्येतैः सर्वगुणैर्जनकतुलाधारादयः। अतो युद्धेऽपलायनमैश्वर्यं च क्षत्रियस्य विशेषगुणौ। तौ च कृष्यादयो जीवनार्थं शुश्रूषा याजनं जीवनार्थं प्रतिग्रहश्चेत्येत एवान्येषां परधर्माः। 'शौर्यं तेजो धृतिर्दाक्ष्यं दानं च क्षत्रियेऽधिकाः। तद्धीना ब्राह्मणे तस्माद्वैश्ये शूद्रे ततोऽल्पकाः। अध्यापनं च शुश्रूषा जीवनार्थमृते सताम्। विप्रादिषु क्रमाज्ज्ञेयाः शूद्रस्याध्यापनं विना। तस्माच्छूद्रोऽल्पशुश्रूषुः स्वभावाज्जीवनं विना। एते नैसर्गिका भावाः स्याद्भावोऽन्योऽपि कुत्रचित्। बलाद्विरुद्धभावस्तु हेयः स्वाभाविकोऽपि यः। अनिसर्गोऽपि हि शुभो

SGDF
Sri Gargeshwari Digital Foundation

वर्धनीयः प्रयत्नतः। याजनैश्वर्यपूर्वास्तु नान्यैः कार्याः शुभा अपि। अपलायनं च शूद्राणां ब्रह्मक्षत्रार्थमिष्यत इति' च। 'प्रसह्य वित्ताहरणं शारीरो दण्ड एव च। अशिष्याणां शासनं च तथैवार्थविनाशनम्। एष ईश्वरभावः स्यान्न कार्यः क्षत्रियेतरैः। सर्वे विधर्मिणः शास्याः क्षत्रियैर्यत्नतः सदा। अङ्गाद्यहानिकृद्दण्डः शिष्येषु ब्राह्मणादिभिः। कार्यो देहेऽपि शिष्यश्च स्वामिना स्वेन वार्पितः। पुत्रानुजादयः सर्वे शिष्या एव निसर्गतः। गुरवश्चैव मित्राणि सखिसब्रह्मचारिणः। सम्बन्धिनश्च सर्वेऽपि तत्तद्योग्यतयाऽखिलैः। शिक्षणीयेषु भावेषु शिक्षणीयाः प्रयत्नतः। उन्मादे बन्धनाद्यैर्वा ताडनं न गुरोः क्वचित्। पापं चरन्तस्त्वन्येऽपि सर्वे दृष्टिपथं गताः। शक्तितो वारणीयाः स्युर्देशकालानुसारतः। तदुत्तमविरोद्धारः संत्याज्या गुरवोऽपि तु। यथाशक्त्यनुशास्यैव कालतोऽपि न चेच्छुभाः। विष्णौ परमभक्तस्तु न त्याज्यः शास्य एव च। शिक्षयंश्च गुरूञ्छिष्यो गुरुवन्नैव शिक्षयेत्। महान्तो नानुशास्याश्च विरुद्धाचरिता अपि। यदि च स्वाधिकानां ते विरोधं नैव कुर्वत' इत्यादि च। 'आपत्सु विप्रः क्षात्रं तु विशां वा धर्ममाचरेत्। क्षात्रासिद्धौ न शूद्रस्तु विप्रक्षत्रिययोः क्वचित्। क्षत्रियो ब्राह्ममापत्सु तदापत्सु विशामपि। क्षत्रियो विप्रधर्मोऽपि नैव भैक्ष्यप्रतिग्रही। वैश्य आपत्सु शौद्रं तु धर्ममेकं न चापरम्। शूद्र आपत्सु विड्धर्मा तदापत्सु च कारुकः। शूद्रस्तु वैश्यधर्माऽपि नैव वेदाक्षरो भवेत्। अत्यापदि क्षत्रियोऽपि पादशुश्रूषणं विना। शौद्रधर्मं चरन्विप्रक्षत्रियेषु न दुष्यति। येषु कर्मसु याच्यः स्यात्स्वामिनापि न याचिता। शौद्राण्यपि स्वधर्मत्वे क्षत्रियस्यापदो यदि। आत्मनश्चेद्बलाधिक्यं सानुबन्धादपि प्रभोः। धर्मार्थं सेवतोऽर्थार्थं विप्रधर्मादिकाद्वरः। प्रभुणा याच्यवृत्तिस्तु विशेषेणापि धर्मभाक्। बाहोर्बलाधिको यः स्यात्क्षत्रियो विद्ययाऽधिकः। विप्रो भागवतौ चैतौ

SGDF
Sri Gargeshwari Digital Foundation

सेशा लोकास्तयोरिम' इत्यादि व्याससमृतौ ॥ ४२-४८ ॥ नैष्कर्म्य-सिद्धिं अनिष्टसर्वकर्मनाशाख्यसिद्धिम् ॥ ४९ ॥ वक्ष्यमाणप्रकारेण वर्तमानस्तदनन्तरं नैष्कर्म्यसिद्धिं प्राप्तो भूत्वा ब्रह्माख्याया महालक्ष्म्याः सकाशं यथाऽऽप्नोति तथा निबोध । 'मम योनिर्महद्ब्रह्म ।' 'ब्रह्मणो हि प्रतिष्ठाऽहमि'त्युक्तत्वात् । 'ब्रह्मभूतः प्रसन्नात्मे'त्युक्त्वा'मद्भक्तिं लभते परामि'ति वक्ष्यमाणत्वाच्च । 'सर्वपापक्षयाद्देहं त्यक्त्वा देवान् क्रमाद्व्रजन् । प्राप्य लक्ष्मीं तत्प्रसादात्पुनः स्ववृद्धा हरौ यदा । भक्ति-स्तया पुनर्ज्ञाने स्ववृद्धे विष्णुं प्रपद्यते । अपरोक्षदृशो विष्णोः शरीरेऽपि सतः पुरा । त्यक्तदेहादिकस्यापि यावद्विष्णुं प्रपद्यते । तावद्गुणा विवर्धन्ते स्थिताः स्युः प्राप्य केशवमि'ति महावाराहे ॥५०॥ विमुच्य निर्ममः शान्तो नैष्कर्म्यसिद्धिं प्राप्तो भूत्वा ब्रह्मणि भूयाय भवतीत्यर्थः ॥ ५३ ॥ विहितानि सर्वकर्माण्यपि मद्यपाश्रयो भूत्वा सदा कुर्वाणः । न हि यथेष्टचरणे तात्पर्यमत्र । तथासति विहितकरणेऽपि समत्वात् 'मामनुस्मर युध्य च । ततः स्वधर्मं कीर्तिं चे'त्यादिप्रस्तुतविरोधः । अपिशब्दस्त्वेकमपि कर्मातदाश्रयेण न कार्यमित्यर्थे ॥ ५६ ॥ भगव-त्संश्रितस्य त्रैविद्यस्य च मनसैव विशेष इत्याह । चेतसा सर्वकर्माणीति । स एव सर्वस्मात्परम इति भावोऽस्येति मत्परः । तत्र चित्तवृत्तिनिरो-धोऽपि । बुद्धियोगः प्रत्याहारादिः ॥ ५७ ॥ प्रकृतिरीश्वरेच्छा । 'प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यत' इति वचनात् । एषा तु प्रकृत्यैव च कर्माणीत्यादिष्वपि युज्यते । तस्या एव हि मुख्यतो नियोक्तृत्वम् । स्वभावकर्मादिभिर्बद्धा । तदेवाह । ईश्वरः सर्वभूताना-मिति ॥५९॥ 'निश्चितार्थः स तु ज्ञेयो यत्रात्मैव परोक्षतः । उच्यते विष्णुना यद्वत्तद्ब्रह्मेत्यादि कथ्यत' इति शब्दनिर्णये । मन्मना इत्युप-संहाराच्च ॥ ६१ ॥ शाश्वतं स्थानं वैकुण्ठादि । 'श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा । अतो हि वैष्णवा लोका नित्यास्ते चेतना

SGDF
Sri Gangeshwari Digital Foundation

अपी'त्याग्नेये। 'न वर्तते यत्र रजस्तमस्तयोः सत्वं चे'त्याद्युक्तम् ॥६२॥ तत्वसारकथनं द्वाविमौ पुरुषावित्यत्रैवोपसंहृतम् । तत्त्वप्रशंसार्थमेव तद्बुद्धिप्रशंसा कृता। अत्र तु साधनसारोपसंहारः सर्वगुह्यतममिति। मन्मना इत्यादेः पूर्वमेवोक्तत्वाद्भूय इति । अर्थतस्त्वत्रापि विष्ण्वाधिक्यमेवोक्तं भवति ॥ ६४ ॥ अन्यसर्वधर्मान्परित्यज्येत्युक्तशेषत्वेन सर्वधर्मानितिवचनम्। मामेकं शरणं व्रजेत्यपि। मन्मना इत्याद्युक्तनिगमनात्मना तद्व्याख्यानम्। 'सर्वोत्तमत्वविज्ञानपूर्वं तत्र मनः सदा। सर्वाधिकप्रेमयुक्तं सर्वस्यात्र समर्पणम्। अखण्डा त्रिविधा पूजा तद्रत्यैव स्वभावतः। रक्षतीत्येव विश्वासस्तदीयोऽहमिति स्मृतिः। शरणागतिरेषा स्याद्विष्णौ मोक्षफलप्रदे'ति महाविष्णुपुराणे। अनादिजन्मकृतसर्वपापेभ्यः । अत्र प्राप्त्यभावात् । धर्मपरित्यागे पापपरित्यागस्य कैमुत्येनैव सिद्धत्वात् ॥ ६६ ॥ अतपस्कायैव न वाच्यम्। अशुश्रूषवे पुनश्चेति दोषाधिक्यमशुश्रूषोर्दर्शयितुं चशब्दः। एवमभक्ताय कदापि न वाच्यम्। कदाचिदल्पतपसोऽल्पशुश्रूषोरपि भक्त्याधिक्ये वाच्यं भवतीति कदाचनेतिशेषः। अभक्ताच्च न वाच्यमसूयोरिति तत्रापि चशब्दः 'समुच्चये तथाधिक्ये न्यूनत्वे चः प्रयुज्यत' इति शब्दनिर्णये। 'अभक्तादपि पापः स्यादसूयुर्दोषदृग्यत' इति च पाद्मे ॥ ६७ ॥ सोऽपि मुक्तः। न च तस्मान्मनुष्येष्वित्युक्तेश्च मुक्तानां महत्तारतम्यं ज्ञायते। मनुष्येष्विति विशेषणात्तत्रापि देवानामाधिक्यं च। 'मुक्तिर्ज्ञात्वाऽपि विष्णुं स्याच्छास्त्रं श्रुत्वा ततोऽधिकम्। मुक्तौ सुखं तत्पठतस्ततोऽप्यधिकमिष्यते। व्याख्यातुस्तु समं मुक्तौ सुखं नान्यस्य कस्यचित्। ततोऽधिकं तु देवानां मुख्यव्याख्याकृतो यत' इति च ॥ ॥ ६७-७१ ॥ यथेच्छसि तथा कुर्वित्याक्षेपपरिहाराय करिष्ये वचनं तवेत्यनुसरति भगवन्तम् ॥ ७३ ॥ ६ ॥ नमस्ते वासुदेवाय प्रेयसां मे प्रियोत्तम। समस्तगुणसम्पूर्ण निर्दोषानन्ददायिने ॥ यस्य त्रीण्यु-

SGDF
Sri Gargeshwari Digital Foundation

दितानि वेदवचने रूपाणि दिव्यान्यलं बद्‌तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ निःशेषदोषरहित कल्याणाशेषसद्गुण । भूतिस्वयम्भुशर्वादिवन्द्यं त्वां नौमि मे प्रियम्॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णयेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ ॥ ॥ ॥

॥ श्रीमद्भगवद्गीतातात्पर्यनिर्णयः समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थ(पूर्णप्रज्ञ)भगवत्पादाचार्यविरचित

श्रीसर्वमूलान्तर्गत

सूत्रप्रस्थानग्रन्थाः

१. ब्रह्मसूत्रभाष्यम् १८३ – ३३२

२. अनुव्याख्यानम् ३३३ – ४८८

३. न्यायविवरणम् ४८९ – ५१८

४. अणुभाष्यम् ५१९ – ५२१

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

ब्रह्मसूत्रभाष्यम्

श्रीवेदव्यासाय नमः ॥ ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यगुरुभ्यो नमः ॥ हरिः ॐ ॥ नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् । ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥ १ ॥ द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान्नारायणो व्यासत्वेनावततार । अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत्, चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च । तदर्थनिर्णयाय ब्रह्मसूत्राणि चकार । तच्चोक्तं स्कान्दे 'नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किञ्चित्तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ॥ गौतमस्य ऋषेः शापाज्ज्ञानेत्वज्ञानतां गते । सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥ शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥ अवतीर्णो महायोगी सत्यवत्यां पराशरात् । उत्सन्नान् भगवान्वेदानुज्जहार हरिः स्वयम् ॥ चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥ अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः । यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥ सविशेषणसूत्राणि ह्यपराणि विदो विदुः । मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ॥ इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः । सूत्रेषु येषु सर्वेऽपि निर्णयास्समुदीरिताः ॥ शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः । एवं विधानि

SGDF
Sri Gargeshwari Digital Foundation

सूत्राणि कृत्वा व्यासो महायशाः ॥ ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तम[1] इत्यादि ।

॥ ॐ ॥ ॐ ॥ अथातो ब्रह्मजिज्ञासा ॥ ॐ ॥ १ ॥

'अथ' शब्दो मङ्गलार्थोऽधिकारानन्तर्यार्थश्च । 'अतः' शब्दो हेत्वर्थः । उक्तं च गारुडे 'अथातःशब्दपूर्वाणि सूत्राणि निखिलान्यपि । प्रारभन्ते नियत्यैव तत्किमत्र नियामकम् ॥ कश्चार्थश्च तयोर्विद्वन् कथमुत्तमता तयोः । एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः ॥ एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः । आनन्तर्येऽधिकारस्य मङ्गलार्थे तथैव च ॥ अथशब्दस्त्वतश्शब्दो हेत्वर्थे समुदीरितः । परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत् ॥ स हि सर्वमनोवृत्तिप्रेरकः समुदाहृतः । सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिःसृतौ ॥ ॐकारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् । तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ॥ अकारस्सर्ववागात्मा परब्रह्माभिधायकः । तथौ प्राणात्मकौ प्रोक्तौ व्याप्तिस्थितिविधायकौ ॥ अतश्च पूर्वमुच्चार्याः सर्वे एते सतां मताः । अथातःशब्दयोरेवं वीर्यमाज्ञाय तत्त्वतः । सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जत' इति ॥

अधिकारश्चोक्तो भागवततन्त्रे 'मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः । तत्र मन्दा मनुष्येषु य उत्तमगणा मताः ॥ मध्यमा ऋषिगन्धर्वा देवास्तत्रोत्तमा मताः । इति जातिकृतो भेदस्तथाऽन्यो गुणपूर्वकः ॥ भक्तिमान् परमे विष्णौ यस्त्वध्ययनवान्नरः । अधमः शमादिसंयुक्तो मध्यमः स (मु) उदाहृतः ॥ आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम् । विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ॥ स उत्तमोऽधिकारी स्यात्संन्यस्ताखिलकर्म-

---

[1] परमेश्वरः पा

SGDF
Sri Gangeshwari Digital Foundation

वानि'ति ॥ 'अध्ययनमात्रवतः'[1] 'नाविशेषादि'[2]ति चोपरि ॥ 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्'[3] ॥ 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'[4] ॥ 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्'[5] ॥ 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन'[6] इत्यादिश्रुतिभ्यश्च ॥ व्योमसंहितायां च ॥ 'अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः । स्त्रीशूद्रब्रह्मबन्धूनां तन्त्रज्ञानेऽधिकारिता ॥ एकदेशे परोक्ते तु न तु ग्रन्थपुरःसरे । त्रैवर्णिकानां वेदोक्ते सम्यग्भक्तिमतां हरौ ॥ आहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके । यथोर्वशी यमी चैव शच्याद्याश्च तथाऽपरा' इति ॥ यतो नारायणप्रसादमृते न मोक्षः, न च ज्ञानं विनाऽत्यर्थप्रसादः, अतो ब्रह्मजिज्ञासा कर्तव्या ॥ 'यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् । वाक्यं वेति सतां नीतिः सावकाशे न तद्भवेदि'ति बृहत्संहितायाम् ॥ 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते'[7]॥ 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'[8]। 'यमेवैष वृणुते तेन लभ्यः'[9]। 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'[10] इत्यादिश्रुतिस्मृतिभ्यः ॥ 'कर्मणा त्वधमः प्रोक्तः प्रसादः, श्रवणादिभिः ॥ मध्यमो, ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः ॥ प्रसादात्त्वधमाद्विष्णोः स्वर्गलोकः प्रकीर्तितः । मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः ॥ श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च । साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते ॥ न चैतानि विना कश्चिज्ज्ञानमाप कुतश्चने'ति नारदीये॥

---

[1] ३-४-१२. ब्र.सू. [2] ३-४-१३. ब्र.सू. [3] ६-४-२३. बृ.उ.
[4] मु.उ. १-२-१२. [5] क.उ. २-२३. [6] श्वे.उ. ६-२३.
[7] ३-१२. तै.आ. [8] ७-१७. भ.गी. [9] २-२३. क.उ.
[10] ६-५-६. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

'ब्रह्म'शब्दश्च विष्णावेव । 'यमन्तः समुद्रे कवयोऽवयन्ति तदक्षरे परमे प्रजाः । यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्या'मित्युक्त्वा 'तदेवर्तं तदुसत्यमाहुस्तदेव ब्रह्म परमं कवीनामि'[1]ति हि श्रुतिः ॥ 'तन्नो विष्णुरि'[+]तिवचनाद्विष्णुरेव हि तत्रोच्यते ॥ न चेतरशब्दात्तत्प्राप्तिः ॥ 'नामानि विश्वाऽभि न सन्ति लोके यदाविरासीदनृतस्य सर्वम् । नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती'ति भाल्लवेयश्रुतिः ॥ 'यो देवानां नामधा एक एव तं सम्प्रश्नं भुवनायन्त्यन्ये'[2]त्येवशब्दान्नान्येषां सर्वनामता । 'अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुरि'[3]ति विष्णोर्हि लिङ्गम्। न च प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यते॥ 'अजस्य नाभाविति यस्य नाभेरभूत श्रुतेः पुष्करं लोकसारम् ॥ तस्मै नमो व्यस्तसमस्तविश्वविभूतये विष्णवे लोककर्त्रे' इति स्कान्दे । 'परो दिवा पर एना पृथिव्ये'[4] ति समाख्याश्रुतौ ॥ 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधामि'त्युक्त्वा 'मम योनिरप्स्वन्तः समुद्र'[5] इत्याह । उग्रो रुद्रः । समुद्रेऽन्तर्नारायणः । प्रसिद्धत्वात्सूचितत्वाच्चास्यार्थस्य । न चाविरोधे प्रसिद्धः परित्यज्यते । उक्तन्यायेन च श्रुतय एतमेव वदन्ति । 'वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयत' इति हरिवंशेषु ॥ न चेतरग्रन्थविरोधः । 'एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज । प्रकाशं कुरु चात्मानमप्रकाशं च मां कुर्वि'ति वाराहवचनात् ॥ शैवे च स्कान्दे ॥ 'श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः । तदैवाच्युत यान्त्येव

[1] म.ना.उ. १-३, ६. [+] ३-१६. म.ना.उ. [2] १०-८२-३. ऋ.सं.
[3] १०-८२-६. ऋ.सं. [4] १०-८२-५. ऋ.सं. [5] १०-१२५-५, ७. ऋ.सं.

SGDF
Sri Gargeshwari Digital Foundation

यदैव त्वं पराङ्मुख' इति ॥ ब्राह्मे च ब्रह्मवैवर्ते 'नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः । बालः क्रीडनकैर्यद्वत् क्रीडतेऽस्माभिरच्युत' इति ॥ न च वैष्णवेषु तथा । 'तच्चैष मोहमि'त्युक्तम् ॥ जिज्ञासाधिकरणम् ॥ १ ॥

ब्रह्मणो लक्षणमाह । **ॐ जन्माद्यस्य यतः ॐ ॥२॥** सृष्टिस्थितिसम्हारनियमनज्ञानाज्ञानबन्धमोक्षा यतः । 'उत्पत्तिस्थितिसम्हारा नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडि'ति स्कान्दे । 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मे'[1] ति । 'य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा'[2] ॥ 'चतुर्भिः साकंनवतिं च नामभिश्चक्रं न वृत्तं व्यतीꣳरवीविपत्'[3] । 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति । न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप'[4] ॥ 'यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वे'[5]त्यादि च ॥२॥ जन्माधिकरणम् ॥२॥

अनुमानतोऽन्ये न कल्पनीयाः ॥ **ॐ शास्त्रयोनित्वात् ॐ ॥३॥** 'नावेदविन्मनुते तं बृहन्तं सर्वानुभूमात्मानं साम्पराये'[6] ॥ 'औपनिषदः पुरुष' इत्यादिश्रुतिभ्यश्च ॥ न चानुमानस्य नियतप्रामाण्यम् ॥ 'श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् । निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च ॥ श्रुतिस्मृतिसहायं यत् प्रमाणान्तरमुत्तमम् । प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा ॥ पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् । इत्याद्यमूहनं तर्कः शुष्कतर्कं तु

[1] ३-१. तै.उ. [2] १-१५४-४. ऋ.सं. [3] १-१५५-६. ऋ.सं
[4] ७-९९-१-२. ऋ.सं [5] १०-८२-३. ऋ.सं. [6] ३ १२-९. तै.ब्रा.

SGDF
Sri Gargeshwari Digital Foundation

वर्जयेदि'त्यादि कौर्मे ॥ शक्यत्वाच्चानुमानानां सर्वत्र । 'सर्वत्र शक्यते कर्तुमागमं हि विनाऽनुमा । तस्मान्न सा शक्तिमती विनागम मुदीक्षितुमि'ति वाराहे ॥ 'रेतो धातुर्वटकणिका घृतधूमाधिवासनम् । जातिस्मृतिरयस्कान्तः सूर्यकान्तोऽम्बुभक्षणम् ॥ प्रेत्यभूताप्ययश्चैव देवताभ्युपयाचनम् । मृते कर्मनिवृत्तिश्च प्रमाणमिति निश्चय'इति मोक्षधर्मवचनान्न नास्तिक्यवादो युज्यते । दर्शनाच्च तपआदिफलस्य । 'ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् । मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥ यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् । अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तदि'ति स्कान्दे ॥ 'साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव चे'त्यारभ्य वेदपञ्चरात्रयोरैक्याभिप्रायेण पञ्चरात्रस्यैव प्रामाण्यमुक्तम्, इतरेषां भिन्नमतत्वं प्रदर्श्य मोक्षधर्मेष्वपि॥ शास्त्रं योनिः प्रमाणमस्येति शास्त्रयोनि ॥ शास्त्रयोनित्वाधिकरणम् ॥३॥

अज्ञानां प्रतीयमानमपि नेतरेषां शास्त्रयोनित्वम्, कुतः ? ।

ॐ तत्तु समन्वयात् ॐ ॥ ४ ॥ अन्वय उपपत्त्यादिलिङ्गम् । उक्तं च बृहत्संहितायाम् । 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय' इति ॥ उपक्रमादितात्पर्यलिङ्गैः सम्यङ्निरूप्यमाणे तदेव शास्त्रगम्यम् । 'मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम् । इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चने'ति हि भागवते ॥४॥ समन्वयाधिकरणम् ॥ ४ ॥

ननु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[1] ॥ 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्'[2] ॥ 'अवचनेनैव प्रोवाच'[3] ॥ 'यद्वाचाऽनभ्युदितम् । येनवागभ्युद्यते ॥ यच्छ्रोत्रेण न शृणोति । येन श्रोत्रमिदꣳ श्रुतमि'[4]त्यादिभिर्न तच्छब्दगोचरम् ।

[1] २-४-१. तै.उ. [2] ३-१५. क.उ. [3] बाष्कलश्रुतिः [4] १ के.उ.

SGDF
Sri Gargeshwari Digital Foundation

नेत्याह ॥ ॐ **ईक्षतेर्नाशब्दम्** ॐ ॥५॥ 'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते'[1] ॥ 'आत्मन्येवात्मानं पश्येत् ॥ विज्ञाय प्रज्ञां कुर्वीते'[2]त्यादिवचनैरीक्षणीयत्वाद्वाच्यमेव। औपनिषदत्वान्नावचनेनेक्षणम् ॥ 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति'[3] ॥ 'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहमि'[4]त्यादिश्रुतिस्मृतिभ्यश्च ॥ अवाच्यत्वादिकं त्वप्रसिद्धत्वात्। 'न तदीदृगिति ज्ञेयं न वाच्यं न च तर्क्यते। पश्यन्तोऽपि न पश्यन्ति मेरो रूपं विपश्चित'इतिवत् ॥ 'अप्रसिद्धेरवाच्यं तद्वाच्यं सर्वागमोक्तितः ॥ अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतमि'ति गारुडे। न चाशब्दत्वमितरसिद्धम् ॥ ५ ॥ ॐ **गौणश्चेन्नात्मशब्दात्** ॐ ॥६॥ न च गौण आत्मा दृश्यो वाच्यश्च न निर्गुण इति युक्तम्, आत्मशब्दात् ॥ 'यो गुणैः सर्वतो हीनो यश्च दोषविवर्जितः। हेयोपादेयरहितः स आत्मेत्यभिधीयते ॥ एतदन्यस्वभावो यः सोऽनात्मेति सतां मतम् ॥ अनात्मन्यात्मशब्दस्तु सोपचारः प्रयुज्यत' इति वामने ॥ 'द्वे वा व ब्रह्मणो रूपे आत्मा चैऽवानात्मा च। तत्र यः स आत्मा स नित्यः शुद्धः केवलो निर्गुणश्च ॥ अथ ह योऽनीदृशः सोऽनात्मे'ति तलवकारब्राह्मणम् ॥ न च मुख्ये सत्यमुख्यं युज्यते ॥ ॥६॥ ॐ **तन्निष्ठस्य मोक्षोपदेशात्** ॐ ॥७॥ न हि गौणात्मनिष्ठस्य मोक्षः 'यस्यानुवित्तः प्रतिबुद्ध आत्मा अस्मिन् सन्दोहे गहने प्रविष्टः ॥ स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एवे'[5]त्यात्मनिष्ठस्य मोक्ष उपदिश्यते। 'अयमात्मा ब्रह्म'[6] ॥ 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'। 'दत्तं दूर्वाससं सोममात्मेशब्रह्मसम्भवान्'॥

---

[1] ५-५. प्र.उ. [2] ६-४-२३, ६-४-२१. बृ.उ. [3] २-१५. क.उ.
[4] १५-१५. भ.गी. [5] ६-४-१३. बृ.उ. [6] १-२. मा.उ. ४-५-१९. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

'चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो ॥ जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः ॥ इतरेष्वात्मशब्दस्तु सोपचारः प्रयुज्यते । तस्यात्मनो निर्गुणस्य ज्ञानान्मोक्ष उदाहृतः ॥ सगुणास्त्वपरे प्रोक्ताः तज्ज्ञानान्नैव मुच्यते ॥ परो हि पुरुषो विष्णुस्तस्मान्मोक्षस्ततः स्मृत'इति पाद्मे ॥७॥ **ॐ हेयत्वावचनाच्च ॐ** ॥८॥ 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुरि'[1] त्यन्येषां हेयत्ववचनादस्याहेयत्ववचनान्न गौण आत्मा ॥८॥ **ॐ स्वाप्ययात् ॐ** ॥९॥ 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते'[2] ॥ 'स आत्मन आत्मानमुद्धृत्याऽऽत्मन्येव विलापयत्यथात्मैव भवति' ॥ 'स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः । एकीभूय पुनः शेते निर्दोषो हरिरादिकृदि'ति स्वस्यैव स्वस्मिन्नप्ययवचनात् ॥ न हि गौणात्मनि निर्दोषस्य लयः ॥९॥ **ॐ गतिसामान्यात् ॐ** ॥१०॥ न च कासुचिच्छाखास्वन्यथोच्यते। 'सर्वे वेदा युक्तयः सुप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव । प्रकाशयन्ते न विरोधः कुतश्चिद्वेदेषु सर्वेषु तथेतिहास'इति पैङ्गिश्रुतेर्गतेर्ज्ञानस्य साम्यमेव ॥१०॥ **ॐ श्रुतत्वाच्च ॐ** ॥११॥ 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'[3]ति । न ह्यशब्दः श्रूयते । न चाप्रसिद्धं कल्प्यम् । सर्वशब्दावाच्यस्य लक्षणाऽयुक्तेः ॥ ॥११॥ ईक्षत्यधिकरणम् ॥ ५ ॥

तमेव समन्वयं प्रकटयत्यानन्दमयोऽभ्यासादित्यादिना समस्तेनाध्यायेन प्रायेण । प्रायेणान्यत्रप्रसिद्धानां शब्दानां परमात्मनि

---

[1] २-२-५. मुं.उ. [2] ७-१-१. बृ.उ. [3] ६-११. श्वे.उ.

SGDF
Sri Gurgeshwari Digital Foundation

समन्वयः प्रदर्श्यतेऽस्मिन् पादे। नान्यथा तदद्दृष्टेः। ब्रह्मजिज्ञासा कर्तव्येत्युक्तम्। तच्च 'ब्रह्म पुच्छं प्रतिष्ठे'[1]त्यानन्दमयावयवरूपं प्रतीयते। न ह्यवयविनं विना अवयवमात्रस्य ज्ञेयतेत्यत आह। **ॐ आनन्दमयोऽभ्यासात् ॐ** ॥१२॥ आनन्दमयो ब्रह्मादिः प्रकृतिर्विष्णुर्वा। ब्रह्मशब्दाद्धिरण्यगर्भस्य प्राप्तिः शतानन्दनाम्ना च। अष्टमूर्तित्वात्सूर्ये प्रोक्तत्वाच्च रुद्रस्य। एवमन्येषामपि। 'मम योनिर्महद्ब्रह्मे'[2]ति ब्रह्मशब्दाद्बहुभावाच्च प्रकृतेः। 'बृह जातिजीव-कमलासनशब्दराशिष्वि'ति ब्रह्मशब्दादेव सर्वजीवानाम्। अन्नमया-देश्च। तथापि न त अनन्दमयशब्देनोच्यन्ते, किन्तु विष्णुरेव। 'तदेव ब्रह्म परमं कवीनाम्'[3]। 'एतमेव ब्रह्मेत्याचक्षते'[4]। 'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते। असम्पूर्णाः परे यस्मादुपचारेण वा भवेत्'॥ 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'॥ 'वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिरि'त्यादिषु तस्मिन्नेव प्रसिद्धब्रह्मशब्दाभ्यासात् ॥१२॥ **ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ** ॥१३॥ विकारात्मकत्वात्तदभिमानित्वाच्च युज्यते प्रकृत्यादीनां मयट्छब्दो न तु परमात्मन इति मा भूत्। प्रचुरानन्दत्वाद्ध्यानन्दमयः। न तु तद्विकारत्वात्। अन्नादीनां च प्राचुर्यमेव॥ 'अद्यतेऽत्तिचे'[5]ति व्याख्यानात्तत्प्राचुर्यं च युज्यते॥ उपजीव्यत्वमेवाद्यत्वम्॥ 'स वा एष'[6] इत्यन्यप्रारम्भात्॥ 'येऽन्नं ब्रह्मोपासत'[7] इत्यादिब्रह्मशब्दा-द्बहुरूपत्वाच्च न विकारित्वमविरोधश्च। न च पृथक्कल्पना युक्ता। स्वरूपे च युज्यते प्रचुरप्रकाशो रविरितिवत्॥ १३॥ **ॐ तद्धेतु-व्यपदेशाच्च ॐ** ॥१४॥ 'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश

---

[1] २-५-२. तै.उ. [2] १४-३. भ.गी. [3] १-६. म.ना.उ [4] ३-२, ३-१२. ऐ.आ. [5] २-२. तै.उ. [6] २-२. तै.उ. [7] २-२. तै.उ.

SGDF
Sri Gargeshwari Digital Foundation

आनन्दो न स्यादि'[1]ति ॥१४॥ **ॐ मान्त्रवर्णिकमेव च गीयते ॐ** ॥१५॥ 'ब्रह्मविदाप्नोति परमि'ति सूचयित्वा 'सत्यं ज्ञानमनन्तं ब्रह्मे'[2]ति मन्त्रवर्णलक्षितं परमेव[3] ब्रह्म शब्दानुसन्धानाद्गीयते । न चावयत्वविरोधः ॥ 'स शिरः स दक्षिणः पक्षः स उत्तरः पक्षः स आत्मा स पुच्छमि'ति तस्यैवावयवत्वोक्तेश्चतुर्वेदशिखायाम् ॥ 'शिरो नारायणः पक्षो दक्षिणः सव्य एव च । प्रद्युम्नश्चानिरुद्धश्च सन्दोहो वासुदेवकः ॥ नारायणोऽथ सन्दोहो वासुदेवः शिरोऽपि वा । पुच्छं सङ्कर्षणः प्रोक्त एक एव तु पञ्चधा ॥ अङ्गाङ्गित्वेन भगवान् क्रीडते पुरुषोत्तमः ॥ ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिञ्जनार्दने । अतर्क्ये हि कुतस्तर्कस्त्वप्रमेये कुतः प्रमे'ति बृहत्संहितायाम् । रसशब्देन विशेषणात्तत्तत्सारभूतं चिन्मात्रमेवोच्यते ॥ इदमिति च दृश्यमान-सन्निहितत्वात् । 'अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान् । प्रोच्यते भगवान् विष्णुरैश्वर्यात्पुरुषोत्तम' इति ब्रह्माण्डपुराणे[4] । न चोक्तप्राप्त्या विरिञ्चादिरुच्यते ॥ १५ ॥ **ॐ नेतरोऽनुपपत्तेः ॐ** ॥१६॥ न ह्यन्यज्ञानान्मोक्ष उपपद्यते । 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत'[5]इति ह्युक्तम् ॥ १६ ॥ **ॐ भेदव्यप-देशाच्च ॐ** ॥१७॥ 'ते ये शतं प्रजापतेरानन्दाः'[6] ॥ 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । 'अथ सोऽभयं गतो भवति'[7] । 'स यश्चायं पुरुष'[8]इत्यादिभेदव्यप-देशात् । न च तत्त्वमसि[9] अहं ब्रह्मास्मि[10] इत्यादिश्रुतिविरोधः ॥ 'नामानि सर्वाणि यमाविशन्ती'[11]ति तत्तच्छब्दवाच्यत्वोक्तेः ॥ 'इदं

---

[1] २-७. तै.उ. [2] २-१. तै.उ. [3] लक्षितमेव. पा. [4] ब्रह्माण्डे. पा.
[5] ३-१२-७. तै.आ. [6] २-८. तै.उ. [7] २-७. तै.उ. [8] २-८. तै.उ.
[9] ६-८. छां.उ. [10] ३-४-१०. बृ.उ. [11] भाल्लवेयश्रुतिः ।

SGDF
Sri Gargeshwari Digital Foundation

हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवः'[1] ॥ 'असर्वः सर्व इत्यपि'[2] ॥ 'विद्याऽऽत्मनि भिदाबोधः'[3] ॥ 'भेददृष्ट्याऽभिमानेन निस्सङ्गेनापि कर्मणा'[3] । 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः'[4] । 'असर्वः सर्व इवात्मैव सन्ननात्मेव प्रत्यङ्पराङिवैक ईयते बहुधेयते' । 'स पुरुषः' 'स ईश्वरः स ब्रह्म' । 'सर्वान्तर्यामिको विष्णुः सर्वनाम्नाऽभिधीयते । एषोऽहं त्वमसौ चेति न तु सर्वस्वरूपतः' ॥ 'नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वहे'[5]-त्यादेश्च । उक्ता च प्राप्तिः । 'ब्रह्मैव सन्नि'[6]त्यपि जीव एव ब्रह्म शब्दः । उपपद्यते च विरोधे । प्रमादात्मकत्वाद्बन्धस्य विमुक्तत्वं च युज्यते । 'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरि'ति हि भागवते ॥ १७ ॥

न च तत्तदनुमानविरोधः ॥ **ॐ कामाच्च नानुमानापेक्षा ॐ ॥ १८ ॥** यथाकामं ह्यनुमातुं शक्यते। अतो न तत्वे पृथगनुमानमपेक्ष्यते । उक्तं च स्कान्दे—'यथाकामाऽनुमा यस्मात्तस्मात्साऽनपगा श्रुतेः । पूर्वापराविरोधाय चेष्यते नान्यथा क्वचिदि'ति ॥ 'नैषा तर्केण मतिराऽपनेये'ति[7] च ॥ **ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ ॥ १९ ॥** अस्य जीवस्य । युक्तिसमुच्चये चशब्दः । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता'[8] । 'अनिलयनेऽभयं प्रतिष्ठां विन्दते'[9] । 'एतमानन्दमयमात्मानमुपसङ्क्रामती'[10]-त्यादि ॥ १९ ॥ आनन्दमयाधिकरणम् ॥ ६ ॥

अदृश्येऽनात्म्य इत्युक्तम् । तच्चादृश्यत्वं 'अन्तः प्रविष्टं कर्तारमेतमन्तश्चन्द्रमसि मनसा चरन्तम्। सहैव सन्तं न विजानन्ति देवा'[11]

---

[1] भागवते [2] तुरश्रुतिः [3] भागवते [4] ३-१-२. मु.उ. [5] मोक्षधर्मे
[6] ६-४. बृ.उ. [7] २-९. कठ.उ [8] २-१. तै.उ. [9] २-७. तै.उ.
[10] २-८. तै.उ. [11] ३-११. तै.आ.

SGDF
Sri Gargeshwari Digital Foundation

इत्यन्तस्थस्य कस्यचिदुच्यते । स च 'इन्द्रो राजा'[1] 'सप्त युञ्जन्ती'[2]-त्यादिभिरन्यः प्रतीयते । तस्मात्स एवानन्दमय इति न मन्तव्यम् । ॥ **ॐ अन्तस्तद्धर्मोपदेशात् ॐ** ॥ २० ॥ अन्तः श्रूयमाणो विष्णुरेव । 'अन्तस्समुद्रे मनसा चरन्तम् । ब्रह्मान्वविन्दद्दशहोतारमर्णे'[3] । 'समुद्रेऽन्तः कवयो विचक्षते मरीचीनां पदमिच्छन्ति वेधसः'[4] । 'यस्याण्डकोशꣳशुष्ममाहु'[5]रित्यादि तद्धर्मोपदेशात् । स हि क्षीरसमुद्रशायी । तस्य च वीर्यमण्डकोशः । 'सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । यस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत' इति व्यासस्मृतौ[6] । 'अहं तत्तेजोरस्मीन्नारायणं पुरुषं जातमग्रतः । पुरुषात्प्रकृतिर्जगदण्डमि'ति[7] चतुर्वेदशिखायाम् ॥ २० ॥ **ॐ भेदव्यपदेशाच्चान्यः ॐ** ॥ २१ ॥ 'इन्द्रस्यात्मा निहितः पञ्च होता' 'वायोरात्मानं कवयो निचिक्युः' 'अन्तरादित्ये मनसा चरन्तम्, देवानाꣳहृदयं ब्रह्मान्वविन्दादि'[8]त्यादि भेदव्यपदेशात् ॥ ॥ २१ ॥ अन्तःस्थत्वाधिकरणम् ॥ ७ ॥

'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादि'[9]-त्याकाशस्यानन्दमयत्वे हेतुरुक्तः, न तु विष्णोरिति न मन्तव्यम् । यतः— ॥ **ॐ आकाशस्तल्लिङ्गात् ॐ** ॥ २२ ॥ 'अस्य लोकस्य का गतिरित्याकाश इति होवाचे'[10]त्यत्र भूताकाशस्य प्राप्तिः । न चासौ युज्यते, किन्तु विष्णुरेव । 'स एष परोवरीयानुद्गीथः स

---

[1] ३-११-६. तै.आ. [2] ३-११-८. तै.आ. [3] ३-११-१. तै.आ. [4] ३-११-११. तै.आ. [5] ३-११-४. तै.आ. [6] स्मृतेः पा. [7] च इत्यधिकः पाठः [8] ३-११. तै.आ. [9] २-७. तै.उ. [10] १-९. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

एषोऽनन्त'[11] इत्यादि तल्लिङ्गात् । 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । परो मात्रया तन्वा वृधाने'[1] त्यादिना तस्यैव[2] हि तल्लिङ्गम् । 'अनन्तो भगवान्ब्रह्म आनन्देत्यादिभिः पदैः । प्रोच्यते विष्णुरेवैकः परेषामुपचारत' इति[3] ब्राह्मे । 'नामानि सर्वाणि यमाविशन्ती'[4]ति चोक्तम् ॥ २२ ॥ आकाशाधिकरणम् ॥ ८ ॥

॥ ॐ अत एव प्राणः ॐ ॥ २३ ॥ 'तद्वै त्वं प्राणो अभवः महान्भोगः प्रजापतेः । भुजः करिष्यमाणः यद्देवान्प्राणयो नवे'[5]ति महाभोगशब्देन परमानन्दत्वं प्राणस्योक्तम् । स च प्राणः प्रसिद्धेर्वायुरित्यापतति । न चैवम् । यतो विष्णुरेव प्राणः । अत एव 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ, अहोरात्रे पार्श्वे'[6] इत्यादि तल्लिङ्गादेव ॥ २३ ॥ प्राणाधिकरणम् ॥ ९ ॥

'यो वेद निहितं गुहायामि'त्युक्तम् । तच्च गुहानिहितं, 'वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत् । वि मे मनश्चरति दूरआधीः किंस्विद्वक्ष्यामि किमु नू मनिष्य'[7] इति ज्योतिरुक्तम् । तच्च ज्योतिरग्निसूक्तत्वात्प्रसिद्धेश्चाग्निरेवेति प्राप्तम् । अत आह—॥ ॐ ज्योतिश्चरणाभिधानात् ॐ ॥२४॥ विष्णुरेव ज्योतिः । कर्णादीनां विचरणाभिधानात् । स हि 'परो मात्रया तन्वा वृधाने'त्यादिना कर्णादिविदूरः ॥२४॥ ज्योतिरधिकरणम् ॥१०॥

॥ ॐ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ॐ ॥ २५ ॥ 'अथ यदतः परो दिवो ज्योतिर्दीप्यत' इत्युक्तस्य ज्योतिषो 'गायत्री वा इदꣳ सर्वमि'ति गायत्र्या समारम्भः कृतः । तस्मान्न विष्णुरिति चेन्न ।

---

[11] १-९ छां.उ. [1] ७-९८-१. ऋ.सं [2] तस्य पा. [3] च इत्यधिकः पाठः
[4] भाल्लवेयश्रुतिः [5] ३-१४. तै.आ. [6] ३-१३. तै.आ. [7] ६-९-६. ऋ.सं

SGDF
Sri Gangeshwari Digital Foundation

तथा चेतोऽर्पणार्थं हि निगद्यते । अग्निगायत्र्यादिशब्दार्थरूपोऽसाविति चेतोऽर्पणार्थं हि निगद्यते । तथाहि दर्शनं 'गायति त्रायति चे'[1]त्यादि । 'सर्वच्छन्दोऽभिधो ह्येष सर्वदेवाभिधो ह्यसौ[2] । सर्वलोकाभिदो ह्येष[3] तेषां तदुपचारत' इति वामने ॥ २५ ॥ **ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॐ ॥२६॥** 'तावानस्य महिमा ततो ज्यायांश्च पुरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी[4]ति । 'सुवर्णं कोशँ रजसा परीवृतं देवानां वसुधानीं विराजम् । अमृतस्य पूर्णां तामु कलां विचक्षते पादँ षड्ढोतुर्न किला विवित्स'[5] इति श्रुतेः । पाद इत्येकदेशपरिमितं चतुर्भागबल इतिवद्भिन्नं च । स हि पुरुषसूक्ताभिधेयः । 'यज्ञेन यज्ञमयजन्ते[6]ति यज्ञशब्दात् । 'यज्ञो वै विष्णुर्देवते[7]ति हि श्रुतिः । 'तस्मिन्काले महाराज राम एवाभिधीयते । यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयत' इति (च) स्कान्दे । **॥ॐ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॐ॥ ॥ २७ ॥** 'त्रिपादस्यामृतं दिवी'[8]ति पूर्वोपदेशः । 'परो दिव'[9] इति पञ्चम्यन्तः पश्चिमः । तस्मान्नैकं वस्त्वत्रोच्यत इति चेन्न, त्रिसप्तलोकापेक्षयोभयस्मिन्नप्यविरोधात् ॥२७॥ गायत्र्यधिकरणम् ॥११॥[10]

प्राणो विष्णुरित्युक्तम् । तत्र 'ता (वा) एताः शीर्षञ्छ्रियश्रिताश्चक्षुश्श्रोत्रं मनो वाक्प्राण'[11]इत्यत्र प्राणस्य विष्णुत्वं न युज्यते[12] । इन्द्रियैः सहाभिधानादित्यत आह ॥ **ॐ प्राणस्तथाऽनुगमात् ॐ ॥ २८ ॥** 'तं देवाः प्राणयन्त'[13] 'स एषोऽसुः स एष प्राणः'[14] 'प्राणऋच इत्येव विद्यात्'[15] 'तदयं प्राणोऽधितिष्ठती'[16]त्याद्यनुगमा-

---

[1] ३-१२-१. छां.उ. [2] अप्यसौ. पा. [3] अप्येष. पा. [4] ३-१२-६. छा.उ. [5] ३-११. तै.आ. [6] ३-१२. तै.आ. [7] श्रुत्यन्तरम् [8] ३-१२-६. छां.उ. [9] ३-१३-७. छां.उ. [10] ज्योतिर्गायत्र्यधिकरणमित्येकमेवाधिकरणं कृतं क्वचित्. [11] २-१-४. ऐ.आ. [12] विद्यते. पा. [13] २-१-५. ऐ.आ. [14] २-१-८. ऐ.आ. [15] २-२-२. ऐ.आ. [16] २-३-८. ऐ.आ.

SGDF
Sri Gargeshwari Digital Foundation

दत्रापि प्राणो विष्णुरेव । 'विष्णुमेवानयन्देवा विष्णुं भूतिमुपासते । स एव सर्ववेदोक्तस्तद्रथो देह उच्यत' इति स्कान्दे । ब्रह्मशब्दानुगमाच्च॥ २८ ॥ **ॐ न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॐ** ॥ २९ ॥ 'प्राणो वा अहमस्म्यृष'[1] इति वक्तुरात्मोपदेशादिन्द्र एवेति चेन्न, 'प्राणस्त्वं प्राणः सर्वाणि भूतानी'[2]ति बह्वध्यात्मसम्बन्धो ह्यत्र विद्यते ॥ २९ ॥

॥ **ॐ शास्त्रदृष्टया तूपदेशो वामदेववत् ॐ** ॥ ३० ॥

शास्त्रमन्तर्यामी । 'संविच्छास्त्रं परं पदमि'ति हि भागवते । 'तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः । न क्वापि किञ्चिन्नामास्ति तमृते पुरुषोत्तममि'ति (च) पाद्मे । 'अहं मनुरभवं सूर्यश्चे'[3]त्यादिवत् ॥ ३० ॥ ॥ **ॐ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॐ** ॥ ३१ ॥ 'तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ती'[4]ति जीवलिङ्गम् । प्राणसंवादादि मुख्यप्राणलिङ्गम् । तस्मान्नेति चेन्न । अन्तर्बहिः सर्वगतत्वेनेत्युपासात्रैविध्यादिहाऽश्रितत्वाच्च । 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत'[5] । 'स एतमेव पुरुषं ब्रह्म ततममपश्यत्'[6] । 'एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेय'[7] इत्यादिना ॥ 'महिदासाभिधो जज्ञ इतरायास्तपोबलात् । साक्षात्स भगवान्विष्णुर्यस्तन्त्रं वैष्णवं व्यधादि'ति (च) ब्रह्माण्डे । तत्तदुपासनायोग्यतया च पुरुषाणाम् । 'केषाञ्चित्सर्वगत्वेन केषाञ्चिद्धृदये हरिः । केषाञ्चिद्बहिरेवासावुपास्यः पुरुषोत्तम' इति ब्राह्मे ॥ 'अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः । प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनामि'ति

---

[1] २-२-३. ऐ.आ. [2] २-२-३. ऐ.आ. [3] ४-२६-१. ऋ.सं. [4] २-२-४. ऐ.आ. [5] २-४-३. ऐ.आ. [6] २-४-३. ऐ.आ. [7] २-१-८. ऐ.आ.

SGDF
Sri Gargeshwari Digital Foundation

च ॥ ३१ ॥ पादान्त्यप्राणाधिकरणम् ॥ १२ ॥ इति श्रीमत्कृष्णद्वैपायनकृत ब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते प्रथमाध्यायस्य प्रथमः पादः[1] ॥

ॐ ॥ लिङ्गात्मकानां शब्दानां विष्णौ प्रवृत्तिं दर्शयत्यस्मिन्पादे प्राधान्येन । 'ब्रह्म ततममि'ति सर्वगतत्वमुक्तं विष्णोः । तच्च 'तस्यैतस्यासावादित्यो रस'[2]इत्यादिनाऽऽदित्यस्य प्रतीयत इत्यतोऽब्रवीत्। ॥ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥ १ ॥ 'स यश्चायमशरीरः प्रज्ञात्मे'[3]त्यादिना सर्वत्रोच्यमानो नारायण एव । 'तदेव ब्रह्म परमं कवीनाम्'[4] । 'परमं यो महद्ब्रह्म' । 'वासुदेवात्परः को नु ब्रह्मशब्दोदितो भवेत् । स हि सर्वगुणैः पूर्णस्तदन्ये तूपचारत' इति तस्मिन्नेव प्रसिद्धब्रह्मशब्दोपदेशात् ॥ १ ॥ ॐ विवक्षितगुणोपपत्तेश्च ॐ ॥ २ ॥ 'स योऽतोऽश्रुत'[5] इत्यादि[6] । स हि 'न ते विष्णो जायमान'[7] इत्यादिनाऽश्रुतत्वादिगुणः । 'स सविता स वायुः स इन्द्रः, सोऽश्रुतः सोऽदृष्टो यो हरिर्यः परमो यो विष्णुर्योऽनन्त' इत्यादि चतुर्वेदशिखायाम् ॥ २ ॥

न चाऽदित्यशब्दाच्चक्षुर्मयत्वादेश्च जीव इति वाच्यम् ॥ ॐ अनुपपत्तेस्तु न शारीरः ॐ ॥ ३ ॥ एकस्य सर्वशरीरस्थत्वानुपपत्तेरेव ॥ ३ ॥ ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥४॥ 'आत्मानं परस्मै शंसती'[8]त्यादि ॥ ४ ॥ ॐ शब्दविशेषात् ॐ ॥ ५ ॥ 'एतमेव ब्रह्मेत्याचक्षत'[9] इति । न हि जीवमेव ब्रह्मेत्याचक्षते । 'एष उ एव ब्रह्मैष उ एवात्मैष उ एव सवितैष उ

---

[1] क्वचित् श्रीमत्कृष्णद्वैपायनकृतेति नास्ति, आचार्य इति च नास्ति। [2] ३-२-३. ऐ.आ. [3] ३-२-४. ऐ.आ. [4] १-६. म.ना.उ. [5] ३-२-४. ऐ.आ. [6] एतद्वाक्यं सूत्रात्पूर्वमेव पठितं क्वचित् । [7] ७-९९-२. ऋ.सं. [8] ३-२-३. ऐ.आ. [9] ३-२-३. ऐ.आ.

SGDF
Sri Gargeshwari Digital Foundation

एवेन्द्र एष उ एव हरिर्हरति परानन्द' इति चेन्द्रद्युम्नशाखायाम् ॥५॥
॥ ॐ स्मृतेश्च ॐ ॥ ६ ॥ 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः'[1]। 'गामाविश्य च भूतानि धारयाम्यहमोजसे'[2]त्यादि। न चाप्रामाणिकं[3] कल्प्यम् ॥ ६ ॥ **ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॐ॥७॥** सर्वेषु भूतेष्वित्यल्पौकस्त्वाच्चक्षुर्मयत्वादिना जीवव्यपदेशाच्च नेति चेन्न। अर्भकौकस्त्वेन चक्षुर्मयत्वादिरूपेण च तस्यैव विष्णोर्निचाय्यत्वात्। सर्वगतत्वेऽप्यल्पौकस्त्वं युज्यते च व्योमवत्। 'सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु च स्थितः। सर्वनामाभिधेयश्च सर्ववेदोदितश्च स' इति स्कान्दे ॥ ७ ॥ **ॐ सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॐ ॥ ८ ॥** जीवपरयोरेकशरीरस्थत्वे समानभोगप्राप्तिरिति चेन्न। सामर्थ्यवैशेष्यात्। उक्तं हि गारुडे—'सर्वज्ञाल्पज्ञताभेदात्सर्वशक्त्यल्पशक्तितः। स्वातन्त्र्यपारतन्त्र्याभ्यां सम्भोगो नेशजीवयोरि'ति[4] ॥८॥
सर्वगतत्वाधिकरणम् ॥ १ ॥

'जन्माद्यस्य यत'[5] इत्युक्तम्। तत्रात्तृत्वं 'स यद्यदेवासृजत तत्तदत्तुमध्रियत। सर्वं वा अत्तीति तददितेरदितित्वमि'[6]त्यदितेः प्रतीयते। 'स यद्यदेवासृजते'ति[7] पुल्लिङ्गं च 'कूटस्थोऽक्षर उच्यत'[8] इति[9]वत्। अत्रोच्यते **॥ ॐ अत्ता चराचरग्रहणात् ॐ ॥९॥** न हि चराचरस्य सर्वस्यात्तृत्वमदितेः। 'स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु। वासुदेवः परः[10] पुंसामितरेऽल्पस्य वा नवे'ति स्कान्दे ॥ 'एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति

---

[1] १०-२०. भ.गी. [2] १५-१३. भ.गी. [3] अप्रमाणकं पा. [4] इति च पा.
[5] १-१-२. ब्र.सू. [6] ३-२-५. बृ.उ. [7] क्वचित् एतदन्तं नास्ति [8] १५-१६. भ.गी. [9] इत्यादि पा. [10] देवो वरः पा.

SGDF
Sri Gargeshwari Digital Foundation

भुवनं साम्पराये स नो हरिर्घृतमिहाऽयुषेऽत्तु देव' इति (च) श्रुतिः ॥९॥
॥ ॐ प्रकरणाच्च ॐ ॥१०॥ अप्संवत्सरसृष्टयादिना तत्प्रकरणाच्च। 'नेहाऽसीत्किञ्चनाप्यादौ मृत्युरासीद्धरिस्तदा। सो त्मनो मनसाऽस्राक्षीदप एव जनार्दनः॥ शयानस्तासु भगवान्निर्ममेऽण्डं महत्तरम्। तत्र संवत्सरं नाम ब्रह्माणमसृजत्प्रभुः। तमत्तुं व्याददादास्यं तदाऽसौ विरुराव ह॥ अथ तं (तत्) कृपया विष्णुः सृष्टिकर्मण्ययोजयत्। सोऽसृजद्भुवनं विश्वमद्यार्थं हरये विभुरि'ति ब्रह्मवैवर्ते॥ १० ॥ अत्तृत्वाधिकरणम्॥ २॥

सर्वात्तैकः पर उक्तः। 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिनाचिकेताः'[1]। इति पिबन्तौ प्रतीयेते, तौ काविति। उच्यते।
॥ ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ ॥११॥ गुहां प्रविष्टौ पिबन्तौ विष्णुरूपे एव। 'घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगामे'[2]त्यादिना तद्दर्शनात्। 'आत्माऽन्तरात्मेति हरिरेक एव द्विधा स्थितः। निविष्टो हृदये नित्यं रसं पिबति कर्मजमि'ति बृहत्संहितायाम्। 'शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत्। पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचिदि'ति पाद्मे। 'यो वेद निहितं गुहायामि'[3]त्यादिना प्रसिद्धं हिशब्देन दर्शयति॥ ११ ॥ ॐ विशेषणाच्च ॐ ॥ १२ ॥ 'यः सेतुरीजानानामक्षरं ब्रह्म तत्परमि'[4]ति। 'पृथग्वक्तुं गुणास्तस्य न शक्यन्तेऽमितत्वतः यतोऽतो ब्रह्मशब्देन सर्वेषां ग्रहणं भवेत्॥ एतस्माद्ब्रह्मशब्दोऽयं विष्णोरेव विशेषणम्। अमिता हि गुणा यस्मान्नान्येषां तमृते वि(प्र)भुमि'ति ब्राह्मे। न च जीवे समन्वयोऽभिधीयते।

[1] १-३-१. क.उ. [2] १०-११४-१. ऋ.सं. [3] २-१. तै.उ. [4] १-३-२. क.उ.

SGDF
Sri Gargeshwari Digital Foundation

'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवाऽरुवण्यो मैवाऽरुवण्यो मैवाऽरुवण्य' इति पैङ्गिश्रुतिः। 'आत्मा हि परमस्स्वतन्त्रोऽधिगुणो जीवोऽल्पशक्तिरस्वतन्त्रोऽवर' इति (च) भाल्लवेयश्रुतिः[1]। यथेश्वरस्य जीवस्य भेदस्सत्यो विनिश्चयात्। एवमेव हि मे वाचं सत्यां कर्तुमिहार्हसि'॥ 'यथेश्वरश्च जीवश्च सत्यभेदौ परस्परम्। तेन सत्येन मां देवास्त्रायन्तु सहकेशवा' इत्यादेर्नासत्यो भेदः॥ १२॥ गुहाधिकरणम्॥ ३॥

आदित्ये विष्णुरित्युक्तम्। 'य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मी'[2]त्यादावग्नीनामेवादित्यस्थत्वमुच्यते। अतोऽक्ष्यादित्ययोरैक्या'द्य एषोऽन्तरक्षिणि पुरुषो दृश्यत'[3] इत्यत्राप्यग्निरेवोच्यते। अत'स्तद्यथा पुष्कर पलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत'[4] इत्यग्निज्ञानादेव सर्वपापाश्लेषान्मोक्षोपपत्तिरिति। अतोऽब्रवीत्[5] ॥ ॐ अन्तर उपपत्तेः ॐ॥ १३॥ चक्षुरन्तस्थो विष्णुरेव। 'त्रिपादस्यामृतं दिवी'[6]त्यादिना तस्यैवामृतत्वाद्युपपत्तेः। ब्रह्मशब्दाद्युपपत्तेश्च। सोऽहमस्मीत्यादि त्वन्तर्याम्यपेक्षया। 'अन्तर्यामिणमीशेशमपेक्ष्याहं त्वमित्यपि। सर्वे शब्दाः प्रयुज्यन्ते सति भेदेऽपि वस्तुषु' इति महाकौर्मे॥ १३॥ **ॐ स्थानादिव्यपदेशाच्च ॐ॥ १४॥** 'तद्यदस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छती'[7]त्यादिस्थानशक्तिः वामनिर्भामनिरित्याद्यात्मशक्तिश्चोच्यते। तस्य ह्येतल्लिङ्गम्। 'स ईशः सोऽसपत्नः स हरिः स परः परोवरीयान् यदिदं चक्षुषि सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति स वामनः स भामनः स आनन्दः सोऽच्युत'इति चतुर्वेदशिखायाम्। 'यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः।

---

[1] क्वचित् श्रुतिरियं न पठिता. [2] ४-११. छां.उ. [3] ४-१५. छां.उ. [4] ४-१४. छां.उ. [5] ब्रवीति पा. [6] १०-९०-३. ऋ.सं. [7] ४-१५. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

स वामनः परोऽस्माकं गतिरित्येव चिन्तयेदि'ति वामने ॥ १४ ॥
॥ **ॐ सुखविशिष्टाभिधानादेव च ॐ** ॥ १५ ॥ 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'[1]ति, 'विज्ञानमानन्दं ब्रह्म',[2] 'आनन्दो ब्रह्मेति व्यजानादि'[3]त्यादेस्तस्यैव हि तल्लक्षणम् । 'लक्षणं परमानन्दो विष्णोरेव न संशयः । अव्यक्तादितृणान्तास्तु विप्लुडानन्दभागिन' इति ब्रह्मवैवर्ते । न च मुख्ये सत्यमुख्यं युज्यते ॥ १५ ॥ **ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ** ॥१६॥ 'स एनान्ब्रह्म गमयती'[4]ति। न ह्यन्यविद्यया अन्यगतिर्युक्ता ॥ १६ ॥ **ॐ अनवस्थितेरसम्भवाच्च नेतरः ॐ** ॥१७॥ जीवस्य जीवान्तरनियामकत्वेऽनवस्थितेः, साम्यादसम्भवाच्च न जीवः । नियम (मे) प्रमाणाभावात् । अनीश्वरापेक्षत्वाच्च ॥ १७ ॥ अन्तराधिकरणम् ॥ ४ ॥

'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत'[5] इत्यादिनाऽन्तर्याम्युच्यते[6] । तत्र 'चैतदमृतमि'[7]त्युक्तममृतत्वमुच्यते । स च 'यस्य पृथिवी शरीरमि'त्यादिना सर्वात्मकत्वात्प्रकृतिस्तत्तज्जीवो वा युक्तः । न हि विष्णोः पृथिव्यादिशरीरत्वमङ्गीक्रियत इत्यत आह—

॥ **ॐ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ** ॥ ॥ १८ ॥ 'यं पृथिवी न वेद' 'यः पृथिव्या अन्तर'[8] इत्यादिना अधिदैवादिषु तद्धर्मव्यपदेशाद्विष्णुरेवान्तर्यामी । स हि 'न ते विष्णो जायमानो न जातः'[9] 'स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः सर्वेषां भूतानामन्तरपुरुष'[10] इत्यादिनाऽविदितोऽन्तरश्च ॥१८॥

---

[1] ४-१०. छां.उ. [2] ५-९-२८. बृ.उ. [3] ३-६. तै.उ. [4] ४-१५. छां.उ.
[5] ५-७-३. बृ.उ. [6] त्याद्यन्त पा. [7] ४-१५-१. छां.उ. [8] ५-७-३. बृ.उ.
[9] ७-१९-२. ऋ.सं. [10] ३-२-४. ऐ.आ.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ न च स्मार्तमतद्धर्माभिलापात् ॐ ॥ १९ ॥

त्रिगुणत्वादिप्रधानधर्मानुक्तेर्न स्मृत्युक्तं प्रधानमन्तर्यामि ॥ १९ ॥

॥ ॐ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॐ ॥२०॥

'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः'[1] 'यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरमि'त्युभयेऽपि हि शाखिनो भेदेनैन(जीव)मधीयते । 'शीर्यते नित्यमेवास्माद्विष्णोस्तु जगदीदृशम् । रमते च परो ह्यस्मिन् शरीरं तस्य तज्जगदि'ति वचनान्न शरीरत्वविरोधः ॥ २० ॥ अन्तर्याम्यधिकरणम् ॥ ५ ॥

अदृश्यत्वादिगुणा विष्णोरुक्ताः । तत्र 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं, सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा'[2] इत्युक्त्वा,[3] 'यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वमि'[4]त्युक्त्वा तस्माच्च 'अक्षरात्परतः पर'[5] इति परः प्रतीयत इत्यतोऽब्रवीत्[6]— ॥ ॐ **अदृश्यत्वादिगुणको धर्मोक्तेः ॐ ॥ २१ ॥** पृथिव्यादिदृष्टान्तमुक्त्वा 'अक्षरात्ससम्भवतीह विश्वमि'[7]त्यतः परं तत्परतः पराभिधानात्, 'कूटस्थोऽक्षर उच्यत'[8] इति स्मृतेश्च प्रकृतेः प्राप्तिः । ब्रह्मशब्दात्तत्परतः पराभिध्यानादेव च हिरण्यगर्भस्य । 'तमेवं विद्वानमृत इह भवति'[9] 'तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया' 'अथ द्वे वाव विद्ये वेदितव्ये परा चैवा(चा)परा च । तत्र ये वेदा

---

[1] बृ. माध्यन्दिनपाठः [2] १-१-६. मुं.उ. [3] एतदनन्तरं इत्युक्त्वेत्यन्तो ग्रन्थः क्वचिन्नास्ति. [4] १-१-७. मुं.उ. [5] २-१-२. मुं.उ. [6] ब्रवीति पा. [7] १-१-७. मुं.उ. [8] १५-१६. भ.गी. [9] ३-१२-७. तै.आ.

SGDF
Sri Gargeshwari Digital Foundation

यान्यङ्गानि यान्युपाङ्गानि यानि प्रत्यङ्गानि साऽपरा। अथ परा यया स हरिर्वेदितव्यो योऽसावदृश्यो निर्गुणः परः परमात्मे'त्यादिना तद्धर्मत्वेनावगतपरविद्याविषयत्वोक्तेर्विष्णुरेवादृश्यत्वादिगुणकः॥२१॥

॥ ॐ विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ ॐ ॥२२॥

'यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तप'[1] इति विशेषणान्न प्रकृतिः। 'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत'[2] इति भेदव्यपदेशान्न विरिञ्चः। 'अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका। श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया॥ तामक्षरं परं प्राहुः परतः परमक्षरम्। हरिमेवाखिलगुणमक्षरत्रयमीरितम्'॥ इति स्कान्दे त्र्यक्षराभिधानादक्षरात्परतः पर इत्यपि विशेषणमेव। 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक'[3] इति भेदव्यपदेशादीशपदप्राप्तोऽपि न रुद्रः॥ २२॥ **ॐ रूपोपन्यासाच्च ॐ ॥ २३ ॥** 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमि'[4]ति। 'एको नारायण आसीन्न ब्रह्मा न च शङ्करः। स मुनिर्भूत्वा समचिन्तयत्। तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा इति। तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि शुक्लं रक्तं रौक्मं कृष्णमिति। स एतान्येतेभ्योऽभ्य(व्य)चीक्लृपत्। विमिश्राणि-व्यमिश्रयत्'। अत एतादृगेतद्रूपमिति तस्यैव हि रूपाण्यभि-धीयन्ते॥ २३॥ अदृश्यत्वाधिकरणम्॥ ६॥

अदृश्यत्वादिगुणेषु सर्वगतत्वं 'यस्त्वेतमेवं प्रादेशमात्रमभि-विमानमात्मानं वैश्वानरमुपास्त'[5] इति वैश्वानरस्योक्तमित्यत आह—

॥ ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ ॥ २४ ॥

---

[1] १-१-९. मुं.उ. [2] १-१-९. मुं.उ. [3] ३-१-२. मुं.उ. [4] ३-१-३. मुं.उ.
[5] ५-१८-१. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

अग्नाविष्ण्वोः साधारणस्य वैश्वानरशब्दस्य विष्णावेव प्रसिद्धात्मशब्देन विशेषणाद्वैश्वानरो विष्णुरेव ॥ २४ ॥ ॐ **स्मर्यमाणमनुमानं स्यादिति** ॐ ॥ २५ ॥ 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित'[1] इति स्मर्यमाणमत्रापि स एवोच्यत इत्यस्यानुमापकम् । समाख्यानात् । इति शब्दः समाख्याप्रदर्शकः ॥ २५ ॥ ॐ **शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषविधमपि चैनमधीयते** ॐ ॥२६॥ 'अयमग्निर्वैश्वानरः'[2] 'वैश्वानरमृत आजातमग्निमि'[3]त्यादि(ः)शब्दः । 'वैश्वानरे तद्धुतं भवति'[4] । 'हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय'[5]मित्याद्यग्निलिङ्गमादिशब्दोक्तम् । 'येनेदमन्नं पच्यते'[6] 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमि'[7]त्यादिना पाचकत्वेनान्तःप्रतिष्ठानं च प्रतीयते । तस्मान्न विष्णुरिति चेन्न । 'अथ हेममात्मानमणोरणीयांसं परतः परं विश्वं हरिमुपासीतेति । सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः सर्वकामः सर्वधर्मः सर्वरूप इति' । 'स य एतमेवमात्मानं विश्वं हरिमारादरमुपास्ते तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषु देवेषु सर्वेषु वेदेषु कामचारो भवती'ति तत्तन्नामलिङ्गादिना तस्यैव दृष्ट्युपदेशान्महोपनिषदि ॥ 'अनात्तत्वादनात्मान ऊनत्वाद्गुणराशितः । अब्रह्माणः परे सर्वे ब्रह्मात्मा विष्णुरेव ही'त्यादिना 'को न आत्मा किं ब्रह्मे'[8]त्यारम्भाच्च अन्येषामसम्भवाद्विष्णुरेव वैश्वानरः । 'चन्द्रमा मनसो जातश्चक्षोस्सूर्यो अजायते'[9]त्यादिना यः पुरुषाख्यो विष्णुरभिहितस्तद्विधमेवात्र 'मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः

---

[1] १५-१४. भ.गी. [2] ७-९-१. बृ.उ. [3] ६-७-१. ऋ.सं. [4] ५-२४-४. छां.उ. [5] ५-१८-२. छां.उ. [6] ७-९-१. बृ.उ. [7] ५-१९-१. छां.उ. [8] ५-११-१. छां.उ. [9] ३-१२. तै.आ.

SGDF
Sri Gangeshwari Digital Foundation

प्राणः पृथग्वर्त्मे'[1]त्यादिनैनं वैश्वानरमधीयते। चशब्देन सकलवेदतन्त्रपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य दर्शयति। तथा च ब्राह्मे— 'यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणम्। तथैव मे मनो नित्यं भूयाद्विष्णुपरायणमि'ति। चतुर्वेदशिखायां च 'सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपादित्येष ह्येवाचिन्त्यः परः परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूप' इति। बृहत्संहितायां च—'यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम्। न तथा सर्ववेदाश्च वेदाङ्गानि च नारदे'त्यादि। 'यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः। तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखमि'ति नारदीयवचनान्नाभेदोक्तिविरोधः॥२६॥ **ॐ अत एव न देवता भूतं च ॐ ॥ २७ ॥** अग्निवैश्वानरादिशब्दस्तेजसि भूते अग्निदेवतायां च प्रसिद्धोऽप्यतः पूर्वोक्तहेतुत एवात्र न सा तच्चाभिधीयते॥ ॥ २७ ॥ **ॐ साक्षादप्यविरोधं जैमिनिः ॐ ॥ २८ ॥** नाग्न्यादयः शब्दा अग्न्यादिवाचकास्तथापि साक्षादेवानन्ययोगेन ब्रह्मवाचकैश्शब्दैः व्यवहारार्थमनभिज्ञानाच्चान्यत्र व्यवहरन्तीत्यभ्युपगमेऽविरोधं जैमिनिर्वक्ति। 'व्यासचित्तस्थिताकाशादवच्छिन्नानि कानिचित्। अन्ये व्यवहरन्त्येतान्यूरीकृत्य गृहादिवदि'ति स्कान्दवचनान्न मतानां परस्परविरोधः ॥ २८ ॥ **ॐ अभिव्यक्तेरित्याश्मरथ्यः ॐ ॥ २९ ॥** तत्र तत्र प्रसिद्धावप्यग्न्यादिषु ब्रह्मणोऽभिव्यक्तेरग्न्यादिसूक्तनियम इत्याश्मरथ्यः॥२९॥ **ॐ अनुस्मृतेर्बादरिः ॐ ॥ ३० ॥** तत्र तत्रोक्तस्य विष्णोरग्न्यादिष्वनुस्मर्यमाणत्वात्तन्नियम इति बादरिः ॥३०॥ **ॐ सम्पत्तेरिति**

[1] ५-१८-२. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

जैमिनिस्तथा हि दर्शयति ॐ ॥ ३१ ॥ साक्षादप्यविरोधं वदन् जैमिनिः सूक्तादिनियममग्न्यादिसम्प्राप्त्या मन्यते । 'तं यथा यथोपासते तदेव भवती'ति दर्शयति ॥ ३१ ॥ न ह्यन्योपासकोऽन्यं प्राप्नुत इति युज्यत इत्यत आह—॥ **ॐ आमनन्ति चैनमस्मिन् ॐ ॥ ३२ ॥** एनं विष्णुमग्न्यादावामनन्ति । 'योऽग्नौ तिष्ठन्'[1] 'य एष एतस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुष'[2] इत्यादिना ॥ ३२ ॥ वैश्वानराधिकरणम् ॥ ७ ॥ इति श्रीमत्कृष्णद्वैपायनकृत ब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते प्रथमाध्यायस्य द्वितीयः पादः ॥

ॐ तत्र चान्यत्र च प्रसिद्धानां शब्दानां विष्णौ समन्वयं प्रायेणास्मिन्पादे दर्शयति । विष्णोः परविद्याविषयत्वमुक्तम् । तत् 'यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमि'[3]त्यत्र 'प्राणानां ग्रन्थिरसि रुद्रो माऽऽविशान्तकः'[4] 'प्राणेश्वरः कृत्तिवासाः पिनाकी'[5]त्यादिना रुद्रस्य प्राणाधारत्वप्रतीतेः 'स एषोऽन्तश्चरते बुहुधा जायमान'[6] इति जीवलिङ्गाच्च तयोः प्राप्तिरित्यत उच्यते[7] ॥ **ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॐ ॥ १ ॥** 'तमेवैकं जानथ आत्मानमि'[8]त्यात्मशब्दात् द्युभ्वाद्याश्रयो विष्णुरेव । 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् । न सम्भवन्ति यस्मात्तैर्नैवाप्ता गुणपूर्णते'ति ब्रह्मवैवर्ते ॥ १ ॥ **ॐ मुक्तोपसृप्यव्यपदेशात् ॐ ॥ २ ॥** 'अमृतस्यैष सेतुरि'[8]ति । 'ब्रह्मविदाप्नोति परम्'[9], 'नारायणं

---

[1] ५-७-५. बृ. उ. [2] ४-५-३ बृ. उ. [3] २-२-५. मुं. उ. [4] ३-५. म.ना. उ. [5] घृतसूक्तम्. [6] २-२-६. मुं. उ. [7] आह. पा. [8] २-२-५ मुं.उ [9] २-१. तै. उ.

SGDF
Sri Gargeshwari Digital Foundation

महाज्ञेयं विश्वात्मानं परायणम्'[1] 'मुक्तानां परमा गतिः' 'एतमानन्दमयमात्मानमुपसङ्क्रामती'[2]त्यादिना तस्यैव मुक्तप्राप्यत्वव्यपदेशात्। 'बहुनाऽत्र किमुक्तेन यावच्छ्वेतं न गच्छति। योगी तावन्न मुक्तस्स्यादेष शास्त्रविनिर्णय' इत्यादित्यपुराणे ॥ २ ॥ ॥ **ॐ नानुमानमतच्छब्दात् ॐ ॥ ३ ॥** नानुमानात्मकागमपरिकल्पितरुद्रोऽत्र वाच्यः। भस्मधरोग्रत्वादितच्छब्दाभावात्। 'सोऽन्तकः स रुद्रः स प्राणभृत्स प्राणनायकः स ईशो यो हरिर्योऽनन्तो यो विष्णुर्यः परः परोवरीयानि'त्यादिना प्राणग्रन्थिरुद्रत्वादेर्विष्णोरेवोक्तत्वात्। ब्रह्माण्डे च 'रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः। ईशनादेव चेशानो महादेवो महत्वतः॥ पिबन्ति ये नरा नाकं मुक्तास्संसारसागरात्। तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः॥ शिवः सुखात्मकत्वेन शर्वः शंरोधनाद्धरिः॥ कृत्यात्मकमिदं देहं यतो वस्ते प्रवर्तयन्॥ कृत्तिवासास्ततो देवो विरिञ्चश्च विरेचनात्। बृंहणाद्ब्रह्मनामाऽसावैश्वर्यादिन्द्र उच्यते॥ एवं नानाविधैश्शब्दैरेक एव त्रिविक्रमः। वेदेषु सपुराणेषु गीयते पुरुषोत्तम' इति। वामने च 'न तु नारायणादीनां नाम्नामन्यत्र सम्भवः। अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तित' इति। स्कान्दे च 'ऋते नारायणादीनि नामानि पुरुषोत्तमः। प्रादादन्यत्र भगवान् राजेवर्ते स्वकं पुरम्' इति। 'चतुर्मुखश्शतानन्दो ब्रह्मणः पद्मभूरिति। उग्रो भस्मधरो नग्नः कपालीति शिवस्य च। विशेषनामानि ददौ स्वकीयान्यपि केशव' इति (च) ब्राह्मे ॥ ३ ॥ ॥ **ॐ प्राणभृच्च ॐ ॥ ४ ॥** एतैरेव हेतुभिर्न जीवो वायुश्च। 'अजायमानो बहुधा विजायत'[3] इति तस्यैव बहुधा जन्मोक्तेः ॥ ४ ॥ **ॐ भेदव्यपदेशात् ॐ ॥ ५ ॥** न चैक्यं वाच्यम्। 'जुष्टं

---

[1] ११ (म. ना. उ.) [2] २-८. तै. उ. [3] ३-१३-१. तै.आ.

SGDF
Sri Gurgeshwari Digital Foundation

यदा पश्यत्यन्यमीशमस्य महिमानमि'[1]ति भेदव्यपदेशात् ॥ ५ ॥ ॥ **ॐ प्रकरणात् ॐ** ॥ ६ ॥ 'द्वे विद्ये वेदितव्ये'[2] इति तस्य ह्येतत्प्रकरणम् ॥ ६ ॥ ॥ **ॐ स्थित्यदनाभ्यां च ॐ** ॥ ७ ॥ 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती[3]ति ईशजीवयोः स्थित्यदनोक्तेः ॥ ७ ॥ द्युभ्वाधिकरणम् ॥ १ ॥

'प्राणो वा आशाया भूयान्' इत्युक्त्वा 'यो वै भूमा तत्सुखमि'[4]त्युक्तेस्तस्यैव भूमत्वप्राप्तिः । 'उत्क्रान्तप्राणानि'[5]त्यादि-तल्लिङ्गात्प्राणशब्दश्च वायुवाचीत्यतो वक्ति॥ **ॐ भूमा सम्प्रसादादध्युपदेशात् ॐ** ॥ ८ ॥ 'सम्प्रसादात्' पूर्णसुखरूपत्वात् 'अध्युपदेशात्' सर्वेषामुपर्युपदेशाच्च विष्णुरेव भूमा । 'सहस्रशीर्षं-देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् ॥ विश्वतः परमां नित्यमि'[6]ति हि श्रुतिः । 'तमुत्क्रामन्तं प्राणोऽनू-त्क्रामती'[7]त्यादिना नोत्क्रमणादिलिङ्गविरोधोऽपि ॥ ८ ॥ **ॐ धर्मोपपत्तेश्च ॐ** ॥ ९ ॥ सर्वगतत्वादिधर्मोपपत्तेश्च ॥ ९ ॥ भूमाधिकरणम् ॥ २ ॥

अदृश्यत्वादिगुणा विष्णोरुक्ताः[8] 'अदृष्टं द्रष्टृश्रुतं श्रोतृ'[9]त्या-दिना । 'अहं सोममाहनसं बिभर्मी'[10]त्यादेस्तस्यापि सम्भवा-न्मध्यमाक्षरस्योक्ता इत्यतो ब्रूते ॥ **ॐ अक्षरमम्बरान्तधृतेः**

---

[1] ३-१-२. मुं.उ. [2] १-१-९. मुं.उ. [3] ३-१-१. मुं.उ. [4] २-३. छां.उ. [5] ७-१५-३. छां.उ. [6] ११. म.ना.उ. [7] ६-४-२. बृ.उ. [8] विष्णोरुक्ताः इति क्वचिन्नास्ति [9] ५-७-११. बृ.उ. [10] १०-१२४-२. ऋ.सं.

SGDF
Sri Gargeshwari Digital Foundation

ॐ ॥ १० ॥ 'एतस्मिन् (न्नु) खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे'[1]त्यम्बरान्तस्य सर्वस्य धृतेर्ब्रह्मैवाक्षरम् । 'य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा'[2] । 'भर्ता सन्भ्रियमाणो बिभर्ति । एको देवो बहुधा निविष्टः[3] । यदा भारं तन्द्रयते स भर्तुम् । परास्य[4] भारं पुनरस्तमेति[5]' । 'यस्मिन्निदं सञ्च वि चैधि सर्वं यस्मिन्देवा अधि विश्वे निषेदुरि'[6]त्यादिश्रुतेः । 'पृथिव्यादि प्रकृत्यन्तं भूतं भव्यं भवच्च यत् । विष्णुरेको बिभर्तीदं नान्यस्तस्मात्क्षमो धृतावि'ति(च) स्कान्दे ॥ १० ॥ ॐ सा च प्रशासनात् ॐ ॥ ११ ॥ सा च धृतिः प्रशासनादुच्यत 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत'[7] इत्यादिना । तच्च प्रशासनं विष्णोरेव । 'सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि'[8] । 'चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतींरवीविपदि'[9]त्यादिश्रुतेः । 'एकः शास्ता न द्वितीयोऽस्ति शास्ता'[10] 'यो हृच्छयस्तमहमिह ब्रवीमि'[11] 'न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषामि'[12]त्यादेश्च ॥ ११ ॥ ॐ अन्यभावव्यावृत्तेश्च ॐ ॥ १२ ॥ 'अस्थूलमनण्वि'[13]त्यादिना स्थूलाण्वादीनामन्यवस्तुस्वभावानां व्यावृत्तेश्च । 'अस्थूलोऽनणुरमध्यमो मध्यमोऽव्यापको व्यापको योऽसौ हरिरादिरनादिरविश्वो विश्वः सगुणो निर्गुण' इत्यादेर्विष्णोरेव(हि) ते धर्माः । 'अस्थूलोऽनणुरूपोऽसावविश्वो[14]विश्व एव च । विरुद्धधर्मरूपोऽसावै-

---

[1] ५-७-११. बृ. उ.　[2] १-१५४-४. ऋ. सं.　[3] सन्निविष्टः पा.
[4] निधाय. पा.　[5] ३-१४ तै. आ.　[6] १-२ म. ना. उ.　[7] ५.८.९. बृ. उ
[8] १-१६४-३६. ऋ. सं.　[9] १-१५५-६. ऋ. सं.　[10] भारते.　[11] ग्रन्थोऽयं क्वचिन्न पठितः　[12] भागवते　[13] ५.८.८ बृ. उ.　[14] स विश्वोऽविश्व. पा.

SGDF
Sri Gurgeshwari Digital Foundation

श्वर्यात्पुरुषोत्तम ' इति च[1] ब्राह्मे ॥ १२॥ अक्षराधिकरणम् ॥ ३ ॥

'सदेव सोम्येदमग्र आसीदि '[2]त्यादिना सतः स्रष्टृत्वमुच्यते । तच्च सत् 'बहु स्यां प्रजायेये '[3]ति परिणामप्रतीतेर्न विष्णुः । स 'ह्यविकारस्सदा शुद्धो नित्य आत्मा सदा हरिरि 'त्यादिनाऽविकारः प्रसिद्ध इत्यतो ब्रवीति ॥ **ॐ ईक्षतिकर्मव्यपदेशात्सः ॐ ॥ १३ ॥** 'तदैक्षते 'तीक्षतिकर्मव्यपदेशात्स एव विष्णुरत्रोच्यते । 'नान्योऽतोऽस्ति द्रष्टा'[4]'नान्यदतोऽस्ति द्रष्टृ'[5]त्यादिना तस्यैव हि तल्लक्षणम् । बहुत्वं चाविकारेणैवोक्तं 'अजायमानो बहुधा विजायत '[6] इति ॥ १३ ॥ सदधिकरणम् ॥ ४ ॥

चन्द्रादित्याद्याधारत्वं विष्णोरुक्तम् । तच्च 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः . . . . किं तदत्र विद्यते . . . .'[7] 'उभे अस्मिन् द्यावा पृथिवी अन्तरेव समाहिते। उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ। विद्युन्नक्षत्राणी '[8]त्यादिनाऽकाशस्य प्रतीयते । स चाकाशो न विष्णुः । 'तस्यान्ते सुषिरँ सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमि'[9]ति श्रुतेरित्यत आह ॥ **ॐ दहर उत्तरेभ्यः ॐ ॥ १४ ॥** 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामस्सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य '[10] इत्यादिभ्य उत्तरेभ्यो गुणेभ्यो दहरे विष्णुरेव । 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति '[11] 'स एष सर्वेभ्यः पाप्मभ्य उदित '[12] इत्यादिना विष्णोरेव हि ते गुणाः । 'नित्यतीर्णाशनायादिरेक एव हरिः स्वतः । अशनायादि-

---

[1] आदि पा. [2] ६-२-१ छां.उ. [3] ६-२-३ छां.उ. [4] ५-७-२३. बृ.उ. [5] ५-८-११ बृ.उ. [6] ३-१३-१ तै. आ. [7] ८-१-२. छां.उ. [8] ८-१-३. छां.उ. [9] ११. म.ना.उ. [10] ८-७-३. छां.उ. [11] ५-५. बृ.उ. [12] १-६-७. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

कानन्ये तत्प्रसादात्तरन्ति ही 'ति पाद्मे । सापेक्षनिरपेक्षयोश्च निरपेक्षं स्वीकर्तव्यम् । 'सत्यकामः परो[1] नास्ति तमृते विष्णुमव्ययम् । सत्यकामत्वमन्येषां भवेत्तत्काम्यकामिते 'ति स्कान्दे ॥ १४ ॥

ॐ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॐ ॥ १५ ॥

'अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ती '[2]ति सुप्तस्य तद्गतिर्ब्रह्म शब्दश्चोच्यते । 'सता सोम्य तदा सम्पन्नो भवती '[3]ति श्रुतेस्तं हि सुप्तो गच्छति । 'अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोक '[4] इति लिङ्गं च तथा(हि) दृष्टम् । 'अरश्च वै ण्यश्च सुधासमुद्रौ तत्रैव सर्वाभिमतप्रदौ द्वा'वित्यादिना तस्यैव हि तल्लक्षणत्वेनोच्यते ॥ १५ ॥ **ॐ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॐ ॥ १६ ॥** 'एष सेतुर्विधृतिरि '[5]ति धृतेः, '(एष सर्वेश्वर) एष भूताधिपतिरेष भूतपाल '[6] इत्याद्यस्य महिम्नोऽस्मिन्नुपलब्धेः । 'एतस्मिन्(न्नु) खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च '[7] 'एतस्य वा अक्षरस्य प्रशासने गार्गि '[8] 'स हि सर्वाधिपतिः स हि सर्वपालः स ईशः स विष्णुः ' 'पतिं विश्वस्याऽत्मेश्वरमि '[9]त्यादि श्रुतिभ्यस्तस्य ह्येष महिमा । 'सर्वेभ्यो विष्णुरेवैको नान्योऽस्ति जगतः पतिरि 'ति स्कान्दे ॥ १६ ॥ **ॐ प्रसिद्धेश्च ॐ ॥ १७ ॥** 'तत्रापि दहं (हरं) गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यमि'[10]ति प्रसिद्धेश्च । तदन्तस्थत्वापेक्षत्वान्न सुषिरश्रुतिविरोधः ॥ १७ ॥ **ॐ इतरपरामर्शात्स इति चेन्नासम्भवात् ॐ ॥ १८ ॥** 'परं ज्योतिरुपसम्पद्य-

---

[1] कामोऽपरो पा. [2] ८-३-२. छां.उ. [3] ६-८-१ छां.उ. [4] ८-५-३. छां.उ. [5] ८-४-१. छां.उ. [6] ६-४-२१. बृ.उ. [7] ५-८-११. बृ.उ. [8] ५-८-९. बृ.उ. [9] ११. म.ना.उ. [10] १०-७. म.ना.उ.

SGDF
Sri Gargeshwari Digital Foundation

स्वेन रूपेणाभिनिष्पद्यते'[1] 'एष आत्मेति होवाचे'[2]ति जीवपरामर्शात्स इति चेन्न। तस्य स्वतोऽपहतपाप्मत्वाद्यसम्भवात् ॥ १८ ॥ ॥ ॐ **उत्तराच्चेदाविर्भूतस्वरूपस्तु** ॐ ॥ १९ ॥ 'स तत्र पर्येति जक्षन् क्रीडन् रममाण'[3] इत्याद्युत्तरवचनाज्जीव एवेति चेन्न। तत्र हि परमेश्वरप्रसादादाविर्भूतस्वरूपो मुक्त उच्यते। यत्प्रसादात्स मुक्तो भवति स भगवान्पूर्वोक्तः ॥ १९ ॥ ॐ **अन्यार्थश्च परामर्शः** ॐ ॥ २० ॥ यं प्राप्य स्वेन रूपेण जीवो निष्पद्यते स एष आत्मेति परमात्मार्थश्च परामर्शः ॥ २० ॥ ॐ **अल्पश्रुतेरिति चेत्तदुक्तम्** ॐ ॥ २१ ॥ 'दहर'[4] इत्यल्पश्रुतेर्नेति चेन्न। 'निचाय्यत्वादेवं व्योमवच्चे'त्युक्तत्वात्। 'एष म आत्माऽन्तर्हृदये ज्यायानि'[5]ति श्रुत्युक्तत्वाच्च ॥ २१ ॥ दहराधिकरणम् ॥ ५ ॥

अदृश्यत्वादयः परमेश्वरगुणा उक्ताः। 'तेषां सुखं शाश्वतं नेतरेषाम्। तदेतदितिमन्यन्तेऽनिर्देश्यं परमं सुखमि'[6]त्यादिना ज्ञानिसुखस्याप्यनिर्देश्यत्वमज्ञेयत्वं चोच्यत इत्यतो वक्ति। ॐ **अनुकृतेस्तस्य च** ॐ ॥ २२ ॥ 'तमेव भान्तमनुभाति सर्वमि'[7]त्यनुकृतेः, 'तस्य भासा सर्वमिदं विभाती'[7]ति वचनाच्च परमात्मैवानिर्देश्यसुखरूपः। न हि ज्ञानिसुखमनुभाति सर्वम्। न च तद्भासा। 'अहं तत्तेजो रश्मीदि'ति नारायणभासा हि सर्वं भाति ॥ २२ ॥ ॐ **अपि स्मर्यते** ॐ ॥ २३ ॥ 'यदादित्यगतं तेजो

---

[1] ८-१२-३. छां-उ. [2] ४-१५-१. छां.उ. [3] ८-१२-३. छां.उ. [4] ८-१-१. छां.उ. [5] ३-१४-३. छां.उ. [6] ५-१२, १४ क.उ. कथं नु तद्विजानीयामित्यधिकः पाठः क्वचित्. [7] ५-१५. क. उ.

SGDF
Sri Gargeshwari Digital Foundation

जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमि'[1]ति । 'न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं ममे'[2]ति च ॥ २३ ॥ अनुकृत्यधिकरणम् ॥ ६ ॥

विष्णुरेव जिज्ञास्य इत्युक्तम् । तत्र 'ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति । मध्ये वामनमासीनं विश्वेदेवा उपासत'[3] इति सर्वदेवोपास्यः कश्चित्प्रतीयते । स च 'एवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते'[4] 'योऽयं मध्यमः प्राणः'[5] 'कुविदङ्गे'[6]त्यादिना प्राणव्यवस्थापकत्वान्मध्यमत्वात्सर्वदेवोपास्यत्वाच्च वायुरेवेति प्रतीयते । अतोऽब्रवीत् ॥ ॐ **शब्दादेव प्रमितः** ॐ ॥ २४ ॥ वामनशब्दादेव विष्णुरिति प्रमितः । न हि श्रुतेर्लिङ्गं बलवत् । 'श्रुतिर्लिङ्गं समाख्या च वाक्यं प्रकरणं तथा । पूर्वं पूर्वं बलीयः स्यादेवमागमनिर्णय' इति स्कान्दे । तच्च लिङ्गं विष्णोरेव । तस्यैव प्राणत्वोक्तेः 'तद्वै त्वं प्राणो अभव' इति ॥ २४ ॥ ॐ **हृद्यपेक्षया तु मनुष्याधिकारत्वात्** ॐ ॥ २५ ॥ सर्वगतस्यापि तस्याङ्गुष्ठमात्रत्वं हृद्यवकाशापेक्षया युज्यते । इतरप्राणिनामङ्गुष्ठाभावेऽपि मनुष्याधिकारत्वान्न विरोधः ॥ २५ ॥ वामनाधिकरणम् ॥ ७ ॥

मनुष्याणामेव वेदविद्यायामधिकार इत्युक्तम् । तिर्यगाद्यपेक्षयैव मनुष्यत्वविशेषणमुक्तं, न तु देवाद्यपेक्षयेत्याह—ॐ **तदुपर्यपि बादरायणः सम्भवात्** ॐ ॥ २६ ॥ तदुपरि मनुष्याणां सतां देवादित्वप्राप्त्युपरि । सम्भवति हि तेषां विशिष्टबुद्ध्यादिभावात् ।

---

[1] १५-१२. भ.गी. [2] १५-६. भ.गी. [3] ५-३. क.उ. [4] ३-४. प्र.उ. [5] ३-५ २१. बृ.उ. [6] ७-९१-१ ऋ.सं.

SGDF
Sri Gangeshwari Digital Foundation

तिर्यगादीनां तदभावादभावः। तेषामपि यत्र विशिष्टबुद्ध्यादिभावस्तत्राविरोधः। निषेधाभावात्। दृश्यन्ते हि जरितार्यादयः ॥ २६ ॥ ॐ **विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॐ ॥ २७ ॥** मनुष्या एव देवादयो भवन्तीति तदुपरीत्युक्तम्। तत्र यदि मनुष्याः सन्तो देवादयो भवन्ति तत्पूर्वं देवताभावाद्देवतोद्दिष्टकर्मणि विरोध इति चेन्न। अनेकेषां देवतापदप्राप्तेर्दर्शनात्। 'ते ह नाकं महिमानः सचन्ते(न्त) यत्र पूर्वे साध्याः सन्ति देवा'[1] इति ॥ २७॥ ॐ **शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॐ ॥ २८ ॥**'वाचा विरूप नित्यये'[2]त्यादि श्रुतेराप्त्यनिश्चयान्नित्यत्वापेक्षत्वाच्च मूलप्रमाणस्य, स्वतः प्रामाण्यप्रसिद्धेश्च नित्यत्वाद्वेदस्य तदुदितानां देवानामनित्यत्वात् पुनरन्यभावनियमाभावाच्च[3] शब्दे विरोध इति चेन्न। 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'[4] 'यथैव नियमः काले सुरादिनियमस्तथा। तस्मान्नानीदृशं क्वापि विश्वमेतद्भविष्यती'त्यादेरत एव शब्दात्तेषां प्रभवनियमात्, महतां प्रत्यक्षात्। यथेदानीं तथोपर्यपि देवा भविष्यन्तीतीतरेषामनुमानाच्च ॥ २८॥ ॐ **अत एव च नित्यत्वम् ॐ ॥ २९ ॥** अत एव शब्दस्य नित्यत्वादेव च देवप्रवाह(स्य)नित्यत्वं युक्तम्[5] ॥२९॥ ॐ **समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॐ ॥ ३० ॥** अतीतानागतानां देवानां समाननामरूपत्वात्प्राप्तपदानां मुक्त्याऽऽवृत्तावप्यविरोधः। 'यथापूर्वमि'[6]ति दर्शनात्। 'अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा। ऋषीणां नामधेयानि याश्च वेदेषु

[1] ३-१२. तै.आ. [2] ८-६४-६ ऋ.सं. [3] पुनरित्यादि क्वचित् नास्ति
[4] ५-७. म.ना.उ. [5] भवति पा. [6] ५-७. म.ना.उ.

SGDF
Sri Gargeshwari Digital Foundation

दृष्टयः । वेदशब्देभ्य एवादौ निर्ममे स महेश्वर ' इति स्मृतेश्च ॥ ३० ॥
ॐ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॐ ॥ ३१ ॥ 'वसूनामेवैको भूत्वे '[1]त्यादिना प्राप्यफलत्वात्प्राप्तपदानां देवानां मध्वादिविद्यास्वनधिकारं जैमिनिर्मन्यते ॥ ३१ ॥ **ॐ ज्योतिषि भावाच्च ॐ ॥ ३२ ॥** ज्योतिषि सर्वज्ञत्वे भावाच्च । आदित्यप्रकाशेऽन्तर्भाववत्तज्ज्ञाने सर्ववस्तूनामन्तर्भावात् । नित्यसिद्धत्वाच्च विद्यानाम् ॥ ३२ ॥ **ॐ भावं तु बादरायणोऽस्ति हि ॐ ॥ ३३ ॥** फलविशेषभावात्प्राप्तपदानामपि देवानां मध्वादिष्वप्यधिकारं बादरायणो मन्यते । अस्ति हि प्रकाशविशेषः । 'यावत्सेवा परे तत्वे तावत्सुखविशेषता । सम्भवाच्च प्रकाशस्य परमेकमृते हरिम् ॥ तेषां सामर्थ्ययोगाच्च देवानामप्युपासनम् । सर्वं विधीयते नित्यं सर्वयज्ञादिकर्म चे'ति स्कान्दे ॥ उक्तफलानधिकारमात्रं जैमिनिमतम् । अतो न तन्मतविरोधः[2] । 'सर्वज्ञस्यैव कृष्णस्य त्वेकदेशविचिन्तितम् । स्वीकृत्य मुनयो ब्रूयुस्तन्मतं न विरुध्यत' इति (च) ब्राह्मे ॥ ३३ ॥ देवताधिकरणम् ॥ ८ ॥

मनुष्याधिकारत्वादित्युक्तेऽविशेषाच्छूद्रस्या'प्यह हारेत्वा शूद्रे'-[3]ति पौत्रायणोक्तेरधिकार इत्यत आह ॥ **ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॐ ॥ ३४ ॥** नासौ पौत्रायणश्शूद्रः, शुचाऽऽद्रवणमेव शूद्रत्वम्[4] । 'कम्वर एतमेतत्सन्तमि'[5]त्यनादरश्रवणात् । 'स ह सञ्जिहान एव क्षत्तारमुवाचे'[6]ति सूच्यते हि ॥ ३४ ॥ **ॐ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्र-**

---

[1] ३-६-२. छां.उ. [2] तदिति क्वचिन्नास्ति. [3] ४-२-३. छां.उ.
[4] शूद्रशब्देनोक्तम् पा. [5] ४-१-३. छां.उ. [6] ४-१-५. छां. उ.

SGDF
Sri Gurgeshwari Digital Foundation

रथेन लिङ्गात् ॐ ॥ ३५ ॥ अयमश्वतरीरथ इति चित्ररथसम्बन्धित्वेन लिङ्गेन पौत्रायणस्य क्षत्रियत्वावगतेश्च । 'रथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयत' इति ब्रह्माण्डे[1] । 'यत्र वेदो रथस्तत्र न वेदो यत्र नो रथ' इति (च) ब्रह्मवैवर्ते ॥ ३५ ॥ **ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ ॥ ३६ ॥** 'अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीते'त्यध्ययनार्थं संस्कारपरामर्शात् । 'नाग्निर्न यज्ञो न क्रिया न संस्कारो न व्रतानि शूद्रस्ये'ति पैङ्गिश्रुतौ संस्काराभावाभिलापाच्च । उत्तमस्त्रीणां तु न शूद्रवत् । 'सपत्नीं मे पराधमे'[2]त्यादिष्वधिकारदर्शनात् । संस्काराभावेनाभावस्तु सामान्येन । अस्ति च तासां संस्कारः । 'स्त्रीणां प्रदानकर्मैव यथोपनयनं तथे'ति स्मृतेः[3] ॥ ३६ ॥ **ॐ तदभावनिर्धारणे च प्रवृत्तेः ॐ ॥ ॥ ३७ ॥** 'नाहमेतद्वेद भो यद्गोत्रोऽहमसी'[4]ति सत्यवचनेन सत्यकामस्य शूद्रत्वाभावनिर्धारणे हारिद्रुमतस्य 'नैतदब्राह्मणो विवक्तुमर्हती'[5]ति तत्संस्कारे प्रवृत्तेश्च ॥ ३७ ॥ **ॐ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॐ ॥ ३८ ॥** 'श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणम् । अध्ययने जिह्वाच्छेदः । अर्थावधारणे हृदयविदारणमि'[6]ति प्रतिषेधात् । 'नाग्निर्न यज्ञश्शूद्रस्य तथैवाध्ययनं कुतः । केवलैव तु शुश्रूषा त्रिवर्णानां विधीयत' इति स्मृतेश्च । विदुरादीनां तु उत्पन्नज्ञानत्वात्कश्चिद्वि[7]शेषः ॥ ३८ ॥ अपशूद्राधिकरणम् ॥९॥

'यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् । महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ती'[8]त्युद्यतवज्रज्ञानान्मोक्षः प्रतीयत

[1] ब्राह्मे पा. [2] १-१६. मन्त्रप्रश्न [3] व्यासस्मृतिः [4] ४-४. छां.उ. [5] ४-५. छां.उ. [6] १२-४-७. गौ.ध. [7] क्वचित् कश्चिदिति नास्ति कुम्भकोण पुस्तके नेत्यधिकः पाठः. [8] २-३-२. क.उ.

SGDF
Sri Gangeshwari Digital Foundation

(श्रूयत) इत्यतोऽब्रवीत् ॥ **ॐ कम्पनात् ॐ ॥ ३९ ॥** एजतीति कम्पनवचनादुद्यतवज्रो भगवानेव 'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादि'[1]ति हि श्रुतिः। 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरि'[2]ति च। 'नभस्वतोऽपि सर्वाः स्युश्चेष्टा भगवतो हरेः। किमुतान्यस्य जगतो यस्य चेष्टा नभस्वत' इति (च) (हि) स्कान्दे ॥ 'चक्रं चङ्क्रमणादेष वर्जनाद्वज्र उच्यते। खण्डनात्खड्ग एवैष हेतिनामा स्वयं हरिरि'ति ब्रह्मवैवर्ते ॥३९॥ कम्पनाधिकरणम् ॥१०॥

हृदय आहितं ज्योतिः परमात्मेत्युक्तम्। तत्र 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष'[3] इत्यत्र 'उभौ लोकावनुसञ्चरती'[4]ति वचनाज्जीव इति प्रतीयत इत्यत उच्यते—॥ **ॐ ज्योतिर्दर्शनात् ॐ ॥ ४० ॥** 'विष्णुरेव ज्योतिर्विष्णुरेव ब्रह्म(।) विष्णुरेवाऽऽत्मा विष्णुरेव बलं विष्णुरेव यशो विष्णुरेवानन्द' इति दर्शनाच्चतुर्वेदशिखायां ज्योतिर्विष्णुरेव। 'प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जद्याती'[4]ति वचनात्तस्यापि लोकसञ्चरणमस्त्येव ॥४०॥ ज्योतिरधिकरणम् ॥ ११ ॥

सर्वाधारत्वं विष्णोरुक्तम् त'च्चाकाशो वै नाम नामरूपयोर्निर्वहिते'[5] त्यत्राऽऽकाशस्य प्रतीयते। वैनामेति प्रसिद्धोपदेशात्। प्रसिद्धाकाशश्चाङ्गीकर्तव्य इत्यत उच्यते ॥ **ॐ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॐ ॥ ४१ ॥** 'ते यदन्तरा तद्ब्रह्मे'[5] त्यर्थान्तरत्वादि व्यपदेशादाकाशो हरिरेव। 'अवर्ण'[6] 'यतो वाचो निवर्तन्त'[7] इत्यादि श्रुतेस्तस्यैव हि तल्लक्षणम्। 'अनामा सोऽप्रसि-

---

1 २-७. तै.उ. 2 ६-४-१८ बृ.उ. 3 ६-३-७ बृ.उ. 4 ६-३-३५. बृ.उ.
5 ८-१४-१. छा.उ. 6 अवर्णमचक्षुश्श्रोत्रम्' इत्याद्याथर्वणी श्रुतिः.
7 २-४. तै. उ.

SGDF
Sri Gangeshwari Digital Foundation

द्धत्वादरूपो भूतवर्जनादि'ति (हि) ब्राह्मे ॥ ४१ ॥ आकाशाधिकरणम् ॥ १२ ॥

असङ्गत्वं परमात्मन उक्तम् । तच्च 'स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष'[1] इति स्वप्नादिद्रष्टुः प्रतीयते । स च जीवः प्रसिद्धेरित्यत आह—॥ॐ सुषुप्त्युत्क्रान्त्योर्भेदेन ॐ ॥ ४२ ॥ 'प्राज्ञेनाऽऽत्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नाऽन्तरम्'[2] 'प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जद्याती'[3]ति भेदव्यपदेशान्न जीवः, पर एवासङ्गः । स्वप्नादिद्रष्टृत्वं च सर्वज्ञत्वात्तस्यैव युज्यते ॥ ४२ ॥ सुषुप्त्यधिकरणम् ॥ १३ ॥

'एष नित्यो महिमा ब्राह्मणस्ये'[4]ति ब्राह्मणस्यापि नित्यमहिमा प्रतीयते । स च ब्राह्मणः 'स वा एष महानज आत्मे'[5]त्यजशब्दाद्विरिञ्च इति प्राप्तम् । देवानां च विद्याकर्मणोः पदप्राप्तिः सूचिता तदुपर्यपीति । अतो ब्रवीति ॥ ॐ पत्यादि शब्देभ्यः ॐ ॥ ४३ ॥ 'सर्वस्याधिपतिः सर्वस्येशानः . . . . स वा एष नेति नेती'[6]त्यादि शब्देभ्यो नित्यमहिमा विष्णुरेव । 'उतामृतत्वस्येशानो यदन्नेनातिरोहति'[7] 'सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि'[8] 'स योऽतोऽश्रुत'[9] इत्यादि श्रुतिभ्यस्तस्यैव हि ते शब्दाः ॥ ४३ ॥ ब्राह्मणाधिकरणम् ॥ १४ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते प्रथमाध्यायस्य तृतीयः पादः ॥

---

1 ६-३-१५. बृ. उ. 2 ६-३-२१ बृ. उ. 3 ६-३-३५. बृ.उ.
4 ६-४-२२. बृ.उ. 5 ६-४-२४. बृ.उ. 6 ६-४-२१. बृ.उ.
7 ३-१२. तै.आ. 8 १-१६४-३६. ऋ.सं. 9 ३-२-४. ऐ.आ.

SGDF
Sri Gangeshwari Digital Foundation

ॐ॥श्रुतिलिङ्गादिभिरन्यत्रैव प्रसिद्धानामपि शब्दानां सामस्त्येन[1] विशेषहेतुभिर्विष्णावेव प्रवृत्तिं दर्शयत्यस्मिन्पादे ॥ॐ **आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॐ ॥१॥** 'तत्तु समन्वया'[2]दिति सर्वशब्दानां परमेश्वरे समन्वय उक्तः। तन्न युज्यते। यतो'ऽव्यक्तात्पुरुषः पर'[3] इति साङ्ख्यानुमानपरिकल्पितं प्रधानमप्येकेषां शाखिनामुच्यत इति चेन्न तस्यैव पारतन्त्र्याच्छरीररूपकेऽव्यक्ते विन्यस्तस्य परमात्मन एवाव्यक्त शब्देन गृहीतेः। कप्रत्ययः कुत्सने। परमात्मन एवाव्यक्तशब्दः। तत्तन्त्रत्वेन तच्छरीररूपत्वादितरस्याप्यव्यक्तशब्दः। 'तुच्छयेनाभ्वपिहितं यदासीदि'[4]ति दर्शयति च। 'अव्यक्तमचलं शान्तं निष्कलं निष्क्रियं परम्। यो वेद हरिमात्मानं स भयादनुमुच्यत' इति पिप्पलादशाखायाम्। 'अक्षरं ब्रह्म परममि'त्युक्त्वा 'अव्यक्तोऽक्षर इत्युक्त(च्यत)'[5] इति वचनाच्च ॥१॥ ॐ **सूक्ष्मं तु तदर्हत्वात् ॐ ॥ २ ॥** सूक्ष्ममेवाव्यक्तशब्देनोच्यते। तद्ध्यव्यक्ततामर्हति। सूक्ष्मत्वं च मुख्यं तस्यैव। 'यत्तत्सूक्ष्मं परमं वेदितव्यं नित्यं पदं वैष्णवं ह्यामनन्ति। यत्तल्लोका न विदुर्लोकसारं विन्दन्त्येतत्कवयो योगनिष्ठा' इति च पिप्पलादशाखायाम्। मुख्ये च विद्यमाने नामुख्यं युक्तम् ॥ २ ॥ ॐ **तदधीनत्वादर्थवत् ॐ ॥३॥** तदधीनत्वाच्चाव्यक्तत्वादीनां तस्यैवाव्यक्तत्वपरावरत्वादिकमर्थवत्। 'यदधीनो गुणो यस्य तद्गुणी सोऽभिधीयते। यथा जीवः परात्मेति यथा राजा जयीत्यपी'ति च स्कान्दे ॥ ३ ॥ ॐ **ज्ञेयत्वावचनाच्च ॐ॥ ॥ ४ ॥** अन्यस्य न वाच्यत्वं युज्यते ॥ ४ ॥ ॐ **वदतीति**

---

[1] एतदन्तं कचित् नास्ति. [2] १-१-४. ब्र.सू. [3] १-३-११. क.उ.
[4] १०-१२९-३. ऋ.सं. [5] ८-३, २१. भ.गी.

SGDF
Sri Gargeshwari Digital Foundation

चेन्न प्राज्ञो हि ॐ ॥ ५ ॥ 'महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत'[1] इति ज्ञेयत्वं वदतीति चेन्न । प्राज्ञः परमात्मा हि तत्रोच्यते ॥ 'अणोरणीयान्महतो महीयानि'[2]ति तस्यैव हि महतो महत्वम् । सर्वस्मात्परस्य महतोऽपि परत्वं युज्यते ॥ ५ ॥ ॥ **ॐ प्रकरणात् ॐ ॥६॥** 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमि'[3]ति तस्य ह्येतत्प्रकरणम् ॥ ६ ॥ **ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ ॥७॥** त्रयाणामेव पितृसौमनस्य-स्वर्ग्याग्निपरमात्मनां प्रश्न उपन्यासश्च । 'अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयत' इति वचनान्न विरोधः ॥ ७ ॥ **ॐ महद्वच्च ॐ ॥ ८ ॥** यथा महच्छब्दो महत्तत्वे प्रसिद्धोऽपि परममहत्वा-त्परमात्मन एव मुख्यः एवमितरेऽपि ॥ ८ ॥ **ॐ चमसवद-विशेषात् ॐ ॥ ९ ॥** यथा चमसशब्दोऽन्यत्र प्रसिद्धोऽपि 'इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न'[4] इति श्रुतेः शिरोवाचक(ः) एवमव्यक्तादिशब्दाः सर्वेऽन्यत्र प्रसिद्धा अपि 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती'[5]त्यादि श्रुतेः परमात्माभि-धायका एव । अविशेषाच्छ्रुतेः ॥९॥ आनुमानिकाधिकरणम् ॥१॥

'वसन्ते वसन्ते ज्योतिषा यजेते'त्यादि कर्माभिधायकस्य कर्मक्रमादिविरोधान्न युज्यत इत्यत आह— ॥ **ॐ ज्योतिरुप-क्रमात्तु तथा ह्यधीयत एके ॐ ॥ १० ॥** ज्योतिरादि कर्मवाचकत्वेन प्रसिद्धाभिधेयोऽपि स एव । 'एष इमं लोकमभ्यार्च-दि'त्युपक्रम्य 'ता वा एताः सर्वा ऋचः सर्वे वेदास्सर्वे घोषाः एकैव

---

[1] १-३-१५. क.उ. [2] १-२-२०. क.उ. [3] १-३-९. क.उ. [4] ४.२.३. बृ.उ. [5] भाल्लवेयश्रुतिः.

SGDF
Sri Gargeshwari Digital Foundation

व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यादि'[1]ति ह्यधीयत एके ॥१०॥

॥ ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॐ ॥११॥ मधुविद्यादिवत्सर्वशब्दार्थत्वेन परस्य कल्पनोपदेशाच्च न कर्मक्रमादि विरोधः ॥ ११ ॥ ज्योतिरुपक्रमाधिकरणम् ॥ २ ॥

॥ ॐ न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॐ ॥ १२ ॥ 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित'[2] इत्यादिषु बहुसङ्ख्योपसङ्ग्रहेऽपि न विरोधः। तस्यैवाकाशादिषु नानाभावात्तदतिरिक्तस्वरूपत्वाच्च ॥ १२ ॥ पञ्च जनानाह—

॥ ॐ प्राणादयो वाक्यशेषात् ॐ ॥ १३ ॥ 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन' इति वाक्यशेषात् ॥ १३ ॥ ॐ ज्योतिषैकेषामसत्यन्ने ॐ ॥ ॥१४॥ 'तद्देवा ज्योतिषां ज्योति'[3]रित्यनेन काण्वानां पञ्चकम्॥१४॥ नसङ्ख्योपसङ्ग्रहाधिकरणम् ॥ ३ ॥

अवान्तरकारणत्वेनापि स एवोच्यत इति वक्ति ॥ ॐ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॐ ॥ ॥ १५ ॥ आकाशादिष्ववान्तरकारणत्वेन स एव स्थितः। यथाव्यपदिष्टस्यैव परस्य 'य आकाशे तिष्ठन्नि'[4]त्यादिना आकाशादिषूक्तेः ॥ ॥ १५ ॥ आकाशाधिकरणम् ॥ ४ ॥

सर्वशब्दानां परमात्मवाचकत्वे कथमन्यत्र व्यवहार इत्यतो ब्रवीति ॥ ॐ समाकर्षात् ॐ ॥ १६ ॥ परमात्मवाचिनः शब्दा अन्यत्र समाकृष्य व्यवह्रियन्ते। 'परस्य वाचकाश्शब्दाः

---

[1] २-२-२. ऐ.आ. [2] ६-४-१७. बृ.उ. [3] काण्वपाठः [4] अथ यां जीवो जहाति. पा.

SGDF
Sri Gargeshwari Digital Foundation

समाकृष्येतरेष्वपि । व्यवह्रियन्ते सततं लोकवेदानुसारत' इति पाद्मे ॥ ॥ १६ ॥ तर्हि कथं तेषां शब्दानां जगति प्रसिद्धिः ? ॥ ॐ **जगद्वाचित्वात् ॐ ॥ १७ ॥** जगति व्यवहारो लोकस्य । न तु परमात्मनि तथा । अतो जगति प्रसिद्धिः शब्दानाम् ॥१७॥ ॥ ॐ **जीवमुख्यप्राणलिङ्गादिति चेत्त(न्न त)द्व्याख्यातम् ॐ ॥१८॥** तदधीनत्वात्तच्छब्दवाच्यत्वमित्युक्तम् । तज्जीवमुख्यप्राणयोर्लिङ्गम् । 'अस्य यदैकां शाखां जीवो जहात्यथ[1] सा शुष्यति'[2] 'वायुना हि लोका नेनीयन्त' इत्यादि श्रुतिभ्य इति चेन्न । उपासात्रैविध्यादिति व्याख्यातत्वात् ॥ १८ ॥ ॐ **अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॐ ॥१९॥** परमात्मज्ञानार्थं कर्मादिकमपि वदतीति जैमिनिः । 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । तस्मै स होवाच द्वे विद्ये वेदितव्ये'[3] 'कथं नु भगवः स आदेशो भवतीति । यथा सौम्यैकेन मृत्पिण्डेने'[4]त्यादिप्रश्नव्याख्यानाभ्याम् । एवमपि चैके पठन्ति 'यस्तन्न वेद किमृचा करिष्यती'[5]ति ॥१९॥ ॐ **वाक्यान्वयात् ॐ ॥ २० ॥** वाक्यस्याप्येवमन्वयो युज्यते पृथक्पृथक्स्थितस्यापि परमात्मना ॥ २० ॥ ॐ **प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॐ ॥ २१ ॥** 'नान्यः पन्था अयनाय विद्यत'[6] इति प्रतिज्ञासिद्धेर्लिङ्गत्वेन कर्मादिकमुच्यत इत्याश्मरथ्यः । यस्मादेवमनित्यफलमन्यत्तस्मान्नान्यः पन्था इति ॥२१॥ ॐ **उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ॐ ॥ २२ ॥** उत्क्रमिष्यतो मुमुक्षोः

---

[1] अथ यां जीवो जहाति. पा. [2] ६-११-२. छां.उ. [3] १-१३-४. मुं.उ.
[4] ६-१-३-४. छां.उ. [5] १-१६४-३९. ऋ.सं. [6] ३-१२-७. तै.आ.

SGDF
Sri Gargeshwari Digital Foundation

कर्मादिना भाव्यं (साधन) साधनत्वेन अतस्तद्वक्तीत्यौडुलोमिर्मन्यते ॥ ॥ २२ ॥ **ॐ अवस्थितेरिति काशकृत्स्नः ॐ ॥ २३ ॥** सर्वं परमात्मन्यवस्थितमिति वक्तुं तद्वचनमिति काशकृत्स्नः । 'कृष्णद्वैपायनमतादेकदेशविदः परे । वदन्ति ते यथाप्रज्ञं न विरोधः कथञ्चने'ति पाद्मे ॥ २३ ॥ समाकर्षाधिकरणम् ॥ ५ ॥

स्त्रीशब्दा अपि तस्मिन्नेवेत्याह—**॥ॐ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॐ ॥ २४ ॥** 'हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति यथा नद्यस्स्यन्दमानाः समुद्रायणाः समुद्रमभिविशन्त्येवमेवैतानि नामानि सर्वाणि पुरुषमभिविशन्ती'ति प्रतिज्ञादृष्टान्तानुपरोधात्प्रकृतिशब्दवाच्योऽपि स एव ॥२४॥ **ॐ अभिध्योपदेशाच्च ॐ ॥ २५ ॥** 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'[1] 'महामायेत्यविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यत' इति वचनात्तदभिध्यैव (च) प्रकृतिशब्देनोच्यते । 'सोऽभिध्या स जूतिः स प्रज्ञा स आनन्द' इति श्रुतेरभिध्या च स्वरूपमेव । 'ध्यायति ध्यानरूपोऽसौ सुखी सुखमतीव च । परमैश्वर्ययोगेन विरुद्धार्थतयेष्यत' इति ब्रह्माण्डे ॥२५॥ **॥ ॐ साक्षाच्चोभयाम्नानात् ॐ ॥ २६ ॥** 'एष ह्येष पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादिरनादिरनन्तोऽन्तः परमः पराद्विश्वरूप' इति पैङ्गिश्रुतौ साक्षादेव प्रकृतिपुरुषत्वाम्नानात् ॥ २६ ॥ **ॐ आत्मकृतेः परिणामात् ॐ ॥ २७ ॥** प्रकर्षेण करोतीति प्रकृतिरिति योगाच्च । प्रकृतावनुप्रविश्य तां परिणाम्य तत्परिणामेषु स्थित्वाऽऽत्मनो बहुधा-

---

[1] ४-१०. श्वे.उ.

SGDF
Sri Gargeshwari Digital Foundation

करणात् । 'अथ हैष आत्मा प्रकृतिमनुप्रविश्याऽत्मानं बहुधा चकार । तस्मात्प्रकृतिस्तस्मात्प्रकृतिरित्याचक्षत' इति भाल्लवेयश्रुतिः । 'अविकारोऽपि परमः प्रकृतिं तु विकारिणीम् । अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयत'॥ इति नारदीये । न चान्यत्कल्प्यम् , अप्रामाणिकत्वात्[1] ॥ २७ ॥ **ॐ योनिश्च हि गीयते ॐ ॥ २७ ॥** अव्यवधानेनोत्पत्तिद्वारत्वं (च) प्रकृतित्वम् । तच्चास्यैव हि गीयते 'यद्भूतयोनिं परिपश्यन्ति धीरा'[2] इति । 'व्यवधानेन सूतिस्तु पुंस्त्वं विद्वद्भिरुच्यते । सूतिरव्यवधानेन प्रकृतित्वमिति स्थितिः ॥ उभयात्मकसूतित्वाद्वासुदेवः परः पुमान् । प्रकृतिः पुरुषश्चेति शब्दैरेकोऽभिधीयत' इति ब्रह्माण्डे ॥ २८ ॥ प्रकृत्यधिकरणम् ॥ ६ ॥

॥ॐ एतेन सर्वे व्याख्याता व्याख्याताः ॐ॥

॥ २९ ॥ एतेन सर्वे शून्यादिशब्दा अपि व्याख्याताः । 'एष ह्येव शून्य एष ह्येव तुच्छ एष ह्येवाभाव एष ह्येवाव्यक्तोऽदृश्योऽचिन्त्यो निर्गुणश्चे'ति महोपनिषदि । 'शमूनं कुरुते विष्णुरदृश्यः सन्परः स्वयम् । तस्माच्छून्य इति प्रोक्तस्तोदनात्तुच्छ उच्यते ॥ नैष भावयितुं योग्यः केनचित्पुरुषोत्तमः । अतोऽभावं वदन्त्येनं नाश्यत्वान्नाश इत्यपि ॥ सर्वस्य तदधीनत्वात्तत्तच्छब्दाभिधेयता । अन्येषां व्यवहारार्थमिष्यते व्यवहर्तृभि'रिति महाकौर्मे । एतेन तदधीनत्वाद्युक्तयुक्तिसमुदायेन । 'अवधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः । द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णय' ॥ इति वाराहसंहितायाम् ॥२९॥ एतेन सर्वेव्याख्याताधिकरणम्[3] ॥ ७ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते प्रथमाध्यायस्य चतुर्थः पादः ॥ समन्वयाध्यायस्समाप्तः ॥

---

[1] अप्रमाणत्वात्. पा. [2] १-१-६. मुं.उ. [3] सर्वेव्याख्यानाधिकरणं. पा.

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ द्वितीयाध्यायः ॥

श्रीगुरुभ्यो नमः । हरिः ॐ ॥ उक्तेऽर्थेऽविरोधं दर्शयत्यनेनाध्यायेन । प्रथमपादे युक्त्यविरोधम् । प्रथमतः स्मृत्यविरोधं दर्शयति ॥ ॐ **स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्** ॐ ॥ १ ॥ सर्वज्ञा हि रुद्रादयः । अतस्तेषां वचनविरोधेऽप्रामाण्यमेव स्यादिति चेन्न । अन्यस्मृतीनां विष्ण्वादिभिर्नितरां सर्वज्ञैरेव कृतत्वाच्छ्रुतेराधिक्यं (च) सिद्ध्यति ॥ १ ॥ ॐ **इतरेषां चानुपलब्धेः** ॐ ॥ २ ॥ इतरेषां तासु स्मृतिषूक्तानां फलादीनां प्रत्यक्षतोऽनुपलब्धेरप्रामाण्यं तासां युक्तम् । चशब्देन भागोपलब्धिरङ्गीकृता ॥२॥ ॐ **एतेन योगः प्रत्युक्तः** ॐ ॥ ३ ॥ योगफलं प्रत्यक्षत उपलभ्यत इति न मन्तव्यम् । उक्ताभ्यासे तत्काल एव फलादृष्टेः ॥ ३ ॥ स्मृत्यधिकरणम् ॥ १ ॥

॥ ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥४॥ नैवं श्रुतेस्तदनुसारिस्मृतेश्च तदुक्तानुपलब्धेरप्रामाण्यम्[1] । विलक्षणत्वात्--नित्यत्वात्तदनुसारित्वाच्च । न हि नित्ये दोषाः कल्प्याः । स्वतश्च प्रामाण्यम् । अन्यथाऽनवस्थितेः । 'न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्वेदा ह्येवैनं वेदयन्ती'ति भाल्लवेयश्रुतेश्च । नित्यत्वं च शब्दादेव प्रतीयते 'वाचा विरूप नित्यये'[2]त्यादेः । 'अनादिनिधना नित्ये'ति च स्मृतिः ॥ ४ ॥ ॐ **दृश्यते तु** ॐ ॥५॥ अधिकारिणां फलम् । भविष्यत्पुराणे च—'ऋग्यजुः

---

[1] वाच्यम्. पा. [2] ८·६४-६. ऋ.सं.

SGDF
Sri Gangeshwari Digital Foundation

सामाथर्वाश्च मूलरामायणं तथा। भारतं पञ्चरात्रं च वेदा इत्येव शब्दिताः ॥ पुराणानि च यानीह वैष्णवानि विदो विदुः। स्वतः प्रामाण्यमेतेषां नात्र किञ्चिद्विचार्यते॥ यत्तेषूक्तं न दृश्येत पूर्वकर्मात्र कारणम्। नाप्रामाण्यं भवेत्तेषां दृश्यते ह्यधिकारतः॥ इतः प्रामाण्यमन्येषां न स्वतस्तु कथञ्चन। अदृश्योक्तौ ततस्तेषामप्रामाण्यं न संशय' इति ॥ ५ ॥ नविलक्षणत्वाधिकरणम्[1] ॥ २ ॥

'मृदब्रवीत्'[2] 'आपोऽब्रुवन्नि'[2]त्यादिवचनाद्युक्तिविरुद्धो वेद इत्यतोऽब्रवीत्—॥ **ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॐ** ॥६॥ मृदाद्यभिमानिदेवता तत्र व्यपदिश्यते। तासां चेतरेभ्यो विशिष्टं सामर्थ्यमनुगतिश्च सर्वत्र। अतस्तासां सर्वमुक्तं युज्यते ॥ ६ ॥ **ॐ दृश्यते च ॐ** ॥ ७ ॥ तासां सामर्थ्यं महद्भिः। भविष्यत्पुराणे च 'पृथिव्याद्यभिमानिन्यो देवताः प्रथितौजसः। अचिन्त्याः शक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः। ताश्च सर्वगता नित्यं वासुदेवैकसंश्रया' इति ॥ ७ ॥ अभिमान्यधिकरणम् ॥ ३ ॥

'असदेवेदमग्र आसीत्'[3] 'असतः सदजायते'[4]त्यादिनाऽसतः कारणत्वोक्तेर्विरोध इत्यतो वक्ति—॥**ॐ असदिति चेन्न प्रतिषेधमात्रत्वात्** ॥८॥ प्रतिषेधमात्रत्वान्नासतः कारणत्वं युक्तम्। असतः कारणत्वाद्युक्तिविरुद्धं वेदवाक्यमित्येतदत्र निषिध्यते। सर्वशब्दानां ब्रह्मणि समन्वयेऽपि 'तदधीनत्वादर्थवदि'[5]त्यादिनाऽमुख्यत्वेनान्यस्यापि वाच्यत्वेनाङ्गीकारादसतः प्राप्तिः। तथा(च) श्रुतिप्राप्तमेवासन्मतमत्र निषिध्यते। समयस्योपरि निषेधात्। अर्था-

---

[1] श्रुतिनित्यत्वाधिकरणम्. पा. [2] ६-१-३. श.ब्रा. [3] ६-२-१. छां.उ.
[4] १०-७२-३. ऋ.सं. [5] १-४-३. ब्र.सू.

SGDF
Sri Gargeshwari Digital Foundation

युक्तिविरोधो(ऽपि) निराक्रियते ॥ ८ ॥ **ॐ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॐ ॥ ९ ॥** असत उत्पत्तौ प्रलयेऽपि सर्वासत्वमेव स्यात् ॥ ९ ॥ **ॐ न तु दृष्टान्तभावात् ॐ ॥ १० ॥** प्रलये सर्वासत्वं भावे दृष्टान्तभावादेव न युज्यते । सत उत्पत्तिः, सशेषविनाशश्च हि लोके दृष्टः ॥ १० ॥ **ॐ स्वपक्षदोषाच्च ॐ ॥ ११ ॥** दृष्टान्ताभावादेव ॥११॥ **ॐ तर्काप्रतिष्ठानादन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॐ ॥ १२ ॥** एतावानेव तर्क इति प्रतिष्ठापकप्रमाणाभावादुक्तादन्यथाऽनुमेयमिति चेन्न, एवं सति प्रमाणसिद्धेऽपि मोक्षेऽन्यथाऽनुमेयत्वादनिर्मोक्षप्रसङ्गः । अतो यावत्प्रमाणसिद्धं तावदेवाङ्गीकर्तव्यम् । नातोऽन्यच्छङ्क्यम् । 'यावदेव प्रमाणेन सिद्धं तावदहापयन् । स्वीकुर्यान्नैव चान्यत्र शङ्क्यं मानमृते क्वचिदि'ति वामने ॥ १२ ॥ **ॐ एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः ॐ ॥ १३ ॥** एतेन दृष्टान्तभावेनाभावेन चावशिष्टा अप्यपरिग्रहा विरुद्धसिद्धान्ता अकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृकत्वादयोऽपि । 'अकस्माद्धीदमाविरासीदकस्मात्तिष्ठत्यकस्माल्लयमभ्युपैति' 'प्रधानादिदमुत्पन्नं प्रधानमधितिष्ठति । प्रधाने लयमभ्येति न ह्यन्यत्कारणं मतम्' । 'जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः । जीवे तु लयमृच्छन्ति न जीवात्कारणं परमि'त्यादि श्रुतिप्राप्ता निराकृताः । यथा दुःखादिषु जीवस्यास्वातन्त्र्यमेवमन्येष्वपीति दृष्टान्तः । श्रुतिगतिस्तु ब्रह्मवाचकत्वेन प्रदर्शिता । यत्रान्यवाचकत्वेऽप्यविरोधस्तत्रान्यदप्यमुख्यतयोच्यते, यत्र विरोधस्तत्र ब्रह्मैवोच्यत इति नियमः ॥ १३ ॥ असदधिकरणम् ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥

॥ १४ ॥ 'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ती'[1]ति मुक्तजीवस्य परापत्तिरुच्यते । अतस्तयोरविभागः । अतः पूर्वमपि स एव । न ह्यन्यस्यान्यत्वं युज्यत इति चेन्न । स्याल्लोकवत् । यथा लोके उदके उदकान्तरस्यैकीभावव्यवहारेऽप्यन्तर्भेदोऽस्त्येव, एवं स्यादत्रापि । तथा च श्रुतिः 'यथोदके शुद्धे शुद्धमासिक्तं तादृगेव भवती'[2]ति । स्कान्दे च—'उदकं तूदके सिक्तं मिश्रमेव यथा भवेत् । न चैतदेव भवति यतो वृद्धिः प्रदृश्यते ॥ एवमेव हि जीवोऽपि तादात्म्यं परमात्मना । प्राप्तोऽपि नासौ भवति स्वातन्त्र्यादिविशेषणादि'ति । 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं स भवान् केवलो हर' इति च । 'न ते महित्वमन्वश्नुवन्ति'[3] 'न ते विष्णो जायमानो न जात'[4] इत्यादि च । फलत्वेऽपि युक्तिविरोधेऽन्तर्भावादत्रोक्तम् ॥ १४ ॥ भोक्त्रधिकरणम् ॥ ५ ॥

॥ ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥

॥ १५ ॥ स्वतन्त्रबहुसाधना सृष्टिर्लोके दृष्टा । नैवं ब्रह्मणः । (किन्तु) स्वरूपसामर्थ्यादेव तस्य सृष्टिः । 'किंस्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथाऽऽसीदि'[5]ति ह्याक्षेपः । अधिष्ठानाद्यनुक्तेः । आदिशब्दाद्युक्तिभिश्च । 'परतन्त्रो ह्यपेक्षेत स्वतन्त्रः किमपेक्षते । साधनानां साधनत्वं यतः किं तस्य साधनै'रित्यादिभिः ॥ १५ ॥

॥ ॐ भावे चोपलब्धेः ॐ ॥ १६ ॥ स्वतन्त्रसाधनभावे प्रमाणैरुपलभ्येत । 'अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन । अतो वेदत्वमेतेषां यतस्ते सर्ववेदका' इति स्कान्दे ॥ १६ ॥ 'अद्धयः

---

[1] ३-२-७. मुं.उ. [2] ४-१५. क.उ. [3] ७.९९.१. ऋ.सं. [4] ७.९९.२. ऋ.सं. [5] १०.८१.२. ऋ.सं.

SGDF
Sri Gargeshwari Digital Foundation

सम्भूतः पृथिव्यै रसाच्चे'[1]त्यादिना साधनान्तरप्रतीतेः कथमनुपलब्धिरित्यत आह—॥ ॐ सत्वाच्चावरस्य ॐ ॥ १७ ॥ अवरस्य तदधीनस्य साधनस्य सत्वात् । 'काल आसीत्पुरुष आसीत्परम आसीत्तद्यदासीत्तदावृतमासीत्तदधीनमासीदथ ह्येक एव परम आसीद्यस्यैतदासीन्न ह्येतदासीदि'ति काषायणश्रुतिः ॥ १७ ॥

॥ ॐ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॐ ॥ १८ ॥ 'नासदासीन्नो सदासी'[2]दिति सर्वस्यासत्त्वव्यपदेशान्नेति चेन्न । अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण हि तदुच्यते । 'तम आसीदि'[3]ति वाक्यशेषात् । न चान्यत्र प्रमाणमस्ति । 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः'[4] । 'अनाद्यनन्तं जगदेतदीदृक् प्रवर्तते नात्र विचार्यमस्ति । न चान्यथा क्वापि च कस्य चेदमभूत्पुरा नापि तथा भविष्यत्' । 'असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्'[5] । 'असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि' 'यस्सत्यरूपं जगदेतदीदृक्सृष्ट्वा त्वभूत्सत्यकर्मा महात्मा' । 'अथैनमाहुस्सत्यकर्मेति, सत्यं ह्येवेदं विश्वमसौ सृजते । अथैनमाहुर्नित्यकर्मेति नित्यं ह्येवासौ कुरुते' । 'यच्चिकेत सत्यमित्तन्न मोघमि'[6]त्यादि श्रुतिस्मृतिभ्यः । 'परस्परविरोधे तु वाक्यानां यत्र युक्तता । तथैवार्थः परिज्ञेयो नावाक्या युक्तिरिष्यत' इति बृहत्संहितायाम् । 'विरुद्धवत्प्रतीयन्त आगमा यत्र वै मिथः । तत्र दृष्टानुसारेण तेषामर्थोऽन्ववेक्ष्यत' इति च। 'ईशोऽनीशो जगन्मिथ्या न पूज्यो गुरुरित्यपि । इत्यादिवद्विरुद्धानि वचनान्यथ युक्तयः । प्रमाणैर्बहुभिर्ज्ञेया आभासा इति वैदिकैः ॥ वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना । अन्येषां तु विरुद्धानां विप्रलम्भोऽथवा भ्रम' इति च

[1] ३-१३. तै.आ. [2] १०-१२९-१. ऋ.सं. [3] १०-१२९-३. ऋ.सं.
[4] १०-५. म.ना.उ. [5] १६-८. भ.गी. [6] १०-५५-६. ऋ.सं.

SGDF
Sri Gurgeshwari Digital Foundation

भागवततन्त्रे । 'शास्त्रार्थयुक्तोऽनुभवः प्रमाणं तूत्तमं मतम् । मध्यमं त्वागमो ज्ञेयः प्रत्यक्षमधमं स्मृतम् । प्रत्यक्षयोरागमयोर्विरोधे निश्चयाय तु । अनुमाद्या न स्वतन्त्राः प्रमाणपदवीं ययुरि'ति पुरुषोत्तमतन्त्रे ॥१८॥ **ॐ युक्तेः शब्दान्तराच्च ॐ ॥१९॥** 'साधनानां साधनत्वं यदात्माधीनमिष्यते । तदा साधनसम्पत्ति-रैश्वर्यद्योतिका भवेदि'त्यादेः साधनान्तरेण सृष्टिर्युक्ता । 'अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टावि'[1]त्यादि शब्दान्तराच्च ॥ १९ ॥ **ॐ पटवच्च ॐ ॥२०॥** साधनान्तरेण हि पटादिसृष्टिर्दृष्टा ॥२०॥ **॥ ॐ यथा प्राणादिः ॐ ॥२१॥** तच्च साधनजातं तेनानु-प्रविष्टमेव यथा शरीरेन्द्रियादिः । 'प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः । क्षोभयामास भगवान् सृष्ट्यर्थं जगतो विभुरि'ति कौर्मे ॥ २१ ॥ आरम्भणाधिकरणम् ॥ ६ ॥

जीवकर्तृत्वपक्षः श्रुतिप्राप्तो विस्तरान्निराक्रियते ॥ **ॐ इतर-व्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥२२॥** जीव-कर्तृत्वपक्षे हिताकरणमहितकरणं च न स्यात् ॥२२॥ **ॐ अधिकं तु भेदनिर्देशात् ॐ ॥ २३ ॥** न च ब्रह्मणः श्रमचिन्तादि-दोषप्राप्तिः । अधिकशक्तित्वात् । 'श्रोता मन्ता द्रष्टाऽऽदेष्टा घोष्टा विज्ञाता सर्वेषां भूतानामन्तरपुरुषः'[2] 'एष त आत्मा सर्वान्तरः'[3] 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येती'[3]त्यादिविशेष-निर्देशात् ॥ २३ ॥ **ॐ अश्मादिवच्च तदनुपपत्तिः ॐ ॥ ॥ २४ ॥** चेतनत्वेऽप्यश्मादिवदस्वतन्त्रत्वात्स्वतः कर्तृत्वानुपपत्ति-

---

[1] १-११. म.ना.उ.　[2] ३-२-४. ऐ.आ.　[3] ५-५-१. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

र्जीवस्य । 'यथा दारुमयीं योषां नरः स्थिरसमाहितः । इङ्गयत्यङ्गमङ्गानि तथा राजन्निमाः प्रजाः' इति भारते ॥ २४ ॥ ॐ **उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि** ॐ ॥ २५ ॥ जीवेन कार्योपसंहारदर्शनात्तस्य कर्तृत्वमिति चेन्न । यथा गोषु क्षीरं दृश्यमानमपि प्राणादेव जायते, 'अन्नं रसादिरूपेण प्राणः परिणयत्यसा'विति वचनात्; एवं जीवे दृश्यमानोऽपि कार्योपसंहारोऽस्वातन्त्र्यात्परकृत एव । 'य आत्मानमन्तरो यमयति'[1] । 'नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुरि'त्यादेः ॥ २५ ॥ ॐ **देवादिवदपि लोके** ॐ ॥ २६ ॥ न च कर्तुरीश्वरस्यादृष्टिविरोधः । देवादिवददृश्यत्वशक्तियोगात् । लोकेऽपि पिशाचादीनां तादृशी शक्तिर्दृष्टा, किम्वीश्वरस्य । 'न युक्तियोगाद्वाक्यानि निराकार्याण्यपि क्वचित् । विरोध एव वाक्यानां युक्तयो न तु युक्तय' इति बृहत्संहितायाम् ॥ २६ ॥ ॐ **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा** ॐ ॥ २७ ॥ अयं च दोषो जीवकर्तृत्वपक्षे । एकेनाङ्गुलिमात्रेण प्रवर्तमानोऽपि पूर्णप्रवृत्तिस्स्यात् । न च तद्युज्यते, सामर्थ्यैकदेशदर्शनात् । न चैकदेशेन, निरवयवत्वात् । 'अथ यः स जीवः स नित्यो निरवयवो ज्ञाताऽज्ञाता सुखी दुःखी शरीरेन्द्रियस्थ' इति भाल्लवेयश्रुतिः । न चोपाधिकृतोंऽशः स एवांश उपहित इति, द्वित्वापेक्षत्वात् । न चान्यत्कल्प्यम् । 'यद्धि युक्त्या विरुध्येत तदीशकृतमेव ही'ति गत्यन्तरोक्तेः ॥ २७ ॥ इतरव्यपदेशाधिकरणम् ॥ ७ ॥

॥ ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥ २८ ॥

---

[1] बृ.उ. माध्यंदिन पाठः.

SGDF
Sri Gargeshwari Digital Foundation

न चेश्वरपक्षेऽयं विरोधः । 'योऽसौ विरुद्धोऽविरुद्धो मनुरमनुरवाग्वागिन्द्रोऽनिन्द्रः प्रवृत्तिरप्रवृत्तिः स परः परमात्मे'ति पैङ्ग्यादिश्रुतेरेव । शब्दमूलत्वाच्च न युक्तिविरोधः । 'यद्वाक्योक्तं न तद्युक्तिर्विरोद्धुं शक्नुयात्क्वचित् । विरोधे वाक्ययोः क्वापि किञ्चित्साहाय्यकारणमि'ति पुरुषोत्तमतन्त्रे ॥ २८ ॥ **ॐ आत्मनि चैवं विचित्राश्च हि ॐ ॥ २९ ॥** परमात्मनो विचित्राश्च शक्तयस्सन्ति, नान्येषाम् । 'विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशाः(शः) स्युः । एको वशी सर्वभूतान्तरात्मा सर्वान्देवानेक एवानुविष्ट' इति श्वेताश्वतरश्रुतिः ॥ २९ ॥ **ॐ स्वपक्षदोषाच्च ॐ ॥३०॥** 'ये दोषा इतरत्रापि ते गुणाः परमे मताः । न दोषः परमे कश्चिद्गुणा एव निरन्तरा' इति वचनाज्जीवपक्ष एव दोषो न परपक्षे । 'अथ यस्सदोषः साञ्जनः सजनिः स जीवोऽथ यः स निर्दोषो निष्कलः सगुणः परः परमात्मे'ति काषायणश्रुतिः ॥३०॥ **ॐ सर्वोपेता च तद्दर्शनात् ॐ ॥ ३१ ॥** 'सर्वैर्युक्ता शक्तिभिर्देवता सा परेति यां प्राहुरजस्रशक्तिम् । नित्यानन्दा, नित्यरूपाऽजरा च या शाश्वताऽत्मेति च यां वदन्ती'ति च चतुर्वेदशिखायाम् ॥ अतो न केवलं विचित्रशक्तिः, किन्तु सर्वशक्तिरेव ॥३१॥ **ॐ विकरणत्वान्नेति चेत्तदुक्तम् ॐ ॥ ३२ ॥** न च करणाभावादनुपपत्तिरिति युक्तम् । 'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्'[1] ॥ 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया

[1] ३-१९. श्वे.उ.

SGDF
Sri Gargeshwari Digital Foundation

चे'[1]त्यादि श्रुतिभ्यः । 'सर्वोपेता चे'ति सामान्यपरिहारेऽपि विशेषयुक्त्यर्थं पुनराशङ्का ॥ ३२ ॥ शब्दमूलत्वाधिकरणम् ॥ ८ ॥

यत्प्रयोजनार्थं सृष्ट्यादिस्तदूनत्वान्न पूर्णतेत्यत आह—॥ ॐ **न प्रयोजनत्त्वात् ॐ ॥ ३३ ॥** 'अथैष एव परम आनन्द'[2] इत्यादिना कृतकृत्यत्वान्न प्रयोजनाय सृष्टिः । किन्तु—॥ ॐ **लोकवत्तु लीलाकैवल्यम् ॐ ॥ ३४ ॥** यथा लोके मत्तस्य सुखोद्रेकादेव नृत्तगानादिलीला न तु प्रयोजनापेक्षया, एवमेवेश्वरस्य ॥ नारायणसंहितायां च—'सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानन्दाद्यथा मत्तस्य नर्तनम् ॥ पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः । मुक्ता अप्याप्तकामाः स्युः किमु तस्याखिलात्मन' इति ॥ 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहे'[3]ति च श्रुतिः ॥३४॥ नप्रयोजनाधिकरणम् ॥ ९ ॥

सर्वकर्तृत्वे वैषम्यनैर्घृण्ये तस्येत्यतो वक्ति—॥ ॐ **वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥ ३५ ॥** कर्मापेक्षया फलदातृत्वान्न तस्य वैषम्यनैर्घृण्ये । 'पुण्येन पुण्यं लोकं नयति पापेन पापमि'[4]ति हि श्रुतिः ॥ ३५ ॥ ॐ **न कर्माविभागादिति चेन्नानादित्वात् ॐ ॥३६॥** यदपेक्षयाऽसौ फलं ददाति न तत्कर्म । 'एष ह्येवैनं साधुकर्मकारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधुकर्म कारयति तं यमधो निनीषत'[5] इति श्रुतेः कर्मणोऽपि तन्निमित्तत्वादिति चेन्न । तस्यापि पूर्वकर्म कारणमित्यनादित्वात्कर्मणः । भविष्यत्पुराणे च—'पुण्य-

[1] ६-८. श्वे.उ. [2] ६-३-३३. बृ.उ. [3] २-९. मां.उ. [4] ३-७. प्र.उ.
[5] ३-८. कौ.उ.

SGDF
Sri Gangeshwari Digital Foundation

पापादिकं विष्णुः कारयेत्पूर्वकर्मणा । अनादित्वात्कर्मणश्च न विरोधः कथञ्चने'ति ॥ ३६ ॥ **ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥ ३७ ॥** न च कर्मापेक्षत्वेनेश्वरस्यास्वातन्त्र्यम् । 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये'त्यादिना कर्मादीनां सत्त्वस्यापि तदधीनत्वात् । न च पुनर्वैषम्याद्यापातेन दोषः । तादृशवैषम्यादेरुपलभ्यमानत्वात् । 'स कारयेत्पुण्यमथापि पापं न तावता दोषवानीशिताऽपि । ईशो यतो गुणदोषादिसत्त्वे स्वयं परोऽनादिरादिः प्रजानामि'ति चतुर्वेदशिखायाम् ॥ ३७ ॥ वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

अवशिष्टैरुपसंहरति ॥ **ॐ सर्वधर्मोपपत्तेश्च ॐ ॥३८॥** 'गुणाःश्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्र शङ्का । चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीता' इति सर्वगुणोपपत्तिश्रुतेश्च[1] ॥ ३८ ॥ सर्वधर्मोपपत्त्यधिकरणम् ॥११॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पदाचार्यविरचिते द्वितीयाध्यायस्य प्रथमः पादः ॥ २ ॥ १ ॥

'इतरेषां चानुपलब्धे'[2]रिति सामान्यनिराकरणं समयानां कृतम् । विशेषतो निराकरोत्यस्मिन्पादे ।

अचेतनप्रवृत्तिमतं प्रथमतो निराकरोति ॥ **ॐ रचनानुपपत्तेश्च नानुमानम् ॐ ॥ १ ॥** अचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेर्नानुमानपरिकल्पितं प्रधानं जगत्कर्तृ । चशब्देन प्रमाणाभावं दर्शयति ॥ १ ॥ **ॐ प्रवृत्तेश्च ॐ ॥ २ ॥** चेतनस्य स्वतः प्रवृत्तिदर्शनाच्च ॥२॥ **ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ ॥ ३ ॥**

---

[1] सर्वधर्मोपपत्तेरिति. पा. [2] २-१-२. ब्र.सू.

SGDF
Sri Gargeshwari Digital Foundation

पयोऽम्बुवदचेतनस्यापि प्रवृत्तिर्युज्यत इति न युक्तम् । 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते, याश्च श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमनु'[1] 'एतेन ह वाव पयो मण्डं भवती'त्यादिना तत्रापीश्वरनिमित्तप्रवृत्तिश्रुतेः ॥ ३ ॥ ॐ **व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ ॥ ४ ॥** 'न ऋते त्वत्क्रियते किं चनार'[2] इति तद्व्यतिरेकेण कस्यापि कर्मणोऽनवस्थितेरनपेक्षितमेवाचेतनवादिमतम् ॥ ४ ॥ रचनानुपपत्त्यधिकरणम् ॥ १ ॥

सेश्वरसाङ्ख्यमतं निराकरोति । यथा पृथिव्या एव पर्जन्यानुगृहीतं तृणादिकमुत्पद्यते, एवं प्रधानादीश्वरानुगृहीतं जगदित्यतो ब्रवीति ॥ **ॐ अन्यत्राभावाच्च न तृणादिवत् ॐ ॥५॥** 'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' 'ब्रह्मण्येवेदमाविरासीद्ब्रह्मणि स्थितं ब्रह्मणि (न्)लयमभ्युपैति ब्रह्मैवाधस्ताद्ब्रह्मैवोपरिष्टाद्ब्रह्म मध्यतो ब्रह्म सर्वतो' 'ब्रह्मैवेदं सर्वमि'[3]त्यादिश्रुतिभ्योऽन्यत्र जगतोऽभावात्तृणादीनां पर्जन्यवन्नानुग्राहकत्वमात्रमीश्वरस्य । 'स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् । अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रिकृदि'ति भागवते । द्रव्यं कर्म च कालश्चेत्यादि च । चशब्देन प्रकृतिसत्तादिप्रदत्वं चाङ्गीकृतम् ॥५॥ अन्यत्राभावाधिकरणम् ॥ २ ॥

लोकायतिकपक्षं निराकरोति— ॥ **ॐ अभ्युपगमेऽप्यर्थाभावात् ॐ ॥ ६ ॥** यस्य धर्माधर्मौ न स्तः तत्सिद्धान्ते किं प्रयोजनम् । अतः स्वव्याहतेरेवोपेक्ष्यः ॥ ६ ॥ अभ्युपगमाधिकरणम् ॥ ३ ॥

---

[1] ५-८-९. बृ.उ. [2] १०-११२-९. ऋ.सं. [3] ४-५-१. बृ.उ.

SGDF
Sri Gargeshwari Digital Foundation

पुरुषोपसर्जनप्रकृतिकर्तृत्ववादमपाकरोति—॥ **ॐ पुरुषाश्मवदिति चेत्तथाऽपि ॐ ॥ ७ ॥** यथा चेतनसम्बन्धादचेतनमेव शरीरमश्मादिकमादाय गच्छति, एवमचेतनाऽपि प्रकृतिः पुरुषसम्बन्धात्प्रवर्तत इति चेन्न । 'न ऋते त्वत्क्रियत' इति तत्रापि तथात्वे दृष्टान्ताभावात् ॥ ७ ॥ **ॐ अङ्गित्वानुपपत्तेः ॐ ॥ ॥ ८ ॥** शरीरप्रवृत्तौ पुरुषस्याङ्गित्वात् । 'अङ्गमङ्गी समादाय यथाकार्यं करोत्यसा'वित्यङ्गित्वव्यवहरोऽनुपपन्नः ॥ ८ ॥ पुरुषाश्माधिकरणम् ॥ ४ ॥

प्रकृत्युपसर्जनपुरुषकर्तृत्ववादमपाकरोति—॥**ॐ अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॐ ॥९॥** शरीरसम्बन्धात्पुरुषः प्रवर्तत इत्यङ्गीकारेऽपि स्वतस्तस्यासामर्थ्याच्छरीरसम्बन्ध एवायुक्तः ॥९॥ **ॐ विप्रतिषेधाच्चासमञ्जसम् ॐ ॥१०॥** सकलश्रुतिस्मृतियुक्तिविरुद्धत्वाच्चानीश्वरमतमसमञ्जसम् । 'श्रुतयः स्मृतयश्चैव युक्तयश्चेश्वरं परम्। वदन्ति तद्विरुद्धं यो वदेत्तस्मान्न चाधम' इति पाद्मे ॥ १० ॥ अन्यथानुमित्यधिकरणम् ॥ ५ ॥

परमाण्वारम्भवादमपाकरोति—॥**ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ ॥११॥** महत्त्वाद्दीर्घत्वाच्च यथा कार्यमुत्पद्यते, एवं ह्रस्वत्वात्पारिमाण्डल्याच्चोत्पद्येत । वाशब्दादन्यथैतयोरपि न स्यात्, विशेषकारणाभावात् ॥११॥ **ॐ उभयथाऽपि न कर्मातस्तदभावः ॐ ॥ १२ ॥** ईश्वरेच्छाया नित्यत्वे तद्भावेऽपि परमाणुकर्माभावान्नेदानीमपि (तत्) स्यात् । अनित्यत्वे तत्कारणाभावात् । अतः परमाणुचेष्टाभावात्तत्कार्याभावः । वैदिके-

SGDF
Sri Gangeshwari Digital Foundation

श्वरस्य तु वेदेनैव सर्वशक्तित्वोक्तेः सर्वमुपपद्यते । स्वत एव काले विशेषा[1]ङ्गीकृतेश्च ॥१२॥ **ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॐ ॥१३॥** कार्यकारणादीनां समवायसम्बन्धाङ्गीकारात्तस्य च भिन्नत्वसाम्यात्समवायान्तरापेक्षायामनवस्थितेः(तिः) । न च तत्प्रमाणम् । प्रथमसम्बन्धासिद्ध्यैव च तदसिद्धिः स्वनिर्वाहकत्वे समवाय एव न स्यात् ॥ १३ ॥ **ॐ नित्यमेव च भावात् ॐ ॥ १४ ॥** नित्यत्वाच्च परमाणूनां समवायस्य च तस्यैव जनित्वाङ्गीकारान्नित्यमेव कार्यं स्यात् । अन्यथा न कदाचित् ॥ १४ ॥ **॥ ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ ॥१५॥** रूपादिमत्त्वाच्च परमाणूनामनित्यत्वम् । तथा दृष्टत्वाल्लोके ॥ १५ ॥ **॥ ॐ उभयथा च दोषात् ॐ ॥ १६ ॥** नित्यत्वे परमाणूनां तद्वत्सर्वनित्यत्वं स्यात् । विशेषप्रमाणाभावात् । अनित्यत्वे कारणाभावात्तदुत्पत्त्यभावः ॥ १६ ॥ **ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ ॥ १७ ॥** श्रुतिस्मृत्यपरिगृहीतत्वाच्चातिशयेनानपेक्ष(क्ष्य)ता । 'आन्वीक्षकीं तर्कविद्यामनुरक्तो निरर्थकाम्' इति(च) मोक्षधर्मे ॥ १७ ॥ वैशेषिकाधिकरणम् ॥ ६ ॥

परमाणुपुञ्जवादिमतं निराकरोति—**॥ ॐ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॐ ॥ १८ ॥** समुदायस्यैकहेतुकत्वं न युज्यते । उभयहेतुकेऽप्यन्योऽन्याश्रयात्तदप्राप्तिः । अन्यथा सर्वदा समुदायसत्वं[2] स्यात् ॥१८॥ **ॐ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॐ॥१९॥** सर्वदा विद्यमानोऽपि

---

[1] विभेद. पा. [2] समुदायत्वं. पा.

SGDF
Sri Gangeshwari Digital Foundation

समुदायः परस्परापेक्षया व्यवह्रियत इति चेन्न । एकं कार्यमुत्पाद्य तस्य विनिष्टत्वात्परस्परप्रत्ययस्तदपेक्षया व्यवहार इति न युज्यते । कारणे सति कार्यं भवत्येवेति हि तस्य नियमः ॥ १९ ॥ ॐ **उत्तरोत्पादे च पूर्वनिरोधात्** ॐ ॥ २० ॥ कार्योत्पत्तावेव कारणस्य विनाशाच्च न विशेषकार्योत्पत्तिः ॥२०॥ ॐ **असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा** ॐ ॥ २१ ॥ कारणे विनष्टे कार्यमुत्पद्यते चेत्तत्कार्यमिति प्रतिज्ञाहानिः । तत्काले कारणमस्ति चेद्विनाशकारणाभावाद्यौगपद्यं सर्वकार्याणाम् ॥ २१ ॥ ॥ॐ **प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात्** ॐ ॥ २२ ॥ कारणे सति कार्यं भवत्येवेति नियमान्निस्सन्तानः ससन्तानश्च विनाशो न युज्यते ॥२२॥ ॐ **उभयथा च दोषात्** ॐ ॥ २३ ॥ कारणे सति कार्यं भवत्येवेति नियमे सर्वदा कार्यभावान्न कार्यकारणविशेषः । अनियमे कार्यानुत्पत्तिः ॥ २३ ॥ ॥ ॐ **आकाशे चाविशेषात्** ॐ ॥ २४ ॥ दीपादिषु विशेषदर्शनात्क्षणिकत्वेनान्यत्र क्षणिकत्वमनुमीयते चेदाकाशादिष्वविशेषदर्शनादन्यत्रापि तदनुमीयेत ॥ २४ ॥ ॐ **अनुस्मृतेश्च** ॐ ॥२५॥ तदेवेदमिति प्रत्यभिज्ञानाच्च । प्रत्यभिज्ञाया भ्रान्तित्वे विशेषदर्शनस्यापि भ्रान्तित्वम् ॥ २५ ॥ समुदायाधिकरणम् ॥ ७ ॥

शून्यवादमपाकरोति— ॥ॐ **नासतोऽदृष्टत्वात्** ॐ ॥ ॥ २६ ॥ अदृष्टत्वादसतः कारणत्वं न युज्यते ॥२६॥ ॐ **उदासीनानामपि चैवं सिद्धिः** ॐ ॥ २७ ॥ असतः कारणत्वे उदासीनानां हेयोपादेयबुद्धिवर्जितानां खपुष्पादीनामपि सकाशात्कार्य-

SGDF
Sri Gargeshwari Digital Foundation

सिद्धिः । चशब्दान्न चेदन्यत्रापि न स्यादविशेषात् ॥ २७ ॥ ॥ ॐ **नाभाव उपलब्धेः** ॐ ॥ २८ ॥ न च जगदेव शून्यमिति वाच्यम् । दृष्टत्वात् ॥ २८ ॥ ॐ **वैधर्म्याच्च न स्वप्नादिवत्** ॐ ॥ २९ ॥ न च दृष्टस्यापि स्वप्नादिवदभावः । तस्योत्तरकाले स्वप्नोऽयं नाऽयं सर्प इत्याद्यनुभवात् । न चात्र तादृशं प्रमाणमस्ति ॥ २९ ॥ असदधिकरणम् ॥ ८ ॥

विज्ञानवादमपाकरोति— ॥ ॐ **न भावोऽनुपलब्धेः** ॐ ॥ ३० ॥ न विज्ञानमात्रं जगत् । तथाऽनुभवाभावात् ॥३०॥ ॥ ॐ **क्षणिकत्वाच्च** ॐ ॥ ३१ ॥ ज्ञानं क्षणिकम् । अर्थानां च स्थायित्वमुक्तम् । अतश्च नैक्यम् ॥ ३१ ॥ ॐ **सर्वथाऽनुपपत्तेश्च** ॐ ॥३२॥ प्रमाणाभावात्सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्च नैते पक्षा ग्राह्याः ॥ ३२ ॥ अनुपलब्ध्यधिकरणम् ॥ ९ ॥

स्याद्वादिमतं दूषयति— ॥ ॐ **नैकस्मिन्नसम्भवात्** ॐ ॥ ३३ ॥ सत्स्यादसत्स्यात्सदसत्स्यात्ततोऽन्यच्च स्यादित्येतन्नैकस्मिन्युज्यते । अदृष्टत्वेनासम्भवात् ॥ ३३ ॥ ॐ **एवञ्चाऽऽत्माकार्त्स्न्यम्** ॐ ॥ ३४ ॥ जीवस्य शरीरपरिमितत्वाङ्गीकारेऽण्वादिशरीरस्थस्य हस्त्यादिशरीरेऽकात्स्न्र्यं स्यात् ॥ ३४ ॥ ॥ ॐ **न च पर्यायादप्यविरोधो विकारादिभ्यः** ॐ ॥ ॥ ३५ ॥ तत्तच्छरीरस्थस्य तत्तत्परिमाणत्वमिति न मन्तव्यम्[1] । विकारित्वादनित्यत्वप्रसक्तेः ॥३५॥ ॐ **अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात्** ॐ ॥ ३६ ॥ परिमाणाभावे स्वरूपा-

[1] वाच्यम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

भावप्राप्त्याऽन्त्यपरिमाणस्थितेस्तदर्थत्वेन शरीरस्थितेरुभयनित्यत्वादविशेषेण सर्वशरीरनित्यत्वं स्यात् ॥३६॥ नैकस्मिन्नधिकरणम्[1]॥१०॥

पाशुपतपक्षमपाकरोति — ॥ **ॐ पत्युरसामञ्जस्यात् ॐ ॥ ३७ ॥** 'यं कामये तं तमुग्रं कृणोमि। तं ब्रह्माणं तमृषिं तं सुमेधाम्'[2]। 'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ'[3]। 'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृते हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्'[4]। 'एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमावि'[5]त्यादि श्रुतेः पारतन्त्र्येणासमञ्जसत्वान्न पशुपतिरीश्वरो[6] जगत्कर्ता ॥ ३७ ॥ **ॐ सम्बन्धानुपपत्तेश्च ॐ ॥ ३८ ॥** अशरीरत्वात्तस्य जगता सम्बन्धो न युज्यते कर्तृत्वेन मृतपुरुषवत् ॥३८॥ **ॐ अधिष्ठानानुपपत्तेश्च ॐ ॥३९॥** पृथिव्याद्यधिष्ठाने स्थितो हि कुलालादिः कार्यं करोति। न चास्य तदस्ति ॥ ३९ ॥ **ॐ करणवच्चेन्न भोगादिभ्यः ॐ ॥ ४० ॥** इदमेव जगत्तस्यकरणवदधिष्ठानादिरूपम्। नित्यस्यापि कस्यचिद्भावाद्युज्यत इति चेन्न भोगादिप्राप्तेः। उत्पत्तिविनाशौ सुखदुःखभोगश्च प्राप्यन्ते तद्गताः ॥ ४० ॥ ॥ **ॐ अन्तवत्त्वमसर्वज्ञता वा ॐ ॥ ४१ ॥** देहवत्वेऽन्तवत्वम्। अन्यथा ज्ञानाभावः। शरीरिण एव हि ज्ञानोत्पत्तिर्दृष्टा। विष्णोस्तु श्रुत्यैव विरोधाः परिहृताः—यदात्मको भगवांस्तदात्मिकी (का) व्यक्तिः। किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकः

---

[1] स्याद्वाद्यधिकरणम्. पा. [2] १०-१२५-५. ऋ.सं. [3] १०-१२५-६. ऋ.सं. [4] ७-४०-५. ऋ.सं. [5] १ म.ना.उ. [6] पतिरीश्वरनामा. पा.

SGDF
Sri Gargeshwari Digital Foundation

शक्त्यात्मक' इति । 'बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भागवतो लक्षयामहे । बुद्धिमान्मनोवानङ्गप्रत्यङ्गवानि'ति । 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षर'[1] इत्यादिक्रिया ॥ ४१ ॥ पत्युरधिकरणम्[2] ॥ ११ ॥

शक्तिपक्षं दूषयति—॥ **ॐ उत्पत्त्यसम्भवात् ॐ** ॥ ॥ ४२ ॥ न हि पुरुषाननुगृहीतस्त्रीभ्य उत्पत्तिर्दृश्यते ॥ ४२ ॥ ॥ **ॐ न च कर्तुः करणम् ॐ** ॥ ४३ ॥ यदि पुरुषोऽङ्गीक्रियते तस्यापि करणाभावादनुपपत्तिः ॥४३॥ **ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ** ॥ ४४ ॥ यदि विज्ञानादिकरणं तस्याङ्गीक्रियते तदा तत एव सृष्ट्याद्युपपत्तेरीश्वरवादान्तर्भावः ॥४४॥ ॥ **ॐ विप्रतिषेधाच्च ॐ** ॥ ४५ ॥ सकलश्रुत्यादिविरुद्धत्वाच्चासमञ्जसम् ॥ ४५ ॥ उत्पत्त्य (शक्त्य) धिकरणम् ॥ १२ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ २ ॥

जीवपरमात्माधिभूताधिदैवेषु श्रुतीनां परस्परं विरोधमपाकरोत्यनेन पादेन ॥ **ॐ न वियदश्रुतेः ॐ** ॥१॥ न वियदनुत्पत्तिमत् । तथाऽश्रुतेः ॥ १ ॥ **ॐ अस्ति तु ॐ** ॥ २ ॥ अस्त्येव चोत्पत्ति श्रुतिः—'आत्मन आकाशः सम्भूत'[3] इत्यादि ॥ २ ॥ ॥ **ॐ गौण्यसम्भवात् ॐ** ॥ ३ ॥ 'अनादिर्वा अयमाकाशः शून्योऽलौकिक' इत्यादिश्रुतिर्गौणी । अन्यथोत्पत्तिश्रुतिबाहुल्यासम्भवात् ॥ ३ ॥ **ॐ शब्दाच्च ॐ** ॥ ४ ॥ 'अथ ह वाव नित्यानि पुरुषः प्रकृतिरात्मा काल इति । अथ यान्यनित्यानि प्राणः

---

[1] पैङ्गि श्रुतिः. [2] पत्युपत्यधिकरणम्. पा. [3] २-१. तै.उ.

SGDF
Sri Gargeshwari Digital Foundation

श्रद्धा भूतानि भौतिकानीति। यानि ह वा उत्पत्तिमन्ति तान्यनित्यानि। यानि ह वा अनुत्पत्तिमन्ति तानि नित्यानि। न ह्येतानि कदाचनोत्पद्यन्ते न लीयन्ते पुरुषः प्रकृतिरात्मा काल इति। अथैतान्युत्पत्तिमन्ति चानुत्पत्तिमन्ति च प्राणः श्रद्धाऽऽकाश इति भागशो ह्युत्पद्यन्त' इति भाल्लवेयश्रुतेः ॥४॥ **ॐ स्याच्चैकस्य ब्रह्मशब्दवत् ॐ॥ ॥५॥** स्यादेवैकस्योत्पत्तिमत्त्वमनुत्पत्तिमत्त्वं च गौणमुख्यत्वापेक्षया। यथा ब्रह्मशब्दः। 'अथ कस्मादुच्यते परं ब्रह्मेति बृहति बृंहयति च'[1] इति श्रुतेः परे ब्रह्मणि मुख्योऽपि गौणत्वेन विरिञ्चादिष्वपि वर्तते। अत एवाब्रह्मत्वं च तेषाम्। एवमन्यत्राप्यनुत्पत्तिमच्छब्दः ॥ ५ ॥

॥ ॐ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॐ ॥ ६ ॥

ब्रह्मणोऽन्यस्य नित्यत्वे 'स इदꣳ सर्वमसृजत'[2]इत्यादि प्रतिज्ञाहानिः। आकाशस्यापि सर्वस्मादव्यतिरेकात्। 'आत्मा वा इदमेक एवाग्र आसीत्'[3] 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'[4] 'इदं वा अग्रे नैव किञ्चनाऽसीदि'[5]त्यादिश्रुतिभ्यः ॥ ६ ॥ **ॐ यावद्विकारं तु विभागो लोकवत् ॐ ॥ ७ ॥** विभक्तत्वाच्च विकारित्वं युक्तम्। विकारिण एव हि विभक्ता लोके दृश्यन्ते ॥ 'एकोऽविभक्तः परमः पुरुषो विष्णुरुच्यते। प्रकृतिः पुरुषः कालस्त्रय एते विभागतः ॥ चतुर्थस्तु महान्प्रोक्तः पञ्चमाऽहङ्कृतिर्मता। तद्विभागेन जायन्त आकाशाद्याः पृथक्पृथक् ॥ यो विभागी विकारः स, सोऽविकारः परो हरिः। अविभागात्परानन्दो नित्यो नित्यगुणात्मकः। विभागो ह्यल्पशक्तित्वं न तदस्ति जनार्दन' इति[6](च) बृहत्संहितायाम् ॥ ७ ॥

॥ वियदधिकरणम् ॥ १ ॥

---

[1] अथर्वशिरः.　[2] २-६. तै.उ. स इदं सर्वं. पा.　[3] १-१. ऐ.उ.
[4] ६-२-१. छां.उ.　[5] २-२-९. तै.आ.　[6] न हि तत्परमात्मनः. पा.

SGDF
Sri Gargeshwari Digital Foundation

'अथ ह नित्याश्चानित्याश्च तेजोऽबन्नान्याकाश इति तान्यनित्यानि वायुर्वाव नित्यो वायुना हि सर्वाणि भूतानि नेनीयन्ते' 'अथ ह चेतनाश्चाचेतनाश्च तेजोऽबन्नान्याकाश इति तान्यचेतनानि वायुर्वाव चेतनो वायुना हि सर्वाणि भूतानि विज्ञायन्ते'। 'कुविदङ्ग नमसा ये वृधा सः पुरा देवा अनवद्यास आसन्। ते वायवे मनवे बाधिताया ऽऽवासयन्नुषसं सूर्येण'[1]। 'सा वा एषा देवतानादिर्योऽयं पवत' इति। 'यस्या नाऽदिर्न मध्यं नान्तो नोदयो न निम्लोच' इत्यादिश्रुतिभ्यो वायोरनुत्पत्तिरित्यतो ब्रवीति—॥ **ॐ एतेन मातरिश्वा व्याख्यातः ॐ** ॥ ८ ॥ एतेन मुख्यामुख्यानुत्पत्तिवचनेन विभक्तत्वाच्च वाय्वनुत्पत्तिश्रुतिरपि व्याख्याता ॥ 'नित्यः परमनित्यश्च तथाऽनित्यः परस्तथा। चतुर्धैतज्जगत्सर्वं परानित्यं तु पार्थिवम् ॥ अनित्यानि तु भूतानि नित्यो वायुरुदाहृतः। परस्तु नित्यः पुरुषः प्रकृतिः काल एव च ॥ एतच्चतुष्टयं विष्णुः स्वयं नित्यः परात्परः। प्रतिव्यूह्य व्यूह्य चासावतीत्य च जनार्दनः। धारयत्यनिशं देवो नित्यानन्दैकलक्षण' इति कौर्मे ॥ ८ ॥
॥ मातरिश्वाधिकरणम् ॥ २ ॥

॥ ॐ असम्भवस्तु सतोऽनुपपत्तेः ॐ ॥ ९ ॥

'असद्वा इदमग्र असीत्। ततो वै सदजायत'[2] 'असतः सदजायते'[3]-त्यादि श्रुतिभ्यः सतोऽप्युत्पत्तिरिति चेन्न। अनुत्पत्तिरेव सतः। तुशब्देनोक्तव्यवस्थामपाकरोति ॥ न ह्यसतः सदुत्पद्यते। अदृष्टत्वादनुपपत्तेः। 'तद्वा एतद्ब्रह्माहुर्बृहति बृंहयति चेति। तद्वा एतदसदाहुः न ह्यासादयति कश्चनेति। तद्वा एतत्परमाहुः परतो हि तदुदीक्ष्यत' इति श्रुतेरसच्छब्दो ब्रह्मवाची। 'देवानां पूर्व्ये युगेऽसतः सदजायतेति

---

[1] ७-९१-१. ऋ.सं. [2] २.७. तै.उ. [3] १०-७२-२. ऋ.सं.

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्म वा असत् सद्वाव प्राणः प्राणं(णो) वाव महान् सह ओजो बल-मित्याचक्षत' इति पैङ्गिश्रुतिः ॥ 'त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेऽजः । ततो वयं सत्प्रमुखा यदर्थे बभूविमाऽत्मन् करवाम किं त' इति (च) भागवते ॥ 'अजायमानो बहुधा विजायत'[1] इति च । 'प्रत्यक्षत्वं हरेर्जन्म न विकारः कथञ्चन । पुरुषः प्रकृतिः कालो महानित्यादिषु क्रमात् ॥ विकार एव जननं पुरुषे तद्विशेषणम् । परतन्त्रविशेषो हि विकार इति कीर्तित' इति (च) पाद्मे ॥ 'अविकारोऽपि भगवान् सर्वशक्तित्वहेतुतः । विकार-हेतुकं सर्वं कुरुते निर्विकारवान् ॥ शक्तिशक्तिमतोश्चापि न विभेदः कथञ्चन । अविभिन्नाऽपि सेच्छादिर्भेदैरपि विभाषत' इति भागवत-तन्त्रे ॥ ९ ॥ असम्भवाधिकरणम् ॥ ३ ॥

॥ ॐ तेजोऽतस्तथा ह्याह ॐ ॥१०॥ 'वायोरग्निः'[2] इत्यादेर्नान्यत उत्पत्तिर्ग्राह्या । अत एव परात्तदपि जायते । 'तत्तेजोऽसृजते'ति ह्याह । कारणत्वेनेत्युक्तेऽप्यमुख्यतयाऽन्येषामपि शब्दोक्तत्वात्पुनरुक्तिरुभयकारणत्वनिवृत्त्यर्थम् ॥ १० ॥ तेजोऽधिकरणम् ॥४॥

॥ ॐ आपः ॐ ॥ ११ ॥ 'ब्रह्मैवेदमग्र आसीत्तदपोऽसृजत तदिदं सर्वम्' इति श्रुतेः 'अग्नेरापः'[3] इत्युक्तेऽपि ब्रह्मण एवाबादिसृष्टिः ॥ 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी'[4] ॥ इत्यादि च । 'कर्ता सर्वस्य वै विष्णुः एक एव न संशयः । इतरेषां तु सत्ताद्या यत एव तदाज्ञये'ति भविष्यत्पुराणे । वामने च—'तत्र तत्र स्थितो विष्णुः तत्तच्छक्तीः प्रबोधयन् । एक एव महाशक्तिः कुरुते सर्वमञ्जसे'ति ॥ घर्मात्स्वेदादिदृष्टेः पुनः प्रतिषेधः[5] ॥ ११ ॥ अब्धिकरणम् ॥ ५ ॥

---

[1] ३-१३. तै.आ. [2] २-१. तै.उ. [3] २-१. तै.उ. [4] २-१-३. मुं.उ.
[5] आप इति पृथग्वचनम्. पा.

SGDF
Sri Gargeshwari Digital Foundation

'ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहीति । ता अन्नमसृजन्त'[1] इत्यद्भ्योऽन्नसृष्टिः श्रूयते 'अद्भ्यः पृथिवी'[2] इति कुत्रचित्पृथिवीसृष्टिः । अतो विरुद्धत्वादप्रामाण्यमित्यतो वक्ति—

॥ ॐ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ॐ ॥१२॥

पृथिवी तत्रान्नशब्देनोच्यते । भूताधिकारत्वात् । कार्ष्ण्यप्रचुरा च पृथिवी । नान्नस्य तथा विशेषः । 'आपश्च पृथिवी चान्नम्'[3] । 'पृथिवी वा अन्नम्'[4] । 'ता आपोऽन्नमसृजन्त पृथिवी वा अन्नम्' इत्यादिशब्दान्तराच्च । आदिशब्दाद्युक्तिः अपौरुषेयत्वेनादोषस्य वाक्यस्य नाप्रामाण्यमित्यादि । कौर्मे च—'विरोधो वाक्ययोर्यत्र नाप्रामाण्यं तदिष्यते । यथा विरुद्धता न स्यात्तथार्थः कल्प्य एतयोरि'ति ॥ 'रक्तोऽग्निरुदकं शुक्लं कृष्णैव पृथिवी स्वतः । नाभिपद्माभिसम्बन्धात्पीता सेत्यभिधीयते । क्षत्ररक्ताभिसम्बन्धाद्रक्तोदकबहुत्वतः । शुक्लत्वमेत्येवमेव वर्णान्तरगतिर्भवेत् ॥ विष्णुवीर्याभियोगाच्च पीतत्वं भुव इष्यते । स्वर्णवीर्यो हि भगवाननादिः परमेश्वरः' ॥ इति व्योमसंहितायाम् ॥ १२ ॥ पृथिव्यधिकरणम् ॥ ६ ॥

'प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकस्तेनान्नेनाप्यायस्वे'[5]त्यादिनाऽन्यः संहर्ता प्रतीयत इत्यतो ब्रूते—**॥ ॐ तदभिध्यानादेव तु तल्लिङ्गात्सः ॐ ॥ १३ ॥** 'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरि'[6]ति बन्धलयस्य तदभिध्याननिमित्तत्वलिङ्गात्तत्कर्तृत्वं प्रतीयते, किमु सादेर्जगतः । इत्येतस्मादेव सर्वसंहारकर्ता विष्णुरिति प्रतीयते, किमु 'यमप्येति भुवनं साम्पराये स नो हरिर्घृतमिहायुषेऽत्तु देवः' । 'य इदं सर्वं विलापयति

[1] ६-२. छां.उ. [2] २-१. तै.उ. [3] २-३-१. ऐ.आ. [4] ३-९. तै.उ.
[5] १६-२. म.ना.उ. [6] १-१०. श्वे.उ.

SGDF
Sri Gargeshwari Digital Foundation

स हरिः परः परमात्मा' इत्यादि श्रुतिभ्य इति एवशब्दः। 'स्रष्टा पाता च संहर्ता स एको हरिरीश्वरः। स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते॥ एकदेशक्रिया चात्र न तु सर्वात्मनेरितम्। सृष्टचादिकं समस्तं तु विष्णोरेव पराद्भवेत्' इति च स्कान्दे॥ 'निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः। हिरण्यगर्भश्शर्वश्च कालाख्यारूपिणस्तवे'ति च भागवते॥ 'स ब्रह्मणा विसृजति स रुद्रेण विलापयति सोऽनुत्पत्तिरलय एक एव हरिः परः परानन्द' इति च महोपनिषदि॥ ॥ १३ ॥ तदभिध्यानाधिकरणम् ॥ ७ ॥

'अत एव हीदं परात्क्रमादुत्पद्यते क्रमाद्विलीयते नासावुदेति नास्तमेती'ति भाल्लवेयश्रुतौ क्रमाल्लयः प्रतीयते। 'अक्षरात्परमादेव सर्वमुत्पद्यते क्रमात्। व्युत्क्रमाद्विलयश्चैव तस्मिन्नेव परात्मनि'॥ इति चतुर्वेदशिखायां व्युत्क्रमाल्लयः प्रतीयते। अत आह— ॥ ॐ

विपर्ययेण तु क्रमोऽत उपपद्यते च ॐ ॥ १४ ॥

क्रमवचनमपि विपरीतक्रमापेक्षया। 'कर्ता प्राणादिकस्यास्य हन्ता भूम्यादिकस्य च। यः क्रमाद्व्युत्क्रमाच्चैव स हरिः पर उच्यत'। इत्यत एव भाल्लवेयश्रुतिवचनात्॥ 'अनुरूपः क्रमः सृष्टौ प्रतिरूपो लये क्रमः। इति क्रमेण भगवान्सृष्टिसंहारकृद्धरिरि'ति च पाद्मे॥ पूर्वेषां पूर्वेषां सामर्थ्याधिक्यादुपपद्यते च॥ वामने च—'पूर्वे पूर्वे यतो विष्णोः सन्निधानं क्रमाधिकम्। सामर्थ्याधिक्यमेतेषां पश्चादेव लयस्तथा॥ व्याप्तिश्चाभ्यधिका तेषामत एव न संशयः'॥ इति च ॥ १४ ॥ विपर्ययाधिकरणम् ॥ ८ ॥

॥ ॐ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॐ ॥ १५ ॥ 'प्राणात्मनो मनसश्च विज्ञानम्'।

SGDF
Sri Gargeshwari Digital Foundation

'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि'[1] इति लिङ्गाद्विज्ञानमनसी अन्तरा विपरीतक्रम इति चेत्—न, विशेषप्रमाणाभावात् ॥१५॥

॥ ॐ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॐ ॥ १६ ॥ 'मनसश्च विज्ञानं' इति व्यपदेशश्चराचरेष्वालोचनाद्विज्ञानं भवतीति भागापेक्षया स्यात् । न विज्ञानतत्त्वापेक्षया ॥ स्कान्दे च—'परादव्यक्तमुत्पन्नमव्यक्तात्तु महांस्तथा । विज्ञानतत्त्वं महतस्समुत्पन्नं चतुर्मुखात् ॥ विज्ञानतत्त्वात्तु मनो मनस्तत्त्वाच्च खादिकम् । एवं बाह्या परा सृष्टिरन्तरस्तद्व्यक्तचपेक्षया । विपरीतक्रमो ज्ञेयो यस्मादन्ते हरेर्दशिः' ॥ इति ॥ १६ ॥
॥ अन्तराधिकरणम् ॥ ९ ॥

॥ ॐ नाऽत्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॐ ॥१७॥
'स इदं सर्वं विलाप्यान्तस्तमसि निलीनस्तद्विलाप्य व्युत्तिष्ठते स इदं सर्वं विसृजति विलापयति विस्थापयति प्रस्थापयत्याच्छादयति प्रकाशयति विमोचयत्येक एव' इति श्रुतेः परमात्माऽपि न लीयते । अश्रुतत्वाद्ब्रह्मलयस्य ॥ निलीनशब्देनापिहितत्वमुच्यते । तुच्छेनाऽभ्वपिहितं यदासीत्, इति श्रुतेः । 'स एतस्मिंस्तमसि निलीनः प्रकृतिं पुरुषं कालं चानुपश्यति नैनं पश्यति कश्चन' इति पैङ्गिश्रुतिः । 'नित्यो नित्यानां चेतनश्चेतनानाम्'[2] । 'स नित्यो निर्गुणो विभुः परः परमात्मा' । 'नित्यो विभुः कारणो लोकसाक्षी परो गुणैः सर्वदृक् शाश्वतश्चे'त्यादि श्रुतिभ्यो नित्यत्वाच्च ॥ १७ ॥ आत्माधिकरणम् ॥ १० ॥

'नित्यो नित्यानामि'ति जीवस्यापि नित्यत्वमुक्तम् । 'सर्वे एते चिदात्मानो व्युच्चरन्ती'त्युत्पत्तिरुच्यते । अतो विरोध इत्यत

[1] ३-१३. कठ. उ. [2] ५-१३. कठ. उ.

SGDF
Sri Gargeshwari Digital Foundation

आह—॥ **ॐ ज्ञोऽत एव ॐ** ॥ १८ ॥ जीवोऽप्यत एव परमेश्वरादुत्पद्यते । शब्दादेव । 'ते वा एते चिदात्मानोऽविनष्टाः परं ज्योतिर्निविशन्त्यविनष्टा एवोत्पद्यन्ते न विनश्यन्ति कदाचने'ति च काषायणश्रुतिः ॥ १८ ॥ **ॐ युक्तेश्च ॐ** ॥ १९ ॥ नित्यस्यापि हि जीवस्योपाध्यपेक्षयोत्पत्तिर्युज्यते ॥ 'उत्पद्यन्ते चिदात्मानो नित्यान्नित्याः परात्मनः । उपाध्यपेक्षया तेषामुत्पत्तिरपि गीयत' इति च व्योमसंहितायाम् ॥ १९ ॥ ज्ञाधिकरणम् ॥११॥

'व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्च सर्वात्मनः सर्वरूपा अनन्ता' इति काषायणश्रुतौ व्याप्तत्वं प्रतीयते । 'अणुर्ह्येष आत्मा यं वा एते सिनीतः । पुण्यं पापं चे'ति गौपवन[1]श्रुतावणुत्वमित्यतो विरोध इति । अतो ब्रवीति—॥ **ॐ उत्क्रान्तिगत्यागतीनाम् ॐ** ॥२०॥ हेतूनां सकाशादणुरेव । 'सोऽस्माच्छरीरादुत्क्रम्यामुं लोकमभिगच्छत्यमुष्मादिमं लोकमागच्छति स गर्भो भवति स प्रसूयते स कर्म कुरुत' इति पौष्यायणश्रुतेः ॥ २० ॥ तत्र स्वातन्त्र्यप्रतीतेः—'एकः प्रसूयते जन्तुरेक एव प्रमीयते । एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतमि'त्यादेश्च स्वयमेवेत्यतो वक्ति—॥ **ॐ स्वात्मना-चोत्तरयोः ॐ** ॥ २१ ॥ 'स एतेनैव स्वात्मना परेणेमं गर्भमनुप्रविशति परेण जायते परेण कर्म कुरुते परेण नीयते परेणोन्नीयते । तं वा एतमभिवदन्ति स्वात्मे'ति । 'एष ह्यानन्दमादत्ते एष ह्येनं जीवमभिजीवयत्येष उद्गमयत्येष गमयत्येष आगमयति'[2] इत्युत्तरयोर्वाक्ययोः परमात्मनैवोत्क्रान्त्यादयः ॥२१॥ **ॐ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॐ** ॥ २२ ॥ 'व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्चे'ति व्याप्तिश्रुतेर्नाणुर्जीव इति चेन्न । 'स

[1] गौतम. पा. [2] पौष्यायण श्रुतिः.

SGDF
Sri Gargeshwari Digital Foundation

आत्मेदं सृजति स द्विधेदं बिभर्ति अन्तर्बहिश्च । बहुधेदमनुप्रविश्याऽऽत्मनोऽभिनयति । स आत्मा स आत्मानः स ईशः स विष्णुः स परः परोवरीयानि' ति परमात्माधिकारत्वात् ॥ 'एकशब्दैर्द्विशब्दैश्च बहुशब्दैश्च केशवः । एक एवोच्यते वेदैस्तावता नास्य भिन्नते' ति च भविष्यत्पुराणे । 'तदयं प्राणोऽधितिष्ठति । तदुक्तमृषिणा—आ तेन यातम्'[1] इत्यादि च ॥ २२ ॥ **ॐ स्वशब्दोन्मानाभ्यां च ॐ ॥ २३ ॥** 'एषो ह्यात्माऽभ्युद्गतो मानशक्तेस्तथाऽप्यसौ प्रमितिं याति वेदैः । पूर्णोऽचिन्त्यः सर्ववेदैकयोनिः सर्वाधीशः सर्ववित्सर्वकर्ते' ति वाक्यशेषे आत्मशब्दोन्मानाभ्यां च । 'आत्माऽमेयः परं ब्रह्म परानन्दादिकाभिधाः । वदन्ति विष्णुमेवैकं नान्यत्राऽसां गतिः क्वचिदि' ति च कौर्मे॥२३॥ **ॐ अविरोधश्चन्दनवत् ॐ ॥२४॥** अणोरपि जीवस्य सर्वशरीरव्याप्तिर्युज्यते । यथा हरिचन्दनविप्लुष एकदेशपतितायाः सर्वशरीरव्याप्तिः ॥ 'अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति । यथा व्याप्य शरीराणि हरिचन्दनविप्लुष' इति च ब्रह्माण्डपुराणे ॥ २४ ॥ **ॐ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॐ ॥ २५ ॥** सम्यगसम्यगवस्थानविशेषाद्युज्यते चन्दनस्येति चेन्न । 'हृदि ह्येष आत्मा'[2] इति जीवस्यापि तथाऽभ्युपगमात् ॥२५॥ **ॐ गुणाद्वाऽऽलोकवत् ॐ ॥२६॥** यथाऽऽलोकस्य प्रकाशगुणेन व्याप्तिर्ज्योतीरूपेणाव्याप्तिः एवं चिद्गुणेन व्याप्तिर्जीवरूपेणाव्याप्तिरिति वा । स्कान्दे च— 'असम्यक्सम्यगिति च ह्यवस्थाभेदतः सुराः । व्याप्त्यव्याप्तियुतास्त्वन्ये चिद्गुणेनैव नान्यथा ॥ चिद्गुणस्य स्वरूपत्वात्तद्व्याप्तिश्चेति युज्यते । शक्तियोगात्सुराणां तु विविधा च व्यवस्थितिरि' ति ॥ २६ ॥ उत्क्रान्त्यधिकरणम् ॥ १२ ॥

---

[1] २-३-८. ऐ.आ. [2] ३-६. प्र.उ.

SGDF
Sri Gargeshwari Digital Foundation

'स नित्यो निरवयवः पुण्ययुक् पापयुक् च स इमं लोकममुं चाऽवर्तते स विमुच्यते स एकधा न सप्तधा न दशधे'ति गौपवनश्रुतावेकस्याबहुत्वं प्रतीयते। 'स पञ्चधा स सप्तधा स दशधा भवति स शतधा च सहस्रधा स गच्छति स मुच्यत' इति पाराशर्यायणश्रुतौ बहुरूपत्वं प्रतीयते। अतो विरोधं परिहरति—॥ **ॐ व्यतिरेको गन्धवत्तथा च दर्शयति ॐ ॥ २७ ॥** यथा पुष्पाद्गन्धः पृथग्गच्छति एवमंशिनो जीवादंशाः पृथग्गच्छन्ति। 'अथैक एव सन् गन्धवद्व्यतिरिच्यते। अथैकीभवति। अथ बह्वीभवति। तं यथा यथेश्वरः प्रकुरुते तथा तथा भवति सोऽचिन्त्यः परमो गरीयानि'ति शाण्डिल्यश्रुतिः। 'अचिन्त्ययेशशक्त्यैव ह्येकोऽवयववर्जितः। आत्मानं बहुधा कृत्वा क्रीडते योगसम्पदे'ति च पाद्मे ॥२७॥ व्यतिरेकाधिकरणम् ॥ १३ ॥

'तत्त्वमसि'[1] 'अहं ब्रह्मास्मी'[2]त्यादिषु जीवस्य परेणाभेदः प्रतीयते। 'नित्यो नित्यानां चेतनश्चेतनानाम्'[3]। 'द्वासुपर्णा'[4] इत्यादिषु भेदः। अत उच्यते-॥ **ॐ पृथगुपदेशात् ॐ ॥२८॥** 'भिन्नोऽचिन्त्यः परमो जीवसङ्घात्पूर्णः परो जीवसङ्घो ह्यपूर्णः। यतस्त्वसौ नित्यमुक्तो ह्ययं च बन्धान्मोक्षं तत एवाभिवाञ्छे'दिति सोपपत्तिककौशिकश्रुतेर्भिन्न एव जीवः॥२८॥ **ॐ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॐ ॥ २९ ॥** ज्ञानानन्दादिब्रह्मगुणा एवास्य यतः सारः स्वरूपमतोऽभेदव्यपदेशः। यथा सर्वगुणात्मकत्वात्सर्वात्मत्वं ब्रह्मण उच्यते 'सर्वं खल्विदं ब्रह्मे'ति। भविष्यत्पर्वणि च—'भिन्ना जीवाः परो भिन्नस्तथापि ज्ञानरूपतः। प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वश' इति ॥२९॥ पृथगुपदेशाधिकरणम् ॥ १४ ॥

---

[1] ६-८-७. छां.उ. [2] १-४-१०. बृ.उ. [3] ६-१३. श्वे.उ. [4] ४-६. श्वे.उ.

SGDF
Sri Gargeshwari Digital Foundation

जीवस्याप्युत्पत्तिरुक्ता। अतस्तस्य 'सोऽनादिना पुण्येन पापेन चानुबद्धः। परेण निर्मुक्त आनन्त्याय कल्प्यत' इत्यनादिकर्मसम्बन्ध आनन्त्याप्तिश्च न युज्यत इत्यत आह—॥ ॐ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ ॥३०॥ यावत्परमात्मा तिष्ठत्यनाद्यनन्तत्वेनैवं जीवोऽपि। 'नित्यः परो नित्यो जीवोऽनित्यास्तस्य धातवः। अत उत्पद्यते च म्रियते च विमुच्यते चे'ति च आग्निवेश्यश्रुतिः। 'आत्मा नित्यः सुखदुःखे त्वनित्ये, जीवो नित्यो धातुरस्य त्वनित्य' इति च भारते ॥३०॥ यावदधिकरणम् ॥१५॥

'विज्ञानात्मा सह देवैश्च सर्वैः'[1]। 'स आनन्दः स बलः स ओजः स परेणामुं लोकं नीयते स विमुच्यत इति जीवस्य ज्ञानानन्दादिरूपत्वमुच्यते। 'स दुःखाद्विमुक्त आनन्दी भवति। सोऽज्ञानाद्विमुक्तो ज्ञानी भवति। सोऽबलाद्विमुक्तो बली भवति। स नित्यो निरातङ्कोऽवतिष्ठत' इति पैङ्गिश्रुतावनानन्दादिरूपत्वं प्रतीयते। अत आह—॥ ॐ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॐ ॥ ३१ ॥ यथा बालस्य सदेव पुंस्त्वं यौवनेऽभिव्यज्यत एवं सतामेवानन्दादीनां व्यक्त्यपेक्षया तदुक्तिः। 'बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्। स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोरि'ति च गौपवनश्रुतिः ॥ ३१ ॥ ॐ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॐ ॥ ३२ ॥ व्यक्त्यनङ्गीकारे देवानां नित्योपलब्धिरानन्दादीनामसुराणां नित्यानुपलब्धिर्मनुष्याणां च नित्योपलब्ध्यनुपलब्धी च प्रसज्ज्यन्ते ॥ 'नित्यानन्दो नित्यज्ञानो नित्यबलः परमात्मा नैवमसुरा एवमनेवं च मनुष्या' इति ह्याग्निवेश्यश्रुतिः॥ भविष्यत्पर्वणि च—'नित्यानन्दज्ञानबला देवा नैवं

[1] ४-११. प्र.उ.

SGDF
Sri Gargeshwari Digital Foundation

तु दानवाः । दुःखोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः ॥ तेषां यदन्यथा दृश्यं तदुपाधिकृतं मतम् । विज्ञानेनाऽऽत्मयोगेन निजरूपे व्यवस्थितिः ॥ सम्यज्ज्ञानं तु देवानां मनुष्याणां विमिश्रितम् । विपरीतं च दैत्यानां ज्ञानस्यैवं व्यवस्थितिरि'ति ॥ ३२ ॥ पुंस्त्वाधिकरणम् ॥ १६ ॥

ईश्वरस्यैव कर्तृत्वमुक्तम् । 'यत्कर्म कुरुते तदभिसम्पद्यत'[1] इति जीवस्योपलभ्यते । अत आह—॥ **ॐ कर्ता शास्त्रार्थवत्त्वात् ॐ ॥ ३३ ॥** जीवस्य कर्तृत्वाभावे शास्त्रस्याप्रयोजकत्वप्राप्तेर्जीवोऽपि कर्ता ॥३३॥ **ॐ विहारोपदेशात् ॐ ॥३४॥** 'स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वे'[2]त्यादि मोक्षेऽपि ॥ ३४ ॥ **॥ ॐ उपादानात् ॐ ॥३५॥** साधनाद्युपादानप्रतीतेश्च ॥३५॥ **॥ ॐ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॐ ॥ ॥ ३६ ॥** 'आत्मानमेव लोकमुपासीत'[3] इति क्रियायां व्यपदेशाच्च । अन्यथाऽऽत्मैव लोकमिति निर्देशः स्यात् ॥ ३६ ॥ तर्हि कथमीश्वरस्यैव कर्तृत्वमित्यतो वक्ति—॥ **ॐ उपलब्धिवदनियमः ॐ ॥ ॥ ३७ ॥** यथा ज्ञान इदं ज्ञास्यामीत्यनियमः प्रतीयत एवं कर्मण्यपि जीवस्य । 'य आत्मानमन्तरो यमयती'[4]ति च श्रुतिः ॥३७॥ कुतः?— **॥ ॐ शक्तिविपर्ययात् ॐ ॥ ३८ ॥** अल्पशक्तित्वाज्जीवस्य ॥ ३८ ॥ **ॐ समाध्यभावाच्च ॐ ॥ ३९ ॥** समाध्यभावाच्चास्वातन्त्र्यं प्रतीयते ॥ ३९ ॥ अतः—॥ **ॐ यथा च तक्षोभयथा ॐ ॥ ४० ॥** यथा तक्ष्णः कारयितृनियतत्वं

---

[1] ६-४-५. बृ.उ. [2] ८-१२-३. छां.उ. [3] ३-४-१५. बृ.उ.
[4] माध्यन्दिन पाठः.

SGDF
Sri Gangeshwari Digital Foundation

कर्तृत्वं च विद्यते एवं जीवस्यापि ॥ ४० ॥ **ॐ परात्तु तच्छ्रुतेः ॐ ॥ ४१ ॥** सा च कर्तृत्वशक्तिः परादेव ॥ 'कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षये'ति हि पैङ्गिश्रुतिः ॥ ४१ ॥ **ॐ कृतप्रयत्नापेक्षस्तु विहित-प्रतिषेधावैयर्थ्यादिभ्यः ॐ ॥ ४२ ॥** ततोऽप्रयोजकत्वं शास्त्रस्य नाऽपद्यते । कृतप्रयत्नापेक्षत्वात्तत्प्रेरकत्वस्य ॥ आदिशब्देना-वैषम्यादि ॥ 'पूर्वकर्म प्रयत्नं च संस्कारं चाप्यपेक्ष्य तु । ईश्वरः कारयेत्सर्वं तच्चेश्वरकृतं स्वयम् । अनादित्वाददोषश्च पूर्णशक्तित्वतो हरेरि'ति भविष्यत्पर्वणि ॥ 'एतदेवं नचाप्येवमेतदस्ति च नास्ति चे'ति च मोक्षधर्मे ॥ ४२ ॥ कर्तृत्वाधिकरणम् ॥ १७ ॥

'अंशा एव हीमे जीवा अंशी हि परमेश्वरः । स्वयमंशैरिदं सर्वं कारयत्यचलो हरि'रिति गौपवनश्रुतौ अंशत्वं जीवस्योपलभ्यते ॥ 'नैवांशो न सम्बन्धो नापेक्ष्यो जीवः परस्य । तथाऽपि तु यथायोगं फलदः प्रभुरेकराट् । न नियम्यः स कस्यापि स सर्वस्य नियामक' इति च भाल्लवेयश्रुतौ ॥ अतो ब्रवीति—॥ **ॐ अंशो नाना-व्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॐ ॥ ४३ ॥** 'मां रक्षतु विष्णुर्नित्यं पुत्रोऽहं परमात्मनः' । 'अवः परेण पितरं यो अस्यानुवेद पर एनावरेण'[1] । 'यस्तद्वेद स पितुष्पिताऽसत्'[2] । 'यस्ता विजानात्स पितुष्पिताऽसत्'[3] । 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती'[4]त्यादिना नानाव्यपदेशादंशो जीवः ॥ तथा च पाराशर्यायणश्रुतिः—'अंशो ह्येष परस्य योऽयं

[1] १-१६४-१८. ऋ.सं. [2] १-१४. म.ना.उ. [3] १-१६४-१६. ऋ.सं.
[4] ३-१-१. मुं.उ.

SGDF
Sri Gargeshwari Digital Foundation

पुमानुत्पद्यते च म्रियते च नाना ह्येनं व्यपदिशन्ति पितेति पुत्रेति भ्रातेति च सखेति चे'ति ॥ 'अन्यः परोऽन्यो जीवो नासावस्य कुतश्चन । नायं तस्यापि कश्चने'त्यन्यथा च काषायणश्रुतिः ॥ 'ब्रह्म दाशा ब्रह्म कितवाः, ब्रह्मैवेमे दाशा' इत्यभेदेनाप्येकेऽधीयते । तथा चाग्निवेश्यश्रुतिः— 'अंशो ह्येष परस्य भिन्नं ह्येनमधीयिरेऽभिन्नं ह्येनमधीयिर' इति । वाराहे च—'पुत्रभ्रातृसखित्वेन स्वामित्वेन यतो हरिः । बहुधा गीयते वेदैर्जीवोंऽशस्तस्य तेन तु । यतो भेदेन तस्यायमभेदेन च गीयते । अतश्चांशत्वमुद्दिष्टं भेदाभेदौ न मुख्यत' इति ॥ ४३ ॥ **ॐ मन्त्रवर्णात् ॐ** ॥ ४४ ॥ 'पादोऽस्य विश्वा भूतानी'[1]ति ॥ ४४ ॥ **ॐ अपि स्मर्यते ॐ ॥ ४५ ॥** 'ममैवांशो जीवलोके जीवभूतः सनातन'[2] इति ॥ ४५ ॥ अनंशत्वश्रुतेर्गतिं चाऽह—॥ **ॐ प्रकाशादिवन्नैवं परः ॐ ॥ ४६ ॥** अंशत्वेऽपि न मत्स्यादिरूपी पर एवं विधः । यथा तेजोंऽशस्यैव कालाग्नेः खद्योतस्य च नैकप्रकारता । यथा जलांशस्यामृतसमुद्रस्य मूत्रादेश्च । यथा च पृथिव्यंशस्य मेरोर्विष्टादेश्च । अभिमानिदेवतापेक्षयैतत् ॥ ४६ ॥ **ॐ स्मरन्ति च ॐ ॥ ४७ ॥** 'एते स्वांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्'[3] । 'अतः परं यदव्यक्तमव्यूढगुणबृंहितम् । अदृष्टाश्रुतवस्तुत्वात्स जीवो यः पुनर्भवः'[3] ॥ 'स्वांशश्चाथो विभिन्नांश इति द्वेधांऽश इष्यते । अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथास्थितिः ॥ तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित् । विभिन्नांशोऽल्पशक्तिः स्यात्किञ्चित्सादृश्यमात्रयुक्' ॥ इति वाराहे । 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य'[4] इत्यादि ॥४७॥ **॥ ॐ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॐ ॥ ४८ ॥** परानुज्ञया प्रवृत्तिः, परतो बन्धनिवृत्तिश्च जीवस्य

[1] १०-९०-३. ऋ.सं. [2] १५-७. भ.गी. [3] भागवते. [4] ११-४३. भ.गी.

SGDF
Sri Gargeshwari Digital Foundation

प्रतीयते, अंशत्वेऽपि देहसम्बन्धात्। 'य आत्मानमन्तरो यमयति'[1]। 'तमेवं विद्वानि'[2]त्यादिना। न तु परस्य। 'वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नारसिंहो वामनो रामो रामः कृष्णो बुद्धः कल्किरहं शतधाऽहं सहस्रधाऽहममितोऽहमनन्तोऽहं नैवैते जायन्ते न म्रियन्ते नैषामज्ञानं न बन्धो न मुक्तिः सर्व एव ह्येते पूर्णा अजरा अमृताः परमाः परानन्दा' इति हि चतुर्वेदशिखायाम्॥ युज्यते च ज्योतिरादिवत् यथाऽऽदित्यो वियद्गतस्तत्प्रकाशश्चैकप्रकारः। 'शुक्लं कृष्णं कनीनिके'[3]ति तदंशस्याप्यक्ष्णो देहसम्बन्धान्न तादृशी शक्तिः। तदनुग्राह्यत्वं तेनैवाऽवृतिपरिहारश्च। यथा बाह्यामृतजलस्यामृतसमुद्रस्य चैकत्वं तदंशस्यापि श्लेष्मणस्तदनुग्राह्यत्वं तेनैव विरोधिनिवृत्तिश्च। मोक्षधर्मे च—'यत्किञ्चिदिह लोकेऽस्मिन्देहबद्धं विशांपते। सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः॥ ईश्वरो हि महद्भूतं प्रभुर्नारायणो विराट्। भूतान्तरात्मा विज्ञेयः सगुणो निर्गुणोऽपि च। भूतप्रलयमव्यक्तं शुश्रूषुर्नृपसत्तमे'ति। वाराहे च—'अंशाश्च देहयोग्यत्वाज्जीवा बन्धादिसंयुताः। अनुग्राह्याश्चेश्वरेण न तु मत्स्यादिको हरिः॥ अदेहबन्धयोग्यत्वाद्यथासूर्यप्रभाऽक्षिणी। यथाऽमृतसमुद्रस्य श्लेष्मादेश्च द्विरूपता। अनुग्राह्यत्वमन्यस्य तेनैवाऽवृतिरोधनमि'ति॥ ४८॥ **ॐ असन्ततेश्चाव्यतिकरः ॐ॥ ४९॥** अपूर्णशक्तित्वाच्च जीवस्य न मत्स्यादिसाम्यम्। तथा च चतुर्वेदशिखायाम्—'तस्य ह वा एतस्य परमस्य त्रीणि रूपाणि कृष्णो रामः कपिल इति। तस्य ह वा एतस्य परमस्य पञ्चरूपाणि दशरूपाणि शतरूपाणि सहस्ररूपाण्यमितरूपाणि तानि ह वा एतानि सर्वाणि पूर्णानि सर्वाण्यनन्तानि सर्वाण्यसम्मितानि। अथावराः सर्व एवापूर्णाः सर्व एव बध्यन्तेऽथ मुच्यन्ते च

[1] माध्यन्दिन पाठः. [2] ३-१२. तै.आ. [3] २-१-५. ऐ.आ.

SGDF
Sri Gargeshwari Digital Foundation

केचने'ति ॥ ४९ ॥ **ॐ आभास एव च ॐ ॥ ५० ॥**
'रूपं रूपं प्रतिरूपो बभूवे'[1]ति प्रतिबिम्बत्वाच्च न साम्यम् । वाराहे च—'द्विरूपावंशकौ तस्य परमस्य हरेर्विभोः । प्रतिबिम्बांशकश्चाथ स्वरूपांशक एव च ॥ प्रतिबिम्बांशका जीवाः प्रादुर्भावाः परे स्मृताः । प्रतिबिम्बेष्वल्पसाम्यं स्वरूपाणीतराणि त्वि'ति ॥ 'सोपाधिरनुपाधिश्च प्रतिबिम्बो द्विधेयते । जीवः परस्यानुपाधिरिन्द्रचापो यथा रवेरि'ति पैङ्गिश्रुतिः ॥ 'यथैषा पुरुषेच्छाया एतस्मिन्नेतदाततमि'[2]ति च श्रुतिः ॥ ५० ॥ अंशाधिकरणम् ॥ १८ ॥

प्रतिबिम्बानां मिथो वैचित्र्ये कारणमाह—॥ **ॐ अदृष्टानियमात् ॐ ॥ ५१ ॥** अनादिविद्याकर्मादिवैचित्र्याद्वैचित्र्यम् ॥ ॥५१॥ **ॐ अभिसन्ध्यादिष्वपि चैवम् ॐ ॥५२॥** इच्छाद्वेषसुखदुःखादिवैचित्र्यं चादृष्टादेव । चशब्देन प्रतिक्षणवैचित्र्यं च ॥ ५२ ॥ **ॐ प्रदेशादिति चेन्नान्तर्भावात् ॐ ॥५३॥** न स्वर्गभूम्यादिप्रदेशविशेषाद्वैचित्र्यम् । तत्प्राप्तेरप्यदृष्टापेक्षत्वात् । एकदेशस्थितानामेव वैचित्र्यदर्शनाच्च ॥५३॥ अदृष्टाधिकरणम् ॥१९॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वितीयाध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

युक्तिसहितश्रुतिविरोधं श्रुतीनामपाकरोत्यनेन पादेन । 'प्राणा एवेदमग्र आसुस्तेभ्यो भूतानि जज्ञिरे । भूतेभ्योऽण्डमण्डस्यान्तस्त्विमे लोकाः । अथ प्राणा एवानादयः प्राणा नित्या' इति काषायणश्रुतौ प्राणानामनुत्पत्तिः प्रतीयते ॥ 'नोपादानं हीन्द्रियाणामतोऽनुत्पत्तिरिष्यते । उपादानकृता सृष्टिः सर्वलोकेषु दृश्यत' इति भविष्यत्पर्वणि ॥ 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चे'[3]ति च । अत उच्यते—

---
[1] ६-४७-१८. ऋ.सं. [2] ३-३. प्र.उ. [3] २-१-३. मुं.उ.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ तथा प्राणाः ॐ ॥ १ ॥ यथाऽऽकाशादयः परमात्मन उत्पद्यन्ते तथा प्राणा अपि ॥ १ ॥ ॐ गौण्यसम्भवात् ॐ ॥२॥ अनादित्वश्रुतिर्गौणानादित्वापेक्षया। मुख्यासम्भवात् ॥ 'नित्यान्येतानि सौक्ष्म्येण हीन्द्रियाणि तु सर्वशः। तेषां भूतैरुपचयः सृष्टिकाले विधीयते। परेण साम्यसम्प्राप्तेः कस्य स्यान्मुख्यनित्यते'ति हि भविष्यत्पर्वणि ॥२॥ ॐ प्रतिज्ञानुपरोधाच्च ॐ ॥ ॥ ३ ॥ स इदं सर्वमसृजते'[1]ति ॥ ३ ॥ प्राणाधिकरणम्[2] ॥ १ ॥

'द्विधा हैवेन्द्रियाणि नित्यानि चानित्यानि च। तत्र नित्यं मनोऽनादित्वान्न ह्यमनाः पुमांस्तिष्ठत्यनित्यान्यन्यानी'ति गौपवनश्रुतौ मनसोऽनुत्पत्तिः सयुक्तिका श्रूयते। अत आह— ॥ ॐ तत्प्राक्श्रुतेश्च ॐ ॥ ४ ॥ 'मनः सर्वेन्द्रियाणि चे'[3]ति पूर्वोक्तत्वान्नानुत्पत्तिर्मनसो युज्यते। 'पूर्वं मनः समुत्पन्नं ततोऽन्येषां समुद्भवः। तदनुत्पत्तिवचनमल्पोपचयकारणादि'ति वायुप्रोक्तवचनं चशब्देन गृहीतम् ॥ ४ ॥ मनोधिकरणम्[4] ॥ २ ॥

'नित्ययाऽनित्यया स्तौमि परमात्मानमच्युतमि'ति। 'वाग्वाव नित्या नह्येषोत्पद्यतेऽस्यां हि श्रुतिरवतिष्ठत' इति सयुक्तिकं पौष्यायणश्रुतौ वाचोऽनुत्पत्तिरुच्यते। अतो ब्रवीति—॥ ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥ ५ ॥ 'तस्मान्मन एव पूर्वरूपं वागुत्तररूपमि'[5]ति मनःपूर्वकत्वाद्वाचो नानुत्पत्तिः ॥ 'वागिन्द्रियस्य नित्यत्वं श्रुतिसन्निधियोग्यता। उत्पत्तिर्मनसो यस्मान्न नित्यत्वं कुतश्चने'ति वायुप्रोक्ते ॥ ५ ॥ वागाधिकरणम्[6] ॥ ३ ॥

---

[1] २-६. तै.उ. [2] प्राणोत्पत्त्यधिकरणम्. पा. [3] २-१-३. मुं.उ.
[4] तत्प्रागधिकरणम्. पा. [5] ३-१-१. ऐ.आ. [6] तत्पूर्वकत्वाधिकरणम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

'सप्त प्राणाः प्रभवन्ति तस्मात्'[1] इति श्रुतिः । 'सप्तैव मारुता बाह्ये प्राणाः सप्त तथाऽऽत्मनि । अधिदैवे तथाऽध्यात्मे सङ्ख्यासाम्यं विदो विदुरि'ति च स्कान्दे । 'द्वादश वा एते प्राणा द्वादश मासा द्वादशाऽदित्या द्वादशराशयो द्वादश ग्रहा' इति कौण्डिन्यश्रुतौ द्वादशप्राणा दृश्यन्ते । अतो वक्ति—॥ **ॐ सप्तगतेर्विशेषितत्वाच्च ॐ** ॥ ६ ॥ ज्ञानेन्द्रियापेक्षया सप्तत्वम् । 'गुहाशयां निहिताः सप्तसप्ते'[1]ति विशेषणात् ॥ 'सप्तप्राणास्त्ववगतेः पञ्चप्राणाश्च कर्मणः । एवं प्राणद्वादशकं शरीरे नित्यसंस्थितमि'ति भविष्यत्पर्ववचनं चशब्दात् ॥ ६ ॥ **ॐ हस्तादयस्तु स्थितेऽतो नैवम् ॐ** ॥ ७ ॥ हस्तादीनां कर्मविषयत्वान्न सहपाठः ॥ 'संसारस्थितिहेतुत्वात्स्थितं कर्म विदो विदुः । तस्मादुद्गतिहेतुत्वाज्ज्ञानं गतिरिहोच्यत' इति (च) वायुप्रोक्ते ॥ ७ ॥ सप्तगत्यधिकरणम् ॥ ४ ॥

'दिवीव चक्षुराततमि'[2]ति व्याप्तिः प्रतीयते । दूरश्रवणदर्शनादियुक्तिश्च ॥ अणुभिः पश्यत्यणुभिः शृणोति प्राणा वा अणवः प्राणैर्ह्येतद्भवती'ति च कौण्डिन्यश्रुतिः ॥ अतो वक्ति—॥ **ॐ अणवश्च ॐ** ॥ ८ ॥ 'तद्यथा ह्यणुनश्चक्षसः प्रकाशो व्यातत एवमेवास्य पुरुषस्य प्रकाशो व्याततोऽणुर्ह्येवैष पुरुषो भवती'ति शाण्डिल्यश्रुतिः ॥ ८ ॥ अण्व(णुत्वा)धिकरणम् ॥ ५ ॥

'नैष प्राण उदेति नास्तमेत्येकल एव मध्ये स्थाता । अथैनमाहुर्मध्यम इती'ति मुख्यप्राणस्यानुत्पत्तिः श्रूयते । 'यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथा । तस्योत्पत्तिर्मृतिश्चैव कथं प्राणस्य युज्यत' इति युक्तिर्वायुप्रोक्ते ॥ 'आत्मत एष प्राणो जायत'[3] इति च । अत आह—॥ **ॐ श्रेष्ठश्च ॐ** ॥ ९ ॥ 'सौक्ष्म्येण ह वा एषोऽवतिष्ठते

[1] २-१-८. मुं.उ. [2] १-२२-२०. ऋ.सं. [3] ३-३. प्र.उ.

SGDF
Sri Gangeshwari Digital Foundation

स्थूलत्वेनोदेति सूक्ष्मश्चाथो स्थूलश्च प्रकृतितः सूक्ष्मोऽन्यतः स्थूलोऽथैनमाहुः सादिरनादिरिती'ति गौपवनश्रुतेः ॥ ९ ॥ **ॐ न वायुक्रिये पृथुगुपदेशात् ॐ** ॥ १० ॥ 'चेष्टायां बाह्यवायौ च मुख्यप्राणे च गीयते । प्राणशब्दस्त्रिषु ह्येषु मुखे मुख्यः प्रकीर्तित' इति वायुक्रिययोरपि व्यपदेशादुत्पत्तिश्रुतिस्तयोर्न स्यात् । 'स प्राणमसृजत . . . खं वायुर्ज्योतिरापः . . . तपो मन्त्राः कर्मे'[1]ति पृथगुपदेशात् । 'भूतानि चेष्टा मन्त्राश्च मुख्यप्राणादिदं जगत् । मुख्यप्राणः परस्माच्च न परः कारणान्वित' इति (च) वायुप्रोक्ते ॥ १० ॥
॥ मुख्यप्राणाधिकरणम्[2] ॥ ६ ॥

'प्राणादिदमाविरासीत्प्राणो धत्ते प्राणे लयमभ्युपैति न प्राणः किञ्चिदाश्रित' इत्याग्निवेश्यश्रुतौ ॥ 'यदाश्रयादस्य चेष्टा सोऽन्यं कथमुपाश्रयेत् । यथा प्राणस्तथा राजा सर्वस्यैकाश्रयो भवेदि'ति च युक्तिर्भारते ॥ 'प्राणस्यैतद्वशे सर्वं प्राणः परवशे स्थितः । न परः क(कि)श्चिदाश्रित्य वर्तते परमो यत' इति पैङ्गिश्रुतिः ॥ अत आह—
॥ **ॐ चक्षुरादिवत्तु तत्सहशिष्टयादिभ्यः ॐ** ॥ ११ ॥
चक्षुरादिवन्मुख्यप्राणोऽपि परमात्मवश एव 'सर्वं ह्येवैतत्परमेऽवतिष्ठते प्राणश्च प्राणाश्च प्राणिनश्च स ह्येक एवैतान्नयत्युन्नयति वशीकरोती'ति गौपवनश्रुतौ चक्षुरादिभिः सह तद्वशत्वेनैव शासनात् ॥ 'सर्वकर्ताऽपि सन्प्राणः परमाधारतः स्थितः । कथमेवान्यथा स स्याद्यतो नैवेश्वरद्वयम् ॥ अवान्तरेश्वरत्वेन तस्येश्वरवचो भवेत् । अतो मध्यमतामाहुस्तस्य वेदेषु वेदिनः ॥ अनन्येश्वरता प्राणे तदन्येश्वरवर्जनम् । यतो विशेषवाक्येन ह्रियते समतावचः' ॥ 'नान्योऽतोऽस्ति द्रष्टा'[3] 'नान्यदतोऽस्ति द्रष्टृ'[4]त्यादिवचनयुक्तयश्चादिशब्दोक्ताः ॥ ११ ॥

---

[1] ६-४. प्र.उ. [2] श्रेष्ठाधिकरणम्. पा. [3] ५-७-२३. बृ.उ.
[4] ५-८-१२. बृ.उ.

SGDF
Sri Gurgeshwari Digital Foundation

॥ ॐ अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॐ ॥ ॥ १२ ॥ इतरेषां प्राणानां करणत्वान्मुख्यस्याकरणत्वात्तस्यान्येभ्य उत्तमत्वं युज्यते । माण्डव्यश्रुतिश्च—'तानि ह वा एतानि सर्वाणि करणान्यथ प्राण एवाकरणस्तस्मान्मुख्यस्तस्मान्मुख्य इत्याचक्षत' इति ॥ १२ ॥ चक्षुराद्यधिकरणम् ॥ ७ ॥

'सर्वे वा एते मुख्यदासाः प्राणोऽपानो व्यान उदानः समान इति । अथ प्राणो वाव सम्राडिति' कौण्डिन्यश्रुतिः । 'प्राणापानादयः सर्वे मुख्यदासा यतोऽनिशम् । अतस्तदाज्ञया नित्यं स्वानि कर्माणि कुर्वत' इति युक्तिर्वायुप्रोक्ते ॥ 'मुख्यस्यैव स्वरूपाणि प्राणाद्याः पञ्च-वायवः । स एव प्राणिनां देहे पञ्चधा वर्ततेऽनिशमि'ति च गौपवन-श्रुतिः ॥ अतो वक्ति—॥ ॐ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ १३ ॥ 'अथ पञ्चवृत्त्यैतत्प्रवर्तते प्राणो वाव पञ्चवृत्तिः प्राणोऽपानो व्यान उदानः समान इति । तेभ्यो वा एतेभ्यः पञ्च-दासाः प्रजायन्ते । प्राणाद्वाव प्राणोऽपानादपानो व्यानाद्व्यान उदाना-दुदानः समानादेव समानो यथा ह वै मनः पञ्चधा व्यपदिश्यते मनोबुद्धिरहङ्कारश्चित्तं चेतनेति । तेभ्यो वा एतेभ्यः पञ्च दासाः प्रजायन्ते । मनसो वाव मनो बुद्धेर्बुद्धिरहङ्कारादहङ्कारश्चित्ताच्चित्तं चेतनाया एव चेतनैवमिती'ति ॥ १३ ॥ पञ्चवृत्त्यधिकरणम् ॥ ८ ॥

'प्राण एवाधस्तात्प्राण उपरिष्टात्प्राणो मध्यतः प्राणः सर्वतः प्राण एवेदं सर्वमि'ति प्राणस्य व्याप्तिः प्रतीयते ॥ 'यतः सर्वं जगद्व्याप्य तिष्ठति प्राण एव तु । अतो धृतं जगत्सर्वमन्यथा केन धार्यत' इति च युक्तिर्वायुप्रोक्ते ॥ 'अणुनैतत्सृज्यतेऽणुनैतद्धार्यते अणौ लयमभ्युपैति प्राणो वा अणुः प्राणो ह्येतद्भवती'ति च सौत्रायण-श्रुतिः ॥ अत आह—॥ ॐ अणुश्च ॐ ॥ १४ ॥ स वा

SGDF
Sri Gangeshwari Digital Foundation

एष प्राणोऽणुर्महान्नामाऽन्तर्वाऽणुर्बहिर्महान्प्राणो वा ईशितव्येश ईशो ह्यसौ सर्वस्येशितव्यश्च परस्ये'ति हि कौण्डिन्यश्रुतिः ॥ प्राणाणुत्वाधिकरणम् ॥ ९ ॥

करणत्वं प्राणानामुक्तम् । 'जीवस्य करणान्याहुः प्राणानेतांस्तु सर्वशः । यस्मात्तद्वशगा एते दृश्यन्ते सर्वदेहिष्वि'ति सौत्रायणश्रुतौ सयुक्तिकं जीवकरणत्वं प्रतीयते ॥ 'ब्रह्मणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वागिति तद्ध्येतैः कारयती'ति च काषायणश्रुतौ ॥ अत आह—॥ **ॐ ज्योतिराद्यधिष्ठानं तु तदामननात् ॐ ॥१५॥** यज्ज्योतिराद्यधिष्ठानं ब्रह्म तदेवैतैः करणैः प्रवर्तयति । 'यः प्राणे तिष्ठन्नि'[1]त्यादि तदामननात् ॥ १५ ॥ कथं जीवकरणत्वश्रुतिरित्यतो वक्ति—॥ **ॐ प्राणवता शब्दात् ॐ ॥ १६ ॥** जीवेनैव (स्व)करणैः कारयति परमात्मा । अतो न विरोधः । एष ह्येनेनाऽऽत्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मानयति बुद्ध्या बोधयति तस्मादेतावाहुः सृतिरसृतिरिती'ति भाल्लवेयश्रुतेः ॥ 'करणैः कारणं ब्रह्म पुरुषापेक्षयाऽखिलम् । श्रोत्रादिभिः कारयति करणानीत्यतो विदुः ॥ न जीवापेक्षया मुख्यं कारयेत्परमेश्वरः । केवलात्मेच्छया तस्मान्मुख्यत्वं तस्य निश्चितमि'ति च वाराहे ॥१६॥ ॥ **ॐ तस्य च नित्यत्वात् ॐ ॥१७॥** अनादिनित्यत्वाच्च जीवकरणसम्बन्धस्य युज्यते तत्करणत्वश्रुतिः । 'अथावियोगीनि । करणैर्वाव न वियुज्यते देहेनैव वियुज्यत इत्येतद्वाव करणानां करणत्वं यद्वाव न वियुज्यत' इति गौपवनश्रुतिः । चशब्दः करणसम्बन्धग्राही ॥ १७ ॥ ज्योतिराद्यधिकरणम् ॥ १० ॥

---

[1] ५-७-१६. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

'अथेन्द्रियाणि प्राणा वा इन्द्रियाणि प्राणा हीदं द्रवन्ती'ति सयुक्तिका पौत्रायणश्रुतिः सामान्येन प्राणानामिन्द्रियत्वं वक्ति। 'द्वादशैवेन्द्रिण्याहुर्मनोबुद्धी तु द्वादशे' इति च काषायणश्रुतिः। अतः कस्येन्द्रियत्वं निवार्यत इत्यतो वक्ति—॥ **ॐ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॐ ॥ १८ ॥** मुख्यप्राणमृते त एवेन्द्रियाणि। 'द्वादशैवेन्द्रियाण्याहुः प्राणो मुख्यस्त्वनिन्द्रियम्। द्रवतां हीन्द्रियाणां तु नियन्ता प्राण एकराडि'ति पौत्रायणश्रुतिः ॥ 'श्रोत्रादीनि तु पञ्चैव तथा वागादिपञ्चकम्। मनोबुद्धिसहायानि द्वादशैवेन्द्रियाणि तु ॥ विषयद्रवणात्तेषामिन्द्रियत्वमुदाहृतम्। तेषां नियामकः प्राणः स्थित एवाखिलप्रभुरि'ति बृहत्संहितायाम् ॥ १८ ॥ ॥ **ॐ भेदश्रुतेः ॐ ॥ १९ ॥** 'स्थित एव हीदं मुख्यप्राणः करोति कारयति बलति बालयति धत्ते धारयति प्रभुं वा एनमाहुरथेन्द्रियाणि न स्थितानि न कुर्वन्ति न कारयन्ति न बलन्ति न बालयन्ति न दधते न धारयन्ति तानि ह वा एतान्यबलानि तस्मादाहुरिन्द्रियाणि करणानी'ति पौत्रायणश्रुतेः ॥१९॥ **ॐ वैलक्षण्याच्च ॐ ॥२०॥** पुरुषापेक्षया प्रवृत्तिरिन्द्रियाणां दृश्यते न मुख्यस्य। 'प्राणाग्नय एवैतस्मिन्पुरे जाग्रती'[1]ति च श्रुतिः ॥ २० ॥ इन्द्रियाधिकरणम् ॥११॥

'विरिञ्चो वा इदं सर्वं विरेचयति विदधाति ब्रह्मा वाव विरिञ्च एतस्माद्धीमे रूपनामनी' इति गौपवनश्रुतिः॥ 'यस्माद्विरेचयेत्सर्वं विरिञ्चस्तेन भण्यते। एको हि कर्ता जगतो ब्रह्मैव च चतुर्मुख' इति च युक्तिर्ब्राह्मे। 'अथ कस्मादुच्यते परम इति परमाद्ध्येते नामरूपे व्याक्रियेते तस्मादेनमाहुः परम इति। अथ कस्मादुच्यते ब्रह्मेति बृहत्त्वाद्बृंहणाच्चे'त्याग्निवेश्यश्रुतिः। अत आह—

[1] ४-३. प्र.उ.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ ॥ ॥ २१ ॥ नामरूपक्लृप्तिः परादेव । 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्य(दा) आस्त'[1] इति श्रुतेः । त्रिवृत्कुर्वत इति हेतुगर्भः । त्रिवृत्करणापेक्षत्वान्नामरूपयोः ॥ 'सर्वनाम्नां च रूपाणां व्यवहारेषु केशवः । एक एव यतः स्रष्टा ब्रह्माद्यास्तदवान्तरा' इति च पाद्मे ॥ 'त्रिवृत्क्रिया यतो विष्णो रूपं च तदपेक्षया । रूपापेक्षं तथा नाम व्यवहारस्तदात्मकः ॥ अतो नाम्नश्च रूपस्य व्यवहारस्य चैकराट् । हरिरेव यतः कर्ता पिताऽतो भगवान्प्रभुरि'ति च ब्रह्माण्डे ॥ २१ ॥ संज्ञाधिकरणम् ॥ १२ ॥

'अद्भ्यो हीदमुत्पद्यते आपो वाव मांसमस्थि च भवत्यापः शरीरमाप एवेदं सर्वमि'ति कौण्डिन्यश्रुतिः । 'अम्मयं तु यतो मांसमतस्तृप्तिश्च मांसत' इति च भारते । 'पृथिवी शरीरमाकाश-मात्मे'[2]ति च अतो ब्रवीति—**॥ ॐ मांसादि भौमं यथा-शब्दमितरयोश्च ॐ ॥ २२ ॥** 'यत्कठिनं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेज' इति श्रुतेर्मांसाद्येव भौमं न सर्वशरीरम् । अप्तेजसोश्च कार्यं यथाशब्दमङ्गीकर्तव्यम् ॥ 'यद्वावाथो विमिश्रं मिश्रांद्ध्येतद्भवति मिश्राणि हि भूतानि तस्मादेवैवमाचक्षते भूतानीती'ति हि काषायणश्रुतिः । 'पञ्चभूतात्मकं सर्वं तथाऽप्येकविवक्षया । एक-भूतात्मकत्वेन व्यवहारस्तु वैदिके । भौममित्येव काठिन्याच्छौक्ल्या-दौदकमित्यपि । तेजिष्ठत्त्वात्तैजसं च यथाऽस्थ्नां वचनं श्रुतावि'ति वायुप्रोक्ते ॥ २२ ॥ कथं तर्हि विशेषवचनमित्यत आह—**॥ ॐ वैशेष्यात्तु तद्वादस्तद्वादः ॐ ॥ २३ ॥** भूतानां विशेष-संयोगादेव विशेषव्यवहारः । 'पार्थिवानां शरीराणामर्धेन पृथिवी स्मृता ।

---

[1] ३-१२. तै.आ. [2] ५-२-१३. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

इतरेऽर्धे त्रिभागिन्य आपस्तेजस्तु भागतः । इति सामान्यतो ज्ञेयं भेदं च प्रतिपूरुषम् । स्वर्गस्थानां शरीराणामर्धं तेज उदाहृतमि'ति च बृहत्संहितायाम् ॥ सर्वाध्यायार्थावधारणार्थाऽध्यायान्ते द्विरुक्तिः । गारुडे च—'अध्यायान्ते द्विरुक्तिः स्याद्वेदे वा वैदिकेऽपि वा । विचारो यत्र सज्ज्येत पूर्वोक्तस्यावधारणे ॥ अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवेत् । विनिन्द्य चेतरान्मार्गान्सम्पूर्णफलता तथे'ति ॥ २३ ॥ मांसा(द्य)धिकरणम् ॥ १३ ॥ इति श्रीमत्कृष्ण-द्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥ द्वितीयोऽविरोधाध्याय-स्समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ तृतीयाध्यायः ॥

साधनविचारोऽयमध्यायः । वैराग्याय गत्यादिनिरूपणा प्रथमपादे । भूतबन्धो हि बन्धः । 'भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विमोचनमि'ति च वाराहे । तच्च मरणे भवति । 'भूतानां विनिवृत्तिस्तु मरणं समुदाहृतम् । भूतानां सम्प्रयोगश्च जनिरित्येव पण्डितैरि'ति च भारते । अतः किं साधनैरित्यत आह—॥ ॐ **तदन्तरप्रतिपत्तौ रंहतिसम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्** ॐ ॥ १ ॥ शरीरान्तरप्रतिपत्तौ भूतपरिष्वक्त एव गच्छति । 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' । 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'[1]ति प्रश्नपरिहाराभ्याम् ॥१॥ ॥ तदन्तराधिकरणम् ॥ १ ॥

॥ ॐ **त्र्यात्मकत्वात्तु भूयस्त्वात्** ॐ ॥ २ ॥ अप्छब्दस्तु त्र्यात्मकत्वाद्युज्यते । भूयस्त्वाच्चापाम् । 'तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमा' इति च भागवते ॥ २ ॥ त्र्यात्मकत्वाधिकरणम् ॥ २ ॥

॥ ॐ **प्राणगतेश्च** ॐ ॥ ३ ॥ 'यत्र वाव भूतानि तत्र करणानि नित्यानि ह वा एतानि भूतानि करणानि च । नैतानि कदाचिद्वियुज्यन्ते न च विलीयन्त' इति भाल्लवेयश्रुतेः प्राणगतेर्भूतान्यपि सह गच्छन्ती'[2]ति सिद्धम् ॥ ३ ॥ प्राणगत्यधिकरणम् ॥ ३ ॥

॥ ॐ **अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्** ॐ ॥ ४ ॥ 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण'[3]

[1] ५-३, ९. छां.उ. [2] सन्तीति. पा. [3] ५-२-१३. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

इत्यादिश्रुतेर्न प्राणानां जीवेन सह गतिरिति चेन्न—भागतोऽग्न्यादिप्राप्तेः ॥ 'पुरुषस्य मृतौ ब्रह्मन्प्राणा भागत एव तु । अधिदैवं प्राप्नुवन्ति भागतोऽनुव्रजन्ति तम् ॥ पुनः शरीरसम्प्राप्तौ तमेवानुविशन्ति चे'ति ब्राह्मे ॥ ब्रह्माण्डे च—'मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च । भागतो भागतस्त्वेनमनुगच्छन्ति सर्वश' इति ॥ ४ ॥ अग्न्याद्यधिकरणम् ॥ ४ ॥

॥ ॐ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॐ ॥ ५ ॥ 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती[1]ति प्रथमाऽग्नौ श्रूयते न भूतानि जुह्वतीति । अतो नेति चेन्न । ता एव प्रस्तुता आपः श्रद्धारूपेण हूयन्ते । 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'[2]त्युपसंहारोपपत्तेः ॥ ५ ॥ प्रथमश्रवणाधिकरणम् ॥ ५ ॥

॥ ॐ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॐ ॥ ६ ॥ अग्न्यादिगतिः प्रत्यक्षतः श्रूयते । अतः प्रत्यक्षश्रवणान्न युक्तमिति चेन्न । 'अथैनं यजमानं किं न जहाति भूतान्येव भूतैरेव गच्छति भूतैर्भुङ्क्ते भूतैरुत्पद्यते भूतैश्चरति भूतैर्विचरती'ति कौण्ठरव्यश्रुतौ प्रतीतेः ॥ ६ ॥ अश्रुतत्वाधिकरणम् ॥ ६ ॥

'अपाम सोमममृता अभूमे'[3]त्यादि श्रुतिविरोध इत्यतो वक्ति—

॥ ॐ भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॐ ॥ ॥ ७ ॥ भागतस्तदमृतत्वम् । 'नान्यः पन्था अयनाय विद्यत'[4] इति श्रुतेरात्मविद एव हि मुख्यम् । वाशब्दात्पारम्पर्येणाऽऽत्मविदपेक्षया वा । तथा हि श्रुतिः —'स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतं यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवाऽऽत्मानमेव लोकमुपासीत स य

---

[1] ५-४-२. छां.उ. [2] ५-९-१. छां.उ. [3] ८-४८-३. ऋ.सं. [4] ३-१२. तै.आ.

SGDF
Sri Gargeshwari Digital Foundation

आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवाऽत्मनो यद्यत्कामयते तत्तत्सृजते'[1] ॥ 'अमृतो वाव सोमपो भवति यावदिन्द्रो यावन्मनुर्यावदादित्यः' । 'कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणि यत एनममृतं नयन्ती'ति च ॥७॥ भाक्ताधिकरणम् ॥ ७ ॥

कृतस्य कर्मणो भोगेन क्षयान्मुक्तिरित्यत आह— ॥ ॐ **कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्याम् ॐ ॥ ८ ॥** 'ततः शेषेणेमं लोकमायाति पुनः कर्म कुरुते पुनर्गच्छति पुनरागच्छती'ति श्रुतेः— 'भुक्तशेषानुशयवानिमां प्राप्य भुवं पुनः । कर्म कृत्वा पुनर्गच्छेत्पुनरायाति नित्यशः ॥ आचतुर्दशमाद्वर्षात्कर्माणि नियमेन तु । दशावराणां देहानां कारणानि करोत्ययम् । अतः कर्मक्षयान्मुक्तिः कुत एव भविष्यती'त्यादिस्मृतेश्च शेषवानेवाऽयाति ॥ ८ ॥ ॥ कृतात्ययाधिकरणम् ॥ ८ ॥

'यथेतमेव गच्छति यथेतमागच्छति स भुङ्क्ते स कर्म कुरुते स परिवर्तत' इति गतिप्रकारेणाऽगतिः प्रतीयते । अतो ब्रूते— ॥ ॐ **यथेतमनेवं च ॐ ॥९॥** 'धूमादभ्रमभ्रादाकाशमाकाशाच्चन्द्रलोकं यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षती'ति काषायणश्रुतेर्यथागतमन्यथा च ॥ ९ ॥ यथेताधिकरणम् ॥ ९ ॥

॥ ॐ **चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॐ ॥ १० ॥** 'तद्य इह रमणीयचरणा रमणीयां योनिमापद्यन्ते कपूयचरणाः कपूयामि'[2]ति श्रुतेश्चरणफलमेव गमना-

---

[1] ३-४-१५. बृ.उ. [2] ५-१०-७. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

गमने न यज्ञादिकृतः। 'आचार इति सम्प्रोक्तः कर्माङ्गत्वेन शुद्धिदः। अशुद्धिदस्त्वनाचारश्चरणं तूभयं मतमि'ति स्मृतेरिति चेन्न। यज्ञाद्युपलक्षणार्था चरणादिश्रुतिरिति कार्ष्णाजिनिर्मन्यते ॥ १० ॥

॥ ॐ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॐ ॥ ११ ॥

तर्हि रमणीयाः कपूया इत्येव स्यात्। चरणशब्दस्यानर्थक्यमिति चेन्न। चरणापेक्षत्वाद्रमणीयत्वादेस्तज्ज्ञापनार्थत्वेनोपपत्तेः ॥ ११ ॥

॥ ॐ सुकृतदुष्कृते एवेति तु बादरिः ॐ ॥ १२ ॥

'धर्मं चरत माऽधर्ममि'त्यादिप्रयोगात्सुकृतदुष्कृते एव चरणशब्दोक्ते इति बादरिर्मन्यते। तुशब्दात्स्वसिद्धान्तोऽपि स एवेति सूचयति। 'तुशब्दस्तु विशेषे स्यात्स्वसिद्धान्तेऽवधारण' इति च नाममहोदधौ॥ १२ ॥ चरणाधिकरणम् ॥ १० ॥

पुण्यकृतामेव गमनागमने नेतरेषामित्यत आह— **॥ ॐ अनिष्टादिकारिणामपि च श्रुतम् ॐ ॥ १३ ॥** 'तद्य इह शुभाकृतो ये वाऽशुभकृतस्तेऽशुभमनुभूयाऽवर्तन्ते पुनः कर्म कुर्वन्ति पुनर्गच्छन्ति पुनरागच्छन्ती'ति भाल्लवेयश्रुतौ ॥ १३ ॥ **ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॐ ॥ १४ ॥**

संयमनमनुभूय केषाञ्चिदारोहः केषाञ्चिदवरोहः। तुशब्दोऽवधारणे। 'सर्वे वा एतेऽशुभकृतः संयमने प्रपतन्ति तत्र ये परद्विषो गुरुद्विषः श्रुतिद्विषस्तदवमन्तारः शठा मूर्खा इति ते वै ततोऽवरुह्य तमसि प्रपतन्ति नैवैत उत्तिष्ठन्तेऽपि कर्हिचिद्ध्रुवं वा एतदित्याहुरथ येऽन्ये ब्रह्मद्विषः स्तेनाः सुरापा इति ते वै तदनुभूयेमं लोकमनुव्रजन्ती'ति कौण्ठरव्यश्रुतेः ॥ १४ ॥ **ॐ स्मरन्ति च ॐ ॥ १५ ॥**

'गच्छन्ति पापिनः सर्वे नरकं नात्र संशयः। तत्र भुक्त्वा पतन्त्येव

SGDF
Sri Gargeshwari Digital Foundation

ये द्विषन्ति जनार्दनम् ॥ महातमसि मग्नानां न तेषामुत्थितिः क्वचित् । इतरेषां तु पापानां व्युत्थानं विद्यतेऽपि च ॥ सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् । इति सर्वत्र नियमः पश्चकष्टे तु तत्सदे'-त्यादि ॥ १५ ॥ अनिष्टादिकार्यधिकरणम् ॥ ११ ॥

॥ ओँ अपि सप्त ओँ ॥ १६ ॥ 'रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा । कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि तु ॥ तामिस्रश्चान्धतामिस्रो द्वौ नित्यौ सम्प्रकीर्तितौ ॥ इति सप्त प्रधानानि बलीयस्तूत्तरोत्तरम् । एतानि क्रमशो गत्वैवाऽरोहोऽथावरोहणमि'ति च भारते ॥ १६ ॥ सप्ताधिकरणम् ॥ १२ ॥

ईश्वरस्य नरकायुक्तेः 'सर्वं विसृजति[1] सर्वं विलापयति सर्वं रमयति सर्वं न रमयति सर्वं प्रवर्तयत्यन्तरस्मिन्निविष्ट' इति कौषारव-श्रुतिविरोध इत्यतो वक्ति—॥ ओँ तत्रापि च तद्व्यापारा-दविरोधः ओँ ॥ १७ ॥ चशब्दाददुःखानुभवेन । 'स स्वर्गे स भूमौ स नरके सोऽन्धे तमसि प्रवृत्तिकृदेक एवानुविष्टो नासौ दुःखभुगीश्वरः प्रभुत्वात्सर्वं पश्यति सर्वं कारयति नासौ दुःखभुग्य एवं वेदेति' पौत्रायणश्रुतेरविरोधः ॥ 'नरकेऽपि वसन्नीशो नासौ दुःखभुगुच्यते । नीचोच्चतैव दुःखादेर्भोग इत्यभिधीयते । नासौ नीचोच्चतां याति पश्यत्येव प्रभुत्वत' इति भागवततन्त्रे ॥ १७ ॥ ॥ तद्व्यापाराधिकरणम् ॥ १३ ॥

'अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्रमिश्राण्यसकृदा-वर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमि'[2]ति गति-स्वातन्त्र्यं भूतानां प्रतीयत इत्यत आह—॥ ओँ विद्याकर्मणोरिति तु प्रकृतत्वात् ओँ ॥१८॥ विद्याकर्मापेक्षयैतद्वचनम् । तयोरपि

[1] सृजति. पा. [2] ५-१०-८. छां.उ. (नैकतरेण गच्छन्ति) पा.

SGDF
Sri Gangeshwari Digital Foundation

प्रकृतत्वात् ॥ 'विद्यापथः कर्मपथो द्वौ पन्थानौ प्रकीर्तितौ । तद्वर्जितस्त्रिधा याति तिर्यग्वा नरकं तम' इति च भारते ॥ १८ ॥
॥ विद्याकर्माधिकरणम् ॥ १४ ॥

'यत्र दुःखं सुखं तत्र सर्वत्रापि प्रतीयते । अपि नीचगतौ किञ्चित्किमु मानुषदेहिन' इति वचनान्महातमस्यपि सुखप्राप्तिरित्यत आह—॥ **ॐ न तृतीये तथोपलब्धेः ॐ** ॥ १९ ॥ 'अथाविद्वानकर्माऽवाग्गच्छति त्रिधा ह वाऽवाग्ग(च्छ)तिस्तिर्यग्यातना तम इति द्वे वाव सुखानुवृत्ते, न तमः सुखानुवृत्तं केवलं ह्येवात्र दुःखं भवती'ति श्रुतेर्न तृतीयावाग्गतौ सुखम् ॥१९॥ **ॐ स्मर्यतेऽपि च लोके ॐ** ॥ २० ॥ 'तिर्यक्षु नरके चैव सुखलेशो विधीयते । नान्धे तमसि मग्नानां सुखलेशोऽपि कश्चने'ति भविष्यत्पर्वणि ॥ लोकसिद्धं चैतत् । चशब्दाल्लोकसिद्धिरपि स्मार्तेत्याह ॥ 'अतिप्रिये यथा राजा न दुःखं सहते क्वचित् । अत्यप्रिये सुखमपि तथैव परमेश्वर' इति हि ब्राह्मे ॥ २० ॥ **ॐ दर्शनाच्च ॐ** ॥२१॥ 'नारायणप्रसादेन समिद्धज्ञानचक्षुषा । अत्यन्तदुःखसल्लीनान्निश्शेष-सुखवर्जितान् ॥ नित्यमेव तथाभूतान्विमिश्रांश्च गणान्बहून् । निरस्ता-शेषदुःखांश्च नित्यानन्दैकभागिनः । अपश्यत्त्रिविधान्ब्रह्मा साक्षादेव चतुर्मुख' इति दर्शनवचनाच्च पाद्मे ॥२१॥ **ॐ तृतीये शब्दा-वरोधः संशोकजस्य ॐ** ॥ २२ ॥ तृतीये तृतीयतमसः श्रवणादेव शब्दानुसारेण संशोकजमोहप्राप्तिः ॥२२॥ **ॐ स्मरणाच्च ॐ** ॥ २३ ॥ 'महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम् । श्रवणादेव मूर्च्छादिरधरस्य यतो भवेत् । तस्मान्न विस्तरेणैतत्कथ्यते राजसत्तमे'ति कौर्मे ॥ २३ ॥ महातमोऽधिकरणम्[1] ॥ १५ ॥

---

[1] न तृतीयाधिकरणम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

'धूमो भूत्वाऽभ्रं भवती'[1]त्याद्यन्यभावः श्रूयते। स कथमित्यतो ब्रवीति—॥ ॐ तत्स्वाभाव्यापत्तिरुपपत्तेः ॐ ॥ २४ ॥ धूमादिषु प्रविश्य तद्गतौ गतिः स्थितौ स्थितिरित्यादिरेव तद्भावापत्तिः। न ह्यन्यस्यान्यभावो युज्यते। न च तत्पदप्राप्तिः। गारुडे च— धूमादिभावप्राप्तिश्च तद्गतौ गतिरेव तु। स्थितौ स्थितिः प्रवेशश्च लघुत्स्वादिस्तथैव च॥ न ह्यन्यस्यान्यथाभावो न च तत्पदमिष्यते। विद्यागम्यं पदं यस्मान्न तत्प्राप्यं हि कर्मणा॥ एकदेशस्वभावेन वागभेदाऽपि युज्यते। यथा जीवः परं ब्रह्म ब्रह्मेदं जगदित्यपीति॥२४॥ ॥ तत्स्वाभाव्याधिकरणम्॥ १६॥

बहुस्थानगमनात्कल्पान्तमप्येवं स्यादित्यत आह—॥ ॐ नातिचिरेण विशेषात् ॐ ॥ २५ ॥ 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्यन्त' इति विशेषान्नातिचिरेण॥ 'स्वर्गाल्लोकादवाक् प्राप्तो वत्सरात्पूर्वमेव तु। मातुः शरीरमाप्नोति पर्यटन्यत्र तत्र चे'ति च नारदीये॥ २५॥ नातिचिरेणाधिकरणम्[2]॥ १७॥

'त इह व्रीहियवा ओषधिवनस्पतयस्तिला माषा इति जायन्त'[3] इति श्रवणादनर्थफलत्वं यज्ञादेरित्यतो वक्ति—॥ ॐ अन्याधिष्ठिते पूर्ववदभिलापात् ॐ ॥ २६ ॥ अन्याधिष्ठिते व्रीह्यादिशरीरे प्रवेशः। न तु भोगोऽस्य। 'धूमो भूत्वाऽभ्रं भवती'[4]त्यादिपूर्वोक्ति(क्त)वत्॥ 'सोऽवाग्गतः स्थावरान्प्रविश्याभोगेनैव व्रजन् स्थूलं शरीरमेति स्थूलाच्छरीराद्भोगाननुभुङ्क्त' इत्यभिलापात्कौषारवश्रुतौ॥ 'स्वर्गादवाग्गतो देही व्रीह्यादीतरदेहगः। अभुञ्जंस्तु क्रमेणैव

[1] ५-१०-५. छां.उ. [2] अचिरप्राप्त्यधिकरणम्. पा. [3] ५-१०-६. छां.उ. [4] ५-१०-५. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

देहमाप्नोति कालत' इति वाराहे ॥ २६ ॥ **ॐ अशुद्धमिति चेन्न शब्दात् ॐ ॥२७॥** हिंसाशापत्वात्पापस्यापि सम्भवाद्दुःखं च भवत्विति चेन्न । शब्दविहितत्वात् ॥ 'हिंसा त्ववैदिका या तु तयाऽनर्थो ध्रुवं भवेत् । वेदोक्तया हिंसया तु नैवानर्थः कथञ्चने'ति वाराहे ॥ २७ ॥ अन्या(धिष्ठिता)धिकरणम् ॥ १८ ॥

'स्वर्गादवाग्गतश्चापि मातुरेवोदरं व्रजेदि'ति वचना'द्य एव गृही भवति यो वा रेतः सिञ्चति तमेवानुविशती'ति श्रुतिः कथमित्यत आह— ॥ **ॐ रेतः सिग्योगोऽथ ॐ ॥ २८ ॥** 'ततो रेतस्सिचमेवानुप्रविशत्यथ मातरमथ प्रसूयते स कर्म कुरुत' इति कौण्ठरव्यश्रुतेः पितरमेव प्रथमतो प्रविशति । मातृप्राप्तेः पश्चादपि भाव्यत्वात् ॥ २८ ॥ रेतोऽधिकरणम् ॥ १९ ॥

'देहं गर्भस्थितं क्वापि प्रविशेत्स्वर्गतो गत' इति वचनात्पश्चादेव प्रविशतीत्यत आह—॥ **ॐ योनेः शरीरम् ॐ ॥ २९ ॥** पितृशरीरान्मातृयोनिमनुप्रविश्य तत एव शरीरमाप्नोति ॥ 'दिवः स्थास्नूनृगच्छति स्थास्नुभ्यः पितरं पितुर्मातरं मातुः शरीरं शरीरेण जायत इति सम्मितम् । अथासम्मितं स्थास्नुभ्यो जायते पितुर्मातुरन्तरे वा गर्भे वा बहिर्वे'ति पौष्यायणश्रुतेः ॥ 'स्थावराणि दिवः प्राप्तः स्थावरेभ्यश्च पूरुषम् । पुरुषात्स्त्रियमापन्नस्ततो देहं यथाक्रमम् ॥ देहेन जायते जन्तुरिति सामान्यतो जनिः । विशेषजननं चापि प्रोच्यमानं निबोध मे ॥ स्थास्नुष्वथापि पुरुषे प्रमदायामथापि वा । गर्भे वा बहिरेवाथ क्वचित्स्थानान्तरेषु चे'ति ब्राह्मे॥२९॥योन्यधिकरणम्॥२०॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयाध्यायस्य प्रथमः पादः ॥ ३ ॥ १ ॥

SGDF
Sri Gangeshwari Digital Foundation

भक्तिरस्मिन्पाद उच्यते। भक्तचर्थं भगवन्महिमोक्तिः॥

॥ ॐ सन्ध्ये सृष्टिराह हि ॐ ॥ १ ॥ न स्वप्नोऽपि तं विना प्रतीयते। 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान् पथः सृजत'[1] इत्यादि श्रुतेः ॥१॥ **ॐ निर्मातारं चैके पुत्रादयश्च ॐ ॥ २ ॥** 'य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण'[2] इति च। 'एतस्माद्ध्येव पुत्रो जायत एतस्माद्भ्रातैतस्माद्भार्या यदेनं पुरुषमेष स्वप्नेनाभिहन्ति' इति गौपवन-श्रुतिश्च ॥ २ ॥ केन साधनेन?— **॥ ॐ मायामात्रं तु कात्स्न्येनाभिव्यक्तस्वरूपत्वात् ॐ ॥ ३ ॥** अनादि-मनोगतान्संस्कारान्स्वेच्छामात्रेण प्रदर्शयति नान्येन साधनेन, सम्यगनभिव्यक्तत्वात् ॥ ब्रह्माण्डे च—'मनोगतांस्तु संस्कारान्स्वेच्छया परमेश्वरः। प्रदर्शयति जीवाय स स्वप्न इति गीयते ॥ यदन्यथात्वं जाग्रत्त्वं सा भ्रान्तिस्तत्र तत्कृता। अनभिव्यक्तरूपत्वान्नान्यसाधन-जम्भवेदि'ति ॥ ३ ॥ **ॐ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॐ ॥ ४ ॥** साधनान्तराभावेऽपि भावाभावसूचकत्वेन चेश्वरो दर्शयति ॥ 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेऽभिपश्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शन'[3] इत्यादिश्रुतेः ॥ हिशब्दा-द्दर्शनाच्च ॥ 'यद्वाऽपि ब्राह्मणो ब्रूयाद्देवता वृषभोऽपि वा। स्वप्नस्थ-मथवा राजा तत्तथैव भविष्यती'त्याद्याचक्षते च स्वप्नविदो व्यासादयः ॥ ४ ॥ सन्ध्याधिकरणम् ॥ १ ॥

॥ ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ ॥ ५ ॥ बन्धमोक्षप्रदत्वात्स एव स्वप्न-

[1] ६-३-१०. बृ.उ. [2] ५-८. कठ. उ. [3] ५-२-९. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

तिरस्कर्ता। 'स्वप्नादिबुद्धिकर्ता च तिरस्कर्ता स एव च। तदिच्छया यतो ह्यस्य बन्धमोक्षौ प्रतिष्ठिता'विति कौर्मे ॥ ५ ॥ पराभिध्यानाधिकरणम् ॥ २ ॥

॥ ॐ देहयोगाद्वासोऽपि ॐ ॥ ६ ॥ देहयोगेन वासो जाग्रदपि तत एव ॥ 'स एव जागरिते स्थापयति स स्वप्ने स प्रभुस्तुराषाट् स एको बहुधा भवती'ति कौण्ठरव्यश्रुतेः ॥ ६ ॥
॥ देहयोगाधिकरणम् ॥ ३ ॥

॥ ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॐ ॥७ जाग्रत्स्वप्नाभावः सुप्तिः नाडीस्थे परमात्मनि । 'आसु तदा नाडीषु सुप्तो भवति'[1] । 'सता सौम्य तदा सम्पन्नो भवती'[2]ति श्रुतेः ॥७॥
॥ तदभावाधिकरणम् ॥ ४ ॥

॥ ॐ अतः प्रबोधोऽस्मात् ॐ ॥८॥ यतस्तस्मिन्सुप्तिः ॥ 'एष एव सुप्तं प्रबोधयत्येतस्माज्जीव उत्तिष्ठत्येष प्रमातैष परम' इति (हि) कौण्डिन्यश्रुतिः ॥ ८ ॥ प्रबोधाधिकरणम् ॥ ५ ॥

॥ ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥ ९ ॥ न च केषाञ्चित्स्वप्नादिकर्ता न तु सर्वेषामिति । 'एष ह्येव साधु कर्म कारयती'[3]ति कर्मण्यवधारणात् ॥ 'प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु । परमः पुरुषो विष्णुस्ततोऽन्यो नास्ति कश्चने'-त्यनुसारिस्मृतेश्च ॥ 'एष स्वप्नान्दर्शयत्येष प्रबोधयत्यथैष एव परम आनन्द' इति च श्रुतिः ॥ 'आत्मानमेव लोकमुपासीते'[4]ति च विधिः ॥ ९ ॥ कर्मानुस्मृत्यधिकरणम् ॥ ६ ॥

---

[1] ८-६-३. छां.उ. [2] ६-८-१. छां.उ. [3] ३-८. कौ.उ.
[4] ३-४-१५. बृ.उ.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॐ ॥ १० ॥
मोहावस्थायां परमेश्वरेऽर्धप्राप्तिर्जीवस्य ॥ 'हृदयस्थात्पराज्जीवो दूरस्थो जाग्रदेष्यति । समीपस्थस्तथा स्वप्नं स्वपित्यस्मिँल्लयं व्रजन् ॥ यत एवं त्रयोऽवस्था मोहस्तु परिशेषतः । अर्धप्राप्तिरिति ज्ञेयो दुःखमात्रप्रतिस्मृतेरि'ति वाराहे ॥ सोऽपि तत एवेति सिद्धम् ॥ 'मूर्च्छा प्रबोधनं चैव यत एव प्रवर्तते । स ईशः परमो ज्ञेयः परमानन्दलक्षण इति (हि) कौर्मे ॥ १० ॥ मुग्धप्राप्त्यधिकरणम्[1] ॥ ७ ॥

स्थानापेक्षया परमात्मनो(ऽपि) भेदादनुग्राह्यानुग्राहकभाव इत्यत आह—**॥ ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ ॥ ११ ॥** स्थानापेक्षयाऽपि परमात्मनो न भिन्नं रूपम् ॥ 'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत'[2] इति श्रुतिः ॥ 'एकरूपः परो विष्णुः सर्वत्रापि न संशयः । ऐश्वर्याद्रूपमेकं च सूर्यवद्बहुधेयत' इति (हि) मात्स्ये ॥ 'प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोह' इति च भागवते ॥ ११ ॥ **ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥ १२ ॥** 'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिध्यत'[3] इति भेदवचनान्नेति चेन्न । 'एष त आत्माऽन्तर्याम्यमृतः'[4] । 'अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्'[5] । 'अयं वै हरयोऽयं वै दश च सहस्राणि च बहूनि चानन्तानि च । तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनमि'[6]ति प्रत्येकमभेदवचनात् ॥ १२ ॥ **ॐ अपि चैवमेके ॐ ॥ १३ ॥**
एवमभेदेनैव । चशब्दादनन्तरूपत्वं चैके शाखिनः पठन्ति ।

---

[1] सम्पत्त्यधिकरणम्. पा. [2] ३-२-३. ऐ.आ. [3] २-१६. मां.उ.
[4] ५-७-३. बृ.उ. [5] ४-५-१. बृ.उ. [6] ४-५-१९. बृ.उ.

SGDF
Sri Gurgeshwari Digital Foundation

'अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः। ओङ्कारो विदितो येन स मुनिर्नेतरो जन'[1] इति। अभेदेऽपि भेदव्यपदेशः स्थानभेदादैश्वर्ययोगाच्च युज्यते॥ ब्रह्मतर्के च—'बद्धो बन्धादिसाक्षित्वाद्भिन्नो भिन्नेषु संस्थितेः। निर्दोषाद्वयरूपोऽपि कथ्यते परमेश्वर' इति॥१३॥
॥ स्थान(तोऽप्य)भेदाधिकरणम्॥ ८॥

रूपवत्त्वादनित्यत्वमित्यतो वक्ति—॥ **ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ॥ १४॥** प्रकृत्यादिप्रवर्तकत्वेन तदुत्तमत्वान्नैव रूपवद्ब्रह्म। हिशब्दा'दस्थूलमनण्वि'[2]त्यादि श्रुतेश्च॥ 'भौतिकानि हि रूपाणि भूतेभ्योऽसौ परो यतः। अरूपवानतः प्रोक्तः क्व तदव्यक्ततः पर' इति मात्स्ये॥ १४॥ **ॐ प्रकाशवच्चावैयर्थ्यम् ॐ॥१५॥** 'यदा पश्यः पश्यते रुक्मवर्णम्'[3]। 'श्यामाच्छबलं प्रपद्ये'[4]। 'सुवर्णज्योति'[5]रित्यादिश्रुतीनां च न वैयर्थ्यम्। विलक्षणरूपवत्वात्। यथा चक्षुरादिप्रकाशे विद्यमाने वैलक्षण्यादप्रकाशादिव्यवहारः॥१५॥ **ॐ आह च तन्मात्रम् ॐ॥ १६॥** वैलक्षण्यं चोच्यते रूपस्य विज्ञानानन्दमात्रत्व'मैकात्म्यप्रत्ययसारमि'[6]ति॥ 'आनन्दमात्रमजरं पुराणमेकं सन्तं बहुधा दृश्यमानम्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषामि'ति चतुर्वेदशिखायाम्॥ १६॥ **ॐ दर्शयति चाथो अपि स्मर्यते ॐ॥ १७॥** दर्शयति चानन्दस्य रूपत्वं 'तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाती'[7]ति॥

---

[1] ४-७. मां.उ. [2] ५-८-८. बृ.उ. [3] ३-१-३. मुं.उ.
[4] ८-१३-१. छां.उ. [5] ३-१०. तै.उ. [6] २-७. मां.उ.
[7] २-२-८. मुं.उ.

SGDF
Sri Gangeshwari Digital Foundation

'शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जनम्। चिन्तयीत यतिर्नान्यं ज्ञानरूपादृते हरेरि'ति च मात्स्ये ॥ १७॥ अरूपाधिकरणम् ॥ ९ ॥

॥ ॐ अत एव चोपमा सूर्यकादिवत् ॐ ॥१८॥

यस्मादेवं परमेश्वररूपाणां मिथो न कश्चिद्भेदोऽत एव सादृश्याज्जीवस्यापि तथा स्यादिति तस्य प्रतिबिम्बत्वमुक्त्वा चशब्देन भेदं दर्शयति ॥ 'रूपं रूपं प्रतिरूपो बभूव'[1] । 'बहवः सूर्यका यद्वत्सूर्यस्य सदृशा जले । एवमेवाऽत्मका लोके परात्मसदृशा मता' इत्यादि ॥ अत एव भिन्नत्वतदधीनत्वसादृश्यैरेव सूर्यकाद्युपमा, नोपाध्यधीनत्वादिना ॥ १८ ॥ उपमाधिकरणम् ॥ १० ॥

नित्यसिद्धत्वात्सादृश्यस्य नित्यानन्दज्ञानादेर्न भक्तिज्ञानादिप्रयोजनमित्यतो ब्रवीति— ॥ **ॐ अम्बुवदग्रहणात्तु न तथात्वम् ॐ** ॥ १९ ॥ अम्बुवत्स्नेहेन। ग्रहणं ज्ञानम्। भक्तिं विना न तत्सादृश्यं सम्यगभिव्यज्यते ॥ 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामि'[2]ति हि श्रुतिः। महत्वबुद्धिर्भक्तिस्तु स्नेहपूर्वाऽभिधीयते। तथैव व्यज्यते सम्यग्जीवरूपं सुखादिकमि'ति पाद्मे ॥ १९ ॥ अम्बुवदधिकरणम् ॥ ११ ॥

॥ ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ ॥ २० ॥ तस्य च भक्तिज्ञानादेर्वृद्धिह्रासभाक्त्वं विद्यते। ब्रह्मादीनामुत्तमानां सर्वेषां भक्तत्वेऽन्तर्भावात्। एवं भक्त्यादिविशेषाङ्गीकारादेवेश्वरस्य ब्रह्मादीनन्यान्प्रति च सामञ्जस्यं भवति ॥ 'साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुः। ब्रह्मादयः क्रमेणैव यथाऽऽनन्दश्रुतौ श्रुता' इति च ब्राह्मे ॥ २० ॥ कुतः ?—

---

[1] ४-५-१९. बृ.उ. [2] २-२३. कठ. उ.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ **दर्शनाच्च** ॐ ॥ २१ ॥ 'अथात आनन्दस्य मीमांसा भवती'[1]त्यारभ्य ब्रह्मपर्यन्तेषु सुखे विशेषदर्शनात् ॥ चशब्दात्स्मृतिः— 'यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे । तथा मुक्तिविशेषोऽपि ज्ञानिनां लिङ्गभेदन' इति ॥ २१ ॥ वृद्धिह्रासाधिकरणम् ॥ १२ ॥

सृष्टिसंहारकर्तृत्वमेवास्य न पालकत्वं स्वतः सिद्धेरित्यत आह—॥ ॐ **प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः** ॐ ॥ २२ ॥ उक्तं सृष्टिसंहारकर्तृत्वमात्रं प्रतिषिध्य ततोऽधिकं ब्रवीति । 'नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ती'[2]ति । चशब्दात्स्मृतिश्च । 'सृष्टिं च पालनं चैव संहारं नियमं तथा । एक एव करोतीशः सर्वस्य जगतो हरिरि'ति ब्रह्माण्डे ॥ २२ ॥ पालकत्वाधिकरणम्[3] ॥ १३ ॥

परमात्मापरोक्ष्यं च तत्प्रसादादेव न जीवशक्त्येति वक्तुमुच्यते—॥ ॐ **तदव्यक्तमाह हि** ॐ ॥२३॥ अव्यक्तमेव तद्ब्रह्म स्वतः । 'अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलम् । यज्ज्ञात्वा मुच्यते जन्तुरानन्दश्चाव्य(क्ष)यो भवेदि'ति हि कौण्ठरव्यश्रुतिः ॥२३॥ ॥ ॐ **अपि संराधने प्रत्यक्षानुमानाभ्याम्** ॐ ॥२४॥ आराधनेऽप्यव्यक्तमेव । ज्ञानि(नां)प्रत्यक्षेणेतरेषामतिसूक्ष्मत्वलिङ्गादनुमानेन ॥ 'न तमाराधयित्वाऽपि कश्चिद्व्यक्तीकरिष्यति । नित्याव्यक्तो यतो देवः परमात्मा सनातन' इति ब्रह्मवैवर्ते ॥ २४ ॥ नित्याव्यक्तेन रूपेण तथैव तिष्ठति । व्यक्तं किञ्चिद्रूपं गृहीत्वा दृश्यते । यथाऽग्न्यादयस्तन्मात्रारूपेणादृश्या अपि स्थूलरूपेण दृश्यन्त एवमिति चेन्न ॥ ॐ **प्रकाशवच्चावैशेष्यम्** ॐ ॥ २५ ॥

---

[1] २-८. तै.उ. [2] १०-३१-८. ऋ.सं. [3] प्रकृत्यधिकरणम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

अग्न्यादिवत् स्थूलसूक्ष्मत्वविशेषाभावात् ॥ 'नासौ सूक्ष्मो न स्थूलः पर एव स भवति तस्मादाहुः परम' इतीति माण्डव्यश्रुतेः । 'स्थूलसूक्ष्मविशेषोऽत्र न क्वचित्परमेश्वरे । सर्वत्रैकप्रकारोऽसौ सर्वरूपेष्वजो यत' इति च गारुडे ॥ 'अव्यक्तव्यक्तभावौ च न क्वचित्परमेश्वरे । सर्वत्राव्यक्तरूपोऽयं यत एव जनार्दन' इति कौर्मे ॥ २५ ॥ तर्हि किं यत्नेनेत्यत आह—॥ **ॐ प्रकाशश्च कर्मण्यभ्यासात् ॐ ॥ ॥ २६ ॥** विषयभूते तस्मिन्नेव श्रवणाद्यभ्यासात्प्रकाशश्च भवति । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'[1] इति श्रुतेः ॥ २६ ॥ नित्याव्यक्तस्य कथं प्रकाश इत्यत उच्यते—॥ **ॐ अतोऽनन्तेन तथा हि लिङ्गम् ॐ ॥ २७ ॥** उभयत्र प्रमाणभावात्तत्प्रसादादेव प्रकाशो भवति । 'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरि'[2]ति लिङ्गात् ॥ युज्यते च तस्यानन्तशक्तित्वात् । 'नित्याव्यक्तोऽपि भगवानीक्ष्यते निजशक्तितः । तमृते परमात्मानं कः पश्येतामितं प्रभुमि'ति नारायणाध्यात्मे ॥२७॥ ॥ अव्यक्ताधिकरणम् ॥ १४ ॥

स्वरूपेणाऽनन्दादिना कथमानन्दित्वादिरित्यत्रोच्यते—॥ **ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ ॥ २८ ॥** 'आनन्दं ब्रह्मणो विद्वान्'[3] । 'अथैष एव परम आनन्द'[4] इत्युभयव्यपदेशादहिकुण्डलवदेव युज्यते । यथाऽहिः कुण्डली कुण्डलं च । तुशब्दात्केवलश्रुतिगम्यत्वं दर्शयति ॥ २८ ॥ **ॐ प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ ॥ २९ ॥** यथाऽऽदित्यस्य प्रकाशत्वं प्रकाशित्वं

---

[1] ४-४-५. बृ.उ. [2] १-१०. श्वे.उ. [3] २-४. तै.उ.
[4] ६-३-३३. बृ.उ.

SGDF
Sri Gargeshwari Digital Foundation

च, एवं वा दृष्टान्तः । तेजोरूपत्वाद्ब्रह्मणः ॥२९॥ **ॐ पूर्ववद्वा ॐ ॥ ३० ॥** यथैक एव कालः पूर्व इत्यवच्छेदकोऽवच्छेद्यश्च भवति ॥ अतिसूक्ष्मत्वापेक्षयैष दृष्टान्तः । स्थूलमतीनां च प्रदर्शनार्थमहिकुण्डलदृष्टान्तः ॥ 'प्रकाशवत्कालवद्वा यथाऽङ्गे शयनादिकम् । ब्रह्मणश्चैव मुक्तानामानन्दोऽभिन्न एव त्विति नारायणाध्यात्मे । 'आनन्देन त्वभिन्नेन व्यवहारः प्रकाशवत् । कालवद्वा यथा कालः स्वावच्छेदकतां व्रजेदि'ति पाद्मे ॥३०॥ **ॐ प्रतिषेधाच्च ॐ ॥ ॥३१॥** 'एकमेवाद्वितीयम्'[1] 'नेह नानाऽस्ति किञ्चने'[2]ति भेदस्य॥३१॥

॥ उभयव्यपदेशाधिकरणम्[3] ॥ १५ ॥

॥ ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ ॥ ३२ ॥ नचाऽनन्दादित्वाल्लोकानन्दादिवत् । 'एष सेतुर्विधृतिः'[4] 'य एष आनन्दः परस्य' 'एष नित्यो महिमा ब्रह्मणस्ये'[5]ति सेतुत्वं ह्युच्यते । 'यतो वाचो निवर्तन्ते'[6] इत्युन्मानत्वम् । 'एतस्यैवाऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'[7]ति सम्बन्धः । 'अन्यज्ज्ञानं तु जीवानामन्यज्ज्ञानं परस्य च । नित्यानन्दाव्ययं पूर्णं परज्ञानं विधीयत' इति भेदः ॥ अतोऽलौकिकत्वात्परमेव ब्रह्मानन्दादिकम् ॥ ३२ ॥ **ॐ दर्शनाच्च ॐ ॥ ३३ ॥** दर्शनादेव चान्यानन्दादीनाम् ॥ 'अदृष्टमव्यवहार्यमव्यपदेश्यं सुखं ज्ञानमोजो बलमिति ब्रह्मणस्तस्माद्ब्रह्मेत्याचक्षते तस्माद्ब्रह्मेत्याचक्षत' इति कौण्डिन्यश्रुतिः ॥ ३३ ॥ अप्रसिद्धस्य कथमानन्द इत्यादिव्यपदेश इत्यतो वक्ति—॥ **ॐ बुद्ध्यर्थः पादवत् ॐ ॥ ३४ ॥** जीवेश्वर-

---

1 ६-२-१. छां.उ. 2 २-४-११. कठ.उ. 3 अहिकुण्डलाधिकरणम्. पा.
4 ८-४-१. छां.उ. 5 ६-४-२३. बृ.उ. 6 २-४. तै.उ. 7 ६-३-३२. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

सम्बन्धज्ञापनार्थमप्रसिद्धोऽपि पादो यथा पादशब्देन व्यपदिश्यते 'पादोऽस्य विश्वा भूतानी'[1]ति तथा। 'अलौकिकोऽपि ज्ञानादिस्तच्छब्दैरेव भण्यते। ज्ञापनार्थाय लोकस्य यथा राजेव देवराडि'ति (च) पाद्मे ॥ ३४ ॥ परानन्दा(परमता)धिकरणम् ॥ १६ ॥

परानन्दमात्रत्वे कथं ब्रह्माद्यानन्दानां विशेष इत्यत उच्यते ॥ ॥ ॐ **स्थानविशेषात्प्रकाशादिवत्** ॐ ॥ ३५ ॥ यथाऽऽदित्यस्य दर्पणादिस्थानविशेषात्प्रतिबिम्बविशेष एवमानन्दादेरपि ॥ 'ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च। प्रतिबिम्बत्वमायाति मध्योच्चादिविशेषत' इति वाराहे ॥३५॥ ॐ **उपपत्तेश्च** ॐ ॥ ॥ ३६ ॥ 'ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादितः। ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रते'ति पाद्मे ॥ ३६ ॥ स्थानविशेषाधिकरणम् ॥ १७ ॥

ध्यानकाले यच्चित्ते प्रदृश्यते तदेव हि ब्रह्मरूपम्। अतः कथमव्यक्ततेत्यत आह—॥ ॐ **तथाऽन्यत्प्रतिषेधात्** ॐ ॥ ॥ ३७ ॥ यथा जीवानन्दादेरन्यद्ब्रह्म तथोपासाकृतादपि। 'यन्मनसा न मनुते येनाऽहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत'[2] इति प्रतिषेधात् ॥ 'पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितम्। ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रदम् ॥ तदुपासनं च भवति प्रतिमोपासनं यथा। दृश्यते त्वपरोक्षेण ज्ञानेनैव परं पदम्। उपासना त्वापरोक्ष्यं गमयेत्तत्प्रसादत' इति ब्रह्मतर्के ॥ ३७ ॥ ॥ प्रतिषेधाधिकरणम्[3] ॥ १८ ॥

देशकालान्तरेऽन्यतोऽपि सृष्ट्यादिर्युक्तेत्यतो ब्रूते—॥ ॐ **अनेन सर्वगतत्वमायामयशब्दादिभ्यः** ॐ ॥ ३८ ॥

---

[1] १०-९०-३. ऋ.सं. [2] १-६. के.उ. [3] तथान्यत्वाधिकरणम्. पा.

SGDF
Sri Gurgeshwari Digital Foundation

सर्वदेशकालवस्तुष्वनेनैव सृष्ट्यादिकं प्रवर्तते ॥ 'एष सर्व एष सर्वगत एष सर्वेश्वर एषोऽचिन्त्य एष परम' इति भाल्लवेयश्रुतिः ॥ 'सर्वत्र सर्वमेतस्मात्सर्वदा सर्ववस्तुषु । स्वरूपभूतया नित्यशक्त्या मायाख्यया यतः । अतो मायामयं विष्णुं प्रवदन्ति सनातनमि'ति चतुर्वेद-शिखायाम् ॥ आदिशब्दादन्यत्र प्रमाणाभावाच्च ॥ ३८ ॥ सर्वगत-त्वाधिकरणम् ॥ १९ ॥

कर्मापेक्षत्वात्फलदानस्य तदेव ददातीति न वाच्यम् । कुतः ?— ॥ ॐ **फलमत उपपत्तेः** ॐ ॥ ३९ ॥ अत एवेश्वरात्फलं भवति । नह्यचेतनस्य स्वतः प्रवृत्तिर्युज्यते ॥ ३९ ॥ ॥ ॐ **श्रुतत्वाच्च** ॐ ॥ ४० ॥ 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणमि'[1]ति ॥ ४० ॥ ॐ **धर्मं जैमिनिरत एव** ॐ ॥ ४१ ॥ यतः फलं तदेव कर्मेश्वराद्भवति । 'एष ह्येव साधुकर्म कारयती'[2]ति श्रुतेरिति जैमिनिः ॥ ४१ ॥ ॐ **पूर्वं तु बादरायणो हेतुव्यपदेशात्** ॐ ॥ ४२ ॥ परस्य कर्मणश्चोभयोः फलकारणत्वेऽपि न कर्म परप्रवर्तकम् । पर एव कर्मणः प्रवर्तकः । 'पुण्येन पुण्यं लोकं नयति पापेन पापमि'[3]ति हेतुव्यपदेशात् । 'द्रव्यं कर्म च कालश्चे'ति च ॥ ४२ ॥ ॥ फलदानाधिकरणम् ॥ २० ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्र-भाष्ये. श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

उपासनाऽस्मिन्पाद उच्यते । सर्वपरिज्ञानं प्रथमत उच्यते—
॥ ॐ **सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्** ॐ ॥ १ ॥

---

[1] ५-९-२७. बृ.उ. [2] ३-८. कौ.उ. [3] ३-२. प्र.उ.

SGDF
Sri Gangeshwari Digital Foundation

अन्तो निर्णयः । 'उभयोरपि दृष्टोऽन्त'[1] इति वचनात् ॥ सर्ववेद-विनिर्णयोत्पाद्यज्ञानं ब्रह्म । 'आत्मेत्येवोपासीते'[2]त्यादिविधीनां तदुक्त-युक्तीनां चाविशिष्टत्वात् ॥ १ ॥ **ॐ भेदान्नेति चेदेकस्यामपि ॐ ॥ २ ॥** 'विज्ञानमानन्दं ब्रह्म'[3] । 'सत्यं ज्ञानमनन्तं ब्रह्मे'[4]त्यादि प्रतिशाखमुक्तिभेदान्नैकाधिकारिविषयाः सर्वशाखा इति चेन्न । एकस्यामपि शाखायां 'आत्मेत्येवोपासीत'[5] 'कं ब्रह्म खं ब्रह्मे'[6]त्यादिभेददर्शनात् ॥ २ ॥ **ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॐ ॥ ३ ॥** 'स्वाध्यायोऽध्येतव्य'[7] इति सामान्यविधेः । हिशब्दा'द्वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मने'ति स्मृतेः ॥ 'सर्ववेदोक्तमार्गेण कर्म कुर्वीत नित्यशः । आनन्दो हि फलं यस्माच्छाखाभेदो ह्यशक्तिजः ॥ सर्वकर्मकृतौ यस्मादशक्ताः सर्वजन्तवः । शाखाभेदं कर्मभेदं व्यासस्तस्मादचीक्लृपदि'ति समाचारे सर्वेषामधिकाराच्च ॥ ३ ॥ **ॐ सलिलवच्च तन्नियमः ॐ ॥ ४ ॥** यथा सर्वं सलिलं समुद्रं गच्छत्येवं सर्वाणि वचनानि ब्रह्मज्ञानार्थानीति नियमः । आग्नेये च—'यथा नदीनां सलिलं शक्ये सागरगं भवेत् । एवं शक्यानि सर्वाणि पुंशक्त्या ब्रह्मवित्तय' इति ॥४॥ **ॐ दर्शयति च ॐ ॥५॥** 'सर्वैश्च वेदैः परमो हि देवो जिज्ञास्योऽसौ नाल्पवेदैः प्रसिद्ध्येत् । तस्मादेनं सर्ववेदानधीत्य विचार्य च ज्ञातुमिच्छेन्मुमुक्षुरि'ति चतुर्वेदशिखायाम् ॥ 'सर्वान्वेदान्सेतिहासान्सपुराणान्सयुक्तिकान् । सपञ्चरात्रान्विज्ञाय विष्णुर्ज्ञेयो न चान्यथे'ति ब्रह्मतर्के ॥ ५ ॥ सर्ववेदा(न्तप्रत्यया)धिकरणम् ॥ १ ॥

---

[1] २-१६. भ.गी. [2] ३-४-७. बृ.उ. [3] ५-९-२८. बृ.उ. [4] २-१. तै.उ. [5] ३-४-७. बृ.उ. [6] ४-१०-५. छां.उ. [7] २-१५. तै.आ.

SGDF
Sri Gangeshwari Digital Foundation

सर्वैर्वेदैर्ज्ञेयो नोपास्योऽशक्यत्वादित्यत आह—॥ **ॐ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॐ ॥६॥** सर्ववेदोक्तान्गुणान्दोषाभावांश्चोपसंहृत्यैव परमात्मोपास्यः ॥ 'उपास्य एकः परतः परो यो वेदैश्च सर्वैः सह चेतिहासैः । सपञ्चरात्रैः सपुराणैश्च देवः सर्वैर्गुणैस्तत्र तत्र प्रतीतैरिति (हि) भाल्लवेयश्रुतिः ॥ आग्नेये च—विधिशेषाणि कर्माणि सर्ववेदोदितान्यपि । यथा कार्याणि सर्वैश्च सर्वाण्येवाविशेषतः ॥ एवं सर्वगुणान्सर्वदोषाभावांश्च यत्नतः । योजयित्वैव भगवानुपास्यो नान्यथा क्वचिदि'ति ॥ समानविषये चोपसंहारः । न तु 'सोऽरोदीदि'[1]त्यादीनाम् । 'गुणैरेव स तूपास्यो नैव दोषैः कथञ्चन । गुणैरपि नतूपास्यो ये पूर्णत्वविरोधिन' इति बृहत्तन्त्रे ॥ ६ ॥ **ॐ अन्यथात्वं (च) शब्दादिति चेन्नाविशेषात् ॐ ॥ ७ ॥** 'आत्मेत्येवोपासीते'[2]तिशब्दादुपसंहारस्यान्यथात्वमिति चेन्न । एते गुणा नोपास्या इति विशेषवचनाभावात् ॥ 'सर्वैर्गुणैरेक एवेशिताऽसावुपासितव्यो न तु दोषैः कदाचिदि'ति विशेषवचनाच्च । अत्मेत्यवधारणमनात्मत्वनिवृत्त्यर्थम् ॥ ७ ॥ **॥ ॐ नवा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॐ ॥८॥** प्रकरणभेदान्न वोपसंहारः कार्यः । परोवरीयस्त्वादिषु तावदेव ह्युक्तम् ॥८॥ **ॐ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॐ ॥९॥** सर्वविद्या उक्त्वा 'सोऽहं नामविदेवास्मि नाऽत्मविदि'[3]ति वचनात्सर्वस्य ब्रह्मनामत्वात्तदुपसंहारः कार्यः । 'नामत्वात्सर्वविद्यानां गुणानामुपसंहृतिः । कार्यैव ब्रह्मणि परे नात्र कार्या विचारणे'ति च ब्रह्मतर्के इति चेत्सत्यम् । उक्तो ह्युपसंहारः । तत्प्रमाणमप्यस्त्येव । 'नाम

---

[1] १-५-१. तै.सं. [2] ३-४-७. बृ.उ. [3] ७-१-३. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

वा एता ब्रह्मणः सर्वविद्यास्तस्मादेकः सर्वगुणैर्विचिन्त्य' इति कौण्डिन्यश्रुतौ ॥ ९ ॥ उपसंहाराधिकरणम् ॥ २ ॥

॥ ॐ प्राप्तेश्च समञ्जसम् ॐ ॥ १० ॥ युज्यते चोपसंहारोऽनुपसंहारश्च योग्यताविशेषात् । 'गुणैस्सर्वैरुपास्योऽसौ ब्रह्मणा परमेश्वरः । अन्यैर्यथाक्रमं चैव मानुषैः कैश्चिदेव त्वि'ति भविष्यत्पर्वणि ॥ १० ॥ प्राप्त्यधिकरणम् ॥ ३ ॥

॥ ॐ सर्वाभेदादन्यत्रेमे ॐ ॥ ११ ॥ सर्वगुणयुक्तत्वेनोपासनादन्यत्रैव फले ब्रह्मादयो भवन्ति । 'सम्पूर्णोपासनाद्ब्रह्मा सम्पूर्णानन्दभाग्भवेत् । इतरे तु यथायोगं सम्यङ्मुक्तौ भवन्ति ही'ति पाद्मे ॥ ११ ॥ सर्वाभेदाधिकरणम् ॥ ४ ॥

सर्वेषां मुमुक्षूणां कियन्नियमेनोपास्यमित्याह — ॥ ॐ आनन्दादयः प्रधानस्य ॐ ॥ १२ ॥ प्रधानफलस्य मोक्षस्यार्थे आनन्दो ज्ञानं सदात्मेत्युपास्य एव ॥ 'सच्चिदानन्द आत्मेति ब्रह्मोपासा विनिश्चिता । सर्वेषां च मुमुक्षूणां फलसाम्यादपेक्षिते'ति ब्रह्मतर्के ॥ १२ ॥ आनन्दाद्यधिकरणम् ॥ ५ ॥

॥ ॐ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॐ ॥ १३ ॥ फलभेदार्थमुपचयापचययोर्भावान्न सर्वेषां प्रियशिरस्त्वादिगुणोपासाप्राप्तिः ॥ 'नैव सर्वगुणाः सर्वैरुपास्या मुक्तिभेदतः । विरिञ्चस्यैव यन्मुक्तावानन्दस्य सुपूर्णते'ति (हि) वाराहे ॥ १३ ॥ प्रियशिरस्त्वाधिकरणम् ॥ ६ ॥

॥ ॐ इतरे त्वर्थसामान्यात् ॐ ॥ १४ ॥ इतरे गुणाः फलसाम्यापेक्षयोपसंहर्तव्याः ॥१४॥ फलसाम्याधिकरणम् ॥७॥

SGDF
Sri Gargeshwari Digital Foundation

उपसंहारानुपसंहारप्रमाणमाह — ॥ ॐ **आध्यानाय प्रयोजनाभावात् ॐ ॥ १५ ॥** आध्यानार्थं हि सर्वे गुणा उच्यन्ते प्रयोजनान्तराभावात् ॥ 'ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा। ज्ञातव्याश्चैव ध्यातव्या गुणास्सर्वेऽप्यतो हरेः ॥ नान्यत्प्रयोजनं ज्ञानाद्ध्यानात्कर्मकृतेरपि। श्रवणाच्चाथ पाठाद्वा विद्याभिः किञ्चिदिष्यत' इति परमसंहितायाम् ॥ 'गुणाः सर्वेऽपि वेत्तव्या ध्यातव्याश्च न संशयः। नान्यत्प्रयोजनं मुख्यं गुणानां कथने भवेत् ॥ ज्ञानध्यानसमायोगाद्गुणानां सर्वशः फलम्। मुख्यं भवेन्न चान्येन फलं मुख्यं क्वचिद्भवेदि'ति बृहत्तन्त्रे ॥१५॥ ॐ **आत्मशब्दाच्च ॐ ॥ १६ ॥** 'आत्मेत्येवोपासीते'[1]त्यनुपसंहारप्रमाणम् ॥ १६ ॥ आध्यानाधिकरणम् ॥ ८ ॥

॥ ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ॥ १७ ॥

न 'चानन्दादयः प्रधानस्ये'त्युक्तिविरोधः। यतः 'सत्यं ज्ञानमनन्तं ब्रह्म'[2] 'विज्ञानमानन्दं ब्रह्मे'[3]तिवदेवाऽत्मशब्दगृहीतिः। 'अत्र ह्येते सर्व एकं भवन्ती'[4]त्युत्तरात् ॥ 'आनन्दानुभवत्वाच्च निर्दोषत्वाच्च भण्यते। नित्यत्वाच्च तथाऽऽत्मेति वेदवादिभिरीश्वर' इति (हि) बृहत्तन्त्रे ॥ १७ ॥ आत्मगृहीत्यधिकरणम् ॥ ९ ॥

॥ ॐ अन्वयादिति चेत्स्यादवधारणात् ॐ ॥ ॥ १८ ॥ सर्वगुणानामन्वय आत्मशब्दे भवति। 'आप्तव्याप्तेरात्मशब्दः परमस्य प्रयुज्यत' इति वचनादिति चेत्सत्यम्। स्याच्चैवम्। आत्मेत्येवेत्यवधारणात्। अन्यथा सर्वोपसंहारवचनविरोधात् ॥१८॥ ॥ अन्वयाधिकरणम् ॥ १० ॥

---

[1] ३-४-७. बृ.उ. [2] २-१. त.उ. [3] ५-९-२८. बृ.उ. [4] ३-४-७. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

॥ ॐ कार्याख्यानादपूर्वम् ॐ ॥१९॥ 'अलौकिकास्तस्य गुणा ह्युपास्या अलौकिकं मुक्तिकार्यं यतोऽस्ये'ति कार्याख्यानादन्यत्रादृष्टा एव गुणा उपास्याः ॥१९॥ कार्याख्यानाधिकरणम् ॥११॥

॥ ॐ समान एवञ्चाभेदात् ॐ ॥ २० ॥ अपूर्वत्वेऽपि समानानामेवोपसंहारः । न तु त्रिविक्रमत्वादीनां कादाचित्कानां पृथक्त्वेन । नित्यविक्रान्त्यादिष्वन्तर्भावात् ॥ २० ॥
॥ ॐ सम्बन्धादेवमन्यत्रापि ॐ ॥ २१ ॥ परमात्मसम्बन्धित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यते ॥ 'गुणास्त्रैविक्रमाद्याश्च (तु) संहर्तव्या न संशयः । विरिञ्चस्यैव नान्येषां स हि सर्वगुणाधिक' इति (हि) बृहत्तन्त्रे ॥ २१ ॥ समानाधिकरणम् ॥ १२ ॥

॥ ॐ न वा विशेषात् ॐ ॥ २२ ॥ न वाऽऽत्मशब्देन सर्वगुणगृहीतिः । अधिकारिविशेषात् ॥२२॥ ॐ दर्शयति च ॐ ॥ २३ ॥ 'सर्वान्गुणानात्मशब्दो ब्रवीति ब्रह्मादीनामितरेषां नचैवे'ति (च) भाल्लवेयश्रुतिः ॥ २३ ॥ विशेषाधिकरणम् ॥ १३ ॥

॥ ॐ सम्भृतिद्युव्याप्त्यपि चातः ॐ ॥ २४ ॥
सम्भृतिद्युव्याप्ती अपि देवादीनामुपसंहर्तव्ये नान्येषाम् । अत एव योग्यताविशेषात् ॥ 'देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः । आनन्दाद्यास्तु सर्वेषामन्यथाऽनर्थकृद्भवेदिति (च) ब्रह्मतर्के ॥ २४ ॥
॥ सम्भृत्यधिकरणम् ॥ १४ ॥

यस्यां विद्यायां महागुणा उच्यन्ते सोत्तमानामितराऽन्येषामिति चेन्न ॥ ॐ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॐ ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ २५ ॥ पुरुषसूक्तोक्तविद्यायामपि केषाञ्चिद्गुणानामनाम्नानात् ॥ 'सर्वतः पौरुषे सूक्ते गुणाः विष्णोरुदीरिताः । तत्रापि नैव सर्वेऽपि तस्मात्कार्योपसंहृतिरि'ति ब्रह्मतर्के ॥ २५ ॥ पुरुषविद्याधिकरणम् ॥ १५ ॥

॥ ॐ वेधाद्यर्थभेदात् ॐ ॥ २६ ॥ 'भिन्धि विद्धि श्रुणीहीति फलभेदेन सर्वशः । यत्यादीनां तेष्वयोगान्नाधिकार्येकता भवेत् । अयोग्योपासनादीयुरनर्थं चार्थनाशनमि'ति बृहत्तन्त्रे ॥२६॥ ॥ वेधाद्यधिकरणम् ॥ १६ ॥

मुक्तस्योपासना कर्तव्या न वेत्यतो ब्रवीति—॥ ॐ हानौ तूपायनशब्दशेषत्वात्कुशाछन्दस्तुत्युपगानवत्तदुक्तम् ॐ ॥ २७ ॥ नियतस्वाध्यायानन्तरं स्वेच्छया कुशाग्रहणस्तुत्युपगानवदेव मोक्ष उपासनादिः । 'ब्रह्मविदाप्नोति परमि'[1]ति मोक्षवाक्यशेषत्वादितरेषाम् ॥ तच्चोक्तम्—'एतत्सामगायन्नास्त'[1] इत्यादि । ब्रह्मतर्के च 'युक्ता अपि हि कुर्वन्ति स्वेच्छयोपासनं हरेः । नियमानन्तरं विप्राः कुशाद्यैरप्यधीयत' इति ॥ 'कृष्णो मुक्तैरिज्यते वीतमोहैरि'ति च भारते ॥ २७ ॥ ॐ साम्पराये तर्तव्याभावात्तथाह्यन्ये ॐ ॥२८॥ स्वेच्छये[2]त्यङ्गीकर्तव्यम् । मुक्तस्य तीर्णत्वात् । 'तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवती'[3]ति ह्यन्ये पठन्ति । वायुप्रोक्ते च—'स्थितप्रज्ञत्वमाप्ता ये ज्ञानेन परमात्मनः । ब्रह्मलोकं गतास्सर्वे ब्रह्मणा च परं गताः । तीर्णतर्तव्यभागाश्च स्वेच्छयोपासते परमि'ति ॥ २८ ॥ मुक्तोपासनाधिकरणम्[4] ॥१७॥

---

[1] ३-१० तै.उ. [2] 'एव' इत्यधिकः पाठः [3] ६-३-२२. बृ.उ.
[4] हान्यधिकरणम्. पा.

SGDF
Sri Gurgeshwari Digital Foundation

कर्मापि कुर्वन्ति न वेत्यत आह—॥ **ॐ छन्दत उभयाविरोधात् ॐ ॥ २९ ॥** स्वेच्छया कुर्वन्ति न वा। बन्धप्रत्यवाययोरभावात् ॥ २९ ॥ **ॐ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॐ ॥ ३० ॥** बन्धप्रत्यवायाभावे हि मोक्षस्यार्थवत्त्वम्। अन्यथा मोक्षत्वमेव न स्यात् ॥ 'कदाचित्कर्म कुर्वन्ति कदाचिन्नैव कुर्वते। नित्यज्ञानस्वरूपत्वान्नित्यं ध्यायन्ति केशवम् ॥ तीर्णतर्तव्यभागा ये प्राप्तानन्दाः परात्मनः। प्रत्यवायस्य बन्धस्याप्यभावात्स्वेच्छया भवेदि'ति हि ब्रह्माण्डे ॥ ३० ॥ **ॐ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॐ ॥ ३१ ॥** उपपन्नश्चैवम्भावः। प्राप्तत्वात्तल्लक्षणस्य फलस्य। यथा लोके विध्यर्थत्वेन विष्णुक्रमणादिकं कृत्वा समाप्तकर्मेच्छया करोति न करोति च ॥३१॥ ॥ छन्दाधिकरणम् ॥ १८ ॥

॥ ॐ अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्याम् ॐ ॥ ३२ ॥ प्राप्तज्ञानानामपि केषाञ्चिन्मुक्तिप्राप्तिः केषाञ्चिन्न, यथोपसंहारनियम इति न मन्तव्यम् ॥ 'सर्वे गुणा ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यै'रित्युपसंहारविरोधादन्यत्राविरोधात्। 'न कश्चिद्ब्रह्मविस्मृतिमनुभवति मुक्तो ह्येव भवति तस्मादाहुः स्मृतिहेती'ति कौण्डिन्यश्रुतेश्च। यथा केषाञ्चिन्मोक्ष एवमन्येषामित्यनुमानाच्च ॥ ३२ ॥ अनियमाधिकरणम् ॥ १९ ॥

॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ॥ ३३ ॥ यथा यथाऽधिकारो विशिष्यते एवं मुक्तावानन्दो विशिष्यते। 'मनुष्येभ्यो गन्धर्वाणां गन्धर्वेभ्य ऋषीणामृषिभ्यो

SGDF
Sri Gangeshwari Digital Foundation

देवानां देवेभ्य इन्द्रस्य इन्द्राद्रुद्रस्य रुद्राद्ब्रह्मण एष ह्येव शतानन्द' इति चतुर्वेदशिखायाम् ॥ अध्यात्मे च—'ज्ञानं चोपासनं चैव मुक्तावानन्द एव च। यथाधिकारं देवानां भवन्त्येवोत्तरोत्तरमि'ति ॥३३॥

॥ ॐ **अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्** ॐ ॥ ३४ ॥ न चासमत्वेन विरोधो भवति। ब्रह्मधीत्वा[1]द्दोषाभावसाम्यादुत्तमेभ्योऽन्येषां भावाच्च। औपसदवच्छिष्यवत्। उक्तं च तुरश्रुतौ—'नानाविधा जीवसङ्घा विमुक्तौ न चैव तेषां ब्रह्मधियां विरोधः। दोषाभावाद्गुरुशिष्यादिभावाल्लोकेऽपि नासौ किमु तेषां विमुक्तेरि'ति ॥३४॥ यावदधिकाराधिकरणम् ॥२०॥

॥ ॐ **इयदामननात्** ॐ ॥ ३५ ॥ नामाद्यारभ्य प्राणान्तमुत्तरोत्तरमुत्तमत्वमुक्तम्। न प्राणात्किञ्चिद्भूय उक्तम्। तथाऽपि पूर्ववत्स्यादि(दपी)ति न वाच्यम्। 'प्राणो वाव सर्वेभ्यो भूयान्नहि प्राणाद्भूयान्प्राणो ह्येव भूयांस्तस्माद्भूयान्नामे'ति कौण्ठरव्यश्रुतेः ॥ ३५ ॥ ॐ **अन्तरा भूतग्रामवदिति चेत्तदुक्तम्** ॐ ॥ ३६ ॥ यथा भूतग्राम एकस्मादेक उत्तमोऽस्त्येव, एवं प्राणादपि परमात्मानमन्तरा विद्यत इति चेन्न। प्राणादुत्तमाभावे प्रमाणमुक्तम्। अन्यत्रोत्तमाभावे न प्रमाणम्। दृश्यते चान्यत्रोत्तमत्वम् ॥ ३६ ॥ ॐ **अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्** ॐ ॥ ३७ ॥ प्राणस्य सर्वोत्तमत्वे परमात्मना भेदानुपपत्तिरिति चेन्न। श्रुत्युपदिष्टवदुपपत्तेः। अन्येभ्यः प्राणस्योत्तमत्वं तस्मात्परमात्मनो ह्युपदिष्टम् ॥ ३७ ॥ इयदामननाधिकरणम् ॥ २१ ॥

---

[1] ब्रह्माधीनत्वात्. पा.

SGDF
Sri Gangeshwari Digital Foundation

नेति चेन्न–॥ **ॐ व्यतिहारो विशिंषन्ति हीतरवत् ॐ ॥ ३८ ॥** उक्तं प्राणात्परमात्मन उत्तमत्वं पूर्वोक्ताध्याहारेण 'एष तु वा अतिवदती'[1]ति विशिंषन्ति हि। यथेतरेषु विशेषणम् ॥ 'उत्तमत्वं हि देवानां मुक्तावपि हि मानवात्। तेभ्यः प्राणस्य तस्माच्च नित्यमुक्तस्य वै हरेरि'ति (च) बृहत्तन्त्रे ॥ ३८ ॥ व्यतिहाराधिकरणम् ॥ २२ ॥

कृतिर्निष्ठा विज्ञानमित्यादीनां भेदाद्ब्रह्मव उत्तमा इति चेन्न— ॥ **ॐ सैव हि सत्यादयः ॐ ॥ ३९ ॥** सत्यादिगुणास्तस्या एव परदेवतायाः स्वरूपभूताः ॥ ब्रह्मतर्के च—'नामादिप्राणपर्यान्ताद्योहि सत्यादिरूपवान्। तस्मै नमो भगवते विष्णवे सर्वजिष्णव' इति ॥ 'सत्याद्या अहमात्मान्ता यद्गुणास्समुदीरिताः। तस्मै नमो भगवते यस्मादेव विमुच्यत' इति चाध्यात्मे ॥ ३९ ॥ सत्याद्यधिकरणम् ॥ २३ ॥

प्रकृतेरपि जन्मादेः संसारप्राप्तेः किमिति नामादिष्वपाठ इत्यत्रोच्यते— ॥ **ॐ कामादितरत्र तत्र चाऽयतनादिभ्यः ॐ ॥ ४० ॥** स्वेच्छयैव मूलस्थाने स्थिताऽन्यत्रावताराान्करोतीश्वरेच्छानुसारेण। 'सर्वायतना सर्वकाला सर्वेच्छा न बद्धा बन्धिका सैषा प्रकृतिरविकृतिरि'ति वत्सश्रुतेः॥ 'नामादयस्तु बद्धत्वान्मोचकत्वात्परोऽपि च। उभयोरप्यभावेन यथाऽव्यक्तं न तूदितम् ॥ श्रुतौ तथा जीवपरावुच्येते किञ्चनेतरत्। नोच्यते च तदा तत्त्वद्वयं वै समुदाहृतमि'ति ब्रह्मतर्के ॥४०॥ **ॐ आदरादलोपः ॐ ॥ ॥ ४१ ॥** अबद्धत्वेऽपि भक्तिविशेषादेवोपासनाद्यलोपस्तस्या भवति ॥

---

[1] ७-१६. छां.उ.

SGDF
Sri Gurgeshwari Digital Foundation

'यथा श्रीर्नित्यमुक्ताऽपि प्राप्तकामाऽपि सर्वदा। उपास्ते नित्यशो विष्णुमेवं भक्तो हरेर्भवेदिति बृहत्तन्त्रे ॥ ४१ ॥ **ॐ उपस्थितेऽतस्तद्वचनात् ॐ ॥ ४२ ॥** अनादिकाले भगवत्सम्बन्धित्वाद्युज्यते च नित्यमुक्तत्वं तस्याः। 'द्वावेतावनादिनित्यावनादियुक्तौ नित्यमुक्तावनादिकृतौ नित्यकृतौ योऽयं परमो या च प्रकृती रमते ह्यस्यां परमो रमते ह्यस्मिन्प्रकृतिः स्वस्मिन्हि रमते परमो न स्वस्मिन्प्रकृतिरत एनमाहुः परम इती'ति गौपवनश्रुतिवचनात् ॥४२॥ ॥ कामाधिकरणम् ॥ २४ ॥

दर्शनार्थं ह्युपासनम्। तच्च श्रवणादेरेव भवति। अतः किमर्थमित्यत्रोच्यते ॥ **ॐ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॐ ॥ ४३ ॥** तत्त्वनिश्चयो वेदार्थनियमश्च ब्रह्मदृष्टेः पृथगेव। हिशब्देन 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'[1] इति श्रुतिं सूचयति। श्रवणादिफलं चाज्ञानविपर्ययादिदर्शनप्रतिबन्धनिवृत्तिः ॥ ब्रह्मतर्के च—'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ। संशयं च पराणुद्य लभते ब्रह्मदर्शनमि'ति ॥४३॥ निर्धारणाधिकरणम् ॥२५॥

॥ **ॐ प्रदानवदेव हि तदुक्तम् ॐ ॥४४॥** न च श्रवणादिमात्रेण ब्रह्मदृष्टिर्भवति, किन्तु सेतिकर्तव्येन। यथा गुरुदत्तं तथैव भवति। 'आचार्यवान्पुरुषो वेदे'[2]ति ह्युक्तम् ॥ ४४ ॥ ॥ प्रदानाधिकरणम् ॥ २६ ॥

गुरुप्रसादः स्वप्रयत्नो वा बलवानिति निगद्यते—॥ **ॐ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॐ ॥ ४५ ॥** ऋषभादिभ्यो विद्यां ज्ञात्वाऽपि सत्यकामेन 'भगवांस्त्वेव मे कामं ब्रूयात्'[3]

[1] ४-४-५. बृ.उ. [2] ६-१४-२. छां.उ. [3] ४-९-२. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

'श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्ध्येव विद्या विदिता साधिष्टं प्रापयती'[1]ति वचनात्, 'अत्र ह न किञ्चन वीयाये'त्यनुज्ञानादुपकोसलवचनाच्च लिङ्गभूयस्त्वाद्गुरुप्रसाद एव बलवान्। तर्हि तावताऽलमिति न मन्तव्यम्। 'श्रोतव्यो मन्तव्य'[2] इत्यादेस्तदपि कर्तव्यम्॥ वाराहे च—'गुरुप्रसादो बलवान्न तस्माद्बलवत्तरम्। तथाऽपि श्रवणादिश्च कर्तव्यो मोक्षसिद्धय' इति॥ ४५॥ गुरुप्रसादाधिकरणम्[3]॥ २७॥

॥ ॐ पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॐ॥ ४६॥ न च पूर्वप्राप्त एव गुरुरिति नियमः। समग्रानुग्रहं चेत्पश्चात्तनः करोति स्वयमेव तदा विकल्पः स्यात्। मानसक्रियावत्, यथोभयोर्ध्यानयोः समयोः। 'पूर्वस्मादुत्तमो लब्धः स्वयमेव गुरुर्यदि। गृह्णीयादविचारेण विकल्पः समयोर्भवेत्॥ समग्रानुग्रहाभावात्सत्यकामः स्वकं गुरुम्। ऋषभाद्यनुज्ञया चैव प्राप तस्माद्धि युज्यत' इति बृहत्तन्त्रे॥ 'समग्रानुग्रहं कश्चित्स्वयमेव समो यदि। कुर्यात्पुनश्च गृह्णीयादविरोधेन कामतः॥ ध्यानयोः समयोर्यद्वद्विकल्पः कामतो भवेत्। एवं गुरोर्द्वितीयस्य विकल्पो ग्रहणेऽपि चे'ति महासंहितायाम्॥ ४६॥ ॐ अतिदेशाच्च ॐ॥ ४७॥ 'ब्रह्मोपास्स्व ब्रह्मोपचरस्व तच्छ्रुणुहि तत्त्वामवतु। यथा ब्रह्मोपचरेर्यथा मामुपचरेर्ये चान्येऽस्मद्विधाः श्रेयसश्च तानुपास्स्व तानुपचरस्व तेभ्यः शृणुहि ते त्वामवन्त्वि'ति पौष्यायणश्रुतावतिदेशाच्च॥ ४७॥ ॥ पूर्वविकल्पाधिकरणम्॥ २८॥

न च 'कर्मणैव हि संसिद्धिमास्थिता जनकादय'[4] इत्यादिनाऽन्यन्मोक्षसाधनम्—॥ ॐ विद्यैव तु निर्धारणात् ॐ॥ ४८॥

---

[1] ४-९-३. छां.उ. [2] ४-४-५. बृ.उ. [3] लिङ्गभूयस्त्वाधिकरणम्. पा.
[4] ३-२०. भ.गी.

SGDF
Sri Gargeshwari Digital Foundation

'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाये'[1]ति निर्धारणाद्विद्ययैव मोक्षः ॥ ४८ ॥ **ॐ दर्शनाच्च ॐ ॥४९॥** न केवलविद्यया किन्त्वपरोक्षज्ञानेनैव च। 'सर्वान्परो माययाऽयं सिनीते दृष्ट्वैव तं मुच्यते नापरेणे'ति कौशिकश्रुतेः ॥ ४९ ॥ ॥ विद्याधिकरणम् ॥ २९ ॥

॥ ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ ॥५०॥ सावधारणा बलवती श्रुतिः । 'इन्द्रोऽश्वमेधांश्छतमिष्ट्वाऽपि राजा ब्रह्माणमीड्यं समुवाचोपसन्नः। न कर्मभिर्न धनैर्नैव चान्यैः। पश्येत्सुखं तेन तत्त्वं ब्रवीही'ति बलवल्लिङ्गम् ॥ 'नास्त्यकृतः कृतेने'[2]त्युपपत्तिश्च। 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिन' इति युक्तिमद्भगवद्वचनम् ॥ अतो न प्रमाणान्तरबाधः। 'कर्मणैवे'[3]त्ययोगव्यवच्छेदः ॥५०॥ अबाधाधिकरणम्[4] ॥ ३० ॥

॥ ॐ अनुबन्धादिभ्यश्च ॐ ॥ ५१ ॥ न केवलं श्रवणादिभिर्गुरुप्रसादेन च ब्रह्मदर्शनम्। किन्तु भक्त्यादिभिश्च ॥ 'सर्वलक्षणसम्पन्नः सर्वज्ञो विष्णुतत्परः। यद्गुरुः सुप्रसन्नः सन्दद्यात्तन्नान्यथा भवेत् ॥ तथाऽप्यनादिसंसिद्धो भक्त्यादिगुणपूगतः। लभेद्गुरुप्रसादं च तस्मादेव च तद्भवेदि'ति ॥ 'भक्तिर्विष्णौ गुरौ चैव गुरोर्नित्यप्रसन्नताम्। दद्याच्छमदमादिं च तेन चैते गुणाः पुनः। तैस्सर्वैर्दर्शनं विष्णोः श्रवणादिकृतं भवेदि'ति च नारायणतन्त्रे ॥५१॥ ॥ अनुबन्धाद्यधिकरणम् ॥ ३१ ॥

॥ ॐ प्रज्ञान्तरपृथक्त्ववद्दृष्टिश्च तदुक्तम् ॐ ॥ ॥ ५२ ॥ उपासनाभेदव(त्त)द्दर्शनभेदः। तच्चोक्तं कमठश्रुतौ—

---

[1] ३-८. श्वे.उ. [2] १-२-१२. मुं.उ. [3] ३-२०. भ.गी. [4] श्रुत्यधिकरणम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

'अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टय इति । देवा वाव सर्वदृष्टयस्तेषु चोत्तरोत्तरमाब्रह्मणोऽन्येषु (तु) यथायोगं यथा ह्याचार्या आचक्षत' इति ॥ अध्यात्मे च—'दृष्ट्यैव ह्यवताराणां मुच्यन्ते केचिदञ्जसा । दर्शनेनाऽन्तरेणान्ये देवास्सर्वत्र दर्शनात् । तेषां विशेषमाचार्यो वेत्ति सर्वज्ञतां गत' इति ॥ ५२ ॥ दर्शनभेदाधिकरणम्[1] ॥ ३२ ॥

॥ ॐ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॐ ॥५३॥ न सामान्यदर्शनमात्रेण मुक्तिः । यथा मृत्युमात्रात् । न हि लोकापत्तिमात्रं मुक्तिः ॥ 'सामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मदर्शनादि'ति हि नारायणतन्त्रे ॥ 'मुच्यते नात्र संदेहो दृष्ट्या तु स्वात्मयोग्यये'ति च ॥ 'दर्शनेनाऽत्मयोग्येन मुक्तिर्नान्येन केनचिदि'ति चाध्यात्मे ॥ ५३ ॥ न सामान्याधिकरणम् ॥ ३३ ॥

'भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी'ति माठरश्रुतेर्न परमात्मना दर्शनमिति चेन्न । 'तस्यैष आत्मा विशते ब्रह्मधामे'[2]ति श्रुतेः । कथं तर्ह्येषा श्रुतिः—

॥ ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॐ ॥ ५४ ॥ परमात्मैवं(व) भक्त्या दर्शनं प्राप्य मुक्तिं ददातीति प्रधानसाधनत्वाद्भक्तिः करणत्वेनोच्यते ॥ मायावैभवे च—'भक्तिस्थः परमो विष्णुस्तयैवैनं वशं नयेत् । तयैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया ॥ स्नेहानुबन्धो यस्तस्मिन्बहुमानपुरस्सरः । भक्तिरित्युच्यते सैव करणं परमी(मे)शितुरि'ति ॥ सर्वशब्दानां ब्रह्मणि प्रवृत्तेश्च ॥५४॥ ॥ ताद्विध्याधिकरणम्[3] ॥ ३४ ॥

---

[1] प्रज्ञान्तराधिकरणम्. पा. [2] ३-२-४. मुं.उ. [3] परेणाधिकरणम्. पा.

SGDF
Sri Gurgeshwari Digital Foundation

जीवांशानां पृथगुत्पत्तेर्नानादियोग्यताऽपेक्षेति न मन्तव्यम्। कुतः?— ॥ ॐ एक आत्मनश्शरीरे भावात् ॐ ॥ ॥५५॥ अंशांशिनोरेकत्वमेव। अंशिकर्म(वि)निर्मितशरीर एवांशस्य भावात् ॥५५॥ ॐ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॐ ॥५६॥ ज्ञानादिभावे[1] विद्यमानेऽपि नांशांशिनोः पृथग्भाव एव। तदुपासनादिभोगादंशस्य। परमसंहितायां च— 'अंशिनस्तु पृथग्जाता अंशास्तस्यैव कर्मणा। पुनरैक्यं प्रपद्यन्ते नात्र कार्या विचारणे'ति ॥ ५६ ॥ एकाधिकरणम् ॥ ३५ ॥

॥ ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ ॥ ५७ ॥ ब्रह्माद्यङ्गदेवतावबद्धोपासनादि प्रतिशाखं प्रतिवेदं च नोपसंह्रियते। हिशब्दात्—'समत्वाद्वोत्तमत्वाद्वा नाङ्गदेवाद्युपासनम्। उपसंहार्यमित्याहुर्वेदसिद्धान्तवेदिन' इति ब्रह्मतर्कवचनात् ॥ ५७ ॥ ॐ मन्त्रादिवद्वाऽविरोधः ॐ ॥५८॥ सर्वदेवतामन्त्रा यथाऽधीयन्त एवमविरोधो वा। 'उपासनाङ्गदेवानां परमाङ्गतया भवेत्। उपसंहृतिर्विशेषे तु फलानामन्यथा न तु ॥ पुरुषाणां विशेषाद्वा यथायोगं भविष्यती'ति बृहत्तन्त्रे ॥ ५८ ॥ ॥ अङ्गावबद्धाधिकरणम् ॥ ३६ ॥

॥ ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथाच दर्शयति ॐ ॥ ५९ ॥ सर्वगुणेषु भूमगुणस्य ज्यायस्त्वं क्रतुवत्सर्वत्र सहभावात्[2] ॥ 'भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते। तस्माद्भूमा गुणतो वै विशिष्टो यथा क्रतुः कर्ममध्ये विशिष्ट' इति च गौपवनश्रुतिः ॥ ५९ ॥ भूमाधिकरणम् ॥ ३७ ॥

---

[1] भेदे. पा. [2] दीक्षाप्रायणीयोदयनीय सवनत्रयावभृथात्मकः क्रतुः इत्यधिकः पाठः क्वचित्।

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ नाना शब्दादिभेदात् ॐ ॥६०॥ 'शब्दोऽनुमा तथैवाक्षो योग्यताभेदतस्सदा। ब्रह्मादीनामेकमर्थं बहुधा दर्शयन्ति हि॥ अतः पूर्णत्वमीशस्य नानैवैषां प्रदृश्यते। अतः फलस्य नानात्वं नानैवोपासनं(ना) यत' इति ब्रह्मतर्के। अतो भूमत्वमपि नानैवोपास्यते ॥६०॥ नाना(शब्दा)धिकरणम् ॥ ३८ ॥

॥ ॐ विकल्पो विशिष्टफलत्वात् ॐ ॥ ६१ ॥ स्वयोग्योपासनानन्तरं सामान्यस्यापि कस्यचिदुपासनं विकल्पेन भवति विशिष्टफलापेक्षया ॥ 'मुक्त्यर्थमात्मयोग्यं हि कार्यमेव ह्युपासनम्। नृसिंहादिकमन्यच्च दुरितादिनिवृत्तये। उपास्यते यथायोगं न वा फलविभेदत' इति (च) ब्रह्मतर्के ॥६१॥ विकल्पाधिकरणम् ॥ ३९ ॥

॥ ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॐ ॥ ६२ ॥ 'यस्य यस्य हि यः कामस्तस्य तस्य ह्युपासनम्। तादृशानां गुणानां च समाहारं प्रकल्पयेत् ॥ अकामत्वान्मुमुक्षूणां न वा तेषामुपासनम्। तुष्ट्यर्थमीश्वरस्यैव नैवोपासा विदुष्यती'ति बृहत्तन्त्रे ॥ ६२ ॥ काम्याधिकरणम् ॥ ४० ॥

॥ ॐ अङ्गेषु यथाऽऽश्रयभावः ॐ ॥ ६३ ॥ अङ्गदेवतानां यथा यथा परमेश्वराङ्गाश्रयत्वं 'चक्षोः सूर्यो अजायते'[1] त्यादि तथा भावना कर्तव्या ॥ ६३ ॥ **ॐ शिष्टेश्च ॐ ॥६४॥** 'यस्मिन्यस्मिन्यो हि चाङ्गे निविष्टः परस्य चिन्त्यः स तथा तथैवे'ति पौत्रायणश्रुतेः ॥ ६४ ॥ **ॐ समाहारात् ॐ ॥ ६५ ॥** 'अङ्गैः पराद्ये हि देवा विसृष्टास्तत्तद्गुणान्परमे संहरेत। तांश्चापि तत्रैव

[1] १०-९०-१३. ऋ.सं.

SGDF
Sri Gurgeshwari Digital Foundation

॥५

विचिन्त्य देवान्स्थानं मुमुक्षुः परमं व्रजेते'ति काषायणश्रुतौ समाहारवचनाच्च ॥ ६५ ॥ **ॐ गुणसाधारण्यश्रुतेश्च ॐ ॥६६॥** 'साधारण्यात्सर्वगुणाः परस्य समाहार्यास्तत्त्वदृशो मुमुक्षोरि'ति माण्डव्यश्रुतेश्च ॥ ६६ ॥ यथाश्रयभावाधिकरणम्[1] ॥ ४१ ॥

॥ ॐ न वाऽतत्सहभावश्रुतेः ॐ ॥६७॥ न वाऽङ्गदेवतोपसंहारः कार्यः । उपसंहारस्य सहाश्रवणात् ॥ ६७ ॥ **॥ ॐ दर्शनाच्च ॐ ॥ ६८ ॥** 'सत्यो ज्ञानः परमानन्दरूप आत्मेत्येवं नित्यदोपासनं स्यात् । नान्यत्किञ्चित्समुपासीत धीरः सर्वैर्गुणैर्देवगणा उपासत' इति कमठश्रुतौ॥६८॥ नवाधिकरणम् ॥४२॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

ज्ञानसामर्थ्यमस्मिन्पाद उच्यते ॥ **ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ ॥ १ ॥** यद्दर्शनार्थमुपासनोक्ता तस्माद्दर्शनात्सर्वपुरुषार्थप्राप्तिरिति बादरायणो मन्यते । 'यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम'[2] इति शब्दात् ॥१॥ **॥ ॐ शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॐ ॥ २ ॥** अस्त्येव मोक्षसाधनत्वं ज्ञानस्य । स्वर्गादिषु तत्साधनकर्मशेषत्वेन ॥ 'स्वर्गं धनाद्देहतो वै गृहाच्च प्राप्स्यन्ति धीरा नत्वधीराः कुतश्चिदि'ति वदति जैमिनिः ॥२॥ **ॐ आचारदर्शनात् ॐ ॥ ॥३॥** ज्ञानिनामेव देवादीनामाचारदर्शनात् ॥३॥ **ॐ तच्छ्रुतेः ॐ ॥ ४ ॥** 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं

---

[1] अङ्गाधिकरणम्. पा. [2] ३-१-१०. मुं.उ.

SGDF
Sri Gangeshwari Digital Foundation

भवती'[1]ति शेषत्वश्रुतेः ॥ ४ ॥ **ॐ समन्वारम्भणात् ॐ ॥ ॥ ५ ॥** 'कर्मैव देहं दैविकं मानुषं वाऽप्यन्वारभेन्नापरस्तत्र हेतुः । भोगांस्तदीयांश्च यथाविभागं ददाति कर्मैव शुभाशुभं यदि'ति माठरश्रुतेश्च । संशब्दः प्राधान्यं दर्शयति ॥५॥ **ॐ तद्वतो विधानात् ॐ ॥ ६ ॥** 'ज्ञानी च कर्माणि सदोदितानि कुर्यादकामः सततं भवेते'ति कमठश्रुतौ ज्ञानवतोऽपि विधानात् ॥६॥ **ॐ नियमाच्च ॐ ॥ ७ ॥** 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नर'[2] इति ॥ ७ ॥ **॥ ॐ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॐ ॥ ८ ॥** 'ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो ज्ञानादेव कामाः सम्पद्यन्ते । अथापि यथा यथा कर्म कुरुते तथा तथाऽधिको भवती'ति कौण्ठरव्यश्रुतेः ॥ युधिष्ठिरादीनां राजसूयादिना फलाधिक्यदर्शनाच्चेति बादरायण(स्य)मतम् ॥८॥ **ॐ तुल्यं तु दर्शनम् ॐ ॥ ९ ॥** राजसूयादिकृतावकृतौ च सममेव तेषां विज्ञानम् । 'विज्ञातमेतत्सर्वेषां मुनीनां ब्रह्मदर्शनात् । स्यादेव मोक्षो नान्यस्मादिति तत्रापि चित्रता ॥ स्वर्गादयः कर्मणैव नान्येनेत्यपरे विदुः । ज्ञानेनाऽधिक्यमित्याहुर्जैमिन्याद्यास्तु केचन ॥ अदृष्टमेव ज्ञानेन दृष्टं नैवोपलभ्यते । इति केचिद्विदः प्राहुर्व्यासशिष्या इमेऽखिलाः ॥ यस्माद्व्यासमतं सर्वं सत्यमेव ततोऽखिलम् । यथाऽऽकाशस्त्वनन्तोऽपि व्यामो हस्तावधिस्तथा । प्रादेशोऽपि हि सत्येन तथैतेषां मतानि तु ॥ स्वयं तु भगवान्व्यासो व्याप्तज्ञानमहांशुमान् । अनन्ताकाशवत्पश्य-

---

[1] १-१-१०. छां.उ. [2] २. ई.उ.

SGDF
Sri Gargeshwari Digital Foundation

न्नखिलं पुरुषोत्तमः ॥ ज्ञानेनैवाऽप्यते सर्वं कर्मणा त्वधिकं भवेत् । इति प्राह महायोगी पुमर्थानां विनिर्णयमि'ति भविष्यत्पर्वणि । 'ज्ञानिनामपि देवानां विशेषः कर्मभिर्भवेत् । चीर्णेऽकृते वा ज्ञानस्य न विशेषोऽस्ति कर्मणी'ति ब्रह्मतर्के ॥९॥ पुरुषार्थाधिकरणम् ॥ १ ॥

सर्वेषां पुरुषार्थापेक्षित्वाज्ज्ञानाधिकारितेत्यत आह— ॥ ॐ **असार्वत्रिकी ॐ ॥ १० ॥** न सर्वेषामधिकारः ॥ १० ॥ ॥ **ॐ विभागश्शतवत् ॐ ॥ ११ ॥** 'नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु । सोमाधिकारो वेदोक्तो ब्रह्मणी द्वे शताधिके ॥ यथा तथैवासङ्ख्येयाः प्रजास्तासु कियाञ्जनः । ज्ञानाधिकारी सम्प्रोक्तो विष्णुपादैकसंश्रय' इति वचनात्सुखापेक्षासाम्येऽपि विभाग इष्यतेऽधिकारार्थम् ॥११॥ कस्याधिकारः ?— ॥ **ॐ अध्ययनमात्रवतः ॐ ॥१२॥** 'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते । गुरुभक्तिविहीनस्य शमादिरहितस्य च । न च वर्णावरस्यापि तस्मादध्ययनान्वितः । ब्रह्मज्ञाने तु वेदोक्तेऽप्य(ह्य)धिकारी सतां मत' इति ब्रह्मतर्के ॥ 'पठेद्वेदानथार्थानधीयीताथ विचार्य ब्रह्म विन्देदि'ति कौषारवश्रुतिः ॥ १२ ॥ अधिकाराधिकरणम्[1] ॥ २ ॥

॥ **ॐ नाविशेषात् ॐ ॥१३॥** न सामान्येनाधिकारो देवादीनाम् । 'अथ पुमर्थसाधनान्यर्थो धर्मो ज्ञानमित्युत्तरोत्तरम् । तत्राधिकारिणो मनुष्या ऋषयो देवा इत्युत्तरोत्तरमि'ति कौण्डिन्यश्रुतिः ॥ १३ ॥ अधिकारविशेषाधिकरणम्[2] ॥ ३ ॥

'अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवे'[3]ति ज्ञानिनो यथेष्टाचरणं विधीयत इत्यत

---

[1] असार्वत्रिकाधिकरणम्. पा. [2] अविशेषाधिकरणम्. पा.

[3] ५-५-१. बृ.उ.

SGDF
Sri Gargeshwari Digital Foundation

आह—॥ ॐ स्तुतयेनुमतिर्वा ॐ ॥ १४ ॥ न विधिः। ज्ञानिनः स्तुतये अनुमतिमात्रं वा। युज्यते च ॥१४॥ ॐ कामकारेण चैके ॐ ॥ १५ ॥ 'कामचाराः कामभक्षाः कामवादाः कामेनैवेमं देहमत्सृज्याथ परात्परमीयुरनारम्भणमि'[1]ति चैके पठन्ति ॥ ॥ १५ ॥ ॐ उपमर्दं च ॐ ॥ १६ ॥ 'ओमित्युच्चार्यान्तरिममात्मानमभिपश्योपमृद्य पुण्यं च पापं च काममाचरन्तो ब्रह्मानुव्रजन्ती'ति च तुरश्रुतौ ॥ १६ ॥ ॐ ऊर्ध्वरेतस्सु च शब्दे हि ॐ ॥ १७ ॥ न तावता कामचाराणां ज्ञानेऽधिकारः। 'य इमं परमं गुह्यमूर्ध्वरेतस्सु भाषयेत्। न तथा विद्यते भूयान्यं प्राप्यान्येऽपि भूयस' इति माठरश्रुतेः ॥ १७ ॥ ॐ परामर्शं जैमिनिरचोदना चापवदति हि ॐ ॥ १८ ॥ 'प्रातरुत्थायाथ सन्ध्यामुपासीत यत्सन्ध्यामुपासते ब्रह्मैव तदुपासतेऽथ देवान्नमेजुहुयाद्वेदानावर्तयीत नान्यत्किञ्चिदाचरेन्न सुरां पिबेन्न पलाण्डुं भक्षयीत न भृशं वदेन्न विस्मरेदात्मनं सोमं पिबेद्धुतशेषेण वर्तयेदि'त्युक्ताचारपरामर्शेन विधिबन्धवर्जितत्वेन कामत एव तस्य चरणं कामचार इति जैमिनिर्मन्यते ॥ न च निषिद्धं कर्म कर्तव्यमेवेति चोदना ॥ 'ब्राह्मणो न हन्तव्यः' इत्याद्यपवादश्च ॥ १८ ॥ ॥ ॐ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॐ ॥ १९ ॥ अनुष्ठेयानां मध्य एष कामतश्चरणं कामतो निवृत्तिरिति बादरायणो मन्यते। 'केन स्याद्येन स्यात्तेनेदृश एवे'[2]ति साम्यश्रुतेः ॥ 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न

---

1 सामशाखा.

2 ५-५-१. बृ.उ.

SGDF
Sri Gargeshwari Digital Foundation

विद्यत' इति भगवद्वचनाच्च ॥ १९ ॥ ॐ विधिर्वा धारणवत् ॐ ॥ २० ॥ 'केन स्याद्येन स्यादि'ति विधिर्वा । यथा वेद-धारणं त्रैवर्णिकानां विहितं नान्येषाम् । एवं स्वमतानुसारिणी प्रवृत्ति-र्ज्ञानिनां विहिता । न तत्राधर्मशङ्का कार्या । नान्येषामिति वा । 'स्वेच्छयैव प्रवृत्तिस्तु ब्रह्मणो विधिचोदिता । नाऽशङ्क्यं तन्मतं क्वापि विष्णोः प्रत्यक्षचोदना । इतरेषां न विहिता स्वेच्छावृत्तिः कथञ्चने'ति हि ब्राह्मे ॥ २० ॥ ॐ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॐ ॥ २१ ॥ स्तुतिमात्रमेव स्वेच्छाचरणं न विधिः । तैरपि सामान्यविधिस्वीकारादिति चेन्न । अपूर्वत्वात्—परवशत्वात् ॥ सर्वविध्यतिक्रमेण स्तुतिमात्रविषयत्वं परब्रह्मण एव हि ॥ विधीनां विषयास्त्वन्ये ब्रह्मणः स्वेच्छया कृतौ । परस्य ब्रह्मणो ह्येव सर्वविध्यति-दूरते'ति ब्रह्मतर्के ॥ २१ ॥ ॐ भावशब्दाच्च ॐ ॥ २२ ॥ 'यथाविधानमपरे विधिर्भावे प्रजापतेः । ब्रह्मणः परमस्यैव सर्वविध्यति-दूरते'ति च तुरश्रुतौ ॥ २२ ॥ ॐ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॐ ॥ २३ ॥ 'केन स्याद्येन स्यादि'त्यादयः स्थिरत्वनिवृत्त्यर्था इति चेन्न । 'त्रेधा हि ज्ञानिनो ह वाव भवन्ति विधिनियता अनियताः स्वेच्छानियता इति । विधिनियता मनुष्या अनियता हि देवा ब्रह्मैव स्वेच्छानियत' इति गौपवनश्रुतौ विशेषित-त्वात् ॥२३॥ ॐ तथाचैकवाक्योपबन्धात् ॐ ॥२४॥ एवं सति विधिवाक्यानां स्वेच्छावृत्तिवाक्यानां च सम्बन्धो भवति॥२४॥ ॥ ॐ अत एव चाग्नीन्धनाद्यनपेक्षा ॐ ॥ २५ ॥ अत एव ज्ञानस्य मोक्षदाने नाग्निहोत्राद्यपेक्षा । ब्रह्मतर्के च—'येषां ज्ञानं समुत्पन्नं तेषां मोक्षो विनिश्चितः । शुभकर्मभिराधिक्यं

SGDF
Sri Gangeshwari Digital Foundation

विपरीतैर्विपर्ययः ॥ स्वेच्छानुवृत्त्यैव भवेद्ब्रह्मणः प्रायशस्तथा । देवानामपि सर्वेषां विशेषादुत्तरोत्तरमि'ति ॥२५॥ **ॐ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॐ ॥ २६ ॥** सर्वधर्मापेक्षा च ज्ञानस्योत्पत्तौ । 'विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'[1]ति श्रुतेः ॥ यथा गतिनिष्पत्त्यर्थमश्वादयोऽपेक्ष्यन्ते न विनिष्पन्नगते-र्ग्रामादिप्राप्तौ ॥ २६ ॥ **ॐ शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॐ ॥ ॥ २७ ॥** यद्यपि ज्ञानेनैव मोक्षो नियतस्तथाऽपि ज्ञानी शम-दमाद्युपेतः स्यात् । 'आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्यन्शान्तो भवेद्दान्तो भवेदनुकूलो भवेदाचार्यं परिचरेत्परिचरेदाचार्यमि'ति माठरश्रुतौ ज्ञानिनोऽपि तद्विधेः ॥ 'ब्राह्मीं वाव त उपनिषदमब्रूमेति तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् । यो वा एतामुपनिषदमेवं वेदे'[2]ति ज्ञानाङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ "यस्य ज्ञानं तस्य मोक्ष इति नात्र विचारणा । तस्य शान्त्यादयोऽङ्गानि तस्मात्तेषामनुष्ठितिः । अवश्यकरणीया स्यादन्यथाऽल्पफलं भवेदि'ति आग्नेये ॥ तुशब्दः पूर्णफलार्थत्वं सूचयति ॥ २७ ॥ **ॐ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॐ ॥ २८ ॥** 'यदि ह वा अप्येवंविन्निखिलं भक्षयीतैवमेव स भवती'ति सर्वान्नानुमतिः प्राणात्ययविषया । 'न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमि'[3]ति दर्शनात् ॥ २८ ॥ **ॐ अबाधाच्च ॐ ॥ २९ ॥** 'अन्याय्यचरणाभावे न हि ज्ञानस्य बाधनम् । अतो विद्वानपि न्याय्यं वर्तेतोत्कर्षसिद्धय' इति ब्रह्मतर्के ॥ २९ ॥

---

[1] ६-४-२२. बृ.उ. [2] ४-७, ९. के.उ. [3] १-१०-४. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

॥ ॐ अपि स्मर्यते ॐ ॥३०॥ 'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः। एतादृशोऽपि नाऽचारं श्रौतं स्मार्तं परित्यजेदि'ति हरिवंशेषु ॥ ३० ॥ ॐ शब्दश्चातोऽकामकारे ॐ ॥ ॥ ३१ ॥ 'स य एतदेवं विदेवं मन्वान एवं पश्यन्नं कामचरितं चरेन्न कामं भक्षयीत न काममनुवर्तेते'ति कौण्डिन्यश्रुतौ ॥ अत इत्यल्पफलत्वं सूचयति। 'न निषिद्धानि वर्तेत पूर्णज्ञानफलेच्छये'ति पाद्मे ॥ ३१ ॥ ॐ विहितत्वाच्चाऽश्रमकर्मापि ॐ ॥ ॥ ३२ ॥ न केवलं निषिद्धाकरणेन पूर्यते। कर्तव्यं च वर्णाश्रमविहितं कर्म ॥ 'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन्। यदात्मनः सुनियतमानन्दोत्कर्षमाप्नुयादि'ति कौषारवश्रुतौ विहितत्वाच्च ॥ अपि शब्दो वर्णधर्मसमुच्चयार्थः ॥३२॥ ॐ सहकारित्वेन च ॐ ॥ ॥ ३३ ॥ 'यथा राज्ञः सहकार्येव मन्त्री तथाऽप्यृते तं क्षितिपः कार्यमृच्छेत्। एवं ज्ञानं कर्म विनाऽपि कार्यं सहायभूतं न विचारः कुतश्चिदि'ति कमठश्रुतौ सहकारित्वोक्तेश्च ॥ 'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु। आनन्दो ह्रसतेऽकार्याच्छुभं कृत्वा च वर्धत' इति (च) ब्रह्माण्डे ॥ 'सर्वदुःखनिवृत्तिश्च ज्ञानिनो निश्चितैव हि। उपासया कर्मभिश्च भक्त्या चाऽनन्दचित्रते'ति बृहत्तन्त्रे ॥ 'धर्मस्वरूपचित्रत्वाद्यो यो देवमनोगतः। स एव धर्मो विज्ञेयो न ह्येते लोकसम्मिता' इति च पाद्मे ॥३३॥ कामचाराधिकरणम्[1] ॥ ४ ॥

॥ ॐ सर्वथाऽपि तु त एवोभयलिङ्गात् ॐ ॥ ॥ ३४ ॥ सर्वप्रकारेणोत्साहेऽपि ये ज्ञानयोग्यास्त एव ज्ञानं प्राप्नुवन्ति नान्ये। 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघ-

[1] स्तुत्यधिकरणम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

त्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य'[1] इति श्रुत्याऽऽचार्योपदेशसाम्येऽपि विरोचनो विपरीतज्ञानमापेन्द्रः सम्यग्ज्ञानमित्युभयविधलिङ्गात् ॥ ३४ ॥ **ॐ अनभिभवं च दर्शयति ॐ ॥ ३५ ॥** 'दैवीमेव सम्पत्तिं देवा अभिगच्छन्त्यासुरीमेव चासुरा नैतयोरभिभवः कदाचित्स्वभाव एव ह्यवतिष्ठत' इति स्वभावानभिभवं च दर्शयति ॥ ३५ ॥ **ॐ अन्तरा चापि तु तद्दृष्टेः ॐ ॥ ३६ ॥** सम्यग्ज्ञानविपरीतज्ञानयोरन्तरा स्थितानामपि देवासुरभावयोर्दार्ढ्यदृष्टेः ॥ ३६ ॥ **ॐ अपि स्मर्यते ॐ ॥ ३७ ॥** 'असुरा आसुरेणैव स्वभावेन च कर्मणा। ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात् ॥ देवा दैवस्वभावेन कर्मणा चाप्यसंशयम्। सम्यग्ज्ञानेन परमां गतिं गच्छन्ति वैष्णवीम् ॥ नानयोरन्यथाभावः कदाचित्क्वापि विद्यते। मानुषा मिश्रमतयो विमिश्रगतयोऽपि चे'ति स्कान्दे ॥३७॥ **ॐ विशेषानुग्रहं च ॐ ॥३८॥** 'शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति नेनीयमानः। एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यानि'[2]ति विशेषानुग्रहं च दर्शयति देवेषु परमेश्वरस्य ॥ 'असुरान्दमयन्विष्णुः स्वपदं च सुरान्नयन्। पुनः पुनर्मानुषांस्तु सृतावावर्तयत्यसावि'ति भविष्यत्पर्वणि ॥३८॥ **ॐ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॐ ॥ ३९ ॥** देवभागादसुरभाग एव बहुलः। 'तस्मान्न जनतामियादि'[3]ति लिङ्गात् ॥ चशब्दा'त्ततः कनीयसा एव देवा ज्यायसा असुरा'[4] इति श्रुतेश्च ॥ 'असुरा बहुला यस्मात्तस्मान्न जनतामियादि'ति

---

[1] ८-७-३. छां.उ. [2] ६-४७-१६. ऋ.सं. [3] ३-३-१०. बृ.उ. [4] ३-३-१. बृ.उ.

SGDF
Sri Gurgeshwari Digital Foundation

123

च ब्राह्मे ॥ ३९ ॥ **ॐ तद्भूतस्य तु तद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॐ ॥ ४० ॥** असुरजातेरेवासुरत्वं देवजातेरेव देवत्वं जैमिनेरपि सिद्धमेव । 'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च गतिमीयुरात्मीयामेव जातिमनुभवन्ती'ति नियमश्रुतेः ॥ 'नासुराणां दैवं रूपं न देवानामासुरं नचोभयं मनुष्याणां यो यद्रूपः स तद्रूपो निसर्गो ह्येष भवती'त्यतद्रूपत्वश्रुतेः ॥ 'तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह पराबभूवुरि'[1]ति देवासुराणां भावाभावश्रुतेश्च ॥ 'देवानां भूतिरित्येव मनो विष्णौ स्वभावतः । असुराणामभूतित्वेनैतन्नेयमतोऽन्यथा ॥ देवाः शापाभिभूतत्वात्प्रह्लादाद्या बभूविरे । अतः सुगतिरेतेषां नान्यथा व्यत्ययो भवेदि'ति चाध्यात्मे ॥ ४० ॥ उभयलिङ्गाधिकरणम् ॥ ५ ॥

॥ ॐ न चाऽधिकारिकमपि पतनानुमानात्तदयोगात् ॐ ॥ ४१ ॥ न च परमात्मैश्वर्यादिकमाकाङ्क्ष्यम् । ब्रह्मादीनामपि नाऽकाङ्क्ष्यं, किमु परस्येति सूचयितुमपिशब्दः । चशब्दस्तु ज्ञानार्थिनां पूर्वोक्तादित्थम्भावान्तरसूचकः । अयोग्यमारोढुं प्रयतन् प्रपतन्हि दृश्यते ॥ एवमयोग्यस्य परमात्मैश्वर्यस्य ब्रह्मादिपदस्य चाकाङ्क्षायां पतनमनुमीयते ॥ 'न देवपदमन्विच्छेत्कुत एव हरेर्गुणान् । इच्छन्पतति पूर्वस्माद्धस्ताद्यत्र नोत्थितिरि'ति ब्रह्माण्डे ॥ 'स्वकीयमिच्छमानं तु राजाद्याः पातयन्ति हि । एवमेव सुराद्याश्च हरिश्च स्वपदेच्छुकमि'त्याद्यनुमानरूपवाक्याच्च ॥ 'मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथा'[2] इति श्रुतिः ॥ ४१ ॥

॥ ॐ उपपूर्वमपीत्येके भाववशमनवत्तदुक्तम् ॐ ॥४२॥

---

[1] २-१-८. ऐ.आ. [2] ८-१४-१४. ऋ.सं.

SGDF
Sri Gargeshwari Digital Foundation

उपदेवपदं च नापेक्ष्यमित्येके । भावशमनवदृषिपदवदेव । तच्चोक्त-मिन्द्रद्युम्नश्रुतौ—'अथ यथर्षीन्प्रजापतीन्नाकाङ्क्षेद्देवं न गन्धर्वान्न-विद्याधरान्न सिद्धानि'ति । बृहत्संहितायां च — 'न देवानभि-काङ्क्षेत कुत एव हरेर्गुणान् । प्राजापत्यान्न चाऽर्षांश्च गान्धर्वादी-नपि क्वचित् । ऋष्यादिषु विशेषे तु दोषो नैवाविशेषि(ष)त' इति विशेष-दर्शनार्थमेक इत्युक्तम् ॥४२॥ **ॐ बहिस्तूभयथाऽपि स्मृते-राचाराच्च ॐ ॥ ४३ ॥** देवर्षिगन्धर्वादिपदेभ्योऽन्यत्र शुभ-विषय आकाङ्क्षयामनाकाङ्क्षायां च न पतनम् । देवर्षिगन्धर्वाणां पदाकाङ्क्षी पतेद्ध्रुवम् । अन्यत्र शुभमाकाङ्क्षन्न पतेदविरोधत इति स्मृतेः ॥ 'नानात्वमेव कामानां नाकामः क्व च दृश्यते । अतोऽ-विरुद्धकामः स्यादकामस्तेन भण्यत' इत्याचाराच्च ॥४३॥ आधिकारि-काधिकरणम् ॥ ६ ॥

॥ ॐ स्वामिनः फलश्रुतेरित्यात्रेयः ॐ ॥४४॥
'ब्रह्मविदाप्नोति पर'[1]मित्यादिफलं स्वामिनां देवानामेव भवति । 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति यदु किं चेमाः प्रजा विजानते देवा एव तद्विजानते देवानां ह्येतद्भवति स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाण' इति माध्यन्दिनायनश्रुतेरित्यात्रेयो मन्यते ॥ ४४ ॥ **ॐ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॐ ॥ ४५ ॥** सत्रयागेष्वृत्विजामपि फलदर्शनादल्पं फलं प्रजानामपि भवतीत्यौडुलोमिर्मन्यते । तदर्थं देवैः क्रियमाण-त्वात् ॥ ४५ ॥ **ॐ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॐ ॥४६॥** तृतीयः स्वपक्षः । देवानां

---

[1] २-१. तै.उ.

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानादिकर्मणि सहकार्यन्तरत्वेन प्रजा विधीयन्ते । यथा प्रजावतो राज्ञः प्रजाः सहकारित्वेन विधीयन्ते । यथा वाऽऽचार्यस्य शिष्याः ॥ वाराहे च—'ज्ञानादिदानं देवानां विष्णुना साधु चोदितम् । वेदे च तेषां विहितं तत्राऽचार्यो महत्तरः ॥ विहितस्सहकारित्वे सहकार्यन्तरं प्रजाः । पातृत्वेन यथा राज्ञो यथा शिष्या गुरोरपि ॥ तस्माच्छ्रुतं फलं तासामाचार्याणां महत्तरम् । ततो महत्तरं प्रोक्तं देवानामुत्तरोत्तर-मि'ति ॥ ४६ ॥ फलश्रुत्यधिकरणम् ॥ ७ ॥

॥ ॐ कृत्स्नभावात्तु गृहिणोपसंहारः ॐ ॥४७॥
'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदि'त्युक्त्वा 'न च पुनरावर्तते न च पुनरावर्तत'[1] इति गृहिणोपसंहारः क्रियते तस्मा-द्गृहस्थस्यैवोत्तरमिति न वाच्यम् । यतः कृत्स्नगृहस्थान्देवानपेक्ष्यैवोप-संहारः क्रियते ॥ 'कृत्स्ना ह्येते गृहिणो देवाः कृत्स्ना ह्येते यतयोऽत एतेषां न पुत्रा दायमुपयन्ति न चैते गृहान्विसृजन्त्यरागा अद्वेषा अलोभाः सर्वभोगाः सर्वज्ञाः सर्वकर्तार' इति पौत्रायणश्रुतिः ॥ ४७ ॥

॥ ॐ मौनवदितरेषामप्युपदेशात् ॐ॥४८॥ न चाऽश्रम-द्वयमेव देवानाम् । 'देवा एव ब्रह्मचारिणो देवा एव गृहस्था देवा एव वनस्था यथा ह्येते मुनय एवं सर्ववर्णाः सर्वाश्रमाः सर्वे ह्येते कर्म कुर्वन्ती'ति कौण्ठरव्यश्रुतौ यतित्वदृष्टान्तेनान्येषामप्युपदेशात् ॥ ४८ ॥
॥ कृत्स्नभावाधिकरणम् ॥ ८ ॥

॥ ॐ अनाविष्कुर्वन्नन्वयात् ॐ ॥ ४९ ॥ 'एतां विद्यामधीत्य ब्रह्मदर्शी वाव भवति । स एतां मनुष्येषु विब्रूयात् । यथा यथा ह वै ब्रूयात्तथा तथाऽधिको भवती'ति माठरश्रुतौ विद्यादानं श्रूयते । तच्च बहूनां स्वीकरणार्थमाविष्कारेणेति न

---
[1] ८-१५-१. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

मन्तव्यम् । अन्वयाद्युक्तेः ॥ आविष्कारेऽयोग्यानामपि स्वीकारप्राप्तिः । तच्च निषिद्धम्—'मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः । (येषां नैतन्नापरं किं च नैकं ब्रह्मणस्पते ब्रूहि तेभ्यः कदाचित्' ॥ 'अथो(प)शमेनोपरता मनुष्याः ये धर्मिणो ब्रूहि तेभ्यः सदा नः) । आदेवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुरि'[1]ति ॥ 'विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि । अनार्यकायानृजवे शठाय मास्म[2] ब्रूया ऋजवे ब्रूहि नित्यमि'ति च ॥४९॥ अनाविष्काराधिकरणम्[3] ॥ ९ ॥

॥ ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ॥ ॥ ५० ॥ 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'[4] इति दर्शनार्थं श्रवणादि विधीयते । तच्च दर्शनमैहिकमेव प्रारब्धप्रतिबन्धाभावे । 'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य इहैव दृष्टिं परमस्य विन्देत् । यद्यारब्धं कर्म निबन्धकं स्यात्प्रेत्यैव पश्येद्योगमेवान्ववेक्ष्ये'ति सौपर्णश्रुतौ तद्दर्शनात्॥ 'अनादिजन्मसम्बद्धं निर्भेत्तुं पापपञ्जरम् । यावत्या सेवया शक्यं तावत्कार्यं न संशयः ॥ यावद्दूरे स्थितो गम्यात्तावद्गन्तव्यमेव हि । इह जन्मान्तरे वाऽपि तावत्यैव तु दर्शनम् ॥ श्रवणं मननं चैव निदिध्यासनमेव च । परे गुरौ च या भक्तिः परिचर्यादिकं हरेः । एषा सेवेति सम्प्रोक्ता यथा तद्दर्शनं भवेदि'ति बृहत्संहितायाम् ॥५०॥ ऐहिकाधिकरणम् ॥१०॥

॥ ॐ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ ॥ ५१ ॥ एवमेव प्रारब्धकर्माभावे शरीरपातानन्तरमेव मोक्षः, तद्भावे जन्मान्तराणीत्यनियमः । 'धर्मी

---

[1] २-२३-१६. ऋ.सं. [2] न.मां. पा. [3] अन्वयाधिकरणम्. पा.
[4] ४-४-५. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

स्वर्गं विधर्मी निरयमेत्येव ब्रह्मसंस्थोऽमृतमेत्येव ब्रह्मसंस्थोमृतमेत्येवे’ति ब्रह्मसंस्थस्य मोक्षस्यैवावधारणात् ॥ ‘विद्वानमृतमाप्नोति नात्र कार्या-विचारणा । अवसन्नं यदारब्धं कर्म तत्रैव गच्छति । नचेद्बहूनि जन्मानि प्राप्यैवान्ते न संशय’ इति नारायणाध्यात्मे ॥ ५१ ॥

॥ मुक्तिफलाधिकरणम् ॥११॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्र-भाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥ तृतीयस्साधनाध्यायस्समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ चतुर्थाध्यायः ॥

फलं निगद्यतेऽस्मिन्नध्याये । कर्मनाशाख्यं फलमस्मिन्पादे । नित्यशः कार्यं सर्वथा भाव्यं साधनं प्रथमत उच्यते । प्रायिकत्वाच्चाध्यायानां पादानां च न विरोधः ॥ **ॐ आवृत्तिरसकृदुपदेशात् ॐ ॥ १ ॥** 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'[1] इत्यादीनां नाग्निष्टोमादिवदेकवारेणैव फलप्राप्तिः । किन्त्वावृत्तिः कर्तव्या। 'स य एषोऽणिमैतदात्म्यमिदं सर्वमि'[2]त्याद्यसकृदुपदेशात् ॥ १ ॥ **ॐ लिङ्गाच्च ॐ ॥ २ ॥** 'स तपोऽतप्यत...पुनरेव वरुणं पितरमुपससारे'[3]त्याद्यावर्तनलिङ्गाच्च ॥ 'नित्यशः श्रवणं चैव मननं ध्यानमेव च । कर्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिरि'ति बृहत्तन्त्रे ॥ २ ॥ आवृत्त्यधिकरणम् ॥ १ ॥

॥ ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥ ३ ॥ आत्मेत्युपदेश उपासनं च मोक्षार्थिभिः सर्वथा कार्यमेव । 'नान्यं विचिन्तय आत्मानमेवाहं विजानीयामात्मानमुपास आत्मा हि ममैष भवती'ति ह्युपगच्छन्ति ॥ 'आत्मेत्येवोपास्स्व आत्मेत्येव विजानीहि नान्यं किञ्चन विजानथ आत्मा ह्येवैष भवती'ति ग्राहयन्ति च ॥ 'आत्मेत्युपासनं कार्यं सर्वथैव मुमुक्षुभिः । नानाक्लेशसमायुक्तोऽप्येतावन्नैव विस्मरेदि'ति भविष्यत्पर्वणि ॥ 'आत्मा विष्णुरिति ध्यानं विशेषणविशेष्यतः । सर्वेषां च मुमुक्षूणामुपदेशश्च तादृशः । कर्तव्यो नास्य हानेन कस्यचिन्मोक्ष इष्यत' इति ब्राह्मे ॥३॥ ॥ आत्मोपगमाधिकरणम् ॥ २ ॥

॥ ॐ न प्रतीके न हि सः ॐ ॥ ४ ॥ 'नाम ब्रह्मेत्युपासीत'[4] इत्यादिना शब्दभ्रान्त्या न प्रतीके ब्रह्मदृष्टिः कार्या ।

---
[1] ४-४-५. बृ.उ. [2] ६-८-७. छां.उ. [3] ३-१, २. तै.उ. [4] ७-१-५. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

किन्तु तत्स्थत्वेनैवोपासनं कार्यम् ॥ ब्रह्मतर्के च—'नामादिप्राणपर्यन्त उभयोः प्रथमात्मतः । ऐक्यदृष्टिरिति भ्रान्तिरबद्धानां भविष्यति ॥ नामादिस्थितिरेवात्र ब्रह्मणो हि विधीयते । सर्वार्था प्रथमा यस्मात्सप्तम्यर्था ततो मते'ति ॥ ४ ॥ प्रतीकाधिकरणम् ॥ ३ ॥

॥ ॐ **ब्रह्मदृष्टिरुत्कर्षात्** ॐ ॥ ५ ॥ ब्रह्मदृष्टिश्च सर्वथा कार्यैव परमेश्वरे । उत्कृष्टत्वात् ॥ 'ब्रह्मदृष्ट्या सदोपास्यो विष्णुः सर्वैरपि ध्रुवम् । महत्त्ववाची शब्दोऽयं महत्त्वज्ञानमेव हि । सर्वतः प्रीतिजनकमतस्तत्सर्वथा भवेत् ॥ आत्मेत्येव यदोपासा तदा ब्रह्मत्वसंयुता । कार्यैव सर्वथा विष्णोर्ब्रह्मत्वं न परित्यजेदि'ति ब्रह्मतर्के ॥ ५ ॥ ब्रह्मदृष्ट्यधिकरणम् ॥ ४ ॥

॥ ॐ **आदित्यादिमतयश्चाङ्ग उपपत्तेः** ॐ ॥६॥ 'चक्षोः सूर्यो अजायते'[1]त्याद्युपासनं च देवानां कार्यमेव । स्वोत्पत्तिस्थानत्वात्स्वाश्रयत्वान्मुक्तौ तत्र लयस्यापेक्षितत्वाच्चोपपन्नं तथोपासनं ॥ नारायणतन्त्रे च — 'आधिव्याधिनिमित्तेन विक्षिप्तमनसोऽपि तु । गुणानां स्मरणाशक्तौ विष्णोर्ब्रह्मत्वमेव तु ॥ स्मर्तव्यं सततं तत्तु न कदाचित्परित्यजेत् । अत्र सर्वगुणानां च यतोन्तर्भाव इष्यते ॥ स्वोत्पत्त्यङ्गं च देवानां विष्णोश्चिन्त्यं सदैव तु । तेषां तत्र प्रवेशो हि मुक्तिरित्युच्यते बुधैः । तदाश्रिताश्च ते नित्यं ततश्चिन्त्यं विशेषत' इति ॥ ६ ॥ आदित्यादिमत्यधिकरणम् ॥ ५ ॥

॥ ॐ **आसीनस्सम्भवात्** ॐ ॥७॥ सर्वदोपासनं कुर्वन्नप्यासीनो विशेषतः कुर्यात् । तदा विक्षेपाल्पत्वेन सम्भवात् ॥७॥

॥ ॐ **ध्यानाच्च** ॐ ॥ ८ ॥ 'स्मरणोपासनं चैव ध्यानात्मकमिति द्विधा । स्मरणं सर्वदा योग्यं ध्यानोपासनमासने ॥ नैरन्तर्य

---

[1] १०-९०-१३. ऋ.सं.

SGDF
Sri Gargeshwari Digital Foundation

मनोवृत्तेर्ध्यानमित्युच्यते बुधैः। आसीनस्य भवेत्तत्तु न शयानस्य निद्रया॥ स्थितस्य गच्छतो वाऽपि विक्षेपस्यैव सम्भवात्। स्मरणात्परमं ज्ञेयं ध्यानं नास्त्यत्र संशय' इति नारायणतन्त्रे॥ अतो ध्यानत्वाच्च॥८॥ **ॐ अचलत्वं चापेक्ष्य ॐ ॥९॥** 'अचलं चेच्छरीरं स्यान्मनसश्चाप्यचालनम्। चलने तु शरीरस्य चञ्चलं तु मनो भवेदि'ति ब्रह्माण्डे॥ ९॥ **ॐ स्मरन्ति च ॐ ॥१०॥** 'समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्नि'त्यादि॥ १०॥ **ॐ यत्रैकाग्रता तत्राविशेषात् ॐ ॥ ११ ॥** देशकालावस्थादिषु यत्रैकाग्रता भवति तत्रैव स्थातव्यम्॥ 'तमेव देशं सेवेत तं कालं तामवस्थितिम्। तानेव भोगान्भुञ्जीत मनो यत्र प्रसीदति॥ न हि देशादिभिः कश्चिद्विशेषः समुदीरितः। मनः प्रसादनार्थं हि देशकालादिचिन्तने'ति वाराहे॥ ११॥ आसनाधिकरणम्॥ ६॥

॥ ॐ आ प्रायणात्तत्रापि हि दृष्टम् ॐ ॥१२॥

यावन्मोक्षस्तावदुपासनादि कार्यम्। 'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीते'[1]ति हि श्रुतिः॥ 'सर्वदैनमुपासीत यावद्विमुक्तिर्मुक्ता अपि ह्येनमुपासत' इति सौपर्णश्रुतिः॥ 'शृणुयाद्यावदज्ञानं मतिर्यावदयुक्तता। ध्यानं च यावदीक्षा स्यान्नेक्षा क्वचन बाध्यते॥ दृष्टतत्वस्य च ध्यानं यदा दृष्टिर्न विद्यते। भक्तिश्चानन्तकालीना परमे ब्रह्मणि स्फुटा। आ विमुक्तेर्विधिर्नित्यं स्वत एव ततः परमि'ति ब्रह्माण्डे॥ १२॥ प्रायणाधिकरणम्॥ ७॥

॥ ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ ॥ १३ ॥ ब्रह्मदर्शन उत्तराघस्याश्लेषः पूर्वस्य

---

[1] ५-१. प्र.उ.

SGDF
Sri Gangeshwari Digital Foundation

विनाशश्च । 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते'[1] । 'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हैवास्य सर्वे पाप्मानः प्रदूयन्त'[2] इति तद्व्यपदेशात् ॥ १३ ॥ **ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ ॥ १४ ॥** पुण्यस्याप्येवमसंश्लेषः पाते । तु शब्दोऽनुत्थानवाची ॥ 'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः । एवं सुकर्मणश्चापि पततस्तमसि ध्रुवमि'ति चाऽग्नेये ॥१४॥ **ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ ॥ १५ ॥** अनारब्धकार्ये एव पूर्वे पुण्यपापे विनश्यतः । 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यत'[3] इति तदवधेः ॥ तु शब्दः स्मृतिद्योतकः ॥ 'यदनारब्धपापं स्यात्तद्विनश्यति निश्चयात् । पश्यतो ब्रह्म निर्द्वन्द्वं हीनं च ब्रह्म पश्यतः । द्विषतो वा भवेत्पुण्यनाशो नास्त्यत्र संशयः ॥ तस्याप्यारब्धकार्यस्य न विनाशोऽस्ति कुत्रचित् । आरब्धयोश्च नाशः स्यादल्पयोः पुण्यपापयोरि'ति नारायणतन्त्रे ॥ १५ ॥ **ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ ॥ १६ ॥** अग्निहोत्राद्यपि मोक्षेऽनुभावायैव । तुशब्दाद्ब्रह्मदर्शनवतः । 'स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतम् । यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवाऽत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवाऽत्मनो यद्यत्कामयते तत्तत्सृजत'[4] इति तद्दर्शनात् ॥१६॥ **ॐ अतोऽन्यदपीत्येकेषामुभयोः ॐ ॥ १७ ॥** मुक्तावनुभवकारणाद्यदन्यत् तत्पुण्यमपि विनश्यति, अप्रारब्धमनभीष्टं च । तथा ह्येकेषां

---

[1] ४-१४-३. छां.उ.　[2] ५-२४-३. छां.उ.　[3] ६-१४-२. छां.उ.
[4] ३-४-१५. बृ.उ.

SGDF
Sri Gurgeshwari Digital Foundation

पाठ उभयोस्त्यागेन—'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामि'[1]ति ॥ 'अनभीष्टमनारब्धं पुण्यमप्यस्य नश्यति । किमु पापं परब्रह्मज्ञानिनो नात्र संशय' इति पाद्मे ॥ १७ ॥

॥ ॐ यदेव विद्ययेति हि ॐ ॥ १८ ॥ ब्रह्मदर्शिकृतमल्पमपि पुण्यं महत्तममनन्तं च भवति । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती'[2]ति श्रुतेः ॥ 'न हास्य कर्म क्षीयत'[3] इति च ॥ 'अल्पमात्रः कृतो धर्मो भवेज्ज्ञानवतो महान् । महानपि कृतो धर्मो ह्यज्ञानां निष्फलो भवेदि'ति च भारते ॥ १८ ॥

॥ ॐ भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते ॐ ॥ ॥१९॥ आरब्धपुण्यपापे भोगेन क्षपयित्वा ब्रह्म सम्पत्स्यते । अथेति नियमसूचकः ॥ 'आरब्धपुण्यपापस्य भोगेन क्षपणादनु । प्राप्नोत्येव तमो घोरं ब्रह्म वा नात्र संशयः ॥ ब्रह्मणां शतकालात्तु पूर्वमारब्धसंक्षयः । नियमेन भवेन्नात्र कार्या काचिद्विचारणे'ति च नारायणतन्त्रे ॥१९॥ तदधिगमाधिकरणम् ॥८॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

देवानां मोक्ष उत्क्रान्तिश्चास्मिन्पाद उच्यते ॥ ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ ॥१॥ वागभिमानिन्युमा मनोऽभिमानिनि रुद्रे विलीयते । वाचो मनोवशत्वदर्शनात् ॥ 'तस्य यावन्न वाङ्मनसि सम्पद्यत'[4] इति शब्दाच्च ॥ 'उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः । तदेतन्मिथुनं ज्ञात्वा न दाम्पत्याद्विहीयत' इति स्कान्दे ॥१॥

॥ ॐ अत एव च सर्वाण्यनु ॐ ॥ २ ॥ अत एव च

---

[1] शाट्यायनशाखा. [2] १-१-१०. छां.उ. [3] ३-४-१५. बृ.उ.
[4] ६-१५-१. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

शब्दात्सर्वाणि दैवतानि यथानुकूलं विलीयन्ते । 'अग्नौ सर्वे देवा विलीयन्तेऽग्निरिन्द्रे इन्द्र उमायामुमा रुद्रे विलीयते एवमन्यानि दैवतानि यथाऽनुकूलमि'ति हि गौपवनश्रुतिः ॥ २ ॥ वाङ्मनसाधिकरणम् ॥ १ ॥

॥ ॐ तन्मनः प्राण उत्तरात् ॐ ॥ ३ ॥ 'मनः प्राण'[1] इत्युत्तराद्वचनान्मनोऽभिमानी रुद्रः प्राणे वायौ विलीयते । 'वायोर्वाव रुद्र उदेति वायौ विलीयते तस्मादाहुर्वायुर्देवानां श्रेष्ठ' इति च कौण्डिन्यश्रुतिः ॥ ३ ॥ मनोऽधिकरणम् ॥ २ ॥

॥ ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ ॥ ४ ॥ स प्राणः परमात्मनि विलीयते । 'सर्वे प्राणमुपगच्छन्ति प्राणः परमुपगच्छति प्राणं देवा अनुप्राणन्ति प्राणः परमनुप्राणिति तस्मादाहुः प्राणस्य प्राण इति' 'प्राणः परस्यां देवतायाम्' । 'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते । अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु । आविश्य परमात्मानं भुङ्क्ते भोगांस्तु बाह्यकान् ॥ नह्यानन्दो निजस्तेषां परैर्लभ्यः कथञ्चन । किमु विष्णोः परानन्दो न ते विष्णविति श्रुतेः ॥ प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतम् । सर्वेशितुश्च सर्वादेस्तस्यान्यत्र लयः कथमि'त्यादि श्रुतिस्मृतिभ्यः ॥४॥ ॥ अध्यक्षाधिकरणम् ॥ ३ ॥

॥ ॐ भूतेषु तच्छ्रुतेः ॐ ॥ ५ ॥ भूतेष्वन्येषां देवानां लयः । 'भूतेषु देवा विलीयन्ते भूतानि परे न पर उदेति नास्तमेत्येकल एव मध्ये स्थाते'ति बृहच्छ्रुतेः ॥५॥ भूताधिकरणम् ॥४॥

॥ ॐ नैकस्मिन्दर्शयतो हि ॐ ॥६॥ नैकस्मिन्भूते सर्वेषां देवानां लयः । 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्ना-

---

[1] ६-१५-१. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

वग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते । मृत्यवः पृथिव्यां वरुण आपोऽग्नयस्तेजसि मरुतो मारुत आकाशे विनायका विलीयन्त' इति महोपनिषच्चतुर्वेदशिखा च दर्शयतः । अतोऽग्नौ देवा विलीयन्त इति तत्र निर्दिष्टानामेव ॥ ६ ॥
॥ अनेकलयाधिकरणम्[1] ॥ ५ ॥

॥ ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ ॥ ७ ॥ देशतः कालतश्च व्याप्त्या समो ना परमपुरुषो यस्याः सा समना । संसारानुपक्रमात्स्वत एवामृतत्वं तस्याः ॥ बृहच्छ्रुतिश्च — 'द्वौ वाव सृत्यनुपक्रमौ प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ चेतौ ज्ञात्वा विमुच्यत' इति ॥ नैतावता साम्यम् ॥ ७ ॥ ॐ तदपीतेः संसारव्यपदेशात् ॐ ॥ ८ ॥ 'समावेतौ प्रकृतिश्च परमश्च नित्यौ सर्वगतौ नित्यमुक्तावसमावेतौ प्रकृतिश्च परमश्च विलीनो हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेती'ति सौपर्णश्रुतेः ॥ ८ ॥ ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ ॥ ९ ॥ सूक्ष्मत्वं चाधिकं ब्रह्मणः प्रकृतेः । ज्ञानानन्दैश्वर्यादिप्रमाणाधिक्यं च ॥ 'सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः । ज्ञानानन्दौ तथैश्वर्यं गुणाश्चान्येऽधिकाः प्रभोरि'ति च तुरश्रुतिः ॥९॥ ॐ नोपमर्देनातः ॐ ॥१०॥ अतस्तस्य ये विशेषगुणास्तेषामनुपमर्देनैव साम्यम् ॥ 'देशतः कालतश्चैव समा प्रकृतिरीश्वरे । उभयोरप्यबद्धत्वं तद्बन्धः परात्मनः । स्वत एव परेशस्य सा चोपास्ते सदा हरिम् ॥ प्रकृतेः प्राकृतस्यापि ये गुणास्ते तु विष्णुना । नियता नैव केनापि नियता हि हरेर्गुणा'

[1] नैकस्मिन्नधिकरणम्. पा.

SGDF
Sri Gangeshwari Digital Foundation

इति भविष्यत्पर्व्रणि ॥ १० ॥ **ॐ अस्यैव चोपपत्तेरूष्मा ॐ ॥ ११ ॥** 'द्विधा हीदमवद्दश्यते ऊष्मावदनूष्मावच्च । तत्रोष्मावत्परं ब्रह्म यन्न जिघ्रन्ति न पश्यन्ति न शृण्वन्ति न विजानन्ति। अथानूष्मावत्प्रकृतिश्च प्राकृतं च यन्न जिघ्रन्ति जिघ्रन्ति च यन्न पश्यन्ति पश्यन्ति च यन्न शृण्वन्ति शृण्वन्ति च यन्न जानन्ति जानन्ति चे'ति सौपर्णश्रुतेः किञ्चित्साम्योपपत्तेः ॥ ११ ॥ **ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ ॥ १२ ॥** 'असमो वा एष परो न हि कश्चिदेवं दृश्यते सर्वे ह्येतेऽणवो जायन्ते च म्रियन्ते च छिद्रा ह्येते भवन्ति । अथ परो न जायते न म्रियते पूर्णश्चैव भवती'ति चतुर्वेदशिखायां साम्यप्रतिषेधान्नेति चेन्न । शारीराद्धि साम्यं प्रतिषिध्यते ॥१२॥ कुतः ?— **॥ ॐ स्पष्टो ह्येकेषाम् ॐ ॥ १३ ॥** 'अथातः समाश्चासमाश्चाभिधीयन्ते समासमाश्चाथ समानि ब्रह्मणो रूपाणि यैरुत्पत्तिः स्थितिर्लयो नियतिरायतिश्चैकं ह्येवैतद्भवत्यथासमा ब्रह्मेन्द्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये के च देवा गन्धर्वा मनुष्याः पितरोऽसुरा यत्किञ्चेदं चरमचरं चाथ समाऽसमा प्रकृतिर्वाव समाऽसमा सैषा हि नित्याऽजरा तद्वशा चे'ति स्पष्टो हि माध्यन्दिनायनानां समादिवादः ॥१३॥ **ॐ स्मर्यते च ॐ ॥ ॥ १४ ॥** 'मत्स्यकूर्मवराहाद्याः समा विष्णोरभेदतः । ब्रह्माद्यास्त्वसमाः प्रोक्ताः प्रकृतिश्च समासमे'ति वाराहे ॥ १४ ॥ समनाधिकरणम् ॥ ६ ॥

॥ ॐ तानि परे तथा ह्याह ॐ ॥ १५ ॥

प्राणद्वारेण सर्वाणि दैवतानि परमात्मनि विलीयन्ते । 'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्त्यचिन्त्य' इति कौषारवश्रुतिः ॥ १५ ॥ पर(लय)ाधिकरणम् ॥ ७ ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ ॐ अविभागो वचनात् ॐ ॥ १६ ॥ 'एते देवा एतमात्मानमनुविश्य सत्याः सत्यकामाः सत्यसङ्कल्पा यथानिकाममन्तर्बहिः परिचरन्ती'ति गौपवनश्रुतिः । तत्परमेश्वरकामाद्यविभागेनैव तेषां सत्यकामत्वम् । 'कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योरि'[1]ति वचनात् । 'मुक्तानां सत्यकामत्वं सामर्थ्यं च परस्य तु । कामानुकूलकामत्वं नान्यत्तेषां विधीयत' इति ब्राह्मे ॥ १६ ॥
॥ अविभागाधिकरणम् ॥ ८ ॥

॥ ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ ॥ १७ ॥ उत्क्रान्तिकाले हृदयस्याग्रे ज्वलनं भवति । 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतत'[2] इति श्रुतेः ॥ तत्प्रकाशितद्वारो निष्क्रामति । विद्यासामर्थ्यात् । 'यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावित'[3] इति स्मृतेर्विद्याशेषगत्यनुस्मरणयोगाच्च ॥ 'आचार्यस्तु ते गतिं वक्ते'[4]ति हि लिङ्गम् । 'हृदिस्थेनैव हरिणा तस्यैवानुग्रहेण तु । उत्क्रान्तिर्ब्रह्मरन्ध्रेण तमेवोपासतो भवेदि'ति चाध्यात्मे ॥ 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती'[5]ति च ॥ १७ ॥ ॐ रश्म्यनुसारी ॐ ॥१८॥ निष्क्रामति । 'सहस्रं वा आदित्यस्य रश्मय आसु नाडीष्वाततास्तत्र श्वेतः सुषुम्नो ब्रह्मयानः सुषुम्नायामाततस्तत्प्रकाशेनैष निर्गच्छती'ति पौत्रायणश्रुतिः ॥१८॥ ॐ निशि नेति चेन्न सम्बन्धात् ॐ ॥ १९ ॥ रश्म्यभावान्निशि

---

[1] ३-१५-४. तै.आ. [2] ६-४-२. बृ.उ. [3] ८-६. भ.गी. [4] ४-१४-१. छां.उ. [5] २-६-१६. कठ.उ.

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानिन उत्क्रमणं न युक्तमिति चेन्न । सर्वदा सम्बन्धाद्रश्मीनाम् ॥ ॥१९॥ कियत्कालम्?—॥ ॐ यावद्देहभावित्वाद्दर्शयति च ॐ ॥ २० ॥ यावद्देहो विद्यते तावद्रश्मिसम्बन्धोऽस्त्येव । 'संसृष्टा वा एते रश्मयश्च नाड्यश्च नैषां वियोगो यावदिदंशरीरमत एतैः पश्यत्येतैरुत्क्रामत्येतैः प्रवर्तत' इति माध्यन्दिनायनश्रुतिः ॥२०॥ ॥ ॐ अतश्चायनेऽपि हि दक्षिणे ॐ ॥ २१ ॥ 'दक्षिणे मरणाद्याति स्वर्गं ब्रह्मोत्तरायण' इत्युक्तेऽपि ज्ञानिनो दक्षिणायनोत्क्रान्तिर्युज्यते । 'शतं पञ्चैव सूर्यस्य दक्षिणायनरश्मयः । तावन्त एव निर्दिष्टा उत्तरायणरश्मयः ॥ ते सर्वे देहसम्बद्धा सर्वदा सर्वदेहिनाम् । महर्लोकादिगन्तार उत्तरायणरश्मिभिः । निर्गच्छन्तीतरैश्चापि यैरेष्टव्येतरा गतिः ॥ उत्तरं दक्षिणमिति त एव तु निगद्यते । न तु कालविशेषोऽस्ति ज्ञानिनां नियमात्फलम् ॥ ददाति कालेऽनुगुणे फलं किञ्चिद्विशिष्यते । अत्युत्तमानां केषाञ्चिन्नविशेषोऽस्ति कालत' इति (हि) नारायणाध्यात्मे ॥ २१ ॥ हृदयाग्रज्वलनाधिकरणम्[1] ॥ ९ ॥

॥ ॐ योगिनः प्रति स्मर्येते स्मार्ते चैते ॐ ॥

॥ २२ ॥ न केवलं कालादिकृते ब्रह्मचन्द्रगती स्मर्येते । किन्तु ज्ञानयोगिनः कर्मयोगिनश्च । 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तत'[2] इत्यत्र योगीति विशेषणात्स्मरणनिमित्ते चैते गती ॥ गत्यनुस्मरणाद्ब्रह्मचन्द्रं वा गच्छति ध्रुवम् । अननुस्मरतः

---

[1] तदोकोधिकरणम्. पा. [2] ८-२४, २५. भ.गी.

SGDF
Sri Gargeshwari Digital Foundation

काले स्मरणं प्राप्य वै गतिरि'त्यध्यात्मे ॥ २२ ॥ प्रतिस्मरणाधिकरणम्[1] ॥१०॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थाध्यायस्य द्वितीयः पादः ॥४॥२॥

मार्गो गम्यं चास्मिन्पाद उच्यते—॥ **ॐ अर्चिरादिना तत्प्रथितेः ॐ ॥ १ ॥** 'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरन्ह आपूर्यमाणपक्षम्'[2] इत्यर्चिषः प्राथम्यं श्रूयते । 'यदा ह वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छती'[3]ति वायोः । तत्रार्चिषः प्राप्तिरेव प्रथमा । 'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम् । धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात् ॥ अग्निर्ज्योतिरिति द्वेधैवार्चिषः सम्प्रतिष्ठितिः । अग्निं गत्वा ज्योतिरेति प्रथमं ब्रह्म संव्रजन् । एकस्मिंस्तु पुरे संस्थो द्विरूपोऽग्नेः सुतो महानि'ति ब्रह्मतर्के ॥१॥ ॥ अर्चिराद्यधिकरणम् ॥ १ ॥

॥ ॐ वायुशब्दादविशेषविशेषाभ्याम् ॐ ॥ ॥ २ ॥ अर्चिषो वायुं गच्छति । 'स वायुमागच्छती'[4]ति सामान्यवचनात् । 'स इतो गतो द्वितीयां गतिं वायुमागच्छति वायोरहरह आपूर्यमाणपक्षमि'ति विशेषवचनाच्च ॥२॥ वायुगत्यधिकरणम् ॥२॥

॥ ॐ तटितोऽधि वरुणस्सम्बन्धात् ॐ ॥ ३ ॥ 'मासेभ्यस्संवत्सरं संवत्सराद्वरुणलोकं वरुणलोकात्प्रजापतिलोकमि'ति कौण्डिन्यश्रुतिः । 'संवत्सरात्तटितमागच्छति तटितः प्रजापतिलोकमि'ति च गौपवनश्रुतिः । 'तत्र तटितो वरुणं गच्छति । तटिता ह्यूयते वरुणलोकस्तटिदुपरि मुक्तामयो राजते तत्रासौ वरुणो राजा

---

[1] योग्यधिकरणम्. पा. [2] ५-१०-१. छां.उ. [3] ७-१०-१. बृ.उ.
[4] ७-१०-१. बृ.उ.

SGDF
Sri Gangeshwari Digital Foundation

सत्यानृते विविश्वती'त्युपरिसम्ब(न्ध)द्धत्वश्रुतेः ॥ ३ ॥ तटिदधिकरणम् ॥ ३ ॥

॥ ॐ आतिवाहिकस्तल्लिङ्गात् ॐ ॥४॥ पूर्वोक्तस्त्वातिवाहिको वायुः । पूर्वगमनलिङ्गात् ॥ ४ ॥ कुतः ?—

॥ ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥ ५ ॥ 'स वायुमागच्छती'[1]ति प्रथममुच्यते । 'उत्क्रान्तो विद्वान्परमभिगच्छन्विद्युतमेवान्तत उपगच्छति द्यौर्वाव विद्युत्तत्पतिं वायुमुपगम्य तेनैव ब्रह्म गच्छती'त्यन्तेऽपि वायुगमनश्रुतेः पूर्वोक्त आतिवाहिकः परो वेति व्यामोहे उत्तरे दिवस्पतिरिति विशेषणात्पूर्वत्राऽऽतिवाहिकस्यैव सिद्धेः ॥ ब्रह्मतर्के च—'उत्क्रान्तस्तु शरीरात्स्वाद्गच्छत्यर्चिषमेव तु । ततो हि वायोः पुत्रं च योऽसौ नाम्नाऽऽतिवाहिकः ॥ ततोऽहः पूर्वपक्षं चाप्युदक्संवत्सरं तथा । तटितं वरुणं चैव प्रजापं सूर्यमेव च ॥ सौमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा । ततो वायुं परं प्राप्य तेनैति पुरुषोत्तममि'ति ॥ ५ ॥ आतिवाहिकाधिकरणम् ॥ ४ ॥

॥ ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥६॥ प्रकारान्तरेण तत्र तत्रोच्यमानत्वाद्वायोरपि परतो ब्रह्मणोऽर्वाग्गन्तव्योऽस्तीति नाशङ्कनीयम् । विद्युत्पतिना वायुनैव 'स एनान्ब्रह्म गमयती'[2]ति ब्रह्मगमनश्रुतेः ॥ 'विद्युत्पतिर्वायुरेव नयेद्ब्रह्म न चापरः । कुतोऽन्यस्य भवेच्छक्तिस्तमृते प्राणनायकमि'ति बृहत्तन्त्रे ॥ ६ ॥ वैद्युताधिकरणम् ॥ ५ ॥

॥ ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ ॥ ७ ॥ 'स एनान्ब्रह्म गमयती'[3]ति कार्यं ब्रह्म गमयतीति बादरिर्मन्यते ॥ 'ऋते देवान्परं ब्रह्म कः पुमान्प्राप्नुयात्क्वचित् । यद्यपि ब्रह्मदृष्टिः

[1] ७-१०-१. बृ.उ. [2] ४-१५-६. छां.उ. [3] ५-१०-२. छां.उ.

SGDF
Sri Gargeshwari Digital Foundation

स्याद्ब्रह्मलोकमवाप्नुयादि'त्यध्यात्मवचनात्तस्यैव गत्युपपत्तेः ॥ ७ ॥ ॥ ॐ **विशेषितत्वाच्च** ॐ ॥ ८ ॥ 'यदि ह वाव परमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखं प्राप्नोति ब्रह्माणं चतुर्मुखमि'ति कौषारवश्रुतौ ॥ ८ ॥ ॐ **सामीप्यात्तु तद्व्यपदेशः** ॐ ॥ ॥ ९ ॥ 'ब्रह्मविदाप्नोति परमि'[1]ति तद्व्यपदेशस्तु समीपत एव परमपि प्राप्नोतीत्येतदर्थमेव ॥९॥ कदा ?— ॥ ॐ **कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्** ॐ ॥ १० ॥ 'ते ह ब्रह्माणमभिसम्पद्य यदैतद्विलीयतेऽथ सह ब्रह्मणा परमभिगच्छन्ती'ति सौपर्णश्रुतेर्महाप्रलये तदध्यक्षेण ब्रह्मणा सह गच्छन्ति ॥ १० ॥ ॥ ॐ **स्मृतेश्च** ॐ ॥ ११ ॥ 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते परात्मानः प्रविशन्ति परं पदमि'ति ॥११॥ ॥ ॐ **परं जैमिनिर्मुख्यत्वात्** ॐ ॥ १२ ॥ ब्रह्मशब्दस्य तत्रैव मुख्यत्वात्परमेव ब्रह्म गमयतीति जैमिनिर्मन्यते ॥ १२ ॥ ॥ ॐ **दर्शनाच्च** ॐ ॥ १३ ॥ दृष्टत्वाच्च परब्रह्मणः ॥ १३ ॥ ॥ ॐ **न च कार्ये प्रतिपत्त्याभिसन्धिः** ॐ ॥ १४ ॥ न हि कार्ये प्रतिपत्तिः प्राप्नवानीत्यभिसन्धिश्च । 'यदुपास्ते पुमाञ्जीवन्यत्प्राप्तुमभिवाञ्छति । यच्च पश्यति तृप्तः संस्तत्प्राप्नोति मृतेरन्वि'ति पाद्मे ॥१४॥ ॐ **अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च** ॐ ॥ १५ ॥ 'प्रतीकं देह उद्दिष्टो येषां तत्रैव दर्शनम् । न तु व्याप्ततया क्वापि प्रतीकालम्बनातु ते ॥ अप्रतीका देवतास्तु ऋषीणां शतमेव च । राज्ञां च शतमुद्दिष्टं गन्धर्वाणां शतं तथा ॥ एतेऽधिकारिणो व्याप्तदर्शिनोऽन्ये न तु

[1] २-१. तै.उ.

SGDF
Sri Gurgeshwari Digital Foundation

क्वचित् । अयोग्यदर्शने यत्वाङ्गंशः पूर्वस्य चापि तु ॥ अप्रतीकाश्रया ये हि ते यान्ति परमेव तु । स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद्ब्रह्मसलोकताम् । ब्रह्मणा सह सम्प्राप्ते संहारे परमं पदमिति गारुडवचनात् उभयत्रोक्तदोषाच्चाप्रतीकालम्बनान्परं नयति । 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यत'[1] इति श्रुतेश्च ॥ अत्र कर्मोपासनमेव । अन्यान्कार्यं नयतीति भगवन्मतम् ॥ ॥ १५ ॥ **ॐ विशेषं च दर्शयति ॐ** ॥ १६ ॥ 'अन्तःप्रकाशा बहिःप्रकाशा सर्वप्रकाशाः । देवा वाव सर्वप्रकाशाः ऋषयोऽन्तः प्रकाशा मानुषा एव बहिःप्रकाशा इति चतुर्वेदशिखायाम् ॥ १६ ॥ ॥ कार्याधिकरणम् ॥ ६ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थाध्यायस्य तृतीयः पादः ॥ ४ ॥ ३ ॥

भोगमाहास्मिन्पादे ॥ **ॐ सम्पद्याविर्भाय स्वेन शब्दात् ॐ** ॥ १ ॥ 'स य एवं विदेवं मन्वान एवं पश्यन्नात्मानमभिसम्पद्यैतेनात्मना यथा कामं सर्वान्कामाननुभवती'ति सौपर्णश्रुतेः । 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत'[2] इति च । 'एवं सेतुं तीर्त्वाऽन्धस्सन्ननन्धो भवती'[3]ति च । तत्र तरणं नाम तत्प्राप्तयेऽन्यतरणमेव । 'इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्यैतेनैव सेतुना मोदते प्रमोदत आनन्दी भवती'ति मौद्गल्यश्रुतेः ॥ १ ॥ सम्पद्याधिकरणम्[4] ॥ १ ॥

॥ **ॐ मुक्तः प्रतिज्ञानात् ॐ** ॥ २ ॥ मुक्त एव चात्रोच्यते । 'अहरहरेनमनुप्रविशत्युपसङ्क्रमे च न तत्र मोदते न

---

[1] ६-४-५. बृ.उ. [2] ८-३-४. छां.उ. [3] ८-४-२. छां.उ. [4] क्वचिदधिकरणमिति विभागो न कृतः ।

SGDF
Sri Gurgeshwari Digital Foundation

प्रमोदते न कामाननुभवति बद्धो ह्येष भवत्यथ यदैनं मुक्तोऽनुप्रविशति मोदते च प्रमोदते च कामांश्चैवानुभवती'ति बृहच्छ्रुतौ प्रतिज्ञानात् ॥२॥ ॥ मुक्ताधिकरणम् ॥ २ ॥

॥ ॐ आत्मा प्रकरणात् ॐ ॥ ३ ॥ परञ्ज्योतिः-शब्देन परमात्मैवोच्यते । तत्प्रकरणत्वात् । 'परञ्ज्योतिः परब्रह्म-परमात्मादिका गिरः । सर्वत्र हरिमेवैकं ब्रूयुर्नान्यं कथञ्चने'ति ब्रह्माण्डे ॥ ३ ॥ आत्माधिकरणम्[1] ॥ ३ ॥

॥ ॐ अविभागेन दृष्टत्वात् ॐ ॥ ४ ॥ भोगाः परमात्मना भुज्यन्ते त एव मुक्तैर्भुज्यन्ते । 'यानेवाहं शृणोमि यान् पश्यामि याञ्जिघ्रामि तानेवैत इदं शरीरं विमुच्यानुभवन्ती'ति दृष्टत्वा-च्चतुर्वेदशिखायाम् ॥ भविष्यत्पुराणे च—'मुक्ताः प्राप्य परं विष्णुं तद्भोगाँल्लेशतः क्वचित् । बहिष्ठान्भुञ्जते नित्यं नाऽनन्दादीन्कथञ्च-ने'ति ॥ ४ ॥ अविभागाधिकरणम् ॥ ४ ॥

॥ ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ ॥ ॥ ५ ॥ सर्वदेहपरित्यागेन मुक्ताः सन्तो ब्राह्मेणैव देहेन भोगान्भुञ्जत इति जैमिनिर्मन्यते । 'स वा एष ब्रह्मनिष्ठ इदं शरीरं मर्त्यमतिसृज्य ब्रह्माभिसम्पद्य ब्रह्मणा पश्यति ब्रह्मणा शृणोति ब्रह्मणैवेदं सर्वमनु-भवती'ति माध्यन्दिनायनश्रुतावुपन्यासात् ॥ 'आदत्ते हरिहस्तेन हरिदृष्टयैव पश्यति । गच्छेच्च हरिपादेन मुक्तस्यैषा स्थितिर्भवेदि'ति स्मृतेः ॥ 'गच्छामि विष्णुपादाभ्यां विष्णुदृष्टया च दर्शनम् । इत्यादि पूर्वस्मरणान्मुक्तस्यैतद्भविष्यती'ति बृहत्तन्त्रोक्तयुक्तेश्च ॥ ५ ॥

॥ ॐ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॐ ॥ ॥ ६ ॥ चितिमात्रो देहो मुक्तानां पृथग्विद्यते तेन भुञ्जते । सर्वं

[1] आत्मसम्पत्त्यधिकरणम्. पा.

SGDF
Sri Gargeshwari Digital Foundation

वा एतदचित्परित्यज्य चिन्मात्र एवैष भवति चिन्मात्र एवावतिष्ठते तामेतां मुक्तिरित्याचक्षत' इत्युद्दालकश्रुतेश्चिदात्मकत्वादित्यौडुलोमिर्मन्यते ॥ ६ ॥ **ॐ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॐ ॥ ७ ॥** 'स वा एष एतस्मान्मर्त्याद्विमुक्तश्चिन्मात्रीभवत्यथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुतेऽभिविजानाति तामाहुर्मुक्तिरि'ति सौपर्णश्रुतौ चिन्मात्रेणाप्युपन्यासाज्जैमिन्युक्तस्य भावादुभयत्राप्यविरोधं बादरायणो मन्यते ॥ नारायणाध्यात्मे च—'मर्त्यं देहं परित्यज्य चितिमात्रात्मदेहिनः । चितिमात्रेन्द्रियाश्चैव प्रविष्टा विष्णुमव्ययम् । तदङ्गानुगृहीतैश्च स्वाङ्गैरेव प्रवर्तनम् । कुर्वन्ति भुञ्जते भोगांस्तदन्तर्बहिरेव वा । यथेष्टं परिवर्तन्ते तस्यैवानुग्रहेरिता' इति ॥ ७ ॥ चितिमात्राधिकरणम्[1] ॥ ५ ॥

॥ ॐ सङ्कल्पादेव च तच्छ्रुतेः ॐ ॥ ८ ॥ न तेषां भोगादिषु प्रयत्नापेक्षा । 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती'[2]त्यादिश्रुतेः ॥ ८ ॥ सङ्कल्पाधिकरणम् ॥ ६ ॥

॥ ॐ अत एव चानन्याधिपतिः ॐ ॥ ९ ॥

सत्यसङ्कल्पत्वादेव । 'परमोऽधिपतिस्तेषां विष्णुरेव न संशयः । ब्रह्मादिमानुषान्तानां सर्वेषामविशेषतः ॥ ततः प्राणादिनामान्ताः सर्वेऽपि पतयः क्रमात् । आचार्याश्चैव सर्वेऽपि यैर्ज्ञानं सुप्रतिष्ठितम् । एतेभ्योऽन्यः पतिर्नैव मुक्तानां नात्र संशय' इति वाराहे ॥ ९ ॥ ॥ अनन्याधिपतित्वाधिकरणम् ॥ ७ ॥

॥ ॐ अभावं बादरिराह ह्येवम् ॐ ॥ १० ॥

चिन्मात्रं विनाऽन्यो देहस्तेषां न विद्यत इति बादरिः । 'अशरीरो

---

[1] ब्राह्माधिकरणम्. पा. [2] ८-२-१. छां.उ.

SGDF
Sri Gangeshwari Digital Foundation

वाव तदा भवत्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतो याभ्यां ह्येष उन्मथ्यत' इत्येवं कौण्ठरव्यश्रुतावाह हि ॥ १० ॥ **ॐ भावं जैमिनिर्विकल्पाम्नानात् ॐ ॥ ११ ॥** 'स वा एष एवंवित्परमभिपश्यत्यभिशृणोति ज्योतिषैव रूपेण चिता वाऽचिता वा नित्येन वाऽनित्येन वाऽथाऽनन्दी ह्येवैष भवति नानानन्दं कश्चिदुपस्पृशती'त्यौद्दालकश्रुतौ विकल्पाम्नानादन्यदेहस्यापि भावं जैमिनिर्मन्यते ॥११॥ **ॐ द्वादशाहवदुभयविधं बादरायणोऽतः ॐ ॥ १२ ॥** यथा द्वादशाहः क्रत्वात्मकः सत्रात्मकश्च भवति । एवं मुक्तभोगो बाह्यशरीरकृतश्चिन्मात्रकृतश्च भवती'ति बादरायणो मन्यते ॥ १२ ॥ उपपत्तिश्च—॥ **ॐ तन्वभावे सन्ध्यवदुपपत्तेः ॐ ॥ १३ ॥** सन्ध्यं स्वप्नः । 'सन्ध्यं तृतीयं स्वप्नस्थानमि'[1]ति श्रुतेः ॥ १३ ॥ **ॐ भावे जाग्रद्वत् ॐ ॥१४॥** ब्रह्मवैवर्ते च—'स्वप्नस्थानां यथा भोगो विना देहेन युज्यते । एवं मुक्तावपि भवेद्विना देहेन भोजनम् ॥ स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचित् । स्वीकृत्य जागरितवद्भुक्त्वा त्यागः कदाचने'ति ॥ १४ ॥ **ॐ प्रदीपवदावेशस्तथा हि दर्शयति ॐ ॥ १५ ॥** शरीरमनुविश्यापि तत्प्रकाशयन्तः पुण्यानेव भोगाननुभवति न तु दुःखादीन् । यथा प्रदीपो दीपिकादिषु प्रविष्टस्तस्थं तैलाद्येव भुङ्क्ते न तु कार्ष्ण्यादि । 'तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवती'[2]ति हि दर्शयति ॥ १५ ॥ न च स्वर्गे लोके न भयं किञ्चनास्ती'[3]त्यादिना स्वर्गादिस्थस्यैतदिति वाच्यम् । यतः—॥ **ॐ स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि**

---

[1] ६-३-९. बृ.उ. [2] ६-३-२२. बृ.उ. [3] १-१२. कठ.उ.

SGDF
Sri Gargeshwari Digital Foundation

ॐ ॥ १६ ॥ सुप्तौ मोक्षे वा तदुच्यते । 'अत्र पिताऽपिता भवत्यनन्वागतं पुण्येनानन्वागतं पापेने'[1]त्याद्याविष्कृतत्वात् ॥ ब्रह्मवैवर्ते च—'ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः । भुञ्जते सुसुखान्येव न दुःखादीन्कदाचन ॥ तीर्णा हि सर्वशोकांस्ते पुण्यपापादिवर्जिताः । सर्वदोषनिवृत्तास्ते गुणमात्रस्वरूपिण' इति ॥१६॥

॥ उभयविधभोगाधिकरणम्[2] ॥ ८ ॥

॥ ॐ **जगद्व्यापारवर्जम्** ॐ ॥ १७ ॥ 'सर्वान्कामानाप्त्वाऽमृतः समभवदि'[3]त्युच्यते । तत्र सृष्ट्यादिभ्योऽन्यान्व्यापारानाप्नोति ॥ १७ ॥ कुतः ?— ॥ ॐ **प्रकरणादसन्निहितत्वाच्च** ॐ ॥१८॥ जीवप्रकरणत्वाज्जीवानां तादृक्सामर्थ्यविदूरत्वाच्च । वाराहे च—'स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्याप्तिष्वपि । मुक्तानां नैव कामः स्यादन्यान्कामांस्तु भुञ्जते । तद्योग्यता नैव तेषां कदाचित्क्वापि विद्यते । नचायोग्यं विमुक्तोऽपि प्राप्नुयान्न च कामयेदि'ति ॥ १८ ॥ ॐ **प्रत्यक्षोपदेशादिति चेन्नाऽधिकारिकमण्डलस्थोक्तेः** ॐ ॥ १९ ॥ 'ता यो वेद, स वेद ब्रह्म, सर्वेऽस्मै देवा बलिमावहन्ती'[4]ति प्रत्यक्षोपदेशाज्जगदैश्वर्यमप्यस्तीति चेन्न । आधिकारिकमण्डलाधिपतिर्ब्रह्मा हि तत्रोच्यते ॥ गारुडे च—'आत्मेत्येव परं देवमुपास्य हरिमव्ययम् । केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन ॥ अत्रैव च स्थितिस्तेषामन्तरिक्षे तु केचन । केचित्स्वर्गे महर्लोके जने तपसि चापरे ॥ केचित्सत्ये महाज्ञाना गच्छन्ति क्षीरसागरम् । तत्रापि क्रमयोगेन ज्ञानाधिक्यात्समीपगाः ॥ सालोक्यं च सरूपत्वं सामीप्यं योगमेव च ।

---

[1] ६-३-२२. बृ.उ. [2] अभावाधिकरणम्. पा. [3] २-५-४. ऐ.आ.
[4] १ ५. तै.उ.

SGDF
Sri Gangeshwari Digital Foundation

इमामारभ्य सर्वत्र यावत्सु क्षीरसागरे ॥ पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधः। मानुषा वर्णभेदेन तथैवाऽश्रमभेदतः॥ क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चिराः। आजानजाः कर्मजाश्च तात्त्विकाश्च शचीपतिः॥ रुद्रो ब्रह्मेति क्रमशस्तेषु चैवोत्तमोत्तमाः। नित्यानन्दे च भोगे च ज्ञानैश्वर्यगुणेषु च। सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम्॥ पूज्यन्ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः। स्वजगद्व्यापृतिस्तेषां पूर्ववत्समुदीरिता॥ सयुजः परमात्मानं प्रविश्य च बहिर्गताः। चिद्रूपान्प्राकृतांश्चापि विना भोगांस्तु कांश्चन। भुञ्जते मुक्तिरेवं ते विस्पष्टं समुदाहृते'ति॥ १९॥ **ॐ विकारावर्ति च तथाहि दर्शयति ॐ ॥ २०॥** विकारावर्ति व्यापारो मुक्तानां न विद्यते। 'इमं मानवमावर्तं नाऽवर्तन्त'[1] इति श्रुतिः॥ वाराहे च—स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम्। बलिं हरन्ति मुक्ताय विरिञ्चाय तु पूर्ववत्॥ सब्रह्मकास्तु ते देवा विष्णवे च विशेषतः। न विकाराधिकारस्तु मुक्तानामन्य एव तु। विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुने'ति॥ २०॥ सर्वकामाधिकरणम्[2]॥ ९॥

॥ ॐ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥ २१॥ 'एतत्साम गायन्नास्त'[3] इत्युच्यते। तत्राऽनन्दादीनां वृद्धिह्रासश्च न विद्यते। किन्त्वेकप्रकारेणैव सर्वदा स्थितिः। 'स एष एतस्मिन्ब्रह्मणि सम्पन्नो न जायते न म्रियते न हीयते न वर्धते स्थित एव सर्वदा भवति दर्शन्नेव ब्रह्म दर्शन्नेवाऽत्मानं तस्यैवं दर्श(य)तो नापत्तिर्न विपत्ति'रित्याह जाबालश्रुतौ॥ 'यत्र गत्वा न म्रियते यत्र गत्वा न जायते। न हीयते यत्र गत्वा यत्र गत्वा न वर्धत' इति मोक्षधर्मे॥ विद्वत्प्रत्यक्षात्कारणाभावलिङ्गाच्च। ब्रह्मवैवर्ते च—

[1] ४-१५-६. छां.उ. [2] जगद्व्यापाराधिकरणम्. पा. [3] ३-१०. तै.उ.

SGDF
Sri Gangeshwari Digital Foundation

'न ह्रासो न च वृद्धिर्वा मुक्तानां विद्यते क्वचित् । विद्वत्प्रत्यक्षसिद्धत्वात्कारणाभावतोऽनुमा ॥ हरेरुपासना चात्र सदैव सुखरूपिणी । न तु साधनभूता सा सिद्धिरेवात्र सा यत' इति ॥ २१ ॥ **ॐ भोगमात्रसाम्यलिङ्गाच्च ॐ ॥ २२ ॥** न च भोगविशेषादिविरोधः । 'एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते यथाकाममुपरमत'[1] इति भोगमात्रसाम्यलिङ्गात् ॥ 'अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत् । कादाचित्कविशेषस्तु नैव तेषां निषिध्यत' इति कौर्मे ॥ 'प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित् । नाप्रियं किञ्चिदपि तु मुक्तानां विद्यते क्वचित् ॥ कुत एव तु दुःखं स्यात्सुखमेव सदोदितम् । भोगानां तु विशेषे(षु) तु वैचित्र्यं लभ्यते क्वचिदि'ति नारायणतन्त्रे ॥२२॥ (एकरूप)स्थित्यधिकरणम् ॥१०॥

॥ ॐ अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॐ ॥

॥ २३ ॥ 'न च पुनरावर्तते न च पुनरावर्तते',[2] 'सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवदि'[3]त्यादिश्रुतिभ्यः ॥२३॥ अनावृत्त्यधिकरणम् ॥ ११ ॥

ज्ञानानन्दादिभिः सर्वैर्गुणैः पूर्णाय विष्णवे ।
नमोऽस्तु गुरवे नित्यं सर्वथाऽतिप्रियाय मे ॥
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलम् ।
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ॥
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि[4] ॥

---

[1] २-८. तै.उ. [2] ८-१५-१. छां.उ. [3] २-५-१-१५. ऐ.आ. [4] तृतीयमेतदमुना भाष्यं कृतं केशवे ॥ पा. एतदनन्तरं ज्ञानेत्यादि श्लोकः पठितः ।

SGDF
Sri Gargeshwari Digital Foundation

नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे[1] ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ-
भगवत्पादाचार्यविरचिते चतुर्थाध्यायस्य
चतुर्थः पादः ॥ ४ ॥ ४ ॥

॥ चतुर्थः फलाध्यायस्समाप्तः ॥

॥ ग्रन्थश्चायं सम्पूर्णः ॥

॥ श्रीलक्ष्मीहयग्रीवार्पणमस्तु ॥

[1] श्लोकोऽयं क्वचिन्नास्ति.

SGDF
Sri Gangeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

अनुव्याख्यानम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ नारायणं निखिलपूर्णगुणैकदेहं निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः । अस्योद्भवादिदमशेषविशेष[1]तोऽपि वन्द्यं सदा प्रियतमं मम संनमामि ॥ तमेव शास्त्रप्रभवं प्रणम्य जगद्गुरूणां गुरुमञ्जसैव । विशेषतो मे[2] परमाख्यविद्याव्याख्यां करोम्यन्वपि चाहमेव ॥ प्रादुर्भूतो हरिर्व्यासो विरिञ्चिभवपूर्वकैः । अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम् ॥ गुरुर्गुरूणां प्रभवः शास्त्राणां बादरायणः । यतस्तदुदितं मानमजादिभ्यस्तद[3]र्थतः ॥ वक्तृश्रोतृप्रसक्तीनां [4]यदाप्तिरनुकूलता । आप्तवाक्यतया तेन श्रुतिमूलतया तथा ॥ युक्तिमूलतया चैव प्रामाण्यं त्रिविधं महत् । दृश्यते ब्रह्मसूत्राणामेकधाऽन्यत्र सर्वशः ॥ अतो नैतादृशं किञ्चित्प्रमाणतममिष्यते । स्वयंकृताऽपि तद्व्याख्या क्रियते स्पष्ट[5]तार्थतः ॥ तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते । सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः ॥ **ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥१॥** ओतत्ववाची ह्योङ्कारो वक्त्यसौ तद्गुणोतताम् । स एव ब्रह्मशब्दार्थो नारायणपदोदितः ॥ स एव भर्गशब्दार्थो व्याहृतीनां च भूमतः[6] । भावनाचैव[7] सुत्वाच्च[8] सोऽयं पुरुष इत्यपि[9] ॥ स एव सर्ववेदार्थो जिज्ञास्योऽयं विधीयते । "ज्ञानी प्रियतमोऽतो मे" "तं विद्वानेव चामृतः" ॥ "वृणुते यं तेन लभ्य" इत्याद्युक्तिबलेन हि । जिज्ञासोत्थज्ञानजात्तत्प्रसादादेव मुच्यते ॥ "द्रव्यं कर्म च कालश्च स्वभावो जीव

---

[1] वन्द्यत्वप्रयोजकीभूतधर्मेभ्यः [2] गुरुम्. [3] मोक्षार्थम्. [4] यदयत्रवाक्ये. [5] स्पष्टतारूपप्रयोजनाय. [6] पूर्णत्वात्. [7] उत्पादनात्. [8] सुखरूपत्वात्. [9] उक्तः ।

SGDF
Sri Gargeshwari Digital Foundation

एव च । यदनुग्रहतस्सन्ति न सन्ति यदुपेक्षया" ॥ "नर्ते त्वत्क्रियते किञ्चिदि"त्यादेर्न हरिं विना । ज्ञानस्वभावतोऽपि स्यान्मुक्तिः कस्यापि हि क्वचित् ॥ अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च सः । आनन्ददश्च मुक्तानां स एवैको जनार्दनः ॥ इत्युक्तेर्बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते । मिथ्यात्वमपि बन्धस्य न प्रत्यक्षविरोधतः ॥ मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याग्रतो भवेत् । मिथ्यायाः[1] साधकत्वं च न सिद्धं प्रतिवादिनः ॥ तच्च मिथ्याप्रमाणेन सता वा साध्यते त्वया । सता चेद्द्वैतसिद्धिःस्यान्न सिद्धं चान्यसाधनम् ॥ साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता । स्वीकृतं, ह्यविशेषस्य साध्या[2] साधकता पुनः ॥ तच्चाविशेषमानेन साध्यमित्यनवस्थितिः । अनङ्गीकुर्वतां विश्वसत्यतां तन्न वादिता ॥ तस्माद्व्यवहृतिः सर्वा सत्येत्येव व्यवस्थिता । व्यावहारिकमेतस्मात्सत्यमित्येव चागतम् ॥ व्यवहारसतश्चापि साधकत्वं तु पूर्ववत् । सत्त्रैविध्यं च मानेन सिद्ध्येत्केनेति पृच्छ्यते ॥ तस्याप्युक्तप्रकारेण नैव सिद्धिः कथञ्चन । वैलक्षण्यं सदसतोरप्येतेन निषिध्यते ॥ वैलक्षण्यं सतश्चापि स्वयं सद्भेदवादिनः । असतश्चापि विश्वस्य तेनानिष्टं कथं भवेत् ॥ यद्युच्यतेऽपि सर्वस्मादिति सद्भेदसंस्थितिः । सन्मात्रत्वं ब्रह्मणोऽपि तस्मात्तदपि नो भवेत् ॥ ज्ञानबाध्यत्वमपि तु न सिद्धं प्रतिवादिनः । विज्ञातस्यान्यथा सम्यग्विज्ञानं ह्येव तन्मतम् ॥ असद्विलक्षणज्ञप्त्यै ज्ञातव्यमसदेव हि । तस्मादसत्प्रतीतिश्च कथं तेन निवार्यते ॥ अन्यथात्वमसत्तस्माद्भ्रांतावेव प्रतीयते । सत्त्वस्यासत एवं हि स्वीकार्यैव प्रतीतता ॥ तस्यानिर्वचनीयत्वे स्यादेव ह्यनवस्थितिः । निर्विशेषे

---

[1] 'नहि...गोत्वादिप्रत्ययेनापि मिथ्यया भवितव्यम्' 'इति श्लोकवार्तिकटीका शर्करिकायां आकृतिवादे श्लोकः २०'. तथा 'इति मिथ्या चतुर्विधा' इति कात्यायनस्मृतौ (स्मृतिचन्द्रिकाव्यवहारकाण्डे ९८ पत्रे ; १८-१९ पङ्क्तौ) प्रयोगदर्शनात्. [2] साध्यैव न तु सिद्धा.

SGDF
Sri Gargeshwari Digital Foundation

स्वयंभाते किमज्ञानावृतं भवेत् ॥ मिथ्याविशेषोऽप्यज्ञानसिद्धिमेव ह्यपेक्षते । न चावरणमज्ञानमसत्ये तेन चेष्यते ॥ अप्रकाशस्वरूपत्वाज्जडे ज्ञानं न मन्यते ॥ अज्ञानाभावतश्शास्त्रं सर्वं व्यर्थीभविष्यति । अज्ञानस्य च मिथ्यात्वमज्ञानादिति कल्पने ॥ अनवस्थितिस्तथा च स्यादन्योऽन्याश्रयताऽथवा । स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेत् ॥ अविद्यादुर्घटत्वं चेत्स्यादात्माऽपि हि तादृशः[1] । अतोऽधिकारिविषयफलयोगादिवर्जितम् ॥ अनन्तदोषदुष्टं च हेयं मायामतं शुभैः ।

सत्यत्वात्तेन दुःखादेः प्रत्यक्षेण विरोधतः ॥ न ब्रह्मतां वदेद्भेदो जीवस्य हि कथञ्चन । यजमानप्रस्तरत्वं यथा नार्थः श्रुतेर्भवेत् ॥ ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः । सार्वज्ञादिगुणं जीवाद्भिन्नं ज्ञापयति श्रुतिः ॥ ईशं तामुपजीव्यैव वर्तते ह्यैक्यवादिनी । उपजीव्यविरोधेन नास्यास्तन्मानता भवेत् ॥ स्वातन्त्र्ये च विशिष्टत्वे स्थानमत्यैक्ययोरपि । सादृश्ये चैक्यवाक्सम्यक्सावकाशा यथेष्टतः[2] ॥ अवकाशोज्झिता भेदश्रुतिर्नातिबला कथम् । अज्ञानासम्भवादेव मिथ्याभेदो निराकृतः ॥ अतो यथार्थबन्धस्य विना विष्णुप्रसादतः । अनिवृत्तेस्तदर्थं हि जिज्ञासाऽत्र विधीयते ॥ यथा दृष्टया प्रसन्नस्सन्राजा बन्धापनोदकृत् । एवं दृष्टः स भगवान्कुर्याद्बन्धविभेदनम् ॥

कार्यता च न काचित्स्यादिष्टसाधनतां विना ॥ कार्यं न हि क्रियाऽव्याप्यं निषिद्धस्य समत्वतः ॥ न भविष्यत्क्रिया कार्यं स्रक्ष्यतीश इति ह्यपि । कार्यं स्यान्नैव चाकर्तुमशक्यं कार्यमिष्यते ॥ साम्यादेव निषिद्धस्य तदिष्टं साधनं तथा । कार्यं साधनमिष्टस्य भगवानिष्टदेवता ॥ मुख्येष्टं वा सुमनसां "प्रेयस्तदि"ति च श्रुतिः[3] । "प्राणबुद्धिमनःस्वात्मदेहापत्यधनादयः ॥ यत्सम्पर्कात्प्रिया आसंस्ततः को न्वपरःप्रियः"[4] ।

---

[1] अविद्यासदृशः (मिथ्या) अधिष्ठानसाक्षिणोरपेक्षाभावेन. [2] यथासम्भवम्. [3] बृहदारण्यकम्. [4] भागवते.

SGDF
Sri Gangeshwari Digital Foundation

इत्यादिवाक्यैराकाङ्क्षा[1] सन्निधिर्योग्यता यतः ॥ तस्मिन्नेव समस्तस्येती[2]ष्टे व्युत्पत्तिरिष्यते ॥ अत्त्यपूपांस्तव भ्रातेत्यादावावापतोऽपि च । उद्वापाद्वर्तमानत्वादाकाङ्क्षादिबलादपि ॥ बालो व्युत्पत्तिमप्ये[3]ति नानयेत्यादिवाक्यतः । आनीयमानदृष्ट्यैव व्युत्पत्तेः सम्भवे सति ॥ एष्यदानयनायायं कुत एव प्रतीक्षते । व्युत्पन्नो वर्तमाने[4] तु क्रियाशब्दे भविष्यति[5] ॥ पुनर्दृष्ट्यैव शब्दश्रुत्पश्चाद्व्युत्पत्तिमेष्यति। वर्तमानमतीतं च भविष्यदिति च क्रमात् ॥ आकाङ्क्षादियुतं यस्माद्विधेर्व्युत्पादनं कुतः । दृष्ट्या ज्ञातपदार्थस्य स्यादाकाङ्क्षा भविष्यति[6] ॥ व्युत्पत्तिः प्रथमा तस्माद्वर्तमानेऽगते[7] ततः । इष्टमाकाङ्क्षते सर्वो न प्रवृत्तिमपेक्षते ॥ अपरोक्षं परोक्षं वा ज्ञानमिष्टस्य साधनम् । क्वापि चेष्टा तदर्था स्यादत्ति[8]र्हि रसवित्तये[9] ॥ वाक्यार्थज्ञानमात्रेण क्वचिदिष्टं[10] भवेदपि । न च स्रुक्स्रुववद्व्यादावतात्पर्यं श्रुतेर्भवेत् ॥ यत्किञ्चित्करणस्यापि यज्ञतैवान्यथा भवेत् । तस्मादुपासनार्थं[11] च स्वार्थे तात्पर्यवद्भवेत् ॥ इतिशब्दो[12]न्नयेऽग्नावित्यप्युन्नीते स्मृतिर्भवेत् । इतिशब्दव्यपेतानि ह्यपि सन्ति वचांस्यलम्[13] ॥ आत्मानमेवेत्यादीनि योगेऽग्नावपि तत्समम् । एकवाक्यत्वयोगे तु वेदस्यापि ह्यशेषतः ॥ वाक्यभेदो न युक्तः स्याद्योगश्च स्यान्महाफले[14] । इति ब्रूयादि[15]ति वचो गत[16]मग्नौ समीपगम्[17] ॥ कल्पनागौरवं चेत्स्यात्पृथक्तात्पर्यकल्पने । कल्पनागौरवादेव पदा[18]र्था न स्युरेव हि ॥ प्रमाणावगतत्वं चेत्तात्पर्याणां तथैव हि । तस्मात्पदार्थे वाक्यार्थे

---

1 मुख्येष्टं वा सुमनसामित्यनेन सम्बन्धः. 2 तस्मात्. 3 बालोऽपि, एति. 4 वर्तमाने अर्थे. 5 भविष्यदर्थे. 6 भविष्यदर्थे. 7 भविष्यदर्थे. 8 चर्वणादिक्रिया. 9 साक्षात्काराय. 10 पुत्रस्ते जात इत्यादौ. 11 उपासनार्थकं सत्यंज्ञानमित्यादिकम्. 12 अध्याहारे. 13 बहूनि सन्ति. 14 मोक्षप्रदे ब्रह्मणि. 15 नगिरागिरेति ब्रूयात्. 16 अवगतम्. 17 जुहोतीत्यस्य. 18 स्रुक्स्रुवादयः.

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्यमुभयत्र च ॥ पृथगेव च वाक्यत्वं पृथगन्वयतो भवेत् । अवान्तरत्वाद्वाक्यानां वाक्यभेदो न दूषणम् ॥ अङ्गीकृतत्वादपि तैः पदानां तु पृथक्पृथक् । क्रियापदेनान्वयस्य वाक्यभेदो हि दूषणम्[1] ॥ प्रत्यक्षादिविरोधेऽतो गौणार्थस्यापि सम्भवात् । अतात्पर्यं पदार्थेऽपि न कल्प्यमविरोधतः[2] ॥ अतो ज्ञानफलान्येव कर्माणि ज्ञानमेव हि । मुख्यप्रसाददं विष्णोर्जिज्ञासायाश्च तद्भवेत् ॥ कर्तव्या तेन जिज्ञासा श्रुतिप्रामाण्ययोगतः ।

प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि ॥ अनवस्थाऽन्यथा हि स्यादप्रामाण्यं तथाऽन्यतः[3] । मिथ्याज्ञप्तिप्रलम्भादेस्तेन वेदविरोधि यत् ॥ न मानमपि वेदानामङ्गीकार्या हि नित्यता । न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचित् ॥ अविप्रलम्भस्तज्ज्ञानं तत्कृतत्वादयोऽपि च । कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न तत् ॥ प्रत्यक्षः कस्यचिद्धर्मो वस्तुत्वादिति चोदिते । न बुद्धो धर्मदर्शी स्यात्पुंस्त्वादित्यनुमाहतिः ॥ अधर्म[4]वादिनो वाक्यमप्रयोजनमेव हि । धर्माभावोऽपि नो तेन[5] प्रत्यक्षावगतो भवेत् ॥ अतःसंशयसम्पत्तौ[6] वाक्यं[7] प्रत्यक्ष[8]वत्प्रमा[9] ।

शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते ॥ अतोऽन्विताभिधायित्वं गौरवं कल्पनेऽन्यथा । न चाशक्त्या[10]भिधायित्वं प्रवृत्तिश्च द्विधाऽन्यथा ॥ एतत्सर्वं तर्कशास्त्रे ब्रह्मतर्के हि विस्तरात् । उक्तं विद्यापृथक्त्वात्तु सङ्क्षेपेणात्र सूचितम् ॥ प्रमाणन्याय[11]सच्छिक्षा क्रियते तर्कशास्त्रतः । मानन्यायैस्तु तत्सिद्धैर्मीमांसा[12] मेयशोधनम् ॥ ब्रह्मतर्के च भगवान्स एव कृतवान्प्रभुः । पञ्चाशत्कोटिविस्तारान्नारायणतनौ कृतात् ॥

---

[1] प्रसज्येत. [2] अविद्यावरणतिरोधानेन जीवे आनन्दादिरूपत्वस्याविरुद्धत्वात्. [3] दोषापवादात्. [4] धर्माभावः. [5] चार्वाकेण. [6] प्राप्तौ तन्निरासार्थम्. [7] अपौरुषेयवाक्यम्. [8] स्थाणुत्वनिश्चायकप्रत्यक्षवत्. [9] प्रमाणम्. [10] अशक्त्या=अन्वयेशक्त्यभावेन. [11] न्यायः=व्याप्तिः, तर्कः, अनुमानम्. [12] मीमांसाशास्त्रतः.

SGDF
Sri Gargeshwari Digital Foundation

उद्धृत्य पञ्चसाहस्रं कृतवान्बादरायणः । अतस्तदर्थं सङ्क्षेपादत इत्यभ्यसूचयत् ॥ यतोऽनुभवतः सर्वं सिद्धमेतदतोऽपि च । देवैश्च दुर्गमार्थेषु व्यापृतो नातिविस्तृतिम् । चकारैता ह्यवज्ञेया युक्तयः प्रतिपक्षगाः ॥ प्रत्यक्षेक्षाक्षमः पक्षं कमेवात्राभिवीक्षते । तस्मादक्षमपक्षत्वान्मोक्षशास्त्रेऽभ्युपेक्षितः ॥ स्वयं भगवता विष्णुर्ब्रह्मेत्येत[1]त्पुरोदितम् । "स विष्णुराह ही" त्यन्ते देवशास्त्रस्य तेन हि ॥ आद्यन्तं देवशास्त्रस्य स्वयं भगवता कृतम् । मध्यं तदाज्ञया शेषपैलाभ्यां कृतमञ्जसा ॥ अतस्तत्रैव विष्णुत्वसिद्धेर्ब्रह्मेत्यसूचयत् । दोषारच्छिद्रशब्दानां पर्यायत्वं यतस्ततः ॥ गुणा नारा इति ज्ञेयास्तद्वान्नारायणः स्मृतः । ब्रह्मशब्दोऽपि हि गुणपूर्तिमेव वदत्ययम् ॥ अतो नारायणस्यैव जिज्ञासाऽत्र विधीयते । सिद्धत्वाद्ब्रह्मशब्दस्य विष्णौ स्पष्टतया श्रुतौ ॥ अम्भस्य[2]पार इत्युक्तो नारायणपदोदितः । 'आपो नारा' इति ह्याह स एवाप्स्वन्तरीरितः ॥ कामतो विधिरुद्रादिपददात्र्या स्वयं श्रिया । योनित्वेनात्मनो[3]विष्णोस्तिष्ठन्तीत्युदितस्य च ॥ यस्मिन्देवा अधीत्युक्त्वा समुद्रं[4] स्थानमेव च । [5]नामचाक्षरमित्येव ऋचइत्युदितं तु यत् ॥ [6]यतः प्रसूतेत्युक्त्वा च तदेव ब्रह्म चाब्रवीत् ॥१॥

॥ ॐ जन्माद्यस्य यतः ॐ ॥ २ ॥ अन्तःसमुद्रगं विश्वप्रसूतेः कारणं तु यत् । सूक्तोपनिषदाद्युक्तं जन्माद्यस्येति लक्ष्यते ॥ सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षावपि ह्यासु श्रुतिषूक्ता हरेः सदा ॥ यं नामानि विशन्त्यद्धा यो देवानामिति ह्यपि । श्रुतेर्नामानि सर्वाणि विष्णोरेव यतस्ततः ॥ अतो न मुख्यतो नाम तदन्यस्य हि कस्यचित् । गुणाः श्रुता इति ह्यस्मान्न दोषोऽर्थः श्रुते-

---

[1] एतस्मात्, पुरा=पूर्वम्. [2] विष्णोर्ब्रह्मशब्दवाच्यत्वे युक्तिपञ्चकम्, प्रथमा युक्तिः. [3] द्वितीया युक्तिः. [4] तृतीया युक्तिः. [5] चतुर्थी युक्तिः [6] पञ्चमी युक्तिः.

SGDF
Sri Gargeshwari Digital Foundation

र्भवेत् ॥ प्रीत्या मोक्षपरत्वाच्च तात्पर्यं नैव दूषणे । सर्वेषामपि वाक्यानां महातात्पर्यमत्र हि ॥ तद्विरोधे न मानत्वं फलं मुक्तिर्हि वाक्यतः । न पुराणादिमानत्वं विरुद्धार्थे श्रुतेर्भवेत् ॥ दर्शनान्तर-मूलत्वा[1]न्मोहार्थं[2] चाज्ञया हरेः । न सर्वनामताऽन्येषां श्रुतावुक्ता हि कुत्रचित् ॥ अदोषवचनाच्चैव नियमेन हरेः श्रुतौ । अज्ञानं पारतन्त्र्यं च प्रलयेऽभाव एव च ॥ अशक्तिश्चोदिताऽन्येषां सर्वेषामपि च श्रुतौ । जन्माद्यस्येति तेनैतद्विष्णोरेव स्वलक्षणम् ॥ अस्योद्भवादिहेतुत्वं साक्षादेव स्वलक्षणम् । कृष्णध्यानच्छलेनैव स्वयं भागवतेऽब्रवीत् ॥ अतो जीवैक्यमपि स निराचक्रे जगद्गुरुः । न हि जन्मादिहेतुत्वं जीवस्य जगतो भवेत् ॥ हिताक्रियादिदोषं च वक्ष्यत्येव स्वयं प्रभुः । निर्गुणत्वं च तेनैव निषिद्धं प्रभुणा स्वयम् ॥ भेदेनैव तु मुख्यार्थ-सम्भवे लक्षणा कुतः । कथं नित्यगुणस्यास्य स्यादैक्यं गुणहानतः ॥ सदैव गुणवत्त्वेऽस्य भिन्नं स्यान्निर्गुणं सदा । न च मिथ्यागुणत्वं स्यादनिर्वाच्यस्य दूषणात् ॥ निर्गुण[3]त्वं तदा च स्यादासुर[4]त्वं न चान्यथा । लक्ष्यलक्षणयोर्भेदोऽभेदो वा यदि वोभयम् ॥ इति [5]पृष्टे तदैक्यस्य गतिरेव[6] न विद्यते । ऐक्याभेदे न शास्त्रेण ज्ञेयं तत्स्वप्रकाशतः ॥ भेदे मिथ्यात्वतो भेदसत्यत्वं स्याद्बलादपि । भेदाभेदौ यदि तदा स्यादेव ह्यनवस्थितिः ॥ स्वनिर्वाहकता[7] चेत्स्या-द्वाह्य[8] वाहक[9]मित्यपि । पर्यायो[10] भेदवान्वा[11] स्यादनवस्थोभयत्र च ॥ सत्यज्ञानादिकेऽप्येवं, न व्यावृत्त्या प्रयोजनम् । व्यावृत्तस्याऽ-विशेषत्वे, तदखण्डं च खण्डितम् ॥ निर्विशेषत्वमेतेन मूकोऽहमिति-

---

[1] पुराणानाम्. [2] कृतत्वात्. [3] यदि परस्मै रुचितं स्यात्. [4] सर्व-शुभधर्मराहित्यम्. [5] वक्तव्यम्. [6] निरूपणप्रकारः. [7] ऐक्यस्य भेदाभेदयोर्वा स्वकर्मकनिर्वाहकता, तस्याः परस्परं धर्मिणा क्रियया च अभेदः स्यात् चेत्. [8] निर्वाह्यम्. [9] निर्वाहकम्. [10] पर्यायः स्यात्. [11] यदि.

SGDF
Sri Gargeshwari Digital Foundation

वद्भवेत् । अभिन्नेऽपि विशेषोऽयं बलादापतति ह्यतः[1] ।। विशेषतद्वतोश्चैव स्वनिर्वाहकता भवेत् । भेदहीने [2]त्वपर्यायशब्दान्तरनियामकः ।। विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः । विशेषास्तेऽप्यनन्ताश्च परस्परविशेषिणः ।। स्वनिर्वाहकतायुक्ताः सन्ति वस्तुष्वशेषतः । अतोऽनन्तगुणं ब्रह्म निर्भेदमपि भण्यते ।। 'एवंधर्मानि'ति श्रुत्या तदभेदोऽप्युदीर्यते ।। २ ।।

।। ॐ शास्त्रयोनित्वात् ॐ ।।३।। शैवाद्यागमसंप्राप्तदृष्टगेन फलेन तु । तद्वाक्योपमयाऽन्यच्च प्रमाणत्वेऽनुमीयते ।। ईशवाक्यत्वत इति चेत्तद्व्यभिचारिणा । अप्रामाण्यानुमा च स्यान्न पृथक्चानुमेश्वरे ।। पुंस्त्वहेतुबलादेव पूर्वोक्तेनैव वर्त्मना । शास्त्रयोनित्वमेतेन कारणस्य बलाद्भवेत् ।। नावेदविन्न तर्केण मतिरित्यादिवाक्यतः । तर्को ज्ञापयितुं शक्तो नेशितारं कथञ्चन ।। वनकर्त्त्वादिरूपेण पक्षभूतस्य चेशितुः । किञ्चिज्ज्ञत्वं हि पुंस्त्वेन शक्यं साधयितुं सुखम् ।। वृक्षकृन्नाखिलंवृक्षं वेत्ति पुंस्त्वाद्धि चैत्रवत् । इत्याद्यनुमया स्पर्धि नानुमानं परेशितुः ।। शक्तं विज्ञापने चाऽतिप्रसङ्गोऽनुमयेदृशा । वस्तुत्वात्तुरगः शृङ्गी पुष्पवत्खं सुतैर्युता ।। चित्रिणी च रसः षष्ठो रसत्वात्सोत्तरो भवेत् । उपक्रमादिलिङ्गेभ्यो नाऽन्या स्यादनुमा ततः ।।३।।

।। ॐ तत्तु समन्वयात् ॐ ।।४।। तएवान्वयनामानस्तैः सम्यक्प्रविचारिते । मुख्यार्थो भगवान्विष्णुः सर्वशास्त्रस्य नापरः ।।४।।

।। ॐ ईक्षतेर्नाशब्दम् ॐ ।।५।। ईक्षणीयत्वतो विष्णुर्वाच्य एव न चान्यथा । लक्ष्यत्वं क्वापि दृष्टं हि किं तदित्यनवस्थितिः ।। माधुर्यादिविशेषाश्च तच्छब्दैरुदिताः सदा । वाक्यार्थोऽपि हि वाक्यार्थशब्देनैवोदितो भवेत् ।। नावाच्यं तेन किञ्चित्स्यादत इत्यादिकैर्वदन् ।

---

[1] अतः उक्तप्रकारेण. [2] तु = एव.

SGDF
Sri Gangeshwari Digital Foundation

अवाच्यत्वं कथं ब्रूयान्मूकोऽहमितिवत्सुधीः ॥ येन लक्ष्यमिति प्रोक्तं लक्ष्यशब्देन सोऽवदत् । एकस्यापि हि शब्दस्य गौणार्थस्वीकृतौ सताम् ॥ महती जायते लज्जा यत्र तत्राखिला रवाः । अमुख्यार्था इति वदन्यस्तन्मार्गानुवर्तिनाम् ॥ कथं न जायते लज्जा वक्तुं शाब्दत्वमात्मनः ॥ ५ ॥ ॐ गौणश्चेन्नात्मशब्दात् ॐ ॥ ६ ॥ ॥ ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ ॥ ७ ॥ आत्मब्रह्मादयः शब्दाः साक्षात्पूर्वाभिधायिनः । जन्मादिकारणं ब्रह्म लक्षितं च यदा तदा ॥ वन्ध्यापुत्रोपमं मायाशबलं वाच्यमित्यपि । कल्पयित्वा विना मानं लक्ष्यं शुद्धं वदन्पदैः ॥ आत्मशब्दोदितस्यैव ज्ञानं मुक्त्यावसाधनम् । आह श्रुतपरित्यागः स्याच्चास्याऽश्रुतकल्पना ॥ स्यात्सर्वत्र च यत्रैक[1]मपि लोको जुगुप्सते । नियमेनोभयं स्याद्धि यस्य स्वपरयोर्मते[2] ॥ अलङ्कृतः सदैवायं दुर्घटैरेव भूषणैः । अन्धन्तमो नित्यदुःखं तस्य स्याद्व्यसनद्वयम् ॥ “[3]अनन्दा नाम ते लोका अन्धेन[4] तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति येऽविद्वांसो बुधो[5] जनाः” ॥ “आसुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः” इत्यादिश्रुतयो मानं शतशोऽत्र समन्ततः ॥ ६ ॥ ७ ॥ ॐ हेयत्वावचनाच्च ॐ ॥ ॥ ८ ॥ हेयत्वावचनाच्चैव नात्मा गौणः श्रुतौ श्रुतः । ‘तमेवैकं जानथाऽन्या वाचो मुञ्चथ’ चेति ह ॥ उक्त आत्मा कथं गौणो हेयपक्षे ह्यसौ श्रुतः । परिवारतया ग्राह्या अपि हेयाः प्रधानतः ॥८॥ ॥ ॐ स्वाप्ययात् ॐ ॥ ९ ॥ पूर्णस्य पूर्णमादाय पूर्णमेवाऽ-

---

1 ययोर्मध्ये. 2 मतेन. 3 न विद्यते नन्दः = आनन्दः येषु ते. 4 अन्धयतीति अन्धं तेन. 5 बुधः = वेदात्, अविद्वांसः वेदोक्तमात्मस्वरूपमपलपन्तः.

SGDF
Sri Gangeshwari Digital Foundation

वशिष्यते । इति स्वस्यैव पूर्णस्य पूर्णेऽप्यय उदाहृतः ॥ कथं माया-
व्यवच्छिन्नः पूर्णो मुख्यतया भवेत् ॥९॥ ॐ श्रुतत्वाच्च ॐ ॥
॥ ११ ॥ पदं च निर्गुण इति कथं गौणं वदिष्यति । गुणा[1]भावोप-
लक्ष्यं चेत्पदं तदपि वाचकम् ॥ अतोऽनवस्थितिमुखसर्वदोषमहास्पदम् ।
कथमेतन्मतं सद्भिराद्रियेत विचक्षणैः ॥ न च साङ्ख्यनिराकृत्यै
सूत्राण्येतान्यचीक्लृपत् । भगवान्न ह्यशब्दत्वं प्रधानेऽङ्गीकरोत्य[2]सौ ॥
समन्वये प्रतिज्ञाते शब्दगोचरतैव हि । प्रथमप्रतिपाद्या स्यात्तदभावे
कुतोऽन्वयः ॥ कथं च लक्षणावादी ब्रूयाद्ब्रह्मसमन्वयम् । योऽसौ
शब्दस्य मुख्यार्थस्तत्रैव स्यात्समन्वयः ॥ जन्मादिकारणे साक्षादाह
देवः समन्वयम् । उक्तं[3] तदेव जिज्ञास्यं क्वावकाशोऽत्र[4] निर्गुणे ॥
कथं[5] चाऽसम्भवस्तस्य[6] मुख्यार्थस्य निराकृतौ[7] । मानेन केन विज्ञेय-
मवाच्याज्ञेयनिर्गुणम् ॥ अमेयं चेन्न शास्त्रस्य तत्र वृत्तिः कथञ्चन ।
तस्माच्छास्त्रेण जिज्ञास्यमस्मदीयं गुणार्णवम् ॥ वासुदेवाख्यमद्वन्द्वं परं
ब्रह्माखिलोत्तमम् । विज्ञेयवाच्यलक्ष्यत्वपूर्वाशेषविशेषतः ॥ निर्गतं मनसो
वाचो यदि तत्स्यादगोचरम् ॥ अस्तु तन्मा वदेद्वादी न चास-
च्छास्त्रगं तु तत् । अवाच्यं[8] वाच्यमित्युक्त्वा किमित्युन्मत्तवन्मृषा ॥
अस्मच्छास्त्रस्य चौर्याय यतते स्वोक्ति[9]दूषकः । जन्मादिकारणं
यत्तत्साक्षान्नारायणाभिधम् ॥ वदन्ति श्रुतयो ब्रह्म शास्त्रं चैतत्तदर्थतः ।
प्रवृत्तमस्त्ववाच्यं ते नैवं ब्रूयाः कथञ्चन ॥ सर्वशब्दैरवाच्यं तदुक्त्वा

---

[1] गुणाभावविशिष्टवाच्यद्वारा उपलक्ष्यं चेत् शुद्धं ब्रह्म। अपि = तथापि, तत्पदं = लक्ष्यपदं ब्रह्मणो वाचकम्. [2] साङ्ख्यः, सूत्रकारः. [3] यत् जन्मादिकारणत्वेन उक्तं तदेव. [4] तत्तु समन्वयादिति सूत्रे. [5] न कथञ्चिदपि. [6] सगुणस्य प्रकृतेऽपि तस्य निर्गुणपरामर्शस्य. [7] त्यागे हेतुभूतः असम्भवः. [8] अवाच्यं उक्त्वा पुनश्च वाच्यं भवतीति. [9] व्याहतभाषी.

SGDF
Sri Gurgeshwari Digital Foundation

तद्विषयं पुनः । शास्त्रं वदन्तमुन्मत्तं कथं लोको न वारयेत् ॥ मा वदो मा विजानीहि त्यजास्मच्छास्त्रचोरताम् । वयं त्वां श्रुतियुक्तिभ्यां बध्वाऽस्मच्छास्त्रमञ्जसा ॥ विचारयामः श्रुतिभिर्युक्तिभिश्चैव सादरम् । [1]अद्भुतत्वादवाच्यं तदतर्क्यांज्ञेयमेव च ॥ अनन्तगुणपूर्णत्वा[2]-दित्यू[3]दे पैङ्गिनां श्रुतिः । अवाच्यमिति लोकोऽपि वक्त्याश्चर्यतमं भुवि ॥ ११ ॥ ५ ॥

॥ ॐ आनन्दमयोऽभ्यासात् ॐ ॥ १२ ॥ एवं शास्त्रावगम्यत्वे विभागेन समन्वयम् । आनन्दमयइत्यादिनाऽध्यायेन वदत्यजः ॥ तत्रान्यत्र प्रसिद्धानां विष्णावेव समन्वयम् । शब्दानां प्रथमे पादे गुणिसामान्यवाचिनाम् ॥ गुणवाचिनां च प्रथममाह देवः समन्वयम् । समुद्रशायिनं सर्वप्रसूतिप्रभवं श्रुतिः ॥ तदेव ब्रह्म परममिति सावधृतिर्जगौ । यतोऽतो ब्रह्मशब्दस्य तत्रैव नियतत्वतः ॥ 'येऽन्नंब्रह्मे'त्यादिरूपादभ्यासात्तैत्तिरीयके । अन्यासु चैतद्रूपासु शाखास्वपि सहस्रशः ॥ आनन्दमय इत्याद्यैः शब्दैर्वाच्यो हरिः स्वयम् । उपलक्षणत्वं शब्दानामानन्दमयपूर्विणाम् ॥ सूत्र-स्याल्पाक्षरत्वेन सर्वशाखाविनिर्णये । पुनश्च प्रापकाद्धेतोस्तत्राधि-करणान्तरम् ॥ सर्वे वेदा आमनन्ति यत्पदं त्विति हि श्रुतिः । आनन्दमयरूपे तु ब्रह्मणः पुच्छतोक्तितः ॥ समस्ताऽब्रह्मताप्राप्ते-रानन्दमयनाम हि । ब्रह्मशब्दस्य चाभ्यासात्पञ्चरूपादिषु स्फुटम् ॥ ब्रह्मताऽवयवेऽपि स्यात्तथाऽवयविनि स्वतः । यथैव कृष्णकेशस्य कृष्णस्य ब्रह्मताऽखिला ॥ दर्शिता चैव पार्थाय निःसीमाः शक्तयोऽस्य हि । ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ॥ विष्ण्वाख्यमुक्तमन्यत्र

---

[1] आश्चर्यतमत्वात्, अवाच्यं = अनिर्वाच्यम्. [2] आश्चर्यतमत्वम्.
[3] वद धातोः लिटि आत्मनेपदम्. ३. ब्र.सू. ३-३-२६. शां. भाष्ये. 'देवच्छन्दांसिपूर्वाणि' इति पैङ्ग्याम्नानात्.

SGDF
Sri Gangeshwari Digital Foundation

ह्यूर्ध्वरेतं च तत्प्रति । विरूपाक्षाख्यमपरं ब्रह्मोक्तं तद्व्रते स्थितम् ॥ समानाधिकृतत्वं चेदुत्तरं नीललोहितम् । कृष्णपिङ्गलरूपेण पुनरुक्तं, भविष्यति ॥ ब्रह्माधिपतिरित्यत्र तापनीयश्रुतौ पुरः । स्वरित[1]-ब्रह्मशब्दान्तं बहुव्रीहित्वमेष्यति ॥ स्वाहेन्द्रशत्रुर्वर्धस्व यद्बहुव्रीहि-तामगात् । तस्मादस्येन्द्रएवाभूच्छत्रुरित्युत्तरश्रुतेः ॥ 'पूर्वान्तस्वरिते पुंसोर्बहुव्रीहित्वमेष्यति' । महाव्याकरणे सूत्रमिति स्वरविनिर्णये ॥ ऋतं सत्यं परं ब्रह्मेत्याद्युद्देश्यद्वितीयका । विभक्तिरूर्ध्वरेतादिः प्रथमा रुद्रगोचरा ॥ तस्माद्विष्णुं परं ब्रह्म प्रति रुद्रो व्रते स्थितः । ऊर्ध्वरेता इति ह्येव श्रुत्यर्थोऽवसितो भवेत् ॥ ऋतं सत्यं परं ब्रह्म प्रति विष्णुं सदाशिवः । ऊर्ध्वरेता ध्यायति ह शङ्करो नीललोहितः ॥ इत्यर्थ-मेतमेवाह नीलग्रीवश्रुतिः परा । आथर्वणी परं ब्रह्म तस्मादेको हरिः श्रुतौ ॥ "तदेवर्त"मिति प्राह कथमेवान्यथा श्रुतिः । अवधारयन्ती तस्यैव ह्यृतत्वादिकमञ्जसा ॥ एको नारायण आसीन्न ब्रह्मा न च शंकरः । वासुदेवोऽग्र एवासीन्न ब्रह्मा न च शंकरः ॥ नेन्द्रसूर्यौ न च गुहो न सोमो न विनायकः । इत्यादिवाक्यतो विष्णोरुत्पत्ति-रवतारगा ॥ मुख्यं ब्रह्म हरिस्तस्मात्प्रस्तावः परमित्यपि । मुख्यब्रह्म-ग्रहे युक्ते नामुख्यं युज्यते क्वचित् ॥ असम्भवे हि मुख्यस्य गौणार्थाङ्गीकृतिर्भवेत् ॥ १२ ॥ **ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ ॥१३॥** प्राचुर्यार्थाश्च मयटः सर्वेऽत्र प्रतिपादिताः । भोग्यत्वमत्र चाद्यत्वमुपजीव्यतया हरेः ॥ महाभोक्ता महाभोग्य इत्यर्थोऽन्नमये भवेत् । महाप्राणो महाबोधो महाविज्ञानवानपि ॥ विशेषसामान्यतया विज्ञानं मन इत्यपि । एकस्य ज्ञानरूपस्य हरे-रुक्तिर्विभागतः ॥ अभेदेऽपि विशेषेणैवान्य इत्युदितो हरिः । भेदशब्दा विशेषं तु हरावन्यत्र भिन्नताम् ॥ ब्रूयुर्हरेर्जीवजडैरपि भेदं

[1] स्वरितः ब्रह्मशब्दान्तः यस्य तत् ब्रह्माधिपतिरितिपदम्.

SGDF
Sri Gargeshwari Digital Foundation

हि मुख्यतः । ब्रह्मतर्कवचोऽप्येवमत एकः स पञ्चधा ॥ उक्तोऽन्नमय इत्यादि भृगोश्चैतद्वदिष्यति । प्राप्यत्वेन मयट्प्रोक्तेर्न तत्राप्यन्यदुच्यते ॥ प्रचुरान्नादिरेवातो ह्यन्नमन्नमयेत्यपि । उच्यते ह्यविशेषेण नान्यत्किञ्चिदिहोच्यते ॥ १३ ॥ ॐ तद्धेतुव्यपदेशाच्च ॐ ॥१४॥ महानन्दत्व एवास्य हेतुः कोऽन्यादिति स्फुटम् । उक्तः श्रुत्यन्तरे यस्मात्सुखं लब्ध्वा करोत्ययम् ॥ करोति नासुखी भूमा सुखं नाल्पे सुखं भवेत् । इत्युक्तं यत्प्रवृत्तिश्च नृत्तगानादिका सुखात् ॥ दुःखाद्रोदादिका चैव सर्वकर्तृत्वतोऽस्य च । सर्वशक्तेर्न दुःखं स्यादतः केवललीलया ॥ प्रवर्तको न चेदेष प्राण्यादन्याच्च कः पुमान् ॥१४॥ ॥ ॐ मान्त्रवर्णिकमेव च गीयते ॐ ॥ १५ ॥ ब्रह्मवित्परमाप्नोतीति यत्प्रथमसूचितम् । तदेव मन्त्रवर्णेन सत्यं ज्ञानमनन्तवत् ॥ लक्षितं तत्र सत्यत्वं सृष्ट्यान्नप्राणयोरपि । उक्तं ज्ञानं तु मनसा विज्ञानेनाप्युदीरितम् ॥ अनन्तत्वं तथाऽऽनन्दमयवाचाऽप्युदाहृतम् । सद्भावं यापयेद्यस्मात्सत्यं तत्तेन कथ्यते ॥ इति सृष्टिरिह प्रोक्ता जगत्सद्भावयापकम् । ब्रह्मेति स्थापनायैव सत्त्वं जीवनमेव च ॥ विशीर्णता च सत्त्वं स्यात्सन्नमित्याहुरेव यत् । अतोऽद्यताऽत्तृताऽन्नत्वं सत्यशब्दार्थ एव हि ॥ 'प्राणं देवा अनुप्राणन्ति मनुष्याः पशवश्च ये । आयुः प्राणो हि भूतानामि'ति यद्गतिजीवने ॥ उक्ते सदिति धात्वर्थो गतिश्चातो हि सत्यता । प्राणत्वमवबोधार्थो मनुधातुः प्रकीर्तितः ॥ नाल्पे सुखमिति प्रोक्त्यैवानन्दमयतोक्तितः । अनन्तत्वं सुनिर्णीतं पूर्णानन्दो हि नाल्पके ॥ अतो हि मन्त्रवर्णोक्तविस्तृतिस्तु समस्तया । क्रियते परया यस्मात् ॥ १५ ॥ ॐ नेतरोऽनुपपत्तेः ॐ ॥ १६ ॥ इतरोऽत्र न कथ्यते ॥ पुरुषं वेत्ति यो मुच्येन्नान्यः पन्था हि विद्यते । इति श्रुतेरन्यवेदी कथं मुक्तिं

SGDF
Sri Gurgeshwari Digital Foundation

प्रयास्यति ॥ पुरुषः पर आत्माऽजो ब्रह्म नारायणः प्रभुः । महानानन्द उद्विष्णुर्भग ओम इतीर्यते ॥ स्वयं नारायणो देवो नान्यस्यैतानि कस्यचित् । तस्मादोमित्युदाहृत्य यज्ञदानादि कुर्वते ॥ सूक्तेन पौरुषेणैनं यजन्त्यध्यात्मकोविदाः । इति पैङ्गिश्रुतिस्तेन नान्यज्ञानाद्विमुच्यते ॥ ब्रह्मशब्दोदिते तस्मिन्नात्मशब्दं प्रयुज्य च । तस्मादाकाशसृष्टिं च प्रोवाचात्र चतुर्विधाम् ॥ भूतं भूताभिमानी च तद्देहोऽन्तर्नियामकः । हरिश्चाकाशशब्दोक्तो मुख्यतो हरिरेव च ॥ आसमन्तात्काशते यदाकाशो मुख्यतो हरिः । बलज्ञानस्वरूपत्वाद्वायुरग्निरगं नयन् ॥ आप आपालनाच्चैव पृथिवी प्रथितो यतः । उष्टानामाश्रयत्वेन स एवौषधिनामकः ॥ ओषधीषु स्थितो विष्णुः क्षुधितैराश्रितो भवेत् । पुरि शेते यतः सोऽथ पुरुषश्चेति गीयते ॥ क्रियाप्रवर्तकत्वेन प्रादुर्भावो हरेर्जनिः । आकाशादिषु नान्योऽस्ति ह्यभिमानोऽभिमानिनः ॥ अभिमानिशरीरस्य साक्षाद्भूतस्य चोद्भवः । एवं देहादिपर्यन्तमागतं हरिमेव तु ॥ परामृशति तस्यैव पञ्चरूपत्ववित्तये । त्यक्त्वा भूतादिकं सर्वं स वा एष इति श्रुतिः ॥ स इत्यात्मपदोद्दिष्ट एष जीवशरीरगः । सारान्नमय एवायं न लोकान्नमयः प्रभुः ॥ इति तं रसशब्देन विशिनष्टि शरीरगम् । इदमित्येव निर्देशो वस्त्रप्रावृतवद्विभोः ॥ शिर आदेर्भवेज्जीवशिरआदौ व्यवस्थितेः । तं विदित्वाऽस्य मुक्तिः स्यान्नान्यज्ञानात्कथञ्चन ॥ १६ ॥ ॐ भेदव्यपदेशाच्च ॐ ॥१७॥ आदित्ये पुरुषेऽचायमिति भेदोपदेशतः । नास्याभेदोऽस्ति जीवेन ॥ ॐ कामाच्च नानुमानापेक्षा ॐ ॥ ॥१८॥ नानुमा कामचारिणी ॥ विमतानि शरीराणि मद्भोगायतनानि यत् । शरीराणीत्यादिका तु तत्त्वज्ञाने ह्यपेक्षते ॥ प्रत्यक्षादिविरुद्धत्वादक्षागमभयोज्झिता । अनुमा कामवृत्ता हि कुत्र नावसरं व्रजेत् ॥

SGDF
Sri Gurgeshwari Digital Foundation

जड आत्मैव वस्तुत्वात्प्रमेयत्वाज्जडं चितिः। घन आकाश इत्याद्या वार्यन्ते केन हेतुना ॥ न जीवभेदसूत्राणां शङ्कयाऽत्र पुनरुक्तता। वाक्यान्तरद्योतकत्वात्पृथगित्यत्र पूर्णता ॥१८॥ ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ ॥१९॥ योगमन्नमयाद्यैर्यत्फलत्वेनास्य शंसति। स्थानद्वयेऽप्यतः कोशा एत इत्यतिसाहसम् ॥ उपसङ्क्रमणं चैव द्वितीयोद्देशितं प्रति। अतिक्रमं वदन्तं तमुपशब्दो निवारयेत् ॥ अश्रुतस्यातिशब्दस्य स्थानं दद्यात्कथं पुनः। श्रुताश्रुतपरित्यागकल्पने विगतह्रियाम् ॥ मृतावेव परित्यागः कृतो ह्यन्नमयस्य च। येऽन्नं ब्रह्मेत्याद्युपासां सामानाधिकरण्यतः ॥ उक्त्वा पञ्चस्वरूपाणां पुनस्तत्प्राप्तिवादिनी। स्थानद्वयगता वेदवाणी तदपलापिनाम् ॥ तमसोऽन्यत्र संस्थानं कथमेव सहेत सा। 'अधीहि भगवो ब्रह्मे'त्युक्तोऽन्नप्राणपूर्वकम् ॥ आह ब्रह्म कथं तन्न द्वारं तदितिवादिनः। उपसत्तिं कथं विद्युरुपसन्नाय हि त्रिशः ॥ वक्तव्यं ब्रह्म गुरुणा चतुर्वारमथापि वा। सकृद्वेत्यागमा ब्रूयुः संप्रदायविदोऽपि च ॥ तद्यत्किञ्चित्कथं ब्रूयादुपसन्नाय दिक्पतिः। न वदेद्ब्रह्म च कथं मायावी न हि वारिराट् ॥ चष्ट इत्येव तच्चक्षुः श्रवणाच्छ्रोत्रमुच्यते। वचनादेव वाग्ब्रह्म सृष्टिस्थित्यादिकारणम् ॥ तच्च वाधूलशाखायामष्टरूपमुदाहृतम्। विज्ञानानन्दसहितं पृथक्सृष्ट्यादिलक्षणैः ॥ आवापोद्वापतः शाखा यत आहुः परं पदम्। यतो भूतानि जायन्त इत्याद्यैर्लक्षणैः स्वयम् ॥ लक्षितं गुरुणा पश्चात्तपसैवापरोक्षितम्। दृष्ट्वैकैकस्वरूपं तु समस्तोक्तानुदर्शनम् ॥ इच्छताऽऽज्ञां गुरोः प्राप्य तपसैवापरोक्षितम्। अब्रह्मेत्येव वदतां श्रुतहान्यश्रुतग्रहौ ॥ साक्षाल्लक्षणतां प्राप्ताविति लज्जा तदुक्तिषु। समीपे सहभोगस्य मुक्तित्वेनोक्तितोऽसकृत् ॥ भेदो जीवेशयोर्मिथ्येत्येव मिथ्या स्वयं भवेत्। एतेन[1] मयटश्चैव द्वैविध्येनार्थकल्पनात् ॥

[1] पञ्चानामपि ब्रह्मत्वोपपादनेन.

SGDF
Sri Gargeshwari Digital Foundation

तदन्येषां मतमपि सत्संसत्सु न भासते । अतो नारायणो देवो निःशेषगुणवाचकैः ॥ गुणिसामान्यवचनैरपि[1] मुख्यतयोदितः । अध्यात्मगैश्च[2] प्राणाद्यैस्तथैव ह्यधिभूतगैः ॥ [3]अन्नादिशब्दैर्भगवानेको मुख्यतयोदितः । [4]जन्माद्यस्येति सूत्रेण गुणसर्वस्वसिद्धये ॥ ब्रह्मणो लक्षणं प्रोक्तं शास्त्रमूलं यतस्ततः । अन्वयः सर्वशब्दानां[5] गुणसर्वस्ववेदकः ॥ शब्दप्रवृत्तिहेतूनां तस्मिन्मुख्यसमन्वयात्[6] । [7]अन्यार्थेष्वल्पता हेतोस्तन्निमित्तत्वतस्तथा ॥ तद्वाचकत्वं शब्दानां बहुलातिप्रयोगतः[8] । [9]रूढमित्येव साध्यं स्यात् रूढिर्हि द्विविधा मता ॥ अविद्वद्विद्वदा[10]प्त्यैव मुख्या हि विदुषां तु सा । विद्वद्रूढिर्वैदिका[11] स्यात्सा योगादेव लभ्यते ॥ तस्मान्मुख्यार्थता विष्णोरिति कृत्वा हृदि प्रभुः । समन्वयं साधयति ॥ १९ ॥ ६ ॥

॥ ॐ अन्तस्तद्धर्मोपदेशात् ॐ ॥ २० ॥ देवानां [12]तत्र शक्तताम् । आशङ्क्य तत्र रूढिं च तच्छब्दानामपि [13]स्वयम् ॥ समुद्रान्तःस्थितत्वाद्यैस्तद्धर्मैर्विष्णुरूढताम् । साधयित्वाऽभिदान्तैश्च पुनरेव न्यवारयत् ॥ २० ॥ ७ ॥

॥ ॐ आकाशस्तल्लिङ्गात् ॐ ॥ २२ ॥ चेष्टा[14] हि चेतनानां या सा भवेत्तत्प्रसादतः । अचेतनस्वभावस्तु विवरादिः[15] कथं ततः[16] ॥ इति शङ्कानिवृत्त्यर्थमाकाश इति नाम च । परतोऽपि [17]वरीयस्त्वपूर्वाल्लिङ्गाद्धरेर्भवेत्[18] ॥ 'नभो ददाति श्वसतां मार्गं यन्नियमा[19]ददः[20] ॥ इत्यादि वाक्यैः ॥ २२ ॥ ८ ॥

---

[1] वाचकैः. [2] अध्यात्मविषयैः. [3] अन्नौषध्यादिशब्दैः. [4] समन्वयसमर्थनाय आदितः सङ्गतिं दर्शयति. [5] एव. [6] सम्बन्धात्. [7] पुरन्दरादिषु. [8] हेतोः. [9] शब्दजातम्. [10] आप्तिः=सम्बन्ध. [11] वैदिकी. [12] प्रवृत्तिनिमित्तवत्तायाम्. [13] साक्षादपि विद्वत्सम्बन्धिनीमपि. [14] वर्षणशासनादिः. [15] विवरत्वादिः. [16] विष्णौ. [17] सर्वोत्तमत्वम्. [18] वाचकम्. [19] यत्प्रेरणातः. [20] भागवते.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ अत एव प्राणः ॐ ॥ २३ ॥ अध्यात्म-[1]
मन्वयव्यतिरेकतः । प्राणादि[2]हेतुतादृष्टेरतिदेशो हि तादृशः[3] ॥
लिङ्गं बलवदेव स्यात्प्रेरकोऽस्यापि यद्धरिः ॥ २३ ॥ ९ ॥ १० ॥

॥ ॐ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पण-
निगदात्तथाहि दर्शनम् ॐ ॥ २५ ॥ नित्यत्वादेव शब्दस्य
तत्स्वभावः कथं हरेः। कथं प्रसिद्धबहुलशब्दानामन्यथार्थता ॥ इति चेत्त-
द्धरेरेव बाहुल्यात् श्रुतिलिङ्गयोः । तादृशत्वाच्च तच्छक्तेः ॥२५॥११॥

॥ ॐ प्राणस्तथाऽनुगमात् ॐ ॥ २८ ॥ बाहुल्ये
श्रुतिलिङ्गयोः । अन्यस्य मुख्यवाच्यत्वमिति तन्मात्र[4]गस्य हि ॥
विष्णोरेव तु लिङ्गानि प्राणस्थानि तु सर्वशः। प्राणसंवादपूर्वाणि
मुख्यतो जीवगानि च ॥ अभ्यार्चच्छतवर्षाणि[5] प्राण[6]वंशत्वमित्यपि[7]।
तस्मादन्यत्रगैः शब्दैरुक्तन्यायैः समन्ततः ॥ एको नारायणो देवो
भण्यते नात्र संशयः । वासुदेवादिरूपेण[8] चतुर्मूर्तिश्च सर्वशः[9] ॥
अथवा पञ्चमूर्तिः स प्रोक्तोऽधिकरणं [10]प्रति । प्रतिसूत्रं प्रतिपदं
प्रत्यक्षरमथापि वा ॥ तैस्तैर्युक्ति[11]श्रुतिन्यायविशेषैर्योग्यता यथा[12] ।
बृहत्तन्त्रप्रमाणेन[13] बह्वर्थ[14]मपि सङ्ग्रहात् ॥ [15]उच्यते नरबुद्धीनामपि
किञ्चिद्ग्रहा[16]र्थतः । ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम् ॥
बहुज्ञा एव जानन्ति विशेषेणार्थमेतयोः । [17]तस्मान्महागुणो विष्णु-

---

[1] शरीरे. [2] जीवनादि. [3] षष्ठ्यन्तं पूर्वोक्तसदृशस्य, परिहारन्यायस्य अतिदेशः कृतः यद्वा तादृशो ह्यतिदेशः यदाशङ्काधिक्ये सति परिहारसाम्यम्. [4] इन्द्रादिगतस्य. [5] इति. [6] चक्षुराद्याश्रयत्वम्. [7] लिङ्गानि. [8] भण्यते. [9] सर्वपादेषु. [10] प्रत्यधिकरणम्. [11] लिङ्ग-श्रुतिसमाख्यादिव्यावर्तकैर्विवेको ज्ञेयः. [12] एवमर्थत्वं ज्ञेयम्. [13] अनतिक्रमेण प्रतीयन्ते. [14] सूत्रजातम्. [15] व्याख्यायते. [16] ज्ञानार्थम्. [17] सर्वनामवाच्यत्वात्.

SGDF
Sri Gargeshwari Digital Foundation

र्नाम्नामपुनरुक्तितः ॥ २८ ॥ १२ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने प्रथमाध्यायस्य प्रथमः पादः ॥ ॥ १ ॥ १ ॥ श्लोकसङ्ख्या २५७ ॥

॥ ॐ ॥ लिङ्गात्मकानां[1] शब्दानां वृत्तिर्नारायणे परे । चिन्त्यते, ॥ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥ १ ॥ सर्वगत्वं तु[2] प्रथमं प्रविचार्यते । तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तिप्रबोधकः[3] ॥ दूरतोऽप्यतिशक्तः स लीलया केवलं प्रभुः । इति ज्ञापयितुम् ॥ १ ॥ ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥ ४ ॥ [4]कर्मकर्त्रोरुत्सर्गतो भिदा । अभेदोऽपि विशेषे[5]स्याद्बली सोऽप्यन[6]पोदितः ॥ [7]एतद्भावाभि[8]धं लिङ्गं क्रियालिङ्गे[9] ततः परम्[10] । अन्तर्याम्यन्तरश्चेति क्रि[11]याभावाख्यमुच्यते ॥ अदृश्यत्वाद्यभावाख्यं श्रुतिर्लिङ्गाधिका परा[12] ॥ ४ ॥ १ ॥

॥ ॐ अत्ता चराचरग्रहणात् ॐ ॥ ९ ॥ अनित्यत्वात्क्रियाणां तु कथमेव स्वरूपता । इति चेत्स विशेषो[13]ऽपि क्रिया[14]शक्त्यात्मना स्थिरः ॥ शक्तिता[15] व्यक्तिता[16] चेति विशेषोऽपि विशेषवान् । अभिन्नोऽपि, क्रियादिश्च स्वभाव इति हि श्रुतिः ॥ 'ज्ञानं नित्यं क्रिया नित्या बलं शक्तिः परात्मनः । नित्यानन्दोऽव्ययः पूर्णो भगवान्विष्णुरच्युतः' ॥ इति पैङ्गिश्रुतिश्चाह 'शक्तिसद्भाव[17] एव तु । क्रियादिनित्यता ज्ञेया तदन्यत्र त्वनित्यता' ॥ इति सत्तत्वचनम् ॥ ९ ॥ २ ॥

---

[1] धर्मप्रवृत्तिनिमित्तकानां. यौगिकानामिति त. प्र. भावदीपे. [2] एव. [3] कार्याभिमुखीकर्ता. [4] एकक्रियायाम्. [5] अपवादे. [6] अपवादरहितः. [7] सर्वगतत्वम्. [8] क्वचित्प्रतीके स्थितिवाचकम्. [9] क्रिये च ते लिङ्गे च. [10] द्वाभ्याम्. [11] क्रियाप्रधानकः. [12] परस्मिन्. [13] धर्मः. [14] क्रियारूपः. [15] इति. [16] इति. [17] सद्भावे=नित्यत्वे.

SGDF
Sri Gangadhareshwar Digital Foundation

॥ ॐ गुहां प्रविष्टावात्मानौ[1] हि तद्दर्शनात् ॐ ॥ ११ ॥ द्वित्वं चैकस्य युज्यते ॥ ११ ॥ ॐ विशेषणाच्च ॐ ॥ १२ ॥ यः सेतुरिति [2]चैकत्ववचनेन विशेषणात् ॥१२॥ ३ ॥

॥ ॐ अन्तर उपपत्तेः ॐ ॥ १३ ॥ अन्तःस्थित्वा रमणकृदन्तरः स उदाहृतः । रमणं चात्मशब्देनाऽऽदेयं मातीति चोच्यते ॥ १३ ॥ ॐ [3]सुखविशिष्टाभिधानादेव च ॐ ॥ ॥ १५ ॥ विशिष्टसुखवत्त्वाच्च [4]ब्रह्मत्वं च विशिष्टता[5] ॥ १५ ॥ ॥ ॐ अनवस्थितेरसम्भवाच्च नेतरः ॐ ॥ १७ ॥ अन्योऽन्यनियतिश्चेशनियमे[6] नान्यथा भवेत् । चेतनानां विशेषो यः स्वभावोऽपीश्वरार्पितः ॥ अन्योऽन्यनियमे तस्मादनवस्थित्यसंभवौ । ईश्वरश्चेन्नियन्ता स्यात्स एव प्रथमागतः[7] ॥ किमित्यपोद्यते[8] कस्माद्वृथाऽ[9]वस्थितिकल्पना[10] । [11]दोषवत्येव तस्मात्सा नैव कार्या कथञ्चन ॥ १७ ॥ ४ ॥

॥ ॐ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ ॥ १८ ॥ रमणं नातियत्नस्य विक्षेपादेव युज्यते । इति चेत्सर्वनियमो[12] यस्य[13] कस्मान्न शक्यते[14] ॥ स्वात्मनाऽनियतं वस्तु प्रतीपं ह्यात्मनो भवेत् । स्वाधीनसत्ताशक्त्यादि कथमात्मप्रतीपकम् ॥ १८ ॥ ५ ॥

---

1 आत्मानौ=पिबन्तौ. 2 एकत्वस्य वचनेन एकवचनेन. 3 सुखेन विशिष्टः=श्रेष्ठः, यद्वा विशिष्टं सुखं सुखविशिष्टं कडारादिवत्परनिपातः. 4 ब्रह्मशब्दार्थः. 5 श्रेष्ठत्वं च. 6 सत्येव उपपन्ना भवेत्. 7 प्रथमं प्रतीतः. 8 त्यज्यते. 9 ईश्वरादित्यानांमध्ये अग्नेः. 10 क्रियते. 11 श्रुतहानिरश्रुतकल्पनाचदोषः. 12 सर्वान्तर्यामित्वम्. 13 तस्य. 14 रमणम्.

SGDF
Sri Gurgeshwari Digital Foundation

॥ ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ ॥२१॥

गुणक्रियादयो भावा यदि वा स्युरभेदिनः। अभेदोऽभावधर्माणां ब्रह्मणा युज्यते कथम्॥ नाभावो[1] भाव इति च[2] विशेषः[3] प्रायशो भवेत्। [4]अतद्भावोऽन्यता चेति न विशेषोऽस्ति कश्चन॥ दोषाभावो गुण इति प्रसिद्धो लौकिकेष्वपि। अदृश्यत्वादिकांस्तस्माद्गुणानाह स्वयं प्रभुः॥ भावाभावविरोधोऽपि न तु सर्वत्र विद्यते। तदभावो हि तद्भावविरोधी न ततो परः॥ पृथक्त्वाभाव[5]तद्रूपा[6]न्भेदांस्त्रीन्कल्पयन्ति चेत्। कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिनः॥ पृथक्त्वान्यत्व-[7]भेदास्तु [8]पर्यायेणैव लौकिकैः। व्यवह्रियन्ते सततं वैदिकैरपि सर्वशः॥ दृष्टहानिरदृष्टस्य कल्पनेत्येव दूषणम्। यदा तदधिको दोषो विद्यते को नु वादिनाम्॥ भावाभावस्वरूपास्तु विशेषा[9] एव वस्तुनः[10]। अभिन्ना एव सङ्ग्राह्या व्यवहारप्रसिद्धये॥ यथैकस्समवायोऽपि भेदाभेदौ च वस्तुनि[11]। अङ्गीकार्या विशेषेण[12] [13]स्थानेषु व्यवहर्तृभिः॥ [14]अखण्डवादिनोऽपि स्याद्विशेषोऽनिच्छतोऽप्यसौ। व्यावृत्ते[15] निर्विशेषे तु किं व्यावर्त्यबहुत्वतः॥ २१॥ ६॥

॥ ॐ वैश्वानरस्साधारणशब्दविशेषात् ॐ ॥ ॥ २४ ॥ बहुलिङ्गसमायुक्तैर्बहुभी रूढनामभिः। प्रसिद्धैरन्यगत्वेन वाच्यस्साक्षाज्जनार्दनः॥ वैश्वानरादयः शब्दा अपि तद्वाचिनस्ततः॥२४॥

॥ ॐ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा

---

[1] प्रायशः अभावः = अन्योन्याभावः दृश्याद्यन्योन्याभावः इति ....
[2] एतयोः. [3] भेदः न भवेत्, गोत्रादिसंसर्गाभावस्य ब्रह्मभिन्नत्वात्, अभाववत्वस्य धर्मत्वात्. [4] अघटत्वम्. [5] अन्योन्याभाव. [6] तद्रूपान्= धर्मिस्वरूपभेदान् इति. [7] अन्योन्याभावस्वरूपभेदः. [8] क्रमेण. [9] अतिशयाः एव. [10] धर्मिणः. [11] इति व्यवहर्तृभिः. [12] विशेषवत्वेन. [13] स्वशास्त्रप्रदेशेषु. [14] धर्मराहित्य. [15] व्यावर्तनीये ब्रह्मणि.

SGDF
Sri Gargeshwari Digital Foundation

दृष्ट्युपदेशादसम्भवात्पुरुषविधमपि चैनमधीयते ॐ ॥ २६ ॥ तानि लिङ्गानि ते शब्दा अपि तद्वा हि[1] सर्वशः । बहुलाऽप्यङ्गरूढिस्त[2]त्प्राङ्गरूढिं न बाध्यते ॥ २६ ॥ ७ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने प्रथमाध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥ २९ ॥ श्लोकसङ्ख्या २८६ ॥

॥ ॐ ॥ तत्रान्यत्र प्रसिद्धानां लिङ्ग[3]नाम्नां[4] पुनर्हरिः । विशेषान्मुख्यतो वृत्तिं स्वस्मिन्नेवात्र वक्त्यजः ॥ ॐ नानुमानमतच्छब्दात् ॥ ३ ॥ विष्णावेवात्मशब्दस्य रूढत्वान्न शिवादिकान् । श्रुतिर्वक्ति ॥ ३ ॥ १ ॥

॥ ॐ भूमा[5] सं[6]प्रसादादध्यु[7]पदेशात् ॐ ॥८॥ अखिलेशत्वाद् भूमा विष्णुः सुखाधिकः ॥ ८ ॥ २ ॥

॥ ॐ अन्यभावव्यावृत्तेश्च ॐ ॥ १२ ॥ अतो विरुद्धवद्भातमपि व्याख्याय तत्त्वतः । योजनीयं हरौ वाक्यं विरुद्धैर्लक्षणैर्युतम् ॥ ब्रह्मैव तानि लिङ्गानि तदन्यत्र त्वसन्त्यपि । [8]अविरोधेन गोविन्दे सन्त्यस्थूलादिकानि च ॥ अन्यवस्तुस्वभावानां स्थौल्यादीनामपाकृतिम् । नारायणे श्रुतिर्वक्ति न तु तस्यास्वभावताम् ॥ सर्वधर्मा सर्वनामा सर्वकर्मा गुणाः श्रुताः । दोषाः श्रुताश्च नेत्याद्या प्रमाणं श्रुतिरत्र च ॥ ३ ॥

लिङ्गं साधारणं शब्दौ [9]स्थानं लिङ्गमनुग्रहः[10] । पुनश्शब्दा लिङ्गशब्दौ[11] विचार्यौ [12]द्विःस्थिता इह ॥ बाहुल्यं लिङ्गशब्दाना-

---

[1] विष्णुविषयाः. [2] तस्मात्. [3] यौगिकानाम्. [4] रूढानाम्.
[5] पूर्णसुखत्वात्. [6] सर्वाधिकत्वोक्तेः. [7] भूयान् धर्मिपरोऽयं शब्दः.
[8] सहैव सन्ति. [9] सृष्टिस्थानम्. [10] स्वानुकूलतया ग्रहणम्.
[11] स्वप्नादिदर्शनं ब्राह्मणशब्दाश्च. [11] विष्णु जगतोः उभयत्रप्रसिद्धाः.

SGDF
Sri Gurgeshwari Digital Foundation

मनुक्तिश्च विरुद्धता । अदृष्टिरन्वयाभावो विपरीत[1]श्रुतिभ्रमः ॥ लिङ्गावकाशराहित्यभ्रमस्तादृग्द्वयं तथा । बहुतादृक्त्वमुक्तस्य विरोधोऽर्थात्तथागतिः ॥ समस्तमेतदित्यत्र पूर्वपक्षेषु युक्तयः । ता एव बलवत्यस्तु गत्यन्तरविवर्जिताः ॥ सिद्धान्तयुक्तयो ज्ञेया दृश्यन्ते ताश्च सर्वशः । मुक्तोपसृप्यता प्राणादाधिक्यं सर्वतस्तथा ॥ वैलक्षण्यं स्वभावस्य प्रेक्षापूर्वक्रिया तथा । [2]अरस्य ण्यस्य चेशत्वं सूर्याद्यनुकृतिस्तथा ॥ वामनाख्या सर्वकम्पस्तच्छब्दानन्य[3]सिद्धता । अनामरूपता भेदस्योपजीव्यप्रमाणता ॥ सर्वैश्वर्यादिकाद्यास्ता वेदेशेन प्रदर्शिताः । अधिकारश्च तद्धानिः प्रसङ्गादेव चिन्तितौ ॥ २५ ॥ ७ ॥

॥ ओँ भावं तु बादरायणोऽस्ति हि ओँ ॥३३॥

तत्फलाय विधिः सिद्धे[4] चोपासाया[5] निराकृतः । यतो जैमिनिना[6]ऽन्यार्थमसिद्धेऽर्थे विधिस्तथा ॥ विद्याधिराजस्य मतमविरोधस्तयोस्ततः । मोक्षे फलविशेषोऽस्ति न च सर्वं प्रकाशते ॥ सर्वदा, तेन देवानामपि युक्ता ह्युपासना । [7]नित्यं वृद्धिक्षयापेतं विष्णोः पूर्णं तु वेदनम् ॥ स्पष्टातिस्पष्टविशदं [8]ब्रह्मणोऽशेषवस्तुगम् । अन्येषां क्रमशो ज्ञानं मितवस्तुगतं सदा ॥ [9]इत्यादयो विशेषास्तु सदा विद्यापतेर्हृदि[10] । जैमिन्याद्यास्तु सामान्यवेत्तृत्वात्तत्तथाऽवदन् ॥ विद्येशमतमेतस्मान्नैव सद्भिर्विरुध्यते ॥३३॥८॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने प्रथमाध्यायस्य तृतीयः पादः ॥ १ ॥ ३ ॥ श्लोकसंख्या ॥ २० ॥ ३०६ ॥

---

[1] अत्र न्यायविवरणं गुर्वर्थदीपिका च द्रष्टव्ये, एवं सङ्केतो नालौकिकः प्रतापरुद्रीये नाटकस्य पञ्चसन्धीनां उक्तिकाले सर्वत्र एवं सङ्केतस्य दृष्टत्वात्. [2] अरनामकस्य ण्यनामकस्य च सुधासमुद्रस्य. [3] अन्यत्रासम्भवः. [4] ज्ञाते ब्रह्मणि विषये. [5] विधिः. [6] फलान्तरार्थम्. [7] विष्णुभिन्नानां सर्वज्ञत्वासिद्धेरित्याह. [8] हिरण्यगर्भस्य. [9] मोक्षेफलविशेषोऽस्तीत्यादयः. [10] वर्तन्ते.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ तदधीनत्वादर्थवत् ॐ ॥ ३ ॥ दुःखिबद्धावराद्यास्तु तदधीनत्वहेतुतः । शब्दा ब्रह्मणि वर्तन्ते राज्ञि यद्वत्पराजयः[1] ॥ स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि[2] कारणम् । स्वातन्त्र्यं तत्र मुख्यं स्यात् कुतो राज्ञि जयोऽन्यथा ॥ न हि भृत्यस्य विजयिशब्दस्तावत्प्रयुज्यते । यावद्राज्ञ्यन्यगत्वेऽपि स्वातन्त्र्याभासमात्रतः ॥ भृत्यबन्धादिकं राज्ञि राज्ञो बन्धादियोग्यतः । कारणं संशयस्य स्यादिति नैव प्रयुज्यते ॥ अमङ्गलत्वाच्छब्दानां राज्ञो योगादमङ्गले । अप्रिय[3]त्वात्तु शब्दस्य स्यात्प्रयोगनिवर्तनम् ॥ गुणास्तु[4] तादृशा[5] यत्र[6] प्रयुज्यन्तेऽखिला अपि । [7]पूज्येष्वेव विशेषेण, [8]स्वातन्त्र्यं मुख्यकारणम् ॥ अतो दोषातिदूरत्वात्संशयस्याप्यसम्भवात् । दोषाणां विष्णुगत्वस्य[9] प्राज्ञबुद्धिव्यपेक्षया ॥ स्वातन्त्र्यार्थमभिप्रेत्य दोष[10]शब्दाश्च विष्णवि[11] । वासुदेवश्रुतिश्चाह 'नैव विष्णावमङ्गलम् ॥ मङ्गलामङ्गलेऽन्यत्र ततो नामङ्गलं वदेत् । स्वातन्त्र्यापेक्षया विष्णौदोषो नामङ्गलोक्तितः ॥ बहुभुक्त्वं यथा दोषो नृषु नैव हरौ क्वचित् । एवं दुःख्यादिशब्दाश्च स्वातन्त्र्यापेक्षयोदिताः ॥ नैव दोषा हरौ तद्बुद्ध्योक्ता दोषकारिणः । तस्मात्ते दोषशब्दाश्च तत्रैव गुणवाचकाः' ॥ ३ ॥ १ ॥

॥ ॐ ज्योतिरुपक्रमात्तु तथाह्यधीयत एके ॐ ॥ ॥१०॥ [12]जातमोतं हरौ यस्माज्ज्योतिः षः प्राणरूपतः । [13]आयजेतश्चायजेतो वसन्तिश्च वसंस्ततः[14] ॥ विगतच्छादनत्वात्तु गच्छ

---

[1] तन्निमित्तकः पराजयीति शब्दः. [2] प्रवृत्तेः. [3] अप्रीतिहेतुत्वात्. [4] गुणाभिधायिनः. [5] स्वाम्यनिमित्तकाः शब्दाः. [6] यर्हि तर्हि. [7] स्वामिषु. [8] अतः. [9] तद्विषयकस्य. [10] दुःख्यादिदोषशब्दाः. [11] विष्णौ प्रयुज्यन्ते. [12] जन्यं, ओतं=प्रविष्टं यस्मिन्. [13] सम्यक् यजेन=यज्ञेन याजकेन वा इतः प्राप्तः. [14] व्याप्तः.

SGDF
Sri Gargeshwari Digital Foundation

भूतक्षयङ्करः । भुंक्ष्वेत्युक्तो हरिर्हुं च हुतमस्मिन् जगद्यतः ॥ [1]स्फुटत्वात्फडिति प्रोक्तः कव रक्षण इत्यतः । कवचं, [2]वर्तते यस्मात्षड्गुणत्वेन सर्वदा ॥ वषट् तद्गत्वतस्तेषां[3] वौष[3]डित्येव कथ्यते । स्वीयं स्वीकुरुते यस्मात्स्वाहेत्युक्तो जनार्दनः ॥ नमन्त्यस्मिन् गुणा यस्मान्नम इत्येव कथ्यते । इत्यशेषक्रियानामशब्दैरेको जनार्दनः ॥ उच्यते मुख्यतो यस्मात्पदवर्णस्वरात्मभिः । तस्मादनन्तगुणता[4] श्रुतितात्पर्यतोऽस्य हि ॥ विज्ञानार्थत्वतः[5] सर्वशब्दानां नास्ति दूषणम्[6] । अङ्गीकृतेऽपि नैवास्ति दोषो वाक्यसमन्वये ॥ तदर्थत्वेन कर्मादेः [7]सम्भवादल्पबुद्धये[8] । 'कश्छन्दसां योगमि'ति श्रुतेर्योगार्थ-तत्त्ववित् ॥ ब्रह्मैको नैव चान्योऽस्ति क इत्यस्योभयार्थतः । तस्यापि पूर्वसिद्धस्य[9] ज्ञानमेवेति निश्चयात् ॥ [10]नित्ययोगोऽपि शब्दानामर्थैर्नैव निषिध्यते ॥ १० ॥ २ ॥

॥ ॐ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॐ ॥ ॥ २४ ॥ ॥ ॐ एतेन सर्वे व्याख्याता व्याख्याताः ॐ ॥ २९ ॥ [11]स्त्रीशब्दाश्च निषे[12]धार्थाः सर्वेऽपि ब्रह्मवाचकाः ॥ ॥ ६ ॥ ७ ॥ विरोधिसर्वबाहुल्यकारणस्त्रीनिषेधिनाम् । पृथक्समन्व-यार्थानि स्थाना[13]न्येतानि सर्वशः ॥ सर्वमानैर्विरोधश्च व्युत्पत्तेरप्य-शक्यता । परस्परविरोधश्च विरोधः कार्यतद्वतोः ॥ स्त्रीलिङ्गत्वं निषेधश्च पूर्वपक्षेषु युक्तयः । दोषात्यस्पृष्टिनियमः शब्दार्थानेकता तथा ॥ बहुरूपत्वमीशस्य व्यक्त्यव्यक्तिविशेषिता । उत्पादनं स्वदेहाच्च

---

1 स्वात्मानंप्रतिव्यक्तत्वात्. 2 इति वः. 3 वौ=विष्णौ, स्थिताः. 4 सिद्ध्यति. 5 परमात्मज्ञानार्थत्वतः. 6 अनित्यत्वादि. 7 न वाक्यान्वयानुपपत्तिः. 8 बुद्धये-बुद्धीनाम्. 9 स्थितस्य, ज्ञातस्य. 10 अर्थैः नित्यसम्बन्धः. 11 स्त्रीलिङ्गाः प्रकृत्यादि शब्दाः. 12 असदादयः. 13 अधिकरणानि.

SGDF
Sri Gangeshwari Digital Foundation

दुर्जनाव्यक्तता तथा । इत्यादियुक्तयः साक्षात्सिद्धान्तस्थापिका इह ॥ ॥ ८ ॥ ॐ समाकर्षात् ॐ ॥ १६ ॥ अन्वयः सर्वशब्दानामशक्यो ज्ञातुमञ्जसा । इति [1]यल्लोकवैमुख्यं जैमिन्यादिमतं वदन् ॥ विद्याधिनाथो भगवानपाचक्रे स्वयं प्रभुः । स्वशिष्याणां प्रसिद्ध्यर्थं मतमात्मीयमंशतः ॥ विज्ञातं तैर्जगादात्र [2]तारतम्यं [3]नृणां वदन् ॥

॥ ५ ॥ ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॐ ॥

॥ ११ ॥ तेषु तेषु पदार्थेषु रूढिरङ्गीकृता यतः । प्रयोजनबहुत्वेन तस्य [4]तस्याविरोधतः ॥ [5]उपदेशादि सामर्थ्याद्विष्णौ शक्तिश्च गृह्यते । तथाप्येतद्विरोधे तु तद्वाचित्वमपोह्यते ॥ अविरोधे तु [6]बह्वर्था एतन्मूलतया मताः । इतो हि रूढताऽन्येषा[7]मुपजीव्यत्वमत्र हि ॥ तत्सिद्धि[8]स्तदपेक्षा[9] च[10] साऽपेक्षा च हरीच्छया । तस्मात्परममुख्यत्वं विष्णावन्यत्र मुख्यता ॥ उपलक्षणा च गौणी च[11] तिस्रः शब्दस्य वृत्तयः । [12]प्रवृत्तिहेतोर्बाहुल्यं[13] ज्ञेयं परममुख्यता ॥ तत्र प्रयोगबाहुल्यं यदि [14]तत्परता किमु । उभयं दृश्यते विष्णौ शब्दानामपि सर्वशः ॥ प्रयोगमात्रबाहुल्यं[15] रूढिरित्यभिधीयते । प्रयोग[16]युक्तसादृश्यं सम्बन्धो वाप्यमुख्यतः[17] ॥ [18]वृत्तिहेतुरिति ज्ञेयः [19]पूर्वायोगेऽपर[20]ग्रहः । एतमेव तथा सन्तं शतर्चीत्यादिनामभिः ॥ आचक्षत इति ह्यत्र [21]सन्तमि[22]त्यवधारणात्(णा) । योगस्य रूढेः प्राबल्यं विद्धद्रूढिं च तत्रगाम् ॥

---

[1] मन्दानां मोक्षे विमुखत्वं अपाचक्रे. [2] अवस्थातारतम्यम्. [3] अल्पाधिकारिणाम्. [4] अर्थस्यापरित्यागेन. [5] श्रुतिलिङ्गादि. [6] अनेकार्थाः. [7] पुरन्दरादीनां रूढता इतो हि=विष्णोरेव. [8-10] तच्छब्दप्रवृत्तिप्रतीतिरेव. [9] अर्थान्तरापेक्षावती. [11] सा. अपेक्षा = विष्णौ शब्दानाम्. [12-13] अर्थान्तरापेक्षा. [14] तस्याः मुख्यता. [15] यत्र तत्र. [16] मुख्यार्थेन. [17-18] अमुख्यवृत्तेर्हेतु. [19] मुख्यासम्भवे. [20] उत्तरस्यामुख्यस्य स्वीकारः. [21] सन्तमितिवचनात्. [22] एतमेवेति.

SGDF
Sri Gargeshwari Digital Foundation

बहुशो दर्शयत्यञ्जस्तात्पर्यात्सनिरुक्तिकम् । अ इति ब्रह्म कथितं तद्व्याख्यानात्मता तथा ॥ शब्दानामपि सर्वेषां, [1]नामवित्कृतकृत्यता, । [2]विष्णुनामार्थरूपत्वं संहितादेरथाब्रवीत् ॥ णकारं च षकारं च बलचेष्टात्मकं वदन् । तज्ज्ञानपूर्वकत्वेन संहिताध्ययनं[3] तथा ॥ उपसर्गत्वतो वेस्तु ताच्छील्यार्थादुनस्तथा । णकारश्च षकारश्च नामरूपतया मतौ ॥ तस्मात्समन्वयो विष्णौ स्वरवर्णपदात्मनः । अपि वेदस्य किमुत वाक्यरूपेण सङ्गतिः[4] ॥ घोषाः सर्वेऽपि वेदाश्च सर्वे वेदाश्च यत्पदम् । इन्द्रं मित्रं यमिन्द्रं च प्रथमः सङ्गतिस्तथा ॥ नामधाः सर्वदेवानामेक इत्यादिका श्रुतिः । प्रमाणमुक्तविषये तदेवोक्त'मुपक्रमात्' ॥ इति स्वयं भगवता ब्रुवताऽशेषमन्वयम् ॥२॥

[5]न शब्दवाच्यतैवात्र[6] प्रधानस्य निषिध्यते । सर्ववेदेतिहासेषु पुराणेषु च[7] सङ्ग्रहात् ॥ [8]सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ॥ निबध्नन्ति महाबाहो देहे देहिनमव्ययम् । इत्यादिवाक्य[9]रूपेण यत्रार्थो नान्य[10] इष्यते ॥ तेजोऽबन्नात्मकं वाऽपि यद्युपादानमिष्यते । अनाद्येवापराधः कः प्रधानमिति चोदिते ॥ अजामेकामिति प्राह श्रुतिरेतां यदा तदा । को दोषः सर्वथैवास्ति परिणामि जडं यदि ॥ [11]अस्माकं परमुख्यार्थो भगवानेक एव तु । मुख्यमात्रतया रूढं सर्वमभ्युपगम्यते ॥ सर्वेषामपि शब्दानां गौणाद्यं तद्योगतः । अर्थद्वयमभिप्रेत्य [12]प्रवृत्ते हरिरुक्तवान् ॥ '[13]कार्याणां

---

[1] तृतीयमानमिदंछान्दोग्यं नामज्ञानिनो मुक्तत्वम्. [2] चतुर्थमानं, ऐतरेयोपनिषत्. [3] अब्रवीत्. [4] समन्वयः. [5] अद्वैतिव्याख्यानं निराह दशवारं योजनाऽस्य वाक्यस्य सुधायाम्. [6] अत्रैव=प्रथमाध्याये. [7] प्रधानस्य. [8] गीता १४-५. [9] वाक्यबोधेन त्रिगुणत्वादिना युक्तस्य प्रधानस्य संग्रहात्. [10] ब्रह्मरूपः. [11] तु मते. [12] प्रवृत्तनामके पञ्चरात्रैकदेशे जितन्तेस्तोत्रे. [13] महदादीनाम्.

SGDF
Sri Gargeshwari Digital Foundation

कारणं [1]पूर्वं वचसां वाच्यमुत्तमम् । योगानां[2] परमां सिद्धिं[3] परमं ते पदं विदुः' ॥ इति, बुद्धौ समारोहादुभयोर्योगरूढयोः । त्यागे च कारणाभावादुभयार्थत्वमिष्यते ॥ विपरीतप्रमा[4]भावे [5]पूर्वारोहस्तु कारणम्[6] । सा भवेद्यत्र स व्यर्थः पूर्वारोहो भ्रमो यथा ॥ अतो-जगदुपादानं प्रधानं वक्ति सा श्रुतिः[7] ॥ १ ॥ 'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ पञ्चभिः पञ्चभिर्ब्रह्म[8] चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः' ॥ इति भागवते प्राह विद्याधीशः स्वयं प्रभुः ॥२॥ न च प्रकृतिशब्देन ब्रह्मोपादानमुच्यते । 'अविकारः सदा शुद्धो नित्य आत्मा सदा हरिः ॥ सदैकरूपविज्ञानबलआनन्दरूपकः' । 'निर्विकारोऽक्षरः शुद्धो निरातङ्कोऽजरोऽमरः ॥ अविश्वो विश्वकर्ताऽजो यः परः सोऽभिधीयते' । 'निर्विकारमनौपम्यं सदैकरसमक्षयम् ॥ ब्रह्मेति परमात्मेति यं विदुर्वैदिका जनाः' । इति श्रुतिपुराणोक्त्या न विकारी जनार्दनः ॥ पराधीनविशेषा[9]प्तिरनिवर्त्योऽ[10]न्यथाभवः[11] । क्षीरादिवद्विकारः स्यान्नैव स स्याद्धरेः क्वचित् ॥ अपादान[12]त्वमेवास्य यद्युपादानतेष्यते । अङ्गीकृतं तत्पितृवन्न तु विश्वात्मना भवः ॥ न चोर्णनाभिजनितृमातॄणां च विकारिता । चेतनत्वात्तदन्नं हि कार्यरूपतया भवेत् ॥ अपादानतया विश्वकर्तृत्वं बुद्धिपूर्वकम् । उक्तं [13]भाल्लविशाखायां ब्रह्मतर्के च सादरम् ॥ 'इच्छामात्रात्प्रभोः सृष्टि-रविकारस्य सर्वदा ॥ स्वभावोऽयमनन्तस्य [14]रजो येना[15]भवज्जगत्'[16] ।

---

[1] मुख्यम्. [2] योगवृत्तीनाम्. [3] सिध्यन्ति अत्रेति सिद्धिः [4] बाधकज्ञानाभावे. [5] पूर्वप्रतीतिः. [6] स्वीकारकारणम्. [7] अजामेकामिति-श्रुतिः. [8] पूर्णम्. [9] धर्मपरिवृत्तिः धर्मिपरिवृत्तिश्च. [10] निवर्त्यश्च. [11] परिणामः. [12] अपायावधित्वम्. [13] भाल्लविश्रुतिः न अप्रसिद्धा ब्र.सू. ३-३-२६. शां. भाष्ये. तद्यथा भाल्लविनां कुशा वानस्पत्या स्थिता मापात' इति निगमे, इत्युक्तेः. [14] गुणत्रयात्मकम्. [15] प्रेरितम्. [16] भाल्लवश्रुतिः.

SGDF
Sri Gangeshwari Digital Foundation

'स्वदेहादिच्छया विश्वं भुक्तपूर्वं जनार्दनः ॥ ससर्ज मातापितृवदूर्णनाभिवद्देव वा। प्रधानं परिणाम्येशो निर्विकारः स्वयं सदा[1]'॥ न चेतनविकारः स्याद्यत्र क्वापि ह्यचेतनम्। नाचेतनविकारोऽपि चेतनः स्यात्कदाचन ॥ न चान्यस्यान्यरूपत्वं[2] [3]विकृतत्वेऽपि दृश्यते। न क्षीरादन्यता दध्नः केनचिद्दृश्यते क्वचित् ॥ सर्वज्ञाद्ब्रह्मणोऽन्यत्वं जगतो ह्यनुभूयते। अभेदः सत्त्वमात्रेण[4] स्यात्खर्व[5]स्वर्णयोरपि ॥ [6]भागेन परिणामश्चेद्भागयोर्भेद एव हि। यो भागो[7] न विकारी स्यात्स एवास्माकमीश्वरः ॥ [8]भिन्नानां समुदायस्य नाम[9] ब्रह्मेति त (चे)द्भवेत्। ब्रह्मोपादानता न स्यात्तदा विश्वस्य हि क्वचित् ॥ शृङ्गाच्छरोऽविलोमभ्यो दूर्वा, गोमयतस्तथा। वृश्चिकश्चेत्येवमाद्येष्वपादानत्वमिष्यते ॥ उपादानैकदेशत्वं यद्यप्यत्र प्रदृश्यते। अप्यपादानतैवात्र दृष्टान्तो ब्रह्मणो भवेत् ॥ न ह्युपादानतैवात्र बाह्यावयवगौरवात्[10]। न चाचेतनतस्तत्र चेतनस्य समुद्भवः ॥ उपादानतया, किं तर्ह्यपादानं ह्यचेतनम्। कार्यदेहगतस्यास्य चेतनस्य प्रदृश्यते ॥ [11]सच्च त्यच्चाभवदिति नास्य विश्वत्वमुच्यते। तत्सृष्ट्वेति गिरैवास्य पूर्वं विश्वस्य सिद्धितः ॥ [12]सत्त्वात्तते-[13]र्वैदिकत्वात्सम्यग्वक्तुमशक्यतः। आश्रयत्वात्स्वाश्रयत्वाज्ज्ञानत्वाद्दुर्विदत्वतः ॥ [14]सत्ततेर्यातनाच्चैव[15] [16]ह्यप्राप्यत्वाच्च दुर्जनैः। नित्यसाधुगुणव्याप्तियन्तृ[17]रूपत्वतः सदा ॥ जगद्गतेन रूपेण ब्रह्मैव हि तथोच्यते। व्यक्तिरुक्तगुणानां हि पुरुषापेक्षया नृणाम् ॥

---

[1] ब्रह्मतर्के. [2] अन्यविकारत्वम्. [3] विकृतत्वदशायाम्. [4] साध्यते-चेत्. [5] अयः खर्परं वा. (हंचु). [6] सद्भागेन. [7] चिद्भागः. [8] सदानन्दचिताम्. [9] ब्रह्मेतिनाम. [10] कार्याद् बाह्यावयवानां बहुत्वात्. [11] इति ब्रह्मणो जगदुपादनत्वाभावे श्रुतियुक्तिनिरासः अथ उपादानत्वे परोक्तश्रुति निरासः. [12] सत्. [13] तत्. [14] सम्यग्व्याप्तेः सत्=सती, त्=ततिः यस्य तत् सत् सत् च तत् यं च सत्यं (शे.वा.चं.). [15] प्रयत्नहेतुत्वात् प्रेरणात्. [16] अनृतम्. [17] सत्यम्.

SGDF
Sri Gargeshwari Digital Foundation

भवेदभवदित्याद्यः प्र(त्यस्मात्प्र)योगश्चात्र युज्यते । तस्मादशेषकर्तैको निर्विकारो रमापतिः ॥ शब्दैः प्रकृतिरित्याद्यैः स्त्रीलिङ्गैरभिधीयते । बहु स्यामिति तस्यैव ह्युक्तमार्गेण युज्यते ॥ तत्तद्गतेन रूपेण [1]तदर्थं ह्यसृजज्जगत् । [2]यच्चाविकृतमेवैकं ब्रह्म विश्वात्मना [3]मृषा ॥ दृश्यते मन्ददृष्ट्यैव[4] स सर्ग इति कथ्यते । सा [5]मन्ददृष्टिस्तस्यैव ब्रह्मणः किं ततोऽन्यगा[6] ॥ ब्रह्मणश्चेत्क सार्वज्ञमन्यगा चेत्स्वतोऽन्यता । नादेह-[7]योगिनो [8]दृष्टिरिति [9]तत्कारणं [10]स्वतः ॥ देहिनः कारणयुता देहाश्च यदि न भ्रमात् । किं भ्रान्तिकल्पितं तत्र भेदोऽपि भ्रमजो [11]यदि ॥ भ्रान्तेरज्ञानमूलत्वात्तस्य भेदव्यपेक्षया[12] । नाज्ञानकल्पकं किञ्चि-दन्योऽन्याश्रयता[13] यतः ॥ [14]भ्रमत्वे त्विय[15]मुक्तिश्च तदन्तःपतनान्न[16] हि । व्यावहारिकता [17]चास्य स्यादबाध्यत्व एव हि ॥ बाध्यं नार्थ-क्रियाकारि, न च स्वप्नोऽपि नो मृषा । वासनाजनितत्वेन तस्याप्यङ्गीकृतत्वतः ॥ 'स हि कर्तेति' वाक्याच्च जाग्रत्त्व[18]मिति हि भ्रमः । [19]सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम् ॥ तदेवार्थ-क्रियाकारि तत्सदेवार्थकारकम् । ब्रह्म त्वर्थक्रियाकारि [20]परतः स्वत एव वा ॥ अङ्गीकृतं हि तेनैव परतस्त्वे न च प्रमा । अमुख्य-सत्यमानस्य साधकत्वे सदावयोः ॥ न हि सम्प्रतिपत्तिः स्यादत-स्तिष्ठतु सा प्रमा । न हि विप्रतिपन्नेन शक्यं साधयितुं क्वचित् ॥

---

[1] नियामकबहुरूपत्वार्थम्. [2] विवर्तवाद निरासारम्भः. [3] मिथ्या अनिर्वचनीयतया. [4] मन्दा दृष्टिर्यया मायया भ्रान्त्या च. [5] माया अज्ञानम्. [6] जीवगता. [7] देहसम्बन्धरहितस्य. [8] पदार्थदर्शनम्. [9] इन्द्रियदेहादि. [10] कल्पनां विना अस्ति. [11] तदा अन्योन्याश्रयता स्यात्. [12] स्थितत्वात्. [13] चक्रकम्. [14] देहादेः भ्रान्तिसिद्धत्वे. [15] नेहनानेति श्रुतिः. [16] मिथ्या स्यात्. [17] प्रपञ्चस्य. [18] जाग्र-त्कालीनवस्त्वैक्यम्. [19] अभ्युपगमवादोऽयं, सर्पतया ज्ञातरज्जोरेव भयहेतुत्वात् इति ३. २. ४ तत्त्वप्र. भावदीपे स्पष्टम्. [20] मायातः

SGDF
Sri Gangeshwari Digital Foundation

साधकत्वं तु सत्यस्य साक्षिणो ह्यावयोर्द्वयोः । सम्यक्सम्प्रतिपन्नं तन्न विवर्तमतं भवेत् ॥ यदि नाङ्गीकृतं किञ्चिदनङ्गीकृतताऽपि हि । नाङ्गीकृतेति मूकः स्यादिति नास्मद्विवादिता ॥ 'विश्वं सत्यं' 'यच्चिकेत' 'प्रघान्वस्य' [1]यथार्थतः । इत्यादिश्रुतयः सर्वा विश्वसत्यत्ववाचिकाः ॥ सत्यत्वं [2]गगनादेश्च साक्षिप्रत्यक्षसाधितम् । साक्षिसिद्धस्य न क्वापि बाध्यत्वं तददोषतः ॥ सर्वकालेष्वबाध्यत्वं साक्षिणैव प्रतीयते । कालो हि साक्षिप्रत्यक्षः सुषुप्तौ च प्रतीतितः ॥ अतीतानागतौ कालावपि नासाक्षिगोचरौ । पक्षीकर्तुमशक्यत्वान्नानुमा तत्र वर्तते ॥ [3]तदेतदिति सर्वं च दृश्यं वा स्मृतिगोचरम् । साक्षिसिद्धेन कालेन खचितं ह्येव वर्तते ॥ तस्मान्न तं विना किञ्चित्स्मर्तुं द्रष्टुमथापि वा । शक्यं तन्नित्यसिद्धेर्हि नानुमाऽवसरो भवेत् ॥ अतोऽदोष[4]प्रतीतस्य[5] सत्यत्वं साक्षिणा मतम् । परीक्षादेश्च [6]सत्यत्वं तेन ह्येव मतं भवेत् ॥ अन्यथा श्रुतियुक्त्यादिप्रमाणैश्च सहैव तु । अकस्माद्विनिवृत्तिश्च किं [7]विश्वस्य न शङ्क्यते ॥ इतः पूर्वं [8]तथा भावाद्यदि[9] नो [10]संसृतेर्गतिः[11] । [12]वाक्यानुमादितश्चेत्स्यात्तत्प्रामाण्यं च साक्षितः ॥ तत्प्रामाण्यं यथा [13]साक्षी स्थापयत्येवमेव हि । सर्वकालेष्वपि स्थैर्याद्व्यभिचारमपोह्य च[14]॥ एवमक्षजमानत्वसिद्धां विश्वस्य सत्यताम् । किमिति स्थापयेन्नायं निर्दोषज्ञानशक्तितः ॥ एकाज्ञानकृतं[15] विश्वमिति यच्चोच्यते मृषा[16] । बहुज्ञानकृतं विश्वमिति तस्योत्तरं भवेत् ॥ परस्य सत्यतां जानन्नपि यः [17]स्वात्मतस्करः । परो नास्तीति वदति किमित्युन्मत्तवद्वदेत् ॥

---

[1] याथातथ्यतोऽर्थान्. [2] आकाशकालयोः साधकानुमाननिरासविस्तारः सुधायां. [3] एतदिति दृश्यं तदिति स्मृतिगोचरम्. [4] दोषरहितेन प्रत्यक्षादिना. [5] प्रपञ्चस्य. [6] यथार्थत्वम्. [7] पूर्णस्य ब्रह्मणः. [8] निवृत्त्यभावात्. [9] यदिब्रह्मणो निवृत्तिर्न शङ्क्यते. [10] अविद्यायाः. [11] निवृत्तिः [12] श्रुति. [13] वर्तमानकालीनम्. [14] एवं स्थापयति. [15] एकजीवगताज्ञानकृतम्. [16] प्रमाणेनविना. [17] स्वानुभवापलापकः.

SGDF
Sri Gargeshwari Digital Foundation

पराभावेऽपि वाग्व्यर्था, यदि नैवोच्यते तदा। कशावेत्रादिकं तस्य [1]तस्करस्योत्तरं वदेत्॥ [2]प्रपञ्चो यदि विद्येत निवर्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥ विकल्पो विनिवर्तेत कल्पितो यदि केनचित्। उपदेशादयं वादोऽज्ञाते द्वैतं न विद्यते॥ इत्यत्र यदि शब्दौ च निवर्तेतेति च द्वयम्। विश्वस्य सत्यतामाहुर्विद्येतो[3]-त्पत्तिमेव[4] च॥ विदोत्पत्ताविति ह्यस्माद्धातोरुत्पत्तिरेव हि। निवृत्ति[5]-व्याप्तियुक् [6]प्रायः [7]प्रपञ्चो भेदपञ्चकः॥ जीवेश्वरभिदा चैव जडेश्वरभिदा तथा। जीवभेदो मिथश्चैव जडजीवभिदा तथा॥ मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः॥ सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात्। द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम्॥ इति श्रुतेर्मितं त्रातं मायाख्य-हरिविद्यया। उत्तमोऽर्थो हरिस्त्वेकः तदन्यन्मध्यमाधमम्॥ [8]वाचारब्धं तु [9]साङ्केत्यनाम स्याद्विकृतं[10] बहु[11]। नित्यं तु नामधेयं यन्मृत्तिकेत्यादि वैदिकम्॥ प्राधान्यात्तत्परिज्ञानात्प्राकृता[12]ज्ञोऽपि पूरुषः। विद्वा-नित्युच्यते सद्भिरेवं नित्यपरात्मवित्[14]॥ [15]सदातनं सत्यमिति नित्यमेवोच्यते बुधैः। प्रयोगश्चोत्तरत्रास्ति 'जरा यद्येन[16]माप्नुयात्॥ देहः प्रध्वंसते [17]चायं किं [18]ततो[19]स्याति[20]शिष्यते। हन्यते न वधेनायं जरया च न जीर्यते॥ एतत्सत्यं[21] [22]ब्रह्मपुरमि'ति नित्यत्व एव हि। वाचारम्भणमित्युक्ते[23] मिथ्ये[24]त्यश्रुतकल्पनम्॥ पुनरुक्ति-

---

1 सकललोकावगतार्थापलापिनः. 2 माण्डूकोपनिषदेवेयं न गौडपाद-कारिका तदेतौ श्लोकौ भवत इत्यारभ्य प्रवृत्तत्वात् तदप्येष श्लोको भवतीतिवत्. 3 विद्येत इत्येतत्. 4 आह. 5 विनाशेन. 6 प्रध्वंसाभावे नाशाभावात्प्रायः इति. 7 प्रपञ्चशब्दार्थः. 8 वाचा आरम्भणम्. 9 प्राकृतभाषाशब्दः. 10 विक्रियते इति विकार. 11 विविधः कारः विकार इत्यस्यार्थः. 12 प्रकृतिनिर्मितस्य सर्वस्य अज्ञानवान्. 14 विद्वानित्युच्यते. 15 सदाभवम्. 16 देहम्. 17 वा. 18 तदा. 19 देहस्यान्तर्गत हरिः. 20 अविशिष्यते. 21 नित्यम्. 22 पूर्णम्. 23 शब्दे. 24 व्याख्यायमाने.

SGDF
Sri Gangeshwari Digital Foundation

र्नामधेय[1]मितीत्यस्य[2] निरर्थता । एकः पिण्डो मणिश्चेति पद्वैय[3]र्थ्य-मेव च ॥ विकारित्वविवक्षायां न चैकनखकृन्तनम् । सर्वं कार्ष्णायसं च स्यादतः सादृश्य एव च ॥ विवक्षाऽत्र[4] तु नित्यत्वे प्राधान्ये चोक्तवर्त्मना[5] । प्राधान्यप्रतिपत्त्यर्थं सृष्ट्यादेश्चैष विस्तरः ॥ तस्मात्केनापि मार्गेण न विवर्तमतं भवेत्[6] । तदसङ्ख्यातदोषेतं हेयमेव शुभार्थिभिः ॥ असङ्ख्यत्वेन दोषाणां ग्रन्थाधिक्यभयादपि । उपरम्यते [7]ततो विष्णुरिच्छापूर्वकमश्रमः ॥ करोति पितृवद्विश्वं पूर्णाशेष-गुणात्मकः ॥ ६ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने प्रथमाध्यायस्य चतुर्थः पादः ॥ १ ॥ ४ ॥ ॥ श्लोकसङ्ख्या ॥ २७ ॥ ४३१ ॥ प्रथमाध्यायस्समाप्तः ॥

---

[1] अनेन पुनरुक्तिः. [2] मृत्तिकेति इति शब्दस्य. [3] विगतार्थत्वं विरुद्धार्थत्वं च. [4] श्रुतौ. [5] प्राधान्ये च विवक्षा. [6] उपपन्नम्. [7] परिणामवादस्य निरस्तत्वात्.

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ द्वितीयाध्यायः ॥

॥ ॐ ॥ उक्तः समन्वयः साक्षादविरोधोऽत्र साध्यते । चतुर्विधस्य तस्यादौ यौक्तस्तत्रापि च स्मृतेः ॥ तस्याश्चतुस्स्वरूपत्वात्प्रत्येकं चतुरात्मकाः[1] । पादाः[2] सर्वे तदंशाश्च[3] मूर्तीनां[4] [5]वर्णमागमात्[6] ॥ आप्तता समताऽदृष्टिश्रुतिसाम्यबलोद्भवाः । सर्वानुसारो लघुता विशेषादर्शनाफले ॥ इष्टासिद्धिश्च नियमः पूर्वपक्षेषु युक्तयः । एता एव त्वतिबलाः सिद्धान्तस्य नियामिकाः ॥ॐ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॐ ॥ १ ॥ आप्तैः प्रत्यक्षतो दृष्ट्वा प्रोक्तमर्थं कथं श्रुतिः । पिपीलिकालिपिनिभा वारये[7]त्सर्वगा हि ते ॥ इति चेद्यद्य[8]शेषज्ञा रुद्राद्या हरिपूर्वकाः । किं नाशेषविदो मानं ह्युभयत्र[10] [11]समं भवेत् ॥ न चाप्तिनिश्चयस्तत्र[12] शक्यते व्यभिचारतः[13] । न चास्या[14] व्यभिचारेऽपि[15] हीयते मानता क्वचित् ॥ [16]निर्दोषवाक्यमूलत्वान्न च तद्युक्तिमूलता । वेदोक्त[18]स्याधिकारस्य[19] दुर्निरूपत्वतः[20] सदा[21] ॥ नियमो व्यभिचारो[22] वा नैव ज्ञातुं हि शक्यते । अधिकारो[23] हि सुलभः कथितोऽन्यागमेष्वलम् ॥ वेदोक्तो ह्यधिकारस्तु दुर्लभस्सर्वमानुषैः । अन्यागमेषु विप्रत्वमपि चण्डालजन्मनाम् ॥ मण्डलान्तः-

---

[1] पादचतुष्टयार्थवन्तः. [2] चत्वारोऽपि. [3] पादरूपांशवन्तः अध्यायाश्च चतुरात्मकाः. [4] चतुर्मूर्तीनां प्रतिपादकत्वेनापि चतुरात्मकत्वम्. [5] आ वर्णम्=एकैकवर्णमारभ्य. [6] आ आगमात्=सर्वशास्त्रपर्यन्तं तेन मूर्तयः प्रतिपाद्याः. [7] सर्वज्ञाः. [8] चेत् तन्न. [10] द्वयोः स्मृत्योर्मध्ये यत्. [11] मया मूलप्रमाणेनसहितम्. [12] शिवादिषु. [13] अन्योन्यविरोधात्. [14] पञ्चरात्रादि स्मृतेः. [15] फलव्यभिचारेऽपि. [16] वेदमूलत्वात्. [18] अनुष्ठाने उपयुक्तस्य. [19] निषेकादिसंस्कारस्य. [20] अस्मदाद्यप्रत्यक्षत्वतः. [21] स्वभावतः. [22] फलस्य. [23] साधनं च.

SGDF
Sri Gangeshwari Digital Foundation

प्रवेशेन क्रमशः प्रतिपाद्यते । अधिकारं दुरापाद्यमुक्त्वाऽतिसुलभं पुनः[1] ॥ अशक्यं साधनं चोक्त्वा सुशकं तत्फलाप्तये । उच्यतेऽतस्तदुक्तं हि व्यभिचारि फले[2]ऽपि तु ॥ कथं प्रमाणतां गच्छेत् ॥१॥

॥ ॐ [3]न [4]विलक्षणत्वादस्य[5] [6]तथात्वं च शब्दात् ॐ ॥ ४ ॥ नित्यत्वात्पुरुषोद्भवैः । उज्झितं सर्वदोषैश्च कथं नो मानतां व्रजेत् ॥ 'विरूप नित्यया वाचा नित्ययाऽनित्यया सदा'[7] । इत्यादिश्रुतिभिर्वेदो नित्य इत्यवगम्यते ॥ पिपीलिकालिपिश्चापि [8]प्रमाणमविरोधतः । यथा द्रौणेरुलूकेन कृतमप्यास बोधकम् ॥ अविरुद्धं [9]विरुद्धं तु विरोधादेव बाधितम् । विरोधादर्शनात्तस्माद्वेदप्रामाण्यमिष्यते ॥ तन्मूलत्वात्स्मृतीनां तु[10] विरोधो [11]यत्र न क्वचित् । [12]विरोधोऽपि स एवोक्तः[13] प्रत्यक्षेणागमेन वा ॥ आगमेनागमस्यैव विरोधे [14]युक्तिरिष्यते । उपजीव्यविरोधे तु वेदस्यान्यार्थकल्पना ॥ प्रत्यक्षमुपजीव्यं स्यात्प्रायो युक्तिरपि क्वचित् । आगमैकप्रमाणेषु तस्यैव ह्युपजीव्यता ॥ [15]युक्तोऽयुक्तश्च यद्यर्थ आगमस्य प्रतीयते । स्यात्तत्र[16] युक्त एवार्थो युक्तिश्च त्रिविधा मता ॥ व्याप्तिः प्रत्यक्षगा[17] यस्या युक्तिगाऽऽगमगा तथा । प्रत्यक्षागममूला तु युक्तिस्तत्र बलीयसी ॥ याथार्थ्यमेव [20]मानत्वं तन्मुख्यं ज्ञानशब्दयोः[20] । अर्थत्वमर्यतैव[21] स्यान्न क्रियार्थेषु सा मता ॥ [22]ज्ञानार्थे ज्ञेयता मुख्या

---

[1] ब्रवीति. [2] फलविषयेऽपि व्यभिचारि. [3] न अप्रामाण्यम्. [4] नित्यत्वात्. [5] वेदादेः. [6] नित्यत्वम्. [7] सदा विद्यमानया. [8] प्रमा भावसाधनं सामानाधिकरण्यं गौणम्. [9] प्रमाणविरुद्धम्. [10] प्रामाण्यमिष्यते. [11] यासु स्मृतिषु. [12] प्रमाणविरोधः [13] विरोधादेव बाधितमित्युक्तः. [14] मीमांसाशास्त्रे. [15] युक्त्युपेतः. [16] तर्हि. [17] प्रत्यक्षगम्या. [20] प्रमाणलक्षणम्, वेदम्. [21] अर्यता, आर्यता, ज्ञेयता. [22] ज्ञानविषये.

SGDF
Sri Gargeshwari Digital Foundation

शब्दार्थे[1] [2]तदनन्तरम् ॥ यथार्थज्ञानजनका [3]यथार्था [4]युक्तयः स्मृताः । अनुप्रमाणमेतानि ह्यक्षयुक्तिवचांस्यतः ॥ प्रामाण्यं नानुवादस्य स्मृतेरपि विहीयते । याथार्थ्यमेव प्रामाण्यशब्दार्थो [5]यद्विवक्षितः ॥ अङ्गीकृतं चेत्प्रामाण्यं [6]स्मृत्यादेः का विरुद्धता । न चाफलत्वं वक्तव्यं सर्वस्मृत्यनुवादयोः ॥ फलवत्त्वं न चास्माभिः प्रामाण्यं हि विवक्षितम् । तृणादिदर्शने[7] किं[8] च फलवत्त्वं निगद्यते ॥ सुखदुःखादिकं किञ्चित्स्मृतावपि हि दृश्यते । न परिच्छेद[9]कार्येव प्रमाणमिति[10] च [11]प्रमा ॥ निर्दोषाक्षोद्भवं ह्यत्र प्रत्यक्षमिति गीयते । प्राकृतं शुद्धचैतन्य[12]मक्षं तु द्विविधं मतम् ॥ शुद्धमीशरमामुक्तेष्वन्यत्र प्राकृतैर्युतम् । निर्दोषमेव चैतन्य[13]मन्यत्रो[14]भयमिष्यते ॥ सुखदुःखादिविषयं[15] शुद्धं संसारगेष्वपि । निर्दोषत्वातिनियमात्तद्बलिष्ठतमं मतम् ॥ पञ्चेन्द्रियमनोभेदात्प्राकृतं षड्विधं स्मृतम् । अनुमा [16]युक्तिरेवोक्ता व्याप्तिरेव तु सा [17]स्मृता ॥ प्रतिज्ञातार्थसिध्यर्थ्यै व्याप्तिरेव[18] यदोदिता । अवशिष्टं किमत्रास्ति लिङ्गं तत्र विजानतः ॥ यदि लिङ्गमसिद्धं स्यात्कुत एवास्य मानता । यदि स्मारक[19]मात्रं स्यात्स्मर्तु[20]र्नात्र[21] प्रयोजनम् ॥ न पञ्चावयवोक्तौ च विवादावसितिर्भवेत् । दृष्टान्तादिषु चैवं स्यात्साधनं पुनरेव[22] तु ॥ लिङ्गोक्तावपि चैवं स्यादनुमाऽवसितिर्ध्रुवा । विरोधोऽसङ्गतिश्चैव साक्षाद्युक्तेस्तु

---

1 शब्दविषये. 2 ज्ञेयता अमुख्येति यावत्. 3 याथातथ्योपेताः. 4 युक्त्यादयः. 5 यत्=यदा. 6 स्मरणादेः. 7 दर्शनस्य. 8 किं फलवत्वम्. 9 ज्ञातताजनकम्. 10 इत्यत्र. 11 प्रमाणम्. 12 इति. 13 सजीवचैतन्यम्. 14 मध्यमजीवेषु. 15 सुखादिविषयकम्. 16 युज्यत एव. न तु वियुज्यतेऽपि, व्याप्यमित्यर्थः. 17 प्रमिता. 18 व्याप्त्युपदेश एव. 19 परोपदेशवाक्यम्. 20 व्याप्तिवचने सत्येव स्मर्तुः. 21 स्मरणाद्युपपत्तेः. 22 वक्तव्यं स्यात्.

SGDF
Sri Gargeshwari Digital Foundation

दूषणम् ॥ [1]प्रतिज्ञायामसम्बन्धो[2] युक्तेरुक्ता ह्यसङ्गतिः । विरोधोऽपि त्रिधैव स्यात्प्रतिज्ञार्थविरुद्धता ॥ लिङ्गराहित्यमव्याप्तिर्न्यूना[3]धिक्ये तु वाचिके । [4]साध्यव्यापकवैलोम्यमव्याप्तिस्साधनस्य च ॥ दुर्बलेन विरोधेऽपि न [5]प्रमाणमसाधकम् । स्ववाक्येन विरोधेऽपि नैव साधकतां [6]व्रजेत् ॥ संवादानुक्तिसंयुक्ता एत एव तु निग्रहाः । वादो जल्पो वितण्डेति कथास्तिस्रो विजानताम्[7] ॥ स्वार्थं परार्थमपि वा तत्त्वनिर्णयसाधिनी । केवलं तु कथा वादो जल्पोऽर्थादिव्यपेक्षया ॥ सतामेव कथा ज्ञेया वितण्डा त्वसतां सताम् । अप्रकाश्य स्वसिद्धान्तमसतां पक्षदूषणम्[8] ॥ उक्ते तैः[9] प्रथमं माने वक्तव्यं तस्य दूषणम् । विद्या परीक्षा[10]पूर्वैव वितण्डा जल्प[11] एव च ॥ [12]उच्चनीचत्वनिर्णीतिर्यतो जयपराजयौ । विनैव तत्त्व[13]निर्णीतिं न हि जल्पादिना क्वचित् ॥ उच्चनीचत्वविज्ञानमिति विद्यापरीक्षणम् । वादेन चोच्चनीचत्वविज्ञानं भवति स्फुटम् ॥ इति वादस्य पूर्वत्वं तत्सिद्धौ व्यर्थताऽन्ययोः । बहुविद्यत्वसिद्धौ तु नैव वादोऽपि कारणम्[14] ॥ सभासभापप्राश्नीक[15]पूर्वस्तु [16]स्पर्धिनामपि । वाद एवोभयार्थः स्यान्निर्णीतिजयकारकः ॥ तत्त्वा[17]प्रकाश एवैको वितण्डाजल्पयोः फलम् । विना[18] वादेन विद्याया यदि शक्यं परीक्षणम् ॥ स्याज्जल्पादिरपि क्वापि वाद एवान्यथा भवेत् । जल्प इत्यपि नाम

[1] प्रतिज्ञार्थे. [2] आकाङ्क्षारूपसम्बन्धराहित्यम्. [3] न्यूनत्वम्. [4] यत् साधनस्य सोपाधिकत्वं (साध्यव्यापकाव्याप्यत्वं) सा अव्याप्तिः. [5] अनुमानम्. [6] प्रमाणम्. [7] अनेकविद्वत्कर्तृकविचारगोचरा, वाक्यप्रबन्धः. [8] पक्षस्य. [9] असद्भिः. [10] परीक्षां कृत्वा निश्चितसाम्ययोरेव. [11] दातव्यः. [12] यतः. [13] तत्त्वं निर्णीयते अनयेति वादम्. [14] विद्यापरीक्षायाः. [15] अनुवादकः (सं. २.) [16] स्पर्धिनोरपिसभादिपूर्वः वादो युज्यतएव. [17] परवञ्चनसामर्थ्यसाध्य वित्तादि लाभः [18] प्रसिध्यादिना.

SGDF
Sri Gangeshwari Digital Foundation

स्याद्वादस्यैतादृशस्य तु ॥ प्रतिज्ञामात्रसाध्यत्वमपि[1] स्याद्याज्ञवल्क्यवत् । संवादे वादिनोः क्वापि विवादे हेतु[2]रिष्यते ॥ सभा सभापतिश्चैव प्राश्निकाश्चैव वैष्णवाः । रागद्वेषविहीनाश्च स्युः, सभ्याः सर्ववेदिनः ॥ प्राश्निकाश्चैतदज्ञाने[3] सभ्याश्चैषां[4] च दूरगाः । प्रमाणं निर्णयाय स्युः पक्षपातविवर्जिताः ॥ उभाभ्यां साधनं चैव [5]दूषणं वादजल्पयोः । सद्भिरागम एवैकः प्रयोज्योऽभीष्टसाधकः ॥ स्वसिद्धान्तानुसारेण[6] ह्यसद्भिरनुमोच्यते । प्रत्यक्षागमवैरूप्य[7]माश्रित्यान्यार्थतैव तु ॥ आगमे दर्शनीयाऽत्र दोषो लिङ्गविलोमता[8] । [9]लिङ्गानुकूल्यं स्वार्थस्य [10]श्रुत्यादीनामनुग्रहः[11] ॥ त्रिपञ्चावयवामेव युग्मावयविनीमपि । नियमाद्योऽनुमां ब्रूयात्तं ब्रूयाद्यदि तादृशी ॥ नानुमेति[12] तदा केन साध्याऽवयवकल्पना[13] । नियतावयवासिद्धौ व्याप्तिमात्रेण साधनम् ॥ कर्तव्यमेव तेन स्यात्तस्मात्सैवानुमा मता । अनुभूतिः प्रमाणं चेत्केन[14] स्मृतिरपोद्यते[15]॥ पूर्वानुभूते किं मानमित्युक्ते स्यात्किमुत्तरम् । [16]मानसं [17]तद्धि [18]विज्ञानं तच्च साक्षिप्रमाणकम् ॥ अतीतानागतं यद्वद्योगिभिर्दृश्य[19]तेऽञ्जसा[20] । एवं पूर्वानुभूतं च [21]मनसैवावगम्यते ॥ विज्ञातं[22] मनसा[23] पूर्वं मयैतत्कृतमित्यपि । साक्षादनुभवात्सिद्धं कथमेव ह्यपोद्यते ॥ एवं लक्षणकं मानत्रयं[24] ब्रह्मादिवस्तुषु । प्रमाणं वेद एवैकस्तत्प्रामाण्यं च साधितम् ॥ २ ॥ ४ ॥

---

1 ज्ञापनीयत्वम्. 2 हेतुवाक्यं सर्वप्रमाणं च. 3 एषु ज्ञानाभावे सति. 4 अज्ञाने सति. 5 कर्तव्यम्. 6 स्वसिद्धान्तनिर्णीतावयवनियमानुसारेण. 7 विरोधम्. 8 उपक्रमादि लिङ्गविरोधरूपो दोषो दर्शनीयः. 9 उपक्रमादि. 10 वेद. 11 नाम. 12 इति ब्रूयात्. 13 नियमः. 14 पदेन. 15 व्यावर्त्यते. 16 मनःप्रत्यक्षजन्यम्. 17 स्मरणम्. 18 साक्षात्काररूपम्. 19 योगसहकृतेन्द्रियेण. 20 साक्षात्. 21 अनुभवजन्यसंस्कारसहकृतेन. 22-23 इति, स्मृतमपि. 24 यतस्ततः.

SGDF
Sri Gangeshwari Digital Foundation

॥ ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ॐ ॥ ६ ॥ तथापि मृज्जलादीनां बुद्धिवागादिवाचकः[1] । दृष्ट[2]-व्याप्तिविरुद्धत्वात्तत्र मानं कथं भवेत् ॥ ततस्तन्नामकः [3]कश्चित्पुमानन्यो भवेदिति[4] । युक्त्यागम[5]विरोधेन प्राप्तमत्राभिधीयते ॥ बालरूढिं विनैवापि विद्वद्रूढिसमाश्रयात् । तत्तन्नामान एवैते तत्तद्वस्त्वभिमानिनः ॥ सन्ति, तेषां विशेषेण शक्तिरन्येभ्य उच्यते । व्याप्तिश्चोक्तानुसारेण दृश्यन्ते चाधिकारिभिः ॥ शास्त्रोक्तवस्तुनश्चैव [6]व्युत्पत्तिः शास्त्र-लिङ्गतः[7] । व्युत्पत्तिः सा बलवती मूर्खव्युत्पत्तितो हि यत् ॥ [8]दृढयुक्तिविरोधे तु सर्वत्र न्याय ईदृशः ॥ ६ ॥ ३ ॥

॥ ॐ [9]असदिति चेन्न प्रतिषेधमात्रत्वात् ॐ ॥ ॥ ८ ॥ अल्पवाक्ययुता युक्तिर्बहुलैव[10] विरोधिनी । यत्र तत्र कथं वस्तुनिर्णयः स्यादितीरिते ॥ विरोधियुक्तिबाहुल्यादिति न्यायो विनिश्चितः । युक्तेस्तु युक्तिबाहुल्यमागमादागमस्य[11] च ॥ कथं न निर्णयं कुर्यादित्य[12]सत्कारणं[13] न हि । श्रुत्यर्थो भवति क्वापि श्रुति-[14]प्रायोपपत्तिभिः ॥ अविरोधश्चतुर्थे तु पादे सम्यक्समर्थ्यते । असत्कार्यं[15] यथा दृष्टं वस्तुत्वा[16]त्कारणं[17] तथा ॥ इति चेन्न निषेधैकस्वरूपस्य न कर्तृता । बुद्धिपूर्वप्रवृत्तिर्हि[18] कर्तृत्वमिति

---

[1] वेदः. [2] प्रमितव्याप्तियुक्त्या. [3] अन्तर्धानादिशक्तिमान् अस्मादादि विलक्षणः. [4] प्राप्तम्. [5] मिथो विरोधेन. [6] वाचकत्वज्ञानम्. [7] शास्त्रोक्तपाशहस्तत्वादि लक्षणेभ्यः. [8] वेदस्य. [9] श्रुतौ सिद्धान्ते न विद्यते सत्=उत्तमं यस्मात्तत् सर्वोत्तमम् (सं.र.) [10] वेदस्य. [11] बाहुल्यम्. [12] महाप्रलयवर्ती कार्यप्रागभावः. [13] जगत्कर्ता. [14] बहुत्वसहित. [15] महदादिकं प्रलये असत्. [16] भावत्वात्. [17] ईश्वरादिकं असत्. [18] इच्छाप्रयत्नादिका.

SGDF
Sri Gangeshwari Digital Foundation

निश्चितम् ॥ प्रतिषेधात्मकत्वं तु [1]भावस्याभावधर्मतः[2] । धर्मधर्म्यैक्यत[3]श्चैव न तु तन्मात्रता भवेत् ॥ अभावस्य च [4]भावो हि धर्मोऽथापि हि धर्मिणः । तादृक्त्वं[5] [6]मात्रतेहोक्ता[7] बुद्धिराहित्यमेव तत्[8] ॥ विशेष्यतैव धर्मित्वं प्रथमप्रतिपत्तिषु । निषेधविधिरूपत्वं[9] भावाभावत्वमत्र[10] हि ॥ ८ ॥ ॐ [11]अपीतौ [12]तद्वत्प्रसङ्गादसमञ्जसम् ॐ ॥ ९ ॥ सर्वनाशेष्वपि सदा शिष्टत्वाद्यस्य कस्य नुः[13] । नाशोऽयं विमतोऽपि स्यान्नाशत्वात्कर्तृशेषवान् ॥ न चाशेषनृनाशस्तु दृष्टो दृश्योऽस्ति वा क्वचित् । धर्माधर्माश्रयत्वेन[14] स्वीकार्योऽपि नरो लये ॥ [15]अनादित्वं विना दृष्टं कथं स्यात्कारणं [16]क्वचित् । पूर्वादृष्टा[17]त्परादृष्टं यदि नैवोत्तरं[18] कुतः ॥ अदृष्टं कारणं नो चेल्लये[19] मानं[20] च किं भवेत् । उत्पत्तिनाशकारी च बुद्धि[21]मान्दृश्यते क्वचित् ॥ तद्दृष्टान्तेन सर्वत्र कर्ता किं नानुमीयते । आगमानुगृहीता तु मानमेषाऽनुमाऽपि तु ॥ ९ ॥ ॐ तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्ष[22]प्रसङ्गः ॐ ॥ १२ ॥ आगमानुग्रहाभावे न तर्कः स्यात्प्रतिष्ठितः । अक्षजागममूलस्य स्यादेवास्य [23]प्रतिष्ठितिः ॥ अन्यथाऽस्या[24]प्रतिष्ठा च स्ववाचा व्याहतैव हि ॥१२॥ ॐ एतेन शिष्टा अपरिग्रहा

---

1 कर्तुः कुलालादेः. 2 अन्योन्याभावरूपधर्मवत्वात्. 3 प्रतिषेधात्मकत्वं भावस्यास्ति. 4 प्रमेयत्वादिधर्मोऽस्ति. 5 प्रतिषेधात्मकत्वम्. 6 प्रतिषेधमात्रता. 7 सूत्रे. 8 तस्मात् प्रतिषेधमात्रत्वादेव. 9 धर्मित्वम्. 10 एवं सत्यपि. 11 प्रलये. 12 अभाववत्त्व. 13 पुरुषस्य. 14 अपि. 15 इव प्रलयेसत्त्वम्. 16 सृष्टिकाले. 17 जायते. 18 अदृष्टं कुतो जायते ? 19 भवेत्. 20 अप्रामाणिकत्वात्प्रलयो न स्यात्. 21 एव. 22 स्ववचनव्याघातात्. 23 प्रामाण्यम्. 24 अप्रतिष्ठा=अप्रामाण्यम्.

SGDF
Sri Gurgeshwari Digital Foundation

अपि व्याख्याताः ॐ ॥ १३ ॥ न च शिष्टागृहीतत्वं [1]निरीशादीशवादिनः । अतोऽवशिष्टजीवादिकर्तृताऽत्र निषिध्यते ॥ तन्मनोऽकुरुतेत्या[2]देरसतो [3]मनसो जनिः[4] । निवारिता तु पूर्वत्र, ह्यकस्मादिति [5]तद्भिना ॥ [5]असतो विश्वजननमाशङ्क्यात्र निषिध्यते । प्रापकं[6] वाक्यमात्रं[7] तु परिहारोऽविशेषितः[8] ॥ क्वचि[9]ज्जीवाकृतं[10] दृष्ट्वाऽचेतनादेव चाकृतम् । [11]तद्वदेवानुमाऽन्यत्र[12] वस्तुत्वात्क्रियते श्रुतेः ॥ १३ ॥ ४ ॥

॥ ॐ भोक्त्रा[13]पत्तेरविभागश्चेत्स्या[14]ल्लोकवत्[15] ॐ ॥ १४ ॥ नान्यदन्यत्व[16]मापन्नं क्वचिद्दृष्टं कथञ्चन[17] । अतो जीवस्य न ब्रह्मभावः स्याद्धि कदाचन[18] ॥ [19]क्वचिद्भिन्नतया दृष्टं तदभिन्नतया कथम्[20] । दृश्येन्नो दृष्ट[21]पूर्वं हि तादृशं न च दृश्यते ॥ भोक्तृत्वापत्तित इति यन्मतं तत्कुतो हरिः । भोक्त्रापत्तेरिति प्राह ॥ १४ ॥ ५ ॥

॥ ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥ ॥ १५ ॥ कथं च [22]तदनन्यता ॥ जगतस्त्वविकारत्व[23] उक्तन्यायेन साधिते । [24]स्वतन्त्रकारणान्यत्वं तेन[25] ह्यत्र निषिध्यते ॥ १५ ॥

---

[1] ईशानङ्गीकर्तुः. [2] प्रमाणात्. [3] ज्ञानेच्छाप्रयत्नेभ्यः. [4] मनः. [5] शून्यात्. [6] शङ्काप्रापकम्. [7] न तु समयः. [8] समानः. [9] देशादौ जीवादौ. [10] अकृतत्वम्. [11] अनुमिति. [12] महदादौ. [13] नाऽन्योऽतोऽस्ति कर्तेतिश्रुतेः. [14] जीवस्य मोक्षे ब्रह्मत्वापत्तिश्रवणात् तयोः भेदाभावः. [15] अभेद एव प्रामाणिकः स्यात् न चैवम्. [16] एकीभवन्तीति तु लोके इव स्थानैक्यात् मत्यैक्याच्च. [17] वस्त्वन्तरेणाभेदम्. [18] उपायेन. [19] मुक्तावपि. [20] काले. [21] कालान्तरे पूर्वदृष्टम्. [22] ब्रह्मणा. [23] ब्रह्मविकारत्वाभावे. [24] ब्रह्मणोऽन्यस्य स्वतन्त्रकारणत्वम्. [25] तदन्यत्वमित्यनेन.

SGDF
Sri Gurgeshwari Digital Foundation

॥ ॐ सत्त्वाच्चावरस्य ॐ ॥ १७ ॥ ॐ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॐ ॥ १८ ॥ "द्रव्यं कर्म च कालश्च स्वाभावश्चेतना[1] धृतिः[2] । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया" ॥ इतिश्रुतेस्तद्वशस्य[3] भावो 'न पर[4]' इत्यतः ॥ १७ ॥ १८ ॥ ॐ युक्तेः[5] शब्दान्तराच्च ॐ ॥ ॥ १९ ॥ शक्तोऽपि ह्यन्यथा[6] कर्तुं स्वेच्छानियमतो हरिः । कारणैर्नियतैरेव करोतीदं जगत्सदा ॥ नित्य[7]भेदो निमित्तेन ह्युपादानेन तु द्वयम्[8] । [9]असद्य[10]त्कार्यरूपेण कारणात्मतयाऽस्ति हि[11] ॥ अनवस्थाऽ[12]न्यथा[13] हि स्यात्सर्वत्रोत्पत्तिनाशयोः । शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा[14] ॥ स्वभिन्नं कारणाभिन्नं भिन्नं विश्वं करोत्यजः । इतिश्रुतेरवसित उक्तोऽर्थोऽयमशेषतः ॥ २१ ॥ ६ ॥

॥ ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥ २२ ॥ 'अनंशस्यापि जीवस्य किञ्चि[15]त्सामर्थ्ययोजनाम् । कार्येषु यः करोत्यद्धा नमस्तस्मै [16]स्वयम्भुवे' ॥ [17]यदि भागेन कार्येषु जीवशक्तिं न योजयेत् । हरिस्तदा हि सर्वत्र कृत्स्नयत्नोंऽशितोऽपि वा ॥ अंशिनो हि पटाद्या ये भिन्नैरेव परस्परम् । अंशैरंशिन उच्यन्ते नैव[18]मेव हि चेतनाः ॥ अतोऽ'नंशिन' इत्येव श्रुतिरेतेषु वर्तते । अप्यनेकस्वरूपेषु विशेषादेव केवलम् ॥ [19]बहुस्वरूपताख्या

---

[1] जीवाः. [2] चित्प्रकृतिः. [3] प्रकृत्यादेः सत्वम्. [4] किं च नास, परम्=स्वतन्त्रम्. [5] युक्तत्वादुभयस्य. [6] कारणैर्विना. [7] कार्यस्य भेदएव. [8] भेदाभेदौ. [9] नास्ति. [10] घटादिकं कार्यात्मना उत्पत्तेः. पूर्वम्. [11] अतोद्वयम्. [12] अव्यवस्था. [13] पूर्वं. कार्यस्य सत्त्वे कारणेनात्यन्ताभेदे च. [14] कार्यानुरूपसामर्थ्यप्रयोगम्. [15] स्वतन्त्राय. [16] इति वचनादवसितोऽर्थः. [17] पूर्णम्. [18] किन्त्वत्यन्ताभिन्नैरंशैः. [19] अनेक.

SGDF
Sri Gangeshwari Digital Foundation

तु तेष्वस्त्येव हि सांशता[1]। बहुत्वेनाविना[2]भावाद्भिन्नता नियमाद्भवेत् ॥ यदि नैवंनियमकृद्भगवान्पुरुषोत्तमः ॥ २२ ॥ ७ ॥

॥ ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥ २८ ॥

तस्य त्वशेषशक्तित्वाद्युज्यते सर्वमेव च। विरोधः सर्ववैशिष्ट्ये[3] यो द्वितीये निरस्यते॥ नारायणस्य त्वध्याये तदन्ये तत्र तत्रगाः। सृष्टिसंहारवाक्यानां जीवरूपाभिधायिनाम् ॥ अप्यन्यो[4]ऽन्याविरोधस्तु द्वितीयाध्यायगोचरः ॥२८॥ ॐ विकरणत्वान्नेतिचेत्तदुक्तम् ॐ ॥ ३२ ॥ [5]मानमेयविशेषेण पुनरुक्तिर्न जायते ॥३२॥८॥

॥ ॐ न प्रयोजनवत्त्वात् ॐ ॥ ३३ ॥ ॐ लोकवत्तु लीलाकैवल्यम् ॐ ॥ ३४ ॥ सदा प्रवृत्तिरीशस्य स्वभावादेव केवलम्। अङ्गचेष्टा यथा पुंसः काश्चिदुद्देशवर्जिताः॥ देवस्यैष स्वभावोऽयमित्याह श्रुतिरञ्जसा। क्रीडां प्रयोजनं कृत्वा सृष्टिः श्रुतिविरोधिनी॥ इति केवललीलैव निर्णीता प्रभुणा स्वयम्। आत्मप्रयोजनार्थाय स्पृहां श्रुतिरवारयत् ॥ न प्रयोजनवत्त्वेनेत्यत आह जगद्गुरुः। 'इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चि[6]ताः'[7]॥ इति प्रशंसया[8] काम[9]श्रुतिभ्यश्चैव युक्तितः[10]। महा[11]तात्पर्ययुक्तेश्च नेच्छामात्रं निषिध्यते॥ मोक्षार्थाः श्रुतयो यस्मात्स च तस्य प्रसादतः। [12]उन्निनीषति वाक्याच्च लोकदृष्टा[13]नुसारतः॥ इच्छानिमित्तको यस्मा[14]त्तदभावे कुतः श्रुतिः। महातात्पर्यरहिता प्रमाणत्वं

---

[1] च. [2] व्याप्तिरूपात्. [3] उत्तमत्वे वैलक्षण्येच. [4] सोऽपि सर्ववैशिष्ट्यविरोधपरिहारएव. [5] मानैक्येऽपि मेयविशेषेण, मेयैक्येऽपि मानविशेषेण. [6] विशिष्टनिश्चयवन्तः. [7] माण्डूक. [8] स्तुत्या. [9] सोकामयत इति. [10] ईश्वर इच्छावान् आत्मत्वात्. [11] तस्मिन् सर्ववेदानां महतात्पर्यवत्वात्. [12] ऊर्ध्वं नेतुमिच्छति [13] दृष्टय. [14] इच्छा.

SGDF
Sri Gargeshwari Digital Foundation

गमिष्यति ॥ याथार्थ्यमेव मानत्वमपि वाक्यं प्रयो[1]जकम् । मानत्वमेति, तत्रापि यत्सम्पूर्णप्रयोजनम् ॥ ३४ ॥ ९ ॥

॥ ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥ ३५ ॥ वैषम्यं चैव नैर्घृण्यं वेदाप्रामाण्यकारणम् । नाङ्गीकार्यमतोऽन्यत्तु न वैषम्यादि[2]नामकम् ॥ ३५ ॥ १० ॥

॥ ॐ सर्वधर्मोपपत्तेश्च ॐ ॥ ३८ ॥ यदधीना[3] गुणाश्चैव दोषा अपि हि सर्वशः । गुणास्तस्य कथं न स्युः, स्युर्दोषाश्च कथं पुनः ॥ सर्व[4]धर्मोपपत्तेस्त[5]द्वाक्यैरपि हि [6]तादृशैः । निर्दोषाशेषगुणको निर्णीतो भगवान्हरिः ॥ ११ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य प्रथमः पादः ॥ २ ॥ १ ॥ श्लोक सङ्ख्या ११५ ॥

॥ ॐ ॥ स्मृतियुक्तिश्रुति[7]गुणयुक्तयो बहुयुक्तयः । एवं चतुर्विधा[8] नैव विरुध्यन्तेऽन्वयं प्रति ॥ इति प्रथमपादेन निर्णीतेऽप्यभियोगतः[9] । दर्शनानां प्रवृत्तत्वान्मन्द आशङ्कते पुनः ॥ अनादिकालतो वृत्ताः समया हि प्रवाहतः । न चोच्छेदोऽस्ति कस्यापि समयस्येत्यतो[10] विभुः ॥ भ्रान्तिमूलत्वमेतेषां पृथग्दर्शयति स्फुटम् । तर्कैर्दृढतमैरेव [11]वाक्यैश्चागमवादिनाम् ॥ दौर्लभ्याच्छुद्धबुद्धीनां बाहुल्या[12]दल्पवेदिनाम् । तामसत्वाच्च लोकस्य[13] मिथ्या[14]ज्ञानप्रसक्तितः ॥ विद्वेषात्परमे तत्त्वे तत्त्ववेदिषु चानिशम् । अनादिवासनायोगा-

---

1 प्रयोजनवत्. 2 दूषणरूपम्. 3 एव. 4 सद्गुणानां दोषाभावानाञ्च ईशे उपपत्तेः. 5 वेदवाक्यैः. 6 तदुपपादकैः. 7 श्रुत्युपसर्जनक. 8 विरोधिप्रतीतयः. 9 आग्रहात्. 10 इति हेतोः आशङ्कते पुनः. 11 तत्प्रामाण्यवादिनां शिष्याणां व्यपेक्षया श्रुतिवाक्यैः. 12 भ्रमाधिष्ठानमात्रविदाम्. 13 राजादेः. 14 कुपण्डितनिमित्तक.

SGDF
Sri Gangeshwari Digital Foundation

दसुराणां[1] बहुत्वतः ॥ दुराग्रहगृहीतत्वाद्वर्तन्ते समयाः सदा । तथापि शुद्ध[2]बुद्धीनामीशानुग्रहयोगिनाम् ॥ सुयुक्तयस्तमो हन्युरागमानुगताः सदा । इति विद्यापतिः सम्यक्समयानां निराकृतिम् ॥ चकार [3]निजभक्तानां बुद्धि[4]शाणत्वसिद्धये ॥ ॐ रचनाऽनुपपत्तेश्च नानुमानम् ॐ ॥ १ ॥ [5]चेतनाचेतनं तत्त्वद्वयमेव निरीश्वराः । [6]आहुस्तत्पञ्च[7]पञ्चत्त्वविभागस्थमचेतनम् ॥ चेतनं तदसङ्ख्यातं भिन्नमन्यद्विदोज्झितम् । अचेतनस्य कर्तृत्वं [8]स्वातन्त्र्येण निगद्यते ॥ परस्परविभेदश्च कार्याणा[9]मालयं भवेत् । भोक्तृतां[10] चेतनस्याहुः केचित्तामपि नापरे ॥ स्वरूपचैतन्यबलात्स्व[11]प्रकाशाच्च भोगिताम् । प्रकृतेश्च [12]स्वरूपस्य विवेकाग्रहमेव तु ॥ अभोगवादिनो भोग[13]माहुर्भेदग्रहा[14]त्तयोः । भोगिनां[15]मुक्तिरुद्दिष्टा स [16]एवाभोगवादिनाम् ॥ ईशस्यासङ्ग्रहादेव[17] न युक्तौ तावुभावपि । चेतनेच्छानुसारेण यदा[18] दृष्टः पटोद्भवः ॥ एतादृशत्वमन्यस्य वस्तुत्वात्केन वार्यते । न च काचित्प्रमोक्तार्थे श्रुतिरेव[19] प्रमा हि नः ॥ आप्तत्वमुक्तमार्गेण वक्तु[20]र्नैवोपपद्यते । अप्रामाण्यस्वतस्त्वस्य स्वीकारा[21]दपि मायिवत्[22] ॥ स्वोक्ताखिलनिषेधी स्यान्न[23] च किञ्चित्प्रसिध्यति । इदं[24] नाचेतनवशं वस्तुत्वात्प्रतिपन्नवत्[25] ॥ इत्येव प्रतिषिद्धस्य केन[26]

---

1 विपरीतबुद्धिप्रयत्नादिप्रेरकाणाम्. 2 यथार्थज्ञानस्वभावानाम्. 3 ब्रह्मादीनाम्. 4 बुद्धिंप्रति युक्तीनाम्. 5 द्वन्द्वैकवद्भावः. 6 साङ्ख्या. 7 पञ्चविंशति. 8 चेतनाधिष्ठानेन विना. 9 प्रलयपर्यन्तम्. 10 सुखदुःखयोः. 11 भोक्तृत्वस्य स्वप्रतीतिसिद्धत्वात्. 12 पुरुषस्य. 13 भोगव्यवहारकारणम्. 14 प्रकृतिपुरुषयोः. 15 मते. 16 भेदाग्रहः. 17 अनङ्गीकारात्. 18 यस्मात्. 19 योयोनिमधिनिष्ठत्येकः इत्यादि. 20 साङ्ख्यप्रणेतुः. 21 प्रामाण्यस्वतस्त्वस्यापि. 22 सदसद्विलक्षणत्वादिवत्. 23 परस्परविरोधे. 24 महदादिकार्यम्. 25 प्रधानवत्. 26 सामर्थ्येन.

SGDF
Sri Gargeshwari Digital Foundation

मूला[1]नुमा भवेत् । स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुतः[2] ॥ अचेतनत्वं स्वातन्त्र्य[3]मिति चात्मप्रमा[4]हतम् । [5]स्वेच्छानुसारितामेव स्वातन्त्र्यं हि विदो विदुः ॥ कुत इच्छाऽचेतनस्य सेच्छं चेत्किमचेतनम्[6] । इच्छाम्यहमिति ह्येव [7]निजानुभवरोधतः ॥ अचेतनेच्छाऽपगता[8] [9]यदि भेदा[10]ग्रहोऽत्र[11] च । कथं स[12] न घटस्य [13]स्यान्मनो म[14] इति भेदतः[15] ॥ मनसोऽपि गृहीत[16]त्वा[17]दुभयात्मकता यतः । कामस्य तु "मनः[18]कामः" [19]प्रियाप्रियविभेदतः ॥ द्वैविध्यं दृश्यते चास्य[20] तस्मा[21]द्भेदाग्रहः कुतः । रचनाऽनुपपत्तेस्तन्न[22] सर्वज्ञा[23]नुमागतम् ॥ अचेतनं जगत्कर्तृ ॥ १ ॥ ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ ॥ ३ ॥ [24]पयोम्ब्वादि च नोपमा ॥ एतत्प्रशास्तिवचनाच्चेतनाचेतनस्य च । द्वैविध्येऽपि तु कामादेः कुतः[25] स्वामित्वमात्मनः ॥ साक्षादनुभवारूढं शक्यतेऽपोदितुं[26] क्वचित् । इच्छास्वामित्वमेवोक्तमिच्छावत्त्वं न चापरम् ॥ किञ्चित्तद्वशगत्वेऽपि स्वामित्वं लोक-[27]वद्भवेत् । [28]सर्वात्मतन्त्रकामादेः किमुतैव परेशितुः ॥ न चानुभवगं कामस्वामित्वं वेदवागपि[29] । शक्ताऽपवदितुं तस्मात्सा [30]तदन्याभिधायिनी ॥ मोक्षकामो भवेदन्यो यदि मुक्ताद्भविष्यतः[31] ।

---

1 साधकानुमा. 2 कुतएव. 3 च. 4 स्वव्याहतं प्रमाणविरुद्धञ्च. 5 प्रवृत्तौ. 6 किं. 7 साक्ष्यनुभवः. 8 अचेतनस्य इच्छा अपगता नास्तीति यावत्. 9 एवमनुभवएवनास्ति. 10 निमित्तम्. 11 व्यवहारे. 12 भेदाग्रहः. 13 व्यवहारहेतुः. 14 मे मनः. 15 भेदेन. 16 नात्मना भेदाग्रहः. 17 आत्मधर्मता मनोधर्मता चास्ति ततः. 18 इति श्रुतिर्युज्यते. 19 मुक्तिसंसारसम्बन्धिभेदेन. 20 कामस्य. 21 श्रुतिविरोधस्य परिहृतत्वात्. 22 तस्मात्. 23 साङ्ख्यवाक्येन ज्ञातम्. 24 क्षीरजलादि. 25 शक्यते. 26 अपवदितुं छान्दसम्. 27 गोस्वामित्ववत्. 28 सर्वात्मनास्वाधीन. 29 'कामःसङ्कल्पःश्रद्धा...सर्वं मन एव' इति माण्डूक. 30 स्वामित्वादन्यस्योपादनत्वस्य. 31 आत्मनः अन्यः.

SGDF
Sri Gurgeshwari Digital Foundation

मोक्षकामस्य[1] किं तेन स्वनाशार्थं[2] च को यतेत् ॥ कर्तृत्वं यस्य तस्यैव भोक्तृत्वमुपलभ्यते । विभागे[3] च तयोर्मानं नैव किञ्चित्क्वचिद्भवेत् ॥ सर्वमानविरोधैकदुर्दीक्षादीक्षितस्त्वयम् । मायावाद्युपमां यायात्तत्त्वशब्दान्निराकृतः ॥ ३ ॥ १ ॥

ओँ अन्यत्राभावाच्च न तृणादिवत् ओँ ॥ ५ ॥

सांख्यस्तु सेश्वरो ब्रूते क्षेत्रा[4]नुग्रहशक्तिमान् ॥ अस्तीश्वरः स्वयंभातः क्लेश[5]कर्मादि[6]वर्जितः ॥ क्षेत्रश[7]क्तिमती सैव प्रकृतिर्बीजशक्तिमान् ॥ जीवः पर्जन्यवद्दैवशक्तिमानीश्वरः स्मृतः ॥ पृथिवीवत्प्रधानं तज्जीवः[8] सन्निधिमात्रतः ॥ बीजावपनकर्तैवेत्यत्र प्राह स्वयं प्रभुः ॥ अन्यत्र क्वापि शक्तिर्न स्वातंत्र्येणेश एव हि ॥ शक्तीस्ताः प्रेरयत्यञ्जस्तदधीनाश्च सर्वदा ॥ [9]सत्ता प्रधानपुरुषशक्तीनां च प्रतीतयः ॥ प्रवृत्तयश्च तास्सर्वा नित्यं नित्यात्मना यतः ॥ तथा नित्यतया नित्यं नित्यशक्त्या स्वयेश्वरः ॥ नियामयति नित्यं च 'न ऋते त्वदि'तिश्रुतेः ॥ स्वभावजीवक[10]र्माणि द्रव्यं कालः श्रुतिः क्रियाः[11] ॥ यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ॥ इति श्रुतेर्न सत्ताद्या अपि नारायणं विना । तत्पतञ्जलि[12]विन्ध्यादिमतं न पुरुषार्थदम् ॥ ५ ॥ २ ॥

॥ ओँ अभ्युपगमेप्यर्थाभावात् ओँ ॥ ६ ॥

चार्वाकैरुच्यते मानमक्षजं नापरं क्वचित् । देह आत्मा पुमर्थश्च कामार्थाभ्यां विना न हि ॥ यदैवं दर्शनेनास्य कोऽर्थः प्रत्यक्षगोचरः । लब्धस्तेनैव हि नरैः[13] शास्त्रात्किं मोहनं विना ॥ स्वपरार्थविहीनत्वात्स्वमतेनैव निष्फलम् । किमित्युन्मत्तवच्छास्त्रं वृथा[14] प्रलपति

1 प्रधानस्य. 2 प्रकृतिकार्यसंसारनाशार्थम् 3 भिन्नाधिकरणत्वे. 4 प्रकृति. 5 अविद्यादि. 6 विधिनिषेधरूपम्. 7 उपादानत्व. 8 पितृजीवः. 9 स्वरूपम्. 10 धर्माधर्मौ. 11 परिस्पन्दा. 12 अनीश्वरसांख्य. 13 शिष्यैः. 14 विषयप्रयोजनशून्यम्.

SGDF
Sri Gargeshwari Digital Foundation

स्वयम् ॥ देहादन्योऽनुभवत[1] आत्मा भाति शरीरिणाम् । मम देह इति व्यक्तं ममार्थ इतिवत्सदा ॥ प्रत्यक्षस्यैव मानत्वमिति केनावसीयते । यदि तत्साधकं वेदप्रामाण्ये न कथं भवेत् ॥ न [2]चान्यामानता [3]क्वापि प्रमाणेनावसीयते । [4]स्वमतेनार्थरहित उपेक्ष्यः पक्ष ईदृशः ॥ ६ ॥ ३ ॥

॥ ॐ पुरुषाश्मवदिति चेत्तथापि ॐ ॥ ७ ॥

सन्निधानाच्चेतनस्य वर्तते[5] यद्यचेतनम् । तथाप्य[6]बुद्धिपूर्वत्वादुक्तदोषः समो[7] भवेत् ॥ ७ ॥ **ॐ अङ्गित्वानुपपत्तेः ॐ ॥ ८ ॥** अङ्गित्वं[8] पुरुषस्यैव सर्वैरेवानुभूयते । तदङ्गत्वोक्तितश्चैव [9]स्यात्सर्वस्यापलापकः ॥ किमु सर्वेश्वरस्यास्य ह्यपलापाद्यतोऽखिलम्[10] ॥ ८ ॥ ४ ॥

॥ ॐ अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॐ ॥ ९ ॥ अङ्गित्वं यदि तस्यैव स्वातन्त्र्यं चेन्न चाखिलम् । तत्प्रेरणेऽप्यशक्तत्वात्स्वतन्त्रोऽन्यो ह्यपेक्षितः ॥ न च स्वातन्त्र्यमस्यैव प्रत्यक्षादिविरोधतः । हिताक्रियादिदोषाच्च भद्रं नानीश्वरं मतम् ॥ संसारिणोऽन्यं सर्वेशं सर्वशक्तिमनौपमम् । चेतनाचेतनस्यास्य सत्त्वादेस्तदधीनताम् ॥ नाङ्गीकुर्वन्ति ये तेषां सर्वेषां च समा इमे[11] । तस्माच्छ्रुतिप्रमाणेन युक्तिभिश्च परो हरिः ॥ अङ्गीकार्यतमो नित्यः सर्वैरपि सुनिश्चितम् ॥ ९ ॥ ५ ॥

॥ ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ ॥ ॥ ११ ॥ नित्यज्ञानप्रयत्नेच्छं सङ्ख्याद्यैरपि पञ्चभिः । युक्तमीशं वदन्तोऽन्ये[12] तदिच्छाऽदृष्टचोदिताः ॥ परमाणवश्चतुर्वर्गाः संयुज्यन्ते

---

[1] प्रत्यक्षेण. [2] प्रत्यक्षादन्ययोरनुमानागमयोः अमानता. [3] विषये. [4] स्वसम्मत्या. [5] प्रवर्तते. [6] प्रकृतेः. [7] न परिहृतः. [8] प्रधानत्वं शरीरं प्रति. [9] साङ्ख्यः. [10] भवति (सं. र.) [11] दोषाः. [12] इत्याहुः.

SGDF
Sri Gangeshwari Digital Foundation

द्विशोऽखिलाः । परमाणुद्वयेनैव द्व्यणुकं नाम जायते ॥ द्व्यणुकत्रयेण त्र्यणुकं तैश्चतुर्भि[1]स्तदात्मकम् । ततस्त्वनियमेनैव खण्डावयविनां भवः ॥ ततश्चानियमेनैव सर्वावयविसम्भवः । कारणं समवाय्याख्यं परमाण्वादिरत्र[2] हि ॥ ईशेच्छादृष्टकालास्तु निमित्तं[3] कारणं मतम् । सामान्यान्त्यविशेषौ च समवायश्च तत्रयम् ॥ नित्यं, क्रिया[4] अनित्याश्च[5] गुणद्रव्ये द्विरूपके[6] । कार्ये[7] गुणक्रियाणां तु [8]समवाय्यन्यकारणम् ॥ [9]कारणस्था गुणाद्यास्तु संयोगो[10] द्रव्यकारणम्[11] । एवं स्थितेऽपि सिद्धान्ते विशेषस्तत्र कल्पितः ॥ द्व्यणुके परमाणौ च ह्रस्वत्वं परिमण्डलम् । न कारणं कार्यगुणे वैरूप्यं तत्र कारणम् ॥ इत्याहुस्तानथोवाच विद्याधीशः स्वयं प्रभुः । महत्त्वं चैव दीर्घत्वं त्र्यणुकाद्येषु[12] [13]कल्पितम् ॥ तस्माच्च[14] सदृशं [15]कार्यं तत्कार्येषूपजायते । यथा तथैव ह्रस्वत्वात्पारिमाण्डिल्यतोऽपि हि ॥ जायेत सदृशं कार्ये[16] परिमाणं समत्वतः[17] । न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेत् ॥ सदृशस्य[18] हि कार्यस्य नैव योगः[19] कथञ्चन । अप्रत्यक्षत्वमेव स्याद्यतः[20] कार्येष्वणुत्वतः[21] ॥ इति चेन्न महत्त्वं च परमाणावणावपि[22] । कथं त्र्यणुकपूर्वेषु नाणुत्वमपि कथ्यते ॥ प्रत्यक्षत्वतदन्यत्वे पुरुषापेक्षयाऽखिले[23] । अणुत्वं च महत्त्वं च यतो वस्तुव्यपेक्षया ॥ [24]तारतम्यस्थिता यस्मात्पदार्थाः सर्व एव च ।

---

1 चतुरणुकात्मकम्. 2 द्व्यणुकादिकार्योत्पत्तौ. 3 तु. 4 उत्क्षेपणादयः. 5 एव. 6 नित्यानित्ये. 7 जायमानानाम्. 8 असमवायिकारणम्. 9 समवायि. 10 अवयवानाम्. 11 समवायि. 12-13 एव. 14 महत्त्वात् दीर्घत्वात्. 15 परिमाणम्. 16 त्र्यणुकेषुद्व्यणुकेच. 17 कार्यपरिमाणत्वादिसाम्यात्. 18 कार्यस्य अणुत्वादि परिमाणादेः तदुत्पत्तिरूपस्य. 19 घटना. 20 तस्मान्नेति. 21 अणुत्वप्रसङ्गेन. 22 द्व्यणुके. 23 द्रव्ये. 24 परिमाणतारतम्येन.

SGDF
Sri Gangeshwari Digital Foundation

यथा महत्त्व[1]विश्रान्तिस्तथाऽणुत्वस्य चेष्यते ॥ परिमाणत्वतश्चेन्न महत्त्वस्यापि विश्रमः । दृश्यतेऽनन्त[1]इत्येव तथाऽऽनन्त्य[2]मणावपि ॥ न महत्त[3]त्वगुणत एतावानिति हीश्वरः । परिच्छिन्नस्तथाऽणोश्च नैतावद्भागता क्वचित् ॥ विश्रान्तो यद्यनन्तांशः कश्चिदस्तीति गम्यते । नावसाययितुं शक्यो विरोधादेव केवलम्[4] ॥ केवलं साक्षिमानेन कालो [5]देशोऽपि नान्तवान्[6] । अपर्यवसितिश्चाणो[7]र्दृश्यते साक्षिणा द्वयोः[8] ॥ यदि नो साक्षिगम्यं तन्महत्त्वं केन गम्यते । विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानतः ॥ यद्या[9]गमादनन्तं तन्महत्त्व[10]मवगम्यते । अनन्तमेव [11]चाणुत्वं कुतो नैवावसीयते ॥ महत्त्वाणुत्वयोर्नैव विश्रान्तिरुपलभ्यते । [12]अन्यदेव ह्यनन्तत्वं महत्त्वाणुत्वयोः समम् ॥ [12]बहुत्वाल्पत्वयोर्यद्वत्सङ्ख्यायामुपलभ्यते । आनन्त्यमेकभागानां[13] [14]तावत्त्वं ह्येव गम्यते ॥ अणीयांश्च महीयांश्च भगवानागमोदितः । आनन्त्यवाचकः शब्दो [15]द्विधाऽऽनन्त्येपि मानताम् ॥ याति नैव, गुणाल्पत्वं कालाल्पत्वं च मानगम् । सर्वकालगतस्याल्पकालेऽपि स्यादवस्थितिः[16] ॥ महागुणस्य चाल्पोऽपि गुणः स्यादिति चेद्भवेत्[17] । तावत्त्व[18]मेव नैव स्याद्देशेऽप्येतन्न नो मतम् ॥ महतोऽल्पत्वमपि हि व्योमवत्प्राह वेदवित् । यद्यल्पदेशसंस्थानं न सर्वत्रापि नो भवेत् ॥ [19]स्थितस्य ह्यल्पदेशेषु सर्वगत्वं भवेद्ध्रुवम्[20] । एकत्राप्यनवस्थस्य कुत एवाखिलस्थता ॥ शून्यत्वमेव तस्य स्याद्यस्यैकत्रापि न स्थितिः ।

---

1 परिमाणोत्कर्षतरतमभावे. 1 अनवधिकः. 2 परिमाणापकर्षतारतम्येपि. 3 संज्ञा चैषा आत्वं न. 4 साक्षात्. 5 आकाशः. 6 अनन्तः दृश्यते अनवधिक परिमाणोत्कर्षवान्. 7 परिमाणापकर्षतारतम्यस्य. 8 काले गगने च. 9 स एषोनन्त इति. 10 कालादिपरिमाणोत्कर्षः. 11 परिमाणापकर्षः. 12 परिच्छेदाभावरूपम्. 12 विशेषणतया. 13 एकत्वसङ्ख्यायाः. 14 आनन्त्यम्. 15 उत्कर्षापकर्षाभ्याम्. 16 यथा. 17 तद्भवेदेव. 18 अल्पत्वम्. 19 स्थितस्यैव. 20 स्थितस्यैव.

SGDF
Sri Gangeshwari Digital Foundation

अतो नाणुत्वविश्रान्तिर्न महत्त्वस्य च क्वचित्[1] ॥ उभयाऽनन्त्ययुक्तस्माद्यदि मुख्यं महद्भवेत् । तच्च ब्रह्म परं [2]साक्षात्सर्वाऽनन्त्ययुतं सदा ॥ यदि साक्षी स्वयंभातो न मानं केन गम्यते । अक्षजादेश्च मानत्वेमनवस्थाऽन्यथा भवेत् ॥ [3]अतः सर्वपदार्थानां भागाः सन्त्येव सर्वदा[4] । सर्वदिक्ष्वपि सम्बन्धादविभागः[5] पराणुता[6] ॥ तत्संयोगादनियतात्पदार्थानां जनिर्भवेत् । द्वयोरेव तु संयोग इति केनावसीयते ॥ कारणस्य गुणास्तेन[7] भवेयुः कार्यगा अपि । तारतम्येन [8]सर्वेऽपि महान्तश्चाणवो[9] यतः ॥ न च तत्प्रोक्तसृष्टौ तु मानं केवलकल्पना । कथं साक्षिमितस्यास्य[10] शक्नुयाद्वारणे क्वचित् ॥ यदि साक्षिमितं नैत[11]न्नानुमा तत्र वर्तते । [12]पक्षीकर्तुमशक्यत्वात्कुत एवानुमा भवेत् ॥ यत्र नास्ति पदन्यासः कस्तं विषय[13]माप्नुयात् । देशान्तरादिशब्दाश्च[14] शशशृङ्गादि[15]शब्दवत् ॥ सदृशं च सजातीयं नास्मत्पक्षे किमेव हि । येनैव च प्रकारेणात्यसिद्धमनुमीयते ॥ तेनैव शशशृङ्गादेः शक्यमस्तित्वकल्पनम् । प्रत्यक्षमागमो वाऽपि भवेद्यत्रनियामकः ॥ सैव व्याप्तिर्भवेन्मानं नान्या सन्दिग्धमूलतः । सहदर्शनमात्रेण न व्याप्तिरवसीयते ॥ यद्वा[16]व्यतिरेकेऽस्य[17] ह्यक्षजं वाऽऽगमो भवेत् । तन्निर्धारित[18]युक्तिर्वा व्याप्तिः सैवा[19]परा न हि ॥ अन्यथा सप्तमरसभावोऽप्यनुमया पतेत् । अनिष्टानि च सर्वाणि ह्यनुमा कामचारिणी ॥ ११ ॥ ॐ समवायाभ्युपगमाच्च

---

[1] कालादौत्रये. [2] अपराधीनतया. [3] साक्षितः. [4] इति सिद्धम्. [5] यस्य भिन्नावयवेषु सत्स्वपि तेषां विभागानर्हत्वम्. [6] परमाणुशब्दप्रवृत्तिनिमित्तम्. [7] द्वयोरेवेतिनियमाभावेन. [8] पदार्थाः. [9] अणवश्च. [10] अनियमारम्भस्य. [11] परमाण्वादिकम्. [12] सिद्धत्वे असिद्धत्वे च परमाण्वादेः. [13] देशम्. [14] साधकानुमानप्रयोगाः. [15] साधकानुमानप्रयोगवत्. [16-17] साधनस्यसाध्यव्यतिरेकेणासत्वे. [18] व्याप्तिक. [19] व्याप्तिः.

SGDF
Sri Gangeshwari Digital Foundation

साम्यादनवस्थितेः ॐ ॥ १३ ॥ [1]कार्यकारणयोश्चैव गुणादेः[2] पञ्चकस्य च । भिन्नस्यैव तु सम्बन्धः समवायोऽन्य ईर्यते ॥ भिन्नत्वसाम्यतस्तस्य ताभ्यां योगो भवेद्ध्रुवम् । स स्वनिर्वाहकश्चेत्स्याद्द्रव्यमेव तथा न किम् ॥ विशेषस्तद्गतत्वादिर्यद्यभिन्नेऽवसीयते । गुणक्रियादिरूपस्य निषेधः केन हेतुना ॥ द्रव्यमेव ततोऽनन्तविशेषात्मतया सदा । नानाव्यवहृतेर्हेतु[3]रनन्तत्वं विशेषतः ॥ विशेषश्च विशेषी स स्वेनैव[4] समवायवत् ॥ कल्पनागुरुतादोषात्पदा[5]र्थान्तरता न हि । कल्पयित्वा [6]षड्पदार्थान् साभावानपि केवलम् ॥ एकस्मि[7]न्सविशेषश्चेत्किं पूर्वं[8] तस्य[9] विस्मृतिः । येन प्रत्यक्षसिद्धेन व्यवहारोऽखिलो भवेत् ॥ भावाभावविभागेन[10] यं विना न कथञ्चन । एतादृशे विशेषेऽस्मिन्को द्वेषो वादिनां भवेत् ॥ अभेदेन प्रतीतिश्च [11]कार्यकारणपूर्वके । [12]अभावान्ते पदार्थेऽ[13]स्ति सविशेषाऽवसीयते ॥ सामान्यादिपदार्थेषु [14]तन्निष्ठत्वादयोऽखिलाः । कथं धर्मा निवार्यन्ते [15]वस्त्वैक्येऽपि हि वादिभिः ॥ कार्यस्य[16] तत्त[17]न्निष्ठत्वं [18]गुणादेर्व्यापिता[19]दिकः । कथं विशेषो नैवास्ति स च धर्मोऽपरो[20] यदि ॥ षड्पदार्थातिरेकः स्यात्पदार्था[21]नियमेऽपि हि । धर्मस्य धर्मसन्तानादनवस्था[22]स्वनिर्भवेत् ॥ सामान्य[23]स्यापि [24]सामान्यं [25]गुणस्यापि

---

[1] अवयवावयविनोः. [2] गुणावयवक्रियासामान्यविशेषाणाम्. [3] ईश्वरस्य अनन्तत्वमन्यत्रानेकत्वम्. [4] स्वेनैव विशेषी न पुनर्विशेषान्तरेण. [5] गुणगुण्यादीनाम्. [6] केवलम्. [7] समवाये. [8] द्रव्ये. [9] विशेषस्य. [10] द्विविधः अखिलो व्यवहारः. [11] अवयवावयवादौ. [12] अन्योन्याभावपर्यन्ते, धर्म्यभिन्ने. [13] यतस्तस्मात् [14] व्यक्ति. [15] धर्म्यैक्ये. [16] अवयविनः. [17] अवयव. [18] रूपादेः [19] आश्रयव्यापित्वादि. [20] स्वाश्रयाद्भिन्नः. [21] षट्त्वनियमाभावे. [22] आकरोऽयंपक्षः. [23] गोत्वादेः. [24] सत्ता. [25] रूपादेः.

SGDF
Sri Gangeshwari Digital Foundation

[1]गुणो ह्यतः । नाङ्गीकृतः स च यदि[2] नानवस्था क्वचिद्भवेत् ॥ अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः । अनन्यत्वान्नानवस्था भेदो नाशे[3] भवेत्तथा[4] ॥ विशेषमेव संश्रित्य विशेषो बलवान्यतः । दृष्टि-[5] प्रमाणतश्चैव विरोधो [6]दर्शने कथम् ॥ विरोधो ह्यविरोधश्च यतो दर्शनमानकौ । ततो दृष्टे विरोधस्तु सद्भिरापाद्यते कथम् ॥ अभिन्नो भगवान्स्वेन तदन्येन विभेदवान् । नित्या धर्मास्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः ॥ [7]सामस्त्योच्छेदिनोऽन्यत्र[8] धर्मा उभय[9]रूपिणः । [10]भावे त एव चोच्छेदा[11]त्तदन्ये च समस्तशः ॥ अंशांशिनोरभेदेन[12] त्वं[13]शसंयोग एव हि[14] । अंशिनो[15] नानवस्थाऽतो यद्यप्यंशेष्व-[16] विश्रमः[17] ॥ [18]एकस्मिन् जात एवान्यः[19] संयोगो जायते यदि । अनवस्था तदैव स्यात्संयोगैक्ये भवेत्क सा ॥ अंशे संयोग[20]दृष्टेश्च दृष्टे का साऽनवस्थितिः । यद्यंशगो न संयोगः[21] कार्येषु प्रथिमा[22] कथम् ॥ परमाणो[23]रणोर्नास्ति महत्त्वेत्यद्भुतं वचः । अणूनां[24] प्रथिमापेक्षां विनैव त्र्यणुकेऽपि सः[25] ॥ परमाणोर्महत्त्वं च विनेत्ये-[26] तद्वचः कथम् । अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदा ॥ सर्व-प्रत्यक्षविषयः कथमेव ह्यपोद्यते । संयोगश्च विभागश्च भेद[27]श्चैव पृथक्[28]पृथक् ॥ अन्योऽन्य[29]प्रतियोगेन ह्युभयोरपि दृश्यते । भिन्ना

---

[1] सङ्ख्यादि. [2] स्वीक्रियते. [3] धर्मिषु सत्सुएव धर्मनाशे. [4] अभेदश्च [5] प्रत्यक्ष. [6] सहदर्शने. [7] सत्येव धर्मिणि सामस्त्येन नाशवन्तः. [8] जडे. [9] भिन्नाभिन्नाः. [10] धर्मिसत्त्वदशायामेव. [11] सत्येव-धर्मिण्यसत्त्वात्. [12] एव. [13] अंशतः. [14] यस्मात्. [15] संयोगः. [16] अंशपरम्परयाः. [17] तथापि नानवस्था. [18] अवयवसंयोगे. [19] अवयवानाम्. [20] संयोगस्यांशवृत्तित्वदृष्टेश्च नानवस्था. [21] कारणा-नाम्. [22] उत्कर्षः. [23] सकाशात्. [24] द्व्यणुकानाम्. [25] परिमाणो-त्कर्षः. [26] द्व्यणुकेऽपि सः. [27] भेदः=पृथक्त्वम्. [28] एकैकद्रव्या-श्रिताः. [29] प्रतियोगित्वेन.

SGDF
Sri Gargeshwari Digital Foundation

इति तु भेदानां समुदायो[1] हि दृश्यते ॥ यथैव च [2]पदार्थानामनयो-र्भेद इत्यपि[3] । इतोऽमुष्यामुतोऽमुष्य भेदो दृष्टो द्विधर्मिकः ॥ तत्रैकवचनं यत्तद्विप्राणां भोजनं यथा । नरत्वादिकमप्येवं तत्तद्धर्मतयेयते ॥ न [4]सर्वधर्म एकोऽस्ति समुदायस्तु[5] भिन्नगः[6] । [7]एतादृशं च सादृश्यं पदार्थेषु पृथक्पृथक् ॥ [8]एकस्मिन्स[9] विनष्टेऽपि यतोऽन्यत्रैव दृश्यते । कुतो भस्मत्वमाप्तस्य नरत्वं पुनरिष्यते ॥ एकत्वे नास्ति मानं च श्रुतिरप्याह सादरम् । 'भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि ॥ स्वैः स्वैर्धर्मै[10]रभिन्नाश्च स्वरूपैरपि सर्वशः । अनिवृत्त[11]विनाशास्तु धर्मा उभयरूपकाः[12] ॥ न केनचिदभिन्नोऽतो भगवान् स्वगुणैर्विना' । इति व्युत्पत्तिरपि हि सादृश्येनैव गम्यते ॥ सर्वेषु युगपच्छब्दः[13] सदृशेषु प्रवर्तते । तथापि प्राप्तित[14]स्त्वेकवचनाच्च विशेषतः ॥ [15]अभीष्टावगतिश्च स्याच्छक्तिः[16] सादृश्यगा[17] यतः । [18]तादृशोऽयं [19]च [20]तच्छब्द इति ज्ञापयति स्फुटम् ॥ जातित[21]-श्चेत्कथं तासु[22] तत्र[23] चेदनवस्थितिः । तथैव व्यक्तिविज्ञानं[24] व्यक्तित्वा[25]भावदूषितम् ॥ यदि तच्चास्ति तस्यापि विशेषेष्व[26]नवस्थितिः। कथं स्वरूपत्वमपि ज्ञायतेऽनुगतं यदि ॥ एक[27]व्युत्पत्तिपर्यन्त-मनवस्थादिदूषितम्[28] । कल्पनागौरवात्तेन युक्ता ना[29]नुगकल्पना ॥

---

[1] अनेकत्वम्. [2] इमे पटा इत्यादौ. [3] इत्यस्यामपि प्रतीतौ. [4] अनेकवृत्ति. [5] अनेकत्वम्. [6] अनेकाश्रितः. [7] अनेकावृत्ति. [8] नरे विनष्टे. [9] सः नरत्वधर्मः. [10] यावद्द्रव्यभाविधर्मैः. [11] अनिवृत्तेऽप्याश्रये विनाशो येषां ते. [12] भिन्नाभिन्नाः. [13] अयमिति शब्दः. [14] योग्यत्वात्. [15] इष्टगोज्ञानम्. [16] वाचकत्वशक्तिः. [17] सादृश्यसम्बन्धिनी (व्यापिका). [18] उपदिष्टगोसदृशः अतः. [19] यस्मात् अयम्. [20] तच्छब्दवाच्यः सः शब्दोवाचको यस्य सः. [21] व्युत्पत्तिः. [22] जातिषु. [23] जातिषु जातित्वम्. [24] व्युत्पत्तिः. [25] जात्यभावेन. [26] व्युक्तिषु प्रवेशः स्यात् तथाच. [27] जातिरहिते. [28] दूषणं लगति. [29] अनुगतजाति.

SGDF
Sri Gangeshwari Digital Foundation

औपाधिकविशिष्टाद्यमपि तद्वस्तु[1] किं ततः । अन्यत्तदेव चेदग्निमत्त्वं किं तत्र भण्यते ॥ अग्निसंयोगमात्रं[2] चेद्भवे[3]त्तत्सिद्धसाधनम् । भूधरस्याग्निसंयोगो[4] यदि षष्ठ्यर्थ[5] एव कः ॥ समवायो यदि ह्यस्य चैकत्वात्सिद्धसाधनम् । यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यते ॥ नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः । सत्यत्वात्को विशेषः स्यान्मायात्राद्यन्यथा भवेत् ॥ उपाधिजन्यं तद्गम्यमिति चौपाधिकं भवेत् । उभयत्राप्यनन्ताः स्युः समवाया इतस्ततः[6] ॥ भिन्नत्वं चैव[7] तेष्वस्ति को विशेष उपाधिगे । अविद्यमान एवान्यः समवायोऽधिगम्यते[8] ॥ उपाधिना तद्गमकमनुमानं न मा भवेत् । एवमेवासतः सत्तासम[9]वायो [10]जनिर्मता ॥ तत्रापि ह्युक्तदोषाणां नैव किञ्चिन्निवारकम् । अस्मत्पक्षे विशेषस्य सर्वत्राङ्गीकृतत्वतः ॥ नास्ति दोषः क्वचिद्भावो ह्यभावश्च[11] स एव हि[12] । अभावस्य च धर्माः स्युर्भावास्तेषां च तेऽखिलाः[13] ॥ प्रत्यक्षमानतः सर्वमेतन्नो वारणक्षमम् । [14]सर्वे भावा अभावाश्च[15] पदार्थास्तेन सर्वदा ॥ तथापि प्रथमं बुद्धेर्यो निषेधस्य गोचरः । सोऽभावो विधिबुद्धेस्तु गोचरः प्रथमं परः[16] ॥ तस्मात्प्रध्व[17]स्तभेदादि[18] सदित्येवावगम्यते । अस्त्यभावोऽस्ति च ध्वंसो देहाभावश्च भस्मता ॥ इत्यादि युज्यते सर्वं प्रत्यक्षादिप्रमाणतः । अन्योऽन्याभावभेदौ च पृथक्त्वं च पृथक् पृथक्[19] ॥ यत्कल्पयन्ति तच्चैव कल्पनागौरवाद्धतम्[20] । पर्याय[21]त्वेन ते शब्दा ज्ञायन्ते सर्व एव हि ॥ भेदस्य तु स्वरूपत्वे ये[22] वदन्ति च शून्यताम् । अद्भुतास्ते

---

[1] तदभिन्नम्. [2] अग्निमच्छब्दार्थः. [3] धूमवत्वानुमानम्. [4] विशिष्टो अनुमानसाध्यः. [5] पर्वतस्येति. [6] उपाधीनां अनन्तत्वात्. [7] यस्मात्. [8] भ्रान्त्या. [9] सम्बन्धः. [10] दुष्टा. [11] भवति. [12] भावोभवति. [13] बहवः. [14] पदार्थाः. [15] भवन्ति. [16] अन्यः=भावः. [17] प्रध्वंस. [18] पृथक्त्वप्रमेयत्वादि. [19] विभिन्नानि. [20] निरस्तम्. [21] क्रमप्रयोजनत्वेन. [22] मायावादिनः.

SGDF
Sri Gargeshwari Digital Foundation

यतोऽन्यस्य[1] प्रतियोगित्वमिष्यते ॥ प्रतियोगिनो हि भेदोऽयं न तु स्वस्मा[2]त्कथञ्चन । विभागेनाल्पतैव स्यात्कुत एव तु शून्यता ॥ न शून्यानां हि संयोगाद्भावो[3] वस्तुं न इष्यते । विदारणार्थो धातुश्च विभागगुणवाचकः ॥ अविदारणेऽपि ह्यास्यस्य[4] भिन्नावोष्ठौ च तस्य[5] च । अत उन्मत्तवाक्यत्वान्मायावादो ह्युपेक्षितः ॥ न चामन्द-सदानन्दस्यन्द्यनन्त[6]गुणार्णवः । ईश्वरोऽष्टगुणत्वेन प्रमेयोऽप्रमितत्वतः ॥ 'मय्यनन्तगुणेऽनन्ते [7]गुणतोऽनन्तविग्रहे'[8] । 'अनन्तगुणमाहात्म्य शक्तिज्ञानमहार्णवः ॥ नारायणः परोऽशेषचेतनेभ्यः परं पदम्' । इत्यादिवेदतद्वाक्यैरनन्तैश्चावसीयते ॥ अनन्तगुणता विष्णोः कथमेव ह्यपोद्यते । यद्यनन्तविशेषाश्च तज्ज्ञानादेर्निवारिताः कथं तत्तद्विषयता सार्वज्ञ्यार्थं विधीयते । औपाधिकविशेषस्तु पूर्वमेव निराकृतः ॥ स्वप्रकाशत्वमपि तु यैर्ज्ञानस्य[9] निवारितम् । कथं सर्वज्ञता तस्य स्वज्ञानाधिगमं विना ॥ ज्ञानं विश्वाधिगन्त्वेकं तज्ज्ञानविषयं परम् । इति ज्ञानद्वयेनैव सर्ववित्परमेश्वरः ॥ इति चेदेष एवार्थ[10]स्तज्ज्ञानावसितो यदि । स्वप्रकाशत्वमेव स्याज्ज्ञानं ह्येतद्विशेषणम् ॥ [11]ज्ञानान्तरेण चेदत्र भवेदेवानवस्थितिः । स्वप्रकाशत्वमेतस्माद्दुर्निवारं समापतेत् ॥ सुखवान्दुःखवांश्च स्यादिति व्याप्तिश्च नो भवेत् । निर्दुःखत्वं महानन्दः श्रुत्यैवेशस्य भण्यते ॥ योऽशनायापिपासे च शोकादींश्चातिवर्तते । आनन्दं ब्रह्मणो विद्वान्वि[12]पाप्मेत्यादिका च सा ॥ ईश्वरस्य तथेष्टत्वं[13] दुःखित्वोपाधि[14]रित्यपि । उक्ते किमुत्तरं ब्रूयात् श्रुत्यनादरतत्परः ॥

---

1 धर्मिभिन्नस्य. 2 धर्मिस्वरूपात्. 3 जन्म. 4 ओष्ठयोः. 5 मायावादिनः. 6 स्यन्दीचासौ अनन्तगुणश्चासौ अर्णवश्च क्षीरार्णव इव. 7 गुणतोऽनन्ते प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते ॥ तदानन्त्यं तु गुणतः ते चानन्ता हि सङ्ख्यया' इति तन्त्रभागवते. 8 भाग. ६-५. 9 ईश्वरज्ञानस्य. 10 ईश्वर. 11 तृतीयज्ञानेन. 12 य आत्मा अपहत पाप्मा. 13 दुःखीभवतु इति. 14 दुःखित्वंप्रतिप्रयोजकम्.

SGDF
Sri Gargeshwari Digital Foundation

न चात्मदुःखितेच्छा स्यादत एतन्निवार्यते । सह[1]दर्शनमात्रेण [2]श्रुतीनामपलापकः ॥ यज्ञादेरपि पापस्य हेतुत्वं हिंसयायुतेः । नानुमाति कथं तत्र यद्युपाधिर्निषिद्धता ॥ अदुःखित्वेन चानुक्तिः कथं नोपाधितां व्रजेत् । 'अदुःखमितरत्सर्वं जीवा एव तु दुःखिनः ॥ तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते' । इति श्रुतिर्हि परमा श्रुत्युक्तिर्यदि कारणम् ॥ किं कार्यमनुमानेन गलस्तनसमेन हि । अनुमानेन यद्यर्थः श्रुतिदृष्टोऽप्यपोद्यते ॥ पूर्वोक्तेन प्रकारेण नेश्वरो धर्म एव च । स्यात्तत्फलं च तेनात्र श्रुतिरेव प्रमा भवेत् ॥ ईशस्यानुमया सिद्धेः श्रुतिर्धर्मि[3]प्रमा भवेत् । तया सर्वगुणैः पूर्व ईश उक्तो यतस्ततः ॥ अनानन्दानुमानस्य धर्मिग्राहिविरोधतः । न प्रमाणं भवेत्तस्मान्नानुमाऽत्रोपयोगिनी ॥ नित्येच्छत्वात्परेशस्य परमाणुसदात्वतः । अदृष्टकालयोश्चैव भावात्कार्यं सदा भवेत् ॥ न हि कालविभेदोऽस्ति तत्पक्षेऽस्मन्मते हरेः । विशेषकाल एवैतत्सृष्ट्या[4]दीच्छा[5] सदातना ॥ विशेषाश्चैव[6] कालस्य हरेरिच्छावशाः सदा । सर्वे निमेषा[7] इति हि श्रुतिरेवाह सादरम् ॥ [8]उदीरयति कालाख्यां [9]शक्तिमित्यस्य वागपि । कालस्य कालगत्वेन न विरोधोऽपि कश्चन ॥ [10]असङ्ख्यातविशेषत्वादिच्छाया[11] अपि सर्वदा[12] । 'ईशो देशश्च[13] कालश्च स्वगता एव सर्वदा ॥ ईशाधीनौ च तौ नित्यं तदाधारौ च तद्गतौ' । इति श्रुतिरपि प्राह काले स्वोद्दिष्ट एव तु ॥ तत्कालसृष्टिमेवातो वाञ्छतीशः सदैव हि । स्यात्कालः स तदैवेति कालस्य स्वगतत्वतः ॥ स्वभावादेव हीच्छैषा[14] देवस्यैष इति श्रुतेः । स्वभावोऽपि परेशेच्छावश

---

[1] सुखदुःखयोः. [2] सुखवत्त्वबोधकश्रुतीनाम्. [3] ग्राहक. [4] भवति. [5] यतः. [6] क्षणलवादयः. [7] कालभेदः. [8] 'कालात्मिकांशक्तिमुदीरयानः'=जनयन्. भागवते. [9] सहकारिशक्तिम्. [10] सिसृक्षात्वादि. [11] ईश्वरेच्छायाः. [12] विद्यमानायाअपि. [13] अव्याकृताकाशः. [14] विचित्रा.

SGDF
Sri Gargeshwari Digital Foundation

इत्युदितः पुरा ॥ नित्या अनित्याश्च ततस्तदधीना इति श्रुतिः ॥१३॥

॥ ॐ रूपादिमत्त्वाच्च विपर्ययो[1] दर्शनात् ॐ ॥१५॥

॥ ॐ उभयथा च दोषात् ॐ ॥ १६ ॥ [2]रूपस्पर्शादि-हेतुभ्यः [3]परमाणोरनित्यता । अनुमेया ॥ १५ ॥ १६ ॥ ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ ॥ १७ ॥ [4]श्रुतीनां च विरुद्धत्वान्न तन्मतम् ॥ उपादेयमतश्चायमविरुद्धः समन्वयः ॥ ६ ॥

॥ ॐ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॐ ॥ ॥ १८ ॥ वैभाषिकाश्च सौत्रान्ताः[5] [6]स्वरसक्षणिकं जगत् । अणूनां समुदायं च[7] काल[8]कर्मनिमित्ततः ॥ उत्पत्ति[9]काले युक्ताना[10]मात्मानं च क्षणस्थितम् । नित्यं सन्तानमेतेषां[11] पञ्चस्कन्धात्मना स्थितम्[12] ॥ संस्काररूपविज्ञानसंज्ञादुःखात्मना स्थितिः[13] । दुःखाभावं सुखं चाहु[14]ररूपज्ञानसन्ततिम् ॥ मोक्षं स[15] समुदायो हि नैकस्मादेव[16] युज्यते । नो[17]भयोश्चोभयत्वं[18] यत्समुदायव्यपेक्षया[19] ॥ अतोऽन्योऽन्याश्रयत्वेन समुदायो न युज्यते ॥१८॥ ॐ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॐ ॥ १९ ॥ अन्योऽन्या[20]पेक्षया पुंसः समुदायत्ववेदनम्[21] । स्यात्त[22]त्सदातनत्वेऽपि तच्च[23] सामीप्यहेतुकम् ॥ इति चेत्कार्यसम्भूति[24]मात्रव्यापृतिकारणम् ।

---

[1] नित्यताराहित्यम्. [2] रूपादिमत्वात्. [3] परमाणूनाम्. [4] श्रुतिभिः. [5] आहुः. [6] स्वभावेनैव क्षणिकम्. [7] जगदाहुः. [8] कर्माख्य. [9] सृष्टिकाले. [10] संनिकृष्टतयोत्पन्नानामणूनाम्. [11] अणूनाम्. [12] जगद्रूक्षम्. [13] स्कन्धानाम्. [14] निर्विषय. [15] गोघटादिबुद्धिविषयः. [16] परमाणोः. [17] सकाशात्. [18] समुदितानेकत्वम्. [19] भवति. [20] परमाणुज्ञानापेक्षया. [21] कदाचित् अतः सृष्टिव्यवस्था. [22] समुदायस्य. [23] परमाणु. [24] उत्पत्तिम्.

SGDF
Sri Gangeshwari Digital Foundation

न तु [1]कार्यविशेषेषु व्यापृतं कारणं भवेत् ॥ अतोऽर्थेन्द्रियसंयोगि-[2] रूपकारणताऽऽत्मनः[3] । संयोगिरूपराहित्यान्नैव [4]तज्ज्ञानताऽपि हि ॥ विशेष[5]कार्यजनकं यदि कारणमिष्यते । कुतः समानरूपत्वं कार्याणामपि सर्वशः ॥ अतोऽनियत्या यत्कि[6]ञ्चिद्यस्य कस्यापि कारणम्[7] । अदृष्टमपि तस्यैव विशेषापादकं कुतः ॥ यस्य कस्यापि यत्किञ्चिद्विशेषमुपपादयेत् । कार्यं च कारणं चैव यत्किञ्चिद्यस्य कस्यचित्[8] ॥ भवेन्नियामकाभावादिदमस्यैव कारणम् । इति नित्यविनाशित्वे केन मानेन गम्यते ॥ इदं न जायतेऽमुष्मादित्यत्रापि न कारणम् ॥१९॥

॥ ॐ अनुस्मृतेश्च ॐ ॥ २५ ॥ विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातनाः । दृश्यते प्रत्यभिज्ञातः स्थिरत्वं सर्ववस्तुषु ॥ २५ ॥

॥ ॐ आकाशे चाविशेषात् ॐ ॥ २४ ॥ फलादीनां[9] विशेषेण[10] सर्वत्राप्यनुमीयते । सत्त्वेन क्षणिकत्वं चेदाकाशस्याविशेषतः[11] ॥ अविशेषोऽखिल[12]स्यापि सत्त्वात्किं नानुमीयते । यद्याकाशस्य सत्त्वं न कुत एव नरादिषु[13] ॥ सधर्मिप्रतियोगित्व-[14] मभावस्य नियामकम् । तौ[15] विना नह्यभावश्च क्वचिद्दृष्टः कदाचन ॥ अधर्मिप्रतियोगित्वमाकाशस्यावगम्यते । स्वीकारत्यागतोऽदृष्टदृष्टयोः सर्ववस्तुषु ॥ गुणानुन्मत्त[16] एवासौ विदधात्यधिकं[17] पुनः ॥ २४ ॥

॥ ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ ॥ २० ॥ उत्तरोत्पत्तिमात्रेण विनाशात्पूर्ववस्तुनः । न संस्कारार्पकत्वं च

---

[1] विसदृशकार्यजनने. [2] ग्राह्यग्राहकरूपयोः अर्थेन्द्रिययोः कार्ययोः. [3] नैव. [4] आत्मनः. [5] विसदृश. [6] अदृष्टम्. [7] स्यात्. [8] एव. [9] देहदीपादीनाम्. [10] परिमाणभेदेन दृष्टान्तेन. [11] पूर्वोत्तरक्षणयोः भेदरहितत्वात्. [12] फलादेः. [13] देहादिषु. [14] अपेक्षावत्त्वम्. [15] तज्ज्ञानम्. [16] उन्मत्ते. [17] स्वतः.

SGDF
Sri Gargeshwari Digital Foundation

युज्यते [1]कस्यचित्क्वचित्[2] ॥ अतो ज्ञातं[3] मयेत्यादि न ज्ञेय[4]मनुमा[5]
कुतः । एकत्वमनुभूतिस्थं[6] त्यक्त्वा निर्मानिका भिदा ॥ कुत
आत्मादिकेषु स्याद्धल्येवानुभवो यतः । कार्यकारणयोश्चैककालीनत्वं
विना कथम् ॥ पूर्वसंस्कारयोगी स्यादुत्तरो नियमेन च । संबद्धा
एव संस्कारमन्यत्रादधतेऽखिलाः ॥ असंबद्धः कथं पूर्व उत्तरे
वासनाकरः । एककालतया योगं विना संस्कारतः कथम्[7] ॥ क्षण-
मात्रमवस्थानं स्वीकृतं सर्ववस्तुषु । पूर्वमध्यापरकलाविकलः क्षण
इष्यते ॥ २० ॥ ॐ असति प्रतिज्ञोपरोधो यौगपद्य-
मन्यथा ॐ ॥ २१ ॥ पूर्वभावभवं[8] कार्यमुत तन्नाशसंभवम् ।
यौगपद्यं सति भवेदुत्पाद्यानामशेषतः ॥ विनाशे चेन्न तत्कार्ये
[9]कार्योत्पत्तौ च का प्रमा । [10]अभेदेऽपि विशेषेण[11] देहदीपफलादिषु ॥
विशेष[12]दर्शनं युक्तमस्माक[13]मनुभूतितः । विशेषदर्शनं मानं यदि न
स्थैर्यदृक्कुतः[14] ॥ दिक्सुखे च [15]खदृष्टान्ताद्भावौ[16] [17]सच्चेत्क्वचिद्भवेत्[18] ।
विश्वं प्रत्यक्षगं त्यक्त्वा तयोर्योऽनुमितं वदेत् ॥ मायावादिवदेवासा-
वुपेक्ष्यो भूतिमिच्छता । सर्वप्रमाणसिद्धं [19]यद्बुद्धेर्भेदेन सर्वदा ॥
कथं नु तस्य बुद्धित्वं विश्वमन्यच्च[20] किंप्रमम्[21] । सर्वलोको बिभेत्यज्ञो
यस्मादनुभवात्सदा ॥ तस्यापलापिनः किं न निष्प्रमाणकवादिनः ।
[22]सोऽहं तदिदमेवाहं सुखी सद्गगनं दिशः ॥ सत्या इत्याद्यनुभवाः

---

[1] कारणस्य. [2] कार्ये. [3] व्यासत्वेनज्ञातं यत् तदत्र विद्यते इति. [4] ज्ञातुं शक्यम्. [5] ततश्च. [6] प्रत्यभिज्ञासिद्धम्. [7] अनुमानादिव्यवहारः. [8] कारणस्य सत्वेजन्यम्. [9] प्रतिक्षणम्. [10] पूर्वोत्तरक्षणयोः. [11] आरंभवादात् वैलक्षण्येन. [12] परिमाणभेदस्य. [13] परिणामवादिनां मते. [14] मानम्. [15] आकाश. [16] भावरूपे. [17] सद्भावः. [18] चेत् तदृष्टान्तेन. [19] ज्ञानात् भिन्नत्वेन. [20] ज्ञानात्. [21] किं प्रमाणकम्. [22] स एव.

SGDF
Sri Gurgeshwari Digital Foundation

सदा तत्प्रतिपक्षगाः । अतो निर्मानमखिलप्रमाणप्रतिपक्षगम् ॥ दुर्मतं कोऽनुगृह्णीयाद्विनाऽसुरतर्तिं क्वचित् ॥ २१ ॥ ७ ॥

॥ ॐ [1]नासतोऽ[2]दृष्टत्वात्[3] ॐ ॥ २६ ॥ [4]अपरः शून्य[5]मखिलं मनोवाचामगोचरम् । निर्विशेषं स्वयंभातं निर्लेप[6]-मजरामरम् ॥ अशेषदोषरहितमनन्तं देशकालतः । वस्तुतश्च[7] [8]तदसीति नित्योपासाऽपरोक्षितम् ॥ रागादिदोषरहितं [9]तद्भावं योगिनं नयेत् । तस्यैवानादिसंवृत्या[10] नानाभेदात्मकं जगत् ॥ सदिवाभाति सत्यत्वं सांवृतं तस्य चेष्यते । पारमार्थिकसत्यत्वं शून्यादन्यस्य न क्वचित् ॥ सांवृतेनैव सत्त्वेन व्यवहारोऽखिलो भवेत्[11] । शून्यात्संवृतियोगेन विश्वमेतत्प्रवर्तते ॥ सृष्टिकाले पुनश्चान्ते [12]स्तिमितं शून्यतां व्रजेत् । इति ब्रूते तमुद्दिश्य जगाद जगतां गुरुः ॥ २६ ॥ ॐ नासतोऽदृष्टत्वात् ॐ ॥ [13]नासतो जगतो भावो[14] न हि दृष्टाऽसतो जनिः । सतः[15] क्वचित्प्रमाणं च दृष्टिरेवाखिलाद्वरम् ॥ ॐ उदा[16]सीनानामपि चैवं सिद्धिः ॐ ॥ २७ ॥ यद्येवं सप्तमरसान्मधुरादिव पीनता । भवेज्जनस्य मार्जारशृङ्गं गोरिव घातकम् ॥ कार्यार्थी कारणं सच्च नोपादद्यात्कथश्चन । न प्रवर्तेत चेष्टाय शून्यादेवेष्ट सम्भवात् ॥ देशकालादिनियमो न हि शून्यात्सतो[17] भवेत् । पुरुषेच्छानुसारेण यदि किञ्चित्प्रजायते ॥ किं नानुमीयते तद्वद्वस्तुत्वा-

---

[1] पुरुषः. [2] आदिकालीन कार्यस्य कर्ता अनुमातव्यः. [3] तथा दृष्टत्वात्. [4] अपरः माध्यमिकः इति ब्रूते. [5] अखिलं जगत् शून्यमेव. [6] धर्माधर्म सम्बन्धशून्यम्. [7] अनन्तम्. [8] तच्छून्यमहम्. [9] शून्यत्वरूपं मोक्षम्. [10] संव्रियते अनया इति अविद्यया. [11] स्वप्नवत्. [12] निष्क्रियम्. [13] शून्यात्. [14] जन्म. [15] भवतः कार्यस्य. [16] हेयोपादेयोपेक्षणीय बुध्यविषयाणाम्, सप्तमरसादीनामपि सकाशात् पीनत्वादिः स्यात्. [17] जायमानस्य.

SGDF
Sri Gangeshwari Digital Foundation

त्पुरुषोद्भवः[1] । सर्वस्यापि ॥ २७ ॥ ॐ नाभाव उपलब्धेः ॐ ॥ २८ ॥ न [2]चाभावो विश्वं सदिति गम्यते ॥ यतोऽनुभवरोधे तु वचनं वादिनः कुतः । स्वप्न[3]भ्रान्तिवदेवेदं संवृत्यैवोपलभ्यते ॥ यदि सत्त्वेन ॥ २९ ॥ ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ ॥ ॥ २९ ॥ किं चात्र भ्रमो नैव निवर्तते ॥ अनादेरस्य विश्वस्य [4]निवृत्तिर्यदि चेष्यते । निवृत्तिश्च निवर्तेत तस्या भ्रान्तित्वसम्भवात् ॥ दृष्टस्य[5] भ्रान्तिता[6] चेत्स्याददृष्टे[7] न भ्रमः कुतः । गवामश्शृङ्गिभावेन[8] न हि स्याच्छशशृङ्गिता ॥ अस्माकं[9] तु प्रमाणेन [10]प्रसादादीश्वरस्य च । उक्तभंग्याऽऽगमानां च प्रामाण्याद्युज्यतेऽखिलम्[11] ॥ दृश्यत्वाद्धिमतं मिथ्या स्वप्नवच्चेदियं च मा[12] । मिथ्या चेत्साध्यसिद्धिर्न व्यभिचारो न चेद्भवेत् ॥ साधकत्वमसत्यस्य साध्यं विप्रतिपत्तितः । तस्य चेत्यनवस्था स्यात्सत्त्वं[13] चास्यानुभूतितः[14] ॥ अनुभूतिविरोधेन मिथ्यात्वे मा न काचन । अतीतानागतौ कालावपि नः साक्षिगोचरौ ॥ [15]तत्सम्बन्धितया सत्त्व[16]मपि दृष्टस्य साक्षिगम् । दृढदृष्टं[17] तु यद्दृष्टं दृष्टाभासस्ततोऽपरम् ॥ भ्रान्तेः[18] संवृतिसत्यस्य विशेषो[19] व्यभिचारवान् । तेनाप्यङ्गीकृतः सम्यक्स नः सत्यत्वमेव हि[20] ॥ विज्ञानाद्व्यभिचारो[21]ऽस्य कदाचित्स्यादिति प्रमा । नैव दृष्टा प्रमा सा च न भवेत्स्वविरोधतः[22] ॥ भेदो[23] विशेष्यधर्म्यादिग्रहणापेक्षया

---

[1] पुरुषात्. [2] न भवतीति असत्. [3] स्वप्नभ्रान्त्योरिव. [4] बाधः. [5] प्रमाणदृष्टस्य. [6] कल्पितत्वम्. [7] प्रमाणादृष्टे शून्ये. [8] सहिता. [9] सतः कारणत्ववादिनांमते. [10] सङ्कल्पात्. [11] परेणाक्षिप्तम्. [12] दृश्यत्वानुमानम्. [13] अबाध्यत्वम्. [14] सिद्धम्. [15] कालान्तर. [16] अबाध्यत्वम्. [17] निर्दोषत्वेन. [18] विषयात् शुक्तिरजतात्. [19] वैलक्षण्यम्. [20] साधयिष्यति. [21] निवृत्तिः. [22] स्वविषयस्य स्वस्य च बाध्यत्वापादकत्वात्. [23] सत्यत्वप्रत्यक्षस्य तर्कबाधं निराह.

SGDF
Sri Gurgeshwari Digital Foundation

यदि । अन्योऽन्याश्रयताहेतोर्दुर्ग्राह्य इति यन्न तत् ॥ स्वरूपं वस्तुनो भेदो यन्न तस्य ग्रहेऽग्रहः । अन्यथाऽस्यामुना भेद इति वक्तुं न शक्यते ॥ अगृहीतो यदा भेदस्तदा स्वस्मादिति ग्रहः । स्यात्प्रतीति विरोधाच्च न हि कश्चित्तथा वदेत् ॥ धर्मित्वप्रतियोगित्वतद्भेदा युगपद्यदि । विशेषणं विशेष्यं च तद्भावश्चैव गृह्यते ॥ को विरोधः स्वरूपेण गृहीतो भेद एव तु । अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यते ॥ किं च भेदः कथं ग्राह्य इति यः परिपृच्छति । [1]धर्म्यादिभेदग्रहणात्तेनोक्तोऽन्योऽन्यसंश्रयः ॥ अन्यत्वाग्रहणे प्रोक्तः कथमन्योऽन्यसंश्रयः । अन्यत्वं यदि सिद्धं स्यात्कथमन्योऽन्य[2]संश्रयः ॥ एतादृशस्य वक्तारावुभौ जात्युत्तराकरौ[3] । मायी माध्यमिकश्चैव तदुपेक्ष्यौ बुभूषुभिः ॥ यच्छून्यवादिनः शून्यं तदेव ब्रह्म मायिनः । न हि लक्षणभेदोऽस्ति निर्विशेषत्वतस्तयोः ॥ अनृतादिविरोधित्वमुभयोश्च स्वलक्षणम् । स्ववाक्या[4]भावसंवादान्न कृत्यं प्रतिवादिनः ॥ तत्पक्ष[5] इति वैधर्म्यान्न स्वप्नादिवदित्यजः । अप्रयत्नान्निराचक्रे चेति दृष्टिविरुद्धताम्॥ निष्प्रमाणत्वमप्यस्य[6] सूचयामास विश्वकृत् ॥२९॥८॥

॥ ॐ न भावो[7]ऽनुपलब्धेः ॐ ॥ ३० ॥ ज्ञानमेवैकमखिलज्ञेयाकारं प्रभासते । तत्र[8] सन्ततिभेदश्च स्वभेदो[9] भेद एव च ॥ कल्पिताः प्रतिभासन्ते नानासंवृतिभूमिषु । इत्येतदपि नो युक्तं न हि ज्ञानतया जगत् ॥ [10]भासतेऽनुभवस्यैव विरुद्धत्वादपेशलम् । तन्मतं ॥ ३० ॥ ॐ क्षणिकत्वाच्च ॐ ॥ ३१ ॥ क्षणिक-

---

[1] धर्म्यादिग्रहणसापेक्ष. [2] भेदस्य ज्ञातत्वेन अन्योन्याश्रयस्य अप्रतिबन्धकत्वात्. [3] छलोत्तरस्य आकरः निधिः. [4] स्ववाक्यस्य=हेतुवाक्यार्थभूत दृश्यत्वस्य. [5] तन्मिथ्यात्वसाधनविषये. [6] मिथ्यात्वस्य. [7] ज्ञानात्मकं जगत्. [8] ज्ञानज्ञेययोः भेदः इति संबन्धः. [9] पूर्वोत्तरज्ञानभेदः. [10] अनुभवेन.

SGDF
Sri Gurgeshwari Digital Foundation

त्वाच्च ज्ञानस्य स्थिररूपतः ॥ ज्ञेयस्योक्तप्रकारेण[1] ॥ ३१ ॥

॥ ॐ सर्वथाऽनुपपत्तेश्च ॐ ॥ ३२ ॥ सर्वश्रुतिविरोधतः । अनुभूतिविरुद्धत्वादपि पक्षा इमेऽशिवाः ॥ ३२ ॥ ९ ॥

॥ ॐ नैकस्मिन्नसम्भवात् ॐ ॥ ३३ ॥ आह क्षपणको विश्वं सदसद्द्वयमद्वयम् । द्वयाद्वयमतत्सर्वं सप्तभङ्गि सदातनम् ॥ नैतत्पदार्थ एकस्मिन्युक्तं दृष्टिविरोधतः । भावाभावतया विश्वं येन रूपेण मीयते ॥ तद्रूपमेव तदिति नियमः केन वार्यते । तत्तद्दोष-निवृत्त्यर्थं स्वीकृता तत्तदात्मता ॥ यदि तैरखिलैर्दोषैर्लिप्यते चल-दर्शनः । अतिहाय प्रमाणाप्तनियमं सदसत्तया ॥ अशेषमाविरुद्धं च निर्मानं व्याहतं सदा । सर्वप्रकारं वदतो दृष्टहानिरमग्रहः[2] ॥ स्वव्याहतत्वमित्याद्या दोषाः सर्वे भवन्ति हि । वक्ति स्वप्रभ[3]मात्मानं देहमानं ॥ ३३ ॥ ॐ एवं चात्माकात्स्न्यर्म् ॐ ॥ ३४ ॥

॥ ॐ न च पर्यायादप्यविरोधो विकारादिभ्यः ॐ ॥ ॥ ३५ ॥ [4]तदप्यलम् ॥ दुष्टं नानाशरीरेषु प्रवेशादन्यथा[5]भवात् । अन्यथाभावि यद्वस्तु तदनित्यमिति स्थितिः[6] ॥ तन्मते[7] [8]तदनित्यत्वं [9]पुद्गलस्यानिवारितम् । नानित्यताऽस्मत्पक्षे तु चैतन्यादेर्विशेषिणः[10] ॥ लक्षणस्य[11] निवृत्तौ तु[12] स्यान्न तच्चेतने क्वचित् । ओतप्रोतात्मकत्वं तु पटे देहेऽङ्गसंस्थितिः ॥ इत्यादिलक्षणस्यैव निवृत्तौ स्यादनित्यता । भौतिकं त्वेव रूपादि व्याप्तं नाशेन नो मते ॥ नैवं तस्यान्यथाभावो यस्यानित्यत्वमीरितम् । रूपादियुक्तस्य तथा जगन्नाशित्वसिद्धये ॥

---

[1] अनुस्मृतेश्चेत्यत्र. [2] अप्रामाणिकस्वीकारः. [3] स्वयं प्रकाशम्. [4] देहपरिमाणत्वम्. [5] आत्मनः विकारापत्तेः. [6] व्याप्तिः. [7] जैनमते स्वीकृता. [8] आत्मनः. [9] देहस्य इव (आत्मनः). [10] लक्ष्यस्य अनित्यता स्यात्. [11] चैतन्यादेः. [12] एव.

SGDF
Sri Gangadhareswar Digital Foundation

व्याप्त्या तयाऽन्यथाभावादात्मनोऽनित्यता भवेत्॥३५॥ ॐ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॐ ॥३६॥ नित्योर्ध्वंगतिरप्येषा या मुक्तिरिति कथ्यते। अलोकाकाशमाप्तस्य कथं न विकृतिश्च सा॥ कीदृशश्चान्यथाभावो नाशहेतुतयेष्यते। संस्थानापगमश्चेत्स न हि भूसागरादिषु॥ यः कश्चिदन्यथाभावो यदि मुक्तिश्च तादृशी। देहमाने विकारस्स्यादिति स्यात्सूनात्मनः॥ आह हस्त्यादिदेहेषु ह्यपि स्यादन्यथा[1]भवः। अणुदेहस्य जीवस्य गजत्वे विकृतिर्हि या॥ देहव्याप्तौ विशेषः कस्तस्याः [2]स्यात्सुतनौ च नुः[3]। गीतात्पुष्पफलावाप्तिः स्पर्शात्कार्श्यं रसात्स्थितिः॥ अपि वृक्षस्य दृश्यन्त इति नाऽनात्मता भवेत्। एवं चात्माकात्स्न्र्यमिति तत एवाह वेदवित्॥ ३६ ॥ १० ॥

॥ ॐ पत्युरसामञ्जस्यात् ॐ ॥३७॥ सर्वज्ञत्वादिकैस्सर्वैर्गुणैरुक्तं सदाशिवम्। जगद्विचित्ररचनाकर्तारं दोषवर्जितम्॥ आहुः पाशुपतास्तच्च बहुश्रुतिविरोधतः। नोपादेयं मतं ह्यस्य देवस्य स्तुहिगर्तगम्॥ उत्पिपेष शिरस्तस्य गृणीषे सत्पतिं पदम्। यद्विष्णोरुपमं हन्तुं रुद्रमाकृष्यते मया॥ धनुर्यं कामये तं तमुग्रं मा शिश्नदेवताः। घ्नन्छिश्नदेवतानेकोऽसावासीन्नारायणः परः॥ तस्माद्रुद्रस्सम्प्रसादश्चाभूतां वैष्णवं मखम्। यज्ञेन यज्ञमयजन्ताबध्नन्पुरुषं पशुम्॥ यो भूतानामधिपती रुद्रस्तन्तिचरो वृषा। इत्यादिश्रुतिसामर्थ्यात्पारतन्त्र्यं जनिर्मृतिः॥ पराधीनपदप्राप्तिरज्ञत्वं प्रलयेऽभवः[4]। प्रतीयन्ते सदोषत्वान्नेशः पशुपतिस्ततः॥ ६७॥ ॐ सम्बन्धानुपपत्तेश्च ॐ ॥ ३८ ॥ अशरीरत्वतस्तस्य सम्बन्धो[5] जगता

---

[1] विकारः. [2] वृक्षदेहस्थस्य. [3] पुरुषस्य या विकृतिः तस्याश्च को विशेषः. [4] असत्त्वम्. [5] कर्तृत्वेन.

SGDF
Sri Gargeshwari Digital Foundation

क्वचित् । कर्तृत्वेन न युज्येत देहिनो[1] ज्ञानदृष्टितः[2] ॥ ३८ ॥
॥ ॐ करणवच्चेन्न भोगादिभ्यः ॐ ॥ ४० ॥ न च
देहादिवद्विश्वमस्य स्याद्भोगसम्भवात् ॥ ४० ॥ ॐ अधिष्ठाना-
नुपपत्तेश्च ॐ ॥३९॥ अधिष्ठाने स्थितः कर्ता कार्यं कुर्वन्प्रतीयते ।
नास्याधिष्ठानयोगोऽस्ति भूतानां प्रलये तदा ॥ अदेहश्चेदसर्वज्ञः
शिलाकाष्ठादिवत्सदा । देही चेदन्तवानेव यज्ञदत्तनिदर्शनात् ॥ न
चैतदखिलं विष्णौ श्रुतिप्रामाण्यगौरवात् । मनोबुद्ध्यङ्गितां विष्णो-
र्लक्षयामो य एव सः ॥ स एव देहो विज्ञानमैश्वर्यं शक्ति[3]रूर्जिता ।
देहो विष्णोर्न ते विष्णो वासुदेवोऽग्रतो भवेत् ॥ एको नारायण
आसीन्न ब्रह्मा न च शङ्करः । अजस्य नाभावध्येकमर्पितं मात्रया
परः ॥ सद्देहस्सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुख-
सुखः स विष्णुः परमोऽक्षरः ॥ आनन्द एक एवाग्र आसीन्नारायणः
प्रभुः । प्रियं तस्य शिरो मोदप्रमोदौ च भुजौ हरेः ॥ आनन्दो
मध्यतो ब्रह्म पुच्छं नान्यदभूत्क्वचित् । मनसोऽस्याभवद्ब्रह्म ललाटा-
दपि शङ्करः ॥ पक्षयोर्गरुडः शेषो मुखादासीत्सरस्वती । सहस्रशीर्षा
पुरुषः सहस्राक्षः सहस्रपात् ॥ इत्यादिश्रुतिसन्दर्भबलान्नित्यगुणात्मनः ।
विष्णोर्देहाज्जगत्सर्वमाविरासीदितीयते ॥ मानवत्त्वाद्विरोधः को नामानं
क्वचिदिष्यते । अविरोधो विरोधश्च मानेनैव हि गम्यते ॥ अत
उक्तं समस्तं च वासुदेवस्य युज्यते । शिवादिनामयुक्ताश्च श्रुतयो
विष्णुवाचकाः ॥ नामानि सर्वाणि च यमेको यो देवनामधाः ।
विष्णुनामानि नान्यस्य सर्वनामा हरिः स्वयम् ॥ न नारायणनामानि
तदन्येष्वपरे हरौ । इत्यादिश्रुतयस्तत्र मानं चोक्तः समन्वयः ॥
पुराणा[4]नि [5]पुराणाद्यैर्विरुद्धत्वान्न तत्प्रमा । तद्विरुद्धेषु नो मानं

---

[1] देहवतामेव. [2] ज्ञानदर्शनात्. [3] बलवती. [4] शैव. [5] वैष्णव.

SGDF
Sri Gangeshwari Digital Foundation

पूर्वापरविरोधतः ॥ समब्राह्मविरोधाच्च नियमा[1]द्वैष्णवेष्वपि । मोहार्थमुक्तितश्चैव विष्णुरेको गुणार्णवः ॥ स्कन्दसूर्यगणेशादि मतानि न्यायतोऽमुतः । निराकृतान्यशेषेण सिद्धान्तस्याविशेषतः ॥३९॥११॥

॥ ॐ उत्पत्त्यसम्भवात् ॐ ॥४२॥ निराकृतौ विशेषस्य[2] भावाच्छक्तिमतं पृथक् । दृष्यते महती देवी ह्रीङ्कारी सर्वकारणम् ॥ त्रिपुरा भैरवीत्यादिनामभिः साऽभिधीयते । तस्याः सदाशिवाद्याश्च जायन्ते देव[3]मानवाः ॥ भूतभौतिकमप्येतदिति तन्नोपपद्यते । दृष्टा पुंभ्यः सदा सृष्टिः स्त्रीपुंभ्यो वा विशेषतः ॥ केवलाभ्यो न हि स्त्रीभ्यस्तत उत्पत्त्यसम्भवात् । नार्च्यं महावाममतं वामैरन्यैरुदीर्यते ॥ शिवोपसर्जना शक्तिः ससर्जेदं समन्ततः । इति तच्चोपपन्नं न ॥४२॥

॥ ॐ न च कर्तुः करणम् ॐ ॥४३॥ शिवस्याकरणत्वतः ॥ अदेहत्वादपि ह्यन्ये ब्रूयुः सर्वज्ञमीश्वरम् । अणुवामा न तद्युक्तं ॥४३॥

॥ ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ ॥ ४४ ॥ ईशवादप्रवेशनात् ॥ सार्वज्ञादिगुणैर्युक्तं गुरुकल्पनया द्वयम्[4] । न युज्यते ततस्त्वीश एक एव प्रयोजकः ॥ उक्तदोषश्च तत्पक्ष इति नैवात्र दृष्यते ॥ ४४ ॥ ॐ विप्रतिषेधाच्च ॐ ॥ ४५ ॥ श्रुतिस्मृतीतिहासनां[5] सामस्त्येन विरोधतः । [6]सतां जुगुप्सितत्वाच्च नाङ्गीकार्यं हि तन्मतम् ॥ पञ्चरात्रनिषेधार्थमेतान्या[7]चक्षते यदि । सूत्राण्यतिविरुद्धं तद्यत आह स भारते ॥ 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् । ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते ॥ पञ्चरात्रविदो ये तु यथाक्रमपरा नृप । एकान्तभावोपगता वासुदेवं विशन्ति ते' ॥ इति, गीता च तच्छास्त्रसङ्क्षेप इति हीरितम् ।

---

[1] एकप्रकारत्वात्. [2] शङ्काविशेषस्य. [3] देवाश्च मानवाश्च. [4] शिवशक्त्याख्यम्. [5] इतिहासैः. [6] सद्भिः. [7] व्याचक्षते.

SGDF
Sri Gargeshwari Digital Foundation

वेदेन पञ्चरात्रेण भक्त्या यज्ञेन चैव हि ॥ दृश्योऽहं नान्यथा दृश्यो वर्षकोटिशतैरपि । इति वाराहवचनं श्लोका इति वचः [1]श्रुतौ ॥ वेदैश्च पञ्चरात्रैश्च ध्येयो नारायणः परः । पञ्चरात्रं च वेदाश्च विद्यैकैव द्विधेयते' ॥ इत्यादि वेदवचनैः पञ्चरात्रमपोद्यते । कथमेवात्र दोषः क उत्पत्तिर्ज्ञोऽत इत्यपि ॥ इहैवोक्ता न चाभूतभावस्तत्रापि कथ्यते। 'अनादिकर्मणा बद्धो जीवः संसारमण्डले ॥ वासुदेवेच्छया नित्यं भ्रमती'ति हि तद्वचः । न हि संसारसादित्वं पञ्चरात्रोदितं क्वचित् ॥ जीवाभिमानिशेषस्य नाम्ना सङ्कर्षणस्य तु । वासुदेवाज्जनिः प्रोक्ता प्रद्युम्नस्य ततस्तथा ॥ मनोऽभिमानिनः कामस्यैवं साक्षाद्धरेः क्वचित् । सङ्कर्षणादिनाम्नैव नित्याचिन्त्योरुशक्तितः ॥ व्यूह युक्तोऽन्यथानूद्य कथं दुष्टत्वमुच्यते । 'यदि विद्याचतुर्वेदानि'तिवद्वेदपूरणम्[2] ॥ पञ्चरात्रादिति कुतो द्वेषः शाण्डिल्य[3]वर्तने । अतः परमशास्त्रोरुद्वेषादुदितमासुरैः ॥ दूषणं पञ्चरात्रस्य वीक्षायामपि न क्षमम् । अतोऽशेषजगद्धाता निर्दोषोरुगुणार्णवः॥ नारायणः श्रुतिगणतात्पर्यादवसीयते। अन्धन्तमः प्रविशन्ति ये त्वविद्यामुपासते ॥ ततो भूय इवायान्ति एतस्या नैव निन्दकाः । ततो विद्यामविद्यां च यो जानात्युभयं सह ॥ दोषज्ञानादतीत्यैतां विद्ययाऽमृतमश्नुते ॥ ४५ ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य द्वितीयः पादः ॥२॥२॥ श्लोकसङ्ख्या ३१३ ॥४२८॥

॥ ॐ ॥ अथाशेषसमाम्नायविरोधापाकृतिं प्रभुः । करिष्यन्नधिदैवाधिभूतजीवपरात्मनाम् ॥ स्वरूपनिर्णयायैव वचनानां परस्परम् । पादेनानेनाविरोधं दर्शयत्यमितद्युतिः ॥ अनुभूतियुक्तिबहुवाग्वैलोम्यं च ततोऽधिकम् । एतत्सर्वं ततः साम्यं द्वारवैयर्थ्यमेव च ॥ दृष्ट-

[1] बृहदारण्यके. [2] वेदार्थ निर्णये सहायत्वेन न्यूनता परिहारः.
[3] शाण्डिल्यस्य आचरणे.

SGDF
Sri Gangeshwari Digital Foundation

युक्त्यनुसारित्वमुक्तान्यार्थाविरोधतः। प्रसिद्धनामस्वीकारे बहुवाक्यानुवर्तिता ॥ लोक[1]दृष्टानुसारित्वं जीवसाम्यमनादिता । तत्रतत्र परिज्ञानं गुणसाम्यश्रुती तथा ॥ उत्पत्तिमत्त्वं स्वगुणाननुभूत्यल्पकल्पने । नानाश्रुतिश्च वैचित्र्यं युक्तयः पूर्वपक्षगाः ॥ व्यवस्था[2]ऽनुपपत्तिश्च स्वातन्त्र्यमनुसारिता । मुख्यता शक्तिमत्त्वं च वैरूप्यं सर्वसङ्ग्रहः ॥ गत्यादिरीशशक्तिश्च सर्वमानविरोधिता । अभीष्टासिद्धिसुव्यक्ती शास्त्रसिद्धिर्विपर्ययः ॥ विशेषकारणं चेति सिद्धान्तस्यैव साधिकाः ॥

॥ ॐ न वियदश्रुतेः ॐ ॥ १ ॥ प्रकृतिः [3]पुरुषः कालो वेदास्तदभिमानिनः । महदाद्याश्च जायन्ते पराधीनविशेषिता ॥ इदं सर्वं ससर्जेति जनिमत्त्वमिहोदितम् । अवकाशमात्रमाकाशः कथमुत्पद्यतेऽन्यथा ॥ यद्यनाकाशता पूर्वं किं मूर्तनिबिडं जगत् । मूर्तसम्पूर्णता चैव यद्यनाकाशता भवेत् ॥ मूर्तद्रव्याणि चाकाशे स्थितान्येव हि सर्वदा । अत आकाशशब्दोक्तस्तद्देवोऽत्र विनायकः ॥ देहोत्पत्त्या समुत्पन्न इति श्रुत्याऽभिधीयते । भूतमप्यसितं दिव्यदृष्टिगोचरमेव तु ॥ उत्पद्यतेऽव्याकृतं हि गगनं साक्षिगोचरम् । प्रदेश इति विज्ञेयं नित्यं नोत्पद्यते हि तत् ॥ तथाऽपि मूर्तसम्बन्धपरतन्त्रविशेषयुक् । खमेवोत्पत्तिमन्नाम श्रुतिशब्दविवक्षितम् ॥ प्रकृतिः पुरुषः काल इत्येते च समस्तशः । ईशाधीनविशेषेण जन्या इत्येव शब्दिताः ॥ कालप्रवाह एवैको नित्यो न तु विशेषवान् । पुरुषाव्यक्तकालानां रमैवैकाभिमानिनी ॥ सिसृक्षुत्वविशेषं तत्साक्षाद्भगवदिच्छया । प्राप्तैव सृष्टेत्युदिता प्रधानं विकृतेरपि ॥ पुमांसो देहसम्बन्धात्सृष्टिमन्त इतीरिताः ॥ १ ॥ १ ॥

॥ ॐ एतेन मातरिश्वा व्याख्यातः ॐ ॥ ८ ॥

एवं प्रलयकालेऽपि प्रतिभातपरावरः । मुख्यवायुर्नित्यसमः शरीरो-

---

[1] स्रष्टुरन्यस्यमारकत्वम्. [2] सर्वोत्तमत्वानुपपत्तिर्वायोः. [3] जीवचैतन्यम्.

SGDF
Sri Gurgeshwari Digital Foundation

त्पत्तिकारणात् ॥ पराधीनविशेषेण जनिमानेव शब्दितः । नैव किञ्चित्ततो जन्मवर्जितं परमा[1]द्दते ॥ पराधीन विशेषत्वे[2] जन्मनः, स्थूलताभवः[3] । पूर्वशब्द[4]विलोपश्च यदि जन्मेति कीर्त्यते ॥ रमाया नैव जन्मास्ति चैतन्यस्यापि केवलम् । प्रधानस्य च वेदस्य वेदस्यापीश्वरेच्छया ॥ व्यक्तिर्नाम विशेषोऽस्ति तस्मात्तद्वशतैव हि । उत्पत्तिरत्र कथिता ॥ ८ ॥ २ ॥

॥ ॐ असम्भवस्तु सतोऽनुपपत्तेः ॐ ॥ ९ ॥ स्वतन्त्रत्वात्परात्मनः ॥ नैवोत्पत्तिः कथमपि न स्वतन्त्रं ततोऽपरम् ॥ ९ ॥ ३ ॥

॥ ॐ व्यतिरेको गन्धवत्तथा च दर्शयति ॐ ॥ ॥ २७ ॥ अच्छेद्यस्यापि जीवस्य विभागं बहुधा हरिः । कृत्वा भोगान्प्रदायैव चैक्यमापादयेत्पुनः ॥ अत ईशवशं सर्वं चेतनाचेतनं जगत् । अविभागं विभागाय यदा नयति केशवः ॥ किमशक्यं परेशस्य तदेति ह्यभिधीयते ॥ २७ ॥ १३ ॥

॥ ॐ पृथगुपदेशात् ॐ ॥२८॥ एवं स्थितेऽपि जीवैक्यं केचिदाहुः परात्मना । तद्योऽहमिति पूर्वाभिः श्रुतिभिश्चानुमाबलात् ॥ न तद्युक्तं यतो विष्णुः पृथगेवाभिधीयते । प्रज्ञानेत्रो लोक इति श्रुतौ भेदोऽभिधीयते ॥ एतमानन्दमित्यन्या परमं साम्यमित्यपि । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च । उपसम्पद्यते ज्योतिः स्वरूपेणाभिपद्यते ॥ तत्र पर्येति जक्षंश्च क्रीडन्नपि सदा सुखी । आचक्ष्व मे परं मोक्षं धीरा यं प्रवदन्ति तम् ॥ इत्युक्त आह वाग्देवी परं मोक्षं प्रजापतेः । शाखां

---

[1] इतिसिद्धम्. [2] एव. [3] सूक्ष्मस्य स्थूलत्वेनभवनं (अभूत्वाभवनं).
[4] पूर्वशब्द निवृत्तिः ततः शब्दन्तरप्रवृत्तिश्च स्यात्.

SGDF
Sri Gargeshwari Digital Foundation

शाखां महानद्यः संयान्ति परितः स्रवाः ॥ धानापूपा मांसकामाः सदा पायसकर्दमाः । यस्मिन्नग्निमुखादेवाः सेन्द्राः सहमरुद्गणाः ॥ ईजिरे क्रतुभिः श्रेष्ठैस्तदक्षरमुपासते । प्रविशन्ति परं देवं मुक्तास्तत्रैव भोगिनः ॥ निर्गच्छन्ति यथाकामं परेशेनैव चोदिताः । भेद-दृष्ट्याऽभिमानेन निःसङ्गेनापि कर्मणा ॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् । स सङ्कृत्य पुनः काले कालेनेश्वरमूर्तिना ॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते । ऋचां त्वः पोषमास्ते च परेण प्रेरिताः सदा ॥ यत्कामस्तत्सृजत्यद्धैवात्मना तत्सृजत्यपि । सहैव ब्रह्मणा कामान् भुङ्क्ते निस्तीर्णतद्गुणः ॥ दुःखादींश्च परित्यज्य जगद्व्यापारवर्जितः । भुङ्क्ते भोगान्सदैवोच्चानित्याद्यागममानतः ॥ मुक्तस्य भेदावगतेः कथमेव ह्यभिन्नता । जीवेशयोर्नानुमा च तदभेदं प्रमापयेत् ॥ मिथ्यैव भेदो विमतो भेदत्वाच्चन्द्रभेदवत् । इति चेत्साध्यधर्मोऽयं सन्नसन्वा न वोभयम् ॥ यदि सन्नपसिद्धान्तः स एवासन्नितीरिते । नोभयं चेन्न सिद्धं तदिति मानस्य दूषणम् ॥ न च मानान्तरेणैतच्छक्यं साधयितुं क्वचित् । अनुमानेन चेत्सैव[1] ह्यनवस्था भविष्यति ॥ न चागमस्तदर्थोऽस्ति नासदासीन्न [2]तद्वदेत् । परिशेषादनिर्वाच्यं यदि सिध्येत्परात्मनः ॥ अनिर्वाच्यत्वमेव स्यात्परिशिष्टो ह्यसौ सदा । न चान्य आगमस्तत्र सदस[3]त्प्रतियोगिनि ॥ न च प्रत्यक्षमत्रास्ति न चार्थापत्तिरिष्यते । बाधा[4]योगात्सत [5]इति बाधा[6]भावत एव हि ॥ इष्टा[7]पत्तिर्न हि भ्रान्तावपि बाधोऽवगम्यते । [8]विषयस्य कुतो बाधो विद्य[9]मानं हि [10]बाध्यते ॥ न हि वन्ध्यासुतो

---

[1] अप्रसिद्धविशेषणतापरिहारार्थानुमानपरम्पराद्वारिकैव. [2] इति, तत्त्वोद्योतेऽस्य विस्तरः. [3] सदसती प्रतियोगिनी यस्य तत् तद्विलक्षणे. [4] सच्चेन्न बाध्येत इति सतः. [5] उक्तार्थापत्तिर्न. [6] विश्वस्य. [7] न बाध्येतेति. [8] भ्रान्तिविषयस्य शुक्त्यादेश्चेत्. [9] रजतादेश्चेत् यत्पूर्वम्. [10] तदेव केनचिन्नाश्यते.

SGDF
Sri Gargeshwari Digital Foundation

[1]वध्यो यज्ञदत्तो हि वध्यते । [2]बाधायोगात्सत [3]इति व्याप्तिरेषा क्व दृश्यते ॥ कश्चायं बाध उद्दिष्टो न हि नाशोऽसतो भवेत् । [4]निवृत्तिश्चाप्रवृ[5]त्तस्य कथमेवोपपद्यते ॥ नासी[6]दस्ति[7] भविष्यच्च तदिति ज्ञानमेयता । यदि बाधस्तदा सत्त्वं तेनै[8]वाङ्गीकृतं पुनः ॥ प्रतीतिर्नासत[9] इति वदन्नङ्गीकरोति ताम् । निषेधो ह्यप्रतीतस्य कथञ्चिन्नोपपद्यते ॥ न चोपमा[10] भवेदत्र प्रत्यक्षात्सत्त्वमेव च[11] । शास्त्रगम्यपरेशानाद्भेदः [12]स्वात्मन ईयते[13] ॥ अनु[14]भूतिविरोधेन कथमेकत्वमुच्यते[15] । किञ्चित्कर्ता च दुःखीति सर्वैरेवानुभूयते ॥ सर्वज्ञो भगवान्विष्णुः सर्वशक्तिरिति श्रुतः । अनु[16]भूताद्धि भेदेन श्रुतिरेषा वदत्यमुम् ॥ उपजीव्यविरुद्धं तु कथमैक्यं श्रुतिर्वदेत् । अप्रामाण्यं यदा भेदवाचकस्य[17] भविष्यति ॥ स[18] एव [19]धर्मिणो ग्राही [20]तदभेदः कथं भवेत् । [21]यत्स्वरूप[22]ग्रहे मानं [23]तद्धर्मे न कथं भवेत् ॥ [24]एकविज्ञानविज्ञप्त्या द्वयं मानं भविष्यति । न चेदेकं प्रमाणं [25]तद्द्वयमप्यत्र नो भवेत् ॥ धर्मि[26]ग्राहिविरोधस्तु तस्मान्मानस्य[27]

---

[1] वध्यः=नाश्यः. [2] सतः. [3] बाध्यमिदं न, सदित्यनुमाने. [4] तिरोभावादिरूपा. [5] आविर्भावादिरूपप्रवृत्तिरहितस्य. [6] नास्तीति. [7] न. [8] असद्वैलक्षण्यमङ्गीकुर्वतैव असत्त्वम्. [9] असतो न प्रतीतिः. [10] प्रमाणमनिर्वचनीयार्थे सादृश्याद्यभावात्. [11] निश्चीयते अतोऽनुपलम्भाभावान्नाभावः प्रमाणम्. [12] जीवस्य. [13] प्रत्यक्षेण. [14] साक्ष्यनुभव. [15] अनुमीयते. [16] साक्ष्यनुभवगोचराज्जीवात्. [17] आगमस्य भेदग्राहिणः प्रत्यक्षस्यच. [18] तदा आगमः प्रत्यक्षंच. [19] जीवस्येश्वरस्यच. [20] तयोः अभेदः बोध्यः. [21] श्रुतिवाक्यम्. [22] ब्रह्म. [23] सार्वज्ञादिधर्मवत्वे. [24] एकविधमेवेदं 'यःसर्वज्ञ' इत्यादि श्रुतिजन्यं विज्ञानं न पुनः भ्रमइव स्वरूपमात्रे प्रमाणं विशिष्टाकारे तु अप्रमाणमित्यनेकविधमित्येवं परीक्षासहकृतसाक्षिविज्ञप्त्याऽपि इदं ज्ञानम्, द्वयं=धर्मधर्मिद्वयगर्भं विशिष्टाकारं प्रत्येति. [25] तद्विज्ञानम्, अत्र=विषये, एकं=विशिष्टाकारं प्रतिप्रमाणं न चेत् तदा द्वयम्, प्रत्यपि=स्वरूपेऽपि नो भवेत्, अविशेषात्. [26] श्रुत्या. [27] अभेद.

SGDF
Sri Gangeshwari Digital Foundation

दूषणम् । नोपजीव्यो ह्यभेदोऽत्र क्वचिद्भेदश्रुतेर्बलात् ॥ न च मानान्तरोपेयं ब्रह्म[1] तद्भवति क्वचित् । येन मानेन चोपेयं भेदस्तेनावगम्यते ॥ सर्वज्ञानुमयैवेशो यद्युपेयः कथञ्चन । सर्वज्ञत्वगुणेनैव तया भेदोऽवगम्यते ॥ न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेत् । न हि बाधः क्वचिद्दृष्टो दुःखाद्यनुभवस्य तु ॥ यदि दुःखानुभूतिश्च भ्रान्तिरित्यवसीयते[2] । अदुःखिताश्रुतिः केन[3] न भ्रान्तिरिति गम्यते[4] ॥ श्रुतिस्वरूपमर्थश्च [5]मानेनैवावसीयते । तच्चेन्मानं गृहीतं ते[6] किं[7] दुःखानुभवे भ्रमः[8] ॥ न च [9]बाधविशेषोऽस्ति [10]यदबाधितमेव तत्[11] । बाधो यद्यनुभूतेऽथ कथं निर्णय ईयते ॥ कोऽपि ह्यर्थो न निश्चेतुं शक्यते [12]भ्रमवादिना । [13]भ्रमत्वमभ्रमत्वं च [14]यदैवानु[15]भवोपगम् ॥ एकस्य भ्रमता तत्र[16] परस्याभ्रमता कुतः[17] । भ्रमत्वमभ्रमत्वं च सर्वं वेद्यं हि साक्षिणा ॥ स चेत्साक्षी क्वचिद्दुष्टः कथं निर्णय ईयते । विशेषाः[18] सर्व एवैते साक्षिप्रत्यक्षगोचराः[19] ॥ ऊरीकृत्य[20] च [21]तान्सर्वान् व्यवहारः प्रवर्तते । [22]साक्षिणो [23]व्यवसायी तु व्यवहारोऽभिधीयते ॥ तस्मात्सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये । साक्षी निर्दोष एवैकस्सदाऽङ्गीकार्य एव नः ॥ शुद्धः साक्षी यदा सिद्धो [24]दुःखित्वं वार्यते कथम् । उपजीव्यप्रमाणं [25]तद्भेदग्राहकमेव हि ॥ अतो जीवेशयोर्भेदः श्रुतिसामर्थ्यसुस्थिरः ॥ २८ ॥ ॐ तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञ[26]वत् ॐ ॥ २९ ॥ तथापि तु

---

1 उपेयं=ज्ञेयम्. 2 श्रुतिमाश्रित्य. 3 कारणेन. 4 अनुभवमाश्रित्य. 5 साक्षिणा. 6 ते=त्वया गृहीतंचेत्. 7 किं=किं निमित्तम्. 8 इति. 9 बाधकज्ञानरूपो विशेषः. 10 यतः. 11 दुःखित्वादिकम्. 12 साक्षिणो भ्रमत्ववादिना. 13 प्रत्ययानाम्. 14 यतः. 15 साक्षिणैव निर्णेयं ततः. 16 ज्ञानेषु एकस्य. 17 निर्णेया. 18 विशिष्यन्ते एतैरिति, करणदोषादयः. 19 एव. 20 करणतयोपादाय. 21 करणदोषादीन्. 22 कार्यः इति. 23 निश्शङ्कः. 24 तेनसिद्धम्. 25 तस्मात्. 26 ब्रह्मणि यथाऽभेदोक्तिः.

SGDF
Sri Gargeshwari Digital Foundation

चिदानन्दपूर्वास्त[1]त्सदृशा गुणाः। सार[2]स्स्वरूपमस्य[3]ापि मुक्ताव-प्यवशिष्यते[4] ॥ [5]अतोऽभेदवदेवैताः श्रुतयः प्रवदन्ति हि। पौराणानि च वाक्यानि [6]सादृश्याभेदसंश्रयात् ॥ सादृश्याच्च प्रधानत्वात्स्वातन्त्र्या-दपि चाभिदाम्। आहुरीशेन जीवस्य न स्वरूपाभिदां क्वचित् ॥ [7]स्थानैक्यमैकमत्यं च मुक्तस्य तु विशिष्यते। [8]सादृश्यं च विशेषेण[9] [10]जडानां द्वय[11]मेव तु॥ भवेत्सादृश्य[12]मत्यल्पं [13]तृतीयं परमात्मना। ईशरूपक्रियाणां च गुणानामपि सर्वशः॥ तथैवावयवानां[14] तत्स्वरूपैक्यं तु मुख्यतः। यथोदकं दुर्गे वृष्टं पर्वतेषु[15] विधावति ॥ एवं धर्मान्पृथक्पश्यंस्ता[16]नेवानुविधावति[17]। इतिश्रुतेर्नोभयं च भेदा-भेदाख्यमिष्यते[18]॥ '[19]एकमेवाद्वितीयं[20] तन्नेह[21] नाना[22]स्ति किञ्चन[23]। मृत्योः[24] स मृत्यु[25]माप्नोति य इह नानेव[26] पश्यति' ॥ इति श्रुताविवेत्यस्माद्भेदाभेदनिराकृतिः। इवो[27]भये[28] च सादृश्य इति वाक्छब्द[29]निर्णये ॥ २९ ॥ १४ ॥

॥ ॐ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॐ ॥ ४३ ॥ भेदस्य मुक्तौ वचनादपि [30]तत्पक्षनिग्रहः। चेतनत्वादि सादृश्यं यद्यभेद इतीष्यते ॥ अङ्गीकृतं तदस्माभिर्न स्वरूपैकता क्वचित्। न केन-

---

[1] परमात्मगुण. [2] सारः=स्वरूपम्. [3] जीवस्य. [4] यतः. [5] एव. [6] सादृश्यमेवाभेदः तस्य. [7] ईशेन क्षीराब्ध्यादि. [8] मुक्तस्येशेन. [9] आनन्दादिना. [10] तु. [11] तत्प्रधानकत्वं तदधीनत्वमेव. [12] सत्तादि-नैव 'भूतानि विष्णुः' इत्यादौ सादृश्यम्. [13] आनन्दादिसादृश्यं सज्जीवानाम्. [14] हस्तादि. [15] दुर्गे. [16] तद्दर्शनमन्वेवाविलम्बेन. [17] नरकम्. [18] सूत्रकृता. [19] अभिन्नम्. [20] समाधिकरहितम्. [21] ब्रह्मणि. [22] भिन्नम्. [23] गुणादि नास्ति. [24] अनन्तरम्. [25] नरकम्. [26] भिन्नं इव=अभिन्नम्. [27] इवशब्दः. [28] पूर्वपदोक्त-विरुद्धे द्वितीये. [29] तन्नामकग्रन्थे. [30] मुख्याभेदपक्षनिरासः.

SGDF
Sri Gargeshwari Digital Foundation

चिदभेदो[1]ऽस्ति भेदाभेदोऽपि वा [2]क्वचित् ॥ [3]समुदायमृते विष्णोः स्वगुणादीन्विनापि वा[4] । इतिश्रुतेर्न तस्यास्ति भेदाभेदोऽपि केनचित् ॥ अभेदश्रुतयोंऽशत्वा[5]त्सादृश्यं चांशता[6]ऽस्य[7] तु । अंशस्तु द्विविधो ज्ञेयः स्वरूपांशोऽन्य एव च ॥ विभिन्नांशोऽल्पशक्तिः स्यात्किञ्चित्सादृश्य-मात्रयुक् । अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथा स्थितिः[8] ॥ स[9] एव [10]चेत्स्वरूपांशः प्रादुर्भावा हरेर्यथा । सूर्यमण्डलमा[11]न्येक-स्तत्प्रकाशाभिमानवान्[12] ॥ सूर्योऽथ सप्तमाब्धेश्च[13] बाह्योदस्य[14] च वारिपः । कठिणत्वेन [15]मेर्वादेः पृथिव्या अपि देवता[16] ॥ धरादे-ष्वेवमेवैको भगवान्विष्णुरव्ययः । नानावताररूपेण स्थितः पूर्णगुणः सदा ॥ विण्मूत्राद्यभिमानिन्यो यथाऽपभ्रष्ट[17]देवताः । सूर्यादिभ्य-[18]स्तथैवायं संसारी परमात्पृथक् ॥ ४३ ॥ ॐ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॐ ॥ ४८ ॥ [19]देहदोषैश्च दुष्टत्वादपभ्रष्टाख्य देवताः[20] । अन्यास्सूर्यादिदेवेभ्यो ह्यनुग्राह्याश्च तैस्सदा ॥ एवमेव पराद्विष्णोः पृथक् संसारिणो मताः । अनु-ग्राह्याश्च तेनैव तत्प्रसादाच्च मोक्षिणः ॥ न तु मत्स्यादिरूपाणामनु-ग्राह्यत्वमिष्यते ॥ ४८ ॥ ॐ असन्ततेश्चाव्यतिकरः ॐ ॥ ॥ ४९ ॥ गुणैरशेषैः पूर्णत्वान्मुख्याभेदो परैर्न च ॥ ४९ ॥ ॥ ॐ आभास एव च ॐ ॥ ५० ॥ अंशाभासाश्च सर्वेऽपि

---

1 विष्णोः स्वगुणादीन् विना. 2 अपि नास्ति. 3 अंशिनं विना 'अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदा' (अनु. २. २.) इत्युक्तेः. 4 व्यवस्थित विकल्पे. 5 उपपद्यन्ते. 6 परमेश्वरांशत्वम्. 7 जीवस्य. 8 सर्वगत्वादिपरिमाणम्. 9 सः=तत्सामर्थ्यादियुक्तः. 10 सः. 11 अंशी सूर्यः. 12 तदंशश्च एक एव. 13 अंशश्चैकः. 14 अभिमानी अंशी. 15 देवताः अंशभूताः. 16 एकैव. 17 नामक देवताः अंशरूपाः. 18 पृथक्. 19 परदेह. 20 अन्तर्धानादिशक्तिमन्तः.

SGDF
Sri Gargeshwari Digital Foundation

परस्यांशा न मुख्यतः । यथैषा पुरुषेच्छाया एत[1]स्मिन्ने[2]तदाततम् ॥ न तु पुंपा[3]दवत्पादा जीवा एते परात्मनः । पूर्णास्तस्य गुणा एव प्रादुर्भावतया स्थिताः ॥ एवं जगाद परमा श्रुतिर्नारायणं [4]परम् । [5]अक्षयो भगवान्विष्णुर्लक्ष्म्यावासो लये स्थितः ॥ मुक्तैस्सदा चिन्त्यमानो ब्रह्माद्यैस्तारतम्यगैः । प्रकृतिः पुरुषः कालो वेदाश्चेति चतुष्टयम् ॥ नित्यं स्वरूपतो विष्णोर्विशेषावाप्तिमात्रतः । उत्पत्तिमदिति प्रोक्तं लक्ष्मीस्तदभिमानिनी ॥ ततो जातः पुमान्नाम ब्रह्माऽस्यां वासुदेवतः । सूत्रात्मा प्राणनामा[6] च देव्यौ प्रकृति[7]मानिनी ॥ [8]ततो [9]रूपं मह[10]न्नाम [11]ब्रह्मणोऽहंकृतिः शिवः । ब्रह्मणो बुद्धिनाम्नोमा तत इन्द्रो मनोऽभिधः ॥ स्कन्दश्च तत एवान्ये सर्वे देवाः प्रजज्ञिरे । तत्र पूर्वतनः श्रेयान्गुणैस्सर्वै[12]स्समस्तशः ॥ तेभ्यश्च भगवान्विष्णुस्तदधीना इमे सदा । जन्मस्थितिलयाज्ञाननियतिज्ञानसंसृतिः ॥ मोक्षश्च[13] तदधीनत्वमेतेषां नैव हीयते । मुक्तावपि स एवैकः स्वतन्त्रः पूर्णसद्गुणः ॥ इति श्रुत्युपपत्तिभ्यां पादेऽस्मिन्प्रभुणोदितम् ॥ १८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥ श्लोकसङ्ख्या १०३ ॥ ॥ ५३१ ॥

॥ ॐ ॥ श्रुत्यर्थः श्रुतियुक्तिभ्यां विरुद्ध इव दृश्यते । यत्र तन्निर्णयं देवः सुविशिष्टोपपत्तिभिः ॥ करोत्यनेन पादेन तत्र स्पष्टार्थवत्श्रुतिः । विशेषश्रुतिवैरूप्यं माहात्म्यं व्यक्तसद्गुणः ॥

---

[1] तथा विष्णौ. [2] जीवजातम्. [3] परमपुरुषस्यामृतपादत्रयमिव. [4] विलक्षणम्. [5] एतत्पादोद्देश्यं अधिदैवादिस्वरूपं पिण्डीकृत्याह. [6] सङ्कर्षणात्. [7] मानिन्यौ, सुपांसुलुगिति पूर्व सवर्णः. [8] प्रकृतिपुरुषाभ्याम्. [9-10] महत्तत्त्वस्वरूपम्. [11] सकाशात् शिवः. [12] समस्तेषु. [13] इतीमे.

SGDF
Sri Gargeshwari Digital Foundation

दृष्टायुक्तिः समानत्वं कर्तृशक्तिर्विमिश्रिता । युक्तयः पूर्वपक्षेषु सुनिर्णीतास्तु तादृशाः ॥ युक्तयो निर्णयस्यैव स्वयं भगवतोदिताः ॥
इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥ श्लोकसङ्ख्या ॥ ४ ॥ ॥ ५३५ ॥ द्वितीयाध्यायस्समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ तृतीयाध्यायः ॥

॥ ॐ ॥ स्वाभाविकान्यथानामसहभावान्यथोक्तयः । अविशेषविशेषौ च सहभावो विमिश्रता ॥ विरुद्धोक्तिः सहस्थानं वैयर्थ्यं चान्यथागतिः । युक्तयः पूर्वपक्षस्य[1] गुणाधिक्यार्थतो भवौ ॥ उपपत्तिर्द्विरूपत्वमाधिक्यमनुरूपता । योग्यता बलवत्त्वं च विभागः कारणाभवः॥ क्लृप्तिरन्या गतीश्चैव सिद्धान्तस्यैव साधकाः[2]॥ ॐ योनेः शरीरम् ॐ ॥ १ ॥ बीज[3]पूरुषयोनीनां [4]सङ्गातिनियमोज्झितिम् । [5]अथशब्देन भगवानाह [6]कारणतश्च ताम्[7] ॥ २० ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य प्रथमः पादः ॥ ३ ॥ १ ॥ श्लोकसङ्ख्या ५ ॥ ५४० ॥

॥ ॐ ॥ पश्चाददृष्टयविज्ञानकालदुःखपृथग्भवाः । स्थानभेदो विरुद्धत्वं न्यायसाम्यं स्वतो भवः ॥ गुणसाम्यमयोगश्च तर्कबाधो विलोमता । नानाभावः प्रलोभश्च युक्तयः पूर्वपक्षगाः[8] ॥ अशक्यकर्तृताशक्तिः स्वतो बोधस्तथैव च । अमानक्लृप्तिसन्मानव्यवस्थात्यल्पताभवाः ॥ विशेषदृष्टिवाक्ये च पुंशक्तिः सुनिदर्शनम् । अलौकिकत्वमाधिक्यं स्वातन्त्र्यं निर्णय[9]प्रमाः ॥ ॐ सन्ध्ये सृष्टिराह हि ॐ ॥ १ ॥ ॐ निर्मातारं चैके पुत्रादयश्च ॐ ॥ २ ॥ ॐ मायामात्रं तु कात्स्न्येनानभिव्यक्तस्वरूपत्वात् ॐ ॥ ३ ॥ [10]वासनाः सर्ववस्तूनामनाद्यनुभवागताः ।

---

[1] पूर्वपक्षाणां संबन्धिन्यः. [2] न्यायाः. [3] व्रीह्यादिकं रेतश्च. [4] सम्बन्धातिनियमाभावम्. [5] प्रकृतादर्थादर्थान्तरवाचिना योनेः शरीरमापद्यते क्वचित्तदभावेऽपि इति. [6] क्वचिज्ज्ञानतपोयोगाद्यतिशयलक्षणेन कारणविशेषेण तां नियमोज्झितिम्. [7] आह. [8] पूर्वपक्षाणां सम्बन्धिन्यः. [9] सिद्धान्तनिर्णयार्थानि प्रमाणानि. [10] भावनापरनामकाः संस्काराः.

SGDF
Sri Gangeshwari Digital Foundation

सन्त्येवाशेषजीवानामनादिमनसि स्थिताः ॥ त्रिगुणात्मकं [1]मनोऽस्त्येव यावन्मुक्तिस्सदातनम् । तत्रैवाशेषसंस्काराः सञ्चीयन्ते सदैव च ॥ सूक्ष्मत्वेन लये सच्च [2]प्राकृतैरुपचीयते । सृष्टिकाले यदा तन्न[3] कुतः संसारसंस्थितिः[4] ॥ संस्कारैर्भगवानेव सृष्ट्वा नानाविधं जगत् । स्वप्नकाले दर्शयति भ्रान्तिर्जाग्रत्त्व[5]मेव हि ॥ अदृष्टे चाश्रुते [6]भावे न भाव[7] उपजायते । अदृष्टादश्रुताद्भावान्न भाव उपजायते ॥ इति श्रुति-पुराणोक्ति[8]रना[9]दित्वात्तु युज्यते । कदाचिद्दर्शनायोग्यं [10]यत्तत्रापि [11]विभागतः ॥ [12]दृष्टं समाधि[13]करणं दृश्यतेऽत्र स च भ्रमः । वासनामात्रमूलत्वाज्जाग्रद्वत्स्पष्टता न च ॥ [14]भेदोऽभेदोऽथ वा द्वन्द्व[15]मिति प्रश्नो न युज्यते । [16]द्रष्टुः स्वप्नस्य दृष्टत्वाद्भेदस्यैवाखिलैर्जनैः ॥ [17]प्रश्नदोषा हि चत्वारः स्वव्याहतिरसङ्गतिः । सिद्धार्थता च वैफल्यं न तैः स्यात्तत्त्वनिर्णयः ॥ तत्त्वनिर्णयवैलोम्यं स्याद्वादेऽपि हि निग्रहः[18] । उद्भावनीयमेव स्यान्न कथावसितिर्भवेत् ॥ विजिगीषु-कथायां तु कथावसितिकारणम् । [19]परिहारेऽपि सिद्धत्वं दूषणं प्रतिवादिनः[20] ॥ प्रति[21]ज्ञायां, तद[22]न्यस्य सिद्धतैव हि साधिका । आश्रय[23]व्याश्रयासिद्धी साध्यासिद्धिश्च दूषणम् ॥ केषाञ्चिन्न च ते दोषा व्याप्तौ [24]सत्यां कथञ्चन । दोषो [25]व्याहतिरेवास्ति नृशृङ्गास्तित्व-साधने ॥ यत्र[26] व्याह[27]तता नास्ति कोऽतिसङ्गोऽस्य[28] साधने[29] ।

---

[1] जडं न तु स्वरूपभूतम्. [2] अहङ्काराद्यैः. [3] प्रलये न स्यात्. [4] आत्मनः संसारावस्थानम्. [5] घटादीनां बाह्यार्थक्रियाक्षमत्वज्ञानम्. [6] पदार्थे. [7] वासना. [8] उक्तिस्तु. [9] संसारस्य. [10] यत् स्वप्ने दृश्यते. [11] सामानाधिकरण्येन विना. [12] दृष्टं जागरे. [13] एक-स्थलवृत्तित्वम्. [14] अथ अद्वैतिव्याख्यानिरासः. [15] स्वप्नद्रष्टुः स्वाप्नैः पदार्थैः भेदाभेदौ. [16] स्वप्नस्य द्रष्टुः. [17] विकल्पप्रश्न. [18] निग्रहस्थानम्. [19] उत्तरे. [20] एव न तु वादिनः. [21] अर्थस्य. [22] हेत्वर्थस्य. [23] व्यधिकरण. [24] अबाधितविषयत्वेच सति. [25] प्रत्यक्षप्रमाणविरोधः. [26] साध्ये. [27] प्रमाणबाधः. [28] अतिप्रसङ्गः. [29] असदाश्रयेण हेतुना क्रियमाणे.

SGDF
Sri Gargeshwari Digital Foundation

प्रत्यक्षागममूलास्तु[1] न्यायास्सर्वे भवन्ति हि ॥ [2]न्यायाभासा[3] अमूलाः स्युर्न्यायस्यान्यस्य[4] तौ पुनः[5] । [6]अदृष्टे [7]व्यभिचारे तु साधकं [8]तदिति स्फुटम् ॥ ज्ञायते साक्षिणैवाद्धा मानबाधे न [9]तद्भवेत् । [10]यत्साक्षिणैव मानत्वं मानानामवसीयते ॥ अमानस्य तु मानत्वं[11] मानसत्वाच्चलं भवेत् । [12]उत्सर्गतोऽपि [13]यत्प्राप्त[14]मपवाद[15]विवर्जितम् ॥ व्यभिचार्यप[16]वादेन मानमेव भविष्यति । अतो हि भोजनादीनामिष्टसाधनताऽनुमा ॥ मानं व्यवहृतौ नित्यं व्यभिचारो हि तत्र च । व्याप्तत्वे व्याश्रयत्वं तु कथमेव हि दूषणम् ॥ रोहिण्युदय आसन्नः कृत्तिकाऽभ्युदिता यतः । इत्युक्ते साधनं नो किं न ह्याज्ञै[17]वात्र साधिका ॥ अन्यत्सद[18]सतोर्विश्वमिति च व्याहतेरमा[19] । असिद्ध[20]-साधने दोषः को, व्याप्तिर्यदि विद्यते ॥ व्याप्तिश्च व्यतिरेकेण तत्र तैश्चावगम्यते । अप्रसिद्धस्य साध्यस्य साधकत्वं यदेष्यते ॥ लिङ्ग[21]-स्यो[22]क्तौ विशे[22]षोऽयं केन मानेन गम्यते । साधनं परमाण्वादेर्यद्यसिद्धस्य चेष्यते ॥ यथाऽनुभवमेवैतन्नाङ्गीकार्यं कुतस्तदा । यत्र नातिप्रसङ्गोऽस्ति मानं न च विपर्यये ॥ क्लिष्टकल्पनयैवात्र साध्यमित्यतिदुर्वचः । परिशेषो [23]मिथस्सिद्धिश्चक्रकस्वाश्रयादयः ॥ असिद्धसाधकत्वेन पञ्चावयवतां विना । अङ्गीकार्याः समस्तैस्तन्नियमः किं निबन्धनः ॥ सिद्धसाधनतायां च न कथाऽवसि[24]तिर्भवेत् । व्यभिचारो हेत्वसिद्धिरेक[25]पक्षेऽपि दूषणम् ॥ साध्यसाधनवैकल्यं[26] दृष्टान्तस्य[27]

---

1 एव. 2 अमूलाः. 3 एव. 4 प्रत्यक्षागममूलकन्यायादन्यस्य. 5 प्रत्यक्षागमौ एव मूलम्. 6 एव. 7 साध्यव्यभिचारे. 8 लिङ्गम्. 9 अदृष्टव्यभिचारित्वम्. 10 यस्मात्. 11 मानत्वग्रहणम्. 12 स्वभावतः. 13 लिङ्गम्. 14 निश्चितमपि. 15 साध्यव्यभिचार. 16 कारणविशेषेण. 17 समयमात्रम्. 18 सकाशात्. 19 अप्रमाणम्. 20 अप्रसिद्धसाध्यस्य. 21 कर्तरि षष्ठी. 22 प्रयोगविशेषः 23 अन्योन्याश्रयः. 24 विशिष्टस्यासिद्धिरेव. 25 वादिप्रतिवादिनोः एकस्य पक्षे. 26 एव. 27 दूषणम्.

SGDF
Sri Gangeshwari Digital Foundation

विशेषणे[1] । वैयर्थ्य[2]मेका[3]सिद्धौ च विशिष्टा[4]सिद्धिरेव हि ॥ अप्रयोजनता तत्र[5] प्रथमप्रश्नदूषणम् । सिद्धप्रश्नादिकं यत्तदाधिक्यान्तर्गतं भवेत् ॥ अर्थापत्त्युपमाऽभावा अनुमान्तर्गताः [6]क्वचित् । प्रत्यक्षान्तर्गतोऽभावः सुखादे[7]र्नियमेन च ॥ अन्यत्र[8] झटिति प्राप्तः[9] प्रारम्भा[10]द्याश्च युक्तयः । आगमार्थावसित्यर्था[11] नियतव्याप्तयोऽखिलाः ॥ वाक्यं प्रकरणं स्थानं समाख्या च [12]तथाविधाः । कुरुपाण्डववत्तेषामुपपत्तेः पृथग्वचः ॥ [13]स्वन्यायैः साधनं[14] कार्यं [15]परन्यायैस्तु [16]दूषणम् । [17]स्वन्यायैर्दूषणं च स्यात्साधितैः प्रतिवादिनः ॥ [18]प्रसङ्गार्थतया प्रोक्ता[19] न सिद्धान्तस्य दूषकाः । छलं जातिरिति द्वेधा व्याह[20]त्यन्तरमिष्यते ॥ जातिः स्वव्याहतिर्ज्ञेया छलमर्था[21]न्तरोत्तरम् । एवं संशोधितन्यायसदागमविरोधतः ॥ नानिर्वाच्यमिह प्रोक्तं मायामात्रपदेन हि । विलक्षणं[22] सदसतोरिति हि व्याहतं स्वतः ॥ प्रतियोगित्व[23]मप्यस्य ब्रह्मणोऽङ्गीकृतं भवेत् । मिथ्या चेत्प्रतियोगित्वं वैलक्षण्यं ततो न हि ॥ अविलक्षणत्वं सत्यं स्यान्मिथ्यात्वं ब्रह्मणस्ततः । अनिर्वाच्यस्य सत्त्वं वा, यदि धर्मा न केचन ॥ ब्रह्मणो, नैव जिज्ञास्यं[24] जिज्ञासा धर्मनिर्णयः । इदमित्थमिति ज्ञानं जिज्ञासायाः प्रयोजनम् ॥ इत्थम्भावो हि धर्मोऽस्य[24] न

---

[1] दत्ते सति. [2] विशेष्यस्य विशेषणस्य वा वैयर्थ्यं तदपि हेतोर्दूषणमेव. [3] विशेषणविशेष्ययोरेकस्य. [4] विशिष्टस्यासिद्धिरेव. [5] प्रश्नदोषेषु. [6] कदाचित्घटाद्यभावग्राहकं प्रत्यक्षान्तर्गतम्. [7] अभावः. [8] सुखादिभिन्ने घटादौ सति. [9] अभावः प्रत्यक्षम्. [10] उपक्रमादयः. [11] निर्णयार्थाः. [12] वेदार्थे निर्णयार्था युक्तयः एव. [13] न केवलं परस्य किं तु स्वस्यापि सिद्धैर्न्यायैः क्वचित्स्वमात्रसिद्धैः साधितैः. [14] स्वपक्षसाधनम्. [15] उभयसिद्ध. [16] खण्डनं दूषणानुमानं तु परमात्रसिद्धैः. [17] क्वचित् स्वमात्रसिद्धैः. [18] आपादनविषयतया. [19] निर्धूमत्वादयः. [20] व्याहतिप्रभेदः. [21] परोक्तस्यार्थान्तरं परिकल्प्य तस्योत्तरम्. [22] सन्ध्यम्, स्वप्नः. [23] स्वाप्नप्रपञ्चं प्रति. [24] ब्रह्म. अस्य ब्रह्मणः.

SGDF
Sri Gangeshwari Digital Foundation

चेन्न प्रतियोगिता[1]। इत्थम्भावात्मकान्धर्मानाहुश्च श्रुतयोऽखिलाः ॥ अदृश्यत्वादयोऽप्यस्य गुणा हि प्रभुणोदिताः। यदि स्युस्तादृशा धर्माः सर्वज्ञत्वादयो न किम् ॥ [2]अन्यापेक्षा यदि स्युष्टे[3] सत्त्वैवं[4] देशकालगा। देशकालानपेक्षा हि न सत्ता क्वापि दृश्यते ॥ सर्वधर्मोज्झितस्यास्य किं शास्त्रेणाधिगम्यते। मिथ्याधर्मविधातुश्च वेदस्यैवाप्रमाणता ॥ अप्राप्तां भ्रान्तिमापाद्य किं वेदो मानतां व्रजेत्। न हि वेदं विना ब्रह्म वेद्यं धर्माश्च तद्गताः ॥ वेदवेद्यस्य मिथ्यात्वं यदि नैक्यस्य तत्कथम्। धर्मारोपोऽपि सामान्य[5]धर्मादीनां हि दर्शने ॥ [6]इदन्तदादिधर्मित्वे धर्मोऽन्यः कल्प्यतेऽत्र हि। सर्वधर्म-विहीनस्य धर्मारोपः क्व दृश्यते ॥ तदर्थं यदि धर्माणामारोपः साऽनव[7]स्थितिः[8]। ईशतज्ज्ञानवेदाक्षजानुमामातृ[9]पूर्विणः ॥ भ्रान्ति-र्विश्वस्य येनैव मानाभासेन कल्प्यते। तन्मात्रस्यान्यथा[10]भावे किं न स्याद्विश्वसत्यता ॥ येनेदं कल्प्यते भ्रान्तं भ्रान्तिस्तस्यैव किं न सा। भ्रान्तत्वे तस्य विश्वा[11]रेरीशाद्यभ्रान्तमेव हि ॥ भवेयुर्भ्रान्तयो नृणां नैवेशादेः कथञ्चन। सत्यत्वमक्षजं प्राप्तं यदि भ्रान्तमितीष्यते ॥ प्रामाण्यमागमस्यापि प्रत्यक्षादन्यतः कुतः। साक्षिप्रत्यक्षतो ह्येव मानानां मानतेयते ॥ साक्षिणः स्वप्रकाशत्वमनवस्था ततो न हि। [12]तात्कालिकं प्रमाणत्वमक्षजस्य यदा भवेत् ॥ ऐक्यागमस्य किं न स्यात्तस्याप्येतादृशं यदि। ऐक्यप्रमाणमिथ्या[13]त्वं यदा[14] विश्वस्य सत्यता ॥ ऐक्यवाक्यस्य मानत्वं यद्यबाध्यमितीष्यते। अक्षजस्यापि

[1] विरोधिता प्रपञ्चधर्मव्यावृत्तिमत्ता. [2] ब्रह्मभिन्नमिथ्याभूत सर्व-वस्त्वपेक्षावत्तः. [3] स्युष्टे इति सुषामादिषु द्रष्टव्यम्. [4] एवं-परापेक्षा. [5] सामान्यरूप. [6] इदंत्वतत्त्वादिधर्मवत्वे दृष्टे एव. [7] सोप्येवमिति प्रसक्तः. [8] इति ब्रह्मणो निर्धर्मकत्वनिरासः. [9] प्रमातृ. [10] अप्रामाण्ये. [11] विश्वमिथ्यात्वं प्रतिपादयतः गौडपादादेः. [12] व्यावहारिकम्. [13] आपद्यते. [14] एवं यदा तदा.

SGDF
Sri Gargeshwari Digital Foundation

230

मानत्वं नाबाध्यं किमितीष्यते ॥ अद्वैतहानिसामान्यान्न विशेषश्च[1] कश्चन । यदि स्वतस्त्वं प्रामाण्ये विश्वसत्ता कथं न ते ॥ प्रामाण्यस्य च मर्यादा कालतो[2] व्याहता भवेत् । कालान्तरेऽप्यमानं[3] चेदिदानीं मानता कुतः ॥ मिथ्यात्वमानं [4]मोक्षेऽपि मानं किं नेति भण्यताम् । मानत्वे द्वैतहानिः स्यादमानत्वेऽप्यमोक्षता[5] ॥ विश्वस्य पुनरापत्तिर्मिथ्यामानं यदा न मा[6] । अस्तिचेन्मुक्त्यवस्था च द्वैतापत्तिरतोऽन्यथा[7] ॥ अमुक्तत्वं[8] तथा [9]काले कालाधीना हि मुक्तता । काल एवागमोऽ[10]प्याह मुक्तिं [11]कालनिवर्तने ॥ मुक्तेरपि निवृत्तिः[12] स्यात्संसारित्वमतो भवेत् । क्व च प्रत्यक्षतः प्राप्तमनुमाऽऽगमबाधितम्[13] ॥ देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचित् । मम देह इति ह्यत्र न देहोऽहमिति प्रमा ॥ उपचारश्च कृष्णोऽहमिति[14] कर्दम लेपने । वस्त्रस्य यद्वदेवं स्याद्यद्यु[15]पाधिकृतं तदा ॥ [16]स्वतः शुक्लत्वव[17]त्काष्र्ण्यं न ममेति प्रतीयते । कथं च भेदो देहादेरात्मनो न प्रतीयते ॥ जातमात्रा मृगा गावो हस्तिनः पक्षिणो झषाः[18] । भयाभयस्वभोगादौ[19] कारणानि विजानते ॥ अस्मृतौ पूर्वदेहस्य विज्ञानं[20] तत्कथं भवेत् । अन्वय[21]व्यतिरेकादे[22]रनुसन्धानविस्मृतौ ॥ यदा देहान्त[23]रज्ञानं

---

[1] प्रत्यक्ष प्रामाण्यस्याबाध्यत्वे बहुप्रपञ्चापत्तिः आगमप्रामाण्याबाध्यतायां तु नैवमिति कश्चन विशेषः न, व्यर्थत्वात्. [2] कालतो मर्यादा=व्यवच्छेदः, तात्कालिकत्वम्. [3] बाधितमानम्. [4] मोक्षसमये. [5] विवक्षितावस्थायाः. [6] तदा विश्वस्य पुनरापत्तिः. [7] असत्त्वे. [8] आत्मनः. [9] तथा विकल्प्य दोषो वाच्यः. [10] "तदा विद्वान् पुण्य पापे" इति. [11] कालासत्त्वे. [12] असत्वम्. [13] क्व दृष्टम्, नैवेत्यर्थः. [14] व्यवहारस्तु. [15] देहादि. [16] वस्त्रे. [17] स्वतोनीरूप एवाहम्. [18] मीनाः. [19] सुखादौ. [20] भयादिकारणज्ञानम्. [21] यद्यत्स्तनपानं तदिष्टसाधनं यदिष्टसाधनं न तत्स्तनपानं न भवतीत्यादेः विस्मृतौ. [22] तथा चायमित्यनुसन्धानस्य विस्मृतौ. [23] पूर्वदेहस्मरणम्.

SGDF
Sri Gargeshwari Digital Foundation

देहैक्यावसितिः कुतः । व्याप्तत्वादात्मनो देहे व्यवहारेष्वपाटवात्[1] ॥ भेद[2]ज्ञानेऽपि चाङ्गार[3]वह्निवत्स्वा[4]विविक्तवत् । भवन्ति व्यवहाराश्च न हि प्रत्यक्षगानपि ॥ अर्थान्यथानुभवतः प्रतिपादयितुं क्षमाः । लोकास्ततो हि प्रत्यक्षसिद्धं नान्येन केनचित् ॥ शक्यं वारयितुं क्वापि [5]तच्चेन्नोत्तर[6]गोचरम् । कथमेवोत्तरः कालस्तद्गो मोक्षश्च गम्यते ॥ आगमोऽपि हि [7]सामान्ये सिद्धे प्रत्यक्षतः [8]पुनः । विशेषं[9] गमयेदेव कथं शक्ति[10]ग्रहोऽन्यथा[11] ॥ अतीतानागतार्थेषु जाते [12]शक्तिग्रहेऽखिलम्[13] । विशेषं[14] गमयेद्वाक्यं न तदज्ञातशक्तिके[15] ॥ शक्तिश्चेद्वर्तमाने स्यान्नातीतानागतं वदेत् । यदि शक्तिग्रहोऽन्यत्र[16] कथं स[17] स्यात्तदग्रहे ॥ [18]सामान्यं [19]दृष्टमेवासा[20]वन्यत्र[21] गमयेद्यदि । सामान्यवर्जितं वस्तु स्वरूपं गमयेत्कथम् ॥ न स्वरूपत्वसामान्यं केनाप्यङ्गीकृतं क्वचित् । [22]स्वरूपं चेदनुगतं व्यावृत्तं [23]तत्र किं भवेत् ॥ [24]सर्वानुगतधर्माणामन्ते हि स्वत्व[25]मिष्यते । किं व्यावृत्तमिति प्रश्ने स्वरूप[26]मिति केवलम् ॥ स्यादुत्तरं[27] ततोऽन्यच्चेत्तदेव [28]स्वयमेव[29] नः । एवं व्यावृत्त[30]रूपेऽपि यदा शक्तिग्रहो भवेत् ॥ तस्य सामान्यतो ज्ञानं विना स[31] च भवेत्कुतः । अतो विशेषसामान्यरूपं [32]सर्वमपीष्यते ॥

---

1 लोकानाम्. 2 देहाद्. 3 अङ्गारे व्याप्त. 4 स्वाभिन्ने स्वसंसृष्टे यथा तथा. 5 साक्षिज्ञानम्. 6 वर्तमानमात्रगोचरं चेत्. 7 अन्वयसामान्यवति पदार्थसमूहे. 8 पश्चात्. 9 अन्वयविशेषवन्तं तमेव पदार्थसमूहम्. 10 पदानां तेषु वाचकत्वज्ञानम्. 11 पूर्वं पदार्थज्ञानाभावे. 12 पदानाम्. 13 वाक्यम्. 14 अन्वयविशेषम्. 15 सति पदसमूहे. 16 अतीतानागतयोरपि. 17 पदशक्तिग्रहः. 18 पूर्वं पदार्थज्ञाने सति. 19 वस्तुगतसामान्यधर्मं गोत्वादिकम्. 20 शब्दः. 21 कालान्तरे. 22 स्वरूपत्वम्. 23 वस्तुनि. 24 सर्वेषाम्. 25 स्वरूपत्वम्. 26 स्वरूपत्वम्. 27 भेदलक्षणं व्यावृत्तम्. 28 स्वरूपम्. 29 तर्हि. 30 निस्सामान्यस्वरूपे. 31 शक्तिग्रहः. 32 सर्वं वस्तु.

SGDF
Sri Gargeshwari Digital Foundation

[1]व्यावृत्तं यच्च[2]सामान्यं तदेव स्याद्विशेषतः[3] । न चैकधर्मता तेन पदार्थानां परस्परम् ।। [4]धर्माणां भेद[5]दृष्टचैव तत्सादृश्यस्य दर्शनात्[6] । अतः [7]सर्वे पदार्थाश्च सामान्यात्साक्षिगोचराः ।। सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा । किञ्चित्सादृश्यविज्ञानादखिलस्यापि वस्तुनः ।। शब्दशक्तिग्रहश्च स्यात्तत्त[8]त्सादृश्यमानतः । [9]प्रत्यक्षं मानसं चैव [10]यदाऽतीतार्थगोचरम्[11] ।। तदा[12] [13]स्मृतिप्रमाणत्वमतीतत्व-विशेषितम्[14] । आधिक्य[15]मनु[16]भूतात्तु यदा[17]तीत[18]त्वमिष्यते[19] ।। मानता च कथं न स्यात्स्मृतेर्बाधश्च नात्र हि । मानत्वं प्रत्यभिज्ञाया अपि सर्वानुभूतिगम् ।। अतीतवर्तमानत्व[20]धर्मिणी सा च दृश्यते[21] । न च सा [22]स्मृतिमात्रार्धा तदिदंत्व[23]ग्रहैकतः[24] ।। अतो न वर्तमानैकनियमः स्याद्ग्रहेऽक्षजे। न च [25]प्रमाणतोऽन्या स्यात्प्र[26]मिति-र्नाम [27]कुत्रचित् ।। मानाभावाद्गौरवाच्च कल्पनायाः किमेतया । मयैतज्ज्ञातमिति तु साक्षिगं ज्ञानगोचरम् ।। ज्ञानमेव ततोऽन्या न प्रमितिर्नाम दृश्यते । मानमातृप्रमेयाणां[28] [29]तदुच्छि[30]त्तिर्न हि क्वचित् ।। स्वाप्नानामपि चैतेषां न बाधो दृश्यते क्वचित् । जाग्रत्त्व-मात्रमत्रैकमन्यथा दृश्यते स्फुटम् ।। अतो मिथ्या न च स्वप्नो

---

[1] स्वरूपम्. [2] यदेव. [3] विशेषबलेन = अनुवृत्त बुद्धिजनकत्वेन सामान्यं रूपञ्च स्यात्. [4] शौक्ल्यादिधर्माणाम्. [5] प्रतिव्यक्ति भिन्नत्वदर्शनात् विशेषरूपत्वम्. [6] सामान्यरूपत्व. [7] वर्तमाना-तीतानागताः. [8] सास्नादिमत्त्वादि सादृश्यानुसारेण. [9] मानसम्. [10] यस्मात्. [11] एव यत्स्मृतिकारणम्. [12] तस्मात्. [13] स्मृतेः. [14] अर्थंस्मृतिः विषयीकरोति. 15-16-17-18-19 अनुक्रम. [20] धर्म-विशिष्टार्थविषया. [21] साक्षिणा. [22] स्मृतिरेव स्मृतिमात्रा, सा अर्धं यस्याः सा स्मृत्यनुभवरूपैकदेशसमुदायरूपा तथाच स्मृत्यनु-भवात्मकैक ज्ञानरूपाच. [23] तत्त्वेदन्त्वज्ञानयोः. [24] एकत्वानुभवात्. [25] ज्ञानतः. [26] ज्ञातता. [27] अतीतादाविव वर्तमानेऽपि. [28] तस्मात्. [29] तदात्मकविश्वस्य. [30] बाधः.

SGDF
Sri Gangeshwari Digital Foundation

[1]जाग्रद्व[2]ज्जाग्रदेव च । आत्मवत्क्वचिदात्मा च स्यादेव [3]भ्रमगोचरः ॥ एतावता न मिथ्याऽसौ स्वप्ने जागरिते तथा । यद्यात्मन्यन्यथा[4]दृश्यं भ्रान्तमत्रापि तद्भवेत् ॥ अबाधितानु[5]वृत्तेस्तु स्वप्नादेर्भ्रान्तता कुतः । न च काचित्प्रमा विश्वभ्रान्तत्वे सर्वमेव च ॥ अभ्रान्तत्वे प्रमाणं तु कथं तद्भ्रान्तता भवेत् । किञ्च भ्रान्तत्ववादी स भ्रान्तत्वं स्वमतस्य च ॥ अङ्गीकरोति नियतं तत्र सम्प्रतिपन्नता । वादिनोस्तेन्न चाभ्रान्तं विश्वमेव भविष्यति ॥ भ्रान्तत्वभ्रान्तता चेत्स्यात्कथं नाभ्रान्तिसत्यता । अशेषदोषदुष्टं तन्मतं हेयं बुभूषुभिः ॥ येन[6] स्वमतहेयत्वं स्वयमङ्गीकृतं सदा । भ्रान्तित्वा[7]द्दुर्घटत्वस्य भूषणत्वाच्च केवलम् ॥ उन्मत्तोऽपि कथं तस्य मतं स्वीकर्तुमिच्छति । ईशशक्तेरचिन्त्यत्वान्महोन्मत्तैः प्रवर्तितम् ॥ अतः प्रज्ञाऽत्र [8]मायोक्ता जैव्यु[9]पादानमेव सा । निमित्तमैश्वरी मुख्या निर्मितं त्रातमेव च ॥ ताभ्यां [10]सहपृथक्[11]चैव मायामात्र[12]मितीर्यते । उभाभ्यां मातमैश्व[13]र्यात्रातं सहपृथक्ततः ॥ [14]प्रज्ञात्मकं मनो येन मनोरूपाश्च[15] वासनाः[16] । धीर्भीरिति मनस्त्वेवेत्याह च श्रुतिरञ्जसा ॥ चिदचिन्मिश्रमेवैतन्मनो यावच्च संसृतिः । तेनावस्था इमास्सर्वा जीवः पश्यति सर्वदा ॥ मनोविकारा विषयाः स्वाप्ना यद्बाह्यवन्न ते । स्थूला भवन्त्यतस्तेषां स्पष्टता न तथा क्वचित् ॥ क्वचित्स्पष्टा अपि स्युष्टे [17]वासना [18]मानसी च सा ॥ ३ ॥ १ ॥

---

[1] जाग्रता दृष्टशुक्तिकावत् न मिथ्या. [2] जाग्रत् स्वप्नश्च आत्मवन्नैव-मिथ्या. [3] क्षणिकोऽहमिति. [4] आरोपिताकारः. [5] अद्राक्षमेवाहं गजं इति ज्ञानानुवृत्तेः. [6] कारणेन. [7] भ्रमविषयत्वेनाङ्गीकृतत्वात्. [8] माया इति. [9] जीवसम्बन्धिनीप्रज्ञा. [10] सहनिर्मितम्. [11] केवलं ईश्वरज्ञानेन रक्षितम्. [12] धातुद्वयात् आतोऽनुपसर्गे क इति कः. [13] ईश्वर सम्बन्धिन्याः. [14] प्रज्ञोपादानम्. [15] मनउपादानकाः. [16] अतः संस्कारज्ञानयोरेकोपादनकत्वाल्लक्षणा. [17] अस्थूलत्वस्य सत्वात्. [18] सुषामादित्वात् षत्वम्.

SGDF
Sri Gangeshwari Digital Foundation

॥ ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ॐ ॥ ५ ॥ ईशेच्छयाऽन्तर्दधाति[1] व्यज्यते च पुनस्तया। सृष्ट्वैव वासनाभिश्च प्रपञ्चं स्वाप्नमीश्वरः॥ वासनामात्रतां तस्य [2]नीत्वाऽन्तर्धापयत्यजः॥ ५ ॥ २ ॥

॥ ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॐ ॥ ॥ ७ ॥ ॐ अतः प्रबोधोऽस्मात् ॐ ॥ ८ ॥ ॐ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॐ ॥ १० ॥ सुषुप्तिबोधमोहांश्च स्ववशस्त[3]द्वशं सदा। जीवं [4]नयति जीवेशो ॥ ४ ॥ ५ ॥ ७ ॥ ॥ ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥ ॥ ९ ॥ नान्यः कर्ताऽस्य कश्चन ॥ ९ ॥ ६ ॥

॥ ॐ न [5]स्थानतोऽपि परस्योऽभय[6]लिङ्गं सर्वत्र हि ॐ ॥ ११ ॥ न स्थानभेदतोऽप्यस्य भेदः कश्चित्परेशितुः। सर्वत्राशेषदोषोज्झपूर्णकल्याणचिद्गुणः ॥११॥ ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥ १२ ॥ तद्विरुद्धं तु यत्तत्र[7] मानं नैव क्वचिद्भवेत्। महातात्पर्यरोधेन कथं तन्मानमत्र तु[8] ॥ दुःखा[9]प्ययसुखावाप्तिहेतुत्वेनैव वेदवाक्। भवेन्मानं तदीशानात्प्रसन्नादेव नान्यथा॥ प्रसन्नता गुणोत्कर्षज्ञानादेव हि केवलम्। निर्दोषतापरिज्ञानादपि नान्येन केनचित्॥ 'यो मामशेषदोषोज्झं गुणसर्वस्व बृंहितम्[10]। जानात्यस्मै प्रसन्नोऽहं दद्यां मुक्तिं न चान्यथा'॥ 'यो मामशेषा[11]भ्यधिकं विजानाति स एव माम्। विजानात्यखिलां-

---

1 सन्ध्यम्. 2 कृत्वा. 3 नीत्वा. 4 प्रापयति. 5 स्थानभेदतः. 6 भिन्नस्वरूपत्वम्. 7 तत्रार्थे. 8 विष्णोर्दोषित्वादौ. 9 नाश-10 प्रत्येकमपि गुणानामनवधिकत्वोक्तिरनेन. 11 गुणैर्दोषाभावैश्च सर्वोत्तमम्.

SGDF
Sri Gangeshwari Digital Foundation

स्तस्य दद्यां कामान्परं पदम्' ॥ 'यो मामेवमसम्मूढः' 'किं मां निन्दन्ति शत्रवः'। इत्यादिवेदस्मृतिगवाक्यैरेवावसीयते ॥ लोक[1]तश्च प्रसादेन मुक्तिः सगुणवेदनात्। महा[2]तात्पर्यमुख्यस्य विरोधादत एव हि ॥ दोषित्वनिर्गुणत्वाल्पगुणत्वादि कथञ्चन। नार्थः श्रुति-पुराणादे[3]स्तद्विरुद्धोऽखिलस्य[4] च ॥ अर्थः [5]स्वयं विनिर्णीतो वासुदेवेन सादरम्। 'इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृत[6]कृत्यश्च भारत'। इत्यतोऽखिलसच्छास्त्रविरुद्धत्वेन नानुमा ॥ वर्तते [7]तत्र तेनेशो निर्णीतोऽखिलसद्गुणः ॥ १२ ॥ ८ ॥

॥ ॐ अत[8] एव चोपमा[9] सूर्यकादिवत् ॐ ॥१८॥

न च चित्त्वादभिन्नत्वं[10] जीवस्येशवदा[11]प्यते। यत आभासतामेव श्रुतिरस्य वदत्यलम् ॥ 'यथैषा पुरुषे छाया एतस्मिन्नेतदाततम्'। 'छाया यथा पुंसदृशी पुमधीना च दृश्यते ॥ एवमेवात्म[12]काः सर्वे ब्रह्माद्याः परमात्मनः'। 'सत्ताप्रतीतिकार्येषु पुमधीनो यथेयते ॥ आभास[13] एवं[14] पुरुषा मुक्ताश्च परमात्मनः'। 'छाया विष्णो रमा तस्याश्छाया धाता [15]विशेषकौ ॥ तस्येन्द्रकामौ च तयोस्तयोरन्येऽखिला अपि'। 'हरेर्ब्रह्माऽस्य गी[16]स्तस्या विशेषाविन्द्र एतयोः ॥ [17]मार-श्चाभासकाः सर्व एतयोस्तदधीनतः। सर्वेऽल्पशक्तयश्चैव पूर्णशक्तिः परो हरिः ॥ चेतनत्वेऽपि भिन्नास्ते तस्मादेतेन सर्वदा'। इत्यादि-श्रुतिवाक्येभ्यो ज्ञायते भेद एव हि ॥ आभासत्वं हि निर्णीतं जीवस्य परमात्मनः। तन्न युक्तं यदा[18]भास[19] उपाध्या[20]यत्त ईयते ॥

---

1 लोकदृष्टान्तोपेतानुमानतश्चावसीयते. 2 परममहातात्पर्यस्य. 3 दोषित्वादेः. 4 श्रुत्यादेः. 5 इति. 6 मुक्तः. 7 परमेश्वरभेदादौ. 8 तदधीनत्वतत्सदृशत्वाभ्यामेव. 9 सूर्यकादिवदित्युपमा न उपाध्यधीनत्वादिना. 10 ब्रह्मणा. 11 युज्यते. 12 अल्पचेतनाः. 13 दर्पणादिः. 14 आभासाः. 15 विः गरुडः. 16 गीः, सरस्वती. 17 मारः, कामः. 18 यस्मात्. 19 सूर्यप्रतिबिम्बादिः. 20 जलाद्युपाध्यधीनः.

SGDF
Sri Gangeshwari Digital Foundation

उपाध्यायत्तताभावादाभास[1]त्वविरोधतः । चेतनत्वेन चांशत्वा[2]त्समु[3]-दायैक्यमा[4]पतेत् ॥ अतः पृथ[5]क्त्वमु[6]दितं समुदा[7]यांशयोर्भवेत् । ईशाख्या[8] समुदाये[9] स्यादीश[10]रूपेष्विवोदिता ॥ अतो देहाद्युपाधीनामपाये समता भवेत् । ईशरूपैरथाभास मुख्यतः सूर्यकादिवत् ॥ यदा तदोपाध्यायत्तरूपाणां[11] नाशिता भवेत् । इत्याशङ्कानिवृत्त्यर्थमाह वेदाधिपः प्रभुः ॥ अत एवोपमेत्येव [12]चान्या[13]भासविशेषिताम् । [14]यदुक्तं तदधीनत्वं सर्वावस्थास्वशेषतः[15] ॥ जीवस्य सदृ[16]शत्वं च चित्त्वमात्रं न चापरम्[17] । तावन्मात्रेण चाभासो [18]रूपमेषां चिदात्मनाम् ॥ नोपाध्यधीनताद्यैश्च नातिसाम्यं निदर्शने । किञ्चित्सुखादिसादृश्यमपीशेनासुरानृते ॥ [19]तत आभासते[20] नित्यं [21]तद्वदाभासतेऽपि च । [22]भानमस्ति[23]त्वमपि चैवा[24]ऽसमन्ताद्यतस्ततः ॥ जीव [25]आभास उद्दिष्टः सदैव परमात्मनः । न जलायत्तसूर्यादिप्रतिबिम्बोपमत्वतः ॥ तदधीनत्वमेवेति[26] किञ्चित्सादृश्यमेव[27] चः[28] । सम्प्रकाशयतः सूत्रगतावखिल[29]मानतः ॥ जीवेशभेददृष्टचैव समुदायैकता

---

1 आभासत्वस्याभेदेन व्याप्तत्वात् भेद साधने विरुद्धत्वात्. 2 अंशत्वाच्च. 3 सकलचेतनसमुदायाभिन्नत्वं तं तु समुदायात्परस्यैव. 4 भवेत्. 5 भिन्नत्वम्. 6 श्रुत्याद्युक्तम्. 7 समुदायस्यांशयोर्जीवेश्वरयोः. 8 ब्रह्मशब्दः. 9 चेतनानाम्. 10 मत्स्यादीनां समुदाये. 11 जीवानाम्. 12 भिन्नक्रमः चोपमेति. 13 अन्यस्मादाभासात् सूर्यकादेः विलक्षणताम्. 14 सन्ध्येसृष्टिराह हीत्यादौ. 15 सर्वव्यापारेषु. 16 परमात्मना. 17 स्वातन्त्र्यादिकम्. 18 स्वरूपम्. 19 ब्रह्माभासशब्दस्य यौगिकार्थमाह ततः तेन निमित्तेन. 20 प्रतीयते इति तदधीनत्वमुक्तम्. 21 अनेनतत्सदृशत्वमुक्तम्. 22 ज्ञानम्. 23 सत्त्वं अस्ति स्वातीति पाठादस्तिशब्दोऽव्ययम्. 24 पूर्वान्तवत्स्वरः सन्धौ इत्युक्तेः नात्र यतिभङ्गः. 25 भा च असा च भासे आ=सर्वकालवर्तिन्यौ भासे आभासे ब्रह्माधीने आभासे यस्य सः. 26 अर्थमेव शब्दः. 27 इत्यर्थम् (एव इति शब्दः). 28 च शब्दः. 29 मानैः भेद दृष्ट्या.

SGDF
Sri Gargeshwari Digital Foundation

कुतः । अशेषदोषराहित्यं सर्वशक्तित्वतो हरेः ॥ 'सर्वोपेते'ति कथितमत ऐक्यं क्व दोषिणा । अशेषशक्तियुक्तश्चेत्स्वातन्त्र्याद्दोषवान्कथम् ॥ अनुसन्धान[1]रहितमैक्यं चेदेकता न [2]तत् । चेतनैक्येऽनुसन्धानं प्रमाणं नैव चापरम् ॥ अनुसन्धानरहितं समुदायैक्यमेव[3] चेत् । चेतनेष्वस्तु तन्नाम[4]मात्रमेव यतस्ततः ॥ मुक्तौ स्यादनुसन्धानमित्यपि स्यात्सु[5]दुष्करम् । [6]सर्वज्ञ एकतां नानुसन्धत्ते नैव सा[7] यतः ॥ पश्चात्स्यादनुसन्धानं[8] चेन्मिथ्याज्ञानिता भवेत् । विद्यमानानुसन्धानं न चेदज्ञत्वमापतेत् ॥ अस[9]दैक्यं भवेत्पश्चा[10]द्यदि स्यात्सप्तमो रसः । [11]समुदायैक्यमेत[12]स्मादूरतोऽपाकृतं सदा ॥ अतोऽशेषगुणो[13]न्नद्धं निर्दोषं यावदेव हि । [14]तावदेवेश्वरो नाम तत्र भेदोऽपि न क्वचित् ॥ 'नेह नानास्ति किमपि[15] [16]हरयोऽयमयं[17] हि सः' । इत्यादिश्रुतिमानेन जीवांशाः[18] सर्व एव च ॥ नियमेनानुसन्धानवन्तो यद्येकता स्वतः । [19]अंशिनोऽशेष[20]सन्धानमत्यल्पस्यापि विद्यते ॥ भुवि जातेन चांशेन सुखदुःखादि[21] तद्गतम् । अनुभूयते विशेषस्तु[22] कश्चिदीशकृतो भवेत् ॥ ईशस्याचिन्त्यशक्तित्वान्नाशक्यं[23] क्वापि विद्यते । सेशताऽनुपपन्नैव यदि जीवैकताऽस्य हि ॥ अनीशस्येशतेत्येव विरुद्धं सर्वमानतः । ईशत्वेनैव विज्ञातमनीश[24]त्वेन चेत्श्रुतिः ॥ अनीशत्वेन विज्ञातमीशत्वेनाथवाऽऽदिशेत् । उपजीव्यविरोधेन नैव मानत्वमेष्यति ॥

---

[1] स्वीयतया दुःखादिसाक्षात्कार. [2] तर्हि. [3] नात्यन्तैक्यम्. [4] न वास्तवम्. [5] स्यात् प्रमाणाभावेन सन्दिग्धत्वात्. [6] यतः. [7] एकता अतः नैव. [8] जीवैक्यस्य. [9] पूर्वं अविद्यमानम्. [10] ज्ञानोत्तरकाले. [11] सदा. [12] प्रमाणशून्यत्वात्. [13] गुणपूर्णम्. [14] मत्स्यादिरूपसमुदायः. [15] किञ्चन. [16] 'अयं वै हरयः'. [17] 'अयमेव स योऽयमात्मा'. [18] इन्द्रादीनामंशा अर्जुनादयः. [19] अत्यल्पस्यापि. [20] अंशागतसर्वानुसन्धानम्. [21] एव न तु सर्वम्. [22] सर्वानुसन्धानरूपः. [23] स्वशिरच्छेदादि. [24] जीवत्वेन.

SGDF
Sri Gangeshwari Digital Foundation

[1]अतएवेश[2]तासिद्धेर्न किञ्चि[3]च्छक्यमस्य[4] च । ईशत्वेऽनीशभेदेन श्रुत्या सम्यक्प्रकाशिते ॥ अयुक्तमपि चान्यत्र युक्तं भवति तद्बलात् । अतोऽन्यत्रापि यद्दृष्टं तदीशेनैव[5] कल्प्यते ॥ श्रुत्याऽऽभासा[6]त्तमपि न[7] हीशत्व[8]परिपन्थि यत् । ईशोऽनीशो जगन्मिथ्या दुःखी मुक्तो भिदा न हि ॥ इति प्रतिज्ञाव्याघातः सर्वदोषाधिकाधिकः । इति हि ब्रह्मतर्कोक्तिरतिहेयमतोऽखिलैः ॥ बुभूषुभिर्मतमिदं जीवेशाभेदवादिनः । नायुक्तमीशितुः किञ्चिदीशत्वस्याविरोधि यत् ॥ यदीशत्वविरोधि स्यात्तदेवायुक्तमञ्जसा । ईशत्वस्याविरोधेन योजयित्वाऽखिलाः प्रमाः ॥ सिद्धे[9]शत्वेन चायुक्तमपि हीशेन योज[10]येत् । मानतः प्राप्तमखिलं नामानं योजयेत्क्वचित् ॥ इति हि ब्रह्मतर्कोक्तिरतो युक्तमिहोदितम् ॥ १८ ॥ १० ॥

॥ ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ ॥१४॥

स चाप्राकृतरूप[11]त्वादरूपः स्वगुणात्मकम् । रूपमस्य शिरःपाणिपादाद्यात्मकमिष्यते ॥ अतो नानित्यता नैव श्रुतिद्वयविरोधिता । यथा हि तैजसस्यैव प्रकाशस्योज्झितावपि ॥ आत्मैव[12] ज्योतिरित्या[13]ह जीवस्येशं श्रुतिस्तथा[13] ॥ १४ ॥ ९ ॥

॥ ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ ॥२०॥ तद्भक्तितारतम्येन तारतम्यं विमुक्तिगम् । ब्रह्मादीनां च सर्वेषामानन्दादेर्यथाक्रमम् ॥ २० ॥ १२ ॥

---

1 जीवैक्यादेव. 2 उक्तरूपशक्तेरसिद्धत्वात्. 3 ईशतानीशतयोरेकत्रावस्थानम्. 4 परमात्मनोऽपि. 5 ईशत्वेनैव. 6 आभास इव=विरुद्धमिव प्रतीयमानमपि यत् अणुत्वयौगपद्यादि. 7-8 ईशत्वाविरोधि तत्ईशत्वेनैवकल्पेते. 9 सिद्धमीशत्वं यस्यासौ तेन. 10 संयोजयेत्=ईश्वरेस्तीति जानीयात्. 11 प्राकृतरूपरहितमेव अप्राकृतरूपयुक्तम्. 12 आत्मैवास्य. 13 इति श्रुतिः (बृह.) ॐ प्रकाशवच्चावैयर्थ्यमितिसूत्रव्याख्या इयम्.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥ ३५ ॥

प्रतिबिम्ब[4]वदप्येषामानन्दोऽन्यगुणा[5] यथा[6] ॥ ३५ ॥ ॐ उपपत्तेश्च ॐ ॥ ३६ ॥ नारायणगुणा[7]धीनश्चात्यल्पस्तदपेक्षया । तस्माद्भिन्नश्च सततं अन्यज्ज्ञानं परस्य च ॥ अन्यज्ज्ञानं तु जीवानामन्य आनन्द ईशता । [8]मुख्येशता परेशस्य गौणी जीवस्य सा यतः । इतिश्रुतेः ॥ ३६ ॥ १७ ॥

॥ ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ ॥२२॥ सृष्टिनाशौ तदधीनावितीरिते । स्वभावत्वात्स्थितेर्नैतदपेक्षेति न युज्यते ॥ यतस्स्वभावोऽप्यखिल ईशायत्तोऽ-[9]खिलस्य च ॥ २२ ॥ १३ ॥

॥ ॐ तदव्यक्तमाह हि ॐ ॥ २३ ॥ अव्यक्तोऽपि स्वशक्त्यैव भक्तानां दृश्यते हरिः ॥ २३ ॥ १४ ॥

॥ ॐ उभय[11]व्यपदेशात्त्वहिकुण्डलवत् ॐ ॥ ॥ २८ ॥ [12]तदभिन्ना गुणा नित्य[13]मपि[14] सर्वे विशेषतः[15] । गुणत्वेन गुणित्वेन भोक्तृभोग्यतया स्थिताः ॥ विशेषा[22]त्मतया तेषां[16] नित्यशक्त्या[18]त्मना [21]तथा । [19]नित्यं[20]स्थितेर्न [23]धर्माणां

पूर्वाधिकरणगत 'यथाक्रममित्यस्य श्रौतक्रमानतिरेकेणेत्यर्थः. [4] प्रसिद्धप्रतिबिम्बैस्तुल्यं वर्तते भगवदानन्दप्रतिबिम्बोभवतीति यावत्. [5-6] अन्येषांसाधनभूतानां भक्त्यादीनां वैचित्र्यानतिक्रमेण परस्परं विचित्रः. [7] आनन्दः. [8] ईशता मुख्य [9] सर्वपदार्थानां स्वभावः. [10] अव्यक्तोपि. [11] गुणात्मकेन गुणित्वेन च ब्रह्मण उक्तत्वात्. [12] तेन अत्यन्ताभिन्नाः धर्माः. [13] नियमेन. [14] तथापि. [15] विशेषशक्त्या. [16-24] अन्वयक्रमः. [22] विशेषात्मतया=व्यक्तिरूपेण, व्यवहार विषयतोपपत्तेः.

SGDF
Sri Gangeshwari Digital Foundation

[17]क्रियादीनामनित्यता[24] ॥ न विशेषात्मता चेय[3]मनित्या शक्तिरूपता । [4]सैव [5]यत्सविशेषा स्या[6]द्विशेषोऽन्यो[7] न[8] चाप्ययम् ॥ स्वनिर्वा[9]कता- हेतोस्तथापि स्याद्विशेषता[10] । विशेष[11]त्वेन विज्ञातैः[12] प्रमाणै[13]रखिलै- रपि[14] ॥ [15]ससर्ज [16]सञ्जहारेति विशेषो ह्यवगम्यते । श्रुत्यैव स स[17a] एवेति तद्भेदश्च गम्यते ॥ [18]भेदो यदि विशेषस्य[19] स भेदो भेदिना[20] कथम् । भिन्नश्चेदनवस्था स्यादभिन्न[21]श्चेत्पुरा[22] न किम् ॥ विशेषोऽभिन्न एवेति तेन नाभ्युपगम्यते । अभिन्नो निर्विशेषश्चे- द्भेद[23]स्तद्भेदता कुतः॥ [24a]अनेनानेन[25] भिन्नोऽयमिति यत्स[26]विशेषतः । भेद एवैष बहुधा दृश्यते तत्कि[27]मुत्तरम् ॥ अभेदभेदयोश्चैव स्वरूपत्वं हि भेदिनः । तयोरप्यविशेषत्वे[28] पर्यायत्वं हि शब्दयोः ॥ अभेदभेदशब्दौ च पर्यायाविति को वदेत् । भेदोऽन्योऽन्यमभेदश्च भेदिना चेद्विशेषिता ॥ अविशेषे कथं भेदो भेदिनैकस्तथा भिदा । पुनस्तयोर्विभेदश्च भेदिमात्रत्वतो भवेत् ॥ भेदिनश्चैव भेदस्य विशेषो यदि गम्यते । अभेदाभेदिनोश्चैव किं भेदोऽभेदभेदयोः ॥ विशेषे- णैव [29]सर्वत्र यदि व्यवहृतिर्भवेत्[30] । कल्पनागौरवायैव किं भेदः[31]

---

[3] व्यवहारालम्बनत्वेनोक्ता. [4] विशेषात्मता. [5] यस्मात्. [6] सविशेषा भिन्नैव. [7] भगवतः भिन्नः. [8] नैव. [9] अनवस्थाभावात्. [10] तस्यविशेषस्य. [11] ज्ञानादिधर्माणां भगव- द्धर्मत्वेन. [12] तदभिन्नत्वेन च. [13] ज्ञानत्वात्. [14] उभयविधैः. [15] सर्वमसृजत्. [16] तदत्तुमध्रियत इति श्रुत्या. [17a] आनन्दोब्रह्म इति- श्रुत्या. [18] एतत्प्रपञ्चनार्थं उत्तरो ग्रन्थः । ब्रह्मणोभेदः. [19] ज्ञानादे- र्ब्रह्मधर्मस्य. [20] ब्रह्मणा ज्ञानादिना च. [21] सविशेषश्च. [22] धर्माणां धर्मिणां सविशेषाभेदः, किं नाङ्गीक्रियते. [23] तस्य तयोरयंभेद इत्येवं भावः. [24a] यस्मात् पटात्. [25] स्तम्भात्. [26] प्रतियोगि विशेष- साहित्येन. [27] अतो न भेदः धर्मिस्वरूपं इति परोक्तस्य, तस्य. [28] अभिन्नत्वे च. [29] भेदभेदिनोरभेदाभेदिनोश्चाभेदेऽपि. [30] चेत्. [31] भेदाभेदयोः भेदः.

SGDF
Sri Gangeshwari Digital Foundation

कल्प्यते[1] तदा ॥ ऐक्यप्रतीत्यभावेन भेद एव[2] गवा[3]श्वयोः । स एवेति [4]प्रतीतौ हि विशेषो नाम भण्यते ॥ सच्चिदा[5]देर[6]पर्यायसिद्ध्यर्थं [7]मायिनाऽपि हि । अङ्गीकार्यो विशेषोऽयं, यद्य[8]सत्यविशेषणम् ॥ [9]पृथक्पृथग्वारयितुं शब्दा[10]न्तरमितीष्यते । [11]मायाविशेषराहित्य-विशेषणविशेषिता ॥ सत्यस्यापि भवेत्सा च तथा[12] चेदनवस्थितिः[13] । यदि सत्ये विशेषो न न [14]तदुक्तिर्भवेत्तदा ॥ लक्ष्यते चेत्तेन लक्ष्य-मित्यपि स्याद्विशेषिता । पुनः पुनर्लक्षणायामपि स्यादनवस्थितिः ॥ यद्यभाव[15]विशेषित्वं स्यादङ्गीकृतमेव ते[16] । असार्वज्ञादिराहित्यमप्येवं ते भविष्यति ॥ तदा सार्वज्ञमेव स्याद्भावार्थत्वान्नञोर्द्वयोः । यदि नैतादृशं ग्राह्य[17]मसुखत्वानिवर्तनात् ॥ असत्त्वाज्ञानतादेश्च[18] स्याद-सत्त्वादिकं तदा । अनृतादिविरोधित्वं यद्यस्या[19]भ्युपगम्यते ॥ अनैश्वर्यविरोधित्वमप्येवं किं निवार्यते । [20]अखण्डखण्डना[21]देवं विशेषोऽखण्डवादिना ॥ [22]खण्डितेनापि मनसा स्वीकार्योऽनन्यथा-गतेः । [23]अखण्डखण्डवादिभ्यां खण्डा[24]खण्डेन चैव तत् ॥ महादरेण शिरसि विशेषो धार्य एव हि । [25]निदर्शनत्रयेणातो भगवानत्य-

---

1 कल्प्यते किम्. 2 स्वीक्रियते न विशेषः. 3 ‘गवाश्वप्रभृतीनिच’ इति निपातः. 4 अभेद. 5 पदसमूहस्य. 6 अपर्यायत्व. 7 क्रियादीनां मायिकत्वमङ्गीकुर्वतामपि. 8 असत्यत्वादि विशेषणम्, आरोपितम्. असत्यत्वाभावं प्रति विशेषणं वा. 9 सत्यत्वादि पृथगर्थवाची. 10 सत्यं ज्ञानमित्यादि. 11 कल्पितासत्यत्वादि विशेषणराहित्यलक्षण-विशेषणविशेषिता. 12 आरोपिता. 13 वाक्यार्थस्य अव्यवस्था. 14 तच्छब्दप्रवृत्तिः. 15 अभावरूपधर्मवत्वम्. 16 मते, तृतीयार्थे अव्ययं वा. 17 तदा आनन्दादिपदानि असुखत्वादीनि न निवर्तयेयुः इति शेषः. 18 अनिवर्तनात्. 19 सत्यत्वादेः. 20 ब्रह्मणो निर्धर्म-कत्वम्. 21 हेतोः. 22 उत्तरोत्प्रेक्षारहितेन. 23 अभेदवादिभेद-वादिभ्याम्. 24 भेदाभेद इति वादिना अर्शआदिभ्योऽच्. 25 अहि-कुण्डलप्रकाश पूर्वत्वम्.

SGDF
Sri Gangeshwari Digital Foundation

भिन्नताम्[1] ॥ गुणानामादरेणाह तच्च[2] नाभिहिता[3]न्वयः । [4]यदाऽशेष-
विशेषा[5]णाममुक्तिः सामान्यतो भवेत् ॥ [6]पदैकेना[7]प्युत्तरेण[8] विशेषाव[9]-
गतिर्भवेत् । यतोऽशेषविशेषाणां वस्तुना[10]स्त्येव चैकता[11] ॥ अतः
सामा[12]न्यतो [13]ज्ञातः पदान्तरबलात्पुनः । भवेद्विशेषतो[14] ज्ञातस्तेन
[15]स्यादन्वितोक्तिता ॥ [16]स्वार्थ एवान्वितो यस्मात्केन चित्त[17]द्विशेषतः ।
[18]अनेनेति [19]तदुक्त्यैव ज्ञायतेऽ[20]नुभवेन[21] हि ॥ यद्यनन्वितमेवैतत्पदं[22]
स्वार्थं वदेदिह । तथाऽन्यान्यपि सर्वाणि कः कुर्यादन्वयं पुनः[23] ॥
व्यापारो न हि शब्दस्य[24] परः[25] स्वार्थप्रकाशनात् । [26]पुमानप्येक-
वारोक्त्या कृतकृत्यो यदा भवेत् ॥ अन्वयस्य कथं ज्ञानं शब्दा[27]र्थत्वं
यदास्य न । यदैवानन्वितार्थस्य[28] वचनं तैः पदैर्भवेत् ॥ अनन्वितस्या-
च्छब्दार्थो न [29]तदर्थो हि सोन्वयः[30] । निराकाङ्क्षपदान्येव वाक्य-
मित्युच्यते बुधैः ॥ तत्त[34]दर्थाभिधानेन स्यान्निराकाङ्क्षता[33] च[32] सा[31] ।
अपूर्तेस्तावदर्थानामाकाङ्क्षा [35]पूर्वमिष्यते ॥ कर्मकर्तृक्रियाणां तु [36]पूर्तौ
कोऽन्योऽन्वयो भवेत् । [37]अपूर्तिश्चेत्पदैरुक्तैः किं नृशृङ्गेण[38] पूर्यते[39] ॥
व्यापार[42]श्चेत्पुन[41]स्तेषा[40]मनुक्ता[43]वपि किं न सः । [44]उक्ते [45]बुद्धि-

---

1 सविशेषाम्. 2 तस्मादेव. 3 पदाभिहितैः पदार्थैरन्वयबोधः. 4 यदि. 5 विशेषान्वितस्यार्थस्य. 6 पदेषुमुख्येन आद्यपदेन. 7 तथापि. 8 पदजातेन. 9 अन्वयविशेषज्ञानम्. 10 ब्रह्मणा. 11 विशेषश्च. 12 एकैकशः पदैः. 13 अन्विततया ज्ञातोर्थः. 14 अन्वितत्वेन. 15 अन्विताभिधायिता. 16 पदानाम्. 17 धर्मविशेषेणान्वयः. 18 सत्यत्वेन ज्ञानत्वेन वा अन्वित इति. 19 सत्यादिपदोक्त्यैव. 20 इति. 21 सिद्धम्. 22 आद्यपदम्. 23 अन्वयज्ञानोपायत्वेन प्रसक्तान् अष्टौपक्षान्निराह. 24 पदस्य. 25 अन्यः. 26 वक्ता. 27 शब्दवाच्यत्वम्. 28 एव. 29 पदार्थानामर्थः. 30 सः पदार्थैः प्रतिपादितः. 31-32-33-34 अनुक्रम. 34 पदैः. 35 गवादिपदप्रयोगात्. 36 अभिधाने सति पदैः. 37 अन्वयस्यानभिधानात्. 38 तत्तुल्येन. 39 अभिधीयते. 40-41-42-43 अनुक्रम. 41-42 विरम्य व्यापारः. 43 अनुक्तानामपि. 44 उक्तौ. 45 बुद्धिविषयता.

SGDF
Sri Gargeshwari Digital Foundation

स्थताहेतोर्यदि व्यापार इष्यते ॥ [1]बुद्धिस्थत्वाय यत्नं न कथं कुर्युः पुरैव च। पुरुषाधीनता तेषां यदि, [2]पश्चाच्च सा समा ॥ [3]पुमानेवान्वयायैषां यदि [4]पश्चाद्विचेष्टते । अनन्विताभिधानानां[5] स[6] एवार्थान्तरोक्तिषु[7] ॥ यततां शब्दशक्तिश्चेत्तत्रनैवान्वये[8] कथम् । तत्कल्पनागुरुत्वादि दोषेतोऽभिहितान्वयः ॥ अनुभूतिविरुद्धश्च त्याज्य एव मनीषिभिः । [9]कर्तृशब्दे ह्यभिहिते धर्मसामान्यवेदनात् ॥ विशेष[10]-धर्ममन्विच्छन् किमित्येव हि पृच्छति । गुणक्रियादिधर्माणां विशेषे कथिते पुनः ॥ निराकाङ्क्षो भवेद्यस्माच्छब्दा [11]अन्वितवाचकाः । अतोऽनन्तगुणात्मैको[12] भगवानेक एव तु ॥ उच्यते सर्ववेदैश्च ॥ २८ ॥ १५ ॥

॥ ॐ [13]परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ ॥३२॥ ते[14] चाखिल[15]विलक्षणाः । सर्वे सर्वगुणात्मानः सर्वकर्तार एव तु ॥ तथापि सविशेषाश्च ॥ ३२ ॥ ॐ बुद्ध्यर्थः पादवत् ॐ ॥ ३४ ॥ [16]विद्व्द्युत्पत्तितोऽपि च । तैस्तैश्शब्दैश्च भण्यन्ते युज्यते चो[17]पदेशतः॥ अन्यानन्दादिसादृश्यमानु[18]कूल्यादि नापरम्[19] । पूर्णत्वादिमहत्तेषां वैलक्षण्यं श्रुतौ श्रुतम् ॥ " पूर्णोऽशेषनियन्ता च [20]सुस्वादुतम एकलः[21] । गुणोरुसमुदायोऽयं वासुदेवः सुनिष्कलः[22]" ॥

---

[1] पदार्थबोधनादिव्यापाराय. [2] अन्वयबोधने. [3] श्रोता. [4] पदार्थस्मरणानन्तरम्. [5] सहाय्येन. [6] पुमानेव. [7] तज्जन्यज्ञानेषु. [8] शक्तिरहितैस्तैः. [9] सम्बन्धि. [10] ज्ञानम्. [11] सामान्येनान्वितस्वार्थे. [12] अभिन्नः. [13] लोकविलक्षणं ब्रह्मानन्दादिगुणजातम्. [14] ते गुणाः. [15] लौकिकानन्दादिभ्यः. [16] भगवद्गुणसाक्षात्कारवताम्. [17] विदुषाम्. [18] निरुपाधिप्रियत्वमानन्दस्य. [19] अल्पत्वास्थिरत्वादि. [20] शोभनानन्दतमः. [21] एकाकी, परानपेक्षः. [22] सर्वथा विभक्तां रहितः.

SGDF
Sri Gangeshwari Digital Foundation

वासुदेवश्रुतिश्चैषा गुणान्वक्ति हरेःपरान्[1] ॥ ३४ ॥ ॐ [2]पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ ॥ ४२ ॥ 'स एवाशेषजीवस्थनिःसंख्यानादिकालिकान् । धर्माऽधर्मान्सदा पश्यन्स्वेच्छया बोध[3]यत्यजः ॥ कांश्चित्तेषां फलं चैव ददाति [4]स्वयमच्युतः । न ते विशेषं कमपि प्रेरणादिकमच्युते ॥ कुर्युः कदाऽपि तेनायं स्वतन्त्रोऽनुपचारतः । कर्माणि तानि च पृथक् चेतनान्येव सर्वशः ॥ अचेतनशरीराणि स्वकर्मफलभाञ्जि च । प्रत्येकं तेषु[5] चानन्तकर्माण्येवं विधानि[6] च ॥ तानि चैवमितीशस्य[7] निःसीमा शक्तिरुत्तमा । एकैव ब्रह्महत्या हि वराहहरिणोदिता[8] ॥ ब्रह्मपारस्तवेनैव निष्क्रान्ता राजदेहतः । स्तोत्रस्य तस्य माहात्म्या[9]द्व्याधत्वं गमिता[10] पुनः ॥ प्राप्य ज्ञानं परं चाप तथाऽन्या[11]न्यपि सर्वशः । अनन्तान्युदितान्येवं[12] प्रभुणा कपिलेन हि ॥ संसारे पच्यमानानि कर्माण्यपि पृथक् पृथक्[13] । तस्मादनन्तमा[14]हात्म्य[15]गुणपूर्णो(र्णो) जनार्दनः ॥ भक्त्या परमयाऽऽराध्य[16] इति पादार्थ ईयते[17] ॥ ४२ ॥ २० ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥ २२१ ॥ २२६ ॥

॥ ॐ ॥ वैराग्यतो भक्तिदार्ढ्यं तेनोपासा यदा भवेत् । आपरोक्ष्यं तया विष्णोरिति पादक्रमो भवेत् ॥ [18]युक्तितो ज्ञात-

---

[1] विलक्षणान्. [2] पूर्वोक्तं ब्रह्मधर्मंच फलहेतुं मन्यते. [3] कांश्चित् सव्यापारी करोति. [4] स्वयमेव. [5] कर्माभिमानिषु. [6] चेतनत्वाद्युक्तधर्मवन्ति. [7] एवं भूतानां कर्मणां दर्शनादिमतः. [8] वराहपुराणे, चेतनत्वादिरूपेण. [9] व्याधत्वादिप्राप्त्या चेतनत्वादिकं गम्यते. [10] प्रापिता ब्रह्महत्या. [11] ब्रह्महत्यायाः. [12] चेतनत्वादिना. [13] उदितानि. [14] शक्ति. [15] आनन्दादि. [16] उपास्य. [17] ज्ञायते. [18] प्रथमसूत्रमारभ्य सर्वेषां अपि सूत्राणां सङ्गत्यर्थं सर्वानुवादः युक्तितः वेदविरोधियुक्तीः पराकृत्य.

SGDF
Sri Gargeshwari Digital Foundation

वेदार्थो निरस्य समयान्परान् । परस्परविरोधं च प्रणुद्याशेषवाक्यगम् ॥ अध्यात्मप्रवणो भूत्वा तस्य सन्निहितत्वतः । बहुयुक्तिविरोधानां भानात्तत्सहितश्रुतेः ॥ विरोधं च निराकृत्य श्रुतीनां [1]प्राणतत्वगान् । परिहृत्य विरोधांश्च तत्प्रसादानुरञ्जितः ॥ देहकर्तृत्वमीशस्य ज्ञात्वा तत्पितृतास्मृतेः । विशेषस्नेहमापाद्य सर्वकर्तृत्वतोऽधिकम् ॥ निष्पाद्य बहुमानं च तदन्यत्रातिदुःखतः । उत्पाद्याधिकवैराग्यं तद्गुणाधिक्य-वेदनात् ॥ सर्वस्य तद्वशत्वाच्च दार्ढ्ये भक्तेरवाप्य च । यततोपासनायैव विशिष्टाचार्यसम्पदा ॥ कर्तव्या ब्रह्मजिज्ञासेत्युक्ते किमिति संशये । अत इत्युदितेऽप्यस्य विशेषानुक्तितः पुनः ॥ सृष्टिबन्धनमोक्षादि-कर्तृत्वस्य श्रुतत्वतः । यतो मोक्षादिदाताऽसावतो जिज्ञास्य एव वः ॥ इत्याह तत्परं ब्रह्म व्यासाख्यं ज्ञानरश्मिमत् । येनैव बन्ध[2]मोक्षः स्यात्स च जिज्ञासया [3]गतः ॥ सुप्रसन्नो भवेदीशो जिज्ञासाऽतोऽस्य मुक्तिदा । मोक्षादिदत्वमीशस्य कथमेवावगम्यते ॥ इति चेच्छास्त्र[4]-योनित्वाच्छास्त्रगम्यो हि मोक्षदः । प्रत्यक्षावसितेभ्यः स्याद्यदि मोक्षः कथञ्चन ॥ किमित्यनादिसंसारमग्नाः सर्वा इमाः प्रजाः । यस्मा-न्नियमतो दुःखहानिः प्रत्यक्षतो भवेत् ॥ धावन्त्येव तमुद्दिश्य राजाद्यमखिलाः प्रजाः । अनुमागम्यतो मोक्षो यदि स्यादनुमैव हि ॥ दृष्टपूरुषवन्मोक्षदातृतां विनिवारयेत् । तच्छास्त्रगम्य एवैको मोक्षदो भवति ध्रुवम् ॥ शास्त्रगम्यश्च नान्योऽस्ति मोक्षदत्वेन केशवात् । मोक्षदो हि स्वतन्त्रः स्यात्परतन्त्रः स्वयं स्मृतौ ॥ वर्तमानः कथं शक्तः परमोक्षाय केवलम् । अन्याश्रयेण यद्येष दद्यान्मोक्षं स एव हि ॥ तेन नानुस्मृतो मोक्षं न दद्यादन्यवाक्यतः । अतस्तदर्थमपि स ज्ञेयो विष्णुर्मुमुक्षुभिः ॥ "यमैवेष" इतिश्रुत्या 'तमेवेति' च सादरम् ।

---

[1] मुख्यप्राणेन्द्रिय विषयकान्. [2] बन्धात् मोक्षः. [3] ज्ञातः. [4] मोक्षदत्वेन शास्त्रैकगम्यत्वात्. [5] अन्यस्य.

SGDF
Sri Gangeshwari Digital Foundation

शास्त्रयोनित्वमस्यैव ज्ञायते वेदवादिभिः ॥ "य एनं विदुरमृता" इत्युक्तस्तु समुद्रगः । 'तदेव ब्रह्म परममि'ति श्रुत्याऽवधारितः ॥ 'यतः प्रसूते'ति ततः सृष्टिमाह ततो हरिः । "शास्त्रयोनि"र्न चान्योऽस्ति मुख्यतस्त्विवति गम्यते ॥ शास्त्रयोनित्वमेतस्य ज्ञायते हि समन्वयात् । सममिति ह्युपसर्गेण परमुख्यार्थतोच्यते ॥ एवं परममुख्यार्थो नारायण इति श्रुतेः । निर्धारणाय 'नाशब्दमि'ति वेदपतिर्जगौ ॥ कथं समन्वयो ज्ञेयः स्वल्पशाखाविदां नृणाम् । 'वेदा[1] ह्यनन्ता' इति हि श्रुतिराहाप्यनन्तताम् ॥ अनन्तवेदनिर्णीतिर्महाप्रलयवारिधेः । उत्तारणोपमेत्यस्मान्न ज्ञेयोऽत्र समन्वयः ॥ इत्याशङ्कापनोदार्थं स आह करुणाकरः । अशक्योत्तारणत्वेऽपि ह्यागमापारवारिधेः ॥ निर्णीयते मयैवायं रोम[2]कूपलयोदिना । यद्यप्यशेषवेदार्थो दुर्गमोऽखिलमानवैः ॥ मज्ज्ञानाव्याकृताकाशे प्राप्नोति परमाणुताम् । [7]इति [8]प्रकाशयन्वि[9]श्वपतिराह[11] प्रमेयताम्[6] ॥ निखिल[3]स्यापि वेदस्य[4] गतिसामान्य[10]मञ्जसा[5] । को नाम गतिसा[12]मान्यमनन्तागमसम्पदः ॥ [13]ज्ञानसूर्यमृते ब्रूयात्तमेकं बादरायणम् । अन्योऽप्यल्पमतिः [14]शाखाचतुष्पञ्चगतं [15]वसु ॥ जानन्ननुमितत्वेन ब्रूयात्तस्य प्रसादतः । इति मुख्यतयाऽशेषगति[16]सामान्यवित्प्रभुः ॥ प्रतिजज्ञे दृढं यस्माद्देवा[17]नामपि[18] [19]पूर्यते । अतो निखिलवेदानां सिद्ध एव समन्वयः ॥ इति सुज्ञापितार्थोऽपि पृथक् चाह समन्वयम् । तत्र प्रथमतोऽन्यत्र[20] प्रसिद्धानां समन्वयः ॥ शब्दानां वाच्य एवात्र

---

[1] अनन्ता 'वै' वेदाः. [2] उदमुदकमस्यास्तीति उदी=समुद्रः रोमकूपेलयोदी यस्य सः तेन प्रलयसमुद्रसमानोऽपि वेदो मदीयज्ञानेऽन्तर्भवतीतिभावः. [3-11] अनुक्रम. [6] स्वेन ज्ञेयताम्. [12] सर्ववेदजन्यज्ञानस्य अविरुद्धत्वम्. [13] ज्ञानेन सूर्य इव. [14] चतुष्पञ्चशाखासु गतं कडारादित्वात् परनिपातः. [15] वसु = वित्तं तद्वेद्यवस्तुरूपम्. [16-17] उत्तमाधिकारिणाम्. [18] अपि=शङ्का. [19] निवार्यते. [20] ब्रह्मणः.

SGDF
Sri Gargeshwari Digital Foundation

महामल्लेशभङ्गवत् । इतोऽप्यभ्यधिकत्वेऽपि तुर्यपादोदितस्य तु ॥ महासमन्वये तस्मिन्नाधिकारोऽखिलस्य हि । ब्रह्मैवाधिकृतस्तत्र मुख्यतोऽन्ये यथाक्रमम् ॥ दुर्गमत्वाच्च नैवात्र प्राथम्येनोदितोऽञ्जसा । अतोऽन्यत्रप्रसिद्धानां शब्दानां निर्णयाय तु ॥ प्रवृत्तः प्रथमं देवस्तत्रानन्दादयो गुणाः । ईशस्यैवेति निर्णीताः श्रुतियुक्तिसमाश्रयात् ॥ देवतान्तरगास्सर्वे शब्द[1]वृत्तिनिमित्ततः । विष्णुमेव वदन्त्यद्धा तत्सञ्ज्ञादुपचारतः ॥ अन्यदेवान्वदन्तीह विशेष[2]गुणवत्कृतः । विष्णुमेव परं ब्रूयुरेवमन्येऽप्यशेषतः ॥ इत्यन्यत्रप्रसिद्धोरुशब्दराशेरशेषतः । ज्ञाते समन्वये विष्णौ [3]लिङ्गैर्ह्येष समन्वयः ॥ तेषामन्यगतत्वे तु न स्यात्सम्यक्समन्वयः । इत्येवाशेषलिङ्गा[4]नां ब्रह्मण्येव समन्वयम् ॥ आहोभयगतत्वं च स्यादतो लिङ्गशब्दयोः । इति संशयनुत्त्यर्थमुभयत्र प्रतीतितः ॥ शब्दानां वर्तमानानां सलिङ्गानां विशेषतः । समन्वयो हरावेव यन्नैवान्यत्र मुख्यतः ॥ शब्दा लिङ्गानि च यतो नैवान्यत्र स्वतन्त्रता । अस्वतन्त्रेषु शब्दस्य वृत्तिहेतुर्न मुख्यतः ॥ यतोऽतो यदधी[9]नास्ते[5] शब्दार्थत्वमुपागताः[10] । [6]अत्यल्पेनैव शब्दस्य[7] [8]वृत्तिहेतुगुणेन तु ॥ [13]अयो [14]यथा [15]दाहकत्वं [11]स एवेशः[12] स्वतन्त्रतः[16] । [17]मुख्यशब्दार्थ इति हि स्वीकर्तव्यो मनीषिभिः ॥ इत्याहैवं च शब्दानां नारायणसमन्वये । सिद्धेऽप्यशेषशब्दानां न कथञ्चन युज्यते ॥ विरोधादवरत्वादेरपि प्राप्तिर्यतो भवेत् । इति चेदवरत्वादि द्विविधं ह्युपलभ्यते ॥ परस्यावरताहेतुर्यः स्वयं पर एव सन् । सोऽपि ह्यवरशब्दार्थो यथा राजा जयी भवेत् ॥ अन्योऽवरत्वानुभवी तयोः

---

[1] प्रवृत्ति. [2] असाधारणगुणप्रतिपादकत्वात्. [3] असाधारणधर्मैः. [4] धर्मबोधकानां यौगिकशब्दानाम्. [5] भगवतोन्ये पदार्थाः. [5–17] अनुक्रम. [9] सन्तः. [11] भगवानेव. [12] निरवधिकशब्दप्रवृत्तिमान्. [13] अग्न्यधीनं सत्. [15] दाहकशब्दार्थत्वमुपागतं यथा तथा शब्दार्थत्वमुपागताः. [16] च. [17] मुख्यः शब्दार्थः.

SGDF
Sri Gurgeshwari Digital Foundation

248

पूर्वोऽस्ति केशवे । द्वितीयो जीव एवाऽस्ति स्वातन्त्र्यान्नैव दूषणम् ॥ हरेरेवमशेषेण सर्वशब्दसमन्वये । उक्ते विरोधहीनस्य स्यात्समन्वयता यतः ॥ अतोऽशेषविरोधानां कृतेशेन निराकृतिः । समन्वयाविरोधाभ्यां सञ्जाते वस्तुनिर्णये ॥ किं मया कार्यमित्येव स्याद्बुद्धिरधिकारिणः । तत्र भक्तिविधानार्थमभक्तान[1]र्थसन्ततौ ॥ उक्तायां भक्तिदार्ढ्याय प्रोक्तेऽशेषगुणोच्चये । वक्तव्योपासना नित्यं कर्तव्येत्यादरेण[2] हि ॥ सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परा चैव तदङ्गं धारणाधिकम् ॥ तथोभयात्मकं चैव पादेऽस्मिन्बादरायणः । आहोपासनमङ्गैव विस्तरात् श्रुतिपूर्वकम् ॥८॥

पृथग्दृष्टिरशक्यत्वमनिर्णीतिः समुच्चयः । विशेषदर्शनं कार्यलोपो नानोक्तिराशुता ॥ विभ्रमोपाकृतिर्लिङ्गमनवस्था विशेषिता । अप्रयोजनता चातिप्रसङ्गो दूरसंश्रयः ॥ विशिष्टकारणं चेष्टा दृष्टवैरूप्यमुन्नतिः । अनुक्तिरप्रयतत्वं दृढबन्धपराभवौ ॥ पुंसाम्यं प्राप्तसंत्यागः कारणानिर्णयो भ्रमः । विशेषदर्शितालापौ गुणसाम्यं पृथग्दृशिः ॥ अगम्यवर्त्मसन्धानमिष्टं फलमकल्पना । शुद्धवैरूप्यमङ्गत्वमविशेषदृशिः क्रिया ॥ युक्तयः पूर्वपक्षस्यासुज्ञेयत्वं विधिक्रिया । माहात्म्यमल्पशक्तित्वं यथायोग्यफलं भवः ॥ फलसाम्यं विशेषश्च गुणाधिक्यं प्रधानता । यथाशक्तिक्रियासन्धिः प्रमाणबलमानतिः ॥ कारणं कार्यवैशेष्यं स्वभावो वस्तुदूषणम् । प्रतिक्रिया विरोधश्च प्रतिसन्धिरनूनता ॥ संस्कारापाटवं स्वेच्छानियतिर्वस्तुवैभवम् । विशेषोक्तिरमानत्वं प्राधान्यं प्रीतिरागमः ॥ सुस्थिरत्वं कृतप्राप्तिरनादिगुणविस्तरः । साधनोत्तमता नानादृष्टिशिष्टिरनूनता ॥ अविघ्नत्वाविरोधौ च गुणवैशेष्यमागमः । सिद्धान्तनिर्णया ह्येता

[1] अभक्तानां पापिनां द्वेषिणां च नरकाद्यनर्थसमुदाये. [2] कर्तव्येति.

SGDF
Sri Gargeshwari Digital Foundation

युक्तयो व्याहताः सदा ॥ ॐ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॐ ॥१॥ यथाशक्त्यखिलान्वेदान्विज्ञायोपासनं[1] भवेत् । तत्राखिलस्य विज्ञप्तिः सम्यग्ब्रह्मण एव हि ॥ तदन्येषां यथायोगमखिलज्ञप्तिरिष्यते । तावतोपासने योग्यो भवेदेवाखिलः पुमान् ॥ महत्त्वस्य परं पारं विदित्वैव जनार्दनः । स्तोष्यतामेति तुष्टत्वमिति नास्त्येव नारद ॥ किं तु निश्चलया भक्त्या ह्यात्मज्ञानानुरूपतः । यः स्तोष्यति सदा भक्तस्तुष्टस्तस्य सदा हरिः ॥ इत्यादिवाक्यसन्दर्भाद्यथायोग्याऽखिलज्ञता । आत्मज्ञानानुरूपत्वं यथाशक्ति विचारणात् ॥१॥ ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॐ ॥ ३ ॥ वेदः कृत्स्नोऽधिगन्तव्यः स्वाध्या[2]याध्ययनं भवेत् । इत्यादिवाक्यवैयर्थ्यमन्यथा न निवार्यते ॥ अद्यापि तेन देवाद्याः श्रृण्वते मन्वते सदा । ध्यायन्ति च यथायोगं तथाप्यावस्तु निर्णयात् ॥ श्रवणं मननं चैव कर्तव्यं सर्वदैव हि । मतिश्रुतिध्यानकालविशेषं गुरुरुत्तमः ॥ वेत्ति तस्योक्तमार्गेण कुर्वतः स्याद्धि दर्शनम् । श्रवणं दृष्टतत्त्वस्य मननं ध्यानमेव च ॥ [3]विशेषानन्दसम्प्राप्त्या[4] अन्यस्यैतानि [5]दृष्टये । यदि तादृग्गुरुर्नास्ति निर्णीत[6]श्रवणादिकम् ॥ [7]सत्सिद्धान्तानुसारेण निर्णयज्ञात्समाचरेत् । श्रवणादि विना नैव क्षणं तिष्ठेदपि क्वचित् ॥ अत्यशक्ये तु निद्रादौ पुनरेव समाचरेत् । अभावे निर्णयज्ञस्य सच्छास्त्राण्येव सर्वदा ॥ श्रृणुयाद्यदि सज्ज्ञानप्राचुर्यमुपलभ्यते । महद्भ्यो विष्णुभक्तेभ्यो यथाशक्ति च संशयान् ॥ छिन्द्यात्स्वतोऽधिकाभावे स्वयमेव समभ्यसेत् । ब्रूयादपि च शिष्येभ्यः सत्सिद्धान्तमहापयन् ॥ अशेषगुणपूर्णत्वं सर्वदोष-

---

[1] कुर्वाणो. [2] स्वाध्यायोऽध्येतव्यः. [3] मोक्षे. [4-5] युज्यते. [6] ब्रह्मसूत्रादिकस्य. [7] सर्वज्ञानाम्.

SGDF
Sri Gangeshwara Digital Foundation

समुज्झितिः। विष्णोरन्यच्च तत्तन्त्रमिति सम्यग्विनिर्णयः॥ स्वतन्त्रत्वं सदा तस्य तस्य भेदश्च सर्वतः। अदोषत्वस्य सिध्यर्थे[1] यद्[2]भेदे [3]तदन्वयः॥ तत्तन्त्रत्वं च मुक्तानामपि तद्गुणपूर्तये[4]। मुक्तानामपि भेदश्च न हि भिन्न[5]मभिन्नताम्॥ गच्छदृष्टं कचि[6]त्तस्याप्यभावोऽनुभवोपगः[7]। [8]पूर्वाभेदे दोषवत्त्वमीशस्येत्यतिभिन्नता॥ नारायणेन मुक्तानामपि सम्य[9]गिति स्थितिः[10]। [11]भेदाभेदेऽप्यभेदेन दोषाणामपि सम्भवः॥ निर्दोषत्वं रमायाश्च [12]तदनन्तरता तथा। ब्रह्मा सरस्वती वीन्द्रशेषरुद्राश्च तत्स्त्रियः॥ शक्रकामौ तदन्ये च क्रमा[12]न्मुक्तावपीति च। सत्सिद्धान्त इति ज्ञेयो निर्णीतो हरिणा स्वयम्॥ एतद्विरोधि यत्सर्वं [14]तमसेऽन्धाय[15] [13]केवलम्। अन्धन्तमो विशन्तीति प्राह श्रुतिरतिस्फुटम्॥ इत्येव श्रुतयोऽशेषाः पञ्चरात्रमथाखिलम्। मूलरामायणं[16] चैव[17] भारतं स्मृतयोऽखिलाः॥ वैष्णवानि पुराणानि साङ्ख्ययोगौ परावपि। ब्रह्मतर्कश्च मीमांसेत्यनन्तः शब्दसागरः॥ अनन्ता युक्तयश्चैव प्रत्यक्षागममूलकाः। प्रत्यक्षमैश्वरं चैव रमादीनामशेषतः॥ मुक्तानामप्यमुक्तानामेतमेवार्थमुत्तमम्। अन्यावकाशरहितं प्रकाशयति सादरम्॥ एतदेव च सच्छास्त्रं दुःशास्त्रं तु ततः परम्। सच्छास्त्रमभ्यसेन्नित्यं दुःशास्त्रं तु परित्यजेत्॥ असंशयेन तत्त्वस्य निर्णये ब्रह्मदर्शनम्। सम्यग्विषम[18]विज्ञान[19]तारतम्यानुसारतः॥ फलं भवेत्तारतम्यात्सुखदुःखात्मकं

---

[1] अङ्गीकार्यः. [2] यस्मात् जगताऽभेदे. [3] दोषसम्बन्धः तस्मात्. [4] अङ्गीकार्यम्. [5] पूर्वम्. [6] नहिभिन्नमभिन्नतां गच्छतीत्यस्यार्थस्य. [7] विषयः. [8] संसारदशायाम्. [9-10] सत्सिद्धान्तः. [11] भेदसहिताभेदे. [12] प्रोक्तक्रमात्तिष्ठन्ति. [13-14-15] अनुक्रम. [15] भवति. [16-17] अवान्तररामायणानामध्यात्मवाल्मीकिरामायणानां मुख्यत्वनिरासः (श्री. ती. टि.) [18] विपरीत. [19] ज्ञान.

SGDF
Sri Gangeshwari Digital Foundation

नृणाम् । सम्यक् चाधिकविज्ञानात्सुखाधिक्यं भवेन्नृणाम् ॥ अतो यथा[1]त्मशक्त्यैव श्रवणं मननं तथा ॥ ३ ॥ १ ॥

॥ ॐ [2]उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॐ ॥६॥ कृत्वाऽथ कुर्वन्नपि वा निदिध्यासनमाचरेत् ॥ ६ ॥ २ ॥

॥ ॐ [3]अनुबन्धादिभ्यः ॐ ॥ ५१ ॥ विषयेषु च संसर्गाच्छाश्वतस्य[4] च संशयात् । मनसा चान्य[5]दाकाङ्क्षा[6]त्परं न प्रति[7]पद्यते ॥ इति भारतवाक्यं हि तेनैतद्दोषवर्जितः । सदोपासनया युक्तो वासुदेवं प्रपश्यति ॥ दोषा अनादिसम्बद्धास्ते मुक्तिपरिपन्थिनः । सन्त्येव प्रायशः पुंस्सु तेन मोक्षो न जायते ॥ सर्वे त एते जीवेषु दृश्यन्ते तारतम्यतः । ऋजूनामेक एवाऽस्ति [8]परमोत्साहवर्जनम् ॥ [9]स गुणा[10]ल्पत्वमात्रत्वान्न[11]र्जुत्वेन विरुध्यते । अतो विष्णौ परा भक्तिस्तद्भक्तेषु रमादिषु ॥ तारतम्येन कर्तव्या पुरुषार्थमभीप्सता । [12]स्वादरः सर्वजन्तूनां संसिद्धो हि स्वभावतः ॥ ततोऽधिकः स्वोत्तमेषु तदाधिक्यानुसारतः । कर्तव्यो वासुदेवान्तं सर्वथा शुभमिच्छता ॥ न कदाचित्त्यजेत्तं च क्रमेणैनं विवर्धयेत् । समेषु स्वात्मवत्स्नेहः सत्स्वन्यत्र ततो दया ॥ कार्यैवमापरोक्ष्येण दृश्यते क्षिप्रमीश्वरः । [13]तत्तमोऽन्धं व्रजेद्विष्णुसमत्वं योऽनुपश्यति ॥ रमाब्रह्मशिवादीनामपि मुक्तौ कथञ्चन । किमुताधिक्यदृष्टेस्तद्गुणाभावमतेरपि ॥ दोषवेत्तुरभेदस्य द्रष्टुर्द्रष्टुस्तथोभयोः । इत्याह सत्श्रुतिस्तेन सम्प्रोक्तगुणसंयुतः ॥ उपासीत हरिं दृष्ट्वा मुक्तिस्तेनैव

---

[1] यथात्मशक्ति+आ=सम्यक् श्रवणं कृत्वा. [2] सर्वगुणानामेकबुद्ध्यारोहः तत्साध्यं ध्यानं च कार्यम्. [3] हरिगुरुभक्तिशमदमादिभ्यश्च ब्रह्मसाक्षात्कारः. [4] ब्रह्मणः. [5] मोक्षादन्यद्विषयजातं प्रति. [6] आकाङ्क्षादितिघञन्तः. [7] पश्यति. [8] मोक्षार्थे. [9] सः=दोषः. [10] उत्साहरूपगुणैर्न्यूनता मात्रत्वात्. [11] निर्दोषत्वेन. [12] स्वस्मिन्. [13] प्रसिद्धम्.

SGDF
Sri Gargeshwari Digital Foundation

जायते । द्वेषाद्यन्मुक्तिकथनं श्रुतिवाक्यविरोधि तत् ॥ [1]रिपवो ये तु रामस्य विमुखत्वान्नि[2]रामिणः । [3]अभिद्रोहपदे नित्यमन्धे तमसि ते स्थिताः ॥ 'हरिद्विषस्तमो यान्ति ये चैव [4]तदभेदिनः । तन्निर्गुणत्ववेत्तारस्तस्य दोषविदोऽपि च' ॥ इत्यादिश्रुतिसन्दर्भाद्वेषिणस्तम ईर्यते । 'हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ॥ विविक्षु[5]रत्यगात्सूनोः प्रह्लादस्यानुभावतः' । 'यदनिन्दत्पिता [6]मह्यं त्वद्भक्ते मयि चाघवान् ॥ तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात्' । निन्दां भगवतः शृण्वन्स्तत्परस्य जनस्य वा ॥ ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः । '[7]अवजानन्ति मां मूढा [8]मानुषीं तनुमाश्रितम् ॥ परं भावमजानन्तो मम भूतमहेश्वरम् । मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ॥ राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः । मामात्मपरदेहेषु[9] प्रद्विषन्तोऽभ्यसूयकाः ॥ तानहं द्विषतः क्रूरान्संसारेषु[10] नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव[11] कौन्तेय ततो यान्त्यधमां गतिम्' ॥ 'यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं प्रभुम् । कथं स न भवेद्द्वेष्य [12]आलोकान्तस्य कस्यचित् ॥ यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं प्रभुम् । मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः' ॥ इत्यादिवाक्यसन्दोहाद्द्वेषिणस्तम एव तु ॥५१॥३१॥

---

[1] मानःस्तेनेभ्यो ये अभिद्रुहस्पदे निरामिणो रिपवोदन्नेषु जागृधुः इति श्रुतिमर्थतः पठति. [2] रामः, रमणं अस्यास्तीति. रामी, रामः विष्णुः तस्मान्निष्क्रान्ताः विमुखाः. [3] अभितः द्रोहस्यस्थानम्. [4] तस्य हरेर्जीवाद्यभेदवादिनः. [5] प्रवेशन सम्भावनाविषयः. [6] मन्निमित्तं त्वाम्. [7] ये. [8] मनुष्यसदृशीम्. [9] प्रेरकत्वेन स्थितम्. [10] सम्सरन्त्यत्रेति संसारा देहाः तस्य विवरणं आसुरीष्वेवेत्यादि. [11] अप्राप्यैवेत्युक्त्या अन्धन्तम उक्तम्. [12] जनस्यान्तः चण्डालादिस्तत्पर्यन्तस्य.

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐ विद्यैव[1] तु निर्धारणात् ॐ ॥ ४८ ॥

नैव मोक्ष इति प्राहुर्लोकायतमते स्थिताः । भोगः शरीरपर्यन्तं भस्मीभावस्ततो भवेत् ॥ इति तत्केन मानेन दृष्टं प्रत्यक्षवादिना । न हि प्रत्यक्षमानेन मोक्षाभावोऽवसीयते ॥ घटते मुक्तिदृष्टिस्तु पुरुषेण महीयसा । नेति वक्तुर्महत्त्वं तु कथञ्चन न विद्यते ॥ साधयन्सर्वसामा[2]न्यं कथमेव विशेषवान् । दृश्यन्ते पुरुषा[3] लोके परापरविदोऽपि च ॥ अपरोक्षदृशो योगनिष्ठाश्चामलचक्षुषः । प्रत्यक्षं देवतां दृष्ट्वा तत्प्रसादाप्तभूतयः ॥ ज्ञानविज्ञानपारज्ञा निषिध्यन्ते कथं नृभिः । दृश्यते चातिमाहा[4]त्म्यं तेषामतिमहौजसाम् ॥ यदि तेऽपि निषिध्यन्ते किं नोक्तिस्ते निषिध्यते । यदुक्तवाक्यप्रामाण्यं प्रत्यक्षेणोपलभ्यते ॥ वरादयोऽपि तद्दत्ताः सदा सत्या भवन्ति हि । अप्रामाण्यं तदुक्तेश्च [5]वृथा वाचाऽवसीयते ॥ न हि प्रयोजनं किञ्चित्परलोकनिवारणात्। [6]वृथावाचं वृथा हन्याद्यदि तस्य किमुत्तरम्॥ स्वजीवनविरोधाय वदन्किं नाम बुद्धिमान् । प्रामाण्ये संशयः किं स्यात्तयोः पुरुषयोरपि ॥ स्वजीवनविरुद्धोक्ति[7]रज्ञो दृष्टस्य चापि यः । यश्चा[8]तीन्द्रियदेवोक्तिश्रोता दृष्टपरावरः ॥ अतीतानागतं सर्वं लोकानु[9]भवमापयन् । अतः प्रत्यक्षगम्यत्वाद्वेदमात्वस्य च स्फुटम् ॥ यद्यागमस्य नो मात्वमक्षजस्य तथा भवेत् । यद्यक्षजस्य मात्वं स्यादागमस्य कथं न तत् ॥ लोक[10]वाक्याद्विशेष[11]श्चाव्यभि[12]चारेण सिध्यति । अस्ति मोक्षोऽपि धर्मेण यथार्थज्ञानतोऽपि च ॥ प्रामाण्यमनुमायाश्च जिनस्याप्तत्वसाधने[13] । तद्वाक्याद्धर्मसज्ज्ञान-

---

[1] ज्ञानमेव मोक्षसाधनं न कर्मादिकम्. [2] सर्वपुरुषाणां समानत्वम्. [3] वसिष्ठादयः. [4] विन्ध्यस्थगनसमुद्रपानादि. [5] व्यर्थत्व. [6] वृथा वाग् यस्य सः तम्. [7] उक्तिमान्. [8] यश्च तयोः प्रामाण्ये. [9] विश्वासं प्रापयन्. [10] उन्मत्त. [11] वैलक्षण्यम्. [12] बाधाभावेन. [13] सति.

SGDF
Sri Gargeshwari Digital Foundation

विज्ञप्तिर्भवतीति च ॥ धर्मोऽहिंसा[1]परो [2]नान्यो ज्ञानं पुद्गल[3]दर्शनम् । इति जैनाः कथं [4]तत्स्यात्प्रमाणमनुमानतः ॥ विषयान्प्रति स्थितं ह्यक्षं प्रत्यक्षमिति गीयते । प्रत्यक्षशब्दानुसारादनुमेति प्रकीर्तिता ॥ आसमन्ताद्गमयति[5] धर्माधर्मौ परं पदम् । यच्चाप्यतीन्द्रियं त्वन्यत्तेनासावागमः स्मृतः ॥ एतेन कारणेनैव तत्तन्मानत्वमिष्यते । स्वरूपं हि तदेतेषामन्यथाऽसिद्धि[6]मानतः ॥ अतोऽनुमा कथं धर्मं पुद्गलं चापि दर्शयेत् । स्वरूपे [7]पुद्गलस्योक्ता दोषा [8]आनन्दमेव च ॥ न मन्यते पुद्गलं स दुःखाभावः सुखं त्विति । [9]मात्रभोगातिरेकेण सुखाधिक्यस्य दर्शनात् ॥ सुखस्याभावता केन न च स्यात्किं विपर्ययः[10] । यदि[11] [13]भावोऽपि [12]कश्चित्स्या[14]त्तस्यैवाभावता कुतः ॥ यदि[15] सर्वेऽप्यभावाः[16] स्युरन्योऽ[17]न्यमिति [18]भावता । [19]अभावा भावतैव स्यात्किन्नश्छिन्नं तदा भवेत् ॥ भावत्वं विधिरूपत्वं निषेधत्वमभावता । निषेधस्य निषेधोऽपि भाव एव बलाद्भवेत् ॥ प्रथमप्रतिपत्तिस्तु भावाभावनियामिका । न च पुद्गलविज्ञानं मोक्षदं भवति क्वचित् ॥ अस्वातन्त्र्यात्पुद्गलस्य ज्ञातोऽपि सुखदो न हि । न हि दुःखिपरिज्ञानाद्दुःखित्वं विनिवर्तते ॥ यदि पुद्गलविज्ञानाददुःखी स्यात्कथञ्चन[20] । [24]देहवानपि [25]नादुःखी किं [21]ज्ञानादुत्तरं[22] सदा[23] ॥

[1] अहिंसा परा, प्रधानभूता यस्य सः. [2] हिंसासहितः. [3] जीवस्य देहस्य वा तद्विविक्तत्वेन. [4] जिनवाक्यम्. [5] प्रादिसमासोऽयं नाव्ययीभावः प्रत्यक्षस्येति प्रयोगात्. गम्यतेनेन इत्येव विग्रहः करणार्थे एव प्रत्ययोक्तेः । इदं त्वर्थप्रदर्शनमात्रं इति 'स्वतएवागमस्यही'त्यत्र परिमळे. [6] रूपप्रकारान्तरेण निरूपयितुमशक्यत्वादित्यर्थः. [7] जीवस्य. [8] आनन्दरूपम्. [9] मीयन्तइतिशब्दादिविषयाणाम्. [10] सुखाभावः दुःखं इति. [11–12–13–14] अनुक्रम. [12] पदार्थः. [13] भावरूप. [14] सुखस्य. [15] पदार्थाः. [16-17] अन्योभावः. [18] यतः. [19] भावतैव स्यात्. [20] दुःखात्म ज्ञानयोर्विरुद्धत्वेन. [21–25] अन्वयक्रम. [22] उत्तरकालम्. [25] स्यात्.

SGDF
Sri Gargeshwari Digital Foundation

ईशक्लृप्त्य[1]नुसारेण स्यात्काला[2]दीशवादिनः । कर्महेतु[3]त्वमपि तु निश्चैतन्यान्नहि क्वचित् ॥ अशेषदुःख[4]विलये [7]नेदानीं[5] [8]कारणं [6]यथा । तथोत्तरं[9] न चैव स्याद्दृष्टि[10]पूर्वानुमा यतः ॥ शक्तस्यान्यस्य विज्ञानं तत्प्रीतिजनकं यदि । तयैव बन्धहानिः स्यादिति[11] किं नाम दूषणम् ॥ स्वज्ञानाद्बन्धहानिस्तु दृश्यते कस्य कुत्रचित् । अहिंसायाश्च धर्मत्वं केन मानेन गम्यते ॥ हिंसाया एव धर्मत्वमित्युक्ते स्यात्किमुत्तरम् । धर्मस्य [12]सुखहेतुत्वमपि केनावगम्यते ॥ हत्याया मोक्षहेतुत्वं कुतो मानान्निवार्यते । न च [13]शून्यपरिज्ञानाच्छून्य[14]भावनयाऽपि च ॥ मोक्षः कथञ्चन भवेद्यदीदानीं कथं न सः । परप्रसादनेच्छोस्तु विलम्बो नाम युज्यते ॥ पुमिच्छाधीनता नो चेद्विलम्बः किं कुतो भवेत् । [15]अन्यत्रापि विलम्बास्तु स्युरीशेच्छानिमित्ततः ॥ [16]अन्यथा कारणं चेत्स्यात्किं कार्यं नोपजायते । कारणे सति कार्यस्य [17]भावः सुनियतोऽस्य[18] हि ॥ विज्ञानवादिनश्चैव विज्ञानाद्वैत[19]वेदनात् । विज्ञानभावनाच्चैव मोक्षो न घटते क्वचित् ॥ [20]अन्तर्ज्ञानस्य बाह्ये[21] च क्षणिकत्वस्य वेदनात् । भावनाच्चोक्तमार्गेण मानाभावान्न मुच्यते ॥ [22]प्रकृतेः [23]पुरुषस्यापि विवेको[24] मुक्तिसाधनम् । इति साङ्ख्या न चैतस्मिन्मानमीशा[25] प्रसादतः ॥ श्रुतयः स्मृतयश्चैव यदेशस्य प्रसादतः । वदन्ति नियमान्मुक्तिं तमृतेऽतः कुतो भवेत् ॥ कणादयोगाक्षपादा

---

[1] सङ्कल्प. [2] कञ्चित्कालमतिवाह्य मुक्तिः स्यात्. [3] मोक्षं प्रतिकर्मणो-हेतुत्वम्. [5-8] अन्वयक्रम. [4] प्रलये. [7-8] न मोक्षस्य कारणं कर्म. [7] इदानींतनं कर्म. [10] प्रमाणगृहीतव्याप्त्यादिमति. [11] इति यद्यनु-मीयते तदा. [12] मोक्षम्. [13] शून्यतत्त्वस्य. [14] ध्यानेन. [15] मोक्षात्. [16] ईश्वरेच्छाया अकल्पने. [17] उत्पादः. [18] बौद्धस्य मते. [19] द्वितैव द्वैतं, न द्वैतं अद्वैतं. विज्ञानस्याद्वैतं=एकत्वम्. [20] शरीरान्तः स्थितस्य. [21] स्थितस्य घटादेः. [22] अन्तःकरणादिरूपायाः. [23] जीवस्य. [24] भेद-दर्शनम्. [25] ईशप्रसादं विना मोक्षसाधनमित्यर्थे.

SGDF
Sri Gangeshwari Digital Foundation

अपीशस्य प्रसादतः । मुक्तिं ब्रुवाणा अप्याहुर्भोगादेव च कर्मणाम् ॥ क्षयं प्राहुः कुतश्चैतत्प्रसन्ने जगदीश्वरे[1] । भिद्यते [2]हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे [3]परावरे[4] । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे[5] । इति श्रुतिपुराणादिवचनेभ्योऽन्यथा[6] गतेः ॥ न च पाशुपताद्युक्त[7]शिवादीना[8]मनुग्रहात्[9] । 'नान्यः पन्था' इति ह्युक्तं पुरुषज्ञानतः [10]श्रुतौ ॥ 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि[11] । एवं पुरुषशब्दश्च प्रयुक्तोऽधिशये हरौ ॥ 'न तस्येशे[12] कश्चन तस्य[14] नाम[16] [13]महद्यशः[15]' । इति चाधिपतिस्तस्य प्रतिषिद्धः स्वयं श्रुतौ ॥ 'विश्वतः [17]परमां नित्यं विश्वं[18] नारायणं हरिम्[19]' । इति सर्वाधिकत्वोक्त्या समोऽपि विनिवारितः ॥ समाधिकस्य[20] राहित्यान्नोपचारपुमानसौ । '[22]पुरुष एवेदं सर्वं यद्भूतं यच्च [21]भव्यम् ॥ [23]उतामृत[27]त्वस्ये[28]शानो [24]यदन्ने[25]नातिरोहति[26]' । मुक्तामुक्तपरेशत्वमिति तस्याह सा श्रुतिः ॥ अमृतेशानवचनात्सर्वस्येशानतोदिता । यदि सर्वत्वमुदितमुतेश इति [29]तद्वृथा ॥ उतशब्दो वदेदेष हीशत्वस्य समुच्चयम् । पुरुषेणैवेदं व्याप्तमिति ब्राह्मणं चाह तं प्रति ॥ एतावानस्य महिमेति महिम्नो वचो हि तत् । सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्[30] ॥ इत्यमुक्ताधिपत्यं तु पूर्वार्धोक्तमनूद्य च ।

---

[1] कर्मणां क्षयोक्तेः. [2] अविद्या. [3] परा अप्यवरा यस्मात् सः तस्मिन्. [4] कठोपनिषत्. [5] भागवते. [6] अन्यथैवोपपत्तेः. [7] उक्तात्. [8] 'षष्ठ्या आक्रोशे' इत्युलुक्. [9] मोक्षः. [10] अमृतत्वम्. [11] नारायणोपनिषदि. [12] ईशे=ईष्टे=नियामकः. [13–14–15–16] अन्वयक्रम. [13] महत् इति. [15] यश इतिच. [16] ना. उ. [17] परमश्चासौ अश्च परमाः तं अः=अकार वाच्यः. [18] पूर्ण. [19] ना.उ. [20] द्वन्द्वैकवद्भावः. [21] भविष्यत् तत्सर्वम्. [22] पुरुषाधीनमेव. [24] यस्मात्. [25] अन्नं, अदनीयममुक्तवर्गम्. [26] अतिक्रामति अतः काम्यार्थाम्श्च. [27] मुक्तवर्गस्य. [29] उतपदम्. [30] भागवते.

SGDF
Sri Gargeshwari Digital Foundation

उतामृतस्येश इति विधत्ते मुक्तिगेशताम् ॥ अतो विष्णुपरिज्ञानादेव मुक्तिर्न चान्यतः । तद्यथेति श्रुतेश्चैव [1]ततः कर्मक्षयो भवेत् ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ [2]सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ इत्यादिभगवद्वाक्यैरुक्तार्थश्चावसीयते । नित्यनैमित्तिकं[3] कर्म कुर्वन्नन्य[4]त्परित्यजन् ॥ मुच्यते संसृतेश्चैतदप्येतेन निराकृतम् । विद्यैवेतीममेवार्थं स्वयमेवाह वेदराट् ॥ विना [5]कर्म न मोक्षः[6] स्याज्ज्ञानेनेत्यपि सा श्रुतिः । नान्यः पन्था इति ह्येव निवारयति सादरम् ॥ अन्यथोपासनमपि [7]तमेव[8]मिति वादिनी । निवारयत्यादरेण न प्रतीक इति प्रभुः ॥ 'अन्धन्तमः प्रविशन्ति ये त्वविद्यामुपासते'। इति श्रुतिविरोधाच्च नान्यथोपासनं भवेत् ॥ न चाप्येकत्वविज्ञानादुक्तन्यायेन मुच्यते । इति सर्वं प्रविज्ञाय सर्वैस्तर्कैः सदागमैः ॥ उपासीत हरिं नित्यं गुणैरेव स्वयोग्यतः । ब्रह्मा [9]सर्वगुणैश्चैव क्रियासामान्यतश्च[10] गीः[11] ॥ गुणसामान्यतो रुद्रो द्रव्य[12]सामान्यतः परे ॥ ४८ ॥ २९ ॥

॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ॥ ३३ ॥ अधिकार[13]विशेषेण भक्तिज्ञानसुखादिभिः । विशेषो देवतादीनां मोक्षे [14]चैव विशेषतः[15] ॥ ३३ ॥ **ॐ अक्षरधियां त्वविरोधः [16]सामान्य[17]तद्भावाभ्यामौपसदवत्तदुक्तम् ॐ ॥ ३४ ॥** न तावता विरोधोऽस्ति निर्दोषत्वात्समस्तशः ।

---

[1] विष्णुज्ञानात्. [2] अवैष्णवान् 'मन्मना भवे'त्यादिविधानात्. [3] पितृश्राद्धादि. [4] काम्यं निषिद्धं च. [5] ज्ञानेन. [6] आनन्दवृद्धिः संसारनिवृत्तिश्च. [7] तं=सहस्रशीर्षत्वादिधर्मोपेतम्. [8] एवं=यथास्थितेनैवप्रकारेण न त्वन्यथा. [9] वेदोक्तैः. [10] सङ्कोचेन. [11] सरस्वती. [12] रूप. [13] योग्यता. [14] च=तु. [15] एव. [16] निर्दोषत्वेनसमानत्वात् सर्वेषाम्. [17] उत्तमेभ्योऽधमानामुपकार सत्त्वात्.

SGDF
Sri Gargeshwari Digital Foundation

आभा[3]सत्वा[2]त्परेषां [1]तदवराणां च सर्वशः ॥ यतोऽवराणां सर्वेऽपि गुणाः सर्वाः क्रिया अपि । नियमेनैव पूर्वेषां सुप्रसादनिबन्धनाः ॥ अतः सच्छिष्यवत्तेषां नैवेष्यादिः कथञ्चन । न च संसारिदेवानां कालेयत्तापरे इमे ॥ सूत्रे ह्यारब्धमात्रस्य भोगेनैव क्षयो ध्रुवः । अनारब्धस्य[4] भोगेन त्वितरे [5]इति चोदितः ॥ पौनरुक्त्येन तेनैते उक्तार्थे इति निश्चयः ॥ ३४ ॥ २० ॥

॥ ॐ इयदामननात् ॐ ॥ ३५ ॥ [6]उषास्स्वाहा च [7]पर्जन्यो [8]मित्रोऽग्निर्वरुणो विधुः । प्रवहोऽनिरुद्ध इन्द्रोमे रुद्रो वाणी च मारुतः ॥ उत्तरोत्तरतस्त्वेते गुणैः सर्वैश्च मुक्तिगाः । सूर्यधर्मौ यथा सोमो मनुर्दक्षो बृहस्पतिः ॥ शची रतिश्चानिरुद्धसमास्तारा च मित्रवत् । सोमवच्छतरूपा तु [9]प्रसूतिर्वन्हिवद्विराट्[10] ॥ पर्जन्यवद्वारुणी[11] च तथा संज्ञा[12] च रोहिणी[13] । [14]धार्मीच मित्रवत्त्वेव प्रावही परिकीर्तिता ॥ मित्रपर्जन्यमध्यस्थावश्विनौ विघ्नवित्तपौ । भृगुरग्निसमो मित्र[15]स्तन्मध्ये ब्रह्मपुत्रकाः ॥ वरुणाग्न्यन्तरा तत्र नारदः प्राय इन्द्रवत् । कामः सुपर्णी चोमावद्वीन्द्रो रुद्रवदीरितः ॥ निर्ऋतिर्मित्रसदृशो विश्वामित्रः[16] कस्व[19]नुवत् । वैवस्वतो[17] मनु[18]श्चाश्विपश्चादन्ये ततोऽवराः ॥ [20]च्यवनोचथ्य[21]वैन्याश्च शशबिन्दुश्च हैहयः । तद्वच्च विप्रराजन्यविशेषोऽत्रापि कश्चन ॥ तद्वत्प्रियव्रतश्चापि तदन्याः [22]शतदेवताः । पर्जन्यमित्रान्तराले तदन्ये तु ततोऽवराः ॥ एतेभ्योऽभ्यधिका श्रीस्तु सदा मुक्ता विशेषतः । तत्समो नास्ति परमो

1-2-3 अन्वयक्रम. 2 उत्तमानाम्. 4 कार्ये एव तु पूर्वे. 5 क्षपयित्वाऽथ-सम्पत्स्यते. 6 छान्दोग्योक्तानां नामवागादीनाम्. 7-8 आदित्यौ एषां समान् मध्येस्थितांश्चाह. 9 दक्षभार्या. 10 अनिरुद्धभार्या. 11 वरुणस्येयम्. 12 सूर्यभार्या. 13 चन्द्रभार्या. 14 धर्मस्येयम्. 15 अग्नि. 16-19 अन्वयक्रम. 20-21 विप्रौ अन्ये राजन्याः. 22 सोमार्हाः.

SGDF
Sri Gargeshwari Digital Foundation

हरिरेव न चापरः ॥ संहितायां[1] बृहत्यां[2] तु स्वयं भगवतोदितम् । तदेतदखिलं प्राण आहङ्कारिक एव च ॥ इन्द्रादनन्तरो ॥३५॥ २१ ॥

॥ ॐ प्रज्ञान्तरपृथक्त्ववद्दृष्टिश्च तदुक्तम् ॐ ॥५२॥

[3]दृष्टिरपि योग्यानुसारतः ॥ ५२ ॥ २२ ॥

॥ ॐ [4]प्रदानवदेव हि तदुक्तम् ॐ ॥ ४४ ॥

॥ ॐ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॐ ॥ ४५ ॥

सम्यग्गुरुप्रसादश्च मुख्यतो दृष्टिकारणम् । श्रवणादि च कर्तव्यं नान्यथा दर्शनं क्वचित् ॥ ४४, ४५ ॥ २६, २७ ॥

॥ ॐ [5]पूर्वविकल्पः [6]प्रकरणात्स्यात्क्रियामानसवत् ॐ ॥ ४६ ॥ गुणाधिकं गुरुं प्राप्य तद्धीनं नाप्नुयात्क्वचित् । विपर्ययस्तु कर्तव्यः सर्वथा शुभमिच्छता ॥ समे विकल्प एव स्यात्पूर्वानुज्ञा च सर्वथा । तदुत्तमगुरुप्राप्त्यै पूर्वानुज्ञा न मृग्यते ॥ गुरुर्ब्रह्माऽखिलानां च विद्या[7] चैव सरस्वती । देवता[8] भगवान्विष्णुः सर्वेषामविशेषतः ॥ तत्प्रसादेन मुक्तिः स्यान्नान्यथा तु कथञ्चन । स्वोत्तमास्तु[9] क्रमेणैव सर्वेषां गुरवः स्मृताः ॥ उपदेशो ब्रह्मणस्तु सर्वेषामेव मुक्तये ॥ ४६ ॥ २८ ॥

॥ ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॐ ॥ ५४ ॥ साधनेभ्योऽधिका भक्तिर्नैवान्यत्तादृशं क्वचित् । भक्तिश्चैव हरावेव मुख्याऽन्यत्र यथाक्रमम् ॥ स्वाधिकत्वेन

1–2 बृहत्संहितायाम्. 3 अपरोक्षज्ञानम्. 4 प्रसादपूर्वकंगुरोर्विद्यादानं तद्युक्तं श्रवणादि. 5 पूर्वप्राप्तेन गुरुणासमस्य पश्चात्तनस्य विकल्पः. 6 प्रकृष्टानुग्रहमपेक्ष्य गुरोः स्वीकार्यत्वात्. 7 विद्याभिमानिनी. 8 विद्याप्रतिपाद्या. 9 विद्यासम्प्रदायप्रवर्तकाश्चेत् तत्त्वेन न चेदनुग्राहकत्वादिना गुरवः

SGDF
Sri Gargeshwari Digital Foundation

सर्वत्र स्वोत्तमेषु क्रमेण च । अनुवर्तते च सा भक्तिर्मुक्तावानन्दरूपिणी ॥ तत्पूर्विकोपासनैवं कर्तव्या मुक्तये गुणैः ॥ ५४ ॥ ३४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥ २११ ॥ ४३७ ॥

॥ ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ ॥ १ ॥ एवमुत्पन्ननिर्दोषभगवद्दर्शनात्सदा । अपेक्षितफलप्राप्तिरारब्धस्यानतिक्रमात्[1] ॥ देवर्षिमानुषादीनां तत्तज्ञा[2]त्यनुसारतः । जैमिन्युक्तं[3] मानुषाणां [4]तद्विशेषाश्च केचन ॥ सामान्यं भगवत्प्रोक्तं देवादीनां[5] विशेषतः[6] । बलवद्विरोधिसद्भावे[7] जैमिन्याद्युक्तिरिष्यते ॥ १ ॥

॥ ॐ स्तुतयेऽनुमतिर्वा ॐ ॥ १४ ॥ [8]विकर्मलेपो नैवाऽस्ति सम्यग्दृष्टिमतां क्वचित् । गुणहानिश्च नैवास्ति ब्रह्मणस्त्वविकर्मतः[9] ॥ देवानामपि न प्रायः क्लृप्तस्य तु कथञ्चन । [10]प्राप्तह्रासो भवेत्क्वापि महता तु विकर्मणा ॥ तथापि तत्क्लृप्तमेव तस्मान्न [11]नियमोज्झितिः । चन्द्रसुग्रीवयोश्चैव स्वोच्चदारपरिग्रहात् ॥ प्राप्तहानिरभून्नैव क्लृप्तहानिः कथञ्चन । ह्रासोऽपि मानुषादीनामानन्दस्य विकर्मणा ॥ भवेन्मुक्तौ विशेषेण स्वोच्चानामपराधतः ॥ १४ ॥

॥ ॐ कामकारेण चैके ॐ ॥ १५ ॥ ज्ञानोत्तरस्य पापस्य चतुर्थेऽलेप उच्यते । अशुचित्वादिकं[12] चास्य न भवेदिति तत्फलम्[13] ॥

---

[1] अतिक्रममकृत्वा. [2] योग्यता. [3] ज्ञानाङ्गस्य कर्मण एव स्वर्गादिसाधनत्वम्. [4] स्वतन्त्रज्ञानस्य तन्नास्तीत्यंशे समानाः जैमिनिमतैकदेशाः । [5] देवादिविषयं व्यवतिष्ठते. [6] अपवादैरपोदितं सत्. [7] प्रतिबन्धक, अप्रतिबद्धज्ञानविषयकं व्यासमतम्. [8] निषिद्धकर्म. [9] निषिद्धकर्मणएव राहित्यात्. [10] प्रसक्तस्य. [11] शास्त्रस्य. [12] असम्भाष्यत्वादिकम्. [13] ज्ञानोत्तरपापस्य.

SGDF
Sri Gangeshwari Digital Foundation

अत्र ज्ञानफलस्यैव मुक्तेर्नियततोच्यते ॥ १५ ॥ ॐ उपमर्दं च ॐ ॥ १६ ॥ प्रारब्धकर्मजस्यैव विषभक्षान्मृतेरिव । [1]प्राप्तस्याप्य-[2]निवर्त्यस्य किञ्चिद्भुक्तस्य संविदा ॥ उपमर्द इह प्रोक्तो देवादीनां यथाक्रमम् । सर्वात्मना त्वभोगो हि प्रारब्धस्यैव कर्मणः ॥ न ब्रह्मदर्शिनोऽपि स्यात्फलह्रासस्तु विद्यते । सर्वात्मना[3] फलह्रासो यदि नारब्धकर्मणः ॥ स्यात्काम्य[4]विधिवैयर्थ्यमि[5]त्युक्तनियमो भवेत् । एवमाद्यपि सम्प्रोक्तं तन्त्रभागवते स्फुटम् ॥[6] तारतम्यं फले नो चेद्ब्रह्मादीनां कथं श्रुतिः । अवृजिनोऽकामहत इति मुक्तिं निगद्य च ॥ आनन्दतारतम्यं च तेषां ब्रूयात्पृथक् पृथक् । संसार एव चेदेत-त्तारतम्यं न मुख्यतः ॥ अकामहतशब्दार्थोऽवृजिनत्वं च नो भवेत् । कामस्य यत्राप्ताः[7] [8]कामास्तत्र माममृतं कृधि ॥ इति [9]यल्लक्षणं मुक्तेः श्रुतिराह बलीयसी । कामाहतिः कुतोऽ[10]न्यत्र प्राप्तकामस्य सा भवेत् ॥ अप्रयत्नेन कामानामवाप्तिः सा यदा भवेत् । तदैवाकामहतता कुत एवान्यथा भवेत् ॥ चेतनस्य त्वसुप्तस्य कुत्र दृष्टा ह्यकामता । अव्यक्तिरेव कामानां न नाशो मोहसुप्तयोः ॥ यत्कामः[11] स्वाप-माप्नोति तदेवोत्थापितः पुनः । अवशोऽपि व्याहरति[12] कुतः सुप्ताव-कामता ॥ [13]सर्वकामानवाप्नोति ब्रह्मणा सह मुक्तिगः । [14]पर्येति तत्र [15]जक्षंश्च क्रीडन् रतिमवाप्नुयात् ॥ कामान्नी कामरूपी सन्निमाँल्लोकांश्च सञ्चरन् । आस्ते गायन्साम मुक्त इत्यादिश्रुतिसद्बलात् ॥ अकाम-स्स्यात्कथं मुक्तः कामा येऽस्य हृदि श्रिताः । इत्यन्तःकरणस्थानां

---

[1] प्रसक्तस्यापि. [2] अनिवर्त्यतया. [3] ईषदपि. [4] ब्रह्महत्यादिकर्म-विपाकक्षयरोगादिनिवृत्त्यर्थानां प्रायश्चित्तविधीनां व्यर्थता. [5] तस्मात्. [6] यावदधिकारमित्यधिकरणस्य विस्तारोऽयम् रामानुजमतनिरासः. [7] प्राप्ताः. [8] विषयाः. [9] यतः. [10] मुक्तात्. [11] यदिच्छावान्. [12] यतस्ततः. [13] सोऽश्नुते. [14] स तत्र पर्येति. [15] वैदिकत्वात्साधुः.

SGDF
Sri Gargeshwari Digital Foundation

कामानां मोक्षमेव हि ॥ आह श्रुतिर्हृदीत्येव न चेद्व्यर्थं विशेषणम् । हृद्येव तेषां श्रयणमिति पक्षो न भासते ॥ मुक्तानां कामितामाह पृथक्शाखासु यच्छ्रुतिः । अतोऽकामहतत्वं तु मुक्तानामेव मुख्यतः ॥ मुख्यार्थस्य वृथा त्यागो मायिनामेव भूषणम् । [4]अपापत्वमदुःखत्वं[5] [6]चावृजि[3]नत्व[2]मिहोदितम्[1] ॥ अप्रियं वृजिनं दुःखमकं तोद[7] इतीर्यते । तत्कारणत्वात्पापं वा वृजिनं नाम कथ्यते ॥ इत्युक्तः स्वयमीशेन [8]नामार्थः शब्दनिर्णये । अपापत्वं च नैवास्ति यावत्संसारमस्य हि ॥ आरब्धपापमस्त्येव दुःखं च ज्ञानिनोऽपि हि । तस्मात्तस्मा[9]दकामत्वमिति चाश्रुतकल्पना ॥ अकामहत इत्युक्तेरश्रुत[10]हानिरपि स्फुटा । [11]कुत्रचित्कामिनः[12] पुंसः[13] कामा[15]भावात्कचित्[14] क्वचित् ॥ इन्द्रादि[16]सुखभोगोऽस्तीत्यनु[17]भूतिर्हि [18]कुप्यति । तस्मादमुक्तसुखगं तारतम्यं पृथक्[19] पृथक् ॥ उक्त्वा[20] यश्चेति मुक्तानां तारतम्यं सुखे श्रुतिः । आहेति पेशलं तच्च चशब्दादेव गम्यते ॥ राद्धः संसिद्ध[21] इत्येव [22]मुक्त एवावगम्यते । साधुना विष्णुना युक्तो मुक्तः [23]साधुयुवा मतः ॥ यौवनं नित्यमेतस्य मुक्तस्येति युवा स च । फलमध्ययनस्याप्तं तेनाध्यायक ईरितः ॥ निर्ह्रासानन्दसम्प्राप्त्या चाशिष्ठ इति गीयते । स्थितस्यानन्यथा प्राप्तेर्दृढिष्ठ इति चोदितः ॥ बलिष्ठश्च स्वभावेन मुक्तो भवति केवलम् । तस्येयं पृथिवीत्यादि पूर्वभावव्यपेक्षया ॥ स एक इति संसारगतमुक्त्वा सुखं पुनः । श्रोत्रियस्येति वदति मुक्ताच्छतगुणात्मताम् । संसारगाच्च संसारगतस्यैव शताधिकम् ॥

[1–6] अन्वयक्रमः. [7] तुदव्यथने तत्कारणम्. [8] वृजिन. [9] पूर्वपूर्वनिर्दिष्टादतिशयेनोत्तरस्य. [10] अकाम इति परेण व्याख्यातत्वेन, हत शब्दस्य त्यागः. [11–15] अन्वयक्रमः. [11] इन्द्रादिपद व्यतिरिक्ते. [14] इन्द्रादिपदे. [16] इन्द्रादिसमान. [17] इति व्याख्याने. [18] राज्यानिच्छोः तत्सुखादर्शनात्. [19] ते ये शतं इत्यादिना. [20] श्रोत्रियस्यचाकामहतस्य. [21] समृद्धः वृद्ध. [22] मुक्त मनुष्यः. [23] तैत्ति.

SGDF
Sri Gargeshwari Digital Foundation

मुक्तान्मुक्तस्य युक्तं स्याच्छ्रुत्युक्तमभिवीक्षतः[1] । युक्तं च साधनाधिक्यात्साध्याधिक्यं सुरादिषु ॥ नाधिक्यं यदि साध्ये स्यात्प्रयत्नः साधने कुतः । यत्नश्च दृश्यते तेषां महानेव महात्मनाम् ॥ यत्र साधनबाहुल्यं साध्यबाहुल्यमत्र च । दृष्टं नियमतो नो चेन्न यत्नं कुर्युरञ्जसा ॥ कृच्छ्रेण साधनादेव न [2]मुक्तवदुदीर्यते । 'दश[3]कल्पं तपश्चीर्णं रुद्रेण लवणार्णवे ॥ त्यक्त्वा सुखानि सर्वाणि क्लिष्टेन लवणाम्भसा । शक्रेण वर्षकोटीश्च धूमः पीतोऽतिदुःखतः ॥ वर्षायुतं च सूर्येण तपोऽवाक्[4]शिरसा कृतम्। सुदुःखेन सुखं त्यक्त्वा धर्मेणाकाशशायिना ॥ पीता मरीचयो वर्ष[5]साहस्रमतिसादरम् । अतिकृच्छ्रेण कुर्वन्ति यत्नं ब्रह्मविदोऽपि च' ॥ इत्येतदखिलं मोक्षविशेषाभावतः कथम् । दैवीसंप[6]द्विमोक्षाय[7] निबन्धा[8]यासुरी मता ॥ इति मोक्षविशेषश्च स्वयं भगवतोदितः । '[9]तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ॥ अमायिनः कामदुघांघ्रिपङ्कजं यथाधिकारा[10]वसितार्थसिद्धये' । 'अक्षण्वन्तः कर्णवन्तः सखायो [11]मनोजवेष्वसमा[12] बभूवुः ॥ आदघ्नास उपकक्षास उत्वे हृदा इव स्नात्वा उत्वे ददृश्रे'। इत्यादीनि च वाक्यानि तारतम्यं विमुक्तिगम् ॥ व्यक्तं वदन्ति तत्केन साम्यं मुक्तेषु गम्यते । दुःखाद्यभावसाम्यं च साम्यवाक्यार्थ ईयते ॥ भक्त्यादिगुणसद्भावे [13]ह्यतुल्यत्वं च भारते ।

---

[1] अभिवीक्षमाणस्य 'यततामपि सिद्धानां' इति गीतायां काङ्क्षतः-कर्मणमित्यत्र काङ्क्षमाणा इति रामानुजभाष्ये "रोदमान" इति शाङ्करस्तुतौ च प्रयोगात् चान्द्रादयस्तु मन्यन्ते सर्वेसादुभयं पदम्. [2] मुक्तानां लीलयैव. [3] ब्रह्मदिन. [4] अधःकृत. [5] सहस्रं परिमाणमस्येति सह्वः. [6] योग्यता. [7] विशिष्ट मोक्षाय. [8] नीचस्थानेऽन्धेतमसि बन्धाय. [9] विष्णुम्. [10] योग्यतानुसारेण निश्चितस्य मोक्षस्य लाभाय. [11] प्रज्ञातिशय ज्ञानादिगुणेषु. [12] तारतम्योपेताः. [13] असमत्वं मोक्षफलस्य.

SGDF
Sri Gargeshwari Digital Foundation

उक्तं साधनवैचित्र्यमपि सर्वत्र कथ्यते ॥ 'दुर्ज्ञेयं घोररूपस्य त्रैलोक्यध्वंसिनः [1]प्रभोः । दैवतैर्मुनिभिः सिद्धैर्महायोगिभिरेव च ॥ नित्ययुक्तैर्महाभागैर्विमोहक्लेशसाध्वसैः । महोत्साहैर्महाधैर्यैः सत्त्वस्थैर्य्यव्यवसायिभिः ॥ अतीतानागतज्ञानप्रभावाप्ययवेदिभिः । शौचस्वाध्यायसन्तोषतपःसत्वदयान्वितैः ॥ किमु मर्त्यैर्भयभ्रान्तिध्वंसमोहरुजान्वितैः । अल्पायुर्वीर्यधीसत्त्वव्यवसायश्रुतिव्रतैः[2]' ॥ 'कस्तं मदा[3]मदं देवं मदन्यो ज्ञातुमर्हति । ब्रह्मैव किञ्चिज्जानाति न तदन्यो हि कश्चन' ॥ मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामते' ॥ 'इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद' ॥ 'यः [4]स्वात्ममायाविभवं स्वयं [5]गतो नाहं नभस्वांस्तमथापरे कुतः । ब्रह्माऽपि [6]यं वेत्ति न चेह[7] सम्यगन्ये कुतो देवमुनीन्द्रमर्त्याः' ॥ 'नमस्तेऽमिततत्त्वाय[8] ब्रह्मादीनां च सूतये[9] । निर्गुणाय च सत्काष्ठां[10] नाहं वेदापरे कुतः' ॥ 'नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्वि[11]रचितं खलु सत्त्वसङ्घाः । यन्मायया मुषितचेतस ईशदैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः' ॥ 'अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिञ्चः । आदित्यविश्वेवसवोऽथ साध्या मरुद्गणाः रुद्रगणाः ससिद्धाः ॥ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः । यस्येहितं[12] न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये' ॥ 'सर्वस्मादौ[13] स्मृतो ब्रह्मा तस्माद्देवादनन्तरः । जानाति देवप्रवरं [14]भूय[15]श्चातोऽधिकं

---

[1] ध्यानचक्रं नृसिंहस्य. [2] वैहायससंहितावाक्यमिदम्. [3] कठ. सुरासुराणां सुखदुःखहेतुम्. [4] स्वरूपमहिम्नो विस्तारम्. [5] ज्ञातवान्. [6] हरिम्. [7] जीवेषु. [8] स्वरूपाय. [9] कारणाय. [10] सम्यङ्दिङ्मात्रम्. [11] यस्य चरित्रम्. [12] चेष्टितम्. [13] आद्यत्वेन. [14] अतिशयेन. [15] ज्ञानिवर्गात्.

SGDF
Sri Gangeshwari Digital Foundation

नृप'॥ 'न त्वामतिशयिष्यन्ति मुक्तावपि कथञ्चन। मद्भक्तियोगाज्ज्ञानाच्च सर्वानतिशयिष्यसि'॥ 'यथाभक्तिविशेषोऽत्र[1] दृश्यते पुरुषोत्तमे। तथा मुक्तिविशेषोऽपि ज्ञानिनां लिङ्गभेदने[2]'॥ 'सायुज्यं समनुप्राप्ता अपि देवादयोऽखिलाः। तारतम्याद्धि तिष्ठन्ति तारतम्यं हि साधने'॥ 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये[3]। यततामपि सिद्धानां कश्चिन्मां वेत्ति [4]तत्त्वतः'॥ '[5]य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति। भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः। भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः। ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ श्रद्धावाननसूयश्च शृणुयादपि यो नरः। सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्'॥ 'ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना। अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे॥ अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः'॥ '[6]सुसूक्ष्मैरप्यशेषैश्च विशेषैः सह पश्यति। स्वात्मानं भगवान्विष्णुः सर्वरूपोऽपि सर्वदा॥ सर्वत्र [7]चान्यदप्येवं तेनादृष्टं न हि क्वचित्। सर्वत्र सर्वदैवेशं पश्यत्येव रमाऽपि तु॥ न तु सर्वैर्विशेषैस्तं पश्यन्त्यप्यन्यतोऽधिकम्। स्वात्मानमन्यच्चाशेषं पश्यत्येव हि सर्वदा॥ ब्रह्मा तु सर्वगं पश्येद्गुणानप्यन्यतोऽधिकम्। न तु सर्वेषु कालेषु तथा पश्यत्यमुक्तिगः॥ मुक्तस्तु सर्वदा पश्येत्सर्वगत्वेन चापि तु। न रमावद्विशेषाणां दर्शनं शक्नुयात्क्वचित्॥ स्वात्मानमन्यच्च सदा विशेषैरखिलैरपि। पश्यत्यज्ञस्तथा वाणी

---

1 संसारे. 2 लिङ्गशरीरभङ्गे जाते सति. 3 ज्ञानाय. 4 प्राचुर्येण एकं च तत्त्वतो ज्ञातुमिति यथा. 5 व्याख्यातुरध्येतुः श्रोतुश्चतारतम्यमुक्तमत्र. 6 अत्र सर्वेषां ज्ञानतारतम्यमुच्यते. 7 विश्वम्.

SGDF
Sri Gargeshwari Digital Foundation

विशेषांस्तावतो न तु ॥ त्रैगुण्यात्परतः पश्येद्व्यासं शतगुणं हरिम् । गिरिशो गरुडश्चैव तमोमात्रगतं हरिम् ॥ पश्येद्विशेषानपि हि वाणीदृष्टान्न पश्यति । उमा सुपर्णी च महत्तत्त्वं यावत्प्रपश्यति ॥ रुद्रदृष्टान्विशेषांश्च नैव पश्येत्कदाचन । स्वरूपमन्यरूपं च मुक्ता देवाः समस्तशः ॥ जानन्तीन्द्रश्च कामश्च ब्रह्म यावदहङ्कृतिः । पश्यन्तो मनुदक्षाद्या बुद्धितत्त्वस्थितं हरिम् ॥ पश्यन्ति सोमसूर्यौ तु मनस्स्थं परमेश्वरम् । अन्ये भूतस्थितं विष्णुं देवाः पश्यन्ति सर्वदा ॥ बहुसाहस्र[1]वर्षेण महत्तत्त्वे क्वचित्क्वचित् । अन्ये चैव यथा योगमण्डान्तर्वर्तिनं हरिम् ॥ श्वेत[2]द्वीपपतिं चैव हृद्येवान्ये तु केचन । कदाचिदेव [3]तत्रापि केचित्पश्यन्ति केशवम् ॥ उमा यावदनन्तांशान् पूर्वदृष्टेभ्य[4] एव तु । विशेषान्वासुदेवस्य पश्चादुक्तान्विचक्षते ॥ शक्रकामादयश्चैव विशेषान्ब्रह्मणि स्थितान् । उमादिभिः[5] प्रबुद्धेभ्यः शतांशानेव [6]चक्षते ' ॥ इत्यादिवेदस्मृतिगवचनेभ्यो यथा[7]र्थतः । तारतम्यं च मुक्तानां[8] साधनानां च दृश्यते ॥ साध्यसाधनवैरूप्य[9]मदृष्टं केन कल्प्यते । वैषम्यं निर्घृणत्वं च तेन[10] स्यातां परस्य च ॥ सापेक्षत्वादिति च तौ विद्याधीशेन वारितौ । तार[12]तम्यात्साध[11]नानां साध्य[15]तादृत्त्वमीशतः[14] ॥ अवैषम्या[17]दिहेतुः स्यात्सदैव[13] परमेश्वरे[16] । [19]स्वातन्त्र्ये [20]विद्यमानेऽपि साधनादौ[18] परेशितुः ॥ अपेक्ष्या[21]नादि[22]वैचित्र्यं न दोष इति तद्वचः । नानादित्वादिति ह्युक्तमुपपद्यत इत्यपि ॥ अपेक्ष्यो[23]पायवैषम्यमुपेयस्य[24] तथा स्थितिः । मया कया विरुद्धा स्याद्राजादावपि दृश्यते ॥ त्यागो दृष्टस्य चादृष्टकल्पनेति सुदुष्करौ ।

---

[1] सहस्रवर्षानुष्टितसाधनेन. [2] केचन श्वेतद्वीपपतिमेव. [3] हृद्यपि. [4] पूर्वपूर्वैर्दृष्टानाम्. [5] षष्ठ्यर्थे ज्ञातानाम्. [6] पश्यति. [7] न तु परमतानुवादरूपेण. [8] च. [9] साध्यस्यावैचित्र्यं साधनस्य वैचित्र्यम्. [10] वैरूप्येण. [11-20] अन्वयक्रमः. [21] स्वेच्छयापेक्ष्य प्रेरकत्वम्. [22] अनादियोग्यता. [23] साधन. [24] साध्यस्य.

SGDF
Sri Gargeshwari Digital Foundation

267

मायिभ्योऽन्येन केनापि [1]तत्किमन्यैश्च वादिभिः ॥ मायिनोऽत्रानुगम्यन्ते श्रुतहान्यश्रुतग्रहौ । अप्यत्र मायिनां लिङ्गे [2]तत्के दोषास्ततोऽधिकाः ॥ निःशेषगतदोषाणां बहुभिर्जन्मभिः पुनः । स्यादापरोक्ष्यं हि हरेर्द्वेषेर्ष्यादिस्ततः कुतः ॥ भवेयुर्यदि चेर्ष्याद्याः समेष्वपि कुतो न ते । तप्यमानाः समान्दृष्ट्वा द्वेषेर्ष्यादियुता अपि ॥ दृश्यन्ते बहवो लोके दोषा[3] एवात्र कारणम् । यदि निर्दोषता [4]तत्र किमाधिक्येन दूष्यते ॥ यद्यन्यदर्शनाभावादीर्ष्यादिर्विनिवार्यते । अदर्शनादरत्यादिः कथं तेन निवार्यते ॥ ब्रह्मणोऽप्यरतिर्दृष्टा पूर्वमेकाकिनः श्रुतौ । नैव रेमे स[5] चैकाकी तस्मान्न रमते क्वचित् ॥ [6]द्वितीयमैच्छत्तेनासाविति श्रुतय ऊदिरे । यदीच्छा नैव [7]तत्रास्तीत्येव [8]तत्कल्प्यते मृषा ॥ श्रुत्युक्तनिर्दोषतैवं किं नाङ्गीक्रियते स्वयम् । तारतम्यं च कामं च श्रुतमेवातिहाय तु ॥ अश्रुता समता केन कल्प्यते युक्तिमानिना । किं तन्मानं समत्वे ते मुक्तानामुपलभ्यते ॥ वृथाऽयमाग्रहः केन श्रुतहान्य[9]श्रुतग्रहे । मोक्षेऽपि तारतम्येत[10]श्चेतनत्वाद्यथा पुरा ॥ इत्युक्त उत्तरं किं ते कल्पनामात्रवादिनः । न च दुःखादिकं कल्प्यं निर्दुःखत्वश्रुतेर्बलात् ॥ शोकं [11]तरत्यात्मवेत्ता[12] तीर्णः [13]सर्वान[14]दुःखभाक्' । 'येनानन्द्येव भवति[15] न शोचति कदाचन' ॥ 'किल्बिष[16]स्पृत्पितु[17]षणिररं हित[18] इहेश्वरः' । 'यं

---

[1] स्वीक्रियते. [2] प्रकृत दोषेषु. [3] दोषाणां समुदितानामेव कारणत्वमित्येकवचनम्. [4] मुक्तेषु. [5] तस्मादेकाकी न रमते. [6] स. [7] मुक्तौ. [8] अन्यदर्शनविषये. [9] हानिसहित. [10] तारतम्येन इतः प्राप्तः तद्वान्. [11] तरति शोकमात्मवित्. [12] वेदिता विचारणार्थस्य विन्दतेर्वा रूपमेतत्. [13] 'तीर्णो हि तदा शोकान्'. [14] 'नानानन्दं कश्चिदुपस्पृशति'. [15] 'तीत्ययो'. [16] मुक्तानां दुःखं न सहते स्पर्धते इति. [17] अन्नदाता. [18] अलमत्यर्थं हितकरः.

SGDF
Sri Gargeshwari Digital Foundation

यमन्त[1]मभिप्रेप्सुः स सङ्कल्पाद्भवेदिह[2] ’ ॥ इत्यादिश्रुतयो मानं निर्दुःखत्वादिसम्पदि[3] । अतो दुःखाद्यनुमया नावकाशोऽत्र[4] लभ्यते ॥ तारतम्यानुमा तस्माद्भवेन्नातिप्रसङ्गिनी । श्रुतियुक्तिबलादेव तारतम्यं विभाव्यते[5] ॥ मुक्तावपि ततः [6]केऽत्र विरोधं कर्तुमीशते ॥१६॥४॥

॥ ॐ सर्वथाऽपि तु त एवोभयलिङ्गात् ॐ ॥ ॥ ३४ ॥ ॐ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॐ ॥ ४१ ॥ अनादियोग्यतां चैव कलिवाणीश्वरा[7]वधिम् । को निवारयितुं शक्तो युक्त्यागमबलोद्धताम्[8] ॥ ब्रह्मणो[9]ऽन्यत [10]आधिक्य[11]युक्तः कालो विवाद[12]वान् । [13]कालो ह्ययं यथेत्यादि माऽनुमा मानिनो [14]भवेत् ॥ अन्यशब्दो हरिश्रीस्वसमेभ्योऽन्यविवक्षया । प्रयुक्तो नैव दोषाय रुद्रादिषु च [15]युक्तितः ॥ उत्तमत्वं तु मुक्तानामपि न ब्रह्मणो [16]भवेत् । व्यक्तिः सुखस्य तु भवेन्न त्वाधिक्यं सुखस्य च ॥ बलज्ञानाधिकत्वं तु तेभ्यो हि ब्रह्मणः सदा । आधिक्यस्य त्वनित्यत्वे न किञ्चिन्मानमीयते ॥ शृण्वे वीर[17] उग्र[19]मुग्रन्दमा[20]यन्न[21] न्यमन्यमतिनेनीय[22]मानः । एधमान[23]-द्विळु[24]भयस्य [25]राजा चोष्कू[28]यते विश[27] इन्द्रो[18]मनु[26]ष्यान् । [31]परा पूर्वे[29]षां सख्या[30] [32]वृणक्ति [33]वितर्तुराणो [34]अपरेभिरेति[35] ॥

---

1 ‘मभिकामः’ अन्तं स्थानम्. 2 मुक्तौ. 3 मुक्तानाम्. 4 मुक्तेषु. 5 सम्यगनुभूयते. 6 के, वादिनः. 7 चतुर्मुख. 8 अप्रतिहताम्. 9 विमतः मानेन. 10-12 ब्रह्मनिष्ठं अन्यप्रतियोगिकाधिक्यं यत् तेनोपेतः. 13 कालत्वात्. 14 प्रति. सर्वोत्कृष्टानादियोग्यतासिद्धिवत्. 15 युक्त्या योग्यता साधनीया. 16 सकाशात्. 17 आरब्धान्तगामी. 18 परमेश्वरः. 19 दुष्टमतिदैत्यान्. 20 तमः प्रापयन्. 21 सर्वान् सत्स्वभावान्. 22 उत्तमलोकं प्रापयन्. 23 स्वयोग्याधिकस्य नाशकः. 27 प्रजाः. 28 संसारे परिवर्तयति नित्यम्. 17-35 अन्वयक्रमः.

SGDF
Sri Gurgeshwari Digital Foundation

अनानु[1]भूतीरवधून्वानः[2] [4]पूर्वीरिन्द्रः[3] शरद[5]स्तर्त[6]रीति। दिवे दिवे[8] [9]सदृशी[12]रन्य[13]मर्धं [10]कृष्णा असे[16]धदप[15]सद्म[14]नोजाः[11] ॥ [22]अहं [17]दासा[7]वृषभो व[18]स्नयन्तो[21]दव्रजे[19]वर्चिनं शम्बरं[20] च। तं[23] [24]भूतिरिति देवा उपासाञ्चक्रिरे ते [25]बभूवुस्तस्माद्धाप्ये[26]तर्हि सुप्तो [27]भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह [28]पराबभूवुः ॥ तद्यथा[29] पेश-[30]स्कारी पेशसो मात्रा[31]मुपादायान्यन्नवतरं कल्याणतरं रूपं तनुते। एवमेवाय[32]मात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं रूपं कुरुते ॥ पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां[33] भूतानाम्[34]। 'प्रयान्ति परमां सिद्धिमैहिकामुष्मिकीं द्रुतम् ॥ या न प्राप्याऽसुरैः सर्वैरक्षय्या क्लेशवर्जिता। न तां गतिं प्रपद्यन्ते विना भागवतान्नरान्' ॥ 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानन्तो मम भूतमहेश्वरम् ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव [35]प्रकृतिं मोहिनीं श्रिताः॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधस्त्यागश्शान्तिरपैशुनम्। दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।

1–25 अन्वयक्रमः. 7 वर्षणाद् वृषभः परमेश्वरः. 8 सर्वदा. 9 चेतनत्वमात्रेण. 10 तमोमयीः. 11 प्रजाः. 12–13 कास्ताः देवेभ्योऽन्यमर्धम्. 14–16 स्वीयात् सम्बन्धनोपायेधत्. 18 जगदाच्छादयन्तौ. 19–20 उदव्रजे जलराशौ. 22 अहन्, हिंसितवान्. 23 परमेश्वरम्. 24 ऐश्वर्यरूपः 25 मुक्ता. 26 इदानीम्. 27 सुप्तस्थोवायुः. 28 तमां प्राप्ताः. 29 सुवर्णकारः. 30 सुवर्णस्य. 31 अंशम्. 32 परमात्मा. 33–34 मनुष्योत्तमानाम्. 35 स्वभावम्.

SGDF
Sri Gurgeshwari Digital Foundation

अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्' ॥ 'मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः । तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥ मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' । द्विविधो [1]भूतसर्गोऽत्र दैव आसुर एव च ॥ विष्णुभक्तिपरो दैवो विपरीतस्तथाऽऽसुरः । देवानां परमो धर्मः सदा यज्ञादिकाः क्रियाः ॥ स्वाध्यायस्तत्त्ववेदित्वं विष्णुपूजारतिः [2]स्मृतिः । दैत्यानां बाहु[3]-शालित्वं मात्सर्यं युद्ध[4]सत्क्रिया ॥ नीतिशास्त्रप्रवेदित्वं शिवपूजा[5]रतिः स्मृतिः । वर्णाश्रमा[6]चारवत्त्वं स्वाध्यायो [7]भक्तिरच्युते ॥ शिवे सूर्ये तथा देव्यां स्वभावो मानुषः स्मृतः । अनादिवैष्णवा एव देवतास्तु स्वभावतः ॥ विपरीताः स्मृता दैत्याः सदैवानादिकालतः । मानुषा मिश्रमतयो विमिश्रगतयोऽपि च' ॥ इत्यादिवाक्यसन्दर्भैर्ज्ञायतेऽ-नादियोग्यता । [8]यद्यनादिविशेषो[9] न साम्प्रतं कथमेव सः ॥ अदृष्टा-देव चादृष्टं स्वीकृतं सर्ववादिभिः । [10]आकस्मिको [11]विशेषश्चेद्दृष्टे [12]क्वचिदिष्यते ॥ सर्वत्राकस्मिकत्वं स्यान्नादृष्टापेक्षता भवेत् । [13]अदृष्टा-च्चेद्वि[14]शेषोऽयमना[15]दित्वं कुतो न तत्[16] ॥ 'न [17]चान्यभेदाद्विष्णौ[18] भेदस्तद्दर्शिना[19]मपि । दृश्यते प्रत्यभिज्ञैव बहुरूपेषु [20]दृश्यते ॥ बहुत्वं च विशेषेण न भेदेन कथञ्चन । प्रत्यभिज्ञा च [21]येषां न तेऽपि

---

1 स्वभावः. 2 विष्णोः. 3 अस्थाने. 4 शिवस्य. 5 कौशलम्. 6 तदनुष्ठानमात्रपर्यवसायित्वम्. 7 साम्येन. 8 श्रुत्यनुमानानुग्राहकं तर्कमाह. 9 योग्यता. 10 विरिञ्चोत्कर्षहेतौ. 11 अदृष्टनिरपेक्षः. 12 अतिशयः. 13 विशिष्यते इति विशिष्टमदृष्टम्. 14 भवति. 15 तर्हि. 16 तादृशादृष्टपरम्परायाः अनादियोग्यतावत्त्वम्. 17 व्यतिरेक दृष्टान्तः, घटादीनां भेदो यथा दृश्यते न तथेति. 18 रामकृष्णादिरूपे. 19 तद्दर्शिभिः. 20 यथा जाम्बवतः. 21 मध्यमजीवानाम्.

SGDF
Sri Gangeshwari Digital Foundation

तन्मुष्ट[1]दृष्टयः ॥ भेदं नैव प्रपश्यन्ति, भेदमन्येभ्य एव च । पश्य[2]न्त्येवं हरि[3]स्तेषां सन्दर्शयति नान्यथा[4]' ॥ एवं बृहत्संहितायां वचनं न पुराणगम् । लोक[5]दर्शनबाधैव वेदरोधाय शक्नुयात् ॥ [6]अपरीक्षितदृष्टिश्च[7] परीक्षापूर्वदर्शनम् । निषेद्धुं शक्नुयात्क्वापि देव[8]-दत्तादिदृष्टिवत्[9] ॥ न च निश्चितभेदस्य[10] दर्शनेऽस्ति पुराणगम् । वाक्यं क्वचिद्धि [11]संमुग्धं [12]दर्शनं [13]तत्र गम्यते ॥ अपरीक्षितमेवात्र वेधादि[14]कमधीशितुः । परीक्षा[15]दर्शने नैव दृश्येते केनचित्क्वचित् ॥ 'निर्दोषमेव तं ब्रह्मा ददर्शाशेषरूपिणम् । निर्दोषमेव रुद्रोऽद्रा[16]-ङ्निर्दोषं तं पुरन्दरः ॥ निर्दोषाण्यस्य रूपाणि दृष्टान्येवं सुरोत्तमैः । अन्ये सदोषाः सर्वेऽपि निर्दोषो हरिरेकलः' ॥ इति [17]बर्कश्रुतेश्चैव सदोषं नास्य दर्शनम् । 'अविद्धो विद्धवद्विष्णुरजातो जातवन्मृषा ॥ अबद्धो बद्धवच्चैव दर्शयत्यमितद्युतिः' । इति पैङ्गिश्रुतिश्चैव प्राह निर्दोषतां हरेः ॥ 'अपरीक्षितदृष्टचैव सदोषो दृश्यते हरिः । परीक्षादर्शनेनैव दोषो दृश्यो हरेः क्वचित्' ॥ इति पैङ्गिश्रुति[18]श्चाह प्रमाणं हि [19]परीक्षितम् । न परीक्षाऽनवस्था स्यात्साक्षिसिद्धेत्वसंशयात् ॥ मानसे दर्शने दोषाः स्युर्न वै साक्षिदर्शने । [20]सुदृढो निर्णयो [21]यत्र ज्ञेयं तत्साक्षिदर्शनम् ॥ इच्छा ज्ञानं सुखं दुःखं भयाभयकृपादयः । साक्षिसिद्धा न कश्चिद्धि तत्र संशयवान्क्वचित् ॥ [22]यत्क[23]चिद्व्यभि[24]चारि

---

[1] अपहत. [2] एवं=भेदाभेदोदासीनतया. [3] योग्यतया. [4] भेदेन-अभेदेन च. [5] लोकानां भेददर्शनानुवादि. [6] परीक्षयाप्रमाणत्वेना-निश्चिता. [7] च = न शक्नुयात्. [8] यज्ञदत्तादौ. [9] दृष्टिरिव. [10] षष्ठ्या अलुक्. [11] प्रमाणत्वाप्रमाणत्वाभ्याम्. [12] भेदस्य. [13] पुराणे. [14] तद्दर्शनम्. [15] युक्त्या. [16] अद्राक्, अद्राक्षीत्. [17] बर्कश्रुतिः शङ्कर-भाष्येऽपि गृहीतातो नाप्रसिद्धा. [18] तदेव. [19] यत्. [20] कदापि बाधरहितः. [21] निपातः य इत्यर्थे. [22] दर्शनम्. [23] शुक्तिरजतादौ-विषये. [24] बाधितम्.

SGDF
Sri Gangeshwari Digital Foundation

स्याद्दर्शनं[1] मानसं हि तत् । मनश्चक्षुर्दर्शना[2]देरपि [4]यत्रैव साक्षिणा[5] ॥ [3]प्रामाण्यं [6]सुगृहीतं स्यात्तत्परीक्षितदर्शनम् । न [7]ज्ञानदृष्टिमात्रेण प्रामाण्यं [8]तस्य दृश्यते ॥ नियमेन[12] [9]सुखाद्येषु प्रामाण्यं[11] [10]साक्षिगोचरम् । स्वप्रामाण्यं सदा साक्षी [13]पश्यत्येव [14]सुनिश्चयात् ॥ ज्ञानस्य ग्राहकेणैव [15]साक्षिणा [16]मानतामितेः । दोषाभावे प्रमाणत्वं दोषाभावस्य[17] साक्षिणा ॥ निश्चितत्वं क्वचिच्चैव स्वतः प्रामाण्यमिष्यते । अतो[18] न सर्वमानानां प्रामाण्यं निश्चितं भवेत् ॥ साक्षिणानिश्चितं [19]यत्र [20]तत्प्रामाण्यं[21] [22]स्वलक्षणम् । न हि कश्चित्सुखाद्येषु संशयं कुरुते जनः ॥ न चैवाखिलमानानि निश्चिनोत्यखिलो जनः । तस्मादनुभवारूढं किमर्थमपलप्यते ॥ दोषाभावादिकं चैव साक्षी [23]सम्यक्प्रपश्यति । [24]तत्परीक्षितमानेन न दोषो [25]विष्णवि क्वचित् ॥ अपरीक्षितदृष्टिस्तु कस्मिन्नर्थे न विद्यते । [26]तत्प्रत्यक्षविरुद्धार्थे नागमस्यापि मानता ॥ [27]उपजीव्यमक्षजं यत्र[28] तदन्यत्र विपर्ययः । लौकिके[29] [30]व्यवहारेऽत्र[31] प्रत्यक्षस्योपजीव्यता ॥ [32]अवतारादिदृष्टौ स्यादागमस्योपजीव्यता । आगमेन हि विष्णुत्वं ज्ञात्वा दोषोऽत्र कल्प्यते ॥ न चेत्स्याद्दोषवानन्यः [33]शास्त्रसिद्धं हि लक्षणम्[34] । कस्यचिद्दोषवत्त्वं स्यादिति [35]मात्रेऽक्षजं भवेत् ॥ न विष्णोर्दोषवत्त्वे हि प्रत्यक्षं वर्तते स्वतः । [36]केचित्पश्यन्ति दोषानित्यत्रापि स्यान्न

---

1 एव न साक्षिरूपम्. 2 जन्यसाक्षात्कारादेः. 3 ज्ञाने. 3–6 अन्वयक्रम. 7 ज्ञानस्य. 8–12 अन्वयक्रमः. 10 साक्षिगतम्, साक्षिगोचरो यस्य तत्. 11 यत्–तत्. 12 दृश्यते. 13 एव. 14 सदा. 15 एव. 16 ज्ञानस्य. 17 परीक्षया. 18 एव. 19 यदा. 20 तदैव. 21 प्रामाण्यं सिध्यति. 22 अप्रामाण्यविविक्तम्. 23 एव. 24 तस्मात्. 25 'यत्सोममिन्द्रविष्णवि' इतिवत्. 26 तदा. 27 आगमस्य. 28 यदा. 29 जीवादिविषये. 30 ऐक्यबोधने. 31 आगमे. 32 विश्वादीनां दोषदृष्टौ. 33 शास्त्रेणैव. 34 श्रीवत्साङ्कादि. 35 एतावत्येवविषये. 36 तत्कालवर्ति पुरुषाः.

SGDF
Sri Gargeshwari Digital Foundation

चाक्षजम् ॥ पौराणं वाक्यमेवात्र तच्छ्रुत्यैव विरुध्यते । पुराणस्योप-जीव्यश्च वेद एव न चापरः ॥ तद्विरोधे कथं मानं तत्तत्र च भविष्यति । अपरीक्षितदृष्टिश्च कथमेवाक्षजं[1] भवेत् ॥ यद्येवं देवदत्ता[2]दिभ्रमः किं नाक्षजं भवेत् । यावच्छक्तिपरीक्षाया[3]मुपजीव्यस्य बाधने[4] ॥ दोषो नाशोधिते दोष उपजीव्यत्वमस्त्वलम् । भ्रमेऽप्य-भ्रमभागो[5]ऽस्ति तन्मात्रमुपजीव्य हि ॥ [6]बाधकज्ञानवृत्तिस्स्यान्न[7] चैवं सुपरीक्षिते । सर्वं तदुपजीव्यैव [8]प्रमाणं वर्तते यतः ॥ कथं ब्रह्मेति तज्ज्ञेयं सर्वज्ञत्वादि[9]लक्षणम् । विहाय[10] यस्मात्कस्मा[11]च्चित्स्वरूपस्यैव चेद्यदि[12] ॥ उपजीव्य[13]त्वमेतस्मा[14]द्व्यावृत्तं [15]यावता भवेत् । [16]तावतै-वोपजीव्यत्वं स्वरूपस्यैव न क्वचित् ॥ सर्वलक्षणयुक्तं च स्वरूपं यदि भण्यते[17] । अस्तु नो नैव हानिः स्यात्स्वपक्षश्चायमञ्जसा ॥ यस्मा-दन्वित एवार्थः शब्दानामपि सर्वशः । विशेषसामान्यतया स्वरूप-मखिलं[18] भवेत्[19] ॥ पुरोवर्तित्व[20]पूर्वाणि [21]देवदत्तादिकभ्रमे । व्यावर्तयन्ति [22]तद्रूपं चैत्रमात्राद्धिनैव तु ॥ [23]ब्रह्मणो निर्विशेषत्वा-[24]द्व्यावर्तयति किं[25] पुनः । यस्मात्कस्माच्चिद[26]प्यर्थात्ताव[27]च्चेत्सिद्ध[28]-साधनम् ॥ चिन्मात्रत्वं[29] च नैवेष्टमविशेषत्ववादिनः । तावन्मात्रं यदीष्टं स्यात्सर्वज्ञत्वं कुतो न तत् ॥ चिन्मात्रा[30]भेदसाध्येऽपि सिद्धं

---

1 प्रमाणम्. 2 यज्ञदत्तादौ. 3 सत्यां प्रमाणतया प्रतीतस्य. 4 उप-जीवकेनकृते इतः. 5 धर्म्यंशः. 6 प्रथमप्रमाणे. 7 सार्वज्ञादिकम्. 8 तत्वमसीत्यादि. 9 (द्वितीयवाक्यंतु) विहाय (१२-१४). 10 धर्मान्. 11 तत्वादेः. 12 तदितिकथं ज्ञेयम्. 13 स्वरूपस्यैव. 14 अपरथा-ज्ञानासंभवात्. 15 धर्मेण. 16 उपेतस्यैव. 17 तच्छब्देन इति यदि भण्यते. 18 योग्यान्वितम्. 19 शब्दबोध्यम्. 20 विशेषणानि. 21 देवदत्तादौचैत्रादिभ्रमे. 22 देवदत्ताद्धि स्वरूपम्. 23 पुनः 24 कर्तृब्रह्म. 25 न किमपि. 26 तत्वादिरहितात्. 27 व्यावृत्तं चेत्. 28 ज्ञातस्यैव ज्ञापकम्. 29 सर्वं विषयकत्वरहितं चिद्रूपत्वम्. 30 चिन्मात्रेण अभेदः साध्यः=प्रतिपाद्यः यस्य तत् .

SGDF
Sri Gargeshwari Digital Foundation

[1]तत्प्रतिवादिनः । [2]स्वाभेदाङ्गीकृतेरेव चित्त्वं स्वस्यापि [3]यन्मतम् ॥ [4]सर्वापेक्षतया सर्वज्ञत्वमित्येव[5] [6]तन्न हि । इति चेच्चेतनत्वं च ज्ञत्वं न ज्ञेयवर्जितम् ॥ स्वज्ञेयत्वं च नैवासौ मन्यते [7]सविशेषतः । स्वशब्दोऽपि[8]परापेक्षस्तस्मा[9]द्व्यावृत्तिरेव हि[10] ॥ स्वशब्दार्थ इति प्रोक्तः स्वरूपं नाम किं [11]न चेत् । रूपशब्देन पूर्वत्वा[12]त्तच्च[13] [14]सामान्यतावचः ॥ न [15]स्वरूपाभिधायि स्याद्वैयर्थ्यं स्वपदस्य यत् । चेतनस्य [16]स्वभावो[17] हि चैतन्यमिति गीयते ॥ तस्माद्विशेषबाहुल्यं[20] चैतन्यस्य[18] विशेषतः[19] । न ज्ञेयज्ञातृहीनं हि ज्ञानं नाम क्वचिद्भवेत् ॥ ज्ञेयज्ञानविहीनश्च ज्ञ इत्यत्र न च प्रमा । ज्ञातृज्ञेयविहीनं च ज्ञानं चेद्धोक्तृभोग्यतः ॥ हीनं भोजनमेव स्यात्ताडनं [21]कर्तृताड्यतः[22] । [23]नित्यत्वात्तादृशं[24] च स्यादिति चेन्नित्यवागपि[24] ॥ वाच्यवक्तृविहीना स्यान्न हि सा चैव तादृशी । द्रष्टारो वेदवाचो हि सन्ति वाच्यानि चाञ्जसा ॥ नित्यो द्रष्टा च वाच्यश्च भगवानेव च स्वयम् । न हि वक्तृविहीना च वाच्यहीनापि वाक् क्वचित्[25] ॥ ज्ञातृज्ञेयविहीनं च ज्ञानमेव न तद्भवेत् । न [26]हि नित्योऽपि वक्तास्ति वाक्यवाच्यविवर्जितः ॥ ज्ञानज्ञेयविहीनश्च ज्ञोऽप्येवं नैव विद्यते । किं च सर्वविलोपश्च[27] केन मानेन गम्यते ॥ सर्वेण सह तद्वाक्यमर्थश्च यदि

---

1 चिदैक्यम्. 2 स्वस्य स्वेन. 3 यतः सम्मतम्. 4 मिथ्याभूत. 5 हेतोः. 6 तदेव. 7 विशेषाङ्गीकारापत्तेः. 8 परापेक्षस्यार्थस्य-प्रतिपादकः. 9 परस्मात्. 10 यथा. 11 न किमपि स्वश्च तत्‌रूपं चेत्यत्र. 12 वैयर्थ्यं स्वपदस्य यत्. 13 स्वरूपपदस्याखण्डत्वपक्षं निराह, रूपपदम्. 14 सामान्याकारस्य वाचकम्. 15 असाधारणाकारस्य. 16 अनागन्तुक. 17 शब्दप्रवृत्तिनिमित्तम्. 18 ब्रह्मणः. 19 अतिशयेन. 20 स्यात्. 21 ताडनकर्तृ. 22 ताड्याभ्याम्, हीनं स्यात्. 23 ज्ञात्रादिहीनम्. 24 वाक् न धात्वर्थः किन्तु तत्कर्म तथापि आकाङ्क्षानिमित्तं प्रतिसम्बन्ध्यन्वितत्वं नित्यत्वेन न हीयत इति तदुक्तिः. 25 प्रलये. 26 यतः. 27 मिथ्यात्वम्.

SGDF
Sri Gangadhareshwar Digital Foundation

गृह्यते । तदभावे न सर्वस्य नापलापो भवेत्तदा ॥ न गृह्यते चेत्तन्न्यायादपलापो न हि क्वचित् । उपपत्तिविहीनस्य[1] वाक्य[2]स्यार्थो न गम्यते ॥ उपक्रमादिलिङ्गानां बलीयो [3]ह्युत्तरोत्तरम् । श्रुत्यादौ [4]पूर्वपूर्वं च ब्रह्मतर्कविनिर्णयात्[5] ॥ प्रत्यक्षमुपपत्तिश्च बह्वश्चागमा यदा । विरुध्यन्ते न चार्थो[7]ऽस्ति [6]यत्र [8]लिङ्गविरोधिता[9] ॥ [10]स एवार्थः कथं ग्राह्य उपपन्नेऽविरोधिनि । मुख्यार्थे विद्यमाने तु क्व सार्वज्ञं निषिध्यते ॥ अतः सर्वगुणैर्युक्तं ब्रह्माङ्गीकार्यमेव हि । [11]अपलापोऽपि सर्वस्य न कथञ्चन युज्यते ॥ अनादियोग्यता चोक्ता[12] तेन[13] ग्राह्यैव सर्वथा । मुक्तानां तारतम्यं च मानैरुक्तैर्न चाल्यते ॥ [14]ज्ञानिनोऽपि यतो नित्यं कुर्वन्ति शुभमेव हि । तारतम्यं तु मुक्तौ च तेनैवाध्यवसीयते ॥ तारतम्यं न चेन्मुक्तौ कुतः कुर्युः शुभं पुनः । कृच्छ्रेणापि तपो ज्ञानं कर्माण्येते चरन्ति हि ॥ बिभ्यति स्माशुभान्नित्यं सकामाश्च शुभे सदा । न च स्वभाव एवायं भयपूर्वप्रवृत्तितः ॥ कृच्छ्रेणाचरणाच्चैव शुभस्यैव पुनः पुनः ॥ तादृशोऽपि [15]स्वभावश्चेदज्ञस्यापि भवेत्तथा । फलवत्त्वे प्रमाणं चेत्तत्रज्ञस्य समं हि तत् ॥ निष्कामं ज्ञानपूर्वं च निवृत्तमिह चोच्यते । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् ॥ 'शुभेनानन्दवृद्धिः स्याद्ह्रासश्चैवाशुभेन हि । ज्ञानिनोऽपि यतस्तेन कर्तव्यं शुभमेव तैः' ॥ 'उपास्ते[16] स य आत्मानं क्षीयते नास्य कर्म हि । अस्माद्ध्येवात्मनो[17] यद्यत्कामयेत्सृजते च तत्[18] ॥ अविद्वान्बहु[19]कर्माऽपि ह्यन्तवत्फलमाप्नुयात् । यदेव विद्यया कुर्यात्तदेव ह्यतिवीर्यवत्' ॥ इत्यादिवाक्यसामर्थ्या-

---

[1] विरुद्धस्य. [2] तात्पर्यम्. [3] यद्यदुत्तरं तत्. [4] यद्यत्पूर्वं तत् बलीयः. [5] निर्णीतत्वात्. [6] यदर्थबोधने. [7] प्रयोजनम्. [8] उपक्रमादि लिङ्ग. [9] च अस्ति. [10] विश्वमिथ्यत्वरूपः. [11] मिथ्यात्वाभिधानम्. [12] प्रमाणैरूपपादिता. [13] तेन कारणेन सा. [14] अपरोक्ष. [15] स्वभावबलायातः. [16] य आत्मानमेव लोकमुपास्ते. [17] परमात्मनः प्रसादेन. [18] कर्म इष्टं वस्तु. [19] अनेककर्मकर्ताऽपि.

SGDF
Sri Gargeshwari Digital Foundation

276

त्तारतम्यं विमुक्तिगम् । न चात्रोपासकस्यैव फलमक्षयमुच्यते ॥ न हि ज्ञानं विना क्वापि फलस्याक्षयता भवेत् । ज्ञानद्वारेण चेत्तस्य नास्मत्पक्षप्रतीपता ॥ ज्ञानोत्तरस्यैवमपि ह्यक्षयत्वं न चान्यथा । पूर्वभाविशुभानां हि ज्ञानेनैव कृतार्थता ॥ प्रारब्धानां तु भोगेन तज्ज्ञानोत्तरकर्मणाम् । मुक्तावनुप्रवेशः स्यादन्यथा तत्कृतिर्न हि ॥ ज्ञानात्पूर्वाणि कर्माणि शुभानि ज्ञानसिद्धये । अकाम्यानि निषिद्धानि ज्ञानरोधाय [1]भुक्तये ॥ [2]योग्यताया बलाद्यच्च शुभबाहुल्यमादितः[3] । ज्ञानबाहुल्यमेवैतत्कुर्यान्नान्यस्य[4] कारणम् ॥ ज्ञानस्य भक्तिभागत्वा-द्भक्तिर्ज्ञान[5]मितीर्यते[6] । ज्ञानस्यैव विशेषो[7] [8]यद्भक्तिरित्यभिधीयते ॥ परोक्षत्वापरोक्षत्वे विशेषौ ज्ञानगौ यथा । स्नेह[9]योगोऽपि तद्वत्स्या-द्विशेषो ज्ञानगोचरः ॥ इत्यभिप्रायतः प्रायो ज्ञानमेव विमुक्तये । वदन्ति श्रुतयः सोऽयं विशेषोऽपि ह्युदीर्यते ॥ भक्तिर्ज्ञानमिति क्वापि न हि द्वेषयुता दृशिः । पुरुषार्थाय भवति सर्वश्रुतिविरोधतः ॥ 'चेतनस्य द्वयं भोग्यं संसारो मुक्तिरेव च । संसारस्त्रिविधस्तत्र स्वर्गो मध्यमधस्तथा ॥ मुक्तिश्च द्विविधा तत्र सुखं नित्यं तथाऽपरम् । नित्यदुःखमिति ज्ञेयं साधनं [10]संसृतावपि ॥ काम्यं कर्मनिषिद्धं च सा[11]ज्ञानमिति निश्चयः । द्वेषो भक्तिश्च [12]मुक्तौ तु मुक्तिद्वय-विधायकम्[13]' ॥ इति पैङ्गिश्रुतेर्द्वेषो नैव सन्मुक्तिकारणम् । असन्मुक्तेः कारणं च मुक्तावित्यत्र केशवः ॥ मुक्तिशब्दोदितो मोक्षं स्वभक्तानां करोति यत् । द्वेषतोऽपि विमुक्तिश्चेन्महातात्पर्य-रोधनम् ॥ भक्त्या प्रसन्नतो देवान्मुक्तिरित्येव तद्गुणान् । वदन्ति श्रुतयस्सर्वाः पुराणान्यागमा अपि ॥ यदि द्वेषेण मुक्तिः स्याद्वक्तव्यो

---

[1] दुःखस्य. [2] ब्राह्मणत्वादिरूपा पितृमरणादिरूपा च. [3] ज्ञानात्पूर्वकृतम्. [4] प्रत्यवायमात्र परिहारस्य. [5] पदाभ्याम्. [6] लक्ष्यते. [7] स्नेहादिसाहित्यलक्षणः. [8] यदा. [9] स्नेहेन सम्बन्धः. [10] संसृतिविषये. [11] अज्ञानसहितम्. [12] विष्णौ. [13] कारकम्.

SGDF
Sri Gangeshwari Digital Foundation

दोषसञ्चयः । स्मर्तव्यो भगवान्नित्य[1]मित्यर्थेनैव हि क्वचित् ॥ द्वेषादिव गुणानाह [2]पुराणे क्रुद्धवाक्यवत् । यथा क्रुद्धः पिता पुत्रं [3]मरेत्याक्षेप-पूर्वकम् ॥ प्रोक्तस्यान्यस्य [4]कृत्यर्थं वदत्येवं पुराणगम् । वाक्यं श्रुतिविरोधेन स्वविरोधेन चाञ्जसा ॥ बह्वागमविरोधाच्च न द्वेषा-न्मुक्तिवाचकम् । 'तमो द्वेषेण[5] संयान्ति भक्त्या मुक्तिं तथैव च ॥ [6]विष्णौ विष्णुप्रसादेन विलोम[7]त्वेन चाञ्जसा' । इति षाड्गुण्यवचन-मप्युक्तार्थनियामकम् ॥ महातात्पर्यरोधेन कथं वाक्यं प्रमाणताम् । याति [8]सर्वार्थरूपं हि महातात्पर्य[9]मिष्यते ॥ वाचकत्वं हि [9]तात्पर्यं पदार्था अखिला खाः[10] । सोऽर्थः कथं परित्याज्य एकशब्दस्य[11] संशये ॥ अतो विज्ञान[12]भक्तिभ्यां पुरुषार्थः परो भवेत् । 'यस्य[13] देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' । 'भक्त्या ज्ञानं [14]ततो [15]भक्तिस्ततो दृष्टिस्ततश्च सा[16] ॥ ततो मुक्तिस्ततो भक्तिः सैव स्यात्सुखरूपिणी' । 'भक्त्या प्रसन्नो भगवान्दद्याज्ज्ञानमनाकुलम् ॥ तयैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया' । '[17]नाहं वेदैर्न तपसा न दानेन न चेज्यया ॥ [18]शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा । भक्त्या त्व[19]नन्यया शक्य अहमेवं-विधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन[20] प्रवेष्टुं च परंतप' । इत्यादि-वाक्यतश्चैव सोऽयमुक्तार्थ ईयते ॥ न च [21]प्रसादमाप्नोति द्वेषाद्भक्त्या

---

1 इत्यभिप्रायेण. 2 क्वचित्. 3 प्रकृत्यन्तरस्यैतद्रूपम्. 4 करणाय. 5 विष्णौ. 6 भक्त्या. 7 कोपेन. 8 सर्वेषां शास्त्राणामनन्यार्थतया-यदेकार्थप्रतिपादकत्वं तद्रूपम्. 9 तत्परं प्रतिपाद्यं यस्यतत् तत्परं तस्य भावः. 10 आगमाः. 11 एकवाक्यसम्बन्धिनिःसंशये सति. 12 माहात्म्यज्ञानस्नेहाभ्यामेव न तु द्वेषेण. 13 श्वेताश्वतरश्रुति. 14 ज्ञानादेः. 15 पक्वा. 16 परिपक्वा. 17 भक्तिरहित श्रवणादिभिः. 18 विवक्षिस्तु सन्धिर्भवतीत्युक्तेः. 19 न विद्यतेऽन्योविषयो यस्याः सा. 20 याथार्थ्येन ज्ञातुम्. 21 हरिप्रसादः द्वेषसाध्यो न प्रसादत्वात् गुरुप्रसादवत् इत्यनुमानं उक्तं दृष्टव्यास्तिकम्.

SGDF
Sri Gargeshwari Digital Foundation

तमाप्नुयात्। इति दृष्टानुसारित्वमप्यस्मिन्नर्थ ईयते ॥ ‘ ये [1]पृथग्विहिता विष्णोर्गुणा वेदेन सादरम् । त एव दृष्टवैलोम्या[2]दङ्गीकार्या न चापरम्[3] ॥ [4]अन्यदृष्टानुसारेण वासुदेवेऽपि गृह्यते । दोषाभावाश्च ये वेदैरुदिता अविहाय तान् ॥ अनुक्ता अपि च ग्राह्या महातात्पर्यशक्तितः ’ । एवं बृहत्संहितावाक् सिद्धान्तो हि तदीरितः ॥ तारतम्येन तद्भक्तेष्वपि भक्तिर्विनिश्चयात्। कर्तव्यैषाऽपि तद्भक्तिर्लोकवेदानुसारतः ॥ यो हि भक्तः प्रधाने स्यात्तदीयेष्वपि भक्तिमान् । दृश्यतेऽसौ नियमतो विपरीतो विपर्यये ॥ व्यभिचारो यदि क्वापि भक्तिह्रासोऽत्र कल्प्यते । भक्तिदोषो ह्यसौ यन्न तद्भक्तेष्वपि भक्तिमान् ॥ तारतम्येन तेष्वद्धा भक्तिदृष्टानुसारतः । विष्णुप्रसादानुसारात्कार्या दोषस्तदन्यथा ॥ स्वप्रीत्यनुसृतौ प्रीतिर्लोकेऽप्यद्धैव दृश्यते । [5]तारतम्यपरिज्ञानमप्येतेनैव[6] [7]साधनम्[8] ॥ लक्ष्मीविरिञ्चवाणीशगिरिजेन्द्रा गिरां पतिः । सूर्यादयश्च क्रमशो भगवत्प्रीतिगोचराः ॥ तेषु भक्तिः क्रमेणैव कार्या नित्यं मुमुक्षुभिः । सर्वेऽपि गुरवश्चैते पुरुषस्य सदैव हि ॥ तस्मात्पूज्याश्च नम्याश्च ध्येयाश्च परितो हरिम् ’। इति षाड्गुण्यवचनादप्येषोऽर्थोऽवसीयते ॥ ‘हरिभक्तिः [9]क्रमेणैव तदीयेषु[10] हरिस्मृतिः[11] । हरिस्तुतिस्तत्स्मृतिश्च [12]तत्स्तुतिर्हरिपूजनम् ॥ तत्पूजा विहितात्याग इति मुक्तेः क्रमेण[13] हि । नियमात्साधनान्येव नित्यसाध्यानि[14] चाखिलैः ’ ॥ इति प्रवृत्तवचनं

---

[1] लोकवैलक्षण्येन. [2] दृष्टवैलोम्यमनादृत्य. [3] लोकविलक्षणं वेदानुक्तं गुणजातं नैवाङ्गीकार्यम्. [4] वेदोक्तादणुत्वमहत्वयौगपद्यादेः अन्यद्गुणजातम्. [5] देवता. [6] भक्तेषु तारतम्येन भक्तिः करणीयेतिसमर्थनेन. [7] मोक्षस्य. [8] इति सिद्धम्. [9] तारतम्येन. [10] भक्तिः. [11–12] तदीय. [13] हरौ मुख्यानि अन्यत्रामुख्यानि. [14] नित्यं कर्तव्यानि.

SGDF
Sri Gargeshwari Digital Foundation

साधनस्य विनिर्णये । [1]प्रवृत्ते पञ्चरात्रे[2] हि साधनस्य[3] विनिर्णयः[4] ॥ हरिद्वेषो न शुभदः [5]सद्द्वेषत्वाद्यथा [6]गुरोः । क्रमाद्भक्तिर्हरिप्रीतिकारणं तत्प्रियोपगा[7] ॥ भक्ति[8]र्यतो यथा स्वस्मिन्नित्याद्या युक्तिरत्र च । प्राधान्य[9]तारतम्यानुसारिणी भक्तिरुत्तमा ॥ [10]प्रीतिदैव हरेर्यस्माद्भक्तिः सा[11] [12]स्वोपगा यथा । इति वा ॥ ४१ ॥ ५ ॥ ६ ॥

॥ ॐ [13]स्वामिनः फलश्रुतेरित्यात्रेयः ॐ ॥४४॥

ज्ञानकर्मादिफलं चैषु[14] [15]क्रमोपगम् ॥ [16]स्वातन्त्र्यतारतम्येन[17] फलं हि फलिनां[18] भवेत् । अशुभं त्वशुभेऽप्येषां स्वातन्त्र्यात्प्रीतितो[19] हरेः ॥ आज्ञया [20]चान्यगं नैव भोगाय भवति क्वचित् । पुण्य[21]मेवामुमाप्नोति न देवान्पापमाप्नुयात् ॥ इत्यादिश्रुतयो मानमुक्तेऽर्थे युक्तयोऽपराः । 'उपासना[22]धर्मफलं यतो [23]देहान्तरे स्थितिः ॥ वासुदेवाज्ञया चैव[24] पूर्वकर्मानुसारतः । प्रेरयन्ति हि ते जीवान्पुण्यपापेषु नित्यशः ॥ [25]अरागद्वेषतश्चैव कथं दोषानवाप्नुयुः । हर्याज्ञाकरणादेव पुण्यमेभिरवाप्यते ॥ हरिपूजेति चोद्देशात्कथं न शुभमाप्नुयुः ॥ अतो यथाक्रमं धर्मज्ञानयोः फलमञ्जसा । सर्वप्राणिगतं देवाः प्राप्नुवन्त्याविरिश्वतः ॥ देवा एव हि देवानां विशिष्टा विनियामकाः । ब्रह्मा त्वखिलदेवानां नराणां च नियामकः ॥ अतः

---

[1] प्रवृत्तनामके ग्रन्थे. [2] पञ्चरात्रैकदेशे. [3] तन्नामकम्. [4] प्रकरणमस्ति. [5] उत्तमपुरुषद्वेषात्. [6] द्वेषः. [7-8] तत्प्रियविषयंकभक्तित्वात्. [9] उत्तमत्वम्. [10] साध्यवचनमिदम्. [11] भक्तिः. [12] स्वमुपगच्छतीति विष्णुविषयिणी. [13] स्वामिनां देवानामेव ज्ञानफलम्. [14] देवेषु. [15] क्रमेणैवोपगच्छति. [16] स्वामित्व. [17] एव. [18] फलभाजाम्. [19] प्रसादेनैव. [20] अशुभं तु इत्यन्वयः. [21] 'पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति' इति बृह. [22] जनितपुण्यफलम्. [23] देवानां प्रेरकतया. [24] जीवानाम्. [25] देवानाम्.

SGDF
Sri Gangeshwari Digital Foundation

सर्वगुणानेष प्राप्नोत्यधिकमन्यतः । द्रव्य[1]स्वातन्त्र्यविज्ञानप्रयत्नैरधिकं फलम् ॥ देवानामन्यगं[2] चापि तेषु हि ब्रह्मणोऽधिकम्' । बृहत्तन्त्रोदितं वाक्यं हरिणा [3]फलनिर्णये ॥ [4]लोकेऽप्येतादृशगुणैः फलाधिक्यं हि दृश्यते । एवं च कलिपूर्वाणामसुराणां महत्फलम् ॥ अशुभेषु सदैव स्यान्मिथ्याज्ञानादिकेषु हि ॥ 'शुभाशुभफलं देवा असुराश्च समाप्नुयुः । क्रमेणैव यथाशक्ति यथा ये ये प्रयोजकाः[5] ॥ प्रेरका अपि पापानां न देवाः पापमाप्नुयुः' । इति प्रकाशिकायां हि प्रोवाच हरिरञ्जसा ॥ ४४ ॥ ॐ [6]आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॐ ॥ ४५ ॥ ॐ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॐ ॥४६॥ 'यद्यप्येवं सुराणां च दैत्यानां च महत्फलम् । शुभाशुभेभ्य एवं च कर्तुश्च[7] स्याद्यथोदितम्[8] ॥ [9]तस्मान्निरयमानुष्यस्वर्गमुक्त्युपभोगिनः । मानुषोत्तममारभ्य[10] देवास्तु निरयं विना ॥ असुरास्तु विना मुक्तिं तमोऽन्धमपि चाप्नुयुः' । इति तत्त्वविवेकोक्तं स्वयं भगवतो वचः ॥ ४४ ॥ ७ ॥

॥ ॐ अनाविष्कुर्व[11]न्नन्वयात्[12] ॐ ॥ ४९ ॥

[13]ज्ञानदा अपि चाचार्या विशेषात्फलमाप्नुयुः । 'मुक्तावष्टगुणं शिष्याद्गुरुराप्नोति शोभनम् ॥ तद्गुरु[14]र्द्विगुणं तस्मात्सार्धं तावत्ततोऽपरे ।

---

[1] इन्द्रियादिषु स्वामित्वम्. [2] जीवगम्. [3] तन्नामकप्रकरणे. [4] कृष्यादौ. [5] तथा तथा. [6] लुप्तोपमानम् । सत्रे ऋत्विजांफलमिव प्रजानामपि ज्ञानादिफलमस्ति । [7] तु अल्पं फलम्. [8] श्रुत्याद्युक्त्यनुसारेण. [9] कर्तुः फलसद्भावादेव. [10] देवपर्यन्ता दैत्यपर्यन्ताश्च. [11] एव उपदेशं कुर्यात्. [12] उपपत्तेः. [13] पूर्ववदत्रापि पूर्वपक्षं अत्यन्तहेयत्वाभावात् प्रपञ्चेनाह. [14] सन्तानकारणत्वात्.

SGDF
Sri Gangeshwari Digital Foundation

देवाः[1] सहस्रगुणितं [2]क्रमात्तस्माद्यथोत्तरम् ॥ ब्रह्मा [3]महौघगुणितमेवं फलविनिर्णयः' । इत्याह भगवांश्छास्त्रे गुरुवृत्ताभिधे स्वयम् ॥ युक्तं च तन्न गोदाता गोमात्रफलमाप्नुयात् । 'य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः । न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतमो भुवि' । इत्याह भगवानेवमपि[4] पात्र[5]मपेक्ष्यते ॥४९॥९॥

॥ ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ॥ ॥ ५० ॥ १० ॥ ॐ एवं मुक्तिफलाऽनियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ ॥ ५१ ॥ ११ ॥ एवमेवाविरोधेन प्रारब्धस्यैव कर्मणः । ज्ञानं दृष्ट[6]फलं प्रोक्तं मुक्तिश्चैवेह [7]लभ्यते ॥ ॥ १० ॥ ११ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥ अध्यायश्च सम्पूर्णः ॥ श्लोकसङ्ख्या ॥ २७८ ॥ ७१५ ॥

---

[1] ज्ञानप्रवर्तकत्वात्. [2-3] सहस्रमहौघेत्युपलक्षणं परम्परायाः अनियतत्वात्. [4] ज्ञानदानस्य तत्सम्प्रदाय प्रवर्तनस्य च महाफलत्वेन बहूनां ग्रहणायाविष्कारेण ज्ञानदानस्य कार्यत्वेऽपि. [5] दानफलेन, अन्यथा प्रत्यवाय हेतुत्वात्. [6] दृष्टं च तत्फलं च. [7] ज्ञानजन्मनि.

SGDF
Sri Gangeshwari Digital Foundation

॥ अथ चतुर्थाध्यायः ॥

॥ ॐ ॥ समन्वयाविरोधाभ्यां सिद्धे[1] [2]वस्तुनि [3]साधने । विचारितेष्वशेषेषु साधनेषु विशेषतः[4] ॥ नित्यशः कार्य[5]मत्यन्तमवश्यम्भावि साधनम् । चिन्त्यते प्रथमं तत्र ॥ ॐ आवृत्तिरसकृदुपदेशात् ॐ ॥ १ ॥ श्रवणादिसकृत्क्रिया ॥ आवृत्तिर्वेति सन्देहे [6]कर्तव्याऽऽवृत्तिरेव हि । उपदेशोऽतत्त्वमसीत्यादिह्यसकृदेव यत् ॥ ' लिङ्गा[7]ह्लातव्यतः पूर्वमृजोर्ब्रह्म[8]त्वतः शतात् । शुश्रावोग्रतपा नाम योग्यो रुद्रपदस्य यः ॥ सार्धं परार्धं विष्णोस्तु गुणान्भक्त्या सदोद्यतः । तत्रिभागमुपासां च चक्रे संभृतमानसः ॥ दशमन्वन्तरं शक्रपदयोग्यो [9]गरुत्मतः । [10]पदयोग्यात्सुमनसः सुनन्दो नाम चाशृणोत् ॥ उपासां चक्र उद्युक्तो मन्वन्तरचतुष्टयम् । सूर्याचन्द्रमसोश्चैव पदयोग्यौ [11]सुतेजसौ ॥ सुरूपश्शान्तरूपश्च मन्वन्तरचतुष्टयम् । [12]अशृण्वतां सुमनसो मन्वन्तरमुपासताम्[13] ॥ ततः प्रोक्तास्तु ते सर्वे भक्त्योग्रतप आदयः । अपश्यन्परमं विष्णुं तत्प्रसादैधिताः सदा' ॥ इत्युक्तं विष्णुना साक्षाद्ग्रन्थे सत्तत्त्वसंज्ञिते ॥ १ ॥ १ ॥

॥ ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥ ॥ ३ ॥ आत्मेति नाम कथितं साक्षान्नारायणस्य हि । 'आत्मा ब्रह्म महांस्तारः परमेशः शुचिश्रवाः ॥ विष्णुर्नारायणोऽनन्त इति श्रीपतिरीर्यते' । इति पैङ्गिश्रुतिश्चैव तथैव परमश्रुतिः ॥ 'ओमात्मा भगवान्विष्णुरात्मानन्दोऽक्षरः स्वराट् । विश्वत्राता नृसिंहोऽजो नारायण

---

[1] सति. [2] परब्रह्मादिरूपे. [3] साधनविषये. [4] परमादरेण. [5] मोक्षसिद्धावत्यन्तम्. [6] श्रवणादीनाम्. [7] आदातव्यः शिष्यैरुपासितव्यः तस्मात्. [8] ब्रह्मत्वानां शतात्पूर्वमिति. [9-10] गरुडपद. [11] सुप्रज्ञावेव न तु मन्दौ. [12] अशृणुताम्. [13] उपासाताम्.

SGDF
Sri Gargeshwari Digital Foundation

उरुक्रमः ॥ अनसूया तथैवात्रेर्जज्ञे[1] पुत्रानकल्मषान् । दत्तं दूर्वाससं सोम[2]मात्मेशब्रह्मसम्भवान्' ॥ इति भागवते चैव[3] तस्मादात्मा जनार्दनः । तस्मादुपास्यो[4] [5]विष्णुरिति ज्ञातव्यः सज्जनैः सदा ॥ तथैवोपासते सन्तस्तथैवोपदिशन्ति च । [6]आदानार्थत्वतश्चायमात्मशब्दः पतिं वदेत् ॥ स्वामी मे विष्णुरित्येव नित्यदोपास्यमञ्जसा । 'स्वामी विष्णुरिति ध्यानं विशेषणविशेष्यतः ॥ कर्तव्यं सर्वथैवैतन्न कथञ्चन विस्मरेत्' । इति सत्तत्ववचनं षाड्गुण्यवचनं परम् ॥ 'मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च । इति ध्येयः सर्वदैव भगवान्विष्णुरव्ययः ॥ ३ ॥ २ ॥

॥ ॐ न प्रतीके न हि सः ॐ ॥ ४ ॥ प्रतीकविषयत्वेन न कार्या विष्णुभावना । प्रतीकं नैव विष्णुर्यन्मिथ्योपासा ह्यनर्थदा ॥ योऽन्यथा[7] सन्तमात्मेश[8]मन्यथा[9] प्रतिपद्यते[10] ॥ किं तेन न कृतं पापं चोरेणात्मापहारिणा' ॥ 'योऽन्यथा सन्तमात्मान[11]मन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा'[12] ॥ 'योऽन्यथैव स्थितं विष्णुमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेण ब्रह्महारिणा' ॥ 'स्वात्मानं प्रतिमां चापि देवतान्तरमेव वा । चेतनाचेतनं वाऽन्यद्ध्यायेद्यः केशवस्त्विति ॥ किं तेन न कृतं पापं चोरेणेशापहारिणा' । 'योऽन्यद्विष्णुरिति ध्यायेज्जानीयाद्वा हरिं तथा ॥ अन्धेतमसि मज्जेत्स [13]यत्र नैवोत्थितिः क्वचित्' । 'योऽन्यद्विष्णुरिति

---

[1] जनयामास. [2] विष्णुशिवब्रह्मभिः, सोमस्तु ब्रह्मणा सहभूतः. [3] आत्मशब्दप्रयोगोऽस्ति. [4] च. [5] आत्मा=विष्णुः आत्मा=स्वामी इति ज्ञातव्यः. [6] स्वीयतया आ+दा+मन् आकारलोपो दस्यचतः निर्वचनत्वात्. [7] प्रतीकभिन्नत्वादिप्रकारम्. [8] जीवानामीशम्. [9] प्रतीकत्वादिना. [10] जानाति ध्यायति च. [11] परमात्मानम्. [12] महाभारते सनत्सुजातीये २. १४. [13] पतितस्य.

SGDF
Sri Gargeshwari Digital Foundation

ध्यायेद्विष्णुरन्यदिति स्म वा ॥ अन्यथाध्यानदोषेण सोऽन्धेतमसि मज्जति' । 'योऽन्यद्विष्णुरिति ध्यायेद्विष्णुरन्यदिति स्म वा ॥ महातमसि मग्नस्य तस्य नैवोत्थितिः क्वचित्' । '[1]यत्किञ्चिदन्यथा[2]-संस्थमन्यथा[3]ध्यातमञ्जसा ॥ ध्यातुर्महादोषकरं किमु सर्वेश्वरो हरिः' । 'यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ॥ महादोषकरं विष्णुः किमु सर्वेश्वरेश्वरः' । 'यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ॥ अनर्थकारणं लोके किमु सर्वेश्वरेश्वरः । न किञ्चिदन्यथा ज्ञेयं ध्येयं वा तेन कुत्रचित् ॥ किमु सर्वोत्तमो विष्णुर्ज्ञेयो नीचतया क्वचित् । तस्माद्वस्तु यथारूपं ज्ञेयं ध्येयं च सर्वदा ॥ कारणं पुरुषार्थस्य नान्यथा भवति क्वचित्' । इति श्रुतिपुराणोक्तिबलतो न प्रतीकता ॥ ध्येया विष्णोः क्वचिद्यस्मान्मिथ्याज्ञानमनर्थदम् । इत्यभिप्रेत्य 'न हि स' इत्याह भगवान्प्रभुः ॥ प्रतीकसंस्थितत्वेन ध्येयो विष्णुर्न चान्यथा ॥ ॥ ४ ॥ ३ ॥

॥ ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ ॥ ५ ॥ ब्रह्मेति च सदा ध्येयो भगवान्विष्णुरञ्जसा । उत्कृष्टो ब्रह्मशब्दार्थः [4]पूर्णत्वं ब्रह्मता[5] यतः ॥ आधिव्याधिनिमित्तेन विक्षिप्तमनसोऽपि तु । ध्येयैव ब्रह्मता नित्यं विष्णोर्भक्त्या निरन्तरम् ॥ इति प्रकाशिकायां च वचनं विष्णुनेरितम् । नात्मेति सूत्रमीशस्य जीवत्वप्रतिपादकम् ॥ आत्मशब्दं यतो हेतुं कृत्वा जीवं न्यवारयत् । स्वशब्दात्प्राणभृच्चैव नोक्त इत्येव वेदराट् ॥ यद्यात्मशब्दो जीवे[6]ऽपि कथं स विनिवारयेत् । आत्मशब्दोदितस्तस्माद्विष्णुरेव न चापरः ॥ 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् । न वदन्ति यतो नाम्ना [7]क्वापि तैर्गुण-पूर्णता' ॥ नारायणाध्यात्मगतमिति यद्वैष्णवं वचः । यदि

---

[1] गङ्गोदकादिकम्. [2] पवित्रम्. [3] अपवित्रम्. [4] वृद्धिः. [5] ब्रह्म-शब्दप्रवृत्तिनिमित्तम्. [6] वर्तते, अथवा वर्तेत. [7] अवस्थायाम्.

SGDF
Sri Gargeshwari Digital Foundation

जीवेशयोर्वेदपतिरैक्यं च मन्यते ॥ आत्मशब्दं कथं तस्मान्निवारयति युक्तितः । भेदस्य व्यपदेशं च स्थितिं चादनमेव च ॥ भेददार्ढ्ये हेतुमाह तात्पर्यं स जगत्पतिः । [1]व्यावहारिकभेदश्चेत्क्वासावव्यावहारिकः ॥ [2]व्यावहारिकमित्येव वचनं व्यावहारिकम् । उत नेति विकल्पे तु यदि स्याद्व्यावहारिकम् ॥ [3]तस्यापि [4]बाध्यता चेत्स्याद्भेदः स्यात्पारमार्थिकः । अव्याव[5]हारिकत्वं चेद्भेदोऽयं सत्यतां गतः ॥ एकस्यासत्यतायां हि द्वयोरेव विरुद्धयोः । अन्यस्य सत्यतैव स्यादिति केन निवार्यते ॥ असत्यं नोक्तमित्युक्ते[6] सत्यमुक्तमिति प्रजाः । जानंत्युक्तं तु नो सत्यमित्युक्तेऽसत्यतामपि ॥ न स्वप्नेऽपि द्वयं मिथ्या [7]तत्रैकं सत्यमेव हि । भावा[8]भावावुभौ तत्र कथं मिथ्या भविष्यतः ॥ भावस्य हि निषेधे तु नाभावस्य निषेधनम् । [9]स्ववाचोऽसत्यता चेत्स्यात्तस्मा[10]द्भेदस्य सत्यता ॥ [11]तस्माज्जीवेशयोर्भेद[12] उक्त न्यायेन[13] गम्यते ॥ २ ॥ [14]एतस्मादात्मशब्दोऽयं [15]परमात्माभिधा[16] भवेत् । प्रतीकविषयत्वेन विष्णुदृष्टिर्न तद्भवेत् ॥ प्रतीके विष्णुरित्येव तस्मात्कार्या ह्युपासना । न च विष्णुः प्रतीकं [17]यत्तस्मा ॥ ३ ॥ न्नात्मे[18]त्युपासना[19] ॥ [20]इति पक्षो[21] यदा ब्रह्मदृष्टिश्चात्र[22] विरुध्यते । स नेति युक्तिस्तत्रापि[23] समेत्युक्तविरुद्धता ॥ यद्यप्युत्कर्षमात्रेण [24]ह्यतद्भावेऽप्युपासना । [25]उत्कर्ष आत्मनोऽपि [26]स्याच्चेतन[27]त्वादचेतनात्[28] ॥

---

1 भ्रान्तिसिद्ध. 2 भेदमात्रम्. 3 वचनस्य. 4 न केवलं भ्रान्तिकल्पितत्वम्. 5 तस्य वचनस्य. 6 प्रमिते. 7 घटतदभावयोर्मध्ये. 8 अभावतत्प्रतियोगिनौ. 9 प्रतिवादिवागर्थस्य सकलभेदमिथ्यात्वस्य. 10 व्याप्तिसद्भावात्. 11 भेदमिथ्यात्वासम्भवात्. 12 परमार्थिकभेदः. 13 द्युभ्वादिसूत्रैः. 14 उक्तन्यायात्. 15 आत्मेतिसूत्रगतः. 16 परमात्मनोऽभिधायकः. 17 यस्मात्. 18 जीव इति. 19 न कार्या. 20 न हि स उपासकः प्रतीकानीति. 21 पूर्वसूत्रव्याख्यानम्. 22 प्रतीकेषु. 23 ब्रह्मप्रतीकयोः. 24 प्रतीकानामब्रह्मत्वे. 25 अचेतनात्. 26 ब्रह्मवत्. 27 आत्मनः. 28 प्रतीकात्.

SGDF
Sri Gangeshwari Digital Foundation

तस्मादतत्वं[1] नोपास्यमिति वेदविदां मतम् । उत्कर्षाद्ब्रह्म[2]ताध्याने यदि स्यात्फलमञ्जसा ॥ ब्रह्मणो नीचताज्ञानादनर्थः किं न जायते । अचेतनस्य ब्रह्मत्वध्याने तुष्टिर्न हि क्वचित् ॥ नीचस्य[3] स्वात्मताज्ञानात्कुप्यति ब्रह्म लोकवत् । चण्डालो नृप इत्युक्ते नृपश्चण्डाल इत्यपि ॥ को विशेषः परिज्ञाते नृपेण स्यात्कथञ्चन । पुरतो नरदेवस्य चण्डालो यदि पूज्यते ॥ राजवर्त्कि न कोपस्स्याद्राज्ञो लोकेऽभिपश्यति । राज्ञस्तु पुरतः प्रोक्ते चण्डालो नृप इत्यपि ॥ आत्मानं स[4] इति प्रोक्तमितिवद्ध्येव कुप्यति । अभेदेनैतयो[5]र्ध्याने को विशेषो वचस्यपि ॥ अयं राजा त्वमित्युक्ते चण्डालेऽथ नृपेऽपि च । चण्डाल इति तु प्रोक्ते सममेव हि दूषणम् ॥ ध्यातेऽप्येकस्य[6] तद्भावे[7] [8]तद्भावोऽन्यस्य[9] किं न तत् । न चैव [10]तदविज्ञातं सर्वज्ञब्रह्मणा क्वचित् ॥ तस्मादपेशलं सर्वमन्यस्य ब्रह्मतावचः । तस्माद्यथोक्तमार्गेण ब्रह्मोपास्यं मुमुक्षुभिः ॥ ५ ॥ ४ ॥

॥ ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ ॥ १३ ॥ तथोपास्याञ्जसा[11] दृष्टं ब्रह्म पापं च भस्मसात् । करोति निखिलं पूर्वं पाश्चात्यस्याप्यसङ्गताम् ॥ करोति **॥ ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ ॥ १४ ॥** [12]तद्विषश्चैवं[13] पुण्यनाशोऽप्यसङ्गता[14] । यदेव विद्ययेत्यत्र पूर्वोक्ताद्धि विशिष्यते ॥ पूर्वं [15]स्वर्गादि लब्ध्यर्थं वीर्यवत्त्वेन चोदितम् ।

---

1 यद्यन्न भवति तत्तत्त्वेन नोपास्यम. 2 प्रतीकानाम्. 3 प्रतीकस्य. 4 सः=चण्डालः. 5 ब्रह्मप्रतीकयोः. 6 प्रतीकस्य. 7 ब्रह्मभावे. 8 प्रतीकभावः. 9 ब्रह्मणः. 10 उपासनम्. 11 आदरनैरन्तर्याभ्याम्. 12 ब्रह्मद्विषः. 13 ज्ञानिवत्. 14 उत्तरस्य पुण्यस्य. 15 मोक्षेतरपुरुषार्थं.

SGDF
Sri Gargeshwari Digital Foundation

कर्मविद्यायुतं पश्चान्मोक्षे वीर्य[1]प्रदं त्विति[2] ॥ १४ ॥ ॐ भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते ॐ ॥१९॥ [3]ततो भोगेन पुण्यं च क्षपयित्वे तरत्तथा ब्रह्मद्विट् ब्रह्मदर्शी च तमो मोक्षाववाप्नुतः ॥ 'ब्रह्मणां[4] [5]शतकालात्तु [6]पूर्वमारब्धसङ्क्षयः । ब्रह्मणस्त्वेव [7]तावत्त्वं पश्चाशद्ब्रह्मणस्तथा[8] ॥ [9]रुद्रस्य [10]विंशदेव स्यादिन्द्रस्या[11]र्कादिके दश । अन्येषां ब्रह्ममात्रस्य त्वन्त[12] आरब्धसङ्क्षयः ॥ ब्रह्मणैव [13]सहातश्च[14] परं नारायणं व्रजेत्' । इति सत्तत्त्ववचनं स्वयं भगवतोदितम् ॥ १९ ॥ ८ ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥ ॥ श्लोकसङ्ख्या ७० ॥

॥ ॐ ॥ देवानां च मनुष्याणामेतावत्सम[15]मेव हि । उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यतः ॥ कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् । फलं मोक्ष इति प्रोक्तं क्रमात्पादेषु चोदितम् ॥ स्रष्टृष्वेव च सृज्यानां प्रवेशो ब्रह्मणो[16] लये[17] । देवानां मार्ग उद्दिष्टो नार्चिरादिर्न चोत्क्रमः ॥ स्रष्टुस्तु ग्रासभूतस्य देह[18]स्तत्र[19] लयं व्रजेत् । यतः सृज्यस्य देवस्य नैवोत्क्रान्तिस्ततो भवेत् ॥ लयाच्चैवार्चिरादीनां लोकानामपि सर्वशः । कथं मार्गो भवेत्तेषां विशतामुत्तरं स्वतः ॥ जातानां मानुषे लोके देवानां तु कदाचन । उत्क्रान्तिमार्गौ भवतो न तदा मुक्तिरिष्यते ॥ अन्येषामपि[20] साक्षात्तु मुक्तिः प्राप्यापि

---

1 आनन्दातिशयप्रदम्. 2 चोदितम्. 3 अप्रारब्धक्षयानन्तरम्. 4-5 षष्ठ्या अलुक् ब्रह्मणां शतस्य कालसमासेः. 6 ज्ञानिनाम्. 7 कल्पशतेन कर्मक्षयवत्त्वं एव. 8 ब्रह्मणाकालात्पूर्वम्. 9 आरब्धसङ्क्षयः. 10 विंशतिशब्द-पर्यायोऽयम्. 11 आरब्धक्षयकालः. 12 अन्ते=अवसाने. 13 अतः परम्. 14 सहैव. 15 कर्मनाशाख्यं फलम्. 16 एव. 17 प्रत्यासन्ने सति. 18 चेतनाधिष्ठित एव. 19 स्रष्टरि. 20 परीक्षिदादीनाम्.

SGDF
Sri Gangeshwari Digital Foundation

तं हरिम् । सहैव ब्रह्मणा भूयादिति शास्त्रस्य निर्णयः ॥ 'क्ष्माऽम्भोऽनलानिलवियन्मनइन्द्रियार्थ[1]भूतादिभिः[2] परिवृतः प्रतिसंजिघृक्षुः[3] । अव्याकृतं[4] विशति [5]यर्हि गुणत्रयात्मा[6] कालं [7]परं स्वमनुभूय परः[8] स्वयम्भूः ॥ [9]एवं परेत्य भगवन्त[10]मनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः । तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयान्त्यगताभिमानाः[11]' ॥ '[12]भगवन्तमनुप्राप्ता अपि तु ब्रह्मणा सह । परमं मोक्ष[13]मायान्ति लिङ्गभङ्गेन योगिनः' ॥ 'प्राप्ता अपि परं देवं सहैव ब्रह्मणा पुनः । आनन्दव्यक्तिमायान्ति पूर्णां लिङ्गस्य भङ्गतः' ॥ इति श्रुतिपुराणोक्तिबलाद्विज्ञायते च तत् । भोगस्तु सर्वदेवानां नरादीनां च विद्यते ॥ [14]तत्र प्रवेशो देवानामुत्तरोत्तरतः[15] क्रमात् । उच्यते देहगानां च वृत्तीना[16]मेव[17]मेव तु ॥ [18]तत्र मोक्षस्वरूपं तु वादिनः प्रतिभा[19]श्रयात् । नाना वदन्ति पुंसां हि मतयो गुणभेदतः[20] ॥ पृथक् पृथक् प्रजायन्ते तमसैवान्यथामतिः । रजसा मिश्रबुद्धित्वं सत्त्वेनैव यथामतिः[21] ॥ [22]गुणातीता विमुक्तानां[23]मतिः शुद्धचितिर्यतः । सम्यगेवाथ[24] नित्या च तत्तन्माहात्म्य[25]योगतः ॥ [26]बहुला चातिविशदा स्पष्टा चैव श्रियो मतिः । महाशुद्धचितित्वेन[27] ततोऽप्यतिमहाचितिः ॥ [28]अशेषोरुविशेषा[29]णामतिस्पष्टतया

---

[1] पञ्चविषयाः. [2] भूतानामादिः अहङ्कारः तदभिमानिदेवैः. [3] संहर्तुमिच्छुः. [4] परमेश्वरम्. [5] यदा. [6] अभिमानी. [7] परसङ्ख्योपेतम् [8] क्ष्मादिभ्यः श्रेष्ठः. [9] तदा. [10] तदीयलोकम्. [11] अगतजीवभावाः. [12] भागवते ३-३३, ९-१०. [13] आनन्दाविर्भावम्. [14] द्वितयपादे प्रथमम्. [15] उत्तरोत्तरेषु. [16] वर्तते देह एताभिरिति वृत्तयोवागाद्याः जडाः तासाम्. [17] मरणकाले लयो भवतीति वागादिपदप्रयोगः. [18] तथा सति मोक्षे प्रमाणैरुपपादिते सति. [19] स्वोत्प्रेक्षामात्रेण. [20] गुणविशेषतः. [21] यथेतिभिन्नं पदं सम्यक्. [22] अतः. [23] यद्यपि. [24] अथापि. [25] योग्यतैव योगः—निमित्तं तस्मात्. [26] बहुलार्थविषयिणी. [27] गुणातीता. [28] उरु—अनन्त. [29] विशिष्यन्त इति पदार्थाः तेषाम्.

SGDF
Sri Gangeshwari Digital Foundation

दृशिः[1] । नित्यमेकप्रकारा च नारायणमतिः परा[2] ॥ सूर्यप्रभावदखिलं भासयन्ती निरन्तरा[3] । निर्लेपा[4] वीतदोषा च नित्यमेवाविकारिणी ॥ विशेषांस्तद्गतान्स्त्यक्त्वा प्रायस्तल्लक्षणा श्रियः । तथैव स्पष्टताऽभावात्तत्त्वाच्चु केवलम् ॥ न तादृशी ब्रह्मणस्तु प्रायेणैवं श्रियो यथा । मुक्तानां तु तदन्येषां समुद्र[5]तरलोपमा ॥ अग्निज्वालावदेव[6] स्यात्सृतिगानां [7]दृशो भवः[8] । एवंविधेषु[9] ज्ञानेषु तमसा मुष्टदृष्टयः[10] ॥ खद्योतसदृशा[11]त्यल्पज्ञानत्वादन्यथादृशः[12] । वदन्ति वादिनो मोक्षं नानामतसमाश्रयात् ॥ आश्रित्य प्रतिभामाह जिन[13]स्तत्रातितामसीम् । ज्ञानात्कर्मक्षयान्मोक्षो भवेद्देहाख्यपञ्जरात्[14] ॥ पञ्जरोन्मुक्तखगवदलोकाकाशगोचरः । नित्यमूर्ध्वं व्रजत्येव पुद्गलो[15] हस्तपादवान् ॥ इति[16] तत्केन मानेन मोक्षरूपं प्रदर्श्यते । गतिरूर्ध्वा च दुःखेता[17] गतित्वाल्लौकिकी यथा ॥ इत्युक्ते चानुमानैक[18]शरणस्य किमुत्तरम् । अनूर्ध्वगतिता तत्र यद्युपाधिः खगस्य च ॥ दूरोर्ध्वगमने दुःखमिति[19] साध्या[20]नुगो न सः । [21]प्रतिसाधनरूपस्य नानुमानस्य दूषणम् ॥ उपाधिः [22]प्रतिरूपं हि[23] [24]साधनं [25]तन्न चापरम्[26] । [27]अथापि [28]सशरीरत्वं चात्रोपाधिर्न वै भवेत् ॥ गतित्वं यत्र देहित्वमिति यत्साधनानुगम् । आगमाननुसारित्वे प्रसङ्गोऽयं यतस्ततः ॥

---

[1] साक्षात्कारः विषयीकारिणी वा. [2] सम्यक्त्वेऽपि गुणेभ्यः. [3] निर्भेदा. [4] कर्मसम्बन्धशून्या. [5] विशेषबलेन वृद्धि, र्‍हासवती. [6] ज्वालाया अग्नेरिव. [7] अन्तःकरणात्. [8] उत्पत्तिः. [9] सत्सु. [10] अपहृतसम्यग्ज्ञानाः. [11] अधिष्ठानसामान्यज्ञानवत्वात्. [12] विपरीतज्ञानिनः. [13] तेषु वादिषु. [14] मोक्षः. [15] जीवः. [16] आह. [17] इता=प्राप्ता. [18] एकं तत् शरणं च तथा अनुमानमेकशरणं यस्य सः तस्य. अतो न एकशब्दस्य पूर्वनिपातः. [19] हेतोः. [20] साध्यव्यापकः. [21] जिनोक्तानुमानानाम्. [22–24] प्रतिपक्षोन्नायकम्. [23] यस्मात्. [25] उपाध्याख्यम्, दूषणम्. [26] अनैकान्त्योद्भावकम्. [27] अव्याप्त्युन्नायकत्वेऽपि. [28] शरीरवृत्तित्वम्.

SGDF
Sri Gangeshwari Digital Foundation

नापसिद्धान्तता[1] दोषः प्रसङ्गे यदि सा भवेत्[2] । तदैवातिप्रसङ्गः स्यान्न प्रसङ्गः क्वचि[3]द्भवेत् ॥ लोका[4]काशगतित्वं चेदुपाधिः साधना[5]-नुगः । सोऽपीत्युक्ते वदेत्किं स तस्माद्भेदोदितो भवेत् ॥ मोक्ष एवं स्वयं विष्णुर्यद्यपीशो ह्यशेषवित् । चकार सौगतमतं मोहायैव चकार यत् ॥ असुराणामयोग्यानां वेदमार्गे प्रवर्तताम् । अतोऽसुराधिकार-त्वान्न ग्राह्यं तन्मतं क्वचित् ॥ चतुष्प्रकारं तच्चोक्तं शून्यं विज्ञान-मेकलम् । [6]अनुमेयबहिस्तत्त्वं तथा [7]प्रत्यक्षबाह्यगम् ॥ इति तत्र तु ये शून्यं वदन्त्यज्ञानमोहिताः । ते मोक्षं तादृशं ब्रूयुर्निश्शङ्कं मायिनो यथा ॥ न किञ्चिन्मुक्त्यवस्थायामात्माऽऽत्मीय[8]मथापि वा । एकस्मि-न्संसृतेर्मुक्ते न किञ्चि[9]दवशिष्यते ॥ तत्संवृत्यैव[10] [11]भेदोऽयं चेतना-चेतनात्मकः । दृश्यते संसृतेर्ध्वंसे[12] निर्विशेषैव शून्यता[13] ॥ न [14]सत्त्वं नैव चासत्त्वं[15] शून्यतत्त्वस्य विद्यते । न सुखत्वं न दुःखत्वं न विशेषोऽपि कश्चन ॥ निर्विशेषं स्वयंभातं निर्लेप[16]मजरामरम् । शून्यं तत्त्वमसंबाधं[17] नानासंवृतिवर्जितम् ॥ अशेष दोष[18]रहितं मनो-वाचामगोचरम् । मोक्ष इत्युच्यतेऽसद्भिर्नानासंवृतिदूषितम्[19] ॥ संसृत्यवस्था विज्ञेया संवृत्यैव विशिष्यते । स्थितया ध्वस्तया चैव [20]संसृतिर्मोक्ष इत्यपि[21] ॥ [22]केचित्तेष्व[23]न्यथा[24] [25]प्राहुस्संवृत्यैव

---

1 सिद्धान्तेऽपि मुक्तानां निर्दुःखत्वाङ्गीकारात्. 2 दोषः. 3 अप-सिद्धान्तस्य सर्वप्रसङ्गेषु उद्भावयितुं शक्यत्वात्. 4 लोकाकाश-सम्बन्धित्वम्. 5 अनुगच्छतीति गतित्वव्यापकः. 6 अनुमेयं बहि-स्तत्त्वम्=ज्ञानव्यतिरिक्तं यस्मिंतत् वैभाषिकमतम्. 7 सौत्रान्तिकमतम्. 8 ज्ञेयम्. 9 चेतनमचेतनं च. 10 तस्यैकस्यैवात्मनोऽज्ञानेन. 11 भिद्यत-इतिभेदः=पदार्थसमूहः. 12 ध्वंसे जाते सति. 13 शिष्यते. 14 पर-सामान्यादिरूपम्. 15 अभावप्रतियोगित्वम्. 16 धर्माधर्मरहितम्. 17 वस्त्वन्तरोपमर्दरहितमद्वितीयम्. 18 कामादि. 19 शून्यमेव. 20 यद्यपि शून्यमेव संसारो मोक्षश्च तथापि. 21 विशिष्यत एव. 22 अनेकात्मवादिनः. 23 शून्यवादिषु. 24 एकात्मवादिमतात्. 25 नानाभूतया.

SGDF
Sri Gurgeshwari Digital Foundation

त्वनेकधा[1] । अवच्छिन्नं[2] महा[3]शून्यं नाना पुद्गल[4]शब्दितम् ॥ यस्य शून्यैकरसता[5] ज्ञानात्सा त्वपगच्छति । स पुद्गल[6]त्वनिर्मुक्तो महाशून्यत्वमेष्यति ॥ संवृत्त्या यस्त्ववच्छिन्नो दुःखान्यनुभवत्यलम्[7] । इत्येवं मायिनश्चाहु[8]रेकजीवत्ववादिनः ॥ [9]बहुजीवमताश्चेति माया तेषां तु संवृतिः । निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदा ॥ सच्चित्सुखादिकं चैव किं कुतोऽखण्डवादिनः । [10]व्यावर्त्यमात्रभेदस्तु विद्यते शून्यवादिनः ॥ अनृतादेरपोहं तु स्वयमेव हि मन्यते । निर्विशेषत्वतो नैव विशेषो ब्रह्मशून्ययोः ॥ प्रामाण्यादि च वेदस्य फलतः सममेव हि । अतत्त्वावेदकं यस्मात्प्रमाणं तेन कथ्यते ॥ अतत्त्वावेदकत्वं यदप्रामाण्यं [11]सतां मतम् । [12]दीर्घभ्रान्तिकरी चेत्स्याद[13]तत्त्वावेदकप्रमा ॥ रज्जुसर्पादिविज्ञानादप्याधिक्यादमानता । स्यादागमस्यानिवर्त्यमहामोहप्रदत्वतः ॥ तलनैल्यादि[14]विज्ञानमाकाशे मानतां व्रजेत् । [15]छत्राकारत्वविज्ञानं चन्द्रप्रादेशतामतिः[16] ॥ निर्भेदत्वं तु शून्यस्य तेनाप्यङ्गीकृतं सदा । सत्त्वासत्त्वादिधर्माणामभाव उभयोर्मतः ॥ न हि [17]सत्प्रतियोगित्वं शून्यत्वं तेन[18] चेष्यते । न च दुःखविरोधित्वादन्या ह्यानन्दतेष्यते ॥ मायिना शून्यपक्षेऽपि ज्ञानं जाड्यविरोधि च । धर्माः केऽपि न सन्त्येव को विशेषस्ततस्तयोः ॥ एतादृशानां पक्षाणां दूषणं प्रभुणा कृतम् । स्वपक्षसाधनेनैव 'नाभाव' इति चोक्तितः ॥ आत्माभावे पुमर्थः क इष्टस्यात्माऽवधिर्यतः ।

1–4 अन्वयक्रमः. 5 अद्वितीयत्व. 6 कर्तृत्वादिरूपात्. 7 इति प्राहुः. 8 एको जीवो यस्मिन् लोके सः. 9 बहवो जीवा यस्मिन् तत् बहुजीव मतं येषां ते. 10 व्यावर्त्यानामसत्त्वादीनामेव भेदः न सत्यादिपदबोध्ये वस्तुनि. 11 विदुषाम्. 12 या. 13 सा. 14 तलमिन्द्रनीलं तस्य नैल्यमिव नैल्यम्. 15 आकाशे. 16 मानतां व्रजेत्. 17 सद्विरोधित्वमसत्त्वम्. 18 शून्यवादिना निर्विशेषत्वाभिप्रायेण शून्यमित्युच्यते नासत्वाभिप्रायेण तत्त्वमित्यङ्गीकारात्.

SGDF
Sri Gangeshwari Digital Foundation

यदि [1]नात्मावधिर्मोक्षो मोक्षः[2] स्याद्घटशून्यता[3] ॥ [4]कल्पिततत्वाद्विशेषाणां मायिनोऽपि समं हि [5]तत् । दृश्यमाने विशेषेऽपि यदि चेदविशेषता[6] ॥ [7]घटाभावोऽविशेषःस्यात्पा[8]श्चात्यश्चेदना[9]गतः । न मोक्षो [10]विमतो [11]यस्माददेहो घटशून्यता ॥ यथेत्युक्ते वदेत्किं स योऽनुमामात्रमानकः । न च मायी वदेदत्र पूर्वोक्तेनैव वर्त्मना ॥ अमानत्वात्श्रुतेस्तस्य न चादेहत्ववादिनी । श्रुतिः काचिददेह[12]त्वमप्राकृतशरीरताम् ॥ मोक्षे भोगं यतो ब्रूते जक्षन् क्रीडन्निति श्रुतिः । निर्दुःखत्वान्न [13]तन्मोक्षः प्रतिपन्नं[14] यथेति च ॥ [15]अनुमादूषणं किं स्याद्वादिनोः शून्यमायिनोः । [16]दुःखं दुःखादभिन्नत्वान्मोक्षोऽपि[17] स्यादसंशयम् ॥ भेदे[18] सद्वैततैव स्यादित्याद्यमितदोषतः । हेयं मायामतेनैव सह शून्यमतं बुधैः ॥ एवं विज्ञानवादोऽपि ज्ञान[19]-मात्रविशेषतः । [20]तस्यापि भङ्गुरत्वादिविशेषमपहाय हि ॥ अद्वैततामतं साक्षादुक्तदोष[21]स्ततो भवेत् । [22]कालो न[23] केवल[24]ज्ञानी

---

[1] आत्मभिन्नानां देहादीनामेव निवृत्तिरात्मनस्तु स्वरूपेणावस्थानं इति पक्षो यदि न स्यात् आत्मनोऽपि शून्यतापत्तिर्यदि स्यात्. [2] देवदत्तस्य मोक्षः स्यात् अविशेषात्. [3] अपि. [4] ननु घटशून्यता नाम न घटाभावः किं तु नष्ट आत्मा घटश्च तयोश्चाप्रामाणिकत्वेन तद्धर्माणामपि कल्पितत्वात्. [5] आत्माभाव इत्यादिकम्. [6] मोक्षत्वेनाभिमतस्य शून्यभावस्य. [7] घटशून्यताऽपि निर्विशेषा. [8] आत्मशून्यभावः व्यवहारदशातः पश्चात्तनः निर्विशेषाः. [9] व्यवहार निरूपणमनागतः= अप्राप्तस्तु, घटशून्यभावोऽपि निर्विशेष एव, व्यवहारदशायामेव तस्य सविशेषत्वात्. [10] शून्यभावो ब्रह्मभावो वा. [11] अदेहत्वात्. [12] अशरीरं वाव सन्तमित्यत्र. [13] तत्, शून्यत्वं ब्रह्मत्वं वा. [14] घटशून्यत्वम्. [15] प्रत्यनुमायाः. [16] दुःखात्मकः. [17] मोक्षः, शून्यं ब्रह्म वा. [18] दुःखात् शून्यब्रह्मणोर्भेदे. [19] ज्ञानमात्ररूपविशेष द्वितीयार्थेतसिः. [20] ज्ञानस्य. [21] समः. [22] मोक्षकालः. [23-24] अद्वितीयज्ञानवान्न-भवति.

SGDF
Sri Gargeshwari Digital Foundation

कालत्वात्प्रतिपन्नवत्[1] ॥ एतयाऽनुमया रोधा[2]न्न [3]तादृङ्मोक्षरूपता ।
यदि कालोऽपि नेत्याह[4] कदेति प्रश्न उत्तरम् ॥ किं वक्ष्यति
यदाऽवस्थां वदेत्सा[5] पक्षतां व्रजेत् । अवस्थात्वादिति ह्येव हेतुः
[6]साऽपि कदेति च ॥ पृष्टे कालश्च वक्तव्यो नाकालत्वं ततो भवेत् ।
न काल इति [7]सामान्यनिषेधे[8] [9]कालगप्रमा ॥ निरुणद्धि समश्चायं
त्रयाणा[10]मुक्तवादिनाम् । एकजीवत्वपक्षे तु कालाभावादियं [11]प्रमा ॥
कुपिता[12] कालमाधाय[13] द्वैतमेवोपपादयेत् । विमतः प्रपञ्चवान्कालः[14]
कालत्वात्प्रतिपन्नवत् ॥ इति चान्यानुमैकत्वं जीवस्य[15] विनिवारयेत् ।
[16]कालशब्देश्वरैकत्वमतान्यप्येवमेव हि ॥ निराकृतानि तेषां च
समत्वा[17]त्पक्षदोषयोः । [18]ज्ञानं स्वरसभङ्ग्येव नित्यसन्तान[19]मिष्यते ॥
बौद्धाभ्यामपराभ्यां तु तत्राप्युक्तानुमा रिपुः । मोक्षो न [20]शुद्ध-
विज्ञानसन्तानी काल[21]गत्वतः ॥ प्रतिपन्नो[22] यथेत्येतदनुमानं तदुत्तरम् ।
अनुमानानि सर्वाणि प्रतिसाधन[23]योगतः ॥ निषिद्धान्युक्तभङ्ग्यैव
श्रुतयश्चास्मदुक्तिगाः । साङ्ख्यनैयायिकाद्याश्च प्राहुर्मोक्षं च निःसुखम् ॥
इच्छाद्वेषप्रयत्नादेरपि सर्वात्मना लयम् । तत्राहुर्नैतदप्यत्र शोभनं
श्रुतयो यतः ॥ महानन्दं च भोगं च नियमेन वदन्ति हि ।

---

[1] वर्तमानकालवत्. [2] विरोधात्. [3] तादृक् मोक्षरूपं यस्य सः तस्य भावः आत्मनः. [4] विज्ञानवादी. [5] कालभावाधिकरणत्वेन. [6] मोक्षावस्था. [7] सामान्यतो. [8] क्रियमाणे सति. [9] साक्षी. [10] प्रत्युक्तानाम्. [11] एकमुक्तिरेवसर्वमुक्तिः एकस्मिन् मुक्ते न किञ्चिदवशिष्यते इति पक्षे. [12] विरोधिनीसती. [13] उपपाद्य. [14] मोक्षकालः. [15] एकत्वम्. [16] कालानुविद्धत्वेन, वैयाकरणमते शब्दानुविद्धत्वेन, सर्वस्य प्रतीयमानत्वात् शिवैकत्वमतं च. [17] मतस्य, जीवनाशाङ्गीकारात् परमेष्ट नाशेऽपुरुषार्थत्वापत्तिदोषस्य च. [18] ज्ञानमेवात्मा. [19] तत्सन्तानो-नित्यः इति वैभाषिकैः सौत्रान्तिकैस्तु संसारे साकारत्वं मुक्तौ निराकारत्वमिति. [20] निर्विषयचित्तसन्तानसम्बन्धी. [21] कालसम्बन्धित्वात्. [22] संसारः. [23] प्रतिपक्षानुमानसम्बन्धात्.

SGDF
Sri Gargeshwari Digital Foundation

प्राकृतप्रियहानिस्तु प्रियास्पृष्टिरितीर्यते ॥ [1]अप्रियं प्रति[2]कूलं तद्-विशेषेण[3] शब्दितम् । नास्ति ह्यप्राकृतं दुःखं सतो[4] जीवस्य कुत्रचित् ॥ प्रियं[5] स्वरूपमेवास्य बलानन्दादिवाक्यतः । [6]हेयत्वाद[8]प्रियस्यैव[7] [9]प्रियहानेरनिष्टतः[10] ॥ न समस्तप्रियाभावो मोक्षे प्रोक्ते[11] तु [12]युज्यते । अप्रियस्य स्वरूपत्वमसुरेष्वेव हि श्रुतम् ॥ असुरा नैवमेवं च नैवं चाखिलमानुषाः । इत्यात्मप्रियहानाय को यतेत च बुद्धिमान् ॥ [13]संज्ञा नास्तीत्यपि[14] ह्यस्य[15] नामुक्तज्ञेयतेति हि[16] । धर्मानुच्छित्ति-मेवास्य यतो वक्त्युत्तरश्रुतिः[17] ॥ [18]आशङ्क्यास्य ज्ञानहानिं मैत्रेय्या मोह[19]माह माम्[20] । भवानित्युक्तवत्या[21] हि नाहं मोहं वदामि ते ॥ इत्युक्त्वा याज्ञवल्क्यो हि स्वरूपानाश[22]मूचिवान् । ज्ञानरूपस्य विज्ञान-नाशस्तन्नाश एव यत् । इति शून्यमतोच्छित्त्यै पुनरानन्दपूर्वकान् ॥ धर्मानाहाप्यनुच्छिन्नांस्तार्किकैर्विनिवारितान् । [23]मात्रा संसर्गमप्याह तथा माध्यन्दिनश्रुतिः[24] ॥ आचिक्षेप[25] मतं तच्च यस्मिन्न विषया[26]दनम् । [27]घ्राणादिभोगाभावस्य त्वनिष्टत्वहृदा श्रुतिः[28] ॥ येनेदमखिलं वेद [29]विज्ञातारं स्वमेव च । केन तं[30] च विजानीया-[31]दित्यनिष्टं च सर्वथा ॥ नाखिलज्ञापको विष्णुरज्ञेयो नियमेन हि ।

---

[1] सर्वमपि दुःखम्. [2] मुमुक्षोः. [3] प्राकृतेतिविशेषणराहित्येन. [4] मुक्तियोग्यस्य. [5] सुखम्. [6–7] एव. [8] दुःखस्य. [9] सुख. [10] अनिष्टत्वात्. [11] अशरीरंवावसन्तं न प्रियाप्रिये स्पृशतः इति श्रुतौ. [12] व्याख्यातुम्. [13] एवं सुखास्पृष्टिश्रुतिं व्याख्याय ज्ञानाभाव श्रुतिं व्याख्याति ॥ संज्ञेति ॥. [14] श्रुतिः. [15] अमुक्तस्य. [16] एव वक्ति. [17] अनुच्छित्ति धर्मेति. [18] न प्रेत्य संज्ञाऽस्तीति श्रुत्या. [19] मोहकम्. [20] मां प्रति. [21] चोदितः. [22] 'अविनाशी वा अरेऽयमात्मा'. [23] मीयन्ते इति रूपादिविषयः. [24] न काण्वश्रुतिः 'यत्र हि द्वैतमिव भवति' इति. [25] अतो न ज्ञानलोपः. [26] रूपादिविषयभोगः. [27] घ्राणादिना गन्धादि. [28] 'यत्र हि द्वैतमिव भवति' इति. [29] तं च केन. [30] 'विज्ञातारमरे केन विजानीयात्'. [31] इति वाक्यद्वयोक्तम्.

SGDF
Sri Gangeshwari Digital Foundation

तज्ज्ञानार्थं हि वेदानामखिलानां प्रवर्तनम् ॥ [1]प्रत्यक्षमात्म[2]विज्ञानाविरोधानुभवादपि । न स्वविज्ञानितायां च विरोधः कश्चनेयते ॥ कर्तृकर्मविरोधश्च [3]नित्यानुभवरोधतः । कथमेव पदं गच्छेद्विरोधोऽ[4]दृष्टबाधनम् ॥ 'सोऽश्नुते सर्वकामांश्च कामान्नी कामरूप्यथ' । इत्यादि श्रुतयश्चोक्त[5]मर्थमेव वदन्ति हि ॥ अस्वातन्त्र्यादिवेत्युक्तं न द्वैताभावतः क्वचित् । [6]आत्मैवाभूदिति ह्यस्मादविशेषप्रसङ्गतः[7] ॥ 'अस्वातन्त्र्योपमाऽभेद[8]भेदेष्विव उदीरितः' । शब्दतत्त्व इति प्रोक्तं मैत्रेय्युक्तो[9]त्तरं च किम् ॥ सुखादिधर्महानौ[10] तु मुक्तेः किं च प्रयोजनम्[11] । [12]यद्यर्थो दुःखहानिः स्यादनर्थः[13] सुखनाशनम् ॥ तयोश्च दुःखहानाद्धि सुखनाशोऽधिको भवेत् । प्राप्यापि दुःखं सुमहत्सुखलेशाप्तये [14]जनः ॥ यतते [15]सुखहानौ हि को[16] मोक्षाय यतेत्पुमान् । अल्पाच्च सुखनाशाद्धि बिभेत्यतितरां जनः ॥ महच्च दुःखमाप्नोति सुखनाशनिवृत्तये । न च रागनिमित्तं तद्वीतरागा अपि स्फुटम् ॥ नारदाद्याः सुखार्थाय सहन्ते दुःखमञ्जसा । युद्धादिदर्शनं यस्मात्सुदुःखेनापि कुर्वते ॥ '[17]यदेन्द्रवैरोचनयोर्ब्रह्मास्त्राभ्यां सुतापिताः । अपि नैवाजहुर्युद्ध[18]रसात्ते नारदादयः' ॥ इति स्कान्दवचस्तस्मात्सुखा-

---

[1] क्रियाविशेषणमेतत्. [2] आत्मकर्मकज्ञानं च तत्राविरोधश्च तयोः. [3] साक्षी. [4] यत्रादृष्टबाधनम्, प्रमाणविरोधाभावस्तत्रैवायं कर्तृकर्म विरोधः प्रवर्तते यथाङ्गुल्यग्रेणाङ्गुल्यस्पर्शने. [5] मुक्तस्य भोगवत्त्वरूपम्. [6] यत्र त्वस्य सर्वम्. [7] पौनरुक्त्यापत्तेः. [8] अभेदभेदेति प्रतियोगिद्वयोपलक्षणम्. [9] अन्यथाव्याख्याने मैत्रेय्युक्तस्य ज्ञानाभावनिन्दनस्य किमुत्तरम्. [10] मुक्तित्वेनाङ्गीकृतायाम्. [11] प्रयुज्यते प्रवर्त्यते, पुरुषोऽनेनेति, मुक्त्यर्थे प्रवर्तकं किमपि नास्ति. [12] अर्थः, अर्थनीयः. [13] अप्यस्ति. [14] जाङ्घिकादिः. [15] अल्पस्यापि सुखस्य. [16] महतोऽदुःखस्यापि । अभ्युपगमवादश्चायं नहि सांसारिकसुखस्य दुःखापेक्षयाऽल्पत्वं तथाऽपि शास्त्रेषु तन्निन्दा मोक्षसुखमपेक्ष्यालपत्वाभिप्रायेण. [17] यतः. [18] दर्शननिमित्तसुखात्.

SGDF
Sri Gargeshwari Digital Foundation

भावाय को यतेत् । [1]विमतो दुःखयुग्यस्माच्चेतनः संत्सुखोज्झितः ॥ प्रति[2]पन्नो यथेत्येव चानुमा केन वार्यते । सर्वश्रुतिपुराणेषु सुखभावो[3]क्तितस्तथा ॥ मुक्तौ न ग्राह्यमेवैतत्सुखाभावमतं बुधैः । 'सोऽनानन्दाद्विमुक्तस्सन्नानन्दी भवति स्फुटम्' ॥ 'निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः । परमानन्दमाप्नोति [4]यत्र कामोऽवसीय[5]ते'[6] ॥ 'न विष्णुसदृशं दैवं न मोक्षसदृशं सुखम् । न वेदसदृशं वाक्यं न [7]वर्णोङ्कारसम्मितः[8]' ॥ 'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ताः[9] [10]कामास्तत्र माममृतं कृधि'[11] ॥ इति श्रुतिपुराणानि [12]तत्र तत्र वदन्ति हि । अतो मोक्षे सुखाभाव इति यत्किञ्चिदेव[13] हि ॥ शिरः कराद्यभावश्च न मुक्तस्य भवेत्क्वचित् । श्रुतयश्च पुराणानि मानमत्र बहूनि च ॥ 'न वर्तते यत्र रजस्तमस्तयोः[14] [15]सत्त्वं च मिश्रं[16] न च कालविक्रमः[17] । न यत्र माया[18] किमुतापरे[19] हरेरनुव्रता यत्र [20]सुरासुरार्चिताः ॥ श्यामावदाताः[21] शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः[22] सुपेशसः[23] । सर्वे चतुर्बाहव [24]उन्मिषन्मणिप्रवेकनिष्काभरणाः [25]सुवर्चसः ॥ [26]प्रवालवैदूर्यमृणालवर्चसां परिस्फुरत्कुण्डल[27]मौलिमालिनाम् । भ्राजिष्णुभिर्यः[28] परितो विराजते लसद्विमानावलिभिर्महात्मनाम् ॥ विद्योत[29]मानप्रमदोत्तमाभिः

---

[1] मुक्तत्वेन परमसम्मतः. [2] नारकी. [3] सत्त्व. [4] परमानन्दे प्राप्ते. [5] अवसानं गच्छति. [6] भागवते भगवद्वाक्यम्. [7] वर्णेत्यविभक्तिको निर्देशः. [8] पुराणे. [9] विषयाः. [10] पर्याप्ताः. [11] ऋग्वेदे ९-११३-११. [12] प्रदेशे. [13] फल्गु, अल्पम्. [14-15-16] तत्सहचरितम्. [17] सामर्थ्यकृतो वस्तुविकारः. [18] प्रकृतिः. [19] महदाद्याः. [20] असुराः साधवः सन्ति. [21] निर्मलाः. [22] सुप्रभाः. [23] सुरूपाः. [24] रश्मिमद्रत्नप्रवरहाराभरणाः. [25] सुबलवन्तः हरेरनुव्रताः. [26] केचित्प्रवालवर्चस इत्यादि. [27] कुण्डलमौलयश्च ते मालिनश्च. [28] यः, लोकः. [29] विद्योतमानाः प्रमदोत्तमा यासु, यद्वा विद्योतमानाभिः प्रमदाभिः.

SGDF
Sri Gurgeshwari Digital Foundation

सविद्युदभ्रावलिभिर्यथा नभः । श्रीर्यत्ररूपि[1]ण्युरुगाय[2]पादयोः करोति [3]मानं [4]बहुधा [5]विभूतिभिः'[6] ॥ 'ऋचान्त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः' ॥ कामान्नरूपी चरतीति[7]पूर्वश्रुत्या [8]पुराणोक्तिभिरप्यदोषः । देहः [9]स्वरूपात्मक एव तेषां मुक्तिं गतानामपि चेयते हि ॥ शिरः कराद्यैरपि मुक्तिभाजो युक्ता यतस्ते पुरुषा[10] इदानीम् । [11]यथेति पूर्वा अनुमाश्च [12]जीवस्वरूपमङ्गादिकमावयन्ति[13] ॥ न ब्रह्मरूपत्वममुष्य देहिनो मुक्तावपि स्यात्प्रमया[14] [15]कथञ्चित् । स ब्रह्मणा सहितोऽशेषभोगान्भुङ्क्ते [16]तथोपेत्य सुखार्णवं तम् ॥ यत्तत्परं ज्योतिरुपेत्य जीवो निजस्वरूपत्वमवाप्य कामान् । भुङ्क्ते स देवः पुरुषोत्तमोऽज आत्मेति चोक्तो गुणपूर्तिहेतोः ॥ सेतुः[17] स देवोऽखिलमुक्तिभाजामुता[18]मृतस्येष्ट इहेशिता यत् । इत्यादिवाक्यै[19]र्भगवद्दृशः[20] सन् भुङ्क्तेऽखिलान् मुक्तिगतोऽपि भोगान् ॥ कालोऽ[21]प्यसौ नैक्ययुतः परेण जीवस्य कालो [22]यत एष [23]यद्वत् । इत्यादिका अप्यनुमा प्रमाणं मुक्तौ च जीवस्य परत्वरोधे[24] ॥ कथं च यः[25] [26]पूर्वमसौ[27] न[28] पश्चा[29]द्भवेत्स एवेत्यपि [30]युक्तिमेति । यतो न दृष्टं [31]यदभून्न पूर्वं

---

[1] प्रत्यक्षा. [2] उरुभिर्ब्रह्मादिभिर्गीयमानस्य. [3] पूजाम्. [4] स्थिताभिः. [5] स्वभूर्तिभिः. [6] एवंभूतं लोकं सन्दर्शयामास. [7] इत्येषा पूर्वायस्याः. [8] श्यामावदाता इत्यादिना देहः प्रतीयते. [9] जीवस्वरूपमेव आत्मा स्वरूपं यस्य. [10] आत्मत्वात्. [11] अस्मदादिवत्. [12] मुक्तजीवस्वरूपम्. [13] करणे कर्तृत्वोपचारः। आपयन्तीति क्वचित्पाठः. [14] मुक्तावपि भेदे. [15] केनापि प्रमाणेन साधनेन वा, प्रमाणेन. [16] श्रुतिसमुच्चयेन. [17] अमृतस्यैष सेतुः. [18] उतामृतत्वस्येशानो. [19] ज्ञायते. [20] तत्समीपं प्राप्तोऽपि. [21] मोक्षसम्बन्ध्यपि जीवस्य परेण यदैक्यं तद्युतो न भवति. [22] कालत्वात्. [23] संसारकालवत्. [24] मुक्तावपि जीवस्य परब्रह्मत्वनिवारणे. [25] जीवः. [26] संसारे. [27] परमात्मा. [28] भवति, असौ. [29] मुक्तौ. [30] अनुमानसमुच्चय. [31] किंचिद्घटादिकम्.

SGDF
Sri Gargeshwari Digital Foundation

पश्चात्तदा[1] सेति[2] कुतश्च[3] किञ्चित् ॥ नचैव मुक्तेन हरेः पृथक्त्वमैक्यं तथा स्यादिति [4]युक्तिमेति । यतो न कुत्रापि भिदाऽभिदा च दृष्टा [5]चितश्चेतनया कुतश्चित्[6] ॥ इत्थं [7]मतानि भ्रम[8]जानि यस्मा[9]न्मोक्षं समुद्देश्य[10]मपि भ्रमेण । विदुर्न सम्यग्यदपीह[11] लौकिकाः सुखं मम स्याद्धि सदेति[12] जानते[13] ॥ ८ ॥

औदार्यमुच्चावचशक्तिरात्मस्वरूपदार्ढ्यं च निजस्वभावः । स्वातन्त्र्यमापूर्णविशेषयोग्यता विरोधहानिश्च चतुर्थपादे ॥ व्यवस्थितिस्त्वविशेषस्थितिश्च निषेधसामान्यविधिक्रियाणाम् । विभक्तता चात्वरयैव सिद्धि[14]र्विपक्षसंप्राप्तिविरुद्ध[15]हेतवः[16] ॥ सुशक्यता शश्वदतिप्रसिद्धिर्विवेक विन्यास विचारसंज्ञाः । नानाप्रवृत्तिः कृतकृत्यता च विपक्षतर्काः [17]समतीतपादे ॥ महाफलत्वं प्रविविक्तता च सन्धिग्रहः साधनमाप्तकृत्यम् । विशेषकार्यं कृतिसंस्थितिश्च सुयुक्तयो निर्णयगाः[18] [19]स्वपक्षे ॥ व्यामिश्रता कार्यकरत्वमर्थक्लृप्तिः सुदार्ढ्यं परतन्त्रता च । समानधर्मः कृतशेषता च लोकोपमा पूर्वमतानुसाराः ॥ विशेषसाम्यश्रुतिराढ्यता च समानलोपो महिमाविशेषः । कृतार्थता शश्वदनुप्रवृत्तिः सिद्धान्तनिर्णीति[20] विशिष्टहेतवः ॥१॥ ॐ नैकस्मि[21]न्दर्शयतो हि ॐ ॥ ६ ॥ प्रधानवायु[22]स्त्वि[23]ह वायुनामा भूतेष्विति

---

[1] ऐक्यमापन्नम्. [2] न दृष्टम्. [3] कारणात्. [4] च मतं युक्तिं नैवैति. [5] चेतनस्य. [6] प्रमाणात्. [7] जैनादि. [8] विप्रलम्भजानिच. [9] मतानां प्रणेतारः. [10] प्रधानोद्देश्यम्. [11] प्राणिषु. [12] स्वोद्देश्यम्. [13] न तु वयमेव न भूयास्मेत्यादि, अतस्तेभ्योऽप्येते मन्दाः. [14] विरुद्ध इतिपाठे सम्प्राप्तिशब्दः करणसाधनः. [15] कृतां निरोधः. [16] पूर्वं संप्राप्तिंकुर्वतीनांयुक्तीनां निवारकाहेतवः. [17] चतुर्थस्य प्रथमे. [18] सिद्धान्त विषये. [19] निर्णयहेतवः सुयुक्तयः. [20] निर्णीतो विशिष्ट. [21] अग्नौ सर्वे देवा विलीयन्ते किंतु पञ्चस्वपि भूतेषु. [22] तुशब्दोऽवधारणे. [23] "वायाविन्द्र" इति श्रुतौ.

SGDF
Sri Gangeshwari Digital Foundation

प्रोक्तगतो[1]ऽपि युक्त्या[2]। यस्मात् श्रुतौ [3]पवते चेति[4] [5]भूरिप्रोक्तो [6]यतो भूत[7]मानी च सो[8]ऽपि ॥ महामानी[9] त्वल्पमानी च यस्मात्तच्छ[10]ब्दे-नाप्युच्यते[11] तेन सोऽपि ॥ ६ ॥ ५ ॥

॥ ॐ तानि परे [12]तथा ह्याह ॐ ॥ १५ ॥

तस्मिन्लयं यान्ति [13]भूतान्यशेषक्रमाविरोधेन स एव विष्णौ[14]। इन्द्रादीनां [15]तत्र लयः क्रमं तु प्रोक्तं विशेषा[16]दनुसृत्य[17] नान्यत् ॥ तस्मादशेषा गिरिजां[18] प्रविश्य तयैव [19]रुद्रं सह तेन वाणीम्। तया पतिं प्राप्य सहैव तेन लयं हरौ यान्ति समस्तजीवाः ॥ सोमस्तु वारीश[20]युतोऽनिरुद्धं विशत्यसौ काममसौ तु वारुणीम्। सा शेषदेवं स गिरं च सैव वायुं विशत्यञ्ज इतीह निर्णयः ॥ उमागिरीशाविति भारती[21]राविति स्म वाग्वेदगता ब्रवीति। अहीन्द्रपत्नीमहिपं विरिञ्च-पत्नी विरिञ्चं च विमुक्तिकाले[22] ॥ त एव [23]यत्तत्पदमाप्नुवन्ति [24]तत्काल [25]एतान्समुपास्य जीवाः। ब्रह्मत्वकाले[26] प्रविशन्ति चैता[27]निति स्म वाक्ताद्दृशतामुपैति ॥ सूर्योऽग्नियुक्तो गुरुमाप्य तेन शक्रं सहैतेन सुपर्णपत्नीम्। तया सुपर्णं सह तेन वाणीं ब्रह्माणमेतद्गत एव याति ॥ इन्द्रप्रवेशस्तु [28]यदोच्यतेऽत्र [29]तदा ह्युमेत्येव सुपर्णपत्नी। उक्ता

---

1 भूतेषु देवानां लय इत्यत्रार्थे प्रोक्तं सूत्रकृता गृहीतं श्रुतिवाक्यं तद्गतोपि. 2 उत्तमानामिन्द्रादीनामधमे भूतवायौ लयानुपपत्तेः इति. 3 सा वा-एषादेवताऽनादिर्योयं पवते. 4 अन्यासु श्रुतिष्वपि. 5 भूरित्वेन सकलजीवोत्तमत्वेन. 6 तस्मात्तस्मिन्निन्द्रादीनां प्रलयोपपत्तेः. 7 अतो भूतनामा. 8 प्रधानवायुरपि. 9 सर्वाभिमानी. 10 भूतशब्देन. 11 न केवलं वायुशब्देन. 12 परमात्मनि लीयन्ते. 13 भूताभिमानि प्रभृति दैवानि. 14 लयं याति. 15 प्रधानवायौ. 16 विशेषवाक्येन. 17 व्याख्यातव्यः. 18 सौपर्णीम्. 19 शेषगरुडौ. 20 वरुण. 21 ईर=समीरः. 22 प्रतिपादनावसरे. 23 यस्मात्. 24 उमात्वादिकाले. 25 उमादीन्देवान्. 26 वाय्वादीनाम्. 27 वारुण्यादीन्. 28 यत्र. 29 तत्र.

SGDF
Sri Gangeshwari Digital Foundation

सुपर्णश्च गिरीशनाम्ना ततो विरोधश्च न कश्चनात्र ॥ भृग्वादयो दक्षमवाप्य तेन प्राप्येन्द्रमेतेन सुपर्णपत्नीम् । [1]विशन्ति ये मनवो राजमुख्या मनुं प्रविश्यात्र गता महेन्द्रम् ॥ आकाश उर्वी च गुरुं प्रविश्य तेनैव यातः पुरुहूतदेवम् । [2]सनादयो यतयः काममेव विशन्ति शिष्टा अपि हव्यवाहम् ॥ वर्णाश्रमाचाररता मनुष्या धर्मं मनुं सोऽपि समेति काले[3] । [4]तमेव सर्वे पितरस्सुरानुगास्सर्वे कुबेरं स च सोममेव ॥ विमुक्तिकाले प्रविशन्त्यभीक्ष्णं[5] भोगांश्च तद्देहगताः प्रभुञ्जते । आनन्दसुव्यक्तिरमुत्र[6] तेषां भवत्यत[7]श्चेष्टत[8] एव निर्गताः ॥ क्रीडन्ति भूयश्च समाविशन्ति [9]तानेव सायुज्यमिदं [10]वदन्ति । सायुज्यहीनास्तु लये तु[11] सर्वे प्रोक्तेन मार्गेण विशन्ति [12]सृष्टौ ॥ [13]बहिश्च निर्यान्ति [14]ततोऽन्यदापि सायुज्यभाजां भवति प्रवेशः । उक्तं समस्तं परमश्रुतौ हि प्रोक्तं च [15]सर्गक्रमतो विपर्ययः ॥ मुक्तौ [16]लये यद्वदथो लयश्च विपर्ययेणेत्यवदद्गिरां प्रभुः । लयो यतो मुक्तिरियं सुराणां भोगो विशेषेण[17] च [18]यं वदिष्यति ॥ उक्तश्च बिम्बप्रतिबिम्बभावः पैङ्गिश्रुतावुक्तलयानुसारतः । बिम्बे लयो यन्नियतश्च मुक्तौ चिदात्मनां तद्वशता च सर्वदा ॥ तेजोऽभिधां[19] तु श्रियमाप्य[20] विष्णुमग्रे[21] ततः[22] पुत्रतयैव[23] वायुः । आप्तः प्रसूतः पुनरेव विष्णुं प्रविश्य मुक्तः प्रलयेऽत्र तिष्ठति ॥ सर्वेऽपि ते मुक्तगणा

---

[1] उभयत्रसम्बन्धः. [2] सनत्कुमारव्यतिरिक्ताः. [3] मोक्षकाले. [4] धर्ममेव. [5] आविष्टग्रहवत्. [6] उत्तमेषु प्रवेशेन. [7] उत्तमेभ्यो निर्गताश्च. [8] इच्छया. [9] पूर्वं प्रविष्टान्. [10] पुराणादीनि. [11] तु-एव. [12] उत्तमान्. [13] तेभ्यः. [14] लयकालात्. [15] मुक्तौ. [16] साधारणप्रलये. [17] देवपदादप्यतिशयेन. [18] भोगम्. [19] तेजः-शब्दस्य लक्ष्मीवाचित्वात. [20] तत्रलीनो भूत्वा. [21] सृष्टिकाले जाते सर्वेभ्यः पूर्वम्. [22] विष्णोः. [23] हिरण्यगर्भतया प्रसूतः.

SGDF
Sri Gargeshwari Digital Foundation

अमन्दसान्द्रं निजानन्दमशेषतोऽपि । भुञ्जन्त[1] एवासत ईशदेहे लयेऽथ सर्गे बहिरेव यान्ति ॥ प्रयाति धर्मं निर्ऋतिस्तु शक्रं मरुद्गणाः पारिषदास्तथैव । सर्वेऽनिरुद्धं पृतनाधिपाद्यास्तुरश्रुतिर्हीत्थमियं[2] विमुक्तितः ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥ ॥ १४८ ॥ २१८ ॥

॥ ओँ ॥ [3]उत्क्रान्तमार्गश्च विमुक्त[4]गम्यं पादोदितम् ॥ ८ ॥ सुक्रमविक्रमौ च ॥ सान्तानिकप्राप्तिरभीष्टता च सौकर्यमित्यन्य[5]मतस्थ तर्काः । विशेष सम्प्राप्तिरुरुत्वमाप्तिः क्रमानुरागः कथितानुवृत्तिः ॥ सिद्धान्तनिर्णीतिकराः[6] ॥ **ओँ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ओँ ॥ १५ ॥** प्रतीकं [7]देहादिकं [8]तद्गतमेव ये नराः । उपासते ते पुरत[9]स्समाप्नुयुर्ब्रह्माणमस्मान्मति[10]माप्य विष्णुम् ॥ प्राप्स्यन्त्यतोऽन्येऽ[11]पि तमाप्य तस्माद्धरिं गता मुक्तिभाजः परान्ते[12] ॥ १५ ॥ ६ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य तृतीयः पादः ॥ ४ ॥ ३ ॥ श्लोकसङ्ख्या ३ ॥ २२१ ॥

॥ ओँ ॥ अतिक्रमोक्तिः कृतिरर्थलाभः परागतिः पारगतिस्तदोकः । समस्तकार्ये वशिता च विश्वसम्भावना युक्तयस्त्वन्यपक्षे ॥ सामान्यरूपं प्रतिभानमुक्तिराश्चर्यता कृत्रिमतास्तदोषः । विशेषकॢप्तिः

---

[1] अनुभवन्तः. [2] देवादीनां देहलयरूपा. [3] देहादुत्क्रान्तानां मानुषाणां मार्गः विष्णुलोकगमनार्थः. [4] कर्मणो देहाच्च विमुक्तानां सर्वेषां प्राप्यम्. [5] मतानाम्. [6] तर्काः. [7] मनःप्रभृति. [8] प्रतीकगतं, विष्णुम्. [9] प्राक्प्रलयकालात्. [10] भगवज्ज्ञान विशेषम्. [11] व्याप्तोपासकाः. [12] परान्तकाले.

SGDF
Sri Gargeshwari Digital Foundation

कृतनिश्चयश्च माहात्म्यमित्येव सुनिर्णयार्थाः ॥ ८ ॥ ॐ [1]अत एव [2]चानन्याधिपतिः ॐ ॥ ९ ॥ अनन्यभृत्यत्वमिहोदितेभ्य[3]-स्त्वन्यस्य भृत्यत्वनिवारणाय[4] । पतिं [5]यदेषामपि विष्णुमाह ह्युतामृतत्वस्य पतित्ववाग्घरेः ॥ [6]एते[7]ऽपि चान्याधिपतित्वयुक्ता विष्णवन्यचित्त्वेन[8] यथा पुमांसः । प्रसिद्धिभाजस्त्विवति चानुमैव [9]ह्यभीष्ट-[10]सिद्ध्यै भवतीह[11] निश्चयात् ॥ मुक्तस्वकीया[12]वरयन्तृतास्ति मुक्तावपि ब्रह्मपुरस्सराणाम्[13] । [14]अनेन देवेन तथामुना[15] च हीष्टे परा[16]र्वाक्तनलोकिनामिति[17] ॥ फलं [18]श्रुतिर्ज्ञानत आह मुक्तावेतच्च सर्वाशुभानाशलिङ्गात् । लोकाधिपत्यं च विधातुरेव सर्वात्मनेत्याह [19]तुरश्रुतिश्च ॥ सर्वे बलिं देवगणा वहन्तीत्येतच्च नान्यस्य तु युक्तिमेति । लोका इतीहापि[20] तु लोकिनां [21]वचो लोका इति ह्येव रवः[22] प्रजासु ॥ प्रयुज्यते सर्वजनैः[23] सदैव तन्मानिनो[24] लोकपदेन चोक्ताः । तद्वास्तु[25] मुक्ता इह लोकशब्दा अन्योऽन्यनाथा इति पैङ्गिनां श्रुतिः ॥ अलोकशब्देन विमुक्तिभाजो वाच्याः[26] पदं [27]तादृगपीह [28]युक्तम् ।

1 सत्यसङ्कल्पत्वादेव. 2 मुक्तः. 3 शास्त्रे स्वाधिपतित्वेनोक्तेभ्यः अन्यशब्दप्रयोगात्. 4 अन्यथा अपतिरित्यवक्ष्यत्. 5 यस्मात्. 6 मुक्ताः. 7 प्रमाणसमुच्चयेन. 8 विष्णवन्यत्वेन जीवत्वेन च. 9 श्रुत्यर्थे विप्रतिपद्यमानं प्रति. 10 अधिपतिसाहित्यस्य. 11 मुक्तेषु. 12 स्वैः सह मुक्तिं गतानाम्. 13 अपि. 14 चक्षुरन्तस्थेन देवेन प्रसन्नेन अर्वाक्तनलोकिनाम्. 15 आदित्यान्तर्गतेन. 16 परलोकवर्तिनां ईष्टे=ईशिता भवति. 17 इत्यर्थवती. 18 श्रुतिः छान्दोग्य १-७-७ 'अथ य एवं विद्वान्...सोऽमुनैव येचाऽमुष्मात्पराञ्चोलोकास्तांश्चाप्नोति देवकामांश्च अथानेनैव येचैतस्मादर्वाञ्चो लोकास्ताम्श्चाप्नोति मनुष्यकामाम्श्च' इति. 19 न्यायविवरणोक्ता. 20 श्रुतौ. 21 प्रतिपादकम्. 22 शब्दः. 23 शब्दशक्तिज्ञैः. 24 लोकाभिमानिनः. 25 अवधारणे. 26 लोकदोषातीतत्वाद्विदेहत्वाद्वा. 27 अलोका इति. 28 छेत्तुं शक्यम्.

SGDF
Sri Gargeshwari Digital Foundation

लोकाभिधाश्चापि यतो हि मुक्ताः [1]प्रकाशरूपाः सततं च सर्वे ॥ ब्रह्मैव लोकाधिपतिर्विमुक्तो भवेदिति प्राह तुरश्रुतिश्च ॥ न [2]चेह विज्ञानफलं [3]समुक्तं लोकाधिपत्यं रविबिम्बगे हरौ । उक्तं [4]पृथक्तच्च[5] पुरैव यस्माद्वि[6]दोऽमुनेत्यादि[7] च[8] सम्यगुक्तः ॥ [9]त्वप्रत्ययं [10]चाप्यतिहाय[11] नैव रूपेण[12] तेनेति भवेदिहार्थः । भवत्य[13]सावित्यणु[14]शब्दमत्र विहाय वाक्यानि बहूनि[15] दोषः[16] ॥ अतो [17]जगद्व्याप्टृतिमन्त एव ब्रह्मादयः पूर्णगुणाः क्रमेण । अमन्दमानन्दमजस्रमेव भुञ्जन्त आत्मीयमजा[18]त्समासते[19] ॥ ७ ॥

नमो नमोऽशेषविशेष[20]पूर्णगुणैकधाम्ने पुरुषोत्तमाय । भक्तानुकम्पा[21]दतिशुद्धसंविद्दात्रेऽनुपाधिप्रिय[22]सद्गुणात्मने ॥ ८ ॥ यस्य[23] त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं [24]बट्[25]तद्दर्शत[26]मित्थमेव निहितं[27] देवस्य भर्गो[28] महत् । वायो रामवचोनयं प्रथमकं पृक्षो

---

[1] प्रसिद्धाः. [2] मुक्तौ. [3] सम्यगुक्तं इति व्याख्यानं न च. [4] पूर्ववाक्य एव तल्लोकाधिपत्यं विभागेनोक्तम्. [5] चक्षुर्गते च. [6] विदुषः परमेश्वरात्. [7] इत्यादीति क्रियाविशेषणम्. [8] अनेन च. [9] अदस्त्वेनेति. [10] रूपेणेतिपदं च यः. [11] प्रवृत्तायां इह श्रुतौ. [12] तेन रूपेण अनेनामुनाच रूपेण अस्यामुष्यच तादात्म्यं प्राप्य इति अर्थोनैव भवेत्. [13] अयं = विद्वान् असौ = परमात्मा भवति. [14] अल्प. [15] प्रयुञ्जानायाः श्रुतेः. [16] अकुशलत्वम्. [17] स्वकीयावरमुक्तानाम्. [18] विष्णुमविहाय. [19] सम्यक् आसते. [20] अशेषविशेषैः पूर्णा ये गुणाः तेषां प्रधानाश्रयाय. [21] भक्ते मयि अनुकम्पात् अनुकम्पां अतति करोति अतसातत्यगमने अन्तर्णीतणिच् प्रापयतीति तथा, भक्तानुकम्पाच्चासौ अतिशुद्ध संविद्दाता च तस्मै अतः अनुकम्पाशब्दस्य नित्यस्त्रीलिङ्गत्वात्पुंस्त्वं कथमिति चोद्यानवकाशः इति कम्बाल्लूर टिप्पण्याम्. [22] सद्गुणानुवादेनानुपाधिप्रियत्वं गुणतादात्म्यं च विधीयत इति न पुनरुक्तिः. [23] स्वस्वरूपज्ञानस्यापि पुरुषार्थसाधनत्वात्तदाविष्कुर्वन्नाह यस्येति. [24] बलात्मकम्. [25] यस्यतन्मूलरूपम्. [26] ज्ञानरूपं अनेन वायुशब्दो निरुक्तः. [27] अवतारेषु. [28] भर्गः= बिभर्ति श्वासरूपेण हंसमन्त्रजपेन सर्वप्राणिजातमिति भर, गमयतीतिगः स एनान् ब्रह्मगमयतीति श्रुतेः.

SGDF
Sri Gangeshwari Digital Foundation

द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः[1] कृतः केशवे[2] ॥ निःशेषदोषरहित कल्याणाखिलसद्गुण । [3]भूतिस्वयम्भुशर्वादिवन्द्यं त्वां नौमि मे प्रियम्[4] ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥ श्लोकसङ्ख्या ॥ १६ ॥ २३७ ॥ अध्यायः सम्पूर्णः ॥

॥ ग्रन्थश्चायं सम्पूर्णः ॥ १९१९ ॥

---

[1] अयं ग्रन्थः. [2] केशवे विषये. [3] भूतिः=महालक्ष्मीः. [4] ग्रन्थारम्भे स्थितस्य नारायणमिति पदस्य ग्रन्थान्ते स्थितेन प्रियमित्यनेन संयोजने नारायणस्य प्रियत्वमुक्तं तेन च ग्रन्थस्य माङ्गलिकत्वं तदध्येतॄणां च सकलपुरुषार्थावाप्तिः सूच्यते ।

विशेष सूचना—अत्र टिप्पण्यां अङ्कानांस्थाने क्वचन तत्पदानां अर्था दत्ताः । क्वचन पूर्वशेषः, कुत्रचिदुत्तरशेषः, क्वचित् तदुपयोगिनोऽन्ये च विषयाः, क्वचित् केवलमन्वयक्रमश्च इत्येते दत्ताः तद्यथासम्भवमूह्यम् ।

SGDF
Sri Gurgeshwari Digital Foundation

305

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमन्न्यायविवरणम्

।। श्रीमद्धनुमद्भीममध्वाऽन्तर्गत श्रीरामकृष्णवेदव्यासात्मक श्रीहयग्रीवाय नमः ।। ॐ ।। चेतनाचेतनजगन्नियन्त्रेऽशेषसंविदे । नमो नारायणायाऽजशर्वशक्रादिवन्दित ।। १ ।। कृत्वा भाष्याऽनुभाष्येऽहमपि वेदार्थसत्पतेः । कृष्णस्य सूत्राऽनुव्याख्यासन्न्यायविवृतिं स्फुटम् ।। २ ।। करोमि मन्दबुद्धीनां बुधानां चोपकारिकाम् । प्रीत्यै तस्यैव देवस्य तत्प्रसादपुरःसरः ।। ३ ।। जीवव्यतिरिक्तेश्वरस्याभावात्तस्य च स्वप्रकाशत्वान्न जिज्ञास्यतेति प्राप्ते "अथातो ब्रह्मजिज्ञासे"त्याह ।। "तद्विजिज्ञासस्व तद्ब्रह्मे"ति ब्रह्मशब्देन पूर्णगुणत्वोक्तेर्नानुभवसिद्धाल्पगुणजीवाऽभेदः ।। "अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन् गुणाः" इति श्रुतेः ।। १ ।। न जीव एवाऽयं ब्रह्म शब्दः । "यतो वा इमानि भूतानि जायन्ते" इत्यादिना जन्मादिकारणत्वस्यैव ब्रह्मलक्षणत्वोक्तेः ।। २ ।। न च रुद्रादौ सममेतल्लक्षणम् । शास्त्रैकसमधिगम्यत्वात् कारणत्वस्य ।। ३ ।। न च पाशुपतशास्त्रोदितत्वादि, शास्त्रप्रतिपाद्यत्वे कारणम् । किं तूपक्रमादिलक्षणः समन्वय एव ।।४।। न च तस्याऽवाच्यत्वं श्रुत्यभिप्रायः । "सर्वे वेदा यत्पदमामनन्ती"त्यादि श्रुतिसहितानुभवस्य बलवत्त्वात् ।। ५ ।। न चाऽवयवत्वविरोधः "नेह नानाऽस्ति किञ्चने"ति श्रुतेरवयवाद्यभेदात् ।। ६ ।। न च "ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां दिव आत्मानं सवितारं बृहस्पतिम् । चतुर्होतारं प्रदिशोऽनुक्लृप्तं वाचो वीर्यं तपसाऽन्वविन्द"दित्यादि शब्दानामन्यविषयत्वम् ।। श्रुतिसन्देहेऽनन्यथासिद्धलिङ्गेन निर्णयोपपत्तेः ।। ७ ।। अधिभूताध्यात्माधिवेदगतानामपि शब्दानामचेतनत्व

SGDF
Sri Gangeshwari Digital Foundation

जीवान्वयव्यतिरेकित्वनित्यत्वेषु विद्यमानेष्वपि भगवद्विषयत्वमेवानन्यथासिद्धलिङ्गैः ॥ "तावानस्य महिमा ततो ज्यायाँश्च पुरुषः" इत्यादिशब्दसहितलिङ्गैश्च ॥ सन्दिग्धश्रुतिलिङ्गाभ्यामुक्ताभ्यामपि, असन्दिग्धयोः केवलयोरेव बलवत्त्वात्(म्) ॥ ११ ॥ न चानन्यथासिद्धत्वमन्यत्र श्रुतिलिङ्गादेः । अन्यगतलिङ्गादीनामपि तद्गतभगवदपेक्षया युक्तेः ॥ १२ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे प्रथमाध्यायस्य प्रथमः पादः ॥ ॥ १ ॥ १ ॥

॥ हरिः ॐ ॥ बहुलिङ्गसहितश्रुतेरपि सावकाशायाः, निरवकाशश्रुत्यादीनामेव बलवत्त्वम् । बहवो ह्यत्राऽदित्यशब्दाः ॥ क्षित्यादिषूक्त्वाऽऽदित्येऽनुक्तिरित्यादिलिङ्गं च । तथाऽपि निरवकाश एतमेवेत्यवधारणादयः ॥ १ ॥ सन्दिग्धश्रुतिलिङ्गाभ्यां निश्चितलिङ्गप्रकरणयोरेव बलवत्त्वम् । सन्दिग्धश्रुतिर्लिङ्गं चाऽदितिशब्दोदितत्वं च ॥ २ ॥ द्विवचनश्रुतेरपि बलं निरवकाशत्वं नास्ति । विष्णोरेवद्विरूपत्वात् ॥ ३ ॥ 'सोऽहमस्मि', 'स एवाऽहमस्मी'त्याद्यभ्यासार्थवादसहितबहुश्रुतिभ्योऽपि निरवकाशोपपत्तेरेव प्राबल्यम् ॥ ४ ॥ पृथिव्यादिशरीरत्वं च न निरवकाशम् । यौगिकशरीरत्वोपपत्तेर्विष्णोरपि ॥ ५ ॥ "अक्षरात्परतः परः" इति श्रुतेरपि नाक्षरात्सम्भवतीत्यस्या निरवकाशत्वम् । अक्षरात्परतः परस्याप्यक्षरान्तरत्ववचनात् (॥ ६ ॥) श्रुतिसाधारण्ये विशेषश्रुत्यादेर्निश्चयः । उभयत्र विशेषश्रुत्यादौ पुनः सावकाशत्वनिरवकाशत्वबलान्निश्चयः ॥ ७ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे प्रथमाध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

॥ हरिः ॐ ॥ "प्राणानां ग्रन्थिरसि' । 'रुद्रो वै लोकायतनम्' । 'वायुना वै गौतम सूत्रेणाऽयं च लोकः परश्च लोकः सर्वाणि भूतानि

SGDF
Sri Gangeshwari Digital Foundation

सन्दृब्धानि भवन्ति'। 'सर्वे वा एते प्राणाश्च प्राणिनश्च देवाश्च दिव्यानि च लोकाश्च लोकिनश्चालोकाश्चालोकिनश्च विष्णावेवोताश्च प्रोताश्च भवन्ति" इत्यादेर्द्युभ्वाद्यायतनत्वमज्ञानां साधारणं लिङ्गम् ॥ १ ॥ 'प्राणो वा आशाया भूयान्विष्णुर्वै देवेभ्यो भूयाँस्तस्माद्भूयान्नामे'त्यादेर्भूमशब्दोऽज्ञानां साधारणः ॥ २ ॥ विष्णोश्चेतनप्रकृतेश्चाऽविनाशित्वसाम्यादक्षरशब्दः साधारणः ॥ ३ ॥ कारणत्वसाम्याद्विष्णोः प्रकृतेश्च, "सदेव सोम्येदमग्र आसी"दित्यादिसृष्टिस्थानं साधारणम् ॥ ४ ॥ लिङ्गं हृत्पद्मस्थितत्वं साधारणम् ॥ ५ ॥ "कथं नु तद्विजानीया"-मित्यानुकूल्येन ग्रहणं कस्येति विचार्यमनुग्रहः ॥ ६ ॥ पुनः शब्दाः 'ईशानो वज्रो ज्योतिराकाश' इति ॥ ७ ॥ १०–१२ ॥ लिङ्गं स्वप्नादिदर्शनं कस्येति ॥ १३ ॥ शब्दो ब्राह्मण इति ॥ १४ ॥ "यस्मिन्द्यौः पृथिवीचान्तरिक्षमोतं मन ओतं प्राणा ओता" इत्यत्रोक्तानां लिङ्गानामन्यत्र रुद्रादिविषयत्वे, शब्दबाहुल्यम्॥ 'प्राणानां ग्रन्थिरसि रुद्रो माविशान्तकः। प्राणेश्वरः कृत्तिवासाः पिनाकी मनो वै रुद्र ओतं च प्रोतं च रुद्रो वाव लोकाऽधार' इत्यादिकं शब्दबाहुल्यम् ॥ १ ॥ प्राणो वा आशाया भूयानित्युक्त्वा प्राणाद्भूयसोऽनुक्तिः ॥ २ ॥ अत्तेत्युक्त्वा न तदश्नाति किञ्चनेति विरुद्धता ॥ ३ ॥ "बहुस्यां प्रजायेये"त्यन्यस्याऽन्यभावाऽदृष्टिः ॥ ४ ॥ "दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्य"मित्यनेन, "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश" इत्यस्यान्वयाभावः ॥ ५ ॥ "तदेतदिति मन्यन्ते" "कथं नु तद्विजानीया"मिति "तेषां सुखं शाश्वत"मित्युक्तज्ञानिसुखग्रहणमिति विपरीतश्रुतिभ्रमः ॥६॥ "ऊर्ध्वं प्राणमुन्नयती"त्यादिलिङ्गानां प्रणादन्यत्रावकाशराहित्यमिति भ्रमः। "एवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते" इत्यादिवाक्याद्भ्रमः ॥ ७ ॥ वज्रशब्द उद्यतत्वलिङ्गं च तादृग्द्वयम् ॥ १० ॥

SGDF
Sri Gangeshwari Digital Foundation

आदित्यादिज्योतिष्मुभयलोकसञ्चरण''मादित्येनैवाऽयं ज्योतिषाऽस्त'' इत्यवधारणमित्यादीनां परमात्मन्यवकाशाभावो बहुतादृत्त्वम् ॥११॥ वै नामेति प्रसिद्धिद्योतकनिपातद्वयं, रूढित्यागेनोक्तयौगिकार्थस्वीकारे विरोधि ॥ १२ ॥ जीवेश्वराभेदे ईश्वरोक्तावप्यर्थाज्जीव एवोच्यत इत्यर्थात्तथागतिः ॥ १३ ॥ ब्राह्मणशब्दस्य पापालेपलिङ्गस्य च चतुर्मुखेन सह परमात्मनोऽभेदं विनाऽवकाशराहित्यादर्थादभेदप्राप्तिरिति समस्तमेतत् ॥ १४ ॥ तेषामेव लिङ्गशब्दानां ''प्राणानां ग्रन्थिरसी''त्यादीनां विष्णौ मुख्यवृत्तिरिति बलवत्त्वम्। तस्य हि रुद्रावणादिकर्तृत्वं मुख्यम् ॥ १ ॥ प्राणस्य विष्णोः सकाशाद्भूयस्त्वानुक्तिः, चशब्देन ''एष तु वा अतिवदति यः सत्येनातिवदती''ति प्राणाद्विष्णोर्भूयस्त्वोक्तिश्च ॥ २ ॥ सर्वाऽऽधारप्रकृत्याधारत्वं, विष्णोरन्यस्य विरुद्धम्। ''पतिं विश्वस्यात्मेश्वरं''—''विश्वाऽत्मानं परायणम्'' इत्यादि श्रुतेः। अनशनोक्तिस्त्वनुपजीवनार्थत्वेनैव सावकाशा ॥ ३ ॥ अचेतनस्येक्षणादृष्टिः। बहुभावश्रुतिस्त्वन्यभावं विना तत्तन्नियामकतया स्वरूपबहुत्वाऽर्थत्वेनैव युज्यते ॥ ४ ॥ आकाशपक्ष एवान्वयाभावः। विष्णुपक्षे तु, योऽन्वेष्टव्यो भगवान्, तस्यान्तर्हृदये यावान्वाऽयमाकाशस्तावानाकाशः, तस्मिन्द्यावापृथिवी अन्तरेव समाहिते, स भगवानपहतपाप्मेत्यन्वयः ॥ ५ ॥ यज्ज्ञानाच्छाश्वतं सुखं स भगवान्यद्ब्रह्मानिर्देश्यं सुखमिति वदन्ति तदेतत्स्वरूपमिति मन्यन्ते। अतः पूर्ववादविपरीतैव श्रुतिः। पूर्ववादोक्तयोजना तु भ्रम एव ॥ ६ ॥ लिङ्गानां परमात्मन्यवकाशो विद्यत एवेति तद्राहित्यं भ्रम एव। वामन श्रुतेरेवानवकाश इति ईशानशब्दोक्तो विष्णुरेव ॥ ७ ॥ वज्रशब्दस्योद्यतत्वस्य च विष्णावेवाऽवकाशः। उद्यमित्वमेवोद्यतत्वमिति ॥१०॥ ''अयं पुरुषः'' इति संसारी। आत्मशब्दोदित एव विष्णुः। अत आदित्यादिज्योतिष्ट्वं संसारिण एव ''आदित्येनैवे''त्यवधारणं बाह्य-

SGDF
Sri Gargeshwari Digital Foundation

ज्योतिष्षु प्राधान्याऽपेक्षयेत्यादि । लोकसञ्चरणं तु जीवमादाय तस्यैवादुःखेन स्वातन्त्र्यात् ॥ ११ ॥ वै नामेति निर्वहितृत्वे श्रुत्यादिप्रसिद्धिबाहुल्यम्, प्रसिद्धाऽकाशस्योक्तमनामरूपत्वं विरुद्धम् ॥ १२ ॥ सुषुप्त्युत्क्रान्त्योर्जीवेश्वरयोर्भेदोक्तेरसङ्गत्वाऽऽदि चेश्वरस्यैवेत्यर्थाद्भेद एव भवति । जीवस्य तदयुक्तेरीशे सावकाशत्वाच्च ॥ १३ ॥ ब्रह्मणा वेदेन गम्यत इति "ब्राह्मण" शब्दो विष्णावेव युज्यत इत्यर्थादजशब्दोऽपि तस्मिन्नेव । चतुर्मुखस्य कर्मफलाभावायुक्तेस्तयोर्भेदोऽर्थादापद्यते । उक्तिविरोधश्च तत्रैव ॥ भेदश्रुतिबाहुल्यात् । तल्लिङ्गं स शब्दश्च चतुर्मुखेऽनवकाश इति समस्तमेतत् ॥ १४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे प्रथमाध्यायस्य तृतीयः पादः ॥ १ ॥ ३ ॥

॥ हरिः ॐ ॥ अवरत्वादिधर्मनियन्तृत्वं, तत्तादात्म्यवत्त्वं चेति द्विविधं ह्यवरत्वादि । "निरनिष्टो निरवद्य" इत्यादिश्रुतेस्तत्तद्दोषतादात्म्यात्यस्पृष्टिनियमात् विष्णोः, 'नामानि सर्वाणि यमाविशन्ती'ति श्रुतिबलाच्च नियन्तृत्वमवरत्वादिकमित्यापतति । श्रुतिद्वयस्याऽपि निरवकाशत्वात् । मृत्युशब्दादिषु प्रसिद्धेश्च । प्रसिद्धत्वात्कर्तृव्युत्पत्तेः । 'तमेव मृत्युममृतं, तात दैवं सर्वात्मनावैहि परं परायणमि'त्यादेश्च । उपचारकल्पनायाश्च क्लिष्टत्वात् । प्रमाणाऽभावाच्च । नाव्यक्तादिशब्दानां परमात्मविषयत्वाङ्गीकारे सर्वमानविरोधः ॥ १ ॥ रूढी रूढियोगो महायोगो महारूढियोगो रूढोपचारो, रूढलक्षणोपचारो लक्षणेति शब्दवृत्तिभेदा(ः), रूढिपूर्वकत्वेन महायोगवृत्त्या परमेश्वरेऽखिलशब्दव्युत्पत्त्युपपत्तेः ॥ २ ॥ बहुरूपत्वादधिकरणाऽधेयत्वादि तस्यैव युज्यते ॥ ३ ॥ व्यक्त्यपेक्षया कार्य (कारण)त्वं च ॥ ४ ॥ इति श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे प्रथमाध्यायस्य चतुर्थः पादः ॥ ॥ १ ॥ ४ ॥ प्रथमाध्यायश्च समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ द्वितीयाध्यायः ॥

॥ हरिः ॐ ॥ रुद्रादीनां सकाशाद्विष्ण्वादीनामेवाप्तत्वम् ॥ श्रुत्यनुसारित्वात् ॥ १ ॥ न श्रुतेः रुद्रादिस्मृतिसाम्यं, किन्तु साक्षि-प्रत्यक्षसाम्यमेव निरपेक्षत्वात् ॥ २ ॥ न मृदादीनां वचनाद्यदृष्टिः श्रुत्यप्रामाण्यकारणम् । अपि तु, वचनादिशक्ताया देवताया मृदादि-शब्दवाच्यत्वद्योतिकैव ॥ ३ ॥ ईश्वरस्य स्रष्टृत्ववदसतोऽपि स्रष्टृत्वं श्रूयत इति नाऽस्ति । सोऽसच्छब्दो ब्रह्मशब्दवदेव ब्रह्मवाचक इति श्रुतेः साम्यम् ॥ ४ ॥ 'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति' इति श्रुतिबलान्नैक्यम् । किन्तु, भेदापादकमेवैतत् , 'निरञ्जनः परमं साम्यमुपैति' 'परात्परं पुरिशयं पुरुषमुपैति दिव्यम्' इति सन्निहितवाक्यबलात् । एकीभावशब्दस्तु सान्निध्येऽपि भवति । 'एकीभूता तु सा सेना पाण्डवानभ्यवर्तते'तिवत् । 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति गौतमे'ति वाक्यान्तराच्च ॥ ५ ॥ न लौकिकसर्वकार्याऽनुसारेणाऽ-कर्तृतन्त्रत्वं सर्वानुसारः । किं तर्हि, तद्वैलक्षण्येन सर्वकर्तृविलक्षण-सर्वशक्तित्वमेवाशेषयुक्ति-श्रुत्यनुसारि । "एष सर्वेश्वरः" इत्यादि-श्रुतेः । युक्तिमात्राच्छ्रुतियुक्ता हि युक्तिर्बलवती ॥६॥ न चेश्वरत्यागेन जीवस्यैव कर्तृत्वाङ्गीकारे कल्पनालाघवम् । श्रुतिसिद्धत्वेनाकल्पनात् । अश्रुतजीवकर्तृत्वाङ्गीकारे गौरवमेव । तदभावे सिद्धान्ते लघुता । 'नान्यः कर्ता, स हि स्वतन्त्रः, परमात्परमो हरि'रित्यादेश्च । अभेद-पक्षस्तु निराकृतः । श्रुत्यनुभवविरोधाच्च ॥ ७ ॥ शब्दैकसमधि-गम्यत्वसर्वशक्तित्वादीनां विशेषाणामदर्शनं जीवे । न जीवा-द्विशेषादर्शनं परमेश्वरे । विशेषश्रुतेरेव ॥ ८ ॥ न च प्रयोजना-भावोऽकर्तृत्वे कारणम् । अशेषकर्तृत्वापवादकश्च । फलापेक्षिणस्त्व-पूर्णत्वादेव न सर्वकर्तृत्वादिशक्तिः, इतरस्य पूर्णत्वादेवाऽनन्तशक्तित्वा-ल्लीलयैव कर्तृत्वम् ॥ ९ ॥ नेशस्य पूर्णत्वासिद्धिः । कर्मसापेक्षत्वेऽ-

SGDF
Sri Gargeshwari Digital Foundation

नीशत्वमनपेक्षत्वे श्रुतेरप्रामाण्यमिति। कर्मणोऽपि तदधीनत्वम्। तथापि तदनुसारेण फलदानमित्य(न)ङ्गीकार एवेष्टश्रुतिप्रामाण्यासिद्धिः॥ १०॥ सर्वचेतना अपूर्णगुणा इति नियमो न। स्वतन्त्रस्य पूर्णगुणत्वनियमात्। 'अपूर्णोऽयं जीवसङ्घोऽस्वतन्त्रः पूर्णो हरिर्यः स्वतन्त्रः सदैव। न हि स्वतन्त्रोऽपूर्णतां कामयीत, पूर्णो यदि स्यादस्वतन्त्रः कुतः सः॥'-इति श्रुतेः॥ ११॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्न्याय विवरणे द्वितीयाध्यायस्य प्रथमः पादः॥ २॥ १॥

॥ हरिः ॐ॥ उक्तविरोधिनस्तत्तत्समयसिद्धाः पूर्वपक्षन्यायाः, तद्विरोधिनोऽन्ये, इति प्रसिद्धा एव॥ १॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्न्यायविवरणे द्वितीयाध्यायस्य द्वितीयः पादः॥ २॥ २॥

॥ हरिः ॐ॥ न च वियत उत्पत्तिमत्त्वेऽनुभूति-युक्ति-बहुवाग्विरोधोऽस्ति, व्यवस्थाऽयोगात्। अवकाशमात्रस्याऽव्याकृतात्मकत्वादनुत्पत्तिवचनानां तद्विषयत्वं, उत्पत्तिवचनानामसितवर्ण-भूत-तदभिमानिशरीरविषयत्वं पराधीनविशेषवत्त्वमात्रविषयत्वं चेति व्यवस्था। 'आकाशो नीलिमोदेति न प्रदेशः कथश्चन। अभावो हि प्रदेशस्य न ह्यत्राभाव इत्यपि' इति पैङ्गिश्रुते(ति)ः॥ १॥ ततोऽधिकमेतत्सर्वमनुभूत्यादिविरुद्धत्वं वायूत्पत्ताविति, न वायोरेव मुख्यानुत्पत्त्यनुपपत्तेः। पराधीनविशेष(त्व)मात्रं ह्युत्पत्तिः। तदभाव उभयोः स्वातन्त्र्यं विरुद्धमेव। सर्वोत्तमत्वानुपपत्तेः। उभयोरपि पराधीनत्वप्राप्तेश्चाऽन्योन्यानुरोधे, अननुरोधे तु न सर्वैश्वर्यम्। ज्ञानाविस्मृत्या वायावपि व्यवस्थेत्यतिदेशः। अनुपपत्तिस्तु तत्प्रापिका। पराधीनविशेषवत्त्वमात्रं त्वव्याकृताकाशस्य तदभिमानिप्रकृतेश्च सममेव॥ २॥ न च सतः पराधीनविषयत्वं (विशेषवत्त्वं)

SGDF
Sri Gargeshwari Digital Foundation

स्वातन्त्र्यात् ॥ ३ ॥ न च विष्णोरेव तेजस उत्पत्तौ द्वारकारण-वैयर्थ्यम् । द्वारमनुसृत्यैव विष्णोः प्रवृत्तेः ॥ ४ ॥ न च तेजस एवापामुत्पत्त्यङ्गीकारे घर्मात्स्वेदादिदृष्टयनुसारित्वमिति गुणाधिक्यम् । मुख्यार्थपरित्यागप्राप्तेः ॥५॥ न चाद्भ्यो वाऽन्नमुत्पद्यत इत्याद्युक्त-प्रसिद्धान्नाख्यान्यार्थाविरोधेन प्रसिद्धान्ननामस्वीकारे बहुवाक्यानु-वर्तितेति गुणः । अन्नशब्दस्य प्रयोगबाहुल्यात्पृथिव्यामपि शक्ति-मत्त्वात् । अधिकारादीनां निरवकाशत्वाच्च । बहुवाक्यानुरोधोऽ-प्यत्रैवेति ॥ ६ ॥ न च रुद्रादीनां लयकारित्वाङ्गीकारे, पितुरन्यस्यैव मारकत्वदृष्टेर्लौकदृष्टयनुसारित्वमिति गुणः । लोकपितृवैरूप्याद्विष्णो-र्यथावाक्यमङ्गीकारोपपत्तेः । अन्यथा "न विष्णोरन्यो विलयकृन्न विष्णोरन्यो विमुक्तिदः" इत्यादि श्रुतिविरोधात् । रुद्रस्य तु क्वचित्संहारद्वारत्वेनैव तद्वाक्यानां सावकाशत्वात् ॥ ७ ॥ न च लोकानुसारित्वम् । "क्रमादुत्पद्यते, क्रमाद्विलीयते, क्रमेणैवोत्पत्ति-र्विलयश्च, क्रमेणैवास्योत्पत्तिविलयौ" इत्यादिलोकानुसारिबहुवाक्यानु-रोधश्च यथोत्पत्तिलये । 'द्विविधः क्रम उद्दिष्टो व्युत्क्रमोऽनुक्रम-स्तथा । सृष्टावन्यो लये चान्य इति वेदविदो विदुः' । इति श्रुतेः क्रमवाक्यस्य सावकाशत्वाद्वैरूप्यं बहुप्रकारत्वं क्रमस्य ॥ ८ ॥ न च केषाञ्चित्क्रमाल्लयः, केषाञ्चिद्व्युत्क्रमाल्लय इत्यङ्गीकारे लोकदृष्टयनुसारा-दन्तरा विज्ञान-मनसी व्युत्क्रमः । 'सर्वं वा एतत्क्रमादुत्पद्यते, व्युत्क्रमाल्लीयते' इति श्रुतौ, सर्वस्याऽपि व्युत्क्रमाल्लयसङ्ग्रहात् । तल्लिङ्गस्य तु चराऽचरव्यपाश्रयविज्ञानादिविषयत्वेनैव सावकाशत्वात् ॥ ॥ ९ ॥ न च चेतनत्वेन साम्याद्विष्णोरपि देहलयः । 'सर्वे वा एते चिदात्मानो ब्रह्मँल्लयमनुप्राप्य विष्णोरुदरे संविशन्ती''ति तस्योदरे सर्वसङ्ग्रहणादिश्रुतिभ्यो नित्यत्वावगमात्तद्देहस्य । अश्रुत-त्वाच्चान्यथा ॥ १० ॥ न चानादित्वाज्जीवस्य पराधीनविशेषा-

SGDF
Sri Gangeshwari Digital Foundation

प्राप्तिः । "इदं सर्वमसृजते"ति सर्वस्मिन्गृहीतत्वात् । पराधीनविशेषवत्त्वेऽप्यनादित्वस्याऽविरोधात् ॥ ११ ॥ न च सर्वदेहस्पर्शज्ञानाद्रसादीनां च तत्र तत्र परिज्ञानाज्जीवस्याऽनणुत्वम् । उत्क्रान्तिगत्यादेः। आदिशब्देन सूक्ष्मतेजोरूपेण व्याप्त्या स्पर्शादिज्ञानोपपत्तिः। अतोऽणुत्वमनणुत्वं चेति भावः ॥ १२ ॥ न च जीवस्य बहुरूपत्वशक्तावीशेन गुणसाम्यम् । ईशशक्त्यैव बहुरूपत्वादेः ॥ १३ ॥ न च श्रुत्या जीवेश्वरैक्यम् । सर्वमानविरोधात् । श्रुतेः सादृश्यैक्यादिना सावकाशत्वात् । बहुमानविरोधे एकस्य दौर्बल्याच्च । धर्मिग्राहकविरोधाच्च ॥ १४ ॥ न चोत्पत्तिमत्त्वाद्विनाशित्वं जीवस्य । अनित्यत्वे तदभीष्टमोक्षाद्यसिद्धेः। न हि पराधीनविशेषवत्त्वमात्रेण विनाशित्वम्, तादृशानामेव नित्यत्वश्रुतिविरोधात् ॥ १५ ॥ न च स्वगुणाऽननुभूत्यनुपपत्तेः पूर्वज्ञानादीनां सामस्त्येनाभावः । पूर्वमव्यक्तानां पश्चात्सुव्यक्त्युपपत्तेः ॥ १६ ॥ न चेश्वरस्यैव कर्तृत्वे कल्पनालाघवम् । जीवस्याऽकर्तृत्वे शास्त्रवैयर्थ्यात् । तस्यापि कर्तृत्वे शास्त्रार्थसिद्धेश्च ॥ ॥ १७ ॥ न च नानाश्रुतेरप्रामाण्यम् । दृष्टभेदानुसारेण तासामर्थोपपत्तेः । अप्रामाण्यकल्पनस्य विपरीतज्ञानमूलत्वात् ॥ १८ ॥ न च वैचित्र्यमनाभासत्वे कारणम् । जीवानां सामान्यत आभासत्वेऽपि विशेषादृष्टाद्वैचित्र्योपपत्तेः ॥ १९ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे द्वितीयाध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

॥ हरिः ॐ ॥ न च प्राणानामुत्पत्त्यङ्गीकारे, 'प्राणा एवानादयः' इत्यादिस्पष्टार्थवद्विशेषश्रुतिविरोधः । 'आत्मैवेदमग्र आसीत्स प्राणमसृजत, स प्राणान्' इत्यादिवचनादनादित्व एव स्पष्टार्थवद्विशेषश्रुतिविरोधात् । 'इदं सर्वमसृजते'ति सामान्यवचनस्याऽधिक्यं सिद्धान्ते । विशेषमात्रश्रुतेः सावकाशाया उभयश्रुतेः प्राबल्यात् ॥१॥

SGDF
Sri Gangeshwari Digital Foundation

न च "नित्यं मनोऽनादित्वा"दिति विशेषश्रुतिविरोधः। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे'ति विशेषश्रुतेः ॥ २ ॥ न च 'वाग्वाव नित्ये'ति विशेषश्रुतिविरोधः, 'मनसो वाव वागुत्पद्यते, वाचो व्याहरणमि'ति विशेषश्रुतेः ॥ ३ ॥ न च 'दशेमे पुरुषे प्राणाः आत्मैकादशः'—'सप्त प्राणाः प्रभवन्ति तस्मादि'ति सङ्ख्याविशेषश्रुत्योरेव परस्परं विरोधः; । "गुहाशयां निहिताः सप्तसप्ते"ति सप्तभावस्य बुद्धीन्द्रियविषयत्वेन विशेषितत्वात्सङ्ख्याश्रुत्योर्विषयवैलक्षण्यात् ॥४॥ न च "दिवीव चक्षुराततमि"ति व्याप्त्याख्यविशेषवाचकश्रुतिविरोधः; "अणूनि वा इन्द्रियाणि तेषां प्रकाशो व्याततः इति ततोऽप्यणुत्ववाचकविशेषश्रुतिविरोधात् ॥ ५ ॥ न च "यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथा। तस्योत्पत्तिर्मृतिश्चैव कथं प्राणस्य युज्यते"। इत्यादिमाहात्म्यवचनान्मुख्यप्राणस्य नोत्पत्तिरिति वाच्यम्। 'महत्त्वान्महतां विष्णुः कर्ता प्राणस्य चैकराट्। किं नाम न सृजेदेष येन शक्त्येदमावृतम् ॥' इति श्रुतेस्ततोऽपि माहात्म्याद्विष्णोः ॥ ६ ॥ न च प्राणादिपञ्चकस्य व्यक्तसद्गुणत्वान्मुख्यप्राणवृत्तित्वमेव। 'अशेषगुणपूर्णानि मुख्यरूपाणि पञ्च च। तद्दासाः पञ्च चाऽन्येऽपि प्राणाद्याः सद्गुणैर्युताः ॥' इति श्रुतेर्मुख्यप्राणस्य ततोऽपि व्यक्तसद्गुणत्वात् ॥८॥ न चाऽणुत्वे प्राणस्य "महान्वै मुख्यप्राणो येन व्याप्तं चराऽचरम्" इति दृष्टाऽयुक्तिः। 'अणुर्वै मुख्यप्राणो य उत्क्रामति नाडीभि'रितिदृष्टाऽयुक्तिरनणुत्वे प्राणस्य ॥ ९ ॥ न चेन्द्रियाणां जीवाऽकरणत्वे दृष्टाऽयुक्तिः। क्वचिदतद्वशत्वस्याऽपि दृष्टत्वात्। 'यश्चक्षुषि तिष्ठन्नि'त्यादिदृष्टाऽत्युक्तेरीशाधीनत्वानङ्गीकारे। लौकिकदृष्टेस्त्वीशेनैव जीवानुसारित्वक्लृप्त्योपपत्तेः ॥ १० ॥ न चेशवशत्वसाम्यान्मुख्यप्राणस्याप्यन्यसाम्यम्; 'यदस्मिन्निदं सर्वमव्याप्नोत्', प्राणस्यैतद्वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्' इत्यादि श्रुतेरीशसाम्यस्यापि भावात्।

SGDF
Sri Gargeshwari Digital Foundation

'प्राणस्यैतद्वशे सर्वं प्राणः परवशे स्थितः' इति श्रुतेर्मध्यमत्वोपपत्तेः ॥ ॥ ११ ॥ न च विरिञ्चस्यापि कर्तृत्वशक्तेः स एव शरीरादिस्रष्टा ; 'त्रिवृत्क्रिया यतो विष्णो रूपं च तदपेक्षया । रूपाऽपेक्षं तथा नाम व्यवहारस्तदात्मकः ॥ अतो रूपस्य नाम्नस्य व्यवहारस्य चैकराट् ॥ हरिरेव यतः कर्ता पिताऽतो भगवान्प्रभुः' ॥ इत्यादेस्तस्यैव कर्तृत्व-शक्तेः विरिञ्चस्य तु द्वारतयोपपत्तेः ॥ १२ ॥ न च (वि)मिश्रितत्वा-द्भूतानां विमिश्रतायामविशेषः । "अन्नमशितं त्रेधा विधीयत" इत्यादिना मिश्रतायामपि विशेषोक्तेः । "सर्वं च भौतिकं मिश्रं मिश्रत्वेऽपि (च) विशेषिता । भौमं मांसमसृग्वारि तेजो मज्जा विशेषतः ॥" इत्यादेश्च ॥१३॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य-विरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥ द्वितीयाध्यायश्च समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ तृतीयाध्यायः ॥

॥ हरिः ॐ ॥ 'भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विमोचनम्' इति वचनात्स्वाभाविकमरणमेव मुक्तिरिति न मन्तव्यम् । मुक्तिसाधनत्वेन ज्ञानादिगुणाधिक्योपदेशान्मरणे भूतवियोगस्यैवाभावात् । 'भूतयुक्तः परं लोकमिमं लोकं च गच्छती'त्यादिवचनाच्च ॥ १ ॥ 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'त्यत्र भूतानीति सामान्यनामानुक्त्वाऽपामिति विशेषनामकथनादपामेव सहगतिरिति न वाच्यम् । त्र्यात्मकत्वादपामर्थतः सर्वभूतानां गतिप्राप्तेः ॥ २ ॥ न च भूतानि गच्छन्तीति सहैवानुक्तेस्तदभावः । प्राणगतेरुपपत्तित उक्तत्वात् ॥ ३ ॥ न च 'अग्निं वागप्येती'त्याद्यन्यथोक्तेः प्राणानां च न सहगतिः ; द्विरूपत्वात्प्राणानाम् ॥ ४ ॥ न च 'प्रथमतो भूतानि जुह्वती'ति विशेषाऽनुक्तेर्भूतानामसहगतिः ; भूतानि जुह्वती'त्युपक्रमादपि 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'त्युपसंहारस्याधिक्यात् तदनुसारेणोपक्रमोक्तश्रद्धाशब्दस्यापि ता एवार्थ इत्यापत्तेः । उपक्रमविरोधेनोपसंहारानुपपत्तेः । उपक्रमप्रामाण्यार्थमेवोपसंहारानुसारित्वमङ्गीकर्तव्यम् । व्याख्यानस्य पश्चात्तनत्वनियमात् । उपक्रमानुसारित्वनियमेऽप्युपसंहारस्योपसंहारेणैवोपक्रमार्थो ज्ञायते ॥ ५ ॥ न च विशेषाश्रवणनियम एव बलवान् । स्थानान्तरश्रवणस्याप्येतदनुरूपत्वात् । आर्थिकश्रवणमप्यनुक्तिं बाधत एव किमु स्थानान्तरगतं स्पष्टश्रवणमिति कैमुत्यार्थमेव नेष्टादिकारिणां प्रतीतेरिति परिहारान्तरमुक्तम् ॥ ६ ॥ न चा'पाम सोमममृता अभूमे'ति विशेषत एव मोक्षफलस्याप्युक्तेः कर्मैव मोक्षसाधनमिति मन्तव्यम् । 'नान्यः पन्था अयनाय विद्यते' । 'स य आत्मानमेव लोकमुपास्ते । यावदिन्द्रो यावन्मनुरि'त्यादिश्रुतिबलादमृतशब्दस्य यथायोग्यमेवार्थकल्पनोपपत्तेः ॥ ७ ॥ न चानुशयस्य सहभावात्स्वर्ग एव फलदत्वं 'भुक्त-

SGDF
Sri Gangeshwari Digital Foundation

शेषानुशयवानित्यादिवचनाद्यथायोग्यमेव फलदानोपपत्तेः ॥ ८ ॥ न च मार्गस्यापि सहभावाद्यथागतमेवागमनमिति नियमः । वचनबलाद्यथायोग्यमेवागमनोपपत्तेः ॥ ९ ॥ न चेष्टापूर्ते दत्तमित्युपासत इत्युपशब्देनेष्टादिभिराचारस्य सहपाठाच्चरणफलं पुनरावृत्तिं करणफलत्वेन भ्रमाद्वदन्तीति वाच्यम् । नान्यः पन्था इत्यादिवचनादेवोभयोरपि चरणशब्देनैवोक्तेर्योग्यत्वात् ॥ १० ॥ न च भयफलकामादिमिश्रबुद्धित्वादिष्टादिकारिणां संसारोऽनिष्टादिकारिणां तदभावान्मुक्तिरिति वाच्यम् । तेषां प्रबलदोषश्रुतेः ॥ ११ ॥ न च नरकभोगस्यानित्यत्वकथनान्नित्यनरकोक्तिर्विरुद्धा । 'रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा । कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि तु । तामिस्रश्चान्धतामिस्रो द्वौ नित्यौ सम्प्रकीर्तिताविति' विभागात् ॥ १२ ॥ न च सहस्थानादीशस्यापि नरकदुःखप्राप्तिः । स्वातन्त्र्यात्कारणाभावात् ॥ १३ ॥ न च साधनेन सह श्रुतेस्तद्वत्फलेऽपि जीवस्य स्वातन्त्र्यम् । अविहितत्वेन कारणाभावात् । अथैतयोः पथोरित्यस्य च साधनार्थत्वात् ॥ १४ ॥ न च दुःखसहस्थायित्वादन्धेतमस्यपि सुखम् । ईशस्याप्रियत्वेनैव कारणाभावात् ॥ १५ ॥ न च धूमादिदेवतासहावस्थानात्कर्मिणोऽपि तत्पदप्राप्तिः । तन्निमित्तविद्याख्यकारणाभावात् ॥ १६ ॥ न च तैस्तैः सहावस्थानादतिचिरत्वम् । वत्सरात्पूर्वमेव त्विति क्लृप्तकालादधिकावस्थाने कारणाभावात् ॥ १७ ॥ न च व्रीह्यादिजीवैः सहावस्थानादुःखप्राप्तिः । शब्दविहितत्वेन पापाख्यकारणाभावात् ॥ १८ ॥ न च वैयर्थ्यं पितृशरीरागमने 'ईशक्लृप्त्यैव पितरं प्रविश्यायाति मातरमि'तीशक्लृप्तत्ववचनात् ॥ १९ ॥ न च पितुः सकाशादन्यतो वौदर्यगर्भस्थशरीरमेव प्रवेष्टुमुपपत्तेर्योनिप्रवेशाभाव इति वाच्यम् । 'योनिद्वारेण देहं च प्राप्नोति प्रायशो नर' इतिवचनात्सामान्यतो गत्यन्तराभावात् । 'विशेषकारणादेव विशेषाज्ञनिरिष्यते । सामान्यजननं

SGDF
Sri Gargeshwari Digital Foundation

चैव नृणां सामान्यहेतुत' इति वचनाच्च ॥२०॥ इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे तृतीयाध्यायस्य प्रथमः पादः ॥ ३ ॥ १ ॥

॥ हरिः ॐ ॥ पश्चाददृष्टेः स्वप्नविषयस्यासत्त्वं न वाच्यम् । अशक्यकरणशक्तिमत्त्वादीश्वरस्य संस्कारेण सृष्ट्वा पुनः संस्कारमात्रतामापाद्य तस्यापि तिरोधानोपपत्तेः । जाग्रत्त्वप्रतीतिमात्रस्य भ्रान्तित्वात् ॥ ॥ १ ॥ न चाविज्ञानमात्रेण स्वप्नप्रतीत्या ज्ञानशक्त्यैव स्वप्नतिरोधानं नेशेनेति वाच्यम् । बोधे जीवस्यास्वातन्त्र्यात् । ज्ञानाज्ञानयोस्तदन्यत्वे जडत्वात्कैमुत्येनास्वातन्त्र्यात् । तत्स्वरूपत्वे तेनैव व्याख्यातत्वात् । उभयात्मकत्वे दोषद्वयापातात् । अनुभयात्मकत्वे व्याहतेः । तावन्मात्रनिमित्तत्वे मानाभावात् । सर्वस्येशहेतुत्वे मानाच्च ॥ २ ॥ न च कालापेक्षयैव जागरितम् । अचेतनत्वादेव कालस्य । चेतनान्तरस्याप्यस्वातन्त्र्यात् ॥ ३ ॥ न च परमात्मनोऽन्यत्रावस्थाने दुःखित्वप्राप्तेर्नाडीषु सुप्तिर्न भवति । उभयस्वीकारोपपत्तौ मानस्य क्लृप्त्यकारणमित्यनवस्थितिदोषादतिप्रसङ्गात ॥ ४ ॥ न च प्रबोधस्य पृथगपि कारणदृष्टेः क्वचित्तदेव । 'न ऋते त्वक्रियत'इति श्रुतेस्तत्रापि ईशकृतत्वे सम्यग्ज्ञानात् ॥ ५ ॥ न च राजादीनां पृथग्दर्शनादीशान्तरकल्पना । 'देशकालविशेषेऽपि स्वप्नादीनां स एव हि । तिरस्कर्ता च कर्ता च न खण्डेशः स राजवदि'ति श्रुतिमानात् ॥ ६ ॥ न च मोहे ब्रह्मप्राप्तिरेव पृथगवस्थत्वादिति वाच्यम् । परिशेषमानादर्धप्राप्तित्वावगमात् ॥ ७ ॥ न च स्थानभेदाद्विष्णोरपि भेदः । 'अयमेव सः' । 'नेह नानास्ति किञ्चने'त्यादि श्रुतिबलात्स्थानानां भेदस्तस्याभेद इति व्यवस्थोपपत्तेः ॥ ८ ॥ न च रूपवत्त्वारूपवत्त्ववचनयोर्विरोधादप्रामाण्यम् । अप्राकृतरूपवत्त्वमिति व्यवस्थोपपत्तेः ॥ ९ ॥ न च परमात्मना चेतनत्वन्यायसाम्येन जीवस्याप्यभेदः । अल्पगुणत्वादि-

SGDF
Sri Gargeshwari Digital Foundation

विरोधात् ॥ १० ॥ न च सादृश्यसत्त्वात्साधनं विनैव जीवस्य तादृत्त्वव्यक्तिः । अनादितः संसारस्यानिवृत्तत्वेन भावात् ॥ ११ ॥ न च मुक्तत्वादिगुणसाम्याद्ब्रह्मादीनां भक्त्यादिगुणसाम्यम् । 'यथा यथाधिकारो विशिष्यते एवं ज्ञानं भक्तिर्बलं च विशिष्यते । मुक्तावानन्द एते च गुणा विशिष्यन्ते अत आहुर्ब्रह्मणे मुक्ता बलिं हरन्ती'त्यादिविशेषदृष्टेः ॥ १२ ॥ न च संहारकर्तुरसंहारादन्यरक्षाया अयोगः । 'स सृजति स पालयति स विनाशयती'त्यादि विशेषवाक्यात् । अन्नदानाद्युपपत्तेश्च ॥ १३ ॥ न चाव्यक्तस्वभावस्य दर्शने तर्कबाधः । अनन्तशक्तित्वाद्विष्णोस्तच्छक्त्या अव्यक्तस्यापि दर्शनोपपत्तेः ॥ १४ ॥ न च गुणानां गुणिस्वरूपत्वं विरुद्धम् । कालादिदृष्टान्तात् ॥ १५ ॥ न च ब्रह्मानन्दादीनामन्यथात्वादतच्छब्दत्वं तच्छब्दत्वे लोकोपमत्वं चेति विलोमता । 'अलौकिकास्तस्य शब्दास्तथार्था अलौकिको ह्येष विष्णुः परत्वात् । तथापि शब्दा लौकिका अप्यमुष्मिन्प्रवर्तमाना अधिकार्थान्वदन्ती'त्यादि श्रुतिभ्योऽलौकिकत्वावगमात् ॥१६॥ न च ब्रह्माद्यानन्दवैचित्र्ये बिम्बभूतविष्ण्वानन्दवैचित्र्यम् । आदित्यादिवदाधिक्यात् । न हि सूर्यकान्तप्रतिबिम्बस्याग्निजनकत्वशक्तिर्न जलगतस्येत्येतावता सूर्ये वैचित्र्यम् । आधिक्यं हि तत्र निमित्तम् । सूर्यचन्द्रादिप्रतिबिम्बं विनाऽन्यत्र तथा विशेषादृष्टेः ॥ १७ ॥ न च नानाभावाद्विष्णोश्चित्तप्रतिबिम्बरूपता । आधिक्यादेव । प्रतिबिम्बे हि दोषाश्च प्रतीयन्ते । अतो हि श्रुतिः प्रतिषेधति 'नेदं यदिदमुपासत' इति ॥ १८ ॥ न च नानावतारकौतुकदर्शनाद्विष्णोः क्वचिद्देशकालान्तरे कौतुकादेव सृष्ट्यादि कुर्वन् अन्यमेव सामस्त्येन नियोजयति । सर्वत्र सर्वमेतस्मादित्यादि श्रुत्या क्रीडायामपि स्वातन्त्र्यात् । 'स्वातन्त्र्यात्क्रीडते विष्णुर्न च स्वातन्त्र्यमन्यगम् । करोति क्वापि नियता क्रीडा सृष्ट्यादिकाऽस्य च ।

SGDF
Sri Gangeshwari Digital Foundation

नियतक्रीडनादेव कर्ता नान्योऽस्ति कस्यचित् । अस्वतन्त्रो हि चलति चलचित्तादशक्तितः । स्वतन्त्रः पूर्णशक्तिः सन्कुतोऽसौ नियतिं त्यजेदि'ति श्रुतेश्च ॥ १९ ॥ न च कर्मान्वयव्यतिरेकात्फलस्येश्वरः फलदातेति प्रलोभमात्रम् । तस्यैव स्वातन्त्र्यात् । 'कर्माण्यनन्तानि यथेष्टमीशः सम्पाद्य तेषां फलमिच्छयैव । कचिद्ददाति क्व च नो ददाति न ह्यानन्त्यात्कर्मणां भोगनाशः । स्वातन्त्र्यं चेत्कर्मणां सर्वभोगः स्यान्न ह्येवं क्वापि तत्केनचित्स्यात् । अतो हि स स्वेच्छया किञ्चिदेव फलं कुर्याद्विफलं प्रायशश्च । क्वचिज्ज्ञानं जनयन् भस्म कुर्यात्स्वेच्छावृत्तिस्तस्य विष्णोः सदैवे'ति ब्रह्माण्डे । 'स्वतन्त्र ईश एवैकस्तद्वशं कर्म सर्वदा । अत ईशत्वमीशस्य न हीशोऽन्यः कथञ्चने'ति श्रुतेः । अतः प्रलोभकल्पने श्रुतहानिरश्रुतकल्पना चेति हरिरेव फलप्रदः ॥ ॥ २० ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे तृतीयाध्यायस्य द्वितीयः पादः ॥३॥२॥

॥ हरिः ॐ ॥ न च प्रतिशाखमुच्यमानानामर्थानां पृथक्त्वात्तच्छाखिभिरेव तत्र तत्रोक्तं ज्ञेयमिति नियमः । 'नानावेदैरितिहासैः पुराणैः सुज्ञेय एको भगवान्युक्तिभिश्चे'ति श्रुतेः सुष्ठुज्ञेयत्वाद्विष्णोः ॥ ॥ १ ॥ न चाशक्यतया कस्यापि सर्वगुणोपसंहारो नास्ति । 'सर्वे गुणाः सर्वदैव ह्युपास्यास्तेनैव विद्वान्विधिकृन्नान्यथा स्यादि'ति श्रुतेर्विहितक्रियालोपप्रसङ्गात् ॥२॥ केषाञ्चित्सर्वगुणोपसंहारस्य कर्तव्यत्वे सर्वेषामपि तथा स्यात् अनेनोपसंहर्तव्या अनेनोपसंहर्तव्या इत्यनिर्णीतेरिति न मन्तव्यम् । 'यस्य यावद्गुणाः स्पष्टं प्रतिभासन्त्युपासने । युगपत्स्वभ्रुजौ यद्वद्ध्यायेत्तावत एव सः । युगपद्ब्रह्मणः सर्वे भासन्ते हि गुणा हरेः । तदन्येषां यथायोग्यं स्वमाहात्म्यानुसारत' इति श्रुतेर्युगपद्गुणप्रतीत्यादिमाहात्म्यान्निर्णयोपपत्तेः ॥ ३ ॥ न च फलानिर्णीतिः । माहात्म्येनैवान्यत्फलं महतामिति निर्णयोपपत्तेः ॥ ४ ॥

SGDF
Sri Gurgeshwari Digital Foundation

आनन्दादीनां केषाञ्चित्समुच्चये प्राप्ते सर्वगुणसमुच्चयः सर्वेषां स्यादिति न मन्तव्यम् । अल्पशक्तित्वात्तेषां पुंसाम् ॥ ५ ॥ प्रियशिरस्त्वादीनामानन्दादिविशेषत्वेनैव दर्शनात्तेषामपि सर्वोपसंहार्यत्वमिति न मन्तव्यम् । 'यथायोग्यान् गुणपूगानुपास्य फलं भवेन्मुक्तिगं नान्यथा स्यात् । नित्यैकाग्रयव्यंग्यताहेतुतश्च साक्षाद्दृशिनो तद्विशेषैः स्मृतैश्चे'ति श्रुतेः स्वयोग्यगुणैरेव फलभावात् ॥ ६ ॥ तर्हि ब्रह्मणोऽन्येषां देवादीनामपि बहुगुणोपासनया कार्यं नास्ति मध्ये नियमासिद्धेरिति न मन्तव्यम् । तेषां भाव्युत्कर्षं ज्ञात्वा तदभिज्ञस्य ब्रह्मण एव गुणनियमोपदेशोपपत्तेः । 'यो यो भावो देवतानां विमुक्तौ तत्तत्प्राप्तौ सुगुणानीशितुश्च । ब्रह्माऽऽदिशत्यथ तांस्ते विचिन्त्य तत्तद्भावं प्राप्नुवन्त्यात्मशक्त्ये'ति श्रुतेः ॥ ७ ॥ न च नानास्थानेषूक्तगुणानामनुपासनार्थत्वम् । विप्रकीर्णान् गुणान्पिण्डीकृत्योपासितुस्तत्सदृशफलप्राप्तेस्तथा ध्यानार्थमेव गुणानामुक्त्युपपत्तेः ॥ ८ ॥ न चाश्वापरोक्ष्यायानन्दादीनामपि लोपेनात्मेत्येतावता पूर्यते । आत्मशब्दार्थविशेषत्वादानन्दादीनाम् ॥ ९ ॥ न चात्मशब्दो विभ्रमकरः । गुणाधिकानामधिकारिणां भगवद्गुणानधिकान्प्रकाशयतीत्यवधारणत्वोपपत्तेः ॥१०॥ अलौकिकगुणानामप्रतीतेर्लौकिकगुणाध्याने तदपाकृतिरेव भवतीति न मन्तव्यम् । लौकिकविलक्षणा अत्युत्तमा इति ध्यानस्यैव प्राधान्यात् ॥ ॥ ११ ॥ ब्रह्मणश्च ब्रह्माण्याश्च स्थानैक्यं गुणतारतम्यं च यथागुणोपासनं मुक्तावाधिक्यं न भवतीत्यत्र लिङ्गम् । समविषमोपासनायुक्तेरिति न मन्तव्यम् । 'यथाशक्ति स्मृतान्धात्रा गुणान्विष्णोः सरस्वती । स्मरेन्नैविक्रमाद्यांस्तु नित्यविक्रान्तिपूर्वकैः । कदाचिल्लोपयेद्देवी स्थानैक्यं न गुणैस्ततः । साम्यं तयोर्यथाविष्णोर्गुणोपासा फलं भवेदि'त्यध्यात्मवचनाद्यथाशक्तिक्रिया देव्याः ॥ १२ ॥ न चात्मशब्देनास्य पुरुषस्यैतावन्तो गुणा उच्यन्त इति व्यवस्थित्यभावः ।

SGDF
Sri Gurgeshwari Digital Foundation

यस्य यावन्तोऽर्था युगपद्ध्यातुं शक्यन्ते तस्य तावन्त इति सन्धेः ॥१३॥ न च मुमुक्षव इत्यविशेषाद्भरणस्य श्रुतेश्च सर्वेषामपेक्षितत्वाच्च संभूतिश्रुव्याप्ती अपि सामान्ये। 'सत्यो ज्ञानं परमानन्दरूप आत्मेत्येवं नित्यदोपासनं स्यात्। नान्यत्किञ्चित्समुपासीत धीरः सर्वैर्गुणैर्देवगणा उपासते। गुण्याकारस्मृतेरेव श्रुतिमात्रं प्रतीयते। न व्याप्तिर्जगदस्मृत्या नानाशक्तिर्यतो मता। देवानां युगपज्ज्ञानं मनुष्याणां तथा न तु। पर्यायेणैव सत्याः स्युर्नैवान्येषां कथञ्चने'त्यादिप्रमाणबलात् ॥ ॥१४॥ क्वचिद्बहुगुणाः क्वचिदल्पगुणाः श्रुतिष्वेवोच्यन्त इत्युपसंहारस्याप्रयोजनतेति न वाच्यम्। 'गुणाः सर्वे ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैरि'त्यादि श्रुतेः। सर्वगुणोपासकस्याप्यधिकारिणो भावादेकत्रापृथक्सर्वगुणानुक्तेश्च बलादुपसंहारानतेः ॥ ॥१५॥ न च मुक्तावुपासनभावे फलादिकमपि स्यादित्यतिप्रसङ्गः। उपासनायाः संस्काराख्यकारणस्य सत्त्वात्। 'न हीयते यत्र गत्वा यत्र गत्वा न वर्धत' इत्यवृद्धिप्रमाणभावाच्च ॥ १७ ॥ न च कर्मकरणशक्तेरप्यदूरत्वात्तत्संश्रयनियमः। उपासनाख्ये कार्ये नित्यकृतिसंस्कारो न तथा कर्मणीति कार्यवैशेष्यात् ॥१८॥ न चायोग्यताख्यविशिष्टकारणाज्ज्ञानिष्वपि केषाञ्चिन्मोक्षो न भवतीति नियमः। ज्ञानिनां मोक्षं ददात्येवेश्वरः स्वभावात्। अयोग्यानां ज्ञानस्यैवोत्पत्त्यनुपपत्तेः ॥ १९ ॥ न च प्रयत्नानुसारिणो मुक्तावधिकारिकानन्दादयः। अधिकारानुसारित्वात्प्रयत्नस्य। कथञ्चिदधिके यत्ने तत्साधनादिवस्तूनां दूषणप्राप्तेः। 'स्वाधिकाराधिको यत्नः प्रायशो नोपपद्यते। कथञ्चिदधिके यत्ने दोषः कश्चित्समापतेदि'ति वचनाच्च ॥ २० ॥ न चैकस्मादेको विशिष्टो दृष्ट एवेति प्राणाद्विशिष्टजीवाभावे दृष्टवैरूप्यमिति दोषः। 'यः सर्वमवजानीयाद्दृते देवं नारायणं देवीं च परमां श्रियम्। स प्राणानवरुध्येमं मन्त्र-

SGDF
Sri Gangeshwari Digital Foundation

मावर्तयीत । आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः । घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेमे'ति । 'स ह्येषां भूतानां वरिष्ठो न ह्येतस्मात्कश्चनोपरि विना देवं नारायणं देवीं च परमां श्रियमि'ति प्रतिक्रियाविधानादिविरोधात् ॥ २१ ॥ 'अस्ति भगवः प्राणाद्भूय' इति प्रश्नाद्यभावात्प्राणस्यैवोन्नतिप्रतीतेर्न विष्णोरपि ततः परत्वमिति न मन्तव्यम् । 'एष तु वा अतिवदतीतिविशेषणात्प्रश्नप्रतिवचनप्रतिसन्धानोपपत्तेः ॥ २२ ॥ न च सत्यादीनामभेदानुक्तेरन्यत्वम् । 'सत्यं पूर्णं विज्ञानं पूर्णं वृतिः पूर्णा निष्ठा पूर्णा श्रद्धा पूर्णा मतिः पूर्णा सुखं पूर्णं भूमा पूर्णोऽहं पूर्ण आत्मा पूर्णो नात्र किञ्चिदूनं पूर्णमेवाधस्तात्पूर्णमुपरिष्टात्पूर्णं मध्यतः पूर्णं सर्वतः । तदेष श्लोको भवति । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' इति श्रुतेः सर्वेषामनूनत्वात् । सत्याद्या अहमात्मान्ता यद्गुणाः समुदीरिताः । तस्मै नमो भगवते यस्मादेव विमुच्यत इति वचनाच्च ॥ २३ ॥ न च श्रियोऽप्रयत्नत्वादनुपासनं संसारो वा । नित्यं भगवदुपस्थितेरतिप्रियत्वात्संस्कारापाटवान्नित्योपासोपपत्तेश्च ॥ २४ ॥ न च बन्धदार्ढ्ये श्रवणादीनामफलता । अन्यथोपासां विनैव श्रवणादिज्ञानमात्रेण मुक्तिरिति दोषः । 'श्रवणादि त्रयोत्पन्नदृष्टयैव स्वेच्छया हरिः । प्रसन्नो मुक्तिदो नित्यमन्यथा न कथञ्चने'तीश्वरेच्छानियतिश्रुतेः ॥ २५ ॥ न च गुर्वधीनत्वे ज्ञानमोक्षयोर्ज्ञानिनोऽपि कदाचिद्गुरुकोपाज्ज्ञानपराभावेनामुक्तिप्रसङ्गान्न गुर्वधीनत्वमिति । 'ज्ञानिनो गुरुशापेऽपि नामुक्तिः संसृतेः क्वचित् । आनन्दह्रासदोषेण सैव मुक्तिर्विदुष्यती'तिवचनान्मुक्तिदूषणेनैव गुरुकोपादेः कृतार्थत्वात् । ज्ञानिनो ब्रह्मवस्तुवैभवेन मुक्तिः स्यादिति गुरोर्वरेण वा मुक्त्युपपत्तेः ॥ २६ ॥ शिष्यस्यापि पुरुषत्वसाम्याद्धारणादेस्तत्प्रयत्नस्य न दौर्बल्यमिति न

SGDF
Sri Gargeshwari Digital Foundation

मन्तव्यम् । गुरुप्रसादो बलवानित्यादि विशेषोक्तेः ॥ २७ ॥ न चोत्तमगुरुस्वीकारार्थत्वेन प्राप्तसंत्यागनिमित्तदोषः । तत्र दोषे माना-भावात् ॥ २८ ॥ न च विद्या कर्म वा संसारनिवृत्तिकारणमिति कारणानिर्णयः । 'नान्यः पन्था अयनाय विद्यत' इत्यवधारणाद्विद्या-वचनस्य प्राधान्यात् ॥ २९ ॥ न च विद्यावचनस्य प्राधान्यं भ्रमः । 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय' इति भगवतस्तस्मि-न्नेवाभ्यधिकप्रीतिवचनात् । यमेवैष वृणुते तेन लभ्य इति तत्प्रीतेरेव मोक्षवचनाच्च ॥ ३० ॥ न च कस्यचिद्विशेषज्ञानोपपत्तेर्भक्त्यादिकं विना मुक्तिः । 'भक्त्यैवैनं जानाति भक्त्यैवैनं पश्यति भक्त्यैव बन्धाद्विमुच्यते भक्त्यैवानन्दीभवति' 'यमेवैष वृणुते तेन लभ्यः' 'भिनत्ति कर्मसंघातं प्रसन्नो भगवान्हरिरि'त्याद्यागमात् ॥ ३१ ॥ न च 'दृष्ट्वैव तं मुच्यते नापरेण' 'यावान्यश्चास्मि तत्त्वतः' 'ततो मां तत्त्वतो ज्ञात्वे'त्यादिसामान्यालापमात्रेण दर्शनस्याविशेषः । 'यथा-योग्यमेवैष आत्मानं दर्शयति यथाधिकारं देवेभ्योऽतो ब्रह्मैवैन-मभिपश्यत्यथात्मैवात्मानमभिपश्यति सुस्थिरो ह्येष नियम' इति दर्शनविशेषनियमस्य सुस्थिरत्ववचनात् । यावान्यश्चास्मीति ब्रह्मण एव ज्ञानोपपत्तेः । यावानित्यत्रापि सामान्यविशेषज्ञानोपपत्तेश्च ॥ ३२ ॥ न च भगवतः सर्वत्र गुणसाम्याद्यस्य कस्यापि रूपस्य दर्शनात्सर्वेषां मुक्तिः । 'समोऽपि भगवान्स्वबिम्बदर्शन एवैनं मोचयति । यथा समेष्वपि कर्मसु स्वकृतमेवैनं भोजयती'तिश्रुत्युक्तस्वकृतप्राप्ति-दृष्टान्तात् ॥ ३३ ॥ भक्तिरेवैनमिति भक्तेरेव पृथङ्मोचकत्वदर्शना-न्नेशकृत्यमिति न मन्तव्यम् । 'अनादितो गुणाः सन्तो भक्त्याद्या न ह्यमूमुचन् । जीवं तद्गुणसुव्यक्तिं कृत्वैनं मोचयेद्धरिः । किञ्चिन्न मोचयेद्वाऽसौ स्वातन्त्र्यं तेन तस्य हि । भक्तिवाकरणत्वेन सावकाशेशवागथ । भक्त्यैनं मोचयेद्विष्णुरिति मानत्वमेष्यती'ति

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मतर्कवचनादनादिगुणविस्तरे सत्यप्यव्यक्त्यादिना तदिच्छां विना मोक्षाप्राप्तेः ॥ ३४ ॥ न चांशिमार्गस्यांशेनागम्यत्वात्तयोर्भेदः । साधनोत्तमस्यादृष्टस्यांशिकृतस्यांशेन भुज्यमानत्वात् । अन्यथाऽदृष्टं-विना शरीरानुपपत्तेः ॥ ३५ ॥ न च गुणान्तरसन्धानस्य क्वापि दर्शनमात्रेण समाधिकाङ्गदेवतान्तरगुणा अप्यङ्गदेवतान्तरे उपसंहर्तव्याः। नानागुणत्वेन तेषां श्रुतिदृष्टेः । अनिषिद्धगुणानां वाक्यान्वयन्याये-नोपसंहारान्न शाखास्वित्यादिविशेषः । उत्तमेष्वधमगुणापेक्षया मन्त्रा-दिवद्वेति ॥ ३६ ॥ न च भूमगुणस्योपासकं प्रतिविशेषाभावेऽपि तत्तदिष्टगुणानुसारेण फलोपपत्तिरित्यविशेषः । 'भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्त' इत्यादिशिष्टेः ॥ ३७ ॥ न च भूमगुण उपासकानामेकप्रकारेणैव प्रतीयत इत्यङ्गीकार्यम् । विशेषस्य कल्पनोपपत्तेरिति न मन्तव्यम् । 'यावानेवाधिकारेषु विशेषोऽनून एव हि । ततो भूमत्वदृष्टौ च ब्रह्मादीनां पृथक् पृथगि'ति विशेषस्या-नूनत्ववचनात् ॥ ३८ ॥ न च शुद्धमोक्षसाधनवैरूप्यान्मोक्षसाधन-त्वेनोपदिष्टं विना विष्णावेवोपासनान्तरस्याकर्तव्यता । अविघ्नता-साधनत्वात् ॥ ३९ ॥ न च काम्यसाधनानामपि गुणानामङ्गत्वा-देवोपसंहर्तव्यतानियमः । अनुपसंहारे विरोधाभावात् । काम्या-नामनियताङ्गत्वाच्च । 'अर्थादिधर्मसिद्धौ हि न नियत्याङ्गमिष्यत' इति ब्रह्मतर्के ॥ ४० ॥ न च देवादीनामिति तत्रैव विशेषवचना-भावाद्ब्रह्मा शिरसि ललाटे रुद्र इत्यादीनां नावश्योपास्यता देवादीनामेव। 'ध्यायेदङ्गेष्वङ्गदेवताः परस्य विशिष्टा हि गुणा मुक्तौ देवानां भवन्ति ते हि तादृशास्ते हि हरेरनुरूपा' इति श्रुतेर्गुणवैशेष्यात् ॥ ४१ ॥ न च क्रियात्वादुपासनाया अग्निष्टोमादिवत्प्रतिशाखं वक्तव्यता । 'उपासना यजनं चेति साम्यं तत्तद्विशेषान् संहरेत्सर्वतश्च। तथा-कर्तॄणां तत्फलानां विशेषाद्व्यर्था हि शाखा अन्यथैवं च सार्था'

SGDF
Sri Gangeshwari Digital Foundation

इत्युपासनाविशेषाणां त्वधिकारिविशेषाणां चागमेऽवगमात् ॥ ४२ ॥
इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्या-न्यायविवरणे तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

॥ हरिः ॐ ॥ न च ज्ञानिन औदार्यान्मोक्षादन्यफलेच्छाया एवासम्भवात्तदुक्तिः प्रशंसामात्रमिति वाच्यम् । प्रायशो न सम्भव-त्येव । कस्यचित्सौभर्यादिवद्भवति चेज्ज्ञानेनैवाशेषमीप्सितं भवतीति व्यवस्थोपपत्तेः ॥ १ ॥ २ ॥ न चाधिकारे समेऽपि तेषामेवोच्चावच-शक्तियोगात्फलभेदोपपत्तेरधिकारविशेषकल्पनं व्यर्थम् । भक्त्या-द्यधिकारानुसारेण शास्त्रात्फलप्राप्तेः सर्वेषामविशेषात् । दृश्यमानत्वाच्च भक्त्याद्यधिकारतारतम्यस्य । उच्चावचशक्तेरपि तन्निबन्धनत्वात् ॥३॥ न च ज्ञानिनामात्मस्वरूपदार्ढ्यात्सत्प्रवृत्तिविपरीतप्रवृत्त्योरविशेषः । 'एतावतोऽधिका नास्ति प्राप्तिरित्यन्ततः स्थिता । या स्थितिस्तां समाप्नोति यथाशक्ति प्रयत्नतः । विपरीतप्रवृत्तेस्तु तस्य ह्रासोऽधिकं भवेदि'ति वचनात्स्थितिविशेषोपपत्तेः ॥ ४–५ ॥ न च सर्वजीवा-नामेकप्रकार एव निजस्वभावश्चैतन्यमिति फलेऽप्यविशेषः । निषेध-सामान्यविधिक्रियाणां विभक्तत्वात् । नादेवो देवपदमन्विच्छेदन्विच्छ-न्यात्यधरं तमः । न देवः स्वीयं पदमन्विच्छन्विदुष्यति । तदेव ह्यस्य स्वमिति निषेधविभागः । स्थिरं ज्ञानं स्थिरो हरावभिषङ्गः स्थिरमोजो बलं विराग एतद्धि सामान्यं देवानाम् । अन्येषामस्थिरा-ण्येतानि सर्वाण्यथापि यथायोगं विनेयानीति सामान्यविभागः । ज्ञानदानमेव देवानां विहितं तप एवर्षीणामाचार एव मनुष्याणां तदविरोधेनान्यानि करणीयानीति विधिविभागः । 'चरन्ति देवा विहितं समस्तमर्धमेव मुनयो दशांशतो मनुष्या' इति क्रियाविभागः॥ ॥ ६ ॥ न च स्वातन्त्र्याद्देवानामेव ज्ञानादिफलं न किञ्चिदन्येषामिति वाच्यम् । 'त्वरयैव मनुष्याणां सिद्धिरत्वरयैव तु । देवानां

SGDF
Sri Gangeshwari Digital Foundation

तत्प्रसादेन मुक्त्या एव सतां नृणामि'ति मानुषमुक्त्यर्थमेव देवानामत्वरया सिद्धिश्रुतेः ॥ ७ ॥ न च गृहस्थानामशेषकर्मविशेषयोग्यत्वादाधिक्यं मुक्तौ । त्वरयैव गृहिणः साधयन्ति मुक्तिमत्वरयैव यतयस्तेभ्यश्चात्वरया देवास्तेषु च ब्रह्मा । तदेष श्लोकः । 'शतं परानभिपश्यैव देवं ब्रह्माऽचरद्दुश्चरं यत्तपोऽग्र्यम् । विहाय रागं मनसश्चोपरिष्ठं ततोऽभवत्परमेष्ठी स मुक्तावि'ति । 'यो हि त्वरया साधयेत्स मन्दं सुखमाप्नुयात् । यो ह्यत्वरया स महदि'ति श्रुतेर्गृहिभ्यो यतीनां तेभ्यो देवानामत्वरया सिद्धेः । बहुकालसाधनाद्बहुकर्माधिकारमात्रस्य दुर्बलत्वात् ॥ ८ ॥ न चाविष्कारेण कथनादशेषतोऽपि योग्या ज्ञानिनो भवन्तीत्यास्था न च त्वरादिषु स्थित्वैव प्रकथनीयम् । न ह्येवं त्वरमाणे सिद्धिर्भवति । अयोग्यानामपि श्रवणप्रसङ्गात् । तस्माद्विचार्य योग्यानामेवात्वरयैव कथयित्वा सिद्धिर्भवति । 'त्यक्त्वा त्वरां ब्रह्मविद्यां वदेत जनाय योग्याय सदैव विद्वानि'ति श्रुतेः । 'मानस्तेनेभ्य' इत्यादेश्च ॥ ९ ॥ न च विरोधाभावात्साधनानुष्ठानजन्मन्येवापरोक्षज्ञानं मुक्तिश्चेति नियमः । प्रतिबन्धे सति तन्निरासेनात्वरयैव सिध्द्युपपत्तेः । 'यद्यारब्धं कर्म निबन्धकं स्यात्प्रेत्यैव पश्येद्योगमेवान्ववेक्ष्ये'त्यादिश्रुतेः । 'अनेकजन्मसंसिद्धस्ततो याति परां गतिमि'ति भगवद्वचनम् ॥ १० ॥ ११ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

॥ तृतीयाध्यायश्च समाप्तः ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ अथ चतुर्थाध्यायः ॥

॥ हरिः ॐ ॥ न च श्रवणाद्यनावृत्त्याऽपरोक्षज्ञानोदये सर्वेषां सुशक्यत्वमिति गुणः । महाफलत्वात्सर्वेषामशक्यताया एवोपपन्नत्वात् । अन्यथा सर्वसुशक्यस्यैव साधनतया सर्वेषां मोक्षापत्तेः ॥ १ ॥ न च शश्वदतिप्रसिद्धत्वादात्मशब्दोदितं स्वामित्वं न नित्यश उपास्यम् । अन्येभ्योऽधिकफलत्वेन सविशेषत्वादात्मत्वस्य ॥ २ ॥ तर्हि विशेषवत्त्वादेव प्रतीकमपीश्वर इत्युपास्यमिति न । यत्र सन्धिरुपपत्तिर्विद्यते तस्यैव ग्राह्यत्वात् । अन्यस्येशत्वग्रहणस्य मिथ्याज्ञानत्वादेवानुपपत्तेः ॥ ॥ ३ ॥ न च प्रतिदिनं विविधगुणन्यासेन भगवत्प्रीत्युपपत्तेर्न ब्रह्मताद्दृष्टिनियम इति वाच्यम् । अशेषगुणान्तर्भावेन तस्यैवाधिकसाधनत्वात् ॥ ४ ॥ न च विविधस्थानेष्वादित्यादीनां चरणाद्विष्ण्वङ्गेष्वादित्यादिमतिनियमो नास्तीति वाच्यम् । तत्कृतावेव कृत्यस्याप्तत्वादादित्यादीनाम् ॥ ५ ॥ न च ज्ञानस्य सम्यक्तद्विषयत्वमात्रेण पूर्तेरासनादिना न कार्यमिति वाच्यम् । आसनादिना निश्चलत्वादिविशेषकार्योपपत्तेः ॥ ६ ॥ न चान्यस्यापि साधनस्य कर्तुं शक्यत्वान्न यावन्मुक्ति ध्यानं कार्यमिति वाच्यम् । ध्यानं विनाऽपरोक्षज्ञानाख्यविशेषकार्यानुपपत्तेः ॥ ७ ॥ न च ज्ञानोदयेऽशेषकर्मक्षये कृतकृत्यत्वात्तदैव मुक्तिः न चेत्कर्माक्षय इति वाच्यम् । प्रारब्धस्यैव कृतस्य यावद्भोगं संस्थितेः । 'कर्माणि क्षपयेद्विष्णुरप्रारब्धानि विद्यया । प्रारब्धानि तु भोगेन क्षपयन्स्वं पदं नयेदि'ति वचनाच्च ॥ ८ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्यायविवरणे चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

॥ हरिः ॐ ॥ न च वाक्पूर्वरूपं मनः उत्तररूपं मनःपूर्वरूपं वागुत्तररूपमित्युक्तेर्व्यामिश्रत्वादनिर्णीतिरेव । वाक्पूर्वरूपं मन उत्तररूपमिति वाचः पूर्ववर्णदेवतात्वनिर्देशमात्रेण मनःपूर्वमित्यनेन साम्यम् । 'मनसा

SGDF
Sri Gargeshwari Digital Foundation

वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरती'ति युक्तितो विशेषो मनःपूर्वकत्वस्यैव श्रुत इति प्राधान्यं मनस एवेति ज्ञायते। 'सृष्टौ च विलये चैव सदा पूर्वप्रवर्तने। नित्यन्वृत्वे च वचसो मनो धीशंशि वो हि तदि'ति श्रुतेश्च ॥ १ ॥ न च मनःपूर्वकत्वनियमादशेषदृष्टादृष्टव्यापाराणां तस्य प्राणादनूनता। 'इन्द्रियस्थैः स्वरूपैस्तु ज्ञानानि जनयत्यसौ। मनःस्थेन विशेषेण कामैः कर्मकृदेव च। पृथक्स्थितेन रूपेण जीवं धारयति प्रभुः। जीवस्थितेन रूपेण वेदयत्यहमित्यपि। प्राण एको वशी नित्यं बाह्यान्तःकरणेश्वरः। तान्येतान्यवशान्येव तथापि कृपयैव सः। पृथक्शक्तोऽपि तद्भेस्तु स्वरूपैस्तद्गकार्यकृत्। तस्येशो भगवन्विष्णुरेवमेष यथान्यग' इत्यादिश्रुतेः प्राणस्यैवाऽध्यताऽवगमात् ॥ २ ॥ सोऽध्यक्षे इत्यस्याप्येवमेवाशङ्कापरिहारश्च। श्रुतिबाहुल्यमेव शङ्कायां परिहारे च विशेषहेतुः ॥ ३ ॥ न च भूतानामुत्पत्तिक्रमवैपरीत्येन लयोक्तेर्मुक्तिलययोर्विशेषाभावाच्चैकस्मिन्नेव भूते सर्वेषां लयोऽर्थतः कॢप्त इति वाच्यम्। तत्तद्भूतोद्भवत्वात्तत्तद्देवानां तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेः। विशेषश्रुतेश्च ॥ ४–५ ॥ न च प्रकृतेः संसाराभावादिनेशेनाप्यन्यथाकर्तुमशक्यत्वेन सुदृढत्वात्सर्वसाम्यमेवेश्वरेण। न चेत्संसारित्वमिति युक्तम्। ईश्वरस्य महामहिमत्वात्। नित्यमसंसारित्वस्य नित्यं तदनुग्रहेणैवोपपत्तेः। 'सदाऽनित्यतयाऽनित्यं नित्यं नित्यात्मना यतः॥ नित्ययैव स्वशक्त्येशो नियामयति नित्यदा। द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः। प्रकृतिः पुरुषश्चैव न सन्ति यदुपेक्षये'त्यादि श्रुतेश्च ॥ ६ ॥ न चान्यदेवादीनां प्राणाधीनत्वात्तत्प्राप्तिनियमात्परप्राप्तिर्नास्त्येव। 'प्राणं प्राप्य परं देवास्तदन्ये चैव तद्गताः। प्राप्नुवन्ति परं देवं वसन्ति च यथासुखमि'ति विशेषश्रुतेः ॥ ७ ॥ न च सत्यसङ्कल्पत्वादेरीश्वरसङ्कल्पाद्यनुसारित्वनियमे संसारसमान-

SGDF
Sri Gangeshwari Digital Foundation

धर्मत्वं मुक्तेरिति वाच्यम् । कृतार्थत्वेनैव विशेषोपपत्तेः । 'अपूर्णतादि-भावो वा दुःखं वा नास्ति किञ्चन । मुक्तस्य पारतन्त्र्येऽपि तारतम्येऽप्यतः सुखी'ति च श्रुतिः ॥ ८ ॥ न च प्रारब्धकर्मशेषवत्त्वादुत्क्रान्ताव-विशेषो ज्ञानिनः । ज्ञानोदयानन्तरं सर्वदा ज्ञानफलस्यानुवृत्तेः । 'प्रारब्धकर्मशेषस्तु विरजातरणावधिः । स्वोदयात्फलदं ज्ञानमादेहं कर्म वा रवेः । तथापि प्रकृतेर्बन्धो ब्रह्मणा सह भिद्यत' इति श्रुतिः । 'शरीरे पाप्मनो हित्वा सर्वान्कामान् समश्नुते । स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव पाप्मना विनिर्मुक्तः स प्राप्नोति विरजां नदीं तत्सुकृतदुष्कृते विधूनुते' 'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति च । 'अन्यथाभाव-नियमोऽनृतता कार्यकारण' इति च ॥ ९ ॥ न च कृष्यादिलौकिक-साधनस्य फलस्मरणानपेक्षत्वात्स्वर्गमोक्षयोरपि तथात्वमिति वाच्यम् । 'क्रियानुवृत्तिर्लौकिके साधने तु मनोऽनुवृत्तिर्वैदिके साधने स्यात् । फलंभवेत्सर्वथेत्येव तस्मात्स्मरेत्सदा निश्चितत्वेन विद्वानि'ति श्रुते-स्तदनुसार्यनुवृत्तेर्लौकिकवैदिकयोः साम्यात् । अतोऽत्र फलानुस्मरणं लवनादिकृष्यनुवृत्तिवद्द्रष्टव्यम् । वचनप्रामाण्यात् ॥ १० ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यान्याय-विवरणे चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

॥ हरिः ॐ ॥ न च तत्र तत्र मार्गस्यान्यथोक्तेरधिकारि-भेदेन पृथङ्मार्गसुक्रमोपपत्तिरिति वाच्यम् । 'सर्वे वा एत उत्क्रामन्ति तेऽर्चिषमेवाभिसंयन्ति ततो वायुं ततोऽहःपूर्वपक्षमित्येष उ एव ब्रह्म-पथः । द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चे'ति विशेषश्रुवितो ज्ञानिनामेकमार्गस्यैव प्राप्तेः । एष एव ब्रह्मपथ इत्यवधारणविरोधा-

SGDF
Sri Gangeshwari Digital Foundation

दन्यथा । एजदिति वैदिकानुष्ठानवत उक्तेर्नाधोगतिविरोधः । 'पुनरावर्तिनो ये तु तेषां धूमपथो ध्रुवः । अन्येषामर्चिरादिश्च तद्भेदो मध्यसंस्थितिः । धूमार्चिरादिदेवेभ्यः प्राप्यानुज्ञां तु मध्यगाः । विहृत्य स्वेष्टदेशेषु तदूर्ध्वं याति चाधरम् । अत्यल्पानामविज्ञाताप्यनुज्ञावर्तिनां भवेत् । पुंद्वारेण स्वदृष्ट्या वा यथायोग्यं विमुच्यताम् । अतो न मार्गभेदोऽस्ति न हि मार्गोऽत्र सम्भवः । प्रेतत्वं चाधरो मार्गः पापजत्वात्तयोः पृथगि'ति स्मृतेश्च ॥ १–४ ॥ न च सोमादग्निमग्नेरिन्द्रमिति सोमादग्नेरेवमस्यापिप्राप्तेः प्रधानवायोरप्यवरोऽन्यः प्राप्योऽस्त्विवति वाच्यम् । उत्तमत्वात्तस्यैव ब्रह्मप्रापयितृत्वशक्तेः । 'वायुरेव ब्रह्म गमयति तस्य ह्येषा शक्तिः । न ह्यन्यो ब्रह्म गमयति प्रियो ह्येनद्गमयति । न ह्यन्यः प्रियो ब्रह्मण' इति श्रुतेः । मार्गे त्ववरस्यापि यथामार्गं पश्चात्प्राप्तिर्भवति लोकवत् । न हि राजानं यः कश्चित्प्रापयति कृत्स्नमतिप्रियं चापहाय ॥ ५ ॥ न च चतुर्मुखमुक्तिपर्यन्तं सन्ततत्वनियमाद्बन्धस्य तावद्भगवत्प्राप्तिर्नास्तीति नियमः । 'यान्ति देवं परं केचित्पूर्वं केचिल्लये विभुम् । योग्यतातारतम्येन विशेषोऽयमपीष्यत' इति श्रुतेस्तथाप्राप्तत्वात् ॥ न च परब्रह्मण एव ब्रह्मशब्दमुख्यार्थत्वेन प्रथमप्राप्तत्वादपोहायुक्तेस्तस्यैव प्राप्तिनियमः । यान्ति देवं परं केचिदिति प्रमाणप्राप्तत्वादेव ॥ न च परप्राप्तिर्यस्याभीष्टा तस्य तत्प्राप्तिरिति नियमः । 'क्रमानुरागी भगवान् क्रमात्पुंभिरवाप्यते । अतः क्रमात्समृद्धे तु ज्ञाने ब्रह्मलये नरैः । प्राप्यते नियमेनैव कैश्चिदेवाप्यते मृता'विति भगवतः क्रमानुरागित्वश्रुतेः ॥ न च बहुधाश्रुतेर्यथासौकर्यं चतुर्मुखस्य परस्य वा प्राप्तिरिति वाच्यम् । श्रुत्युक्तानुवृत्तेरेव न्याय्यत्वात् । 'सप्रतीकाश्चतुर्मुखमप्रतीकाः परममुहैते गच्छन्त्यागच्छन्ति च चतुर्मुखात्परमं पराच्चतुर्मुखं यावद्विलयमथ सह चतुर्मुखेन विमुच्यन्ते आनन्दिनो भवन्ती'ति हि श्रुतिः ।

SGDF
Sri Gargeshwari Digital Foundation

अन्तर्भेदाधिकरणत्वात्समुदायोक्तिः ॥ ६ ॥ इति श्रीमन्न्यायविवरणे चतुर्थाध्यायस्य तृतीयः पादः ॥ ४ । ३ ॥

॥ हरिः ॐ ॥ न चैतं सेतुं तीर्त्वेत्यत्रातिक्रमोक्तेर्मुक्तो ब्रह्म-तीर्त्वा गच्छति । तरतीतिसामान्यप्रतीतेर्ब्रह्म तीर्त्वा इदं गच्छतीति विशेषानुक्तेः 'इमां घोरामशिवां नदीं तीर्त्वा ब्रह्म संपद्यत' इति विशेषोक्तेश्चैतं सेतुं प्रत्यन्यत्तीर्त्वेत्यन्यथोपपत्तेः ॥ १ ॥ न च कृति-मत्त्वादमुक्त एवोच्यते । 'स तत्र पर्येती'त्यादौ स्वेन रूपेणाभिनिष्पद्यत इति मुक्तस्य स्पष्टं प्रतिभातत्वाच्छ्रुतौ । स तत्र पर्येतीति श्रुत्यैक्य-प्रतीतेश्चैवं भूतस्यापि प्रकरणत्वं प्रकल्प्य श्रुतिबाधाङ्गीकारे सा श्रुति-रप्येवं विभज्य किं योजयितुं न शक्यत इति श्रुतेरेवाभावप्रसङ्गः । सत्यं ज्ञानमित्यादावपि सत्यमित्यस्यान्यमित्यनेनान्वय इत्यादि-प्रसङ्गात् ॥ २ ॥ न च परं ज्योतिः शब्देनाऽदित्यज्योतिरङ्गीकारे 'स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्त' इत्यादिनैकार्थतेति प्रयोजनम् । 'अथ किमुच्यते परं ज्योतिरित्यात्मैव परं ज्योतिः स हि परमो द्योतते जीवाच्चाजीवाच्च तस्मादाहुः परं ज्योतिरिति तमेवैष जीवोऽभिसम्पद्य स्वेनरूपेणाभि-निष्पद्यत' इति तस्यैव परंज्योतिष्ट्वोक्तेः । सावकाशलिङ्गान्निरवकाश-श्रुतेरेव बलवत्त्वात् ॥ ३ ॥ न च परमगतित्वादीश्वराभुक्ता अपि भोगा मुक्तौ भवन्ति । ईश्वरस्य स्वत एव पूर्णानन्दत्वादभोगस्यापि सम्भवादिति वाच्यम् । 'पूर्णानन्दः पूर्णभुक्पूर्णकर्ता पूर्णज्ञानः पूर्णभाः पूर्णशक्तिः । पूर्णैश्वर्याद्भगवान्वासुदेवो विरुद्धशक्तिर्न च दोषस्पृगीश' इत्याश्चर्यतयैव ब्रह्मण उभयोक्तेः । सावकाशोपपत्तिमात्रान्निरवकाश-श्रुतियुक्तोपपत्तेरेव बलवत्त्वात् ॥ ४ ॥ न च पारङ्गतत्वान्मुक्तस्य चिन्मात्रदेहोऽपि नास्तीति वाच्यम् । अकृत्रिमत्वात्तस्य देहस्यानप-गमात् । 'अथ विमुक्तस्य चिन्मात्र एव देहो भवति चिन्मात्राणि

SGDF
Sri Gargeshwari Digital Foundation

करणानि तैरीशानुगृहीतैर्भोगान् भुङ्क्त' इति श्रुतेः ॥ ५ ॥ न च भगवदोकसि स्थितत्वान्मुक्तस्य तस्याप्योकस्त्वसाम्येन तत्तदुपायसाध्यभोगसाधनत्वं वाच्यम् । निर्दोषत्वात्तदोकसो मुक्तस्य च संकल्पादेवेतिश्रुत्यनुसारेणोपपत्तेः॥६॥ न च परगृहगतत्वादस्य राजगृहगतस्येव स्वाधमा अपि कदाचिदीशते । निर्दोषत्वादेव मुक्तस्येश्वरस्य तत्रस्थानां मुक्तान्तराणां च राजदोषवद्दोषासम्भवाद्यथायोग्यमेव स्वीकारोपपत्तेः । 'मुक्तानां पतयो देवा देवानां च प्रजापतिः । तस्य विष्णुर्नचैवेदं पारावर्यं विनश्यती'ति श्रुतिः ॥ ७ ॥ न च देहभावे तत्कार्यदुःखादिस्तदभावे भोगासम्भव इति दोषः । 'देहाभावाच्च भावाच्च निर्भोगित्वं च दुःखिताम् । यान्त्यमुक्ता नोभयं च मुक्तानां वशिता यत' इति श्रुत्यैव विशेषक्लृप्तेः ॥ ८ ॥ न च संकल्पादेव समस्तसम्भवात्सृष्ट्यादिसमस्तकार्यसम्भवः । 'व्यापारो जगतो विष्णोर्मुक्तानां तु स्वभोगगः । न हि स्वर्णं शुद्धमपि वह्निकार्यकरं भवेत् । अयोग्यशक्तितस्त्वेन नाधिकानन्दसम्भवः । न हि कश्चित्सुशक्तोऽपि चकाराचेतनं चितम् । न च कामस्तथा भूयात्ततः स्यात्सत्यकामिते'ति श्रुत्या विशेषक्लृप्तेरेव । 'मुक्तानां न जगद्यत्नस्तथापि विबुधाः सदा । मुक्तानां तु नियन्तारस्तेषां ब्रह्माऽस्य वै हरिरि'ति च विशेषक्लृप्तिः ॥ ॥ ९ ॥ न च वशित्वान्मुक्तस्यापि वृद्धिः । कृतकृत्यत्वेन निःश्रमत्वादुपासनादावभ्यासपाटवान्निर्दोषत्वात्स्नेहाधिक्याच्च तस्यैव परमसुखरूपत्वेन फलरूपत्वात् । 'अभ्यासपाटवात्स्नेहादश्रमत्वादुपासना । भक्तिश्च सुखरूपैव मुक्तानां न तु साधनमि'ति श्रुतिः ॥ १० ॥ न चानन्तत्वात्कालस्य त्रयोदशी पञ्चदशीवत्कदाचित्समस्तस्यापिसम्भवान्मुक्तस्यापि पुनरावृत्त्या शङ्केतिवाच्यम् । सत्यकामत्वादिमाहात्म्यात् । 'अशेषकामसत्यत्वान्मुक्तानां न पुनर्भवः । यस्मात्स कामयेदेव नित्यमात्मापुनर्भवमि'ति च श्रुतिः ॥ ११ ॥ इत्यनन्त-

SGDF
Sri Gargeshwari Digital Foundation

महान्यायमीमांसाऽपारवारिधेः । उत्तारणात्यशक्त्यैव व्याकुलीकृत-चेतसाम् । मन्दानामुपकाराय महतां चोच्छ्रितात्मनाम् । तद्विशेष-परिज्ञानप्रदीप्तार्काभचेतसाम् । विशेषगाढे मनसि नितरामुपकारकः । न्यायप्लवो मयाऽकारि सङ्क्षेपात्प्रमिताक्षरैः । विस्तारोऽप्ययमेव स्यात्त-द्विशेषातिवेदिनाम् । व्याख्यानुव्याख्ययोरेव विस्तारो यदुदीरितः । अनल्पचेतसां पुंसामलं विज्ञानसिद्धये । तन्न्यायोद्धरणे शक्ता अपि ह्येतेन सुस्थिरम् । न्यायानुगं मनः कुर्युरिति सङ्ग्रहलालसाः । को नामाशेषविद्योरुसागरोन्मथनोद्धृतम् । साक्षाद्विद्याधिराजेन न्यायामृत-मनुत्तमम् । अशेषतोऽधिगच्छेत वन्द्यो वृन्दारकोऽपि सन् । एवं सुदुर्लभेऽप्यद्धा महान्यायपरामृते । केचनाधिक्रियन्तेऽत्र तत्प्रसादानु-रञ्जिताः । ब्रह्माद्या अमृते यद्वत्सागरोन्मथनोद्धृते । अहं तु तत्प्रसादैक-महास्पदबलोद्धतः । न्यायामृतार्णवमिममवगाह्य विभज्य च । सङ्क्षेप-विस्तराभ्यां च चकार व्याकृतिं कृतिम् । तत्प्रसादमृते कस्य शक्तिः संसारसागरे । मग्नस्य चेतनस्य स्यात्तत्कृतानुकृतौ क्वचित् । नित्यानन्दामृतस्यन्दि तत्कटाक्षैर्धितस्य तु । का नु शक्तिर्भवेन्नैव ततः कोऽत्रातिविस्मयः । विद्याऽविद्ये सुखं दुःखमशक्तिः शक्तिरेव च । उत्पत्तिस्थितिनाशाश्च विशेषाश्च परेऽखिलाः । चेतनाचेतनस्यास्य समस्तस्य यदिच्छया । स मम स्वकृतेनैव प्रीयतां पुरुषोत्तमः ॥ यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचो नयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ नमोऽजभवभूर्यक्षपुरःसरसुराश्रय । नारायणारणं मह्यं मापते प्रेयसां प्रिय ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रा-नुव्याख्यान्यायविवरणे चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥ चतुर्थोऽध्यायः सम्पूर्णः ॥

॥ न्यायविवरणं सम्पूर्णम् ॥

SGDF
Sri Gangeshwari Digital Foundation

336

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमदणुभाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ हरिः ॐ ॥ नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥१॥ विष्णुरेव विजिज्ञास्यः
सर्वकर्ताऽऽगमोदितः । समन्वयादीक्षतेश्च पूर्णानन्दोऽन्तरः खवत् ॥२॥
प्रणेता ज्योतिरित्याद्यैः प्रसिद्धैरन्यवस्तुषु । उच्यते विष्णुरेवैकः सर्वैः
सर्वगुणत्वतः ॥ ३ ॥ सर्वगोऽत्ता नियन्ता च दृश्यत्वाद्युज्झितः सदा ।
विश्वजीवान्तरत्वाद्यैर्लिङ्गैः सर्वैर्युतः स हि ॥ ४ ॥ सर्वाश्रयः पूर्णगुणः
सोऽक्षरः सन् हृदब्जगः । सूर्यादिभासकः प्राणप्रेरको दैवतैरपि ॥५॥
ज्ञेयो न वेदैः शूद्राद्यैः कम्पकोऽन्यश्च जीवतः । पतित्वादिगुणैर्युक्त-
स्तदन्यत्र च वाचकैः ॥ ६ ॥ मुख्यतः सर्वशब्दैश्च वाच्य एको
जनार्दनः । अव्यक्तः कर्मवाक्यैश्च वाच्य एकोऽमितात्मकः ॥ ७ ॥
अवान्तरं कारणं च प्रकृतिः शून्यमेव च । इत्याद्यन्यत्रनियतैरपि
मुख्यतयोदितः । शब्दैरतोऽनन्तगुणो यच्छब्दा योगवृत्तयः ॥ ८ ॥
इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानन्दतीर्थभगवत्पा-
दाचार्यविरचिते प्रथमोऽध्यायः ॥ १ ॥

॥ हरिः ॐ ॥ श्रौतस्मृतिविरुद्धत्वात्स्मृतयो न गुणान्हरेः ।
निषेद्धुं शक्नुयुर्वेदा नित्यत्वान्मानमुत्तमम् ॥ १ ॥ देवतावचनादापो
वदन्तीत्यादिकं वचः । नायुक्तवाद्यसन्नैव कारणं दृश्यते क्वचित् ॥२॥
असज्जीवप्रधानादिशब्दा ब्रह्मैव नापरम् । वदन्ति कारणत्वेन क्वापि
पूर्णगुणो हरिः ॥ ३ ॥ स्वातन्त्र्यात्सर्वकर्तृत्वान्नायुक्तं तद्वदेच्छ्रुतिः ।
भ्रान्तिमूलतया सर्वसमयानामयुक्तितः ॥ ४ ॥ न तद्विरोधाद्वचनं
वैदिकं शङ्क्यतां व्रजेत् । आकाशादिसमस्तं च तज्जं तेनैव लीयते ॥५॥

SGDF
Sri Gangeshwari Digital Foundation

सोऽनुत्पत्तिलयः कर्ता जीवस्तद्वशगः सदा । तदाभासो हरिः सर्वरूपेष्वपि समः सदा ॥ ६ ॥ मुख्यप्राणश्चेन्द्रियाणि देहश्चैव तदुद्भवः । मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥ ७ ॥ सर्वदोषोज्झितस्तस्माद्भगवान् पुरुषोत्तमः । उक्ता गुणाश्चाविरुद्धास्तस्य वेदेन सर्वशः ॥८॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वितीयोऽध्यायः ॥ २ ॥

॥ हरिः ॐ ॥ शुभेन कर्मणा स्वर्गं निरयं च विकर्मणा । मिथ्याज्ञानेन च तमो ज्ञानेनैव परं पदम् ॥ १ ॥ याति तस्माद्विरक्तः सन् ज्ञानमेव समाश्रयेत् । सर्वावस्थाप्रेरकश्च सर्वरूपेष्वभेदवान् ॥२॥ सर्वदेशेषु कालेषु स एकः परमेश्वरः । तद्भक्तितारतम्येन तारतम्यं विमुक्तिगम् ॥ ३ ॥ सच्चिदानन्द आत्मेति मानुषैस्तु सुरेश्वरैः । यथाक्रमं बहुगुणैर्ब्रह्मणा त्वखिलैर्गुणैः ॥ ४ ॥ उपास्यः सर्ववेदैश्च सर्वैरपि यथाबलम् । ज्ञेयो विष्णुर्विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम् ॥ ५ ॥ सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः । न लिप्यते ज्ञानवांश्च सर्वदोषैरपि क्वचित् ॥६॥ गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ । नृणां सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रमम् ॥ ७ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयोऽध्यायः ॥ ३ ॥

॥ हरिः ॐ ॥ विष्णुर्ब्रह्म तथा दातेत्येवं नित्यमुपासनम् । कार्यमापद्यपि ब्रह्म तेन यात्यपरोक्षताम् ॥ १ ॥ प्रारब्धकर्मणोऽन्यस्य ज्ञानादेव परिक्षयः । अनिष्टस्योभयस्यापि सर्वस्यान्यस्य भोगतः ॥२॥ उत्तरेषूत्तरेष्वेवं यावद्वायुं विमुक्तिगाः । प्रविश्य भुञ्जते भोगांस्तदन्तर्बहिरेव वा ॥ ३ ॥ वायुर्विष्णुं प्रविश्यैव भोगश्चैवोत्तरोत्तरम् । उत्क्रम्य मानुषा मुक्तिं यान्ति देहक्षयात्सुराः ॥ ४ ॥ अर्चिरादिपथा वायुं प्राप्य तेन जनार्दनम् । यान्त्युत्तमा नरोच्चाद्या ब्रह्मलोकात्सहामुना ॥५॥

SGDF
Sri Gargeshwari Digital Foundation

यथासङ्कल्पभोगाश्च चिदानन्दशरीरिणः । जगत्सृष्टयादिविषये महासामर्थ्यमप्यृते ॥ ६ ॥ यथेष्टशक्तिमन्तश्च विना स्वाभाविकोत्तमान् । अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिताः । दुःखादिरहिता नित्यं मोदन्तेऽविरतं सुखम् ॥ ७ ॥ पूर्णप्रज्ञेन मुनिना सर्वशास्त्रार्थसङ्ग्रहः । कृतोऽयं प्रीयतां तेन परमात्मा रमापतिः ॥ ८ ॥ नमो नमोऽशेषदोषदूरपूर्णगुणात्मने । विरिञ्चिशर्वपूर्वेड्य वन्द्याय श्रीवराय ते ॥ ९ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थोऽध्यायः ॥ ४ ॥

॥ श्रीमदणुभाष्यं सम्पूर्णम् ॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीः

श्रीमदानन्दतीर्थ (पूर्णप्रज्ञ) भगवत्पादाचार्य विरचित

श्री सर्वमूलांतर्गत

ऋक् (संहिता) प्रस्थान ग्रन्थः

१. ऋग्भाष्यम् (ऋक् संहितायुतम्) ५२३-६१२

[प्रथमाष्टके तृतीयाध्याये एकविंशवर्गपर्यन्तम्
प्रथममण्डले चत्वारिंशत्सूक्तात्मक संहितापर्यन्तं वा]

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ऋग्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥ हरिः ॐ ॥ नारायणं निखिलपूर्णगुणार्णमुच्चसूर्यामितद्युतिमशेषनिरस्तदोषम् । सर्वेश्वरं गुरुमजेशनुतं प्रणम्य वक्ष्याम्यृगर्थमतितुष्टिकरं तदस्य ॥ ओमशेषगुणाधार इति नारायणोऽप्यसौ । पूर्णो भूतिवरोऽनन्तसुखो यद्व्याहृतीरितः ॥ गुणैस्ततः प्रसविता वरणीयो गुणोन्नतेः । भा-रति-ज्ञानरूपत्वाद्भर्गो ध्येयोऽखिलैर्जनैः । प्रेरकोऽशेषबुद्धीनां स गायत्र्यर्थ ईरितः ॥ छ ॥

स पूर्णत्वात्पुमान्नाम पौरुषे सूक्त ईरितः । स एवाखिलवेदार्थः सर्वशास्त्रार्थ एव च । 'स एव सर्वशब्दार्थ' इत्याहोपनिषत्परा । 'ता वा एता ऋच' इति विशेषेणाप्यृगर्थताम् । 'यो देवानामि'ति श्रुत्या देव नाम्नां विशेषतः । स्पष्टत्वात्तद्गतत्वेन ॥ छ ॥

तत्राऽहाग्रेऽग्निनामकम् । अग्रणीत्वं यदग्नित्वमित्यग्रे नाम तद्भवेत् । एवमेवाह भगवान्निरुक्तिं बादरायणः । 'यथैवाग्न्यादयः शब्दाः प्रवर्तन्ते जनार्दने । तथा निरुक्तिं वक्ष्यामो ज्ञानिनां ज्ञानसिद्धये' । इति तेन (अग्निमीळे) अग्निशब्दोऽयमग्र एवाभिपूज्यताम् । अग्रयत्वमग्रनेतृत्वमत्तिमङ्गागनेतृताम् । आह तं स्तौम्यशेषस्य पूर्वमेव हितं प्रभुम् । ऋत्विङ्क्रियामकत्वेन यज्ञानामृत्विजं सदा । द्योतनाद्विजयात्कान्त्या स्तुत्या व्यवहृतेरपि । गत्या रत्या च देवाख्यं

ऋक्संहिता

मधुच्छन्दा वैश्वामित्रः । अग्निः । गायत्री ।

॥ ॐ ॥ अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् १

SGDF
Sri Gangeshwari Digital Foundation

होतृसंस्थं विशेषतः। अग्निसंस्थेन रूपेण यतोऽग्निर्होतृदेवता। इन्द्रियाग्निषु चार्थानां यद्धोता होतृनामकः। रतिधारकोत्तमत्वात्स रत्नधातम ईरितः ॥१॥ (अग्निःपूर्वेभिः) स पूर्वैर्नूतनैरेष्यैर्विज्ञानादृषि-नामकैः। ईड्यो देवादिभिस्सर्वैस्स च देवानिहानयेत् ॥ २ ॥ (अग्निनारयिं) तेनैव रयिमाप्नोति वित्तं विद्याधनात्मकम्। दिवसे दिवसे नित्यं पुष्टिमेव न हीनताम्। यशश्च पुत्रसंयुक्तं वीर्यवत्तममेव वा ॥ ३ ॥ (अग्नेयं) यं यज्ञं परितो भूत्वा रक्षसि त्वं सदैव च। विधिमार्गस्थितं देवान्स एवाप्नोत्यसंशयम् ॥ ४ ॥ (अग्निर्होता) सोऽखिलग्रहणप्रज्ञः सद्गुणैः सन्ततोऽखिलम्। यमयत्यग्र्यकीर्तीनामुत्तमो विबुधैः सह। आगन्ताऽखिलभक्तानां पूजास्वीकारतत्परः ॥ ५ ॥ १ ॥ (यदङ्ग) यजमानाय यद्भद्रं कर्तुमिच्छसि सत्प्रिय। त्वच्चेष्टयैव कर्माणि वर्तयित्वा तदीहनम्। तवैव सत्यमङ्गानां रसयद्वह्निगो हरिः। अङ्गिरा अङ्गिरः पुत्रो यतोऽग्निरभवत्क्वचित् ॥ ६ ॥ (उपत्वा) वस्तर्दिनमहोरात्रमभीष्टप्राणिनां सदा। अल्पा अपि वयं बुद्ध्या त्वामुच्चगुणमीश्वरम्। उपयाम मनःकर्मवाग्भिस्त्वन्नमसंभराः ॥ ७ ॥ (राजन्तं) देदीप्यमानं स्वे सद्मन्यध्वरेशं सदावृधम्। यथार्थज्ञानगोपं त्वामुपेमसि ॥ ८ ॥ (सनः) पितेव नः। सूपाश्रयो भव त्वं च

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति २
अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम् ३
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स इद्देवेषु गच्छति ४
अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत् ॥ ५ ॥ १ ॥
यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत्सत्यमङ्गिरः ६
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ७
राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे ८

SGDF
Sri Gangeshwari Digital Foundation

यद्वदौरससूनवे । रक्ष सन्ततसौख्याय सम्यक्सत्त्वाय वा सदा ॥ ॥ ९ ॥ २ ॥ १ ॥

मुनिस्तु सर्वविद्यानां भगवान्पुरुषोत्तमः । विशेषतश्च वेदानां 'यो ब्रह्माणमि'ति श्रुतिः । ऋग्वेदादिकमस्यैव श्वसितं प्राह चापरा । 'वाचो बभूवुरुशतीर्हयग्रीवादि'ति स्फुटम् । वचो भागवतेऽप्यस्ति ब्रह्माण्डेऽपि तथा परम् । 'हयग्रीवादिमा विद्याः श्वसितत्वेन निःसृताः । ब्रह्मणा स्वीकृतास्ताश्च रुद्रशेषविपा अपि । दक्षाद्याः सनकाद्याश्च शक्राद्या मनवस्तथा । जगृहुस्ते च विश्वस्मिंश्चक्रुर्व्याप्तास्ततोऽखिलाः' । उक्तं पद्मपुराणे च 'कपिलो भगवानजः। प्रोवाच ब्रह्मणे विद्या' 'हृदिस्थो बादरायणः । ओङ्कारपूर्विका विद्याः प्रेरयत्यखिलेष्वपि। सदैव ब्रह्मणे पूर्वमि'ति सात्वतसंहिता । सकृन्निगदमात्रेण गृहीतं ब्रह्मणाऽखिलम् । अन्तर्गतस्य व्यासस्य प्रसादान्नित्यशक्तितः । तेन चानन्तशक्तित्वा-द्युगपत्समुदीरितम्। प्रथमप्रतिपत्तृत्वान्मुनिर्ब्रह्माऽखिलस्य च। सुपर्णोऽखिलवेदानां पञ्चरात्रस्य नागराट् । द्वितीयप्रतिपत्तृत्वान्मुनित्वे संप्रकीर्तितौ । यः पश्यति स्वयं वाक्यं स ऋषिस्तस्य कीर्तितः । अर्वाक्तु द्वादशावृत्तेरधीत्याऽप्यृषिरेव सः । यत्स्वयं प्रतिभा तस्य संशयार्थं गुरोर्वचः । सुपर्णादेर्विरिश्चस्य केवलं धर्मकारणम् । ऋचामृषिस्ततः शक्रो यजुषां सूर्य एव च । सोमः साम्नां तृतीयास्ते प्रतिपत्तार ईरिताः । अथर्वाङ्गिरसामग्निरेकर्षिश्चाप्यथर्वणाम् । इत्युक्ताः समुदायस्य सन्त्यन्ये च पृथक्पृथक् । एतज्ज्ञानाददृष्टस्य फलस्याप्तिः स्फुटं भवेत्। द्रष्टृणां तु चतुर्थानां ज्ञानादप्यैहिकं भवेत्। ते चैकस्यापि बहवः स्युः सूक्तस्यर्च एव वा। तस्यां तस्यामवस्थायां तत्तत्प्राप्तिविशेषतः । तेषां वाक्यस्वरूपेण प्रार्थनादिषु पश्यति ।

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व । सच॑स्वा नः स्व॒स्तये॑ ॥ ९ ॥ २ ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

विष्णुर्ब्रह्मा सुपर्णो वा तत्तद्योग्यार्थभेदतः। सर्ववेदाभिमानित्वाच्छ्री-र्ब्रह्माणी च भारती। द्रष्ट्रयश्च सर्वविद्यानां व्याख्यातो ब्रह्मणा मरुत्। स्वभर्त्रनन्तरं द्रष्ट्र्यस्तेभ्यस्तन्नोदिता हि रुक्। ताः स्तुवन्ति हरिं नित्यं विद्याभिस्ते च सर्वशः। छन्दस्त्वेन मुनिस्त्वेन तासां स्मृति-रुदीरिता। स्मर्तव्यास्ते च सर्वेऽपि मुनित्वेन पृथक्पृथक्। गायत्री बृहती चैव ताः सर्वा गरुडस्तथा। ब्रह्माण्यनुष्टुबिन्द्राणी त्रिष्टुप्स्वाहेति चोच्यते। गायत्री जगती चैव वारुणी रोहिणी तथा। अनुष्टुब्बृहती चैव तारा पङ्क्तिः शची तथा। उष्णिक् सौरी जगत्यश्च सर्वदेवस्त्रियो मताः। विराण्मित्रावरुणयोर्भार्ये इति च कीर्तिते। अतिछन्दांसि सर्वाणि सर्वदेव्यः प्रकीर्तिताः। विराडिति च नामासां तास्ता ऊनाधिकेष्वपि। निचृद्भुरिग्विराट्संज्ञा प्रस्तारेत्यादि नाम च। बह्वी-नामेकमानेन त्वेकं नाम च युज्यते। सर्वाभिमानिता चैव तिसृणां तु यथाक्रमम्। देवता सर्वविद्यानां स्वयं नारायणः प्रभुः। ऋते तत्र प्रसिद्धाश्च देवता श्रीस्तथाऽत्र च। ऋते प्रसिद्धा ब्रह्मैव ततस्तेन क्रमेण च। पूर्वप्रसिद्धवर्जं तु शक्रान्ता देवता मताः। ब्रह्मवायू गिरौ वीन्द्रशेषरुद्राश्च तत्स्त्रियः। शक्रकामौ कामपुत्रमनुदक्षाङ्गिर-स्सुताः। तद्वच्छची रतिः सूर्यसोमधर्मादि तत्स्त्रियः। प्रधानमरुतो वारिपतिरग्निश्च मारुताः। निर्ऋतिः स्त्रियश्च सूर्यादेरश्विनावितरे तथा। अनन्तकोटिशतकदशार्धार्धांशतः क्रमात्। ज्ञानभक्तिबलैश्वर्यपूर्वाखिल-गुणैरपि। मुक्तावपि क्रमो ह्येष देवता उदिता इमाः। इन्द्रावरा विशेषेण लिङ्गेनैव पृथक्पृथक्। देवतास्तत्र तत्र स्युरेष एव परो विधिः। वेदादिवर्णपर्यन्तैर्मूर्तयः केशवस्य तु। समासव्यासयोगेन वाच्या-स्तात्पर्यतः पृथक्। यथायोगं यथान्यायमन्यासामपि मूर्तयः। ऋक्संहितायां स्वाध्याये निरुक्ते व्यासनिर्मिते। प्रवृत्ते चैतदखिलमुक्तं हि प्रभुणा स्वयम्। सर्वे वेदाश्च नामानि ता वा एता ऋचस्तथा।

SGDF
Sri Gargeshwari Digital Foundation

इन्द्रं मित्रं वरुणमित्याद्यत्र च प्रमा परा। 'देवता तारतम्यं च सर्वोत्कृष्टं च केशवम्। ज्ञात्वैव मुच्यते ह्यस्मान्नान्यथा तु कथञ्चन'। इति पैङ्गिश्रुतिश्चाह दृश्यन्तेऽत्र च सर्वशः। न ते महित्वमित्यादिनैश्वरानेव केवलान्। गुणान्विष्णोः श्रुतिर्ह्याह नैव दोषान्कथञ्चन। जाता परिबभूवेति मर्यादां ब्रह्मणोऽपि हि। नैव रेमे बिभेद्ब्रह्मा नासीदित्यादिकानपि। दोषान्रुद्रे च तानेव नमिनन्तीति पूर्वकान्। यं कामये तं तमुग्रं रुद्राय धनुरित्यपि। अस्य देवस्य मा शिश्नदेवा अपि गुरित्यपि। घ्नञ्छिश्नदेवानित्याद्या दोषा बहव ईरिताः। ततो वितिष्ठे योनिः स एतावत्यहमित्यपि। अन्याश्रयत्वं देव्याश्च कथितं बहुशोऽपि हि। तदाश्रयत्वमन्येषामपि तत्रैव निश्चयात्। ब्रह्मैवाग्र इति ह्युक्त्वा रुद्रादीनां ततो जनिः। उक्ता जातानि विश्वानि स पर्यभवदित्यपि। यस्य च्छायामृतं मृत्युरिति चादरतोऽब्रवीत्। 'अनन्तादवरेशाना तस्याः प्राणस्ततश्च वाक्। तस्या रुद्र उमा तस्मादिन्द्रस्तस्यास्ततोऽपरे'। सौपर्णश्रुतिरित्याह सप्त क्षितय इत्यपि। वायुरस्मा उपामन्थद्विश्वदेवाय वायवे। विश्वैर्देवैः स इत्याद्याः प्रमा अत्रापरा अपि। 'नारायणोऽदितिर्वायुर्वाणी रुद्र उमा विभुः। इतरे च क्रमाद्धीनाः शतांशाद्वायुतोऽवराः'। इति बर्कश्रुतिश्चाह शक्रात्सप्तक्षितिश्रुतिः। अयं त एमि तन्वेति पूर्वा अन्या अपि स्फुटम्। वायोराधिक्यमप्याहु'रिन्द्रं सोमं हुताशनम्। सूर्यं रुद्रमिमान्पश्चदेवानेको महात्मनः। सृजत्यत्ति महान्प्राण' इति चाह तुरश्रुतिः। विहिसोतोरसृक्षत नेन्द्रं देवममंसत। न यस्येन्द्र इति ह्याह विष्णोरिन्द्रस्य हीनताम्। वेधा अजिन्वदित्यादिवचनं विष्णुनामतः। आनन्दश्रुतिरप्यस्य जीवतामेव दर्शयेत्। आह सूर्यादपीन्द्रस्य वायोर्विष्णोरपीशताम्। यः सूर्यं य उषसं म्रियन्ते पञ्चदेवताः। चक्षुषा द्यौश्चादित्यश्च चक्षोः सूर्यो अजायत। यमादित्यो न वेदेति पूर्वा श्रुतिरथापराः। 'विष्णोर्वातो अजनिष्ट वातादिन्द्रस्ततो

SGDF
Sri Gurgeshwari Digital Foundation

रविः । सोमश्चेति लयोऽप्येवं पूर्वेपूर्वे गुणाधिकाः' । 'विष्णोः प्राणो अजनिष्ट प्राणादिन्द्रो रविर्विधुः । लयोऽप्येतादृशस्तेषां पूर्वःपूर्वो गुणाधिकः' । तुरश्रुतिश्च सौपर्णी पिङ्गश्रुतिरपीदृशी । अतः सर्वाधिको विष्णुर्निर्णीतः श्रुतिसञ्चयात् । अतो दोषवचो यत्र तद्वाक्यमवरं वदेत् । निर्दोषतैव विष्णोस्तु क्रमान्मध्यगतेष्वपि । 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते । विष्णोः सहस्रनामापि निरन्तरशतार्थकम्' । इति स्कान्दवचो यस्मादर्थभेदव्यपेक्षया । निर्दोषत्वं हरेर्वक्ति दोषमन्येष्वपि क्रमात् । तारतम्यस्य विज्ञप्त्यै वचो दोषस्य चार्थवत् । गुणाः श्रुता इति ह्याह गुणैक नियतिं हरौ । 'निर्दोषगुणपूर्णश्च विष्णुरेको न चापरः । अपूर्णा दोषरहिता मायैका तद्वशैव च । अदोषः प्रायशो ब्रह्मा दोषवन्तः क्रमात्परे' । इति मान्यश्रुतिश्चाह भेदोऽर्थानां ततो मतः । रूढिमेव समाश्रित्य विभज्यार्थान्यथाक्रमम् । विदोषगुणपूर्त्यर्थे विष्णौ योगार्थमानयेत् । पश्चादेव यथायोगमितरेष्वपि संनयेत् । ऋग्वेदसंहितायां च प्रभुणैवं समीरितम् । पृथग्रूपाणि विष्णोस्तु देवतान्तरगाणि च । अग्न्यादिसूक्तवाच्यानि नाम्ना सूक्तभिदा भवेत् ॥ छ ॥

नकिर्माकिः स्मसीत्यादिप्रोक्ताऽधिक्यविवक्षया । आधिक्योऽधिकमित्येव हरिणा सूत्रमीरितम् । कृत्वीहत्वीति पूर्वाश्च तृतीयोऽतिशये यतः । विश्लिष्टार्थे च विश्लिष्टमूनार्थे चोनमिष्यते । व्यत्ययोऽभेदकरणस्वातन्त्र्येषु समीरितः । अभेदो हरिरूपाणां गुणानां च क्रियासु च । तस्यैवावयवानां च भेदः श्रीब्रह्मपूर्वकैः । मुक्तैरपि जडैर्भेदः कैमुत्यादेव दृश्यते । ऋग्वेदसंहितायां च प्रोक्तमेतत्समस्तशः । 'अभेदः स्वगुणाद्यैश्च मुक्तानामपि सर्वशः । भेदाभेदस्त्वभेदश्च गुणैः संसारिणामपि । जडानामंशतो भेदः समुदायेन चोभयम् । मनुष्यगन्धर्वपितृगणकार्मिकतात्त्विकाः । देवाः शक्रः

SGDF
Sri Gargeshwari Digital Foundation

शिवो ब्रह्मा मुक्तौ सौख्यादिभिर्गुणैः। शतायुतोत्तरा नित्यमन्योन्यप्रीतिसंयुताः'। इति सिद्धान्तगं वाक्यं स्वयं भगवतेरितम्। 'स्वाध्यायस्तत्त्वविज्ञानं विष्णुभक्तिर्विरागता। निषिद्धकर्मसन्त्यागो विहितस्य सदा क्रिया। सदा विष्णुस्मृतिश्चैव केवलं मोक्षसाधनम्। एतैर्विना न मोक्षः स्याद्धवेदेतैरपि ध्रुवम्। ऋषिच्छन्दोदैवतानि ज्ञात्वार्थं चैव भक्तितः। स्वाध्यायेनैव मोक्षः स्याद्विरक्तस्य हरिस्मृतेः। जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते। तस्मान्नित्यं हरिं ध्यायन्कुर्यात्स्वाध्यायमञ्जसा। ऐहिकामुष्मिका भोगा रक्तस्यान्यस्तु मुच्यते'। इति स्वाध्यायवचनं स्वयं भगवतोदितम्। 'स्वाध्यायात्तु प्रवचने सहस्रगुणितं फलम्। अर्थद्रष्टुः कोटिगुणं ततोऽनन्तं नियामके। तर्कागमाभ्यां नियतिं यः करोत्यधिकं ततः। पूर्णं वेदाखिलद्रष्टुर्ब्रह्मणः फलमुच्यते। दार्ढ्यमेवानुदात्तार्थ उदात्तस्योच्चताऽर्थता। नीचता स्वरितस्यार्थः प्रचयस्य यथास्थितिः। समाहारेऽखिला अर्थाः स्वरार्थानामियं स्थितिः। स्तुत्यधर्मस्य भेदेन पदाद्यादिस्वरे भिदा। साधारणो विधिस्त्वेष विशेषो यत्र यत्र च। क्रमादेव तदन्येषामृष्यादीनां स्वयोग्यतः। विपर्ययार्थकथने विपरीतं तथा तमः। यावत्प्रयोजको ज्ञाने तावत्तावच्छुभाधिकः। तथैव विपरीतोऽपि स्मृतौ ज्ञाने च तत्समम्। तमोनिरयमानुष्यस्वर्गमोक्षातिरेकतः। योग्यतातारतम्येन फलं सर्वेषु चोच्यते'। इति प्रवृत्तवचनं विवेकेऽप्येतदीरितम्। 'यादृशो योग्यतां यायात्स ज्ञेयोऽर्थस्तथा स्फुटम्। अनन्तनियमैर्युक्ता अनन्तार्थविशेषिणः। वेदा इति समासेन नियमोऽयं समीरितः' ऋक्संहितागतं वाक्यमिति चान्यन्नियामकम्। तस्माद्वन्द्याश्च पूज्याश्च ब्रह्माद्या ज्ञानयोजकाः। गुरुत्वेन क्रमादेव विशेषेणैव केशवः। आरभ्य स्वगुरुं यावद्विष्णुरेवोत्तरोत्तराः। क्रमान्निष्फलताऽन्यत्र गुरुतत्त्वे समीरिता॥ छ॥

SGDF
Sri Gurgeshwari Digital Foundation

एवं स्थितेऽग्निगं विष्णुमग्निनामानमेव च । मधुच्छन्दा ऋक्शतेन वाय्वादिगतमेव च । साग्न्यादिं स्तौति सद्भक्त्या तत्तन्नामानमेव च ॥ छ ॥

(वायवायाहि) बलत्वादयनाच्चैव वायुरित्यभिधीयते । वात्यायुरिति वा ज्ञानाद्धरणादाश्रयत्वतः । वय बन्धन इत्यस्मात्संसारादेर्व्ययादपि । व्येत्यस्मिन्निति वा वायुर्वयश्रेष्ठत्व इत्यपि । मुख्यतो वासुदेवे ते गुणाः सन्त्येव सर्वशः । अनिषिद्धास्तदन्येषु यथायोग्यतया मताः । दर्शतस्ततदृष्टित्वात्सर्वज्ञोऽसौ यतो विभुः । भक्त्याद्यलङ्कृताः सोमा मनांस्यन्ये हिरण्यतः । हिरण्यालङ्कृता यस्माद्धूयन्ते वायवे सुताः । तान्पाहि श्रुधि चाह्वानं स्वातन्त्र्ये व्यत्ययोऽप्ययम् । मनोऽपि भोग्यमीशस्य प्रीतिमात्रेण केवलम् । गुणाधिक्यं येन भवेद्वेदस्यार्थः स एव हि । प्रयोजकत्वान्नान्यस्य फलाभावात्तदर्थता । उपक्रमादयो यत्र तात्पर्यार्थस्स एव हि ॥ १ ॥ (वायउक्थेभिः) स्तुवन्ति शास्त्रैः स्तोतारो यथावद्यज्ञवेदिनः ॥२॥ (वायोतव) वात्त्वत्संपर्किणी यज्ञकृते प्रापयतीप्सितम् । सोमपायातिमहती महार्थत्वात्त्वदर्थतः ॥ ३ ॥ (इन्द्रवायू) इन्द्रः स परमैश्वर्यादिदमुद्दिश्य च द्रुतेः । ददर्शेदं दीप्तिमत्त्वादिदं रातीति वा भवेत् । सोमाभिमानिनो देवा वामिच्छन्ति हि सोमगाः । प्रियैरुपागतं तेनोपेन्द्रः सङ्कर्षणो हरिः । द्विरूपत्वाद्बहुत्वं च विशेषादेव केवलम् । एकस्यैव हरेर्नात्र भेदः शङ्क्यः

मधुच्छन्दा वैश्वामित्रः । १-३ वायुः ; ४-६ इन्द्र-वायू ;
७-९ मित्रा-वरुणौ । गायत्री ।

वाय॒वा या॑हि दर्शते॒मे सोमा॒ अरं॑कृताः । तेषां॑ पाहि श्रु॒धी हवं॑म् १

वाय॑-उ॒क्थेभि॑र्जरन्ते॒ त्वामच्छा॑ जरि॒तारः॑ । सु॒तसो॑मा अह॒र्विदः॑ २

वायो॒ तव॑ प्रपृ॒ञ्च॒ती धेना॑ जिगाति दा॒शुषे॑ । उ॒रू॒ची सोम॑पीतये ३

इन्द्र॑वायू इ॒मे सु॒ता उप॒ प्रयो॑भि॒रा ग॑तम् । इन्द॑वो वामु॒शन्ति॒ हि ४

SGDF
Sri Gurgeshwari Digital Foundation

कथश्चन । 'एकमेवाद्वितीयं त''नेह नानास्ति किश्चन' । 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' । 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति । एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति' । उक्त्वा धर्मान्पृथत्त्वस्य निषेधादेवमेव हि । विशेषो ज्ञायते श्रुत्या भेदादन्यश्च साक्षितः ॥ ४ ॥ (वायविन्द्रश्चचेतथः) विजानतः सुतानन्नपतौ सूर्ये सदास्थितौ । द्रवद्रुतं सुत्रात्पर्यद्योतकोऽभ्यास इष्यते ॥ ५ ॥ ३ ॥ (वायविन्द्रश्चसुन्वतः) यजन्सुन्वन्कृतस्यानुसारि कर्मैव निष्कृतम् । तदर्थे क्षिप्रमायातं धियेत्थं भूतयाऽचलौ । नरौ तावविनाशित्वादुपचारः क्वचिद्भवेत् । अमरत्ववद्यतो मोक्षौ देवतानां सुनिश्चितः ॥ ५ ॥ (मित्रंहुवे) मित्वा त्रातीति मित्रोऽयं मितमह्वा करोति वा । मितं रातीति वा नित्यं मितं रमयतीति वा । आवृणोतीति वरुणस्तमसाऽज्ञानतोऽपि वा । वरमुन्नयतीत्यस्माद्वरानन्दत्वतोऽपि वा । पूता दक्षा अनेनेति पूतदक्ष इतीरितः । तमाह्वयामि सुखिनं शमदत्रमते यतः । अनूनसुखभोक्तृत्वाद्रिशादा इति कीर्तितः । हरिर्घृतः सुशुद्धत्वाद्घृताची च तदश्चनात् । स्वधीति साधको विष्णुर्भक्तानां च यथार्थतः ॥ ७ ॥ (ऋतेन) नित्यवृद्धः स भगवानृतेनानुपचारतः । ऋतस्पृग्वेदवाच्यत्वादन्यौ चेद्भगवानृतः । ऋ गतावित्यतः सर्ववस्तुष्वनुगतत्वतः । तेन वृद्धौ तत्स्पृशौ च सर्वदा मित्रवारिपौ । संहितायां तु दैर्घ्यादिरुक्ताधिक्ये पदेऽन्यथा । अनन्यार्थत्वविज्ञप्त्या ईशाथे च महाक्रतुम् महत्सुखं वा ॥ ८ ॥ (कवीनः) तुविजौ ब्रह्मजातौ तथाविधौ ।

वायुविन्द्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप द्रवत् ॥ ५ ॥ ३ ॥

वायुविन्द्रश्च सुन्वत आ यातमुप निष्कृतम् । मक्ष्वि१त्था धिया नरा ६

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ७

ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ८

SGDF
Sri Gargeshwari Digital Foundation

हरिस्तथैव भूतत्वात्स्थानं क्षय इहोच्यते। कर्मापसश्चकर्तारं दक्षं कर्तारमेव वा। अस्मदर्थे दधाते तौ नित्यं बुद्धौ गतागतौ ॥ ९ ॥ ॥ ४ ॥ २ ॥

(अश्विनायज्वरीः) अन्नानि यज्ञयोग्यानि क्षिप्रहस्तौ शुभाधिपौ। बहुगोपौ बहुभुजौ नो योयजतमश्विनौ। यज्ञे वृतान्स्वभागान्वा संयोजयतमाशु वै। आशुवानाद्गतेरश्वी क्षिप्रावगतितोऽथवा। अश्नुतेऽखिलमित्येवाप्यश्वजत्वात्तथाऽश्विनौ ॥ १ ॥ (अश्विनापुरुदंससा) बहुकर्मकृतौ सौख्यवीर्यात्मिकया धिया गिरः। अस्मदीयाः सम्भजतं धिष्ण्यौ सर्वाश्रयौ सदा ॥ २ ॥ (दस्रा) भेदकौ सर्वशत्रूणां दस्रौ संबन्धिनौ हि वाम्। सुता युवाकवः सोमा यज्वनः स्तृतबर्हिषः। नासत्यौ नासिकासंस्थौ नैव चासद्गुणौ क्वचित्। रुजां द्रावणतो रुद्रो वायुस्तदनुवर्तनात्। स्नेहतोऽनुवशत्वाद्वा तन्मार्गगतितोऽथवा। कस्मिन्वहमिति श्रुत्या वासुदेवोऽश्विनावपि। रुद्रवर्तनिशब्दोक्ताः ॥ ३ ॥ (इन्द्रायाहिचित्रभानो) चित्रं भद्रं रतं चितौ। चिद्रतेश्चायनीयत्वाददनाद्वा चितो भिदा। तादृशा रश्मयो ज्ञानमस्येति भगवान्परः। चित्रभानुरिति प्रोक्तस्तेजो वा तादृशं प्रभोः। त्वदिच्छव इमे सोमाः पटीभिः सूक्ष्मतन्तुभिः। विस्तृत्य शोधिताः सूक्ष्मप्रमाभिर्वा मनांसि च। सोमानां मनसां चैव देवताः सोमरश्मिगाः। सोमभृत्याः

कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसम्
॥ ९ ॥ ४ ॥ २ ॥

मधुच्छन्दा वैश्वामित्रः। १-३ अश्विनौ; ४-६ इन्द्रः;
७-९ विश्वेदेवाः; १०-१२ सरस्वती। गायत्री।

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती। पुरुभुजा चनस्यतम् १
अश्विना पुरुदंससा नरा शवीरया धिया। धिष्ण्या वनतं गिरः २
दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः। आ यातं रुद्रवर्तनी ३
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः ४

SGDF
Sri Gargeshwari Digital Foundation

समस्तस्य सोम एवाधिपो हरिः ॥ ४ ॥ (इन्द्रायाहिधियेषितः) अस्मद्बुद्ध्या प्रार्थितो वा स्वबुद्ध्या प्रेरितोऽपि वा । ब्राह्मणैः प्रेरितो भक्त्या वदतो होतुरञ्जसा । ब्रह्माणि सोमयुक्तानि यजमानस्य वेच्छतः । उपाया ह्यपि यः कोऽपि साधको यज्ञकृन्मतः । मानसो वाचिको वा स्याद्यज्ञो होता ह्वयन्स च ॥ ५ ॥ (इन्द्रायाहितूतुजानः) वेगवांस्तूतुजानः स्यात्संसारमुपसंहरन् । वर्तते येन हरिवा हरिभिर्वर्ततेऽथवा । हरणाद्विषयाणां च प्राणा हरय ईरिताः । तेषु वर्तत इत्यस्मात्तान्वाऽथ गमयेदसौ । हरिवा हरिवान्वापि विष्णुना वर्ततेऽथवा । चनो मन इह प्रोक्तं सुखं च क्वचिदीर्यते ॥ ६ ॥ ५ ॥ (ओमासः) आसमन्तात्स्वीकृता मा ओमा इति च शब्दिताः । ॐनामा भगवान्विष्णुस्तेन वा निर्मिताः सुराः । ओता मानेषु मावैषु प्रोता ओमा इतीरिताः । प्रजाश्चर्षणयः प्रोक्ता विश्वे ते च प्रवेशनात् । सर्वे वाथ विशां वानाच्छब्दः कस्मै यथा भवेत् । दातारो यजमाना वा ॥ ७ ॥ (विश्वेदेवासोअप्तुरः) अप्तुरः कर्मवेगिनः । उस्रास्तु रश्मयश्चैव स्वसराणि दिनानि च ॥ ८ ॥ (विश्वेदेवासोअस्रिधः) असंसारादस्रिधस्ते देवाश्चेन्मोक्षनिश्चयात् । यथेष्टनिश्चितज्ञाना एहि मायाः समन्ततः । अदुःखत्वादद्रुहस्ते मेधं यज्ञं जुषन्तु नः । वह्नयो वहनादस्य ॥ ९ ॥ (पावकानः) शोधकत्वात्तु पावका । सरणात्सर्वगत्वेन सर्वज्ञो वासरो हरिः । सरसः सरतित्वाद्वा तद्वत्येव सरस्वती । हरौ गुणाः सरश्शब्दा देवी तु हरिवाचिनी । हरिप्रियत्वतो वायुः सरस्वांस्तत्प्रियाऽथवा ।

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ५
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः
॥ ६ ॥ ५ ॥
ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः सुतम् ७
विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः । उस्रा इव स्वसराणि ८
विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ९

SGDF
Sri Gargeshwari Digital Foundation

गुणस्त्वेन ततत्वाद्वा भगवांस्तु सरस्वती। स्त्रीरूपश्चैव पुंरूपो भगवान्न नपुंसकः। स्त्रीपुंदोषविहीनत्वादपि तच्छब्दगोचरः। अन्नेनो वाजिनामीशो वाजिनी सूर्य उच्यते। वाजीनच्छन्दसां वापि स्वामी प्रोक्तः सवाजिनी। छन्दांस्यश्वा यतस्तस्य ते चेना अन्यवाजिना। अन्नवत्त्वाद्वाजिनी वाग्ज्ञानयुद्धत्वतोऽपि वा। सपुत्रो वागुमा तस्याः पुत्री तद्वाजिनीवती। सरस्वती हरिर्वापि यज्ञं वहतु नोऽशनैः। अन्नदा हि सदा देवी धिया सह वसेद्यतः। धियावसुर्नित्यबोधा ॥ १० ॥ (चोदयित्री) सुवाचां प्रेरका सदा। सुबुद्धिज्ञापिका सैव स्वातन्त्र्याल्लुसयो भवेत्। अनेनैव प्रकारेण सैव यज्ञादिधारिणी ॥ ११ ॥ (महोअर्णः) महो अर्णः परं ब्रह्म तेजस्त्वाच्च महत्त्वतः। अरमानन्दरूपत्वाण्णो हि निर्वृतिवाचकः। तज्ज्ञापयति सा देवी ज्ञानं दत्वा महत्तरम्। महो अर्णः स्वयं देवः स्वमात्मानं प्रकाशयेत्। विराजयति विश्वाश्च धियः सुज्ञानदानतः ॥ १२ ॥ ६ ॥ ३ ॥ १ ॥

सूक्तं त्वनारतं प्रोक्तमनुवागेककालिका। अन्यथात्वं च तत्र स्यादावापोद्वापतस्त्वृचाम्। वेदानन्तत्वविज्ञप्त्यै तौ चक्रे बादरायणः। 'ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान्प्रभुः। यजूंषि निगदाच्चैव तथा सामानि सामतः'। एवं पुराणवचनादुद्धृता हि ततस्ततः। ऋचः शाखात्वमापन्नाः शिष्यतच्छिष्यकैरिमाः। मानस्तेनेति पूर्वासु ह्यूनता दृश्यतेऽर्थतः। शुनःशेपोदिताभ्यश्च पठ्यन्तेऽन्यत्र काश्चन। अत्राप्यक्रमतो दृष्टिरिति नैकक्रमो भवेत्। अनन्तत्वात्तु वेदानां प्रायः कर्मानुसारतः। सङ्क्षेपं कृतवान्देवः शिष्याश्च तदनुज्ञया। अष्टकाध्याय-

---

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः १०
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ११
महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति
॥ १२ ॥ ६ ॥ ३ ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

वर्गादिभेदं च कृतवान्प्रभुः। स्वाध्यायविश्रमार्थाय तस्मात्क्रमविपर्ययः। तत्र तत्रैवान्तरिता दृश्यन्ते च खिला अपि। यत्रार्थे न विशेषोऽस्ति पदान्तरितताऽत्र च। यत्राल्पोऽपि विशेषोऽस्ति पदं नान्तरितं भवेत् ॥ छ ॥

(सुरूपकृत्नुं) विष्णुं सुरूपकर्तारमभिप्रेतार्थसिद्धये। त्राणाय वा कामधेनुमिव दोहाय तत्स्थितेः। दिनेदिने स्वाह्वयामो ॥ १ ॥ (उपनः) ज्ञानदोऽस्यैव चाधिकम्। ज्ञानाख्यरयियुक्तस्य हिरण्यादिमतोऽपि वा। सुखकारी भवां ॥ २ ॥ (अथाते) स्तस्माल्लभेम सुमतीस्तव। अन्ते मितास्त्वद्विषया मतयो ह्युत्तमोत्तमाः। अस्मानतीत्य मा पश्यकरुणार्द्रदृशा सदा ॥ ३ ॥ (परेहि) मन्मनो वाऽथ शक्रो वा दूरेऽपि परमेश्वरम्। गच्छाग्राह्यमनष्टं च व्याप्तचित्तं य एव च। सखिभ्य उत्तमो नित्यम् ॥ ४ ॥ (उतब्रुवन्तु) निदस्तस्य समीपगाः। तेऽपि ब्रुवन्तु नो देवं प्रापुर्ये चान्यतोऽपि तम्। निर्गत्याज्ञानतस्तस्माद्दधाना ईश एव च। दुवः प्राणान्ब्रुवं त्वेव तेऽपि नः परमेश्वरम् ॥ ५ ॥ ७ ॥ (उतनः) अरयोऽपि प्रजा अस्मान्वोचेयुः सुभगान्सदा। शत्रुभेदिंस्तवेन्द्रस्य स्यामैवानुग्रहे सुखे ॥६॥ (एमाशुं)

मधुच्छन्दा वैश्वामित्रः। इन्द्रः। गायत्री।

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि १
उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः २
अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति ख्य आ गहि ३
परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य आ वरम् ४
उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत। दधाना इन्द्र इद्दुवः
॥ ५ ॥ ७ ॥
उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः। स्यामेदिन्द्रस्य शर्मणि ६

SGDF
Sri Gargeshwari Digital Foundation

आशुवीर्यं तवैवाशुं सोमं क्षिप्रं मनोऽपि वा। आरभस्वोदरे तुष्ट्यै हृदि वा यज्ञभूषणम्। ईमेव पुंमदकरं मदादुत्पतनादिके। हेतुं मन्दत्वहेतुं च तत्सखीनां पुरो गतेः॥ ७॥ (अस्यपीत्वा) एनं पीत्वा बहुज्ञानाऽभूत्तमोभिरनावृतः। प्रसादादेव मुक्तेषु तमो सद्यतया घनः। आवृतेरेव वृत्राणि ह्यज्ञानान्यन्नदं नरम्। प्रावो युद्धेषु योद्धारं भक्तं ज्ञानिनमेव च॥ ८॥ (तन्त्वा) योधयामो वयं तं त्वां ज्ञानादिधनलब्धये। अज्ञानाद्यस्मदरिभि॥ ९॥ (योरायः) योऽशेषद्रविणावनिः। सुखदः संसृतेः पारस्तस्मा इन्द्राय गायत। कम्पोऽशेषग्रहे क्वापि लज्जायां वा पुरातने। पृथक्त्वे धृष्यतायां वा हरिणर्क्संहितोदितः॥ ॥ १०॥ ८॥ ४॥

(आत्वेता॥०॥१॥ पुरूतमं) सुपूर्णानां पूर्णतमं वरेण्यानामधीश्वरम्। सुते सोमे सुखेनैव स चागायत तं प्रभुम्॥ २॥ (सघ) मुक्तौ योगायासमन्ताद्भवेन्नोघोऽवधारणे। स एव भगवान्ज्ञानवित्ताय स च बुद्धिगः। बुद्धिः पुराश्रयत्वेन पुरन्धिः पत्न्यथापि वा। पत्न्यर्थत्वे तु तादर्थ्ये सोऽन्नैः सह न आव्रजेत्॥ ३॥ (यस्यसंस्थे)

एमाशुमाशवे भर यज्ञश्रियं नृमादनम्। पतयन्मन्दयत्सखम् ७
अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः। प्रावो वाजेषु वाजिनम् ८
तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो। धनानामिन्द्र सातये ९
यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा। तस्मा इन्द्राय गायत
॥ १०॥ ८॥ ४॥

मधुच्छन्दा वैश्वामित्रः। इन्द्रः। गायत्री।

आ त्वेता नि षीदतेन्द्रमभि प्र गायत। सखायः स्तोमवाहसः १
पुरूतमं पुरूणामीशानं वार्याणाम्। इन्द्रं सोमे सचा सुते २
स घा नो योग आ भुवत्स राये स पुरन्ध्याम्।
गमद्वाजेभिरा स नः ३

SGDF
Sri Gangeshwari Digital Foundation

यस्य स्थितौ न वृणुते हर्यग्रमपि शत्रवः । मनः पुरो वा विषयहरणा-
न्मन एव च । बुद्धिश्च हरिशब्दोक्ते तम आदीनि शत्रवः ॥ ४ ॥
(सुतपात्रे) सोमपे शुचयः सोमाः प्राप्त्यै दधिविमिश्रिताः । मनांसि
ध्यानयुक्तानि वा यान्ति हरये सदा ॥ ५ ॥ ९ ॥ (त्वंसुतस्य) सदा
पूर्णः शुभज्ञानज्यैष्ठ्यव्यक्त्यै सुताप्तये । न क्षुदादेरभिव्यक्तो भवो ॥६॥
(आत्वा) गीर्भिर्वृत प्रभो । प्रकृष्टचेतास्त्वद्भृत्यो योऽस्मै स्युः शङ्कराः
सुताः ॥ ७ ॥ (त्वांस्तोमाः) व्यञ्जयन्त्यधिकं स्तोमाः साम्न्युक्थान्यृक्षु
चैव हि । महागुणैर्व्यञ्जयन्तु गिरोऽस्माकमपि प्रभो । आकाशवृद्धि-
वद्वृद्धिर्विष्णोः स्यान्नैव चान्यथा । 'न वर्धते नो कनीयानि'ति ह्येनं
श्रुतिर्जगौ । महातात्पर्यरोधाच्च श्रुत्यर्थो नापरो भवेत् । यद्यन्यापेक्षया
वृद्धिरीश त्वं स्यात्कुतोऽस्य च । अक्षितोतिरिति ह्यस्मात्पूर्णाभिप्रायतो-
दिता ॥ ८ ॥ (अक्षितोतिः) अनन्तफलदं वाजमस्मत्तो लभतां स च ।
ददातु वा पौरुषाणि शक्तयो यत्र चाखिलाः । अतश्चानन्तशक्तित्वान्न
वृद्ध्याद्याः कथञ्चन । सर्वोपेतेत्येतमर्थमभिप्रेत्याह वेदराट् ॥ ९ ॥
(मानो) मा मर्ता नस्तनूनां तु द्रोग्धारः स्युः कथञ्चन । ईशोऽस्यापाकुरु
वधं तेन नो मुक्तिदानतः । मानुषेभ्यस्तनूनां च नैव नः स्युर्विपत्तयः ।
कालेन दैवतः प्राप्तः स्याददेहत्वतो वधः ॥ १० ॥ १० ॥ ५ ॥

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ४
सुतपाव्ने सुता इमे शुचयो यन्ति वीतये । सोमासो दध्याशिरः ॥५॥९॥
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ६
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः । शं ते सन्तु प्रचेतसे ७
त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धन्तु नो गिरः ८
अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् । यस्मिन्विश्वानि पौंस्या ९
मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः ।
ईशानो यवया वधम् ॥ १० ॥ १० ॥ ५ ॥

SGDF
Sri Gangeshwari Digital Foundation

(युञ्जन्ति) पौंस्यानि वासुदेवस्य ब्रध्नं वृद्धं दिवाकरम्। अरुणं चरन्तं परितो गिरीन्युञ्जन्ति सर्वदा। तैरेवान्यानि चन्द्रादि रोचनानि त्रिविष्टपे। रोचयन्ति ॥ १ ॥ (युञ्जन्त्यस्य) हरी चास्य मनोबुद्धी स्वशक्तयः। युञ्जन्त्यधिगुणत्वेन काम्यावश्वावथापि वा। विशिष्ट-पक्षसंयुक्ताविव क्षिप्रतरौ सदा। रथे देहेऽपि वा देवाः स्वमनो बुद्धिमेव च। अस्य देहे प्रयुञ्जन्ति सूर्यादीन्स्थापयन्ति च। सूर्यादि-स्थापकत्वं च ब्रह्मादीनां भवेत्सदा। शोणौ च शमणौ प्रोक्तौ सुखप्राप्तौ यतस्सदा। श्यामौ मूर्धनि शोणौ च शक्राश्वावग्रगौ स्मृतौ। धृष्टौ नृन्प्रति तं वेशं वहन्तौ तावुभावपि ॥ २ ॥ (केतुं) अज्ञाय कुर्वन्सज्ज्ञानं हेमाहेमाय चेश्वर। उषद्भिः संप्रकाशद्भिः शक्तिभि-र्व्यक्ततामगाः। मर्या मरणवन्तोऽपि देवा एवम् ॥ ३ ॥ (आदह) हरेर्वशात्। तदैव सुखमन्वेव पुनर्गूढत्वमापिरे। स्वेच्छयैव परेशस्य शक्तयो देवता अपि। यज्ञे वाच्यं दधानाश्च नाम ॥४॥ (वीळुचित्) वीळु दृढं ह्यपि। आरुजद्भिः स्वसामर्थ्यैर्गुहायां संस्थितोऽपि सन्। वहद्भिरखिलं लोकं प्रकाशत्वानि लब्धवान्। देवैर्वैतादृशैः साकमानु-कूल्येन लब्धवान् ॥ ५ ॥ ११ ॥ (देवयन्तः) सम्यक्प्रद्योतयन्तोऽमुं

मधुच्छन्दा वैश्वामित्रः। १-३ इन्द्रः, ४, ६, ८, ९ मरुतः,
५, ७ मरुत इन्द्रश्च, १० इन्द्रः। गायत्री।

युञ्जन्ति ब्र॒ध्नम॑रु॒षं चर॑न्तं॒ परि॑ त॒स्थुषः॑। रोच॑न्ते रोच॒ना दि॒वि १

यु॒ञ्जन्त्य॑स्य॒ काम्या॒ हरी॒ विप॑क्षसा॒ रथे॑। शोणा॑ धृ॒ष्णू नृ॒वाह॑सा २

के॒तुं कृ॒ण्वन्न॑के॒तवे॒ पेशो॑ मर्या अपे॒शसे॑। समु॒षद्भि॑रजायथाः ३

आदह॑ स्व॒धामनु॒ पुन॑र्गर्भ॒त्वमे॑रि॒रे। दधा॑ना॒ नाम॑ य॒ज्ञिय॑म् ४

वी॒ळु चि॑दारु॒ज॒त्नुभि॒र्गुहा॑ चि॒दिन्द्र॒ वह्नि॑भिः।
अवि॑न्द उ॒स्रिया॒ अनु॑ ॥ ५ ॥ ११ ॥

दे॒व॒यन्तो॒ यथा॑ म॒तिमच्छा॑ वि॒दद्व॑सुं॒ गिरः॑। म॒हाम॑नूषत श्रु॒तम् ६

SGDF
Sri Gangeshwari Digital Foundation

मतिरूपं यथास्थितम् । विदद्भिस्तं महान्तं च विश्रुतं सुगिरोऽस्तुवन् ॥ ६ ॥ (इन्द्रेण) तस्य सन्दर्शनायैव सङ्गतस्तेन शङ्करः । मखात्मा पुरुहूतो वा श्रीभूमी च सुखात्मिके ॥ ७ ॥ (अनवद्यैः) अनवद्यैर्महाज्ञानैः प्रियैर्देवगणैः सह । वायुना च सहार्चन्ति सुधीत्वात्परमेश्वरम् ॥ ८ ॥ (अतः) अतो हेतोरिहायाहि दिवो वा सूर्यमण्डलात् । परिज्मन्सर्वगास्माकमधिकृत्य समर्हणम् । अस्मिन्गिरः प्राप्नुवन्ति सम्यक्परमसुख्यतः । युञ्जन्तीत्यत्र बाहुल्याद्देवयन्तोऽत इत्यपि । बाहुल्यादृष्टितो गीर्भिर्विनार्थो नान्य इष्यते ॥९॥ (इतोवा) इतो दिवो वा पातालात्सातिं लाभस्वरूपिणम् । महतो रञ्जकाद्विष्णोर्लोकाद्वा तमधीमहे ॥ १० ॥ १२ ॥ ६ ॥

(इन्द्रमित्) तमेव गाथिनः साम्ना स्तुवन्त्यृग्भिश्च बह्वृचाः । बृहन्तमन्यवाणीभिरपि ॥ १ ॥ (इन्द्रइत्) हर्यो विमिश्रितः । रथेऽथ वामनो बुद्ध्योर्वाङ्मात्रेणैव योगिनोः । सचा सुखेन वज्री च ज्ञानानन्दो हि धातुतः । हितश्च रमणीयश्च हिरण्यय इतीरितः ॥ २ ॥ (इन्द्रोदीर्घाय) दीर्घकालं दर्शनाय सूर्यमारोहयद्दिवि । ज्ञानैरादर-

---

इन्द्रे॑ण॒ सं हि दृक्ष॑से संजग्मा॒नो अबि॑भ्युषा । म॒न्दू स॑मा॒नव॑र्चसा ७
अ॒न॒व॒द्यैर॒भिद्यु॑भिर्म॒खः सह॑स्वदर्चति । ग॒णैरिन्द्र॑स्य॒ काम्यैः॑ ८
अतः॑ परिज्म॒न्ना ग॑हि दि॒वो वा॑ रोच॒नादधि॑ । सम॑स्मिन्नृञ्जते॒ गिरः॑ ९
इ॒तो वा॑ सा॒तिमीम॑हे दि॒वो वा॒ पार्थि॑वा॒दधि॑ । इन्द्रं॑ म॒हो वा॒ रज॑सः
॥ १० ॥ १२ ॥ ६ ॥

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । गायत्री ।

इन्द्र॒मिद्गा॒थिनो॑ बृ॒हदिन्द्र॑म॒र्केभि॑र॒र्किणः॑ । इन्द्रं॒ वाणी॑रनूषत १
इन्द्र॒ इद्धर्योः॑ सचा॒ संमि॑श्ल॒ आ व॑चो॒युजा॑ । इन्द्रो॑ व॒ज्री हि॑र॒ण्ययः॑ २
इन्द्रो॑ दी॒र्घाय॒ चक्ष॑स॒ आ सूर्यं॑ रोहयद्दि॒वि । वि गोभि॒रद्रि॑मैरयत् ३

SGDF
Sri Gargeshwari Digital Foundation

योग्यं च प्राणात्मानं समैरयत् ।।३।। (इन्द्रवाजेषु) बहुभिर्युध्यमानेषु युद्धेष्वपि सदाऽव नः। दुष्टोग्रैः सदभिप्रायै-।। ४ ।। (इन्द्रंवयं) महदल्पधनार्थिनः। हवामहेऽरिवर्जे तं तमसां प्रतियोगिनम् ।। ।। ५ ।। १३ ।। (सनः) अस्मदीयं चरुं भोज्यमानन्दं तमपावृणु। मोक्षगं सर्वदातस्त्वमप्रतिद्वन्द्व नो वृषन् ।। ६ ।। (तुञ्जे) त्वयैव प्रेरणे जाते तत्रतत्र य उत्तराः। तेऽपि स्तोमाः सुष्टुतित्वमस्यानन्त्यान्न चाप्नुयुः ।। ७ ।। (वृषा) प्रतिवीरो वृषा वंसस्तद्धन्ता वंसगो विभीः। यूथान्याकर्षति यथा प्रजाः प्रेरयति प्रभुः। अल्पस्यापि प्रसिद्धैव दृष्टान्तत्वं तु युज्यते ।। ८ ।। (यएकः) राजा भवति वित्तानां प्रजानां चैक एव यः। देवगन्धर्वदैतेयपितृमानुषभेदतः। प्रजानामपि पञ्चानां सामान्याच्च विशेषतः ।। ९ ।। (इन्द्रंवो) सम्यग्घवामहे सर्वगतं च व्यक्तरूपतः। स्थातुमेकत्र वोऽर्थाय जनानोऽस्तु स केवलः ।। १० ।। १४ ।। ७ ।। २ ।।

(एन्द्र) जयिना सहितं लाभयुक्तं वित्तं सदा बलम्। वर्षिष्ठं सुमहद्रक्षानिमित्तं नित्यदा भर ।। १ ।। (नियेन) येनारीन्मुष्टियुद्धेन

इन्द्र॒ वाजे॑षु नोऽव स॒हस्र॑प्रधनेषु च। उ॒ग्र उ॒ग्राभि॑रू॒तिभि॑ः ४
इन्द्रं॑ व॒यं म॑हाध॒न इन्द्र॒मर्भे॑ हवामहे। युजं॑ वृ॒त्रेषु॑ व॒ज्रिण॑म् ॥५॥१३॥
स नो॑ वृषन्न॒मुं च॒रुं सत्रा॑दाव॒न्नपा॑ वृधि। अ॒स्मभ्य॒मप्र॑तिष्कुतः ६
तु॒ञ्जेतु॑ञ्जे॒ य उत्त॑रे॒ स्तोमा॒ इन्द्र॑स्य व॒ज्रिण॑ः। न वि॑न्धे अस्य सुष्टुतिम् ७
वृषा॑ यू॒थेव॒ वंस॑गः कृ॒ष्टीरि॑य॒र्त्योज॑सा। ईशा॑नो॒ अप्र॑तिष्कुतः ८
य एक॑श्चर्षणी॒नां वसू॑नामिर॒ज्यति॑। इन्द्र॒ः पञ्च॑ क्षिती॒नाम् ९
इन्द्रं॑ वो वि॒श्वत॒स्परि॒ हवा॑महे॒ जने॑भ्यः। अ॒स्माक॑मस्तु॒ केव॑लः
॥१०॥१४॥७॥२॥

मधुच्छन्दा वैश्वामित्रः। इन्द्रः। गायत्री।

एन्द्र॑ सान॒सिं र॒यिं स॒जित्वा॑नं सदा॒सह॑म्। वर्षि॑ष्ठमू॒तये॑ भर १
नि येन॑ मुष्टिह॒त्यया॒ नि वृ॒त्रा रु॒णधा॑महै। त्वोता॑सो॒ न्यर्व॑ता २

SGDF
Sri Gurgeshwari Digital Foundation

तमांसि ज्ञानयुद्धतः । त्वत्प्रेरितानि रुन्धामः कांश्चिद्वा तुरगादिभिः । आवृत्त्यैवोपसर्गस्य क्रियावृत्तिर्भविष्यति ॥ २ ॥ (इन्द्रत्वोतासः) त्वत्प्रेरिता ज्ञानरतिं दृढत्वेनाददीमहि ॥ ३ ॥ (वयंशूरेभिः) त्वया पृतन्यतः शत्रूनभिष्याम सुयोद्धृभिः ॥ ४ ॥ (महाँइन्द्रः) यस्मान्महाननादिश्च विष्णुर्जीवोऽवरस्तथा । तस्यैवास्तु महत्त्वं तन्न जीवब्रह्मतां स्मरेत् । आकाशवत्प्रथिम्नाऽसौ शवः सुखबले तथा ॥५॥१५॥ (समोहे) अन्यसंवहनेनापि ये तं प्राप्ता जनार्दनम् । ज्ञानलाभेन तु नरस्त एव पशवोऽपरे । विप्राश्चैव धिया युक्ता मूर्खाः शूद्रसमा मताः ॥ ६ ॥ (यः कुक्षिः) यः कुक्षिस्तस्य देवस्य समुद्र इव सोऽखिलान् । कामान्क्षरति भक्ताय महाप इव तर्पकाः । काकुदस्तस्य जिह्वाः स्युर्बह्व्यो बहुमुखेषु याः ॥ ७ ॥ (एवाह्यस्य) एवमेवास्य वाणी च वेदेता महती तथा। पक्कशाखेव यजते वरदात्री विरप्शिनः। बलिष्ठस्य हि ते ॥ ८ ॥ (एवाहिते) सन्ति सद्योऽपि यजते हि ते । मावते ज्ञानिने नित्यमूतयश्च विभूतयः ॥ ९ ॥ (एवाह्यस्य) स्तोमा उक्थानि चैवास्य तस्मै काम्यानि सर्वदा । गेयाः शंस्यानि सोमस्य पीतये नान्यथा पिबेत् ॥ १० ॥ १६ ॥ ८ ॥

इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि । जयेम सं युधि स्पृधः ३
वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् । सासह्याम पृतन्यतः ४
महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥ ५ ॥ १५ ॥
समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ६
यः कुक्षिः सोमपातमः समुद्र इव पिन्वते । उर्वीरापो न काकुदः ७
एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ८
एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित् सन्ति दाशुषे ९
एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये ॥ १० ॥ १६ ॥ ८ ॥

SGDF
Sri Gargeshwari Digital Foundation

(इन्द्रेहि) सोमपाः सोमपर्वाणः सर्वं यस्मात्तदिच्छया । अभिष्टिरोजसा नित्यं मदं सुखमवाप्स्यसि ॥ १ ॥ (एमेनं) एनमासृजतेन्दौ च विष्णुं तं मदकारिणम् । मन्दिने विष्णवे सम्यक्कर्मिणं सर्वकर्मिणे ॥ २ ॥ (मत्स्व) स्वानन्द विश्वजीवेश मत्स्वास्मद्रक्षया सह ॥ ३ ॥ (असृग्रं) त्वन्निस्सृता वेदवाचस्त्वां प्रत्येवाप्यनारतम् । उच्चैर्मुख्यतया सम्यग्विसृष्टाः स्वपतिं प्रति । अजोषाः स्तुत्यरूपेण त्वत्सेव्यास्त्वदृते क्वचित् ॥ ४ ॥ (सञ्चोदय) अर्वाङ्गीचान्प्रति त्वस्मान्भद्रं राधः प्रचोदय । अस्त्येव ते विशेषेण प्रकृष्टं शुभमच्युतम् ॥ ॥ ५ ॥ १७ ॥ (अस्मान्) रभस्वतः शब्दवतः स्तोतॄनस्मान्यशस्वतः । तत्र त्वयि महाराये महाकीर्ते सुचोदय ॥ ६ ॥ (सङ्गोमत्) अस्मास्वतिबृहज्ज्ञानं नित्यं सन्धेहि चाक्षयम् ॥ ७ ॥ (अस्मे) विद्यां कीर्तिं सदेहान्नं बहुलाभयुतं बृहत् । प्रार्थने पौनरुक्त्यं न चोदयेति ततः पुनः ॥ ८ ॥ (वसोः) वसोर्वसूनां च पतिं देवदेवेश्वरं प्रभुम् ।

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । गायत्री ।

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा १
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये २
मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ३
असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिम् ४
सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् ।
असदित्ते विभु प्रभु ॥ ५ ॥ १७ ॥
अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ६
सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितम् ७
अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम् । इन्द्र ता रथिनीरिषः ८
वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम् । होम गन्तारमूतये ९

SGDF
Sri Gargeshwari Digital Foundation

ऋञ्चेयमाह्वयामोऽत्र गृणन्तोऽभीष्टसिद्धये ॥ ९ ॥ (सुते) अविनाश्यरि-रुद्दिष्टो बृहच्छूषं सुखं प्रति । सुते सुते सङ्गृहाय देवाय बृहतेऽर्चेति ॥ ॥ १० ॥ १८ ॥ ९ ॥

(गायन्ति) गायन्ति सामगास्त्वामृग्भिः शंसंत्यृग्वेदिनोऽन्तिकम् । विरिञ्चास्त्वां बहुज्ञानशक्रकेतुमिवोच्छ्रितम् । व्यजान- ॥ १ ॥ (यत्सानोः) न्नुच्चतोऽप्युच्चं सामर्थ्यं करणे तव । ततोऽपि भूरि यत्तेन चेतत्यर्थमतो भवान् । मुक्तामुक्तसमूहेन शोभते गूढशक्तिमान् । उच्चादुच्चं विरिञ्चादिगतं कर्तृत्वमेव यत् । भूरिस्पष्टमभूत्तेन परेशस्य ततश्च सः । चेतत्यर्थानशेषांश्च महायूथेन चेष्टते ॥ २ ॥ (युक्ष्वाहि) कक्ष्याभिपूरकौ पुष्टया युंक्ष्व त्वं केशिनौ हरी । अथोपगम्य शृणु नो गिरो ॥ ३ ॥ (एहि) ऽभिस्वरवस्तुतिम् । प्रशंसां कुरु शब्दं च पुनर्हर्षान्महत्तरम् । ब्रह्म यज्ञं च नोऽन्तस्थो बहिष्ठश्चैव वर्धय ॥ ४ ॥

सुतेसुते न्योकसे बृहद् बृहत एदरिः । इन्द्राय शूषमर्चति
॥ १० ॥ १८ ॥ ९ ॥

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । अनुष्टुप् ।

गायन्ति त्वा गायत्रिणो ऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद् वंशमिव येमिरे १

यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वम् ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति २

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ३

एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ४

SGDF
Sri Gargeshwari Digital Foundation

(उक्थं) नित्यवृद्धत्वतो विष्णोर्वर्धनं तु प्रकाशनम् । बहुशत्रून्निषिदसौ हरिर्दनुजघातकः । अस्मत्सख्याय शब्दं च चकारास्मासु संस्थितः । यथा सुतेषु सोमेषु करोत्यृत्विक्षु च स्थितः ॥ ५ ॥ (तमित्) तमेव शरणं नित्यं सखित्वाद्यर्थमीमहे । शक्त्यानन्दस्वरूपत्वाच्छक्रः सर्वत्र चाशकत् । अस्माकं च सदा वित्तं ददद्देव प्रवर्तते ॥ ६ ॥ १९ ॥ (सुविवृतं) विस्पष्टं सुष्टकाल्यं च यशस्त्वद्दत्तमेव हि । गूढं ज्ञानसमूहं त्वं विवृण्वृद्धिं च नः कुरु ॥ अद्रिरादरणीयत्वात्प्राणस्तद्वर्तकोऽद्रिवाः । हरिः शक्रस्तथाद्रीणां छेदनाद्दारणादपि ॥ ७ ॥ (नहित्वा) न त्वामृघायमाणं हि वर्धमानं तु रोदसी । संप्राप्नुतः श्रीभूमी च सहिते वाऽप्रसादतः । अपः प्रजाः सुखवतीरजयस्त्वद्वशत्वतः । ज्ञानानि संधूनुहि च प्रापयोच्चा अपि स्वयम् ॥ ८ ॥ (आश्रुत्) बहुश्रवण-कर्णास्मदाह्वानं शृणु चादरात् । अद्यैव च गिरो धेहि मयि स्तोमं च मत्कृतम् । प्रियं योगादपि कुरु ॥ ९ ॥ (विद्माहि) विद्म त्वां

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च ५
तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।
स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥ ६ ॥ १९ ॥
सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ७
नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ८
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ९
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् ।
वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् १०

SGDF
Sri Gargeshwari Digital Foundation

शक्तिमत्तमम् । श्रोतारं युत्सु चाह्वानमाह्वयामस्तवावनम् । बहुलाभोत्तममिति ॥ १० ॥ स्थानान्तरगते ऋचौ । दृष्ट्वेन्द्रं यज्ञगं याभ्यां मधुच्छन्दाः समस्तुवत् । आ तू न इति तेनैव न विरुद्धा शतर्चिता ॥ छ ॥ (आतूनः) मात्रा कुशैर्गृहीतत्वाज्जन्मन्यासीत्स कौशिकः । गाधित्वाद्वा हिरण्याण्डकोशस्थत्वाद्धरिस्तथा । मन्दसानो नित्यसुखी स्तुत्यमायुश्च नस्तिर । ऋषिं सहस्रलाभं मां कुरु च ॥ ॥ ११ ॥ (परित्वा) त्वा इमा गिरः । सर्वदा परितः सन्तु मदीयाः सर्वलाभिनम् । वृद्धिरूपा गिरो जुष्टाः सेवारूपाश्च सन्तु नः ॥ ॥ १२ ॥ २० ॥ १० ॥

अष्टावृचः पुनस्तेन दृष्टा अन्यत्रगास्तपः । कुर्वता ॥ छ ॥ (इन्द्रंविश्वा) सम्यगुद्रिक्तगुणव्यक्तिस्तथाभिधः ॥१॥ (सख्येते ॥२॥ पूर्वीरिन्द्रस्य) प्रथमानि महत्त्वेन ते दानान्यवनानि च । न भिद्यन्ते न नश्यन्ति गोमदन्नं यशस्तथा । यदि मंहते ददातीशो ॥ ३ ॥

आ तू न॑ इन्द्र कौशिक मन्दसा॒नः सु॒तं पि॑ब ।
नव्य॑मा॒युः प्र सू ति॑र कृ॒धी स॑हस्र॒सामृषि॑म् ११
परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतः॑ ।
वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥ १२ ॥ २० ॥ १० ॥

जेता माधुच्छन्दसः । इन्द्रः । अनुष्टुप् ।

इन्द्रं॒ विश्वा॑ अवीवृधन्त्समु॒द्रव्य॑चसं॒ गिरः॑ ।
र॒थीत॑मं र॒थीनां॒ वाजा॑नां॒ सत्प॑तिं॒ पति॑म् १
स॒ख्ये त॑ इन्द्र वा॒जिनो॒ मा भे॑म शवसस्पते ।
त्वाम॒भि प्र णो॑नुमो॒ जेता॑र॒मप॑राजितम् २
पू॒र्वीरिन्द्र॑स्य रा॒तयो॒ न वि द॑स्यन्त्यू॒तयः॑ ।
यदी॒ वाज॑स्य॒ गोम॑तः स्तो॒तृभ्यो॒ मंह॑ते म॒घम् ३

SGDF
Sri Gargeshwari Digital Foundation

(पुरांभिन्दुः ॥ ४ ॥ त्वंवलस्य) वलस्तिर्यग्गतिर्धियः। वाचामन्यार्थबुद्धेस्तु विलं मूलं तमो हि यत्। तदपावृतवांस्त्वं च प्रदर्श्य विनिवार्य च। त्वां हि देवा भयापेताः प्रेर्यमाणास्त्वयैव च। छाद्यमानं गिरा दैत्यैररक्षन्निव सद्गिरा ॥ छ ॥ इन्द्रस्य गोसवार्थे च समुत्सृष्टा जगत्यपि। चर्तुं गावो हृता दैत्यैः सरमारक्षिताः पुरा। तस्याः स्वसृत्वमुक्त्वैव तयोच्छिष्टं च गोपयः। तदर्थं पणयो नाम ते दैत्या बलपूर्वकाः। इन्द्रेण निहताः पश्चाज्ज्ञात्वा च सरमाकृतम्। ताडयित्वा पदा वक्रात्सृते पयसि तां भयात्। शरणागतां प्रेषयित्वा दूत्येन पणिनां पुनः। भित्वा गिरिव्रजं तं च गावो यत्र प्रतिष्ठिताः। निःसारिताः पुनस्ताश्च गोसवेनेष्टमेव च। तदा देवा अभीत्यैव परितो जुगुपुः पतिम् ॥ ५ ॥ (तवाहं) तवदानैरहं सिन्धुं नदीं प्रत्यागमं पुनः। त्वामावदन्स्तुतिपदैर्यज्ञदीक्षार्थमुद्यताः। उपातिष्ठन्त कर्तारो विधुस्त्वां ये गिरोदित ॥ ६ ॥ (मायाभिः) शक्तिभिः शक्तिमन्तं त्वां शोषकं वृत्रमातिरः। तमो वा त्वां विदुर्मेधारतास्तेषां श्रवांसि च। विद्या उच्चैस्तरां देहि ॥ ७ ॥ (इन्द्रमीशानं) स्तुवन्ति त्वां सहौजसा ॥ ८ ॥ २१ ॥ ११ ॥ ३ ॥ छ ॥

पुरां भिन्दुर्युवा कविरमितौजा अजायत।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ४
त्वं वलस्य गोमतोऽपावरद्रिवो बिलम्।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ५
तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन्।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ६
मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ७
इन्द्रमीशानमोजसाभि स्तोमा अनूषत।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥८॥२१॥११॥३॥

SGDF
Sri Gurgeshwari Digital Foundation

ऋक्संहितायाः स्वाध्यायात्प्रबन्धाभ्यासनिर्मितात् । ब्राह्मणेभ्यस्तथा मानात्प्रोक्ताः स्युर्मुनयोऽत्र ये । श्रुत्यभावादलिङ्गाच्च मुनिर्नान्यः प्रतीयते । श्रुतिलिङ्गान्यता यावत्तावत्पूर्वा प्रमा भवेत् ॥ छ ॥ शतर्ग्भिरुत्तराभिस्तु वह्निनामानमच्युतम् । अस्तौन्मेधातिथिस्ताभ्य उत्तरा अपि तदृशः । अन्यत्रगास्तपस्यन्स ता ददर्श कदाचन । कालस्थानान्तरत्वं चेत्सङ्ख्यातोऽभ्यधिकं भवेत् । अन्यस्थानगता अन्यदृष्टा अप्यत्रगा यदि । सङ्ख्यान्तर्भावमेष्यन्ति ता इतोपगता यतः ॥ छ ॥ (अग्निंदूतं) यज्ञभागार्थमत्रस्थो देवैः संप्रेषितो यतः । दूतोऽग्निर्वासुदेवश्च तत्तत्प्रार्थितकृद्यतः । विश्ववेदाः स सर्वज्ञो यज्ञज्ञो यज्ञसुक्रतुः ॥१॥ (अग्निं) अग्निनामा जामदग्न्यो भगवान्संप्रकीर्तितः । तस्य रूपबहुत्वेन वीप्सा चैवोपपद्यते । हवीमभिर्ऋगाह्वानैराह्वयन्तः प्रजापतिम् ॥ २ ॥ (अग्नेदेवान्) जज्ञानो व्यज्यमानस्तु वृक्तं प्रस्तुतमुच्यते । यजमानो वृक्तबर्हि-॥ ३ ॥ (तान्) बोधयेशेच्छतः सुरान् । देवैः सहोपविशसि ॥ ४ ॥ (घृताहवन) यस्य ते सुघृतं हविः । रिषतो नाशकात्रक्षो जनान्प्रति दहैव च ॥५॥ (अग्निनाग्निः) यस्यास्ये हूयते सोऽग्निः परेशेन समिध्यते । अथवाऽऽहवनीयोऽग्नि-

---

मेधातिथिः काण्वः । अग्निः, ६ प्रथमपादस्य
[निर्मथ्याहवनीयौ] अग्नी । गायत्री ।

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् १
अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् २
अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः ३
ताँ उशतो वि बोधय यदग्ने यासि दूत्यम् । देवैरा सत्सि बर्हिषि ४
घृताहवन दीदिवः प्रति ष्म रिषतो दह । अग्ने त्वं रक्षस्विनः ५
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥६॥२२॥

SGDF
Sri Gargeshwari Digital Foundation

मैथितेन समिध्यते ॥ ६ ॥ २२ ॥ (कविमग्निं) सत्यधर्मा सद्गुण-
भृद्दुःखघ्नोऽमीवचातनः । चातनं कालनं वा स्यात् ॥ ७ ॥
(यस्त्वामग्ने ॥ ८ ॥ योअग्निं) देववीतिस्तु तद्गतिः । आवासयति
यस्त्वां च तं त्वं मृळय सर्वदा ॥ ९ ॥ (सनःपावक) त्वत्पूजाविषये
देवानावहेन्द्रियमानिनः ॥ १० ॥ (सनस्तवानः) गायत्रेण स्तूयमानो
दृश्यमानेन नो रयिम् । पुत्रयुक्तामिषं चैव वीर्ययुक्तामथावह ॥ ११ ॥
(अग्नेशुक्रेण) ज्वलता तेजसा विश्वदेवाह्वानैर्वृणु स्तुतिम् ॥ १२ ॥
॥ २३ ॥ १२ ॥

(सुसमिद्धः) अस्मद्धविष्मते देवानाहूय यज चादरात् ॥ १ ॥
(मधुमन्तं) तनूभ्यो वाक्ततो देवो व्यक्तस्तेन तनूनपात् ॥ २ ॥
(नराशंसं) नरैः स्तुत्यो नराशंसो वह्नेरन्याऽथवा तनूः ॥ ३ ॥

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ७
यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति । तस्य स्म प्राविता भव ८
यो अग्निं देववीतये हविष्माँ आविवासति । तस्मै पावक मृळय ९
स नः पावक दीदिवोऽग्ने देवाँ इहा वह । उप यज्ञं हविश्च नः १०
स नः स्तवान आ भर गायत्रेण नवीयसा । रयिं वीरवतीमिषम् ११
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः । इमं स्तोमं जुषस्व नः
॥ १२ ॥ २३ ॥ १२ ॥

मेधातिथिः काण्वः । (आप्रीसूक्तं, अग्निरूपा देवताः=) १ इध्मः,
समिद्धोऽग्निर्वा, २ तनूनपात्, ३ नराशंसः, ४ इळः, ५ बर्हिः,
६ देवीर्द्वारः, ७ उषासानक्ता, ८ दैव्यौ होतारौ प्रचेतसौ,
९ तिस्रो देव्यः सरस्वतीळाभारत्यः, १० त्वष्टा,
११ वनस्पतिः, १२ स्वाहाकृतयः । गायत्री ।

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते । होतः पावक यक्षि च १
मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये २
नराशंसमिह प्रियमस्मिन् यज्ञ उप ह्वये । मधुजिह्वं हविष्कृतम् ३

SGDF
Sri Gargeshwari Digital Foundation

(अग्नेसुखतमे) मनूनां च हितत्वेन मनुर्हित इतीरितः ॥ ४ ॥ (स्तृणीत) आनुषक्सर्वतो देवस्थानं बर्हिः स्तृणीत च । शुद्धस्य विष्णोर्यत्स्थानं घृतपृष्ठं हि तन्मनः । यत्र स्याद्दर्शनं विष्णोर्नित्यामरणधर्मिणः ॥ ५ ॥ (विश्रयन्तां) ऋतरूपेण हरिणा समृद्धा या ऋतावृधः । द्वारो देव्यः श्रियो दास्यः श्रयन्तामिह नो मखे । मानसे बाह्ययज्ञे वा ह्यसङ्गत्वादसश्चतः । अद्याहनि तथा नूनमद्यैव यजनार्थतः । द्वारभूतः स भगवानपि साक्षान्मुमुक्षतः । स्त्रीरूपश्च स ॥ ६ ॥ २४ ॥ (नक्तोषासा) नक्ता स्यान्नाक्तो यस्मात्स सर्वतः । उषाः प्रकाशरूपत्वात्सुभद्रे ते उपह्वये । अस्मिन्बर्हिषि संस्थित्यै ॥७॥ (तासुजिह्वा) होतारौ देवगावपि । मथ्यमानो परश्चैव वह्नी तद्गोऽथवा हरिः । आत्माऽन्तरात्मरूपेण द्विरूपो वा व्यवस्थितः । देवेषु यजतां यज्ञमस्मदीयमिमं सदा ॥ ८ ॥ (इळा) इळेड्यत्वाद्धरिः श्रीर्वा भूरूपा सैव चापरा । मही तु भारतीनाम वायव्या ब्रह्मणोऽपरा । तद्गतस्तादृशै रूपैः पृथक्स्थो वा हरिस्तथा ॥ ९ ॥ (इहत्वष्टारं) त्वष्टा तेजस्त्वतो विष्णुर्बलत्वाद्वा समीरितः । विश्वरूपकरत्वाच्च विश्वरूपोऽथ पूर्तितः ॥ १० ॥ (अवसृजा) वननीयपतित्वेन वनस्पतिरितीरितः ।

अग्ने॑ सु॒खत॑मे॒ रथे॑ दे॒वाँ ई॑ळि॒त आ व॑ह । असि॒ होता॒ मनु॑र्हितः ४
स्तृ॒णी॒त ब॒र्हिरा॑नु॒षग्घृ॒तपृ॑ष्ठं मनीषिणः । यत्रा॒मृत॑स्य॒ चक्ष॑णम् ५
वि श्र॑यन्तामृता॒वृधो॒ द्वारो॑ दे॒वीर॑स॒श्चतः॑ । अ॒द्या नू॒नं च॒ यष्ट॑वे ॥ ६ ॥ २४ ॥
नक्तो॒षासा॑ सु॒पेश॑सा॒ ऽस्मिन् य॒ज्ञ उप॑ ह्वये । इ॒दं नो॑ ब॒र्हिरा॒सदे॑ ७
ता सु॑जि॒ह्वा उप॑ ह्वये॒ होता॑रा॒ दैव्या॑ क॒वी । य॒ज्ञं नो॑ यक्षतामि॒मम् ८
इळा॒ सर॑स्वती म॒ही ति॒स्रो दे॒वीर्म॑यो॒भुवः॑ । ब॒र्हिः सी॑दन्त्व॒स्रिधः॑ ९
इ॒ह त्वष्टा॑रमग्रि॒यं वि॒श्वरू॑प॒मुप॑ ह्वये । अ॒स्माक॑मस्तु॒ केव॑लः १०
अव॑ सृजा वनस्पते॒ देव॑ दे॒वेभ्यो॑ ह॒विः । प्र दा॒तुर॑स्तु॒ चेत॑नम् ११

SGDF
Sri Gangeshwari Digital Foundation

ज्ञानं तु चेतनम् ॥ ११ ॥ (स्वाहा) स्वाहा स्वभागगतिमान्स्मृतः। अव्ययत्वादमोषश्च ॥ १२ ॥ २५ ॥ १३ ॥

(ऐभिरग्ने) कामदोहादुवः स्मृताः ॥ १ ॥ (आत्वा ॥ २ ॥ इन्द्रवायू) बृहन्पतिर्बृहत्या वा वाच एव बृहस्पतिः। मित्रेति मित्रावरुणौ पूषानाम स पोषणात्। पूर्णत्वाद्वा भगः प्रोक्तः पूर्णैश्वर्यादिकत्वतः। आदिस्थत्वात्स आदित्य आददानः प्रयाति वा। बहुरूपत्वतश्चैव मानोक्तत्वात्तु मारुतः ॥ ३ ॥ (प्रवः) मत्सरा मदकारित्वात्ताच्छील्यादुत्तरं पदम्। द्रप्सास्ते द्रवणाच्चैव चमसस्थाश्चमूषदः। शिरश्च चमसं प्रोक्तमिष्टदानात्तथेन्दवः ॥ ४ ॥ (ईळतेत्वां) अवस्युर्यजमानः स्यादवनार्थप्रवृत्तितः। आत्मस्थं वा बहुवचो बहवो मुनयोऽत्र वा। उत्तराणां वचस्त्वेन स्वयं वदति चेश्वरः। अरं कृतोऽतिकर्तारस्त्वलङ्कर्तार एव वा ॥ ५ ॥ (घृतपृष्ठाः) स्निग्धपृष्ठास्समारूढा हरिणा वा विदोषिणा। मनोमात्रेण योज्याश्च त्वां

स्वाहा॑ य॒ज्ञं कृ॑णोत॒नेन्द्रा॑य॒ यज्व॑नो गृ॒हे। तत्र॑ दे॒वाँ उप॑ ह्वये ॥ १२ ॥ २५ ॥ १३ ॥

मेधातिथिः काण्वः। विश्वे देवाः (विश्वैर्देवैः सहितोऽग्निः),
३ इन्द्रवायुबृहस्पतिमित्राग्निपूषभगादित्यमरुद्गणाः,
१० विश्वदेवाग्नीन्द्रवायुमित्रधामानि, ११ अग्निः। गायत्री।

ऐभि॑रग्ने दु॒वो गिरो॒ विश्वे॑भिः॒ सोम॑पीतये। दे॒वेभि॑र्याहि॒ यक्षि॑ च १
आ त्वा॒ कण्वा॑ अहूषत गृ॒णन्ति॑ विप्र ते॒ धियः॑। दे॒वेभि॑रग्न॒ आ ग॑हि २
इ॒न्द्र॒वा॒यू बृह॒स्पतिं॑ मि॒त्राग्निं पू॒षणं॒ भग॑म्। आ॒दि॒त्यान् मारु॑तं ग॒णम् ३
प्र वो॑ भ्रियन्त॒ इन्द॑वो मत्स॒रा मा॑दयि॒ष्णवः॑। द्र॒प्सा मध्व॑श्चमू॒षदः॑ ४
ईळ॑ते॒ त्वाम॑व॒स्यवः॒ कण्वा॑सो वृ॒क्तब॑र्हिषः। ह॒विष्म॑न्तो अ॒रंकृ॑तः ५
घृ॒तपृ॑ष्ठा म॒नो॒युजो॒ ये त्वा॒ वह॑न्ति॒ वह्न॑यः। आ दे॒वान्त्सोम॑पीतये ॥ ६ ॥ २६ ॥

SGDF
Sri Gangeshwari Digital Foundation

देवांश्च वहन्ति ये ॥ ६ ॥ २६ ॥ (तान्यजत्रात्) तैर्देवान्यजतः स्तोतॄन्ज्ञानेन ब्रह्मणैधितान् । पत्नीभिर्योजयागन्तुं सह मध्वश्च पायय ॥ ७ ॥ (येयजत्राः) ते षष्ठ्यतोऽनुदात्तः स्यादुदात्तो बहुवाचकः । आवृत्तस्तु भवेदर्थस्ते पिबन्तु वषट्कृतौ ॥ ८ ॥ (आर्कीसूर्यस्य) सूर्यस्य रोचनात्स्वर्गादावक्षत्यग्निरिन्दुपान् । उषः प्रकाशनाद्ब्रह्म तद्विदस्त उषर्बुधः ॥ ९ ॥ (विश्वेभिः) देवास्ते विष्णु-धामत्वान्मित्रधामान ईरिताः ॥ १० ॥ (त्वंहोता ॥ ११ ॥ युक्ष्व) अग्निवाहा अश्वतर्यो दूर्वापद्माग्निसप्रभाः । लोहिताः क्वचिदश्वाश्च रोहिन्मृग्योऽपि कुत्रचित् ॥ १२ ॥ २७ ॥ १४ ॥

(इन्द्रसोमं ॥ मरुतः ॥ अभियज्ञं) ऋतुर्मार्गस्तु नेतृत्वान्नेष्टाऽग्नि-र्हरिरेव वा । ईष्टे न कश्चिदस्येति ग्ना नद्यश्च समीरिताः । गति-

---

तान् यजत्राँ ऋतावृधो ऽग्ने पत्नीवतस्कृधि । मध्वः सुजिह्व पायय ७

ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया । मधोरग्ने वषट्कृति ८

आर्की सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ९

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः १०

त्वं होता मनुर्हितो ऽग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ११

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः । ताभिर्देवाँ इहा वह
॥ १२ ॥ २७ ॥ १४ ॥

मेधातिथिः काण्वः । [प्रतिदैवतं ऋतुसहितम्–] १ इन्द्रः, २ मरुतः, ३ त्वष्टा, ४ अग्निः, ५ इन्द्रः, ६ मित्रावरुणौ, ७-१० द्रविणोदाः, ११ अश्विनौ, १२ अग्निः । गायत्री ।

इन्द्र सोमं पिब ऋतुना ऽऽ त्वा विशन्त्विन्दवः ।
मत्सरासस्तदोकसः १

SGDF
Sri Gangeshwari Digital Foundation

शीलत्वतो ग्रास्ता ज्ञातृनेतृत्वतो हरिः। गमनान्नयनाद्वा ग्रा ऋतुपात्र-
मृतुस्तथा। सोमास्तदोकसः प्रोक्ता ऋतुपात्रस्थिता यतः। पत्नी
नेतृत्वतो नेष्टा नेष्टर्त्विक्संप्रकीर्तितः। ज्ञापयन्ति स्वलिङ्गानीत्यृतवः
सम्प्रकीर्तिताः। पावनाच्चैव पोतारो मरुतः पोतृदेवताः। अग्निस्तु
देवता नेष्टुस्त्वष्टेन्द्रो विष्णुरेव वा ॥ १ ॥ २ ॥ ३ ॥ (अग्नेदेवान्)
वेद्युत्तरा सदश्चैव प्राग्वंशो योनयः स्मृताः। भूष भूषय नो यज्ञं ॥४॥
(ब्राह्मणात्) ब्राह्मणाच्छंसिपात्रतः। पिबेन्द्र नो राधसोऽर्थं त्वामनु-
त्वृतुदेवताः। स्तृतं छिन्नमिति प्रोक्त ॥ ५ ॥ (युवंदक्षं) मस्तभ्यं
दुर्दभं स्मृतम्। दक्षाख्यं यजमानं चापीशाथे यज्ञमेव च। सोमं
पीत्वर्तुपात्रेण सहवातेन चर्तुना ॥ ६ ॥ २८ ॥ (द्रविणोदाः) होता
च होतृकाश्चैव द्रविणोदा द्रवीणसः। अग्निश्चैवाग्नयस्तेषां देवता
विष्णुमीळते ॥ ७ ॥ (द्रविणोदाददातु ॥ ८ ॥ द्रविणोदाःपिपीषति)
पातुमिच्छति सोमं स सोमास्तस्मै प्रतिष्ठिताः। ऋतुपात्रैर्देवताभिः
सहैवैनमभीप्सत ॥ ९ ॥ (यत्त्वा) चतुर्थवारमपि यत्त्वां यजामो
ददिर्भव ॥ १० ॥ (अश्विना) दीद्यग्नी इति दीप्ताग्नी ॥ ११ ॥

मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन। यूयं हि ष्ठा सुदानवः २
अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि ३
अग्ने देवाँ इहा वह सादया योनिषु त्रिषु। परि भूष पिब ऋतुना ४
ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु। तवेद्धि सख्यमस्तृतम् ५
युवं दक्षं धृतव्रत मित्रावरुण दूळभम्। ऋतुना यज्ञमाशाथे ॥६॥२८॥
द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते ७
द्रविणोदा ददातु नो वसूनि यानि शृण्विरे। देवेषु ता वनामहे ८
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत ९
यत् त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे। अध स्मा नो ददिर्भव १०
अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता। ऋतुना यज्ञवाहसा ११

SGDF
Sri Gargeshwari Digital Foundation

(गार्हपत्येन) संत्योऽग्निः सन्ततत्वतः । विष्णुर्वर्त्वधिपो विष्णुः केशवादिस्वरूपतः । ग्रहान्सोमस्य मिमत इति तस्यैव कथ्यते । गार्हपत्येन पात्रेण यजमानस्तु देवयन् । देवान्पातीति ॥ १२ ॥ ॥ २९ ॥ १५ ॥

(आत्वा) सुष्टूरीकुर्वन्ति विषयान्यतः । चक्षूंषीन्द्रस्य हरयस्तेनोक्ताः सूरचक्षसः ॥ १ ॥ (इमाः) भक्तिस्नुतानि धानानि बुद्धेर्धाना इति ह्यपि ॥ २ ॥ (इन्द्रं) प्रातरित्यादिवाक्येन सवनत्रयमीरितम् । समाप्तत्वात्सोमपीतिस्तृतीयं सवनं स्मृतम् । सदा ॥३॥ (उपनः ॥ ४ ॥ सेमं ॥ ५ ॥ ३० ॥ इमेसोमासः) विष्णुविवक्षायां यजमानबलं सहः । तदिष्टस्यैव दानाय तद्गुणव्यक्तिरेव वा । 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते' । 'हेयोपादेयरहितगुणपूर्णो हरिः सदा' । 'अनुग्रहव्यक्तिरेव तद्गुणानां च नान्यथा' । इत्यादिवेदवाक्येभ्यो नैव

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि । देवान् देवयते यज
॥ १२ ॥ २९ ॥ १५ ॥

मेधातिथिः काण्वः । इन्द्रः । गायत्री ।

आ त्वा वहन्तु हरयो वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः १

इमा धाना घृतस्नुवो हरी इहोप वक्षतः । इन्द्रं सुखतमे रथे २

इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे । इन्द्रं सोमस्य पीतये ३

उप नः सुतमा गहि हरिभिरिन्द्र केशिभिः । सुते हि त्वा हवामहे ४

सेमं नः स्तोममा गह्युपेदं सवनं सुतम् । गौरो न तृषितः पिब ॥५॥३०॥

इमे सोमास इन्दवः सुतासो अधि बर्हिषि । ताँ इन्द्र सहसे पिब ६

SGDF
Sri Gangeshwari Digital Foundation

वृद्धिर्हरेः क्वचित् ॥ ६ ॥ (अयन्ते ॥ ७ ॥ विश्वमित् ॥ ८ ॥ सेमं) पृण संपूरय स्वाध्यः सुधीतय इतीरिताः ॥ ९ ॥ ३१ ॥ १६ ॥

(इन्द्रावरुणयोः) अविकारेण संस्थानमीदृक्त्वं नाम कीर्तितम् ॥ ॥ १ ॥ (गन्तारा) मावतो ज्ञानयुक्तस्य प्रजाश्चर्षणयः स्मृताः ॥ २ ॥ (अनुकामं) नेदिष्ठत्वं समीपत्वं क्षिप्रं शरणमीमहे ॥ ३ ॥ (युवाकु) युवयोरेव वाक्यानां सुमतीनां च सर्वशः । भवेमान्नप्रदातृणां सर्वदा विषया वयम् ॥ ४ ॥ (इन्द्रः) क्रतुः प्रधान उक्थ्यश्च शस्त्रैः स्तुत्यो विशेषतः ॥ ५ ॥ ३२ ॥ (तयोरित्) रक्षणेन तयोर्वित्तं ज्ञानं वा प्राप्नुमः सदा । निधीमहि च दानं च स्यादेवास्माकमर्थिने ॥ ६ ॥ (इन्द्रावरुण) ह्रस्वता संहितायां तु देवतैक्यप्रदर्शिनी । स्वरूपैक्यं द्वयो तत्तु मत्यैक्यं भिन्नयोरपि ॥ ७ ॥ (इन्द्रावरुणनु) अद्य वां

अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः । अथा सोमं सुतं पिब ७
विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति । वृत्रहा सोमपीतये ८
सेमं नः काममा पृण गोभिरश्वैः शतक्रतो । स्तवाम त्वा स्वाध्यः
॥ ९ ॥ ३१ ॥ १६ ॥

मेधातिथिः काण्वः । इन्द्रावरुणौ । गायत्री, ४-५ पादनिचृत्
(५ ह्रसीयसी वा) गायत्री ।

इन्द्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृळात ईदृशे १
गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः । धर्तारा चर्षणीनाम् २
अनुकामं तर्पयेथामिन्द्रावरुण राय आ । ता वां नेदिष्ठमीमहे ३
युवाकु हि शचीनां युवाकु सुमतीनाम् । भूयाम वाजदाव्नाम् ४
इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् । क्रतुर्भवत्युक्थ्यः ॥ ५ ॥ ३२ ॥
तयोरिदवसा वयं सनेम नि च धीमहि । स्यादुत प्ररेचनम् ६
इन्द्रावरुण वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युषस्कृतम् ७
इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा । अस्मभ्यं शर्म यच्छतम् ८

SGDF
Sri Gurgeshwari Digital Foundation

नुनुमो लोपः स्वातन्त्र्यार्थे हि सूत्रतः । साधयन्तीषु धीष्वेव शर्मास्मभ्यं प्रयच्छतम् ॥ ८ ॥ (प्रवां) यथास्थितस्तुतिं यां च वर्धयेथे सदैव मे ॥ ९ ॥ ३३ ॥ १७ ॥ ४ ॥

(सोमानं) सौम्यं शब्दं कृणु त्वं नो विष्णो वायो सुवाक्पते । कक्षीवन्तं प्रति हि यो दत्तो यः स उशिक्सुतः । विवक्षितो मुनिः सोऽपि तस्मादर्थोऽपि मां प्रति ॥ १ ॥ (योरेवान्) वित्तवान्रोगहा ज्ञानवेत्तास्माभिः सयुग्भवेत् । तुरो वेगाद्धरिर्वायु-॥ २ ॥ (मानः) ररुट् चातिरोषणात् । तस्य धूर्तिर्वचो नास्मान्पूरयेद्रक्ष नो हरे ॥३॥ (सघ) घेतिहाऽवधृतिश्चैव सोमः सौम्यत्वतो हरिः । उना मया च युक्तत्वादूमैर्युक्तत्वतोऽपि वा । अमः स इति वा ॥ ४ ॥ (त्वन्तं) साक्षाच्छ्रीर्दक्षेणेति दक्षिणा । दक्षिणा चतुरत्वाद्वा स्वयमेव जनार्दनः॥ ॥ ५ ॥ ३४ ॥ (सदसस्पतिं) सदसस्पतिर्हरिः साक्षाद्वायुरग्निरथापि

प्र वा॑मश्नोतु सुष्टु॒तिरिन्द्रा॑वरुण॒ यां हु॒वे । यामृ॒धाथे॑ स॒धस्तु॑तिम्
॥ ९ ॥ ३३ ॥ १७ ॥ ४ ॥

मेधातिथिः काण्वः । १-३ ब्रह्मणस्पतिः, ४ इन्द्रो ब्रह्मणस्पतिः सोमश्च, ५ ब्रह्मणस्पतिः सोम इन्द्रो दक्षिणा च, ६-८ सदसस्पतिः, ९ सदसस्पतिर्नराशंसो वा । गायत्री ।

सो॒मानं॒ स्वर॑णं कृणु॒हि ब्र॑ह्मणस्पते । क॒क्षीव॑न्तं॒ य औ॑शि॒जः १

यो रे॒वान् यो अ॑मीव॒हा व॑सु॒वित् पु॑ष्टि॒वर्ध॑नः । स नः॑ सिषक्तु॒ यस्तु॒रः २

मा नः॒ शंसो॒ अर॑रुषो धू॒र्तिः प्रण॒ङ् मर्त्य॑स्य । रक्षा॑ णो ब्रह्मणस्पते ३

स घा॑ वी॒रो न रि॑ष्यति॒ यमिन्द्रो॒ ब्रह्म॒णस्पति॑ः ।
सोमो॑ हि॒नोति॒ मर्त्य॑म् ४

त्वं तं ब्र॑ह्मणस्पते॒ सोम॒ इन्द्र॑श्च॒ मर्त्य॑म् । द॒क्षि॑णा पा॒त्वंह॑सः ॥५॥३४॥

सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒ काम्य॑म् । स॒निं मे॒धाम॑यासिषम् ६

SGDF
Sri Gargeshwari Digital Foundation

वा। लाभज्ञानस्वरूपोऽसौ शरणं तमयासिषम् ॥ ६ ॥ (यस्मात्) धीप्रेरकः स ध्येयश्च धीभिर्योगं तदाप्नुते ॥ ७ ॥ (आत्) तस्माद्धविष्कृतस्त्वृद्धिं करोति यजतो विभुः। करोति चोत्तमं यज्ञं देवाह्वानानि गच्छति ॥ ८ ॥ (नराशंसं) नरैः स्तुत्यो नराशंसो हरिर्धृष्टतमश्च सः। गुणानां प्रथमाधिक्यात्सप्रथस्तम ईरितः। यस्य स्वर्गादपि गृहं मखः प्रियमिवेयते ॥ ९ ॥ ३५ ॥ १८ ॥

(प्रतित्यं) यज्ञं प्रतिप्रति त्यं तं सम्यक्शास्त्रोक्तलक्षणम्। आहूयसे ॥ १ ॥ (नहि) महान्नैव त्वदन्योऽस्ति क्रतुं प्रति। विष्णौ हि मुख्यतोऽर्थोऽयमग्नौ कांश्चिद्दते सुरान् ॥ २ ॥ (येमह) महतो रञ्जकात्स्वर्गादद्रोग्धारोऽखिलं विदुः ॥ ३ ॥ (यउग्राः) प्राप्ता अर्के विशेषेण सन्निधिस्तत्र यद्धरेः ॥ ४ ॥ (येशुभ्राः) शुद्धा घोरबलाः क्षेत्रत्रातारः क्षतितोऽपि वा। रम्यसत्सुखभोक्तारो मरुतो मारुतत्वतः। एतादृशानि रूपाणि प्राणाग्निस्थानि चेशितुः। पृथग्वा

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन। स धीनां योगमिन्वति ७

आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम्। होत्रा देवेषु गच्छति ८

नराशंसं सुधृष्टममपश्यं सप्रथस्तमम्। दिवो न सद्ममखसम्
॥ ९ ॥ ३५ ॥ १८ ॥

मेधातिथिः काण्वः। अग्निर्मरुतश्च। गायत्री।

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि १

नहि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आ गहि २

ये महो रजसो विदुर्विश्वे देवासो अद्रुहः। मरुद्भिरग्न आ गहि ३

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा। मरुद्भिरग्न आ गहि ४

SGDF
Sri Gargeshwari Digital Foundation

तादृशान्येव देवगान्यपि सर्वशः ॥ ५ ॥ ३६ ॥ (येनाकस्य) स्वर्गोपरि प्रकाशे च सूर्यादावासते सुराः । नाको निर्दुःखरूपत्वाद् द्यौः प्रकाशस्वरूपतः ॥ ६ ॥ (यईंखयन्ति) प्रतोलयन्ति च गिरींस्तिरस्कृत्य च सागरम् । पुरुषान्प्रकृतिं वापि पर्ववन्तो हि जन्मना । पुरुषाः सुसमुद्रेकात्समुद्रः प्रकृतिर्मता । प्रकृतेः पुरुषाणां च प्रेरकः सन्सदा हरे । स्वरूपैर्बहुभिर्युक्त आयाहि समसद्गुणैः ॥ ७ ॥ (आये ॥ ८ ॥ अभित्वा) ॥ ९ ॥ ३७ ॥ १९ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य-विरचिते श्रीमदृग्भाष्ये (प्रथमाष्टके) प्रथमोऽध्यायः ॥ १ ॥

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न आ गहि ॥ ५ ॥ ३६ ॥

ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न आ गहि ६

य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम् । मरुद्भिरग्न आ गहि ७

आ ये तन्वन्ति रश्मिभिस् तिरः समुद्रमोजसा । मरुद्भिरग्न आ गहि ८

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरुद्भिरग्न आ गहि ॥ ९ ॥ ३७ ॥ १९ ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ अथ द्वितीयोऽध्यायः ॥

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ (अयंदेवाय) सर्वजन्मकृते विष्णुदेवायेयं स्तुतिः कृता। मुखेन विप्रैः काण्वाद्यैः सैव यद्रतिधातमा ॥ १ ॥ (यइन्द्राय) वाङ्मात्रेणैव योज्यौ ये चक्रुरिन्द्राय वाजिनौ। शमीभिर्विष्णुनिष्ठाभिर्यज्ञभागं च लेभिरे। भगवांश्चैतदखिलं कृतवानृभुषु स्थितः। पृथग्वा फलदातृत्वात् ॥ २ ॥ (तक्षन्) परितो ज्मां यतश्चरेत्। परिज्माऽतो रथः काम्यं सबरित्यभिधीयते। ब कामन इति ह्यस्मा-॥ ३ ॥ (युवाना) त्सुधन्वैषां पिता स्मृतः। बृहस्पतेः कामधेनुमृजुभक्ता ऋजूयवः। अवेतनं स्वामिबलात्कर्म विष्टचत्र तेऽक्रत। ऋतभूमिर्ज्ञानभूमिर्भगवानृभुरीरितः। येषां भूतमृतं कर्म यज्ञभागाप्तितोऽपि ते ॥ ४ ॥ (संवः) सहेन्द्रेण सहादित्यैः प्राप्ता युष्माकमिन्दवः ॥ ५ ॥ १ ॥ (उतत्यं) एकं चमसं चतुरः कुरुतेत्याह तान्पुरा। त्वष्टाग्निश्चैव देवानां वाक्यात्तदपि तैः कृतम्।

॥ अथ द्वितीयोऽध्यायः ॥

मेधातिथिः काण्वः। ऋभवः। गायत्री।

अयं देवाय जन्मने स्तोमो विप्रेभिरासया। अकारि रत्नधातमः १

य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी। शमीभिर्यज्ञमाशत २

तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम्। तक्षन् धेनुं सबर्दुघाम् ३

युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः। ऋभवो विष्ट्यक्रत ४

सं वो मदासो अग्मतेन्द्रेण च मरुत्वता। आदित्येभिश्च राजभिः
॥ ५ ॥ १ ॥

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम्। अकर्त चतुरः पुनः ६

SGDF
Sri Gargeshwari Digital Foundation

ह्यादि स्वोक्तंपरित्यज्य त्वष्टुः शुश्रूषणं कृतम् । तं पूर्वकृतमेवैकं चमसं चतुरोऽक्रत ॥ ६ ॥ (तेनः) सप्तसङ्ख्यानि रत्नानि त्रिकालेष्वपि धत्तन । पुराणपञ्चरात्रेतिहासवेदान्हरिस्तथा । मीमांसातर्कसहितान्पञ्च वेदानथापि वा । सप्तच्छन्दांसि वैकैकं तद्गुणैरखिलैः सह ॥ ७ ॥ (अधारयन्त) सुकर्मणा यज्ञभागमभजन्नप्यधारयन् । वह्नयो धारकत्वेन स्थिरत्वेन यथागतिः ॥ ८ ॥ २ ॥ १ ॥ (२०) ॥

(इहेन्द्राग्नी) ह्वये सोमं प्रति च तौ ॥ १ ॥ (तायज्ञेषु) शुम्भनं भूषणं मतम् ॥ २ ॥ (तामित्रस्य) तौ मित्रस्य प्रशस्त्यर्थौ हरेः ॥ ३ ॥ (उग्रासन्ता ॥ ४ ॥ तामहान्ता) रक्षांसि चोब्जतम् । रक्षोरक्ष्याः प्रजा यस्मादत्र्यो मार्गत्रयोज्झिताः । पितृदेवमनुष्याणां गत्यभावादधोगतेः ॥ ५ ॥ (तेनसत्येन) सत्येन गुणपूर्णेन विष्णुना तेन जागृतम् । स्वगुणैरेव विष्णुस्तु प्रकृष्टे चेतने हरौ । पदे गम्यत्वतः सम्यक्तस्मिन्नेव स्वभावतः । तथास्थितौ तु जागृतमिति विष्णुर्विशेषतः । उक्तः ॥ ६ ॥ ३ ॥ २ ॥ (२१) ॥

ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते । एकमेकं सुशस्तिभिः ७
अधारयन्त वह्नयोऽभजन्त सुकृत्यया । भागं देवेषु यज्ञियम्
॥ ८ ॥ २ ॥ १ ॥ २० ॥

मेधातिथिः काण्वः । इन्द्राग्नी । गायत्री ।

इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि । ता सोमं सोमपातमा १
ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः । ता गायत्रेषु गायत २
ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे । सोमपा सोमपीतये ३
उग्रा सन्ता हवामह उपेदं सवनं सुतम् । इन्द्राग्नी एह गच्छताम् ४
ता महान्ता सदस्पती इन्द्राग्नी रक्ष उब्जतम् । अप्रजाः सन्त्वत्रिणः ५
तेन सत्येन जागृतमधि प्रचेतुने पदे । इन्द्राग्नी शर्म यच्छतम्
॥ ६ ॥ ३ ॥ २ ॥ २१ ॥

SGDF
Sri Gargeshwari Digital Foundation

(प्रातर्युजा) प्रातः स्तुतत्वेन प्रोक्तौ प्रातर्युजाविति। अश्विनौ भगवांश्चैव प्रातर्योगेन गम्यते। स्तुतिशब्दः स्तुतौ यस्माद्बुध्यते वर्तमानकः। बोधयेत्यत उक्तं तत्परतो बुद्ध्यते कथम् ॥ १ ॥ (यासुरथा ॥ २ ॥ यावां) कशया स्पृष्टिमात्रेण मधुरं कुरुतोऽखिलम्। अतो मिमिक्षतमिति स्पर्शो मेक्षणमुच्यते। वेदवाक्यस्तुतत्वेन कशा सा सूनृतावती। तयैव घृतसोमादि स्पृशतं याज्ञिकं वसु ॥ ३ ॥ (नहिवां ॥ ४ ॥ हिरण्यपाणिं) हितत्वाद्रमणीयत्वाद्धिरण्यं वर्णतोऽपि च। रूपं नारायणस्यैव पाणिशब्दोपलक्षितम्। स्रष्टृत्वात्सविता विष्णुः स ज्ञाता स्वपदादिकम्। स एव देवता मुख्या तद्गुणैक्येन देवता ॥ ५ ॥ ४ ॥ (अपांनपातं) व्यक्तत्वात्पार्थिवे देहे सोऽपांनपा जनार्दनः ॥ ६ ॥ (विभक्तारं) सदा विभज्य दातारं वसोरुत्तमराधसः। अशेषपुण्यपापादिविशेषैश्चितिदर्शकम्। आह्वयामः ॥ ७ ॥

मेधातिथिः काण्वः। १-४ अश्विनौ; ५-८ सविता; ९-१० अग्निः; ११ देव्यः; १२ इन्द्राणीवरुणान्यग्नाय्यः; १३-१४ द्यावापृथिव्यौ; १५ पृथिवी; १६ विष्णुर्देवा वा; १७-२१ विष्णुः। गायत्री।

प्रातर्युजा वि बोधयाश्विनावेह गच्छताम्। अस्य सोमस्य पीतये १

या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना ता हवामहे २

या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम् ३

नहि वामस्ति दूरके यत्रा रथेन गच्छथः। अश्विना सोमिनो गृहम् ४

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम् ॥ ५ ॥४॥

अपां नपातमवसे सवितारमुप स्तुहि। तस्य व्रतान्युश्मसि ६

विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम् ७

SGDF
Sri Gargeshwari Digital Foundation

(सखायः) स राधांसि शोभयत्यञ्जसा हरिः ॥८॥ (अग्नेपत्नीः ॥९॥ आग्ना) नदीश्च भारतीं चैव होत्रमाहुतिरूपतः । वरूत्रीं वरणीयत्वात्राणाद्बुद्धिस्वरूपिणीम् । विष्णुश्च प्राणसंबन्धाद्भारतीत्येव चोदितः । प्राणस्तु भरतो भारततत्वाद्भर्तृरूपतः । होत्राहुतत्वतो विष्णुः श्रीर्वापि धिषणा मता ॥ १० ॥ ५ ॥ (अभिनः) शर्म दत्वैव महतो विष्णो रक्षन्तु नोऽभितः । प्राणेनैवावसा साकं यस्मादविधवाः सदा । अतो ह्यच्छिन्नपत्रास्ताः सदा युक्तर्णभूषणाः ॥ ११ ॥ (इहेन्द्राणीं ॥१२॥ महीद्यौः) भरणैर्नः पारयेतां दुःखेभ्यः श्रीश्च भूश्च ते । स्वयं वा भगवानन्ये रोदसी लोकदेवते ॥ १३ ॥ (तयोरित्) तयोः पथस्तु विज्ञानं घृतवत्सापरोक्षकम् । यल्लोकदेवताऽपि स्याद्भारती ज्ञानदेवता । विष्णोर्नित्यपदस्थं यज्ज्ञानं यद्घृतवत्पयः । लिहन्ति विप्रास्तज्ज्ञानं बुद्धिभिस्तत्प्रसादतः । गां धारयन्वर्तते यद्गन्धर्वस्तेन केशवः ॥१४॥

सखा॑य॒ आ नि षी॑दत सवि॒ता स्तोम्यो॒ नु नः॑ ।
दाता॒ राधां॑सि शुम्भति ८

अग्ने॒ पत्नी॑रि॒हा व॑ह दे॒वाना॑मुश॒तीरुप॑ । त्वष्टा॑रं॒ सोम॑पीतये ९

आ ग्ना अ॑ग्न इ॒हाव॑से॒ होत्रां॑ यविष्ठ॒ भार॑तीम् ।
वरू॑त्रीं धि॒षणां॑ वह ॥ १० ॥ ५ ॥

अ॒भि नो॑ दे॒वीरव॑सा म॒हः शर्म॑णा नृ॒पत्नीः॑ ।
अच्छि॑न्नपत्राः सचन्ताम् ११

इ॒हेन्द्रा॒णीमुप॑ ह्वये वरुणा॒नीं स्व॒स्तये॑ । अ॒ग्नायीं॒ सोम॑पीतये १२

म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं य॒ज्ञं मि॑मिक्षताम् ।
पि॒पृ॒तां नो॒ भरी॑मभिः १३

त॒योरिद् घृ॒तव॒त्पयो॒ विप्रा॑ रिहन्ति धी॒तिभिः॑ ।
ग॒न्ध॒र्वस्य॑ ध्रु॒वे प॒दे १४

SGDF
Sri Gargeshwari Digital Foundation

(स्योनापृथिवि) स्योना सुखकरी स्यान्नो यतो नश्यसि नो नृवत् । निवेशनी साऽधारत्वाच्छर्म यच्छ महत्तरम् ॥ १५ ॥ ६ ॥ (अतोदेवाः) असुरेभ्यो जगद्धृत्वा यतो विष्णुस्त्रिविक्रमैः । आरभ्य पृथिवीं सप्तलोकैः साकं जगत्पतिः । चक्रे सुरान्पदस्थानप्यतो देवा अवन्तु नः । विशिष्टबलचेष्टत्वाद्विष्णुरित्यभिधा हरेः । प्राणं बलं षकारं च णकारं चाह हि श्रुतिः ॥ १६ ॥ (इदंविष्णुः) रमन्ति पांसवो यत्र पांसुरं पदमीरितम् । समूढं तत्र विश्वं हि पांसुवज्जगतः पतेः ॥१७॥ (त्रीणिपदा) वेदान्कालान्गुणाँल्लोकान्देवमानुषदानवान् । चेतनाचेतनान्मिश्रांस्त्रीणि पदा विचक्रमे । रक्षकत्वेन सर्वाणि स्रष्टृभर्तृत्वतस्तथा । मोक्षदत्वेन च विभुः स्तम्भनीयो न केनचित् । धारकांश्चैव वाय्वादीन्धारयन्वर्तते ततः ॥ १८ ॥ (विष्णोःकर्माणि) जानीथ विष्णुकर्माणि प्राणिकर्माण्यशेषतः । यतो जातान्यविज्ञातो भगवान्सर्वदैव च । स्पशा ज्ञातदृशौ यस्मादिन्द्रस्य स हितः सखा । प्राणस्यैवेन्द्रनाम्नश्च कस्मिन्न्वहमिति श्रुतेः । त्वयेदिन्द्रेतिवचनात्प्राण इन्द्राभिधो मतः ॥१९॥ (तद्विष्णोः) रमाब्रह्मशिवादिभ्यो यद्विष्णोः

स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः ॥ १५ ॥ ६ ॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्त धामभिः १६

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूळ्हमस्य पांसुरे १७

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् १८

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा १९

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् २०

SGDF
Sri Gargeshwari Digital Foundation

परमं पदम् । रूपं पश्यन्ति निर्मुक्ताः संसारात्सूरयः सदा । चक्षुर्दिवीव व्याप्तं यदद्दृश्यं फलदर्शितम् ॥ २० ॥ (तद्विप्रासः) संदीपयन्ति विज्ञानैः संसारात्प्राप्तजागराः । विपन्यवो ज्ञानितमा विष्णोर्यत्परमं पदम् । तात्पर्याधिक्यविज्ञप्त्या अर्थमेतं पुनर्जगौ ॥ ॥ २१ ॥ ७ ॥ ३ ॥ (२२) ॥

(तीव्राःसोमासः) वीर्यवन्तश्च ये सोमा यजमानेष्टसाधकाः । पिब तान् ॥१॥ (उभा) सर्वदेवानां ज्ञानाधिक्यौ दिविस्पृशौ ॥२॥ (इन्द्रवायू) मनसः प्रेरकौ चैव बहुज्ञानौ धियस्पती ॥ ३ ॥ (मित्रं) जज्ञानौ व्यज्यमानौ तु यजमानस्य शोधकौ ॥ ४ ॥ (ऋतेन) परेण ब्रह्मणा तस्मिन्वृद्धौ सत्यपती सदा । सत्यं ज्योतिः प्रकाशत्वात्तौ मित्रावरुणा हुवे ॥ ५ ॥ ८ ॥ (वरुणः) संसिद्धान्कुरुतां

तद् विप्रा॑सो विप॒न्यवो॑ जागृ॒वांस॒ः समि॑न्धते ।
विष्णो॒र्यत् प॑र॒मं प॒दम् ॥ २१ ॥ ७ ॥ ३ ॥ (२२) ॥

मेधातिथिः काण्वः । १ वायुः, २-३ इन्द्रवायू, ४-६ मित्रावरुणौ, ७-९ इन्द्रो मरुत्वान्, १०-१२ विश्वे देवाः, १३-१५ पूषा, १६-२२, २३ (पूर्वार्धस्य) आपः, २३ (उत्तरार्धस्य), २४ अग्निः । १-१८ गायित्री, १९ पुरउष्णिक्, २१ प्रतिष्ठा, २०, २२-२४ अनुष्टुप् ।

ती॒व्राः सोमा॑स॒ आ ग॑ह्या॒शीर्व॑न्तः सु॒ता इ॒मे ।
वायो॒ तान् प्रस्थितान् पिब १
उ॒भा दे॒वा दि॑वि॒स्पृशे॑न्द्रवा॒यू ह॑वामहे । अ॒स्य सोम॑स्य पी॒तये॑ २
इ॒न्द्र॒वा॒यू म॑नो॒जुवा॑ विप्रा॑ हवन्त ऊ॒तये॑ । स॒ह॒स्रा॒क्षा धि॒यस्पती॑ ३
मि॒त्रं व॒यं ह॑वामहे॒ वरु॑णं॒ सोम॑पीतये । ज॒ज्ञा॒ना पू॒तद॑क्षसा ४
ऋ॒तेन॒ यावृ॑ता॒वृधा॑वृ॒तस्य॒ ज्योति॑ष॒स्पती॑ । ता मि॒त्रावरु॑णा हुवे ॥५॥८॥
वरु॑णः प्रावि॒ता भु॑वन् मि॒त्रो विश्वा॑भिरू॒तिभि॑ः ।
कर॑तां नः सु॒राध॑सः ६

SGDF
Sri Gargeshwari Digital Foundation

नस्तौ ॥ ६ ॥ (मरुत्वन्तं) सगणस्तृप्यतां हरिः ॥ ७ ॥ (इन्द्रज्येष्ठाः) पूषा पूर्णत्वतो विष्णुस्तन्मित्राः पूषरातयः ॥ ८ ॥ (हत) सहसा बलरूपेण शक्रेण सहिताः सुराः । मदज्ञानं हतातीव दानशीला न शक्नुयात् । दुर्वाक्तद्वान्पुमान्वा नो ॥ ९ ॥ (विश्वान्) भारती पृश्निरुच्यते । गोरूपा च क्वचित्साऽभूत्तत्सुताश्चाखिलाः सुराः । अन्यत्रापि सुतास्तस्याः ॥ १० ॥ ९ ॥ (जयतां) जयतामिव तद्ध्वनिः । धैर्याद्याति यदा विष्णुं वायुं वा याथनोत्तमम् ॥ ११ ॥ (हस्कारात्) दोषत्यागाद्गुणप्राप्तेर्हस्कारो वायुरुच्यते । विद्युद्विशिष्टज्ञानत्वाद्भारती तत्सुता हि ते । सर्वदेवाश्च मरुतो रक्षन्त्वेतादृशो हरिः । तत्त-दन्तर्गतत्वेन ॥ १२ ॥ (आपूषन्) पूषा पूर्णत्वतश्च सः । आघृणिः पूर्णरश्मित्वादाजनश्चित्रबर्हिषम् । ब्रह्माणं च दिवो देव्या भर्तारं वायुमाजगाम् । यथागतम् ॥ १३ ॥ (पूषा) जगद्राजमविन्द-द्भगवान्सुतम् । स्वकुक्षिगूढं ब्रह्माणम् ॥ १४ ॥ (उतोसः) मह्यं सोमैश्च तर्पितः । साधयामास षडयुक्तानिन्द्रियाणि चकार च ।

म॒रुत्व॑न्तं हवामह॒ इन्द्र॒मा सोम॑पीतये । स॒जूर्ग॒णेन॑ तृम्पतु ७
इन्द्र॑ज्येष्ठा॒ मरु॑द्गणा॒ देवा॑स॒ः पूष॑रातयः । विश्वे॒ मम॑ श्रुता॒ हव॑म् ८
ह॒त वृ॒त्रं सु॑दानव॒ इन्द्रे॑ण॒ सह॑सा यु॒जा । मा नो॑ दुः॒शंस॑ ईशत ९
विश्वा॑न् दे॒वान् ह॑वामहे म॒रुत॒ः सोम॑पीतये ।
उ॒ग्रा हि पृश्नि॑मातरः ॥ १० ॥ ९ ॥ ४ ॥
जय॑तामिव तन्य॒तुर्म॒रुता॑मेति धृष्णु॒या । यच्छुभं॑ या॒थना॑ नरः ११
ह॒स्का॒राद्वि॒द्युत॒स्पर्यऽतो॑ जा॒ता अ॑वन्तु नः । म॒रुतो॑ मृळयन्तु नः १२
आ पू॑षञ्चि॒त्रब॑र्हिष॒माघृ॑णे ध॒रुणं॑ दि॒वः । आजा॑ न॒ष्टं यथा॑ प॒शुम् १३
पू॒षा राजा॑न॒माघृ॑णि॒रप॑गूळ्हं॒ गुहा॑ हि॒तम् । अवि॑न्दच्चि॒त्रब॑र्हिषम् १४
उ॒तो स मह्य॒मिन्दु॑भि॒ः षड् यु॒क्ताँ अ॑नु॒सेषि॑धत् ।
गोभि॒र्यवं॒ न च॑र्कृषत् ॥ १५ ॥ १० ॥

SGDF
Sri Gurgeshwari Digital Foundation

साधनं शक्तिदानं तु गोभिर्वाभिर्यथायवम् ॥ १५ ॥ १० ॥
(अंवयः) अंबयो मातरो ह्यापः कारणत्वात्सहोदराः । जगतो जामयो
यस्मात्सह ताभिर्विवर्धते । अध्वरं कुर्वतां क्षीरं सोमं चापि प्रपृश्वतीः ।
संपृक्ताः ॥१६॥ (अमूः) याः समीपस्थाः सूर्यस्य सहिता अपि ॥१७॥
(अपः) ह्वयामि ता याः पिबन्ति गावो नः सर्वथा हविः । कार्यं
नदीभ्यः ॥ १८ ॥ (अप्स्वन्तः) तास्वन्तरदृश्यममृतं स्थितम् ।
अपामेव प्रशंसार्थं सहायाः सन्तु नः सुराः ॥ १९ ॥ (अप्सुमे)
तात्पर्यार्थं पुनर्वाक्यं सुखाधारो हुताशनः ॥ २० ॥ ११ ॥
(आपःपृणीत) वरूथं गुप्तिरुद्दिष्टा ज्योतिर्विष्णुदृशे तथा । सूरिप्राप्यो
यतो विष्णुः सूर्य इत्यभिधीयते । पृण दाने ॥ २१ ॥ (इदमापः)
ऽखिलं पापमापः प्रवहतापि नः । हिंसाजं शेफजं चैव तथैवानृत-
संभवम् ॥ २२ ॥ (आपः) रसेन सङ्गताश्च स्मो यस्मादनुचरा हि

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पयः १६

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम् १७

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यः कर्त्वं हविः १८

अप्स्व१न्तरमृतमप्सु भेषजमपामुत प्रशस्तये । देवा भवत वाजिनः १९

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।

अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ॥ २० ॥ ११ ॥

आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक् च सूर्यं दृशे २१

इदमापः प्र वहत यत्किं च दुरितं मयि ।

यद् वाहमभिदुद्रोह यद् वा शेप उतानृतम् २२

आपो अद्यान्वचारिषं रसेन समगस्महि ।

पयस्वानग्न आ गहि तं मा सं सृज वर्चसा २३

SGDF
Sri Gangeshwari Digital Foundation

वः ॥ २३ ॥ (संमाग्ने) कुर्युर्मामपि विद्वांसं मदर्थं सर्वदा सुराः ।
एनं मामिति वार्थः स्यादनुजानन्तु वोदितम् ॥२४॥१२॥४॥(२३)॥५॥

शुनःशेपो ददर्शात उत्तरं परमृक्शतम् । यूपादात्मविमोक्षाय स्तुवन्देवान्पृथक्पृथक् । न्यूनं शतमिहैवान्यच्चतुर्थे पञ्चमेऽपि च । मण्डले ब्रह्मणोक्तस्तु क्रमोऽत्रापि हृचां भवेत् ॥ (कस्यनूनं) कर्तुः परानन्दतनोरिदानीं मनामहे चारु विष्णोः सुराणाम् । नामेशश्चें-दिन्दिरायै पुनर्दाद्दृशेयं तां मातरं तं च देवम् । स मुक्तानाममृता-नामजेशमुख्यानां चाभ्यधिको यत्सुखादौ । तेनोक्तोऽसौ कतमो खण्डितत्वात्स चादितिर्महती तन्मही च । देशानन्त्यात्तन्महत्त्वं गुणैस्तु कालाच्चोक्तं तस्य चाखण्डितत्वम् । स एव माता च पिता च देवस्तस्मिन्सदा संस्थितास्तत्पुनर्दात् । अत्ति विश्वं तेन चैवादितिस्स श्रीर्वा ब्रह्मा प्रोक्त एवं क एव । गुणाश्च तस्याभ्यधिकाः सदैव जीवेभ्यस्तत्सोऽपि तद्वाक्ययोग्यः । ददात्वसौ विष्णवे चेन्दिरायै प्राप्तानस्मानपि तौ सर्वगत्वात् । विशेषदेशप्राप्तितस्तस्य चास्तिर्वैकुण्ठादि-लोक उक्तो हरेश्च ॥ १ ॥ (अग्नेर्वयं) तस्यैवान्यद्रूपमग्न्याख्यमुक्तं यो यज्ञेशो हूयते जामदग्न्यः । स देवानां प्रथमो नाम तस्य स्मृतं

सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः ॥ २४ ॥ १२ ॥ (२३) ॥ ५ ॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः । १ कः (प्रजापतिः), २ अग्निः, ३-५ सविता, ५ भगो वा, ६-१५ वरुणः । १, २, ६-१५ त्रिष्टुप्, ३-५ गायत्री ।

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।
को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च १
अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दात् पितरं च दृशेयं मातरं च २

SGDF
Sri Gangeshwari Digital Foundation

सार्थं सर्वकामप्रदं स्यात् ।। २ ।। (अभित्वा) सवितेत्यपरं रूपं
जगत्कारणमीशितुः । वित्तानामीश्वरं तं तु वार्यं हि वरणीयतः ।
वित्तं रक्षन्नवन्नित्यमात्मानं भागमेम्यहम् । त्वामैश्वर्यादिसमितिम् ।।
।। ३ ।। (यश्चित्) योऽपि ते परमो भगः । इत्थंभूतो विकारित्वा-
च्छशमानः सुखाधिकः । नेदीयसो ब्रह्मणोऽपि पूर्वो द्वेषादिवर्जितः ।
हस्तयोस्तं दधे देव तव रूपमनामयम् । निदो दवीय इति तु
विरुद्धार्थद्वयाभिधौ । दूरसामीप्यवचनावुभावपि महोदधौ । यदाऽन्य-
स्सविता देवस्तव स्वामी भगो हरिः । अद्वेषो विष्णुरित्युक्तेस्तमहं
हस्तयोर्दधे ।। ४ ।। (भगभक्तस्य) विष्णुभक्तस्य ते रायो मूर्धानं
राय उत्तमम् । तवावसाऽऽरभे विद्यामुच्चैरश्नामि तत्फलम् । ऐश्वर्यादि-
गुणा यस्य भगो भक्तं परात्मनः । तस्य ते वित्तमश्नामि तव रक्षा-
बलाद्धरे ।। ५ ।। १३ ।। (नहिते) क्षतात्त्राणं ते बलसंविदं च पूर्णं
नापुर्मुक्तिगा ये विशिष्टाः । अपि स्वयं संसृतेरुत्पतन्तः पतयन्तोऽन्यां-
च्छिष्यभक्तानुदाराः । सदा शुभान्याचरन्तोऽपि देवा अब्देवता आप
इति श्रुतिर्यत् । गङ्गाद्या वा वायुदेवस्य विष्णोरुत्पत्तिं ये जानते
देवसङ्घाः । वयः सुपर्णा इति वाप्य ।। ६ ।। (अबुध्नेराजा)ऽबुध्ने
प्रकाशतः संभजतः स्वमुच्चैः । स्तूपं स्थानं ददते पूतदक्षो नीचस्था

अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन् भागमीमहे ३
यश्चिद्धि त इत्था भगः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ४
भगभक्तस्य ते वयमुदशेम तवावसा । मूर्धानं राय आरभे ।।५।।१३।।

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ६
अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ७

SGDF
Sri Gargeshwari Digital Foundation

अप्यूर्ध्वगास्तेन तस्थुः । नीचाश्रये मुक्तिगा मानुषाद्यास्तेषां बुध्नो नीचलोकः सुरेभ्यः । नीचा गुणा अप्रकाशोऽथवैषां नीचोच्चत्वं क्रमशश्चाविरिश्चात् । अस्माकमन्तर्निहितानि नित्यं ज्ञानानि भूयासुरतोऽधिकानि । भवन्त्यर्हा भवितुं वा भविष्याः स्युर्द्धिर्ग्रहे प्रार्थनैवाधिकार्थे ॥ ७ ॥ (उरुंहि) उरुं राजा रञ्जनाद्राजनाद्वा सूर्याय पन्थानमसौ चकार । स्वाज्ञानुसारेण सदैव गत्यै पादावपादाय च गन्तवेऽकरोत् । अज्ञाय विज्ञानमकः स गन्तुमात्मानमित्यर्थ इहाञ्जसोक्तः । बुद्धेर्धातुः शङ्करस्यापि दोषान्वक्ता ज्ञानाच्छिक्षकत्वाच्च विष्णुः ॥ ८ ॥ (शतन्ते) जगद्रक्षासाधनान्यप्यनन्तान्यनन्तधा सन्ति पुनस्तवेश । अगाधरूपा महती शुभा च मतिर्मम त्वद्विषये सदाऽस्तु । ऋतज्ञानप्रतिरूपत्वहेतोर्निर्ऋत्याख्यां दुर्मतिं दूर एव । बाधस्व दुर्ज्ञानिजनं निरस्य स्वर्गात्पराकृत्य च शश्वदेव । कृतं च पापं प्रमुमुग्धि मत्त ॥ ९ ॥ (अमीये) ऋक्षाण्यमी निहितानि त्वयोच्चैः । दृश्यानि रात्रौ न दिवा त्वयैवेत्यादीनि कर्माण्यनिरोधितानि । पश्यन्परानन्दतनोस्तवैव चन्द्रो नित्यं दृश्यमानस्त्वयैव । संप्रेरितो याति परे च देवा एवं त्वदाज्ञाकरणाः सदैव ॥ १० ॥ १४ ॥ (तत्त्वायामि) एवंगुणो यत्त्वमतो

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उं ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ८
शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ९
अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद् दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥ १० ॥ १४ ॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ११

SGDF
Sri Gurgeshwari Digital Foundation

व्रजामि सदा शरण्यं शरणं वेदवाचा । नमन्नन्यो यजमानो हविर्भिस्तदाशास्ते त्वद्गतिं देवदेव । अनिन्दन्नस्मान्नरमात्रबुद्ध्या सम्बोधयोच्चैः स्तुतमस्मदायुः । छेत्सी-॥ ११ ॥ (तदित्) नक्तं दिवसे चैतदेव स्तोत्रं त्वदीयं प्राहुरार्याः सुकार्यम् । मह्यं केतो ज्ञानरूपो हृदिस्थो नारायणो वक्त्ययं तेऽन्यरूपम् । पश्यत्यपीशो यं समह्वद्गृहीतः स नो देवो मोचयत्वग्रचदुःखात् ॥१२॥ (शुनःशेपोह्यह्वत्) शुनःशेपो ह्यह्वद्गृहीतः स्थानत्रये विक्रयाद्यैः सुबद्धः । द्रुतं प्राप्तानि द्रुपदानि विक्रयो यूपे बन्धः संज्ञपनोद्यमश्च । आदित्योऽसावादिसंस्थः परेशो वारीशान्तः संस्थितः स्तूयतेऽत्र । शुनःशेपो यमित्यादिकेन वारीशोऽपि ह्यृषिणा स्तूयमानः । गुणास्त्रयो द्रुपदानीति चोक्ता द्रवत्ययं जीवसङ्घो हि यत्र । करोत्वेनमवसृष्टं सृतेः स प्रसन्नोऽस्मान्कर्मपाशान्मुमोक्तु ॥ १३ ॥ (अवते) निन्दां च तेऽवाग्गतेर्हेतुभूतामवगच्छामः सेयमित्यप्ययोग्याम् । नमस्कारैस्त्वद्गतैस्त्वन्मखैश्च हविर्युक्तैस्त्वत्प्रसादात्स च त्वम् । क्षितिरस्मभ्यं प्राणरन्ताखिलज्ञो वियोजयास्मत्कृतान्याश्वघानि ॥ १४ ॥ (उदुत्तमं) पुण्यं पापं मिश्रमित्येव पाशान्यथायोग्यं श्रथयान्येषु दत्वा । त्वन्निष्ठया तेन वयं त्वदीयलक्ष्म्याः पुत्राः स्याम मुक्ताः सृतेश्च । एषा विष्णोः

तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे ।
शुनःशेपो यमह्वद्गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु - १२
शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् १३
अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि १४
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।

SGDF
Sri Gargeshwari Digital Foundation

केवलाऽप्येवमन्या अयोग्याया अन्यदेवेषु सम्यक्। वाक्यैर्विशिष्टैरपवादहीनैर्ज्ञेया गुणा अन्यदेवेषु चैव। पतिः सोमो वरुणस्याप्यथाग्नेः पतिः सूर्यस्तावुभौ तुल्यवीर्यौ। सूर्याचन्द्रमसोः पतिरिन्द्रोऽस्य रुद्रः पतिर्ब्रह्मा पतिरस्यापि विष्णुः। पतिर्मुक्तेर्वासुदेवोऽथ दृष्टेर्ब्रह्मा विद्यायाः शर्व इन्द्रः क्रियायाः। क्रियांशानामधिपा अन्यदेवास्तथा फलानामपि मुक्तिमार्गे। यथायोग्यं स्वेन्द्रियप्रेरकाश्च ततः पूज्या देवता मुक्तिकामैः। इति श्रुतेस्तारतम्यं गुणानां ज्ञात्वा योज्याः श्रुतयस्तत्र तत्र॥ १५॥ १५॥ ५॥ (२४)॥

(यच्चित्) दिवसे दिवसे देव कुर्मो यदपि ते व्रतं। यथैव
सुजना ॥ १ ॥ (मानोवधाय) मा नो हन्तु साधय निघ्नते।
जिहीळानस्त्यजन्धर्मं हरतो मा च मन्यवे ॥ २ ॥ (विमृळीकाय)
मनस्त्वयि निबध्नीमो गीर्भिरश्वं वियोजितम्। बध्नाति सारथिर्यद्व-
न्मृळीको रक्षकोऽधिकम्। त्वन्मनोऽस्मासु वा गीर्भी रक्षणाय
विसीमहि ॥ ३ ॥ (पराहि) पराक्पतन्ति प्रज्ञा मे विविधाः शुभ-
लब्धये। पक्षिणो वसतीर्यद्वद्धान त्वां प्राप्नुवन्ति च ॥ ४ ॥
(कदा) अतोऽखिलक्षत्रपतिमाह्वयामः कदा वयम्। अविनाशिनं

अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥१५॥१५॥५॥(२४)॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः।
वरुणः। गायत्री।

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यविद्यवि १
मा नो वधाय हत्नवे जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे २
वि मृळीकाय ते मनो रथीरश्वं न संदितम्। गीर्भिर्वरुण सीमहि ३
परा हि मे विमन्यवः पतन्ति वस्यइष्टये। वयो न वसतीरुप ४
कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्षसम् ॥५॥१६॥

SGDF
Sri Gargeshwari Digital Foundation

रक्षणाय महादर्शनमञ्जसा ॥ ५ ॥ १६ ॥ (तदित्) तत्प्रसादाद्ब्रह्म-वायू सममेवावगच्छतः । वेनन्तौ हि विजानन्तौ तौ हि ज्ञानिवरौ मतौ । यथाज्ञानं प्रयोगं च दाशुषे कुरुतो न तौ । अश्विनौ वरुणश्चेत्स्या ॥ ६ ॥ (वेदायः) दाकाशे पक्षिणां पदम् । वेत्त्यसौ सूक्ष्मविज्ञानात्तथा नावो जलेऽब्धिगः । मुक्तानां च स्थितिं वेद ज्ञानस्य च गतिं पराम् । क्षीराब्धिशयनो विष्णुः ॥ ७ ॥ (वेदमासः) कालं कालोद्भवैः सह । य आत्मनः समीपे च जायते तं च पद्मजम् । मुक्तं वा ॥ ८ ॥ (वेदवातस्य) वर्तनां वायोर्महतोऽति-प्रकाशिनः । बृहतो ज्ञानिनश्चैव बृहतो महतोऽपि वा । अधिकानि पदान्येव देवा अध्यासतेऽपि तान् ॥ ९ ॥ (निषसाद) साम्राज्याय सपस्त्यासु निषसाद प्रजासु च । सुज्ञान- ॥ १० ॥ १७ ॥ (अतोविश्वानि) स्तत्र सन्विश्वान्यद्भुतानि च पश्यति । कर्ता चिकित्वान्स कृतकर्तव्यानि च पश्यति ॥ ११ ॥ (सनः) विश्वान्यहानि नो देवः सुपथानि करोत्वसौ । ददात्वायूंषि नो नित्यं मुक्तौ वा ॥ १२ ॥

तदित्स॑मा॒नमा॑शाते॒ वेन॑न्ता॒ न प्र यु॑च्छतः । धृतव्र॑ताय दा॒शुषे॑ ६
वेदा॒ यो वी॒नां प॒दम॒न्तरि॑क्षेण॒ पत॑ताम् । वेद॑ ना॒वः स॑मु॒द्रियः॑ ७
वेद॑ मा॒सो धृतव्र॑तो॒ द्वाद॑श प्र॒जाव॑तः । वेदा॒ य उ॑प॒जाय॑ते ८
वेद॒ वात॑स्य व॒र्तनिमु॒रोर्ऋ॒ष्वस्य॑ बृह॒तः । वेदा॒ ये अ॒ध्यास॑ते ९
नि ष॑साद धृतव्र॑तो॒ वरु॑णः प॒स्त्या॒३॑स्वा ।
साम्रा॑ज्याय सु॒क्रतुः॑ ॥ १० ॥ १७ ॥
अतो॒ विश्वा॒न्यद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति । कृता॑नि॒ या च॒ कर्त्वा॑ ११
स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् ।
प्र ण॒ आयूं॑षि तारिषत् १२

SGDF
Sri Gurgeshwari Digital Foundation

(बिभ्रत्) ऽतिद्रुतभ्रमम् । हितं च रमणीयं च चक्रं स्वर्णं च वर्णतः । अबिभ्रच्च सुनिर्णिक्तं शुद्धं वस्त्रमवस्त च । अविज्ञातचरा देवाः स्पशस्तस्य निषेदिरे । परितो वरुणः पाशमबिभ्रद्द्रुतबन्धनम् ॥१३॥ (नयं) स्तम्भयन्ति न यं वीरा स्तम्भका अपि राक्षसाः । जनानां द्रोहिणो दैत्याः शत्रवश्चाभिमातयः ॥ १४ ॥ (उतयः) असमं च यशश्चक्रे योऽस्माकं हृदयेषु च । अमानुषेषु चान्येषु समन्तादात्मनः सदा । अज्ञेष्वपि च मर्त्येषु व्यतनोदात्मनो यशः ॥ १५ ॥ १८ ॥ (परामे) महाज्ञानं परेशानमिच्छन्त्यो मम धीतयः । सर्वतो यान्ति यद्वच्च गावः शृङ्गस्वरा ननु ॥ १६ ॥ (सन्नु) आपूर्णं मधुमोक्षस्थं सुखं पचसि मेऽग्निवत् । तत्संवोचावहै भूयः प्रियस्त्वं मम यत्सदा ॥ १७ ॥ (दर्शन्नु) अदर्शं तं च सर्वज्ञं तद्रथं च भुवि स्थितम् । सुगिरो मे जुषत च ॥ १८ ॥ (इमंमे) त्वा ऽवनेप्सु-रहं चके । पश्येयं ॥ १९ ॥ (त्वंविश्वस्य) त्वं च विश्वस्य राजा भवसि मेधिरः । मेधावान् ग्मः पृथिव्याश्च सकाले च प्रतिश्रुधि ॥२०॥

बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम् ।
परि स्पशो नि षेदिरे १३
न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम् । न देवमभिमातयः १४
उत यो मानुषेष्वा यशश्चक्रे असाम्या । अस्माकमुदरेष्वा ॥ १५ ॥ १८ ॥
परा मे यन्ति धीतयो गावो न गव्यूतीरनु । इच्छन्तीरुरुचक्षसम् १६
सं नु वोचावहै पुनर्यतो मे मध्वाभृतम् । होतेव क्षदसे प्रियम् १७
दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि । एता जुषत मे गिरः १८
इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके १९
त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि । स यामनि प्रति श्रुधि २०

SGDF
Sri Gangeshwari Digital Foundation

(उदुत्तमं) स त्वं त्रिगुणपाशान्नो मुमुग्धि छिन्धि चाञ्जसा ॥
॥ २१ ॥ १९ ॥ ६ ॥ (२५) ॥

अथ स्तौत्यग्निगं विष्णुमग्निमप्यग्निगोचरैः । वचनैः ॥ (वसिष्व) सर्वदेवानां पूजायै प्रोद्यतो भवान् । वसिष्वोत्तमवस्त्राणि भूषणैरप्यलङ्कुरु । कुर्वन्नुत्सवमत्यन्तमस्मदीयं मखं यज । नित्यमेध्य हरे देव भोग्यान्नानां सदापते । ऊर्जितानां जनानां वा स्वसिन्नो अध्वरं यज । रमयत्यध्वनि शुभे येन तेनाध्वरो मखः ॥ १ ॥ (निनः) वचो नो निनयात्यन्तं दिवि व्याप्ततया सदा । अशेषदेवगत्वेन मन्मभिर्मतिभिः सह । अवमो दशदेवेषु वह्निर्विष्णुस्तु तत्स्थितः ॥ २ ॥ (आहि) सख्ये च सूनवे मह्यमायजत्येष देवताः । आपिः प्राप्यो मम स्वामी भृत्यत्वान्मह्यमापये ॥३॥ (आनः ॥४॥ पूर्व्यहोतः) अस्य मेऽर्थे कुरु मदं स्वातन्त्र्यान्मादयस्व वा ॥५॥२०॥ (यच्चित्) शश्वद्विस्तरतः सर्वान्यदा देवान्यजामहे । तदा त्वय्येव हि

उदु॑त्त॒मं मु॑मुग्धि नो॒ वि पाशं॑ मध्य॒मं चृ॑त ।
अवा॑ध॒मानि॑ जी॒वसे॑ ॥ २१ ॥ १९ ॥ ६ ॥(२५) ॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः ।
अग्निः । गायत्री ।

वसि॑ष्वा॒ हि मि॑येध्य॒ वस्त्रा॑ण्यूर्जां पते । सेमं नो॑ अध्व॒रं य॑ज १
नि नो॒ होता॒ वरे॑ण्यः॒ सदा॑ यविष्ठ॒ मन्म॑भिः । अग्ने॑ दि॒वित्म॑ता॒ वचः॑ २
आ हि ष्मा॑ सू॒नवे॑ पि॒तापि॒र्यज॑त्या॒पये॑ । सखा॒ सख्ये॒ वरे॑ण्यः ३
आ नो॑ ब॒र्ही रि॒शाद॑सो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा । सीद॑न्तु॒ मनु॑षो यथा ४
पूर्व्य॑ होतर॒स्य नो॒ मन्द॑स्व स॒ख्यस्य॑ च ।
इ॒मा उ॒ षु श्रु॑धी॒ गिरः॑ ॥ ५ ॥ २० ॥
यच्चि॒द्धि शश्व॑ता॒ तना॑ दे॒वंदे॑वं॒ यजा॑महे । त्वे इद्धू॑यते ह॒विः ६

SGDF
Sri Gargeshwari Digital Foundation

हविर्हूयते ॥६॥ (प्रियोनः।) सप्रियो भव। मन्द्रो मदकरः ॥७॥ (स्वग्नयः ॥ ८ ॥ अथानः) स्त्रीणां पुंसां चोभयवर्गिणां ॥ ९ ॥ (विश्वेभिः) चनः सुखं धा अस्मासु वायोः पुत्रोऽग्निरेव चेत्। भगवान्वायुना व्यङ्ग्यो ॥ १० ॥ २१ ॥ ७ ॥ (२६) ॥

(अश्वंन) वारवान्बडवामुखः। स्वदृष्टान्तो हरेर्यस्माद्विष्णुः स बडवामुखः ॥ १ ॥ (सघ) सूनुः स शवसो वायोः पृथुज्ञानः सुशेवकृत्। सुखकृन्नो भवेन्मीढ्वान्स्वामी नः सूनुरेव वा। व्यङ्ग्यत्वाद्वायुना सार्धं सुशेवः सुसुखात्मकः ॥ २ ॥ (सनः) आसात्समीपतश्चास्मानघार्थायोर्निपाहि च। प्रति प्रतिसदो नित्यो विश्वायु- ॥३॥ (इममूषु) स्त्वमिमां स्तुतिं। सनिं दानस्वरूपां च गायत्रीछन्द आत्मिकाम्। नव्यां संस्तुतिषु श्रेष्ठां वद देवेषु सादरम् ॥ ४ ॥

प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः। प्रियाः स्वग्नयो वयम् ७

स्वग्नयो हि वार्यं देवासो दधिरे च नः। स्वग्नयो मनामहे ८

अथा न उभयेषाममृत मर्त्यानाम्। मिथः सन्तु प्रशस्तयः ९

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः।

चनो धाः सहसो यहो ॥ १० ॥ २१ ॥ २६ ॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः।

१-१२ अग्निः, १३ देवाः। १-१२ गायत्री, १३ त्रिष्टुप्।

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः।

सम्राजन्तमध्वराणाम् १

स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः।

मीढ्वाँ अस्माकं बभूयात् २

स नो दूराच्चासाच्च नि मर्त्यादघायोः। पाहि सदमिद्विश्वायुः ३

इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम्। अग्ने देवेषु प्र वोचः ४

SGDF
Sri Gargeshwari Digital Foundation

(आनः) उत्तमाधममध्येषु भोगेष्वस्मानवामुहि । रक्षकत्वेन शिक्षास्मान्ज्ञानवस्त्वर्थमेव च । अन्ते मोक्षे मितत्वेन ज्ञानमन्तममुच्यते ॥ ॥ ५ ॥ २२ ॥ (विभक्तासि) क्षीराब्ध्यूर्मिसमीपस्थो मुक्तभोगविभागदः । यजमानाय सद्यश्च क्षरस्यखिलमीप्सितम् । नित्यमुत्तमतेजस्त्वाच्चित्रभानुर्हरिः स्मृतः ॥ ६ ॥ (यमग्ने) यं मर्त्यं रक्षसि विभो यं युत्सु प्रेरयस्यपि। ज्ञानाज्ञानात्मकेष्वेव स गन्ता नित्यसत्सुखम् । भोगान्वा मुक्तिगान्नित्यानिह चेदुपचारतः ॥७॥ (नकिः) परिपूर्णोऽस्य नैवास्ति त्वदीयस्य तु कस्यचित् । भोगोऽपि बहुलो यस्माद्दित्सस्येव पुनः पुनः । सहन्त्यः सन्ततबलः सहसः पुत्र एव वा । श्रवाय्यः श्रवणीयश्च सुप्रसिद्धतमोऽपि वा ॥ ८ ॥ (सवाजं) वाजं तारयिताऽऽनेता सोर्वद्भिर्गोसमाश्रितः । त्वदीयस्तु भवेद्विप्रैर्दाता विपुलदानतः । युद्धस्य तारकोऽन्नस्य दाता भोगस्य वा भवेत् । इन्द्रियैस्तमसा युद्धं तरुता ज्ञानदोऽथ वा ॥ ९ ॥ (जराबोध) स्तुतिबोद्धा यतस्तां त्वमवधारय सर्वदा । नित्यज्ञानोऽपि दत्वा तत्फलं वेत्तेति कथ्यते । रुजां विद्रावकेशाय प्रत्यक्षां तव वा स्तुतिम् ॥ १० ॥ २३ ॥

आ नो॑ भज पर॒मेष्वा वाजे॑षु मध्य॒मेषु॑ ।
शिक्षा॒ वस्वो॒ अन्त॑मस्य ॥ ५ ॥ २२ ॥

वि॒भ॒क्तासि॑ चित्रभानो॒ सिन्धो॑रू॒र्मा उ॑पा॒क आ ।
स॒द्यो दा॒शुषे॑ क्षरसि ६
यम॑ग्ने पृ॒त्सु मर्त्य॒मवा॒ वाजे॑षु यं जु॒नाः । स यन्ता॒ शश्व॑ती॒रिषः॑ ७
नकि॑रस्य सहन्त्य पर्ये॒ता कय॑स्य चित् । वाजो॑ अस्ति श्र॒वाय्यः॑ ८
स वाजं॒ वि॒श्वच॑र्षणि॒रर्व॑द्भिरस्तु॒ तरु॑ता । विप्रे॑भिरस्तु॒ सनि॑ता ९
जरा॑बोध॒ तद्वि॑विड्ढि वि॒शेवि॑शे य॒ज्ञिया॑य ।
स्तोमं॑ रु॒द्राय॒ दृशी॑कम् ॥ १० ॥ २३ ॥

SGDF
Sri Gangeshwari Digital Foundation

(सनः) नितराममितत्वेन महान्पुरुसुखश्च सः। धूत्करोति गरुत्मान्यद्धरेश्चेद्धूमकेतुता। ताच्छील्ये म इति ह्यस्मात्तत्राद्धूम इतीरितः। ज्ञानायान्नाय च स नः प्रहिणोतु सुकर्मणाम् ॥ ११ ॥ (सरेवान्) देवानां केतुभूतोऽसौ वित्तवान्विश्पतिर्यथा। अस्मदीयानि चोक्थानि बृहत्तेजाः शृणो- ॥ १२ ॥ (नमः) त्वथ। नारायणब्रह्मपुरःसरास्तु देवा महान्तः शिशवः स्कन्दपूर्वाः। बटुस्वरूपाश्च त एव कुत्रचिद्युवान इन्द्रादय एत एव। महत्त्वमेषां गुणतोऽपि यूनामिन्द्रादयो मध्यगुणा युवानः। आपेक्षिकाल्पैश्च गुणैस्तदीयैः समीरिता आशिना अर्भकाश्च। कृतं नमः शक्तिमन्तो यजाम न ज्यायसां स्तुतिमात्रं लुपामः। एकस्य विष्णोरपि रूपभेदा अणीयांसः संत्यथवा महान्तः। युवत्वसाम्येऽपि महत्त्वभेदाद्युवा महानित्यपि भेद उक्तः ॥

॥ १३ ॥ २४ ॥ ८ ॥ (२७)

(यत्रग्रावा) विस्तीर्णाधस्तना यत्र ग्रावाणोऽभिषवोद्धृताः। धिषणाभिषुतान्सोमानव नः स्वीकृतस्तु ते। गुरु स्वीकार इत्यस्मा-

---

स नो॑ म॒हाँ अ॑निमा॒नो धू॒मके॑तुः पुरु॒श्च॒न्द्रः। धि॒ये वाजा॑य हिन्वतु ११

स रे॒वाँ इ॑व वि॒श्पति॒र्दैव्यः॑ के॒तुः शृ॒णोतु नः। उ॒क्थैर॒ग्निर्बृ॒हद्भा॑नुः १२

नमो॑ म॒हद्भ्यो॒ नमो॑ अर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्यः॑।

यजा॑म दे॒वान्यदि॑ श॒क्नवा॑म॒ मा ज्याय॑सः॒ शंस॒मा वृ॑क्षि देवाः ॥

॥ १३ ॥ २४ ॥ (२७) ॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः। १-४ इन्द्रः, ५-६ उलूखलं, ७-८ उलूखलमुसले, ९ प्रजापतिर्हरिश्चन्द्रः, (अधिषवण–) चर्म सोमो वा। १-६ अनुष्टुप्, ७-९ गायत्री।

यत्र॒ ग्रावा॑ पृ॒थुबु॑ध्न ऊ॒र्ध्वो भव॑ति॒ सोत॑वे।

उ॒लूख॑लसुताना॒मवे॒द्विन्द्र जल्गुलः १

SGDF
Sri Gargeshwari Digital Foundation

द्धातोः स्तुत्यो हि जल्गुलः ॥ १ ॥ (यत्रद्वौ) फलकेऽभिषवस्यैव स्त्रियो जघनसाम्यतः । प्रोक्ते ॥ २ ॥ (यत्रनारी) उपच्यवश्चापच्यवः सङ्गतिभेदतः । जिह्वाग्रा वाथ वाग्युक्तिरुच्यतेऽभिषवस्तथा । खल-श्चोरुस्तथा देहः सोमो मन इतीरितः । ज्ञानोत्पत्तौ च फलकस्थाने ओष्ठे उदीरिते ॥ ३ ॥ (यत्रमन्थां) मन्थरश्मीनश्वरश्मीन्यथा यत्र निबध्यते । रश्मयो यत्र नाड्यश्च ॥ ४ ॥ (यच्चित्) यस्माद्युक्तो गृहे गृहे । देहे देहेऽथवा तेन द्युमद्दुन्दुभिवद्वद । पृथिवी देवता तस्य तद्वतो वा स्वयं हरिः । सोमामात्यो परो देवो वनस्पति-रितीरितः । सोमो वा तद्वविष्णुर्वा श्रुतः फलकदेवता । वृक्षाणामपि सर्वेषामतो ॥ ५ ॥ २५ ॥ (उतस्म) वृक्षाग्र एव तु । वायुर्वाति वनानां वा भजनीयदिवौकसाम् । पतिर्विष्णुस्तु तस्याग्रे वायुर्देवो हि गच्छति । पातवे स्वस्य सोमं वा मनो वा सुनु विष्णवे ॥ ६ ॥ (आयजी) आयज्वावन्नलब्धॄणामुत्तमावतिभक्षकौ । जह भक्षण

यत्र द्वाविव जघनाधिषवण्या कृता ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः २

यत्र नार्यपच्यवमुपच्यवं च शिक्षते ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ३

यत्र मन्थां विबध्नते रश्मीन्यमितवा इव ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ४

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ ५ ॥ २५ ॥

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोममुलूखल ६

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः । हरी इवान्धांसि बप्सता ७

SGDF
Sri Gargeshwari Digital Foundation

इत्यस्माद्यथाऽश्वावन्नभक्षकौ। सोमस्य भक्षकावत्र ॥ ७ ॥ (तानः) ऋष्वावतिमहत्तरौ। महद्भिः सोतृभिः सोममिन्द्राय मधुमत्सुतम् ॥ ॥ ८ ॥ (उच्छिष्टं) सोमम्सुतपवनायैतं द्रोणो परिपवित्रके। भर शिष्टं चमसयोर्ऋजीषं गोरधि त्वचि। भरेत्यात्मानमेवाह स्वान्तर्यामिण-मेव वा। शिरोभेदौ तु चमसौ द्रोणं चोदरमीरितम्। पवित्रं बुद्धिरेवात्र मनःशुद्धिस्तया यतः। मुखचर्मैव गोचर्म मन एतेषु विष्णवि। धार्यं ॥ ९ ॥ २६ ॥ ९ ॥ (२८)

(यच्चिद्धि) यत्सद्गुणाऽशस्ता इव स्मसि वयं ततः। शुभ्र-वाग्धनआदीनां विषयेऽस्मान्प्रशंसय। बहुवाच्यज्ञेययुक्तान्कृत्वाऽस्मांस्त्वं महामख ॥ १ ॥ (शिप्रिन्) सुखिन्नन्नपते वाग्ज्ञ तव कर्माणि सर्वशः ॥ २ ॥ (निष्वापय) दैत्यरक्षःप्रजे मिथ्यादृशौ सस्तां पुनर्बहु।

ता नो॑ अ॒द्य व॑नस्पती ऋ॒ष्वावृ॒ष्वेभिः॑ सो॒तृभिः॑।

इन्द्रा॑य॒ मधु॑मत्सुतम् ८

उ॒च्छि॒ष्टं च॒म्वो॑र्भर॒ सोमं॑ प॒वित्र॒ आ सृ॑ज।

नि धे॑हि॒ गोरधि॑ त्व॒चि ॥ ९ ॥ २६ ॥ ९ ॥ (२८) ॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः।
इन्द्रः। पङ्क्तिः।

यच्चि॒द्धि स॑त्य सोमपा अनाश॒स्ता इ॑व॒ स्मसि॑।

आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ १

शिप्रि॑न्वाजानां पते॒ शची॑व॒स्तव॑ दं॒सना॑।

आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ २

नि ष्वा॑पया मिथू॒दृशा॑ स॒स्तामबु॑ध्यमाने।

आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ ३

SGDF
Sri Gargeshwari Digital Foundation

अबुध्यमाने नित्यं च यथा निष्वापयेश्वर ॥ ३ ॥ (ससन्तु) स्वपन्तु ते शत्रवस्ते सर्वदाऽज्ञानमोहिताः । बोधन्तु चैव मित्राणि तव रूपं सुनिर्भयम् ॥ ४ ॥ (समिन्द्र) पापया मायया मिथ्यास्तुवन्तं त्वामपि प्रभो । मायामयास्तवगुणा न सन्ति परमार्थतः । इति नित्यं रुवन्तं च मायावाद्याख्यगर्दभम् । संचूर्णय तमस्येव क्षिप्त्वा तप्ताश्मभिः सदा ॥ ५ ॥ (पताति) दूरं च पातयत्वेनान्वायुस्तस्मिंस्तमस्यधः । वनं दृढग्रहेणैव तत्तमोवेदनोल्बणा । कुण्डृणाचीति संप्रोक्ता कुण्डानीचत्वतोऽधिकम् । कुम्भः कुण्डाभिधः कुम्भीपाकान्नीचा हि तद्गतिः । रेफः स्वरव्यत्ययश्च तदाधिक्यार्थमीरितौ ॥ ६ ॥ (सर्वं) सर्वं परिक्रोशकरं पापिनं जहि जम्भय । दंशय श्वादिभिर्नित्यं क्रकचैर्दशनं यथा ॥ ७ ॥ २७ ॥ १० ॥ (२९) ॥

(आवः) हे वाजयन्तो युध्यन्तो देवा भोगिन एव वा । सोमैर्व इन्द्रमासिञ्चे कृविं यद्वन्नृपं कृतेः । कर्तारमीशमिव वा

सुसन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ४
समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ५
पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ६
सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ
॥ ७ ॥ २७ ॥ १० ॥ (२९) ॥

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः । १-१६ इन्द्रः, १७-१९ अश्विनौ, २०-२२ उषाः । १-१०, १२-१५, १७-२२ गायत्री, ११ पादनिचृद्गायत्री, १६ त्रिष्टुप् ।

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् । मंहिष्ठं सिञ्च इन्दुभिः १

SGDF
Sri Gurgeshwari Digital Foundation

स्वदृष्टान्तो हरेर्भवेत् ॥ १ ॥ (शतंवा) शतेन वा सहस्रेण सोमाना-माशिरावताम् । पाताल इव नैवायं निलीनो भवति क्वचित् । विलापयति तानेव ॥ २ ॥ (संयत्) बलिनेऽस्मै मदाय च । संदधुर्नैव विश्वानि व्यक्तीरस्योदरे क्वचित् । समुद्रेकात्समुद्राख्या प्रकृतिश्च महत्त्वतः ॥ ३ ॥ (अयमुते) तयैवायं प्रपञ्चश्च कपोतो गर्भधिं यथा । सम्यग्व्याप्नोषि विश्वं च तस्मान्नोऽव च ओहसे ॥४॥ (स्तोत्रं) गिरां वाहक ते स्तोत्रमखिलं वेदवैदिकम् । सूनृता वागियं मे च विभूतिरिति कल्प्यताम् । अस्त्वित्येतत्प्रसादेन फलदाना-दुदीर्यते ॥ ५ ॥ २८ ॥ (ऊर्ध्वः) उत्तमः सन्नत्र युद्धे ज्ञानाज्ञानमये विभो । अभिप्रेतार्थसिद्ध्यर्थमस्माकं तिष्ठ सर्वदा । मत्स्थितस्त्वमहं चैव त्वामन्येषु ब्रवावहै ॥ ६ ॥ (योगे) तेजस्वितममिन्द्रं तं योगे योगे हवामहे ॥ ७ ॥ (आघ) उक्तं चेत्स शृणोत्येव श्रुतं चेदागमिष्यति । बह्वर्थयुक्ताभिप्रायैरन्नैरप्युप नो हवं ॥ ८ ॥ (अनु) पुरातनस्य विष्णोस्तदोकसोऽर्थे ह्वये हरिम् । महान्प्रति प्रतिस्थश्च तुविप्रति-

---

श॒तं वा॒ यः शुची॑नां स॒हस्रं॑ वा॒ समा॑शिराम् । एदु॑ नि॒म्नं न री॑यते २

सं यन्मदा॑य शु॒ष्मिण॑ ए॒ना ह्य॑स्यो॒दरे॑ । स॒मु॒द्रो न व्यचो॑ द॒धे ३

अ॒यमु॑ ते॒ सम॑तसि क॒पोत॑ इव गर्भ॒धिम् । वच॒स्तच्चि॑न्न ओहसे ४

स्तो॒त्रं रा॑धानां पते॒ गिर्वा॑हो वीर॒ यस्य॑ ते ।

विभू॑तिरस्तु सू॒नृता॑ ॥ ५ ॥ २८ ॥

ऊ॒र्ध्वस्ति॑ष्ठा न ऊ॒तये॒ऽस्मिन् वाजे॑ शतक्रतो । सम॒न्येषु॑ ब्रवावहै ६

योगे॑योगे त॒वस्त॑रं॒ वाजे॑वाजे हवामहे । सखा॑य॒ इन्द्र॑मू॒तये॑ ७

आ घा॑ गम॒द्यदि॒ श्रव॑त्सह॒स्रिणी॑भिरू॒तिभिः॑ । वाजे॑भि॒रुप॑ नो॒ हव॑म् ८

अनु॑ प्र॒त्नस्यौक॑सो हु॒वे तु॑विप्र॒तिं नर॑म् । यं ते॒ पूर्वं॑ पि॒ता हु॒वे ९

SGDF
Sri Gargeshwari Digital Foundation

रितीरितः । यं त्वां पूर्वं पिता ज्ञात्वैवाह्वयामास विश्वकृत् । त्वद्भक्त इति वा ब्रह्मा ॥ ९ ॥ (तंत्वा) तं त्वामाशास्महे वयं ॥ १० ॥ २९ ॥ (अस्माकं) अस्माकं सुखिनां सोमपातॄणा- ॥ ११ ॥ (तथातत्) मस्तु तत्तथा । ते सकाशाद्यथेच्छामः प्राप्तुं देव तथा कृणु । वज्रो ज्ञानं वज गतावित्यस्मा- ॥ १२ ॥ (रेवतीः) द्वित्तसंयुताः । रेवतीः पशवः प्रोक्ताः सधमादे सुखस्थितौ । तुवि वाजमहान्नानि क्षुमन्तः स्थिति-संयुताः । ज्ञानयुक्तं सुखं वा स्यात्सतीशेऽस्माकमूर्जितं ॥ १३ ॥ (आघ) त्वद्वांस्तथैव चाप्तः स्यात्स्तोतॄणामासमन्ततः । इयानो गम्यमानस्तै रणतोश्वक्रयोर्यथा । अक्षमाश्रयभावेन ॥ १४ ॥ (आयत्) स्तोतॄणां काममादुहः । आसमन्तात्स्थितं काममत्याधिक्ये पृथक्पदम् ॥ १५ ॥ ३० ॥ (शश्वदिन्द्रः) क्रोधाच्छ्वसद्भिः प्रथयद्भि-रात्मवीर्यं सुरैः शश्वदिन्द्रो जिगाय । धनानि नः स्वर्णरथं च दाता

तं त्वां वयं विश्ववाराऽऽशास्महे पुरुहूत ।
सखे वसो जरितृभ्यः ॥ १० ॥ २९ ॥

अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम् । सखे वज्रिन्त्सखीनाम् ११

तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु । यथा त उश्मसीष्टये १२

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम १३

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः ।
ऋणोरक्षं न चक्र्योः १४

आ यद्दुवः शतक्रतवा कामं जरितॄणाम् ।
ऋणोरक्षं न शचीभिः ॥ १५ ॥ ३० ॥

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान्त्स नः सनिता सनये स नोऽदात् १६

SGDF
Sri Gargeshwari Digital Foundation

लब्धा प्रादाल्लाभकृते च नोऽखिलम् ॥ १६ ॥ (आश्विनौ) गोमद्धिरण्यवच्च स्याद्यथायातं तथैव नः । सुखपुत्रयुजा चाश्ववत्येषा शं सुखं यतः । इडैश्वर्यं तथा वीरं वीर्यं खान्यश्वनामतः । गौर्वाग्घितं च रमणं परं ब्रह्मगुणोच्छ्रितम् ॥ १७ ॥ (समान) समानयोगयुक्तोऽयं रथो देहस्त्वदात्मनाम् । चित्सुखत्वादमर्त्यश्च ज्ञायते क्षीरसागरे । मोक्षस्य यावता प्राप्तिः समानो योग उच्यते ॥ १८ ॥ (न्य१घ्नचस्य) एकं चक्रं गिरेर्मूर्ध्नि नियतं दिवि चापरम् । पापं चक्रं हरिघ्नचस्य पुण्यं दिव्यस्य चोपरि ॥ १९ ॥ (कस्ते) को मर्त्यस्तव भोगाय यतः सर्वप्रियो भवान् । किमपि प्रियमस्येति पूर्णानन्दात्कधप्रियः । आप्तकामत्वतः कं वा गच्छसि स्वार्थहेतुतः । विशेषाद्भावृतेर्विष्णुः कथितश्च विभावरी ॥२०॥ (वयंहि) चिन्तयामस्तवैकस्य विश्वमान्तपराकयोः । पराकः सुसुखैव श्रीरन्तः कलिरुदाहृतः । नरकस्वर्गयोरेव देव्युषा उदिता यदा । जात्यश्ववत्सदाभद्रे चारुणे ॥ २१ ॥ (त्वंत्येभिः) प्राणवाक्सुते । तद्व्यंग्यत्वाद्धरिश्चैव दिवस्पुत्र उदाहृतः ॥ २२ ॥ ३१ ॥ ११ ॥ (३०) ॥

आश्विनावश्वावत्येषा यातं शवीरया । गोमद्दस्रा हिरण्यवत् १७
समानयोजनो हि वां रथो दस्रावमर्त्यः । समुद्रे अश्विनेयते १८
न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः । परि द्यामन्यदीयते १९
कस्त उषः कधप्रिये भुजे मर्तो अमर्त्य । कं नक्षसे विभावरि २०
वयं हि ते अमन्महान्तादा पराकात् । अश्वे न चित्रे अरुषि २१
त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः ।
असे रयिं नि धारय ॥ २२ ॥ ३१ ॥ ११ ॥ (३०) ॥

SGDF
Sri Gangeshwari Digital Foundation

अग्नीन्द्रादिगतं पृथक्स्थितमपि स्तौत्यच्युतं भक्तितः स्वर्णस्तूप इतिप्रसिद्धिमगमद्यः संस्तुवन्स्वर्यगम् । विष्णुं स्वर्णसमानचारुवपुषं स्वर्णाभिधं शाश्वतं तं दृष्ट्वा परतोऽभवच्च महितः सुज्ञानमप्याप्तवान् ॥

(त्वमग्ने प्रथमो अङ्गिरा ऋषिः) अङ्गे रसो ज्ञानत एव चर्षिः सखा प्रियत्वेन दिवौकसां हरिः । तव व्रतेनैव सविद्यकर्मिणो महाविज्ञाना मरुतो बभूविरे ॥ १ ॥ (त्वमग्ने प्रथमो अङ्गिरस्तमः) व्यापी च विश्वस्य सुमेधया युतो जडाजडे वेत्ति तथाऽब्धिशायी । कति-प्रकारोऽपि स हि प्रजायै स्वामी गुरुर्नित्यसखा पिता च ॥ २ ॥ (त्वमग्ने प्रथयो मातरिश्वने) त्वं विष्णो प्रथमो मातरिश्वन आवि-र्बभूवास्य सुबोधवत्त्वात् । वायुर्विवस्वान्विविधेषु वासादशोभेतां श्रीश्च भूः सर्वहोतुः । वरत्वतस्ते रदनाद्रोदसी ते सैका हि दीर्णा द्विविधा बभूव । सहन्तेऽमुं नैव केचिद्धसद्मुर्वायुर्विरिश्चोऽपि महांश्च तस्मै । विश्वस्य भारं प्रतिदिष्टवांस्त्वं वासाच्च सर्वत्र वसुर्भवानसि ॥ ३ ॥ (त्वमग्ने मनवे) विशिष्टबोधान्मनवे वायवे त्वं प्रादाद्दिवं ज्ञानरूपां प्रियां च । यथा तदीयेति तु वाशनं स्याल्लोकस्य सर्वस्य तथैव देव ।

हिरण्यस्तूप आङ्गिरसः । अग्निः । जगती, ८-१६-१८ त्रिष्टुप् ।

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः १

त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परि भूषसि व्रतम् ।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे २

त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते ।
अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो ३

त्वमग्ने मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः ।

SGDF
Sri Gangeshwari Digital Foundation

पुरूरवा वायुरेवोरुशब्दादन्यस्मै वा सुकृते सुकृत्तरः। श्वा वै वायुः श्वसनात्त्राणतोऽस्य नित्यं मुक्तः प्रकृतेः पूरुषाच्च। तेनैव त्वामानयन्पूर्वसन्तो नीतं पुनश्चाप्यपरे सुभक्त्या ॥ ४ ॥ (त्वमग्ने वृषभः) श्रोतव्यस्त्वं यजमानेन नित्यं नित्यायुरग्रे जनताप्रविष्टः। ऐश्वर्याद्याः षड्गुणा नित्यवृत्ता वषट्कारस्यार्थ इत्याह वेदः ॥ ५ ॥ ३२ ॥ (त्वमग्ने वृजिनवर्तनिं) सद्विद्याख्ये विदथे संप्रजाते पापाचारं पुरुषं वा पिपर्षि। सक्मन् गृहे स्वे विविधप्रजेशो विचर्षणिः शूरसातौ च युद्धे। सातिर्लाभे यत्परितक्म्येऽधिगम्ये दभ्रा अपि त्वां शरणं यदि स्म। ऋतागतास्तत्र हि भूयसोऽपि तैर्हंसि शक्त्या संख्यया वा प्रयत्नात् ॥ ६ ॥ (त्वंतं) दिने दिने तत्स्तुतिं श्रोतुकामस्तव स्तोतारममृतत्वे दधासि। प्रीत्याधिक्यात्ततृषाणो मनुष्यदेवोभयेषां सुखमातनोषि। आसमन्ताज्ज्ञानिने तत्र नित्यं प्रियं मोक्षाख्यं ततृषाणो विशेषात् ॥ ७ ॥ (त्वंनोअग्नेसनये) प्रज्ञाधनानां लब्धये नः कृधि त्वं यशस्विनं कारिणं ज्ञानदं च। कर्तापरोक्ष्यं यावदुपासनादीन्कारुस्तेन प्रोच्यते तत्त्वदर्शी। संस्तूयमानः कर्मणा

श्वात्रेण यत्पित्रोर्मुच्यसे पर्याऽऽत्वा पूर्वमनयन्नापरं पुनः ४
त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः।
य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि ॥५॥३२॥
त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे।
यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः ६
त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे।
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये ७
त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः।
ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ८

SGDF
Sri Gargeshwari Digital Foundation

नूतनेन समृद्धिं च प्राप्नुमः प्राक्तनस्य ॥ ८ ॥ (त्वन्नोअग्नेपित्रोः) त्वं नः पित्रोः प्रकृतेः पूरुषस्य समीपस्थस्तन्नियन्ता सदैव । देवेषु त्वं जागृविर्नित्यवेत्ता तनूकृन्नो बोधय प्राज्ञवर्यः । विश्वं वसु प्रार्पयसे च कारवे ॥ ९ ॥ (त्वमग्नेप्रमतिः) आयुष्करो भ्रातरस्ते वयं च । देहे त्वेकस्मिन् गर्भवद्वासतश्च भ्राताऽस्य जीवः परमस्य नित्यम् ॥१०॥३३॥ (त्वामग्ने) आयो राज्ञो हृदये प्रेरकत्वादायोरायुर्नहुषस्याधिपश्च । चक्रुर्देवा देहसृष्टचैव तस्य यन्नामान्तर्यामिणो जीवगं च । नामार्थभाग्वासुदेवो हि शक्त्या तेन ह्यायुः प्रथमोऽसाविहोक्तः । मनुर्नाम्ना मनुषस्तस्य चेला पुत्री नामास्या अपि विष्णोः सदैव । इळेड्यत्वादुपजीव्यत्वतश्च स एवायुरयनाज्ज्ञानतश्च । तच्छास्यत्वाच्छासनी मानवीळा तच्छासकत्वाच्छासनी वासुदेवः । ममत्वकर्तुर्हि पितुः स पुत्रः स्वातन्त्र्यं च ममता नान्यदस्ति ॥ ११ ॥ (त्वन्नोअग्नेतव) त्वं नो मघोनो यजमानस्य तन्वस्तवैव रक्षाशक्तिभी रक्ष देव । चशब्देन ज्ञानभक्त्यादिकं च सदास्माकं यजमानस्य चाद्धा । त्राता तोकस्य पुत्रस्य च त्वं सन्ततित्वात्तनयस्यास्य सूनोः । गवां च त्वं रक्षिता-

---

त्वं नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः ।
तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे ९
त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम् ।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥
॥ १० ॥ ३३ ॥
त्वामग्ने प्रथममायुमायवे देवा अकृण्वन् नहुषस्य विश्पतिम् ।
इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ११
त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते १२

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानसौख्यवाचां वाद्धैवानिमेषान् सुरांश्च। संरक्षमाणसस्त्वद्व्रते तैः प्रवृत्ते ॥ १२ ॥ (त्वमग्नेयज्यवे) यज्योश्च त्वं पालको ह्यन्तरश्च। नितरां यः सङ्गहीनोऽनिषङ्गस्तस्मै भक्त्या दीप्यसे ज्ञानदृष्टया। द्विशीर्षत्वाच्चतुरक्षोऽधियज्ञो द्वे शीर्षे इति वागुत्तरत्र। यो दत्तहव्यस्तेऽतिसौम्याय पीत्यै कर्तुर्मन्त्रं संभजसे हि तस्य ॥ १३ ॥ (त्वमग्नउरु) महास्तोत्राय वदते स्पार्हमिष्टं रेक्णः सुखं परमं तद्ददासि। आसमन्ताद्धारकस्यापि वायोः प्रज्ञानदः प्रोच्यसे त्वं पिता च। प्रशास्सि त्वं परिपक्काधिकारं प्रदेशकत्वादखिलं त्वं सुवेत्ता ॥ १४ ॥ (त्वमग्नेप्रयत) धृतं वर्मेव परिपासि नित्यं प्रयत्नाद्यो दक्षिणादो मखेषु। स्वादुक्षद्मा सुखगेहो गृहे च स्योनं सुखं यः परेषां करोति। यावज्जीवं यजते सुप्रतिज्ञो भूत्वा च यो यजते तस्य सैव। द्युप्राप्तिभावे ह्युपमा देह एव क्षमेति वा वसतिर्ज्ञानमार्गे ॥ ॥ १५ ॥ ३४ ॥ (इमां) या मे भवच्छरणप्राप्तिरेषा मर्षस्व तामल्प इति क्रुधो मा। त्वत्प्राप्त्यर्थं दूरमागां च यत्तत्प्राप्यः पिता ज्ञानदो देवतानाम्। त्वं भ्रामको मानुषाणामृषीणां कर्ता तथा ज्ञानदानेन

त्वम॑ग्ने यज्य॑वे पा॒युरन्त॑रोऽनिष॒ङ्गाय॑ चतुर॒क्ष इ॑ध्यसे।
यो रा॒तह॑व्योऽवृ॒काय॒ धाय॑से की॒रेश्चि॒न्मन्त्रं॒ मन॑सा वनो॒षि तम् ॥ १३
त्वम॑ग्न उरु॒शंसा॑य वा॒घते॑ स्पा॒र्हं यद्रेक्ण॑ः पर॒मं व॒नोषि॒ तत्।
आ॒ध्रस्य॑ चि॒त्प्रम॑तिरुच्यसे पि॒ता प्र पाकं॒ शास्सि॒ प्र दि॒शो॑ विदुष्ट॑रः ॥ १४
त्वम॑ग्ने॒ प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑ पासि वि॒श्वत॑ः।
स्वा॒दु॒क्षद्मा॒ यो व॑स॒तौ स्यो॑न॒कृज्जी॑वया॒जं यज॑ते॒ सोप॒मा दि॒वः ॥१५॥३४॥
इ॒माम॑ग्ने श॒रणिं॑ मीमृषो न इ॒मम॒ध्वानं॒ यमगा॑म दू॒रात्।
आ॒पिः पि॒ता प्रम॑तिः सो॒म्यानां॒ भृमि॑रस्यृषि॒कृन्मर्त्या॑नाम् ॥ १६

SGDF
Sri Gargeshwari Digital Foundation

देव ॥ १६ ॥ (मनुष्वत्) यथा मनुश्चाङ्गिरा वा ययातिर्गृहे प्राप्तस्त्वां तथा मद्गृहं च । अभ्यायाह्यावह देवसङ्घमासादय बर्हिषि यक्षि च प्रियम् । यष्टा त्वमेवाखिलजीवगो यत् ॥ १७ ॥ (एतेनाग्ने) स्पष्टत्वं च प्राप्नुहि वेदवाचा । शक्त्या यत्ते चकृम ज्ञानतो वा वस्यो भद्रं प्रणयास्मान्सुमत्या । भोगेतया संसृज नित्यमेव यस्माच्छक्त्या चकृम त्वत्सुकर्म ॥ १८ ॥ ३५ ॥ ३१ ॥

(इन्द्रस्यनु) इन्द्रस्य वा वासुदेवस्य वीर्याण्याचक्षेऽहं यानि मुख्यानि चक्रे । अहिं दैत्यं संशयं वा जघानं जलानुसारेण चखान मार्गम् । ततर्द विघ्नान्कर्मणां वाऽनुसाराद्वहनात्पक्षा वक्षणा दुर्वचांसि । जीवानां चेद्वक्षणा जन्मपर्ववतां बिभेदैव सुयुक्तिभिस्ताः ॥ १ ॥ (अहन्) त्वष्टा त्वेतज्ज्ञानवज्रं विरिश्चिस्ततक्ष चै(तै ?)तद्विषयं त्विडात्मा । स्वर्यं वज्रं निशितं शब्दजं वा शिशुवत्सा गाव इवैतदीरिताः । अञ्जः समुद्रं जग्मुरापः क्रिया वा समुद्रिक्तं देवमेनं व्रजन्ति ॥ २ ॥

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे ।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम् १७

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा ।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥
॥ १८ ॥ ३५ ॥ ३१ ॥

हिरण्यस्तूप आङ्गिरसः । इन्द्रः । त्रिष्टुप् ।

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् १

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः २

SGDF
Sri Gargeshwari Digital Foundation

(वृषायमाणः) वव्रे सोमं तृषितो यद्वदेव वृषाऽपिबत्सवनेषु त्रिषु स्म । सवनानां कद्रुकत्वं द्रुतं यत्कमत्र सोमो ध्यानयोगे मनो वा । सायङ्करं लयकृज्ज्ञानमेव समाददे संशयमीशवद्वा ॥ ३ ॥ (यदिन्द्र) अहन्नेनं प्रथमं मायिनां च व्यनाशयो व्याजरूपाश्च मायाः । ततः सूर्यद्युदिनादेश्च कर्ता त्वमेव तावद्बलतो न शत्रुम् । लभसे मायावादिनां वाऽथ माया व्यनाशयः स्वजनैस्तज्जयेन ॥ ४ ॥ (अहन्वृत्रं) अहन्वृत्रं व्यंसमतोऽधिकं च तमो मिथ्याप्रत्ययौ व्यंसनाद्वा । स्कन्धास्तरोर्यद्वदथो विवृक्णा अहिश्च वज्रेण कुलस्य शङ्कतेः । विद्या नाम्ना कुलिशो बुद्धिरेव पृथिव्याख्या संशयस्तद्गतो यत् । अतः पृथिव्या उपपृ- ॥ ५ ॥ ३६ ॥ (अयोद्धेव) ग्यस्य योद्धा नायोद्धाऽसौ तद्वदेवेन्द्रशत्रुः । दर्पोद्रिक्तो ह्याह्वयामास शक्रं विष्णुं वाऽज्ञानं वीरतमं रिपूणाम् । महोच्चानां बाधकं दार्ढ्यहेतोर्ऋजीषाख्यं नास्य विष्णोर्वधानाम् । संप्राप्तिमज्ञानमथापि वृत्रः शक्रस्यातारीत्संपिपिषे प्रजाश्च । रुजा युक्ता मानुषीर्वा सृतिस्था इन्द्रः शत्रुर्यस्य स हीन्द्रशत्रुः । पुंसोः पूर्वस्मिन्स्वरितांते समासो बहुव्रीहिर्हीति सूत्रं

वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ३

यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ४

अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥५॥३६॥

अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ६

SGDF
Sri Gurgeshwari Digital Foundation

पुराणम् ॥ ६ ॥ (अपात्) सञ्छिन्नपाद्बाहुरपीन्द्रमेव युयोध वज्रं व्यसृजत्स तस्य । गिरेः सानुप्रतिमे कण्ठदेशे तर्कागमाभ्यां रहितं तमो वा । संयुध्यमानं मानवज्रेण विष्णुर्जघान वध्रिर्वधयोग्योऽथ नीचः । ईशस्य शत्रुर्भवितुं स इच्छन्व्यस्तोऽशयद्बहुधेशेन तेन ॥७॥ (नदन्न) अपां रोद्धारममुया स्वमात्रा सहैव शक्रेण हतं शयानम् । भिन्नं नदं यद्वदतीत्य चापो मनः पूर्वं चारुहाणाः प्रयान्ति । वृत्रो याः पूर्वं स्वमहिम्ना परीत्य पुरातिष्ठत्तत्सुतोऽहिश्च तासाम् । पत्सुतश्शीः पादतोऽनन्तरं तु शेताऽभवत्तद्वदेवाभिरुन्धन् । तमः पुत्रः संशयो वाभिरुन्धन् शुभान्यास्ते निहतः सोऽपि तेन ॥ ८ ॥ (नीचावयाः) नीचस्थाने बन्धनं याऽपि चापां करोति दानुर्वृत्रमाता दनुः सा । वृत्रो ह्यभूद्दनुजः कश्यपाच्च पापात्माऽसौ वैष्णवस्त्वष्टृजातः । वृत्रः पुत्रोऽस्या इति सा वृत्रपुत्रा वधं तस्या आहरत्पूर्वमिन्द्रः । प्रकृतिर्वा वृत्रमाता तमो हि तस्या अभूत्तां जघानोशिता वा । प्रातिस्विकी प्रकृतिर्यत्तमश्च दोषाश्चान्ये पुंस्वतो युक्तमेतत् । सुतावनार्थमुपरिस्था बभूव सुतस्य माता तां निहत्यामुमेव । जघानेन्द्रः कारणस्यापि नाशात्कार्योत्थानं वारयामास विष्णुः । स्यादेव पूर्वं कार्यनाशो ह्यथापि निःशेषनाशः कारणस्यैव नाशात् । एवं भक्तानन्नुजग्राह देवो नारायणः पारयन् संसृतेश्च । उत्तरत्वं प्रकृतेः शक्तितः स्या- ॥ ९ ॥

अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद्व्यस्तः ७

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ८

नीचावया अभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ९

SGDF
Sri Gangeshwari Digital Foundation

(अतिष्ठन्तीनां) दनन्तत्वान्नैव तिष्ठन्ति काष्ठाः। अतस्तासां न गृहं किञ्चिदस्ति निण्यं सुखेनैव चरन्ति चापः। दीर्घं तमो वृत्रसंज्ञं तमो वा दीर्घमन्धं प्राप वृत्रः स एव ॥ १० ॥ ३७ ॥ (दासपत्नीः) दासस्य विष्णोर्वरुणस्य पत्न्यो निरुद्धा आसन्नहिना यद्वदेव। गावो बलेनेन्द्रयज्ञे सुकृप्ता वृत्रं हत्वा तमहिश्चाशु शक्रः। उद्घाटयामास बिलं तदापां शुभद्वारं भगवान्वा तमो घ्नन् ॥ ११ ॥ (अश्व्योवारः) सृके युद्धे प्रत्यहंस्त्वां यदि स्म देवः प्रधानोऽपि तदश्ववारः। वालीव त्वं ननु देवस्तदानीं प्रतिहन्ता तेनैव कश्चिद्धि तस्मात्। अजयो बलाद्गा अजयो हिरण्यं सोमं गन्तुममुचः सप्तसिन्धून् ॥ १२ ॥ (नास्मै) अशनिंयाः विद्युतं यां मिहं च नाम्ना हेतिं वेद्युपमां सुतीक्ष्णाम्। अशनिमेदं ह्रादुनिनामधेयं त्वामुद्दिश्यैवाऽकिरत्सोऽहि-रुग्रः। त्वां प्रत्येतन्नैव सिद्धिं चकार पश्चात्काले त्वजयस्त्वं तमेव ॥१३॥ (अहेर्यातारं) अहेर्योद्धारं कमपश्य इन्द्र यज्ञघ्नुषस्तेऽपि भयं जगाम। ज्ञानानि मिथ्याबोधतोऽस्मन्मनश्च शब्दादिकादमुचः सप्तसिन्धून्।

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥ १० ॥ ३७ ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार　११

अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून्　१२

नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च।
इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये　१३

अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत्।
नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि　१४

SGDF
Sri Gangeshwari Digital Foundation

महत्तत्त्वादीन्विपरीता मतिस्तु विद्युच्छब्दास्तन्यतुर्वक्तृशक्तिः । मिहेत्युक्ता ह्लादुनिर्हुङ्कृतिश्च प्रतिवक्तृणामनुकूले रमेशे । न साधयन्ति स्म तमस्समुत्था जयत्येनं संशयं वासुदेवः । स्वभक्तार्थे तद्धृदिस्थः क एव त्वदन्योऽहेरभिगन्ता भवेत । तवैव यस्मात्संशयं जघ्नुषस्तु त्वदीयानां भयमञ्जो व्यपैति । शतमेकोनमतरस्त्वं नदीनामहिं दैत्यं घ्नन्यथाऽऽकाशदेशात् । भीतः श्येनो ह्यतिगच्छेत्तथैव नानानदीवारकत्वात्तु तस्य । ईशो देवानां तावतां तावतीश्च स्रुत्यापगास्तारयामास यद्वत् । भीतः श्येनस्तरतीत्थं तथैषां कृत्वोपमां तारयामास देवः । स्वातन्त्र्ये भेदकरणे चोक्त एव व्यत्यास इत्यनवद्यं तदेतत् । वस्वादित्या मरुतश्चाश्विनौ च बृहस्पतिः शेषविपानिरुद्धाः । ब्रह्मा ब्रह्माण ऋभवश्चैव रुद्रा ऊनं शतं देवतासंहितोक्तम् ॥१४॥ (इन्द्रोयातः) स एवेन्द्रो भगवांस्तत्प्रसादात्प्राप्तो भक्तैः पर्यवसानगन्तुः । मुक्तस्य राजाऽपि शमस्य मुक्तेर्ज्ञानं शृङ्गं तद्वतश्चैव नित्यम् । स एव राजा क्षयति प्रजानां भूतान्यराणीव च पर्यभूत्सः ॥ १५ ॥ ३८ ॥ ३२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमदृग्भाष्ये प्रथमाष्टके द्वितीयोऽध्यायः ॥ २ ॥

इन्द्रो॑ या॒तोऽव॑सितस्य॒ राजा॒ शम॑स्य च शृ॒ङ्गिणो॒ वज्र॑बाहुः ।
सेदु॒ राजा॑ क्षयति चर्षणी॒नाम॒राम्न ने॒मिः परि॒ ता ब॑भूव
॥ १५ ॥ ३८ ॥ १३ ॥ (३२) ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ तृतीयोऽध्यायः ॥

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवायनमः ॥ ॐ ॥ (एतायाम) ये सखायस्त्वरिता एत देवा
उपायाम पशुवत्तद्वशस्थाः । गव्यन्त उक्ता अतिनिश्चितेऽर्थे भूतशब्द-
श्चेत्याह सूत्रं परेशः । प्रकृष्टज्ञानं वर्धयत्येव सुष्ठु स नोऽभेद्योऽनामृणः
क्वापि तस्य । वित्तानि तस्माद्वेदवाक्योत्थमेव केतं ज्ञानं परमावर्जते
नः । ददा- ॥ १ ॥ (उपेत्) त्युपैवेशमहं पतामि यथा श्येनो
वसतिं पूर्वभुक्ताम् । इन्द्रं नमस्यन्ननुकूलर्ग्भिरेव यः स्तोतृभ्यो हव्य
एवास्ति काले ॥ २ ॥ (निसर्वसेनः) अशेषसेनापतिरेष शत्रूनशेषतो-
हन्तुमथो तमांसि । बध्नाति तूणान्निजसज्जनान्वा संयोजयत्यात्मनि
मानबाणान् । अर्यो गम्यो धीश्वरो गा मतीर्वा सङ्कालयत्येव च
यस्य वष्टि । भक्तस्य तत्त्वं ददमानस्य भूरि भद्रं मा भूरसुरस्त्वं
कदाचित् । अस्मदर्थे हिंसकत्वेन नित्यं प्रवृद्ध ॥ ३ ॥ (वधीर्हि)
वज्रेण घनेन दस्युम् । ज्ञानेन वा ज्ञानगणं धनाढ्यमयज्युं चाप्येक

॥ अथ तृतीयोऽध्यायः ॥

हिरण्यस्तूप आङ्गिरसः । इन्द्रः । त्रिष्टुप् ।

एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः १
उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् २
नि सर्वसेन इषुधीरसक्त समर्यो गा अजति यस्य वष्टि ।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ३
वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र ।
धनोरधि विषुणक् ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ४

SGDF
Sri Gargeshwari Digital Foundation

एवान्तरे च । चरंश्छाकैः शक्तिभिः सर्वदेवनरादिलोकं यमय-ञ्जघन्थ । अधिकृत्य त्वां धनमत्यन्तपुष्टं विष्वग्जग्मुरयजन्तः सदैव । मृतिं प्रापुर्दुःखबाहुल्यरूपां सनका लाभे योग्यरूपा अपि स्म ॥ ४ ॥ (पराचित्) अयज्वानोऽन्ये वक्ष्यमाणास्तु ये ते सन्त्यासुरा यज्वभिः स्पर्धमानाः । शिरांस्यपि स्वानि सन्तत्यजुस्ते सद्भिः स्पर्धामात्र-सम्पूरितार्थाः । तानव्रतान्स्वर्गतः खात्पृथिव्या निरधमस्त्वं स्थैर्यवा-निन्द्रियेशः ॥ ५ ॥ १ ॥ (अयुयुत्सन्) यदा नवग्वा ऋषयोऽसुरेन्द्रै-रुपद्रुताः शरणं वासुदेवम् । प्रापुस्तमोभिस्तामसैर्वाघसङ्घैः संपीडिता अयुयुत्संस्तदा तैः । सेनां च विष्णोर्निरयातयंस्ते वधाय तेषां हरि-भक्त्यादिकान्वा । गुणान्समर्था इव योधाः स्वशत्रुवधैकशीला अपि नष्टाः प्लवद्भिः । गुणैर्विष्णोः स्वैर्गुणैर्वा प्रसादादीशस्य संकालयन्तो ह्यगच्छन् ॥ ६ ॥ (त्वमेतान्) रक्षोगणान्भक्षयतो मुनींश्च संपीडिता-न्नुदतश्च त्वयैव । अयोधयो रजसोऽन्ते सुसत्त्ववृधिर्यदा जगतः स्यात्तदैव । पुंदोषान्वा गुणभक्षान्नृसत्त्ववृद्धौ दिवो ज्ञानतोऽवादहश्च । अज्ञानदस्युं स्तुवतः संस्तुतिं च प्रावो रक्षो ॥ ७ ॥ (चक्राणासः) बन्धनं ये जनानां । कुर्वन्ति हेम्ना मणिभिश्शोभमाना दैत्यादयो

परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः ।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः ॥ ५ ॥ १ ॥

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः ।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ६

त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे ।
अवादहो दिव आ दस्युमुच्चा प सुन्वतः स्तुवतः शंसमावः ७

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः ।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण ८

SGDF
Sri Gangeshwari Digital Foundation

दृढदोषा धनैर्वा । ते प्रेरयन्तोऽपि परस्परेण नैवातरन्वासुदेवं कथञ्चित् । सहैव सूर्येण च देवसङ्घांश्चरानज्ञातानदधाद्वासुदेवः । दैत्यानां वा तमसां वृत्तदृष्टचै ॥ ८ ॥ (परियत्) पर्यभुङ्क्थाः सह यद्रोदसी च । स्वमहिम्ना विश्वतः सम्यगेव त्वदभक्तान्निरधमो भक्त-सङ्घैः ॥ ९ ॥ (नयेदिवः) ये दस्यवो द्युपृथिव्योरशेषभोगेच्छवो धनदं चेश्वरं तं । जिगीषवः स्वीयमायाभिरेव नैवोदापुर्द्वयमेतत्कदा-चित् । युक्तं ज्ञानं वज्रमेवायुधं वा दस्यून्हन्तुं कृतवान्देवदेवः । निजेनैव ज्योतिषा भक्तहृद्गतमोगूढान्यदुहन्निश्चयेन । ज्ञानानि विष्णु-र्यत्तदज्ञानमुग्रं ॥ १० ॥ २ ॥ (अनुस्वधां) यस्य कर्माण्यक्षरन्सौख्य-मेव । यो वेदवाचां सृतिनावात्मकानां मध्येऽवर्धदयथाज्ञानरूपः । समीचीनज्ञानतोऽहंस्तमीश ओजिष्ठेन (हे)हतिरूपेण सम्यक् । मोक्ष-प्रकाशार्थमथापि नावा तरणीयानां मध्यतोऽपां वृधं तम् । अहिं वा ॥ ११ ॥ (न्याविध्यत्) इळिनो भूस्थिताः स्युस्तत्राविशन्नसुरो नाम तस्य । इळीबिशस्तस्य दृढानि यानि बलादीनि न्यहनत्तानि देवः । तमसो वा शृङ्गिणं शोषकं च वृषरूपं दैत्यमहन्नथो वा । कामं यावच्छक्तितो विक्रमाद्वा वेगेन वा शत्रुमथो पृतन्युम् । जघन्थ

परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम् ।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ९

न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन् ।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥१०॥२॥

अनु स्वधामक्षरन्नापो अस्याऽवर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ११

न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।
यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् १२

SGDF
Sri Gurgeshwari Digital Foundation

वज्रेण सुबोधतो वा न शक्तिसामस्त्यमिहोदितं हरेः । अनन्तशक्तिर्हि हरिः सदैव कुत एव शत्रुस्तदमुष्य कोऽपि । अतो यथाशक्त्यभियुध्यमानं शत्रुं जघन्थेति महानिहार्थः ॥ १२ ॥ (अभिसिध्मः) स सर्वतः सिद्धियुतः सदैव जिगाय जीवारिगणान्पुरश्च । संसाररूपा अभिनद्वृषेण प्राणेन तिग्मेन विरोधिनः प्रति । संयोजयामास वज्रेण वृत्रं ज्ञानेन वा ज्ञानममुष्य हत्यै । मतिं च स्वामदिशत्स्वप्रजाभ्यः स शाशदानः सुसुखी सदैव ॥ १३ ॥ (आवःकुत्सं) कुत्सं दशद्युं च मुनिं नृपं च यस्मिन्स्थितः स्वात्मरूपं सुभक्त्या । अदर्शयस्तोषितो यः स्वतन्त्रश्चाकन्नुकः कर्म यतः स्वतन्त्रे । वृषरूपस्यास्य नृपस्य युध्यतः शफच्युतो रेणुरुन्नक्षतद्याम् । श्वेता वाणी वायुभार्या सुतोऽस्याः श्वैत्रेयोऽयं युध्यतो ह्युदस्थात् । वृषः श्वैत्रेयो धर्म एवाथ कुत्सनामाध्यात्मे कुत्सितोत्सारणात्स्यात् । धर्मरेणुः स्वर्गमात्राभिगामी साक्षाद्धर्मो मोक्षफलोपगः स्यात् ॥ १४ ॥ (आवश्शमं) शमात्मकं वृषभं धर्ममेवाप्यरक्षस्त्वं तुग्रियास्वप्यधीश । तुग्रयाख्या स्यात्सन्ततिर्दीर्घकाला मुक्तिक्षेत्रं विजयायैव धर्मम् । श्वेतासुतं रमणाद्रेफउक्तस्तमक्षरस्त्वं त्वयि ये तस्थिवांसः । ज्योतिश्चक्रे निजरूपं विमुक्त्या ज्ञानान्यरीणामधराणि चाकरोः ॥ १५ ॥ ३ ॥ १ ॥ (३३) ॥

अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः १३

आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ १४

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।
ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः
॥ १५ ॥ ३ ॥ १ ॥ (३३) ॥

SGDF
Sri Gangeshwari Digital Foundation

(त्रिश्चित्) आरभ्य चाद्यैव दिवा निशायां तदन्तरे च त्रिरपि स्म सर्वदा। अस्माकमेव भवतं यतोऽन्यो वेत्ता न तावित्युदितौ नवेदसौ। गौणं तदन्यत्र हरौ तु मुख्यतो व्यापी तु मार्गो युवयोस्तु दानम्। अशेषदेशेषु गतेरशेषदातृत्वतश्चैव युवोर्हि यन्त्रम्। वासोयन्त्रं यद्वदयत्नतः स्याद्धिम्याहिनोतेस्तं तु विक्षेपणीहि। तद्वद्बुद्धिप्रेरकाऽयत्नतो वा मायार्थसेनौ भवतं मनीषिभिः। सहैव देवैः ॥१॥ (त्रयः) पवयश्चायुधानि सोमस्य पानं चेतनत्वाद्विदुस्ते। वज्रः खड्गः शर इत्यायुधानि त्रिवेणवः स्तम्भनामान एव। दिवानिशायां त्रिस्त्रिरेवानुयाथः कर्मारम्भार्थं लोकसिद्ध्यर्थमञ्जः। चक्रं गदा शर इत्यायुधानि वेदास्त्रयो वासुदेवस्य च स्युः। रथः स्वीयो ज्ञानिनां वा शरीरं प्राणादयः स्तम्भनान्यस्य चापि ॥ २ ॥ (समाने) वैषम्यहीने सुखभाजनेऽह्नि विमुक्तिकालेऽखिलदोषनाशकौ। स्वभक्तानां शोधयन्तं च यज्ञं त्रिरस्माकं युद्धजिता इषश्च। सुखानि वा मोक्षगतानि नोऽलमहोरात्रं क्षरतं सर्वदैव ॥ ३ ॥ (त्रिर्वर्तिः) यद्वर्तनं सर्वलोकेषु तच्च त्रिकालगं युवयोरेव सर्वम्। भक्ते जने सुष्ठु रक्ष्ये सुभक्ते त्रिधेव कालानुगते सुशिक्षितम्। सुखं वहेतं च युवां तु नः सदा पुष्टिं च

हिरण्यस्तूप आङ्गिरसः। अश्विनौ। जगती; ९, १२ त्रिष्टुप्।

त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना।
युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः ॥ १
त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः।
त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ॥ २
समाने अहन् त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम्।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥ ३
त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम्।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥ ४

SGDF
Sri Gurgeshwari Digital Foundation

नित्यां क्षरतं वर्णवच्च ॥ ४ ॥ (त्रिर्नोरयिं) वित्तं च नित्यं देवतातिं च नित्यं धियं च शुभ्रां नित्यमेवावतं नः । कीर्तिं सौभाग्यं रक्षतं नः सदैव कालत्रये युष्मदीयं रथं च । पुत्री सूर्यस्यारुहद्भक्तदेहे ज्ञानोदयो वा भगवत्प्रसादात् ॥५॥ (त्रिर्नोअश्विना) सर्वेषु कालेष्वपि भेषजानि नः सर्वलोकप्रभवानि दत्तम् । अद्भ्यः सुखायैव सुखं ममैव स्वल्पस्य युष्मत्पुत्रकस्याथ दत्तम् । पती शुभस्याथ सुतस्य शंयोर्मदीयस्यैवावहतं सुखं वा ॥ ६ ॥ ४ ॥ (त्रिर्नोअश्विनायजता ॥७॥ त्रिरश्विना ॥ ८ ॥ क्व ॥ ९ ॥ आनासत्यागच्छतं ॥ १० ॥ आनासत्यात्रिभिः ॥११॥ आनोअश्विना ॥ १२) ॥ ५ ॥ २ ॥ (३४) ॥

त्रिर्नो र॒यिं व॑हतमश्विना यु॒वं त्रिर्दे॒वता॑ता त्रिरु॒ताव॑तं धियः॑ ।
त्रिः सौ॑भग॒त्वं त्रिरु॒त श्रवां॑सि नस्त्रि॒ष्ठं वां॒ सूरे॑ दुहि॒ता रु॑हद्रथ॑म् ५
त्रिर्नो॑ अश्विना दि॒व्यानि॑ भेष॒जा त्रिः पार्थि॑वानि॒ त्रिरु॑ दत्तम॒द्भ्यः ।
ओ॒मानं॑ शं॒योर्मम॑काय सू॒नवे॑ त्रि॒धातु॒ शर्म॑ वहतं शुभस्पती ॥ ६ ॥ ४ ॥
त्रिर्नो॑ अश्विना यज॒ता दि॒वेदि॑वे॒ परि॑ त्रि॒धातु॑ पृथि॒वीम॑शायतम् ।
ति॒स्रो ना॑सत्या रथ्या परा॒वत॑ आ॒त्मेव॒ वातः॒ स्वस॑राणि गच्छतम् ७
त्रिर॑श्विना॒ सिन्धु॑भिः स॒प्तमा॑तृभि॒स्त्रय॑ आहा॒वास्त्रे॒धा ह॒विष्कृ॒तम् ।
ति॒स्रः पृ॑थि॒वीरु॒परि॑ प्र॒वा दि॒वो नाकं॑ रक्षेथे॒ द्युभि॑र॒क्तुभि॒र्हि॑तम् ८
क्व१॒ त्री च॒क्रा त्रि॒वृतो॒ रथ॑स्य॒ क्व१॒ त्रयो॑ व॒न्धुरो॒ ये सनी॑ळाः ।
क॒दा योगो॑ वा॒जिनो॒ रास॑भस्य॒ येन॑ य॒ज्ञं ना॑सत्योपया॒थः ९
आ ना॑सत्या गच्छतं हू॒यते॑ ह॒विर्मध्वः॑ पिबतं मधु॒पेभि॑रा॒सभिः॑ ।
यु॒वोर्हि पूर्वं॑ सवि॒तोषसो॒ रथ॑मृ॒ताय॑ चि॒त्रं घृ॒तव॑न्त॒मिष्य॑ति १०
आ ना॑सत्या त्रि॒भिरे॑काद॒शैरि॒ह दे॒वेभि॑र्यातं मधु॒पेय॑मश्विना ।
प्रायु॒स्तारि॑ष्टं॒ नी रपां॑सि मृक्षतं॒ सेध॑तं॒ द्वेषो॒ भव॑तं सचा॒भुवा॑ ११
आ नो॑ अश्विना त्रि॒वृता॒ रथे॑ना॒ऽर्वाञ्चं॑ र॒यिं व॑हतं सु॒वीर॑म् ।
शृ॒ण्वन्ता॑ वा॒मव॑से जोहवीमि वृ॒धे च॑ नो भवतं॒ वाज॑सातौ
॥ १२ ॥ ५ ॥ २ ॥ (३४) ॥

SGDF
Sri Gurgeshwari Digital Foundation

(ह्वयाम्यग्निं) ह्वयामि देवानग्निपूर्वानथो वा विष्णुं तैस्तैर्नामभी राति यस्मात्। रतित्वाद्वा रतिदत्वात्स रात्री ॥ १ ॥ (आकृष्णेन) कृष्णं रजः शार्वरं हृत्तमो वा। देवान्नृजातानथवा विमुक्तानन्यान्मर्त्यान्स्मृतिगान्वा लयेषु। निशासु वा स्वात्मनि संनिवेशयन्प्रस्वापयन्वा रविगो जनार्दनः ॥ २ ॥ (यातिदेवः) आयाति नित्यं चोच्चनीचैः प्रदेशैः शुभ्राश्वयुक्तेन रथेन याज्यः। शुभौ च तौ रमणीयौ च शुभ्रौ पुरोगाश्वौ हरिदश्वो हि सूर्यः। परावतो दूरतो ॥ ३ ॥ (अभीवृतं) ऽभीवृतश्च रथो हिरण्यैस्तस्य शम्या युगाणी। तमःप्रकाशौ यदधीनौ यतस्तौ दधान इत्युच्यते वासुदेवः। कृष्णं रजस्तविषी सत्त्वपूर्वा गुणास्त्रयो व्युत्क्रमात् ॥ ४ ॥ (विजनान्) तत्तुरंगाः। श्यावाः श्यामत्वान्नीलपादो जगत्ते पश्यन्ति सन्धिः प्रउगं रथस्य। देवप्रियत्वाद्दैव्यनाम्नो हरेस्तु समीपस्थं सर्वगत्वाज्जगद्धि ॥ ५ ॥

हिरण्यस्तूप आङ्गिरसः। १ (पादानां क्रमेण) अग्निः, मित्रावरुणौ, रात्रिः, सविता च। २-११ सविता। त्रिष्टुप्, १, ९ जगती,।

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये १
आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् २
याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम्।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ३
अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम्।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः ४
वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ५

SGDF
Sri Gangeshwari Digital Foundation

(तिस्रोद्यावः) तिस्रो द्यावो मात्रयं द्वाउपस्थौ जडाजडे श्रीर्विराषाडधीश । विश्वस्य साक्षाद्भगवान्नियन्ता यमोऽस्य सर्वं गदितं सदैव । जडाजडत्वान्नान्यमुक्तं पृथग्घि सर्वस्वाम्यं वक्तुमेवोदिता श्रीः । अन्योन्यसंबन्धविवक्षयैव ह्युपस्थत्वं मुक्तभूतानि यानि । अशेषतस्तानि रथस्य यद्वदाणिं रथ्यं संश्रितं सर्वदैव । एवं हरिं संश्रितान्यब्जजेशपूर्वाण्यपीत्येष वेदार्थसारः । इह ब्रवीत्वन्यथा योऽभिपश्येत्कुर्याद्वा तद्यो यथावच्च पश्येत् । शेषं ज्ञानं स ब्रवीत्वस्मदर्थे चकार यो विष्णुरेतत्स वा नः ॥ ६ ॥ ६ ॥ (विसुपर्णः) । गम्भीरवेगो भगवान्वा सुपर्णः परानन्दादन्तरिक्षाण्यपश्यत् । असौ रतिः शुभनीतिश्च विष्णुरित्यपश्यद्दुर्लभत्वात्क एव । पश्यन्नवेरश्मिगणानपीह सर्वव्याप्तानपि विष्णोर्न रश्मीन् । लोकः पश्येदिति क्वात्रातताने त्याक्षिप्यते व्यक्तिमपेक्ष्य रश्मेः ॥ ७ ॥ (अष्टौ) ऊर्ध्वं मध्यमधरं चेति धन्वत्रयं तमः सुखलीनं यतस्तत् । युक्तं भवेत्तद्गतैः सर्वदैव दृढश्लेषाद्योजनं स्यात्तमो हि । अष्टौ दिशः प्रकृतेर्वा पृथिव्या महदाद्याः सिन्धवस्तान्यपश्यत् । हिरण्याक्षो नरसिंहात्मना स वार्याणि यद्वरणीयं सुवित्तम् ॥ ८ ॥ (हिरण्यपाणिः) चर्षणिभ्यो यत्प्रजाभ्यो विशिष्टो

ति॒स्रो द्याव॑ः सवि॒तुर्द्वा उ॒पस्था॒ँ एका॑ य॒मस्य॒ भुव॑ने विरा॒षाट् ।
आ॒णिं न रथ्य॑म॒मृताधि॑ तस्थुरि॒ह ब्र॑वीतु॒ य उ॒ तच्चिके॑तत् ॥ ६ ॥ ६ ॥
वि सु॑प॒र्णो अ॒न्तरि॑क्षाण्यख्यद्गभी॒रवे॑पा असु॑रः सुनी॒थः ।
क्वे॒३॑दानीं॒ सूर्य॒ः कश्चि॑केत कत॒मां द्यां र॒श्मिर॒स्या त॑तान ७
अ॒ष्टौ व्य॑ख्यत्क॒कुभ॑ः पृथि॒व्यास्त्री धन्व॒ योज॑ना स॒प्त सिन्धू॑न् ।
हि॒र॒ण्या॒क्षः स॑वि॒ता दे॒व आगा॒द्दध॒द्रत्ना॑ दा॒शुषे॒ वार्या॑णि ८
हिर॑ण्यपाणिः सवि॒ता विच॑र्षणिरु॒भे द्यावा॑पृथि॒वी अ॒न्तरी॑यते ।
अपामी॑वां॒ बाध॑ते॒ वेति॒ सूर्य॑म॒भि कृ॒ष्णेन॒ रज॑सा॒ द्याम्‌ृ॑णोति ९

SGDF
Sri Gangeshwari Digital Foundation

विचर्षणिः केशवः सूर्यमेति । ऋणोति सम्पूरयति ॥ ९ ॥ (हिरण्यहस्तः) स्ववान्स स्वतन्त्रत्वात्स्वर्णपात्रं सुपूर्णम् । दधानोऽसौ स्वर्णवर्णश्च तेन स्वर्णपाणिः स्वर्णहस्तश्च देवः । पृथक्पृथक्पाणिपूर्वाङ्गवित्त्यै स्वर्णवर्णः स्वर्णपाणिः स उक्तः । एतैर्लिङ्गैर्वेत्ति सूर्यं यतश्च सूर्यादन्यः सविता वासुदेवः । उक्तो गायत्र्या चारणैस्तत्रतत्र कप्यास पद्माक्ष—इति ह्युदाख्यः ॥ १० ॥ (येते) ये पन्थानो देवयाना अमुत्र साध्या ये ते रेणवो रागतो वा । रजो हानादथवा तान्प्रदाय रक्षाधिकान्ब्रूहि नोऽथो समेभ्यः ॥११॥७॥३॥(३५)॥७॥

कण्वस्त्वध्यापयन्विष्णोरनुग्रहमथाप्नुवन् । इच्छंश्च ज्ञानवितर्तिं देवांस्तुष्टाव भक्तितः । ऋक्शतेनावशिष्टं च जप्यस्यान्ते तु कालतः । शृण्वन्तु स्तोममित्यन्ता ददर्शैकाग्रमानसः ॥छ॥ (प्रवः) बह्वाधेयत्वतः पुत्रं बहूनां वो हुताशनम् । बहुज्ञेयत्वतो विष्णुं वेमहे हे प्रजाः सदा । देवज्ञानाद्वा यजनाद्देवयत्यः समीळते । यमन्ये च जनास्सन्तः ॥१॥

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः १०
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव
॥ ११ ॥ ७ ॥ ३ ॥ (३५) ॥ ७ ॥

कण्वो घौरः । अग्निः, १३-१४ यूपो वा । प्रगाथः=विषमा बृहत्यः, समाः सतोबृहत्यः (१३ उपरिष्टाद्बृहती । ऐ०ब्रा० २।२ चरणच्छेदः)

प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते १

SGDF
Sri Gargeshwari Digital Foundation

(जनासः) सहसा वायुनैधितम् । धारयन्ति जनास्तस्य कर्म कुर्मो वयं च ते । सन्त्यः सम्यत्त्ववतो विष्णुर्वायोरपि विद्वद्धिकृत् ॥ २ ॥ (प्रत्वा ॥ ३ ॥ देवासः) प्रततेः पुरातनत्वाद्वा प्रत्नो ॥ ४ ॥ (मन्द्रः) मन्द्रो महामखः ॥ ५ ॥ ८ ॥ (त्वेइत्) देवान्सुवीर्याद्यजसि ॥ ६ ॥ (तङ्घ) तं हि त्वामेव सर्वदा । उपासते नमस्यन्तः सन्तस्तीर्णास्तु संस्तुतेः । स्त्रिधो ह्यति तितिर्वांसस्तीर्णदुःखा इहैव वा । त्वत्प्रसादेन विद्वांसः प्राप्य ब्राह्मण्यमुत्तमम् ॥ ७ ॥ (घ्नन्तः) तमो घ्नन्तोऽतर-ल्लोकानपः कर्माणि चोत्तमाः । उरु ब्रह्म क्षितित्वेन चक्रुस्तत्रैव

जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य २

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ३

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ४

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥ ५ ॥ ८ ॥

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ६

तं घेमित्था नमस्विन उप स्वराजमासते ।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्त्रिधः ७

घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे ।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्दश्वो गविष्टिषु ८

SGDF
Sri Gargeshwari Digital Foundation

संस्थितेः। वृषा स भगवान्विष्णुर्मुनौ कण्वेऽभवत्स्थितः। क्रन्ददश्वस्वरूपश्च ज्ञानस्यान्वेषणे कृते। ततः कण्वान्निस्सरन्ति शुद्धा वेदानुगा गिरः। द्युतिमत्त्वात्स तु द्युम्नी ॥ ८ ॥ (संसीदस्व) देवेषु ज्ञानवत्तमः। स त्वं शोचस्व दीप्यस्व धूमः संसारधूत्कृतेः। अरुषो रोषहीनत्वाद्धूमश्चेच्छुभगन्धनात् ॥ ९ ॥ (यन्त्वादेवासः ॥१०॥९॥ यमग्निं) यं सुतो मे समीधेऽग्निं मेध्यातिथिऋतादधि। उक्त्वा सत्यां वेदवाचं देयान्यन्नानि तस्य हि। तं प्रतीमा ऋचः सर्वाः प्रकाशाद्वर्धयाम तं। इन्धनं तु हरेर्नान्यत्क्वचिदस्ति प्रकाशनात् ॥ ११ ॥ (रायः) वित्तानि पूरयास्माकं देवेष्वप्याप्यमस्ति ते। यज्ञभागादिपूज्यत्वात्स्वधावः सुखवर्धकः। श्रुत्यवाजो यज्ञभागो राजा भवसि तस्य हि ॥ १२ ॥ (ऊर्ध्वः) अस्मद्रक्षाकृते नित्यं स्थितो भव विष्णुवत्। विष्णुश्चेत्स्वात्मदृष्टान्तो नोऽन्नदाता तथोद्यमी।

सं सीदस्व महाँ असि शोचस्व देववीतमः।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ९

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥ १० ॥ ९ ॥

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ११

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम्।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि १२

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे १३

SGDF
Sri Gargeshwari Digital Foundation

यत्स्तुवद्भिर्द्विजैर्युक्ताः स्नेहैस्त्वां विह्वयामहे ॥१३॥ (ऊर्ध्वोनः) ज्ञानेन पाहि नितरामुद्यम्युच्चगुणोऽपि नः । असुरा अत्रयः प्रोक्ता मार्गत्रय-विवर्जिताः । स्वर्गापवर्गमानुष्यं त्यक्त्वा यान्ति तमो हि ते । अदन्तीत्यथ रक्षांसि वात्रयोऽधिकभक्षणात् । भोगाय जीवनायापि स्वलोकचरणाय च । उत्तमान्कुरु नो नित्यं दोहनानि च लम्भय । देवेभ्योऽखिलकाम्यानि सदानोऽतिमहान्ति च ॥१४॥ (पाहि) अरं छिद्रं प्रापयतीत्यरा वा पापपूरुषः । धूत्कृतेस्तस्य नो रक्ष नश्यतोऽस्म-द्वधाय च । यवीयस्तु स्थितत्वेन यविष्ठयो हरिरुच्यते । ब्रह्माद्यपेक्षया नित्यं यविष्ठतम एव यत् । अग्निर्यविष्ठय इत्युक्तो यदाधिक्यार्थे-तोऽधिकम् ॥ १५ ॥ १० ॥ (घनेव) वायुर्मेघानिव जहि सर्वतः पापपूरुषान् । अस्मद्द्रोही च यस्तं च तापेनैवात्ति यत्ततः । तपुर्जम्भः शिशीते यस्तीक्ष्णो भवति सर्वदा । नेशो भवतु सोऽस्माकं दुरात्मा पापपूरुषः ॥ १६ ॥ (अग्निर्वव्ने) सुवीर्यं सौभगं चैव ममेशः सम-भाजयत् । मेध्यातिथिं सुतं चैव मित्राणि च ररक्ष मे । उपस्तुतं

ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः १४

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठय ॥ १५ ॥ १० ॥

घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक् ।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत १६

अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् १७

SGDF
Sri Gargeshwari Digital Foundation

चैव मुनिं सातौ लाभे ररक्ष ह ॥ १७ ॥ (अग्निना) तुर्वशादींस्तथा राज्ञो वयं तेन हवामहे। तुरोऽपि यद्वशो विष्णुः स च तुर्वशनामवान्। यदस्ति तत उच्चत्वाद्यदुरुग्रो सुरान्प्रति। तमेव तत्प्रासादेन ह्वयामो नयदेव सः। नववास्त्वादिकान्राज्ञो बलं दस्यु विनिग्रहे ॥ १८ ॥ (नित्वां) मनुष्यः सन्नहं त्वां तु ज्योतिर्मुक्तजनाय च। निदधे हृदि सत्त्वं च दीप्यसे मयि सर्वदा। ब्रह्मजोऽग्निर्ऋताद्वेदवाचोऽभिव्यज्यते हरिः। उक्षितः स्वगुणैः सर्वैर्युक्तो ॥ १९ ॥ (त्वेषासः) ऽमेयाश्च शक्तयः। त्वेषा इत्युदितास्तस्य हरेरश्मय एव च। भीमा न प्रतिगन्तुं च शक्या राक्षसपक्षिणः। यावतो जङ्गमास्तेषां हिंसनावांस्तु राक्षसः। यातुमावानितिप्रोक्तो यातनानुभवात्कचित्। यातुरित्येव च प्रोक्तः सन्तं प्रत्यनुकूलतः। स्थितास्ताः शक्तयो विष्णोः ॥२०॥ ॥ ११ ॥ ४ ॥ (३६) ॥

(क्रीळंवः) क्रीडाशीलं च मारुतम्। शर्धः सुखबलाढ्यं वाप्यनर्वाणमनिन्द्रियम्। न वायोरिन्द्रियाणां हि देवाः सन्त्यभिमानिनः। अतोऽनिन्द्रियता तस्य रथे देहे शुभश्च सः। कण्वास्तं गायताभीक्ष्णं

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः १८
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः १९
त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥२०॥११॥४॥(३६)॥

कण्वो घौरः। मरुतः। गायत्री।

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम्। कण्वा अभि प्र गायत १

SGDF
Sri Gangeshwari Digital Foundation

विष्णुं वा तादृशैर्गुणैः ॥ १ ॥ (ये) पृषत्यो वाहनान्येषामन्यदायुधमुच्यते। स्वप्रकाशोऽथवा विष्णुस्तल्लिङ्गैर्व्यज्यते सह। तत्तद्देवगतस्यापि विष्णोर्लिङ्गं च तद्भवेत् ॥ २ ॥ (इहेव) यत्ते वदन्ति वचनं मेघनादात्मकं हि तत्। इहापि श्रूयत इव वर्णा व्यक्तेरिवेति च। हस्तेष्वेषां कशाः सन्ति चित्रं मार्गेऽधिगम्यते। रेण्वादिसर्ववस्तूनां गमनान्मार्गचित्रता। विष्णोस्सर्वं जगच्चित्रं मार्गे संप्रेर्यतेऽमुना ॥ ॥ ३ ॥ (प्रवः) शोधकाय प्रधानाय वो बलाय च वायवे। शुद्धाय वा सुप्रकाशज्ञानायातिबलाय च। गायत ब्रह्म देवत्तं देवेषु ततमीश्वरम्। प्रीतिर्वायोर्विष्णुगानाद्वेदाख्यं ब्रह्म विष्णवे। देवैरधीयमानत्वाद्देवत्तं ब्रह्म वैष्णवम् ॥ ४ ॥ (प्रशंसा) अहन्तव्यत्वतस्त्वघ्न्यं वायुं वृषभरूपिणम्। क्रीडन्तं वेदरूपासु गोषु तं स्तुहि मारुतम्। माभिर्वेदैः स्तुतत्वेन मारुतो विष्णुरेव वा। भक्षणार्थं रसस्यासौ ववृधे मरुतां पिता ॥ ५ ॥ १२ ॥ (कोवः) आसमन्तादुत्तमः कः प्रधानो वायुरेव वः। विष्णोराक्षेप एव स्यात्को नामास्ति परस्त्विवति। त्वत्पर्यन्तं च वर्षिष्ठः को भवेदिति वा भवेत्। आधूतयो दिवो ग्मश्च भूम्या इत्यन्वयो भवेत्। तस्मादन्तं प्रतीवैतज्जगत्सन्धूनुथाखिलम् ॥ ६ ॥ (निवः) नीचैर्धृतो मानुषो वो मार्गायोग्राय मन्यवे। न पूर्यते च कोपाय स्वल्पत्वान्मानुषः क्वचित्।

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः। अजायन्त स्वभानवः २

इहेव शृण्व एषां कशा हस्तेषु यद्वदान्। नि यामञ्चित्रमृञ्जते ३

प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे। देवत्तं ब्रह्म गायत ४

प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम्।
जम्भे रसस्य वावृधे ॥ ५ ॥ १२ ॥

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः। यत्सीमन्तं न धूनुथ ६

नि वो यामाय मानुषो दध्र उग्राय मन्यवे। जिहीत पर्वतो गिरिः ७

SGDF
Sri Gargeshwari Digital Foundation

बहुवर्षयुतोत्युच्चगिरिर्मार्गे हि वोऽत्यजत् । मूलं ॥ ७ ॥ (येषां) येषां तथा ज्मेषु मार्गेष्वितिभिया धरा । कम्पते जीर्णराजेव ॥ ८ ॥ (स्थिरंहि) स्थिरं वो जननं यतः । जाता वायोर्दिवि वयो मातुः प्राप्तानि रेतवे । निर्गन्तुं तत्क्षणेनैव सर्वलोकाटनाय हि । यौवनं ते युवानो हि निसर्गान्मातुराजनेः । मातुरेव प्रसादेन सम्यक्तद्विविधं बलम् । प्रज्ञाबाहुबलं यस्मात्तस्मा- ॥ ९ ॥ (उदु) द्दिश उदापिरे । ते गिरः सूनवो देव्या वाश्रा वचनशीलिनः । अभिजन्मानुसारेण गुणान्पातुमुदापिरे ॥ १० ॥ १३ ॥ (त्यश्चित्) 'पज्ञां भूमि'रिति-श्रुत्या सुता विष्णोर्वसुन्धरा । तज्जत्वात्पर्वता विष्णोर्नप्तारः सेचनाद्धि मिट् । हरिस्तमपि मेर्वादिं मरुतश्च्यावयन्ति हि । अमृध्रम-प्रधृष्यत्वा- ॥ ११ ॥ (मरुतः) द्बलं यदपि वोऽखिलम् । जनां-श्च्यावयितुं स्थानाच्छक्ताः सम्यग्गिरीनपि ॥ १२ ॥ (यद्ध) कुर्वन्ति शास्त्रसंवादं मार्गे शृण्वन्ति केचन । तेषां मध्ये हि मरुतां ॥ १३ ॥ (प्रयात) शीभं क्षिप्रं प्रयात नः । मदं कुरुत तत्रैव दोहनान्यत्र सन्ति हि ॥ १४ ॥ (अस्ति) सर्वमायुर्जीवसेऽस्ति प्रसादान्मरुतां हि नः ॥ ॥ १५ ॥ १४ ॥ ५ ॥ (३७) ॥

येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः । भिया यामेषु रेजते ८
स्थिरं हि जानमेषां वयो मातुर्निरेतवे । यत्सीमनु द्विता शवः ९
उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत ।
वाश्रा अभिज्ञु यातवे ॥ १० ॥ १३ ॥
त्यं चिद्धा दीर्घं पृथुं मिहो नपातममृध्रम् । प्र च्यावयन्ति यामभिः ११
मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरीँरचुच्यवीतन १२
यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना । शृणोति कश्चिदेषाम् १३
प्र यात शीभमाशुभिः सन्ति कण्वेषु वो दुवः । तत्रो षु मादयाध्वै १४
अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम् ।
विश्वं चिदायुर्जीवसे ॥ १५ ॥ १४ ॥ ५ ॥ (३७) ॥

SGDF
Sri Gargeshwari Digital Foundation

(कद्ध) कदाऽनयोर्हस्तयोर्देवा धध्वे प्रियतातवत् । कदापि यत्प्रियस्तातः कधप्रियइतीरितः । स्तृतं बर्हिर्यद्विषये ते प्रोक्ता वृक्त-बर्हिषः ॥ १ ॥ (क्वनूनं) दिवः पृथिव्याश्चेदानीं क गच्छथ च किं फलम् । न गच्छथ क वाप्येतज्ज्ञातव्यं तत्प्रसादतः । आह्वयन्ति क वा गावो यथैव यवसार्थिनः । फलार्थिनः स्तुवन्तो वः काह्वयन्ति तथैव च ॥ २ ॥ (क्ववः) स्तुत्यानि वः सुखानि च कथं ज्ञेयानि नः सदा । इत्यभिप्रायतः प्रश्नः कस्मिन्नो ज्ञापकस्त्विवति । सुवितानि सुभद्राणि सौभगं लक्षणं परम् ॥ ३ ॥ (यत्) पृश्निर्वेदः प्रश्नयोग्यः पृश्निमाता हरिस्ततः । ज्ञेयस्तस्यापि विज्ञाता मारुतश्चेत्सुता गिरः । मानुषा यदि यूयं वः स्तोता देवो भवेदपि ॥ ४ ॥ (मावः) न स्यादसेव्यः स्तोताऽत्र यथा यवसगोचरे । गोप्राप्ये तु मृगो सेव्यो यममार्गं न च व्रजेत् । याच्ञारीति विशेषोऽयं निन्दास्तुत्येकदेश-युक् ॥ ५ ॥ १५ ॥ (मोषुणः) मावधीन्नः कचिन्मृत्युः परतः परतोऽपि च । दुर्हणा दुःखदा हन्त्री या तु सा तृष्णया सह ॥६॥ (सत्यं) अप्रमेया यथा सत्यं धन्वन्नपि हि सेचनम् । रुजां विद्रावक-स्यैव वायोः पुत्रा हि रुद्रियाः । विनाप्यचेतनं वातं वृष्टिं कृण्वन्ति

कण्वो घौरः । मरुतः । गायत्री ।

कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः १

क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः । क्व वो गावो न रण्यन्ति २

क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता । क्वो३ विश्वानि सौभगा ३

यद्यूयं पृश्निमातरो मर्तासः स्यातन । स्तोता वो अमृतः स्यात् ४

मा वो मृगो न यवसे जरिता भूदजोष्यः ।
पथा यमस्य गादुप ॥ ५ ॥ १५ ॥

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् । पदीष्ट तृष्णया सह ६

सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः । मिहं कृण्वन्त्यवाताम् ७

SGDF
Sri Gargeshwari Digital Foundation

हीच्छया । ७॥ (वाश्रेव) एषां सकाशाद्वृष्टिश्च विद्युद्भूमिं प्रकाशयेत् । गौर्वत्समिव भूम्यां च ॥ ८ ॥ (दिवाचित्) लोकं सिञ्चन्ति मातृवत् ॥ ९ ॥ (अध) मानुषादित्वमन्यच्च बिभेदेषां स्वनादपि । गृहमानिनो गृहाद्यं वा चचालैषां स्वनादपि ॥ १० ॥ १६ ॥ (मरुतः) अखिन्नैर्गमनैश्चैव दृढस्वीयैश्च पाणिभिः । अनुयात नदीश्चित्राः ॥ ११ ॥ (स्थिरावः) स्थिरास्सन्ति रथादयः ॥ १२ ॥ (अच्छ) ब्रह्मणश्च पतिं विष्णुं यथावद्व्याप्तया गिरा । जरायै संस्तुतित्वेन तृतीया भावरूपिणी । सर्वा विभक्तयश्चेत्थं भाववाचिन्य एव च । महाव्याकरणे सूत्रमिति संस्तुतिरूपतः । विद विष्णुं स्वप्रकाशमग्निवत्सूर्यवत्तथा । आह चात्मानमेवात्र 'दार्ढ्ये स्वप्रतियोगिता' । इति सूत्रात् ॥ १३ ॥ (मिमीहि) कीर्तिमस्य विष्णोः कुरु मुखे सदा । विस्तारयति पर्जन्यो यद्वद्वृष्टिं तथैव च । विस्तृणीहि तथेशस्य तथा कीर्तिं जगत्यपि ॥ १४ ॥ (वन्दस्व) पनस्युं ज्ञानशीलं च विज्ञेयं गणमर्किणम् । अभवन् ज्ञापका वृद्धा अस्माकं तदनुग्रहात् ॥ १५ ॥ ॥ १७ ॥ ६ ॥ (३८) ॥

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ८
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन । यत्पृथिवीं व्युन्दन्ति ९
अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम् ।
अरेजन्त प्र मानुषाः ॥ १० ॥ १६ ॥
मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ११
स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम् । सुसंस्कृता अभीशवः १२
अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम् । अग्निं मित्रं न दर्शतम् १३
मिमीहि श्लोकमास्ये पर्जन्य इव ततनः । गाय गायत्रमुक्थ्यम् १४
वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम् ।
अस्मे वृद्धा असन्निह ॥ १५ ॥ १७ ॥ ६ ॥ (३८) ॥

SGDF
Sri Gangeshwari Digital Foundation

(प्रयत्) परावतो हरेः स्थानान्मानं शोचिरिवास्यथ। सूर्यादयो यथा शोचिर्दूरादस्यन्ति जन्तुषु। एवं ज्ञानं सम्प्रदायान्मरुतो विष्णुरेव वा। इत्थं यथा सर्वदृश्यं तत्तथा भवतां कृतम्। एवं यत्र क्व वा ज्ञानाद्बलाद्वा गच्छथ कचित्। स्वतन्त्रत्वात्परापेक्षा नहि वः कचिदिष्यते। किञ्चिद्याथ बलात्किञ्चिद्धूनुथ स्वबलाद्धि तत्॥ १॥ (स्थिरावः) शत्रूणामपनोदाय सन्ति वस्त्विह हेतयः। स्तम्भनाय च शत्रूणां सुदृढान्येव ताः सदा। स्थिरत्वं दीर्घकालत्वं वीळुत्वं दृढता तथा। युष्माकं तविषी तेजो बलमस्त्युत्तमं सदा। मायिनो नहि मर्त्यस्य बलं तेजोऽथवोत्तमम्॥ २॥ (परा) स्थिरं चाज्ञानपापादि तद्भक्ताय पराहथ। गुरूनपि नरान्नित्यं गुणैर्वर्तयथाञ्जसा। पर्वतानां पृथिव्याश्च दिशो नित्यं वियाथन। वनिनश्च तरून्सम्यग्भजनीयान्सुरान्हरिः॥ ३॥ (नहिवः) भूमौ दिवि च वः शत्रुः कचिन्नैव हि लभ्यते। रिशादसः सुसुखिनः सुखेन शमदन्ति यत्। बलं तेजोऽपि वो ह्यस्ति व्याप्ता नित्यतया युजा। अधाप्याधर्षणायैव

कण्वो घौरः। मरुतः। प्रगाथः=विषमा बृहत्यः,
समाः सतोबृहत्यः।

प्र यदि॒त्था प॑रा॒वतः॑ शो॒चिर्न मान॒मस्य॑थ।
कस्य॒ क्रत्वा॑ मरुतः॒ कस्य॒ वर्प॑सा॒ कं या॑थ॒ कं ह॑ धूतयः॥ १

स्थि॒रा वः॑ स॒न्त्वायु॑धा परा॒णुदे॑ वी॒ळू उ॒त प्र॑ति॒ष्कभे॑।
यु॒ष्माक॑मस्तु॒ तवि॑षी॒ पनी॑यसी॒ मा मर्त्य॑स्य मा॒यिनः॑॥ २

परा॑ ह॒ यत्स्थि॒रं ह॒थ नरो॑ व॒र्तय॑था गु॒रु।
वि या॑थन व॒निनः॑ पृथि॒व्या व्याशाः॒ पर्व॑तानाम्॥ ३

न॒हि वः॒ शत्रु॑र्विवि॒दे अधि॒ द्यवि॒ न भूम्यां॑ रिशादसः।
यु॒ष्माक॑मस्तु॒ तवि॑षी॒ तना॑ यु॒जा रुद्रा॑सो॒ नू चि॑दा॒धृषे॑॥ ४

SGDF
Sri Gargeshwari Digital Foundation

निखिलाशुभसन्ततेः ॥४॥ (प्रवेपयन्ति) प्रवेपयन्ति पर्वतान्विविश्वन्ति वनस्पतीन् । जनिपर्ववतो जीवान्सम्प्रेरयति केशवः । भजनीयपतीन्ब्रह्म पूर्वांश्च फलदानतः । तारतम्येन सम्यक् च विवेचयति सर्वदा । सर्वप्रजास्वतिष्ठन्त प्राप्तास्ताभिस्सहैव च । मत्ता इव प्रेरयन्ति शुभाशुभकृतौ नरान् ॥ ५ ॥ १८ ॥ (उपो) अयुङ्ध्वं पृषतीश्चैव रोहितं पृष्ठतो रथे । वो यामं प्रति दार्ढ्याय शेषमश्रेत्पुनर्धरा । भीतिमापुर्मानुषाश्च ॥ ६ ॥ (आवः) क्षिप्रं वः प्राप्तये सुखम् । रक्षां वृणीमहे युष्मद्गन्ताऽद्यापि च नोऽवसा । भीतियुक्ताय कण्वाय मह्यं ॥ ७ ॥ (युष्मेषितः) युष्माभिरेव च । प्रेरितोऽथ नियन्तृत्वाद्युष्माकं मानुषेण वा । बाह्यदृष्ट्या त्वभूतीर्नो य इच्छति तमोऽञ्जसा । बलेन च द्रावयत युष्मदीयोतिभिस्तथा ॥ ८ ॥ (असामि ॥ ९ ॥ असाम्योजः) ओजो समं बिभृथ च मखेज्याः सममुत्तमम् । सुदानशीलाः कण्वाय दत्ता सममभीप्सितम् । असमैर्नोप्यभिप्रायैर्गन्त वृष्टिं न विद्युतः ॥ १० ॥ १९ ॥ ७ ॥ (३९) ॥

प्र वे॑पयन्ति॒ पर्व॑ता॒न्वि वि॑ञ्चन्ति॒ वन॒स्पती॑न् ।
प्रो आ॑रत मरुतो दु॒र्मदा॑ इव॒ देवा॑सः॒ सर्व॑या वि॒शा ॥ ५ ॥ १८ ॥
उपो॒ रथे॑षु॒ पृष॑तीरयुग्ध्वं॒ प्रष्टि॑र्वहति॒ रोहि॑तः ।
आ वो॒ यामा॑य पृथि॒वी चि॑दश्रो॒दबी॑भयन्त॒ मानु॑षाः ६
आ वो॑ म॒क्षू तना॑य॒ कं रुद्रा॒ अवो॑ वृणीमहे ।
गन्ता॑ नू॒नं नोऽव॑सा॒ यथा॑ पु॒रेत्था कण्वा॑य बि॒भ्युषे॑ ७
यु॒ष्मेषि॑तो मरुतो॒ मर्त्ये॑षित॒ आ यो नो॒ अभ्व॒ ईष॑ते ।
वि तं यु॑योत॒ शव॑सा॒ व्योज॑सा॒ वि यु॒ष्माका॑भिरू॒तिभिः॑ ८
असा॑मि॒ हि प्र॑यज्यवः॒ कण्वं॑ द॒द प्र॑चेतसः ।
असा॑मिभिर्मरुत॒ आ न॑ ऊ॒तिभि॒र्गन्ता॑ वृ॒ष्टिं न वि॒द्युतः॑ ९
अ॒साम्योजो॑ बिभृथा सुदान॒वोऽसा॑मि धूतयः॒ शवः॑ ।
ऋ॒षि॒द्विषे॑ मरुतः परिम॒न्यव॒ इषुं॒ न सृ॑जत॒ द्विष॑म् ॥१०॥१९॥७॥(३९)॥

SGDF
Sri Gargeshwari Digital Foundation

(उत्तिष्ठ) देवयन्तः पूजयन्तः स्तुवन्तोऽतिकृताशनः। प्राशू- ॥ ॥ १ ॥ (त्वामित्) र्वायोः सुतेत्येव सहसस्पुत्र इत्यथ। तद्व्यंग्यत्वाद्धरिः प्रोक्तः शक्रस्तत्सुत एव च। युद्धं हितधनं प्रोक्तं निहितं धनमेव वा। स्वश्व्यं तु स्विन्द्रियफलमाचकेऽपश्यदित्यपि ॥ २ ॥ (प्रैतु) पतिस्तु ब्रह्मणो विष्णुर्वागीशत्वात्समीरणः। अग्रतो यात्वसावस्मत्कार्येष्वेवं सरस्वती। सूनृता वैष्णवी वाग्वा यज्ञं वीरं नरं प्रति। नयन्तु देवाः सर्वेऽपि यत्पञ्चजनवर्धनः। पङ्क्तिराधा हरिस्तेन वीरो नर्यस्स एव च। देवगन्धर्वनृपितृदैत्याः पञ्चजनाभिधाः ॥३॥ (योवाघते) वाघते स्तुवते विष्णुर्ददाति सूनरं वसु। सुष्ठु येन नरो भूयात्सूनरं ज्ञानमुच्यते। स धत्तेऽचाक्षयां कीर्तिमिळामन्नं यजामहे। सुवीर्यत्वात्सुवीरं तत्सुप्रतूर्तिः सुपेशकृत्। प्राणचेष्टानिमित्तत्वात्तदनेह इतीरितम् ॥ ४ ॥ (प्रनूनं) स एव भगवान्विष्णुर्मन्त्रं तद्विषयं वदेत्। उक्थमुत्थापकत्वेन स एव भगवान्हरिः। तन्मन्त्रवाच्या देवाश्च ॥

कण्वो घौरः। ब्रह्मणस्पतिः। प्रगाथः=विषमा बृहत्यः,
समाः सतोबृहत्यः।

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा　१
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके　२
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः　३
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम्　४
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥ ५ ॥ २० ॥

SGDF
Sri Gargeshwari Digital Foundation

॥५॥२०॥ (तमित्) यद्वाच्या देवतास्तु ताः । तमेव मन्त्रं वोचेम ज्ञानार्थं सुखकारणम् । इमां वाचं स्वीकुरुत सकाशाद्वोऽखिलं शुभम् । अश्नवा- ॥ ६ ॥ (कोदेवयन्तं) नतिदौर्लभ्याद्देवभक्तं क आप्नुयात् । यजमानं वानुगच्छेत्कः सम्यक् स्तृतबर्हिषम् । तत्र तत्र प्रस्थितोऽसौ यजमानः सुखैः स्वयम् । स्वेष्टस्थानेषु चान्तर्वा विष्णुरन्तर्गतो यतः । तद्वच्चेन क्षयं स्थानं प्राप्नोति ज्ञानतो यजन् ॥ ७ ॥ (उपक्षत्रं) उपपृक्तः क्षत्रियैः स आवेशेन जनार्दनः । हन्ति शत्रूंश्च तैर्देवो भये च स्वाश्रयं ददौ । वर्ताऽभिगन्ता तरुता जेता चास्य न हि क्वचित् । युद्धं महाधनं त्वर्भं प्रसिद्धं धनमेव हि ॥ ८ ॥ २१ ॥ ८ ॥ (४०) ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम् श्रीमदृग्भाष्यम् संपूर्णम् ॥ ॥ ॥ ॥ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ६
को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थिताऽन्तर्वावत्क्षयं दधे ७
उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥८॥२१॥८॥(४०)॥

SGDF
Sri Gangeshwari Digital Foundation

श्रीमदानन्दतीर्थ(पूर्णप्रज्ञ)भगवत्पादाचार्यविरचित-

श्रीसर्वमूलान्तर्गता

उपनिषत्प्रस्थानग्रन्थाः

१ ऐतरेयोपनिषद्भाष्यम् ६१३-७१४
(ऐतरेयोपनिषत्समलङ्कृतम्)

२ तैत्तिरीयोपनिषद्भाष्यम् ७१५-७३८
(तैत्तिरीयोपनिषत्समलङ्कृतम्)

३ बृहदारण्यकोपनिपद्भाष्यम् ७३९-८९२
(बृहदारण्यकोपनिषत्समलङ्कृतम्)

४ ईशावास्योपनिषद्भाष्यम् ८९३-८९७
(ईशावास्योपनिषत्समलङ्कृतम्)

५ काठकोपनिषद्भाष्यम् ८९८-९१२
(काठकोपनिषत्समलङ्कृतम्)

६ छान्दोग्योपनिषद्भाष्यम् ९१३-१०३०
(छान्दोग्योपनिषत्समलङ्कृतम्)

SGDF
Sri Gangeshwari Digital Foundation

७ आथर्वणो(मुण्डको)पनिषद्भाष्यम् १०३१-१०४१
[आथर्वणो(मुण्डको)पनिषत्समलङ्कृतम्]

८ माण्डूकोपनिषद्भाष्यम् १०४२-१०५१
(माण्डूक्योपनिषत्समलङ्कृतम्)

९ षट्प्रश्नोपनिषद्भाष्यम् १०५२-१०५९
(षट्प्रश्नोपनिषत्समलङ्कृतम्)

१० तलवकारो(केनो)पनिषद्भाष्यम् १०६०-१०६४
[तलवकारो(केनो)पनिषत्समलङ्कृतम्]

SGDF
Sri Gurgeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ऐतरेयोपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॥ ॐ ॥ नारायणं निखिलपूर्णगुणैकदेहं सर्वज्ञमच्युतमपेतसमस्तदोषं । प्राणस्य सर्वचिदचित्परमेश्वरस्य साक्षादधीश्वरमियां शरणं रमेशं ॥ 'प्रादुर्बभूव भगवांस्तपसेतराया नारायणोऽब्जजसुतस्य विशालनाम्नः । तस्मिन्गतेऽध्वरमभूत्सुरविप्रसंघो निश्चेतनस्तदनु पद्मभवोऽमुमस्तौत् ॥ तेन स्तुतः स भगवान् गिरिशेंद्रमुख्यान्सर्वानबोधयदजेन सहैव तेऽथ । दासत्वमापुरत एव महत्सुराणां दासत्वतः स महिदास इति प्रसिद्धः ॥ शृण्वत्सु तेषु भगवानवदद्रमायै दिव्यां श्रुतिं स परमोऽतिमुदैतरेयीं । सा बह्वृचैः प्रपठिता चतुराननाद्यैस्यां रहस्यमुदितं परमं हि विष्णोः ॥ महाभूतिः श्रुतिः सैषा महाभूतिर्यतो हरिः । विशेषेणात्र कथितः सर्वज्ञः शाश्वतः प्रभुरि'त्यृक्संहितायां ।

एष एव सदा पंथा भगवान्पुरुषोत्तमः । नित्यं स्वप्राप्तिहेतुत्वात्कर्तृत्वात्कर्म मातृतः । ब्रह्मैष गुणपूर्णत्वात्सत्यं साधुस्वरूपतः । क्वापि तं विस्मरेन्नैव त्यक्त्वा तं नेतरं व्रजेत् । पूर्वे नैनं तत्यजुर्हि ब्रह्माद्यास्तेन संसृतेः । मुक्ता श्रीश्च तदत्यागान्नित्यमुक्ता गुणाधिका ।

अथ ऐतरेयोपनिषत्सु ऐतरेयारण्यके द्वितीय प्रघट्टके प्रथमाध्यायः

॥ हरिः ॐ ॥ एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयान्न ह्यत्यायन्पूर्वे येऽत्यायंस्ते परा बभूवुस्तदुक्तमृषिणा प्रजा ह तिस्रो अत्यायमीयुर्न्य१न्या अर्कमभितो विविश्रे । बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेशेति प्रजा ह तिस्रो अत्यायमीयुरिति या वै

SGDF
Sri Gurgeshwari Digital Foundation

विहायस्ययनात्प्रोक्ता वयांसीति पिशाचकाः। वर्तितज्ञानतो वंगा नरास्तैरवनं सदा। अन्नरूपैर्गृध्नवो हि वंगावगधनामकाः। राक्षसा असुरा ईरपादा इति समीरिताः। धर्मो ज्ञानं च वैराग्यमैश्वर्यं चतुरात्मकः। वायुर्देवोऽत्रासुराणामैश्वर्यं गुण एव हि। ईरपादास्ततः प्रोक्तास्ते त्रयो विष्णुमत्यजन्। पराभूतास्ततस्ते तु तमस्यंधे निपातिताः। देवाश्च ऋषयो मर्त्य सत्तमा इति च त्रयः। आश्रिता विष्णुमेवैकं त्रिस्थानस्थितमच्युतं। अग्निस्थमाश्रिता मर्त्या विष्णुमर्काभिधं परं। आजनैरर्चितत्वात्स ह्यर्क इत्युच्यते हरिः। अग्नौ कर्माणि कृत्वैव मानुषा मुक्तिभागिनः। कर्मभिः शुद्धसत्त्वानां कर्मत्यागोऽपि नान्यथा। आश्रिताः सूर्यगं विष्णुमृषयो बृहदित्यसौ। तेजसा बृंहणादुक्तो विष्णुरादित्य इत्यपि। आदानात्सर्ववस्तूनां स्वाध्यायेनामुमाश्रिताः। मुच्यंते ऋषयो नित्यं नान्यथा तु कथश्चन। वायुस्थमाश्रिता देवाः पवमानाभिधं हरिं। संसारात्पावयित्वा यन्महानन्दे मिनोत्ययं। पवमानस्ततो विष्णुर्व्याप्तः सर्वासु दिक्षु च। आश्रितो भगवान्सर्वैः सर्वत्रापि विशेषतः। आश्रयात्पृथगुक्तोऽयं नित्यानन्दो रमापतिः ॥ १ ॥

उत्थापनादुक्थनामा स एव पृथिवीस्थितः। प्रथितः पृथिवीनामा सोऽन्तरिक्षाभिधोऽत्रगः। अंतरीक्ष्यो यतो द्युस्थो द्युनामाऽतिप्रकाशनात्। अध्यात्मे च निविष्टोऽसौ पुरुषाख्यो जनार्दनः। पृषु

ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः न्य१न्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं बृहद्ध तस्थौ भुवनेष्वन्तरित्यद उ एव बृहद्भुवनेष्वन्तरसावादित्यः पवमानो हरित आविवेशेति वायुरेव पवमानो दिशो हरित आविष्टः ॥१॥

उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवीतो हीदं सर्वमुत्तिष्ठति यदिदं किञ्च तस्याग्निरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुतेऽन्तरिक्षमेवोक्थमन्तरिक्षं वा अनु पतन्त्यन्तरिक्षमनु धावयन्ति

SGDF
Sri Gargeshwari Digital Foundation

स्थितत्वात्स महान्प्रजानां पतिरेव च । अहमुक्थमिति ह्येतां विद्या-मनुभवत्यसौ । पृथक्पृथक्च तस्यांगान्युक्थानि जगदीशितुः । अग्नि-वातदिनेशानामुत्थानानि पृथक्पृथक् । वदनं नासिका नेत्रमित्येतानि परात्मनः । तृचाऽशीतिविभिन्नस्य शस्त्रस्यान्नत्वहेतुतः । विष्णोस्तृ-चाशीति वत्स्यात्प्रसिद्धान्नमिति स्फुटं । अन्नाभिमानिदेवश्च तृचाशी-त्याश्च देवता । सोम एव ततश्चान्नमशीतय इतीरितं । अदनाऽऽघ्राण-दृष्ट्याख्यभोगत्रयविभागतः । मुखनासाचक्षुषां तद्भोग्यमन्नं हरेः श्रुतं । अरणं गमनं यस्मादर्कः शीघ्र गतित्वतः । श्येन एव तदाकारा चिति-रर्कपदोदिता । सुपर्णप्रतिमा सा यत्तदारूढो जनार्दनः । तस्मा-त्तस्यार्क इति सा प्रोच्यते वैदिकैः पदैः । योऽसौ चितिगतो वीन्द्रः सोऽग्निवातरविष्वपि । तथा वाक्प्राणचक्षुष्षु तस्मात्तेऽर्काः प्रकीर्तिताः । तेषु स्थिते सुपर्णे च रूपभेदैः पृथक्पृथक् । स्थितो विष्णुस्तदर्कास्ते तस्मादेव प्रकीर्तिताः । व्याप्तत्वाज्जीवदेहेषु मुखे विष्णोर्मुखं स्मृतं । नासयोर्नासिका विष्णोरक्ष्णोरेव तदक्षिणी । जीववाक्प्राणचक्षुष्षु तद्भा-गाद्यास्ततः स्थिताः । विष्णोर्वाग्भार्गवो रामो प्राणोऽस्य नरकेसरी । चक्षुस्तु कपिलो विष्णुरग्न्यादीनां च कारणं । जीववागादिसंस्थं च सुपर्ण-मधिसंस्थिताः । अविशेषोऽपि भगवान् पूर्णैश्वर्यस्वरूपतः । अङ्गाङ्गित्वे-नैक एव स्वानन्दानुभवे स्थितः । स एव व्यूह्य चात्मानं पृथग्रूप इव स्थितः ।

तस्य वायुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुतेऽसावेव द्यौरुक्थमसुतः-प्रदानाद्धीदं सर्वमुत्तिष्ठति यदिदं किञ्च तस्यासावादित्योऽर्कोऽन्नमशीत-योऽन्नेन हीदं सर्वमश्नुत इत्यधिदैवतमथाध्यात्मं पुरुष एवोक्थमयमेव महान्प्रजापतिरहमुक्थमस्मीति विद्यात्तस्य मुखमेवोक्थं यथा पृथिवी तथा तस्य वागर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते नासिके एवोक्थं यथान्तरिक्षं तथा तस्य प्राणोऽर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते तदेतद्ब्रध्नस्य विष्टपं यदेतन्नासिकायै विनतमिव ललाटमेवोक्थं यथा द्यौस्तथा तस्य चक्षुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते समानमशीत-योऽध्यात्मं चाधिदैवतं चान्नमेवान्नेन हीमानि सर्वाणि भूतानि

SGDF
Sri Gangeshwari Digital Foundation

सुपर्णनामा भगवान्सुपर्णे च व्यवस्थितः । अग्न्यादिषु च तन्नामा वासुदेवः स संस्थितः । अन्ननामा स एवान्ने चेष्टयन्सर्वमास्थितः । अन्ने स्थितः स एवेशो ह्यन्नदातृगतिप्रदः । तस्यांतरिक्षगस्यैव नियमादनुपक्षिणः । पतन्ति धावयन्त्यश्च नरादींश्च नरादयः । परस्य विष्णोर्धामत्वात्स्वर्यो ब्रह्म इतीरितः । निहितश्चैव तल्लोको नासिकायां नतस्थले । पृथिव्यां संस्थितो विष्णुः स्त्रीरूपेण द्युलोकतः । पतितं सर्वमेवात्ति तथा दिवि च संस्थितः । इतो गतं सर्वमत्ति द्युनामा भगवान्परः । भोग्यत्वादाद्य इत्युक्त एवमाद्यात्तृरूपवान् । एक एव परो विष्णुरत्ताऽन्यैरुपजीव्यतः । आद्यो भवति चान्येषां नोपजीव्यो भवेद्यथा । हरिः स सर्वजीवानां न भुज्यंते यथाऽमुना । सर्वे लोकास्तथा कर्तुं नैवेष्टे कश्चन क्वचित् ॥ २ ॥

स एव भगवान्विष्णुः प्रजापतिरितीरितः । तस्माज्जाताः सर्वदेवा ब्रह्माद्यास्तेभ्य एव च । वृष्टिः संजायते तस्याः सर्वा ओषधयोऽभवन् । ओषधीभ्योऽन्नमन्नाच्च रेतो रेतस एव च । सर्वाः प्रजाः प्रजायन्ते सङ्कल्पो हृदयाभिधः । प्रजाभ्यो जायते तस्माद्विकल्पाख्यं मनस्तथा । विकल्पाद्वाक्प्रचारश्च वाचा नामादिवेदनात् । कर्म संजायते तस्मात्कर्मणश्च जगत्पुनः । कर्माभिमान्ययं जीवः परस्य ब्रह्मणो हरेः । आवासस्थानमुद्दिष्टो विशेषात्स इरामयः । इच्छानुरूपं तु सुखमिरेत्येव प्रकीर्तितं ।

समनर्न्तीँ ३ अन्नेनेमं लोकं जयत्यन्नेनामुं तस्मात्समानमशीतयोऽध्यात्मं चाधिदैवतं चान्नमेव तदिदमन्नमन्नादमियमेव पृथिवीतो हीदं सर्वमुत्तिष्ठति यदिदं किञ्च यद्ध किञ्चेदं प्रेर्ता ३ इ तदसौ सर्वमत्ति यदु किञ्चातः प्रैतीँ ३ तदियं सर्वमत्ति सेयमित्याद्याऽत्त्यत्ता ह वा आद्यो भवति न तस्येशे यंनाद्यायद्वैनं नाद्युः ॥ २ ॥

अथातो रेतसः सृष्टिः प्रजापते रेतो देवा देवानां रेतो वर्षं वर्षस्य रेत ओषधय ओषधीनां रेतोऽन्नमन्नस्य रेतो रेतो रेतसो रेतः प्रजाः प्रजानां रेतो हृदयं हृदयस्य रेतो मनो मनसो रेतो वाग्वाचो रेतः कर्म तदिदं कर्म कृत-

SGDF
Sri Gargeshwari Digital Foundation

इच्छानन्दप्रभूतत्वात्स एव च हिरण्मयः। हिरुक्सुखं हिरण्यं स्याद्बाह्या-नन्दात्पृथग्यतः। आधिक्यार्थे मयड्यस्मादधिकानन्दरूपकः। उत्सृज्य-कर्मजं रूपं निजानन्दैकरूपकः। एवं नारायणं जानन्सर्वलोकैककारणं। तल्लोके दृश्यते भूतैर्मुक्तैरानन्दरूपकः॥ ३॥

तमिमं प्रथमज्ञानिपुरुषं चतुराननं। वासुदेवाभिधं ब्रह्म प्राप प्रपदयोः पुरा। यस्मात्प्रपेदे भगवान्प्रपदा चतुराननं। तस्मात्प्रपदनादेव प्रपदंनाम कीर्तितं। चतुर्मुखाकारवतां नृणां पादतलोपरि। प्रपदाख्या वर्ततेऽतो न तु पश्वादिनां क्वचित्। अयादूर्ध्वं ततो विष्णुः प्रपदादूरु-मत्र च। स्थित ऊरू च तावास्तामूरूर्ध्वगमनाद्धरेः। किंचिदूर्ध्वं ततो गत्वा वायुना सह केशवः। वायुमाहोरुगरणं कुर्वत्रस्थित इत्यपि। उर्वेव गरणं चक्रे वायुर्यत्र स्थितः सदा। तत्स्थानमुदरं नाम पुनराह जनार्दनः। उरुस्थानं निवासं मे कुरु विस्तारसंयुतं। तथाऽकरोत्स वायुश्च तदुरोऽभूदुरुत्वतः। उरोमध्ये च हृदयं तत्रावासो हरेः सदा। सूक्ष्मदृष्टियुता ये तु मुनयः शार्कराक्ष्यकाः। उदरे ते परं ब्रह्म वासुदेवमुपासते। हृत्स्थमेव परं विष्णुं ध्यायन्त्यारुणयः सदा। उदरस्थं च हृद्गं च ते उभे ब्रह्म तत्परं। एकमेव यतस्तस्मादुभये ह्यपि तद्विदः।

मयं पुरुषो ब्रह्मणो लोकः स इरामयो यद्धीरामयस्तस्माद्धिरण्मयो हिरण्मयो ह वा अमुष्मिँल्लोके सम्भवति हिरण्मयः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद॥ ३॥

तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपदे तस्मात्प्रपदे इत्याचक्षते शफाः खुरा इत्यन्येषां पशूनां तदूर्ध्वमुदसर्पत्ता ऊरू अभवतामुरु गृणीहीत्यब्रवीत्तदुदरमभव-दुर्वेव मे कुर्वित्यब्रवीत्तदुरोऽभवदुदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्माहैव ता ३ इ ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत यच्छिरोऽभवत्तच्छिरसः शिरस्त्वं ता एताः शीर्षच्छ्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक्प्राणः श्रयन्तेऽस्मिंछ्रियो य एवमेतच्छिरसः शिरस्त्वं वेद ता अहिंसंताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हन्तास्मा-च्छरीरादुत्क्रामाम तद्यस्मिन्न उत्क्रान्त इदं शरीरं पत्स्यति तदुक्थं

SGDF
Sri Gargeshwari Digital Foundation

तत ऊर्ध्वं गतो विष्णुर्वायुना सह दैवतैः । स्थितो मूर्धनि देवेशः श्रितोऽसाविति तच्छिरः । तत्र प्राणात्मना वायुर्मनोरूपेण शङ्करः । शेषः सुपर्ण इंद्रश्च मनांस्येव पृथक्पृथक् । अहंभावमनो रुद्रः शेषोऽसौ पांचरात्रकं । वैदिकं गरुडश्चेंद्रो यज्ञादिविषयं मनः । श्रोत्रं चंद्रो रविश्चक्षुर्वागग्निः परिकीर्तितः। एते देवास्तदन्ये च सर्वप्राणिषु संस्थिताः। उपासते महाविष्णुं परमात्मानमच्युतं । वाचा हिंसामकुर्वस्ते विनिन्दन्तः परस्परं । ते विष्णोराज्ञयाऽवोचन्नुत्क्रमाम पृथक्पृथक् । देहादब्जभवस्यास्माद्यस्मिन्नुत्क्रांत एव हि । शरीरं पद्यते श्रेयान्स न इत्यवधार्यतां । ततः क्रमेण चाग्न्याद्या निष्क्रांतास्तेषु सर्वशः । निष्क्रांतेषु न वै पातः शरीरस्याभवत्क्वचित् । वायावुत्क्रांत एवैतच्छरीरमपतत्क्षितौ । उदासीनवदास्तां तौ केशवश्चाब्जसंभवः । तेषां बलपरीक्षार्थं वाय्वादीनां च सर्वशः । पुनस्ते प्राविशन्सर्वे वह्निसूर्यौ शशी शिवः । नोत्थानमभवत्तेषु प्रविष्टेष्वपि सर्वशः । वायौ प्रविष्टे तूत्थानं कायस्यासीत्तदैव च । उच्चैः स्थितत्वादुक्थोऽभूद्वायुरेव ततः प्रभुः । उच्चत्वं च गुणाधिक्यं त्वमुच्चोऽसीति तेऽब्रुवन् । भृत्या वयं तवैव स्म त्वमस्माकं पतिः सदा । स्पर्धामहे त्वद्बलेन त्वया नान्येन केनचित् ।

भविष्यतीति वागुदक्रामदवदन्नश्नन्पिबन्नास्तैव चक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तैव श्रोत्रमुदक्रामदश्रृण्वन्नश्नन्पिबन्नास्तैव मन उदक्रामन्मीलित इवाश्नन्पिबन्नास्तैव प्राण उदक्रामत्तत्प्राण उत्क्रान्तेऽपद्यत तदशीर्यताशारीतीँ३ तच्छरीरमभवत्तच्छरीरस्य शरीरत्वं शीर्यते ह वा अस्य द्विषन्पाप्मा भ्रातृव्यः पराऽस्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ता अहिंसंतेवाहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हन्तेदं पुनः शरीरं प्रविशाम तद्यस्मिन्नः प्रपन्न इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति वाक्प्राविशदशयदेव चक्षुः प्राविशदशयदेव श्रोत्रं प्राविशदशयदेव मनः प्राविशदशयदेव प्राणः प्राविशत्तत्प्राणे प्रपन्न उदतिष्ठत्तदुक्थमभवत्तदेतदुक्थं प्राण एव प्राण उक्थमित्येव विद्यात्तं देवा अब्रुवंस्त्वमुक्थमसि

SGDF
Sri Gangeshwari Digital Foundation

इत्यूचुर्वीन्द्रशेषेशशक्रचन्द्रादिकाः पृथक् । वायुः स संस्तुतस्तैश्च प्रसन्नोऽभूद्दिवौकसां ॥ ४ ॥

तस्माच्छ्रुत्वा परं ब्रह्म देवा नारायणाभिधं । शिष्यप्रशिष्यादिषु च तेऽनयन्वायुनोदितं । वायुमप्यनयन्सर्वे यशसा तद्गुणोक्तितः । ये ये गुणान्विजानन्ति वायोस्तानाविशन्मरुत् । तत्रतत्र प्रविष्टत्वात्प्रततोऽसौ बभूव ह । प्रततत्वात्प्रातरिति तस्य नामाभवद्विभोः । संगतश्चाभवज्जीवचिता रूपान्तरेण सः । सङ्गतत्वात्सायमिति तद्रूपं नामतोऽभवत् । वायोस्तत्पुनरध्यात्मं प्राणापानाभिधं द्वयं । अध्यात्ममग्निर्वागाख्यश्चक्षुः सूर्यः प्रकीर्तितः । यज्ञादिसाधने यत्तु मनश्चंद्रः प्रकीर्तितः । मित्रो यमश्च वरुणः कुबेरश्च दिगीश्वराः । श्रोत्राभिमानिनः सर्वे वैदिकश्रवणोचितं । श्रोत्रं चंद्रस्तथा स्मार्ततान्त्रिकश्रवणोचितं ॥ यम एव षडङ्गानां विषयश्रवणोचितं । श्रोत्रं तु वरुणः काम्यशास्त्रार्थे मित्र एव च । श्रोत्रं यन्नीतिशास्त्रार्थे कुबेरश्च प्रकीर्तितः । विष्णुना प्रहितानां हि संयोगोऽध्यात्ममेष हि । शिवादीनां च सर्वेषां मनस्त्वं कथितं पुरा । एतास्सर्वा देवता हि ब्रह्मवायुसुपर्णकाः । शेषशङ्करशक्राश्च चन्द्रसूर्ययमा अपि । अग्निश्च मित्रावरुणौ कुबेराद्याश्च सर्वशः । अधिदैवं स एवैक आधिक्यात्पुरुषोत्तमः । देवमात्रास्तदन्ये तु स आविः पुरुषोत्तमः । पूर्णज्ञानस्वरूपत्वादेतावत्कथितं भवेत् । तात्पर्यात्सर्ववेदैश्च तज्ज्ञानन्नवदन्मुनिः । हिरण्यदन्नामवेदो भूतेषु हि सुरानृते ।

त्वमिदं सर्वमसि तव वयं स्मस्त्वमस्माकमसीति तदप्येतदृषिणोक्तं त्वमस्माकं तव स्मसीति ॥ ४ ॥

तं देवाः प्राणयन्त स प्रणीतः प्रातायत प्रातायतीँ ३ तत्प्रातरभवत्समागादितीँ ३ तत्सायमभवदहरेव प्राणो रात्रिरपानो वागग्निश्चक्षुरसावादित्यश्चन्द्रमा मनो दिशः श्रोत्रं स एष प्रहितां संयोगोऽध्यात्ममिमा देवता अद उ आविरधिदैवतमित्येतत्तदुक्तं भवत्येतद्ध स्म वै तद्विद्वानाह हिरण्यदन्वैदो न तस्येशे यं मह्यं न

SGDF
Sri Gargeshwari Digital Foundation

मदभीष्टं ममादातुं नैवेष्टे कश्चनाञ्जसा। विष्णुना प्रहितानां हि देवानामहमुत्तमं। वेद संयोगमध्यात्मं ततो मुक्तौ यथेष्टभुक्। स्यान्नैवात्रास्ति संदेहः स्वेच्छाविहृतिरेव च। मन्निषेधे न शक्तोऽस्ति प्रीता देवा हि मे सदा। अधिदैवेन सहिता विष्णुना प्रभविष्णुना। एतद्धि तेन कथितं मुनिना तत्त्ववेदिना। विष्णुप्रहितदेवानां योगमध्यात्ममञ्जसा। वेद तं च नियोक्तारमुपास्ते विष्णुमव्ययं। एतादृशोपासनाया योग्यः सन्सततं सुधीः। स्वस्वाम्यन्यानि भूतानि हरेयुर्बलिमस्य हि। मुक्तस्य वैष्णवे लोके मुक्तानि च न संशयः। इत्येतद्ध्यानयोगाश्च मुनयो देवतास्तथा। मानुषा ज्ञानमात्रेण स्वावरैः पूज्यतामियुः। मुक्तामुक्तैर्मुक्तियोग्या इति शास्त्रस्य निर्णयः। स एष भगवान्विष्णुः सत्यमित्यभिधीयते। सर्वोत्तमत्वात्पूर्णत्वात्सर्वज्ञत्वात्तथैव च। देवतात्रयमन्यच्च पृथक्सत्यमितीर्यते। शेषवीन्द्रशिवादिभ्य उत्तमत्वात्सदैव हि। वायुः सदितिसम्प्रोक्तो जीवेषु तु सुपूर्णतः। तीति ब्रह्मा समुद्दिष्टः स एवान्नाभिमानवान्। अन्नं प्रजापतिरिति श्रुतिरन्या ह्यभाषत। अतिनादात्सदा वेदैरप्यन्नं स चतुर्मुखः। यमित्यादित्य उद्दिष्टो यमयेद्यत्प्रकाशनात्। देवतात्रयमेतत्तु सहितं सत्यमुच्यते। शुक्लकृष्णकनीनासु चक्षुषोऽप्येत आस्थिताः। एवं सत्यपदार्थं हि विज्ञायोपास्त आदरात्। योग्यस्तस्या उपासाया नैवासत्येन दुष्यति। देवता मुनयश्चैव योग्या अस्या अपि स्फुटं। मनुष्याणां ज्ञानमात्राद्दोषो नातितरां भवेत् ॥ ५ ॥

तस्य नारायणस्यैव सर्ववेदात्मिका हि वाक्। तन्तिरूपा जगद्बन्धे

दद्युरिति प्रहितां वा अहमध्यात्मं संयोगं निविष्टं वेदैतद्ध तदनीशान्नानि ह वा अस्मै भूतानि बलिं हरन्ति य एवं वेद तत्सत्यं सदिति प्राणस्तीत्यन्नं यमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति स यदि ह वा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत्सत्यस्य सत्यत्वं वेद ॥ ५ ॥

तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः

SGDF
Sri Gargeshwari Digital Foundation

नाम ब्रह्मादिकं च यत्। विप्रक्षत्रियवैश्यादिरूपं चाखिलमेव तु। दाम तेनैव बध्नाति सकलं जगदच्युतः। सर्वे हि नामवंतोऽत्र सर्वे वेदोदिता अपि। वेदात्मिक्या यतो वाचा विष्णुर्वदति सोऽखिलं। य एतद्विष्णुवाचैव बद्धं नामाख्यदामभिः। ज्ञात्वा जगदुपास्ते तु योग्यः संस्तदुपासने। तं प्रत्येवाखिलान्येव भूतानि सह दैवतैः। बलिं हरन्ति पश्चाथ भूतान्येनं वहन्ति च। योग्यश्चास्या उपासाया योग्यो ब्रह्मपदस्य यः। भूतयुक्ते रथे तस्मात्स तिष्ठति सुरार्चितः। मुक्तः संश्च तदन्येषां ज्ञानमात्राद्विमुक्तिगैः। स्वावरैः सेव्यतैव स्यात्कैश्चिदेव क्वचित्क्वचित्। तथैव वायुना बद्धं जगदेतत्ततोऽवरं। सुपर्णशेषगिरिशशक्रसूर्याद्यमञ्जसा। विष्णोर्वाय्योश्च लोमादौ छन्दांस्येवाश्रितानि च। विष्णोर्विमुक्तवाय्योश्च लोमाद्यं तु चिदात्मकं। लोमप्राणादिभेदश्च नैव कश्चिच्चिदात्मनि। छन्नश्छंदोभिरेवं स केशवस्तेन चाभिधा। छन्दांसीत्येव तेषां हि य एवंविदुपासकः। निवारयन्ति पापेभ्यश्छन्दांसि किमु केशवः। योग्या अस्याश्च विद्याया भृग्वाद्या देवतास्तथा। छन्दस्सु संस्थितो विष्णुर्गोपायत्येव तद्विदः। मन्त्रोऽप्यर्थमिमं प्राहापश्यं गोपामिति स्म ह। एष गोप्ता हि सर्वस्य वायुस्थः पुरुषोत्तमः। छन्दस्सु संस्थितो वायुर्वायौ च स जनार्दनः। वायुश्च

सर्वं सितं सर्वं हीदं नामभिः ३ सर्वं वाचाऽभिवदति वहन्ति ह वा एनं तन्तिसंबद्धा य एवं वेद तस्योष्णिग्लोमानि त्वग्गायत्री त्रिष्टुम्मांसमनुष्टुप्स्नावान्यस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहती स च्छन्दोभिश्छन्नो यच्छन्दोभिश्छन्नस्तस्माच्छन्दांसीत्याचक्षते छादयन्ति ह वा एनं छन्दांसि पापात्कर्मणो यस्यां कस्याञ्चिद्दिशि कामयते य एवमेतच्छन्दसां छन्दस्त्वं वेद तदुक्तमृषिणाऽपश्यं गोपामित्येष वै गोपा एष हीदं सर्वं गोपायत्यनिपद्यमानमिति न ह्येष कदाचन संविशत्या च परा च पथिभिश्चरन्तमित्या च ह्येष परा च पथिभिश्चरति स सध्रीचीः स विषूचीर्वसान इति सध्रीचीश्च ह्येष विषूचीश्च वस्त इमा एव दिश आवरीवर्ति भुवनेष्वन्तरित्येष ह्यन्तर्भुवनेष्वावरीवर्त्यथो आवृतासोऽवतासो न कर्तृभिरिति सर्वं

SGDF
Sri Gargeshwari Digital Foundation

वायुसंस्थश्च कदाचिन्नैव तिष्ठतः । वायुर्हि नित्यसञ्चारी सदा सर्वप्रवृत्तिमान् । चोदितः केशवेनैव तत्स्थेनामितशक्तिना । आसमन्तात्पराक्चापि पञ्चभूतेभ्य ईश्वरः। वायुस्तत्स्थो हरिश्चैव चरत्यमितपौरुषः। सध्रीचीनासु पूर्वादिदिक्ष्वेतौ चतसृष्वपि । नित्यदा वसतः कोणदिक्ष्वथाऽसु विषूचिषु । अन्तश्च सर्वलोकेषु चरतो लोकसाक्षिणौ । हस्तयोरेतयोरेव नित्याक्षीणं वसु स्थितं । तद्ध्यसह्यं बलं वायोरनन्तं किमु तद्धरेः । वायोराधारभूतस्य ताभ्यां हि ऋतुनामकाः । आवृताः सर्वजीवा हि यथैव कनका वटाः । आच्छाद्यन्ते वित्तवद्भिस्ताभ्यामेवं च चेतनाः। आवृता महदाद्यास्तु देहे तिष्ठन्ति चैतयोः । विष्टब्धाश्चैव सर्वेपि जीवा आकाश एव च । स वायुः प्रकृतिश्चैव विष्टब्धौ केशवेन हि । बृहत्त्वाद्बृहतीत्येव तयोर्नाम प्रकीर्तितम् । वायुकेशवयोः प्राणनाम सर्वप्रणायनात् । विशेषतो बृहत्प्राणो भगवांस्तत्र केशवः । इति विद्यात् ॥ ६ ॥

तस्य विष्णोरङ्गानामथ वैभवम् । उच्यते तस्य वाचा हि सृष्टावग्निः क्षितिस्तथा । शिश्रूषार्थं तस्य पृथ्वी जनयत्योषधीः प्रभोः । ताः पचत्यग्निरुद्युक्त आहृता आहृताः पुनः । आहरेति वचोऽस्यापि शृण्वन्त्येव महर्षयः । मुखजत्वात्तयोर्विष्णोर्मुखं जनकमिष्यते । आस्यभोग्यं ततो विष्णोरन्नं तौ कुरुतः सदा । सर्वैर्यद्भुज्यते चान्नं तत्र तत्र स्थितो हरिः । तद्भुङ्क्तेऽतस्तदर्थं हि तावन्नं कुरुतस्सदा ।

हीदं प्राणेनाऽऽवृतं सोयमाकाशः प्राणेन बृहत्या विष्टब्धस्तद्यथाऽयमाकाशः प्राणेन बृहत्या विष्टब्ध एवं सर्वाणि भूतान्या पिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं विद्यात् ॥ ६ ॥

अथातो विभूतयोऽस्य पुरुषस्य तस्य वाचा सृष्टौ पृथिवी चाग्निश्चास्यामोषधयो जायन्तेऽग्निरेनाः स्वदयतीदमाहरतेदमाहरतेत्येवमेतौ वाचं पितरं परिचरतः पृथिवी चाग्निश्च यावदनु पृथिवी यावदन्वग्निस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्च

SGDF
Sri Gangeshwari Digital Foundation

विष्णोर्वाग्विभवं वेद य उपास्ते च सर्वदा। योग्यः संस्तदुपासायाः स भूम्यग्निसमन्वितः। समं तयोर्व्याप्तिमांश्च तद्वन्मुक्तश्च नित्यदा। अनष्टलोको वसति समीपे केशवस्य च। योग्या अस्या उपासायाः पृथिव्यग्निपदस्य ये। योग्यास्ते वै मुख्यतया तदन्ये यत्र तौ स्थितौ। तत्र चर्तुं समर्थाः स्युर्मुक्तिं प्राप्य यदृच्छया। कादाचित्कोपासने तु तावत्येषां च योग्यता। वेदनं ह्यापरोक्ष्येण मुख्यं भवति नान्यथा। एकदेशविदो यस्मात्परोक्षज्ञानिनोऽखिलाः। आपरोक्ष्यं भवेद्यस्मान्नैवोपासामृते क्वचित्। तस्मादुपासापूर्वं तु योऽपरोक्षं प्रपश्यति। स एव वेद नान्यस्तु योग्यस्यैवापरोक्षदृक्। तस्माद्योग्यस्योक्तफलमन्येषां किञ्चिदेव हि। प्राणादिभ्यश्च वाय्वाद्या एवं विष्णोः प्रजज्ञिरे। ब्रह्मशेषसुपर्णेन्द्रशिवाद्या आप ईरिताः। ते विष्णोर्मनसा जाताः सर्वे चावभिमानिनः। वैश्वदेव्यस्ततो ह्यापो वरुणश्च मनोभवः। प्राणिनां पूर्तपुण्येषु श्रद्धारूपमनोऽधिपः। एवं हि सर्वदेवा हि विष्णवङ्गेभ्यः प्रजज्ञिरे। स्वोत्पत्त्यङ्गं च ते विष्णोः शिश्रूषन्ते पृथक्पृथक्।

य एवमेतां वाचो विभूतिं वेद प्राणेन सृष्टावन्तरिक्षं च वायुश्चान्तरिक्षं वा अनु चरन्त्यन्तरिक्षमनु शृण्वन्ति वायुरस्मै पुण्यं गन्धमावहत्येवमेतौ प्राणं पितरं परिचरतोऽन्तरिक्षं च वायुश्च यावदन्वन्तरिक्षं यावदनु वायुस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यतेऽन्तरिक्षस्य च वायोश्च य एवमेतां प्राणस्य विभूतिं वेद चक्षुषा सृष्टौ द्यौश्चादित्यश्च द्यौर्हास्मै वृष्टिमन्नाद्यं संप्रयच्छत्यादित्योऽस्य ज्योतिः प्रकाशं करोत्येवमेतौ चक्षुः पितरं परिचरतो द्यौश्चाऽऽदित्यश्च यावदनु द्यौर्यावदन्वादित्यस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते दिवश्चाऽऽदित्यस्य च य एवमेतां चक्षुषो विभूतिं वेद श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च दिग्भ्यो हैनमायन्तीँ३ दिग्भ्यो विशृणोति चन्द्रमा अस्मै पूर्वपक्षापरपक्षान्विचिनोति पुण्याय कर्मणे एवमेते श्रोत्रं पितरं परिचरन्ति दिशश्च चन्द्रमाश्च यावदनु दिशो यावदनु चन्द्रमास्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यते दिशां च चन्द्रमसश्च य एवमेतां श्रोत्रस्य विभूतिं

SGDF
Sri Gargeshwari Digital Foundation

विष्णोर्विषयधर्मेषु ज्ञानादिषु चतुर्मुखः। श्रद्धां ददाति भूतानां वैदिकश्रवणे विपः। तान्त्रिके शेषरुद्रौ च शक्रो यज्ञादिकर्मणि। वायुर्गन्धवहश्चास्य भक्तिज्ञानप्रदस्तथा। भूतानां तस्य विषये त्वन्तरिक्षं च कर्मणः। तदीयस्यैव भोगार्थं जीवानां श्रुतिचारदम्। अन्तरिक्षं च विघ्नेशः सूर्यस्तत्कर्मसिद्धये। भूतानां ज्योतिषो दाता द्यौरप्यन्नाद्यदायिनी॥ ७॥

आप इत्येव देवानां ब्रह्मादीनां कथं भवेत्। नामेत्यपृच्छल्लक्ष्मीस्तं महिदासं जनार्दनम्। आप इत्येव नामैषां भवतीत्याह स प्रभुः। इदं मदाख्यं यद्ब्रह्म ह्याप इत्यभिधीयते। आ पूर्णत्वाद्गुणैः सर्वैस्तन्मूलमखिलस्य च। तूलभूतं तदन्यत्तु पिता ह्येष जनार्दनः। पुत्रा ब्रह्मादयः सर्वे नैवायं वृक्षमूलवत्। स्वतन्त्रत्वाज्जगन्नाथः पितृत्वात्परमेशितुः। तन्नामाऽप इति ह्येतद्ब्रह्मरुद्रादिनां भवेत्। यथा यदव इत्येव रघवः कुरवस्तथा। पुत्रनाम पितुश्च स्यात्तत्तन्त्रत्वात्सुतस्य हि। यथा पितामहाद्याश्च पितरो नाम कीर्तिताः। तथापि मुख्यया वृत्त्या व्यवहारव्यवस्थितिः। आप इत्येव देवानां सर्वेषां प्रददौ हरिः। स्वकीयमेवमन्यानि पृथक्पृथगदात्प्रभुः। नारायणादिनामानि ददौ नान्यस्य केशवः। एवं स भगवान्विष्णुर्महिदासाभिधः प्रभुः। जानन्नित्योदितज्ञानादाह देवीमिदं वचः। देवपर्यन्तमा व्याप्तिं वेदाहं

वेद मनसा सृष्टा आपश्च वरुणश्चाऽऽपो हास्मै श्रद्धां सन्नमन्ते पुण्याय कर्मणे वरुणोऽस्य प्रजां धर्मेण दाधारैवमेते मनः पितरं परिचरन्त्यापश्च वरुणश्च यावदन्वापो यावदनु वरुणस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यतेऽपां च वरुणस्य च य एवमेतां मनसो विभूतिं वेद॥ ७॥

आपा ३ इत्याप इति तदिदमाप एवेदं वै मूलमदस्तूलमयं पितैते पुत्रा यत्र ह क्व च पुत्रस्य तत्पितुर्यत्र वा पितुस्तद्वा पुत्रस्येत्येतत्तदुक्तं भवत्येतद्ध स्म वैतद्विद्वानाह महिदास ऐतरेय आऽहं मां देवेभ्यो वेदा

SGDF
Sri Gangeshwari Digital Foundation

मम सर्वदा। मत्पर्यन्तं तथा व्याप्तिं देवानामपि सर्वशः। मयि देवास्तेषु चाहमिति विद्धि वरानने। मयैतानि प्रदत्तानि पदानि ब्रह्मपूर्वकाः। अधितिष्ठन्ति सत्ताद्या अप्येतेषां मदाज्ञया। ज्ञानकर्मबलेहाद्या मद्दत्ता इति किं वदे। संभृता मत्त एवैते स एष भगवान् गिरिः। गिरणात्सर्वभूतानां चक्षुर्नामास्य दर्शनात्। सर्वश्रोतृत्वतः श्रोत्रं मनो मन्तृत्वहेतुतः। प्राणनामा प्रणेतृत्वात्तमेनं गुणपूर्तितः। गिरणाच्चाखिलस्यास्य प्राहुर्ब्रह्मगिरिं प्रभुम्। य एवं वेद तं विष्णुमापरोक्ष्येण शाश्वतम्। गिरत्येवाखिलं पापं भ्रातृवत्सह संस्थितम्। पराभवति पाप्माऽस्य द्वेष्टा निरयगः सदा। असनाद्भगवान्सोऽसुः सर्वस्यापि जनार्दनः। प्रकृष्टानन्दरूपत्वात्प्राण इत्यभिधीयते स एष भूतिनामाऽपि ज्ञानैश्वर्यादिभूतिदः। अज्ञानादिप्रदातृत्वात्स एवाभूतिनामकः। सुखज्ञानादिगुणदं पूर्णं सर्वगुणैः प्रभुम्। उपासते तं वाय्वाद्या देवास्तस्माच्च तेऽखिलाः। बभूवुः सुखसज्ज्ञानपूर्वैः सर्वगुणैर्युताः। देवानामपि सर्वेषां प्रधानोऽद्यापि मारुतः। स्थित्वा सुप्तेषु विष्णुं तं भूर्भूरित्येव शंसति। भूःशब्दार्थो भूतिरिति वैपरीत्येन चासुराः। अभूतिकारकोऽस्माकमैश्वर्यादिगुणोज्झितः। इत्येवोपासते तस्मात्पराभूताश्च सर्वशः। ज्ञानैश्वर्यादिभिर्हीनाः पेतुरन्धे तमस्यथ। य एवं वेद तं विष्णुं भूतिदं भूतिरूपिणम्। भावाभावं च देवानां दैत्यानां चैवमेव तु। ज्ञानैश्वर्यादिभिः सोऽपि भवेत्तस्य परात्मनः। प्रसादात्तस्य पाप्मा च पराभवति सर्वशः। स एष भगवान्विष्णुर्मृत्युदो मोक्षदस्तथा। स एव जीवनकरो यदाऽपानेन संयुतम्। प्राणं नियमयत्यस्मिंच्छरीरे पुरुषोत्तमः। शरीराद्बहिरेतौ तु यदा

ओ मद्देवान्वेदेतःप्रदाना ह्येत इतःसंभृता इति स एष गिरिश्चक्षुः श्रोत्रं मनो वाक्प्राणस्तं ब्रह्मगिरिरित्याचक्षते गिरति ह वै द्विषन्तं पाप्मानं भ्रातृव्यं पराऽस्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद स एषोऽसुः

SGDF
Sri Gargeshwari Digital Foundation

निःसारयत्यजः । तदा मृत्युपदश्चायं मुक्तानामपि जीवनम् । प्राणादेव हि तत्रापि प्राणाधारो जनार्दनः । अवाक्प्राक्च सदागच्छेद्वायुरानन्दरूपिणा । अनेनैव गृहीतो हि प्राणोऽपानेन संयुतः । अनेन हरिणा यस्मान्नियतो न पराग्भवेत् । अमर्त्यस्तत्प्रसादेन वायुर्देहैः सह स्थितः । अनित्या अपि देहास्ते शश्वत्सन्त्या विमोक्षतः । स्थूलसूक्ष्मविभागेन किमु वायुर्जगत्प्रभुः । नानागती तु तावेतौ वायुः प्राप्नोति केशवम् । शरीरं तु विनष्टं स्यात्पश्चत्वमुपगच्छति । जडं तज्जडतामेति चेतना वायुदेवता । चेतनेशं हरिं याति विरुद्धगमनौ च तौ । ऊर्ध्वं गच्छति देवः स देहोऽधःपतति क्षितौ । दृश्यमेतच्छरीरं चाप्यदृश्या वायुदेवता । य एवं वेद तं वायुममृतं सर्वनायकम् । पूर्णानन्देन हरिणा गृहीतं तद्वशं सदा । स मुक्तो लोकमाप्नोति विष्णोर्मुक्तैश्च दृश्यत' इति च । ब्रह्मपन्थाः सत्यं कर्मेति तस्य नारायणस्य वासुदेवाद्याः । क्रमेण चतस्रो मूर्तयः । नासिकायां यन्नेत्रयोर्मध्ये विनतमिव किञ्चिन्नतस्थानं तत्सूर्यलोकस्थानीयं विद्यात् । तथेतिनिर्णयः । ईरामयइति दैर्घ्यमवधारणार्थम् । 'दैर्घ्यं प्लुतं च हिंकारो बिन्दुरप्यवधारण' इति शब्दनिर्णये । ब्राह्माहैव ता ३ इते । 'देशतः कालतोऽर्थाच्च बलतो गुणतस्तथा। स्वरूपतोऽपि नैव स्याद्भेदोऽत्यल्पोऽपि यत्र हि । केवलैश्वर्ययोगेन यत्र संख्यादिवद्भवेत् । स्वरस्पर्शविभागेन तत्रोक्तिः स्याद्विभक्तिषु । अचिन्त्यात्तु तथैश्वर्यादेकोऽपि बहुरूपवान् । प्रकाशयेद्यतो विष्णुः सर्वत्राप्यविशेषवान् । न विशेषो हि रूपाणां मत्स्यादीनां कथञ्चन । नैश्वर्ये न बले चैव नानन्दादिगुणेष्वपी'त्यादि शब्दनिर्णयवचनात् । द्विवचनमत्र व्यवहारमात्रमिति ता इत्युक्तम् ।

स एष प्राणः स एष भूतिश्चाभूतिश्च तं भूतिरिति देवा उपासां चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह पराबभूवुर्भवत्यात्मना पराऽस्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं

SGDF
Sri Gargeshwari Digital Foundation

'संहितायां यत्र दैर्घ्यं पदे यत्र न विद्यते। उक्तार्थस्य महाधिक्यं श्रुतेस्तत्र विवक्षितमि'त्यतो ब्रह्माहेति दैर्घ्यमपि परब्रह्मत्वविवक्षया। अद उ एव नारायणाख्यमधिदैवतं अन्यानि दैवतमात्राणि। स्थानान्तरेऽन्येषामप्यधिदैवत्वकथनं कर्मजदेवाद्यपेक्षया। मुख्याधिदैवतं नारायण एव। तस्योष्णिग्लोमानीत्यादि लोमसूष्णिगित्याद्यर्थे। 'सप्तसु प्रथमे'ति सूत्रात्। सच्छन्दोभिश्छन्न इतिवाक्यशेषात्। 'ब्राह्मणोऽस्य मुखमासीदि'त्यादिवच्च। 'अङ्गेषु यस्य छन्दांसि देवा लोका मखा अपि। तद्वशा नियता नित्यं नमस्तस्मै परात्मन' इति च स्कान्दे। अस्मै पुण्याय कर्मण इत्येतमुद्दिश्य जीवानां पुण्यकर्मकर्तुम्। तैर्हि स्तुत्यादिकर्माणि कृतानि श्रोत्रेण शृणोति भगवान्। दिग्भ्योऽप्यन्य एव विशृणोति जीवः। अन्येषां जीवानां श्रवणजं भोगं स्वश्रोत्रेण दिग्भिरननुगृहीतेनैव भगवान् भुङ्क्ते। न च जीववागादिना पृथिव्यग्न्यादिकं सृष्टमित्यत्र किञ्चिन्मानमस्ति। मुखादिन्द्रश्चाग्निश्चेत्यादिना भगवतः सकाशाद्धि सर्वेषां सृष्टिः प्रसिद्धा। सृष्टिभेदादन्यथावचनम्। न च मुख्यकारणाङ्गीकारेऽविरोधे औपचारिकं कारणमङ्गीकर्तुं युक्तम्। अतिप्रसङ्गात्। न हि यत्किञ्चित्कारणत्वमस्तीत्येतावता ब्राह्मणस्य चण्डालः पितेत्युच्यते। पितृत्वं चात्रोक्तं वाचं पितरमित्यादिना। 'मनुष्याणां तु यत्कर्म न देवोत्पत्तिकारणम्। दैवतैरुपकारस्तु क्रियते नरकर्मणाम्। देवानां कर्मणैवैते जायन्ते सर्वमानुषाः। प्रधानत्वान्न देवानां नृकर्मोत्पत्तिकारणमि'ति च ब्रह्माण्डे। आह महिदास ऐतरेय इति तु सर्वस्य

वेद स एष मृत्युश्चैवामृतं च तदुक्तमृषिणाऽपाङ्प्राङेति स्वधया गृभीत इत्यपानेन ह्ययं यतः प्राणो न पराङ्भवत्यमर्त्यो मर्त्येना सयोनिरित्येतेन हीदं सर्वं सयोनि मर्त्यानि हीमानि शरीराणी३ अमृतैषा देवता ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न निचिन्वन्ति हैवेमानि शरीराणी३ अमृतैवैषा देवताऽमृती ह वा अमुष्मिंल्लोके संभवत्यमृतः

SGDF
Sri Gangeshwari Digital Foundation

वचनस्य तदीयत्व ज्ञापनार्थं न तु सन्निहितस्यैव । यथेन्द्रं कुत्स-मित्यादि । यथा च 'पूर्वं तु बादरायणो हेतुव्यपदेशादि'ति ॥ ८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके प्रथमोऽध्यायः ॥ २ ॥ १ ॥

॥ ॐ ॥ एष नारायणो देवो वायुना सहैवेमं लोकमभ्यार्चत् । ब्रह्मादिशरीरेषु प्रविवेश । पुरुष इत्यन्तर्यामिरूपस्याख्या । पुरि शेत इति प्रसिद्धत्वाच्च पञ्चरात्रेषु । य एष सूर्यमण्डले स्थित्वा तपति भगवान्स नारायणः । 'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेदे'त्यादिश्रुतिभ्यः । 'य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यत' इत्युक्त्वा 'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' इत्युक्तत्वान्न शिवादयः । शिवो हि विरूपाक्षः । प्रसिद्धश्च पुण्डरीकाक्ष इति भगवान्नारायणः । यमादित्यो न वेदेत्युक्तत्वान्नादित्यः । 'भेद-व्यपदेशाच्चान्य' इति भगवद्वचनम् । वृत्रं यदिन्द्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे । यत्सूर्यस्य हरितः पतन्तीः पुरस्सतीरुपरा एतशेकः । सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतस्सूर्यमारोहयो दिवि । चन्द्रमा मनसो जातश्चक्षोस्सूर्यो अजायत । यस्सूर्यं य उषसं

सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद य एवं वेद ॥ ८ ॥ इत्यैतरेयोपनिषत्सु द्वितीयारण्यके प्रथमोऽध्यायः । २ । १ ।

हरिः ॐ ॥ एष इमं लोकमभ्यार्चत्पुरुषरूपेण य एष तपति प्राणो वाव तदभ्यार्चत्प्राणो ह्येष य एष तपति तं शतं वर्षाण्यभ्यार्चत्तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति तं यच्छतं वर्षाण्यभ्यार्चत्तस्माच्छतर्चिनस्तस्माच्छतर्चिन इत्याचक्षत एतमेव सन्तं स इदं सर्वं मध्यतो दधे यदिदं किञ्च स यदिदं सर्वं मध्यतो दधे यदिदं किञ्च तस्मान्माध्यमास्तस्मान्माध्यमा इत्याचक्षत एतमेव सन्तं प्राणो वै गृत्सोऽपानो मदः स यत्प्राणो गृत्सोऽपानो मदस्तस्माद्गृत्समदस्तस्माद्गृत्समद इत्याचक्षत एतमेव सन्तं

SGDF
Sri Gargeshwari Digital Foundation

जजान यो अपां नेता स जनास इन्द्रः'। 'उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य। येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च। यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः। तमेताः पञ्चदेवताः परिम्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निरि'त्यादौ सूर्यस्य सर्वत्र पराधीनत्वावगतेश्च। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः। केयूरवान्मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्र' इति नारसिंहपुराणे। 'तापनी पाचिका चैव शोषणी च प्रकाशनी। नैव राजत्रवेः शक्तिः शक्तिर्नारायणस्य चे'ति पाद्मे। 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमि'ति च। न च विष्णोरन्याधीनत्वं श्रुतिसूक्तं कुत्रचित्। उत्पत्तिस्तु प्रादुर्भावापेक्षया। 'एको नारायण आसीन्न ब्रह्मा न च शङ्कर' इति महाप्रलये तस्यैवावस्थानश्रुतेः। 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधामि'ति ब्रह्मशिवादीनां देव्यधीनपदप्राप्तिमुक्त्वा तस्या अपि भगवदधीनत्वं 'मम योनिरप्स्वं १ तः समुद्रे ततो वितिष्ठे भुवना नु विश्वा परो दिवा पर एना पृथिव्ये'त्याह। 'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ। अहं सुवे पितरमस्य मूर्धन्नि'ति ब्रह्मरुद्रयोर्देव्यास्सकाशात्सृष्टिसंहारौ चोक्तौ। 'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदेहि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विना विरावदि'त्यादिना विष्णोःप्रसादादेव शिवादीनां पदप्राप्तिकथनाच्च। 'तमेताः सप्त क्षितय उपतिष्ठन्ते तद्या इमा अक्षँल्लोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्त' इत्यादिना शिवादिसर्वदेवोपास्यस्य वायो'रयं वाव शिशुर्योऽयं मध्यमः प्राण' इति मध्यमशब्दोक्तस्य 'प्राणः स्थूणे'ति प्राणशब्दोदितो नारायण आश्रय उक्तः। तस्मात्सर्वोत्तमो भगवान्नारायणः प्राणशब्दोदित

SGDF
Sri Gargeshwari Digital Foundation

आदित्यमण्डलस्थस्तपतीत्यादि सिद्धम् । 'क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चिराः । आजानजाः कर्मदेवास्तात्त्विका दक्ष एव च । शक्रश्चोमा च रुद्रश्च भारती वायुरेव च । मुक्ता उक्ताः शतगुणा बलज्ञानसुखादिभिः । विष्णुभक्त्यादिभिश्चैव गुणैः सर्वैः क्रमाधिकाः । तस्माद्रमा ततो विष्णुरनन्तगुणतोऽधिकः । नित्यमुक्तः स्वतन्त्रश्च न चान्यस्तादृशः क्वचित् । कुत एवाधिकोऽन्यः स्याद्यन्मुक्ता अपि तद्वशाः । रमाऽपि तेद्वशा नित्यं स नान्यस्य वशे प्रभुः । न भेदः शेषशिवयोः सुपर्णः शेषसंमितः । कामः शक्रसमो नित्यं प्रतिबिम्बाश्च ते क्रमादि'ति च महासंहितायाम् । स पुरुषेषु शतं वर्षं गत इति शतर्चिनामा । बहुरूपत्वाद्बहुवचनम् । एतमेव तथासन्तं मुख्यत आचक्षते ऋषींस्तूपचारतः । आत्मन उदरे धृतवान् मध्ये स्थित्वा धृतवांश्च । 'प्राणस्थः प्राणनामाऽसावपानेऽपाननामकः । नेतृत्वा-च्चापनेतृत्वाद्भगवान्पुरुषोत्तम' इति च । वामो भद्रः ॥ १ ॥

वसिष्ठो वसतामुत्तमः । अभ्यपवयत पावयामास संसारात् ।

तस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तद्यदस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तस्माद्विश्वामित्रस्तस्माद्विश्वामित्र इत्याचक्षत एतमेव सन्तं तं देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तस्माद्वामदेवस्तस्माद्वामदेव इत्याचक्षत एतमेव सन्तं स इदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्च स यदिदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्च तस्मादत्रयस्तस्मादत्रय इत्याचक्षत एतमेव सन्तम् ॥ १.॥

एष उ एव बिभ्रद्वाजः प्रजा वै वाजस्ता एष बिभर्ति यद्बिभर्ति तस्माद्भरद्वाजस्तस्माद्भरद्वाज इत्याचक्षत एतमेव सन्तं तं देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तस्माद्वसिष्ठस्तस्माद्वसिष्ठ इत्याचक्षत एतमेव सन्तं स इदं सर्वमभि-प्रागाद्यदिदं किञ्च स यदिदं सर्वमभिप्रागाद्यदिदं किञ्च तस्मात्प्रगाथा-स्तस्मात्प्रगाथा इत्याचक्षत एतमेव सन्तं स इदं सर्वमभ्यपवयत यदिदं

SGDF
Sri Gargeshwari Digital Foundation

तद्विष्णवाख्यं ब्रह्म सूक्तान्यवोचतेति सूक्तनामकमभवत्। बतेत्यास्वादने। स्वात्मनैव स्वयं सुष्ठूक्तमिति वा। इदं सर्वं परिपूर्णं सन्नहमल्पप्राणिषु प्रविश्य सूक्ष्मरूपो महाप्राणिषु महारूपश्च भवानीति स भगवानब्रवीत्। तस्मात्क्षुद्रोसानीत्युक्तत्वात्क्षुद्रसूक्तास्ते क्षुद्रप्राणिषु स्थिता भगवद्रूपसङ्घाः। महानसानीत्युक्तत्वान्महासूक्ता महाप्राणिषु स्थिताः। सूक्ष्मरूपत्वादेव क्षुद्रनाम भगवतः। न तु सामर्थ्याल्पत्वात्। न हि सामर्थ्यादिगुणेषु कश्चिद्विशेषो भगवद्रूपेषु। एभ्यः प्राणिभ्यो गतवानित्यर्क्। गच्छति हि मरणकाले। 'ब्रह्मणा संपरित्यक्तो मृत इत्युच्यते बुधैरिति' हि भारते। 'म्रियमाणमिमं जीवं वासुदेवादिदेवताः। त्यक्त्वा भागेन गच्छन्ति भागतोऽनुव्रजन्ति तम्। गतैर्भागैरपि पुनर्विशेयुर्भोगसिद्धये। भोग्यलोकमनुप्राप्तं तस्मात्सम्भवदन्तरे'ति च। अर्च गतिपूजनयोः ऋ गताविति धातोः। सर्वेभ्योऽर्धेभ्यः स्थानेभ्यः शरीरेभ्यो गतवानित्यर्धर्चः। सर्वाणि भूतान्यपादि। पद गतौ। तस्मात्पदं नाम। अधिकं क्षरतीत्यक्षरम्। क्षरणं नाम सन्ततदानम्।

किञ्च स यदिदं सर्वमभ्यपवयत यदिदं किञ्च तस्मात्पावमान्यस्तस्मात्पावमान्य इत्याचक्षत एतमेव सन्तं सोऽब्रवीदहमिदं सर्वमसानि यच्च क्षुद्रं यच्च महदिति ते क्षुद्रसूक्ताश्चाभवन्महासूक्ताश्च तस्मात्क्षुद्रसूक्तास्तस्मात्क्षुद्रसूक्ता इत्याचक्षत एतमेव सन्तं सूक्तं बतावोचतेति तत्सूक्तमभवत्तस्मात्सूक्तं तस्मात्सूक्तमित्याचक्षत एतमेव सन्तमेष वा ऋगेष ह्येभ्यः सर्वेभ्यो भूतेभ्योऽर्चत स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत तस्मादृक्तस्मादृगित्याचक्षत एतमेव सन्तमेष वा अर्धर्च एष ह्येभ्यः सर्वेभ्योऽर्द्धेभ्योऽर्चत स यदेभ्यः सर्वेभ्योऽर्द्धेभ्योऽर्चत तस्मादर्धर्चस्तस्मादर्धर्च इत्याचक्षत एतमेव सन्तमेष वै पदमेष हीमानि सर्वाणि भूतानि पादि स यदिमानि सर्वाणि भूतानि पादि तस्मात्पदं तस्मात्पदमित्याचक्षत एतमेव सन्तमेष वा अक्षरमेष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति स यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति तस्मादक्षरं तस्मादक्षरमित्याचक्षत एतमेव सन्तं ता वा

SGDF
Sri Gargeshwari Digital Foundation

क्षर विनाशसन्ततदानयोरिति धातोः। एवमृषिषु शब्देषु च व्यवह्रियमाणानि सर्वाणि नामानि विष्णोरेव मुख्यतः किमु देवतानामानि। 'यो देवानां नामधा एक एव तं संप्रश्नं भुवनायन्त्यन्या'। 'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्'। 'यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यंमु सत्यमाहुः'। 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती'त्यादि श्रुतिभ्यः। न केवलमृष्यादीनां नाम भगवतः सर्वे वेदा अपि तस्यैव नामानि किमु च वेदाः। समुद्रमेघवृक्षपतनभेरीताडनादिसर्वघोषा अपि तस्यैव नामानि यथायोग्यं योजनीयानि। एकमेव व्याहरणम्। एकप्रकारमेव नाम। निर्दोषगुणपूर्तिवाचकत्वादेकप्रकारता। प्राणे नारायण एव। नारायणविषय एव व्याहारः। ऋचस्तु विशेषत इन्द्रादिनामवतो विष्णोर्गुणानल्पज्ञानामपि प्रकाशयन्तीति। प्राणे नारायण एवेति विद्यात्। उक्तं च बृहत्संहितायाम्। 'हुंकारेण सहैवाब्धिः सर्वाभिभवशक्तताम्। विष्णोर्वक्ति यतो हुं च पराभिभववाचकः। ओमिति स्वरते नित्यं वायुर्मेघेषु संस्थितः। बलवन्नादसंयुक्तो ह्यधिकोच्चत्वमस्य तु। ॐ कारस्यार्थ उद्दिष्ट उक्तार्थाधिक्यमेव च। नादो बली प्रवदति तथा भेरीध्वनिः प्रभोः। अनुदात्तस्वरूपत्वादौदार्यं वदतीशितुः। तदपेक्षयान्यनीचत्वं घंटाद्याः स्वरितात्मकाः। उच्चस्थितिमुदात्तस्तु स्वर्णचंच्वादिकः स्वरः। विष्णोर्वक्ति तथा मन्द्रः श्वासादिः प्रचयात्मकः। एकप्रकारतां विष्णोः सदाचाल्यां वदत्यपि। इत्यादयः सर्वघोषा विष्णोरेव गुणोन्नतिम्। वदन्ति किमु वेदाद्या मार्जाराद्यभिधास्तथा। मारयित्वा प्रभक्ष्यैव जरयत्यखिलं जगत्। तेन मार्जार उद्दिष्टो मोषणान्मूषको हरिः। वर्षणाद्वृष उद्दिष्टो बलनाद्वलिनामकः। तारणात्तृणनामाऽसावित्याद्येकोऽभिधीयते। सर्वनामापि भगवान्सर्व-

SGDF
Sri Gangeshwari Digital Foundation

शक्तिश्च सर्ववित्। ब्रह्मरुद्रादिजीवेभ्यो जडेभ्यः श्रिय एव तु। व्यतिरिक्तः सदानन्तसान्द्रानन्दैकरूपकः। तस्यैव मुख्यनामानि समाकृष्येतरेष्वपि। उपचारात्प्रवर्तन्ते व्यवहारप्रसिद्धये। तथैव सर्वनामानि प्रवर्तन्ते च मारुते। न तावन्मुख्यवृत्त्यैव मुख्यतोऽन्यव्यपेक्षया। मुख्यतः सर्वनामा तु विष्णुरेको न चापरः। तस्मात्प्राणादिशब्दाश्च विष्णावेव हि मुख्यतः। अन्यव्यपेक्षया वायौ मुख्यवृत्तिर्विधीयते। वायुश्च सूर्यसंस्थः संस्तपत्येतज्जगत्त्रयम्। आज्ञयैव हरेर्वायोः शक्त्या सूर्यस्तपत्ययमि'त्यादि च। न प्रसिद्धसूर्यस्येयं तापनशक्तिरिति ज्ञापयितुं प्राणो ह्येष य एष तपतीत्युक्तम्। 'प्राणाद्वा एष उदेति प्राणेऽस्तमेती'ति च श्रुतिः। प्राणशब्दश्च मुख्यतो विष्णौ प्रवर्तमानोऽपि वायावपि वर्तते। अतः सर्ववेदाद्यभिधेयत्वं वायोरप्यस्ति। 'प्राणस्य प्राणमि'ति श्रुतेरुभयोरपि प्राणशब्दः प्रसिद्ध एव। 'अयं वाव शिशुर्योऽयं मध्यमः प्राण'इति वायोर्विशेषणादुत्तमप्राणो विष्णुरिति च सिद्धम्। 'द्वावात्मानौ हि वेदेषु द्वौ प्राणौ द्वौ च चेतनौ। अज्ञानाभिभवास्पृष्टौ वायुर्नारायणश्च तौ। तदन्ये चेतनास्सर्वे प्राणाश्चात्मान एव च। अज्ञानाभिभवस्पृष्टास्तस्मात्ते ह्यधमाः श्रुताः। मध्यमो वायुरेवैक उत्तमः केवलो हरिः। सर्वशब्दोदितौ तस्मादेतौ द्वावेव नापरः। अन्ये चैव मितैः शब्दैरुच्यन्ते नामितैः क्वचित्। श्रीरप्यखिलशब्दोक्ता विष्णुवन्न तु मुख्यतः। तस्मादमितनामानावपि तौ मितनामवत्। श्रीश्च वायुश्च विष्णुस्तु मुख्योक्तेरमिताभिधः। अनन्तनामकत्वाच्च सोऽनन्तगुण ईरितः। पृथङ्नामानि यस्मात्तद्गुणानेव प्रचक्षत' इत्यादि ब्रह्माण्डे॥ २॥

एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्॥ २॥

SGDF
Sri Gangeshwari Digital Foundation

अन्यदेवताविषयत्वेन प्रतीयमाना अप्यृचो भगवद्विषया एव मुख्यतः। तदनन्तरं वायुविषयाश्च। तस्माद्बृहतीसहस्रं सर्वं मुख्यतो नारायणस्यान्नं तदाज्ञया वायोश्च। तस्मात्तच्छंसनेन भगवान्वायुश्चातिप्रीयत इति दर्शयति विश्वामित्रं ह्येतदहः शंसिष्यन्तमित्यादिना। 'वृत्रं हत्वा पुरेन्द्रस्तु महेन्द्रत्वाभिपत्तये। महाव्रतं कर्म चक्रे हौत्रं चक्रेऽत्र कौशिकः। भृगुरध्वर्युरभवद्ब्रह्म ब्रह्माऽभवत्स्वयम्। उद्गाता वायुरभवत्स्वयं नारायणः प्रभुः। सादस्यमकरोत्तत्र तदन्येऽन्येऽपि चर्त्विजः। बृहतीसहस्रं शंसिष्यन्यदा सस्मार केशवम्। वायुना सह देवेशस्तदा वासवमाविशत्। आविष्टो विष्णुनाथेन्द्रो वायुना सह कौशिकम्। शंसेत्युक्त्वा निषण्णोऽभूदिदमन्नं तवेति सः। ऋक्साहस्रं शशंसाथ यज्ञाङ्गत्वेन भक्तितः। तच्छ्रुत्वा तुष्टिमगमत्केशवो वायुसंयुतः। द्वितीयवारं शंसेति प्राह तं च जनार्दनः। प्रीत्यैव शक्रमाविष्टो विश्वामित्रः शशंस तत्। अतिप्रियत्वाद्भगवान्पुनरप्याह कौशिकम्। तृतीयं च शशंसासौ विष्णोरन्नं प्रकल्पयत्। ततोऽतितुष्टो भगवान्ददामि वरमित्यमुम्। ऊचे स प्रथमे त्वेव निजसालोक्यमीश्वरः। प्रादाद्द्वितीये सामीप्यं तृतीये पुनरेव च। वरं ददानीत्युक्तः स मुनिः प्राह जनार्दनम्। सम्यक्त्वामेव जानीयामिति मोक्षे सुखोच्चताम्। इच्छंस्तं प्राह भगवानिन्द्रस्थो वायुसंयुतः। सर्वनामाहमस्म्येक इति ज्ञानं ममोत्तमम्। यस्मात्सर्वगुणत्वं स्यात्सर्वनामत्व

विश्वामित्रं ह्येतदहः शंसिष्यन्तमिन्द्र उपनिषससाद स हान्नमित्यभिव्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे दितीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे तृतीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपेयाय

SGDF
Sri Gurgeshwari Digital Foundation

एव तु । न हि दोषाभिधायीनि विष्णोर्नामानि कानिचित् । अदोषत्वान्महाविष्णोर्न सामान्यवचांस्यपि । सर्वोत्तमगुणात्मत्वात्सदा नारायणस्य हि । सर्वोत्तमगुणानेव नामान्याचक्षते हरेः । यावज्ज्ञानेन मोक्षः स्यात्तावज्ज्ञात्वाऽपि कौशिकः । अधिकज्ञानलब्ध्यर्थं मोक्षेऽधिकसुखाप्तये । जानीयां त्वामिति प्राह तस्मा आह स केशवः । इन्द्राविष्टः प्राणनाम तथान्याश्चाभिधाः प्रभुः । प्रकृष्टानन्दरूपत्वात्प्राण इत्यभिधीयते । अहेयत्वादहंनामास्म्यसनान्मिनुतेरपि । ततो वेत्तीति च त्वं स पूर्णत्वात्सर्वनामकः । सर्वाणि बहुरूपत्वात्सर्वरूपेषु पूर्तितः । प्रभूतत्वाद्भूतनामा सर्वरूपप्रभूततः । बहुरूपः स भूतानीत्युक्तो विष्णुस्सनातनः । सर्वैश्वर्यस्वरूपत्वादेष इत्यभिधीयते । स एव सूर्यसंस्थः सन् लोकं तपति केशवः । सर्वनामवतस्तस्य ममान्नं मित्रमुच्यते । अन्नाभिमानिनी साक्षाच्छ्रीरेव प्रमदोत्तमा । साऽन्नमित्युच्यते विष्णोर्भोग्यत्वान्मित्रमेव च । दक्षभागस्थितेनत्वाद्दक्षिणं नाम सोच्यते । तस्या इनो हि विष्णुः स दक्ष भागे स्थितः सदा । यस्याभिमानिन्यन्नस्य लक्ष्मीः सा देवतोत्तमा । वैश्वामित्रं तदन्नं तु ऋक्सहस्रात्मकं मतम् । विश्वामित्रेण दृष्टत्वाद्वैश्वामित्रमितीर्यते । इन्द्राविष्टः कोऽयमिति शङ्कां परिहरन्हरिः । आदित्यसंस्थितो विष्णुस्तपन्नस्मीति चोचिवान् । त्वां जानीयामिति प्रश्नं विश्वामित्रस्य कुर्वतः । अभिप्रायद्वयं ह्यस्ति शक्राविष्टो न चापरः । हरेरिति तु मे तर्कस्तेजोबाहुल्यतोऽजनि । तस्य तर्कस्य सत्यत्वं ज्ञातव्यं प्रथमं मया । द्वितीयं यदि विष्णुः स्याज्ज्ञातव्यो मे विशेषतः । इत्यभिप्रायमस्यैव ज्ञात्वा विष्णुः सनातनः । अभिप्रायद्वयस्यापि परिहारं हरिर्ददौ । प्राणो वा अहमित्यादि नामसन्दर्भमुक्तवान् । विशेष-

---

तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागा वरं ते ददामीति स होवाच त्वामेव जानीयामिति तमिन्द्र उवाच प्राणो वा अहमस्म्यृषे प्राणस्त्वं

SGDF
Sri Gurgeshwari Digital Foundation

ज्ञानसिध्यर्थं नाम्नामुक्तिः परात्मनः। इन्द्राविष्टः कोऽयमिति शङ्कानुत्त्यर्थमेव च। तपन्नेवास्मीत्यवदत्तपन्तं वेद सोऽपि हि। नारायणं सूर्यगतं गायत्र्योपासको हि स' इति ब्रह्माण्डे। उपनिषण्णमिन्द्रं दृष्ट्वाऽपि त्वामेव जानीयामिति वरस्वीकारादिन्द्रादेव चेन्द्राविष्टो भगवानत्रोक्त इति ज्ञायते। इन्द्रं तु जानात्येव हि विश्वामित्रः। भगवन्तमपि स्वरूपत आगतं जानात्येव। विशेषज्ञानप्रार्थने प्राणो वा अहमस्म्यृष इत्यादिकमेव पूर्यते। एष तपन्नेवास्मीति व्यर्थम्। प्राणो ह्येष य एष तपतीत्युक्तत्वात्। स एतेन रूपेण सर्वा दिशोविष्टोस्मीत्यादिनाप्याविष्टस्य विष्णुत्वं किञ्चिज्ज्ञायते। तथाप्येतेनेति तृतीयात्वात्करणत्वाशङ्का भवति। तस्य म इति वैयधिकरण्यमिति च। अतो भगवन्नामानि पृथगुक्त्वाऽहं विष्णुरित्येष तपन्नेवास्मीत्युवाच। इन्द्रशरीरमेव पश्यतो विश्वामित्रस्य तर्कमात्रतो भगवानिति किञ्चिज्ज्ञानत इति ज्ञायते। नचेन्द्रस्य प्राणशब्दः सर्वशब्दाभिधेयत्वं च विद्यते। अजस्य नाभावध्येकमर्पितमित्युक्तस्य पद्मनाभस्य हि यो देवानां नामधा एक एवेति सर्वदेवाभिधानत्वमुक्तम्। इन्द्रे हीन्द्रशब्दोऽपि न मुख्यतो वर्तते। परमैश्वर्याभावात्। इन्द्रशब्दोऽपि विष्णावेव वर्तते। स हि परमेश्वरः। 'यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुरि'ति श्रुतेश्च। 'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मानि'त्यादि श्रुतेश्च। 'सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणी'त्यादिना विष्णुरेव हि तत्र प्रस्तुतः। 'नामानि विश्वाभि न सन्ति लोके यदाविरासीदनृतस्य सर्वम्। नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती'ति श्रुतिः। यो देवानां नामधा एक एवेत्यवधारणान्नान्यस्य सर्वनामत्वम्। स च विष्णोर्नान्यः। पद्मनाभत्वादेव। श्रियो वायोरपि न नारायणादिनामत्त्वम्। 'एको वासुदेवस्तत्सदृशपरौ न स्त' इति श्रुतिः।

SGDF
Sri Gargeshwari Digital Foundation

'एको नारायण आसीत्तत्समो वाधिको वा नास्ती'ति च । 'येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च । यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजा' इत्युक्तस्य समुद्रशायिन एव नारायणस्य 'तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामि'ति परब्रह्मत्वावधारणाच्च विष्णोः परं सदृशं वा नास्त्येव। अतस्तदत्रोच्यत इत्यपि न वक्तव्यम् । 'परो मात्रया तन्वा वृधान न ते महित्व-मन्वश्नुवन्ति । न ते विष्णो जायमानो न जातो देव महिम्नः परमं-तमापे'त्यादेश्च । 'नकिरिन्द्र त्वदुत्तरो न ज्यायां अस्ति वृत्रहन् । नकिरेवा यथा त्वमि'त्याद्यपि सर्वनामकत्वात्तस्यैव । 'किमेकं दैवतं लोके किं वाप्येकं परायणमि'त्यादिप्रश्नस्यापि 'परमं यो महत्तेजः परमं यो महत्तपः । परमं यो महद्ब्रह्म परमं यः परायणम् । पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् । दैवतं देवतानां च भूतानां योऽव्ययः पिता। यतः सर्वाणि भूतानि भवन्त्यादियुगागमे। यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये । तस्य लोकप्रधानस्य जगन्नाथस्य भूपते । विष्णोर्नामसहस्रमि'त्येव भारते परिहाराच्च । मेऽन्नं दक्षिण-मित्युक्तत्वाच्च विष्णुरेवेति ज्ञायते । स हि विष्णुर्दक्षिणामित्र उक्तो हरिवंशेषु धन्याश्चर्याध्याये । 'दक्षिणाभिः सहैवैतन्मदधस्ताज्जगत्सदा। धन्याश्चर्योऽहमेवैको मित्रं मे दक्षिणा रमा। इत्यवादीद्धरिर्भूपा धन्योऽसीत्युदितो मये'ति नारदवचनम्। न च बृहतीसहस्राभिमानिनीं देवीं विना चेतनमात्रस्य मुख्यमित्रत्वं युज्यते। 'मिनोति त्रायते चेति मित्रमित्यभिधीयते। तस्माद्योऽयं विजानाति स मित्रं तस्य नान्यथे'ति भारते। उक्थायुत्वाच्च विष्णुरेवात्रोक्त इत्यवगम्यते।

प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति स एतेन रूपेण सर्वा दिशो विष्टोऽस्मि तस्य मेऽन्नं मित्रं दक्षिणं तद्वैश्वामित्रमेष तपन्नेवास्मीति होवाच ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

बृहतीसहस्रं ह्युक्थनामकं मुख्यतः। 'महाव्रतनियुक्तं यदृक्सहस्रं हरेः प्रियम्। तदुक्थमिति सम्प्रोक्तं तेनेयो विष्णुरेव हि। तस्मादुक्थायुरित्युक्त ऐश्वर्यादिन्द्र उच्यते। तस्मादुक्थायुरिन्द्रेति विष्णुर्यज्ञेषु पूज्यत' इति गारुडे। विष्णुर्ह्युक्थायुरिन्द्र इत्युच्यते। यज्ञेष्वन्य इन्द्रः पृथक्चोच्यते। 'यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुरि'त्युक्त्वा 'तस्मै त्वा तेभ्यस्त्वे'ति भेदवचनाच्च। सत्य इति वायुः। सदिति प्राण इति श्रुतेः। 'सदेव सत्यमित्युक्तं सत्यो वायुरुदाहृतः। साधुत्वं सत्यता प्रोक्ता साधुर्वायुर्हि सर्वत' इति शब्दनिर्णये। प्रियधाम्न उप समीपे गमनं नाम तद्धामप्राप्तिकारणभगवत्प्रसादप्राप्तिः। अन्यथोप शब्दो व्यर्थः स्यात्। न च तदेव भगवतः प्रियं धाम विश्वामित्रेण प्राप्तम्। 'बृहतीसहस्रे प्रथमे सालोक्यं प्रददौ हरिः। द्वितीये स्वपुरप्राप्तिं तृतीयेऽन्तःपुरस्य च। तथा स्वविषयं ज्ञानं विश्वामित्रे ददौ प्रभुरि'ति च गारुडे। न चेन्द्रादिभिरैक्यमत्रोच्यते। 'प्राणस्तथाऽनुगमादि'ति च विष्णोरेव प्राणशब्दाभिधेयत्वमुक्त्वा 'न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्नि'ति वक्तुः बृहतीसहस्रं शंसितुर्विश्वामित्रस्येन्द्रेण स्वात्मोपदेशः क्रियत इति पक्षो निराकृतो हि भगवता सूत्रेषु। अध्यात्मसम्बन्धशब्देनावेशो विष्णोरिन्द्रे विवक्षितो भगवता। अन्येष्वन्तर्यामिरूपेण सम्बन्धोऽस्त्येव। अस्मिन्निन्द्रे तु विशेषावेशस्तात्कालिकः। अधिकात्मनः परमात्मनः सम्बन्धोऽध्यात्मसम्बन्धः। न हि स्वात्मना स्वस्य सम्बन्धो भवति। यद्यध्यात्ममात्मत्रोच्यत इति विवक्षितं तर्ह्यध्यात्मभूमेत्येव स्यात्सम्बन्धशब्दो व्यर्थः। तस्मादिन्द्रादिजीवेभ्यो विष्णोर्भेद एवात्र भगवतो विवक्षितः। 'शास्त्रदृष्टया तूपदेशो वामदेववदि'ति शास्तुरन्तर्यामिणो विष्णोः सर्वशरीरस्थितत्वात्सर्वनामाभिधेयत्वं चोक्तं अहं मनुरभवं सूर्यश्चेत्यादिवत्। न हि मनुसूर्यादिर्भवति वामदेवस्तेषां पक्षेऽपि। सर्वप्रवृत्तिहीनतां

SGDF
Sri Gangeshwari Digital Foundation

हि ते मोक्षं वदन्ति । अत्र चाहं भूमिमददामार्यायेत्यादिना प्रवृत्तिरेवोच्यते । न च वामदेवेन मन्वादिकर्म क्रियते कदापि । अतीतार्थश्चायं दृश्यते भूमिमददामित्यादिना । न हि पूर्वं वामदेवेन तानि कर्माणि कृतानि । भगवान्विष्णुर्हीन्द्राय भूमिमददात् । स एव च सर्वेष्वन्तर्यामित्वेन स्थित्वा नामप्रवृत्तिनिमित्तानि सर्वकर्माणि कुर्वन्नवबोधसूरिर्नियमनादिभिर्मनुसूर्यादिसर्वनामा भवति । यदि भेदस्य पूर्वमपि मिथ्यात्वमङ्गीक्रियते तर्हि भूमिदानादिसर्वकर्मणां मन्वादित्वस्यापि मिथ्यात्वादहं मनुरभवमित्यादिकं सर्वमनर्थकमेव भवति । 'जीवेश्वरभिदा चैव जीवभेदः परस्परम् । जडेश्वरभिदा चैव जडभेदस्तथैव च । जडजीवभिदा चैव सत्योऽयं भेदपञ्चकः । न कदाचिन्निवर्त्योऽयं मुक्तौ संसार एव च । य एतदन्यथाब्रूयुस्ते हि यान्त्यधरं तम'इति भविष्यत्पर्वणि । 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी । एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमि'त्यादि च । न च प्राणो वा अहमस्म्यृष इत्यादावहमस्म्यादिशब्दोऽस्मच्छब्दार्थस्थः । एष तपन्नेवास्मीत्युपरितनस्य वैयर्थ्यात् । प्राणो ह्येष य एष तपतीत्युक्तत्वात् । अतोऽहमस्मीत्यादि च भगवन्नामैव । न च जीवैक्यवचनमत्र प्रस्तुतम् । ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एवेति सर्वनामाभिधेयत्वं भगवत उक्त्वा तत्रैव प्रमाणत्वेन विश्वामित्रं ह्येतदहरित्याद्याख्यायिकोक्ता । तस्मात्सर्वान्तर्यामित्वात्सर्वगुणत्वात्सर्वशक्तित्वाच्च सर्वनामवत्त्वमेव विष्णोरुच्यते न तु सर्वस्वरूपत्वम् । उक्तं च भारते । 'स्रष्टृत्वाचैव पातृत्वान्नियमाच्च प्रकाशनात् । सर्वत्वमुक्तं विष्णोस्तु न तु सर्वस्वरूपत' इति । पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमिति पुरुषेणैवेदं सर्वं व्याप्तं यद्भूतं यच्च

SGDF
Sri Gangeshwari Digital Foundation

भव्यम् । 'आ तृणादा करीषात्सर्वं भगवानिति मिथ्यादृष्टिरेवेति' च श्रुतिः । 'हिरण्मयो ह वा अमुष्मिँल्लोके सम्भवति हिरण्मयः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद अमृतो ह वा अमुष्मिँल्लोके सम्भवत्यमृतः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद स एतेन प्रज्ञेनात्मनास्माल्लोका-दुत्क्रम्यामुष्मिन्त्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभव-दि'त्यादिना मुक्तानामपि भेदस्यैवोक्तेश्च । न हि भेदाभावे सर्वेभ्यो भूतेभ्यो ददृश इति युज्यते । न चामुक्तैः सर्वभूतैर्मुक्तो दृश्यते । एकत्वे तु ददृश इत्येतावता पूर्यते सर्वेभ्यो भूतेभ्य इति व्यर्थम् । न च तेषां पक्षे स्वयमपि स्वात्मानं पश्यति । कर्तृकर्मविरोध इति हि ते वदन्ति । अतः सर्वश्रुतिविरोध एव जीवेश्वरैक्याङ्गीकारे । न च कर्तृकर्मविरोधोनामास्तीत्यत्र किञ्चिन्मानम् । श्रुत्यनुभवसिद्धत्वाच्च स्वदर्शनादेः । न च तेषां पक्षे प्रज्ञेन सर्वज्ञेन परमात्मना सर्वकामा-वाप्तिर्नामाङ्गीक्रियते शरीरादुत्क्रान्तस्य ज्ञानिनः । तस्माद्वेदविरुद्ध-वादिन एव तेऽपि । न च शून्यवादिनः कश्चिद्विशेषो दृश्यते । न हि सर्वावाच्यं सर्वाज्ञेयं शून्यं चेति कश्चिद्विशेषः । केनापि शब्देनावाच्यस्य लक्षणायामपि प्रमाणं नास्ति । क्षीरमाधुर्यादयोऽपि तैरेव शब्दै-रुच्यन्ते । 'विशदं क्षीरमाधुर्यं स्थिरमाज्यस्य तीक्ष्णकम् । गुडस्य पनसादीनां निर्हारीत्यभिधीयत' इति शब्दनिर्णये । न च सर्वगुण-दोषक्रियाविनिर्मुक्तस्यास्तित्वमपि कुत्रचिद्दृष्टम् । अतः शून्यवादिन एव तेऽपि । अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदतीत्यादिना प्रसादादिगुणाश्च भगवतो दृश्यन्ते । यस्य ब्रह्म च क्षत्रं चोभे भवत ओदन इत्यादिना कर्माणि च । तस्मिन्देवाः श्रिताः सर्व इत्यादि-गुणाश्च तत्रैवोक्ताः । 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उत्वे ह्रदा इव स्नात्वा उत्वे ददृश्र' इति मुक्तानामपि तारतम्यं चोक्तम् । 'श्रुत्वा विष्णुं कर्णफलं प्राप्तत्वा-

SGDF
Sri Gangeshwari Digital Foundation

त्कर्णसंयुताः। अक्षण्वन्तो दर्शनाच्च विष्णोर्मुक्ताश्च ये गणाः। तारतम्यं च तेषां हि श्रुतावुदितमञ्जसा। क्षीरसागरदध्नास्तु केचित्तिष्ठन्ति मुक्तिगाः। उपस्थिता ब्रह्मवनं केचिदश्वत्थमण्डलम्। ऐरे ह्रदे केचिदपि देवा एव परं हरिम्। नागभोगशयं मुक्ता दृष्ट्वेऽधिकमोदिनः। सागरादिस्थिता विष्णुं पश्यन्ति क्वचिदेव ही'ति ब्रह्मसारे। 'यत्र ब्रह्मा पवमान छन्दस्यां ३ वाचं वदन्। ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परिस्रव'। 'यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितम्। तस्मिन्मां धेहि पवमानामृते लोके अक्षित-इन्द्रायेन्दो परिस्रव'। 'यत्र राजा वैवस्वतो यत्रावरोधनं दिवः। यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव'। 'यत्रानु कामं चरणं त्रिनाके त्रिदिवे दिवः। लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव'। 'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते। कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव'। इत्यादिना ब्रह्मसूर्ययमादीनां सर्वदेवानां दिवोदेव्या अवरोधभूतानां सर्वदेवीनां गङ्गाद्यब्देवतानां च वेदव्याख्यानं सोमयागादिकं कामचरणं च मुक्तानां भेदेनावस्थितानामुच्यते। मुक्ताश्चात्रोच्यन्त इति प्रतीयते। अमृतङ्कृधीति वचनात्। अमुक्तानां स्वे स्वे लोकेऽवस्थानं हि तेषाम्। मुक्तानां हि विष्णुलोकेऽवस्थानं देवानाम्। 'मुक्तः-प्रतिज्ञानात्'। 'सङ्कल्पादेव च तच्छ्रुतेः'। 'जगद्व्यापारवर्जम्'। 'भोगमात्रसाम्यलिङ्गाच्च'। 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्'। इत्यादि मुक्तसूत्रेभ्यश्च मुक्तानां विष्णोर्भेदो भोगादिकं च सर्वं प्रतीयते। ग्राव्णा सोमे महीयत इति ब्रह्मणोऽन्यमुक्तैः पूज्यत्वं च प्रतीयते। न च सूत्रेषु निश्चितार्थस्यौपचारिकत्वं वक्तुं युज्यते। निर्णयात्मकत्वात्तेषाम्। अतिप्रसङ्गश्चोपचारादिकल्पने। 'ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैरि'ति निश्चितानि ब्रह्मसूत्राणि। 'बहुनात्र

SGDF
Sri Gangeshwari Digital Foundation

किमुक्तेन यावच्छ्वेतं न गच्छति। योगी तावन्न मुक्तः स्यादेष शास्त्रस्य निर्णय' इति चादित्यपुराणे । न च निर्णायकानि भगवद्वाक्यान्यपहाय मानुषवाक्यैरेव तेषामुपचारत्वादिकल्प्यम्। न च भोगरहिता मुक्तिर्नामान्याऽस्तीत्यत्र किञ्चिन्मानम्। 'भुञ्जते पुरुषं प्राप्य यथा देवग्रहादयः। तथा मुक्तावुत्तमायां विष्णुमाविश्य भुञ्जते। विष्णोर्वशाश्च ते सर्वे सर्वदा दुःखवर्जिताः। न तु विष्णुगुणान्सर्वे भुञ्जते ते कदाचन। बाह्यभोगान्भुञ्जते च तारतम्येन कांश्चन। विष्णोर्देहाद्बहिश्चापि निर्गच्छन्ति यथेष्टत' इति स्कान्दे। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे'ति भगवद्वचनम् तस्मान्मुक्तैरपीज्यमानः सर्वस्माद्भिन्नः सर्वोत्तमः सर्वनामा सर्वशक्तिः सर्वगुणसम्पूर्णो नारायणः सर्ववेदादिषूच्यत इति सिद्धम् ॥ ३ ॥

यावतीभिर्ऋग्भिः शंसिताभिः षट्त्रिंशत्सहस्राण्यक्षराणि भवन्ति। यस्मात्कस्मादपि च्छन्दसस्तावत्यः शंसनीयास्तदा सम्पादितं बृहतीसहस्रं भवति। तत्र या व्यञ्जनाभिमानिदेवता सैव सर्वप्राणिनां शरीराभिमानिदेवता स्वायंभुवो मनुः। घोषाभिमानिदेवता सर्वजीवाभिमानी ब्रह्मा। ऊष्माभिमानी वायुः। 'व्यञ्जनानां शरीरस्य चाभिमानी मनुः स्मृतः। घोषाणां सर्वजीवानामभिमानी चतुर्मुखः। ऊष्माभिमानी वायुश्च प्रतिपाद्यो जनार्दनः। एतेषामधिपं विष्णुं बृहत्युक्थस्य देवताम्। उपास्यैव वसिष्ठोऽभूद्वसिष्ठः शक्र एव च। एतां विद्यां कौशिकाय भरद्वाजाय चादरात्। एतद्विद्याबलेनैव विद्याधीशेन

तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य यानि व्यञ्जनानि तच्छरीरं यो घोषः स आत्मा य ऊष्माणः स प्राण एतद्धस्म वै तद्विद्वान्वसिष्ठो वसिष्ठो बभूव तत एतन्नामधेयं लेभ एतदु हैवेन्द्रो विश्वामित्राय प्रोवाचैतदु हैवेन्द्रो भरद्वाजाय प्रोवाच तस्मात्स तेन बन्धुना यज्ञेषु हूयते

SGDF
Sri Gargeshwari Digital Foundation

बन्धुना । यज्ञेष्वाहूयते नित्यमिन्द्रो विष्णुप्रसादतः । षट्त्रिंशद्रूपवान्विष्णुर्व्यञ्जनेषु च संस्थितः । तान्येव विष्णुरूपाणि रात्रीणामपि देवताः । एकैकं च सहस्रं तद्व्यञ्जनेषु च रात्रिषु । रूपं विष्णोः स्थितं व्यूह्य षट्त्रिंशतिसहस्रधा । षटत्रिंशतिसहस्राणि स्वरगाणि हरेरपि । तान्येवाह्नां दैवतानि रूपाणि परमात्मनः । द्वासप्तति-सहस्राणि रूपाण्येवं रमापतेः । शताब्दानामहोरात्रदैवतान्युत्तमानि च । बृहतीसहस्रवर्णानामपि ध्यात्वाऽखिलान्यपि । शतवर्षहरिध्यान-फलमाप्नोति पूरुषः । एवं ज्ञात्वाऽपि सम्पाद्य बृहतीनां सहस्रकम् । ज्ञानान्नारायणस्यैव प्रकृष्टज्ञानसन्ततेः । स एव मेमयो विष्णुः प्रकृष्ट-ज्ञानरूपकः । प्राधान्यं मयशब्दोऽयं वक्ति विष्णोः सदैव हि । प्रधानोऽस्य हरिर्यस्मात्प्रज्ञारूपोऽधिदेवता । ब्रह्मामृतं च तेनायं ब्रह्मादिमय उच्यते । सर्वोत्तमस्वरूपत्वाद्विष्णुरुक्तः स देवता । ब्रह्म पूर्णगुणत्वाच्च नित्यत्वादमृतं तथा । एतादृशं तु यो विष्णुं प्रधानं वेत्ति सर्वदा । प्रज्ञादिभिर्गुणैः स्वस्मात्परेभ्यश्च सदाऽधिकम् । प्रज्ञा-देवब्रह्मामृतमयः स परिकीर्तितः । प्रज्ञादिमय एवं स भूत्वा देवान् क्रमेण च । एति मारुतपर्यन्तान्मारुतेन च केशवं । सम्पादनाच्च विद्याया अस्याः परत एव च । द्वासप्ततिसहस्राणि रूपाणि हि रमा-पतेः । बृहतीसहस्रसंस्थानि स्वरव्यञ्जनभेदतः । तान्येव पुरुषस्थानि यस्मात्पुरुषसंस्थितम् । बृहतीसहस्रं तच्छंस्यं व्यज्यते न ह्यृते नरम् । द्वासप्ततिसहस्राणि तान्येवाहर्निशासु च । विष्णुरूपाणि सूर्येऽपि त्वहोरात्रं हि सूर्यगम् । तस्माद्योऽयमहं नामा सदाऽहेयत्वहेतुतः । स

तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति व्यञ्जनैरेव रात्रीराप्नुवन्ति स्वरैरहानि तद्वा इदं बृहती-सहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य परस्तात्प्रज्ञा-मयो देवतामयो ब्रह्ममयोऽमृतमयः सम्भूय देवता अप्येति य एवं वेद

SGDF
Sri Gangeshwari Digital Foundation

एवासौ सूर्यसंस्थः साक्षान्नारायणः प्रभुः । योऽसौ सूर्यगतो विष्णुः सोऽहेयो भास्करादिभिः । एवं मनुष्यजीवेषु सूर्यादिषु च संस्थितः । एक एव परो विष्णुरिति जीवसमीपगम् । ईक्षेन्नारायणं देवं सर्वजीवेश्वरेश्वरमि'त्यैतरेयसंहितायाम् । संपन्नस्य परस्तादेवानन्तरमेव । न पुनः कर्मान्तरेण शरीरारम्भ एवंविदो भवति । प्रज्ञामयो देवतामय इत्यादिपृथक्पृथङ्मयशब्दोऽनिरुद्धादिचतुर्मूर्तीनामपि परस्परसाम्येन सर्वजीवेभ्य आधिक्यं ज्ञातव्यमिति दर्शयितुं । 'अन्तर्यामिस्वरूपेण ज्ञापयन्ननिरुद्धकः । प्रज्ञेत्युक्तो द्योतनाच्च प्रद्युम्नो देवतोदितः । अमं करोति यच्छास्त्रममृतं स्वस्मिन् पुनःपुनः । संकर्षणोऽमृतं तस्माद्वासुदेवस्तु बृंहणात् । जीवानां मुक्तिदानेन ब्रह्मेति कथितः प्रभुः । एवमेकोऽपि भगवांश्चतुर्धा समुदीरित' इत्यादि चातुरात्म्ये। सम्भूयेत्यत्र समित्युपसर्गाद्बृहतीसहस्रसंपादनानन्तरं भगवदाधिक्यं पुनराधिक्येन ज्ञायत इत्युक्तं भवति । भगवदाधिक्यमधिकं ज्ञात्वा देवता अपि क्रमेण प्राप्नोति । 'द्वासप्ततिसहस्राणां रूपाणां पर्युपासनात् । आधिक्यं ज्ञायते विष्णोर्नितरां हि पुनः पुनः । प्राप्नोति देवताश्चैव केशवान्ताः क्रमेण तु । योग्या अस्याश्च विद्याया देवा ऋषय एव चे'त्यादि सत्तत्त्वे । बृहतीसहस्रस्थितानि विष्णुरूपाणि पुरुषे स्थितानि पुरुषैरहेयत्वादहंनामकानि तान्येव सूर्ये स्थितानि यान्येव सूर्ये स्थितानि तान्यपि सूर्यादिभिरहेयत्वादहंनामकानि तदेवोक्तं नारायणाख्यं परं ब्रह्मैव सर्वदा उप समीप ईक्षेत । नात्र जीवेश्वराभेदो विवक्षितः । उप समीपे ईक्षेतेति समीपे दर्शनवचनात् । न च निरर्थकत्वमुपसर्गस्याङ्गीकर्तुं युक्तम् । न ह्यार्षेषु वेदादिषु व्याकरणनिरुक्तादिषु

तद्योहं सोऽसौ योऽसौ सोऽहं तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेत्येतदु हैवोपेक्षेतोपेक्षेत ॥ ४ ॥ इत्यैतरेयोपनिषत्सु द्वितीयारण्यके-द्वितीयोध्यायः ॥ २ ॥ २ ॥

SGDF
Sri Gangeshwari Digital Foundation

चोपसर्गाणां वैयर्थ्यमङ्गीकृतं कुत्रचित् । उक्तं च भगवता व्यासेन । 'नानर्थकः स्वरो वाऽपि वर्णो वा कुत्रचिद्भवेत् । पदं वाक्यं कुतश्च स्यान्नाल्पार्थमपि कुत्रचित् । उच्चाराद्यर्थमपि वा नास्ति किञ्चित्स्वरादिकम् । महार्थमेव सर्वं हि वेदे वा वैदिकेऽपि वे'ति । सुकरं च सर्वपदानामनर्थकत्वकल्पनं यैश्च वाक्यैरर्थवत्त्वं प्रतीयते तेषामप्यनर्थकत्वमेव स्याद्विशेषाभावात् । न च मानुषवाक्येन वेदपदानामानर्थक्यं कल्प्यम् । जीवेश्वरैक्याङ्गीकारे योऽहं सोऽसावित्येव पूर्यते पुनर्योऽसौ सोऽहमिति व्यर्थम् । न ह्यस्य तेनैक्ये तस्यानेन भेदशङ्का भवति । अस्य तस्येति भेदाङ्गीकारे नाभेदो मुख्यः । किन्तु तदधीनत्वमेवान्यस्य भवति स्नेहविशेषो वा । चैत्रो मैत्रो मैत्रश्चैत्र इतिवत् । तत्र ह्युभयस्नेहापेक्षया पुनर्वचनं युज्यते । अभ्यासत्वे ह्येकप्रकारेण प्रयोगो दृष्टः । अत्र हि प्रयोगद्वैविध्यं दृश्यते । 'एकप्रकारा बहुशो वागभ्यास इतीरितः । अर्थान्तरार्था द्विविधा प्रयुक्तेति हि निर्णय' इति गारुडे । अहंशब्दस्याहेयत्वाङ्गीकारे नराहेयत्वं सुराहेयत्वं चोच्यत इति न वैयर्थ्यम् । 'अ इति ब्रह्म तत्रागतमहमिति न वा अहमिमं विजानाति तस्योपनिषदहमि'त्यादौ विष्णोरेवाहेयत्वेनाहंनामकत्वप्रसिद्धेः । अहंशब्दस्यास्मच्छब्दार्थकत्वेऽहमिमं न जानातीति न युज्यते । तस्य भूरिति शिरो भुव इति बाहू इत्यादिनाऽक्षिसंस्थो भगवानेव ह्यहंशब्दोदितः । न हि जीवस्याक्षिणि पृथक् शिरोबाह्वादिकं विद्यते । हृदि स्थितमेव हि तस्य स्वरूपम् । जागरितेऽप्यक्ष्यादिषु विशेषसन्निहितं भवति दीपप्रकाशवत् । 'अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि' । 'गुणाद्वा लोकवदि'ति च सूत्रात् । 'आदित्ये हिरण्मयः पुरुषस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' इत्यादि सूर्ये स्थितस्य विष्णो रूपमुक्त्वाऽक्षिस्थितस्यापि तस्यैतस्य तदेव रूपमिति कथनाच्च । 'स एष एवैतस्मादर्वाञ्चो लोकास्तेषां चेष्ट' इत्यादि-

SGDF
Sri Gurgeshwari Digital Foundation

लोकाधिपत्यकथनाच्च । न हि कश्चिद्भिक्षुकः पातालाद्यधिपतिरित्यत्र किञ्चिन्मानम् । तस्माद्भगवानेवाहेयत्वादहन्नामा । 'चक्षुर्मित्रस्य वरुणस्याग्नेः' । 'जगतस्तस्थुषश्चात्मे'त्यादि जीवेभ्यो भेददर्शनाच्च । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यत' इति भारते । देवता अपि एति प्राप्नोतीत्येव चार्थः । लयश्चेद्देवतास्वप्येतीति स्यात् । न च विनाशः पुरुषार्थः । मयट्शब्दस्य भगवत्प्राधान्यार्थत्वानङ्गीकारे सम्भूय देवता अप्येतीति लयश्च युज्यते । उपासनायास्तु सम्पन्नस्य परस्तादित्युक्तत्वात्पूर्वमेव सिद्धिः । 'सर्वस्माद्भिन्नमीशेशं जीवाभेदेन यः स्मरेत् । स यात्यन्धं तमो घोरं नित्यातिशयदुःखदम् । सर्वोत्तमं तु यो विष्णुं भिन्नं जानाति सर्वतः । नित्यानन्दमसौ याति वासुदेवप्रसादत' इति चैतरेयसंहितायाम् । अतः सर्वव्यतिरिक्तः सर्वोत्तमः सर्वगुणसम्पूर्णो नारायण इति सिद्धम् । 'सर्वप्रमाणसिद्धत्वं वक्तुमाध्यायमूलतः । अध्यायान्ते द्विरुक्तिः स्यात्पूर्वोक्तस्यावधारण' इति शब्दनिर्णये ॥ ४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके द्वितीयोऽध्यायः ॥ २ ॥ २ ॥

॥ ॐ ॥ 'योऽसौ नारायणो देवः परमात्मा सनातनः । नित्याततगुणत्वात्स आत्मेत्युक्तः सदा श्रुतौ । नारायणादिरूपेण पञ्चधाऽवस्थितः सदा । सर्वस्योत्थापकत्वात्स उक्थमित्यभिधीयते । बृहतीसहस्ररूपे च स उक्थे पञ्चधा स्थितः । पञ्चभेदं हि तच्छस्त्रं तृचाशीतित्रयं च यत् । पूर्वापरं तृचाशीत्या इति पञ्चात्मकं हि तत् । प्रथमे पञ्चकाद्भागे स्थितो नारायणः स्वयम् । ऋक्र्याशीतिके पूर्वे गायत्रीच्छन्दआत्मके । वासुदेवः स्थितो नित्यमृगशीतित्रये तथा । द्वितीये बृहतीच्छन्दस्यसौ सङ्कर्षणः स्थितः । यस्यावेशबलेनैव जीवः

॥ हरिः ॐ ॥ यो ह वा आत्मानं पञ्चविधमुक्थं वेद यस्मादिदं

SGDF
Sri Gargeshwari Digital Foundation

सङ्कर्षणोऽपरः । पृथिवीं बिभर्ति सततं तत्प्रसादात्तवैभवः । तृतीयायां तृचाशीत्यामुष्णिक्छन्दसि केशवः । प्रद्युम्नरूपी सततं स्थितो यस्यैव सन्निधेः । कामः प्रद्युम्ननामाभूत्तत्प्रसादात्तवैभवः । उक्थस्यैवान्त्यभागे तु सोऽनिरुद्धो हरिः स्थितः । कामपुत्रोऽनिरुद्धाख्यां यदावेशेन लब्धवान् । एवं पञ्चात्मकं विष्णुं बृहत्युक्थस्य देवताम् । यो वेद सम्यग्वेत्ता स तानि रूपाणि वै हरेः । स्थितानि पञ्चभूतेषु पृथिव्याद्यभिधानि च । तदावेशात्पृथिव्यादिनाम भूतेषु पञ्चसु । पृथुत्वात्पृथिवीनामा भूमौ नारायणः स्थितः । बलज्ञानस्वरूपत्वाद्वायुनामा स एव च । वायौ सङ्कर्षणो नित्यं स्थित आकाशनामकः । व्याप्तत्वाद्वासुदेवस्तु सदाकाशे स्थितः प्रभुः । अनिरुद्धस्तथैवाप्सु बहुरूपो व्यवस्थितः । अन्नामा पालनान्नित्यं प्रद्युम्नो ज्योतिषि स्थितः । ज्योतिर्नामा द्योतनाच्च बहुरूपः पृथक्पृथक् । यद्यप्यस्य हरेः सर्वरूपाण्यप्यखिलैर्गुणैः । पूर्णान्यथापि चैकैकरूपेषु स पृथग्गुणैः । व्यवहारान्पृथग्देवः करोतीव हि लीलया । तस्मात्पृथग्विवास्येति नाम विष्णोः परात्मनः । सर्वत्र सर्वनाम्नोऽपि व्यवहारार्थमीर्यते । एतस्माद्धि हरेर्नित्यं जगदुत्तिष्ठति प्रभोः । मुक्तौ लये च तं याति स च सर्वाश्रयः प्रभुः । य एवं वेत्ति तं विष्णुमुपास्ते चापरोक्षतः । स मुक्तः समजातीनामाश्रयश्च भविष्यति । सजातीनामुत्तमत्वपदयोग्या हि ये सुराः । ब्रह्मेन्द्राद्यास्ते हि योग्याः साक्षादस्मिन्नुपासने । अन्येषां ज्ञानमात्रेण योग्यमाधिक्यमाप्यते । सङ्कर्षणश्च प्रद्युम्नस्तत्र भोक्तृषु संस्थितौ । भोक्तृशक्तिप्रदौ नित्यं भोक्तारौ च विशेषतः । नारायणानिरुद्धौ तौ भोग्यवस्तुषु संस्थितौ । तर्पकौ सर्वलोकानां

सर्वमुत्तिष्ठति स सम्प्रतिवित्पृथिवी वायुराकाश आपो ज्योतींषीत्येष वा आत्मोक्थं पञ्चविधमेतस्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येत्ययनं ह वै समानानां भवति य एवं वेद तस्मिन्योऽन्नं चान्नादं च वेदाहास्मिन्नन्नादो जायते भवत्यस्यान्नमापश्च पृथिवी चान्नमेतन्मयानि ह्यन्नानि भवन्ति

SGDF
Sri Gangeshwari Digital Foundation

तस्माद्भोग्यौ न चर्च्यतः । अवकाशप्रदो नित्यं वासुदेवो नभःस्थितः । एवं पञ्चात्मकं विष्णुं य उपास्ते सदैव तु । अवकाशप्रदः सोऽपि स्वजातीनां भविष्यति । भोक्ता चाप्यायकश्चैव तस्य विष्णोः प्रसादतः । ब्रह्मेन्द्राद्याः स्वजातीशपदयोग्या अमुष्य च । योग्या उपासनस्य स्युस्तदन्ये ज्ञानमात्रके । सङ्कर्षणश्च प्रद्युम्नो जङ्गमेषु व्यवस्थितौ । नारायणानिरुद्धौ तु स्थावरान्तर्गतौ प्रभू । तत्राप्याकाशगो नित्यं वासुदेवो निरञ्जनः । प्राणानां भरणान्नित्यं प्राणभृन्नाम तद्धरेः । न ह्यन्यः प्राणभर्ताऽस्ति तमृते पुरुषोत्तमम् । ओषणाच्च निधानाच्च स एवौषधिनामकः । वननीयपतित्वाच्च स एव हि वनस्पतिः । अन्ने स्थित्वा तृप्तिदत्वं तस्याद्यत्वमपीष्यते । पुरुषस्य हरेर्ये तु सदाकारेण संस्थिताः । देवगन्धर्वमर्त्याद्यास्तेषु सङ्कर्षणो हरिः । प्रद्युम्नश्च स्थितो नित्यं पुरुषाकृतिरेव तु । तौ भोक्तारौ च भोग्यानां भोजकावखिलस्य च । नारायणानिरुद्धौ तु तथान्यपशुषु स्थितौ । वृषभाश्वादिरूपेण तृप्तिदावखिलस्य च । वाहनोपानहादीनामारोढारो नरादयः । यतः सङ्कर्षणश्चैव प्रद्युम्नस्तेषु संस्थितौ । ततस्तयोर्हि सञ्चार उपरीव भविष्यति । आकाशगो वासुदेवः पञ्चमोऽत्राप्युपास्यते । वाहनादियुतो मुक्तौ भवेदेतदुपासक' इत्यैतरेयसंहितायाम् । आत्मशब्दाच्च न भूतमात्रमत्रोच्यते । न च मुख्यार्थं परित्यज्योपचारार्थोऽङ्गीकर्तव्यो विरोधाभावे । सर्वनामवत्त्वं च भगवतः श्रुत्यैवोपपादितं पूर्वत्र । वप नीरोमकरणावकाशप्रदानबीजवर्धनेऽष्विति च धातुः । तस्मिन्पञ्चके योऽन्नमन्नादं च वेद सोऽस्मिन्स्वजातियूथे विशेषेणान्नाद आजायते ह । तस्मिन्वेद अस्मिन्नाजायत इति पृथक्पृथक्पुनः पुनर्विशेषणादुपासकस्य

ज्योतिश्च वायुश्चान्नादमेताभ्यां हीदं सर्वमन्नमत्त्यावपनमाकाश आकाशे हीदं सर्वं समोप्यत आवपनं ह वै समानानां भवति य एवं वेद तस्मिन्योऽन्नं चान्नादं च वेदाहास्मिन्नन्नादो जायते भवत्यस्यान्नमोषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादमोषधिवनस्पतीन्हि प्राणभृतोऽदन्ति तेषां य

SGDF
Sri Gargeshwari Digital Foundation

स्वजातिसन्निधानाच्च स्वजाताविति ज्ञायते । 'क्षीराब्धिशयनं विष्णो रूपं यत्पुरुषाभिधम् । सङ्कर्षणश्च प्रद्युम्नस्तदाकारौ नृषु स्थितौ । नारायणानिरुद्धौ तु पश्वाकारौ पशुस्थिताविति' सत्तत्त्वे । गुणवैशेष्याभावेन वाहनादिषु चरणमात्रादधीव चरन्तीत्यादाविवशब्दः ॥ १ ॥

'आविर्भावं तारतम्याद्यो वेद परमात्मनः । स तस्यैव विशेषेण प्रीतियोगाद्भविष्यति । स्थावरं जङ्गमं चैव भूयस्त्वेनाश्नुते हरिः । आविर्भूतस्तेषु सदा सम्यक्स्वात्मानमेव च । तारतम्यात्सन्निहितं सर्वभूतेषु केशवः । वेत्त्येक एव विष्णोर्यद्विशेषावेशनं सदा । जङ्गमेषु च वृक्षेषु नैव तादृक्शिलादिषु । तस्माद्वृक्षादिषु रसश्चित्तं चलनवत्सु च । दृश्यते न शिलाद्येषु सन्निधिर्न हि तादृशी । शिलाद्येषु स्थितो विष्णुर्भारदार्ढ्यादिकारणम् । नैव चित्तादिकस्यातो वृक्षाद्या उत्तमास्ततः । विशेषोऽयं पदार्थानां न तु विष्णोः कथञ्चन । यत्र विष्णुर्गुणाधिक्यं दर्शयेद्वस्तु तद्वरम् । गुणपूर्णो हि सर्वत्र स्वयं विष्णुः सनातनः । वृक्षेभ्योऽप्यधिकं विष्णुर्जङ्गमेषु प्रकाशितः । तेभ्योऽपि पुरुषे विष्णुर्गुणाधिक्यप्रकाशक' इत्यादि च । य आत्मानं परमात्मानमाविस्तरां आविर्भावतारतम्येन वेद स तस्य विष्णोरेव । सर्वेषां

उभयतोदन्ताः पुरुषस्यानुविधा विहितास्तेऽन्नादा अन्नमितरे पशवस्तस्मात्त इतरान्पशूनधीव चरन्त्यधीव ह्यन्नेऽन्नादो भवत्यधीव ह समानानां जायते य एवं वेद ॥ १ ॥

तस्य य आत्मानमाविस्तरां वेदाश्नुते हाऽऽविर्भूय ओषधिवनस्पतयो यच्च किञ्च प्राणभृत्स आत्मानमाविस्तरां वेदौषधिवनस्पतिषु हि रसो दृश्यते चित्तं प्राणभृत्सु प्राणभृत्सु त्वेवाविस्तरामात्मा तेषु हि रसो दृश्यते न चित्तमितरेषु पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकौ त एतावन्तो भवन्ति यथाप्रज्ञं हि सम्भवाः ॥ २ ॥

SGDF
Sri Gangeshwari Digital Foundation

तदीयत्वेऽपि प्रियत्वात्तदीयत्वविशेषणम्। ओषधिवनस्पतयो यच्च किञ्च प्राणभृत्तत्सर्वं शिलादिभ्यो भूयस्त्वेन तेष्वाविर्भूतोऽश्नुते भगवान्। स एव च नारायणः सम्यक्स्वात्मानमाविस्तरां वेद। अन चेष्टायामिति धातोश्चेष्टावत्त्वमेव प्राणभृत्त्वं पश्वादीनाम्। ज्ञानानुसारेण ह्युत्पत्तयः सम्भवाः ॥ २ ॥

'योऽस्मिन् पुरुषे पश्वादिभ्य आधिक्येन सन्निहितो भगवान्स एष पुरुषः समुद्रः समुद्रिक्तोऽन्येभ्यः। स जीवो यद्यपि भगवत्प्रसादात्सर्वलोकाधिपो भवति सर्वलोकानतीत्य यत्किञ्चिदलौकिकं मोक्षाख्यमप्यश्नुते तथापि तमेनमात्मशब्देन प्रस्तुतं विष्णुमत्येव मन्यतेऽधिकमेव मन्यते स्वात्मनः सर्वस्माच्च मुक्तोऽपि न तेन साम्यं तद्भावं वा मन्यते। 'कृष्णो मुक्तैरिज्यते वीतमोहैः'। 'मुक्तानां परमा गतिः'। 'अमृतस्यैष सेतुरि'त्यादिवाक्याच्च। यद्यपि देवलोकाधिपत्यं तद्योग्यस्य विष्णुर्ददाति तदप्यश्नुवीतैव। बहुगणिकादिपरिवाररूपमशुचीदं पदमित्यादिबुद्ध्या नापह्नुवीत। एनं भगवन्तमतिमन्येतैव सर्वथा स्वतः सर्वस्माच्चाधिकमेव मन्येत। यद्यमुं लोकमश्नुते प्राप्नोति अश्नुवीत भुञ्जीत। पृथिवीलोकाधिपत्येऽपि विष्णोराधिक्यं सत्पुरुषो मन्यत इति प्रत्यक्षसिद्धत्वान्न पृथगुक्तम्। अतिशब्दाद्यद्धकिञ्चेति प्रथमोक्तो मोक्ष इति सिद्धम्। अन्तरिक्षप्राप्तेरल्पत्वान्मोक्षे स्वतः सिद्धत्वाच्चातिमन्यत इति सिद्धवचनमेव कृतम्। स्वर्गादिप्राप्तेरधिकैश्वर्याद्भगवत्समोऽहं भगवत्स्वरूप इति वा मन्तुं प्राप्तिरस्तीत्येवैनं मन्येतेति सावधारणविधिः। न च मन्यत इति काममात्रम्। मनु अवबोधन इति धातोः। न ह्यवबोध एव कामः। अन्यथा राज्यं जानन्नपि राज्यकाम इति स्यात्। न च मन्यते मन्येतेति द्विविधः प्रयोग-

---

स एष पुरुषः समुद्रः सर्वं लोकमति यद्ध किञ्चाश्नुतेऽत्येनं मन्यते यद्यन्तरिक्षलोकमश्नुतेऽत्येनं मन्यते यद्यमुं लोकमश्नुवीतात्येवैनं मन्येत

SGDF
Sri Gargeshwari Digital Foundation

स्तस्मिन्पक्षे युज्यते। न च सर्वलोकमतीत्याश्नतो मुक्तस्य मुक्तेरन्यत्र कामो विद्यते। सर्वलोकाधिकं च मुक्तिं विना नान्यत्। तस्मान्मुक्तै-रमुक्तैरपि भगवान्सर्वोत्तमत्वेन चिन्त्य इति सिद्धम्। 'पुरुषस्थ-पञ्चभूतेषु पञ्चरूपो हरिः स्थितः। प्रद्युम्नादिस्वरूपेण ज्योतिरादौ पृथक्पृथक्। स एव च पुनर्वायौ पञ्चधाऽवस्थितः प्रभुः। प्राणादिरूपे वसति ह्यनिरुद्धादिरूपवान्। अनिरुद्धः स प्रद्युम्नस्तथा सङ्कर्षणः प्रभुः। वासुदेवो नारायणः पञ्चरूप इति क्रमात्। पञ्चरूपोऽपि भगवान्यस्माद्वायौ विशेषतः। स्थितस्तेन च खादिभ्यो वायुरेव विशिष्यते। अत एव पृथिव्यादिस्वरूपा मन आदयः। देवाः प्राणाश्रिता नित्यं गच्छन्ति प्राणमन्वपि। पृथिवीमयं मनस्तत्र शेषवीन्द्रशिवेन्द्रकाः। कामानिरुद्धौ देवगुरुर्मनोदेवाः सचन्द्रकाः। श्रोत्रमाकाशरूपं च मित्रधर्मजलाधिपाः। कुबेरश्च दिशां देवाः श्रोत्रदेवा इति श्रुताः। ज्योतीरूपं तथा चक्षुश्चक्षुर्देवो रविः स्मृतः। किञ्चित्तेजोयुता वाक्च विशेषेण त्वबात्मिका। उपचीयते ततः साऽद्भिस्तदभावे च शुष्यति। तृषितस्य हि वागेव पूर्वं मन्दा प्रवर्तते। वाग्देवते ततो वह्निरुमा चापि प्रकीर्तिते। चक्षुष्ट्वमग्नेः श्रोत्रत्वं चन्द्रस्यापि सहोच्यते। स्वाहाया अपि वाक्त्वं च पर्जन्यस्य मनः-स्थितिः। द्वितीयमेतदास्थानं श्रुतिवाक्यप्रमाणतः। शेषवीन्द्र-

---

स एष पुरुषः पञ्चविधस्तस्य यदुष्णं तज्ज्योतिर्यानि खानि स आकाशोऽथ यल्लोहितं श्लेष्मा रेतस्ता आपो यच्छरीरं सा पृथिवी यः प्राणः स वायुः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानस्ता एता देवताः प्राणापानयोरेव निविष्टाश्चक्षुः श्रोत्रं मनो वागिति प्राणस्य ह्यन्वपायमेता अपियन्ति स एष वाचश्चित्तस्योत्तरोत्तरि-क्रमो यद्यज्ञः स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः स एष यज्ञानां सम्पन्नतमो यत्सोम एतस्मिन्ह्येताः पञ्च विधा अधिगम्यन्ते यत्प्राक्सवनेभ्यः सैका विधा त्रीणि सवनानि यदूर्ध्वं सा पञ्चमी ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

शिवादीनां मनआदिस्वरूपिणाम् । आश्रयो वायुरेवैकस्तस्य नारायणः स्वयम् । तस्माद्वायुवशानां हि वाक्चित्तादिस्वरूपिणाम् । देवानां क्रमवृत्तिभ्यो जाते यज्ञेऽपि केशवः । अग्निहोत्रादिके नित्यमनिरुद्धादिरूपकः । पञ्चधाऽवस्थितः सोमे पञ्चरूपो व्यवस्थितः । सवनत्रयात्पूर्वके च सवनत्रितये परे । अनिरुद्धादिरूपेण क्रमेणैव व्यवस्थितः । तमेतं परमं विष्णुं मुक्तोऽप्यत्येव मन्यते । अधिकं ह्येव तस्मात्तं मन्येतान्योऽपि सर्वदे'त्यादि च । पञ्चरूपभगवद्ध्यानार्थमेव चैतत्पञ्चविधत्वं सर्वत्रोक्तम् ॥ ३ ॥

यज्ञेषु यज्ञनामानं याज्यत्वात्पुरुषोत्तमम् । अधिरूढं तथाऽहस्सु चाहर्नामानमेव तु । अहार्यत्वाद्धि देवेषु देवं सर्वोत्तमत्वतः । एवं च सर्वनामानं सर्वेषु स्थितमच्युतम् । स्तोमादिषु च यो वेद स सम्यग्विदिति श्रुतः । य एष उक्थनामाऽसौ सर्वोत्थापनको हरिः । महांश्च परिपूर्णत्वात्सहस्रबृहतीस्थितः । अहरह्नां सयज्ञानां यज्ञो देवाधिकोऽपि सः । अनिरुद्धादिरूपेण स विष्णुः पञ्चधा स्थितः । स्तोमसामचितिच्छन्दश्शस्त्रेष्वपि पृथक्पृथक् । एकैकमेव तद्रूपमनिरुद्धादिपञ्चकम् । प्रस्तावादिष्वपि विभुः पञ्चधैव व्यवस्थितः । प्रस्तावादीन्पञ्चकृत्वस्तस्मादेव प्रकुर्वते । पञ्चरूपं तमेवैकं स्तोतुमेव पृथक्पृथक् । तत्र ये स्तोमशब्दाश्च संस्थिता बहुकोटयः । पृथक्पृथक्त्वेऽपि विष्णोः प्रादुर्भावान्प्रचक्षते । अनन्तरूपो हि हरिः शब्दोऽप्येष ह्यनन्तधा । विष्णोः सहस्रनाम्नस्तु यत्तद्रूपसहस्रकम् । बृहतीसहस्रमेतच्च तद्वक्ति हि पृथक्पृथक् । सहस्रशब्दोऽप्यमितं यतो वक्त्यमितान्यतः । नामानि विष्णोरुच्यन्ते सहस्रमिति चाख्यया । अनन्तनामवचने त्वशक्तत्वात्सहस्रकम् । नाम्नां पृथगिदं प्रोक्तमनन्त-

---

यो ह वै यज्ञे यज्ञं वेदाहन्यहर्देवेषु देवमध्यूळ्हं स संप्रतिविदेष वै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो यदेतन्महदुक्थं तदेतत्पञ्चविधं

SGDF
Sri Gargeshwari Digital Foundation

तनुवाचकम् । विष्णोरनन्तरूपाणामुक्त्या पञ्चशतद्वये । आसीत्सहस्रमित्याख्या सहस्रं मुख्यतोऽमितम् । ब्रह्म यावत्तावती वागिति वेदप्रमाणतः । सहैवानन्तरूपैस्तु सरणेन सहस्रकम् । नाम्ना सह सृतेरेव रूपाणां वा सहस्रता । बृहतीसहस्रं चैतस्माद्रूपानन्ताभिधायकम् । पृथक्पृथग्घि नामार्था ऋच एताः प्रकीर्तिताः । सर्वनामात्मकं तस्मादृक्सहस्रमिदं हरेः । सर्वरूपाण्यतो विष्णोस्संस्तुतान्यमुनैव हि । मत्स्यकूर्मक्रोडसिंहबटुभार्गवराघवाः । कृष्णबुद्धौ च कल्कीति रूपाणां दशकं हरेः । पञ्चभेदविभिन्नेन ह्यृक्सहस्रेण शंस्यते । रूपाणां पञ्चकं पूर्वमपरं पञ्चकं हरेः । प्रस्तावाद्यैरानिधनैः स्तूयते सामभक्तिभिः । तानि रूपाण्यस्य दश सर्वरूपात्मकानि च । दशनामानि चास्यैव सर्वरूपाभिधान्यपि । पञ्चकं सामभक्तीनामृक्सहस्रं च तद्वयम् । स्तावकं सर्वरूपाणामत एव रमापतेः । दशेति सर्वनामैतत्प्रथितं मुख्यतः श्रुतौ । शं रूपं भगवन्तं यद्धाम्यत्त्या समस्तशः । दशेत्यमितनाम्नां तदाख्या रूपेषु शं ददेः । सर्वनामार्थवचनात्पञ्चकद्वितयस्य च । अभूद्दशेति वै नाम तस्मादेतद्दशाखिलम् । दशैव मूलसंख्या च तद्विभेदाः शतादयः । ऋक्सहस्रमिदं तस्मादनन्तगुणमच्युतम् । अनन्तशक्तिममितरूपनामानमेव च । वक्ति च्छन्दस्त्रयं चात्र तृचाशीति त्रयात्मकम् । अशनादित्रिकं तच्च भूत्वा विष्णुमुपैति च । सर्वच्छन्दोऽभिधश्चैव सर्वदेवाभिधस्तथा । सर्वमुन्यभिधश्चैव सर्ववस्त्वभिधो हरिः । अनन्तपूर्णगुणकस्तस्माज्ज्ञेयो रमापतिः । मुख्यतोऽस्यां च विद्यायां योग्य एकश्चतुर्मुखः । एकदेशपरिज्ञाने त्वन्ये योग्याः शिवादय' इति च । त्रिविधो ह्यनिरुद्धोऽसावध्यात्मादिविभेदतः । अतस्त्रिवृदिति प्रोक्तस्तथा पञ्चदशात्मकः । प्रद्युम्नः पञ्चभूतेषु ह्यध्यात्मादिविभेदतः । लिङ्गसप्तदशस्थत्वात्तावान्सङ्कर्षणः श्रुतः ।

त्रिवृत्पञ्चदशं सप्तदशमेकविंशं पञ्चविंशमिति स्तोमतो गायत्रं रथन्तरं

SGDF
Sri Gargeshwari Digital Foundation

सप्तधातुषु संस्थः सन्नध्यात्मादिविभेदतः । एकविंशो वासुदेवो मन-आदिचतुष्टये । गुणत्रये च प्रकृतावध्यात्मादिविभेदतः । मूलरूपेण च सह पञ्चविंशात्मकः प्रभुः । नारायणस्त्वचिन्त्यात्मा स एकोऽपि ह्यनन्तधा । गायकानां त्राणतोऽसौ गायत्रमनिरुद्धकः । प्रद्युम्नो हि रथारूढस्तेन चोक्तो रथन्तरम् । बृहद्रूपो बृहन्नामा तथा सङ्कर्षणः प्रभुः । भद्रं तु वासुदेवोऽसौ भद्रमोक्षप्रदो यतः । नारायणो राजनं स्याद्राजयत्येष मोक्षिणः । गायत्री त्वनिरुद्धोऽसौ त्रिकाले गीयते यतः । उष्णिगुष्णस्वरूपत्वात्प्रद्युम्नोऽग्न्यादिसंस्थितः । स्त्रीरूपो बृहती-नामा बृहत्सङ्कर्षणः प्रभुः । वासुदेवस्तथा त्रिष्टुप् त्रिवेदैः स्तूयते यतः । नारायणस्तु स्त्रीरूपो द्विधैवासौ व्यवस्थितः । द्विपदेति ततो नाम सर्वच्छन्दोऽभिधा इमे । वनितातनवः प्रोक्ता मध्यं नारायणः प्रभुः । वासुदेवोऽस्य पुच्छं च वामदक्षौ च पक्षकौ । सङ्कर्षणश्च प्रद्युम्नः क्रमादेव प्रकीर्तितौ । अनिरुद्धः शिरश्चैव तथैकोऽपि हि पञ्चधा । प्रस्तावनामाऽनिरुद्धो रक्षन्संस्तूयते यतः । सृजन् जगच्च रमया प्रद्युम्नस्तत्र गीयते । उद्गीथनामा तेनासौ जगदुद्गमनेन वा । संहारात्प्रतिहाराख्यस्तथा सङ्कर्षणः प्रभुः । मोचयित्वा समीपं हि द्रावयेद्वासुदेवकः । तेनोपद्रवनामाऽसौ निधीयन्ते यतोऽखिलाः । मुक्ता नारायणे देवे तेनासौ निधनाभिध' इत्यादि च । स्तूयमान-त्वात्स्तोमः समत्वात्साम छन्द्यत्वाच्छन्दः ॥ ४ ॥

बृहद्भद्रं राजनमिति सामतो गायत्र्युष्णिग्बृहतीत्रिष्टुब्द्विपदेति च्छन्दस्तः शिरो दक्षिणः पक्ष उत्तरः पक्षः पुच्छमात्मेत्याख्यानं पञ्चकृत्वः प्रस्तौति पञ्चकृत्व उद्गायति पञ्चकृत्वः प्रतिहरति पञ्चकृत्व उपद्रवति पञ्चकृत्वो निधनमुपयन्ति तत्स्तोभसहस्रं भवत्येवं ह्येताः पञ्चविधा अनुशास्यन्ते यत्प्राक्तृचाशीतिभ्यः सैका विधा तिस्रस्तृचाशीतयो यदूर्ध्वं सा पञ्चमी तदेतत्सहस्रं तत्सर्वं तानि दश दशेति वै सर्वमेतावती हि संख्या दश दशतस्तच्छतं दश शतानि तत्सहस्रं तत्सर्वं तानि त्रीणि च्छन्दांसि भवन्ति त्रेधा विहितं वा इदमन्नमशनं पानं खादस्तदेतैराप्नोति ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

तदिदमुक्तप्रकारेणैव बृहतीसहस्रं सम्पन्नं भवति। तदेके नानाच्छन्दसां सहस्रं शंसितव्यमेव बृहतीसहस्रसम्पादनमविवक्षितमिति प्रतिजानते। केचित्त्रिष्टुप्सहस्रमेव शंसितव्यमिति। अनुष्टुप्सहस्रमेवेति वदन्तोऽनुष्टुप्प्रशंसात्मिकामृचं दर्शयन्ति। बीभत्सूनां जगद्भर्तुमिच्छताम्। अपां सयुजं सहैव चरन्तं चाहुः। विष्णुं हंसस्वरूपिणं अनुष्टुभं चर्चूर्यमाणं पुनःपुनर्वदन्तं परमेश्वरं ददृशुश्च। 'मेघसंस्थं हंसरूपं तं विष्णुं परमेश्वरम्। विरिञ्चिशिवपूर्वेभ्यो नृसिंहानुष्टुभं पराम्। उच्चारयन्तमर्थांश्च व्याचक्षाणं समन्ततः। ददृशुर्मुनयो दिव्या आचार्यब्रह्मशर्वयोः। एवं वायुं च ददृशुस्तत्र हंसस्वरूपिणम्। शिवादिभ्यो व्याहरन्तं तामेवानुष्टुभं परामि'त्यादि च। वागाख्यायामनुष्टुभ्युच्चार्यमाणायां हि मुनयो विष्णुं ददृशुः। अतो ब्रह्मादयोऽपि विष्णोः सकाशादनुष्टुबर्थं सर्वदा शृण्वन्तीति ज्ञायतेऽतोऽनुष्टुवेव च्छन्दसां वरेति चोक्तं भवति। 'अनुष्टुभां सहस्रं तु यः शंसीतात एव तु। भवितुं चेश्वरः स स्याद्भावो मुक्तिर्न चान्यथा। यशस्वी स प्रसिद्धः स्याच्छुभकीर्तिश्च सर्वदा। स्वच्छन्दमृत्युता च स्यात्तस्येत्याहैतरेयकः। महैतरेयो भगवांस्तन्नेत्याह रमापतिः। नानाच्छन्दःप्रशंसादिप्रमाणरहितत्वतः। परिहाराय चापूर्णमैतरेयमुने शृणु। त्वं तु मन्त्रमुदाहृत्य यस्मादेतदवोचथाः। तस्माद्वक्ष्याम्युत्तरं ते प्रियः शिष्योऽसि मे यतः। उमैव वागिति प्रोक्ता सानुष्टुबभिमानिनी। अकृत्स्ना सा ततो नैव ब्रह्मेत्युक्ता कथञ्चन।

तद्वा इदं बृहतीसहस्रं सम्पन्नं तद्धैतदेके नानाच्छन्दसां सहस्रं प्रतिजानते किमन्यत्सदन्यद्ब्रूयामेति त्रिष्टुप्सहस्रमेके जगतीसहस्रमेकेऽनुष्टुप्सहस्रमेके तदुक्तमृषिणाऽनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषेति वाचि वै तदैन्द्रं प्राणं न्यचायन्नित्येतत्तदुक्तं भवति स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुराऽऽयुषः प्रैतोरिति ह स्माहाकृत्स्नो ह्येष आत्मा यद्वागभि हि प्राणे न मनसेऽऽस्यमानो वाचा

SGDF
Sri Gargeshwari Digital Foundation

वागिन्द्रियाभिमानिन्यां न हि ब्रह्मवचः क्वचित् । वायुना प्राणरूपेण मनोरूपशिवेन च । अभ्यस्यमानोऽनुभवेत्पुमान्वाचा तु न क्वचित् । अभिमानी बृहत्यास्तु वायुरेव यतः प्रभुः । तस्मादेषा छन्दसां हि वरिष्ठा बृहती स्मृता । पूर्णो हि वायुर्देवानां तस्माद्ब्रह्मेति चोच्यते । माहात्म्याधिक्यतश्चैव बृहतीत्येव नाम तत् । अङ्गेभ्य एव सम्भूतान्यन्यच्छन्दांसि चाब्जजात् । मध्यात्तु बृहती जाता तस्मात्सा मध्यमुच्यते । पठ्यते तेन मध्ये सा च्छन्दसां प्रवरा सती । छन्दांस्यन्यान्यङ्गवत्स्युर्मध्यवद्बृहती परा । सप्तच्छन्दांसि चैवं हि प्रतिमा वैष्णवी मता । गायत्रीदेवतात्वं च लक्ष्म्या यत्राभिधीयते । बृहती देवता तत्र भगवान् पुरुषोत्तमः । आधिक्यं छन्दसां यत्र गायत्र्यास्तु विवक्षितम् । तत्र तत्पुत्रको वायुर्बृहती देवता मता । ऋचामाधिक्ययोगार्थं नाङ्गीकर्तव्यमत्र तत् । प्रधानत्वाद्बृहत्यास्तु जगत्याद्यं न युज्यते । सम्पादनाद्बृहत्यास्तु मुक्तो भवितुमीश्वरः । स्यात्प्रसिद्धः सुकीर्तिश्च च्छन्दोमृत्युर्गुणाधिकः । इति प्राह स्वयं विष्णुर्महिदासाभिधः प्रभुरि'त्यादि च । इतोऽन्यत्सत्किमित्याहुर्नानाच्छन्दस्त्ववादिनः । अन्यत्सद्रूपमित्याहुस्त्रिष्टुब्वादिन एव ते । ऐन्द्रं प्राणं परमेश्वरसहितं वायुम् । प्राणेन मनसा च । अभिद्रस्य मानोऽभ्यस्यमानः । तृतीयोऽतिशय इति सूत्रादकारस्येकारः । 'मथनान्मिथिलो जातः सहनात्सिंह उच्यते । हत्वी दस्यूनि'त्यादिवच्च । अभ्यस्यमानः अभितः क्षिप्यमाणो विषयेषु बहुशः । कृत्स्न आत्मा कृत्स्नप्रतिमा विष्णोः ।

नानुभवति बृहतीमभि संपादयेदेष वै कृत्स्न आत्मा यद्बृहती सोऽयमात्मा सर्वतः शरीरैः परिवृतस्तद्यथाऽयमात्मा सर्वतः शरीरैः परिवृत एवमेव बृहती सर्वतश्छन्दोभिः परिवृता मध्यं ह्येषामङ्गानामात्मा मध्यं छन्दसां बृहती स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरुषा(राऽऽ)युषः प्रैतोरिति ह स्माऽऽह कृत्स्नो ह्येष आत्मा यद्बृहती तस्माद्बृहतीमेवाभि सम्पादयेत् ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

'एकापि प्रतिमा विष्णोर्बृहतीच्छन्दसां वरा। अन्यच्छन्दोऽभिधा यत्स्यात्प्रतिमा मध्यमैव तदि'ति च। एवं ब्रह्मादिभिः श्रूयमाणानुष्टुबपि बृहत्या अङ्गमिति बृहत्या एवाधिक्यमुक्तं भवति ॥ ५ ॥

बृहतीसम्पादनेऽनुष्टुप्शंसनमात्रात्पञ्चविंशोत्तरशतानुष्टुबाधिक्यं च भवति। अत आधिक्याद्बृहतीसम्पादनमेव वरम्। तस्यात्रैवान्तर्भावात्। जगत्यादिकं त्वधिकत्वेऽपि बृहतीवन्माहात्म्याभावादेवोपेक्ष्यते। वाचमष्टापदीमहमित्यनुष्टुभो बृहतीसम्पादनवचनाच्च। अष्टचतुरक्षराण्यनुष्टुप्। तस्या एव बृहतीसम्पादने नव स्रक्तयो भवन्ति। ऋचा वाक् ऋग्रूपेण वागृतं स्पृष्ट्वा सत्यरूपं विष्णुं स्पृष्टा भवति। इन्द्रस्य परमेश्वरस्य विष्णोः सम्बन्धी नितरां प्रियत्वाद्यः प्राणदेवता वायुः तस्य प्रतिमारूपमिदं बृहतीसहस्रम्। स च वायुर्विष्णोर्मुख्यप्रतिमा। तस्माद्विष्णोरेव प्रतिमा बृहतीसहस्रम्। तस्मात्तस्यैव बृहतीसहस्रत्वेन सम्पन्नस्य पञ्चविंशोत्तरैकादशशतानुष्टुप्त्वेन सम्पादने बृहतीदैवतप्राणरूपाद्वायोरनुष्टुब्देवताया वाग्रूपाया उमाया उत्पत्तिः संस्मृता भवत्येवं जानतः। ततश्चोमाया अपि भगवत्प्रतिमात्वाद्विष्णुप्रतिमास्थापक एव भवत्येतत्सर्वं सम्यग्ध्यायन्। विष्णुरेव बृहत्याः प्राणस्याधिष्ठातृदेवता। प्रतिमाधिष्ठितदेवतावत्। तस्माद्बृहत्याः सकाशादनुष्टुप्सम्पादने तस्यैव विष्णोः प्रतिमान्तरं तस्मादेव निर्मितं भवति। अतएवेन्द्रात्परि तन्वं मम इत्युक्तम्। बृहतीस्थविष्णोर्बलादेव तत्संपद्यते। स हि तस्याः षट्त्रिंशदक्षरादित्वमपि नियमयति तत्प्रसादा-

तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्यैकादशानुष्टुभां शतानि भवन्ति पञ्चविंशतिश्चानुष्टुभ आत्तं वै भूयसा कनीयस्तदुक्तमृषिणा वाचमष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवन्ति नवस्रक्तिमिति बृहती संपद्यमाना नवस्रक्त्यृतस्पृशमिति सत्यं वै वागृचा स्पृष्टेन्द्रात्परि तन्वं मम इति तद्यदेवैतद्बृहतीसहस्रमनुष्टुप्सम्पन्नं भवति तस्मात्तदैन्द्रात्प्राणाद्बृहत्यै वाचानुष्टुभं तन्वं संनिर्मिमीते

SGDF
Sri Gargeshwari Digital Foundation

द्वायुश्च। वायुरेव यद्भगवन्नियतो नियमयति तस्मादिन्द्रात्परीत्य-स्यैन्द्रात्प्राणादिति व्याख्या कृता। 'यावत्सहस्रं बृहती तावच्छंसे-दनुष्टुभाम्। छन्दसां वा तदन्येषां बृहतीत्वं स्मरेत्ततः। तेन सर्वगतो विष्णुः सर्वस्मादधिकोऽर्चितः। भवेदेवं जानतस्तु कृता च प्रतिमा भवेत्। तथा वायोरपि कृता वायुर्हि प्रतिमा हरेः। तस्माद्वायुकृतं सर्वं क्रियते विष्णुनैव हि। बृहतीसहस्रं सम्पन्नमेकादशशतं पुनः। अनुष्टुभां स्मरेत्पञ्चविंशोत्तरमुदारधीः। तेन वायोरुमोत्पत्तिः सम्य-ग्ज्ञानात्स्मृता भवेत्। ततो द्वितीयप्रतिमा विष्णोरेव कृता भवेत्। विष्णुनाऽनुप्रविष्टौ यदुमा वायुश्च तद्वशावि'त्यादि च। स्रक्तयो विभागाः। 'स्रक्तिरंशो विभागश्च विदलं चेति कथ्यत' इति शब्द-निर्णये। स वा एष वाचः परमो विकारः। अकाराख्यवाग्विकारे-घूत्तमो बृहतीसहस्राख्यः। 'अकारः प्रथमं नाम विष्णोः सर्वगुणा-न्ब्रुवन्। सर्वदोषविरुद्धत्वाद्गुणानामन्यतामपि। विष्णोर्वदति जीवेभ्यो जडेभ्यश्चैव सर्वदा। अभावं चैव दोषाणां सर्वेषां केशवे वदेत्। सम्यग्वक्तृत्वतस्तस्मादकारो मुख्यनाम हि। तदर्थानेकदेशेन शब्दाः सर्वेऽपि चोचिरे। व्याख्याव्याख्येयरूपत्वं विकारत्वमिहोदितम्। विकारत्वं च नान्यत्स्यान्नित्या वेदा यतोऽखिलाः। वाचकेषु तथा विष्णोः सहस्रबृहतीमयम्। उक्थमुत्तममुद्दिष्टं व्याख्याऽकारस्य सा परा। अन्येऽपि शब्दाः सर्वेऽपि ह्यकारार्थाभिधायिनः। एषां परम-मुख्यं तत्तदेतत्पञ्चधा स्थितम्। व्याख्यानमेवाकारस्य सहैवोक्थेन सर्वशः। मितामिते स्वरस्सत्यमनृतं चेति पञ्चधा। तस्मादकार एवायं सर्ववागात्मकः श्रुतः। तस्यैव व्यक्तिरूपोऽयं सर्ववेदादि-विस्तरः। तस्मात्सर्वगुणान्विष्णोरकारो वक्ति यत्प्रभोः। तद्व्यक्त-योऽपि शब्दा ये सर्वे विष्णुगुणब्रुवाः। अकारस्य तथोपांशोरभिमानी

स वा एष वाचः परमो विकारो यदेतन्महदुक्थं तदेतत्पञ्चविधं मित-

SGDF
Sri Gangeshwari Digital Foundation

तु मारुतः । देहेन्द्रियान्तःकरणनाम्नोऽस्य द्विविधस्य च । स्थूलसूक्ष्मशरीरस्य सर्वेषामभिमानिनी । भारत्युच्चोदितस्यापि ह्यकारस्याभिमानिनी । तस्मादुच्चादुपांशुर्हि जपादिषु फलाधिकः । वायुः पतिर्हि भारत्या उपांशोर्देवता मतः । अकारस्य विकारोऽयमोङ्कार इति कथ्यते । अधिकोच्चत्वमानं हि तस्यार्थः समुदीरितः । अकारेणैव तत्सर्वमुक्तमाधिक्यवत्ततः । अधिकोच्चस्वरूपोऽसौ माता चाधिक एव हि । एकार्थत्वादकारोऽसौ नकारत्वमुपागतः । दीर्घीभूतः पुनस्तेनैवाकारेण सह स्थितः । अभाववाच्यकारस्य ह्यर्थो रेफः क्षयं वदन् । सोऽप्यकारेण सहितो दीर्घत्वं समुपागतः । अभाववाच्यकारः स एकार्थाद्गत्यभावयोः । यकारत्वं गतस्तस्मान्नो रेफस्योत्तरत्वतः । णत्वं गतो ह्यकारोऽसौ नो विरुद्धार्थवाचकः । अन्यत्वात्सर्वजीवेभ्यो जडेभ्यश्च सदैव हि । सर्वदोषोज्झितत्वाच्च सर्वतोऽप्यधिकत्वतः । निरासनाच्च दोषाणां स्वभक्तेभ्यः समन्ततः । सर्वदोषविरुद्धोरुगुणपूर्णस्वरूपतः । नारायण इति प्रोक्तो ह्यकारार्थोऽयमेव हि । तस्मादकारबीजेयं विष्णोर्नारायणाभिधा । प्रणवश्च ततोऽकारः प्रधानं नाम चक्रिणः । अकारनामा नान्योऽस्ति तमृते पुरुषोत्तमम् । ब्रह्मरुद्रादिनामानि ब्रह्मादिष्वप्यमुख्यतः । वर्तन्ते न त्वकारोऽयं वर्तते केशवं विना । नारायणादिनामानि नृणां नामक्रियास्वपि । विहितान्यकारो नैवायं विहितस्तमृते प्रभुम् । वायुर्ब्रह्मापि चाकारदेवते न तु नामिनौ । यथा वेदाभिधेयोऽन्यो वेदाख्या देवता परा । एवं नामाभिमानी तु वायुर्वाच्यो जनार्दनः । तस्मादइति नामैतद्विष्णोः केवलमेव हि । विशेषतोऽस्य व्याख्यानं बृहतीनां सहस्रकम् । तस्मात्प्रीतो भवेद्विष्णुः शंसनादस्य सर्वदा । तस्माद्यज्ञेऽपि वा शंसेदयज्ञेऽपि रहः पुमान् ।

ममितं स्वरः सत्यानृते इत्यृग्गाथा कुंब्या तन्मितं यजुर्निगदो वृथा वाक्तदमितं सामाथो यः कश्च गेष्णः स स्वर ओमिति सत्यं नेत्यनृतं

SGDF
Sri Gangeshwari Digital Foundation

ध्यात्वा नारायणं देवं विष्णोरन्नं हि तत्परमि'त्यादि ब्रह्मसारे। परमविकारेण सह विकारमात्रस्यापि प्रस्तुतत्वात्तदेतत्पञ्चविधमिति परामर्शः। 'स्वराणां नियमो यत्र ह्यृचो नामैव ताः स्मृताः। अन्यामिताक्षरा यास्तु ता गाथाः परिकीर्तिताः। खण्डवाक्यानि कुम्भ्याः स्युरसमानि परस्परम्। यज्ञाङ्गं यजुरुद्दिष्टं निगदं वाक्यमात्रकमि'त्यादि शब्दनिर्णये। अकारार्थत्वान्नकारस्य किञ्चिन्मूलमिव। तस्मान्मूलत्वादकारार्थोऽपि ज्ञेय एव। नायोग्यानां सम्यग्वाच्य इति स्वल्प एव प्रकाशितोऽस्माभिः। वाच उद्वर्तनाशक्तेः स्वयमेवोद्वर्तते। यद्धि देवतासु करोति तदात्मन्यापतति। तस्माद्द्रव्यदानं ज्ञानदानं वा काले पात्राद्यनुसारेणैव कुर्यात्। अकारस्योङ्कारता त्वकारलोपेनैव जातेति सत्यमोङ्कारः। अकारस्यादौ स्थितत्वेन च यथार्थरूपत्वात्। उकारादिविकारसहितत्वात्पुष्पफलात्मकश्च। अकारस्यार्थरूपः सन्नेव च भगवांस्तमेवोङ्कारो वक्ति। अतश्च सत्यमोङ्कारः। यमर्थमकारो वक्ति तमेव वक्तीति। नकारस्त्वच्छिरस्कत्वान्मूलभूतस्याकारस्यान्ते स्थितिरूपत्वादयथास्थितेरसत्यरूपः। तथाप्यकारस्य चैकार्थत्वान्मूल-

---

तदेतत्पुष्पं फलं वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद्दयेत त्वेनेन पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमों कुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादथैतत्पूर्णमभ्यात्मं यन्नेति स यत्सर्वन्नेति ब्रूयात्पापिकाऽस्य कीर्तिर्जायेत सैनं तत्रैव हन्यात्तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोति तयोर्मिथुनात्प्रजायते भूयान् भवति यो वै तां वाचं वेद यस्या एष विकारः स संप्रतिविदकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति तस्यै यदुपांशु स प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तिर इव तिर इव ह्यशरीरोरमशरीरो हि प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरम्॥ ६॥

SGDF
Sri Gargeshwari Digital Foundation

भूतश्च । तस्मादकारस्यैतद्बृथावागादिकमपि व्याख्यानम् । तस्माद्विजानतः सर्वमपि भगवन्नामैव ॥ ६ ॥

विद्यान्तरोपदेशार्थं तद्वा इदं बृहतीसहस्रमिति पुनः पुनः परामर्शः । तदिदं बृहतीसहस्रं तद्यशस्तस्य नारायणस्य यशः । यस्य नारायणस्यैतद्यशः स भगवानेवेन्द्रनामा । स हि यत्प्रथमत इन्द्रो बभूव स्वेच्छया यज्ञनामा । तस्मात्तमेव वेदा इन्द्रशब्देन वदन्ति मुख्यतः । इदि परमैश्वर्य इति धातोश्च तस्यैव हि परमैश्वर्यम् । अन्येषां तु द्वादशानां तेन दत्तमेवेन्द्रत्वं न तु मुख्यतः । अतो विष्णावेवेन्द्रशब्दं प्रयुङ्क्ते श्रुतिः । 'मत्सि सोमं वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुमि'ति । न चेन्द्रं विष्णुं चेति पृथगन्वयः क्रियते । तद्वा वरुणादिषु पृथक्पृथङ्मत्सिशब्ददर्शनादत्रापि पृथङ्मत्सिशब्दो दृश्येत । न हि सर्वेषां पृथङ्मत्सिशब्ददर्शने एकस्यैवान्यथात्वं युज्यते । न चात्र द्वित्वगमकं चकारादिकं विद्यते । तस्मात्प्रातर्भगं पूषणं ब्रह्मणस्पतिमित्याद्यप्येकस्यैव विष्णोर्विशेषणम् । यत्र चैवं भूतेष्वेकत्वे विरोधो दृश्यते तत्र तेनैव विरोधेन द्वित्वं भवति । अन्यथैकत्वमेव । 'यो देवानां नामधा एक एवे'ति चोक्तम् । बहुरूपत्वाद्बहुवचनं च विष्णोरेव युज्यते । तस्मान्मुख्यतो विष्णावेवेन्द्रादिशब्दा अन्येषामुपचारतः । मत्सि महामिन्द्रमिन्दो मदायेत्यन्येन्द्रस्य पृथगुक्तेश्च मत्सीन्द्रमिन्दो पवमानेति पूर्वोक्त इन्द्रो विष्णुरेवेति सिद्धम् । महत्त्वं च तस्यादितिपुत्रत्वेऽग्रजत्वमात्रं न तु सामर्थ्यतः । मह पूजायामिति धातोः । पूज्यो ह्यग्रजो भवति । 'आयो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः । वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजदि'तीन्द्रस्य परमदैवं

तद्वा इदं बृहतीसहस्रं संपन्नं तद्यशः स इंद्रः स भूतानामधिपतिः स य एवमेतमिन्द्रं भूतानामधिपतिं वेद विस्रसा हैवास्माल्लोकात्प्रैतीति

SGDF
Sri Gargeshwari Digital Foundation

जनको यज्ञभागादिप्रदाता विष्णुरेव हि श्रूयते । इन्द्रश्च यजमानः । तस्मात्तत्प्रसादादवताराग्रजत्वमेव तस्य महत्त्वम् । अन्येन्द्रो ह्यहं प्रथमः पिबेयमहं प्रथमः पिबेयमिति वायुना विवदमान आजौ पराजितो वायुं प्रसादयित्वा चतुर्थे वायुना सह ग्रहमाप । विष्णुस्तु ऋतुं सचन्त मारुतस्य वेधस इति वायोरपि विधाता श्रूयते । डुधाञ् धारण-पोषणयोरिति धातोर्विशेषेण धारणपोषणकर्ता हि वेधाः । तस्माद्भगवत एवैतद्यशो बृहदुक्थादिकम् । 'ऋक्सहस्रात्मकं विष्णोर्यश इन्द्राभिधस्य हि । इन्द्रो हि प्रथमो विष्णुर्यज्ञनामा जगत्पतिः । तत्प्रसादा-दथेन्द्रत्वं द्वादशान्ये प्रपेदिरे । पुरन्दरस्त्वेक एव वासुदेवप्रसादतः । द्विवारमिन्द्रतामाप तस्माद्द्वादश ते परे । अग्रजत्वाददित्यां तु महेन्द्रो नाम चाभवत् । महाव्रतं कर्म कृत्वा चैव नाम्ना महेन्द्रकः । महत्त्वं मुख्यतो विष्णोर्न ह्यन्यस्य कदाचन । एवं यो वेद तं विष्णुं विस्रस्तो बन्धतोऽखिलात् । अस्माल्लोकाद्धरेर्लोकमेति नास्त्यत्र संशयः । इत्याह भगवान्विष्णुर्महिदासस्वरूपकः । श्वेतद्वीपादिकात्प्राप्य स इन्द्राख्यो हरिः स्वयम् । महिदासाभिधो भूत्वा लोकेष्वेषु विराजति । तत्र पृच्छन्ति केचित्तु यद्येष भगवान्हरिः । महिदासादिरूपेण भूमिष्ठो रमते प्रभुः । तदा यदा स्त्रिया विष्णू रमते नित्यसत्सुखः । कया स्त्रिया रतिं कुर्यान्न ह्यन्यरतिरच्युतः । स्त्रीरूपे तत्स्वयं स्वस्मिन्रमतेऽ-सावितीदृशम् । वाच्यं तत्र च भूमिष्ठरूपेण तु दिवि स्थितम् । स्त्रीरूपं किमसौ गच्छेदथ यद्येवमत्र च । स्त्रीरूपं पृथिवी संस्थं केन रूपेण संव्रजेत् । न ह्यन्यगम्यो भगवांस्त्रीरूपोऽपि जनार्दनः । इति पृष्टः स्वशिष्यैः स महिदासोऽवदद्धरिः । स्त्रीषु यल्लोहितं लोके

ह स्माऽऽह महिदास ऐतरेयः प्रेत्येंद्रो भूत्वैषु लोकेषु राजति तदाहुर्यदनेन रूपेणामुं लोकमभिसंभवतीँ३ अथ केन रूपेणेमं लोकमाभवतीँ३ तद्यदेत-त्स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्न बीभत्सेताथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात्तस्मान्न बीभत्सेत सोयमात्मेममात्मान-

SGDF
Sri Gurgeshwari Digital Foundation

तत्राग्निस्थो जनार्दनः । स्त्रीरूपः सोऽग्निनामैव ज्वलज्ज्वालासमप्रभः । तस्माद्विष्णोः सन्निधानाद्भर्ता भार्याशरीरगात् । न बीभत्सेतैव रक्ता-त्तथा पुंरेतसि स्थितः । आदित्ये संस्थितो विष्णुरादेरादित्यनामकः । तस्मान्न रेतसो भार्या बीभत्सेत पतिस्थितात् । पुंरूपो भगवान्विष्णू रेतसिस्थो द्युमत्प्रभः । तस्माद्यद्भूमिगं विष्णोः स्त्रीरूपं तत्स्वयं हरिः । प्रादुर्भावगतो दद्याद्दिवि स्थितपुमात्मनः । सूर्यगस्य तथा पुंसो रेतसिस्थस्य चात्मनः । देवीषु यल्लोहितगं स्त्रीरूपं परमात्मनः । तत्स सूर्यगतो विष्णुः पुंरेतःस्थस्य चात्मनः । दद्याद्भूमिगतस्यैव रूप-द्वयमिदं ततः । परस्परं सम्भवति विष्णोर्नित्यसुखात्मकम् । प्रादु-र्भावस्थितं रूपं यच्च भूमौ पुमात्मकम् । विष्णोस्तदपि देवीषु स्थितस्त्रीरूपकात्मना । एवमन्योऽन्यतो विष्णू रतः स्वस्मिन्न चान्यतः । रमया रममाणोऽपि तत्स्थेनैव स्त्रियात्मना । रमते नान्यतः क्वापि रतिर्विष्णोः सुखात्मनः । रमया रमणं तस्माद्रमाया रतिपात्रता । नैवास्या रतिदातृत्वं विष्णोर्न ह्यन्यतो रतिरि'त्यादि च । स एव महिदास इन्द्रनामा प्राप्येमं लोकमत्र भूत्वा प्रादुर्भूय मनुष्यदृष्टिगोचरतां प्राप्यैषु लोकेषु राजति । नात्र प्रेत्यशब्दो मरणवाची । किन्तु 'प्रेतां यज्ञस्य शम्भुवे'त्यादिवत्प्राप्तिवाच्येव । न हि मृतः पुनरेषु लोकेष्वेव राजति । न च यशोमात्रराजनेन स्वस्य राजनं भवति । भिन्नपदार्थत्वात् । यद्वा एति च प्रेति चेत्यादौ प्राप्त्यर्थेऽपि वेदेषु प्रसिद्धत्वाच्च । 'लक्ष्मणः प्रेत्य सुग्रीवं बभाषे रामचोदितमि'ति स्कान्दे । यदनेन रूपेणामुं लोकमभिसंभवति । अनेन महिदासादिरूपेणामुं लोकं दिविष्ठं स्वरूपम् । लोक्यत इति स्वरूपवाची लोकशब्दः । 'आत्मानमेव लोकमुपासीते'तिवत् । यच्छब्दः किंशब्दार्थे । अनेन रूपेण तद्रूपमभिसंभवति किम् ? । उभयोरपि परिहारदर्शनादस्यापि प्रश्नत्व-मवगम्यते । 'यतश्चोदेति सूर्य' इत्यादिवत् । रंगस्तु प्रश्नविषयस्य

SGDF
Sri Gargeshwari Digital Foundation

दुरवगमत्वं प्रकाशयति । 'दुर्गमे प्रश्नविषये प्रश्नो रंगयुतो भवेदि'ति शब्दनिर्णये । केन रूपेणेमं लोकमाभवति । केन स्वरूपेण भूमिष्ठनात्मन एव स्त्रीरूपेण विष्णुः संबध्यते । सोऽयं महिदासादि-प्रादुर्भावरूप इदं भूमिष्ठस्त्रीरूपं लोहितगतं च स्वकीयमेव रूपममुष्मै दिविष्ठाय स्वपुरुषरूपाय प्रयच्छति देवरेतःस्थिताय च । देवी लोहितस्थितमात्मनः स्त्रीरूपं महिदासादिरूपेभ्यो मानुषरेतःस्थित-रूपेभ्यश्च दिविष्ठैश्च विष्ण्वादिस्वरूपैः प्रयच्छति च । तानि भूमिष्ठत्वेन दिविष्ठत्वेन द्विविधत्वात्तावित्युच्यन्ते । अग्नेस्तद्रूपमग्निनाम्नो विष्णोः प्रतिमा तत्सन्निधानात् । एवमादित्यनाम्नो विष्णोः । न ह्यग्न्यादि-स्वरूपमेव लोहितादि । न च लौकिकस्त्रीपुरुषसंबंधमात्रमत्रोच्यते । अप्रस्तुतत्वात्तस्य । भगवानेव ह्यत्र प्रस्तुतः । असावात्मेत्यात्मशब्दाच्च भगवानेवेति ज्ञायते । 'आत्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते । गुणपूर्त्यभिधायी स नान्यस्य गुणपूर्णता । अमुख्यात्मान एवातो ब्रह्माद्याः सर्व एव ही'त्यादि च ब्रह्माण्डे । यदक्षरं पंचविधं समेति । सत्यस्य सत्यमनु यत्र युज्यत इत्यादिनोक्तार्थविषयोदाहृतैः श्लोकैरपि भगवत एव स्वरूपाणां परस्परयोगस्योक्तत्वात् । गायत्र्युष्णिग्बृहती-त्यादिना भगवत एव पञ्चविधस्य स्त्रीरूपस्य महिदासादिपञ्चपुंरूपाणां च प्रस्तुतत्वाच्च ॥ ७ ॥

यन्नारायणादिरूपेण पञ्चविधमक्षरं परं ब्रह्म तत्स्वस्मिन्नेव स्त्रीपुंरूपेण समेति । स्त्रीपुंरूपेण युजो देवा अश्वरूपेण रथे युक्ताः संतो यन्नारायणाख्यं परं ब्रह्माभिसंवहन्ति । तदेतत्सत्यस्य सत्यं नारायणाख्यं ब्रह्म यत्रानुयुज्यते यस्मिंत्स्वरूप एव स्त्रीपुंरूपेण युज्यते ।

ममुष्मा आत्मने संप्रयच्छत्यसावात्माऽमुमात्मानमिममस्मा आत्मने संप्रयच्छति तावन्योन्यमभिसंभवतोऽनेनाह रूपेणामुं लोकमभिसंभवत्य-मुनो रूपेणेमम् लोकमाभवति ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

तत्र तस्मिन्नेव परे ब्रह्मणि नारायणाख्ये सर्वदेवा एकीभवन्ति मुक्ताः सन्तो मिलिता भवन्ति। नायमेकीभावो नाम स्वरूपैक्यम्। किंत्वेकस्थाने वासोऽत्यनुकूलचित्तता च। 'एकीभूय नृपाः सर्वे ववृषुः पाण्डवं शरैः'। 'एकीभूता तु सा सेना पाण्डवानभ्यवर्तते'-त्यादिवत्। न चैकीभावशब्दः स्वरूपैकत्वविषये प्रयुज्यमानः कुत्रचिद्दृष्टः। एकः पुरुषोऽपि यदा द्विधा भूत्वा एकीभवतीत्युच्यते तदाऽपि स्थानैक्यमेव। स्वरूपैक्यस्य पूर्वमेव सिद्धत्वात्। नचाज्ञात एकत्वे पुनर्ज्ञाते ऐक्यं प्राप्त इति प्रयोगो दृश्यते। किन्तु ज्ञात इत्येव प्रयुज्यते। तस्माद्भावसहित एकशब्दो न स्वरूपवाची। न हि पूर्वं भिन्नस्य पश्चात्स्वरूपैक्यं भवति किन्तु संसर्ग एव भवति। तस्मादत्रापि संसर्ग एव विवक्षितः। यदक्षरं पञ्चविधं समेतीत्युक्तस्य सत्यस्य सत्यमनु यत्र युज्यत इति परामर्शं कृत्वा तत्र देवाः सर्व एकं भवन्तीत्युच्यते तस्मान्न पुनरुक्तिः। यस्मादक्षरान्नारायणाख्यात्स स्वयमेव भगवान्प्रादुर्भावरूपी स्त्रीपुंरूपेण युक्त आगच्छति। तात्पर्यार्थे तस्यैवार्थस्य पुनरभ्यासः। वियूय विचार्य नामायत्तान्येव नामार्थभूतान्येव विष्णोर्माहात्म्यादीन्यन्वविन्दन्। ततश्चाधिकं समतृप्यन्। श्रृते परिपक्के सति ज्ञाने। यस्मिन्विष्णौ नामानि ज्ञात्वा तस्मिन् ज्ञाने परिपक्के समतृप्यन् तस्मिन्नेव देवाः सर्वयुजो भवन्तीत्यवधारणार्थे पुनर्वचनम्। सर्वयुजो भवन्ति मनोवाक्कर्मभिस्तत्रैव युक्ता भवन्ति। 'अर्थतः कठिनं क्रूरमुल्बणं श्रवणाप्रियमि'ति शब्दनिर्णये। अस्त्री

तत्रैते श्लोकाः यदक्षरं पंचविधं समेति युजो युक्ता अभियत्संवहन्ति। सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्वे एकं भवन्ति॥ यदक्षरादक्षरमेति युक्तं युजो युक्ता अभि यत्संवहन्ति। सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्वे एकं भवन्ति॥ यद्वाच ओमिति यच्च नेति यच्चास्याः क्रूरं यदु चोल्बणिष्णु। तद्वियूया कवयोऽन्वविंदन्नामायत्ता समतृप्यंच्छृतेऽधि॥ यस्मिन्नामा समतृप्यंच्छृतेऽधि तत्र देवाः सर्वयुजो भवन्ति। तेन पाप्मानमपहत्य ब्रह्मणा

SGDF
Sri Gangeshwari Digital Foundation

पुमान्ब्रुवन् अस्त्री पुमांसं ब्रुवन् सप्तसु प्रथमेति सूत्रात्। स्वातन्त्र्ये विभक्तिव्यत्यय इति च। स्वतन्त्रो हि भगवान् तत्प्रेरित एव तं वदतीत्यभिप्रायः। वदन्वदति वदन्नेव वदति। वदन्नेव न वदति। भवत्येव हि भगवान्स्त्रीरूपः पुंरूपश्च। तस्माद्वदत्येव। अप्रसिद्धत्वान्न वदति च। 'स्त्रीरूपश्चैव पुंरूपो यस्मान्नारायणः स्थितः पुमांस्त्री चेति वाच्योऽतो वैलक्षण्यान्न चोच्यते। विष्णोर्नपुंसकाकारो नैवास्ति क्वचन प्रभोः। तथाप्यरागाकृष्टत्वात्तच्छब्दैरपि कथ्यत' इति गारुडे। 'नारायणादिरूपेण पञ्चधैव हरिः स्थितः। तन्नामभिश्च स्त्रीरूपैः समेति स्वैः स केशवः। यत्स्यन्दनं वहन्त्येते देवा भार्यासमन्विताः। अधिदैवे तथाऽध्यात्मे जीवदेहात्मकं रथं। स सूर्यः सूर्यभार्या च चक्षुर्द्वयसमाश्रितौ। वहतोऽश्वात्मकौ देहं नारायणरथात्मकं। सोमश्च रोहिणी चैव दक्षवामश्रुतिस्थितौ। उभयोः पक्षयोः स्थित्वा वहतोऽश्वात्मकौ तयोः। उद्धारणार्थमेतेषामुमा वाचि समास्थिता। नागाकारैव रश्मित्वमगमद्वैष्णवे रथे। मनःस्थितः शिवश्चात्र मनोनामा महाबलः। अभवत्सारथिर्विष्णोर्विष्णुर्वायुश्च तं रथम्। प्रकृष्टानंदरूपत्वात्प्राणाख्यावधितिष्ठतः। तावेव चाश्विनामानौ हयास्यौ जगदीश्वरावि'त्यादि गारुडे। 'तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमि'ति च श्रुतिः। 'सर्वसाधुगुणत्वात्तु वायुः सत्य इतीर्यते। तस्यापि सत्यतादाता साधुपूर्णगुणो हरिः। सत्यस्य सत्य एतस्मात्स्त्रीपुंरूपः स केशवः। यस्मिन्स्वात्मनि युक्तः स रमते स्त्रीपुमात्मना। मुनिगन्धर्वपित्राद्यैर्न तत्प्राप्यं कथञ्चन। आप्नुवन्ति सुराः सर्वे तद्रूपं जाज्वलत्सदा। अर्धनारीपुमाकारं तस्य वामस्थितानि च। स्त्रीरूपाणि तु सर्वाणि विष्णोरत्यद्भुतानि च। विष्णोर्यानि

स्वर्गं लोकमप्येति विद्वान्। नैनं वाचा स्त्रियं ब्रुवन्नैनमस्त्रीपुमान्ब्रुवन्। पुमांसं न ब्रुवन्नेनं वदन्वदति कश्चन॥ अ इति ब्रह्म तत्राऽऽगतमहमिति॥

SGDF
Sri Gargeshwari Digital Foundation

तु पुंरूपाण्यास्थितान्यस्य दक्षिणे । तान्यस्यैव तु रूपाणि युज्यन्तेऽत्र परस्परम् । एष नारायणो देवो ह्यर्धनारीपुमात्मकः । सर्वे देवास्सभार्याश्च तं प्राप्य पुरुषोत्तमम् । एकीभावं स्वभार्याभिरर्धनारीपुमात्मना । प्राप्यैवोपासते विष्णुं मुक्ताः संसारसागरात् । मोदन्ते च रमन्ते च विभागं चेच्छयाऽऽमुयुः । बहुधा च भवन्त्येते स्त्रीपुमात्मपृथक्त्वतः । प्रसादाद्वासुदेवस्य भागः स्त्रीपुंस्वरूपिणः । तेनैव नियता नित्यं तद्वशास्तत्परायणाः । रमन्ते नान्यगम्योऽसौ देशो विष्णोः परात्मनः । स्त्रीपुंरूपेण युक्तं तद्विष्ण्वाख्यं परमक्षरं । अक्षरादेव परमात्पुंसो नारायणाभिधात् । आगच्छन्ति तदैते च देवा भार्यासमन्विताः । वहन्त्यश्वादिरूपेण रथस्थं परमं वपुः । तत्सर्वदेवैः प्राप्यं च नान्यैः कथमपि क्वचित् । मितादिपश्वरूपं यद्वाक्यं लोकेऽथवा श्रुतौ । नारायणस्य नामैतदिति जानन्ति देवताः । मनोवाक्कर्मभिस्तस्माद्योग-माप्स्यन्ति तत्र ते । सर्वशब्दान्हरौ नेतुं कस्य देवानृते बलं । वाय्वन्तास्तारतम्येन विष्णुनामार्थवेदिनः । सम्यग्वेत्ता मारुतोऽत्र तस्मान्मुक्तेभ्य एव च । सुरेभ्योऽधिकमानन्दं नित्यं भुंक्ते हरेरन्वि'-त्याद्यर्धनारीनारायणतन्त्रे । एवं सर्वे शब्दा भगवद्वाचका इत्युक्त्वा अकारो विशेषतो नारायणवाचक इत्याह । अ इति ब्रह्मेति । 'इतिशब्दोऽभिधानान्ते यत्र वैशेषिकं हि तत् । नाम स्यादिति मे साक्षान्निर्णयः समुदाहृत' इति शब्दनिर्णये। तत्रागतमहमिति । यस्माद-इत्ययं शब्दः प्रस्तुतस्य भावं विरोधिनमन्यं च वदति तस्मात्प्रत्यक्षत्वा-ज्जीवजडात्मकस्य जगत एवानुक्तावपि प्रस्तुतरूपत्वात्तदन्यस्तद्विरोधी तत्र दृश्यमानदोषवर्जितश्चाकारशब्दार्थ इति सिद्ध्यति । मनसि प्रस्तुतत्वादवचनेऽपि प्रस्तुतमेवेदं सर्वं । दृष्टसम्बन्धित्वाददृष्टं सर्वमपि प्रस्तुतं भवति । भगवांस्त्वइति पृथग्विवक्षितत्वादेव न प्रस्तुतसमुदाये । न च शून्यस्याशब्दार्थता । शून्याङ्गीकारे ह्यकारस्याभावताख्य एक

SGDF
Sri Gangeshwari Digital Foundation

एवार्थ इति सिद्ध्यति । विष्णोरंगीकारे त्वभावताऽन्यता विरोधितेति त्रयोऽप्यर्थाः सम्यगेव सिद्ध्यन्ति । तस्मादकारस्य भगवानेव मुख्यार्थो न शून्यं । एकदेशार्थत्वात् । तस्मादमुख्यार्थत्वादन्ययुक्तेनैवाकारेणाभाव इति तदुच्यते न त्व इत्येव केनचित्क्वचित् । न च तथा प्रयोगोऽस्ति । तस्मात्पारतन्त्र्याल्पगुणत्वादिसर्ववस्तुस्वभावविरुद्धस्वभावं स्वतन्त्रं पूर्णगुणं सर्वजीवजडेभ्योऽन्यदज्ञानदुःखाल्पत्वपारतन्त्र्योत्पत्तिनाशादिसर्वदोषविवर्जितं ब्रह्मैवाशब्दार्थः । पूर्णं हि ब्रह्मशब्दस्यार्थः । न च दोषयुक्तस्य पूर्णता । न च जीवजडाद्यपूर्णवस्त्वभिन्नस्य पूर्णत्वं भवति । तस्मादकारशब्दार्थ एव ब्रह्मशब्दार्थः । तदेतदुक्तमः इति ब्रह्मेति । अः इति पृथक्त्वेन वचनं तत्सममधिकं वा किमपि नास्तीति दर्शयितुम् । 'विवृतावपि सर्गः स्यात्संहितायां च यत्र हि । समानोत्तमहीनत्वमुच्यते वस्तुनोऽञ्जसे'ति शब्दनिर्णये । अः इति ब्रह्म पूर्णं वस्तूच्यते । तत्रागतमहमिति । तत्राकारस्य पूर्णवाचित्वेऽहमेव सोऽकारवाच्य इत्याह महिदासरूपो भगवान्नारायणः । अहमेक एव परिपूर्णः । अन्येषां सर्वेषां मदधीनत्वादल्पत्वादिति । मुक्तेभ्यः प्रलये लीनेभ्यश्च सर्ववस्तुभ्यः सदा विभिन्न एव भगवानिति दर्शयितुं च अः इति पृथग्वचनम् । तच्चोक्तं वाक्यनिर्णये । 'मुक्ता अपि न विष्णुत्वं यान्ति तत्समतामपि । आधिक्यं कुत एव स्यान्मुक्तानां मुक्तिदात्तः । कुत एव प्रलीनानां प्रलये तु तदात्मता । ब्रह्मशर्वेन्द्रपूर्वाणां मुक्तावपि न विष्णुता । यदा तदा तु संसारे क्व तद्रूपत्वमिष्यते । अन्योऽसौ सर्वतो विष्णुः स्वातन्त्र्याद्गुणपूर्तितः । सर्ववस्तुस्वभावस्य विरुद्धोरुस्वभावकः । पारतन्त्र्याल्पताऽज्ञानजनिनाशादिवर्जितः । अकारेण ततो विष्णुः संहितायां पदात्मना । बह्वृचोपनिषत्प्रोक्तस्तेनैव परमात्मना । महिदासावतारेण सोऽहमेवंविधस्त्वित्ति । मत्तोऽन्यो न हि पूर्णोऽस्ति यतोऽकारश्च पूर्णतां । वक्ति तस्मादकारोऽयं मामेव वदति स्फुटम् ।

SGDF
Sri Gangadhareswar Digital Foundation

नाभाववाच्यकारः स्यादर्थत्रययुतो यतः । एकार्थात्मा ह्यभावः स्यान्निषेधैकस्वरूपतः । अन्यता च निषेधश्च विरुद्धत्वमिति त्रयः । अकारार्थो ह्यभावस्तु निषेधैकस्वरूपतः । एकदेशस्वरूपत्वान्नाकारेणैव भण्यते । किंत्वभाव इति त्वेव तेनाकारोदितो हरिरि'ति । न च निषेधस्वरूपे विरुद्धता चान्यता चास्तीत्येतावता पूर्णार्थता भवति । तदाऽर्थत्रयकल्पनस्य वैयर्थ्यात् । उक्तं हि शब्दनिर्णये । 'विरुद्धता निषेधान्यभावयुक्ते हि केवलः । अकारो वर्तते तेषामेकार्थात्मन्यभावके । वर्ततेऽभाव इत्येव न त्व इत्येव केवल' इति । तस्मान्नारायण एवाकारवाच्य इति सिद्धम् । 'यतोऽकारः सदा विष्णोर्वाचकत्वेन संस्थितः । तस्माद्वर्णत्रयात्माऽयं प्रणवोऽपि त्रयात्मकम् । हरिमेव सदा वक्ति नैवान्यं कश्चन क्वचित् । सृष्टिकर्ता ब्रह्मनामा योऽसृजच्चतुराननम् । अंतर्यामी विरिञ्चस्य सोऽकारार्थो जनार्दनः । वैकुंठलोक आस्ते स द्वितीयवपुषा हरिः । उकारवाच्यः स विश्नुर्नृसिंहो रुद्रनामकः । रौद्रत्वात्स शिवस्यापि स्रष्टा संहारकारकः । अन्तर्यामी शिवस्यापि मकारार्थः प्रकीर्तितः । एवं त्रियात्मकं विष्णुं प्रणवोऽयं त्रियात्मकः । एवं पृथगिवाचष्टे बिन्दुर्वक्तयनिरुद्धकम् । प्रद्युम्नाद्यान्नादपूर्वाः सर्वान्नारायणात्मकान् । पद्मनाभादिका एव मूर्तीर्नारायणोत्तराः । प्रणवोऽयं वदत्यष्टौ तस्मान्नान्याभिधायक' इति तत्त्वसारे । 'षट्त्रिंशतिसहस्राणि बृहत्युक्थार्णगानि तु स्त्रीरूपाणि हरेस्तावदह्नामप्यभिमानिषु। सूर्यरूपेषु रूपाणि पुमाकाराणि सर्वशः । एतैः पुरुषगै रूपैर्बृहत्युक्थव्यवस्थितैः । कदाचिद्भगवान्विष्णुः पुमाकाराणि तानि च । कृत्वा सूर्यगतान्येव स्त्रीरूपाणि विधाय च । तान्याप्नोति च पुंरूपैस्तैरेवाक्षरगानि च । स्त्रीरूपाणि जगन्नाथः प्राप्नोत्यात्मेच्छया प्रभुः । पुंरूपप्रमदारूपस्वरूपै रमते स्वयम् । एकीकृत्य च तान्येव द्विरूपो रमते तथा । स एव रमते मायां स्थितात्मस्त्रीतनौ हरिः ।

SGDF
Sri Gargeshwari Digital Foundation

प्राणस्योत्पत्तिकामः सन्ननेच्छामारनामक' इत्यर्धनारीनारायणतन्त्रे । वायोरुत्पत्तिकामो मायां रमायां रमत इत्यनकाममारः । जीवस्थिते-नाक्षरगेनाक्षरनाम्ना स्वरूपेण जीवाख्यसूर्यस्थितमहराख्यं स्वरूपमाप्नोति तेन चाक्षराख्यं स्वरूपमाप्नोति । यदक्षरादक्षरमेति युक्तमित्यस्य व्याख्यानरूपत्वाच्चैतदवसीयते । पुमांसं स्त्रियं च वदन्नेव न वदतीत्युक्तत्वादुभयात्मकं रूपं प्रतीयते । अस्त्रीपुमानिति ब्रुवन्नपि न वदतीत्युक्तत्वाच्च स्त्रीत्वं पुंस्त्वं च प्रतीयते विष्णोः । न च नपुंसकरूपं भगवतः कुत्रचिदुक्तम् । प्रसिद्धमेव च रूपद्वयम् । अतो नपुंसके वदन्नपि न वदतीति न तद्वदनुषज्यते । नपुंसकरूपे प्रमाणाभावादेव । लौकिकस्त्रीपुंविलक्षणत्वादस्त्री पुमानित्यपि वदन्निति भवति । 'स्त्रीपुंरूपद्वयं विष्णोर्न तृतीयं कथञ्चन । साक्षान्नपुंसक-स्तस्मान्मुक्तिभागी न तु क्वचिदि'ति ब्रह्मांडे । न च रक्ष इति नपुंसकशब्दमात्रेण रावणादयो नपुंसका भवन्ति । भवतीतिपदाभावा-दनकाममार इति भगवन्नामैवेति ज्ञायते । 'ऋष ज्ञान इति ह्यस्माद्धातोः सर्वज्ञ एकराट् । वेदद्रष्टा परमऋषिर्हियास्यः पुरुषोत्तमः । मन्त्राणां प्रथमो द्रष्टा सर्वेषां यत एव तु । ऋषिणोक्तमिति प्राहुर्मन्त्रोक्तं ब्राह्मणान्यतः । तत्प्रसादाद्धि तपसा पश्चान्मन्त्रान्प्रपेदिरे । ब्रह्माद्या ब्राह्मणं पश्चात्तैर्दृष्टमृषिभिः पृथक् । मन्त्राश्चोपनिषच्चैव नाकृत्वा सुमहत्तपः । प्रथमं तद्धयास्येन दृष्टं केनचिदीक्ष्यते । विना पृथक्तपो-

---

तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति जीवाक्षरेणैव जीवाहराप्नोति जीवाह्ना जीवाक्षरमित्यनकाममारोऽथ देवरथस्तस्य वाग्धुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः संग्रहीता तदयं प्राणोऽधितिष्ठति तदुक्तमृषिणाऽऽतेन यातं मनसो जवीयसा निमि षश्चिज्जवीयसेति जवीयसेति ॥ ८ ॥ इत्यैतरेयोपनिषत्सु द्वितीयारण्यके तृतीयोऽध्यायः ॥ २ ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

दृश्येद्ब्राह्मणं मुनिभिर्यतः। मन्त्राश्चोपनिषच्चैव ब्राह्मणादुत्तमास्ततः। तत्राप्युपनिषच्छ्रेष्ठा युक्तावस्थाधिगम्यत' इत्यादि प्रमाणविवेके। तेन रथेनाध्यात्मशरीराख्येनाधिदैवं रथरूपेण। ऋभव इत्यत्र देवानां साधारणं नाम। 'आदित्या वसवो रुद्रा विश्वे ऋभव इत्यपि। सर्वदेवसमाख्या च द्वादशाष्टादिकेष्वपी'ति शब्दनिर्णये। 'निर्मितो दैवतैः सर्वैर्विष्णुना वायुना सह। अधिष्ठितो रथो दिव्यः सोऽध्यात्मं देहनामकः। सम्यग्योगो यदा तस्य मनोवाक्कर्मभिर्भवेत्। देहाख्यस्य रथस्यैव तदा नारायणात्प्रभोः। विविधं वासवत्वात्तु विवस्वन्नामकाच्छुभं। संसारवारकं ज्ञानं दिवो दुहितृनामकम्। विष्णुतत्त्वापरोक्षाख्यमहनी द्वे च शोभने। ज्ञानावस्था मुक्त्यवस्थेत्युभे एवाहनी परे। जायन्ते देवतास्त्वेषां भारती वायुरेव च। जीवन्मुक्तेश्च मुक्तेश्च दाता रूपद्वयी प्रभुः। सर्वस्त्रीणामुत्तमत्वाद्द्यौर्नामा श्रीरुदाहृता। दुहिताऽस्या भारती तु नित्याहेयस्वरूपतः। अहरित्युच्यते वायुर्ज्ञानात्मत्वात्तथैव च। अधिदैवे रथेऽप्येते विष्णोर्लक्ष्म्यां प्रजज्ञिरे। रथेन तेन देवेशौ विष्णुवायू जगत्पती। आयातमिति हैवैतौ प्रार्थयेद्यज्ञकर्मणि। अन्यथाप्यर्थयेदेतौ ज्ञानेच्छुः पुरुषः सदा। जपेन्मन्त्रद्वयं नित्यमातेन निमिषस्तथा। रक्षणं वां समीपे स्यान्ममेत्यध्यात्ममेव च। हयास्यत्वाच्चाश्विनौ तावित्याह परमाश्रुतिः। ऐन्द्राग्नेयादिकाश्चैवं सर्वे मन्त्रा हरिं परम्। वदन्ति मुख्यतो नान्यं सर्वनामानमच्युतम्। अथवा वायुदेवस्थं पृथक्संस्थं च केशवम्। मन्त्रो द्विवचनो वक्ति तथा वहुवचस्स्वपी'त्याद्यैतरेयसंहितायाम्। सुखं ददत इति सुदिने। विवस्वतो विष्णोः सकाशाद्दिवो दुहिता अहनी च जायन्ते। अहनी इति द्विवचनेन द्वित्वे सिद्धेऽप्युभे इति वचनमध्यात्माधिदैवतयोरुभयोरपि वचनार्थम्। न च सूर्यरथोऽत्र वर्ण्यते। न चाहोरात्रे अहनी इत्युच्येते। सूर्यस्याश्विनामाभावात्

SGDF
Sri Gargeshwari Digital Foundation

सप्ताश्वत्वाच्च तद्रथस्य । चतुरश्वत्वं चात्रोच्यते । श्रोत्रे पक्षसी चक्षुषीयुक्ते इत्यध्यात्मसम्बन्धाच्च। न च रात्रौ सुदिनमितिप्रयोगो दृष्टः। असुदिनस्यापि तत एव जातत्वाद्व्यर्थविशेषणता च । अस्मिन्पक्षे तु लौकिकाहर्व्यावृत्त्यर्थे सुदिने इति युज्यते । जीवन्मुक्तिश्च मुक्तिश्च हि मुख्ये सुदिने । 'स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माध्येवात्मनो यद्यत्कामयते तत्तत्सृजत' इति ज्ञानावस्थायां मुक्तौ भोगबाहुल्यकारणत्वात्सापि मुक्तिवत्सुदिनम् । न हि मुक्ता-वाधिक्यार्जनमस्ति । 'न हीयते यत्र गत्वा यत्र गत्वा न वर्धत' इति वचनात् । अतो ज्ञानोत्पत्तिसमनन्तरमेव मुक्तौ न पुनरार्जनमस्तीति किञ्चित्कालं ज्ञानित्वेनावस्थानमपि सुदिनमेव । ज्ञानात्पूर्वं तु पतन-संशयादेव न सुदिनम् । न चाश्विरथो वर्ण्यते । न ह्यश्विरथयोगादहनी जायेते । एकरासभयुक्तो हि तद्रथः । 'तद्रासभो नासत्या सहस्रमि'ति वचनात् । न च विवस्वच्छब्दोऽश्विनोर्विद्यते । 'यो देवानां नामधा एक एवे'ति विष्णोः सर्वनामानि प्रसिद्धानि च । 'युजो युक्ता अभि यत्संवहन्ती'त्यादिना तस्यैव प्रस्तावाच्च । अतो विष्णुरेव मुख्यतः सर्वनामोक्त इति सिद्धम् ॥ ८ ॥ इति श्रीमदानन्दतीर्थभगवत्पादा-चार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके तृतीयोऽ-ध्यायः ॥ २ ॥ ३ ॥

ॐ॥ 'एको नारायणस्त्वासीत्प्रलये रमया सह । नित्यातत-गुणत्वात्स आत्मेति श्रुतिषूदितः । इदं सर्वमपेक्ष्यासौ कालतो गुणतस्तथा । अग्रच एव समस्तेभ्यस्तद्वशत्वाद्रमापि सा । विद्यमानापि नाग्रस्था गुणैरूना ततो यतः । न ब्रह्मा न शिवश्चासीन्नैवान्यच्च मिषत्क्वचित् । सुप्तास्तत्र यतो जीवाः सर्वे ब्रह्मशिवादिकाः । असुप्ता श्रीश्च मुक्ताश्च स्वतन्त्रोन्मेषवर्जनात् । अनुन्मेषा एव तेऽपि स्वतन्त्रोन्मेष

हरिः ॐ ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्स

SGDF
Sri Gangeshwari Digital Foundation

एकराट् । नारायणो न चान्योऽस्ति पूर्णोन्मीलद्गुणात्मकः । पराधीनेन वित्तेन भुंजन्नपि हि भिक्षुकः । वित्तवानिति नैवोक्तस्तथा श्रीर्मुक्तिगा अपि । मिषन्तोऽप्यन्यतन्त्रत्वान्न मिषन्तः कथञ्चन । सर्वदाप्येक एवायं स्वतन्त्रो नापरः क्वचित् । कालाग्रयत्वं वक्तुमस्य प्रलये स्थितिरुच्यते । स ऐच्छद्भगवान्विष्णुः स्रष्टुं लोकाभिमानिनः । लोकाभिधानवद्देवाञ्जडलोकांश्च शाश्वतः । स लोकेभ्यः पूर्वतनान-वाख्यान्महदादिकान् । ब्रह्मशर्वादिकान् सृष्ट्वा जडैस्सह जनार्दनः । दिवमाकाशमुर्वीं च ससृजेऽथ द्विसप्तकान् । इति सृष्ट्वा स लोकांस्तु पुनस्तानेव लोकपान् । अन्डान्तः स्रष्टुमैच्छच्च तेषां पूज्यत्वसिद्धये । अम्नामकेभ्यस्तेभ्यः स पूर्वसृष्टेभ्य एव तु । सर्वजीवाधिकत्वात्तु ब्रह्माणं पुरुषाभिधम् । अंशेनोद्धृत्य रुद्राद्यैः सह चैनमयोजयत् । तथैव चेतना-नाश्च भागानुद्धृत्य पिण्डवत् । चेतनाचेतनं राशिमेकस्थं विदधे प्रभुः । पुनरैच्छज्जगन्नाथस्तस्याङ्गोत्पत्तिमच्युतः । अण्डवन्मुखमस्यासीत्प्रथमं तु शिरोऽभिधम् । भिन्नमास्यं पुनस्तस्य विष्णोरेवेच्छया प्रभोः । तत्र वाङ्नामकं रूपं वह्नेरासीत्पुरातनम् । तस्यैवाथ द्वितीयं च यदग्निरिति गीयते । तथैव नासिकातोऽभून्मुख्यवायोः सुतो मरुत् । प्राणो वायुरिति द्वेधा चक्षुषोऽभूत्तथा रविः । द्विरूप एव कर्णाभ्यां

ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजताम्भो मरीचीर्मरमापोऽदोम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाऽण्डं मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्ना-द्रेतो रेतस आपः ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

मित्रधर्माप्यवित्तपाः। दिग्देवता द्विरूपेण बभूवुः सर्व एव च। हृदयाद्गरुडानन्तशिवचन्द्राः पृथक्पृथक्। मनो बुद्ध्यभिमानाश्च तन्नामानश्च जज्ञिरे। त्वचश्च रोमनामानो वृक्षनामान एव च। द्विविधाः पारिजाताद्या बभूवुर्ब्रह्मदेहतः। हस्ताभ्यां द्विविधः शक्रः पद्भ्यां तत्सूनुरेव च। यज्ञस्त्वजनि पायोश्च यमो निर्ऋतिरेव च। रेतोन्नामा द्विरूपस्तु शिव एव च गुह्यतः। अपानो मृत्युरिति च मुख्यो नाभेस्तु मारुतः ॥ १ ॥

एवं रूपद्वयेनापि स्तुवन्तो विष्णुमव्ययम्। दिव्याम्बराः कुण्डलिनः प्राविशन्नुदकार्णवम्। तदाऽशनापिपासाख्यं द्विरूपं मारुतं पुनः। तस्मिन्देवसमूहे तु विष्णुः प्रावेशयत्प्रभुः। तेऽब्रुवन्देहि नो वासं यत्र चान्नमदामहे। गोरूपमेभ्यो ब्रह्माणं ददौ नारायणः प्रभुः। तत्र प्रविश्य ते देवा नालमित्यब्रुवन्पुनः। अश्वरूपं विरिञ्चश्च पुनरेवावदत्प्रभुः। तद्रूपेऽपि प्रविश्यैव नालमित्यब्रुवन्पुनः। पूर्वसृष्टं पुमाकारं ब्रह्मणोऽदात्पुनर्हरिः। तद्दृष्ट्वैवालमित्यूचुर्विशतेति स चाब्रवीत्। विविशुश्च यथोत्पन्नाः सर्वे देवाश्चतुर्मुखम्। अशनापिपा-

---

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनन्नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्त्सुकृतं बतेति पुरुषो वाव सुकृतं ता अब्रवीदथायतनं प्रविशतेत्यग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशंस्तमशनापिपासे अब्रूतामावाभ्यामभि प्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

सामानी तु द्विरूपो मारुतोऽवदत्। कुर्वाज्ञामावयोश्चैव यथा त्वच्छासनानुगौ। नित्यं भवावेति हरिः सर्वत्र प्रविशेत्यमुम्। आह तस्माद्देवतानां सर्वासां भागभुङ्मरुत्। एक एव प्राणनामा नाभिस्थोऽपि स एव तु। अशनापिपासापानश्च मृत्युश्चेति चतुर्विधः। एक एव महान्वायुः सर्वदेवेषु संस्थितः॥ २॥

पुनरैच्छत्केशवोऽसावन्नमेभ्यः सृजा इति। अवाख्या देवताः पूर्वं सृष्टा ब्रह्मादिकाः पुनः। ददर्श सुविशालाभ्यां नेत्राभ्यां पुष्करेक्षणः। तद्दर्शनात्तदिच्छातस्तासां देहोऽभवत्पृथक्। सर्वासामपि देहैकदेशेभ्यो मिलितं शुभम्। सर्वैरधिष्ठितं चैव विरिञ्चेन विशेषतः। दिव्यावयवसम्पन्नमेकमेव सुलोचनम्। भोग्यभोक्त्रात्मना नास्ति तस्य दुःखं कथञ्चन। ते हि देवाः स्वयं भोग्याः स्वयं भोक्तार एव च। क्रीडन्ते मोदिनो नित्यं तथाप्यन्नात्मकस्त्वसौ। क्रीडयाऽपाक्रमत्किञ्चित्तं तदाऽसौ चतुर्मुखः। अत्तुं वागादिभिः सर्वैरैच्छन्नाप्यशकत्तदा। जानन्नपि क्रीडयैव तारतम्यं प्रकाशयन्। एवं चकार ब्रह्मा स ह्याज्ञानं लोककर्तरि। क्षुत्पिपासादयश्चैव देवानां भोगसाधकाः।

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत्तदेनत्सृष्टं पराङ्त्यजिघांसत्तद्वाचाऽजिघृक्षत्तन्नाशक्नोद्वाचा गृहीतुं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन गृहीतुं स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्तच्चक्षुषाऽजिघृक्षत्तन्नाशक्नोच्चक्षुषा गृहीतुं स यद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण गृहीतुं स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाऽजिघृक्षत्तन्नाशक्नोत्त्वचा गृहीतुं स यद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत्तन्मनसाऽजिघृक्षत्तन्नाशक्नोन्मनसा गृहीतुं स यद्धैतन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन गृहीतुं स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत

SGDF
Sri Gargeshwari Digital Foundation

न तु पीडाकरास्तेषामैश्वर्यादिगुणोन्नतेः। अन्नमूर्तिं ततो ब्रह्मा प्रधानेनैव वायुना। अपानाख्येनात्तुमैच्छत्तदैवाशकदाशु सः। तस्माद्ब्रह्मोक्तैक एवासौ सर्वस्यान्नस्य मारुतः। तत्प्रसादात्परेऽश्नन्ति किञ्चित्किञ्चिन्न चाखिलम्। आयूरूपोऽखिलानां च देवानां वायुरेव हि। अन्नदेवस्य चायुः स तस्माद्देवोत्तमो मरुत्। आयुःशब्दो ज्ञानवाची गतिवाची च यत्ततः। चेष्टामोक्षज्ञानदाता सुराणां मारुतस्ततः। अन्योऽन्यगुणदातृत्वात्समानौ ब्रह्ममारुतौ। तस्मान्मोक्षे सुखे ज्ञाने विष्णुभक्त्यादिकेष्वपि। सर्वेभ्यश्चाधिकौ तौ हि तयोर्विष्णुः परस्सदा देवतानां प्रवेशात्तु पूर्वमेव जनार्दनः। इत्थमैक्षत देवेशो ब्रह्माद्या यदि मां विना। क्रियादिषु समर्थाः स्युर्न मे विष्ण्वभिधा भवेत्। सर्वचेष्टयितृत्वाच्च विशिष्टबलतस्तथा। विष्णुरित्यभिधा मह्यं सा न युक्ता दिवौकसाम्। स्वतन्त्रत्वे ततः सर्वे मद्वशा एव नान्यथा। तस्मादेषां प्रवृत्त्यर्थं प्रवेक्ष्ये सह वायुना। इति मत्वा विरिञ्चस्य शरीरं प्रविवेश सः। मूर्धन्यनाड्या प्रथमं ब्रह्मवायुसमन्वितः। अग्न्यादयस्ततः पश्चात्प्रविष्टास्तन्नियोजिताः। प्रपदाभ्यां तथान्येन रूपेण प्रविवेश सः। बिभर्ति देहं तेनैव मूर्धाविष्टेन चेष्टयन्। नारायणो वासुदेव इति द्वेधा व्यवस्थितः। मूर्धाविष्टो वासुदेवस्तस्य चावसथा-

---

कतरेण प्रपद्या इति स ईक्षत यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सैषा विदृतिर्नाम द्वास्तदेतन्नांदनं तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथोऽयमावसथ इति स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वावदिषदिति स एतमेव पुरुषं ब्रह्मततममपश्यदिदमदर्शमितीं ३ तस्मादिदंद्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः॥ ३॥ इत्यैतरेयोपनिषत्सु द्वितीयारण्यके चतुर्थोऽध्यायः॥ २॥ ४॥

SGDF
Sri Gangeshwari Digital Foundation

स्त्रयः। अक्षि कण्ठो हृदित्येव त एव स्वप्ननामकाः। आप्नोत्यत्र स्वयं विष्णुरतः स्वप्नाः प्रकीर्तिताः। अनिरुद्धादिरूपेण त्रिधा तेषु व्यवस्थितः। दाताऽवस्थात्रयस्यास्य जीवस्य क्रमशो विभुः। सुषुम्नायां वासुदेवो मूर्धन्येव व्यवस्थितः। तस्यामेव ब्रह्मनाड्यां स्थितो नारायणः प्रभुः। स एव भगवान्विष्णुः प्रादुर्भावात्मना पुनः। जातो मत्स्यादिरूपेण सर्वभूतेषु चाविशत्। असुराणां निहन्तारं ज्ञानादिगुणदं तथा। चेष्टाप्रदं च भूतेषु न मदन्यं वदत्यपि। इति मत्वा जगन्नाथो दैत्यनिग्रहणेच्छया। ज्ञानदानार्थमपि तु प्रादुर्भूतो भुवि प्रभुः। तथा जीवेषु सर्वेषु प्रविष्टः प्रेरणेच्छया। को ह्यन्यस्तमृते विष्णुमेतत्कर्म करिष्यति। स सर्वगुणसम्पूर्णं सर्वगं नित्यमव्ययम्। एतदेवस्वरूपं स त्वपश्यदवतारगम्। तस्मात्सर्वावताराश्च सर्वजीवेषु संस्थिताः। प्रादुर्भावाः सर्वगुणैः पूर्णा एव सदा स्थिताः। पश्यन्ति च तथा नित्यं निर्दोषोरुस्वसंविदा। गुणपूर्णस्वरूपस्य त्वापरोक्ष्येण दर्शनात्। सर्वदैव ह्यसौ विष्णुरिदिन्द्रो नामतो मतः। ब्रह्मादीनां हि सर्वेषां तत्प्रसादेन जायते। जानन्ति न स्वतस्तेन नेदन्द्रास्ते प्रकीर्तिताः। रमाऽपि तत्प्रसादेन जानाति किमुतापरे। अल्पज्ञाना अल्पगुणा अल्पानन्दाश्च तेऽखिलाः। रमाजशंकरेन्द्राद्यास्तेनानिन्द्राः क्रमेण ते। पापैरज्ञाततां देवा मानयन्ति सदात्मनः। हर्षेण तेन विष्णुः स इन्द्र इत्यभिशब्द्यते। नेदन्द्रताऽसुरादीनां ज्ञायेतेति श्रुतिर्हरिम्। इन्द्र इत्येव वदति पारोक्ष्येणोरुसद्गुणमि'त्याद्यैतरेयसंहितायाम्। आततगुणत्वादात्मा नारायणः। ब्रह्मपन्थाः सत्यं कर्मेति तस्यैव पञ्चरात्रप्रसिद्धैरेव नामभिरारब्धत्वाच्च। 'मुख्यतः कर्मनामा तु प्रादुर्भावात्मको हरिः। अनिरुद्धतनुश्चैव तत्र ह्यमितचेष्टितः। कर्माभासा जीवसङ्घाः सत्यं प्रद्युम्ननामकः। सङ्कर्षणो हरिः पन्था ब्रह्मोक्तो वासुदेवक' इत्यादि नाममनिर्णये। 'मत्सीन्द्रमिन्दो पवमान विष्णुमि'त्यादिश्रुतौ तस्मिन्नेव

SGDF
Sri Gangeshwari Digital Foundation

प्रसिद्धस्येन्द्रशब्दस्य बहुशोऽभ्यासाच्च । अकारस्य च विष्णावेव प्रसिद्धस्यात्राप्यभ्यासात् । तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी इति सूर्यमण्डले पुण्डरीकाक्षत्वेन निर्दिष्टस्यात्रापि य एष तपतीत्यादिना बहुशोऽभ्यासाच्च । सूर्यो हि हिरण्याक्षः सविता देव आगादिति पिङ्गलाक्षः प्रसिद्धः । 'विरूपाक्षः शिवः सूर्यः सुराचार्यो विनायकः । पुण्डरीकेक्षणो विष्णुः सहस्राक्षः सुराधिप'इति च स्कान्दे । 'यो देवानां नामधा एक एव' । 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' । 'यमिन्द्रमाहुर्वरुणं यमाहुः' । 'चन्द्र-सूर्यादयः शब्दा विष्णावेव हि मुख्यतः । उपचारात्तदन्येषां विष्णुनैव कृताः पुरे'त्यादिना तस्यैव सर्वनामवत्त्वाच्च । णकारो बलं षकारः प्राण आत्मेत्यादिनान्तेऽपि विष्णुशब्दव्याख्यानेनोपसंहाराच्च । 'आत्म-ब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् । न वर्तन्ते तदन्यत्र शृङ्गिबेरेऽग्निशब्दवदि'ति च पाद्मे । 'एको नारायण आसीन्न ब्रह्मा न च शंकरः' । 'एको नारायण आसीन्न ब्रह्मा नेशानः' । 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकर'इत्यादि श्रुतिभ्यश्च । अग्रशब्दो गुणाधिक्यवाची । इदं रमाब्रह्मशिवादिकं सर्वं जगदपेक्ष्यात्मैवाग्रे विष्णुरेवाग्र्यः सर्वगुणैरित्यर्थः । तत्र हेतुस्तदन्यत्किञ्चिन्न मिषदासीत् । सर्वस्याप्युन्मेषणं नासीदित्यर्थः । स्वत उन्मेषणं कस्यापि नास्ति । अस्तिशब्दवदासीच्छब्दोऽपि सर्वकालसाधारणः । भगवत्प्रसादादेव सर्वदा सर्वं किञ्चिदुन्मिषति । स्वातन्त्र्येण पूर्णोन्मेषो विष्णुरेव । 'उन्मेषो गुणसंपूर्तेरुद्रिक्तानुभवः स्मृतः । तदेव मिषणं नाम सद्रूपं मिनुते यतः । मिषच्च नान्यद्विष्णोर्हि किमुतोन्मिषदिष्यते । उच्चैर्मिषन्हि भगवान्सर्वदैव जनार्दन' इति च सत्तत्त्वे । 'नास्ति नारायण-समं न भूतं न भविष्यती'ति च भारते । सर्वजीवानां रमायाश्च प्रलयेऽपि विद्यमानत्वादेव नाग्र इति कालापेक्षया तदधीनमिषत्वा-

SGDF
Sri Gargeshwari Digital Foundation

दन्येषामग्र्यः स एवेत्याशयः। तदधीनत्वमेव तेषां सृष्ट्यादिना दर्शयति। स्थूलशरीरस्य पूर्वाभावस्तत एवार्थतः सिद्ध्यति। 'प्रलयेऽप्यखिलं देवी रमा विष्णुप्रसादतः। जानाति नित्यज्ञानेन मुक्ता ध्यानस्थिता लय' इति च सत्तत्त्वे। ब्रह्मादीनां शरीरान्तरस्यापि प्रलयेऽनुक्तेरेवाभावः सिद्ध्यति। 'आत्मा ब्रह्माग्र इत्यादि गुणाग्र्यत्वं हरेर्वदेत्। कालज्यैष्ठ्यं न यस्मात्तत्सृष्ट्युक्तेरेव सिद्ध्यती'ति वाक्यनिर्णये। गुणाग्र्यतायामेव कालज्यैष्ठ्यस्याप्यन्तर्भावाच्च। अं विष्णुं बिभर्तीत्यम्भो विष्णुलोको दिवः परः महरादयश्च दिव्यपि भगवान्प्रतितिष्ठतीति प्रतिष्ठा। तेषु सर्वेषु प्रत्यक्षतश्चरति विष्णुस्तस्मादम्भ इत्युच्यते। दिवः परे द्यौश्चाम्भोनामका इत्यर्थः। सूर्यमरीचीनां तत्र विशेषेण विततत्वादन्तरिक्षं मरीचयः। मरीचीनामयनात्। पृथिव्यां क्षिप्रं मरन्तीति पृथिवीमरः। 'भूतेभ्योऽनन्तरं त्वण्डं सृष्ट्वा विष्णुः पुरा प्रभुः। लोकभेदांश्च चक्रेऽत्र पश्चाद्ब्रह्मा विशेषतः। सम्यक्चकार लोकांस्तांल्लोककर्ता ततः स चे'ति ब्रह्मवैवर्ते। या अधस्तात्पूर्वमेव सृष्टा देवतास्ता आप इत्युच्यन्ते। आपा इत्याप इतीति पूर्वं भगवदङ्गसृष्टानामेवाप्शब्देनोक्तेः। अयं पितैते पुत्रा इति च। आहं मां देवेभ्यो वेद ओमद्देवान्वेदेति च। 'ब्रह्मवायू च तद्भार्ये वीन्द्रशेषौ च तत्स्त्रियौ। शिवस्तद्दयिता शक्रकामौ तद्दयितादयः। सर्वे सुराः क्रमेणैव विष्णोर्जाता अबाख्यकाः। ज्ञानानन्दबलाद्येषु विष्णुभक्तौ च सर्वशः। हीनाः शतगुणेनैव क्रमेणानेन ते मताः। तेभ्यश्च ऋषयो मर्त्या हीना एव क्रमेण च। विशेषतस्तु मुक्तानां सर्वसंसारबन्धनात्। क्रमोऽयं सम्यगुद्दिष्टो नित्यानन्दैकभोगिनाम्। न विशेषो ब्रह्मवाय्वोरधिकाराविभेदतः। न शेषशिवयोश्चैव तत्पत्नीनां च सर्वशः। सुपर्णशेषयोश्चैव साम्यं सर्वगुणेष्वपि। साम्यमेवैतयोः पत्न्योः साम्यं शक्रमनोजयोः। एते

SGDF
Sri Gargeshwari Digital Foundation

तु महदादीनां सर्वेऽपि ह्यभिमानिनः। पूर्वस्य प्रतिबिम्बश्च चरमस्तत्सुतस्तथा। तद्वशाश्चाखिला विष्णोर्न विष्णुः कस्यचिद्वशे। महदादिमानिनश्चैते जातास्तैः सह सर्वशः। एते लोका इति प्रोक्ता लोकानामभिमानिनः। त एव लोकपालाश्च यदा पश्चात्प्रजज्ञिरे। पश्चाज्जातैर्हि रूपैस्तैर्लोकस्थान्पालयन्त्यलमि'त्यादि तत्त्वसारे। अमूर्च्छयत् मूर्तमकरोत्। अग्निर्वाग्भूत्वेत्यादिना पश्चादैक्यप्रतीतेरेकस्यैव रूपद्वयं तदिति प्रतीयते। प्रजानीहि प्रकर्षेणानुजानीहि। अन्नदेवता च सर्वदेवतायुक्तो विरिञ्च एव। ग्रसनं चैतस्मिन्प्रवेश एव न तु पीडा तस्य। एक एव हि ब्रह्मा भोक्तृभोज्यत्वेन स्थितो भोज्यरूपेणैकीभूयातितरां मुमोदेत्यर्थः। देवानामुपद्रवाभावाद्भोक्तृत्वशक्तियोजनमेवाशनापिपासाभ्यामन्ववार्जनम्। वायुरेव च भोक्तृत्वशक्तिरूपः। यदि वागादीनामेवाभिव्याहरणादिशक्तिः स्यान्मां विना तर्हि विष्णुत्वं न मम स्यात् तस्मात्कोऽहं भवानीत्याक्षेपः। विशेषेण प्राणयति सर्वान्सर्वेभ्यो विशिष्टश्चेति हि विष्णुः। णकारो बलं षकारः प्राण आत्मेति व्याख्यानात्। तस्मान्मत्प्रेरिता एवैते अभिव्याहारादिशक्ता इत्यभिप्रायः। पूर्णानन्दस्वरूपत्वान्नन्दनो भगवान्। प्रादुर्भावरूपेण जातोऽपि भगवान् सर्वभूतान्यभितः सर्वकालेषु विशेषेण पश्यत्येव। इह भूतेषु मत्तोऽन्यं प्रवर्तकं वदेत्किमित्याक्षेपः। अहमेव स्वतन्त्रः परिपूर्णगुण इति कृष्णराघवादिसर्वावताररूपोऽपि सर्वदाऽनुभवत्येव। 'नायं दशरथाज्जातो न चापि वसुदेवतः। क्वास्याज्ञानं कुतो दुःखं प्रादुर्भावेष्वपि प्रभोः। प्रादुर्भूतश्चिदानन्दशरीरो राघवः स्वयम्। स्तम्भाद्वा नरदेहाद्वा नैवास्य प्राकृती तनुः। दैत्यानां मोहनार्थाय सोऽज्ञानाद्यं प्रकाशयेत्। पूर्णचित्सुखरूपोऽपि सदा सर्वावतारग' इत्यादि स्कान्दे। एतमेव पुरुषं व्यासकृष्णकपिलराघवादिरूपं ततममपश्यत्। ततमं परिपूर्णतमं ब्रह्माऽपश्यत्। इदं मे स्वरूप-

SGDF
Sri Gangeshwari Digital Foundation

मदर्शमेवाहमिति । रङ्गस्त्ववधारणे । 'रङ्गोवधारणे चैव संवादे च प्रयुज्यत' इति पदविवेके । अपश्यदित्यत्र नातीतकालत्वं विवक्षितम् । अभिव्यैख्यदित्यभिशब्दस्यानुषङ्गात् । अपश्यत्पश्यतीति चैककालसम्बन्धं विना वक्तुमशक्यत्वात्तथा प्रयोगः । 'प्रयोग एककालीनः सर्वकालेऽनुषज्यते । ददर्श विष्णुरित्यादौ नित्यचिद्रूपतो हरे'रित्यादि सत्तत्त्वे । परोक्षप्रिया इवेत्यसुराणां सम्यग्दर्शनेन पतनं देवानां प्रियं तथाप्यपरोक्षदर्शिन्येव प्रीतिं कुर्वन्तीतीवशब्दः ॥३॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके चतुर्थोऽध्यायः ॥ २ ॥ ४ ॥

॥ ॐ ॥ 'अयं नारायणो देवः पुरुषे प्रथमं विशेत् । अन्नस्थोऽन्नेन सहितस्तस्मिन्रेतस्त्वमागते । तस्मिंस्थितं स्वरूपं स पुरुषस्थो बिभर्त्यजः । तद्रूपं रेतसा साकं स्वयं पुंसि स्थितो हरिः । स्त्रियां सिञ्चति तस्यैव स्थानान्तरगतेः प्रभोः । प्रथमं जन्मविष्णोस्तु स तस्या अङ्गवत्प्रभुः । नैनां हिनस्त्यानुकूल्यात्सा पुत्रं भावयत्यथ । पुत्रस्य भावना सैव तद्गत्वाद्धरिभावना । सम्भावितव्या सा चैव भर्त्रा पुत्रैश्च सादरम् । सम्भावनं कुमारस्य जानतः केशवे भवेत् । तस्येत्यर्पणमात्रेण पूजितो हि भवेद्धरिः । पुत्रस्थस्य हरेः पूजां कुर्वतः पृथिवीस्थितिः । स्वर्गस्थस्यापि भवति पुत्रपुण्यं यतोऽखिलम् । अत्यल्प-

---

॥ हरिः ॐ ॥ (अपक्रामन्तु गर्भिण्यः) ॥ पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजस्सम्भूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा तस्मादेनां न हिनस्ति साऽस्यैतमात्मानमत्र गतं भावयति सा भावयित्री भावयितव्या भवति तं स्त्री गर्भं बिभर्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येतेषां लोकानां सन्तत्या एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म सोऽस्यायमात्मा पुण्येभ्यः

SGDF
Sri Gurgeshwari Digital Foundation

पुण्यभाक्स स्यान्नार्चयेत्केशवं यदि । पृथिव्यां जन्म पुत्रस्य द्वितीयं विष्णुजन्म हि । एतद्रूपं निधायैव जीवार्थे धर्मकर्तवे । पितृस्थेन तु रूपेण गच्छत्यन्यत्र केशवः । पितुरन्यत्र जननं तृतीयं जन्म तद्धरेः । अन्तर्यामितयैवं हि सर्वजीवेषु संस्थितम् । सर्वदोषोज्झितं विष्णुं कर्तारं सर्वकर्मणाम् । नित्यानन्दं स्वतन्त्रं च सर्वज्ञं सर्वतोऽधिकम् । यो वेद देहबन्धात्स विमुक्तो नित्यमुत्तमान् । भोगान्भुङ्क्ते यथायोग्य-मिति वेदानुशासनमि'त्यैतरेयसंहितायाम् । नात्र जीवोत्पत्तिमात्र-मुच्यते । न हि जीवोत्पत्तिमात्रपरिज्ञानादमृतत्वं भवति । ज्ञातमेव सर्वैः पितापुत्रसम्बन्धमात्रं पश्चादिभिरपि । 'गर्भे नु सन्नन्वेषामवेद-महं देवानां जनिमानि विश्वे'त्युक्तार्थ उदाहृतमन्त्रे देवजन्मकथनाच्च । विष्णुर्हि परमो देवः । तेनैव सह सर्वेऽपि देवा जीवदेहजनने जायन्त इव । शरीरप्राप्तिरेव हि जन्मान्येषामपि । अयमेव विशेषो देवानां दुःखाभोगः । स्वातन्त्र्यं च विष्णोः । आत्मन्येवात्मानं बिभर्ति आत्मानमेव तद्भावयतीत्याद्यात्मशब्दश्च मुख्यतो विष्णावेव युज्यते । णकारो बलं षकारः प्राण आत्मेति विष्णुशब्दार्थैक-देशवाचित्वाच्चात्मशब्दस्य । एतया द्वारा प्रापद्यतेति तस्यैव शरीरप्रवेशस्य प्रस्तुतत्वाच्च । जीवशरीरं परित्यज्यान्यत्रगमनमात्रं विष्णोरप्यस्तीति प्रैतीत्युक्तेऽप्यविरोधः । कृष्णराघवादिस्वरूपमेव ह्यसौ न परित्यजति । 'कृष्णो ह्यत्यक्तदेहोऽपि त्यक्तदेहवदेव

कर्मभ्यः प्रतिधीयतेऽथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदुक्तमृषिणा गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ॥ शतं मा पुर आयसीर-रक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवत् ॥ १ ॥ (यथास्थानं गर्भिण्यः)
इत्यैतरेयोपनिषत्सु द्वितीयारण्यके पञ्चमोऽध्यायः ॥ २ ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

च । लोकानां दर्शयामास स्वरूपसदृशाकृतिम् । येनरूपेण कंसादीन् जघ्ने तद्रूपमेव हि । पूज्यतेऽद्यापि शर्वाद्यैर्निर्मितान्याशवाकृतिः । स्वर्गारोहणकाले तु जनास्तेनैव मोहिताः । यत्तद्रूपं निजं विष्णोर्दृष्टं सर्वजनैर्भुवि । अद्यापि तद्देवलोके पूज्यते सर्वदैवतैरि'त्यादि स्कान्दे । 'प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनमि'ति च भागवते । प्रेतां यज्ञस्य शंभुवेत्यादिवत्प्रकृष्टगतिवाच्येवायं शब्दः । प्रकृष्टगतित्वादेव च मरणेऽपि प्रयुज्यते । एषामवेदमहमित्यत्रापि जीवभेद एवोक्तः । अन्यथा मम जनिमानीत्येवोच्येत । व्यर्थता चैषामित्यादि विशेषणानाम् । अवेदमित्यनेनैव स्वस्य सिद्धत्वादहमित्यप्यहेयत्वेनेति क्रियाविशेषणम् । जन्म जानन्नपि देवानां दुःखादिहेयरहितत्वेन व्यजानामीत्यर्थः । तस्मादहं मनुरित्यादावप्यहेयगुणं भगवन्तमेवाहंशब्दो वक्ति । सर्वान्तरत्वात्तस्मिन्नेवाभवमित्युत्तमपुरुषशब्दोऽपि सर्वो वर्तते । 'अहेयत्वादहं विष्णुः स तु सर्वान्तरत्वतः । अस्य स्मीत्यादिभिः शब्दैरुच्यतेऽन्योऽपि जीवत' इति ब्रह्मवैवर्ते । न च मूढव्यवहार एव वेदनिर्णयाय भवति । किं तु सर्वेषामनुभवो युक्तयश्च वाक्यान्तरं च निर्णयकारणम् । तस्मात्सर्वजीवादिभ्योऽन्यः सर्वोत्तमो विष्णुरेवात्रोक्तः । 'न वेदेषु पदं किञ्चिद्वर्णो वा व्यर्थ इष्यते । यथायोग्यं चार्थभेद ऊह्यः सर्वत्र वेदिभिरि'ति शब्दनिर्णये । 'शब्दा रेतोन्नमित्याद्या अपि तत्र गतं हरिम् । वदन्त्यविष्णुवाची हि न शब्दः क्वचिदिष्यत' इति च । भावयति सम्भावयति । सोऽग्र एव सोऽग्रचो विष्णुरेव । पुत्रसम्भावनमपि तत्रस्थं विष्णुं सम्भावयामीति तत्तस्यैव भवति । एवं भावयतामेवैष पन्था उरुगाय इत्याद्यपि । तं पश्यन्ति पशव इत्याद्यपि दिव्यपश्वादीनामेव । अन्येषां स्वभावप्रवृत्तिः । ता एव देवताः शतं पुर आयसीर्ज्ञानिन्यो विशेषतः । अय पय गताविति

SGDF
Sri Gangeshwar Digital Foundation

धातोः। मानुषानपेक्ष्य पूर्णत्वात्पुरः। विष्णुर्मुख्यत एव पूर्णः। न च शरीरैर्जीवो रक्षितः। मुख्ये युज्यमाने च नामुख्यार्थः कल्प्यः। शमस्य विद्यत इति शी विष्णुः पूर्णानन्दत्वात्। स एव ज्ञानत्वाद्यश्चेति श्यः। सोऽस्य जीवस्येन इति श्येनः। विष्णुं स्वामिनं ज्ञात्वेत्यर्थः। निरदीयं निष्क्रम्यातीतोऽस्मि गर्भवासं स्वरानन्दो विष्णुरत्रग इति स्वर्गलोको विष्णुलोकः। अमृतः सन्सर्वान्कामानाप्त्वा तानेव सर्वान्कामान्समभवदनुभवति। अपेक्षितवस्तुस्वीकार आप्तिः सम्भवो भोगः। तान्समभवत्ततो मनुष्या अजायन्तेत्यादिवत्। मुक्त्यनन्तरमेव ह्यनुपचरितसर्वकामावाप्तिः। मुख्य एव चार्थः स्वीकार्यः। अमुक्तानां विष्णुलोकगानामपि न सर्वकामावाप्तिः। जयविजयादीनामप्रियदर्शनात्। अतोऽमृतः सन्सर्वान्कामानाप्त्वेत्यर्थः। 'मुक्तः कामानवाप्नोति भुङ्क्ते चैव यथेष्टतः। सर्वानपि निरातङ्कः सर्वदा च हरेर्वश' इति सत्तत्त्वे ॥१॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके पञ्चमोऽध्यायः॥ २॥५॥

॥ ॐ ॥ 'अयं विष्णुर्हि किंरूप उपास्योऽस्माभिरच्युतः। इत्यपृच्छद्रमादेवी महिदासं जनार्दनम्। आह तां महिदासोऽथ पूर्णानन्दतमस्त्विवति। उपास्यस्तादृशो ह्यस्य स्वभावः परमात्मनः। येन जीवो दर्शनादीन्प्रेरितः कुरुते सदा। यो विष्णुर्हृदयमिति हृद्गतत्वात्प्रकीर्तितः। मन्तृत्वान्मन इत्येव यच्च ज्ञानस्वरूपतः। एतत्सन्निहितत्वाच्च पूर्णत्वादेति कीर्तितः। इतत्वाच्च ततत्वाच्च स इतन्नाम केशवः। गुणानामुच्चयो यस्मात्स च इत्येवशब्दितः।

॥ हरिः ॐ ॥ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति यदेतद्धृदयं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः

SGDF
Sri Gargeshwari Digital Foundation

सम्यग्ज्ञानस्वरूपत्वात्संज्ञानमिति कीर्तितः । आततज्ञानरूपत्वादाज्ञानं भगवान्हरिः । विविधज्ञानरूपत्वाद्विज्ञानमिति कीर्तितः । प्रकृष्टात्मगुणज्ञानरूपः प्रज्ञानमुच्यते । अविस्मृतित्वान्मेधा स दृष्टिर्दर्शनरूपतः । धृतिर्धारणरूपत्वान्मतिर्मासु ततत्वतः । मनुनाम्नामजादीनां मनीषेशो यतो हरिः । सर्वप्रेरकरूपत्वाज्जूतिरित्यभिधीयते । सर्वदेशेषु कालेषु स्वरूपेषु च सर्वशः । समं रमत इत्येव स्मृतिर्नाम जनार्दनः । सर्वस्य क्लृप्तिकर्तृत्वात्सङ्कल्प इति गीयते । क्रतुः स सर्वकर्तृत्वादसुरप्यसनाद्धरिः । अमेयानन्दरूपत्वात्काम इत्यभिधीयते । अवशः स स्वतन्त्रत्वात्त्रयोविंशति नामकम् । यो वेदैवं हरिं सम्यङ्मुच्यतेऽखिलसंसृतेः । ब्रह्मा शिवश्च शक्रश्च देवाश्चान्ये समस्तशः । तथैव पञ्चभूतानि पुण्यपापविमिश्रिताः । क्षुद्रात्मानस्तु ये मर्त्या इतरे असुरा अपि । सर्वं जगदिदं विष्णोर्वशे तिष्ठति सर्वदा । तेनैव नीयते नित्यं तस्मिन्नेव प्रतिष्ठितम् । मुक्ता ये लोकनामानो नीयन्ते तेऽपि विष्णुना । स्वयं चानन्यनिष्ठत्वात्प्रतिष्ठेत्यभिधीयते । देशतः कालतश्चैव गुणतश्चातिपूर्तितः । विष्णोर्ब्रह्मेति नामैतन्मुख्यतोऽन्यत्र न क्वचित् । सोऽलोकनामा मुक्तस्तु चितिमात्रस्वरूपतः । प्रकृष्टज्ञानरूपस्य प्रसादात्परमात्मनः । अस्माद्देहात्समुत्क्रम्य गत्वोर्ध्वं लोकमुत्तमम् । अमृतः सन्विष्णुलोके भोगान्सम्प्राप्य पुष्कलान् । भुङ्क्ते

सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्त्येष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रोऽलोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवत् ॥ ॥ १ ॥ इत्यैतरेयोपनिषत्सु द्वितीयारण्यके षष्ठोऽध्यायः ॥ २ ॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

यथेष्टतो नित्यमिति वेदानुशासनमि'त्याद्यैतरेयसंहितायाम् । जानन्त्याऽपि देव्या लोकानुग्रहार्थं विशेषज्ञानार्थं च कोऽयमात्मेतिपृष्टः स भगवानाह । कतरः स आत्मेति । कतरः आनन्दतमः 'यत्रोभयोः प्रयोगो न तत्रैकार्थौ तरसमावि'ति शब्दनिर्णये । यत्प्रेरणादयं जीवो दर्शनादीन्करोति च । रमाब्रह्मादीनामपि तत्प्रेरितत्वात् । सर्वेषां दर्शनादिकारणत्वमेकैकमपि तस्य लक्षणं भवतीति वा शब्दः सर्वत्रानुषज्यते । प्रजापतिः शिवः लिङ्गाभिमानित्वात् । 'प्रजापतिः शिवः शेषो लिङ्गमित्यभिधीयते । लिङ्गाभिमानी लोकस्य स्रष्टा गिरिश एव ही'ति शैवपुराणे । 'सममस्त्वनयोर्युद्धमिति प्राह प्रजापतिः । वाक्यं शिवस्य तच्छ्रुत्वा शक्रो नेत्याह सत्वर' इति भारते । क्षुद्रमिश्राणीव बीजानि शाल्यादिबीजवत् । भिन्नस्वभावा ब्रह्मादयः सर्वजीवाः । 'ब्रह्माद्याः सर्व एवैते जीवा भिन्नस्वभावकाः । यथाशाल्यादिबीजानि भिन्नवीर्याणि सर्वश' इति सत्तत्त्वे । प्रथमेतराणीतिशब्दो मानुषाणां द्वितीयो सुरादीनाम् । प्रज्ञानेत्रोऽलोक इति । अलोकशब्देन मुक्तसमुदाय उच्यते । ब्रह्मादिस्थावरान्तस्य लोकस्य सर्वं तत्प्रज्ञानेत्रमिति विष्णवधीनत्वस्य पूर्वमेवोक्तत्वात्पुनः प्रज्ञानेत्रोऽलोक इति मुक्तविषयमेव । मुक्तो ह्यलोक्यत्वादलोकः । अण्डजानि चेत्याद्युक्त्वा पुनरश्वा गाव इत्यादि देवादीनां मन आदेरेव जातानामपि स्वीकारार्थम् । अण्डजत्वाद्युत्पत्तिप्रकारोऽपि विष्णवधीन इति ज्ञापयितुं तत्कथनम् । 'तथाश्मानस्तृणकाष्ठाश्च सर्वे दिदृक्षये स्वां प्रकृतिं भजन्त' इति भारतवचनादश्मादीनामपि प्राणित्वात्तत्स्वीकारार्थं प्राणीति । गमनपतनस्थिरत्वादयोऽपि भावा विष्णवधीना इति ज्ञापयितुं जङ्गममित्यादिवचनम् । स एतेनेत्यलोकशब्दोक्तो मुक्तः परामृश्यते । सकलकर्मबन्धमुक्त्यनन्तरं हि शरीरादुत्क्रामति । प्रकृष्टज्ञानरूपेण विष्णुना प्रेरितः प्रज्ञेनात्मनैवोत्क्रम्य तेनैव सर्वा-

SGDF
Sri Gargeshwari Digital Foundation

न्कामानाप्त्वा तेनैव सर्वान्कामान्स भुङ्क्त इति सर्वत्रानुषज्यते । प्रज्ञानेत्रोऽलोक इत्युक्ते कथं प्रज्ञानेत्रो मुक्त इत्याकाङ्क्षायां तस्यैव व्याख्यानं स एतेन प्रज्ञेनात्मनेत्यादि । अनुक्तविशेषणानामपि भगवदधीनत्वज्ञापनार्थं प्रज्ञानेत्रो लोक इति सामान्यवचनम् । 'अनारब्धफलानां च प्रारब्धानां च सर्वशः । कर्मणां दाह एवायं मुक्तिरित्यभिधीयते । स तु मुक्तस्ततो देहादुद्गच्छति परात्मना । प्रेरितो विष्णुलोकं च प्राप्य भोगानवाप्य च । भुङ्क्ते विष्णुप्रसादेन न विष्णोरवशः क्वचित् । विष्णुतन्त्रा इमे सर्वे मुक्ता अपि यतोऽखिला' इति ब्रह्माण्डे । ब्रह्मेन्द्रादिशब्दा विष्णावेव मुख्यत इति तद्व्यावृत्त्या जीवानां स्वीकारार्थमेष इत्यादिशब्दः । स हि भगवान्स्वनेत्रकोऽपि नानुग्राह्यः । अनुग्राह्यत्वं हि ब्रह्मादीनामत्र विवक्षितम् । 'नेयताऽनुग्राह्यतापि न सा विष्णोः स्वतोऽपि त्वि'ति शब्दतत्त्वे ॥१॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके षष्ठोऽध्यायः ॥ २ ॥ ६ ॥

॥ ॐ ॥ वाङ्मे मनसि प्रतिष्ठिता अवबोधरूपे विष्णौ प्रतिष्ठिता स च विष्णुर्मे वाचि स्थितः । यदेतद्धृदयं मनश्चेति विष्णुनामधेयेषूक्तत्वात् । आविरावीर्म एधि हे विष्णो ममाविराविर्भव । आणीस्थित आण्यां स्थित विष्णो इति संबोधनम् । 'आधारः सर्ववेदानां वेदाणी प्राण उच्यते । तस्मिंस्थितो हरिर्नित्यमाणीस्थ इति गीयत' इति शब्दतत्त्वे । आविरावीरिति दैर्घ्यमतिशयार्थे । आधिक्येऽधिकमितिसूत्रात् । अणशब्दस्य गतिवाचित्वाच्चलमाणमुच्यते । तस्य

॥ हरिः ॐ ॥ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणी स्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रांत्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम् ॥ १ ॥ २६ ॥ इत्यैतरेयोपनिषत्सु द्वितीयारण्यके सप्तमोऽध्यायः ॥ २ ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

धारणेन तद्वानाणी। स्थापक इत्यर्थः। मे श्रुतं मा प्राहासीः। मम विद्यागोचर एव सर्वदा भव। विस्मृतो मा भव। हे विष्णो अनेन त्वद्विषयेणैवाधीतेनाहोरात्रान्संदधामि। सर्वाहोरात्रेष्वपि त्वद्विषयाध्ययनमेव करोमीत्यर्थः। ऋतं यथावदवगतं त्वां वदिष्यामि। सत्यं साधुगुणैस्ततं सर्वनियन्तारं च। तद्विष्णवाख्यं ब्रह्म मामवत्विति तस्यैव विष्णोः परोक्षत्वेनैव प्रार्थनम्। 'वाङ्म इत्यादिकं खण्डं विष्णुप्रार्थनरूपकं अविघ्नत्वमभीप्सूनां शिष्याणां दृष्टवान्हरिरि'ति च ॥१॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके सप्तमोऽध्यायः ॥ २ ॥ ७ ॥ इति द्वितीयप्रघट्टकं सम्पूर्णम् ॥ २ ॥

॥ ॐ ॥ 'विष्णुनाम्नि षकारस्य णकारस्य च संहिताम्। विष्णोस्तु बहुरूपाणां वाचिकामृषयो विदुः। तौ च वर्णौ हरेः सम्यक्स्वरूपप्रतिपादकौ। बहुधैव स्थितस्यास्य सदैवैकस्वरूपिणः। विष्णुनामार्थरूपत्वाद्वेदानामपि सर्वशः। अन्येषामपि शब्दानां संहिता विष्णुवाचिकाः। तद्वाचकास्तथा वर्णाः सर्वे लौकिकवैदिकाः। पृथिवीनामकं रूपं पृथुत्वात्पृथिवीस्थितम्। देवता पूर्ववर्णस्य पूर्वरूपं तदुच्यते। देवतोत्तरवर्णस्य क्रीडनाच्च द्युनामकम्। दिवि स्थितं हरे रूपमुत्तरं रूपमुच्यते। वेदकत्वाच्चायनत्वाद्रूपं यद्वायुनामकम्। विष्णोस्तद्वर्णयोर्मध्यदेवतेति प्रकीर्तितम्। संहितानामकं तच्च रूपद्वयसहस्थितेः। वर्णद्वयं विकारं च षकारं केचिदब्रुवन्। षकारं मध्यमत्रैव णकारं केचिदुत्तरम्। पृथक्करणमेवैषां वर्णयोर्मध्यमुच्यते। उपसर्गमात्रं वीत्याहुः केचिन्नाम ष्णुमात्रकम्। षकारं च णकारं च

॥ अथ तृतीयारण्यकम् ॥

॥ हरिः ॐ ॥ अथातः संहिताया उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुस्संहितेति माण्डूकेय आकाशः संहितेत्यस्य माक्षव्यो वेदयां-

SGDF
Sri Gargeshwari Digital Foundation

वर्णौ पूर्वोत्तरावपि । व्यक्तिरेवोष्मणस्तत्र मध्यमित्यभिधीयते । सर्वेप्येत उपादेयाः पक्षा निर्दोषका यत' इत्याद्यैतरेयसंहितायाम् । आकाशस्थ आकाशनामा भगवान्वर्णयोर्मध्यदेवतेति माक्षव्यः । उभयरूपसंहितत्वात्संहितानामकः । स माण्डूकेयस्तेन माक्षव्येनापरिहृतः स्वपक्ष इति मेने । मे मदीयेन मदुपासितेनास्याकाशस्य पुत्रेण वायुना न समागादसौ माक्षव्यः । वायुस्थविष्ण्वनुपासनात् । यद्यप्याकाशस्थो भगवान्संहितानामको भवति । तथापि न वायुस्थस्यासंहितात्वं भवतीत्यपरिहृतत्वम् । परिहृतो माण्डूकेयपक्ष इत्यहं मेन इत्यागस्त्यः । आकाशे विष्णूपासनस्याधिकफलत्वात् । पिता ह्याकाशो वायोः । भगवतस्तु पक्षः समत्वमेव वाय्वाकाशयोरिति । आकाशस्य पितृत्वाद्वायोर्बलाधिकत्वाच्चोभयोरुपासनास्थानत्वे साम्यम् । तस्मादुभावपि ग्राह्यौ । त्वगिन्द्रियदेवतात्वेनाकाशात्पूर्वमेव वायोःसात्विकाहङ्कारजत्वाद्वायोराकाशाद्गुणाधिकत्वम् । तथाप्यत्राकाशस्य पितृत्वं व्याप्तिश्चाधिकेत्युपासनायां साम्यम् । अत्र प्राणाख्यस्य प्राणे स्थितस्य विष्णोः । संहितानामत्वे पितापुत्रयोः साम्यमेव । अन्यत्र तु पुत्रपक्ष एव बलीयान् । युक्तिमत्त्वात् । 'मनोवाक्प्राणनामाऽसौ मन आदिषु संस्थितः । विष्णुस्तस्य रथो देह इन्द्रियाश्वः प्रकीर्तित' इति च । 'प्रष्टिः स पृच्छनीयत्वात्परमात्मा जनार्दनः । वक्तृत्वाच्चैव वाङ्नामा

चक्रे स हाविपरिहृतो मेने न मेऽस्य पुत्रेण समगादिति समाने वै तत्परिहृतो मेन इत्यागस्त्यः समानं ह्येतद्भवति वायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपं प्राणस्संहितेति शूरवीरो माण्डूकेयोऽथ हास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपं मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राणस्त्वेव संहितेति समानमेनयोरत्र पितुश्च पुत्रस्य च स एषोऽश्वरथः प्रष्टिवाहनो मनोवाक्प्राणसंहतः स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु माण्डूकेयानाम् ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

मनो मन्तृत्वहेतुत' इति च। 'प्राणन्नेव प्राणो नाम भवति। वदन्वाक्पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैव तानि कर्मनामान्येवे'ति च श्रुतिः। मुक्तिरेव स्वर्गलोकः। अमुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वेति प्रस्तुतत्वात्। 'मुक्तः प्रकृष्टज्ञानैश्च वेदैर्विष्णूत्थतेजसा। नित्यायुषा च युक्तः स्यात्संहितारूपविद्धरेरि'ति च। प्रकृष्टत्वेन जननात्प्रजेति ज्ञानम्। पाति शंसाधनाश्चेति पशवो वेदाः। परब्रह्मणो विष्णोर्वरणादेव सम्यक्चायितं स्वरूपं तेजः ब्रह्मवर्चसम्। लौकिकप्रजादिकमपि तदिच्छतां यथायोग्यं भवति। माण्डूकेयैर्ऋषिभिरुपासिता एता विद्याः॥ १॥

'वराहो वामनः सिंह इति रूपत्रयं हरेः। पूर्वोत्तरार्णमध्येषु स्थितमुक्तं सनातनम्। माण्डूकेयैर्हि शाकल्यो वासुदेवादिरूपिणम्। तेषु चोच्चारके चैव स्थितमाह चतुर्विधम्। भूमिद्युवृष्टिपर्जन्यनाम्नोर्व्यादिषु संस्थितम्। उर्व्यादीनां चतुर्णां च देह एव स्थितिं पुनः। अधरार्धस्य चोर्व्याश्च साम्यमन्यस्य वै दिवा। वाचो वृष्ट्यैव साम्यं च पर्जन्येनैव चात्मनः। तेषां तेषु स्थितिं चैव विष्णोश्च चतुरात्मनः। आकाशस्यान्तराकाशे नृसिंहस्यात्र संस्थितिम्। वायोः प्राणात्मतां चैव तत्र दाशरथेः स्थितिम्। सूर्यविद्युद्धुताशानां

अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः सन्धिः पर्जन्यः संधाता तदुतापि यत्रैतद्बलवदनूद्वह्वन्संदधदहोरात्रे वर्षति द्यावापृथिव्यौ समधातामित्युताप्याहुरिती न्वधिदैवतमथाध्यात्मं पुरुषो ह वा अयं सर्व आन्दं द्वे विदले भवत इत्याहुस्तस्येदमेव पृथिव्या रूपमिदं दिवस्तत्रायमन्तरेणाकाशो यथाऽसौ द्यावापृथिव्यावन्तरेणाऽकाशस्तस्मिन्हास्मिन्नाकाशे प्राण आयत्तो यथाऽमुष्मिन्नाकाशे वायुरायत्तो यथाऽमूनि त्रीणि ज्योतींष्येवमिमानि पुरुषे त्रीणि ज्योतींषि यथासौ दिव्यादित्य एवमिदं शिरसि चक्षुर्यथाऽसावन्तरिक्षे विद्युदेवमिदमात्मनि हृदयं यथाऽयमग्निः पृथिव्यामेवमिदमुपस्थे रेत एवमु ह स सर्वंलोकमात्मानमनुविधायाऽ-

SGDF
Sri Gargeshwari Digital Foundation

दृग्घ्रद्रेतःसु च स्थितिम्। कपिलस्य च हंसस्य जामदग्न्यस्य तेषु च। स्थितिं वदति विद्येयमपि मोक्षप्रदायिनी'त्यादि च। वर्षणाद्वृष्टिः। परं जनयतीति पर्जन्यनामा विष्णुः। सं धिनोतीति सन्धिः। धिनु पुष्टाविति धातुः। सम्यग्धारणात्सन्धाता। वर्षणमेव द्यावापृथिव्योः सन्धानम्। पर्जन्यस्थो भगवांस्तु तत्कर्ता॥ २॥

पृथिवीस्थो वराहस्तु संहितादेवतोदिता। दिविष्ठो वामनश्चैव सम्प्रोक्तः पददेवता। नृसिंहस्त्वंतरिक्षस्थो भगवान्क्रमदेवता। स्वाध्याय-मेवं ध्यात्वा यः करोत्युपवदेन्न तम्। तस्यापवदिता याति त्रैलोक्या-दध एव हि। नाशमाप्नोति निरये तस्मादपवदेन्न तम्। गच्छस्यध इति ब्रूयादन्यं ब्राह्मणतस्तथा। ब्रह्मप्राप्तेर्हि योग्यो यो ब्राह्मणः स न चेतर' इति च। भञ्जनवर्जितत्वान्निर्भुजं संहिता। तृण च्छेदन इति धातोः प्रतृण्णं पदम्। उभयमन्तरेण क्रमः। निर्भुजमूलत्वा-त्पदादीनां तद्विषयप्रवादा अपि निर्भुजप्रवादा इत्येवोच्यन्ते। पृथिवी-स्थितपृथिवीनामकविष्ण्वायतनं पृथिव्यायतनमित्यादि। अवराभ्यां पृथिव्यन्तरिक्षाभ्यां च्युतोऽसीति। उत्तराभ्यामन्तरिक्षद्युभ्याम्। 'क्रमस्वाध्यायकृद्यस्तं विशेषेण न निन्दयेत्। लोकत्रयादपि भ्रष्टो

हेदमेव पृथिव्या रूपमिदं दिवः स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति॥ २॥

अथातो निर्भुजप्रवादाः पृथिव्यायतनं निर्भुजं दिव्यायतनं प्रतृण्ण-मन्तरिक्षायतनमुभयमन्तरेणाथ यद्येनं निर्भुजं ब्रुवन्तमुपवदेदच्योष्ठाऽ-वराभ्यां स्थानाभ्यामित्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवन्तमुपवदेदच्योष्ठा उत्तराभ्यां स्थानाभ्यामित्येनं ब्रूयाद्यस्त्वेवोभयमन्तरेणाह तस्या नास्त्युप-वादो यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभि-व्याहरति तत्प्रतृण्णस्याग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेणाथ यद्येनं निर्भुजं ब्रुवन्तं पर उपवदेत्पृथिवीं देवतामारः पृथिवी त्वा देवता रिष्यतीत्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवन्तं पर उपवदेद्दिवं देवतामारो द्यौस्त्वा देवता

SGDF
Sri Gargeshwari Digital Foundation

यस्मात्तन्निन्दको भवेदि'ति च। तस्मादतिदुष्टत्वात्तन्निन्दको नास्त्येवे-त्युक्तं तस्य नास्त्युपवाद इति। 'तं कृष्णं पुण्डरीकाक्षं को नु युध्येत बुद्धिमानि'त्यादिवत्। उपवदेदित्युक्तो मनुष्यमात्रः। पर उपवदे-दित्यसुरः। सर्वशत्रुत्वात्। 'अमुक्तियोग्यैस्तु नरैर्विदुषां निन्दने कृते। ब्रूयाल्लोकच्युतोऽसीति निन्दितोऽसुरसर्गगैः। नाशयिष्यति विष्णुस्त्वामन्धे तमसि पातयेत्। इति ब्रूयान्न तु ब्रूयाद्देवसर्गात्मकं क्वचिदि'ति च। 'षणयोः सन्धिकरणात्संहिताध्ययनं भवेत्। विषणस्त्विवति यो ब्रूयात्पदाध्यायी भवेत सः। संध्युक्तिश्च विभागश्च द्वयं व्याप्तं क्रमेण तु। तस्माद्द्विधाऽपि वचनात्क्रमाध्यायी भवेत सः। भोगवृद्धिं च यो मोक्ष इच्छेद्विष्णव इत्यसौ। मोक्षकामो विषणवे द्वयकामो द्वयं वदेत्। विष्णुनामात्मकत्वाच्चाथ संहितपदक्रमाः। सर्ववेदस्थिता मोक्षतद्भोगद्वयसाधकाः। तज्ज्ञानामेव नान्येषामिति वेदानुशासनम्। संहिताद्या ब्रुवन्वाऽपि य एवं विन्न चाब्रुवन्। परिवादं ब्रुवन्तं वा न ब्रुवन्तमथापि वा। यद्वदेतत्तथैव स्यात्क्षिप्रमेव न संशय' इति च। अग्र एव। अग्रयमेवोभयमन्तरेण। 'द्युम्नो द्युतिस्वरूपत्वाद्विष्णुरेव प्रकीर्तितः। योऽतिक्रामति तस्याज्ञामतिद्युम्नः प्रकीर्तितः। मोक्षयोग्योऽपि यस्त्वेवमतिद्युम्नो भवेत्पुमान्। लोक-च्युतोऽसीत्येवं तं ब्रूयान्नाज्ञास्थितं क्वचित्। लोकच्युतो भवेत्येनमपि नैव वदेत्क्वचित्। च्युतोऽसीति तु शिक्षार्थं ब्रूयान्नैवान्यथा क्वचिदि'ति च ॥ ३ ॥

रिष्यतीत्येनं ब्रूयादथ यद्येनमुभयमन्तरेण ब्रुवन्तं पर उपवदेदन्तरिक्षं देवतामारोन्तरिक्षं त्वा देवता रिष्यतीत्येनं ब्रूयाद्यथा तु कथा च ब्रुवन्वाऽब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यान्न त्वेवान्यत्कुशलाद्ब्राह्मणं ब्रूयादतिद्युम्न एव ब्राह्मणं ब्रूयान्नातिद्युम्ने चन ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह स्माऽह शूरवीरो माण्डूकेयः ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

भगवदुपासकस्य यस्मिन्कस्मिंश्चिद्दोष उक्ते तं प्रत्युक्तिप्रकारः पूर्वं दर्शितः। अनुव्याहारशब्देन भगवदुपासनाविषय एवास्याशक्त्यादिदोषं वदतः प्रत्युक्तिरुच्यते। निर्भुजं वदन्तमित्यादि त्ववस्थामात्रदर्शनम्। आत्मनो ज्ञानसामर्थ्यानुसारेण वक्तव्यत्वादनुव्याहारः। 'सर्वाधारत्वतो वंश इत्युपासीत यो हरिम्। वायुं च मुक्तिमाप्नोति य एवं तदुपासकम्। निन्देत विष्णुविज्ञानविषये तं वदेत सः। विष्णुना वंशभूतेन वायुना सहितं तथा। न शक्नोषीति मामात्थ हास्यतस्त्वामतो हि तौ। ज्ञानसामर्थ्यवानित्थं ब्रूयाद्देवादिरुत्तमः। अन्यो गन्धर्वपित्रादिरल्पज्ञानबलो हि यः। स ब्रूयाद्विष्णुवायुभ्यां सन्धिमिच्छन्तमेव माम्। सन्धातुं नाशको यस्माद्धास्यतस्त्वामतो हि तावि'ति च। स य एनं प्राणं वंशमुपवदेत्प्राणं प्रत्येनमुपासकमुपवदेत्। प्राणस्य विष्णोः प्रियत्वं तव न प्राप्स्यतीति। नाशकः संधातुं मया सह सन्धानं कर्तुं नाशकः। मम प्रीतिं कर्तुं नाशकः। 'तद्भक्तभक्तेष्वपि यो न कुर्यात्प्रीतिमञ्जसा। विष्णुर्जहाति तं पापमिह चामुत्र च प्रभुरि'ति च भारते॥ ४॥

पूर्ववर्णस्थितं यत्तद्रूपं पूर्वाक्षराभिधम्। वराहाख्यं हरेरन्यवर्णगं वामनाभिधम्। उत्तराक्षरसंज्ञं च वर्णयोरन्तरस्थितम्। अवनात्काशनाच्चैतदवकाशाभिधं हरेः। नृसिंहरूपमित्याहुर्निर्भुजास्यास्तथाऽवदत्। ह्रस्वो येनाक्षरोच्चारो मात्रासन्धिस्वरात्मकः। व्यासरूपो

अथातोऽनुव्याहाराः प्राणो वंश इति विद्यात्स य एनं प्राणवंशमुपवदेच्छक्नुवंचेन्मन्येत प्राणं वंशं समधां ३ प्राणं मा वंशं सन्दधतं न शक्नोषीत्याह प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयादथ चेदशक्नुवन्तं मन्येत प्राणं वंशं समधित्सिषन्तं नाशकः सन्धातुं प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयाद्यथा तु कथा च ब्रुवन्वा ब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यान्न त्वेवान्यत्कुशलाद्ब्राह्मणं ब्रूयादिति द्युम्नएव ब्राह्मणं ब्रूयान्नातिद्युम्ने चन ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह स्माऽह शूरवीरो मांडूकेयः॥४॥ अथ खल्वाहुर्निर्भुजवक्त्राः पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः

SGDF
Sri Gargeshwari Digital Foundation

हरिः साक्षात्संहितानामकस्त्ववति। तत्पुत्रो मध्यमः प्राह समोच्चारणकारणः। सामनामा वासुदेवः संहितानामवानिती'ति च। मापयति त्रायति चेति मात्रा भगवान्। यथोच्चारितवर्णयोर्मध्यस्थितश्च। 'मानस्तेनेभ्यो ये अभिद्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः। येषां नैतन्नापरं किञ्चनैकं ब्रह्मणस्पते ब्रूहि तेभ्यः कदाचित्। अथो शमेनोपरता मनुष्या ये धर्मिणो ब्रूहि तेभ्यः सदा नः। आ देवानामोहते विव्रियो हृदि बृहस्पते न परः साम्नो विदुः'। अभिद्रुहस्पदे अभितो द्रोहस्य नित्यनिरतिशयदुःखस्यान्धतमसो योग्याः। 'ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः। शास्त्रतत्त्वमविज्ञाय तथा वादबला जनाः। कामक्रोधाभिभूतत्वादहङ्कारवशं गताः। याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः। ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः। वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते। तेषां तमःशरीराणां तम एव परायणमि'ति मोक्षधर्मे भगवद्वचनादेवंविधा एव स्तेनाः। अभिद्रुहस्पदस्थाश्च। निरामिणः रामस्य रमणरूपस्य पूर्णानन्दस्वरूपस्य विष्णोर्जीवस्वरूपताज्ञानेन नीचताविदः। त एव रिपवश्च तस्य। 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानन्तो मम भूतमहेश्वरम्। मोघाशा मोघकर्माणो मोघज्ञाना

पूर्वरूपोत्तररूपे अन्तरेण सा संहितेति स य ऐवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथ वयं ब्रूमो निर्भुजवक्त्रा इति ह स्माह ह्रस्वो मांडूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण येन सन्धिं विवर्तयति येन स्वरा स्वरं विजानाति येन मात्रामात्रां विभजते सा संहितेति स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथ हास्य पुत्र आह मध्यमः प्रातीबोधीपुत्रोऽक्षरे खल्विमे अविकर्षन्ननेकीकुर्वन्यथावर्णमाह तद्याऽसौ मात्रा पूर्वरूपोत्तररूपे अन्तरेण सन्धिविज्ञपनी साम तद्भवति सामैवाहं संहितां मन्य इति तदप्येतदृषिणोक्तं बृहस्पते न परः साम्नो विदुरिति स य एवमेतां संहितां वेद

SGDF
Sri Gargeshwari Digital Foundation

विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता' इत्यादिवचनादसुरादयः। अन्नेषु जागृधुः भोगमात्रगृध्नवः। येषामेतत्सर्वोत्तमं वासुदेवाख्यं परं ब्रह्म नास्तीति पक्षः ईशितव्ये विद्यमाने हीश्वरो भवतीति। न चापरं किञ्चित्परमपेक्षया ह्यपरमिति। किं तर्हि किञ्चनैकं किमप्येकमेव वस्त्वस्ति न परमपरं चेति तेषां पक्षः। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत्कामहैतुकम्। एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः। प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः। ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी'त्यादि वचनात्। ब्रह्मणस्पते ब्रह्मणो वेदस्य पते वायो। 'अथ हेममासन्यं प्राणमूचुः। एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिरि'त्यादि श्रुतेरेतादृशेभ्यो मा ब्रूहि। शमेन विष्णुनिष्ठया उप समीपे तस्मिन्नेव रताः साम्नो विष्णोः परं किमपि न विदुः। तदेव देवानां त्रयः। सर्वदेवानां परतमं विष्ण्वाख्यं ब्रह्म हृदा व्योहते। वासुदेवादिरूपेण वरं नियामकं चेति त्रयः। तेभ्यो ब्रूहि। 'वायुं विद्याः समासाद्य सर्वासां पतिमूचिरे। एतेनेभ्यो मैव नो ब्रूहि ब्रूह्यथो वैष्णवेषु चे'ति च। 'सामनाम्ना श्रुतिर्यस्माद्विष्णुमाह ततः प्रियम्। तन्नाम विष्णोरिह तु संहितार्थं वदेद्यत' इति च। सामनाम्नः संहिताशब्दार्थत्वाद्विष्णोस्तस्य नाम्नः श्रुतिसिद्धत्वाच्च सामनाम्नो वासुदेवरूपसमाख्यासु पञ्चरात्रे पठितत्वाच्च तद्रूपं संहितानामकमिति युक्तमित्यभिप्रायः॥ ५॥

'देवता पूर्ववर्णस्य लक्ष्मीरेव प्रकीर्तिता। नारायणस्तूत्तरस्य तौ वाक्प्राणाभिधौ मतौ। मध्यस्थः संहितानामा सोऽर्धनारीपुमात्मकः।

सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति॥ ५॥

बृहद्रथन्तरयो रूपेण संहिता सन्धीयत इति ताक्ष्यों वाग्वै रथन्तरस्य रूपं प्राणो बृहत उभाभ्यामु खलु संहिता सन्धीयते वाचा च प्राणेन

SGDF
Sri Gangeshwari Digital Foundation

वेदात्मकत्वाद्वाङ्नाम्नी लक्ष्मीरेव प्रकीर्तिता । प्राणनामा प्रणेतृत्वात्साक्षान्नारायणः स्वयं । रमित्यानन्द उद्दिष्टः सम्भोग्यं थमुदाहृतम् । विष्णुभोग्या रतितरा लक्ष्मीरेव रथन्तरम् । नारायणौ बृहत्त्वात्तु बृहन्नामा प्रकीर्तितः । रथन्तरस्य बृहतो देवते चैव तावुभौ । वाक्प्राणसंस्थितौ चैव ताभ्यामेव हि सन्धितम् । लक्ष्मीनारायणं रूपं संहितानामकं शुभम् । एतां विद्यामवाप्तुं हि वत्सरं गा अरक्षत । तार्क्ष्य एतन्मात्रं च समुद्दिश्य न चापरम् । संहिता देवता बह्वृच इति कुण्ठरवात्मजः । द्वयं द्वयं देवतानां मिलितं हरिशर्ववत् । संहितानामकं तत्र वर्णमध्यस्य देवता । तयोरेकं देवतयोः परमन्यत्तथाऽवरं । अवरस्य परस्यापि संयोगात्संहिता तु सा । प्रोक्ताऽवरपरेत्येव वाक्प्राणाख्यौ रमाच्युतौ । संहितैका तथैवान्या केशवो वायुसंयुतः । वायुः स पवमानाख्यो देवताश्चाखिला अपि । तृतीया संहिता प्रोक्ता देवतास्ताः सशङ्कराः । चतुर्थी संहिता प्रोक्ता शङ्करो ब्रह्मणा सह । पञ्चमी संहिता चैव संहिता मोक्षदा इमाः । प्रथमायां द्वितीयायां विष्णुरेव परो मतः । तृतीयायां वायुरेव चतुर्थ्यां सर्वदेवताः । विरिञ्च एव पञ्चम्यामवरा इतरे ततः । प्रथमायां संहितायामवरो वामभागगः । द्वितीयायां तु परमस्तृतीयायां तथाऽवरः । चतुर्थ्यां परमश्चैव पञ्चम्यां वामगोऽवरः ।

चैतस्यां ह स्मोपनिषदि संवत्सरं गा रक्षयते तार्क्ष्य एतस्यां ह स्म मात्रायां संवत्सरं गा रक्षयते तार्क्ष्यस्तदप्येतदृषिणोक्तं रथन्तरमाजभारा वसिष्ठः ॥ भरद्वाजो बृहदाचक्रे अग्नेरिति स य एवमेतां संहितां वेद-सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्प्राणेन संहितेति कौण्ठरव्यः प्राणः पवमानेन पवमानो विश्वैर्देवैर्विश्वे-देवाः स्वर्गेण लोकेन स्वर्गो लोको ब्रह्मणा सैषाऽवरपरा संहिता स यो हैतामवरपरां संहितां वेदैवं हैव स प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सन्धीयते यथैषा संहिता स यदि परेण वोपसृतः स्वेन वाऽर्थेनाभिव्याहरेदभिव्याहार्षन्नेव विद्याद्दिवं संहिताऽगमद्विदुषां देवाना-

SGDF
Sri Gurgeshwari Digital Foundation

अवराद्याः परान्ता यदेताः सर्वाश्च संहिताः। ततोऽवरपराः प्रोक्ता नैवोक्तास्ताः परावराः। अभिमानी द्युलोकस्य शिवः सर्वस्य लोकनात्। द्योतनाच्च यदि ब्रूयान्मन्त्रमेतमथाऽपि वा। आत्मार्थेऽथ परार्थे वा चिन्तयेदेवमञ्जसा। विद्वांसो देवता यस्मात्सम्यक्तेन महत्फलम्। तेषामेव हरिश्चैव संहितारूपकः प्रभुः। अगमद्देवलोकं हि कर्तुं देवेष्वनुग्रहम्। इति चिन्तयतस्तेषां प्रसादात्फलमञ्जसा। पञ्चालचण्डो वाचं तु ब्रह्माणीं हि सरस्वतीं। मन्यतेऽस्याः पुत्रवच्च देवं नारायणं प्रभुम्। वेदैर्हि व्यज्यते विष्णुः सा च वेदाभिमानिनी। प्राणस्थो भगवान्विष्णुः प्राणनामा प्रणेतृतः। ब्रह्मणोऽपि पिता नित्यं भगवान्पुरुषोत्तमः। उपचर्यते पुत्र इति वेदैर्यद्व्यज्यते हरिः। सा देवी संहितानाम्नी वाच्योऽस्या विष्णुरेव हि। प्रजापत्याख्यशर्वेण प्रोक्ताऽन्या संहिताऽपि हि। विष्णुरेवादितिर्नाम सर्वस्यात्ता यतः प्रभुः। स एव पितृसंस्थस्तु पातृत्वात्पितृनामकः। देवतोत्तरवर्णस्थ मातृस्थो मातृनामकः। माननात्पूर्ववर्णस्य देवतेति प्रकीर्तितः। पोषकत्वात्सन्धिनामा वर्णयोरन्तरस्थितः। स एव पुत्रसंस्थश्च पुत्रनामा जनार्दनः। त्राणात्पूतित एवासौ वर्णसन्धानकर्मणि। सन्धाननामा सन्धानकर्तृत्वात्पुरुषोत्तमः। प्रजातिकर्मसंस्थश्च स एव प्रजनाभिधः। जनकत्वात्परो विष्णुरेवं विष्णुर्हि संहिता। वासुदेवादिरूपेण चतुर्धैवं व्यवस्थितः। स एव दिवि संस्थश्च द्युनामा क्रीडनात्प्रभुः। अन्तरेवे-क्षणाच्चैव सोऽन्तरिक्षोऽन्तरिक्षगः। पृथिवी पृथिवीस्थश्च प्रथितत्वा-ज्जनार्दनः। मुख्यार्थत्वात्सर्वनाम्नां सर्वदेवाभिधो हरिः। विश्वे देवा इति प्रोक्तो बहुधा तेषु संस्थितः। ज्ञानद्युतेर्देवनामा स्थितो देवेषु केशवः। गां धारयंश्च गंधर्वो गंधर्वेषु व्यवस्थितः। माननान्मानुषो नाम मानुषेषु स्थितो हरिः। पालनात्पितृनामाऽसौ पितृष्वेव व्यव-स्थितः। रतेः प्राणेऽसुराख्यश्च सोऽसुरेषु व्यवस्थितः। एवं पंचजने-

SGDF
Sri Gurgeshwari Digital Foundation

ष्ठुस्थो हरिः पंचजनाभिधः। जातनामा जातसंस्थः प्रादुर्भूतगुणत्वतः। जनिक्रियास्थितश्चासौ जनित्वमिति गीयते। जनिं यस्मात्तवयति तवनं हि प्रकाशनमि'ति च। 'प्रथश्च सप्रथश्चैव राजानौ मत्स्य-देशजौ। यापयामासतुर्विष्णोर्हविर्नाम्नो हविर्मुखे। अनुष्टुब्देवता यस्तु नृसिंहो जगतोऽस्य च। स्वमुखे हवनादेव हविरित्यभिधीयते। तस्मिन्यज्ञे वसिष्ठस्तु चतूरूपाज्जनार्दनात्। आजहार श्रियं देवीं रथ-न्तरवराभिधाम्। चतुर्मूर्तिः स्तुतस्तेन प्रेषयामास तां श्रियम्। सा चास्मै प्रददौ विद्यां प्रययौ च पुनर्हरिम्। धातेत्युक्तोऽनिरुद्धस्तु प्रद्युम्नस्तु द्युनामकः। वासुदेवः प्रसविता सर्वस्य प्रसवाद्विभुः। संकर्षणो विष्णुनामा प्रणेतृत्वाद्बलादपि। चतूरूपं परं विष्णुं राजानौ प्रथसप्रथौ। भरद्वाजो वसिष्ठश्च ध्यात्वाऽविन्दन्परात्परम्। यजनीयो यजुर्नामा विष्णुः संकर्षणाभिधः। जीवानां स्कन्दनादेव स्कन्नः प्रद्युम्न उच्यते। प्रथमो वासुदेवस्तु देवयानोऽनिरुद्धकः। प्राप्यो देवैर्यतो नित्यमनिरुद्धाभिधो हरिः। तस्मादेवं चतुर्मूर्तेः स्तुतिसन्तोषिताद्धरेः। आजहार भरद्वाजो रूपं नारायणाभिधम्। तद्बृहन्नामकं विष्णोश्चातु-रात्म्यात्समुद्धृतम्। भरद्वाजमुपागम्य प्रादान्मोक्षवरं परम्। चतुर्मूर्तिः स भगवानग्निरित्यभिधीयते। अग्रयत्वात्सर्वभूतानामेवं चत्वार एव ते। अविन्दंस्तं चतुर्मूर्तिं साक्षान्नारायणं प्रभुम्। गुहायां संस्थितमपि ह्यतीव हितमस्य च। सर्वज्ञत्वाद्यज्ञनाम्नो विष्णोस्तेजः परं हि तत्। तस्मादेव चतुर्मूर्तेः सूरिप्राप्यत्वहेतुतः। सूर्यनाम्नोऽहरन्घर्मनामानं तं नृसिंहकम्। घर्षणात्सर्वलोकस्य नृसिंहो घर्म उच्यते। निर्गत्य स चतुर्मूर्तेर्विप्र-क्षत्राभिसंस्तुतात्। प्रथादीनां चतुर्णां च पुरुषार्थचतुष्टयम्। दत्वा जगाम भगवान् स्वकीयां तनुमेव च। वसिष्ठाच्च भरद्वाजाद्धोत्रध्वर्व्यो-र्नृपौ तु तौ। यथेष्टसिद्धिं संप्राप्तौ सम्यगिष्टाज्जनार्दनादि'त्यादृग्वेद-संहितायास्। यस्य प्रथ इति नाम स च हविर्नाम्नो विष्णोर्हविर्यत्

SGDF
Sri Gangeshwari Digital Foundation

अयत् । अटो लोपेनांतर्णीतणिच्त्वेन अयापयदित्यर्थः । एवं सप्रथ इति यस्य नामाऽसौ । हविर्यदिति पृथक्सम्बन्धः । आचक्रे आकारयामास । अविन्दन्ते ते अविन्दन्नित्यध्यात्माधिदैवतयोरुभयत्रापि भगवन्तमविन्दन्नित्यर्थः । देवयानं गुहा यदिति वचनात् । 'चतुःशिखण्डां तु रमां द्विरूपो भगवान्हरिः । परमानन्दरूपत्वात्सुपर्णइति नामकः । रमयामास तस्यां च निषण्णः सर्वदैव सः । एक एव च विष्णुः स प्रविष्टः क्षीरसागरम् । सर्वं पश्यत्यसौ देवः पूर्णाकुण्ठेन चेतसा । परिपक्केन मनसाऽपश्यमित्याह तं त्वजः । मातेव व्यञ्जकत्वात्तं प्राणस्थं वाक्सरस्वती । लिहते लिह्यत इव प्राणस्थेन तु सा सदा । स्वयं तु भगवान्विष्णुर्वाक्पतेर्ब्रह्मणोऽपि हि । नित्यः पिता स्वतन्त्रश्च नास्य माता पिताऽपि चे'त्यादि च ॥६॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये तृतीयप्रघट्टके प्रथमोऽध्यायः ॥ ३ ॥ १ ॥

मेवं भविष्यतीति शश्वत्तथा स्यात्स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्संहितेति पञ्चालचण्डो वाचा वै वेदास्सन्धीयन्ते वाचा च्छन्दांसि वाचा मित्राणि सन्दधति वाचा सर्वाणि भूतान्यथोवागेवेदं सर्वमिति तद्यत्रैतदधीयते वा भाषते वा वाचि तदा प्राणो भवति वाक्तदा प्राणं रेळ्ह्यथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेळिह तावन्योन्यं रीळहो वाग्वै माता प्राणः पुत्रस्तदप्येतदृषिणोक्तमेकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ॥ तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेळिह स उ रेळिह मातरमिति स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथातः प्रजापतिसंहिता जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः सन्धिः प्रजननं सन्धानं सैषाऽदितिः संहिताऽदितिर्हीदं सर्वं यदिदं किञ्च पिता च माता च पुत्रश्च प्रजननं च तदप्येतदृषिणोक्तमदितिर्माता स पिता स पुत्र इति स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति सर्वमायुरेति ॥ ॥ ६ ॥ इत्यैतरेयोपनिषत्सु तृतीयारण्यके प्रथमोऽध्यायः ॥ ३ ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

ॐ ॥ 'गृहस्याच्छादनादीनां मध्यवंशो यथाऽश्रयः। तथेन्द्रियाभिमान्यादिदेवानां वायुराश्रयः। तेषु सर्वेषु भगवान्बहुरूपो हरिः स्थितः। विष्णुनामाऽक्षरेष्वेवमन्येष्वपि तदर्थतः। प्राणनामाऽपि भगवान्प्राणस्थश्चोष्मसु स्थितः। ऊष्मनामा समर्थत्वात्स एव भगवान्हरिः। पूर्णत्वादात्मनामाऽसौ प्रतिमात्वादमुष्य तु। सङ्घात आत्मशब्दोक्तो ह्यस्थिरश्चास्थिनामकः। अस्थिस्थितो हरिः स्पर्शसंस्थितः स्पर्शनामकः। स्पर्शहेतुत्वतः स्पर्शनामा स भगवान्हरिः। मज्जासुस्थः स मज्जाख्यो मदं जनयतीति ह। स एव स्वरसंस्थश्च स्वराख्यः स्वरतेः प्रभुः। प्रमाणं सारयेद्यस्मान्मांसाख्यो मांससंस्थितः। लोहिताख्यो रक्तवर्णो लोहितस्थो जनार्दनः। अस्थिस्थान्येव रूपाणि पर्वस्वपि हरेर्यतः। तत एव विभक्तानि संख्या तेषां पृथङ्ग तत्। तस्मात्सप्तशतान्येव देहे विंशच्च तस्य हि। रूपाणि विष्णोर्भागे तु षष्ठ्युत्तरशतत्रयम्। तान्येव विष्णो रूपाणि वत्सराहस्सु सर्वशः। अहर्नामा च भगवानहार्यत्वात्प्रकीर्तितः। अहोभिः समसङ्ख्यानि यस्मादध्यात्मगानि तु। रूपाणि विष्णोस्तेनायमहस्संमान उच्यते। पूर्णदर्शनशक्तित्वाच्चक्षुर्मय उदीरितः। तादृक्श्रवणशक्तित्वात्तथा

॥ हरिः ॐ ॥ प्राणो वंश इति स्थविरः शाकल्यस्तद्यथा शालवंशे सर्वेऽन्ये वंशाः समाहिताः स्युरेवमस्मिन्प्राणे चक्षुः श्रोत्रं मनो वागिन्द्रियाणि शरीरं सर्व आत्मा समाहितस्तस्यैतस्यात्मनः प्राण ऊष्मरूपमस्थीनि स्पर्शरूपं मज्जानः स्वररूपं मांसं लोहितमित्येतदन्यच्चतुर्थमन्तस्था रूपमिति ह स्माऽह ह्रस्वो माण्डूकेयस्त्रयं त्वेव न एतत्प्रोक्तं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति त्रीणीतः षष्टि शतानि त्रीणीतस्तानि सप्तविंशतिशतानि भवन्ति सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स एषोऽहःसंमानश्चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमहःसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं वेदाह्नां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रोत्रमयः स्मृतः। छन्दोमयः सत्यकामो मन्त्रवक्त्रबलात्मकः। एवं विद्वांस्तस्य रूपाण्याप्नोति ज्ञानपुत्रवान्। पीयमानं शमाप्नोति प्राप्याहर्नामकं हरिम्॥ १॥

एवमुक्तप्रकारेण तस्य ह्यक्षरनामकम्। अशीत्युत्तरसाहस्ररूपं वर्णेषु संस्थितम्। विष्णुनाम्नोऽथवाऽन्येषु पञ्चाशत्सङ्ख्यकेष्वपि। तावत्सङ्ख्यानि देहेषु पृथङ्मज्जास्थिपर्वसु। रूपाणि विष्णोस्तावन्ति चेष्टकानि पृथक्पृथक्। अर्कस्थितबृहत्याख्यरूपाण्यह्नां च सर्वशः। सम्पादकानि तान्येव तान्यक्षरमितानि च। अस्थ्यादिस्थितरूपाणि तान्युपास्य विमुच्यत' इति च। तस्यैतस्यात्मनस्तस्य शरीराख्यस्यात्मनो य आत्मा आदानादिकर्ता तस्य परमात्मन एतस्य। अस्थ्नां मज्ज्ञां पर्वणां च मिलितानामपि विंशोत्तरसप्तशतत्वोक्तेस्तत्स्थविष्णुरूपाण्येवोच्यन्त इति सिद्धम्। अस्थ्यादीन्येव चेदशीत्युत्तरसहस्राणि सन्ति हि। षणुष्णुरित्येतानि विष्णुनामगतान्यूष्माक्षरसन्धिनामकानि तद्गतभगवद्रूपाणि मुख्यतस्तन्नामकानि। 'अहार्यत्वादहर्नामा रात्रिनामा रतिप्रदः। सन्धानात्सन्धिनामाऽसौ स्वयं नारायणः प्रभुः। सन्ध्यूष्माक्षरगाण्यस्य विष्णो रूपाणि सर्वशः। सन्ध्यारात्रिदिवास्थानि साशीतिकसहस्रकम्। तान्येवास्थिषु मज्जासु पर्वस्वपि च सर्वशः। परज्ञानात्तु पर्वाणि विष्णो रूपाणि तानि हि। अस्थानान्मदनाच्चैव ह्यस्थिमज्जाभिधानि च। व्यक्तिर्मज्जासु तस्यैव प्राणो मज्जासु संस्थितः। मज्जैव रेतो भवति रेतसिस्थो विशेषतः। प्राणस्तेन हि तद्रेतोयुक्तं

अथ कौण्ठरव्यस्त्रीणि षष्टि शतान्यक्षराणां त्रीणि षष्टि शतान्यूष्मणां त्रीणि षष्टि शतानि सन्धीनां यान्यक्षराण्यवोचामाहानि तानि यानूष्मणोऽवोचाम रात्रयस्ता यान्सन्धीनवोचामाहोरात्राणां ते सन्धय इत्यधिदैवतमथाध्यात्मं यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मं यानूष्मणोऽधिदैवतमवोचाम मज्जानस्तेऽध्यात्ममेष ह वै संप्रति प्राणो यन्मज्जैतद्रेतो न ह वा ऋते प्राणाद्रेतः सिच्यते यद्वा ऋते प्राणाद्रेतः

SGDF
Sri Gangeshwari Digital Foundation

प्राणेन सर्वदा। यदि प्राणो न तद्रेतो न गर्भत्वं व्रजेत्क्वचित्। विशेषप्राणसम्बन्धवर्जितान्यत एव हि। न मांसादीनि गर्भत्वं यान्त्यतः स हि रेतसि। विशेषेण स्थितः प्राणः प्राणे चैव विशेषतः। स्थितो नारायणो देवस्तस्मान्मज्जासु च स्थित' इति च। मज्जास्वधिकसन्निधानज्ञापनार्थमिदं वचनम्। अशीत्युत्तरसहस्रवर्णानामभावाच्च तत्स्थविष्णुरूपाण्येव तत्सङ्ख्यानीति सिद्धम्। अर्के निलीनत्वेनादृश्यत्वेन स्थिता भगवत्प्रादुर्भावा अर्कलिनः। त एव शरीरे स्थित्वा सहस्रं बृहतीः सम्पादयन्ति। वाक्प्रेरकत्वाद्विष्णुनामार्थत्वत्वादेव च बृहतीसहस्रस्य तद्देवताश्चैतान्येवाशीत्युत्तरसहस्ररूपाणि एतान्येवाहः-प्रवर्तकानि च। अहःशब्देन यज्ञो दिवसश्चोभावप्यभिप्रेतौ। 'यज्ञानां दिवसानां च साशीतिकसहस्रकैः। विष्णुः प्रवर्तको रूपैर्बृहत्युक्थस्य चाञ्जसा। बृहत्युक्थेन वाच्यानि रूपाण्येतान्यधीशितुरि'ति च॥ २॥

संसारबाधितैः प्राप्यो बाध्वो वायुरुदाहृतः। स हि मोक्षप्रदो विष्णोराज्ञया स उवाच ह। सर्वदेहाभिमानी तु शरीरपुरुषः शिवः। सर्ववर्णाभिमानी च शेषोऽसौ च्छान्दसः पुमान्। सर्ववेदाभिमान्येव गरुडो वेदपूरुषः। संवत्सराभिमानी तु ब्रह्मैव हि महापुमान्। सारः शिवस्यानिरुद्धनामा देहस्थितो हरिः। अ इत्याक्रियते यस्मा-

---

सिच्येत पूयेन्न सम्भवेद्यान्त्सन्धीनधिदैवतमवोचाम पर्वाणि तान्यध्यात्मं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति पञ्चेतश्चत्वारिंशाच्छतानि पञ्चेतस्तदशीतिसहस्रं भवत्यशीतिसहस्रं वा अर्कलिनो बृहतीरहरभिसम्पादयन्ति स एषोऽक्षरसंमानश्चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमक्षरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति॥ २॥

चत्वारः पुरुषा इति बाध्वः शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुष इति शरीरपुरुष इति यमवोचाम स य एवायं दैहिक आत्मा तस्य योऽयमशरीरः प्रज्ञात्मा स एसश्छन्दः पुरुष इति यमवोचामाक्षरस-

SGDF
Sri Gangeshwari Digital Foundation

द्वासुदेवो ह्यकारकः। शेषस्य सारसविभुर्ब्रह्माख्यो ज्ञानबृंहणात्। सङ्कर्षणाख्यस्तु हरिः सारः स गरुडस्य च। ब्रह्मर्त्विक्संस्थितश्चासौ तस्माद्ब्रह्मिष्ठमेव हि। कुर्याद्ब्रह्मर्त्विजं तस्मिन्विशेषेण स्थितो हरिः। ब्रह्मणः सारभूतस्तु प्रद्युम्नो भगवान्हरिः। स एवादित्यसंस्थश्च स ह्यादिर्जगतो विभुः। ततश्च सर्वभूतेषु जीवानां विनियामकः। स एवादित्यगो विष्णुर्यः प्रद्युम्नाभिधो हरिः। स एव सर्वदेहेषु चानिरुद्धतनुः स्थितः। सङ्कर्षणो वासुदेव इत्येकः स चतुर्विधः। प्रतिपूरुषमेतस्मात्स्थितो विष्णुर्नियामकः। आदित्यादिषु च स्थित्वा द्योतकोऽसौ प्रति प्रति। स चेतनतमत्वाद्धि चित्रमित्यभिधीयते। मुख्यत्वात्सर्वदेवानामननादीशितृत्वतः। कर्तृत्वादप्यनीकं स उदैत्सूर्यस्थितो हरिः। ज्ञानदत्वाच्च देवानां चक्षुरेनेन दर्शनात्। आपूरयत्सर्वलोकान्प्रकाशेन जनार्दनः। आदानात्सर्वजीवानामत्तृत्वात्प्रलयेऽपि च। आत्मेत्युक्तः स भगवान् जगतः स्थावरस्य च। एवं चतुर्विधो विष्णुः संहितादेवता यदा। ज्ञायते पूर्ववर्णस्य रूपं नारायणाभिधम्। प्रादुर्भावाः समस्ताश्च चरमार्णस्य देवताः। तदा तु संहितां सम्यङ्मन्येऽहं संहितामिति। आह वायुरिमं विष्णुं बृहत्युक्थस्य देवताम्। महाव्रताख्यस्तोत्रस्य चेष्टकानां च देवताम्। एतमेवाखिल-

---

माम्नाय एव तस्यैतस्याकारो रसो वेदपुरुष इति यमवोचाम येन वेदान्वेद ऋग्वेदं यजुर्वेदं सामवेदं तस्यैतस्य ब्रह्मा रसस्तस्माद्ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो यज्ञस्योल्बणं पश्येन्महापुरुष इति यमवोचाम संवत्सर एव प्रध्वंसयन्नन्यानि भूतान्यैक्या भावयन्नन्यानि तस्यैतस्यासावादित्यो रसः स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदिति विद्यात्तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति तदप्येतदृषिणोक्तं चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चेत्येतामनुविधं संहितां सन्धीयमानां मन्य इति ह स्माऽह बाध्व एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधीष्वेतं

SGDF
Sri Gangeshwari Digital Foundation

जगद्व्याप्तं पूर्णगुणात्मकम् । संवसद्रतिदातृत्वाद्ब्रह्मा संवत्सराभिधः । नियामकः स जीवानां सर्वेषां प्रभुरीश्वरः । अनन्तमूर्तिर्ब्रह्माऽसावनन्तजगदास्थितः । नियामकस्तस्य विष्णुस्तावद्रूपेषु संस्थितः । तत्संवत्सरसंमानः स विष्णुः परमेश्वरः ॥ ३ ॥

य एनं वक्त्ययोग्येभ्यो योऽथ चैनं महाव्रते । कर्मण्याचार्यतोऽन्यस्य शंसेत पितृतोऽथवा । महाव्रतेन स्तोत्रेण स्तुवीतैनमथापि वा । महाव्रते चितिं वाऽपि कुर्यान्नास्य फलं श्रुतेः । सुकृतस्य फलं चैव नासौ सम्यगवाप्स्यति । प्रत्यक्षज्ञानिनोऽप्येतदानन्दह्रासकृद्भवेत् । प्रत्यक्षज्ञानिनो मोक्षो न कथञ्चिद्धि हीयते । आचार्यमेव तं विद्याद्गुणैर्यः स्वात्मनोऽधिकः । गुणाधिकस्य तेनैव शंसनादि न दुष्यति । अयोग्यस्योपदेशे तु कृते हौत्रादिकेऽपि वा । प्रायश्चित्तार्थमेतत्तु शंसीत शतवारकम् । अन्यथा मानुषेष्वेव जायते न दिवं व्रजेत् । योग्या अस्याश्च विद्याया देवा ऋषय एव च । एकदेशज्ञानयोग्या मानुषा उत्तमा यदि । कर्मसञ्चयवेत्तारं त्यजेन्नारायणं हि यः । प्रीत्यैकदेशसंस्थत्वात्सखायमिति चोदितम् । न विद्यायाः फलं तस्य श्रुतं च नरकावहम् । नैव प्राप्नोति सुकृतं सन्त्यागात्परमात्मनः ।

वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते स एष संवत्सरसंमानश्चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा स य एवमेतं संवत्सरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसति ॥ ३ ॥

दुग्धदोहा अस्य वेदा भवन्ति न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पन्थानमिति तदप्येतदृषिणोक्तं यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पन्थामिति न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पन्थानमित्येतत्तदुक्तं भवति तस्मादेवं विद्वान्न परस्मा अग्निं चिनुयान्न परस्मै महाव्रतेन स्तुवीत न परस्मा एतदहः शंसेत्कामं पित्रे वाऽऽचार्याय वा शंसेदात्मन एवास्य तत्कृतं भवति स यश्चायमशरीरः प्रज्ञात्मा यश्चासा-

SGDF
Sri Gargeshwari Digital Foundation

मुख्यत्यागो हरेरेष यन्नास्तीति वदेदमुम् । तत्समं वाऽधिकं वाऽपि ब्रूयादैक्यमथापि वा । ऐश्वर्यादिगुणानां वा ह्रासं नास्तित्वमेव वा । तत्प्रसादं विना मोक्षं ब्रूयाद्वा कस्यचित्क्वचित् । ऐक्यं वा ब्रह्मशर्वादेर्मुक्तावैक्यमथापि वा । व्यत्यासं चावताराणां जीवाभेदममुष्य वा । भेदज्ञानं तद्गुणानां तेन वाऽथ मिथोऽपि वा । तथैव तत्क्रियाणां च तद्रूपाणामथापि वा । असाम्यदर्शनं वाऽपि तद्गुणानां परस्परम् । देहदेहिविभेदं च तस्मिन्नवयवेषु वा । परस्परं भेददृष्टिं तेन वा कुत्रचित्क्वचित् । दोषसंसर्गमस्यापि स्वतः परत एव वा । अज्ञानतो ज्ञानतो वा निर्देहत्वममुष्य च । तद्देहस्य प्राकृतत्वमचिदानन्ददेहताम् । प्रादुर्भावेष्वपि विभोर्देहत्यागोद्भवादिकम् । अज्ञानदुःखासामर्थ्यपारवश्यादिकं तथा । अतद्वशत्वं कस्यापि कदाचित्क्वचिदप्युत । परिमाणं बलादेर्वा तस्य विष्णोर्महात्मनः । भेदाभेददृशिर्वाऽस्य जीवैर्वा स्वगुणादिभिः । तर्कैस्तस्यापलापो वा तत्र रक्तेन चेतसा । त्यागानामेवमुक्तानां तर्काद्यैः साधनं तथा । अचिन्त्यविभवेऽप्यस्मिन्नसम्भवनिरूपणम् । स एव मुख्यतस्त्यागो वासुदेवस्य कीर्तितः । रमाब्रह्मादिकानां च तारतम्यानभिज्ञता । संशयश्चोक्ततत्त्वेषु जगन्मिथ्यात्वदर्शनम् । अस्मृतिर्वासुदेवस्य तद्भक्तानां च निन्दनम् । द्वितीय एष त्यागस्तु विष्णोरेव प्रकीर्तितः । निषिद्धकर्मकरणं विहितस्य च वर्जनम् । त्यागस्तृतीयो हि हरेश्चतुर्थोऽयोग्यपूरुषे । उपदेशः केशवस्य यथाशास्त्रोदितक्रमात् । आचार्यपित्रोरन्यत्र तथैव च महाव्रते । हौत्रोद्गात्राध्वर्यवाणि त्याग एवं चतुर्विधः । त्यागद्वयात्तु प्रथमात्प्राप्यतेऽन्धं तमः क्रमात् । तृतीयान्निरयप्राप्तिश्चतुर्थान्न दिवं व्रजेत् । उपदिष्टेऽपि यस्तत्त्वे संशयं कुरुते पुमान् । सोऽन्धंतमो व्रजेदन्यो निरयायैव गच्छति । स एव भगवान्विष्णुरेतैर्दोषैर्विना यदि । ज्ञायते मुक्तिदः साक्षान्नात्र कार्या विचारणा । यदि ज्ञानं

SGDF
Sri Gargeshwari Digital Foundation

नातिपक्वं सरागं च मनो भवेत्। तदा स्वर्गादिलोकाप्तिः संशयश्चेत्क्वचित्क्वचित्। आवृत्तिरेव संसारे यावन्निःसंशयो भवेत्। पुनरावृत्तिहीनं तु तमोऽन्धं मुक्तिरेव च। पूर्वं तु निःसुखं तत्र निर्दुःखं चापरं मतम्। निश्शेषगुणहीनं च पूर्वं निर्दोषकं परम्। विमिश्रगतयस्त्वन्याः पुनरावृत्तिसंयुताः। असुरा देवता मर्त्या योग्या एतेषु च क्रमात्। न च तेषां सङ्करोऽस्ति यथायोग्या हि तद्गतिः। मानुषेषूत्तमा मुक्तिमधमा निरयं तथा। आप्नुवन्ति मनुष्येषु मध्यमाः सृतिभागिनः। नियमोऽयं नान्यथा स्यादच्छिद्रत्वं यथा भवेत्। दोषेऽथवा गुणे वाऽपि तदा दैत्याः सुरा अपि। स्वां स्वां गतिं समायान्ति तावत्संसारभागिनः। अच्छिद्रत्वं नैव सर्वैः कदाचित्प्राप्यते यतः। सृष्टिस्थितिलयादीनां नोच्छेदस्तेन कुत्रचित्। तस्माद्दोषान्प्रहायैव विष्णुं सर्वोत्तमोत्तमम्। जानीयात्तेन मुक्तिः स्यादपरोक्षदृशेरनु। सूर्यमण्डलगो विष्णुर्देहे चक्षुषि संस्थितः। अनिरुद्धश्च हृदये न च भेदोऽनयोः क्वचित्। अन्येषामपि रूपाणामिति विद्याद्विचक्षणः। द्विरूपः स यदा विष्णुरपगच्छति देहतः। तदैव दुर्निमित्तानि जायन्ते नान्यदा क्वचित्। तस्मात्तेषां दर्शने तु कर्तव्यं पारलौकिकम्। सर्वमेव जपेच्चैव यदन्तीत्यादिका ऋचः। ऋग्भिः षड्भिर्वायुरेव पवमानादिना मतः। स्तूयते सोऽङ्गनेतृत्वादग्निरित्यभिधीयते। परस्य ब्रह्मणो विष्णोर्ज्ञापनाख्यप्रसूतिभिः। वायुः पुनाति यल्लोकान्सविता तेन कथ्यते। पवित्रं नाम साक्षात्तत्परं ब्रह्म जनार्दनः। प्रसादयित्वा तं विष्णुं तेन लोकान्पुनात्यसुः। ज्ञानाख्यप्रसवेनापि

वादित्य एकमेतदित्यवोचाम तौ यत्र विहीयेते चन्द्रमा इवाऽऽदित्यो दृश्यते न रश्मयः प्रादुर्भवन्ति लोहिनी द्यौर्भवति यथा मञ्जिष्ठाः व्यस्तः पायुः काककुलायगन्धिकमस्य शिरो वायति संपरेतोऽस्याऽत्मा न चिरमिव जीविष्यतीति विद्यात्स यत्करणीयं मन्येत तत्कुर्वीत यदन्ति यच्च दूरक इति सप्त जपेदादित्प्रत्नस्य रेतस इत्येका यत्र ब्रह्मा पवमानेति

SGDF
Sri Gangeshwari Digital Foundation

स्वयं वायुः पुनात्ययम् । प्राणाग्नेरर्चिषो देहे विततास्तेषु केशवः । अर्चिष्मान्विततो नित्यं वायुस्तेन पुनात्ययम् । यत्र ब्रह्मेति षड्भिश्च प्रार्थनीयः स मारुतः । मोचयित्वैव संसाराद्विष्णोर्लोके कृधीति च । आदित्यव्रतस्येति विष्णुः स्तुत्यो वैकुण्ठलोकगः । आदित्यमण्डलस्थश्च साक्षान्नारायणः प्रभुः । उद्वयं त्वितिमन्त्रेण स्तुत्यो वायोरपीश्वरः । अपमृत्युभयं तस्य यदन्तीत्यृग्जपाद्व्रजेत् । कालमृत्युर्यदि भवेत्तथा जन्मादिकं भयम् । अन्याभिः कर्मतः पूतो यत्र ब्रह्मेति वैष्णवम् । लोकं व्रजेत्तथाऽन्याभ्यां विष्णुर्मोक्षसुखप्रदः । इष्टप्रदानशीलत्वादिन्दुर्वायुः स एव च । सोमः सौम्यस्वरूपत्वात्पवमानश्च पावनात् । विष्णुः पुरातनत्वात्तु प्रत्नो रेतो महारतिः । देवत्रा देव एवाऽसौ सर्वदेवेश्वरो यतः । सूर्यश्च सूरिभिः प्राप्यो नित्यानन्दो रमापतिः । देशतः कालतश्चैव गुणतश्चापि पूर्तितः । अत इत्युच्यते विष्णुः सन्ततो ह्यत उच्यते । तृतीयवर्णोऽतिशये यतस्तेनातिरेव वा । अत इत्युच्यते विष्णुः सम्यक्श्रुत्याद्यशक्यतः । पूर्णत्वाद्भगवान्विष्णुरश्रुतत्वादिनोदितः । अन्तस्थः सर्वजीवानां पूर्णत्वात्पुरुषाभिधः । समः स सर्वरूपेषु सर्वजीवनियामकः । इति विद्यात्परं विष्णुं मुच्यते तेन संसृते'रित्यादि च । शरीरपुरुषादीनां प्राप्यत्वात्तदुपास्यत्वात्तेषां नियामकत्वेन तेभ्योऽप्युत्तमत्वेन तेषु स्थितत्वाच्च तेषां सार इत्युच्यते भगवान् । यदीं एव अलकं अरकं यत्किञ्चिच्छृणोति तत्सर्वमरतिरूपान्धतमःप्राप्तिकारणमेव तस्य भवति । तत्र हि सर्वरत्यभावो रतिविरुद्धदुःखं च पूर्णम् । परस्मै शंसनामात्रादरतिरेवेत्यतः प्रस्तुते चतुर्थत्यागेन तस्य वाच्यपि भागो अस्ति । न हि प्रवेद सुकृतस्य पन्थामिति दोषद्वयमेवेत्यवधारयति । न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पन्थानमित्येतत्तदुक्तं भवतीति । अलकं शृणोतीति त्यागद्वयस्य मुख्यतस्तृतीयस्यापि नरकं शृणोतीति किञ्चिद्भवति ।

SGDF
Sri Gangeshwari Digital Foundation

तौ यदाऽस्माच्छरीराद्विहीयेते तदैवैतानि निमित्तानि पश्यन्तीति नियमः । न च तदा पश्यत्येवेति । वासेन रमयतीति वासरं विष्णुर्ज्योतिः । 'यत्र ब्रह्मा वेदवाक्यं व्याचक्षाणो मखैर्यजन् । सोमेन च सुतेनेशमास्ते लोके हरेर्हि स' इति स्कान्दे । ग्राव्णा सोमविषये सोमेनेष्ट्वा महीयते तेनैव विष्णुप्रीत्या स्वस्यानन्दं जनयन् । स्वरानन्दरूपो विष्णुः । दिवो देव्या अवरोधनं तस्याः परिवारभूताः सर्वदेव्यः द्यौर्नाम वायुपत्नी । अजनयो मरुतो वक्षणाभ्यो दिव आवक्षणाभ्य इत्यादेः । यह्वतीः स्यन्दमानाः । 'सर्वेष्टद जगत्प्राण मामादाय परिस्रव । यत्रासौ भगवान्विष्णुस्त्वं हि मोक्षप्रदः सदे'ति च । 'इन्दुरिष्टप्रदत्वाद्यो वायुरादाय गच्छति । इन्द्रनाम्नः केशवस्य समीपं मुक्तमञ्जसे'ति च । अनन्यहेतुकं साक्षाद्भगवद्भक्तिरूपकम् । 'सुखमानन्द इत्युक्तो मोदो भोगनिमित्तकः । प्रमोदस्तद्विशेषोत्थो मुन्नामात्यल्पभोगत'इत्यृग्वेदसंहितायाम् । तमसः सकाशात् उद्गता वयमुत्तरं सर्वोत्तमं विष्ण्वाख्यं ज्योतिः परिपश्यन्तस्तमेव देवत्रा देवं देवविषयेऽपि देवमगन्म । तदेवज्योतिष्ट्वेनोत्तरत्वेन च पश्यन्त इति दर्शने इत्थं भावविधानार्थं पूर्वम् । तथैवासौ भगवानुत्तमज्योतिः । न राजादिष्विवाविद्यमानभक्तिमात्रमिदमिति ज्ञापयितुमगन्म ज्योति-रुत्तममिति पुनर्वचनम् । 'अर्चिषोंऽशा वर्तुलास्तु नाम्ना वटरकाः

षळुद्ध्यं तमसस्परीत्येकाऽथापि यत्र च्छिद्र इवाऽदित्यो दृश्यते रथ-नाभिरिवाभिख्यायेत च्छिद्रां वा च्छायां पश्येत्तदप्येवमेव विद्यादथा-प्यादर्शे वोदके वा जिह्मशिरसं वाऽशिरसं वाऽऽत्मानं पश्येद्विपर्यस्ते वा कन्याके जिह्मेन वा दृश्येयातां तदप्येवमेव विद्यादथाप्यपिधायाक्षिणी उपेक्षेत तद्यथा वटरकाणि संपतन्तीव दृश्यन्ते तानि यदा न पश्येत्तद-प्येवमेव विद्यादथाप्यपिधाय कर्णा उपशृणुयात्स एषोऽग्नेरिव प्रज्वलतो रथस्येवोपब्दिस्तं यदा न शृणुयात्तदप्येवमेव विद्यादथापि यत्र नील इवाग्निर्दृश्यते यथा मयूरग्रीवा मेघे वा विद्युतं पश्येन्मेघे वा विद्युतं न पश्येन्महामेघे वा मरीचीरिव पश्येत तदप्येवमेव विद्यादथापि यत्र भूमिं

SGDF
Sri Gargeshwari Digital Foundation

स्मृता' इति शब्दनिर्णये। 'बृहत्तमं मधु यदि सहापूपं प्रभक्षयेत्। स्वप्ने तस्याचिरान्मृत्यू रक्ताब्जे वा शिरोधृत' इति ब्रह्माण्डे। 'रात्र्यास्तु देवता दुर्गा दुःस्वप्ने सा प्रपूजिता। पायसेन हरेन्मृत्युं रात्रिसूक्तादकालिकम्। यदि कालिकमृत्युः स्यात्पदं सा परमं नयेत्। सहैव विष्णुना भक्तं विष्णोस्तद्वेदिनं तथा। रतिदत्वात्परो विष्णुर्मुख्यतो रात्रिरुच्यते। तदाश्रयत्वाद्दुर्गाऽपि रात्रिरित्यभिधीयते। स्त्रीरूपः स परो विष्णुः पायसेष्टो हि मोक्षदः। तस्मादुभौ सहैवेज्यौ भक्त्या दुःस्वप्नदर्शने। बहुभिर्नयनैर्विष्णुर्बहुधेदं ददर्श ह। आयन्सर्वेषु लोकेषु धृतास्तेनैव हि श्रियः। नीचानुच्चांश्च जीवान्स ब्रह्मादीनुर्वेपूरयत्। ज्ञानेन बाधते ज्ञानं स्वसारं स्वं तथाऽकरोत्। उष आख्यं शुक्लवर्णं प्रमदारूपमेव च। तमश्चापाकरोत्येव तदा सूर्यादिषु स्थितः। स नः स्वामी यदुदरे यमनाद्यामनामके। अविक्ष्महि वयं सर्वे वृक्षे यद्वत्पतत्रिणः। शेनाख्यास्तु सुखीनत्वादासमन्तात्सुरोत्तमाः। पद्वन्तो मानुषाश्चैव पादमात्रप्रयायिनः। ग्रामाख्या बहुलत्वात्तु दैत्या एव प्रकीर्तिताः। अर्थिनस्तु कृतार्थत्वान्मुक्ता एव श्रुताः श्रुतौ। ऊरीकृतप्रमाणत्वादूर्म्यः स भगवान्हरिः। वृकास्तेनैव निर्याप्या वृकाः क्रूरत्वतोऽसुराः। तत्स्वभावाश्च वृक्याः स्युः स्तेनास्तत्र महासुराः। ब्रह्मस्तेना यतस्ते हि नित्यमैकात्म्यवेदिनः। विष्णुः सुखतरश्चैव

ज्वलन्तीमिव पश्येत तदप्येवमेव विद्यादिति प्रत्यक्षदर्शनान्यथ स्वप्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति वराह एनं हन्ति मर्कट एनमास्कन्दयत्याशु वायुरेनं प्रवहति सुवर्णं खादित्वाऽपगिरति मध्वश्नाति बिसानि भक्षयत्येकपुण्डरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्राजयति स यद्येतेषां किञ्चित्पश्येदुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वाऽन्येनान्नेन ब्राह्मणान् भोजयित्वा चरुं स्वयं प्राश्नीयात्स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः श्रोता मन्ता द्रष्टाऽऽदेष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात्॥ ४॥

SGDF
Sri Gurgeshwari Digital Foundation

भक्तानां भवति प्रभुः । कृष्णं व्यक्तं तमोऽज्ञानमज्ञानां पेशलं हि तत् । तद्यातयत्तृणमिव भगवान्पुरुषोत्तमः । स एव चोषाः कथितः 'प्रकाशत्वाज्जनार्दनः । जयितः स्तोममिव च ब्राह्मणाय यथा च गाः । उपाकरं तथा स्तोमं तवाहं तद्वृणीष्व च । द्यौरिति ज्ञानमुद्दिष्टं तद्व्यङ्ग्यत्वाज्जनार्दनः । दुहिता दिव इत्युक्त एवमर्थेन पूज्यते । रात्रीसूक्तेन भगवान्साक्षान्नारायणः प्रभुः । तत्सन्निधानाद्दुर्गाया एषोऽर्थ उपचारतः । एवं स्तुतस्तथैवेष्टो भगवान्मोक्षदो भवेत् । यदन्तीत्याद्यृचः सर्वा अपि दुःस्वप्नदर्शने । जप्या एव विशेषोऽयं होमो दुःस्वप्नदर्शने । परोक्षज्ञानिनो विष्णुरापरोक्ष्यं व्रजेत्त्वरन् । अपरोक्षदृशः प्रीतः सुखाधिक्यं करोत्यजः । मुक्तस्य द्विविधैस्तस्माज्जपो योगश्च सर्वथा । कर्तव्यो न्यासिभी रात्रीसूक्तं जप्यं त्रिशोऽञ्जसे'त्यैतरेयसंहितायाम् ॥ ४ ॥

अथ सर्ववाग्विषया विद्योच्यते । विष्णुशब्दार्थत्वात्सर्ववाचाम् । पूर्वोक्ता अपि सर्ववागुपनिषद एव । तथापि मुख्यत एव सर्ववाग्विषयत्वाद्वक्ष्यमाणामेव सर्वस्यै वाच उपनिषदिति सर्वेऽप्याचक्षते । 'पृथिव्यादिस्थितो विष्णुः पृथिव्याद्यभिधानवान् । स्पर्शादीनां देवताऽसौ क्रमेणैव प्रकीर्तितः । तस्य विष्णोरयं देहो वीणा साक्षात्प्रकीर्तिता । दैवी वीणा ततः सेयं लोकसिद्धा तु मानुषी । ब्रह्मादिदेहान्यो वेद विष्णोर्वीणेति भक्तितः । विद्यापूर्णसुखः स स्याद्भूमिपूरितकीर्तिमान् । विद्याधिक्यार्थमेवैतां वाक्सारामप्यृचं जपेत् ।

अथ खल्वियं सर्वस्यै वाच उपनिषत्सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषद इमां त्वेवाऽऽचक्षते पृथिव्या रूपं स्पर्शा अन्तरिक्षस्योष्माणो दिवः स्वरा अग्नेरूपं स्पर्शा वायोरुष्माण आदित्यस्य स्वरा ऋग्वेदस्य रूपं स्पर्शा यजुर्वेदस्योष्माणः सामवेदस्य स्वराश्चक्षुषो रूपं स्पर्शाः श्रोत्रस्योष्माणो मनसः स्वराः प्राणस्य रूपं स्पर्शा अपानस्योष्माणो व्यानस्य स्वरा अथ खल्वियं दैवी वीणा भवति तदनुकृतिरसौ मानुषी वीणा

SGDF
Sri Gangeshwari Digital Foundation

ध्यात्वा नारायणं देवं स्त्रीरूपं वाचि संस्थितम्। ओष्ठापिधानेत्येषा ह्यक्सारो वाचः प्रकीर्तितः। विष्णोर्हि वाचि संस्थस्यैवोष्ठावेतौ पिधानवत्। कुलीति चोक्तो भगवान्प्रलीनाशेषकुत्सितः। पाति सर्वं विशिष्टश्च सर्वस्मादित्यतः पविः। सर्ववागीश्वरो विष्णुः स्त्रीरूपो मां सुवादयेदि'ति च। नेत्युपमानार्थम्। ओष्ठावपिधानवदस्येति। न च विष्णोरन्या सर्वस्या वाच ईशाना। स हि मुख्यतः सर्वेश्वरः। तस्यैवप्रस्तुतत्वाद्वक्ष्यमाणत्वाच्च। 'श्रियः पतिर्यज्ञपतिर्जगत्पतिर्गिरां पतिर्लोकपतिर्धरापतिरि'ति भागवते। 'यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ्न वेदे'त्यादि श्रुतिश्च। स्त्रीलिङ्गत्वं देवतेत्यादिवदपि युज्यते। स्त्रीरूपत्वाच्च ॥ ५ ॥

संवत्सर इति विशेषणाद्विरिञ्च एवात्र प्रजापतिः। 'ब्रह्मा विश्वः कतमः स्वयम्भूः प्रजापतिः संवत्सर' इत्यादि श्रुतेः। 'श्रान्तो ब्रह्मा सर्ववेदैः स्तुत्वा नारायणं प्रभुम्। तेनैव सम्यक्सन्धाय दार्ढ्यं देहस्य सोऽकरोत्। सन्धानात्संहितेत्युक्तो विष्णुरेव सनातनः। विष्णु-

---

भवति यथाऽस्याः शिर एवममुष्याः शिरो यथाऽस्या उदरमेवममुष्या अंभणं यथाऽस्यै जिह्वैवममुष्यै वादनं यथाऽस्यास्तन्त्रय एवममुष्या अङ्गुलयो यथाऽस्याः स्वरा एवममुष्याः स्वरा यथाऽस्याः स्पर्शा एवममुष्याः स्पर्शा यथा ह्येवेयं शब्दवती तर्द्मवत्येवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोमशेन चर्मणा पिहिता भवत्येवमसौ लोमशेन चर्मणा पिहिता लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्राऽस्यकीर्तिर्भवति यत्र क्वचाऽर्या वाचो भाषन्ते विदुरेनं तत्राथातो वाग्रसो यस्यां संसद्यधीयानो वा भाषमाणो वा न विरुरुचुषेत तत्रैतामृचं जपेदोष्ठापिधाना न कुलीदन्तैः परिवृता पविः सर्वस्यै वाच ईशाना चारु मामिह वादयेदिति वाग्रसः ॥ ५ ॥

अथ हास्या एतत्कृष्णहारीतो वाग्ब्राह्मणमिवोपोदाहरति प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरः स च्छन्दोभिरात्मानं समदधाद्यच्छन्दोभिरात्मानं समदधात्तस्मात्संहिता तस्यै वा एतस्यै संहितायै णकारो बलं

SGDF
Sri Gargeshwari Digital Foundation

नाम्नि णशब्देन विष्णोर्बलमुदीर्यते। ण इत्याक्रियमाणत्वाण्णकारोऽस्य बलं मतम्। विष्णुनाम्नि षकारेण रमाब्रह्मेशपूर्विणः। प्रणेतृताऽखिलस्यैव विष्णोरुक्ता तथात्मता। आततत्वं सर्वगुणैर्देशतः कालतस्तथा। आत्मशब्दोदितं तच्च षशब्देनाभिधीयते। ष इत्याक्रियमाणत्वं प्रणेतृत्वं च पूर्णता। विष्णोः षकार इत्युक्ता वीत्युक्तस्य विशिष्टता। अन्त्यस्थित उकारस्तु ताच्छील्यादि हरेर्वदेत्। एवं विशिष्टप्राणत्वमाततत्वं च सर्वतः। विशिष्टं च बलं विष्णोः सर्वस्माच्छीलमित्यपि। उदितं विष्णुशब्देन तस्माद्दक्संहितामनु। वर्णद्वयसमायोगे ष्णुशब्दस्यार्थमेव तु। विष्णोः प्राणत्वमात्मत्वं बलं चैवात्र वेत्ति यः। स एव विष्णोर्बलवित्तथा प्राणत्वविद्भवेत्। स एव मुक्तः संसारान्नित्यायुष्मान्भविष्यति। संहितासहितत्वेन यदृचो धीमहे वयम्। वेदानन्यान्पुराणं वा तेन विष्णुपदोदितः। अवाप्तो भगवान्स्यान्नस्तन्नामार्था यतोऽखिलाः। इत्याहुर्ऋषयः सर्वे किमन्याध्ययनाद्भवेत्। यज्ञैर्वेत्यृषयोऽप्यन्ये कावषेया वदन्ति हि। मौनेन विष्णुशब्दार्थं ध्यायन्तो वाचमेव वा। जुहुमो विष्णुनामाख्यां जपन्तो मन्त्रमेव वा। नमस्कारसमायुक्तं जुहुमः प्राणमत्र हि। किमन्यैर्बहुभिः कार्यैरेतस्यैवाधिकत्वतः। एतदर्थानुसन्धानपूर्वं वेदानथापि वा। अधीमहे यजामो वा नान्यथा तु कथञ्चन। एष एव हि सर्वेषां वेदानामर्थ ईरितः। विष्णुनामोदितो योऽर्थस्तद्व्याख्याऽन्य-

---

षकारः प्राण आत्मा स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात्स यदि विचिकित्सेत्सणकारं ब्रवाणीँ ३ अणकाराँ ३ इति॥ सणकारमेव ब्रूयात्सषकारं ब्रवाणीँ ३ अषकाराँ ३ इति॥ सषकारमेव ब्रूयात्ते यद्वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारावुपाप्ताविति ह स्माऽह ह्रस्वो माण्डूकेयोऽथ यद्वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारावुपाप्ताविति ह स्माऽह स्थविरः

SGDF
Sri Gargeshwari Digital Foundation

द्वचोऽखिलम्। एवं विशिष्टप्राणात्मबलाद्यखिलसद्गुणैः। पूर्णस्वभावः सर्वेषां वचसामर्थ ईरितः। संहिताख्यानि विष्णोस्तु रूपाण्येतानि सर्वशः। अन्यविद्या स्वशिष्यस्य न ब्रूयात्प्रथमं क्वचित्। व्याख्यान-शक्तिहीनाय नैव ब्रूयात्कथञ्चन। वैष्णवाय सुवृत्ताय मेधाश्रद्धायुताय च। गुरोः शिश्रूषकायैव ब्रूयादित्यनुशासनमि'ति च। य एतेन णइतिशब्देनाक्रियमाणं विष्णोः पूर्णबलं षशब्देनाक्रियमाणं देशतः कालतो गुणतश्चाततत्वं च सर्वां संहितामनु तदर्थत्वेन वेद। अक्षर-द्वयसंयोगरूपया संहितयैतदेव सर्वत्रोच्यत इति स सम्पूर्णबलं सर्व-प्रणेतृत्वशक्त्यादियुक्तं विष्णुं वेद। अथेत्यादिका अपि संहितारूपा एव। पदवर्णयोः पृथगनभिव्याहारात्। तस्मात्सर्वशब्दा विष्णुना-मव्याख्यानरूपा एव। यद्वयं संहितायुक्तत्वेनर्चोऽधीमहे तेनास्माकं णशब्दषशब्दार्थरूपो विष्णुरुपात्तः। तद्व्याख्यानत्वात्सर्ववाचाम्। वीत्युपसर्गत्वादुकारस्य च ताच्छील्यार्थत्वादुक्तार्थविशेषणरूपत्वेन प्रसिद्धत्वान्न पृथक्तयोर्व्याख्यानमत्र कृतम्। ऋच इति सर्ववाचा-मुपलक्षणम्। अतः सर्ववेदादिशब्दोदितः सर्वगुणपरिपूर्णो भगवा-न्नारायण इति सिद्धम्॥

सर्वैश्च वैदिकपदैरपि लोकशब्दैर्मेघाग्निवारिधितलादिरवैश्च सर्वैः। एकोऽभिधेयपरिपूर्णगुणः प्रियोऽलं नारायणो मम सदैव सुतुष्टिमेतु॥ ॥६॥ यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट्तद्दर्शत-मित्थमेव निहितं देवस्य भर्गो महत्। वायो रामवचोनयं प्रथमकं पृक्षो

शाकल्य एतद्धस्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्ये-ष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययस्ता एताः संहिता नानन्तेवासिने प्रब्रूयान्ना-संवत्सरवासिने नाप्रवक्त्र इत्याचार्या आचार्याः॥ ६॥ इत्यैतरेयोपनिषत्सु तृतीयारण्यके द्वितीयोऽध्यायः॥ ३॥ २॥ इति तृतीयारण्यकं सम्पूर्णम्॥ ॥ ३॥

SGDF
Sri Gargeshwari Digital Foundation

द्वितीयं वपुर्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हि तेन प्रभौ ॥ 'हनुशब्दो ज्ञानवाची हनूमान्मतिशब्दितः। रामस्य स्वृतरूपस्य वाचस्तेनानयन्त हि। भूतमो भीम इत्युक्तो वाचो मा मातरः स्मृताः। ऋगाद्या इतिहासं च पुराणं पञ्चरात्रकम्। प्रोक्ताः सप्तशिवास्तत्र शयो भीमस्ततः स्मृतः। मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम्। मध्व आनन्दतीर्थः स्यात्तृतीया मारुतीतनुः। इति सूक्तगतं रूपत्रयमेतन्महात्मनः। यो वेद वेदवित्स स्यात्तत्त्ववित्तत्प्रसादत' इति च। 'साधको रामवाक्यानां तत्समीपगतः सदा। हनूमान्प्रथमो ज्ञेयो भीमस्तु भहुभुक्पितोः। पृतनाक्षयकारी च द्वितीयस्तु तृतीयकः। पूर्णप्रज्ञस्तथानन्दतीर्थनामा प्रकीर्तितः। दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते। प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः। आसमन्तात्पतित्वे तु गूढं कलियुगे हरिम्। असत्यमप्रतिष्ठं च जगदेतदनीश्वरम्। वदद्भिर्गूहितं सन्तं तृतीयोऽसुर्मथायति। येन विष्णोर्हि वर्पाख्यान्गुणानज्ञासिषुः परान्। ईशानासः सूरयश्च निगूढान्निर्गुणोक्तिभिः। त्रेतायां द्वापरे चैव कलौ चैते क्रमात्त्रयः। एतेषां परमो विष्णुर्नेता सर्वेश्वरेश्वरः। स्वयम्भुब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नम'इति च ॥ पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ॥ अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये तृतीयप्रघट्टके द्वितीयोऽध्यायः॥ ३ ॥ २ ॥ तृतीयप्रघट्टकः सम्पूर्णः॥ ऐतरेयोपनिषद्भाष्यं सम्पूर्णम् ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

तैत्तिरीयोपनिषद्भाष्यम्

॥ श्रीहयमुखायनमः ॥ ॐ ॥ सत्यं ज्ञानमनन्तमानन्दं ब्रह्म सर्वशक्त्येकम् । सर्वैर्वेदैर्वैरीड्यं विष्ण्वाख्यं सर्वदैमि सुप्रेष्ठम् ॥ १ ॥ 'आदित्यसंस्थिताद्विष्णोः श्रुत्वा ब्रह्मा यथा हरिम् । तुष्टाव तत्प्रकारेण वरुणोक्तेन वै भृगुः । विष्णुमस्तौत्तथा प्राह शन्नोमित्रादिका श्रुतिः । यदुवाच हरिः सूर्यमण्डलस्थः परः पुमान् । ब्रह्मा तदाह वरुणे वरुणो भृगवेऽपि तु । शन्नोमित्रादिभिर्वाक्यैस्तैरेव हरिमस्तुवत् । भृगुः पञ्चात्मकं पूर्णमन्नादिमयमच्युतम् । मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दनः । सुप्रीतः प्रददौ ज्ञानं स्वात्मभक्तिं च शाश्वतीमि'त्यादि यजुःसंहितायाम् । 'भृगुवाक्यतया वायुनमस्कारादिकं हरिः । प्रोवाच ब्रह्मणे चैवं वचः सुबहुदर्शिष्वि'ति च । वरणीयो वर्णः । स्वरतेस्तु स्वरः । मानात्त्राता मात्रा । बलरूपः समश्च सर्वरूपेषु । सन्ततश्च । 'वर्णादिवाचकं रूपं ज्ञेयं वर्णादिनामकम् । विष्णोर्वर्णादिसंस्थं च पुंसु तत्तत्क्रियाप्रदम् । नारायणादिरूपाणि

॥ तैत्तिरीयोपनिषत् ॥

१. शीक्षावल्ली ।

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ ओं शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ॥१॥ ओं शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

लोकादिषु च पञ्चसु । अनिरुद्धावसानानि ध्येयानि चतुरात्मना । वासुदेवादिकान्येव तानि पूर्वोत्तरार्णयोः । संहितायास्तथा सन्धौ सन्धाने चापि कृत्स्नशः । यो वेदैतानि रूपाणि सर्वभोगसमन्वितः । प्राप्नोति वैष्णवं स्थानं मुक्तः स्वर्गाभिधं परम् । यो विश्वरूपो भगवान्छन्दसामधिपो हरिः । छन्दोभ्योऽमृतरूपेभ्यः सुव्यक्त-स्तदुपासनात् । मेधावी तत्त्वविज्ञानी भूत्वा क्षिप्रं विमुच्यत' इति च । 'वेदावासत्वतो विष्णुर्ब्रह्मकोश इति स्मृतः । भगः षड्गुणपूर्णत्वा-द्बहुरूपत्वतो विभुः । सहस्रशाख इत्युक्तस्तमुपास्य जनार्दनम् । मुच्यते नात्र सन्देहः सर्वभोगैश्च पूज्यत' इति प्रकृते । 'आवहन्ती चिरं सर्वभोगान्या श्रीः सनातनी । तां मय्यावह गोविन्द

सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातः सꣳहिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिषमधिविद्य-मधिप्रजमध्यात्मम् । ता महासꣳहिता इत्याचक्षते ॥३॥ अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः सन्धिः वायुः सन्धानम् । इत्यधिलोकम् ॥४॥ अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तर-रूपम् । आपः सन्धिः । वैद्युतः सन्धानम् । इत्यधिज्यौतिषम् ॥ ५ ॥ अथाधिविद्यम् । आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनꣳ सन्धानम् । इत्यधिविद्यम् ॥६॥ अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा सन्धिः । प्रजननꣳ सन्धानम् । इत्यधिप्रजम् ॥७॥ अथाध्यात्मम् । अधरा हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्सन्धिः । जिह्वा सन्धानम् । इत्यध्यात्मम् । इतीमा महासꣳहिताः । य एवमेता महासꣳहिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ८ ॥ यच्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे

SGDF
Sri Gargeshwari Digital Foundation

सुशिखण्डोपशोभिताम्' इति च । 'भूरादिव्याहृतीभिस्तु वाच्यं मूर्तिचतुष्टयम् । अनिरुद्धादिकं वासुदेवान्तं देहमध्यगः । वासुदेवो महोनामा त्वनिरुद्धः शिरो मतः । भूर्नामाथ भुवोनामा बाहू प्रद्युम्न ईरितः । सङ्कर्षणः सुवर्नामा पादौ तस्य महात्मनः । अनन्योऽप्यन्यशब्देन चतुरात्मा प्रकीर्त्यते । निर्विशेषोऽपि भगवान्सङ्ख्यामात्रविशेषतः । लोकज्योतिः प्राणवेदेष्वेकः स पुरुषोत्तमः । प्रत्येकशश्चातुरात्म्यात्षोडशात्मा प्रकीर्तितः । महीयते महति च स्वयं स भगवान्हरिः । पूज्यपूजकभेदोऽत्र नैव कश्चिदपीष्यते । नामप्रवृत्तिहेतुत्वान्नामलोकादिकं हरेः । अयं समीपस्थतया त्वसौ प्राणे स्थितत्वतः । ईक्षणादन्तरिक्षं चाथादित्यस्थोऽदितेः सुतः । अग्निरग्नौ स्थितत्वाच्च वायुर्वयति यज्जगत् । चन्द्र आह्लादरूपत्वादृगर्च्यत्वाज्जनार्दनः । यजुर्याज्यस्वरूपत्वात्साम चासौ समत्वतः । बृहत्त्वाद्ब्रह्म वेदानां समुदायेऽखिले स्थितः । तत्सम्बन्धाद्वेदराशिर्ब्रह्मशब्देन कीर्तितः । प्रकृष्टनयनात्प्राणोऽपानोऽवाङ्नयनाद्धरिः । विविधं नयनाद्व्यानः सोऽन्नं सर्वोपजीव्यतः । एवं षोडशरूपोऽसौ चतुरात्मा व्यवस्थितः । महाचमसनामाऽसौ यस्मादतिचमत्कृतिः । माहा-

---

श्रियमावह । लोमशां पशुभिः सह स्वाहा ॥१०॥ आ मा यन्तु ब्रह्मचारिणः स्वाहा । वि मायन्तु ब्रह्मचारिणः स्वाहा । प्र मायन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा । यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन्त्सहस्रशाखे । नि भगाहं त्वयि मृजे स्वाहा ॥११॥ यथापः प्रवतायन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरा यन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥१२॥ भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते ।

SGDF
Sri Gangeshwari Digital Foundation

चमसस्तज्ज्ञानी ब्रह्मा सम्परिकीर्तितः । एवं षोडशरूपाणां ज्ञान-योग्यश्चतुर्मुखः । स एव ब्रह्मवित्तस्मात्पूज्यते मुक्तिगोऽपि सन् । सर्वदेवैरतितरां यः सम्यक्षोडशात्मविदि'ति व्याहृतितत्त्वे । 'तस्य भूरितिशिरः एकं शिरः एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे सुवरिति प्रतिष्ठे द्वे प्रतिष्ठे द्वे एते अक्षरे' इत्यादि श्रुतेः । सर्वव्याहृतीनां प्रवेत्ता माहाचमस्यश्चतुर्थीत्वेनैतां प्रवेदयत इति विशेषः । 'भूर्नामा स्फूर्तिरूपत्वाद्भूरिवीर्यत्वतो भुवः । सुवः सुबलरूपत्वान्महः पूर्णत्वतो विभुः । तदेतच्चतुराकारं ब्रह्मोक्तं गुणबृंहणात् । स आत्मा सर्वदेवानां चतुरात्मा जनार्दनः । तस्य ब्रह्मादयो देवा अङ्गमागन्तुक-त्वतः । वासुदेवादिरूपोऽसौ षोडशात्मा चतुश्चतुः । स एव सर्व-वेदोक्तः सर्वविद्यासु चेश्वरः । प्रणवार्था व्याहृतयो व्याहृत्यर्था ऋगादयः । इतिहासः पुराणं च पञ्चरात्रं च सर्वशः । सम्यग्व्याहर-णाद्विष्णोः श्रुता व्याहृतयस्त्विवति । सर्ववेदोक्तसर्वस्वव्याहृतेर्व्याहृति-त्वमु । विशेषेणाहरन्तीमं विष्णुमित्यथवा स्मृता'इति व्याहृतिसारे ।

मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः ॥१३॥ भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुवरित्यसौ लोकः । मह इत्यादित्यः । आदित्येन वा व सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते । भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि । मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा । चतस्र-श्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलि-मावहन्ति ॥१४॥ स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अन्तरेण तालुके । य एष स्तन इवावलम्बते ।

SGDF
Sri Gargeshwari Digital Foundation

'य एष हृदयाकाशस्त्वनिरुद्धस्तु तद्गतः। प्रद्युम्नस्तालुमध्यस्थो लम्बिन्या- मिन्द्रनामकः। व्याख्यः सुपर्णरूपत्वात्केशान्ते वर्तते तु यः। सङ्कर्षणः सुपर्णात्मा वासुदेवोऽव्ययः स्मृतः। यस्माद्व्यपगते स्थाता जगति प्रलये विभुः। अशीर्षककपालोऽसौ कपालादुपरि स्थितः। अनिरुद्धस्तु भूर्नामा हुताशे संव्यवस्थितः। प्रद्युम्नो भगवान्वायौ भुव इत्येव कीर्तितः। सङ्कर्षणः सुवर्नामा सूर्ये तिष्ठति केशवः। महोनामा वासुदेवो ब्रह्मणिस्थश्चतुर्मुखे। स वासुदेवः स्वाराज्यं व्याप्यास्मि- न्मनसस्पतौ। अनिरुद्धे च संव्याप्तस्ततो वागादिनां पतिः। वागादिषु स्थितो नित्यं भवत्येव जनार्दनः। खव्यापी च जगद्व्यापी नित्यैश्वर्यात्स ईश्वरः। आकाशवद्व्याप्तदेहः सत्यात्मा गुणपूर्तितः। वायोर्विशेष- रमको बलानन्दस्वरूपवान्। ज्ञानानन्दस्वरूपोऽसौ शान्तिनामा सुखोन्नतेः। अन्तगत्वात्स्वतः पूर्तेः समृद्धं तत्प्रकीर्तितम्। इत्युपास्व प्राथमिको योग्यस्त्वं मदुपासने। प्राधान्यादिति पूर्वं हि प्राह विष्णु- श्चतुर्मुखमि'ति ब्रह्मसारे। 'पृथिव्याद्यं पाङ्क्तषट्कं पाङ्क्तेनैव स्वयं हरिः। नारायणादिरूपेण बलयत्यञ्जसा प्रभुः। इत्युवाच स्वयं विष्णुर्वेदद्रष्टा गुणाधिक' इति तत्त्वसंहितायाम्। आत्मा। अहङ्कारतत्त्वम्।

सैन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य शीर्षकपाले॥१५॥ भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ। सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्। वाक्पति- श्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः। एतत्ततो भवति॥१६॥ आकाशशरीरं ब्रह्म। सत्यात्मप्राणारामं मन आनन्दम्। शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्व॥ १७॥ पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि। आप ओषधयो वनस्पतय आकाश आत्मा। इत्यधिभूतम्। अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं मनो वाक्त्वक्। चर्म माꣳसꣳ स्नावास्थि

SGDF
Sri Gargeshwari Digital Foundation

'ओंनामा भगवान्विष्णुरधिकोच्चगुणत्वतः। यद्यद्रूपं भगवतस्तदिदं सर्वमेव च। ओमेवाधिकपूर्णत्वात्तस्माद्यज्ञेषु चर्त्विजः। ओमित्येव स्वकर्माणि कुर्वंत्युद्दिश्य केशवम्। अधिकोच्च शृणुष्वेति हरिमध्वर्युराह हि। अधिकोच्च महाधाम सूच्चदेवेति चादरात्। प्रतिप्रतिगृणात्येनं शंरूपात्युच्चशावन। इत्याह होता शस्त्रेषु तथैवान्येऽपि चर्त्विजः। एवं स्वाध्यायकृच्चाह ब्रह्मप्राप्त्यर्थमञ्जसा। एवं जानन्त एते तु प्राप्नुवन्त्येव तत्परमि'ति च। ऋतं च स्वाध्यायप्रवचने च कर्तव्यानि। प्रवचनं व्याख्यानम्। यथार्थज्ञानमृतम्। तत्पूर्वकं यथार्थवचनं करणं च सत्यम्। 'ऋतं यथार्थविज्ञानं सत्यं तत्पूर्विका कृतिः। ध्यानसत्ये पूज्यपूजा तप इत्यभिधीयत'इति शब्दनिर्णये। सर्वकर्मकृतिकालेष्वपि स्वाध्यायप्रवचनयोः कर्तव्यत्वात्तयोः सर्वत्रानुषङ्गः। 'मन्त्रो मन्त्रार्थवचनमन्यस्य त्वात्मनोऽपि वा। सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ यत' इति कर्मतत्त्वे। आत्मनश्चेन्मनसैवार्थवचनम्। 'मानुषं मानुषो धर्मो देवा अपि हि मानुषे। मनुष्यवत्प्रवर्तन्ते नैवैश्वर्यप्रकाशिन'इति च। 'प्रजाया रक्षणं चैव पुनः प्रजननं तथा।

मज्जा। एतदधिविधाय ऋषिरवोचत्। पाङ्क्तं वा इदꣳ सर्वम्। पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोतीति॥ १८॥ ओमिति ब्रह्म। ओमितीदꣳ सर्वम्। ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओꣳ शोमिति शस्त्राणि शꣳसन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति॥ १९॥ ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च॥ अग्नयश्च स्वाध्यायप्रवचने च। अग्निहोत्रं च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च। मानुषं च

SGDF
Sri Gangeshwari Digital Foundation

प्रकृष्टजातिकरणं कर्मभिस्तनये पितुरि'ति च। 'सत्ये तपसि वा चीर्णे सर्वकर्म कृतं भवेत्। स्वाध्याये च प्रवचने ह्यन्तर्भावो विशेषत' इति च। 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवती'ति च श्रुतिः। 'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यत'इति भारते। 'सम्यग्ज्ञात्वा तु यो विष्णुं व्याख्यायीत जपेत च। न तस्य किञ्चिदकृतं कर्तव्यं मुच्यते च स'इति कर्मतत्त्वे। 'संसारवृक्षच्छेत्ताहं मत्कीर्तिः पर्वतोपमा। अत्युत्कृष्टेन हरिणा पावितोऽस्मि यतः स्फुटम्। वाजिरूपश्च नेता च वाजिनी सूर्य उच्यते। तत्रस्थो भगवान्विष्णुः सम्प्रोक्तो वाजिनीवसुः। तेनामृतोऽस्मि

स्वाध्यायप्रवचने च। प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च ॥२०॥ सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः ॥२१॥ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि। द्रविणꣳ सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम् ॥२२॥ वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयाऽऽसने न प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम् ॥२३॥ अथ यदि ते कर्मविचिकित्सा

SGDF
Sri Gargeshwari Digital Foundation

द्रविणं नित्यानन्दस्वरूपतः। तेनामृतेन सिक्तोऽहं तेन व्याप्तो यतः सदा। इत्याह मन्त्रदृक्पूर्वं त्रिशङ्कुर्मानवो नृप'इति यजुर्विवेके। संहितायाः पञ्चाधिकरणाभिमानित्वं प्राणादिरूपस्य वायोरपि भवति। पृथिव्यन्तरिक्षमित्युक्तपाङ्क्तत्वं च। अत उपक्रमोपसंहारयोस्त्वामेव प्रत्यक्षं ब्रह्मवदिष्यामि त्वामेव प्रत्यक्षं ब्रह्मावादिषमिति युज्यते॥ इति प्रथमवल्ली सम्पूर्णा॥ १॥

स्वयोग्यं ब्रह्मविद्भुङ्क्ते विरिञ्चेन परेण च। ब्रह्मणा सह तद्वश्यः सुखमेव न दुष्कृतमि'ति च। 'य एष भगवान्विष्णुर्भूतस्रष्टा

वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्। शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः॥ २४॥ इति प्रथमवल्ली सम्पूर्णा॥ १॥

॥ २. ब्रह्मवल्ली॥

॥ ॐ॥ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥१॥ ॐ ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान्कामान्त्सह। ब्रह्मणा विपश्चितेति॥ २॥ तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशा-

SGDF
Sri Gangeshwari Digital Foundation

गुणाधिकः । स एवान्नात्पुनर्जातो ह्यजातोऽपि यतो विभुः । अन्नात्मनि शरीरेऽसौ व्यज्यते सुविवेकिभिः । अन्नस्य सारभूतोऽयं शरीरस्य च केशवः । अन्ननामा चान्नसंस्थः शरीरेषु च संस्थितः । अत्तृत्वात्सर्वलोकानामन्नमित्युच्यते हरिः । उपजीव्यश्च भूतानामिति चान्नं जनार्दनः । स ज्यायान्सर्वभूतेभ्यस्तस्मात्सर्वौषधं स्मृतः । संसारे दह्यमानानामाश्रयत्वात्स औषधम् । प्रचुरं मय इत्युक्तं प्रचुरात्ता यतो हरिः । प्रचुरैः सेव्यते नित्यमतोऽन्नमय ईरितः । देहस्यैव शिरस्यस्य शिरो विष्णोः प्रतिष्ठितम् । बाह्वोः पक्षौ तथा मध्ये मध्यं पश्चात्तनौ तथा । पुच्छमित्येष भगवाननिरुद्धः स्वयं हरिः । तस्यान्तरं परं रूपमभिन्नमपि भिन्नवत् । प्रद्युम्नाख्यं प्राणमयं प्रणेतृत्वात्प्रकीर्तितम् । शिरस्तस्य प्राणगतं प्राण इत्येव नामतः । व्यानाख्यो दक्षिणः पक्षो व्यानगश्चोत्तरस्तथा । अपानाख्योऽपानगत आकाशस्थं च मध्यमम् । आकाशाख्यं तथा पुच्छं पृथ्व्यां पृथिविनामकम् ।

द्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः ॥ ३ ॥ स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा ॥४॥ तदप्येष श्लोको भवति ॥ अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति ॥५॥ तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा ॥६॥ तदप्येष श्लोको भवति ॥

SGDF
Sri Gangeshwari Digital Foundation

उदान आकाशनामा समानः पृथिवीति च। प्रणेतृत्वात्प्राणनाम शिरो विष्णोः प्रकीर्तितम्। विशेषाच्चेष्टयेद्यस्माद्व्यानाख्यो दक्षिणः करः। यस्मादपनयेद्दोषानपानः सव्य उच्यते। आकाशस्त्ववकाशत्वान्मध्यदेहो महात्मनः। पृथिवी पुच्छमस्योक्तं सर्वस्यापि प्रधारणात्। स एष जगतामायुस्तस्मिन्सङ्कर्षणः स्थितः। शिरस्तस्य यजुर्नाम यज्ञानां हरणात्स्मृतम्। यजुः संस्थं च बाहू तु ऋक्सामान्तस्थितौ सदा। ऋगर्चनायाः स्वीकारात्साम दोषात्समीकृतेः। पंचरात्रगतं मध्यमादेशाख्यं सुविस्तृतेः। अथर्वाख्यं तथा पुच्छमधरं चाङ्गिनां रसः। मनोवाचामगम्यं तं ज्ञात्वाऽऽनन्दस्वरूपिणम्। कुतश्चिन्न बिभेत्येव वासुदेवोंतरस्ततः। श्रद्धाख्यं श्रुतिधर्तृत्वाच्छ्रद्धायां तच्छिरः स्मृतम्। ऋतं ज्ञानततेर्दाता चर्तस्थो दक्षिणः करः।

प्राणं देवा अनुप्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते। सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य ॥७॥ तस्माद्वा एतस्मात्प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा ॥८॥ तदप्येष श्लोको भवति॥ यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य ॥९॥ तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा ॥१०॥ तदप्येष श्लोको भवति॥ विज्ञानं

SGDF
Sri Gargeshwari Digital Foundation

वामः सत्यस्थितः सत्यं सतां यस्मान्नियामकः । योगाख्यं सर्व-लोकस्य योगादत्रैव योगगम् । मध्यं पुच्छं महोनाम महनीयत्वतः सदा । तस्मिन्नानन्दरूपोऽसौ स्थितो नारायणः सदा । शिरः प्रिये स्थितं तस्य परेयं प्रियनामकम् । मोदप्रमोदयोर्बाहू मोदनाच्च प्रमोद-नात् । मोदप्रमोदनामानावानंदस्त्वाततत्वतः । मध्यमानन्दसंस्थं च ब्रह्म सृष्ट्या तु बृंहयेत् । पुच्छं प्रधानवायौ च ब्रह्माख्ये संस्थितं सदा । अभेदोऽप्यविशेषोऽपि परमैश्वर्ययोगतः । देहदेहिवदेवासौ पंचधाऽवस्थितो हरिः । बहिःस्थो देहवद्विष्णुरन्तस्थो देहिव(त्स)त्स्मृतः । अन्तर्व्याप्तिविशेषेण न त्वशक्तत्वतो बहिः । सर्वेऽपि पुरुषाकारा उत्तरात्पूर्वसम्भवाः । अत्तृत्वं च प्रणेतृत्वं बोधो विविधवेद्यता । आनन्दश्च यतः पूर्णस्ततोऽन्नादिमयाः स्मृताः । अन्नादिदास्ते प्रत्येकं सर्वे सर्वगुणा अपि । नामभेदस्ततस्तूक्तः सर्वनामवतामपि । पञ्चरूपं च तद्ब्रह्म जीवादन्यन्न विद्यते । इति ये तु विजानन्ति तेऽसन्तस्तम आलयाः । जीवादन्यत्परं ब्रह्म पञ्चरूपं च ये विदुः । सन्तस्त इति

यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठ-मुपासते । विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान्कामान्त्समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥११॥ तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥१२॥ अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता३उ ॥ १३ ॥

SGDF
Sri Gurgeshwari Digital Foundation

विज्ञेया मोक्षयोग्या हि ते ध्रुवम् । इत्युक्ते ब्रह्मणा पूर्वं पप्रच्छ वरुणो विभुम् । अविद्वानपि यः कश्चिद्ब्रह्माप्नोति कथश्चन । विद्वानेवोत तत्रापि सर्वे वाऽथैव केचन । यदि सर्वेऽथ तत्रापि सर्वे सम्यक्समाप्नुयुः । केचिदेवोत सम्यक्त्वदसम्यगपरे जनाः । ज्ञानिनोऽपीति पृष्टस्सन्ब्रह्मा प्राह चतुर्मुखः । अज्ञा न प्राप्नुयुर्ब्रह्म प्राप्नुयुर्ज्ञानिनोऽखिलाः । तत्रापि सम्यक्प्राप्तिस्तु विरिश्चस्यैव सर्वदा । अन्येषां तारतम्येन प्राप्तिः सुखविशेषतः । इत्यभिप्रायवान्ब्रह्मा ह्युकारेण समासतः । उक्त्वा प्रश्नोत्तरं पश्चाद्विस्तरेण जगाद ह । कश्चिदेवोत सम्यक्त्वदाप्नुयादिति वाक्यतः । अनन्तरं तथैवेति ब्रह्मोङ्कारमुवाच ह । अज्ञो नैव तदाप्नोति ज्ञाने वै तदवाप्नुते । इति ज्ञापयितुं विष्णोः स्वातन्त्र्यज्ञापनाय तु । आह सृष्टिं प्रवेशं च माहात्म्यज्ञानतो यतः । प्रीतिं यान्ति महान्तस्तु तद्वशा एव चेश्वराः । अग्न्यादयोऽपि किमुत तदन्ये मुक्तिदस्ततः । स एवैकः स विज्ञेयः पूर्णैश्वर्यादिरूपवान् । इति तस्य महैश्वर्यमुच्यते स त्वकामयत् । सृष्ट्वा जगदिदं सर्वं नियामकतयाऽस्य तु । बहुरूपो भवानीति स्याज्जगच्चेत्यचिन्तयत् । स्यादित्यालोचनान्नान्यत्तपो विष्णोः कदाचन । अवतारेष्वनुकृतिर्बाह्यवृत्त्या तपस्विनाम् । सृष्टिर्नाम स्वरूपात्तु बहिर्निष्क्रमणं स्मृतम् । यद्यपीदं जगत्सर्वं स्वोदरस्थं महात्मनः । तथाप्येष द्वितीयेन रूपेण बहिराक्षिपेत् । रूपान्तरेणाविशच्च जगत्सर्वं जनार्दनः । त्यच्चानिरुक्तं विज्ञानं तथा निलयनं महान् । सत्यं प्राणस्तथा श्रीश्च सन्निरुक्तं तथानृतम् । अविज्ञानं

सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत । यदिदं किञ्च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनु प्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च । तत्सत्यमित्याचक्षते ॥ १४ ॥ तदप्येष श्लोको भवति ॥

SGDF
Sri Gargeshwari Digital Foundation

चानिलयनं प्रकृतिप्राणयोः परम् । तद्वद्विष्णोस्तु सम्बन्धात्स्वतस्तन्नामको हरिः । ततो नियामकश्चेति त्यदानन्त्यादवाच्यतः । अनिरुक्तं निलयनं सर्वाधारत्वतो हरिः । विज्ञानं सर्वविज्ञानात्सत्यं साधुस्वरूपतः । अवसादसुवाच्यत्वदौर्बल्यज्ञप्त्यसाधुताः । प्रकृतिप्राणतोऽन्यत्र कुर्वंस्तन्नामको हरिः । अतः साधुस्वरूपः सन्त्सत्यनामानृतादिकम् । नामानेन गतत्वादेर्यदिदं किञ्च भाषितम् । सन्निरुक्तादिशब्देन तत्सर्वं साधुतैव हि । अवसादनादिहेतुत्वं साधुतैव हि सर्वशः । असाधुतावसादादिस्तत्कर्तृत्वं हि भाषितम् । अनासाद्यस्त्वसन्नामा पूर्वं नारायणाभिधः । स आसाद्यश्च सन्नामा वासुदेवोऽभवत्प्रभुः । स वासुदेवः स्वात्मानं चक्रे सङ्कर्षणादिकम् । तस्मात्तत्सुकृतं नाम स आनन्दो रसस्ततः । आनन्दमेनं सम्प्राप्य मुक्तो मोदेन्न चान्यथा । आदीप्तस्त्वेष भगवान्यद्यानन्दो भवेन्न च । सामान्यचेष्टा धर्माश्च कस्य स्युस्तमृते प्रभुम् । सुखं लब्ध्वा हि कुरुते लोकचेष्टां जनार्दनः । अल्पात्सुखादल्पकर्मा पूर्णानन्दाद्धि सर्वकृत् । नह्यार्ताः कर्म कुर्वन्ति मुग्धाश्चैव विशेषतः । तस्माद्यादृक्सुखं तादृक्कर्म पूर्णसुखस्ततः । सर्वकृत्त्वात्परो विष्णुराह तस्मात्सनातनी । सुखं लब्ध्वा करोतीति च्छन्दोगानां श्रुतिः परा । अलब्ध्वा तु सुखं नैव करोतीत्यपि सादरम् । तत्पूर्णानन्ददेवेन कारितः प्राणिति स्फुटम् । सर्वलोकः

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवायं लब्ध्वानन्दी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति ॥ १५ ॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥

SGDF
Sri Gargeshwari Digital Foundation

स एवैक आनन्दयति चाखिलम् । तस्माद्दृश्ये जैवानां गुणानामप्य-सङ्गतेः । अनात्म्येऽथ गुणानन्त्याद‌निरुक्ते निराश्रयात् । अनिलय-नेऽभयत्वेन यदा ज्ञानेन तिष्ठति । तदाऽभयं हरिं गच्छेन्नैवाज्ञानी कथञ्चन । यदैतस्मिन्परे विष्णावुदरं जीवगत्वतः । भेदं करोति तेनैव भयमस्य महद्भवेत् । अ इत्युक्तः परो विष्णुरेभ्य उच्चः स एव तु । त उदा जीवसङ्घाः स्युरुदरं तद्गतान्तरम् । तदेव ब्रह्म भय-कृद्विदुषोऽविदुषस्तथा । विदुषोऽल्पभयं कुर्याद्यावन्मुक्तिं व्रजत्यसौ । अथाभयं भवेद्ब्रह्म तस्य मुक्तस्य सर्वदा । तस्माद्वाय्वादयो देवा विद्वांसोऽपि विशेषतः । भीताः स्वकर्म कुर्वन्ति विष्णोः प्रीत्यर्थ-मञ्जसा । अमन्वानस्य नुर्विष्णुः कुर्यान्नित्यं महद्भयम् । तम आख्यमनुत्थानं विदुषां नियमेन तु । स्यादेव मोक्षस्तत्रापि ह्यानन्दस्य विचित्रता । यस्तु साधुगुणैर्युक्तस्तस्यैवाप्यखिला मही । त्रेतायुगे चक्रवर्ती यदा मुक्तस्तु संसृतेः । अधीतिफलपूर्णत्वादाध्यायक इतीरितः । स एव विष्णुना युक्तो गच्छतीति युवा स्मृतः । एकानन्दस्वरूपोऽसौ मानुषो मुक्त इष्यते । तस्माच्छतगुणानन्दा गन्धर्वा मानुषात्मकाः । मुक्ताः श्रुतिफलं प्राप्तास्ततः कामाहतास्तथा ।

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति ॥१६॥ सैषाऽऽनन्दस्य मीमांऽसा भवति । युवा स्यात्साधु युवाध्यायकः । आशिष्ठो (द्द)द्रढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः ॥१७॥ श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देव-गन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणा-मानन्दाः । स एकः पितॄणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः । स एक

SGDF Sri Gangeshwari Digital Foundation

तेभ्यः शतगुणानन्दा देवप्रेष्यास्तु मुख्यतः। एते हि देवगन्धर्वा मुक्तेभ्यस्तेभ्य एव च। शताधिका हि पितरस्तेभ्य आजानदेवताः। अनाख्याता देवतास्तु जाता देवकुले च याः। अजानदेवतास्ता हि ताभ्योऽग्र्याः कर्मदेवताः। बल्याद्या अन्तराप्राप्तदेवताः कर्मदेवताः। ताभ्यश्च तात्त्विका देवाः सृष्ट्यादौ देवतां गताः। तेभ्यो दक्षश्चेन्द्रनामा स हीन्दुं रावयत्पुरा। तस्माद्बृहस्पतिर्नाम महेन्द्रत्वात्पुरन्दरः। तस्मात्प्रजापतिर्मुक्तो रुद्रः प्रजननेशिता। तस्माद्ब्रह्मा शतगुणो मुक्त इत्येष निर्णयः। यथानन्दे तथा ज्ञाने विष्णुभक्तौ बलादिके। सर्वैर्गुणैः शतगुणाः क्रमेणोक्तेन तेऽखिलाः। अथवा सहस्रगुणिता अनन्तगुणितास्तथा। परिमाणे शतगुणेऽप्यानन्दस्फुटतावशात्। यथा दीपाच्छतगुणाप्यग्निज्वाला न दीपवत्। स्फुटीभवेद्यथैवाग्निर्बहुलोऽपि

आजानजानां देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः॥१८॥ ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः॥ १९॥ स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य॥२०॥ स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसङ्क्रामति। एतं प्राणमयमात्मानमुपसङ्क्रामति। एतं मनोमयमात्मानमुपसङ्क्रामति। एतं विज्ञानमयमात्मानमुपसङ्क्रामति। एतमानन्दमयमात्मानमुपसङ्क्रामति॥ २१॥ तदप्येष श्लोको भवति॥ यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति॥ एतꣳ ह वाव न

SGDF
Sri Gangeshwari Digital Foundation

न सूर्यवत् । यथैव सूर्याद्विगुणश्चन्द्रो नैव स्फुटीभवेत् । उत्तरेषामुत्तरेषां गुणा एवमतिस्फुटाः । प्रतिबिम्बा यतः पूर्वे ब्रह्मान्तानां नरादयः । अतोऽस्पष्टस्वरूपास्ते स्फुटरूपास्तथोत्तराः । यत्प्रसादात्स्वरूपाप्तिर्ब्रह्मादीनां समन्ततः । स विष्णुः सर्वजीवेषु नृषु देवेषु च स्थितः । एक एव महायोगी निर्विशेषोऽखिलैर्गुणैः । सर्वोत्तमः स पूर्णश्च तमेवं वेद यः पुमान् । जीवांश्च तारतम्यस्थान्स गच्छेत्पश्चरूपिणम् । विष्णुं न पुण्यपापे च तस्यानिष्टे कदाचन । प्रियाप्रियेषु तज्ज्ञानी ह्यास्तृणोति यतो नृषु । अगोचरं वाङ्मनसोरानंत्यात्पुरुषोत्तमम् । ज्ञात्वा मुक्तस्य भीर्नैव कुतश्चन भविष्यती'त्यादि यजुःसंहितायाम् ।

न च सह ब्रह्मणेत्यादेरन्योऽर्थः कल्प्यः । अप्रामाणिकत्वादनाश्वासाच्च । न चौषधीभ्योऽन्नमन्नरसमय इत्यत्रोभयार्थत्वेन विरोधः । अन्नस्यान्नं मध्यमः प्राणः । प्राणस्थूणेत्यादिवद्विशेषितत्वादुपपत्तेः । न चान्नमयादीनामब्रह्मत्वे किंचिन्मानम् । 'येऽन्नं ब्रह्मोपासते' । 'ये प्राणं ब्रह्मोपासते' । 'आनन्दं ब्रह्मणो विद्वान्' । 'विज्ञानं ब्रह्म चेद्वेद' । 'अस्ति ब्रह्मेति चेद्वेद' । 'अधीहि भगवो ब्रह्मेति' । 'तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमि'त्यादिना ब्रह्मशब्देनोक्तत्वाच्च । न च लौकिकाऽन्नस्यात्त्वमस्ति । 'येऽतोऽन्यथाविदुस्तेऽन्यराजानस्ते क्षय्यलोका भवंतीति'श्रुतेरविद्यमानोपासनादोषावगतेश्च । 'न च रमंत्यहो असदुपासनयाऽऽत्महन'इति च भागवते । 'नाविद्यामानं ब्रुवते वेदा ध्यातुं न वैदिकाः । अविद्यमानं ध्यायन्तो यान्ति सर्वेऽधरं तमः । तस्मात्सत्यार्थतां ब्रुयाद्वेदानामपि सर्वशः । य एवं वेद स ज्ञानी ज्ञानवान्नान्यथा भवेदि'ति वेदार्थविवेके । 'स यश्चायं पुरुषे, यश्चासावादित्य'इत्यधिकरणत्वेन भेद एव जीवस्य परमादुक्तः । 'एतस्मिन्न-

SGDF
Sri Gargeshwari Digital Foundation

दृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते'। 'एतमानन्दमयमात्मानमुपसङ्क्रामति'। 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता'। 'एतमानन्दमयमात्मानमुपसङ्क्रम्य। इमांल्लोकान्कामान्नीकामरूप्यनुसञ्चरन्नि'त्यादिना मुक्तस्यापि भेद एवाभ्यस्यते। 'अथ सोऽभयं गतो भवती'ति मुक्तिप्रस्तावात्। 'सैषाऽऽनन्दस्य मीमांसे'ति मुक्तानन्दो मीमांस्यते। श्रोत्रियस्य चाकामहतस्येति सर्वत्र विशेषणाच्च। न ह्यमुक्तस्याकामहतत्वं मुख्यं भवति। न च मुख्या श्रोत्रियता। 'यस्य श्रुतिफलं पूर्णं स श्रोत्रिय उदाहृतः। स हि मुक्तोऽकामहतः स हि कामैर्न हन्यते। यस्य कामास्तु सत्याः स्युः स हि कामैर्न हन्यते। न ह्यकामः क्वचित्कश्चित् दृश्यते श्रूयतेऽपिचे'ति ब्रह्माण्डे। न च देवपदाकामस्य सकाशादिन्द्रपदाकामस्य शतगुणानन्दो दृश्यते। सति च प्राजापत्यादिकामे। न च मानुषाः प्रायस्तदिच्छवः। चक्रवर्तिनस्तु युवशब्देनैव मुक्तत्वमुक्तम्। तस्मान्मुक्तविषयेयं मीमांसा। 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता' इत्यत्राप्यन्तःकरणस्थानामेव कामानां विमोक्ष उक्तः। न तु स्वरूपभूतानाम्। 'यं यमन्तमभिकामो भवति सोऽस्य संकल्पादेव भवतीति मुक्तानामपि स्वरूपभूतः कामः प्रतीयते। 'कामः संकल्प आनन्दो मुक्तानां तारतम्यतः। स्वरूपभूतास्ते सर्वे निर्दोषा गुणरूपका' इति पाद्मे। 'संकल्पादेव च तच्छ्रुतेरि'ति सूत्रम्। 'भेदव्यपदेशादि'ति जीवेशयोर्भेदश्चोक्तो भगवता। न च भेददर्शनमसुकरम्। स्वरूपत्वाद्भेदस्य। सर्वव्यावृत्तं हि सर्वस्य स्वरूपं सर्वैरनुभूयते। अन्यथाऽहं वा दृष्टोऽन्यो वा दृष्ट इत्यपि संशयः स्यात्। न च पश्चाद्भेदो ज्ञायत इत्यत्र किंचिन्मानम्। न हि दृष्टवस्तुनः पुरुषस्य तस्य वस्त्वन्तराद्भेदे संशयः क्वचिद्दृष्टः। न च सर्वतो व्यावृत्त्यनुभवे सर्वज्ञताऽपेक्षितेति दोषः। सामान्यतः सर्वस्य सर्वैरपि ज्ञातत्वात्। यावत्तु सर्वभूतो भेदो विशेषतो

SGDF
Sri Gangeshwari Digital Foundation

न ज्ञायते तावत्स्वरूपमेव विशेषतो न ज्ञातम् । न हि ज्ञाताद्वस्तुनोऽव्यावृत्तिः केनचिच्छंक्यते । यदा तु संशीयते तदापि कुतश्चिद्व्यावृत्तमेव ज्ञायते । न हि सर्वमिदं भवति वा न वेति कस्यचित्संशयः । अतो व्यावृत्तिरेव स्वरूपम् । अस्य भेद इति विशेष्यत्वमस्य स्वरूपमितिवत् । यथास्तीति वर्तमानः कालो वस्तुना सहैवानुभूयते । एवमन्यस्माद्व्यावृत्तमित्यत्रान्यदपि सामान्यतः सहैवानुभूयते । न ह्यस्तीति वर्तमानकालापेक्षयाऽनुभूयत इत्येतावता विद्यमानता नाम वस्तुनोऽन्या । सदित्यपि शत्रंतत्वात्कालसम्बन्ध्येवानुभूयते । तिष्ठन्नितिवत् । एवमन्यस्माद्व्यावृत्तमित्यन्येन सह प्रतीयमानमपि न स्वरूपादन्यत् । अस्माद्व्यावृत्तिरन्यस्य स्वरूपमन्यस्माद्व्यावृत्तिरस्य स्वरूपमिति नैकस्वरूपता । ज्ञानानन्दादिवत्स्वरूपत्वेऽपि व्यवहारविशेषो भवति । न च स्वरूपत्वेन भेदस्याभावो भवति । ज्ञानानन्दादिवदेव । अन्यप्रतियोगिकत्वाद्भेदस्य न स्वस्मादपि भवति । 'भेदस्तु सर्ववस्तूनां स्वरूपं नैजमव्ययम् । नष्टानामपि वस्तूनां भेदो नैव विनश्यति । अवस्तुनोऽपि रूपं स्वं भेद एव न चान्यथा । विशेषरूपनाशेन भेदमात्रावसायिता । नाश इत्युच्यते सद्भिर्भेदो न हि विनश्यति । इत्याहुः केचिदज्ञानात्तत्राहुः सूक्ष्मदर्शिनः । सत्यं भेदस्तु वस्तूनां स्वरूपं नात्र संशयः । तस्माद्वस्तुविनाशे तु तद्भेदो नास्ति कुत्रचित् । अविनष्टस्य तस्मात्तु भेदोऽस्त्येव स्वरूपतः । एवं भावादभावस्य न भेदोऽभावरूपवान् । अभावाद्भावरूपस्य स्वरूपं भाव इष्यते । नष्टभेदोऽप्यभावात्मा विद्यते च विनाशतः ।

तपति । किमहꣳ साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मानꣳ स्पृणुते । उभे ह्येवैष एते आत्मानꣳ स्पृणुते । य एवं वेद । इत्युपनिषत् ॥ ॐ ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ २२ ॥ इति द्वितीयवल्ली सम्पूर्णा ॥ २ ॥

SGDF
Sri Gangeshwari Digital Foundation

स्वरूपत्वात्तु भेदस्य भेदे शङ्का न कस्यचित् । सर्वं सामान्यतो यस्मात्सर्वैरप्यनुभूयते । तस्माद्व्यावृत्तता सर्वैस्सर्वस्मादनुभूयते । प्रतियोगिता त्वभावस्याप्यस्त्यभावतया स्फुटम् । न ह्यभावोऽप्यधर्मा स्यान्न तु स्याद्भावधर्मयुक् । अभावस्यास्तितानाम स्यादेवाभावरूपिणी । अभावतापि सैव स्यान्न तु स्याद्भावरूपिणी । अतः स सर्वव्यावृत्तस्वरूपो भगवान्परः । येन ज्ञातः स तु ज्ञानी मुच्यते नात्र संशय'इति तत्त्वनिर्णये ॥ इति द्वितीयवल्ली सम्पूर्णा ॥ २ ॥

'चक्षुः स चष्टे यद्विष्णुः श्रोत्रं श्रोतृत्वतो विभुः । वाक्च वक्तृत्वतो नित्यं मनो मन्तृत्वतस्तथा । तपो ज्ञानस्वरूपत्वाद्विज्ञानं तु

॥ ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥
॥ ॐ भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति । तꣳ होवाच । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ॥ १ ॥ स तपोऽतप्यत । स तपस्तप्त्वा ॥ अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व ॥ २ ॥ तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः

SGDF
Sri Gargeshwari Digital Foundation

विवेचनात् । ज्ञानानुसन्धानरूपतपसा तं जनार्दनम् । क्रमाद्भृगुर्व्यजानात्तमन्नादिबहुरूपिणम् । एवं विजानंस्तं विष्णुं तस्मिंस्तु प्रतितिष्ठति । मुक्तो भूत्वाऽन्नवांश्च स्यादन्नादश्च सदैव तु । अन्ननामा तु भगवान्विद्वांस्तमुपजीवति । तद्वांश्च तेन गुप्तत्वाद्धियार्थे वसतीच्छया । आगतं नेति न ब्रूयात्तदेतद्विदुषो व्रतम् । स विष्णुः पृथिवीनामा

प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा । आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति ॥ ३ ॥ सैषा भार्गवी वारुणी विद्या । परमे व्योमन्प्रतिष्ठिता । य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ४ ॥ अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या । अन्नं न परिचक्षीत । तद्व्रतम् ॥ ५॥ आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या । अन्नं बहु कुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी

SGDF Sri Gurgeshwari Digital Foundation

पृथुत्वात्प्राणनामकः। प्रकृष्टानन्दबलत आकाशः सर्ववेत्तृतः। शराख्य देहिनश्चैव शरीरं प्रेरणात्स्मृतः। एतैश्चतुर्भिर्भगवान्रूपैश्च चतुरात्मभिः। भोग्यभोक्तृस्वरूपेण तिष्ठति क्रीडयन्स्वयम्। न च भोग्यत्वमात्रेण हीनत्वं तस्य कुत्रचित्। न हि भार्योपभोग्यस्तु भर्ता हीनत्वमाप्नुयात्। एवं स भगवान्विष्णुरविशेषोऽखिलेष्वपि। रूपेषु क्रीडते नित्यं भोक्ता भोग्य इतीच्छया। अन्नाख्यं तं नैव निन्द्याद्बहु मन्येत तं सदा। इति व्रतद्वयं ह्येतद्भाव्यं यदि सुखे स्पृहा। येन केनापि विधिना बह्वित्येव जनार्दनम्। मत्वैव प्राप्नुयान्नित्यं मनोवाक्कायवृत्तिभिः। य एवं समुपासीत तस्यान्नाख्यो हरिः स्वयम्। सिद्ध इत्येव हि प्राहुर्विद्वांसः परिनिष्ठिताः। यस्य तद्ब्रह्म संसिद्धं पूर्वं तेनाप्यतेऽग्रतः। मध्ये वयसि चेत्सिद्धं मुक्तो मध्यं प्रपश्यति। वार्धके चेद्विजानाति मुक्तः पादौ प्रपश्यति। तेजोमण्डलमेवान्यदङ्गं विष्णोः प्रपश्यति। पूर्वे वयसि बोद्धव्यमामुखात्सर्वदृष्टये। क्षेमकृत्त्वात्क्षेमनामा वाचिस्थः स परो हरिः। योगनामा तथा प्राणे सर्वकामनियोजनात्। क्षेमनामा क्षेमकृत्त्वादपाने हि हरिः स्वयम्। कर्मनामा हस्तगतः कर्मकृत्त्वाज्जनार्दनः। गतिदत्वाद्गतिर्नाम पादस्थः पुरुषोत्तमः। विसर्गकृद्वि-

---

प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या॥ ६॥ न कञ्चन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नꣳ राध्यते। एतद्वै मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यते। य एवं वेद॥ ७॥ क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः समाज्ञाः। अथ दैवीः। तृप्तिरिति

SGDF
Sri Gargeshwari Digital Foundation

मुक्त्याख्यः पायुस्थः परमो विभुः । अध्यात्मस्थ इति प्रोक्तोऽथाधिदैवगतं शृणु । पर्जन्ये वृष्टिनामाऽसौ वृष्टिदत्वाज्जनार्दनः । वायौ तु बलनामा च बलदत्वात्सदैव हि । यशःप्रदत्वाद्दक्षे तु यशः पश्वभिमानिनि । नक्षत्रेषु ज्योतिराख्यो ज्योतिर्दातृत्वतो हरिः । उपस्थमानिनि शिवे प्रजात्यानन्दसन्ततेः । दातृत्वात्तत्तदाख्योऽसौ सन्ततिस्त्वमृतं स्मृतम् । सर्वं सर्वप्रदत्वात्तु प्रकृतौ पुरुषोत्तमः । स प्रतिष्ठा स्थापकत्वान्मनो मान्यत्वतो हरिः । नमो नम्यत्वतो नित्यं महश्चापि महत्त्वतः । विरिञ्चमारकश्चासौ ब्रह्म पूर्णगुणत्वतः । वेदैनं तत्त्वतो ब्रह्मा स एनं पश्वरूपिणम् । प्राप्य गायति मुक्तस्सन्नन्ननामास्मि भोग्यतः । यथेष्टमन्नभोक्ता च कीर्तिकर्ता हरेस्तथा । ऋतरूपस्य विष्णोस्तु पुत्रः प्रथमजो ह्यहम् । देवेभ्यः पूर्वजश्चाहं मुक्तानामाश्रयः

वृष्टौ । बलमिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजा-(प)तिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे ॥८॥ तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्मह इत्युपासीत । महान्भवति । तन्मन इत्युपासीत । मानवान्भवति । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः ॥ ९ ॥ स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसङ्क्रम्य । एतं प्राणमयमात्मानमुपसङ्क्रम्य । एतं मनोमयमात्मानमुपसङ्क्रम्य । एतं विज्ञानमयमात्मानमुपसङ्क्रम्य । एतमानन्दमयमात्मानमुपसङ्क्रम्य । इमाँल्लोकान्कामान्नीकामरूप्यनुसञ्चरन् । एतत्साम गायन्नास्ते । हा३वु हा३वु हा३वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादो३हमन्नादो३हमन्नादः । अहँ श्लोककृदहँ श्लोककृदहँ श्लोककृत् ॥ १० ॥ अहमस्मि प्रथमजा ऋता३स्य । पूर्वं देवेभ्योऽमृतस्य ना३भायि । यो मा ददाति स इदेवमा३वाः । अहमन्नमन्नमदन्तमा३द्मि । अहं विश्वं भुवनमभ्यभवा३म् । सुवर्णज्योतीः । य एवं वेद । इत्युपनिषत् ॥

SGDF
Sri Gargeshwari Digital Foundation

सदा । यो ददाति च मां सम्यग्विष्णुतत्त्वप्रदर्शकः । स इत्थमेव मां याति विष्णोरन्नमहं सदा । ममान्नं सर्वजीवास्तु भोग्या मम यतः सदा । सर्वमभ्यभवं चाहं गुणैः सर्वैश्च नित्यकैः । सुवर्णो भगवान्विष्णुर्ज्योतिः स मम रेचकः । योऽहमेवं विदभवं तस्य मे माधवः पतिः । इति ब्रह्मा गायमानो मुक्तश्चरति सर्वदे'ति यजुःसंहितायाम् । अन्नं भगवन्तं न परिचक्षीत । न निराकुर्यात् । तद्गुणांस्तत्कर्माणि वा कुत्रापि बहुकुर्वीत । बहुगुणत्वेन प्रतिपादये-द्भगवन्तम् । यया कया च विधया बह्वन्नं प्राप्नुयात् । अतिप्रयत्नेनापि विहितप्रकारेण । बहुतरां भगवद्विद्यां प्राप्नुयात् । 'प्रजापतिः प्रथमजा ऋतस्य आत्मनात्मानमभिसम्बभूव' । 'प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूवे'त्यादिना विरिञ्चस्यैवैतज्ज्ञानम् । अन्यो न परिबभूवेति निषेधात् । 'विद्युद्वन्मानुषा विद्युः सूर्यमण्डलवत्सुराः । प्रतिबिम्बवच्च गिरिशो ब्रह्मैनं पश्यति स्फुटम् । ब्रह्मा हि स्थिर-चिद्रूपो बहुलात्मा विशेषतः । अन्ये क्रमादबहुलास्तथा चञ्चलचेतसः । तस्मात्सम्यङ्न पश्यन्ति हरिं ब्रह्मा तु पश्यती'ति हरिवंशवचनाच्च ब्रह्मैवैनं सम्यग्वेद ॥ इति तृतीयवल्ली सम्पूर्णा ॥ ३ ॥

यस्योच्चोऽथ समो वा कश्चिन्नैवास्त्यनन्तसच्छक्तेः । तं वन्दे परमेशं प्रेयांसं प्रेयसश्च मे विष्णुम् । 'यस्य त्रीण्युदितानि वेदवचनै रूपाणि दिव्यान्यलं बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हि तेन प्रभौ ॥ हनुशब्दो ज्ञानवाची हनूमान्मति-

---

स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्वि ना॒वधी॑तमस्तु मा वि॑द्वि॒षाव॑है । ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥ ११ ॥
इति तृतीयवल्ली सम्पूर्णा ॥ ३ ॥

॥ इति तैत्तिरीयोपनिषत् सम्पूर्णा ॥

SGDF
Sri Gargeshwari Digital Foundation

शब्दितः। रामस्य स्वृतरूपस्य वाचस्तेनानयन्त हि। भृतमो भीम इत्युक्तो वाचो मा मातरः स्मृताः। ऋगाद्या इतिहासश्च पुराणं पञ्चरात्रकम्। प्रोक्ताः सप्तशिवास्तत्र शयो भीमस्ततः स्मृतः। मध्वित्यानन्द, उद्दिष्टो वेति तीर्थमुदाहृतम्। मध्व आनन्दतीर्थः स्यात्तृतीया मारुतीतनुः। इति सूक्तगतं रूपत्रयमेतन्महात्मनः। यो वेद वेदवित्स स्यात्तत्त्ववित्तत्प्रसादत' इति च। 'साधको रामवाक्यानां तत्समीपगतः सदा। हनूमान्प्रथमो ज्ञेयो भीमस्तु बहुशुक्पितोः। पूतनाक्षयकारी च द्वितीयस्तु तृतीयकः। पूर्णप्रज्ञस्तथाऽऽनन्दतीर्थ-नामा प्रकीर्तितः। दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते। प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः। आसमन्तात्पतित्वे तु गूढं कलियुगे हरिम्। असत्यमप्रतिष्ठं च जगदेतदनीश्वरम्। वदद्भिर्गूहितं सन्तं तृतीयोऽसुर्मथायति। येन विष्णोस्तु वर्पाख्यान् गुणानाज्ञासिषुः परान्। ईशानासः सूरयश्च निगूढान्निर्गुणोक्तिभिः। त्रेतायां द्वापरे चैव कलौ चैते क्रमात्त्रयः। एतेषां परमो विष्णुर्नेता सर्वेश्वरेश्वरः। स्वयम्भूर्ब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नम' इति च। पूर्णागण्य-गुणोदारधाम्ने नित्याय वेधसे। अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः॥ (इति चतुर्थवल्ली सम्पूर्णा॥ ४॥) इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचितं श्रीमत्तैत्तिरीयोपनिषद्भाष्यं सम्पूर्णम्॥

॥ श्रीकृष्णार्पणमस्तु॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

बृहदारण्यकोपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतश्रीरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ प्राणादेरीशितारं परमसुखनिधिं सर्वदोषव्यपेतं सर्वान्तस्थं सुपूर्णं प्रकृतिपतिमजं सर्वबाह्यं सुनित्यम् । सर्वज्ञं सर्वशक्तिं सुरमुनिमनुजाद्यैः सदा सेव्यमानं विष्णुं वन्दे सदाहं सकलजगदनाद्यन्तमानन्ददं तम् ॥ १ ॥ 'यथा तुष्टाव लक्ष्मीशं सर्गादौ चतुराननः । तथा जगाद सूर्याय याज्ञवल्क्याय सोऽब्रवीत् ॥ २ ॥ वाजिरूपेण सूर्येण प्रोक्तं वाजसनेयकम् । कण्वाय याज्ञवल्क्योऽदात्काण्वं तेन प्रकीर्तितमि'ति वाराहे । 'अश्वस्वरूपो ब्रह्माभूदश्वरूपाज्जनार्दनात् । तत्र सन्निहितो विष्णुरश्वरूपः स्वयं प्रभुः । तयोश्च प्रतिमा मेध्यो यतोऽश्वोऽयं श्रुतौ श्रुतः । सर्वं जगत्तदङ्गेषु तस्मात्सन्निहितं स्मृतम् । तयोरङ्गेष्विदं यस्माज्जगत्सर्वं प्रतिष्ठितमि'ति प्रध्याने । 'उच्चैःश्रवाः सन्निहितो मेध्येऽश्वे तत्र केशवः । तस्मिन्निदं जगत्सर्वं ब्रह्मा चोच्चैःश्रवःस्थित' इति सौपर्णे । 'पर्वताः सिकताश्चैव नद्यः कूपः सरांसि च । हविः कपालयूपाद्या देवता एव सर्वशः ।

बृहदारण्यकोपनिषत्

३. तृतीयोऽध्यायः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः परिश(र्श)व ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मा॰ सान्युवध्य॰ सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता

SGDF
Sri Gangeshwari Digital Foundation

तत्तन्नामैव नामैषां भिन्नानामभिमानतः । नामानि तान्यपि हरेः स हि सर्वगुणाधिक'इति नारदीये । 'उषाः शिरो ब्रह्मनाम तत्त्वमस्त्रादयोऽखिलाः । सप्तम्यर्थाः समुद्दिष्टाः पञ्चम्यर्थास्तथा श्रुताः । षष्ठ्यर्थाश्च चतुर्थ्यर्थास्तृतीयार्थाश्च सर्वशः । तदैक्यवाचिवच्छब्दा अपि तद्गत्ववाचकाः । ऐक्यार्था नैव ते सर्वे भिन्नरूपा यतः सदा । ईशाङ्गवाचिनो वा स्युस्तेषामेव तदर्थतः । सप्तसु प्रथमा यस्मात्तद्योग्यार्थता भवेदि'ति ब्रह्मतर्के । 'अङ्गप्रत्यङ्गशो व्याप्तो विष्णुरेव तुरङ्गमे । अतो विष्णवङ्गगं सर्वं मेध्याङ्गस्थमुदीरितमि'ति च । पुनरप्यश्वस्य मेध्यस्येतिवचनं कस्यचिदश्वस्यैवमासीदितीतिहासरूपेण नोच्यते किन्तु सर्वमेध्यानामेवमिति ज्ञापनार्थम् । 'सर्वव्यक्तिष्वभिव्याप्त्यै तात्पर्याधिक्यवित्तये । प्रतीतानुपपत्तेरप्याभासत्वविवक्षया । पुनर्वचनमुद्दिष्टं शतशोऽपि पृथक्पृथगि'ति च । 'विष्णोः पुरीषस्थानीया काठिन्यात्पृथिवी श्रुता । तत्स्थत्वात्सिकताः सर्वा उवध्यस्थाः प्रकीर्तिताः । उर्व्यास्तु पादगत्वेपि नोवध्यत्वं विरुध्यते । यतस्तदभिमानिन्यो देवता अनुकीर्तिताः । तासां च बहुरूपत्वादैश्वर्याच्च परेशितुरि'ति च । 'अवान्तरदिशो विष्णोरस्थिपुच्छान्युदाहृताः । पूर्वपश्चार्धभेदेन दिशः पार्श्वे प्रकीर्तिते । शिरश्च पादमूलानि पुच्छं षड्तवः स्मृताः । संवत्सराभिमानी च ब्रह्मा सर्वशरीरगः । क्लोमानश्च यकृच्चैव मांसौ गिर्यभिमानिनः । आन्त्रेषु नद्यः सर्वाश्च सोऽयं विष्णुः सनातन'इति च । नभोऽभिमानी विघ्नेशो विष्णोर्मांसाश्रितः सदा । अन्तरिक्षाभिमानी च तत्स्नुरुदरे स्थित'इति च ॥ १ ॥ अश्वपूर्वापरौ

ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचन् जघनार्धो य(त)द्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥ अहर्वा अश्वं पुरस्तान्महिमाऽन्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमाऽन्वजायत तस्यापरे समुद्रे योनिरेतौ

SGDF
Sri Gargeshwari Digital Foundation

होम्यौ महिमानौ ग्रहौ स्मृतौ । अहोरात्राभिमन्तारौ तयोरप्यभिमानिनौ । कामश्चाथ रतिश्चैव विष्णुब्रह्मशरीरजौ । समुद्रेकात्समुद्रस्तु विष्णुः पूर्व उदाहृतः । उपचारेणतूद्रेकादपरश्च चतुर्मुखः । स विष्णुर्हयनामा सन् देववाहेषु संस्थितः । वाजिनामा तु गान्धर्वेष्वर्वनामाऽसुरेषु च । मनुष्येष्वश्वनामाऽसौ तद्बन्धुः स्वयमेव सः । तस्मादेवोत्थितिस्तस्य रूपभेदो न तस्य च । ऐश्वर्यात्स तथापीशो व्यक्तिभावं गमिष्यति । हत्वा याति यतः शत्रून्हरिस्तस्माद्धयः स्मृतः । सर्वदा युद्धकर्तृत्वाद्वाजी चापि प्रकीर्तितः । अर्वाभिगमनादुक्त आशुत्वादश्व उच्यत'इति वैहायसे । तेषां तेषां वाहनेषु स्थित्वा तत्तत्कर्मकर्तृत्वात्तत्तन्नामा । 'पतन्ति नियतं हन्तुं देवाश्वाः शत्रुमूर्धसु । वेगाधिका आसुराश्वा वेगमात्रं नृवाहन' इति स्कान्दे । 'गन्धर्वास्तु सदा युद्धरता देवानुगा यतः । तदशक्तौ तु देवानां युध्यन्ते स्वामिनो यतः । केचिद्गानरता नित्यं गन्धर्वा नर्तकाः परे । केचिद्वाद्यरता नित्यं चारणा देवचारका' इति च ॥ २ ॥ इत्यश्वब्राह्मणम् ॥ ॥ ३ ॥ १ ॥

'सर्वसंहारकं विष्णुं देवीं जीवांस्तथैव च । कालं त्रिगुणसाम्यं च कर्माणि प्राणमिन्द्रियम् । संस्कारं चैव वेदांश्च नर्ते किञ्चिल्लये त्वभूदि'ति ब्रह्मतर्के । लयकाले परमात्मनैवावृतमासीत् । 'अशनं जगदेतद्यन्नयत्यात्मेच्छया हरिः । अशनाया ततः प्रोक्त उदन्या कर्मनायक'इति ब्राह्मे । अन्यत्र नेतृत्वप्रतीतावपि श्रुतिषु प्रसिद्धेः स एव नेतेत्याह । अशनाया हि मृत्युरिति । तत्तत एव मनोऽकुरुत

वा अश्वं महिमानावभितः संबभूवतुर्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वाऽसुरानश्वो मनुष्यान्समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ २ ॥ इति प्रथममश्वब्राह्मणम् ॥ ३ ॥ १ ॥

नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीदशनायया अशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति । सोऽर्चन्नचरत्तस्यार्चत आपोऽ-

SGDF
Sri Gargeshwari Digital Foundation

यतः स्वयमेवासीन्नान्यत् । आत्मवान्त्स्यामित्यैच्छत् । शरीरवान्त्स्यामिति । अप्सृष्ट्यर्थं मनोऽकुरुत । 'ऐच्छद्विष्णुरदेहः सन् देहवान्त्स्यामिति प्रभुः । यतो देह इदं सर्वं तस्य विष्णोरदेहिनः । तद्वशत्वात्स्वयं देवश्चिदानन्दशरीरकः । सोऽत्मानमर्चन्नचरदप्सृष्ट्यर्थं जनार्दनः । यत्कुर्वन् यत्सृजेदीशस्तद्धवेद्धि तदात्मकम् । अतोऽर्चतो यतो जाता आपोऽतोऽर्चनसाधनाः । अन्यथा कर्तुमीशोऽपि क्रीडया तत्तदात्मकम् । कर्तुं तत्तत्प्रवृत्तिः संस्तत्करोति स्वयं प्रभुरि'ति ब्रह्माण्डे । मे सर्वाहेयस्य विष्णोः । 'अस्मच्छब्दगतैर्विष्णुर्वाच्यः सप्तविभक्तिभिः । सर्वाहेयत्वतस्त्वेकः सर्वस्य प्रतियोगितः । युष्मच्छब्दाभिधेयश्च तच्छब्दैश्च परोक्षतः । स एव बहुरूपत्वाद्बहुशब्दाभिधानवान् । जीवस्थितेन रूपेण ह्रद्रेनापि द्विधोच्यते । भिन्नोऽपि सर्वजीवेभ्यः सर्ववस्तुभ्य एव च । पूर्णानन्दादिरूपस्य कुतोऽल्पसुखिनैकते'ति ब्रह्मतर्के । 'उदकं सुखहेतुत्वान्कमित्येवाभिधीयते । तदेव ह्यर्चतो जातमतोऽर्क इति कीर्त्यत'इति व्यासनिरुक्ते । अर्चतो जातं सुखसाधनं चेत्यर्क इत्यर्थः । कं सुखमस्मै भवति । 'अपां हि सुखहेतूनां वेद विष्णोर्जनिं हि यः । स मुक्तः सुखभागेव स्याद्विष्णोस्तु प्रसादत'इति माहात्म्ये ॥ १ ॥ अर्कशब्दस्यादित्ये प्रसिद्धत्वादप्शब्दोऽपि तत्रेत्याशङ्कां निवर्तयितुमापो वा अर्क इति पुनर्वचनम् । नादित्येऽर्कशब्दः किंत्वप्स्वेवार्कशब्द इत्यर्थः । शरो मण्डः । 'फेनरूपस्तु यो मण्डो जलस्थोऽसौ सुसंहतः । पृथिवीत्वं समापन्नस्तस्यां शिश्ये जनार्दनः । ततः स चिन्तयामास स्यादग्निरिति देवराट् । तच्चिन्तनात्समुत्पन्नो वायुरग्न्यभिधानवान् । अग्रजत्वादग्रणीत्वाद्वायोरग्नित्वमिष्यत'इति प्रवृत्ते ।

जायन्तार्चतो वै मे कमभूदिति तदेवार्कस्यार्कत्वं कँह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥ आपो वा अर्कस्तद्यदपाँशर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्तताग्निः ॥ २ ॥ स त्रेधाऽऽत्मानं व्यकुरुतादित्यं तृतीयं वायुं

SGDF
Sri Gargeshwari Digital Foundation

'शक्तिविस्रंसने चापि शयने चापि कीर्तितः। श्रमशब्दो हरेर्नैव शक्तिविस्रंसनं क्वचित्। अतो हरेः श्रमो नाम शयनं सम्प्रकीर्तितमि'ति ब्रह्मतर्के। तस्यामश्राम्यदिति साधिकरणत्वाच्च शयनं युक्तम्। न हि पृथिव्यां श्रमो नामान्तःकरणधर्मो युज्यते। अधिकरणपरम्पराकल्पनं च क्लिष्टकल्पनम्। 'सृष्ट्वा स पृथिवीं विष्णुः शेतेऽनन्तेऽब्धिमध्यगः। तस्यां पृथिव्यां श्वेताख्ये द्वीपे मुक्तैरुपास्यत'इति मुक्तिसंहितायाम्। 'तस्य आलोचनायुक्तस्तस्मात्कार्यार्थकामना। तप्तता तु हरेरुक्ता कुतो दुःखं हरेः प्रभोरि'ति ब्रह्मतर्के। तेजोरसः जगतः सामर्थ्यसारभूतः ॥२॥ वायुरग्निरिति प्रोक्तो ह्यग्रणीत्वादथाङ्गिनाम्। नेतृत्वाददनाच्चापि तस्य स्रष्टा जनार्दनः। स वायुर्वायुरूपेण जगत्पाति शरीरगः। आदित्यस्थेन रूपेण जगद्याति प्रकाशयन्। अग्निस्थेन तु रूपेण हूयते सर्वयज्ञभिः। आदाय यात्यायुरिति स एवादित्य उच्यते। तत्सम्बन्धात्तु तन्नाम सूर्यस्याग्नेस्तथैव च। स एष कूर्मरूपेण वायुरण्डोदके स्थितः। विष्णुना कूर्मरूपेण धारितोऽनन्तधारकः। अप्सु पादा हि चत्वारो ह्यण्डोदे कोणसंस्थिताः। उरस्तु भूमिसंश्लिष्टमतिरिच्य भुवं पुनः। पार्श्वतः पृष्ठतश्चैव शिरश्चोदकसंस्थितम्। आकाशमुदरे तस्य द्यौः पृष्ठे संस्थिता विभोः। एवंविद्वांस्तु यत्रैति तत्रैव प्रतितिष्ठती'ति प्रभञ्जने। स्थानेच्छा चेत्तत्रैव प्रतितिष्ठति। 'उपास्ते कूर्मरूपं यो वायुं संस्थितिमाप्नुयात्। इच्छया विनिवृत्तिं वा लोकं चावृत्तिवर्जितमि'त्यध्यात्मे। स एष प्राणस्त्रेधा विहित इतिवचनाच्च वायुः। 'बिभर्त्यण्डं हरिः कूर्मस्त्वण्डे चाप्युदकं महत्। उदके कूर्मरूपस्य वायुः पुच्छं समाश्रितः। वायोः पुच्छं समाश्रित्य

तृतीयमग्निं तृतीयं स एष प्राणस्त्रेधा विहितस्तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मावथास्य प्रतीचीदिक् पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदरमियमुरस्स एषोऽप्सु प्रतिष्ठितो यत्र क्वचैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥ सोऽकामयत द्वितीयो म

SGDF
Sri Gargeshwari Digital Foundation

शेषस्तु पृथिवीमिमाम्। बिभर्ति तस्यां च जगदिदं सर्वं प्रतिष्ठित-मि'ति वैभवे। 'वायोस्तु कूर्मरूपस्य पूर्वतश्चोदके मुखम्। आग्नेयेशानगौ बाहू पादौ निर्ऋतिवायुगावि'ति प्रकृष्टे ॥ ३ ॥ आत्मा ब्रह्मा मे द्वितीयो जायेतेत्यकामयत। वायुरेव ब्रह्मा भवतीति-दर्शयितुं वायोः सृष्टिः प्रथममुक्ता। 'वायुरेव यतो ब्रह्मपदं नियमतो व्रजेत्। सहैव जननेऽप्यस्मात्पूर्वं वायोर्जनिं वदेत्। क्वचित्तु ब्रह्मणः पूर्वं प्राधान्यात्तत्पदस्य चे'ति ब्रह्मतर्के। 'आत्मा विरिञ्चः सुमनाः सुधौतश्चेति कथ्यते। ब्रह्मा चतुर्मुखश्चेति पूर्वजो यः प्रजापतिरि'ति शब्दनिर्णये। स मनसा स्वेच्छया वाचं श्रियं देवीं मिथुनं समभवत्। 'मम द्वितीयो जायेत ब्रह्मेति भगवान्परः। वेदाभिमानिनीं देवीं श्रियं समभवत्प्रभुः। स्वेच्छयैव यतः शक्तिस्तां विनापि हरेः सदा। ततः संवत्सरोनाम ब्रह्मा समभवत्प्रभोः। तं गर्भमुदरे बिभ्रद्याव-त्संवत्सरं रमा। तं जातमत्तुं स्वमुखं विदार्य पुरुषोत्तमः। श्रुत्वा रावं पुनस्तस्य व्यदधात्सृष्टये प्रभुरि'ति कारणविवेके। बिन्दुलोपे-नाशनाया मृत्युरित्यर्थः। 'अशनाया हि मृत्युरि'त्युक्तम्। सर्वाशन-नेतेत्यर्थे बिन्दुः। आधिक्येऽधिकमिति सूत्रात्। सम्यगात्मनो वत्सभूतान्देवादीन्रमयतीति संवत्सरः। 'ब्रह्मणो भाणितिवचो निःसृतं भयतो मुखात्। तस्याभिमानिनी देवी तदैवोत्था चतुर्मुखात्। वागीश्वरीति तामाहुर्वाचं चापि सरस्वतीमि'ति भावतत्त्वे। तदभिमानि-त्वात्सैव वागित्युच्यते। भारूपो णरूपश्चेति भगवान् भाण् तद्व्यञ्जक-त्वाद्भणनं वाक् ॥ ४ ॥ अभिमंस्ये लीनं करिष्ये चेत्। 'मानं

आत्मा जायेतेति स मनसा वाचं मिथुनꣳ समभवदशनायां मृत्युस्त-द्यद्रेत आसीत्स संवत्सरोऽभवन्न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभर्यावान्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जात-मभिव्याददात्स भाणमकरोत्सैव वागभवत् ॥ ४ ॥ स ऐक्षत यदि ह

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानं लयश्चैव मर्यादा चैव कथ्यते । उत्पादनं च सङ्ख्यानं बलं च क्वचिदुच्यत'इति शब्दनिर्णये । 'वेदाभिमानिनः सर्वास्तथा यज्ञाभिमानिनः। गायत्र्यामसृजद्ब्रह्मा स्वभार्यायां प्रजास्तथे'ति प्रकाशिकायाम्। 'यद्यद्ब्रह्माऽसृजत्पूर्वं तत्तदत्ति जनार्दनः । अदितिर्नाम तेनासौ भगवान्पुरुषोत्तमः । उपास्ते यः परं देवमेवमत्तीति सर्वदा । स्वयोग्यतानुसारेण सर्वात्ताऽसौ भवत्युत । ब्रह्मरुद्रसुपर्णानां सर्वात्तृत्वं विशेषतः । प्रायेणात्तृत्वमिन्द्रादेरन्येषां दर्शनादिकम् । बहुलस्येति योग्यत्वभेदादत्तृत्वमिष्यत' इति मान्यसंहितायाम् । 'आत्मनो यादृशा भोगा भोक्तुं योग्या हि तादृशान् । भोक्ता विष्णुरिति ध्यायेत्सर्वात्तृत्वं हरेः स्मरेत् । दैवतानां च सर्वेषां सर्वात्तिध्यानमिष्यत' इति प्रवृत्ते ॥ ५ ॥ 'इच्छतो विष्णुयजनं ब्रह्मणः साधनास्मृतेः । श्रमात्तापाच्च देहं तं त्यक्तुमिच्छा बभूव ह । इच्छया चाप्युदक्रामत्प्राणैः सह पितामहः । यशोवीर्यनिमित्तत्वात्प्राणास्तन्नामकाः स्मृताः । अत्यल्पे चापि सञ्जाते श्रमेऽपि न तदिच्छया । तापे प्राणा निःसरन्ति सा च क्रीडा विभोः स्मृता । बृंहमाणं शरीरं तु पुनर्दृष्ट्वा पितामहः । प्रवेष्टुं तच्छरीरं च कामयामास स प्रभुः । पुनस्तस्मिन्प्रवेशाय शवरूपस्य मेध्यताम् । ऐच्छत्तेनैव देही स्यामिति तस्मिन्विवेश च । तस्मिन्प्रविश्य स ब्रह्मा द्वितीयं वपुरग्रहीत् । दृष्ट्वोपायं महायज्ञेऽथाश्वाकारं पितामहः । श्वेतीभावात्परं यस्मात्तज्जज्ञेऽतोऽश्वनामकम् । यदर्थे

वाव इममभिम१स्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेनात्मनेद१ सर्वमसृजत यदिदं किञ्चर्चो यजू१षि सामानि च्छन्दा१सि यज्ञान्प्रजाः पशून्स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्व१ सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥ ५ ॥ सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीर१ श्वयितुमध्रियत तस्य शरीर एव मन

SGDF
Sri Gargeshwari Digital Foundation

श्वेततामाप तद्देहो मेध्यतामपि । अश्वमेधः स यज्ञोऽभून्नाम्ना तेन तदा कृतः । श्वैतीभावं गते देहे पुनर्मेध्ये यतः स्थितः । अतोऽश्वमेधनामाऽसौ ब्रह्मा शुभचतुर्मुखः । अश्वो भूत्वा यतो मेध्यः सोऽभवत्तेन वा स्मृतः । मेधो यज्ञः समुद्दिष्टो याज्ञीयं मेध्यमुच्यते । शुद्धं मेध्यमथापि स्यादेवंविद्योऽश्वमेधवित् । तमश्वरूपमात्मानमनिवारितवद्विभुः । चारयामास रूपेण तदन्येन पुमात्मना । सर्वस्मिन् भुवने चाब्दं तदन्ते परमात्मने । स्वस्मिन्स्थिताय सङ्कल्प्य यज्ञ आलभतात्मवान् । अजादिकान्पशूनन्यदेवस्थपरमात्मने । कर्तृत्वेन पशुत्वेन यत्फलं तदशेषतः । मम स्यादिति मन्वानः सोऽश्वरूपमधारयत् । अबुद्धिपूर्वमरणात्स्वर्गश्चापि पशोर्भवेत् । ज्ञानपूर्वं पशोः पुंसः किमु वक्तव्यमित्यजः । एवं सूर्योऽप्यश्वमेधनामा संवत्सराभिधः । सूर्ये स्थितो यतो ब्रह्मा ह्यश्वमेधाभिधः स्वयम् । सूर्ये ततत्वात्सूर्यात्मा ब्रह्माऽसौ परिकीर्तितः । अग्नौ स्थितो यतः सोऽर्कस्तस्मादग्निरितीर्यते । ब्रह्मातता यतो लोकास्तदात्मानस्ततो मताः । ब्रह्मसूर्याग्निलोकेषु व्याप्तैका देवता हरिः । तादृशं नृहरिं ज्ञात्वा पुनर्मृत्युं जयन्नसौ । सदैव वर्तते ब्रह्मा पुनर्मृत्युर्मृतिः स्मृता । नैनं मृत्यात्मको मृत्युः प्राप्नोति हरिसेवनात् । यस्मान्नृसिंहो मृत्योश्च मृत्युरात्मास्य वै भवेत् । आततत्वात्तथाऽत्तृत्वादात्माऽसौ ब्रह्मणः स्मृतः । आदानादात्तनिर्माणा-

---

आसीत् ॥ ६ ॥ सोऽकामयत मेध्यं म इदँ स्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वा अश्वमेधं वेद य एनमेवं वेद ॥ तमनवरुध्यैवामन्यत तँ संवत्सरस्य परस्तादात्मन आलभत पशून्देवताभ्यः प्रत्यौहत्तस्मात्सर्वदैवत्यं प्रोक्षितं प्राजापत्यमालभन्त ॥ एष ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्माऽयमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ । सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवत्येतासां देवतानामेको भवति ॥७॥ इति द्वितीयमश्वमेधब्राह्मणम् ॥ ३ ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

दात्तज्ञानात्तथैव च । एतासां देवतानां च ब्रह्मेशत्वेन वर्तते । नृसिंहस्य सदा ज्ञानाद्ध्यानाच्च तदनुग्रहादि'ति महासंहितायाम् । भूयःशब्दः पूर्णत्ववाची । परमेश्वरं परिपूर्णं यजेयेति । अश्वदित्यश्वोऽभवत्तदेव रूपं मेध्यं यज्ञ आलभनीयं चाभवदित्यश्वमेधः । तमनवरुध्येवामन्यतेत्यादिवाक्यशेषादश्वभावः प्रतीयते । अश्वत् बृंहितं पश्चान्मेध्यं चाभूद्यस्य शरीरं सोऽश्वमेध इति च । निरोधमकृत्वा चारयिष्यामीत्यमन्यत । स्वेच्छयैव स्वरूपान्तरत्वादश्वरूपस्य ॥६॥७॥ इत्यश्वमेधब्राह्मणम् ॥ ३ ॥ २ ॥

'द्वया ब्रह्मसुतास्तत्र दैतेया बहवः स्मृताः । तमोरूपाः सत्वरूपा अल्पसङ्ख्याः सुराः स्मृताः । बहुत्वात्तैर्जिता देवाः शंकरस्य वरेण च । यज्ञेन विष्णुमभ्यर्च्य तत्रोद्गातृबलेन च । जयामैनानिति

द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥ ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ २ ॥ अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायद्यो घ्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने । ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥ ३ ॥ अथ ह चक्षुरूचुस्त्वं न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायद्यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने ते विदुरनेन वैन उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥ ४ ॥ अथ ह श्रोत्रमूचुस्त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणँ शृणोति तदात्मने ते विदुरनेन वैन उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपँ शृणोति स एव स

SGDF
Sri Gargeshwari Digital Foundation

स्मृत्वा वह्न्यादीनप्यचूचुदन् । औद्गात्रेऽग्निमुखाः सर्वे इन्द्ररुद्रौ च वेधितौ । असुरैः पापपूगेन मुख्यवायुं ततोऽब्रुवन् । दैत्यास्तं वेद्धुमीप्सन्तो ध्वस्ता नेशुश्च सर्वशः । पांसुपिण्डो यथा वज्रशिलां प्राप्यैव नश्यति । तस्मादखण्डशक्तिः स मुख्यवायुरुदाहृतः । शापैरथ वरैर्वापि नास्य प्रतिहतिर्भवेत् । स्वेच्छयैवानुसारेण विना कुत्रापि पुत्रकाः । एवंविदपि पापेभ्यः शत्रुभ्योऽपि प्रमुच्यते । स वायू रुद्रशक्रादेर्वासुदेवबलाश्रयः । विमोच्य पापसङ्घातं दिशामन्तेष्वथाक्षिपत् । उन्मुच्य मृत्योस्तांश्चैवाधोर्ध्वलोकेषु चावहत् । अग्निर्नासिक्यवायुश्च दिक्पा इन्द्रादयोऽखिलाः । सूर्यः सोमश्च रुद्रश्च तेनैव स्वपदे स्थिताः ।

पाप्मा ॥ ५ ॥ अथ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणं सङ्कल्पयति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ सङ्कल्पयति स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पाप्मनाऽविध्यन् ॥ ६ ॥ अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविधन्त्स यथाऽश्मानमृत्वा लोष्टो विध्वꣳसतैवꣳ हैव विध्वꣳसमाना विष्वञ्चो विनेशुस्ततो देवा अभवन्परासुरा भवत्यात्मना परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥ ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानाꣳ हि रसः ॥ ८ ॥ सा वा एषा देवता दूर्नाम दूरꣳ ह्यस्या मृत्युर्दूरꣳ ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥ ९ ॥ सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयाञ्चकार तदासां पाप्मनो विन्यदधात्तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १० ॥ सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैनां मृत्युमत्यवहत् ॥ ११ ॥ स वै वाचमेव प्रथमामत्यवहत्सा या यदामृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥ अथ प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १३ ॥ अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत

SGDF
Sri Gurgeshwari Digital Foundation

स्त्रीगुणैः सर्वपूर्णत्वाद्बृहती तु सरस्वती । अनन्तवेदरूपत्वात्सैव ब्रह्मेति कीर्तिता । विष्णुना बृंहितत्वाद्वा तत्पतिर्वायुरीश्वरः । सारत्वात्स्त्रीषु सा देवी सेत्युक्ता सामरूपतः । गीथेत्युक्ता तदुद्गीथः सामाख्योऽर्धतनुस्तथा । अर्धनारीनरवपुर्वायुः कुत्रचिदीरितः । अयास्यो विश्वसृग्यज्ञे तेनाविष्टोऽन्वगायत । गृहकोशादिकं यत्स्वं तद्रूप्यस्य स्वरस्थितः । भूषणस्वर्णरूपी च स एवापि स्वरस्थितः । वागिन्द्रियं पीठरूपं तस्य देवस्य संस्थितम् । गानकालेऽन्यदा त्वन्नं प्राणपीठमिति स्मृतम् । पवमाना इति प्रोक्ता मुख्यवायुत्वयोगिनः । अनादि-

---

स आदित्योऽभवत्सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १४ ॥ अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवꣳस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १५ ॥ अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्येवꣳ ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥ १६ ॥ अथात्मनेऽन्नाद्यमागायद्यद्धि किञ्चान्नमद्यते अनेनैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥ ते देवा अब्रुवन्नेतावद्वा इदꣳ सर्वं यदन्नं तदात्मन आगासीरनु नोऽस्मिन्नन्न आभजस्वेति ते वै माऽभिसंविशतेति तथेति तꣳ समन्तं परिण्यविशन्त तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति भर्ता स्वानाꣳ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद य उ हैवं विदꣳ स्वेषु प्रतिप्रति बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनुभवति यो वैतमनु भार्यान्बुभूषति स हैवालं भार्येभ्यो भवति ॥१८॥ सोऽयास्य आङ्गिरसोऽङ्गानाꣳ हि रसः प्राणो वा अङ्गानाꣳ रसः प्राणो हि वा अङ्गानाꣳ रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष ह वा अङ्गानाꣳ हि रसः ॥ १९ ॥ एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ॥ २० ॥ एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥ २१ ॥ एष उ एव साम वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वं यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकतां जयति य एवमेतत्साम वेद ॥ २२ ॥ एष उ वा उद्गीथः प्राणो

SGDF
Sri Gargeshwari Digital Foundation

कालसम्बद्धा योग्यता सा प्रकीर्तिता । सर्वाधिक्यारोहणं तु तेषामेव विमुक्तिगम् । प्रस्तावकाले प्रस्तोतुं योग्यो वायुपदस्य यः । जपेद्यजूंषि त्वेतानि त्रीणि विष्णुं सदा स्मरन् । असतो मा सदित्यादि विष्णुप्रार्थनभाञ्जि च । द्वात्रिंशल्लक्षणैः सम्यग्युक्ता वायुत्वयोग्यकाः । नियमेनैव विष्णोस्तु प्रादुर्भावा विशेषतः । सहस्रारेण चक्रेण चिन्हिता दक्षिणे करे । गदयाष्टास्रया चैव शतावर्तेन कम्बुना । वामे करे तथाब्जेन सहस्रदलशोभिना । अष्टाविंशल्लक्षणाश्च गिरीशपदयोगिनः । चतुर्विंशतिमारभ्य षोडशादासुराः स्मृताः । अष्टकादपयश्चोक्तास्तदूनाश्चक्रवर्तिनः । असद्दुःखात्मको मृत्युः सदानन्दोऽमृतं स्मृतम् । तमोऽज्ञानात्मको मृत्युर्ज्योतिर्ज्ञानामृतं स्मृतम् । मृत्योर्माऽमृतमित्यत्र मृत्युर्मरणमेव च । एवंविद्वायुपदयोग्या उद्गातार एव तु । यदा भवेयुस्तेषु तदा याजी तु वृणुयाद्वरम् । आत्मने याजिने वापि ह्युद्गातैवं

वा उत् प्राणेन हीदꣳ सर्वमुत्तब्धं वागेव गीथोच्चगीथा चेति स उद्गीथः ॥ २३ ॥ तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाचायं त्वस्य राजा मूर्धानं विपातयताद्यदी(दि)तोऽयास्य आङ्गिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥ २४ ॥ तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसम्पन्नयार्त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एवाथो यस्य स्वं भवति भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥ २५ ॥ तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥ तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः ॥ २७ ॥ अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तूयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मां कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो

SGDF
Sri Gurgeshwari Digital Foundation

विधो यदि । आगायेत्तद्भवेन्नात्र कार्याऽभीष्टे विचारणा । एवं तं सामनामानं वायुं यो वेद सादरम् । तस्येष्टलोकराहित्ये नाशा कार्याऽरिणा क्वचित् । तस्माद्वायुत्वयोग्यैर्हि येषां लोकाः प्रकीर्तिताः । तेषामलोकशङ्का च नैव कार्या कदाचन । यस्मान्नारायणस्यातिप्रियाः प्राणत्वयोगिन' इत्यादि महासंहितायाम् । आस्यादयत इत्ययास्यः । प्रसिद्धमृत्व्यमृतत्वान्नात्र तिरोहितमिवास्ति । एष उद्गातेति वायुत्व-योग्यः । तद्धैतल्लोकजिदेवेति तस्माद्वराभियाचनम् ॥ उद्गीथ-ब्राह्मणम् ॥ ३ ॥ ३ ॥

इदमग्रे एतस्याग्रे परमात्मैवासीत् । ततः पुरुषविधो ब्रह्माऽऽसीत् । पुरुषो विष्णुस्तद्विधत्वात्पुरुषविधः । 'एतस्य जगतो ह्यग्र आसीन्नारायणः परः । एक एव श्रिया सार्धं तमात्मा पुरुषेत्यपि । आहुस्तस्मात्पुरुष-विधो ब्रह्मा समभवद्विभोः । ब्रह्मादेश्च श्रियश्चैव नित्यं विष्णुर्गुणाधिकः । यथा तथैव रुद्रादेर्ब्रह्मा यस्माद्गुणाधिकः । एतस्मात्पुरुषविधता ब्रह्मणः सम्प्रकीर्तिता । स तु सर्वा दिशो दृष्ट्वा नान्यदृष्ट्वा पितामहः । अब्रवी-दहमस्मीति स्वाहेयत्वमनुस्मरन् । हातुं शक्यमिदं सर्वमासीदेकोऽभवं यतः । अहेयत्वं स्वरूपस्य स एवं समचिन्तयत् । ततोऽभवदहंनामा स चाभूत्पुरुषाभिधः । ओषणात्सर्वपापानां पूर्वं पुरुष उच्यते ।

ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मां कुर्वित्येवैतदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्त्यथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तꣳ स एष एवं विदुद्गाताऽऽत्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥२८॥ इत्युद्गीथब्राह्मणम् ॥ ३ ॥ ३ ॥

आत्मैवेदमग्र आसीत्पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्य-त्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहं नामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमय-मित्येवाग्र उक्त्वाथान्यन्नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मा-त्सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति

SGDF
Sri Gargeshwari Digital Foundation

नारायणप्रसादेन य एवं पुरुषाभिधम् । वेद स्वाभिमतं यस्तु पूर्वं प्राप्तुमभीप्सति । ओषेत्सर्वमतुष्टः सन् ब्रह्मविष्णुप्रसादतः ॥ १ ॥ तस्य त्वेकस्य सहसा यतो भीः समजायत । तस्मादद्यापि चैकस्य निर्विवेकं भयं भवेत् । विममर्श ततो ब्रह्मा यस्मान्मे बाधको नहि । मया सृज्या यतः सर्वे इतः पश्चात्तनो हरः । अतः कस्माद्बिभेमीति तस्य भीतिरपोहिता । विष्णोरतिप्रियात्वात्तु तदन्येषां पितृत्वतः । कस्माद्भयं भवेत्तस्य समानाद्धि भयं भवेत् । विरोधिनोऽधिकाद्वापि हीनाद्वा पारवश्यतः । हीनमेव यतस्तस्य सर्वमेव जगद्वशे । न च जातं तदा सर्वं हरिरेव यतः परः ॥ २ ॥ न रेमे स ततो ब्रह्मा तस्मादेकस्य नो रतिः । अथापि पत्नीमैच्छच्च स स्थूलत्वमुपागतः । दम्पती सहितौ यावद्ब्रह्मा चैव सरस्वती । तावद्देहोऽभवद्ब्रह्मा तदा देहं द्विधाऽकरोत् । पातनात्पतिपत्नीत्वशब्द एनोरजायत । तस्मात्तयोरेक-सुखं भवत्येवार्धपात्रवत् । ततस्तस्यामुमेशादीन्देवान्सर्वान्मनूनपि । जनयामास बोधस्य प्राधान्यं हि मनुष्यता ॥ ३ ॥ सर्वज्ञाऽपि तु सा देवी विरिञ्चे भक्तिमत्यपि । तद्धार्यतामात्मनश्च नितरां धर्ममीक्षती ।

य एवं वेद ॥ १ ॥ सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्य-भेष्यद्द्वितीयाद्वै भयं भवति ॥ २ ॥ स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत्स हैतावानास यथा स्त्रीपुमाꣳसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्ध-बृगळमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव ताꣳ समभवत्ततो मनुष्या अजायन्त ॥३॥ सा हेयमीक्षाञ्चक्रे कथं नु माऽऽत्मन एव जनयित्वा सम्भवति हन्त तिरोऽसानीति सा गौरभवदृषभ इतरस्ताꣳ समेवाभवत्ततो गावो अजायन्त बडवेतराऽभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्ताꣳ समेवाभवत्तत एकशफमजायताऽजेतराऽ-भवद्बस्त इतरोऽविरितरा मेष इतरस्ताꣳसमेवाभवत्ततोऽजावयोऽ-जायन्तैवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

अनाद्यनन्तसम्बन्धमुभयोरपि जानती। स्त्रीस्वभावं दर्शयन्ती साऽधर्ममिव चैक्षत। नानासृष्टिप्रसिद्ध्यर्थं सा गोत्वादिकमाव्रजत्। वृषादिरूपतां सोऽपि प्राप्य सृष्ट्वेदमञ्जसा। सर्जनात्सृष्टिनामाऽभूत्तद्वित्तत्पुत्रतां व्रजेत्। पिपीलिकांतरुद्रादौ यथायोग्यत्वमात्मनः। अथान्नादमथाप्यन्नं स्रक्ष्यामीति विचिन्तयन्। ओष्ठद्वयं ममंथान्तर्हस्तौ चैव परस्परम्। तन्मुखाच्चैव हस्ताभ्यामन्तरग्निरजायत। एवं सर्वस्य हेतुत्वात्सर्वस्यापि पतित्वतः। सर्वे देवा एष एवेत्याहुर्वेदविदो जनाः। स्वतंत्रेषु यतः शब्दा वर्तेयुः सर्व एव च। स रेतसः पुनः सोममसृजद्ब्रह्मविद्वरः। सर्वाधिकोऽपि योग्यत्वान्मर्त्यधर्मतया पुरा। अवमो योग्यताहीनानप्यायुर्मात्रतोऽधिकान्। यतोऽस्रागतिसृष्टिस्तं देवं यो वेद पूरुषः। विष्णोः प्रसादतः सृष्टिं देवलोके स जायते। आत्मयोग्यानुसारेण सुखज्ञानादियुक्तते'ति ब्रह्मतर्के। भगवदुपासनामाहात्म्यमेतदिति दर्शयितुं तद्यदिदमाहुरित्याद्यारम्भः ॥ ६ ॥ इति प्राजापत्यब्राह्मणम् ॥ ४ ॥

विश्वम्भरो वायुः। अकृत्स्नो हि स इत्यस्याभिप्रायः स योऽत एकैकमुपास्ते न स वेदेत्यादि। प्राण इत्यादिनामानि परमेश्वरस्य न सर्वगुणसम्पूर्णतां वदन्ति किंतु प्राणनादिकर्मकर्तृत्वमेव वदन्ति।

सोऽवेदहं वाव सृष्टिरस्म्यह५ हीद५ सर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्या५हास्यैतस्यां भवति य एवं वेद ॥५॥ अथेत्यभ्यमन्थत्स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतो लोमका हि योनिरन्तरतस्तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत्किञ्चेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोतिसृष्टिर्यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्या५ हास्यैतस्यां भवति य एवं वेद ॥६॥ प्राजापत्यब्राह्मणम्॥ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिद५ रूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिद५

SGDF
Sri Gargeshwari Digital Foundation

आत्मशब्द एव सर्वगुणसम्पूर्णत्वं वदति । अस्य सर्वस्य गुणजातस्याय-मात्मैव पदनीय आश्रयो यस्मादतस्तं सर्वगुणवाचकेनात्मशब्देनैवोपासीत । अनेन ह्येतत्सर्वं वेद यस्मात्सर्वज्ञानप्रदस्तस्मात्सर्वगुणसम्पूर्ण इत्येवोपासनं तस्य युक्तम् । तदुपासनादेव सर्वज्ञत्वादयो भवन्ति किमु तस्येति । पद्यते अनेनेति पदं साधनम् । यथा तत्तत्साधनेन तत्तत्फलं प्राप्नुयादेवं सर्वगुणयुक्तत्वेन भगवदुपासनात्कीर्तिं श्लोकं च विन्दते । शं लोकः श्लोकः परमानन्दं परमं ज्ञानं चेत्यर्थः । लुकृ प्रकाश इति धातोः । 'असीदेको हरिः पूर्वं देवी नारायणी तथा । अन्यदव्यक्ततां यातं तद्व्यक्तमकरोद्धरिः । सृष्ट्वा जगदिदं सर्वं सृष्ट्वा देहांश्च सर्वशः । आकेशादानखाग्रेभ्यः प्रविष्टः पुरुषोत्तमः । यथा प्राणः शरीरेषु क्षुरो यद्वत्क्षुरस्तुके । प्रविष्टमपि तं विष्णुं न पश्यन्ति पृथग्जनाः । प्रविष्ट इति जानंश्च नैनं जानाति सर्वशः । यस्मात्तद्गुणभागोऽयं प्रवेशः प्राणनादि च । तस्मात्प्राणादिनामानि कर्मनामानि तस्य तु । तस्मात्प्राणादिनाम्ना य उपास्ते हरिमव्ययम् । अकृत्स्नोपासकः स स्याद्यस्मात्तद्गुणभागवित् । पूर्णत्वेऽपि परेशस्य यस्तु तद्गुणभागवित् । अकृत्स्नवित्स्यात्कृत्स्नस्य वेत्ताऽऽत्मेतिविदेव यः । चिदानन्दादयो यस्य गुणा आप्ताः सदैव तु । स आत्मेति प्रविज्ञेयो गुणानामाप्तितो हरिः । प्राणनादीनि कर्माणि चात्मशब्दोदितानि तु । तदेतदात्मरूपं हि गुणनामाश्रयत्वतः । पदनीयमिति प्रोक्तं यतस्तज्ज्ञोऽपि सर्ववित् । सार्वज्ञ्यादिगुणास्तस्य किमुतात्मेश्वरस्य तु । एवं सर्वगुणैर्युक्तं सर्वजीवेश्वरं हरिम् । यो वेद तत्तत्साध्यं तु यथा तैस्तैस्तु

रूप इति स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये तं न पश्यन्त्यकृत्स्नो हि स प्राणन्नेव प्राणनामा भवति वदन्वाक्पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव स योऽत एकैकमुपास्ते न स वेदात्कृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्वे एकं भवति तदेतत्पद-

SGDF
Sri Gargeshwari Digital Foundation

साधनैः । प्राप्नुयादेवमेवासौ कीर्तिं च परमं सुखम् । ज्ञानं च परमं विन्देन्मुक्तः सन्नात्र संशयः ॥ १ ॥ स एष विष्णुर्भगवान् पुत्राद्वित्तात्तथाऽऽत्मनः । अन्यस्मादपि सर्वस्मात्प्रेष्ठ एव स्वभावतः । आत्मनोऽपि प्रियत्वं तु तेनैव कृतमञ्जसा । आत्मनो निरयायैव कुर्यात्कर्माणि नित्यशः । यतोऽतः स्वात्मनश्चापि स्वाप्रियत्वमुदाहृतम् । स चेदप्रियकृद्विष्णुर्नात्मापि प्रियतां व्रजेत् । अस्मिन्प्रिये प्रियं सर्वं तस्मादेकः प्रियो हरिः । स चात्मशब्देनोद्दिष्टो यस्मादाप्तगुणः प्रभुः । अतो विष्णोः प्रियं ब्रूयाद्यः स्वात्माद्यं दुरात्मवान् । प्रियरोधं करोषीति तं ब्रूयाद्वैष्णवो महान् । एवं वदन्वैष्णवस्तु समर्थः प्रियरोधने । तस्य स्याच्च विशेषेण तदुक्त्यैवापि दुःखिनः । तस्मात्सर्वप्रियो विष्णुरित्युपास्ते सदा प्रियः । नास्य प्रियमनित्यं स्यादस्य प्रीतिः सदा भवेत् । तस्मात्सर्वप्रियं विष्णुमुपासीतैव नित्यशः । नित्यप्रियकरो विष्णुर्भवेत्तस्याप्यजः स्वयमि'त्यध्यात्मे ॥ २ ॥ ब्रह्मविद्यया सर्वं भविष्यन्त आत्मयोग्यतापूर्तिमाप्नुवन्तो महान्तो यदाहुः । ब्रह्मविद्यया स्वयोग्यं सर्वं प्राप्यत इति । नित्यनिर्दुःखानन्दानुभवरूपो हि स्वत उत्तमो जीवः । तादृशं रूपमज्ञानात्तिरोहितं ब्रह्मविद्ययाऽभिव्यज्यत एव । न चान्यथाऽभिव्यज्यत इति सन्तो यदाहुः । तत्तत्र केचिन्मनुष्या इति मन्यन्ते। स्वरूपमपि ब्रह्मविद्ययाऽभिव्यज्यते चेत्तद्ब्रह्मापि यस्मात्सर्वमभवत्परिपूर्णमभवत्तस्मात्स्वरूपं ज्ञात्वैवाभवत्किमिति । सत्यम् ॥ ३ ॥ तदपि स्वरूपं नित्यापरोक्षज्ञानेन

नीयमस्य सर्वस्य यदयमात्माऽनेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविन्देदेवं कीर्तिꣳ श्लोकं विन्दते य एवं वेद ॥ १ ॥ तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियꣳरोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ २ ॥ तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ ३ ॥ ब्रह्म वा इदमग्र आसीत्तदात्मानमेवा-

SGDF
Sri Gangeshwari Digital Foundation

सर्वदा जानात्येव । अत एव सर्वदा परिपूर्णमिति तेषां परिहारः । तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदिति ॥ 'आत्मा वा इदमेक एवाग्र आसीत्' 'सदेव सोम्येदमग्र आसीदि'त्यादिवत्सदातनज्ञानं पूर्णभावं चाह । इदमग्रे अस्याग्र इति षष्ठचर्थे द्वितीया । अहं अहेयं, ब्रह्म परिपूर्णम् । अस्मि सर्वदास्तीति मेयमित्येतैर्विशेषणैरात्मानं स्वरूपमेवावेत् । यद्यहंशब्दोऽस्मच्छब्दार्थवाची अस्मिशब्दश्चोत्तमपुरुषे तदाऽऽत्मानमिति व्यर्थं स्यात् । अतोऽहमस्मिशब्दावुक्तार्थावेव । अग्रे अनादिकालत एव विद्यमानमात्मानं जानाति च तद्ब्रह्मेत्यर्थः । सर्वनियंतृत्वेन सर्वगतत्वादहेयम् । 'तद्योऽहं सोऽसौ योऽसौ सोऽहं योऽसावसौ पुरुषः सोऽहमस्मी'त्यादिष्वप्यहंशब्दोऽन्तर्यामित्वेनाहेयत्ववाची ।

'तत्सत्यं स आत्मा तत्त्वमसीति भेदस्य नवकृत्वोऽभ्यासात् । 'तद्योऽहं सोऽसौ' 'अहं ब्रह्मास्मी'त्यादिवाक्यानां सम्यगर्थापरिज्ञानात् भ्रान्तिप्राप्तोऽभेदोऽतत्त्वमसीति नवकृत्वो निराक्रियते । 'तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं कुतस्तु खलु सौम्यैवं स्यात्कथमसतः सज्जायेते'त्यादिना 'असद्वा इदमग्र आसीदसतः सदजायते'-त्यादि श्रुत्यर्थापरिज्ञानोत्थभ्रमो यथा निवार्यते । एवमतत्त्वमसीतिवाक्येनापि । स आत्मेतिशब्दाच्च । आत्मशब्दस्य परमात्मनि मुख्यत्वेऽपि जीवे भ्रान्तिरुपपद्यते । तन्निवृत्त्यर्थं वाऽतत्त्वमसीत्याह । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यत' इत्यादिनाप्त्यादिकमैतदात्म्यमिदं सर्वमित्यनेनोच्यते । 'पूर्णत्ववाच्यात्मशब्द आत्मा पूर्णत्वतो हरिरि'त्यादिना स आत्मेति पूर्णत्वमभिधीयते । 'यथा सोम्यैकेन मृत्पिण्डेने'ति सदृशविज्ञानेन सदृशान्तरं विज्ञातं भवतीत्युक्तम् । लोहमणिनेति मणिशब्दात्प्रधानविज्ञानेनाप्रधानं सर्वं विज्ञातं भवतीति । 'मणिर्मुखं प्रधानं च उत्तमस्य वचो भवेदि'ति वचनात् । 'यथा सोम्यैकेन

SGDF
Sri Gangeshwari Digital Foundation

नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यादि'ति पुनरपि सदृशेन विज्ञातेन सदृशान्तरं विज्ञातं भवतीत्यभ्यासस्तात्पर्यार्थः। उपादानविवक्षायामेकत्वविवक्षायां चैकेनेतिविशेषणं पिण्डेनेति एकेन मणिनेति पुनरेकेनेति च विशेषणानि व्यर्थानि भवेयुः। तस्मिन्पक्षे मृदा विज्ञातया लोहेन विज्ञातेन कार्ष्णायसेन च विज्ञातेन सर्वं विज्ञातं भवतीति वक्तव्यम्। नह्येकमृत्पिण्डविकारभूतं सर्वमृण्मयम्। न च तेनैक्यं सर्वस्य विद्यते। नचैकलोहमणिकार्यं सर्वलोहमयम्। न च तेनैकीभूतम्। न चैकनखनिकृन्तनकार्यं सर्वं कार्ष्णायसम्। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'त्यादि प्रधानपरिज्ञाने गुणभूतं परिज्ञातमिव भवतीत्यत्र दृष्टान्तान्तरम्। वाचा नाम्ना आरम्भणं विकारः विविधत्वेन कर्तुं योग्यमिति विकारः। सत्यं सर्वदा विद्यमानं नामधेयं मृत्तिकेत्येव। सङ्केतरूपेण नानाविधानि नामानि कर्तुं शक्यन्ते। तथापि शास्त्रप्रयोगसिद्धमृत्तिकादिनामपरिज्ञानात्तन्नामविद्भवति। एवं नित्यासाम्यातिशयसर्वगुणपरिपूर्णपरमेश्वरपरिज्ञानात्सर्वविद्भवतीति। यथैकस्मिन् जनपदे प्रधानपुरुषेषु परिज्ञातेष्वाहूतेष्वागतेषु विनाशितेषु रक्षितेषु वा सर्वो जनपदः परिज्ञात आहूत आगतो विनाशितो रक्षित इत्युच्यते। यथा वा राजसु नाशितेषु। 'नाशिता पृथिवी सर्वा धार्तराष्ट्रेण दुर्नयैरि'ति। यथा च केषांचित्पुरुषाणां रक्षणेन। 'शशास पृथिवीं सर्वां सशैलवनकाननामि'ति। एवं सर्वोत्तमस्य परमेश्वरस्य विज्ञानात्सर्वं विज्ञातमिव भवति। न च मृन्मात्रविज्ञानाद्घटशरावादिसंस्था विज्ञाता भवन्ति मुख्यतः। तथासति दृष्टमृदः पुरुषस्य घटशरावादिजिज्ञासा न स्यात्। सृष्टिकथनं च प्राधान्यार्थं त्रीणि रूपाणीत्येव सत्यमित्यपि प्राधान्यार्थमेवाभिमानिदेवतापेक्षया। 'तेजोऽभिमानवान्ब्रह्मा वायुश्चाबभिमानवान्। रुद्रः क्षित्यभिमानी चाप्येतन्मयमिदं जगत्। अभिमन्यमान-

SGDF
Sri Gargeshwari Digital Foundation

सहितास्त्रय एतेऽभिमानिनः । विष्णोर्जाताः क्रमेणैव पूर्वस्मादुत्तरोत्तरम् । तेजोऽबन्नाभिधा तस्मादेषामेव प्रकीर्तिता । एते च त्रीणि रूपाणीत्यभिधागोचराः सुराः । ब्रह्मवायुगिरीशेस्यस्तेभ्यो जातमिदं जगत् । अतोऽग्निसूर्यसोमानामपि रूपं तदुद्भवम् । अतोऽग्निसूर्यसोमानां नामाप्येषां प्रकीर्तितम् । सादनाद्यमनाच्चैव सत्यमेषां त्रयः सुराः । तेषां सत्यं हरिः साक्षाद्यतस्तेषां नियामकः । प्रधाने सत्यशब्दोऽयं श्रुतिभिः समुदाहृतः । यथैव सर्वलोहानां प्रधानं काञ्चनं स्मृतम् । यथा मृत्पिण्डसदृशा मृण्मयाः सर्व एव च । यथा कार्ष्णायसं सर्वं समं कार्ष्णायसान्तरे । एवं सर्वस्य जगतः सदृशः श्रेष्ठ एव च । हरिस्तेन तु तज्ज्ञानाज्जगज्ज्ञातमिवाखिलम् । स स्रष्टा चैव संहर्ता नियन्ता रक्षिता हरिः । तेन व्याप्तमिदं सर्वमैतदात्म्यमतो विदुः । स आत्मा पूर्णगुणतः स सूक्ष्मः सर्वगः सदा । सर्वोत्तमत्वात्सत्यं तज्जीवाभिन्नं तदासुराः । विदुर्न त्वं तथा विद्धि श्वेतकेतो कदाचन । किंतु विष्णुः पृथक् सर्वदेवदेवेश्वरः प्रभुः । पृथगेवाहमत्यल्पशक्तिज्ञानसुखादिकः । इत्येव विद्धि सततमतो मोक्षमवाप्स्यसि । सर्वोत्तम इति ज्ञातो विष्णुर्मोक्षमिमं नयेत् । जीवरूपतया ज्ञातस्तमोऽन्धं प्रापयेत्प्रभुः । विष्णोर्दासतया विष्णोः सामीप्यं मोक्ष उच्यते । न विष्णुत्वं तु मोक्षः स्यादेषोऽहमिति वा स्मृतेः । संसारसागरात्तीर्णो मुक्तोऽहमिति वा स्मृतिः । यदा तदा विमोक्षेण किं फलं ज्ञानिनो भवेत् । यथा मधुकरैर्नानाविधपुष्परसैः सह । मधुत्वं प्रापितः संविदभावान्न सुखी भवेत् । यथा नद्यो न मुक्ता हि समुद्रं प्रापिता अपि । इयमस्मीति चाज्ञानाद्यथा सुप्तो न मुच्यते । प्रलयेऽपि हरिं प्राप्तः पृथक्त्वज्ञानवर्जनात् । एवं जीवेशयोर्भेदज्ञानाद्विष्णोः सदोचताम् । ज्ञात्वैव मुच्यते तस्मादेवं जानीहि पुत्रके' ति ब्रह्माण्डे । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि' ति

SGDF
Sri Gargeshwari Digital Foundation

मोक्षधर्मे । 'तस्मै स्वलोकं भगवान् सभाजितः संदर्शयामासे'त्युक्त्वा 'न वर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः । न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता' इति भागवते । 'अदर्शयत्स्वकं लोकं ब्रह्मणे विष्णुरव्ययः । यस्मात्पदात्परं नास्ति यत्र मुक्ता उपासत' इति हरिवंशेषु । अतः परं न यत्पदमित्यत्रापि यच्छब्दस्य यस्मादित्यर्थः । 'यत्तदित्यादयः शब्दाः पंचम्यर्थाश्च कीर्तिता'इति च । 'विद्यात्मनि भिदाबोधः' । 'क्ष्मांभोऽनलानिलवियन्मनइन्द्रियार्थैर्भूतादिभिः परिवृतः प्रतिसंजिघृक्षुः । अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परं स्वमनुभूय परः स्वयम्भूः ॥ एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः । तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः' ॥ 'भेददृष्ट्याऽभिमानेन निःसंगेनापि कर्मणे'त्यादि च । 'आधिपत्यमृते चैव आनन्देनापि कर्मणा । सर्वे ते ब्रह्मणस्तुल्या भोगेन विषयेण च । नानात्वेनापि संबद्धास्तदा तत्कालभाविना । प्रकृतौ कारणातीताः स्वात्मन्नेव व्यवस्थिताः । प्रदर्शयित्वा ह्यात्मानं प्रकृतिस्तेषु सर्वशः । पुरुषान्यबहुत्वेन प्रतीता न प्रवर्तते । प्रवर्तति पुनः सर्गे तेषां सा न प्रवर्तते । संयोगः प्रकृतेर्नैव मुक्तानां तत्त्वदर्शनात् । समा दुःखनिवृत्तिस्तु मुक्तानामपि सर्वशः । मानुषादिविरिञ्चान्तं सुखं मुक्तौ शतोत्तरमि'त्यादि वायुप्रोक्ते । 'ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः । शास्त्रतत्त्वमविज्ञाय तथावादबला जनाः । कामक्रोधाभिभूतत्वादहंकारवशं गताः । याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः । ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः । वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते । तेषां तमःशरीराणां तम एव परायणम् ।' 'अन्य ईशस्तथाऽन्योऽहमिति ज्ञानं विपश्चिताम् । आधिक्यज्ञानमीशस्य यतोऽन्यत्वेन युज्यते । यतः स्वरूपतश्चान्यो जातितः श्रुति-

SGDF
Sri Gargeshwari Digital Foundation

तोऽर्थतः। कथमस्मि स इत्येव सम्बन्धः स्यादसंहितः'। 'बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। को ह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति॥ वैशंपायन उवाच। नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह। बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमि'त्यादि च मोक्षधर्मे। 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोक०। यस्मात्क्षर०। अतोऽस्मि लोके०। यो मामेवं०। स सर्वविद्भजति मां०। इति गुह्यतमं शास्त्र०। एतद्बुध्वा बुद्धिमा०भारते'ति च। ब्रह्मणस्तद्गुणानां च भेददर्श्यधरं तमः। भेदाभेदप्रदर्शी च मध्यमं तु तमो विशेत्। ईषद्भेदप्रदर्शी च तम एवोत्तरं विशेत्। विजानीयात्ततो ब्रह्म सदा सर्वगुणात्मकम्। गुणानां च विशेषोऽस्ति न विभेदः कथञ्चन। ते च सर्वे गुणाः पूर्णास्तच्छरीरः परः स्मृतः। आनन्दज्ञानशक्त्यादिदेहं विष्णुं तु ये जनाः। अदेहं भूतदेहं वा विदुस्ते चाधरं तमः। तथा प्रकृतिदेहज्ञाः कर्मदेहविदोऽपि वा। तस्मादानन्दचिद्देहं चिदानन्दशिरोमुखम्। चिदानन्दभुजं ज्ञानसुखैकपदसाङ्गुलिम्। आ केशादा नखाग्रेभ्यः पूर्णचित्सुखशक्तिकम्। प्रत्येकं तु गुणांस्तांस्तु सदा सर्वगुणात्मकान्। ज्ञात्वा विमुच्यते विष्णोः प्रसादान्मानुषोऽपि सन्। जीवाभेदं तथाऽभेदं जगता ये विदुः प्रभोः। तेऽपि यान्ति तमो घोरमधरं ब्रह्मतस्कराः। भेदाभेदं विदुर्ये च जीवैस्तु जगताऽपि वा। परस्य ब्रह्मणो यान्ति तमस्तेऽप्युत्तरं सदा। अभेदज्ञाः प्रकृत्याऽपि भेदाभेदविदस्तथा। तेऽपि यान्ति तमो घोरमधरं चोत्तरं क्रमात्। तस्मात्सर्वोत्तमं विष्णुं पूर्णसर्वगुणोच्छ्रितम्। विजानीयाद्विमुक्त्यर्थं सर्वतश्च विलक्षणम्। अन्धन्तमः प्रविशन्ति ये देहं परमात्मनः। भिन्नं विजानते विष्णोर्भिन्नाभिन्नविदोऽपि वा। अन्धन्तमः प्रविशन्ति

SGDF
Sri Gargeshwari Digital Foundation

प्रादुर्भावांस्तु येऽपि वा। सर्वभूतस्थितान्वाऽपि भिन्नान् जानन्ति येऽखिलान्। भिन्नाभिन्नविदो वाऽपि शिरःपाण्यादिकं तथा। भिन्नं मिथो विजानीयुर्भिन्नाभिन्नविदोऽपि वा। तेऽपि यान्ति तमो घोरं यतो नैवोत्थितिः क्वचित्। प्रादुर्भावतया ये च तदन्यान् जानते विभोः। तेऽपि यान्ति तमो घोरं तस्मान्नैवंविदो विदुः। मत्स्यकूर्म-क्रोडसिंहबटुभार्गवराघवाः। कृष्णबुद्धौ कल्किदत्तहयशीर्षैतरेयकाः। पाराशर्यश्च कपिलो वैकुण्ठ ऋषभस्तथा। यज्ञो धन्वन्तरिश्चैव स्त्रीरूप-स्तापसो मनुः। नारायणो हरिः कृष्ण उपेन्द्रः सर्व एव च। एवमाद्या हरेः साक्षात्प्रादुर्भावाः प्रकीर्तिताः। श्रीर्भूर्दुर्गाम्भ्रणी ह्रीश्च महालक्ष्मीश्च दक्षिणा। सीता जयन्ती सत्या च रुक्मिणीत्यादिभेदिता। प्रकृति-स्तेन चाविष्टा तद्वशा न हरिः स्वयम्। ततोऽनन्तांशहीना च बलज्ञप्तिसुखादिभिः। गुणैः सर्वैस्तथाऽप्यस्य प्रसादाद्दोषवर्जिता। सर्वदा सुखरूपा च सर्वदा ज्ञानरूपिणी। प्राणः सूत्रं महान्ब्रह्मा चित्तं वायुर्बलं धृतिः। स्थितिर्योगश्च वैराग्यं ज्ञानं प्रज्ञा स्मृतिः सुखम्। मेधा मुक्तिर्विष्णुभक्तिरादिगोपो महान्प्रभुः। ऋजुः समानो विज्ञाता महाध्याता महागुरुः। हनूमान् भीम आनन्द इत्यादिबहुरूपिणः। हिरण्यगर्भा येऽतीता ये भाव्या यश्च वर्तते। सर्वे विष्णुवशा नित्यं विमुक्तेरप्यनन्तरम्। एभ्यः श्रीस्तु विमुक्तेभ्यो गुणैः कोटिगुणोत्तरा। ज्ञानानन्दबलादिभ्यः सर्वेभ्यः सर्वदैव हि। भिन्नाभिन्नाश्च ते सर्वे ब्रह्माणस्तु परस्परम्। अभिमानः पृथक्तेषामानन्दः सह भुज्यते। ते तु भिन्ना हरेर्नित्यं श्रियोऽन्येभ्यस्तथैव च। आविष्टो विष्णुरेतेषु न विष्णुस्तत्स्वरूपकः। विष्णोरतिप्रियत्वात्ते ह्यध्यर्धा इति चोदिताः। विष्णोः केवलभेदेऽपि शेषादिभ्यः प्रिया यतः। विष्णोः प्रियत्वे तद्भक्तौ तज्ज्ञाने च श्रियस्तु ते। मुक्ता अप्यवरा नित्यं सर्वे कोटिगुणेन च। सरस्वती च गायत्री श्रद्धाद्या प्रीतिरेव च। सर्व-

SGDF
Sri Gargeshwari Digital Foundation

वेदात्मिका बुद्धिरनुभूतिः सुखात्मिका। गुरुभक्तिर्हरौ प्रीतिः सर्वमन्त्रात्मिका भुजिः। शिवकन्येन्द्रसेना च द्रौपदी काशिजा तथा। चन्द्रेत्यादिस्वरूपा यास्तेभ्यः शतगुणावराः। विष्णुभक्तौ च तत्प्रीतौ ज्ञानानन्दादिकेष्वपि। मुक्तेः पश्चादपि गुणैः सर्वैर्ब्रह्मभ्य ईरिताः। शेषः सदाशिवश्चोर्ध्वस्तपोऽहङ्कार एव च। नरोऽपटो लक्ष्मणश्च रौहिणेयः शुकस्तथा। सद्योजातो वामदेवश्चाघोरस्तत्पुमानपि। दुर्वासा द्रौणिरौर्वश्च जैगीषव्यादिरूपकाः। पूर्वोक्तैश्च गुणैः सर्वैस्ताभ्यः शतगुणावराः। मुक्तेः पश्चादपि सदा अतीतानागताश्च याः। अतीतानागता ये च सर्वशोऽप्यवराः सदा। एवं सुपर्णाः सर्वेऽपि समाः शेषैः सदैव तु। सर्वैर्गुणैस्तथा मुक्तौ तद्भार्यास्तच्छतावराः। ताभ्यः शतावरास्त्विन्द्राः पुरन्दर इतीरिताः। तेभ्यः शतावरास्त्वन्ये इन्द्राश्चान्याश्च देवताः। द्वित्रिपश्चादिगुणतः परस्परविशेषिणः। सनत्कुमारास्तु सदा पुरन्दरसमा मताः। सनकाद्या नारदश्च दक्षभृग्वादयोऽपि च। देवावरा यथा तद्वन्मनवोऽपि प्रकीर्तिताः। त्रिचतुर्भागभेदेन तेऽप्यन्योऽन्यविशेषिणः। वाली गाधी विकुक्षिश्च पार्थ इन्द्रः पुरन्दरः। सुदर्शनश्च भरतः प्रद्युम्नः स्कन्द एव च। सनत्कुमारः कामश्चेत्येक एव व्यवस्थितः। स्वायम्भुवो मनुर्दक्षो वायुः स्पर्शाधिपस्तथा। बृहस्पतिश्चानिरुद्ध एते सूर्यादितोऽधिकाः। सूर्यश्च चन्द्रमाश्चैव यमश्चैते त्रयः सुराः। प्रोक्तेभ्यस्त्ववराश्चान्यदेवेभ्योऽपि सदाऽधिकाः। कार्तवीर्यः पृथुश्चैव दौष्यन्तिर्भरतस्तथा। शशबिन्दुश्च मान्धाता ककुत्स्थाद्यास्तथाऽपरे। सर्वे ते विष्णुनाऽऽविष्टा विष्णोर्भिन्नाः सदैव तु। शतावराश्च देवेभ्यः कर्मदेवा इति स्मृताः। तुम्बुरुप्रमुखा ये च तथोर्वश्यादिका अपि। विश्वामित्रब्रह्मपुत्रानृते चाप्यृषयोऽखिलाः। सूर्यादिभ्योऽधमाश्चैव मन्वादिभ्यस्तथैव च। वैवस्वतो मनुर्नित्यं विष्ण्वावेशी ततोऽधिकः। कार्तवीर्यादिराजभ्यो देवभृत्याः शतावराः।

SGDF
Sri Gangeshwari Digital Foundation

आजानदेवास्ते प्रोक्तास्तेभ्यश्च पितरश्चिराः। पितॄणां सप्तकं यत्त-त्कर्मदेवसमं मतम्। विश्वामित्रो ब्रह्मपुत्रैः समो मुनिरुदाहृतः। आचार्यः पितॄणां चासौ पितृभिः सह पठ्यते। आजानेभ्यस्तु पितरो ह्यष्टभ्योऽन्ये शतावराः। कर्मदेवगणा अष्टगन्धर्वास्तत्परे शतम्। आजानदेवास्तेभ्योऽन्ये पितृभ्यश्च शतावराः। स्वमुखेनैव देवैर्ये आज्ञाप्याः सर्वदा गणाः। आख्याता देवगन्धर्वा ये त्वन्यमुख-गोचराः। मानुषास्ते तु गन्धर्वास्तेभ्यस्ते च शतावराः। तेभ्यः शतावराश्चैव मनुष्येषूत्तमा गणाः। देवादिष्वेषु सर्वेषु प्रोक्ता अपि विशेषिणः। पञ्चांशतो दशांशाद्वा स्वस्वजात्यां परस्परम्। देवस्त्रियो दशांशोनाः स्वपतिभ्यस्तथाऽपराः। अष्टांशोनाः प्रविज्ञेया यासां मुक्तौ सह स्थितिः। अनादिश्च विशेषोऽयं सर्वेषां मानुषादिनाम्। इयं नीचोच्चता क्वापि न केनापि ह्यपोदितुम्। शक्यते योऽन्यथा-कर्तुमिच्छेत्सोऽपि तमो व्रजेत्। योऽपि वेद समत्वेन सर्वान्नीचोच्चतः स्थितान्। सोऽपि याति तमो घोरं यश्च साम्यमुदीरयेत्। मानुषोत्तम-मारभ्य ब्रह्मान्तानां प्रयत्नतः। विष्णोर्भक्तिज्ञानपूर्वं भवेन्मुक्तिः प्रसादतः। भक्तिज्ञानादिकाः सर्वे सर्वेषामप्यनादयः। अनादिकाला-दारभ्य वृद्धानामुत्तरोत्तरम्। तत्तद्योग्यतया पूर्तौ विष्णोर्दृष्टिः प्रजायते। यथोदश्चनकुम्भादेः सरित्सागरयोरपि। अल्पेन महता वाऽपि पूर्तियोग्यतया भवेत्। एवं नरादिब्रह्मान्तजीवानां साधनै-रपि। अनादिसिद्धैर्भक्त्याद्यैः पूर्तिर्योग्यतया भवेत्। अल्पैः पूर्ति-स्तथाल्पानां महद्भिर्महतामपि। भक्त्याद्यैर्जायते तेषां साधनैर्नान्यथा क्वचित्। श्रवणं मननं चैव ध्यानं भक्तिस्तथा दृशिः। ज्ञानञ्चोक्त-विशेषाणां सर्वेषां साधनं भवेत्। त्यक्त्वैतानि न कस्यापि भवेन्मोक्षः कदाचन। सर्वोत्तमतया ज्ञानपूर्वकः स्नेह एव तु। भक्तिर्विष्णौ समुद्दिष्टा तदन्येषां च योग्यतः। विष्णुभक्तिर्देवभक्तिर्गुरौ भक्तिस्तथैव च।

SGDF
Sri Gargeshwari Digital Foundation

तत्तच्छ्रैष्ठ्यानुसारेण मुक्तौ नियतसाधनम्। भक्तिपूर्तौ भवेन्मुक्तिस्तदभावे च नो भवेत्। भक्तिर्ज्ञानं तथा ध्यानं मुक्तानामपि सर्वशः। नियमेन न हीयन्ते मुक्तानां ते स्वरूपकाः। साधनानि तु सर्वाणि भक्तिज्ञानप्रवृद्धये। नैवान्यसाधनं भक्तिः फलरूपा हि सा यतः। स्वात्मोत्तमेषु विद्वेषात्तमो नियमतो व्रजेत्। गुणानामल्पताज्ञानं तत्स्त्रीरागस्तथैव च। तत्प्रतीपे च या बुद्धिस्त्रिविधो द्वेष उच्यते। द्वेषोज्झिता च या भक्तिः सा मोक्षं नियमान्नयेत्। निर्दुःखं तु सुखं नित्यं मोक्ष इत्यभिधीयते। चिदानन्दशिरोदेहपाणिपादात्मकाः सदा। सर्वदोषविनिर्मुक्ता मुक्ताः क्रीडन्ति नित्यशः। अनादिकालादारभ्य या भार्यास्ताः सदैव तु। ब्रह्मादीनां विमुक्तौ च भार्याः स्युर्नियमात्सदा। न कदाचिद्विमुक्तानां भार्याः काश्चित्स्युरन्यगाः। न कदाचिद्वियोगश्च न विद्वेषो न वाऽरतिः। मोदन्ते सहिताः सर्वे सदा विष्णुपरायणा' इति पैङ्गिश्रुतिः।

'एकमेवाद्वितीयम्'। 'नेह नानास्ति किञ्चन'। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'। 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्। मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति'। 'एकधैवानुद्रष्टव्यं नेह नानास्ति किञ्चन। मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति'। 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक्पश्यंस्तानेवानु विधावती'त्यादि च। इहेति परमेश्वररूपेषु अवयवेषु धर्मेषु च किञ्चन नाना नास्तीत्यर्थः। एकमेवाद्वितीयमिति तत्समोऽधिको वा तदनधीनो वा नास्तीति सतात्पर्यं निषिध्यते। 'एक एवाद्वितीयोऽसौ हरिर्वेदेषु सर्वदा। एक एवाद्वितीयोऽसावश्वमेधः क्रतुष्वपि। एकैव वाऽद्वितीया सा विष्णुभक्तिर्हि साधने। एक एवाद्वितीयोऽसौ प्रणवो मन्त्र उच्यत' इत्यादि वचनात्। यथैकमुत्तमं पुरुषमपेक्ष्य तस्मिन्पुरे एक एव नान्योऽस्ती-

SGDF
Sri Gangeshwari Digital Foundation

त्युक्तेऽपि तत्सदृशस्तदधिको वान्यो नास्तीत्युक्तं भवति । 'एक एवाद्वितीयोऽसौ तदतन्त्रस्य वर्जनात् । तत्समस्याधिकस्यापि ह्यभावात्पुरुषोत्तम' इति ब्राह्मे । स्वगतभेदाविवक्षायामिहेतिविशेषणं व्यर्थं स्यात् । नानेवेति भेदाभेदनिराकरणार्थम् । 'विरुद्धोभयसंयोग इव शब्दः प्रदृश्यत' इति शब्दतत्त्वे । पर्वतेषु दुर्गे पर्वताग्रे वृष्टं यथाऽधो विधावति एवं पृथक् दृष्टान्धर्मानन्वेव तदनन्तरमेवाधोऽन्धे तमसि विधावति । 'भेदेन दर्शनाद्वापि भेदाभेदेन दर्शनात् । विष्णोर्गुणानां रूपाणां तदंगानां मुखादिनाम् । तथा दर्शनकालात्तु क्षिप्रमेव तमो व्रजेदि'ति ब्रह्माण्डे । 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' । 'द्वा सुपर्णा सयुजा सखाया' । 'यो वेद निहितं गुहायां परमे व्योमन्' । 'सोऽश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चितेति' । 'एतमानन्दमयमात्मानमुपसंक्रम्य इमांल्लोकान्कामान्नीकामरूप्यनुसंचरन्' । 'अथात आनन्दस्य मीमाꣳसा भवती'त्यारभ्य मनुष्यादिब्रह्मांतानां मुक्तानामानन्दे शतगुणविशेषश्चोच्यते । मुक्तानां चायं विशेषः । 'श्रोत्रियस्य चाकामहतस्ये'ति विशेषणात् । न हि ब्रह्मादीनामनधिगतः श्रुत्यर्थः केषांचिदस्ति । न च ब्रह्माण एव केचन कामहताः केचनाकामहता इत्यत्र प्रमाणमस्ति । तस्माच्छ्रोत्रिय इति प्राप्तश्रुतिफलत्वान्मुक्त उच्यते । अकामहतत्वं च मुख्यं मुक्तस्यैव । 'प्राप्तश्रुतिफलत्वात्तु श्रोत्रियाः प्राप्तमोक्षिणः । त एव चाप्तकामत्वात्तथाऽकामहताः श्रुताः' इति च भारते । 'ब्रह्मणोऽपि ह्यमुक्तस्य नाकामहतता परा । यतस्तस्यापि कामस्य क्षणव्यवहितिर्भवेदि'ति च । कामहतता कामेनोपद्रवः । 'ब्रह्मणोऽप्यल्पदुःखं स्यात्तदप्यनभिमानतः । नास्त्यात्मसम्बन्धतया भोगाभावात्कथंचने'ति च । न चान्यस्य कस्यचिच्छ्रोत्रियस्याकामहतस्य च ब्रह्मणा समं सुखं युज्यते । 'ज्ञानमप्रतिघं यस्य वैराग्यं च

SGDF
Sri Gargeshwari Digital Foundation

जगत्पतेः । ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयमि'त्यादिना श्रोत्रियत्वादिगुणैस्तस्यैवान्येभ्य आधिक्यात् । न चेन्द्रपदाद्विरक्त-स्येन्द्रसमं सुखं ब्रह्मपदाद्विरक्तस्य तत्सममित्यत्र किंचिन्मानमस्ति । दृष्टवस्तुनि विरागे आयासाभावात्कश्चित्सुखविशेषो दृश्यते । अन्यत्र ब्रह्मपदाद्विरक्तस्य न कश्चिद्विशेषो दृश्यते । अतोऽनुभवविरुद्धत्वा-द्यत्किंचिदेतत् । ' नरादिब्रह्मपर्यन्तं विमुक्तानां शतोच्छ्रयः । निःशेष-दुःखहीनानां नित्यानन्दैकभोगिनाम् । अप्यानन्दो मिऽथोऽप्युक्त-स्त्वध्वर्यूणां श्रुतौ पृथगि'ति हरिवंशेषु । ' यदा ह्येवैष एतस्मिन्नुदर-मन्तरं कुरुत' इत्यत्राप्येतस्मिन्निति विशेषणात्स्वगतभेदनिषेध एव । ' अभेदमीशरूपाणां भेदं जीवेशयोरपि । यः पश्येत्स्थिरया बुध्या भक्तिमान्स विमुच्यत'इति भविष्यत्पुराणे । ' परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' स उत्तमः पुरुषः । स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा' । 'यस्य लोकं समासाद्य स्वरूप-मभिपद्यते । जीवः पर्येति विष्णोश्च समीपे तत्प्रसादतः । यत्प्रसादात्स पर्येति स विष्णुः पुरुषोत्तमः' । 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे' । 'दुग्धसागरगाः केचित्केचिदश्वत्थकक्षगाः । अमृतह्रदेषु केचिच्च पिबन्ति स्नातवत्सदा । केचित्पश्यन्ति तं देवं सदा केचित्समीपगाः' । 'आर्णि न रथ्यममृताधितस्थुरिह ब्रवीतु य उ तच्चिकेतत्' । 'रथ्यमार्णिमिवाश्रित्य मुक्ताः सर्वे व्यवस्थिताः । यं विष्णुं देवदेवेशं नमस्तस्मै स्वयम्भुव'इत्यादि । तौ यत्र विहीयेते इत्यत्रापि परमात्मैव । 'शरीरानभिमानी यो हृदि संस्थो जनार्दनः । अभिमानवतो देहे जीवस्य स नियामकः । स एव सूर्यसंस्थश्च हंसः सोऽहमिति श्रुतः । हन्तृत्वाद्ध्वंसनामाऽसौ सोऽहं चासावहेयतः । स एव सूर्यसंस्थेन रूपेणैवाक्षिणि स्थितः । सूर्यसंस्थाद्धि रूपात्स

SGDF
Sri Gangeshwari Digital Foundation

विभक्तोऽक्षिणि संस्थितः । गच्छतो म्रियमाणस्य तावुभावपि देहतः । तयोर्देहविहाने तु भवेतारिष्टदर्शनम् । तदा सञ्चिन्तयेद्देवं तमेव पुरुषोत्तममित्यादि हरिवंशेषु । 'क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचिता अनित्याः । आविर्हिताश्चापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः । क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयं ज्योतिरजः परेशः । नारायणो भगवान्वासुदेवः स्वमायया ऽऽत्मन्यवधीयमान इति भागवते । 'स्वेच्छयैवावृतो विष्णुर्जीवे तिष्ठति सर्वदा । योऽसौ नियमयन् जीवं क्षेत्रज्ञ इति शब्दित' इति हरिवंशेषु । अशरीरः प्रज्ञात्मेतिविशेषणाच्च परमात्मा । न हि जीवस्याशरीरत्वममुक्तस्य । 'एष त आत्माऽन्तर्याम्यमृतः अतोऽन्यदार्तमि'ति च । न हि जीवादन्यस्यार्तिरुपपद्यते । 'सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यादि'त्यादि श्रुतिभ्यश्च । 'ब्रह्मादयो हि भूतानि तेषामन्तर्गतो हरिः । समः स सर्वभूतेषु य एवं वेद तत्त्वविदि'ति च भारते । न च मुख्ये सति लक्षणानाम युज्यते । न च मुख्यत एव जीवेशयोरैक्यं युक्तम् । प्रत्यक्षविरोधादेव । 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत'इत्यादेः । सहस्रशीर्षत्वादि-सर्वेशत्वसर्वज्यायस्त्वादिज्ञानादेव मोक्षः प्रतीयते । अनन्ययोगेन न चात्रैक्यज्ञानमुक्तम् । 'पुरुष एवेदं सर्वमि'त्यत्रापि सर्वेशितृत्वमेवोक्तम् । 'उतामृतत्वस्येशान' इति वाक्यशेषात् । 'पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत् । इत्युच्यते तदीयत्वान्न तु सर्वस्वरूपतः । भूतभव्यादि-जातस्य मुक्तानामपि चेश्वरः । इत्युच्यते श्रुतौ विष्णुः सर्वदा पुरुषोत्तम' इति भारने । 'सर्वस्मादुत्तम इति सम्यक् स्नेहयुता मतिः । सुस्थिरा भक्तिरुद्दिष्टा तया मोक्षो न चान्यतः । तया मोक्षो भवत्येव सा चेत्पूर्णा स्वयोग्यतः । अपरोक्षदृशा युक्ता सा पूर्णे-त्यभिधीयते । अपरोक्षदृशिश्चापि महाचार्योक्तदर्शनम् । सोऽपि

SGDF
Sri Gangeshwari Digital Foundation

यन्मोक्षनियतं मनसा समुदीरयेत्। तस्य दर्शनतो याति मुक्तिं नास्त्यत्र संशयः । ध्यानं च गुरुशुश्रूषा नित्यनैमित्तिकाः क्रियाः । तीर्थदानजपाद्याश्च स्वाध्यायो हरिकीर्तनम्। द्वादश्यादिव्रतं चैव तुलस्याद्यैरथार्चनम्। सर्वं भक्त्यर्थमुद्दिष्टं निष्फलन्तु तया विना। विष्णुभक्तियुतो मुक्तिं याति नान्यः कथञ्चन। एतदन्यत्तु यच्छास्त्रं न तच्छास्त्रं कुवर्त्म तत्। विष्णोर्भक्तिमृते मुक्तिर्जीवाभेदो हरेरपि। शिवब्रह्मादिसाम्यं च हरेर्मोहार्थमुच्यते । दैत्यानां मोहनार्थाय विष्णोरन्यसमानता। हीनता चोच्यते शास्त्रैर्न तद्ग्राह्यं मनीषिभिः। विष्णुवायुगिरीशेन्द्रदेवविप्राः क्रमात्सदा। सामर्थ्यतो विहीनास्तु गुणैः सर्वैस्तथैव च। हीनो विष्णुर्न कस्यापि सर्वतश्चोत्तमो मतः। एतदन्यत्तु यच्छास्त्रं तदासुरविमोहनम् । तस्मात्सर्वोत्तमं विष्णुं निश्चित्यपरमं व्रजेदि'ति हरिवंशेषु । 'तुलापुरुषदानाद्यैरश्वमेधादिभिर्मखैः। वाराणसीप्रयागादितीर्थस्नानादिभिः प्रिये। गयाश्राद्धादिभिः पित्र्यैर्वेदपाठादिभिर्जपैः। तपोभिरुग्रैर्नियमैर्यमैर्भूतदयादिभिः। गुरुशुश्रूषणैः सत्यैः धर्मैर्वर्णाश्रमोचितैः। ज्ञानध्यानादिभिः सम्यक् चरितैर्जन्मजन्मभिः । न यान्ति तत्परं श्रेयो विष्णुं सर्वेश्वरेश्वरम्। सर्वभावैरनाश्रित्य पुराणपुरुषोत्तममि'ति पाद्मे । 'भावो भक्तिः समुद्दिष्टस्तद्वान् भावुक उच्यत'इति नारसिंहे। 'मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामत' इति भागवतवचनम्। परायण इति विशेषणान्न नारायणायनत्वं विना मुक्तिद्योतकम्॥ छ॥

न च सिद्धेऽर्थे तात्पर्याभावो वक्तुं युक्तः। अस्त्यत्र तव पिता राजेत्यादिषु सिद्ध एव तात्पर्यदर्शनात्। न च तत्र कार्ये तात्पर्यं कल्पयितुं युक्तम्। सुखसाधनत्वविज्ञानेनैव प्रवृत्त्युपपत्तेः। वाक्यस्य स्वार्थमात्रे तात्पर्यपर्यवसानात्। अधिककल्पनायामश्रुतकल्पनाप्रसक्तिः।

SGDF
Sri Gargeshwari Digital Foundation

यजेतेत्यादिष्वपि यजनादेः सुखसाधनतामात्रं प्रतीयते । न शब्दस्य प्रेरकतावाक्यमात्रस्य प्रेरकत्वे सर्वैर्विहितमनिष्टसाधनमपि क्रियेत । व्युत्पत्तिरपि सिद्धे साङ्गुलिनिर्देशादिना युज्यते । न च कुत्रचित्सुखसाधनं विना कार्यान्वितं विद्यते । लिङाद्यर्थोऽपि सुखसाधनत्वमेव । न च कार्यान्वित एव तात्पर्यमित्यत्र किञ्चिन्मानम् । 'सुखसाधनमेवैकं नृणां वेदः प्रदर्शयेत् । न कुर्विति नरं क्वापि प्रेरयत्यत्र कश्चन । सुखसाधनताज्ञानात्सुखप्राप्त्यर्थमिच्छया । प्रवर्तते ततो वेदः सिद्धस्यैव प्रदर्शकः । न तु कारकतां क्वापि वेदः प्राप्नोति कस्यचिदि'ति ब्राह्मे । अतस्तद्विरोधिकथनं मोहत एव । कार्यान्विते शक्तिरिति वदता सिद्धवाक्यानां प्रामाण्यमङ्गीकृतं च । अन्यथा वसन्ते वसन्ते ज्योतिषा यजेतेत्यादौ वसन्तादिलक्षणवाक्यानां स्थानान्तरस्थानां स्वार्थे प्रमाण्याभावाद्वसन्ताद्यसिद्धेर्यागाद्यसिद्धिः । कार्यान्विते शक्तिरित्युक्ते कार्यपदस्य कार्यान्वयाभावादशक्त्या विध्यादेरसिद्धिश्च । कार्यपदस्य स्वत एव शक्तिरन्येषां कार्यान्वितत्वेनेत्यङ्गीकारे कल्पनागौरवम् । स्वार्थे शक्तिरित्यङ्गीकारे न कश्चिद्विरोधः । कर्तव्यतामात्रे वाक्यप्रामाण्याङ्गीकारे कर्मप्रयोजने प्रमाणाभावात्तत्रापि तात्पर्यमङ्गीकर्तव्यमेवेति सिद्धमेव सिद्धे तात्पर्यम् । 'चित्रादितारकाद्वन्द्वं यदा पूर्णेन्दुसंयुतम् । चैत्रादिमासा विज्ञेया' इत्यादौ वस्तुयाथार्थ्ये तज्ज्ञाने चोभयत्रतात्पर्यदर्शनात् । उपासनावाक्येष्वप्युपासनायां वस्तुयाथार्थ्ये चोभयत्र तात्पर्यं युक्तम् । 'उपासनायाः कार्यत्वे विष्णोरात्मत्व एव च । उभयत्रापि तात्पर्यमात्मोपासादिके विधौ । तस्मादसत्यं न ध्यायेद्ध्यायेत्तत्सत्यता यथा । विचार्य मतिमान्वाक्यैर्बहुभिः स्वार्थवाचकैरि'ति हरिवंशेषु । तस्मादिष्टसाधनमेव सर्ववाक्यार्थः । तार्किकाणां तूक्तवचनानां प्रामाण्यं सिद्धमेव । अतस्तद्विरोधिकथनं मोहत एव । 'अनुमाया विरोधश्चेत्प्रत्यक्षेणागमेन वा । सैवाप्रमाणतां गच्छेदागम-

SGDF
Sri Gargeshwari Digital Foundation

द्विट् तथाऽक्षजम् । तस्मादागम एवैको मानानामुत्तमोत्तमः । धर्मार्थकाममोक्षाणां साक्षादेव प्रदायक’इति वायुप्रोक्तवचनान्नानुमानविरोधो वक्तुं युज्यते । सर्वत्रानिवार्यत्वाच्च प्रत्यनुमानस्य । ‘निर्णयस्त्वागमेनैव नानुमाऽऽगमवर्जिता । क्वचिन्निर्णीतिहेतुः स्यादतः शास्त्राद्विनिर्णय’ इति भारते । न च वेदात्मकेतिहासपुराणोक्तन्यायं परित्यज्य येन केनचित् कृप्तन्यायो युज्यते । ‘अक्षपादकणादौ च साङ्ख्ययोगार्हतास्तथा । शिवशक्तिमहायानलोकायतपुरःसराः । गाणपत्याश्च सौराश्च सर्वे प्रोक्ता दुरागमाः । ऋग्यजुःसामाथर्वाश्चेतिहासपुराणकौ । स्वागमा इति संप्रोक्ता मीमांसा धर्म एव चे’ति पाद्मे । ‘पञ्चरात्रं भारतं च मूलरामायणं तथा । इतिहास इति प्रोक्तो ब्राह्माद्यं च पुराणकमि’ति प्रकाशिकायाम् । वेदाश्चैवेतिहासाश्च पुराणं भागवतं तथा । मूलप्रमाणमुद्दिष्टं मीमांसा च तथोत्तरा । एतेषामविरोधे तु मानमन्यदुदीरितम् । एतेषां तु विरुद्धं यदप्रमाणं विदो विदुरि’ति व्यासस्मृतौ । ‘विष्णोः सर्वोत्तमत्वस्य ज्ञानार्थं शास्त्रमिष्यते । अतस्तत्साधकं शास्त्रं दुःशास्त्रं तद्विरोधि यदि’ति ब्रह्माण्डे । ‘विष्णोः सर्वोत्तमत्वं च तद्भक्त्या मोक्ष एव च । शास्त्रार्थ इति निर्दिष्टः सर्वशास्त्रार्थनिर्णयादि’ति पाद्मे । न चागमस्याप्रामाण्यं वक्तुं युक्तं तत्प्रमाणाभावात् । स्वतः प्रामाण्याच्च । तदनङ्गीकारे चानवस्थानात् । आगमाप्रामाण्यसाधकानुमानादेरप्यागमवदप्रामाण्यप्राप्तेश्च । विशेषप्रमाणाभावात् । स्वीकृतत्वाच्च तैरपि स्वागमप्रामाण्यस्य । न ह्यनुमानादिना सप्तमलधारणचैत्यवन्दनादेः स्वर्गसाधनत्वं ज्ञातुं शक्यम् । न च प्रत्यक्षमात्रप्रामाण्यवादिनस्तत्सिद्धमागमाप्रामाण्यम् । अतस्तेषां प्रत्यक्षवदनुमानवच्चाङ्गीकर्तव्यमागमप्रामाण्यम् । उक्तं च भविष्यत्पर्वणि । ‘येनोक्तमागमामात्वं कुतस्तदिति तं वदेत् । प्रत्यक्षादेर्यदि ब्रूयात्तन्मात्वं क्वेति तं वदेत् । तत्स्वतश्चेदागमस्य प्रामाण्यं न स्वतः कुतः । परत-

SGDF
Sri Gangeshwari Digital Foundation

श्चेत्प्रमाणस्य न कस्यापि स्थितिर्भवेत् । अङ्गीकृतं च प्रामाण्यं सर्वैरप्यागमस्य तु । यतः स्वपक्षप्रामाण्यं विरोधेऽप्यक्षजादिना । अङ्गीकुर्वन्ति तत्पक्षः प्रत्यक्षादिविरोधकः । शून्यता क्षणिकत्वं च ज्ञानमात्रत्वमेव वा । भावाभावात्मता साकं शरीरात्मत्वमेव च । प्रत्यक्षेण विरुध्यन्ते मद्देह इति दर्शनात् । भावरूपस्थिरत्वादेर्ज्ञानाद्भेदस्य दर्शनात् । देहभेदो यद्यमुख्यो देहैक्ये मुख्यता कुतः । जातिस्मृतिप्रमाणाच्च न युक्ता देहरूपता । अनुष्ठाय च शास्त्रार्थं फलभोगस्य दर्शनात् । प्रत्यक्षादेर्विरुद्धत्वात्सौगताद्या दुरागमाः । बह्वागमविरोधाच्च दुष्टत्वं तेषु संस्थितम् । प्रामाण्यं स्वीकृतं यैस्तु वेदानामागमा हि ते । शतकोटयः पञ्चरात्रं पुराणं तावदेव च । रामस्य चरितं तावत्तावदन्यच्च सर्वशः । अनन्ताश्च तथा वेदाः साङ्गोपाङ्गाश्च सर्वशः । सर्वाधिक्यं यत्र विष्णोस्तात्पर्यात्समुदीर्यते । विंशदेव सहस्राणि श्लोकानां समुदीरितम् । बार्हस्पत्यं तथा बौद्धं भावाभावमतं तथा । शिवशक्त्यादिकं यच्च किञ्चित्प्रामाण्यसंयुतम् । त्रिंशत्कोटयेव तत्सर्वमतो मानं न तत्स्मृतम् । बहुमानविरुद्धं यन्न तन्मानं विदो विदुः । गुणसाम्येऽपि किमुत गुणाधिकविरोधि यत् । यथा बहूनां ज्ञानानां समानां गुणतोऽपि च । विरोध्येकं तु यज्ज्ञानं न मानत्वं गमिष्यति । प्रत्यक्षादौ हि बहुभिः समैरेकमपोद्यते । तस्माद्वेदाः प्रमाणं स्युर्बाहुल्यादेव किं पुनः । अदोषत्वाद्गुणाच्चैव बलवत्कार्यसाधनात् । वेदोक्तकर्मयुक्तानां तथा सिद्धिमतामपि । वेदबाह्यक्रियायोगान्न बाधः क्वापि दृश्यते । वेदोक्तकर्मसिद्धानां नाबाध्यं दृश्यते क्वचित् । असाध्यं वा ततो वेदाः प्रामाण्यं निश्चयाद्गता' इति ।

'प्रत्यक्षमनुमानं च वाक्यं चेति त्रिधा प्रमा । उपमाद्यं प्रमाणं यदेतेष्वन्तर्गतं हि तत् । निर्दोषेन्द्रियसंयोगः प्रत्यक्षमिति

SGDF
Sri Gangeshwari Digital Foundation

गीयते । निर्दोषयुक्तिरनुमा तादृशोक्तिस्तथाऽऽगमः । मानं चैव विशेषेण निर्दोषज्ञानसाधनम् । अर्थापत्तिश्चोपमा च संभवाद्यनुमैव तु । दुःखाद्यभावः प्रत्यक्षं बाह्यगश्चानुमा स्मृता । योग्यस्यानुपलब्ध्याख्या युक्तिरेव हि बाह्यगा । मनसः संप्रयोगो यो दुःखादिरहितात्मनः । अभावरूपं प्रत्यक्षं मनश्च द्विविधं मतम् । चेतनं च जडं चेति चक्षुराद्यं तथैव च । चेतनं त्विन्द्रियं ह्यात्मस्वरूपान्नापरं स्मृतम् । मुक्तानां चेतनं त्वेव बद्धानामुभयं तथा । स्वरूपेणापि संयोगः स्वरूपस्यैव युज्यते । यथा रत्नस्य संयोगस्तत्प्रकाशेन नित्यदा । रत्नस्य च प्रकाशस्य न भेदः कश्चिदिष्यते । विशेषो नाम विज्ञेयो विशेषादृष्टिगोचरः । विष्णोरेव स्वरूपाणां तद्गुणानां तथैव च । तस्यैव शिरआदीनां नैव भेदोऽस्ति कश्चन । अभेदेऽपि विशेषेण व्यवहारः पृथग्भवेत् । विष्णोर्जडेन जीवैश्च भेद एव श्रिया तथा । विष्णोः क्रियाश्च याः कश्चिदभेदस्तैरपि ध्रुवम् । कादाचित्कत्वमप्यासां विशेषेणैव युज्यते । एवं विमुक्तजीवानां स्वरूपैः स्वगुणैरपि । स्वक्रियाभिस्तथैवैक्यं नित्यं स्वावयवैरपि । भेदाभेदस्तु बद्धानां गुणैः स्वैः कर्मभिस्तथा । अंशांशिनोर्गुणस्यापि गुणिनः कर्म तद्वतोः । कार्योपादानयोश्चैव व्यक्तिसामान्ययोरपि । भेदाभेदः समुद्दिष्टो विनाशो यत्र दृश्यते । एकस्मिन्विद्यमानेऽपि तयोरेकस्य कस्यचित् । अविनाभावनियमो यत्राभेदस्तु तत्र हि । अभेदश्च स्वभिन्नेन भेदाभेदस्तु तत्र च । भेदाभेदो न तु क्वापि विष्णोरस्ति कदाचन । भेद एव तु जीवाद्यैः केवलाभेद आत्मनि । स्वरूपेषु विशेषो यः स्वरूपं तस्य सोऽपि तु । क्रियाणां च न नाशोऽस्ति तच्छक्तेः पूर्वकालतः । विशेष एवोपरतिः क्रियायाः समुदीरिता । विशेषस्य विशेषोऽन्यो न चैवास्ति कथञ्चन । स्वस्यापि तु विशेषश्च स्वयमेव भविष्यति । यथा जनेर्जनिर्नान्या तस्या वस्तुजनिर्जनिः । तथापि

SGDF
Sri Gangeshwari Digital Foundation

तु जनित्वात्सा सत्वं वस्तुन आनयेत् । एवमेव विशेषोऽसौ विशेषान्तर-वर्जितः । करोति न करोतीति विशेषव्यवहारकृत् । व्यक्तिभावं गता या तु करोतीति स्वरूपिणी । शक्तिरूपस्थिता सैव क्रिया शक्तिरितीर्यते । सा च व्यक्तिस्तु जनिवत्क्रियाया रूपमेव तु । तथापि तु विशेषेण स्वरूपेण विशेषिणी । जनेर्जनिवदेवासौ ज्ञातव्या व्यतिरेकतः । एवं मुक्तक्रिया नित्या नान्येषां भ्रान्तिसम्भवात् । मुक्तावुच्छेदतश्चैव निःशेषेणाखिलस्य च । नैवं मुक्तक्रियायास्तु तस्याश्च पुनरुद्भवात् । अमुक्तानां क्रिया याश्च मुक्तावपि समास्थिताः । अभिन्ना इति ता ज्ञेया अभिव्यक्तेः पुनःपुनः । चिन्तनादिक्रियाणां तु मुक्तावुच्छेदतः सदा । किं मया कार्यमादीनां भेदाभेद उदीरितः । अचेतनेष्वस्वतन्त्राः क्रिया यस्मात्सदैव तु । भेदाभेदस्ततो ज्ञेयः सर्वत्र नियमेन तु । ईश्वरः प्रकृतिर्जीवो जडं चेति चतुष्टयम् । पदार्थानां समुद्दिष्टं तत्रेशो विष्णुरुच्यत' इत्यादि ब्रह्मतर्के । 'पराऽस्य शक्ति-र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादि श्रुतयश्च । शक्तिशक्तिमतोश्चैव विशेषस्य विशेषिणः । अविनाभाविता यत्र न भेदस्तत्र विद्यते । सर्वाधिकसुखत्वं च ज्ञानं सर्वाधिकं तथा । सर्वाधिका सर्वशक्तिस्तेजः सर्वाधिकं तथा । इत्यादयो गुणाः सर्वे स्वरूपं वैष्णवं तथा । भेदान्यत्वादयः शब्दा अतद्रूपत्ववाचकाः । क्वचिदन्तरशब्दश्च विशेषस्यैव वाचकः । एकस्मिन्नेव शब्दानां यस्तु नानास्वरूपिणाम् । प्रयोजकत्वहेतुः स्यात्स विशेषः प्रकीर्तित' इति च ॥ छ ॥

यदाहुर्ब्रह्मविज्ञानात्समग्रत्वं यियासवः । ब्रह्मज्ञानात्समग्रत्वं नान्यतश्चेतिनिश्चयात् । तत्र केचिन्मनुष्यास्तु मन्यन्ते ब्रह्म किं मतेः । समग्रभावमगमदितिब्रूयाच्च तानिति । ब्रह्मापि सर्वदात्मान-महेयं गुणबृंहितम् । सर्वदास्तीति मेयं च विजानाति तथैव तु ।

SGDF
Sri Gargeshwari Digital Foundation

अतएव समग्रत्वं स्वत एवास्य सर्वदा। तदहेयं परं ब्रह्म यो योऽवे-द्गुणबृंहितम्। सर्वदास्तीति मेयं च स स याति समग्रताम्। मुख्यं समग्रं तद्ब्रह्म ज्ञानस्यापि समग्रतः। किञ्चित्समग्रतां देवास्तेषां ज्ञानं हि तादृशम्। आपुस्ततोऽधमां ज्ञानतादृक्त्वादृषयोऽपि तु। ऋषिभ्योऽप्यधमां प्रापुर्मानुषाश्च समग्रताम्। अहेयं च गुणैः पूर्णं नित्यास्तिज्ञानगोचरम्। ब्रह्म पश्यन्वामदेवः सूक्तमेतद्ददर्श ह। अहं मनुः सूर्य इति स्वान्तर्यामिव्यपेक्षया। अहंशब्दो यतो विष्णौ ततश्चोत्तमपूरुषाः। वर्तन्तेऽभवमित्याद्याः सर्वान्तस्थे जनार्दने। मनुरेषोऽवबोधत्वान्मन्वन्तस्थो जनार्दनः। स ह्याचारानुवाचेशः प्रेरयन्मनुमानसम्। स एव सूरिभिः प्राप्यः सूर्यान्तस्थो मुमुक्षुभिः। स एव कक्षगैः सेव्यः कक्षीवति समास्थितः। स एव शुक्रसंस्थस्तु नीतीः कवयति स्वयम्। यतः कविः स कामस्य प्रेरणादुशनाः स्मृतः। स एव शम्बरपुरोविभेदेन्द्रे व्यवस्थितः। सर्वान्तर्यामिकत्वात्तु सर्व-कर्मा स एव हि। ततः सूक्ते तथोवाच वामदेवः श्रियः पतिम्। यो योऽहेयं परं ब्रह्म सदैवास्तीति मानगम्। इदानीमपि जानाति स्वयोग्यां स समग्रताम्। प्राप्नोति तस्य देवाश्च नाभूतिं कर्तुमीशते। आत्मा हि विष्णुर्देवानां तेषु व्याप्तो यतः सदा। नियोक्तृत्वेन कार्येषु तज्ज्ञो यस्माच्च साधकः। यस्य प्रीतो हरिर्नित्यं तस्य प्रीताश्च देवताः। प्रीतियोगान्नैव तस्य विरुद्धं कर्तुमीशते। एवं विलक्षणं देवमुपास्ते जीवरूपिणम्। अहेयोऽस्तीति मेयोऽन्योऽथान्योऽसौ हरि-रित्यपि। न स वेद परं विष्णुं जीवरूपेण वेत्ति यत्। नाहेयत्वं

वेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवꣳ सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदꣳ सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषाꣳसमभवत्यथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवꣳ

SGDF
Sri Gangeshwari Digital Foundation

च वेदास्य तस्मात्पशुवदीरितः। देवानां पशुवच्चासौ यो वेदाहेयरूपिणम्। पशवो बहवो यद्वत्पुरुषं भोजयन्त्युत। तत्त्वज्ञः पुरुषस्तद्वदेकोऽपि बहुगा यथा। देवान्भोजयति ज्ञानसम्पत्त्या विष्णुसंश्रयात्। स्वीकारे तु पशोः प्रीतिरेकस्यापि भविष्यति। बहूनां हि गवां लाभे परा प्रीतिश्च किं पुनः। तस्मात्सुबहुगोरूपे देवानां तत्त्ववेदिनि। भवेदभ्यधिका प्रीतिर्विष्ण्वहेयत्ववेदनात्। नित्याहेयस्तथैवान्यस्तदन्यो विष्णुरित्यपि। देवानामप्रियं ज्ञानं नैवं विद्यादतः पुमान्। विष्णोरहेयतां चैव नित्यत्वं पूर्णतामपि। यो न वेद तथा यश्च जीवैरैक्यं हरेर्वदेत्। यश्चासत्यं जगद्ब्रूयात्सर्वे ते तमसि स्फुटम्। मज्जन्ति सर्ववेदैर्हि गुणैः सर्वैर्हरिर्यतः। पूर्णो नित्यमपूर्णाश्च जीवा मुक्ता अपि स्फुटम्। निःशेषदुःखमोकेन सुखैकानुभवस्तु यः। मोक्ष इत्युच्यते वेदैस्तेऽपि मुक्ता हरिं सदा। उपासते जगच्चैतत्सर्वदाऽद्यन्तवर्जितम्। न कदाचिज्जगन्नाशो न कदाचित्तदन्यथा। जगत्प्रवाहरूपेण सर्वदैवं व्यवस्थितम्। ज्ञानतः कर्मतो वापि तपसा शक्तितोऽपि वा। न कस्याप्यन्यथा भाव्यं जगदेतत्कदाचन। सत्यो विष्णुः श्रीश्च सत्या जीवाः सत्या जडं तथा। असत्यं नास्ति किञ्चिच्च सर्वेषां ज्ञानगोचरम्। ज्ञात्वा विष्णुमतो मुक्तिं प्राप्नुयात्पुरुषोत्तममि'ति भविष्यत्पर्वणि। इदमित्यात्मनो योग्यं सर्वं समग्रं भवति। निर्दुःखानन्दस्यापेक्षितत्वान्मनसि स्थितत्वेनेदमिति युज्यते। तत्सर्वमभवत्सर्वं भविष्यन्त इत्यादिना समग्रभावस्य प्रस्तुतत्वात्। ब्रह्मपश्यन्वामदेवो ब्रह्मणो मन्वादिजीवैरहेयत्वं प्रतिपेदे। 'ब्रह्म पश्यन्वामदेवो ब्रह्मणोऽहेयतां सदा। मन्वादिभिः सर्वजीवैः प्रतिपेदे हि

स देवानां यथाह वै बहवः पशवो मनुष्यं भुञ्जुरेवमेवैकः पुरुषो देवान्भुनक्त्येकस्मिन्नेव पशावादीयमाने प्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः॥ ४॥ ब्रह्म वा इदमग्र आसीदेकमेव

SGDF
Sri Gangeshwari Digital Foundation

मन्त्रदृगि’ति ब्राह्मे। तदिदं ब्रह्म योऽहेयत्वादिगुणमेतर्ह्यपि वेद। अहंशब्दस्याहेयत्वानङ्गीकारे इदंशब्दोऽपि व्यर्थः। सर्वस्वरूपत्वं हि दुर्विदद्भिरङ्गीक्रियते। इदंशब्देन परब्रह्मविवक्षायां ब्रह्मशब्दो व्यर्थः स्यात्। इदं योऽहमिति वेदेत्येव स्यात्। एवंशब्दश्च व्यर्थः। अस्मत्पक्षे तु तदात्मानमेवावेदित्यपि ज्ञातव्यमित्येवंशब्दार्थः। तत्पक्षे तदपि व्यर्थमेव। न हि तत्पक्षे तत्स्वात्मानं वेत्ति। व्याख्यान-व्याख्येयभावश्चागतिका गतिः। ‘अभावे पृथगर्थानां व्याख्या-मभ्यासमेव वा। कल्पयेन्नैव तद्भावे व्याख्याऽभ्यासश्च युज्यत’इति भारते। स्वरूपज्ञं तथाऽहेयं नित्यं च ब्रह्म वेत्ति यः। समग्रभावं गच्छेत्स तत्प्रसादान्न संशय’ इति च। स ईश्वर एषां देवानामात्मा भवति। पुल्लिङ्गं च ‘तत्सत्यं स आत्मे’त्यादिवद्भवति। ‘देवानां व्यापकत्वात्तु तेषामात्मा हरिः सदा। तज्ज्ञः प्रियस्ततस्तेषां तस्य नाभूतिदास्तत’ इति वामने। सर्वेभ्योऽन्यां विलक्षणां देवतां स्वगुणेभ्योऽहेयत्वादिभ्यश्चान्यां य उपास्ते अहेयोऽसमीति मेयश्चान्योऽन्यश्चासौ विष्णुरिति मत्वा यो विष्णोरन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेदेति वा। ‘जीवादिभ्यो हरिर्भिन्नस्तं यः स्वगुणभेदतः। अहेयोऽन्यो हरिश्चान्य इति मत्वाऽन्यमेव वा। य उपास्ते न स ज्ञानी मनुष्याणां पशुर्हि सः। सम्यग्ज्ञानी तु देवानां पशुरित्यभिधीयत’ इति च। एवं स देवानामित्यत्र पूर्वः सम्यग्ज्ञानी परामृश्यते। एतन्मनुष्या विद्युरित्यत्रैतच्छब्देन विष्णोरन्यदेवतोपासन-मुच्यते। न ह्यज्ञान्येव देवानां भोजकः। ज्ञानी हि विशेषेण भोजकः। ‘अथो अयं वा आत्मा सर्वेषां भूतानां लोक’इति वचनात्। स य एवंवित्सर्वेषां भूतानां ब्रह्मविच्च तत्रोच्यते। प्रस्तुतत्वात्। ‘तत्त्वविद्देवगौः प्रोक्तो नरगौश्चाप्यतत्त्ववित्। तस्माद्देवास्तत्त्वविदे प्रियं कुर्वन्त्यतन्द्रिता’ इत्याग्नेये। तस्य ह न देवाश्च-

SGDF
Sri Gangeshwari Digital Foundation

नाभूत्या ईशत इति देवानां तत्त्वज्ञानं प्रियमित्युक्तं च। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमि'ति। 'यच्चिकेत सत्यमित्तन्न मोघं वसुस्पार्हमुत जेतोत दाता'। 'सत्यो जीवेशयोर्भेदः सत्या विष्णोर्गुणा अपि। सत्यं जगदिदं सर्वं सत्येशजगतोर्भिदि'रित्यादेश्च। 'भेदेनैव जगत्सर्वं भेदेनेशं गुणैः सह। भेदेन जीवानन्योऽन्यं मुक्ताः पश्यन्ति सर्वशः। निःशेषदुःखहीनाश्च केवलं सुखभोगिनः। जन्ममृत्युविहीनाश्च कालसम्बन्धवर्जिताः। रजस्तमःसत्वहीनाः प्रकृत्यादिविवर्जिता'इत्यादि गारुडवचनान्न ज्ञाननिवर्त्यता वक्तुं युक्ता। 'तिर्यङ्मानुषदेवादिविष्णुरूपेष्वशक्तता। यस्मिन्कस्मिंश्च विषये दुःखित्वं भिन्नताऽपि वा। प्रकृतेर्विकारिता वाऽपि च्छेदभेदव्रणादि वा। अज्ञानं नाशिता वाऽपि जन्म जीवैरभिन्नता। प्रकृत्यभिन्नता वाऽपि जीवाभेदः परस्परम्। जडाभेदोऽथ वा विष्णोर्मिथ्यात्वं जगतोऽपि वा। अगुणत्वमदेहत्वमकर्तृत्वं तथा हरेः। सम्यग्भक्तिमृते मुक्तिर्विष्णौ तद्द्वेषतस्तथा। मुक्तावभोगो जीवानां मुक्तौ साम्यं तथैव च। अरूपत्वं च जीवानां मुक्तानां बन्धिनामपि। नामतीर्थादिभिर्मुक्तिस्तत्त्वज्ञानं विनाऽपि तु। विष्णोः सकाशात्प्रकृतेर्ब्रह्मणोऽनन्तरुद्रयोः। गरुडेन्द्रसूर्यविघ्नादेरग्निसोमगुहादिनाम्। प्रद्युम्नस्यानिरुद्धस्य देवविप्रादिनामपि। यैः कैश्चापि गुणैर्विष्णोः सकाशाद्वरता तथा। यदा कदापि यत्नैर्वा वरशापादिनाऽपि वा। तपसा वाप्युपायैर्वा योगज्ञानादिनापि वा। साम्यं वा विष्णवधीनत्वादन्यथैषां स्थितिः कृतिः। असंसारित्वमेषां वाप्येषामीश्वरतापि वा। विना विष्णुप्रसादेन मुक्तिरेषां सकाशतः। विष्णोः प्रयोजनावाप्तिर्विष्णोर्दोषश्च कश्चन। विष्णोः सर्वेषु रूपेषु सम्पूर्णगुणहीनता। भेदो वा विष्णुरूपेषु विशेषो वा गुणेषु च। श्रियः सकाशादाधिक्यं ब्रह्मादेः साम्यमेव वा। ब्रह्मवाय्वोरनन्तस्य रुद्रस्य गरुडस्य च। तेभ्यश्चैवेन्द्रसूर्यादेर्विप्रभूपादिनां ततः। बद्धानां

SGDF
Sri Gangeshwari Digital Foundation

मुक्तिगानां वा दैत्यानां मोक्ष एव च। सर्वं मोहार्थमुद्दिष्टं वेदेषु हरिणाऽपि वा। ब्रह्मणा वाऽथ रुद्रेण देवैश्च मुनिभिस्तथा। यथा सुराणां सज्ज्ञाने तात्पर्यं सर्वदा श्रुतेः। तथा दुर्ज्ञानजनने तात्पर्यमसुरेषु च। एवमेव च देवानां विष्णुब्रह्मादिनामपि। विष्णोः सर्वगुणैः पूर्तिरपि मत्स्यादिरूपिणः। अजेयत्वमभेद्यत्वमच्छेद्यत्वं च सर्वशः। सर्वावताररूपाणामपि चित्सुखरूपता। श्रीब्रह्मरुद्राद्याधिक्यं सर्वेशत्वं स्वतन्त्रता। सर्वशक्तिस्तत्प्रसादान्मोक्षो ब्रह्मादिनामपि। तद्भक्त्यैव विमोक्षश्च भेदो जीवेशयोरपि। श्रीब्रह्मरुद्रशक्रादेः क्रमेणैव निजा गुणाः। सर्वदोषव्यपेतत्वं विष्णोः सर्वत्र सर्वदा। एतत्सर्वं सर्ववेदैर्विष्ण्वाद्यैर्देवतागणैः। ऋषिभिः क्षत्रियाद्यैश्च सम्यक्कृतात्पर्यतः सदा। उक्तं सर्वेषु शास्त्रेषु तस्माद्ग्राह्यं बुभूषुभिः। इदं सत्यमिदं सत्यमिदं सत्यं न संशयः। कोटिभिः शपथैश्चापि निर्णीतं देवतागणैः। अनादिकालतश्चायं शास्त्रार्थो नान्यथा क्वचित्। पुनश्चानन्तकालीन एष एव न संशयः। ज्ञातव्यश्चैष एवार्थः सर्वदैव बुभूषुभिः। एवं तु स्थिरया बुद्ध्या ज्ञात्वा यास्यथ तत्परम्। एवं ते हंसरूपेण विष्णुना देवतागणाः। ब्रह्माद्या बोधिताः सर्वे तथा ज्ञात्वा परं गताः। साक्षाद्विष्णुर्हंसरूप उक्त्वैवं तु दिवौकसाम्। वासुदेवाख्यरूपेण तेन सर्वहृदि स्थितः। सङ्कर्षणाख्यरूपेण विवेशानन्तमेव च। तं ध्यायति सदाऽनन्तस्तस्मान्मुक्तिपदेच्छया। प्रद्युम्नाख्येन रूपेण काममेव विवेश सः। हंसस्तद्ध्यानतो मुक्तिं काम इच्छति सर्वदा। अनिरुद्धाख्यरूपेण सोऽनिरुद्धं विवेश ह। हंसस्तद्ध्यानतो मुक्तिमनिरुद्धस्तथेच्छती'त्यादि ब्रह्माण्डपुराणे तत्त्वनिर्णयगीतायाम् ॥ ४ ॥

'विष्णोर्ब्राह्मणजातिः सन् ब्रह्मा जज्ञे चतुर्मुखः। इतोऽग्रे जगतस्तस्मात्क्षत्रजातिरजायत। वायुः सदाशिवोऽनन्तो गरुडः शक्र एव

तदेकꣳ सन्न व्यभवत्तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति तस्मा-

SGDF
Sri Gargeshwari Digital Foundation

च । कामश्च वरुणश्चैव सोमः सूर्यो यमस्तथा । एवमाद्याः क्षत्रियास्तु देवानां ब्रह्मनिर्मिताः । श्रेयसी सर्वजातिभ्यः क्षत्रजातिरिति श्रुतिः । नैव क्षत्रात्परा जातिर्ब्रह्मजातिं विना क्वचित् । ब्राह्मणाच्च परो राजा राजसूयाश्वमेधयोः । उपास्ते राजसूयेऽतो ब्राह्मणो राजसूयिनम् । आसीन आसनाधस्तात्तथापि ब्राह्मणो गुरुः । तस्मात्स राजसूयान्ते ब्राह्मणान्वन्दयीत च । यः क्षत्रियो ब्राह्मणहा पितृहा स प्रकीर्तितः । पापीयानेव भवति हत्वा स्वपितरं यथे'ति वामने । 'स्वतोऽधिकगुणं हत्वा साक्षाच्च पितरं पुनः । क्षत्रस्य ब्राह्मणं हत्वा तावान्दोषो भवेद्ध्रुवमि'त्याग्नेये । 'ईशानो मारुतः प्राणो वायुर्जिष्णुस्तथैव च । धृष्णुश्च पवमानश्च पवनश्चेति कथ्यत' इति शब्दतत्त्वे । 'मृत्युः सङ्कर्षणः शेषः शेतानन्तस्तथैव च । बलिर्महाविषश्चेति भूधरश्चेति कथ्यत' इति च । 'इन्द्रः सुपर्णो गरुडो महाभारो धुरन्धरः । विश्वजिच्चाप्यवध्यश्च वैनतेयश्च कथ्यत'इति च । पर्जन्यो मघवाम्श्चैव पुरुहूतः पुरन्दरः । प्राचीनबर्हिर्हर्यश्वः सोमपा मेषभुक्तथे'ति च । 'यशोनिधिर्ब्राह्मणस्तु तद्दातुं क्षत्रिये स्वयम् । अधो ब्राह्मण आसीनो राजसूये हि सेवत'इति प्रत्यये । ऋच्छति विनाशयति । रीङ् क्षय इति धातोः ॥ ५ ॥

'विवस्वदिन्द्रवरुणविष्णुभ्योऽन्ये दितेः सुताः । रुद्रादन्ये तथा रुद्रा वायोरन्ये च वायवः । अग्नेरन्ये च वसवो वैश्या इत्येव कीर्तिताः । एक एव हरेर्जातः परिवारविवर्जितः । वाय्वादीन्क्षत्रियान्सृष्ट्वा पुनरल्प-

---

त्क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उप निःश्रयति स्वां योनिं य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥ ५ ॥ स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ॥ ६ ॥ स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयꣳ हीदꣳ सर्वं पुष्यति

SGDF
Sri Gargeshwari Digital Foundation

परिग्रहः। इच्छन्बहुपरीवारं वैश्यान्देवान्ससर्ज ह। ततो बहुतरानिच्छन् शूद्रान्देवान्ससर्ज ह। अश्विनौ पृथिवी चैव कालमृत्यव एव च। शूद्रदेवाः समुद्दिष्टा देववर्णा इति स्मृताः। स्रष्टा स्वयं समुद्दिष्टः पालका देवता इमाः। धारणं कथमस्य स्याद्गतिश्चास्य कथं परा। इति मत्वा हरेर्भक्तिर्धर्मरूपं पुनर्विभुः। प्राणिनां धैर्यरूपं च वायो रूपान्तरं पुनः। ससर्ज मतिमान्ब्रह्मा विष्णोराज्ञापुरःसरः। तस्माद्वायोः परो नास्ति ऋते विष्णुं सनातनम्। शेषादीनां क्षत्रियाणां वायुरेवाधिपः स्मृतः। धारणाद्धर्म इत्याहुर्वायुर्धारयति प्रजाः। अबलोऽपि ततो वायोर्विष्णुभक्त्यादिरूपिणः। प्राप्तुमिच्छति युक्तः सन्विष्णुं सुबलवत्तरम्। यथैव युवराजेन महाराजमभीप्सति। प्राप्तुं धर्माभिमानी स वायुः सत्याभिमानवान्। तस्मादाहुर्धर्मविदं सत्यं वेत्तेति वेदिनः। सत्यज्ञमथ धर्मज्ञं वायुर्देवो यतस्तयो'रिति नारदीये। नैव व्यभवदिति परिवारबहुत्वेन यद्विशिष्टत्वं तन्नाभवदित्यर्थः। 'बृहत्त्वात्सर्ववर्णानां ब्राह्मणाः परिकीर्तिताः। क्षतत्राणात्क्षत्रियाश्च त्रिपूनत्वाद्विशः स्मृताः। ऊनवाची हि विट्शब्दः शुभे दत्ते त्रिभिर्यतः। रमते स ततः शूद्रः

यदिदं किञ्च ॥ ७॥ स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयाꣳसमाशꣳसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वैतत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीत्येतध्द्येवैतदुभयं भवति ॥ ८॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यश्शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याꣳ रूपाभ्यां ब्रह्माभवदथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वानूक्तोऽन्यद्वाकर्माकृतं यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो

SGDF
Sri Gargeshwari Digital Foundation

स ब्राह्मण्याभिमानवान् । ब्रह्माऽग्निना सहैवास्ते देवेष्वथ नरेषु च । ब्राह्मणेन सहैवास्ते ब्रह्मा शुभचतुर्मुखः । क्षत्रजात्यभिमानी तु पवनो देवराजभिः । सुपर्णशेषरुद्राद्यैर्मानुषेषु च राजभिः । वैश्यजात्यभिमानी च नासिक्यो वायुरूर्जितः । वस्वादिभिः सहैवास्ते देवेष्वथ नरेषु च । विड्भिः शूद्राभिमानी च निर्ऋतिर्देवतासु च । नासत्ययोः पृथिव्यां च शूद्रेष्वेव तु मानुषे । यस्मादग्नौ विशेषेण ब्रह्मणः सन्निधिर्भवेत् । अतोऽग्नावेव देवानां सर्वेषां नियमाद्धविः । हुत्वा लोकान्प्रार्थयन्ति तथा विप्रेषु मानुषे । सर्वजात्युत्तमो ब्रह्मा यतो विप्राग्निसंस्थितः । तस्माद्विप्रान्स्तथैवाग्निं तर्पयेद्ब्रह्मतुष्टिकृत् । तुष्टे ब्रह्मणि विष्णुश्च तुष्टो लोकान्प्रदास्यति । अग्निविप्रार्चकोऽप्येवं यो न वेद हरिं परम् । आश्रयं सर्वजीवानां हरिस्तं नैव भोजयेत् । यथाऽनधीतो वेदस्तु यथा कर्माकृतं तथा । न सम्यक् फलदो विष्णुरज्ञातो जगदीश्वरः । यद्यवेत्ता महदपि हयमेधादिकं हरेः । कुर्यात्क्षयिष्णुफलवान्स भवेन्नात्र संशयः । आप्तकामतयाऽत्मेति यो विष्णुः समुदीरितः । सर्वाश्रयमुपासीत तमेव पुरुषं सुधीः । विष्णुस्सर्वाश्रय इति सदोपास्ते य आत्मवान् । क्षीयन्ते नास्य कर्माणि शुभान्येव कदाचन । उपासनाबलान्मुक्तो भोगान्कर्मफलान्सदा । भुङ्क्ते विष्णोः समीपस्थः सर्वदोषविवर्जित'इति ब्रह्माण्डे । एताभ्यां रूपाभ्यां सहितं हि ब्रह्माभवत् । स्वं लोकं स्वाश्रयम् ॥ छ ॥ 'योऽयं सर्वेषु जीवेषु नियामकतया स्थितः । स विष्णुराप्तकामत्वादात्मेत्येवोच्यते बुधैः । स लोकः सर्वभूतानां सर्वजीवेषु संस्थितः । वैश्वदेवादिकान्होमान्यज्ञांश्च कुरुते विभुः । कारुण्यात्सर्वदेवेषु तेन देवाश्रयो हरिः । ऋषीणामाश्रयश्चापि स्वाध्यायेष्वपि संस्मृतेः । स हि जीवेषु संविष्टः पिण्डं

यद्यत्कामयते तत्तत्सृजते ॥ ९ ॥ अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेनर्षीणा-

SGDF
Sri Gargeshwari Digital Foundation

पुत्रजर्नि तथा। यत्करोति पितृणां च संश्रयस्तत एव सः। तृणोदकादिदानेन पशूनामन्नतो नृणाम्। उपकाराच्च सर्वेषां प्राणिनामाश्रयो हरिः। यज्ञादीन्देवतादीनामन्नत्वेन पुरैव यत्। ब्रह्माद्यैरर्थितः प्रादात्क्षीराब्धेस्तट उत्तरे। अतश्च सर्वलोकानामाश्रयो विष्णुरेव सः। एवं यो वेत्ति विष्णोस्तु सर्वाधारत्वमुत्तमम्। सर्वाण्यपि हि भूतानि तस्येच्छन्त्यविनाशिताम्। स्वाश्रयस्य यथा नित्यमनाशं प्रार्थयन्ति हि। राजादेरपि तान्येवमुत्तमाश्रयवेदिनः। तदेतद्वासुदेवस्य सर्वाधारत्वमुत्तमम्। विदितं सर्ववेदैश्च मीमाम्साभिश्च निश्चितमि'ति भविष्यत्पर्वणि। 'किन्तु ब्रह्मादिभिर्देवैः पुरा दृष्ट्वा निरंहसः। निर्भयान्विष्णुनाम्नैव यथेष्टं पदमागतान्। अलब्ध्वा चात्मनः पूजां सम्यगाराधितो हरिः। मयाचास्मादपि श्रैष्ठ्यं वाञ्छताहङ्कृतात्मना। ततः साक्षाज्जगन्नाथः प्रसन्नो भक्तवत्सलः। अंशांशेनात्मनैवैतान्पूजयामास केशवः। देवान्पितॄन् द्विजान्हव्यकव्याद्यैः करुणामयः। ततः प्रभृति पूज्यन्ते त्रैलोक्ये सचराचर'इति पाद्मे॥ छ॥ 'एको नारायणः पूर्वमासीज्जायां स ऐच्छत। विद्यमानामपि सदा भोगार्थं पुरुषोत्तमः। नित्यत्वेऽप्युभयोर्देवोऽवियुक्तस्तु तया यदा। एक इत्युच्यते देव्या रममाणः सुतं विभुः। ऐच्छद्ब्रह्मा ततो जज्ञे ततो

मथ यत्पितृभ्यो निम्पृणाति यत्प्रजामिच्छते तेन पितृणामथ यन्मनुष्यान्वासयते यदेभ्यो दानं (ऽशनं) ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाꣳस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवं विदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा एतद्विदितं मीमाꣳसितम्॥ १०॥ आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छꣳश्च नातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथवित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न

SGDF
Sri Gargeshwari Digital Foundation

देवांश्च सर्वशः। जाते पुत्रे वित्तमैच्छद्भूतान्यण्डं ततोऽभवत्। अण्डस्यान्तस्त्विमे लोकाः कुर्यां कर्मेति चैच्छत। ततस्तु कृतवान्यज्ञं स्वस्मै स पुरुषोत्तमः। आहुरात्मेति तं देवं पूर्णत्वाद्विष्णुमव्ययम्। तस्माद्द्यापि यः कामी स ह्येतावन्तमिच्छति। दैवं वित्तं सुखाद्यं हि मित्राद्यं मानुषं तु यत्। इदानीमपि तस्माद्धि कामयेदेवमेव तु। यः कश्चित्पुरुषो वाऽपि तद्वैकल्यादकृत्स्नवान्। एकाकिनोऽप्यवैकल्यं यथैव स्यात्तथा शृणु। स्वात्मनस्त्वपृथग्यत्तज्ज्ञानरूपं मनः परम्। मुक्तावपि न हेयं यत्तत्स्वात्म्येत्येव चिन्तयेत्। जायां तु तादृशीं वाचं बलं तादृक्स्वमात्मजम्। श्रोत्रं चक्षुश्च तादृग्यद्वित्तं दैवं च मानुषम्। एवं भूतं चिन्तनं यत्तत्कर्मेत्येव चिन्तयेत्। एतत्षट्कं च हरये सर्वेशाय समर्पयेत्। एवमात्मा प्रिया पुत्रो वित्तं द्विविध-मित्यपि। पञ्चभिः क्रियते यज्ञः पुरुषः पशुरेव च। मातापितृभ्या-मन्नेन तयोः पूर्वेण कर्मणा। जन्यस्य कर्मणा चैव साध्यः पञ्चभिरेव तु। एवं हि प्राणिनोऽन्येऽपि जायन्ते नात्र संशयः। एतामुपासनां कुर्याद्यो ब्राह्मं पदमाप्य च। सर्वस्यास्य पतिर्भूयाद्विष्णोरेव प्रसादतः। ब्राह्मे पदे त्वयोग्या ये ते देवपदमाप्नुयुः। तस्याप्ययोग्या लोकस्य भवेयुरधिकप्रियाः। क्रमान्मुक्तिं व्रजेयुश्च केशवस्य प्रसादत' इति माहात्म्ये। अविशेषेण ततोऽन्यत्स्यादितीच्छन्नपि न विन्देत्। ततोऽन्यस्याभावात्। 'आत्मा मनश्चिन्तनं च शेमुषी बुद्धिरित्यपि। एकार्थवाचका धीश्च मनीषा तप इत्यपी'ति शब्दतत्त्वे। 'सर्वाश्रयं च पितरं सर्वेषामधिकं गुणैः। अविदित्वा महत्पुण्यं कृत्वा न फल-भाग्भवेत्। तथा ज्ञात्वा हरिं यस्तु कुर्यात्कर्म सदोदितम्। अनन्तफलवान्स स्यात्प्राप्नोति च मनोगतमि'ति बृहच्छ्रुतौ। परमात्मैव गृहस्थान्तर्यामित्वेन सर्वेषां लोक आश्रयः। 'गृहस्थान्तर्गतो विष्णु-र्यज्ञैर्देवाश्रयो भवेत्। स्वाध्याये ऋषिसंस्मृत्या ऋषीणां च सदाश्रयः।

SGDF
Sri Gargeshwari Digital Foundation

स्वाध्यायाच्छ्राद्धतश्चैव पितॄणामन्नदानतः । मनुष्यादेरतो वेत्ति य एवं सततं गृही । स्वस्यान्तर्यामिणं विष्णुं सुरादीन्पूजयेत्तथा । तस्याविनाशमिच्छन्ति स्वाश्रयस्य यथा सुराः । तदेतत्सर्वशास्त्रेषु ऋषिसङ्घैर्विचारितमि'ति नारायणश्रुतौ । नराणामाश्रया देवा न देवानां नराः क्वचित् । नराणां च सुराणां च गतिरेको जनार्दन' इति च । आत्मा ब्रह्मा । 'आत्मा तु जगतां ब्रह्मा तस्यात्मा भगवान्हरिः । स एव जातः प्रथमं वासुदेवाच्चतुर्मुखः । सोऽकामयत भार्या मे स्यात्पुत्रस्तदनन्तरम् । ततो वित्तं मम स्याच्च कर्म कुर्यां ततो हरेः । इति सोऽपि न तान्प्राप ततोऽपूर्णत्वमात्मनः । मत्वा पूर्णत्वसिध्यर्थं भार्यां वाचमकल्पयत् । प्राणं पुत्रं तथा वित्तं चक्षुर्बाह्यमथान्तरम् । ज्ञानाख्यं श्रोत्रमेवासौ कर्म स्वात्मानमेव तु । एवं स मानसे यज्ञे त्वयजत्केशवं विभुम् । ततोऽस्य वाचः सम्भूता भार्या तस्य सरस्वती । पुत्रः प्राणादभूद्वायुर्दिशो लोका हिरण्मयाः । तस्यापरोक्षतां यातो भगवान्पुरुषोत्तमः । सर्वविद्या ददौ ताश्च श्रोत्रेण जगृहे विभुः । आत्मना सर्वकर्माणि चकार भगवत्परः । पुराऽऽसीन्मन एवास्य तेनेदं पञ्चकं विभुः । अवाप कर्मपर्यन्तं देहान्तात्पञ्चकात्स्वयम् । तस्मादद्यापि यो विद्वानुपास्ते पञ्चकं तथा । विष्णूपकरणत्वेन स इदं सर्वमाप्स्यति । मुक्तिश्चान्ते भवत्यस्य पञ्चानां देवतां हरिम् । नारायणं वासुदेवं तथा सङ्कर्षणं विभुम् । प्रद्युम्नं चानिरुद्धं च स्मरतो नित्यमेव तु । सवनत्रयं तथा पूर्वमुत्तरं चेति पञ्चकम् । यज्ञे मध्यं शिरः पक्षौ पुच्छं पशुषु पूरुषे । चतुर्दिशं तथा मध्यमिति सर्वत्र पञ्चकमि'ति च ॥ इत्यव्याकृतब्राह्मणम् ॥ ३ ॥ ५ ॥

प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्योकृत्स्नता मन एवास्यात्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दते श्रोत्रं दैवं श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्म करोति स एष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिद१ँ सर्वं यदिदं किञ्च तदिद१ँ सर्वमाप्नोति य एवं वेद ॥ ११ ॥ इत्यव्याकृतब्राह्मणम् ॥ ३ ॥ ५ ॥

SGDF
Sri Gurgeshwari Digital Foundation

पिता विष्णुः। यत् यदा। तपसा प्राणिनां कर्मभिः। मेधया स्वेच्छया। 'स हीदमन्नं धिया धिया जनयते कर्मभिरि'ति वचनात्। 'सप्तान्नानि यदा विष्णुः परमः पुरुषो विभुः। ससर्ज तेषां स्वार्थानि चकार त्रीणि केशवः। मनो वाचं तथा प्राणं तस्मात्तैस्तुष्टिमेति सः। तस्मात्तद्भक्तिकामः स्यात्सङ्कल्पं तत्कृतिं प्रति। कुर्यात्तद्वेदनेच्छां च श्रद्धां तस्य गुणोन्नतौ। अश्रद्धामन्यसाम्ये वाप्यन्येषामुन्नतौ ततः। अन्येषां सत्स्वरूपत्वे प्राकृतत्वादिकेऽस्य च। धृतिं तन्निन्दिवागादौ प्राप्ते तत्रैव चाधृतिम्। तन्मतस्य विसर्गार्थे ह्रियं तद्भक्तिवर्जने। तद्विवेके धियं चैव तदज्ञाने भियं तथा। वाचं नित्यं तद्गुणोक्तौ प्राणं तत्कर्मणि स्फुटम्। तदन्यकर्मसन्त्यागे

यत्सप्तान्नानि मेधया तपसाऽजनयत्पितैकमस्य साधारणं द्वे देवानभाजयत् त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत्तस्मिन्त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन स देवानपि गच्छति स ऊर्जमुपजीवतीति श्लोकाः ॥ १ ॥ यत्सप्तान्नानि मेधया तपसाऽजनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रꣳह्येतद्द्वे देवानभाजयदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति प्र च जुह्वत्यथो आहुर्दर्शपूर्णमासाविति तस्मान्नेष्टियाजुकः स्यात्पशुभ्य एकं प्रायच्छदिति तत्पयः पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमारं जातं घृतं वै वाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्त्यथ वत्सं जातमाहुरतृणाद इति तस्मिन्त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदꣳसर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न तद्यदिदमाहुः संवत्सरं पयसा जुह्वदपपुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान्त्सर्वꣳहि देवेभ्योऽन्नाद्यं प्रयच्छति कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते यो वैतामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्स देवानपि गच्छति स ऊर्जमुपजीवतीति प्रशꣳसा ॥ २ ॥ त्रीण्यात्मनेऽ-

SGDF
Sri Gangeshwari Digital Foundation

चापानं व्यानमस्य च। विरोधिनां निरासे त्वथोदानं योगधारणे। मनोवागादीन्द्रियाणां समानं नियमेऽत्र हि। अन्नभुक्तेषु सुस्थैर्येनरः कुर्यात्सदैव हि। अनेकगोचरेच्छा स्यात्काम एकाश्रये स्थितः। प्राणः प्रवृत्तिहेतुः स्यादपानस्तु निवर्तने। बलकर्मा तथा व्यान उदानो योगकर्मकृत्। देहेन्द्रियमनोनेता समानो नः स्थितिप्रदः। मनोवाक्प्राणसान्निध्यप्राधान्याज्जीव उन्नतिः। मनोवाक्प्राणरूपोऽसौ भगवान्पुरुषोत्तमः। मनोवाक्प्राणतस्तस्य जाता अन्येऽभिमानिनः। ब्रह्मा सरस्वती वायुर्मनआद्यभिमानिनः। सर्वस्यान्तः स्थितं विष्णुमायत्ता वाग्घि नः सदा। सर्ववाचश्च घोषाश्च विष्णोर्नामेति कीर्तिताः। तज्ज्ञानां तत्फलं च स्यादज्ञानां तत्फलं न तु। सर्वेन्द्रियगतं ज्ञानं मनआयत्तमीरितम्। पृष्ठे स्पृष्टेऽप्यनेनाहं स्पृष्ट इत्येव वेत्त्यतः। मनस्यव्याकुलेऽन्यत्र नैव वेत्ति कथञ्चन ॥ छ ॥

कुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सैषा ह्यन्तमायत्तैषा हि नः प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राणएवैतन्मयो वाऽयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥३॥ त्रयो लोका एत एव वागेवायं लोको मनोन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ ४ ॥ त्रयो वेदा एत एव वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ ५ ॥ देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः प्राणो मनुष्याः ॥ ६ ॥ पिता माता प्रजैत एव मन एव पिता वाङ्माता प्राणः प्रजा(ः) ॥ ७ ॥ विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति ॥ ८ ॥ यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वाऽवति ॥ ९ ॥ यत्किञ्चाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति ॥ १० ॥ तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ ११ ॥ अथैतस्य

SGDF
Sri Gangeshwari Digital Foundation

लोकवेदसुरज्ञातपित्रादेश्चाभिमानिनः । द्युपृथिव्यग्निसूर्याणां सोमस्याप्यभिमानिनः । स इन्द्रः परमैश्वर्यादशत्रुः समवर्जनात् । वायुरेते समा व्याप्तौ ब्रह्मेशौ गुणतोऽधिकौ । अनन्ताश्च गुणा ह्येषामन्यजीवव्यपेक्षया । तेभ्योऽप्यनन्ता विष्णोस्तु तेषामेवमुपासकः । नित्यलोकोपभोगी स्यादनित्यस्यान्यथा भवेत् । वायुः प्रजापतिः सोऽसौ चन्द्रसंस्थो विशेषतः । रात्रौ रात्रौ क्षयादस्य पूरणाद्रात्रिनामकाः । कलाः पञ्चदश प्रोक्ता ध्रुवैवास्य तु षोडशी । अकलोऽपि स चन्द्रस्य कलाभिः प्रोच्यते तथा । सोऽमावास्यां यतो रात्रौ प्राणभृत्सु व्यवस्थितः । कल्यावेशादल्पदोषः कृकलासवधोऽपि सन् । तस्यां रात्रौ महान्दोषो देवताऽवेशतो भवेत् । वायुः संवत्सरः प्रोक्तो वत्सो विष्णोरसौ यतः । सम्यगेव रतिं याति स एवं विदुषि स्थितः । अध्रुवास्तु कला यद्वत्सौम्यस्तस्य तथा धनम् । आगमापायवत्त्वात्तु ध्रुवावद्देह उच्यते । नाभिस्थानं शरीरं तु चक्रस्य प्रधिवद्धनम् । सर्वस्वविजयेऽप्यस्मात्प्रधिमात्रं तु गच्छति । एवं महागुणान्देवानेवं यो वेद पूरुषः । न चैभ्योऽतिप्रियः कश्चिद्विष्णोरस्ति कदाचन ॥ छ ॥

मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनꣳ समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥ १२ ॥ अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रस्त एते सर्व एव समास्सर्वेऽनन्तास्स यो हैतानन्तवत उपास्तेन्तवन्तꣳ स लोकं जयत्यथ यो हैताननन्तानुपास्ते अनन्तꣳ स लोकं जयति ॥ १३ ॥ स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदशकला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यते अप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥ यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदशकला आत्मैवास्य षोडशी

SGDF
Sri Gargeshwari Digital Foundation

चतुर्थं भोज्यमेवान्नं सर्वसाधारणं स्मृतम् । आत्मनोऽतिसमीपत्वं तस्य योऽन्नस्य मन्यते । अक्षयं पापमस्य स्याद्देवब्रह्मस्वहारिणः । तदेव मन्त्रयुक्तत्वाद्बलिहोमात्मना द्वयम् । देवानां प्रददौ विष्णुस्तस्मान्नैवेच्छया यजेत् । यदीच्छया यजेत्तेषामपहर्ता भविष्यति । देवस्वं तेन येनैव काम्यार्थं विनियोजितम् । परकीयेन वित्तेन तस्मिन्विनिमये यथा । चतुष्पाद्भ्यो द्विपाद्भ्यश्च पशुभ्यः पय आत्मकम् । प्रायच्छत्सप्तमान्नं स गोक्षीरं मुख्यमत्र च । आत्मने चैव देवानां तद्धोमार्थं प्रकल्पितम् । संवत्सरं गोपयसा येन होमो हरेः कृतः । भगवत्तत्त्वविदुषा तस्य मुक्तिर्न संशयः । अदृष्टभगवद्रूपस्यैतद्दर्शनकारणम् । भगवद्दृष्टिपूतस्तु विना होमेन मुच्यते । सप्तान्नसृष्टितत्त्वज्ञस्त्वेकहोमेन मुच्यते । विशेषज्ञो यतः सोऽयं भगवत्तत्त्ववेदने । को नाम भगवान्विष्णुः परमानन्दरूपतः । प्राणिनां कर्मभिश्चैव स्वेच्छया च पुनः पुनः । सप्तान्नं सृजते यस्मादन्नानामक्षयस्ततः । तस्मादक्षितिनामाऽसौ भगवान्पुरुषोत्तमः । य एवमक्षितिं वेद भगवन्तं सनातनम् । अप्रयत्नेन भोगाः स्युर्यथेष्टास्तस्य सर्वदा । सप्तान्नोपासनं यस्माद्देवानां योग्यमुत्तमम् । तस्माद्देवत्वमाप्नोति योग्यो देवपदस्य यः । ऊर्जं देवान्नमुद्दिष्टं ऊर्जितास्तु गुणास्तथा । तदप्याप्नोति न नरा योग्या एतदुपासने । ज्ञानमात्रेण देवानां सामीप्यं प्राप्नुवन्ति त' इति नारायणीये ॥ छ ॥

कला स वित्तेनैवा च पूर्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनाऽगादित्येवाहुः ॥ १५ ॥ अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकाना१ँ श्रेष्ठस्तस्माद्विद्यां प्रश१ँसन्ति ॥ १६ ॥ अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माऽहं यज्ञोऽहं लोक इति

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मेति वेदः। स्वाध्यायादिकर्तृत्वात्पुत्रस्त्वं ब्रह्मेत्याद्युच्यते। आत्मा भवति, व्यापको भवति। 'पुनः पुनः कर्मकृतिर्मानुष्यजय उच्यते। जन्मान्तरं विना नैव कर्मणा तत्तु युज्यते। पुत्रेण विद्यया नित्यमेकैकेनापि युज्यते। उभाभ्यां किमु वक्तव्यमष्टभागफलं सुतात्। विद्यया त्वर्धमाप्नोति सर्वं सप्तान्नविल्लभेत्। पुत्रमाविश्य सामर्थ्यान्मुच्यतेऽच्छिद्रकर्मणः। अक्ष्णं च पुदिति च्छिद्रं पुत्रस्तत्त्राणतो भवेत्। पृथिव्यादिस्थिता देवाः सरस्वत्यादिकास्त्रयः। अधिकावेशतो देवेष्वतो देवा इति स्मृताः। यदावेशात्सर्वमुक्तं सत्यं देवी तु वाग्घि सा। यदावेशान्न दुःखी स्यादानन्दी दैवतं मनः। यदावेशात्सर्वकार्येष्वम्लानः प्राण एव सः। सर्वसामर्थ्ययुक्तः स्यान्न म्रियेत कदाचन। एवं सप्तान्नविन्मुक्तस्त्रिभिराविष्ट एव तु। सर्वेषु व्याप्तिमन्वेति न दुःखी प्राणिषु स्थितः। सप्तान्नोपासनायोग्या देवा एकान्ततो हि यत्। देवांश्च पापं नाप्नोति तस्मात्पापं न तस्य तु।

यद्वै किं चानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ये वै के च यज्ञास्तेषाꣳ सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषाꣳ सर्वेषां लोक इत्येकता एतावद्वा इदꣳ सर्वमेतस्मात्सर्वꣳ सन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किञ्चिदक्ष्णया कृतं भवति तस्मादेनꣳ सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठत्यथैनमेते देवाः प्राणा अमृता आविशन्ति ॥१७॥ पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥ १८ ॥ दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानन्द्येव भवत्यथो न शोचति ॥ १९ ॥ अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः सञ्चरꣳश्चासञ्चरꣳश्च न व्यथतेऽथो न रिष्यति स य एवंवित्सर्वेषां भूतानामात्मा भवति यथैषां देवतैवꣳ स यथैताꣳ देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति यदु किञ्चेमाः प्रजाः शोचन्त्यमैवासां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति ॥ २० ॥ अथातो व्रतमीमाꣳसा

SGDF
Sri Gangeshwari Digital Foundation

देवा मनुष्यतामंशैराप्ता ये पुत्रतः फलम्। स्यात्तेषामेव चामुक्तेर्मुक्तानां न तु किञ्चन। मुक्तानां दैववागादेरावेशः सम्प्रकीर्तितः। प्राणज्ञानं यथाऽवन्ति रहस्यमिति सर्वदा। एवं मुक्तस्वरूपं चाप्यवन्त्येव रहस्यतः। उत्तमः सर्वदेवेषु प्राण एव हरेरनु। चतुर्मुखस्य प्राणस्य न विशेषोऽस्ति कश्चन। तस्माद्विष्णोर्व्रतस्यानु नित्यं प्राणव्रतं चरेत्। हंसोपास्तिः श्वासरूपे तयोर्व्रतमुदीरितम्। हंसरूपौ हि तौ देवौ श्वासोच्छ्वासप्रवर्तकौ। तस्मात्प्राण्यादपान्याच्च सद्रूपं संस्मरेत्सदा। नान्यस्योपासनं कुर्यात्तद्भृत्यत्वं विना क्वचित्। इन्द्रियाणि ससर्जादौ वासुदेवः प्रजापतिः। अध्यात्ममिन्द्रियाण्याहुरधिदैवं तु देवताः। अध्यात्ममग्निर्वाङ्नामा चक्षुरादित्य उच्यते। श्रोत्रं तु चन्द्रमा नाम मनः स्थूलं तु वासवः। येन यज्ञादिकं कुर्याच्छेषरुद्रविपास्तथा। मनः सूक्ष्मं ज्ञानयोग्यं शेषो व्याख्यानगोचरम्। रुद्रस्तु मननाख्यं च गारुडो ध्यानगोचरम्। वायुः प्राण इति प्रोक्तो येन सर्वं नियम्यते। त एते भगवत्सृष्टा व्यूदिरेऽध्यात्मसंस्थिताः। अधिदैवे ज्वलत्कर्मा वह्निः सूर्यस्तु तापकः। सोमः कान्तौ वृष्टिकर्मा वासवः शेष एव तु। पञ्चरात्रप्रवृत्तीशो रुद्रस्तत्स्थक्रियापरः। सर्वप्रवर्तको

प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योऽन्येनास्पर्धन्त वदिष्याम्येवाहमिति वाग् दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्युः श्रमो भूत्वोपयेमे तान्याप्नोत्तान्याप्त्वा मृत्युरवारुन्धत्तस्माच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरेऽयं वै नः श्रेष्ठो यः सञ्चरꣳश्चासञ्चरꣳश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवꣳस्तस्मादेत एतेनाख्यायन्ते प्राणा इति तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्धतेऽनुशुष्यत्यनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मं ॥ २१ ॥ अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एवमन्या देवता यथादैवतꣳ स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुर्म्लोचन्ति ह्यन्यदेवता न

SGDF
Sri Gargeshwari Digital Foundation

वायुर्ज्ञानमोक्षप्रदस्तथा । वेदप्रवृत्तिकृद्धीन्द्रस्तेऽधिदैवे च पस्पृधुः । अहं श्रेयानहं श्रेयानिति तानब्रवीद्धरिः । स्वकर्म यस्त्वविश्रान्तः कुर्याच्छ्रेयान्हि वः स्मृतः । इति श्रुत्वा ततश्चक्रुः कर्म स्वं स्वमनारतम् । तानेतान्छ्रमरूपेण ग्राप ब्रह्मा प्रजापतिः । श्रान्ताः स्वं भगवत्कर्म न शेकुः सर्वदेवताः । वायुं तु समशक्तित्वान्नाप ब्रह्मा प्रजापतिः । तेनासौ भगवत्कर्म सर्वं च कृतवान्त्सदा । श्रमात्पापात्मको मृत्यु-र्भगवत्कर्मवर्जनात् । अन्यान्देवानवापाशु नैव वायुं कदाचन । ते वायुं ज्ञानमैच्छन्त श्रेष्ठोऽयमिति निश्चिताः । तं ज्ञात्वा तेन चाविष्टा-स्तद्भृत्यत्वमुपागताः । तस्मात्प्राणाश्च मरुत इत्येषां नाम संस्थितम् । वायोर्देवा हि जायन्ते लयमेष्यन्ति तत्र च । तस्मान्नित्यं तद्व्रताश्च तद्व्रतोऽतो भवेत्सदा । अन्यदेवव्रतारम्भं यदि कुर्यात्समापयेत् । तेनासौ वायुना साकं भगवन्तमुपेष्यती'ति नारायणश्रुतौ । आनन्द्येव भवति । न शोचतीत्यतो मुक्त इत्येवावगम्यते ॥ छ ॥ सप्तान्न-ब्राह्मणम् ॥ ३ ॥ ६ ॥

सहैव माति जानातीति समम् । आत्मा प्राणः । नामरूपयो-रपि प्राणाधीनत्वादेकमित्युच्यते । 'प्राणो वायुरिति प्रोक्तस्तत्पत्नी

वायुस्सैषा नास्तमिता देवता यद्वायुः ॥ २२ ॥ अथैष श्लोको भवति ॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽ-स्तमेति तं देवाश्चक्रिरे धर्मँ स एवाद्य स उ श्व इति यद्वा एतेऽमुर्ह्य-भ्रियन्त तदेवाप्यद्य कुर्वन्ति तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्युच्चरेत्समापिपैषेत्तेनो एतस्यै देवतायै सायुज्यँ सलोकतां जयति ॥ २३ ॥ सप्तान्नब्राह्मणम् ॥ ३ ॥ ६ ॥

त्रयं वा इदं नाम रूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषाँ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥ अथ रूपाणां चक्षुरित्येतदेषा-मुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥ अथ कर्मणा-

SGDF
Sri Gargeshwari Digital Foundation

नाम भारती । रूपं तु तत्सुतो रुद्रो वशे प्राणस्य तद्द्वयम् । अमृतो वायुरुद्दिष्टो नित्यज्ञानात्मकत्वतः । सत्यं यथार्थवक्तृत्वाद्भारती रुद्र एव चे'ति । 'रुद्रे वेदेषु च प्राणः प्रविष्टश्छादितः सदा । सत्य इत्युच्यते नित्यं स्वरूपेणामृतः स्मृत' इति च ॥ ब्राह्मणम् ॥ ३ ॥ ७ ॥ ॥ ॐ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्बृहदारण्यकोपनिषद्भाष्ये तृतीयोऽध्यायः ॥ ३ ॥

॥ ॐ ॥ अतीत्य जगद्धर्मवर्जितत्वेन स्थितत्वादतिष्ठाः । उत्तमत्वान्मूर्धा । स्वयमेवापराजितबहुरूपत्वादपराजितसेना भगवान् ।

मात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषाᳲ सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयᳲ सदेकमयमात्माऽऽत्मैकः सन्नेतत्त्रयं तदेतदमृतᳲ सत्येन च्छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥ ब्राह्मणम् ॥ ॥ ३ ॥ ७ ॥ बृहदारण्यके तृतीयोऽध्यायः ॥ ३ ॥

दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥ १ ॥ स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्ते अतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥ २ ॥ स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहत्पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहः सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥ स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ॥ ४ ॥ स होवाच गार्ग्यो

SGDF
Sri Gangeshwari Digital Foundation

जिष्णुरुत्तमः। अन्येषां जेता अन्यतस्त्यजायी। विषासहिरसह्यः। आत्मनि हिरण्यगर्भे। आत्मन्वी चित्तवान्। चित्ताभिमानित्वात्तस्य

य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥ स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥ स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥ स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपँ हैवैनमुपगच्छति नाप्रतिरूपं अथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥ स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः सन्निगच्छति सर्वाँस्तानतिरोचते ॥ ९ ॥ स होवाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा असुरीति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वँ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १० ॥ स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्त्संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्गुणश्छिद्यते ॥ ११ ॥ स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वँ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥१२॥ स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते आत्मन्वी ह भवत्यात्मन्विनी

SGDF
Sri Gangeshwari Digital Foundation

स्वहृदि स्थितं स्वनियामकं भगवद्रूपमुपास्यैव मोक्षो भवति। देवतासु भगवन्तमुपास्य तत्तद्देवतासमीपं प्राप्य पुनः स्वहृदिस्थमुपास्यैव मोक्षो- भवतीत्यतो नैतावता विदितं भवतीत्युक्तम्। स्वहृदिस्थभगवद्रूपस्य स्वस्मिन्विशेषसम्बन्धज्ञापनार्थं बृहत्पाण्डुरवास इत्याद्यामन्त्रणम्। तेभ्यो नामभ्योऽप्यस्य शरीरे विशेषसम्बन्ध इत्यतः पाणिपेषणेन जीव- मुत्थापयामास भगवान्। येषां बहिरुपासनेन मोक्षस्तेषामपि हृद्युपासनं किञ्चित्कर्तव्यमेव। स्वहृदिस्थेन भगवद्रूपेण विशेषसम्बन्धदर्शनार्थ- मेव यत्रैष एतत्सुप्तोऽभूदित्यादि प्रश्नप्रतिवचनं समस्तम्। यत्र यस्मि- न्परमेश्वरे विज्ञानमये एष जीवः सुप्तोऽभूत्। यत्रेत्यधिकरणभूत एव य एष विज्ञानमय इति परामृश्यते। अन्योऽन्तर आत्मा विज्ञानमयः। विज्ञानं ब्रह्म चेद्वेदेति श्रुतेः। तानि यदा परमात्मा गृह्णाति तदैतत्पुरुषो जीवः स्वपितिनाम। स यत्र परमात्मा स्वप्नया नाड्या चरति तदा जीव उच्चावचं निर्गच्छतीव। सर्वदा महाराजवत्प्राणान् गृहीत्वा परमात्मा परिवर्तते। जीवस्तु कदाचिदेव स्वप्ने राजवदात्मानं

हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः॥ १३॥ स होवाचाजात- शत्रुरेतावन्नू ३ इत्येतावद्धीति नैतावता विदितं भवतीति स होवाच गार्ग्य उप त्वा यानीति॥ १४॥ स होवाचाजातशत्रुः प्रतिलोमं वै तद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञापयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयां चक्रे बृहन्पाण्डुरवासः सोम राजन्निति स नोत्तस्थौ तं पाणिना पेषं बोधयाञ्चकार स होत्तस्थौ॥ १५॥ स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽ- भूद्य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः॥ १६॥ स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्त- र्हृदय आकाशस्तस्मिन् शेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः॥ १७॥ स यत्रैतत्स्वप्नया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति स यथा

SGDF
Sri Gargeshwari Digital Foundation

पश्यति कदाचिद्ब्राह्मणवच्छ्वमार्जारादिवद्वा । आनन्दस्य परमात्मनोऽतिघ्नीं समीपम् । कुमारो रुद्रः । महाराजो वायुः । महाब्राह्मणो ब्रह्मा । न हि जीवो विज्ञानपूर्वकं प्राणानां विज्ञानमादत्ते । न च सर्वप्राणलोकदेवभूतानां स्रष्टा । 'आदित्यचन्द्रविद्युत्सु भूतेष्वादर्श एव च । गच्छत्पाश्चात्यशब्देन चक्षुश्छायागतं तथा । हिरण्यगर्भसंस्थं च सदोपास्य हरिं परम् । तद्देवसार्ष्णितामेत्य हृद्युपास्य हरिं पुनः । मुक्तिमेत्यथ यो बाह्यान्मुक्तिमेष्यति सोऽपि तु । हृदि किञ्चिदुपास्यैव विष्णुं मुक्तिमनुव्रजेत् । यानि सूर्यादिनामानि विष्णोस्तानि न संशयः । तदुक्तान्येव सूर्यादेराकृष्यैवोपचारतः । विशेषेण तु सम्बन्धो यतः स्वहृदि संस्थिते । जीवस्यातो न सोमादिनाम्नाऽऽहूतो हरिः परः । जीवं च वारयेत्तत्र यदा विष्णुः सनातनः । स्वप्नं पश्यति जीवोऽयं यदा विज्ञानरूपिणम् । सुषुम्नासंस्थितं विष्णुमेति तत्सुप्तिमेष्यति । सम्यग्ज्ञानमयाद्विष्णोरुत्थानं वाप्ययं व्रजेत् । प्राणानां चैव लोकानां देवानां प्राणिनामपि । सत्यसत्यो हरिः स्रष्टा पाता विलयकृत्तथा । नियन्ता मोक्षदश्चैव विष्णुरेव सनातन' इति नारायणश्रुतौ ॥ अजातशत्रुब्राह्मणम् ॥ ४ ॥ १ ॥

महाराजो जनपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥ १८ ॥ अथ यदा सुषुप्तो भवति तदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥ १९ ॥ स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति । तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥ अजातशत्रुब्राह्मणम् ॥ ४ ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

आधानमवस्थानं सूक्ष्मशरीरम् । प्रत्याधानं विधानं स्थूलशरीरम् । प्राणो नारायणः स्थूणा । 'वायुर्गोवत्सरूपेण सर्वप्राणिषु संस्थितः । सूक्ष्मदेहो गृहं तस्य वितानं स्थूल उच्यते । अन्नं दामात्मकं तस्य स्थूणा तु भगवान्हरिः । ध्यायत्येवं हि यो वायुं श्रोत्रादीन्मनसा सह । बुद्धिं च सप्तशत्रून्स विषयेष्वभिधावतः । असुरान्सन्निरुध्यैव वेत्ति नारायणं परम् । दक्षिणाक्षिस्थितं वायुं सप्तदेवा उपासते । अक्षीणज्ञानमनसः सदाशिवपुरःसराः । उपास्यमानं तैर्देवैर्मोक्षार्थं वायुमीश्वरम् । स्थूणया विष्णुना सार्धं यो विद्यात्सोऽन्नमश्नुते । अक्षय्यमेव मुक्तः सन्सर्वदुःखविवर्जितः । विश्वरूपं यशश्चेति नाम्ना विष्णू रमा तथा । वायुश्च संस्थिता नित्यं सर्वेषां दक्षिणाक्षिगाः । पूर्णत्वाद्विश्वतो विष्णो रमायाः स्त्रीषु पूर्णतः । वायोर्जीवेषु पूर्णत्वाद्यशोज्ञानसुखात्मकाः । प्राणाश्चैते प्रणेतृत्वादृषयो रुद्रपूर्वकाः । गौतमो नाम रुद्रस्तु सर्वज्ञत्वात्प्रकीर्तितः । भरद्वाजस्तु पर्जन्यो वाजमन्नं भरेद्यतः । वृष्ट्यैव विश्वामित्राख्य आदित्यो यत्प्रकाशनात् । विश्वं विज्ञापयन्नित्यमग्निस्तु जमदग्निकः । जातं मितं चात्ति यस्माद्वसिष्ठा-

---

यो ह वै शिशुꣳ साधनꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्ध्ययं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येवाधानमिदं प्रत्याधानं प्राणःस्थूणा अन्नं दाम ॥ १ ॥ तमेताः सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षँल्लोहिन्यो राजयस्ताभिरेनꣳ रुद्रोन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनका तयाऽदित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रोऽधरयैनं वर्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥ तदेष श्लोको भवत्त्वयर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहतं विश्वरूपं तस्याऽऽसत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेव तदाह तस्याऽऽसत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्ता ॥ ३ ॥ इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं

SGDF
Sri Gurgeshwari Digital Foundation

ख्यस्तु वासवः । वसतामुत्तमो यस्मात्पृथ्वी कश्यपनामिका । मेघवृष्टं पिबेद्यत्कं शयानैव हि सा सदा । द्यौरत्रिरिति सम्प्रोक्ता तत्स्थैर्हि हुतमद्यते । श्रोत्रदिङ्नासिकाबाहुदक्षिणाक्षिषु संस्थिताः । द्वितीयेन तु रूपेण देवा एते शिवादयः । एवमेषां तु नामानि वेत्ति यः सर्वभुग्भवेत् । सरस्वत्यष्टमी चैव वाचि संस्था विशेषतः । उपास्ते वायुमेवैकं सस्थूणं ब्रह्मवेदिता । ब्रह्मनामा सदा वायुरेनां वेत्ति विशेषतः । इति तां वेद यो विद्वान्सर्वात्ता स भविष्यती'ति नारायणीये ॥ शिशुब्राह्मणम् ॥ ४ ॥ २ ॥

विशरणावसादनयुक्तं सत् । ततं सर्वज्ञं च त्यम् । प्रलयेऽपि भगवदन्तरेव रता अक्षिता स्थितेति श्रीरन्तरिक्षम् । य एष तपतीत्यादित्यस्थो हिरण्यगर्भ उच्यते । मण्डले पुरुष इति भगवान्विष्णुः । एवमेव चक्षुर्दक्षिणेक्षन्पुरुषश्च । तस्यैवामूर्तरसस्य भगवतो नेति नेतीत्यादेशः । अतस्तस्मादमूर्तसारत्वादित्यर्थः । अथेत्यानन्तर्यार्थे । इति नेति नेति मूर्तामूर्तविलक्षण इत्यर्थः । उभयसादृश्यनिषेधार्थं द्विवारम् । इति नेतिनिषिध्यमानमप्येतस्मादन्यत्परं नास्ति एष एव परः । मूर्तामूर्ते त्वपरमे वैतदपेक्षया । मूर्तामूर्तमेवाध्यात्मं प्राणा इत्युच्यन्ते ।

जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्रिर्ह वै नामैतद्यदत्रिरिति सर्वस्याता भवति सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥ शिशुब्राह्मणम् ॥ ४ ॥ २ ॥

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं च मृतं स्थितं च यच्च सच्च त्यच्च ॥ १ ॥ तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥ २ ॥ अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्तस्य ह्येष रस इत्यधिदैवतम् ॥ ३ ॥ अथाध्यात्ममिदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः ॥ ४ ॥ अथामूर्तं प्राणश्चायमन्तरात्म-

SGDF
Sri Gangeshwari Digital Foundation

ब्रह्मणो वायोश्चामूर्तत्वात्। 'मूर्तामूर्तमिदं रूपं ब्रह्मणः प्रतिमात्मकम्। नैतत्स्वरूपमेतत्स्यात्तद्धि सर्वपरं सदा। श्रियो वायोर्विरिश्चाच्च येऽन्ये मूर्ता हि ते स्मृताः। मूरं पापं हि तेनाप्तं मूर्तमित्यभिधीयते। विशीर्णं चावसन्नं च तदेवातः सदुच्यते। पराधीनगतित्वाच्च स्थितमित्यभिधीयते। तस्य सारो विरिश्चस्तु तद्विरुद्धस्वभावकः। मूर्ताद्विरुद्धरूपत्वाच्छ्रीर्वायुश्चाप्यमूर्तकौ। सर्वज्ञौ च ततौ चैव नियतौ हरिणैव तौ। तयोः सारस्तु भगवान्हरिर्नारायणः परः। आदित्यमण्डले चैव चक्षुष्ष्वपि च सुस्थितः। तत्रैव संस्थितो ब्रह्मा मूर्तसारोऽपि तस्य च। विष्णुरेव परः सारस्तस्य रूपाण्यनेकधा। महारजनवासोवत्पाण्ड्वाविकवदेव च। विद्युत्पद्मेन्द्रगोपादिवह्निवत्सुखभास्वरः। नैवासौ मूर्तवद्विष्णुर्न च मूर्तरसोपमः। न चामूर्तोपमो देवः स एव परमः सदा। तस्यान्यदपरं सर्वं सत्यसत्यः स एकराट्। मूर्तामूर्तात्मकाः प्राणास्तेषां सत्यः स एव ही'ति नारायणश्रुतौ। प्रथमनिषेधेनैव मूर्तरससादृश्यमपि निषिद्धम्॥ मूर्तामूर्तब्राह्मणम्॥ ॥ ४ ॥ ३ ॥

न्त्राकाश एतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेक्षन्पुरुषस्तस्य ह्येष रसः॥ ५॥ तस्य हैतस्य पुरुषस्य रूपं यथा महारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तꣳ सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्॥ ६॥ मूर्तामूर्तब्राह्मणम्॥ ४॥ ३॥

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति॥ १॥ सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृतं(ता) स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवता जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य नाऽशास्ति वित्तेनेति॥ २॥ सा होवाच

SGDF
Sri Gangadhareswar Digital Foundation

आत्मा नारायणः । तस्यैव हि कामेन पत्यादिः प्रियो भवति । न हि पत्यादीनां जायादीनामहं प्रियः स्यामिति कामनामात्रेण प्रियत्वं भवति । भगवदिच्छयैव हि तद्भवति । अन्यथा जायार्थे पत्यर्थे इत्येव स्यात् । प्राधान्यादिदं सर्वं विदितम् । सर्वकारणत्वाच्च सर्वप्राधान्यं भगवतः । प्राधान्याप्राधान्ययोरपि स एव हि हेतुः । अन्यत्रात्मनो ब्रह्म वेद भगवदधीनत्वेन न वेद । तदनाश्रितत्वेन स्थानान्तरे च वेद । परादात्परतो लोकालोकस्यान्धे तमसि । इदं ब्रह्मादिकम् । यदयमात्मा । यत्रायमात्मा । अन्यत्र परिज्ञाने दोषोक्तेस्तत्र परिज्ञानं ह्युक्तं भवति । अन्यथा अन्यदात्मनो

मैत्रेयी येनाहं नामृतास्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥ स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषस एह्यास्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनः कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम् ॥ ५ ॥ ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्म वेदेति स्यात् । यदित्यव्ययत्वाद्यत्रेत्यपि भवति । यथा यस्मादित्यर्थे । 'सप्तसु प्रथमे'ति च सूत्रम् । दुन्दुभ्याघातादिदृष्टान्तोऽपि तदधीनत्वं तत्कारणत्वं च ज्ञापयति । न हि दुन्दुभ्यादिरेव तच्छब्दः । न च तदुपादानं स्थानान्तरे तदुपलम्भात् । नह्युपादानादुपादेयं स्थानान्तरे भवति । शब्दो हि स्थानान्तरे गत्वा प्रतिश्रुतित्वमुपैति । भगवदिच्छाया दृष्टान्तो दुन्दुभ्यादिः । न हि दुन्दुभिं पश्यन्पुरुषो दुन्दुभ्याघाते मुरजशब्दोऽयमिति गृह्णाति । एवं भगवन्तं जानन्नान्याधीनं जगदिति गृह्णाति । किं तु भगवदिच्छाधीनमित्येव । तदेव दर्शयति । स यथार्द्रैन्धाग्नेः स यथा सर्वासामपामित्यादिना । न ह्यग्निरेव धूमः । न चाप एव समुद्रः । न ह्यपामाप एवाश्रयः । किन्तु वरुणोऽपां खातो वा । स एव च समुद्र इत्युच्यते । एवमेव

भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ६ ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्यांच्छब्दांच्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥ स यथा वीणायै वाद्यमानायै न बाह्यांच्छब्दाच्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥९॥ स यथाऽऽर्द्रैन्धाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निःश्वसितानि ॥ १० ॥ स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषां स्पर्शानां त्वगेकायनमेवꣳ सर्वेषाꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषां गन्धानां नासिकैकायनमेवꣳ सर्वेषां रूपाणां चक्षुरेकायनमेवꣳ सर्वेषां शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ सङ्कल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तमेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेका-

SGDF
Sri Gargeshwari Digital Foundation

सैन्धवखिल्यस्य विलीनस्य समस्ताम्भसश्च वरुणोऽपां खातो वा समुद्राख्य आश्रयः। वरुणवदपां खातवद्वाऽनन्तोऽपारो भगवान् जीव एव विज्ञानघनाख्यो भूतसम्बन्धाज्ञातः संस्तल्लयमनु भगवन्तमाप्नोति। समुद्रे प्रास्तसैन्धवखिल्यवत्। समुद्रजलस्थानीया मुक्ताः बहव एकस्वभावाः। बहवो हि जलपरमाणवः। सामुद्रजलमेकाश्रयम्। मुक्तानां संज्ञाऽप्यन्यैर्न ज्ञायते शास्त्रं विना। संज्ञा नास्तीत्युक्त्वा अलं वा अरे इदं विज्ञानायेत्युक्तेर्न विजानातीत्युक्ते प्रतिज्ञाविरोधः। न च सर्वाज्ञानं पुरुषार्थः। 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति च। 'नानात्वेनाभिसम्बन्धास्तदा तत्कालभाविना। संयोगः प्रकृतेर्नैषां मुक्तानां तत्त्वदर्शनात्। प्रवर्तति पुनः सर्गे तेषां सा न प्रवर्तते। आनन्देन विना चैव भोगेन विषयेण च। सर्वे ते ब्रह्मणस्तुल्या आधिपत्यं न चैव ही'ति वायुप्रोक्ते। इवशब्दस्त्वस्वातन्त्र्यार्थे। न हि तदधीनं पृथगित्येवोच्यते। तस्मादमुक्तैर्न ज्ञायत इति संज्ञा नास्तीत्युक्तम्। 'पतिर्जाया प्रिया नैव स्वेच्छया तु भविष्यति। विष्णोरिच्छावशेनैव स्वयं च स्वप्रियो भवेत्। विष्णोरिच्छावशेनैव हन्ति ह्यात्मानमात्मना। स्वात्मानमप्रियं कृत्वा निरये पातयत्यपि।

यनमेवꣳ सर्वेषां वेदानां वागेकायनमेवम्॥११॥ स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहाणायैव स्याद्यतो यतस्त्वाददीत लवणमेवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः॥१२॥ सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति स होवाच (याज्ञवल्क्यो) न वा अरे अहं मोहं ब्रवीमीत्यलं वा अर इदं विज्ञानाय॥१३॥ यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरꣳ शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयाद्येनेदꣳ सर्वं

SGDF
Sri Gargeshwari Digital Foundation

प्राधान्येन हरेर्ज्ञानात्सर्वं विदितवद्भवेत् । ब्रह्मजात्यात्मकं वेत्ति नैव विष्णुवशं हि यः । ब्रह्माणं तं ततो ब्रह्मा पातयेत्तमसि ध्रुवम् । एवं क्षत्रात्मको वायुर्वित्तरूपश्च वित्तपः । पञ्चभूतानि विश्वे च देवा लोकाभिमानिनः । सर्वाभिमानिनी देवी मूलप्रकृतिरेव च । सर्वं विष्णौ स्थितं विष्णोर्जातं विष्णोर्वशे सदा । शङ्खशब्दो यथा शङ्ख-देवतावशगः स्थितः । तस्माद्वेदाः समुत्पन्ना विद्याख्या मूलिका श्रुतिः । सर्वोपनिषदश्चैव पञ्चरात्राख्यसंहिताः । ब्रह्मसूत्राणि वेदानां व्याख्यास्तासां च विस्तरः । सर्वमेतज्जगच्चैव निःसृतं तुरगाननात् । वरुणस्य वशे यद्वदाप एवं वशे हरेः । सर्वे बद्धाश्च मुक्ताश्च तारतम्यात्मना स्थिताः । यदि मुक्तस्य विज्ञानं गन्धादिविषये न चेत् । तथैव भगवद्रूपे स्वरूपे च परस्परम् । एवमज्ञानरूपां तां मुक्तिं को नाम वाञ्छति । तस्माद्विष्णोर्वशे सर्वे यथेष्टमुपभोगिनः । मुक्ताः सदा तारतम्यात्तिष्ठन्त्याब्रह्मणोऽखिला' इति हयग्रीवसंहितायाम्। 'सर्गे सर्गे तु यो नैव शब्दतोऽप्यन्यथा भवेत् । श्रुत्याख्यः स तु विज्ञेय इतिहासादिरर्थतः । भगवदृष्टमेवान्यैर्ब्रह्माद्यैर्दृश्यते यदि । ऋषिभेदस्तु तत्र स्याद्वेदो नाविष्णुनिर्गतः । वेद इत्येव विष्णूक्त-स्तपसा दृश्यते परैरि'ति च ॥ मैत्रेयीब्राह्मणम् ॥ ४ ॥ ४ ॥

भगवतो रूपं रूपं प्रति जीवाख्यः प्रतिबिम्बो बभूव । बभूवेति सदेव सोम्येदमग्र आसीदितिवदनादित्वार्थे । 'सुखदा

विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥ चतुर्थं मैत्रेयीब्राह्मणम् ॥ ४ ॥ ४ ॥

इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ १ ॥ इमा आपः सर्वेषां भूतानां मध्वासामपाꣳ सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ

SGDF
Sri Gangeshwari Digital Foundation

सर्वभूतानां पृथ्वी मधुवदुच्यते । पृथिव्याश्चैव भूतानि तथा सर्वाश्च देवताः । पृथिव्यादिषु देवेषु शरीरादिषु च स्थितः । एक एव परो विष्णुर्हयशीर्षस्वरूपधृक् । अनन्ततेजा नित्यश्च स एव ब्रह्म

रेतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद९ सर्वम् ॥ २ ॥ अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चाय-मध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदम-मृतमिदं ब्रह्मेद९ सर्वम् ॥ ३ ॥ अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चामध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽय-मात्मेदममृतमिदं ब्रह्मेद९ सर्वम् ॥ ४ ॥ अयमादित्यः सर्वेषां भूतानां मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽ-मृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽय-मेव स योऽयमात्मेदममृतमिदं ब्रह्मेद९ सर्वम् ॥ ५ ॥ इमा दिशः सर्वेषां भूतानां मध्वासां दिशा९ सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म९ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽ-मृतमयः पुरुषोऽमेव स योऽयमामेदममृतमिदं ब्रह्मेद९ सर्वम् ॥ ६ ॥ अयं चन्द्रः सर्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिन् चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानस-स्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद९ सर्वम् ॥ ७ ॥ इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चाय-मध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृत-मिदं ब्रह्मेद९ सर्वम् ॥ ८ ॥ अयं स्तनयित्नुः सर्वेषां भूतानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिंस्तनयित्नौ तेजोमयोऽ-मृतमयः पुरुषो यश्चायमध्यात्मं शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योयमात्मेदममृतमिदं ब्रह्मेद९ सर्वम् ॥९॥ अयमाकाशः सर्वेषां भूतानां मध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मि-न्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म९ हृद्याकाशस्तेजोमयो-ऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥ १० ॥ अयं धर्मः सर्वेषां भूतानामध्वस्य धर्मस्य सर्वाणि भूतानि मधु

SGDF
Sri Gangeshwari Digital Foundation

सर्वगम् । तदेव गुणपूर्णत्वाद्ब्रह्म सर्वमनूनतः । आत्मनामा परो विष्णुः सर्वगो यः प्रकीर्तितः । स एव हयशीर्षाख्यस्त्वधिदैवादिषु स्थितः । अराणामाश्रयौ यद्वद्बहिरन्तः प्रतिष्ठितौ । नाभिनेमी तथा विष्णुर्जीवानामाश्रयः स्थितः । स एव दशधा प्रोक्तो विष्णुर्मत्स्यादि-रूपकः । शतं नारायणाद्यात्मा विश्वाद्यात्मा सहस्रकः । परादिरूपो बहुधा सोऽनन्तात्माऽजितादिकः । भूताख्यः सर्वजीवानां विरिञ्चानां च सर्वशः । आत्मनाम्नां स एवैको राजाधिपतिरेव च । स्वामित्वा-द्राजशब्दोऽयमाधिक्यात्पालनात्तथा । अधिपश्चेति संप्रोक्तः पुरुषः पुरुषस्थितेः । पुराख्येष्वेव देहेषु हृत्पुर्यपि वसत्यसौ । नानेन किञ्चिदव्याप्तं नानेनाच्छादितं न च । नैवास्मात्पूर्वकं किञ्चिन्नैवास्मा-दपरं तथा । सर्वस्माद्बाह्यतश्चासौ सर्वस्मादन्तरस्तथा । व्याप्तेरात्मेति संप्रोक्तो ब्रह्मेति गुणपूर्तितः । स सर्वस्यापरोक्षज्ञ इति वेदानुशासनम् । विरिञ्चस्त्वात्मशब्दोक्तो मानुषं मनुरुच्यते । सत्यं च स्तनयित्नुश्च वायोरूपान्तरे स्मृते । एत एव स्वरे सत्ये जीवे चाध्यात्मसंस्थिताः ।

यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजो-मयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥ ॥ ११ ॥ इदꣳ सत्यं सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्त्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १२ ॥ इदं मानुषं सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽय-मात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १३ ॥ अयमात्मा सर्वेषां भूतानां मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽ-मृतमयः पुरुषो यश्चायमध्यात्ममात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १४ ॥ स वा अयमात्मा सर्वेषां भूतानामधिपतिस्सर्वेषां भूतानाꣳ राजा तद्यथा रथनाभौ च

SGDF
Sri Gangeshwari Digital Foundation

तेषां नियामको विष्णुस्तत्र तत्रैव संस्थितः । जीवे स्थितश्चात्मनामा सौवरः स्वरगः स्मृतः । सत्यगः सत्यनामाऽसौ धर्मगो धर्म एव च । मनोः स्वायम्भुवस्याख्या मानुषेत्येव देहिषु । बहिश्च तद्गतो विष्णुर्मानुषेत्येव कथ्यते । प्रातिश्रुत्क इति श्रोत्रे तैजसा विद्युति स्थितः । इति नानाविधैर्नामसमूहैर्विष्णुरिज्यते । दध्यङ्ङाथर्वणोऽश्विभ्यामेतां विद्यामदात्पुरा । हयग्रीवब्रह्मविद्येत्येषा ब्रह्मादिभिर्धृते'ति । प्रत्यैरयतं प्रतिसमधत्तम् । ऋतायन् सत्यं कुर्वन् । कक्ष्यं नारायणकवचम् । त्वाष्ट्रं त्वष्टुः पुत्रेण विश्वरूपेणेन्द्रायोक्तम् । सनये लाभाय । दंसः कर्म । स्तनयित्नुर्वृष्टिमिव । तस्यां विद्यायां परस्योक्तायां तव शिरश्छेत्स्यामीतीन्द्रेण दधीचं प्रत्युक्ते सोऽश्विभ्यामावां ब्रवीहीत्युक्त इन्द्रेणोक्तमाह । तदाश्विभ्यां पाव इत्युक्त्वा तच्छिरः छित्वान्यत्र निधाय अश्वशिरः सन्धितं तेन विद्यायामुक्तायां तस्मिन्निन्द्रेण छिन्ने

रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे एत आत्मानः समर्पिताः ॥ १५ ॥ इदं वैतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् तद्वान्नरा सनये दꣳस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥ १६ ॥ इदं वैतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् आथर्वणायाश्विना दधीचेऽश्व्यꣳ शिरः प्रत्यैरयतꣳ स वा मधु प्रवोचदृतायं त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ ॥ १७ ॥ इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरस्स पक्षी भूत्वा पुरः पुरुष आविशदिति स वा अयं पुरुषः सर्वासु पूर्षु पुरि शयो नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृतम् ॥ १८ ॥ इदं वैतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् । रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ १९ ॥ पञ्चमं मधुब्राह्मणम् ॥ ४ ॥ ५ ॥

SGDF
Sri Gurgeshwari Digital Foundation

पूर्वशिरः सन्धितं पूर्वं जानन्नपीन्द्रः पश्चाद्विश्वरूपाच्छुश्रावेति पुनर्नवत्वायेति न विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामित्यनेन विरोधः। मधुब्राह्मणम्॥ ॥ ४ ॥ ५ ॥

'पाराशर्यो जातूकर्ण्यः पराशरसुतावुभौ। विप्रायामेव भार्यायां तृतीयः कृष्ण एव चे'ति ब्रह्माण्डे। 'परस्य ब्रह्मणो विष्णोर्हयशीर्षादधीतवान्। ब्रह्मविद्यामिमां ब्रह्मा ततः सनक एव चे'ति गारुडे॥ इति वंशब्राह्मणम्॥ ४ ॥ ६ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्बृहदारण्यकोपनिषद्भाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥१॥ आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानभिम्लात आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्याꣳ सैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो बैजवापायनाद्बैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यः आसुरायणाच्च यास्काच्चासुरायणस्त्रैवर्णेस्त्रैवर्णिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो मांटेर्माण्टिर्गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्यांच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपादो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनः प्रध्वंसनात्प्रध्वंसन एकऋषेरेकऋषिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोस्सनारुः सनातनात्सनातनः सनकात्सनकः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ ३ ॥ षष्ठं वंशब्राह्मणम् ॥ ४ ॥ ६ ॥ चतुर्थोऽध्यायः ॥ ४ ॥

SGDF
Sri Gangeshwari Digital Foundation

'होतर्यग्नौ वाचि चैव यो विष्णुं मुक्तिदं स्मरेत्। नित्यं स मुच्यतेऽध्वर्युस्सूर्यचक्षुष्षु यः स्मरेत्। अधिकः प्रकाश एवास्य मुक्तान्वन्येभ्य इष्यते। मुक्तेभ्योऽपि तथोद्गातृवायुप्राणेषु यः स्मरेत्। पूर्णचन्द्रं सदा पश्येदधिकाह्लादसंयुतः। मनोब्रह्मनिशेशेषु यो विष्णुं सर्वदा स्मरेत्। अप्रयत्नेन लोकं स विष्णोर्याति न संशयः। होत्रग्नयादीनि नामानि विष्णोः सर्वाणि मुख्यतः। तत्सम्बन्धात्तदन्येषां स वै होत्रादिकर्मकृत्। तस्माद्धोत्रग्निवागादेरैक्यं श्रुतिषु

॥ ॐ ॥ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कःस्विदेषां ब्राह्मणानां अनूचानतम इति स ह गवां सहस्रमवरुरोध दश दश पादाः एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥ तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सौम्योदज सामश्रवा३ इति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रवीतेत्यथ ह जनकस्य वैदेहस्य होता आश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोसी३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयꣳ स्म इति तꣳ ह तत एव प्रष्टुं दध्रे होताऽश्वलः ॥ २ ॥ याज्ञवल्क्येति होवाच यदिदꣳसर्वं मृत्युनाप्तꣳ सर्वं मृत्युनाभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति होत्रर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः साऽतिमुक्तिः ॥ ३ ॥ याज्ञवल्क्येति होवाच यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्यध्वर्युणर्त्विजा चक्षुषाऽऽदित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः साऽतिमुक्तिः ॥ ४ ॥ याज्ञवल्क्येति होवाच यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳसर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः साऽतिमुक्तिः ॥ ५ ॥ याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्भणमिव केनाऽऽक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य

SGDF
Sri Gangeshwari Digital Foundation

चोच्यते। होत्रादिष्वेव चतुर्षु वासुदेवादिरूपधृक्। व्यवस्थितो हि तज्ज्ञानादचिरान्मुक्तिमेष्यति। मुक्तिनामा स भगवान्मोक्षदत्वात्प्रकीर्तितः। मनुष्येभ्योऽधिकसुखं देवेभ्यो यत्प्रयच्छति। मुक्तावप्यतिमोक्षः स तेन देवः प्रकीर्तितः। एता ह्युपासना नित्यं नैव योग्या नृणां श्रुताः। अतिमुक्तिप्रदा यस्माद्देवाद्यास्तासु योगिनः। याज्याशस्यापुरोवाक्यासंस्थितं यो हरिं स्मरेत्। सर्वप्राणभृतामीशः स भवेन्नात्रसंशयः। उज्ज्वलच्छब्दवद्वाविष्वेकमेव हरिं स्मरेत्। सर्वलोकाधिपत्यं स लभते पुरुषोत्तमात्। मनसो देवता ब्रह्मा सर्वदेवेषु संस्थितः। देवब्रह्ममनस्स्वेकं यो विष्णुं सर्वदा स्मरेत्। अनन्तनामकं तेन तल्लोकं नित्यमश्नुते। निश्चयेन विमोक्षत्वाद्विश्वे देवा अनन्तकाः। अनन्तनामकं विष्णुमुपास्यापि ह्यनन्तकाः। पुरोवाक्यादिपु प्राणादिषूपासां करोति यः। एकमेव हरिं लोकव्याप्तमेव

ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षा अथ सम्पदः॥ ६॥ याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होताऽस्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्यजतीति यत्किञ्चेदं प्राणभृदिति॥७॥ याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अतिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोकः॥ ८॥ याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति॥ ९॥ याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्या अपानो याज्या व्यानः शस्या किं

SGDF
Sri Gurgeshwari Digital Foundation

लभेदसौ। अत्रापि वासुदेवाद्याश्चत्वारो देवताः स्मृताः। देवानां पदहेतुत्वात्सम्पन्नाम्न्य उपासनाः। मुक्तौ भोगविशेषस्य हेतुत्वाच्च प्रकीर्तिताः। एताश्च देवतायोग्या न मनुष्येषु कुत्रचित्। मनुष्याणां ज्ञानमात्राद्गुणाधिक्यं भविष्यती'ति परमश्रुतौ ॥ इत्याश्वलब्राह्मणम् ॥ ॥ ५ ॥ १ ॥

आकाशं परमात्मानमेव। 'केचित्तु मानुषा मुक्तिमनुक्रम्यैव देहतः। देहपाते तु देहस्य दोषान्भुक्त्वैव सर्वशः। मरणोच्छूनतादींस्तु स्वकीयारब्धकर्मजान्। देहे क्षीणे तु गच्छन्ति दृष्ट्वा विष्णु-

---

ताभिर्जयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकꣳ शस्यया ततो ह होता आश्वल उपरराम ॥ १० ॥ इत्याश्वलब्राह्मणम् ॥ ५ ॥ १ ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ १ ॥ प्राणो वै ग्रहः सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धान् जिघ्रति ॥ २ ॥ वाग्वै ग्रहः स नाम्नातिग्रहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ३ ॥ जिह्वा वै ग्रहः स रसेनातिग्रहेण गृहीतो जिह्वया हि रसान्विजानाति ॥ ४ ॥ चक्षुर्वै ग्रहः स रूपेणातिग्रहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥ श्रोत्रं वै ग्रहः स शब्देनातिग्रहेण गृहीतः श्रोत्रेण हि शब्दान् शृणोति ॥ ६ ॥ मनो वै ग्रहः स कामेनातिग्रहेण गृहीतो मनसा हि कामान्कामयते ॥ ७ ॥ हस्तौ वै ग्रहः स कर्मणातिग्रहेण गृहीतो हस्ताभ्याꣳ हि कर्म करोति ॥ ८ ॥ त्वग्वै ग्रहः स स्पर्शेनातिग्रहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ॥ ९ ॥ याज्ञवल्क्येति होवाच यदिदꣳ सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोपामन्नमप पुनर्मृत्युं जयति ॥ १० ॥ याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामंत्याहो३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥ ११ ॥ याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥ १२ ॥ याज्ञवल्क्येति

SGDF
Sri Gangeshwari Digital Foundation

मनुज्ञया । पुनरत्रैव तिष्ठन्ति नित्यानन्दैकभोगिनः । देहादुत्क्रम्य देवास्तु यान्ति विष्णुं सनातनम् । देहादुत्क्रम्य यातानां देवा भागत एव तु । स्वाधिदैवं व्रजन्त्यद्धा भागतोऽनुव्रजन्ति तान् । आकाशाख्यं स्वरूपं तु विष्णुस्तद्धृदि संस्थितः । भागतो भागतश्चैतानन्नुयाति जनार्दनः । ज्ञानस्थितेन रूपेण देवानां मुक्तिदो हरिः । पुण्यस्थितेन रूपेण स्वर्गं निरयमन्यगः । रहस्यमेतद्देवानां विदुः कर्मेति मानुषाः । तस्मान्नैतज्जनेष्वेतद्विष्णोः कर्म प्रकाशयेदि'ति च । अत एव याज्ञवल्क्यो न जनेषूवाच । 'कर्मनामा तु भगवान्फलकर्तृत्वतो हरिः । पातनात्पापनामाऽसौ पुनातेः पुण्यनामवानि'ति भारते । इत्यार्तभागब्राह्मणम् ॥ ५ ॥ २ ॥

पारीक्षिताः प्रद्युम्नाः । अश्वमेधयाजिन इन्द्राः । 'प्रद्युम्नः कामनामाऽसौ पारीक्षित इतीरितः । सर्वेक्षणात्परो विष्णुः परीक्षिदिति कीर्तितः । तत्पुत्रत्वात्कामदेवः पारीक्षित इति स्मृतः । शताश्वमेधयाजित्वादिन्द्रा एवाश्वमेधिनः । अतीतानागतानां च

होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीꣳ शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्त्तभागाऽऽवामेवैतस्य वेदिष्यावो न नावेत्तत्सजन इति तौ होत्क्रम्य मन्त्रयांचक्राते तौ ह यदूचतुः कर्म हैव तदूचतुरथ यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥ १३ ॥ इत्यार्तभागब्राह्मणम् ॥ ५ ॥ २ ॥

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्यव्रजाम ते पतंजलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति तं यदा लोकानामंतानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन् स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥ १ ॥ स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेध-

SGDF
Sri Gargeshwari Digital Foundation

कामानां वज्रिणामपि । एकमेव हि मुक्तानां स्थानं वेदोदितं सदा । इन्द्रनामा तु गरुडः सामर्थ्यादेव कथ्यते । तस्य रूपद्वयं नित्यं सौपर्णं पौरुषं तथा । तत्र पौरुषरूपी सन्भूत्वा सौपर्णरूपवान् । कामदेवानुपादाय मुक्तौ वायोः प्रयच्छति । वायुस्तान्स्वशरीरस्थान्कृत्वेन्द्रा यत्र मुक्तिगाः । प्रद्युम्ननामके विष्णावेवं वायुर्हि मोक्षदः । तस्मात्सर्वोत्तमो वायुर्विविधं तु यदष्टकम् । देवानृषीन्पितॄन्यक्षान् गन्धर्वान्मानुषोरगान् । असुरांश्च वशे नित्यं नयत्यमितपौरुषः । सम्पूर्णांश्च सुपर्णेशशेषेन्द्रान्स्तत्स्त्रियोऽपि च । अष्टौ नयत्युन्नयति वशीकृत्य स्वयं प्रभुः । अतो व्यष्टिः समष्टिश्च वायुरेवाभिधीयते । एवं व्यष्टिं समष्टिं च यो वायुं वेद तत्त्वतः । तत्परं च हरिं नित्यं मुच्यते संसृतेः पुमानि'ति परमसंहितायाम् । 'चरकस्तीर्थसञ्चारी वित्तार्थी करकः स्मृत' इत्यभिधानम् । 'अहर्मुहूर्तं विज्ञेयमहर्मासोऽपि भण्यते । अहर्दिनं प्रकाशश्च क्वचिज्ज्ञानं बलं तथे'ति च । 'मुहूर्तमष्टभागोनघटिकाद्वयमिष्यते । क्वचिद्द्विघटिकाऽपि स्यात्क्वचित्स्यात्तावदुत्तर' इति कालनिर्णये । 'द्वात्रिंशत्तु मुहूर्तानां दिनमेकं विदुर्बुधाः । त्रिंशन्मुहूर्तमथवा मुहूर्तोन्मानभेदत' इति च । 'सप्तकोटिं च लक्षाणां चतुर्दश च नित्यशः । अष्टाविंशत्सहस्रं च सप्तांशशतपञ्चकम् । सौरो रथस्त्वहोरात्रात्परियाति दिवि स्थितः । तत्त्रिभागाधिकं चक्रं मानसोत्तरगं चरेत् । नृणां कार्तयुगानां तु योजना

याजिनो गच्छंतीति क्व न्वश्वमेधयाजिनो गच्छंतीति द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकस्तꣳ समंतं पृथिवी द्विस्तावत्पर्येति ताꣳ समंतं पृथिवीं द्विस्तावत्समुद्रः पर्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्नित्येवमिव वै स वायुमेव प्रशशꣳस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद ततो ह भुज्युर्लाह्यायनिरुपरराम ॥२॥ भुज्युब्राह्मणम् ॥५।३॥

SGDF
Sri Gangeshwari Digital Foundation

मानतो भवेत् । यावत्सूर्यरथो याति दिवारात्रेण पार्श्वयोः । सूर्यस्य तावदेव स्यात्प्रकाशः सर्वतस्तथा । तमोऽन्धं द्विगुणं तस्मात्काठिण्यात्पृथ्विनामकम् । ततो मण्डोदकं चापि द्विगुणं परिकीर्तितम् । पञ्चाशत्कोटिविस्तारमेवमण्डान्तमुच्यते । ततस्त्वण्डं च सौवर्णं तद्भिन्नं हरिणा पुरा । सुषिरं सर्वतो दिक्षु क्षुरधारासमं ततः । सुपर्णो वायवे तेन मुक्तान्कामान्प्रयच्छती'ति तत्त्वसंहितायाम् ॥ भुज्युब्राह्मणम् ॥ ॥ ५ ॥ ३ ॥

यत्साक्षादपरोक्षात् । साक्षादेवापरोक्षमत्ति । अनुभवति स्वरूपमन्यच्च सर्वं पश्यतीति साक्षादपरोक्षात् । आपरोक्ष्येण पश्यतामप्यन्येषां भगवत्प्रसादादेव दर्शनं भवति । न भगवतोऽन्यापेक्षयेति साक्षादिति विशेषणम् । अनन्यापेक्षस्याप्यपूर्णत्वं भवतीत्यतो ब्रह्मेति । अन्येषां नियन्तृत्वं चास्तीत्यत आत्मा । अन्यनियन्तृत्वेऽप्यन्यापेक्षा नास्तीत्यतः सर्वान्तरः । सर्वं सामर्थ्यं स्वान्तरेवास्तीति । जीवेश्वराभेदनिवृत्त्यर्थं त आत्मेति । साक्षादपरोक्षत्वादिगुणैरेव भेदे सिद्धेऽपि परमार्थतोऽपि जीवेश्वराभेदनिवृत्त्यर्थं त आत्मेति । तत्र प्रधानतात्पर्यज्ञापनार्थं पुनः पुनरभ्यासः । देवतान्तरस्यापीदं लक्षणं समानमिति पृच्छति यथा विब्रूयादित्यादिना । चतुष्पात्त्वादिलक्षणं गोरश्वस्यापि यथा सममेवमेव साक्षादपरोक्षत्वादिलक्षणं तत्तद्देवतावादिभिस्तस्यास्तस्या

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा सर्वान्तरो यो व्यानेन व्यानिति स त आत्मा सर्वान्तर य उदानेनोदानिति स त आत्मा सर्वान्तरो यः समानेन समानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥ १ ॥ स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो न

SGDF
Sri Gangeshwari Digital Foundation

अङ्गीक्रियत एव। अतो विशेषनाम वक्ति। अत इति। अतोऽन्यद्विष्णोरन्यदार्तम्। अ इति विष्णोर्हि नाम। 'न ते विष्णो' 'परो मात्रये'त्यादि श्रुतिप्रसिद्धं विष्णोर्लक्षणम्। न दृष्टेर्द्रष्टारमित्यादिना वक्ति। 'विनैवान्यप्रसादेन पूर्णसर्वगुणात्मकम्। पश्यन्ननुभवत्येव स्वरूपं केशवः प्रभुः। पश्यत्यव्यवधानेन सर्वं चान्यज्जडाजडम्। साक्षादेवापरोक्षात्स विष्णुरेव ततः स्मृतः। साक्षाच्छब्दः स्वतन्त्रत्वमपरोक्षस्त्वनावृतिम्। अदनं भोग उद्दिष्टस्तस्माद्विष्णुस्तथा स्मृतः। ब्रह्मासौ गुणपूर्णत्वादात्मा सर्वनियन्तृतः। अनियम्यत्वतो नित्यं सर्वैः सर्वान्तरः स्मृतः। प्राणादिपञ्चरूपो यो वायुः सर्वनियामकः। नियन्ता परमो विष्णुर्वायोस्तस्यापि सर्वदा। न दृश्यश्चक्षुषा चासौ न मनोबुद्धिगोचरः। अनन्तत्वान्महाविष्णुरवाच्योऽश्राव्य एव च। यद्यप्येते गुणाः सर्वे विष्णोरेव न चान्यगाः। तथाप्येतैर्गुणैर्युक्तानज्ञाः प्राहुः शिवादिकान्। अनाम्नैव ततो विष्णुमाहुर्वेदा अदोषतः। अदोषत्वाद्गुणोद्रेकाद इत्युक्तो हरिः स्वयम्। अगम्यत्वाच्च बुध्यादेरतोऽन्ये सर्व एव तु। ब्रह्मरुद्रादयो जीवा दुःखिनस्तत्प्रसादतः। दुःखमुक्ता निजानन्दं प्राप्नुयुर्नित्यमञ्जसा। मुक्तानामपि सर्वेषां विष्णुरेव नियामकः। पूर्णानन्दस्य तस्यैव मुक्ता विप्रुट्सुखात्मकाः। तारतम्येन तिष्ठन्ति ब्रह्मा तेष्वधिकः सदा। यथा चन्द्रात्सदा भिन्नाः सर्वे तुहिनबिन्दवः। एवं विष्णोः सदा भिन्ना मुक्ता ब्रह्मादिका गणाः। एवं नियन्ता भगवान् पूर्णसर्वगुणार्णवः। एक एव परो विष्णुरनियम्यः सदोदित'इत्यादि बृहच्छ्रुतिः। 'आर्तिर्दुःखं समुद्दिष्टमनार्तो विष्णुरुच्यत' (रच्युत) इति च। अतोऽन्यदार्तमित्येतस्माच्च जीवानां भेदः प्रसिद्धः। न हि जीवादन्यस्यार्तिर्युज्यते। अतो जीवेभ्योऽ-

---

दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारꣳ शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥ उषस्तब्राह्मणम् ॥ ५ ॥ ४ ॥

SGDF
Sri Gangeshwari Digital Foundation

न्यश्च विष्णुरेव। तदन्ये ब्रह्मरुद्रादयः सर्वे जीवा एवेति सिद्धम्। 'प्रकृतिस्त्वतिसामीप्यादनार्तापि पृथङ्ग तु। उच्यते न स्त्रियो यद्वत्त्रयस्त्रिंशत्सु भेदिता' इति च॥ इत्युषस्तब्राह्मणम्॥ ५॥ ४॥

यदेव साक्षादिति पुनः प्रश्नो मुक्तानामपि भगवतो भेदोऽस्तीति ज्ञापयितुम्। यदेव ब्रह्म तदन्ये ब्रह्मादयो मुक्ता अपि यन्नैव भवन्ति कदाचन। तमेव मे व्याचक्ष्व मुक्तजीववैलक्षण्येन सहेति द्वितीय-एव शब्दार्थः। स तु भगवान्स्वत एवातीताशनायादिरतीतानागत-वर्तमानकालेषु ब्रह्मादयस्तु तं विदित्वा तत्प्रसादादेव पश्चादत्येष्यन्ति एतं वैतमित्येतादृशैर्गुणैः साक्षादपरोक्षत्वजीवभेदादिभिर्युक्तमित्यर्थः भिक्षाचर्यं चरन्ति मुक्ता अपि ब्रह्मादयस्तस्मादेव परमेश्वराद्विलुडानन्द-मेव भिक्षन्तो वर्तन्ते। ब्रह्माणनान्मुक्ता एव ब्राह्मणशब्देनोच्यन्ते। न हि ज्ञानादनन्तरं संन्यासस्य कर्तव्यता। येषां तद्योग्यता तेषामपि ज्ञानार्थत्वेनैव संन्यासः। मुक्ता अपि यं भिक्षन्ते सोऽतिपूर्णमहानन्दो भगवान्स्वत एव। तदन्ये ब्रह्मादयो मुक्ता अपि तत एव विलुडानन्द-भिक्षुका इति विशेषः। तथापि तेषामेषणातीतत्वान्न दुःखम्। पुत्रस्य वित्तस्य च लोकार्थत्वाल्लोकैषणायामन्तर्भावः। वित्तस्यापि प्रायः पुत्रार्थत्वात्पुत्रैषणायां लोकैषणाया अपि दुःखरूपत्वात्सापि तेषां नास्त्येवेति दर्शयितुमुभे ह्येते एषणे एव भवत इत्याह। उभे अपि दृष्टादृष्टविषये एषणात्वाद्दुःखरूपे एवेत्यर्थः। पुत्रवित्तैषणे उभे अपि दृष्टविषयत्वादेकैवेत्युभे एवेत्युक्तम्। द्वितीयो ब्राह्मणो ब्रह्माणितुं

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तमेव मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वा ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव

SGDF
Sri Gangeshwari Digital Foundation

योग्यः । पाण्डित्यमागमजज्ञानम् । बाल्यं युक्तिसहितम् । बलयुक्तत्वात् । मौनमुपासनाजम् । अमौनमपरोक्षज्ञानम् । निर्विद्य नितरां प्राप्य लब्ध्वा । विद्लृ लाभ इति धातोः । अथ ब्राह्मणो मुक्तो भवतीत्यर्थः । स मुक्तो येन केनापि वर्तयन्नीदृश एव भिक्षुक एव । न कदाचित्स्वतन्त्रो भवति । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति च वक्ष्यति । मुक्तविषयं चैतत् । अत्र पिताऽपिता भवतीत्यादि तत्प्रस्तावे 'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं ही'ति भगवद्वचनम् । तत्रैव मुक्तानामानन्दतारतम्यं चोक्तम् । 'स यो मनुष्याणां राद्धः समृद्धो भवती'त्यादिना । श्रोत्रियत्वावृजिनत्वाकामहतत्वानां मुक्तेष्वेव मुख्यत्वात् । यश्च श्रोत्रिय इति ह्यभ्यासः । न ह्यमुक्ता अवृजिना अकामहता वा । न च श्रुतिफलं सम्यक्प्राप्ताः । श्रुतिफलप्राप्तिर्हि श्रोत्रियत्वम् । 'सर्वे विमोहितधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावा'इति भागवते शरीरसम्बन्धिनां मोहादियुतत्वम् । मोहादियुतानां न श्रोत्रियत्वमदुःखत्वमकामहतत्वं वा । 'वृजिनं व्रजनं दुःखं क्लेशो बाधेति चोच्यत'इत्यभिधानम् । न च देवादिपदाकामानामिन्द्रादिपदाकामानां कश्चिद्विशेषो दृश्यते । अतो मुक्तविषयमेवैतत् । 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति' । 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरे' । 'मुक्तानां परमागतिः' । 'कृष्णो मुक्तैरिज्यते वीतमोहैरि'त्यादिवचनैश्च भगवदनुग्राह्यत्वं तदानन्दानवाप्तिश्च मुक्तानां दृश्यते । 'बह्वभ्यासात्त आत्मेति मुक्तौ जीवेशयोर्भिदा । प्रधानतत्परत्वेन दृश्यतेऽत्यादरात्सदा । महा-

---

भवतस्तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्तं ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥ कहोलब्राह्मणम् ॥ ५ ॥ ५ ॥

SGDF
Sri Gurgeshwari Digital Foundation

तात्पर्ययोगाच्च स एवार्थोऽवगम्यते । तात्पर्यं परमं विष्णोरत्युद्रेके विशेषतः । सर्वश्रुतिस्मृतीनां च दृश्यतेऽन्यत्तदर्थतः । स च जीवेशयोर्भेदे सर्वोद्रेको हि युज्यते । बह्वभ्यासस्त आत्मेति श्रुतावादरतस्ततः । ममात्मेति वचो यत्र विष्णोरपि च दृश्यते । देहस्यापि स्वरूपत्वज्ञापनं तत्प्रयोजनम् । न ह्यप्रयोजकं वेदपदं वर्णोऽथवा स्वरः । देहस्वरूपता विष्णोर्न ममेति पदं विना । सम्यक् ज्ञापयितुं शक्या ततस्तत्पदमिष्यते । ततस्त आत्मेति वचो भेदाभावे न युज्यते । भिक्षया भक्षणं तस्मादानन्दस्य ततोऽवदत् । मुक्तानामेकदेशत्वं ब्रह्मानन्दव्यपेक्षया । विप्लुट्त्वं प्रतिबिम्बत्वं श्रुतिषूक्तं हि सर्वशः । तथापि पूर्णानन्दत्वममुक्तानां व्यपेक्षया । ब्रह्मादेस्तारतम्यं च मुक्तावेव सदातनम् । दृष्टादृष्टेषणानाशान्निर्दुःखत्वं च सर्वदा । परब्रह्मत्ववचनं मुक्तानां यत्र दृश्यते । जीवेषु ब्रह्मशब्दोक्तेः परत्वं तु विमुक्तितः । तत्परब्रह्मता तेषां बद्धजीवोच्चता मता । ततो ब्रह्माणने योग्यः पाण्डित्यं प्राप्नुयात्परम् । पाण्डित्यमागमज्ञत्वं बाल्यं युक्तिसहायता । मौनं तूपासनासिद्धिरमौनं भगवद्दृशिः । एतान्याप्य भवेन्मुक्तिर्मुक्तो वै भिक्षुको भवेत् । न ह्यन्यभिक्षितं विष्णुर्दद्यान्नियमतः क्वचित् । मुक्तस्य भिक्षितं सर्वं दद्यान्नियमतो हरिः । अयोग्यभिक्षणं तेषां न कदाचित्तु युज्यते । येन केनापि नैतेषां भिक्षावृत्तिर्विनश्यति । प्रथमो ब्राह्मणो मुक्तो द्वितीयो योग्य उच्यते । अपरोक्षविन्मुक्तयोस्तु तार्तीयेनोभयोर्ग्रहः । अतो मुक्ता अमुक्ताश्च न स्वतन्त्राः कदाचन । स्वतन्त्रस्तु स एवैको भगवान्पुरुषोत्तम' इत्यादि ब्रह्मतर्के । 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' ॥ इत्यादिना च भेदेन महोत्कर्षे परमतात्पर्यं सर्वशास्त्राणामाह ॥ इति कहोळब्राह्मणम् ॥ ५ ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

मुक्तानां तारतम्यं हि गार्गिब्राह्मणेनोच्यते । लोका इति मुक्तानामानन्दानुभवाः स्वरूपभूताः । अप्सु वायाविति स्वरूपस्यैव प्रस्तुतत्वात् । अनतिप्रश्न्यां वै देवतामतिपृच्छसीति देवतास्वरूप-प्रश्नस्यैवावगम्यमानत्वाच्च । न चोपरितनलोकेष्वधस्तनलोका आश्रिताः । न च वायुर्गन्धर्वलोकाश्रितः । वाय्वाश्रयत्वश्रुतेः सर्वलोकानाम् । 'वायुना हि सर्वे लोका नेनीयन्त' इत्यादिना । 'सप्तस्कन्धगतो लोकान्यो बिभर्ति महाबल'इति हरिवंशेषु । न चानतिप्रश्नत्वं लोक-मात्रस्यास्ति । अधस्तनेषु चोपरितना लोकास्तिष्ठन्ति । न च मरुता-मेकोऽपि गन्धर्वलोकादवरो विद्यते । उक्तं च । 'आ पिबन्त्यखिला-न्भोगानित्यापश्चक्रवर्तिनः । मुक्तास्तेषां वायुसुतश्चक्रो नाम व्यपाश्रयः । मुक्तस्तस्य च मुक्तस्तु मरुद्गन्धर्वनामवान् । सुतो वायोस्तत्सुखानां मौक्तानामन्तरिक्षगः । मरुतामेक एवासावन्तरिक्षस्तु वायुजः । तत्सुखानां तु मौक्तानामानन्दाः सूर्यरूपकाः । सौराणां चापि मौक्तानामानन्दाश्चन्द्ररूपकाः । आह्लादनाच्चन्द्रनामा देवोऽसावनि-रुद्धकः । स एव चन्द्रमाविश्य स्थितस्तन्नामकोऽपि सः । अनिरुद्ध-सुखानां च मौक्तानामिन्द्र आश्रयः । नक्षत्रनामवानिन्द्रो नैवान्यः क्षत्रियोऽस्य हि । विद्यते त्रिषु लोकेषु ब्रह्माद्यास्तूर्ध्वलोकगाः ।

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदꣳ सर्वमप्स्वोतं च प्रोतं चेति कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गंधर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु

SGDF
Sri Gargeshwari Digital Foundation

आनन्दानां तथेन्द्राणां मौक्तानां देव आश्रयः। देवेति लिङ्गनाम स्याल्लिङ्गात्मा रुद्र उच्यते। इन्द्राश्रयः शिवस्यापि सुखानां मुक्तिगामिनाम्। शिवो हीश्वरनामा स्यात्तत्पारम्यात्सरस्वती। इन्द्रेत्युक्ता तत्सुखानां ब्रह्माधिर्मुक्तिगामिनाम्। तत्सुखानां परं ब्रह्म मुक्तिगानां पराश्रयः। एवमेव च संसारे बिम्बत्वादुत्तरोत्तरम्। न परब्रह्मणः कश्चिदाश्रयः स्वाश्रयं यतः। तस्याश्रयोऽस्ति वेत्येवं पृच्छतोऽपि शिरः सदा। भिद्यते पर्वतैरन्धे तमसिस्थस्य दैवतैः। तस्माद्ब्रह्म परं नित्यं ज्ञेयं पूर्णमनाश्रयमि'ति ब्रह्माण्डे। 'रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः। ब्रह्मा मामाश्रितो नित्यं नाहं कश्चिदुपाश्रित' इति भारते। 'अथात आनन्दस्य मीमांसा भवती'त्यादेश्च। संसाराल्लुप्तानां मुक्तानां कानि सुखानि लोकाः रोचमानानि कानि लोकाः। लीनं सुखं क इत्युक्तं कं नाम क्षीयतेऽत्र यत्॥ इति गार्गिब्राह्मणम्॥ ॥ ५ ॥ ६ ॥

पुनस्तस्यैव सर्वनियन्तृत्वमुच्यते। योऽन्तरो यमयतीति द्वितीयो यशब्दो विष्णुशब्दपर्यायः। 'अकयप्रविसम्भूयसखहा विष्णुवाचकाः।

खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि माऽतिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि माऽतिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥ गार्गिब्राह्मणम् ॥ ५ ॥ ६ ॥

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्यासीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकꣳ सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं

SGDF
Sri Gangeshwari Digital Foundation

एकाक्षरा अ इत्येष निर्दोषत्वाज्जनार्दनः। आनन्दत्वात्क इत्युक्तः पूर्णत्वाद्य इतीर्यत'इत्यादि शब्दनिर्णये। इति स्वप्रतिज्ञातप्रकारेण। 'ब्रह्मवित्पूर्णविज्ञानाल्लोकानां कर्तृवेदनात्। लोकविद्देवविच्चासौ देवानां देववेदनात्। वेदार्थवेदनाच्चैव वेदविद्भूतवित्तथा। तन्नियन्तृपरिज्ञानादात्मविच्चास्ववेदनात्। सर्ववित्सर्वसारज्ञो यो वेद पुरुषोत्तमम्। देशाधिष्ठातृविज्ञानाद्देशज्ञ इति चोच्यते। यथा तद्वद्धरेर्ज्ञानात्सर्वज्ञ इति वैदिकमि'ति ब्रह्मतर्के। 'स्यूतं जगदिदं यस्मिन्सूत्रं वायुरसौ स्मृतः। तं चापि यमयेद्यस्मादन्तर्यामी हरिः स्मृतः। पृथिव्याद्या देवतास्तु देहवद्यद्वशत्वतः। शरीरमिति चोच्यन्ते यस्य विष्णोर्महात्मनः। अन्तस्थो देवतानां च न विदुर्यं च देवताः। प्रविष्टत्वाद्देवतास्थः सोऽन्तरः स्ववशत्वतः। बाह्यापेक्षां विना यस्तु रमते

तं भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति॥ १॥ स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रꣳसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण सन्दब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहीति॥ २॥ यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः॥ ३॥ योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः॥ ४॥ योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः॥ ५॥ योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षꣳ शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः॥ ६॥ यो वायौ तिष्ठ-

SGDF
Sri Gangeshwari Digital Foundation

सोऽन्तरः स्मृतः। अतिप्रियत्वाच्च हरेरन्तरत्वमुदाहृतम्। जीवानां स्वप्रियत्वं च विष्णुना नियतं यतः। तस्य प्रियत्वं नान्येन देवस्य नियतं क्वचित्। स्वतन्त्रः सन्नियन्तासावन्तर्यामी ततः स्मृतः। देवतानां स्वभावोऽपि स्वरूपमपि सर्वदा। तदधीनं यतो यामी वासुदेवः प्रकीर्तितः। स्वभावसत्तादातृत्वं यन्तृत्वमिति कथ्यत'इति ब्रह्मतर्के। 'अधिभूतं सर्वजीवा अध्यात्मं तच्छरीरगाः। देवतास्ताः स्वलोकस्था अधिदैवाभिधा मताः। लोकाभिमानिन्यस्ता एवाधिलोका इतीरिताः। यज्ञाभिमानिनो देवा अधियज्ञा इति स्मृता'इति च। भवनाधिकारे स्थितत्वादधिभूतम्। 'पृथुं नारायणं वाति समादायैव पक्षिराट्। अतः स पृथिवीत्युक्तस्त्वन्तरिक्षं हरः स्मृतः। स्वान्तर्गतं यतः सर्वमिच्छया क्षपयेदसौ। द्यौर्नाम देवी विद्युत्स्यात्साक्षादेव

न्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ७ ॥ यो दिवि तिष्ठन् दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ॥ ८ ॥ य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ९ ॥ यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १० ॥ यश्चन्द्रतारके तिष्ठꣳश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्रतारकꣳ शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ११ ॥ य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १२ ॥ यस्तमसि तिष्ठꣳस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरꣳ यस्तमसोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥१३॥ यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो यं तेजो न वेद यस्य तेजः शरीरं यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥ यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत

SGDF
Sri Gurgeshwari Digital Foundation

सरस्वती । द्योतनात्सर्ववस्तूनां तमो दुर्गा प्रकीर्तिता । यतः संग्लपयेत्सर्वास्तेजः श्रीः परिकीर्तिता । आकाशो विघ्न उद्दिष्टः काशते हि पृथूदरः । आपो वरुण उद्दिष्टो तदेतत्पालयत्यसौ । आत्मा विज्ञानमिति तु सर्वजीवाभिमानवान् । ब्रह्मैवोक्तस्त्विमे सर्वेऽप्यनुक्ता याश्च देवताः । ये च जीवाः परे सर्वे नियता विष्णुनैव हि । जीवानां नियमेऽजीवं किमु वाच्यमिति श्रुतिः । पृथक्कृतन्नियमं नैषा वक्ति सिद्धत्वतः स्वतः । स एव सर्ववेत्ता हि परमात्परमो हरिः । नान्यो वेत्ता स्वतन्त्रोऽस्ति जीवाः सर्वे हि दुःखिनः । यदि स्वतन्त्रा नैवैते दुःखिनः स्युः कदाचन । अत आर्तिमतामार्तिदाता मुक्तिप्रदश्च

इत्यधिभूतमथाध्यात्मम् ॥ १५ ॥ यः प्राणे तिष्ठन्प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ॥ १६ ॥ यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ्न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १७ ॥ यश्चक्षुषि तिष्ठꣳश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १८ ॥ यः श्रोत्रे तिष्ठꣳश्रोत्रादन्तरो यꣳ श्रोत्रं न वेद यस्य श्रोत्रꣳ शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १९ ॥ यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ २० ॥ यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो यं त्वङ्न वेद यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ २१ ॥ यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानꣳ शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ २२ ॥ यो रेतसि तिष्ठन्रेतसोऽन्तरो यꣳ रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम ॥ २३ ॥ इत्यन्तर्यामिब्राह्मणम् ॥ ॥ ५ ॥ ७ ॥

SGDF
Sri Gangeshwari Digital Foundation

सः । भगवान्परमो विष्णुः स्वतन्त्रः सर्वदैकराडि’त्यादि महा-मीमांसायाम् ॥ इत्यन्तर्यामिब्राह्मणम् ॥ ५ ॥ ७ ॥

पूर्वं गार्ग्या जीवानामुत्तरोत्तराश्रयत्वं सर्वेषां भगवदाश्रयत्वं च श्रुतम् । न तु मूलप्रकृतेराधारत्वमाधेयत्वं वा । अतः पुनः पृच्छति । विजिगीषुकथात्वाद्ब्राह्मणानुज्ञया । स्वभर्तुर्विद्याबलं जानन्त्यपि युष्माक-मयं जेतुं न शक्य इति ज्ञापयित्वा तेषामुपकारार्थं च पप्रच्छ । न च युक्त्या पूर्वमुपरता । भार्यात्वाद्भगवतोऽन्याधारत्वं नाशंक्यमित्युक्ते भीत्यैवोपरता । भगवतोऽन्याधारत्वं च सर्वाधारमूलप्रकृतेरपि भगवा-नेवाधार इत्युक्तयुक्तित एव निवारितं भवति । ‘नान्यदतोऽस्ति द्रष्टृ’त्यादियुक्तिभिश्च । अस्थूलत्वादित्युक्तिभिश्च । ‘वादो जल्पो वितण्डेति त्रिविधा विदुषां कथा । केवलं तत्त्वविज्ञानमुद्दिश्य गुरु-शिष्ययोः । अन्ययोर्वा बहूनां वा निर्दुष्टमनसां कथा । वाद इत्युच्यते सद्भिर्जयस्तत्रार्थिको भवेत् । विजये शिष्यतान्येषां पूजा च जयिनः सदा । पुनश्च संशयो यत्स्यात्तेषां तस्यापि वारणम् । कर्तव्यं जयिना नित्यमशक्तस्य स्वतोऽधिकात् । अन्योन्यनिर्णयश्चेत्स्यात्तदा सब्रह्मचारिणः । पृष्टेन प्रथमं मानं वक्तव्यं वादिना शुभम् । वेदाः सर्वे शुभं मानं सेतिहासपुराणकाः । सपञ्चरात्रमीमांसाः स्मृतय-श्चाप्यनन्तरम् । तदन्यदशुभं प्रोक्तं न प्रयोज्यं कथासु च । मिश्र-मक्षानुमाने तु ग्राह्ये शब्दार्थनिर्णये । अदुष्टमिन्द्रियं त्वक्षमुपपत्ति-स्तथाऽनुमा । अनुमैव त्वभावाख्यो ह्यर्थापत्त्युपमे तथा । उपपत्ति-भेदा यत्तेऽपि वाक्यमेवागमः शुभम् । तत्त्वनिर्णयवैलोम्यं संवादो वा विरोधिते । पराजय इति प्रोक्तः समः सर्वकथासु च । तत्त्व-

---

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति पृच्छ गार्गीति ॥१॥ सा होवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो

SGDF
Sri Gangeshwari Digital Foundation

निर्णयवैलोम्ये दण्ड्यो वादकथास्वपि । गुरुणैव त्ववश्यानां राजा दण्डं प्रयोजयेत् । गुरुदण्डस्तु वाचा स्याद्राजदण्डोऽर्थदेहतः । गुरुदण्डोऽप्यर्थतः स्यात्संवादे व्रततोऽपि च । राजदण्डो बलाच्च स्याद्दोषस्य गुरुलाघवात् । संवादे दण्ड्यता नास्ति जल्पादौ च कथञ्चन । तत्त्वविप्लवकर्तारं संसत्सु च पराजितम् । छित्वा जिह्वां च काकाङ्कं राजा राज्याद्विवासयेत् । अन्यसाम्यमभेदो वा नीचता वा कुतश्चन । विष्णोः श्रीपूर्वकाणां च व्यत्यासो गुणदोषतः । तद्भक्तेरन्यधर्मत्वं पञ्चैते तत्त्वविप्लवाः । तत्त्वविप्लावकं शूद्रं वैश्यं क्षत्रियमेव वा । हन्यादेवाविचारेण विप्रजिह्वां तथोद्धरेत् । स्वसिद्धान्ते प्रमाणं च परसिद्धान्तदूषणम् । वक्तव्यमुभयं वादे जल्पे चेति सतां मतम् । अवाक्यदूषणं तर्कादागमादेव साधनम् । वाक्यतात्पर्यविज्ञप्त्यै मानमन्यन्न चान्यथा । सतोरेव यदा स्पर्धा गुणतोऽर्थार्थमेव वा । तदा जल्पः समुद्दिष्टस्तत्र विद्यां परीक्षयेत् । विद्यापरीक्षापूर्वा हि सत्कथा जल्प उच्यते । सर्वज्ञा वैष्णवाः पञ्च सप्त वोभयसंमताः । अधिका वा यथालब्धाः प्राश्निकास्तु परीक्षकाः । उभयोः प्रश्नकर्तृत्वात्प्राश्निका इति कीर्तिताः । तदभावे गुणोद्रेकं दर्शयेतां पृथग्जने । विद्यासाम्ये कथा कार्या ह्यन्यथैकपराजयः । विद्योनो दण्ड्य एव स्याद्यदि नोच्चस्य शिष्यताम् । व्रजेत्पश्चाद्यथा वाद एवं जल्पः प्रकीर्तितः । अर्थनिर्णयहेतुत्वाद्वादे प्रश्नो जयेऽपि तु । न जल्पे तु पुनः प्रश्नः सभ्यानुज्ञां विना भवेत् । स्पर्धा सतां वितण्डा स्यात्तत्त्वविप्लावकैर्यदा । मूलपक्षग्रहापेता वितण्डा कविभिर्मता । सतामेव वितण्डा स्यादसतां जल्प एव तु । एवं जल्पो वितण्डेति ह्युभयोः सहिता कथा । अप्रकाश्यः स्वपक्षो हि पाषण्डानां यतस्ततः । अग्रहेणैव पक्षस्य तर्कागमबलेन तु । दूषयेदेव पाषण्डास्तत्त्वविप्लावकान्सदा । तत्पक्षाणां निषेध्यत्वात्तेषां पक्षग्रहो भवेत् । विष्णुभक्त्यन्यधर्माख्यस्तत्त्वविप्लव

SGDF
Sri Gangeshwari Digital Foundation

एव तु । बौद्धादीनां यतः सर्वे तत्त्वविप्लावकास्तथा । सर्वनास्तिकवादी वा स्वमनीषामतोऽपि वा । तस्यापि पक्षं संश्रित्य दूषयेद्वाक्ययुक्तितः । यस्य नैवागमो मानं तं ब्रूयादागमाश्रयः । धर्मार्थोऽथ वृथैवायं तव पक्षस्य संग्रहः । धर्मार्थश्चेन्न धर्मो हि शक्यो द्रष्टुं विनाऽऽगमात् । यथाऽनुमीयते हिंसा पापहेतुस्तथैव हि । धर्महेतुत्वमप्यस्या अनुमातुं सुशक्यते । वृथा पक्षं वृथा हन्याद्यदि कश्चित्किमुत्तरम् । इत्यशक्तौ सतां सर्वे संभूयापि निवारणम् । कुर्युरेवासतां सन्तस्तत्त्वविप्लाविनां जये । येषां विष्णोः समं किञ्चिदधिकं वा न तु क्वचित् । क्षराक्षराभ्यां भिन्नं च विष्णुं पश्यन्ति ये सदा । तारतम्यविदः सर्वजीवानां प्रकृतेरपि । भगवद्धर्मिणो नित्यं ते सन्तः परिकीर्तिताः । पराजितेष्वसत्स्वुक्तं राजा दण्डं प्रपातयेत् । जितेषु सत्स्वसद्भिस्तु राजोदासीनतां व्रजेत् । यावदेषां विजेता स्यादथ दण्डं निपातयेदि'त्यादि ब्रह्मतर्के । 'बाणस्त्वयोमयः प्रोक्तः शरो नालोऽस्य कीर्तित'इत्यभिधानम् । 'कर्मारस्तु तदा बाणं तीक्ष्णमञ्जलिकाभिधम् । सन्दधानः शरे यान्तं राजानं न ददर्श हे'ति पाद्मे । 'दीप्तेराकाशशब्दोक्ता श्रीर्हि सर्वाश्रया मता । तदाश्रयः परो विष्णुः सोऽस्थू-

---

वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याथि(धि)नौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥ २ ॥ सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥ ३ ॥ स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥ सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽ(था) परस्मै धारयस्वेति पृच्छ गार्गीति ॥५॥ सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥ ६ ॥ स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा

SGDF
Sri Gangeshwari Digital Foundation

लादिगुणो मत' इति स्कान्दे। पुनः प्रश्नः सर्वाधारा प्रकृतिरित्यनुपचरितत्वेनावधारणार्थम्। आकाश एवेत्यवधारणात्। 'पुनरुक्तिः शब्ददोषो न्यूनाधिक्यादिकं तथा। न जिगीषुकथायां च कारणं स्यात्पराजये। क्वचिद्विद्याधिकस्यापि स्खलनं सम्भवेद्यतः। तत्त्वनिर्णयवैलोम्यं विलम्बो वा मुहूर्ततः। विद्यादौर्बल्यहेतुः स्यादतस्तस्मिन्पराजय' इति ब्रह्माण्डे। अतस्तत्त्वनिर्णयविरोधिपुनरुक्त्यादीनि निग्रहः। 'प्रसिद्धस्थूलसूक्ष्मादिवैलक्षण्याज्जनार्दनः। अस्थूलादिरिति प्रोक्तो नैव स्थौल्याद्यभावतः। अनावृत्तेस्तमो नास्य स्वातन्त्र्यान्नाद्यते क्वचित्। द्यावापृथिव्यौ श्रीभूमी केशौ सूर्यविधू मतौ। दीप्तेः

द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥ स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमगोत्रमजरमभयममृतमरजोऽशब्दमविवृतमसंवृतमपूर्वमनपरमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन ॥८॥ एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः ॥ ९ ॥ यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वास्माऽल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥ तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्ट्रश्रुतँ श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ॥ ११ ॥ सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वं यदस्मा-

SGDF
Sri Gargeshwari Digital Foundation

पृथुत्वाज्ज्ञानाच्च तथाह्लादविधेरपि । तदाधारो हरिर्नित्यं स्वातन्त्र्येण प्रशासकः । आधारत्वं श्रियो यच्च तच्च विष्णोः प्रशासनात् । तद्वशान्न स्वतन्त्रत्वं स स्वतन्त्रो हरिः सदे'ति महामीमांसायाम् । 'न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा । नयोगित्वादीश्वरत्वात्सत्यरूपाच्युतो विभुरि'ति वाराहे । 'आदित्यवर्णं तमसस्तु पार' इत्यादेश्च । 'न सत्तन्नासदुच्यते' । 'अदुःखमसुखं समम्' । 'न प्रज्ञं नाप्रज्ञमि'त्यादि च ॥ इत्यक्षरब्राह्मणम् ॥ ५ ॥ ८ ॥

'ये ये वराः सुरास्ते तु परेषां महिमात्मकाः । महीत्युक्तं हि माहात्म्यं महिमानो हि तन्मिताः । एवं हि महिमाशब्दस्तद्वशत्वं वदत्ययम् । यत्र माहात्म्यवाची स्यान्महत्त्वं महिमा तथा । त्रयस्त्रिंशत्सुराणां हि परिवारास्ततः परे । षण्णामेते त्रयाणां ते ते द्वयोः साधिकस्य तौ । एकस्य सोऽपि क्रमतः पराधीनस्वरूपिणः । पराधीनबलाश्चैव पराधीनप्रवृत्तयः । एक एव स्वतन्त्रोऽसौ भगवान्पुरुषोत्तमः । अग्रं विष्णुं नयेद्यस्मात्सुपर्णोऽग्निरुदाहृतः । प्रथितं हरिमादाय वातीति

न्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ततो ह वाचक्नव्युपरराम ॥ १२ ॥ इत्यक्षरब्राह्मणम् ॥ ५ ॥ ८ ॥

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिꣳशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥ स होवाच महिमान एवैषामेते त्रयस्त्रिꣳशत्त्वेव देवा इति कतमे ते त्रयस्त्रिꣳशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳशा इति ॥२॥ कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदꣳ वसु सर्वं

SGDF
Sri Gargeshwari Digital Foundation

प्रथिवः स्मृतः। तद्भार्या पृथिवी नाम यत्तदिच्छानुसारिणी। सर्वज्ञत्वात्तथायुष्ट्वात्सूत्रात्मा वायुरुच्यते। श्रद्धानामैव तत्पत्नी सर्वस्यान्तर्निरीक्षणम्। अन्तरिक्षमिति प्रोक्ता देवेभ्योऽधिकवीक्षणात्। आदिकालस्थितो यस्मादादित्यस्तु सदाशिवः। द्यौरुमा च समुद्दिष्टा वाग्रूपा द्योतिका यतः। त एते सर्वदेवेभ्यो विशिष्टास्तद्वशाः परे। नक्षत्रमिन्द्र उद्दिष्टश्चन्द्रः काम उदाहृतः। अत्राणात्सूर्यचन्द्राद्यैराह्लादाच्चैव हेतुतः। वासयन्ति जगद्यस्मादेतेऽष्टौ वसवः स्मृताः। ज्ञानादिषड्गुणाः षट्सु तदन्येभ्योऽधिका यतः। वसुष्वपि त एवोक्ता वीन्द्राद्याः पूर्वकीर्तिताः। प्राणाद्या वायुपुत्रास्तु दश बुद्ध्यभिमानवान्। बृहस्पतिरिति ह्येते रुद्रा इत्येव कीर्तिताः। मासाभिमानिनो ये तु यमचन्द्रयुता द्विषट्। धात्रर्यमाद्या आदित्या इन्द्राविष्णू विनैव तु। स्तनयित्नोरभीमानी वायुजस्त्विन्द्र उच्यते। स एव वज्र इन्द्रस्य सोऽशनिश्चाशनादरेः। यज्ञो नामेन्द्रपुत्रो यो जयन्त इति चोच्यते। स एव पशुमानित्वात्पशवश्चेति कथ्यते। एवं प्राधान्यतो देवास्त्रयस्त्रिंशत्प्रकीर्तिताः। दक्षाग्निप्रमुखाः सर्वे प्राणा एव हि वायुजाः। रुद्रा अपि तदावेशात् पृथङ्नोदीरिता इह। काम एवानुविष्टत्वादनिरुद्धश्च नोदितः। मन्वावेशादिन्द्रजस्तु संख्यायामनुवेशितः। अश्विनौ निर्ऋतिश्चैव कुबेरश्च विनायकः। अर्यमण्यंशादिचतुर्षु विशेषा-

---

हितमिति तस्माद्वसव इति॥ ३॥ कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति॥ ४॥ कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्या एते हीदꣳ सर्वमाददाना यन्ति ते यदिदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति॥ ५॥ कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति॥ ६॥ कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चैते षडेतेषु हीदꣳ सर्वꣳ षडिति

SGDF
Sri Gangeshwari Digital Foundation

वेशसंयुताः । अत्रोक्ता अपि पृथिव्याद्या अन्तर्यामिब्राह्मणे भवन्ति । षट्सु प्रधानास्तिस्रो हि वायुवीन्द्रमहेश्वराः । स्वभार्याणां स्वाश्रयत्वात्ते लोका ज्ञानरूपतः । पदैक्याद्ब्रह्मवाय्वोस्तु पदसाम्याच्छिवस्य च । शेषस्यापि तु नैवोक्तिः पृथक् श्रद्धा च मारुतः । द्वौ देवाविह सम्प्रोक्तावन्नं श्रद्धा प्रकीर्तिता । अतीतत्वाद्देवताभ्यो नेतृत्वाच्चान्नमुच्यते । श्रद्धेति वायोः पत्नी सा प्राणो वै विष्णुरुत्तमः । णेत्येवानन्द उद्दिष्ट आसमन्तात्प्रकृष्टतः । प्राणो हि भगवान्विष्णुरध्यर्धो वायुरुच्यते । अध्यर्धा हि गुणा नित्यं वायोरध्यर्ध एव तत् । न चैकत्वं भवेद्वायोस्तद्विशिष्टो यतो हरिः । न च द्वितीयता तस्मिन्प्रीतिरत्यधिका हरेः । तेनाध्यर्धगुणौ यस्मात्सर्वस्माद्देवतागणात् । न चाशक्यं न चाप्राप्यमतोऽध्यर्ध इतीरितः । अत्यन्तरङ्गं यत्तस्मान्न हरेः पृथगीरिता । श्रीः स्वरूपविभेदेऽपि सर्वोत्कृष्टाऽपि नित्यशः । तस्या अपि परो विष्णुर्गुणैः सर्वैरदोषवान् । एक इत्युच्यते नित्यं यस्मान्नान्यस्तथाविधः । तत्परो वा गुणोद्रेके ब्रह्माऽसौ गुणपूर्तितः । तथात्वेन यतो नित्यमविकारेण याति हि । त्यदित्युक्तास्ततो विष्णुः

॥ ७ ॥ कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति ॥ ८ ॥ तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते ॥ ९ ॥ पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ शारीरः पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यमृतमिति होवाच ॥ १० ॥ काम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥ ११ ॥

SGDF
Sri Gangeshwari Digital Foundation

सर्वदेवेश्वरेश्वर' इति महामीमांसायाम् । 'शारीरो मनुरुद्दिष्टः कामः प्रद्युम्न उच्यते । आदित्यस्थस्तथा रुद्रः श्रोत्रश्चन्द्र उदाहृतः । छायामयस्तु निर्ऋतिरादर्शे सूर्य एव च । पर्जन्यस्त्वप्सु पुरुषः शक्रः पुत्राभिमानवान् । अमृतं वायुरुद्दिष्टः स्त्रियः श्रीर्गौरुमा तथा । सत्यं ब्रह्मा समुद्दिष्टो गरुत्मच्छेषका दिशः । आदेशनाद्दिशः प्रोक्ता मृत्युर्यम उदाहृतः । अन्तर्गतेन रूपेण वायुरेव त्वसुः स्मृतः । पालकेन स्वरूपेण ब्रह्मैव च (वात्र) प्रजापतिः । प्रकाशस्त्वान्तरो ज्योति-

---

रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवाच ॥ १२ ॥ आकाश एव यस्यायतनꣳ श्रोत्रं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥१३॥ तम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं छायामयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मृत्युरिति होवाच ॥ १४ ॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमादर्शे पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यसुरिति होवाच ॥ १५ ॥ आप एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष वदैव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥ १६ ॥ रेत एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं पुत्रमयः पुरुषस्स एष वदैव शाकल्य तस्य का देवतेति प्रजापति-

SGDF
Sri Gargeshwari Digital Foundation

लोंको बाह्य इतीर्यते । मनःस्थिता मनो नाम्नी बोधरूपत्वतो रमा । सैवाग्निस्थाऽदनान्नित्यमग्निरित्येव गीयते। हृदयं बुद्धिसंस्था सा त्वयनं हृदि यत्ततः । चक्षुः सा दृष्टिहेतुत्वादृष्टानां लोक एव से'ति च । बुद्धिवृत्त्यपेक्षया बहिः प्रकाशहेतुत्वमपि देव्या न विरुध्यते । इम एव त्रयो लोका इति पूर्वोक्तानां देवानामनुक्तौ कथं लोकमात्रे सर्व-देवानामन्तर्भावः ? । उक्ताङ्गीकारेऽनन्तर्भावः कथम् ? । कथं चाग्न्यादिषु ? । न चावासमात्रमत्र विवक्षितम् । प्रतिशरीरमपि सर्वदेवानामावासान्न लोकादीनां विशेषः । सामर्थ्याधिक्यं चात्र विवक्षितम् । एतेषु हीदं सर्वं षळिति । 'यदस्मिन्निदं सर्वमध्यार्ध्नोत्स ब्रह्म त्यदित्याचक्षते । महिमान एवैषामि'त्यादिषु षड्गुणोद्रेका-दीनामुक्तेः । अन्तर्भावस्य च महिमकारणकत्वोक्तेः । इदं सर्वं गुणषट्कं पूर्णं गुणषट्कमित्यर्थः । इदंशब्दो विवक्षितत्वादयं भगवा-नितिवत् । एवमेवेदं सर्वमध्यार्ध्नोदिति च गुणाधिक्येन तदधीनत्वे विवक्षिते निवासत्वादिकमन्तर्भवति । उत्तमानामधिकव्याप्त्यादेः । न तु निवासत्वादौ गुणाधिक्यादिकं । कथं च तन्महिमत्वेनान्तर्भावमुक्त्वा निवासत्वमात्रेणान्तर्भाव उच्यते ? । कथं चान्यथा कामादीनां प्रसिद्ध-महिमानां स्त्रीमात्रादिकं देवतोच्येत ? । प्रसिद्धं चैतत् । 'आत्मा देवानां भुवनस्य गर्भः' । 'आत्मा ते वातः' । 'इन्द्रो वै देवानामोजिष्ठः' । 'ब्रह्मा देवानां प्रथमः संबभूव'। 'अयं वाव शिशुर्योऽयं मध्यमः प्राणः'। 'तमेताः सप्ताक्षितय उपतिष्ठन्ते' । 'तद्या इमा अक्षँल्लोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्तो यच्छुक्लं तेनेन्द्रः' । 'अश्वमेधः क्रतुश्रेष्ठो ज्योतिःश्रेष्ठो दिवाकरः । ब्राह्मणो द्विपदां श्रेष्ठो देवश्रेष्ठश्च मारुतः' । 'वायुर्भीमो भीमनादो महौजास्सर्वेषाञ्च प्राणिनां प्राणभूतः । अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः' । 'ऋतुं सचन्त मारुतस्य वेधसः' । 'वायोरात्मानं कवयो निचिक्युः' । 'आत्मत एष प्राणो जायते' ।

SGDF
Sri Gargeshwari Digital Foundation

'यो वायौ तिष्ठन्' । 'देवानां देवता वायुर्वायोर्देवो जनार्दनः' । 'स प्राणमसृजत । प्राणाच्छ्रद्धाम्' । 'एतस्माज्जायते प्राणः' । 'रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः । ब्रह्मा मामाश्रितो नित्यं नाहं कञ्चिदुपाश्रित'इत्यादिषु सर्वत्र । 'श्रियः प्रसादं स कुशेशयेशयः श्रितः स चिन्त्यः प्रशशंस शौरि'मित्यादि च । दिशो वेद सदेवाः सप्रतिष्ठा इति याज्ञवल्क्यवचनम् । सर्वप्रतिष्ठात्वेन ब्रह्मणोऽपि ज्ञानं भवतीति किं ब्रह्मविद्वानित्यस्य चोत्तरम् । यदि दिशो वेत्थ तर्हि किं देवतोऽस्याम् । 'आदित्यस्याश्रयश्चक्षुर्नामा स्वायम्भुवो मनुः । चक्षुस्थो दृष्टिशक्तीशो रूपात्मेन्द्रस्तदाश्रयः । बुद्धितत्त्वात्मिकोमा च शक्रस्यापि समाश्रयः । एवं यमस्याश्रयश्च यज्ञमान्यनिरुद्धकः । दक्षिणामानिनी देवी रतिरेव तदाश्रयः । श्रद्धारूपः सदा कामस्तस्या अपि समाश्रयः । हृदयात्मिक्युमा तस्य कामस्यापि समाश्रयः ।

रिति होवाच ॥ १७ ॥ शाकल्येति होवाच याज्ञवल्क्यस्त्वा५ स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥ १८ ॥ याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपाञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥१९॥ किं देवतोऽस्यां प्राच्यां दिश्यसीति आदित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य ॥ २० ॥ किं देवतोऽस्यां दक्षिणायां दिश्यसीति यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धाया५ ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २१ ॥ किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिता इति

SGDF
Sri Gargeshwari Digital Foundation

अब्देवता सदा चन्द्रो वरुणस्य समाश्रयः। रेत आत्मा सुरगुरुः सोमस्यापि समाश्रयः। तस्याप्युमैवाश्रयः स्यात्तस्यैव तु दिगीशितुः। सोमस्य दीक्षारूपा तु शतरूपा समाश्रयः। तस्याः सत्यात्मको देवो मनुरेव समाश्रयः। तस्याप्युमैवाश्रयः स्यात्स्रष्टृरूपस्य नित्यदा। मध्यदिक्स्वामिनोऽग्नेश्च स्वाधारो वाग्बृहस्पतिः। तस्याप्युमैव हृदयरूपा नित्यं समाश्रयः। तस्याः समाश्रयो रुद्रस्त्वमहश्चेति रूपवान्। अहङ्कारात्मको नित्यमात्मोमा परिकीर्तिता। बुद्ध्यात्मनैवाततत्वाद्यद्यस्यानाश्रयो हरः। तदा बोधात्मिका शक्तिर्नास्या देहाभिरक्षणे। अरक्षितान्मानुषादीन् श्वानो वाद्युर्वयांसि वा। शिवस्य च तथोमायाः प्राणात्मा शेष आश्रयः। शेषस्यापानरूपा सा भारत्येव व्यपाश्रयः। तस्या व्यानाभिधो वायुर्विशिष्टानो यतो हि सः। उन्नेतृत्वादुदानाख्या तस्य श्रीराश्रयः सदा। समानाख्यो हरिस्तस्याः सहैव ह्यानयत्यसौ। स्थावरस्थानकास्त्वन्ये सर्वेषां चेष्टको हि सः। स एष भगवान्नैवं

रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥ किंदेवतोऽस्यामुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥ किंदेवतोऽस्या ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्नु प्रतिष्ठित इति वाचीति कस्मिन्नु वाक्प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥ अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासे यद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयाꣳसि वैनद्विमथ्नीरन्निति ॥२५॥ कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति स एष नेति नेत्यात्माऽगृह्यो

SGDF
Sri Gangeshwari Digital Foundation

श्रीवदन्याश्रयो हरिः । न च ब्रह्मादिवद्विष्णुर्नैवाऽसौ बद्धवत्क्वचित् । न च मुक्तवदीशेशः कुत एव जडोपमः । अग्राह्योशीर्यसङ्गोऽसावसितश्च न रिष्यति । न हि सर्वात्मना क्वापि केनचिज्ज्ञायते क्वचित् । स्वल्पोऽपि शीर्यते नैव कारणात्कार्यतोऽपि वा । न लिप्यते जगन्नाथः क्वचिद्दोषेण केनचित् । भूतपूर्वो भविष्यो वा बन्धो नास्य कुतश्चन । न च नाशो भवेत्क्वापि न नशिष्यति च क्वचित् । अन्यत्सर्वं गृहीतं हि तेन ज्ञानादिना सदा । अशीर्यत्वादयोऽन्येषां सर्वेषां तत्प्रसादतः । अतस्तस्यापि वैषम्यान्नेति नेत्याह तं श्रुति'रित्यादि च । 'तद्गुणानां सुपूर्णानां विप्रुट्कं प्रतिबिम्बितम् । श्रीर्भुङ्क्ते तद्गुणान्ब्रह्मा तस्य रुद्रादयोऽपि चे'त्यादि च। अहर्ज्ञानमस्य लीनमित्यहर्लीक एवाहल्लिकः । अज्ञेत्याक्षिपति । न हि गृह्यत इत्यादिना ग्रहणशीरणादिषु सर्वप्रमाणाभावं दर्शयति । 'नेति नेत्यादिरूपेण विज्ञापितगुणोऽपि तु । विशेषापेक्षया पृष्टो न शाकल्यो विवेद तमि'ति ब्रह्माण्डे । 'तदपेक्षां विनैवासौ निर्गत्य पुरुषोत्तमः । वहत्येवानिशं सर्वं निरूढं तेन तज्जगत् । प्रति प्रतिस्थितो रूपैर्यस्माद्धत्ते हरिः सदा । अतः प्रत्यूह्यते तेन व्यक्ताव्यक्तमिदं जगदि'ति ब्रह्मतर्के । 'न विनोपनिषद्भिः स ज्ञेयः केनापि कस्यचित् । अत औपनिषत्कं तं प्राहुर्विष्णुं सनातनमि'ति च । 'प्रश्नो वादे च जल्पादौ कर्तव्यः प्रतिवादिना । तदुक्तिमात्रे प्रामाण्यं यदि नास्यागमान्तरम् । अपेक्षितं यदा शङ्का दर्शनीयस्तदाऽऽगमः । निःशङ्कत्वेन यो वक्ता प्रश्नानामुत्तरं सदा ।

न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्रत्यूह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति त५ह न मेने शाकल्यस्तस्य ह मूर्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥२६॥
अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा

SGDF
Sri Gargeshwari Digital Foundation

आनुकूल्येनागमानां नाशङ्क्यं तद्वचः क्वचित् । दशतालो दशमुखो ललाटस्त्रिंशकस्तथा । सार्धोन्नतश्चैव पुनः पर्यग्दशशिरास्तथा । पञ्चोराः सप्तपादो यो नाशङ्क्यं तद्वचः क्वचित् । नवाङ्गुलमुखो यस्तु गले च चतुरङ्गुलः। चतुर्विंशाङ्गुलतनुस्तद्वाक्यं देवपूजितम्। प्राधान्याल्लक्षणोपेतो दुर्लक्षणयुतोऽपि सन्। तस्यापि वाक्यं मानं स्यात्किमु सर्वयुतस्य तु। प्रायो देवाश्च ऋषयो न सर्वशुभलक्षणाः । ऋते विष्णुं सुरश्रेष्ठं ब्रह्माणं वाप्यनन्तरम् । यस्मान्न विदुषां वाक्यमाशङ्क्यं केनचित्क्वचित् । तस्माद्वेदेषु सर्वेषु कथाः प्रश्नोत्तरात्मिकाः । न प्रमाणान्तरं तत्र पृच्छन्ति घटनां विना । एतस्मादाश्वलाद्याश्च पप्रच्छुर्नैव कुत्रचित् । आगमं याज्ञवल्क्योक्तेरन्यं तं मिथिलोऽपि चे'ति ब्रह्मतर्के । 'यश्छिन्नविचिकित्सस्तु च्छिनत्त्यपि च संशयान्। तस्य पर्येषणं कुर्यात्प्रतीच्छन्नोत दक्षिणामिति'च भारते । 'षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः । दशतालश्चतुर्हस्तः स देवैरपि पूज्यत'इति वायुप्रोक्ते । अतएव च सर्वागमेषु प्रतिसंहितमाचार्यलक्षणमुच्यते । यथा वनस्पतौ वृक्षइत्ययंशब्दोऽमृषा तथैव पुरुषे पुरुषशब्दो विद्यमान एव । स च नित्यत्वे संभवति । पुरुकालेऽपि सन्पुरुष इति । स्नावमध्ये यत्स्थिरं विद्यतेऽस्थि सल्लीनं तद्दारुसंश्लिष्टपाशवत् । वृक्षो मूलाद्रोहतीत्यङ्गीकारमात्रम् । यत्समूलमावृहेयुरिति तस्यापि दूषणात् । अन्यस्य रेतसो जननमपि जीवतः पुरुषान्तरस्य भावे । प्रलये तु सर्वप्रलयात्कस्मादुत्पत्तिः १ । तत्पृष्टं सर्वं वक्तुमशक्यत्वात्पुरुषस्य पुनरुत्पत्तौ कारणं भगवन्तं जानन्तोऽपि तूष्णीमृषयो बभूवुः । पुरुषनामकत्वान्नित्यस्य जीवस्य यावन्मुक्तिः पुनरुत्पत्त्या भवितव्यं न शरीरेण सह नाशः । तस्य च स्वोत्पत्तावस्वातन्त्र्यादन्येनोत्पादकेन भाव्यम् । कोऽसाविति प्रश्नाशयः । तेषु तूष्णींभूतेषु स्वयमेव परिहरति विज्ञानमानन्दं ब्रह्मेति । तस्याप्यन्य उत्पादक इत्याशङ्का मा भूदिति जात एव न

SGDF
Sri Gangeshwari Digital Foundation

जायत इत्याह । पुरुषान्तरापेक्षया पुनः शब्दो न तु क्रियाभ्यासापेक्षया । 'एक एव हरिर्बन्धुः पुनरन्यो न विद्यत'इतिवत् । रातिरिष्टः । तिष्ठमानस्य तद्विदः परायणम् । 'विजित्यसर्वान्पप्रच्छ याज्ञवल्क्यः पुनर्मुनीन् । यथा वनस्पतौ वृक्षशब्द एवं यथार्थतः । पुरुषेऽपि हि तच्छब्दो नित्यत्वादेव युज्यते । तस्मान्नास्य शरीरेण नाशस्तस्मात्पुनर्जनिः । आमुक्तेर्भविता नित्यं कुतस्तदिति चोच्यताम् । रेतसो जननं यावत्प्रलयस्तावदेव हि । निर्मूलस्य च वृक्षस्य प्रलये पुरुषस्य च । पुनरुत्पादको यस्तं वदन्तु मम कृत्स्नशः । धानाजात इवायं हि दृश्यते विदुषां तरुः । अस्वातन्त्र्यात्तु विदुषां नैव तत्कारणं भवेत् । अञ्जसा प्रेत्य सम्भूतिकारणं तद्वदन्तु नः । प्रेत्य सम्भूतिकर्ता हि स्वतन्त्रो घटते यतः । इति पृष्टास्तु मुनयो न वक्तुं शेकुरञ्जसा तद्वेत्तारोऽपि तत्प्रश्ननिर्मूलनबलोज्झिताः । अथाष्ण्यो(र्ष्या)त्तत्प्रभावेन धर्षिता नाशकन्यदा । स्वयमेव तदोवाच याज्ञवल्क्यो महामुनिः । पूर्णानन्दो हरिर्नान्यः कारणं सृज्यसर्जने । नैवास्य जनकः कश्चि-

---

मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥ तान्हैतैः श्लोकैः पप्रच्छ ॥ यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा । तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥ १ ॥ त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः । तस्मात्तदा तृणात्प्रैति रसो वृक्षादिवाऽऽहतात् ॥२॥ मा᳚ꣳसान्यस्य शर्कराणि किनाटं स्नाव तत्स्थिरम् । अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥ ३ ॥ यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः । मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ४ ॥ रेतस इति मा वोचत जीवतस्तत्प्रजायते । धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य सम्भवः ॥५॥ यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् । मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥६॥ जात एव न जायते को न्वेनं जनयेत्पुनः ॥ विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम् ॥ तिष्ठमानस्य तद्विद इति ॥ ७ ॥ २८ ॥ इति शाकल्यब्राह्मणम् ॥ ॥ ५ ॥ ९ ॥ पञ्चमोऽध्यायः ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

न्नित्यजातो ह्यसौ हरिः । स प्रियः सर्वदातॄणां ज्ञानिनां परमप्रियः। ये तु तद्भाविता नित्यं तेषामेष परायणमि'ति नारायणीये ॥ इति शाकल्यब्राह्मणम् ॥ ५ ॥ ९ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते बृहदारण्यकोपनिषद्भाष्ये पञ्चमोऽध्यायः ॥ ५ ॥

अणुर्भगवांस्तद्विषयान्निर्णयान्वक्तुं वा । 'प्रतिष्ठा प्रतिमा प्रोक्ता प्रतिरूपेण संस्थितेः । प्रतिमाऽधिकसादृश्यान्मुख्या विष्णोः सदा रमा । दीप्तत्वादासमन्तात्सा चाकाश इति गीयते । प्रत्येकं विष्णुरूपाणामन्यदायतनं पृथगि'त्यध्यात्मे । 'प्रतिमानमवस्थानं रहस्यं नाम सार्थकम् । चतुष्टयं यदा ज्ञातं सम्यग्विद्याफलं तदे'ति च । का प्रज्ञता वागेवेत्यादेर्धर्मधर्म्यभेदः । 'अमिताक्षरं पञ्चरात्रं विद्येत्याहुर्मनीषिणः । मिताक्षरं श्लोकवाच्यमुभयं वेद ईर्यत'इति ब्रह्माण्डे । 'सूत्रं तु ब्रह्मसूत्राख्यं महामीमांसिका तथा । तथा साङ्कर्षणं सूत्रं

जनको ह वैदेह आसाञ्चक्रेऽथ ह याज्ञवल्क्य आवव्राज त꣡ होवाच याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानित्युभयमेव सम्राळिति होवाच ॥ १ ॥ यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छैलिनोऽब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किँ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्राळिति होवाच वाचा वै सम्राड्बन्धुः प्रज्ञायत ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्ट꣡ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते वाग्वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्तिदेवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभ꣡ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदङ्कः

SGDF
Sri Gangeshwari Digital Foundation

ब्रह्मतर्कादयस्तथा । प्रकाशिका निर्णयश्च तत्त्वनिर्णय एव च । व्याख्येति कथिताः सर्वाः स्वयं भगवता कृताः । बृहत्तर्कादयः सर्वा अनुव्याख्याः प्रकीर्तिता'इति प्रतिसङ्ख्याने । 'वाग्विष्णुर्वाचकत्वेन प्राणः प्रणयनात्स्वयम् । मनो मन्तृत्वतो नित्यं स चक्षुः सर्व-दर्शनात् । श्रोत्रं श्रवणशक्तित्वाद्धृदयं हृद्गतो यत'इति प्रत्याहारे ।

शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट्-कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट् कामाय प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे बर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्य-पश्यतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येक-पाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यन्तमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको ह वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यश्रृण्वतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्र-मेवायतनमाकाशः प्रतिष्ठानं त इत्येनदुपासीत काऽनन्तता याज्ञवल्क्य

SGDF
Sri Gargeshwari Digital Foundation

'अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिती'त्यादि च। 'वागादिषु स्थितं विष्णुं य उपास्ते सदैव तु। वागादिनाम्ना नैनं स प्रजहाति कदाचने'ति सत्तत्त्वे। अत आयतनमेव वागिन्द्रियादि। परमं ब्रह्मेतिवचनान्न वागिन्द्रियादिमात्रमुपास्यम्। 'प्रतिमाद्यं हरित्वेन पृथिव्याद्यमथापि वा। इन्द्रियप्राणजीवाद्यमथवा य उपासते। मिथ्योपास्तिमतां तेषां निष्कृतिर्न कदाचन। अतिदुःखे पतन्त्यद्धा तमस्यन्धे पतङ्गवदि'त्युपासनानिर्णये। 'सर्वेन्द्रियेषु या विष्णोरुपासा युगपत्सदा। देवानामेव योग्या सा तया देवत्वमाप्नुयुः। सर्वे देवपदे योग्याः सायुज्यं स्वोत्तमेष्वथ। सम्प्राप्य ब्रह्मणा सार्धं प्राप्नुयुः पुरुषोत्तमम्। दुहन्ति सर्वभोगांश्च तेभ्योऽन्ये मुक्तिगा नराः। स्वोत्तमेभ्यश्च देवेभ्यस्ते मुक्ता हरये सदे'ति च। प्रविश्य देहं यो भोगः स्वरूपव्यतिरेकतः। सायुज्यमिति तं प्राहुः संयुक्तत्वाद्विशेषत' इति च। 'इन्द्रियेषु स्थितं विष्णुमुपासीत क्रमेण तु। सदा देवपदायोग्यः स मानुषसुरो भवेत्। मानुषा देवलोकस्थास्ते

दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशः दिशो वै सम्राट् श्रोत्रꣳ श्रोत्रं वै सम्राट् परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको ह वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवायतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत कानन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट् स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट् परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच

SGDF
Sri Gargeshwari Digital Foundation

प्रोक्ता मानुषाः सुराः। मानुषा देवसायुज्यं यान्त्युपासनयाऽनये'ति च। 'ऋषभान्गजमिश्रांस्तु क्षत्रियो गुरुदक्षिणाम्। विप्रो दद्याद्वृषानेव वैश्यो गाः प्रतिविद्यकमि'ति च मानसंहितायाम्। 'अन्यया विद्यया मुक्तिः सुराणामन्यया नृणाम्। तत्रापि योग्यताभेदात्प्रतिभेदा अवान्तराः। यया यस्य विमुक्तिः स्यात्तद्दाता मुख्यतो गुरुः। एकदेशे गुरुत्वं स्यादन्यविद्याप्रदस्य त्वि'ति च। 'प्राणसंस्थस्य वै विष्णोः संप्रीत्यै भोजनं भवेत्। तदिच्छयैव चौर्यादि कुर्युरज्ञा अपि ध्रुवम्। तथापि तं न जानीयुः प्राणात्मानं जनार्दनमि'ति प्रवृत्ते। 'यच्चक्षुषि स्थितं रूपं विष्णोश्चक्षुस्तदुच्यते। शब्दादेरप्यापरोक्ष्ये तद्धेतुर्विश्वनामकम्। तद्गतस्य ततो विष्णोः कण्ठस्थानागमो यदा। तदा स्वप्नो भवेज्जाग्रद्दर्शनं नैव जायते। चक्षुर्निमीलनं च स्यात्सर्वेन्द्रियगुणैः सह। चक्षुरात्मा ततो विष्णुः सत्यमित्यभिधीयत'इति च। 'सर्वव्यापी तु भगवाननन्त इति कीर्तितः। दिङ्नामा स तु विज्ञेयो दिक्षुस्थो नित्यदेशनादि'ति च। 'मनःस्थितस्य यद्विष्णोः सम्बन्धादेव कामतः। जातः सुतः सुखे हेतुः परानन्दो हरिः किम्वि'ति ब्रह्मतर्के। सदा प्रतिष्ठितानि भवन्ति। विशेषतोऽपि प्रतिष्ठितानि सुप्तौ। 'हृदये सर्वशो व्यापी प्रादेशः पुरुषोत्तमः।

जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ६ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य कि स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवायमायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राट् सर्वेषां भूतानामायतनं हृदयं वै सम्राट् सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि

SGDF
Sri Gargeshwari Digital Foundation

जीवानां स्थानमुद्दिष्टः सर्वदैव सनातनः। हृत्कर्णिकामूलगतः सोऽङ्गुष्ठाग्रप्रमाणकः । मूलेश इति नामास्मिन्सर्वे जीवाः प्रतिष्ठिताः । अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ। प्रविशन्ति सुषुप्तौ तु प्रबुध्यन्ते ततस्तथा। सोऽयं त्रिरूपो भगवान्हृदयाख्यः प्रकीर्तित' इति च । 'स्थानमायतनं प्रोक्तं प्रतिष्ठा धारकः पुमानि'ति च ॥ इति षडाचार्यब्राह्मणम् ॥६॥१॥

स्वयोग्यं ज्ञानं श्रोतुं सिंहासनादवरुह्योपसदनं कृत्वोवाच । यत्स्वात्मना प्राप्यं मुक्तौ तदुपास्यैव मुक्तिर्भवतीत्यतः प्राप्यं पृच्छति । 'वृन्दैः प्राप्यतमत्वात्तु वृन्दारक इति स्मृत' इति च पाद्मे । 'राज्ञां हृदयसंस्थो य इन्द्रो नाम जनार्दनः । स इन्द्रे च यमे चैव संप्राप्यो मुक्तराजभिः । तस्मात्तेषामुपास्यः स विराण्णामा तदाश्रया। श्रीस्तयोः स्तुतिरेषा हि प्राणेन क्रियते सदा। कर्णौ पिधाय या ज्ञेया सर्ववेदात्मिका हि सा । काशनात्सर्वजीवानामाकाश इति सा

भवन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनꣳ हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥७॥ इति षडाचार्य ब्राह्मणम् ॥ ६ ॥ १ ॥

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन्रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्माऽस्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवान्वेद यत्र गमिष्यामीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति स होवाच ब्रवीतु भगवानिति ॥ १ ॥ इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥ अथैतद्वामेऽक्षि(क्ष)णि पुरुषरूपमेषास्य पत्नी विराट् तयोरेष सꣳस्तावो य एषोन्तर्हृदय आकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः सञ्चरणीयैषा हृदयादूर्ध्वा

SGDF
Sri Gangeshwari Digital Foundation

स्तुतिः। जाग्रतां सर्वजीवानां स विष्णुर्दक्षिणाक्षिगः। तस्य पूर्वदिशीन्द्राग्नी सभार्यौ सम्प्रतिष्ठितौ। यमराक्षसौ दक्षिणस्यां वरुणो वायुरेव च। पश्चिमस्यामुत्तरस्यां सोमेशानौ प्रतिष्ठितौ। ब्रह्मा प्रधानवायुश्च तथोर्ध्वायां दिशि स्थितौ। अधरायां शेषकामौ सभार्याः सर्व एव च। एकैकस्यां हि चत्वारो नेतृत्वात्प्राणनामकाः। इन्द्रियाभिमतेश्चैव प्राणा इत्येव शब्दिताः'। त्वत्प्रसादाद्यदभयमस्माकं प्राप्तं तदेव तव तृप्तयेऽस्तु नान्यद्वयं प्रत्युपकर्तुं शक्नुम इत्यर्थः। 'स भगवान्स्वकृतेन तुष्येदि'तिवत्। इन्धो दीप्तः। 'जीवभोगस्य भोक्तेशो जीवस्तद्भोगभुङ्क् तु। विविक्तभुगिवातोऽसौ भगवान्पुरुषोत्तम'इति पाद्मे॥ इति कूर्चब्राह्मणम्॥ ६॥ २॥

'याज्ञवल्क्यो वरं दत्वा राज्ञा संवादकामुकः। वैदेहनगरं प्रायात्सन्तो यच्छास्त्रलोलुपा'इति स्कान्दे। तथापि सम्राडेव पूर्वं पप्रच्छ। आत्मा भगवानेवास्य ज्योतिः। 'भावेऽभावेऽपि सूर्यादेर्जीवानां विष्णुरेव हि। ज्योतिस्तथाप्यभावे तु तज्ज्ञेयं हि विशेषतः।

नाड्युच्चरति यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्येताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः॥ ३॥ तस्य प्राची दिक् प्राञ्चः प्राणा दक्षिणा दिक् दक्षिणाः प्राणाः प्रतीची दिक् प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यते असङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको ह वैदेहोऽभयं त्वागच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमस्मि॥ ४॥ द्वितीयं कूर्चब्राह्मम्॥ ६॥ २॥

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तꣳ हास्मै ददौ तꣳह सम्राडेव पूर्वं

SGDF
Sri Gargeshwari Digital Foundation

अस्वातन्त्र्यात्तु जीवस्य द्योतयन्बुद्धिमस्य सः। प्रवर्तयति सर्वेशस्तमस्यपि जनार्दन'इति च। 'स्वातन्त्र्याद्ध्यायतीवासौ ध्याययञ्जीवमञ्जसा। गृह्णातीव ग्राहयन्स जीवं सर्वेश्वरेश्वरः। सदा विज्ञानपूर्णोऽसौ समानोऽसौ सदा समः। अविकारात्समानः सञ्जीवमादाय सञ्चरेत्। उभौ लोकौ स्वापकत्वाद्भूत्वाऽसौ स्वप्ननामकः। इमं लोकं जाग्रदाख्यं मृत्युरूपात्मकं सदा। बहुपापैकहेतुत्वात्तारयेत्स्वप्नमानयन्। इमं लोकं च भूराख्यं तारयित्वान्तरिक्षगम्। जीवं कुर्यान्मृतौ विष्णुर्भूर्लोकः क्षिप्रमृत्युमान्। बहवो मृत्यवश्चात्र मृत्यो रूपाण्यतस्त्वयम्। पापहेतुत्वतश्चायं भूर्लोको मृत्युरूपकः। जाग्रच्च पृथिवी चैव द्यौः सुषुप्तिस्तथैव च। स्वप्नश्चैवान्तरिक्षं च ज्ञेया अन्योन्यनामकाः।

पप्रच्छ ॥ १ ॥ याज्ञवल्क्य किं ज्योतिरयं पुरुष इत्यादित्यज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ २ ॥ अस्तमित आदित्ये याज्ञवल्क्य किं ज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्य ॥ ३ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किं ज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किं ज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥ कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनु सञ्चरति ध्यायतीव लेलायतीव स हि स्वप्नोभूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥ स वाऽयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते

SGDF
Sri Gargeshwari Digital Foundation

तद्व्यभिप्रायिका यस्मादुभौ लोकाविति श्रुतिः। स वा अयं जायमान इति च द्व्याश्रया श्रुतिः। यस्य ज्योतिरयं विष्णुः स परामृश्यते तथा। यदा तु भगवानुक्तस्तदा स्वातन्त्र्यतो विभुः। म्रियमाणो जायमान इत्युक्तस्तन्नियामकः। फलदानाय पापानां ग्रहस्संसर्ग उच्यते। मोक्षदाने फलादानाद्विजहातीति चोच्यते। जीवोऽपि मुक्तिकाले तु हाता पापस्य कथ्यते। स्वर्गः सुषुप्तिरित्याख्या मुक्तेरपि यतः समा। परलोके यतो मुख्यो मुक्तिरेव न चापरः। अतो द्युसुप्तिमोक्षाणामभिप्रायादिदं वचः। सुप्तिरित्यादिकं स्वेति विष्णोराख्या सुखत्वतः। पुनरागमनं नाम मुक्तानामपि विद्यते। प्रलये तु प्रविश्यैनं भगवन्तं जनार्दनम्। स्थित्वा ज्ञानाविलोपेन निर्गच्छन्ति पुनस्ततः। न च ज्ञानसुखादीनां तेषां सृष्टौ लयेऽपि वा। विशेषः कश्चिदन्तश्च बहिश्चैव रमन्ति ते। स्वापयत्येनमिति स स्वपितीत्युच्यते हरिः। आनन्दपापलोकादेर्दर्शनं स्वप्नसुप्तयोः। अपि विष्णोः सदैवास्ति न जीवस्य कथञ्चन। अत्रायं भगवान्विष्णुर्जीवस्य स्वयमेव तु। ज्योतिर्विशेषतो भूयान्नैवान्यज्ज्योतिरत्र यत्। न हि जीवः स्वयं द्रष्टुं सुप्तः शक्नोति हि ध्रुवम्। अतः स नैव जीवोऽयं सर्वं पश्यति सूक्ष्मदृक्। स्वप्नेऽन्तरिक्षे स्वर्गे वा न रथाद्याः पुरा स्थिताः। तदैव तत्कर्मयोग्यान्निर्मिमीते हरिः स्वयमि'त्यादि महामीमांसायाम्। जीवपक्षे प्रसिद्धत्वात्कतम आत्मेति प्रश्नो न युक्तः। न च जीवः समानः सन्नुभौ लोकौ सञ्चरति। सुखदुःखविशेषवत्त्वात्। न च सुखदुःखादेर्मिथ्यात्वे किञ्चिन्मानम्। 'याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः'। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्'।

स उत्क्रामन् म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥ तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयं स्वप्नस्थानं तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च

SGDF
Sri Gurgeshwari Digital Foundation

'वैधर्म्याच्च न स्वप्नादिवदि'त्यादि भगवद्वचनविरुद्धत्वाच्च। न चैतन्नासीदस्ति भविष्यतीत्यनुभवः कदाचिद्भविष्यतीत्यत्र किञ्चिन्मानम्। किञ्चित्कालं स्थिरत्वमात्रस्य शून्यवादिनामपि सिद्धत्वाद्वैधर्म्याच्च न स्वप्नादिवदित्यादिवचनम् व्यर्थं स्यात्। अतो न कदाचिदस्य नासीदस्ति भविष्यतीत्यनुभवो भविष्यतीत्यभिप्रायेणैव तद्वचनम्। न च तथानुभवे शून्यस्यानिर्वचनीयस्य च कश्चिद्विशेषः। न च शून्यवादिनां तद्वादिनां च कश्चिद्विशेषो मोक्षे। न च नित्यज्ञानस्वरूपमस्तीति वचनेन कश्चिद्विशेषः ज्ञेयाभावे ज्ञानस्याप्यभावात्। न हि ज्ञेयरहितं ज्ञानं नामास्तीत्यत्र किञ्चिन्मानम्। न च स्वविषयं तदिति तेषां पक्षः। तदा कर्तृकर्मविरोध आपततीति हि तेषां वचनम्। न च जानातीत्यादिकर्तृत्वं ज्ञानस्य तैरङ्गीक्रियते। निर्विशेषत्वाङ्गीकारात्। अतः शून्यवादिन एव तेऽपि। स्वप्नो भूत्वा स्वापको भूत्वा। न हि जीवोऽपि स्वप्न एव भवति। स्वापं नयतीति स्वप्न इति च व्युत्पत्तिः। जायमानो म्रियमाणः स्वपितीत्यादि तु 'कृत्वा विवाहं तु कुरुप्रवीराः'। 'तदेतन्मे विजानीहि यथाऽहं मन्दधीर्हरे। सुखं बुध्येय दुर्बोधं येषां भवदनुग्रहात्'। 'जज्ञे बहुज्ञं परमाभ्युदारम्'। 'द्रष्टुश्चक्षुषो नास्ति जिह्वे'त्यादिवदन्तर्णीतणिचूत्वेन भवति। 'स्वातन्त्र्यस्नेहयोरन्तर्णीतणिजि'ति हि सूत्रम्। कथमन्यथा 'स्वयं निहत्य स्वयं निर्माय स्रवन्त्यः सृजते। स हि कर्ता स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती'त्यादि युज्यते। उक्तार्थे च स्वप्नेन शारीरमित्यादि जीवेश्वरभेदमन्त्रा उक्ताः प्रमाणत्वेन। ईश्वरो जीवस्य

परलोकस्थानं चाथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनन्दाँश्च पश्यति स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति ॥ ९ ॥ न तत्र रथा न रथयोगा

SGDF
Sri Gargeshwari Digital Foundation

भयानि पश्यन् जक्षदिव हसदिव। प्राज्ञेनात्मना संपरिष्वक्तः प्राज्ञेनात्मनान्वारूढ इत्यादिषु चाभ्यासेन सर्वत्र भेद एव निर्दिश्यते 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति च निर्णयात्मकं भगवद्वचनम्। न चावस्थाभेदेन जीवभेदो व्यावहारिकोऽप्यस्तीत्यत्र किञ्चिन्मानम्। न हि जाग्रत्स्वप्नस्थश्च द्वावित्यज्ञप्रयोगोऽपि कश्चिदस्ति लौकिकः। न च भ्रमस्तादृशः। तस्माद्भगवानेवात्रोच्यते सर्वकर्तृत्वेन। वेशान्ता वेश्यागृहाः। सुषुप्तिमोक्षोभयविवक्षयैव तद्वचनमपि भगवताप्युक्तं 'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं ही'ति। उभयापेक्षमित्युक्ते मोक्षस्थसुप्तिरिति मन्दस्याशङ्का स्यादतो मोक्षे सुप्तिरेव नास्तीति ज्ञापयितुमन्यतरापेक्षमित्युक्तं न त्वन्यतर एवार्थ इति। ज्ञाने विकल्पायोगात्। अतोऽवस्थाश्च लोकाश्च सर्वे विवक्षिताः। सर्वावतः आसमन्तात्सर्ववतः सर्वज्ञानान्युपादाय। 'बाह्यप्रकाशो भेत्युक्तो ज्योतिरान्तर उच्यते। सुखं स्वरूपभूतं यदानन्द इति कथ्यते। मुन्नामविषयोत्थं यत्प्रकृष्टविषयात्प्रमुदि'ति च। शुक्रं जीवमादाय। 'शोकेन रत्या युक्तत्वाच्छुक्रो जीव उदाहृत' इति च। 'रत्यानन्दौ पूर्णनित्यौ हितौ तेन हिरण्मयः। स्वर्णवर्णतया वाऽपि वासुदेवो हिरण्मयः। प्रधानहंसरूपत्वादेकहंस इतीरित' इति च। 'अंशेन जीवमादाय क्वचिदीशो बहिर्नयेत्। स्वप्नेषु फल्गुनं यद्वत्कृष्णः कैलासमानयत्। वासनारूपकान्प्रायस्त्वन्तरेव प्रदर्शयेत्। अतो बहिः कुलायादित्यपि

न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता॥ १०॥ तदेते श्लोका भवन्ति स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति॥ शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंसः॥ ११॥ प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा॥ स ईयतेऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एकहꣳसः॥ १२॥ स्वप्नान्त

SGDF
Sri Gargeshwari Digital Foundation

वाङ् न विरुध्यत' इति च। 'उच्चावचेषु रूपेषु प्रविशन्पुरुषोत्तमः। बहुरूपत्वमायाति स्वप्ने स जगतः प्रभुरि'ति च। 'मोदरूपत्वतो विष्णोः स्त्रीभिर्मोदो विडम्बनम्। जीवस्य मृतिकाले च स्वप्नकाले च केशवः। एवंविधानि कर्माणि कुर्वाणोऽपि न दृश्यते। तथा जागरिते सुप्तौ मुक्तैरेव तु दृश्यते। तथापि नायतेभ्यस्तं ज्ञानी ब्रूयाज्जनार्दनम्। यस्य गोचरतां विष्णुः कदाचिन्न प्रपद्यते। तस्यायतस्य पापस्य भेषजं न हि विद्यते। सुप्तिकालेऽप्ययं विष्णुः सदा जागरितात्मकः। यानि जागरिते पश्येत्तानि सुप्तेऽपि पश्यति। नित्यज्ञानस्वरूपत्वाद्भगवान्पुरुषोत्तमः। नित्यानन्यप्रकाशत्वेऽप्यन्यज्योतिर्यदा भवेत्। तदा स्यात्संशयोऽज्ञानावित्यत्रेति विशेषणमि'ति च। जीवस्यापि स्वप्नावस्थायां जागरितत्वेऽस्येति विशेषणं व्यर्थम्। पूर्वोक्तमपि मोक्षायैव भवति। अत ऊर्ध्वं विशिष्टमोक्षाय ब्रूहि। 'स्वयोग्यभगवद्दृष्टेः सर्वैर्मुक्तिरवाप्यते। पुनर्ज्ञानान्तराधिक्यात्सुखाधिक्यं विमोक्षगमि'ति ब्रह्मतर्के। स्वप्नसुषुप्त्युभयाभिप्रायेण तानि सुप्त इत्युक्तम्। तत्र सुषुप्तिमात्राभिप्रायेण स वा एष एतस्मिन्प्रसाद

उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि॥ उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्॥ १३॥ आराममस्य पश्यन्ति न तं पश्यति कश्चनेति॥ तं नायतं बोधयेदित्याहुर्दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यतेऽथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति॥ १४॥ स वा एष एतस्मिन्सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति॥१५॥ स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र यत्किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येव-

SGDF
Sri Gargeshwari Digital Foundation

इत्याह । 'यत्रोभयविवक्षा स्यात्परामर्शस्तदोभयोः । एकस्यापि भवे-न्नैकविवक्षायां क्वचिद्द्वयोरि'ति शब्दनिर्णये । स्वप्नाख्यातं स्थानं स्वप्नान्तम् । 'अन्तःस्थानं स्थलं वासः प्रदेश इति चोच्यत' इति च । स्वप्नान्तं च बुद्धान्तं चेत्यत्रापि स्वप्नान्तशब्दः स्वप्नसुषुप्त्युभयाभि-प्रायेण । 'शुभाशुभं तु दृष्ट्वैव स्वप्ने जागरितेऽपि च । असंस्पृष्टः सदा दुःखैश्चरतीशः पुनः पुनः । स्वप्नसुप्त्यात्मकं कूलमेकं बुद्धात्मकं परम् । महामत्स्य इवासङ्गी चरत्येको जनार्दनः । यं विष्णुं श्येनवच्छ्रान्तो जीवो जागरिते भ्रमन् । स्वप्ने च सुप्तावभ्येति संश्रान्तः सद्गृहं यथा । स्वित्यानन्दः परो विष्णुस्तमाप्तः सुप्त उच्यते । सम्प्राप्य तमयं जीवः कामयेन्नैव किञ्चन । न च स्वप्नसमभ्रान्तिज्ञानं याति कदाचन । सुषुप्तौ च किमु ज्ञानान्मुक्तौ प्राप्तो जनार्दनम् । निहितो भगवान्यत्र हिता नाड्यः प्रकीर्तिताः । नानावर्णो हरि-स्तासु नानारूपी व्यवस्थितः । तासां मध्ये सुषुम्ना च तत्र सुप्तिं व्रजत्ययम् । ता एव कण्ठदेशस्था जीवस्तत्र व्यवस्थितः । स्वप्ना-न्पश्यति जाग्रद्वद्भयं च प्रतिपद्यते । अ इत्यादिश्यते विष्णुरविद्या तन्निरीक्षणम् । तेन स्वप्नानयं पश्येज्जीवो जागरितं तथे'ति महा-

---

मेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥ स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ १७ ॥ तद्यथा महामत्स्य उभे कूले अनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभा-वन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च ॥ १८ ॥ तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ सल्लयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति ॥ १९ ॥ ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति ॥ यदेव जाग्रद्भयं पश्यति तदत्रा-

SGDF
Sri Gargeshwari Digital Foundation

मीमांसायाम् । जिनन्तीव ताडयन्तीव । विच्छाययति भयेन विच्छायं करोति । अहेमेवेदं सर्वोऽस्मि स्वयोग्यतापेक्षया पूर्णोऽस्मि । विषयभोगानन्वितस्वरूपानन्देनेत्येवशब्दः । इदमिति पूर्णत्वविशेषणम् । 'अजानता महिमानं तवेदमि'तिवत्स्वपूर्णतामापरोक्ष्येणानुभूयेदं पूर्णोऽस्मीति मन्यते । 'क्वचित्तद्भावशेषः स्यात्क्रियाशेषः क्वचिद्भवेत् । क्वचित्पदार्थशेषः स्यादिदमादिस्त्रिधा स्मृत' इति शब्दनिर्णये । न हि राजा देवो वा सर्वं जगद्भवति । राज्ञो भोगापेक्षया पूर्तिर्भवतीति देवदृष्टान्तः । प्रत्यक्षदर्शनार्थं राजदृष्टान्तः । 'स्वयोग्यपूर्तेः स्वातन्त्र्याद्राज्ञो देवगणस्य च । सर्वभावस्तथा मोक्षे न तु सर्वस्वरूपत'इति ब्रह्मतर्के । 'छन्दसामप्यवाच्यत्वादतिच्छन्दा हरिः स्मृतः । तेनाश्लिष्टो ह्ययं जीवः सुप्तो मुक्तोऽथवा भवेत् । विष्णोरूपं हि यन्नित्यमभयं पापवर्जितम् । आप्तकामं च पूर्णत्वादात्मकामं सुखत्वतः । शोकं विना सुरमणाच्छोकान्तरमितीरितम् । तेनाश्लिष्टः स्वपुत्राणां दायादानां न वै पिता । तेषां दुःखाद्दुःखित्वान्न माता लोकमान्यपि । अलोकमानान्नो लोको देवोऽपि स्वाधिकारतः । वर्षणादेर्व्युत्थितत्वान्न देवो वेदमान्यपि । अवेदमानान्नो वेदः पापी पापफलाप्ययात् । अपापः श्रमणश्चापि यतिधर्मात्समुत्थितेः । अयतिस्तापसश्चैवमनिष्टं

विद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदꣳ सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ २० ॥ तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयꣳ रूपꣳ तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामँ रूपँ शोकान्तरम् ॥ २१ ॥ अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति ॥ २२ ॥ यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो

SGDF
Sri Gargeshwari Digital Foundation

पुण्यमप्यमुम्। नान्वेत्येवं विधो मुक्तो विष्णोः सम्प्राप्तिमात्रतः। यत्तन्न विष्णुः पश्येत पश्यन्वै तन्न पश्यति। नित्यज्ञानस्वरूपत्वात्तत्समं नान्यदिष्यत' इति च। यत्किञ्चिद्वस्तु भगवता न दृष्टं तन्नास्त्येव। विद्यमानं सर्वं पश्यत्येव। न हि द्वितीयो द्रष्टा यो भक्तत्वेन जगत्पश्यति। तद्विरोधेन पश्यत्यभ्रान्तः। तद्दृष्टादन्यद्वा। 'नान्योऽतोऽस्ति द्रष्टे'त्यादिश्रुतेः। 'यत्तदृष्टं भगवता तदेवास्ति न चापरम्। न ह्यन्यो विद्यते द्रष्टा यः पश्येत्तददर्शितम्। ब्रह्मादिरपि यो द्रष्टा पश्येत्तस्य प्रसादतः। तददृष्टं कुतः पश्येदतः को वा विरोधत' इति च। यदवतारादिकं द्वैतत्वेन न पश्यति न तु तत्ततो द्वितीयम्। नित्यज्ञानत्वाक्रमाभावात्। यद्विभक्तत्वेन विष्णुः पश्यति तत्ततोऽन्यदस्ति चे'ति च। यस्माद्विष्णुर्विश्वं विभक्तत्वेनैव पश्यति तस्मात्तदन्यदस्त्येव। न च जगदभावोऽत्रोच्यते। अन्यद्विभक्तमिति विशेषणवैयर्थ्यात्। न च भ्रान्तिकल्पितं जगदित्यत्र किञ्चिन्मानम्। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमि'त्यादि निन्द-

---

विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्॥२३॥ यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत्॥२४॥ यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत्॥ २५॥ यद्वै तन्न वदति वदन्वै तं न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत्॥ २६॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात्॥ २७॥ यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्नतु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत॥ २८॥ यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति नहि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत्॥ २९॥ यद्वै तन्न विजानाति विजानन्वै तन्न

SGDF
Sri Gargeshwari Digital Foundation

नाच्च । द्रष्ट्रन्तरनिषेधेन तस्यैव सर्वद्रष्टृत्वमेव च यत्र वा अन्यदिव स्यादित्यादिनोपसंह्रीयते । अन्यथान्योऽन्यत्पश्येदित्यादिकमनर्थकम् । न ह्येकस्यान्यत्वेऽन्यस्यानन्यत्वं भवति । अतो द्वितीयोऽन्यशब्दो व्यर्थ एव स्यात् । न च तत्पक्षे दृश्यत्वादिकमात्मनो विद्यते । तस्माद्यत्र किञ्चिदपि स्वातन्त्र्यमन्यस्य भवति तत्रैव भगवतोऽन्यः पुरुषो भगवद्दृष्टादन्यत्पश्यतीत्यादि युज्यते तदेव नास्ति स्वतः । अतो नान्योऽन्यत्पश्येदित्यर्थः । अन्यदिवेतीवशब्दोऽल्पस्वातन्त्र्यार्थे । राज्ञः पृथगिव भृत्य इतिवत् । 'उपमार्थे तथाल्पत्वेऽपीवशब्दः प्रयुज्यत' इति शब्दनिर्णये । 'स्वरूपभेदे स्वातन्त्र्ये विरोधे च विलक्षणे । अन्यशब्दश्चतुर्ष्वेषु प्रयोक्तव्यो मनीषिभिरि'ति च । 'अनन्याः सर्व एवैते योधाः कुन्तीसुतादपी'ति प्रयोगाच्च । 'दशरात्रैर्भुक्तमिव न सम्यक्स्वल्पभोजनादि'ति च । 'प्रकृतेः पुरुषाणां च नाणुमात्रमपि क्वचित् । स्वातन्त्र्यं विष्णुना सर्वे नियताः सर्वदैव हि । तद्दृष्टं ततः को हि पश्येत्किं वापि तद्भवेदि'ति महामीमांसायाम् । 'अभेदेन स्वावताराञ्जीवाजीवं तु भेदतः । यदभ्रमो हरिर्वेत्ति स तदन्यच्च तद्वयमि'ति च । अन्यदप्यस्वातन्त्र्येणान्यवदवस्थितं यस्मिन्पक्षेऽस्ति तत्रैवान्यदर्शनादिव्यवहारो युज्यते । सप्तमरसादिदर्शनाभावादिति च । सर्वेन्द्रियोपभोगोऽपि विष्णोः स्वात्मनि विद्यते । यदि जगदेव न स्यात्तदा कथं मोक्षेऽप्यन्यानि भूतानि मात्रां उपजीवन्तीति युज्यते १ । मोक्षप्रकरणं चैतत् । 'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं ही'ति भगवद्वचनम् । 'यदा हि सलिलत्वेन प्रकृतिर्व्याप्य तिष्ठति । तदा तस्यां परो विष्णुरेको द्रष्टा व्यवस्थितः । अविरोधादद्वितीय एकोऽसौ समवर्जनात् । बृहज्ज्ञाना-

---

विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥ यत्र वा

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मलोकः सदैव पुरुषोत्तमः। सर्वगत्वादस्य गतिः परा विष्णोः सदैव हि। पूर्णैश्वर्यादस्य सम्पत्परमा सम्प्रकीर्तिता। सार्वज्ञ्यात्परमो लोको विष्णोरानन्द एव च। स्वातन्त्र्यात्परमो ज्ञेयः स हि पूर्णः सदोदितः। प्रतिबिम्बरूपविप्रुट्कांस्तदानन्दस्य चाखिलाः। मुक्ता ब्रह्मादयोऽश्नन्ति तारतम्येन नित्यदा। सलीलः सलिल इति वा। 'अन्येभ्यस्तु विमुक्तेभ्य आनन्दश्चक्रवर्तिनाम्। मुक्तानां हि शतोद्रिक्तः पितॄणां तेभ्य एव च। तेभ्योऽप्यृषीणां मुक्तानां कर्मदेवाभिधायिनाम्। तेभ्यश्च मुक्तदेवानां तेभ्यश्चोमापतेस्तथा। तस्माच्च ब्रह्मणस्त्वेवं मुक्तस्य गरुडादपि। एष एव ततो विष्णुः पूर्णानन्दः प्रकीर्तितः। यस्य ब्रह्मापि मुक्तः सन् विप्रुण्मात्रं समश्नुत'इति च। राद्धो मुक्तः। मनुष्याणां योग्यतया स्वसमेभ्यः प्रयत्नाधिक्यादाधिक्यं मुक्तौ प्राप्तुं शक्यत इत्यतः समृद्ध इत्युक्तम्। यावत्साधयितुं शक्यते तावत्साधनैः सम्पूर्णत्वेन मुक्त इत्यर्थः। स्वराष्ट्रे ज्ञानोपदेष्टृत्वान्मुक्तावपि तेषामधिपतिः। ज्ञानपूर्वकत्वेन मनुष्यत्वे दानादिकं कृत्वा तत्फलैरपि भोगैर्मुक्तौ सम्पन्नतमः। 'न हास्य कर्म क्षीयत'इति श्रुतेः। अन्यथा राद्ध इति विशेषणं व्यर्थं भवति। स मनुष्याणां परम आनन्द इति स्वरूपानन्दश्चात्रोच्यते। न ह्यमुक्तानां स्वरूपानन्दाविर्भावोऽस्ति।

अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ३१ ॥ सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥ स यो ह वै मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिस्सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको

SGDF
Sri Gurgeshwari Digital Foundation

'भुज्यते स्वसुखं मुक्तैराभासोऽन्यैस्ततोऽपर' इति च। जितलोका इत्यपि मुक्ता एवोच्यन्ते। गन्धर्वलोके गन्धर्वाणां ब्रह्मज्ञाने मुक्तावित्यर्थः। तदा हि ब्रह्मज्ञानं सदोदितमवतिष्ठते। एष ब्रह्मलोकः सम्राळित्यादिषु ज्ञानस्यैव लोकशब्दोदितत्वात्। यश्च श्रोत्रिय इति वचनं तेषामजादीनामपि मुक्तानामेवायं नियमेनानन्दशतगुणोद्रेकः। अन्यदा तु कदाचिद्भवति। कदाचिद्व्याकुलतया न भवतीति दर्शयितुम्। चशब्दस्तु श्रोत्रियत्वावृजिनत्वाकामहतत्वादीनां गुणानां मुक्तौ समुच्चयार्थः। मुक्तस्यैवैते गुणा भवन्तीति मुक्तस्वीकारार्थं य इति विशेषणम्। 'सर्वं श्रुतिफलं मुक्तैः प्राप्यं नान्येन केनचित्। अतस्तु श्रोत्रियो मुक्तो ह्यन्यः श्रोत्रियको भवेत्। अदुःखत्वं च तस्यैव कामैरहतता तथा। यः कामितं न प्राप्नोति स कामहत उच्यते। काम्याप्राप्तेश्च पापाच्च कामात्कामहतः स्मृतः। उभयस्याप्यभावेन मुक्तोऽकामहतो मत'इति च। 'आजानदेवा इन्द्राद्या जातेभ्यस्ते वरा यत' इति च। प्रजापतिलोक इत्युक्तेनैव मुक्तप्रजापतिसिद्धावपि मुक्तस्यैव प्रजापतेर्ब्रह्मणश्चायं विशेष इति स्वरूपकथनार्थं यश्च श्रोत्रिय इत्यादि। अनुपचरितश्रोत्रियादित्वमिति ज्ञापयितुमभ्यासः। सर्वेषामपि मुक्तानां नियमेन तदस्तीति ज्ञापयितुं च। 'प्रजास्तु पशुशब्दोक्ताः पशुपस्तु प्रजापतिरि'ति च। अथशब्दादेष ब्रह्मलोक इति विशेषणाच्च द्वितीयब्रह्मलोकशब्देन परब्रह्मैवोच्यते। अन्यथैष एव परम आनन्द इत्युक्त्वा पुनरेष इतिशब्दोऽनर्थकः स्यात्। तस्यैव ब्रह्मलोकशब्देन पूर्वमभ्यासाच्च। न च तैत्तिरीयादि-

---

गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्तेऽथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतं प्रजापतिलोक आनन्दाः स

SGDF
Sri Gargeshwari Digital Foundation

श्रुतिविरोधः। शतशब्दस्यायुते दशलक्षादावपि समत्वात्। अतश्चक्रवर्तिभ्यो मनुष्यगन्धर्वाः शताधिकाः। देवगन्धर्वा अयुताधिकाः। पितरो दशलक्षाधिका इत्यविरोधः। उत्तमगन्धर्वापेक्षया पितृभ्यो गन्धर्वाणामाधिक्यं च युज्यते। आजानदेवेभ्यो जाता आजानजा इत्यतस्तत्राप्यविरोधः। यत्राजानजा इत्युपरिपाठस्तत्राजानेभ्यो ब्रह्मादिभ्यो जाता इति भवति। इन्द्रबृहस्पत्यादीनां विशेषस्तु विशेषवचनत्वादत्राप्यङ्गीकर्तव्य एव। 'सामान्यधर्मो बलवान् धर्माद्विशेषिकाद्यथा। बलवद्विशेषवचनं सामान्यवचनात्तथे'ति च। 'नृपा मनुष्यगन्धर्वा देवाश्च पितरस्तथा। देवैः सहितगन्धर्वा ऋषयो देवतास्तथा। इन्द्रो बृहस्पतिश्चैव प्रधानेन्द्रः पुरन्दरः। रुद्रो ब्रह्मेति क्रमशो मुक्ताः शतगुणोत्तरा' इति च। 'अतिप्रयत्नतो यावत्प्राप्तुं शक्यं विमुक्तिगम्। सुखाद्यं तस्य सम्प्राप्त्यै ज्ञानश्रेण्यः क्रमात्स्मृताः। एकां श्रेणीं प्रविज्ञाय तदुत्कृष्टां च तद्वराम्। क्रमेणैव विजिज्ञासुर्जनकः पृच्छति स्म ह। पुनः पुनर्विमोक्षाय ब्रूहीत्यद्धा वरात्पुरे'ति च। 'रहस्यमस्यायोग्यं च यदि मामेष पृच्छति। दत्तो मया वरोऽस्येति वक्तव्यं मे भविष्यति। इति भीतोऽभवद्राज्ञो याज्ञवल्क्यः सुमेधये'ति ब्रह्माण्डे। तेभ्य आश्वलादिभ्यः।

'सर्वदा जीवमादाय नियमाद्विष्णुरेव हि। जाग्रदादिषु संयाति नान्यथा तु कथञ्चन। एवं नियमविज्ञप्त्यै जीवास्वातन्त्र्यवित्तये। परिवृत्तिमवस्थासु साभ्यासा वक्ति हि श्रुतिरि'ति निर्णये। अतस्तात्पर्यार्थं पुनर्वचनम्। ग्रामादिकमुत्सर्जयायात्। 'यथा ग्रामं

एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनन्द एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥ स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रति-

SGDF
Sri Gurgeshwari Digital Foundation

परित्यज्य यात्यनः पुमधिष्ठितम्। एवं देहं परित्यज्य विष्णुनाधिष्ठितः पुमानि'ति च। अणिमानं भगवन्तम्। 'स य एषोऽणिमा' 'तेजः परस्यां देवतायामि'ति हि श्रुतिः। उपतपता रोगादिना। 'आम्रं बाल्येऽपि पतति परिणामे ह्युदुम्बरम्। सम्यक्पाके यथाश्वत्थं फलं जीवमृतिस्तथा। कलावाम्रोपमा जीवास्त्रेतास्त्वौदुम्बरोपमाः। कृतेऽश्वत्थसमाश्चैव यान्ति ब्रह्मवशाः सदे'ति पाद्मे। प्राणायैव 'वायुमेवाद्रवत्येष जीवो मोक्षाय तत्त्ववित्। तदनुज्ञयैव ज्ञानित्वमतस्तं पुनराव्रजेत्। सर्वेऽपि वायुमासाद्य जायस्व ज्ञानमाप्नुहि। इति तस्य वरादेव जायन्ते ज्ञानिनोऽखिलाः। पुनस्तं प्राप्य मुक्तिश्च प्राप्नुयुस्तदनुज्ञये'ति प्रवृत्ते। इदं मुक्तजीवस्वरूपमायाति। अतोऽनेन सहेदं परं ब्रह्मायातीति परब्रह्मणः पूजार्थं प्रतिकल्पन्ते। यथा राज्ञो ध्वजादिकं दृष्ट्वाऽयं ध्वज आगच्छति तस्माद्राजाऽऽयातीति पूजां प्रतिकल्पन्ते तद्वत्। अन्यथेदं ब्रह्मायातीदमागच्छतीति द्विरुक्तिर्व्यर्था स्यात्। वीप्सात्वे त्वयमायातीत्येकप्रकारेण शब्दाभ्यासः स्यात्। 'एकप्रकारशब्दानामभ्यासस्त्वादरार्थकः। स्वरवर्णादिमात्रं वाप्यन्यथाचेत्तदा परः। अर्थः स्यादेष नियमो वाक्ये वीप्सापदे तथा। प्रातिस्विकार्थेऽपि भवेदभ्यासे वा तथा स्थित' इति शब्दनिर्णये। न च कुत्रचिदादरार्थे द्विरूपप्रयोगो दृष्टोऽनंतरितः। 'यदा मुक्तो व्रजत्यूर्ध्वं तदा तत्सहितो हरिः। नियमाद्दृश्यते देवैरमुक्ते नियमो

न्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ३४ ॥ तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेवमेवायं शरीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जद्याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥ स यत्रायमणिमानं न्येति जरयावोपतपता वाणिमानं निगच्छति तद्यथाम्रमौदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥३६॥ तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छती-

SGDF
Sri Gangeshwari Digital Foundation

न तु। यथा ध्वजादिकं दृष्ट्वा पूजां राज्ञः प्रकुर्वते। एवं विमुक्तिगं दृष्ट्वा विष्णोः पूजां प्रकुर्वत' इति तत्त्वनिर्णये। तस्मादणिमानं न्येतीत्यादिना जीवगतं ब्रह्मैवोच्यते। जीवोपतापादि तु नैव। 'जीवमादाय गच्छन्तमनुयान्ति दिवौकसः। प्राणाभिमानिनो विष्णुं नृपं परिजना यथे'ति च। 'उग्रास्तु श्रेणयः प्रोक्ता योधाः प्रत्येनसः स्मृताः। ग्रामण्यस्तु चमूपालास्ते सर्वे द्विविधा मताः। राज्ञा सह स्थिताश्चैव तथा जनपदे स्थिताः। ते सर्वेऽपि नियन्तव्या श्रेणीभिर्द्विविधैः सदे'ति राजनीतौ। 'अनुयान्ति शरीरस्थ. अभियान्ति स्वलोकगाः। मुक्तमादाय गच्छन्तं विष्णुं सर्वे दिवौकस' इत्यध्यात्मे। इति ज्योतिर्ब्राह्मणं ॥ ६ ॥ ३ ॥

'सर्वेषां बलकारित्वाद्बल्यो विष्णुः प्रकीर्तितः। तं यदा प्राप्य जीवात्मा मृतेः पूर्वं विमुग्धताम्। याति विष्णुं तदा देवा यान्ति तेजःस्वरूपिणः। तानादाय हरिश्चक्षुस्थानाद्हृदयमाव्रजेत्। तदा न किञ्चिज्जानाति जीवो ब्रह्मसमाश्रित' इति च। एनं बल्यमभिसमायान्ति। पराङ्स्थितश्चाक्षुषो भगवान्प्रत्यक्पर्यावर्तते। 'इंधो ह वै नामैष योऽयं दक्षिणेक्षन्पुरुष' इत्यादि श्रुतेः। 'हृदये संस्थितो जीवो विशेषेण हरिस्तथा। चक्षुरादिषु रूपाणि जाग्रत्काले तयोः सदा। बहूनि संति तान्येव यदैकीभावमाप्नुयुः। हृदयस्थेन रूपेण

त्येव९ हैवंविद९ सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्मायातीदमागच्छतीति ॥ ३७ ॥ तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥३८॥ इति ज्योतिर्ब्राह्मणम् ॥६॥३॥

स यत्रायमात्मा बल्यं न्येत्य सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैव चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति ॥ १ ॥ एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न

SGDF
Sri Gangeshwari Digital Foundation

तदा जीवो न किञ्चन। जानातीति विदुः प्राज्ञास्तदा विष्णोः स्वतेजसा। द्योतते हृदयाग्रं च तेन द्वारेण केशवः। निष्क्रामेज्जीवमादाय प्राण एनमनुव्रजेत्। प्राणमन्ये तथा देवा विद्या कर्म च योग्यते'ति महामीमांसायां। 'कर्माभिमानी गरुडो ब्रह्मा ज्ञानाभिमानवान्। पूर्वप्रज्ञा योग्यता स्याद्रमा तदभिमानिनी। एतेऽपि विष्णुं गच्छन्तमनुयान्ति सदैव तु। वायुर्ज्ञानात्मकश्चैव प्राणात्मक इति द्विधा। अनुयाति हृषीकेशं सर्वैर्देवैः समन्वित' इति च। 'देवलोके चिरं रत्वा यस्तु मुक्तिं व्रजिष्यति। स तु तद्देवताद्वारेणोत्क्रामति न संशयः। विष्णोर्लोकं परं गच्छन्नुत्क्रामेन्मूर्ध्न एव तु। तथैव ब्रह्मणो लोकं सुषुम्नाया विभेदत' इत्यध्यात्मे। सविज्ञानो भवति जीवेन सहितो भवति। सविज्ञानं जीवमेवान्ववक्रामति। जीवमारुह्य गच्छति भगवान्प्राज्ञेनात्मनाऽन्वारूढ इति ह्युक्तम्। 'यो विज्ञाने तिष्ठन्य आत्मनि तिष्ठन्नि'त्युभयोर्जीवाभिप्रायेण हि पाठः। 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयत' इति भगवद्वचनं। 'विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठंति यत्रे'ति च। एष आत्मा निष्क्रामतीति जीवाङ्गीकारे शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुत इत्यादिकमयुक्तं स्यात्। न हि जीवः शरीरं निहत्य अविद्यामयति रूपान्तरं वा करोति। न च सर्वमयत्वं जीवस्य। ब्रह्मेति विशेषणाच्च।

रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति स विज्ञानमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च॥ २॥ तद्यथा तृणजलायुका तृणस्यान्तं गत्वा अन्यमाक्रममाक्रम्यात्मानमुपसꣳहरत्येवमेवायमात्मेदꣳ शरीरं निहत्याविद्यां गमयित्वान्य-

SGDF
Sri Gargeshwari Digital Foundation

'यथा तृणजलूकैवं भगवान्पुरुषोत्तमः। जीवस्य सूक्ष्मरूपं तु प्राप्य स्थूलं परित्यजेत्। इदं शरीरं भूतेषु विलापयति केशवः। अविद्यां चैव जीवस्य गमयेज्ज्ञानसर्जनात्। स्वर्णकारो यथा स्वर्णमलमग्नौ निहत्य च। शुद्धेन तेन चात्मेष्टं कुरुते रूपमञ्जसा। एवं स भगवान्विष्णुर्जीवस्वर्णस्य यन्मलम्। अविद्याकामकर्माद्यमात्माग्नौ नाश्य सर्वकृत्। स्वेच्छया कुरुते रूपं यद्योग्यं तस्य मुक्तिगम्। पितृजीवस्य पित्र्यं स गान्धर्वं तस्य चैव हि। दैवं तु देवजीवस्य प्राजापत्यं प्रजापतेः। ब्रह्मणो ब्राह्ममेवेति नित्यानन्दस्वरूपकम्। न योग्यतां विना क्वापि पूर्वप्रज्ञाश्रुतेः क्वचित्। यदा मुक्तो भवेद्ब्रह्मा तदा ब्रह्मा स मुख्यतः। एवं प्रजापतिश्चैव तथैवान्येऽपि सर्वशः। यथा हि स्वर्णरूप्याद्यं मलहानौ हि तद्भवेत्। पूर्वं तु योग्यतामात्रं द्विजत्वं बालके यथे'त्यादि च। न ह्यमुक्तानां कल्याणतरत्वं। न च मृगादीनां कल्याणत्वमपि। मरणमात्रं चेदत्रोच्यते तदा कल्याणतरमिति विशेषणं व्यर्थं स्यात्। पूर्वोक्तश्रोत्रियावृजिनाकामहतदेवादीनां चात्रोक्तिः। पूर्वाननुभूतत्वान्नवतरं च भवति। 'अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ। तथैव सुमहत्तेजः करोति भगवान्महत्। अतो नवतरं चैतद्ब्रह्मादीनां करोत्यजः। अन्येषां वा भूतानां मनुष्यादीनां नासुरादीनां भविष्यति च। मयं तु मानुषं स्वर्णं पीतं गान्धर्वमेव च। इंद्रगोपनिभं नाम्ना जांबूनदमिति स्मृतम्। दैवं चामीकरं नाम प्रोद्यदादित्यसन्निभं। नैजो विशेषः स्वर्णानामेतेषां सर्वदैव च। नाग्न्यादिनापि समतां यान्ति तानि कथञ्चन। एवं मानुषगन्धर्वपितृदेवाः प्रजापतिः। ब्रह्मेति क्रमशो

माक्रममाक्रम्यात्मानमुपसꣳहरति ॥ ३ ॥ तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुत एवमेवायमात्मेदꣳ शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरꣳ रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम् ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

जीवा विशिष्टा उत्तरोत्तरं । स्वभावेनैव मुक्तानां स्वभावो व्यक्तिमाव्रजेदि'त्यादि च । 'स यत्राणिमानं न्येति तस्य ह वै तस्य हृदयस्याग्रं प्रद्योतते तेन धीरा अपियन्ति ब्रह्मविदः। स्वर्गं लोकमित ऊर्ध्वा विमुक्तास्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चे'त्येवमादेश्च मुक्तविषयमेवैतत् । मुक्तविषयत्वेन चैतत्प्रकरणं सूचयामास भगवान् । 'तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यादि'त्यादिना ।

न चान्या मुक्तिरस्तीत्यत्र किञ्चिन्मानम् । 'सोऽश्नुते सर्वान्कान्त्सह ब्रह्मणा विपश्चिता । एतमानन्दमयमात्मानमुपसंक्रम्येमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन्' । 'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु' । 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाच'। 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः'। 'स य एवंविदेवं पश्यन्नेवं मन्वानस्तस्य सर्वेषु लोकेषु कामचारो भवति' । 'स एकधा भवति त्रिधा भवति पंचधा सप्तधा पुनश्चैकादशस्मृतः' । 'न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते'। 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानत आत्मा भवति गौतम'। 'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'। 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः'। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च'। 'न वर्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः। श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशस' इत्यादि श्रुतिस्मृतीतिहासपुराणेषु तेषां निर्गुणमुक्तिविषयत्वेन प्रसिद्धेष्वेव स्थलेषु मुक्त्यनंतरं भोगोक्तेश्च। 'अशरीरक्रियागौणदेहादेस्ते ह्यभावतः। चिदानन्दशरीरादेः सदेहाद्या विमोक्षिणः। अनिन्द्रिया अनाहारा अनिष्पन्दाः सुगन्धिनः' इत्यादेश्च।

SGDF
Sri Gargeshwari Digital Foundation

मयट् प्राचुर्ये स्वरूपे च । 'आत्मायमाततत्वाद्धि ब्रह्म पूर्णगुणत्वः । दूरस्थत्वात्स इत्युक्तः समीपस्थो ह्ययं स्मृतः । पूर्णज्ञानस्वरूपत्वाद्विज्ञानमय ईर्यते । सर्वमन्तृस्वरूपत्वात्स एवोक्तो मनोमयः । बलपूर्णस्वरूपत्वात्स प्राणमय ईरितः । सर्वद्रष्टृस्वरूपत्वाच्चक्षुर्मय इतीर्यते । सर्वश्रोतृस्वरूपत्वात्स श्रोत्रमय ईरितः । सर्वाधारात्सुगन्धत्वात्पृथिवीमय उच्यते । सर्वतृप्तिकरत्वाच्च विष्णुरापोमयः स्मृतः । सर्वकर्तृस्वरूपत्वाच्छ्रुतो वायुमयो हरिः । अवकाशप्रदातृत्वादाकाशमय ईर्यते । पूर्णतेजःस्वरूपत्वात्तेजोमय उदाहृतः । सृष्ट्यादीच्छास्वरूपत्वात्स्मृतः काममयो हरिः । सर्वदुष्टप्रतीपत्वात्स हि क्रोधमयो मतः । सुखादिधर्मरूपत्वाज्ज्ञेयो धर्ममयः प्रभुः । अप्राकृतस्वरूपत्वादनेतन्मय एव च । अपार्थिवो हरेर्गन्धो न तृप्तिश्चाप्यवात्मिका । नाग्नेयं तस्य तेजोऽपि न च वायुर्बलं हरेः । श्रोत्राद्या नास्य चाकाशो मनस्तत्त्वं न तन्मनः । बुद्धितत्त्वं न तद्बुद्धिर्नाहमस्याहमुच्यते । महदात्मकं न तच्चित्तं प्रकृतिर्नास्य चेतना । प्रकृत्यादिगुणा यस्मात्तद्गुणप्रतिबिंबकाः । अतः सर्वमयो विष्णुः सर्वाद्यत्वादतन्मयः । चिदानन्दात्मकास्तस्य गुणाः सर्वगुणात्मकाः । सर्वदातः सर्ववैलक्षण्यमेषां प्रकीर्तितं । क्रोधः क्षमात्मको यस्य चिदानन्दात्मकस्तथा । अन्यक्रोधसमः क्रोधस्तस्य विष्णोः कथं भवेत् । एवं सर्वगुणास्तस्य सर्वेभ्योऽपि विलक्षणाः । पूर्वप्रज्ञानुसारेण विमुक्तस्तमुपेष्यति । अनादिकालसम्बन्धा या प्रज्ञा विष्णुसंश्रया । पूर्वप्रज्ञेति सा प्रोक्ता ब्रह्मादेस्तारतम्यत' इति च महामीमांसायाम् । 'वर्तमानं यतो विष्णोर्वशे तस्मादिदम्मयः । अतीतानागतं यस्मात्त-

---

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय अपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयस्सर्वमय-

SGDF
Sri Gangeshwari Digital Foundation

द्दशेऽतो ह्यदोमयः। प्राधान्ये च मयट् प्रोक्तः स्वरूपे च यतो भवेत्। इदंरूपोऽप्यदोरूपस्ततो नित्यत्वतो हरिः। अस्य तस्य प्रधानश्च नित्यपूर्णबलत्वत'इति च। 'यथा पूर्वं तथेदानीमिति विष्णुस्तदुच्यते। यथा बाह्ये तथैवान्ते ततो यदिति चोच्यते। यथेदानीं तथा नित्यं यस्मादेष भविष्यति। अत एतदितिप्रोक्तो वासुदेवो जगत्पतिः। स यथा करोति पुरुषं तथैवायं भविष्यति। साधुर्भवति साधुं चेत्करोति पुरुषोत्तमः। पापो भवति पापं चेत्स करोति जनार्दनः। तत्प्रेरितेन पुण्येन पुण्यो भवति मानवः। तत्प्रेरितेन पापेन तथा पापः पुमान्भवेत्। आहुश्च तत्कामाधीनं जीवमेनं सदैव हि। तत्कामादस्य कामः स्याद्यथाकामस्तथा भवेत्। कामानुसारिणी निष्ठा कर्मनिष्ठाऽनुसारतः। फलं कर्मानुसारेण विष्णोः काममयस्ततः। जीवोऽयं सर्वदैव स्यान्नान्यथा तु कथंचने'त्यादि च।

जीवेश्वराभेदाङ्गीकारे 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति सूत्रविरोधः। 'प्राज्ञेनात्मनान्वारूढः प्राज्ञेनात्मना सम्परिष्वक्त'इत्यादि श्रुतिविरोधश्च। न च व्यावहारिकभेदो नाम कश्चिदस्तीत्यत्र किञ्चिन्मानम्। भ्रान्तिभेदत्वे श्रुतिसिद्धत्वमेव न स्यात्। न हि निर्दोषश्रुतिवाक्यसिद्धं भ्रान्तमिति युक्तम्। उन्मत्तवाक्यवत्सर्ववेदस्याप्रामाण्यप्रसक्तेः। न च स्वविषयभ्रमत्वादन्यदप्रामाण्यं नाम किञ्चित्। तन्मते ह्युन्मत्तवाक्यविषयस्याप्यनिर्वाच्यत्वमेव। 'सत्यः सो अस्य महिमा गृणेशवः'। 'त एते सत्याः कामा'इत्यादिश्रुतिभिर्भगवद्गुणानां सत्यत्वमेव ज्ञायते। 'सत्यमेनमनुविश्वे मदन्ति रातिं देवस्य गृणतो मघोन'इति सर्वजीवानां भगवदनुजीवनं च सत्यमित्येवोच्यते। तदा कथं जीवेशभेदस्यासत्यता?। न च सर्वविध्यर्थं क्रियासिद्धस्य कुत्रचिद्बाधो दृष्टः। 'न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजत' इति मुक्त्यनन्तरमपि तदधीनत्वप्रतीतेश्च। न भेदस्यासत्यता। न हि

SGDF
Sri Gurgeshwari Digital Foundation

संसारावस्थायामक्षीणकर्मता भवति। न च मुख्यार्थं परित्यज्यामुख्यो युक्तः। अतः सत्य एव भेदः। स भगवान्यथाकारी यथा कारयति यथा चारी यथाचारयति तथा भवति। स भगवान् यथा कामो भवति तथा कामो जीवो भवति। इत्थं कामोऽस्य भूयादिति भगवदिच्छावशादस्य कामो भवतीत्यर्थः। क्रतुरितीत्थं करिष्याम्येवेति निश्चयरूपः कामः। स भगवदिच्छया हि भवति। 'कामेन मे काम आगादि'ति च श्रुतिः। 'अयोग्यकामराहित्यान्मुक्तो निष्काम उच्यते। अ इत्युक्तः परो विष्णुस्तत्कामोऽकाम ईरितः। तथा कामयमानः स योग्यकामस्य चापि तु। कादाचित्कसमुद्भूतेर्भगवत्कामनां विना। कामितस्याखिलस्याप्तेराप्तकामश्च मुक्तिगः। चिदानन्दात्मकं रूपं कामत्वेन भविष्यति। यतस्तेनैवात्मकाम इति मुक्तोऽभिधीयते। मुक्तस्य न पुनः प्राणा उत्क्रामन्ति कदाचन। जीवोऽपि ब्रह्मशब्दोक्तो जडाद्गुणबृहत्त्वतः। प्राप्नोति परमं ब्रह्म प्रलये प्रलये सदा। अन्यदा स्वेच्छया विष्णोः स्वरूपाद्बहिरेष्यति। स्वेच्छयान्तर्बहिश्चैवं रमते मुक्त आत्मवानि'त्यादि च। न चामुक्तस्य कथञ्चिदाप्तकामता मुख्यतः। ब्रह्माप्येतीतिवचनात्पूर्वब्रह्मशब्दो जीववाच्येव। यद्यज्ञाननाशात्परिज्ञानमात्रं तदा स्वस्य ब्रह्मतां विजानाती-

---

स्तद्यदेतदिदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनाथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते ॥ ॥ ५ ॥ तदेष श्लोको भवति ॥ तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषिक्तमस्य ॥ प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् ॥ तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥ तदेष श्लोको भवति ॥ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत

SGDF
Sri Gargeshwari Digital Foundation

त्येव स्यात्। न तु ब्रह्माप्येतीति। न हि राजपुत्रः पूर्वमात्मानमजानन्पश्चाद्राजपुत्र इति विज्ञाय राजपुत्रमप्येतीत्युच्यते। किन्तु राजपुत्रत्वेनात्मानं व्यजानादित्येवोच्यते। विस्मृतकण्ठमणिरपि विज्ञात इत्येवोच्यते, न तु प्राप्त इति। अतः पूर्वब्रह्मशब्दो जीववाच्येव। 'अथ मर्त्योऽमृतो भवति'। अथ मुक्त्यनन्तरं न कदाचिन्मृतिरस्य भवतीत्यर्थः। मुक्त एव परे ब्रह्मणीच्छया प्रविशति निःसरति च। दर्शनादीन्ब्रह्मणो भोगांश्च करोति। स्वरूपभूताः कामा मुक्तानां भवन्तीत्यतो हृदि श्रिता इति विशेषणम्। हृदयस्यैव मोचनात्तत्स्थाः कामा मुक्तानामपगच्छन्तीति युक्तमेव। न ह्यमुक्तस्य कदाचित्सर्वे कामा मुच्यन्ते। सुप्त्यादावप्यभिभव एव वासनाया विद्यमानत्वात्। वासनाया हि पुनरुद्भवः। 'यावद्विमुच्येत्पुरुषस्तावत्कामा हृदि स्थिताः। चित्ताभावाद्विमुक्तस्य स्युः कामास्तद्गताः कुतः। स्वरूपभूतचित्तेन कामाद्याः स्युः सुखात्मकाः। दुःखात्मकाः प्राकृता वा मुक्तानां न कथञ्चने'ति ब्रह्मतर्के। अयं जीवोऽथ मुक्त्यनन्तरमेवाशरीरो भवति। अमृतः कदापि न मृतः। प्राणाख्यं परब्रह्मैव। 'कतम एको देव इति प्राण इति। स ब्रह्मेत्याचक्षत'इत्यादि श्रुतेः। तेज एव च तेज इति श्रीः। 'अन्येषाममृतत्वं च भवेद्विष्णुप्रसादतः। नित्यामृतः स भगवान् श्रीश्च नान्यः कथञ्चने'ति नारदीये। 'प्राणस्तु भगवान्विष्णुः सर्वनेतृत्वतो विभुः। तेजस्तु सर्वतेजस्त्वाच्छ्रीरेव समुदाहृते'ति च। 'तत्प्राप्तेः सुखहेतुत्वात्पन्था इति हरिः श्रुतः। अणुश्च विततश्चासौ यतोऽन्तर्बहिरेव च। श्रिया स्पृष्टः श्रीपतित्वादनु-

---

इति॥ तद्यथाऽहिनिर्ल्वयनी (निळ) यनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः॥७॥ तदेते श्लोका भवन्ति॥ अणुः पन्था विततः पुराणो माꣳ स्पृष्टोऽनुवित्तो मयैव॥ तेन धीरा अपियन्ति

SGDF
Sri Gangeshwari Digital Foundation

वित्तस्तथैव च । तस्य प्रसादात्संयान्ति तल्लोकं सर्वमोक्षिणः । ऊर्ध्वः स भगवान्सर्वविशिष्टो यत्सदैव हि । रूपमाहुः पञ्चविधं तस्य विष्णोर्महात्मनः । शुक्लं तु वासुदेवाख्यमनिरुद्धं तु नीलकम् । सङ्कर्षणं पिङ्गलं च प्रद्युम्नं हरितं स्मृतम् । नारायणं लोहितं स्यात्पञ्चरूपाण्यजे हरौ । पञ्चभेदविभिन्नो यस्त्वभिन्नोऽपि स्वरूपतः । स पन्था ब्रह्मणा ज्ञातः पद्मजेनैव सन्ततम् । परब्रह्मस्वरूपज्ञो महातेजः श्रियस्तथा । सम्यक्स्वरूपविज्ञानात्तैजसत्वेन कीर्तितः । भगवत्कर्मकर्तृत्वात्पुण्यकृच्चाभिधीयते । एवं विधोऽपि तस्यैव प्रसादाद्याति तां गतिम् । अतः पन्थास्समुद्दिष्टो भगवान्केशवः स्वयम् । स्वगताखिलभेदेन विहीनोऽपि स सर्वदा । सर्वेषां व्यवहाराणां भेदोत्थानां स ईश्वरः। अभिन्नोऽपि ह्यतो भिन्नः पञ्चभेदादिना मृषा। अन्यथोपासका येऽस्य ते यान्ति ह्यधरं तमः । ततः किञ्चिद्विशेषेण दुर्ज्ञानस्याविनिन्दकाः । सम्यगाचार्यवचनमवज्ञाय विरोधिनि। सत्वबुद्धिं यतः कुर्युस्ततस्तेऽधिकपापिनः । अप्राप्तत्यागिनः प्राप्तनिष्ठाहीनो हि दोषवान् । नित्यदुःखस्वरूपत्वादनन्दं तत्तमो मतम् । बोधके विद्यमानेऽपि ये विदुर्न परं हरिम् । तेऽपि यान्ति तमो घोरं नित्योद्रिक्तासुखात्मकमि'ति च । बुधस्सकाशेऽप्यविद्वांस इत्यर्थः । 'बोधना-

---

ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वो विमुक्ताः ॥ ८ ॥ तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितं च॥ एष पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ९ ॥ अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते ॥ ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥ १० ॥ अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः ॥ तांस्ते प्रेत्याभिगच्छन्त्यविद्वाꣳसोबुधो जनाः ॥ ११ ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥ यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्सन्दोघे गहने प्रविष्टः ॥ स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥ १३ ॥ इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदीर्महती विनष्टिः ॥ य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःख-

SGDF
Sri Gangeshwari Digital Foundation

ज्ज्ञानवान्भुत्स्यात्तत्सकाशाच्च ये हरिम् । न विदुस्ते तमो यान्ति सर्वदुःखात्मकं परम् । यदि जीवः परात्मानमयमस्मीति वेदितुम् । योग्यः शरीरभेदादेः कथं दुःखी तदा भवेत् । दुःखी शरीरसम्बन्धाज्जीवो विष्णोः प्रसादतः । अदुःखी विशुद्धानन्दं मुक्त एव च भोक्ष्यति । नित्यमुक्तः पूर्णसुखः स्वतन्त्रः पुरुषोत्तमः । परतन्त्रः कथं जीवो योग्यः सोऽस्मीति वेदितुम् । यस्मात्सोऽस्मीति नैवायं विजानीयात्कदाचन । तदीयोऽस्मीति जानीयात्सर्वदैव बुधस्तत' इति च । 'यस्य ज्ञातो नित्यबुद्धो भगवान्पुरुषोत्तमः । तस्य लोकः स एवैको यो लोकः परमात्मनः । स हि विष्णुः परो वायोरपि कर्ता प्रकीर्तितः । विश्वो वायुः समुद्दिष्टः पूर्णत्वाज्जीवसङ्घतः । तदन्यस्यापि सर्वस्य कर्तैको विष्णुरेव हि । प्रविष्टो गहने देहमध्ये सन्दोघ नामनि । तज्ज्ञानी याति तं लोकं तत्प्रसादाच्च वर्तते । न वत्सराश्च नाहानि यस्य नित्याविकारतः । ज्योतिषां ज्योतिरचलं तद्देवाः समुपासते । प्राणश्चक्षुस्तथैवान्नं मनः श्रोत्रं च पञ्चमम् । मूलप्रकृतिसंयुक्तं यद्गतं प्रतिपूरुषम् । तस्य रूपगुणाद्येषु न कश्चिद्भेद इष्यते । तद्भेददर्शी संयाति मृत्योर्मृत्य्वभिधं तमः । तस्मादेकप्रकारेण द्रष्टव्यो भगवान्हरिः । परिमाणविहीनत्वादप्रमेय इतीरितः' । इत्यादिवचनादप्रमेयत्वमवाच्यत्वममनोविषयत्वं च सर्वात्मना न मनसैवानुद्रष्टव्यमित्युक्तत्वात् । न च केनाप्यवाच्यस्य लक्षणा दृष्टा । क्षीरमाधुर्यविशेषादेरपि तत्तच्छब्देनैव वाच्यत्वात् । 'विशदं क्षीरमाधुर्य

मेवापियन्ति ॥ १४ ॥ यदैतमनुपश्यन्त्यात्मानं देवमञ्जसा ॥ ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥ यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ॥ तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥१६॥ यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ॥ तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥ प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥ मनसैवानुद्रष्टव्यं

SGDF
Sri Gangeshwari Digital Foundation

गुडे तीक्ष्णं घृते स्थिर'मित्यादि च। न च निर्गुणस्य सत्यमेवास्ति। गुणभेदादीनामपि सन्त्येव गुणाः। न चानवस्था स्वनिर्वाहकत्वात्। 'अवाच्यममनोगम्यमगुणं चेत्कुतोऽस्ति तत्। तस्मादेवं वदन्वस्तुशून्यतामर्थतो वदेत्। गुणाश्च गुणिनः सर्वे स्वेनैव गुणिनो गुणा' इत्यादि च। 'सर्वमस्य वशे यस्माद्धरिः सर्ववशी ततः। सर्वस्य ब्रह्मरुद्रादेरन ईशान एव च। गुणाधिकः पालकश्चेत्यतोऽधिपतिरीरित' इति च। भूत एवाधिपतिर्नास्याधिपत्यमादिमत्। 'नित्यबोधात्मकत्वाद्यो मुनिः प्रोक्तो जनार्दनः। तं विद्वांश्च मुनिर्नाम बोधस्तस्याप्यमुख्यतः। यं विदित्वा विमुक्ताश्चायुक्तकामविवर्जिताः। उत्पत्तिलयहीनाश्च नित्यानन्दैकभोगिनः। आनन्दभिक्षां विष्णूत्थां चरन्त्यज्ञानवर्जिताः। स एष मोक्षदो विष्णुर्यत्कल्याणं कृतं मया। पापं कृतं मयेत्येतन्न कदाचित्करिष्यति। कृते मया पुण्यपापे इति यच्चेतनात्मनाम्। तत्सर्वमतएवोक्तं विष्णोः सर्वेश्वरेश्वरात्।

नेह नानास्ति किञ्चन॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥ ॥ १९॥ एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्॥ विरजः पर आकाशादज आत्मा महान्ध्रुवः॥ २०॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तदिति॥ २१॥ स वा एष महानजं आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्त्येतद्ध स्म वैतत्पूर्वे विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति याह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न

SGDF
Sri Gurgeshwari Digital Foundation

तीर्णो हि वर्तते नित्यं पुण्यपापे जनार्दनः। नैनं कदाचित्तपतः पुण्यपापे जनार्दनमि'ति च। 'शान्तिस्तु भगवन्निष्ठा दमो मद्विनिग्रहः। हृदिस्थविष्णौ सन्तोषः सदैवोपरमः स्मृतः। तितिक्षा द्वन्द्वसहता क्षमा क्रोधासमुत्थितिरि'ति शब्दनिर्णये। 'सर्वः पूर्णः समुद्दिष्टस्तथा ज्ञेयो जनार्दनः। रागसन्देहपापानि तथा जानंस्तरिष्यति। नित्यं हि रागपापादेर्मुक्तो यत्पुरुषोत्तमः। वेदाख्यब्रह्मणान्यत्वाद्विष्णुर्ब्रह्मण उच्यते। पूर्णत्वाज्ज्ञानरूपत्वाद्ब्रह्मलोकश्च स प्रभुः। न मरिष्यतीति ह्यमरो न मृतो यत्ततोऽमृतः। ब्रह्मायमाप्तकामत्वादेवं यो वेद तं परम्। आप्तकामोऽभयश्चैव भवेद्विष्णोरनुग्रहादि'ति च। परमार्थे विचिकित्सा ब्रह्मणो भवतीति नित्यमेव तथाभवतीत्यर्थः। 'अभूद्भविष्यति भवत्येवमाद्यपदानि तु। नित्यभावाभिधायीनि यत्र वाच्या हरेर्गुणाः' इति शब्दनिर्णये॥ इति शारीरब्राह्मणम्॥ ६॥ ४॥

रिष्यत्येतमु हैवैतेन तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युमे उ हैवैष एते तरति नैनं कृताकृते तपतः॥२२॥ तदेतदृचाभ्युक्तं एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान्तस्यैव स्यात्पदं वित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति॥ तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजोऽविचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान् ददामि मां चापि सह दास्यायेति॥ २३॥ स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु य एवं वेद॥ २४॥ स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद॥ २५॥ इति शारीरब्राह्मणम्॥ ६॥ ४॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन्॥ १॥ मैत्रेयीति होवाच याज्ञवल्क्यः

SGDF
Sri Gargeshwari Digital Foundation

प्रियां वाचमवर्धयद्भवती। बाह्याभ्यन्तरविशेषाभावेन सर्वत्र लवणरसघन एव। न वा अहमिमं विजानातीति। अहेयमिमं

प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥ २ ॥ सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यान्वहं तेऽनामृताऽहो नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति ॥ ३ ॥ सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेत्थ तदेव मे ब्रूहीति ॥ ४ ॥ स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृद्धं तर्हि भवत्येतद्व्याख्यास्यामि व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वा मरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदꣳ सर्वं विदितम् ॥ ६ ॥ ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान्वेद भूतानि तंपरादुर्योऽन्यत्रात्मनो भूतानि

SGDF
Sri Gangeshwari Digital Foundation

परमात्मानं जीवो न जानातीत्यत्रैव भगवान्मोहान्तं मोहाख्यं नाशमापीपिपत् प्रापयामास। अतोऽहं ब्रह्मास्मीत्यादिष्वहंशब्दोऽहेयत्ववाचीति सिद्धम्। अन्यथा कथमहं विजानातीति युज्यते?।

वेद सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीद९ सर्वं यदयमात्मा ॥७॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्यांच्छब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥८॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्यांच्छब्दांच्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खमध्यस्य वा शब्दो गृहीतः ॥ ९ ॥ स यथा वीणायै वाद्यमानायै न बाह्यांच्छब्दांच्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥ स यथार्द्रैन्धाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्ट९ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥ ११ ॥ स यथा सर्वासामपा९ समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायनमेवं सर्वेषां रसानां जिह्वैकायनमेवं सर्वेषां गन्धानां नासिकैकायनमेवं सर्वेषां रूपाणां चक्षुरेकायनमेवं सर्वेषां शब्दानां श्रोत्रमेकायनमेवं सर्वेषां सङ्कल्पानां मन एकायनमेवं सर्वासां विद्यानां हृदयमेकायनमेवं सर्वेषां कर्मणां हस्तावेकायनमेवं सर्वेषामानन्दानामुपस्थ एकायनमेवं सर्वेषां विसर्गाणां पायुरेकायनमेवं सर्वेषामध्वनां पादावेकायनमेवं सर्वेषां वेदानां वागेकायनं स यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥ सा होवाच मैत्रेय्यत्रैव मा भगवान् मोहान्तमापीपिपन्न वा अहमिमं विजानातीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वाऽरेऽयमात्मानुच्छित्तिधर्मा ॥ १३ ॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतर९ रसयते तदितर इतरमभिवदति तदितर इतर९ शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्व-

SGDF
Sri Gangeshwari Digital Foundation

एतावद्विज्ञातुः परमात्मनो विज्ञानादिकमेव ह्यमृतत्वं मोक्षः। 'विष्णोर्ज्ञानादिकं मोक्षस्तदभावे कुतः सुखम्। ज्ञेयाभावान्न हि ज्ञानं ज्ञानाभावे हि शून्यता। तस्माज्ज्ञेययुतो मोक्षः सुखरूपत्वतः सदे'ति ब्रह्मतर्के ॥ इति मैत्रेयीब्राह्मणम् ॥ ६ ॥ ५ ॥

अवरेभ्योऽपि शृण्वन्ति परमाश्च क्वचित्क्वचित्। लीलयैव न चैतेषां परमत्वं विहीयत'इति च ॥ ब्राह्मणम् ॥ ६ ॥ ६ ॥ इति

मात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत्तत्केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयाद्येनेदं सर्वं विजानाति तं केन विजानीयात्स एष नेति-नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥ १४ ॥ मैत्रेयीब्राह्मणम् ॥ ६ ॥ ५ ॥

अथ वꣳशः पौतिमाष्यो गौपवनात् गौपवनः पौतिमाष्यात् पौतिमाष्यो गौपवनात् गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यो गार्ग्यात् गार्ग्यो गार्ग्याद्गार्ग्यो गौतमात् गौतमः सैतवात् सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यन्दिनायनान्माध्यन्दिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवर्णेस्त्रैवर्णिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्यात् विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्याङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्या-

SGDF
Sri Gangeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्बृहदारण्यकभाष्ये षष्ठोऽध्यायः ॥ ६ ॥

॥ ॐ ॥ अवतारा महाविष्णोः सर्वे पूर्णाः प्रकीर्तिताः । पूर्णं च तत्परं रूपं पूर्णात्पूर्णाः समुद्गताः । परावरत्वं तेषां तु व्यक्तिमात्रविशेषतः । न देशकालसामर्थ्यैः पारावर्यं कथञ्चन । पूर्वरूपस्य पूर्णस्य पूर्णं यदवतारगम् । रूपं तदात्मन्यादाय पूर्णमेवावतिष्ठते । लौकिकव्यवहारो यो भूभारक्षपणादिकः । तदद्दष्टिं विना नान्यो लयः कृष्णादिनां क्वचित् । ओताः सर्वगुणा यस्मादस्मिन्नों विष्णुरुच्यते । खं प्रकाशस्वरूपत्वाद्ब्रह्म तद्व्याप्तरूपतः । पुनः खं सुखरूपत्वात्पुराणं तदनादितः । वायोश्च रतिदं यस्माद्वायुरं ब्रह्म तत्परम् । ख्यातत्वाच्चापि तत्खं स्याद्रौहिणेयस्तथाऽवदत् । वेदोऽयं ज्ञानरूपत्वादिति यं ब्राह्मणा विदुः । निर्दोषत्वाद इत्युक्तस्तेन वेद्यं सदाऽखिलमि'ति च । बाह्लीकसुता हि रोहिणी अतो बलभद्रः कौरव्यायणीपुत्रः । 'ज्ञानदानं तु देवानां फलदानं च कर्मणाम् । विष्णुना

मश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकऋषेरेकऋषिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनकात्सनकः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भुब्रह्मणे नमः ॥ ६ ॥ ६ ॥ इति बृहदारण्यके षष्ठोऽध्यायः ॥ ६ ॥

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदेनैव यद्वेदितव्यम् ॥ प्रथमं ब्राह्मणम् ॥ ७ ॥ १ ॥

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच दइति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्मेत्योमिति होवाच व्यज्ञासिष्टेति ॥ १ ॥ अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति

SGDF
Sri Gargeshwari Digital Foundation

विहितं पूर्वं पुनर्देवनरासुराः । ब्रह्माणमपि पप्रच्छुर्देवानां सद्गुणो-च्छ्रितेः । अनहङ्कारमात्रं तु ब्रह्मणा विहितं सदा । सर्वोच्चमोक्ष-सम्प्राप्त्यै नराणां ज्ञानसाधनम् । देवादीनां दानमेव हविरादेः प्रकीर्तितम् । तमःप्राप्तिविलम्बाय दैत्यानां विहिता दये'ति प्रवृत्ते । हरणाद्यज्ञभागादेर्ज्ञानादेर्दानतस्तथा । यानादव्यवधानेन परस्य ब्रह्मण-स्तथा । ब्रह्मा हृदय इत्युक्तस्तस्यैवंविदपि ध्रुवम् । हृतिदानस्वर्गयान-पात्रं स्यात्तत्प्रसादतः । हृत्वैवास्मै ददत्यद्धा स्वकीयाश्चान्य एव चे'ति निर्णये । परमात्मा च प्रजापतिः । 'ततत्वादेकरूपत्वात्तत्परं ब्रह्म कीर्तितम् । तदेव तादृशं प्रोक्तं नैवान्यत्तादृशं क्वचित् । तदेतत्सत्य-मेवासीद्वासुदेवाख्यमव्ययमि'ति ब्रह्मतर्के । तदेव हि तत् । तन्नारायणाख्यं परं ब्रह्मैतदेव सत्यं वासुदेवाख्यमासीदित्यर्थः । 'स्वस्मा-त्स्वयं समुत्पन्नो वासुदेवात्मना प्रभुः । सत्यं ब्रह्मेति यो वेद महायाज्यं तु तं परम् । प्राप्नोत्येव हि तल्लोकाञ्जीवन्नप्युत्तमो भवेदि'ति प्रध्याने । 'स्वभागहरणाद्दानात्फलानां यापनान्नृणाम् । हृदयं भगवा-न्विष्णुः सत्यं तद्गुणरूपत'इति सत्तत्त्वे । 'प्रजापतिरिति ब्रह्मा वेदेषूक्तो ह्यमुख्यतः । यस्मिन्नूषुर्ब्रह्मचर्यं देवासुरनरोऽब्जजे । एष वै भगवा-

---

तेभ्यो हैतदेवाक्षरमुवाच दइति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचु-र्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥ अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच दइति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञा-सिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्दद द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रय॰ शिक्षेद्दमं दानं दयामिति ॥ द्वितीयं ब्राह्मणम् ॥ ॥ ७ ॥ २ ॥

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सत्यं तदेतत्त्र्यक्षर॰ हृदयमिति हृइत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद दइत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥ तृतीयं ब्राह्मणम् ॥ ७ ॥ ३ ॥

SGDF
Sri Gangeshwari Digital Foundation

न्विष्णुर्मुख्यतस्तु प्रजापतिः । यज्ज्ञानान्मुक्तिमायान्ति स्वर्गाख्यां हृदयं च सः । हृदि सद्दानयानेभ्यः सत्यं सद्गुणरूपतः । यत्तद्धृदयमित्युक्तं ब्रह्म तत्सत्यतामगात् । सत्यत्वं सदनीयत्वमासाद्यं यन्मुमुक्षुभिः । एवं तद्ब्रह्म यो वेद स हि लोकानिमाञ्जयेत् । एतल्लोकजयो नाम धर्मज्ञानादिपूर्णता । जित एव ह्यसौ लोको यदा वेद जनार्दनमि'ति गुणपरमे । परलोको जित एवाभवदित्यर्थः । 'सदा सर्वगुणापानादापो नारायणः स्मृतः । द्वितीयं रूपमसृजद्वासुदेवं स आत्मनः । ब्रह्म सत्यमिति प्राहुर्वासुदेवाभिधं प्रभुम् । तस्माद्ब्रह्माऽजनि ततो देवाः सर्वेऽपि जज्ञिरे । तस्माद्ब्रह्मादयो देवा वासुदेवमुपासते । ततत्वादन्यथाज्ञानं तीत्येव समुदीर्यते । तस्याधस्तात्सदात्मा तु सादयन्ननृतं हरिः । उपरिष्टाच्च यन्नामा नाशयन्ननृतं स्थितः । एवं यो वेद तं विष्णुं नास्य मिथ्यादृशिर्भवेत् । योग्यतापेक्षयोपासाऽथापरोक्ष्याच्च तत्फलम् । सम्यग्ददात्यन्यथा च भवेद्देवोपकारिणी । अत्ययोग्याय चेत्सा स्याद्विपरीतफलप्रदा । वैपरीत्यं तु विघ्नः स्यान्न तु पापं कथञ्चने'त्याधारे ॥ छ ॥

'स वासुदेवो भगवानादित्यस्थो जनार्दनः । आदित्यनामा संप्रोक्तो आदानाद्धविषां सदा । स एव दक्षिणाक्षिस्थस्तच्च रूपद्वयं हरेः । अन्योऽन्यस्मिन्स्थितं नित्यं प्राणैश्च सह रश्मिभिः । दक्षिणाक्षि-

---

तद्वैतदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकान् जित इन्वसावसद्य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म ॥ चतुर्थं ब्राह्मणम् ॥ ७ ॥ ४ ॥

आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्त सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवांस्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतं सत्यभूयमेव भवति नैवं विद्वाꣳसमनृतं हिनस्ति ॥ १ ॥ तद्यत्तत्सत्यमसौ स आदित्यो य

SGDF
Sri Gurgeshwari Digital Foundation

स्थितो विष्णुर्यदाऽस्मादुत्क्रमिष्यति । तदैव म्रियमाणस्तु जीवः पश्ये-द्विरश्मिकम् । सूर्यस्य मण्डलं नास्य प्रतीयन्ते हि रश्मयः । तत्क्षणे नियमेनैव केषाञ्चित्सप्तभिर्दिनैः । तस्य विष्णोः शिरो नाम भावना-द्भूरिति स्मृतम् । भावनं रक्षणं प्रोक्तं दृष्ट्या वाचा च रक्षति । उत्पादनाद्भुनामा स्याद्दक्षिणो बाहुरस्य तु । विनाशनाद्भ इत्युक्तः सव्यो बाहुः परात्मनः । स्वित्यानन्दस्समुद्दिष्टो वरिति ज्ञानमुच्यते । मुक्तिदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चैव सव्यश्च क्रमाद्वर्ण-द्वयोदितौ । पादावस्य हि तत्प्राप्तिर्मुक्तिरित्यभिधीयते । अहमेषो ह्यहेयत्वाज्जीवेन सहभावतः । असावहरिति प्रोक्तः सर्वलोक-प्रकाशनात् । तद्वेदनात्सर्वपापं हन्ति चैव जहाति च । कानिचिद्धन्ति पापानि कल्पादीन्संजहाति चे'ति प्रवृत्ते । 'मनोमयो ज्ञानमयः प्रधानं मय उच्यते । महाज्ञानात्मकश्चैव भारूपः सद्गुणात्मकः । सर्वप्रशासको विष्णुर्विद्युत्सर्वस्य वेदनात् । य एनं वेद वेत्तारं सर्वस्य

एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मि-न्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्स यदो-त्क्रमिष्यन् भवति शुद्धमेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्याय-न्ति ॥ २ ॥ य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे सुवरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥ योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे सुवरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ४ ॥ पञ्चमब्राह्मणम् ॥ ७ ॥ ५ ॥

मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च ॥ षष्ठब्राह्मणम् ॥ ७ ॥ ६ ॥

विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युत् विद्यत्येनं पाप्मनो य एवं वेद विद्यु-द्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ सप्तमब्राह्मणम् ॥ ७ ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

परमेश्वरम् । पादेभ्यो मोचयित्वैनं स्वात्मानं वेदयेद्धरिरि'ति माहात्म्ये । 'सरस्वती तु गोरूपा तस्या देवादयोऽखिलाः । स्तनानेवोपजीवन्ति तस्या वायुः पतिः प्रभुः । वत्सो मनोऽभिमान्यस्याः-सरस्वत्याः सदाशिव' इति प्रभञ्जने । 'अग्निनामा तु भगवानौदर्याग्नौ प्रतिष्ठितः । विश्वैर्गुणैः समेतत्वादनन्तत्वाच्च स प्रभुः । वैश्वानर इति प्रोक्तः सोऽग्निरङ्गप्रनेतृतः । तस्य विष्णोस्तुतिरियं क्रियते वायुना सदा । कर्णौ पिधाय या नित्यं श्रोतुं शक्याऽखिलैः सदे'ति तन्त्रमालायाम् । 'प्रवहं वायुपुत्रं च सूर्यसोमौ च विद्युतम् । प्राप्य प्रधानवायुं च याति तत्परमं पदमि'ति ब्रह्माण्डे ॥ छ ॥

व्याधीञ्छवहृतिं चैव शवदाहादिकं तथा । विष्णवे तप इत्येव चिन्तयन्याति तत्परमि'ति च । 'अक्लेशितोऽपि क्लेशादीनतीतैष्यानपीह यः । विष्णवे तप इत्येव प्रार्थयेत्स परं व्रजेत् । विष्णोः स्वरूपवेत्ता चेदन्यथा न कथञ्चन । यथा स्वरूपवेत्तुः स्यादेकैकापि ह्युपासना ।

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्या प्राण ऋषभो मनो वत्सः ॥ अष्टमब्राह्मणम् ॥ ७ ॥ ८ ॥

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति ॥ नवमब्राह्मणम् ॥ ७ ॥ ९ ॥

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लम्बरस्य खं तेन स ऊर्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीयते यथा दुन्दुभेः खं तेन स ऊर्ध्व आक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः ॥ दशमब्राह्मणम् ॥ ७ ॥ १० ॥

एतद्वै परमं तपो यद्व्याधितस्तप्यते परम॰ हैव स लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यं हरन्ति परमं हैव स लोकं जयति

SGDF
Sri Gargeshwari Digital Foundation

मोक्षाय सहिताः सर्वा अप्यज्ञस्य न तु क्वचित्। यथावत्केशवं ज्ञात्वा स्वयोग्यैकामुपासनाम्। अपि कृत्वा हरिं दृष्ट्वा मुच्यते नात्र संशय' इति ब्रह्मतर्के। 'अन्नाभिमानी ब्रह्मैव प्राणो वायुरुदाहृतः। अन्योऽन्यानुप्रविष्टौ तौ सर्वदैव सुसंस्थितौ। वायुं विना ब्रह्मणोऽपि शरीरं पूतिमेष्यति। वायुश्च शोषमायाति विना ब्रह्माणमञ्जसा। तयोरेवं परिज्ञानी वासिष्ठः पाणिनामकः। ब्रह्मवायुविदे कार्यं किं मया साध्वसाधु वा। नासाधुना साधयितुं शक्योऽसौ साधुनाऽपि वा। नार्थोऽस्य कृतकृत्यत्वाद्यदि वेद परं हरिम्। इति प्रशस्य तज्ज्ञानं वसिष्ठं प्राब्रवीत्ततः। अन्योऽन्यानुप्रवेशेन ब्रह्मवाय्वोर्विशेषतः। प्रयोजनं कस्य भवेदिति तं प्रतृदोऽब्रवीत्। ब्रह्मा निवेशनीयः स्याद्वायुश्चास्य रतिप्रदः। अतः प्रयोजनं तुल्यमन्योऽन्यात्मप्रवेशनादि'ति सन्धाने। 'उत्थापनादुक्थनामा मोक्षे प्राप्यो यतोऽखिलैः। यजुश्चाथ क्षतत्राणात्क्षत्रं सम्यक्त्वकारणात्। सर्वेषां साम च प्रोक्तो वायुरेव जगत्पतिरि'ति च॥ छ॥

य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमꣳ हैव स लोकं जयति य एवं वेद॥ एकादशब्राह्मणम्॥ ७॥ ११॥

अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वै प्राण ऋते अन्नादेते ह्येव देवते एकधा भूयं भूत्वा परमतां गच्छतस्तद्ध स्माह प्रातृदः पितरं किंस्विदेवैवं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति स ह स्माह पाणि नामा प्रातृदः कस्त्वेनयोरेकधा भूयंभूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै वि अन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद॥ द्वादशब्राह्मणम्॥ ॥ ७॥ १२॥

उक्थं प्राणो वा उक्थं प्राणो हीदं सर्वमुत्थापयत्युद्धा स्मा उक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यं सलोकतां जयति य एवं वेद॥ १॥

SGDF
Sri Gurgeshwari Digital Foundation

ऋग्यजुःसामसंस्थो यो भगवान्पुरुषोत्तमः। स द्वितीयपदेनोक्तो गायत्र्याः प्रथमेन तु। भूम्यन्तरिक्षस्वर्गस्थतृतीयेन समीरगः। चतुर्थपादो गायत्र्याः प्रणवः समुदीरितः। तद्वाच्यो भगवान्सूर्यमण्डलस्था तु या रमा। सत्वात्मिक्येव तत्संस्थो रज आख्यप्रधानतः। परः परोरजस्तस्माद्य एवं वेद तं प्रभुम्। लोकानां चैव वेदानां सर्वेषां प्राणिनामपि। सदैवाधिपतिर्भूत्वा यशःश्रीमांश्च जायते। गायत्र्युपासने योग्यो ब्रह्मैव हि चतुर्मुखः। तस्मादुक्तफलं सर्वं सर्वोपासा च तस्य हि। अंशेनोपासनाऽन्येषां फलमल्पं च योग्यतः। गायत्र्या न ह्ययोग्योऽपि द्विजो योग्योऽपि न क्वचित्। ऋते विरिञ्चं तस्मात्तु तस्यैव ह्यखिलं फलम्॥ यः परोरजास्तपति स तुरीयपदेन प्रणवेन पद्यते। तुरीयं पदं ददृश इव दृष्ट इव। तदधीनतेजःपुञ्जस्य सूर्यमण्डलस्य दृष्टत्वात्। 'सूर्यमण्डलगो विष्णुः सर्वेषां दृष्टवत्स्थितः। यस्मात्तदुत्थितं तेजोमण्डलं दृश्यतेऽखिलैरि'ति त्रैविद्ये। सर्वं रजः सर्वा प्रकृतिम्। 'रञ्जनात्प्रकृतिः प्रोक्ता रज इत्येव वैदिकैः। तस्या अप्युत्तमो विष्णुर्यतोऽतः स परोरजाः। अभिमानिनी तु गायत्र्या मुख्या

यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते ह्यस्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यं सलोकतां जयति य एवं वेद ॥ २ ॥ साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि ह्यस्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यं सलोकतां जयति य एवं वेद ॥ ३ ॥ क्षत्रं प्राणो वै क्षत्रं प्राणे हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्रक्षत्रमत्रं प्राप्नोति क्षत्रस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ ४ ॥ त्रयोदशब्राह्मणम् ॥ ७ ॥ १३ ॥

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥१॥ ऋचो यजूंषि सामानीत्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥ प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्षरं ह वा

SGDF
Sri Gargeshwari Digital Foundation

श्रीः परिकीर्तिता । ब्रह्माण्यमुख्याऽतो ज्ञेया सा तु ब्रह्माणमाश्रिता । ब्रह्मा तु मुख्यगायत्रीं सा परोरज आश्रयेदि'ति च । तद्वा एतज्जगत्सत्ये प्रतिष्ठितम् । भूमिरन्तरिक्षं द्यौरित्यादिना प्रस्तुतत्वात् । 'तद्वा एतज्जगत्सर्वं चक्षुः सूर्याभिमानिनी । विराण्नामविशेषाख्ये सर्वदा सम्प्रतिष्ठितम् । शेषः प्रतिष्ठितो वायौ स ह्यस्माद्बलवत्तरः । स सत्य इति सम्प्रोक्तः सन्नस्मिन्याति यद्धरिः । वायुः समाश्रितो देवीं मुख्यां गायत्रिनामिकाम् । सा चात्मनामधिपतिमेवं परममाश्रिता । प्राणानां रक्षणादेव गायत्री सा प्रकीर्तिता । सावित्रीति च यामाह स विष्णुः परतोरजाः । एषैव सा हि गायत्री सविता हि जनार्दनः । तस्माद्धि सूयते सर्वं सावित्री च तदाश्रिता । आदित्यस्तत्प्रतीकत्वात्सवितेति प्रकीर्तितः । प्रतिमायां च तच्छब्दः प्रयोज्यो ह्युपचारतः ; यस्मा आह स विष्णुस्तां गायत्रीं जगदीश्वरः । ब्रह्मणे तस्य सा प्राणान्सर्वदा पाति पुत्रवत् । ब्रह्मा हि पुत्रस्तस्यास्तु तत्पुत्रा इतरेऽखिलाः । तामाहुः परमां देवीं वृणीमह ऋगात्मिकाम् । नैव सा प्रतिमा मुख्या गायत्री परमा स्मृता । गायत्रीमुख्यवेत्तारो योग्या ब्रह्मपदस्य ये । तेषां प्रतिग्रहाद्दोषो न कश्चन भविष्यति । न

एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणितावद्ध जयति योऽस्या एतदेवं पदं वेदाथास्या एतदेव तुरीयं दर्शतं पदं परो रजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपति एवꣳ हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ३ ॥ सैषा गायत्र्येतस्मिꣳस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वैतत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एव ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलꣳ सत्यादोजीय इत्येवमेषा गायत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गयाꣳस्तत्रे प्राणा वै गयास्तत्प्राणाꣳस्तत्रे तद्यद्गयाꣳस्तत्रे तस्माद्गायत्रीनाम स यामेवामूꣳ सावित्रीमन्वाहैषैव

SGDF
Sri Gargeshwari Digital Foundation

चैकपदविज्ञानफलायालं सुखानि च। विष्णोर्यदा भगवतो लोका-न्वेदांश्च चेतनान्। विरिञ्चिजन्मन्यखिलान्प्रतिगृह्णन्ति कृत्स्नशः। गायत्रीपदविज्ञानफलमात्रं तदा भवेत्। प्रणवप्रतिपाद्यं यत्तुरीयं भगवत्पदम्। सर्वगं वासुदेवाख्यं न तत्केनचिदाप्यते। गायत्रीत्रि-पदज्ञेयमनिरुद्धादिकं त्रयम्। ब्रह्मा प्राप्नोति मुक्तः सन्वासुदेवं न कश्चन। लोकस्थमनिरुद्धं च प्रद्युम्नं वेदगं तथा। सङ्कर्षणं वायुसंस्थं व्याप्त्या ब्रह्मा विमुक्तिगः। गायत्रीज्ञानसामर्थ्यात्प्रणवज्ञानशक्तितः। वासुदेवं च सम्पश्येन्न व्याप्नोति कथञ्चन। अनन्तत्वाद्वासुदेवः कथं व्याप्यो भवेत्प्रभुः। वर्णत्रयात्मप्रकृतिमतीतः सूर्यमण्डले। गुण-त्रयात्मिकां बाह्ये यतोऽतः स परोरजाः। यतो न व्याप्यते सोऽसौ ब्रह्मणापि कथञ्चन। अतः प्रतिग्रहो नास्य वासुदेवस्य विद्यत'इति प्रकाशिकायाम्। तावदेतावत्प्रतिगृह्णीयादिति तस्यैव सामस्त्येन ग्रहणार्थम्। एतावदेव मम हस्ते विद्यत इतिवत्। न ह्यन्यदेव-तावत्प्रतिग्राह्यमस्ति। 'अष्टाक्षरत्वाद्गायत्र्याः प्रोक्ता सैकपदीति च। प्रणवेन सहैतास्तु गायत्र्याश्चतुरस्तदा। अकाराद्यतिशान्तान्तः प्रणवोऽ-ष्टाक्षरो यतः। पादः प्रणवसंयुक्तो गायत्री सा पृथग्यदा। द्विपदीति तदा प्रोक्ता त्रिपदी स्वपदैस्त्रिभिः। चतुष्पदी सप्रणवा ब्रह्मणोऽन्यैर्न

सा स यस्मा अन्वाह तस्य प्राणाꣳस्त्रायते ॥ ४ ॥ तां हैतामेके सावित्री-मनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति तन्न तथा कुर्याद्गायत्रीमेव सावित्रीमनुब्रूयाद्यदि ह वा अप्येवंविद्बह्विव प्रतिगृह्णाति न ह वै तद्गायत्र्या एकंचन पदं प्रति ॥ ५ ॥ स य इमाꣳस्त्रींल्लोकान्पूर्णान्प्रति-गृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्ताव-त्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्ताव-त्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केनचनाप्यं कुत उ एतावत्प्रति-गृह्णीयात् ॥ ६ ॥ तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी

SGDF Sri Gargeshwari Digital Foundation

गम्यते । अपदी च ततः प्रोक्ता गायत्र्येवमुपस्थिता । कामाप्राप्ति-मपूर्तिं वा शत्रवे सा करिष्यति । असावदो मैव प्रापन्नास्मै कामः समृध्यताम् । उपस्थिता चेदित्थं सा यद्वदोऽहं समाप्नुयाम् । इति सा कामपूर्तिं च स्वस्य सम्यक्करिष्यति । सम्यग्ब्रह्मपदावाप्तिं तद्योग्यां मुक्तिमेव च । ब्रह्मणोपासितो तद्याद्गायत्र्याः पुरुषोत्तमः । अलेपं सर्वपापेभ्यो विशेषेण प्रतिग्रहात् । तद्योग्यां मुक्तिमन्येषां यथायोग्य-मुपासितः । वक्तव्यो भगवान् विष्णुर्गायत्र्या मुखसंस्थितः । अग्नि-मण्डलगो नित्यमग्निनामाऽग्रणीत्वतः । गायत्र्यास्तु परिज्ञानं ज्ञाते मुख्यगते हरौ । सफलं भवेदन्यथा तु न सम्यक्फलदं भवेत् । गायत्रीमुखगो विष्णुर्ज्ञेयः सर्वात्मना ततः । संहर्ता सर्वदोषाणामग्निस्थः सर्वदाहकः । नित्यानन्दोऽग्निवर्णश्च रामः परशुभृत्सदे'ति गायत्री-संहितायाम् । 'सूर्यमण्डलनाम्ना तु पात्रेण स्वमुखं हरिः । पिधायैव

चतुष्पद्यपदसि न हि (सं)पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परो-रजसे सावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स काम ऋध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ७॥ एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्री-विदब्रूथा अथ कथꣳ हस्तीभूतो वहसीति मुखꣳ ह्यस्याः सम्राण्न विदां-चकारेति होवाच तस्याग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्या-दधति सर्वमेव तत्सन्दहत्येवꣳ हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ८ ॥ चतुर्दशब्राह्मणम् ॥ ॥ ७ ॥ १४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ॥ तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यमसूर्यप्राजापत्यव्यूहरश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरं । ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर । अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ पञ्चदशब्राह्मणम् ॥ ७ ॥ १५ ॥ इति बृहदारण्यके सप्तमोऽध्यायः ॥ ७ ॥

SGDF
Sri Gurgeshwari Digital Foundation

जगत्सर्वं पश्यत्यमितविक्रमः। उदकं पीयते तेन तमसस्त्रायते जगत्। यतोऽतः पात्रमुद्दिष्टं विद्वद्भिः सूर्यमण्डलम्। पूषा पूर्णत्वतो विष्णुर्दृष्टये विष्णुधर्मिणः। स्वमुखं प्रकाशयेदेकं नान्यथा तु कथञ्चन। नान्यो यत्तादृशो ज्ञाता तस्मादेकऋषिर्हरिः। यमो नियमनात्प्रोक्तः सूर्य ऊरीकृतेरयम्। ज्ञेयः प्रजापतेरेव प्राजापत्यस्ततः स्मृतः। प्राणे स्थितो यः पुरुषः सोऽसावहमिति स्मृतः। अहेयत्वादसुत्वाच्च मेयत्वादस्मिनामकः। अदोषत्वाद इत्युक्तो वायुस्तन्निलयो यतः। अनिलं तत एवासावमृतं चेति कीर्त्यते। तदाश्रयोऽपि ह्यमृतः किमु साक्षात्स्वयं हरिः। क्रतुश्च ज्ञानरूपत्वात्स एव हि जनार्दनः। सोऽग्निरङ्गप्रणेतृत्वाद्विश्वज्ञानविदां वर'इति च। जुहुराणमल्पं कुर्वत्। न वा अहमिमं ज्ञानातीतिवत्। सर्वत्राप्यहंशब्दोऽहेयवाच्येव ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्बृहदारण्यकभाष्ये सप्तमोऽध्यायः ॥७॥

'अहं श्रेयोविवादं तु येन कृत्वाखिलाः सुराः। असमर्थाः स्वरक्षायां स वायुः सुरनायकः। विवदन्तोऽखिला देवा ययुर्नारायणं प्रभुम्। अहं श्रेयानहं श्रेयानिति वायुपुरःसराः। उक्तं भगवता

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ १ ॥ यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ २ ॥ यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥ ३ ॥ यो ह वै सम्पदं वेद सर्वꣳ हास्मै पद्यते यं कामं कामयते श्रोत्रं वै सम्पच्छ्रोत्रे हीमे सर्वे वेदा अभिसम्पन्नाः सर्वꣳ हास्मै पद्यते तं कामं कामयते य एवं वेद ॥ ४ ॥ यो ह वा आयतनं वेदायतनं स्वानांभवत्यायतनं जनानां मनो वा आयतनमायतनꣳ स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ५ ॥ यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभी रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६ ॥

SGDF
Sri Gangeshwari Digital Foundation

तेन येन त्यक्तेऽखिला अपि। स्थातुं न शक्ताः स श्रेयानित्युक्ताः पुनरागताः। उत्क्रान्ताश्च पुनः सर्वे तद्विज्ञप्त्यै पृथक्पृथक्। सुपर्णशेषरुद्रेन्द्रसूर्यादिषु पृथक्पृथक्। उत्क्रान्तेषु ब्रह्मदेहाच्छरीरं न पपात ह। ऋत उत्क्रान्तमेकं तु तदन्ये निवसन्ति च। प्राण उच्चिक्रमिषति

ते हेमे प्राणा अहँ श्रेयसे विविदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रान्त इदँ शरीरं पापीयो मन्यते स वो वसिष्ठ इति ॥ ७ ॥ वाग्घोच्चक्राम सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति तेहोचुर्यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तः चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाँसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा अन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रं होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति तेहोचुर्यथा मुग्धा अविद्वाँसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥ रेतो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति तेहोचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वांसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥ अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः पड्वीशशङ्कून् संवृहेदेवँ हैवेमान् प्राणान् संबबर्ह ते होचुर्मा भगव उत्क्रामीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ १३ ॥ सा ह वागुवाच यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोसीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहँ संपदस्मि त्वं तत्सम्पदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतः तस्योमे किमन्नं किं वास इति

SGDF
Sri Gurgeshwari Digital Foundation

स्थातुं नाशक्नुवन्परे। प्राणं विना न च ब्रह्मा तं विना प्राण एव च। अन्योऽन्यापाश्रयाच्छक्तौ स्थातुमन्ये कुतस्ततः। तस्मात्प्राणो वरो देवेष्विति सर्वेपि मेनिर' इति पवमाने। 'द्युपर्जन्यधरापुंस्त्रीसंस्थितं

यदिदं किञ्च आ श्वभ्य आ क्रिमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाचाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवं विद्वानशिष्यन्नाचामेदशित्वा चाचामेत् ॥ १४ ॥ इति प्रथमं ब्राह्मणम् ॥ ८ ॥ १ ॥

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम स आजगाम जैबलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा३ इति स भो३ इति प्रतिशुश्रावानुशिष्टो न्वसि पित्रेत्योमिति होवाच ॥ १ ॥ वेत्थ यथेमाः प्रजाः प्रयन्त्यो विप्रतिपद्यन्ता३ इति नेति होवाच वेत्थ यथेमं लोकं पुनरापद्यन्ता३ इति नेति हैवोवाच वेत्थ यथाऽसौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न सम्पूर्यता३ इति नेति होवाच वेत्थो यतिथ्यामाहुत्याꣳ हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वाऽपि हि नर्षेर्वचः श्रुतं द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति नाहमत एकञ्चन वेदेति होवाच ॥ ॥ २ ॥ अथैनं वसत्योपमन्त्रयाञ्चक्रे नादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तं होवाचेति वाव किल नो भवान् पुरानुशिष्टानवोचदिति कथं सुमेध इति पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्ततो नैकञ्चन वेदेति कतमे त इतीम इति ह प्रतीकान्युदाजहार ॥ ३ ॥ स होवाच तथा नस्त्वं तात जानीथा यथा यदहं किञ्चन वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति स आजगाम गौतमो यत्र प्रवाहणस्य जैबलेरास तस्मा आसनमाहृत्योदकमाहरयाञ्चकाराथ हास्मा अर्घ्यं चकार तꣳ होवाच वरं भवते गौतमाय दद्म इति ॥ ४ ॥ स होवाच प्रतिज्ञातो म एष वरो या तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ॥ ५ ॥ स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ॥ ६ ॥ स होवाच विज्ञायते हास्तिहिरण्यस्यापात्तं गो-

SGDF
Sri Gangeshwari Digital Foundation

पञ्चरूपिणम्। नारायणं वासुदेवं तथा सङ्कर्षणं प्रभुम्। प्रद्युम्नं चानिरुद्धं च क्रमाद्ध्यायंस्तु सर्वदा। पञ्चाग्निविन्नाम भवेत्स याति परमं पदम्। नास्य संसर्गदोषोऽपि कदाचन भविष्यती'ति त्रैविद्ये। दृष्टादृष्टमहत्वं अनेनोपनिषदुक्तविधानेन जातः पुत्रः प्रायः स्वर्गापवर्गयोग्यो भवतीति प्रजातिकर्मवचनम्। 'यथोपनिषदं जातो योग्यः स्वर्गापवर्गयोः। भवेद्यदि मनः पित्रोर्विष्णोर्नान्यत्र गच्छति। न कुर्याद्यदि कर्मैतन्मनः पित्रोस्तु विष्णुगम्। दृष्टसामर्थ्यहीनश्च मोक्षयोग्यः स्थिरं यदि। दृष्टसामर्थ्यवांश्च स्यादाज्ञाद्यैः कारणैः क्वचित्। विशेषकारणाभावे यथोक्तं नान्यथा भवेदि'ति च। 'नारायणो द्युशब्दोक्तः सर्वदा द्युतिहेतुतः। वासुदेवस्तु पर्जन्यः परं स जनयेद्यतः। सङ्कर्षणस्तु पृथिवी प्रथितत्वात्सदैव हि। प्रद्युम्नः पुरुषेत्युक्तः पूरयेत्स जगद्यतः। स्त्री शब्दोक्तोऽनिरुद्धः स्यात्सहितस्त्रिषु यत्सदा। अनिरुद्धो हि देवेषु सर्वदा त्रिषु संस्थितः। द्युवादिषु प्रसिद्धेषु तत्सम्बन्धा-

---

अश्वानां दासीनां प्रवराणां परी(रि)धानस्य मानो भवान्। बहोरनन्तस्यापर्यन्तस्याभ्यवदान्योऽभूदिति स वै गौतम तीर्थेनेच्छसी३ इत्युपैम्यहं भवन्तमिति वाचाहस्मैव पूर्व उपयन्ति सहोपायनकीर्त्या उवास ॥७॥ स होवाच तथा नस्त्वं गौतम मापराध्यस्तव च पितामहा यथेयं विद्येतःपूर्वं न कस्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवंब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥ ८ ॥ असौ वै लोकोऽग्निर्गौतम तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा सम्भवति ॥९॥ पर्जन्यो वा अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ सोमं राजानं जुह्वति तस्या आहुत्यै वृष्टिः सम्भवति ॥ १० ॥ अयं वै लोकोऽग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुत्या अन्नं सम्भवति ॥ ११ ॥ पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ अन्नं

SGDF
Sri Gurgeshwari Digital Foundation

द्युवादिकः । शब्दो भवेत्तथाग्न्यादिरदनात्परमो भवेत् । अङ्गत्वेनार्यते यस्मादङ्गारस्तेन कीर्तितः । अर्च्यत्वादर्चिरुद्दिष्टो विष्वक्त्वाद्विष्फुलिङ्गकः । समेधनाच्च समिधस्तत्र तत्र स्थितो हरिः । तत्तच्छब्दैः सदा वाच्य इतरे तु तदन्वयात् । आदित्यो रश्मिरित्याद्याः शब्दाश्चैवमवस्थिताः । एकैकस्मिन्पञ्चभेदा अर्चिरादिविभागतः । नारायणादिभेदेन तथैव प्रतिपादिता' इति प्रवृत्ते । धूत्काराद्धूम उद्दिष्टः शत्रूणां पुरुषोत्तमः । अर्चिरर्च्यतमत्वाच्च स्वाङ्गोऽङ्गार इतीर्यते । अङ्गित्वेनाङ्गरूपेण यत एको व्यवस्थित'इत्यादि तैविद्ये । 'नीचादप्युत्तमा ज्ञानं शृणुयुर्लीलया क्वचित् । श्रोतृवक्तृविभेदोऽयं नाधिक्यज्ञापकस्ततः । यस्याधिक्यं तु वेदोक्तं पञ्चरात्रेऽथवा भवेत् । इतिहासपुराणे वा सोऽधिको नेतरः क्वचित्' इति ब्रह्मतर्के । आदानादादित्यः । रमणाच्छामनाच्च रश्मयः । अहीनत्वादहः । चन्दनाच्चन्द्रः । अस्य क्षत्रमन्यन्नास्तीति नक्षत्रम् । बहुरूपत्वाद्बहुवचनम् । ज्ञानादायुष्ट्वाच्च वायुः । अन्यैरभरणीयत्वादभ्रम् । विद्योतनाद्विद्युत् । अशनादशनिः । निर्ह्लादनाद्ध्रादुनिः । आसमन्तात्काशनादाकाशः । सम्यग्वत्सात्त्रमयतीति संवत्सरः । आदेशनाद्दिशः । अवान्तरमादिशतीत्यवान्तरदिशः ।

जुह्वति तस्या आहुत्यै रेतः सम्भवति ॥ १२ ॥ योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः सम्भवति स जीवति यावज्जीवत्यथ यदा म्रियते ॥ १३ ॥ अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विष्फुलिङ्गा विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः सम्भवति ॥ १४ ॥ ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तान्वैद्युतान् पुरुषो मानव एत्य ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः

SGDF
Sri Gangeshwari Digital Foundation

रतिकरत्वाद्रात्रिः । वचनाद्वाक् । प्रणयनात्प्राणः । जहाति गमयतीति जिह्वा । चष्ट इति चक्षुः । शृणोतीति श्रोत्रम् । उपस्थितत्वादुपस्थः । यापयति नयति चेति योनिः । अभिनन्दयतीत्यभिनन्दः । उपमन्त्रणमन्तःकरणं च स एव करोति । 'तदधीनं यतः सर्वं सर्वशब्दैस्ततो हरिः । मुख्याभिधेयस्त्वन्यानि तत्सङ्गादुपचारत' इति ब्रह्मतर्के । 'तदधीनत्वादर्थवदि'ति भगवद्वचनम् । 'समाकर्षाचिति च । 'पञ्चाग्निविद्यया चैव तथैव प्राणविद्यया । प्रजापतिकर्मणा चैव तथा ज्ञानप्रदानतः । आचार्यवंशविज्ञानाद्यः पूज्यः पुरुषोत्तमः । सर्वान्तर्यामिको नित्यो नमस्तस्मै परात्मन'इति सद्भावे ।

परावतो वसन्ति तेषां न पुनरावृत्तिः ॥ १५ ॥ अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ति ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्ति तेषाँ यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्त आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ ततो जायन्ते ते लोकान्प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्तेऽथ य एतौ पन्थानौ नविदुस्ते कीटाः पतङ्गा यदिदं दंदशूकम् ॥ १६ ॥ द्वितीयं ब्राह्मणम् ॥ ८ ॥ २ ॥

स यः कामयते महत्प्राप्नुयामित्युदगयनं आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहं उपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे वा सर्वौषधं फलानीति संभृत्य परिसमूह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्यावृताज्यꣳ सꣳस्कृत्य पुꣳसा नक्षत्रेण मन्थꣳसन्नीय जुहोति यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामांस्तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु स्वाहा या तिरश्चीनि पद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजेꣳसराधनीं महꣳ स्वाहा ॥ १ ॥ ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति चक्षुषे स्वाहा सम्पदे

SGDF
Sri Gangadhareswar Digital Foundation

स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति श्रोत्राय स्वाहा यतनाय स्वाहे-
त्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ
हुत्वा मन्थे सꣳस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमव-
नयति ॥ २ ॥ अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सोमाय
स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति स्वः
स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूर्भुवस्वः स्वाहेत्यग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति
क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूताय स्वाहेत्यग्नौ
हुत्वा मन्थे सꣳस्रवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे सꣳ-
स्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सर्वाय
स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ॥ ३ ॥ अथैनमभिमृशति भ्रमदसि ज्वलदसि
पूर्णमसि प्रस्तब्धमस्येकशफमसि हिंकृतमसि हिंक्रियमाणमस्युद्गीथ-
मसि उद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे सन्दीप्तमसि
विभुरसि प्रभुरस्यन्नमसि ज्योतिरसि निधनमसि संसर्गोऽसीति ॥ ४ ॥
अथैनमुद्यच्छत्यामꣳ स्यामꣳ हि ते महि स हि राजेशानोऽधिपतिः स
माꣳ राजेशानोऽधिपतिं करोत्विति ॥ ५ ॥ अथैनमाचामति तत्सवितु-
र्वरेण्यं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधी-
र्भूःस्वाहा भर्गो देवस्य धीमहि मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः
मधु द्यौरस्तु नः पिता भुवःस्वाहा धियो यो नः प्रचोदयात् मधुमान्नो
वनस्पतिर्मधु माꣳ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः स्वः स्वाहेति
सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीरहमेवेदꣳ
सर्वꣳ भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य पाणी प्रक्षाल्य जघने-
नाग्निं प्राक्शिराः संविशन्ति प्रातरादित्यमुपतिष्ठते दिशामेकपुण्डरीकमसि
अहं मनुष्याणामेकपुण्डरीकं भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो
वंशं जयति ॥ ६ ॥ तं हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्या-
यान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः
प्ररोहेयुः पलाशानीति ॥ ७ ॥ एतमु हैव वाजसनेयो याज्ञवल्क्यो मधु-
काय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिञ्चे-
ज्जायेरन् शाखाः प्ररोहेयुः पलाशानीति ॥ ८ ॥ एतमु हैव मधुकः

SGDF
Sri Gargeshwari Digital Foundation

पैङ्ग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ९ ॥ एतमु हैव चूलो भागवित्तिर्जानकाय आयस्थूणायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १० ॥ एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ११ ॥ एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति तमेतं नापुत्राय वाऽनन्तेवासिने वा ब्रूयात् ॥ १२ ॥ चतुरौदुम्बरो भवत्यौदुम्बरः स्रुव औदुम्बरश्चमस औदुम्बर इध्म औदुम्बर्या उपमन्थन्यौ दश ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्पिष्टान् दधनि मधुनि घृत उपसिञ्चत्याज्यस्य जुहोति ॥ १३ ॥ तृतीयं ब्राह्मणम् ॥ ८ ॥ ३ ॥

एषा वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥ १ ॥ स ह प्रजापतिरीक्षाञ्चक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे तां सृष्ट्वाऽध उपास्त तस्मात्स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत् ॥ २ ॥ तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य एवं विद्वानधोपहासं चरत्यासाँ स्त्रीणाँ सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासं चरत्यस्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥ एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै तद्विद्वान्कुमार हारीत आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति य इदमविद्वाꣳसोऽधोपहासं चरन्तीति बहु वा इदं सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ४ ॥ तदभिमृशेत् अनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ५ ॥ अथ यद्युदक आत्मानं परिपश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणं सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासा-

SGDF
Sri Gargeshwari Digital Foundation

स्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ६ ॥ सा चेदस्मै न दद्यात्काममेनामवक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिन्द्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥ ७ ॥ सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः ॥ ८ ॥ स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ सन्धायोपस्थमस्या अभिमृश्य जपेत् अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमाममूं मयीति ॥ ९ ॥ अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं सन्धायाभिप्राण्यापान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥ १० ॥ अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं सन्धायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति ॥ ११ ॥ अथ यस्य जायायै जारः स्यात्तं चेद्द्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमं शरबर्हिस्तीर्त्वा तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयान्मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषीः पुत्रं पशूंस्त आददेऽसाविति मम समिद्धेऽहौषीरिष्टासुकृते त आददेऽसाविति मम समिद्धेऽहौषीराशापराकाशौ त आददेऽसाविति स वा एष निरिन्द्रियो विसुकृतोऽस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति ॥ १२ ॥ अथ यस्य जायामार्तवं विन्देत्त्र्यहं कꣳसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥ १३ ॥ स य इच्छेत्पुत्रो मे शुक्लो गौरो जायेत वेदमनुब्रवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातां ईश्वरौ जनयितवै ॥ १४ ॥ अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १५ ॥ अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥ अथ य इच्छेद्दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १७ ॥ अथ य इच्छेत्पुत्रो मे पण्डितो विजिगीतो समितिङ्गमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रवीत सर्वमायुरियादिति मांसौदनं पाचयित्वा

SGDF
Sri Gargeshwari Digital Foundation

सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै औक्षेण वार्षभेण वा ॥ १८ ॥
अथाभिप्रातरेव स्थालीपाकावृताज्यं चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहाऽनुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यमिच्छ प्रपूर्व्यां सं जायां पत्या सहेति ॥ १९ ॥ अथैनामभिपद्यतेऽमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳरभावहै सह रेतो दधावहै पुंसे पुत्राय वित्तय इति ॥ २० ॥ अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठाय मुखेन मुखं सन्धाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु। आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥ हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ। तं ते गर्भं हवामहे दशमे मासि सूतये। यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥ सोष्यन्तीमद्भिरभ्युक्षति यथा वायुः पुष्करिणीं समिङ्गयति सर्वत एवा ते गर्भ एजतु सहावैतु जरायुणा इन्द्रस्यायं व्रजः कृतः सार्गलः सपरिश्रयस्तमिन्द्र निर्जहि गर्भेण सावरँ सहेति ॥ २३ ॥ जातोऽग्निमुपसमाधायाङ्क आधाय कꣳसे पृषदाज्यं सन्नीय पृषदाज्यस्योपघातं जुहोति अस्मिन्सहस्रं पुष्यासमेधमानः स्वे गृहे। अस्योपसन्द्यां मा च्छैत्सीः(त्) प्रजया च पशुभिश्च स्वाहा मयि प्राणाꣳस्त्वयि मनसा जुहोमि स्वाहा यत्कर्मणाऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टꣳ सुहुतं करोतु नः स्वाहेति ॥ २४ ॥ अथास्य दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथ दधि मधु घृतं संनीयानन्तर्हितेन जातरूपेण प्राशयति भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ २५ ॥ अथास्य नाम करोति वेदोऽसीति तदस्य तद्गुह्यमेव नाम भवति ॥ २६ ॥ अथैनं मात्रे प्रदाय स्तनं प्रयच्छति यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे करिति ॥२७॥
अथास्य मातरमभिमन्त्रयत इलासि मैत्रावरुणी वीरे वीरमजीजनत् सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदिति तं वा एतमाहुरतिपिता

SGDF
Sri Gargeshwari Digital Foundation

नित्यानन्दमनौपमं परमजं सर्वत्रगं सुस्थिरं सर्वज्ञं प्रतिबोधमात्रममलं पूर्णं गुणैरच्युतैः ॥ विश्वोत्पत्तिलयस्थितिप्रमतिसम्मोक्षे परं कारणं श्रेष्ठं मे सततं प्रियात्प्रियतमं नित्यं सदोपास्महे ॥

बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥ चतुर्थं ब्राह्मणम् ॥ ८ ॥ ४ ॥

अथ वꣳशः पौतिमाषीपुत्रः कात्यायनीपुत्रात् कात्यायनीपुत्रो गौतमीपुत्रात् गौतमीपुत्रो भारद्वाजीपुत्रात् भारद्वाजीपुत्रः पाराशरीपुत्रात् पाराशरीपुत्र औपस्वस्थीपुत्रात् औपस्वस्थीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रः कात्यायनीपुत्रात् कात्यायनीपुत्रः कौशिकीपुत्रात्कौशिकीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैय्याघ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः ॥ १ ॥ आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वात्सीपुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रो वार्त्तभागीपुत्रादार्त्तभागीपुत्रः शौंगीपुत्रात्च्छौंगीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्र आलंबिनीपुत्रादालम्बिनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्मांडूकायनीपुत्रो मांडूकीपुत्रान्माडूकीपुत्रः शांडिलीपुत्राच्छांडिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः क्रौंचिकीपुत्राभ्यां क्रौंचिकीपुत्रौ वैधृपतीपुत्राद्वैधृपतीपुत्रः कार्षकेयीपुत्रात्कार्षकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः प्राश्नीयपुत्रा आसुरायणादासुरायण आसुरेरासुरिः ॥ २ ॥ याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालको अरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजस्रवसो वाजस्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपात् शिल्पः कश्यपः कश्यपात् नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूꣳषि

SGDF
Sri Gargeshwari Digital Foundation

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट् तद्दर्शत-मित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हि तेन प्रभौ । हनुशब्दो ज्ञानवाची हनुमान्मतिशब्दितः । रामस्य स्वृत्तरूपस्य वाचस्तेनानयन्त हि । भूतमो भीम इत्युक्तो वाचो मा मातरः स्मृताः । ऋगाद्या इतिहासश्च पुराणं पञ्चरात्रकम् । प्रोक्ताः सप्त-शिवास्तत्र शयो भीमस्ततः स्मृतः । मध्वित्यानन्द उद्दिष्टो वेति-तीर्थमुदाहृतम् । मध्व आनन्दतीर्थस्याच्चतीया मारुतीतनुः । इति सूक्तगतं रूपत्रयमेतन्महात्मनः । यो वेद वेदवित्स स्यात्तत्त्ववित्त-त्प्रसादतः । साधको रामकार्याणां तत्समीपगतः सदा । हनुमा-न्प्रथमो ज्ञेयो भीमस्तु बहुभुक् पितोः । पृतनाक्षयकारी च द्वितीयस्तु तृतीयकः । पूर्णप्रज्ञस्तथानन्दतीर्थनामा प्रकीर्तितः । दशेति सर्व-मुद्दिष्टं सर्वं पूर्णमिहोच्यते । प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः । आसमन्तात्पतित्वे तु गूढं कलियुगे हरिम् । असत्यमप्रतिष्ठं तु जगदेतदनीश्वरम् । वदद्भिर्गूहितं सन्तं तृतीयोऽसुर्मथायति । येन विष्णोर्हि वर्पाख्यान् गुणानज्ञासिषुः परान् । ईशानासः सूरयश्च निगूढान्निर्गुणोक्तिभिः । त्रेतायां द्वापरे चैव कलौ चैते क्रमात्त्रयः । येषां हि परमो विष्णुर्नेता सर्वेश्वरेश्वरः । स्वयं तु ब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नम' इति च ॥

वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥३॥ समानमा(नः) साञ्जीवीपुत्रात् साञ्जीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौ-त्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्यज्ञवर्चसोराजस्तम्बायनाद्यज्ञवर्चाराजस्तम्बाय

SGDF
Sri Gargeshwari Digital Foundation

पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे। अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्बृहदारण्यकोपनिषद्भाष्येऽष्टमोऽध्यायः ॥ समाप्तोऽयं ग्रन्थः ॥ छ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

नस्तुरात्कावषेयाच्चुरःकावषेयः प्रजापतेः प्रजापतिः ब्रह्मणो ब्रह्मस्वयम्भु-ब्रह्मणेनमः ॥ ४ ॥ पञ्चमं ब्राह्मणम् ॥ ८ ॥ ५ ॥ इति बृहदारण्यके अष्टमोऽध्यायः ॥ इति श्रीमद्बृहदारण्यकोपनिषत्समाप्ता ॥ श्रीः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ईशावास्योपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥ हरिः ॐ ॥ नित्यानित्यजगद्धात्रे नित्याय ज्ञान-मूर्तये । पूर्णानन्दाय हरये सर्वयज्ञभुजे नमः ॥ १ ॥ यस्माद्ब्रह्मेन्द्र-रुद्रादिदेवतानां श्रियोऽपि च । ज्ञानस्फूर्तिस्सदा तस्मै हरये गुरवे नमः ॥ २ ॥ स्वायम्भुवो मनुरेतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव । 'स्वायम्भुवस्स्वदौहित्रं विष्णुं यज्ञाभिधं मनुः । ईशावास्यादिभिर्मन्त्रैस्तुष्टावाऽवहितात्मना । रक्षोभिरुग्रैस्सम्प्राप्तः खादितुं मोचितस्तदा । स्तोत्रं श्रुत्वैव यज्ञेन तान्हत्वाऽवध्यतां गतान् । प्रादाद्धि भगवांस्तेषामवध्यत्वं हरः प्रभुः । तैर्वध्यत्वं तथान्येषामितः कोऽन्यो हरेः प्रभुरि'ति ब्रह्माण्डे । भागवते चायमेवार्थ उक्तः । ईशस्यावासयोग्यमीशावास्यम् । जगत्यां प्रकृतौ । तेनेशेन त्यक्तेन दत्तेन भुञ्जीथाः ॥ 'स्वतः प्रवृत्त्यशक्तत्वादीशावास्यमिदं जगत् । प्रवृत्तये प्रकृतिगं यस्मात्स प्रकृतीश्वरः । तदधीनप्रवृत्तित्वात्तदीयं सर्वमेव तत् । तद्दत्तेनैव भुञ्जीथा अतो नान्यं प्रयाचयेदि'ति ब्रह्माण्डे ॥ १ ॥ अकुर्वतः कर्म न लिप्यत इति नास्ति । 'अज्ञस्य कर्म लिप्येत कृष्णोपास्तिमकुर्वतः । ज्ञानिनोऽपि यतो ह्रास आनन्दस्य

ईशावास्योपनिषत्

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ ईशावास्यमिदꣳ सर्वं यत्किंच जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १ ॥ कुर्वन्नेवेह कर्माणि

SGDF
Sri Gargeshwari Digital Foundation

मवेद्ध्रुवम् । अतोऽलेपेऽपि लेपस्स्यादतः कार्यैव सा सदे'ति नारदीये ॥
॥ २ ॥ सुष्ठु रमणविरुद्धत्वादसुराणां प्राप्यत्वाच्चासुर्याः । 'न च
रमन्त्यहो असदुपासनयात्महन' इत्युक्तत्वात् । 'महादुःखैकहेतुत्वा-
त्प्राप्यत्वादसुरैस्तथा । असुर्या नाम ते लोकास्तान्यान्ति विमुखा
हरावि'ति च वामने । ये के चेति नियम उक्तः । 'नियमेन तमो
यान्ति सर्वेऽपि विमुखा हरावि'ति च ॥ ३ ॥ 'अनेजन्निर्भयत्वा-
त्तदेकं प्राधान्यतस्तथा । सम्यग्ज्ञातुमशक्यत्वादगम्यं तत्सुरैरपि ।
स्वयं तु सर्वानगमत्पूर्वमेव स्वभावतः । अचिन्त्यशक्तितश्चैव सर्वग-
त्वाच्च तत्परम् । द्रवतोऽत्येति संतिष्ठत्तस्मिन्कर्माण्यधान्मरुत् ।
(म)मारुत्येव यतश्चेष्टा सर्वा तां हरयेऽर्पयेदि'ति ब्रह्माण्डे । ऋष ज्ञाने
॥ ४ ॥ तदेजति तत एव एजत्यन्यत् । तत्स्वयं नैजति । 'ततो
बिभेति सर्वोऽपि न बिभेति हरिः स्वयम् । सर्वगत्वात्स दूरे च
बाह्येऽतश्च समीपग' इति तत्त्वसंहितायाम् ॥ ५ ॥ 'सर्वगं परमात्मानं
सर्वं च परमात्मनि । यः पश्येत्स भयाभावान्नात्मानं गोप्तुमिच्छती'ति
सौकरायणश्रुतिः ॥ ६ ॥ यस्मिन्परमात्मनि सर्वभूतानि स परमात्मैव
तत्र सर्वभूतेष्वभूत् । एवं सर्वभूतेष्वेकत्वेन परमात्मानं विजानतः को
मोहः । 'यस्मिन्सर्वाणि भूतानि स आत्मा सर्वभूतगः । एवं सर्वत्र
यो विष्णुं पश्येत्तस्य विजानतः । को मोहः कोऽथवा शोकः स

जिजीविषेच्छतꣳ समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते
नरे ॥ २ ॥ असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः । ताꣳस्ते
प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥ अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन्पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो
मातरिश्वा दधाति ॥४॥ तदेजति तन्नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य
सर्वस्य तदु सर्वस्य (अस्य) बाह्यतः ॥५॥ यस्तु सर्वाणि भूतान्यात्मन्येवानु
पश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥ यस्मिन्त्स-
र्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कश्शोक एकत्वमनु-

SGDF
Sri Gargeshwari Digital Foundation

विष्णुं पर्यगायत'इति पिप्पलादशाखायाम्। पूर्वोक्तानुवादेन शोकमोहाभावेऽपि विजानतश्चात्रोच्यते। अभ्यासश्च सर्वगतत्वस्य तात्पर्यद्योतनार्थः॥ ७॥ 'शुक्रं तच्छोकराहित्यादव्रणं नित्यपूर्णतः। पावनत्वात्सदा शुद्धमकायं लिंगवर्जनात्। स्थूलदेहस्य राहित्यादस्नाविरमुदाहृतम्। एवं भूतोऽपि सार्वज्ञात्कविरित्येव शब्द्यते। ब्रह्मादिसर्वमनसां प्रकृतेर्मनसोऽपि च। ईशितृत्वान्मनीषी स परिभूः सर्वतो वरः। सदाऽनन्याश्रयत्वाच्च स्वयम्भूः परिकीर्तितः। स सत्यं जगदेतादृङ्नित्यमेव प्रवाहतः। अनाद्यनन्तकालेषु प्रवाहैकप्रकारतः। नियमेनैव ससृजे भगवान्पुरुषोत्तमः। सज्ज्ञानानन्दशीर्षोऽसौ सज्ज्ञानानन्दबाहुकः। सज्ज्ञानानन्ददेहश्च सज्ज्ञानानन्दपादवान्। एवं भूतो महाविष्णुर्यथार्थं जगदीदृशम्। अनाद्यनन्तकालीनं ससर्जात्मेच्छया प्रभुरि'ति वाराहे॥ ८॥ 'अन्यथोपासका ये तु तमोऽन्धं यान्त्यसंशयम्। ततोऽधिकमिव व्यक्तं यान्ति तेषामनिन्दकाः। तस्माद्यथास्वरूपं च नारायणमनामयम्। अयथार्थस्य निन्दां च (९।१०) ये विदुस्सह सज्जनाः। ते निन्दयाऽयथार्थस्य दुःखाज्ञानादिरूपिणः। दुःखाज्ञानादिसन्तीर्णाः सुखज्ञानादिरूपिणः। यथार्थस्य परिज्ञानात्सुखज्ञानादिरूपताम्। या(११)न्त्येवं सृष्टिकर्तृत्वं नाङ्गीकुर्वन्ति ये हरेः। तेऽपि यान्ति तमो घोरं तथा संहारकर्तृताम्। नाङ्गीकुर्वन्ति

पश्यतः॥ ७॥ सपर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्। कविर्मनीषी परिभूस्स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यस्समाभ्यः॥ ८॥ अन्धंतमः प्रविशंति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायाꣳ रताः॥ ९॥ अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥ १०॥ विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ ११॥ अन्धंतमः प्रविशन्ति येऽसम्भूतिमुपासते। ततो भूय

SGDF
Sri Gangeshwari Digital Foundation

तेऽप्येवं तस्मात्सर्वगुणात्मकम् । सर्वकर्तारमीशेशं सर्वसंहारकारणम् ॥
॥ १२ ॥ १३ ॥ यो वेद संहृतिज्ञानादेहबन्धाद्विमुच्यते । सुख-
ज्ञानादिकर्तृत्वज्ञानात्तद्व्यक्तिमाव्रजेत् । सर्वदोषविनिर्मुक्तं गुणरूपं
जनार्दनम् । जानीयान्न गुणानां च भागहानिं प्रकल्पयेत् । न
मुक्तानामपि हरेस्साम्यं विष्णोरभिन्नताम् । नैव प्रचिन्तयेत्तस्मा-
द्ब्रह्मादेस्साम्यमेव वा । मानुषादिविरिश्चान्तं तारतम्यं विमुक्तिगम् ।
ततो विष्णोः परोत्कर्षं सम्यग्ज्ञात्वा विमुच्यत'इति कौर्मे ॥ १४ ॥
'पात्रं हिरण्मयं सूर्यमण्डलं समुदाहृतम् । विष्णोस्सत्यस्य तेनैव
सर्वदाऽपिहितं मुखम् । तत्तु पूर्णत्वतः पूषा विष्णुर्दर्शयति स्वयम् ।
सत्यधर्माय भक्ताय (१५) प्रधानज्ञानरूपतः । विष्णुरेकऋषिर्ज्ञेयो
यमो नियमनाद्धरिः । सूर्यस्स सूरिगम्यत्वात्प्राजापत्यः प्रजापतेः ।
विशेषेणैव गम्यत्वा(१६)दहं चासावहेयतः । अस्मि नित्यास्तिता-
मानात्सर्वजीवेषु संस्थितः । स्वयं तु सर्वजीवेभ्यो व्यतिरिक्तः परो
हरिः । स क्रतुर्ज्ञानरूपत्वादग्निरङ्गप्रणेतृत' इति ब्रह्माण्डे । सत्यं
ब्रह्म हृदये धारयतीति सत्यधर्मा । एकोऽसौशब्दः प्राणे स्थित
इति ॥ १७ ॥ यस्मिन्नयं स्थितः सोऽप्यमृतः किमु परः । अः
ब्रह्मैव निलयनं यस्य वायोः सोऽनिलम् । 'अतिरोहितविज्ञानाद्वायु-
रप्यमृतः स्मृतः । मुख्यामृतः स्वयं रामः परमात्मा सनातन'इति

इव ते तमो य उ संभूत्याꣳ रताः ॥ १२ ॥ अन्यदेवाहुस्सम्भवादन्यदा-
हुरसम्भवात् । इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥
सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह । विनाशेन मृत्युं तीर्त्वा
संभूत्याऽमृतमश्नुते ॥ १४ ॥ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥ पूषन्नेकर्षे यम सूर्य प्राजापत्य
व्यूह रश्मीन्त्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ॥ १६ ॥
योऽसावसौ पुरुषस्सोऽहमस्मि ॥ १७ ॥ वायुरनिलममृतमथेदं

SGDF
Sri Gurgeshwari Digital Foundation

रामसंहितायाम् ॥ १८ ॥ भक्तानां स्मरणं विष्णोर्नित्यज्ञप्तिस्वरूपतः । अनुग्रहोन्मुखत्वं तु नैवान्यत्क्वचिदिष्यत'इति ब्रह्मतर्के ॥ १९ ॥ वयुनं ज्ञानम् । 'त्वद्दत्तया वयुनयेदमचष्ट विश्वमि'ति वचनात् । जुहुराणं अस्मान् अल्पीकुर्वत् । युयोधि वियोजय । 'यदस्मान्कुरुतेऽत्यल्पांस्तदेनोऽस्मद्वियोजय । नय नो मोक्षवित्तायेत्यस्तौद्यज्ञं मनुस्स्वराडि'ति स्कान्दे । युयु वियोग इति धातुः । भक्तिज्ञानाभ्यां भूयिष्ठां नमउक्तिं विधेम ॥ २० ॥

पूर्णशक्तिचिदानन्दश्रीतेजःस्पष्टमूर्तये । ममाभ्यधिकमित्राय नमो नारायणाय ते ॥ १ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमीशावास्योपनिषद्भाष्यं समाप्तम् ॥

॥ श्रीकृष्णार्पणमस्तु ॥

भस्मान्तꣳ शरीरं ॥ १८ ॥ ॐ क्रतो स्मर कृतꣳ स्मर ॥ ॐ क्रतो स्मर कृतꣳ स्मर ॥ १९ ॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देववयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ २० ॥ ईशावास्योपनिषत्समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

काठकोपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ नमो भगवते तस्मै सर्वतः परमाय ते । सर्वप्राणिहृदिस्थाय वामनाय नमो नमः ॥ 'अग्नौ विष्णुं सदा ध्यायंस्त्रिशोऽग्निं नाचिकेतकम् । यश्चयीत स तु प्राप्य स्वर्गं तत्र भयातिगः । उष्य मन्वन्तरं कालममृतत्वं भजेत्क्रमादि'ति ब्रह्मसारे । 'इच्छन्वाजश्रवोनप्ता ददौ सर्वस्वदक्षिणाम् । उद्दालकस्स्वर्गलोकं ददौ गाश्च निरिन्द्रियाः । मां दत्वापि न ते गावो दातव्या ईदृशा इति । उवाच पुत्रस्तं बालस्तं शशाप पिता स्वयम् । स जगाम यमं बालो ब्रह्मचारी यमस्य तु । पत्नचा सम्पूज्यमानोऽपि जग्राहार्घ्यादिकं न

काठकोपनिषत्

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॥ ॐ ॥ उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नाचिकेतानाम पुत्र आस ॥१॥ तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धा विवेश ॥२॥ पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः । अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत् ॥३॥ स होवाच पितरं तत कस्मै मां दास्यतीति । द्वितीयं तृतीयं तं होवाच मृत्यवे त्वा ददानीति ॥ ४ ॥ बहूनामेमि प्रथमो बहूनामेमि मध्यमः । किंस्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥५॥ अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे । सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६ ॥ वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् । तस्यैताꣳ शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥७॥ आशाप्रतीक्षे सङ्गतꣳसूनृतां चेष्टापूर्ते पुत्रपशूꣳश्च सर्वान् । एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ॥८॥ तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्

SGDF
Sri Gargeshwari Digital Foundation

तु । आगते तु यमे प्राह यमं सोदकमाहर । इत्युक्तस्स यमस्तं तु सम्पूज्याऽदाद्वरत्रयम् । सौमनस्यं पितुश्चैव नाचिकेताग्निगं हरिम् । मुक्तौ स्थितं च तं विष्णुमिति प्रादाद्वरत्रयमि'ति गतिसारे ॥ 'अग्रयत्वादग्निनामाऽसौ नाचिकेताग्निगो हरिः । लोको विष्णोरनन्तस्य तज्ज्ञानान्नित्य आप्यते । प्रतिष्ठा सर्वलोकस्य स विष्णुस्सर्वहृद्गतः । स एव सर्वलोकादिस्तं ज्ञात्वा मुच्यते ध्रुवमि'ति च । या इष्टका या इष्टकादेवताः । 'इष्टकादेवतां विष्णुं षष्ठ्युत्तरशतत्रिकम् । यथावदेव विज्ञाय मुच्यते कर्मबन्धनादि'ति च । त्रिभिरेत्य सन्धिं वेदैरविरुद्धः । वेदोक्तप्रकारेण भगवत्तत्त्वादिकं जानन्नित्यर्थः । त्रिकर्मकृत् यज्ञदानतपःकर्ता । 'यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तदि'ति वचनात् । त्रयमेतद्या इष्टका इत्यादि । 'ब्रह्मेति वेद उद्दिष्टस्तस्माद्व्यक्तो यतो हरिः । ब्रह्मजस्तेन कथितस्स एव ज्ञोऽखिलज्ञत'इति नामनिरुक्तौ । अनेकरूपां स्वर्णमयीम् । 'बहुरूपं च पुरटं कार्तस्वरमितीर्यत'इत्यभिधानात् । 'यमोऽनुवादसन्तुष्टो वह्नेस्तन्नामतामपि । सृङ्कां स्वर्णमयीं

ब्रह्मन्नतिथिर्नमस्यः । नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु । तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥९॥ शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो । त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥१०॥ यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः । सुखꣳ रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥११॥ स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति । उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके॥१२॥ स त्वमग्निꣳस्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥१३॥ प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् । अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम् ॥१४॥ लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा । स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनराह तुष्टः ॥१५॥ तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः । तवैव नाम्ना भविताऽयमग्निः सृङ्कां

SGDF
Sri Gargeshwari Digital Foundation

चैव कण्ठमालामदाद्विभुरि'ति पाद्मे । लोकादिः प्रतिष्ठा ब्रह्मजज्ञोऽनन्तलोकाप्तिरित्यादिविशेषणैश्च भगवानेव । स्तोममहदुरुगायं प्रतिष्ठामितिपरामर्शाच्च । भगवतो ह्युरुगायनाम प्रसिद्धम् । गुहानिहितत्वं च तस्यैव विशेषतः प्रसिद्धम् । न चाग्निपरिज्ञानमात्रेणानन्तलोकाप्तिर्भगवज्ज्ञानं विना । 'तद्वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवती'त्यादिश्रुतेः । न च मुख्ये सत्यमुख्यार्थो युज्यते । प्रेते मुक्ते मनुष्ये नियामकत्वेन भगवानस्तीति ज्ञानिनो वदन्ति । नास्तीत्यज्ञाः । तस्य नियामकस्य स्वरूपं यथावदहं विद्याम् । 'अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः । देहाद्विमुच्यमानस्य किमत्र परिशिष्यते । एतद्वै तदि'ति परिहाराच्च मुक्ते स्थितो भगवान्पृच्छ्यत इति सिद्धम् । देहाद्विशेषेण मोचनं नाम मुक्तिरेव । मुक्तेरपि मरणात्मकत्वान्मरणमित्यपि भवति । स्थूलदेहपरित्यागस्तु विस्रंसमानस्येत्यनेनैवोक्तो भवति । 'अग्निस्थं परमात्मानं सामान्याज्ज्ञानतोऽपि तु । अजानतस्तु मुक्तौ च जीवान्तःस्थितमीश्वरम् । नियामकं च जीवानां मुक्तानामपि सर्वदा । गुणान्सर्वोत्तमत्वादीनविज्ञाय हरेस्तथा । नैव मुक्तिर्भवेत्तस्मात्कृच्छ्रात्तदवद्यमः । तस्य गोप्यत्वविज्ञप्त्यै तथाप्यग्निस्थवेदनात् । सुखाधिक्यं भवेन्मुक्तौ तस्मात्तत्पृथगीरितमि'ति तत्त्वसारे । 'स्थाणुमन्येऽनुसँयन्ति यथाकर्म यथाश्रुतमि'त्युक्त्वा 'य एषु सुप्तेषु जागर्ति कामं

चेमामनेकरूपां गृहाण ॥ १६ ॥ त्रिना(णा)चिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू । ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति ॥ १७ ॥ त्रिना(णा)चिकेतस्त्रयमेत द्विदित्वा य एवं विद्वाꣳश्चिनुते नाचिकेतम् । स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥ एष तेऽग्निर्नाचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण । एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ॥ १९ ॥ येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष

SGDF
Sri Gangeshwari Digital Foundation

कामं पुरुषो निर्मिमाण' इति वचनाच्च जीवेषु स्थितो भगवान्पृच्छयत इति सिद्धम् । मृतजीवे स्थितो मुक्तजीवे स्थितश्चोभयात्मको भगवान्विवक्षित इत्येतस्माचाविरोधः । 'गुह्यं तत्परमं ब्रह्म शीर्यमाणं शरीरिणम् । सम्प्राप्तमपि जीवेषु जागर्ति स्वपितेष्वपी'ति ब्रह्माण्डे । धारकत्वाद्धर्मो भगवान् । मरणे स्थितं भगवन्तं मानुप्राक्षीः । महति साम्पराये मुक्तौ ॥ १ ॥ १ ॥

वृतस्तृतीयः ॥ २० ॥ देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयोऽणुरेष धर्मः । अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ॥२१॥ देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ । वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ॥ २२ ॥ शतायुषः पुत्रपौत्रान्वृणीष्व बहून्पशून्हस्तिहिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ॥ २३ ॥ एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च । महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥ २४ ॥ ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामांश्छन्दतः प्रार्थयस्व । इमा रामाः सरथाः सतूर्या न हीदृशा लम्भनीया मनुष्यैः ॥ २५ ॥ आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः । श्वोऽभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः । अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्तगीतम् ॥ २६ ॥ न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वाम् । जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥ २७ ॥ अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्वाधस्थः प्रजानन् । अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत ॥ २८ ॥ यस्मिन्निदं विचिकित्सन्ति मृत्यो यत् साम्पराये महति ब्रूहि नस्तत् । योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥ २९ ॥ इति प्रथमाध्यायस्य प्रथमा वल्ली ॥ ॥ १ ॥ १ ॥

अन्यच्छ्रेयोऽन्यदुतैव प्रेयः ते उभे नानार्थे पुरुषं सिनीतः । तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ १ ॥ श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमान्वृणीते ॥ २ ॥ स त्वं प्रियान् प्रियरूपांश्च

SGDF
Sri Gargeshwari Digital Foundation

सृङ्कां शृङ्खलाम् । अन्यो भगवानन्योऽहमित्यजानन्ननन्यः । तेन प्रोक्ते गतिर्ज्ञानं नास्ति । 'प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठे'ति वाक्यशेषात् । 'जीवानां चैव विष्णोश्च यो न वेत्ति भिदां पुमान् । तदनुव्रताश्च ये केचित्तेषां ज्ञानं न जायत'इति ब्रह्मवैवर्ते । आख्यं विष्ण्वाख्यं नित्यं शेवधिरिति जानामि । नित्यमाख्यविष्णुविषयै-र्द्रव्यैर्मनआदिभिः । आख्यनित्यविषयैर्विष्ण्वाख्यनित्यविषयैर्द्रव्यैः । नित्यं भगवन्तं प्राप्तवानस्मि । ध्रुवो भगवान् । अध्रुवैस्तद्भक्तिवर्जितैर्न प्राप्यते । क्रतोरानन्त्यहेतुम् । स्तोमैरपि सर्वात्मना प्राप्तुमशक्यम् । स्तोमेभ्योऽपि महान्तम् । उरुगायमित्युक्तत्वाच्च न जीवविषयोऽयं प्रश्नः । 'शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते' । 'शरवत्तन्मयो भवेत्' । 'अभयं तितीर्षतां पारम्' । 'तादृगेव भवती'त्यादौ सर्वत्र भेदस्यैवोक्तेश्च न जीवाभेदः । नाचिकेतं शकेमसीत्युक्तत्वाच्च नाचिकेताग्निस्थो

कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥ ३ ॥ दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवोलोलुपन्तः ॥ ४ ॥ अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः। दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥ ॥ ५ ॥ न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥ ६ ॥ श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तो बहवो यन्न विद्युः। आश्चर्योऽस्य वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७ ॥ न नरेणावरः प्रोक्त येषु सुज्ञेयो बहुधा चिन्त्यमानः । अनन्यप्रोक्ते गतिरत्र नास्ति अणीयान्ह्यतर्क्यमणुप्रमाणात् ॥ ८ ॥ नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ । यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥९॥ जानाम्यहँ शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् । ततो मया नचिकेतश्चितोऽग्निरनित्यद्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥ कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम् ।

SGDF
Sri Gargeshwari Digital Foundation

भगवानेवोच्यत इति सिद्धम्। उरुगायं दृष्ट्वा कामस्याप्तिमत्यस्राक्षीः। न च मृत्वा यमं प्राप्तस्य नचिकेतसो मृतोऽस्ति न वेति संशयोऽस्ति। गह्वरे मुक्तजीवे स्थितम्। प्रवृह्य जीवात्पृथक्कृत्य। 'मुक्तजीवे स्थितं विष्णुं विदित्वा जीवतः पृथक्। मोदते मोदनीयं तं प्राप्य मुक्तस्सदैव चे'ति महावाराहे। 'एतद्ध्येवाक्षरं ब्रह्म विष्ण्वाख्यं परमव्ययम्। सर्वस्यालम्बनं ज्ञात्वा मुच्यते नात्र संशय'इति च। 'देहोत्पत्तिविनाशाख्यौ ज्ञानिनोऽप्युद्भवाऽभवौ। न कुतश्चिद्यतो विष्णुर्जायतेऽतस्तदीक्षणात्। भावाऽभावौ न विदुषो यस्माज्जीवो न कश्चन। जायते म्रियते वापि स्वरूपेण कथञ्चन। अजो नित्योऽविकारश्च जीवः पुरमणन्नपी'ति च। अयं भगवान्कुतोऽपि न बभूव यस्मादतस्तद्वेत्तापि विपश्चिन्न जायते न म्रियते च। यतः कश्चिज्जीवः स्वतो न बभूव। देहसम्बन्धाद्धि जायते। विपश्चितस्तु देहसम्बन्धाभावान्न जायते न म्रियते च। जीवस्यापि स्वतो मरणाभावादुभौ तौ न विजानीतः। एवं नित्यस्य जन्तोर्गुहायां निहितः। ए विष्णौ क्रतुर्यस्य

स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥ ११ ॥ तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥ एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेनमाप्य। स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये ॥१३॥ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ १४ ॥ सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदँ संग्रहेण ब्रवीम्योमित्येतत् ॥ १५ ॥ एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्। एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ १६ ॥ एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ १७ ॥ न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमानेऽपि देहे (शरीरे) ॥ १८ ॥ हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥ अणोरणीयान्महतो महीया-

SGDF
Sri Gurgeshwari Digital Foundation

सोऽक्रतुस्तन्निश्चयः। आत्मनः सकाशान्महिमानं महामानम्। 'जीवाद्गुणपरिमाणं यस्माद्विष्णोर्महत्तरम्। तस्माज्जीवात्स महिमा विष्णुरित्युच्यते श्रुताविʼति च। ऐश्वर्यादेवाऽऽसीनो दूरं व्रजतीत्यादि। 'आसीनो दूरं व्रजति शयानो याति सर्वतः। ऐश्वर्याद्भगवान्विष्णुर्विरुद्धं घटयत्यसाविʼति च ॥ १ ॥ २ ॥

'आत्मान्तरात्मेति विभुरेक एव द्विधा स्थितः। स विष्णुः परमे वायौ परेभ्योऽप्यूद्धरूपके। शुभान्पिबति भोगान्स च्छायेव

नात्मास्य जन्तोर्निहितो गुहायाम्। तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥ २० ॥ आसीनो दूरं व्रजति शयानो याति सर्वतः। कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ॥ २१ ॥ अशरीरँ शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ २२ ॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥ २३ ॥ नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥ यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ २५ ॥ इति द्वितीया वल्ली ॥ ॥ १ ॥ २ ॥

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिना(णा)चिकेताः ॥ १ ॥ यः सेतुरीजानानामक्षरं ब्रह्म तत्परम्। अभयं तितीर्षतां पारं नाचिकेतँ शकेमहि ॥ २ ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव च। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४ ॥ यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥ यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥ यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः। न स तत्पदमाप्नोति सँसारं चाधिगच्छति ॥ ७ ॥ यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥ विज्ञानसारथिर्यस्तु मनः-

SGDF
Sri Gangeshwari Digital Foundation

विदुषां प्रभुः । आतपः पापिनां नित्यं मर्यादा विष्णुयाजिनाम् । संसारस्य च पारस्थस्स विष्णुर्द्विस्वरूपकः । देवेभ्य इन्द्रियात्मभ्यो ज्यायांसोऽर्थाभिमानिनः । सोमवित्तपसूर्याऽप्या अश्व्यग्नीन्द्रेन्द्रसूनवः । यमो दक्षश्चेन्द्रियेशास्सुपर्णी वारुणी तथा । उमेति चार्थमानिन्यस्तिस्रो द्विद्व्येकदेवताः । मनोऽभिमानिनो रुद्रवीन्द्रशेषास्त्रयोऽपि तु । ते श्रेष्ठा अर्थमानिभ्यस्तेभ्यो बुद्धिस्सरस्वती । तस्या ब्रह्मा महानात्मा ततोऽव्यक्ताभिधा रमा । तस्यास्तु पुरुषो विष्णुः पूर्णत्वान्नैव तत्समः । कश्चित्कुतश्चिच्छ्रेष्ठस्तु नास्तीति किमु सा कथा । तस्माद्वागात्मिका देवीरुमाद्यास्तु शिवादिषु । शिवादीन् ब्रह्मवाय्वोस्तु नियच्छेन्महदात्मनोः । तौ रमायां परानन्दे तां विष्णौ परमात्मनि । तद्वशत्वेन तद्ध्यानं नियमो नाम नापरः । कुतस्तु मानुषो देवान्नियच्छेद्विनियामकानि'ति च । स्वभार्यायाः परत्वं सिद्धमिति महतःपरमित्येवोक्तम् ॥ १ ॥ ३ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीकाठकोपनिषद्भाष्ये प्रथमोऽध्यायः ॥ १ ॥

प्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ ९ ॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ १० ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥ ११ ॥ एषु(ष) सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥ यच्छेद्वाङ्मनसि प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति तदिच्छेच्छान्त आत्मनि ॥ १३ ॥ उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत । क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथः तत्कवयो वदन्ति ॥ १४ ॥ अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥ १५ ॥ नाचिकेतमुपाख्यानं मृत्युप्रोक्तँ सनातनम् । उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥ १६ ॥ य इदं(मं) परमं गुह्यं श्रावयेद्ब्रह्मसंसदि । प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते ॥ तदानन्त्याय कल्पत इति ॥ १७ ॥ इति तृतीया वल्ली ॥ १ ॥ ३ ॥ इति काठकोपनिषदि प्रथमोऽध्यायः ॥१॥

SGDF
Sri Gangeshwari Digital Foundation

तृणु कात्करण इति धातुः ॥ इदं गुह्यं ब्रह्म प्रवक्ष्यामि । यथा मरणं प्राप्य जीवो भवति तच्च प्रवक्ष्यामि जीवेश्वरभेदज्ञापनाय । यः कर्मफलभोक्ता सुप्त्यादिमान्स जीवः । यः प्रलयादिषु जीवेषु सुप्तेषु जागर्ति स विष्णुः परं ब्रह्मेत्यर्थः । न हि जीवस्य योन्यादिगमनं ब्रह्म । जीवाद्भेदेन ज्ञातं हि ब्रह्म यथावज्ज्ञातं भवति । जीवस्यान्तिके । न हि स्वस्य स्वयं जीवोऽन्तिके भवति । वस्त्वन्तरस्य हि दूरत्वमन्तिकत्वं वा । 'अन्नामभ्यश्च भूतेभ्यस्तपोनाम्नश्शिवादपि । पूर्वं यो जनयामास पूर्वाऽजातं चतुर्मुखम् । स्वात्मानं च गुहासंस्थं सर्वभूतैस्सहाऽभिभूः । यः पश्यति सदा विष्णुस्स एष हृदि संस्थित' इति च । यथा मुखादिन्द्रश्चाग्निश्चेत्यादिना जाता एवेन्द्रादयः कश्यपात्पुनर्जायन्ते न तथा भगवतो ब्रह्मा । किन्त्वजातमेवाऽद्भ्यः पूर्वमजायत जनयामास । अजायतेति जज्ञे बहुज्ञमितिवदन्तर्णीतणिच् । 'अदनाददितिर्विष्णुर्यः प्राणसहितः स्थितः । उत्तमो देवताभ्यश्च सोऽत्मानं विविधात्मना । मत्स्यकूर्मादिरूपेण गुहासंस्थमजीजनत् । भूतैस्सह महाविष्णुः परमात्मा युगेयुग'इति च । देवतामयी देवतोत्तमा । प्राणेन सहितो भवति । गुहां प्रविश्य तिष्ठन्तं स्वात्मानं भूतैस्सह विविधं जनयामास । 'सर्वज्ञो भगवा-

---

पराञ्चि खानि व्यतृणात्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥ पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् । अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥ येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् । एतेनैव विजानाति किमत्र परिशिष्यते । एतद्वै तत् ॥ ३ ॥ स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥ य इदं मध्वदं वेदात्मानं जीवमन्तिकात् । ईशानं भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥५॥ यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत ॥ गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यति । एतद्वै तत् ॥ ६ ॥ या प्राणेन संविशत्यदितिर्देवता-

SGDF
Sri Gangeshwari Digital Foundation

न्विष्णुररण्योर्गुरुशिष्ययोः। सुभृतस्तूयते नित्यं जानद्भिः पुरुषोत्तम' इति च। अर्यते ण आभ्यामित्यरणी। 'यः प्रादुर्भावगो विष्णुर्देहादिषु च संस्थितः। स एव मूलरूपश्च साक्षान्नारायणाभिधः। मूलरूपश्च यो विष्णुः प्रादुर्भावादिगश्च सः। गुणतस्स्वरूपतो वापि विशेषं योऽत्र पश्यति। अत्यल्पमपि मृत्वा स तमोऽन्धं यात्यसंशयम्। भेदाभेदविदश्चात्र तमो यान्ति न संशयः। तथैवाऽवयवानां च गुणानां च परस्परम्। क्रियाणां तेन चैतेषां भेदविच्चोभयंविदः। यान्त्येवान्धं तमो नात्र कार्या काचिद्विचारणे'ति च। 'भवेदेकत्र संयोग इवशब्दो विरुद्धयोः। धर्मयोरुपमायां वा स्वल्पत्वे वा विवक्षित'इति शब्दनिर्णये। अतो नानेवेतीवशब्दोऽत्यल्पविषयो भेदाभेदविषयश्च। प्रथमं य इह नानेव पश्यतीति स्वरूपभेदनिषेधार्थम्। नेह नानास्ति किञ्चनेति किञ्चनशब्दादवयवानां गुणानां क्रियाणां च परस्परं तद्वता च भेदनिषेधार्थम्। भेदाभेद एव निषिध्यते न तु भेद इत्याशङ्कां निवारयितुमेवं धर्मान्पृथक्पश्यन्निति भगवद्धर्माणामवयवगुणकर्मणां भेददर्शने पृथग्दोषमाह। पर्वतेषु दुर्गे शिखरे वृष्टमधो विधावति। एवं विष्णोश्च धर्मान्पृथक्पश्य-

---

मयी। गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वै तत् ॥ ७ ॥ अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः। दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः। एतद्वै तत् ॥ ८ ॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति। तं देवास्सर्वे अर्पितास्तदु नात्येति कश्चन। एतद्वै तत् ॥ ९ ॥ यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १० ॥ मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन। मृत्योस्स मृत्युं गच्छति य इह नानेव पश्यति ॥ ११ ॥ अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत् ॥ १२ ॥ अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वै तत् ॥ १३ ॥ यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक्पश्यंस्तानेवानु विधावति ॥

SGDF
Sri Gargeshwari Digital Foundation

न्नन्धन्तमो विधावति । विजानतो मुनेरात्मा वायुरपि तादृगेव भवति न तु स एव भवति । किम्वन्ये जीवाः । 'सर्वेषां ज्ञानिनामात्मा देवानां च विशेषतः । मुक्तो वायुश्च सादृश्यमेव विष्णोस्तु गच्छति । न तु तद्रूपतां याति किम्वन्ये देवमानुषाः । आभासाभासरूपास्तु वायोर्देवस्य सर्वश'इति भविष्यत्पर्वणि ॥ २ ॥ १ ॥ (४) ॥

इदं पुरं भगवदधीनमित्यधिष्ठायाजस्येदं पुरमिति स्थितं कृत्वा । 'विमुक्तो निरभीमानात्पूर्वमेवापरोक्षवित् । मुख्यतो मुच्यते पश्चा-दुःखाद्याभासहानत'इति च । 'नित्यहीनोऽखिलैर्दोषैस्साररूपो यतो हरिः । हंस इत्युच्यते तस्माद्वायुस्थश्शुचिषत्स्मृतः । वरसुर्वसुरित्युक्तस्स एवाप्यन्तरिक्षगः । होता सर्वेन्द्रियादिस्थो वेद्यां पूज्यश्च वेदिषत् । अत्यन्नश्चातिथिः प्रोक्तो यस्मादन्नं थमुच्यते । स द्रोणकलशे सोमे स्थित उक्तो दुरोणसत् । नृषु स्थितश्च देवेषु वरेष्वपि स एव तु । ऋतरूपे तथा वेदे व्योमाख्यप्रकृतावपि । व्योतं जगदिदं यस्यां सा व्योम श्रीरुदाहृता । अब्जगोजाद्रिजेष्वेवमास्ते सोऽब्जादिकस्ततः । तथैवर्तेषु मुक्तेषु गतास्ते पिष्णुमित्यृताः । वेदैर्मुख्यतया प्रोक्त ऋतमित्येव चोच्यते । बृहत्पूर्णगुणत्वाच्च स एव पुरुषोत्तमः । न

॥ १४ ॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥ इति द्वितीयाध्यायस्य प्रथमा वल्ली ॥ ॥ २ ॥ १ ॥ (४) ॥

पुरमेकादशद्वारमजस्यावक्रचेतसः । अधिष्ठाय न शोचति विमुक्तश्च विमुच्यते । एतद्वै तत् ॥ १ ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २ ॥ ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति । मध्ये वामनमासीनं विश्वेदेवा उपासते ॥ ३ ॥ अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः । देहाद्विमुच्यमानस्य किमत्र परिशिष्यते । एतद्वै तत् ॥ ४ ॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥ हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।

SGDF
Sri Gargeshwari Digital Foundation

केवलं प्राण एव चेतनानां विधारकः । किन्तु विष्णुं समाश्रित्य प्राणो जीवान्बिभर्त्ययम् । अतो मुख्याश्रयो विष्णुश्चेतनानां स्वतन्त्रतः । अग्निर्यथैको लोकेषु प्रविष्टोऽन्यो न विद्यते । पाकादिकर्ताऽथाप्यस्य देवस्य प्रतिरूपकाः । रूपंरूपं प्रति ह्येते सन्त्यचेतनवह्नयः । एवं देवो वायुरपि धारकोऽन्यो न विद्यते । रूपंरूपं तथाप्यस्य प्रत्यभूत्प्रतिरूपकः । अचेतनः स्पर्शगम्यो योऽयमेवं जनार्दनः । एकस्स्वतन्त्रो नान्योऽस्ति सर्वजीवान्तरस्थितः । रूपंरूपं प्रति ह्यस्य प्रतिबिम्बाश्च चेतनाः । बाह्याश्च ते ततो नास्य स्वरूपं ते कथञ्चन । अनादिप्रतिबिम्बाश्च बभूवुस्ते ह्यनन्तकाः । सूर्यो यथान्तरं चक्षुः प्रतिबिम्बोऽस्य बाह्यकम् । बाह्यचक्षुर्गतैर्दोषैरन्तश्चक्षुर्न लिप्यते । अन्तश्चक्षुर्देवता तु बाह्यं चक्षुरचेतनम् । एवं बाह्यस्वतन्त्रत्वाज्जीवेभ्यः पुरुषोत्तमः । अस्वतन्त्रस्य जीवस्य दुःखैर्नैव हि लिप्यते । चेतनाभासको जीवः परमश्चेतनो हरिः । स्वतन्त्रत्वात्स्वतन्त्रो हि नैव दोषेण लिप्यत' इति कौर्मे । स एक एव सर्वभूतान्तरात्मा । तस्य रूपंरूपं प्रतिरूपाख्यो जीवो बभूव । बहिश्चासौ परमात्मनो नितरां भिन्नः । परतन्त्रत्वात् । आत्मैवेदमग्र आसीदित्यादिवदनादित्वापेक्षया ।

यथा मरणं प्राप्यात्मा भवति गौतम ॥ ६ ॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनु संयन्ति यथाकर्म यथाश्रुतम् ॥ ७ ॥ य एषु(ष) सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन । एतद्वै तत् ॥ ८ ॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥ वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥ सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥ एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति

SGDF
Sri Gangeshwari Digital Foundation

न्नन्धन्तमो विधावति । विजानतो मुनेरात्मा वायुरपि तादृगेव भवति न तु स एव भवति । किम्वन्ये जीवाः । 'सर्वेषां ज्ञानिनामात्मा देवानां च विशेषतः । मुक्तो वायुश्च सादृश्यमेव विष्णोस्तु गच्छति । न तु तद्रूपतां याति किम्वन्ये देवमानुषाः । आभासाभासरूपास्तु वायोर्देवस्य सर्वश'इति भविष्यत्पर्वणि ॥ २ ॥ १ ॥ (४) ॥

इदं पुरं भगवदधीनमित्यधिष्ठायाजस्येदं पुरमिति स्थितं कृत्वा । 'विमुक्तो निरभीमानात्पूर्वमेवापरोक्षवित् । मुख्यतो मुच्यते पश्चा-दुःखाद्याभासहानत'इति च । 'नित्यहीनोऽखिलैर्दोषैस्सारस्रूपो यतो हरिः । हंस इत्युच्यते तस्माद्वायुस्थश्शुचिषत्स्मृतः । वरसुर्वसुरित्युक्तस्स एवाप्यन्तरिक्षगः । होता सर्वेन्द्रियादिस्थो वेद्यां पूज्यश्च वेदिषत् । अत्यन्नश्चातिथिः प्रोक्तो यस्मादन्नं थमुच्यते । स द्रोणकलशे सोमे स्थित उक्तो दुरोणसत् । नृषु स्थितश्च देवेषु वरेष्वपि स एव तु । ऋतरूपे तथा वेदे व्योमाख्यप्रकृतावपि । व्योतं जगदिदं यस्यां सा व्योम श्रीरुदाहृता । अब्जगोजाद्रिजेष्वेवमास्ते सोऽब्जादिकस्ततः । तथैवर्तेषु मुक्तेषु गतास्ते पिष्णुमित्यृताः । वेदैर्मुख्यतया प्रोक्त ऋतमित्येव चोच्यते । बृहत्पूर्णगुणत्वाच्च स एव पुरुषोत्तमः । न

॥ १४ ॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥ इति द्वितीयाध्यायस्य प्रथमा वल्ली ॥ ॥ २ ॥ १ ॥ (४) ॥

पुरमेकादशद्वारमजस्यावक्रचेतसः । अधिष्ठाय न शोचति विमुक्तश्च विमुच्यते । एतद्वै तत् ॥ १ ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिष-दतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २ ॥ ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति । मध्ये वामन-मासीनं विश्वेदेवा उपासते ॥ ३ ॥ अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः । देहाद्विमुच्यमानस्य किमत्र परिशिष्यते । एतद्वै तत् ॥ ४ ॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मि-न्नेतावुपाश्रितौ ॥ ५ ॥ हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।

SGDF
Sri Gurgeshwari Digital Foundation

केवलं प्राण एव चेतनानां विधारकः । किन्तु विष्णुं समाश्रित्य प्राणो जीवान्बिभर्त्ययम् । अतो मुख्याश्रयो विष्णुश्चेतनानां स्वतन्त्रतः । अग्निर्यथैको लोकेषु प्रविष्टोऽन्यो न विद्यते । पाकादिकर्ताऽथाप्यस्य देवस्य प्रतिरूपकाः । रूपंरूपं प्रति ह्येते सन्त्यचेतनवह्नयः । एवं देवो वायुरपि धारकोऽन्यो न विद्यते । रूपंरूपं तथाप्यस्य प्रत्यभूत्प्रतिरूपकः । अचेतनः स्पर्शगम्यो योऽयमेवं जनार्दनः । एकस्स्वतन्त्रो नान्योऽस्ति सर्वजीवान्तरस्थितः । रूपंरूपं प्रति ह्यस्य प्रतिबिम्बाश्च चेतनाः । बाह्याश्च ते ततो नास्य स्वरूपं ते कथञ्चन । अनादिप्रतिबिम्बाश्च बभूवुस्ते ह्यनन्तकाः । सूर्यो यथान्तरं चक्षुः प्रतिबिम्बोऽस्य बाह्यकम् । बाह्यचक्षुर्गतैर्दोषैरन्तश्चक्षुर्न लिप्यते । अन्तश्चक्षुर्देवता तु बाह्यं चक्षुरचेतनम् । एवं बाह्यस्वतन्त्रत्वाज्जीवेभ्यः पुरुषोत्तमः । अस्वतन्त्रस्य जीवस्य दुःखैर्नैव हि लिप्यते । चेतनाभासको जीवः परमश्चेतनो हरिः । स्वतन्त्रत्वात्स्वतन्त्रो हि नैव दोषेण लिप्यत' इति कौर्मे । स एक एव सर्वभूतान्तरात्मा । तस्य रूपंरूपं प्रतिरूपाख्यो जीवो बभूव । बहिश्चासौ परमात्मनो नितरां भिन्नः । परतन्त्रत्वात् । आत्मैवेदमग्र आसीदित्यादिवदनादित्वापेक्षया ।

यथा मरणं प्राप्यात्मा भवति गौतम ॥ ६ ॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनु संयन्ति यथाकर्म यथाश्रुतम् ॥ ७ ॥ य एषु(ष) सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन । एतद्वै तत् ॥ ८ ॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥ वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥ सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥ एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति

SGDF
Sri Gangeshwari Digital Foundation

'आत्मनिस्थं हरिं जानन्मुच्यते नात्र संशयः। जीवैक्येन तु तं ध्यायंस्तमस्यन्धे पतेद्ध्रुवमि'ति च। एतदेव भगवद्रूपं परमं सुखम्। ज्ञानिसुखं तु तद्विप्लुण्मात्रम्। 'ब्रह्मादीनां तु मुक्तानां सुखं विष्णुसुखस्य तु। प्रतिबिम्बस्तु विप्लुट्को विष्णोरेव परं सुखम्। सम्यग्भाति न भातीति जानीयां तत्कथं न्वहम्। तत्प्रसादमृते दिव्यमनिर्देश्यं परं सुखमि'ति च महावाराहे ॥ २ ॥ २ ॥ (५) ॥

'सर्वोच्चो भगवान्विष्णुर्मूलं भूमिवदस्यतु। जगदाख्यस्य वृक्षस्य शाखा देवास्ततोऽवमाः। वृक्षमूलं रमादेवी सोऽश्व आशुगतेर्हरिः। तद्व्याप्तत्वात्तदन्नत्वादश्वत्थोऽयं प्रकीर्तितः। प्रवाहतस्त्वनादिश्च मुख्यतस्त्वमृतो हरिः। मुख्यामृतस्स एवैको जगन्नित्यं प्रवाहतः। प्राणाख्ये तु हरौ सर्वमेजत्यस्माच्च निस्सृतम्। वज्रवद्भयदं चैव स्वधर्मस्यातिलङ्घने। जीवे स्थितस्तु भगवान्दृश्यते ज्ञानदृष्टितः। आदर्शे मुखवत्सम्यङ्न तथा पितृलोकगः। ततः किञ्चित्स्पष्टतया गान्धर्वे दृश्यते

धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥ तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्। कथं नु तद्विजानीयां किमु भाति न भाति वा ॥ १४ ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १५ ॥ इति द्वितीयाध्यायस्य द्वितीया वल्ली ॥ २ ॥ २ ॥ (५) ॥

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वै तत् ॥ १ ॥ यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥ इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः। ततः स्वर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥ यथाऽऽदर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके। यथाप्सु परीव दृश्यते तथा गन्धर्वलोके। छायातपयोरिव

SGDF
Sri Gargeshwari Digital Foundation

हरिः । नाऽत्यातपे न च्छायायां यथैवाहनि दृश्यते । स्पष्टं तथा ब्रह्मलोके दृश्यते पुरुषोत्तम'इति च । पुनरिन्द्रियेभ्यः परं मन इत्यादि देवतातारतम्यज्ञानपूर्वकं भगवतः सर्वोत्तमत्वज्ञान एव सर्ववाक्यानां महातात्पर्यमिति ज्ञापयितुम् । 'तारतम्यपरिज्ञानपूर्वकं सर्वतो हरेः । आधिक्ये सर्ववाक्यानां तात्पर्यं महदिष्यत'इति च । 'प्रादुर्भावानृते विष्णुमिन्द्रियैर्नैव पश्यति । प्रादुर्भावानपि यदा ज्ञानदृष्ट्यैव पश्यति । तदैव मुच्यते योगी न दुष्टैरिन्द्रियैः क्वचिदि'ति च । प्रभवाप्ययौ प्रति हि योगः । भगवतस्सकाशात्प्रभवाप्ययौ । 'अधिकस्सतोऽयं भगवान्त्सर्वस्मादपि केशवः । अस्तीति नामकस्तस्माज्ज्ञातव्यस्स तथैव च । अनाधिक्यं जानतां तु कथं स उपलभ्यते । प्रकृतेः पुरुषाणां च तत्त्वं भावयति स्फुटम् । तत्त्वभावस्ततो विष्णुस्तत्प्रसादात्तु तस्य हि । आधिक्यं ज्ञायते सत्तः प्रसादश्च तथाविदः । अनादिकालादाधिक्यं सर्वस्माज्ज्ञानतो हरेः । पुनःपुनर्वृद्धिमेति तज्ज्ञानं हि भवेभवे । येषामाधिक्यविज्ञानं नैव पूर्वं हरेर्भवेत् । तेषां पश्चाच्च नैव स्यादभिभूतं तु तत्पुनः । व्यञ्जकाद्व्यक्तिमभ्येति तस्मात्तज्ज्ञानमुत्तमम'ति च । 'अन्तःकरणकामानां त्यागो व्यक्तिश्चिदात्मनाम् ।

ब्रह्मलोके ॥ ५ ॥ इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् । पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥ इन्द्रियेभ्यः परं मनो मनसः सत्वमुत्तमम् । सत्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥ ७ ॥ अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च । तं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥ ८ ॥ न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनम् । हृदा मनीषी मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ॥ ९ ॥ यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥ १० ॥ तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥ ११ ॥ नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ १२ ॥ अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।

SGDF
Sri Gangadhareshwar Digital Foundation

कामानां तु तदा मुक्तौ मृतिं नैवाभियास्यति। मिथ्याज्ञानग्रन्थिभिस्तु नितरां मुच्यते यदा । तदामृतत्वमेवैति तदर्थं चानुशासनम् । शरीरभूतो विष्णोस्तु जीवस्तद्वशगो यतः । अधिष्ठितश्च तेनैव विजानीयात्पृथक्ततः । स्वाख्याच्छरीराज्जीवात्तु प्रवृहेद्विष्णुमव्ययमि'ति च । 'यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयती'ति च । जनानां हृदय इत्युक्तत्वाच्च जीवात्पृथग्घरिरिति सिद्धम् । 'देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि । जीवस्य स तु विज्ञेयो जीवाद्भेदेन मुक्तय'इति च । संसारिशरीरेणाभेदो वादिना केनापि नाङ्गीकृतः । न च लोके सिद्धः । जनानामितिभेदात् । न जीवोऽङ्गुष्ठमात्रः । अतो विष्णोर्जीवाद्भेद उक्तः अतस्सर्वोत्तमो विष्णुरिति सिद्धम् ॥ ॥ २ ॥ ३ ॥ (६) ॥

नमो भगवते तस्मै विष्णवे प्रभविष्णवे । यस्याहमाप्त आप्तेभ्यो यो म आप्ततमस्सदा ॥ १ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीकाठकोपनिषद्भाष्ये द्वितीयोऽध्यायः ॥२॥

॥ श्रीकृष्णार्पणमस्तु ॥

अस्तीत्येवोपलब्धस्य तत्वभावः प्रसीदति ॥ १३ ॥ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥ यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः । अथ मर्त्योऽमृतो भवति एतावदनुशासनम् ॥ १५ ॥ शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ॥१६॥ अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण। तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥ १७ ॥ मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् । ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥ १८ ॥ इति द्वितीयाध्याये तृतीया वल्ली ॥ ॥ २ ॥ ३ ॥ (६) ॥ इति श्रीकाठकोपनिषत्सम्पूर्णा ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

छान्दोग्योपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ अत्युद्रिक्तविदोषसत्सुखमहाज्ञानैकतानप्रभासर्वप्राभवशक्तिभोगबलसत्सारात्मदिव्याकृतिम्। सृष्टिस्थाननिरोधनित्यनियतिज्ञानप्रकाशावृतिध्वान्तामोक्षविमोक्षदं हरिमजं नित्यं सदोपास्महे ॥ १ ॥ हयग्रीवमुखोद्गीर्णगीर्भिर्देवी रमा पतिम्। अस्तुवद्विस्तृतगुणं भोगिप्रस्तरशायिनम् ॥ ओमितिनामकमक्षरं सर्वसन्निहितत्वादेतत्। उच्चत्वाद्गीतत्वात्सर्वस्थानत्वाच्चोद्गीथं भगवन्तमुपासीत। उक्तं च महासंहितायाम्। 'हयग्रीवोद्गीतवाक्यैः रमा देवी रमापतिम्। ओमित्येतन्मुखैर्देवमस्तुवत्सामवेदगै'रिति। 'ॐनामानमुपासीत तदर्थगुणपूर्वकम्। ओतत्वादवनान्मानादधिकोच्चत्वकारणात्। आनन्दादोजसश्चैव भरणादोमुदाहृत' इति समन्वये। 'ओतमस्मिञ्जगत्सर्वमत्युच्चश्चाखिलैर्गुणैः। इत्योमिति सदोपास्यः सोऽक्षरः पुरुषोत्तमः। उच्चत्वाद्गीयमानत्वात्स्थानादुद्गीथ उच्यते। ॐमित्येनं समुद्दिश्य

श्रीछान्दोग्योपनिषत्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे अस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐ शान्तिश्शान्तिश्शान्तिः ॥

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥

SGDF
Sri Gangeshwari Digital Foundation

ह्युद्गाता गायति स्फुटम् । विष्णोरोमितिनाम्नोऽस्य व्याख्यानमधिकोच्चता । अकारेणाधिकं प्रोक्तमुकारेणोच्चमुच्यते । तथा मितं सर्ववेदैर्मकारेणाभिधीयते । अधिकोच्चमितिज्ञातमोमित्यस्यार्थ ईरितः । तदेतत्परमत्वं तु यथाक्रमम्नुदीर्यते । देवतानुक्रमज्ञाश्च विष्णोः परमताविदः । एकान्तिनस्ते विज्ञेया यथाक्रमपरास्तथा । अस्मादसावुच्च इति क्रमस्यान्तगतं हरिम् । एकमेव तु ये विद्युस्ते ह्येकान्तिन ईरिताः । एवं यथाक्रमज्ञाश्च सदैकान्तपरायणाः । प्रविशन्ति परं देवं नारायणमनामयम् । उच्चक्रमान्तगत्वेन कुर्युः पूजां हरेः सदा । लक्ष्म्यादेः क्रमशः पूजां ज्ञात्वा भागवता इति । स्वतन्त्रपूज्यताबुध्या न दद्युः किञ्च कस्यचित् । ब्रह्माद्या मनुसंज्ञा ये वर्णत्वेनोदिताः श्रुतौ । मानवाख्याश्च मुनयस्तान्यजन्ति न चेतरान् । पितृत्वेन गुरुत्वेन साक्षाद्भागवतत्वतः । अपभ्रष्टा अदेवाश्च ब्रह्माद्याख्यायुता अपि । देवसंज्ञाश्च दीनत्वात्पूजयेयुर्न तान्कचित् । यद्भागवतबुध्यैव दत्तं ब्रह्मादयः सुराः । वैदिकाः प्रतिगृह्णीयुरपभ्रष्टास्तथेतरत् । यथाक्रमपरिज्ञानादेकान्तित्वाच्च केवलम् । अच्छिद्रत्वाच्च नियतो मोक्षोऽन्यत्तु विडम्बनम् । विष्णौ भक्तिर्विशेषेण मोक्षावाप्तौ हि कारणम् । तद्भक्तेषु क्रमेणैव रमाद्येषु त्वनन्तरम् । तृतीयमपि वैराग्यं न चान्यन्मोक्षकारणम् । एतत्साधनताहेतोस्तदन्यद्धि विधीयते । अतोऽन्यत्सर्वकृच्चापि गच्छेदेवाधरं तमः । अस्मिन्सुनिष्ठितो नित्यं मोक्ष्येवान्योज्झकोऽपि सन् । अतस्तेषां क्रमं वक्ष्ये देवानां यः श्रुतौ श्रुतः । पृथिवी सर्वभूतेभ्यः सदा सर्वगुणैर्वरा । रसः सारो वरश्चेति शब्दा एकार्थवाचकाः । पृथिव्या वरुणः श्रेष्ठस्तस्मादोषधिदेवता ।

॥ १ ॥ एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः स एष रसानां रसतमः परमः परार्ध्योऽष्टमो य

SGDF
Sri Gargeshwari Digital Foundation

सोमस्तस्मात्तु पुरुषो रुद्रो यत्पौंस्यदेवता। तस्मात्सरस्वती वाग्घि श्रेष्ठास्या ऋक्स्वरूपिणी। सैव श्रेष्ठा ततो वायुर्वरिष्ठस्सामनामकः। समत्वात्सर्वभूतेषु साम साम्नां च देवता। ततः श्रेष्ठतमो विष्णुः श्रेष्ठश्रेष्ठतमः सदा। श्रेष्ठाच्छ्रेष्ठतमाच्चापि परमात्परमो विभुः। परमर्धियुतत्वाच्च परार्ध्य इति कीर्तित'इति सारनिर्णये। अतिशयेन परमर्धिगुणः परमः परार्ध्यः। उत्तमेभ्योऽप्यतिपरमोत्तमोत्तमो रसानां रसतमः परमः परार्ध्यः। रसानां सकाशादपि परमपरार्ध्यरसतम इत्यर्थः। प्राणादीनां भूतादिभ्यः श्रेष्ठत्ववदस्य श्रेष्ठत्वं न भवति किन्तु महान्विशेष इति ज्ञापयितुं रसानां रसतम इत्यादिबहुविशेषणं। भूतेभ्यः पृथिव्या रसत्वं तेभ्यो वरुणस्य रसतरत्वं सोमस्य रसतमत्वं रुद्रस्य परमरसतमत्वं वाचः परमपररसतमत्वं प्राणस्य परमपरार्धरसतमत्वं अयं तु भगवान् प्राणादपि परमपरार्धरसतममात्रो न भवति। किन्तु प्राणस्यापि रसभूताया रमाया अपि परमपरार्ध्यरसतमः। अस्मादप्यतिशयेन परमित्यसंख्यागोचरत्वेन परार्धेन ज्ञेयं हि परार्ध्यम्। ऋग्रूपाया वाचः पृथक्परत्वाङ्गीकारेऽपि भूतेभ्यः प्राणस्य परमपरार्धरसतमत्वमेव न तु परमपरार्धिरसतमत्वम्। परस्मादा समन्ताद्वृद्धं हि परार्धम्। तेनोत्तमत्वेन ज्ञेयं परार्धि। तेनासङ्ख्यागोचरत्वेन ज्ञेयं परार्ध्यं परार्धोत्तमं परार्धितेनासङ्ख्यागोचरत्वेन ज्ञेयं परार्ध्यमित्यतः परार्धित्वं श्रियो भवति श्रियोऽपि परार्ध्यो भगवान्। अतो रसानां रसतमः परमः परार्ध्यः। पृथिव्याः सोमवरुणयोश्चौषध्यब्देवतात्वेन रुद्रस्य च लिङ्गदेवतात्वेन प्रसिद्धेः ऋगादीनामेव विमर्शः क्रियते कतमा कतमर्गित्यादिना। तज्ज्ञानस्य विशिष्टफलत्वाच्च। वाचश्च सरस्वतीत्वेन प्रसिद्धेर्वागृचोरैक्याच्च न विमर्शः कृतः। 'विशेषात्प्राणसंयुक्ता वागृगित्यभिधीयते। ऋ गताविति धातोर्हि ऋक्त्वं सर्गाभिमानिनी। विशेषसंयोगहीना यदा सैव

SGDF
Sri Gangeshwari Digital Foundation

सरस्वती। तदा तस्यावरा सैव प्राणसंयोगिनी मता। प्राणयोग-वियोगाभ्यां सैषैकापि विभिद्यते। वागेवर्क्छ्रुतौ प्रोक्ता प्राणः सामेति कीर्तितः। अक्षयाद्गतिरूपत्वादक्षेषु रमणादपि। अक्षरं भगवान्विष्णुरोमित्युच्चत्वहेतुतः। इतिशब्दोऽन्यथाभावनिवृत्त्यर्थ उदाहृतः। एवमत्युच्च एवासौ सर्वदैतद्धृदि स्थितः। उद्गीयमान उद्गीथो भगवान्पुरुषोत्तमः। तस्मादोमित्यनुज्ञानं कुर्वन्त्येते जनाः सदा। त्वदुक्तं तत्तथा कुर्याद्भगवानेव केशवः। इत्यभिप्रायतः शब्दः प्रवृत्तः स पुरातनैः। तदेतदज्ञैस्तु जनैः स्वानुज्ञेति प्रतीयते। ओमित्ययं पूर्णवाची समृद्धिर्ह्योमितीरिता। समृद्धस्ते हि कामोऽयमित्यनुज्ञाऽथवा भवेत्। अतस्समृद्धिवाची स्याद्धरेरोंशब्द ईरितः। इति वा दीयतेऽनुज्ञा हरिस्तव समृद्धिदः। वाक्प्राणौ दम्पती चापि संसृज्येते जनार्दने। मुक्तौ तु तत्प्रसादेन संसृज्यन्ते ततः परे। तद्द्वारेणैव साक्षात्तु प्राणः संसृज्यते हरौ। तेनैव विष्णुनेयं च त्रयीविद्या प्रवर्तते। ओमित्युक्तत्रा हि तद्व्याख्या सर्वैर्मन्त्रैः प्रवर्तते। ॐनामकस्य पूजार्थं विष्णोरेव सदैव हि। महिम्ना सारभूतेन विष्णुना ज्ञोऽज्ञ एव च। कुरुतः कर्म नाज्ञस्य मुक्तिर्ज्ञस्य भवेत्तु सा। स्वयोग्यं तु परिज्ञानं यत्तस्योपनिषत्स्मृतम्। अक्षरं भगवान्विष्णुस्तस्योपप्रणवः स्मृतः। उपाख्या तु तद्व्याख्येत्येवमाह श्रुतिः परे'ति तार्तीये।

उद्गीथः॥२॥ कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति वागेवर्क् प्राणः सामोमित्येतदक्षरमुद्गीथः॥३॥ तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते॥ ॥४॥ यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य काममापयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥५॥ तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥६॥ तेनेयं त्रयीविद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्ये-

SGDF
Sri Gargeshwari Digital Foundation

'परर्धं परमादुच्चं परार्धं तु ततोऽधिकम्। ततोऽधिकं परार्धिः स्यात्परार्ध्यमिति तत्परम्। परतः परमाच्चैव परार्धो वायुरीरितः। परार्धिनी श्रीरुद्दिष्टा परार्ध्यो भगवान्हरिरि'ति शब्दनिर्णये ॥ १ ॥

उद्गीथाख्यस्य विष्णोर्विशिष्टप्रतिमा वायुरेव। अतस्तस्य सर्वोत्तमत्वज्ञानपूर्वकं तस्मिंस्ततोऽप्युत्तमत्वेनोपासित एव भगवान् सम्यक् फलं ददातीति दर्शयति। 'वायौ मुख्यधियेति चे'ति भगवद्वचनम्। 'यस्माद्वायौ स्मृतो विष्णुर्वायोर्मुख्यतयाऽखिलात्। स्वस्य मुख्यतया तस्मात्परां तुष्टिं गमिष्यति। अतो विचार्य सकलैर्देवैः प्राणे जनार्दनः। उपसितो दैत्यजयकारणात्पापवर्जिते। वायुपुत्रं च नासिक्यमग्निं वागात्मकं तथा। सोमं श्रोत्रात्मकं चैव सूर्यं चक्षुःस्वरूपिणम्। रुद्रं मनःस्वरूपं च शेषं चाहंस्वरूपिणम्। चित्तात्मकं च गरुडं पापेन विविधुः सुरान्। असुरास्तैर्यतो विद्धास्तस्मात्ते दोषयोगिनः।

तस्यैवाक्षरस्यापचित्यै महिम्ना रसेन तेनोभौ कुरुतो यश्चैतदेवंवेद यश्च न वेद ॥ ७ ॥ नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवत्यथ ह यएवायं मुख्यः प्राणस्तमुद्गीथमुपासीत तस्येतरैः प्राणै-रुपव्याख्यानं भवति ॥ ८ ॥ १ ॥

देवासुरा ह वै यत्र संयेतिर उभये प्राजापत्यास्तद्ध देवा उद्गीथ-माजह्रुरनेनैनानभिभविष्याम इति ॥१॥ ते ह नासिक्यं प्राणमुद्गीथमुपासां-चक्रिरे तꣳ हासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः ॥ २ ॥ अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे हासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥ ३ ॥ अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येत-द्विद्धम् ॥ ४ ॥ अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥ ५ ॥ अथ ह मन उद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं सङ्कल्पयते सङ्कल्पनीयं चासङ्कल्पनीयं च

SGDF
Sri Gangeshwari Digital Foundation

मुख्यवायौ यदा देवाः शरीरस्थे च सूर्यगे। विष्णुमुद्गीथनामानं तदा तं च विदध्वसुः। यदा विदध्वसुः प्राणं विध्वस्तास्ते तदाऽसुराः। अखन्याश्मानमेपाप्य लोष्टो विध्वंसते यथा। प्रतिमां प्रेयसीं प्राप्य विष्णोः प्राणं तथाऽसुराः। तस्मादादित्यसंस्थे वा शरीरस्थेऽपि चानिले। बलज्ञानात्मके दिव्याकृतिमत्युज्ज्वलात्मनि। सर्वदेवोत्तमे विष्णुमुपासीत ततोऽधिकम्। अस्योपासनया देवास्सर्वनामानि भेजिरे। इन्द्रो बृहस्पतिः शम्भुरित्याद्याः प्राणगा यतः। प्राणस्य नामशब्दाश्च मुख्यतो विष्णुसंस्थिता'इति प्रव्याने। 'उद्गीथाख्यं परं विष्णुमुपास्त्या जहुरञ्जसा। तथापि प्राण एवासौ प्रीतिमागादुपासित'इति च। 'प्राणं प्राप्यैव विध्वस्ता यथा सर्वेऽसुरास्तथा। तदुपासकस्य यश्चापि प्रतीपं दातुमिच्छती'ति च। 'एवं विदित्वा संसारान्मुक्तिमेष्यत्यसंशयम्। विष्णुमप्यन्ततो वेत्ति प्राणवेत्ता यतः स्फुटम्। वीति विष्णुः समुद्दिष्टो विशिष्टत्वात्तु सर्वतः। आददात्येव तं प्राणवेत्तान्ते तत्प्रसादतः। प्राणात्परं तु ये विष्णुं जीवांश्चैवावरांस्ततः। ये विदुस्ते विदुः प्राणं नान्यथा तु कथञ्चने'ति च। 'प्राण उद्गीथ

पाप्मना ह्येतेद्विद्धम् ॥ ६ ॥ अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तꣳ हासुरा ऋत्वा विदध्वसुर्यथाश्मानमाखणमृत्वा विध्वꣳसेत ॥ ७ ॥ एवं यथाश्मानमाखणमृत्वा विध्वꣳसत एवं हैव स विध्वꣳसते य एवं विदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ॥ ८ ॥ नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवत्येतमु एवान्ततो वित्त्वोत्क्रामति व्याददात्येवान्तत इति ॥ ९ ॥ तꣳ हाङ्गिरा उद्गीथमुपासाञ्चक्र एतमु एवाङ्गिरसं मन्यन्तेऽङ्गाना यद्रसः ॥ १० ॥ तेन तꣳ ह बृहस्पतिरुद्गीथमुपासाञ्चक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पतिः ॥ ११ ॥ तेन तꣳ हायास्य उद्गीथमुपासाञ्चक्र एतमु एवायास्यं मन्यन्त आस्याद्यदयते ॥ १२ ॥ तेन तं ह बको दाल्भ्यो विदाञ्चकार स ह नैमिशीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति ॥ १३ ॥

SGDF
Sri Gargeshwari Digital Foundation

इत्याद्या नाम ब्रह्मादिकास्तथा । सप्तम्यर्थाः समुद्दिष्टाः सप्तसु प्रथमा यतः । प्राणमुद्गीथमित्याद्या द्वितीया सप्तमी मते'ति च ॥ २ ॥

आदित्यसंस्थितो नित्यं प्राणस्तपति नापरः । प्रकाशनं च तपनं काष्ठवत्सूर्यगं भवेत् । सूर्यमण्डलगो वायुरुदयास्तमयोज्झितः । अपि प्रजाभ्य उद्यंश्चैवोद्गायति जनार्दनम् । आदित्यमण्डलस्थश्च सर्वप्राणिगतस्तथा । वायुस्समान एवायमुष्णोऽसावपि च स्फुटम् । तस्मादस्मिन्नमुष्मिन्वाप्युद्गीथाख्यं जनार्दनम् । उपासीत विमोक्षाय सर्वकामाप्तये तथे'ति च । केशवः स्वः स्वतन्त्रत्वात्तद्गतेर्मारुतः स्वरः । शरीरस्थश्च सूर्यस्थः प्रतिप्रत्या समन्ततः । मां प्रतीत्यतएवासौ प्रत्यास्वर उदाहृतः । प्राणाद्यास्त्रिविधाः पञ्चप्रधानो वायुरेव च । मुख्यपञ्चकरूपस्सन्गरुडो मध्यपञ्चकः । अवमः पञ्चकस्त्वन्ये प्राणाद्यस्तस्य सूनवः । इति त्रेधा विभागोऽयं विभागोऽन्यश्चतुर्थकः । प्राणापानौ शेषवीन्द्रौ तथोदानसमानकौ । रुद्रेन्द्रौ तत्परः श्रेष्ठो वायुर्व्यान

आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥ १४ ॥ २ ॥

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायत्युद्यंस्तस्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥१॥ समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिममम़ुं चोद्गीथमुपासीताथ खलु व्यानमेवोद्गीथमुपासीत ॥ २ ॥ यद्वै प्राणिति स प्राणो यदपानिति सोऽपानोऽथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक्तस्मादप्राणन्ननपानन्वाचमभिव्याहरति या वाक् सर्क्तस्मादप्राणन्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्ननपानंत्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायत्यतो ॥ ३ ॥ यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ४ ॥ अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो हि गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वं स्थितं द्यौरेवोदन्तरिक्षं गीः पृथिवी

SGDF
Sri Gargeshwari Digital Foundation

उदाहृतः। तस्मिन्नुद्गीथनामानमुपासीत हरिं परम्। योऽसौ व्यानगतो विष्णुः स वागृक्सामगः सदा। उद्गीथे च स एवैकस्तस्माद्व्यानाद्धि तत्क्रियाः। उद्गीथनामा भगवान् स्थितो व्यानादिपञ्चके। वीर्यवत्कर्मकृत्तस्माद्व्यान एव ह्युदाहृतः। तस्माद्व्यानगतं विष्णुमुपासीतैव नित्यशः। यद्यप्येको हि भगवान्सर्वदा सर्ववस्तुगः। अनूनोद्रिक्तमहिमो निर्विशेषस्सदैव च। तथापि तत्क्रियाभेदान्नामरूपादिकं पृथक्। उच्यते ह्यपृथक्त्वेऽपि पूर्णैश्वर्यैकहेतुतः। अविशेषोऽपि भगवान् सर्वशक्तित्वहेतुतः। विशेषहेतुकं सर्वं करोत्यविकृतः सदा। उद्गीथाक्षरगं चैव प्राणादिषु च संस्थितम्। आशीःसमृद्धिहेतुष्वप्यखिलेषु व्यवस्थितम्। एकमेव हरिं वेद यः स सर्वेष्टमाप्नुयादि'ति च। 'उच्छब्दवाच्याः प्राणाद्या वागाद्या गीरितीरिताः। अन्नाद्या स्थमिति प्रोक्तास्तेषूद्गीथो हरिः स्थित'इति च। आत्मानं परमात्मानमन्ततः सर्वोत्तमत्वेन सर्वत्रोपसृत्य ॥ ३ ॥

स्वरतेस्तु स्वरो विष्णुस्तद्रतेर्वायुरुच्यते। वायुस्वरे स्वरं विष्णुमोमाख्यं समुपासिरे। देवास्तेनामृतं प्राप्ता मुक्त्याख्यं मृत्युवर्जिताः।

थमादित्य एवोद्वायुर्गीरग्निस्थं सामवेद एवोद्यजुर्वेदो गीर्ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥५॥ अथ खल्वाशीः समृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेद्यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेद्येन च्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तꣳ स्तोममुपधावेद्यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेदात्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ ६ ॥ ३ ॥

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानं देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशꣳस्ते च्छन्दोभिराच्छादयन्यदेभिराच्छादयꣳस्तच्छन्दसां छन्दस्त्वं तानु तत्र मृत्युर्यथा मत्स्यमुदके

SGDF Sri Gangeshwari Digital Foundation

मारणान्मृत्युरित्युक्ता दुर्गा तद्भयतः सुराः । ओमित्युपास्य तं विष्णुं परमामृतमापिर'इति संख्याने । ऊर्ध्वा उत्तमाः ॥ ४ ॥

आदित्यसंस्थितो वायुः प्रणवस्तद्गतो हरिः । प्रकृष्टत्वाच्च नेतृत्वाद्गतित्वादखिलस्य च । उद्गीथ उच्चैर्गेयत्वात्स एव पुरुषोत्तमः । स एव प्राणगो देहे ओमित्येव सदा जपन् । एत्येष भगवान्विष्णुर्ध्यायन्नेकं तमक्षरम् । एकपुत्रो मुक्तिमेति ध्यायन्प्राणेषु रश्मिषु । बहुपुत्रो विमुक्तःस्यात्तस्माद्ध्यायेत्तथा परमि'ति च । प्राणस्थं भूमानमभिगाय्यदुरुद्गीतमनुसमाहरति । अनुरूपमेव करोति । होतृसदनस्थमग्निस्थं भगवन्तं ध्यात्वा । 'अन्यथागानजं दोषमग्नौ ध्यात्वा हरिं परम् । अपाकरोति तस्मात्तं ध्यायेदेवाग्निगं सदे'ति त्रैविद्ये ॥ ५ ॥

'अग्नीरस्सूर्यनीलेषु वायुस्थः सामदेवता । उर्वीवियद्द्युशुक्लेषु ऋग्देवीस्था सरस्वती । सेति भार्या हि वाग्देवी प्राणोऽमः पतिरीरितः ।

परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि तेऽनुवित्त्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥१॥ यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवꣳ सामैवं यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभवन्त्स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरꣳ स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ॥ २ ॥ ४ ॥

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वाऽऽदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥१॥ एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीꣳस्त्वं पर्यावर्तयताद्बहवो वैते भविष्यन्तीत्यधिदैवतम् ॥२॥ अथाध्यात्मं य एवायं मुख्यप्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥३॥ एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणांस्त्वं भूमानमभिगायताद्बहवो वैते भविष्यन्तीति ॥४॥ अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥ ५ ॥ ५ ॥

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयत इयमेव साग्निरमस्तत्साम ॥१॥ अन्तरिक्षमेवर्ग्वायुः साम

SGDF
Sri Gargeshwari Digital Foundation

एवं तौ सामनामानावुभावेवाप्युदाहृतौ । अतो हि सामवेदोऽयं ऋक्सामात्मक ईरितः । वागादिष्वेवमेवैतौ वाक्प्राणौ सर्वदा स्थितौ । तयोरन्तःस्थितो विष्णुर्गायकौ तस्य तावुभौ । ऋक्सामभ्यां स उन्नामा पापोद्धश्चोच्च एव चे'त्यादि सत्तत्त्वे । 'कप्यासरक्तपद्माक्षः सूर्यगश्चाक्षिगश्च सः । गायकस्तस्य विष्णोर्यः स स्वर्ग्यांश्च नृलोकगान् । कामान्दद्यान्नरश्चेत्स्यात्सुराणां च नृणामपि । मोक्षदो यदि वायुःस्यान्मुख्योद्गाता ततोऽनिल' इति च । 'तस्मादुद्गीथ उच्चोऽसौ गायते गीयतेति चे'ति । आत्मा जीवः । 'सरस्वती हि चक्षुःस्था जीवस्थो

तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम ॥२॥ द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते द्यौरेव सादित्योऽमस्तत्साम ॥ ३ ॥ नक्षत्राण्येवर्क्चन्द्रमाः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ॥ ४ ॥ अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयतेऽथ यदेवैतदादित्यस्य शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥ ५ ॥ अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः ॥ ६ ॥ तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद ॥ ७ ॥ तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥ ८ ॥ ६ ॥

अथाध्यात्मं वागेवर्क् प्राणः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते वागेव सा प्राणोऽमस्तत्साम ॥ १ ॥ चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते चक्षुरेव सात्माऽमस्तत्साम ॥ २ ॥ श्रोत्रमेवर्ङ्मनः साम तदेतं तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते श्रोत्रमेव सा मनोऽमस्तत्साम ॥ ३ ॥ अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम

SGDF
Sri Gargeshwari Digital Foundation

वायुरीरितः। विदित्वा तावुभौ देवौ तद्वं ध्यायेद्धरिं सदे'ति मानसे। 'दृश्यते ज्ञानदृष्ट्या यः सूर्ये चक्षुषि चैकराट्। ऋङ्नामा ज्ञानरूपत्वात्साम नित्यसमत्वतः। उक्थमुत्थापकत्वाच्च यजुर्याज्य-स्वरूपतः। ब्रह्मासौ पूर्णरूपत्वादेवं सर्वाभिधानवानि'ति च। यथा बदरिकानाथो द्वारकानाथ इत्यपि। अर्वाङ्नाथः पराङ्नाथ इति तद्वदिहोच्यते। सर्वनाथोऽपि भगवान्सन्निधानविशेषत' इति च॥ ॥ ६ ॥ ७ ॥

अग्निः सामाभिमानी स्याद्वरुणस्तु स्वरात्मकः। प्राणावराभि-मानी तु सूर्य एव प्रकीर्तितः। अन्नाभिमानी दक्षश्च शक्रस्त्व-बभिमानवान्। द्व्यात्मकश्च शिवः प्रोक्तः क्रमेणैवोत्तरोत्तराः। क्रमेण मोक्षे प्राप्याश्च पूर्वेषामुत्तरोत्तरा'इति निवृत्ते। अग्नेर्वागात्मकत्वा-त्स्वरस्योदकात्मकत्वात्। आदित्य एव प्राणोऽन्नं वै प्रजापतिरि'ति

गीयतेऽथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥४॥ अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥५॥ स एष चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः ॥ ६ ॥ अथ य एतदेवं विद्वान्त्साम गायत्युभौ साम गायति सोऽमुनैव स एष चामुष्मात्पराञ्चो लोकास्ताꣳश्चाप्नोति देव-कामाꣳश्च ॥७॥ अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ताꣳश्चाप्नोति मनुष्य-कामाꣳश्च तस्मादु हैवंविदुद्गाता ब्रूयात् ॥ ८ ॥ कं ते काममागायानीत्येष ह्येष कामगानस्येष्टे य एवं विद्वान्त्साम गायति साम गायति ॥ ९ ॥ ७ ॥

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैबिलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति ॥१॥ तथेति ह समुपविविशुः स ह प्रवाहणो जैबलि-रुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचꣳ श्रोष्यामीति स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति

SGDF
Sri Gangeshwari Digital Foundation

श्रुतेः । 'आप एवेन्द्रो द्यौर्वा व रुद्र'इत्यादेश्च । 'विशेषज्ञानसंप्राप्त्यै जानन्तोऽपि परं हरिम् । ब्रूयुर्देवाश्च ऋषयस्तदन्यस्य परात्मतामि'ति ब्रह्मतर्के । स्वर्गाभिमानिरुद्रं प्रति सामाभिसंस्थापयामः । तत्स्तावकं हि साम । मूर्धा ते विपतेदिति यः कश्चिद्ब्रूयाच्चेद्विपतिष्यति । 'ब्रह्मैव हि पृथिव्यात्मा विष्णुराकाशनामकः । आदीप्तत्वाद्धरीयांश्च परमो हरिरेव ही'ति सत्तत्त्वे । शुभाशुभानां दाहादौ साम्यात्सामाग्नि-रीरितः । स्वो विष्णुः सागरे रन्ता वरुणोऽतः स्वरः स्मृतः । उदयाज्जगत्प्रणेतृत्वात्सूर्यः प्राण उदाहृतः । अत्ता रुद्रस्तद्विरोधादक्षः स्यादन्ननामकः । स्वो विष्णुस्तद्रतिर्वायुस्तद्धो मुक्तौ सदाशिवः । अतः स्वर्गोऽसुसंस्थत्वादसाविति च कीर्तितः । सर्वेदेवान्तरत्वात्तु

होवाच का साम्नो गतिरिति ॥२॥ स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाचापां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति ॥३॥ न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थापयामः स्वर्गसंस्तावं हि सामेति तं ह शिलकः शालावत्य उवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥४॥ हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति तं ह प्रवाहणो जैबिलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाच ॥ ५ ॥ ८ ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोऽनन्तः ॥१॥ परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते तं हैतमधिधन्वा शौनक

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मायं समुदाहृतः। लोको ज्ञानस्वरूपत्वादेतेषां परमो हरिरि'ति ब्रह्मतर्के। आपालनादाप इन्द्रः। अधिकंवरीयान् परोवरीयान्। तत्परोवरीयोऽस्य रक्षकं भवति। यावतः द्वापरादिपर्यन्तम्॥ ॥८॥९॥

'उपला इष्टकाः स्थूला मटचीति प्रकीर्तिता' इति शब्दनिर्णये। 'आसन्नयौवना योषिदाढकीत्यभिधीयत' इति च। 'प्रद्रवन्नन्नपानार्थं प्रद्राणक इतीरित'इति च॥ १०॥

उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति तथामुष्मिँल्लोक इति स एतमेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथाऽमुष्मिँल्लोके लोक इति लोके लोक इति॥ २॥ ९॥

मटचीहतेषु कुरुष्वाढक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे॥१॥ तँ होवाच नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इत्येतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतँ स्यादिति होवाच न स्विदेतेऽप्युच्छिष्टा इति॥२॥ न वा अजीविष्यमिमा न खादन्निति होवाच कामो म उदपानमिति स ह खादित्वातिशेषाञ्जायाया आजहार साग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ स ह प्रातः सञ्जिहान उवाच यद्बतान्नस्य लभेमहि लभेमहि धनमात्राँ राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति॥३॥ तं जायोवाच हन्त पत इम एव कुल्माषा इति तान् खादित्वामुं यज्ञं विततमेयाय तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोप विवेश स ह प्रस्तोतारमुवाच प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीत्येवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीत्येवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे॥ ४॥ १०॥

अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः

SGDF
Sri Gangeshwari Digital Foundation

'प्राणस्थविष्णुना सर्वे प्रस्तूयन्ते यतस्ततः। प्रस्तावदेवता स स्यात्प्रस्तावस्तु जनिर्यतः। आदित्यसंस्थितो विष्णुर्यत्सदा सर्वगीतभुक्। राजादौ गीतमप्यज्ञैर्भुङ्क्ते गानस्य देवता। उद्गीथदेवता तस्मात्स एव पुरुषोत्तमः। अन्नस्थेनैव जीवन्ति भूतान्येतानि विष्णुना। प्रतिहारदेवताऽतः स प्रतिहारो हि भोजनमि'ति च। उच्चैः सन्तमुत्तमं सन्तम्॥ ११॥

दल्भपुत्रो बको मित्रया पुत्रार्थे स्वीकृतो ग्लाववच्चूर्णीं स्थितत्वात्तया ग्लावेत्युक्तो ग्लावनामको जातः। अत उभयथास्य निर्देशो भवतीत्यर्थः। 'प्रसादार्थं बकस्यापि वायुनोक्तः श्वरूपिणा। शौवोद्गीथ

पर्यैषिषं भगवतो वा अहमवित्यान्यानवृषि भगवांस्त्वेव मे सर्वैरार्त्विज्यैरिति॥ १॥ तथेत्यथ तर्ह्येत एव समतिसृष्टास्तुवन्तां यावत्तेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह यजमान उवाच॥ २॥ अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति॥ ३॥ प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति॥ ४॥ अथ हैनमुद्गातोपससादोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेत्यादित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेत्यथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेत्यन्नमिति होवाच॥ ५॥ सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति॥
॥ ६॥ ११॥

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्यो-

SGDF
Sri Gargeshwari Digital Foundation

इति प्रोक्तोरुद्रादीनां श्वरूपिणाम् । उपासितः पौर्णमास्यां शौवोद्गीथेन केशवः । सर्वाभीष्टं ददातीति प्रातरित्याह मारुतः । ओमदामादिकं मन्त्रं वायुनोक्तं तु देवताः । वायुस्थविष्णुमुद्दिश्य हिङ्कृत्य प्रापुरीप्सितम् । देवौ विष्णुश्च वायुश्च सर्वज्ञत्वात्क्रमेण तु । वरुणौ वरणीयत्वात्सवितारौ प्रसूतितः । प्रजानां च पती तद्वत्क्रमादेव प्रकीर्तितावि'ति च ॥ १२ ॥

हूयतेऽत्राग्निहोत्रादिर्हावुकारस्त्वियं ततः ।, हेत्याश्चर्यवदायाति हेतिवा सुखकृत्त्वतः । हायिकारस्ततो वायुरथेत्युक्तमनन्तरम् । आनन्तर्यात्प्रकाशस्य सूर्याच्चन्द्रस्तथेरितः । सर्वसामीप्यतो विष्णुरिहेति कथितः सदा । इन्धनादग्निरीकार ऊकारस्सूर्य उच्चितः । नितरामाह्वयन्त्येनमितीन्द्रो निहवः स्मृतः । एतीत्येकारएवासौ औहोयीत्यखिलाः सुराः । उच्चत्वाद्विष्णुरुः प्रोक्तो हूयन्तेऽस्मिन्यतोऽखिलाः । मुक्तावौहोयिनस्तस्मात्सर्वदेवाः प्रकीर्तिताः । हीति निश्चय उद्दिष्टो निश्चयज्ञानतस्सदा । ब्रह्मा हिङ्कार इत्युक्तो वायुः प्राणः शरीरगः । स्वे विष्णौ रमयत्येनं जीवं तस्मात्स्वरः स्मृतः । ययिर्नित्यगतेर्वायुस्तद्भाया[illegible]या सरस्वती । सैवान्नदेवता प्रोक्ता यात्रा प्राणेन नीयते । सर्ववागात्मिका या तु श्रीर्विशेषेण राजनात् । विराडुक्ता निरुक्तस्तु

चुरन्नं नो भगवानागायत्वशनायाम वा इति ॥ १ ॥ तान्होवाचेहैव मा प्रातरूपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य हिङ्चक्रुरो३मदा३मों३पिबा३मों देवो वरुणः प्रजापतिः सविता३न्नमिहा३हरदन्नपते३न्नमिहा३हराहरोमिति ॥ ॥ २ ॥ १२ ॥

अयं वाव लोको हावुकारो वायुर्हायिकारश्चन्द्रमा अथकार आत्मेहकारोऽग्निरीकार आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोयिकारः प्रजापतिर्हिङ्कारः प्राणः स्वरोऽन्नं या या वाग्विराडनिरुक्तस्त्रयोदशःस्तोभः सञ्चरो हुङ्कारो दुग्धेस्मै वाग्दोहं यो वाचो दोहोऽन्नवा-

SGDF
Sri Gargeshwari Digital Foundation

व्याप्तो नारायणस्तु यः । आहूत एव पातीति हुष्कार इति कीर्तितः । हुबित्याक्रियते यस्माद्धुष्कारस्तु जनार्दनः । अनिरुक्तस्त्ववाच्यत्वा-त्परमः पुरुषो हरिरि'ति माहात्म्ये । सम्यक् चरतीति स एव सञ्चरः ॥ १३ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये प्रथमोऽध्यायः ॥ १ ॥

हरिः ॐ ॥ समस्तस्य पूर्णस्य साधुत्वात्सामनाम्नो विष्णोरुपासनं साधु । सारत्वेन मेयं साम । सारत्वेन धार्यं साध्वित्वेक एवार्थः । 'साधुत्वात्सामनामानं समस्तगुणपूर्तितः । समस्तं य उपासीत नारायणमनामयम् । सर्वसाम्नां देवतेति स मुक्तः साधुधर्मभागि'ति सामसंहितायाम् ॥ १ ॥

'नारायणाख्य उद्गीथ उद्गेयः प्रणवेन यत् । उद्गच्छन्ति यतोऽस्माद्वा वासुदेवादिमूर्तयः । प्रथमावताररूपत्वाद्वासुदेवः परः पुमान् । प्रस्तावो निधनं चापि सङ्कर्षण उदाहृतः । सङ्कर्षणो हि संहर्ता प्रद्युम्नः परमेश्वरः । हिङ्कार इति सम्प्रोक्तो हीति

नन्नादो भवति य एतामेवꣳ साम्नामुपनिषदं वेदोपनिषदं वेद ॥ १३ ॥ श्रीमच्छान्दोग्योपनिषदि प्रथमोध्यायः ॥ १ ॥

समस्तस्य खलु साम्न उपासनꣳ साधु यत्खलु साधु तत्सामे-त्याचक्षते यदसाधु तदसामेति ॥ १ ॥ तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥ २ ॥ अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ॥ ३ ॥ स य एतदेवंविद्वान्त्साधु सामेत्युपास्तेऽभ्याशोह यदेनꣳ साधवो धर्मा आ च गच्छेयुरुप च नमेयुः ॥ ४ ॥ १ ॥

लोकेषु पञ्चविधꣳ सामोपासीत पृथिवी हिङ्कारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥ १ ॥ अथावृत्तेषु

SGDF
Sri Gangeshwari Digital Foundation

सृष्टिरुदीर्यते । प्रसिद्धता हि सृष्टिः स्यादनिरुद्धः परो विभुः । प्रतिहार इति प्रोक्तः स हि कार्येष्विदं जगत् । प्रतिप्रति हरेन्नित्यं मूर्तिप्रतिहृतेस्तथा । ते पृथिव्यादिषु सदा तन्नामानः प्रतिष्ठिताः । पृथिवीत्यादिशब्दार्थास्ते हि मुख्यत ईरिताः । तत्सम्बन्धात्तदर्थत्वं पृथिव्यादेरमुख्यतः । प्रथनादेव सस्यादेः पृथिवीत्वमुदाहृतम् । अग्नित्वमदनाच्चैव ह्यन्तरीक्षणयोगतः । अभावाद्व्यवधानस्य त्वन्तरिक्षमितीर्यते । आदानादायुषश्चैव स आदित्य उदीरितः । द्यौः क्रीडाकारणत्वाच्च तत्सर्वं हि परे हराविʼति च । 'पञ्चात्मकं यो लोकेषु सदोपास्ते हरिं परम् । ऊर्ध्वाधःसंस्थितास्तस्य पञ्चैव दशमूर्तयः । मोक्षादिकमभीष्टं यत्कल्पन्तेऽस्य सदैव हीʼति च ॥ २ ॥

'पञ्चरूपं तु यो विष्णुं पुरोवातादिषु स्थितम् । उपास्ते वृष्टिरस्मै स्याद्वर्षयत्यस्य मुक्तिगान् । सर्वभोगांश्च भगवान्पञ्चरूपी जनार्दनʼ इति च ॥ ३ ॥

'अप्सु पञ्चविधोपासी यो नारायणवान्भवेत् । न चास्य मृतिरप्सु स्यादप्सुषड्गवान्हरिरिʼति च । अप्सु स्थितनारायणवान्मुक्तो

द्यौर्हिङ्कार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ॥ २ ॥ कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु पञ्चविधꣳ सामोपास्ते ॥ ३ ॥ २ ॥

वृष्टौ पञ्चविधꣳ सामोपासीत पुरो वातो हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहारः ॥ १ ॥ उद्गृह्णाति तन्निधनं वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पञ्चविधꣳ सामोपास्ते ॥ २ ॥ ३ ॥

सर्वास्वप्सु पञ्चविधꣳ सामोपासीत मेघो यत्संप्लवते स हिङ्कारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥ १ ॥ न हाप्सु प्रैत्यप्सुमान्भवति य एतदेवं-विद्वान्सर्वास्वप्सु पञ्चविधꣳ सामोपास्ते ॥ २ ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

भवतीत्यर्थः। अपः सृत इत्यप्सुर्भगवान्। दीर्घलोपेनाप्सुमानिति वा ॥ ४ ॥

हेमन्तशिशिरयोरैक्येन पञ्चत्वम्। 'ऋतुनामानमृतुगमृतुत्वादृतुनामकः। इत्युपासीत यो विष्णुं पञ्चात्मानममुष्य हि। मोक्षादीन्कल्पते चास्य ऋतुसंस्थो जनार्दनः। रक्ष्यत्वात्तेन तद्वांश्च सदैव स्यादुपासक' इति च। 'वासस्य सुखकारित्वाद्वसन्तः पुरुषोत्तमः। नीरादेर्गरणाद्ग्रीष्मो वर्षणाद्वर्ष उच्यते। शं रातीति शरत्प्रोक्तो हेमन्तो हिमकारणादि'ति च ॥ ५ ॥

'पालनात्सुखकारित्वात्पशुनामा जनार्दनः। मुक्तस्तद्वान्भवत्येव पशुषूपासको हरेरि'ति च। 'यज्ञेनाञ्जनहेतुत्वादजस्थो भगवानजः। अविस्थस्त्वविरेवोक्त ऊर्णया शीततोऽवनात्। गौश्च सद्गतिहेतुत्वाद्गोस्थः स पुरुषोत्तमः। अश्वश्चैवाशुगन्तृत्वात्पुरुषः पूर्तिहेतुत' इति च। भवन्ति हास्य पशव इति प्रसिद्धपशव एव। अजा इत्यादिबहुवचनं बहुरूपत्वाद्भगवतः ॥ ६ ॥

'परस्मादुत्तमं प्रोक्तं परो इति ततः परम्। परोवरं परं तस्मात्प्रोक्तं पारोवरीयकम्। परोवरीयांस्येतानि विष्णोः रूपाणि सर्वशः। तेषां विशेषो नैवास्ति सदा तानि समानि हि।

ऋतुषु पञ्चविधꣳ सामोपासीत वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम् ॥ १ ॥ कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवंविद्वानृतुषु पञ्चविधꣳ सामोपास्ते ॥ ॥ २ ॥ ५ ॥

पशुषु पञ्चविधꣳ सामोपासीताजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनं भवन्ति हास्य पशवः पशुमान्भवति य एतदेवंविद्वान्पशुषु पञ्चविधꣳ सामोपास्ते ॥ ६ ॥

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयांसि वैतानि परोवरीयो

SGDF
Sri Gurgeshwari Digital Foundation

अत्युत्तमोत्तमान्येतान्यन्यस्मात्सर्वतोऽपि त्वि'ति च। 'प्राणो नेतृत्वतो विष्णुर्वाक्सर्ववचनात्सदा। चक्षुश्च दर्शनान्नित्यं श्रोत्रं श्रवणहेतुतः। मनो मन्तृत्वतश्चास्य ह्येक एव तु पञ्चधे'ति च। परोवरीयो ब्रह्मास्य भवति सर्वापेक्षितदातृत्वात् ॥ ७ ॥

'आदिः कल्पादिहेतुत्वात्क्रोडात्मा केशवः स्वयम्। दुष्टोपद्रवकर्तृत्वान्नरसिंह उपद्रव' इति च। हुङ्कारसहिते वाक्ये प्रद्युम्नस्तु सदा स्थितः। आकारयुक्ते वाराहो वासुदेवः प्रसंयुते। नारायणस्तथोद्युक्ते प्रतियुक्तेऽनिरुद्धकः। उपयुक्ते नृसिंहश्च नीतिसङ्कर्षणस्तथा। अभावे यावदेते स्युस्तावत्तद्दैवतं स्मृतम्। एवं सप्तविधं विष्णुं य उपास्ते सदा विभुम्। वाङ्नामा भगवांस्तस्य भवेत्सर्वार्थदोहकृदि'ति च ॥८॥

'आदित्यस्थं परं विष्णुं ध्यायेदादित्यनामकम्। स रूपं साम चासौ सर्वदा समरूपतः। सर्वेषां मां प्रतीत्येव दृष्टिसाम्याच्च साम सः। दृष्टिसाम्यं मण्डलस्य विष्णुस्तस्य च कारणम्। तस्मिन्निमानि भूतानि सर्वाण्येवाश्रितानि हि। उदयात्पूर्वमेवासौ भवेत्प्रद्युम्ननामकः। पश्चाधारस्तदात्माऽसौ वासुदेवस्तथोदये। आश्रयश्च नृणां तत्र वराहः सङ्गवे तु सः। तत्र पक्ष्याश्रयो विष्णुस्तथा नारायणाभिधः।

हास्य भवति परोवरीयसो ह लोकान् जयति य एतदेवंविद्वान्प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥ ७ ॥

अथ सप्तविधस्य वाचि सप्तविधꣳ सामोपासीत यत्किञ्च वाचो हुमिति स हिङ्कारो यत्प्रेति स प्रस्तावो यदेति स आदिर्यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवंविद्वान्वाचि सप्तविधꣳ सामोपास्ते ॥ ८ ॥

अथ खल्वमुमादित्यꣳ सप्तविधं सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम ॥ १ ॥ तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिङ्कारस्तदस्य

SGDF
Sri Gargeshwari Digital Foundation

मध्यन्दिने स आधारो देवानां च ततः परम् । अनिरुद्धस्स आधारो गर्भस्थानां सदैव हि । ततः परं नृसिंहाख्यः स आरण्याश्रयो मतः । अथास्तमितवेलायां स सङ्कर्षण ईरितः । आश्रयः स पितॄणां च सप्तात्मकमुपास्य तम् । प्राप्नोति परमं स्थानं मुक्तः संसारसागरा- दि'ति च । हिङ्कारनामानमाश्रितत्वाद्धिङ्कुर्वन्ति । प्रस्तावाश्रयत्वा- त्प्रस्तुतिकामाः प्रारम्भकामाः । प्रशंसाकामाश्च । प्रारम्भावतारत्वा- त्प्रशंसादेवतात्वाच्च तस्य । सर्वाधारत्वाद्वराहस्य तदाधारणां पक्षिणा- मनाधारेणैव गमनम् । नारायणनामार्थत्वेन सर्वगुणपूर्त्योपासनादेव सर्वोत्तमा देवाः । इतरमूर्तीनामपि सर्वगुणपूर्त्योपासने नारायणो- पासनमेव भवति । सर्वगुणपूर्त्यर्थत्वान्नारायणशब्दस्य । अनिरुद्धा- श्रयत्वाद्गर्भाणां पितुः शरीरादन्यत्र प्रतिहृता अपि न विनश्यन्ति । वर्धन्ते च तत्रैव । अन्यद्धि भुक्तं जीर्यत एव । 'धाता गर्भं दधातु त'इति च श्रुतिः । धाता हि भगवाननिरुद्धः । विष्णुस्त्वष्टा प्रजापतिर्धाता इति चतुर्मूर्तयो ह्युच्यन्ते । 'योनिक्लृप्तिर्वासुदेवाद्रूपं सङ्कर्षणाद्भवेत् । आसेककर्म प्रद्युम्नादनिरुद्धाच्च धारणमि'ति च । व्याप्तेर्विष्णुर्वासुदेवस्त्वष्टा त्वेषाद्द्वितीयकः । प्रजापतिः प्रजापातान्निषेकः पातनं ततः । प्रजापतिस्तु प्रद्युम्नो धाता धारणकर्मतः । अनिरुद्ध

पशवोऽन्वायत्तास्तस्मात्ते हिङ्कुर्वन्ति हिङ्कारभाजिनो ह्येतस्य साम्नः ॥ २ ॥ अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशꣳसाकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः ॥ ३ ॥ अथ यत्सङ्गववेलायाꣳ स आदिस्तदस्य वयाꣳस्यन्वायत्तानि तस्मात्ता- न्यन्तरिक्षेनारम्बणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः ॥ ॥ ४ ॥ अथ यत्सम्प्रति मध्यन्दिने स उद्गीथस्तदस्य देवा अन्वायत्ता- स्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥ ५ ॥ अथ यदूर्ध्वं मध्यन्दिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्ता- स्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः ॥ ६ ॥ अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्ता-

SGDF
Sri Gangeshwari Digital Foundation

इति प्रोक्तः कृष्णरामौ तथाश्विनावि'ति च। 'कक्षश्वभ्रे नृसिंहस्य सदावस्थितिकारणात्। द्रवन्ति कक्षश्वभ्राभ्यां तदज्ञानेऽपि रक्षणात्। मृगा भीता यतस्तेषां नृसिंहस्त्वाश्रयः सदा। पितॄणामाश्रयो यस्मात्सङ्कर्षण उदाहृतः। अतस्तान्प्रति पिण्डादीन्निदधत्यज्ञका अपि। अन्यथा तन्मृतानां तु कुत एवोपतिष्ठती'ति च। 'न रूपाणां विशेषोऽस्ति गुणतो नामतोऽपि वा। तथापि तत्प्रियं नाम नारायण इति स्म ह। विशेषतः समस्तानां नाम्नां तस्यार्थ एव तु। विज्ञायते गुणैः पूर्तिर्नामसाम्यं तदाथवे'ति च। 'नाम्नो नारायणाख्यस्य गुणैः पूर्तिं हि देवताः। विज्ञायार्थमुपास्यैव सर्वाधिक्यमथापिर'इति च॥ ॥ ९ ॥

'यस्यान्यः सदृशो नास्ति स्वरूपाणि समानि च। स आत्मसंमितो विष्णुरतिमृत्युरमृत्युतः। प्रद्युम्नादिस्वरूपेण स विष्णुः सप्तधा स्थितः। समानि तानि सर्वाणि ज्ञानानन्दबलैस्तथा। ज्ञानादित्रयवाचीनि त्र्यक्षराण्यपि सर्वशः। हिङ्कारादीनि नामानि सर्वेषामपि सर्वशः। आदिनाम्नः प्रकारस्तु योज्यः स्यात्प्रतिहारतः। तेन त्र्यक्षरमेव स्यान्नामद्वयमपि प्रभोः। उपद्रवे तु वःकारो यद्यपि व्यतिरिच्यते। नाम नारायणस्यैव सोऽपि क्षीराब्धिशायिनः। व्यञ्जनस्वरसर्गैस्तु सोऽपि ज्ञानादिवाचकः। त्रिवर्णत्वात्समः सोऽपि ज्ञानाद्यैः पुरुषोत्तमः। वःकारार्थपरिज्ञानात्प्राप्योऽब्धिशयनः प्रभुः। एकविंशार्णविज्ञानात्प्राप्योऽसौ सूर्यमण्डले। स एव भगवान्विष्णु-

---

स्तस्माच्चे पुरुषं दृष्ट्वा कक्षꣳ श्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः ॥ ७ ॥ अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यꣳ सप्तविधꣳ सामोपास्ते ॥ ८ ॥ ९ ॥

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधꣳ सामोपासीत हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् ॥ १ ॥ आदिरिति द्व्यक्षरं

SGDF
Sri Gangeshwari Digital Foundation

द्वाविंशद्रूपवान्यतः। तान्येव सप्तरूपाणि विभिद्यन्ते त्रिधा त्रिधा। एकः पयोऽब्धिशयन इति द्वाविंशतिः प्रभोः। प्रद्युम्नाद्यास्तु चत्वारो द्विषण्मासेषु संस्थिताः। त्रिशस्त्रिशः केशवाद्या वसन्तादिषु पञ्चमः। रूपद्वयं तु षष्ठस्य स्थितं मत्स्यादिपञ्चकम्। तृतीयं पृथिवीसंस्थं जामदग्न्याख्यमेव तत्। अन्तरिक्षद्युसूर्येषु सप्तमस्य त्रिधा तनुः। रामः कृष्णः कल्किरिति तज्ज्ञानात्तान्यवाप्य च। द्वाविंशेन पयोऽब्धिस्थं प्राप्यते रूपमक्षरम्। एतद्द्वाविंशकं रूपं नाकं चासुखवर्जनात्। पूर्णानन्दस्वरूपत्वाद्विशोकं शोकनाशनादि'ति सामसंहितायाम्। प्राप्नोतीहादित्यस्य जयम्। इह पृथिव्यादिषु स्थितभगवत्प्राप्तावप्यादित्यस्थ एव प्राप्यते। ऐक्यात्। परो हास्यादित्यजयाज्जयो भवति। आदित्यस्थस्यादित्यनाम्नो भगवतः प्राप्त्या परो जयः रूपान्तरप्राप्तिरपि भवति। 'स्वरूपमेकं प्राप्तस्तु विष्णोः स्यात्सर्वरूपगः। ऐक्यात्तथापि सम्प्राप्तिर्बहूपास्त्या सुखाधिकी'ति च। जयोनाम प्राप्तिरेव। धनजिते स्वर्जिते सत्राजित इत्यादिवत्। केशवादिरूपेण ललाटादिपु स्थितेरित एकविंश इत्युच्यते। 'चित्रादियोगदातृत्वान्मासनामा स्वयं हरिः। लोकः प्रकाशरूपत्वादादित्यश्चादनादपामि'ति च॥ १०॥

'प्राणसंस्थे हरौ प्रोतं गायत्रं साम सर्वदा। तद्वाचकं नियम्यं चेत्यतः प्रोतमितीर्यते। प्राणस्थविष्णोः सामीप्यात्तत्स्थमेतदितीर्यते।

प्रतिहार इति चतुरक्षरं तत इहैकं तत्समम्॥ २॥ उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्समम्॥ ३॥ निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वैतानि द्वाविꣳशतिरक्षराणि॥ ४॥ एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोऽसावादित्यो द्वाविꣳशेन परमादित्याज्जयति तन्नाकं तद्विशोकम्॥ ५॥ आप्नोतीहादित्यस्य जयं परो हास्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसंमितमतिमृत्यु सप्तविधꣳ सामोपास्ते सामोपास्ते॥६॥१०॥

SGDF
Sri Gangeshwari Digital Foundation

क्वचिन्निर्देशसामीप्याद्विष्णोरेतदितीर्यत'इति च । 'प्राणस्थविष्णुलाल्यत्वात्प्राणीत्येवाभिधीयते । मोक्षस्तु सर्वमायुः स्यान्नित्यत्वाज्ज्योक्समस्तविदि'ति च ॥ ११ ॥

'मन्थनादिस्थितं यस्तु तन्नामानं हरिं परम् । तत्त्क्रियैकहेतुत्वाद्योऽग्नौ ध्यायेज्जनार्दनम् । रथन्तराश्रयं पञ्चरूपं स च विमुच्यत'इति च ॥ १२ ॥

'मिथुनस्थं पञ्चरूपं ध्यात्वैव पुरुषोत्तमम् । अत्यागी च स्वभार्याणां मुच्यते नात्र संशय' इति च । मिथो नयतीति मिथुनं भगवान् ॥ १३ ॥

'आदित्यनाम्नि पञ्चात्मन्यभिध्याते जनार्दने । पर्जन्यनाम्नि चर्त्वाख्ये लोकाख्ये पशुसंज्ञके । अङ्गाख्ये देवताख्ये च सर्वाख्ये च

मनो हिङ्कारो वाक् प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् ॥ स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या महामनाः स्यात्तद्व्रतम् ॥ ११ ॥

अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनम् संशाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम् ॥ १ ॥ स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥ ॥ २ ॥ १२ ॥

उपमन्त्रयते स हिङ्कारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतीहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् ॥ १ ॥ स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न काञ्चन परिहरेत्तद्व्रतम् ॥ २ ॥ १३ ॥

SGDF
Sri Gangeshwari Digital Foundation

प्रतिष्ठितम् । बृहदाद्यं च यो वेद मुच्यते नात्र संशयः । समुद्रेका-त्समुद्रस्तु देशनाद्दिश उच्यते । लोपकत्त्वाल्लोम च स्यात्तवोरूप-स्त्वगुच्यते । मादनात्साररूपत्वान्मांसोऽस्थि त्वासनात्स्थिरम् । मदस्य जननान्मज्जा सोऽङ्गमन्तिगतत्वतः । वायुर्ज्ञानात्तथायुष्ट्वान्नक्षत्रं च स्वतन्त्रतः । चन्द्रमाः परमानन्दात्त्रैविद्यो ज्ञानरूपतः । वयांसि

उद्यन्हिङ्कार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारो-ऽस्तंयन्निधनमेतद्बृहदादित्ये प्रोतꣳ स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पतन्तं न निन्देत्तद्व्रतम् ॥ १४ ॥

अभ्राणि संप्लवन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतꣳ स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपाꣳश्च सुरूपाꣳश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् ॥ १५ ॥

वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतꣳ स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग्जीवति महा-न्प्रजया पशुभिर्भवति महान्कीर्त्या ऋतून्न निन्देत्तद्व्रतम् ॥ १६ ॥

पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महा-न्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् ॥ १७ ॥

अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् ॥ १८ ॥

लोम हिङ्कारस्त्वक्प्रस्तावो माꣳसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतꣳ स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतꣳ वेदाङ्गीभवति नाङ्गेन विमूर्च्छति सर्वमायुरेति ज्योतिग्जीवति महा-

SGDF
Sri Gargeshwari Digital Foundation

व्ययनाच्चैव वीत्याकाशस्तथोच्यते। तत्रायनाद्वयः प्रोक्तो मरीचिर्मितरुत्त्वतः। सर्पस्सर्पणहेतुत्वाद्गन्धर्वो गोधरत्वतः। पिता स सृष्टिहेतुत्वात्सर्वं पूर्णगुणत्वतः। एतैर्नामभिरुद्दिष्टो भगवान्पुरुषोत्तम' इति च ॥ छ ॥

'यादृश्येवोन्नतिर्योग्या तस्याः सर्वात्मनाऽऽयतिः। सर्वभावस्तु विज्ञेयो न तु सर्वस्वरूपते'ति च। न च सर्वस्वरूपता पुरुषार्थः। नारकित्वादेरपि प्राप्तेः। न चार्थान्तरकल्पना युक्ता। प्रमाणाभावात्। 'असनान्मितिरूपत्वादस्मीत्युक्तः परो हरिः। तं सर्वइत्युपासीत पूर्णता सर्वता स्मृते'ति च। सर्वमस्मीत्युत्तमपुरुषत्वे तेभ्यो न ज्यायः परमन्यदस्तीति ज्यायःपरशब्दौ व्यर्थौ। अन्यस्यैवाभावात्। अतस्ततोऽन्यदस्तीति सिद्धम्। अतस्ततोऽन्यत्परमज्याय एव नास्ति। ज्यायो लक्ष्मीर्विद्यते। परमज्यायस्तु भगवानेव।

जीवैक्याङ्गीकारे यस्तद्वेदेति तच्छब्दोऽप्ययुक्तः। तदा स्वात्मानं वेदेत्येव स्यात्। न च प्रसिद्धभेदानुवादः। श्रुतिं विना तत्स्वरूपस्यैवासिद्धेस्तद्भेदस्यातिशयेनासिद्धिः। ऐक्य ईश्वरस्य स्वज्ञानमस्तीति न तद्रूपस्य जीवस्याज्ञानादिकं युज्यते। औपाधिकभेदाङ्गीकारेऽप्युपाधिरुभयोरैक्यादुभयोरप्यज्ञत्वं कुर्यात्। उपाधिनिमित्तदोषाश्चोभयोरपि स्युः। उपाधिसम्बन्धस्य समत्वात्। उपाधिसम्बन्धस्यास्मिन्नन्यथा तस्मिन्नन्यथेति विशेषार्थमयमसावितिभेदस्योपाधिं विना स्वत एवापेक्षितत्वात्। अतः स्वतो भिन्नस्यैवोपाधिना विशेषो भवति। 'यस्तु भिन्नः स्वतः खादिस्तस्य भेदो ह्यबुद्धिनाम्। उपाधिभिर्ज्ञाप्य एव न तु भेदं स्वयं सृजेत्। उपाधिरप्यभिन्नस्य भेदं साधयितुं क्वचित्। न क्षमः सिद्धभेदस्य ज्ञापकः स्यादबुद्धिनाम्। आकाश

न्प्रजया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतं मज्ज्ञु नाश्नीयादिति वा ॥ १९ ॥

SGDF
Sri Gargeshwari Digital Foundation

अप्यतस्त्वेते अनन्ता अप्कणादिवदि'ति ब्रह्मतर्के। अतो न जीवेशाभेदः। 'न तु देवः स्वयं भूत्वा देवदेवं समर्चयेत्। समानव्यवहारो हि न पूज्यः पूजको भवेदि'ति परमसंहितायाम्। 'अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात्प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ'। 'अन्यदेव तद्विदितादथो अविदितादधि'। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यति तद्वद'। 'नित्यो नित्यानां चेतनश्चेतननामेको बहूनां यो विदधाति कामान्'। 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति'। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः'। 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता। आधिपत्यमृते चैव भोगेन विषयेण च। आनन्दायीनृते मुक्तास्सर्वे ते ब्रह्मणस्समा'इत्यादेश्च। 'प्रद्युम्नादीनि रूपाणि त्रीणित्रीण्येव पञ्च च। ऋगादिस्थानभेदेन नित्याभिन्नानि चेशनादि'ति सामसंहितायाम्। दृष्टवस्तुनो मिथ्यात्वाङ्गीकारे च युक्त्यपेक्षा। न तु सत्यत्वे। 'दृष्टस्य सत्यतायां तु युक्तिर्वाऽयुक्तिरेव वा। भूषणं तस्य मिथ्यात्वे युक्त्यभावोऽतिदूषणम्। युक्तिश्च दोष एव स्याद्बलवन्मानवर्जिते'ति ब्रह्मतर्के। न च शून्यत्वमिथ्यात्वयोः कश्चिद्विशेषः। तत्प्रमाणाभावात्। अतः सत्य एव भेदः। न च कदाचित्कस्यापि नासीदस्ति भविष्यतीति बुध्यभावे व्यावहारिकसत्यमित्यत्रास्माकं विरोधः।

अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतꣳ स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् ॥ २० ॥

त्रयी विद्या हिङ्कारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाꣳसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतꣳ स य एवमेतत्साम सर्वस्मि-

SGDF
Sri Gargeshwari Digital Foundation

तद्भावे च न शून्याद्विशेषः। 'सत्यमेनमनुविश्वे मदन्ती'त्यादि-श्रुतेश्च सत्यो भेदः। 'प्रपञ्चो यदि विद्येत निवर्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः। विकल्पो विनिवर्तेत कल्पितो यदि केनचित्। उपदेशादयं वादोऽज्ञाते द्वैतं न विद्यत'इत्यादि-श्रुतेश्च। प्रपञ्चो भेदः यदि विद्येत भवेत उत्पद्येत तर्हि निवर्तेत। अतो न जीवेश्वरादिभेद उत्पद्यते। किन्तु नित्य एव। अतो मायया भगवत्प्रज्ञानेन मातं रतं च मात्रम्। भगवाञ्जानाति रमते चास्मिन्भेद इति। तच्च भगवद्रूपमद्वैतम् परमार्थो भगवांस्तद्रूपेणाद्वैतम्। यदद्वैतं नामोच्यते तत्परमार्थभगवदपेक्षयेत्यर्थः। स्वगतभेदो भगवति नास्तीत्युक्तम्। न च कल्पनामात्रो भेदः। यदि केनचित्कल्पितो विकल्पस्तथापि निवर्तेत। तस्मादुपदेशादयमेव वादः। केनापि तत्प्रसादेन विनाऽविज्ञातत्वादज्ञातो भगवांस्तद्गतो भेदो न विद्यत इति। 'जीवेश्वरगतो जीवेष्वथ जीवजडात्मनोः। जडेशयोर्जडेष्वेवं पञ्चभेदः प्रपञ्चकः। प्रकृष्टमोक्षहेतुत्वात्तज्ज्ञानं प्रेतिकथ्यते। प्रकृष्ट-पञ्चकत्वाद्वा प्रपञ्चोऽयं प्रकीर्तितः। यद्ययं सादिरेव स्यान्निवर्तेत कदाचन। न निवर्तते यतस्तेन नायं सादिर्भवेत्क्वचित्। मायेति विष्णुविज्ञानं तन्मितत्वाच्च न क्वचित्। भ्रान्तत्वमस्य यद्विष्णोर्नैव भ्रान्तिः कथञ्चन। रमते चात्र यद्विष्णुर्न हि भ्रान्तौ रमेद्धरिः। परमार्थे हरौ नैव भेदोऽस्ति जडजीववत्। यद्ययं कल्पितो भेदः कस्मान्नैव निवर्तते। तस्माद्भूतभविष्याख्यभवदाख्यपराभिधाः। तदन्ये चैक एवास्मिन्नोङ्काराख्ये जनार्दने। अज्ञातनामके तस्मिन्न भेदोऽस्ति कथञ्चने'ति ब्रह्मतर्के। विदिः कादाचित्कस्वरूपलाभ इति च धातुः।

न्प्रोतꣳ वेद सर्वꣳ ह भवति॥ १॥ तदेषश्लोको यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति यस्तद्वेद स वेद सर्वꣳ सर्वा दिशो बलिमस्मै हरन्ति सर्वमसीत्युपासीत तद्व्रतं तद्व्रतं॥ २॥ २१॥

SGDF
Sri Gangeshwari Digital Foundation

भिद्येतेतिवद्विद्येतेतिशब्दः। परमार्थत इति विश्वतश्चक्षुरितिवत्सप्तम्यर्थे। परमार्थे द्वैताभाव एवेत्यर्थः। परमार्थः परमात्माऽद्वैत इति प्रथमार्थो वा। न हि विद्यमानं निवर्तत इति नियमः। उत्पद्यमानं हि प्रायो निवर्तते। जीवेश्वरप्रकृत्यादिकं बहुलं हि विद्यमानं न निवर्तते। न च कल्पितो विकल्प इति पक्षे कल्पितो यदीति यदिशब्दो युज्यते। कल्पितत्वं चेच्छ्रुतेरभिप्रायः अविद्यमानोऽयं प्रपञ्चो विनिवर्तते कल्पितो विकल्पो विनिवर्तत इत्येव शब्दः स्यात्। न तु निवर्तेतेति। अतः सत्यतापरमिदं वाक्यं भेदस्य। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्'। 'एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धय'इति निन्दनाच्च। 'विद्याऽत्मनि भिदाबोधः'। 'जुष्टं यदा पश्यत्यन्यमीशमस्ये'त्यादिभेदज्ञानस्य प्रशंसनाच्च। अतोऽसनान्मितत्वाच्चास्मीति भगवन्नामैवैतत्॥ २१॥

सर्वदा समत्वात्साम भगवान्। तस्योद्गानप्रकारो विनर्दिवृषभस्वरवन्मेघनर्दनवद्वा। तदेव वृणे। सर्वोत्तमत्त्वात्। 'विष्णोः स्वरो वृषभवन्मेघनादवदेव वा। स्त्रीपशुस्वरवद्वह्नेर्गम्भीरोऽनुपमो विभोः। ब्रह्मणस्त्वथ सोमस्य साक्षाद्घण्टानिनादवत्। मृदुमेघस्वरो वायोरिन्द्रस्य स्तनयित्नुवत्। बृहस्पतेः क्रौञ्चवच्च वरुणस्य तु

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य तान्त्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत्॥ १॥ अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसाध्यायन्नप्रमत्तः स्तुवीत॥ २॥ सर्वे स्वरा इन्द्रस्यात्मनः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रं शरणं प्रपन्नोऽभूवं स त्वा प्रतिवक्ष्यतीत्येनं ब्रूयात्॥ ३॥ अथ यद्येनमूष्मसूपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रतिपेक्ष्यतीत्येनं ब्रूयादथ यद्येनꣳ स्पर्शेषूपालभेत मृत्युं शरणंप्रपन्नोऽभूवं स त्वा

SGDF
Sri Gargeshwari Digital Foundation

विस्वरः । एकस्य पादवर्षस्य स्वरो विष्णोरुदाहृतः । वायोर्विंशतिवर्षस्य ब्रह्मणस्तु तदन्तरे'ति च । 'गायेदेतैः स्वरैस्तस्माद्यथाशक्ति न विस्वरम् । अधिकारी सदौद्गात्रे मुख्यतः प्राण एव यत् । अतो मोक्षादिदाने स देवादीनां क्षमो भवेत् । अन्येषां स ददातीह मद्धृदिस्थ इति स्मृतिः । कार्या हि नान्यथा कुर्यादवमन्ताऽन्यथा भवेत् । देवानां मोक्षदानादौ न हि मानुष ईश्वरः । अतः प्राणो हृदिस्थो मे ददातीतिस्मृतिर्भवेत् । सङ्कल्पोत्त्यादिकर्ता च प्राण एव यतः सदा । आगायानीति युज्येत तस्मात्तस्मिन्हि मुख्यतः । आत्मेति भगवान्विष्णुः प्राणस्थः पुरुषोत्तमः तस्मा अन्नं ह्यर्थतस्तु प्राणस्यान्नभुजिर्भवेत् । प्राणस्याप्यमृतत्वं हि मुख्यमेव फलं यतः । देवान्तर्भावतो विष्णोर्नामृतत्वं क्व चादिमत् । इन्द्रे बलं ददानीति स्वरान्घोषबलात्मकान् । ब्रूयादग्रस्तानिरस्तानूष्मणः स्पर्शानपि । समस्तान्बलदानार्थमिन्द्रे चैव प्रजापतेः । विष्णोः स्वात्मानमेवाहमर्पये मृत्युवर्जितान् । मोक्षयोग्यान्करिष्यामीत्येवं स प्राण एव तु । कुर्यादन्यस्तु मत्स्थस्तु प्राण एवेदृशः क्षमः । करोतीति स्मरेन्नित्यं नान्यथा तु कथञ्चन । देवावमन्ता हि तमो यात्यसंशयतो यतः । अत इन्द्रं प्रजापाख्यं विष्णुं मृत्युं च सर्वदा । शरणं गतोऽहमिति च ध्यायेत्सर्वत्र सर्वदा । ऐश्वर्यादिन्द्रनामा तु वायुः स्वरपतिः सदा । ऊष्माधिपस्तु भगवान्विष्णुरेव प्रजापतिः । मृत्युनामा तु संहाराद्रुद्रः स्पर्शाधिपः स्मृतः । मानुषाणां तु शरणमितरेषां तु वायुतः । वायोस्तुबलदानाद्यं मोक्षदानादिकं हरेः । यस्माद्वायुपदे योग्या बहव-

---

प्रतिधक्ष्यतीत्येनं ब्रूयात् ॥ ४ ॥ सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्वे ऊष्माणोऽग्रस्तानिरस्ताविवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानभिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥ ५ ॥ २२ ॥

SGDF
Sri Gargeshwari Digital Foundation

स्त्विन्द्रनामकाः । अत इन्द्रे ददानीति स्मृतिः प्राणस्य युज्यत' इति सामसंहितायाम् । 'सर्वोपद्रवकर्तॄणामसुराणां कुबुद्धिनाम् । उपालम्भे कृते युक्तं विष्णुस्त्वां प्रतिपेक्ष्यति । रुद्रस्त्वां धक्ष्यतीत्यादि नान्यथा तु कथञ्चने'ति च । मृत्योस्सकाशादात्मानं परिहराणीति । 'ब्रह्मा प्रजापतिश्चेति विष्णुरन्यं प्रबोधयन् । तथेन्द्रनामा वायुश्च परेषां बोधको यदे'ति च । बृंहयति प्रजाः पाति इदं रातीति व्युत्पत्तिभिः ॥ २२ ॥

सर्वधर्मैः पुण्यलोको ब्रह्मज्ञानाद्विमुच्यते । ॐकारो ब्रह्मणो नाम सर्ववागात्मकश्च सः । तद्व्याख्यात्वात्सर्ववाचां सर्ववागात्मता भवेत् । इदं तु प्रस्तुतत्वात्स सर्वं चाप्यर्थपूर्णतः । सर्वशब्दान्वितत्वाच्च न लिङ्गव्यत्ययो भवेत् । आधिक्यं चैव सर्वत्वं प्रस्तुतं तद्यथेति तदि'ति च । 'अकाराद्याः क्रमेणैव भूरादेः साररूपिणः । अस्मादयं सार इति ज्ञानमेवाभितापनम् । सम्प्रस्रावश्च तद्दृष्टिर्ब्रह्मणः परमस्य हि । नित्यज्ञानोऽपि भगवान् क्रीडयाचीक्लृपद्यदा । तदाभितापशब्दोऽयं वर्तते परमात्मनी'ति च । तपःशब्देनैव यतिधर्मश्चोक्तः । 'सर्वेषामाश्रमस्थानामज्ञानां पुण्यलोकता । अपरोक्षदृशां विष्णोरमृतत्वं न चान्यथे'ति च । 'यज्ञाध्ययनदानैस्तु गृही स्यात्सोमलोकगः । यतयस्तपसा सूर्यं चत्वारोऽपि विशेषतः । गच्छन्ति तपसैवर्षीन् वनस्था ब्रह्मचारिणः । नैष्ठिका वालखिल्यांश्च गुरुशुश्रूषयैव तु । यदि पश्यन्त्येत एव साक्षादेवं जनार्दनम् ।

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्त्सर्वे एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति ॥ १ ॥ प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि सम्प्रास्रवन्त भूर्भुवः स्वरिति तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओंकारः सम्प्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि

SGDF
Sri Gargeshwari Digital Foundation

अमृतत्वं तदा यान्ति नान्यथा तु कथञ्चने'ति च। न च संन्यासमात्रेणामृतत्वम्। 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत' इति श्रुतेः। 'विद्यैव तु निर्धारणादि'ति भगवद्वचनम्। 'न रोधयति मां धर्मो न साङ्ख्यं योग उद्धव। न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणे'ति च। 'न च संन्यसनादेव सिद्धिं समधिगच्छती'ति च। 'तस्य पुत्रा दायमुपयन्ती'त्यादेर्गृहस्थादीनामपि ज्ञानिनां मोक्षः प्रतीयते। 'सर्ववर्णाश्रमाणां च ज्ञानान्मोक्षो विनिश्चितः। अन्त्यानां स्थावराणां वा तथापि यतिरुत्तमः। ज्ञानद्वारो यतो न्यासो विशेषेण भविष्यती'ति च। 'वेदान्तविज्ञानसुनिश्चितार्थास्संन्यासयोगाद्यतयश्शुद्धसत्त्वा'इति च॥ ॥ २३ ॥

'वसुरुद्रादितेयेषु विश्वेषु स्थितमीश्वरम्। तन्नामानं हरिं मन्त्रैर्लोकद्वारादिभिः प्रभुम्। प्रार्थयित्वा दिवं त्वज्ञो ज्ञो मोक्षं प्राप्नुयात्तथा। यजमानो नान्यथा तु लोकोऽस्य प्राप्यते वरः। राजनं पृथिवीलोके राज्यमित्युच्यते बुधैः। विराज्यमन्तरिक्षे तु स्वाराज्यं स्वर्गगं भवेत्। एतेषु मोक्षोऽपि भवेन्मानुषाणां विशेषिणाम्। श्वेतद्वीपं तथा गत्वा दृष्ट्वा विष्णुं च ते ततः। अनुज्ञाताः प्रमोदन्ते

सन्तृण्णान्येवमेतेनोङ्कारेण सर्वा वाक्सन्तृण्णोङ्कार एवेद॰ सर्वमोङ्कार एवेद॰ सर्वम्॥ २॥ २३॥

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातः सवन॰ रुद्राणां माध्यन्दिन॰ सवनमादित्यानां विश्वेषां देवानां च तृतीयसवनं क्व तर्हि यजमानस्य लोक इति स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात्॥ १॥ पुरा प्रातरनुवाकस्योपकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासव॰ सामाभिगायति लो३कद्वारमपावार्णू३३पश्येम त्वा वय॰राआआआआआ हुं आआआ३ज्या ३ यो ३आआआआइत्यथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एताऽस्म्यत्र यजमानः परस्तादायुषः स्वाहाऽपजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै

SGDF
Sri Gargeshwari Digital Foundation

निर्दुःखास्तु धरादिष्वि'ति च । 'यो देवानां नामधा एक एवे'ति-श्रुतेश्च भगवत एव वस्वादिनामानि । 'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्त'इति वचनाच्च भगवानेव प्रार्थ्यः । भगवत्स्वरूपस्य सम्यगपरिज्ञानाद्रागाच्च तेषामन्तवत्फलत्वम् । 'न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते' । 'गतागतं कामकामा लभन्त'इति वचनात् । 'सर्वोत्तमत्वस्याज्ञानाद्विष्णोरन्धन्तमो भवेत् । तद्द्वेषात्किमु वक्तव्यं ब्रह्मादिद्वेषतोऽपि वा । तारतम्यापरिज्ञानादनुत्थानं तमो भवेत् । अपराधकृतस्तेषां निरयं त्वेव गच्छति । पूजाया अकृतेस्तेषां न वर्णेषु जनिर्भवेत् । सम्यक्कर्माननुष्ठानात्स्वर्गं नैवोपगच्छति । अपरोक्षदृशेरौन्यान्मोक्षं नैवोपगच्छती'ति च । 'पूर्वपूर्वगुणैर्दोषानशक्ता उत्तरोत्तराः । स्थानद्वयोत्तरे शक्ता मोक्षोनानपरोक्षिणः । विरुद्धरागिणां नैव ह्यपरोक्षदृशिर्भवेत् । यावद्रागविनाशः स्याद्विरक्तो भक्तिसंयुतः । सर्वदैवाप्रमत्तश्च पश्येदेव हरिं

वसवः प्रातःसवनꣳ सम्प्रयच्छन्ति ॥ २ ॥ (२४) ॥ पुरा माध्यन्दिनस्य सवनस्योपकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रꣳ सामाभिगायति लो३कद्वारमपावार्णू३३पश्येम त्वा वयं विरा आआआआ हुं आआआ३ज्या ३ यो ३ आआइत्यथ जुहोति नमो वायवेन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्म्यत्र यजमानः परस्तादायुषः स्वाहाऽपजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यन्दिनꣳ सवनꣳ सम्प्रयच्छन्ति (२५) पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपविश्य स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति लो३कद्वारमपावार्णू३३पश्येम त्वा वयꣳ स्वारा आआआआ हुं आआआ ज्या ३ यो ३ आआ इत्यादित्यमथ वैश्वदेवं लोकद्वारमपाऽऽवाऽऽवार्णू पश्येम त्वा वयꣳ साम्रा आआआआ हुं आआआ ज्या ३ यो ३ आआ इत्यथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दतैष वै यजमानस्य लोक एताऽस्म्यत्र यजमानः परस्तादायुषः स्वाहाऽपहतपरिघमित्युक्त्वोत्तिष्ठति तस्मा आदित्याश्च विश्वे च

SGDF
Sri Gargeshwari Digital Foundation

परम् । अविस्मृतिस्सदा विष्णोरन्यथाज्ञानवर्जनम् । शास्त्राभ्यासः सदोद्योगाच्छ्रवणाच्च विचारतः । निषिद्धकर्मणां त्यागः स्वधर्मस्य कृतिः सदा । अप्रमाद इति प्रोक्तः शास्त्रं वेदास्तु पञ्च च । भारतं पञ्चरात्रं च मूलरामायणं तथा । पुराणं भागवतं चैव पञ्चमो वेद-उच्यत' इति च । 'त्रिलोकप्राप्तिपरिघास्त्रयः सन्ति सनातनाः । तेषामग्न्यादिगो विष्णुरपहन्ता स्मृतो भवेत् । मृतः सन्सुखभोगाय यत्र गच्छति तत्र ह । एकैकः परिघोऽग्रे स्याद्धते तस्मिंस्तु विष्णुना । यजमानः पृथिव्यादिलोकान्भोगाय याति ही'ति च । 'यस्त्राति यज्ञमातारं यज्ञमात्रा हरिस्तु सः । तमेवं वेत्ति यो भक्तो याति स्वर्मुक्तिमेव चे'ति च ॥ २४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये द्वितीयोऽध्यायः ॥ २ ॥

हरिः ॐ ॥ 'य आदित्यगतो विष्णुः स एव मधुनामकः । मदधिर्मध्विति प्रोक्तो मदः सुखमिहोच्यते । अ इत्याधिक्यमुद्दिष्टं मज्ज्ञानततिरुच्यते । तद्वत्ता ततिरुद्दिष्टा तेनानुभव ईरितः । अधिकोऽनुभवो यस्य सर्वस्मादीप्सितादपि । सोऽयं मद इति प्रोक्तः सर्वं हि सुखसाधनम् । तत्पूर्णो मधुनामा स्यात्तृतीयोऽतिशयार्थकः । देवानामुपजीव्यत्वात्स देवमधुनामकः । आदित्वादाततत्वाच्च ज्ञानरूपत्ववतस्तथा । आदित्य इति सम्प्रोक्तः प्रसिद्धमधुवच्च सः । तिरोवंशादिसंयुक्तो द्युनाम्नी च द्युसंस्थिता । प्रकाशादिगुणैः श्रीस्तु वायोराश्रय-

---

देवास्तृतीयसवनꣳ सम्प्रयच्छन्त्येष ह वै यज्ञस्य मात्रां वेद य एवं वेद य एवं वेद ॥ २४ ॥ (२६) ॥ इति श्रीमच्छान्दोग्योपनिषदि द्वितीयोऽध्यायः ॥ २ ॥

असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥ १ ॥ तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्य ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ॥ २ ॥ एतमृग्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं

SGDF
Sri Gargeshwari Digital Foundation

रूपतः। तिरोवंश इतिप्रोक्ता मध्वपूपस्तु मारुतः। तस्मिन्सन्निहितो विष्णुर्विशेषेण यतः सदा। सोऽन्तरिक्षमितिप्रोक्तः स्वान्तस्सम्यग्घरीक्षणात्। अन्तरिक्षस्थितश्चासौ वस्वाद्या मधुकारिणः। तत्पुत्रास्तु मरीच्याद्यास्सूर्यरश्मिषु संस्थिताः। तिर्यक्स्थित्वा वशे कुर्याद्यस्माद्देवी रमा हरिम्। भक्त्यैवातस्तिरोवंशस्तिर्यक्त्वं प्रणतिः स्मृता। तिर्यक्स्थित्वा स्वसंस्थं तु वशीकुर्याद्यतस्ततः। वंशस्तिरश्चीनोऽन्योऽपि यस्मिन्नाप्यमुपस्थितम्। सोऽपूप आप्यो भगवान्मध्वाज्यादिप्रसिद्धगम्। प्राच्यरश्मिषु संस्थस्तु रतिशंमानरूपतः। प्राच्यरश्मिरिति प्रोक्तो वासुदेवाभिधो हरिः। एतद्विना नालमिति नाडीत्यंश उदाहृतः। स्वरूपांशैर्विना प्राप्तुं नालं हि प्रापितांशिनम्। ऋग्वेदमानिनश्चैव वह्न्याद्या वसवस्त्वृचः। अर्च्यत्वात्प्रथमं चैव विशेषाद्यज्ञदेवताः। इन्द्राद्या यजुरुद्दिष्टा रुद्रा इन्द्रसखा यतः। इन्द्रशब्दोदितो वायुः स याज्यः सोमभुक्पुरः। स हि शंकरपूर्वाणां रुद्राणां मुख्य एव च। सामनामान आदित्या मासशः समभोगतः। इन्द्रो वरुण उद्दिष्टो यज्ञेषु व्रियते यतः। आदित्यानामधिपतिः स हि विष्णुनियोजितः। विष्णुस्तूपास्यरूपत्वान्नोपासकगणे युतः। इतिहासपुराणानां सोमाद्या अभिमानिनः। अथर्वाङ्गिरसां चैवाप्यथर्वाङ्गिरनामकाः। अधरं वर्तयेयुस्ते वृष्टिमङ्गरसास्तथा। मनस्त्वात्प्राणरूपत्वादथर्वाङ्गिरसस्ततः। गुह्यादेशा ब्रह्मपदे ये योग्या ब्रह्मणा सह। सर्वगुह्योपदेष्टारः सर्वेषां

वीर्यमन्नाद्यꣳ रसोऽजायत ॥ ३ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितꣳ रूपम् ॥ ४ ॥ १ ॥

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः ॥ १ ॥ तानि वा एतानि यजूꣳष्येतं यजुर्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लꣳ रूपम् ॥ ३ ॥ २ ॥

SGDF
Sri Gurgeshwari Digital Foundation

गुरवो हि ते । ब्रह्मेति सर्ववेदानां नामानन्तत्त्वतः स्मृतम् । ऋग्वेदादींस्तु ते देवा अग्न्याद्याः संव्यचारयन् । मधु ब्रह्मव्यक्तिकृत्त्वात्ते वै मधुकृतः स्मृताः । ज्ञानपोषकरत्वात्तु वेदाः पुष्पाभिधाः स्मृताः । अन्यत्र मधुकृत्पोषान्नित्यत्वादमृताश्च ताः । वेदवाचः सुरैः पेया भोग्यत्वादाप ईरिताः । वेदपानं विचारश्च श्रवणं पाठ एव च । देवैर्विचारितेभ्यश्च वेदेभ्यो व्यक्ततां गतः । ज्ञानानन्दस्वरूपत्वाद्यशस्तेजस्स्वरूपकः । इन्द्रियं परमैश्वर्याद्वीर्यरूपश्च सर्वदा । सर्वानुग्रहशक्तित्वादन्नाद्यो बलरूपतः । रसनामा च भगवान्संस्थितः सूर्यमण्डले । व्यक्षरद्धर्ममोक्षादीन्देवानां भगवान्हरिः । ऋक्प्रोक्तो लोहिताकारो वासुदेवः परः पुमान् । स एव सूर्यलौहित्ये प्राच्यरश्मिषु संस्थितः । सङ्कर्षणः शुक्लवर्णो यजुर्वेदोदितः प्रभुः । शुक्लवर्णे च सूर्यस्य दक्षरश्मिषु संस्थितः । प्रद्युम्नः श्यामवर्णस्तु सामवेदोदितः प्रभुः । प्रत्यग्रश्मिषु सूर्यस्य श्यामवर्णेऽपि च

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः ॥ १ ॥ तानि वा एतानि सामान्येतꣳ सामवेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णꣳ रूपम् ॥ ३ ॥ ३ ॥

अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ॥ १ ॥ ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परः कृष्णꣳ रूपम् ॥ ३ ॥ ४ ॥

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपः ॥ १ ॥ ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य मध्ये क्षोभत इव ॥ ३ ॥ ते वा एते रसानाꣳ रसा वेदा

SGDF
Sri Gargeshwari Digital Foundation

स्थितः । अनिरुद्धः सुनीलश्च इतिहासपुराणयोः । अथर्ववेदे चोक्तस्स-न्नुदग्रश्मिषु संस्थितः । सुकृष्णे सूर्यरूपे च मध्ये नारायणः प्रभुः । ऊर्ध्वरश्मिषु संस्थश्च प्रोद्यदादित्यसप्रभः । महामरीचिपुञ्जेन चलतीवाचलोऽपि सन् । स वाच्यः सर्ववेदानामेवं पञ्चात्मको हरिः । वेदानां सारभूतोऽसौ वेदानां नित्यताप्रदः । अतोऽमृतानाममृतो रसानां रस एव चे'ति सामसंहितायाम् ।

न चाचेतनमात्रमुपासितं पुरुषार्थप्रदानशक्तम् । 'ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयादि'ति वाक्यशेषाच्चैतदवगम्यते 'य एतामेवं ब्रह्मोपनिषदं वेदे'ति च । कथं चाचेतनोपासनं ब्रह्मादिपदप्रदं भवति ? । 'न वै तत्र न विम्लोचो नोदियाय कदाचन । सकृद्दिव हैवास्मै भवती'त्यादि च मुक्तस्यैव मुख्यतो युज्यते । यशस्तेज इन्द्रियवीर्यान्नाद्यरसत्वं च भगवन्तं विना कस्य मुख्यतो युज्यते ? । 'तस्य नाम महद्यशः' । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञान (वैराग्ययो) विज्ञानयोश्चैव षण्णां भग इतीरणा' । 'रसो वै सः' । 'सुखात्मकं षड्गुणविग्रहं परं हृदि स्थितं ब्रह्म निरञ्जनं स्वरुक् । ऐश्वर्यवैराग्ययशोविबोधवीर्यश्रिया पूर्णमहं प्रपद्ये' । 'अहं तत्तेजोरश्मीन्नारायणं पुरुषमि'त्यादेश्च । 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण'इति च । 'न चाचेतनस्यैश्वर्यादिरूपत्वं युज्यते । ज्ञानात्मको भगवानैश्वर्यात्मको भगवान् शक्त्यात्मको भगवानि'ति च श्रुतिः । 'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादि'ति सर्ववेदप्रतिपाद्यत्वं भगवत उक्तं भगवता । 'स सर्वनामा स च विश्वरूपः प्रसीदतां ब्रह्म महाविभूति'रिति च । 'सर्वे वेदा यत्पदमामनन्ति' । 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव' । 'वेदे रामायणे चैव पुराणे भारते तथा ।

हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥ ४ ॥ ५ ॥

SGDF
Sri Gangeshwari Digital Foundation

आदावन्त्ये च मध्ये च विष्णुः सर्वत्र गीयते' । 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती'त्यादेश्च । उपनिषत्त्वाच्च विशेषतो न यत्किञ्चिदुच्यत इति वक्तुं युक्तम् । 'विष्णुरुक्तः सर्ववेदैर्मन्त्रैरपि विशेषतः । आरण्यके विशेषेण नैवान्यत्किञ्चिदुच्यते । कर्मार्थं च ब्राह्मणं स्यादमुख्यार्थविवक्षया । मुख्यतो विष्णुरेवैको ब्राह्मणेष्वपि कथ्यते । आरण्यकेष्वृते विष्णुं नैवान्यत्किञ्चिदुच्यते । सूत्रात्मा तूच्यते विष्णोस्तद्विशिष्टत्ववित्तये । कुत्रचित्तदुपास्तिश्च तस्याऽप्यर्धतनुत्वतः । तस्मिन्विष्णोरुपास्त्यर्थं नान्यथा किञ्चिदुच्यत'इति ब्रह्माण्डे । 'यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवत्राणनिरोधमस्य । लीलावतारैरीप्सितकर्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः । वित्तं त्वतीर्थीकृतमङ्ग वाचं हीनां मया रक्षति दुःखदुःखी । यन्न व्रजन्त्यघभिदो रचनानुवादाः शृण्वन्ति येऽन्यविषयाः कुकथा मतिघ्नीः । यास्तु श्रुता हतभगैर्नृभिरात्तवीर्यास्तांस्तान्क्षिपन्त्यशरणेषु तमस्सु हन्ते'त्यादि भगवद्वचनाच्च । 'सर्वासु शाखास्वारणमावर्तयेदारणमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तये'दित्युपनिषदभ्यासस्य सतात्पर्यं विहितत्वादभगवद्विषयस्य निन्दितत्वाच्च नोपनिषत्स्वन्यदुच्यते । 'अभ्यसेदधियज्ञं चाप्यधिदैवं विशेषतः । अध्यात्मं तु विशेषेण यस्माद्विष्णुस्त्रिषूदित'इति स्कान्दे । 'मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम् । इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चने'त्यादेश्च भगवदुपासना एव सर्वत्रोक्ताः ॥ ५ ॥

'प्रथमामृतस्य द्रष्टारो वसवस्त्वग्निपूर्वकाः । यावत्पश्यन्ति तं विष्णुं तावत्ते नान्यभोगिनः । एतदेव विशन्त्यद्धा मोक्षे ते तत

तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद वसूनामेवैको

SGDF
Sri Gangeshwari Digital Foundation

एव च। स्वेच्छयैव समुद्यन्ति मुक्ताः सन्तो बहिस्तथा। एवं द्वितीयरूपं तु शिवाद्या वायुसंस्थिताः। वायोर्हिरण्यगर्भत्वात्पदद्वय-मुदाहृतम्। रुद्राणामाश्रयत्वं च साध्यानामपि सर्वशः। अतो यजुर्विचारश्च सर्ववेदात्मनस्तथा। वायोरेव विचारः स्याद्ब्रह्मणोऽपि विशेषतः। उभयाश्रयः स मोक्षेऽपि वायुरेव हि सर्वदा। द्रष्टारोऽथ तृतीयस्य शक्रमुख्यादितेः सुताः। चतुर्थस्य तु सोमाद्या मरुतः पञ्चमस्य च। ऋजवो ब्रह्ममुख्या हि सुपर्णः शेष एव च। सरस्वती सुपर्णी च वारुणी साध्यनामकाः। अन्योन्यमुखता मुक्तौ ब्रह्मणां समता तथा। वाक्शेषादेर्मुखं ब्रह्मा मुक्तावपि विशेषतः। द्रष्टोभय-स्यापि शिवो द्वितीयस्यान्तगस्य च। मोक्षे त्वन्यत्र चैकस्य परतः शेषभावतः। ये चैतत्पदयोग्यास्स्युर्देवाः पञ्च महागणाः। तेषामपि

भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविश-त्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ४ ॥ ६ ॥

अथ यद्द्वितीयममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभि-संविशन्त्येतस्माद्रूपादुद्यन्ति॥ २ ॥ स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविश-त्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ४ ॥ ७ ॥

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूप-मभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेदादित्या-नामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूप-मभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यो दक्षिणत उदे-तोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेताऽऽदित्यानामेव-तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ४ ॥ ८ ॥

SGDF
Sri Gangeshwari Digital Foundation

यदोपासा निच्छिद्रा मधुनामके। तदा वस्वादितां प्राप्य मुक्तिमेष्यन्त्यसंशयम्। उदेत्यास्तमयं यावद्याति भानुस्तु पर्वते। उदयास्ताद्रिमध्यस्य वसवः पतयः स्मृताः। ततश्चास्तमयाद्यावदर्धरात्रं दिवाकरः। दक्षिणादुत्तरं याति किञ्चित्पूर्वसमन्वितम्। तद्देशकालयोरीशा रुद्रा वायुपुरःसराः। वसुभोज्यादर्धकालमर्धदेशस्तथैव च। रुद्रभोज्योऽर्धरात्रात्तु याम आदित्यदैवतः। पश्चिमात्पूर्वमार्गस्तु रौद्रादर्धः प्रकीर्तितः। ततः परोऽर्धयामस्तु सौम्याद्दक्षिणमार्गकः। मारुतः काल उद्दिष्ट आदित्यार्धश्च देशतः। पश्चात्पश्चादुदेत्येव पूर्वतोऽस्तमुपैति च। ततस्तदर्धकालेन श्वोत्तरादुदितस्तथा। अस्तं दक्षिणतो याति स कालो मारुतः स्मृतः। उदेत्यैन्द्रपुरे चोर्ध्वमर्वागुदयपर्वते। अस्तमेति तदर्धेन ब्रह्मा तस्य पतिः स्मृतः। एकत्रिंशत्तु घटिकाः साधिका वसुदैवताः। तदर्धा रुद्रदैवत्यास्तत आदित्यदैवताः। तदर्धा मारुता ब्राह्मास्तदर्धा देशतस्तथे'ति च। रौद्रो

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ४ ॥ ९ ॥

अथ यत्पञ्चमममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्व उदेताऽर्वाङस्तमेता साध्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ४ ॥ १० ॥

SGDF
Sri Gangeshwari Digital Foundation

द्विगुणीभूतो वसुकालो यावांस्तावान्भवतीति द्विस्तावत् अर्ध इत्यर्थः । ब्राह्मे मुहूर्त इत्युषःकालस्य प्रसिद्धेश्च । रौद्रः काल इति पूर्वरात्रस्य प्रसिद्धेः सार्धरात्रस्य सौम्यः काल इत्यपररात्रस्य । सौम्यकालत्वाच्च तस्मिन्काले शीतमुत्पद्यते । मारुतकालत्वाद्वायुश्च वाति । आग्नेय-कालत्वादेवाह्नि सैकघटिकं होमकर्माणि विशेषतः प्रवर्तन्ते । 'अहः सर्वं वसूनां तु परेषां रात्रिरेव च । प्रदत्ता विष्णुना पूर्वं नाल-मित्यब्रुवन्परे । पुनर्विशेषतो दत्तं रुद्राणां मरुतां तथा । माध्यन्दिनं तृतीयं चाप्यादित्यानां प्रदत्तवान् । विश्वेषामपि देवानां सामान्या-द्वसुनामहरि'ति च । सर्वस्याधिपतिर्ब्रह्मा रुद्राद्यास्तु द्वयोर्द्वयोः । वसवस्त्वह्न एवेशाः सामान्यान्न विशेषत'इति च । माध्यन्दिने तृतीये च रुद्रादे राज्यमिष्यते । तद्भृत्यत्वाद्वसूनां तु प्रातः काले विशेषतः । तत्रापि वाय्वधीनत्वमग्न्यादीनां प्रकीर्तितम् । एवं पृथिव्या रुद्राणा-मन्तरिक्षं प्रकीर्तितम् । मरुतां च द्विलोकेशा आदित्याः परिकीर्तिताः । सर्वेषामधिपो ब्रह्मा युवाधीशस्तु मारुतः । त्रिलोकाधिपतिश्चेन्द्रस्तेषा-मप्यधिपो हरिरि'ति च । स्वाराज्यं भोगः स्वरञ्जनात् । न त्विन्द्राद्यमो द्विगुणकालं तिष्ठति तस्माद्वरुणस्तस्मात्सोम इत्यत्र किञ्चिन्मानम् । न च सोमाद्विगुणमेव ब्रह्मा तिष्ठति । द्विपरार्धं हि तस्य कालः । इन्द्रादयो हि मन्वन्तरमात्रं तिष्ठन्ति । न च वसूनां पूर्वोपदेशो रुद्राणां दक्षिण आदित्यानां पश्चिमो मरुतामुत्तर एव । नान्यत्रेत्यत्र प्रमाणमस्ति । तत्पक्षे रुद्रैः सह इन्द्रस्य दक्षिणत्व-प्राप्तेश्च । न चेन्द्रशब्देन वायुस्तैर्गृहीतः । अत इन्द्रादेवेन्द्रस्य द्विगुण-कालत्वमिति विरोधः । इन्द्रादिपुरीणामुद्वासत्वेनैवमङ्गीकारे तत्षोडश-गुणत्वादूर्ध्वोदयस्यैकेन्द्रात्परतोऽनिन्द्रत्वमेव स्यात् । अथ तं त ऊर्ध्व उदेत्येति तत्पक्षे पश्चादप्यादित्यभावात्कल्पान्तलयो न स्यादित्याद्यनन्त-दोषदुष्टत्वेऽपि ग्रन्थाल्पत्वायैवोपरम्यते ॥ छ ॥

SGDF
Sri Gangeshwari Digital Foundation

'वस्त्रादीनां तु सर्वेषां सर्वदिक्षुपुराण्यपि। सन्त्येवमपि धीवृत्त्यै प्रत्येकं दिक्षु कथ्यत'इति च। ऐन्द्र्या उद्वासे रुद्राणामेवोदयाभाव इति च दोषः। अतो यत्किञ्चिदेतत्। 'उदेति पूर्वतः सूर्यो निम्लोचति च पश्चिमे। एवं नियम उद्दिष्टो ब्रह्मणा विष्णुचोदनात्। द्विगुणं द्विगुणं कालमुदित्वा दक्षिणादिषु। मध्ये व्यवस्थितिः पश्चाद्ब्रह्माणं याचिता पुरा। हिरण्यकेन सूर्यस्य हिरण्याक्षेण वै पुनः। तदासुराणां देवत्वं ब्रह्मा तत्पददौ तयोः। तच्छ्रुत्वेन्द्रादिभिः प्रोक्तः कथं प्रादा वराविमौ। देवता हि विनश्येयुरेवं दत्ते वरे त्वया। इत्युक्तो देवतैः प्राह ब्रह्मा लोकपितामहः। न मया स वरो दत्तो दैतेयानां सुराः क्वचित्। येन युष्मद्विनाशः स्यात्ततो व्येतु च वो भयम्। दक्षिणाद्युदयो यस्तु स हि दैनन्दिनो मया। अभिप्रेतो नैव चायं कालान्तरगतः क्वचित्। अर्धनाड्युत्तरा नाडीः सकाष्ठा नित्यशो रविः। पश्चादशोत्तरां गच्छेत्पूर्वं रात्रे तु दक्षिणात्। तदर्धं पश्चिमात्पूर्वं तदर्धं चोत्तरादपि। दक्षिणां च तदर्धं स ऊर्ध्वादर्वाक्च गच्छति। दक्षिणाद्युदयस्त्वेष न तु कालान्तरे क्वचित्। यदोत्तरस्मात् द्विगुणः पूर्वो भवति वै सुराः। तदापि द्विगुणत्वं स्यात्तन्मयात्र विवक्षितम्। अहःसाम्येऽपि क्रमश आतपस्याल्पकालतः। गिर्यावृत्तेः क्षिप्रमन्येषूदयास्तमयाविव। कालान्तरे भाविनं तु दक्षिणाद्युदयं पुनः। अपेक्ष्यैव वरो दत्तो द्वितीयो देवता मया। समयश्च कृतो नित्यो मया सूर्यस्य चानघाः। पूर्वस्मादुदयो नित्यः पश्चिमेऽस्तमयस्तथा। नियमो नान्यथाऽयं स्यात्कदाचित्केनचित्क्वचित्। तस्मान्न वो भयं क्वापि प्रोक्ता इत्थं सुरास्तदा। विशोका अभवन्सर्वे ययुः स्वंस्वं निवेशनमि'ति च। एतदेव मोक्षधर्मेषु बलिवासवसंवाद उक्तम्। देवान्प्रति ब्रह्मणो वचनं रहस्यत्वादविज्ञाय बलिना दक्षिणाद्युदय उक्तः। इन्द्रेण तु ब्रह्मवचनं जानता दक्षिणाद्युदयो नास्ती-

SGDF
Sri Gargeshwari Digital Foundation

त्युक्तम् । 'दैतेययोर्वरं ज्ञात्वा त्वविज्ञाय सुरान्प्रति । ब्रह्मणोक्तं हि बलिना वासवं प्रत्युदीरितम् । दक्षिणाद्युदयान्ते तु त्वां जेष्यामि पुरन्दर । इत्युक्तस्तमुवाचेन्द्रो न कदाचन तद्भवेत् । ब्रह्मणा नियमो यस्मात्कृतः प्रागुदयो रवेः । इत्युक्त्वा तु जगामेन्द्रो दिवमैरावतस्थित'इति च ॥ १० ॥

'अथ सूर्यस्थितो विष्णुरादित्यस्त्वादिमूलतः । आदानाद्वापिदेवानामूर्ध्वं गच्छति मण्डलात् । प्राप्य वैकुण्ठलोकं च नोदेत्यस्तं न चैति सः । एकलः प्रलये स्थाता देवता नात्र संशयः । तेन सत्येन न व्यृद्धिमाप्नुयां ब्रह्मणा क्वचित् । इत्युवाच पुरा ब्रह्मा देवेभ्यः स चतुर्मुखः । एतां विद्यां तु यो वेद नित्यमस्य दिवा भवेत् । वैकुण्ठधामसंस्थस्य मुक्तस्यानुदयास्तकम् । तदेतद्भगवान्विष्णुः प्रादाज्ज्ञानं विरिञ्चये । विरिञ्चिर्मनवे प्राह प्रजाभ्यो मनुरेव च । पूरयित्वा तु पृथिवीं रत्नैः सप्तसमुद्रिणीम् । दत्वाऽपि गुरवे नैव पूर्यते गुरुदक्षिणा । देवास्तूपासनायोग्या एकैकस्यामृतस्य हि । सर्वस्योपासने ब्रह्मा तदन्ये ज्ञानमात्रके । उपासने नैव योग्यास्तद्योग्या हि सुरा यत'इति देवश्रुतौ । ब्रह्मणा परेण मा विराधिषि । भगवत्प्रसादादवृद्धिं न प्राप्नुयामित्यर्थः ॥ ११ ॥

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदेष श्लोकः ॥ १ ॥ न वै तत्र न निम्लोचो नोदियाय कदाचन । देवास्तेनाहꣳ सत्येन मा विराधिषि ब्रह्मणेति ॥ २ ॥ न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ॥ ३ ॥ तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥ ४ ॥ इदं वा व तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वाऽन्तेवासिने ॥५॥ नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति ॥ ६ ॥ ११ ॥

SGDF
Sri Gargeshwari Digital Foundation

यदिदं किञ्च भूतं प्रभूतं परिपूर्णं तत्सर्वं गायत्री भगवानेव। भू बहाविति धातोः। बहुः पूर्णतायामिति च। 'यदिदं परितः पूर्णं मत्स्यकूर्मादिरूपकम्। तदिदं भगवान्विष्णुस्सर्वान्तःस्थित एव च। तन्निःसृतत्वाद्वेदानां गायकस्त्राति चाखिलम्। अतो गायत्रि-नामासौ वासुदेवः परः पुमान्। भूमा भूतमितिप्रोक्तः पूर्णत्वा-त्पुरुषोत्तमः। अनन्यापेक्षमुद्रिक्तं सर्वस्य विनियामकम्। यद्यत्तत्त-द्विष्णुरेव नान्यदेतादृशं क्वचित्। स एव भगवान्विष्णुर्वाङ्नामा वाचि संस्थितः। वचनाद्धयशीर्षाख्यो गायत्र्यां च स आस्थितः। स एव पृथिवीनामा पृथिव्यामपि संस्थितः। विष्णौ हि पृथिवीसंस्थे जगत्सर्वं प्रतिष्ठितम्। नातिशेते च तं कश्चित्स हि सर्वाधिको हरिः। पृथुत्वात्पृथिवीनामा स एवान्तःशरीरगः। शरित्वादीरणाच्चैव शरीरं भगवानजः। पुरुषो जीव उद्दिष्टस्तस्मिन्नेव स्थितो विभुः। योऽसौ जीवे स्थितो विष्णुः शरीरमितिनामकः। शंत्वाच्च रतिरूपत्वादीरणाच्च स एव तु। जीवचैतन्यरूपस्य हृदयेऽपि व्यवस्थितः। अयनाद्धृदि विष्णुः स हृदयं कीर्तितो बुधैः। गायत्र्यां संस्थितो विष्णुः स्त्रीरूपः सूर्यसप्रभः। द्वितीयश्चैव मत्स्यादिर्भूतनामावतारगः। तृतीयो वाचि संस्थश्च स्त्रीरूपो हयशीर्षकः। चतुर्थः पृथिवीसंस्थः स्त्रीरूपः पीत-वर्णकः। जीवस्यान्तर्गतो व्याप्य शरीरमितिनामकः। पञ्चम-स्तद्धृदिस्थश्च षष्ठो हृदयनामकः। गायत्रीनामको विष्णुरेवं षड्विध उच्यते। त्रिभिः स्वरूपपादैश्च भिन्नेनैकेन चैव हि। गायत्रीनामको विष्णुश्चतुष्पात्संप्रकीर्तितः। भिन्नपादः सर्वजीवास्तस्य सादृश्यमात्रतः। स्वरूपपादा विष्णोस्तु त्रयो हि दिवि संस्थिताः। नारायणो वासुदेवो वैकुण्ठ इति ते त्रयः। अनन्तशयनं चैव तथानन्तासनं हरेः।

गायत्री वा इदꣳ सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च ॥ १ ॥ या वै सा गायत्रीयं वाव सा

SGDF
Sri Gargeshwari Digital Foundation

बहुलक्षोच्छ्रिते नित्ये विमाने संस्थितं यतः । चित्प्रकृत्यात्मनि ततो दिवीति कथितं श्रुतौ । लोकत्रयविवक्षायां परतो लक्षयोजनात् । सर्वं द्यौरिति विज्ञेयं ततस्ते दिविसंस्थिताः । दिवः परश्च भगवान्-सप्तलोकविवक्षया । परं ब्रह्मेति भगवान्सर्वगः संप्रकीर्तितः । स एव जीवस्य बहिर्हृदयाकाश आस्थितः । योऽयं हृदयगः सोऽथ जीवान्त-र्व्याप्य संस्थितः । व्याप्तो जीवान्तरे योऽसौ स जीवहृदि संस्थितः । एवं चापि चतुष्पात्त्वं वासुदेवस्य कीर्तितम् । स एव पूर्णो भगवान-प्रवर्त्यस्तथाखिलैः । अन्यैः प्रवर्त्यते योऽसौ स प्रवर्तीति गीयते । अप्रवर्त्यो हरिर्नित्यः स्वतन्त्रत्वात्सदैव च । अस्य प्रवृत्तिर्नास्तीति सोऽप्रवर्तीति कीर्तितः । पूर्णास्वतन्त्रा श्रीश्चास्य वेत्तुर्भवति शाश्वती । साक्षाद्गायत्र्युपासायां योग्य एकश्चतुर्मुखः । तस्मादनन्यतन्त्रास्य श्री-र्भवेन्नान्यथा क्वचित् । विष्णुतन्त्रत्वमस्य स्यात्परेषां तस्य तन्त्रता । यथाक्रमेण तन्त्रत्वं योग्यताक्रमतो भवेदि’ति च सत्तत्त्वे । ब्रह्म शब्दाच्च भगवानित्यवसीयते । पूर्णाप्रवृत्तित्वं च तस्मिन्नेव मुख्यम् । तावानस्य महिमेति मन्त्राच्च । पादोऽस्य विश्वा भूतानीति जीवानां चतुष्पादान्तर्भावात् । भूतं यदिदं किञ्चेति षड्विधान्तर्भूतं भूतं

येयं पृथिव्यस्याꣳ हीदꣳ सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयन्ते ॥ २ ॥ या वै सा पृथिवीयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीर्यन्ते ॥ ३ ॥ (तद्व एत) यद्वै तत्पुरुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशयन्ते ॥ ४ ॥ सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् ॥ ५ ॥ तावानस्य महिमा ततो ज्यायाꣳश्च पुरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ॥६॥ यद्वै तद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः ॥७॥ अयं वाव स योऽयमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशः ॥ ८ ॥ अयं वाव स योऽयमन्तर्हृदय आकाशो यो वै सोऽन्तर्हृदय आकाशस्त-देतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनीꣳ श्रियं लभेत य एवं वेद ॥ ९ ॥ १२ ॥

SGDF
Sri Gargeshwari Digital Foundation

मत्स्याद्यवताररूपमेव । 'द्वाविंशेष्ववतारेषु जीवोऽप्युक्तो यथा पृथुः । तथा पादेषु चतुर्षु सान्निध्याज्जीव ईरितः । यथा कालः पुमान्व्यक्तं प्रकृतिश्च परस्य तु । विष्णो रूपाणि गण्यन्ते पररूपेण वै सह । एवं भूतानि गण्यन्ते भिन्नान्यपि पदैः सह । मूर्तामूर्ते यथा रूपे ब्रह्मणस्तु तथैव च । भिन्नान्यपि तु भूतानि पदानि स्वपदैः सहे'ति प्राथम्ये । 'सुदर्शनाख्यं स्वास्त्रं तु प्रायुङ्क्त दयितं त्रिपादि'ति श्रीभागवते प्रयोगाच्च न जीवो भगवत्स्वरूपम् । 'सुवर्चला यथा सूर्यपत्न्यंशःसमुदाहृता । एवं जीवा भगवतो वस्तुभेदेऽपि सर्वदे'ति च ॥ १२ ॥

'प्राणाभिमानी चक्षुश्च सूर्य एव ह्युदाहृतः । तेजोऽन्नाद्यभिमानी च प्राग्द्वाराधिपतिर्हरेः । दक्षिणाधिपतिस्सोमो व्यानः श्रोत्राभिमानवान् । यशोलावण्यरूपश्च पश्चिमद्वारपस्तथा । वागपानात्मको वह्निर्ब्रह्मतेजोऽन्नदेवता । उत्तरद्वारपस्त्विन्द्रः समानमन आत्मकः । कीर्त्यैश्वर्यात्मको नित्यमूर्ध्वद्वारप एव च । प्रधानवायुराकाशः सर्वज्ञादुन्नतेस्तथा । उदान ऊर्जितत्वात्स ओजः पूर्णत्वतो महः । परस्य ब्रह्मणस्त्वेते पुरुषाः पञ्च कीर्तिताः । द्वारपा हृदये चैव विष्णुलोके च सर्वदा । आन्तरद्वारपा ह्येते जयाद्या बाह्यतः स्मृताः ।

तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद ॥ १ ॥ अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रं स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवं वेद ॥ २ ॥ अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक् सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद ॥३॥ अथ योऽस्योदङ् सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भवति य एवं वेद ॥ ४ ॥ अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चे-

SGDF
Sri Gargeshwari Digital Foundation

एवमेतानुपास्यैव तद्गुणांशांशभाग्भवेत् । विष्णुलोकं तथा गच्छेद्भवेदपि सुसन्ततिः । योऽसौ वैकुण्ठगो विष्णुः सप्तलोकोपरिस्थितः । स एव सर्वलोकेषु विश्वतो ब्रह्मणस्तथा । उच्चेषूत्तमलोकेषु तथा प्रत्यवरेषु च । पुरुषेषु च सर्वेषु स एकः संव्यवस्थितः । प्राणसंस्थस्स वै विष्णुः प्राणोऽग्नौ संव्यवस्थितः । स्पर्शेन दृश्यते चाग्निस्तदृष्टिरिव सा ततः । स प्राणः स्तौति तं विष्णुं सा स्तुतिः श्रूयते सदा । कर्णौ पिधाय तद्विद्वान् दिव्यचक्षुः सुकीर्तिमान् । मुक्तो भूत्वा भवेद्यस्मादुपासीतैव सन्ततमि'ति सत्तत्त्वे । दिक्षु यानाद्यशो व्याप्तं कीर्तिः प्रत्यक्षतःस्तुतिरि'ति शब्दनिर्णये । सर्वतः पृष्ठेषु सर्वत उच्चेषु वैकुण्ठक्षीरसागरानन्तासनादिषु विश्वतो ब्रह्मणोऽप्युच्चेषु तत उत्तमो नास्तीत्यनुत्तमाः सर्वतः स्वयमुत्तमाः । 'पृथिवीस्थेषु सर्वोच्चो लोकोऽनन्तासनात्मकः । अन्तरिक्षात्मकेभ्यश्च श्वेतद्वीपे स्थितो हरिः । द्व्यात्मकेभ्यश्च सर्वेभ्यो वैकुण्ठश्चोच्च उच्यते । पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् । दिवीन्द्रसदनं चैव तत्परे तु दिवः परे । पृथिव्यां ब्रह्मणो मेरौ जयन्तं त्वन्तरिक्षगम् । तृतीयं सत्यलोकं च सदनं त्रिविधं स्मृतम् । तेभ्योऽनन्तासनाद्या यत्परतो विश्वतः पर'

त्युपासीतौजस्वी महस्वान्भवति य एवं वेद ॥ ५ ॥ ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥ ६ ॥ अस्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिस्तस्यैषा दृष्टिः ॥ ७ ॥ यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति तदेतदृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद ॥ ८ ॥ १३ ॥

SGDF
Sri Gangeshwari Digital Foundation

इति सत्तत्त्वे । 'निनदः समुद्रघोषः स्यान्नदथुर्मेघसम्भव'इति च । 'चक्षुष्यश्चक्षुषि ब्रह्मण्येष यातीत्युपासक'इति च ॥ १३ ॥

'इदं ब्रह्मातिसामीप्यात्सर्वं पूर्णगुणत्वतः । तच्च ब्रह्मजलान्साक्षाद्योऽसौ विष्णुर्जलेऽनिति । आनीदवातमिति यं वेदवागवदत्स्फुटम् । अप्रकेते तु सलिले ब्रह्म नारायणोऽपि सः । इति शान्त उपासीत यस्माज्ज्ञानमयः पुमान् । क्रतुस्तु निश्चितं ज्ञानं तद्वशः पुरुषो मृतौ । तस्माद्विनिश्चितं ज्ञानं कुर्याद्विष्णौ महागुणे । महाज्ञानात्मकत्वात्तु प्रोक्तो विष्णुर्मनोमयः । यस्माद्बलशरीरोऽसावतः प्राणशरीरकः । आसमन्तात्प्रकाशात्स आकाशात्मा प्रकीर्तितः । सर्वगन्धादिरूपश्च भोक्ता चैषां सदैव हि । इति निश्चयकृद्याति तमेव पुरुषोत्तममि'ति सद्गुणे । एकत्र सर्वगन्धादिना चिदानन्दात्मकसर्वगन्धादिरूपत्वमुच्यते । अन्यत्र तद्भोक्तृत्वम् ॥ १४ ॥

'क इत्यानन्द उद्दिष्ट उश इच्छा प्रकीर्तिता । आनन्देच्छास्वरूपोऽसौ कोशो विष्णुः प्रकीर्तितः । तस्योदरेऽन्तरिक्षं च पृथिवी पादबुध्नयोः । शिरोविवरगा द्यौश्च दिशो बाहुषु संस्थिताः । अजरोऽयं महाविष्णुर्वसवो देवतागणाः । तेषां निधानं भगवांस्तस्मिन्सर्वमिदं

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ॥ १ ॥ मनोमयः प्राण शरीरो भारूपः सत्यसङ्कल्प आकाश आत्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः ॥ २ ॥ एष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः ॥ ३ ॥ सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः ॥ ४ ॥ १४ ॥

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलं स एष कोशो वसुधानस्तस्मिन्विश्वमिदꣳ श्रितम् ॥ १ ॥

SGDF
Sri Gangeshwari Digital Foundation

श्रितम्। प्राचीदिक्संस्थितस्तस्य बाहुर्दक्षिण ऊर्ध्वगः। जुहूः स होमकर्तृत्वाद्भुङ्क्ते ह्येतेन केशवः। दक्षिणस्त्वधरो बाहुर्दक्षिणादिक्स्थितो विभोः। सहमानेति स प्रोक्तो मानं वेदात्मकं यतः। शङ्खो वेदात्मकः शङ्खसहितो दक्षिणाधरः। बाहुर्जुहोति चक्रेण शत्रूनित्यथवा जुहूः। प्रतीचीदिक्स्थितस्तस्य वामबाहुस्तथोत्तरः। राजीयुक्तगदायुक्तो राज्ञीनामा प्रकीर्तितः। अधरो वामबाहुर्य उत्तरादिक्स्थितो विभोः। श्रिय आधारपद्मित्वात्सुभूतानामकः स्मृतः। दिङ्नामानश्च ते प्रोक्ता धर्मज्ञानातिदेशनात्। तेभ्यो जातो महावायुर्दिशां वत्सस्ततः स्मृतः। धर्मज्ञानादिरूपेण विष्णोर्बाहुचतुष्टयात्। जातं वायुं विदित्वैव पुत्रो भूत्वा न रोदिति। न जायते न म्रियते मुक्तो भूत्वा सुखी भवेत्। वायुं हरेः सुतं ज्ञात्वा नाहं पुत्रतयाऽरुदम्। हरेः प्रसादसामर्थ्यादजराचामरा ह्यहम्। अनादिकालसम्बन्धादित्युवाच पुरा रमा। अविनष्टं परानन्दकामं विष्णुं सदा ह्यहम्। प्रपद्ये तत्प्रसादेन केवलं नात्मशक्तितः। प्राणं सर्वप्रणेतारं प्रपद्ये केशवं सदा। प्रभूतं यदिदं किञ्चित्प्रादुर्भावात्मकं हरेः। मत्स्याद्यं तत्प्राण एव विष्णुर्नास्त्यत्र संशयः। तस्मान्मत्स्यादिरूपं तं विष्णुमेव प्रपद्यथ। हे जना इत्यवोचत्सा लक्ष्मीः सर्वाः प्रजाः प्रति। प्राणनामा वासुदेवो मोक्षं स्वान्प्राणयेद्यतः। सङ्कर्षणस्तु भूर्नामा भूषयेज्ज्ञानतो यतः। स पृथ्व्यां पृथिवीनामा स्वात्मानं

तस्य प्राची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदꣳ रोदिति सोऽहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदꣳ रुदम् ॥ २ ॥ अरिष्टं कोशं प्रपद्येऽमुनाऽमुनाऽमुना प्राणं प्रपद्येऽमुनाऽमुनाऽमुना भूः प्रपद्येऽमुनाऽमुनाऽमुना भुवः प्रपद्येऽमुनाऽमुनाऽमुना स्वः प्रपद्येऽमुनाऽमुनाऽमुना ॥ ३ ॥ स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदꣳ सर्वं भूतं यदिदं किञ्च तमेव तत्प्रापत्सि ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रथयेद्यतः। अन्तरिक्षेऽन्तरिक्षाख्यो यतः साध्वन्तरीक्षते। दिवि द्युनामा स विभुः सर्वक्रीडाकरत्वतः। प्रद्युम्नश्च भुवोनामा सृष्ट्या यद्भावयेज्जगत्। सोऽग्निनामा परो वह्वावत्ति सर्वं यतो हुतम्। वायुनामा स वायुस्थो वात्यायुश्चयतोऽस्य तत्। आदित्याख्यः स आदित्ये आददात्यायुरस्य यत्। स्वर्नामा त्वनिरुद्धोऽसौ परानन्द-प्रदत्वतः। ऋग्वेदाख्यः स ऋग्वेदे ज्ञानं वेदयते यतः। यजुर्वेदो यजुर्वेदे यज्ञं वेदयते यतः। सामवेदः सामवेदे साम्यं वेदयते ह्ययम्। एवं चतुर्विधं तत्त्वं तदवोचमहं हरेः। इत्युवाचेन्दिरा देवी स्तुवन्ती परमं हरिमि'ति च। पुल्लिङ्गेनोच्यते स्त्री च पुंवच्छक्तिमती यदी'ति च ॥ १५ ॥

'विष्णुपूजार्थयज्ञोऽहमित्युपासनमादरात्। कुर्वीत पुरुषो नित्यं तस्य यत्षोडशोत्तरम्। शतमायुस्तत्सवनत्रयमीरितमुत्तमम्। चतु-र्विंशत्तु यत्पूर्वं प्रातःसवनमेव तत्। प्रार्थयित्वा वसूंस्तद्धं पुमान्मृत्यु-मपानुदेत्। मध्ये चतुश्चत्वारिंशन्मध्यमं सवनं स्मृतम्। रुद्राणां-प्रार्थनेनात्र पुमान्मृत्युमपानुदेत्। ततोऽष्टचत्वारिंशत्तु तृतीयं सवनं

अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥ ५ ॥ अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥ ६ ॥ अथ यदवोचं स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येवतदवोचं तदवोचम् ॥ ७ ॥ १५ ॥

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनं चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीदꣳ सर्वं वासयन्ति ॥ १ ॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा वसव इदं मे प्रातःसवनं माध्यन्दिनꣳ सवनमनुसन्तनुतेति माऽहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीये-त्युद्धैव तत एत्यगदो ह भवति ॥ २ ॥ अथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यन्दिनꣳ सवनं चतुश्चत्वारिंशदक्षरा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनꣳ

SGDF
Sri Gargeshwari Digital Foundation

स्मृतम्। आदित्यानां प्रार्थनेन तद्वं मृत्युमपानुदेदि'ति सर्वयज्ञे। महिदासोऽन्यः कृष्णश्चान्य एव। 'महिदासस्त्वैतरेयः कृष्णोऽन्यो देवकीसुतः। कपिलश्च द्वितीयोऽन्यस्त्रय एते पुरा नराः। सञ्जत्योच्चैस्तपस्तेपुर्ब्रह्मणे परमेष्ठिने। मातुः स्वस्य च नामैक्यं विष्णुना स्यादिति ह्युभौ। स्वात्मशिष्यप्रशिष्याणां नामैक्यं कपिलस्तथा। एवमेव च वेदोक्ता भवेमेति त्वतन्द्रिताः। तान्वरान्प्रददौ तेषां ब्रह्मा लोकपितामहः। तस्मात्तन्नामिनश्चासंस्त्रयस्ते मुनयोऽपि हि। महिदासस्त्वैतरेयो बह्वृचोपनिषद्गतः। साक्षात्स भगवान्विष्णुस्तन्नामैको मुनिर्ह्यभूत्। कृष्णस्तु वासुदेवाख्यः परमात्मैव केवलम्। तन्नामा देवकीपुत्रस्त्वन्योऽप्यभवदञ्जसा। कपिलो वासुदेवाख्यः साक्षान्नारायणः प्रभुः। तन्नामा कपिलोऽन्यस्तु शिष्यनाम्ना सहाभवत्। स षोडशशतञ्जीवी महिदासोऽपरस्त्वृषिः। घोरशिष्यस्तथा कृष्णः कपिलश्च कुशास्त्रकृत्। त्रय एते वरं प्राप्य ब्रह्मणः परमेष्ठिनः। कृतकृत्याः प्रमुमुदुस्तन्नामानश्च तेऽभवन्नि'ति कालकीये॥ १६॥

सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदꣳ सर्वꣳ रोदयन्ति ॥ ३ ॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे माध्यन्दिनꣳ सवनं तृतीयंसवनमनुसन्तनुतेति माऽहं प्राणानां रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ ४ ॥ अथ यान्यष्टाचत्वारिꣳशद्वर्षाणि तत्तृतीयसवनमष्टाचत्वारिंशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वाव आदित्या एते हीदꣳ सर्वमाददते ॥ ५ ॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसन्तनुतेति माऽहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥ ६ ॥ एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत्प्र ह षोडशं वर्षशतं जीवति य एवं वेद ॥ ७ ॥ १६ ॥

SGDF
Sri Gargeshwari Digital Foundation

'स्वरूपभूतयज्ञस्य क्षुत्पिपासारतिस्तथा। दीक्षा भोजनपाने च रतिश्चोपसदः स्मृताः। व्यवायहासभक्षास्तु स्तुतशस्त्रात्मकाः स्मृताः। तपो दानार्जवाहिंसाः सत्यमप्यस्य दक्षिणा। सोऽष्यत्य- सोष्टेति ततो यज्ञवत्पुत्रजन्मनि। आहुर्हि पुनरुत्पत्तिः प्रसवः प्रथमा पितुः। यज्ञस्नानं तु मरणं तदा ध्यायेत्त्रयं पुमान्। भगवन्नक्षयोऽसि त्वमच्युतोऽसि गुणैः सदा। प्राणाच्च सुखितो नित्यमाधिक्येनेति चिन्तयेदि'ति सत्त्वे। आदित्तस्मादेव तत्प्रसादादेव। प्रत्नस्य पुरातनस्यानादेर्भगवतो रेतसः रतिरूपस्य ज्योतिः पश्यन्ति। वासेन रमयतीति वासरम्। दिवःपरतो वैकुण्ठे यदिध्यते। ऋद्धतममेव सर्वदा। 'अथ यदतः पर'इत्युक्तत्वाच्च। न चादित्यमण्डलं दिवः परतः। उत्तरं ज्योतिः पश्यन्तः स्वरानन्दरूपं परिपश्यन्तो वयं तमस उदगन्म। उत्तरं ज्योतिः पश्यन्तस्तदेवोत्तरं स्वश्च पश्यन्तः। द्विरुक्तिस्तात्पर्यार्था। उदाख्यं ज्योतिरुत्तमं तमसः सकाशादगन्म प्राप्ताः स्मेत्यर्थः। 'तस्योदितिनामे'ति श्रुतेः। देवत्रादेवं देवविषयेऽपि देवं देवानां देवमित्यर्थः। सूरिभिः प्राप्यत्वात्सूर्यम्। 'रतिरूपं परं ज्योतिरनादेः केशवस्य यत्। तत्प्रसादेन पश्यन्ति हृदि वासाद्रति-

---

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः ॥ १ ॥ अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥ २ ॥ अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ॥ ३ ॥ अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणाः ॥ ४ ॥ ददात्यात्म- दक्षिणं वा एतद्यत्सत्रमिति तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादन- मेवास्य तन्मरणमेवावभृथः ॥ ५ ॥ तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसꣳशितमसीति तत्रैते द्वे ऋचौ भवतः ॥ ६ ॥ आदित्प्रत्नस्य रेतस उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरं स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ ७ ॥ १७ ॥

SGDF
Sri Gangeshwari Digital Foundation

प्रदम् । यत्पूर्णं सर्वदा भाति वैकुण्ठे परतो दिवः । तदुदाख्यं प्रपश्यन्तो निर्गत्य तमसो वयम् । ज्योतिरानन्दसद्रूपमुत्तमोत्तममुत्तमम् । देवानां दैवतं साक्षात्सूरिप्राप्यं परं पदम् । प्राप्ताः स्म वासुदेवाख्यमिति मन्त्रदृगब्रवीदि'ति नारायणीये ॥ १७ ॥

'मनःसंस्थस्तु यो देवः साक्षान्नारायणः प्रभुः । स एवाकाशसंस्थश्च मन आकाशनामकः । मननान्मन आकाश आसमन्तात्प्रकाशनात् । वासुदेवादिभेदेन स वागादिषु संस्थितः । अग्न्यादिषु च तन्नामा वागादिस्थः स एव तु । अग्न्यादिस्थैः सहैवेशो भाति दुष्टांस्तपत्यथ । एवंविद्वांस्तमीशेशं यशोज्ञानसुखात्मताम् । कीर्तिं च ब्रह्मसम्प्राप्त्या वरतां मुक्तिगामपि । प्राप्य भाति तपत्यद्धा स्वाज्ञानादिकमेव चे'ति च ॥ १८ ॥

'अगम्यत्वादसन्नाम ब्रह्म नारायणाभिधम् । प्रलये वासुदेवाख्यं गम्यं सदभवद्विदाम् । तत्प्रकृत्या समभवत्तत आण्डमजायत ।

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ १ ॥ तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राणः पादश्चक्षुःपादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतमग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ २ ॥ वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ३ ॥ प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ४ ॥ चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ५ ॥ श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ ६ ॥ १८ ॥

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निर-

SGDF
Sri Gargeshwari Digital Foundation

प्रदम्। यत्पूर्णं सर्वदा भाति वैकुण्ठे परतो दिवः। तदुदाख्यं प्रपश्यन्तो निर्गत्य तमसो वयम्। ज्योतिरानन्दसद्रूपमुत्तमोत्तमसूत्तमम्। देवानां दैवतं साक्षात्सूरिप्राप्यं परं पदम्। प्राप्ताः स्म वासुदेवाख्यमिति मन्त्रदृगब्रवीदि'ति नारायणीये ॥ १७ ॥

'मनःसंस्थस्तु यो देवः साक्षान्नारायणः प्रभुः। स एवाकाशसंस्थश्च मन आकाशनामकः। मननान्मन आकाश आसमन्तात्प्रकाशनात्। वासुदेवादिभेदेन स वागादिषु संस्थितः। अग्न्यादिषु च तन्नामा वागादिस्थः स एव तु। अग्न्यादिस्थैः सहैवेशो भाति दुष्टांस्तपत्यथ। एवंविद्वांस्तमीशेशं यशोज्ञानसुखात्मताम्। कीर्तिं च ब्रह्मसम्प्राप्त्या वरतां मुक्तिगामपि। प्राप्य भाति तपत्यद्धा स्वाज्ञानादिकमेव चे'ति च ॥ १८ ॥

'अगम्यत्वादसन्नाम ब्रह्म नारायणाभिधम्। प्रलये वासुदेवाख्यं गम्यं सदभवद्विदाम्। तत्प्रकृत्या समभवत्तत आण्डमजायत।

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ १ ॥ तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राणः पादश्चक्षुःपादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतमग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ २ ॥ वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ३ ॥ प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ४ ॥ चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ५ ॥ श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ ६ ॥ १८ ॥

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निर-

SGDF
Sri Gurgeshwari Digital Foundation

तस्मिन्नादित्यनामासावभवत्सूर्यमण्डले। नियन्तैव च सूर्यस्य भगवान् पुरुषोत्तमः। तस्मिन्नादित्यनामानमादित्यस्थं जनार्दनम्। ब्रह्मोपासीत परमं सर्ववेदज्ञता तत'इति ब्रह्मतत्त्वे। उल्लूलव उरूरवः। अतिमहान्तो गायत्र्यादिघोषाः उप च निम्रेडेरन्। मुक्ते तस्मिन्नेव वसेयुः। 'सूर्यबिम्बस्थिते विष्णौ जायमाने परात्मनि। गायत्रीपूर्वकैर्वेदैर्ब्रह्माद्यास्समुपस्थिताः। उपतिष्ठन्त्यतो नित्यं गायत्र्यादिभिरञ्जसा। तद्विद्वान्मुक्त आवासो वेदानां सर्वदा भवेदि'ति च ॥ १९ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये तृतीयोध्यायः ॥ ३ ॥

हरिः ॐ ॥ भल्लाक्ष मन्दाक्ष। यथा कृते जिते त्रेतादिजयफलं च तस्यैव भवति। एवमन्येषां पुण्यफलं प्राधान्येन तस्यैव भवति

भिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् ॥ १ ॥ तद्यद्रजतं सेयं पृथिवी यत्सुवर्णं सा द्यौर्यज्जरायु ते पर्वता यदुल्बं स मेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकꣳ स समुद्रोथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उल्लूलवोनूदतिष्ठन्त्सर्वाणि च भूतानि च सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उल्लूलवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः ॥ ३ ॥ स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन् ॥ ४ ॥ १९ ॥ इति श्रीमच्छान्दोग्योपनिषदि तृतीयोऽध्यायः ॥ ३ ॥

॥ ॐ ॥ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत आवसथान्मापयाञ्चक्रे सर्वत एव मेऽत्स्यन्तीति ॥ १ ॥ अथ ह हꣳसा निशायामतिपेतुस्तद्धैवꣳ हꣳसो हꣳसमभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीरिति तमु ह परः प्रत्युवाच कम्वर एनमेतत्सन्तꣳ सयुग्वानमिव रैक्कमात्थेति यो नु कथꣳ सयुग्वा रैक्क इति ॥ ३ ॥ यथा कृतायविजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥ ४ ॥

SGDF
Sri Gangadhareswar Digital Foundation

अरे अङ्ग इष्ट सयुग्वारैको ज्ञातव्यः। अहं ह्यरा ३ इति प्लुतिः पामकषणभावेन ॥ १ ॥

शुचा द्रवणाच्छूद्रः। 'राजा पौत्रायणः शोकाच्छूद्रेति मुनिनोदितः। प्राणविद्यामवाप्यास्मात्परं धर्ममवाप्नवानि'ति पाद्मे ॥ २ ॥

'संवृंक्ते सर्वदेवान्यद्वायुः संवर्ग ईरितः। महिमाऽस्य महानेष यदनद्योऽस्ति देवता' इति प्रभञ्जने। 'दशेति वै सर्वमि'ति श्रुतेः।

तदु ह जानश्रुतिः पौत्रायण उपशुश्राव स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु कथꣳ सयुग्वा रैक्व इति ॥ ५ ॥ यथा कृताय विजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥ ६ ॥ स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय तꣳ स होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमृच्छेति ॥ ८ ॥ सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश तꣳ हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्व इत्यहꣳ ह्यरा३ इति प्रति ह जज्ञे स ह क्षत्ताऽन्विष्याविदमिति प्रत्येयाय ॥ ८ ॥ १ ॥

तदु ह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे तꣳ हाभ्युवाद ॥ १ ॥ रैक्वेमानि षट् शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवताꣳशाधि यां देवतामुपास्स इति ॥ २ ॥ तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति तदुह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥ ३ ॥ तꣳ हाभ्युवाद रैक्वेदꣳ सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायाऽयं ग्रामो यस्मिन्नास्सेऽन्वेव मा भगवः शाधीति ॥ ४ ॥ तस्याह मुखमुपोद्गृह्णन्नुवाचाजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति ते हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवास तस्मै होवाच ॥ ५ ॥ २ ॥

वायुर्वाव संवर्गो यदा वा महाप्रलये अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ॥ ॥ १ ॥ यदाऽऽप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्त्सर्वान् संवृङ्क्त इत्यधिदैवतम् ॥ २ ॥ अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणꣳ चक्षुः प्राणꣳ श्रोत्रं प्राणं मनः प्राणो

SGDF
Sri Gangeshwari Digital Foundation

कृतस्य च पूर्णात्मकत्वादध्यात्माधिदैवतभेदेन पञ्चदेवता दशभूताः कृतम् । तस्माद्वायुना सह दशसङ्ख्यापूरणात्सर्वदिक्षु स्थिता देवता वायुना सहान्नमेव । अन्नादी देवता विराड्विष्णुरेव । अनद्यमान इत्यन्यैरनद्यमानः । 'वायुस्तु सर्वदेवात्ता वायोरत्ता जनार्दनः । न तस्य कश्चिदत्तास्ति स विराडधिराजनादि'ति च ॥ ३ ॥

'आर्जवं ब्राह्मणे साक्षाच्छूद्रोऽनार्जवलक्षणः । गौतमस्त्विवति विज्ञाय सत्यकाममुपानयदि'ति सामसंहितायाम् ॥ ४ ॥

ह्येवैतान्सर्वान्त्संवृक्त इति ॥ ३ ॥ तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥ ४ ॥ अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः ॥५॥ स होवाच महात्मनश्चतुरो देव एकः कः सो (स) जागर भुवनस्य गोपास्तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन्बहुधा वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ॥ ६ ॥ तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येया-यात्मा देवानां जनिता प्रजानाꣳ हिरण्यदꣳष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुरनद्यमानो यदन्नमत्तीति वै वयं ब्रह्मचारिन्निदमुपास्महे दत्तास्मै भिक्षामिति ॥ ७ ॥ तस्मा उ ह ददुस्ते वा एते पञ्चान्येपञ्चान्ये दश सन्तस्तत्कृतं तस्मात्सर्वासु दिक्ष्वन्नमेव दश कृतꣳ सैषा विराडन्नादी तयेदꣳ सर्वं दृष्टꣳ सर्वमस्येदं दृष्टं भवत्यन्नादो भवति य एवं वेद य एवं वेद ॥ ८ ॥ ३ ॥

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे ब्रह्मचर्यं भवति विवत्स्यामि किंगोत्रो न्वहमस्मीति ॥ १ ॥ सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकामो जाबालो ब्रवीथा इति ॥ २ ॥ स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ॥३॥ तꣳ होवाच किंगोत्रो नु सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽह-मस्म्यपृच्छं मातरꣳ सा मा प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साऽहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहꣳसत्यकामो जाबालोऽस्मि भो इति ॥४॥

SGDF
Sri Gargeshwari Digital Foundation

'वायुर्वृषभरूपः सन्नग्निर्हंसश्चतुर्मुखः । मद्गुरूपश्च वरुणः सत्यकामाय होचिरे । प्रकाशानंततेजोवत्स्थानवत्संज्ञिका हरेः ।

तꣳ होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधꣳ सोम्याऽऽहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःशता (तं) गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तयेति स ह वर्षगणं प्रोवास ता यदा सहस्रꣳ सम्पेदुः ॥ ५ ॥ ४ ॥

अथ हैनमृषभोऽभ्युवाद सत्यकामा ३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य सहस्रꣳ स्मः प्रापय न आचार्यकुलम् ॥ १ ॥ ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम ॥ २ ॥ स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३ ॥ ५ ॥

अग्निष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तमग्निरभ्युवाद सत्यकामा३इति भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम ॥ ३ ॥ स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति य एतमेवंविद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ॥ ४ ॥ ६ ॥

हꣳसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तꣳ हꣳस उपनिपत्याभ्युवाद सत्यकामा३इति भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाचाग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम ॥ ३ ॥ स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति

SGDF
Sri Gangeshwari Digital Foundation

वासुदेवादिका मूर्तीः प्रत्येकं चतुरात्मनः। दिगादिषु स्थितास्तेषामधिपाश्च तदाख्यकाः। नाचार्यबुध्या तैरुक्तमतोऽनुज्ञां गुरोरगात्। उत्तमाचार्यसम्प्राप्त्यै नावराचार्यतः क्वचित्। इच्छेदनुज्ञां श्रुत्वापि नानुज्ञां प्रार्थयेत्ततः। ऋषिभ्यस्तूत्तमा देवा देवेभ्यो वायुरुत्तमः। वायोश्च भगवान्विष्णुर्न तस्मादुत्तमो गुरुरि'त्याचार्यसंहितायाम्। अत्र ह न किञ्चन वीयाय देवेभ्यः श्रुत्वा न च ते काचिद्धानिरभवदित्यर्थः ॥ ९ ॥

प्राणो ब्रह्म बलरूपं ब्रह्म कमानन्दरूपं खं ज्ञानरूपम्। 'अपरं

य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ४ ॥ ७ ॥

मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तं मद्गुरुपनिपत्याभ्युवाद सत्यकामा३ इति भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नाम ॥ ३ ॥ स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिँल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥ ४ ॥ ८ ॥

प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकामा३ इति भगव इति ह प्रतिशुश्राव ॥ १ ॥ ब्रह्मविदिव वै सोम्य भासि को नु त्वाऽनुशशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवांस्त्वेव मे कामे ब्रूयात् ॥ २ ॥ श्रुतꣳ ह्येव मे भगवद्दृशेभ्य आचार्याद्ध्येव विद्या विदिता साधिष्ठं प्रापयतीति तस्मै हैतदेवोवाचात्र ह न किञ्चन वीयायेति वीयायेति ॥ ॥ ३ ॥ ९ ॥

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादश वर्षाण्यग्नीन्परिचचार स ह स्मा अन्यानन्तेवासिनः समावर्तयꣳस्तꣳ ह स्मैव न समावर्तयति ॥ १ ॥ तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्परिचचारीन्मा त्वाऽग्नयः परिप्रवोचन्प्रब्रूह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे ॥ २ ॥ स ह व्याधिनाऽनशितुं दध्रे

SGDF
Sri Gangadhareswar Digital Foundation

ब्रह्म स प्राणः साक्षाद्यो बलदेवता । ज्ञानानन्दात्मकं पूर्णं परं ब्रह्म स्वयं हरिः । नैजानन्दबलोद्रेकः कमित्युक्तो मनीषिभिः । बलज्ञान-समाहारः पूर्णः खमितिशब्दितः । तदात्मकः परो विष्णुराकाश इति कीर्तितः । एवं प्राणस्तथाऽऽकाशो ब्रह्मणी द्वे प्रकीर्तिते' इति च । प्राणशब्दस्य वायुरर्थः प्रसिद्धः । कखयोर्भिन्नार्थत्वशङ्कया कं च खं च न विजानामीत्याह । अतएवैक्याभिप्रायेण यद्वाव कं तदेव खं यदेव खं तदेव कमित्यूचुः ॥ १० ॥

'पृथुत्वात्पृथिवी विष्णुरग्निश्चाप्यङ्गनेतृतः । अन्नमत्तृत्वतो नित्यमादित्यश्चादिरूपतः । आप आपालनाच्चैव देशनाद्दिश एव च । अनन्यराजो नक्षत्रमानन्दत्वाच्च चन्द्रमाः । प्राणोऽसौ बलरूपत्वा-दाकाशः पूर्तिहेतुतः । द्यौः प्रकाशस्वरूपत्वाद्वेदनाद्विद्युदेव च । यः

तमाचार्यजायोवाच ब्रह्मचारिन्नशान किं नु नाश्नासीति स होवाच बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि नाशिष्या-मीति ॥ ३ ॥ अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः परिच(र्य)-चारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः ॥ ४ ॥ प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः ॥ ५ ॥ १० ॥

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति नास्या-प(व)रपुरुषाः क्षीयन्ते उप वयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥ ११ ॥

अथ हैनमन्वाहार्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्ते उप वयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥ १२ ॥

SGDF
Sri Gargeshwari Digital Foundation

सोमसूर्यविद्युत्सु तत्तन्नामा हरिः परः। अहेयत्वादहंनामा गार्हपत्यादिसंस्थित'इति तत्त्वसंहितायाम्। जीवैक्यपक्षे आदित्ये पुरुषं चन्द्रमसि विद्युतीति भेदव्यपदेशो न युज्यते। पृथिव्यग्निरन्नमादित्य आदित्ये पुरुष इत्यादिना आदित्यादिशब्दवाच्यौ प्रथमार्थः सप्तम्यर्थश्च द्वौ प्रतीयेते। अतो नैक्यमुच्यते। स एवाहमस्मीत्यन्तर्यामिणोः सर्वविशेषाभावज्ञापनार्थम्। पूर्वं सोहमस्मीत्यभेदे तात्पर्याधिक्यज्ञापनाय। 'अहमस्म्यादिकाः शब्दा अन्तर्यामिणि मुख्यतः। तत्सम्बन्धाज्जीवगाश्च तस्माद्भेदगता हरौ। अस्मच्छब्दोदितोऽन्तःस्थ आत्मा व्याप्तो जनार्दनः। अग्नयो द्विविधं विष्णुमवोचन्नुपकोसल' इति सामसंहितायाम्। नास्यावरपुरुषाः क्षीयन्ते भृत्यवानेव भवति। लोकी भगवल्लोकी भवति ॥ १३ ॥ इह च अव च इहावे। इहेति मनुष्यलोकस्था उच्यन्ते अवेति पातालस्थाः। मानुषासुरौ भगवन्तं निह्नुत एव न वक्तुं समर्थौ। अतो देवा एव मामनुशासुरित्यर्थः। ईदृशा इति वर्णतो ज्वालावर्णा इति। अन्यादृशाश्च करशिरश्चरणादि-

---

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥ १३ ॥

ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्यात्मविद्या चाचार्यस्तु ते गतिं वक्तेत्याजगाम हास्याचार्यस्तमाचार्योऽभ्युवादोपकोसला३ इति ॥१॥ भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वानुशशासेति को नु माऽनुशिष्याद्भो इतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इतीहाग्नीनभ्यूदे किं नु सोम्य किल तेऽवोचन्निति ॥ २ ॥ इदमिति ह प्रतिजज्ञे लोकान्वाव किल सोम्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै होवाच ॥ ३ ॥ १४ ॥

SGDF
Sri Gangeshwari Digital Foundation

मन्तः । चन्द्रादिसर्वनामवत्त्वात् । 'यो देवानां नामधा एक एवे'ति-श्रुतेर्विष्णोरेव सर्वनामानि ॥ १४ ॥

असङ्गभगवत्स्थानत्वाच्चक्षुषोऽसङ्गत्वमुच्यते । 'यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुषु । तस्मै नमो भगवते वामनाय परात्मन'इति महाकौर्मे । इमं मानवमावर्तं नावर्तन्ते । मानवा यत्रावर्तन्ते स मानवावर्तः । तं मानवावर्तं प्रति नावर्तन्ते । 'चक्षुस्थं वामनं वेद स पुनर्नैव जायते । मुक्तो दुस्तरसंसाराद्वामनं प्राप्नुतेऽचिरादि'ति च ॥ १५ ॥

'यज्ञाभिमानी यज्ञाख्यो वायुर्यज्ञे प्रतिष्ठितः । ज्ञ शुद्धभाव इत्यस्माद्यन्नयं पावयेद्यतः । अतो वायुर्यज्ञनामा तत्पादौ वाङ्मनः-स्थितौ । दक्षिणोऽस्य मनःसंस्थो ब्रह्मर्त्विक्तस्य पूजकः । होत्राद्या वाचि संस्थस्य वामपादस्य पूजकाः । तस्मात्प्रातरनूवाकपरिधान्यो-

---

य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृत-मभयमेतद्ब्रह्मैतस्मिन्न किञ्चन श्लिष्यति तद्यद(द्यप्य)स्मिन्त्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति ॥ १ ॥ एत॰ संयद्वाम इत्याचक्षत एत॰ हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद ॥ २ ॥ एष उ एव वामनिरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद ॥ ३ ॥ एष उ एव भामनिरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद ॥ ४ ॥ अथ यदु चैवास्मिंच्छव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासा॰स्तान्मासेभ्यः संवत्सर॰ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो-मानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन खलु प्रतिपद्य-माना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते ॥ ५ ॥ १५ ॥

एष ह वै यज्ञो योऽयं पवत एष (ह)यन्निद॰ सर्वं पुनाति यदेष यन्निद॰ सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक्च वर्तनी ॥ १ ॥ तयोरन्यतरां मनसा स॰स्करोति ब्रह्मा वाचा होताऽध्वर्युरुद्गातान्यतरा॰ स (अथ) यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यपवदति॥२॥

SGDF
Sri Gangeshwari Digital Foundation

र्यदन्तरा । ब्रह्मा चेदुत्सृजेद्वाचं यज्ञपाल्लोपकृद्भवेत् । वाङ्मनःपाद-यज्ञाख्यप्रतिमो वायुरीरितः । ध्यायन्वायुं हरिं चैव ततो ब्रह्मा मुनिर्भवेत् ॥ १६ ॥

अग्निर्नासिक्यवायुश्च सूर्यो लोकरसाश्रयः । अग्नेः रसस्तु ऋग्वेद-मानी ब्रह्मा प्रकीर्तितः । नासिक्यवायोस्तु रसो यजुर्वेदात्मको हरः । सामवेदाभिमानी तु वायुः सूर्यरसः स्मृतः । वराहसिंहकपिलास्तेषां भूरादिनामकाः । व्याहृतीभिस्ततो जुह्वन्ब्रह्मैवंविद्भिरिष्टितः । सर्वान्स ऋत्विजो रक्षेद्ब्रह्मैवंवित्ततो भवेदि'ति च । उदक्प्रवण ऊर्ध्वप्रवणः

अन्यतरामेव वर्तनीꣳ संस्कुर्वन्ति हीयतेऽन्यतरा स यथैकपाद्व्रजन्रथो वै केन चक्रेण वर्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञꣳ रिष्यन्तं यजमानोऽनुरिष्यति स इष्ट्वा पापीयान्भवति ॥ ३ ॥ अथ यत्रोपाकृते प्रातरनुवाकेन पुरा परिधानीयाया ब्रह्मा व्यववदत्युभे एव वर्तनी सꣳस्कुर्वन्ति न हीयतेऽन्यतरा ॥ ४ ॥ स यथोभयपाद्व्रजन्रथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति स इष्ट्वा श्रेयान्भवति ॥ ५ ॥ १६ ॥

प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानाꣳ रसान्प्राबृहदग्निं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः ॥१॥ स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानाꣳ रसान्प्राबृहदग्नेर्ऋचो वायोर्यजूꣳषि सामान्यादित्यात् स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्राबृहद्भूरित्यृग्भ्यो भुव इति यजुर्भ्यः स्वरिति सामभ्यः ॥ ३ ॥ तद्यदृक्तो रिष्येद्भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टꣳ सन्दधाति ॥ ४ ॥ अथ यदि यजुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयाद्यजुषामेव तद्रसेन यजुषां वीर्येण यजुषां यज्ञस्य विरिष्टꣳ सन्दधाति ॥ ५ ॥ अथ यदि सामतो रिष्येत्स्वः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टꣳ सन्दधाति ॥६॥ तद्यथा लवणेन सुवर्णꣳ सन्दध्यात्सुवर्णेन रजतꣳ रजतेन त्रपु त्रपुणा सीसꣳ सीसेन लोहं लोहेन दारु दारुचर्मणा ॥ ७ ॥ एवमेषां लोकाना-मासां देवतानामस्यास्त्रय्या विद्याया वीर्येण यज्ञस्य विरिष्टꣳ सन्दधाति भेषजकृतो ह वा एष यज्ञो यत्रैवंविद्ब्रह्मा भवति ॥ ८ ॥ एष ह वा

SGDF
Sri Gangeshwari Digital Foundation

ऊर्ध्वलोकानुसारी । यज्ञस्य दुरिष्टया यतो यतः स्थानादावर्तते तत्त-त्स्थानमेवंविदा ब्रह्मणा गच्छति । तद्ब्रह्मैवैकर्त्विक्कुरून्कर्तॄर्यजमानादी-नभिरक्षति । अश्वा आशुज्ञानी । वा गतिगन्धनयोरिति धातोः । गतिशब्दश्चावगतौ भवति । 'दीर्घबिन्दुविसर्गादीनां लोपो वे'ति-सूत्रादाशुवैवाश्वा ॥ १७ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य-विरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

हरिः ओं ॥ 'यः श्रेष्ठं ज्येष्ठमखिलदेवानां वायुमञ्जसा । वेद स स्वसमानानां ज्येष्ठःश्रेष्ठो विमुक्तिगः । समीपे वसतां श्रेष्ठो वसिष्ठस्यैव वेदनात् । एकस्थाने स्थितिस्तु स्यात्प्रतिष्ठाज्ञस्य चेच्छतः । सम्पद्धेतुस्सम्पदः स्युर्गृहं चायतनं विदः । ज्येष्ठः श्रेष्ठो वसिष्ठश्च

उदक्प्रवणो यज्ञो यत्रैवंविद्ब्रह्मा भवत्येवंविद॰ ह वा एषा ब्रह्माणमनुगाथा यतो यत आवर्तते तत्तद्गच्छति ॥९॥ मानवो ब्रह्मैवैक ऋत्विक्कुरूनश्वाभि-रक्षत्येवंविद्ध ह वै ब्रह्मा यज्ञं यजमान॰ सर्वा॰श्चर्त्विजोऽभिरक्षति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ॥ १० ॥ १७ ॥ इति श्रीमच्छान्दोग्योपनिषदि चतुर्थोऽध्यायः ॥ ४ ॥

हरिः ओं ॥ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥ १ ॥ यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः ॥ २ ॥ यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मि॰श्च लोकेऽमुष्मि॰श्च चक्षुर्वाव प्रतिष्ठा ॥ ३ ॥ यो ह वै सम्पदं वेद स॰हास्मै कामाः सम्पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रं वाव सम्पद्यत् ॥ ४ ॥ ये ह वा आयतनं वेदायतन॰ ह स्वानां भवति मनो ह वा आयतनम् ॥ ५ ॥ अथ ह प्राणा अह॰श्रेयसि व्यूदिरेऽह॰श्रेया-नस्म्यह॰श्रेयानस्मीति ॥ ६ ॥ ते ह प्राणाः प्रजापतिं पितरमेत्योचु-र्भगवन्को नः श्रेष्ठ इति तान्होवाच यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतर-मिव दृश्येत स वः श्रेष्ठ इति ॥ ७ ॥ सा ह वागुच्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथाऽकला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥ ८ ॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच

SGDF
Sri Gangeshwari Digital Foundation

सम्पदायतनं तथा । वायुरेव महांस्तस्य प्रसादादग्निरेव तु । उपचारतो वसिष्ठः स्यात्प्रतिष्ठैवं रविस्ततः । सम्पदिन्द्रस्तथैवोक्तो रुद्र आयतनं तथे'ति प्रभावे । 'सर्वेन्द्रियाणां व्यापारान्प्राण एव करोत्ययम् । इन्द्रियस्थः पृथक्चासौ शक्तोऽपि स्वयमेव तु । षण्मासात्पूर्वं बालानां केवलं प्राणतो भवेत् । व्यापार्यं मनसा सर्वमतः पश्चादसंस्मृतिः । तुरीयायामवस्थायां प्राणादेव विबोधनम् । तथापि संस्मृतिस्तत्र प्राणवश्यतया भवेत् । प्राणस्य वश्यतानाम भक्त्या स्यात्तत्प्रसादतः । प्राणे वश्ये मनो वश्यमिन्द्रियाणि च सर्वश'इति च । अक्षेषु प्रतिप्रति स्थितत्वादनः प्रत्यक्षम् । 'प्राणविज्ञानयोग्यस्तु रुद्रो मुख्यतया स्मृतः । तस्मात्स सर्वभोक्ता स्यात्तदन्येषां स्वयोग्यत'इति च ॥ 'सिद्धमेवान्न-

---

कथमशकतर्ते मज्जीवितुमिति यथान्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥९॥ श्रोत्रꣳहोच्चक्राम तत्संवत्सरं प्रोष्य पर्यैत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्यैत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥ ११ ॥ अथ ह प्राण उच्चक्रमिषन्त्स यथा सुहयः पड्वीशशङ्कून्त्सङ्खिदेदेवमितरान्प्राणान्त्समखिदत्तꣳ हाभिसमेत्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ॥ १२ ॥ अथ हैनं वागुवाच यदहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठोसीति ॥ १३ ॥ अथ हैनꣳ श्रोत्रमुवाच यदहꣳ सम्पदस्मि त्वं तत्सम्पदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥१४॥ न वै वाचो न चक्षूꣳषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवति ॥ १५ ॥ १ ॥

स होवाच किं मेऽन्नं भविष्यतीति यत्किञ्चिदिदमाश्वभ्य आशकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह

SGDF
Sri Gangeshwari Digital Foundation

वस्त्राद्यं विष्णोः स्वातन्त्र्यतः सदा। स्वार्थं समर्पयेद्विष्णौ यथा प्राणे सुराः पुरे'ति कर्मानुपूर्व्याम्। 'प्राणस्य वस्त्रबुध्या तु भोजनोभयतः पिबन्। स्वर्गे मुक्तौ तथा दिव्यवस्त्रलाभी भवत्यलमि'ति प्रभञ्जने। 'योग्यस्य प्राणविद्यायां स्थाणोरपि हि तच्छ्रुतेः। पलाशाद्यं भवेदत्र परतो मुक्तिरेव च। विष्णोर्ज्ञानमनुप्राप्य भवेन्नास्त्यत्र संशय' इति प्राणसंहितायाम्। 'ज्येष्ठश्रेष्ठादिकैर्हुत्वा प्राणायात्र परत्र च। ज्येष्ठः श्रेष्ठः समानेभ्यो भवेन्नात्र विचारणे'ति च। सवितुर्जगत्प्रसवितुर्विष्णोः सकाशाद्वयं भोजनं रक्षां सर्वभोगांश्च वृणीमहे। भगस्य समग्रैश्वर्यादि-सर्वगुणस्वरूपस्य विष्णोः॥ पुरुषं तुरं वायुं श्रेष्ठं सर्वधातॄणां उत्तमं

वा एवंविदि किञ्चनानन्नं भवतीति॥१॥ स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो ह भवति॥२॥ तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येतच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति॥३॥ अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्याꣳ रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्॥४॥ वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्सम्पदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्॥५॥ अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदꣳ स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ राज्यमाधिपत्यं गमयत्वहमेवेदꣳ सर्वमसानीति॥६॥ अथ खल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति श्रेष्ठꣳ सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति निर्णिज्य कꣳसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात्॥७॥ तदेष श्लोकः यदा कर्मसु काम्येषु स्त्रियꣳ स्वप्नेऽभिपश्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्ननिदर्शन इति॥८॥२॥

SGDF
Sri Gargeshwari Digital Foundation

च धीमहि । 'नारायणीयं तं वायुं चिन्तयित्वोत्तमोत्तमम् । जगत्प्रसवितुर्विष्णोः सकाशाद्भोगमाप्नुम' इति च ॥ २ ॥

नारायणादयः पञ्च क्रमात्पञ्चाग्नयः स्मृताः । अदनादङ्गनेतृत्वान्नितरामचलत्वतः । समेधनात्समिद्विष्णुर्धूत्कारात्धूम उच्यते । अरश्चितत्वादर्चिश्च सोङ्गारोऽङ्गरतेरपि । विविधं स्फुरणाच्चैव विष्फुलिङ्ग इतीरितः । पुनर्नारायणाद्यात्मा प्रत्येकं पञ्चरूपवान् । आदित्यस्स तथादानाद्रश्मी रतिशरूपतः । तमसाऽहननीयत्वादहश्चन्द्रः परस्सुखम् ।

श्वेतकेतुर्हारुणेयः पञ्चालानाꣳ समितिमेयाय तꣳ ह प्रवाहणो जैबिलिरुवाच कुमारानु त्वाऽशिषत्पितेत्यनु हि भगव इति ॥ १ ॥ वेत्थ यदितोऽधि प्रजाः प्रयन्तीति न भगव इति वेत्थ यथा पुनरावर्तन्त ३ इति न भगव इति वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना ३ इति न भगव इति ॥ २ ॥ वेत्थ यथाऽसौ लोको न सम्पूर्यत ३ इति न भगव इति वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति नैव भगव इति ॥ ३ ॥ अथनु किमनुशिष्टोऽवोचथा यो हीमानि न विद्यात्कथꣳ सोऽनुशिष्टो ब्रवीतेति स हाऽऽयस्तः पितुरर्धमेयाय तꣳ होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाऽशिषमिति ॥ ४ ॥ पञ्च मा राजन्यबन्धुः प्रश्नानप्राक्षीत्तेषां नैकं च नाशकं विवक्तुमिति स होवाच यथा मा त्वं तातै(तदे)तानवदो यथाहमेषां नैकं च न वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति ॥ ५ ॥ स ह गौतमो राज्ञोऽर्धमेयाय तस्मै ह प्राप्तायार्हाञ्चकार स ह प्रातः सभाग उदेयाय तꣳ होवाच मानुषस्य भगवान् गौतम वित्तस्य वरं वृणीथा इति स होवाच तवैव राजन्मानुषं वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव(मे)- ब्रूहीति स ह कृच्छ्री बभूव ॥ ६ ॥ तꣳ ह चिरं वसेत्याज्ञापयाञ्चकार तꣳ होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक्त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ॥ ७ ॥ ३ ॥

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विष्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति ॥ २ ॥ ४ ॥

SGDF
Sri Gurgeshwari Digital Foundation

अनन्यराजो नक्षत्रं वायुर्ज्ञानायुरूपतः । अभ्रमम्भरणाद्विष्णुर्विद्यु-द्विद्योतनादपि । अशनादशनिश्चैव निर्हादाद्ध्रादुनिस्तथा । संवत्सरो वासनाच्च स आकाशः प्रकाशनात् । रात्रिश्च रतिदानात्स दिशतीति दिशः स्मृतः । अवान्तरं दिशेद्यस्मादवान्तरदिगुच्यते । वचनाद्वाक् तथा प्राणस्त्वननाच्चक्षुरुच्यते । दर्शनाच्छ्रवणाच्छ्रोत्रं जिह्वा वै होमतः स्मृतः । उपस्थितेरुपस्थः स उपमन्त्रकृदेव सः । योनिर्युनक्ति यस्मात्स सर्वान्तःकृच्च नन्दनः । असौ लोकः प्रकाशत्वात्प्राणस्थत्वाच्च केशवः । पर्जन्यो जनको यस्मात्पृथिवी प्रथितत्वतः । पुरुषः पुरु यस्मात्स योषा जोष्यो यतोऽखिलैरि'ति सामसंहितायाम् । 'अभ्र धूमादिभावस्तु जीवस्याभ्रादिसंस्थितिः । अभ्रादिमानिरूपं तु ज्ञानि-

---

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चि-रशनिरङ्गारा ह्रादुनयो विष्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा-स्सोमꣳ राजानं जुह्वति तस्या आहुतेर्वर्षः सम्भवति ॥ २ ॥ ५ ॥

पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विष्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मि-न्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नꣳ सम्भवति ॥ २ ॥ ६ ॥

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वार्चि-श्चक्षुरङ्गाराः श्रोत्रं विष्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेतः सम्भवति ॥ २ ॥ ७ ॥

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दाविष्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवति ॥ ॥ २ ॥ ८ ॥

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बाऽऽ-वृतो गर्भो दश वा (नव वा) मासानन्तः शयित्वा यावद्वाथ जायते ॥१॥ स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः सम्भूतो भवति ॥ २ ॥ ९ ॥

तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिष-मभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति

SGDF
Sri Gargeshwari Digital Foundation

प्राप्यं यतो भवेदि'ति च। परमस्य जन्यमिति पर्जन्यः। 'पञ्च पञ्च स्वरूपेण सूर्यादौ संस्थितो हरिः। स्वर्गादौ चापि तन्नामा तद्योगान्नामिनः पर' इति च ॥ १० ॥

प्रत्यब्दयज्ञकृत्सम्यङ्महाशालः प्रकीर्तितः। वेदवेदार्थवित्सम्यङ्महाश्रोत्रिय उच्यते। क्रीडात्मकत्वाद्याख्यं च सुतेजाश्चातितेजसा।

मासाꣳस्तान् ॥ १ ॥ मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एनान्ब्रह्म गमयत्येष देवयानः पन्था इति ॥ २ ॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिꣳ रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासाꣳस्तान्नैते संवत्सरमभिप्राप्नुवन्ति ॥ ३ ॥ मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ॥ ४ ॥ तस्मिन्यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति ॥ ५ ॥ अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते ततो वै खलु दुर्निष्प्रपतनं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति ॥६॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरꣳश्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा ॥ ७ ॥ अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयꣳ स्थानं तेनासौ लोको न सम्पूर्यते तस्माज्जुगुप्सेत तदेष श्लोकः ॥ ८ ॥ स्तेनो हिरण्यस्य सुरां पिबꣳश्च गुरोस्तल्पमावसन्ब्रह्महा चैते पतन्ति चत्वारः पञ्चमश्चाचरꣳस्तु तैरिति ॥ ९ ॥ अथ ह य एतानेवं पञ्चाग्नीन्वेद न स ह तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद ॥ १० ॥ १० ॥

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रिया समेत्य मीमांसाञ्चक्रुः को न आत्मा किं ब्रह्मेति ॥ १ ॥ ते ह सम्पादयाञ्चक्रुरुद्दालको वै भगवन्तोऽयमारुणिः सम्प्रतीममात्मानं वैश्वानर-

SGDF
Sri Gargeshwari Digital Foundation

स्वर्गाधारं शिरो विष्णोः सर्वरूपातिदर्शनात् । चक्षुस्तु विश्वरूपाख्य-मादानादायुषामपि। आदित्याख्यं च सूर्यस्याप्याश्रयं सर्वदा स्मृतम्। वाय्वादिप्राणशक्यं न यत्तत्कर्ता हरेर्यतः। प्राणस्तेन पृथग्वर्त्मा वायुर्ज्ञानायुरूपतः । वायोरप्याश्रयो नित्यं बहुत्वाद्बहुलः स्मृतः। आकाशनामा चादीप्तेर्मध्यदेहो रमापतेः। व्याप्तत्वादाप इत्युक्तो रयी रतिकरत्वतः। वस्तिराकाशवायोश्च तावाधारौ प्रकीर्तितौ। प्रथना-त्पृथिवीनामा प्रतिष्ठा च प्रतिष्ठितेः। पादौ भगवतो विष्णोः

मध्येति त९ हन्ताभ्यागच्छामेति त९ हाभ्याजग्मुः ॥ २ ॥ स ह सम्पादयां चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति ॥ ३ ॥ तान्होवाचाश्व-पतिर्वै भगवन्तोऽयं कैकेयः सम्प्रतीममात्मानं वैश्वानरमध्येति त९ हाभ्यागच्छामेति त९ हाभ्याजग्मुः ॥ ४ ॥ तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार स ह प्रातः सञ्जिहान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ॥ ५ ॥ ते होचुर्येन हैवार्थेन पुरुषश्च-रेत्त९ हैव वदेदात्मानमेवेमं वैश्वानर९ सम्प्रत्यध्येषि तमेव नो ब्रूहीति ॥ ॥ ६ ॥ तान्होवाच प्रातर्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच ॥ ७ ॥ ११ ॥

औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥ ॥ २ ॥ १२ ॥

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहुविश्वरूपं कुले दृश्यते ॥१॥ प्रवृत्तोऽ-श्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं

SGDF
Sri Gargeshwari Digital Foundation

भवत्यस्य ब्रह्मवर्चसं कुले य एवमेतमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यद्य(ष्यो य)न्मां नागमिष्यतः इति ॥ ॥ २ ॥ १३ ॥

अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्माऽऽत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आ(य)यन्ति पृथग्रथश्रेणयोऽनुयन्ति ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति ॥ २ ॥ १४ ॥

अथ होवाच जनꣳ शार्कराक्ष्यꣳ शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवात्मानं वैश्वानरमुपास्ते सन्देहस्त्वेष आत्मन इति होवाच सन्देहस्ते व्यशीर्यद्यन्मां नागमिष्य इति ॥ २ ॥ १५ ॥

अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं रयिमान्पुष्टिमानसि ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति ॥ २ ॥ १६ ॥

अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचैष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ॥ २ ॥ १७ ॥

तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वाꣳसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ॥ १ ॥ तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथ-

SGDF
Sri Gurgeshwari Digital Foundation

पृथिव्याश्रय एव च। उत्तमानां हि पादेन सर्वं रूपं हि कथ्यते। विष्णोः पदमिति ह्यस्मात्प्रथितिर्वैदिकी स्मृता। प्राणश्चक्षुस्तथादित्य इत्येका देवता स्मृता। पूर्वद्वारपतिर्विष्णोर्व्यानः श्रोत्रं च चन्द्रमाः। दक्षिणद्वारपस्त्वेको वागपानोऽग्निरेव च। पश्चिमद्वारपोऽप्येकः समानो

ग्वर्त्माऽऽत्मा सन्दे(दो)हो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः॥ २॥ १८॥

तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयँ स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति॥ १॥ प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ २॥ १९॥

अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति॥ १॥ व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानु तृप्तिं तृप्यन्ति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ २॥ २०॥

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति॥ ॥ १॥ अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवीचाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ २॥ २१॥

अथ यां चतुर्थीं जुहुयात्तां जुहुयात्समानाय स्वाहेति समानस्तृप्यति॥ १॥ समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ २॥ २२॥

अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति॥ ॥ १॥ उदाने तृप्यति त्वक्तृप्यति त्वचि तृप्यन्त्यां वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठत-

SGDF
Sri Gargeshwari Digital Foundation

मन एव च। इन्द्र इत्येक एवोक्त उत्तरद्वाररक्षकः। उदानो वायुरित्येक ऊर्ध्वद्वाराधिपश्च सः। स एवाकाशनामा च लक्ष्म्याविष्टो विशेषतः। पृथिवीनामिका श्रीस्तु द्यौर्दिशो विद्युदेव च। वायुपत्नी समुद्दिष्टा तत्तद्द्वाराधिपाश्च ते। अधितिष्ठन्ति ते सर्वे नारायणमनामयम्। यद्विष्णुर्ज्ञानरूपत्वात्किमानन्दस्वरूपतः। एतेषु तृप्तेषु हरिस्तृप्यत्येषां प्रियो ह्यसौ। सूर्यप्रसादात्तु नराः पूर्वद्वारेण केशवम्। प्राप्नुवन्त्यथ सोमस्य प्रसादात्पितरस्तथा। द्वारेण दक्षिणेनैव गन्धर्वाः पश्चिमेन तु। अग्निप्रसादादृषय उत्तरेणेन्द्रसंश्रयात्। शिवाद्या वायुमाश्रित्य यान्त्यूर्ध्वेण हरिं सुराः॥ वैश्वानराख्यविष्णोस्तु सम्यग्ज्ञानेन सर्वशः। वैश्वानरज्ञानयोग्याः साक्षादेव सुराः स्मृताः। तस्मात्तेषां फलं सर्वमन्येषां तु स्वयोग्यत'इति वैश्वानरविद्यायाम्। 'को न आत्मा किं ब्रह्म' 'सोऽयमात्मा चतुष्पात्'। 'स्थूलभुग्वैश्वानरः प्रथमः पादः'। 'ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ'। 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित'इत्यादेश्च वैश्वानरो विष्णुरिति सिद्धम्॥ स वायुः स आकाशः वायुश्चाकाशश्चाधितिष्ठत इति वचनाद्वायोरूपमन्याधिष्ठितमाकाशाख्यं वायोः स्वरूपमिति विज्ञायते।

स्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ २॥ २३॥

स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात्॥ १॥ अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति॥ २॥ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवꣳ हास्य सर्वे पाप्मनः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति॥ ३॥ तस्मादु हैवंविद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतꣳ स्यादिति तदेष श्लोकः॥ ४॥ यथेह क्षुधिता बाला मातरं पर्युपासते। एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति॥ ५॥ २४॥ इति श्रीमच्छान्दोग्योपनिषदि पञ्चमोऽध्यायः॥ ५॥

SGDF
Sri Gargeshwari Digital Foundation

'आकाशनामा विघ्नेशो वायुश्चाकाशकः स्मृतः। आकाश इति लक्ष्मीश्च तथाकाशो हरिः स्वयमि'ति शब्दनिर्णये। 'सुतेजोविश्वरूपादिभेदेनाङ्गानि मापतेः। अभिन्नान्यपि कथ्यन्ते लोकदृष्टिविभेदत'इति च ॥ २४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये पञ्चमोऽध्यायः ॥ ५ ॥

हरिः ॐ ॥ 'अधीत्यब्दद्वादशत्वाद्द्वादशाब्द इतीरितः। श्वेतकेतुर्भारते तु नोत्पत्तिद्वादशत्वत' इति वाक्यनिर्णये। 'यथा मृत्पिण्डविज्ञानात्सादृश्यादेव मृन्मयाः। विज्ञायन्ते तथा विष्णोः सादृश्याज्जगदेव च। यथा स्वर्णस्य विज्ञानात्सर्वे लोहमयास्तथा। प्राधान्याद्विष्णुविज्ञानाद्विज्ञातं स्याज्जगत्सदा। अत्यल्पेऽपि हि विज्ञाते सदृशे तादृशं बहु। ज्ञायते नखकृन्तन्या यथा सर्वमयोमयम्। किमु विष्णोर्बहोर्ज्ञानादत्यल्पं जगदीदृशम्। अनन्याधीनविज्ञानादन्याधीनं तथैव च। मृदयोलोहनाम्नां हि ज्ञानात्साङ्केतिकं यथे'त्यादि सामसंहितायाम्। 'स्वर्णं लोहमणिश्चैव पुरटं चाभिधीयत'इति शब्दनिर्णये। विकारत्वविवक्षायामेकपिण्डमणिशब्दा व्यर्थाः स्युः।

हरिः ॐ ॥ श्वेतकेतुर्हारुणेय आस तँ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥ १ ॥ स ह द्वादशवर्ष उपेत्य चतुर्विँशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तँ ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः ॥ २ ॥ येनाश्रुतँ श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति ॥ ३ ॥ यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ ४ ॥ यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं लोहमणिरित्येव सत्यम् ॥ ५ ॥ यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं कार्ष्णायसमित्येव सत्यमेवँ सोम्य स आदेशो भवतीति ॥ ६ ॥ न वै नूनं

SGDF
Sri Gangeshwari Digital Foundation

मृत्तिकेति लोहमणिरिति कार्ष्णायसमित्यत्रेतिशब्दा नामधेयशब्दाश्च व्यर्थाः स्युः। विकारमिथ्यात्वविवक्षायां मृत्तिकैव सत्यं लोह एव सत्यं कार्ष्णायसमेव सत्यमित्येव स्यात्। न तु नामधेयादिशब्दाः। न च वाचारम्भणमात्रमिति मात्रशब्दोऽस्ति। न चारभ्यस्यारम्भण-मिति युज्यते शब्दः। क्रिया ह्यारम्भणम्। अतो वाचा नाम्नारम्भणं विकारो विविधाकारो विक्रियमाणः। सत्यं नामधेयं सर्वदा विद्यमानं नामधेयं मृत्तिकेत्यादय इत्यर्थः। सत्त्वेन कालतस्ततं ज्ञायते विद्वद्भि-रिति नित्यत्वेन प्रसिद्धमेव सत्यमित्यत्र विवक्षितम्। सङ्केतेन क्रियमाणानि ह्यन्यानि वामानि। अतो विकाररूपाणि। विकार-शब्दस्य नियतपुल्लिङ्गत्वादारम्भणं विकार इति वेदाः प्रमाणमितिव-द्युज्यते। न च मृत्तिकादिनामविकारः साङ्केतिकं नाम। प्राधान्य-मेवात्र मृत्तिकादिनामवद्भगवतो विवक्षितम्। सृष्टिश्च प्राधान्यार्थ-मेवात्रोच्यते॥ १॥

एकमेवाद्वितीयं स्वगतभेदवर्जितं समानवर्जितं च। 'एकमेवा-द्वितीयं तत्समाभ्यधिकवर्जनात्। स्वगतानां च भेदानामभावाद्ब्रह्म शाश्वतमि'ति प्रवृत्ते। 'भेदाभेदनिवृत्त्यर्थमेवशब्दोऽवधारकः। समाधिकनिवृत्त्यर्थमद्वितीयपदं तथा। भेदाभेदेऽप्येकशब्दो यतोऽ-वयविनि स्थितः। एकमेवेत्यतः प्राह नारायणमियं श्रुतिः। समे द्वितीयशब्दः स्याददद्वितीयोऽसमत्वतः। साधिकः कुत एव स्यादित्याह परमा श्रुतिरि'ति सामसंहितायाम्। न च विजातीयभेदवर्जनं नाम कुत्रचित्प्रसिद्धम्। तत्प्रमाणाभावाच्च। 'एक एवाद्वितीयो भगवां-

---

भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवा५-स्त्वेव मे तद्ब्रवीत्विति यथा सोम्येति होवाच॥ ७॥ १॥

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेद-मग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायतइति॥ १॥ कुतस्तु खलु सोम्यैव५ स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव

SGDF
Sri Gurgeshwari Digital Foundation

स्तत्सदृशपरो न स्त'इति च। विजातीयाभावे येनाश्रुतं श्रुतं भवतीत्यादि विशेषणं च व्यर्थम्। यस्य कस्यचिज्ज्ञानं तज्ज्ञानमेव भवतीति। अज्ञानमपि ज्ञानमेव भवति। भेदाभावात्। न च मिथ्या सत्यमिति भेदः। तस्यैव विजातीयत्वप्राप्तेः। तद्भेदस्य मिथ्यात्वे तदभेदस्य सत्यत्वप्रसङ्गाच्च। मिथ्यासत्ययोरैक्ये इदं सत्यं इदं मिथ्येति भेदाभावाज्जीवेशभेदादेरपि सत्यत्वप्रसङ्गः। अतः परमार्थं ब्रह्मान्यन्मिथ्येत्यपि न युज्यते। अतः सजातीयः स्वगतभेदोऽधिकाख्यं विजातीयं चात्र निषिध्यते। 'सर्वोत्तमत्वात्सन्नामा हरिर्नारायणः प्रभुः। सोऽसृजत्प्रथमं देवीं तेज आख्यां श्रियं सतीम्। तते स्थितेन रूपेण साऽजैव हि यतः सदा। तेज इत्युच्यते तस्माज्जनेर्वा तत एव तु। यदस्याः सृष्टिकृद्रूपं विद्याख्यं जायते हरेः। मन्वाख्यः प्राण एवास्या अन्नामा जायतेऽथ च। ब्राह्मणादिचतुर्वर्णस्ततश्चान्नाभिधो हरः। तेजःसंस्था च सा देवी प्राणोऽप्सु स्थित एव च। ततस्तेजस एवापो जायन्तेऽन्नस्थितो हरः। जायतेऽतोऽद्भ्य एवान्नं पृथिवी त्वन्नरूपिणी॥ २॥

सृष्टेष्वेतेषु भगवानीक्षाश्चक्रे स केशवः। जीवाख्येनैव रूपेण योऽनिरुद्ध इति स्मृतः। तेन रूपेण लक्ष्म्यादीन्प्रविष्टो रूपनामनी।

सोम्येदमग्र आसीदेकमेवाद्वितीयम्॥ २॥ तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तद(द्ध्य)पो जायन्ते॥३॥ ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तद(द्ध्य)न्नाद्यं जायते॥ ४॥ २॥

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति॥ १॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति॥२॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा(नु)तु

SGDF
Sri Gurgeshwari Digital Foundation

करिष्ये त्रिवृतश्चैतानेकैकं करवाणि च । इति मत्वा प्रविश्याथ तेभ्य इन्द्रादिनामपि । नामरूपाणि कृतवांस्तांश्चान्योन्यप्रवेशिनः । कृत्वाग्नि-सोमसूर्यादिष्वेतांस्त्रीन्विदधे पुनः ॥ ३ ॥

अतो यल्लोहितं रूपं श्रियस्तद्रूपसम्भवम् । यच्छुक्लं वायुजं विद्यात्कृष्णं चैव शिवोद्भवम् । तस्मादग्नेर्यदच्युत्वमग्निनामप्रवर्तकम् । लक्ष्म्यादिदेवतानां तन्नैवाग्नेरग्निता ततः । मुख्यैवमाददानत्वमादित्यस्य तदुद्भवम् । अत आदित्यनामैषां नैवादित्यस्य मुख्यतः । यच्चन्द्राह्लादकत्वं च तत्तेषां चन्द्रता तथा । विद्युद्विद्योतनं तेषां ततस्ते सर्वनामिनः । तथैव सर्वरूपं च तद्रूपप्रतिबिम्बितम् । सर्वरूपाश्च ते तस्माल्लोहितादिक्रमेण तु । अतोऽन्यनामधेयं तु वाचाऽऽरम्भणहेतुतः । साङ्केत्येन विकारः स्यात्त्रयाणामेव नित्यता । यथा लक्ष्म्यादिकानां च नामसङ्केततोऽन्यगम् । वाचारम्भणहेतोस्तद्विकारो नैव मुख्यतः । मुख्यं नाम त्रिरूपाणीत्याद्यं वेदोदितं परम् । अतस्तदेव सत्योक्तं मुख्यं सत्यमितीर्यते । इन्द्रादिनामरूपाणि यथैव त्रिषु मुख्यतः ।

खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ४ ॥ ३ ॥

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ १ ॥ यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ २ ॥ यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापगाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ३ ॥ यद्विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ४ ॥ एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः ॥ ५ ॥ यदु

SGDF
Sri Gurgeshwari Digital Foundation

तदधीनत्वतस्तेषामेषामुच्चबलत्वतः । शिवनामानि रूपाणि तथा वायोस्तु मुख्यतः । तदीयानि तथा लक्ष्म्यास्तदीयानि हरेस्तथा । तस्मात्स एव सर्वेशः सर्वरूपः स एव च । सर्वनामा स एवैकः सर्वशक्तिस्तथैव च । अन्येषां यच्च रूपाद्यं तत्तस्मात्प्रतिबिम्बितम् । एक एवाद्वितीयोऽसावतः सर्वोत्तमत्वतः । मुख्यत्वादेव सन्नामा सत्ततिज्ञानरूपतः । सत्यमित्युच्यते विष्णुस्स त्वं नासि कथञ्चन । अतोऽनूचानमानी त्वं स्तब्धोऽसि कुत एव तु । त्वत्तोऽधिका अपीन्द्राद्यास्तदुच्चाश्च श्रियादयः । सर्वोच्चो भगवान्विष्णुर्न स्तम्भोऽस्यापि हि क्वचित् । अतो न विद्वन्मानी स्या महानस्मीति वा मनः । न ते स्यान्नैव च स्तम्भो ज्ञात्वा विष्णोः परं बलम् । न हि विष्णोर्बलं ज्ञात्वा स्तम्भहेतुः कथञ्चने'त्यादि सामसंहितायाम् ॥ ४ ॥

देवता एव मांसादिशब्दवाच्याः । तत्र प्रवेशात् । अश्यमानाश्चोपजीव्यत्वात् । न च दुःखं तासाम् । ऐश्वर्यात् । तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदिति प्रस्तुतत्वात् । 'जीव इति भगवतोऽनिरुद्धस्याख्ये'ति च श्रुतिः । 'प्राणस्य प्राणश्चक्षुषश्चक्षुर्जीवस्य जीवः

रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विद्वाञ्चक्रुर्यदु शुक्लमिवाभूदित्यपाꣳ रूपमिति तद्विदाञ्चक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः ॥ ६ ॥ यद्वविज्ञातमिवाभूदित्येतासामेव देवानाꣳ समास इति तद्विदाञ्चक्रुर्यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ७ ॥ ४ ॥

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माꣳसं योऽणिष्ठस्तन्मनः ॥ १ ॥ आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः ॥ २ ॥ तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥३॥ अन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४ ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रधानस्य प्रधानं भगवांश्चतुर्मूर्तिरि'ति च। 'प्राणाधारो हरिर्नान्यो जीवशब्दस्ततो हरौ। संसारिणो जीवता तु जननाद्वानतस्तथे'ति च। जीवशब्देन संसारिविवक्षायां तत्तेज ऐक्षतेत्यादिना तेषामेव चेतनत्वावगतेर्नामरूपव्याकरणे जीवांतरप्रवेशो नापेक्षितः। 'प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः। त्रयोविंशतितत्त्वानां गणं युगपदाविशदि'ति च। 'यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र। यथोभयेषां त इमेह लोका बलिं हरंतोऽन्नमदंत्यमूढाः। त्वं नः स चक्षुः परिदेहि शक्ता देव क्रियार्थे यदनुग्रहेणे'ति तत्त्वानां प्रार्थनानंतरं भगवत एव तेषु प्रवेशोक्तेर्भागवते। यतश्च स एव जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठतीति भगवत्येव जीवशब्दः प्रयुज्यते। न ह्यचेतनस्य मोदमानत्वमस्ति। अतोंऽतर्यामिरूप एव जीवशब्दः। 'भोक्तुस्तु सुखदुःखानामंतःस्थो जीवनामकः। बहिःस्थितस्तु सन्नामा भगवान्पुरुषोत्तम'इति तत्त्वविवेके। अग्नेरग्निरितिनाम मुख्यतो नास्ति। अग्निनामानि त्रीणि रूपाणीति नामधेयं सत्यमित्यादि॥ ५। ६। ७॥

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति॥ १॥ एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति॥ २॥ अपा॰ सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति॥ ३॥ तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति॥ ४॥ अन्नमय॰ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥ ५॥ ६॥

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माऽशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति॥ १॥ स ह पञ्चदशाहानि नाऽऽशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजू॰षि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति॥ २॥ त॰ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन

SGDF
Sri Gangeshwari Digital Foundation

स्वप्नस्यांतः सुषुप्तिः । 'स्वातंत्र्यात्स इति प्रोक्तो विष्णुः सर्वेश्वरेश्वरः । तं प्राप्नोति मनोनामा संसारी स्वपिती'त्यत इति च । मननान्मनोनामा संसारी । 'शुंगमित्यंकुरं प्रोक्तं तन्मूलं भगवान्हरिः । जगतो मूलमप्येष निमित्तं न विकारवान् । बीजजीवो यथा मूलमंकुरस्याविकारतः । यथा पिता पुत्रतन्वास्तद्देहो हि विकारवान् । एवं हरिर्मूलमपि न विकारः कथंचने'ति च । प्राथम्याच्च तेजआद्या लक्ष्म्यादय इति सिद्धम् । 'तेजोऽभिमानिनी लक्ष्मीः प्राणस्त्वबभिमानवान् । अन्नाभिमानी रुद्रश्च तिस्रस्ता देवताः पुरे'ति च ब्रह्मांडे । 'यत्रैतत्पुरुषः स्वपितिनाम सता सोम्य तदा

ततोऽपि न बहु दहेदेवꣳ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥ ३ ॥ स हाशाथ हैनमुपससाद तꣳ ह यत्किञ्च पप्रच्छ सर्वꣳ ह प्रतिपेदे ॥ ४ ॥ तꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्रज्वलयेत्तेन ततोऽपि बहु दहेत् ॥ ५ ॥ एवꣳ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टाऽभूत्साऽन्नेनोपसमाहिता प्राज्वालीत्तयैतर्हि वेदाननुभवस्यन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ६ ॥ (तदेष श्लोकः 'पञ्चेन्द्रियस्य पुरुषस्य यदेव स्यादनावृतम् ॥ तदस्य प्रज्ञा स्रवति दृतेः पादादिवोदकं दृतेः पादादिवोदकम्' ॥ इति क्वचित्पाठ इति वेदेशीये) ॥ ७ ॥

उद्दालको हाऽरुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनꣳ स्वपितीत्याचक्षते स्वꣳ ह्यपीतो भवति ॥ १ ॥ स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते प्राणबन्धनꣳ हि सोम्य मन इति ॥ २ ॥ अशनायापिपासे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितꣳ

SGDF
Sri Gangeshwari Digital Foundation

संपन्नो भवती'ति संसारिणो ब्रह्मप्राप्तिमुक्त्वा 'स यथा शकुनिः सूत्रेण प्रबद्ध' इति तस्योपपादानान्मनोनामा पुरुषः। प्राणनामा भगवान्। 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा' इत्युपसंहारात्। प्रजाशब्दश्चेतनेष्वेव प्रसिद्धः। 'प्रजानां सुखदुःखेन राजाऽऽप्नोति शुभाशुभमि'त्यादेश्च। 'शरीरधातुकृत्त्वेन लक्ष्म्याद्याश्च मुमुक्षुणा। ध्येयास्तदीशितृत्वेन भगवान्पुरुषोत्तम'इति वचनादनुसंधानकर्तव्यताज्ञापनार्थं तदुक्तं पुरस्तादित्युक्तम्। मुक्तावुमा तु वागाख्या रुद्रं याति मनोऽभिधम्। वायुं याति शिवश्चापि वायुस्तेजोऽभिधां श्रियम्। वायुमादाय सा देवी याति विष्णुं परात्परम्। द्वारमात्रा तु सा देवी वायुप्राप्यो जनार्दनः। मृतिकाले च मुक्तौ च पुरुषा वाचमाप्नुयुरिति सत्त्वे। 'योऽसौ नियमनाद्विष्णुः सारत्वात्स इति स्मृतः। अणिमा सूक्ष्मतो गम्य ऐतदात्म्यं च तद्वशम्। परानंदत्वतः सत्यमात्मा पूर्णगुणत्वतः। सत्यतो नासितत्वं हि माभूत्ते स्तब्धता ततः। असुराः स्तब्धतां याता ब्रह्माहमिति-

---

सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ३ ॥ तस्य क्व मूलꣳ स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ ४ ॥ अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ५ ॥ तस्य क्व मूलꣳ स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥ ६ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ७ ॥ ८ ॥

SGDF
Sri Gangeshwari Digital Foundation

मानिनः। असत्यं जगदित्याहुः सिद्धोऽहं बलवानिति। अनीश्वरं जगत्प्राहुरप्रतिष्ठं तथैव च। चेतनैकत्वविषयान्वेदानाहुश्च सर्वशः। कुतर्कपरमा नित्यं न सहंते गुणान्हरेः। शास्त्रतत्त्वमविज्ञाय ब्रूयुर्देवेषु चैकताम्। यांति चैव तमो घोरं परमात्मविनिंदकाः। आलंब्य तन्मतं न त्वमेकत्वं विद्धि विष्णुना। एकत्वाभावतो नैव भवेथाश्च महामनाः। तन्निष्ठा हि प्रजा यस्मात्तत्प्रतिष्ठाश्च मोक्षगाः। तन्मूलाश्च यतस्तासां सद्भावः कुत एव तु। यदि स्वतोऽन्यः परमो देहेऽस्मिन्संव्यवस्थितः। न दृश्यते कुत इति भूयः पप्रच्छ पुत्रकः। अज्ञैरदृश्यमानोऽपि न भेदो नास्ति पुत्रक। यथा पुष्परसा युक्ता अजानंतोऽपि भेदिनः। अजानंतोऽपि पुरुषास्तथा विष्णोर्हि भेदिनः॥९॥

इति पित्रोपदिष्टः सन् पुत्रः पप्रच्छ तं पुनः। चेतनानामविज्ञानं कथमित्येव चिंतयन्। तं प्रत्याह यथा नद्यश्चेतनाश्च समुद्रगाः। स्वं वारि नैव जानंति प्रजास्तद्वत्प्रजालये॥ १० ॥

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसानाꣳ समवहारमेकतां गमयन्ति॥१॥ ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पत्स्यामह इति॥२॥ त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तत्तदाभवन्ति॥३॥ स एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥४॥९॥

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापि यन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति॥१॥ एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तदाभवन्ति॥२॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥३॥१०॥

SGDF
Sri Gargeshwari Digital Foundation

स्वतोऽन्योऽस्ति परो देह इति ज्ञायेत मे कथम् । इति पृष्टः पुनः प्राह वृक्षदृष्टांततः पिता । अभिमानिनोऽस्वतंत्रत्वाच्छेदेन ज्ञायते तरौ । हरिः किमु मनुष्येषु शोषो ह्यस्यास्वतंत्रतः ॥ ११ ॥

ज्ञायते न कथं स्वस्मिन् सूक्ष्मे ज्ञाते परो हरिः । तत्रस्थ इति पृष्टः संस्तमाहोद्दालकः सुतम् । वटबीजे यथा सूक्ष्मे महान्नयग्रोधभावयुक् । न दृश्यतेऽभिमानी स एवं जीवगतो हरिः ॥ १२ ॥

कथं दृश्येत तच्छक्तिः पृथक्तस्य ह्यदर्शने । इति भावयुतं प्राह

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥ अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यत्येवमेव खलु सोम्य विद्धीति होवाच ॥ २ ॥ जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति यथा सोम्येति होवाच ॥ ३ ॥ ११ ॥

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति ॥ १ ॥ तꣳ होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति श्रद्धस्व सोम्येति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥ १२ ॥

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति तद्ध तथा चकार तꣳ होवाच यद्दोषा लवणमुदकेऽवधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥ १ ॥ यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्त्यादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते तꣳ होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

पुत्रमुद्दालकः पुनः । यथाप्सु लवणं व्याप्तं रसदृष्टौ न दृश्यते । एवं चेतनगो विष्णुस्तद्भिन्नोऽपि न दृश्यते ॥ १३ ॥

कथं स ज्ञायते विष्णुर्भिन्न इत्यत्र चाब्रवीत् । यथैवान्योपदेशेन बद्धाक्षः स्वगृहं व्रजेत् । तथा चार्योपदेशेन भिन्नमीशं व्रजेत्पुमान् ॥ १४ ॥

यथा पुंसोऽस्वतंत्रत्वं तज्ज्ञापयतु मा भवान् । इत्युक्त आह ज्ञाने हि दृष्टैवास्यास्वतंत्रता ॥ १५ ॥

अभेदज्ञानिनां दोषः कीदृशः स्यादितीरिते । प्राह यस्मात्परस्वानां हर्ता राज्ञा निहन्यते । किमु राज्ञोऽपहर्तैवं ब्रह्मस्तेनो निहन्यते । सर्वेषां

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥ १३ ॥

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वाप्राध्मायीताभिनद्धाऽक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥ तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य(त) इति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥ १४ ॥

पुरुषꣳ सोम्योपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥ अथ यदास्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥ १५ ॥

पुरुषꣳ सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ

SGDF
Sri Gargeshwari Digital Foundation

शास्तृ यद्ब्रह्म तत्स्वरूपतया स्मरन् । ब्रह्मस्तेनो निहन्येत तमस्यंधे सदैव हि । दोषा ह्यज्ञानपूर्वास्तु बध्वा पुरुषमीशितुः । विष्णोर्हेर्तेति बाधंते चाभिमानकृतास्पदम् । ततो विचारयंत्येनं देवता हरिणा सह । नाहं विष्णुर्न स्वतंत्रो न च पूर्णगुणोऽस्म्यहम् । मम स्वामी हरिर्नित्यं स्वतंत्रः पूर्णषड्गुणः । एवं दार्ढ्यं शपथवद्यदा कुर्यादयं सदा । जानन्नेव न तापी स्यादंतरानंदभोगतः । तदा तेभ्यो मोचयित्वा हत्वा मिथ्याभिशंसिनः । स्वकीयं कुरुते विष्णुरन्यथा तैस्सह प्रभुः । तमस्यंधे पातयति महाकारागृहोपमे । महांधे वा पातयति हस्तच्छेदादि-संमिते । ततोऽधरे वा तद्योग्यं दुःखभेदं वधोपमे । तस्मादाचार्यतो ज्ञात्वा विष्णोर्भेदेन पूर्णताम् । उपासीत ततो मुक्तिं याति नास्त्यत्र संशय'इत्यादि सामसंहितायाम् । स्वयंभूरिति विष्णुजत्वाद्विरिंच उच्यते । न हि विरिंचादेव विरिंचो जातः । 'यो ब्रह्माणं विदधाति पूर्वमित्यादि श्रुतेः । आत्मा भगवान् । ततो भूतत्वादात्मभूः । 'दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवानि'ति वचनात् । अ इति विष्णुस्तज्जातत्वादजः । 'अ इति ब्रह्मे'त्यादि श्रुतेः । 'वासुदेवात्परो नैव ब्रह्मशब्दोदितो भवेदि'त्यादेश्च । अतः स्वशब्दो विष्णावेव प्रसिद्धः । ततः स्वमपीतो भवतीति युज्यते । अप्ययो नामाविज्ञेय-त्वेन प्रवेशः । 'अविज्ञातं प्रविष्टं यदपीतमिति कीर्त्यते । यथा नद्यः समुद्रे तु यथा विष्णुं लये प्रजा'इति शब्दनिर्णये । न च जीवस्या-तद्भावोऽस्ति । उत्थितस्य सुप्तिसंसारयोः परामर्शदर्शनात् । 'अहं विश्वं भुवनमभ्यभवम् ।' 'आजन्ममरणं स्मृत्वा मुक्ता हर्षमवा-

---

हन्यते ॥ १ ॥ अथ स यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥ २ ॥ स यथा तत्र नादाह्येतैतदात्म्यमिद९ सर्वं तत्सत्य९ स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥ १६ ॥

SGDF
Sri Gargeshwari Digital Foundation

मुयुरि'ति। तद्भावस्यापरामर्शाच्च। 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नांतरमि'त्यादि श्रुतेश्च। 'सुषुप्त्युत्क्रांत्योर्भेदे'नेति च भगवद्वचनम्। 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'। 'सति संपद्य न विदुः सति सम्पत्स्यामह इति'। 'सत आगम्य न विदुः सत आगच्छामह इति'। 'स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति'। 'अण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति'। 'लवणमेतदुदकेऽवधायाऽथ मा प्रातरुपसीदथा इति स ह तथा चकार तं होवाच यद्दोषा लवणमेतदुदकेऽवधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति। मध्यादाचामेति कथमिति लवणमित्यन्त्यादाचामेति कथमिति लवणमिति'। 'अत्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति'। 'एतां दिशं गन्धारा एतां दिशं व्रजेति'। 'तेजः परस्यां देवतायां तावन्न जानाति'। 'अपहार्षीत्स्तेयमकार्षीदि'त्यादि नवकृत्वो भिन्नस्य वस्तुनो भेदापरिज्ञानादनर्थं सूक्ष्मत्वाद्भेदस्य दुर्ज्ञेयत्वं च सदृष्टान्तं तात्पर्येणाह।

न चाभेदे कश्चिद्दृष्टान्त उक्तः। न हि शकुनिसूत्रयोर्नानावृक्षरसानां नदीसमुद्रयोर्वृक्षपरमात्मनोर्धानापरमात्मनोर्लवणोदकयोः पुरुषगन्धारयोर्नियतज्ञानानियतज्ञानयोश्चाभेदोऽस्ति। महातात्पर्यविरोधश्चाभेदे। विष्णोः परमोत्कर्षे हि सर्वप्रमाणानां महातात्पर्यं भगवताऽभिहितम्। 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।

SGDF
Sri Gangeshwari Digital Foundation

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः। यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत। इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारते'ति। 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति'। 'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवमवशिष्यते'। 'मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव'। 'राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्। प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्'। 'अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप। अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि'। 'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः'। 'न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्'। 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानन्तो मम भूतमहेश्वरम्'। 'मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः'। 'महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्'। 'यो मामजमनादिं च वेत्ति लोकमहेश्वरम्। असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते'। 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः'। 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत'। 'ये मां ज्ञात्वा गुणैः पूर्णं न चलन्ति ततः क्वचित्। तैरेवाप्यो न चैवान्यैरहं सर्वेश्वरेश्वरः'। 'ये तु मद्गुणसम्पूर्तौ ज्ञानस्नेहस्थिरात्मकाः। तेषां हस्तगतो मोक्षो मामेव स्मरतां सदा'। 'ये मन्यन्ते गुणापूर्तिं तमस्तेषां परायणम्'। 'न च तेभ्यो प्रियो मह्यं यश्च स्याद्गुण-

SGDF
Sri Gangeshwari Digital Foundation

पूर्तिवित् । स मामाप्नोति नियतं न च तस्मात्प्रियो मम' । 'प्रमाणान्यखिलान्येव तर्काश्चैतत्पराः सदा । एतद्विरुद्धं यन्मानं तर्कश्चाभास एवत्वि'त्यादौ । 'तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह पराबभूवुः' । 'भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते । तस्माद्भूमा गुणतो वै विशिष्टो यथा क्रतुः कर्ममध्ये विशिष्टः' । 'असुन्वन्तं समं जहिदूणा शंयो नते मयः । अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते' । 'सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये' । 'एतावानस्य महिमा अतो ज्यायांश्च पूरुषः' । 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' । 'सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च कथ्यन्ते यस्योत्कर्षप्रसिद्धये । यस्योत्कर्षप्रसिध्यर्थं सर्वे वेदाश्च युक्तयः । ज्ञात्वैव च यदुत्कर्षं मुच्यन्ते स हरिः परः' । 'अद्यातमस्य महिमानमायवोऽनुष्टुवन्ति पूर्वथे'त्यादिश्रुतिश्च विष्णोरुत्कर्षे महातात्पर्यं कथयति । 'महातत्परता विष्णोरुत्कर्षेऽवान्तरा ततः । अन्यत्र सर्ववाक्यानां युक्तीनां च विशेषत' इति ब्रह्माण्डे । 'ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति' 'ॐ ब्रह्मदृष्टिरुत्कर्षादि'त्यादि निर्णयात्मकं भगवद्वचनम् । न च शारीरपराभेदे तात्पर्यमित्यत्र किञ्चिन्मानम् । अतत्त्वमसीति भेदस्य नवकृत्वोऽभ्यासाच्च । 'ॐ भेदव्यपदेशात् ॐ' । 'ॐ भेदव्यपदेशाच्चान्यः' ॐ । 'ॐ अनुपपत्तेस्तु न शारीरः ॐ' । 'ॐ शारीरश्चोभयेऽपि हि भेदेनैनमधीयतेॐ' । 'ॐपृथगुपदेशादि'त्यादिना सर्वत्र भेदस्यैव भगवता निर्णीतत्वाच्च । 'पुरुष एवेदं सर्वमिति च पुरुषेणेदं सर्वं व्याप्तं यद्भूतं यच्च भव्यम्' । 'न च भगवान्गोत्वेन मनुष्यत्वेन वा भवति । आ तृणादा करीषात्सर्वं भगवानिति मिथ्यादृष्टिरेषा । दधिसक्तवो घृतौदनमित्यादौ व्याप्तशब्दाभावेऽपि व्याप्त-

SGDF
Sri Gargeshwari Digital Foundation

शब्दोऽवगम्यते। दधिसिक्ताः सक्तवो घृतसिक्तमोदनमि'ति श्रुतिः। 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमि'ति 'पुरुषेण हीदं नेनीयत' इति च। अतः सर्वप्रमाणानां भगवदुत्कर्ष एव महातात्पर्याच्छारीराभेदं वदतां महातात्पर्यविरोधः। 'अज्ञानदुःखसम्बन्धाद्यावज्ज्ञानं शरीरिणः। सर्वदा ज्ञानकं विष्णुमहमस्मीति ये विदुः। अज्ञानदुःखमन्तारस्ततस्ते नीचतां विदुः। विष्णोरुत्कर्षहर्तॄणां नैव तेषां सुखं क्वचिद्। योऽन्यथा सन्तमीशेशं स्वरूपं प्रतिपद्यते। किं तेन न कृतं पापं चोरेणेशापहारिणा'। 'ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः। शास्त्रतत्त्वमविज्ञाय तथा वादबलाज्जनाः। कामक्रोधाभिभूतत्वादहङ्कारवशं गताः। ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः। याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः। वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते। तेषां तमःशरीराणां तम एव परायणम्'। 'यतः स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः। कथमस्मि स इत्येव सम्बन्धस्स्यादसंहित' इति। 'बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। को ह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति॥ वैशम्पायन उवाच। नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह। बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमि'ति मोक्षधर्मवचनाच्च। 'हंनाम हन्यमानत्वाज्जीवस्य समुदाहृतम्। जीवादन्यो यतो विष्णुरहंनामा ततः स्मृतः। स्मीति जीवः समुद्दिष्टः स्मीत्यल्पं सुमितत्वतः। पूर्णत्वादस्मिनामाऽसौ पूर्णपूर्णत्वहेतुतः। ब्रह्मास्मीत्युच्यते विष्णुर्बृहत्पूर्णो यतः सदा। असौ सूर्यगतो विष्णुर्दूरस्थत्वात्प्रकीर्तितः। अहंनामा जीवगतो नित्याहेयत्वहेतुत' इति ब्रह्माण्डे। 'परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' 'स उत्तमः पुरुषः' 'स तत्र पर्येति जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा'। 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा'। 'यो वेद निहितं गुहायां

SGDF
Sri Gargeshwari Digital Foundation

परमे व्योमन् । सोऽश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता' । 'एतमानन्दमयमात्मानमुपसङ्क्रम्य । इमाँल्लोकान्कामान्नीकामरूप्यनुसञ्चरन् । एतत्साम गायन्नास्ते' । 'स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते' । 'ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः' । 'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' । 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति' । 'नानात्वेनाभिसम्बद्धास्तदा तत्कालभाविना । प्रकृतौ करणातीताः स्वात्मन्येव व्यवस्थिताः । संयोगः प्रकृतेर्नैषां मुक्तानां तत्त्वदर्शनात् । पुरुषान्यबहुत्वेन प्रतीता न प्रवर्तते । प्रवर्तति पुनः सर्गे तेषां सा न प्रवर्तते' । 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' । 'न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता' इत्यादि श्रुतिस्मृतिषु सतात्पर्यं मुक्तानां विष्णोर्भेदस्यैवोक्तेः । 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः सति सम्पद्य न विदुः सत आगम्य न विदुरि'त्यादौ भेद एव ह्यत्र सतात्पर्यं प्रतिपादितः । ता नद्यः समुद्रादागत्य समुद्रं प्रविशन्ति स समुद्र एव भवति न नदीभावं प्राप्नोति स एव च समुद्रो भवति समुद्र एव समुद्रो भवति न नद्य इति भेदस्यैवावधारणं क्रियते । न च स्वकीयस्य ब्रह्मभावस्याज्ञोऽपहर्ता भवति । किं त्वविद्यमानब्रह्मभावाभिमन्तैवापहर्ता । न हि स्वकीयवित्तपरित्याग्यपहर्ता भवति । किन्तु परस्वहर्तैव । तस्मादविद्यमानब्रह्मभावाभिमन्तैवापहार्षीत्स्तेयमकार्षीदिति दृष्टान्तपूर्वकमुच्यते । अदुःखित्वपूर्णज्ञानानन्दस्वातन्त्र्यादिब्रह्मस्वभावाननुभवन्स्वात्मनोऽपि ज्ञात्वैव तद्भावाभिमतेः स्तैन्यम् । परकीयाभिमतेरपहारः । 'परस्वभावाभिमतेरपहर्ता स्ववञ्चनात् । स्तेनश्चाभेदवेत्ता तु ब्रह्मणो हन्यते सदे'ति तत्त्वविवेके । न च दार्ढ्यमात्रे दृष्टान्तोऽयम् ।

SGDF
Sri Gargeshwari Digital Foundation

स यदि तस्य कर्ता भवति स यदि तस्य कर्ता न भवतीति हति-मुक्त्योरपहारानपहारैकहेतुकत्वश्रुतेः। अन्यथा यदि दृढो भवति यद्य-दृढो भवतीत्युच्येत। न च सत्यासत्यमात्रम्। तदा सत्यानृत-वाग्दृष्टान्तेन पूर्तेरपहारदृष्टान्तो न स्यात्। तस्मादभेदज्ञानेन महान्तं विनाशं प्रदर्श्य भेदज्ञानान्मुक्तिपरमेवैतद्वाक्यम्। भिन्नस्यैवोत्कर्षो भवति। अभिन्नस्य कुत उत्कर्षः स्यात्?। अज्ञानदुःखयुक्तत्वाच्च। न हि तत्पक्षे परमार्थदुःखिनो भ्रान्त्या दुःखिनश्च तत्काले कश्चि-द्विशेषः। अस्वातन्त्र्यं च भ्रान्तस्य निश्चितमेव। न हि भ्रमः स्वेच्छया युज्यते। 'स्वात्मानं परमं विष्णुं विदित्वैव स राघवः। दैत्यानां मोहनार्थाय दर्शयामास मूढतामि'ति पाद्मे॥ 'ॐ जगद्व्यापारवर्जं ॐ'॥ ॥ 'ॐ प्रकरणात् ॐ'॥ इत्यैश्वर्यमर्यादया मुक्तानां ब्रह्मणश्च भेदस्यैव निर्णीतत्वाच्च भगवता। 'ब्रह्मसूत्रानुसारेण वेदाद्यं सर्वमेव च। योज्यं न ब्रह्मसूत्राणि दृश्यमानार्थतोऽन्यथे'ति च ब्रह्मवैवर्ते। 'चोरदृष्टान्ततो यस्य ह्यभेदज्ञानतस्तमः। भेदेनोत्कर्षवेत्तुस्तु मुक्तिरेव ह्यचोरवदि'ति च। 'सारत्वात्स इतिप्रोक्तो ज्ञानत्वाद्य इतीरितः। सर्वस्येष्ट इति ह्येष मानानामणकोऽणिमा। तत्तन्त्रत्वादैतदात्म्यं स सत्यः साधुरूपतः। तत्ततः पूर्णतश्चात्मा सादनात्स इतीरितः। अतत्त्वमसि पुत्रेति य उक्तो गौतमेन तु। नवकृत्वः सदृष्टान्तं सर्वभेदेन केशवः। तस्मै नमो

(तदेष श्लोकः सर्वेषां खलु भूतानामात्मा सत्ये प्रतिष्ठितः॥ तेनात्मानमन्तर्धाय न किञ्चित्पापमृच्छति॥ आत्मसंस्थाऽऽत्मसाक्षी सतां धर्मः प्रतापवान्॥ न स पापानि कुरुते यस्यात्मा भवति प्रियः॥ जायत्येको म्रियत्येकोऽश्नात्येकः शुभाशुभमिति तद्धास्य विजज्ञाविति विजज्ञाविति तदेष श्लोकः॥ सर्वभूतात्मभूतेभ्यः सम्यग्भूतानि पश्यतो देवा अपि मार्गे मुह्यन्ति पदज्ञानात्पदैषिणः पदज्ञानात्पदैषिणः॥ अयं श्लोकपाठः सर्वोऽपि क्वाचित्क इति वेदेशीये) ॥ १७॥ ओमिति श्रीमच्छान्दोग्योपनिषदि षष्ठोऽध्यायः॥ ६॥

SGDF
Sri Gargeshwari Digital Foundation

भगवते चिदचित्परमाय ते । पुरुषोत्तमाय देवाय पूर्णानन्दैकरूपिणे' इति सामसंहितायाम् । अतः सर्वचिदचिद्विलक्षणः सर्वोत्तमः सर्वगुणपरिपूर्णो भगवान्पुरुषोत्तम इति सिद्धम् ॥ छ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते छान्दोग्योपनिषद्भाष्ये षष्ठोऽध्यायः ॥६॥

॥ हरिः ॐ ॥ यद्वेत्थ तेन तदुक्त्वा मामुपसीद । 'पितृलक्षणं तु पित्र्यं स्याद्राशिः स्यात्पूगलक्षणम् । देवतालक्षणं दैवं निधिश्च निधिलक्षणम् । वाकोवाक्यं मूलवेदो वेदसारोपसंहृतिः । एकायनमितिप्रोक्तं देवविद्या त्वमानुषी । देवज्ञेयैव या विद्या ब्रह्मविद्या तथारणम् । भूतविद्या भूतचिह्नं क्षत्रविद्या तु नीतिका । नाक्षत्री ज्योतिषाख्या च सर्पलक्षणमेव च । सर्पविद्येति सम्प्रोक्ता या देवपरिचारगा । सा देवजनविद्या स्यादेता वेद स नारद' इति सामसंहितायाम् । 'विद्यानां निर्णयाज्ञानादविद्वानुच्यते पुमान् । सर्वविद्याविदप्यद्धा तस्मान्निर्णयवित्तये । कुमारमैच्छदेवर्षिर्नारदो ब्रह्मवित्तममि'ति च । 'विष्णोर्नाम यतो विद्याः सर्वनामेत्यतः स्मृतः ।

॥ हरिःॐ ॥ अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तꣳ होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ॥१॥ ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यामेतद्भगवोऽध्येमि ॥ २ ॥ सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतꣳ ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तन्मा भगवांच्छोकस्य पारं तारयत्विति तꣳ होवाच यद्वै किञ्चैतदध्यगीष्ठा नामैवैतत् ॥ ३ ॥ नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्वेति ॥ ४ ॥ स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम

SGDF
Sri Gargeshwari Digital Foundation

नामाभिमानिनी चोषास्तस्यां ब्रह्म परं स्मरेत् । यदेषा न त्वमेया स्यान्मीयते ह्युषसि ध्रुवम् । रात्रिमानमजानद्भिस्ततो नामेत्युषाः स्मृता ॥ १ ॥

तस्यास्तु भूयसी स्वाहा धर्मज्ञानसुखादिभिः । सर्वैर्गुणैर्विमुक्तौ च तथा बन्धे च सर्वदा । वाचोऽभिमानिनी सैव वाङ्नाम्नी चाश्विना-द्वसोः ॥ २ ॥

एवं तस्या विमुक्तौ च पर्जन्यः सर्वतो वरः । मनोऽभिमानी सम्प्रोक्तो वृष्टया निर्माणतो मनः ॥ ३ ॥

ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ५ ॥ १ ॥

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदꣳ साम-वेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसि च तृणवनस्पतीञ्छ्वाप-दान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति ॥ १ ॥ स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥२॥

मनो वाव वाचो भूयो यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरुते पुत्राꣳश्च पशूꣳश्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते मनो ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्स्वेति ॥ १ ॥ स यो मनो ब्रह्मेत्युपास्ते स यावन्मनसो गतं तत्रास्य यथाकामचारो भवति यो मनो ब्रह्मेत्युपास्तेऽस्ति भगवो मनसो भूय इति मनसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ ३ ॥

SGDF
Sri Gurgeshwari Digital Foundation

तथा तस्माद्धरो मित्रो मुक्तौ सङ्कल्पदेवता । अह्नि सङ्कल्पयेद्यस्मात्स्वप्स्यन्ति निशि यत्ततः । तथा मित्राद्धरस्त्वग्निर्मुक्तौ चित्तस्य देवता । चितत्वाच्चित्तनामा च तस्माद्वरुण एव च । ध्यानस्य देवता चासौ तन्नामा च निधानतः । सत्यानृतविवेकार्थं तथा तस्मान्निशाकरः । विज्ञानदेवता चासौ तन्नामा च विवेचनात् । सत्यस्य तस्माच्च तथा वायुर्भूतात्मको वरः । बलात्मकस्तथा तस्मादन्नदेवोऽनिरुद्धकः । अन्ननामानुनादित्वात्तैजसाहंभवस्ततः । तथा वरिष्ठः प्राणाख्यो वायुः सोऽपां च देवता । अन्नामा देहसंव्याप्तेस्तथा तस्मात्पुरन्दरः । तेजोभिमानी तन्नामा तेजो ह्योज इतीर्यते । तथा तस्मादुमा चैव सा चाकाशाभिमानिनी । आकाशनाम्नी दीप्तत्वात्तस्याश्चैव सदा शिवः । स्थिरस्मृत्यभिमानी स सममेव रतेः स्मरः । मुख्यवायुप्रिया तस्मात्परमैव सरस्वती । बन्धमुक्त्योः सर्वगुणैः सर्वदाऽऽशास्त्ररूपिणी । शमित्यानन्द उद्दिष्ट आशापूर्णसुखत्वतः । तस्याः श्रेष्ठो मुख्यवायुः प्रकृष्टानां च नायकः । प्राणनामा णइत्येव ह्यानन्दः समुदीरितः ।

सङ्कल्पो वाव मनसो भूयान्यदा वै सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि ॥ १ ॥ तानि ह वा एतानि सङ्कल्पैकायनानि सङ्कल्पात्मकानि सङ्कल्पे प्रतिष्ठितानि समक्लृपतां द्यावापृथिवी समकल्पेतां वायुश्चाकाशश्च समकल्पन्तामापश्च तेजश्च तेषां संक्लृप्त्यै वर्षꣳ सङ्कल्पते वर्षस्य संक्लृप्त्या अन्नꣳ सङ्कल्पतेऽन्नस्य संक्लृप्त्यै प्राणाः सङ्कल्पन्ते प्राणानाꣳ संक्लृप्त्यै मन्त्राः सङ्कल्पन्ते मन्त्राणां संक्लृप्त्यै कर्माणि सङ्कल्पन्ते कर्मणाꣳ संक्लृप्त्यै लोकाः सङ्कल्पन्ते लोकानां संक्लृप्त्यै सर्वं सङ्कल्पते स एष सङ्कल्पः सङ्कल्पमुपास्स्वेति ॥२॥ स यः सङ्कल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्ध्यति याव त्सङ्कल्पस्य गतं तत्रास्य यथाकामचारो भवति यः सङ्कल्पं ब्रह्मेत्युपास्तेऽस्ति भगवः सङ्कल्पाद्भूय इति सङ्कल्पाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ३ ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

आणा सरस्वती प्रोक्ता तत्प्रकृष्टसुखत्वतः । प्राण इत्युच्यते वायुः सर्वे त्वेते दशोत्तराः । पर्जन्यमित्रशिखिनो भूतवायुस्तथैव च । द्विगुणा एवानिरुद्धोऽनिलात्पञ्चगुणाधिकः । पादोनो वरुणादग्निरध्यर्धोनस्समो मतः । शिवादाशा तथैवास्या मुख्यवायुः शतोत्तरौ । सङ्ख्यान्यथात्वं यत्र स्यात्तत्रावेशविशेषतः । अवराणां गुणस्यापि परमीयत्वतस्तथा । प्राणात्तु भगवान्विष्णुरनन्तगुणतोऽधिकः । नित्यमुक्तो नित्यशक्तिर्नित्योद्रिक्तगुणः प्रभुरि'ति तत्त्वविवेके । 'सैषाऽऽनन्दस्य मीमांसा भवती'त्यादेश्च । 'अथातः सम्भूतिः परमाद्विद्या विद्यायाः प्राणः प्राणाच्छ्रद्धा श्रद्धायाः शिवश्शिवाद्बुद्धिर्बुद्धेरिन्द्र इन्द्रात्तैजसः प्राणस्तैजसादनिरुद्धोऽनिरुद्धात्स्पर्शवातः स्पर्शवातात्सोमस्सोमाद्वरुणो वरुणादग्निरग्नेर्मित्रो मित्रात्पर्जन्यः पर्जन्यात्स्वाहा स्वाहाया उषा जायते तेषां परः परोज्यायान्गुणैरुत्तर उत्तरः प्रत्यवरः परस्मात्परमादुत्तर उत्तरो मुच्यते स्वं स्वं भावमापद्यते । नैषां पारावर्यमुच्छिद्यते कदाचन नैषां पारावर्यमुच्छिद्यते कुतश्चन पारावर्येणैव ब्रह्मोपयन्ति पारावर्येणैव मुक्ताः सञ्चरन्ती'त्यादि श्रुतेश्च । नामादिमारुतान्तेषु देवेष्वेभ्यश्च भेदतः । उपासितो हरिर्मुक्तिं दद्यान्नास्त्यत्र संशय' इति सत्तत्त्वे । 'उषादिमारुतान्तेषु समः समगुणोऽपि सन् । ध्यातः प्रीतिं हरिर्यायादधिकामुत्तरोत्तरे । उत्तमेषूत्तमा प्रीतिस्तस्य तत्र स्मृतस्ततः । ध्यातुरप्युत्तमां प्रीतिं यायान्नास्त्यत्र संशयः । तारतम्यपरिज्ञानात्तेषु ध्यातो विमुक्तिदः । प्रीतिं न चान्यथा यायादिति शास्त्रस्य निर्णय' इति तत्त्वविवेके । 'नामादिप्राणपर्यन्ताः सप्तम्यर्थाः प्रकीर्तिताः । तृतीयापञ्चमीषष्ठीचतुर्थ्यर्थाश्च सर्वशः । शब्दास्ते ब्रह्मशब्देन सम्बन्ध्येयुर्यदा तदा । ब्राह्मणोऽस्य मुखं यद्वदात्मा वै पुत्रको यथा । यथा च यूप आदित्य एवमेष प्रकीर्तितः । सप्तसु प्रथमा यस्माद्भूयो भूयस्त्वतस्तथा । षट्सु द्वितीया यस्माच्च

SGDF
Sri Gargeshwari Digital Foundation

कारणत्वात्परस्य च। न ह्यन्यदन्यदित्येव ध्यातं स्यात्पुरुषार्थदम्। अनर्थश्च भवेत्तस्माद्भृत्ये राजेतिबोधवत्। राजपूजां यथा भृत्ये कुर्याद्राजा हिनस्ति हि। तद्वशत्वात्तथा भृत्य एवं नामादिकं च यः। उपास्ते ब्रह्मरूपेण तं ब्रह्मार्थेतराणि च। पातयन्ति तमस्यन्धे तस्मान्नेक्षेत तांस्तथे'ति सामसंहितायाम्। 'अचेतनमयोग्यं च तथैवाताच्विकं क्वचित्। नोपासीत परोऽनर्थः स्यात्तथोपासनाकृतः। दर्भचर्मादयश्चातो देवता ह्यभिमानिनः। न ह्यचेतनकं किञ्चित्फलदं स्यात्कदाचन। औषधादिषु चैतस्माद्देवा एव वरप्रदाः। औषधादिस्थिता देवास्तेऽज्ञे दृष्टफलप्रदाः। ज्ञानिन्यदृष्टदाश्च स्युर्नादैवं किञ्चिदिष्यते। यथाज्ञस्यापि राज्ञस्तु भोजनं क्लृप्तमिष्यते। न त्वविज्ञाय राजानं ग्रामप्राप्तिस्ततो भवेद्। एवं देवा दृष्टफलं दद्युरज्ञस्य चाल्पतः। किञ्चिज्ज्ञानकृतादृष्टात्तच्च नैवान्यथा भवेत्। अदृष्टाख्यं फलं यत्तु तज्ज्ञस्यैव न चान्यगम्। तस्मादचेतनोपास्तां न कुर्यात्क्वापि कश्चन। न चासत्यां न चायोग्यां यदीच्छेदुत्तमं फलम्। यदि नेच्छेत्तमोगन्तुं यदिचेच्छेद्धरेः प्रियम्। अथ कर्तव्यकारी च मुमुक्षुरथवा भवेत्। सोऽपीच्छेत हरेः प्रीतिं नात्र कार्या विचारणे'त्युपासनालक्षणे। 'ॐ अभिमानव्यपदेशस्तु विशेषानुगतिभ्यां ॐ'। 'ॐ पयोऽम्बुवच्चेत्तत्रापी'ति भगवद्वचनम्। 'देवेषु चर्मादिनामानि संवादादेरि'ति च देवतामीमांसायाम्। 'अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्यामि'ति सङ्कर्षणसूत्रम्। 'ओषधयः संवदन्ते सोमेन सह राज्ञा'। 'प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा'। 'न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवन् चित्रमर्च'। 'न देवानामतिव्रतं शतात्मा न जीवति'। 'अनेहसो व ऊतयः सु ऊतयो व ऊतयः'। 'द्यावापृथिवी जनयन्नभिव्रताप ओषधीर्वनिनानि यज्ञिया। अन्तरिक्षं स्वा १ राप पुरूतये वशं देवासस्तन्वी ३ नि मामृजुः'। 'अचेतनं

SGDF
Sri Gargeshwari Digital Foundation

चेतनेभ्यो दैवतेभ्यश्च चेतनाः। देवाः प्राणाच्च स प्राणो विष्णोरेव सदैव तु। स्वभावं च प्रवृत्तिं च विकारं च समाप्नुयुः। कश्चिद्भाव ऋते तेषां नैतत्स्याच्च कदाचन। अचेतनप्रवृत्तौ तु न दृष्टान्तोऽस्ति कश्चन। चेतनानां प्रवृत्तेश्च दृष्टत्वादेव सर्वशः। अदृष्टं दृष्टवज्ज्ञेयं यथा दृष्टप्रणेतृकम्। विसर्पत्तण्डुलं दृष्ट्वा कल्प्या तत्र पिपीलिका। न तद्दृष्ट्वैव दृष्टानामपिपीलिकसर्पणम्। एवं दृष्टानुसारेण चिदधीन-मचेतनम्। दुर्घटा शक्तिरपि हि पिशाचानां हि दृश्यते। देवानां किमु किम्वेव परमस्य हरेः प्रभोरि'त्यादि ब्रह्मतर्के।

हृदयज्ञो भगवत्तत्त्वज्ञः। हृदयनाद्धृदयम्। 'उदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मेत्यारुणय'इति श्रुतिः। 'कोलं पूगफलं प्रोक्तं कलं ताम्बूलपत्रकमि'त्यभिधानम्। 'भूतानां भौतिकानां च मन्त्राहुतिगणस्य च। अचेतनगणस्यास्य कल्पको मित्रनामकः। प्राणा भूतानि मन्त्राद्याश्चिदचित्त्वविभेदिनः। अचितां कल्पको मित्रश्चितां वाय्वादयः स्मृता'इति वस्तुतत्त्वे। सर्वमचेतनं सङ्कल्प्यते। 'अस्थिर-स्मरणं चित्तं स्थिरसंस्मरणं स्मर'इति शब्दनिर्णये। 'वेदनं ज्ञानमात्रं स्याद्विद्वत्त्वं तु विशेषत'इति च। 'मोक्षे यस्मिन्प्रवेशः स्यात्सा प्रतिष्ठा हि

चित्तं वाव सङ्कल्पाद्भूयो यदा वै चेतयतेऽथ सङ्कल्पयतेऽथ मनस्य-त्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि॥१॥ तानि ह वा एतानि चित्तैकायनानि चित्तात्मा(त्मका)नि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तꣳ ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठ चित्तमुपास्स्वेति॥ २॥ स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोका-न्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥ ॥ ३ ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

मुख्यतः। उपचारतस्त्ववस्थानमिति शब्दविदो विदुरि'ति च। 'देवा मनुष्यतां प्राप्ता विज्ञेया देवमानुषाः। ध्यानं कुर्वन्त इव ते नैव स्युर्बहुभाषिणः। ब्रूयुरर्थवतीं वाचं नानर्थां प्रायशो हि त' इति

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीव द्यौर्ध्यायतीवान्तरिक्षं ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादाꣳशा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानापादाꣳशा इवैव ते भवन्ति ध्यानमुपास्स्वेति ॥१॥ स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ ६ ॥

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयांसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति॥१॥ स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकान् ज्ञानवतोऽभिसिद्ध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ ७ ॥

बलं वाव विज्ञानाद्भूयोऽपीह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन्परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्बलेनापो बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयाꣳसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकं बलेन वै लोकस्तिष्ठति बलमुपास्स्वेति ॥१॥ स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ २ ॥ ८ ॥

SGDF
Sri Gargeshwari Digital Foundation

पाद्मे । 'बलं ज्ञानबलं चैव बाह्यं चेति द्विधा मतम् । युक्तिज्ञता ज्ञानबलं सा ज्ञानादधिका मते'ति तत्त्वसारे । अन्नं ज्ञानरसान्नं च बाह्यमन्नमिति द्विधा । ज्ञानान्नं ज्ञानबलतः श्रेष्ठं ज्ञानरतिर्हि तत् । यद्बाह्यं तु बलं तस्माद्बाह्यमन्नं विशिष्यते । आपश्च द्विविधाः प्रोक्तास्तृप्तिर्या ज्ञानतो रतेः । ता ज्ञेया आन्तरा आपो बाह्यास्तु द्रवरूपकाः । आन्तरान्नादान्तरापो बाह्याद्बाह्यास्तथा वराः । एवं तेजः प्रातिभाख्यं बाह्यं चेति द्विधा मतम् । प्रातिभं ज्ञानतृप्तेश्च परमाकाश एव च ।

अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दशरात्रीर्नाश्नीयाद्यद्यु ह जीवेदथवाऽद्रष्टाऽश्रोताऽमन्ताऽबोद्धाऽकर्ताऽविज्ञाता भवत्यथान्नस्याशी द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति ॥ १ ॥ स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भूय इत्यन्नाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ ९ ॥

आपो वावान्नाद्भूयस्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्यथ यदा सुवृष्टिर्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु भविष्यतीत्याप एवेमा मूर्ता येयं पृथिवी यदन्तरिक्षं यद्द्यौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयाꣳसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकमाप एवेमा मूर्ता अप उपास्स्वेति ॥ १ ॥ स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामाꣳस्तृप्तिमान्भवति यावदपां गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ १० ॥

तेजो वावाऽद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथाऽऽपः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्लादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तेज उपास्स्वेति ॥ १ ॥ स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिध्यति यावत्तेजसो गतं तत्रास्य यथाकामचारो भवति यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ ११ ॥

SGDF
Sri Gargeshwari Digital Foundation

स्थिरा तु प्रतिभान्तस्था छिद्रमेव तु बाह्यगः। स्थिरा हि प्रतिभा श्रेष्ठा चञ्चला या स्मराभिधा। एकधैव स्मृतिः श्रेष्ठाऽऽशापरोक्षदृगात्मकम्। श्रेष्ठं सुखं ततो मोक्षे प्राणाख्यं परमं सुखम्। उत्तरोत्तरमेतद्धि वाय्वन्ताभिमतं सदा। बाह्याज्ञो बाह्यमन्नं च जायतेऽन्यत्तदन्यथा। व्यक्तिरन्तर्गतानां तु विपरीतक्रमाद्भवेत्। तथापि मोक्षगं यस्मात्स्वभावो नित्य एव तु। अतस्तस्मादापरोक्ष्यं कादाचित्कं हि जायते। दृष्टयधीना स्मृतिश्चेयं प्रतिभा स्मृतिसम्भवा। स्थैर्यमालम्ब्य तु चलमन्यथा नैव तिष्ठति। प्रतिभातश्च तृप्तिः स्यादतृप्तस्य तु का रतिः। तत एवं क्रमादेव वरिष्ठः प्राणजो गुण' इति च॥ १४॥

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति॥ १॥ स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिद्ध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥ ॥ २॥ १२॥

स्मरो वा आकाशाद्भूयाꣳस्तस्माद्यद्यपि बहव आसीरन्नस्मरन्तो नैव ते कञ्चन शृणुयुर्न मन्वीरन्न विजानीरन् यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन् स्मरेण वै पुत्रान्विजानाति स्मरेण पशूꣳ स्मरमुपास्स्वेति॥१॥ स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति भगवः स्मराद्भूय इति स्मराद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥ २॥ १३॥

आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मन्त्रानधीते कर्माणि कुरुते पुत्राꣳश्च पशूꣳश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्स्वेति॥ १॥ स य आशां ब्रह्मेत्युपास्ते आशयास्य सर्वे कामाः समृध्यन्त्यमोघा हास्याऽऽशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥ २॥ १४॥

SGDF
Sri Gurgeshwari Digital Foundation

योऽसौ प्राणः स प्राणेन परब्रह्मणा याति। स एष भगवान् प्राणं प्रत्यभीष्टं ददाति। प्राणस्य प्राणमिति श्रुतेः। प्राणो वायुः परमात्मानं च ज्ञानेन दर्शयन्ददाति। सर्वस्मादतीतमुत्तमं वदतीत्यतिवादी। 'एष तु वा अतिवदती'ति तुशब्दोऽर्थान्तरवाची। अस्ति भगवः प्राणाद्भूय इति प्रश्नो व्यतिहार्यः। 'यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम्। यत्र प्रमाणं वाक्यं वा प्रतिहार्यं न संशयः'। 'ॐ व्यतिहारो विशिंषन्ति हीतरवदि'ति च भगवद्वचनम्। अतिवादी प्राणवादी विष्णुवादी विशेषतः। स सत्यो भगवान्विष्णुर्यन्निर्दोषो नियामकः। विशिष्टज्ञानरूपश्च सामान्यज्ञानरूपकः। नित्यश्रद्धा-

---

प्राणो वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः॥ १॥ स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाऽऽचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वाऽस्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसि (इति)॥ २॥ अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषन्दहेन्नैवैनं ब्रूयुः पितृहाऽसीति न मातृहाऽसीति न भ्रातृहाऽसीति न स्वसृहाऽसीति नाचार्यहाऽसीति न ब्राह्मणहाऽसीति॥ ३॥ प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीत्येव ब्रूयान्नापह्नुवीत॥ ४॥ १५॥

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति॥ १॥ १६॥

यदा वै विजानात्यथ सत्यं वदति नाविजानन्त्सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति॥ १॥ १७॥

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति॥ १॥ १८॥

SGDF
Sri Gargeshwari Digital Foundation

स्वरूपश्च तथैव स्थैर्यरूपकः । स एव सर्वकर्ता च सुपूर्णानन्दरूपकः । स च सर्वगुणैः पूर्णो भूमेत्युच्चार्यते ततः । यदधीनं विना नान्यत्किञ्चिदस्ति कुतश्चन । स भूमोक्तोऽतिपूर्णत्वादन्यदल्पमुदीर्यते । स सर्वगुणसम्पूर्णः सर्वदेशेषु सर्वदा । स्वतन्त्रः सर्ववस्तूनि तदधीनानि सर्वशः । पूर्णत्वात्सुखरूपोऽसौ सर्वकर्ता सुखत्वतः । कर्तृत्वात्सुस्थिरश्चासौ स्थिरत्वादास्तिकस्तथा । आस्तिकत्वाच्च मन्तासौ विज्ञाता च ततो हरिः । ज्ञातृत्वाच्च स निर्दोषः सर्वस्यापि नियामकः । भूमा नारायणाख्यः स्यात्स एवाहङ्कृतिः स्मृतः । आकार्योऽहमिति ह्येष ततोऽहङ्कार उच्यते । जीवस्थस्त्वनिरुद्धो यः सोऽहङ्कार इतीरितः । सोऽप्यणुत्वेऽपि संव्यापी परमैश्वर्ययोगतः । यथा बालतनौ विष्णौ मार्कण्डेयेन धीमता । प्रविश्य नान्तोऽधिगत एवं व्याप्तो हरिः परः ।

यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति ॥ १ ॥ १९ ॥

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति ॥ ॥ १ ॥ २० ॥

यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृतिं भगवो विजिज्ञास इति ॥ १ ॥ २१ ॥

यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति ॥ १ ॥ २२ ॥

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥ १ ॥ २३ ॥

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यꣳ स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति ॥ १ ॥ गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥ २ ॥ २४ ॥

SGDF
Sri Gangeshwari Digital Foundation

अणुरूपोऽपि भगवान्वासुदेवः परो विभुः। आत्मेत्युक्तः स च व्यापी न च भेदो हरौ क्वचिदि'ति परमसारे। भूमप्रसादं विना नाल्पे सुखमस्ति। मर्त्यं च पूर्वम्। 'अल्पापि ह्यमृता देवी श्रीः पूर्णातिप्रियत्वत'इति च। आत्मरतिर्भगवद्रतिः। स्वो भगवान्। सोऽस्य प्रत्यक्षत आज्ञापयिता भवतीति स्वराट्। आत्मतः प्राण आत्मत आशेत्यादि मुक्तःसन् प्राणादीनां सृष्ट्यादिकं पश्यतीत्यर्थः। 'सर्वं हि पश्यः पश्यती'ति वाक्यशेषात्। पश्य इति द्रष्टा। 'यदा पश्यः पश्यते रुक्मवर्णमि'ति श्रुतेः। 'भूमोपासनयोग्यस्तु साक्षाद्ब्रह्मैव मुख्यतः। स तद्विद्याबलेनैव विष्णुना रतिमाप्नुयात्। तेनैव क्रीडते नित्यं स्त्रीरूपो मिथुनीभवेत्। तदानन्दः स एवास्य राजा भवति नापरः। पश्येच्च प्राणसृष्ट्याद्यं ये तदन्य उपासकाः। ते यथा-योग्यमाप्स्यन्ति फलं मुक्तौ न संशय' इति परमतत्त्वे। न च भूमानं भगवो विजिज्ञास इति पृष्टःसन् भूम्नो लक्षणं स एवाधस्तात्स उपरिष्टादित्यादिना पूर्णत्वं भगवतोऽन्यस्याहङ्कारस्योपदिशतीति युज्यते। न चाहङ्कारस्य पूर्णत्वमस्ति। न च मुख्ये पूर्णत्वे युज्यमाने उपचरितं युज्यते। न चाहङ्कारस्य काचित्प्रस्तुतिः। अथ शब्दस्तु रूपान्तरा-पेक्षया युज्यते। अतः शब्दस्तत्प्रसादादिति। आत्मरतिः स्वरा-डित्यादि। यो ब्रह्माणं विदधाति पूर्वमिति ब्रह्मण उत्पत्तिप्रसिद्धेः

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वमित्यतोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टा-दहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदꣳ सर्वमिति ॥ १ ॥ अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्ता-दात्मा दक्षिणत आत्मोत्तरत आत्मैवेदꣳ सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवत्यथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषाꣳ सर्वेषु लोकेष्वकामचारो भवति ॥ २ ॥ २५ ॥

SGDF
Sri Gargeshwari Digital Foundation

स्वयम्भूरात्मभूरित्यादिष्वात्मशब्दः स्वयंशब्दश्च यथा विष्णुवाची तद्वदेवात्राप्यात्मशब्दो विष्णुवाच्येव। न च मुक्तेभ्यः प्राणादिकमुत्पद्यते। 'ॐ जगद्व्यापारवर्जमि'ति वर्णितत्वाद्भगवता। आत्मत एव प्राणो जायत इत्यवधारणान्न भगवतोऽन्यस्मात्प्राणो जायते। 'आत्मेति मुख्यतो विष्णुस्तदन्ये तूपचारतः। तथैव स्व इति प्रोक्तस्तस्माद्ब्रह्माऽऽत्मभूः स्वभूरि'ति स्कान्दे। 'इदंनामातिसामीप्यात्सर्वं पूर्णगुणत्वतः। भूमाहमात्मेतिहरिस्त्रिविधोऽपि हि सर्वदे'ति विश्वनिर्णये। 'स्त्रीगुणाः पुंगुणाश्चैव नपुंसकगुणा अपि। यदधीना व्यत्ययः स्याल्लिङ्गानां तत्र सर्वशः। कः किं कं तत्सर्वमात्माऽदितिर्देवादयस्तत'इति लिङ्गनिर्णये। 'गुरोर्विद्याहृतिर्या तु स आहार इति स्मृतः। तच्छुद्धौ ज्ञानशुद्धिः स्याज्ज्ञानशुद्धौ स्थिरा स्मृतिः। स्मृतिस्थैर्ये त्वापरोक्ष्यं हरेर्मोक्षस्ततो भवेदि'ति साधननिर्णये ॥ २६ ॥ ॐ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये सप्तमोऽध्यायः ॥ ७ ॥

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशा आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मतः सङ्कल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मन्त्रा आत्मतः कर्माण्यात्मत एवेदꣳ सर्वमिति ॥१॥ तदेष श्लोकः ॥ न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताꣳ सर्वꣳ ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति ॥ स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशःस्मृतः ॥ शतं च दश चैकं च सहस्राणि च विꣳशतिः ॥ आहार शुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवास्मृतिः ॥ स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति देवर्षये नारदाय भगवान्त्सनत्कुमारस्तꣳ स्कंद इत्याचक्षते तꣳ स्कंद इत्याचक्षते ॥ २ ॥ २६॥ ॐमिति श्रीमच्छांदोग्योपनिषदि सप्तमोऽध्यायः ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

हरिः ॐ ॥ यदिदमस्मिन् ब्रह्मपुर इति ब्रह्मपुरशब्देन ब्रह्माख्यं पुरं पूर्णत्वात्पुरमिति परं ब्रह्म ब्रह्मणः पुरमिति शरीरं चोभयं विवक्षितम् । 'प्राप्तोऽवध्यं ब्रह्मपुरं राजेव निवसाम्यहम्' । 'अस्मिंश्चेद्यदिदं ब्रह्मपुरे सर्वं समाहितम् । यदैनञ्जरा वाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यत इति स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युरि'ति वाक्यशेषाद्भगवद्वचनाच्च ब्रह्मपुरशब्देन पुरंब्रह्मोच्यत इत्यवसीयते । 'यत्पुण्डरीकं पुरमध्यसंस्थं यदिदं शरीरं तदेतदाद्यं देवसदनमि'त्यादेः शरीरं च। 'यद्वैतद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशः । यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यती'-त्यादिना परब्रह्मण्येव हृदयं स्थितम् । 'दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् । दहरोऽस्मिन्नन्तर आकाशः किं तदत्र विद्यत'इत्याकाशशब्देन भूताकाशो विवक्षितः । किं तदत्र विद्यत इत्यस्यायं परिहारः । अस्मिन्भूताकाशे परब्रह्माख्य आकाशो विद्यते । आसमन्तात्काशनादाकाशः । आसमन्तात्कमश्नातीति वा । अस्मिन्कामाः समाहिता इति वाक्यशेषात् । आसमन्तात्कामानश्नातीति वा । स च यावान्बहिः परमात्मा व्याप्तोऽस्ति तावानेव विद्यते गुणतः । पूर्णगुणत्वादल्पपरिमाणस्यापि महत्परिमाणत्वं च युज्यते । अचिन्त्यशक्तित्वात् । 'यस्मिन्विरुद्धगतयोऽप्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्ये'ति वचनात् । आनुपूर्व्येति श्रुतिप्रमाणादित्यर्थः ।

॥ हरिःॐ ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥ १ ॥ तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्रविद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥ २ ॥ यावान्वा अयमाकाशस्तावनेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रम-

SGDF
Sri Gangeshwari Digital Foundation

स्वयम्भूरात्मभूरित्यादिष्वात्मशब्दः स्वयंशब्दश्च यथा विष्णुवाची तद्वदेवात्राप्यात्मशब्दो विष्णुवाच्येव। न च मुक्तेभ्यः प्राणादिकमुत्पद्यते। 'ॐ जगद्व्यापारवर्जमि'ति वर्णितत्वाद्भगवता। आत्मत एव प्राणो जायत इत्यवधारणान्न भगवतोऽन्यस्मात्प्राणो जायते। 'आत्मेति मुख्यतो विष्णुस्तदन्ये तूपचारतः। तथैव स्व इति प्रोक्तस्तस्माद्ब्रह्माऽऽत्मभूः स्वभूरि'ति स्कान्दे। 'इदंनामातिसामीप्यात्सर्वं पूर्णगुणत्वतः। भूमाहमात्मेतिहरिस्त्रिविधोऽपि हि सर्वदे'ति विश्वनिर्णये। 'स्त्रीगुणाः पुंगुणाश्चैव नपुंसकगुणा अपि। यदधीना व्यत्ययः स्याल्लिङ्गानां तत्र सर्वशः। कः किं कं तत्सर्वमात्माऽदितिर्देवादयस्तत'इति लिङ्गनिर्णये। 'गुरोर्विद्याहृतिर्या तु स आहार इति स्मृतः। तच्छुद्धौ ज्ञानशुद्धिः स्याज्ज्ञानशुद्धौ स्थिरा स्मृतिः। स्मृतिस्थैर्ये त्वापरोक्ष्यं हरेर्मोक्षस्ततो भवेदि'ति साधननिर्णये॥ २६ ॥ ॐ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये सप्तमोऽध्यायः॥ ७॥

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशा आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मतः सङ्कल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मन्त्रा आत्मतः कर्माण्यात्मत एवेदꣳ सर्वमिति॥१॥ तदेष श्लोकः॥ न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताꣳ सर्वꣳ ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति॥ स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशःस्मृतः॥ शतं च दश चैकं च सहस्राणि च विꣳशतिः॥ आहार शुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवास्मृतिः॥ स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति देवर्षये नारदाय भगवान्त्सनत्कुमारस्तꣳ स्कंद इत्याचक्षते तꣳ स्कंद इत्याचक्षते॥ २॥ २६॥ ॐमिति श्रीमच्छांदोग्योपनिषदि सप्तमोऽध्यायः॥ ७॥

SGDF
Sri Gargeshwari Digital Foundation

हरिः ॐ ॥ यदिदमस्मिन् ब्रह्मपुर इति ब्रह्मपुरशब्देन ब्रह्माख्यं पुरं पूर्णत्वात्पुरमिति परं ब्रह्म ब्रह्मणः पुरमिति शरीरं चोभयं विवक्षितम् । 'प्राप्तोऽवध्यं ब्रह्मपुरं राजेव निवसाम्यहम्' । 'अस्मिंश्चेद्यदिदं ब्रह्मपुरे सर्वं समाहितम् । यदैनञ्जरा वाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यत इति स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युरि'ति वाक्यशेषाद्भगवद्वचनाच्च ब्रह्मपुरशब्देन पुरंब्रह्मोच्यत इत्यवसीयते । 'यत्पुण्डरीकं पुरमध्यसंस्थं यदिदं शरीरं तदेतदाद्यं देवसदनमि'त्यादेः शरीरं च। 'यद्वैतद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशः । यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यती'त्यादिना परब्रह्मण्येव हृदयं स्थितम् । 'दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् । दहरोऽस्मिन्नन्तर आकाशः किं तदत्र विद्यत'इत्याकाशशब्देन भूताकाशो विवक्षितः । किं तदत्र विद्यत इत्यस्यायं परिहारः । अस्मिन्भूताकाशे परब्रह्माख्य आकाशो विद्यते । आसमन्तात्काशनादाकाशः । आसमन्तात्कमश्नातीति वा । अस्मिन्कामाः समाहिता इति वाक्यशेषात् । आसमन्तात्कामानश्नातीति वा । स च यावान्बहिः परमात्मा व्याप्तोऽस्ति तावानेव विद्यते गुणतः । पूर्णगुणत्वादल्पपरिमाणस्यापि महत्परिमाणत्वं च युज्यते । अचिन्त्यशक्तित्वात् । 'यस्मिन्विरुद्धगतयोऽप्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्ये'ति वचनात् । आनुपूर्व्येति श्रुतिप्रमाणादित्यर्थः ।

॥ हरिःॐ ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥ १ ॥ तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्रविद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥ २ ॥ यावान्वा अयमाकाशस्तावनेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रम-

SGDF
Sri Gargeshwari Digital Foundation

'आनुपूर्वी श्रुतिर्वेद आम्नायश्चेति कथ्यत'इत्यभिधानात् । अन्यथाऽनिशमित्युक्तिविरोधात् । 'एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा एष म आत्मान्तर्हृदये ज्यायान्पृथिव्या' इति हृदयस्थस्यैवाणुत्वमहत्वोक्तेश्च । 'गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्रशङ्का। चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीता' इति च श्रुतिः। 'सुविरुद्धा अश्रुताश्च गुणाः सन्त्येव सर्वशः । दोषाः केऽपि न सन्त्येव श्रुता अपि तु सर्वश' इति गारुडे । किं तदत्र विद्यत इति पृष्टत्वाद्धृद्गत आकाशो हृदयशब्देनोच्यते । हृद्ययनात् । तस्मिन् हृदयाख्य आकाशे ब्रह्माख्य आकाशो विद्यत इत्यर्थः। अन्यथा कथं भूताकाशस्य दहरस्य बहिराकाशसमत्वम् । दहरोऽस्मिन्नन्तराकाश इति पूर्वोक्ताकाशस्य दहरत्वमुक्तम् । उत्तरस्य तु यावान्वा अयमाकाश इत्यनन्तपरिमाणत्वम् । अतो ब्रह्माकाश एवोत्तरः । पूर्वोक्तस्याभूताकाशत्वे 'तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यं तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यं सहस्रशीर्षꣳ देवमि'त्यादि कथं युज्यते ? । न हि भगवदन्तःस्थितमेवान्यत्किञ्चिद्विजिज्ञासितव्यम् । तद्वावेत्यवधारणाच्च । उत्तरस्यापरब्रह्मत्वे च सर्वाधारत्वं 'नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मे'त्यादि न युज्यते । किं तदत्रविद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्यस्य य एषोऽन्तर्हृदय आकाश इत्येव

सावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति ॥ ३ ॥ तं चेद्ब्रूयुरस्मिꣳश्चेदिदं ब्रह्मपुरे सर्वꣳ समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैनज्जराऽवाप्नोति प्रध्वꣳसते वा किं ततोऽतिशिष्यत इति ॥ ४ ॥ स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशंति यथानुशासनं यं यमंतमभिकामा भवन्ति

SGDF
Sri Gargeshwari Digital Foundation

परिहारः। न तू'भे अस्मिन्द्यावापृथिवी'त्यादि। तत्तु विजिज्ञासितव्यत्वे हेतुत्वेन सामर्थ्यकथनमेव। न हि द्यावापृथिव्यादेरेव विजिज्ञास्यत्वम्। 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथे'ति हि श्रुतिः। उभे अस्मिन्द्यावापृथिवीत्याद्युभशब्दो मुक्तामुक्तराशिव्यपेक्षया। 'यच्चास्येहास्ति यच्च नास्ती'ति वाक्यशेषात्। अस्येति संसारिणः। न हि संसारिणो मुक्ता उपकारकाः। यद्यस्य नोपकारकं तत्तस्य नास्तीत्युच्यतेऽन्यस्य सत्वेऽपि। यथा वित्तादि। यथायोग्यमेवैनं भगवन्तं प्रजा मुक्ता अन्वाविशन्ति तच्छासनानुसारेण। यं यं कामं कामयते तं तस्मादेवोपजीवन्ति। तदविदुषां पुण्यानि क्षयिष्णुफलान्येव भवन्ति। एतांश्च सत्यान्कामान्भगवदीयान्। 'बृहत्त्वात्पूर्णकामत्वाद्विष्णुर्ब्रह्मपुराभिधः। तस्मिंस्तस्य पुरं देहस्तस्मिन्हृदयमास्थितम्। हृदयाकाशगो विष्णुस्तस्मिन्त्सर्वमिदं स्थितम्। स सत्यकामो भगवान्यदिष्टं तस्य तद्भवेत्। तस्मिन्त्समाहिताः कामाः सत्याः पुंसामपि ध्रुवम्। तस्यैव

यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवंति ॥ ५ ॥ तद्यथेह कर्म(चि)जितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते तद्य इहात्मानमननुविद्य व्रजंत्येतां॰श्च सत्यान्कामां॰स्तेषां॰ सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजंत्येतां॰श्च सत्यान्कामां॰स्तेषां॰ सर्वेषु लोकेषु कामचारो भवति ॥ ६ ॥ १ ॥

स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते ॥ १ ॥ अथ यदि मातृलोककामो भवति संकल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन सम्पन्नो महीयते ॥ २ ॥ अथ यदि भ्रातृलोककामो भवति संकल्पादेवास्य भ्रातरः समुत्तिष्ठंति तेन भ्रातृलोकेन संपन्नो महीयते ॥ ३ ॥ अथ यदि स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्तिष्ठंति तेन स्वसृलोकेन संपन्नो महीयते ॥ ४ ॥ अथ यदि सखिलोककामो भवति संकल्पादेवास्य सखायः समुत्तिष्ठंति तेन सखिलोकेन संपन्नो महीयते ॥ ५ ॥ अथ यदिगंधमाल्यलोककामो भवति संकल्पादेवास्य गंधमाल्ये समुत्तिष्ठतस्तेन गंधमाल्यलोकेन संपन्नो महीयते ॥ ६ ॥ अथ यद्यन्न-

SGDF
Sri Gargeshwari Digital Foundation

ह्यनुसारेण सत्यत्वं नान्यथा क्वचित्। यथा बिम्बानुसारेण प्रतिबिम्ब-प्रकाशनम्। तस्माद्ये मुक्तियोग्याः स्युस्तेषां कामाः पुरापि तु। सत्याः सन्तस्तदज्ञानान्न दृश्यन्ते तथाऽखिलाः। अज्ञानमनृतं प्रोक्त-मृगताविति धातुतः। तस्माद्द्रष्टुं यदिष्टं स्यात्तद्दृष्टिनियमो न तु। अमुक्तस्य हरेर्लोकं मुक्तो गत्वा हि पश्यति। अज्ञत्वादेव सुप्तौ तु नित्यं यान्तोऽपि माधवम्। नैव पश्यन्त्यसौ विष्णुर्हृदयं नाम हृद्गतेः। एवं हृदयनामानं विष्णुं जानन्हि नित्यशः। विष्णुलोकगतेः पुण्य-माप्त्वा विष्णुं व्रजेत्तथा। यस्य सम्यक्प्रसादोऽस्ति विष्णोरेव स उच्यते। सम्प्रसादः स उत्थाय शरीरात्प्राप्य केशवम्। यथास्वरूपस्तु भवेद्यं प्राप्यासौ स्वरूपताम्। आप्नोति स परो ह्यात्मा भगवा-निन्दिरापतिः। इत्याह सा रमादेवी पश्यन्ती परमं पदम्।

पानलोककामो भवति संकल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्नपानलोकेन संपन्नो महीयते ॥ ७ ॥ अथ यदि गीतवादित्रलोककामो भवति संकल्पा-देवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो महीयते ॥ ८ ॥ अथ यदि स्त्रीलोककामो भवति संकल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन सम्पन्नो महीयते ॥ ९ ॥ यं यमन्तमभि-कामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेवास्य समुत्तिष्ठति तेन संपन्नो महीयते ॥ १० ॥ २ ॥

त इमे सत्याः कामा अनृताऽपिधानास्तेषाꣳ सत्यानाꣳ सतामनृत-मपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥ १ ॥ अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विंदतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथाऽपि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विंदेयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंत्यनृतेन हि प्रत्यूढाः ॥ २ ॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तꣳ हृद्ययमिति तस्माद्धृदयमहरहर्वा एवं वित्स्वर्गं लोकमेति ॥ ३ ॥ अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतद-मृतमभयमेतद्ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥ ४ ॥

SGDF
Sri Gangeshwari Digital Foundation

सदित्यमृतधर्माणो मुक्ताः श्रीरपि चेरिताः। तीत्युक्ता मर्त्यधर्माणस्तेषां नियमनाद्धरिः। सत्यमित्युच्यते सद्भिः सेतुश्चापि विधारणात्। सितमस्मिन् जगत्सर्वमिति सेतुरितीरितः। एतं सेतुं प्रतिपुमानन्यत्तीर्त्वा ह्यदोषवान्। स प्राप्यो ब्रह्मचर्येण मनोवाक्कर्मभिस्तु यत्। चरणं ब्रह्मणि परे ब्रह्मचर्यं हि तत्स्मृतम्। तेनैव ब्रह्मचर्येण भवेयुर्ब्रह्मलोकगाः। एतेषां ब्रह्मलोकः स्यात्परं ब्रह्मैव लोकनात्। ब्रह्मलोक इति प्रोक्तं तस्य लोकोऽपि कथ्यते। यज्ञ इष्टं च सत्रं च मौनंचानशनं तथा। परस्य ब्रह्मणो ज्ञानं सर्वमेतदुदीरितम्। परस्य ब्रह्मणो लोके श्वेतद्वीपाभिधे परे। अरण्यौ चार्णवौ दिव्यौ चिदानन्दरसात्मकौ। यावानुच्चः स्वर्गलोकस्तावानुच्चतया स च। श्वेतद्वीपो

तानि ह वा एतानि त्रीण्यक्षराणि सतियमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ ५ ॥ ३ ॥

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैतꣳ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतꣳ सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः ॥ १ ॥ तस्माद्वा एतꣳ सेतुं तीर्त्वाऽन्धः सन्ननंधो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा एतं सेतुं तीर्त्वाऽपि नक्तमहरेवाभिनिष्पद्यतेऽसकृद्विभातो ह्येवैष ब्रह्मलोकः ॥ २ ॥ तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविंदंति तेषामेवैष ब्रह्मलोकस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ३ ॥ ४ ॥

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव यो ज्ञाता तं विंदतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवेष्ट्वाऽत्मानमनुविंदते ॥ १ ॥ अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विंदतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते ॥ २ ॥ अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविंदतेऽथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेवतदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरंमदीयꣳ सरस्तदश्वत्थः सोमसवन-

SGDF
Sri Gargeshwari Digital Foundation

दिविष्ठोऽतस्तत्र मद्यं सरोवरम् । सर्वभोज्यात्मकं दिव्यं तत्राश्वत्थाः सुधास्रवाः । तत्र विष्णोः पुरं दिव्यमपराजितनामकम् । विमिताख्यं च पर्यङ्कं विष्णोर्मानेन सम्मितम् । चित्सुवर्णमयं दिव्यं लक्ष्मी-स्तत्तत्स्वरूपिणी । स श्वेतद्वीपगो विष्णुः पर्यङ्कब्रह्मनामकः । स एष हृदि नाडीषु पञ्चरूपः प्रतिष्ठितः । विष्णोरणिम्नो रूपाणि पञ्चनाडी-स्थितानि तु । नारायणाख्यं सौषुम्नं मध्यस्थं रक्तवर्णकम् । शुक्लं तु वासुदेवाख्यं नादिन्यामग्रतः स्थितम् । पिङ्गलायां पिङ्गलं तु रूपं सङ्कर्षणाभिधम् । पश्चिमे वज्रिकायां च पीतं प्रद्युम्ननामकम् । इडायामनिरुद्धाख्यं नीलरूपं व्यवस्थितम् । सूर्येऽप्येवं पञ्चरूपो भगवान्संव्यवस्थितः । आदित्यनामा चादित्वात्तद्व्याप्तं सूर्यमण्डलम् । तद्रश्मिभिस्तथा व्याप्ताः समस्ताः सूर्यरश्मयः । तस्मिन्नाडीषु च

स्तदपराजिता पूर्ब्रह्मणः प्रभुविमितꣳ हिरण्मयं ॥ ३ ॥ तद्य एवैतावरं च वै ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविंदंति तेषामेवैष ब्रह्मलोक-स्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ४ ॥ ५ ॥

अथ या एता हृदयस्य नाड्यस्ताः पिंगलस्याणिम्नस्तिष्ठंति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिंगल एष शुक्ल एष नील एष पीत एष लोहितः ॥ १ ॥ तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छंतीमं चामुष्मादादित्यात्प्रतायंते त आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्तेऽमुष्मिन्नादित्ये सृप्ताः ॥ २ ॥ तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा सम्पन्नो भवति ॥ ३ ॥ अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥ ४ ॥ अथ यत्रैतस्मा-च्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमते स ओमिति वा होद्वा मीयते स यावत्क्षिपेन्मानस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदं(नं)निरोधोऽविदुषाम् ॥ ५ ॥ तदेष श्लोकः । शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति उत्क्रमणे भवन्ति ॥ ६ ॥ ६ ॥

SGDF
Sri Gangeshwari Digital Foundation

प्रोतास्तथा नाडीस्थरश्मयः। तन्नाडीसंस्थितं विष्णुं मध्ये जीवः प्रपद्यते। तत्तेजसा हि सम्पन्नः सुप्त इत्यभिधीयते। ओमित्येव वहन्नित्यं वायुरोंवाडितीरितः। तेन वामत्वमायाति मुक्तिकाले ह्युपासकः। दिव्यचिद्रूपभावो हि वामभाव उदीरितः। यदैनं नेतुमन्विच्छन्मनः क्षिपति मारुतः। आदित्याख्यं तदा विष्णुं याति जीवः स्वविग्रये'ति पर्यङ्कोपासनायाम् ॥ ६ ॥

'इन्द्रो विरोचनश्चैव श्रुत्वा तु ब्रह्मणोऽक्षिगम्। विष्णुमानन्दरूपं तं सम्यक्ज्ञानविपर्ययौ। आपतुस्तत्र देवेन्द्रो जानन्नपि विरोचनम्। मोहयन्ननुरूपाणि तस्य वाक्यान्युवाच ह। यथा विरोचनो नैव जानीयाद्विष्णुमञ्जसा। स्ववाक्यं चानृतं न स्यात्तथा ब्रह्माऽप्युवाच ह। अयोग्या ह्यसुरा ज्ञाने वक्तव्यं चैव नानृतम्। मच्छापादासुरो भावः प्रह्लादादेर्न तु स्वतः। अयं त्वासुर एवातो वक्ष्याम्यस्योभयं यथा। इन्द्रस्तु शुद्धभावत्वात्पुनरायास्यति ध्रुवम्। इत्यभिप्रायतः प्रोक्तो ब्रह्मणाक्षिगतो हरिः। अयोग्यत्वात्तु तच्छ्रुत्वा प्रतिरूपं विरोचनः। मत्वाऽप्स्वादर्शके चैव पप्रच्छ कतमस्त्विवति। तत्रापि

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाꣳश्च लोकानाप्नोति स सर्वाꣳश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ १ ॥ तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामानितीन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥ २ ॥ तौ ह द्वात्रिꣳशतं वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्ताववास्तमिति तौ होचतुर्य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह भगवतो वाचो वेदयन्ते तमिच्छन्ताववास्तामिति ॥ ३ ॥ तौ ह प्रजापतिरुवाच य एषोऽतरक्षणि

SGDF
Sri Gargeshwari Digital Foundation

तु हरेर्भावं हृदि कृत्वा चतुर्मुखः। दृश्यते ह्येष एवेति तत्त्ववेदि-
विवक्षया। तथापि योग्यतैवात्र भूयसीति निवेदितुम्। दर्शय-
न्प्रतिरूपस्य दोषानाह प्रजापतिः। अलङ्कारादिभिर्युक्तः पश्यस्वेति
विवेचयन्। यथा देहगुणे गौण्यं दोषे दोषास्तथैव तु। तथाप्य-
शुद्धभावत्वात्प्रतिरूपस्य तद्गुणान्। परस्य ब्रह्मणो जानन्ययौ तुष्टमनाः
स्वयम्। असुराणामविश्वासनिवृत्त्यर्थं पितामहः। माध्यस्थ्यं ज्ञाप-
यानश्च जानन्वैरोचनं मनः। प्राहाज्ञानां पराभाव इत्युच्चैश्च पुनः पुनः।
तथाप्यशुद्धभावत्वादजानन्नेव निर्ययौ। गत्वा चैव परंब्रह्म प्रति-
रूपात्मकं सदा। दिदेश सर्वासुराणां शरीरालङ्कृतेरपि। अलङ्कृतिं

पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वंतेषु परिख्यायत इति होवाच ॥ ४ ॥ ७ ॥

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आलोमभ्य आनखेभ्यः प्रतिरूपमिति ॥ १ ॥ तौ ह प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्ष्येथामिति तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥ २ ॥ तौ होचतुर्यथैवेदमावां भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ परिष्कृताविति एष आत्मेति होवाचैतदमृतमभयमेद्ब्रह्मेति तौ ह शांतहृदयौ प्रवव्रजतुस्तौ ॥ ३ ॥ तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति स ह शांतहृदय एव विरोचनोऽसुरान् जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महय्यन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति ॥ ४ ॥ तस्मादप्यद्येहाददा-नमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणाꣳ ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति सꣳस्कुर्वंत्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ५ ॥ ८ ॥

SGDF
Sri Gangeshwari Digital Foundation

ब्रह्मणश्च प्रत्यक्षेणोपलम्भिताम्। अतोऽसुरा न दास्यन्ति न यजन्त्यात्मनः परम्। स्वभोगेनैव तृप्तिः स्यादिति सर्वेऽपि मेनिरे। तत्संस्कारवशेनैव स्वयं ब्रह्मेतिवेदिनः। अभवन्नपतंश्चैव तमोऽन्धे नित्यदुःखिताः। इन्द्रश्च जानन्नपि तु मोहयन्नसुरं तदा। गत्वा निववृते पश्चादिव पश्यन् सदोषताम्। पुनः पुनश्च मोहाय गत्वा गत्वा निवर्तते। कथञ्चिदेव विज्ञातं मयेत्यज्ञान्विमोहितुम्। तद्योग्यान्येव वाक्यानि ब्रह्माप्याह पुनः पुनः। गरीयसी योग्यतेति ज्ञापय-

---

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिञ्छरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति ॥ १ ॥ नाहमत्र भोज्यं पश्यामीति स समित्पाणिः पुनरेयाय तꣳ ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन्पुनरागम इति स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोज्यं पश्यामीति ॥ २ ॥ एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिꣳशतं वर्षाणीति स हापराणि द्वात्रिꣳशतं वर्षाण्युवास तस्मै स होवाच ॥ ३ ॥ ९ ॥

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श तद्यद(द्य)पीदꣳ शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥ १ ॥ न वधेनास्य हन्यते नास्य स्रामेण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोज्यं पश्यामीति ॥२॥ स समित्पाणिः पुनरेयाय तꣳ ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥ ३ ॥ न वधेनास्य हन्यते नास्य स्रामेण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि

SGDF
Sri Gurgeshwari Digital Foundation

न्पूर्ववत्पुनः। सन्दिग्धान्येव वाक्यानि प्रोवाचेन्द्राय चात्मभूः। स्वप्नं प्रदर्शयन्यस्तु पूज्यते सर्वदैवतैः। स एव विष्णुरित्याह तत्राप्याह पुरन्दरः। दर्शयन्नासुरीं बुद्धिं स्वप्नदृश्यविवक्षया। घ्नन्तीवैनमदन्तीव तथा न स्यात्परो हरिः। इत्युक्त आह ब्रह्मैनं सुप्तिस्थो भगवानिति। यत्र सुप्तो ह्ययं जीव इत्युक्तः प्राह वासवः। नाहं जानामि मत्तोऽन्यं सुप्तौ नान्योऽपि दर्शयेत्। अहमस्मीति भूतानि न च पश्यन्ति कानिचित्। यदि जीवः परात्मा वाप्यन्योन्यस्मिन्नपीतताम्। गतौ तदाप्यपीतस्तु शं विनैव भवेदिति। उक्तो ब्रह्माऽब्रवीच्छक्रं ज्ञापयंस्तत्त्वमञ्जसा। योऽयं शरीरसम्बन्धी जीव इत्यव-

---

रोदितीव नाहमत्र भोज्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिँशतं वर्षाणीति स हापराणि द्वात्रिँशतं वर्षाण्युवास तस्मै स होवाच ॥ ४ ॥ १० ॥

तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाहं खल्वयमेवँ सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोज्यं पश्यामीति ॥ १ ॥ स समित्पाणिः पुनरेयाय तँ ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाहं खल्वयं भगव एवँ संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोज्यं पश्यामीति ॥ २ ॥ एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्च वर्षाणीति स हापराणि पञ्च वर्षाण्युवास तान्येकशतं संपेदुरेतत्तद्यदाहुरेकशतँ ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै स होवाच ॥ ३ ॥ ११ ॥

मघवन्मर्त्यं वाव इदँ शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥ १ ॥ अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेनरूपेणाभिनिष्पद्यन्ते

SGDF
Sri Gurgeshwari Digital Foundation

धार्यताम् । भूतैष्यद्वर्तमानेषु यस्य नो देहसङ्गतिः । सोऽशरीरः परो विष्णुरमृतो नित्यमूर्तिमान् । अधिष्ठाय तथापीमं देहमास्ते स ईश्वरः । जरामृत्युपरीतोऽयं जीवात्मा देहसङ्गतेः । परेणेयं सुखं प्रोक्तं प्रियमित्येव पण्डितैः । परेणेयमभद्रं यदप्रियं तदुदीरितम् । न जीवस्य तयोर्हानिः कदाचिद्विद्यते क्वचित् । अशरीरं परं ब्रह्म नैव ते स्पृशतः क्वचित् । अन्नामा भगवान्विष्णुर्व्याप्तत्वात्परमेश्वरः । तेनैव भ्रियमाणत्वाद्ब्रह्माभ्रमिति कीर्तितः । वायोः पत्नी विद्युदुक्ता विशेषद्युतिहेतुतः । ब्रह्माणी स्तनइत्नुः स्यात्सर्वशब्दात्मिका यतः । एतेषां ज्ञानवैशेष्यान्नातिदेहेन सङ्गतिः । अतः प्रियाप्रिये तेषामपि न ब्रह्मणः किमु । विष्णवीयं हि सुखं तेषां स्वभर्त्रीयमथापि च । न ह्यन्येयं सुखं तेषामतस्ते प्रियवर्जिताः । यथा ते परमाकाशाद्विष्णोरेव समुत्थिताः । तमेव प्राप्य संयान्ति नैजमानन्दमूर्जितम् । एवं सम्यक्प्रसादेन विष्णोर्मुक्तोऽपि योऽपरः । यं प्राप्य ते निजानन्दमाप्नुवन्ति स केशवः । तं प्राप्य रमते मुक्तः स्त्रीभिर्यानैश्च बन्धुभिः । यथैव सारथिर्याने एवं देहे च मारुतः । यथा रथी

॥ २ ॥ एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा नोपजन९ स्मरन्निद९ शरीर९ स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिन् शरीरे प्राणो युक्तः ॥ ३ ॥ अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेद९ शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥ ४ ॥ अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते ॥ ५ ॥ य एते ब्रह्मलोके तं वा एतं देवा आत्मानमुपासते तस्मात्तेषा९ सर्वे च लोका आत्ताः सर्वे च कामाः सर्वा९श्च लोकानाप्नोति सर्वा९श्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ ६ ॥ १२ ॥

SGDF
Sri Gargeshwari Digital Foundation

तथा विष्णुर्जीवोऽन्यरथगो यथा । यदाश्रितानीन्द्रियाणि प्राणश्चापि यदाश्रयः । यदाश्रयोऽप्ययं जीवो यो वेदैषां प्रवर्तनम् । दर्शनं श्रवणं घ्राणं जिह्वां स्पर्शं मनस्तथा । तदीयान्विषयांश्चैव यो वेदाखिलमञ्जसा । स विष्णुः परमो ज्ञेयो देवताः करणानि च । स एतैरिन्द्रियैर्विष्णुर्भोगाननुभवत्यजः । स्वरूपेणैव शक्तोऽपि जीवदेहस्थितो हरिः । भुङ्क्ते तदिन्द्रियैर्भोगाञ्छुरितैरिन्द्रियैः स्वकैः । जीवं तदिन्द्रियाण्येवं प्राणं च व्याप्य कृत्स्नशः । भुङ्क्ते तत्तद्गुणान् विष्णुर्नैव दोषान् कदाचन । तमेवं देवताः सर्वा वाय्वाद्याः समुपासते । तस्माद्देववशा लोकाः सर्वकामाः सजीवकाः । तमेतं यो यथा ज्ञात्वा पश्येद्विष्णुं सनातनम् । आप्नोति सर्वकामांश्च सर्वलोकांश्च कामत' इति सामसंहितायाम् ।

उभौ लोकाववाप्नोतीति वचनान्न लोकायतिकमतं विरोचनोक्तम् । किन्तु बिम्बप्रतिबिम्बयोरभिमान्यैक्याभिप्रायेण जीवात्मैव महय्य इति मायावाद एव । न चात्र जीव आत्मशब्दोक्तः । 'तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इतीशजीवयोः सतात्पर्य भेदाभिधानात् । न हि जीवादन्यस्य प्रियाप्रियानुभवोऽस्ति । न च मुक्तस्यापि प्रियाप्रियापहतिरस्ति । न च विष्णोरत्र विवक्षितं प्रियम् । पराधीनरतिप्राप्तिर्हि प्रियमत्र विवक्षितं न हि तद्भगवतः । मुक्तानां तु भगवदधीनरतित्वात्प्रियमस्त्येव । 'जीवा मुक्ता अमुक्ताश्च पराधीनरतित्वतः । न प्रियापहतिः क्वापि स्वातन्त्र्यान्न हरेः प्रियम् । पराधीनरतिर्यस्मात्प्रियमित्युच्यते बुधैः । हरेरधीनता तु स्याद्यद्यपि ब्रह्मवायुवोः । तदन्यवशताभावादप्रियाविति तौ श्रुतौ । यथा राज्ञः स्वराट्शब्दो रुद्रस्येश्वरता तथा । यथा शक्रस्य चेन्द्रत्वं तद्वदप्रियता तयोः ।

SGDF
Sri Gargeshwari Digital Foundation

यथा राज्याः स्व(श्व)राज्ञीत्वं यथा चोमेश्वरी स्मृता। विद्युतः स्तनयित्नोश्च तथैवाप्रियता श्रुते'ति च परमश्रुतौ। 'स एव सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत'इति मुक्तस्य तत्प्रसादात्तत्प्राप्त्या निजानन्दानुभवश्रुतेश्च। स उत्तमः पुरुष इति तस्य जीवादुत्तमत्वश्रुतेश्च। अपरपुरुषापेक्षया ह्युत्तमपुरुषशब्दो भवति। अन्यथोत्तमशब्द एव स्यात्। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत'इति च। 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते। तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरे'। 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति'। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः'। 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति'। 'एतमानन्दमयमात्मानमुपसङ्क्रम्येमाँल्लोकान्कामान्नीकामरूप्यनुसञ्चरन्'। 'न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः'। 'कृष्णो मुक्तैरिज्यते वीतमोहैरि'त्यादेश्च। 'स तत्र पर्येति जक्षन् क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरमि'त्यत्रापि भेदेनावस्थानश्रुतेः। उपशब्दादन्तशब्दाच्च मुक्तस्य परंज्योतिःसमीपावस्थानावगतेश्च। न च जीवमात्रं देवा उपासते। ऊर्जे पृथिव्या भक्त्वा योरुगायमुपासत' इति हि श्रुतिः। 'भेददृष्ट्याभिमानेन निःसङ्गेनापि कर्मणे'त्यादेश्च। 'भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः। भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलङ्कृषीष्ट भगवान् वचांसि म' इत्यादौ भगवत एवेन्द्रियैर्भोगोक्तेश्च। 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे' इति च। 'ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनादि'ति भगवद्वचनं च। 'इदं पश्यामि जिघ्राणीत्यपि जीवा न वै विदुः। द्रव्याणामपरिज्ञानाद्भेदासौ पुरुषोत्तम'इति च। 'स उत्तमः पुरुष'इति भगवत एवायं परामर्शः। 'ॐ अन्यार्थश्च परामर्श' इति भगवद्वचनात्। 'उत्तमः पुरुषस्त्वन्यः

SGDF
Sri Gargeshwari Digital Foundation

परमात्मेत्युदाहृत' इति च। 'ॐ जगद्व्यापारवर्जमि'त्यल्पैश्वर्यत्वं मुक्तस्य भगवताऽभिहितम्। अतो यं प्राप्य जीवः स्वेन रूपेणाभिनिष्पद्यते स भगवानुत्तमः पुरुष इति परामर्शः। 'स्वप्ने महीयमानश्चरति यत्रैतत्सुप्त' इति पुरस्तादपि भेदोक्तेः। न हि महीयमान एव जीवश्चरति।

प्रायोग्यः सारथिः। प्रयोगेन यानस्य। 'यन्ता सारथिरानेता प्रायोग्य इति कीर्तित' इत्यभिधानात्। 'अन्येभ्यो दीप्यमानत्वाद्दैवं चक्षुर्मनः स्मृतमि'ति च। य एते ब्रह्मलोके तेषु रमते अनुविद्य। शास्त्राचार्यानुसारेण विदित्वा विजानात्यापरोक्ष्येण। 'वेदनं शास्त्रतो ज्ञानं विज्ञानं ब्रह्मदर्शनमि'ति च ॥ १२ ॥

'श्यामो हृदिस्थितो विष्णुः शबलो विश्वरूपवान्। जीववर्णो जीवगतो लोहितश्चक्षुषि स्थित'इति मानसे। 'हयग्रीवमुखोत्थानि यानि वाक्यानि तानि तु। रमा ददर्श तान्येव ब्रह्मा तान्येव नारदः। यानि विष्णोरयोग्यानि प्रार्थनाद्यात्मकानि तु। तान्युत्तरेषां वाक्यानि भविष्याण्यवदद्धरिः। एवं रमा तथा ब्रह्मा छान्दोग्योपनिषद्वि से'ति सामसंहितायाम् ॥ १३ ॥

'आकाशोऽतिप्रकाशत्वान्नामरूपे ऋते स्थितः। ब्रह्माख्यो भगवान्विष्णुस्तद्वेश्म प्राप्नुयामहम्। यशोऽहं सर्ववर्णानां मत्तोऽन्येषां यशो भवेत्। सोऽहं मम यशोदातृ यशसां यश उत्तमम्।

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामीत्यभिसम्भवामीति ॥ १ ॥ १३ ॥

आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतꣳ स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवानि(मि) ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्वेतमदत्कमदत्कं श्वेतं लिन्दु माऽभिगां लिन्दु माऽभिगाम् ॥ १ ॥ १४ ॥

SGDF
Sri Gargeshwari Digital Foundation

विष्णवाख्यं परमं ब्रह्म श्वेतं श्वसनगं यतः। अदत्कमद्यमानं कं स्वानन्दानुभवात्मकम् । लिन्दु तद्भतिदं यस्मात्तदहं प्राप्नुयां सदा ॥ १४ ॥

उपदिष्टः परेणैव त्वेवमाह चतुर्मुखः। उवाच च मनोर्विद्यां प्रजाभ्यो मनुरेव च। तस्मात्सर्वेन्द्रियाणीशे निधाय पुरुषोत्तमे। दृष्ट्वा तं परमं विष्णुं तल्लोकं प्रतिपद्यते। नावर्तेत पुनस्तस्मात्कदाचित्केनचित्क्वचिदि'ति च ॥ १५ ॥

पूर्णानन्दमहोदधिः परतमो नित्यः परस्मात्सदा सर्वज्ञः सकलेशिता गुणनिधिर्नित्योत्सवस्तद्विदाम्। सर्वस्मादधिकं मम प्रियतमस्त्विष्टादपीष्टोत्तमस्सर्वस्माच्च हितात्सदा हिततमः प्रीतो भवेन्मे हरिः॥ 'यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत्। वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि॥ हनशब्दो ज्ञानवाची हनुमान्मतिशब्दितः। रामस्य स्वृतरूपस्य वाचो नेता गुणोदधिः। भृतमो भीम इत्युक्तो वाचो मा मातरः स्मृताः। ऋगाद्या इतिहासश्च पुराणं पञ्चरात्रकम्। प्रोक्ताः सप्तशिवास्तत्र शयो

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बी शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिꣳसन्सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते ॥ ॥ १ ॥ १५ ॥ इति श्रीमच्छान्दोग्योपनिषदि अष्टमोऽध्यायः ॥ ८ ॥

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ॥ हरिः ॐ ॥ इति श्रीमच्छान्दोग्योपनिषत्सम्पूर्णा ॥

SGDF
Sri Gangeshwari Digital Foundation

भीमस्ततः स्मृतः ॥ मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् । मध्व आनन्दतीर्थः स्याचृतीया मारुती तनुः । इति सूक्तगतं रूपत्रयमेतन्महात्मनः । यो वेद वेदवित्स स्यात्तत्त्ववित्तत्प्रसादत'इति सद्भावे ॥ आनन्दतीर्थ इति तु यस्य नाम तृतीयकम् । पूर्णप्रज्ञेन तेनेदं कृतं भाष्यं हरेः प्रियम् ॥ नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम । नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

ॐ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्येऽष्टमोऽध्यायः ॥ ८ ॥ श्रीमच्छान्दोग्यभाष्यं सम्पूर्णम् ॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

आथर्वणो(मुण्डको)पनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥ हरिः ॐ ॥ आनन्दमजरं नित्यमजमक्षयमच्युतम् । अनन्तशक्तिं सर्वज्ञं नमस्ये पुरुषोत्तमम् ॥ 'मनोर्वैवस्वतस्यादावथर्वा ब्रह्मणोऽजनि । मित्रश्च वरुणश्चाथो प्रहेतिर्हेतिरेव च । ब्रह्मणः प्रथमे कल्पे शिवः प्रथमजः स्मृतः । सनकाद्यास्तु वाराहे ब्रह्मा विष्णोः सुतोऽग्रज'इति ब्रह्माण्डे । 'ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः । ता एव परमा विद्या यदा विष्णोस्तु वाचका'इति परमसंहितायाम् । 'ऋग्भिर्हौत्रेण शम्सन्ति तथौद्गात्रैस्तुवन्ति ये । विष्णुमेव तथा तस्मै यजुर्भिरपि जुह्वति । स्तुवन्त्याथर्वणैश्चैनं सेतिहासपुराणकैः । न विष्णोः सदृशं किञ्चित्परमं चापि मन्वते । सर्वोत्तमं तं जानन्तस्ते हि भागवतोत्तमाः । वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते । एतदन्ते च मध्ये च

आथर्वणो(मुण्डको)पनिषत्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥ १ ॥ अथर्वणे यां प्रवदेत ब्रह्मा अथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् । स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥ २ ॥ शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ ३ ॥ तस्मै स होवाच ॥ द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति । परा चैवापरा च ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मैवोक्त्वा विजानताम्। ऋगादिपञ्चधासंस्थं शब्दब्रह्म प्रशाम्यति। यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च। स्तुवन्ति सत्यकर्माणं सत्यं सत्येषु सामसु'। 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये'। 'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहमि'ति च भारते। 'चतुर्दश महाविद्यास्थानानि वेदितव्यानि भवन्ती'ति च मूलश्रुतिः। 'पञ्चरात्रमृगाद्याश्च सर्वमेकं पुराऽभवत्। मूलवेद इति ह्याख्या काले कृतयुगे तदा। नैवर्क्सामादिनामानि तदा वेदस्य चाभवन्। नैव चेन्द्रादिनामानि विष्णोरन्यत्र कुत्रचित्। ब्रह्मरुद्रेन्द्रपूर्वैस्तु नामभिः प्रोच्यते हरिः। देवतात्वेन चेज्यस्स ब्रह्माद्या मनुनामकाः। वक्तृत्वेन पितृत्वेन कारित्वेनैव चादरात्। इज्यन्ते देवताः सर्वा न तु देवतया क्वचित्। अनन्ययाजिनस्ते तु तस्मात्कार्तयुगा जनाः। प्राप्नुवन्ति हरिं तं च तस्माद्वेदे न किञ्चन। पारावर्यं हरेर्यस्मादुत्थितास्तुरगाननात्। ऋगाद्या अनुव्याख्यान्तास्तस्मात्सर्वैर्हरिं यजेत्। तस्माद्ब्रह्मादयः सर्वे मनवो मानवास्तथा। यजन्ति सर्ववेदैस्तं जानन्ति च विनिश्चयात्। अशक्तः पञ्चरात्रेण ऋगाद्यैर्वाथ तं यजेत्। ऋगाद्यैरेव स त्रैतैर्भिन्नैरिष्टो जनैर्हरिः। द्वापरीयैर्जनैर्विष्णुः पञ्चरात्रैस्तु केवलैः। कलौ तु नाममात्रेण पूज्यते भगवान्हरिः। एको वेदः कृते ह्यासीत्त्रेतायां स त्रिधाऽभवत्। स एव पञ्चधा जातो द्वापरं प्राप्य वै युगम्। उत्सन्नः स कलिं प्राप्य वेदः प्रायेण सर्वशः। मुख्यो धर्मः कार्तयुगो वर्तितव्यः कलावपि। त्रेतादौ तदशक्त्या हि धर्मोऽन्यः सम्प्रकीर्तितः। कृते भागवताः सर्वे वेदाश्च पुरुषास्तथा। त्रेतायां भिन्नविषयास्ततस्त्रैविद्यतां

तत्रापरा। ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति॥ अथ परा। यया तदक्षरमधिगम्यते॥५॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्व-

SGDF
Sri Gangeshwari Digital Foundation

गताः। तस्मादेकः सर्ववेदैर्ज्ञेयो विष्णुः सनातनः। पूज्यो यज्ञैः सोपचारैर्ध्येयो वन्द्यश्च सर्वदे'त्यादि नारायणसंहितायाम्। 'वेदवादाश्चानुयुगं हसन्तीति च नः श्रुति'रिति भारते। 'वेदैश्च पञ्चरात्रैश्च भक्त्या यज्ञैस्तथैव च। दृश्योऽहं नान्यथा दृश्यो वर्षकोटिशतैरपी'त्यादि वाराहे। अत्रापि तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यन्नित्यादिना कर्मविषयामपरविद्यामुक्त्वा 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामि'त्यारभ्याथर्वणानेव मन्त्रान्परविद्यात्वेनाह। चतुर्वेदसंस्कारवतामेव च विद्यायामधिकार उक्तः। 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमि'ति॥ शिरोव्रतमित्युपलक्षणत्वेन। 'स्ववेदव्रतयुक्तस्य सर्ववेदगतास्वपि। अधिकारोऽस्ति विद्यासु नावेदव्रतिनः क्वचिदि'ति व्याससमृतौ। एतद्ब्रह्म चतुर्मुखः॥ ॥ १॥

तदेतत्सत्यं भगवान्। तत्कामाः कर्माण्याचरथ। तदा सापि परविद्या। अन्यथा प्लवा ह्येते अदृढा यज्ञरूपाः। भगवद्विषयत्वेन

गतं सुसूक्ष्मम्। तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥ ६॥ यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति॥ यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्॥ ७॥ तपसा चीयते ब्रह्म ततोऽन्नमभिजायते। अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्॥ ८॥ यस्सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते॥ ९॥ १॥

तदेतत्सत्यम्। मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि॥ तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके॥ १॥ यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने। तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् (श्रद्धया हुतम्)॥ २॥ यस्याग्निहोत्रमदर्शपूर्णमासमनाग्रयणमतिथिवर्जितं च। अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान् हिनस्ति॥ ३॥ काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः॥ ४॥ एतेषु यश्चरते भ्राजमानेषु यथाकालं

SGDF
Sri Gargeshwari Digital Foundation

कृते एष वः पुण्यः सुकृतो ब्रह्मलोकः। परब्रह्मलोकः। 'निष्कामं ज्ञानपूर्वं यन्निवृत्तमिह चोच्यते। निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमि'ति व्यासस्मृतौ। 'स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयत'इति च श्रुतिः। 'सहयज्ञाः प्रजाः सृष्ट्वे'त्युक्त्वा 'एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ स जीवती'ति च। 'यान्ति मद्याजिनोऽपि मामि'ति च। 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्चयवन्ति त' इति च। यस्त्वात्मरतिरित्युक्त्वापि कुर्याद्विद्वांस्तथासक्त इत्येवोक्तत्वाच्च। 'ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतस'इति च। 'लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघे'त्युक्तत्वाच्च नात्राश्रमान्तरविरोधः। त्रेतायां बहुधा सन्ततानि कृते त्वेकप्रकारेणैव सन्ततानि। 'अग्निष्टोमादिभिर्यज्ञैः सर्वदेवस्थितं हरिम्। यजन्ति तांश्च कारित्वाद्वसुस्तस्मात्तथायजत्। पृथक्पृथक्च त्रेतायां यजन्ते देवतागणान्। यथा कृते तथा प्राज्ञास्त्रेतायां बहुधा तत इति'पाद्मे। 'यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः'। 'यो देवानां देवतमो जनित्रो वायोस्तस्मै सोममेभ्यो जुहोमि। एवं वायोः पितरं विष्णुमेव

चाहुतयो ह्याददायन्। तन्नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः॥५॥ एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति। प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः॥६॥ प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति॥७॥ अविद्यायामन्तरे वेष्ट्य(वर्त)मानाः स्वयं धीराः पण्डितंमन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥८॥ अविद्यायां बहुधा वर्तमानाः स्वयं कृतार्था इत्यभिमन्यन्ति बालाः। यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते॥९॥ इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।

SGDF
Sri Gangadhareshwar Digital Foundation

यजन्ति देवैः सह ये कृते जनाः। एवं त्रेतायां केचिदन्ये पृथक्तानिष्ट्वा विष्णावर्पयन्ते न चान्य' इति च ब्रह्माण्डे। विष्णोः सर्वेभ्यः किञ्चिदुत्तमत्वं जानन्त इमं लोकमाविशन्ति। साम्यं हीनत्वं वा जानन्तो हीनतरं तम एव विशन्ति। 'देवेभ्य उत्तमं विष्णुं राजवद्यस्तु मन्यते। याजी स मानुषं याति साम्यहीनत्ववित्तम' इति च। त्रैविद्या मामिति तु 'येप्यन्यदेवता भक्ताः। तेऽपि मामेव कौन्तेय यजन्ति'। 'अहं हि सर्वयज्ञानां भोक्ते'त्युक्तत्वादज्ञानपूर्वयाजिनस्त्रैविद्याः ॥ २ ॥

'अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका। अक्षरं परमं श्रीस्तु परतः परमक्षरम्। वासुदेवः परानन्द इति त्रिविधमक्षरमि'ति च। 'विष्ण्वङ्गानां हि नामानि द्युवादीनि तु सर्वशः। क्रीडादिशक्ति-

---

नाकस्य पृष्ठे सुकृते तेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति ॥ १० ॥ तपःश्रद्धे येऽभ्यु(ह्यु)पवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः। सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥ परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥ तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १३ ॥ २ ॥ १ ॥

तदेतत्सत्यम्। यथा सुदीप्तात्पावकाद्विष्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥ १ ॥ दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥ २ ॥ एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ ३ ॥ अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ ४ ॥ तस्मादग्निः समिद्धो(धो)यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्याम्। पुमान्रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात्सम्प्रसूताः ॥ ५ ॥ तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च। संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ॥ ६ ॥ तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि। प्राणापानौ व्रीहि-

SGDF
Sri Gangadhara Digital Foundation

रूपत्वात्तज्ञत्वादन्यवस्तुष्वि'ति च । 'वासुदेवः पुमान्नामा पूर्णत्वात्स स्वयोषिति । रमायां गर्भमदधात्प्रजास्तस्मात्प्रजज्ञिर' इति च । सप्तार्चिषो वृत्तयः । होमाः सम्बन्धाः । लोका गोलकाः । गुहाशयां बुद्धौ । 'लोपः समान'इति सूत्रादेकयकारलोपः । प्रतिपुरुषं सप्त सप्त । भगवतः कर्म चेष्टा तपो ज्ञानं च ॥ १ ॥ (३) ॥

परामृतब्रह्माख्यः पुरुषो भगवानेव । 'यैषा चेष्टा भगवतो यच्च ज्ञानं परात्मनः । तत्सर्वं भगवानेव ये च धर्मा बलादय'इति च । 'स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुतिः । विज्ञानाद्ब्रह्मणः परम् । 'नाभिह्रदादिह सतोऽम्भसि यस्य पुंसो विज्ञानशक्तिरहमास-मनन्तशक्ते'रिति भागवते । 'प्राणः प्रणयनाद्विष्णुर्वक्तृत्वाद्वागुदीरितः ।

यवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥ ७ ॥ सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्तहोमाः । सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयां निहिताः सप्त सप्त ॥ ८ ॥ अतः समुद्रा गिरयश्च सर्वे अस्मा-त्स्यन्दन्ते सिन्धवः सर्वरूपाः । अतश्च सर्वा ओषधयो रसाश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥ ९ ॥ १ ॥ (३) ॥

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् । एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरति ह सोम्य ॥ १ ॥ आविः सन्निहितं गुहाचरं नाम महत्पदम् । अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्च यत् । एतज्जानथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम् ॥ २ ॥ यदर्चि-मद्यदणुभ्योऽणु च यस्मिँल्लोका निहिता लोकिनश्च । तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः । तदेतत्सत्यम् । तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥३॥ धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्दधीत । आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ ४ ॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ५ ॥ यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः ॥६॥ अरा इव रथनाभौ संहता यत्र नाड्यः । स एषोऽन्तश्चरते बहुधा जायमानः । ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ॥ ७ ॥ यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये

SGDF
Sri Gurgeshwari Digital Foundation

मनो मन्तृत्वतो विष्णुः सर्वजीवनियामक'इति शब्दनिर्णये । अमृतस्य मुक्तस्य सेतुः ॥ 'ॐ मुक्तोपसृप्यव्यपदेशात् ॐ' ॥ 'मुक्तानां परमा-गतिरि'त्यादेः । 'हृदयस्थः सदा विष्णुर्बहुधा चैकधा भवन् । चरति स्वेच्छयैवान्तः सर्वजीवान्नियामयन्नि'ति प्रवृत्ते । 'परा अप्यवरा यस्मात्स हि विष्णुः परावरः । ब्रह्माण्डमध्यगो नित्यं तपत्येष रवौ स्थित'इति च । सूर्यादयस्तं न भासयन्ति । इदं ब्रह्मैव विश्वं पूर्णम् । इदमेव वरिष्ठं सर्वोत्तमम् । इदंशब्दानां बहुत्वाद्ब्रह्मविषय एवेदं-शब्दः ॥ २ ॥ २ ॥ (४) ॥

स्वादुवत्सर्वदाऽत्ति । न तु स्वाद्वेव । 'तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेदे'त्यज्ञानां स्वादुनिषेधात् । जीवाद्यमेव नाश्नाति भगवान्न तु नाश्नात्येव । तस्येदाहुः पिप्पलं स्वाद्वित्युक्त-त्वात् । 'स्वातन्त्र्येणैव भोक्तृत्वाद्दुःखाभोगाच्च सर्वदा । अभोक्ता चैव भोक्ता च भगवान्विष्णुरव्यय'इति च तत्त्वसारे । 'नास्तीशोऽस्या यतोऽन्यो हि ततोऽनीशा हरेर्मतिः । तया मुह्यति जीवस्तमन्यं ज्ञात्वा

ब्रह्मपुरे ह्येष व्योम्न्यात्मा सम्प्रतिष्ठितः । मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय ॥ तद्विज्ञानेन परिपश्यन्ति धीरा आनन्द-रूपममृतं यद्विभाति ॥ ८ ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ९ ॥ हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ १० ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ ११ ॥ ब्रह्मैवेदममृतं पुरस्तात्प(द्ब्रह्म प)श्चाद्ब्रह्म दक्षिणत-श्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ १२ ॥ ॥ २ ॥ २ ॥ (४) ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ १ ॥ समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ २ ॥ यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं

SGDF
Sri Gurgrakwari Digital Foundation

विमुच्यते। जीवादन्यः स्वतन्त्रोऽयं यतोऽतः पुरुषोत्तम'इति ब्रह्मसारे। पुण्यं चानिष्टं विधूय। 'सत्यो हि भगवान्विष्णुः सद्गुणत्वात्प्रकीर्तितः। असुरास्तद्विरुद्धत्वादनृताः परिकीर्तिताः। तस्य विष्णोर्निधानं तु वैकुण्ठो लोक उत्तम'इति च। सर्वगत्वात्तद्दूरेऽन्तिके च। 'नान्यैर्देवैर्हरिं पश्येज्ज्ञानरूपेण वायुना। ब्रह्मणा परमज्ञानरूपेण हरिणा तथा। प्रसन्नेनैव तं पश्येदन्येऽनुज्ञाप्रदायिन'इति च। षोडशकलाशरीरो न भवतीति निष्कलः। 'यदा पश्यः पश्यते रुग्मवर्णम्'। 'आनन्दरूपममृतं यद्विभाती'त्युक्तत्वात् ॥ १ ॥ (५) ॥

स आत्मज्ञार्चको ब्रह्मणो धाम प्राणं वेद। यत्र विश्वं पूर्ण ब्रह्म निहितम्। 'प्रधानं धाम विष्णोस्तु प्राण एव प्रकीर्तितः। उपायैर्यो विजानीयात्प्राणस्थं परमेश्वरम्। तस्य प्राणे हरिर्नित्यमाविष्टो

पुरुषं ब्रह्मयोनिम्। तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ ३ ॥ प्राणो ह्येष सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी। आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥ ४ ॥ सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्। अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥ ५ ॥ सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः। येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ ६ ॥ बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति। दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥ ७ ॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥ ८ ॥ एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा ॥ ९ ॥ यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥ १० ॥ १ ॥ (५) ॥

स वेदैतत्परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम्। उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥ १ ॥ कामान्यः

SGDF
Sri Gargeshwari Digital Foundation

भवति ध्रुवम् । नित्यं प्राणे स्थितस्यैव विष्णोरावेश एव हि । प्राणद्वारेण यज्ज्ञानदीपनं ज्ञानिनः सदा । सन्निधानं यथा प्राप्ताः पिशाचाः पुरुषेष्वपि । तत्र स्थित्वापि भुञ्जन्त आविशेयुः पुनश्च ते । मन्त्रादिभिस्तथा विष्णुः सदा प्राणस्थितोऽपि सन् । ज्ञानदीप्त्यादिकं कुर्याज्ज्ञानिनः पुनरेव त्वि'ति च । एतच्छुक्रं प्रत्यन्यदतिवर्तन्ते । 'सर्वं तीर्त्वा हरिं शुक्रं प्रतिवर्ती भवेत्पुनः । ज्ञानिनः सा हि मुक्तिः स्यात्तन्नैवात्येति कश्चने'ति महावाराहे । सर्वतो देहादेर्मुक्ताः सर्वगं भगवन्तं प्राप्य तमेवापियन्ति । 'देहादेः सर्वतो मुक्ताः सर्वगं पुरुषोत्तमम् । प्राप्य तस्मिन्प्रविश्याथ मोदन्तेऽन्तर्बहिस्तथे'ति च । ब्रह्मलोकेषु स्थित्वा परान्तकाले परिमुच्यन्ति । 'अविरोधश्च सादृश्यमेकदेशस्थितिस्तथा । एकीभावस्त्रिधा प्रोक्तो नैकीभावः स्वरूपयोः । कुतोऽभूतस्य भवनं स्वरूपस्यैक्यमेव हि । अतो नदीनां जीवानां विरुद्धानां नृणामपि । अब्धिना हरिणा चैव तथैव च नरान्तरैः । एकीभावस्तु संश्लेषो विरोधस्य च वर्जनम् । स्वरूपैक्यं कुतस्तेषां नित्यभिन्नस्वरूपिणाम् । हरेरपि स्वरूपाणामेकीभावो यदोच्यते । संश्लेष एव सिद्धत्वात्स्वरूपैक्यस्य नो भव'इति च । गताः मुक्ताः । प्राणादिपञ्चदशकलारूपा देवता । अन्ये च देवाः सर्वे प्रतिदेवतासु

कामयते मन्यमानः स कामभिर्जायते तत्र तत्र। पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामाः ॥ २ ॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ ३ ॥ नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात्। एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ॥ ४ ॥ सम्प्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः। ते सर्वगं सर्वतः प्राप्य धीरा मुक्तात्मानः सर्वमेवापियं(विश)ति ॥ ५ ॥ वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोकेषु परान्तकाले परामृता(ः)त्परिमुच्यन्ति सर्वे ॥ ६ ॥ गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रति देवतासु।

SGDF
Sri Gargeshwari Digital Foundation

देवताप्रतिबिम्बभूतासु प्रजासु प्रति प्रतिस्थिताः कर्माणि विज्ञानमयो जीवश्च परमात्मनि प्रविशन्ति । 'प्रतिबिम्बो हरेः प्राणस्तस्य चान्याः कलाः क्रमात् । कलानां देवता अन्या देवतानां नरा अपि । तस्मात्सर्वेषु मुक्तेषु नरेष्वपि नियामकाः । तिष्ठन्ति नात्र सन्देहः परमात्मनि चाखिला' इति मुक्तिविवेके । 'कलाभ्यश्चान्यदेवेभ्यः कर्म प्रत्यवरं यतः । कलाभ्यः पृथगुक्तं तत्पुष्करः कर्म चोच्यत'इति । अन्यथा गता भविष्यन्तीत्यध्याहारो दोषः । न च मूलरूपाणि प्रतिदेवता इत्युच्यन्ते देवानाम् । प्रतिरूपशब्दवद्धि प्रतिदेवताशब्दः । 'विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र । इमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति यथा सोम्येमाः समुद्रायणा' इति नदीदृष्टान्तपूर्वकं पुरुषप्राप्तिकथनाच्च मुक्ता देवता एवोच्यन्ते । 'स प्राणमसृजते'त्यादेश्च पुरुषो भगवान् । 'अगम्यनामरूपत्वादमुक्तैर्मुक्तिगा नराः । विहीननामरूपास्तु न हि तद्रहितत्वतः । अशरीरो यथा वायुः सामान्यागम्यदेहतः । एवं नद्यः समुद्रस्थाः सामान्यागम्यरूपत'इति च । 'स्वकीयमुदकं नद्यः समुद्रे नैव जानते । वायुस्तु तत्पृथक्ज्ञात्वा मेघे कृत्वा प्रवर्षती'ति च । विमुक्त इत्यमुक्त इत्यर्थः, विप्रिय इतिवत् । अविहायेति च । अनन्तं वै नामेति च श्रुतेः । 'परंब्रह्म विदित्वा तु बृंहितः स्यात्स्वयोग्यतः । नायोग्यं किञ्चिदाप्नोति कुत एव हरेर्गुणानि'ति च । 'ब्रह्मत्वं बृंहितत्वं स्याज्जीवानां न परात्मता । अस्वतन्त्रस्य जीवस्य कुतो नित्यस्वतन्त्रते'ति स्कान्दे । 'यत्रामृतः स पुरुषो ह्यव्ययात्मा' । 'यत्र तत्सत्यस्य परमं निधानम्' । 'अमृतस्यैष सेतुः' । 'शरवत्तन्मयो भवेत्' । 'ब्रह्म तल्लक्ष्यमुच्यते' । 'निरञ्जनः परमं साम्यमुपैति' । इत्यादिना मुक्तस्य सर्वत्र भगवत्सकाशाद्भेदस्यैवोक्तत्वाच्च ॥ 'ॐ मुक्तोपसृप्यव्यपदेशात् ॐ' ॥ 'ॐ जगद्व्यापारवर्जं ॐ' ॥ 'ॐ प्रकरणाद

SGDF
Sri Gangeshwari Digital Foundation

सन्निहितत्वाच्चे'त्यादिना भगवतापि सर्वत्र भेदस्यैव सूचितत्वात् । 'न ते महित्वमन्वश्नुवन्ति' । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' । 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं स भवान्केवलो हर'इत्यादेश्च । 'मुक्तेभ्योऽपि मनुष्येभ्यो देवा एव गुणाधिकाः । तेभ्यो वायुस्ततो विष्णुः परिपूर्णगुणः सदा । ये त्वेतदन्यथाविद्युस्ते हि यान्त्यधरं तमः । ये त्वेतदेवं जानन्ति ते यान्ति परमं हरिमि'ति च । 'देवानां सन्ततौ जाताः प्रायशो ज्ञानिनः कृते । बलवद्धेतुतश्चान्ये यस्माद्ब्रह्मविदः सुराः । न सन्ततौ ब्रह्मविदो नराणां ज्ञानिनामपि । प्रायशः स्युः सुराणां च नियमोऽयं कृते युगे । तस्मात्स भगवान्विष्णुर्ज्ञेयः सर्वोत्तमोत्तमः ॥ सदा सर्वगुणैः पूर्णो योऽनन्तः पुरुषोत्तम' इति च ॥ प्रियतां भगवान्मह्यं प्रेष्ठप्रेष्ठतमः सदा । मम नित्यं नमाम्येनं परमोदारसद्गुणम् ॥ २ ॥ ॥ ३ ॥ (६) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमाथर्वणोपनिषद्भाष्यं सम्पूर्णम् ॥ श्रीपाण्डुरंगविठ्ठलार्पणमस्तु ॥

॥ श्रीहयग्रीवाय नमः ॥

कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ॥ ७ ॥ यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥८॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति । नास्याब्रह्मवित्कुले भवति ॥ तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९ ॥ तदेष श्लोकः (तदेतदृचाऽभ्युक्तम्) । क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वन्त एकर्षिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १० ॥ तदेतत्सत्यमृषिरङ्गिराः पुरोवाच । नैतदचीर्णव्रतोऽधीते ॥ ॐ नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ११ ॥ ॥२॥३॥(६)॥ इति श्रीमदाथर्वणोपनिषत्समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीहयवदनाय नमः ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

माण्डूकोपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ पूर्णानन्दज्ञानशक्तिस्वरूपं नित्यमव्ययम् । चतुर्धा सर्वभोक्तारं वन्दे विष्णुं परं पदम् ॥ मण्डूकरूपिणा वरुणेन चतूरूपो नारायणोऽत्र स्तूयते । 'ध्यायन्नारायणं देवं प्रणवेन समाहितः । मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययमि'ति पाद्मे । 'ओमित्युक्तं तु यद्ब्रह्म तदक्षरमुदाहृतम् । ओतमत्र जगद्यस्मादों तस्माद्भगवान्हरिः । तदिदं गुणपूर्त्यैव सर्वमित्येवशब्दितम् । भाविभूतभवत्कालेष्वेकरूपतया हरिः । सर्वदा नित्य इत्येषा व्याख्योङ्कारस्य कीर्तिते'ति बृहत्संहितायाम् । 'ओमित्याक्रियते यस्मादोङ्कारोऽसावतः परः । सर्वत्वमिति पूर्णत्वं तन्नान्यस्य हरेः क्वचिदि'ति नैर्गुण्ये । सर्वमोङ्कार एवेत्यन्यस्य पूर्णत्वनिवारणम् । त्रिकालातीतत्वं च तस्यैव । प्रकृतेरपि त्रिकालातीतत्वं विद्यत इत्यन्यदितिविशेषणम् । 'परमं यो महद्ब्रह्म' । 'तदेव ब्रह्म परमं कवीनाम्' । 'पूर्णमदः पूर्णमिदमि'त्यादिषु प्रसिद्धं च ब्रह्मणः पूर्णत्वमित्याह । सर्वं ह्येतद्ब्रह्मेति । श्रीब्रह्मादिसकलदेहेषु स्थित्वा आदानादिकर्ता योऽयं कश्चित्प्रतीयते । जीवानामस्वातन्त्र्यदर्शनात् ।

॥ श्री माण्डूकोपनिषत् ॥

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ ओमित्येकाक्षरमिदं सर्वम् ॥ तस्योपव्याख्यानं भूतं भवद्भविष्यदिति । सर्वमोङ्कार एव यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥१॥ सर्वं ह्येतद्ब्रह्म । अयमात्मा ब्रह्म । सोयमात्मा चतुष्पात् ॥२॥

SGDF
Sri Gurgeshwari Digital Foundation

सोऽपि स एवेति दर्शयति । अयमात्मा ब्रह्मेति । 'पूर्णस्तु हरिरेवैको नान्यत्पूर्णं कदाचन । विना च प्रकृतिं नान्यत्कालातीतं परात्मनः । कालश्चैव दिशो देवाः प्रकृत्यात्मान ईरिताः । अभिमानात्तु जीवानां न कालातीतता भवेत् । मुक्तानामपि पूर्वत्र कालसम्बन्ध ईरितः । पूर्णत्वं च सदा विष्णोः प्रसिद्धं सर्ववेदतः । सोऽयं विष्णू रमाब्रह्मरुद्रानन्तादिगः सदा । आदानादनकर्तृत्वादात्मा तेषामगोचरः । इति मण्डूकरूपी सन् ददर्श वरुणः श्रुतिमि'ति हरिवंशेषु । 'चतुर्धाऽवस्थितो देहे परमात्मा सनातनः । वैश्वानरो जागरितस्थानगो गजवक्त्रकः । निर्माता बाह्यसंवित्तेर्जीवानां तदगोचरः । अष्टादशमुखान्यस्य पुमाकाराणि सर्वशः । मध्यमं तु गजाकारं चतुर्बाहुः परः पुमान् । पादौ हस्तिकरो हस्ता इति सप्ताङ्ग ईरितः । स्थूलान्भोगानिन्द्रियैः स शुभान्भुङ्क्ते न चाशुभान् । विश्वं स्थूलं समुद्दिष्टं सर्वगम्यत्वहेतुतः । तत्सम्बन्धी नरोऽनाशाद्वैश्वानर उदाहृतः । विनायकस्तु विश्वस्य ध्यानादैद्गजवक्त्रताम् । तथैव तैजसध्यानात्रिध्यानादिन्द्र इन्द्रताम् । चतुर्ध्यानाच्च रुद्रत्वं रुद्र आप जनार्दनात् । एवंभूतगुणो विष्णुश्चतुरात्मा परात्पर' इति महायोगे । 'जाग्रद्दर्शनसंस्काररूपत्वात्स्वप्नगं तु यत् । प्रविविक्तं तु तज्ज्ञानकारणोऽन्तर्ज्ञ उच्यत'इति वाराहे । 'सुषुप्तं तु तमो ज्ञेयं हरिं प्राप्य तदावृतः । न कामयेन्नैव पश्येज्जीवः स्वात्मतमो विना । कालं च तस्य स्थानस्य पतिः प्राज्ञो हरिः स्वयम् । चित्तस्थो दर्शयेत्तस्मात्तैजसः स्वप्नकृद्धरिः । न बाह्यं ज्ञापयेद्यस्मात्प्राज्ञस्तेन जनार्दनः । एकीभावं व्रजेतां च तेन विश्वश्च तैजसः । एकीभूतस्तदा प्राज्ञो घनो जीवस्तमोवृतः । तन्मात्रस्य

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमःपादः ॥ ३ ॥ स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयःपादः ॥ ४ ॥ यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन

SGDF
Sri Gargeshwari Digital Foundation

स कालस्य घनप्रद(ज्ञ)ः प्रदर्शनादि'ति प्रकाशिकायाम् । आनन्दमयः पूर्णानन्दः । चेतोमुखः ज्ञानस्वरूपमुखः । प्रज्ञानघन इति विपरीत-समासः । घनप्रज्ञ इति वक्ष्यमाणत्वात् । विषयभोगं विनाऽऽनन्द-मात्रभुक्त्वादानन्दभुगिति विशेषः । आनन्दमयत्वचेतोमुखत्व-सर्वज्ञत्वसर्वेश्वरत्वादि चतुष्टयेऽपि समम् । अन्यत्रातिदेशार्थ-मेकत्रानन्दमयत्वं चेतोमुखत्वं चोक्तम् । एष चतूरूप आत्मा सर्वज्ञत्वसर्वेश्वरत्वादिलक्षणः । 'परमात्मा चतूरूपः सर्वप्राणिशरीरगः । विश्वश्च तैजसः प्राज्ञस्तुरीयश्चेति कथ्यते ॥ तानि रूपाणि सर्वाणि पूर्णानन्दमयानि तु । चेतोमुखानि सर्वाणि पूर्णज्ञानस्वरूपतः । मुखशब्दस्तु सर्वस्य देहस्याप्युपलक्षणः । तथापि मुखशब्दोऽयं पूर्णत्वं सूचयेद्विभोः । ज्ञानस्य मुख्यवाचित्वान्मुखवाच्यपि सन्स्वत'इति मार्कण्डेये । 'पूर्णानन्दस्वरूपस्य क्रीडाभोगो न चान्यथा । यथाऽऽ-दित्यस्य दीपेन न विशेषोऽस्ति कश्चने'ति ब्रह्मतर्के । 'प्रमाणस्य प्रमाणं च बलवद्विद्यते मुने । ब्रह्मदृष्टान्यतो मन्त्रान्प्रमाणं सलिलेश्वरः । अत्र श्लोका भवन्तीति चकारैव पृथक्पृथगि'ति गारुडे । खण्डचतुष्ट-येऽपि पृथक्पृथक् । 'प्रभवः सर्वभावानां विष्णुरेव न संशयः । इत्थं सतां निश्चयः स्यादन्यथा त्वसतां भवेत् । सर्वस्य हि प्रणेतृत्वात्प्राणो

एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयःपादः ॥५॥ एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी । एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥ अत्रैते श्लोका भवन्ति । बहिःप्रज्ञो विभुर्विश्वो ह्यन्तः-प्रज्ञस्तु तैजसः । घनः प्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥ १ ॥ दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः । आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥ २ ॥ विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् । आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥ ३ ॥ स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसम् । आनन्दं च तथा प्राज्ञं त्रिधा तृप्तिं विजानथ ॥४॥ त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः । वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥ ५ ॥ प्रभवस्सर्वभावानां सतामिति विनिश्चयः ।

SGDF
Sri Gargeshwari Digital Foundation

नारायणः परः। तां सृष्टिं बहुधा प्राहुर्ज्ञानिनोऽज्ञानिनस्तथा। विष्णुर्विकृतिमायातिमहदादिस्वरूपिणीम्। तत्तद्विविधभूतिस्तु सृष्टिः प्रोक्ता ह्यपण्डितैः। स्वप्नमायासरूपां च केचिदज्ञा जना विदुः। अविकारस्य चिन्मात्रस्वेच्छयैवाखिलं जगत्। उत्पद्यत इति प्राज्ञाः प्राहुर्ब्रह्मादयोऽखिलाः। पूर्णशक्तेः कुतो माया सार्वज्ञात्स्वप्नवत्कुतः। सर्वदोषव्यतीतस्य विकारः कुत इष्यते। तस्मादेवाविकारस्य विष्णोरिच्छावशादिदम्॥ यथार्थमेव सम्भूतमिति वेदवचोऽखिलम्। केचित्कालत एवैतां सृष्टिमाहुरकोविदाः। केचिद्रुद्राद्ब्रह्मणश्च प्रधानादिति चापरे। विमूढाः सर्व एवैते यतो नारायणः परः। सर्वकर्ता सर्वशक्तिरेक एव च नापरः। प्रधानकालब्रह्मेशमुखाः सर्वेऽपि तद्वशाः। तस्यापि विष्णोः सृष्टिं तु केचिदाहुरनैपुणाः। अतृप्तस्यैव भोगार्थं क्रीडार्थं तु विपश्चितः। सा च क्रीडा स्वभावोऽस्य कुतोऽतृप्त्या स्पृहा विभो'रिति हरिवंशेषु॥ १॥

'विष्णुस्तुरीयरूपेण द्वादशान्ते व्यवस्थितः। मुक्तानां प्राप्यरूपोऽसौ व्यवहारे न दृश्यते। सम्यक्समाहितानां तु प्राप्तानां षोडशीं कलाम्। अपरोक्षदृशां क्वापि तुरीयं दृश्यते पदम्। अन्तर्बहिश्च सौक्ष्मं

सर्वं जनयति प्राणश्चेतोंशून्पुरुषः पृथक्॥ ६॥ विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः। स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता॥ ७॥ इच्छामात्रं प्रभोस्सृष्टिरिति सृष्टौ विनिश्चिताः। कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः॥ ८॥ भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे। देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेति॥ ९॥ प्रथमः खण्डः॥ १॥

नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टमव्यवहार्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः। अत्रैते श्लोका भवन्ति। निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः। अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः॥ १॥ कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ। प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिद्ध्यतः॥ २॥ नात्मानं न परांश्चैव

SGDF
Sri Gargeshwari Digital Foundation

च समाधिज्ञानमेव च । बहिःशब्दादिकं जानन्पश्यन्स्वप्नं तथैव च । यदा भवति साऽवस्था ह्युभयज्ञानशब्दिता । एतत्सर्वं तुरीयेण रूपेण न करोत्यजः । सर्वज्ञानप्रदश्चापि मुक्तस्यैव तुरीयक'इति ब्रह्माण्डे । 'अमुक्तस्य त्वदृश्यत्वात्षोडशीं वा कलामृते । तुरीयोऽदृष्ट इत्युक्तो ग्रहणादेरगोचरः । विना मुक्तिं ततस्तेनाऽव्यवहार्य इतीरितः । जाग्रदादिप्रवृत्तिस्तु लक्षणं ह्यनुमापकम् । अलक्षणस्तद्राहित्यादचिन्त्यस्तत एव च । तत एव ह्यनिर्देश्यश्चिदानन्दैकलक्षणः । मुक्तस्य सर्वव्यापारहेतुरेव तुरीयकः । एकः प्रधान उद्दिष्ट आत्मा पूर्णत्वतः श्रुतः । तदेवास्य स्वरूपं यदैकात्म्यं तेन कीर्तितः । प्रत्ययो ज्ञानरूपत्वात्सार आनन्दरूपतः । प्रपञ्चो विस्तृतेर्विष्णुः शम आनन्दरूपतः । उत्कृष्टानन्दरूपत्वादुपशब्दः प्रकीर्तितः । प्रपञ्चं देहबन्धाख्यं तुरीयः शमयेद्यतः । प्रपञ्चोपशमस्तेनाप्युक्तः स भगवान्प्रभुः । निर्दुःखसुखरूपत्वाच्छिवशब्दः श्रुतौ श्रुतः । अन्यथाप्रत्ययो द्वैतं शमयेत्तं यतो हरिः । अद्वैतस्तेन चोद्दिष्टस्तुरीयः पुरुषोत्तम'इति माहात्म्ये । 'अपेक्ष्य वस्तुयाथार्थ्यं द्वित्वमन्यस्वरूपता । इण् गताविति धातोश्च तज्ज्ञानं द्वैतमुच्यत'इति सङ्कल्पे । स आत्मा स विज्ञेय इति सोऽयमात्मा चतुष्पादिति चतुर्धाविभक्त उच्यते उपसंहारार्थम् । सोऽयमात्माध्यक्षरमिति पृथगारम्भात् । 'विश्वादिरूपो यत्स्वात्मा स विज्ञेयो मुमुक्षुभिः । निर्विशेषोऽपि भगवांश्चतुर्धा समुदीरित'इति प्रत्यये । सर्वदुःखानां निवृत्तेः कारणभूतस्तुरीयो देवः । 'हरिस्तुरीयरूपेण मोक्षदः सम्प्रकीर्तितः । देवः स सर्वजीवानां गम्यत्वात्समुदीरितः । भावा जीवाः समुद्दिष्टा भवन्त्येते यतो विभोः । ईशानामपि मुक्तानां ईशानः सोऽननाच्छ्रुत'इति प्रत्याहारे । 'कार्यकारणबन्धस्य तदधीनत्वतो विभुः । विश्वादिरूपो भगवान्बद्ध इत्युच्यते श्रुतौ । कुतो बन्धः परस्यास्य बन्धेशस्य चिदात्मन'इति

SGDF
Sri Gangeshwari Digital Foundation

च। 'स बद्धः स दुःखी स बन्धयति स दुःखयतीति। स जीवः स प्रकृतिः स जीवयति स प्रकरोतीति। सोऽवरः सोऽनित्यः सोऽवरयति सोऽनित्ययतीति' इति कौषारवश्रुतिः। 'विष्णोर्गुणोक्तिपरता मम नित्यं सुरेश्वराः। तदर्थमन्यद्वचनमतस्तस्य विरोधि यत्। तन्ममार्थो न हि क्वापि साहं तत्सरणात्सदा। सरस्वतीति सम्प्रोक्ता तस्माज्ज्ञेया हरेर्गुणा' इति महोपनिषदि। 'नात्मानं न परांश्चैव न सत्यं चापि नानृतम्। प्राज्ञः संवेदयेत्किञ्चिज्जीवकालतमो विना। सुप्त्यवस्थां सुखं चापि विना नान्यत्प्रदर्शयेत्। सर्वं तु दर्शयेन्मुक्तौ तुरीयः परमेश्वर' इति प्रत्यये। 'स्वतन्त्रे कर्तृशब्दः स्यात्प्राज्ञस्यावेदनं यथा। सर्वप्रदर्शके चैव तुरीये सर्वदर्शनमि'ति ब्रह्मतर्के। 'निद्रायुतास्तु विश्वाद्यास्तदधीना यतो हि सा। यथा भृत्ययुतः स्वामी न ह्यज्ञानं परात्मन' इति च। 'अभेदमपि तद्ब्रह्म बहुरूपं विशेषतः। करोति न करोतीति व्यवहार्यं स्वशक्तित' इति च। न संवेदयतीत्यस्वीकारे 'तुर्यं तत्सर्वदृक् सदा। द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययो' रिति च विरुद्धम्। द्वैतग्रहणाकारणत्वं तुल्यमित्यर्थः। 'द्वैतं न ग्राहये-त्तुर्यो न च प्राज्ञः कथञ्चन। द्वैतग्रहणबीजं तु निद्रा प्राज्ञं समाश्रिते'ति प्रकटश्रुतिः। विपरीतज्ञानादपि विपरीतज्ञानान्तरं जायते। अनादि-मायया विष्णोरिच्छया स्वापितो यदा। तया प्रबोधमायाति तदा

न सत्यं नापि चानृतम्। प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक्सदा ॥३॥ द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः। बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥४॥ स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया। न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ ५ ॥ अन्यथागृह्णतः स्वप्नो निद्रा-तत्त्वमजानतः। विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ ६ ॥ अनादि-मायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ ७ ॥ प्रपञ्चो यदि विद्येत निवर्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥८॥ विकल्पो विनिवर्तेत कल्पितो यदि केनचित्। उपदेशादयं वादो ज्ञाते द्वैतं न विद्यत इति ॥ ९ ॥ द्वितीयः खण्डः ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

विष्णुं प्रपश्यती'ति प्रकाशिकायाम् । 'तन्वा स्वस्वामिसम्बन्धः प्रपञ्चोऽस्य शरीरिणः । वस्तुतोऽसौ न चैवास्ति परमस्य वशे यतः । तन्वादिकस्तथाप्येष ह्यभिमानात्प्रदृश्यते । अतः स विद्यत इति ह्यङ्गीकारो भवेद्यदि । तथापि भगवज्ज्ञानात्स निवर्तेदसंशय'इति ब्रह्मतर्के । अद्वैतमन्यथाज्ञातं परब्रह्मादिवस्तु तत् । द्वैतं द्विधा ज्ञातं अन्यथाज्ञातमज्ञैः । परमार्थतः परमेश्वरात् । तस्यैव मायामात्रं तदिच्छया निर्मितम् । तदन्यथाज्ञानं तस्मात्तदिच्छयैव निवर्तते । 'परेण ब्रह्मणा यत्तु द्विधा न ज्ञातमञ्जसा । तदद्वैतं परं ब्रह्म तदेव ज्ञातमन्यथा । जीवेन द्वैतमुद्दिष्टं मिथ्याज्ञानं तदेव च । परमार्थात्पराद्विष्णोर्जात-मिच्छावशादनु । मायेतीच्छा समुद्दिष्टा मायामात्रं तदुद्भवम् । उत्तमत्वात्परार्थोऽसौ भगवान्विष्णुरच्युत'इति च । अनन्यथा इतमवगतमद्वैतं द्वैतं वस्तुस्वरूपापेक्षया द्विधा ह्यन्यथाज्ञातमित्यर्थः । अतो विकल्पः । शरीरादिसम्बन्धः । केनचिदज्ञानादिना कारणेन कल्पितोऽप्युपदेशान्निवर्तते । अयं सतां वादः । ज्ञाते सति परब्रह्मणि द्वैतमन्यथाज्ञानं निवर्तत इति । 'विकल्पो देहबन्धादिः केनचित्कारणेन तु । कल्पितो विनिवर्तेत गुरुवाक्यादसंशयः । एष एव सतां वादो ज्ञाते ब्रह्मणि तत्त्वतः । निवर्ततेऽन्यथाज्ञानं तत आनन्दमेत्यसावि'ति च ॥ २ ॥

अधिकं सर्वत अविनाशि चेत्यध्यक्षरम् । अधिका एव मात्रा अंशा यस्य तदधिमात्रम् । अ इत्यनेनाभिधानेनाक्रियत इत्यकारः । तत्र पूर्वोक्तो वैश्वानरः प्रथमा मात्रेत्याद्यनुवादः । अकार इत्यादिकं विधेयम् । प्राज्ञस्तैजसश्चादिरस्येत्यादिमान् । सुप्तेरुत्थाने प्राज्ञाद्विभक्तो भवति विश्वः । स्वप्नादुत्थाने तैजसात् । आदिश्चास्योपासकस्य

सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा अकार उकारो मकार इति । जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा । आप्तेरादिमत्त्वाद्वा आप्नोति ह वै सर्वान्कामानादिश्च भवति । य एवं वेद । स्वप्न-

SGDF
Sri Gurgeshwari Digital Foundation

भवति । शरीराभिमानादुत्थाप्य कर्षतीत्युत्कर्षः । निद्राविषयानुभवश्चानेन क्रियत इत्युभयत्वं समानः सर्वेषां मध्यस्थो भवति । मितेरन्तर्गमनात् । 'अधिकत्वाच्च नित्यत्वादध्यक्षरमुदाहृतः । येंऽशास्तस्य तु सर्वेऽपि पूर्णाः प्रत्येकशः प्रभोः । अतोऽधिमात्रमुद्दिष्टो मात्रा अंशा उदाहृताः । श्रुतः स विष्णुरोंकार ओमित्याक्रियते यतः । आद्यस्तदंशो ह्याप्तिस्स्याद्विषयानापयेद्यतः । जीवस्य तु यतः प्राज्ञातैजसाद्वा समुत्थितः । अविभागोऽपि भगवानादिमांस्तेन कीर्तितः । तस्मादुत्पद्यते मुक्तः सज्ज्ञानानन्दलक्षणः । आप्नोति विषयान्सर्वान्निद्राया विषयस्य च । उभयोः कारणत्वेन ह्युभयस्तैजसः स्मृतः । देहाभिमानादुद्धृत्य कर्षति स्वप्नमण्डले । उत्कर्षत्वं ततस्तस्य तज्ज्ञानी ज्ञाननित्यताम् । आप्नोति देहादुत्कृष्य स्वात्मानं सर्वमोक्षिणाम् । मध्यस्थः स भवेत्स्नेहाद्दोषाभावाच्च सर्वशः । स्वात्मन्यन्तर्गमयति मानमन्तर्गतिः स्मृता । जीवमन्तर्गतं कृत्वा तज्ज्ञानलयकृद्यतः । प्राज्ञो मानमपीतिश्च तज्ज्ञोऽप्येवं विमुक्तिगः । व्याप्त्यान्तर्गमयेत्सर्वं दुःखाद्यं तु विलापयेत् । अणूनामपि जीवानां प्रकाशो व्यापको भवेत् । अण्डमात्रे बहिश्चापि देवतानां यथाक्रमम् । अतोऽन्तर्गमनं मुक्तौ जीवेषु जगतो भवेदि'ति ब्रह्मतर्के । मात्रासम्प्रतिपत्तौ अंशध्याने । आदिमत्त्वं विश्वस्य विद्यते । तदुपासकस्यापि भवतीत्यादि

स्थानस्तैजस उकारो द्वितीया मात्रा । उत्कर्षादुभयत्वाद्वा । उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति । य एवं वेद । सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा । मितेरपीतेर्वा । मिनोति ह वा इदं सर्वमपीतिश्च भवति । य एवं वेद । अत्रैते श्लोका भवन्ति । विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् । मात्रासम्प्रतिपत्तौ स्यादादिसामान्यमेव च ॥ १ ॥ तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम् । मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥ २ ॥ मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् । मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च ॥ ३ ॥ त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितम् । स पूज्यस्सर्वभावानां

SGDF
Sri Gurgeshwari Digital Foundation

सामान्यम्। अमात्रेऽप्यगतिर्न विद्यते। प्रतिदिवसं विभाग एकीभावश्च विद्यते विश्वादीनाम्। तुरीयस्य तन्न विद्यत इत्यमात्रः। त्रिश्वादीनां व्यवहारकारणत्वं विद्यते। तुरीयस्य तन्न विद्यत इत्यतो गम्यत्वमपि नास्तीत्याशङ्कां निवारयति अगतिर्नविद्यत इति। आत्मानं संविशन्तीति गतिवचनात्। 'आदिमत्त्वेन सामान्यमुपास्येन भवेदिति। उपासकस्य सज्ञानन्सर्ववन्द्यो भवेत्पुमान्। सामान्यत्रयमप्येतत्तुल्यं मुक्तिगतत्वतः। अमात्रत्वं तुरीयस्य त्वविभागाद्दिनेदिने। जाग्रदादेरकर्ताऽपि गम्योऽसौ ज्ञानिनां भवेदि'ति च। 'आदिमत्त्वादिसामान्यं तुल्यं मोक्षोपभोग्यतः। अमात्रत्वं तुरीयस्याप्यविभागाद्दिनेदिन'इत्यात्मसंहितायाम्॥ ३॥

आत्मैव भूत्वान्याभिमानं त्यक्त्वा परमात्मनैव परमात्मानं प्रविशत्युपासकः। अव्यवहार्यत्वादिकमत्र सममिति दर्शयितुं पुनरप्युक्तमव्यवहार्यत्वादिकम्। 'तुरीयं नादनामानं हरिं ज्ञात्वा परं पदम्। तमेव प्रविशेच्छुद्धरूपी तत्सदृशात्मवान्। ज्ञानानन्दौ च शक्तिश्च तथापि न समाः क्वचित्। विमुक्तस्यापि जीवस्य पारतन्त्र्यं च नित्यदा। चतूरूपस्यास्य विष्णोर्नाम प्रणव इत्यपि। जाग्रदादिप्रणयनात्स एव ब्रह्म बृंहणात्। ओमित्याक्रियमाणत्वादोङ्कारः स प्रकीर्तितः। आदिमत्त्वादयो ह्यर्था ओमित्यस्य श्रुतौ श्रुताः। अपूर्वः कारणाभावान्नाद्यभावादनन्तरः। पराधीनस्थित्यभावादनपर उदाहृतः।

वन्द्यश्चैव महामुनिः॥ ४॥ अकारो नयते विश्वमुकारश्चापि तैजसम्। मकारश्च पुनः प्राज्ञं नामात्रे विद्यतेऽगतिरिति॥५॥ तृतीयः खण्डः॥३॥

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत ॐकार आत्मैव-संविशत्यात्मनाऽऽत्मानम्। य एवं वेद। अत्रैते श्लोका भवन्ति। ओंकारं पादशो विद्यात्पादामात्रा न संशयः। ओंकारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत्॥ १॥ युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्। प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित्॥ २॥ प्रणवो ह्यपरं ब्रह्म प्रणवश्च

SGDF
Sri Gargeshwari Digital Foundation

सर्वगत्वादबाह्यश्च तं ज्ञात्वा प्रविमुच्यत'इति च। परत्वमपरत्वं च विष्णोरेकस्य वै यदा। श्रूयते न तु सामर्थ्यभेदस्तत्र कथञ्चन। अवतारस्य पूर्वत्वात्पौर्वापर्यमुदाहृतमि'ति ब्रह्मतर्के। पूर्वावतारे पश्चिमावतारेऽपि पूर्ण एवेति प्रणवो ह्यपरं ब्रह्मेत्यादेरर्थः ॥ ४ ॥

एकोऽपि निर्विशेषोऽपि चतुर्धा व्यवहारभाक्। यस्तं वन्दे चिदात्मानं विष्णुं विश्वादिरूपिणम् ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं माण्डूकोपनिषद्भाष्यम् सम्पूर्णम् ॥

परं स्मृतः। अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ॥ ३ ॥ सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च। एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥ ४ ॥ प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम्। सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥ ५ ॥ अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमश्शिवः। ॐकारो विदितो येन स मुनिर्नेतरो जनः स मुनिर्नेतरो जन इति ॥ ६ ॥ चतुर्थः खण्डः ॥ ४ ॥ इति श्रीमाण्डूकोपनिषत्समाप्ता ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

षट्प्रश्नोपनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥ हरिः ॐ ॥ नमो भगवते तस्मै प्राणादिप्रभविष्णवे। अमन्दानन्दसान्द्राय वासुदेवाय वेधसे ॥ 'प्रजानां पालनाद्विष्णुः प्रजापतिरितीरितः । स वायुं सूर्यनामानं चन्द्रनाम्नीं सरस्वतीम् । सूर्याचन्द्रमसौ देवः ससर्ज पुरुषोत्तमः । तावाविश्य स्वयं विष्णुः सर्वसृष्टीः करोत्यजः । अमूर्तस्थः स वायुस्तु मूर्तसंस्था सरस्वती । आदित्यस्थः स वायुस्तु प्राणानात्मनि संनयेत् । प्राच्यप्राणास्तथेन्द्राद्या दक्षिणाश्च यमादयः । प्रतीच्या वरुणाद्यास्तु सोमाद्या उत्तराः स्मृताः । शेषमित्राववाचीनौ वीन्द्रकामावुदक्तनौ । सभार्याः कोणपैः सार्धं

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ १ ॥ तान्ह स ऋषिरुवाच ॥ भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ । यथाकामं प्रश्नान्पृच्छत । यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥ २ ॥ अथ कबन्धी कात्यायन उपेत्य पप्रच्छ । भगवन्कुतो ह वा इमाः प्रजाः प्रजायन्त इति ॥ ३ ॥ तस्मै स होवाच । प्रजाकामो ह वै प्रजापतिः । स तपोऽतप्यत । स मिथुनमुत्पादयते । रयिञ्च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति ॥ ४ ॥ आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः । रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः ॥ ५ ॥ अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान्रश्मिषु सन्निधत्ते ॥६॥ यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं

SGDF
Sri Gargeshwari Digital Foundation

चत्वारो दिशि दिश्यपि। संवत्सरस्थो भगवान्वागीरावयनस्थितौ। मासस्थितः स भगवान्पक्षयोर्वाक्च मारुतः। अहोरात्रे तु भगवान्प्राणो ह्यहनि वाङ्निशि। दम्पत्योर्भगवान्विष्णुर्भार्यास्था तु सरस्वती। भर्तृस्थः स स्वयं वायुरेवं जानन्विमुच्यत' इति प्रजापतिसंहितायाम्॥ ॥ १ ॥

वायुरग्निरित्यत्र भूतवायुरुच्यते। प्राणशब्देन प्रधानवायुः ॥२॥

प्रकाशयति तेन सर्वान्प्राणान्रश्मिषु सन्निधत्ते। स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते। तदेतदृचाभ्युक्तम् ॥ ७॥ विश्वरूपं करिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्। सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ८॥ संवत्सरो वै प्रजापतिः। तस्यायने दक्षिणं चोत्तरं च तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते। ते चान्द्रमसमेव लोकमभिजयन्ते। त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते। एष वै रयिर्यः पितृयाणः ॥ ९॥ अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजयन्ते। एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोधः। तदेष श्लोकः ॥ १०॥ पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्। अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षळर आहुरर्पितमिति ॥ ११ ॥ मासो वै प्रजापतिः। तस्य कृष्णपक्ष एव रयिः। शुक्लः प्राणस्तस्मादेते ऋषयः शुक्ल इष्टिं कुर्वन्ति। इतर इतरस्मिन् ॥१२॥ अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः। प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ॥ १३ ॥ ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते। अन्नं वै प्रजापतिस्ततो ह वै तद्रेतः। तस्मादिमाः प्रजाः प्रजायन्त इति ॥ १४ ॥ तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति। ते मिथुनमुत्पादयन्ते तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम्॥ ॥ १५ ॥ तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥ ॥ १६ ॥ इति प्रथमः प्रश्नः ॥ १ ॥

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन्कत्येव देवाः प्रजा विधारयन्ते। कतर एतत्प्रकाशयन्ते। कः पुनरेषां वरिष्ठ इति ॥ १ ॥ तस्मै स होवाच। आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी

SGDF
Sri Gangeshwari Digital Foundation

आत्मतः परमात्मतः । 'विष्णोर्वायुः समुत्पन्नो वायोः सर्वाश्च देवताः । प्राणाद्यास्तान्नयन्प्राण आज्ञापयति राजवत् । स्वयं च पञ्चरूपस्सन्दध्यान्मोक्षादिकं प्रभुरि'ति प्रभञ्जने ॥ ३ ॥

वाङ्मनश्चक्षुःश्रोत्रं च ते प्राकाश्या अभिवदन्ति । वयमेतद्बाणमवष्टभ्य विधारयाम इति ॥ २ ॥ तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथाह-मेवैतत्पञ्चधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति । तेऽश्रद्दधाना बभूवुः ॥ ३ ॥ सोऽभिमानादूर्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रामत्यथेतरे सर्वे एवोत्क्रामन्ते । तस्मिंश्च प्रतिष्ठमाने सर्वे एव प्रतिष्ठन्ते । तद्यथा मधु-मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रमन्ते । तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते । एवं वाङ्मनश्चक्षुः श्रोत्रं चेति ते प्रीताः प्राणं स्तुन्वन्ति ॥ ४ ॥ एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत् ॥ ५ ॥ अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । ऋचो यजूंषि सामानि यज्ञः क्षत्रं च ब्रह्म च ॥ ६ ॥ प्रजापतिश्चरसि गर्भे त्वमेव प्रति जायसे । तुभ्यं प्राण प्रजास्त्विमा यत्प्राणैः प्रतितिष्ठसि ॥ ७ ॥ देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा । ऋषीणां चरितं सत्यमथर्वाङ्गिरसामपि(सि) ॥ ८ ॥ इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता । त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥ ९ ॥ यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः । आनन्दा रूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥ १० ॥ व्रात्यस्त्वं प्राणैकऋषिरत्त-विश्वस्य सत्पतिः । वयमद्यस्य दातारः पिता त्वं मातरिश्व नः ॥ ११ ॥ याते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि । या मनसि सन्तता शिवां तां कुरु मोत्क्रमीः ॥१२॥ प्राणस्यैतद्वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम् । मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति ॥ १३ ॥ २ ॥

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ । भगवन्कुत एष प्राणो जायते । कथमायात्यस्मिन् शरीरे । आत्मानं वा प्रविभज्य कथं प्रतिष्ठते । केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥ १ ॥ तस्मै स होवाचातिप्रश्नान्पृच्छसि ब्रह्मिष्ठोऽसीति । तस्मात्तेऽहं ब्रवीमि ॥ ॥ २ ॥ आत्मत एष प्राणो जायते । यथैषा पुरुषे च्छाया एतस्मिन्नेत-दाततम् । मनोकृतेनायात्यस्मिञ्छरीरे ॥ ३ ॥ यथा सम्राडेवाधिकृता-न्विनियुङ्क्ते एतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण

SGDF
Sri Gargeshwari Digital Foundation

'रश्मीनामविशेषेऽपि ह्यन्यदृष्टिव्यपेक्षया। सूर्यस्य मण्डलं यान्तीत्युच्यन्ते तददर्शनात्। एवं विष्णोस्तु सामीप्याद्देवानां सुप्तिगस्य तु। व्यवहाराकरत्वाच्च एकीभाव इतीर्यत'इति च। भगवतः

इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते ॥ ४ ॥ पायूपस्थेऽपानं चक्षुःश्रोत्रेमुखनासिकाभ्यां प्राणः स्वयं प्रतिष्ठते। मध्ये तु समानः। एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥ ५ ॥ हृदि ह्येष आत्मा। अत्रैतदेव शतं नाडीनाम्। तासां शतं शतमेकैकस्यां द्वासप्ततिं प्रतिशाखा नाडीसहस्राण्यासु व्यानश्चरति ॥ ६ ॥ अथैकयोर्ध्वमुदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥ ७ ॥ आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानो वायुर्व्यानः ॥ ८ ॥ तेजो ह वा उदानः तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः ॥ ९ ॥ यच्चित्तस्तेनैष प्राणमायाति। प्राणस्तेजसा युक्तः सहात्मना यथासङ्कल्पितं लोकं नयति ॥ १० ॥ य एवं विद्वान्प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति। तदेष श्लोकः ॥ ११ ॥ उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा। अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुतइति ॥ १२ ॥ ३ ॥

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगवन्नेतस्मिन्पुरुषे कानि स्वपन्ति कान्यस्मिञ्जाग्रति। कतर एष देवः स्वप्नान्पश्यति। कस्यैतत्सुखं भवति कस्मिन्सर्वे सम्प्रतिष्ठिता भवन्तीति ॥ १ ॥ तस्मै स होवाच। यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति ताः पुनरुदयतः प्रचरन्त्येवं ह वैतत्सर्वं परे देवे मनस्येकीभवति। तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥ २ ॥ प्राणाग्नय एवैतस्मिन्पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते। प्रणयनादाहवनीयः प्राणः ॥ ३ ॥ यदुच्छ्वासनिःश्वासावेतावाहुती समं नयति स समानो मनो ह वाव यजमान इष्टं फलमेवोदानः। स एनं यजमानमहरहर्ब्रह्म गमयति ॥ ४ ॥ अत्रैष देवः स्वप्ने महिमानमनुभवति यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देश दिगन्तरे च प्रत्यनुभूतं

SGDF
Sri Gurgeshwari Digital Foundation

शरीरवत्सादृश्ययुक्ते जीवे सुखं भवति। कस्यैतत्सुखं भवतीति पृष्टत्वात्। न ह्यचेतनस्य शरीरस्य सुखं भवति। 'यस्यात्मा शरीर-मि'ति च श्रुतिः। 'सादृश्याद्देहवज्जीवो विष्णोस्तस्य सुखं भवेत्। सुप्तौ तस्य सुखार्थं हि भगवान्सुप्तिमानयेदि'ति च ॥ ४ ॥

'प्रणवेन हरिं ध्यायन्ब्रह्मलोकं समेत्य च। ज्ञानं चतुर्मुखात्प्राप्य मुच्यते नात्र संशयः' ॥ ५ ॥

पुनः पुनः प्रत्यनुभवति। दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ॥ ५ ॥ स यदा तेजसाभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यति ॥ अथ यदैतस्मिञ्छरीरे सुखं भवति ॥ ६ ॥ स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते। एवं ह वैतत्सर्वं परे आत्मनि सम्प्रतिष्ठन्ते ॥ ७ ॥ पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसनं च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ च दातव्यं च पादौ च गन्तव्यं च पायुश्च विसर्जयितव्यं चोपस्थश्चानन्दयितव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥ ८ ॥ एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः। स परेऽक्षर आत्मनि सम्प्रतिष्ठते ॥ ९ ॥ परमेवाक्षरं प्रतिपद्यते स यो ह वैतदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति। तदेष श्लोकः ॥ १० ॥ विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र। तदेतदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥ ११ ॥ ४ ॥

अथ हैनं शैब्यः सत्यकामः पप्रच्छ। स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति ॥ १ ॥ तस्मै स होवाच। एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः। तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥ २ ॥ स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते। स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनु-

SGDF
Sri Gargeshwari Digital Foundation

कर्मेति पुष्करः प्रोक्त उषा नामाभिमानिनी । लोकाभिमानी पर्जन्यः स्वाहा वै मन्त्रदेवता । तपोभिमानी वह्निश्च वरुणो वीर्यदेवता । अन्नस्य देवता सोमो मनो नामानिरुद्धकः । इन्द्रियेशाश्च सूर्याद्या-श्चक्षुराद्यभिमानिनः । रुद्रो वीन्द्रः शेषकामौ मनसस्त्वेव देवताः । श्रद्धेति वायोः पत्नी स्यात्सर्वेषां प्रभवाप्यया । तस्याश्च कारणं प्राणः सर्वेषामुत्तमोत्तमः । तस्यापीशः कारणं च वासुदेवः परोऽव्ययः । न तस्य सदृशः कश्चित्कुत एवोत्तमो भवेत् । तं ज्ञात्वा मुच्यते जन्तुर्विदित्वैवं परात्परमि'ति तत्त्वविवेके । 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी'ति-मन्त्रोक्त एव क्रमः । न हीन्द्रियेभ्यो मनः पश्चात् । 'तत्प्राक्-श्रुतेश्चे'ति भगवद्वचनम् । 'विष्णोः प्राणस्ततः श्रद्धा तस्या रुद्रो मनोऽभिधः । तस्मादिन्द्रस्त्विन्द्रियात्मा तस्य सोमोऽन्नदेवता । ततश्च वरुणः सृष्टस्तस्मादग्निस्ततोऽवरः । आकाशदेवता विघ्नस्ततो

भवति ॥ ३ ॥ अथ यदि द्विमात्रेण मनसि सम्पद्यते सोन्तरिक्षं यजुर्भि-रुन्नीयते सोमलोकं स सोमलोके विभूतिमनुभूय पुनरावर्तते ॥ ४ ॥ यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकम् । स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते । तदेतौ श्लोकौ भवतः ॥ ५ ॥ तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योऽन्यसक्ता अनविप्रयुक्ताः । क्रियासु बाह्या-भ्यन्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥ ६ ॥ ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते । तमोङ्कारेणैवायनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं चेति ॥ ७ ॥ ५ ॥

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । भगवन् हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैनं प्रश्नमपृच्छत । षोडशकलं भारद्वाज पुरुषं वेत्थ तं मह्यं ब्रवीहीति । तमहं कुमारमब्रुवं नाहमिमं वेद यद्यह-मिममवेदिष्यं कथं ते नावक्ष्यमिति । समूलो वा एष परिशुष्यति

SGDF
Sri Gargeshwari Digital Foundation

वायोः सुतो मरुत् । तस्मादग्निः पावकाख्यः प्रथमोऽग्नेस्सुतस्ततः । ततः पर्जन्य उद्भूतः स्वाहाऽतो मन्त्रदेवता । उदकात्मको बुधस्तस्या उषा नामात्मिका ततः । ततः शनिः पृथिव्यात्मा कर्मात्मा पुष्कर-स्ततः । क्रमात्प्रत्यवरा एते मुक्ताः सर्वगुणैरपि । नित्यमुक्तस्ततो विष्णुः प्राणादप्युत्तमोत्तम'इति च । समुद्रे इत्येवं प्रोच्यते । पुरुषे इत्येवं प्रोच्यते । भिद्येते तासां नामरूपे । भिद्येते चासां नामरूपे इत्युक्तत्वात् । अज्ञैरनवगतान्यपि समुद्रे स्थितानां नदीनां विष्णौ स्थितानां मुक्तानां च भिन्नान्येव नामरूपाणि सन्त्येवेत्यर्थः । न च भेदशब्दो नाशे प्रयुज्यमानः क्वापि दृष्टः । घटादावपि बहुभाव एव भेदशब्दः प्रयुज्यते । नाशस्त्वर्थत एवावगम्यते । न चात्रार्थतोऽपि नाशोऽवगम्यते । नहि नामानि रूपाणि च कपालवद्बहुधा भूतानि तिष्ठन्ति । अतो भिद्येते इति पृथक्त्वमेवोच्यते । 'अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिता'इति वाक्यशेषाच्च । अतः पुरुषे भिन्नानि नाम-रूपाणि प्रतिष्ठितानीत्येवार्थः । अस्तगमनं त्वादित्यवदज्ञानामविज्ञेय-त्वमेव । 'प्राणादयः कला यस्मिन्मुक्ता नित्यं प्रतिष्ठिताः । पृथक् पृथङ्नामरूपैर्नमस्तस्मै पराय त'इति सत्तत्त्वे । नामरूपाद्विमुक्त इत्यनेनापि नामरूपामुक्तत्वमुच्यते । विप्रिय इत्यादिवत् । नामरूपे अविहायेति च पूर्वत्र । अनन्तं वै नामानन्ता विश्वेदेवा इति नामरूपयो-रनन्तत्वं हि श्रुतिर्वक्ति । 'यत्र पूर्वे साध्याः सन्ति देवाः' । 'स तत्र पर्येति

योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुम् । स तूर्ष्णीं रथमारुह्य प्रवव्राज । तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १ ॥ तस्मै स होवाच । इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति ॥२॥ स ईक्षाञ्चक्रे कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥ स प्राणमसृजत प्राणाच्छ्रद्धां खं वायु-र्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च ॥ ४ ॥ यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं

SGDF
Sri Gargeshwari Digital Foundation

जक्षन् क्रीडन्रममाणः । सोऽश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता' ॥ 'ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्करीष्वि'त्यादेश्च । अतः सर्वमुक्तेभ्योऽप्युत्तमोत्तमः परिपूर्णो नारायण इति सिद्धम् ॥ नमोनमोऽस्तु हरये प्रेष्ठप्रेष्ठतमाय मे । परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥ ६ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं षट्प्रश्नोपनिषद्भाष्यं सम्पूर्णम् ॥ छ ॥ श्रीकृष्णार्पणमस्तु ॥

प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते । स एषोऽकलोऽमृतो भवति । तदेषश्लोकः ॥५॥ अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः । तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥६॥ तान्होवाच । एतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति ॥७॥ ते हि तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ८ ॥ ६ ॥ इति षट्प्रश्नोपनिषत्समाप्ता ॥ श्रीवेदव्यासाय नमः ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

तलवकारो(केनो)पनिषद्भाष्यम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ अनन्तगुणपूर्णत्वादगम्याय सुरैरपि । सर्वेष्टदात्रे देवानां नमो नारायणाय ते ॥ 'वैजयन्ते समासीनमेकान्ते चतुराननम् । विष्णोर्विविदिषुस्तत्त्वं पर्यपृच्छत्सदाशिवः । यदिदं पुरुषावश्यं तत्र तत्र पतेन्मनः । केन तत्प्रेरितं याति प्राणः सर्वोत्तमस्तथा । चक्षुः श्रोत्रं तथा वाचं को देवो विनियोजयेत् । इति पृष्टस्तदा ब्रह्मा प्राह देवमुमापतिम् । ध्यात्वा नारायणं देवं सर्वाधारमनूपमम् । सर्वज्ञं सर्वशक्तिं च सर्वदोषविवर्जितम् । यः प्राणस्य प्रणेता च चक्षुरादेश्च सर्वशः । अगम्यः सर्वदेवैश्च परिपूर्णत्वहेतुतः । प्राणादीनां प्रणेता च सर्ववेत्ता च सर्वशः । सर्वोत्तमश्च सर्वत्र स विष्णुरिति धार्यताम् ॥ १ ॥

तलवकारो(केनो)पनिषत्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥१॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २ ॥ न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्म न विजानीमो यथैतदनुशिष्यात् । अन्यदेव तद्विदितादथो अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥ यद्वाचाऽनभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ४ ॥ यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥ यच्चक्षुषा न

SGDF
Sri Gurgeshwari Digital Foundation

यं सम्यङ्नैव जानाति कश्चिन्निरवशेषतः। सर्वात्मना विजानामीति तु यस्य मतं भवेत्। तस्याज्ञातः स भगवान्यो नैवं मन्यते सदा। ज्ञातस्तस्य तथास्यैव निःशेषं मननं कृतम्। इति यो मन्यते नास्य मतः स पुरुषोत्तमः। नातिवेद्यो न चावेद्यस्तस्मात्स परमेश्वरः। नेदं जीवस्वरूपं तद्ब्रह्म विष्ण्वाख्यमव्ययम्। किन्तु यत्ते समीपस्थमासते विनियामकम्। तदेव ब्रह्म विद्धि त्वं विष्ण्वाख्यं परमव्ययम्। नियामकं तद्देवानां मर्त्यानां किमुतोत्तमम्। तत्प्रसादं विना जीवे मन्तव्या न प्रवृत्तयः। किमु जीवस्य तद्भावो न मन्तव्य इतीर्यते ॥ ॥ २ ॥

इत्यत्राख्यायिकां वच्मि शृणु तां त्वं महेश्वर। स्थित्वा देवेषु तद्ब्रह्म व्यजयद्दैत्यदानवान्। देवेभ्योऽर्थाय विजयं ते देवा मेनिरे स्वकम्। आविष्टा असुरैस्तेषां प्रबोधाय जनार्दनः। यक्षरूपः

पश्यति येन चक्षूंषि पश्यति। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥ यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥ यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥ १ ॥

यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्। यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ॥ ९ ॥ १ ॥ नाहं मन्ये सुवेदेति। नो न वेदेति वेद च। यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ १० ॥ २ ॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ ११ ॥ ३ ॥ प्रतिबोधविदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ ॥ १२ ॥ ४ ॥ इह चेदवेदीदथ सत्यमस्ति। न चेदिहावेदीन्महती विनष्टिः। भूतेषु भूतेषु विचित्य धीराः। प्रेत्यास्माल्लोकादमृता भवन्ति ॥ १३ ॥ ५ ॥ २ ॥

ब्रह्म ह देवेभ्यो विजिग्ये। अथ तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्त। अस्माकमेवायं विजयो अस्माकमेवायं महिमेति ॥ ॥ १४ ॥ १ ॥ तद्धैषां विजज्ञौ। तेभ्यो ह प्रादुर्बभूव। तन्न व्यजानन्त।

SGDF
Sri Gurgeshwari Digital Foundation

प्रादुरभूदुमाशिवसमन्वितः। ब्रह्मणा चापि सहित एतेभ्योऽपि परो ह्यहम्। एतेऽपि मे भृत्यभूताः परिवार्य व्यवस्थिताः। इति ज्ञापयितुं विष्णुः सह तैरप्युपागतः। यूयमेतानपि ज्ञातुमशक्ताः किमु मामिति। तज्ज्ञानार्थं हुताशश्च नासिक्यो वायुरेव च। इन्द्रश्च क्रमशो जग्मुस्तं ज्ञातुं नैव चाशकन्। तत्रेन्द्रोऽधिकबुद्धित्वात्पृच्छतीति जनार्दनः। मत्तः शिवाद्ब्रह्मणश्च श्रोतुं नैवापि शक्तिमान्। इति ज्ञापयितुं तत्र नादृश्यत स केशवः। एषैव ज्ञानदाने ते योग्योमेति व्यदर्शयत्॥ ॥ ३ ॥

उमा सा सम्यगाचष्ट तस्मै विष्णुं परं पदम्। यस्माद्ब्रह्मा च वायुश्च शेषवीन्द्रौ शिवस्तथा। सभार्या गर्विणो नासन्सुरेभ्यस्तेऽधि-

---

किमिदं यक्षमिति॥ १५॥ २॥ तेऽग्निमब्रुवन्। जातवेद एतद्विजानीहि किमेतद्यक्षमिति। तथेति॥ १६॥ ३॥ तदभ्यद्रवत्। तमभ्यवदत्कोऽसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥ १७॥ ४॥ तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं दहेयं यदिदं पृथिव्यामिति॥१८॥५॥ तस्मै तृणं निदधावेतद्दहेति। तदुप प्रेयाय सर्वजवेन। तन्न शशाक दग्धुम्। स तत एव निववृते। नैतदशकं विज्ञातुं यदेतद्यक्षमिति॥ ॥ १९॥ ६॥ अथ वायुमब्रुवन्। वायवेतद्विजानीहि किमेतद्यक्षमिति। तथेति॥ २०॥ ७॥ तदभ्यद्रवत्। तमभ्यवदत्कोऽसीति। वायुर्वा अहमस्मीत्यब्रवीत्। मातरिश्वा वा अहमस्मीति॥ २१॥ ८॥ तस्मिंस्त्वयि किं वीर्यमिति। अपीदं सर्वमाददीय यदिदं पृथिव्यामिति॥ २२॥ ९॥ तस्मै तृणं निदधावेतदादत्स्वेति तदुप प्रेयाय सर्वजवेन तन्न शशाकादातुम्। स तत एव निववृते। नैतदशकं विज्ञातुम्। यदेतद्यक्षमिति॥ २३॥ १०॥ अथेन्द्रमब्रुवन्। मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्। तस्मात्तिरोदधे॥ २४॥ ११॥ स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमाँ हैमवतीम्। ताँ होवाच किमेतद्यक्षमिति॥ २५॥ १२॥ ३॥

(सा) ब्रह्मेति होवाच। ब्रह्मणो वा एतद्विजये देवा अमहीयध्वमिति। ततो ह वै विदाञ्चकार ब्रह्मेति॥ २६॥ १॥ तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुः। ते ह्येनत्प्रथमो

SGDF
Sri Gargeshwari Digital Foundation

कास्ततः । इन्द्रस्तु प्रथमं ब्रह्म व्यजानात्तेन तूत्तमः । दक्षादिभ्यस्तथा कामस्तज्ज्ञातुं पूर्वमुक्तवान् । दक्षो बृहस्पतिश्चैव मनुः कामात्मजस्तथा । सूर्याचन्द्रमसौ धर्मो वरुणश्चोचुरोमिति । नासिक्यवायुरग्निश्च प्रथमं तदपश्यताम् । सर्वदेवाधिकास्तस्मादेते देवाः प्रकीर्तिताः । एतेभ्यश्चेन्द्रकामौ तु ताभ्यां ब्रह्मादयोऽधिकाः । एतेषामवमो वह्निः परमो विष्णुरुच्यते । अन्तराले स्थितास्त्वन्ये ब्रह्माद्याः पूर्वमीरिताः । अग्निः पश्चाद्व्यजानात्तदिन्द्रवाक्यात्ततोऽवमः । तस्माद्विष्ण्वभिसम्बन्धात्पारावर्यं सुरेष्विदम् । व्यद्योतयद्विद्युदादीन्कपिलाख्यस्तु यो हरिः । अक्ष्णोर्निमेषणं कृत्वा यः शेते क्षीरसागरे । स एवैकः परं ब्रह्मेत्येवं तस्योपदेशनम् । अधिदैवे तथाध्यात्मे यं मनो गच्छतीव च । सम्यङ्न गच्छति क्वापि मनो येन स्मरत्यपि । सोऽनिरुद्धाख्य ईशेशः परं ब्रह्मेति कीर्त्यते । स विष्णुस्तद्वनं नाम ततत्वाद्वननीयतः । एवमेनं तु यो वेद भवेत्सर्वैरपेक्षितः । एतच्छ्रुत्वा हरोऽपृच्छद्ब्रह्माणं पुनरेव तु । विद्याकारं मम ब्रूहीत्युक्तो ब्रह्माह तं पुनः । विद्यावेद्यं तव प्रोक्तमास्थानं ते वदाम्यहम् । तपोदमस्वधर्मेषु ये स्थितास्तेषु तिष्ठति । विद्यास्थानानि तस्यास्तु वेदा अङ्गानि निर्णयः । वेदैतामेवमखिलं यो विष्णौ प्रतितिष्ठती'त्यादि ब्रह्मसारे । विद्युतः सूर्यादिप्रकाशान् । आसमन्ताद्व्यद्युतत्प्राकाशयत् । 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमि'ति वचनात् । 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं

विदाञ्चकार ब्रह्मेति ॥ २७ ॥ २ ॥ तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान् । स ह्येनन्नेदिष्ठं पस्पर्श । स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ २८ ॥ ३ ॥ तस्यैष आदेशो यदेतद्विद्युतोऽभिव्यद्युतदा३ इति । न्यमीमिषदा ३ इत्यधिदैवतम् ॥ २९ ॥ ४ ॥ अथाध्यात्मम् । यदेतद्गच्छतीव च मनोऽनेनैव तदुपस्मरति । अभीक्ष्णं सङ्कल्पः ॥ ३० ॥ ५ ॥ तद्ध तद्वनं नाम तद्वनमित्युपासितव्यम् । स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि

SGDF
Sri Gurgeshwari Digital Foundation

विभाती'ति च । न्यमीमिषत् आसमन्तान्निमीलिताक्षमभवत् । 'स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि । अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मा निशि सुप्तशक्तिष्वि'ति वचनात् । पूर्णत्वाच्च आः । अभीक्ष्णं सङ्कल्प इति मनसो विशेषणम् । सङ्कल्पकमित्यर्थः । सप्रतिष्ठां सायतनामुपनिषदं ब्रूहीत्युक्ते सम्यगेव मयोपनिषत्स्वरूपमुक्तम् । तत्र वक्तव्यं नास्ति । तपो दमः कर्म च विद्यायाः प्रतिष्ठा । तद्वत्सु विद्या प्रतितिष्ठतीत्यर्थः । सत्यमिति मीमांसा । 'निर्णीयते यतः सम्यगिदं सत्यमिति स्फुटम् । श्रुतिस्मृत्युदितं सर्वं व्यक्तं मीमांसयैतया । सत्यमित्युच्यते तस्मान्मीमांसा ब्रह्मनिश्चय' इति शब्दनिर्णये । 'ऋग्यजुःसामाथर्वाख्याः पञ्चरात्रं च भारतम् । मूलरामायणं चैव पुराणं भगवत्परम् । वेदा इत्युच्यते सद्भिः शिक्षाद्यं स्मृतयस्तथा । अङ्गानि सत्यं मीमांसा तद्विद्यायतनं त्रयमि'ति विद्यानिर्णये ॥ यश्चिदानन्दसच्छक्तिसम्पूर्णो भगवान्परः । नमोऽस्तु विष्णवे तस्मै प्रेष्ठाय प्रेयसां च मे ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं तलवकारोपनिषद्भाष्यं सम्पूर्णम् ॥

॥ ऐतरेयादिदशोपनिषद्भाष्याणि सम्पूर्णानि ॥

सर्वाञ्छन्ति ॥ ३१ ॥ ६ ॥ उपनिषदं भो ब्रूहीति । उक्ता त उपनिषत् । ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ३२ ॥ ७ ॥ तस्यै तपो दमः कर्मेति प्रतिष्ठा । वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ३३ ॥ ८ ॥ यो ह वा एतामुपनिषदमेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति ज्येये प्रतितिष्ठति ॥ ३४ ॥ ९ ॥ ४ ॥ इति तलवकारोपनिषत्समाप्ता ॥

SGDF
Sri Gangeshwari Digital Foundation

श्रीमदानन्दतीर्थ(पूर्णप्रज्ञ)भगवत्पादाचार्यविरचित-

श्रीसर्वमूलान्तर्गताः

प्रकरणग्रन्थाः

१	प्रमाणलक्षणम्	१०६५-१०६७
२	कथालक्षणम्	१०६८-१०६९
३	उपाधिखण्डनम्	१०७०-१०७१
४	मायावादखण्डनम्	१०७२-१०७३
५	प्रपञ्चमिथ्यात्वानुमानखण्डनम्	१०७४
६	तत्त्वसङ्ख्यानम्	१०७५
७	तत्त्वविवेकः	१०७६
८	तत्त्वोद्योतः	१०७७-१०८३
९	कर्मनिर्णयः (आवश्यक वेदभाग समलङ्कृतः)	१०८४-११०५
१०	विष्णुतत्त्वविनिर्णयः	११०६-११३४

SGDF
Sri Gangeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

प्रमाणलक्षणम्

श्रीमद्धनुमद्भीमम ध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥ ॐ ॥ अशेषगुरुमीशेशं नारायणमनामयम् । संप्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् ॥ यथार्थं प्रमाणम् । तद्द्विविधम् । केवलमनुप्रमाणं च । यथार्थज्ञानं केवलम् । तत्साधन-मनुप्रमाणम् । केवलं चतुर्विधम् । ईशलक्ष्मीयोग्ययोगिभेदेन । पूर्वद्वयमनादि नित्यम् । स्वातन्त्र्यपारतन्त्र्याभ्यां तद्विशेषः । पूर्वं स्वपरगताखिलविशेषविषयम् । द्वितीयमीशेऽन्येभ्योऽधिकम् । असार्वत्रिकम् । अन्यत्र सर्वविषयम् । स्पष्टत्वे भेदः । योगिना-मृजूनामनादिनित्यम् । ईशे जीवेभ्योऽधिकम् । अन्यत्रालोचने सर्वविषयम् । क्रमेण वर्धमानं आमुक्तेः । ततोऽव्ययम् । ततोऽ-र्वाक्क्रमेण ह्रसितम् । सादि च तात्त्विकेभ्योऽन्यत्र । अयोगिज्ञान-मुत्पत्तिविनाशवत् । अल्पम् । अनुप्रमाणं त्रिविधम् । प्रत्यक्षमनुमान-मागम इति । निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् । निर्दोषोपपत्ति-रनुमानम् । निर्दोषः शब्द आगमः । अर्थापत्त्युपमे अनुमाविशेषः । अभावोऽनुमा प्रत्यक्षं च । परामर्शापरामर्शविशेषात् । सम्भव-परिशेषावनुमा । आत्मान्योन्याश्रयचक्रकानवस्थाकल्पनागौरवश्रुत-दृष्टहानादयो दूषणानुमा । उपक्रमोपसंहारतदैकरूप्याभ्यासापूर्वता-फलार्थवादाश्च उपपत्तिविशेषाः । त एव सोपपत्तयो लिङ्गानि । समाख्यावाक्यप्रकरणस्थानानि च लिङ्गविशेषाः । व्याप्तिरुपपत्ति-मूलम् । सा प्रतिज्ञाहेतुदृष्टान्तरूपा । हेतुगर्भा प्रतिज्ञा केवलाऽपि ।

SGDF
Sri Gangeshwari Digital Foundation

सिद्धौ प्रतिज्ञायां हेतुमात्रं च। दृष्टान्तः सप्रतिज्ञो हेतुगर्भः उपपत्तिदोषौ विरोधासङ्गती। न्यूनाधिके वाचनिके। संवादानुक्तिगुता निग्रहाः। प्रत्यक्षं सप्तविधम्। साक्षिषडिन्द्रियभेदेन। मानसप्रत्यक्षजा स्मृतिः। स्मृत्यनुवादयोर्नाप्रामाण्यम्। यथार्थत्वानुभवात्। अहानेश्च। विरोधो मानस्ववाक्याभ्याम्। स्ववाक्यविरोधोऽपसिद्धान्तजातिरूपेण। जातिर्न मेये मानापेक्षेत्यादिका। मेये मानापेक्षास्तीति च तेनैव न्यायेन सिद्धत्वात्। मानविरोधश्च। छलमसङ्गतम्। अन्यच्च। गृष्टिविवक्षया गामानयेत्युक्ते पृथिवीविवक्षया गवानयनमशक्यमितिवत्। त्रिविधो विरोधः। प्रतिज्ञाहेतुदृष्टान्तभेदेन। प्रमाणविरुद्धार्थप्रतिज्ञा प्रतिज्ञाविरोधः। हेतुस्वरूपासिद्धिरव्याप्तिश्चेति हेतुविरोधः। साध्यस्य साधनस्य वाऽननुगमो दृष्टांतविरोधः। प्रतिज्ञायाः समबलविरोध एव सप्रतिसाधनः। स एवोपाधिदोषोऽपि।

सर्व एते दृश्यत्वानुमाने द्रष्टव्याः। प्रत्यक्षागमादिभिर्जगतः सत्यत्वात् तत्पक्षे दृश्यत्वस्य च मिथ्यात्वात्। अनिर्वचनीयस्य प्रतिवादिनोऽसिद्धत्वात्। आत्मनोऽपि दृश्यत्वात्। शुक्तिरजतादेरनिर्वचनीयत्वाभावात्। अनिर्वचनीयदृश्यत्वाभावात्। मानससिद्धत्वादिति सप्रतिसाधनत्वाच्च। जगत्सत्यत्वग्राहिप्रत्यक्षस्य वर्तमानमात्रग्राहित्वे अनुमानागमप्रामाण्यग्राहिणोऽपि प्रत्यक्षत्वाविशेषादुत्तरक्षणे प्रामाण्यं न सेत्स्यतीति भेदादिवाक्यानामेव प्रामाण्यं स्यात्। तस्य साक्षिसिद्धत्वं चेज्जगत्सत्यत्वमपि साक्षिसिद्धम्। व्यभिचारश्चेदागमार्थानुमानिर्दोषत्वाध्यवसाये च समः। अत उत्तरदिवसेऽभेदवाक्यस्य भेदोऽर्थः स्यात्। निर्दोषानुमायाः सदोषत्वं, सदोषानुमाया निर्दोषत्वं इत्यव्यवस्था। आश्रयसाध्यव्यधिकरणासिद्धयो न दूषणं अतिप्रसंगाभावात्। अतिप्रसंगेन हि दोषत्वादोषत्वे कल्प्ये। व्याप्तिरेव हि प्रयोजिका। असत्यपि व्याप्तिरस्त्येव। असदाश्रयस्य साधकत्वं

SGDF
Sri Gurgeshwari Digital Foundation

नेत्यपि व्याप्तिं विना कथं निवार्यते । असदाश्रयमित्यादिविशेषणत्वसंभवे कथमव्याप्तिः । न चात्यन्ताभावोऽपि सर्वधर्मरहितः । प्रमेयत्वाद्यनुभवात् । परिशेषार्थापत्तिप्रामाण्याभ्युपगमाच्च । विमतं सकर्तृकमित्यत्र सर्वज्ञत्वस्य पक्षधर्मताबलेन सिद्ध्यङ्गीकारात् । परिशेषोऽर्थापत्तिरनुमानमित्यविशेषः । उपपत्तिमात्रत्वात् । उपपत्तेश्च व्याप्त्यपेक्षा सर्वथाङ्गीकार्येत्याग्रहमात्रेण भेदः । उपमानस्यापि व्याप्तिरूपत्वात् । न हि स्वसदृशेनासदृशं क्वचिद्दृष्टं । योग्यानुपलब्धेश्च लिंगत्वं अविशेषात् । उक्तदोषेष्वेवाशेषानुमानदोषाणामन्तर्भावः । साध्याविशिष्टोऽसिद्धः । सिद्धसाधकोऽसंगतः । न प्रमासाधनं प्रमाणं । ज्ञानव्यतिरिक्तायां प्रमायां प्रमाणाभावात् । न चाज्ञातपरिच्छित्तिरेव प्रमेत्यत्र किञ्चिन्मानं । याथार्थ्यमेव प्रामाण्यमित्यंगीकारात् । न चानुभूतिरेव प्रमाणम् । स्मृत्यादावव्याप्तेः । वेदानुमानादिप्रामाण्यप्रसिद्धेश्च । 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् । प्रमाणमिति विज्ञेयं धर्माद्यर्थे बुभूषुभिरि'ति श्रुतेश्च । ऐतिह्यमागमभेदः । न च सम्यगनुभवसाधनं प्रमाणम् । ईश्वरज्ञानादावव्याप्तेः । अप्रामाण्ये प्रमाणाभावाच्च । प्रामाण्यज्ञाने च । तत्राप्यङ्गीकारेऽनवस्थितेः । स्वप्रकाशात्माङ्गीकारे तत्राव्याप्तेः । स्मृतेश्च प्रामाण्यानङ्गीकारे अनुभूतं मयेत्यत्र प्रमाणाभावात् । लिङ्गत्वेन प्रामाण्ये कल्पनागौरवम् । दृष्टहानिश्च । स्मृतिप्रमाणद्वैविध्यमात्रकल्पने मिथ्याज्ञानादेर्निराकरणादनुभवविरोधः । तदनुभवाभाव इत्युक्ते अनुभवः स्मृतिश्च नास्तीत्युक्ते किमुत्तरम् । स्वसिद्धैः साधनं परसिद्धैर्दूषणम् । अतो न दूषणे अपसिद्धान्तादि । इष्टापत्तिः सिद्धसाधनत्वादसंगतमेव ॥ आनन्दतीर्थमुनिना ब्रह्मतर्कोक्तमार्गतः । मानलक्षणमित्युक्तं संक्षेपाद्ब्रह्मसिद्धये ॥ अशेषमानमेयैकसाक्षिणेऽक्षयमूर्तये । अजेशपुरुहूतेड्य नमो नारायणाय ते ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं प्रमाणलक्षणं सम्पूर्णम् ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

कथालक्षणम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ नृसिंहमखिलाज्ञानतिमिराशिशिरद्युतिम् । संप्रणम्य प्रवक्ष्यामि कथालक्षणमञ्जसा ॥ वादो जल्पो वितण्डेति त्रिविधा विदुषां कथा । तत्त्वनिर्णयमुद्दिश्य केवलं गुरुशिष्ययोः ॥ कथाऽन्येषामपि सतां वादो वा समितेः शुभा । ख्यात्याद्यर्थं स्पर्धया वा सतां जल्प इतीर्यते ॥ वितण्डा तु सतामन्यैस्तत्त्वमेषु निगूहितम् । स्वयं वा प्राश्निकैर्वादे चिन्तयेत्तत्त्वनिर्णयम् ॥ रागद्वेषविहीनास्तु सर्वविद्याविशारदाः । प्राश्निका इति विज्ञेया विषमा एक एव वा ॥ अशेषसंशयच्छेत्ता निःसंशय उदारधीः । एकश्चेत्प्राश्निको ज्ञेयः सर्वदोषविवर्जितः ॥ एको वा बहवो वा स्युर्विष्णुभक्तिपरास्सदा । विष्णुभक्तिर्हि सर्वेषां सद्गुणानां स्वलक्षणम् ॥ पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धये । नैषा तर्केणापनेया मतिरित्याह हि श्रुतिः ॥ अन्यार्थ एवागमस्य वक्तव्यः प्रतिवादिना ॥ ऋग्यजुःसामाथर्वाश्च भारतं पञ्चरात्रकम् । मूलरामायणं चैव संप्रोच्यन्ते सदागमाः ॥ अनुकूला य एतेषां ते च प्रोक्तास्सदागमाः । अन्ये दुरागमा नाम तैर्न साध्यं हि साध्यते ॥ स्वपक्ष आगमश्चैव वक्तव्यः प्रतिवादिना । तस्याप्यन्यार्थता साध्या वादिना स्वार्थसिद्धये ॥ अन्यार्थता निराकार्या स्वागमस्य विनिश्चयात् । उपपत्त्यवकाशोऽत्र ह्यागमार्थविनिर्णये ॥ वाद्यागमार्थे निर्णीत आगमार्थः परस्य तु । निर्णेयः सहितैः पश्चात्ततो निश्शेषनिर्णयः ॥ प्रत्यक्षसिद्धेष्वर्थेषु प्रश्ने मामक्षजं वदेत् । ज्ञानं वा

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानसिद्धेषु नानुमां प्रथमं वदेत् ॥ परतुष्टिकरं वाक्यं वदेतां यदि वादिनौ । स एवात्रागमो ज्ञेयः परतुष्टिर्हि तत्फलम् ॥ एवं निर्णयपर्यन्तं वादे सुबहवोऽपि हि । घटेयुश्चिरकालं च जल्पे यावत्परोजितः ॥ तत्त्वनिर्णयवैलोम्यं वादे साक्षात्पराजयः । संवादे श्लाघ्यतैव स्याद्गुरुत्वमितरस्य च ॥ तत्त्वनिर्णयवैलोम्ये निन्द्यो दण्ड्योऽथवा भवेत् । विरोधासङ्गतिन्यूनतूर्ष्णीभावादिकैर्जितः । भवेज्जल्पे, वितण्डायां न्यायो जल्पवदीरितः । संवादे दण्ड्यता न स्याद्वितण्डाजल्पयोरपि । पराजितत्वमात्रं स्यान्निन्द्यो दण्ड्योऽपि वाऽन्यथा । अनुवादादिराहित्यं नैव जल्पेऽपि दूषणम् ॥ विद्याहीनत्वलिङ्गेऽपि वादिनोः स्यात्पराजयः । तदभावान्नैव षट्कादन्यो निग्रह इष्यते । अन्तर्भावादिहान्येषां निग्रहाणामिति स्म ह ॥ विद्या परीक्षापूर्वैव वृत्तिर्जल्पवितण्डयोः । स्खलितत्वादिमात्रेण न तत्रापि पराजयः । वादजल्पवितण्डानामिति शुद्धं स्वलक्षणम् ॥ आनन्दतीर्थमुनिना ब्रह्मतर्कानुसारतः । कथालक्षणमित्युक्तं प्रीत्यर्थं शार्ङ्गधन्वनः ॥ सदोदितामितज्ञानपूरवारितहृत्तमाः । नरसिंहः प्रियतमः प्रीयतां पुरुषोत्तमः ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं कथालक्षणं सम्पूर्णम् ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

उपाधिखण्डनम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ नारायणोऽगण्यगुणनित्यैकनिलयाकृतिः । अशेषदोषरहितः प्रीयतां कमलालयः ॥ अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चन । उपाधिभेदाद्घटत इति चेत्स स्वभावतः । अज्ञानतो वा द्वैतस्य सत्यता स्वत एव चेत् । अनवस्थितिरज्ञानहेतौ वाऽन्योन्यसिद्धिता ॥ चक्रकापत्तिरथवा भेदश्चोपाधितः कुतः । विद्यमानस्य भेदस्य ज्ञापको नैव कारकः । उपाधिर्दृष्टपूर्वो हि खेऽपि देशान्तरस्य सः ॥ ज्ञापको विद्यमानस्य मूढबुद्धिव्यपेक्षया । न चेदुपाधिसम्बन्ध एकदेशेऽथ सर्वगः । एकदेशेऽनवस्था स्यात्सर्वगश्चेन्न भेदकः ॥ सुखदुःखादिभोगश्च स्वरूपैक्ये न भेदतः । दृश्यो ह्युपाधिभेदेऽपि हस्तपादादिगो यथा । नानादेहगभोगानुसन्धानं योगिनो यथा । न चेद्भोगानुसन्धानं तदिच्छा योगिनः कुतः । अनुसन्धानरहितदेहबाहुल्यमन्यथा । सिद्धमेव हि तत्पक्षे विशेषो योगिनः कुतः ॥ सिद्धौ हि कर्मभेदस्य स्यादुपाधिविभिन्नता । तत्सिद्धौ चैव तत्सिद्धिरित्यन्योन्यव्यपाश्रयः । आत्मस्वभावभेदस्य विदोषत्वेन चाखिलः । प्रत्यक्षादिविरोधाच्च दुष्टः पक्षोऽयमञ्जसा । चेष्टालिङ्गेन सात्मत्वे परदेहस्य साधिते । अन्यत्वं स्वात्मनस्तस्मात्सर्वैरेवानुभूयते ॥ अज्ञता चाल्पशक्तित्वं दुःखित्वं स्वल्पकर्तृता । सर्वज्ञतादीशगुणविरुद्धा ह्यनुभूतिगाः ॥ सार्वज्ञादिगुणा विष्णोः श्रुतिषु प्रतिपादिताः । सत्यः सो अस्य महिमेत्यादिवाक्यान्मृषा न च । न च वेदोक्तमिथ्यात्वे

SGDF
Sri Gargeshwari Digital Foundation

मानं तन्मानतापि न । अतोऽज्ञासम्भवादेव नाधिकार्यैक्यवादिनाम् ॥ अतो नाज्ञातमिति च विषयो विषयान्तरे । अज्ञाभावात्फलं कस्य योगः शशनृश्रृङ्गयोः ॥ दुर्घटत्वं भूषणं चेत्स्यादविद्यात्वसात्मनः । अंधन्तमोऽप्यलङ्कारो नित्यदुःखं शिरोमणिः ॥ अतः परो मात्रयेति पूर्वश्रुतिनिदर्शितः । अन्यमीशमितिश्रुत्या भिन्नजीवदृशं गतः । भिन्नत्वेनात्मसादृश्यदो यदेति श्रुतेः सदा ॥ मायावादतमोव्याप्तमिति तत्त्वदृशा जगत् । भातं सर्वज्ञसूर्येण प्रीतये श्रीपतेः सदा ॥ नमोऽमन्दनिजानन्दसान्द्रसुन्दरमूर्तये । इंदिरापतये नित्यानन्दभोजनदायिने ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमुपाधिखण्डनं सम्पूर्णम् ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

मायावादखण्डनम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकरः । जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

विमतमनारम्भणीयं अन्यथाप्रतिपादकत्वात् यदित्थं तत्तथा यथा सम्प्रतिपन्नम् । न हि ब्रह्मात्मैक्यस्य याथार्थ्यं तत्पक्षे । अद्वैतहानेः स्वरूपातिरेके । अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता । निर्विशेषत्वादात्मनो नानधिगतो विशेषः । सिद्धत्वात्स्वरूपस्य विशेषाभावाच्च नाज्ञानं कस्यचिदावरकम् । अनधिगतार्थगन्तृप्रमाणमिति च तन्मतम् । अज्ञानासम्भवादेव तन्मतमखिलमपाकृतम् । मिथ्यात्वे चैक्यस्याऽतत्त्वावेदकत्वमागमस्य स्यात् । सत्यता च भेदस्य । एवमेव प्रयोजनमपि निरस्तम् । स्वरूपत्वान्मोक्षस्य पूर्वमेव सिद्धत्वात् । अज्ञानासम्भवेन चतुर्थप्रकाराभावात्पञ्चमप्रकारतापि निरस्ता । विषयप्रयोजनाभावादेवाधिकारी च । तदभावादेव सम्बन्धोऽपि ॥

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' ॥ 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च

SGDF
Sri Gargeshwari Digital Foundation

परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः' ॥ 'भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति'। इति विष्णोः पुरुषोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितम्॥ इति सर्वज्ञमुनिना मायावादतमोऽखिलम्। निरस्तं तत्त्ववादेन सतां संशयनुत्तये॥ नास्ति नारायणसमं न भूतं न भविष्यति। एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम्॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं मायावादखण्डनं सम्पूर्णम्॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

प्रपञ्चमिथ्यात्वानुमानखण्डनम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ विमतं मिथ्या दृश्यत्वाद्यदित्थं तत्तथा यथा सम्प्रतिपन्नम् । इत्युक्ते जगतोऽभावादाश्रयासिद्धः पक्षः । अनिर्वचनीयासिद्धेरप्रसिद्धविशेषणः । सदसद्वैलक्षण्ये मिथ्यात्वे सिद्धसाधनता । दृश्यत्वाभावादसिद्धो हेतुः । अनिर्वचनीयासिद्धेरेव । अनिर्वचनीयासिद्धेरेव सपक्षाभावाद्विरुद्धः । आत्मनोऽपि दृश्यत्वादनैकान्तिकः । जगतोऽभावेऽनुमानस्याप्यभाव इति तर्कबाधितत्वेनानध्यवसितः । प्रत्यक्षादिविरुद्धत्वाद्विश्वं सत्यमित्यादिवाक्यविरुद्धत्वाच्च कालात्ययापदिष्टः । रजतं दृष्टमितिभ्रममात्रत्वात् विमतं सत्यं दृश्यत्वादात्मवदित्यपि प्रयोज्यत्वात्प्रकरणसमः । विमतं सत्यं प्रमाणदृष्टत्वाद्यदित्थं तत्तथा यथात्मेतिप्रयोगात्सत्प्रतिसाधनः शुक्तिरजतस्याप्यनिवचनीयत्वाभावात्साध्यविकलो दृष्टान्तः । उक्तप्रकारेण दृश्यत्वाभावात्साधनविकलश्च । प्रमाणविरुद्धत्वमुपाधिः । साध्यधर्मविशिष्टः पक्षः । साध्यसमानधर्मविशिष्टः सपक्षः । साध्यविपरीतधर्मविशिष्टो विपक्षः । पक्षवचनं प्रतिज्ञा । लिङ्गं हेतुः । निदर्शनं दृष्टान्तः ॥ यो दृश्यते सदानन्दनित्यव्यक्तचिदात्मना । निर्दोषाखिलकल्याणगुणं वन्दे रमापतिम् ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं प्रपञ्चमिथ्यात्वानुमानखण्डनं सम्पूर्णम् ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

तत्त्वसङ्ख्यानम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥ ॐ ॥ स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते । स्वतन्त्रो भगवान्विष्णुर्भावाभावौ द्विधेतरत् ॥ प्राक्प्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते । चेतनाचेतनत्वेन भावोऽपि द्विविधो मतः ॥ दुःखस्पृष्टं तदस्पृष्टमिति द्वेधैव चेतनम् । नित्यादुःखा रमाऽन्ये तु स्पृष्टदुःखास्समस्तशः ॥ स्पृष्टदुःखा विमुक्ताश्च दुःखसंस्था इति द्विधा । दुःखसंस्था मुक्तियोग्या अयोग्या इति च द्विधा ॥ देवर्षिपितृपनरा इति मुक्तास्तु पञ्चधा । एवं विमुक्तियोग्याश्च तमोगाः सृतिसंस्थिताः ॥ इति द्विधा मुक्त्ययोग्या दैत्यरक्षःपिशाचकाः । मर्त्याधमाश्चतुर्धैव तमोयोग्याः प्रकीर्तिताः । ते च प्राप्तान्धतमसः सृतिसंस्था इति द्विधा ॥ नित्यानित्यविभागेन त्रिधैवाचेतनं मतम् । नित्या वेदाः पुराणाद्याः कालः प्रकृतिरेव च ॥ नित्यानित्यं त्रिधा प्रोक्तमनित्यं द्विविधं मतम् । असंसृष्टं च संसृष्टमसंसृष्टं महानहम् ॥ बुद्धिर्मनः खानि दश मात्रा भूतानि पञ्च च । संसृष्टमण्डं तद्गं च समस्तं सम्प्रकीर्तितम् ॥ सृष्टिः स्थितिः संहृतिश्च नियमोऽज्ञानबोधने । बन्धो मोक्षः सुखं दुःखमावृतिर्ज्योतिरेव च ॥ विष्णुनास्य समस्तस्य समासव्यासयोगतः ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं तत्त्वसङ्ख्यानं सम्पूर्णम् ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

तत्त्वविवेकः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ स्वतन्त्रं परतन्त्रं च प्रमेयं द्विविधं मतम् । स्वतन्त्रो भगवान्विष्णुर्निर्दोषाखिलसद्गुणः ॥ द्विविधं परतन्त्रं च भावोऽभाव इतीरितः । पूर्वापरसदात्वेन त्रिविधोऽभाव इष्यते ॥ भावाभावस्वरूपत्वान्नान्योन्याभावता पृथक् । चेतनोऽचेतनश्चेति भावोऽपि द्विविधः स्मृतः ॥ नित्यमुक्तश्च सृतियुक्परतन्त्रोऽपि चेतनः । द्विधैव श्रीर्नित्यमुक्ता सृतियुक्त द्विधा मतः ॥ मुक्तोऽमुक्त इति ह्यत्र ब्रह्मान्ता उत्तरोत्तरम् । मुक्ताः शतगुणाः प्रोक्ता रमा तेभ्योऽखिलैर्गुणैः ॥ नित्यं बहुगुणोद्रिक्ता ततोऽनन्तगुणो हरिः । अमुक्तास्त्रिविधास्तत्र नीचमध्योच्चभेदतः । मुक्तियोग्यास्तत्र चोच्चा नित्यावर्तास्तु मध्यमाः । नीचा नित्यतमोयोग्या द्विधैवाचेतनं मतम् ॥ नित्यानित्यत्वभेदेन देशः कालः श्रुतिस्तथा । भूतेन्द्रियप्राणगुणसूक्ष्मरूपं च नित्यकम् ॥ एषां विकारोऽनित्यः स्यान्नित्या एव हि चेतनाः । गुणक्रियाजातिपूर्वा धर्माः सर्वेऽपि वस्तुनः ॥ रूपमेव द्विधं तच्च यावद्वस्तु च खण्डितम् । खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत् ॥ खण्डितं रूपमेवात्र विकारोऽपि विकारिणः । कार्यकारणयोश्चैव तथैव गुणतद्वतोः ॥ क्रियाक्रियावतोस्तद्वत्तथा जातिविशेषयोः । विशिष्टशुद्धयोश्चैव तथैवांशांशिनोरपि ॥ य एतत्परतन्त्रं तु सर्वमेव हरेः सदा । वशमित्येव जानाति संसारान्मुच्यते हि सः ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः तत्त्वविवेकः सम्पूर्णः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

तत्वोद्द्योतः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः । नित्यातादृशचिच्चेत्ययन्तेष्टो नो रमापतिः ॥

विमतो भिन्नो मुक्तत्वाद्यदित्थं तत्तथा यथा सम्प्रतिपन्नः । न च भेदे विकल्पो युज्यते । अनिर्वचनीयस्य सर्वत्राप्रसिद्धत्वादेव । शशविषाणं गोविषाणं वोच्यत इतिवत् । न चानिर्वचनीये किञ्चिन्मानम् । मिथ्याशब्दोऽनिर्वचनीयं वदतीत्यत्र च । अनुमानस्य चाप्रसिद्धविशेषणः पक्षः । न च धूमत्ववन्मिथ्यात्वमित्युभयसम्प्रतिपन्नं सामान्यमस्ति । न च बाष्पारोपितधूमेन धूमवत्त्वं व्यभिचरति । न च भावाभावविलक्षणं क्वचिदागमो वक्ति । 'नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यदि'त्यत्र च । पारिशेष्येणानिर्वचनीयत्वाङ्गीकारे 'आनीदवातं स्वधया तदेकमि'ति तदानीं परिशिष्टत्वाद्ब्रह्मण एवानिर्वचनीयत्वं स्यात् । 'मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यते । मूर्तामूर्तेतरद्ब्रह्म न सत्तन्नासदुच्यत'इति पैङ्गिश्रुतिः । 'यदन्यद्वायोश्चान्तरिक्षाच्चैतत्सदि'ति माध्यन्दिनश्रुतिः । 'अद्भुतत्वादनिर्वाच्यं ब्रह्म चिच्चेत्यमेव च । अचिन्त्यं तत एवैतदतर्क्यार्ज्ञेयमेव च । ऋ गताविति धातोस्तु पूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्तमित्युक्तमनृतं परिणामतः । प्रकृतिप्राकृतं प्रोक्तमसत्तद्शुभत्वतः । असतां बुद्धिगम्यत्वादसत्यमिति चोच्यते । नियमेन बहिश्चित्तास्ते

SGDF
Sri Gargeshwari Digital Foundation

सन्तो ब्रह्मणि स्थिताः । विश्वं सत्यं वशे विष्णोर्नित्यमेव प्रवाहतः । न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारतः । असत्यमप्रतिष्ठं ये जगदाहुरनीश्वरम् । त आसुराः स्वयं नष्टा जगतः क्षयकारिण' इत्यादि व्याससमृतौ । 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्पर-सम्भूतं किमन्यत्कामहैतुकम् । एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्प-बुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिता' इत्यादि च गीतासु । 'विश्वं सत्यं मघवानायुवोरिदापश्च न प्रमिनन्ति व्रतं वाम् । प्रघान्वस्य महतो महानि सत्यासत्यस्य करणानि वोचम्' । 'सत्यः सो अस्य महिमा गृणेशवो यज्ञेषु विप्रराज्ये' । 'कविर्मनीषी परिभूः स्वयम्भू-र्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्य' इत्यादि श्रुतिभ्यश्च । न चार्थापत्त्याऽनिर्वचनीयसिद्धिः । असतः प्रतीतिं विनाऽसद्वैलक्षण्य-ज्ञानानुपपत्तेः । न च बाध्यं जगदित्यत्र किञ्चिन्मानम् । बाध्यत्व-मपि हि तेषां मिथ्या । तस्य च मिथ्यात्वेऽबाध्यत्वमेव सत्यं स्यात् । सद्विलक्षणत्वं च सज्जातिविलक्षणत्वं सन्मात्रविलक्षणत्वं वा । जात्यङ्गी-कारे सद्धहुत्वम् । सन्मात्रविलक्षणत्वं चेत्सिद्धसाधनता । ब्रह्म-वैलक्षण्याङ्गीकारात् । न च कयापि युक्त्या मानेन वा भेदनिराकरणं भवति । अङ्गीक्रियमाणत्वात् । अनिर्वचनीयासिद्धेश्च । सद्विलक्षणत्व-मसद्विलक्षणत्वं च मिथ्येत्यविलक्षणत्वमेव सत्यं स्यात् ।

एवमेव हेत्वादिष्वपि विकल्पो निराकरणीयः । दृश्यत्वा-द्यनुमानेष्वप्येत एव दोषाः । आत्मनोऽपि दृश्यत्वादनैकान्तिकता च । न चात्मनो दृक्कर्मत्वं विना तज्ज्ञानत्वम् । तदज्ञाननिवृत्तिश्च तेन भवति । न च तदाकारम् । अतद्विषयत्वादेव । तद्विषयत्वमेव हि तदाकारत्वम् । न हि ज्ञानज्ञेययोरेकाकारता । न ह्यज्ञानस्य घटाश्रयत्वं ब्रह्माश्रयत्वं वास्ति । पुंगतमेव हि तमः ज्ञानेन निवर्तते । विषयाश्रयं चेदज्ञानं निवर्तते तर्ह्येकेन ज्ञातस्य घटस्यान्यैरज्ञातत्वं न स्यात् ।

SGDF
Sri Gangeshwari Digital Foundation

अतद्विषयज्ञानेन तदज्ञाननिवृत्तौ घटज्ञानेनापि निवर्तेत। अविषयत्वादेव तस्य ज्ञानत्वं न स्याद्घटवत् ।

जडत्वं चाप्रमातृत्वमेव। न च प्रमातृत्वमात्मनस्तैरङ्गीक्रियते। अतस्तदप्यनैकान्तिकम् । मिथ्याप्रमातृत्वं चानिर्वचनीयनिरासादेव निरस्तम्। यदि जडत्वं नामाप्रकाशत्वं तदप्यात्मनः स्वविषयप्रकाशत्वाभावात्परविषयप्रकाशत्वाभावाच्चानैकान्तिकमेव। स्वविषयत्वं हि कर्तृकर्मविरोधात्तैर्नाङ्गीक्रियते। मिथ्याभूतपरविषयत्वं चानिर्वचनीयनिरासादेव निरस्तम्। विषयवर्जितः प्रकाश एव न भवति घटवत्। तत्प्रमाणाभावात् ।

देशतः कालतः परिच्छिन्नत्वं प्रकृतिकालादिष्वभावाद्भागासिद्धम् । वस्तुतः परिच्छिन्नत्वमात्मनोऽपि भेदाङ्गीकारादनैकान्तिकम् ।

प्रत्यक्षबाधितं च जगन्मिथ्यात्वम् । सदिति प्रतीयमानत्वात्। न च प्रत्यक्षसिद्धमन्येन केनापि बाध्यं दृष्टम्। चन्द्रप्रादेशत्वादिविषयं तु दूरस्थत्वादिदोषयुक्तत्वादपटु। न च जगत्प्रत्यक्षस्यापटुत्वे किञ्चिन्मानम्। न च जगतोऽज्ञानजन्यत्वे किञ्चिन्मानम्। 'न च मायाविना माया दृश्यते विश्वमीश्वरः। सदा पश्यति तेनेदं न मायेत्यवधार्यताम्॥ अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत्। सर्वापरोक्षविद्विष्णुर्विश्वदृक्तन्न तन्मृषे'ति ब्रह्माण्डे । 'ईशोऽनीशो जगन्मिथ्या न पूज्यो गुरुरित्यपि। एक आत्मा परब्रह्मभावो मुक्तिरिति ह्यपि। एवमादि विरुद्धानि वचनान्यथ युक्तयः। प्रमाणैर्बहुभिर्ज्ञेया आभासा इति वैदिकैः। वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना। इतराणि विरुद्धानि प्रलम्भभ्रमजान्यपी'ति व्यासस्मृतिः। 'ॐ नासतो दृष्टत्वात्'। 'नाभाव उपलब्धेः'। 'वैधर्म्याच्च न स्वप्नादिवदि'त्यादि भगवद्वचनेनापि निरस्ताः।

SGDF
Sri Gargeshwari Digital Foundation

न च शून्यवादिनः सकाशाद्वैलक्षण्यं मायावादिनः। व्यावहारिकसत्त्वस्य तेनाप्यङ्गीक्रियमाणत्वात्। 'सत्यं तु द्विविधं प्रोक्तं सांवृतं पारमार्थिकम्। सांवृतं व्यावहार्यं स्यान्निवृत्तौ पारमार्थिकम्। विचार्यमाणे नो सत्त्वं सत्त्वं चापि प्रतीयते। यस्य तत्सांवृतं ज्ञेयं व्यवहारपदं च यदि'त्यादिना। न च निर्विशेषब्रह्मवादिनः शून्यात्कश्चिद्विशेषस्तस्य। 'निर्विशेषं स्वयं भातं निर्लेपमजरामरम्। शून्यं तत्त्वमविज्ञेयं मनो वाचामगोचरम्। जाड्यसंवृतिदुःखान्तपूर्वदोषविरोधि यत्। नित्यभावनया भातं तद्भावं योगिनं नयेत्। भावार्थप्रतियोगित्वं भावत्वं वा न तत्त्वतः। विश्वाकारं च संवृत्या यस्य तत्पदमक्षयमि'त्यादि तद्वचः। अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धमिति च मायावादी। 'नास्य सत्त्वमसत्त्वं वा न दोषो गुण एव वा। हेयोपादेयरहितं तच्छून्यं पदमक्षयमि'ति च शून्यवादी। सत्त्वादयो धर्माः परमार्थतो मायावादिनापि नाङ्गीक्रियन्ते। सर्वविशेषविनिर्मुक्तत्वाङ्गीकारात्। 'अवाच्यं सर्वशब्दैस्तल्लक्ष्यते चाखिलैः पदैः। अज्ञेयं ज्ञानलक्ष्यं च तच्छून्यं पदमक्षयमि'ति च शून्यवादी। न चाखण्डत्वेन कश्चिद्विशेषः। 'यदखण्डं पदं लक्ष्यं सर्वैरपि विशेषणैः। सर्वैर्विशेषणैर्मुक्तं तच्छून्यं पदमक्षयमि'ति च शून्यवादी। एवमेव मायावादिराद्धान्तः। न च मायावादिनो भावत्वं नाम धर्मः। न च शून्यवादिनः शून्यत्वं नाम धर्मः। 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे। यदासीत्तत एवाद्यः स्वयम्भूः समभूदजः'। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर'इति भगवद्राद्धान्तः। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादि श्रुतिः। प्रकृष्टप्रकाशश्चन्द्र इत्यादिषु प्रकृष्टत्वादिविशेषणानि सन्त्येवेति न तत्साम्यम्। अनित्यदेशकालसम्बन्धित्वस्य सत्त्वान्न सोऽयं देवदत्त

SGDF
Sri Gargeshwari Digital Foundation

इत्याद्युपमा च। देवदत्तादिस्वरूपमात्रस्य सिद्धत्वान्न स्वरूपमात्रे प्रश्नः। नक्षत्रादिव्यतिरेकमात्रस्यापि सिद्धत्वान्न व्यतिरेकमात्रे। अन्यथा प्रश्नस्यैवासम्भवात्। अतः कैर्विशेषणैर्विशिष्ट इति प्रश्ने प्रकृष्टप्रकाशतद्देशकालादिविशिष्ट एव वाक्यार्थः। अङ्गीक्रियमाणत्वाद्विशिष्टादेरनिर्वचनीयाभावाच्च सत्यत्वं च सिद्धम्। दृष्टस्य वस्तुनो बलवद्दृष्टिं विना नान्यद्बाधकमिति दुर्घटत्वे सुघटत्वे वा नानिर्वचनीयसिद्धिः। सर्ववैलक्षण्याङ्गीकाराद्दुर्घटमपि ब्रह्म प्रमाणादङ्गीक्रियत एव।

जगतो भिन्नमभिन्नं भिन्नाभिन्नं वेत्यादिविकल्पस्तत्रापि युज्यते। भिन्नं चेद्भेदादिविशिष्टाच्छुद्धं भिन्नमभिन्नंवेत्याद्यनवस्था। अभिन्नं चेन्मिथ्यारूपेण जगता ब्रह्मापि मिथ्यैव स्यात्। भिन्नाभिन्नं चेद्दोषद्वयमपि। उभयविलक्षणं चेदनिर्वचनीयत्वं ब्रह्मण एवापतितम्। यद्येवमपि नानिर्वचनीयत्वं ब्रह्मणस्तर्हि जगतोऽपि न स्यात्। विश्वं सत्यमित्यादिवचनमत्राप्युक्तम्। 'न सत्तन्नासदुच्यते'। 'असद्वा इदमग्र आसीत्'। 'नासदासीन्नो सदासीदि'त्यादि ब्रह्मणोऽपि मिथ्यात्वे प्रमाणमस्ति। न हि दृष्टेर्बलवत्किञ्चित्प्रमाणम्। न हि युक्तिपराजितोऽपि क्षुधितो नान्नमत्ति। बलवद्दृष्टचबाधे.। न चान्नत्वे दुर्घटे तस्यानन्नत्वं भवति। दृष्टचबाधितदृष्टस्य। न चान्नानन्नवैलक्षण्यमनुभूयते। न च तथा व्यवहारः। न च तत्र किञ्चिन्मानम्। अतो विशिष्टादिनिराकरणयुक्तीनामपि विशिष्टाद्यपेक्षत्वाज्ज्ञात्युत्तरमिति न युक्तिबाधापि। अतो निखिलगुणगणाढ्यमेव ब्रह्म श्रुत्यभिप्रेतम्।

अनिर्वचनीयासिद्धेरेवानुमानस्याप्यसिद्धिः। यदि जगन्मिथ्या स्यात्तदा दृश्यत्वाद्यनुमानस्यापि जगदन्तःपातित्वेन मिथ्यात्वादसिद्धिः स्यात्। वाचारम्भणं विविधप्रकारः नामधेयं नित्यं धार्यं नाम मृत्तिकेत्यादि वैदिकमेव। अनित्यत्वात्साङ्केतिकं नामाप्रधानं नित्यत्वा-

SGDF
Sri Gargeshwari Digital Foundation

न्मृत्तिकादिनामैव प्रधानम् । प्रधानज्ञानादप्रधानं ज्ञातमिव भवति । एवं प्रधानस्य परमात्मनो ज्ञानादप्रधानं ज्ञातमिव भवति । प्राधान्यज्ञापनार्थमेव सृष्ट्यादिकथनम् । यथा सोम्येत्याद्यपि सादृश्यकथनम् । न चैकनखनिकृन्तनविकारः सर्वं कार्ष्णायसम् । प्रधानपुरुज्ञानाद्ग्रामो ज्ञात इति व्यपदेशोऽस्ति । न हि सत्यज्ञानेन मिथ्याज्ञानं भवति । मुक्तामुक्तयोर्भेदाभावे मुक्तस्य संसारः संसारिणो वा मुक्तत्वं स्यात् । यद्यज्ञानकृतो भेदस्तर्हीश्वरस्याज्ञानाभावात्संसारिणैक्यं तेनानुभूयेत । ततश्च दुःखित्वं स्यात् । 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप' । 'सुखं दुःखं भवोऽभावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः' । 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' । इत्यादिनेश्वरेणापि भेदस्यैवानुभूयमानत्वाच्च । तत एवाभ्रान्तत्वान्न मुक्तस्यापि भेदनिवृत्तिः । न चोपाधिभेदमात्रेणेश्वरस्य दुःखाभावः । हस्तपादाद्युपाधिभेदेऽपि भोक्तुरेकत्वानुभवात् । 'उद्यतायुधदोर्दण्डाः पतितस्वशिरोऽक्षिभिः । पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन्युधी'ति भारतवचनान्न विश्लेषाद्विशेषः । अतोऽनौपाधिकत्वादेव भेदस्य न मुक्तस्येश्वरैक्यम् । 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' । 'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'त्यादि मुक्तभेदवचनेभ्यश्च ।

एवं प्रत्यक्षानुमानागमविरुद्धत्वादभेदविषयवत्प्रतीयमानान्यपि वाक्यानि सादृश्याद्यर्थान्येव योजनीयानि । 'विरुद्धवत्प्रतीयन्त आगमा यत्र वै मिथः । तत्र दृष्टानुसारेण तेषामर्थोऽन्ववेक्ष्यत'इति ब्राह्मवचनाच्च । भेदाद्यनुभवस्य भ्रान्तित्वाङ्गीकारे तदपलापयुक्तेर्नितरां

SGDF
Sri Gargeshwari Digital Foundation

भ्रान्तित्वाद्भेदाद्यनुभवस्याभ्रान्तित्वमेव भवति । परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वात् । एकजीववादपक्षे तन्निष्ठानां मृत्यनन्तरमपि विश्वस्यानिवृत्तत्वाद्भेदनिष्ठ एवैकजीव इत्यापतति। तस्य च तत्रैवाग्रहान्न कदाचिद्भेदनिवृत्तिरित्यनिवृत्तिरेव भवति । न चैकजीवाज्ञानपरिकल्पितास्समस्ता इत्यत्र किञ्चिन्मानम् । अतो मुक्तेभ्योऽप्यन्य एव समस्तगुणपरिपूर्णो भगवान्विष्णुरिति सिद्धम् ॥

'ब्रह्मेशानदिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरे' ॥ 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति' ।

सत्यचिच्चेत्यपतये मुक्तामुक्तोत्तमाय ते । नमो नारायणायार्यवृन्दवन्दितपद्मय ॥

आनन्दतीर्थपुंसिंहो मायावादिदितेःसुतान्। विदार्य युक्तिनखरैरप्रतीपो विभासते ॥ १ ॥ पलायध्वं पलायध्वं त्वरया मायिदानवाः । सर्वज्ञहरिरायाति तर्कागमदरारिभृत् ॥ २ ॥ द्रवत द्रवताशु मायिनः प्रविशध्वमतन्द्रिता गुहाः । कमलारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्करः ॥ ३ ॥ नृहरिः सकलज्ञनामकः समुपैति हि मायिदानवान् । प्रपलायनमत्र तत्क्षमं त्वरया वो वसतिर्गुहासु च ॥ ४ ॥ जयत्यानन्दतीर्थेष्टदेवता नरकेसरी । विपाटिताज्ञानतमःकपाटात्युरुहुङ्कृतः ॥ ५ ॥ जयत्यमितपौरुषः स्वजनतेष्टचिन्तामणिः । अजेशमुखवन्दितो गुणगणार्णवः श्रीपतिः ॥ ६ ॥ सर्वज्ञसन्मुनीन्द्रोच्चसन्मनःपङ्कजालयः । अजितो जयति श्रीशो रमाबाहुलताश्रयः ॥ ७ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्तत्वोद्द्योतः सम्पूर्णः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

कर्मनिर्णयः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ ॐ ॥ य इज्यते विधीशानशक्रपूर्वैः सदा मखैः ।
रमाप्रणयिने तस्मै सर्वयज्ञभुजे नमः ॥

ऋग्वेदब्राह्मणचतुर्थपञ्चिकाऽऽद्याध्यायादिमखण्डानि

॥ ॐ ॥ देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरंस्तं द्वितीयेनाह्नाऽसिञ्चंस्तं तृतीयेनाह्ना प्रायच्छंस्तं चतुर्थेऽहन्प्राहरत्तस्माच्चतुर्थेऽहन्षोळशिनं शंसति वज्रो वा एष यत्षोळशी तद्यच्चतुर्थेऽहन्षोळशिनं शंसति वज्रमेव तत्प्रहरति द्विषते भ्रातृव्याय वधं योऽस्यस्तृत्यस्तस्मै स्तर्तवै वज्रो वै षोळशी पशव उक्थानि तं परस्तादुक्थानां पर्यस्य शंसति तं यत्परस्तादुक्थानां पर्यस्य शंसति वज्रेणैव तत्षोळशिना पशून्परिगच्छति तस्मात्पशवो वज्रेणैव षोळशिना परिगता मनुष्यानभ्युपावर्तन्ते तस्मादश्वो वा पुरुषो वा गौर्वा हस्ती वा परिगत एव स्वयमात्मनेऽत एव वाचाभिषिद्ध उपावर्तते वज्रमेव षोळशिनं पश्यन्वज्रेणैव षोळशिना परिगतो वाग्घि वज्रो वाक्षोळशीतदाहुः किं षोळशिनः षोळशित्वमिति षोळशः स्तोत्राणां षोळशः शस्त्राणां षोळशभिरक्षरैरादत्ते षोळशभिः प्रणौति षोळशपदां निविदं दधाति तत्षोळशिनः षोळशित्वं द्वे वा अक्षरे अतिरिच्येते षोळशिनोऽनुष्टुभमभिसम्पन्नस्य वाचो वाव तौ स्तनौ सत्यानृते वाव ते अवत्येनं सत्यं नैनमनृतं हिनस्ति य एवं वेद ॥ खण्डः १ ॥

गौरिवीतं षोळशिसाम कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं गौरिवीतं तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान्गौरि-

SGDF
Sri Gurgeshwari Digital Foundation

ऋग्वेदब्राह्मणम्

वीतं षोळशिसाम कुरुते नानदं षोळशिसाम कर्तव्यमित्याहुरिन्द्रो वै वृत्राय वज्रमुदयच्छत्तमस्मै प्राहरत्तमभ्यहनत्सोऽभिहतो व्यनदद्यद्व्यनदत्तन्नानदं सामाभवत्तन्नानदस्य नानदत्वमभ्रातृव्यं वा एतद्भ्रातृव्यहा साम यन्नानदमभ्रातृव्यो भ्रातृव्यहा भवति य एवं विद्वान्नानदं षोळशिसाम कुरुते तद्यदि नानदं कुर्युरविहृतः षोळशी शंस्तव्योऽविहृतासु हि तासु स्तुवते यदि गौरिवीतं विहृतः शोळशी शंस्तव्यो विहृतासु हि तासु स्तुवते ॥ खण्डः २ ॥

अथातश्छन्दांस्येव व्यतिषजत्या त्वा वहन्तु हरय उपो षु शृणुही गिर इति गायत्रीश्च पङ्क्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ताः पशवः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति यदु गायत्री च पङ्क्तिश्च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्वज्ररूपान्नैति यदिन्द्र पृतनाज्येऽयं ते अस्तु हर्यत इत्युष्णिहश्च बृहतीश्च व्यतिषजत्यौष्णिहो वै पुरुषो बार्हताः पशवः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति यदुष्णिक्च बृहती च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्वज्ररूपान्नैत्याधूर्ष्वस्मै ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति द्विपदां च त्रिष्टुभं च व्यतिषजति द्विपाद्वै पुरुषो वीर्यं त्रिष्टुप्पुरुषमेव तद्वीर्येण व्यतिषजति वीर्ये प्रतिष्ठापयति तस्मात्पुरुषो वीर्ये प्रतिष्ठितः सर्वेषां पशूनां वीर्यवत्तमो यदु द्विपदा च विंशत्यक्षरा त्रिष्टुप्च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्वज्ररूपान्नैति एष ब्रह्मा प्रतेमहे विदथे शंसिषं हरी इति द्विपदाश्च जगतीश्च व्यतिषजति द्विपाद्वै पुरुषो जागताः पशवः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति तस्मात्पुरुषः पशुषु प्रतिष्ठितोऽत्ति चैनानधि च तिष्ठति वशे चास्य यदु द्विपदा च षोळशाक्षरा जगती च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्वज्ररूपान्नैति त्रिकद्रुकेषु

SGDF
Sri Gargeshwari Digital Foundation

महानाम्नीनामृचामुपसर्गा ये उपसर्जनभूतास्तानुपसृजति संयोजयति । महन्नाम यास्वृक्षु विद्यते ता महानाम्न्यः । परस्य

ऋग्वेदब्राह्मणम्

महिषो यवाशिरं प्रो॑ष्वस्मै पुरोरथमित्यतिच्छन्दसः शंसति च्छन्दसां वै यो रसोऽत्यक्षरत्सोऽतिच्छन्दसमभ्यत्यक्षरत्तदतिच्छन्दसोऽतिच्छन्द-स्त्वं सर्वेभ्यो वा एष च्छन्दोभ्यस्सन्निर्मितो यत्षोळशी तद्यदति-च्छन्दसः शंसति सर्वेभ्य एवैनं तच्छन्दोभ्यः सन्निर्मिमीते सर्वेभ्य-श्छन्दोभ्यः सन्निर्मितेन षोळशिना राध्नोति य एवं वेद ॥ खण्डः ३ ॥

महानाम्नीनामुपसर्गानुपसृजत्ययं वै लोकः प्रथमा महानाम्न्य-न्तरिक्षलोको द्वितीयाऽसौ लोकस्तृतीया सर्वेभ्यो वा एष लोकेभ्य-स्सन्निर्मितो यत्षोळशी तद्यन्महानाम्नीनामुपसर्गानुपसृजति सर्वेभ्य एवैनं तल्लोकेभ्यस्सन्निर्मिमीते सर्वेभ्यो लोकेभ्यस्सन्निर्मितेन षोळशिना राध्नोति य एवं वेद । प्रप्र वस्त्रिष्टुभमिषमर्चत प्रार्चत यो व्यतीरँ-फाणयदिति प्रज्ञाता अनुष्टुभः शंसन्ति तद्यथेह चेह चापथेन चरित्वा पन्थानं पर्यवेयात्तादृक्तद्यत्प्रज्ञाता अनुष्टुभः शंसति स यो व्याप्तो गत-श्रीरिव मन्येताविहृतं षोळशिनं शंसयेन्नेच्छन्दसां कृच्छ्रादवपद्या इत्यथ यः पाप्मानमपजिघांसुः स्याद्विहृतं षोळशिनं शंसयेद्व्यतिषक्त इव वै पुरुषः पाप्मना व्यतिषक्तमेवास्मै तत्पाप्मानं शमलमपहन्त्यप पाप्मानं हते य एवं वेदोद्यद्ब्रध्नस्य विष्टपमित्युत्तमया परिदधाति स्वर्गो वै लोको ब्रध्नस्य विष्टपं स्वर्गमेव तं लोकं यजमानं गमयत्यपाः पूर्वेषां हरिवः सुतानामिति यजति सर्वेभ्यो वा एष सवनेभ्यस्संनिर्मितो यत्षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति यजति पीतवद्वै प्रातः-सवनं प्रातःसवनादेवैनं तत्सन्निर्मिमीतेऽथो इदं सवनं केवलं त इति माध्यन्दिनं वै सवनं केवलं माध्यन्दिनादेवैनं तत्सवनात्सन्निर्मिमीते ममद्धि सोमं मधुमन्तमिन्द्रेति मद्वद्वै तृतीयसवनं तृतीयसवनादेवैनं

SGDF
Sri Gangeshwari Digital Foundation

ब्रह्मणो यन्नामेन्द्रादिकं तन्महार्थत्वान्महत्। महद्धि तत्परं ब्रह्म। अशेषगुणपूर्तेः। तत्रैक आहुरगुणं ब्रह्मेति। न तद्युक्तम्। श्रुतियुक्तिविरोधात्। तथाहि श्रुतिः। 'सत्यं ज्ञानमनन्तं ब्रह्म'। 'विज्ञानमानन्दं ब्रह्म'। 'यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः'। 'तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते'। 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः'। 'एतावानस्य महिमा अतो ज्यायांश्च पुरुषः'। 'यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा'। 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते'। 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः'। 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि। परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति। न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमापे'त्यादिका।

युक्तिश्च। बुद्धिपूर्वं सर्वकर्तृत्वात्सर्वज्ञत्वादयो गुणा युक्ताः।

ऋग्वेदब्राह्मणम्

तत्सन्निर्मिमीते सत्रा वृषन् जठर आवृषस्वेति वृषण्वद्वै षोळशिनो रूपं सर्वेभ्यो वा एष सवनेभ्यस्सन्निर्मितो यत्षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति जयति सर्वेभ्य एवैनं तत्सवनेभ्यः सन्निर्मिमीते सर्वेभ्यः सवनेभ्यः सन्निर्मितेन षोळशिना राध्नोति य एवं वेद महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु सर्वेभ्यो वा एष च्छन्दोभ्यः सन्निर्मितो यत्षोळशी तद्यन्महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु सर्वेभ्य एवैनं तच्छन्दोभ्यः सन्निर्मिमीते सर्वेभ्यश्छन्दोभ्यस्सन्निर्मितेन षोळशिना राध्नोति य एवं वेद॥ खण्डः ४॥ ऋग्वेदब्राह्मणचतुर्थपञ्चिकायां आद्याध्याये चतुर्थखण्डः सम्पूर्णः॥

SGDF
Sri Gargeshwari Digital Foundation

'कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभमि'ति च भागवते। न 'चैको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'त्यादिविरोधः। सत्त्वादिगुणाभावोक्तेस्तत्र। अन्यथैको देवः सर्वभूतेषु गूढ इत्यादीनामपि गुणत्वात्स्वोक्तिविरोधः। न च निर्विशेषं नाम किञ्चिदस्ति। निर्विशेषत्वोक्तेरेव व्याहतत्वात्। निर्विशेषत्वेन विशिष्टं तन्न वेत्युक्ते यद्यविशिष्टं तर्हि न विशेषनिराकरणम्। विशेषवत्त्वमेव भवति। यदि तेन विशिष्टं स एव विशेष इति व्याहतिः। न च निर्विशेषत्वे किञ्चिन्मानम्। अशेषविशेषवचनानुभवयुक्तिविरोधश्च। न च मिथ्याविशेषवत्। व्याहतेः। मिथ्याविशेष इत्युक्ते ह्यसद्विशेष इत्येव भवति। तथाच विशेषविशिष्टपक्षोक्तदोष एव। न चानिर्वचनीयविशेष इति भवति। अनिर्वचनीयासिद्धेः। न हि तत्र प्रत्यक्षमस्ति। मिथ्याशब्दस्त्वभाववाच्येव। तदन्यत्र प्रमाणाभावात्। न चान्यत्प्रमाणम्। प्रतिज्ञाव्याहतेः। न हि सदन्तरासतश्चान्यत्सदसद्विलक्षणं प्रसिद्धम्। असन्न भवतीत्युक्ते द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति सदेव भवति। असदन्तरं वा विशेषविवक्षायाम्। किञ्चैतद्वैलक्षण्यम् भेदोऽभेदो भेदाभेदो वा। न तावद्भेदः अनङ्गीकारात्। व्यावहारिकभेदश्चानिर्वाच्यसिद्धौ वक्तव्यः। न चाव्यावहारिकं किञ्चित्। न चाशेषव्यवहारनिवृत्तौ किञ्चिन्मानम्। न च मिथ्यातथ्ययोः सामान्यं व्यावहारिकत्वं धूमबाष्पयोर्धूमत्ववत्। न चाभेदोऽनङ्गीकारादेव। तथैवोभयम्। अभेदे चानिर्वाच्यब्रह्मणोस्तच्छब्दयोः पर्यायत्वम्। न च व्यावर्त्यविशेषेणापर्यायत्वं क्वचित्। व्यावर्त्यविशेषस्तद्व्यावृत्ते ब्रह्मणि विशेषमापादयति चेद्विशिष्टवाक्यार्थता। न चेन्न ब्रह्मज्ञानार्थिने पदान्तरं वाच्यम्। असङ्गतत्वात्। मिथ्याविशेषस्य चासिद्धिरुक्ता। अतोऽन्योऽन्याश्रयताऽनवस्थितिश्चक्रकं वा।

SGDF
Sri Gangeshwari Digital Foundation

भेदाभेदविलक्षणमप्युक्तरीत्यैवापाकृतम् । किञ्चासद्विलक्षणमित्यत्रा-भावान्यविरोधानां मध्ये नञः कोऽर्थः ? । यद्यभावो न । असद्विलक्षणत्वं भावत्वमेव जगतः स्यात् । न च सतोऽन्यस्मादसतो विलक्षणं जगत् । असतोऽन्यत्वादिधर्मानङ्गीकाराद्ब्रह्मणश्च । असतोऽनिर्वचनीयत्वाङ्गीकाराच्च न वैलक्षण्यं ततोऽनिर्वाच्यस्य । तथापि चेद्वैलक्षण्यं नानिर्वचनीय(वाच्य)त्वं जगतः । न च विरोधः । विरोधिनोरन्यतर-निषेधेऽन्यतरव्याप्तत्वानुभवात् । अविद्यमानं न भवतीत्युक्ते विद्यमान-मित्येव हि सर्वलोकानुभवः । अतोऽनन्तगुणो भगवान्नारायण इति सिद्धम् ॥

न च सिद्धेऽर्थे वाक्यस्य प्रामाण्याभावादीश्वराद्यसिद्धिः । सिद्धातिरिक्तकार्याभावात् । लिङाद्यर्थस्त्विष्टसाधनत्वमेव । न हि कर्तव्यत्वं नामेष्टसाधनत्वादन्यत्किञ्चित् । तन्मानाभावात् । शब्दस्तु न तद्वक्तीत्युक्तम् । लिङादेरिष्टसाधनार्थत्वेनैव कृतार्थत्वे तदन्यकार्य-कल्पने कल्पनागौरवम् । न च तत्कल्पकं किञ्चित् । विप्रतिपत्तौ चान्यन्मानं वक्तव्यं तद्भावे । न चानुमा । अप्रसिद्धविशेषणत्वात् । न चार्थापत्तिः । अनुपपत्त्यभावात् । कार्याभावादेव कार्यान्वयिनि-[कार्यान्वयान्वयिनि वा]व्युत्पत्तिरित्यादि दूरतो निरस्तम्। कार्यान्विते व्युत्पत्तिरिति वदतोऽकार्यान्विते व्युत्पत्तिरित्युक्ते किमुत्तरम् । अध्या-हारइत्युक्ते लोप इत्युत्तरम् । अशेषसिद्धपदानामर्थलोपाल्लिङाद्यर्थ-मात्रलोप एव गरीयान् । हससि हसामीत्यादि सिद्धार्थ एव बालानां व्युत्पत्तेः । प्रथमप्राप्तत्वान्न तत्त्यागे कारणम् । तथैव व्युत्पत्ति-दर्शनाच्च । अतः सिद्धार्थे प्रामाण्यसिद्धेश्च सिद्धं महागुणवत्त्वं विष्णोः ॥

SGDF
Sri Gargeshwari Digital Foundation

ताश्च विदा मघवन्नित्याद्याः । हे मघवन् यशस्विन् मखपत इति वा। 'तं वा एतं मघ(ख)वन्तं सन्तं मघवानित्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः' । 'तेभिरिन्द्रं चोदय दातवे मघम्' । 'तन्न आयातु मघाय' । 'यशो वाव मघम्' । 'मघमनु प्रापत्सि । आ मामेतु मघम्' । 'मघमनु प्रापत्सि । धनं वाव मघमि'त्यादिश्रुतिभ्यः ॥ गातुं त्वां स्तोतुम् । विद वेदयेति सामान्यतोऽपेक्षिताशेषवेदनमुक्त्वा तात्कालिकापेक्षितं प्रार्थयति । गातुं विदेति । त्वमेवानुशंसिषो दिशः मार्गान् । आत्मनः स्तुतिप्रकारांस्त्वमेवोपदिशेत्यर्थः । पूर्वीणां भगवत्सम्प्रदायागतानां परमविद्यानामर्थे शिक्ष । शचीनां विद्यानां पते, वाचां पत इति वा । पुरूवसो बहुवित्त बहुज्ञानेति वा । बहुषु वसति बहूनामास इति वा ॥ १ ॥ आभिः अभिष्टिभिः एवंभूतैस्त्वत्पर्येषणैस्त्वत्प्रार्थनैः कश्चिन्मदादिकं प्रचेतय प्रबोधय । प्रकृष्टचेतन सर्वज्ञ परमात्मन् । द्युम्नाय ज्ञानाय । वित्ताय यशसे वा । इषे अन्नाय च नः प्रबोधय । एतादृशो हि शक्रः । शक्र एवेति वा । शक्तिरतिरूपत्वाच्छक्रः ॥ २ ॥ राये वित्ताय । वाजाय अन्नाय । वज्रिणं इन्द्रं वर्तयतीति वज्रिवः । नियामकत्वेन गच्छतीति वा । शविष्ठ बलवत्तम सुखवत्तमेति वा । ऋञ्जसे प्रेरयसि सर्वान् । मंहिष्ठ वज्रिन्नृञ्जस इत्यभ्यासस्तात्पर्यार्थः । मत्स्व मदं कुरु ॥ ३ ॥ विद वेदय लम्भय रायः सुवीर्यं च । वाजानां प्रजानां पतिर्भुवः अभवः । 'प्रजा वै वाज'इति श्रुतेः । वशाँ अनु यथावशम् । वश इच्छायामिति धातोः । यथावशं

॥ अथैतरेयोपनिषच्चतुर्थारण्यकम् ॥

ॐ ॥ विदा मघवन्विदा गातुमनुंशंसिषो दिशः । शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥ १ ॥ आभिष्ट्वमभिष्टिभिः प्रचेतन प्रचेतय । इन्द्र द्युम्नाय न इष एवा हि शक्रः ॥ २ ॥ राये वाजाय वज्रिवः शविष्ठ वज्रिन्नृञ्जसे । मंहिष्ठ वज्रिन्नृञ्जस आयाहि पिब मत्स्व ॥ ३ ॥ विदा रायः सुवीर्यं भुवो वाजानां पतिर्वशाँ अनु । मंहिष्ठ वज्रिन्नृञ्जसे यः

SGDF
Sri Gargeshwari Digital Foundation

यथेच्छम् । शूराणां सकाशाद्बलवत्तमः ॥ ४ ॥ मघोनां यशस्विनां महत्तमः । चिकित्वः ज्ञातः कर्तरिति वा । नः अभितः सर्वतो नय । इन्द्रो विदे समस्तं व्यजानात् । तमेव स्तुषे ॥ ५ ॥ ऊतये रक्षायै अभिप्रायसिद्ध्ये वा । स नो द्विषः शत्रूनतिपारयतु पापानि तमांसि वा । क्रतुः ज्ञानरूपः । छन्दः इच्छारूपः । छन्द्यत्वा-च्छादनत्वाद्वा । ऋतं अशेषशास्त्रावगतम् ॥ ६ ॥ सातये लब्धये । स्निधः विनाशान् ॥ ७ ॥ पूर्वस्थानादेः सतस्ते सकाशात् यत्सुम्नं सुखं तस्मिन्नः आधेहि । तव पूर्तिः शस्यते ॥ ८ ॥ तन्नव्यं स्तुत्यम् । ब्रह्म तत्सम्यग्घृदि मन्यसे । जनस्योपदेशेन तत्स्वरूपेषु त्वं चाहं च संब्रवावहै । गोषु ज्ञानेषु गच्छति ज्ञानविषयो भवति । सुशेवः सुसुखः । समाधिकवर्जितोऽद्वयः ॥ ९ ॥ एवाह्येवैवाहीत्यग्न्यादि-देवतानां संवादरूपेणोक्तमर्थमतिशयेनावधारयति । अभ्यासो हि तात्पर्यार्थः । एवाहि एवमेवेत्यर्थः । 'विनिश्चिते तु संवादे विभागो रङ्ग एव चे'ति शब्दनिर्णये । अतोऽग्नाइ इत्यादि । एवमेव हि शक्रो वशाननु यथावशं स्वतन्त्रो वर्तत इत्यर्थः । अय पय गताविति धातोः आयो इत्यायतिः । उपो इतिवदतिशयार्थ ओकारः । 'ओ अतिशय'इति च सूत्रम् । आयो जानातीत्यायोमन्यः । समीपस्थ-

---

शविंष्ठ : शूराणां ॥ ४ ॥ यो मंहिंष्ठो मघोनां चिकित्वो अभि नों नय । इन्द्रों विदे तमु स्तुषे वशी हि शक्रः ॥ ५ ॥ तमूतयें हवामहे जेतांरम पराजितम् । स नंः पर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ॥ ६ ॥ इन्द्र धनंस्य सातयें हवामहे जेतांरमपंराजितम् । स नंः पर्षदति द्विषः स नंः पर्षदति स्निधंः ॥ ७ ॥ पूर्वस्य यत्तें अद्रिवः सुम्न आधेहि नो वसो । पूर्तिः शंविष्ठ शस्यत ईशे हि शक्रः ॥ ८ ॥ नूनं तं नव्यं सन्यसे प्रभो जनंस्य वृत्रहन् । समन्येषु ब्रवावहै शूरो यो गोषु गच्छति सखा सुशेवो अद्वयाः ॥ ९ ॥ एवा ह्येवैवाह्यग्नाँ ३इ ॥ एवाह्येवैवाविंद्रँ ॥ एवा

SGDF
Sri Gargeshwari Digital Foundation

मपि जानातीत्युपोमन्यः । अन्येषामिन्द्रियाणां पराङ्मुखत्वान्न ह्यान्तरं जानन्ति । अयं त्वान्तरमप्यापरोक्ष्येण पश्यति । अयनेन प्राप्यं दूरस्थमायो इति वा । मनु अवबोधन इति धातोर्मन्युरिति ज्ञानी । बाह्यज्ञाय ज्ञानिने आन्तरज्ञाय ज्ञानिन इत्यभ्यासो हि तात्पर्यार्थः । एवं विधं मद्व्रतं त्वामुद्दिश्यैवोपेहि । विश्वध विश्वधारक । समीपतो दूरतश्च त्वां मन्यमानाय मह्यं मन्यवे ज्ञानाय मामुपेहीति वा । समीपे दूरतोऽभिज्ञं त्वामुद्दिश्यैव मद्व्रतं । एहि विष्णो न मे शक्तिस्त्वदाह्वानेहि मामुप । इति ब्रह्माऽस्तुवद्विष्णुं तन्नाभ्युत्थितपद्मग' इति पाद्मे । 'समीपे दूरतश्चैव ध्यायन्तं त्वां सदा विभो । मामेहि ज्ञानदानायेत्याह गाधिसुतो हरिमि'ति स्कान्दे । 'ओतमस्मिञ्जगद्यस्मादोमित्युक्तो हरिः सदा । तमेव जगदाधारं यतयः पर्युपासत' इति मान्यसंहितायाम् । इन्द्रो वा एताभिर्महानात्मानं निरमिमीतेत्यस्याप्युक्तो एवार्थः । निर्माणं नामात्मनस्तद्व्याख्यानेन ख्या(स्था)पनम् । न ह्यन्यथा तासां करणत्वं भवति । 'यस्तद्वेद स पितुष्पितासदि'ति (च) श्रुतिः । 'त्रीणि पदा निहिता गुहासु यस्तद्वेद स पितुष्पिता सत्' । 'स्त्रियः सतीस्ताँ उमे पुंस आहुः पश्यं दक्षण्वान्न विचेतदन्धः । कविर्यः पुत्रः स इमा चिकेत यस्ता विजानात्स पितुष्पिताऽसत्' । इत्यादि श्रुतिभ्यो विज्ञानमेव तन्निर्माणम् । 'इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुरि'त्यादेर्विज्ञापनं वा । प्रचेतन प्रचेतय । आयाहि पिब मत्स्व क्रतुश्छन्दक्रतं

ह्येवैवाहि विष्णाँ ३ उ ॥ एवा ह्येवैवाहि पूषन् ॥ एवा ह्येवैवाहि देवाः ॥ एवा हि शक्रो वशी हि शक्रो वशाँ अनु ॥ आयो मन्याय मन्यव उपोमन्याय मन्यवे ॥ उपेहिं विश्वधा ॥ विदा मघवन्विदो ३म् ॥ १० ॥ इति चतुर्थारण्यके प्रथमोऽध्यायः ॥

SGDF
Sri Gargeshwari Digital Foundation

बृहत् । सुम्न आधेहि नो वसो इत्युपसर्गाः । अंशा अप्यंश्यपेक्षयोपसर्गा भवन्ति । उपसृष्टत्वादुपसर्गाः । 'अन्तर्गतं बहिर्गतं च द्विधा स्यादुपसर्जनम् । हस्तबद्धेतिवच्चैव पदानां चोपसर्गवदि'ति शब्दनिर्णये । 'अधत्तान्यं जठरे प्रेमरिच्यत प्रचेतन ॥ दाता राधः स्तुवते काम्यं वसु प्रचेतय ॥ अस्माकं बोधि चोदिताऽऽयाहि पिब मत्स्व ॥ तं त्वा परिष्वजामहे ऋतुश्छन्दऋतंबृहत् ॥ या ते रातिर्ददिर्वसुः सुम्न आधेहि नो वसो' इत्युपसृजति । अशेषमहानाम्न्यर्थसंस्मरणपरिज्ञानपूर्वकमुपसर्गसंयोजनं कर्तव्यमित्येतदर्थत्वेन महानाम्नी प्रशंसा क्रियते । अन्यथा तावन्मात्रप्रशंसामृते अशेषमहानाम्नीप्रशंसाया व्यर्थत्वात् । तृच विभागेन विदा मघवन्, तमूतये, नूनमिति वा तिस्रो महानाम्न्यः । 'प्रथमा या महानाम्नी तद्वाच्यः पार्थिवो हरिः। द्वितीयाया आन्तरिक्ष्यस्तृतीयाया द्युगः प्रभुरि'त्यृक्संहितायाम्। 'तृचास्तिस्रो महानाम्न्यः पञ्चर्चा प्रथमापरा । तृचा द्व्यचा च निगदैस्तार्तीया सप्तभिर्युता । इति त्रेधा विभागः स्याज्जपध्यानादि कर्मस्वि'ति च । 'त्रिलोकगेन हरिणा निर्मितः षोळशीक्रतुः । एवं ज्ञात्वा हरिं तं च कर्म कुर्वन्न जायत' इति प्रवृत्ते । एवाह्येवैवाहीत्य-(त्युपसर्ग)स्यार्थोऽप्युक्तावधारणरूपत्वात्पूर्वोक्तार्थपरिज्ञानं विना न स्मर्तुं शक्यते । एवं निर्मितेन षोळशिना ऋद्धो (राध्नो) भवत्येवंवित् ।

ॐ ॥ गायत्रीछन्दः ॥ १ ॥ १ ॥ २९ ॥ आ त्वा वहन्तु हरयो वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः ॥ १ ॥ इमा धाना घृतस्नुवो हरी इहोप वक्षतः । इन्द्रं सुखतमे रथे ॥ २ ॥ इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे । इन्द्रं सोमस्य पीतये ॥ ३ ॥ (मं-१, सू-१६)

SGDF
Sri Gangeshwari Digital Foundation

पङ्क्तिछन्दः ॥ १ ॥ ६ ॥ ३ ॥ उपो षु शृणुही गिरो मघवन्मातथा इव। यदा नः सूनृतावतः कर आदर्थयास इद्योजा न्विंद्र ते हरी ॥ १ ॥ सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि। प्र नूनं पूर्णबंधुरः स्तुतो याहि वशाँ अनु योजान्विन्द्र ते हरी ॥ ३ ॥ स घातं वृषणं रथमधि तिष्ठाति गोविदम्। यः पात्रं हारियोजनं पूर्णमिंद्र चिकेतति योजान्विन्द्र ते हरी ॥ ४ ॥ (मं-१, सू-८२)

उष्णिक्छन्दः ॥ ६ ॥ १ ॥ ५ ॥ यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः। आदित्ते हर्यता हरी ववक्षतुः ॥ २५ ॥ ६ ॥ १ ॥ ६ ॥ यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः। आदित्ते हर्यता हरी ववक्षतुः ॥ २६ ॥ यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे। आदित्ते हर्यता हरी ववक्षतुः ॥ २७ ॥ (मं-८, सू-१२)

बृहतीछन्दः ॥ ३ ॥ ३ ॥ ८ ॥ अयं ते अस्तु हर्यतः सोम आ हरिभिस्सुतः। जुषाण इंद्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥ १ ॥ हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः। विद्वांश्चिकित्वान्हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥ २ ॥ द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम्। अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥ ३ ॥ (मं-३. सू-४४.)

द्विपदाऋक् ॥ ५ ॥ ३ ॥ २५ ॥ आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥ ४ ॥ (मं-७. सू-३४.) ॥ एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ विश्रुतयो यथा पथो इन्द्र त्वद्येति रातयः ॥ त्वामिच्छव सस्पते यन्ति गिरो न संयतः ॥

त्रिष्टुप्छन्दः ॥ ५ ॥ ३ ॥ १३ ॥ ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम् ॥ अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥ २ ॥ (मं-७. सू-२९.)

जगतीछन्दः ॥ ८ ॥ ५ ॥ ५ ॥ प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम्। घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥ १ ॥ हरिं हि योनिमभि ये समस्वरन्हिन्वन्तो हरी दिव्यं यथा सदः। आ यं पृणन्ति हरिभिर्न धेनव इन्द्राय शूषं हरिवन्तमर्चत ॥ २ ॥ सो अस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ॥ द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता

SGDF
Sri Gargeshwari Digital Foundation

प्रप्र वः हे ऋत्विजः प्रजा वा वस्त्रिष्टुभमिषं त्रिष्टुभाख्यमन्न-मिन्द्रः परमेश्वरः सोमाय आविवासति। पुरंध्या धिया अशेषप्राणि-देहाश्रयया स्वबुद्ध्या प्रप्र प्रकर्षेणातितरां शंसमाना त्रिष्टुप् प्रीतिं करोति। सोमपानार्थमित्यर्थः। मन्दद्वीराय तस्य वीरस्य परमेश्वरस्य मन्दं प्रीतिं करोतीतिमन्दद्वीरः सोमः। न त्वात्मप्रयोजनाय प्रीतिं करोति किंतर्हि वो मेधसातये यज्ञसिद्ध्यर्थम्। व इति गुरुत्वादीश्वरं प्रत्येव वा बहुवचनम्। तदा वोऽन्नं त्रिष्टुभं वो मेधसातये भवद्दैवत्य-

---

मिमिक्षिरे ॥३॥ (मं-१०. सू-१६.) अतिछन्दः ॥ २ ॥ ६ ॥ २८ ॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत्। स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ १ ॥ अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे। अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ २ ॥ साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैस्सासहिर्मृधो विचर्षणिः। दाता राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥३॥ (मं-२. सू-२२)

वेपशाकर्यः ॥ ८ ॥ ७ ॥ २१ ॥ प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत। अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्ता-मन्यकेषां ज्याका अधि धन्वसु ॥ १ ॥ त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम्। अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ २ ॥ वि षु विश्वा अरातयोऽर्यो नशंत नो धियः। अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ ३ ॥ (मं-१०. सू-१३३.)

॥ ६ ॥ ५ ॥ ५ ॥ प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे। धिया वो मेधसातये पुरन्ध्या विवासति ॥१॥ नदं व ओदतीनां नदं योयुवतीनां। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ २ ॥ ता अस्य सूददोहसः सोमं

SGDF
Sri Gargeshwari Digital Foundation

यज्ञसिद्ध्यर्थं भवान् प्रप्राविवासतीत्यर्थः ॥ १ ॥ ओदतीनां उन्दनकर्त्रीणां वः अपां भवदीयानां पतिं वः पुरुषं प्राणं नदनकर्तारं प्रति इषुध्यसि पतिर्भवसि । सृष्टौ सृष्टौ यो यः प्राणस्तं तं प्रति पतिर्भवसीति नदमिति पुनर्वचनम् । योयुवतीनां गमनशीलानामाकाशे पोप्लूयमानानामघ्न्यानां धूमरूपेणादाह्यानां रेतोरूपेणाजराणां वा धेनूनां जगत्पोषकाणाम् । धिनु पुष्टाविति धातोः । 'ता नदेन विहरती'त्यादिश्रुतेः । पयसा सेचकानां देशाद्देशान्तरगमनशीलानामघ्न्यानां हन्तुमयोग्यानां धेनूनां गवां पतिं वायुं प्रति इषुध्यसीति वा । 'वायुर्वाव गवां पतिरि'ति श्रुतेः । धेनुशब्दाच्च । ओदतीनां भक्त्या सेचकानाम् । योयुवतीनामतिशयेनात्मतत्त्वावगमकानामघ्न्यानां नित्यानां धेनूनां धर्मार्थकाममोक्षपोषकाणां वाचां पतिं वायुं प्रति पतिर्भवसीति वा । 'वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकार इति । तस्या द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्स'इत्यादिश्रुतिभ्यः ॥२॥ ताः पृश्नयः आपो गावो वाचो वा । अस्य सूददोहसः प्राणस्य वायुस्थस्य परमेश्वरस्य सोमं श्रीणन्ति । अद्भिर्हि संसृष्टो भवति । सोमः पय आदिना वा श्रृतो भवति । मन्त्रैर्वा गृह्यते । 'अथ सूददोहाः प्राणो वै सूददोहा'इति श्रुतिश्च । शोभनमुदं कर्मज्ञानं वा दोग्धीति सूददोहाः । उदेत्युच्चो भवत्यनेन पुरुष इत्युदं ज्ञानादि मनो वाव सोमः तद्वाचः श्रीणन्ति स्वार्थैः प्रश्नयोग्यत्वात्पृश्नयो वाचः । प्रशंसनरूपत्वात्प्रशंसनीयत्वाद्वा । प्रशंसनीयत्वमेव अपां गवां च । देवानां जन्मनि यज्ञे । तत्र हि तेषामभिव्यक्तिः पूर्वं ज्ञाने वा । विशः प्रजाश्च श्रीणन्ति । मुख्यतः ता एव श्रीणन्तीति च शब्द-

---

श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥ ३ ॥
(मं-८. सू-६९.)

SGDF
Sri Gangeshwari Digital Foundation

वर्जनम् । दिवस्त्रिष्वारोचनेषु । आदित्यचन्द्रविद्युत्पर्यन्तं स्थितानां देवानां जन्मनि यज्ञे । यज्ञो वै देवजन्म । तत्र हि देवाः प्रादुर्भवन्ति । 'आसूर्याचन्द्रमसावाविद्युतं ते वै लोकानधिश्रिता' इत्यादिश्रुतेः । 'द्यौर्वाव विद्युत्तत्पतिं वायुमुपगम्य तेनैव परमुपगच्छति । सैषा ब्रह्मलोके विराजते' इत्यादिश्रुतेर्द्यौरेव विद्युत् ॥ ३ ॥

अर्चत । अर्चनं यज्ञादि । प्रार्चनं ज्ञानध्यानादि । 'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतपे'ति भगवद्वचनात् । प्रिययज्ञा अर्चत । प्रियज्ञानाः प्रार्चत । पुत्रकाः अल्पज्ञाना अप्यर्चत । 'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्नि'ति च । उतशब्दाज्ज्ञानिनामप्यर्चनं युक्तं स्वाश्रमानुसारेणेति । 'अधा ते विष्णो विदुषा चिदर्ध्यस्स्तोमो यज्ञश्च राध्यो हविष्मते'ति श्रुतेः । किं तदर्चनीयं धृष्णु धृष्टं परंब्रह्म वासुदेवाख्यम् । पुरं देहं नार्चत । 'प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे । प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिन' इति भागवते । 'स्वदेहमानिहरये प्रणमेत्केवलाय वा । न देहाय न तन्मानपराय च कथञ्चने'ति व्यासस्मृतौ । पुनरर्चतेति तात्पर्यार्थे ॥ १ ॥ गर्गरगोधापिङ्गादीनां घोषा अपि नादमात्रव्यञ्जकत्वेन भगवद्वाचका एवेत्याह । अवस्वरातिगर्गर इत्यादिना । एतत्समस्तमिन्द्रायैवेत्यर्थः । ब्रह्म वेदो विशेषत इन्द्रायैवोद्यतः । गर्गर इति पादभूषणमहामत्रकदधिपात्रहस्तिहस्तानां नाम । पिङ्गा चकोरी । अवपरीत्यल्पाधिक्यादिविशेषोऽपि तद्वाचक एवेति ज्ञापनाय । चनिष्कददित्यनुकरणशब्दः । सनिष्वणदित्यतिशयार्थे । 'ता वा एताः सर्वा ऋचः सर्वे

॥ ६ ॥ ५ ॥ ६ ॥ अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥ १ ॥ ८ ॥ अव स्वराति गर्गरो गोधा परि सनिष्वणत् । पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम् ॥ २ ॥ ९ ॥ आ

SGDF
Sri Gargeshwari Digital Foundation

वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्या-दि'ति श्रुतिः । 'दध्नो मथनशब्दश्चाप्यन्तर्नादस्वरूपतः । भीषकत्वं हरेर्ब्रूयादन्तर्नादो हि भीषणे । गजबृंहितमप्येवं धिकारसहितं वदेत् । स्वरितेन समायोगाद्धिकृतौ स्वरितो यतः । महामन्त्रं जलाद्यैश्च युक्तमेतादृशं वदेत् । पादभूषा च धिकारं तत्कृतं स्वरितं वदेत् । अद्भुतत्वं हरेर्वक्ति पिङ्गाकण्ठगशब्दवत् । तामेवाद्भुततां वक्ति गृह-गोधाऽपरापि चे'ति शब्दतत्त्वे ॥ २ ॥ यच्चैन्यो नद्य आपतन्ति तद्घोषश्चेन्द्रवाचकः । 'नदीसमुद्रघोषाश्च नादत्वाच्छ्रैष्ठ्यवाचकाः । नादो हि श्रैष्ठ्यवाची स्यादेवं घोषाः परेऽपि चे'ति । तदर्थं च नद्य आपतन्ति । 'भूताधिभूतोऽम्बुनिधानमध्ये भूत्वा हरिः सर्वहरोऽति-धाम्ना । अगाधमम्भो विदधाति भस्म यो बाडवाग्निर्नृहरिर्विचिन्त्य' इति वैहायससंहितायाम् । सुदुघाः सुष्ठु अपां दोहनकर्त्र्यः । स्फुर-णापगमनमासां नास्तीत्यनपस्फुरः । नित्यचलनस्वभावाः । अपगत-स्फुरणत्वेन सोमं गृभायत । अचलत्वेन मनो वा ॥ ३ ॥

व्यतीन् विशेषेणाधिकान् देवान् । अफाणयद्विस्तारयामास । दाशुषे यजमानाय । तत्समीपे । फण विस्तार इति धातोः । सुयुक्तान्सुयोगरतान् । 'विशेषेणाधिकत्वेन व्यतयो देवताः स्मृताः । नित्ययोगरताश्चैव नारायणपरायणाः । त एव चेन्द्रियात्मानस्ता-न्विस्तारयतीश्वरः । मन आदीन्द्रियाणां तु शक्तिविस्तार एव तु । विस्तारो देवतानां स्याद्भक्तेषु हरिणा कृत'इति प्रकाशसंहितायाम् । 'चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतींरवीविपदि'ति

यत्पतंन्त्येन्यंस्सुदुघा अनंपस्फुरः । अपस्फुरं गृभायत सोममिन्द्राय पातंवे ॥ ३ ॥ १० ॥ (मं-८. सू-६१.)

॥ ६ ॥ ५ ॥ ७ ॥ यो व्यतीँरफांणयत्सुयुंक्ताँ उपं दाशुषें । तक्वो नेता तदिद्वपुंरुपमा यो अमुंच्यत ॥ १ ॥ १३ ॥ अतीदु शक्र ओंहत इन्द्रो

च श्रुतिः। 'स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवमि'ति च। 'न देवा यष्टिमादाय रक्षन्ति पशुपालवत्। यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तमि'ति भारते। तक्को जगत्कर्ता। तक निर्माण इतिधातोः। नवर्तवे प्रसवः सर्गतक्क इत्यादिप्रयोगाच्च। नेता च सर्वस्य। तदेव वपुः सः। यत्तज्जगत्कर्तृनेतृरूपम्। 'देहदेहिविभागश्च न क्वचित्परमेश्वरे। गुणतद्वद्विभागो वा नेह नानेति च श्रुतेरि'ति पाद्मे। 'तद्विज्ञानेन परिपश्यन्ति धीराः। आनन्दरूपममृतं यद्विभाति'। 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः। ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षर' इति श्रुतेश्च। 'विशुद्धविज्ञानमरीचिमालया सचित्ररत्नप्रकरप्रकाशया। प्रकाशिताशेषजगत्स्वरूपया प्रभुः सहाह्लादतनुर्विभूषित इति पुरुषोत्तमसंहितायाम्। उपमा उपमायाम्। उपमाविषये अमुच्यत त्यक्तोऽभवत्। निरुपम इत्यर्थः। 'अल्पाक्षरेण शक्येऽपि वक्तुं बह्वक्षरं यदि। उक्तस्याधिक्यमेवात्र निषेधेऽशेषतो भवेदि'ति शब्दनिर्णये ॥१॥ विश्वा विश्वान् द्विषोऽज्ञानपापादीनतीत्य शक्तो विष्णुः स्वभक्तानतिवहत्येव हि। 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्'। 'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसामि'त्यादिप्रसिद्धिं उशब्देनाह। द्विषोतीत्यातिशयेनात्मानं प्रत्योहत इत्यतिशब्दद्वयार्थः। ओदनं उन्दतेः कर्म बन्धनमभिनद्भगवान्। कानीनो बादरायणः। परः परमात्मा। गिरैव पच्यमानं परिपाककाले। 'संश्लेषादोदनं कर्म पच्यमानं गिरैव

विश्वा अति द्विषः। भिनत्कनीनं ओदनं पच्यमानं परो गिरा ॥२॥१४॥
अर्भको न कुमारकोऽधितिष्ठन्नवं रथम्। स पक्षन्महिषं मृगं पित्रे मात्रे

SGDF
Sri Gargeshwari Digital Foundation

हि। अभिनद्भगवान्व्यासः स्वभक्तानामशेषत' इति व्याससंहितायाम् ॥ ॥ २ ॥ अर्भक इव स्थितो नवं रथमध्यतिष्ठत् । कुमारः कुत्सितमारकः । अर्भक इव सूक्ष्मदेहः । पूर्वं पूर्वं देहं परित्यज्य नवं नवं देहमध्यतिष्ठज्जीवमादाय । 'जीवदेहं परित्यज्य सह जीवेन चेश्वरः । जीवस्यान्यशरीरं च समुत्पाद्य विशत्यज'इति मान्यसंहितायाम् । कुमारक इवार्भकः सूक्ष्मदेह इति वा । अर्भकः सूक्ष्मदेहोऽपि न कुमार इति वा । सपक्षत्परिपक्वज्ञानादिगुणमकरोत् । महिषं महान्तं ब्रह्माणं मृगं मृगयन्तं स्वात्मानं पित्रे स्वस्मै मात्रे लक्ष्म्यै विमुक्रतुं पितृमातृविषये पूर्णज्ञानं पुनः पूरयामासेत्यर्थः । 'ज्ञानपूर्णं विधातारं मोक्षदानेन केशवः । स्वपुत्रं पूरयामास महिषं महतां महानि'ति प्रवृत्ते ॥ ३ ॥

यथास्थिताः प्रज्ञाताः । इतस्ततः संयोजनं विना यथास्थितशंसनं पथि(थः) प्राप्तिः । व्याप्तो विशेषेणापन्नः । अविहृतमसंसृष्टम् । कृच्छ्रादयथास्थितशंसननिमित्ताद्दुःखादवाग्गतिं गतश्रीकतामेव प्राप्नुयाम् । 'विलोमः शत्रुज(क्ष)यकृत्संसर्गः पापनाशनः । यथास्थितः श्रीकरःस्यात्स्वाध्यायः शंसनेऽपि चे'ति प्रवृत्ते । 'गतश्रियः श्रियो हानिं पापहानिं परस्य च । संसर्गश्छन्दसां कुर्याच्छ्रियो वृद्धिं यथास्थित' इति स्वाध्यायतत्त्वे । 'किञ्चित्त्वे चोभयत्वे च संशये सदृशे तथा । इवशब्दः प्रयुज्येत न्यक्कारेऽपि च पण्डितैरि'ति शब्दनिर्णये । अतो गतश्रीत्वसंशयेऽपीत्यर्थः। इतस्ततो विशेषेण(सं)हृतं(संयोजितं) विहृतम्। 'पापानां व्यतिषिक्तत्वाद्व्यतिषक्तं विनाशकम् । धनस्याव्यतिषङ्गेण व्यतिषङ्गोऽविनाशकः । सदृशं सदृशस्यैव यतः स्यात्प्रविनाशकम् ।

विमुक्रतुम् ॥ ३ ॥ १५ ॥ एतास्सर्वाः प्रज्ञातानुष्टुभः ॥ ६ ॥ ५ ॥ ६ ॥ उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि ॥ मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥ ७ ॥ इति त्रिः परिदध्यात् ॥ (मं-८. सू-६९.)

SGDF
Sri Gargeshwari Digital Foundation

तथाप्यप्राप्तनाशस्य धनस्य बलवत्त्वतः । शक्नुयान्न विनाशाय पापस्ये-च्छासमेधितम् । संसृष्टं स्याद्विनाशाय न हीच्छा धनसंक्षय' इति स्वाध्यायतत्त्वे । अव्यतिक्तत्वं च मोक्षे वर्तत इत्यत्रोभयार्थ इव-शब्दः । एवंभूतेन शंसनेन पाप्मानमपहन्ति । शमलं रागादिकं च । पापस्य पृथगुक्तेः । 'शमलं पापमुद्दिष्टं रागद्वेषादिकं तथा । अपराधश्च शमलं मलं च शमलं विदुरि'ति शब्दनिर्णये । य एवमुपास्ते सोऽपि पाप्मानमपहन्ति । 'ऋक्षु संसृज्यमानासु प्रोच्यमानं जनार्दनम् । पुंसंसृष्टस्य पापस्य निहन्तारं विशेषतः । तत्प्रसादेन मुक्तस्य पापा-संसृष्टतामपि । ध्यायन्कर्माण्यकृत्वाऽपि मुच्यते सर्वपातकैरि'ति प्रवृत्ते ॥ छ ॥

न चैवमादिवाक्यानां स्वार्थे प्रामाण्याभावः । सिद्धार्थे प्रामा-ण्यस्य साधितत्वात् । अविरोधाच्च । न च बह्वर्थेषु तात्पर्यकल्पने कल्पनागौरवम् । वचनेनैव प्रतीयमानत्वादर्थस्य कल्पनाऽभावात् । न च वाचनिकार्थस्तात्पर्यार्थ इति विशेषः । तन्मानाभावात् । यत्र वाचनिकार्थादन्यस्तात्पर्यार्थः प्रतीयते लौकिकवाक्येषु न तत्र साक्षा-द्वचनं प्रबोधकम् । वचनलिङ्गकानुमा हि सा । विरोधादमुख्य-वृत्तिर्वा आप्तत्वनिश्चये । आप्तत्वानिश्चये प्रामाण्यमेव न भवति । वेदवाक्यस्य तु वाचनिकार्थं विना नैवान्यो युज्यते । वाचनिकानां तु बहूनामप्यविरोधे स्वीकार्यता ॥ 'ॐ स्वाप्ययसम्पत्त्योरन्यतरापेक्ष-माविष्कृतं ही'ति सूत्रम् । 'वानात्स्मृतेर्देवनाद्वासुदेवो वासाद्द्युते-श्छादनात्क्रीडया च । बलादसुत्वाद्दातृतो वर्तनाच्च तं वासुदेवं प्रवदन्ति वेदा' इत्यादि सौकरायणश्रुतिः । मोक्षेऽपि सुप्तिरस्तीत्या-शङ्कानिवृत्त्यर्थमेवान्यतरपदम् । 'रूढियोगौ विना कश्चिन्नैवार्थो वेदगो भवेत् । तत्रापि यौगिको मुख्यः सर्वत्रास्ति स वैदिके । अनवस्था-निवृत्त्यर्थं यौगिके रूढकल्पना । ज्ञाते विशेषविज्ञानं व्यवहारोऽपि

SGDF
Sri Gargeshwari Digital Foundation

रूढित'इति ब्रह्मतर्के ॥ वाचनिकमर्थं परित्यज्य नियोगार्थकल्पने श्रुतहानिरश्रुतकल्पनेति सर्वदोषाधिकौ तस्य व्यर्थमापद्येते। एवं च वदतो विधिशब्दा निरर्थकाः सिद्धार्था वा सिद्धशब्दा वा स्वार्थे प्रमाणभूता इत्युक्ते किमुत्तरम्। न च कारणं किञ्चिद्वाचनिकानां बहूनामप्यर्थानां त्यागे। प्रतीयमाने तु विरोधे तदन्योऽर्थः स्वीकार्यो वाचनिक एव। सोऽपि वाचनिक एवेत्यपि तत एव सिद्ध्यति। 'मुख्यार्थानां च सर्वेषां तारतम्यं च विद्यते। तत्रापि परमो मुख्यो वाच्योऽशेषरवैर्हरिः। तत्तन्मुख्याविरोधेन तदन्यार्थस्य सङ्ग्रहः। स्वतो मुख्यविरोधे तु त्याज्योऽन्योऽर्थोऽखिलेष्वपि। इति सर्वत्र नियमः शब्दार्थज्ञानभूमिष्वि'ति च। न च क्रियायामेव प्रयोजनं न सिद्ध इति युक्तम्। ज्ञानमात्रेऽपि महाप्रयोजनदर्शनात्पितृजीवनादिवाक्ये। आह च स्वयं भगवान्। 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः। यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत। इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारते'ति। 'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतपे'ति च॥ 'ध्यानं त्वखिलकर्मभ्यो ध्यानाच्च ज्ञानमुत्तमम्। न ज्ञानसदृशं किञ्चित्पुरुषार्थप्रसिद्धय' इति प्रवृत्ते। 'दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जये'ति च। 'अशेषकर्मपूगोऽपि न विष्णुध्यानलेशभाक्। तच्च ध्यानं हरेर्ज्ञानकोट्यंशाय न पूर्यत' इति कर्मविवेके। 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत' इति च श्रुतिः। न च कर्ममात्रे पर्यवसितिर्वेदस्य। सुखज्ञानस्यैव प्रयोजनत्वात्। अतः सिद्धस्यैव प्रयोजनत्वं वाच्यम् (सिद्धम्)।

SGDF
Sri Gurgeshwari Digital Foundation

प्रशंसादीनां च तात्पर्यं वाचनिकार्थात्यागेनैव कथितं स्वयं भगवता ॥ 'ॐ भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयती'ति । तस्माद्विरुद्धवत्प्रतीयमानानि प्रशंसादीनि ज्ञानसहकार्यपेक्षया योजनीयानि । पुराणादीनां तु श्रुत्यादिविरोधे गौणोऽप्यर्थो युज्यते । 'कुहकं चेन्द्रजालं च विरुद्धाचरणानि च । दर्शयित्वा जनं सर्वं मोहयाशु महेश्वरे'त्यादि वाराहे ॥ छ ॥

ब्रध्नस्य सूर्यस्य विष्टपं स्वर्गमुद्धन्वहीन्द्रोऽहं च यत्तदिन्द्रगृहं ब्रध्नं विष्टपं मध्वः पीत्वा तत्र सचेवहि सुखमनुभवाव । सख्युरिन्द्रस्य त्रिस्सप्तस्थानेषु । 'एकविंशतिदिव्यानि स्थानानि दिवि चक्रिणः । वज्रिणो वापि तद्भक्तैर्भुज्यन्ते तानि याज्ञिकैरि'ति प्रवृत्ते । पूर्वान्सुतान्प्रातःसवनगान्सोमानपाः । हरीनिन्द्रियाणि वर्तयतीति हरिवः । हरिभिर्वर्तत इति वा । इदं माध्यन्दिनं सवनं केवलं ते । अथो इत्यर्थान्तरम् । मधुमन्तं सोमं जठरे आवृषस्व आसिञ्च ममद्धि च सत्रा अस्मत्प्राणेन सह । पीतशब्दवत् । अपूर्वपानत्वात्तदेव पानं मुख्यमिति पीतशब्दः । इन्द्रस्यकेवलत्वात्केवलं माध्यन्दिनं सवनम् । ममद्धीति तृतीयसवनम् । तत्र हि मदो विशेषतो भवति पूर्तेः । इति सवनत्रयरूपता षोळशिनः । वृषण्वत् वृष्णः इन्द्रस्य विशेषतः प्रियत्वात् । एवं चतूरूपता षोळशिनः । राध्नोति ऋद्धो भवति । विहृतपक्षे तु । पादान्व्यवधायार्धर्चशः शंसेत् । पूर्वासां पूर्वाणि पदानि । गायत्र्यः पङ्क्तिभिः पङ्क्तीनां तु द्वे द्वे पदे शिष्येते ताभ्यां प्रणुयात् । उष्णिहो बृहतीभिरुष्णिहां तूत्तमान्पादान्द्वौ द्वौ कुर्यात् । चतुरक्षरमाद्यम् । द्विपदाश्चतुर्धा कृत्वा प्रथमां त्रिष्टुभोत्तरा जगतीभिः

॥ ८ ॥ ५ ॥ ७ ॥ अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ॥ ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥ १३ ॥ (मं-१०. सू-९६.) इति ऋङ्मन्त्रः सम्पूर्णः ॥

॥ इति श्रीमत्कर्मनिर्णयमूलभूतवेदभागः सम्पूर्णः ॥

SGDF
Sri Gangeshwari Digital Foundation

उत्तमायाश्चतुर्थमक्षरमन्त्यं पूर्वस्याद्यमुत्तरस्यानुष्टुभमतिछन्दस्स्वव-दध्यात् । द्वितीयतृतीययोः पादयोरवसाने उपदध्यात् । प्रचेतनेति पूर्वस्याम् । प्रचेतयेत्युत्तरस्याम् । उत्तराश्चितरान्पादान्षष्ठान्कृत्वा अनुष्टुप्कारं शंसेत् । महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येका-दशाक्षरेषु पादेषु । एवाह्येवा अपाः पूर्वेषां हरिवः सुतानां एवाहीन्द्रं अथो इदं सवनं केवलं ते । एवाहि शक्रो ममद्धि सोमं मधुमन्त-मिन्द्र वशी हि शक्रः सत्रा वृषञ्जठर आवृषस्वेति ॥

भगवद्भक्तिज्ञानवैराग्यपूर्वकं च कर्म कर्तव्यम् । 'इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे सुकृते तेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति' । 'नैष्कर्म्यमप्यच्युत-भाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् । कुतः पुनः शश्वदभद्र-मीश्वरे न चार्पितं कर्म यदप्यकारणम्' । 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' । 'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्य-मासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान्' । 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः । ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः । ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः' । 'तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः । क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमोनमः' । 'एष उ एव दाश्वान् य एवं वेद' । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' । 'परं भावमजानन्तो मम भूतमहेश्वरम् । मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः' । 'सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ।

SGDF
Sri Gargeshwari Digital Foundation

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे'। 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्। तिष्ठमानस्य तद्विद'इत्यादि श्रुतिस्मृतिभ्यः॥

नमो नारायणायाजभवशक्रोष्णरुङ्मुखैः। सदा वन्दितपादाय श्रीपाय प्रेयसेऽधिकम्॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः कर्मनिर्णयः सम्पूर्णः॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

विष्णुतत्त्वविनिर्णयः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ सदागमैकविज्ञेयं समतीतक्षराक्षरम् । नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥

विशेषणानि यानीह कथितानि सदुक्तिभिः । साधयिष्यामि तान्येव क्रमात्सज्जनसंविदे ॥ 'ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम् । मूलरामायणं चैव पुराणं चैतदात्मकम् । ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः । दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥ ज्ञेय एतैस्सदा युक्तैर्भक्तिमद्भिः सुनिष्ठितैः । न च केवलतर्केण नाक्षजेन न केनचित् । केवलागमविज्ञेयो भक्तैरेव न चान्यथे'ति ब्रह्माण्डे । 'नावेदविन्मनुतेदं बृहन्तं सर्वानुभूमात्मानꣳ साम्पराय' इति तैत्तिरीयश्रुतिः । 'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठे'ति कठश्रुतिः । नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदा इति' इति पिप्पलादश्रुतिः ।

न चैतेषां वचनानामेवाप्रामाण्यम् । अपौरुषेयत्वाद्वेदस्य । 'इतिहासपुराणः पञ्चमो वेदानां वेद' इति तद्गृहीतत्वाच्च । न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम् । तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः । यस्य तौ नाभिमतौ नासौ समयी । समयप्रयोजनाभावात् । न च तेन लोकोपकारः । धर्माद्यभावज्ञाने परस्परं हिंसादिनाऽपकारस्यैव प्राप्तेः । न चोपकारेण तस्य प्रयोजनम् । अदृष्टाभावात् । अतो धर्माद्यभावं वदता स्वसमयस्यानर्थक्यमङ्गीकृतमेवेति नासौ समयी ।

SGDF
Sri Gangeshwari Digital Foundation

न च पौरुषेयेण वाक्येन तत्सिद्धिः । अज्ञानविप्रलम्भयोः प्राप्तेः । न च तदर्थत्वेन सर्वज्ञः कल्प्येत । अन्यत्रादृष्टस्य सर्वज्ञत्वस्य कल्पनं तस्याविप्रलम्भकत्वकल्पनं तस्य तत्कृतत्वकल्पनं चेति कल्पनागौरव-प्राप्तेः । अपौरुषेयवाक्याङ्गीकारे न किञ्चित्कल्प्यम् । अपौरुषेयत्वं च स्वत एव सिद्धम् । वेदकर्तुरप्रसिद्धेः । अप्रसिद्धौ च कर्तुस्तत्कल्पने कल्पनागौरवम् । अकल्पने चाकर्तृकत्वं सिद्धमेव । न च लौकिक-वाक्यवत्सकर्तृकत्वम् । तस्याकर्तृकत्वप्रसिद्ध्यभावात् । न च केन-चित्कृत्वा वेद इत्युक्तं वेदसमम् । परम्पराऽभावात् । न च स्वयं प्रतिभातवेदैर्दृष्टमवेदवाक्यं भवति । परम्परासिद्धवेदवाक्यानुसारित्वात् । वेदद्रष्टॄणामुक्तगुणवत्त्वाच्च तेषाम् । उक्तं च ब्रह्माण्डे । 'विंशल्लक्षण-तोऽनूनस्तपस्वी बहुवेदवित् । वेद इत्येव यं पश्येत्स वेदो ज्ञानदर्शना-दि'ति ।

प्रामाण्यं च स्वत एव । अन्यथाऽनवस्थानात् । न चोक्त-युक्त्यधीनत्वं प्रामाण्यस्य । बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनाम् । अदुष्टबुद्धीनां स्वत एव सिद्धत्वाच्च प्रामाण्यस्य । न चाकाङ्क्षायामेव प्रमाणान्तरापेक्षत्वादनवस्थाभाव इति वाच्यम् । आकाङ्क्षाया एव बुद्धिदोषात्मकत्वात् । दुष्टबुद्धीनामेवाप्रामाण्यशङ्केति परतोऽप्रामाण्यम् । प्रामाण्यं च स्वत एव सिद्धम् । न चोच्चारणकाल एव वर्णानामुत्पत्तिरिति वाच्यम् । तदेवेदं वचनमिति प्रत्यभिज्ञा-विरोधात् । न च सादृश्यात्प्रत्यभिज्ञाभ्रान्तिरिति वाच्यम् । सोऽयं-देवदत्त इत्यादेरपि तथात्वप्राप्तेः । सर्वक्षणिकत्वं वदता बौद्धेन सेयं दिगित्यादिप्रत्यभिज्ञाया भ्रान्तित्वं न वाच्यम् । पञ्चस्कन्धेभ्योऽ-न्यत्वात् । न च दिश एव भ्रान्तिकल्पिताः । विज्ञानशून्ययोरपि साम्यात् । न चादित्योदयादिनैव दिक्कल्पना । अन्धकारेऽपि दिङ्मात्रप्रतीतेः । कादाचित्कभ्रान्तिरेवादित्योदयादिदर्शनान्निवार्यते ।

SGDF
Sri Gargeshwari Digital Foundation

सा च विज्ञानशून्ययोरपि भवतीति तेषां मतम् । वादिविप्रतिपत्तेः । अतो दिशः स्थिरा एवेति सिद्ध्यति शून्यवदेव । अतस्तद्भेदस्यापि स्थैर्यं सिद्धम् । तदेवेदं वाक्यमिति प्रत्यभिज्ञानात् । न चानुमानादीनामागमं विना प्रामाण्यं धर्मादिषु । तदगोचरत्वात् । अतोऽपौरुषेयवाक्येनैव धर्मादिसिद्धेः सर्ववादिनामपि तदङ्गीकार्यम् । तत्प्रामाण्यं च स्वत एव सिद्धम् । अप्रामाण्यस्य च परतस्त्वानङ्गीकारे दुष्टेन्द्रियादेरप्यप्रामाण्यहेतुत्वं न स्यात् । तदनङ्गीकारे चानुभवविरोधः । अतः प्रामाण्यं स्वतः परतोऽप्रामाण्यमिति सिद्धम् । 'वाचा विरूप नित्यया' । 'नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदमि'ति 'श्रुतिर्वाव नित्या अनित्या वाव स्मृतयो याश्चान्या वाच' इति पैङ्गीश्रुतिः । 'विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः । अनादिनित्या सा तच्च विना तां न स गम्यत'इति कात्यायनश्रुतिः । 'सहस्रधा महिमानः सहस्रं यावद्ब्रह्मविष्ठितं तावती वाक्' । 'कश्छन्दसां योगमावेद धीरः को धिष्ण्यां प्रतिवाचं पपादे'त्यादि च । 'नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः । सर्गे सर्गेऽमुनैवैत उद्गीर्यन्ते तथैव च । तत्क्रमेणैव तैर्वर्णैस्तैः स्वरैरेव नान्यथा । अतः श्रुतित्वमेतासां श्रुता एव यतोऽखिलैः । जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः । मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः । यतस्ता हरिणा दृष्टाः श्रुता एवापरैर्जनैः श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः । तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु । चेतनस्य जनिर्यद्वदुच्यते सर्वलौकिकैः । पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु । क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् । वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया । अवान्तराभिमानानां देवानां वा व्यपेक्षया । नानित्यत्वात्कुतस्तेषामनित्यत्वं स्थिरात्मनामि'ति ब्रह्माण्डे । न चानित्यत्वे श्रुतिर्वेद इत्यादि विशेषशब्द उपपद्यते । 'वेदास्ते

SGDF
Sri Gargeshwari Digital Foundation

नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः । आम्नायोऽनन्यथापाठादीशबुद्धिस्थिताः सदे'ति महावाराहे । न च नित्यत्वं विना वेदानां दर्शनव्यवहारो युज्यते । न च वर्णपदादीनामनित्यत्वं वक्तुं युक्तम् । सर्वज्ञत्वादीश्वरस्य तद्बुद्धौ सर्वदा प्रतीयमानत्वात् । न च घटादिवत्संस्कारमात्रत्वं वक्तुं युक्तम् । प्रत्यभिज्ञाविरोधस्योक्तत्वात् । पुराणानामप्यन्यथाशब्दरचनमेवानित्यत्वम् । अत आकाशगुणे शब्दे व्यज्यमाना वर्णादयस्तत्क्रमात्मको वेदश्च नित्य एवेति सिद्धम् ।

न च केवलसिद्धेऽर्थे व्युत्पत्त्यभावादप्रामाण्यम् । सिद्धान्वित एव व्युत्पत्तिगृहीतेः । इयं माताऽयं पितेत्यादावङ्गुलिप्रसारणादिपूर्वकनिर्देशेनैव हि तज्जानाति । कार्यान्वित एव व्युत्पत्तिरिति वदतः कार्यस्य कार्यान्वयाभावात्कल्पनागौरवम् । इयं माताऽयं पिता सुरूपोऽसीत्यादौ सिद्धमात्रज्ञापनेन पर्यवसितत्वाद्वाक्यस्य । तस्य तत्र प्रामाण्यानुभवाच्च । न च कुत्रचित्सिद्धज्ञापनादन्यद्वाक्यस्य प्रयोजनं दृष्टम् । ज्ञात्वैव हीष्टसाधनतां प्रवर्तते निवर्तते च विपर्ययेण । अतः सिद्ध एव सर्ववाक्यानां प्रामाण्यं सिद्धम् । प्रसिद्धं च व्याकरणनिरुक्तादीनां सिद्धमात्रे प्रामाण्यं सर्ववादिनाम् । तदनङ्गीकारे च सर्वशाब्दव्यवहारासिद्धिः । उक्तं च नारदीये । 'सर्वज्ञं सर्वकर्तारं नारायणमनामयम् । सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि । सर्वेषामपि वेदानामितिहासपुराणयोः । प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यत' इति ।

न च जीवेश्वराभेद एव तात्पर्यमागमस्य । तत्र प्रमाणाभावात् । न च जीवेश्वरभेदः सिद्ध इत्यनुवादकत्वं भेदवाक्यानाम् । आगमं विनेश्वरस्यैवासिद्धेः । न चानुमानात्तत्सिद्धिः । विपर्ययेणाप्यनुमातुं शक्यत्वात् । विमतं सकर्तृकं कार्यत्वाद्घटवदित्युक्ते विमतं विकर्तृकमस्मत्सम्मतकर्तृरहितत्वादात्मवदित्यनुमानविरोधात् । अकार्यत्व-

SGDF
Sri Gangeshwari Digital Foundation

मुपाधिरित्युक्ते शरीरिजन्यत्वमितरत्राप्युपाधिरित्युत्तरम्। प्रत्यक्षानुमानसिद्धत्वे च भेदस्य तद्विरोधादेवाप्रामाण्यमभेदागमस्य। तेनाभेदागमस्य प्रामाण्याभावे नानुवादकत्वं भेदवाक्यानाम्। न हि बलवतोऽनुवादकत्वम्। दार्ढ्यहेतुत्वात्। प्रत्यक्षादेरागमस्य प्राबल्येऽपि नोपजीव्यप्रमाणविरोधे प्रामाण्यम्। विषयाभावे स्वस्यैवाप्रामाण्यप्राप्तेः। तेनैव ह्यनुमानादिनागमस्य विषयः सिध्यति तत्पक्षेऽपि। अनुमानेन ह्यनुवादित्वपक्ष ईश्वरो बोद्धव्यः प्रत्यक्षेण चागमः। अतस्तयोर्विरोधे प्रामाण्यं न स्यात्। अनुमानसिद्धेश्वराच्च भेदोऽनुभवत एव सिद्धो जीवस्य। असर्वकर्तृत्वेनानुभवात्। न चानुभवविरोधे आगमस्य प्रामाण्यम्। आगमप्रामण्यानुभवस्याप्यप्रामाण्यप्राप्तेः। बहुप्रमाणसंवादश्च दार्ढ्यहेतुरेव। बहूनां वचने तस्यैव दर्शने दार्ढ्यस्यैव दृष्टेः। सर्वाविवादस्थल एव कथञ्चिदनुवादकत्वम्। न चात्र सर्वाविवादः। एकत्ववादिनामेव विवाददर्शनात्। बहुप्रमाणविरोधे चैकस्याप्रामाण्यं दृष्टं शुक्तिरजतादौ। न च दोषजन्यत्वादेव दुर्बलत्वमिति विरोधः। बहुप्रमाणविरुद्धानां दोषजन्यत्वनियमात्। दोषजन्यत्वं च बलवत्प्रमाणविरोधादेव ज्ञायते। 'अदुष्टमिन्द्रियं त्वक्षं तर्कोऽदुष्टस्तथानुमा। आगमोऽदुष्टवाक्यं च स्वदृक्चानुभवः स्मृतः। बलवत्प्रमाणतश्चैव ज्ञेया दोषा न चान्यथा। द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः। तयोः स्वभावो बलवानुपजीव्यादिकश्च सः। याथार्थ्यमेव प्रामाण्यं तन्मुख्यं ज्ञानशब्दयोः। ज्ञानं च द्विविधं बाह्यं तथानुभवरूपकम्। बल्येवानुभवस्तत्र निर्दोषं त्वक्षजादिकम्। अनुप्रमाणतां याति तथाक्षादित्रयं ततः। प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्। उपजीव्यविरोधे तु न प्रामाण्यमम्नुष्य च। यामाहुरनुमां केचिन्नियाद्यवयवात्मिकाम्। सा व्यर्था नोपपत्त्या हि विना सापि प्रमाणताम्। यात्यतो युक्तिरेवैका प्रमाणमनुमात्मकम्। युक्तिः

SGDF
Sri Gangeshwari Digital Foundation

प्रतिज्ञारूपा च हेतुदृष्टान्तरूपिका। तथोपनयरूपा च परा निगमनात्मिका। पृथक्पृथक्प्रमाणत्वं याति युक्तितयैव तु। प्रतिज्ञाहेतुगर्भैव पृथक्प्रामाण्यमेष्यति। सिद्धत्वेन प्रतिज्ञाया हेतुर्मानं पृथग्भवेत्। प्रतिज्ञावयवत्वात्तु स्वातन्त्र्येणैव मानताम्। दृष्टान्तो यात्युपनयो व्याप्तिमाश्रित्य केवलम्। व्याप्तिस्तु केवलापि स्यात्प्रमाणं नियमाश्रयात्। तथा निगमनं चोपसंहारैकस्वरूपतः। प्रामाण्यं यात्यनुभवो ज्ञापयत्युपपत्तिताम्। विरोधश्च तथाधिक्यं न्यूनताऽसङ्गतिस्तथा। उपपत्तिदोषा विज्ञेया विरोधश्च स्वतोऽन्यतः। जनकस्यात्ययो जातिः स्वस्य वान्यस्य वा भवेत्। जनकं प्रमाणमुद्दिष्टं स्वस्यार्थस्य प्रकाशनात्। निग्रहा एत एव स्युः संवादानुक्तिसंयुताः। अर्थतः प्राप्तिरेवार्थापत्तिरित्यभिधीयते। दृष्ट्वा सदृशमेवान्यं पूर्वदृष्टे तु वस्तुनि। एतत्सदृशताज्ञानमुपमानं प्रकीर्तितम्। अभावस्य परिज्ञानं द्विविधं समुदाहृतम्। एकं तत्रानुभवतो योग्यस्यानुपलब्धितः। द्वितीयमपि विज्ञेयं सुखाद्ये च घटादिके। एकं प्रत्यक्षरूपं स्याद्द्वितीयमनुमात्मकम्। क्वचिद्घटाद्यभावोऽपि प्रत्यक्षेणावगम्यते। झटित्येव परिज्ञानान्न लिङ्गोद्भवता मता। अर्थापत्तिश्चोपमा च ह्यनुमाभेद एव तु। आगमो द्विविधो ज्ञेयो नित्योऽनित्यस्तथैव च। प्रत्यक्षं त्रिविधं ज्ञेयमैश्वरं यौगिकं तथा। अयौगिकं चेति तथा सर्वमक्षात्मकं मतम्। अक्षाणि च स्वरूपाणि नित्यज्ञानात्मकानि च। विष्णोः श्रियस्तथैवोक्तान्यन्येषां द्विविधानि तु। स्वरूपाणि च भिन्नानि भिन्नानि त्रिविधानि च। दैवासुराणि मध्यानीत्येतत्प्रत्यक्षमीरितम्। विषयान्प्रति स्थितं ह्यक्षं प्रत्यक्षमितिकीर्तितम्। अक्षयं पुरुषस्याक्षं स्वरूपे मुख्यमेव तु। उपचारस्तदन्यत्र सृष्टावुपचयो यतः। उपपत्तिस्वरूपत्वादनुमा सम्भवादिकम्। प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणताम्। याति नैवान्यथा तस्य नियतत्वं क्वचिद्भवेदि'त्यादि ब्रह्मतर्के।

SGDF
Sri Gargeshwari Digital Foundation

अत्र चोपजीव्यत्वेन प्रमाणप्राबल्याद्भेद एव तात्पर्यं युक्तम्। कथं चानुवादकत्वं भेदस्य प्रमाणेनासिद्धौ ? सिद्धौ च कथमभेदवाक्यस्याबाधः ? न चाप्रमाणसिद्धेनानुवादकत्वं प्रमाणस्य भवति। दुर्बलत्वे च भेदप्रमाणस्याभासत्वान्न भेदवाक्यानामनुवादित्वम्। अतश्च भेदवाक्यानामेव प्राबल्यम्। सर्वप्रमाणविरुद्धवचनानामेव प्राबल्याङ्गीकारे इदं वा अग्रे नैव किञ्चनासीदसतः सदजायतेत्यादीनामेवाविचारेण प्रतीयमानस्यार्थस्य सर्वप्रमाणविरुद्धत्वात्तत्र सर्वागमानां महातात्पर्यं प्रसज्येत। न च तत्र युक्तिविरोध इति वाच्यम्। तस्मिन्पक्षे युक्तिविरुद्धत्वेनाननुवादित्वमिति गुण एव स्यात्। युक्तिसिद्धत्वे ह्यनुवादित्वं स्यात्। अतः प्रमाणसिद्धत्वे तदपलापायुक्तेरप्रमाणसिद्धत्वे च भेदप्रमाणस्यानुवादित्वाभावाच्च न भेदवाक्यानां दौर्बल्यम्। न च प्रमाणबहुत्वे दौर्बल्यम्। दार्ढ्यमेव हि बहुवाक्यसंवादे दृष्टम्। तथासत्यभ्यासादेरप्यप्रामाण्यहेतुत्वं स्यात्। अभ्यासस्य च तात्पर्यलिङ्गत्वं सर्वेषां सिद्धम्। तदनङ्गीकारे तत्पक्षेऽपि नवकृत्वस्तत्त्वमसीत्यभ्यासस्यानुवादकत्वेनाप्रामाण्यं स्यात्। प्रथमवाक्येनैव यस्यासिद्धं तदर्थमपरमित्युक्ते प्रत्यक्षादिना भेदो येनानिश्चितस्तदर्थं वाक्यमित्युत्तरम्। तस्माद्बहुप्रमाणसंवादित्वे प्राबल्यमेव। अतः सर्वप्रमाणविरुद्धत्वान्नाभेदे तात्पर्यं वाक्यस्य।

किन्तु विष्णोस्सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्। तथा चोक्तं भगवता। 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत॥ इति गुह्यतमं शास्त्रमिदमुक्तं

SGDF
Sri Gargeshwari Digital Foundation

मयानघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारते'ति। 'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम्। अवान्तरं तत्परत्वं तदन्यत्सर्वागमानां पुरुषार्थस्ततोऽत' इति पैङ्गिश्रुतिः। 'मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम्। उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरमि'ति महावाराहे। युक्तं च विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्। मोक्षो हि सर्वपुरुषार्थोत्तमः। 'धर्मार्थकामाः सर्वेऽपि न नित्या मोक्ष एव हि। नित्यस्तस्मात्तदर्थाय यतेत मतिमान्नर' इति भाल्लवेयश्रुतिः। 'अनित्यत्वात्सदुःखत्वान्न धर्माद्याः परं सुखम्। मोक्ष एव परानन्दः संसारे परिवर्ततामि'ति भारते। मोक्षश्च विष्णुप्रसादेन विना न लभ्यते। 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण। नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मादि'ति नारायणश्रुतिः। 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामि'ति कठश्रुतिः। 'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसामि'ति भगवद्वचनम्। 'उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः। बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडि'ति स्कान्दे। 'अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च सः। आनन्ददश्च मुक्तानां स एवैको जनार्दन' इति च। 'बन्धको भवपाशेन भवपाशाच्च मोचकः। कैवल्यदः परं ब्रह्म विष्णुरेव न संशय' इति च। प्रीतिश्च गुणोत्कर्षज्ञानादेव विशेषतो दृष्टा। नाभेदज्ञानात्। अभेदज्ञानादप्रीतिरेवोत्तमानां भवति। घातयन्ति हि राजानो राजाऽहमिति वदन्तम्। ददति च सर्वमभिप्रेतं गुणोत्कर्षं वदतः। 'न तादृशी प्रीतिरीड्यस्य विष्णोर्गुणोत्कर्षज्ञातरि यादृशी स्यात्। तत्प्रीणनान्मोक्षमाप्नोति सर्वस्ततो वेदास्तत्परास्सर्व एवे'ति सौपर्णश्रुतिः। 'यो मामेवमसम्मूढो जानाति

SGDF
Sri Gargeshwari Digital Foundation

पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारते'ति गुणोत्कर्ष-ज्ञानादेव परमा प्रीतिर्भगवता स्वयमेवाभिहिता । अतो विष्णोर्गुणोत्कर्ष एव सर्वश्रुतिस्मृतीनां महातात्पर्यम् ।

न चाभेदे तात्पर्यमित्यत्र किञ्चिन्मानम् । न च विशेषण-विशेष्यतया भेदसिद्धिः विशेषणविशेष्यभावश्च भेदापेक्षः धर्मि-प्रतियोग्यपेक्षया भेदसिद्धिः भेदापेक्षं च धर्मिप्रयोगित्वमित्यन्योन्या-श्रयतया भेदस्यायुक्तिः । पदार्थस्वरूपत्वाद्भेदस्य । न च धर्मिप्रति-योग्यपेक्षया भेदस्यास्वरूपत्वम् । ऐक्यवत्स्वरूपस्यैव तथात्वात् । स्वरूपसिद्धावपि तदसिद्धिश्च जीवेश्वरैक्यं वदतः सिद्धैव । भेदस्तु स्वरूपदर्शन एव सिद्धः । प्रायः सर्वतो विलक्षणं हि पदार्थस्वरूपं दृश्यते । अस्य भेद इति तु पदार्थस्य स्वरूपमितिवत् । यदि न स्वरूपं भेदस्तदा पदार्थे दृष्टे प्रायः सर्वतो वैलक्षण्यं तस्य न ज्ञायेत । अज्ञाते च वैलक्षण्ये आत्मनि घट इत्यपि संशयः स्यात् । न हि कश्चित्तथा संशयं करोति । ज्ञात्वैव प्रायः सर्वतो वैलक्षण्यं कस्मिंश्चिदेव सदृशे संशयं करोति । न ह्यात्मन्यहं देवदत्तो न वेति कस्यचित्संशयो भवति । सामान्यतः सर्ववैलक्षण्ये ज्ञात एव घटत्वादिज्ञानम् । अतो नान्योन्याश्रयता । न च युगपज्ज्ञानानुत्पत्तिर्दोषः । यथा युगपदेव दीपसहस्रदर्शने सामान्यतः सर्वे ज्ञायन्त एव तथा स्यात् । एकस्मिन्नेव वस्तुनि विशेषस्तैरप्यङ्गीकृत एव। नेति नेतीत्यत्र सर्ववैलक्षण्याङ्गीकारात् । विशेषानङ्गीकारे च पुनरुक्तेः । न च घटाद्वैलक्षण्यमेव पटाद्वैलक्षण्यम् । अनुभवविरोधात् । तस्माद्भेददर्शनं युक्तमेव ।

यच्च प्रमाणदृष्टानामपि पदार्थानां मिथ्यात्वकल्पनं तच्च प्रमाण-विरुद्धत्वादेव प्रकाशतस्करत्वम् । न हि प्रमाणदृष्टस्य तर्कबाध्यत्वम् । प्रत्यक्षादिविरुद्धानां तर्काभासत्वनियमात् । शुक्त्यादे रजतत्वादिप्रतीते-रपि बलवत्प्रत्यक्षविरुद्धत्वादेव भ्रमत्वं न तर्कमात्रात् । तर्कमात्रतः

SGDF
Sri Gangeshwari Digital Foundation

प्रत्यक्षबाधने भूतचतुष्टयस्यावादेः पृथिवीत्वादृष्टेः पृथिव्या अपि पृथिवीत्वं न स्यात्। अतो न तर्कमात्र एव दृष्टस्य भ्रान्तित्वं कल्प्यम्। अतः सर्वभेदनिरासकतर्कस्य सर्वश्रुतिस्मृतिप्रत्यक्षानुमानविरुद्धत्वान्नितरामाभासत्वम्। न च परमार्थतो भेदाभावो व्यावहारिकः सोऽस्तीति वाच्यम्। सदसद्वैलक्षण्ये प्रमाणाभावात्। असतः ख्यात्ययोगादिति वदतः ख्यातिरभून्न वा। यदि नाभून्न तत्ख्यातिनिराकरणम्। यद्यभूत्तथापि। न चासतो वैलक्षण्यं तत्प्रतीतिं विना ज्ञायते। न च शुक्ते रजतत्वं सदसद्विलक्षणम्। असदेव रजतं प्रत्यभादित्यनुभवात्। न च प्रतीतत्वादसत्त्वाभावः। असतः सत्त्वप्रतीतिः सतोऽसत्त्वप्रतीतिरित्यन्यथाप्रतीतेरेव भ्रान्तित्वात्। न चासतो भ्रान्तावपि प्रतीतिर्नास्तीति वाच्यम्। अनिर्वचनीयपरमार्थत्वस्यासत एव दृष्टयङ्गीकारात्। न च तदप्यनिर्वाच्यम्। अनवस्थितेः। प्रथमानिर्वचनीयासिद्ध्या सर्वानिर्वचनीयासिद्धिरिति मूलक्षतिः। अनिर्वचनीयत्वे रजतस्यानिर्वचनीयमिदं रजतमिति बाधकज्ञानमुत्पद्येत। मिथ्याशब्दस्त्वभाववाची। न च सदसद्वैलक्षण्यं नामास्तीत्यत्र किञ्चिन्मानम्। अनुभवविरोधश्च तत्पक्षे। सदसतोर्द्वयोरेव सर्वैरनुभूयमानत्वात्। अतोऽनिर्वचनीयाभावादसतः प्रतीत्यनङ्गीकारात्प्रतीयमानत्वाच्च भेदस्य सत्त्वप्राप्तेर्नाद्वितीयत्वं युज्यते।

कथं च श्रुतिसिद्धो जीवपरमात्मभेदो निराक्रियते ?। मिथ्यावादित्वे च श्रुतेः कथमैक्यस्य सत्यत्वम् ?। कथं चैवंवादिनां वेदवादित्वम् ?। वेदोक्तस्य मिथ्यात्वाङ्गीकारादेव ह्यवेदवादित्वं बौद्धादीनामपि। अतो विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्।

कथं च जीवपरमात्मैक्ये सर्वश्रुतीनां तात्पर्यं युज्यते ?। सर्वप्रमाणविरुद्धत्वात्। तथा ह्यनुभवविरोधः। न ह्यहं सर्वज्ञः

SGDF
Sri Gargeshwari Digital Foundation

सर्वेश्वरो निर्दुःखो निर्दोष इति वा कस्यचिदनुभवः। अस्ति च तद्विपर्ययेणानुभवः। न च मिथ्यानुभवोऽयम्। तद्विपरीतप्रमाणाभावात्।

न चाभेदे कश्चिदागमः। सन्ति च भेदे सर्वागमाः। तथाह्यतत्त्वमसीति नवकृत्वोपदेशः सदृष्टान्तकः। न चायमभेदोपदेशः। 'स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते। सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' ॥ 'यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसानां समवहारमेकतां गमयन्ति ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पत्स्यामह इति। त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तदा भवन्ति' ॥ 'इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति समुद्र एव भवति। ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति। एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति। त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तदा भवन्ति' ॥ 'स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति। अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति' ॥ 'न्यग्रोधफलमत आहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति। तं होवाच यं वै सोम्यैतमणिमानं न निभालयसे अस्य सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति' ॥ 'लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा

SGDF
Sri Gargeshwari Digital Foundation

इति तद्ध तथा चकार तं होवाच यद्दोषा लवणमेतदुदकेऽवधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद यथा विलीनमेवाङ्गास्यां तदाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमिति अन्त्यादाचामेति कथमिति लवणमिति अभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते। तं होवाचात्र वा व किल सत्सोम्य न निभालयसेऽत्रैव किलेति' ॥ 'यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्' ॥ 'अथ यदास्यवाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावन्न जानाति' ॥ 'पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते अथ स यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते। एवमेव खलु सोम्याचार्यवान्पुरुषो वेदे'ति स्थाननवकेऽपि भेद एव दृष्टान्ताभिधानात्। न हि शकुनिसूत्रयोर्नानावृक्षरसानां नदीसमुद्रयोर्जीववृक्षयोरणिमधानयोर्लवणोदकयोर्गन्धारपुरुषयोरज्ञप्राणादिनियामकयोः स्तेनापहार्ययोश्चैक्यम्। सति सम्पद्य न विदुः सति सम्पत्स्यामह इति त इह व्याघ्रो वा सिंहो वेति सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वेति भेदापरिज्ञानानेनानर्थवचनाच्च। न हि गृहादागतस्य गृहे प्रविष्टस्य च तदैक्यम्। 'ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवती'त्यत्रापि भेद एवोच्यते। अन्यथा तास्समुद्र एव भवतीति व्यपदेशः स्यात्। अतो नद्यः समुद्रादागच्छन्ति तं प्रविशन्ति च समुद्रस्तु स एव नैतासां समुद्रत्वं भवतीत्यर्थः। न हि भिन्नानां नदीजलपरमाणूनां सामुद्राणुभिरैक्यं युज्यते। तथासति महाजन-

SGDF
Sri Gargeshwari Digital Foundation

समितौ प्रविष्टानां द्वित्राणां तदैक्यं स्यात् । न च तद्युज्यते । भेदे-नानुभवात् । स्वं ह्यपीतो भवतीत्यत्रापि स्व इति परमात्मनोऽभिधानम् । 'स्वात्मना चोत्तरयो'रिति सूत्रात् । 'स्वातन्त्र्यात्स्व इति प्रोक्त आत्माऽयं चातततत्वतः । ब्रह्मायं गुणपूर्णत्वाद्भगवान्विष्णुरव्यय' इति परमोप-निषदि । अपीत इत्यत्रापि प्रवेशमात्रम् । स्वमिति द्वितीयानिर्देशात् । एकीभावविवक्षायां स्वेनेतिनिर्देशः स्यात् । 'स्वं कुलायं यथाऽपीतः पक्षी स्यादेवमीश्वरम् । अप्येति जीवः प्रस्वापे मुक्तौ चान्योऽपि सन्सदे'ति च । एवमेव खलु सोम्येतन्मनो दिशंदिशं पतित्वा-न्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयत इत्यत्रापि मनइति जीवः प्राण-इति परमात्मा । यत्रायं पुरुषः स्वपितिनामेति तयोरेव प्रस्तुतत्वात् । 'मननान्मन उद्दिष्टः पुद्गलो निरयं गिरन् । कर्मानुशयनाच्चैव संसार्यनुशयी स्मृत' इति च परमोपनिषदि । 'प्राणः प्रणयनादेष साधुत्वात्सन्हरिः स्मृत' इति च । 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा' इत्यत्रापि भेद एव प्रतीयते । 'स्रष्टृत्वादाश्रय-त्वाच्च मुक्तानां च प्रति प्रति । स्थापनाच्च विभुर्विष्णुरन्यः संसारिणो मत' इति च । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठतीत्यत्रापि जीवशब्देन परमात्माभिहितः । 'जीव इति भगवतोऽनिरुद्धस्याख्ये'ति श्रुतेः । 'विष्णुर्जीव इतिप्रोक्तः सततं प्राणधारणात् । स प्रविश्य शरीरं च स्थावरं जङ्गमं तथा ॥ महाभूतानि च विभुस्त्रिवृत्करण-पूर्वकम् । संसारिणं भ्रामयति सदैवान्यत्वलक्षणम् ॥ तेनायं मोदते नित्यं वृक्षावस्थागतोऽपि सन्नि'ति च । 'तत्तेज ऐक्षत ता आप ऐक्षन्त इमास्तिस्रो देवता' इति पूर्वमेव चेतनत्वसिद्धेरनेन जीवेनात्म-नेति संसारिणः पुनः प्रवेशो न युक्तः । अतस्तत्र जीवशब्देन परमात्मैवाभिहितः । 'जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमान-

SGDF
Sri Gargeshwari Digital Foundation

स्तिष्ठतीत्यत्रापि जीवशब्दोदितः पर एव। पेपीयमानो मोदमानस्तु संसारी। न हि चेतनादन्यस्य मोदभोगादिकं युज्यते। 'सुखस्य चाप्यायतनं शरीरं दुःखस्य चाप्यायतनं शरीरम्। अचेतनं प्राकृतमेतदाहुर्भोक्ता तयोश्चेतनकः शरीरी'ति च भारते। 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत' इत्यत्रापि जीवशब्दः परे। न हि संसारिणो मुख्यतः प्राणधारकत्वं युज्यते। 'ब्रह्मणा त्यक्तदेहस्तु मृत इत्युच्यते नर' इति च। 'यं वै सोम्यैतमणिमानं न निभालयसेऽस्य सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठती'त्यत्राप्यणिमशब्देन पर एवाभिहितः। 'स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्युक्तत्वाच्च। धानासु त्वण्व्य इवेमा धाना इति स्त्रीलिङ्गप्रयोगादिवशब्दप्रयोगाच्च नाणिमत्वम्। न च ता न निभालयसे। ऐतदात्म्यमित्येतदीयम्। स आत्मेत्यात्मशब्दस्तु पर एव। 'द्युभ्वाद्यायतनं स्वशब्दात्'। 'नानुमानमतच्छब्दात्'। प्राणभृच्चे'त्यत्र तमेवैकं जानथ आत्मानमिति स्वशब्दपर्यायात्मशब्दान्न प्रकृतिजीवावभिधीयेते किन्तु पर एवेति भगवता व्यासेनाभिहितम्। अत आत्मशब्दस्तस्मिन्नेव मुख्यः। 'आततत्वाच्च मातृत्वादात्मेति परमो हरिः। आत्माभासास्तदन्ये ये न ह्येतेषां तता गुणा' इति परमोपनिषदि। तेजः परस्यां देवतायां तावन्न जानातीत्यत्र च 'यदास्य प्राणादीन्परो ग्रसति तदा न जानाति यदा ददाति तदा जानाती'ति तद्वशत्वमेवोक्तम्। 'यदा प्राणान्ददातीशस्तदा चेतनकोऽखिलम्। जानाति ग्रस्तकरणस्तेन वेत्ति न किञ्चने'ति च। अपहार्षीत्स्तेयमकार्षीदित्यत्र चान्याभिमतस्यैव वस्तुनोऽपहार्यत्वाद्भेद एवायं दृष्टान्तः। अन्यं सन्तं परमात्मानं स्वयमितिमन्यमानः स्तेन एवेति। न हि स्वकीयं परित्यजंस्स्तेनो भवति। 'ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः। शास्त्रतत्त्वमविज्ञाय तथा वादबलाज्जनाः। कामक्रोधाभि-

SGDF
Sri Gargeshwari Digital Foundation

भूतत्वादहङ्कारवशंगताः। याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः। ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः। वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते। तेषां तमश्शरीराणां तम एव परायणम्। यतः स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः। कथमस्मि स इत्येव सम्बन्धः स्यादसंहित'इति मोक्षधर्मे। 'यथा पक्षी च सूत्रं च नानावृक्षरसा यथा। यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा। यथा चोरापहार्यौ च यथा पुंविषयावपि। तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ। तथापि सूक्ष्मरूपत्वान्न जीवात्परमो हरिः। भेदेन मन्ददृष्टीनां दृश्यते प्रेरकोऽपि सन्। वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्यथे'ति च परमोपनिषदि। 'प्रेरकः सर्वजीवानां प्राणधीचोदिता च सः। विष्णुस्संसारिणोऽन्यो यस्तमविज्ञाय मूढधीः। देहेन्द्रियप्राणबुद्धि-नेतृत्वं मन्यतेऽत्मनः। अतः संसारपदवीं याति जीवेशयोः सदा। वैलक्षण्यं परं ज्ञात्वा मुच्यते बध्यतेऽन्यथे'ति च। सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयायेत्यात्मनोन्यमनूचानत्वादिगुणप्रदं परमविज्ञाय स्तब्धस्य पराधीनत्वज्ञापनेन स्तब्धतां निरस्य तन्निष्ठा ह्यत्रोपदिश्यते।

तद्धैक आहु'रसदेवेदमग्र आसीदि'त्यादि वादिप्रसिद्धमपि निराक्रियते। 'इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढा'-इत्यादिवच्छ्रुतितात्पर्यापरिज्ञानप्राप्तं च। दर्शितं चैकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणा इति। तद्वशत्वज्ञापनार्थं च 'सदेव सोम्येदमग्र आसीदि'त्यादिसृष्टिकथनम्। एकविज्ञानेन सर्वविज्ञानं च प्राधान्या-त्किञ्चित्सादृश्यात्कारणत्वाच्च। न तु तदन्यस्य मिथ्यात्वात्। न हि सत्यज्ञानेन मिथ्याज्ञानं भवति। न हि शुक्तिज्ञो रजतज्ञ इत्युच्यते। विरोधात्तयोर्ज्ञानयोः। नेदं रजतमित्यरजतज्ञो हि शुक्तिज्ञो भवति। रजतज्ञश्चेन्न शुक्तिज्ञः। न हि तज्ज्ञस्तदभावज्ञो भवति। तदभावस्य

SGDF
Sri Gargeshwari Digital Foundation

तज्ज्ञानपूर्वकत्वं चान्यत्र तस्य सत्त्वादेव दृष्टम् । तदनङ्गीकारे तदेव न युज्यते । प्रधानज्ञानादप्रधानस्य ज्ञातवद्व्यपदेशोऽस्त्येव । यथा प्रधानपुरुषाणां ज्ञानाह्वाननाशनैर्ग्रामो ज्ञात आहूतो नाशित इति व्यपदेशः । कारणे च पितरि ज्ञाते पुत्रो ज्ञात इति । जानाम्येनमस्य पुत्रोऽयमिति व्यपदेश इति । एवमत्राप्येतत्सृष्टं सर्वमित्यादि । सादृश्याच्चैकस्त्रीज्ञानादन्यस्त्रीज्ञानमिति । तदेव सादृश्यमत्रापि विवक्षितं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि'त्यादिना । अन्यथैकशब्दः पिण्डशब्दश्च व्यर्थः स्यात् । मृदा विज्ञातयेत्येतावता पूर्णत्वात् । न ह्येकमृत्पिण्डात्मकान्यन्यमृण्मयानि । सादृश्यमेव हि तेषाम् । 'यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् । यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यादि'त्यादिकमपि व्यर्थं स्यात् । न ह्येकमण्यात्मकमन्यल्लोहमयम् । न चैकनखनिकृन्तनात्मकं सर्वं कार्ष्णायसम् । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'त्यत्र च वाचा नाम्नामारम्भणं विकारः अविकृतं नित्यं नामधेयं मृत्तिकेत्येवेत्येतद्वचनं सत्यमिति श्रुत्यर्थः । न च वाचारम्भणशब्दोऽपि मिथ्यात्वे प्रसिद्धः । वाचारम्भणमात्रमिति चाश्रुतकल्पनम् । तस्मिन्पक्षे नामधेयशब्द इतिशब्दश्च व्यर्थः स्यात् । अतो न कुत्रापि जगतो मिथ्यात्वमुच्यते । 'कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः' । 'यच्चिकेत सत्यमित्तन्न मोघं वसुस्पार्हमुत जेतोत दाता' । 'विश्वं सत्यं मघवानायुवोरिदापश्च न प्रमिनन्ति व्रतं वाम्' । 'प्र घान्वस्य महतो महानि सत्यासत्यस्य करणानि वोचम्' । 'अनाद्यनन्तं जगदेतदीदृक्प्रवर्तते नात्र विचार्यमस्ति । न चान्यथा क्वापि च कस्य चेदमभूत्पुरा नापि तथाऽभविष्यत्' । 'असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि' । 'यः सत्यरूपं जगदेतदीदृक्सृष्ट्वा त्वभूत्सत्यकर्मा महात्मा' ।

SGDF
Sri Gangeshwari Digital Foundation

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत्कामहैतुकम् । एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिता' इत्यादेश्च । 'अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः । स्वप्नादिसाम्यं जगतो न तु बोधनिवर्त्यता । सर्वज्ञस्य यतो विष्णोः सर्वदैतत्प्रतीयते । बोधासहं ततो नैतर्त्कि त्वाज्ञावशमस्य ही'ति परमोपनिषदि । 'प्रज्ञाविनिर्मितं यस्मादतो मायामयं जगत् । अनेनानुगतं यस्मादनृतं तेन कथ्यते । बोधानिवर्त्यमपि तु नित्यमेव प्रवाहतः । अ इत्युक्तः परो देवस्तेन सत्यमिदं जगत् । तदधीनस्वरूपत्वादसत्यं तेन कथ्यते । सत्यस्य सत्यः स विभुरिन्द्रचापस्य सूर्यवदि'ति च । 'तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमि'ति च । 'महामायेत्यविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यते' । 'प्रकृतिः प्रकृष्टकरणाद्वासना वासयेद्यतः । अ इत्युक्तो हरिस्तस्य विद्याऽविद्येति संज्ञिता । मायेत्युक्ता प्रकृष्टत्वात्प्रकृष्टं हि महाभिधम् । विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्यते । प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणे'ति च । 'सर्वे वेदा हरेर्भेदं सर्वस्माज्ज्ञापयन्ति हि । भेदः स्वातन्त्र्यसार्वज्ञसर्वैश्वर्यादिकश्च सः । स्वरूपमेव भेदोऽयं व्यावृत्तिश्च स्वरूपता । सर्वव्यावृत्तये यस्मात्स्वशब्दोऽयं प्रयुज्यते । सर्वव्यावृत्ततामेव नेतिनेत्यादिका श्रुतिः । विष्णोरतो वदेदन्या अपि सर्वा न संशय' इति नारायणश्रुतिः । 'अहं ब्रह्मास्मि' 'तद्योहं सोऽसौ योऽसौ सोऽहं योऽसावादित्ये पुरुषः सोऽहमस्मि' 'स एवाहमस्मी'त्यादि त्वन्तर्याम्यपेक्षया । 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' । 'अ इति ब्रह्म तत्रागतमहमिति । तस्योपनिषदहमिति' । 'अहंनामा हरिर्नित्यमहेयत्वात्प्रकीर्तितः । त्वं चासौ प्रतियोगित्वात्परोक्षत्वात्स' इत्यपि । 'सर्वान्तर्यामिणि हरावस्मच्छब्दविभक्तयः । युष्मच्छब्द-

SGDF
Sri Gangeshwari Digital Foundation

गताश्चैव सर्वास्तच्छब्दगा अपि । सर्वशब्दगताश्चैव वचनान्यखिलान्यपि । स्वतन्त्रत्वात्प्रवर्तन्ते व्यावृत्तेऽप्यखिलात्सदा । तत्सम्बन्धात्तु जीवेषु तत्सम्बन्धादचित्स्वपि । वर्तन्त उपचारेण तिङ्पदान्यखिलान्यपि । तस्मात्सर्वगतो विष्णुरेको भिन्न ततो बहुरि'ति नारायणश्रुतिः । 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकमि'ति भगवद्वचनम् ।

न चासत्यो भेदः । 'सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः' । 'सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये' । 'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः' । 'आत्मा हि परमस्वतन्त्रः सर्ववित्सर्वशक्तिः परमसुखः परमो जीवस्तु तद्वशोऽल्पज्ञोऽल्पशक्तिरार्तोऽल्पक' इत्यादि श्रुतिभ्यः। न चावान्तरसत्यत्वमिदम् । 'यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' । 'एतमानन्दमयमात्मानमुपसङ्क्रम्य इमान्लोकान्कामान्नीकामरूप्यनुसञ्चरन् । एतत्साम गायन्नास्ते' ॥ 'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः' ॥ 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन्क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा' ॥ 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं विजानीयाद्येनेदं सर्वं विजानाति तं च केन विजानीयाद्विज्ञातारमरे केन विजानीयात्' ॥ 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति' ॥ 'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' ॥ 'अमृतस्यैष सेतुः' ॥ 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे' ॥ 'ईशमाश्रित्य

SGDF
Sri Gargeshwari Digital Foundation

तिष्ठन्ति मुक्ताः संसारसागरात् । यथेष्टभोगभोक्तारो ब्रह्मान्ता उत्तरोत्तरमि'ति मोक्षानन्तरं भेदश्रुतिभ्यः । 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे'ति भगवद्वचनम् । 'ॐ जगद्व्यापारवर्जम्' ॥ 'ॐ प्रकरणादसन्निहितत्वाच्चे'त्यादि च । 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मे'ति तद्धर्माणामप्यनुच्छित्तेः प्रस्तुतत्वादत्रैव मा भगवान्मोहान्तमापिपन्न प्रेत्य संज्ञास्ती'ति संज्ञानाशस्य दोषत्वेनोक्तत्वात् । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि'ति ह्याक्षेप एव । न हि भोगाभावो विज्ञातारमरे केन विजानीयादिति विज्ञातुरविज्ञानं चापेक्षितम् । 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः । स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोरि'ति परमश्रुतिः ॥ 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति मोक्षधर्मे ॥ 'न तु तद्द्वितीयमस्ती'ति च । यत्तद्ब्रह्म द्वैतत्वेन न पश्यति तदेव द्वितीयं नेत्याह । 'यत्ततोऽन्यद्विभक्तत्वेनैव पश्येदि'ति वाक्यशेषात् । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत' इति हेतोश्च । 'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ती'त्यत्राप्येकीभावो मत्यैक्यं क्षीराब्ध्यादिस्थिततद्रूपापेक्षया स्थानैक्यं वा । 'कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योः । यदमीषामदः प्रियं तदैतूपमामभि' । 'ब्रह्ममत्यनुकूला मे मतिर्मुक्तौ भविष्यति । अतः प्रायोऽनुकूलत्वमिदानीमपि संस्थितम्' ॥ 'येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम्' ॥ 'एतमानन्दमयमात्मानमुपसङ्क्रामती'त्यादि श्रुतिभ्यः । स्वरूपैक्याभिप्राये कर्माणि विज्ञानमयश्चेति न युज्यते । न हि तत्पक्षेऽपि कर्मणां ब्रह्मैक्यं मुक्तावस्ति । निवृत्त्यभिप्राये च पञ्चदशकलानामपि समत्वात् । 'गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदैवतास्वि'त्यन्यासां कलानां गमनमुक्त्वा कर्मणां विज्ञानात्मनश्चैकीभावकथनं व्यर्थं स्यात्

SGDF
Sri Gangeshwari Digital Foundation

विशेषाभावात् । न च ज्ञाननिवृत्तस्य रजतस्य शुक्त्यैकीभावव्यवहारोऽस्ति । परेऽव्यय इत्यधिकरणत्वकथनं च भेदज्ञापकम् । अन्यथा पर एव भवन्तीति निर्देशः स्यात् । 'जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु । एकस्थाननिवासो वा व्यक्तिस्थानमपेक्ष्य सः । न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः । स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरूपते'ति परमश्रुतिः ॥ 'ब्रह्म वेद ब्रह्मैव भवती'त्यादि च 'सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदि'तिवत् । बृंहितो भवतीत्यर्थः । न हि ब्राह्मणपूजकः स एव ब्राह्मणो भवति । 'ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः । प्रकृतिः परमं ब्रह्म परमं महदच्युतः । तस्मान्न मुक्ता न च सा न क्वचिद्विष्णुवैभवम् । प्राप्नुवन्ति स एवैकः स्वतन्त्रः पूर्णषड्गुण'इति परमश्रुतिः ॥ 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति' ॥ 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं स भवान्केवलो हर'इति च । 'यथापियन्ति तेजांसि महातेजसि भास्करे । पृथक्पृथक्स्थितान्यद्धि स्वरूपैरपि सर्वशः । परे ब्रह्मणि जीवाख्यब्रह्माण्यप्यपियन्ति हि । मुक्तौ पृथक्स्थितान्येव तदन्येषामदर्शनम् । अप्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचिदि'ति नारायणश्रुतिः । अतः सर्वागमविरुद्धमेव जीवेश्वरैक्यम् ॥

तथैव सर्वयुक्तिविरुद्धं च । न तावदेकजीववादो युज्यते । एकाज्ञानपरिकल्पितत्वे च सर्वस्य सर्वमिदं परिकल्पितमिति जानतः पुनः शिष्यादिबोधनं न युज्यते । न हि स्वप्नोऽयमिति निश्चित्य स्वाप्नपुत्रदायार्थं यतते । स्वप्ने तु स्वाप्नत्वाज्ञानादेव यतते । न च बहूनां दृश्यमानत्वादस्याज्ञानपरिकल्पितमिदमिति निश्चयो युज्यते । स्वप्ने तु प्रबोधानन्तरमेकस्यावशिष्टत्वान्निश्चयः । न चात्र तथास्ति । तस्य तस्य तथा तथा प्रतिपत्तव्यमित्यङ्गीकारे वस्तुनि विकल्पा-

SGDF
Sri Gurgeshwari Digital Foundation

सम्भवादकल्पितमित्येव स्यात्। न च तथा प्रतिपत्तव्यमित्यत्र प्रमाणमस्ति। शिष्याज्ञानपरिकल्पितमित्यङ्गीकारे तस्यैवाचार्यभावे स्वयमेव कल्पितो भवतीति सम्यग्ग्रन्थाधिगमस्यैवानर्थहेतुत्वं स्यात्। न च कस्यचिन्मुक्तिः। ग्रन्थाधिगमे तस्यैव शिष्याज्ञानपरिकल्पितत्वप्राप्तेः। स चैको जीवो यदि भेदवादी भवति तस्य तत्रैव दार्ढ्यान्न कदाचिद्भेदनिवृत्तिरिति न कस्यापि मुक्तिः स्यात्। तेन यथा कल्पितं तथैव भवतीति तेनैकजीववादिनां नित्यनिरयकल्पने स एव स्यात्। न चैकजीवाज्ञानपरिकल्पितं समस्तमित्यत्र किञ्चिन्मानम्। 'प्रपञ्चो यदि विद्येत निवर्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थत'-इत्यस्य चायमर्थः। प्रपञ्चो यदि विद्येत भवेत उत्पद्येत तर्हि निवर्तेत न च निवर्तते तस्मादनादिरेवायम्। प्रकृष्टः पञ्चविधो भेदः प्रपञ्चः। न चाविद्यमानोऽयम्। मायामात्रत्वात्। मायेति भगवत्प्रज्ञा सैव मानत्राणकर्त्री यस्य तन्मायामात्रम्। परमेश्वरेण ज्ञातत्वाद्रक्षितत्वाच्च न द्वैतं भ्रान्तिकल्पितमित्यर्थः। न हीश्वरस्य भ्रान्तिः। तर्ह्यद्वैतः सर्वभावानामितिव्यपदेशः कथमित्यत आह। अद्वैतं परमार्थत इति। परमार्थापेक्षया ह्यद्वैतं सर्वस्मादुत्तमोऽर्थः स एक एवेत्यर्थः। अन्यथाऽ-द्वैतः सर्वभावानामिति व्यर्थं स्यात्। सर्वभावानां मध्ये तस्यैकस्यैवा-द्वैतत्वमित्युक्ते समाधिकराहित्यमेवोक्तं स्यात्। अन्येषां समाधिक-भावः। विकल्पो विनिवर्तेत कल्पितो यदि केनचिदिति वाक्यशेषाच्च न कल्पितत्वमस्येति ज्ञायते। निवर्तत इत्यङ्गीकारे निवर्तेत विद्येतेति च प्रसङ्गरूपेण कथनं यदिशब्दौ च न युज्यन्ते। विद्येतेत्यस्य चोत्पत्त्यर्थानङ्गीकारे यद्यदस्ति तत्तन्निवर्तत इति व्याप्त्यभावान्निवर्तेतेति न युज्यते। अतः प्रपञ्चस्यानादिसत्यत्वपरमिदं वाक्यम्। अतः उपदेशादयं वादोऽज्ञाते द्वैतं न विद्यत इत्याह। अज्ञात एव द्वैतं न विद्यते। अज्ञानिनां पक्ष एव द्वैतं न विद्यत इत्यर्थः॥ 'जीवेश्वरभिदा

SGDF
Sri Gargeshwari Digital Foundation

चैव जडेश्वरभिदा तथा। जीवभेदो मिथश्चैव जडजीवभिदा तथा। मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः। सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात्। न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः। कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते। द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम्। मतं हि ज्ञानिनामेतन्मितं त्रातं च विष्णुना। तस्मात्सत्यमिति प्रोक्तं परमो हरिरेव त्वि'ति परमश्रुतिः॥ मैत्रेयीशाखायां च। 'अथ ज्ञानोपसर्गा' इत्युक्त्वा 'अथ ये चान्ये मिथ्यातर्कैर्दृष्टान्तैः कुहकेन्द्रजालैर्वैदिकेषु परिस्थातुमिच्छन्ति तैः सह न संवसेत्प्राकाश्या ह्येते तस्करा अस्वर्ग्या' इत्याह। 'नैरात्म्यवादकुहकैर्मिथ्यादृष्टान्तहेतुभिः। भ्राम्यँल्लोको न जानाति वेदविद्यान्तरं तु यदि'ति। आत्मसम्बन्धि किमपि नास्तीतिवादो नैरात्म्यवादः।

भ्रान्तिकल्पितत्वे च जगतः सत्यं जगद्द्वयमपेक्षितम्। न हि सत्यशुक्तेः सत्यरजतस्य तयोः सादृश्यस्य चाभावे भ्रान्तिर्भवति। स्वप्नेऽपि वासनारूपं सत्यमेव जगन्मनसि स्थितं बहिष्ठत्वेन दृश्यते। देहात्मनोरप्येकदेशस्थत्वादि सादृश्यमस्त्येव। शङ्खः पीतो नभो नीलमित्यादिष्वपि पीतादयोऽन्यत्र विद्यन्त एव। तत्सादृश्यं च द्रव्यत्वादिकं किञ्चिच्छङ्खादीनां चास्त्येव। अतो न कुत्रापि सदृशसत्यवस्तुद्वयं विना भ्रमः। न चात्मन्यनात्मभ्रमः क्वापि दृष्टः। न हि कश्चिदहमहं न भवामीति भ्रान्तो दृश्यते। आत्मन्यनात्मभ्रम एवायं प्रपञ्च इति तैरुच्यते। तं विनैवात्मन्यात्मभ्रमकल्पनेऽनात्मनस्सत्यत्वं स्यात्। तदा चाद्वितीयत्वकल्पनेऽनात्मैवास्ति नात्मेति भवति। आत्माज्ञानात्मकत्वे च जगत आत्मनो भिन्नत्वेन न दृश्येत। न हि शुक्तेर्भेदेन रजतं दृश्यते भ्रान्तौ। न चैकमेव युगपद्बहुधा दृश्यते भ्रान्तौ। न चात्मनि भेदभ्रमः क्वापि दृष्टः। न च कुत्रापि मिथ्योपाधिकृतो भेदो दृष्टः। न च ज्ञानाज्ञानयोरपि मिथ्या-

SGDF
Sri Gargeshwari Digital Foundation

कल्पितत्वं दृष्टम् । तद्विषयस्यैवान्यथात्वं भ्रान्तौ । एवमाद्यनन्तयुक्ति-विरुद्धोऽयं पक्षः । ग्रन्थबहुत्वं स्यादित्येवोपरम्यते ।

न च सत्यत्वाङ्गीकारे कश्चिद्दोषः । बहुजीववादिपक्षेऽपि भेदस्य मिथ्यात्वाङ्गीकारे एते दोषा भवन्त्येव । मिथ्योपाधिकृतं हि तेषामपि बहुत्वम् । न च मिथ्योपाधिकृतो भेदः क्वापि दृष्टः । आत्मन्य-नात्मकल्पनारूपत्वान्मिथ्योपाधिरेव न युज्यते । मायामयीसृष्टिरपि तत्सदृशस्यान्यस्य विद्यमानत्व एव दृष्टा । द्रव्यत्वादिसादृश्ययुतं किञ्चिदधिष्ठानमाश्रित्यैव च । 'अधिष्ठानं च सदृशं तथ्यवस्तुद्वयं विना । न भ्रान्तिर्भवति क्वापि स्वप्नमायादिकेष्वपि । मानस्यां वासनायां तु बहिर्वस्तुत्वकल्पनम् । स्वाप्नो भ्रमश्च मायायां कर्तृ-देहादिवस्तुषु । चतुरङ्गबलत्वादिकल्पनं भ्रम इष्यते । न भ्रान्ति-कल्पितं विश्वमतो विष्णुबलाश्रयमि'ति ब्रह्मवैवर्ते । 'न च मायाविना माया दृश्यते विश्वमीश्वरः । सदा पश्यति तेनेदं न मायेत्यवधार्यता-मि'ति च । 'अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत् । सर्वा-परोक्षविद्विष्णुर्विश्वदृक्तन्न तन्मृषे'ति च । यदि चैकमेव ब्रह्मोपाधि-भेदात्संसरति मुच्यते च तदा संसारिणां सर्वदा विद्यमानत्वात्सर्वदा संसार्येव ब्रह्म । अतस्तद्भावोऽपि न मुक्तिः । सर्वदोपाधिसम्बन्धत्वा-त्तस्य । न च शुद्धस्य नोपाधिसम्बन्ध इति वाच्यम् । उपाधि-सम्बन्धस्योपाधिसम्बन्धकल्पनेऽनवस्थाप्रसङ्गात् । न च तेनैव सम्बन्धेन सम्बन्धस्य । आत्माश्रयप्रसङ्गात् । इतश्च मिथ्योपाधिर्न युज्यते । अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः । अज्ञानं विना मिथ्यात्वासिद्धेः । न च मिथ्योपाधिं विनाऽज्ञानसिद्धिः । मिथ्योपाधिभिन्नस्यैवाज्ञ-त्वात् । शुद्धस्यैवाज्ञत्वे मुक्तस्याप्यज्ञत्वप्रसक्तेः । स्वाभाविकत्वा-त्सत्यत्वात्सद्वितीयत्वप्रसक्तेश्च । स्वाभाविकस्य चानिवृत्त्यङ्गीकारा-दनिवृत्तिप्रसक्तेश्च । सत्यस्य चानिवृत्तिरिति हि तत्पक्षः । अत-

SGDF
Sri Gargeshwari Digital Foundation

श्चान्योन्याश्रयता। अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः मिथ्योपाधिसिद्धौ जीवसिद्धिः जीवसिद्धौ तदाश्रयाज्ञानसिद्धिरिति चक्रकं वा। न च शुद्धमेव भ्रान्त्याऽज्ञमिति युक्तम्। अज्ञानसिद्धौ भ्रमसिद्धिः तत्सिद्धावज्ञानसिद्धिरित्यन्योन्योन्याश्रयत्वात्। 'अनागता अतीताश्च यावन्तः सहिताः क्षणाः। अतीतानागताश्चैव यावन्तः परमाणवः। ततोऽप्यनन्तगुणिता जीवानां राशयः पृथगि'ति वत्सश्रुतेर्न संसारिणां परिसमाप्तिरस्मत्पक्षे। 'परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणिराशयः। सूक्ष्मत्वादीशशक्त्यैव स्थूला अपि हि संस्थिताः। सहस्रयोजनसभां प्रभावाद्विश्वकर्मणः। अनन्ता राशयोऽनन्ताः प्रजानामधिसंस्थिता' इति स्कान्दे।

न च मिथ्यावस्तुनो दुर्घटत्वमेव भूषणम्। दृष्टस्य वस्तुनो मिथ्यात्वकल्पनस्य दृष्टिसकाशाद्बलवत्प्रमाणयुक्त्यपेक्षत्वात्। तदभावे सत्यत्वं दृष्ट्यैव सिद्ध्यति। न ह्यन्नादिकं भोग्यं दृष्ट्वा भोक्तुं सत्यत्वे प्रमाणान्तरमपेक्षते। किन्तु नेदमन्नमिति केनचिदुक्ते कथमिदमन्नत्वेन दृश्यमानमन्नं न भवतीति प्रमाणान्तरमपेक्षते। न च प्रत्यक्षदृष्टस्य ततो बलवत्प्रत्यक्षमागमं विनाऽनुमानादिनैव बाधो दृष्टः। दूरस्थवृक्षह्रस्वत्वादौ प्रत्यक्षापटुत्वस्य निश्चितत्वाद्युक्त्या तत्र दीर्घत्वनिश्चयः। प्रत्यक्षस्य हि दूरे मन्दग्राहित्वं परिमाणादावन्यथात्वं च ततो बलवत्प्रत्यक्षेणैव निश्चितम्। न च प्रत्यक्षस्य मिथ्यात्वं केनापि प्रमाणेन निश्चितम्। विशेषतश्च ज्ञानाज्ञानसुखदुःखात्मभेदादिविषयस्यानुभवस्य न मिथ्यात्वं दृष्टम्। अतश्च संसारस्य सत्यत्वात्सत्यस्य चानिवृत्त्यङ्गीकारान्न मोक्षः स्यात्। अनुभवसिद्धस्य बलवदनुभवं विना युक्तित एव मिथ्यात्वाङ्गीकारे आत्मनोऽपि मिथ्यात्वं स्यात्। युक्तिश्च। सर्वस्यान्यस्य मिथ्यात्वाङ्गीकारात् द्विधाकल्पने कल्पनागौरवमिति। आत्माधिष्ठानभ्रमस्यैवादृष्टेस्तस्याधिष्ठानत्वमपि न युज्यते। दुर्घटत्वस्य

SGDF
Sri Gangeshwari Digital Foundation

भूषणत्वे दुर्घटमप्यात्ममिथ्यात्वं स्यादेव । प्रतीतेरप्यविद्याकार्यत्वाङ्गीकारात् । तस्याश्च दुर्घटत्वस्य भूषणत्वात्सत्यस्य च युक्त्यपेक्षत्वाद्घटादीनां द्रष्टृत्वमात्मनश्च जडत्वं द्रष्टुरभावे च प्रतीतिरधिष्ठानं विनैव भ्रम इत्यादि विरुद्धं सर्वमपि स्यात् ।

उपाधिभेदाङ्गीकारे हस्तपादाद्युपाधिभेदेऽपि तद्गतसुखदुःखादिभोक्तुर्यथा भेदो न प्रतीयते एवमेव शरीरादिभेदेऽपि भोक्तुर्भेदो न दृश्येत । सर्वगतसुखदुःखादिकमेकेनैव भुज्येत । यथा चैकाङ्गुल्याद्यपगमेऽपि न मुक्तिः एवमेकोपाध्यपगमेऽपि तस्यैवानन्तोपाधिसम्बन्धत्वान्न मुक्तिः स्यात् । 'उद्यतायुधदोर्दण्डाः पतितस्वशिरोऽक्षिभिः । पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन्युधी'ति भारतवचनान्न विश्लेषाद्विशेषः । किञ्चोपाधिरात्मन एकदेशं ग्रसत्युत सर्वमात्मानम् । एकदेशाङ्गीकारे सावयवत्वम् । सावयवस्यचानित्यत्वं तैरङ्गीकृतम् । सर्वग्रासे च नोपाधिर्भेदकः स्यात् । उपाधिकृतांशकल्पने तदुपाधिकृतत्वे आत्माश्रयत्वम् । उपाध्यन्तरकल्पनेऽनवस्था । न चेश्वरस्य सर्वगतत्वादौपाधिकभेदो ब्रह्मणा भवति । न हि देशतः कालतश्चापरिच्छिन्नयोरौपाधिकभेदो दृष्टः । सर्वोपाधिगतत्वाच्चैकस्यैवेश्वरस्य भेदस्य मिथ्यात्वाद्धस्तपादादिभेदेऽपि भोक्तुरेकत्ववत्सर्वसुखदुःखादिभोक्तृत्वमीश्वरस्यैव स्यात् । देशतः कालतश्चापरिच्छिन्नयोरौपचारिकभेदाभावादेव दुःखिनोऽन्यच्छुद्धं ब्रह्म न सिद्ध्यति । अतः स्वाभाविकस्संसार इत्यनिवृत्तिरेव स्यात् ।

किञ्च विशिष्टस्य शुद्धस्य वा संसारः ? । शुद्धस्य संसार इत्युक्ते स्वव्याहतिः । विशिष्टस्येत्युक्ते विशिष्टोऽन्यः स एव वा । स एव चेदुक्तो दोषः । अन्यश्चेन्नित्योऽनित्यो वा ? । अनित्यश्चेन्नाश एव तस्य न मोक्षः । नित्यत्वे च भेदस्य सत्यत्वं मोक्षेऽपि तस्य भावात् । स्वरूपमात्रस्याभेद उपाधिभिन्न एवेत्यङ्गीकारे स्वरूपमेवोपाधिसंबद्ध-

SGDF
Sri Gargeshwari Digital Foundation

मिति न तस्य शुद्धत्वम् । अशुद्धस्वभावस्य न कदाचिच्छुद्धत्वमिति च तत्पक्षः । उपाधिमिथ्यात्वाङ्गीकारे चान्योन्याश्रयत्वादिदोषा उक्ताः । न चानादिकर्मभेदाद्भेदः । औपाधिकभेदसिद्धौ कर्मभेदसिद्धिः तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयत्वात् । अतोऽनन्तदोषदुष्टत्वाद्ग्रन्थबहुत्वं स्यादित्येवोपरम्यते । अतः सर्वप्रमाणविरुद्धत्वान्नाभेदे श्रुतितात्पर्यम् ।

सर्वशब्दावाच्यस्य लक्षणाऽपि न दृष्टेति न तस्य शास्त्रगम्यत्वम् । अतोऽवाच्यत्वादज्ञेयत्वाच्छून्यमेव तदिति प्राप्तम् । न च स्वेनापि ज्ञेयत्वं तैरुच्यते । कर्तृकर्मविरोध इति हि ते वदन्ति । न च स्वरूपमन्यद्वा ज्ञेयं ज्ञातारं च विना ज्ञानं दृष्टम् । अतो ज्ञातृज्ञेयाभावाज्ज्ञानस्यापि शून्यतैव । अतः शून्यवादान्न कश्चिद्विशेषः । न च ज्ञातृज्ञेयरहितं ज्ञानं क्वापि दृष्टम् । अप्राप्तत्वाच्चेश्वरभेदस्य नाभेदे श्रुतितात्पर्यं युज्यते । 'सर्वोत्तमं सर्वदोषव्यपेतं गुणैरशेषैः पूर्णमन्यं समस्तात् । वैलक्षण्याज्ज्ञापयितुं प्रवृत्ताः सर्वे वेदा मुख्यतो नैव चान्यदि'ति महोपनिषदि । अतः सर्वागमैरेव सर्वस्माद्भिन्नत्वेन सर्वस्माद्विशिष्टत्वेन च विज्ञेयो भगवान्नारायण इति सिद्धम् ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्त्वविनिर्णये प्रथमः परिच्छेदः ॥ १ ॥

॥ ॐ ॥ 'ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात्क्षराः ॥ लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिः । स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः । निस्सीमत्वेन ते सर्वे तद्वशाः सर्वदैव च । सर्गस्थितिक्षययतिप्रकाशावृतिबन्धनम् । सर्वक्षराणामेकः स कुर्यात्सात्विकमोक्षणम् । सर्गस्थितियतिज्योतिर्नित्यानन्दप्रदोऽक्षरे । चेष्टाप्रदश्च सर्वेषामेक एव परो हरिः । तस्य नान्योऽस्ति सर्गादिकर्ता निर्दोषकश्च स' इति परमश्रुतिः । 'ब्रह्मशेषसुपर्णेशशक्रसूर्यगुहादयः । सर्वे क्षरा अक्षरा

SGDF
Sri Gangeshwari Digital Foundation

तु श्रीरेका तत्परो हरिरि’ति स्कान्दे। ‘यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्। अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवाउ। अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश। अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वं१तस्समुद्रे’॥ ‘यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः। यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यससर्ज भूम्या’॥ ‘यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणि। अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम्। यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्। तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्’॥ ‘अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदेहि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विना विरावत्’॥ ‘चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत’॥ ‘एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावापृथिवी’॥ ‘एको नारायण आसीन्न ब्रह्मा न च शंकरः। स मुनिर्भूत्वा समचिन्तयत्तत एते व्यजायन्त। विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा इति’॥ ‘वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः। नेन्द्रसूर्यौ न च गुहो न सोमो न विनायक’इत्यादि श्रुतिभ्यश्च॥ ‘यस्मात्परं नापरमस्ति किञ्चिदि’त्यत्राप्यपरमस्तीत्येवार्थः। अन्यथा ‘तेनेदं पूर्णं ततो यदुत्तरं तदरूपमनामयमि’ति वाक्यशेषविरोधात्। तेनेदमित्युक्तमेव तत इति परामृश्यते। अन्यथा यस्मात्परमित्युक्तिविरोधात्। ‘नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति’॥ ‘अस्यैव सर्वनामानि व्यतिरिक्तस्य सर्वतः। यः स्वतन्त्रः सदैवैकः स विष्णुः परमो मत’ इत्यादि श्रुतिभ्योऽन्यनामान्यस्यैवेति नान्येषां सर्वेश्वरत्वादिकमुच्यते। सर्ववेदेष्वप्यस्यादोषवचनादादावभावावचनाच्च तद्वचनाच्चान्येषां सर्वेषां वेदेषु सर्वेषु। तेषां सर्वनामत्वानुक्तेश्च। ‘उत्पत्ति-

SGDF
Sri Gangeshwari Digital Foundation

र्वासुदेवस्य प्रादुर्भावो न चापरः। देहोत्पत्तिस्तदन्येषां ब्रह्मादीनां तदीरणात्। देहोऽनादिर्हरेर्नित्यो ब्रह्मादीनामनित्यकः। मुख्योत्पत्तिस्तदन्येषां प्रादुर्भावो हरेर्जनिरि'ति परमश्रुतेश्च ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्त्वविनिर्णये द्वितीयः परिच्छेदः ॥ २ ॥

॥ ॐ ॥ 'वर्जितः सर्वदोषैर्यो गुणसर्वस्वमूर्तिमान्। स्वतंत्रो यद्वशाः सर्वे स विष्णुः परमो मत'इति परमोपनिषदि। 'नित्यपूर्णाखिलगुणो निर्दोषः सर्वदैव यः। यः स्वतन्त्रः परो विष्णुर्जन्ममृत्यादिवर्जितः'। नारद उवाच। 'निर्दोषश्चेत्कथं विष्णुर्मानुषेषूदपद्यत। चिन्ताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथम्। एष मे संशयो ब्रह्मन् हृदि शल्य इवार्पितः। अनुद्धार्योऽपरैर्मर्त्यैः स्वशक्तिशक्त्या तमुद्धर'। ब्रह्मोवाच। 'स्त्रीपुंमलाभियोगात्मा देहो विष्णोर्न जायते। किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम्। प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा। तथाप्यसुरमोहाय परेषां च क्वचित्क्वचित्। दुःखाज्ञानश्रमादीन्स दर्शयेच्छुद्धसद्गुणः। क्व व्रणादि क्व चाज्ञानं स्वातन्त्र्यान्नित्यसद्गुणे। दौर्लभ्यायैव मोक्षस्य दर्शयन्परमो हरिः। मिथ्यादर्शनदोषेण तेन मुक्तिं न यान्ति च। तमो यान्ति च तेनैव तस्माद्दोषविवर्जितम्। प्रादुर्भावगतं चैव जानीयाद्विष्णुमञ्जसे'ति ब्रह्माण्डे। 'गुणक्रियादयो विष्णोः स्वरूपं नान्यदिष्यते। अतो मिथोऽपि भेदो न तेषां कश्चित्कदाचन। स्वरूपेऽपि विशेषोऽस्ति स्वरूपत्ववदेव तु। भेदाभावेऽपि तेनैव व्यवहारश्च सर्वत'इति परमोपनिषदि। 'अभिन्नत्वमभेदश्च यथा भेदविवर्जितम्। व्यवहार्यं पृथक् च स्यादेवं सर्वे गुणा हरेः। अभेदाभिन्नयोर्भेदो यदि वा भेदभिन्नयोः। अनवस्थितिरेव स्यान्न विशेषणतामतिः। मूलसम्बन्धमज्ञात्वा तस्मादेकमनन्तधा। व्यवहार्यं विशेषेण दुस्तर्कबलतो हरेः। विशेषोऽपि

SGDF
Sri Gargeshwari Digital Foundation

स्वरूपं स स्वनिर्वाहकतास्य चे'ति ब्रह्मतर्के। 'एकमेवाद्वितीयं तन्नेह नानास्ति किंचन'। 'मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति'। यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक्पश्यंस्तानेवानु-विधावती'त्यादि श्रुतेश्च। 'देशः सर्वत्र पुरुषः स्वतन्त्रः कालनित्यता। इत्यादिषु स्वसम्बन्धाद्यथैव गुणरूपिणः। गुणित्वं गुणभोक्तृत्वं स्याद्विष्णोस्तच्च स स्वयमि'ति ब्रह्मतर्के। 'विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः। निर्दुःखानन्दभुङ्नित्यं तत्समीपे स मोदते। मुक्तानां चाश्रयो विष्णुरधिकोऽधिपतिस्तथा। तद्वशा एव ते सर्वे सर्वदैव स ईश्वर'इति परमश्रुतिः। 'अमृतस्यैष सेतुः'। 'सोऽश्नुते सर्वान्कामा-न्सह ब्रह्मणा विपश्चिते'त्यादि च। 'नृपाद्याश्शतधृत्यन्ता मुक्तिगा उत्तरोत्तरम्। गुणैः सर्वैः शतगुणा मोदन्त इति हि श्रुतिरि'ति पाद्मे। अतो निश्शेषदोषवर्जितः पूर्णानन्दगुणो नारायण इति सिद्धम्।

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट् तद्दर्श-तमित्थमेव निहितं देवस्य भर्गो महत्। वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे॥

स्वतंत्रायाखिलेशाय निर्दोषगुणरूपिणे। प्रेयसे मे सुपूर्णाय नमो नारायणाय ते॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्त्वविनिर्णये तृतीयः परिच्छेदः॥ ३ ॥

॥ ग्रन्थश्चायं सम्पूर्णः॥

॥ श्रीकृष्णार्पणमस्तु॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थ(पूर्णप्रज्ञ)भगवत्पादाचार्यविरचित-

श्रीसर्वमूलान्तर्गत-

स्तोत्र-आचारग्रन्थाः

१. स्तोत्रग्रन्थौ

१	नखस्तोत्रम्	११३५
२	द्वादशस्तोत्रम्	११३६-११४५

२. आचारग्रन्थाः

१	कृष्णामृतमहार्णवः	११४६-११६२
२	तन्त्रसारसङ्ग्रहः	११६३-११९७
३	सदाचारस्मृतिः	११९८-१२००
४	यतिप्रणवकल्पः	१२०१-१२०२
५	जयन्तीनिर्णयः	१२०३-१२०४

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

नरसिंहनखस्तोत्रम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-हयग्रीवाय नमः ॥

पान्त्वस्मान्पुरुहूतवैरिबलवन्मातङ्गमाद्यद्धटा-
कुम्भोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कण्ठीरवास्यप्रततसुनखरा दारितारातिदूर-
प्रध्वस्तध्वान्तशान्तप्रविततमनसा भाविता नाकिवृन्दैः ॥ १ ॥

लक्ष्मीकान्त समन्ततो विकलयन्नैवेशितुस्ते समं
पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुर-
त्खद्योतोपमविष्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्
नरसिंहनखस्तोत्रं सम्पूर्णम्

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचर्यविरचितम्

श्रीमद्द्वादशस्तोत्रम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ हरिः ॐ ॥ वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्ज-
नम् ॥ इन्दिरापतिमाद्यादिवरदेशवरप्रदम् ॥ १ ॥ नमामि निखिला-
धीशकिरीटाघृष्टपीठवत् ॥ हृत्तमश्शमनेऽर्काभं श्रीपतेः पादपङ्कजम्
॥ २ ॥ जाम्बूनदाम्बराधारं नितम्बं चिन्त्यमीशितुः ॥ स्वर्णमञ्जीर-
संवीतमारूढं जगदम्बया ॥ ३ ॥ उदरं चिन्त्यमीशस्य तनुत्वेऽप्यखिलं
भरम् ॥ वलित्रयाङ्कितं नित्यमुपगूढं श्रियैकया ॥ ४ ॥ स्मरणीय-
मुरो विष्णोरिन्दिरावासमीशितुः ॥ अनन्तमन्तवदिव भुजयोरन्तरं
गतम् ॥ ५ ॥ शङ्खचक्रगदापद्मधराश्चिन्त्या हरेर्भुजाः ॥ पीनवृत्ता
जगद्रक्षाकेवलोद्योगिनोऽनिशम् ॥ ६ ॥ सन्ततं चिन्तयेत्कण्ठं भास्व-
त्कौस्तुभभासकम् ॥ वैकुण्ठस्याखिला वेदा उद्गीर्यन्तेऽनिशं यतः ॥७॥
स्मरेत यामिनीनाथसहस्रामितकान्तिमत् ॥ भवतापापनोदीड्यं श्रीपते-
र्मुखपङ्कजम् ॥ ८ ॥ पूर्णानन्यसुखोद्भासि मन्दस्मितमधीशितुः ॥
गोविन्दस्य सदा चिन्त्यं नित्यानन्दपदप्रदम् ॥ ९ ॥ स्मरामि भव-
सन्तापहानिदामृतसागरम् ॥ पूर्णानन्दस्य रामस्य सानुरागावलोकनम्
॥ १० ॥ ध्यायेदजस्रमीशस्य पद्मजादिप्रतीक्षितम् ॥ भ्रूभङ्गं पार-
मेष्ठ्यादिपददायि विमुक्तिदम् ॥ ११ ॥ सन्ततं चिन्तयेऽनन्तमन्तकाले
विशेषतः ॥ नैवोदापुर्गृणन्तोऽन्तं यद्गुणानामजादयः ॥ १२ ॥ इति
श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वादशस्तोत्रे प्रथमोऽध्यायः
॥ १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

SGDF
Sri Gurgeshwari Digital Foundation

सुजनोदधिसंवृद्धिपूर्णचन्द्रो गुणार्णवः ॥ अमन्दानन्दसान्द्रो नः प्रीयतामिन्दिरापतिः ॥ १ ॥ रमाचकोरीविधवे दुष्टदर्पोदवह्नये ॥ सत्पान्थजनगेहाय नमो नारायणाय ते ॥ २ ॥ चिदचिद्भेदमखिलं विधायाधाय भुञ्जते ॥ अव्याकृतगृहस्थाय रमाप्रणयिने नमः ॥ ३ ॥ अमन्दगुणसारोऽपि मन्दहासेन वीक्षितः ॥ नित्यमिन्दिरयाऽऽनन्दसान्द्रो यो नौमि तं हरिम् ॥ ४ ॥ वशी वशे न कस्यापि योऽजितो विजिताखिलः ॥ सर्वकर्ता न क्रियते तं नमामि रमापतिम् ॥ ५ ॥ अगुणाय गुणोद्रेकस्वरूपायादि(वि)कारिणे ॥ विदारितारिसङ्घाय वासुदेवाय ते नमः ॥६॥ आदिदेवाय देवानां पतये सादितारये ॥ अनाद्यज्ञानपाराय नमो वरवराय ते ॥ ७ ॥ अजाय जनयित्रेऽस्य विजिताखिलदानव ॥ अजादिपूज्यपादाय नमस्ते गरुडध्वज ॥ ८ ॥ इन्दिरामन्दसान्द्राग्रयकटाक्षप्रेक्षितात्मने ॥ अस्मदिष्टैककार्याय पूर्णाय हरये नमः ॥ ९ ॥ इति श्रीमद्द्वादशस्तोत्रे द्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥

कुरु भुङ्क्ष्व च कर्म निजं नियतं हरिपादविनम्रधिया सततम् ॥ हरिरेव परो हरिरेव गुरुर्हरिरेव जगत्पितृमातृगतिः ॥ १ ॥ न ततोऽस्त्यपरं जगतीड्यतमं परमात्परतः पुरुषोत्तमतः ॥ तदलं बहुलोकविचिन्तनया प्रवणं कुरु मानसमीशपदे ॥ २ ॥ यततोऽपि हरेः पदसंस्मरणे सकलं ह्यघमाशु लयं व्रजति ॥ स्मरतस्तु विमुक्तिपदं परमं स्फुटमेष्यति तत्किमपाक्रियते ॥ ३ ॥ शृणुतामलसत्यवचः परमं शपथेरितमुच्छ्रितबाहुयुगम् ॥ न हरेः परमो न हरेः सदृशः परमः स तु सर्वचिदात्मगणात् ॥ ४ ॥ यदि नाम परो न भवेत्स हरिः कथमस्य वशे जगदेतदभूत् ॥ यदि नाम न तस्य वशे सकलं कथमेव तु नित्यसुखं न भवेत् ॥ ५ ॥ न च कर्मविमामलकालगुणप्रभृतीशमचित्तनु तद्धि यतः ॥ चिदचित्तनु सर्वमसौ तु हरिर्यमयेदिति वैदिकमस्ति वचः ॥ ६ ॥ व्यवहारभिदाऽपि गुरोर्जगतां न तु चित्त-

SGDF
Sri Gargeshwari Digital Foundation

गता स हि चोद्यपरम् ॥ बहवः पुरुषाः पुरुषप्रवरो हरिरित्यवदत्स्वयमेव हरिः ॥ ७ ॥ चतुराननपूर्वविमुक्तगणा हरिमेत्य तु पूर्ववदेव सदा ॥ नियतोच्चविनीचतयैव निजां स्थितिमापुरिति स्म परं वचनम् ॥ ८ ॥ आनन्दतीर्थसन्नाम्ना पूणप्रज्ञाऽभिधायुजा ॥ कृतं हर्यष्टकं भक्त्या पठतः प्रीयते हरिः ॥ ९ ॥ इति श्रीमद्द्वादशस्तोत्रे तृतीयोऽध्यायः ॥ ३ ॥

निजपूर्णसुखामितबोधतनुः परशक्तिरनन्तगुणः परमः ॥ अजरामरणः सकलार्तिहरः कमलापतिरीड्यतमोऽवतु नः ॥ १ ॥ यदसुप्तिगतोऽपि हरिः सुखवान्सुखरूपिणमाहुरतो निगमाः ॥ स्वमतिप्रभवं जगदस्य यतः परबोधतनुं च ततः स्वपतिम् ॥ २ ॥ बहुचित्रजगद्बहुधाकरणात्परशक्तिरनन्तगुणः परमः ॥ सुखरूपममुष्य पदं परमं स्मरतस्तु भविष्यति तत्सततम् ॥ ३ ॥ स्मरणे हि परेशितुरस्य विभोर्मलिनानि मनांसि कुतः करणम् ॥ विमलं हि पदं परमं स्वरतं तरुणार्कसवर्णमजस्य हरेः ॥ ४ ॥ विमलैः श्रुतिशाणनिशाततमैः सुमनोऽसिभिराशु निहत्य दृढम् ॥ बलिनं निजवैरिणमात्मतमोभिदमीशमनन्तमुपास्व हरिम् ॥ ५ ॥ स हि विश्वसृजो विभुशंभुपुरंदरसूर्यमुखानपरानपरान् ॥ सृजतीड्यतमोऽवति हन्ति निजं पदमापयति प्रणतान्सुधिया ॥६॥ परमोऽपि रमेशितुरस्य समो न हि कश्चिदभून्न भविष्यति च ॥ क्वचिदद्यतनोऽपि न पूर्णसदागणितेड्यगुणानुभवैकतनोः ॥ ७ ॥ इति देववरस्य हरेः स्तवनं कृतवान्मुनिरुत्तममादरतः ॥ सुखतीर्थपदाभिहितः पठतस्तदिदं भवति ध्रुवमुच्चसुखम् ॥ ८ ॥ इति श्रीमद्द्वादशस्तोत्रे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥

वासुदेवापरिमेयसुधामन् शुद्धसदोदित सुन्दरी(रि)कान्त ॥ धराधरधारण वेधुरधर्तस्सौधृतिदीधितिवेधृविधात ॥ १ ॥ अधि(धी)कबन्धं रन्धयबोधाच्छिन्धि पि(वि)धानं बन्धुरमद्धा ॥ केशव केशव शाशक वन्देपाशधरार्चित शूरवरेश ॥२॥ नारायणामलकारण वन्दे कारणकारण

SGDF
Sri Gargeshwari Digital Foundation

पूर्ण वरेण्य ॥ माधव माधव साधक वन्दे बाधक बोधक शुद्धसमाधे ॥ ३ ॥ गोविन्द गोविन्दपुरन्दर वन्दे स्कन्दसुनन्दनवन्दितपाद ॥ विष्णो सृजिष्णो ग्रसिष्णो विवन्दे कृष्ण सदुष्ण वधिष्णो सुधृष्णो ॥४॥ मधुसूदन दानवसादन वन्दे दैवतमोदित वेदितपाद ॥ त्रिविक्रम निष्क्रम विक्रम वन्दे सुक्रम संक्रमहुंकृतवक्त्र ॥ ५ ॥ वामन वामन भामन वन्दे सामन सीमन शामन सानो ॥ श्रीधर श्रीधर शन्धर वन्दे भूधर वार्धर कन्धरधारिन् ॥ ६ ॥ हृषीकेश सुकेश परेश विवन्दे शरणेश कलेश बलेश सुखेश ॥ पद्मनाभ शुभोद्भव वन्दे संभृतलोकभराभर भूरे ॥ ७ ॥ दामोदर दूरतरान्तर वन्दे दारितपारगपार परस्मात् ॥ ८ ॥ आनन्दतीर्थमुनीन्द्रकृता हरिगीतिरियं परमादरतः ॥ परलोकविलोकनसूर्यनिभा हरिभक्तिविवर्धनशौण्डतमा ॥ ९ ॥ इति श्रीमद्द्वादशस्तोत्रे पंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥

मत्स्यकरूप लयोदविहारिन् वेदविनेतृचतुर्मुखवन्द्य ॥ कूर्मस्वरूपक मन्दरधारिन्लोकविधारक देववरेण्य ॥१॥ सूकररूपक दानवशत्रो भूमिविधारक यज्ञवराङ्ग ॥ देव नृसिंह हिरण्यकशत्रो सर्वभयान्तक दैवतबन्धो ॥२॥ वामन वामनमाणववेष दैत्यवरान्तक कारणरूप(भूत) ॥ राम भृगूद्वह सूर्जितदीप्ते क्षत्रकुलान्तक शम्भुवरेण्य ॥३॥ राघव राघव राक्षसशत्रो मारुतिवल्लभ जानकीकान्त ॥ देवकि(की)नन्दन सुन्दररूप रुक्मिणिवल्लभ पाण्डवबन्धो ॥४॥ देवकिनन्दन नन्दकुमार वृन्दावनाञ्चन गोकुलचन्द्र ॥ कन्दफलाशन सुन्दररूप नन्दितगोकुल वन्दितपाद ॥ ५ ॥ इन्द्रसुतावक नन्दकहस्त चन्दनचर्चित सुन्दरीनाथ ॥ इन्दीवरोदरदलनयन मन्दरधारिन् गोविन्द वन्दे ॥ ६ ॥ चन्द्रशतानन कुन्दसुहास नन्दितदैवतानन्दसुपूर्ण[1] ॥ दैत्यविमोहक नित्यसुखादे देवसुबोधक बुद्धस्वरूप ॥ ७ ॥ दुष्टकुलान्तक कल्कि-

---

[1] देवकिनन्दनेत्यारभ्य सुपूर्णेत्यन्तं अध्यायादौ केचित्पठन्ति ।

SGDF
Sri Gangeshwari Digital Foundation

स्वरूप धर्मविवर्धन मूलयुगादे ॥ नारायणामल कारणमूर्ते पूर्णगुणार्णव नित्यवि(सु)बोध ॥ ८ ॥ आनन्दतीर्थमुनीन्द्रकृता हरिगाथा पापहरा शुभा नित्यसुखार्था ॥९॥ इति श्रीमद्द्वादशस्तोत्रे षष्ठोऽध्यायः ॥६॥

विश्वस्थितिप्रलयसर्गमहाविभूतिवृत्तिप्रकाशनियमावृतिबन्धमोक्षाः ॥ यस्या अपाङ्गलवमात्रत ऊर्जिता सा श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ १ ॥ ब्रह्मेशशक्ररविधर्मशशाङ्कपूर्वगीर्वाणसन्ततिरियं यदपाङ्गलेशम् ॥ आश्रित्य विश्वविजयं विसृजत्यचिन्त्या श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ २ ॥ धर्मार्थकामसुमतिप्रचयाद्यशेषसन्मङ्गलं विदधते यदपाङ्गलेशम् ॥ आश्रित्य तत्प्रणतसत्प्रणता अपीड्य श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ३ ॥ षड्वर्गनिग्रहनिरस्तसमस्तदोषा ध्यायन्ति विष्णुमृषयो यदपाङ्गलेशम् ॥ आश्रित्य यानपि समेत्य न याति दुःखं श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ४ ॥ शेषाहिवैरिशिवशक्रमनुप्रधानचित्रोरुकर्मरचनं यदपाङ्गलेशम् ॥ आश्रित्य विश्वमखिलं विदधाति धाता श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ५ ॥ शक्रोग्रदीधितिहिमाकरसूर्यसूनुपूर्वं निहत्य निखिलं यदपाङ्गलेशम् ॥ आश्रित्य नृत्यति शिवः प्रकटोरुशक्तिः श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ६ ॥ तत्पादपङ्कजमहासनतामवाप शर्वादिवन्द्यचरणो यदपाङ्गलेशम् ॥ आश्रित्य नागपतिरन्यसुरैर्दुरापां श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ७ ॥ नागारिरुग्रबलपौरुष आप विष्णोर्वाहत्वमुत्तमजवो यदपाङ्गलेशम् ॥ आश्रित्य शक्रमुखदेवगणैरचिन्त्यं श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ८ ॥ आनन्दतीर्थमुनिसन्मुखपङ्कजोत्थं साक्षाद्रमाहरिमनःप्रियमुत्तमार्थम् ॥ भक्त्या पठत्यजितमात्मनि सन्निधाय यः स्तोत्रमेतदभियाति तयोरभीष्टम् ॥९॥ इति श्रीमद्द्वादशस्तोत्रे सप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥ ॥ ॥

वन्दिताशेषवन्द्योरुवृन्दारकं चन्दनाचर्चितोदारपीनांसकम् ॥
इन्दिराचञ्चलापाङ्गनीराजितं मन्दरोद्धारिवृत्तोद्भुजाभोगिनम् ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥१॥ सृष्टिसंहारलीला-
विलासाततं पुष्टषाड्गुण्यसद्विग्रहोल्लासिनम् ॥ दुष्टनिःशेषसंहारकर्मोद्यतं
हृष्टपुष्टानुशिष्टप्रजासंश्रयम् ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्ड-
मण्डनम् ॥ २ ॥ उन्नतप्रार्थिताशेषसंसाधकं सन्नतालौकिकानन्ददश्रीपदम् ॥ भिन्नकर्माशयप्राणिसंप्रेरकं तन्न किं नेति विद्वत्सु मीमांसितम् ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥ ३ ॥
विप्रमुख्यैः सदा वेदवादोन्मुखैः सुप्रतापैः क्षितीशेश्वरैश्चार्चितम् ॥
अप्रतर्क्योरुसंविद्गुणं निर्मलं सु(स)प्रकाशाजरानन्दरूपं परम् ॥ प्रीणयामो
वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥ ४ ॥ अत्ययो यस्य केनापि न
क्वापि हि प्रत्ययो यद्गुणेषूत्तमानां परः ॥ सत्यसंकल्प एको वरेण्यो
वशी मत्यनूनैः सदा वेदवादोदितः ॥ प्रीणयामो वासुदेवं देवता-
मण्डलाखण्डमण्डनम् ॥ ५ ॥ पश्यतां दुःखसन्ताननिर्मूलनं दृश्यतां
दृश्यतामित्यजेशार्चितम् ॥ नश्यतां दूरगं सर्वदाप्यात्मगं वश्यतां
स्वेच्छया सज्जनेष्वागतम् ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्ड-
मण्डनम् ॥ ६ ॥ अग्रजं यः ससर्जाजमग्र्याकृतिं विग्रहो यस्य सर्वे
गुणा एव हि ॥ उग्र आद्योऽपि यस्यात्मजाग्र्यात्मजः सद्गृहीतः सदा
यः परं दैवतम् ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥७॥
अच्युतो यो गुणैर्नित्यमेवाखिलैः प्रच्युतोऽशेषदोषैः सदा पूर्तितः ॥
उच्यते सर्ववेदोरुवादैरजः स्वर्चितो ब्रह्मरुद्रेन्द्रपूर्वैः सदा ॥ प्रीणयामो
वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥ ८ ॥ धार्यते येन विश्वं सदा-
जादिकं वार्यतेऽशेषदुःखं निजध्यायिनाम् ॥ पार्यते सर्वमन्यैर्न
यत्पार्यते कार्यते चाखिलं सर्वभूतैः सदा ॥ प्रीणयामो वासुदेवं
देवतामण्डलाखण्डमण्डनम् ॥ ९ ॥ सर्वपापानि यत्संस्मृतेः संक्षयं
सर्वदा यान्ति भक्त्या विशुद्धात्मनाम् ॥ शर्वगुर्वादिगीर्वाणसंस्थानदः
कुर्वते कर्म यत्प्रीतये सज्जनाः ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्ड-

SGDF
Sri Gurgeshwari Digital Foundation

मण्डनम् ॥ १० ॥ अक्षयं कर्म यस्मिन्परे स्वर्पितं प्रक्षयं यान्ति दुःखानि यन्नामतः ॥ अक्षरो योऽजरः सर्वदैवामृतः कुक्षिगं यस्य विश्वं सदाजादिकम् ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥११॥ नन्द(दि)तीर्थोरुसन्नामिनो नन्दिनः सन्दधानाः सदानन्ददेवे मतिम् ॥ मन्दहासारुणापाङ्गदत्तोन्नतिं नन्दिताशेषदेवादिवृन्दं सदा ॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनम् ॥१२॥ इति श्रीमद्द्वादशस्तोत्रे अष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥

अतिमततमोगिरिसमितिविभेदन पितामहभूतिद गुणगणनिलय ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ १ ॥ विधिभवमुखसुरसततसुवन्दित रमामनोवल्लभ भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ २ ॥ अगणितगुणगणमयशरीर हे विगतगुणेतर भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ३ ॥ अपरिमितसुखनिधिविमलसुदेह हे विगतसुखेतर भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ४ ॥ प्रचलितलयजलविहरण शाश्वत सुखमयमीन हे भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ५ ॥ सुरदितिजसुबलविलुलितमन्दरधर परकूर्म हे भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ६ ॥ सगिरिवरधरातलवह सुसूकर परमविबोध हे भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ७ ॥ अतिबलदितिसुतहृदयविभेदन जयनृहरेऽमल भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ८ ॥ बलिमुखदितिसुतविजयविनाशन जगदवनाजित भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेक-

SGDF
Sri Gargeshwari Digital Foundation

कारण राम रमारमण ॥ ९ ॥ अविजितकुनृपतिसमितिविखण्डन रमावर वीरप भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ १० ॥ खरतरनिशिचरदहनपरामृत रघुवर मानद भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ ११ ॥ सुललिततनुवर वरद महाबल यदुवर पार्थप भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ १२ ॥ दितिसुतमोहन विमलविबोधन परगुण बुद्ध हे भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ १३ ॥ कलिमलहुतवह सुभग महोत्सव शरणद कल्कीश हे भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥ १४ ॥ अखिलजनिविलयपरसुखकारण पर पुरुषोत्तम भव मम शरणम् ॥ शुभतमकथाशय परम सदोदित जगदेककारण राम रमारमण ॥१५॥ इति तव नुतिवरसततरतेर्भव सुशरणमुरु सुखतीर्थमुनेर्भगवन् ॥ १६ ॥ इति श्रीमद्द्वादशस्तोत्रे नवमोऽध्यायः ॥९॥

अवन श्रीपतिरप्रतिरधिकेशादिभवादे ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १ ॥ सुरवंद्याधिप सद्वर भरिताशेषगुणालम् ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ २ ॥ सकलध्वान्तविनाशक परमानन्दसुधाहो ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ३ ॥ त्रिजगत्पोत सदार्चितचरणाशापतिधातो ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ४ ॥ त्रिगुणातीत विधारक परितो देहि सुभक्तिम् ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ५ ॥ शरणं कारण भावन भव मे तात सदालम् ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ६ ॥ मरणप्राणद पालक जगदीशाव सुभक्तिम् ॥ करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ७ ॥ तरुणादित्यसवर्णकचरणाब्जा-

SGDF
Sri Gargeshwari Digital Foundation

मलकीर्ते । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ८ ॥ सलिल-प्रोत्थ सरागकमणिवर्णोच्चनखादे । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ९ ॥ ख(क)जतूणीनिभ पावन वरजङ्घामितशक्ते । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥१०॥ इभहस्तप्रभ शोभन परमोरुस्थर-माले । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ११ ॥ असनो-त्फुल्लसुपुष्पकसमवर्णावरणान्ते । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १२ ॥ शतमोदोद्भवसुन्दरवरपद्मोत्थितनाभे । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १३ ॥ जगदागूहकपल्लवसमकुक्षे शरणादे । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १४ ॥ जगदम्बामलसुन्दरगृहवक्षोवरयोगिन् । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥१५॥ दितिजान्तप्रदचक्रदरगदायुग्वरबाहो । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १६ ॥ परमज्ञानमहानिधिवदन श्रीरमणेन्दो । करुणापूर्ण वरप्रदचरितं ज्ञापय मे ते ॥ १७ ॥ निखिलाघौघविनाशकपरसौख्यप्रददृष्टे । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १८ ॥ परमानन्दसुतीर्थ(सु)मुनिराजो हरिगाथाम् । कृतवान्नित्यसुपूर्णकपरमानन्दपदैषी ॥ १९ ॥ इति श्रीमद्द्वादशस्तोत्रे दशमोऽध्यायः ॥ १० ॥

उदीर्णमजरं दिव्यममृतस्यन्द्यधीशितुः । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ १ ॥ सर्ववेदपदोद्गीतमिन्दिरावासमुत्तमम् । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ २ ॥ सर्वदेवादिदेवस्य विदारितमहत्तमः । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ ३ ॥ उदारमादरान्नित्यमनिन्द्यं सुन्दरीपतेः । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ ४ ॥ इन्दीवरोदरनिभं सुपूर्णं वादिमोहदम् । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ ५ ॥ दातृ सर्वामरैश्वर्य-विमुक्त्यादेरहो वरम् । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥६॥

SGDF
Sri Gangeshwari Digital Foundation

दूराद्दूरतरं यत्तु तदेवान्तिकमन्तिकात् । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ ७ ॥ पूर्णसर्वगुणैकार्णमनाद्यन्तं सुरेशितुः । आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥ ८ ॥ आनन्दतीर्थमुनिना हरेरानन्दरूपिणः । कृतं स्तोत्रमिदं पुण्यं पठन्नानन्दतामियात् ॥ ९ ॥

इति श्रीमद्द्वादशस्तोत्रे एकादशोऽध्यायः ॥ ११ ॥

आनन्द मुकुन्द अरविन्दनयन । आनन्दतीर्थपरानन्दवरद ॥१॥ सुन्दरीमन्दिर गोविन्द वन्दे । आनन्दतीर्थपरानन्दवरद ॥ २ ॥ चन्द्रसुरेन्द्रसुवन्दित वन्दे । आनन्दतीर्थपरानन्दवरद ॥ ३ ॥ चन्द्रकमन्दिरनन्दक (मन्दारस्यन्दितमन्दिर) वन्दे । आनन्दतीर्थपरानन्दवरद ॥ ४ ॥ वृन्दारकवृन्दसुवन्दित वन्दे । आनन्दतीर्थपरानन्दवरद[1] ॥ ५ ॥ मन्दारस्नूनसुचर्चित वन्दे । आनन्दतीर्थपरानन्दवरद[2] ॥ ६ ॥ इन्दिरानन्दक सुन्दर वन्दे । आनन्दतीर्थपरानन्दवरद ॥ ७ ॥ मन्दिरस्यन्दन(न्दित)स्यन्दक वन्दे । आनन्दतीर्थपरानन्दवरद ॥ ८ ॥ आनन्दचन्द्रिकास्यन्दक वन्दे । आनन्दतीर्थपरानन्दवरद ॥ ९ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वादशस्तोत्रे द्वादशोऽध्यायः ॥ १२ ॥

॥ इति श्रीमद्द्वादशस्तोत्रं सम्पूर्णम् ॥

---

1 श्लोकोऽयं केषुचित्कोशेषु नास्ति ।

2 अयमपि तथा ।

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

कृष्णामृतमहार्णवः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ हरिः ॐ ॥ अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः श्रुतः । यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥ १ ॥ तापत्रयेण सन्तप्तं यदेतदखिलं जगत् । वक्ष्यामि शान्तये तस्य कृष्णामृतमहार्णवम् ॥ २ ॥ ते नराः पशवो लोके किं तेषां जीवने फलम् । यैर्न लब्धा हरेर्दीक्षा नार्चितो वा जनार्दनः ॥ ३ ॥ संसारेऽस्मिन्महाघोरे जन्मरोगभयाकुले । अयमेको महाभागः पूज्यते यदधोक्षजः ॥ ४ ॥ स नाम सुकृती लोके कुलं तेनाभ्यलङ्कृतम् । आधारः सर्वभूतानां येन विष्णुः प्रसादितः ॥ ५ ॥ यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् । तद्विशिष्टफलं नृणां सदैवाराधनं हरेः ॥ ६ ॥ कलौ कलिमलध्वंसि सर्वपापहरं हरिम् । येऽर्चयन्ति नरा नित्यं तेऽपि वन्द्या यथा हरिः ॥ ७ ॥ नास्ति श्रेयस्तमं नृणां विष्णोराराधनान्मुने । युगेऽस्मिंस्तामसे लोके सततं पूज्यते नृभिः ॥८॥ अर्चिते सर्वदेवेशे शङ्खचक्रगदाधरे । अर्चिताः सर्वदेवाः स्युर्यतः सर्वगतो हरिः ॥९॥ स्वर्चिते सर्वलोकेशे सुरासुरनमस्कृते । केशवे कंसकेशिघ्ने न याति नरकं नरः ॥ १० ॥ सकृदभ्यर्च्य गोविन्दं बिल्वपत्रेण मानवः । मुक्तिभागी निरातङ्की विष्णुलोके चिरं वसेत् ॥ ११ ॥

शंकरः (उवाच) ॥ सकृदभ्यर्चितो येन देवदेवो जनार्दनः । यत्कृतं तत्कृतं तेन सम्प्राप्तं परमं पदम् ॥ १२ ॥ सकृदभ्यर्चितो

SGDF
Sri Gargeshwari Digital Foundation

येन हेलयाऽपि नमस्कृतः । स याति परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ १३ ॥

नारदः ॥

समस्तलोकनाथस्य देवदेवस्य शार्ङ्गिणः । साक्षाद्भगवतो विष्णोः पूजनं जन्मनः फलम् ॥ १४ ॥

पुलस्त्यः ॥

भक्त्या दूर्वाङ्कुरैः पुम्भिः पूजितः पुरुषोत्तमः । हरिर्ददाति हि फलं सर्वयज्ञैश्च दुर्लभम् ॥ १५ ॥ विधिना देवदेवेशः शङ्खचक्रधरो हरिः । फलं ददाति सुलभं सलिलेनापि पूजितः ॥ १६ ॥ नरके पच्यमानस्तु यमेन परिभाषितः । किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥ १७ ॥

धर्मः ॥

द्रव्याणामप्यभावे तु सलिलेनापि पूजितः । यो ददाति स्वकं स्थानं स त्वया किं न पूजितः ॥ १८ ॥ नारसिंहो हृषीकेशः पुण्डरीकनिभेक्षणः । स्मरणान्मुक्तिदो नृणां स त्वया किं न पूजितः ॥ १९ ॥

ब्रह्मा ॥

गर्भस्थिता मृता वापि मुषितास्ते सुदूषिताः । न प्राप्ता यैर्हरेर्दीक्षा सर्वदुःखविमोचनी ॥ २० ॥

मार्कण्डेयः ॥

सकृदभ्यर्चितो येन देवदेवो जनार्दनः । यत्कृत्यं तत्कृतं तेन सम्प्राप्तं परमं पदम् ॥ २१ ॥ धर्मार्थकाममोक्षाणां नान्योपायस्तु विद्यते । सत्यं ब्रवीमि देवेश हृषीकेशार्चनादृते ॥ २२ ॥ तस्य

SGDF
Sri Gargeshwari Digital Foundation

यज्ञवराहस्य विष्णोरमिततेजसः । प्रणामं ये प्रकुर्वन्ति तेषामपि नमोनमः ॥ २३ ॥

मरीचिः ॥

अनाराधितगोविन्दैर्नरैः स्थानं नृपात्मज । न हि सम्प्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥ २४ ॥

अत्रिः ॥

परः पराणां पुरुषस्तुष्टो यस्य जनार्दनः । स चाप्नोत्यक्षयं स्थानमेतत्सत्यं मयोदितम् ॥ २५ ॥

अङ्गिराः ॥

यस्यान्तः सर्वमेवेदमच्युतस्याव्ययात्मनः । तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि ॥ २६ ॥

पुलस्त्यः ॥

परं ब्रह्म परं धाम योऽसौ ब्रह्म सनातनम् । तमाराध्य हरिं यान्ति मुक्तिमप्यतिदुर्लभाम् ॥ २७ ॥

पुलहः ॥

ऐन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् । प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ॥ २८ ॥ प्राप्नोत्याराधिते विष्णौ मनसा यद्यदिच्छति । त्रैलोक्यान्तर्गतं स्थानं किमु लोकोत्तरोत्तरम् ॥ २९ ॥ ये स्मरन्ति सदा विष्णुं शङ्खचक्रगदाधरम् । सर्वपापविनिर्मुक्ताः परं ब्रह्म विशन्ति ते ॥ ३० ॥ ततोऽनिरुद्धं देवेशं प्रद्युम्नं च ततः परम् । ततः सङ्कर्षणं देवं वासुदेवं परात्परम् ॥ ३१ ॥ वासुदेवात्परं नास्ति इति वेदान्तनिश्चयः । वासुदेवं प्रविष्टानां पुनरावर्तनं कुतः ॥ ३२ ॥

आत्रेयः ॥

यो यानिच्छेन्नरः कामान्नारी वा वरवर्णिनी । तान्समाप्नोति विपुलान्समाराध्य जनार्दनम् ॥ ३३ ॥

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मा ॥

बाहुभ्यां सागरं तर्तुं क इच्छति पुमान्भुवि । वासुदेवमनाराध्य को मोक्षं गन्तुमिच्छति ॥ ३४ ॥

कौशिकः ॥

अनाराधितगोविन्दा ये नरा दुःखभागिनः । आराध्य वासुदेवं स्युर्नित्यानन्दैकभागिनः ॥ ३५ ॥

शंकरः ॥

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते । प्रायश्चित्तं तु तस्योक्तं हरिसंस्मरणं परम् ॥ ३६ ॥ (नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः । तावत्कर्तुं न शक्नोति पातकं पातकी जनः) ॥३६॥

ब्रह्मा ॥

न ह्यपुण्यवतां लोके मूढानां कुटिलात्मनाम् । भक्तिर्भवति गोविन्दे स्मरणं कीर्तनं तथा ॥ ३७ ॥ तदैव पुरुषो मुक्तो जन्मदुःखजरादिभिः । जितेन्द्रियो विशुद्धात्मा यदैव स्मरते हरिम् ॥३८॥ प्राप्ते कलियुगे घोरे धर्मज्ञानविवर्जिते । न कश्चित्स्मरते देवं कृष्णं कलिमलापहम् ॥ ३९ ॥ न कलौ देवदेवस्य जन्मदुःखापहारिणः । करोति मर्त्यो मूढात्मा स्मरणं कीर्तनं हरेः ॥ ४० ॥ ये स्मरन्ति सदा विष्णुं विशुद्धेनान्तरात्मना । ते प्रयान्ति भयं त्यक्त्वा विष्णुलोकमनामयम् ॥ ४१ ॥ गर्भजन्मजरारोगदुःखसंसारबन्धनैः । न बाध्यते नरो नित्यं वासुदेवमनुस्मरन् ॥ ४२ ॥ यममार्गं महाघोरं नरकाणि यमं तथा । स्वप्नेऽपि नैव पश्येत यः स्मरेद्गरुडध्वजम् ॥४३॥ हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः । पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥ ४४ ॥ गोविन्दस्मरणं पुंसां पापराशिमहाचलम् । असंशयं दहत्याशु तूलराशिमिवानलः ॥ ४५ ॥

SGDF
Sri Gargeshwari Digital Foundation

अगस्त्यः ॥

स्मरणादेव कृष्णस्य पापसङ्घातपञ्जरः । शतधा भेदमायाति गिरिर्वज्रहतो यथा ॥ ४६ ॥ कृष्णे रताः कृष्णमनुस्मरन्ति तद्भाविता-स्तद्गतमानसाश्च । भिन्नेऽपि देहे प्रविशन्ति कृष्णं हविर्यथा मन्त्रहुतं हुताशे ॥४७॥ सा हानिस्तन्महच्छिद्रं सा चान्धजडमूकता । यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥ ४८ ॥ नारायणो नाम नरो नराणां प्रसिद्धचोरः कथितः पृथिव्याम् । अनेकजन्मार्जितपापसञ्चयं हरत्यशेषं स्मृतमात्र एव ॥ ४९ ॥ यस्य संस्मरणादेव वासुदेवस्य चक्रिणः । कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ ५० ॥ किं तस्य बहुभिस्तीर्थैः किं तपोभिः किमध्वरैः । यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥५१॥ ये मानवा विगतरागपरावरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति । ध्यानेन तेन हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबन्ति ॥ ५२ ॥ हे चित्त चिन्तयस्वेह वासुदेवमहर्निशम् । नूनं यश्चिन्तितः पुंसां हन्ति संसारबन्धनम् ॥५३॥ आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ५४ ॥ स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥ ५५ ॥ वेदेषु यज्ञेषु तपस्सु चैव दानेषु तीर्थेषु व्रतेषु यच्च । इष्टेषु पूर्तेषु च यत्प्रदिष्टं पुण्यं स्मृते तत्खलु वासुदेवे ॥ ५६ ॥ आराध्यैव नरो विष्णुं मनसा यद्यदिच्छति । फलं प्राप्नोति विपुलं भूरि स्वल्पमथापि वा ॥ ५७ ॥ यन्नामकीर्तनं भक्त्या विलापनमनुत्तमम् । मैत्रेयाशेषपापानां धातूना-मिव पावकः ॥ ५८ ॥ कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् । प्रयाति विलयं सद्यः सकृत्सङ्कीर्तितेऽच्युते ॥ ५९ ॥ अनायासेन चायान्ति मुक्तिं केशवसंश्रिताः । तद्विघाताय जायन्ते शक्राद्याः परिपन्थिनः ॥ ६० ॥ चतुःसागरमासाद्य जम्बूद्वीपोत्तमे क्वचित् ।

SGDF
Sri Gargeshwari Digital Foundation

न पुमान्केशवादन्यः सर्वपापचिकित्सकः ॥ ६१ ॥ यदभ्यर्च्य हरिं भक्त्या कृते वर्षशतैरपि । फलं प्राप्नोति विपुलं कलौ सङ्कीर्त्य केशवम् ॥ ६२ ॥ क्षीयते तु यदा धर्मः प्राप्ते घोरे कलौ युगे । तदा न कीर्तयेत्कश्चिन्मुक्तिदं देवमच्युतम् ॥ ६३ ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः । पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगै-रिव ॥ ६४ ॥ नारायणेतिमन्त्रोस्ति वागस्ति वशवर्तिनी । तथापि नरके घोरे पतन्तीत्येतदद्भुतम् ॥ ६५ ॥ आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः । सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति ॥ ६६ ॥

कौशिकः ॥

सकृदुच्चरितं यैस्तु कृष्णेति न विशन्ति ते । गर्भागारगृहं मातुर्यमलोकं च दुःसहम् ॥ ६७ ॥ क्व नाकपृष्ठगमनं पुनरावृत्ति-लक्षणम् । क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥ ६८ ॥ बुद्ध्वा बुद्ध्वाऽभ्यसेदेतद्धरिरित्यक्षरद्वयम् । स्मरणात्कीर्तनाद्यस्य न पुनर्जायते भुवि ॥ ६९ ॥ हे जिह्वे मम निःस्नेहे हरिं किं नानुभाषसे । हरिं वदस्व कल्याणि संसारोदधिनौर्हरिः ॥ ७० ॥ असारे खलु संसारे सारात्सारतरो हरिः । पुण्यहीना न विन्दन्ति सारङ्गाश्च यथा जलम् ॥ ७१ ॥ कुरुक्षेत्रेण किं तस्य किं काश्या पुष्करेण किम् । जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ ७२ ॥

ब्रह्मा ॥

असारे खलु संसारे सारमेकं निरूपितम् । समस्तलोकनाथस्य सारमाराधनं हरेः ॥ ७३ ॥ सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पणम् । तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ ७४ ॥ यस्तु विष्णुपरो नित्यं दृढभक्तिर्जितेन्द्रियः । स्वगृहेऽपि वसन्याति तद्विष्णोः परमं पदम् ॥ ७५ ॥

SGDF
Sri Gangeshwari Digital Foundation

शंकरः ॥

साधु साधु महाभाग साधु दानवनाशन । यन्मां पृच्छसि धर्मज्ञ केशवाराधनं प्रति ॥ ७६ ॥ निमिषं निमिषार्धं वा मुहूर्तमपि भार्गव । नादग्धाशेषपापानां भक्तिर्भवति केशवे ॥ ७७ ॥ किं तेन मनसा कार्यं यन्न तिष्ठति केशवे । मनो मुक्तिफलावाप्तौ कारणं सुप्रयोजितम् ॥ ७८ ॥ रोगो नाम न सा जिह्वा यया न स्तूयते हरिः । गर्तौ नाम न तौ कर्णौ याभ्यां तत्कर्म न श्रुतम् ॥ ७९ ॥ नूनं तत्कण्ठशालूकमथवाऽप्युपजिह्विका । रोगो नाम न सा जिह्वा या न वक्ति हरेर्गुणान् ॥ ८० ॥ भारभूतैः करैः कार्यं किं तस्य नृपशोर्द्विज । यैर्हि न क्रियते विष्णोर्गृहसम्मार्जनादिकम् ॥ ८१ ॥ चरणौ तौ तु सफलौ केशवालयगामिनौ । ते च नेत्रे महाभाग याभ्यां संदृश्यते हरिः ॥ ८२ ॥ किं तस्य चरणैः कार्यं वृथा सञ्चरणैर्द्विज । यैर्हि न व्रजते जन्तुः केशवालयदर्शने ॥८३॥ वेदवेदाङ्गविदुषां मुनीनां भावितात्मनाम् । ऋषित्वमपि धर्मज्ञ विज्ञेयं तत्प्रसादजम् ॥ ८४ ॥ विचित्ररत्नपर्यङ्के महाभोगे च भोगिनः । रमन्ते नाकिरामाभिः केशवस्मरणात्फलम् ॥ ८५ ॥ अश्वमेधसहस्राणां यः सहस्रं समाचरेत् । नासौ तत्फलमाप्नोति तद्भक्तैर्यदवाप्यते ॥८६॥ रेरे मनुष्याः पुरुषोत्तमस्य करौ न कस्मान्मुकुलीकुरुध्वम् । क्रियाजुषां को भवतां प्रयासः फलं हि यत्तत्पदमच्युतस्य ॥८७॥ विष्णोर्विमानं यः कुर्यात्सकृद्भक्त्या प्रदक्षिणम् । अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ ८८ ॥ प्रदक्षिणं तु यः कुर्याद्धरिं भक्तिसमन्वितः । हंसयुक्तविमानेन विष्णोर्लोकं स गच्छति ॥ ८९ ॥ तीर्थकोटिसहस्राणि व्रतकोटिशतानि च । नारायणप्रमाणस्य कलां नार्हन्ति षोडशीम् ॥ ९० ॥ उरसा शिरसा दृष्ट्या मनसा वचसा तथा । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥ ९१ ॥ शाठ्येनापि

SGDF
Sri Gurgeshwari Digital Foundation

नमस्कारं कुर्वतः शार्ङ्गपाणये। शतजन्मार्जितं पापं नश्यत्येव न संशयः ॥ ९२ ॥ संसारार्णवमग्नानां नराणां पापकर्मणाम्। नान्योद्धर्ता जगन्नाथं मुक्त्वा नारायणं प्रभुम् ॥ ९३ ॥ रेणुकुण्ठितगात्रस्य कणा यावन्ति भारत। तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥९४॥ पावनं विष्णुनैवेद्यं सुभोज्यमृषिभिः स्मृतम्। अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणं चरेत् ॥ ९५ ॥ कोटचैन्दवसहस्रैस्तु मासोपोषणकोटिभिः। तत्फलं लभते पुम्भिर्विष्णोर्नैवेद्यभक्षणात् ॥ ९६ ॥ विष्णोर्नैवेद्यशेषेण यो भुनक्ति दिनेदिने। सिक्थे सिक्थे लभेत्पुण्यं चान्द्रायणशताधिकम् ॥ ९७ ॥ नैवेद्यशेषं तुलसीविमिश्रितं विशेषतः पादजलेन सिक्तम्। योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ ९८ ॥ त्रिरात्रफलदा नद्यो याः काश्चिद्समुद्रगाः। समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥ ९९ ॥ षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी। विष्णुपादोदकस्यैताः कलां नार्हन्ति षोडशीम् ॥१००॥ गङ्गाप्रयागगयपुष्करनैमिषाणि संसेवितानि बहुशः कुरुजाङ्गलानि। कालेन तीर्थसलिलानि पुनन्ति पापं पादोदकं भगवतः प्रपुनाति सद्यः ॥ १०१ ॥ यानि कानि च तीर्थानि ब्रह्माण्डान्तर्गतानि च। विष्णुपादोदकस्यैताः कलां नार्हन्ति षोडशीम् ॥ १०२ ॥ स्नात्वा पादोदकं विष्णोः पिबन् शिरसि धारयेत्। सर्वपापविनिर्मुक्तो वैष्णवीं सिद्धिमाप्नुयात् ॥ १०३ ॥ यथा पादोदकं पुण्यं निर्माल्यं चानुलेपनम्। नैवेद्यं धूपशेषश्च आरार्तिश्च तथा हरेः ॥ १०४ ॥ तुलस्यास्तु रजोजुष्टं नैवेद्यस्य च भक्षणम्। निर्माल्यं शिरसा धार्यं महापातकनाशनम् ॥ १०५ ॥ भक्त्या वा यदि वाऽभक्त्या चक्राङ्कितशिलां प्रति। दर्शनं स्पर्शनं वापि सर्वपापप्रणाशनम् ॥ १०६ ॥ शालग्रामशिला यत्र तत्र सन्निहितो हरिः। तत्र स्नानं च दानं च वाराणस्याः शताधिकम् ॥१०७॥

SGDF
Sri Gargeshwari Digital Foundation

म्लेच्छदेशेऽशुचौ वापि चक्राङ्को यत्र तिष्ठति । योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे ॥ १०८ ॥ शालग्रामोद्भवो देवः शैलं चक्राङ्कमण्डलम् । यत्रापि नीयते तत्र वाराणस्याः शताधिकम् ॥ १०९ ॥ शालग्रामोद्भवो देवो देवो द्वारवती भवः । उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ११० ॥ हरिणा मुक्तिदानीह मुक्तिस्थानानि सर्वशः । स यस्य सर्वभावेषु तस्य तैः किं प्रयोजनम् ॥ १११ ॥ हरिर्याति हरिर्याति दस्युव्याजेन यो वदेत् । सोऽपि सद्गतिमाप्नोति गतिं सुकृतिनो यथा ॥ ११२ ॥ वासुदेवं परित्यज्य योऽन्यं देवमुपासते । त्यक्त्वाऽमृतं स मूढात्मा भुङ्क्ते हालाहलं विषम् ॥११३॥ त्यक्त्वाऽमृतं यथा कश्चिदन्यपानं पिबेन्नरः । तथा हरिं परित्यज्य योऽन्यं दैवमुपासते ॥ ११४ ॥ स्वधर्मं तु परित्यज्य परधर्मं चरेद्यथा । तथा हरिं परित्यज्य योऽन्यं दैवमुपासते ॥ ११५ ॥ यथा गङ्गोदकं त्यक्त्वा पिबेत्कूपोदकं नरः । तथा हरिं परित्यज्य योऽन्यं दैवमुपासते ॥ ११६ ॥ गां च त्यक्त्वा स मूढात्मा गर्दभीं वन्दते यथा । तथा हरिं परित्यज्य योऽन्यं दैवमुपासते ॥ ११७ ॥ स्वमातरं परित्यज्य श्वपाकीं वन्दते यथा । तथा हरिं परित्यज्य योऽन्यं दैवमुपासते ॥ ११८ ॥ वासुदेवं परित्यज्य योऽन्यं दैवमुपासते । तृषितो जाह्नवी तीरे कूपं खनति दुर्मतिः ॥ ११९ ॥ यावत्स्वस्थमिदं पिण्डं नीरुजं करणान्वितम् । तावत्कुरुष्वात्महितं पश्चात्तापेन तप्यसे ॥ १२० ॥ यावत्स्वास्थ्यं शरीरेषु करणेषु च पाटवम् । तावदर्चय गोविन्दमायुष्यं सार्थकं कुरु ॥ १२१ ॥ स्मर्यतां तु हृषीकेशो हृषीकेषु दृढेषु च । अदृढेषु हृषीकेषु हृषीकेशं स्मरन्ति के ॥ १२२ ॥ यावच्चिन्तयते जन्तुर्विषयान्विषसन्निभान् । तावच्चेत्स्मरते विष्णुं को न मुच्येत बन्धनात् ॥ १२३ ॥ यावत्प्रलपते जन्तुर्लोकवार्तादिभिः सदा । तावच्चेद्वदते विष्णुं को न मुच्येत बन्धनात् ॥ १२४ ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीसूतः ॥

ज्ञात्वा विप्रैस्तिथिं सम्यग्दैवज्ञैः समुदीरिताम् । कर्तव्य उपवासस्तु अन्यथा नरकं व्रजेत् ॥ १२५ ॥ क्षये वाप्यथवा वृद्धौ सम्प्राप्ते वा दिनक्षये । उपोष्या द्वादशी पुण्या पूर्वविद्धां परित्यजेत् ॥ १२६ ॥ पूर्वविद्धां प्रकुर्वाणो नरो धर्मान्निकृन्तति । सन्ततेस्तु विनाशाय सम्पदो हरणाय च ॥ १२७ ॥ कलावेधे तु विप्रेन्द्र दशम्यैकादशीं त्यजेत् । सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव सन्त्यजेत् ॥ १२८ ॥ श्वदृतौ पञ्चगव्यं च दशम्या दूषितां त्यजेत् । एकादशीं द्विजश्रेष्ठ पक्षयोरुभयोरपि ॥ १२९ ॥ तस्माद्विप्र न विद्धा हि कर्तव्यैकादशी क्वचित् । विद्धा हन्ति पुरापुण्यं श्राद्धं च वृषलीपतिः ॥ १३० ॥ जप्तं दत्तं हुतं स्नातं तथा पूजा कृता हरेः । तत्सर्वं विलयं याति तमः सूर्योदये यथा ॥ १३१ ॥ एकादश्यां यदा ब्रह्मन् दिनक्षयतिथिर्भवेत् । उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥ १३२ ॥ प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः । सम्पूर्णा इति विज्ञेया हरिवासरवर्जिताः ॥ १३३ ॥ अरुणोदयकाले तु दशमी यदि दृश्यते । पापमूलं तदा ज्ञेयमेकादश्युपवासनम् ॥१३४॥ अरुणोदयवेलायां दशमी यदि दृश्यते । न तत्रैकादशी कार्या धर्मकामार्थनाशिनी ॥ १३५ ॥ चतस्रो घटिकाः प्रातररुणोदय उच्यते । यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥ १३६ ॥ उदयात्प्राग्यदा विप्रा मुहूर्तद्वयसंयुता । सम्पूर्णैकादशीनाम तत्रैवोपवसेद्गृही ॥ १३७ ॥ उदयात्प्राक् त्रिघटिकाव्यापिन्येकादशी यदा । सन्दिग्धैकादशी नाम वर्ज्या धर्मार्थनाशिनी ॥ १३८ ॥ पुत्रपौत्रप्रवृद्ध्यर्थं द्वादश्यामुपवासयेत् । तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥ १३९ ॥ उदयात्प्राक् द्विघटिकाव्यापिन्येकादशी यदा । सङ्कीर्णैकादशी नाम वर्ज्या धर्मार्थकाङ्क्षिभिः ॥ १४० ॥ पुत्रराज्य-

SGDF
Sri Gargeshwari Digital Foundation

प्रवृद्ध्यर्थं द्वादश्यामुपवासनम् । तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥ १४१ ॥ दशमीशेषसंयुक्ता गान्धार्या समुपोषिता । तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् ॥ १४२ ॥ अपीषद्दशमी-विद्धा सदा तां परिवर्जयेत् । सुराबिन्दुसमायुक्तां प्रवदन्ति मनीषिणः ॥ १४३ ॥ बह्वागमविरोधेषु ब्राह्मणेषु विवादिषु । उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥ १४४ ॥ एकादश्यां तु विद्धायां सम्प्राप्ते श्रवणे तथा । उपोष्या द्वादशी पुण्या पक्षयो-रुभयोरपि ॥ १४५ ॥ उपरागसहस्राणि व्यतीपातायुतानि च । अमालक्षं तु द्वादश्याः कलां नार्हन्ति षोडशीम् ॥ १४६ ॥ शुद्धापि द्वादशी ग्राह्या परतो द्वादशी यदि । विषं तु दशमी ज्ञेयाऽमृतं चैकादशीतिथिः ॥ १४७ ॥ विषप्रधाना वर्ज्या साऽमृता ग्राह्या प्रयत्नतः । द्वादश्यां भोजनं चैव विद्धायां ह्युपोषणम् ॥ १४८ ॥ यः कुर्यान्मन्दबुद्धित्वान्निरयं सोऽधिगच्छति । यानि कानि च वाक्यानि विद्धोपोषपराणि च ॥१४९॥ धनदार्चापराणि स्युर्वैष्णवी न दशायुता । अथवा मोहनार्थाय मोहिन्या भगवान्हरिः ॥ १५० ॥ अर्थितः कारयामास व्यासरूपी जनार्दनः । धनदार्चाविवृद्ध्यर्थं महावित्तलयस्य च ॥ असुराणां मोहनार्थं पाषण्डानां विवृद्धये ॥१५१॥ आत्मस्वरूपाविज्ञप्त्यै स्वलोकाप्राप्तये तथा । एवं विद्धां परित्यज्य द्वादश्यामुपवासयेत् ॥१५२॥ कोटिजन्मार्जितं पापमेकयैव विनश्यति । ततः कोटिगुणं चापि निषिद्धस्येतरैर्जनैः ॥ १५३ ॥ यदनादिकृतं पापं यदूर्ध्वं यत्करिष्यति । तत्सर्वं विलयं याति परेषामुपवासनात् ॥ ॥ १५४ ॥ न च तस्मात्प्रियतमः केशवस्य ममापि च । एकादश्यां ह्यवेधे तु द्वादशीं न परित्यजेत् ॥ १५५ ॥ पारणे मरणे चैव तिथिस्तात्कालिकी स्मृता । ब्रह्मचारी गृहस्थो वा वानप्रस्थो यति-स्तथा ॥ १५६ ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो भर्तृमती तथा ।

SGDF
Sri Gargeshwari Digital Foundation

अभर्तृका तथान्ये च सूतवैदेहिकादयः ॥ १५७ ॥ एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । एकादश्यां तु यो भुङ्क्ते मोहेनावृतचेतसा ॥ १५८ ॥ शुक्लायामथ कृष्णायां निरयं याति स ध्रुवम् । विवेचयति यो मोहाच्छुक्ला कृष्णेति पापकृत् ॥ १५९ ॥ एकादशीं स वै याति निरयं नात्रसंशयः । यथा गौर्नैव हन्तव्या शुक्ला कृष्णेति भामिनि ॥ १६० ॥ एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । यानि कानि च वाक्यानि कृष्णैकादशिवर्जने ॥ १६१ ॥ भरण्यादिनिषेधे च तानि काम्यफलार्थिनाम् । कामिनोऽपि हि सिद्ध्यर्थं कुर्युरेवोपवासनम् ॥ १६२ ॥ प्रीणनार्थं हरेर्नित्यं न तु काम्यव्यपेक्षया । तस्माच्छुक्लामथो कृष्णां भरण्यादियुतामपि ॥ १६३ ॥ प्रत्यवायनिषेधार्थामुपवासीत नित्यशः । प्रीणनार्थं हरेश्चापि विष्णुलोकस्य चाप्तये ॥ १६४ ॥ कला वार्धकला वापि परतो द्वादशी यदि । द्वादशद्वादशीर्हन्ति पूर्वेद्युः पारणे कृते ॥१६५॥ अतिरिक्ता द्वादशी चेद्यस्तां नोपोषयेद्यदि । द्वादशद्वादशीर्हन्ति द्वादशी चातिलङ्घिता ॥ १६६ ॥ द्वादश्यामतिरिक्तायां यो भुङ्क्ते पूर्ववासरे । द्वादशद्वादशीर्हन्ति द्वादशीं न परित्यजेत् ॥ १६७ ॥ द्वादशीं श्रवणोपेतां यो नोपोष्यात्सुमन्दधीः । पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥ १६८ ॥ एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् । न तत्र विधिलोपः स्यादुभयोर्देवता हरिः ॥ १६९ ॥ अल्पायामपि विप्रेन्द्र पारणं तु कथं भवेत् । पारयित्वोदकेनापि भुञ्जानो नैव दुष्यति ॥ अशितानशिता यस्मादापो विद्वद्भिरीरिताः ॥ १७० ॥ अम्भसा केवलेनैव करिष्ये व्रतपारणम् । तद्विशिष्टं मुनिप्रोक्तमशितानशितं च यत् ॥ १७१ ॥ न काशी न गया गङ्गा न रेवा न च पुष्करम् । न चापि कौरवं क्षेत्रं तुल्यं भूप हरेर्दिनात् ॥ १७२ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च । एकादश्युपवासस्य कलां

SGDF
Sri Gargeshwari Digital Foundation

नार्हन्ति षोडशीम् ॥१७३॥ एकादशीसमुत्थेन वह्निना पातकेन्धनम् । भस्मीभवति राजेन्द्र अपि जन्मशतोद्भवम् ॥ १७४ ॥ नेदृशं पावनं किञ्चिन्नराणां भुवि विद्यते । यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥ १७५ ॥ तावत्पापानि देहेस्मिंस्तिष्ठन्ति मनुजाधिप । यावन्नोपोषयेज्जन्तुः पद्मनाभदिनं शुभम् ॥ १७६ ॥ एकादशेन्द्रियैः पापं यत्कृतं भवति प्रभो । एकादश्युपवासेन तत्सर्वं विलयं व्रजेत् ॥ ॥ १७७ ॥ एकादशीसमं किञ्चित्पवित्रं न हि विद्यते । व्याजेनापि कृता राजन्न दर्शयति भास्करिम् ॥ १७८ ॥

श्रीव्यासः ॥

अन्नं निवेदयेन्मह्यं प्राप्ते मद्वासरे शुभे । तस्यापि नरकप्राप्तिः किं पुनर्भोजने कृते ॥ १७९ ॥ स ब्रह्महा स गोघ्नश्च स स्तेनो गुरुतल्पगः । एकादश्यां तु भुञ्जानः पक्षयोरुभयोरपि ॥ १८० ॥ वरं स्वमातृगमनं वरं गोमांसभक्षणम् । वरं हत्या सुरापानमेकादश्यन्नभक्षणात् ॥ १८१ ॥ एकादशीदिने पुण्ये भुञ्जते ये नराधमाः । अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥ १८२ ॥ पृथिव्यां यानि पापानि ब्रह्महत्यादिकानि च । अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ॥ १८३ ॥

रुग्माङ्गदः ॥

अष्टवर्षाधिको यस्तु ह्यशीतिर्न हि पूर्यते । यो भुङ्क्ते मानवः पापो विष्णोरहनि चागते ॥१८४॥ पिता वा यदि वा पुत्रो भार्या वापि सुहृज्जनः । पद्मनाभदिने भुङ्क्ते निग्राह्यो दस्युवद्भवेत् ॥१८५॥

ब्रह्मा ॥

उपोष्य द्वादशीं पुण्यां सर्वपापक्षयप्रदाम् । न पश्यन्ति यमं वापि नरकाणि न यातनाम् ॥ १८६ ॥

SGDF
Sri Gangeshwari Digital Foundation

शंकरः ॥

रटन्तीह पुराणानि भूयोभूयो वरानने । न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे ॥ १८७ ॥ द्वादशी न प्रमोक्तव्या यावदायुः प्रवर्तते । अर्चनीयो हृषीकेशो विशुद्धेनान्तरात्मना ॥१८८॥ भक्त्या ग्राह्यो हृषीकेशो न धनैर्धरणीसुराः । भक्त्या सम्पूजितो विष्णुः फलं धत्ते समीहितम् ॥ १८९ ॥ जलेनापि जगन्नाथः पूजितः क्लेशनाशनः । परितोषं प्रयात्याशु तृषार्तस्तु यथा जलैः ॥ ॥ १९० ॥ आसीनस्य शयानस्य तिष्ठतो व्रजतोऽपि वा । रमस्व पुण्डरीकाक्ष नृसिंह हृदये मम ॥ १९१ ॥ करावलम्बनं देहि श्रीकृष्ण कमलेक्षण । भवपङ्कार्णवे घोरे मज्जतो मम सर्वदा ॥१९२॥ सर्वगश्चैव सर्वात्मा सर्वावस्थासु चाच्युत । रमस्व पुण्डरीकाक्ष नृसिंह हृदये मम ॥ १९३ ॥ (एकादश्यां न भुञ्जीत न सुरां वा पिबेत्कचित् । ब्राह्मणो नैव हन्तव्य इत्येषा वैदिकी स्मृतिः) ॥ १९४ ॥ त्राहि त्राहि जगन्नाथ वासुदेवाच्युताव्यय । मां समुद्धर गोविन्द दुःखसंसारसागरात् ॥ १९५ ॥ एतत्पुण्यमिदं गुह्यं पवित्रं पापनाशनम् । आयुष्यं च यशस्यं च धन्यं दुःस्वप्ननाशनम् ॥ १९६ ॥ कलौ पापं कियन्मात्रं हत्यास्तेयादिसम्भवम् । स्मृते मनसि गोविन्दे दह्यते तूलराशिवत् ॥ १९७ ॥ कलौ केशवभक्तानां न भयं विद्यते कचित् । स्मृते सङ्कीर्तिते ध्याते संक्षयं याति पातकम् ॥ १९८ ॥ अध्येतव्यमिदं शास्त्रं श्रोतव्यमनसूयया । भक्तेभ्यश्च प्रदातव्यं धार्मिकेभ्यः पुनःपुनः ॥ १९९ ॥ अधीयाना इदं शास्त्रं विष्णोर्माहात्म्यमुत्तमम् । सर्वपापविनिर्मुक्ताः प्राप्नुवन्ति परं पदम् ॥२००॥ श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् । श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च गच्छति ॥ २०१ ॥ तस्मादिदं सदा सेव्यं श्रोतव्यं च सदैव हि । कुतर्कदावदग्धेभ्यो न दातव्यं कथञ्चन ॥ २०२ ॥

SGDF
Sri Gargeshwari Digital Foundation

संसारविषपानेन ये मृताः प्राणिनो भुवि। अमृताय स्मृतस्तेषां कृष्णामृतमहार्णवः ॥ २०३ ॥ क्लिन्नं पादोदकेनैव यस्य नित्यं कलेवरम्। तीर्थकोटिसहस्रैस्तु स्नातो भवति प्रत्यहम् ॥ २०४ ॥ तीर्थकोटिसहस्रैस्तु सेवितैः किं प्रयोजनम्। तोयं यदि पिबेन्नित्यं शालग्रामशिलाच्युतम् ॥ २०५ ॥ शालग्रामशिलास्पर्शं ये कुर्वन्ति दिनेदिने। वाञ्छन्ति करसंस्पर्शं तेषां देवाः सवासवाः ॥ २०६ ॥ दुःसहो नारको वह्निर्दुःसहा यमकिङ्कराः। विषमश्चान्तकपथः प्रेतत्वं चातिदारुणम् ॥ २०७ ॥ सञ्चिन्त्य मनसाप्येवं पातकाद्विनिवर्तयेत्। स्मरणं कीर्तनं विष्णोः सदैव न परित्यजेत् ॥ २०८ ॥ अच्युतानन्तगोविन्दनामोच्चारणभेषजात्। नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ २०९ ॥ सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ २१० ॥ एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः। कीर्तयन्ति परं श्रेष्ठं देवं नारायणं प्रभुम् ॥२११॥ किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः। यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥ २१२ ॥ नित्योत्सवो भवेत्तेषां नित्यश्रीर्नित्यमङ्गलम्। येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः ॥ ॥ २१३ ॥ जीवंश्चतुर्दशादूर्ध्वं पुरुषो नियमेन तु ॥ २१४ ॥ दशावराणां देहानां कारणानि करोत्ययम्। स्त्री वाप्यनूनदशकं देहं मानुषमार्जयेत् ॥ २१५ ॥ चतुर्दशोर्ध्वजीवीनि संसारश्चादिवर्जितः। अतोऽविज्ञ्वा परं देवं मोक्षाशा का महामुने ॥ २१६ ॥ आचतुर्दशमाद्वर्षात्पुरुषो नियमेन तु। दशावराणां देहानां कारणानि करोत्ययम् ॥ २१७ ॥ अतः कर्मक्षयान्मुक्तिः कुत एव भविष्यति। समानां विषमा पूजा विषमाणां समा तथा ॥ २१८ ॥ क्रियते येन देवोऽपि स्वपदाद्भ्रश्यते हि सः। वित्तं बन्धुर्वयः कर्म विद्या चैव तु पञ्चमी। एतानि मान्यस्थानानि गरीयो ह्युत्तरोत्तरम् ॥ २१९ ॥

SGDF
Sri Gargeshwari Digital Foundation

गुणानुसारिणीं पूजां समां दृष्टिं च यो नरः । सर्वभूतेषु कुरुते तस्य विष्णुः प्रसीदति ॥ २२० ॥ यथा सुहृत्सु कर्तव्यं पितृभ्रातृसुतेषु च । तथा करोति पूजां हि समबुद्धिः स उच्यते ॥ २२१ ॥ तिर्यक्पुण्ड्रं न कुर्वीत सम्प्राप्ते मरणेऽपि वा ॥ २२२ ॥ न चान्य-नाम विब्रूयात्परान्नारायणादृते । नैवेद्यशेषं देवस्य यो भुनक्ति दिने-दिने ॥ २२३ ॥ सिक्थेसिक्थे भवेत्पुण्यं चान्द्रायणशताधिकम् । ऊर्ध्वपुण्ड्रमृजुं सौम्यं ललाटे यस्य दृश्यते ॥ २२४ ॥ स चण्डालोऽपि शुद्धात्मा पूज्य एव न संशयः ॥ २२५ ॥ अशुचिर्वाप्यनाचारो मनसा पापमाचरन् ॥ २२६ ॥ शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्राङ्कितो नरः । ऊर्ध्वपुण्ड्रविहीनस्य स्मशानसदृशं मुखम् ॥ २२७ ॥ अवलोक्य मुखं तस्य आदित्यमवलोकयेत् । यज्ञो दानं तपश्चैव स्वाध्यायः पितृ-तर्पणम् ॥ २२८ ॥ व्यर्थं भवति तत्सर्वमूर्ध्वपुण्ड्रं विना कृतम् । गोपीचन्दनलिप्ताङ्गो यं यं पश्यति चक्षुषा ॥ २२९ ॥ तं तं शुद्धं विजानीयान्नात्र कार्या विचारणा । आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ॥ २३० ॥ वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति । जीवितं विष्णुभक्तस्य वरं पञ्चदिनान्यपि ॥ २३१ ॥ न तु कल्प-सहस्रैस्तु भक्तिहीनस्य केशवे । किं तेन जातमात्रेण भूभारेणान्न-शत्रुणा ॥ २३२ ॥ यो जातो नार्चयेद्विष्णुं न स्मरेन्नापि कीर्तयेत् । यो ददाति द्विजातिभ्यश्चन्दनं गोपिमर्दितम् ॥ २३३ ॥ अपि सर्षप-मात्रेण पुनात्यासप्तमं कुलम् । ज्ञानी च कर्माणि सदोदितानि कुर्या-दकामः सततं भवेत ॥२३४॥ अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः । एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत् ॥ २३५ ॥ 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥ २३६ ॥ एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' । 'आचारश्चैव साधूनामात्मनस्तुष्टिरेव

SGDF
Sri Gargeshwari Digital Foundation

च' ॥ २३७ ॥ 'वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः' । 'निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते ॥ २३८ ॥ निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम्' ॥ २३९ ॥

श्रीमदानन्दतीर्थार्यसहस्रकिरणोत्थिता । गोततिः सततं सेव्या गीर्वाणैः सिद्धिदा भवेत् ॥ २४० ॥ यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ २४१ ॥ यः सर्वगुणसम्पूर्णः सर्वदोषविवर्जितः । प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ॥२४२॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः कृष्णामृतमहार्णवः सम्पूर्णः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

तन्त्रसारसङ्ग्रहः

श्रीमद्धनुमद्भीमसध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ हरिः ॐ ॥ जयत्यब्जभवेशेन्द्रवन्दितः कमला-
पतिः । अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः ॥ १ ॥ विधिं विधाय
सर्गादौ तेन पृष्टोऽब्जलोचनः । आह देवो रमोत्सङ्गविलसत्पाद-
पल्लवः ॥ २ ॥ अहमेकोऽखिलगुणो वाचकः प्रणवो मम । अकारा-
द्यतिशान्तान्तः सोऽयमष्टाक्षरो मतः ॥ ३ ॥ स विश्वतैजसप्राज्ञतुरीया-
त्मान्तरात्मनाम् । परमात्मज्ञानात्मयुजां मद्रूपाणां च वाचकः ॥४॥
तद्रूपभेदाः पञ्चाशन्मूर्तयो मम चापराः । पञ्चाशद्वर्णवाच्यास्ता वर्णा-
स्तारार्णभेदिताः ॥ ५ ॥ द्विरष्टपञ्चकचतुःपञ्चेत्येवाष्टवर्गगाः । अज
आनन्द इन्द्रेशावुग्र ऊर्ज ऋतुम्भरः ॥ ६ ॥ ऋघलृशौ लृजिरेकात्मैर
ओजोभृदौरसः । अन्तोऽर्धगर्भः कपिलः खपतिर्गरुडासनः ॥ ७ ॥
घर्मो ङसारश्चार्वङ्गश्छन्दोगम्यो जनार्दनः । झाटितारिर्ञमष्टङ्की
ठलको डरको ढरी ॥ ८ ॥ णात्मा तारस्थपो दण्डी धन्वी नम्यः
परः फली । बली भगो मनुर्यज्ञो रामो लक्ष्मीपतिर्वरः ॥ ९ ॥
शान्तसंवित् षड्गुणश्च सारात्मा हंसळाळुकौ । पञ्चाशन्मूर्तयस्त्वेता
ममाकारादिलक्षकाः ॥ १० ॥ नारायणाष्टाक्षरश्च ताराष्टाक्षरभेदवान् ।
आद्यैस्तारचतुर्वर्णैर्भिन्ना व्याहृतयः क्रमात् ॥ ११ ॥ अनिरुद्धादिका-
स्तासां देवता व्युत्क्रमेण वा । ताश्च तन्मूर्तयस्त्वेव द्वादशार्ण-
पदोदिताः ॥ १२ ॥ नारायणाष्टाक्षराच्च व्याहृतिभ्यस्तथैव च ।
विभेदो द्वादशार्णानां केशवाद्याश्च देवताः ॥१३॥ नारायणाष्टाक्षराच्च

SGDF
Sri Gangeshwari Digital Foundation

व्याहृतिस्त्रिगुणात्पुनः। वेदमाता तु गायत्री द्विगुणा द्वादशाक्षरात् ॥
॥ १४ ॥ चतुर्विंशन्मूर्तयोऽस्याः कथिता वर्णदेवताः। तद्भेदः पौरुषं
सूक्तं वेदाः पुरुषसूक्तगाः ॥ १५ ॥ वैदिकाः सर्वशब्दाश्च तस्मा-
त्सर्वाभिधोऽस्म्यहम्। पञ्चाशद्वर्णभिन्नाश्च सर्वशब्दा अतोऽपि च ॥
॥ १६ ॥ ऋषिश्च देवतैकोऽहं तारादीनां विशेषतः। छन्दो मदीया
गायत्री ताराष्टाक्षरयोर्मता ॥ १७॥ उद्यद्भास्वत्समाभासश्चिदानन्दैक-
देहवान्। चक्रशङ्खगदापद्मधरो ध्येयोऽहमीश्वरः ॥ १८ ॥ लक्ष्मी-
धराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः ॥ १९ ॥ ब्रह्मवायुशिवाहीश-
विपैः शक्रादिकैरपि। सेव्यमानोऽधिकं भक्त्या नित्यनिःशेषशक्ति-
मान् ॥ २० ॥ मूर्तयोऽष्टावपि ध्येयाश्चक्रशङ्खवराभयैः। युक्ताः प्रदीप-
वर्णाश्च सर्वाभरणभूषिताः ॥ २१ ॥ तादृग्रूपाश्च पञ्चाशज्ज्ञानमुद्राऽ-
भयोद्यताः। टङ्की दण्डी च धन्वी च तत्तद्युक्तास्तु वामतः ॥२२॥
वासुदेवादिकाः शुक्लरक्तपीतासितोज्ज्वलाः। चक्रशङ्खगदाब्जेतः प्रथमो
मुसली हली ॥ २३ ॥ सशङ्खचक्रस्त्वपरस्तृतीयः शार्ङ्गबाणवान्।
सचक्रशङ्खस्तुर्यस्तु चक्रशङ्खासिचर्मवान् ॥ २४ ॥ केशवो मधुसूदनः
सङ्कर्षणदामोदरौ। स वासुदेवः प्रद्युम्नो दक्षोच्चकरशङ्खिनः ॥ २५ ॥
विष्णुमाधवानिरुद्धपुरुषोत्तमाधोक्षजाः। जनार्दनश्च वामोच्चकरस्थित-
दरा मताः ॥ २६ ॥ गोविन्दश्च त्रिविक्रमः सश्रीधरहृषीकपः।
नृसिंहश्चाच्युतश्चैव वामाधःकरशङ्खिनः ॥ २७ ॥ वामनः सनारायणः
पद्मनाभ उपेन्द्रकः। हरिः कृष्णश्च दक्षाधःकरशङ्खधरा मताः ॥२८॥
शङ्खचक्रगदापद्मधराश्चैते हि सर्वशः। क्रमव्युत्क्रमपद्मादिगदादि-
व्युत्क्रमस्तथा ॥ २९ ॥ अर्धक्रमः सान्तरश्च षट्सु षट्स्वरिपूर्विणाम्।
वर्णानां देवतानां च नित्यत्वान्न क्रमः स्वतः ॥ ३० ॥ व्यक्तिक्रमं
ब्रह्मबुद्धावपेक्ष्य क्रम उच्यते। समासव्यासयोगेन व्याहृतीनां
चतुष्टयम् ॥ ३१ ॥ सत्यं चाङ्गानि तारस्य प्रोच्यन्तेऽष्टाक्षरस्य च।

SGDF
Sri Gargeshwari Digital Foundation

कृद्धमहावीरद्युसहस्रसहितोल्कका: ॥ ३२ ॥ चतुर्थ्यन्ता हृदादीनि पृथग्रूपाणि तानि च। विष्णोरेवात्यभेदेऽपि तदैश्वर्यात्तदन्यवत् ॥३३॥ चक्रशङ्खवराभीतिहस्तान्येतानि सर्वशः। मूलरूपसवर्णानि कृष्णवर्णा शिखोच्यते ॥ ३४ ॥ चतुर्विंशन्मूर्तयश्च मूलरूपसवर्णकाः। आदिवर्णत्रयं नाभिहृच्छिरस्सु यथाक्रमम् ॥ ३५ ॥ न्यसनीयं च तद्वर्णदेवताध्यानपूर्वकम्। पञ्जानुनाभिहृदयवाङ्नासानेत्रकेषु च ॥ ३६ ॥ अष्टाक्षराणां न्यासः स्याद्व्याहृतीनां प्रजापतिः। मुनिश्छन्दस्तु गायत्री देवता भगवान्हरिः ॥ ३७ ॥ उद्यदादित्यवर्णश्च ज्ञानमुद्राभयोद्यतः। तारेण व्याहृतीभिश्च ज्ञेयान्यङ्गानि पञ्च च ॥ ३८ ॥ नाभिहृत्केषु सर्वेषु चतस्रो व्याहृतीर्न्यसेत्। द्वादशार्णस्य जगतीच्छन्दोऽन्यत्तारवत्स्मृतम् ॥ ३९ ॥ अच्छवर्णोऽभयवरकरो ध्येयोऽमितद्युतिः। पदैर्व्यस्तैः समस्तैश्च ज्ञेयान्यङ्गानि पञ्च च ॥ ४० ॥ अष्टाक्षराणां स्थानेषु बाह्वोरूर्वोश्च विन्यसेत्। विश्वामित्रस्तु सन्ध्यार्थे तदन्यत्र प्रजापतिः। मुनिर्देवस्तु सवितृनामा स्रष्टृत्वतो हरिः ॥ ४१ ॥ प्रोद्यदादित्यवर्णश्च सूर्यमण्डलमध्यगः। चक्रशङ्खधरोऽङ्कस्थदोर्द्वयो ध्येय एव च ॥ ४२ ॥ सताराश्च व्याहृतयो गायत्र्यङ्गानि पञ्च च। दोःपत्सन्धिषु साग्रेषु नाभिहृन्मुखकेषु च ॥ ४३ ॥ वर्णन्यासश्च कर्तव्यस्तारवन्निखिलं स्मृतम्। पञ्चाशदक्षराणां च पुंसूक्तस्यापि सर्वशः ॥ ॥ ४४ ॥ अनुष्टुभश्च त्रिष्टुप् च च्छन्दोऽस्य त्रिष्टुभोऽपि वा। विष्णुशब्दश्चतुर्थ्यन्तो हृदयेतः षडक्षरः ॥ ४५ ॥ तारवत्सर्वमस्यापि श्यामो ध्येयो हरिः स्वयम्। वर्णा एव षडङ्गानि षणयोर्भेदयोगतः ॥४६॥ पञ्जानुनाभिहृन्नासाकेषु न्यासश्च वर्णशः। एते तु सर्वमन्त्राणां मूलमन्त्रा विशेषतः ॥ ४७ ॥ एतज्ज्ञानात्समस्तं च ज्ञातं स्याच्छब्दगोचरम्। एतज्जपात्समस्तानां मन्त्राणां जापको भवेत् ॥ ४८ ॥ पूज्यश्च भगवान्नित्यं चक्राब्जादिकमण्डले। हृदये वाऽचले वापि जले वा

SGDF
Sri Gargeshwari Digital Foundation

केवलस्थले ॥ ४९ ॥ अष्टाक्षरेण सम्पूज्य प्रथमं देवतां पराम् । मध्ये सव्ये गुरूंश्चैव दक्षिणे सर्वदेवताः ॥ ५० ॥ पुनः सव्ये सर्वगुरूनाग्नेयादिषु च क्रमात् । गरुडं व्यासदेवं च दुर्गां चैव सरस्वतीम् ॥ ५१ ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं चैव कोणगान् । तदन्तः पूर्वदिक्पूर्वमधर्मादींश्च पूजयेत् ॥ ५२ ॥ अपूजिता अधर्मादिदातारस्ते तथाऽभिधाः । निर्ऋतिश्चैव दुर्गा च कामो रुद्रश्च देवताः ॥ ५३ ॥ यमवायुशिवेन्द्राश्च ज्ञेया धर्मादिदेवताः । परमः पुरुषो मध्ये शक्तिराधाररूपिणी ॥ ५४ ॥ कूर्मोऽनन्तश्च पृथिवी क्षीरसागर एव च । श्वेतद्वीपो मण्टपश्च दिव्यरत्नमयो महान् ॥५५॥ पद्ममेतत्त्रयं देवी रमैव बहुरूपिणी । सूर्यसोमहुताशाश्च पद्मे श्रीस्त्रिगुणात्मिका ॥ ५६ ॥ आत्मान्तरात्मपरमज्ञानात्मानश्च मूर्तयः । विमलोत्कर्षणी ज्ञाना क्रिया योगा तथैव च ॥ ५७ ॥ प्रह्वी सत्या तथेशानाऽनुग्रहा चेति शक्तयः । अष्टदिक्षु च मध्ये च स्वरूपाण्येव ता हरेः ॥५८॥ ततोऽनन्तं योगपीठस्वरूपं पूजयेद्धरेः । तत्रावाह्य हरिं चार्घ्यं पाद्यमाचमनीयकम् ॥ ५९ ॥ मधुपर्कं पुनश्चार्चां स्नानं वासो विभूषणम् । उपवीतासने दत्वा गन्धपुष्पे तथैव च ॥ ६० ॥ लक्ष्मीधरे यजेत्तत्र पार्श्वयोरुभयोर्हरेः । हृदयादींस्तथेन्द्रादिदिक्ष्वस्त्रं कोणकेषु च ॥ ६१ ॥ वासुदेवादिकान्दिक्षु केशवादींस्ततः परम् । मत्स्यकूर्मवराहांश्च नारसिंहं च वामनम् ॥ ६२ ॥ भार्गवं राघवं कृष्णं बुद्धं कल्किनमेव च । अनन्तं विश्वरूपं च तद्बहिः पूजयेत्क्रमात् ॥ ॥ ६३ ॥ अनन्तब्रह्मवाय्वीशान्वीशं चाग्रे प्रपूजयेत् । वारुणीं चैव गायत्रीं भारतीं गिरिजामपि ॥ ६४ ॥ कोणेषु वीन्द्रवामे च सौपर्णीं पूजयेदपि । इन्द्रादीञ्छेषविष्वक्सेनान्तान्सभार्यान्सपरिग्रहान् ॥ ६५ ॥ धूपदीपौ ततो दत्वा नैवेद्यं मूलमन्त्रतः । अनेन क्रमयोगेन जुहुयात्संस्कृतेऽनले ॥ ६६ ॥ पुष्पाञ्जलिश्च होमश्च मूलेनाष्टोत्तरं शतम् ।

SGDF
Sri Gargeshwari Digital Foundation

सकृत्सकृत्पुष्पमन्यैर्होमस्तस्य चतुर्गुणः ॥ ६७ ॥ विसर्जयित्वा नैवेद्यं मूलेन त्रिः समर्च्य च । धूपदीपौ पुनर्दत्वा पुनर्मूलेन पूर्ववत् ॥६८॥ अर्चयित्वा हरिं ध्यात्वा जपेदष्टोत्तरं शतम् । पुनर्ध्यायेद्धरिं सर्वदेवदेवेश्वरं प्रभुम् ॥ ६९ ॥ जपध्यानहुतार्चादीनेवं यः कुरुते सदा । धर्मार्थकाममोक्षाणां भाजनं स्यात्स एव हि ॥ ७० ॥ सर्वोत्तमं हरिं ज्ञात्वा य एवं भक्तिपूर्वकम् । जपध्यानादिभिर्नित्यं पूजयेन्नास्य दुर्लभम् ॥ ७१ ॥ भक्तिं कृत्वान्यदेवेषु ब्रह्मरुद्रादिकेष्वपि । सर्वोत्कर्षमविज्ञाय विष्णोर्याति तमो ध्रुवम् ॥ ७२ ॥ न यज्ञा न च तीर्थानि नोपवासव्रतानि च । दैवतानि च सर्वाणि त्रातुं तं शक्नुयुः क्वचित् ॥ ७३ ॥ हरिर्हि सर्वदेवानां परमः पूर्णशक्तिमान् । स्वतन्त्रोऽन्ये तद्वशा हि सर्वेऽतः स जगद्गुरुः ॥ ७४ ॥ ब्रह्मादयश्च तद्भक्त्या भागिनो भोगमोक्षयोः । तस्माज्ज्ञेयश्च पूज्यश्च वन्द्यो ध्येयः सदा हरिः ॥ ७५ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे प्रथमोऽध्यायः ॥ १ ॥

हरिः ॐ ॥ यस्य कस्यापि मन्त्रस्य न्यासः पञ्चाशदक्षरैः । वीर्यदः केऽभितो वक्त्रमक्षिकर्णेषु नासयोः ॥ १ ॥ गण्डयोरोष्ठयोर्दन्तपङ्क्त्योर्मूर्ध्नि च वाचि च । दोःपत्सन्धिषु साग्रेषु पार्श्वयोः पृष्ठगुह्ययोः ॥ २ ॥ तुन्दे च हृदि धातूनां सप्तके प्राणजीवयोः । सक्षकारान् न्यसेद्वर्णान्नृसिंहः क्षस्य देवता ॥ ३ ॥ जपे न्यासे च विहितः क्षोऽक्षराणां सदान्ततः । प्राणायामो रेचयित्वा पूरयित्वा च कुम्भके ॥ ४ ॥ तारैस्त्रिर्द्वादशावृत्तैर्व्येकद्वादशकेन वा । तत्तन्मन्त्रेण वा कार्यो गायत्र्या दशतारकैः ॥ ५ ॥ आदावेव जपे कुर्याच्छोषणं दहनं प्लुतिम् । वाय्वग्निवारुणैर्बीजैर्ध्यात्वा तन्मण्डले हरिम् ॥ ६ ॥ एकपञ्चाशद्वर्णानां चतुर्विंशतिमूर्तयः । आत्माद्या वासुदेवाद्या विश्वाद्या मत्स्यकच्छपौ ॥ ७ ॥ कोलो नृसिंहः सवटुर्जामदग्न्यरघूद्वहौ ।

SGDF
Sri Gargeshwari Digital Foundation

वासिष्ठयादवौ कृष्णावात्रेयो बुद्धकल्किनौ ॥ ८ ॥ शिंशुमारश्चेति शतं कलाः कलशनामकाः । एताभिः सहितां मूलमूर्तिं कुम्भोदके सुधीः ॥९॥ पूर्वोक्तविधिनाऽभ्यर्च्य प्रतिमां शिष्यमेव वा । स्नापये-त्पूर्वमर्चायां जपोऽनूनः सहस्रतः ॥ १० ॥ मूलमन्त्रस्य चाङ्गानां न्यासः स्नानादनन्तरम् । प्रतिमायां सन्निधिकृच्छिष्ये माहात्म्य-कृद्भवेत् ॥ ११ ॥ कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् । योग्यतां पापहानिं च पुण्यवृद्धिं च साधयेत् ॥ १२ ॥ उपसर्गेषु जातेषु दैवभूतात्महेतुषु । आयुषे वाथ शान्त्यै वा श्रिये वा पुण्य-वृद्धये ॥ १३ ॥ योग्यतायै मन्त्रसिद्ध्यै विष्णोः प्रीत्यर्थमेव वा । जुहुयात्सहस्रमयुतं लक्षं कोटिमथापि वा ॥ १४ ॥ पूर्ववत्संस्कृते वह्नौ ध्यात्वा देवं जनार्दनम् । कृत्वा त्रिमेखलं कुण्डं चतुर्विंशाङ्गुलो-च्छ्रितम् ॥ १५ ॥ तावत्खातं चतुष्कोणमुच्छ्रितं द्वादशैव वा । द्व्यङ्गुलं त्र्यङ्गुलं वापि चतुरङ्गुलमेव वा ॥ १६ ॥ विस्तारो मेखलानां स्यादन्त्या वा चतुरङ्गुला । चतुर्विंशाङ्गुला वा तद्विस्तारो द्वादशैव वा ॥ १७ ॥ अश्वत्थपत्राकृतिः स्यान्मूलतो द्वादशाङ्गुला । योनिः खाते च विनता प्रविष्टा द्व्यङ्गुलं तथा ॥ १८ ॥ तदात्मनि हरिं ध्यात्वा कुण्डे देवीं श्रियं तथा । विष्णुवीर्यात्मकं वह्निं निक्षिपेत्प्रणवेन तु ॥ १९ ॥ कुर्यात्क्रियाः षोडश च व्याहृतीभिः पृथक्पृथक् । वह्नेस्तद्गहरेः प्रीतिं कुर्वन्द्रव्यैर्यजेत्ततः ॥ २० ॥ आज्येन वा पायसेन समिद्भिः क्षीरिणामथ । तिलैर्वा तण्डुलैर्वापि मधुरैस्त्रिभिरेव वा ॥२१॥ ब्रह्मवृक्षसमिद्भिर्वा समिद्भिर्वाऽमृतोद्भवैः । अमृतासमिधो ज्ञेयाः सर्वत्र चतुरङ्गुलाः ॥ २२ ॥ एवमेव च दीक्षायामाज्येनैवाहुतिक्रिया । पूजा च कार्या विधिवत्पूर्वं सर्वहुतेष्वपि ॥ २३ ॥ गुरवे दक्षिणां दद्याल्लक्षे लक्षे शतं सुधीः । आत्मनैव कृते होमे शक्तितो गुरु-दक्षिणा(म्) ॥२४॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे द्वितीयोऽध्यायः ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

हरिः ॐ ॥ प्रतिष्ठां कारयन् विष्णोः कुर्यात्सुप्रतिमां बुधः । लोहैर्वा शिलया दार्वा मृदा वापि यथाक्रमम् ॥ १ ॥ षण्णवन्त्यङ्गुलां योग आसीनामथवा स्थिताम् । शयानां वा मुमुक्षूणां व्याचक्षाणां निजां स्थितिम् ॥ २ ॥ मुखादूर्ध्वं द्व्यङ्गुलोच्चां नवाङ्गुललसन्मुखाम् । सुवृत्तत्र्यङ्गुलग्रीवामास्तनाच्च षडङ्गुलाम् ॥ ३ ॥ पश्चादशाङ्गुलां नाभेरा सार्धदशकाङ्गुलाम् । वृषणादा मूलतश्च सार्धद्व्यङ्गुलमायताम् ॥ ४ ॥ तावदा गुदतो दीर्घां चैत्यादष्टादशाङ्गुलाम् । तथा द्व्यङ्गुलचैत्यां च द्वाविंशज्जङ्घया युताम् ॥ ५ ॥ आरभ्य गुल्फमध्यं च सहार्ध-चतुरङ्गुलाम् । षडङ्गुलोच्चप्रपदां सार्धत्र्य(द्व्य)ङ्गुलमेव च ॥६॥ प्रपदोच्च-युतामन्ते द्व्यङ्गुलप्रपदोच्छ्रयाम् । त्र्यङ्गुलद्व्यङ्गुलामर्धहीनमध्याङ्गुला-मपि ॥ ७ ॥ त्रिपदाङ्गुलहीनान्यां ततस्तादृशतत्पराम् । पादोनो-च्चाङ्गुष्ठनखां तदर्धतदनन्तराम् ॥ ८ ॥ क्रमशः पादहीनान्यां रक्त-पादनखां शुभाम् । विस्तारः प्रपदस्यापि षडङ्गुल उदाहृतः ॥ ९ ॥ अङ्गुष्ठपरिणाहस्तु चतुरङ्गुल ईरितः । त्र्यङ्गुलस्तु तदन्यस्य त्रीण्यर्धोनाः क्रमात्पराः ॥ १० ॥ दशाङ्गुलं जङ्घमूलं मध्यं च त्र्यङ्गुलाधिकम् । सप्तादशाङ्गुलं तूर्ध्वं जानुरष्टादशाङ्गुलम् ॥ ११ ॥ ऊर्वन्तोऽपि तथा ज्ञेयो मध्यं द्विद्वादशाङ्गुलः । चतुरङ्गुलाधिकं मूलं गुह्यं सार्ध-चतुष्टयम् ॥ १२ ॥ सार्धत्रयं परीणाहाद्वृषणं चतुरङ्गुलम् । सप्ताङ्गुलं परीणाहाद्वृत्तं प्रोक्तं समस्तशः ॥१३॥ अष्टत्रिंशाङ्गुलः कट्याः परीणाह उदाहृतः । सुवृत्तत्वं तथा श्रोण्योः पीनत्वं च समस्तशः ॥ १४ ॥ विस्तारश्च तथा कट्याः सुप्रतिष्ठितता पदोः । कट्याश्चैवाङ्गुलाधिक्यं नाभेरध उदाहृतः ॥ १५ ॥ नाभिः सार्धाङ्गुलश्चैव गम्भीरोर्धाङ्गुलो-न्नतः । वृत्तः प्रदक्षिणश्चैव द्विचत्वारिंशदङ्गुलम् ॥ १६ ॥ मध्यं स्तने परीणाहः षडङ्गुलमतोऽधिकः । एकोनविंशाङ्गुलं तदुरोविस्तार-लक्षणम् ॥ १७ ॥ पादोनमङ्गुलं चैव भुजाभ्यां सह सार्धकम् ।

SGDF
Sri Gangeshwari Digital Foundation

अंसयोर्विस्तृतिश्चैव पृथगष्टाङ्गुला मता ॥ १८ ॥ सप्ताङ्गुलोच्छ्रयः कक्षादुपरि स्कन्धयोर्मतः । अष्टत्रिंशाङ्गुलं चैव हस्तयोर्मानमुच्यते ॥ ॥ १९ ॥ अष्टादशाङ्गुलो बाह्वोः परीणाह उदाहृतः । क्रमादूनं तदन्ते तु सार्धाष्टाङ्गुलमीरितम् ॥ २० ॥ साङ्गुलस्तु तलः सार्धनवाङ्गुल उदाहृतः । समं तदुभयं ज्ञेयं तथैव तलविस्तृतिः ॥ २१ ॥ अर्धाङ्गुलोन्नता मध्या द्वयोः सार्धाङ्गुलोन्नता । कनिष्ठिकायास्तस्यास्तु व्रीहिमात्राधिकः परः ॥ २२ ॥ सार्धत्रयपरीणाहौ मध्यज्येष्ठावुदाहृतौ । अन्यौ व्रीहितदर्धोनावन्या सार्धद्वयाङ्गुला ॥ २३ ॥ पादोनान्तपरीणाहाः सर्वा ज्येष्ठां विना स्मृताः । वक्षोविस्तारसदृशः परीणाहो गलस्य च ॥ २४ ॥ ललाटकुक्षिकण्ठास्तु दीर्घरेखात्रयान्विताः । वृत्तो गलो बाहवश्च स्तनावङ्गुलयस्तथा ॥ २५ ॥ रक्तास्तलनखाश्चैव नेत्रान्तोऽधर एव च । उत्तरोष्ठश्च जिह्वा च नखौ पादोनकाङ्गुलौ ॥ २६ ॥ अर्धाङ्गुलौ तथा मध्यावन्येऽष्टांशक्रमोनकाः । नासिकाया अधस्ताच्च नासिका च रराटिका ॥ २७ ॥ समा मानेन नासाया उच्चत्वेनैव मापने । अर्धाङ्गुलाधिकं सर्वमुखस्य तु भविष्यति ॥ ॥ २८ ॥ चतुरङ्गुलं तथैवास्यं सार्धव्रीह्यधरं स्मृतम् । उत्तरं व्रीहिमात्रं तु तदूर्ध्वं चाधरोपमम् ॥ २९ ॥ सार्धाङ्गुलमथ प्रोक्तमधरादध एव च । आस्य पार्श्वद्वयं प्रोक्तमाकर्णात्तु षडङ्गुलम् ॥ ३० ॥ सप्ताङ्गुलं नासिकायाः पार्श्वमाकर्णतः स्मृतम् । सपादाङ्गुलमुच्चा च नासिका परिकीर्तिता ॥ ३१ ॥ अर्धाङ्गुले पुटे तस्या मध्यं च समुदाहृतम् । नासिका व्रीहिविस्तारा चक्षुषी चाङ्गुलित्रये ॥ ३२ ॥ अङ्गुलं चैव विस्तीर्णे फुल्लेऽर्धं च तदन्यथा । चतुरङ्गुलौ भ्रुवौ चैव तथार्धाङ्गुलविस्तृतौ ॥ ३३ ॥ असंहतौ च निबिडौ तथा पक्ष्म सुनीलकम् । कर्णौ च त्र्यङ्गुलौ सार्धद्वयविस्तारसंयुतौ ॥ ३४ ॥ सकुण्डलं तावदेव विवरं सम्प्रकीर्तितम् । तथा द्व्यङ्गुलविस्तारं लताभ्यां-

SGDF
Sri Gargeshwari Digital Foundation

सह कथ्यते ॥ ३५ ॥ कर्णपूरयुतौ कर्णावुत्पलाभ्यां च संयुतौ । नीलालकसहस्रेण युक्तं तन्मुखपङ्कजम् ॥ ३६ ॥ ललाटं सुविशालं च तथा सार्धनवाङ्गुलम् । विस्तारो मूर्ध्नि वृत्तं च शिरश्छत्राकृति स्मृतम् ॥ ३७ ॥ दीर्घाश्च कुञ्चिताग्राश्च नीलाः केशा हरेर्मताः । मुखमानेन चैवोच्चं किरीटं केशवस्य हि ॥ ३८ ॥ कुण्डले मकराकारे वक्षश्चैव सकौस्तुभम् । सश्रीवत्सं दक्षिणतः पीनं तुङ्गमुदाहृतम् ॥ ॥ ३९ ॥ हारग्रैवेयसहितमुपवीतयुतं तथा । बाहवश्च सकेयूरकङ्कणांगदमुद्रिकाः ॥ ४० ॥ समध्यबन्धं मध्यं च नितम्बे पीतमम्बरम् । काञ्चीगुणश्च पदयोर्नूपुरे चातिसुखने ॥ ४१ ॥ अङ्गुलीयानि च पदोः कृतिभिः साधु कारयेत् । सोत्तरीयं च चक्राद्यैरायुधैश्च समन्वितम् ॥ ४२ ॥ अनुन्नतैरविरलैर्दन्तैर्युक्तं च सुस्मितम् । समदृष्टियुतं कार्यं श्लक्ष्णं चैव मनोहरम् ॥ ४३ ॥

प्रतिमार्थं व्रजन्पश्चध्वनिभिर्मङ्गलैर्युतः । गत्वा शुचिस्थलं चैव शिलां तत्र परीक्षयेत् ॥ ४४ ॥ ध्वनिभेदेन विज्ञाय शिलां गर्भवतीं त्यजेत् । मूलमन्त्रं जपन्विष्णुं ध्यायंस्तिष्ठेदुपोषितः ॥ ॥ ४५ ॥ वार्क्षी चेद्यज्ञवृक्षस्य सारेणैव तु कारयेत् । बलिदानं च सङ्क्षेपविधानेनैव कथ्यते ॥ ४६ ॥ अस्य सङ्क्षेपशास्त्रत्वान्न विस्तरविरोधिता । दत्त्वोपहारं हरये तद्भूतेभ्यो बलिं हरेत् ॥ ४७ ॥ प्राच्येभ्यो विष्णुभूतेभ्य इत्याद्यखिलदिक्षु च । आदाय विष्णुभूतेभ्यो लोकपेभ्यस्तथा हरेः ॥ ४८ ॥ अनुज्ञामुद्धरेद्वृक्षं शिलां वा च प्रतिमाकृते । प्रतिमां पिण्डिकां पीठं शिलाभिस्तु त्रिजातिभिः ॥ ४९ ॥ स्वरस्थूलत्वभेदेन पुंस्त्र्याद्या जातितः शिलाः । पुंशिला प्रतिमार्थं तु स्त्रीशिला पीठकॢप्तये ॥ ५० ॥ वेदमङ्गलघोषेण वाद्यैश्च प्रतिमां हरेत् । प्रागुदक्प्रवणे देशे कुर्याद्देवालयं सुधीः ॥५१॥ रामावृते दक्षिणतः पश्चाद्रिर्यग्र एव वा । मध्ये वा ग्रामपुरयोर्विशाले

SGDF
Sri Gargeshwari Digital Foundation

सुशुचौ तथा ॥ ५२ ॥ ऐशानीं दिशमेकां तु विनोदकविवर्जिते । जलाशयस्य मध्ये वा शिलावृक्षादिवर्जिते ॥ ५३ ॥ श्मशानादिकदेशानां विदूरे सुमनोहरे । किष्कुद्वादशतोऽनूनं कुर्याद्देवालयस्थलम् ॥ ५४ ॥ द्विगुणं चतुर्गुणं वापि शतकिष्कुप्रमाणकम् । कृत्वा भूशोधनं सम्यक्सार्धपुंमानतस्त्वधः ॥ ५५ ॥ केशाङ्गारास्थिवल्मीकलोष्टाश्मादिविवर्जिते । हरिं तत्रापि सम्पूज्य बलिं दत्वापि पूर्ववत् ॥ ॥ ५६ ॥ मृद्दारुशैलैर्लोहैर्वा कुर्याद्देवालयं दृढम् । दी(र्घास्तु क)र्घस्थकलमास्तिस्रस्तिर्यगष्टयवोदराः ॥ ५७ ॥ अङ्गुल्या मध्यरेखायाः समा लक्षणतः स्मृताः । स्वाङ्गुल्या मध्यरेखा तु प्रतिमादिषु लक्षणम् ॥ ५८ ॥ ह्रस्वमध्योच्चभेदेन तत्तन्मानं समस्तशः । प्रादेशहस्तपुरुषमानं सामान्यलक्षणम् ॥ ५९ ॥ प्रतिमाध्यर्धकं द्वारमूर्ध्वमर्धं च विस्तृतिः । प्रतिमार्धप्रमाणेन पीठस्योच्चत्वमिष्यते ॥ ६० ॥ उन्नतिः पिण्डिकायास्तु चतुरङ्गुलमानतः । त्र्यङ्गुलं द्व्यङ्गुलं वापि गृहान्तः प्रतिमासमम् ॥ ६१ ॥ उच्चं पर्यक्च क्रमश उच्चत्वं मध्यतः स्मृतम् । तावदुच्चं बहिश्चैव यद्येकं शिखरं भवेत् ॥ ६२ ॥ अर्धोच्चमथवापि स्यादधस्तात्प्रतिमोन्नतम् । ततो द्विगुणमानं वा सार्धप्रतिममेव वा ॥ ६३ ॥ शिखरान्तरे तु प्रतिमामानं तद्दल उच्यते । तत्त्रिपादं तदर्धं वा तदध्यर्धमथापि वा ॥ ६४ ॥ वर्तुलं पद्मसदृशं हस्तिपृष्ठसमं तथा । चतुरस्रं चाष्टकोणं विमानं परिकीर्तितम् ॥६५॥ प्रतिमाया दशगुणं विंशद्गुणमथापि वा । वर्तुलं शिखरं त्वेकं किरीटाकृतिमद्भवेत् ॥ ६६ ॥ सभयाऽपि समेतं वा पृथक्सभमथापि वा । द्विसभं त्रिसभं वापि सगोपुरमथापि वा ॥ ६७ ॥ प्राकारवृत्तयुक्तं वा सप्तप्राकारमेव वा । समवृत्तं किष्कुमात्रं बहिर्वा चतुरश्रकम् ॥६८॥ ततः परं किष्कुमात्रं सभाया अन्तरं यदि । ततस्तावत्तृतीयायाः सार्धमेव ह्युदाहृतम् ॥ ६९ ॥ किष्कुत्रयं च शक्रादेः स्थानं तद्वृत्ततः

SGDF
Sri Gargeshwari Digital Foundation

स्मृतम् । ततस्तु मण्टपं कुर्यात्प्रतिष्ठायाः सुलक्षणम् ॥ ७० ॥ पूजये-द्वास्तुपुरुषस्योपरिष्ठांस्तु सर्वदा । देवान्ब्रह्मादिकान्वास्तुर्वराहस्य हरेः सुतः ॥ ७१ ॥ पातितो दैवतैर्भूमौ चतुरश्राकृतिः स्थितः । कृत्वाष्ट-काष्ठकोष्ठानि मध्ये ब्रह्मा च तुष्टये ॥ ७२ ॥ पूज्यो द्वये द्वये शक्रो यमो वरुण एव च । सोमश्च पूज्यः कोणेषु वह्न्याद्याः कोणदेवताः ॥ ॥ ७३ ॥ पुनस्त्रयस्त्रये कामं धातारं सविधातृकम् । स्कन्दं च पूजये-त्कोणे सूर्यं चैव विनायकम् ॥ ७४ ॥ कालं कुबेरं च बहिः प्रत्येकं दिक्षु पूजयेत् । हारं हरिं गभीरं च गाहनं गेहनं गुहम् ॥ ७५ ॥ भातमङ्गारकं चैव पूर्वस्यां दिशि पूजयेत् । दारुणं विदरिं दूतं प्रद्योतं द्योतनं दरिम् ॥ ७६ ॥ मृत्युं शनैश्चरं चैव दक्षिणस्यां प्रपूजयेत् । पुष्करं क्षरणं क्षारं विक्षणं क्षोभणं क्षरम् ॥ ७७ ॥ चार्वङ्गं भार्गवं चैव पश्चिमायां प्रपूजयेत् । चारं विचारं प्रचरं सञ्चारं चरणं चरम् ॥ ७८ ॥ बृहस्पतिं बुधं चैवाप्युत्तरस्यां प्रपूजयेत् । एवमेव विमानस्य कृतेः प्रागपि पूजयेत् ॥ ७९ ॥ सप्तपर्णमयं साधु कारये-न्मण्टपं ततः । सप्तहस्तं द्विषड्ढस्तमथवा द्विगुणं ततः ॥ ८० ॥ चतुर्गुणं वा सम्यक्च चतुरश्रं सहाजिरम् । अन्यं च मण्टपं दीर्घं पञ्चहस्तं तु कारयेत् ॥ ८१ ॥ त्रिचतुष्कोष्ठकं तत्र मध्ये प्रागायतं शुभम् । कारयेन्मण्डलं साधु हस्तमात्रं तु (सु)विस्तृतम् ॥ ८२ ॥ तत्र द्वादशपात्राणि स्थापयेत्पालिकादिकम् । पालिकास्तु चतुर्विंश-त्यङ्गुलोच्छ्रयसंयुताः ॥ ८३ ॥ अष्टादशाङ्गुलाश्चैव तथा पञ्चमुखा इति (अपि) । द्वादशाङ्गुलकाश्चैव शरावाः पश्चिमानुगाः ॥ ८४ ॥

तत्र विष्णुं चतुर्मूर्तिं पूजयेद्भक्तितस्त्रिशः । सप्तधान्यानि तेष्वेव पूरयेदङ्कुरार्थतः ॥८५॥ तत्र नित्यं बलिं दद्याद्विष्णवे दशरात्रकम् । ब्रह्मशंकरगीर्वाणपितृगन्धर्वयक्षकैः ॥ ८६ ॥ भूतैश्च पायसेनैव तथा पद्माक्षतेन वा । अन्नापूपेन पुष्पान्नैरन्नलाजाक्षतैरपि ॥८७॥ सक्तुभिश्च

SGDF
Sri Gargeshwari Digital Foundation

क्रमेणैव देवांतान् पायसेन वा। तदैव प्रतिमायाश्च कारयेदधिवासनम् ॥ ८८ ॥ पञ्चगव्ये सप्तरात्रं क्षिप्त्वा पुरुषसूक्ततः। वेदांश्च चतुरः सम्यक्पारयेयुर्द्विजोत्तमाः ॥ ८९ ॥ प्राच्यादिद्वारगौ द्वौ द्वावेकैकं तु दशावराः। यथालब्धं यथावित्तमथवा विष्णुतत्पराः ॥ ॥ ९० ॥ त्रयोदशात्रकुण्डानि परितः कारयेद्बुधः। उक्तलक्षणयुक्तानि प्रधानं त्वग्निकोणके ॥ ९१ ॥ साक्षात्तु कोणगाद्धस्तमात्रमन्तरतः सुधीः। आज्याहुतिं तेषु कुर्यात्प्रत्येकं लक्षसङ्ख्यकम् ॥९२॥ प्रत्येकमयुतं वापि प्रधाने लक्षसङ्ख्यकम्। अर्धं तदर्धमथवा मूलमन्त्रेण मन्त्रवित् ॥ ९३ ॥ पञ्चविंशतितत्वार्थे प्रधाने जुहुयात्पुनः। प्रत्येकं तु सहस्रं वा प्रत्येकं शतमेव वा ॥ ९४ ॥ शतं पुरुषसूक्तेन गायत्र्या च सहस्रकम्। कृत्वा जलाधिवासं च पूर्वं वा पञ्चगव्यतः ॥ ९५ ॥ चक्राब्जं भद्रकं वापि मण्टपे मण्डलं शुभम्। पद्मं वृत्तत्रयं चक्रं राशयो वीथिका लताः ॥ ९६ ॥ शोभोपशोभिकाश्चापि चक्राब्जस्य तु लक्षणम्। चतुरश्रं विना चक्रं विशेषो भद्रके स्मृतः ॥ ९७ ॥ सहस्रमर्धं पादं वा कलशांस्तत्र पूजयेत्। शतं तदर्धं पादं वा वित्ताभावे निगद्यते ॥ ९८ ॥ क्वाथेन क्षीरवृक्षाणां तथा पञ्चामृतैरपि। पञ्चगव्येन शुद्धेन जलेन च पृथक्पृथक् ॥ ९९ ॥ पूरयेत्कलशान्मध्यं शुद्धोदेनैव पूरयेत्। ब्राह्मस्यैव चतुर्दिक्षु गन्धोदानां चतुष्टयम् ॥१००॥ चतुर्दले सिते पद्मचतुष्के मण्डले स्थिते। पूर्वादिक्रमयोगेन रसक्वाथशुभोदकान् ॥ १०१ ॥ गन्धांश्च स्थापयेत्पञ्चगव्यं शुद्धान्तरे न्यसेत्। पृथक् चतुर्दलं पद्मं रक्तं कृत्वाल्पकं सुधीः ॥ १०२ ॥ पञ्चाशत्त्वे तु गन्धोदं सर्वमध्ये निधापयेत्। ब्राह्मस्य पुरतस्त्वेकं शार्वं संस्थापयेद्बृहत् ॥ १०३ ॥ अष्टदिक्ष्वष्टपद्मेषु पञ्चकं पञ्चकं न्यसेत्। अनेन क्रमयोगेन कलशा अखिला अपि ॥ १०४ ॥ तत्तद्द्रव्यमयास्तत्र तत्र स्थाप्यास्तु बाह्यतः। तदैवाङ्कुरपात्राणि परितस्तत्र विन्यसेत् ॥१०५॥

SGDF
Sri Gargeshwari Digital Foundation

कुशोदकं च कार्पूरं कौङ्कुमं चान्दनं तथा। तुहिनोदं (हैरबेर) हरिद्रोदमौशीरं कौष्टसार्षपम् ॥ १०६ ॥ नदीसङ्गमजं चैव ताटाकं कौप्यमेव च। निर्झरोदमिति प्रोक्ता विशेषकलशा इमे ॥ १०७ ॥ शुद्धोदद्वयमप्येतन्महातीर्थसमुद्भवम्। चतुर्विंशतिमूर्तीनां वर्णमूर्तीस्तथाऽपराः ॥ १०८ ॥ आवाहयेच्छतत्वे तु क्रमव्युत्क्रमतस्तु ताः। वर्णमूर्तीः पुनश्चैव द्विचतुर्वारमेव वा ॥ १०९ ॥ सहस्रकलशादित्वे जपेन्मन्त्रांश्च शक्तितः। ततस्तु पञ्चघोषैश्च वेदघोषैस्तथाऽऽदरात् ॥ ॥ ११० ॥ आनीय प्रतिमां स्नानं कारयेत्प्रणवेन तु। मन्त्रैः पुरुषसूक्तान्तैर्विश्वतश्चक्षुषा तथा ॥ १११ ॥ पुनश्चाष्टाक्षरेणैव प्रणवेनैव भक्तितः। स्नापयित्वा गन्धजलैर्गन्धपुष्पादिभिः पुनः ॥ ११२ ॥ अलङ्कृत्य स्थापयेत्तु प्रतिमां प्रणवेन तु। जपेदष्टाक्षरं मन्त्रं तत्तन्मूर्तिमनुं तथा ॥ ११३ ॥ अष्टोत्तरशतं मन्त्री ध्यायेत्तेजोमयीं पुनः। प्रतिमां प्रतिमांतस्थां तन्मध्ये परमं वपुः ॥ ११४ ॥ चिदानन्दरसं सर्वगुणसम्पूर्णमुत्तमम्। पञ्चविंशतितत्त्वानां देवतास्तदनन्तरम् ॥ ११५ ॥ स्थापयेत्प्रतिमामध्ये परितः केशवस्य तु। तत्रात्वाहार्षसूक्तं च घर्मसूक्तं च वैष्णवम् ॥ ११६ ॥ सूक्तं च विश्वकर्मीयं पौरुषं सूक्तमेव च। जप्त्वा चैव निजं मन्त्रं पुनरष्टाक्षरं सुधीः ॥ ११७ ॥ प्रणवं च जपेद्विष्णुं ध्यायन्नुत्तमरूपिणम्। ततस्तु कलशैर्बाह्यक्रमेणैव जनार्दनम् ॥ ॥ ११८ ॥ स्नापयेदुक्तमन्त्रैस्तु मध्यमं प्रणवेन तु। अष्टार्णेन निजेनापि तथा पुरुषसूक्ततः ॥ ११९ ॥ आवाहनं च स्नपनं पञ्चगव्येन मध्यवत्। पूर्वाद्युत्तरपर्यन्तः कलशक्रम उच्यते ॥१२०॥ जप्त्वा पुनश्च तन्मन्त्रान्पूजयेच्च विधानतः। द्वारलोकपतिभ्यश्च बलिं दत्वा यथाक्रमम् ॥ १२१ ॥ वस्त्ररत्नहिरण्याद्यैरलङ्कृत्य विभूतितः। गुरवे दक्षिणां दद्यात्कोटिं लक्षं सहस्रकम् ॥ १२२ ॥ शतमर्धं तदर्धं वा निःस्वो भक्त्या क्षमापयेत्। तदर्धमृत्विजां चैव तदर्धं पारणा-

SGDF
Sri Gargeshwari Digital Foundation

कृताम् ॥ १२३ ॥ आ श्वभ्य आ श्वपाकेभ्यो दद्यादन्नं समस्तशः । पुरस्तात्परतश्चैव सप्तरात्रं निरन्तरम् ॥ १२४ ॥ सुवर्णवस्त्ररत्नाद्यै-रागताभ्यागतानपि । पूजयेच्छक्तितो भक्त्या प्रीयतां भगवानिति ॥ ॥ १२५ ॥ गीतनृत्तैश्च वाद्यैश्च पुराणैरितिहासकैः । सूक्तैर्मङ्गल-घोषैश्च वैदिकैर्दिनसप्तकम् ॥ १२६ ॥ नयेत्ततो महाराजविभूत्या-ऽवभृथं सुधीः । कारयेद्देवदेवस्य स्वाध्यायैर्गीतनृत्तकैः ॥ १२७ ॥ महानदीसङ्गमे तु तीर्थे चातिप्रशस्तके । स्नापयेत्पूर्ववन्मन्त्रैः पुंसूक्तान्तैः स्मरन्हरिम् ॥ १२८ ॥ ततः पूर्ववदागत्य प्रवेश्य पुरुषोत्तमम् । पूजयित्वा विधानेन दत्वा दानानि शक्तितः ॥१२९॥ गुरुं च भक्त्या सम्पूज्य स्वीकुर्यादाशिषस्ततः । शतप्रस्थादनूनं तु नैवेद्यं पायसोत्तरम् ॥ १३० ॥ दिनेष्वेतेषु दातव्यं सघृतं ससि-तादिकम् । पश्चादपि यथाशक्ति पूजा कार्या हरेः सदा ॥ १३१ ॥

जीर्णालयोद्धृतौ चैव तत्त्वमन्त्रान्स्वकं तथा । प्रातिलोम्येन जप्त्वैव मूर्तौ सङ्कोचयेद्धरिम् ॥१३२॥ उक्तेनैव विधानेन तदर्धैर्विभवैः सुधीः । पादमात्रैरपि हरिं स्नापयित्वा यथोदितम् ॥ १३३ ॥ एतेनैव विधानेन कृत्वा देवालयं पुनः । स्थापयेत्पुण्डरीकाक्षं द्विगुणेन प्रवाहणात् ॥ १३४ ॥ विभवेनानुलोम्ये(मे)न जपन्मन्त्रान्पुनस्तथा । आराधयेज्जगन्नाथं ध्यायन्भक्त्या यथोदितम् ॥ १३५ ॥ यात्रापि पूर्ववत्तत्राप्युत्सवेषु च सर्वशः । कलशोक्तविधानेन पूजा बलिहृति-स्तथा ॥ १३६ ॥ उत्सवेषु सदा कार्या कलशश्चोत्सवादनु । यात्रा-स्नानं च कर्तव्यं सम्यगुक्तविधानतः ॥ १३७ ॥

चोरचाण्डालपतितश्वोदक्यादिप्रवेशने । शवाद्युपहतौ चैव पूजा-विच्छेदने तथा ॥१३८॥ स्नापनोक्तेन मार्गेण प्रायश्चित्तकृतिः स्मृता । सर्वत्र विष्णुगायत्र्या होमः स्यादयुतावरः ॥१३९॥ नावाव्याद्यभि-

SGDF
Sri Gangeshwari Digital Foundation

ध्यानानि विद्महे धीमहे तथा । प्रचोदयात्तृतीयाधस्तन्नो गायत्रिनामिका ॥ ॥ १४० ॥

दुर्गाशिवस्कन्दसूर्यविनायकमुखानपि । स्थापयेदुक्तमार्गेण तत्तन्मन्त्रैः स्मरन्हरिम् ॥ १४१ ॥ गोलकद्वितयं विष्णोस्त्रितयं वा प्रकीर्तितम् । अन्यदेवप्रतिष्ठासु तदन्तश्चिन्तयेद्धरिम् ॥ १४२ ॥ विष्णुस्मृतिविहीना तु पूजा स्यादासुरी सदा । गृह्णन्ति देवता नैतां ततः स्याद्देशविप्लवः ॥ १४३ ॥ व्याधिचोरादिभिस्तस्मादन्तर्ध्येयो हरिः सदा । विष्णुभक्तिविहीनस्य गतिः स्यान्न शुभा क्वचित् ॥१४४॥ भक्तस्याप्यन्यदेवेषु तस्माद्ध्येयो हरिः सदा । संस्मृतो भगवान्विष्णुः सर्वमङ्गलमङ्गलः ॥ १४५ ॥ समस्ताभीष्टदायी स्यात्तेन ध्येयोऽखिलैर्जनैः ।

पुरुषोऽव्यक्तं च महानहङ्कारो मनस्तथा ॥ १४६ ॥ दशेन्द्रियाणि शब्दाद्या भूतेताः पञ्चविंशतिः । तत्त्वाख्या कालमाये च नियतिर्मतिरेव च ॥ १४७ ॥ विद्या कला प्रवृत्तिश्च द्वात्रिंशत्तत्त्वसङ्ग्रहः । स्फूर्तिः संवित्प्रतिष्ठा च शक्तिरित्यपराणि तु ॥१४८॥ महालक्ष्मीस्वरूपाणि ह्येकादश विदो विदुः । विष्णोरपि स्वरूपाणि तन्नाम्नैकादशैव तु ॥ १४९ ॥ प्रधानोपमवर्णानि द्विभुजान्यप्यशेषतः । कृताञ्जलिपुटान्येव प्रधानं तं हरिं प्रति ॥ १५० ॥ सर्वाण्येतानि तत्त्वानि ब्रह्मा तु पुरुषः स्मृतः । महांश्चाव्यक्तनाम्नी तु ब्रह्माणी सम्प्रकीर्तिता ॥ १५१ ॥ एवं वायुरपि ज्ञेयो भारती चैव तत्त्रयम् । रुद्रोऽहङ्कार उद्दिष्टः स्कन्देन्द्रौ मन उच्यते ॥ १५२ ॥ अहङ्कारः शेषवीन्द्रावपि विद्धिरीरितौ । दिग्वायुसूनुसूर्याश्च वरुणश्चाश्विनावपि ॥ १५३ ॥ वह्निदक्षाविन्द्रसूनुर्मित्रश्चैव मनुस्तथा । इन्द्रियाख्याः शब्दनामा बृहस्पतिरुदाहृतः ॥ १५४ ॥ अन्ये तु सूनवो वायो रुद्रस्यापि प्रकीर्तिताः । एतेषु भगवान्विष्णुः प्रधानतनुरेव तु ॥१५५॥

SGDF
Sri Gargeshwari Digital Foundation

ध्येयः परात्मनोर्मध्ये तत्त्वनामा(म) तदर्थयोः । जपे न्यासे नमोंऽतश्च स्वाहान्तो होमकर्मणि ॥ १५६ ॥ त्रिचतुष्षट्दशावृत्तिरेतेषां तु हुतादिके । न्यासोऽङ्गुलीषूरुबाहुमध्येषु व्युत्क्रमे स्मृतः ॥ १५७ ॥ क्रमे विपर्ययेणात्र शक्त्यादित्वं प्रकीर्तितम् । ऋषिच्छन्दोदेवताङ्ग-ध्यानानुक्तौ प्रधानवत् ॥ १५८ ॥ ज्ञेया मन्त्राः समस्तास्ते पृथङ्मोक्षादिदायकाः । तन्त्रमार्गास्तु हरिणा ह्यसङ्ख्याः कीर्तिता अपि ॥ १५९ ॥ तेष्वयं सुगमो मार्गः सफलश्चानुतिष्ठताम् । यावतो ह्यनुष्ठाने कर्मपूर्तिर्न विद्यते ॥ १६० ॥ तावत्समस्तं कथितमस्मिं-स्तन्त्रे यथाविधि । प्रीयतेऽनेन मार्गेण पूजितो मुक्तिदो भवेत् ॥ ॥ १६१ ॥ कामदश्च स्वभक्तानां भगवान्पुरुषोत्तमः ॥ १६२ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे तृतीयोऽध्यायः ॥ ३ ॥

॥ हरिः ॐ ॥ अथ विष्णूदिते तन्त्रसारे मन्त्रगणो हि यः । उदितः सङ्ग्रहेणासावुच्यतेऽखिलसाधकः ॥ १ ॥ याष्टमस्तूयुतोऽन्तेन समेतश्चैव भूभृतः । बीजं नमश्च भगवान् सोद्देश्यो रूपसंयुतः ॥ २ ॥ स एव तादृशो लोकत्रयपालो भुवःपतेः । भावं मे देहि दान्ते तु

मन्त्रोद्धारक्रमः

(छाल्लारीमनुसृत्य)

२, ३. याष्टमः=हकारः, उयुतः=उकारेण युतः, अन्तेन=बिन्दुना समेतः (हुं) नमः=तदनन्तरं नमः शब्दः, भगवान् सोद्देश्यः=भगवते, सः एव=वराहशब्द एव, रूपसंयुतः=रूप शब्देन युक्तः, तादृशः=चतुर्थ्यन्तः (वराहरूपाय) तादृशः लोकत्रयपालः=चतुर्थ्यन्तः भूर्भुवः स्वः पतिरिति शब्दः (भूर्भुवः स्वः पतये) भुवः पतेः भावं=भूपतित्वं, मे देहि=मे देहीति शब्दः, दान्ते=दा कारान्ते, दापय स्वाहया=दापयेति तदनन्तरं स्वाहेति शब्दयुक्तः। तथा च ॥ ॐ हुं नमो भगवते वराह-रूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि दादापय स्वाहा ॥ इति मन्त्राकारः ॥ (३३)

SGDF
Sri Gargeshwari Digital Foundation

दापय स्वाहया युतः ॥ ३ ॥ मनुस्तस्यापरस्तारबीजोद्देशनमोयुतः । नमः सोद्देशभगवान्महाशब्दयुतश्च सः । तादृशः स्वाहया युक्तो वराहस्यापरो मनुः ॥ ४ ॥ श्यामः सुदर्शनदराभयसद्वरेतो भूम्या युतोऽखिलनिजोक्तपरिग्रहैश्च । ध्येयो निजैश्च तनुभिः सकलैरुपेतः कोलो हरिः सकलवाञ्छितसिद्धयेऽजः ॥ ५ ॥ वैष्णवानां मुनिर्ब्रह्मा मन्त्राणां वर्णभेदतः । ज्ञेयं छन्दो देवतैकं तत्तद्रूपो हरिः परः ॥६॥ प्रणवेन स्वनाम्ना च भूधरेण परात्मना । सर्वज्ञसर्वशक्तिभ्यां षडङ्गानि विदो विदुः ॥७॥ ज्ञानैश्वर्यप्रभानन्दतेजःशक्तिभिरेव वा (च) । पूर्णात्ममध्यगैः सर्ववैष्णवाङ्गान्यथो विदुः ॥ ८ ॥

तिष्ठोदादि(ः)स्वजायायाः कारणं स्वाहया युतः ॥९॥ श्रीकरोऽष्टाक्षरो मन्त्रो गरुडारूढसंस्मृतिः । द्विर्भीषय त्रासय च प्रमर्दय तथैव च ॥ १० ॥ प्रध्वंसयाथो रक्षेति पश्चाङ्गश्चेदुदाहृतः ।

क्रूरं वीरं बृहद्विष्णुं दीप्यन्तं विश्वतो मुखम् ॥११॥ पुंमृगेन्द्रं भयकरं शुभं मृत्योश्च मारकम् । नमामि स्वयमित्येष द्वात्रिंशार्णो

---

४. तारः=ॐकारः, बीजं=हुं इति बीजाक्षरं, उद्देशः=चतुर्थी विभक्तियुतो वराह शब्दः (वराहाय), नमः=नमः शब्दः । तथा च ॥ ॥ ॐ हुं वराहाय नमः ॥ इति द्वितीयमन्त्राकारः ॥ (८)

नमः—आदौ नमः शब्दः, तदनन्तरं सोद्देशभगवान्=चतुर्थ्यन्तो भगवच्छब्दः, ततः महाशब्देन युक्तः सः तादृशः = चतुर्थ्यन्तो वराहशब्दः (महावराहाय), ततः स्वाहया=स्वाहा शब्देन युक्तः तृतीयो वराहमन्त्रः ॥ तथाच ॥ नमो भगवते महावराहाय स्वाहा ॥ इति तृतीयमन्त्राकारः ॥ (१४)

९, १०. उदादिः—उत् इत्याकारक शब्दादिः, तिष्ठ=तिष्ठेति शब्दः (उत्तिष्ठ), स्वजायायाः कारणं=श्रीकर इति शब्दः ततः स्वाहा शब्देन युक्तः । तथा च ॥ उत्तिष्ठ श्रीकर स्वाहा ॥ इति श्रीकरोऽष्टाक्षरो मन्त्रः ॥ (८)

११, १२. क्रूरं—उग्रमिति पदं, वीरं=तदनन्तरं वीरमिति पदं, ततो बृहद्विष्णुं—महाशब्दोपेत विष्णुं इति पदं, ततः दीप्यन्तं—ज्वलन्तं,

SGDF
Sri Gargeshwari Digital Foundation

मनुर्हरेः ॥ १२ ॥ द्विर्जयस्योपरि निजं सोद्देशं सर्ववित्तथा । महातेजो बलं वीर्यं तादृशं स्वाहया युतम् ॥ १३ ॥ चतुर्विंशाक्षरो मन्त्रो निखिलेष्टप्रदायकः । विद्महे धीमहे पूर्वं स्वयं चैव महाबलः ॥ ॥ १४ ॥ प्रेरयेत्तन्न इत्येतन्मध्येऽनन्तः प्रकीर्तितः । पादैर्व्यस्तैः समस्तैश्च पदैश्चाङ्गं प्रकीर्तितम् ॥ १५ ॥ पूर्वयोस्तत्र पूर्वं तु सर्वज्ञेन षडङ्गकम् । तृतीयं तु द्विरावृत्तैः पादैरङ्गसमन्वितम् ॥ १६ ॥ ध्यायेन्नृसिंहमुरुवृत्तरवित्रिनेत्रं जानुप्रसक्तकरयुग्ममथापराभ्याम् । चक्रं दरं च दधतं प्रियया समेतं तिग्मांशुकोट्यधिकतेजसमग्र्यशक्तिम् ॥ ॥ १७ ॥ सर्वेष्वपि हि मन्त्रेषु ध्याद्यनन्तान्तबाहुकः । चेतनान्तस्थमारभ्य सर्वगान्तस्थ(स्व)रूपवान् ॥ १८ ॥ अनन्तरूपो ध्येयोऽत्र स्वगुरूक्तानुसारतः । यथायोग्यं यथाशक्ति तत्तदायुधभूषणः ॥१९॥ शङ्खचक्रगदापद्मखड्गखेटाः सशार्ङ्गकाः । शरो मुसलवज्रौ च हलः

ततः विश्वतोमुखं=सर्वतोमुखमिति पदं, ततः पुं मृगेन्द्रं=नरसिंहमिति पदं, भयङ्करं=भीषणमिति पदं, शुभं=भद्रमिति पदं, मृत्योश्च मारकं=मृत्युमृत्युं इति पदं, ततः नमामि इति, स्वयं=अहमिति पदं। तथा च॥ 'उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं । नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्'॥ इति नरसिंहमन्त्रः ॥ (२२)

१३. द्विः जयस्य=जय जय शब्दस्य, अनन्तरं सोद्देशं निजं=नरसिंहाय इति पदं, तदनन्तरं तथा सर्ववित्=सर्वज्ञायेति पदं, ततः तादृशं महातेजोबलं वीर्यं=महातेजोबलवीर्याय इति पदं, ततः स्वाहा इति पदं तथा च 'जय जय नरसिंहाय सर्वज्ञाय महातेजोबलवीर्याय स्वाहा' इति अपरो नरसिंहमन्त्रः ॥ (२४)

१४. विद्महे पूर्वं=विद्महे शब्दात् प्राक् स्वयं च=नरसिंहाय इति पदं, धीमहे पूर्वं=धीमहि शब्दात् प्राक्, महाबलः च=महाबलाय इति पदं, तन्नः प्रेरयेत् इत्येतन्मध्ये=तन्नः इत्यनन्तरं प्रचोदयात् इत्यस्मात्पूर्वं, अनन्तः=अनन्त इति पदम्। तथा च 'नरसिंहाय विद्महे महाबलाय धीमहि। तन्नोऽनन्तः प्रचोदयात्' इति नरसिंहगायत्रीमन्त्रः ॥

SGDF
Sri Gurgeshwari Digital Foundation

पाशाङ्कुशौ तथा ॥ २० ॥ शूलं च भिण्डिबालश्च पट्टिशोऽग्नि-
र्वराभये । तर्कमुद्राक्षमाला च पुस्तकं च विदारणम् ॥ २१ ॥
इत्यादीन्यखिलान्येव विष्णोश्चिन्त्यानि बाहुषु ।

वियत्स इति युग्मार्णो विपरीतश्च स स्मृतः ॥ २२ ॥ स सर्ग-
हीनो वेतश्च बिन्दुहीनोत्तरस्तथा । त्रय एते महामन्त्राः पुरुषार्थ-
चतुष्टये ॥ २३ ॥ कल्पवृक्षाः प्रिया विष्णोर्विशेषज्ञानदायकाः ।
तैरेव तु द्विरावृत्तैरङ्गमेषां प्रकीर्तितम् ॥ २४ ॥ श्वासरूपो जपो
नित्यमुभयोर्विद्वदज्ञयोः । एकविंशत्सहस्रात्मा सषट्शतमहर्निशम् ॥
॥ २५ ॥ अर्पणीयो हरौ नित्यं प्रातर्योगो महानयम् । अशेषदोष-
दहनस्तत्त्वज्ञानप्रदायकः ॥ २६ ॥ अष्टैश्वर्यप्रदश्चैव कृतादौ समुपा-
सताम् । तारयोगोऽप्येवमेव ब्रह्मादावेव वर्तते ॥ २७ ॥ ध्याये-
द्रवीन्दुकरमिन्दुसहस्रलक्षकान्तिं प्रियासहितमास्थितमिन्दुबिम्बे । शङ्खा-
रिदोर्द्वयमुदर्कमहेन्दुबिम्बात्संसिच्यमानममृतेन रमाधिनाथम् ॥२८॥

---

२२. मालारूपो हंसमन्त्रः— वियत्=आकाशबीजं हकारः बिन्दु सहितः, ततः सः=विसर्गसहितः सकारः, अनेन 'हंसः' इति युग्मार्णः=द्यक्षरः मन्त्रः । सः=हंसः इति मन्त्रः, विपरीतः=व्युत्क्रमेण उच्चरितः सोहं इत्यपि द्यक्षरः, द्वितीयो मन्त्रः सः=सः इति वर्णः सर्गहीनः=विसर्गरहितः तथा अकाररहितश्च कार्यः, तथा च स् इति भवति, वेतः=वा कारेण सहितश्च कार्यः ततश्च 'स्वा' इति भवति, उत्तरः='हं' इति वर्णः, बिन्दुहीनः=अनुस्वार रहितः, आ कार सहितश्च, तथा=पूर्ववदेव द्यक्षरः 'स्वाहा' इति तृतीयो मन्त्रः । तथा च 'हंसः सोहं स्वाहा' इति मन्त्रत्रयात्मकः मालारूपः षडक्षरः हंसमन्त्रः ।

२७. हंसमन्त्रान्तरमाह — तारयोगः = ॐकार सम्बन्धवान्, एवमेव=अयमपि पूर्वमन्त्रवत् चतुर्थो हंसमन्त्रः, एवकारेण पूर्वमन्त्र-सम्बद्ध एवायं न पृथक् । तथा च ॐ हंसः सोहं स्वाहा इति सप्ताक्षरः हंसमन्त्रः । एते चत्वारः मालामन्त्रा इत्युक्तं भवति ।

SGDF
Sri Gurgeshwari Digital Foundation

अन्त्यस्य रक्तवर्णो वा ध्येयो विष्णुः सनातनः। विद्युद्वर्णोऽथवा ध्येयः शक्त्येतः पञ्चमन्त्रयुक् ॥ २९ ॥ अष्टाक्षरो महामन्त्रस्तैरेवाङ्गैः समन्वितः। अन्त्यध्यानयुतश्चैव निःशेषपुरुषार्थदः ॥ ३० ॥

मूलं नः प्रतिषेधश्च सोद्देशो(श्यो)भगवानपि। विष्णुर्भोज्याधिपः स्वाहा युक्तोऽष्टादशवर्णकः ॥ ३१ ॥ अङ्गानि तत्पदैरेव मन्त्रचिन्तामणिस्त्वयम्। यथेष्टभक्ष्यभोज्यादिदाता मुक्तिप्रदायकः ॥ ३२ ॥ ध्यायेत्सुशुक्लमरविन्ददलायताक्षं सौवर्णपात्रदधिभोज्यमथामृतं च। दोर्भ्यां दधानमखिलैश्च सुरैः समेतं शीतांशुमण्डलगतं रमया समेतम् ॥ ३३ ॥

अमृतं स्वयमुद्देशयुक्तः सहृदयो मनुः। सतारोऽष्टाक्षरोऽङ्गानि पदैर्व्यस्तैः समस्तकैः ॥ ३४ ॥ उद्यद्रविप्रभमरीन्द्रदरौ गदां च ज्ञानं

---

२९. हंसस्यैव मन्त्रान्तरमाह—पूर्वोक्तः हंसमन्त्रः शक्त्या=शक्तिबीजेन बिन्दुयुक्तेन ह्रीकारेण इतः (चेत्)=युक्तः चेत्, पञ्चमन्त्रयुक्=पञ्चमन्त्रमालारूपः अष्टाक्षरो महामन्त्रो भवति तथा च ॐ ह्रीं हंसः सोहं स्वाहा इति मन्त्रनिष्पत्तिः ॥

३१. मन्त्रचिन्तामणिमन्त्रमाह—मूलं=ॐकारः, ततः नः=नकारः, प्रतिषेधः=प्रतिषेधार्थकः मकारः नमः शब्द इत्यर्थः, ततः सोद्देशः=चतुर्थ्यन्तः, भगवान्=भगवते इति शब्दः अपि तथैव चतुर्थ्यन्तः, विष्णुः=विष्णवे इति शब्दः ततः तथैव चतुर्थ्यन्तः, भोज्याधिपः=तदर्थकः अन्नाधिपते इति शब्दः, अन्ते स्वाहा युक्तः=स्वाहा शब्देन युक्तः, एवं अष्टादशवर्णात्मकः मन्त्रः ॥ तथा च 'ॐ नमो भगवते विष्णवे अन्नाधिपतये स्वाहा' इति मन्त्रः उद्धृतो भवति, इममेव मन्त्रं दधिवामनमन्त्र इत्याहुः।

३४. वामनमन्त्रमाह—अमृतं=अमृत बीजं 'वां' इत्यक्षरं, स्वयं उद्देश युक्तः=चतुर्थ्यन्तः स्ववाचकः 'वामनाय' इति शब्दः। सहृदयः='नमः' शब्दयुक्तः, सतारः=ॐकारयुक्तः अष्टाक्षरः, मनुः=अष्टवर्णात्मकः वामनमन्त्रः। तथा च 'ॐ वां वामनाय नमः' इति मन्त्रनिष्पत्तिः।

SGDF
Sri Gangeshwari Digital Foundation

च बिभ्रतमजं प्रियया समेतम् । विश्वावकाशमभितः प्रतिभासयन्तं भासा स्वया स्मरत विष्णुमजादिवन्द्यम् ॥ ३५ ॥

त्रिविक्रमस्तु सोद्देशो विश्वरूपश्च तत्परः । धीविदौ च महे विष्णुस्तन्नः प्रेरणमध्यगः ॥ ३६ ॥

स्वयमुद्देशसंयुक्तस्तदाद्यर्णपुरःसरः । सनतिः षडक्षरो मन्त्रो वर्णैरङ्गक्रिया मता ॥ ३७ ॥ अङ्गारवर्णमभितोऽण्डबहिःप्रभाभिर्व्याप्तं परश्वधधनुर्धरमेकवीरम् । ध्यायेदजेशपुरुहूतमुखैः स्तुवद्भिरावीतमात्मपदवीं प्रतिपादयन्तम् ॥ ३८ ॥ श्यामं रवीन्द्वमितदीधितिकान्तियुक्तं ज्ञानं शरं च दधतं प्रियया समेतम् । स्वात्मस्वरूपममितं हनुमन्मुखेषु सन्दर्शयन्तमजितं स्मरतोरुगीर्भिः ॥ ३९ ॥

निजगोत्रं तु सोद्देशं पूर्वाक्षरपुरःसरम् । नत्यन्तं तारपूर्वं च मनुरष्टाक्षरो मतः ॥ ४० ॥ ते च बीजे बीजभूते धर्मादीनामशेषतः ।

---

३६. वामनगायत्रीमाह—सोद्देशः = चतुर्थ्यन्तः, त्रिविक्रमः = 'त्रिविक्रमाय' इति शब्दः । तत्परः=तदनन्तरं विश्वरूपश्च=चतुर्थ्यन्तः 'विश्वरूपाय' इति शब्दः । धी विदौ च-एतयोरुपरि 'विद्' शब्दः 'धी' शब्दश्च, तयोरुपरि 'महे' इति शब्दः तदनन्तरं तन्नः प्रेरणमध्यगः='तन्नः' 'प्रचोदयात्' इत्येतयोः मध्ये स्थितः, विष्णुः=विष्णुशब्दः । ततश्च त्रिविक्रमाय विद्महे । विश्वरूपाय धीमहि । तन्नो विष्णुः प्रचोदयात् । इति वामनगायत्री निष्पन्ना ॥ इमां त्रिविक्रमगायत्रीत्यप्याहुः ॥

३७. इदानीं परशुराममन्त्रं दाशरथिराममन्त्रं च युगपदुद्धरति-उद्देशसंयुक्तः=चतुर्थ्यन्तः, स्वयं='राम' शब्दः, तदाद्यर्णपुरःसरः=बिन्दुसहित 'रा' वर्णपूर्वकः 'रां' इति वर्णपूर्वकः, सनतिः = अन्ते 'नमः' शब्दयुक्तः षडक्षरः मन्त्रः । ततश्च 'रां रामाय नमः' इति मन्त्रावुद्धृतौ ।

४०. भार्गवराघवमन्त्रौ युगपदुद्धरति । तारपूर्वं = ॐकारपूर्वं, पूर्वाक्षरपुरःसरं=बिन्दुसहिताद्यक्षरपूर्वकं 'भां' 'रां' इति, सोद्देशं निजगोत्रं=चतुर्थ्यन्तं तत्तद्रामगोत्रवाचिपदं 'भार्गवाय' 'रामाय' इति,

SGDF
Sri Gargeshwari Digital Foundation

एते विजयदा मन्त्रा ज्ञानमोक्षप्रदायकाः ॥ ४१ ॥ हिरण्यरत्नराज्यादिसमभीष्टसुरद्रुमाः ।

कृष्णो गोविच्च कामेतः सोद्देशो वल्लवीजनः ॥ ४२ ॥ प्रियश्च तादृशः स्वाहायुगष्टादशवर्णकः । पदैरङ्गानि सम्प्रीतिकाममोक्षप्रदो मनुः ॥ ४३ ॥ ध्यायेद्धरिन्मणिनिभं जगदेकवन्द्यं सौन्दर्यसारमरिशङ्खवराभयानि । दोर्भिर्दधानमजितं सरसं च भैष्मीसत्यासमेतमखिलप्रदमिन्दिरेशम् ॥ ४४ ॥

सकामः स्वयमुद्देशी नत्यन्तोऽयं षडक्षरः । तदादिरपि सर्वेष्टचिन्तामणिरुदाहृतः ॥ ४५ ॥ दृष्टार्थ एव मन्त्राणां कलौ वीर्यं

नत्यन्तं=नमः शब्दान्तं अष्टाक्षरयुक्तं मन्त्रद्वयम् । ततश्च 'ॐ भां भार्गवाय नमः' 'ॐ रां राघवाय नमः' इति क्रमेण भार्गवराघवमन्त्रावुद्धृतौ ।

४१. तयोरेव एकाक्षर मन्त्रद्वयमाह । ते बीजे='भां' 'रां' इति, च=मन्त्रौ भवतः । अनेन 'भां' इति एकाक्षरो भार्गवमन्त्रः 'रां' इति एकाक्षरो राघवमन्त्रश्च उद्धृतौ ।

४२. कृष्णमन्त्रमाह । कामेतः=कामबीजेन 'क्लीं' इति वर्णेन युक्तः, सोद्देशः=चतुर्थ्यन्तः, कृष्णः='कृष्णाय' इति शब्दः, ततस्तथैव चतुर्थ्यन्तः, गोवित्='गोविन्दाय' इति शब्दः, ततश्च वल्लवीजनः='गोपीजन' शब्दः, ततः तादृशः=चतुर्थ्यन्तः, प्रियः='वल्लभाय' इति शब्दः, स्वाहायुक्तः='स्वाहा' शब्दयुतः, एवं च 'क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा' इति अष्टादशवर्णात्मकः मन्त्रः उद्धृतः । इमं मन्त्रं मदनगोपालनाम्नापि व्यवहरन्ति ।

४५. कृष्णमन्त्रान्तरमाह । सकामः='क्लीं' कारेण युक्तः, उद्देशी=चतुर्थ्यन्तः, स्वयं='कृष्ण' शब्दः 'कृष्णाय' इति शब्द इत्यर्थः, नत्यन्तः=अन्ते 'नमः' पदयुतः । अनेन 'क्लीं कृष्णाय नमः' इति षडक्षरः मन्त्रः उक्तो भवति ।

एकाक्षर कृष्णमन्त्रमाह । तदादिः=तन्मन्त्रादिस्थित 'क्लीं' इति वर्णोऽपि मन्त्र इत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

तिरस्कृतम् । तत्राप्युद्दीप्तवीर्या हि मन्त्रा अत्र प्रकीर्तिताः ॥ ४६ ॥
वासिष्ठवृष्णिप्रवरमन्त्रास्तत्रापि वीर्यदाः ।

स्वयं वेदपदारूढः पूर्ववर्णपुरःसरः ॥ ४७ ॥ नत्यन्तोऽष्टाक्षरो मन्त्रः प्रियो विज्ञानगोपतेः । व्याख्याश्रीसर्वविज्ञानकवितादिगुणप्रदः ॥ ४८ ॥ वादे विजयदो नित्यं यथा युद्धे नृकेसरी ॥४९॥ विज्ञानरोचिः परिपूरितान्तर्बाह्याण्डकोशं हरितोपलाभम् । तर्काभयेतं विधिशर्वपूर्वगीर्वाणविज्ञानदमानतोऽस्मि ॥ ५० ॥

ज्ञानानन्दपुरःपूर्णो विद्महे धीमहे तथा । तन्नः प्रेरणमध्ये तु व्यासो मन्त्राधिपाधिपः ॥ ५१ ॥

आदिबीजं स्थिरादोषज्ञानबीजं विमुक्तिदम् । सर्वपापक्षयकरं सर्वव्याधिविनाशनम् ॥ ५२ ॥ ध्यायेच्छशाङ्कशतकोट्यतिसौख्यकान्तिं संसिच्यमानममृतोरुघटैः सुरेशैः । वर्णाभिमानिभिरजेशमुखैः सहैव पञ्चाशता प्रतिगिरन्तमशेषविद्याः ॥ ५३ ॥

---

४७. वेदव्यासमन्त्रमाह । पूर्ववर्णपुरःसरः=व्यासपदपूर्ववर्णभूत 'व्या' शब्देन बिन्दुसहितेन आदौ युक्तः, वेदपदारूढः='वेद' इति पदोपरिस्थितः, स्वयं=चतुर्थ्यन्तः 'व्यासाय' इति शब्दः, नत्यन्तः='नमः' पदेन अन्ते युक्तः । एवं च 'व्यां वेदव्यासाय नमः' इति अष्टाक्षरः मन्त्रः निष्पन्नः ।

५१. वेदव्यासगायत्रीमाह । ज्ञानानन्दपुरः = 'ज्ञान' शब्द 'आनन्द' शब्दयोः आदौ प्रयुक्तः, पूर्णः=पूर्णशब्दः, एतौ चतुर्थ्यन्तौ ज्ञातव्यौ, तथा–तयोरनन्तरं यथाक्रमं, विद्महे धीमहे=ज्ञानपदानन्तरं विद्महे पदं, आनन्दपदानन्तरं धीमहि इति पदं, तन्नः प्रेरण मध्ये='तन्नः' 'प्रचोदयात्' इत्यनयोर्मध्ये व्यासः='व्यासः' इति पदं । तथा च 'पूर्णज्ञानाय विद्महे । पूर्णानन्दाय धीमहि । तन्नो व्यासः प्रचोदयात् ।' इति व्यासगायत्री उद्धृता भवति ।

५२. एकाक्षरवेदव्यासमन्त्रमाह । आदिबीजं=मन्त्रस्यादौ प्रयुज्यमानं 'व्यां' इति बीजम् । तथा च 'व्यां' इत्येकाक्षरो मन्त्र उक्तो भवति ।

SGDF
Sri Gargeshwari Digital Foundation

सोद्देशस्तु स्वयं दीर्घपूर्वार्णाद्यो नमोयुतः । सर्वविद्याप्रदोऽष्टार्णः प्रतिवादिजयप्रदः ॥ विमुक्तिसाधनः कीर्तिबुद्धिस्थैर्यप्रदः सदा ॥ ॥ ५४ ॥ वन्दे तुरङ्गवदनं शशिबिम्बसंस्थं चन्द्रावदातममृतात्मकरैः समन्तात् । अण्डान्तरं बहिरपि प्रतिभासयन्तं शङ्खाक्षपुस्तकसुबोधयुताब्जबाहुम् ॥ ५५ ॥ नस्तो मुखादपि निरन्तरमुद्गिरन्तं विद्या अशेषत उताब्जभवेशमुख्यैः । संसेव्यमानमतिभक्तिभरावनम्रैर्लक्ष्म्याऽमृतेन सततं परिषिच्यमानम् ॥ ५६ ॥

स्वयमुद्देशवान्पूर्ववर्णपूर्वो नमोयुतः । सतारोऽष्टाक्षरश्चैव नवार्णश्च मनू स्मृतौ ॥ ५७ ॥ प्रोद्यद्दिवाकरसमानतनुं सहस्रसूर्योरुदीधितिभिराप्तसमस्तलोकम् । ज्ञानाभयाङ्कितकरं कपिलं च दत्तं ध्यायेदजादिसमितिं प्रतिबोधयन्तम् ॥ ५८ ॥ अधृष्यताज्ञानमोक्षप्रदौ भक्तेष्विमौ सदा ।

---

५४. हयग्रीवमन्त्रचतुष्टयमुद्धरति । दीर्घपूर्वाद्यार्णः=आद्यः दीर्घः पूर्ववर्णः । बिन्दुयुक्तश्च । 'हां' इति वर्णपूर्वकः, नमोयुतः=अन्ते 'नमः' शब्दयुक्तः, सोद्देशः=चतुर्थ्यन्तः, स्वयं=स्ववाचकः यथासम्भवं 'हयशिरस्' 'हयग्रीव' 'हयशीर्ष' 'हयशीर्षन्' इत्येतेष्वेकशब्दयुक्तः अष्टाक्षरः मन्त्रः । एवं च (१) 'हां हयशिरसे नमः' (२) 'हां हयग्रीवाय नमः' (३) 'हां हयशीर्षाय नमः' (४) 'हां हयशीर्ष्णे नमः' इति चत्वारो मन्त्रा उद्धृता भवन्ति—अत्र चतुर्थे मन्त्रे षकार णकारयोर्भेदेन अष्टाक्षरता ज्ञेया ।

५७. कपिलदत्तात्रेयमन्त्रौ युगपदाह । स्वयं=स्ववाचकः कपिलशब्दः दत्तात्रेयशब्दो वा, उद्देशवान्=चतुर्थ्यन्तः, पूर्ववर्णपूर्वः='कं' इति 'दं' इति वा आदौ युक्तः, अन्ते नमो युतः='नमः' शब्दयुक्तः, सतारः=ॐकारपूर्वकः । एवं च 'ॐ कं कपिलाय नमः' इति अष्टाक्षरः कपिलमन्त्रः, 'ॐ दं दत्तात्रेयाय नमः' इति नवाक्षर दत्तात्रेयमन्त्रश्च उद्धृतौ ।

५९. वैदिकान् जप्यान् वैष्णवान् मन्त्रानाह । (१) दीर्घतमोदृष्टं=दीर्घतमसा ऋषिणा दृष्टं, विष्णोर्नुकं='विष्णोर्नु कं वीर्याणि प्रवो चं'

SGDF
Sri Gurgeshwari Digital Foundation

सूक्तं दीर्घतमोदृष्टं विष्णोर्नुकमिति प्रभोः ॥ ५९ ॥ सर्वार्थदं गार्त्समदं यो जात इति चापरम् । वासिष्ठं च परो मात्रयेति ज्ञानविमुक्तिदम् ॥ ६० ॥ भौवनीयं सर्वकाममोक्षदं य इमेत्यपि । एवमेवाखिला वेदा ज्ञातव्या विष्णुतत्पराः ॥ ६१ ॥

स्वदृष्टं सूक्तमखिलकामदं हरितुष्टिदम् । वाचोम्भ्रि(म्भृ)ण्याः श्रियोऽङ्गानि श्रीर्लक्ष्मीर्मेन्दिरा रमा ॥ ६२ ॥ कौशेयपीतवसनामरविन्दनेत्रां पद्मद्वयाभयवरोद्यतपद्महस्ताम् । उद्यच्छतार्कसदृशीं परमाङ्कसंस्थां ध्यायेद्विधीशनुतपादयुगां जनित्रीम् ॥ ६३ ॥

लज्जाबीजं च तद्बीजं तस्या एवाभिधायकम् । पाशाङ्कुशौ रक्तवस्त्रे लज्जाबीजे विशिष्यते ॥ ६४ ॥ अमध्ययुग्मस्वरगं तेनैवाङ्गमुदाहृतम् । सत्ताबीजं च दुर्बीजं तद्वदेव प्रकीर्तितम् ॥ ६५ ॥ वर्णः

इति षडर्चं वर्गत्रयात्मकं वा सूक्तं (ऋक्संहिता. मं. १–सू. १५४) (अ. २–अ. २–व. २४)। (२) वासिष्ठं=वसिष्ठ ऋषिणा दृष्टं, परोमात्रयेति='परो मात्रया तन्वा वृधान' इत्यादि चतुर्दशर्चं सूक्तं (ऋ. सं. ७–९९, १००) (अ. ५–अ. ६–व. २४, २५)। (३) भौवनीयं विश्वकर्मणा दृष्टं य इमेति='य इमा विश्वा भुवनानि जुह्वदि'त्यादि चतुर्दशर्चं सूक्तं (ऋ. सं. १०–८१, ८२) (अ. ८–अ. ३–व. १६, १७)। (४) गार्त्समदं=गृत्समदऋषिणा दृष्टं, यो जात इति='यो जात एव प्रथमो मनस्वान्' इत्यादि पञ्चदशर्चं सूक्तं (ऋ. सं. २–१२) (अ. २–अ. ६. व. ७, ८, ९)।

६२. लक्ष्मीमन्त्रमाह। वाचः=वाङ्नियामकत्वेन वागाख्यायाः अम्भृणीनामिकायाः श्रियः प्रतिपादकं, स्वदृष्टं=श्रीदेव्या दृष्टं, सूक्तं='अहं रुद्रेभिर्वसुभिश्चरामि' इत्यादि अष्टर्चं (ऋ. सं. १०–१२५) (अ. ८–अ. ७–व. ११, १२)

६४. लक्ष्म्या अपरौ मन्त्रावाह । लज्जाबीजं='ह्रीं' इति पदं, तद्बीजं='श्रीं' इति पदं। एवं च 'ह्रीं' इत्येकः 'श्रीं' इत्येकः एवं द्वौ मन्त्रौ उक्तौ भवतः।

६५. लक्ष्म्या एवापरं मन्त्रद्वयमाह । सत्ताबीजं=सत्तार्थकं भू इति बीजं, दुर्बीजं='दुः' इति बीजं, द्वौ बीजादिवदेव अंगादियुक्तम्। एवं च 'भू' इत्येकः 'दुः' इत्येकः इति मन्त्रद्वयम्।

SGDF
Sri Gargeshwari Digital Foundation

श्यामो विशेषोऽत्र ताम्बूलं नीलमुत्पलम् । चक्रशङ्खौ तर्जनं च शूलमित्यपरत्र च ॥ ६६ ॥ नमोऽन्तः स्वेनसहितस्तद्द्वान्यो मनुः स्मृतः । दुर्गा त्रिष्टुप् कश्यपोक्ता तत्रवर्णोऽग्निवत्स्मृतः ॥ ६७ ॥ त्रिनेत्रत्वं च दुर्गायाः प्रायः सर्वत्र कथ्यते । पादैः समस्तेन तथा षड्वर्णेनाङ्गमुच्यते ॥ ६८ ॥ रमाया एव रूपाणि त्वेतानि हि विदो विदुः । मुख्यतो जामदग्न्यस्तु देवताऽस्य मनोः स्मृतः ॥ ६९ ॥

हिरण्यगर्भसूक्तं च भृगुदृष्टं प्रकीर्तितम् । ब्रह्मधातृविरिञ्चाजपाद्यैरङ्गमुदाहृतम् ॥ ७० ॥ ध्यायेन्निषण्णमजमच्युतनाभिपद्मे प्रोद्यद्दिवाकरसमूहनिकाशमग्र्यम् । मातृप्रकारकरमुत्तमकान्तिमद्भिर्वक्त्रैः सृजन्तमखिलैः परमार्थविद्याः ॥ ७१ ॥ स्वयमुद्देशनतिमांस्तस्य पञ्चाक्षरो मनुः । स्वयमेवापरोऽष्टार्णस्तादृशः सम्प्रकीर्तितः ॥ ७२ ॥

---

६७. लक्ष्म्याः पुनः अपरं मन्त्रद्वयमाह । तदेव='भूं' 'दुं' इत्येतद्बीजद्वयमेव, नमोन्तं=अन्ते 'नमः' शब्दोपेतं, स्वेन=चतुर्थ्यन्तेन 'भू' शब्देन 'दुर्गा' शब्देन च सहितं, अन्यः मनुः=लक्ष्म्या एव अपरं मन्त्रद्वयं स्मृतम् । तथा च 'भूं भुवे नमः' इति पञ्चाक्षर एको मन्त्रः, 'दुः दुर्गायै नमः' इति षडक्षर अपरः ।

तस्या एव मन्त्रान्तरमाह । त्रिष्टुप्=त्रिष्टुप् छन्दोबद्धा, कश्यपोक्ता=कश्यपर्षिणा दृष्टा, दुर्गा='जातवेदसे सुनवाम सोममि'त्यादि ऋक् (ऋ. सं. १-९९-१) (अ. १–अ. ७–व. ७) दुर्गामन्त्र इत्यर्थः ।

७०. हिरण्यगर्भमन्त्रमाह । भृगुदृष्टं=भृगुमुनिना दृष्टं, हिरण्यगर्भसूक्तं=पञ्चदशर्चं 'हिरण्यगर्भः समवर्तताग्रे' इत्यादि सूक्तं चतुर्मुखब्रह्मणः मन्त्ररूपं (ऋक् सं. १०–१२१) (अ. ८–अ. ७–व. ३, ४)

७२. तस्यैव पञ्चाक्षरमन्त्रमाह । उद्देशनतिमान्=चतुर्थ्यन्तः नमः शब्दयुक्तश्च, स्वयं=स्ववाचकः 'ब्रह्म' शब्दः ब्रह्मणः पञ्चाक्षरो मन्त्रः । 'ब्रह्मणे नमः' इति मन्त्रनिष्पत्तिः ।

तस्यैव मन्त्रान्तरमाह । तादृशः=चतुर्थ्यन्तः नमःशब्दवांश्च, स्वयमेव=स्ववाचक हिरण्यगर्भ शब्दः अष्टाक्षरः अपरः मन्त्रः संप्रकीर्तितः । तथा च 'हिरण्यगर्भाय नमः' इति मन्त्रः भवति ।

SGDF
Sri Gangeshwari Digital Foundation

बळाद्यं भृगुणा दृष्टं प्राणाग्नेः सूक्तमुच्यते । प्राणाद्यैः पञ्चभिस्तस्याप्यङ्गान्युक्तानि सूरिभिः ॥ ७३ ॥ उद्यद्रविप्रकरसन्निभमच्युताङ्के स्वासीनमस्य नुतिनित्यवचःप्रवृत्तिम् । ध्यायेद्गदाभयकरं सुकृताञ्जलिं तं प्राणं यथेष्टतनुमुन्नतकर्मशक्तिम् ॥ ७४ ॥ प्राणाद्याः पञ्चमन्त्राश्च तस्य देवस्य वाचकाः । उच्यते हरिरप्येतैः साक्षान्नारायणादिकः ॥७५॥

ब्रह्माण्या अपि भारत्या गौरीर्यस्त इति श्रुतौ । मन्त्रौ दीर्घतमोदृष्टौ सर्वाभीष्टप्रदायकौ ॥ ७६ ॥ उद्यद्दिवाकरसमूहनिभां स्वभर्तुरङ्कस्थितामभयसद्वरबाहुयुग्माम् । मुद्रां च तत्त्वदृशये वरपुस्तकं च दोर्युग्मकेन दधतीं स्मरतात्मविद्याम् ॥ ७७ ॥ पादैर्व्यस्तैः समस्तैश्च तदङ्गानि विदो विदुः । स्वयमुद्देशनत्यन्तौ मन्त्रौ द्वावपरौ तयोः ॥

---

७३. मुख्यवायुमन्त्रमाह । भृगुणा दृष्टं = भृगु ऋषिणा दृष्टं, बळाद्यं=बळिति प्रथमपदयुक्तं 'बळित्था तद्वपुषे धायि दर्शतं' इत्यादि एकवर्गात्मकं, त्रयोदशर्चं, पञ्चदशर्चं वा प्राणाग्नि सूक्तं मुख्यप्राणस्य मन्त्ररूपम् । (ऋ. सं. १–१४१) (अ. २–अ. २–व. ८)

७५. वायोरेव अपरानपि मन्त्रानाह । वायुदेवस्य वाचकाः प्राणाद्याः = चतुर्थ्यन्ताः नमः शब्दयुक्ताः प्राणापानव्यानोदानसमान शब्दाः पञ्च पञ्चमन्त्रा इत्यर्थः । तथा च 'प्राणाय नमः' 'अपानाय नमः' 'व्यानाय नमः' 'उदानाय नमः' 'समानाय नमः' इति पञ्च मन्त्रा भवन्ति । एतैः पञ्चमन्त्रैः नारायण, वासुदेव, सङ्कर्षण, प्रद्युम्न, अनिरुद्धाख्य पञ्चरूपो हरिरपि, साक्षात्=तदनन्तर्गत एव उच्यते । तथा च एते विष्णोरपि मन्त्रा इत्यर्थः ।

७६. सरस्वती भारत्योः क्रमेण मन्त्रावाह । दीर्घतमो दृष्टौ गौरीर्यस्त इति श्रुतौ='गौरीर्मिमाय सलिलानि तक्षति' (ऋ. सं. १-१६४-४१) (अ. २–अ. ३–व. २२), 'यस्ते स्तनः शशयो यो मयो भू' (ऋ. सं. १-१६४-४९) (अ. २–अ. ३–व. २३) इत्यादि ऋक् मन्त्रौ द्वयात्मकौ क्रमेण सरस्वत्या भारत्याश्च मन्त्रौ ।

७८. सरस्वती भारत्योः पञ्चाक्षर मन्त्रावाह । उद्देश नत्यन्तौ= चतुर्थ्यन्तौ नमः शब्देन अन्ते युक्तौ, स्वयं=ब्रह्माणी शब्दः भारती शब्दश्च । तथा च 'ब्रह्माण्यै नमः' 'भारत्यै नमः' इति मन्त्रौ ज्ञेयौ ।

SGDF
Sri Gangeshwari Digital Foundation

॥ ७८ ॥ मन्त्रा एते हरेः प्रीतिदायकाः सर्वकामदाः । इष्टं दैवं हरिः साक्षाल्लक्ष्मीर्भाग्यस्य देवता ॥ ७९ ॥ गुरुर्ब्रह्माऽथ वायुर्वा विद्यादेव्यौ प्रकीर्तिते । तस्मादेते प्रिया विष्णोरन्तरङ्गतया सदा ॥ ॥ ८० ॥ ज्ञेयाश्चैव प्रपूज्याश्च विष्णोः प्रीतिमभीप्सता ।

उद्देशनतियुङ्मन्त्रः स्वयमेव शिवस्य तु ॥ ८१ ॥ वर्णैरेतैस्तदङ्गानि वामदेवो मुनिः स्मृतः । पङ्क्तिशब्दार्थविज्ञाने नहि छन्दसि संशयः ॥ ८२ ॥ ध्येयः पञ्चमुखो रुद्रः स्फटिकामलकान्तिमान् । विद्युच्छुभ्रासितरजःश्यामान्यस्य मुखानि च ॥ ८३ ॥ जटावबद्धेन्दुकलः प्रियायुङ्नागभूषणः । मन्त्रेष्वेतेषु सर्वेषु वाच्यस्तारेण केशवः ॥ ॥ ८४ ॥ अन्तर्यामितया ध्येयः सर्वदेवेषु सर्वदा ।

स एव वनितालिङ्गः पार्वत्या मनुरुच्यते ॥ ८५ ॥ गौरी वराभयकरा ध्येया पीताम्बरा च सा ।

स्वयमुद्देशनत्यन्तः पूर्वपूर्वः षडक्षरः ॥ ८६ ॥ सनत्कुमारदृष्टोऽयं मन्त्रः शेषस्य कामदः । दधानो हलसौनन्दौ श्वेतवर्णः कृताञ्जलिः ॥ ८७ ॥ सहस्रमूर्धाऽद्वितीयकर्णभूषः प्रियायुतः । वनमाली नीलवासा ध्येयो विष्णोस्तु पृष्ठतः ॥ ८८ ॥

---

८१. शिवमन्त्रमाह । उद्देशनतियुक्=चतुर्थी युक्तः नमः शब्दयुक्तश्च, स्वयं एव=स्ववाचक शिवशब्द एव शिवस्य मन्त्रः 'नमः शिवाय' इति पञ्चाक्षर मन्त्रः उद्धृतः ।

८५. पार्वती मन्त्रमाह । सः एव=पूर्वमन्त्रगत शिव शब्द एव वनितालिङ्गः चेत्=स्त्रीलिङ्गान्तश्चेत् पार्वत्या मन्त्र इत्युच्यते 'नमः शिवायै' इति पञ्चाक्षर मन्त्रः उद्धृतः ।

८६. शेषमन्त्रमाह । पूर्वपूर्वः=अद्याक्षर 'शें' पूर्वकः, उद्देशनत्यन्तः=चतुर्थ्यन्तः नमोन्तश्च, स्वयं = शेषवाचकः शेषशब्दः । तथा च 'शें शेषाय नमः' इति षडक्षरः मन्त्रः उद्धृतो वेदितव्यः ।

SGDF
Sri Gangeshwari Digital Foundation

व्यत्यस्तपक्षितारौ च स्वाहान्तो गारुडो मनुः । कश्यपोऽस्य मुनिर्ध्येयः सुधापूर्णं हिरण्मयम् ॥ ८९ ॥ दधानः कुम्भमभयं पीतः शुक्लोऽरुणो हरिः । कृष्णश्चाजानुतो नाभेः कण्ठात्कादन्त एव च ॥ ॥ ९० ॥ प्रियायुक्पुरतो विष्णोः पक्षतुण्डसमन्वितः । जङ्गम-स्थावरविषहृदयं सर्वकामदः ॥ ९१ ॥

मन्त्राश्च लोकपालानां नमोऽन्ताः सर्वकामदाः । पीतरक्तासित-श्वेतशुक्लरक्ताश्च वर्णतः ॥ ९२ ॥ सप्रियाः साभया वज्रशक्तिदण्डासि-पाशिनः । गदाङ्कुमुदशूलर्ष्टिखड्गिनो भूषणोज्ज्वलाः ॥ ९३ ॥

अग्निश्च स्वयमुद्देशी सनमः स्कन्दवाचकः । कौशिकोऽस्य मुनिर्वह्निवर्णः षण्मुख उज्ज्वलः ॥ ९४ ॥ धनुःशक्तिधरो ध्येयः कामदो भयनाशनः ।

ह्रस्वः कृपालुः सेतश्च स्वयमन्यः स्वयं तथा ॥ ९५ ॥

---

८९. गरुडमन्त्रमाह । व्यत्यस्तपक्षितारौ=विपरीतप्रयुक्तः पक्षि-शब्दः 'क्षिप' इति ॐकारश्च, स्वाहान्तः=स्वाहा इति शब्देन अन्ते युक्तः गरुडसम्बन्धी मन्त्र इत्यर्थः । तथा च 'क्षिप ॐ स्वाहा' इति मन्त्र उद्धृतः ।

९२. इन्द्रादीनां दशानां लोकपालानां मन्त्रानाह । नमोन्ताः= अत एव चतुर्थ्यन्ताः इन्द्रादिशब्दाः नमः शब्दान्ताः मन्त्रा इत्यर्थः । तथाच 'इन्द्राय नमः' 'अग्नये नमः' 'यमाय नमः' 'निर्ऋतये नमः' 'वरुणाय नमः' 'वायवे नमः' 'कुबेराय नमः' 'ईशानाय नमः' इत्यादयः ।

९४. स्कन्दमन्त्रमाह । अग्निः=अग्निबीजं 'रं' कार, उद्देशी= चतुर्थ्यन्तः, स्वयं='स्कन्दाय' इति शब्दः । सनमः='नमः' इति अन्ते युक्तः, स्कन्दमन्त्र इत्यर्थः । तथा च 'रं स्कन्दाय नमः' इति मन्त्रोद्धारः ।

९५. सूर्यमन्त्रमाह । ह्रस्वः = ह्रस्वस्वरयुक्तः, कृपालुः = कृपालु पार्यायः 'घृणी' शब्दः, सेतः=विसर्गेण युक्तः 'घृणिः' इति भवति । ततः स्वयं=स्ववाचक सूर्यशब्दः, ततः सेतः=विसर्गयुक्तः, स्वयमन्यः=

SGDF
Sri Gargeshwari Digital Foundation

सतारोऽष्टाक्षरः सौरः क्रमव्युत्क्रमतः पदैः । अङ्गानि पद्मयुगलधरो ध्येयोऽरुणो रविः ॥ ९६ ॥ सर्वव्याधिहरः श्रीदो वृष्टिदोऽयं मनुः स्मृतः । मोनयदासाप्रप्रक्षि व्यत्यस्तो विघ्नराण्मनुः ॥९७॥ रक्ताम्बरो रक्ततनू रक्तमाल्यानुलेपनः । महोदरो गजमुखः पाशदन्ताङ्कुशाभये ॥ ॥ ९८ ॥ बिभ्रद्ध्येयो विघ्नहरः कामदस्त्वरया ह्ययम् ।

तत्रतत्र स्थितो विष्णुस्तत्तच्छक्तीः प्रबोधयन् ॥ ९९ ॥ एक एव महाशक्तिः कुरुते सर्वमञ्जसा ।

स्वयमुद्देशवान्पूर्वपूर्वो हृदयसंयुतः ॥ १०० ॥ धान्वन्तरो महामन्त्रः संसृतिव्याधिनाशनः । अत्रोक्तसर्वमन्त्राणां नायकोपलसन्निभः ॥ १०१ ॥ छ ॥ चन्द्रौघकान्तिममृतात्मकरैर्जगन्ति सञ्जीवयन्तममितात्मसुखं परेशम् । ज्ञानं सुधाकलशमेव च सन्दधानं शीतांशुमण्डलगतं स्मरतात्मसंस्थम् ॥ १०२ ॥ मूर्ध्निस्थितादमुत एव सुधां स्रवन्तं भ्रूमध्यगाच्च तत एव च तालुसंस्थात् । हार्दाच्च नाभिसदनादधरस्थिताच्च ध्यात्वाभिपूरिततनुर्दुरितं निहन्यात् ॥१०३॥ अज्ञानदुःखभयरोगमहाविषाणि योगोऽयमाशु विनिहन्ति सुखं च दद्यात् । उन्मादविभ्रमहरः परतश्च सान्द्रस्वानन्दमेव पदमापयति स नित्यम् ॥ १०४ ॥ ध्यात्वैव हस्ततलगं स्वमृतं स्रवन्तं देवं स यस्य शिरसि स्वकरं निधाय । आवर्तयेन्मनुमिमं स तु वीतरोगः पापादपैति

सूर्यवाचक आदित्य शब्दः, सतारः=ॐकारपूर्वकः । ततश्च 'ॐ घृणिः सूर्य आदित्यः' इति अष्टाक्षरः मन्त्रः ।

९७. विघ्नेश्वरमन्त्रमाह । व्यत्यस्तः=विपरीतक्रमः, मोनयदासाप्रप्रक्षि=एतदात्मको अष्टवर्णसमुदायः । एवं च 'क्षिप्रप्रसादाय नमः' इति अष्टाक्षरो विघ्नेश्वर मन्त्रः ।

१००. धन्वन्तरिमन्त्रमाह । पूर्वपूर्वः=आदिवर्णपूर्वकः 'धं' इति पूर्वकः, उद्देशवान्=चतुर्थ्यन्तः, स्वयं=स्ववाचकधन्वन्तरिशब्दः, 'धन्वन्तरये' इति नत्यन्तः मन्त्रः तथा च 'धं धन्वन्तरये नमः' इति मन्त्रनिष्पत्तिः ।

SGDF
Sri Gargeshwari Digital Foundation

मनसा यदि भक्तिनम्रः ॥ १०५ ॥ शतं सहस्रमयुतं लक्षं वा रोगसंक्षयात् । इममेव जपेन्मन्त्रं साधूनां दुःखशान्तये ॥ १०६ ॥ ज्वरदाहादिशान्त्यर्थं तर्पयेन्मनुनामुना । ध्यात्वा हरिं जले सप्तरात्रं जूर्तिर्विनश्यति ॥ १०७ ॥ अयुतामृतसमिद्धोमाद्धोघृतक्षीरसंयुतात् । सर्वे रोगा विनश्यन्ति विमुखो न हरेर्यदि ॥ १०८ ॥ भूताभिचारशांत्यर्थमपामार्गाहुतिक्रिया । द्विगुणामृतया पश्चात्केवलेन घृतेन वा ॥ ॥ १०९ ॥ आयुर्विवृद्धये नित्यं जन्मनक्षत्र एव वा । चतुश्चतुर्भिर्दूर्वाभिः क्षीराज्याक्ताभिरिष्यते ॥ ११० ॥

सर्वाः क्रिया हरौ भक्ते हरिभक्तैः स्वनुष्ठिताः । गुरुभक्तैः सदाचारैः फलन्त्यद्धा न चान्यथा ॥ १११ ॥ ब्रह्मान्ता गुरुवश्चैव संप्रदायप्रवर्तकाः । तत्तद्गुणानुसारेण पूज्या मान्याश्च कृत्स्नशः ॥ ॥ ११२ ॥ सर्वेभ्योऽभ्यधिका भक्तिर्विष्णौ स्यादतिनिश्चला । लक्ष्मी ब्रह्मादिषु ततः क्रमेण स्यात्सुभाविता ॥ ११३ ॥ एवं विद्याः फलिष्यन्ति नान्यथा तु कथञ्चन । शुभान्ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् ॥ ११४ ॥ इतरानात्मपापोत्थांस्तेषां विद्या फलिष्यति । मुक्तावपि च संसारे नात्मनो विष्णुतां क्वचित् ॥ ११५ ॥ ब्रह्मरुद्रादिभावं वा साम्यं वाधिक्यमेव वा । अतद्वशत्वमथवा यः स्मरेत्स तु सिद्धिभाक् ॥ ११६ ॥ नान्यथा सिद्धिमाप्नोति कल्पकोटिशतैरपि । स्मृत्वा गुरुं पूर्वगुरुमादिमूलगुरूंस्तथा ॥ ११७ ॥ देवतां वासुदेवं च विद्याभ्यासी तु सिद्धिभाक् । अवज्ञाता गुरूणां च देवतानां न सिध्यति ॥ ११८ ॥ प्रयाति च तमो घोरं मन्त्रावज्ञाकृदेव च । यस्तारतम्यवेत्ता स्याद्गुरूणां देवतास्वपि ॥ ११९ ॥ भक्तिमान् गुरुदेवेषु तद्भक्तेषु च सिध्यति । गुरुदेवप्रतीपानां विमुखस्तत्प्रिये रतः ॥ ॥१२०॥ अकामक्रोधलोभश्च नचिरात्सिद्धिमाप्नुयात् । सकामेभ्योऽमितगुणा ह्यकामैस्तु कृताः क्रियाः ॥ १२१ ॥ तस्मादकाम एवालं भजेद्विष्णुं सनातनम् ।

SGDF
Sri Gangeshwari Digital Foundation

अयं मे हस्त इति च मन्त्रः पूर्वोक्तवत्स्मृतः ॥ १२२ ॥ अत्रोक्तास्तु क्रियाः सर्वमन्त्रेष्वप्युपलक्षणम् । विजयस्तंभनादीनि नारसिंहैर्विशेषतः ॥१२३॥ जामदग्न्यैश्च कार्याणि राघवैर्यादवैरपि । वाराहैः स्तम्भनं क्षिप्रं श्रीकराः कथिताः पुरा ॥ १२४ ॥ बहुबाहुं महाकायमुद्युक्तं चोद्यतायुधम् । स्मरन्विजयमाप्नोति स्तम्भनादींश्च कारयेत् ॥ ॥१२५॥ वसुपूर्णकरं रत्नपर्वतस्थं विभावयन् । वसुसिद्धिमवाप्नोति सेव्यमानमजादिभिः ॥ १२६ ॥ श्रिया विभूतिभिर्युक्तं भावयन् भूतिमाप्नुयात् । यद्यन्मनोगतं तस्य तत्तदाप्नोत्यसंशयम् ॥ १२७ ॥ तथातथा हरिं ध्यायन् क्रियास्तास्ताश्च साधयन् । श्रिये पद्मानि जुहुयात्संप्रीत्या उत्पलानि च ॥ १२८ ॥ शरान् जयाय जुहुयादभिमन्त्रच प्रयोजयेत् । विद्यायै मन्त्रितं वारि वचां वा तुलसीमपि ॥ ॥१२९॥ ब्राह्मीं घृतं (घृष्टं) सुवर्णं वा शतावृत्त्या तु नित्यशः । अकुर्वंश्च क्रियां भक्त्या निरपेक्षो भजन्हरिम् ॥ १३० ॥ सर्वमेतदवाप्नोति विशेषेण न संशयः ।

सृष्टिस्थितिलयन्यासाः प्रातिलोम्यानुलोमतः ॥ १३१ ॥ स्थित्यन्ता एव वर्णानां श्रेष्ठा एवं चतुर्दश । संहृत्यन्ता मोक्षिणां च एकविंशतिरेव वा ॥ १३२ ॥ पादहृत्केषु नाभ्यास्ययुक्तं च सललाटकम् । सनासिका सदृग्जान्वा सश्रोत्रं सोरुकं तथा ॥ १३३ ॥ सोरस्कं च सकण्ठं च सभुजद्वयमेव च । सगण्डयुग्मं सालीकं सतुण्डक्रोडकं तथा ॥ १३४ ॥ समूलं च सगुह्यं च सपार्श्वद्वयमेव च । सदोर्द्वयं व्यापकं च गलपार्श्वद्वयेन च ॥ १३५ ॥ ककुत्स्तनद्वयेनापि पृष्ठमूलेन सर्वशः । न्यासो यथाक्रमं प्रोक्तो मन्त्रेष्वेतेषु

---

१२२. वैदिकं धान्वन्तरं मन्त्रमाह । अयं मे हस्तः इति='अयं मे हस्तो भगवान्' इत्यादि एक ऋगात्मकः (ऋ. सं. १०-६०-१२) (अ. ८-अ. १–२५) मन्त्रः पूर्वोक्तधन्वन्तरिमन्त्रवत् स्मृतः ।

SGDF
Sri Gangeshwari Digital Foundation

कृत्स्नशः ॥ १३६ ॥ प्रतिमायामात्मनि च न्यासोऽयं सन्निधानकृत् ।
बीजांतःसाध्यमध्यं च विभक्तदलमन्त्रयुक् ॥१३७॥ वर्णानु-
प्रातिलोम्येन वृत्तं भूपुरसंयुतम् । बीजसंदब्धकोणं च यन्त्रं रक्षादि-
साधकम् ॥ १३८ ॥ समं तत्सर्वमन्त्रेषु जप्तं धार्यं तु वा भुवि ।
विलिख्य मण्डले वा तत्पूजयेद्धरिमञ्जसा ॥ १३९ ॥ प्रतिमा-
लक्षणैर्यावद्युक्त आचार्य उत्तमः । सर्ववित्तपसा युक्त आज्ञाशक्तियुतो
हरेः ॥ १४० ॥ यावद्भक्तो यथालब्धैर्गुणैर्युक्तोऽथ वैष्णवः । गुरुः
सत्संप्रदायज्ञस्तारतम्येन सिद्धिदः ॥ १४१ ॥ उत्तमादुत्तमसिद्धिर्धर्म-
मोक्षादिषु स्फुटम् । तस्मादुत्तम आचार्ये लब्धे नातोऽवरं व्रजेत् ॥
॥ १४२ ॥ एकस्य शिष्यतां प्राप्य तदाज्ञां न विना समम् । अवरं
वा व्रजेदुच्चगुणश्चेन्नैव दुष्यति ॥ १४३ ॥ विशेषतो गुणश्च स्याद्देवेष्व-
प्येवमेव हि । तस्मादुत्तममाचार्यं देवेशं चाश्रयेद्धरिं ॥ १४४ ॥
अपरोक्षदृशेरेव यस्मान्मोक्षो न चान्यथा । अपरोक्षदृशिश्चैव श्रवणा-
न्मननादनु ॥ १४५ ॥ सम्यङ्निश्चिततत्त्वस्य निदिध्यासनया भवेत् ।
द्विविधा सा च संप्रोक्ता विष्णुशास्त्रावमर्शनम् ॥ १४६ ॥ एकं ध्यानं
हरेरन्यच्चत्वार्यंगानि तस्य च । यमश्च नियमश्चासा प्राणायाम इती-
रितः ॥ १४७ ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ । यमाः
शौचं तपस्तुष्टिः स्वाध्यायो हरिपूजनम् ॥ १४८ ॥ नियमा वीरपद्मे
च स्वस्तिकाद्यानि चासनम् । रेचकः पूरकश्चैव कुम्भकश्च त्रिधा स्मृतः॥
॥ १४९ ॥ प्राणायामः स्मृतिं विष्णोर्विना नियम उच्यते । अधीति-
स्मृतियुक्तो हि निदिध्यासनमेव हि ॥ १५० ॥ प्राणायामे च
विष्णोर्यत्स्मरणं ध्यानमेव तत् । आसा शौचं प्राणयमो निष्परिग्रह-
पूर्वकाः ॥ १५१ ॥ तप आद्याः क्रमात्सर्वे उत्तरोत्तरतोऽधिकाः ।
सर्वतः श्रवणाद्यास्तु मुख्या मुक्तिप्रसाधने ॥ १५२ ॥ अज्ञस्य श्रवणं
श्रेष्ठमयुक्तेर्मननं तथा । ध्यानं निश्चिततत्त्वस्य तस्माच्छास्त्रावमर्शनं ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ १५३ ॥ स्वयं दशगुणं तस्माद्व्याख्यैकस्य शतोत्तरा । अपरोक्ष-
दृशाऽप्येषा कर्तव्या विष्णुतुष्टिदा ॥ १५४ ॥ य इमं परमं गुह्यं
मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥
॥ १५५ ॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः । भविता न
च मे तस्मादन्यः प्रियतरो भुवि ॥ १५६ ॥ शौचासने त्वङ्गमात्रं न
पृथग्धर्मकारणम् । प्राणायामादयस्तुष्टिपर्यन्ता द्विगुणाधिकाः ॥१५७॥
स्वाध्यायोऽतः कोटिगुणस्ततोऽनन्तगुणा हरेः । पूजा तत्त्रिगुणं ध्यान-
मिति धर्मक्रमः स्मृतः ॥ १५८ ॥ ऊर्वोरधः पदोरूर्ध्वं विभागेनेति
च त्रिधा । आसनत्रयमुद्दिष्टं मन्त्रस्मरणपूर्वकम् ॥ १५९ ॥ द्विगुणो-
त्तरं रेचकादि षोडशादिक्रमेण तु । मात्राणां ह्रस्ववर्णस्य कालो
मात्रेति शब्द्यते ॥१६०॥ क्रमेणैवाभ्यसेन्मात्रां वृद्धिमेकाग्रधीः पुनः ।
रेचयित्वा दक्षिणतः पूरयित्वा च वामतः ॥ १६१ ॥ कुंभकश्च
सुषुम्नायां विष्णुं वायुं च संस्मरेत् । मूलाधारं समारभ्य त्वामूर्धान-
मृजुस्थिता ॥१६२॥ मध्ये सुषुम्ना विज्ञेया वज्रिकार्या प्रकाशि(नी)का ।
वैद्युता ब्रह्मनाडीति सैव पञ्चप्रभेदिनी ॥ १६३ ॥ पृष्टवामाग्रदक्षांत-
भेदास्तेषु क्रमेण तु । हरिर्नीलः सितः पिङ्गो लोहितश्चात्र केशवः ॥
प्रद्युम्नादिस्वरूपेण ध्येयः सिद्धिमभीप्सता ॥ १६४ ॥ मूले च नाभौ
हृदयेन्द्रयोनिभ्रूमध्यमूर्धाद्विषडन्तकेषु । चतुःषडष्टद्विचतुर्द्विषट्कदलेषु
पद्मेषु सितारुणेषु ॥ १६५ ॥ पञ्चात्मकोऽसौ भगवान्सदैव ध्येयो
हृदन्तान्यरुणानि तानि । त्रिकोणवह्नौ च षडश्रवायौ द्विस्तावदश्र-
रविवृत्तशशित्रिवह्नौ ॥ १६६ ॥ वृत्ते विधावपि विचिन्त्यमिदं
दशार्धरूपं सितं तदखिलं हृदयात्परस्थम् । इडा च पिङ्गळा चैव
वज्रिका धारिणी तथा ॥ १६७ ॥ सुषुम्नायाश्चतुर्दिक्षु वज्रिकाद्यास्तु
तत्र च । चतुर्मूर्तिः स भगवान्हृदये संव्यवस्थितः ॥ १६८ ॥
द्वासप्ततिसहस्राणि नाड्योऽन्यास्तु प्रधानतः । बृहतीसहस्रस्पर्शाना-

SGDF
Sri Gangeshwari Digital Foundation

मृचां वाच्योऽत्र केशवः ॥ १६९ ॥ रूपाणां लक्षणं तेषां रहस्यत्वान्न कथ्यते ॥ १७० ॥ विष्णुना ब्रह्मणे प्रोक्तं ग्रन्थसङ्कोचतस्तथा ।

खण्डस्मृतिर्धारणा स्यादखण्डा ध्यानमुच्यते ॥ १७१ ॥ अप्रयत्नात्समाधिश्च दर्शनं चिरयाऽनया । अथवा सततं शास्त्रविमर्शेन भविष्यति ॥ १७२ ॥ परमस्नेहसंयुक्तयथार्थज्ञानतो भवेत् । सा भक्तिरितिविज्ञेया साधनं भोगमोक्षयोः ॥ १७३ ॥ मुख्यमेषैव नान्यत्स्यात्सर्वं व्यर्थं तया विना । सैकाप्यभीष्टफलदा मोक्षो दर्शनयुक्तया ॥ १७४ ॥ दर्शनं च तया हीनं व्यर्थमन्यत्किमुच्यते । योग्यं तु दर्शनं नैव तया हीनं भविष्यति ॥ १७५ ॥ आनन्दचित्सदितिपूर्वगुणैः समस्तैर्मर्त्यादिभिर्विधिपरैर्भगवान् क्रमेण । ध्यातोऽधिकैरधिगुणोऽधिकमेव सौख्यं मुक्तौ ददाति सततं परमस्वरूपः ॥ ॥ १७६ ॥

निर्दोषाखिलसम्पूर्णगुणेन हरिणा स्वयम् । ब्रह्मणे कथितात्तन्त्रसारादुद्धृत्य सादरम् ॥ १७७ ॥ आनन्दतीर्थमुनिना कृतो ग्रन्थोऽयमञ्जसा । ग्रन्थोऽयं पाठमात्रेण सकलाभीष्टसिद्धिदः ॥१७८॥ किमु ज्ञानादनुष्ठानादुभयस्मात्पुनः किमु ॥ १७९ ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ ॥ १८० ॥ अशेषदोषोज्झितपूर्णसद्गुणं सदा विशेषापगतोरुरूपम् । नमामि नारायणमप्रतीपं सदा प्रियेभ्यः प्रियमादरेण ॥ १८१ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे चतुर्थोऽध्यायः सम्पूर्णः ॥ ४ ॥

॥ तन्त्रसारसङ्ग्रहः सम्पूर्णः ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिता

सदाचारस्मृतिः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक श्रीलक्ष्मी-
हयग्रीवाय नमः ॥ हरिः ॐ ॥ यस्मिन्सर्वाणि कर्माणि संन्यस्या-
ध्यात्मचेतसा । निराशीर्निर्ममो याति परं जयति सोऽच्युतः ॥ १ ॥
स्मृत्वा विष्णुं समुत्थाय कृतशौचो यथाविधि । धौतदन्तः समाचम्य
स्नानं कुर्याद्विधानतः ॥ २ ॥ उद्धृतेति मृदालिप्य द्विषडष्टषडक्षरैः ।
त्रिर्निमज्याऽऽप्यसूक्तेन प्रोक्षयित्वा पुनस्तथा ॥ ३ ॥ मृदालिप्य
निमज्य त्रिस्त्रिर्जपेदघमर्षणम् । स्रष्टारं सर्वलोकानां स्मृत्वा नारायणं
परम् ॥ ४ ॥ यतश्वासो निमग्नोऽप्सु प्रणवेनोत्थितस्ततः । सिञ्चे-
त्पुरुषसूक्तेन स्वदेहस्थं हरिं स्मरन् ॥ ५ ॥ वसित्वा वास आचम्य
प्रोक्ष्याचम्य च मन्त्रतः । गायत्र्या चाञ्जलिं दत्वा ध्यात्वा सूर्यगतं
हरिम् ॥ ६ ॥ मन्त्रतः परिवृत्याथ समाचम्य सुरादिकान् । तर्पयित्वा
निपीड्याथ वासो विस्तृत्य चाञ्जसा ॥ ७ ॥ अर्कमण्डलगं विष्णुं
ध्यात्वैव त्रिपदीं जपेत् । सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
॥ ८ ॥ आसूर्यदर्शनात्तिष्ठेत्ततस्तूपविशेत वा । पूर्वां सन्ध्यां सनक्षत्रा-
मुत्तरां सदिवाकराम् ॥ ९ ॥ उत्तरामुपविश्यैव वाग्यतः सर्वदा जपेत् ।
ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ॥
केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥१०॥
गायत्र्यास्त्रिगुणं विष्णुं ध्यायन्नष्टाक्षरं जपेत् । प्रणम्य देवान्विप्रांश्च
गुरूंश्च हरिपार्षदान् ॥ ११ ॥ एवं सर्वोत्तमं विष्णुं ध्यायन्नेवार्चये-
द्धरिम् । ध्यानप्रवचनाभ्यां च यथायोग्यमुपासनम् ॥ १२ ॥
धर्मेणेज्यासाधनानि साधयित्वा विधानतः । स्नात्वा सम्पूजयेद्विष्णुं

SGDF
Sri Gargeshwari Digital Foundation

वेदतन्त्रोक्तमार्गतः ॥१३॥ वैश्वदेवं बलिं चैव कुर्यान्नित्यं तदर्पणम्। इष्टं दत्तं हुतं जप्तं पूर्तं यच्चात्मनः प्रियम् ॥ १४ ॥ दारान्सुतान्प्रियान्प्राणान्परस्मै सन्निवेदयेत्। भुक्तशेषं भगवतो भृत्यातिथिपुरस्सरः ॥ १५ ॥ भुञ्जीत हृद्गतं विष्णुं स्मरंस्तद्गतमानसः। आचम्य मूलमन्त्रेण कोष्ठं स्वमभिमन्त्रयेत् ॥ १६ ॥ वेदशास्त्रविनोदेन प्रीणयन्पुरुषोत्तमम्। अहःशेषं नयेत्सन्ध्यामुपासीताथ पूर्ववत् ॥ १७ ॥ यामात्परत एवाथ स्वपेद्ध्यायञ्जनार्दनम्। अन्तराले ततो बुद्ध्वा स्मरेत बहुशो हरिम् ॥ १८ ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावम्। करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ १९ ॥

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥२०॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ २१ ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥२२॥ यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत ॥ २३ ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' ॥२४॥ 'रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः। ब्रह्मा मामाश्रितो नित्यं नाहं कञ्चिदुपाश्रितः' ॥ २५ ॥ 'ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः। श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ २६ ॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः' ॥ २७ ॥ 'द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च। विष्णुभक्तिपरो दैवो विपरीतस्तथासुरः' ॥ २८ ॥ 'स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः' ॥ २९ ॥ 'धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत।

SGDF
Sri Gargeshwari Digital Foundation

पापं भवति धर्मोऽपि यो नभक्तैः कृतो हरेः' ॥ ३० ॥ 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । नित्यं भवेच्च मन्निष्ठो बुभूषुः पुरुषस्तथा' ॥ ३१ ॥

एष नित्यः सदाचारो गृहिणो वनिनस्तथा । वैश्वदेवं बलिं दन्तधावनं चाप्यृते बटोः ॥ ३२ ॥ एवमेव यतेः स्वीयवित्तेन तु विना सदा । मूलमन्त्रैः सदास्नानं विष्णोरेव च तर्पणम् ॥ ३३ ॥ विशेषो निष्क्रिययतेरजलाञ्जलिना तथा । तर्पणं तु हरेरेव यतेरन्यस्य चोदितम् ॥ ३४ ॥ समिद्धोमो बटोश्चैव स्मृत्वा विष्णुं हुताशने । सर्ववर्णाश्रमैर्विष्णुरेक एवेज्यते सदा ॥ ३५ ॥ रमाब्रह्मादयस्तस्य परिवारतयैव तु ॥ ३६ ॥ 'कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्' ॥ ३७ ॥ 'वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन्यदास्ते ॥३८॥ धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' ॥ ३९ ॥

आनन्दतीर्थमुनिना व्यासवाक्यसमुद्धृतिः । सदाचारस्य विषये कृता सङ्क्षेपतः शुभा ॥ ४० ॥ अशेषकल्याणगुणनित्यानुभवसत्तनुः । अशेषदोषरहितः प्रीयतां पुरुषोत्तमः ॥ ४१ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिता सदाचारस्मृतिः सम्पूर्णा ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

यतिप्रणवकल्पः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ ॐ ॥ समिच्चर्वाज्यकान्हुत्वा सम्यक्पुरुषसूक्ततः ।
सर्वेषामभयं दत्वा विरक्तः प्रव्रजेद्धरिम् ॥ १ ॥ श्रुत्वा भागवतं
शुद्धमाचार्यं शरणं व्रजेत् । अधीहि भगवो ब्रह्मेत्यस्मै ब्रूयाद्गुरुः
परम् ॥ २ ॥ उच्चारयेत्त्रिशस्तारं दक्षिणे श्रवणे तथा । ऋषिच्छन्दो-
दैवतानि ब्रूयात्तस्य क्रमात्सुधीः ॥ ३ ॥ अन्तर्यामीति गायत्री
परमात्मेत्यनुक्रमात् । विश्वश्च तैजसः प्राज्ञस्तुर्यश्चाक्षरदेवताः ॥ ४ ॥
कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च । परं ज्योतिः परं ब्रह्म
वासुदेव इति क्रमात् ॥ ५ ॥ अकारादेस्तथा शान्तातिशान्तान्तस्य
देवताः । एवमुक्त्वा तु तद्ध्यानं ब्रूयाद्भक्ताय सद्गुरुः ॥ ६ ॥ अष्टपत्रे
तु हृत्पद्मे मध्ये सूर्येन्दुवह्निगम् । पीठं तत्पद्ममध्यस्थं नारायण-
मनामयम् ॥ ७ ॥ उद्यदादित्यसङ्काशं तेजसाऽनुपमं सदा । सहस्रे-
णापि सूर्याणां सज्ज्ञानानन्दरूपिणम् ॥ ८ ॥ अतिरक्ततलं भास्वन्नख-
व्रातविभूषितम् । वृत्तजङ्घं वृत्तजानुं हस्तिहस्तोरुमीश्वरम् ॥ ९ ॥
महाकटितटाबद्धकाञ्चीपीताम्बरोज्ज्वलम् । सुनिम्ननाभिं त्रिवलिं
सुवृत्तोदरबन्धनम् ॥ १० ॥ विशालवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
वनमालाधरं हारवैजयंत्यादिभिर्युतम् ॥ ११ ॥ पृथुदीर्घचतुर्बाहुं
चक्रशङ्खगदाम्बुजैः । युक्तमुन्निद्रपद्माक्षं स्फुरन्मकरकुण्डलम् ॥ १२ ॥
पूर्णचन्द्रायुतोद्रिक्तकान्तिमन्मुखपङ्कजम् । सुभ्रुवं सुललाटान्तं किरीटा-
बद्धमूर्धजम् ॥ १३ ॥ निःशेषदुःखदमनं नित्यानन्दं शुचिस्मितम् ।

SGDF
Sri Gargeshwari Digital Foundation

विश्वादींश्चैव कृष्णादीनेवं भूतान्सनातनान् ॥ १४ ॥ अभिन्नानेव सततं तस्माद्विष्णोः परात्मनः । वराभयोद्यतकरान्नित्यानन्दैक-रूपिणः ॥ १५ ॥ एवमुक्त्वा गुरुर्ध्यानं शपथं कारयेत्ततः । न विष्णुं वैष्णवांश्चैव विसृजेयमिति त्रिशः ॥ १६ ॥ न चान्यदेवता-साम्यं तदैक्यमथवा हरेः । चिन्तयेयं मृतो वापि न चाप्येकत्व-वादिभिः ॥ १७ ॥ समत्ववादिभिर्वाऽहं सङ्गच्छेयं कदाचन । तन्निन्दकैश्च तद्भक्तनिन्दकैर्वा महामुने ॥ १८ ॥ एवं कृते तु शपथे मस्तके हस्तपङ्कजम् । निधायोत्तीर्य संसारात्सुखी भव हरेः प्रियः ॥ ॥ १९ ॥ सर्वदुःखादिभिर्मुक्तो नित्यानन्दैकरूपकः । सम्प्राप्य विष्णुसामीप्यं तत्रापि हरिभक्तिमान् ॥ २० ॥ भक्तिमांश्चान्यदेवेषु तारतम्यं च संस्मरन् । सर्वोत्कर्षं स्मरन्विष्णोर्भूयाश्चैव सदा सुखी ॥ ॥ २१ ॥ न मुक्तौ विष्णुनैक्यं वा मुक्तानां साम्यमेव वा । स्मरेथा इति चोक्त्वाथ समयाननुशिक्षयेत् ॥ २२ ॥ नित्यशश्च हरेः पूजा जपध्यानसमर्पणम् । कर्तव्यं तु त्वया वत्स जपश्च त्रिसहस्रकः ॥ ॥२३॥ मध्यमः प्रणवस्योक्तो योऽवरः स सहस्रकः । त्रिसहस्रात्परो यस्तु स उत्तमजपः स्मृतः ॥ २४ ॥ आत्मानं प्रतिबिम्बत्वे ध्यायन्बिम्बं जनार्दनम् । ध्यायस्व सततं वत्स सपर्यां नित्यशः कुरु ॥ २५ ॥ मानसैर्वाथ पुष्पैर्वा प्रणवेन समाहितः । अन्यांश्च वैष्णवान्मन्त्राञ्जपेथा भक्तिपूर्वकम् ॥ २६ ॥ श‍ृणुष्व वैष्णवं शास्त्रं सदा वेदार्थतत्परः । वेदान्मन्त्रानुपनिषत्सहितान्सर्वदा श‍ृणु ॥२७॥ इतिहासपुराणं च पञ्चरात्रं तथैव च । तदर्थान्ब्रह्मसूत्रैश्च सम्यङ्निर्णीय तत्त्वतः ॥ २८ ॥ विष्णोः सर्वोत्तमत्त्वं च सर्वदा प्रतिपादय ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितो यतिप्रणवकल्पः सम्पूर्णः ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

जयन्तीनिर्णयः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॐ ॥ रोहिण्यामर्धरात्रे तु यदा कालाष्टमी भवेत् । जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशनी ॥ यस्यां जातो हरिः साक्षान्निशीथे भगवानजः । तस्मात्तद्दिनमत्यन्तं पुण्यं पापहरं परम् ॥ तस्मात्सर्वैरुपोष्या सा जयन्ती नाम वै सदा । द्विजातिभिर्विशेषेण तद्भक्तैश्च विशेषतः ॥ यो भुङ्क्ते तद्दिने मोहात्पूयशोणितमत्ति सः । तस्मादुपवसेत्पुण्यं तद्दिनं श्रद्धयान्वितः ॥ कृत्वा शौचं यथान्यायं स्नानं कुर्यादतन्द्रितः । प्रभातकाले मेधावी योगायेति यथाविधि ॥ नित्याह्निकं प्रकुर्वीत भगवन्तमनुस्मरन् । योगाय योगपतये योगेश्वराय योगसम्भवाय श्रीगोविन्दाय नमो नमः ॥ मध्याह्नकाले च पुमान्सायंकाले त्वतन्द्रितः । स्नायीत पूर्वमन्त्रेण वासुदेवमनुस्मरन् ॥ ततः पूजां प्रकुर्वीत विधिवत्सुसमाहितः । यज्ञायेति च मन्त्रेण श्रद्धाभक्तियुतः पुमान् ॥ कृष्णं च बलभद्रं च वसुदेवं च देवकीम् । नन्दगोपं यशोदां च सुभद्रां तत्र पूजयेत् । अर्घ्यं दत्वा समभ्यर्च्याभ्युत्थिते शशिमण्डले ॥ जातः कंसवधार्थाय भूभारोत्तारणाय च । कौरवाणां विनाशाय दैत्यानां निधनाय च ॥ पाण्डवानां हितार्थाय धर्मसंस्थापनाय च । गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥ क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव । गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशिन् ॥ दत्वार्घ्यं मनुनानेन ह्युपस्थाय विधुं बुधः । शशिने चन्द्रदेवाय सोमदेवाय चेन्दवे ॥ मृगिणे शीतबिम्बाय

SGDF
Sri Gurgeshwari Digital Foundation

लोकदीपाय दीपिने । शीतदीधितिबिम्बाय तारकापतये नमः ॥ उपसंहृत्य तत्सर्वं ब्रह्मचारी जितेन्द्रियः । विश्वायेति च मन्त्रेण ततः स्वापं समाचरेत् ॥ ततो नित्याह्निकं कृत्वा शक्तितो दीयतां धनम् । सर्वायेति च मन्त्रेण ततः पारणमाचरेत् ॥ धर्मायेति ततः स्वस्थो मुच्यते सर्वकिल्बिषैः ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितो जयन्तीनिर्णयः सम्पूर्णः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थ(पूर्णप्रज्ञ)भगवत्पादाचार्यविरचित-

श्रीसर्वमूलान्तर्गत-

इतिहास-पुराणप्रस्थानग्रन्थाः

१. यमकभारतम् १२०५-१२१०

२. श्रीमन्महाभारततात्पर्यनिर्णयः १२११-१५८३

१. प्रथमोऽध्यायः १२११-१२२०
(सर्वशास्त्रार्थनिर्णयात्मकः)

२. द्वितीयोऽध्यायः १२२०-१२३२
(सुवाक्योद्धरणात्मकः)

३. तृतीयोऽध्यायः १२३२-१२३८
(सर्गानुसर्गप्रादुर्भावनिर्णयात्मकः)

४. चतुर्थोऽध्यायः १२३९-१२४४
(बालकाण्डकथानिरूपणात्मकः)

५. पञ्चमोऽध्यायः १२४४-१२४९
(हनूमद्दर्शनकथापर्यन्तः)

६. षष्ठोऽध्यायः १२४९-१२५४
(समुद्रतरणनिश्चयकथापर्यन्तः)

SGDF
Sri Gargeshwari Digital Foundation

७. सप्तमोऽध्यायः १२५४-१२५७
(सुन्दरकाण्डकथानिरूपणात्मकः)

८. अष्टमोऽध्यायः १२५७-१२७६
(युद्धकाण्डकथानिरूपणात्मकः)

९. नवमोऽध्यायः १२७६-१२८६
(उत्तरकाण्डकथानिरूपणात्मकः)

१०. दशमोऽध्यायः १२८६-१२९२
(व्यासावतारकथानिरूपणात्मकः)

११. एकादशोऽध्यायः १२९३-१३१०
(कृष्णचरिते अंशावतरणनिरूपणात्मकः)

१२. द्वादशोऽध्यायः १३१०-१३२०
(कृष्णावतारे पाण्डवोत्पत्तिकथात्मकः)

१३. त्रयोदशोऽध्यायः १३२०-१३३२
(कंसवधकथात्मकः)

१४. चतुर्दशोऽध्यायः १३३२-१३४२
(कृष्णचरिते असुरसंहारात्मकः)

१५. पञ्चदशोऽध्यायः १३४२-१३४७
(पाण्डवादीनां अस्त्रविद्याभ्यासकथात्मकः)

१६. षोडशोऽध्यायः १३४८-१३५०
(कृष्णचरिते जरासन्धादिभङ्गात्मकः)

SGDF
Sri Gargeshwari Digital Foundation

१७. सप्तदशोऽध्यायः १३५०-१३६७
(कृष्णचरिते कृष्णविजयकथात्मकः)

१८. अष्टादशोऽध्यायः १३६७-१३७७
(भीमार्जुनदिग्विजयकथात्मकः)

१९. एकोनविंशोऽध्यायः १३७७-१३९७
(पाण्डवराज्यलाभपर्यन्तकथात्मकः)

२०. विंशोऽध्यायः १३९८-१४१७
(नरकासुरवध-सुभद्राहरण-खाण्डवदहनकथात्मकः)

२१. एकविंशोऽध्यायः १४१७-१४४४
(पाण्डववनप्रवेशकथापर्यन्तः)

२२. द्वाविंशोऽध्यायः १४४४-१४७७
(वनवासकथानिरूपणात्मकः)

२३. त्रयोविंशोऽध्यायः १४७७-१४८१
(विराटपर्वकथात्मकः)

२४. चतुर्विंशोऽध्यायः १४८१-१४८७
(उद्योगपर्वकथात्मकः)

२५. पञ्चविंशोऽध्यायः १४८७-१४९७
(भीष्मपर्वकथात्मकः)

२६. षड्विंशोऽध्यायः १४९७-१५२०
(द्रोणपर्वकथात्मकः)

SGDF
Sri Gurgeshwari Digital Foundation

२७. सप्तविंशोऽध्यायः १५२०-१५३४
(कर्णपर्वकथात्मकः)

२८. अष्टाविंशोध्यायः १५३४-१५४९
(शल्य-गदा-सौप्तिक-स्त्रीपर्वकथात्मकः)

२९. एकोनत्रिंशोऽध्यायः १५४९-१५५३
(सर्वधर्मनिर्णयनिरूपणात्मकः)

३०. त्रिंशोऽध्यायः १५५३-१५६५
(अश्वमेधकथात्मकः)

३१. एकत्रिंशोऽध्यायः १५६५-१५७०
(धृतराष्ट्रस्वर्गारोहणकथात्मकः)

३२. द्वात्रिंशोऽध्यायः १५७०-१५८३
(पाण्डवस्वर्गारोहण, बुद्धकल्क्यवतारकथात्मकः)

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

यमकभारतम्

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ ॐ ॥ ध्यायेत्तं परमानन्दं यन्माता पतिमयद-
परमानन्दम् । उज्झितपरमानं दम्पत्याद्याद्याश्रमैः सदैव परमानन्दम् ॥
॥ १ ॥ यस्य करालोऽलं चक्रं कालः परस्य हि करालोलम् । यस्य
गदा पवमानः सन्यो व्यासोऽभवत्सदापवमानः ॥ २ ॥ यस्य रमा
न मनोगं जगृहे विश्वम्भरापि नमनोऽगम् । यस्य पुमानानन्दं भुङ्क्ते
यद्धाम कपतिमानानन्दम् ॥ ३ ॥ परमेषु यदातेजः परमेषु चकार
वासुदेवो जः । मानधि बिभ्रत्सु मनो माऽनधिमाऽसीन्न वासुदेवोऽजः ॥
सोऽजनि देवक्यन्ते यस्मादनुकम्पनाऽव देवक्यन्ते । अवदन्देव क्यं
ते भुवनं हि सुराः सदैव देवकयन्ते ॥ ५ ॥ नीतो वसुदेवेन स्वत-
तेन स गोकुलं सुवसुदेवेन । तत्र यशोदा तनयं मेने कृष्णं स्वकीय-
मवदातनयम् ॥ ६ ॥ ववृधे गोकुलमध्या द्योदेवो विश्वमद्भुताकुल-
मध्यात् । तत्र च पूतनिकाया वधमकरोद्यन्निजाः (स)पूतनिकायाः ॥
॥ ७ ॥ अधुनोच्छकटं लोली पादाङ्गुष्ठेन वातपेशशकटं लोली ।
अतनोद्रक्षामस्य स्वाज्ञानाद्गोपिका सदेरक्षामस्य ॥ ८ ॥ मुखलालन-
लोला तन्मुखगं जगदचष्ट सालनलोलातत् । नाध्यैन्मायामस्य जगत्प्रभोः
स्वाधिकततमायामस्य ॥ ९ ॥ तस्य सुशर्माण्यकरो दरिणो गर्गः
सदुक्तिकर्माण्यकरोत् । अवदन्नामानमयं जगदार्दि वासुदेवनामान-
मयम् ॥ १० ॥ तस्य सखा बलनामा ज्येष्ठो भ्राताऽथ यन्निजा
बलना मा । यस्य च पर्यङ्कोऽयं पूर्वतनो विष्णुभजसपर्यङ्कोऽयम् ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ ११ ॥ तेन हतो वातरयस्तृणचक्रो नाम दितिसुतोऽवातरयः । हरमाणो बालतमं स्वात्मानं कण्ठरोधिनाऽबालतमम् ॥ १२ ॥ सोऽवनिमध्ये रङ्गन्नरिदरयुग्बालरूपमध्येरङ्गन् । अमुषन्नवनीतमदः स्व(स)गोकुले गोपिकासुनवनीतमदः ॥ १३ ॥ तन्माता कोपमिता तमनुससारात्मवादवाको(आत्मवाको)पमिता । जगृहे सानमनं तं देवं तच्चिन्तयैव सानमनन्तम् ॥ १४ ॥ अथ सान्तरितामानं विष्णुं विश्वोद्भवं सदान्तरितामानम् । अनयद्दामोदरतां योऽरमयत्सुन्दरीं निजामोदरताम् ॥ १५ ॥ चक्रे सोऽर्जुननाशं प्राप्नोति यत्स्मृतिः सदार्जुनना शम् । तौ च गतौ निजमोकस्तेनैव नुतेन यन्निजानिजमोकः ॥ १६ ॥ अथ वृन्दावनवासं गोपाश्चक्रुर्जगत्क्षिताऽवनवासम् । तत्र बकासुरमारः शौरिरभून्नित्यसंश्रितासुरमारः ॥ १७ ॥ अहनद्वत्सतनूकं योऽपाल्लोकं स्वयत्नवत्सतनूकम् । सोऽपाद्वत्सानमरः सहाग्रजो गोपवत्सवत्सानमरः ॥ १८ ॥ स विभुः श्रीमानहिके ननर्त यस्य श्रमानमा मा न हि के । अकरोन्नद्युदकान्तं कान्तं नीत्वोरगं स नाद्युदकान्तम् ॥ १९ ॥ हत्वा धेनुकमूढं बलात्प्रलम्बं च खेट् सधेनुकमूढम् । व्रजमावीदमृताशः पीत्वा वह्निं चरस्थिरादमृताशः ॥ २० ॥ गिरिणा रक्षापि कृता व्रजस्य तेन स्वरक्षरक्षापिकृता । शक्राय व्यञ्जयता स्वां शक्तिं विश्वमात्मनाऽव्ययं व्यञ्जयता ॥२१॥ रेमे गोपीष्वरिहा स मन्मथाक्रान्तसुन्दरीपीष्वरिहा । पूर्णानन्दैकतनुः स विश्वरुक्पावनोऽप्यानन्दैकतनुः ॥२२॥ अथ हतयोर्गलिकेश्योः श्वफल्कजप्रापितः पुरीं गलिकेश्योः । भङ्क्त्वा धनुराजवरं जघान तेनैव च स्वयं राजवरम् ॥ २३ ॥ मृद्न(त)न्गजमुग्रबलं सबलो रङ्गं विवेश सृतिमुग्रबलम् । हत्वा मल्लौ बलिनौ कंसं च विमोक्षितौ ततौ रौ बलिनौ ॥ ॥ २४ ॥ प्रादात्सान्दीपनये मृतपुत्रं ज्ञानदीपसान्दीपनये । गुर्वर्थेऽज्ञानतमःप्रभेदिता नित्यसम्भृताज्ञानतमः ॥२५॥ जित्वा मागधराजं

SGDF
Sri Gargeshwari Digital Foundation

तोषितमकरोत्सदात्मयोगधराजम् । अनुकुर्वन्निजसदनं चक्रे रम्यं पुरं सुबोधनिजसदनम् ॥ २६ ॥ प्रसभं सगजबलस्य क्षत्रस्योच्चैः समगधराजबलस्य । मानं शिशुपालवरं हत्वा भैष्मीमवाप शिशुपालवरम् ॥ ॥२७॥ हंसो डिभिकश्चपलावमुना संष्ठूदितौ यवनकश्चपला । कीर्तिर्विमला विरता प्रतता विश्वाधिपावनीलाविरता ॥ २८ ॥ सत्याजाम्बवतीर्या भार्या विन्दाद्या भानुसाम्बवतीर्याः । प्रद्युम्नं मोदरतः प्राप ज्येष्ठं हरिः सुतं (स्व)मोदरतः ॥ २९ ॥ यत्परिवारतयेशा जाता देवा नृपात्मनाऽरतयेशाः । यद्भरितं विषसर्पप्रभृति ध्वान्तं न मारुतिं विषसर्प ॥ ३० ॥ येन हिडिम्बबकाद्या रक्षोधीशा निपातिता बबकाद्याः । भीमे प्रीतिममेयां व्यञ्जयता तेनैव (तेन) शेषपाति ममे याम् ॥ ३१ ॥ अथ कृष्णावरणेतान्प्राप्तान्राज्ञोऽशृणोत्सदावरणेतान् । द्रष्टुं यातः सबलस्तां चानैषीत्पृथासुतांस्ततः सबलः ॥ ३२ ॥ तानिन्द्रस्थलवासांश्चक्रे कृष्णः परो निजस्थलवासान् । स्वबलोद्रेचितमानैर्जुगोप धर्मं च तैः पराचितमानैः ॥ ३३ ॥ वालिवधानुनयाय प्रणयी सख्यं सुसन्दधे नु नयाय । वासवजेन विशेषात्तेनैव पुनर्नृजन्मजेन विशेषात् ॥ ॥ ३४ ॥ मातुः परिभवहान्यै राज्ञा द्युसदामितश्च परिभवहान्यै । अभवन्नरकमुरारिर्योऽवात्सीदत्समस्तनरकमुरारिः ॥ ३५ ॥ नीतो दिवि देववरै रेमे सत्यासमन्वितोऽदेववरैः । सर्वर्तुवने शशिना निशि सत्यां वासरे वनेऽशशिना ॥ ३६ ॥ सुरतरुमापालिमतात्प्रकाशयश्छक्तिमात्मनः पालिमतात् । सुरवरवीरेषु दरी प्रधानजीवेश्वरः परेषुदरी ॥३७॥ पुरमभियायारिदरी दत्वा भद्रां पृथासुतायारिदरी । शक्रपुरीमभियातः प्रादाद्वह्वेर्वनं सतामभियाऽतः ॥ ३८ ॥ शिवभक्तप्रवराद्यं पुमान्न सेहे गिरि(री)शविप्रवराद्यम् । तं स्वात्मेन्द्रवरेण व्यधुनोद्धीमेन धूतरुद्रवरेण ॥ ३९ ॥ यस्याज्ञाबलसारैः पार्थैर्दिग्भ्यो हृतं धनं बलसारैः । जित्वा क्ष्मामविशेषां प्रसह्य भूपान्समस्तकाम-

SGDF
Sri Gargeshwari Digital Foundation

विशेषाम् ॥ ४० ॥ अथ पार्थान् क्रतुराजं प्रापयदमरेट् सरुद्र-शक्रतुराजम् । पूजा तेनावापि छिन्नश्चैद्यः स्मृतिं गतेनावापि ॥४१॥ निहतौ सौभकरूशौ शीतो भातश्च येन तौ भ(भा)करूशौ । अजय-द्रुद्रं च रणे बाणार्थेऽवनतिपतितकचन्द्रं चरणे ॥ ४२ ॥ असृज-ज्ज्वरमुग्रतमःक्षयप्रदो लीलयाऽधिवरमुग्रतमः । क्रीडामात्रं विश्वं प्रकाशयन्नात्मनः सविहरकमात्रं विश्वम् ॥ ४३ ॥ यस्यावेशोरुबला-न्यहनत्पार्थोऽसुरान्प्रजेशोरुबलान् । वरदानादस्यैव जगत्प्रभोरीरणात्स-मनुगतनादस्यैव ॥ ४४ ॥ यस्यावेशात्सबलः प्रचकर्ष पुरं प्रसह्य चेशात्सबलः । कुरुपतिनाम नु यमुनाऽऽकृष्टा येनाहुरर्ह्य(र्घ्य)मतनु यमुना ॥ ४५ ॥ यद्बलवान्क्रोधवशान्निनाय नाशं वृकोदरः क्रोध-वशान् । लेभेऽचान्यागम्यं स्थानं पुष्पाणि धाम चान्यागम्यम् ॥४६॥ यद्बलभारवहत्वान्नाचलदुरगादिभिः सुभारवहत्वात् । धर्मादरिहाऽपि पदं भीमो येनैव साहसं रिहाऽपि पदम् ॥ ४७ ॥ न हि नहुषोऽलं नहितुं धर्मो द्रौणिस्तथेतरोऽलं नहितुम् । नो राड्कर्णो ब्रह्मवरी येन ध्वस्तोऽस्त्रमग्रहीत्स ब्रह्म वरी ॥ ४८ ॥ क्षात्रं धर्मं स्ववता गुरुवृत्त्यै केशवाज्ञया च चरमं स्ववता । सर्वं सेहे मनसा भीमेनेशैकमानिना हेमनसा ॥ ४९ ॥ यद्भक्तप्रवरेण प्रोतः स्वस्मिन्स कीचकः प्रवरेण । पतितास्तस्य सहायाः कृष्णार्थे मानिनः समस्य सहायाः ॥ ५० ॥ यद्भक्त्याऽनुगृहीतौ पार्थौ भीमश्च गोनृपौ नु गृहीतौ । ऋणमुक्त्यै सुव्यत्यस्त्यै क्रमशो वीरावमुञ्चतां सुव्यत्यस्त्यै ॥ ५१ ॥ यद्भक्त्या-ऽमितयाऽलं कृष्णा कार्ये विवेश कृष्णाकार्ये । यामीरार्धतनुत्वान्नापा-द्ध्रीमाद्दतेऽपि नापाद्ध्रीमात् ॥ ५२ ॥ यां स्प्रष्टुमिच्छन्तमजातशत्रुं न्यवारयत्स्वस्थमजातशत्रुम् । शंरूपाने नित्यरतेरियं श्रीरिति स्म देवेड्यदितेरियं श्रीः ॥५३॥ मनसामनसाऽमनसा मनसा यमनन्त-मजस्रमवेदनुया । विलयं विलयं विलयं विलयन्निखिलं त्वशुभं

SGDF
Sri Gargeshwari Digital Foundation

प्रचकार च या (यः)॥ ५४ ॥ सोऽगाद्दूतमुखेन प्रभुणेदं वर्तते यदूतमुखेन। पार्थार्थे बहुतनुतां यत्र प्रकाशयत्स्वयं सबहुतनुताम् ॥ ॥ ५५ ॥ गुरुकर्णनदीजादीनवधीचक्षुर्बलेन जनदीजादीन्। शक्त्या निजया परवान्स्वजनानुद्रेचयन्ननन्तयाऽपरवान् ॥५६॥ यस्य सुनीति-सहायान्न रिपून्मेनेऽर्जुनः समेतसहायान्। अकरोचासु परासुप्रततिं सेनासु धावनासुपरासु ॥ ५७ ॥ येन जयद्रथमारः पार्थः(त्रा)-शत्रूनवापतद्रथमारः। यद्विरहादपि देहे सरथः शश्वत्स्थितेः सदादपि देहे ॥ ५८ ॥ यद्भरितो भरताभः प्रभुरं(र)भाभावितोऽभिभरताभः। भीमो रभसाभिभवी प्रसभं भाभाभिभूर्भासा भिभवी ॥ ५९ ॥ यदनु-ग्रहि(ह)पूर्णत्वाद्भीमः सर्वानरीननहिपूर्णत्वात्। अदहद्बाहुबलेन क्रोधाग्नावाहितान्निजाहुबलेन ॥ ६० ॥ कृष्णाभीमाप्ततमः शीर्णं येन स्वकीयहृदयमाप्ततमः। धृतराष्ट्रसुतानवधीद्भीमेन स्थापितो मनसि सुसुतानवधीत् ॥ ६१ ॥ भीमविपाटितदेहानदर्शयत्स्वानरीन्विपाटित-देहान्। कृष्णाया हितकारी सम्यगीरप्रियः सदाऽहितकारी ॥६२॥ अथ हरिणाऽपीतबलं द्रौणेरस्त्रं महारिणा पीतबलम्। दधता वासोऽ-मरणं नीतं चक्रेऽभिमन्युजं सोमरणम् ॥ ६३ ॥ तस्य च रक्षा सुकृता जनार्दनेनेशशेषकेक्षासुकृता। पार्थेषु प्रेमवता नित्यं भर्त्राऽ-सुतासुविप्रेमवता ॥ ६४ ॥ ज्ञानं परमं प्रादाद्भीष्मगतः सृतिविमोक्ष-चरमं प्रादात्। पाण्डुसुतानामधिकं चक्रे वेदं गुणोत्तरं स्वनामधिकम् ॥ ॥६५॥ तेनावापि सुजातैर्हयमेधस्तुरगवर्तनेऽपि सुजातैः। पाण्डुसुतैः सवस्त्रकैः (रा) प्राप्तैर्व्यासात्मना सुसवस्त्रकैः ॥ ६६ ॥ तदनु सुपाण्डुतनूजै रेमे क्ष्मां पालयन्सुपाण्डुतनूजैः। अनुपमसुखरूपोऽजः परमः श्रीवल्लभः सति ख(सुख)रूपोऽजः ॥ ६७ ॥ सुगतिं चरमामददान्निजयोग्यां ज्ञानिसुततिं परमामददात्। पार्थानां सयदूनां स पितृप्रेष्यादिनामिनां सयदूनाम् ॥ ६८ ॥ रेमे तत्रापि सुखी परमोऽनन्तो ननन्द तत्रापि

SGDF
Sri Gargeshwari Digital Foundation

सुखी । प्राणेनेन्दिरया च प्रयुतो नित्यं महागुणेन्दिरया च ।।६९।। एवं सर्वाणि हरे रूपाणि श्रीपतेः सुपर्वाणिहरेः । पूर्णसुखानि सुभान्ति प्रततानि निरन्तराणि सुभान्ति ।।७०।। राम राम महाबाहो माया ते सुदुरासदा । वाद सादद को लोके पादावेव तवासजेत् ।। ।। ७१ ।। जेत्सवातव वेदापाके लोकोदद सादव । दासरादुसुतेया-माहोबाहा मम राम राः ।। ७२ ।। देवानां पतयो नित्यं मतं यस्य न जानते (नो मतं यस्य जानते) । तस्मै देव नमस्येऽहं भवतेऽसुर-मारये ।। ७३ ।। समस्तदेवजन कवासुदेवपरामृत । वासुदेव परामृत-ज्ञानमूर्ते नमोऽस्तु ते ।। ७४ ।। देवादे देवलोकप पूर्णानन्दमहोदधे । सर्वज्ञेश रमानाथ देवादेऽदेऽव लोकप ।। ७५ ।। यो निर्ममेऽशेष-पुराणविद्यां योनिर्ममे शेषपुराणविद्याम् । योऽनिर्ममेऽशेषपुराणविद्यां यो निर्ममेशे षपुराणविद्याम् ।। ७६ ।। अनन्तपारामितविक्रमेश प्रभो रमापारमनन्तपार । महागुणाढ्यापरिमेयसत्व रमालयाशेषमहा-गुणाढ्य ।। ७७ ।। भाभाभाभाभाभाभाभा भाभाभाभाभाभा । भाभा-भाभाभाभाभाभा भाभाभाभाभाभा ।। ७८ ।। नैव परः केशवतः परमादस्मात्समश्च सुकेशवतः । यो(सो)ऽयं शपथवरो नः शश्वत्सन्धारितः सुशपथवरोऽनः ।। ७९ ।। कृष्णकथेयं यमिता सुखतीर्थेनोदिताऽनेनेयं यमिता । भक्तिमता परमेशे सर्वोद्रेकात्सदा नुवताऽऽप रमेशे ।। ८० ।। इति नारायणनामा सुख(ऽव क)तीर्थसुपूजितः सुनारायणना मा । पूर्ण गुणैरधिक पूर्णज्ञानेच्छाभक्तिभिः स्वधिकपूर्ण(ः) ।।८१।। इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं यमकभारतं सम्पूर्णम् ।।

।। श्रीकृष्णार्पणमस्तु ।।

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

महाभारततात्पर्यनिर्णयः

प्रथमोऽध्यायः

श्रीमद्धनुमद्भीमध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मी-
हयग्रीवाय नमः ॥ नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयो-
न्नियतिप्रदाय । ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय वितताय
नमोनमस्ते ॥ १ ॥ आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः
परमात्म एकः । संशान्तसंविदखिलं जठरे निधाय लक्ष्मीभुजान्तरगतः
स्वरतोऽपि चाग्रे ॥ २ ॥ तस्योदरस्थजगतः सदमन्दसान्द्रस्वानन्दतुष्ट-
वपुषोऽपि रमारमस्य । भूत्यै निजाश्रितजनस्य हि सृज्यसृष्टावीक्षा
बभूव परनामनिमेषकान्ते ॥ ३ ॥ दृष्ट्वा स चेतनगणाञ्जठरे शयाना-
नानन्दमात्रवपुषः सृतिविप्रमुक्तान् । ध्यानंगतान्सृतिगतांश्च सुषुप्ति-
संस्थान्ब्रह्मादिकान्कलिपरान्मनुजांस्तथैक्षत् ॥ ४ ॥ स्रक्ष्ये हि चेतन-
गणान्सुखदुःखमध्यसंप्राप्तये तनुभृतां विहृतिं ममेच्छन् । सोऽयं विहार
इह मे तनुभृत्स्वभावसंभूतये भवति भूतिकृदेव भूत्याः ॥ ५ ॥ इत्थं
विचिन्त्य परमः स तु वासुदेवनामा बभूव निजमुक्तिपदप्रदाता ।
तस्याज्ञयैव नियताऽथ रमापि रूपं बभ्रे द्वितीयमपि यत्प्रवदन्ति
मायाम् ॥ ६ ॥ सङ्कर्षणश्च स बभूव पुनः सुनित्यः संहारकारण-
वपुस्तदनुज्ञयैव । देवी जयेत्यनुबभूव स सृष्टिहेतोः प्रद्युम्नतामुपगतः
कृतितां च देवी ॥ ७ ॥ स्थित्यै पुनः स भगवाननिरुद्धनामा देवी च
शान्तिरभवच्छरदां सहस्रम् । स्थित्वा स्वमूर्तिभिरमूभिरचिन्त्यशक्तिः
प्रद्युम्नरूपक इमांश्चरमात्मनेऽदात् ॥ ८ ॥ निर्देहकान्स भगवाननिरुद्ध-
नामा जीवान्स्वकर्मसहितानुदरे निवेश्य । चक्रेऽथ देहसहितान्क्रमशः

SGDF
Sri Gangeshwari Digital Foundation

स्वयम्भुप्राणात्मशेषगरुडेशमुखान्समग्रान् ॥ ९ ॥ पश्चात्मकः स भगवान्द्विषडात्मकोऽभूत्पश्चद्वयीशतसहस्रपरोऽमितश्च । एकः समोऽप्यखिलदोषसमुज्झितोऽपि सर्वत्र पूर्णगुणकोऽपि बहूपमोऽभूत् ॥१०॥ निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः । आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा ॥११॥ कालाच्च देशगुणतोऽस्य न चादिरन्तो वृद्धिक्षयौ न तु परस्य सदातनस्य । नैतादृशः क्व च बभूव न चैव भाव्यो नास्त्युत्तरः किमु परात्परमस्य विष्णोः ॥ १२ ॥ सर्वज्ञ ईश्वरतमः स च सर्वशक्तिः पूर्णाव्ययात्मबलचित्सुखवीर्यसारः । यस्याज्ञया रहितमिन्दिरया समेतं ब्रह्मेशपूर्वकमिदं न तु कस्य चेशम् ॥ १३ ॥

आभासकोऽस्य पवनः पवनस्य रुद्रः शेषात्मको गरुड एव च शक्रकामौ । वीन्द्रेशयोस्तदपरे त्वनयोश्च तेषामृष्यादयः क्रमश ऊनगुणाः शतांशात् ॥ १४ ॥ आभासका त्वथ रमास्य मरुत्स्वरूपाच्छ्रेष्ठाप्यजात्तदनु गीः शिवतो वरिष्ठा । तस्या उमा विपतिनी च गिरस्तयोस्तु शच्यादिकाः क्रमश एव यथा पुमांसः ॥ १५ ॥ ताभ्यश्च ते शतगुणैर्दशतो वरिष्ठाः पश्चोत्तरैरपि यथाक्रमशः श्रुतिस्थाः । शब्दो बहुत्ववचनः शतमित्यतश्च श्रुत्यन्तरेषु बहुधोक्तिविरुद्धता न ॥ ॥ १६ ॥ तेषां स्वरूपमिदमेव यतोऽथ मुक्तावप्येवमेव सततोच्चविनीचरूपाः । शब्दः शतं दश सहस्रमिति स्म यस्मात्तस्मान्न हीनवचनोऽथ ततोऽग्र्यचरूपाः ॥१७॥ एवं नरोत्तमपरास्तु विमुक्तियोग्या अन्ये च संसृतिपरा असुरास्तमोगाः । एवं सदैव नियमः क्वचिदन्यथा न यावन्न पूर्तिरुत संसृतिगाः समस्ताः ॥ १८ ॥ पूर्तिश्च नैव नियमाद्भविता हि यस्मात्तस्मात्समाप्तिमपि यान्ति न जीवसङ्घाः । आनन्त्यमेव गणशोऽस्ति यतो हि तेषामित्थं ततः सकलकालगता प्रवृत्तिः ॥ ॥ १९ ॥

SGDF
Sri Gargeshwari Digital Foundation

एतैः सुरादिभिरतिप्रतिभादियुक्तैर्युक्तैः सहैव सततं प्रविचिन्तयद्भिः। पूर्तैरचिन्त्यमहिमः परमः परात्मा नारायणोऽस्य गुणविस्तृतिरन्यगा क्व ॥ २० ॥ साम्यं न चास्य परमेण च केन चाप्यं मुक्तेन च क्वचिदतस्त्वभिदा कुतोऽस्य। प्राप्येत चेतनगणैः सततास्वतन्त्रैर्नित्यस्वतन्त्रवपुषः परमात्परस्य ॥ २१ ॥ अर्थोऽयमेव निखिलैरपि वेदवाक्यै रामायणैः सहितभारतपञ्चरात्रैः। अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रैर्निर्णीयते सहृदयं हरिणा सदैव ॥ २२ ॥ नारायणस्य न समः पुरुषोत्तमोऽहं जीवाक्षरे ह्यधिगतोऽस्मि ततोऽन्यदार्तम्। मुक्तोपसृप्य इह नास्ति कुतश्च कश्चिन्नानेव धर्मपृथगात्मदृगेत्यधो हि ॥२३॥ आभास एव पृथगीशत एष जीवो मुक्तस्य नास्ति जगतो विषये तु शक्तिः। मात्रा परोऽसि न तु तेऽश्नुवते महित्वं षाड्गुण्यविग्रह सुपूर्णगुणैकदेह ॥ २४ ॥ माहात्म्यदेह सृतिमुक्तिगते शिवश्च ब्रह्मा च तद्गुणगतौ न कथञ्चनेशौ। न श्रीः कुतस्तदपरेऽस्य सुखस्य मात्रामश्नन्ति मुक्तसुगणाश्च शतावरेण ॥ २५ ॥ आभासकाभासपरावभासरूपाण्यजस्राणि च चेतनानाम्। विष्णोः सदैवातिवशात्क्वदापि गच्छन्ति केशादिगणा न मुक्तौ ॥ २६ ॥ यस्मिन्परेऽन्येऽप्यजजीवकोशा नाहं परायुर्न मरीचिमुख्याः। जानन्ति यद्गुणगणान्न रमादयोऽपि नित्यः स्वतन्त्र उत कोऽस्ति तदन्य ईशः ॥ २७ ॥ नैवैक एव पुरुषः पुरुषोत्तमोऽसावेकः कुतः स पुरुषो यत एव जात्या। अर्थाद्गुतेश्च गुणतो निजरूपतश्च नित्यान्य एव कथमस्मि स इत्यपि स्यात् ॥ २८ ॥ सर्वोत्तमो हरिरिदं तु तदाज्ञयैव चेतुं क्षमं स तु हरिः परमः स्वतन्त्रः। पूर्णाव्ययागणितनित्यगुणार्णवोऽसावित्येव वेदवचनानि परोक्तयश्च ॥ ॥ २९ ॥

ऋगादयश्च चत्वारः पञ्चरात्रं च भारतम्। मूलरामायणं ब्रह्मसूत्रं मानं स्वतः स्मृतम् ॥ ३० ॥ अविरुद्धं तु यत्त्वस्य प्रमाणं

SGDF
Sri Gargeshwari Digital Foundation

तच्च नान्यथा। एतद्विरुद्धं यत्तु स्यान्न तन्मानं कथञ्चन ॥ ३१ ॥ वैष्णवानि पुराणानि पञ्चरात्रात्मकत्वतः। प्रमाणान्येव मन्वाद्याः स्मृतयोऽप्यनुकूलतः ॥ ३२ ॥ एतेषु विष्णोराधिक्यमुच्यतेऽन्यस्य न क्वचित्। अतस्तदेव मन्तव्यं नान्यथा तु कथञ्चन ॥ ३३ ॥

मोहार्थान्यन्यशास्त्राणि कृतान्येवाज्ञया हरेः। अतस्तेषूक्तमग्राह्यमसुराणां तमोगतेः ॥ ३४ ॥ यस्मात्कृतानि तानीह विष्णुनोक्तैः शिवादिभिः। एषां यन्न विरोधि स्यात्तत्रोक्तं तन्न वार्यते ॥ ३५ ॥ विष्ण्वाधिक्यविरोधीनि यानि वेदवचांस्यपि। तानि योज्यान्यानुकूल्याद्विष्ण्वाधिक्यस्य सर्वशः ॥३६॥ अवतारेषु यत्किञ्चिद्दर्शयेन्नरवद्धरिः। तच्चासुराणां मोहाय दोषा विष्णोर्न हि क्वचित् ॥ ३७ ॥ अज्ञत्वं पारवश्यं वा वेधभेदादिकं तथा। तथा प्राकृतदेहत्वं देहत्यागादिकं तथा ॥ ३८ ॥ अनीशत्वं च दुःखित्वं साम्यमन्यैश्च हीनताम्। प्रदर्शयति मोहाय दैत्यादीनां हरिः स्वयम् ॥ ३९ ॥ न तस्य कश्चिद्दोषोऽस्ति पूर्णाखिलगुणो ह्यसौ। सर्वदेहस्थरूपेषु प्रादुर्भावेषु चेश्वरः ॥ ॥ ४० ॥ ब्रह्माद्यभेदः साम्यं वा कुतस्तस्य महात्मनः।

यदेवं वाचकं शास्त्रं तद्धि शास्त्रं परं मतम् ॥ ४१ ॥ निर्णयायैव यत्प्रोक्तं ब्रह्मसूत्रं तु विष्णुना। व्यासरूपेण तद्ग्राह्यं तत्रोक्ताः सर्वनिर्णयाः ॥ ४२ ॥ यथार्थवचनानां च मोहार्थानां च संशयम्। अपनेतुं हि भगवान्ब्रह्मसूत्रमचीक्लृपत् ॥ ४३ ॥ तस्मात्सूत्रार्थमागृह्य कर्तव्यः सर्वनिर्णयः। सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता ॥ ४४ ॥ अभेदः सर्वरूपेषु जीवभेदः सदैव हि। विष्णोरुक्तानि सूत्रेषु सर्ववेदेड्यता तथा ॥ ४५ ॥ तारतम्यं च मुक्तानां विमुक्तिर्विद्यया तथा। तस्मादेतद्विरुद्धं यन्मोहार्थं तदुदाहृतम् ॥ ४६ ॥ तस्माद्येये गुणा विष्णोर्ग्राह्यास्ते सर्व एव तु। इत्याद्युक्तं भगवता भविष्यत्पर्वणि स्फुटम् ॥ ४७ ॥ 'एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति।

SGDF
Sri Gargeshwari Digital Foundation

त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ ४८ ॥ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज । प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु' ॥ ४९ ॥ इति वाराहवचनं ब्रह्माण्डोक्तं तथाऽपरम् । 'अमोहाय गुणा विष्णोराकारश्चिच्छरीरता ॥५०॥ निर्दोषत्वं तारतम्यं मुक्तानामपि चोच्यते । एतद्विरुद्धं यत्सर्वं तन्मोहायेति निर्णयः' ॥ ५१ ॥ स्कान्देऽप्युक्तं शिवेनैव षण्मुखायैव सादरम् । शिवशास्त्रेऽपि तद्ग्राह्यं भगवच्छास्त्रयोगि यत् ॥ ५२ ॥ 'परमो विष्णुरेवैकस्तज्ज्ञानं मुक्तिसाधनम् । शास्त्राणां निर्णयस्त्वेष तदन्यन्मोहनाय हि ॥ ५३ ॥ ज्ञानं विना तु या मुक्तिः साम्यं च मम विष्णुना । तीर्थादिमात्रतो ज्ञानं ममाधिक्यं च विष्णुतः ॥ ५४ ॥ अभेदश्चास्मदादीनां मुक्तानां हरिणा तथा । इत्यादि सर्वं मोहाय कथ्यते पुत्र नान्यथा' ॥ ५५ ॥ उक्तं पद्मपुराणे च शैव एव शिवेन तु । यदुक्तं हरिणा पूर्वमुमायै प्राह तद्धरः ॥ ५६ ॥ 'त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदा । द्वापरादौ युगे भूत्वा कलया मानुषादिषु ॥५७॥ स्वागमैः कल्पितैस्त्वं च जनान्मद्विमुखान्कुरु । मां च गोपय येन स्यात्सृष्टिरेषोत्तराधरा' ॥ ॥ ५८ ॥ न च वैष्णवशास्त्रेषु वेदेष्वपि हरेः परः । क्वचिदुक्तोऽन्यशास्त्रेषु परमो विष्णुरीरितः ॥ ५९ ॥ निर्दोषत्वाच्च देवानां वेदोक्तं ग्राह्यमेव हि । वेदेष्वपि परो विष्णुः सर्वस्मादुच्यते सदा ॥ ६० ॥ 'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्' ॥ ६१ ॥ 'स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहन्तुमुग्रम्' । 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्' ॥ ६२ ॥ 'एको नारायण आसीन्न ब्रह्मा न च शंकरः' । 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः' ॥ ६३ ॥ 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं

SGDF
Sri Gargeshwari Digital Foundation

साम्यमुपैति' ॥ ६४ ॥ 'यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' ॥ ६५ ॥ 'प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् । सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः' ॥ ६६ ॥ 'यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता' । 'सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये' ॥ ६७ ॥ 'सत्या विष्णोर्गुणाः सर्वे सत्या जीवेशयोर्भिदा । सत्यो मिथो जीवभेदः सत्यं च जगदीदृशम् ॥ ६८ ॥ असत्यः स्वगतो भेदो विष्णोर्नान्यदसत्यकम् । जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः ॥ ६९ ॥ जीवेशयोर्भिदा चैव जीवभेदः परस्परम् । जडेशयोर्जडानां च जडजीवभिदा तथा ॥ ॥ ७० ॥ पञ्चभेदा इमे नित्याः सर्वावस्थासु नित्यशः । मुक्तानां च न हीयन्ते तारतम्यं च सर्वदा ॥ ७१ ॥ क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चिराः । आजानजाः कर्मजाश्च देवा इन्द्रः पुरन्दरः ॥ ॥ ७२ ॥ रुद्रः सरस्वती वायुर्मुक्ताः शतगुणोत्तराः । एको ब्रह्मा च वायुश्च वीन्द्रो रुद्रसमस्तथा ॥ ७३ ॥ एको रुद्रस्तथा शेषो न कश्चिद्वायुना समः । मुक्तेषु श्रीस्तथा वायोः सहस्रगुणिता गुणैः ॥७४॥ ततोऽनन्तगुणो विष्णुर्न कश्चित्तत्समः सदा' । इत्यादिवेदवाक्यं विष्णोरुत्कर्षमेव वक्त्युच्चैः ॥ ७५ ॥ तात्पर्यं महदत्रेत्युक्तं योमामिति स्वयं तेन । भूम्नो ज्यायस्त्वमित्युक्तं सूत्रेषु निर्णयात्तेन ॥ ७६ ॥ तत्प्रीत्यैव च मोक्षः प्राप्यस्तेनैव नान्येन ॥ ७७ ॥ 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' ॥ ७८ ॥ 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया । मोक्षो ज्ञानं च क्रमशो मुक्तिगो भोग एव च ॥ ७९ ॥ उत्तरेषां प्रसादेन नीचानां नान्यथा भवेत् । सर्वेषां च हरिर्नित्यं नियन्ता तद्वशाः परे ॥ ८० ॥ तारतम्यं ततो ज्ञेयं सर्वोच्चत्वं हरे-

SGDF
Sri Gargeshwari Digital Foundation

स्तथा । एतद्विना न कस्यापि विमुक्तिः स्यात्कथञ्चन ॥ ८१ ॥ पञ्चभेदांश्च विज्ञाय विष्णोः स्वाभेदमेव च । निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न चान्यथा ॥ ८२ ॥ अवतारान्हरेर्ज्ञात्वा नावतारा हरेश्च ये । तदावेशांस्तथा सम्यग्ज्ञात्वा मुक्तिर्न चान्यथा ॥ ८३ ॥ सृष्टि-रक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् । मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न चान्यथा ॥ ८४ ॥ वेदांश्च पञ्चरात्राणि सेतिहासपुराणकान् । ज्ञात्वा विष्णुपरानेव मुच्यते नान्यथा क्वचित् ॥ ८५ ॥ माहात्म्य-ज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरितिप्रोक्तस्तया मुक्तिर्न चान्यथा ॥ ८६ ॥

त्रिविधा जीवसङ्घास्तु देवमानुषदानवाः । तत्र देवा मुक्तियोग्या मानुषेषूत्तमास्तथा ॥ ८७ ॥ मध्यमा मानुषा ये तु सृतियोग्याः सदैव हि । अधमा निरयायैव दानवास्तु तमोलयाः ॥ ८८ ॥ मुक्तिर्नित्या तमश्चैव नावृत्तिः पुनरेतयोः । देवानां निरयो नास्ति तमश्चापि कथञ्चन ॥ ८९ ॥ नासुराणां तथा मुक्तिः कदाचित्केन-चित्क्वचित् । मानुषाणां मध्यमानां नैवैतद्द्वयमाप्यते ॥ ९० ॥ असुराणां तमःप्राप्तिस्तदा नियमतो भवेत् । यदा तु ज्ञानिसद्भावे नैव गृह्णन्ति तत्परम् ॥ ९१ ॥ तदा मुक्तिर्हि देवानां यदा प्रत्यक्षगो हरिः । स्वयोग्ययोपासनया तन्वा तद्योग्यया तथा ॥ ९२ ॥ सर्वै-र्गुणैर्ब्रह्मणा तु समुपास्यो हरिः सदा । आनन्दो ज्ञः सदात्मेति ह्युपास्यो मानुषैर्हरिः ॥ ९३ ॥ यथाक्रमं गुणोद्रेकात्तदन्यैरा विरिञ्चतः । ब्रह्मत्व-योग्या ऋजवो नाम देवाः पृथग्गणाः ॥ ९४ ॥ तैरेवाप्यं तत्पदं तु नैवान्यैः साधनैरपि । एवं सर्वपदानां तु योग्याः सन्ति पृथग्गणाः ॥ ॥९५॥ तस्मादनाद्यनन्तं हि तारतम्यं चिदात्मनाम् । तच्च नैवान्यथा कर्तुं शक्यं केनापि कुत्रचित् ॥ ९६ ॥ अयोग्यमिच्छन्पुरुषः पतत्येव न संशयः । तस्माद्योग्यानुसारेण सेव्यो विष्णुः सदैव हि ॥ ९७ ॥

SGDF
Sri Gargeshwari Digital Foundation

अच्छिद्रसेवनाच्चैव निष्कामत्वाच्च योग्यतः । द्रष्टुं शक्यो हरिः सर्वैर्नान्यथा तु कथञ्चन ॥ ९८ ॥ नियमोऽयं हरेर्यस्मान्नोल्लङ्घ्यः सर्वचेतनैः । सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यति ॥ ९९ ॥ दानतीर्थतपोयज्ञपूर्वाः सर्वेऽपि सर्वदा । अङ्गानि हरिसेवायां भक्तिस्त्वेका विमुक्तये ॥ १०० ॥ भविष्यत्पर्ववचनमित्येतदखिलं परम् ॥१०१॥ 'शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति नेनीयमानः । एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्' ॥ १०२ ॥ 'परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति । अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति' ॥ १०३ ॥ 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' । 'तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय' ॥ १०४ ॥ 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' ॥ १०५ ॥ 'भक्त्यर्थान्यखिलान्येव भक्तिर्मोक्षाय केवला । मुक्तानामपि भक्तिर्हि नित्यानन्दस्वरूपिणी ॥ १०६ ॥ ज्ञानपूर्वः परः स्नेहो नित्यो भक्तिरितीर्यते' । इत्यादिवेदवचनं साधनप्रविधायकम् ॥ ॥ १०७ ॥ 'निःशेषधर्मकर्ताऽप्यभक्तस्ते नरके हरे । सदा तिष्ठति भक्तश्चेद्ब्रह्महापि विमुच्यते' ॥ १०८ ॥ 'धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत । पापं भवति धर्मोऽपि यो नभक्तैः कृतो हरे' ॥ ॥ १०९ ॥ 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप' ॥ ११० ॥ 'अनादिद्वेषिणो दैत्या विष्णौ द्वेषो विवर्धितः । तमस्यन्धे पातयति दैत्यानन्ते विनिश्चयात् ॥ ॥ १११ ॥ पूर्णदुःखात्मको द्वेषः सोऽनन्तो ह्यवतिष्ठते । पतितानां तमस्यन्धे निःशेषसुखवर्जिते ॥ ११२ ॥ जीवाभेदो निर्गुणत्वमपूर्णगुणता तथा । साम्याधिक्ये तदन्येषां भेदस्तद्गत एव च ॥ ११३ ॥ प्रादुर्भावविपर्यासस्तद्भक्तद्वेष एव च । तत्प्रमाणस्य निन्दा च द्वेषा

SGDF
Sri Gurgeshwari Digital Foundation

एतेऽखिला मताः ॥ ११४ ॥ एतैर्विहीना या भक्तिः सा भक्तिरिति निश्चिता । अनादिभक्तिर्देवानां क्रमाद्वृद्धिंगतैव सा ॥ ११५ ॥ अपरोक्षदृशेर्हेतुर्मुक्तिहेतुश्च सा पुनः । सैवानन्दस्वरूपेण नित्या मुक्तेषु तिष्ठति ॥ ११६ ॥ यथा शौक्ल्यादिकं रूपं गोर्भवत्येव सर्वदा । सुखज्ञानादिकं रूपमेवं भक्तेर्न चान्यथा ॥ ११७ ॥ भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् । स एव मुक्तिदाता च भक्तिस्तत्रैव कारणम् ॥ ११८ ॥ ब्रह्मादीनां च मुक्तानां तारतम्ये तु कारणम् । तारतम्यस्थिताऽनादिर्नित्या भक्तिर्न चेतरत् ॥ ११९ ॥ मानुषेष्वधमाः किञ्चिद्द्वेषयुक्ताः सदा हरौ । दुःखनिष्ठास्ततस्तेऽपि नित्यमेव न संशयः ॥ १२० ॥ मध्यमा मिश्रभूतत्वान्नित्यं मिश्रफलाः स्मृताः । किञ्चिद्भक्तियुता नित्यमुत्तमास्तेन मोक्षिणः ॥१२१॥ ब्रह्मणः परमा भक्तिः सर्वेभ्यः परमस्ततः' । इत्यादीनि च वाक्यानि पुराणेषु पृथक्पृथक् ॥ १२२ ॥

'षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः । सप्तपादश्चतुर्हस्तो द्वात्रिंशल्लक्षणैर्युतः ॥१२३॥ असंशयः संशयच्छिद्गुरुरुक्तो मनीषिभिः । तस्माद्ब्रह्मा गुरुर्मुख्यः सर्वेषामेव सर्वदा ॥ १२४ ॥ अन्येऽपि स्वात्मनो मुख्याः क्रमाद्गुरव ईरिताः । क्रमाल्लक्षणहीनाश्च लक्षणालक्षणैः समाः ॥ ॥१२५॥ मानुषा मध्यमाः सम्यग्दुर्लक्षणयुतः कलिः । सम्यग्लक्षणसम्पन्नो यद्यद्यात्सुप्रसन्नधीः ॥ १२६ ॥ शिष्याय सत्यं भवति तत्सर्वं नात्र संशयः । अगम्यत्वाद्धरिस्तस्मिन्नाविष्टो मुक्तिदो भवेत् ॥१२७॥ नातिप्रसन्नहृदयो यद्यद्याद्गुरुरप्यसौ । न तत्सत्यं भवेत्तस्मादर्चनीयो गुरुः सदा ॥ १२८ ॥ स्थावराणां गुरुत्वं तु भवेत्कारणतः क्वचित् । मर्यादार्थं तेऽपि पूज्या न तु यद्वत्परो गुरुः' ॥ १२९ ॥ इत्येतत्पञ्चरात्रोक्तं पुराणेष्वनुमोदितम् ।

'यदा मुक्तिप्रदानाय स्वयोग्यं पश्यति ध्रुवम् ॥ १३० ॥

SGDF
Sri Gurgeshwari Digital Foundation

रूपं हरेस्तदा तस्य सर्वपापानि भस्मसात् । यान्ति पूर्वाण्युत्तराणि न श्लेषं यान्ति कानिचित् ॥ १३१ ॥ मोक्षश्च नियतस्तस्मात्स्वयोग्य-हरिदर्शने' । भविष्यत्पर्ववचनमित्येतत्सूत्रगं तथा ॥ १३२ ॥ श्रुतिश्च तत्परा तद्वत्तद्यथेत्यवदत्स्फुटम् । मुक्तास्तु मानुषा देवान्देवा इन्द्रं स शंकरम् ॥ १३३ ॥ स ब्रह्माणं क्रमेणैव तेन यान्त्यखिला हरिम् । उत्तरोत्तरवश्याश्च मुक्ता रुद्रपुरःसराः ॥१३४॥ निर्दोषा नित्यसुखिनः पुनरावृत्तिवर्जिताः । स्वेच्छयैव रमन्तेऽत्र नानिष्टं तेषु किञ्चन ॥१३५॥ असुराः कलिपर्यन्ता एवं दुःखोत्तरोत्तराः । कलिर्दुःखाधिकस्तेषु तेऽप्येवं ब्रह्मवद्गणाः ॥ १३६ ॥ तथान्येऽप्यसुराः सर्वे गणा योग्यतया सदा । ब्रह्मैव सर्वजीवेभ्यः सदा सर्वगुणाधिकः ॥ १३७ ॥ मुक्तोऽपि सर्व-मुक्तानामाधिपत्ये स्थितः सदा । आश्रयस्तस्य भगवान्सदा नारायणः प्रभुः' ॥ १३८ ॥ इत्यृग्यजुःसामाथर्वपञ्चरात्रेतिहासतः । पुराणेभ्य-स्तथान्येभ्यः शास्त्रेभ्यो निर्णयः कृतः ॥ १३९ ॥ विष्ण्वाज्ञयैव विदुषा तत्प्रसादबलोन्नतेः । आनन्दतीर्थमुनिना पूर्णप्रज्ञाभिधायुजा ॥ १४० ॥ तात्पर्यं शास्त्राणां सर्वेषामुत्तमं मया प्रोक्तम् । प्राप्यानुज्ञां विष्णोरेत-ज्ज्ञात्वैव विष्णुराप्योऽसौ ॥१४१॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य-विरचिते श्रीमन्महाभारततात्पर्यनिर्णये सर्वशास्त्रार्थनिर्णयो नाम प्रथमो-ऽध्यायः ॥ १ ॥

॥ अथ द्वितीयोऽध्यायः ॥

श्रीः ॥ जयति हरिरचिन्त्यः सर्वदेवैकवन्द्यः परमगुरुरभीष्टावाप्तिदः सज्जनानाम् । निखिलगुणगणार्णो नित्यनिर्मुक्तदोषः सरसिजनयनोऽसौ श्रीपतिर्मानदो नः ॥ १ ॥ उक्तः पूर्वाध्याये शास्त्राणां निर्णयः परो

SGDF
Sri Gargeshwari Digital Foundation

दिव्यः । अथ भारतवाक्यान्यैतैरेवाध्यवस्यन्ते ॥ २ ॥ क्वचिद्ग्रन्थान्प्रक्षिपन्ति क्वचिदन्तरितानपि । कुर्युः क्वचिच्च व्यत्यासं प्रमादात्क्वचिदन्यथा ॥ ३ ॥ अनुत्सन्ना अपि ग्रन्था व्याकुला इति सर्वशः । उत्सन्नाः प्रायशः सर्वे कोट्यंशोऽपि न वर्तते ॥ ४ ॥ ग्रन्थोऽप्येवं विलुलितः किम्वर्थो देवदुर्गमः । कलावेवं व्याकुलिते निर्णयाय प्रचोदितः ॥ ५ ॥ हरिणा निर्णयान्वच्मि विजानंस्तत्प्रसादतः ॥६॥ शास्त्रान्तराणि सञ्जानन्वेदांश्चास्य प्रसादतः । देशेदेशे तथा ग्रन्थान्दृष्ट्वा चैव पृथग्विधान् ॥ ७ ॥ यथा स भगवान्व्यासः साक्षान्नारायणः प्रभुः । जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया ॥ ८ ॥ सङ्क्षेपात्सर्वशास्त्रार्थं भारतार्थानुसारतः ।

निर्णयः सर्वशास्त्राणां भारतं परिकीर्तितम् ॥ ९ ॥ 'भारतं सर्ववेदाश्च तुलामारोपिताः पुरा । देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः । व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ॥ १० ॥ महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ ११ ॥ निर्णयः सर्वशास्त्राणां सदृष्टान्तो हि भारते । कृतो विष्णुवशत्वं हि ब्रह्मादीनां प्रकाशितम् ॥ १२ ॥ यतः कृष्णवशे सर्वे भीमाद्याः सम्यगीरिताः । सर्वेषां ज्ञानदो विष्णुर्यशोदातेति चोदितः ॥ १३ ॥ यस्माद्व्यासात्मना तेषां भारते यश ऊचिवान् । ज्ञानदश्च शुकादीनां ब्रह्मरुद्रादिरूपिणाम् ॥ १४ ॥

ब्रह्माऽधिकश्च देवेभ्यः शेषाद्रुद्रादपीरितः । प्रियश्च विष्णोः सर्वेभ्य इति भीमनिदर्शनात् ॥ १५ ॥ भूभारहरणे विष्णोः प्रधानाङ्गं हि मारुतिः । मागधादिवधादेव दुर्योधनवधादपि ॥ १६ ॥ यो य एव बलज्येष्ठः क्षत्रियेषु स उत्तमः । अङ्गं चेद्विष्णुकार्येषु तद्भक्त्यैव च नान्यथा ॥ १७ ॥ बलं नैसर्गिकं तच्चेद्वरास्त्रादेस्तदन्यथा । अन्यावेशनिमित्तं चेद्बलमन्यात्मकं हि तत् ॥ १८ ॥ देवेषु बलिनामेव भक्ति-

SGDF
Sri Gurgeshwari Digital Foundation

ज्ञाने न चान्यथा । स एव च प्रियो विष्णोर्नान्यथा तु कथञ्चन ॥
॥ १९ ॥ तस्माद्यो यो बलज्येष्ठः स गुणज्येष्ठ एव च । बलं हि
क्षत्रिये व्यक्तं ज्ञायते स्थूलदृष्टिभिः ॥ २० ॥ ज्ञानादयो गुणा यस्मा-
ज्ज्ञायन्ते सूक्ष्मदृष्टिभिः । तस्माद्यत्र बलं तत्र विज्ञातव्या गुणाः परे ॥
॥ २१ ॥ देवेष्वेव न चान्येषु वासुदेवप्रतीपतः । क्षत्रादन्येष्वपि
बलं प्रमाणं यत्र केशवः ॥ २२ ॥ प्रवृत्तो दुष्टनिधने ज्ञानकार्ये तथैव
च ॥ २३ ॥ अन्यत्र ब्राह्मणानां तु प्रमाणं ज्ञानमेव हि । क्षत्रियाणां
बलं चैव सर्वेषां विष्णुकार्यता ॥ २४ ॥

कृष्णरामादिरूपेषु बलकार्यो जनार्दनः । दत्तव्यासादिरूपेषु
ज्ञानकार्यस्तथा प्रभुः ॥ २५ ॥ मत्स्यकूर्मवराहाश्च सिंहवामनभार्गवाः ।
राघवः कृष्णबुद्धौ च कृष्णद्वैपायनस्तथा ॥ २६ ॥ कपिलो दत्त-
ऋषभौ शिंशुमारो रुचेः सुतः । नारायणो हरिः कृष्णस्तापसो मनुरेव
च ॥ २७ ॥ महिदासस्तथा हंसः स्त्रीरूपो हयशीर्षवान् । तथैव
वडबावक्त्रः कल्की धन्वन्तरिः प्रभुः ॥ २८ ॥ इत्याद्याः केवलो
विष्णुर्नैषां भेदः कथञ्चन । न विशेषो गुणैः सर्वैर्बलज्ञानादिभिः
क्वचित् ॥ २९ ॥

श्रीब्रह्मरुद्रशेषाश्च वीन्द्रेन्द्रौ काम एव च । कामपुत्रोऽनिरुद्धश्च
सूर्यश्चन्द्रो बृहस्पतिः ॥ ३० ॥ धर्म एषां तथा भार्या दक्षाद्या
मनवस्तथा । मनुपुत्राश्च ऋषयो नारदः पर्वतस्तथा ॥ ३१ ॥ कश्यपः
सनकाद्याश्च वन्ह्याद्याश्चैव देवताः । भरतः कार्तवीर्यश्च वैन्याद्याश्चक्र-
वर्तिनः ॥ ३२ ॥ गयश्च लक्ष्मणाद्याश्च त्रयो रोहिणिनन्दनः ।
प्रद्युम्नो रौक्मिणेयश्च तत्पुत्रश्चानिरुद्धकः ॥ ३३ ॥ नरः फल्गुन
इत्याद्या विशेषावेशिनो हरेः ।

वालिसाम्बादयश्चैव किञ्चिदावेशिनो हरेः ॥ ३४ ॥

SGDF
Sri Gargeshwari Digital Foundation

तस्माद्बलप्रवृत्तस्य रामकृष्णात्मनो हरेः । अन्तरङ्गं हनूमांश्च भीमस्तत्कार्यसाधकः ॥ ३५ ॥ ब्रह्मात्मको यतो वायुः पदं ब्राह्ममगात्पुरा । वायोरन्यस्य न ब्राह्मं पदं तस्मात्स एव सः ॥ ३६ ॥

यत्र रूपं तत्र गुणा भक्त्याद्या स्त्रीषु नित्यशः । रूपं हि स्थूलदृष्टीनां दृश्यं व्यक्तं ततो हि तत् ॥ ३७ ॥ प्रायो वेत्तुं न शक्यन्ते भक्त्याद्यास्त्रीषु यत्नतः । यासां रूपं गुणास्तासां भक्त्याद्या इति निश्चयः ॥ ३८ ॥ तच्च नैसर्गिकं रूपं द्वात्रिंशल्लक्षणैर्युतम् । नालक्षणं वपुर्मात्रं गुणहेतुः कथञ्चन ॥ ३९ ॥ आसुरीणां वरादेस्तु वपुर्मात्रं भविष्यति । न लक्षणान्यतस्तासां नैव भक्तिः कथञ्चन ॥ ॥ ४० ॥ तस्माद्रूपगुणोदारा जानकी रुक्मिणी तथा । सत्यभामेत्यादिरूपा श्रीः सर्वपरमा मता ॥ ४१ ॥ ततः पश्चाद्द्रौपदी च सर्वाभ्यो रूपतो वरा । भूभारक्षपणे साक्षादङ्गं भीमवदीशितुः ॥४२॥ हन्ता च वैरहेतुश्च भीमः पापजनस्य तु । द्रौपदी वैरहेतुः सा तस्माद्भीमादनन्तरा ॥ ४३ ॥

बलदेवस्ततः पश्चात्ततः पश्चाच्च फल्गुनः । नरावेशादन्यथा तु द्रौणिः पश्चात्ततोऽपरे ॥ ४४ ॥ रामवज्ञाम्बवत्याद्याः षट् ततो रेवती तथा । लक्ष्मणो हनुमत्पश्चात्ततो भरतवालिनौ । शत्रुघ्नश्च ततः पश्चात्सुग्रीवाद्यास्ततोऽवराः ॥ ४५ ॥ रामकार्यं तु यैः सम्यक्स्वयोग्यं न कृतं पुरा । तैः पूरितं तु कृष्णाय बीभत्स्वाद्यैः समन्ततः ॥ ४६ ॥ अधिकं यैः कृतं तत्र तैरूनं कृतमत्र तु । कर्णाद्यैरधिकं यैस्तु प्रादुर्भावद्वये कृतम् ॥ ४७ ॥ विविदाद्यैर्हितैः पश्चाद्विप्रतीपं कृतं हरेः । प्रादुर्भावद्वये ह्यस्मिन्सर्वेषां निर्णयः कृतः ॥ ४८ ॥ नैतयोरकृतं किञ्चिच्छुभं वा यदि वाऽशुभम् । अन्यत्र पूर्यते क्वापि तस्मादत्रैव निर्णयः ॥ ४९ ॥ पश्चात्तनत्वात्कृष्णस्य वैशेष्यात्तत्र निर्णयः । प्रादुर्भावमिमं तस्माद्गृहीत्वा भारतं कृतम् । उक्ता रामकथा ह्यस्मिन्मार्कण्डेय-

SGDF
Sri Gurgeshwari Digital Foundation

समाख्यया ॥ ५० ॥ तस्माद्यद्भारते नोक्तं तद्धि नैवास्ति कुत्रचित् । अत्रोक्तं सर्वशास्त्रेषु न हि सम्यगुदाहृतम्' ॥ ५१ ॥ इत्यादि कथितं सर्वं ब्रह्माण्डे हरिणा स्वयम् । मार्कण्डेऽयेपि कथितं भारतस्य प्रशंसनम् ॥ ५२ ॥ 'देवतानां यथा व्यासो द्विपदां ब्राह्मणो वरः । आयुधानां यथा वज्रमोषधीनां यथा यवाः ॥ ५३ ॥ तथैव सर्वशास्त्राणां महाभारतमुत्तमम्' ॥५४॥ वायुप्रोक्तेऽपि तत्प्रोक्तं भारतस्य प्रशंसनम् । 'कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ॥ ५५ ॥ को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्' । एवं हि सर्वशास्त्रेषु पृथक्पृथगुदीरितम् ॥ ५६ ॥ उक्तोऽर्थः सर्व एवार्यं माहात्म्यक्रमपूर्वकः । भारतेऽपि यथा प्रोक्तो निर्णयोऽयं क्रमेण तु । तथा प्रदर्शयिष्यामस्तद्वाक्यैरेव सर्वशः ॥ ५७ ॥

नारायणं सुरगुरुं जगदेकनाथं भक्तप्रियं सकललोकनमस्कृतं च । त्रैगुण्यवर्जितमजं विभुमाद्यमीशं वन्दे भवघ्नममरासुरसिद्धवन्द्यम् ॥५८॥ ज्ञानप्रदः स भगवान्कमलाविरिञ्चिशर्वादिपूर्वजगतो निखिलाद्वरिष्ठः । भक्त्यैव तुष्यति हरिप्रवणत्वमेव सर्वस्य धर्म इति पूर्वविभागसंस्थः ॥५९॥ निर्दोषकः सृतिविहीन उदारपूर्णसंविद्गुणः प्रथमकृत्सकलात्मशक्तिः । मोक्षैकहेतुरसुरूपसुरैश्च मुक्तैर्वन्द्यः स एक इति चोक्तमथोत्तरार्धे ॥६०॥ नम्यत्वमुक्तमुभयत्र यतस्ततोऽस्य मुक्तैरमुक्तकगणैश्च विनम्यतोक्ता । इत्थं हि सर्वगुणपूर्तिरमुष्य विष्णोः प्रस्ताविता प्रथमतः प्रतिजानतैव ॥ ॥६१॥ कृष्णो यज्ञैरिज्यते सोमपूतैः कृष्णो वीरैरिज्यते विक्रमद्भिः । कृष्णो वन्यैरिज्यते संमृशानैः कृष्णो मुक्तैरिज्यते वीतमोहैः ॥ ६२ ॥ सृष्टा ब्रह्मादयो देवा निहता येन दानवाः । तस्मै देवाधिदेवाय नमस्ते शार्ङ्गधारिणे ॥ ६३ ॥ स्रष्टृत्वं देवानां मुक्तिस्रष्टृत्वमुच्यते नान्यत् । उत्पत्तिर्दैत्यानामपि यस्मात्संमिता विशेषोऽयम् ॥ ६४ ॥ अथ च दैत्यहतिस्तमसि स्थिरा नियतसंस्थितिरेव न चान्यथा । तनुविभाग-

SGDF
Sri Gurgeshwari Digital Foundation

कृतिः सकलेष्वियं न हि विशेषकृता सुरदैत्यगा ॥ ६५ ॥ तमिममेव सुरासुरसञ्चये हरिकृतं प्रविशेषमुदीक्षितुम् । प्रतिविभज्य च भीम-सुयोधनौ स्वपरपक्षभिदा कथिता कथा ॥ ६६ ॥ 'नमो भगवते तस्मै व्यासायामिततेजसे । यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥ ॥ ६७ ॥ वासुदेवस्तु भगवान्कीर्त्यतेऽत्र सनातनः । प्रतिबिम्ब-मिवादर्शे यं पश्यन्त्यात्मनि स्थितम् ॥ ६८ ॥ नास्ति नारायणसमं न भूतं न भविष्यति । एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम्' ॥ ॥ ६९ ॥ आद्यन्तयोरित्यवदत्स यस्माद्व्यासात्मको विष्णुरुदारशक्तिः । तस्मात्समस्ता हरिसद्गुणानां निर्णीयते भारतगा कथैषा ॥ ७० ॥ 'सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम्' ॥ ७१ ॥ 'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा' ॥ ७२ ॥ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ ७३ ॥ को हि तं वेदितुं शक्तो यो न स्यात्तद्विधोऽपरः । तद्विधश्चापरो नास्ति तस्मात्तं वेद स स्वयम् ॥७४॥ को हि तं वेदितुं शक्तो नारायणमनामयम् । ऋते सत्यवतीसूनोः कृष्णाद्वा देवकीसुतात् ॥ ७५ ॥ अप्रमेयोऽनियोज्यश्च स्वयं कामगमो वशी । मोदत्येष सदा भूतैर्बालः क्रीडनकैरिव ॥ ७६ ॥ न प्रमातुं महाबाहुः शक्योऽयं मधुसूदनः । परमात्परमेतस्माद्विश्वरूपान्न विद्यते ॥ ॥७७॥ वसुदेवसुतो नायं नायं गर्भेऽवसत्प्रभुः । नायं दशरथाज्जातो न चापि जमदग्नितः ॥ ७८ ॥ जायते नैव कुत्रापि म्रियते कुत एव तु । न वध्यो मुह्यते नायं बध्यते नैव केनचित् ॥ ७९ ॥ कुतो दुःखं स्वतन्त्रस्य नित्यानन्दैकरूपिणः ॥ ८० ॥ ईशन्नपि हि देवेशः सर्वस्य जगतो हरिः । कर्माणि कुरुते नित्यं कीनाश इव दुर्बलः ॥८१॥ नात्मानं वेद मुग्धोऽयं दुःखी सीतां च मार्गते । बद्धः शक्रजितेत्यादि-

SGDF
Sri Gangeshwari Digital Foundation

लीलैषाऽसुरमोहिनी ॥ ८२ ॥ मुह्यते शस्त्रपातेन भिन्नत्वग्रुधिरस्रवः ।
अजानन्पृच्छति स्मान्यांस्तनुं त्यक्त्वा दिवं गतः ॥ ८३ ॥ इत्याद्यसुर-
मोहाय दर्शयामास नाट्यवत् । अविद्यमानमेवेशः कुहकं तद्विदुः सुराः ॥
॥ ८४ ॥ प्रादुर्भावा हरेः सर्वे नैव प्राकृतदेहिनः । निर्दोषगुण-
सम्पूर्णा दर्शयन्त्यन्यथैव तु ॥ ८५ ॥ दुष्टानां मोहनार्थाय सतामपि च
कुत्रचित् । यथायोग्यफलप्राप्त्यै लीलैषा परमात्मनः ॥ ८६ ॥ 'ज्ञानं
तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः । यज्ज्ञात्वा नेह भूयोऽ-
न्यज्ज्ञातव्यमवशिष्यते' ॥ ८७ ॥ 'अहं कृत्स्नस्य जगतः प्रभवः प्रलय-
स्तथा । मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय' ॥ ८८ ॥ अव-
जानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम
भूतमहेश्वरम्' ॥ ८९ ॥ 'मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ ९० ॥ महात्मानस्तु
मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादि-
मव्ययम्' ॥ ९१ ॥ 'पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च
गुरुर्गरीयान् । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्य-
प्रतिमप्रभाव' ॥ ९२ ॥ 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः' ॥ ९३ ॥ 'मम
योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति
भारत' ॥ ९४ ॥ 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः
सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ ९५ ॥ उत्तमः पुरुषस्त्वन्यः
परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥९६॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च
प्रथितः पुरुषोत्तमः ॥९७॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ ९८ ॥ इति गुह्यतमं शास्त्र-
मिदमुक्तं मयाऽनघ । एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' ॥९९॥

SGDF
Sri Gangeshwari Digital Foundation

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च। दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ १०० ॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ १०१ ॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः। प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ॥१०२॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी। आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ॥ १०३ ॥ मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥१०४॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' ॥ ॥१०५॥ 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्' ॥ १०६ ॥ 'सर्वगुह्यतमं भूयः शृणु मे परमं वचः। इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्' ॥१०७॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे' ॥ १०८ ॥ 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्। सर्वेष्वेतेषु राजेन्द्र ज्ञानेष्वेतद्विशिष्यते ॥ १०९ ॥ ज्ञानेष्वेतेषु राजेन्द्र साङ्ख्यपाशुपतादिषु। यथा योगं यथा न्यायं निष्ठा नारायणः परः ॥ ११० ॥ पञ्चरात्रविदो मुख्या यथाक्रमपरा नृप। एकान्तभावोपगता वासुदेवं विशन्ति ते' ॥१११॥ 'जनमेजय उवाच ॥ बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। को ह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति ॥ ११२ ॥ वैशंपायन उवाच ॥ नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह। बहूनां पुरुषाणां हि यथैका योनिरुच्यते ॥ तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्' ॥ ११३ ॥ 'आह ब्रह्मैतमेवार्थं महादेवाय पृच्छते। तस्यैकस्य ममत्वं हि स चैकः पुरुषो विराट् ॥११४॥ अहं ब्रह्मा चाद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः। मत्तो जगत्स्थावरजङ्गमं च सर्वे वेदाः सरहस्याश्च पुत्र' ॥ ११५ ॥ तथैव

SGDF
Sri Gargeshwari Digital Foundation

भीमवचनं धर्मजं प्रत्युदीरितम् । 'ब्रह्मेशानादिभिर्देवैस्समेतैर्यद्गुणांशकः । नावसाययितुं शक्यो व्याचक्षाणैश्च सर्वदा ॥ ११६ ॥ स एष भगवान्कृष्णो नैव केवलमानुषः । यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः' ॥ ॥ ११७ ॥ वचनं चैव कृष्णस्य ज्येष्ठं कुन्तीसुतं प्रति ॥ ११८ ॥ 'रुद्रं समाश्रिता देवाः रुद्रो ब्रह्माणमाश्रितः । ब्रह्मा मामाश्रितो नित्यं नाहं कश्चिदुपाश्रितः ॥ ११९ ॥ 'यथाऽऽश्रितानि ज्योतींषि ज्योतिःश्रेष्ठं दिवाकरम् । एवं मुक्तगुणाः सर्वे वासुदेवमुपाश्रिताः' ॥ १२० ॥ भविष्यत्पर्वगं चापि वचो व्यासस्य सादरम् । 'वासुदेवस्य महिमा भारते निर्णयोदितः ॥ १२१ ॥ तदर्थास्तु कथाः सर्वा नान्यार्थं वैष्णवं यशः । तत्प्रतीपं तु यद्दृश्येन्न तन्मम मनीषितम् ॥ १२२ ॥ भाषास्तु त्रिविधास्तत्र मया वै सम्प्रदर्शिताः । उक्तो यो महिमा विष्णोः स तूक्तो हि समाधिना ॥ १२३ ॥ शैवदर्शनमालम्ब्य क्वचिच्छैवी कथोदिता । समाधिभाषयोक्तं यत्तत्सर्वं ग्राह्यमेव हि ॥ ॥१२४॥ अविरुद्धं समाधेस्तु दर्शनोक्तं च गृह्यते । आद्यन्तयोर्विरुद्धं यद्दर्शनं तदुदाहृतम् ॥ १२५ ॥ दर्शनानन्तरं सिद्धं गुह्यभाषान्यथा भवेत् । तस्माद्विष्णोर्हि महिमा भारतोक्तो यथार्थतः ॥ १२६ ॥ तस्याङ्गं प्रथमं वायुः प्रादुर्भावत्रयान्वितः । प्रथमो हनुमान्नाम द्वितीयो भीम एव च । पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः ॥ १२७ ॥ त्रेताद्येषु युगेष्वेव सम्भूतः केशवाज्ञया । एकैकशास्त्रिषु पृथक् द्वितीयाङ्गं सरस्वती ॥ १२८ ॥ शंरूपे तु रतेर्वायौ श्रीरित्येव च कीर्त्यते । सैव च द्रौपदी नाम काली चन्द्रेति चोच्यते ॥ १२९ ॥ तृतीयाङ्गं हरेः शेषः प्रादुर्भावसमन्वितः । प्रादुर्भावा नरश्चैव लक्ष्मणो बल एव च ॥ १३० ॥ रुद्रात्मकत्वाच्छेषस्य शुको द्रौणिश्च तत्तनू । इन्द्रो नरांशसम्पत्त्या पार्थोऽपीषत्तदात्मकः ॥ १३१ ॥ प्रद्युम्नाद्यास्ततो विष्णोरङ्गभूताः क्रमेण तु । चरितं वैष्णवानां तु विष्णूद्रेकाय

SGDF
Sri Gangeshwari Digital Foundation

कथ्यते' ॥ १३२ ॥ तथा भागवतेऽप्युक्तं हनूमद्वचनं परम् । 'मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः। कुतोऽस्य हि स्यू रमतः स्व आत्मन्सीताकृतानि व्यसनानीश्वरस्य ॥ १३३ ॥ न वै स आत्माऽऽत्मवतामधीश्वरो भुङ्क्ते हि दुःखं भगवान्वासुदेवः । न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि जहाति कर्हिचित्' ॥१३४॥ 'यत्पादपङ्कजपरागनिषेवकाणां दुःखानि सर्वाणि लयं प्रयान्ति । स ब्रह्मवन्द्यचरणो जनमोहनाय स्त्रीसङ्गिनामिति रतिं प्रथयंश्चचार' ॥१३५॥ क्वचिच्छिवं क्वचिदृषीन्क्वचिद्देवान्क्वचिन्नरान् । नमत्यर्चयति स्तौति वरानर्थयतेऽपि च । लिङ्गं प्रतिष्ठापयति वृणोत्यसुरतो वरान् ॥१३६॥ सर्वेश्वरः स्वतन्त्रोऽपि सर्वशक्तिश्च सर्वदा । सर्वज्ञोऽपि विमोहाय जनानां पुरुषोत्तमः ॥ १३७ ॥ तस्माद्यो महिमा विष्णोः सर्वशास्त्रोदितः स हि । नान्यदित्येष शास्त्राणां निर्णयः समुदाहृतः ॥१३८॥ भारतार्थस्त्रिधा प्रोक्तः स्वयं भगवतैव हि । 'मन्वादि केचिद्ब्रुवते ह्यास्तिकादि तथा परे ॥ १३९ ॥ तथोपरिचराद्यन्ये भारतं परिचक्षते ॥ १४० ॥ सकृष्णान्पाण्डवान्गृह्य योऽयमर्थः प्रवर्तते । प्रातिलोम्यादिवैचित्र्यात्तमास्तीकं प्रचक्षते ॥ १४१ ॥ धर्मो भक्त्यादिदशकः श्रुतादिः शीलवैनयौ । सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधाः ॥ १४२ ॥ नारायणस्य नामानि सर्वाणि वचनानि तु । तत्सामर्थ्याभिधायीनि तमौपरिचरं विदुः ॥ १४३ ॥ भक्तिर्ज्ञानं सवैराग्यं प्रज्ञा मेधा धृतिः स्थितिः । योगः प्राणो बलं चैव वृकोदर इति स्मृतः ॥ १४४ ॥ एतद्दशात्मको वायुस्तस्माद्भीमस्तदात्मकः । सर्वविद्या द्रौपदी तु यस्मात्सैव सरस्वती ॥ १४५ ॥ अज्ञानादिस्वरूपस्तु कलिर्दुर्योधनः स्मृतः । विपरीतं तु यज्ज्ञानं दुःशासन इतीरितः ॥ १४६ ॥ नास्तिक्यं शकुनिर्नाम सर्वदोषात्मकाः परे । धार्तराष्ट्रास्त्वहङ्कारो द्रौणी रुद्रात्मको यतः ॥ १४७ ॥ द्रोणाद्या इन्द्रियाण्येव पापान्यन्ये तु सैनिकाः ।

SGDF
Sri Gangeshwari Digital Foundation

पाण्डवेयास्तु पुण्यानि तेषां विष्णुर्नियामकः ॥१४८॥ एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते । दुर्विज्ञेयमतः सर्वैर्भारतं तु सुरैरपि ॥ १४९ ॥ स्वयं व्यासो हि तद्वेद ब्रह्मा वा तत्प्रसादतः । तथापि विष्णुपरता भारते सारसङ्ग्रहः' ॥ १५० ॥ इत्यादिव्यासवाक्यैस्तु विष्णूत्कर्षोऽवगम्यते । वाय्वादीनां क्रमश्चैव तद्वाक्यैरेव चिन्त्यते ॥ १५१ ॥ 'वायुर्हि ब्रह्मतामेति तस्माद्ब्रह्मैव स स्मृतः । न ब्रह्मसदृशः कश्चिच्छिवादिषु कथञ्चन' ॥ १५२ ॥ 'ज्ञाने विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषु योगे । बुद्धौ च नान्यो हनुमत्समानः पुमान्कदाचित्क च कश्च नैव' ॥ १५३ ॥ 'बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतोऽजनि । यदीमुपह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥ १५४ ॥ पृक्षो वपुः पितुमान्नित्य आशये द्वितीयमा सप्तशिवासु मातृषु । तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥ १५५ ॥ निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसाऽक्रन्त सूरयः । यदीमनु प्र दिवो मध्व आधवे गुहासन्तं मातरिश्वा मथायति ॥ १५६ ॥ प्रयत्पितुः परमान्नीयते पर्यापृक्षुधो वीरुधो दंसु रोहति । उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणाशुचिः ॥ १५७ ॥ आदिन्मातॄराविशद्यास्वाशुचिरहिंस्यमान उर्विया विवावृधे । अनुयत्पूर्वा अरुहत्सना जुवो निनव्यसीष्ववरासु धावते' ॥ ॥ १५८ ॥ 'अश्वमेधः क्रतुश्रेष्ठो ज्योतिःश्रेष्ठो दिवाकरः । ब्राह्मणो द्विपदां श्रेष्ठो देवश्रेष्ठस्तु मारुतः ॥ १५९ ॥ बलमिन्द्रस्य गिरिशो गिरिशस्य बलं मरुत् । बलं तस्य हरिः साक्षान्न हरेर्बलमन्यतः' ॥ ॥ १६० ॥ 'वायुर्भीमो भीमनादो महौजाः सर्वेषां च प्राणिनां प्राणभूतः । अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः' ॥१६१॥ 'तत्त्वज्ञाने विष्णुभक्तौ धैर्ये स्थैर्ये पराक्रमे । वेगे च लाघवे चैव प्रलापस्य च वर्जने ॥ १६२ ॥ भीमसेनसमो नास्ति सेनयोरुभयो-

SGDF
Sri Gangeshwari Digital Foundation

रपि । पाण्डित्ये च पटुत्वे च शूरत्वे च बलेऽपि च' ॥ १६३ ॥ तथा युधिष्ठिरेणैव भीमं प्रति समीरितम् । 'धर्मश्चार्थश्च कामश्च मोक्षश्चैव यशो ध्रुवम् ॥ १६४ ॥ त्वय्यायत्तमिदं सर्वं सर्वलोकस्य भारत' । विराटपर्वगं चापि वचो दुर्योधनस्य हि ॥ १६५ ॥ वीराणां शस्त्रविदुषां कृतिनां तत्त्वनिर्णये । 'सत्वे बाहुबले धैर्ये प्राणे शारीरसम्भवे ॥१६६॥ साम्प्रतं मानुषे लोके सदैत्यनरराक्षसे। चत्वारः प्राणिनां श्रेष्ठाः सम्पूर्णबलपौरुषाः ॥ १६७ ॥ भीमश्च बलभद्रश्च मद्रराजश्च वीर्यवान् । चतुर्थः कीचकस्तेषां पञ्चमं नानुशुश्रुम ॥ १६८ ॥ अन्योऽन्यानन्तरबलाः क्रमादेव प्रकीर्तिताः' । वचनं वासुदेवस्य तथोद्योगगतं परम् ॥ ॥ १६९ ॥ 'यत्किञ्चात्मनि कल्याणं सम्भावयसि पाण्डव । सहस्रगुणमप्येतत्त्वयि सम्भावयाम्यहम्' ॥ १७० ॥ 'यादृशे च कुले जातः सर्वराजाभिपूजिते । यादृशानि च कर्माणि भीम त्वमसि तादृशः ॥ ॥ १७१ ॥ अस्मिन्युद्धे भीमसेन त्वयि भारः समाहितः । धूरर्जुनेन वोढव्या वोढव्या इतरे जनाः' । उक्तं पुराणे ब्रह्माण्डे ब्रह्मणा नारदाय च ॥ १७२ ॥ 'यस्याः प्रसादात्परमं विदन्ति शेषः सुपर्णो गिरिशः सुरेन्द्रः । माता च येषां प्रथमैव भारती सा द्रौपदी नाम बभूव भूमौ ॥ १७३ ॥ या मारुताद्गर्भमधत्त पूर्वं शेषं सुपर्णं गिरिशं सुरेन्द्रम्। चतुर्मुखाभांश्चतुरः कुमारान्सा द्रौपदी नाम बभूव भूमौ ॥ ॥१७४॥ यस्याधिको बले नास्ति भीममेकमृते क्वचित् । न विज्ञाने न च ज्ञाने एष रामः स लाङ्गली ॥ १७५ ॥ यस्य न प्रतियोद्धाऽस्ति भीममेकमृते क्वचित् । अन्विष्यापि त्रिलोकेषु स एष मुसलायुधः' ॥ ॥ १७६ ॥ तथा युधिष्ठिरेणैव भीमाय समुदीरितम् । 'अनुज्ञातो रौहिणेयात्त्वया चैवापराजितः ॥१७७॥ सर्वविद्यासु बीभत्सुः कृष्णेन च महात्मना । अन्वेष रौहिणेयं च त्वां च भीमापराजितम् ॥१७८॥ वीर्ये शौर्ये बले नान्यस्तृतीयः फल्गुनादृते' । तथैव द्रौपदी वाक्यं

SGDF
Sri Gangeshwari Digital Foundation

वासुदेवं प्रतीरितम् ॥ १७९ ॥ 'अधिज्यमपि यत्कर्तुं शक्यते नैव गाण्डिवम् । अन्यत्र भीमपार्थाभ्यां भवतश्च जनार्दन' ॥ १८० ॥ तथैवान्यत्र वचनं कृष्णद्वैपायनेरितम् । 'द्वावेव पुरुषौ लोके वासुदेवादनन्तरौ ॥ भीमस्तु प्रथमस्तत्र द्वितीयो द्रौणिरेव च ॥ १८१ ॥ अक्षयाविषुधी दिव्ये ध्वजो वानरलक्षणः । गाण्डीवं धनुषां श्रेष्ठं तेन द्रौणेर्वरोऽर्जुनः' ॥ १८२ ॥

इत्याद्यनन्तवाक्यानि सन्त्येवार्थे विवक्षिते । कानिचिद्दर्शितान्यत्र दिङ्मात्रप्रतिपत्तये ॥ १८३ ॥ तस्मादुक्तक्रमेणैव पुरुषोत्तमता हरेः । अनौपचारिकी सिद्धा ब्रह्मता च विनिर्णयात् ॥ ॥ १८४ ॥ पूर्णप्रज्ञकृतेयं सङ्क्षेपादुद्धृतिः सुवाक्यानाम् । श्रीमद्भारतगानां विष्णोः पूर्णत्वनिर्णयायैव ॥ १८५ ॥ स प्रीयतां परतमः परमादनन्तः सन्तारकः सततसंसृतिदुस्तरार्णात् । यत्पादपद्ममकरन्दजुषो हि पार्थाः स्वाराज्यमापुरुभयत्र सदाविनोदात् ॥ १८६ ॥ ३२७॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये सुवाक्योद्धरणं नाम द्वितीयोऽध्यायः ॥ २ ॥

॥ अथ तृतीयोऽध्यायः ॥

॥ ॐ ॥ जयत्यजोऽखण्डगुणोरुमण्डलः सदोदितो ज्ञानमरीचिमाली । स्वभक्तहार्दोच्चतमोनिहन्ता व्यासावतारो हरिरात्मभास्करः ॥ ॥ १ ॥ जयत्यजोऽक्षीणसुखात्मबिम्बः स्वैश्वर्यकान्तिप्रततः सदोदितः । स्वभक्तसन्तापदुरिष्टहन्ता रामावतारो हरिरीशचन्द्रमाः ॥ २ ॥ जयत्यसङ्ख्योरुबलाम्बुपूरो गुणोच्चरत्नाकर आत्मवैभवः । सदा सदात्मज्ञनदीभिराप्यः कृष्णावतारो हरिरेकसागरः ॥ ३ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरये ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

जयो नामेतिहासोऽयं कृष्णद्वैपायनेरितः । वायुर्नरोत्तमो नाम देवीति श्रीरुदीरिता ॥५॥ नारायणो व्यास इति वाच्यवक्तृस्वरूपकः । एकः स भगवानुक्तः साधकेशो नरोत्तमः ॥ ६ ॥ उपसाधको नरश्चोक्तो देवी भाग्यात्मिका नृणाम् । सरस्वती वाक्यरूपा तस्मान्नम्या हि तेऽखिलाः ॥ ७ ॥ कृष्णौ सत्या भीमपार्थौ कृष्णेत्युक्ता हि भारते ॥ ॥ ८ ॥ सर्वस्य निर्णयसुवाक्यसमुद्धृती तु स्वध्याययोर्हरिपदस्मरणेन कृत्वा । आनन्दतीर्थवरनामवती तृतीया भैमीतनुर्मरुत आह कथाः परस्य ॥ ९ ॥

व्यूढश्चतुर्धा भगवान्स एको मायां श्रियं सृष्टिविधित्सयाऽऽर । रूपेण पूर्वेण स वासुदेवनाम्ना विरिञ्चं सुषुवे च साऽतः ॥ १० ॥ सङ्कर्षणाच्चापि जयातनूजो बभूव साक्षाद्बलसंविदात्मा । वायुर्य एवाथ विरिञ्चनामा भविष्य आद्यो न परस्ततो हि ॥ ११ ॥ सूत्रं स वायुः पुरुषो विरिञ्चः प्रद्युम्नतश्चाथ कृतौ स्त्रियौ द्वे । प्रजज्ञतुर्यमले तत्र पूर्वा प्रधानसंज्ञा प्रकृतिर्जनत्री ॥ १२ ॥ श्रद्धा द्वितीयाऽथ तयोस्तु योगो बभूव पुंसैव च सूत्रनाम्ना । हरेर्नियोगादथ सम्प्रसूतौ शेषः सुपर्णश्च तयोः सहैव ॥ १३ ॥ शेषस्तयोरेव हि जीवनामा कालात्मकः सोऽथ सुपर्ण आसीत् । तौ वाहनं शयनं चैव विष्णोः काला जयाद्याश्च ततः प्रसूताः ॥ १४ ॥ काला जयाद्या अपि विष्णुपार्षदा यस्मादण्डात्परतः सम्प्रसूताः । नीचास्सुरेभ्यस्तत एव तेऽखिला विष्वक्सेनो वायुजः खेन तुल्यः ॥१५॥ व्यूहात्तृतीयात्पुनरेव विष्णोर्देवांश्चतुर्वर्णगतान्समस्तान् । संगृह्य बीजात्मतयाऽनिरुद्धो न्यधत्त शान्त्यां त्रिगुणात्मिकायाम् ॥१६॥ ततो महत्तत्त्वतनुर्विरिञ्चः स्थूलात्मनैवाजनि वाक्च देवी । तस्या-महङ्कारतनुं स रुद्रं ससर्ज बुद्धिं च तदर्धदेहाम् ॥१७॥ बुद्ध्यामुमायां स शिवस्त्रिरूपो मनश्च वैकारिकदेवसङ्घान् । दशेन्द्रियाण्येव च तैजसानि क्रमेण खादीन्विषयैश्च सार्धम् ॥ १८ ॥ पुंसः प्रकृत्यां च पुनर्विरिञ्चा-

SGDF
Sri Gurgeshwari Digital Foundation

च्छिवोऽथ तस्मादखिलाः सुरेशाः । जाताः सशक्राः पुनरेव सूत्राच्छूद्धा सुतानाप सुरप्रवीरान् ॥ १९ ॥ शेषं शिवं चेन्द्रमथेन्द्रतश्च सर्वे सुरा यज्ञगणाश्च जाताः ॥ २० ॥ पुनश्च माया त्रिविधा बभूव सत्वादि-रूपैरथ वासुदेवात् । सत्वात्मिकायां स बभूव तस्मात्स विष्णुनामैव निरन्तरोऽपि ॥ २१ ॥ रजस्तनौ चैव विरिञ्च आसीत्तमस्तनौ शर्व इति त्रयोऽस्मात् । एते हि देवाः पुनरण्डसृष्टावशक्नुवन्तो हरिमेत्य तुष्टुवुः ॥ २२ ॥ त्वन्नो जगच्चित्रविचित्रसर्गनिःसीमशक्तिः कुरु सन्नि-केतनम् । इति स्तुतस्तैः पुरुषोत्तमोऽसौ स विष्णुनामा श्रियमाप सृष्टये ॥ २३ ॥ सुषाव सैवाण्डमधोक्षजस्य शुष्मं हिरण्यात्मकमम्बु-मध्ये । तस्मिन्प्रविष्टा हरिणैव सार्धं सर्वे सुरास्तस्य बभूव नाभेः ॥ लोकात्मकं पद्ममुष्य मध्ये पुनर्विरिञ्चोऽजनि सद्गुणात्मा ॥ २४ ॥ तस्मात्पुनः सर्वसुराः प्रसूतास्ते जानमाना अपि निर्णयाय । निःसृत्य कायादुत पद्मयोनेः सम्प्राविशन्क्रमशो मारुतान्ताः ॥ २५ ॥ पपात वायोर्गमनाच्छरीरं तस्यैव चावेशत उत्थितं पुनः । तस्मात्स एको विबुधप्रधान इत्याश्रिता देवगणास्तमेव ॥ २६ ॥ हरेर्विरिञ्चस्य च मध्यसंस्थितेस्तदन्यदेवाधिपतिः स मारुतः । ततो विरिञ्चो भुवनानि सप्त ससप्तकान्याशु चकार सोऽब्जात् ॥ २७ ॥ तस्माच्च देवा ऋषयः पुनश्च वैकारिकाद्याः सशिवा बभूवुः ॥ २८ ॥ अग्रे शिवोऽहंभव एव बुद्धेरुमा मनोजौ सहशक्रकामौ । गुरुर्मनुर्दक्ष उतानिरुद्धः सहैव शच्या मनसः प्रसूताः ॥ २९ ॥ चक्षुः श्रुतिभ्यां स्पर्शात्सहैव रविः शशी धर्म इमे प्रसूताः । जिह्वाभवो वारिपतिर्नसोश्च नासत्यदस्रौ क्रमशः प्रसूताः ॥ ततः सनाद्याश्च मरीचिमुख्या देवाश्च सर्वे क्रमशः प्रसूताः ॥ ॥ ३० ॥ ततोऽसुराद्या ऋषयो मनुष्या जगद्विचित्रं च विरिञ्चतोऽ-भूत् ॥ ३१ ॥ उक्तक्रमात्पूर्वभवश्च यो यः श्रेष्ठः स स ह्यासुरकानृते च । पूर्वश्च पश्चात्पुनरेव जातो नाश्रेष्ठतामेति कथञ्चिदस्य ॥ गुणास्तु

SGDF
Sri Gargeshwari Digital Foundation

कालात्पितृमातृदोषात्स्वकर्मतो वाभिभवं प्रयान्ति ॥ ३२ ॥ लयो भवेद्व्युत्क्रमतो हि तेषां ततो हरिः प्रलये श्रीसहायः । शेते निजानन्दममन्दसान्द्रसन्दोहमेकोऽनुभवन्ननन्तः ॥ ३३ ॥ अनन्तशीर्षास्यकरोरुपादः सोऽनन्तमूर्तिः स्वगुणाननन्तान् । अनन्तशक्तिः परिपूर्णभोगो भुञ्जन्नजस्रं निजरूप आस्ते ॥ ३४ ॥ एवं पुनः सृजते सर्वमेतदनाद्यनन्तो हि जगत्प्रवाहः । नित्या हि जीवाः प्रकृतिश्च नित्या कालश्च नित्यः किमु देवदेवः ॥३५॥ यथा समुद्रात्सरितः प्रजाताः पुनस्तमेव प्रविशन्ति शश्वत् । एवं हरेर्नित्यजगत्प्रवाहस्तमेव चासौ प्रविशत्यजस्रम् ॥ ३६ ॥ एवं विदुर्ये परमामनन्तामजस्य शक्तिं पुरुषोत्तमस्य । तस्य प्रसादादथ दग्धदोषास्तमाप्नुवन्त्याशु परं सुरेशम् ॥ ३७ ॥

देवानिमान्मुक्तसमस्तदोषान्स्वसन्निधाने विनिवेश्य देवः । पुनस्तदन्यानधिकारयोग्यांस्तत्तद्गुणानेव पदे नियुङ्क्ते ॥ ३८ ॥ पुनश्च मारीचत एव देवा जाता अदित्यामसुराश्च दित्याम् । गावो मृगाः पक्ष्युरगादिसत्वा दाक्षायणीष्वेव समस्तशोऽपि ॥ ३९ ॥ ततः स मग्नामलयो लयोदधौ महीं विलोक्याशु हरिर्वराहः । भूत्वा विरिञ्चार्थमिमां सशैलामुद्धृत्य वारामुपरि न्यधात्स्थिरम् ॥ ४० ॥ अथाब्जनाभप्रतिहारपालौ शापात्त्रिशो भूमितले प्रजातौ । दित्यां हिरण्यावथराक्षसौ च पैतृष्वसेयौ च हरेः परस्तात् ॥४१॥ ततो हिरण्याक्ष उदारविक्रमो दितेः सुतो योऽवरजः सुरार्थे । धात्रार्थितेनैव वराहरूपिणा धरोद्धृतौ पूर्वहतोऽब्जजोद्भवः ॥ ४२ ॥ अथो विधातुर्मुखतो विनिःसृतान्वेदान्हयास्यो जगृहेऽसुरेन्द्रः । निहत्य तं मत्स्यवपुर्जुगोप मनुं मुनींस्तांश्च ददौ विधातुः ॥ ४३ ॥ मन्वन्तरप्रलये मत्स्यरूपो विद्यामदान्मनवे देवदेवः । वैवस्वतायोत्तमसंविदात्मा विष्णोः स्वरूपप्रतिपत्तिरूपाम् ॥ ॥ ४४ ॥ अथो दितेर्ज्येष्ठसुतेन शश्वत्प्रपीडिता ब्रह्मवरात्सुरेशाः । हरिं विरिञ्चेन सहोपजग्मुर्दौरात्म्यमस्यापि शशंसुरस्मै ॥ ४५ ॥

SGDF
Sri Gangeshwari Digital Foundation

अभिष्टुतस्तैर्हरिरुग्रवीर्यो नृसिंहरूपेण स आविरासीत् । हत्वा हिरण्यं च सुताय तस्य दत्वाऽभयं देवगणानतोषयत् ॥ ४६ ॥ सुरासुराणामुदधिं विमथ्नतां दधार पृष्ठेन गिरिं स मन्दरम् । वरप्रदानादपरैरधार्यं हरस्य कूर्मो बृहदण्डवोढा ॥ ४७ ॥ वरादजेयत्वमवाप दैत्यराट् चतुर्मुखस्यैव बलिर्यदा तदा । अजायतेन्द्रावरजोऽदितेः सुतो महानजोऽप्यब्जभवादि-संस्तुतः ॥४८॥ स वामनाऽत्मासुरभूभृतोऽध्वरं जगाम गां संनमय-न्पदेपदे । जहार चास्माच्छलतस्त्रिविष्टपं त्रिभिः क्रमैस्तच्च ददौ निजाग्रजे ॥ ४९ ॥ पितामहेनास्य पुराऽभियाचितो बलेः कृते केशव आह यद्वचः । नायाच्ञयाऽहं प्रतिहन्मि तं बलिं शुभाननेत्येव ततोऽ-भ्ययाचत ॥ ५० ॥ बभूविरे चन्द्रललामतो वरात्पुरा ह्यजेया असुरा धरातले । तैरर्दिता वासवनायकाः सुराः पुरो निधायाब्जजमस्तुव-न्हरिम् ॥५१॥ विरिञ्चसृष्टैर्नितरामवध्यौ वराद्विधातुर्दितिजौ हिरण्यकौ । तथा हयग्रीव उदारविक्रमस्त्वया हता ब्रह्मपुरातनेन ॥ ५२ ॥ स चासुरान्रुद्रवरादवध्यानिमान्समस्तैरपि देवदेव । निःसीमशक्त्यैव निहत्य सर्वान्हृदम्बुजे नो निवसाथ शश्वत् ॥ ५३ ॥ इत्यादरोक्तस्त्रिदशैरजेयः स शार्ङ्गधन्वाऽथ भृगूद्वहोऽभूत् । रामो निहत्यासुरपूगमुग्रं ह्रदाननादि-र्विदधेऽसृजैव ॥ ५४ ॥ ततः पुलस्त्यस्य कुले प्रसूतौ तावादिदैत्यौ जगदेकशत्रू । परैरवध्यौ वरतः पुरा हरेः सुरैरजेयौ च वराद्विधातुः ॥ ॥ ५५ ॥ सर्वैरजेयः स च कुम्भकर्णः पुरातने जन्मनि धातुरेव । वरान्नरादीनृत एव रावणस्तदातनात्तौ त्रिदशानबाधताम् ॥ ५६ ॥ तदाब्जजं शूलिनमेव चाग्रतो निधाय देवाः पुरुहूतपूर्वकाः । पयोम्बुधौ भोगिपभोगशायिनं समेत्य योग्यां स्तुतिमभ्ययोजयन् ॥५७॥ त्वमेक ईशः परमः स्वतन्त्रस्त्वमादिरन्तो जगतां नियोक्ता । त्वदाज्ञयैवाखिल-मम्बुजोद्भवा वितेनिरेऽग्र्याश्चरमाश्च येऽन्ये ॥ ५८ ॥ मनुष्यमाना-त्रिशतं सषष्टिकं दिवौकसामेकमुशन्ति वत्सरम् । द्विषट्सहस्रैरपि

SGDF
Sri Gargeshwari Digital Foundation

तैश्चतुर्युगं त्रेतादिभिः पादश एव हीनैः ॥ ५९ ॥ सहस्रवृत्तं तदहः स्वयम्भुवो निशा च तन्मानमितं शरच्छतम् । त्वदाज्ञया स्वाननुभूय भोगानुपैति सोऽपि त्वरितस्त्वदन्तिकम् ॥ ६० ॥ त्वया पुरा कर्णपुटाद्विनिर्मितौ महासुरौ तौ मधुकैटभाख्यौ । प्रभञ्जनावेशवशात्त्वदाज्ञया बलोद्धतावाशु जलेऽभ्यवर्धताम् ॥ ६१ ॥ त्वदाज्ञया ब्रह्मवरादवध्यौ चिक्रीडिषासम्भवया मुखोद्गतान् । स्वयम्भुवो वेदगणानहार्षतां तदाऽभवस्त्वं हयशीर्ष ईश्वरः ॥ ६२ ॥ आहृत्य वेदानखिलान्प्रदाय स्वयम्भुवे तौ च जघन्थ दस्यू । निष्पीड्य ता(डिता)-वूरुतले कराभ्यां तन्मेदसैवाशु चकर्थ मेदिनीम् ॥ ६३ ॥ एवं सुराणां च निसर्गजं बलं तथाऽसुराणां वरदानसम्भवम् । वशे तवैतद्द्वयमप्यतो वयं निवेदयामः पितुरेव तेऽखिलम् ॥ ६४ ॥ इमौ च रक्षोऽधिपती वरोद्धतौ जहि स्ववीर्येण नृषु प्रजातः । इतीरिते तैरखिलैः सुरेश्वरैर्बभूव रामो जगतीपतिः प्रभुः ॥ ६५ ॥ स कश्यपस्यादितिगर्भजन्मनो विवस्वतस्तन्तुभवस्य भूभृतः । गृहे दशस्यन्दननामिनोऽभूत्कौसल्यकानाम्नि तदर्थिनेष्टः ॥ ६६ ॥ तदाज्ञया देवगणा बभूविरे पुरैव पश्चादपि तस्य भूम्नः । निषेवणायोरुगुणस्य वानरेष्वथो नरेष्वेव च पश्चिमोद्भवाः ॥ ६७ ॥ स देवतानां प्रथमो गुणाधिको बभूव नाम्ना हनुमान्प्रभञ्जनः । स्वसम्भवः केसरिणो गृहे प्रभुर्बभूव वाली स्वत एव वासवः ॥ ६८ ॥ सुग्रीव आसीत्परमेष्ठितेजसा युतो रविः स्वात्मत एव जाम्बवान् । य एव पूर्वं परमेष्ठिवक्षसस्त्वगुद्भवो धर्म इहास्यतोऽभवत् ॥ ॥ ६९ ॥ य एव सूर्यात्पुनरेव संज्ञया नाम्ना यमो दक्षिणदिक्प आसीत् । स जाम्बवान्दैवतकार्यदर्शिना पुरैव सृष्टो मुखतः स्वयम्भुवा ॥ ॥ ७० ॥ ब्रह्मोद्भवः सोम उताऽस्य सूनोरत्रेरभूत्सोऽङ्गद एव जातः । बृहस्पतिस्तार उतो शची च शक्रस्य भार्यैव बभूव तारा ॥ ७१ ॥ बृहस्पतिर्ब्रह्मसुतोऽपि पूर्वं सहैव शच्या मनसोऽभिजातः । ब्रह्मोद्भव-

SGDF
Sri Gangeshwari Digital Foundation

स्याङ्गिरसः सुतोऽभून्मारीचजस्यैव शची पुलोम्नः ॥ ७२ ॥ स एव शच्या सह वानरोऽभूत्स्वयम्भुवो देवगुरुर्बृहस्पतिः । अभूत्सुषेणो वरुणोऽश्विनौ च बभूवतुस्तौ विविदश्च मैन्दः ॥ ७३ ॥ ब्रह्मोद्भवौ तौ पुनरेव सूर्याद्बभूवतुस्तत्र कनीयसस्तु । आवेश ऐन्द्रो वरदानतोऽभूत्ततो बलीयान्विविदो हि मैन्दात् ॥ ७४ ॥ नीलोऽग्निरासीत्कमलोद्भवोत्थः कामः पुनः श्रीरमणाद्रमायाम् । प्रद्युम्ननामाऽभवदेवमीशात्स स्कन्दतामाप स चक्रतां च ॥ ७५ ॥ पूर्वं हरेश्चक्रमभूद्धि दुर्गा तमःस्थिता श्रीरिति यां वदन्ति । सत्वात्मिका शङ्खमथो रजस्था भूर्नामिका पद्ममभूद्धरेर्हि ॥ ७६ ॥ गदा तु वायुर्बलसंविदात्मा शार्ङ्गं च विद्येति रमैव खड्गः । दुर्गात्मिका सैव च चर्मनाम्नी पश्चात्मको मारुत एव बाणः ॥ ७७ ॥ एवं स्थितेष्वेव पुरातनेषु वराद्रथाङ्गत्वमवाप कामः । तत्सूनुतामाप च सोऽनिरुद्धो ब्रह्मोद्भवः शङ्खतनुः पुमात्मा ॥ ७८ ॥ तावेव जातौ भरतश्च नाम्ना शत्रुघ्न इत्येव च रामतोऽनु । पूर्वं सुमित्रातनयश्च शेषः स लक्ष्मणो नाम रघूत्तमादनु ॥ ७९ ॥ कौसल्यकापुत्र उरुक्रमोऽसावेकस्तथैको भरतस्य मातुः । उभौ सुमित्रातनयौ नृपस्य चत्वार एते ह्यमरोत्तमाः सुताः ॥ ८० ॥ सङ्कर्षणाद्यैस्त्रिभिरेव रूपैराविष्ट आसीत्त्रिषु तेषु विष्णुः । इन्द्रोऽङ्गदे चैव ततोऽङ्गदो हि बली नितान्तं स बभूव शश्वत् ॥ ८१ ॥ येऽन्ये च भूपाः कृतवीर्यजाद्या बलाधिकाः सन्ति सहस्रशोऽपि । सर्वे हरेः सन्निधिभावयुक्ता धर्मप्रधानाश्च गुणप्रधानाः ॥ ८२ ॥ स्वयं रमा सीरत एव जाता सीतेति रामार्थमनूपमा या । विदेहराजस्य हि यज्ञभूमौ सुतेति तस्यैव ततस्तु साऽभूत् ॥ ८३ ॥ इत्यादिकल्पोत्थित एष सर्गो मया समस्तागमनिर्णयेन । सहानुसर्गः कथितोऽत्र पूर्वो यो यो गुणैर्नित्यमसौ वरो हि ॥८४॥ पाश्चात्यकल्पेष्वपि सर्गभेदाः श्रुतौ पुराणेष्वपि चान्यथोक्ताः । नोत्कर्षहेतुः प्रथमत्वमेषु विशेषवाक्यैरवगम्यते तत् ॥८५॥ (४१२)॥

SGDF
Sri Gangeshwari Digital Foundation

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये सर्गानुसर्गप्रादुर्भावनिर्णयो नाम तृतीयोऽध्यायः ॥ ३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

॥ ॐ ॥ अथाभ्यवर्धश्चतुराः कुमारा नृपस्य गेहे पुरुषोत्तमाद्याः । नित्यप्रवृद्धस्य च तस्य वृद्धिरपेक्ष्य लोकस्य हि मन्दद्दष्टिम् ॥ १ ॥ निरीक्ष्य नित्यं चतुरः कुमारान्पिता मुदं सन्ततमाप चोच्चम् । विशेषतो राममुखेन्दुबिम्बमवेक्ष्य राजा कृतकृत्य आसीत् ॥ २ ॥ तन्मातरः पौरजना अमात्या अन्तःपुरा वैषयिकाश्च सर्वे । अवेक्षमाणाः परमं पुमांसं स्वानन्दतृप्ता इव सम्बभूवुः ॥ ३ ॥ ततः सुवंशे शशिनः प्रसूतो गाधीति शक्रस्तनुजोऽस्य चासीत् । वरेण विप्रत्वमवाप योऽसौ विश्वस्य मित्रं स इहाजगाम ॥ ४ ॥ तेनार्थितो यज्ञरिरक्षयैव कृच्छ्रेण पित्रास्य भयाद्विसृष्टः । जगाम रामः सह लक्ष्मणेन सिद्धाश्रमं सिद्धजनाभिवन्द्यः ॥ ५ ॥ अनुग्रहार्थं स ऋषेरवाप सलक्ष्मणोऽस्त्रं मुनितो हि केवलम् । ववन्दिरे ब्रह्ममुखाः सुरेशास्तमस्त्ररूपाः प्रकटाः समेत्य ॥६॥ अथो जघानाशु शरेण ताटकां वराद्विधातुस्तदनन्यवध्याम् । ररक्ष यज्ञं च मुनेर्निहत्य सुबाहुमीशानगिरा विमृत्युम् ॥ ७ ॥ शरेण मारीचमथार्णवेऽक्षिपद्वचो विरिञ्चस्य तु मानयानः । अवध्यता तेन हि तस्य दत्ता जघान चान्यात्रजनीचरानथ ॥ ८ ॥

तदा विदेहेन सुतास्वयंवरो विघोषितो दिक्षु विदिक्षु सर्वशः । निधार्य तद्राधिसुतानुयायी ययौ विदेहाननुजानुयातः ॥ ९ ॥ अथो अहल्यां पतिनाभिशप्तां प्रधर्षणादिन्द्रकृताच्छिलीकृताम् । स्वदर्शनान्मानुषतामुपेतां सुयोजयामास स गौतमेन ॥ १० ॥ बलं स्वभक्तेरधिकं प्रकाशयन्ननुग्रहं च त्रिदशेष्व-

SGDF
Sri Gargeshwari Digital Foundation

तुल्यम् । अनन्यभक्तां च सुरेशकाङ्क्षया विधाय नारीं प्रययौ तयाऽर्चितः ॥ ११ ॥ श्यामावदाते जगदेकसारे स्वनन्तचन्द्राधिककान्तिकान्ते । सहानुजे कार्मुकबाणपाणौ पुरीं प्रविष्टे तुतुषुर्विदेहजाः ॥ ॥ १२ ॥ पपुर्नितान्तं सरसाक्षिभृङ्गैर्वराननाब्जं पुरुषोत्तमस्य । विदेहनारीनरवर्यसङ्घा यथा महापौरुषिकास्तदङ्घ्रिम् ॥ १३ ॥ तदा विदेहः प्रतिलभ्य रामं सहस्रनेत्रावरजं गविष्ठम् । समर्चयामास सहानुजं तमृषिं च साक्षाज्ज्वलनप्रकाशम् ॥१४॥ मेने च जामातरमात्मकन्यागुणोचितं रूपनवावतारम् । उवाच चास्मा ऋषिरुग्रतेजाः कुरुष्व जामातरमेनमाश्विति ॥ १५ ॥ स आह चैनं परमं वचस्ते करोमि नात्रास्ति विचारणा मे । शृणुष्व मेऽथापि यथा प्रतिज्ञा सुताप्रदानाय कृता पुरस्तात् ॥ १६ ॥ तपो मया चीर्णमुमापतेः पुरा वरायुधावाप्तिधृतेन चेतसा । स मे ददौ दिव्यमिदं धनुस्तदा कथञ्चनाचाल्यमृते पिनाकिनम् ॥ १७ ॥ न देवदैत्योरगदेवगायका अलं धनुश्चालयितुं सवासवाः । कुतो नरास्तद्भरतो हि किङ्कराः सहानसैवात्र कृषन्ति कृच्छ्रतः ॥ १८ ॥ अधार्यमेतद्धनुराप्य शङ्करादहं नृणां वीर्यपरीक्षणे धृतः । सुतार्थमेतां चकर प्रतिज्ञां ददामि कन्यां य इदं हि पूरयेत् ॥ ॥ १९ ॥ इतीरितां मे गिरमभ्यवेत्य दितेः सुता दानवयक्षराक्षसाः । समेत्य भूपाश्च समीपमाशु प्रगृह्य तच्चालयितुं न शेकुः ॥ २० ॥ संस्विन्नगात्राः परिवृत्तनेत्रा दशाननाद्याः पतिता विमूर्छिताः । तथापि मां धर्षयितुं न शेकुः सुताकृते ते वचनात्स्वयम्भुवः ॥ २१ ॥ पुरा हि मेऽदात्प्रभुरब्जजो वरं प्रसादितो मे तपसा कथञ्चन । बलान्न ते कश्चिदुपैति कन्यकां तदिच्छुभिस्ते न च धर्षणेति ॥ २२ ॥ ततस्तु ते नष्टमदा इतो गताः समस्तशो ह्यस्तन एव पार्थिवाः । ततो ममायं परिपूर्य मानसं वृणोतु कन्यामयमेव मेऽर्थितः ॥ २३ ॥ तथेति चोक्तो मुनिना स किङ्करैरनन्तभोगोपममाश्वथानयत् । समीक्ष्य

SGDF
Sri Gargeshwari Digital Foundation

तद्धामकरेण राघवः सलीलमुद्धृत्य हसन्नपूरयत् ॥ २४ ॥ विकृष्यमाणं तदनन्तराधसा परेण निःसीमबलेन लीलया । अभज्यतासह्यममुष्य तद्बलं प्रसोढुमीशं कुत एव तद्भवेत् ॥ २५ ॥ स मध्यतस्तत्प्रविभज्य लीलया यथेक्षुदण्डं शतमन्युकुञ्जरः । विलोकयन्वक्रमृषेरवस्थितः सलक्ष्मणः पूर्णतनुर्यथा शशी ॥ २६ ॥ तमब्जनेत्रं पृथुतुङ्गवक्षसं श्यमावदातं चलकुण्डलोज्ज्वलम् । शशक्षतोत्थोपमचन्दनोक्षितं ददर्श विद्युद्वसनं नृपात्मजा ॥ २७ ॥ अथो कराभ्यां प्रतिगृह्यमालामम्लान-पद्मां जलजायताक्षी । उपेत्य मन्दं ललितैः पदैस्तां तदंस आसज्य च पार्श्वतोऽभवत् ॥ २८ ॥ ततः प्रमोदो नितरां जनानां विदेहपुर्या-मभवत्समन्तात् । रामं समालोक्य नरेन्द्रपुत्र्या समेतमानन्दनिधिं परेशम् ॥ २९ ॥ लक्ष्म्या समेते प्रकटं रमेशे सम्प्रेषयामास तदाशु पित्रे । विदेहराजो दशदिग्रथाय स तं निशम्याशु तुतोष भूमिपः ॥ ॥३०॥ अथात्मजाभ्यां सहितः सभार्यो ययौ गजस्यन्दनपत्तियुक्तया । स्वसेनयाऽग्रे प्रणिधाय धातृजं वसिष्ठमाश्वेव स यत्र मैथिलः ॥ ३१ ॥ स मैथिलेनातितरां समर्चितो विवाहयामास सुतं मुदम्भरः । पुरोहितो गाधिसुतानुमोदितो जुहाव वह्निं विधिना वसिष्ठः ॥ ३२ ॥ तदा विमानावलिभिर्नभस्तलं दिदृक्षतां सङ्कुलमास नाकिनाम् । सुरानका दुन्दुभयो विनेदिरे जगुश्च गन्धर्ववराः सहस्रशः ॥ ३३ ॥ विजानमाना जगतां हि मातरं पुराऽर्थितुं नाययुरत्र देवताः । तदा तु रामं रमया युतं प्रभुं दिदृक्षवश्चक्रुरलं नभस्तलम् ॥ ३४ ॥ यथा पुरा सागरजा-स्वयंवरे सुमानसानामभवत्समागमः । तथा ह्यभूत्सर्वदिवौकसां तदा तथा मुनीनां सहभूभृतां भुवि ॥ ३५ ॥ प्रगृह्य पाणिं च नृपात्मजाया रराज राजीवसमाननेत्रः । यथा पुरा सागरजासमेतः सुरासुराणा-ममृताब्धिमन्थने ॥ ३६ ॥ स्वलङ्कृतास्तत्र विचेरुरङ्गना विदेहराज्यस्य हि याश्च योषितः । मुदा समेतं रमया रमापतिं विलोक्य रामाय ददौ धनं

SGDF
Sri Gargeshwari Digital Foundation

नृपः ॥ ३७ ॥ प्रियाणि वस्त्राणि रथान्सकुञ्जरान्पराध्यर्यरत्नान्यखिलस्य चेशितुः । ददौ च कन्यात्रयमुत्तमं मुदा तदा स रामावरजेभ्य एव ॥३८॥ महोत्सवं तं त्वनुभूय देवता नराश्च सर्वे प्रययुर्यथागतम् । पिता च रामस्य सुतैः समन्वितो यथावयोध्यां स्वपुरीं मुदा ततः ॥ ३९ ॥

तदन्तरे सोऽथ ददर्श भार्गवं सहस्रलक्षामितभानुदीधितिम् । विभासमानं निजरश्मिमण्डले धनुर्धरं दीप्तपरश्वधायुधम् ॥४०॥ अजानतां राघवमादिपूरुषं समागतं ज्ञापयितुं निदर्शनैः । समाह्वयन्तं रघुपं स्पृधेव नृपो ययाचे प्रणिपत्य भीतः ॥ ४१ ॥ न मे सुतं हन्तुमिहार्हसि प्रभो वयोगतस्येत्युदितः स भार्गवः । सुतत्रयं ते प्रददामि राघवं रणे स्थितं द्रष्टुमिहागतोऽस्म्यहम् ॥ ४२ ॥ स इत्थमुक्त्वा नृपतिं रघूत्तमं भृगूत्तमः प्राह निजां तनुं हरिः । अभेदमङ्गेष्वपि दर्शयन्परं पुरातनोऽहं हरिरेष इत्यपि ॥ ४३ ॥ शृणुष्व राम त्वमिहोदितं मया धनुर्द्वयं पूर्वमभून्महाद्भुतम् । उमापतिस्त्वेकमधारयत्ततो रमापतिश्चापरमुत्तमो-त्तमम् ॥ ४४ ॥ तदा तु लोकस्य निदर्शनार्थिभिः समर्थितौ तौ हरिशङ्करौ सुरैः । रणे स्थितौ वां प्रसमीक्षितुं वयं समर्थयामोऽत्र निदर्शनार्थिनः ॥ ४५ ॥ ततो हि युद्धाय रमेशशङ्करौ व्यवस्थितौ ते धनुषी प्रगृह्य । यतोऽन्तरस्यैष नियामको हरिस्ततो हरोऽग्रेऽस्य शिलोपमोऽभूत् ॥ ४६ ॥ शशाक नैवाथ यदाभिवीक्षितुं प्रस्पन्दितुं वा कुत एव योद्धुम् । शिवस्तदा देवगणाः समस्तशः शशंसुरुच्चैर्जगतो हरेर्बलम् ॥ ४७ ॥ यदीरणेनैव विनैष शंकरः शशाक न प्रश्वसितुं च केवलम् । किमत्र वक्तव्यमतो हरेर्बलं हरात्परं सर्वत एव चेति ॥४८॥ ततः प्रणम्याशु जनार्दनं हरः प्रसन्नदृष्ट्या हरिणाऽभिवीक्षितः । जगाम कैलासममुष्य तद्धनुस्त्वया प्रभग्नं किल लोकसन्निधौ ॥ ४९ ॥ धनु-

SGDF
Sri Gargeshwari Digital Foundation

र्यदन्यद्धरिहस्तयोग्यं तत्कार्मुकात्कोटिगुणं पुनश्च । वरं हि हस्ते तदिदं गृहीतं मया गृहाणैतदथो हि वैष्णवम् ॥५०॥ यदीदमागृह्य विकर्षसि त्वं तदा हरिर्नात्र विचार्यमस्ति । इति ब्रुवाणः प्रददौ धनुर्वरं प्रदर्शय-न्विष्णुबलं हराद्वरम् ॥ ५१ ॥ प्रगृह्य तच्चापवरं स राघवश्चकार सज्यं निमिषेण लीलया । चकर्ष सन्धाय शरं च पश्यतः समस्तलोकस्य च संशयं नुदन् ॥५२॥ प्रदर्शिते विष्णुबले समस्तशो हराच्च निःसंख्यतया महाधिके । जगाद मेघौघगभीरया गिरा स राघवं भार्गव आदि-पूरुषः ॥ ५३ ॥ अलं बलं ते जगतोऽखिलाद्वरं परोऽसि नारायण एव नान्यथा । विसर्जयस्वेह शरं तपोमये महासुरे लोकमये वराद्विभोः ॥ ॥ ५४ ॥ पुराऽतुलो नाम महासुरोऽभवद्वरात्स तु ब्रह्मण आप लोकताम् । पुनश्च तं प्राह जगद्गुरुर्यदा हरिर्जितः स्याद्धि तदैव वध्यसे ॥ ५५ ॥ अतो वधार्थं जगदन्तकस्य सर्वाजितोऽहं जितव-द्व्यवस्थितः । इतीरिते लोकमये स राघवो मुमोच बाणं जगदन्तकेऽ-सुरे ॥ ५६ ॥ पुरा वरोऽनेन शिवोपलम्भितो मुमुक्षया विष्णुतनु-प्रवेशनम् । स तेन रामोदरगो बहिर्गतस्तदाज्ञयैवाशु बभूव भस्मसात् ॥५७॥ इतीव रामाय स राघवः शरं विकर्षमाणो विनिहत्य चासुरम् । तपस्तदीयं प्रवदन्मुमोद तदीयमेव ह्यभवत्समस्तम् ॥ ५८ ॥ निरन्तरानन्दविबोधसारः स जानमानोऽखिलमादिपूरुषः । वदन्शृणोतीव विनोदतो हरिः स एक एव द्वितनुर्मुमोद ॥ ५९ ॥ स चेष्टितं चैव निजाश्रयस्य जनस्य सत्त्वविबोधकारणम् । विमोहकं चान्यतमस्य कुर्वंश्चिक्रीड एकोऽपि नरान्तरे यथा ॥ ६० ॥ ततः स कारुण्यनिधि-र्निजे जने नितान्तमैक्यं स्वगतं प्रकाशयन् । द्विधेव भूत्वा भृगुवर्य आत्मना रघूत्तमेनैक्यमगात्समक्षम् ॥ ६१ ॥ समेत्य चैक्यं जगतोऽ-भिपश्यतः प्रणुद्य शङ्कामखिलां जनस्य । प्रदाय रामाय धनुर्वरं तदा जगाम रामानुमतो रमापतिः ॥ ६२ ॥

SGDF
Sri Gargeshwari Digital Foundation

ततो नृपोऽत्यर्थमुदाऽभिपूरितः सुतैः समस्तैः स्वपुरीमवाप ह । रेमेऽथ रामोऽपि रमास्वरूपया तयैव राजात्मजया हि सीतया ॥ ६३ ॥ यथा पुरा श्रीरमणः श्रिया तया रतो नितान्तं हि पयोब्धिमध्ये । तथा त्वयोध्यापुरगो रघूत्तमोऽप्युवास कालं सुचिरं रतस्तया ॥ ६४ ॥ इमानि कर्माणि रघूत्तमस्य हरेर्विचित्राण्यपि नाद्भुतानि । दुरन्तशक्तेरथ चास्य वैभवं स्वकीयकर्तव्यतयाऽनुवर्ण्यते ॥ ६५ ॥ (४७७) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीरामचरिते बालकाण्डकथानिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

॥ अथ पञ्चमोऽध्यायः ॥

॥ ॐ ॥ इत्थं विश्वेश्वरेऽस्मिन्निखिलजगदवस्थाप्य सीतासहाये भूमिष्ठे सर्वलोकास्तुतुषुरनुदिनं वृद्धभक्त्या नितान्तम् । राजा राज्याभिषेके प्रकृतिजनवचो मानयन्नात्मनोऽर्थ्यं दध्रे तन्मन्थरायाः श्रुतिपथमगमद्भूमिगाया अलक्ष्म्याः ॥१॥ पूर्वं क्षीराब्धिजाता कथमपि तपसैवाप्सरस्त्वं प्रयाता तां नेतुं तत्तमोऽन्धं कमलजनिरुवाचाशु रामाभिषेकम् । भूत्वा दासी विलुंप स्वगतिमपि ततः कर्मणा प्राप्स्यसे त्वं सेत्युक्ता मन्थराऽऽसीत्तदनु कृतवतीत्येव चैतत्कुकर्म ॥२॥ तद्वाक्यात्कैकयी सा पतिगवरबलादाजहारैव राज्यं रामस्तद्गौरवेण त्रिदशमुनिकृतेऽरण्यमेवाविवेश । सीतायुक्तोऽनुजेन प्रतिदिनसुविवृद्धोरुभक्त्या समेतः संस्थाप्याशेषजन्तूनस्वविरहजशुचा त्यक्तसर्वेषणार्थान् ॥ ३ ॥ वृक्षान्पक्षीभकीटान्पितरमथ सखीन्मातृपूर्वान्विसृज्य प्रोत्थां गङ्गां स्वपादाद्धर इव च गुहेनार्चितः सोऽथ तीर्त्वा । देवार्च्यस्यापि पुत्रादृषिगणसहितात्प्राप्य पूजां प्रयातः शैलेशं चित्रकूटं कतिपयदिवसान्यत्र

SGDF
Sri Gangeshwari Digital Foundation

मोदन्नुवास ॥ ४ ॥ एतस्मिन्नेव काले दशरथनृपतिः स्वर्गतोऽभूद्वियोगाद्रामस्यैवाथ पुत्रौ विधिसुतसहितौ मन्त्रिभिः केकयेभ्यः । आनीतौ तस्य कृत्वा श्रुतिगणविहितप्रेतकार्याणि सद्यः शोचन्तौ राममार्गं पुरजनसहितौ जग्मतुर्मातृभिश्च ॥ ५ ॥ धिक्कुर्वन्तौ नितान्तं सकलदुरितगां मन्थरां कैकयीं च प्राप्तौ रामस्य पादौ मुनिगणसहितौ तत्र चोवाच नत्वा । रामं राजीवनेत्रं भरत इह पुनः प्रीतयेऽस्माकमीश प्राप्याशु स्वामयोध्यामवरजसहितः पालयेमां धरित्रीम् ॥ ६ ॥ इत्युक्तः कर्तुमीशः सकलसुरगणाप्यायनं रामदेवः सत्यां कर्तुं च वाणीमवददतितरां नेति सद्भक्तिनम्रम् । भूयोभूयोऽर्थयन्तं द्विगुणितशरदां सप्तके त्वभ्यतीते कर्तैतत्ते वचोऽहं सुदृढमृतमिदं मे वचो नात्र शङ्का ॥ ७ ॥ श्रुत्वैतद्रामवाक्यं हुतभुजि पतने स प्रतिज्ञां च कृत्वा रामोक्तस्यान्यथात्वे न तु पुरमभिवेक्ष्येऽहमित्येव तावत् । कृत्वान्यां स प्रतिज्ञामवसदथ बहिर्ग्रामके नन्दिनाम्नि श्रीशस्यैवास्य कृत्वा शिरसि परमकं पौरटं पादपीठम् ॥ ८ ॥

समस्तपौरानुगतेऽनुजे गते स चित्रकूटे भगवानुवास ह । अथाजगामेन्द्रसुतोऽपि वायसो महासुरेणात्मगतेन चोदितः ॥ ९ ॥ स चासुरावेशवशाद्रमास्तने यदा व्यधात्तुण्डमथाभिवीक्षितः । जनार्दनेनाशु तृणे प्रयोजिते चचार तेन ज्वलताऽनुयातः ॥ १० ॥ स्वयम्भुशर्वेन्द्रमुखान्सुरेश्वराञ्जिजीविषुस्ताञ्छरणं गतोऽपि । बहिष्कृतस्तैर्हरिभक्तिभावतो ह्यलङ्घ्यशक्त्या परमस्य चाक्षमैः ॥ ११ ॥ पुनः प्रयातः शरणं रघूत्तमं विसर्जितस्तेन निहत्य चासुरम् । तदक्षिगं साक्षिकमप्यवध्यं प्रसादतश्चन्द्रविभूषणस्य ॥ १२ ॥ स वायसानामसुरोऽखिलानां वरादुमेशस्य बभूव चाक्षिगः । निपातितोऽसौ सह वायसाक्षिभिस्तृणेन रामस्य बभूव भस्मसात् ॥ १३ ॥ ददुर्हि तस्मै विवरं बलार्थिनो यद्वायसास्तेन तदक्षिपातनम् । कृतं रमेशेन तदेकनेत्रा बभूवुरन्येऽपि

SGDF
Sri Gargeshwari Digital Foundation

च वायसास्तदा ॥ १४ ॥ भविष्यतामप्यथ यावदेव द्विनेत्रता काककुलोद्भवानाम् । तावत्तदक्ष्यस्य (दक्षिस्थ) कुरङ्गनाम्नः शिवेन दत्तं दितिजस्य चाक्षयम् ॥ १५ ॥ अतः पुनर्भाविममुष्य हिन्वन्भविष्यतश्चैकदृशश्चकार । स वायसात्राघव आदिपूरुषस्ततो ययौ शक्रसुतस्तदाज्ञया ॥ १६ ॥

रामोऽथ दण्डकवनं मुनिवर्यनीतो लोकाननेकश उदारबलैर्निरस्तान् । श्रुत्वा खरप्रभृतिभिर्वरतो हरस्य सर्वैरवध्यतनुभिः प्रययौ सभार्यः ॥ १७ ॥ आसीच्च तत्र शरभङ्ग इति स्म जीर्णो लोकं हरेर्जिगमिषुर्मुनिरुग्रतेजाः । तेनादरोपहृतसार्घ्यसपर्यया स प्रीतो ददौ निजपदं परमं रमेशः ॥ १८ ॥ धर्मो यतोऽस्य वनगस्य नितान्तशक्तिह्रासे स्वधर्मकरणस्य हुताशनादौ । देहात्ययः स तत एव तनुं निजाग्नौ सन्त्यज्य रामपुरतः प्रययौ रमेशम् ॥ १९ ॥ रामोऽपि तत्र ददृशे धनदस्य शापाद्गन्धर्वमुर्वशिरतेरथ यातुधानीम् । प्राप्तं दशां सपदि तुम्बरुनामधेयं नाम्ना विराधमपि शर्ववरादवध्यम् ॥ २० ॥ भङ्क्त्वास्य बाहुयुगलं विलगं चकार संमानयन्वचनमम्बुजजन्मनोऽसौ । प्रादाच्च तस्य सुगतिं निजगायकस्य भक्षार्थमंसकमितोऽपि सहानुजेन ॥ २१ ॥ प्रीतिं विधित्सुरगमद्भवनं निजस्य कुम्भोद्भवस्य परमादरतोऽमुना च । सम्पूजितो धनुरनेन गृहीतमिन्द्राच्छार्ङ्गं तदादिपुरुषो निजमाजहार ॥ ॥ २२ ॥ आत्मार्थमेव हि पुरा हरिणा प्रदत्तमिन्द्रे तदिन्द्र उत रामकरार्थमेव । प्रादादगस्त्यमुनये तदवाप्य रामो रक्षन्नृषीनवसदेव स दण्डकेषु ॥ २३ ॥ काले तदैव खरदूषणयोर्बलेन रक्षःस्वसा पतिनिमार्गणतत्पराऽऽसीत् । व्यापादिते निजपतौ हि दशाननेन प्रामादिकेन विधिनाऽभिससार रामम् ॥ २४ ॥ साऽनुज्ञयैव रजनीचरभर्तुरुग्रा भ्रातृद्वयेन सहिता वनमावसन्ती । रामं समेत्य भव मे पतिरित्यवोचद्भ्रातुं यथा तम उपेत्य सुयोगकामम् ॥ २५ ॥ तां तत्र हास्यकथया

SGDF
Sri Gargeshwari Digital Foundation

जनकासुताग्रे गच्छानुजं म इह नेति वचः स उक्त्वा। तेनैव दुष्टचरितां हि विकर्णनासां चक्रे समस्तरजनीचरनाशहेतोः ॥२६॥ तत्प्रेरितान्सपदि भीमबलान्प्रयातांस्तस्याः खरत्रिशिरदूषणमुख्यबन्धून्। जघ्ने चतुर्दश-सहस्रमवारणीयकोदण्डपाणिरखिलस्य सुखं विधातुम् ॥२७॥ दत्तेऽभये रघुवरेण महामुनीनां दत्ते भये च रजनीचरमण्डलस्य। रक्षःपतिः स्वसृमुखादविकम्पनाच्च श्रुत्वा बलं रघुपतेः परमाप चिन्ताम् ॥ २८ ॥ श्रुत्वाऽशु कार्यमवमृश्य जगाम तीरे क्षेत्रं नदीनदपतेः श्रवणं धरित्र्याः। मारीचमत्र तपसि प्रतिवर्तमानं भीतं शराद्रघुपतेर्नितरां ददर्श॥ २९ ॥ तेनार्थितः सपदिराघववञ्चनार्थं मारीच आह शरवेगममुष्य जानन्। शक्यो न ते रघुवरेण हि विग्रहोऽत्र जानामि संस्पर्शमस्य शरस्य पूर्वम् ॥ ३० ॥ इत्युक्तवन्तमथ रावण आह खड्गं निष्कृष्य हन्मि यदि मे न करोषि वाक्यम्। तच्छ्रुत्वान्भययुतोऽथ निसर्गतश्च पापो जगाम रघुवर्यसकाशमाशु ॥ ३१ ॥ सम्प्राप्य हैममृगतां बहुरत्नचित्रः सीतासमीप उरुधा विचचार शीघ्रम्। निर्दोषनित्यवरसंविदपि स्म देवी रक्षोवधाय जनमोहकृते तथाऽऽह ॥ ३२ ॥ देवेममाशु परिगृह्य च देहि मे त्वं क्रीडामृगं त्विति तयोदित एव रामः। अन्वक्ससार ह शरासनबाणपाणिर्मायामृगं निशिचरं निजघान जानन् ॥ ३३ ॥ तेनाहतः शरवरेण भृशं ममार विक्रुश्य लक्ष्मणमुरुव्यथया स पापः। श्रुत्वैव लक्ष्मणमचूचुददुग्रवाक्यैः सोऽप्याप रामपथमेव सचापबाणः ॥ ॥ ३४ ॥ यां यां परेश उरुधैव करोति लीलां तां तां करोत्यनु तथैव रमापि देवी। नैतावतास्य परमस्य तथा रमाया दोषोऽणुरप्यनु विचिन्त्य उरुप्रभू यत् ॥ ३५ ॥ क्वाज्ञानमापदपि मन्दकटाक्षमात्रा-त्सर्गस्थितिप्रलयसंसृतिमोक्षहेतोः। देव्या हरेः किमु विडम्बनमात्रमेत-द्विक्रीडतोः सुरनरादिवदेव तस्मात् ॥ ३६ ॥ देव्याः समीपमथ रावण आससाद साऽदृश्यतामगमदप्यविषह्यशक्तिः। सृष्ट्वात्मनः प्रतिकृतिं

SGDF
Sri Gargeshwari Digital Foundation

प्रययौ च शीघ्रं कैलासमर्चितपदा न्यवसच्छिवाभ्याम् ॥ ३७ ॥
तस्यास्तु तां प्रतिकृतिं प्रविवेश शक्रो देव्याश्च सन्निधियुतां व्यवहार-
सिद्ध्यै। आदाय तामथ ययौ रजनीचरेन्द्रो हत्वा जटायुषमुरुश्रमतो
निरुद्धः ॥ ३८ ॥ मार्गे व्रजन्तमभियाय ततो हनूमान्संवारितो
रविसुतेन च जानमानः। दैवं तु कार्यमथ कीर्तिमभीप्समानो रामस्य
नैनमहनद्वचनाद्धरेश्च ॥ ३९ ॥ प्राप्यैव राक्षस उतात्मपुरीं स तत्र
सीताकृतिं प्रतिनिधाय ररक्ष चाथ। रामोऽपि तत्तु विनिहत्य सुदुष्टरक्षः
प्राप्याश्रमं स्वदयितां नहि पश्यतीव ॥ ४० ॥ अन्वेषमाण इव तं च
ददर्श गृध्रं सीतां रिरक्षिषुमथो रिपुणा विशस्तम्। मन्दात्मचेष्टमसुनो-
त्क्रमरेश्च कर्म श्रुत्वा मृतं तमदहत्स्वगतिं तथाऽदात् ॥ ४१ ॥ अन्यत्र
चैव विचिरन्सहितोऽनुजेन प्राप्तः करौ स सहसाऽथ कबन्धनाम्नः।
धातुर्वरादखिलजायिन उज्झितस्य मृत्योश्च वज्रपतनादतिकुञ्चितस्य ॥
॥ ४२ ॥ छित्त्वास्य बाहुयुगलं सहितोऽनुजेन तं पूर्ववत्प्रतिविधाय
सुरेन्द्रभृत्यम्। नाम्ना दनुं त्रिजटयैव पुराभिजातं गन्धर्वमाशु च
ततोऽपि तदर्चितोऽगात् ॥ ४३ ॥ दृष्ट्वा तमेव शबरी परमं हरिं च
ज्ञात्वा विवेश दहनं पुरतोऽस्य तस्यै। प्रादात्स्वलोकमिममेव हि सा
प्रतीक्ष्य पूर्वं मतङ्गवचनेन वनेऽत्र साऽभूत् ॥४४॥ शापाद्वराप्सरसमेव
हि तां विमोच्य शच्या कृतात्पतिपुरस्त्वतिदर्पहेतोः। गत्वा ददर्श
पवनात्मजमृश्यमूके स ह्येक एनमवगच्छति सम्यगीशम् ॥ ४५ ॥
देहेऽपि यत्र पवनोऽत्र हरिर्यतोऽसौ तत्रैव वायुरिति वेदवचः प्रसिद्धम्।
कस्मिन्वहन्त्विवति तथैव हि सोऽवतारे तस्मात्स मारुतिकृते रविजं
ररक्ष ॥ ४६ ॥ एवं स कृष्णतनुरर्जुनमप्यरक्षद्भीमार्थमेव तदरिं रविजं
निहत्य। पूर्वं हि मारुतिमवाप रवेः सुतोऽयं तेनास्य वालिनमहन्रघुपः
प्रतीपम् ॥ ४७ ॥ एवं सुराश्च पवनस्य वशे यतोऽतः सुग्रीवमत्र तु
परत्र च शक्रसूनुम्। सर्वे श्रिता हनुमतस्तदनुग्रहाय तत्रागमद्रघुपतिः

SGDF
Sri Gangeshwari Digital Foundation

सह लक्ष्मणेन ॥ ४८ ॥ यत्पादपङ्कजरजः शिरसा बिभर्ति श्रीरब्जजश्च गिरिशः सह लोकपालैः । सर्वेश्वरस्य परमस्य हि सर्वशक्तेः किं तस्य शत्रुहनने कपयः सहायाः ॥ ४९ ॥ समागते तु राघवे प्लवङ्गमाः ससूर्यजाः । विपुप्लुवुर्भयार्दिता न्यवारयच्च मारुतिः ॥५०॥ संस्थाप्याशु हरीन्द्राञ्ज्ञानन्विष्णोर्गुणाननन्तान्सः । साक्षाद्ब्रह्मपिताऽसावित्येतेनास्य पादयोः पेते ॥ ५१ ॥ (५२८) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीरामचरिते हनूमद्दर्शनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

॥ अथ षष्ठोऽध्यायः ॥

॥ ॐ ॥ उत्थाप्य चैनमरविन्ददलायताक्षश्चक्राङ्कितेन वरदेन कराम्बुजेन । कृत्वा च संविदमनेन नुतोऽस्य चांसं प्रीत्याऽऽरुरोह स हसन्सह लक्ष्मणेन ॥ १ ॥ आरोप्य चांसयुगलं भगवन्तमेनं तस्यानुजं च हनुमान्प्रययौ कपीन्द्रम् । सख्यं चकार हुतभुक्प्रमुखे च तस्य रामेण शाश्वतनिजार्तिहरेण शीघ्रम् ॥ २ ॥ श्रुत्वास्य दुःखमथ देववरः प्रतिज्ञां चक्रे स वालिनिधनाय हरीश्वरोऽपि । सीतानुमार्गणकृतेऽथ स वालिनैव क्षिप्तां हि दुन्दुभितनुं समदर्शयच्च ॥ ३ ॥ वीक्ष्यैव तां निपतितामथ रामदेवः सोऽङ्गुष्ठमात्रचलनादतिलीलयैव । सम्प्रास्य योजनशतेऽथ तयैव चोर्वीं सर्वान्विदार्य दितिजानहनद्रसास्थान् ॥ ४ ॥ शर्वप्रसादजबलाद्दितिजानवध्यान्सर्वान्निहत्य कुणपेन पुनश्च सख्या । भीतेन वालिबलतः कथितः स सप्ततालान्प्रदर्श्य दितिजान्सुदृढांश्च वज्रात् ॥ ५ ॥ एकैकमेषु स विकम्पयितुं समर्थः पत्राणि लोप्तुमपि तूत्सहते न शक्तः । विष्वक्स्थितान्यदि भवान्प्रतिभेत्स्यतीमानेकेषुणा

SGDF
Sri Gangeshwari Digital Foundation

तर्हि वालिवधे समर्थः ॥ ६ ॥ जेतुं चतुर्गुणबलो हि पुमान्प्रभुः स्याद्धन्तुं शताधिकबलोऽतिबलं सुशक्तः । तस्मादिमान्हरिहयात्मज-बाहुलोप्यपत्रान्विभिद्य मम संशयमाशु भिन्धि ॥ ७ ॥ श्रुत्वाऽस्य वाक्यमवमृश्य दितेः सुतांस्तान्धातुर्वरादखिलपुम्भिरभेद्यरूपान् । ब्रह्म-त्वमाप्तुमचलं तपसि प्रवृत्तानेकेषुणा सपदि तान्प्रबिभेद रामः ॥ ८ ॥ सन्धाय कार्मुकवरे निशिते तु बाणेऽथाकृष्य दक्षिणभुजेन तदा प्रमुक्ते । रामेण सत्वरमनन्तबलेन सर्वे चूर्णीकृताः सपदि ते तरवो रवेण ॥ ९ ॥ भित्वा च तान्स गिरिकुम्भगवत्प्रमुक्तः पातालसप्तकमथात्र च ये त्ववध्याः । नाम्नाऽसुराः कुमुदिनोऽब्जजवाक्यरक्षाः सर्वांश्च तानदह-दाशु शरः स एकः ॥ १० ॥ नैतद्विचित्रममितोरुबलस्य विष्णो-र्यत्प्रेरणात्सपवनस्य भवेत्प्रवृत्तिः । लोकस्य सप्रकृतिकस्य सरुद्रकाल-कर्मादिकस्य तदपीदमनन्यसाध्यम् ॥ ११ ॥

दृष्ट्वा बलं भगवतोऽथ हरीश्वरोऽसावग्रे निधाय तमगात्पुर-मग्रजस्य । आश्रुत्य रावमनुजस्य बिलात्स चागादभ्येनमाशु दयिता-प्रतिवारितोऽपि ॥ १२ ॥ तन्मुष्टिभिः प्रतिहतः प्रययावशक्तः सुग्रीव आशु रघुपोऽपि हि धर्ममीक्षन् । नैनं जघान विदिताखिललोकचेष्टो-ऽप्येनं स आह युधि वां न मया विविक्तौ ॥ १३ ॥ सौभ्रात्रमेष यदि वाञ्छति वालिनैव नाहं निरागसमथाग्रजनिं हनिष्ये । दीर्घः सहोदर-गतो न भवेद्धि कोपो दीर्घोऽपि कारणमृते विनिवर्तते च ॥ १४ ॥ कोपः सहोदरजने पुनरन्तकाले प्रायो निवृत्तिमुपगच्छति तापकश्च । एकस्य भङ्ग इति नैव झडित्यपास्तदोषो निहन्तुमिह योग्य इति स्म मेने ॥ १५ ॥ तस्मान्न बन्धुजनगे जनिते विरोधे कार्यो वधस्तदनु-बन्धुभिराश्रितीह । धर्मं प्रदर्शयितुमेव रवेः सुतस्य भावी न ताप इति विच न तं जघान ॥१६॥ यः प्रेरकः सकलशेमुषिसन्ततेश्च तस्याज्ञता कुत इहेशवरस्य विष्णोः । तेनोदितोऽथ सुदृढं पुनरागतेन वज्रोपमं

SGDF
Sri Gangeshwari Digital Foundation

शरममूमुचदिन्द्रसूनौ ॥ १७ ॥ रामाज्ञयैव लतया रविजे विभक्ते वायोः सुतेन रघुपेण शरे प्रमुक्ते । श्रुत्वास्य शब्दमतुलं हृदि तेन विद्ध इन्द्रात्मजो गिरिरिवापतदाशु सन्नः ॥ १८ ॥ भक्तो ममैष यदि मामभिपश्यतीह पादौ ध्रुवं मम समेष्यति निर्विचारः । योग्यो वधो न हि जनस्य पदानतस्य राज्यार्थिना रविसुतेन वधोऽर्थितश्च ॥ १९ ॥ कार्यं ह्यभीष्टमपि तत्प्रणतस्य पूर्वं शस्तो वधो न पदयोः प्रणतस्य चैव । तस्माददृश्यतनुरेव निहन्मि शक्रपुत्रं त्वितीह तमदृश्यतया जघान ॥२०॥ यः प्रेरकः सकललोकबलस्य नित्यं पूर्णाव्ययोच्चबलवीर्यतनुः स्वतन्त्रः । किं तस्य दृष्टिपथगस्य च वानरोऽयं कर्तेशचापमपि येन पुरा विभग्नम् ॥ २१ ॥ सन्नेऽथ वालिनि जगाम च तस्य पार्श्वं प्राहैन-मार्द्रवचसा यदि वाञ्छसि त्वम् । उज्जीवयिष्य इति नैच्छदसौ त्वदग्रे को नाम नेच्छति मृतिं पुरुषोत्तमेति ॥२२॥ कार्याणि तस्य चरमाणि विधाय पुत्रं त्वग्रे निधाय रविजः कपिराज्य आसीत् । रामोऽपि तद्गिरिवरे चतुरोऽथ मासान्दृष्ट्वा घनागममुवास सलक्ष्मणोऽसौ ॥२३॥

अथातिसक्ते क्षितिपे कपीनां प्रविस्मृते रामकृतोपकारे । प्रसह्य तं बुद्धिमतां वरिष्ठो रामाङ्घ्रिभक्तो हनुमानुवाच॥२४॥ न विस्मृतिस्ते रघुवर्यकार्ये कार्या कथञ्चित्स हि नोऽभिपूज्यः । न चेत्स्वयं कर्तुमभीष्टमद्य ते ध्रुवं बलेनापि हि कारयामि ॥ २५ ॥ स एवमुक्त्वा हरिराजसन्निधौ द्वीपेषु सप्तस्वपि वानरान्प्रति । सम्मेलनायाशुगतीन्स्म वानरान्प्रस्थापयामास समस्तशः प्रभुः ॥ २६ ॥ हरीश्वराज्ञाप्रणिधानपूर्वकं हनूमता ते प्रहिता हि वानराः । समस्तशैलद्रुमषण्डसंस्थितान्हरीन्समादाय तदाऽभिजग्मुः ॥ ॥ २७ ॥ तदैव रामोऽपि हि भोगसक्तं प्रमत्तमालक्ष्य कपीश्वरं प्रभुः । जगाद सौमित्रिमिदं वचो मे प्लवङ्गमेशाय वदाशु याहि ॥२८॥ यदि प्रमत्तोऽसि मदीयकार्ये नयाम्यहं त्वेन्द्रसुतस्य मार्गम् । प्रायः स्वकार्ये प्रतिपादिते हि मदोद्धता न प्रतिकर्तुमीशते ॥ २९ ॥ इतीज्यरामेण

SGDF
Sri Gargeshwari Digital Foundation

समीरिते तदा ययौ सबाणः सधनुः स लक्ष्मणः । दृष्ट्वैव तं तेन सहैव तापनिर्भयाद्ययौ रामपदान्तिकं त्वरन् ॥ ३० ॥ हनूमतः साधुवचोभिराशु प्रसन्नचेतस्यधिपे कपीनाम् । समागते सर्वहरिप्रवीरैः सहैव तं वीक्ष्य ननन्द राघवः ॥३१॥ ससम्भ्रमं तं पतितं पदाब्जयोस्त्वरन्समुत्थाप्य समाश्लिषत्प्रभुः । स चोपविष्टो जगदीशसन्निधौ तदाज्ञयैवादिशदाशु वानरान् ॥ ३२ ॥ समस्तदिक्षु प्रहितेषु तेन प्रभुर्हनूमन्तमिदं बभाषे । न कश्चिदीशस्त्वदृतेऽस्ति साधने समस्तकार्यप्रवरस्य मेऽस्य ॥ ३३ ॥ अतस्त्वमेव प्रतियाहि दक्षिणां दिशं समादाय मदङ्गुलीयकम् । इतीरितोऽसौ पुरुषोत्तमेन ययौ दिशं तां युवराजयुक्तः ॥ ३४ ॥ समस्तदिक्षु प्रतियापिता हि ते हरीश्वराज्ञामुपधार्य मासतः । समाययुस्तेऽङ्गदजाम्बवन्मुखाः सुतेन वायोः सहिता न चाययुः ॥ ३५ ॥ समस्तदुर्गप्रवरं दुरासदं विमार्गतां विन्ध्यगिरिं महात्मनाम् । गतः स कालो हरिराडुदीरितः समासदंश्चाथ बिलं महाद्भुतम् ॥३६॥ कृतं मयेनातिविचित्रमुत्तमं समीक्ष्य तत्तार उवाच चाङ्गदम् । वयं न यामो हरिराजसन्निधिं विलङ्घितो नः समयो यतोऽस्य ॥ ३७ ॥ दुरासदोऽसावतिचण्डशासनो हनिष्यति त्वामपि किं मदादिकान् । अगम्यमेतद्बिलमाप्य तत्सुखं वसाम सर्वे किमसाविहाचरेत् ॥ ३८ ॥ न चैव रामेण सलक्ष्मणेन प्रयोजनं नो वनचारिणां सदा । न चेह नः पीडयितुं स च क्षमस्ततो ममेयं सुविनिश्चिता मतिः ॥ ३९ ॥ इतीरितं मातुलवाक्यमाशु स आददे वालिसुतोऽपि सादरम् । उवाच वाक्यं च न नो हरीश्वरः क्षमी भवेल्लङ्घितशासनानाम् ॥ ४० ॥ राज्यार्थिना येन हि घातितोऽग्रजो हताश्च दाराः सुनृशंसकेन । स नः कथं रक्षति शासनातिगान्निराश्रयान्दुर्बलकान्बले स्थितः ॥ ४१ ॥ इतीरिते शक्रसुतात्मजेन तथेति चोचुः सहजाम्बवन्मुखाः । सर्वेऽपि तेषामथ चैकमत्यं दृष्ट्वा हनूमा-

SGDF
Sri Gangeshwari Digital Foundation

निदमाबभाषे ॥४२॥ विज्ञातमेतद्धि मयाङ्गदस्य राज्याय ताराभिहितं हि वाक्यम् । साध्यं न चैतन्न हि वायुसूनू रामप्रतीपं वचनं सहेत ॥ ॥ ४३ ॥ न चाहमाक्रष्टुमुपायतोऽपि शक्यः कथञ्चित्सकलैः समेतैः । सन्मार्गतो नैव हि राघवस्य दुरन्तशक्तेर्बिलमप्रधृष्यम् ॥ ४४ ॥ वचो ममैतद्यदि चादरेण ग्राह्यं भवेद्वस्तदतिप्रियं मे । न चेद्बलादप्यनये प्रवृत्तान्प्रशास्य सन्मार्गगतान्करोमि ॥ ४५ ॥ इतीरितं तत्पवनात्मजस्य श्रुत्वातिभीता धृतमूकभावाः । सर्वेऽनुजग्मुस्तमथाद्रिमुख्यं माहेन्द्रमासेदुरगाधबोधाः ॥ ४६ ॥ निरीक्ष्य ते सागरमप्रधृष्यमपारमेयं सहसा विषण्णाः । दृढं निराशाश्च मतिं हि दध्रुः प्रायोपवेशाय तथा च चक्रुः ॥ ४७ ॥ प्रायोपविष्टाश्च कथां वदन्तो रामस्य संसारविमुक्तिदातुः । जटायुषः पातनमूचिरे तत्सम्पातिनाम्नः श्रवणं जगाम ॥४८॥ तस्याग्रजोऽसावरुणस्य सूनुः सूर्यस्य बिम्बं सह तेन यातः । जवं परीक्षन्नथ तं सुतप्तं गुप्त्वा पतत्रक्षयमाप्य चापतत् ॥ ४९ ॥ स दग्धपक्षः सवितृप्रतापाच्छ्रुत्वैव रामस्य कथां सपक्षः । भूत्वा पुनश्चाशु मृतिं जटायुषः शुश्राव पृष्ट्वा पुनरेव सम्यक् ॥ ५० ॥ स रावणस्याथ गतिं सुतोक्तां निवेद्य दृष्ट्वा जनकात्मजाकृतिम् । स्वयं तथाऽशोकवने निषण्णामवोचदेभ्यो हरिपुङ्गवेभ्यः ॥ ५१ ॥ ततस्तु ते ब्रह्मसुतेन पृष्टा न्यवेदयन्नात्मबलं पृथक्पृथक् । दशैव चारभ्य दशोत्तरस्य क्रमात्पथो योजनतोऽभियाने ॥ ५२ ॥ सनीलमैन्दद्विविदाः सताराः सर्वेऽप्यशीत्याः परतो न शक्ताः । गन्तुं यदाथात्मबलं स जाम्बवाञ्जगाद तस्मात्पुनरष्टमांशम् ॥ ५३ ॥ बलेर्यदा विष्णुरवाप लोकांस्त्रिभिःक्रमैर्नन्दिरवं प्रकुर्वता । तदा मया भ्रान्तमिदं जगत्त्रयं सवेदनं जानु ममास मेरुतः ॥ ५४ ॥ अतो जवो मे न हि पूर्वसम्मितः पुरा त्वहं षण्णवतिप्लवोऽस्मि । ततः कुमारोऽङ्गद आह चास्माच्छतं प्लवेयं न ततोऽभिजाने ॥ ५५ ॥ आपूरिते तैः सकलैः शतस्य गमागमे शत्रुबलं

SGDF
Sri Gurgeshwari Digital Foundation

च वीक्ष्य । सुदुर्गमत्वं च निशाचरेशपुर्याः स धातुः सुत आबभाषे ॥ ॥५६॥ अयं हि गृध्रः शतयोजनं गिरिं त्रिकूटमाहेत उतात्र विघ्नाः । भवेयुरन्येऽपि ततो हनूमानेकः समर्थो न परोऽस्ति कश्चित् ॥ ५७ ॥ उक्त्वा स इत्थं पुनराह सूनुं प्राणस्य निःसीमबलं प्रकाशयन् । त्वमेक एवात्र परं समर्थः कुरुष्व चैतत्परिपाहि वानरान् ॥५८॥ इतीरितोऽसौ हनुमान्निजेप्सितं तेषामशक्तिं प्रकटां विधाय । अवर्धताशु प्रविचिन्त्य रामं सुपूर्णशक्तिं चरितोरुतदाज्ञाम् ॥ ५९ ॥ (५८७) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीरामचरिते समुद्रतरणनिश्चयो नाम षष्ठोऽध्यायः ॥ ६ ॥

॥ अथ सप्तमोऽध्यायः ॥

॥ ॐ ॥ रामाय शाश्वतसुविस्तृतषड्गुणाय सर्वेश्वराय बलवीर्यमहार्णवाय । नत्वा लिलङ्घयिषुरर्णवमुत्पपात निष्पीड्य तं गिरिवरं पवनस्य सूनुः ॥ १ ॥ चुक्षोभ वारिधिरनुप्रययौ च शीघ्रं यादोगणैः सह तदीयबलाभिकृष्टः । वृक्षाश्च पर्वतगताः पवनेन पूर्वं क्षिप्तोऽर्णवे गिरिरुदागमदस्य हेतोः ॥ २ ॥ श्यालो हरस्य गिरिपक्षविनाशकाले क्षिप्तोऽर्णवे स मरुतोर्वरितात्मपक्षः । हैमो गिरिः पवनजस्य तु विश्रमार्थमुद्भिद्य वारिधिमवर्धदनेकसानुः ॥ ३ ॥ नैवात्र विश्रमणमैच्छदविश्रमोऽसौ निःसीमपौरुषबलस्य कुतः श्रमोऽस्य । आश्लिष्य पर्वतवरं स ददर्श गच्छन्देवैस्तु नागजननीं प्रहितां वरेण ॥ ४ ॥ जिज्ञासुभिर्निजबलं तव भक्ष्यमेतु यद्यत्त्वमिच्छसि तदित्यमरोदितायाः । आस्यं प्रविश्य सपदि प्रविनिःसृतोऽस्माद्देवाननन्दयदुत स्वृतमेषु रक्षन् ॥ ॥५॥ दृष्ट्वा सुरप्रणयितां बलमस्य चोग्रं देवाः प्रतुष्टुवुरमुं सुमनोऽभि-

SGDF
Sri Gargeshwari Digital Foundation

वृष्ट्या । तैरावृतः पुनरसौ वियतैव गच्छञ्छायाग्रहं प्रतिददर्श च सिंहिकाख्यम् ॥ ६ ॥ लङ्कावनाय सकलस्य च निग्रहेऽस्याः सामर्थ्यमप्रतिहतं प्रददौ विधाता । छायामवाक्षिपदसौ पवनात्मजस्य सोऽस्याः शरीरमनुविश्य बिभेद चाशु ॥ ७ ॥ निःसीममात्मबलमित्यनुदर्शयानो हत्वैव तामपि विधातृवराभिगुप्ताम् । लम्बे स लम्बशिखरे निपपात लङ्काप्राकाररूपकगिरावथ सञ्चुकोच ॥ ८ ॥ भूत्वा बिडालसमितो निशि तां पुरीं च प्राप्स्यन्ददर्श निजरूपवतीं स लङ्काम् । रुद्धोऽनयाश्वथ विजित्य च तां स्वमुष्टिपिष्टान्तयानुमत एव विवेश लङ्काम् ॥ ९ ॥ मार्गमाणो बहिश्चान्तः सोऽशोकवनिकातले । ददर्श शिंशपावृक्षमूलस्थितरमाकृतिम् ॥१०॥ नरलोकविडम्बस्य जानन्रामस्य हृद्गतम् । तस्य चेष्टानुसारेण कृत्वा चेष्टाश्च संविदम् ॥ ११ ॥ तादृक्चेष्टासमेताया अङ्गुलीयमदात्ततः । सीताया यानि चैवासन्नाकृतेस्तानि सर्वशः ॥ भूषणानि द्विधा भूत्वा तान्येवासंस्तथैव च ॥ १२ ॥ अथ चूडामणिं दिव्यं दातुं रामाय सा ददौ ॥ १३ ॥ यद्यप्येतन्न पश्यन्ति निशाचरगणास्तु ते । द्युलोकचारिणः सर्वे पश्यन्त्यृषय एव च ॥ १४ ॥ तेषां विडम्बनायैव दैत्यानां वञ्चनाय च । पश्यतां कलिमुख्यानां विडम्बोऽयं कृतो भवेत् ॥ १५ ॥ कृत्वा कार्यमिदं सर्वं विशङ्कः पवनात्मजः । आत्माविष्करणे चित्तं चक्रे मतिमतां वरः ॥ १६ ॥

अथ वनमखिलं तद्रावणस्यावलुम्प्य क्षितिरुहमिममेकं वर्जयित्वाशु वीरः । रजनिचरविनाशं काङ्क्षमाणोऽतिवेलं मुहुरतिरवनादी तोरणं चारुरोह ॥ १७ ॥ अथाशृणोद्दशाननः कपीन्द्रचेष्टितं परम् । दिदेश किङ्करान्बहून्कपिर्निगृह्यतामिति ॥ १८ ॥ समस्तशो विमृत्यवो वराद्धरस्य किङ्कराः । समासदन्महाबलं सुरान्तरात्मनोऽङ्गजम् ॥ १९ ॥ अशीतिकोटियूथपं पुरःसराष्टकायुतम् । अनेक-

SGDF
Sri Gangeshwari Digital Foundation

हेतिसङ्कुलं कपीन्द्रमावृणोद्बलम् ॥२०॥ समावृतस्तथायुधैः स ताडितश्च तैर्भृशम् । चकार तान्समस्तशस्तलप्रहारचूर्णितान् ॥ २१ ॥ पुनश्च मन्त्रिपुत्रकान्स रावणप्रचोदितान् । ममर्द सप्तपर्वतप्रभान्वराभिरक्षितान् ॥ ॥ २२ ॥ बलाग्रगामिनस्तथा स शर्ववाक्सुगर्वितान् । निहत्य सर्वरक्षसां तृतीयभागमक्षिणोत् ॥ २३ ॥ अनौपमं (अनूपमं) हरेर्बलं निशम्य राक्षसाधिपः । कुमारमक्षमात्मनः समं सुतं न्ययोजयत् ॥ ॥ २४ ॥ स सर्वलोकसाक्षिणः सुतं शरैर्ववर्ष ह । शितैर्वरास्त्रमन्त्रितैर्न चैनमभ्यचालयत् ॥ २५ ॥ स मण्डमध्यकासुतं समीक्ष्य रावणोपमम् । तृतीय एष चांशको बलस्य हीत्यचिन्तयत् ॥ २६ ॥ निधार्य एव रावणः स राघवाय नान्यथा । यदीन्द्रजिन्मया हतो न चास्य शक्तिरीक्ष्यते ॥ २७ ॥ अतस्तयोः समो मया तृतीय एष हन्यते । विचार्य चैवमाशु तं पदोः प्रगृह्य पुप्लुवे ॥ २८ ॥ स चक्रवद्भ्रमातुरं विधाय रावणात्मजम् । अपोथयद्धरातले क्षणेन मारुतीतनुः ॥ २९ ॥ विचूर्णिते धरातले निजे सुते स रावणः । निशम्य शोकतापितस्तदग्रजं समादिशत् ॥ ३० ॥ अथेन्द्रजिन्महाशरैर्वरास्त्रसम्प्रयोजितैः । ततश्च वानरोत्तमं न चाशकद्विचालने ॥ ३१ ॥ अथास्त्रमुत्तमं विधेर्युयोज सर्वदुःसहम् । स तेन ताडितो हरिर्व्यचिन्तयन्निराकुलः ॥ ३२ ॥ मया वरा विलङ्घिता ह्यनेकशः स्वयम्भुवः । स माननीय एव मे ततोऽत्र मानयाम्यहम् ॥३३॥ इमे च कुर्युरत्र किं प्रहृष्टरक्षसां गणाः । इतीह लक्ष्यमेव मे स रावणश्च दृश्यते ॥ ३४ ॥ इदं समीक्ष्य बद्धवत्स्थितं कपीन्द्रमाशु ते । बबन्धुरन्यपाशकैर्जगाम चास्त्रमस्य तत् ॥ ॥ ३५ ॥ अथ प्रगृह्य तं कपिं समीपमानयंश्च ते । निशाचरेश्वरस्य तं स पृष्टवांश्च रावणः ॥ ३६ ॥ कपे कुतोऽसि कस्य वा किमर्थमीदृशं कृतम् । इतीरितः स चावदत्प्रणम्य राममीश्वरम् ॥३७॥ अवै(वे)हि दूतमागतं दुरन्तविक्रमस्य माम् । रघूत्तमस्य मारुतिं कुलक्षये

SGDF
Sri Gurgeshwari Digital Foundation

तवेश्वरम् ॥ ३८ ॥ न चेत्प्रदास्यसि त्वरन्रघूत्तमप्रियां तदा । सपुत्रमित्रबान्धवो विनाशमाशु यास्यसि ॥ ३९ ॥ न रामबाणधारणे क्षमाः सुरेश्वरा अपि । विरिञ्चिशर्वपूर्वकाः किमु त्वमल्पसारकः ॥ ४० ॥ प्रकोपितस्य तस्य कः पुरः स्थितौ क्षमो भवेत् । सुरासुरोरगादिके जगत्यचिन्त्यकर्मणः ॥ ४१ ॥ इतीरिते वधोद्यतं न्यवारयद्विभीषणः । स पुच्छदाहकर्मणि न्ययोजयन्निशाचरान् ॥ ४२ ॥ अथास्य वस्त्रसञ्चयैः पिधाय पुच्छमग्नये । ददुर्ददाह नास्य तन्मरुत्सखो हुताशनः ॥ ४३ ॥ ममर्ष सर्वचेष्टितं स रक्षसां निरामयः । बलोद्धतश्च कौतुकात्प्रदग्धुमेव तां पुरीम् ॥ ४४ ॥ ददाह चाखिलां पुरीं स्वपुच्छगेन वह्निना । कृतिस्तु विश्वकर्मणोऽप्यदह्यतास्य तेजसा ॥ ४५ ॥ सुवर्णरत्नकारितां स राक्षसोत्तमैः सह । प्रदह्य सर्वतः पुरीं मुदान्वितो जगर्ज च ॥ ४६ ॥ स रावणं सपुत्रकं तृणोपमं विधाय च । तयोः प्रपश्यतोः पुरीं विधाय भस्मसाद्ययौ ॥ ४७ ॥ विलङ्घ्य चार्णवं पुनः स्वजातिभिः प्रपूजितः । प्रभक्ष्य वानरेशितुर्मधु प्रभुं समेयिवान् ॥ ४८ ॥ रामं सुरेश्वरमगण्यगुणाभिरामं सम्प्राप्य सर्वकपिवीरवरैः समेतः । चूडामणिं पवनजः पदयोर्निधाय सर्वाङ्गकैः प्रणतिमस्य चकार भक्त्या ॥ ४९ ॥ रामोऽपि नान्यदनुदातुममुष्य योग्यमत्यन्तभक्तिभरितस्य विलक्ष्य किञ्चित् । स्वात्मप्रदानमधिकं पवनात्मजस्य कुर्वन्समाश्लिषदमुं परमाभितुष्टः ॥ ५० ॥ ॥ (६३७) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीरामचरिते सुन्दरकाण्डकथानिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥

॥ अथ अष्टमोऽध्यायः ॥

॥ ॐ ॥ श्रुत्वा हनूमदुदितं कृतमस्य सर्वं प्रीतः प्रयाणमभिरोचयते स रामः । आरुह्य वायुसुतमङ्गदगेन युक्तः सौमित्रिणा

SGDF
Sri Gangeshwari Digital Foundation

सरविजः सह सेनयाऽगात् ॥१॥ सम्प्राप्य दक्षिणमपांनिधिमत्र देवः शिष्ये जगद्गुरुस्तमोऽप्यविषह्यशक्तिः। अग्रे हि मार्दवमनुप्रथयन्स धर्मं पन्थानमर्थितुमपां पतितः प्रतीतः ॥ २ ॥ तत्राजगाम स विभीषणनामधेयो रक्षःपतेरवरजोऽप्यथ रावणेन। भक्तोऽधिकं रघुपतावतिधर्मनिष्ठस्त्यक्तो जगाम शरणं च रघूत्तमं तम् ॥ ३ ॥ ब्रह्मात्मजेन रविजेन बलप्रणेत्रा नीलेन मैन्दविविदाङ्गदतारपूर्वैः। सर्वैश्च शत्रुसदनादुपयात एष भ्रातास्य न ग्रहणयोग्य इति स्थिरोक्तः ॥ ४ ॥ अत्राह रूपमपरं बलदेवताया ग्राह्यः स एव नितरां शरणं प्रपन्नः। भक्तश्च रामपदयोर्विनिशिष्णु रक्षो विज्ञाय राज्यमुपभोक्तुमिहाभियातः ॥ ॥ ५ ॥ इत्युक्तवत्यथ हनूमति देवदेवः संगृह्य तद्वचनमाह यथैव पूर्वम्। सुग्रीवहेतुत इमं स्थिरमाग्रहीष्ये पादप्रपन्नमिदमेव सदा व्रतं मे ॥ ६ ॥ सब्रह्मकाः सुरगणाः सहदैत्यमर्त्याः सर्वे समेत्य च मदङ्गुलिचालनेऽपि। नेशा भयं न मम रात्रिचरादमुष्माच्छुद्धस्वभाव इति चैनमहं विजाने ॥ ७ ॥ इत्युक्तवाक्य उत तं स्वजनं विधाय राज्येऽभ्यषेचयदपारसुसत्वराशिः। मत्वा तृणोपममशेषसदन्तकं तं रक्षःपतेरवरजस्य ददौ स लङ्काम् ॥ ८ ॥ कल्पान्तमस्य निशिचारपतित्वपूर्वमायुः प्रदाय निजलोकगतिं तदन्ते। रात्रित्रयेऽप्यनुपगामिनमीक्ष्य सोऽब्धिं चुक्रोध रक्तनयनान्तमयुङ्क्तदब्धौ ॥ ९ ॥ सक्रोधदीप्तनयनान्तहतः परस्य शोषं क्षणादुपगतो दनुजादिसत्वैः। सिन्धुः शिरस्यर्हणं परिगृह्य रूपी पादारविन्दमुपगम्य बभाष एतत् ॥ ॥ १० ॥ तं त्वा वयं जडधियो न विदाम भूमन्कूटस्थमादिपुरुषं जगतामधीशम्। त्वं सत्वतः सुरगणान्रजसो मनुष्यांस्तार्तीयतोऽसुरगणानभितस्तथास्राः ॥ ११ ॥ कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीम्। बध्नीहि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥ १२ ॥ इत्युक्तवन्तमसु-

SGDF
Sri Gangeshwari Digital Foundation

माश्वनुगृह्य बाणं तस्मै घृतं दितिसुतात्मसु चान्त्यजेषु । शार्वाद्वरा-
द्विगतमृत्युषु दुर्जयेषु निःसंख्यकेष्वमुचदाशु ददाह सर्वान् ॥ १३ ॥
कृत्वेरिणं तदथमूलफलानि चात्र सम्यग्विधाय भवशत्रुरमोघचेष्टः ।
बद्धुं दिदेश सुरवर्धकिनोऽवतारं तज्ज्ञं नलं हरिवरानपरांश्च सेतुम् ॥१४॥
बध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः ।
सुग्रीवनीलहनुमत्प्रमुखैरनेकैर्लङ्कां विभीषणदृशाऽविशदाशु दग्धाम् ॥१५॥
प्राप्तं निशम्य परमं भुवनैकसारं निःसीमपौरुषमनन्तमसौ दशास्यः ।
त्रासाद्विषण्णहृदयो नितरां बभूव कर्तव्यकर्मविषये च विमूढचेताः ॥१६॥
प्रस्थाप्य वालिसुतमेव च राजनीत्यै रामस्तदुक्तवचनेऽप्यमुना गृहीते ।
द्वारो रुरोध स चतस्र उदीर्णसैन्यो रक्षःपतेः पुर उदारगुणः परेशः ॥
॥ १७ ॥ द्वारां निरोधसमये स दिदेश पुत्रं वारांपतेर्दिशि सुरेश्वर-
शत्रुमुग्रम् । प्राच्यां प्रहस्तमदिशद्दिशि वज्रदंष्ट्रं प्रेताधिपस्य शशिनः
स्वयमेव चागात् ॥ १८ ॥ विज्ञाय तत्स भगवान्हनुमन्तमेव देवेन्द्र-
शत्रुविजयाय दिदेश चाशु । नीलं प्रहस्तनिधनाय च वज्रदंष्ट्रं हन्तुं
सुरेन्द्रसुतसूनुमथादिदेश ॥ १९ ॥ मध्ये हरीश्वरमधिज्यधनुर्नियुज्य
यस्यां स राक्षसपतिर्दिशमेव तां हि । उद्दिश्य संस्थित उपात्तशरः
सखड्गो देदीप्यमानवपुरुत्तमपूरुषोऽसौ ॥ २० ॥ विद्रावितो हनुम-
तेन्द्रजिदाशु हस्तं तस्य प्रसन्न इव वीर्यममुष्य जानन् । नीलो विभीषण
उभौ शिलया च शक्त्या सश्वक्रतुर्यमवशं गमितं प्रहस्तम् ॥ २१ ॥
नीलस्य नैव वशमेति स इत्यमोघशक्त्या विभीषण इमं प्रजहार साकम् ।
तस्मिन्हतेऽङ्गद उपेत्य जघान वज्रदंष्ट्रं निपात्य भुवि शीर्षममुष्य
मृद्गन् ॥ २२ ॥ सर्वेषु तेषु निहतेषु दिदेश धूम्रनेत्रं स राक्षसपतिः
स च पश्चिमेन । द्वारेण मारुतसुतं समुपेत्य दग्धो गुप्तोऽपि शूलिवचनेन
दुरन्तशक्तिम् ॥ २३ ॥ अकम्पनोऽपि राक्षसो निशाचरेशचोदितः ।
उमापतेर्वरोद्धतः क्षणाद्धतो हनूमता ॥ २४ ॥ अथास्त्रसम्प्रदीपितैः

SGDF
Sri Gargeshwari Digital Foundation

समस्तशो महोल्मुकैः । रघुप्रवीरचोदिताः पुरं निशि स्वदाहयन् ॥२५॥
ततस्तौ निकुम्भोऽथ कुम्भश्च कोपात्प्रदिष्टौ दशास्येन कुम्भश्रुतेर्हि ।
सुतौ सुप्रहृष्टौ रणायाभियातौ कपींस्तान्बहिः सर्वशो यापयित्वा ॥२६॥
स कुम्भो विधातुः सुतं तारनीलौ नलं चाश्विपुत्रौ जिगायाङ्गदं च ।
सुयुद्धं च कृत्वा दिनेशात्मजेन प्रणीतो यमस्याशु लोकं सुपापः ॥२७॥
ततो निकुम्भोऽद्रिवरप्रदारणं महान्तमुग्रं परिघं प्रगृह्य । ससार सूर्या-
त्मजमाशु भीतः स पुप्लुवे पश्चिमतो धनुःशतम् ॥ २८ ॥ तं भ्रामय-
त्याशु भुजेन वीरे भ्रान्ता दिशो द्यौश्च सचन्द्रसूर्याः । सुराश्च तस्योरु-
बलं वरं च शर्वोद्भवं वीक्ष्य विषेदुरीषत् ॥ २९ ॥ अनन्यसाध्यं तमथो
निरीक्ष्य समुत्पपाताशु परोऽस्य मारुतिः । प्रकाश्य बाह्वन्तरमाह चैनं
किमेभिरत्र प्रहरायुधं ते ॥ ३० ॥ इतीरितस्तेन स राक्षसोत्तमो
वरादमोघं प्रजहार वक्षसि । विचूर्णितोऽसौ तदुरस्यभेद्ये यथैव वज्रो
विपतौ वृथाऽभवत् ॥ ३१ ॥ विचूर्णिते निजायुधे निकुम्भ एत्य
मारुतिम् । प्रगृह्य चात्मनोंसके निधाय जग्मिवान्द्रुतम् ॥ ३२ ॥
प्रगृह्य कण्ठमस्य स प्रधानमारुतात्मजः । स्वमाशु मोचयंस्ततो न्यपात-
यद्धरातले ॥ ३३ ॥ चकार तं रणात्मके मखे रमेशदैवते । पशुं
प्रभञ्जनात्मजो विनेदुरत्र देवताः ॥ ३४ ॥

सुप्तघ्नो यज्ञकोपश्च शकुनिर्देवतापनिः । विद्युज्जिह्वः प्रमाथी च
शुकसारणसंयुताः ॥ ३५ ॥ रावणप्रेरिताः सर्वे मथ्नन्तः कपिकुञ्जरान् ।
अवध्या ब्रह्मवरतो निहता रामसायकैः ॥ ३६ ॥ युद्धोन्मत्तश्च मत्तश्च
देवान्तकनरान्तकौ । त्रिशिरा अतिकायश्च निर्ययू रावणाज्ञया ॥३७॥
नरान्तको रावणजो हयवर्योपरिस्थितः । अभीः ससार समरे प्रासोद्यत-
करो हरीन् ॥ ३८ ॥ तं दहन्तमनीकानि युवराजोऽङ्गदो बली ।
उत्पपात निरीक्ष्याशु समदर्शयदप्युरः ॥ ३९ ॥ तस्योरसि प्रासवरं
प्रजहार स राक्षसः । द्विधा समभवत्तत्तु वालिपुत्रस्य तेजसा ॥ ४० ॥

SGDF
Sri Gangeshwari Digital Foundation

अथास्य हयमाश्वेव निजघान मुखे कपिः । पेततुश्चाक्षिणी तस्य स पपात
ममार च ॥ ४१ ॥ स खड्गवरमादाय प्रससार रणे कपिम् । आच्छिद्य
चास्य खड्गं तं निहतो वालिसूनुना ॥ ४२ ॥ गन्धर्वकन्यकासूते निहते
रावणात्मजे । आजगामाग्रजस्तस्य सोदर्यो देवतान्तकः ॥ ४३ ॥
तस्यापतत एवाशु शरवर्षप्रतापिताः । प्रदुद्रुवुर्भयात्सर्वे कपयो जाम्बव-
न्मुखाः ॥ ४४ ॥ स शरं तरसादाय रविपुत्रायुधोपमम् । अङ्गदं
प्रजहारोरस्यपतत्स मुमोह च ॥ ४५ ॥ अथ तिग्मांशुतनयः शैलं
प्रचलपादपम् । अभिदुद्राव संगृह्य चिक्षेप च निशाचरे ॥ ४६ ॥
तमापतन्तमालक्ष्य दूराच्छरविदारितम् । सुरान्तकश्चकाराशु दधार च
परं शरम् ॥ ४७ ॥ स तमाकर्णमाकृष्य यमदण्डोपमं शरम् ।
अविद्ध्यद्धृदये राज्ञः कपीनां स पपात ह ॥ ४८ ॥ बलमप्रतिमं वीक्ष्य
सुरशत्रोस्तु मारुतिः । आह्वयामास युद्धाय केशवः कैटभं यथा ॥४९॥
तमापतन्तमालोक्य रथं सहयसारथिम् । चूर्णयित्वा धनुश्चास्य समाच्छिद्य
बभञ्ज ह ॥ ५० ॥ अथ खड्गं समादाय पुर आपततो रिपोः । हरिः
प्रगृह्य केशेषु पातयित्वैनमाहवे ॥ ५१ ॥ शिरो ममर्द तरसा
पवमानात्मजः पदा । तमीशानगिराऽवध्यं निहत्य पवनात्मजः ॥५२॥
समीडितः सुरवरैः प्लवङ्गैर्वीक्षितो मुदा । विद्रावितास्विलकपिं वरा-
त्रिशिरसं विभोः । भङ्क्त्वा रथं धनुः खड्गमाच्छिद्याशिरसं व्यधात् ॥
॥ ५३ ॥ युद्धोन्मत्तश्च मत्तश्च पार्वतीवरदर्पितौ । प्रमथ्नन्तौ कपी-
न्सर्वान्हतौ मारुतिमुष्टिना ॥ ५४ ॥ ततोऽतिकायोऽतिरथो रथेन
स्वयम्भुदत्तेन हरीन्प्रमृद्नन् । चचार कालानलसन्निकाशो गन्धर्विकायां
जनितो दशास्यात् ॥ ५५ ॥ बृहत्तनुः कुम्भवदेव कर्णावस्येत्यतो नाम
च कुम्भकर्णः । इत्यस्य सोऽर्कात्मजपूर्वकान्कपीञ्जिगाय रामं सहसा-
भ्यधावत् ॥ ५६ ॥ तमापतन्तं शरवर्षधारं महाघनाभं स्तनयित्नु-
घोषम् । निवारयामास यथा समीरः सौमित्रिरात्तेष्वसनः शरौघैः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥५७॥ ववर्षतुस्तावतिमात्रवीर्यौ शरान्सुरेशाशनितुल्यवेगान् । तमोमयं चक्रतुरन्तरिक्षं सुशिक्षया क्षिप्रतरास्त्रबाणैः ॥ ५८ ॥ शरैः शरानस्य निवार्य वीरः सौमित्रिरस्त्राणि महास्त्रजालैः । चिच्छेद बाहू शिरसा सहैव चतुर्भुजोऽभूत्स पुनर्द्विशीर्षः ॥ ५९ ॥ छिन्नेषु तेषु द्विगुणास्यबाहुः पुनःपुनः सोऽथ बभूव वीरः । उवाच सौमित्रिमथान्तरात्मा समस्तलोकस्य मरुद्विषण्णम् ॥ ६० ॥ ब्रह्मास्त्रतोऽन्येन न वध्य एष वराद्विधातुः सुमुखेत्यदृश्यः । रक्षःसुतस्याश्रवणीयमित्थमुक्त्वा समीरोऽरुहदन्तरिक्षम् ॥ ६१ ॥

अथानुजो देवतमस्य सोऽस्त्रं ब्राह्मं तनूजे दशकन्धरस्य । मुमोच दग्धः सरथाश्वसूतस्तेनातिकायः प्रवरोऽस्त्रवित्सु ॥ ६२ ॥ हतेषु पुत्रेषु स राक्षसेशः स्वयं प्रयाणं समरार्थमैच्छत् । सज्जीभवत्येव निशाचरेशे खरात्मजः प्राह धनुर्धरोत्तमः ॥ ६३ ॥ नियुङ्क्ष्व मां मे पितुरन्तकस्य वधाय राजन्सहलक्ष्मणं तम् । कपिप्रवीरांश्च निहत्य सर्वान्प्रतोषये त्वामहमद्य सुष्ठु ॥ ६४ ॥ इतीरिते तेन नियोजितः स जगाम वीरो मकराक्षनामा । विधूय सर्वांश्च हरिप्रवीरान्सहाङ्गदान्सूर्यसुतेन साकम् ॥ ६५ ॥ अचिन्तयँल्लक्ष्मणबाणसङ्घानवज्ञया राममथाह्वयद्रणे । उवाच रामं रजनीचरोऽसौ हतो जनस्थानगतः पिता त्वया ॥ ६६ ॥ केनाप्युपायेन धनुर्धराणां वरः फलं तस्य ददामि तेऽद्य । इति ब्रुवाणः स सरोजयोनेर्वरादवध्योऽमुचदस्त्रसङ्घान् ॥ ६७ ॥ प्रहस्य रामोऽस्य निवार्य चास्त्रैरस्त्राण्यमेयोऽशनिसंनिभेन । शिरः शरेणोत्तमकुण्डलोज्ज्वलं खरात्मजस्याथ समुन्ममाथ ॥ ६८ ॥ विदुद्रुवुस्तस्य तु येऽनुयायिनः कपिप्रवीरैर्निहतावशेषिताः । यथैव धूम्राक्षमुखेषु पूर्वं हतेषु पृथ्वीरुहशैलधारिभिः ॥६९॥ ततः स सज्जीकृत आत्तधन्वा रथं समास्थाय निशाचरेश्वरः । वृतः सहस्रायुतकोट्यनीकपैर्निशाचरैराशु ययौ रणाय ॥ ७० ॥ बलैस्तु

SGDF
Sri Gangeshwari Digital Foundation

तस्याथ बलं कपीनां नैकप्रकारायुधपूगभग्नम् । दिशः प्रदुद्राव हरीन्द्रमुख्याः समर्दयन्नाशु निशाचरांस्तदा ॥ ७१ ॥ गजो गवाक्षो गवयो वृषश्च सगन्धमादा धनदेन जाताः । प्राणादयः पञ्च मरुत्प्रवीराः सकत्थनो वित्तपतिश्च जघ्नुः ॥ ७२ ॥ शरैस्तु तान्षड्भिरमोघवेगैर्निपातयामास दशाननो द्राक् । अथाश्विपुत्रौ च सजाम्बवन्तौ प्रजह्रतुः शैलवरैस्त्रिभिस्तम् ॥७३॥ गिरीन्विदार्याशु शरैरथान्याञ्छरान्दशास्योऽमुचदाशु तेषु । एकैकमेभिर्विनिपातितास्ते ससार तं शक्रसुतात्मजोऽथ ॥७४॥ शिलां समादाय तमापतन्तं बिभेद रक्षोहृदये शरेण । दृढाहतः सोऽप्यगमद्धरातलं रवेः सुतोऽथैनमभिप्रजग्मिवान् ॥ ७५ ॥ तद्धस्तगं भूरुहमाशु बाणैर्दशाननः खण्डश एव कृत्वा । ग्रीवाप्रदेशेऽस्य मुमोच बाणं भृशाहतः सोऽपि पपात भूमौ ॥ ७६ ॥ अथो हनूमानुरगेन्द्रभोगसमं स्वबाहुं भृशमुन्नमय्य । तताड वक्षस्यधिपं तु रक्षसां मुखैः स रक्तं प्रवमन्पपात ॥ ७७ ॥ स लब्धसंज्ञः प्रशशंस मारुतिं त्वया समो नास्ति पुमान्हि कश्चित् । कः प्रापयेदन्य इमां दशां मामितीरितो मारुतिराह तं पुनः ॥७८॥ अत्यल्पमेतद्यदुपात्तजीवितः पुनस्त्वमित्युक्त उवाच रावणः । गृहाण मत्तोऽपि समुद्यतं त्वं मुष्टिप्रहारं त्विति तं पुपोथ ॥ ७९ ॥ किञ्चित्प्रहारेण तु विह्वलाङ्गवत्स्थिते हि तस्मिन्निदमन्तरं मम । इत्यग्निसूनुं प्रययौ स रावणो निवारितो मारुतिनापि वाचा ॥ ८० ॥ तमापतन्तं प्रसमीक्ष्य नीलो धनुर्ध्वजाग्राश्वरथेषु तस्य । चचार मूर्धस्वपि चञ्चलोऽलं जडीकृतस्तेन स रावणोऽपि ॥ ८१ ॥ स क्षिप्रमादाय हुताशनास्त्रं मुमोच नीले रजनीचरेशः । स तेन भूमौ पतितो न चैनं ददाह वह्निः स्वतनुर्यतोऽसौ ॥ ८२ ॥ ततो ययौ राघवमेव रावणो निवारयामास तमाशु लक्ष्मणः । ततक्षतुस्तावधिकौ धनुर्भृतां शरैः शरीरावरणावदारणैः ॥ ॥ ८३ ॥ निवारितस्तेन दशाननो भृशं रुषान्वितो बाणममोघमुग्रम् ।

SGDF
Sri Gurgeshwari Digital Foundation

स्वयम्भुदत्तं परिकृष्य चाशु ललाटमध्ये प्रमुमोच तस्य ॥ ८४ ॥ भृशाहतस्तेन मुमोह लक्ष्मणो रथादवप्लुत्य दशाननोऽपि । क्षणादभिद्रुत्य बलात्प्रगृह्य स्वबाहुभिर्नेतुमिमं समैच्छत् ॥ ८५ ॥ सम्प्राप्य संज्ञां स सुविह्वलोऽपि सस्मार रूपं निजमेव लक्ष्मणः । शेषं हरेरंशयुतं न चास्य सञ्चालनायापि शशाक रावणः ॥ ८६ ॥ बलात्स्वदोर्भिः परिगृह्य चाखिलैर्यदा स वीरं प्रचकर्ष रावणः । चचाल पृथ्वी सहमेरुमन्दरा ससागरा नैव चचाल लक्ष्मणः ॥ ८७ ॥ सहस्रमूर्ध्नोऽस्य बतैकमूर्धनि ससप्तपातालगिरीन्द्रसागरा । धराऽखिलेयं ननु सर्षपायति प्रसह्य को नाम हरेत्तमेनम् । ८८॥ प्रकर्षति त्वेव निशाचरेश्वरे तथैव रामावरजं त्वरान्वितः । समस्तजीवाधिपतेः परा तनुः समुत्पपातास्य पुरो हनूमान् ॥ ८९ ॥ समुष्टिमावृत्य च वज्रकल्पं जघान तेनैव च रावणं रुषा । प्रसार्य बाहूनखिलैर्मुखैर्वमन्स रक्तमुष्णं व्यसुवत्पपात ॥ ९० ॥ निपात्य रक्षोधिपतिं स मारुतिः प्रगृह्य सौमित्रिमुरङ्गशायिनः । जगाम रामाख्यतनोः समीपं सौमित्रिमुद्धर्तुमलं ह्यसौ कपिः ॥ ९१ ॥ स रामसंस्पर्शनिवारितक्लमः समुत्थितस्तेन समुद्धृते शरे । बभौ यथा राहुमुखात्प्रमुक्तः शशी सुपूर्णो विकचत्स्वरश्मिभिः ॥ ९२ ॥ स शेषभोगाभमथो जनार्दनः प्रगृह्य चापं सशरं पुनश्च । सुलब्धसंज्ञं रजनी-चरेशं जगाद सज्जीभव रावणेति ॥ ९३ ॥ रथं समारुह्य पुनः सकार्मुकः समार्गणो रावण आशु रामम् । अभ्येत्य सर्वाश्च दिशश्चकार शरान्धकाराः परमास्त्रवेत्ता ॥ ९४ ॥ रथे स्थितेऽस्मिन्रजनीचरेशे न मे पतिर्भूमितले स्थितः स्यात् । इति स्म पुत्रः पवनस्य रामं स्कन्धं समारोप्य ययौ च राक्षसम् ॥ ९५ ॥ प्रहस्य रामोऽस्य हयान्निहत्य सूतं च कृत्वा तिलशो ध्वजं रथम् । धनूंषि खड्गं सकलायुधानि छत्रं च सञ्छिद्य चकर्त मौलीन् ॥ ९६ ॥ कर्तव्यमूढं तमवेक्ष्य रामः पुनर्जगादाशु गृहं प्रयाहि । समस्तभोगाननुभूय शीघ्रं प्रतोष्य बन्धून्पुनरेहि मर्तुम् ॥ ९७ ॥

SGDF
Sri Gargeshwari Digital Foundation

इतीरितोऽवाग्वदनो ययौ गृहं विचार्य कार्यं सह मन्त्रिभिः स्वकैः । हतावशिष्टैरथ कुम्भकर्णप्रबोधनायाशु मतिं चकार ॥ ९८ ॥ सशैलशृंगासिपरश्वधायुधैर्निशाचराणामयुतैरनेकैः । तच्छ्वासवेगाभिहतैः कथञ्चिद्गतैः समीपं कथमप्यबोधयत् ॥ ९९ ॥ शैलोपमानस्य तु मांसराशीन्विधाय भक्ष्यानपि शोणितह्रदान् । सुतृप्तमेनं परमादरेण समाह्वयामास सभातलाय ॥ १०० ॥ उवाच चैनं रजनीचरेन्द्रः पराजितोऽस्म्यद्य हि जीवति त्वयि । रणे नरेणैव हि रामनाम्ना कुरुष्व मे प्रीतिममुं निहत्य ॥ १०१ ॥ इतीरितः कारणमप्यशेषं श्रुत्वा जगर्हाग्रजमेव वीरः । अमोघवीर्येण हि राघवेण त्वया विरोधश्चरितो बताद्य ॥ १०२ ॥ प्रशस्यते नो बलिभिर्विरोधः कथञ्चिदेषोऽतिबलो मतो मम । इतीरितो रावण आह दुर्नयोऽप्यहं त्वयाऽव्यो हि किमन्यथा त्वया ॥ १०३ ॥ चरन्ति राजान उताक्रमं क्वचित्त्वयोपमान्बन्धुजनान्बलाधिकान् । समीक्ष्य हीत्थं गदितोऽग्रजेन स कुम्भकर्णः प्रययौ रणाय ॥ १०४ ॥ प्राकारमालङ्घ्य स पञ्चयोजनं यदा ययौ शूलवरायुधो रणम् । कपिप्रवीरा अखिलाः प्रदुद्रुवुर्भयादतीत्यैव च सेतुमाशु ॥ १०५ ॥ शतबलिपनसाख्यौ तत्र वस्वंशभूतौ पवनगणवरांशौ श्वेतसम्पातिनौ च । निर्ऋतितनुमथोग्रं दुर्मुखं केसरीति प्रवरमथ मरुत्सु प्रास्यदेतान्मुखे सः ॥१०६॥ रजनिचरवरोऽसौ कुम्भकर्णः प्रतापी कुमुदमपि जयन्तं पाणिना संपिपेष । नलमथ च गजादीन्पञ्च नीलं सतारं गिरिवरतरुहस्तान्मुष्टिनाऽपातयच्च ॥ १०७ ॥ अथाङ्गदश्च जाम्बवानिनात्मजश्च वानरैः । निजघ्निरे निशाचरं सवृक्षशैलसानुभिः ॥ ॥ १०८ ॥ विचूर्णिताश्च पर्वतास्तनौ निशाचरस्य ते । बभूव काचन व्यथा न चास्य बाहुशालिनः ॥ १०९ ॥ अथापरं महाचलं प्रगृह्य भास्करात्मजः । मुमोच राक्षसेऽथ तं प्रगृह्य तं जघान सः ॥ ११० ॥ तदा पपात सूर्यजस्तताड चाङ्गदं रुषा । सजाम्बवन्तमाशु तौ निपेततु-

SGDF
Sri Gargeshwari Digital Foundation

स्तलाहतौ ॥ १११ ॥ अथ प्रगृह्य भास्करिं ययौ स राक्षसो बली । जगाम चानु मारुतिः सुसूक्ष्ममक्षिकोपमः ॥ ११२ ॥ यदैनमेष बाधते तदा विमोचयाम्यहम् । यदि स्म शक्यतेऽस्य तु स्वमोचनाय तद्वरम् ॥ ११३ ॥ इति व्रजत्यनु स्म तं मरुत्सुते निशाचरः । पुरं विवेश चार्चितः स्वबन्धुभिः समस्तशः ॥ ११४ ॥ तुहिनसलिलमाल्यैः सर्वतोऽभिप्रवृष्टे रजनिचरवरेऽस्मिंस्तेन सिक्तः कपीशः । विगतसकलयुद्धग्लानिरावञ्चयित्वा रजनिचरवरं तं तस्य नासां ददंश ॥११५॥ कराभ्यामस्य कर्णौ च नासिकां दशनैरपि । सञ्छिद्य क्षिप्रमेवासावुत्पपात हरीश्वरः ॥ ११६ ॥ तलेन चैनं निजघान राक्षसः पिपेष भूमौ पतितं ततोऽपि । समुद्गतोऽसौ विवरेऽङ्गुलीनां जघान शूलेन पुनः स राक्षसः ॥ ११७ ॥ अमोघशूलं प्रपतत्तदीक्ष्य रवेः सुतस्योपरि मारुतात्मजः । प्रगृह्य जानौ प्रणिधाय शीघ्रं बभञ्ज तं प्रेक्ष्य ननाद चोच्चैः ॥ ११८ ॥ अथैनमावृत्य जघान मुष्टिना स राक्षसो वायुसुतं स्तनान्तरे । जगर्ज तेनाभिहतो हनूमानचिन्तयंस्तत्प्रजहार चैनम् ॥ ॥११९॥ तलेन वक्षस्यभिताडितो रुषा हनूमता मोहमवाप राक्षसः । पुनश्च संज्ञां समवाप्य शीघ्रं ययौ स यत्रैव रघुप्रवीरः ॥ १२० ॥ विचिन्तयामास ततो हनूमान्मयैव हन्तुं समरे हि शक्यः । असौ तथाप्येनमहं न हन्मि यशो हि रामस्य दृढं प्रकाशयन् ॥ १२१ ॥ अनन्यवध्यं तमिमं निहत्य स्वयं स रामो यश आहरेत । दत्तो वरो द्वारपयोः स्वयं च जनार्दनेनैव पुरातनश्च ॥ १२२ ॥ मयैव वध्यौ भवतं त्रिजन्मसु प्रवृद्धवीर्याविति केशवेन । उक्तं मयैवैष यदप्यनुग्रहं वधेऽस्य कुर्यान्न तु मे स धर्मः ॥ १२३ ॥ इति स सञ्चिन्त्य कपीशयुक्तो जगाम यत्रैव कपिप्रवीराः । स कुम्भकर्णोऽखिलवानरांस्तु प्रभक्षयन्ग्राममुपाजगाम ॥१२४॥ ते भक्षितास्तेन कपिप्रवीराः सर्वेऽपि निर्जग्मुरमुष्य देहात् । स्रोतोभिरेवाथ च रोमकूपैः केचित्तमेवारुरुहुर्यथा

SGDF
Sri Gargeshwari Digital Foundation

गिरिम् ॥ १२५ ॥ स तान्विधूयाशु यथा महागजो जगाम रामं समरार्थमेकः । प्रभक्षयन्स्वानपरांश्च सर्वशो मत्तः समाघ्राय च शोणितं पिबन् ॥१२६॥ न्यवारयत्तं शरवर्षधारया स लक्ष्मणो नैनमचिन्तयन्सः । जगाम रामं गिरिशृङ्गधारी समाह्वयत्तं समराय चाशु ॥ १२७ ॥ अथो समादाय धनुः सुघोरं शरान्सुरेशाशनितुल्यवेगान् । प्रवेशयामास निशाचरे प्रभुः स राघवः पूर्वहतेषु यद्वत् ॥ १२८ ॥ यावद्बलेन न्यहनत्खरादिकान्न तावतैव न्यपतत्स राक्षसः । अथ प्रहस्यात्मबलैकदेशं प्रदर्शयन्बाणवरान्मुमोच ॥ १२९ ॥ द्वाभ्यां स बाहू निचकर्त तस्य पदद्वयं चैव तथा शराभ्याम् । अथापरेणास्य शिरो निकृत्य सम्प्राक्षिपत्सागरतोय आशु ॥ १३० ॥ अवर्धताब्धिः पतितेऽस्य काये महाचलाभे क्षणदाचरस्य । सुराश्च सर्वे ववृषुः प्रसूनैर्मुदा स्तुवन्तो रघुवर्यमूर्धनि ॥ १३१ ॥ योजनानां त्रिलक्षं हि कुम्भकर्णोऽभ्यवर्धत । पूर्वं पश्चात्सञ्चुकोच लङ्कायामुषितुं स्वयम् ॥ १३२ ॥ स तु स्वभावमापन्नो म्रियमाणोऽभ्यवर्धत । तेनास्मिन्पतिते त्वब्धिरवर्धदधिकं तदा ॥१३३॥

अथापरे ये रजनीचरास्तदा कपिप्रवीरैर्निहताश्च सर्वशः । हतावशिष्टास्त्वरिताः प्रदुद्रुवुर्भ्रातुर्वधं चोचुरुपेत्य रावणम् ॥ १३४ ॥ स दुःखतप्तो निपपात मूर्छितो निराशकश्चाभवदात्मजीविते । तमाह पुत्रस्त्रिदशेशशत्रुर्नियुङ्क्ष्व मां शत्रुवधाय मा चिरम् ॥ १३५ ॥ मया गृहीतस्त्रिदशेश्वरः पुरा विषीदसे किं नरराजपुत्रतः । स एवमुक्त्वा प्रजुहाव पावकं शिवं समभ्यर्च्य समारुहद्रथम् ॥ १३६ ॥ स आत्तधन्वा सशरो रथेन वियत्समारुह्य ययावदर्शनम् । स नागपाशैर्वरतः शिवस्य बबन्ध सर्वान्कपिवीरसङ्घान् ॥ १३७ ॥ पुरावताराय यदा स विष्णुर्दिदेश सर्वांस्त्रिदशांस्तदैव । ममापि सेवा भवता प्रयोज्येत्येवं गरुत्मानवदद्वृषाकपिम् ॥ १३८ ॥ तमाह विष्णुर्न भुवि प्रजातिसुपैहि सेवां तव चान्यथाहम् । आदास्य एवात्र यथा यशः स्याद्धर्मश्च कर्तव्य-

SGDF
Sri Gangeshwari Digital Foundation

कृदेव च स्याः ॥ १३९ ॥ वरेण शर्वस्य हि रावणात्मजो यदा निबध्नाति कपीन्सलक्ष्मणान् । उरङ्गपाशेन तदा त्वमेव समेत्य सर्वानपि मोचयस्व ॥ १४० ॥ अहं समर्थोऽपि स लक्ष्मणश्च तथा हनूमान्न विमोचयामः । तव प्रियार्थं गरुडैष एव कृतस्त्वादेश इमं कुरुष्व ॥ ॥ १४१ ॥ तदेतदुक्तं हि पुरात्मना यत्ततो हि रामो न मुमोच कश्चन । स लक्ष्मणो नैव च मारुतात्मजः स एव जानाति हि देवगुह्यम् ॥ १४२ ॥ अथो निबध्याशु हरीन्सलक्ष्मणाञ्जगाम रक्षः स्वपितुः सकाशम् । ननन्द चासौ पिशिताशनेश्वरः शशंस पुत्रं च कृतात्मकार्यम् ॥ १४३ ॥ स पक्षिराजोऽथ हरेर्निदेशं स्मरंस्त्वरावानिह चाजगाम । तत्पक्षवातस्पर्शेन केवलं विनष्ट एषां स उरङ्गबन्धः ॥ ॥ १४४ ॥ स राममानम्य परात्मदैवतं ययौ सुमाल्याभरणानुलेपनः । कपिप्रवीरास्तु तरूञ्छिलाश्च प्रगृह्य नेदुर्बलिनः प्रहृष्टाः ॥ १४५ ॥ श्रुत्वा विनादं प्लवगेश्वराणां पुनः सपुत्रोऽत्रसदत्र रावणः । बन्धादमुष्मात्प्रविनिःसृतास्ते किमत्र कार्यं त्विति चिन्तयानः ॥ १४६ ॥ पुनश्च हुत्वा स हुताशमेव रथं समारुह्य ययावदर्शनम् । ववर्ष चास्त्राणि महांत्यजस्रं वरादुमेशस्य तथाब्जजस्य ॥ १४७ ॥ पुनश्च तस्यास्त्रनिपीडितास्ते निपेतुरुर्व्यां कपयः सलक्ष्मणाः । स्पृशन्ति नास्त्राणि दुरन्तशक्तिं तनुं समीरस्य हि कानिचित्क्वचित् ॥ १४८ ॥ विज्ञातुकामः पुरि सम्प्रवृत्तिं विभीषणः पूर्वगतस्तदाऽगात् । ददर्श सर्वान्पतितान्स वानरान्मरुत्सुतं त्वेकमनाकुलं च ॥ १४९ ॥ स तं समादाय ययौ विधातृजं विमूर्छितं चोदकसेकतस्तम् । आश्वास्य किं जीवसि हीत्यवोचत्तथेति स प्राह च मन्दवाक्यः ॥ १५० ॥ ऊचे पुनर्जीवति किं हनूमाञ्जीवाम सर्वेऽपि हि जीवमाने । तस्मिन्हते निहताश्चैव सर्वे इतीरितेऽस्मीत्यवदत्स मारुतिः ॥ १५१ ॥ इत्युक्तो जाम्बवानाह हनूमन्तमनन्तरम् । योऽसौ मेरोः समीपस्थो गन्धमादन-

SGDF
Sri Gargeshwari Digital Foundation

संज्ञकः ॥ १५२ ॥ गिरिस्तस्मात्समाहार्यं त्वयौषधिचतुष्टयम् । मृतसञ्जीवनी मुख्या सन्धानकरणी परा। सवर्णकरणी चैव विशल्यकरणीति च ॥ १५३ ॥ इत्युक्तः स क्षणेनैव प्रापतद्गन्धमादनम् । अवाप चाम्बरचरो राममुक्तः शरो यथा ॥ १५४ ॥ अन्तर्हिताश्चौषधीस्तु तदा विज्ञाय मारुतिः । उद्बबर्ह गिरिं क्रोधाच्छतयोजनमण्डलम् ॥ ॥ १५५ ॥ स तं समुत्पाट्य गिरिं करेण प्रतोलयित्वा बलदेवसूनुः । समुत्पपाताम्बरमुग्रवेगो यथा हरिश्चक्रधरस्त्रिविक्रमे ॥ १५६ ॥ अवाप चाक्ष्णोः स निमेषमात्रतो निपातिता यत्र कपिप्रवीराः । तच्छैलवातस्पर्शात्समुत्थिताः समस्तशो वानरयूथपाः क्षणात् ॥१५७॥ अपूजयन्मारुतिमुग्रपौरुषं रघूत्तमस्यानुजनिस्तथाऽपरे । पपात मूर्ध्न्यस्य च पुष्पसंततिः प्रमोदितैर्देववरैर्विसर्जिता ॥१५८॥ स देवगन्धर्वमहर्षिसत्तमैरभिष्टुतो रामकरोपगूहितः । पुनर्गिरिं तं शतयोजनोच्छ्रितं न्यपातयत्संस्थित एव तत्र ॥१५९॥ स पूर्ववन्मारुतिवेगचोदितो निरन्तरं श्लिष्टतरोऽत्र चाभवत् । पुनश्च सर्वे तरुशैलहस्ता रणाय चोत्तस्थुरलं नदन्तः ॥१६०॥ पुनश्च तान्प्रेक्ष्य समुत्थितान्कपीन्भयं महच्छक्रजितं विवेश । स पूर्ववद्धव्यवहे समर्च्य शिवं तथाऽदर्शनमेव जग्मिवान् ॥१६१॥ वराश्रयेणाजगिरीशयोः पुनः संमोहनास्त्रैः स बबन्ध तान्कपीन् । अथाह रामस्य मनोनुसारतः पुरास्त्रमेवानुसरन्स लक्ष्मणः ॥१६२॥ पितामहास्त्रेण निहन्मि दुर्मतिं तवाज्ञया शक्रजितं सबान्धवम् । इतीरितस्तेन स चाह राघवो भयाददृश्ये न विमोक्तुमर्हसि ॥१६३॥ न सोढुमीशोऽसि यदि त्वमेतदस्त्रं तदाहं शरमात्रकेण । अदृश्यमप्याशु निहन्मि संतं रसातलेऽथापि हि सत्यलोके ॥१६४॥ इति स्म वींद्रस्य हनूमतश्च बलप्रकाशाय पुरा प्रभुः स्वयं । संमानयित्वाऽस्त्रममुष्य रामो दुरन्तशक्तिः शरमाददेऽथ ॥१६५॥ अनेन दृष्टोऽहमिति स्म दुष्टो विज्ञाय बाह्वोर्बलमस्य चोग्रम् । विनिश्चयं

SGDF
Sri Gangeshwari Digital Foundation

देवतमस्य पश्यन्प्रदुद्रुवे प्राणपरीप्सुराशु ॥ १६६ ॥ हाहाकृते प्रद्रुत इंद्रशत्रौ रघूत्तमः शत्रुविभीषणत्वात् । बिभीषणेत्येव सुरैरभिष्टुतो विज्ञानमस्त्रं त्वमुचत्स्वसैन्ये ॥ १६७ ॥ निशाचरास्त्रं ह्यगमत्क्षणेन रामास्त्रवीर्याद्धरयो नदन्तः । उत्तस्थुरुच्चोरुगिरीन्प्रगृह्य प्रशंसमाना रघुवीरमुच्चैः ॥ १६८ ॥ सुरैश्च पुष्पं ववृषद्भिरीडितस्तस्थौ धनुष्पाणिरनंतवीर्यः । स रावणस्याथ सुतो निकुम्भिलां पुनः समासाद्य जुहाव पावकम् ॥ १६९ ॥ विभीषणोऽथाह रघूत्तमं प्रभुं नियोजयाद्यैव वधाय दुर्मतेः । कृताग्निपूजो न हि वध्य एष वरो विधातुः प्रथितोऽस्य तादृशः ॥ १७० ॥ न वै वधं राम इयेष तस्य पलायितस्यात्मसमीक्षणात्पुनः । सत्वोज्झितोऽसावतिकूटयोधी न मे वधार्होऽयमिति स्म स प्रभुः ॥ १७१ ॥ स आदिदेशावरजं जनार्दनो हनूमता चैव विभीषणेन । सहैव सर्वैरपि वानरेंद्रैर्ययौ महात्मा स च तद्वधाय ॥ १७२ ॥ स जुह्वतस्तस्य चकार विघ्नं प्लवंगमैः सोऽथ युयुत्सया रथम् । समास्थितः कार्मुकबाणपाणिः प्रत्युद्ययौ लक्ष्मणमाशु गर्जन् ॥ १७३ ॥ उभौ च तावस्त्रविदां वरिष्ठौ शरैः शरीरांतकरैस्ततक्षतुः । दिशश्च सर्वाः प्रदिशः शरोत्तमैर्विधाय शिक्षास्त्रबलैर्निरंतराः ॥ १७४ ॥ अस्त्राणि तस्यास्त्रवरैः स लक्ष्मणो निवार्य शत्रोश्चलकुंडलोज्वलम् । शिरः शरेणाशु समुन्ममाथ सुरैः प्रसूनैरथ चाभिवृष्टः ॥ १७५ ॥

निपातितेऽस्मिन्नितरां निशाचरान्प्लवंगमा जघ्नुरनेककोटिशः । हतावशिष्टास्तु दशाननाय शशंसुरत्यासुतप्रणाशम् ॥ १७६ ॥ स तं निशम्याप्रियमुग्ररूपं भृशं विनिःश्वस्य विलप्य दुःखात् । संस्थापयामास मतिं पुनश्च मरिष्य इत्येव सुनिश्चितार्थः ॥ १७७ ॥ मरणाभिमुखः शीघ्रं रावणो रणकर्मणि । सञ्जीभवन्नंतरैव दिदेश बलमूर्जितम् ॥ १७८ ॥ त्रिंशत्सहस्राणि महौघकानामक्षौहिणीनां सहषट्सहस्रम् । श्रमेण संयोजयताशु रामं सज्जीभवानीति दिदेश रावणः ॥ १७९ ॥

SGDF
Sri Gurgeshwari Digital Foundation

तदप्रधृष्यं वरतः स्वयंभुवो युगांतकालार्णवघूर्णितोपमम् । प्रगृह्य नानाविधमस्त्रशस्त्रं बलं कपीन्छीघ्रतमं जगाम ॥ १८० ॥ आगच्छमानं तदपारमेयं बलं सुघोरं प्रलयार्णवोपमम् । भयात्समुद्वीक्ष्य विषण्णचेतसः कपिप्रवीरा नितरां प्रदुद्रुवुः ॥ १८१ ॥ वरो हि दत्तोऽस्य पुरा स्वयंभुवा धरातलेऽल्पेऽपि निवासशक्तिः । अजेयता चेत्यत एव सार्कजाः प्लवंगमा द्रष्टुमपि स्म नाशकन् ॥ १८२ ॥ प्रगृह्य रामोऽपि धनुः शरांश्च समंततस्तानवधीच्छरौघैः । स एव सर्वत्र च दृश्यमानो विदिक्षु दिक्षु प्रजघान सर्वशः ॥ १८३ ॥ क्षणेन सर्वांश्च निहत्य राघवः प्लवंगमानामृषभैः सुपूजितः । अभिष्टुतः सर्वसुरोत्तमैर्मुदा भृशं प्रसूनोत्करवर्षिभिः प्रभुः ॥ १८४ ॥ अथाययौ सर्वनिशाचरेश्वरो हतावशिष्टेन बलेन संवृतः । विमानमारुह्य च पुष्पकं त्वरन्शरीरनाशाय महायुधोद्धतः ॥ १८५ ॥ विरूपनेत्रोऽथ च यूपनेत्रस्तथा महापार्श्वमहोदरौ च । ययुस्तमावृत्य सहैव मंत्रिणो मृतिं पुरोधाय रणाय यान्तम् ॥ १८६ ॥ अथास्य सैन्यानि निजघ्नुरोजसा समन्ततः शैलशिलाभिवृष्टिभिः । प्लवङ्गमास्तानभिवीक्ष्य वीर्यवान्ससार वेगेन महोदरो रुषा ॥ १८७ ॥ वीक्ष्यातिकायं तमभिद्रवंतं स कुंभकर्णोऽयमिति ब्रुवंतः । प्रदुद्रुवुर्वानरवीरसंघास्तमाससादाशु सुतोऽथ वालिनः ॥ १८८ ॥ वदन्स तिष्ठध्वमिति स्म वीरो बिभीषीकामात्रमिदं न यात । इतीरयन्नग्रत एव पुप्लुवे महोदरस्येंद्रसुतात्मजो बली ॥ १८९ ॥ अथो शरानाशु विमुञ्चमानं शिरः परामृश्य निपात्य भूतले । ममर्द पद्भ्यामभवद्गतासुर्महोदरो वालिसुतेन चूर्णितः ॥ १९० ॥ अथो महापार्श्व उपाजगाम प्रवर्षमाणोऽस्य शरांबुधाराः । प्रसह्य चाच्छिद्य धनुः करस्थं समाददे खड्गममुष्य सोऽङ्गदः ॥ १९१ ॥ निगृह्य केशेषु निपात्य भूतले चकर्त वामांसत औदरं परम् । यथोपवीतं स तथा द्विधाकृतो ममार मंत्री रजनीचरेशितुः ॥ १९२ ॥ अथैनमा-

SGDF
Sri Gurgeshwari Digital Foundation

जग्मतुरुद्यतायुधौ विरूपनेत्रोऽप्यथ यूपनेत्रः । यथैव मेघौ दिवि तिग्मरश्मिं तथा समाच्छादयतां शरौघैः ॥ १९३ ॥ ताभ्यां स बद्धः शरपञ्जरेण विचेष्टितुं नाशकदत्र वीरः । हरीश्वरः शैलमतिप्रमाणमुत्पाट्य चिक्षेप तयोः शरीरे ॥ १९४ ॥ उभौ च तौ तेन विचूर्णितौ रणे रवेः सुतस्योरुवलेरितेन । निशाचरेशोऽथ शरेण सूर्यजं बिभेद वक्षस्यपि सोऽपतद्भुवि ॥ १९५ ॥ ततश्च सर्वांश्च कपिप्रवीरान्विधूय बाणैर्बलवान्दशाननः । जगाम रामाभिमुखस्तदैनं रुरोध रामावरजः शरौघैः ॥ १९६ ॥ तदा दशास्योऽन्तकदण्डकल्पां मयाय दत्तां कमलोद्भवेन । मयाद्गृहीतां च विवाहकाले प्रगृह्य शक्तिं विससर्ज लक्ष्मणे ॥ १९७ ॥ तया स वीरः सुविदारितोराः पपात भूमौ सुभृशं विमूर्च्छितः । मरुत्सुतः शैलमतिप्रमाणं चिक्षेप रक्षःपतिवक्षसि द्रुतं ॥ १९८ ॥ तेनातिगाढं व्यथितो दशाननो मुखैर्वमञ्छोणितपूरमाशु । तदन्तरे च प्रतिगृह्य लक्ष्मणं जगाम शक्त्या सह रामसन्निधिम् ॥ १९९ ॥ समुद्बबर्हाथ च तां स राघवो दिदेश च प्राणवरात्मजं पुनः । प्रभुः समानेतुमथो वरौषधीः स चानिनायाशु गिरिं पुनस्तम् ॥ २०० ॥ तद्गन्धमात्रेण समुत्थितोऽसौ सौमित्रिरात्तोरुबलश्च पूर्ववत् । शशंस चाश्लिष्य मरुत्सुतं प्रभुः स राघवोऽगण्यगुणार्णवः स्मयन् ॥ २०१ ॥ प्राक्षिपत्तं गिरिवरं लङ्कास्थः सन्स मारुतिः । अर्धलक्षे योजनानां यत्रासौ पूर्वसंस्थितः ॥ २०२ ॥ तद्बाहुवेगात्संश्लेषं प्राप पूर्ववदेव सः । मृताश्च ये प्लवङ्गास्तु तद्गन्धात्तेऽपि जीविताः ॥ २०३ ॥ रामाज्ञया हि रक्षांसि हरयोऽब्धाववाक्षिपन् । नोज्जीवितास्ततस्ते तु वानरा नीरुजोऽभवन् ॥ २०४ ॥ छिन्नप्ररोहिणश्चैव विशल्याः पूर्ववर्णिनः । ओषधीनां प्रभावेण सर्वेऽपि हरयोऽभवन् ॥ २०५ ॥ अथाससादोत्तमपूरुषं प्रभुं विमानगो रावण आयुधौघान् । प्रवर्षमाणो रघुवंशनाथं तमात्तधन्वाभिययौ स रामः ॥ २०६ ॥ सम्मानयन्राघवमादिपूरुषं

SGDF
Sri Gurgeshwari Digital Foundation

निर्यातयामास रथं पुरन्दरः । सहायुधं मातलिसंगृहीतं समारुरोहाशु स लक्ष्मणाग्रजः ॥ २०७ ॥ आरुह्य तद्रथवरं जगदेकनाथो लोकाभयाय रजनीचरनाथमाशु । अभ्युद्ययौ दशशतांशुरिवान्धकारं लोकानशेषत इमान्निगिरन्तमुद्यन् ॥ २०८ ॥ आयान्तमीक्ष्य रजनीचरलोकनाथः शस्त्राण्यथास्त्रसहितानि मुमोच रामे । रामस्तु तानि विनिकृत्य निजैर्महास्त्रैस्तस्योत्तमाङ्गदशकं युगपन्न्यकृन्तत् ॥ २०९ ॥ कृत्तानि तानि पुनरेव समुत्थितानि दृष्ट्वा वराच्छतधृतेर्हृदयं विभेद । बाणेन वज्रसदृशेन स भिन्नहृत्को रक्तं वमन्न्यपतदाशु महाविमानात् ॥ २१० ॥

तस्मिन्हते त्रिजगतां परमप्रतीपे ब्रह्मा शिवेन सहितः सहलोकपालैः । अभ्येत्य पादयुगलं जगदेकभर्तू रामस्य भक्तिभरितः शिरसा ननाम ॥ २११ ॥ अथैनमस्तौत्पितरं कृताञ्जलिर्गुणाभिरामं जगतः पितामहः । जितं जितं तेऽजित लोकभावन प्रपन्नपालाय नताः स्म ते वयं ॥ २१२ ॥ त्वमेक ईशोऽसि न चादिरन्तस्तवेज्यकालेन तथैव देशतः । गुणा ह्यगण्यास्तव तेऽप्यनन्ताः प्रत्येकशश्चादिविनाशवर्जिताः ॥ २१३ ॥ न चोद्भवो नैव तिरस्कृतिस्ते क्वचिद्गुणानां परतः स्वतो वा । त्वमेक आद्यः परमः स्वतन्त्रो भृत्यास्तवाहं शिवपूर्वकाश्च ये ॥ २१४ ॥ यथार्चिषोऽग्नेः पवनस्य वेगा मरीचयोऽर्कस्य नदीषु चापः । गच्छन्ति चायान्ति च सन्तताश्च तद्वन्मदाद्याः शिवपूर्वकाश्च ये ॥ २१५ ॥ ये ये च मुक्तास्त्वथ ये च बद्धाः सर्वे तवेशेश वशे सदैव । वयं सदा तद्गुणपूगमुच्चैः सर्वे वदन्तोऽपि न पारगामिनः ॥ २१६ ॥ किमेष ईदृग्गुणकस्य ते प्रभो रक्षोवधोऽशेषसुरप्रपालनं । अनन्यसाध्यं हि तथापि तद्द्वयं कृतं त्वया तस्य नमो नमस्ते ॥ २१७ ॥ इतीरिते त्वब्जभवेन शूली समाह्वयद्राघवमाहवाय । वरं मदीयं त्वगणय्य रक्षो हतं त्वया तेन रणाय मैहि ॥ २१८ ॥ इतीरितेऽस्त्वित्यभिधाय राघवो धनुः प्रगृह्याशु शरं च

SGDF
Sri Gangeshwari Digital Foundation

सन्दधे । विकृष्यमाणे चलिता वसुन्धरा पपात रुद्रोऽपि धरा-
प्रकम्पतः ॥ २१९ ॥ अथोत्थितश्चासुरभाववर्जितः क्षमस्व देवेति
ननाम पादयोः । उवाच च त्वद्वशगोऽस्मि सर्वदा प्रसीद मे त्वद्विषयं
मनः कुरु ॥ २२० ॥ अथेंद्रमुख्याश्च तमूचिरे सुरास्त्वयाविताः
स्मोऽद्य निशाचराद्भयम् । तथैव सर्वापद एव नस्त्वं प्रपाहि सर्वे
भवदीयकाः स्मः ॥ २२१ ॥ सीताकृतिं तामथ तत्र चागतां दिव्यच्छ-
लेन प्रणिधाय पावके । कैलासतस्तां पुनरेव चागतां सीतामगृह्णाद्धुत-
भुक्समर्पितां ॥२२२॥ जानन् गिरीशालयगां स सीतां समग्रहीत्पावक-
सम्प्रदत्तां । मुमोद संप्राप्य च तां स रामः सा चैव देवी भगवन्त-
माप्य ॥२२३॥ अथो गिरेरानयनात्परस्ताद्ये वानरा रावणबाणपीडिताः ।
तारापिता तान्निरुजश्चकार सुषेणनामा भिषजां वरिष्ठः ॥ २२४ ॥
तदा मृतान्राघव आनिनाय यमक्षयाद्देवगणांश्च सर्वशः । समन्वजाना-
त्पितरं च तत्र समागतं गन्तुमियेष चाथ ॥ २२५ ॥ विभीषणेनार्पित-
मारुरोह स पुष्पकं तत्सहितः सवानरः । पुरीं जगामाशु निजामयोध्यां
पुरो हनूमन्तमथो न्ययोजयत् ॥ २२६ ॥ ददर्श चासौ भरतं हुताशनं
प्रवेष्टुकामं जगदीश्वरस्य । अदर्शनात्तं विनिवार्य रामं समागतं चास्य
शशंस मारुतिः ॥ २२७ ॥ श्रुत्वा प्रमोदोरुभरः स तेन सहैव पौरैः
सहितः समातृकः । शत्रुघ्नयुक्तोऽभिसमेत्य राघवं ननाम बाष्पाकुल-
लोचनाननः ॥ २२८ ॥ उत्थाप्य तं रघुपतिः सस्वजे प्रणयान्वितः ।
शत्रुघ्नं च तदन्येषु प्रतिपेदे यथावयः ॥ २२९ ॥ पुरीं प्रविश्य
मुनिभिः साम्राज्ये चाभिषेचितः । यथोचितं च संमान्य सर्वानाहेद-
मीश्वरः ॥ २३० ॥ सर्वैर्भवद्भिः सुकृतं विधाय देहं मनोवाक्सहितं
मदीयम् । एतावदेवाखिलसद्विधेयं यत्कायवाक्चित्तभवं मदर्चनम् ॥
॥ २३१ ॥ मुक्तिप्रदानात्प्रतिकर्तृता मे सर्वस्य चाथो भवतां भवेत ।
हनूमतो न प्रतिकर्तृता स्यात्स्वभावभक्तस्य निरौपधं मे ॥ २३२ ॥

SGDF
Sri Gargeshwari Digital Foundation

मद्भक्तौ ज्ञानपूर्तावनुपधिकबलप्रोन्नतिस्थैर्यधैर्यस्वाभाव्याधिक्यतेजःसुमतिदमशमेष्वस्य तुल्यो न कश्चित् । शेषो रुद्रः सुपर्णोऽप्युरुगुणसमितौ नो सहस्रांशतुल्या अस्येत्यस्मान्मदीशं पदमहममुना सार्धमेवोपभोक्ष्ये ॥ ॥ २३३ ॥ पूर्वं जिगाय भुवनं दशकन्धरोऽसावब्जोद्भवस्य वरतो न तु तं कदाचित् । कश्चिज्जिगाय पुरुहूतसुतः कपित्वाद्विष्णोर्वरादजयदर्जुन एव चैनं ॥ २३४ ॥ दत्तो वरो न मनुजान्प्रति वानरांश्च धात्राऽस्य तेन विजितो युधि वालिनैषः । अब्जोद्भवस्य वरमाश्वभिभूय रक्षो जिग्ये त्वहं रणमुखे बलिमाह्वयन्तम् ॥ २३५ ॥ बलेर्द्वारस्थोऽहं वरमस्मै सम्प्रदाय पूर्वं तु । तेन मया रक्षोऽस्तं योजनमयुतं पदांगुल्या ॥ २३६ ॥ पुनश्च युद्धाय समाह्वयंतं न्यपातयं रावणमेकमुष्टिना । महाबलोऽहं कपिलाख्यरूपस्त्रिकोटिरूपः पवनश्च मे सुतः ॥ २३७ ॥ आवां स्वशक्त्या जयिनाविति स्म शिवो वरान्मेऽजयदेनमेव । ज्ञात्वा सुराजेयमिमं हि वव्रे हरो जयेयाहममुं दशाननम् ॥ २३८ ॥ अतः स्वभावाज्जयिनावहं च वायुश्च वायुर्हनुमान्स एषः । अमुष्य हेतोस्तु पुरा हि वायुना शिवेंद्रपूर्वा अपि काष्ठवत्कृताः ॥ २३९ ॥ अतो हनूमान्पदमेतु धातुर्मदाज्ञया सृष्टयवनादिकर्म। मोक्षं च लोकस्य सदैव कुर्वन्मुक्तश्च मुक्तान्सुखयन्प्रवर्तताम् ॥ २४० ॥ भोगाश्च ये यानि च कर्मजातान्यनाद्यनन्तानि ममेह सन्ति । मदाज्ञया तान्यखिलानि संति धातुः पदे तत्सहभोगनाम ॥ २४१ ॥ एतादृशं मे सहभोजनं ते मया प्रदत्तं हनुमन्सदैव । इतीरितस्तं हनुमान्प्रणम्य जगाद वाक्यं स्थिरभक्तिनम्रः ॥ २४२ ॥ को न्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह । तथापि नाहं प्रवृणोमि भूमन्भवत्पदांभोजनिषेवणादृते ॥२४३॥ त्वमेव साक्षात्परमः स्वतंत्रस्त्वमेव साक्षादखिलोरुशक्तिः । त्वमेव चागण्यगुणार्णवः सदा रमाविरिंचादिभिरप्यशेषैः ॥ २४४ ॥ समेत्य सर्वेऽपि सदा वदंतोऽप्यनंतकालाच्च न वै समाप्नुयुः । गुणांस्त्वदीयान्परि-

SGDF
Sri Gargeshwari Digital Foundation

पूर्णसौख्यज्ञानात्मकस्त्वं हि सदातिशुद्धः ॥ २४५ ॥ यस्ते कथासेवक एव सर्वदा सदारतिस्त्वय्यचलैकभक्तिः । स जीवमानो न परः कथंचित्तज्जीवनं मेऽस्त्वधिकं समस्तात् ॥ २४६ ॥ प्रवर्धतां भक्तिरलं क्षणे क्षणे त्वयीश मे ह्रासविवर्जिता सदा । अनुग्रहस्ते मयि चैवमेव निरूपधौ तौ मम सर्वकामः ॥ २४७ ॥ इतीरितस्तस्य ददौ स तद्द्वयं पदं विधातुः सकलं च शोभनम् । समाश्लिषच्चैनमथार्द्रया धिया यथोचितं सर्वजनानपूजयत् ॥ २४८ ॥ (८८५) इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीरामचरिते युद्धकांडकथानिरूपणं नामाष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः

॥ ॐ ॥ अथाप्तराज्यो भगवान्स लक्ष्मणं जगाद राजा तरुणो भवाशु । इतीरितस्त्वाह स लक्ष्मणो गुरुं भवत्पदाब्जान्न परं वृणोम्यहम् ॥ १ ॥ न मां भवत्पादनिषेवणैकस्पृहं तदन्यत्र नियोक्तुमर्हसि । नहीदृशः कश्चिदनुग्रहः क्वचित्तदेव मे देहि ततः सदैव ॥२॥ इतीरितस्तस्य तदेव दत्वा दृढं समाश्लिष्य च राघवः प्रभुः । स यौवराज्ये भरतं निधाय जुगोप लोकानखिलान्सधर्मकान् ॥ ३ ॥ प्रशासतीशे पृथिवी बभूव विरिञ्चलोकस्य समा गुणोन्नतौ । जनोऽखिलो विष्णुपरो बभूव न धर्महानिश्च बभूव कस्यचित् ॥ ४ ॥ गुणैश्च सर्वैरुदिताश्च सर्वे यथा योग्यतयोच्चनीचाः । समस्तरोगादिभिरुज्झिताश्च सर्वे सहस्रायुष ऊर्जिता धनैः ॥ ५ ॥ सर्वे जना नित्यबलोपपन्ना यथेष्टसिद्ध्या च सदोपपन्नाः । समस्तदोषैश्च सदा विहीनाः सर्वे सुरूपाश्च सदा महोत्सवाः ॥ ६ ॥ सर्वे मनोवाक्तनुभिः सदैव विष्णुं यजन्ते न तु कश्चिदन्यम् । समस्तरत्नोद्धरिता च पृथ्वी यथेष्टधान्या

SGDF
Sri Gargeshwari Digital Foundation

बहुदुग्धगोमती ॥ ७ ॥ समस्तगन्धाश्च सदातिहृद्या रसा मनोहारिण एव तत्र । शब्दाश्च सर्वे श्रवणार्तिहारिणः स्पर्शाश्च सर्वे स्पर्शेंद्रियप्रियाः ॥ ८ ॥ न कस्यचिद्दुःखमभूत्कथञ्चिन्न वित्तहानिश्च बभूव कस्यचित् । नाधर्मशीलो न च कश्चनाप्रजो न दुष्प्रजो नैव कुभार्यकश्च ॥ ॥ ९ ॥ स्त्रियो न चासन्विधवाः कथञ्चिन्न वै पुमांसो विधुरा बभूवुः । नानिष्टयोगश्च बभूव कस्यचिन्न चेष्टहानिर्न च पूर्वमृत्युः ॥ ॥ १० ॥ यथेष्टमाल्याभरणानुलेपना यथेष्टपानाशनवाससोऽखिलाः । बभूवुरीशे जगतां प्रशासति प्रकृष्टधर्मेण जनार्दने नृपे ॥ ११ ॥ स ब्रह्मरुद्रमरुदश्विदिवाकरादिमूर्धन्यरत्नपरिघट्टितपादपीठः । नित्यं सुरैः सहनरैरथ वानरैश्च संपूज्यमानचरणो रमते रमेशः ॥ १२ ॥ तस्याखिलेशितुरनाद्यनुगैव लक्ष्मीः सीताभिधा त्वरमयत्स्वरतं रमेशम् । नित्यावियोगिपरमोच्चनिजस्वभावसौंदर्यविभ्रमसुलक्षणपूर्वभावा ॥ १३ ॥ रेमे तया स परमः स्वरतोऽपि नित्यं नित्योन्नतप्रमदभारभृतस्वभावः । पूर्णोडुराजसुविराजितसन्निशासु दीप्यन्नशोकवनिकासु सुपुष्पितासु ॥ ॥ १४ ॥ गायन्ति चैनमनुरक्तधियः सुकण्ठा गन्धर्वचारणगणाः सह चाप्सरोभिः । तं तुष्टुवुर्मुनिगणाः सहिताः सुरेशै राजान एनमनुयान्ति सदाऽप्रमत्ताः ॥ १५ ॥ एवं त्रयोदशसहस्रमसौ समास्तु पृथ्वीं ररक्ष विजितारिरमोघवीर्यः । आनन्दमिन्दुरिव सन्दधदिन्दिरेशो लोकस्य सान्द्रसुखवारिधिरप्रमेयः ॥ १६ ॥

देव्यां स चाजनयदिन्द्रहुताशनौ द्वौ पुत्रौ यमौ कुशलवौ बलिनौ गुणाढ्यौ । शत्रुघ्नतो लवणमुल्बणबाणदग्धं कृत्वा चकार मधुरां पुरमुग्रवीर्यः ॥ १७ ॥ कोटित्रयं स निजघान तथाऽसुराणां गन्धर्वजन्म भरतेन सतां च धर्मम् । संशिक्षयन्नयजदुत्तमकल्पकैः स्वं यज्ञैर्भवाब्जजमुखास्ससचिवाश्च यत्र ॥ १८ ॥ अथ शूद्रतपश्चर्यान्निहतं विप्रपुत्रकम् । उज्जीवयामास विभुर्हत्वा तं शूद्रतापसम् ॥ १९ ॥

SGDF
Sri Gargeshwari Digital Foundation

जङ्घनामाऽसुरः पूर्वं गिरिजावरदानतः । बभूव शूद्रः कल्पायुः स लोकक्षयकाम्यया ॥ २० ॥ तपश्चचार दुर्बुद्धिरिच्छन्माहेश्वरं पदम् । अनन्यवध्यं तं तस्माज्जघान पुरुषोत्तमः ॥ २१ ॥ श्वेतदत्तां तथा मालामगस्त्यादाप राघवः ॥ २२ ॥ अनन्नयज्ञकृच्छ्वेतो राजा क्षुद्विनिवर्तनम् । कुर्वन्स्वमांसैर्धात्रोक्तो मालां रामार्थमार्पयत् ॥ २३ ॥ अगस्त्याय न साक्षात्तु रामे दद्यादयं नृपः । क्षुदभावमात्रफलदं न साक्षाद्राघवेऽर्पितम् ॥२४॥ क्षुदभावमात्रमाकांक्षन्मामसौ परिपृच्छति । व्यवधानतस्ततो रामे दद्याच्छ्वेत इति प्रभुः । मत्वा ब्रह्मादिशन्मालां प्रदातुं कुम्भयोनये ॥ २५ ॥ तामगस्त्यकरपल्लवार्पितां भक्त एष मम कुम्भसम्भवः । इत्यवेत्य जगृहे जनार्दनस्तेन संस्तुत उपागमत्पुरम् ॥ ॥ २६ ॥

अथ केचिदासुरसुराः सुराणका इत्युरुप्रथितपौरुषाः पुरा । ते तपः सुमहदास्थिता विभुं पद्मसम्भवमवेत्य चोचिरे ॥ २७ ॥ भूरिपापकृतिनोऽपि निश्चयान्मुक्तिमाप्नुम उदारसद्गुण । इत्युदीरितमजोऽवधार्य तत्प्राह च प्रहसिताननः प्रभुः ॥ २८ ॥ यावदेव रमया रमेश्वरं नो वियोजयथ सद्गुणार्णवम् । तावदुच्चमपि दुष्कृतं भवन्मोक्षमार्गपरिपंथि नो भवेत् ॥ २९ ॥ इत्युदीरितमवेत्य तेऽसुराः क्षिप्रमोक्षगमनोत्सुकाः क्षितौ । साधनोपचयकांक्षिणो हरौ शासति क्षितिमशेषतोऽभवन् ॥ ३० ॥ताननादिकृतदोषसञ्चयैर्मोक्षमार्गगतियोग्यतोज्झितान् । मैथिलस्य तनया व्यचालयन्मायया स्म तनुवा स्वमार्गतः ॥ ३१ ॥ आज्ञयैव हि हरेस्तु मायया मोहितास्तु दितिजा व्यनिन्दयन् । राघवो निशिचराहृतां पुनर्जानकीं जगृह इत्यनेकशः ॥ ॥ ३२ ॥ ब्रह्मवाक्यमृतमेव कारयन्पातयंस्तमसि चान्ध आसुरान् । नित्यमेव सहितोऽपि सीतया सोऽग्निसाक्षिकमभूद्वियुक्तवत् ॥ ३३ ॥ तेन चान्धतम ईयुरासुरा यज्ञमाह्वयदसौ च मैथिलीम् । तत्र भूमि

SGDF
Sri Gargeshwari Digital Foundation

शपथच्छलात्क्ष्मणां दृष्टिमार्गमपहाय सा स्थिता ॥ ३४ ॥ गुरुं हि जगतो विष्णुर्ब्रह्माणमसृजत्स्वयम् । तेन तद्वचनं सत्सु नानृतं कुरुते क्वचित् ॥ ॥ ३५ ॥ नासत्स्वप्यनृतं कुर्याद्वचनं पारलौकिकम् । ऐहिकं त्वसुरेष्वेव क्वचिद्धन्ति जनार्दनः ॥ ३६ ॥ निजाधिक्यस्य विज्ञप्त्यै क्वचिद्वायु-स्तदाज्ञया । हन्ति ब्रह्मत्वमात्मीयमद्धा ज्ञापयितुं प्रभुः ॥३७॥ नान्यः कश्चित्तद्वराणां शापानामप्यतिक्रमी । अयोग्येषु तु रुद्रादिवाक्यां तौ कुरुतो मृषा ॥ ३८ ॥ एकदेशेन सत्यं तु योग्येष्वपि कदाचन । न विष्णोर्वचनं क्वापि मृषा भवति कस्यचित् । एतदर्थोऽवतारस्तु विष्णो-र्भवति सर्वदा ॥ ३९ ॥ प्रविश्य भूमौ सा देवी लोकदृष्ट्यनुसारतः । रेमे रामेणावियुक्ता भास्करेण प्रभा यथा ॥ ४० ॥ एवं रमालालित-पादपल्लवः पुनश्च यज्ञैरयजत्स्वमेव । वराश्वमेधादिभिराप्तकामो रेमेऽभि-रामो नृपतीन्विशिक्षयन् ॥ ४१ ॥ रामस्य दृश्या त्वन्येषामदृश्या जनकात्मजा । भूमिप्रवेशादूर्ध्वं सा रेमे सप्तशतं समाः ॥ ४२ ॥ एवंविधान्यगणितानि जनार्दनस्य रामावतारचरितानि तदन्यपुम्भिः । शक्यानि नैव मनसाऽपि हि तानि कर्तुं ब्रह्मेशशेषपुरुहूतमुखैः सुरैश्च ॥ ४३ ॥

तस्यैवमब्जभवलोकसमामिमां क्ष्मां कृत्वाऽनुशासत उदीक्ष्य गुणान्धरायाः । वैशेष्यमात्मसदनस्य हि काङ्क्षमाणा बृन्दारकाः कमलजं प्रति तच्छशंसुः ॥ ४४ ॥ आमन्त्र्य तैः सह विभुर्भगव-त्प्रयाणं स्वीयाय सद्मन इयेष दिदेश चाथ । रुद्रं स्वलोकगमनाय रघूत्तमस्य संप्रार्थने स च समेत्य विभुं ययाचे ॥ ४५ ॥ एकान्तमेत्य रघुपेण समस्तकालो रुद्रो जगाद वचनं जगतो विधातुः । वैशेष्य-मात्मसदनस्य हि काङ्क्षमाणास्त्वामर्थयन्ति विबुधाः सहिता विधात्रा ॥ ॥ ४६ ॥ पुत्रस्तवेश कमलप्रभवस्तथाहं पौत्रस्तु पौत्रकवचो यदपि ह्ययोग्यम् । संभावयन्ति गुणिनस्तदहं ययाचे गन्तुं स्वसद्म नतिपूर्व-

SGDF
Sri Gangeshwari Digital Foundation

मितो भवन्तम् ॥ ४७ ॥ यत्कार्यसाधनकृते विबुधार्थितस्त्वं प्रादुश्चकर्थ निजरूपमशेषमेव । तत्साधितं हि भवता तदितः स्वधाम क्षिप्रं प्रयाहि हर्षं विबुधेषु कुर्वन् ॥ ४८ ॥ ओमित्युवाच भगवांस्तदशेषमेव श्रुत्वा रहस्यथ तनुस्त्वपरा हरस्य । दुर्वासनामयुगिहागमदाशु रामं मां भोजय क्षुदितमित्यसकृद्ब्रुवाणा ॥ ४९ ॥ सिद्धं न देयमुत साध्यमपीति वाचं श्रुत्वाऽस्य वाक्समयजातमुरु स्वहस्तात् । अन्नं चतुर्गुणमदादमृतोपमानं रामस्तदाप्य बुभुजेऽथ मुनिः सुतुष्टः ॥ ५० ॥ तृप्तो ययौ च सकलान्प्रति कोपयानः कश्चिन्न मेऽर्थितवरं प्रतिदातुमीशः । एवं प्रतिज्ञक ऋषिः स हि तत्प्रतिज्ञां मोघां चकार भगवान्न तु कश्चिदन्यः ॥ ५१ ॥ कुन्ती तु तस्य हि मुनेर्वरतोऽजयत्तं रामः स कृष्णतनुवा स्वबलाज्जिगाय । तस्मिञ्छिवे प्रतिगते मुनिरूपके च याहीति लक्ष्मणमुवाच रमापतिः सः ॥ ५२ ॥ एकान्ते तु यदा रामश्चक्रे रुद्रेण संविदम् । द्वारपालं स कृतवांस्तदा लक्ष्मणमेव सः ॥ ॥ ५३ ॥ यद्यत्र प्रविशेत्कश्चिद्धन्मि त्वेति वचो ब्रुवन् । तदन्तरागतमृषिं दृष्ट्वाऽमन्यत लक्ष्मणः ॥ ५४ ॥ दुर्वाससः प्रतिज्ञा तु रामं प्राप्यैव भज्यताम् । अन्यथा त्वयशो रामे करोत्येष मुनिर्ध्रुवम् ॥ ५५ ॥ राघवो घ्नन्नपि तु मां करोत्येव दयां मयि । इति मत्वा ददौ मार्गं स तु दुर्वाससे तदा ॥ ५६ ॥ स्वलोकगमनाकांक्षी स्वयमेव तु राघवः । इयं प्रतिज्ञा हेतुः स्यादिति हन्मीति सोऽकरोत् ॥ ५७ ॥ अत्यन्तबन्धुनिधनं त्याग एवेति चिन्तयन् । याहि स्वलोकमचिरादित्युवाच स लक्ष्मणम् ॥ ५८ ॥ इत्युक्तः स ययौ जगद्भवभयध्वान्तच्छिदं राघवं ध्यायन्नाप च तत्पदं दशशतैर्युक्तो मुखाम्भोरुहैः । आसीच्छेषमहाफणी मुसलभृद्दिव्याकृतिर्लाङ्गली पर्यङ्कत्वमवाप यो जलनिधौ विष्णोः शयानस्य च ॥ ५९ ॥ अथ राघवः स्वभवनोपगतौ विदधे मतिं सह जनैरखिलैः । समघोषयच्च य इहेच्छति तत्पदमक्षयं सपदि

SGDF
Sri Gangeshwari Digital Foundation

मैत्विति सः ॥ ६० ॥ श्रुत्वा तु तद्य इह मोक्षपदेच्छवस्ते सर्वे समाययुरथा तृणमा पिपीलं । रामाज्ञया गमनशक्तिरभूत्तृणादेर्ये तत्र दीर्घभविनो न हि ते तदैच्छन् ॥ ६१ ॥ संस्थापयामास कुशं स्वराज्ये तैः साकमेव च लवं युवराजमीशः । संस्थाप्य वालितनयं कपिराज्य आशु सूर्यात्मजोऽपि रघुवीरसमीपमायात् ॥ ६२ ॥ अथाह वायुनन्दनम् स राघवः समाश्लिषन् । तवाहमक्षिगोचरः सदा भवामि नान्यथा ॥ ६३ ॥ त्वया सदा महत्तपः सुकार्यमुत्तमोत्तमम् । तदेव मे महत्प्रियं चिरं तपस्त्वया कृतम् ॥ ६४ ॥ दशास्यकुम्भकर्णकौ यथा सुशक्तिमानपि । जघन्थ न प्रियाय मे तथैव जीवकल्पकम् ॥ ६५ ॥ पयोऽब्धिमध्यगं च मे सुसद्म चान्यदेव वा । यथेष्टतो गमिष्यसि स्वदेहसंयुतोऽपि सन् ॥ ६६ ॥ यथेष्टभोगसंयुतः सुरेशगायकादिभिः । समीड्यमानसद्यशा रमस्व मत्पुरः सदा ॥ ६७ ॥ तवेप्सितं न किञ्चन क्वचित्कदाचिदेव वा । मृषा भवेत्प्रियश्च मे पुनःपुनर्भविष्यसि ॥६८॥ इतीरितो मरुत्सुतो जगाद विश्वनायकम् । विधेहि पादपङ्कजे तवेश भक्तिमुत्तमाम् ॥ ६९ ॥ सदा प्रवर्धमानया तया रमेऽहमञ्जसा । समस्तजीवसञ्चयात्सदाधिका हि मेऽस्तु सा ॥ ७० ॥ नमो नमो नमो नमो नतोऽस्मि ते सदा पदम् । समस्तसद्गुणोच्छ्रितं नमामि ते पदं पुनः ॥ ७१ ॥ इतीरिते तथेति तं जगाद पुष्करेक्षणः । जगाम धाम चात्मनस्तृणादिना सहैव सः ॥ ७२ ॥ खगा मृगास्तृणादयः पिपीलिकाश्च गर्दभाः । तदासुरुत्तमा यतो नृवानरास्तु किं पुनः ॥ ७३ ॥ सदैव रामभावनात्सदा सुतत्ववेदिनः । यतोऽभवंस्ततस्तु ते ययुः पदं हरेस्तदा ॥ ७४ ॥ स तैः समावृतो विभुर्ययौ दिशं तदोत्तराम् । अनन्तसूर्यदीधितिर्दुरन्तसद्गुणार्णवः ॥ ७५ ॥ सहस्रसूर्यमण्डलज्वलत्किरीटमूर्धजः । सुनीलकुन्तलावृतामितेंदुकान्तिसन्मुखः ॥ ७६ ॥ सुरक्तपद्मलोचनः सुविद्युदाभकुण्डलः । सुहासविद्रुमाधरः समस्तवेद-

SGDF
Sri Gargeshwari Digital Foundation

वाग्रसः ॥ ७७ ॥ दिवाकरौघकौस्तुभप्रभासकोरुकन्धरः । सुपीवरोन्नतोरुसज्जगद्धरांसयुग्मकः ॥७८॥ सुवृत्तदीर्घपीवरोल्लसद्भुजद्वयाङ्कितः । जगद्विमथ्य संभृतः शरोऽस्य दक्षिणे करे ॥ ७९ ॥ स्वयं स तेन निर्मितो हतो मधुश्च कैटभः । शरेण येन विष्णुना ददौ च लक्ष्मणानुजे ॥ ८० ॥ स शत्रुसूदनोऽवधीन्मधोः सुतं रसाह्वयम् । शरेण येन चाकरोत्पुरीं च माधुराभिधाम् ॥ ८१ ॥ समस्तसारसम्भवं शरं दधार तं करे ॥ ८२ ॥ स वामबाहुना धनुर्दधार शार्ङ्गसंज्ञितम् । उदारबाहुभूषणः शुभाङ्गदः सुकङ्कणः । महाङ्गुलीयभूषितः सुरक्तसत्कराम्बुजः ॥ ८३ ॥ अनर्घ्यरत्नमालया वनाख्यया च मालया । विलासिविस्तृतोरसा बभार च श्रियं प्रभुः ॥ ८४ ॥ स भूतिवत्सभूषणस्तनूदरे वलित्रयी । उदारमध्यभूषणो लसत्तटित्प्रभाम्बरः ॥ ॥ ८५ ॥ करीन्द्रसत्करोरुयुक्सुवृत्तजानुमण्डलः । क्रमाल्पवृत्तजंघकः सुरक्तपादपल्लवः ॥ ८६ ॥ लसद्धरिन्मणिद्युती रराज राघवोऽधिकम् । असंख्यसत्सुखार्णवः समस्तशक्तिसत्तनुः ॥ ८७ ॥ ज्ञानं नेत्राब्जयुग्मान्मुखवरकमलात्सर्ववेदार्थसारांस्तन्वा ब्रह्माण्डबाह्यान्तरमधिकरुचा भासयन्भासुरास्यः । सर्वाभीष्टाभये च स्वकरवरयुगेनार्थिनामादधानः प्रायाद्देवाधिदेवः स्वपदमभिमुखश्चोत्तराशां विशोकाम् ॥ ८८ ॥ दध्रे च्छत्रं हनूमान्स्रवदमृतमयं पूर्णचन्द्रायुताभं सीता सैवाखिलाक्ष्णां विषयमुपगता श्रीरिति ह्रीरथैका । द्वेधा भूता दुधाव व्यजनमुभयतः पूर्णचन्द्रांशुगौरं प्रोद्यद्भास्वत्प्रभाभा सकलगुणतनुर्भूषिता भूषणैः स्वैः ॥ ८९ ॥ साक्षाच्चक्रतनुस्तथैव भरतश्चक्रं दधद्दक्षिणेनायात्सव्यत एव शङ्खवरभृच्छङ्खात्मकः शत्रुहा । अग्रे ब्रह्मपुरोगमाः सुरगणा वेदाश्च सोंकारकाः पश्चात्सर्वजगज्जगाम रघुपं यान्तं निजं धाम तम् ॥ ९० ॥ तस्य सूर्यसुतपूर्ववानरा दक्षिणेन मनुजास्तु सव्यतः । रामजन्मचरितानि तस्य ते कीर्तयन्त उच्चकैर्द्रुतं ययुः ॥ ९१ ॥ गन्धर्वैर्गीयमानो

SGDF
Sri Gangeshwari Digital Foundation

विबुधमुनिगणैरब्जसंभूतिपूर्वैर्वेदोदारार्थवाग्भिः प्रणिहितसुमनाः सर्वदा स्तूयमानः । सर्वैर्भूतैश्च भक्त्या स्वनिमिषनयनैः कौतुकाद्वीक्ष्यमाणः प्रायाच्छेषगरुत्मदादिकनिजैः संसेवितं स्वं पदम् ॥ ९२ ॥ ब्रह्मरुद्रगरुडैः सशेषकैः प्रोच्यमानसुगुणोरुविस्तरः । आरुरोह विभुरम्बरं शनैस्ते च दिव्यवपुषोऽभवंस्तदा ॥ ९३ ॥

अथ ब्रह्मा हरिं स्तुत्वा जगादेदं वचो विभुम् । त्वदाज्ञया मया दत्तं स्थानं दशरथस्य हि ॥ ९४ ॥ मातॄणां चापि तल्लोकस्त्वयुताब्दादितोऽग्रतः । अनर्हायास्त्वयाऽऽज्ञप्ता कैकेय्या अपि सद्गतिः । स्तुत्वा तु भरतं नैषा गच्छेत निरयानिति ॥ ९५ ॥ तथापि सा यदावेशाच्चकार त्वय्यशोभनम् । निकृतिर्नाम सा क्षिप्ता मया तमसि शाश्वते ॥ ॥ ९६ ॥ कैकयी तु चलाँल्लोकान्प्राप्ता नैवाचलान्क्वचित् । पश्चाद्भक्तिमती यस्मात्त्वयि सा युक्तमेव तत् ॥ ९७ ॥ मन्थरा तु तमस्यन्धे पातिता दुष्टचारिणी । सीतार्थं ये त्वनिन्दन्स्त्वां ते च याता महत्तमः ॥ ॥ ९८ ॥ प्रायशो राक्षसाश्चैव त्वयि कृष्णत्वमागते । शेषा यास्यन्ति तच्छेषा अष्टाविंशे कलौ युगे ॥ ९९ ॥ गते चतुःसहस्राब्दे तमोगास्त्रिशतोत्तरे ॥ १०० ॥ अथ ये त्वत्पदाम्भोजमकरन्दकलिप्सवः । त्वया सहागतास्तेषां विधेहि स्थानमुत्तमम् ॥ १०१ ॥ अहं भवः सुरेशाद्याः किङ्करास्स्म तवेश्वर । यच्च कार्यमिहास्माभिस्तदप्याज्ञापयाशु नः ॥१०२॥ इत्युदीरितमाकर्ण्य शतानन्देन राघवः । जगाद भावगम्भीरं सुस्मिताधरपल्लवः ॥ १०३ ॥ जगद्गुरुत्वमादिष्टं मया ते कमलोद्भव । गुर्वादेशानुसारेण मयाऽऽदिष्टा च सद्गतिः ॥ १०४ ॥ अतस्त्वया प्रदेया हि लोका एषां मदाज्ञया । हृदि स्थितं च जानासि त्वमेवैकः सदा मम ॥ १०५ ॥ इतीरितो हरेर्भावविज्ञानी कंजसंभवः । पिपीलिकातृणान्तानां ददौ लोकाननुत्तमान् ॥ १०६ ॥ वैष्णवान्सन्ततत्वाच्च नाम्ना सान्तानिकान्विभुः । ते जरामृतिहीनाश्च सर्वदुःखविवर्जिताः ।

SGDF
Sri Gargeshwari Digital Foundation

संसारमुक्ता न्यवसंस्तत्र नित्यसुखाधिकाः ॥ १०७॥ ये तु देवा इहोद्भूता नृवानरशरीरिणः । ते सर्वे स्वांशितामापुस्तन्मैंदविविदावृते ॥ ॥ १०८ ॥ असुरावेशतस्तौ तु न राममनुजग्मतुः । पीतामृतौ पुरा यस्मान्मम्रतुर्न च तौ तदा ॥ १०९ ॥ तयोश्च तपसा तुष्टश्चक्रे तावजरामरौ । पुरा स्वयंभूस्तेनोभौ दर्पादमृतमन्थने ॥ ११० ॥ प्रसह्यापिबतां देवैर्देवांशत्वादुपेक्षितौ । पीतामृतेषु देवेषु युध्यमानेषु दानवैः । तैर्दत्तमात्महस्ते तु रक्षायै पीतमाशु तत् ॥ १११ ॥ तस्माद्दोषादापतुस्तावासुरं भावमूर्जितम् ॥ ११२॥ अङ्गदः कालतस्त्यक्त्वा देहमाप निजां तनुम् । रामाज्ञयैव कुर्वाणो राज्यं कुशसमन्वितः ॥ ११३ ॥ विभीषणश्च धर्मात्मा राघवाज्ञापुरस्कृतः । सेनापतिर्धनेशस्य कल्पमावीत्स राक्षसान् ॥ ११४ ॥ रामाज्ञया जाम्बवांश्च न्यवसत्पृथिवीतले । उत्पत्त्यर्थं जाम्बवत्यास्तदर्थं सुतपश्चरन् ॥ ११५ ॥

अथो रघूणां प्रवरः सुरार्चितः स्वयैकतन्वा न्यवसत्सुरालये । द्वितीयया ब्रह्मसदस्यधीश्वरस्तेनार्पितोऽथापरया निजालये ॥ ११६ ॥ तृतीयरूपेण निजं पदं प्रभुं व्रजन्तमुच्चैरनुगम्य देवताः । अगम्यमर्यादमुपेत्य च क्रमाद्विलोकयन्तोऽतिविदूरतोऽस्तुवन् ॥ ११७ ॥ ब्रह्मा मरुन्मारुतसूनुरीशः शेषो गरुत्मान्हरिजः शक्रकाद्याः । क्रमादनुव्रज्य तु राघवस्य शिरस्यथाज्ञां प्रणिधाय निर्ययुः ॥ ११८ ॥ स्वं स्वं च सर्वे सदनं सुरा ययुः पुरन्दराद्याश्च विरिञ्चपूर्वकाः । मरुत्सुतोऽथो बदरीमवाप्य नारायणस्यैव पदं सिषेवे ॥ ११९ ॥ समस्तशास्त्रोद्धरितं हरेर्वचो मुदा तदा श्रोत्रपुटेन सम्भरन् । वदंश्च तत्त्वं विबुधर्षभाणां सदा मुनीनां च सुखं ह्युवास ॥ १२० ॥ रामाज्ञया किंपुरुषेषु राज्यं चकार रूपेण तथाऽपरेण । रूपैस्तथान्यैश्च समस्तसद्मन्युवास विष्णोः सततं यथेष्टम् ॥ ॥ १२१ ॥ इत्थं स गायञ्छतकोटिविस्तरं रामायणं भारतपञ्चरात्रम् । वेदांश्च सर्वान्सहितब्रह्मसूत्रान्व्याचक्षाणो नित्यसुखोद्धरोऽभूत् ॥ १२२॥

SGDF
Sri Gangeshwari Digital Foundation

रामोऽपि सार्धं पवनात्मजेन स सीतया लक्ष्मणपूर्वकैश्च । तथा गरुत्मत्प्रमुखैश्च पार्षदैः संसेव्यमानो न्यवसत्पयोऽब्धौ ॥१२३॥ कदाचिदीशः सकलावतारानेकं विधायाहिपतौ च शेते । पृथक्च संव्यूह्य कदाचिदिच्छया रेमे रमेशोऽमितसद्गुणार्णवः ॥ १२४ ॥

इत्यशेषपुराणेभ्यः पञ्चरात्रेभ्य एव च । भारताच्चैव वेदेभ्यो महारामायणादपि ॥ १२५ ॥ परस्परविरोधस्य हानान्निर्णीय तत्त्वतः । युक्त्या बुद्धिबलाच्चैव विष्णोरेव प्रसादतः ॥ १२६ ॥ बहुकल्पानुसारेण मयेयं सत्कथोदिता । नैकग्रन्थाश्रया तस्मान्नाशङ्क्याऽत्र विरुद्धता ॥ ॥ १२७ ॥ क्वचिन्मोहायासुराणां व्यत्यासः प्रतिलोमता । उक्ता ग्रन्थेषु तस्माद्धि निर्णयोऽयं कृतो मया ॥ १२८ ॥ एवं च वक्ष्यमाणेषु नैवाशङ्क्या विरुद्धता । सर्वकल्पसमश्चायं पारम्पर्यक्रमः सदा ॥ १२९ ॥ पुंव्यत्यासेन चोक्तिः स्यात्पुराणादिषु कुत्रचित् । कृष्णामाह यथा कृष्णो धनञ्जयशरैर्हतान् ॥१३०॥ शतं दुर्योधनादींस्ते दर्शयिष्य इति प्रभुः । भीमसेनहतास्ते तु ज्ञायन्ते बहुवाक्यतः ॥ ॥ १३१ ॥ विस्तारे भीमनिहताः सङ्क्षेपेऽर्जुनपातिताः । उच्यन्ते बहवश्चान्ये पुंव्यत्याससमाश्रयात् ॥ १३२ ॥ विस्तारे कृष्णनिहता बलभद्रहता इति । उच्यन्ते च क्वचित्कालव्यत्यासोऽपि क्वचिद्भवेत् ॥ ॥१३३॥ यथा सुयोधनं भीमः प्राहसत्कृष्णसन्निधौ । इति वाक्येषु बहुषु ज्ञायन्ते निर्णयादपि ॥ १३४ ॥ अनिर्णये तु कृष्णस्य पूर्वमुक्ता गतिस्ततः । व्यत्यासास्त्वेवमाद्याश्च प्रातिलोम्यादयस्तथा ॥ १३५ ॥ दृश्यन्ते भारताद्येषु लक्षणग्रन्थतश्च ते । ज्ञायन्ते बहुभिर्वाक्यैर्निर्णयग्रन्थतस्तथा ॥ १३६ ॥ तस्माद्धि निर्णयग्रन्थानाश्रित्यैव च लक्षणम् । बहुवाक्यानुसारेण निर्णयोऽयं मया कृतः ॥ १३७ ॥ उक्तं लक्षणशास्त्रे च कृष्णद्वैपायनोदिते । त्रिभाषां यो न जानाति रीतीनां शतमेव च ॥ १३८ ॥ व्यत्यासादीन्सप्तभेदान्वेदाद्यर्थं तथा वदेत् । स याति

SGDF
Sri Gangeshwari Digital Foundation

निरयं घोरमन्यथाज्ञानसम्भवम् ॥ १३९ ॥ इत्यन्येषु च शास्त्रेषु तत्र तत्रोदितं बहु । व्यत्यासः प्रातिलोम्यं च गोमूत्री प्रघसस्तथा ॥१४०॥ उक्षणः सुधरः साधुः सप्तभेदाः प्रकीर्तिताः । इत्यादिलक्षणान्यत्र नोच्यन्तेऽन्यप्रसङ्गतः ॥ १४१ ॥ अनुसारेण तेषां तु निर्णयः क्रियते मया । तस्मान्निर्णयशास्त्रत्वाद्ग्राह्यमेतद्बुभूषुभिः ॥ १४२ ॥ इतीरिता रामकथा परा मया समस्तशास्त्रानुसृतेर्भवापहा । पठेदिमां यः शृणुयादथापि वा विमुक्तबन्धश्चरणं हरेर्व्रजेत् ॥ १४३ ॥ (१०२८) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीरामचरिते उत्तरकाण्डकथानिरूपणं नाम नवमोऽध्यायः ॥९॥

अथ दशमोऽध्यायः

॥ ॐ ॥ द्वापरेऽथ युगे प्राप्ते त्वष्टाविंशतिमे पुनः । स्वयम्भुशर्वशक्राद्या दुग्धाब्धेस्तीरमाययुः ॥ १ ॥ पयोऽब्धेरुत्तरं तीरमासाद्य विबुधर्षभाः । तुष्टुवुः पुण्डरीकाक्षमक्षयं पुरुषोत्तमम् ॥ २ ॥ नमो नमोऽगण्यगुणैकधाम्ने समस्तविज्ञानमरीचिमालिने । अनाद्यविज्ञानतमोनिहन्त्रे परामृतानन्दपदप्रदायिने ॥ ३ ॥ स्वदत्तमालाभुविपातकोपतो दुर्वाससः शापत आशु हि श्रिया । शक्रे विहीने दितिजैः पराजिते पुरा वयं त्वां शरणं गताः स्मः ॥ ४ ॥ त्वदाज्ञया बलिना सन्दधाना वराद्गिरीशस्य परैरचाल्यम् । वृन्दारका मन्दरमेत्य बाहुभिर्न शेकुरुद्धर्तुमिमे समेताः ॥५॥ तदा त्वया नित्यबलत्वहेतुतो योऽनन्तनामा गरुडस्तदंसके । उत्पाट्य चैकेन करेण मन्दरो निधापितस्तं स सह त्वयाऽवहत् ॥ ६ ॥ पुनः परीक्षद्भिरसौ गिरिः सुरैः सहासुरैरुन्नमितस्तदंसतः । व्यचूर्णयत्तानखिलान्पुनश्च ते त्वदीक्षया पूर्ववदुत्थिताः

SGDF
Sri Gargeshwari Digital Foundation

प्रभो ॥७॥ पुनश्च वामेन करेण वीश्वरे निधाय तं स्कन्धगतस्त्वमस्य । अगाः पयोऽब्धिं सहितः सुरासुरैर्मथ्ना च तेनाब्धिमथाप्यमथ्नाः ॥ ८ ॥ कृतश्च कद्रोस्तनयोऽत्र वासुकिर्नेत्रं त्वया कश्यपजः स नागराट् । ममन्थुरब्धिं सहितास्त्वया सुराः सहासुरा दिव्यपयोघृताधिकम् ॥ ९ ॥ नैच्छन्त पुच्छं दितिजा अमङ्गलं तदित्यथाग्रं जगृहुर्विषोल्बणम् । श्रान्तास्तु तेऽतो विबुधास्तु पुच्छं त्वया समेता जगृहुस्त्वदाश्रयाः ॥१०॥ अथातिभारादविशत्सुकाञ्चनो गिरिः स पातालमथ त्वमेव । तं कच्छपात्मा त्वभरः स्वपृष्ठे ह्यनन्यधार्यं पुरुलीलयैव ॥ ११ ॥ उपर्यधश्चात्मनि नेत्रगोत्रयोस्त्वया परेणाविशता समेधिताः । ममन्थुरब्धिं तरसा मदोत्कटाः सुरासुराः क्षोभितनक्रचक्रम् ॥ १२ ॥ श्रान्तेषु तेष्वेक उरुक्रमस्त्वं सुधारसाप्त्यै मुदितो ह्यमथ्नाः । तदा जगत्रासि विषं समुत्थितं त्वदाज्ञया वायुरधात्करे निजे ॥ १३ ॥ कलेः स्वरूपं तदतीव दुःसहं वराद्विधातुः सकलैश्च दुःस्पृशम् । करे विमथ्यास्तबलं विधाय ददौ स किञ्चिद्गिरिशाय वायुः ॥१४॥ स तत्पिबन्कण्ठगतेन तेन निपातितो मूर्च्छित आशु रुद्रः । हरेः करस्पर्शबलात्स संज्ञामवाप नीलोऽस्य गलस्तदासीत् ॥१५॥ अथ त्वदाज्ञां पुरतो निधाय निधाय पात्रे तपनीयरूपे । स्वयं त्वनिर्मथ्य बलोपपन्नं पपौ स वायुस्तदुतास्य जीर्णम् ॥ १६ ॥ अत्यल्पपानाच्च बभूव शूला शिवस्य शीर्ष्ण्यस्य करावशिष्टम् । अभूत्कलिः सर्वजगत्सु पूर्णं पीत्वा विकारो न बभूव वायोः ॥ १७ ॥ कलेः शरीरादभवन्कुनागाः सवृश्चिकाः श्वापदयातुधानाः । अथ त्वयाऽब्धौ तु विमथ्यमाने सुराऽभवत्तामसुरा अवापुः ॥ ॥ १८ ॥ उच्चैःश्रवा नाम तुरङ्गमोऽभूत्करी तथैरावतनामधेयः । अन्ये च दिक्पालगजा बभूवुर्वरं तथैवाप्सरसां सहस्रम् ॥ १९ ॥ तथाऽऽयुधान्याभरणानि चैव दिवौकसां पारिजातस्तरुश्च । तथैव साक्षात्सुरभिर्निशेशो बभूव तत्कौस्तुभं लोकसारम् ॥ २० ॥ अथेन्दिरा यद्यपि

SGDF
Sri Gargeshwari Digital Foundation

नित्यदेहा बभूव तत्रापरया स्वतन्वा । ततो भवान्दक्षिणबाहुना सुधा-
कमण्डलुं कलशं चापरेण ॥२१॥ प्रगृह्य तस्मान्निरगात्समुद्राद्धन्वन्तरि-
र्नाम हरिन्मणिद्युतिः । ततो भवद्धस्तगतं दितेः सुताः सुधाभरं कलशं
चापजह्रुः । मुक्तं त्वया शक्तिमतापि दैत्यान्सत्यच्युतान्कारयितुं
वधाय ॥ २२ ॥ ततो भवाननुपमसुत्तमं वपुर्बभूव दिव्यप्रमदात्मकं
त्वरन् । श्यामं नितम्बार्पितरत्नमेखलं जाम्बूनदाभाम्बरभृत्सुमध्यमम् ॥
॥ २३ ॥ बृहन्नितम्बं कलशोपमस्तनं सत्पुण्डरीकायतनेत्रमुज्ज्वलम् ।
समस्तसारं परिपूर्णसद्गुणं दृष्ट्वैव तत्सम्मुमुहुः सुरारयः ॥२४॥ परस्परं
तेऽमृतहेतुतोऽखिला विरुध्यमानाः प्रददुः स्म ते करे । समं सुधायाः
कलशं विभज्य निपाययास्मानिति वञ्चितास्त्वया ॥ २५ ॥ धर्मच्छलं
पापजनेषु धर्म इति त्वया ज्ञापयितुं तदोक्तम् । यद्यत्कृतं मे भवतां
यदीह संवाद एवोद्विभजे सुधामिमाम् ॥ २६ ॥ यथेष्टतोऽहं विभजामि
सर्वथा न विश्वसध्वं मयि केनचित्क्वचित् । इति प्रहस्याभिहितं निशम्य
स्त्रीभावमुग्धास्तु तथेति तेऽवदन् ॥ २७ ॥ ततश्च संस्थाप्य पृथक्सुरा-
सुरांस्तवातिरूपोच्चलितान्सुरेतरान् । सर्वान्भवद्दर्शन ईक्ष्य लज्जिताऽस्म्यहं
दृशो मीलयतेत्यवोचः ॥२८॥ निमीलिताक्षेष्वसुरेषु देवता न्यपाययः
साध्वमृतं ततः पुमान् । क्षणेन भूत्वा पिबतः सुधां शिरो राहोर्न्यकृन्तश्च
सुदर्शनेन ॥ २९ ॥ तेनामृतार्थं हि सहस्रजन्मसु प्रतप्य भूयस्तप
आरितो वरः । स्वयम्भुवस्तेन भवान्करेऽस्य बिन्दुं सुधां प्रास्य शिरो
जहार ॥३०॥ शिरस्तु तस्य ग्रहतामवाप सुरैः समाविष्टमथो सबाहुः ।
क्षिप्तः कबन्धोऽस्य शुभोदसागरे त्वया स्थितोऽद्यापि हि तत्र साम्प्रतः ॥
॥ ३१ ॥ अथासुराः प्रत्यपतन्नुदायुधाः समस्तशस्ते च हतास्त्वया
रणे । कलिस्तु स ब्रह्मवरादजेयो ऋते भवन्तं पुरुषेषु संस्थितः ॥३२॥
तस्यार्धदेहा समभूदलक्ष्मीस्तत्पुत्रका दोषगणाश्च सर्वशः । अथेन्दिरा
वक्षसि ते समास्थिता त्वत्कण्ठगं कौस्तुभमास धाता ॥ ३३ ॥ यथा-

SGDF
Sri Gargeshwari Digital Foundation

विभागं च सुरेषु दत्तास्त्वया तथाऽन्येऽपि हि तत्र जाताः । इत्थं त्वया साध्वमृतं सुरेषु दत्तं हि मोक्षस्य निदर्शनाय ॥ ३४ ॥ भवेद्धि मोक्षो नियतं सुराणां नैवासुराणां स कथञ्चन स्यात् । उत्साहयुक्तस्य च तत्प्रतीपं भवेद्धि राहोरिव दुःखरूपम् ॥ ३५ ॥ कलिः स्वयं ब्रह्म-वरादिदानीं विबाधतेऽस्मान्सकलाः प्रजाश्च । अज्ञानमिथ्यामतिरूपतोऽसौ प्रविश्य सज्ज्ञानविरुद्धरूपः ॥ ३६ ॥ त्वदाज्ञया तस्य वरोऽब्जजेन दत्तः स आविश्य शिवं चकार । कदागमांस्तस्य कुयुक्तिबाधां न हि त्वदन्यश्चरितुं समर्थः ॥ ३७ ॥ वेदाश्च सर्वे सहशास्त्रसङ्घा उत्सादिता-स्तेन न सन्ति तेऽद्य । तत्साधु भूमाववतीर्य वेदानुद्धृत्य शास्त्राणि कुरुष्व सम्यक् ॥ ३८ ॥ अदृश्यमज्ञेयमतर्क्यरूपं कलिं निलीनं हृदयेऽखिलस्य सच्छास्त्रशस्त्रेण निहत्य शीघ्रं पदं निजं देहि महाजनस्य ॥ ३९ ॥ ऋते भवन्तं न हि तं निहन्ता त्वमेक एवाखिलशक्तिपूर्णः । ततो भवन्तं शरणं गता वयं तमोनिहत्यै निजबोधविग्रहम् ॥ ४० ॥

इतीरितस्तैरभयं प्रदाय सुरेश्वराणां परमोऽप्रमेयः । प्रादुर्बभूवा-मृतभूरिलायां विशुद्धविज्ञानघनस्वरूपः ॥ ४१ ॥ वसिष्ठनामा कमलो-द्भवात्मजः सुतोऽस्य शक्तिस्तनयः पराशरः । तस्योत्तमं सोऽपि तपोऽ-चरद्धरिः सुतो मम स्यादिति तद्धरिर्ददौ ॥ ४२ ॥ उवाच चैनं भगवान्सुतोषितो वसोर्मदीयस्य सुताऽस्ति शोभना । वने मृगार्थं चरतोऽस्य वीर्यं पपात भार्यां मनसा गतस्य ॥ ४३ ॥ तच्छ्येनहस्ते प्रददौ स तस्मै दातुं तदन्येन तु युध्यतोऽपतत् । जग्रास तन्मत्स्यवधूर्य-मस्वसुर्जलस्थमेनां जगृहुः स्म दाशाः ॥ ४४ ॥ तद्गर्भतोऽभून्मिथुनं स्वराज्ञे न्यवेदयन्सोऽपि वसोः समार्पयत् । पुत्रं समादाय सुतां स तस्मै ददौ सुतोऽभूदथ मत्स्यराजः ॥ ४५ ॥ कन्या तु सा दाशराजस्य सद्मन्यवर्धतातीवसुरूपयुक्ता । नाम्ना तु सा सत्यवतीति तस्यां तवात्म-जोऽहं भविताऽस्म्यजोऽपि ॥ ४६ ॥ इतीरितश्चक्रधरेण तां मुनिर्जगाम

SGDF
Sri Gargeshwari Digital Foundation

मार्तण्डसुतां समुद्रगाम् । उत्तारयन्तीमथ तत्र विष्णुः प्रादुर्बभूवाशु विशुद्धचिद्घनः ॥४७॥ विदोषविज्ञानसुखैकरूपोऽप्यजो जनान्मोहयितुं मृषैव। योषित्सु पुंसो ह्यजनीव दृश्यते न जायते क्वापि बलादिविग्रहः ॥ ॥४८॥ यथा नृसिंहाकृतिराविरासीत्स्तम्भात्तथा नित्यतनुत्वतो विभुः। आविर्भवेद्योषिति नो मलोत्थस्तथापि मोहाय निदर्शयेत्तथा ॥ ४९ ॥ स्त्रीपुंप्रसङ्गात्परतो यतो हरिः प्रादुर्भवत्येष विमोहयञ्जनम्। अतो मलोत्थोऽयमिति स्म मन्यते जनोऽशुभः पूर्णगुणैकविग्रहम् ॥ ५० ॥ द्वीपे भगिन्याश्च यमस्य विश्वकृत्प्रकाशते ज्ञानमरीचिमण्डलः। प्रभासयन्नण्डबहिस्तथान्तः सहस्रलक्षामितभानुदीधितिः ॥ ५१ ॥ अगण्यदिव्योरुगुणार्णवः प्रभुः समस्तविद्याधिपतिर्जगद्गुरुः। अनन्तशक्तिर्जगदीश्वरेश्वरः समस्तदोषातिविदूरविग्रहः ॥ ५२ ॥ शुभमरकतवर्णो रक्तपादाब्जनेत्राधरकर(नख)रसनाग्रश्चक्रशङ्खाब्जरेखः। रविकरवरगौरं चर्म चैणं वसानस्तटिदमलजटासन्दीप्तचूडं दधानः ॥ ५३ ॥ विस्तीर्णवक्षाः कमलायताक्षो बृहद्भुजः कम्बुसमानकण्ठः। समस्तवेदान्मुखतः समुद्गिरन्ननन्तचन्द्राधिककान्तिसन्मुखः ॥ ५४ ॥ प्रबोधमुद्राभयदोर्द्वयान्वितो यज्ञोपवीताजिनमेखलोल्लसन्। दृशा महाऽज्ञानभुजङ्गदष्टमुज्जीवयानो जगदत्यरोचत ॥ ५५ ॥ स लोकधर्माभिरिरक्षया पितुर्द्विजत्वमाप्याशु पितुर्ददौ निजम्। ज्ञानं तयोः संस्मृतिमात्रतः सदा प्रत्यक्षभावं वरमात्मनो ददौ ॥ ५६ ॥

द्वैपायनः सोऽथ जगाम मेरुं चतुर्मुखाद्यैरनुगम्यमानः। उद्धृत्य वेदानखिलान्सुरेभ्यो ददौ मुनिभ्यश्च यथाऽऽदिसृष्टौ ॥५७॥ सर्वाणि शास्त्राणि तथैव कृत्वा विनिर्णयं ब्रह्मसूत्रं चकार। तच्छुश्रुवुर्ब्रह्मगिरीशमुख्याः सुरा मुनीनां प्रवराश्च तस्मात् ॥ ५८ ॥ समस्तशास्त्रार्थनिदर्शनात्मकं चक्रे महाभारतनामधेयम्। वेदोत्तमं तच्च विधातृशङ्करप्रधानकैस्तन्मुखतः सुरैः श्रुतम् ॥५९॥ अथो गिरीशादिमनोऽनुशायी कलि-

SGDF
Sri Gargeshwari Digital Foundation

र्ममाराशु सुवाङ्मयैः शरैः । निकृत्तशीर्षो भगवन्मुखेरितैः सुराश्च सज्ज्ञानसुधारसं पपुः ॥ ६० ॥ अथो मनुष्येषु तथाऽसुरेषु रूपान्तरैः कलिरेवावशिष्टः । ततो मनुष्येषु च सत्सु संस्थितो विनाश्य इत्येव हरिर्व्यचिन्तयत् ॥ ६१ ॥ ततो नृणां कालबलात्सुमन्दमायुर्मतिं कर्म च वीक्ष्य कृष्णः । विव्यास वेदान्स विभुश्चतुर्धा चक्रे तथा भागवतं पुराणम् ॥ ६२ ॥ ये ये च सन्तस्तमसानुविष्टास्तांस्तान्सुवाक्यैस्तमसो विमुञ्चन् । चचार लोकान्स पथि प्रयान्तं कीटं व्यपश्यत्तमुवाच कृष्णः ॥ ६३ ॥ भवस्व राजा कुशरीरमेतत्त्यक्त्वेति नैच्छत्तदसौ ततस्तम् । अत्यक्तदेहं नृपतिं चकार पुरा स्वभक्तं वृषलं सुलुब्धम् ॥ ॥ ६४ ॥ लोभात्स कीटत्वमुपेत्य कृष्णप्रसादतश्चाशु बभूव राजा । तदैव तं सर्वनृपाः प्रणेमुर्ददुः करं चास्य यथैव वैश्याः ॥ ६५ ॥ उवाच तं भगवान्मुक्तिमस्मिंस्तव क्षणे दातुमहं समर्थः । तथापि सीमार्थमवाप्य विप्रतनुं विमुक्तो भव मत्प्रसादात् ॥ ६६ ॥ ज्ञानं च तस्मै विमलं ददौ सः महीं च सर्वां बुभुजे तदन्ते । त्यक्त्वा तनुं विप्रवरत्वमेत्य पदं हरेराप सुतत्त्ववेदी ॥ ६७ ॥ एवं बहून्संसृतिबन्धतः प्रभुर्व्यमोचयद्व्यासतनुर्जनार्दनः । बहून्यचिन्त्यानि च तस्य कर्माण्यशेषदेवेशसदोदितानि ॥ ६८ ॥

अथास्य पुत्रत्वमवाप्तुमिच्छंश्चचार रुद्रः सुतपस्तदीयम् । ददौ च तस्मै भगवान्वरं तं स्वयं च तप्त्वेव तपो विमोहयन् ॥ ६९ ॥ विमोहनायासुरसर्गिणां प्रभुः स्वयं करोतीव तपः प्रदर्शयेत् । कामादिदोषांश्च मृषैव दर्शयेन्न तावता तस्य हि सन्ति कुत्रचित् ॥ ७० ॥ ततस्त्वरण्योः स बभूव पुत्रकः शिवोऽस्य सोऽभूच्छुकनामधेयः । शुकी हि भूत्वा ह्यगमद् घृताची व्यासं विमथ्नन्तमुतारणीं तम् ॥ ७१ ॥ अकामयन्कामुकवत्स भूत्वा तयाऽर्थितस्तं शुकनामधेयम् । चक्रे ह्यरण्योस्तनयं च सृष्ट्वा विमोहयंस्तत्त्वमार्गेष्वयोग्यान् ॥ ७२ ॥ शुकं

SGDF
Sri Gargeshwari Digital Foundation

तमाशु प्रविवेश वायुर्व्यासस्य सेवार्थमथास्य सर्वम् । ज्ञानं ददौ भगवान्सर्ववेदान्सभारतं भागवतं पुराणम् ॥ ७३ ॥ शेषोऽथ पैलं मुनिमाविशत्तदा वीशः सुमन्तुमपि वारुणिं मुनिम् । ब्रह्माऽविशत्तमुत वैशम्पायनं शक्रश्च जैमिनिमथाविशद्विभुः ॥ ७४ ॥ कृष्णस्य पादपरिसेवनोत्सुकाः सुरेश्वरा विविशुराशु तान्मुनीन् । समस्तविद्याः प्रतिपाद्य तेष्वसौ प्रवर्तकांस्तान्विदधे हरिः पुनः ॥ ७५ ॥ ऋचां प्रवर्तकं पैलं यजुषां च प्रवर्तकम् । वैशम्पायनमेवैकं द्वितीयं सूर्यमेव च ॥ ७६ ॥ चक्रेऽथ जैमिनिं साम्नामथर्वाङ्गिरसामपि । सुमन्तुं भारतस्यापि वैशम्पायनमादिशत् ॥७७॥ प्रवर्तने मानुषेषु गन्धर्वादिषु चात्मजम् । नारदं पाठयित्वा च देवलोकप्रवृत्तये ॥ ७८ ॥ आदिशत्ससृजे सोऽथ रोमाश्चाद्रोमहर्षणम् । तं भारतपुराणानां महारामायणस्य च ॥ ७९ ॥ पञ्चरात्रस्य कृत्स्नस्य प्रवृत्त्यर्थमथादिशत् । तमाविशत्कामदेवः कृष्णसेवासमुत्सुकः ॥ ८० ॥ स तस्मै ज्ञानमखिलं ददौ द्वैपायनः प्रभुः । सनत्कुमारप्रमुखांश्चक्रे योगप्रवर्तकान् ॥ ८१ ॥ भृग्वादीन्कर्मयोगस्य ज्ञानं दत्वाऽमलं शुभम् । जैमिनिं कर्ममीमांसाकर्तारमकरोत्प्रभुः ॥८२॥ देवमीमांसकाद्यन्तं कृत्वा पैलमथादिशत् । शेषं च मध्यकरणे पुराणान्यथ चाकरोत् ॥ ८३ ॥ शैवान्पाशुपताच्चक्रे संशयार्थं सुरद्विषाम् । वैष्णवान्पञ्चरात्राच्च यथार्थज्ञानसिद्धये ॥ ८४ ॥ ब्राह्मांश्च वेदतश्चक्रे पुराणग्रन्थसङ्ग्रहान् । एवं ज्ञानं पुनः प्रापुर्देवाश्च ऋषयस्तथा ॥ ८५ ॥ सनत्कुमारप्रमुखा योगिनो मानुषास्तथा । कृष्णद्वैपायनात्प्राप्य ज्ञानं ते मुमुदुः सदा ॥ ८६ ॥ समस्तविज्ञानगभस्तिचक्रं वितत्य विज्ञानमहादिवाकरः । निरस्य चाज्ञानतमो जगत्ततं प्रभासते भानुरिवावभासयन् ॥ ८७ ॥ चतुर्मुखेशानसुरेन्द्रपूर्वकैः सदा सुरैः सेवितपादपल्लवः । प्रकाशयंस्तेषु सदाऽऽत्मगुह्यं मुमोद मेरौ च तथा बदर्याम् ॥ ८८ ॥ (१११६) ॥ इति श्रीमदानन्दतीर्थ-

भगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये व्यासावतारकथानिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्यायः

॥ ॐ ॥ शशाङ्कपुत्रादभवत्पुरूरवास्तस्यायुरायोर्नहुषो ययातिः । तस्यास पत्नीयुगलं सुताश्च पञ्चाभवन्विष्णुपदैकभक्ताः ॥ १ ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत । द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ २ ॥ यदोर्वंशे चक्रवर्ती कार्तवीर्यार्जुनोऽभवत् । विष्णोर्दत्तात्रेयनाम्नः प्रसादाद्योगवीर्यवान् ॥ ३ ॥ तस्यान्ववाये यदवो बभूवुर्विष्णुसंश्रयाः । पुरोर्वंशे तु भरतश्चक्रवर्ती हरिप्रियः ॥ ४ ॥ तद्वंशजः कुरुर्नाम प्रतीपोऽभूत्तदन्वये । प्रतीपस्याभवन्पुत्रास्त्रयस्त्रेताग्निवर्चसः ॥ ५ ॥ देवापिरथ बाह्लीको गुणज्येष्ठश्च शन्तनुः । त्वग्दोषयुक्तो देवापिर्जगाम तपसे वनम् ॥ ६ ॥ विष्णोः प्रसादात्स कृते युगे राजा भविष्यति । पुत्रिकापुत्रतां यातो बाह्लीको राजसत्तमः ॥ ७ ॥ हिरण्यकशिपोः पुत्रः प्रह्लादो भगवत्प्रियः । वायुना च समाविष्टो महाबलसमन्वितः ॥ ८ ॥ येनैव जायमानेन तरसा भूर्विदारिता । भूभारक्षपणे विष्णोरङ्गतामाप्तुमेव सः ॥ ९ ॥ प्रतीपपुत्रतामाप्य बाह्लीकेष्वभवत्पतिः । रुद्रेषु पत्रतापाख्यः सोमदत्तोऽस्य चात्मजः ॥१०॥ अजैकपादहिर्बुध्निर्विरूपाक्ष इति त्रयः । रुद्राणां सोमदत्तस्य बभूवुः प्रथिताः सुताः ॥ ११ ॥ विष्णोरेवाङ्गतामाप्तुं भूरिर्भूरिश्रवाः शलः । शिवादिसर्वरुद्राणामावेशाद्वरतस्तथा ॥ १२ ॥ भूरिश्रवा अतिबलस्तत्रासीत्परमास्त्रवित् । तदर्थं हि तपश्चीर्णं सोमदत्तेन शम्भवे ॥१३॥ दत्तो वरश्च तेनास्य त्वत्प्रतीपाभिभूतिकृत् । बलवीर्यगुणोपेतो नाम्ना

SGDF
Sri Gangeshwari Digital Foundation

तमाशु प्रविवेश वायुर्व्यासस्य सेवार्थमथास्य सर्वम् । ज्ञानं ददौ भगवान्सर्ववेदान्सभारतं भागवतं पुराणम् ॥ ७३ ॥ शेषोऽथ पैलं मुनिमाविशत्तदा वीशः सुमन्तुमपि वारुणिं मुनिम् । ब्रह्माऽविशत्तमुत वैशम्पायनं शक्रश्च जैमिनिमथाविशद्विभुः ॥ ७४ ॥ कृष्णस्य पादपरिसेवनोत्सुकाः सुरेश्वरा विविशुराशु तान्मुनीन् । समस्तविद्याः प्रतिपाद्य तेष्वसौ प्रवर्तकांस्तान्विदधे हरिः पुनः ॥ ७५ ॥ ऋचां प्रवर्तकं पैलं यजुषां च प्रवर्तकम् । वैशम्पायनमेवैकं द्वितीयं सूर्यमेव च ॥ ७६ ॥ चक्रेऽथ जैमिनिं साम्नामथर्वाङ्गिरसामपि । सुमन्तुं भारतस्यापि वैशम्पायनमादिशत् ॥७७॥ प्रवर्तने मानुषेषु गन्धर्वादिषु चात्मजम् । नारदं पाठयित्वा च देवलोकप्रवृत्तये ॥ ७८ ॥ आदिशत्ससृजे सोऽथ रोमाश्चाद्रोमहर्षणम् । तं भारतपुराणानां महारामायणस्य च ॥ ७९ ॥ पञ्चरात्रस्य कृत्स्नस्य प्रवृत्त्यर्थमथादिशत् । तमाविशत्कामदेवः कृष्णसेवासमुत्सुकः ॥ ८० ॥ स तस्मै ज्ञानमखिलं ददौ द्वैपायनः प्रभुः । सनत्कुमारप्रमुखांश्चक्रे योगप्रवर्तकान् ॥ ८१ ॥ भृग्वादीन्कर्मयोगस्य ज्ञानं दत्वाऽमलं शुभम् । जैमिनिं कर्ममीमांसाकर्तारमकरोत्प्रभुः ॥८२॥ देवमीमांसकाद्यन्तं कृत्वा पैलमथादिशत् । शेषं च मध्यकरणे पुराणान्यथ चाकरोत् ॥ ८३ ॥ शैवान्पाशुपताच्चक्रे संशयार्थं सुरद्विषाम् । वैष्णवान्पञ्चरात्राच्च यथार्थज्ञानसिद्धये ॥ ८४ ॥ ब्राह्मांश्च वेदतश्चक्रे पुराणग्रन्थसङ्ग्रहान् । एवं ज्ञानं पुनः प्रापुर्देवाश्च ऋषयस्तथा ॥ ८५ ॥ सनत्कुमारप्रमुखा योगिनो मानुषास्तथा । कृष्णद्वैपायनात्प्राप्य ज्ञानं ते मुमुदुः सदा ॥ ८६ ॥ समस्तविज्ञानगभस्तिचक्रं विताय विज्ञानमहादिवाकरः । निरस्य चाज्ञानतमो जगत्ततं प्रभासते भानुरिवावभासयन् ॥ ८७ ॥ चतुर्मुखेशानसुरेन्द्रपूर्वकैः सदा सुरैः सेवितपादपल्लवः । प्रकाशयंस्तेषु सदाऽऽत्मगुह्यं मुमोद मेरौ च तथा बदर्याम् ॥ ८८ ॥ (१११६) ॥ इति श्रीमदानन्दतीर्थ-

SGDF
Sri Gangeshwari Digital Foundation

भगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये व्यासावतारकथानिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्यायः

॥ ॐ ॥ शशाङ्कपुत्रादभवत्पुरूरवास्तस्यायुरायोर्नहुषो ययातिः । तस्यास पत्नीयुगलं सुताश्च पञ्चाभवन्विष्णुपदैकभक्ताः ॥ १ ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत । द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ २ ॥ यदोर्वंशे चक्रवर्ती कार्तवीर्यार्जुनोऽभवत् । विष्णोर्दत्तात्रेयनाम्नः प्रसादाद्योगवीर्यवान् ॥ ३ ॥ तस्यान्ववाये यदवो बभूवुर्विष्णुसंश्रयाः । पुरोर्वंशे तु भरतश्चक्रवर्ती हरिप्रियः ॥ ४ ॥ तद्वंशजः कुरुर्नाम प्रतीपोऽभूत्तदन्वये । प्रतीपस्याभवन्पुत्रास्त्रयस्त्रेताग्निवर्चसः ॥ ५ ॥ देवापिरथ बाह्लीको गुणज्येष्ठश्च शन्तनुः । त्वग्दोषयुक्तो देवापिर्जगाम तपसे वनम् ॥ ६ ॥ विष्णोः प्रसादात्स कृते युगे राजा भविष्यति । पुत्रिकापुत्रतां यातो बाह्लीको राजसत्तमः ॥ ७ ॥ हिरण्यकशिपोः पुत्रः प्रह्लादो भगवत्प्रियः । वायुना च समाविष्टो महाबलसमन्वितः ॥ ८ ॥ येनैव जायमानेन तरसा भूर्विदारिता । भूभारक्षपणे विष्णोरङ्गतामाप्तुमेव सः ॥ ९ ॥ प्रतीपपुत्रतामाप्य बाह्लीकेष्वभवत्पतिः । रुद्रेषु पत्रतापाख्यः सोमदत्तोऽस्य चात्मजः ॥१०॥ अजैकपादहिर्बुध्निर्विरूपाक्ष इति त्रयः । रुद्राणां सोमदत्तस्य बभूवुः प्रथिताः सुताः ॥ ११ ॥ विष्णोरेवाङ्गतामाप्तुं भूरिर्भूरिश्रवाः शलः । शिवादिसर्वरुद्राणामावेशाद्वरतस्तथा ॥ १२ ॥ भूरिश्रवा अतिबलस्तत्रासीत्परमास्त्रवित् । तदर्थं हि तपश्चीर्णं सोमदत्तेन शम्भवे ॥१३॥ दत्तो वरश्च तेनास्य त्वत्प्रतीपाभिभूतिकृत् । बलवीर्यगुणोपेतो नाम्ना

SGDF
Sri Gangeshwari Digital Foundation

भूरिश्रवाः सुतः ॥१४॥ भविष्यति मयाऽऽविष्टो यज्ञशील इति स्म ह। तेन भूरिश्रवा जातः सोमदत्तसुतो बली ॥ १५ ॥

पूर्वोदधेस्तीरगतेऽब्जसम्भवे गङ्गायुतः पर्वणि घूर्णितोऽब्धिः। अवाक्षिपत्तस्य तनौ निजोदबिन्दुं शशापैनमथाब्जयोनिः ॥ १६ ॥ महाभिषङ्नामनरेश्वरस्त्वं भूत्वा पुनः शन्तनुनामधेयः। जनिष्यसे विष्णुपदी तथैषा तत्रापि भार्या भवतो भविष्यति ॥ १७ ॥ शान्तो भवेत्येव मयोदितस्त्वं तनुत्वमाप्तोऽसि ततश्च शन्तनुः। इतीरितः सोऽथ नृपो बभूव महाभिषङ्नाम हरेः पदाश्रयः ॥ १८ ॥ स तत्र भुक्त्वा चिरकालमुर्वीं तनुं विहायाप सदो विधातुः। तत्रापि तिष्ठन्सुरवृन्दसन्निधौ ददर्श गङ्गां श्लथिताम्बरां स्वकाम् ॥१९॥ अवाङ्मुखेषु द्युसदस्सु गङ्गां निरीक्षमाणं पुनरात्मसम्भवः। उवाच भूमौ नृपतिर्भवाशु शप्तो यथा त्वं हि पुरा मयैव ॥ २० ॥ इतीरितस्तत्क्षणतः प्रतीपाद्बभूवनाम्ना नृपतिश्च शन्तनुः। अवाप्य गङ्गां दयितां स्वकीयां तया मुमोदाब्दगणान्बहूंश्च ॥२१॥ अथाष्टमो वसुरासीद्द्युनामा वराङ्गिनाऽस्य बभूव भार्या। बभूव तस्याश्च सखी नृपस्य सुबिन्दनाम्नो दयिता सनाम्नी ॥ २२ ॥ तस्या जरामृतिविध्वंसहेतोर्वसिष्ठधेनुं स्वमृतं क्षरन्तीम्। जरापहां नन्दिनिनामधेयां बद्धुं पतिं चोदयामास देवी ॥ ॥ २३ ॥ तया द्युनामा स वसुः प्रचोदितो भ्रातृस्नेहात्सप्तभिरन्वितोऽपरैः। बबन्ध तां गामथ तान्छशाप वसिष्ठसंस्थः कमलोद्भवः प्रभुः ॥ ॥ २४ ॥ अधर्मवृत्ताः प्रतियात मानुषीं योनिं द्रुतं यत्कृते सर्व एव। धर्मच्युताः स तथाष्टायुराप्यतामन्ये पुनः क्षिप्रमथो विमोक्ष्यथ ॥२५॥ प्रचोदयामास च या कुमार्गे पतिं हि साम्बेति नरेषु जाता। अभर्तृका पुंस्त्वसमाश्रयेण पत्युर्मृतौ कारणत्वं व्रजेत ॥२६॥ भवत्वसौ ब्रह्मचर्यैकनिष्ठो महान्विरोधश्च तयोर्भवेत। स गर्भवासाष्टकदुःखमेव समाप्नुतां शरतल्पे शयानः ॥ २७ ॥ मृत्यष्टकोत्थामपि वेदनां स प्राप्नोतु

SGDF
Sri Gangeshwari Digital Foundation

शस्त्रैर्बहुधा निकृत्तः । इतीरितास्ते कमलोद्भवं तं ज्ञात्वा समुत्सृज्य च गां प्रणेमुः ॥ २८ ॥ न मानुषं गर्भमवाप्नुमो वयं भवत्वयं सर्ववित्कीर्तिमांश्च । महास्त्रवेत्ता भवदंशयुक्तस्तथा बलं नोऽखिलानामुपैतु ॥ ॥ २९ ॥ इतीरितेऽस्त्वित्युदिताः स्वयम्भुवा वसिष्ठसंस्थेन सुरापगां ययुः । ऊचुस्तथैनामुदरे वयं ते जायेमहि क्षिप्रमस्मान्हन त्वम् ॥३०॥ इतीरिता सा वरमाशु वव्रे तेभ्योऽप्यपापत्वमथाप्रियत्वम् । तेषां तथैवात्मन एकमेषां दीर्घायुषं तान्सुषुवेऽथ शन्तनोः ॥३१॥ अविघ्नतस्तान्विनिहन्तुमेव पुरा प्रतीपस्य हि दक्षिणोरुम् । समाश्रिता कामिनीव त्वकामा तत्पुत्रभार्या भवितुं विडम्बात् ॥ ३२ ॥ तेनैव चोक्ता भव मे सुतस्य भार्या यतो दक्षिणोरुस्थितासि । भागो हि दक्षो दुहितुः स्नुषाया भार्याभागो वाम इति प्रसिद्धः ॥ ३३ ॥ उवाच सा तं न तु मां सुतस्ते काऽसीति पृच्छेन्न तु मा निवारयेत् । अयोग्यकर्त्रीमपि कारणं च मत्कर्मणो नैव पृच्छेत्कदाचित् ॥ ३४ ॥ यदा त्रयाणामपि चैकमेष करोति गच्छेयमहं विसृज्य । तदा त्वदीयं सुतमित्युदीरिते तथेति राजाऽप्यवदत्प्रतीपः ॥ ३५ ॥ तथैव पुत्राय च तेन तद्वचो वधूक्तमुक्तं वचनाद्द्युनद्याः । कनीयसे सा ह्यवदत्सुतस्ते नान्यः पतिः शन्तनुरेव मे वृतः ॥ ३६ ॥ ततस्तु सा शन्तनुतोऽष्टपुत्रानवाप्य सप्त न्यहनत्तथाष्टमम् । गन्तुं ततो मतिमाधाय हन्तुमिवोद्योगं सा हि मृषा चकार ॥ ३७ ॥ अवस्थितिर्नातिसुखाय मानुषे यतः सुराणामत एव गन्तुम् । ऐच्छन्न तस्या हि बभूव मानुषो देहो नरोत्थो हि तदास शन्तनोः ॥ ३८ ॥ तां पुत्रनिधनोद्युक्तां न्यवारयत शन्तनुः । काऽसि त्वं हेतुना केन हंसि पुत्रान्नृशंसवत् ॥ ३९ ॥ रूपं सुरवरस्त्रीणां तव तेन न पातकम् । भवेत्कर्म त्वदीयं तन्महत्कारणमत्र हि ॥ ४० ॥ तत्कारणं वद शुभे यदि मच्छ्रोत्रमर्हति । इतीरिताऽवदत्सर्वं प्रययौ च सुरापगा ॥४१॥ न धर्मो देवतानां हि ज्ञातवासश्चिरं नृषु । कारणादेव

SGDF
Sri Gurgeshwari Digital Foundation

हि सुरा नृषु वासं प्रकुर्वते ॥ ४२ ॥ कारणापगमे यान्ति धर्मोऽप्येषां तथाविधः । अदृश्यत्वमसंस्पर्शो ह्यसम्भाषणमेव च ॥ ४३ ॥ सुरैरपि नृजातैस्तु गुह्यधर्मो दिवौकसाम् । अतः सा वरुणं देवं पूर्वभर्तारमप्यमुम् ॥ ४४ ॥ नृजातं शन्तनुं त्यक्त्वा प्रययौ वरुणालयम् । सुतमष्टममादाय भर्तुरेवाभ्यनुज्ञया ॥ वधोद्योगान्निवृत्ता सा ददौ पुत्रं बृहस्पतौ ॥ ४५ ॥ देवव्रतोऽसावनुशासनाय मात्रा दत्तो देवगुरौ शतार्धम् । संवत्सराणामखिलांश्च वेदान्समभ्यसत्तद्धशगान्तरात्मा ॥४६॥ ततश्च मात्रा जगतां गरीयस्यनन्तपारेऽखिलसद्गुणार्णवे । रामे भृगूणामधिपे प्रदत्तः शुश्राव तत्त्वं च शतार्धवर्षम् ॥ ४७ ॥ स पञ्चविंशत्पुनरब्दकानामस्त्राणि चाभ्यस्य पतेर्भृगूणाम् । मात्रा समानीय तटे निजे तु संस्थापितः प्रार्पयितुं स्वपित्रे ॥ ४८ ॥ स तत्र बध्वा शरपञ्जरेण गङ्गां विजह्रेऽस्य पिता तदैव । व्रजन्मृगार्थी तृषितोऽवलोकयन् गङ्गामतोयामभवत्सुविस्मितः ॥४९॥ स मार्गयामास ततोऽस्य हेतुं ज्ञप्त्यै तदा स्वं च ददर्श सूनुम् । क्रीडन्तमस्त्रेण बभूव सोऽपि क्षणाददृश्यः पितृदर्शनादनु ॥ ५० ॥ मीमांसमानं तमवेक्ष्य गङ्गा सुतं समादाय पतिं जगाद । अयं सुतस्ते परमास्त्रवेत्ता समर्पितो वीर्यबलोपपन्नः ॥५१॥ अस्याग्रजाः स्वां स्थितिमेव याता हरेः पदाम्भोजसुपाविते जले । तनूर्मदीये प्रणिधाय तस्मात्तान्मा शुचोऽनेन च मोदमानः ॥ ५२ ॥ इति प्रदायामुमदृश्यतामगाद्गङ्गा तमादाय ययौ गृहं स्वकम् । राजाभिषिच्याथ च यौवराज्ये मुमोद तत्सद्गुणतर्पितो भृशम् ॥५३॥ पुनः स पित्रानुमतो बृहस्पतेरवाप वेदान्पुरुषायुषोऽर्धतः । रामात्तथास्त्राणि पुनस्त्ववाप तावद्भिरब्दैस्त्रिशतैश्च तत्त्वम् ॥ ५४ ॥ स सर्ववित्त्वं समवाप्य रामात्समस्तविद्याधिपतेर्गुणार्णवात् । पितुः समीपं समवाप्य तं च शुश्रूषमाणः प्रमुमोद वीरः ॥ ५५ ॥

यदैव गङ्गा सुषुवेऽष्टमं सुतं तदैव यातो मृगयां स शन्तनुः ।

SGDF
Sri Gargeshwari Digital Foundation

शरद्वतो जातमपश्यदुत्तमं वने विसृष्टं मिथुनं त्वयोनिजम् ॥ ५६ ॥
शरद्वांस्तु तपः कुर्वन्ददर्श सहसोर्वशीम् । चस्कन्द रेतस्तस्याथ शरस्तम्बे
ततोऽभवत् ॥ ५७ ॥ विष्कम्भो नाम रुद्राणां भूभारहरणेऽङ्गताम् ।
हरेः प्राप्तुं तथा तारा भार्या या हि बृहस्पतेः ॥ ५८ ॥ तावुभौ
शन्तनुर्दृष्ट्वा कृपाविष्टः स्वकं गृहम् । निनाय नाम चक्रेऽथ कृपाया
विषयौ यतः ॥ ५९ ॥ कृपः कृपीति स कृपस्तपो विष्णोश्चचार ह ।
तस्य प्रीतस्तदा विष्णुः सर्वलोकेश्वरेश्वरः ॥ ६० ॥ प्रादादेष्यत्सप्त-
ऋषित्वमायुः कल्पान्तमेव च । स शन्तनुगृहेऽतिष्ठन्देवव्रतसखाऽ-
भवत् ॥ ६१ ॥ पुत्रवच्छन्तनोश्चासीत्स च पुत्रवदेव तत् । मिथुनं
पालयामास कृपोऽप्यस्त्राण्यवाप च ॥ ६२ ॥ सर्ववेदानधिजगौ सर्व-
शास्त्राणि कौशिकात् । तत्त्वज्ञानं तथा व्यासादाप्य सर्वज्ञतां गतः ॥
॥ ६३ ॥ यदाभिजातः स कृपस्तदैव बृहस्पतेः सूनुरगाच्च गङ्गाम् ।
स्नातुं घृताचीं स ददर्श तत्र श्लथद्दुकूलां सुरवर्यकामिनीम् ॥ ६४ ॥
तद्दर्शनात्स्कन्नमथेन्द्रियं स द्रोणे दधाराशु ततोऽभवत्स्वयम् । अम्भोज-
जावेशयुतो बृहस्पतिः कर्तुं हरेः कर्म भुवो भरोद्धृतौ ॥६५॥ द्रोणेति
नामास्य चकार तातो मुनिर्भरद्वाज उतास्य वेदान् । अध्यापयामास
स शास्त्रसङ्घान्सर्वज्ञतामाप च सोऽचिरेण ॥ ६६ ॥ काले च तस्मि-
न्पृषतोऽनपत्यो वने तु पाञ्चालपतिश्चचार । तपो महत्तस्य तथा
वराप्सरोऽवलोकनात्स्कन्दितमाशु रेतः ॥ ६७ ॥ स तद्विलज्जावशतः
पदेन समाक्रमत्तस्य बभूव सूनुः । हूहू तु नाम्ना स विरिञ्चिगायको
नाम्नाऽऽवहो यो मरुतां तदंशयुक् ॥ ६८ ॥ स द्रोणतातात्समवाप
वेदानस्त्राणि विद्याश्च तथा समस्ताः । द्रोणेन युक्तः स तदा गुरोः सुतं
सहैव नौ राज्यमिति ह्यवादीत् ॥ ६९ ॥ पदे द्रुतत्वाद्द्रुपदाभिधेयः स
राज्यमापाथ निजां कृपीं सः । द्रोणोऽपि भार्या समवाप्य सर्वप्रति-
ग्रहोज्झश्च पुरेऽवसत्सुखी ॥ ७० ॥ शिलोञ्छवृत्त्यैव हि वर्तयन्स धर्म

SGDF
Sri Gargeshwari Digital Foundation

महान्तं विरजं जुषाणः । उवास नागाख्यपुरे सखाऽस देवव्रतस्याथ कृपस्य चैव ॥ ७१ ॥ तेषां समानो वयसा विराटस्त्वभूद्धहानाम विधातृगायकः । मरुत्सु यो विवहो नाम तस्याप्यंशेन युक्तो निजधर्मवर्ती ॥ ७२ ॥ ततः कदाचिन्मृगयां गतः स ददर्श कन्यां प्रवरां तु शन्तनुः । या पूर्वसर्गे पितृपुत्रिका सती चचार विष्णोस्तप उत्तमं चिरम् ॥ ७३ ॥ यस्यै वरं विष्णुरदात्पुराऽहं सुतस्तव स्यामिति या वसोः सुता । जाता पुनर्दाशगृहे विवर्धिता व्यासात्मना विष्णुरभूच्च यस्याम् ॥ ७४ ॥ तद्दर्शनान्नृपतिर्जातहृच्छयो वव्रे प्रदानाय च दाशराजम् । ऋते स तस्यास्तनयस्य राज्यं नैच्छद्दातुं तामथायाद्गृहं स्वम् ॥७५॥ तच्चिन्तया म्लानमुखं जनित्रं दृष्ट्वैव देवव्रत आश्वपृच्छत् । तत्कारणं सारथिमस्य तस्माच्छ्रुत्वाऽखिलं दाशगृहं जगाम ॥ ७६ ॥ स तस्य विश्वासकृते प्रतिज्ञां चकार नाहं करवाणि राज्यम् । तथैव मे सन्ततितो भयं ते व्येतूर्ध्वरेताः सततं भवानि ॥७७॥ भीमव्रतत्वाद्धि तदास्य नाम कृत्वा देवा भीष्म इति ह्यचीकृपन् । प्रसूनवृष्टिं स च दाशदत्तां कालीं समादाय पितुः समार्पयत् ॥ ७८ ॥ ज्ञात्वा तु तां राजपुत्रीं गुणाढ्यां सत्यस्य विष्णोर्मातरं नामतस्तत् । लोके प्रसिद्धां सत्यवतीत्युदारां विवाहयामास पितुः स भीष्मः ॥ ७९ ॥ प्रायः सतां न मनः पापमार्गे गच्छेदिति ह्यात्ममनश्च सक्तम् । ज्ञात्वापि तां दाशगृहे विवर्धितां जग्राह सद्धर्मरतश्च शन्तनुः ॥ ८० ॥ स्वच्छन्द-मृत्युत्ववरं प्रदाय तथाप्यजेयत्वमधृष्यतां च । युद्धेषु भीष्मस्य नृपोत्तमः स रेमे तथैवाब्दगणान्बहूंश्च ॥८१॥ लेभे स चित्राङ्गदमत्र पुत्रं तथा द्वितीयं च विचित्रवीर्यम् । तयोश्च बाल्ये व्यसृजच्छरीरं जीर्णेन देहेन च किं ममेति ॥८२॥ स्वेच्छया वरुणत्वं स प्राप नानिच्छया तनुः । तस्मिन्काले त्यज्यते हि बलवद्भिर्वधं विना ॥८३॥ अतिसक्तास्तपोहीनाः कथञ्चिन्मृतिमाप्नुयुः । अनिच्छयापि हि यथा मृतश्चित्राङ्गदानुजः ॥८४॥

SGDF
Sri Gangeshwari Digital Foundation

अथौर्ध्वदैहिकं कृत्वा पितुर्भीष्मोऽभ्यषेचयत् । राज्ये चित्राङ्गदं वीरं यौवराज्येऽस्य चानुजम् ॥ ८५ ॥ चित्राङ्गदेन निहतो नाम स्वं त्वपरित्यजन् । चित्राङ्गदोऽकृतोद्वाहो गन्धर्वेण महारणे ॥ ८६ ॥ विचित्रवीर्यं राजानं कृत्वा भीष्मोन्वपालयत् । अथ काशिसुतास्तिस्र-स्तदर्थं भीष्म आहरत् । अम्बामप्यम्बिकानाम्नीं तथैवाम्बालिकां पराम् ॥ ॥ ८७ ॥ पाणिग्रहणकाले तु ब्रह्मदत्तस्य वीर्यवान् । विजित्य तं साल्वराजं समेतान्क्षत्रियानपि ॥ ८८ ॥ अम्बिकाम्बालिके तत्र संवादं चक्रतुः शुभे । अम्बा सा भीष्मभार्यैव पूर्वदेहे तु नैच्छत ॥ ८९ ॥ शापाद्धिरण्यगर्भस्य साल्वकामाहमित्यपि । उवाच तां स तत्याज साऽगमत्साल्वमेव च ॥ ९० ॥ तेनापि सम्परित्यक्ता परामृष्टेति सा पुनः । भीष्ममाप स नोऽगृह्णात्प्रययौ सापि भार्गवम् ॥ ९१ ॥ भ्रातु-र्विवाहयामास सोऽम्बिकाम्बालिके ततः । भीष्माय तु यशो दातुं युयुधे तेन भार्गवः ॥ ९२ ॥ अनन्तशक्तिरपि सन्न भीष्मं निजघान ह । न चाम्बां ग्राहयामास भीष्मकारुण्ययन्त्रितः ॥ ९३ ॥ अनन्तशक्तिः सकलान्तरात्मा यः सर्ववित्सर्ववशी च सर्वजित् । न यत्समोऽन्योऽस्ति कथं च कुत्रचित्कथं ह्यशक्तिः परमस्य तस्य ॥ ९४ ॥ भीष्मं स्वभक्तं यशसाभिपूरयन्विमोहयन्नसुरांश्चैव रामः । जित्वैव भीष्मं न जघान देवो वाचं च सत्यामकरोत्स तस्य ॥ ९५ ॥ 'विद्धवन्मुग्धवच्चैव केशवो वेदनार्तवत् । दर्शयन्नपि मोहाय नैव विष्णुस्तथा भवेत्' ॥ ९६ ॥ एवमादिपुराणोत्थवाक्याद्रामः सदा जयी । यशो भीष्मस्य दत्वा तु सोऽम्बां च शरणागताम् ॥ ९७ ॥ उन्मुच्य भर्तृद्वेषोत्थपापात्तेनाश्व-योजयत् । अनन्तरं शिखण्डित्वात्तदा सा शाङ्करं तपः ॥ ९८ ॥ भीष्मस्य निधनार्थाय पुंस्त्वार्थं च चकार ह । भीष्मो यथा त्वां गृह्णीयात्तथा कुर्यामितीरितम् ॥ रामेण सत्यं तच्चक्रे भीष्मे देहान्तरं गते ॥ ९९ ॥ रुद्रस्तु तस्यास्तपसा तुष्टः प्रादाद्वरं तदा । भीष्मस्य

SGDF
Sri Gargeshwari Digital Foundation

मृतिहेतुत्वं कालात्पुंदेहसम्भवम् ॥ १०० ॥ मालां च य इमां मालां गृह्णीयात्स हनिष्यति । भीष्ममित्येव तां मालां गृहीत्वा सा नृपान्ययौ ॥ १०१ ॥ तां न भीष्मभयात्केऽपि जगृहुस्तां हि सा ततः । द्रुपदस्य गृहद्वारि न्यस्य योगात्तनुं जहौ ॥ १०२ ॥ एतस्मिन्नेव काले तु सुतार्थं द्रुपदस्तपः । चकार शम्भवे चैनं सोऽब्रवीत्कन्यका तव ॥ ॥ १०३ ॥ भूत्वा भविष्यति पुमानिति साम्बा ततोऽजनि । नाम्ना शिखण्डिनी तस्याः पुंवत्कर्माणि चाकरोत् ॥ १०४ ॥ तस्यै पाञ्चालराजः स दशार्णाधिपतेः सुताम् । उद्वाहयामास स तां पुंवेषेणैव गूहिताम् ॥ १०५ ॥ अन्यत्र मातापित्रोस्तु न विज्ञातां बुबोध ह । धात्र्यै न्यवेदयत्साथ तत्पित्रे सा न्यवेदयत् ॥ १०६ ॥ स क्रुद्धः प्रेषयामास निहन्मि त्वां सबान्धवम् । इति पाञ्चालराजाय निर्जगाम च सेनया ॥ १०७ ॥ विश्वस्य वाक्यं रुद्रस्य पुमानेवेति पार्षतः । प्रेषयामास धिग्बुद्धिर्भिन्ना ते बालवाक्यतः ॥ १०८ ॥ अपरीक्षकस्य ते राष्ट्रं कथमित्येव नर्मकृत् । अथ भार्यासमेतं तं पितरं चिन्तयाऽऽकुलम् ॥ १०९ ॥ दृष्ट्वा शिखण्डिनी दुःखान्मन्निमित्तान्न नश्यतु । इति मत्वा वनायैव ययौ यत्र च तुम्बरुः ॥ ११० ॥ स्थूणाकर्णाभिधेयस्तामपश्यद्दृढकर्णतः । स तस्या अखिलं श्रुत्वा कृपां चक्रे महामनाः ॥ १११ ॥ स तस्यै स्वं वपुः प्रादात्तदीयं जगृहे तदा । अंशेन पुंस्त्वभावार्थं पूर्वदेहे समास्थितः ॥ ११२ ॥ पुंसां स्त्रीत्वं भवेत्क्वापि तथाप्यन्ते पुमान्भवेत् । स्त्रीणां नैव हि पुंस्त्वं स्याद्बलवत्कारणैरपि ॥ ११३ ॥ अतः शिववरेऽप्येषा जज्ञे योषैव नान्यथा । पश्चाच्च पुंतनुं सैषा प्रविवेशैव पुंयुताम् ॥ ११४ ॥ नास्या देहः पुंस्त्वमाप न च पुंसाऽनधिष्ठिते । पुंदेहे न्यवसत्साऽथ गन्धर्वेण त्वधिष्ठिते ॥ ११५ ॥ गान्धर्वं देहमाविश्य स्वकीयं भवनं ययौ । तस्यास्तद्देहसादृश्यं गन्धर्वस्य प्रसादतः ॥११६॥ प्राप गन्धर्वदेहोऽपि

SGDF
Sri Gargeshwari Digital Foundation

तया पश्चादधिष्ठितः । श्वो देहि मम देहं मे स्वं च देहं समाविश ॥ ॥ ११७ ॥ इत्युक्त्वा स तु गन्धर्वः कन्यादेहं समास्थितः । उवासैव वने तस्मिन्धनदस्तत्र चागमत् ॥ ११८ ॥ अप्रत्युत्थायिनं तं तु लीयमानं विलज्जया। शशाप धनदो देवश्चिरमित्थं भवेति तम् ॥११९॥ यदा युद्धे मृतिं याति सा कन्या पुंतनुस्थिता । तदा पुंस्त्वं पुनर्यासि चपलत्वादितीरितः ॥ १२० ॥ तथाऽवसत्स गन्धर्वः कन्या पित्रोरशेषतः । कथयामासानुभूतं तौ भृशं मुदमापतुः ॥१२१॥ परीक्ष्य तामुपायैस्तु श्वशुरो लज्जितो ययौ ॥ १२२ ॥ श्वो भूते सा तु गन्धर्वं प्राप्य तद्वचनात्पुनः । ययौ तेनैव देहेन पुंस्त्वमेव समाश्रिता । स शिखण्डी नामतोऽभूदस्त्रशस्त्रप्रतापवान् ॥ १२३ ॥

विचित्रवीर्यः प्रमदाद्वयं तत्संप्राप्य रेमेऽब्दगणान्सुसक्तः । तत्याज देहं च स यक्ष्मणार्दितस्ततोऽस्य माताऽस्मरदाशु कृष्णम् ॥ १२४ ॥ आविर्बभूवाशु जगज्जनित्रो जनार्दनो जन्मजराभयापहः । समस्तविज्ञानतनुः सुखार्णवः संपूजयामास च तं जनित्री ॥ १२५ ॥ तं भीष्मपूर्वैः परमादरार्चितं स्वभिष्टुतं चावददस्य माता । पुत्रौ मृतौ मे न तु राज्यमैच्छद्भीष्मो मया नितरामर्थितोऽपि ॥ १२६ ॥ क्षेत्रे तव भ्रातुरपत्यमुत्तममुत्पादयास्मत्परमादरार्थितः । इतीरितः प्रणतश्चाप्यभिष्टुतो भीष्मादिभिश्चाह जगद्गुरुर्वचः ॥ १२७ ॥ ऋते रमां जातु ममाङ्गसङ्गयोग्याङ्गना नैव सुरालयेऽपि । तथापि ते वाक्यमहं करिष्ये सांवत्सरं सा चरतु व्रतं मे ॥ १२८ ॥ सा पूतदेहाऽथ च वैष्णवव्रतान्मत्तः समाप्नोतु सुतं वरिष्ठम् । इतीरिते राष्ट्रमुपैति नाशमिति ब्रुवन्तीं पुनराह वाक्यम् ॥ १२९ ॥ सौम्यस्वरूपोऽप्यतिभीषणं मृषा तच्चक्षुषो रूपमहं प्रदर्शये । सहेत सा तद्यदि पुत्रकोऽस्या भवेद्गुणाढ्यो बलवीर्ययुक्तः ॥१३०॥ इतीरितेऽस्त्वित्युदितस्तयाऽगमत्कृष्णोऽम्बिका सा तु भयान्न्यमीलयत् । अभूच्च तस्यां धृतराष्ट्रनामको गन्धर्वराट्-

SGDF
Sri Gargeshwari Digital Foundation

पवनावेशयुक्तः ॥ १३१ ॥ स मारुतावेशवशाद्बलाधिको बभूव राजा धृतराष्ट्रनामा । अदाद्वरं चास्य बलाधिकत्वं कृष्णोऽन्ध आसीत्स तु मातृदोषतः ॥ १३२ ॥ ज्ञात्वा तमन्धं पुनरेव कृष्णं माताऽब्रवीज्जनयान्यं गुणाढ्यम् । अंबालिकायामिति तत्तथाऽकरोद्भयाच्च सा पाण्डुरभून्मृषादृक् ॥ १३३ ॥ परावहो नाम मरुत्ततोऽभवद्वर्णेन पाण्डुः स हि नामतश्च । स चास वीर्याधिक एव वायोरावेशतः सर्वशस्त्रास्त्रवेत्ता ॥ १३४ ॥ तस्मै तथा बलवीर्याधिकत्वं वरं प्रादात्कृष्ण एवाथ पाण्डुम् । विज्ञाय तं प्राह पुनश्च माता निर्दोषमन्यं जनयोत्तमं सुतम् ॥ १३५ ॥ उक्त्वेति कृष्णं पुनरेव च स्नुषामाह त्वयाक्ष्णोर्हि निमीलनं पुरा । कृतं ततस्ते सुत आस चान्धस्ततः पुनः कृष्णमुपास्व भक्तितः ॥ १३६ ॥ इतीरिताप्यस्य हि मायया सा भीता भुजिष्यां कुमतिर्न्ययोजयत् । सा तं परानन्दतनुं गुणार्णवं संप्राप्य भक्त्या परयैव रेमे ॥ १३७ ॥ तस्यां स देवोऽजनि धर्मराजो माण्डव्यशापाद्य उवाह शूद्रताम् । वसिष्ठसाम्यं समभीप्समानं प्रच्यावयन्निच्छया शापमाप ॥ ॥ १३८ ॥ अयोग्यसम्प्राप्तिकृतप्रयत्नदोषात्समारोपितमेव शूले । चोरैर्हृतेऽर्थेऽपि तु चोरबुद्ध्या मक्षीवधादित्यवदद्यमस्तम् ॥ १३९ ॥ नासत्यता तस्य च तत्र हेतुतः शापं ग्रहीतुं स तथैव चोक्त्वा । अवाप शूद्रत्वमथास्य नाम चक्रे कृष्णः सर्वविच्त्वं तथाऽदात् ॥ १४० ॥ विद्यारतेर्विदुरो नाम चायं भविष्यति ज्ञानबलोपपन्नः । महाधनुर्बाहुबलाधिकश्च सुनीतिमानित्यवदत्स कृष्णः ॥ १४१ ॥ ज्ञात्वाऽस्य शूद्रत्वमथास्य माता पुनश्च कृष्णं प्रणता ययाचे । अंबालिकायां जनयान्यमित्यथो नैच्छत्स कृष्णोऽभवदप्यदृश्यः ॥ १४२ ॥

योग्यानि कर्माणि ततस्तु तेषां चकार भीष्मो मुनिभिर्यथावत् । विद्याः समस्ता अददाच्च कृष्णस्तेषां पाण्डोरस्त्रशस्त्राणि भीष्मः ॥१४३॥ ते सर्वविद्याप्रवरा बभूवुर्विशेषतो विदुरः सर्ववेत्ता । पाण्डुः समस्तास्त्र-

SGDF
Sri Gangadharan Digital Foundation

विदेकवीरो जिगाय पृथ्वीमखिलां धनुर्धरः ॥ १४४ ॥ गवद्गणादास तथैव सूतात्समस्तगन्धर्वपतिः स तुम्बरुः । य उद्वहोनाम मरुत्तदंश-युक्तो वशी सञ्जयनामधेयः ॥ १४५ ॥ विचित्रवीर्यस्य स सूतपुत्रः सखा च तेषामभवत्प्रियश्च । समस्तविन्मतिमान्व्यासशिष्यो विशेषतो धृतराष्ट्रानुवर्ती ॥ १४६ ॥ गान्धारराजस्य सुतामुवाह गान्धारिनाम्नीं सुबलस्य राजा । ज्येष्ठो ज्येष्ठां शकुनेर्द्वापरस्य नास्तिक्यरूपस्य कुकर्म-हेतोः ॥ १४७ ॥

शूरस्य पुत्री गुणशीलरूपयुक्ता दत्ता सख्युरेव स्वपित्रा । नाम्ना पृथा कुन्तिभोजस्य तेन कुन्ती भार्या पूर्वदेहेऽपि पाण्डोः ॥ १४८ ॥ कूर्मश्च नाम्ना मरुदेव कुन्तिभोजोऽथैनां वर्धयामास सम्यक् । तत्रागमच्छङ्करांशोऽतिकोपो दुर्वासास्तं प्राह मां वासयेति ॥ १४९ ॥ तमाह राजा यदि कन्यकायाः क्षमिष्यसे शक्तितः कर्मकर्त्र्याः । सुखं वसे-त्योमिति तेन चोक्ते शुश्रूषणायादिशदाशु कुन्तीम् ॥ १५० ॥ चकार कर्म सा पृथा मुनेः सुकोपनस्य हि । यथा न शक्यते परैः शरीर-वाङ्मनोऽनुगा ॥ १५१ ॥ स वत्सरत्रयोदशं तया यथावदर्चितः । उपादिशत्परं मनुं समस्तदेववश्यदम् ॥१५२॥ ऋतौ तु सा समाप्लुता परीक्षणाय तन्मनोः । समाह्वयद्दिवाकरं स चाजगाम तत्क्षणात् ॥१५३॥ ततो न सा विसर्जितुं शशाक तं विना रतिम् । सुवाक्ययत्नतोऽपि तामथाससाद भास्करः ॥ १५४॥ स तत्र जज्ञिवान्स्वयं द्वितीयरूपको विभुः । सवर्मदिव्यकुण्डलो ज्वलन्निव स्वतेजसा ॥ १५५ ॥ पुरा स वालिमारणप्रभूतदोषकारणात् । सहस्रवर्मनामिनाऽसुरेण वेष्टितोऽजनि ॥ ॥ १५६ ॥ यथा ग्रहैर्विदुष्यते मतिर्नृणां तथैव हि । अभूच्च दैत्य-दूषिता मतिर्दिवाकरात्मनः ॥ १५७॥ तथापि रामसेवनाद्धरेश्च सन्निधानयुक् । सुदर्शनीयकर्णतः स कर्णनामकोऽभवत् ॥ १५८ ॥ स रत्नपूर्णमञ्जुषागतो विसर्जितो जले । जनापवादभीतितस्तया यमस्व-

SGDF
Sri Gangeshwari Digital Foundation

सुर्द्धुतम् ॥१५९॥ नदीप्रवाहतो गतं ददर्श सूतनन्दनः । तमग्रहीत्स-रत्नकं चकार पुत्रकं निजम् ॥ १६० ॥ सूतेनाधिरथेन लालिततनु-स्तद्भार्यया राधया संवृद्धो निखिलाः श्रुतीरधिजगौ सर्वाणि शास्त्राणि च । बाल्यादेव महाबलो निजगुणैः संभासमानोऽवसन्नाम्नाऽसौ वसुषेणतामगमदप्यासीद्धमा तद्वसु ॥ १६१ ॥

अथ कुन्ती दत्ता सा पाण्डोः सोऽप्येतया चिरं रेमे । शूरा-च्छूद्र्यां जातां विदुरोऽवहदारुणीं गुणाढ्यां सः ॥ १६२ ॥ अथ चर्तायननामा मद्रेशः शक्रतुल्यपुत्रार्थी । कन्यारत्नं प्राप्तुं चक्रे ब्राह्मं तपो वरं चाप ॥१६३॥ प्रह्लादावरजो यः संह्लादो नामतो हरेर्भक्तः । सोऽभूद्ब्रह्मवरान्ते वायोरावेशयुक्सुतो राज्ञः ॥ १६४ ॥ स मारुतावेश-वशात्पृथिव्यां बलाधिकोऽभूद्वरतश्च धातुः । शल्यश्च नाम्नाऽखिल-शत्रुशल्यो बभूव कन्यास्य च माद्रिनाम्नी ॥ १६५ ॥ सा पाण्डुभार्यैव च पूर्वजन्मन्यभूत्पुनश्च प्रतिपादिताऽस्मै । शल्यश्च राज्यं पितृदत्तमञ्जो जुगोप धर्मेण समस्तशास्त्रवित् ॥ १६६ ॥ अथाङ्गनारत्नमवाप्य तद्द्वयं पाण्डुस्तु भोगान्बुभुजे यथेष्टतः । अपीपलद्धर्मसमाश्रयो महीं ज्येष्ठापचायी विदुरोक्तमार्गतः ॥ १६७ ॥ भीष्मो हि राष्ट्रे धृतराष्ट्रमेव संस्थाप्य पाण्डुं युवराजमेव । चक्रे तथाप्यन्ध इति स्म राज्यं चकार नासावकरोच्च पाण्डुः ॥ १६८ ॥ भीष्माम्बिकेयोक्तिपरः सदैव पाण्डुः शशासावनि-मेकवीरः । अथाम्बिकेयो बहुभिश्च यज्ञैरीजे स पाण्डुश्च महा-धनौघैः ॥ १६९ ॥

नैषा विरोधे कुरुपाण्डवानां तिष्ठेदिति व्यास उदीर्णसद्गुणः । स्वमातरं स्वाश्रममेव निन्ये स्नुषे च तस्या ययतुः स्म तामनु ॥१७०॥ सुतोक्तमार्गेण विचिन्त्य तं हरिं सुतात्मना ब्रह्मतया च सा ययौ । परं पदं वैष्णवमेव कृष्णप्रसादतः स्वर्ययतुः स्नुषे च ॥ १७१ ॥ माता च सा विदुरस्याप लोकं वैरिञ्चमन्वेव गताम्बिकां सती । व्यासप्रसादा-

SGDF
Sri Gargeshwari Digital Foundation

त्सुतसद्गुणैश्च कालेन मुक्तिं च जगाम सन्मतिः ॥१७२॥ अम्बालिकापि क्रमयोगतोऽगात्परां गतिं नैव तथाम्बिका ययौ । यथा यथा विष्णुपरश्चिदात्मा तथा तथा ह्यस्य गतिः परत्र ॥ १७३ ॥

पाण्डुस्ततो राज्यभरं निधाय ज्येष्ठेऽनुजे चैव वनं जगाम । पत्नीद्वयेनानुगतो बदर्यामुवास नारायणपालितायाम् ॥१७४॥ गृहाश्रमेणैव वने निवासं कुर्वन्स भोगान्बुभुजे तपश्च । चक्रे मुनीन्द्रैः सहितो जगत्पतिं रमापतिं भक्तियुतोऽभिपूजयन् ॥ १७५ ॥ स कामतो हरिणत्वं प्रपन्नं दैवादृषिं ग्राम्यकर्मानुषक्तम् । विद्ध्वा शापं प्राप तस्मात्स्त्रियायुङ्म्नरिष्यसीत्येव बभूव चार्तः ॥१७६॥ न्यसिष्णुरुक्तः पृथया स नेति प्रणामपूर्वं न्यवसत्तथैव । ताभ्यां समेतः शतशृङ्गपर्वते नारायणस्याश्रममध्यगे पुरः ॥ १७७ ॥ तपो नितान्तं स चकार ताभ्यां समन्वितः कृष्णपदाम्बुजाश्रयः । तत्सङ्गपूतद्युसरिद्वराम्भःसदावगाहातिपवित्रिताङ्गः ॥ १७८ ॥

एतस्मिन्नेव काले कमलभवशिवाग्रेसराः शक्रपूर्वा भूम्या पापात्मदैत्यैर्भुवि कृतनिलयैराक्रमं चासहन्त्या । ईयुर्देवाधिदेवं शरणमजगुरुं पूर्णषाड्गुण्यमूर्तिं क्षीराब्धौ नागभोगे शयितमनुपमानन्दसन्दोहदेहम् ॥ ॥ १७९ ॥ ऊचुः परं पुरुषमेनमनन्तशक्तिं सूक्तेन तेऽब्जजमुखा अपि पौरुषेण । स्तुत्वा धराऽसुरवराक्रमणात्परेश खिन्ना ह्यतोऽतिविमुखास्तव तेऽतिपापाः ॥१८०॥ दुःसङ्गतिर्भवति भारवदेव देव नित्यं सतामपि हि नः शृणु वाक्यमीश । पूर्वं हता दितिसुता भवता रणेषु ह्यस्मत्प्रियार्थमधुना भुवि तेऽभिजाताः ॥ १८१ ॥ आसीत्पुरा दितिसुतैरमरोत्तमानां सङ्ग्राम उत्तमगजाश्वरथद्विपद्भिः । अक्षौहिणीशतमहौघमहौघमेव सैन्यं सुरात्मकमभूत्परमास्त्रयुक्तम् ॥१८२॥ तस्मान्महौघगुणमास महासुराणां सैन्यं शिलागिरिमहास्त्रधरं सुघोरम् । तेषां रथाश्च बहुनल्वपरिप्रमाणा देवासुरप्रवरकार्मुकबाणपूर्णाः । नानाम्बराभरणवेष-

SGDF
Sri Gangeshwari Digital Foundation

वरायुधाढ्या देवासुराः सस्मृपुराशु परस्परं ते ॥१८३॥ जघ्नुर्गिरीन्द्र-
तलमुष्टिमहास्त्रशस्त्रैश्चक्रुर्नदीश्च रुधिरौघवहा महौघम् । तत्र स्म देव-
वृषभैरसुरेशचम्वा युद्धे निषूदित उतौघबलैः शतांशः ॥ १८४ ॥
अथात्मसेनामवमृद्यमानां वीक्ष्यासुरः शम्बरनामधेयः । ससार मायाविद-
सह्यमायो वरादुमेशस्य सुरान्विमोहयन् ॥ १८५ ॥ मायासहस्रेण सुरा
विमर्दिता रणे विषेदुः शशिसूर्यमुख्याः । तान्वीक्ष्य वज्री परमाख्य-
विद्यां स्वयम्भुदत्तां प्रयुयोज वैष्णवीम् ॥ १८६ ॥ समस्तमायापहया
तयैव वराद्रमेशस्य सदाप्यसह्यया । माया विनेशुर्दितिजेन्द्रसृष्टा वारीश-
वह्नीन्दुमुखाश्च मोचिताः ॥ १८७ ॥ यमेन्दुसूर्यादिसुरास्ततोऽसुरा-
न्निजघ्नुराप्यायितविक्रमास्तदा । सुरेश्वरेणोर्जितपौरुषा बहून्वज्रेण वज्री
निजघान शम्बरम् ॥ १८८ ॥ तस्मिन्हते दानवलोकपाले दितेः सुता
दुद्रुवुरिन्द्रभीषिताः । तान्विप्रचित्तिर्विनिवार्य धन्वी ससार शक्रप्रमुखा-
न्सुरोत्तमान् ॥ १८९ ॥ वरादजेयेन विधातुरेव सुरोत्तमांस्तेन शरै-
र्निपातितान् । निरीक्ष्य शक्रं च विमोहितं द्रुतं न्यवारयत्तं पवनः
शरौघैः ॥ १९० ॥ अस्त्राणि तस्यास्त्रवरैर्निवार्य चिक्षेप तस्योरसि
काञ्चनीं गदाम् । विचूर्णितोऽसौ निपपात मेरौ महाबलो वायुबलाभि-
नुन्नः ॥ १९१ ॥ अथाससादाशु स कालनेमिस्त्वदाज्ञया यस्य वरं
ददौ पुरा । सर्वैरजेयत्वमजोऽसुरः स सहस्रशीर्षो द्विसहस्रबाहुयुक् ॥
॥ १९२ ॥ तमापतन्तं प्रसमीक्ष्य मारुतस्त्वदाज्ञया दत्तवरस्त्वयैव ।
हन्तव्य इत्यस्मरदाशु हि त्वां तदाविरासीस्त्वमनन्तपौरुषः ॥ १९३ ॥
तमस्त्रशस्त्राणि बहूनि बाहुभिः प्रवर्षमाणं भुवनाप्तदेहम् । चक्रेण बाहू-
न्विनिकृत्त्य कानि च न्यवेदयश्चाशु यमाय पापम् ॥ १९४ ॥ ततोऽ-
सुरास्ते निहता अशेषास्त्वया त्रिभागा निहताश्चतुर्थम् । जघान वायुः
पुनरेव जातास्ते भूतले धर्मबलोपपन्नाः ॥ १९५ ॥ राज्ञां महावंश-
सुजन्मनां तु तेषामभूद्धर्ममतिर्विपापा । शिक्षामवाप्य द्विजपुङ्गवानां

SGDF
Sri Gangadhara Digital Foundation

त्वद्भक्तिरप्येषु हि काचन स्यात् ॥ १९६ ॥ त्वद्भक्तिलेशाभियुतः सुकर्मा व्रजेन्न पापां तु गतिं कथञ्चित् । दैत्येश्वराणां च तमोऽन्धमेव त्वयैव क्लृप्तं ननु सत्यकाम ॥ १९७ ॥ धर्मस्य मिथ्यात्वभयाद्वयं त्वामथापि वा दैत्यशुभाप्तिभीषा । संप्रार्थयामो दितिजान्सुकर्मण-स्त्वद्भक्तितश्चालयितुं च शीघ्रम् ॥ १९८ ॥ य उग्रसेनः सुरगायकः स जातो यदुष्वेव तथाभिधेयः । तवैव सेवार्थममुष्य पुत्रो जातोऽसुरः कालनेमिः स ईश ॥ १९९ ॥ यस्त्वत्प्रियार्थं न हतो हि वायुना भवत्प्रसादात्परमीशताऽपि । स एष भोजेषु पुनश्च जातो वरादुमेशस्य परैरजेयः ॥ २०० ॥ स औग्रसेने जनितोऽसुरेण क्षेत्रे हि तद्रूपधरेण मायया । गन्धर्वजेन द्रमिलेन नाम्ना कंसो जितो येन वराच्छचीपतिः ॥ ॥ २०१ ॥ जित्वा जलेशं च हृतानि येन रत्नानि यक्षाश्च जिताः शिवस्य । कन्यावनार्थं मगधाधिपेन प्रयोजितास्ते च हृते बलेन ॥ ॥ २०२ ॥ स विप्रचित्तिश्च जरासुतोऽभूद्वराद्विधातुर्गिरिशस्य चैव । सर्वैरजेयो बलमुत्तमं तज्ज्ञात्वैव कंसस्य मुदा सुते ददौ ॥ २०३ ॥ निवारयामास न कंसमुद्धतं शक्तोऽपि यो यस्य बले न कश्चित् । तुल्यः पृथिव्यां विवरेषु वा क्वचिद्वशे बलाढ्यो नृपतींश्च चक्रे ॥ २०४ ॥ हतौ पुरा यौ मधुकैटभाख्यौ त्वयैव हंसो डिभिकश्च जातौ । वरादजेयौ गिरिशस्य वीरौ भक्तौ जरासन्धमनु स्म तौ शिवे ॥२०५॥ अन्येऽपि भूमावसुराः प्रजातास्त्वया हता ये सुरदैत्यसङ्गरे । अन्ये तथैवान्धतमः प्रपेदिरे कार्या तथैषां च तमोगतिस्त्वया ॥ २०६ ॥ व्यासावतारे निहतस्त्वया यः कलिः सुशास्त्रोक्तिभिरेव चाद्य । श्रुत्वा त्वदुक्तीः पुरुषेषु तिष्ठन्नीषच्चकारेव मनस्त्वयीश ॥२०७॥ रामात्मना ये निहताश्च राक्षसा दृष्ट्वा बलं तेऽपि तदा तवाद्य । समं तवान्यं न हि चिन्तयन्ति सुपापिनोऽपीश तथा हनूमतः ॥ २०८ ॥ ये केशव त्वद्बहुमानयुक्ता-स्तथैव वायौ न हि ते तमोऽन्धम् । योग्याः प्रवेष्टुं तदतो हि

SGDF
Sri Gangeshwari Digital Foundation

मार्गाच्चाल्यास्त्वया जनयित्वैव भूमौ ॥ २०९ ॥ नितान्तमुत्पाद्य भवद्विरोधं तथैव वायौ बहुभिः प्रकारैः । सर्वेषु देवेषु च पातनीया-स्तमस्यथान्धे कलिपूर्वकासुराः ॥२१०॥ हतौ च यौ रावणकुम्भकर्णौ त्वया त्वदीयौ प्रतिहारपालौ । महासुरावेशयुतौ हि शापात्त्वयैव तावद्य विमोचनीयौ ॥ २११ ॥ यौ तौ तवारी हतयोः प्रविष्टौ दैत्यौ तु तावन्धतमः प्रवेश्यौ । यौ तौ त्वदीयौ भवदीयवेश्म त्वया पुनः प्रापणीयौ परेश ॥२१२॥ आविश्य यो बलिमञ्जश्चकार प्रतीपमस्मासु तथा त्वयीश । स चासुरो बलिनामैव भूमौ साल्वो नाम्ना ब्रह्मदत्तस्य जातः ॥२१३॥ मायामयं तेन विमानमद्र्यमभेद्यमाप्तं सकलैर्गिरीशात् । विद्रावितो यो बहुशस्त्वयैव रामस्वरूपेण भृगूद्वहेन ॥ २१४ ॥ नासौ हतः शक्तिमतापि तत्र कृष्णावतारे स मयैव वध्यः । इत्यात्मसङ्कल्पमृतं विधातुं स चात्र वध्यो भवतातिपापी ॥ २१५ ॥ यदीयमारुह्य विमानमस्य पिताऽभवत्सौभपतिश्च नाम्ना । यदा स भीष्मेण जितः पितास्य तदा स साल्वस्तपसि स्थितोऽभूत् ॥ २१६ ॥ स चाद्य तस्मा-त्तपसो निवृत्तो जरासुतस्यानुमते स्थितो हि । अनन्यवध्यो भवताद्य वध्यः स प्रापणीयश्च तमस्यथोग्रे ॥ २१७ ॥ यो बाणमाविश्य महासुरोऽभूत्स्थितः स नाम्ना प्रथितोऽपि बाणः । स कीचको नाम बभूव रुद्रवरादवध्यः स तमः प्रवेश्यः ॥२१८॥ अतस्त्वया भुव्यवतीर्य देवकार्याणि कार्याण्यखिलानि देव । त्वमेव देवेश गतिः सुराणां ब्रह्मेशशक्रेन्दुयमादिकानाम् ॥ २१९ ॥ त्वमेव नित्योदितपूर्णशक्ति-स्त्वमेव नित्योदितपूर्णचिद्घनः । त्वमेव नित्योदितपूर्णसत्सुखस्त्वादृङ्न कश्चित्कुत एव तेऽधिकः ॥ २२० ॥

इतीरितो देववरैरुदारगुणार्णवोऽक्षोभ्यतमामृताकृतिः । उत्थाय तस्मात्प्रययावनन्तसोमार्ककान्तिद्युतिरन्वितोऽमरैः ॥ २२१ ॥ स मेरु माप्याह चतुर्मुखं प्रभुर्यत्र त्वयोक्तोऽस्मि हि तत्र सर्वथा । प्रादुर्भविष्ये

SGDF
Sri Gargeshwari Digital Foundation

भवतो हि भक्त्या वशस्तवाहं स्ववशोऽपि चेच्छया ॥ २२२ ॥ ब्रह्मा प्रणम्याह तमात्मकारणं प्रादां पुराहं वरुणाय गाः शुभाः । जहार तास्तस्य पिताऽमृतस्रवाः स कश्यपो द्राक्सहसातिगर्वितः ॥ २२३ ॥ मात्रा त्वदित्या च तथा सुरभ्या प्रचोदितेनैव हृतासु तासु । श्रुत्वा जलेशात्स मयाभिशप्तः क्षत्रेषु गोजीवनको भवेति ॥ २२४ ॥ शूरात्स जातो बहुगोधनाढ्यो भूमौ यमाहुर्वसुदेव इत्यपि । तस्यैव भार्या त्वदितिश्च देवकी बभूव चान्या सुरभिश्च रोहिणी ॥ २२५ ॥ तच्चं भवस्वाशु च देवकीसुतस्तथैव यो द्रोणनामा वसुः सः । स्वभार्यया धरया त्वत्पितृत्वं प्राप्तुं तपस्तेप उदारमानसः ॥ २२६ ॥ तस्मै वरः स मया सन्निसृष्टः स चास नन्दाख्य उतास्य भार्या । नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोऽथ गोपः ॥२२७॥ तौ देवकीवसुदेवौ च तेपतुस्तपस्त्वदीयं सुतमिच्छमानौ । त्वामेव तस्मात्प्रथमं प्रदर्श्य तत्र स्वरूपं हि ततो व्रजं व्रज ॥ २२८ ॥ इतीरितः सोऽब्जभवेन केशवस्तथेऽति चोक्त्वा पुनराह देवताः । सर्वे भवन्तो भवताशु मानुषे कार्यानुसारेण यथानुरूपतः ॥ २२९ ॥

अथावतीर्णाः सकलाश्च देवता यथा यथैवाह हरिस्तथा तथा । वित्तेश्वरः पूर्वमभूद्धि भौमाद्धरेः सुतत्वेऽपि तदिच्छयाऽसुरात् ॥२३०॥ पापेन तेनापहृतो हि हस्ती शिवप्रदत्तः सुप्रतीकाभिधानः । तदर्थमेवास्य सुतोऽभिजातो धनेश्वरो भगदत्ताभिधानः ॥२३१॥ महासुरस्यांशयुतः स एव रुद्रावेशाद्बलवानस्त्रवांश्च । शिष्यो महेन्द्रस्य हते बभूव ताते स्वधर्माभिरतश्च नित्यम् ॥२३२॥ अभूच्छिनिर्नाम यदुप्रवीरस्तस्यात्मजः सत्यक आस तस्मात् । कृष्णः पक्षो युयुधानाभिधेयो गरुत्मतोंऽशेन सुतो बभूव ॥ २३३ ॥ यः संवहो नाम मरुत्तदंशश्चक्रस्य विष्णोश्च बभूव तस्मिन् । यदुष्वभूद्धृदिको भोजवंशे सितः पक्षस्तस्य सुतो बभूव ॥ ॥ २३४ ॥ स पाञ्चजन्यांशयुतो मरुत्सु तथांशयुक्तः प्रवहस्य वीरः ।

SGDF
Sri Gargeshwari Digital Foundation

नामास्य चाभूत्कृतवर्मेत्यथान्ये ये यादवास्तेऽपि सुराः सगोपाः ॥२३५॥ ये पाण्डवानामभवन्सहाया देवाश्च देवानुचराः समस्ताः । अन्येऽपि सर्वे त्वसुरा हि मध्यमा ये मानुषास्ते चलबुद्धिवृत्तयः ॥ २३६ ॥ लिङ्गं सुराणां हि परैव भक्तिर्विष्णौ तदन्येषु च तत्प्रतीपता । अतोऽत्र ये ये हरिभक्तितत्परास्ते ते सुरास्तद्धरिता विशेषतः ॥ २३७ ॥ (१३५३)

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये एकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः

॥ ॐ ॥ बभूव गन्धर्वमुनिस्तु देवकः स आस सेवार्थमथाहुकाद्धरेः । स उग्रसेनावरजस्तथैव नामास्य तस्मादजनि स्म देवकी ॥ १ ॥ अन्याश्च याः कश्यपस्यैव भार्या ज्येष्ठां तु तामाहुक आत्मपुत्रीम् । चकार तस्माद्धि पितृष्वसा सा स्वसा च कंसस्य बभूव देवकी ॥२॥ सैवादितिर्वसुदेवस्य दत्ता तस्या रथं माङ्गलं कंस (लकं स) एव । संयापयामास तदा हि वायुर्जगाद वाक्यं गगनस्थितोऽमुम् ॥ ३ ॥ विनापराधाद्धि ततो गरीयसो न मातुलो वध्यतामेति विष्णोः । लोकस्य धर्माननुवर्ततोऽतः पित्रोर्विरोधार्थमुवाच वायुः ॥ ४ ॥ मृत्युस्तवास्या भविताष्टमः सुतो मूढेति चोक्तो जगृहे कृपाणम् । पुत्रान्समर्प्यास्य च शूरसूनुर्विमोच्य तां तत्सहितो गृहं ययौ ॥ ५ ॥ षट्कन्यकाश्चावरजा गृहीतास्तेनैव ताभिश्च मुमोद शूरजः । बाह्लीकपुत्री च पुरा गृहीता पुरास्य भार्या सुरभिस्तु रोहिणी ॥ ६ ॥ राज्ञश्च काशीप्रभवस्य कन्यकां स पुत्रिकापुत्रकधर्मतोऽवहत् । कन्यां तथा करवीरेश्वरस्य तेनैव धर्मेण दितिं दनुं पुरा ॥ ७ ॥ यो मन्यते विष्णुरेवाहमित्यसौ पापो वेनः पौण्ड्रको

SGDF
Sri Gurgeshwari Digital Foundation

वासुदेवः । जातः पुनः शूरजात्काशिजायां नान्यो मत्तो विष्णुरस्तीति वादी ॥ ८ ॥ धुन्धुर्हतो यो हरिणा मधोः सुत आसीत्सुतायां करवीरेश्वरस्य । सृगालनामा वसुदेवोऽथ देवकीमुदूह्य शौरिर्न ययावुभे ते ॥९॥ ततस्तु तौ वृष्णिशत्रू बभूवतुर्ज्येष्ठौ सुतौ शूरसुतस्य नित्यम् । अन्यासु च प्राप सुतानुदारान्देवावतारान्वसुदेवोऽखिलज्ञः ॥ १० ॥ ये ये हि देवाः पृथिवींगतास्ते सर्वे शिष्याः सत्यवतीसुतस्य । विष्णोर्ज्ञानं प्राप्य सर्वेऽखिलज्ञास्तस्माद्यथायोग्यतया बभूवुः ॥ ११ ॥ मरीचिजाः षण्मुनयो बभूवुस्ते देवकं प्राहसन्कार्श्यहेतोः । तच्छापतः कालनेमिप्रसूता अवध्यतार्थं तप एव चक्रुः ॥ १२ ॥ धाता प्रादाद्वरमेषां तथैव शशाप तान्क्ष्मातले सम्भवध्वम् । तत्र स्वतातो भवतां निहन्तेत्यात्मान्यतो वरलिप्सून्हिरण्यः ॥ १३ ॥ दुर्गा तदा तान्भगवत्प्रचोदिता प्रस्वापयित्वा प्रचकर्ष कायात् । क्रमात्समावेशयदाशु देवकीगर्भाशये तान्न्यहनच्च कंसः ॥ १४ ॥

तदा मुनीन्द्रसंयुतः सदो विधातुरुत्तमम् । स पाण्डुराप्तुमैच्छत न्यवारयंश्च ते तदा ॥ १५ ॥ यदर्थमेष जायते पुमान्हि तस्य सोऽकृतेः । शुभां गतिं न तु व्रजेद्ध्रुवं ततो न्यवारयन् ॥ १६ ॥ प्रधानदेवताजनौ नियोक्तुमात्मनः प्रियाम् । बभूव पाण्डुरेष तद्विना न तस्य सद्गतिः ॥ ॥ १७ ॥ अतोऽन्यथा सुतानृते व्रजन्ति सद्गतिं नराः । यथैव धर्मभूषणो जगाम सन्ध्यकासुतः ॥ १८ ॥ तदा कलिश्च राक्षसा बभूवुरिन्द्रजिन्मुखाः । विचित्रवीर्यनन्दनप्रियोदरे हि गर्भगाः ॥ १९ ॥ तदास्य सोऽनुजोऽशृणोन्मुनीन्द्रभाषितं च तत् । विचार्य च प्रियामिदं जगाद वासुदेवधीः ॥ २० ॥ य एव म(स)द्गुणाधिकस्ततः सुतं समाप्नुहि । सुतं विना न नो गतिं शुभां वदन्ति साधवः ॥ २१ ॥ तदस्य कृच्छ्रतो वचः पृथाऽग्रहीज्जगाद च । ममास्ति देववश्यदो मनूत्तमः सुताप्तिदः ॥ २२ ॥ न ते सुरानृते समः सुरेषु केचिदेव च । अत-

SGDF
Sri Gurgeshwari Digital Foundation

स्तवाधिकं सुरं कमाह्वये त्वदाज्ञया ॥ २३ ॥ वरं समाश्रिता पतिं व्रजेत या ततोऽधमम् । न काचिदस्ति निष्कृतिर्न भर्तृलोकमृच्छति ॥ ॥ २४ ॥ कृते पुरा सुरास्तथा सुराङ्गनाश्च केवलम् । निमित्ततोऽपि ताः क्वचिन्न तान्विहाय रेमिरे ॥ २५ ॥ मनोवचःशरीरतो यतो हि ताः पतिव्रताः । अनादिकालतोऽभवंस्ततः सभर्तृकाः सदा ॥ २६ ॥ स्वभर्तृभिर्विमुक्तिगाः सहैव ता भवन्ति हि । कृतान्तमाप्य चाप्सरःस्त्रियो बभूवुरूर्जिताः ॥ २७ ॥ अनावृताश्च तास्तथा यथेष्टभर्तृकाः सदा । अतस्तु ता न भर्तृभिर्विमुक्तिमापुरुत्तमाम् ॥ २८ ॥ सुरस्त्रियोऽति-कारणैर्यदान्यथास्थिताः सदा । दुरन्वयाः सुदुःसहा विपत्ततो भविष्यति ॥ ॥ २९ ॥ अयुक्तमुक्तवांस्ततो भवांस्तथापि ते वचः । अलङ्घ्यमेव मे ततो वदस्व पुत्रदं सुरम् ॥ ३० ॥ इतीरितोऽब्रवीन्नृपो न धर्मतो विना भुवः । नृपोऽभिरक्षिता भवेत्तदाह्वयाशु तं विभुम् ॥ ३१ ॥ स धर्मजः सुधार्मिको भवेद्धि सूनुरुत्तमः । इतीरिते तया यमः समा-हुतोऽगमद्द्रुतम् ॥ ३२ ॥ ततश्च सद्य एव सा सुषाव पुत्रमुत्तमम् । युधिष्ठिरं यमो हि स प्रपेद आत्मपुत्रताम् ॥ ३३ ॥

यमे सुते तु कुन्तितः प्रजात एव सौबली । अदह्यतेर्ष्यया चिरं बभञ्ज गर्भमेव च ॥ ३४ ॥ स्वगर्भपातने कृते तयाऽऽजगाम केशवः । पराशरात्मजो न्यधाद्घटेषु तान्विभागशः ॥३५॥ शतात्मना विभेदिताः शतं सुयोधनादयः । बभूवुरन्वहं ततः शतोत्तरा च दुःशला ॥ ३६ ॥ स देवकार्यसिद्धये ररक्ष गर्भमीश्वरः । पराशरात्मजो विभुर्विचित्रवीर्य-जोद्भवम् ॥३७॥ कलिः सुयोधनोऽजनि प्रभूतबाहुवीर्ययुक् । प्रधान-वायुसन्निधेर्बलाधिकत्वमस्य तत् ॥ ३८ ॥ पुरा हि मेरुमूर्धनि त्रिविष्ट-पौकसां वचः । वसुन्धरातलोद्भवोन्मुखं श्रुतं दितेः सुतैः ॥ ३९ ॥ ततस्तु ते त्रिलोचनं तपोबलादतोषयन् । वृतश्च देवकण्टको ह्यवध्य एव सर्वतः ॥ ४० ॥ वरादुमापतेस्ततः कलिः स देवकण्टकः । बभूव

SGDF
Sri Gangeshwari Digital Foundation

वज्रकाययुक् सुयोधनो महाबलः ॥४१॥ अवध्य एव सर्वतः सुयोधने समुत्थिते । घृताभिपूर्णकुम्भतः स इन्द्रजित्समुत्थितः ॥ ४२ ॥ स दुःखशासनोऽभवत्ततोऽतिकायसम्भवः । स वै विकर्ण उच्यते ततः खरोऽभवद्बली ॥ ४३ ॥ स चित्रसेननामकस्तथाऽपरे च राक्षसाः । बभूवुरुग्रपौरुषा विचित्रवीर्यजात्मजाः ॥ ४४ ॥ समस्तदोषरूपिणः शरीरिणो हि तेऽभवन् । मृषेति नामतो हि या बभूव दुःशलाऽऽसुरी ॥ ॥ ४५ ॥ कुहूप्रवेशसंयुता ययार्जुनेर्वधाय हि । तपः कृतं त्रिशूलिने ततो हि सात्र जज्ञुषी ॥ ४६ ॥ तयोदितो हि सैन्धवो बभूव कारणं वधे । स कालकेयदानवस्तदर्थमास भूतले ॥ ४७ ॥ तथा स निर्ऋताभिधोऽनुजः स निर्ऋतेरभूत् । स नासिकामरुद्युतो युयुत्सुनामकः कृती ॥ ४८ ॥ स चाम्बिकेयवीर्यजः सुयोधनादनन्तरः । बभूव वैश्यकन्यकोदरोद्भवो हरिप्रियः ॥ ४९ ॥

युधिष्ठिरे जात उवाच पाण्डुर्बाह्वोर्बलाज्ज्ञानबलाच्च धर्मः । रक्ष्योऽन्यथा नाशमुपैति तस्माद्बलद्वयाढ्यं जनयाशु पुत्रम् ॥ ५० ॥ यज्ञाधिको ह्यश्वमेधो मनुष्यदृश्येषु तेजस्स्वधिको हि भास्करः । वर्णेषु विप्रः सकलैर्गुणैर्वरो देवेषु वायुः पुरुषोत्तमादृते ॥५१॥ विशेषतोऽप्येष पितेव मे प्रभुर्व्यासात्मना विष्णुरनन्तपौरुषः । अतश्च ते श्वशुरो नैव योग्यो दातुं पुत्रं वायुमुपैहि तं प्रभुम् ॥५२॥ इतीरिते पृथयाऽऽहूत-वायुसंस्पर्शमात्रादभवद्बलद्वये । समो जगत्यस्ति न यस्य कश्चिद्भक्तौ च विष्णोर्भगवद्वशः सुतः ॥ ५३ ॥ स वायुरेवाभवदत्र भीमनामा भृता माः सकला हि यस्मिन् । स विष्णुनेशेन युतः सदैव नाम्ना सेनो भीमसेनस्ततोऽसौ ॥ ५४ ॥ तज्जन्ममात्रेण धरा विदारिता शार्दूल-भीताज्जननीकराद्यदा । पपात संचूर्णित एव पर्वतस्तेनाखिलोऽसौ शत-शृङ्गनामा ॥ ५५ ॥ तस्मिन्प्रजाते रुधिरं प्रसस्रुवुर्महासुरा वाहनसैन्य-संयुताः । नृपाश्च तत्पक्षभवाः समस्तास्तदा भीता असुरा

SGDF
Sri Gangeshwari Digital Foundation

राक्षसाश्च ॥ ५६ ॥ अवर्धतात्रैव वृकोदरो वने मुदं सुराणामधिकं प्रवर्धयन् ।

तदैव शेषो हरिणोदितोऽविशद्गर्भं सुताया अपि देवकस्य ॥५७॥ स तत्र मासत्रयमुष्य दुर्गयाऽपवाहितो रोहिणीगर्भमाशु । नियुक्तया केशवेनाथ तत्र स्थित्वा मासान्सप्तजातः पृथिव्याम् ॥५८॥ स नामतो बलदेवो बलाढ्यो बभूव तस्यानु जनार्दनः प्रभुः । आविर्बभूवाखिल-सद्गुणैकपूर्णः सुतायामपि देवकस्य ॥ ५९ ॥ यः सत्सुखज्ञानबलैकदेहः समस्तदोषस्पर्शोज्झितः सदा । अव्यक्ततत्कार्यमयो न यस्य देहः कुतश्चित्क च स ह्यजो हरिः ॥ ६० ॥ न शुक्लरक्तप्रभवोऽस्य काय-स्तथापि तत्पुत्रतयोच्यते मृषा । जनस्य मोहाय शरीरतोऽस्या यदावि-रासीदमलस्वरूपः ॥ ६१ ॥ आविश्य पूर्वं वसुदेवमेव विवेश तस्मा-दृतुकाल एव । देवीमुवासात्र च सप्तमासान्सार्धांस्ततश्चाविरभूदजोऽपि ॥ ॥ ६२ ॥ यथा पुरा स्तम्भत आविरासीदशुक्लरक्तोऽपि नृसिंहरूपः । तथैव कृष्णोऽपि तथापि मातापितृक्रमादेव विमोहयत्यजः ॥ ६३ ॥ पितृक्रमं मोहनार्थं समेति न तावता शुक्लतो रक्ततश्च । जातोऽस्य देह-स्त्वतिदर्शनाय सशङ्खचक्राब्जगदः स दृष्टः ॥ ६४ ॥ अनेकसूर्याभ-किरीटयुक्तो विद्युत्प्रभे कुण्डले धारयंश्च । पीताम्बरो वनमाली स्वनन्त-सूर्योरुदीप्तिर्ददृशे गुणार्णवः ॥६५॥ स कञ्जयोनिप्रमुखैः सुरैः स्तुतः पित्रा च मात्रा च जगाद शूरजम् । नयस्व मां नन्दगृहानिति स ततो बभूव द्विभुजो जनार्दनः ॥ ६६ ॥

तदैव जाता च हरेरनुज्ञया दुर्गाभिधा श्रीरनु नन्दपत्न्याम् । ततस्तमादाय हरिं ययौ स शूरात्मजो नन्दगृहान्निशीथे ॥ ६७ ॥ संस्थाप्य तं तत्र तथैव कन्यकामादाय तस्मात्स्वगृहं पुनर्ययौ । हत्वा स्वसुर्गर्भषट्कं क्रमेण मत्वाष्टमं तत्र जगाम कंसः ॥६८॥ गर्भं देवक्याः सप्तमं मेनिरे हि लोकाः सुतं त्वष्टमं तां ततः सः । मत्वा हन्तुं

SGDF
Sri Gangeshwari Digital Foundation

पादयोः सम्प्रगृह्य सम्पोथयामास शिलातले च ॥६९॥ सा तद्धस्तात्क्षिप्रमुत्पत्य देवी खेऽदृश्यतैवाष्टभुजा समग्रा । ब्रह्मादिभिः पूज्यमाना समग्रैरत्यद्भुताकारवती हरिप्रिया ॥ ७० ॥ उवाच चार्या तव मृत्युरत्र क्वचित्प्रजातो हि वृथैव पाप । अनागसीं मां विनिहन्तुमिच्छस्यशक्यकार्ये तव चोद्यमोऽयम् ॥ ७१ ॥ उक्त्वेति कंसं पुनरेव देवकीतल्पेऽशयद्बालरूपैव दुर्गा । नाज्ञासिषुस्तामथ केचनात्र ऋते हि मातापितरौ गुणाढ्याम् ॥ ७२ ॥ श्रुत्वा तयोक्तं तु तदैव कंसः पश्चात्तापाद्वसुदेवं सभार्यम् । प्रसादयामास पुनःपुनश्च विहाय कोपं च तमूचतुस्तौ ॥ सुखस्य दुःखस्य च राजसिंह नान्यः कर्ता वासुदेवादिति स्म ॥ ७३ ॥ आनीय कंसोऽथ गृहे स्वमन्त्रिणः प्रोवाच कन्यावचनं समस्तम् । श्रुत्वा च ते प्रोचुरत्यन्तपापाः कार्यं बालानां निधनं सर्वशोऽपि ॥ ७४ ॥ तथेति तांस्तत्र नियुज्य कंसो गृहं स्वकीयं प्रविवेश पापः । चेरुश्च ते बालवधे सदोद्यता हिंसाविहाराः सततं स्वभावतः ॥ ७५ ॥

अथ प्रभाते शयने शयानमपश्यतामब्जदलायताक्षम् । कृष्णं यशोदा च तथैव नन्द आनन्दसान्द्राकृतिमप्रमेयम् ॥ ७६ ॥ मेनात एतौ निजपुत्रमेनं स्रष्टारमब्जप्रभवस्य चेशम् । महोत्सवात्पूर्णमनाश्च नन्दो विप्रेभ्योऽदाल्लक्षमितास्तदा गाः ॥७७॥ सुवर्णरत्नाम्बरभूषणानि बहूनि गोजीविगणाधिनाथः । प्रादादथोपायनपाणयस्तं गोपा यशोदां च मुदा स्त्रियोऽगमन् ॥ ७८ ॥ गतेषु तत्रैव दिनेषु केषुचिज्जगाम कंसस्य गृहं स नन्दः । पूर्वं हि नन्दः स करं हि दातुं बृहद्वनान्निःसृतः प्राप कृष्णाम् ॥ ७९ ॥ सहागता तेन तदा यशोदा सुषाव दुर्गामथ तत्र शौरिः । निधाय कृष्णं प्रतिगृह्य कन्यकां गृहं ययौ नन्द उवास तत्र ॥ ८० ॥ निरुष्य तस्मिन्यमुनातटे स मासं ययौ द्रष्टुकामो नरेन्द्रम् । राज्ञेऽथ तं दत्तकरं ददर्श शूरात्मजो वाक्यमुवाच चैनम् ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ ८१ ॥ याह्युत्पाताः सन्ति तत्रेत्युदीरिते जगाम शीघ्रं यमुनां स नन्दः। रात्रावेवागच्छमाने तु नन्दे कंसस्य धात्री तु जगाम गोष्ठम् ॥ ॥ ८२ ॥ सा पूतनानाम निजस्वरूपमाच्छाद्य रात्रौ शुभरूपवच्च। विवेश नन्दस्य गृहं बृहद्वनप्रान्ते हि मार्गे रचितं प्रयाणे ॥ ८३ ॥ तीरे भगिन्यास्तु यमस्य वस्त्रगृहे शयानं पुरुषोत्तमं तम्। जग्राह मात्रा तु यशोदया तया निद्रायुजा प्रेक्ष्यमाणा शुभेव ॥ ८४ ॥ तन्मायया धर्षिता निद्रया च न्यवारयन्नैव हि नन्दजाया। तया प्रदत्तं स्तन-मीशिताऽसुभिः पपौ सहैवाशु जनार्दनः प्रभुः ॥८५॥ मृता स्वरूपेण सुभीषणेन पपात सा व्याप्य वनं समस्तम्। तदाऽऽगमन्नन्दगोपोऽपि तत्र दृष्ट्वा च सर्वेऽप्यभवन्सुविस्मिताः ॥ ८६ ॥ सा ताटका चोर्वशी-सम्प्रविष्टा कृष्णावध्यानान्निरयं सञ्जगाम। सा तूर्वशी कृष्णभुक्तस्तनेन पूता स्वर्गं प्रययौ तत्क्षणेन ॥ ८७ ॥ सा तुम्बरोः सङ्गत आविवेश रक्षस्तनुं शापतो वित्तपस्य। कृष्णस्पर्शाच्छुद्धभवा पुनर्दिवं ययौ तुष्टे किमलभ्यं रमेशे ॥ ८८ ॥

यदाऽऽप देवश्चतुरोऽथ मासांस्तदोपनिष्क्रामणमस्य चासीत्। जन्मर्क्षमस्मिन्दिन एव चासीत्प्रातः किञ्चित्तत्र महोत्सवोऽभूत् ॥८९॥ तदा शयानः शकटस्य सोऽधः पदाऽक्षिपत्तं दितिजं निहन्तुम्। अनः समाविश्य दितेः सुतोऽसौ स्थितः प्रतीपाय हरेः सुपापः ॥ ९० ॥ क्षिप्तोऽनसिस्थः शकटाक्षनामा स विष्णुनेत्वा सहितः पपात। ममार चाशु प्रतिभग्नगात्रो व्यत्यस्तचक्राक्षमभूदनश्च ॥९१॥ सा सम्भ्रमात्तं प्रतिगृह्य शङ्कया कृष्णं यशोदा द्विजवर्यसूक्तिभिः। संस्नापयामास नदीतटात्तदा समागता नन्दवचोऽभितर्जिता ॥ ९२ ॥ हत्वा तु तं कंसभृत्यं स कृष्णः शिश्ये पुनः शिशुवत्सर्वशास्ता। एवं गोपान्प्रीणय-न्बालकेलीविनोदतो न्यवसत्तत्र देवः ॥ ९३ ॥

विवर्धमाने लोकदृष्ट्यैव कृष्णे पाण्डुः पुनः प्राह पृथामिदं वचः।

SGDF
Sri Gargeshwari Digital Foundation

धर्मिष्ठो नौ सूनुरग्रे बभूव बलद्वयज्येष्ठ उतापरश्च ॥ ९४ ॥ यदैक एवातिबलोपपन्नो भवेत्तदा तेन पराक्मर्दे । प्रवर्तमाने स्वपुरं हरेयुश्चौर्यात्परे तद्द्वयमत्र योग्यम् ॥ ९५ ॥ शस्त्रास्त्रविद्वीर्यवान्नौ सुतोऽन्यो भवेद्देवं तादृशमाह्वयातः । शेषस्तव भ्रातृसुतोऽभिजातस्तस्मान्नासौ सुतदानाय योग्यः ॥ ९६ ॥ न वै सुपर्णः सुतदो नरेषु प्रजायते चास्य यतस्तथाज्ञा । कृता पुरा हरिणा शङ्करस्तु क्रोधात्मकः पालने नैव योग्यः ॥ ९७ ॥ अतो महेन्द्रो बलवाननन्तरस्तेषां समाह्वानमिहार्हतीति स्वराट् । इतीरिता साऽह्वयदाशु वासवं ततः प्रजज्ञे स्वयमेव शक्रः ॥ ॥ ९८ ॥ स चार्जुनो नाम नरांशयुक्तो विष्ण्वावेशी बलवानस्त्रवेत्ता । रूप्यन्यस्स्यात्सूनुरित्युच्यमाना भर्त्रा कुन्ती नेति तं प्राह धर्मात् ॥९९॥ बृहस्पतिः पूर्वमभूद्धरेः पदं संसेवितुं पवनावेशयुक्तः । स उद्धवो नाम यदुप्रवीराज्जातो विद्वानुपगवनामधेयात् ॥१००॥ द्रोणात्मकं नातितरां स्वसेवकं कुर्याद्धरिर्मामिति भूय एव । स उद्धवात्माऽवततार यादवेष्वासेवनार्थं पुरुषोत्तमस्य ॥ १०१ ॥ बृहस्पतेरेव स सर्वविद्या अवाप मन्त्री निपुणः सर्ववेत्ता । वर्षत्रये तत्परतः स सात्यकिर्जज्ञे दिने चेकितानश्च तस्मिन् ॥ १०२ ॥ मरुत्सु नामप्रवहो यदुष्वभूत्स चेकितानो हरिसेवनार्थम् । तदैव जातो हृदिकात्मजोऽपि वर्षत्रये तत्परतो युधिष्ठिरः ॥१०३॥ ततोऽब्दतो भूभरसंहृतौ हरेरङ्गत्वमाप्तुं गिरिशोऽजनिष्ट । अश्वत्थामा नामतोऽश्वध्वनिं स यस्माच्चक्रे जायमानो महात्मा ॥ १०४ ॥ स सर्वविद्बलवानस्त्रवेत्ता कृपस्वसायां द्रोणवीर्योद्भवोऽभूत् । सुयोधनस्तच्चतुर्थेऽह्नि जातस्तस्यापरेद्युर्भीमसेनः सुधीरः ॥ ॥ १०५ ॥ यदा स मासद्वितयी बभूव तदा रोहिण्यां बलदेवोऽभिजातः । बली गुणाढ्यः सर्ववेदी य एव सेवाखिन्नो लक्ष्मणोऽग्रे हरेर्भूत् ॥ १०६ ॥ यदा हि पुत्रान्विनिहन्तुमेतौ सहैव बद्धौ गतिशृङ्खलायाम् । कंसेनापापौ देवकीशूरपुत्रौ वियोजिताः शौरिभार्याः

SGDF
Sri Gargeshwari Digital Foundation

पराश्च ॥ १०७ ॥ विनिश्चयार्थं देवकीगर्भजानामन्या भार्या धृतगर्भाः स कंसः । स्थानान्तरे प्रसवो यावदासां संस्थापयामास सुपापबुद्धिः ॥ ॥ १०८ ॥ हेतोरेतस्माद्रोहिणी नन्दगेहे प्रसूत्यर्थं स्थापिता तेन देवी । लेभे पुत्रं गोकुले पूर्णचन्द्रकान्ताननं बलभद्रं सुशुभ्रम् ॥ १०९ ॥ यदा त्रिमासः स बभूव देवस्तदाऽऽविरासीत्पुरुषोत्तमोऽजः । तौ कृष्णशेषावाप्तु-कामौ सुतौ हि तपश्चक्राते देवकीशूरपुत्रौ ॥११०॥ विष्ण्वावेशी बलवान्यो गुणाधिकः स मे सुतः स्यादिति रोहिणी च । तेपे तपोऽतो हरिशुक्ल-केशयुतः शेषो देवकीरोहिणीजः ॥ १११ ॥ अवर्धतासौ हरिशुक्लकेश-समावेशी गोकुले रौहिणेयः । कृष्णोऽपि लीला ललिताः प्रदर्शयन्बल-द्वितीयो रमयामास गोष्ठम् ॥ ११२ ॥

स प्राकृतं शिशुमात्मानमुच्चैर्विजानन्त्या मातुरादर्शनाय । विजृम्भमाणोऽखिलमात्मसंस्थं प्रदर्शयामास कदाचिदीशः ॥ ११३ ॥ साण्डं महाभूतमनोऽभिमानमहत्प्रकृत्यावृतमब्जजादिभिः । सुरैः शिवे-तैर्नरदैत्यसङ्घैर्युतं ददर्शास्य तनौ यशोदा ॥११४॥ न्यमीलयच्चाक्षिणी भीतभीता जुगूह चात्मानमथो रमेशः । वपुः स्वकीयं सुखचित्स्वरूपं पूर्णं सत्सु ज्ञापयंस्तद्व्यदर्शयत् ॥ ११५ ॥ कदाचित्तं लालयन्ती यशोदा वोढुं नाशक्नोद्भूरिभाराधिकार्ता । निधाय तं भूमितले स्वकर्म यदा चक्रे दैत्य आगात्सुघोरः ॥११६॥ तृणावर्तो नामतः कंसभृत्यः सृष्ट्वात्युग्रं चक्रवातं शिशुं तम् । आदायागादन्तरिक्षं स तेन शस्तः कंठग्राहसंरुद्धवायुः ॥११७॥ पपात कृष्णेन हतः शिलातले तृणावर्तः पर्वतोदग्रदेहः । सुविस्मयं चापुरथो जनास्ते तृणावर्तं वीक्ष्य संचूर्णि-ताङ्गम् ॥ ११८ ॥ अक्रुध्यतां केशवोऽनुग्रहाय शुभं स्वयोग्यादधिकं निहन्तुम् । स क्रुध्यतां नवनीतादिमुष्णंश्चचार देवो निजसत्सुखा-म्बुधिः ॥ ११९ ॥

यस्मिन्नब्दे भाद्रपदे स मासे सिंहस्थयोर्गुरुरव्योः परेशः । उदै-

SGDF
Sri Gargeshwari Digital Foundation

ततः फाल्गुने फल्गुनोऽभूद्गते ततो माद्रवती बभाषे ॥ १२० ॥ जाताः
सुतास्ते प्रवराः पृथायामेकानपत्याहमतः प्रसादात् । तवैव भूयासमहं
सुतेता विधत्स्व कुन्तीं मम मन्त्रदात्रीम् ॥ १२१ ॥ इतीरितः प्राह
पृथां स माद्र्यै दिशस्व मन्त्रं सुतदं वरिष्ठम् । इत्यूचिवांसं पतिमाह
यादवी दद्यां त्वदर्थे तु सकृत्फलाय ॥ १२२ ॥ उवाच माद्र्यै सुतदं
मन्त्रं च पुनः फलं ते न भविष्यतीति । मन्त्रं समादाय च मद्रपुत्री
व्यचिन्तयत्स्यान्नु कथं द्विपुत्री ॥ १२३ ॥ सदाऽवियोगौ दिविजेषु
दस्रौ न चैतयोर्नामभेदः क्वचिद्धि । एका भार्या सैतयोरप्युषा हि
तदायातः सकृदावर्तनाद्द्वौ ॥ १२४ ॥ इतीक्षन्त्याऽऽकारितावश्विनौ तौ
शीघ्रं प्राप्तौ पुत्रकौ तत्प्रसूतौ । तावेव देवौ नकुलः पूर्वजातः सहदेवोऽ-
भूत्पश्चिमस्तौ यमौ हि ॥ १२५ ॥ पुनर्मनोः फलवत्त्वाय माद्री
सम्प्रार्थयामास पतिं तदुक्ता । पृथाऽवादीत्कुटिलैषा मदाज्ञामृते देवा-
वाह्वयामास दस्रौ ॥ १२६ ॥ अतो विरोधं च मदात्मजानां कुर्या-
देषेत्येव भीतां न मा त्वम् । नियोक्तुमर्हः पुनरेव राजन्नितीरितोऽसौ
विरराम क्षितीशः ॥ १२७ ॥ विशेषनाम्नैव समाहुताः सुरा दद्युः
सुतानित्यविशेषितं तयोः । विशेषनामापि समाह्वयत्तौ मन्त्रावृत्तिर्नाम-
भेदेऽस्य चोक्ता ॥ १२८ ॥ युधिष्ठिराद्येषु चतुर्षु वायुः समाविष्टः
फल्गुनेऽतो विशेषात् । युधिष्ठिरे सौम्यरूपेण विष्टो वीरेण रूपेण
धनञ्जयेऽसौ ॥१२९॥ शृङ्गाररूपं केवलं दर्शयानो विवेश वायुर्यमजौ
प्रधानः । शृङ्गारकैवल्यमभीप्समानः पाण्डुर्हि पुत्रं चकमे चतुर्थम् ॥
॥ १३० ॥ शृङ्गाररूपो नकुले विशेषात्सुनीतिरूपः सहदेवं विवेश ।
गुणैः समस्तैः स्वयमेव वायुर्बभूव भीमो जगदन्तरात्मा ॥ १३१ ॥
सुपल्लवाकारतनुर्हि कोमलः प्रायो जनैः प्रोच्यते रूपशाली । ततः
सुजातौ वरवज्रकायौ भीमार्जुनावप्यृते पाण्डुरैच्छत् ॥१३२॥ अप्राकृतानां
तु मनोहरं यद्रूपं द्वात्रिंशल्लक्षणोपेतमग्र्यम् । तन्मारुतो नकुले कोमलाभ

SGDF
Sri Gargeshwari Digital Foundation

एवं वायुः पञ्चरूपोऽत्र चासीत् ॥ १३३ ॥ अतीतेन्द्रा एव ते विष्णु-षष्ठाः पूर्वेन्द्रोऽसौ यज्ञनामा रमेशः । स वै कृष्णो वायुरथ द्वितीयः स भीमसेनो धर्म आसीत्तृतीयः ॥ १३४ ॥ युधिष्ठिरोऽसावथ नासत्य-दस्रौ क्रमात्तावेतौ माद्रवतीसुतौ च । पुरन्दरः षष्ठ उतात्र सप्तमः स एवैकः फल्गुनो ह्येत इन्द्राः ॥१३५॥ क्रमात्संस्कारान्क्षत्रियाणामवाप्य तेऽवर्धन्त स्वतवसो महित्वना । सर्वे सर्वज्ञाः सर्वधर्मोपपन्नाः सर्वे भक्ताः केशवेऽत्यन्तयुक्ताः ॥ १३६ ॥ (१४८९) ॥ इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीकृष्णावतारे पाण्डवोत्पत्तिर्नाम द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः

॥ ॐ ॥ गर्गः शूरसुतोक्त्या व्रजमायात्सात्वतां पुरोधाः सः । चक्रे क्षत्रिययोग्यान्संस्कारान्कृष्णरोहिणीसून्वोः ॥ १ ॥ ऊचे नन्द सुतोऽयं तव विष्णोर्नावमो गुणैः सर्वैः । सर्वे चैतत्त्राताः सुखमाप्स्य-न्त्युन्नतं भवत्पूर्वाः ॥ २ ॥ इत्युक्तः स मुमोद प्रययौ गर्गोऽपि केशवोऽथाद्यः । स्वपदैरग्रजयुक्तश्चक्रे पुण्यं व्रजन्व्रजोद्देशम् ॥ ३ ॥ स कदाचिच्छिशुभावं कुर्वन्त्या मातुरात्मनो भूयः । अपनेतुं परमेशो मृदं जघासेक्षतां वयस्यानाम् ॥ ४ ॥ मात्रोपालब्ध ईशो मुखविवृति-मकर्नाम्ब मृद्भक्षिताऽहं पश्येत्यास्यान्तरे तु प्रकृतिविकृतियुक्सा जगत्पर्य-पश्यत् । इत्थं देवोऽप्यचिन्त्यामपरदुरधिगां शक्तिमुच्चां प्रदर्श्य प्रायो ज्ञातात्मतत्त्वां पुनरपि भगवानावृणोदात्मशक्त्या ॥ ५ ॥ इति प्रभुः स लीलया हरिर्जगद्विडम्बयन् । चचार गोष्ठमण्डलेऽप्यनन्तसौख्य-चिद्घनः ॥ ६ ॥ कदाचिदीश्वरः स्तनं पिबन्यशोदया पयः । सृतं

SGDF
Sri Gurgeshwari Digital Foundation

निधातुमुज्झितो बभञ्ज दध्यमत्रकम् ॥ ७ ॥ प्रमथ्यमानदध्युरु-
प्रजातमिन्दुसन्निभम् । नवं हि नीतमाददे रहो जघास चेशिता ॥८॥
प्रजायते हि यत्कुले यथायुगं यथावयः । तथा प्रवर्तनं भवेद्दिवौकसां
समुद्भवे ॥ ९ ॥ इति स्वधर्ममुत्तमं दिवौकसां प्रदर्शयन् । अधर्म-
पावकोऽपि सन्विडम्बते जनार्दनः ॥ १० ॥ नृतिर्यगादिरूपकः स
बाल्ययौवनादियुक् । क्रियाश्च तत्तदुद्भवाः करोति शाश्वतोऽपि सन् ॥
॥ ११ ॥ स विप्रराजगोपकस्वरूपकस्तदुद्भवाः । तदा तदा विचेष्टते
क्रियाः सुरान्विशिक्षयन् ॥ १२ ॥ तथाप्यनन्यदेवतासमं निजं बलं
प्रभुः । प्रकाशयन्पुनः पुनः प्रकाशयत्यजो गुणान् ॥ १३ ॥ अथा-
त्तयष्टिमीक्ष्य तां स्वमातरं जगद्गुरुः । स पुप्लुवे तमन्वगान्मनोविदूर-
मञ्जना ॥ १४ ॥ पुनः समीक्ष्य तच्छ्रमं जगाम तत्करग्रहम् । प्रभुः
स्वभक्तवश्यतां प्रकाशयन्नुरुक्रमः ॥ १५ ॥ सदा विमुक्तमीश्वरं
निबद्धुमञ्जसाऽऽददे । यदैव दाम गोपिका न तत्पुपूर तं प्रति ॥१६॥
समस्तदामसञ्चयः सुसन्धितोऽप्यपूर्णताम् । ययावनन्तविग्रहे शिशुत्व-
सम्प्रदर्शके ॥ १७ ॥ अबन्धयोग्यतां प्रभुः प्रदर्श्य लीलया पुनः ।
स एकवत्सपाशकान्तरं गतोऽखिलम्भरः ॥ १८ ॥ सुतस्य मातृवश्यतां
प्रदर्श्य धर्ममीश्वरः । बभञ्ज तौ दिविस्पृशौ यमार्जुनौ सुरात्मजौ ॥
॥ १९ ॥ पुरा धुनिश्चमुस्तथापि पूतनासमन्वितौ । अनोक्षसंयुतौ
तपः प्रचक्रतुः शिवां प्रति । तया वरोऽप्यवध्यता चतुर्षु च
प्रयोजितः ॥२०॥ अनन्तरं तृणोद्भमिस्तपोऽचरद्वरं च तम् । अवाप
ते त्रयो हताः शिशुस्वरूपविष्णुना ॥ २१ ॥ धुनिश्चमुश्च तौ तरू
समाश्रितौ निषूदितौ । तरुप्रभञ्जतोऽमुना तरू च शापसम्भवौ ॥२२॥
पुरा हि नारदान्तिके दिगम्बरौ शशाप सः । धनेशपुत्रकौ द्रुतं तरुत्व-
माप्नुतं त्विति ॥२३॥ ततो हि तौ निजां तनुं हरेः प्रसादतः शुभौ ।
अवापतुः स्तुतिं विभोर्विधाय जग्मतुर्गृहम् ॥२४॥ नलकूबरमणिग्रीवौ

SGDF
Sri Gurgeshwari Digital Foundation

मोचयित्वा च शापतः । वासुदेवोऽथ गोपालैर्विस्मितैरभिवीक्षितः ॥ ॥ २५ ॥ वृन्दावनं यियासुः सन्नन्दसूनुर्बृहद्वने । ससर्ज रोमकूपेभ्यो वृकान्व्याघ्रसमान्बले ॥२६॥ अनेककोटिसङ्घैस्तैः पीड्यमाना व्रजालयाः । ययुर्वृन्दावनं नित्यानन्दमादाय नन्दजम् ॥२७॥ इन्दिरापतिरानन्दपूर्णो वृन्दावने प्रभुः । नन्दयामास नन्दादीनुद्दामतरचेष्टितैः ॥ २८ ॥

स चन्द्रतो हसत्कान्तवदनेनेन्दुवर्चसा । सहितो रौहिणेयेन वत्सपालो बभूव ह ॥ २९ ॥ दैत्यं स वत्सतनुमप्रमयः प्रगृह्य कंसानुगं हरवरादपरैरवध्यम् । प्रक्षिप्य वृक्षशिरसि न्यहनद्बकोऽपि कंसानुगोऽथ विभुमच्युतमाससाद ॥ ३० ॥ स्कन्दप्रसादकवचः स मुखे चकार गोविन्दमग्निवदमुं प्रदहन्तमुच्चैः । चच्छर्द तुण्डशिरसैव निहन्तुमेनमायान्तमीक्ष्य जगृहेऽस्य स तुण्डमीशः ॥ ३१ ॥ तुण्डद्वयं यदुपतिः करपल्लवाभ्यां सङ्गृह्य चाशु विददार ह पक्षिदैत्यम् । ब्रह्मादिभिः कुसुमवर्षिभिरीड्यमानः सायं ययौ व्रजभुवं सहितोऽग्रजेन ॥ ३२ ॥ एवं स देववरवन्दितपादपद्मो गोपालकेषु विहरन्भुवि षष्ठमब्दम् । प्राप्तो गवामखिलपोऽपि स पालकोऽभूद्वृन्दावनान्तरगसान्द्रलतावितानै ॥ ॥ ३३ ॥ ज्येष्ठं विहाय स कदाचिदचिन्त्यशक्तिर्गोगोपगोगणयुतो यमुनातटेषु । रेमे भविष्यदनुवीक्ष्य हि गोपदुःखं तद्बोधनाय निजमग्रजमेषु सोऽधात् ॥ ३४ ॥ तं ब्रह्मणो वरबलादुरगं त्ववध्यं सर्वैरवार्यविषवीर्यमृते सुपर्णात् । विज्ञाय तद्विषविदूषितवारिपानसन्नान्पशूनपि वयस्यजनान्स आवीत् ॥ ३५ ॥ तद्दृष्टिदिव्यसुधया सहसाऽभिवृष्टाः सर्वेऽपि जीवितमवापुरथोच्चशाखम् । कृष्णः कदम्बमधिरुह्य ततोऽतितुङ्गादास्फोट्य गाढरशनो न्यपतद्विषोदे ॥ ३६ ॥ सार्पह्रदः पुरुषसारनिपातवेगसङ्क्षोभितोरगविषोच्छ्वसिताम्बुराशिः । पर्यप्लुतो विषकषायविभीषणोर्मिभीमो धनुःशतमनन्तबलस्य किं तत् ॥ ३७ ॥ तं यामुनह्रदविलोलकमाप्य नागः काल्यो निजैः समदशत्सह वासुदेवम् ।

SGDF
Sri Gargeshwari Digital Foundation

भोगैर्बबन्ध च निजेश्वरमेनमज्ञः सेहे तमीश उत भक्तिमतोऽपराधम् ॥
॥ ३८ ॥ उत्पातमीक्ष्य तु तदाखिलगोपसङ्घस्तत्राजगाम हलिना प्रतिबोधितोऽपि । दृष्ट्वा निजाश्रयजनस्य बहोः सुदुःखं कृष्णः स्वभक्तमपि नागममुं ममर्द ॥ ३९ ॥ तस्योन्नतेषु स फणेषु ननर्त कृष्णो ब्रह्मादिभिः कुसुमवर्षिभिरीड्यमानः । आर्तो मुखैरुरु वमन्रुधिरं स नागो नारायणं तमरणं मनसा जगाम ॥ ४० ॥ तच्चित्रताण्डवविरुग्णफणातपत्रं रक्तं वमन्तमुरुसन्नधियं नितान्तम् । दृष्ट्वाहिराजमुपसेदुरमुष्य पत्न्यो नेमुश्च सर्वजगदादिगुरुं भुवीशम् ॥ ४१ ॥ ताभिः स्तुतः स भगवानमुना च तस्मै दत्वाऽभयं यमसहोदरवारितोऽमुम् । उत्सृज्य निर्विषजलां यमुनां चकार संस्तूयमानचरितः सुरसिद्धसाध्यैः ॥ ४२ ॥ गोपैर्बलादिभिरुदीर्णतरप्रमोदैः सार्धं समेत्य भगवानरविन्दनेत्रः । तां रात्रिमत्र निवसन्यमुनातटे स दावाग्निमुद्धतबलं च पपौ व्रजार्थे ॥
॥ ४३ ॥

इत्थं सुरासुरगणैरविचिन्त्यदिव्यकर्माणि गोकुलगतेऽगणितोरुशक्तौ । कुर्वत्यजे व्रजभुवामभवद्विनाश उग्राभिधादसुरतस्तरुरूपतोऽलम् ॥ ४४ ॥ तद्गन्धतो नृपशुमुख्यसमस्तभूतान्यापुर्मृतिं बहुलरोगनिपीडितानि । धातुर्वराज्जगदभावकृतैकबुद्धिर्वध्यो न केनचिदसौ तरुरूपदैत्यः ॥ ४५ ॥ सङ्कर्षणेऽपि तदुदारविषानुविष्टे कृष्णो निजस्पर्शतस्तमपेतरोगम् । कृत्वा बभञ्ज विषवृक्षममुं बलेन तस्यानुगैः सह तदाकृतिभिः समस्तैः ॥४६॥ दैत्यांश्च गोवपुष आत्तवरान्विरिञ्चान्मृत्यूज्झितानपि निपात्य ददाह वृक्षान् । विक्रीड्य रामसहितो यमुनाजले स नीरोगमाशु कृतवान्व्रजमब्जनाभः ॥ ४७ ॥ सप्तोक्षणोऽतिबलवीर्ययुतानदम्यान्सर्वैर्गिरीशवरतो दितिजप्रधानान् । हत्वा सुतामलभदाशु विभुर्यशोदाभ्रातुः स कुम्भकसमाह्वयिनोऽपि नीलाम् ॥
॥ ४८ ॥ या पूर्वजन्मनि तपः प्रथमैव भार्या भूयासमित्यचरदस्य हि

SGDF
Sri Gargeshwari Digital Foundation

सङ्गमो मे । स्यात्कृष्णजन्मनि समस्तवराङ्गनाभ्यः पूर्वं त्विति स्म तदिमां प्रथमं स आप ॥ ४९ ॥ अग्रे द्विजत्वत उपावहदेष नीलां गोपाङ्गना अपि पुरा वरमापिरे यत् । संस्कारतः प्रथममेव सुसङ्गमो नो भूयात्तवेति परमाप्सरसः पुरा याः ॥ ५० ॥ तत्राथ कृष्णमवदन्स-बलं वयस्याः पक्वानि तालसुफलान्यनुभोजयेति । इत्यर्थितः सबल आप स तालवृन्दं गोपैर्दुरासदमतीव हि धेनुकेन ॥ ५१ ॥ विघ्नेशतो वरमवाप्य सुदुष्टदैत्यो दीर्घायुरुत्तमबलः कदनप्रियोऽभूत् । नित्योद्धतः स उत राममवेक्ष्य तालवृन्दात्फलानि गलयन्तमथाभ्यधावत् ॥ ५२ ॥ तस्य प्रहारमभिकाङ्क्षत आशु पृष्ठपादौ प्रगृह्य तृणराजशिरोऽहरत्सः । तस्मिन्हते खरतरे खररूपदैत्ये सर्वे खराश्च खरतालवनान्तरस्थाः ॥ प्रापुः खरस्वरतराः खरराक्षसारिं कृष्णं बलेन सहितं निहताश्च तेन ॥ ॥ ५३ ॥ सर्वान्निहत्य खररूपधरान्स दैत्यान्विघ्नेश्वरस्य वरतोऽन्यजनै-रवध्यान् । पक्वानि तालसुफलानि निजेषु चादाद्दुर्वारपौरुषगुणोद्धरितो रमेशः ॥ ५४ ॥ पक्षद्वयेन विहरत्स्वथ गोपकेषु दैत्यः प्रलम्ब इति कंसविसृष्ट आगात् । कृष्णस्य पक्षिषु जयत्सु स राममेत्य पापः पराजित उवाह तमुग्ररूपः ॥ ५५ ॥ भीतेन रोहिणिसुतेन हरिः स्तुतोऽसौ स्वाविष्टतामुपदिदेश बलाभिपूर्त्यै । तेनैव पूरितबलोऽम्बर-चारिणं तं पापं प्रलम्बमुरुमुष्टिहतं चकार ॥५६॥ तस्मिन्हते सुरगणा बलदेवनाम रामस्य चक्रुरतितृप्तियुता हरिश्च । वह्निं पपौ पुनरपि प्रदहन्तमुच्चैर्गोपांश्च गोगणमगण्यगुणार्णवोऽपात् ॥ ५७ ॥

कृष्णं कदाचिदतिदूरगतं वयस्या ऊचुः क्षुधार्दिततरा वय-मित्युदारम् । सोऽप्याह सत्रमिह विप्रगणाश्चरन्ति तान्याचतेति परिपूर्ण-समस्तकामः ॥ ५८ ॥ तान्प्राप्य काममनवाप्य पुनश्च गोपाः कृष्णं समीयुरथ तानवदत्स देवः । पत्नीः समर्थयत मद्वचनादिति स्म चक्रुश्च ते तदपि ता भगवन्तमापुः ॥ ५९ ॥ ताः षड्विधान्नपरिपूर्ण-

SGDF
Sri Gargeshwari Digital Foundation

कराः समेताः प्राप्ता विसृज्य पतिपुत्रसमस्तबन्धून् । आत्मार्चनैकपरमा
विससर्ज कृष्ण एका पतिप्रविधृता पदमाप विष्णोः ॥ ६० ॥ भुक्त्वाथ
गोपसहितो भगवांस्तदन्नं रेमे च गोकुलमवाप्य समस्तनाथः । आज्ञाति-
लङ्घनकृतेः स्वकृतापराधात्पश्चात्सुतप्तमनसोऽप्यभवंश्च विप्राः ॥ ६१ ॥
कृष्णोऽथ वीक्ष्य पुरुहूतमहप्रयत्नं गोपान्न्यवारयदविस्मरणाय तस्य ।
मा मानुषोऽयमिति मामवगच्छतात्स इत्यव्ययोऽस्य विदधे महभङ्ग-
मीशः ॥ ६२ ॥ गोपांश्च तान्गिरिमहोऽस्मदुरुस्वधर्म इत्युक्तिसच्छलत
आत्ममहेऽवतार्य । भूत्वातिविस्तृततनुर्बुभुजे बलिं स नानाविधान्नरस-
पानगुणैः सहैव ॥ ६३ ॥ इन्द्रोऽथ विस्मृतरथाङ्गधरावतारो मेघा-
न्समादिशदुरूदकपूगवृष्टयै । ते प्रेरिताः सकलगोकुलनाशनाय धारा
वितेरुरुरुनागकरप्रकाराः ॥ ६४ ॥ ताभिर्निपीडितमुदीक्ष्य स कञ्ज-
नाभः सर्वं व्रजं गिरिवरं प्रसभं दधार । वामेन कञ्जदलकोमलपाणिनैव
तत्राखिलाः प्रविविशुः पशुपाः स्वगोभिः ॥ ६५ ॥ वृष्ट्वोरुवार्यथ
निरन्तरसप्तरात्रं त्रातं निरीक्ष्य हरिणा व्रजमश्रमेण । शक्रोऽनुसंस्मृत-
सुरप्रवरावतारः पादाम्बुजं यदुपतेः शरणं जगाम ॥ ६६ ॥ तुष्टाव
चैनमुरुवेदशिरोगताभिर्गीर्भिः सदाऽगणितपूर्णगुणार्णवं तम् । गोभृद्गुरुं
हरगुरोरपि गोगणेन युक्तः सहस्रगुरगाधगुमग्र्यमग्र्यात् ॥ ६७ ॥
त्वत्तो जगत्सकलमाविरभूदगण्यधाम्नस्त्वमेव परिपासि समस्तमन्ते ।
अत्सि त्वयैव जगतोऽस्य हि बन्धमोक्षौ न त्वत्समोऽस्ति कुहचित्परि-
पूर्णशक्ते ॥ ६८ ॥ क्षन्तव्यमेव भवता मम बाल्यमीश त्वत्संश्रयोऽस्मि
हि सदेत्यभिवन्दितोऽजः । क्षान्तं सदैव भवतस्तव शिक्षणाय पूजापहार-
विधिरित्यवदद्रमेशः ॥ ६९ ॥ गोविन्दमेनमभिषिच्य स गोगणेशो
गोभिर्जगाम गुणपूर्णममुं प्रणम्य । गोपैर्गिरां पतिरपि प्रणतोऽभिगम्य
गोवर्धनोद्धरणसञ्जतसंशयैः सः ॥ ७० ॥ कृष्णं ततः प्रभृति गोपगणा
व्यजानन्नारायणोऽयमिति गर्गवचश्च नन्दात् । नारायणस्य सम

SGDF
Sri Gargeshwari Digital Foundation

इत्युदितं निशम्य पूजां च चक्रुरधिकामरविन्दनेत्रे ।। ७१ ।। स्कन्दादुपात्तवरतो मरणादपेतं दृष्ट्वा च रामनिहतं बलिनं प्रलम्बम् । चक्रुर्विनिश्चयममुष्य सुराधिकत्वे गोपा अथास्य विदधुः परमां च पूजाम् ।। ७२ ।।

कात्यायनीव्रतधराः स्वपतित्वहेतोः कन्या उवाह भगवानपराश्च गोपीः । अन्यैर्धृता अयुगबाणशराभिनुन्नाः प्राप्ता निशास्वरमयच्छशिराजितासु ।।७३।। तास्त्वत्र तेन जनिता दशलक्षपुत्रा नारायणाह्वययुता बलिनश्च गोपाः । सर्वेऽपि दैवतगणा भगवत्सुतत्वमाप्तुं धरातलगता हरिभक्तिहेतोः ।। ७४ ।। तास्तत्र पूर्ववरदानकृते रमेशो रामा द्विजत्वगमनादपि पूर्वमेव । सर्वा निशास्वरमयत्समभीष्टसिद्धिचिन्तामणिर्हि भगवानशुभैरलिप्तः ।। ७५ ।। संपूर्णचन्द्रकरराजितसद्रजन्यां वृन्दावने कुमुदकुन्दसुगन्धवाते । श्रुत्वा मुकुन्दमुखनिःसृतगीतसारं गोपाङ्गना मुमुहुरत्र ससार यक्षः ।। ७६ ।। रुद्रप्रसादकृतरक्ष उतास्य सख्युर्भृत्यो बली खरतरोऽपि च शङ्खचूडः । ताः कालयन्भगवतस्तलताडनेन मृत्युं जगाम मणिमस्य जहार कृष्णः ।। ७७ ।। नाम्नाप्यरिष्ट उरुगायविलोमचेष्टो गोष्ठं जगाम वृषभाकृतिरप्यवध्यः । शम्भोर्वरादनुगतश्च सदैव कंसं गा भीषयन्तममुमाह्वयदाशु कृष्णः ।। ७८ ।। सोऽप्याससाद हरिमुग्रविषाणकोटिमग्रे निधाय जगृहेऽस्य विषाणमीशः । भूमौ निपात्य च वृषासुरमुग्रवीर्यं यज्ञे यथा पशुममारयदग्रयशक्तिः ।। ।। ७९ ।। केशी तु कंसविहितस्तुरगस्वरूपो गिर्यात्मजावरमवाप्य सदा विमृत्युः । पापः स केशवमवाप मुखेऽस्य बाहुं प्रावेशयत्स भगवान्ववृधेऽस्य देहे ।। ८० ।। तत्खादनाय कुमतिः स कृतप्रयासः शीर्णास्यदन्तदशनच्छद रुद्धवायुः । दीर्णः पपात च मृतो हरिरप्यशेषैर्ब्रह्मेशशक्रदिनकृत्प्रमुखैः स्तुतोऽभूत् ।। ८१ ।। व्योमश्च नाम मयसूनुरजप्रसादाल्लब्धामितायुरखिलान्विदधे बिले सः । तं

SGDF
Sri Gargeshwari Digital Foundation

श्रीपतिः सुरपतिः पशुवद्विशस्य निःसारितान्बिलमुखादखिलांश्चकार ॥ ॥ ८२ ॥

कुर्वत्यनन्यविषयाणि दुरन्तशक्तौ कर्माणि गोकुलगतेऽखिललोकनाथे। कंसाय सर्वमवदत्सुरकार्यहेतोर्ब्रह्माङ्गजो मुनिरकारि यदीशपित्रा ॥ ८३ ॥ श्रुत्वातिकोपरभसोच्चलितः स कंसो बद्ध्वा सभार्यमथ शूरजमुग्रकर्मा । अक्रूरमाश्वदिशदानयनाय विष्णो रामान्वितस्य सहगोपगणै रथेन ॥ ८४ ॥ संसेवनाय स हरेरभवत्पुरैव नाम्ना किशोर इति यः सुरगायकोऽभूत् । स्वायम्भुवस्य च मनोः परमांशयुक्त आवेशयुक्कमलजस्य बभूव विद्वान् ॥ ८५ ॥ सोऽक्रूर इत्यभवदुत्तमपूज्यकर्मा वृष्णिष्वथास स हि भोजपतेश्च मन्त्री । आदिष्ट एव जगदीश्वरदृष्टिहेतोरानन्दपूर्णसुमना अभवत्कृतार्थः ॥ ८६ ॥ आरुह्य तद्रथवरं भगवत्पदाब्जमब्जोद्भवप्रणतमन्तरमन्तरेण । सञ्चिन्तयन्पथि जगाम स गोष्ठमाराद्दृष्ट्वा पदाङ्कितभुवं मुमुदे परस्य ॥८७॥ सोऽचेष्टतात्र जगदीशितुरङ्गसङ्गाल्लब्धोच्चयेन निखिलाघविदारणेषु । पांसुष्वजेशपुरुहूतमुखोच्चविद्युद्भ्राजत्किरीटमणिलोचनगोचरेषु ॥८८॥ सोऽपश्यताथ जगदेकगुरुं समेतमग्रोद्भवेन भुवि गा अपि दोहयन्तम् । आनन्दसान्द्रतनुमक्षयमेनमीक्ष्य हृष्टः पपात पदयोः पुरुषोत्तमस्य ॥ ८९ ॥ उत्थाप्य तं यदुपतिः सबलो गृहं स्वं नीत्वोपचारमखिलं प्रविधाय तस्मिन् । नित्योदिताक्षयचिदप्यखिलं स तस्माच्छुश्राव लोकचरितानुविडम्बनेन ॥ ९० ॥ श्रुत्वा स कंसहृदि संस्थितमब्जनाभः प्रातस्तु गोपसहितो रथमारुरोह । रामः श्वफल्कतनयाभियुतो जगाम यानेन तेन यमुनातटमव्ययात्मा ॥९१॥ संस्थाप्य तौ रथवरे जगताभिवन्द्यौ श्वाफल्किराश्ववततार यमस्वसारम् । स्नात्वा स तत्र विधिनैव कृताघमर्षः शेषासनं परमपूरुषमत्र चैक्षत् ॥ ९२ ॥ नित्यं हि शेषमभिपश्यति सिद्धमन्त्रो दानेश्वरः स तु तदा ददृशे हरिं च । अग्रे हि बालतनुमत्र

SGDF
Sri Gargeshwari Digital Foundation

समीक्ष्य कृष्णः किं नास्ति यान इति यानमुखो बभूव ॥ ९३ ॥
तत्रापि कृष्णमभिवीक्ष्य पुनर्निमज्ज्य शेषोरुभोगशयनं परमं ददर्श ।
ब्रह्मेशशक्रमुखदेवमुनीन्द्रवृन्दसंवन्दिताङ्घ्रियुगमिन्दिरया समेतम् ॥९४॥
स्तुत्वा वरस्तुतिभिरव्ययमब्जनाभं सोऽन्तर्हिते भगवति स्वकमारुरोह ।
यानं च तेन सहितो भगवाञ्जगाम सायं पुरीं सहबलो मधुरामनन्तः ॥
॥ ९५ ॥

अग्रेऽथ दानपतिमक्षयपौरुषोऽसावीशो विसृज्य सबलः सहितो वयस्यैः । द्रष्टुं पुरीमभिजगाम नरेन्द्रमार्गे पौरैः कुतूहलयुतैरभिपूज्यमानः ॥ ९६ ॥ आसाद्य कुञ्जरगतं रजकं ययाचे वस्त्राणि कंसदयितं गिरिजावरेण । मृत्यूज्झितं सपदि तेन दुरुक्तिविद्धः पापं कराग्रमृदितं व्यनयद्यमाय ॥ ९७ ॥ हत्वा तमक्षतबलो भगवान्प्रगृह्य वस्त्राणि चात्मसमितानि बलस्य चादात् । दत्वाऽपराणि सखिगोपजनस्य शिष्टान्यास्तीर्य तत्र च पदं प्रणिधाय चागात् ॥ ९८ ॥ ग्राह्यापहेयरहितैकचिदात्मसान्द्रस्वानन्दपूर्णवपुरप्ययशोषहीनः । लोकान्विडम्ब्य नरवत्समलक्तकाद्यैर्वस्त्रा विभूषित इवाभवदप्रमेयः ॥ ९९ ॥ माला अवाप्य च सुदामत आत्मतन्त्रस्तावक्षयोऽनुजगृहे निजपार्षदौ हि । पूर्वं विकुण्ठसदनाद्धरिसेवनाय प्राप्तौ भुवं मृजनपुष्पकरौ पुरापि ॥ १०० ॥ सर्वेष्टपुष्टिमिह तत्र सरूपतां च कृष्णस्तयोर्वरमदादथ राजमार्गे । गच्छन्ददर्श वनितां नरदेवयोग्यमादाय गन्धमधिकं कुटिलां व्रजन्तीम् ॥ ॥ १०१ ॥ तेनार्थिता सपदि गन्धमदात्त्रिवक्रा तेनाग्रजेन सहितो भगवाँल्लिलिम्पे । तां चाऋजुत्वमनयत्स तयाऽर्थितोऽलमायामि कालत इति प्रहसन्नमुञ्चत् ॥ १०२ ॥ पूर्णेन्दुवृन्दनिवहाधिककान्तिकान्तस्वयमितोरुपरमद्युतिसौख्यदेहः । पीताम्बरः कनकभासुरगन्धमाल्यः श‍ृङ्गारवारिधिरगण्यगुणार्णवोऽगात् ॥ १०३ ॥ प्राप्याथ चायुधगृहं धनुरीशदत्तं कृष्णः प्रसह्य जगृहे सकलैरभेद्यम् । कांसं स नित्यपरिपूर्ण-

SGDF
Sri Gargeshwari Digital Foundation

समस्तशक्तिरारोप्य चैतदनुकृष्य बभञ्ज मध्ये ॥ १०४ ॥ तस्मिन्सुरासुरगणैरखिलैरभेद्ये भग्ने बभूव जगदण्डविभेदभीमः । शब्दः स येन निपपात भुवि प्रभग्नसारोऽसुरो धृतियुतोऽपि तदैव कंसः ॥ १०५ ॥ आदिष्टमप्युरुबलं भगवान्स तेन सर्वं निहत्य सबलः प्रययौ पुनश्च । नन्दादिगोपसमितिं हरिरत्र रात्रौ भुक्त्वा पयोऽन्वितशुभान्नमुवास कामम् ॥ १०६ ॥

कंसोऽप्यतीव भयकम्पितहृत्सरोजः प्रातर्नरेन्द्रगणमध्यगतोऽधिकोच्चम् । मञ्चं विवेश सहजानपदैश्च पौरैर्नानानुमञ्चकगतैर्युवतीसमेतैः ॥ ॥ १०७ ॥ संस्थाप्य नागमुरुरङ्गमुखे कुवल्यापीडं गिरीन्द्रसदृशं करिसादियुक्तम् । चाणूरमुष्टिकमुखानपि मल्लवीरान्रङ्गे निधाय हरिसंयमनं किलैच्छत् ॥ १०८ ॥ अक्षौहिणीगणितमस्य बलं च विंशदासीदसह्यमुरुवीर्यमनन्यवध्यम् । शम्भोर्वरादपि च तस्य सुनीथनामा यः पूर्वमास वृक इत्यसुरोऽनुजोऽभूत् ॥ १०९ ॥ सप्तानुजा अपि हि तस्य पुरातना ये सर्वेऽपि कंसपृतनासहिताः स्म रङ्गे । तस्थुः सराममभियान्तमुदीक्ष्य कृष्णमात्तायुधा युधि विजेतुमजं सुपापाः ॥११०॥ कृष्णोऽपि सूर्य उदिते सबलो वयस्यैः सार्धं जगाम वररङ्गमुखं सुरेशैः । संस्तूयमान उरुविक्रम आसुराणां निर्मूलनाय सकलाचरितोरुशक्तिः ॥ ॥ १११ ॥ आयञ्जगद्गुरुतमो बलिनं गजेन्द्रं रुद्रप्रसादपरिरक्षितमाश्वपश्यत् । दुष्टोरुरङ्गमुखसंस्थितमीक्ष्य चैभ्यं पापापयाहि नचिरादिति वाचमूचे ॥ ११२ ॥ क्षिप्तः स ईश्वरतमेन गिरीशलब्धादृप्तो वराज्जगति सर्वजनैरवध्यः । नागं त्ववध्यमभियापयते ततोऽग्रे पापो दुरन्तमहिमं प्रति वासुदेवम् ॥ ११३ ॥ विक्रीड्य तेन करिणा भगवान्स किञ्चिद्धस्ते प्रगृह्य विनिकृष्य निपात्य भूमौ । कुम्भे पदं प्रतिनिधाय विषाणयुग्ममुत्कृष्य हस्तिपमहन्निपपात सोऽपि ॥ ११४ ॥ नागंससादिनमवध्यमसौ निहत्य स्कन्धे विषाणमवसृज्य सहाग्रजेन ।

SGDF
Sri Gargeshwari Digital Foundation

नागेन्द्रसान्द्रमदबिन्दुभिरञ्चिताङ्गः पूर्णात्मशक्तिरमलः प्रविवेश रङ्गम् ॥
॥ ११५ ॥ विष्टे जगद्गुरुतमे बलवीर्यमूर्तौ रङ्गं मुमोद च शुशोष
जनोऽखिलोऽत्र । कञ्जं तथापि कुमुदं च यथैव सूर्य उद्यत्यजेऽनुभविनो
विपरीतकाश्च ॥ ११६ ॥ रङ्गं प्रविष्टमभिवीक्ष्य जगाद मल्लः कंस-
प्रियार्थमभिभाष्य जगन्निवासम् । चाणूर इत्यभिहितो जगतामवध्यः
शम्भुप्रसादत इदं शृणु माधवेति ॥ ११७ ॥ राजैव दैवतमिति
प्रवदन्ति विप्रा राज्ञः प्रियं कृतवतः परमा हि सिद्धिः । योत्स्याव तेन
नृपतिप्रियकाम्ययाऽवां रामोऽभियुध्यतु बली सह मुष्टिकेन ॥ ११८ ॥
इत्युक्त आह भगवान्परिहासपूर्वमेवं भवत्विति स तेन तदाभियातः ।
सन्दर्श्य दैवतपतिर्युधि मल्ललीलां मौहूर्तिकीमथ पदोर्जगृहे स्वशत्रुम् ॥
॥ ११९ ॥ उत्क्षिप्य तं गगनगं गिरिसन्निकाशमुद्भ्राम्य चाथ शतशः
कुलिशाक्षताङ्गम् । आविध्य दुर्धरबलो भुवि निष्पिपेष चूर्णीकृतः स
निपपात यथा गिरीन्द्रः ॥ १२० ॥ कृष्णं च तुष्टुवुरथो दिवि देव-
सङ्घा मर्त्या भुवि प्रवरमुत्तमपूरुषाणाम् । तद्वद्बलस्य दृढमुष्टिनिपिष्टमूर्धा
भ्रष्टस्तदैव निपपात स मुष्टिकोऽपि ॥ १२१ ॥ कूटश्च कोसल उत
च्छलनामधेयौ द्वौ तत्र कृष्णनिहतावपरो बलेन । कंसस्य ये त्ववरजाश्च
सुनीथमुख्याः सर्वे बलेन निहताः परिघेण वीराः ॥ १२२ ॥ ताभ्यां
हतानभिसमीक्ष्य निजान्समस्तान्कंसो दिदेश बलमक्षयमुग्रवीर्यम् । रुद्र-
प्रसादकृतरक्षमवध्यमेतौ निःसार्य दण्डमधिकं कुरुतेऽतिपापः ॥१२३॥
श्रुत्वेव राजवचनं बलमक्षयं तदक्षौहिणीदशकयुग्ममनन्तवीर्यम् । कृष्णं
चकार विविधास्त्रधरं स्वकोष्ठे सिंहं यथाखिलसृगालबलं समेतम् ॥
॥ १२४ ॥ जानन्नपीश्वरमनन्तबलं महेन्द्रः कृष्णं निजं रथमयातय-
दायुधाढ्यम् । शुश्रूषणाय परमस्य यथा समुद्रमर्घ्येण पूरयति पूर्णजलं
जनोऽयम् ॥ १२५ ॥ स्वं स्यन्दनं तु भगवान्स महेन्द्रदत्तमारुह्य
सूतवरमातलिसङ्गृहीतम् । नानायुधोग्रकिरणस्तरणिर्यथैव ध्वान्तं व्यनाशय-

SGDF
Sri Gangeshwari Digital Foundation

दशेषत आशु सैन्यम् ॥ १२६ ॥ निःशेषतो विनिहते स्वबले स कंसश्चर्मासिपाणिरभियातुमियेष कृष्णम् । तावत्तमेव भगवन्तमभिप्रयान्तमुत्तुङ्गमञ्चशिरसि प्रददर्श वीरम् ॥ १२७ ॥ तं श्येनवेगमभितः प्रतिसञ्चरन्तं निश्छिद्रमाशु जगृहे भगवान्प्रगृह्य । केशेषु चैनमभिमृश्य करेण वामेनोद्धृत्य दक्षिणकरेण जघान केऽस्य ॥ १२८ ॥ सञ्चालितेन मुकुटेन विकुण्डलेन कर्णद्वयेन विगताभरणोरसा च । स्रस्ताम्बरेण जघनेन सुशोच्यरूपः कंसो बभूव नरसिंहकराग्रसंस्थः ॥ १२९ ॥ उत्कृष्य तं सुरपतिः परमोच्चमञ्चादन्यैरजेयमतिवीर्यबलोपपन्नम् । अब्जोद्भवेशवरगुप्तमनन्तशक्तिर्भूमौ निपात्य स ददौ पदयोः प्रहारम् ॥ ॥ १३० ॥ देहे तु योऽभवदमुष्य रमेशबन्धुर्वायुः स कृष्णतनुमाश्रयदन्यपापम् । दैत्यं चकर्ष हरिरत्र शरीरसंस्थं पश्यत्सु कञ्जजमुखेषु सुरेष्वनन्तः ॥ १३१ ॥ द्वेषात्स सर्वजगदेकगुरोः स्वकीयैः पूर्वं प्रमापितजनैः सहितः समस्तैः । धात्र्यादिभिः प्रतिययौ कुमतिस्तमोऽन्धमन्येऽपि चैवमुपयान्ति हरावभक्ताः ॥१३२॥ नित्यातिदुःखमनिवृत्ति सुखव्यपेतमन्धन्तमो नियतमेति हरावभक्तः । भक्तोऽपि कञ्जजगिरीशमुखेषु सर्वधर्मार्णवोऽपि निखिलागमनिर्णयेन ॥ १३३ ॥ यो वेत्ति निश्चितमतिर्हरिमब्जजेशपूर्वाखिलस्य जगतः सकलेऽपि काले । सृष्टिस्थितिप्रलयमोक्षदमात्मतन्त्रं लक्ष्म्या अपीशमतिभक्तियुतः स मुच्येत् ॥ ॥ १३४ ॥ तस्मादनन्तगुणपूर्णममुं रमेशं निश्चित्य दोषरहितं परयैव भक्त्या । विज्ञाय दैवतगणांश्च यथा क्रमेण भक्ता हरेरिति सदैव भजेत धीरः ॥ १३५ ॥

निहत्य कंसमोजसा विधातृशम्भुपूर्वकैः । स्तुतः प्रसूनवर्षिभिर्मुमोद केशवोऽधिकम् ॥ १३६ ॥ सदैव मोदरूपिणो मुदोक्तिरस्य लौकिकी । यथोदयो रवेर्भवेत्सदोदितस्य लोकतः ॥ १३७ ॥ अनन्तचित्सुखार्णवः सदोदितैकरूपकः । समस्तदोषवर्जितो हरिर्गुणात्मकः

SGDF
Sri Gangeshwari Digital Foundation

सदा ॥ १३८ ॥ (१६२७) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये कंसवधो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः

॥ ॐ ॥ कृष्णो विमोच्य पितरावभिवन्द्य सर्ववन्द्योऽपि रामसहितः प्रतिपालनाय । धर्मस्य राज्यपदवीं प्रणिधाय चोग्रसेने द्विजत्वमुपगम्य मुमोच नन्दम् ॥ १ ॥ नन्दोऽपि सान्त्ववचनैरनुनीय मुक्तः कृष्णेन तच्चरणपङ्कजमात्मसंस्थम् । कृत्वा जगाम सह गोपगणेन कृच्छ्राद्ध्यायञ्जनार्दनमुवास वने सभार्यः ॥ २ ॥ कृष्णोऽप्यवन्तिपुरवासिनमेत्य विप्रं सान्दीपिनं सह बलेन ततोऽध्यगीष्ट । वेदान्सकृन्निगदितान्निखिलाश्च विद्याः संपूर्णसंविदपि दैवतशिक्षणाय ॥ ३ ॥ धर्मो हि सर्वविदुषामपि दैवतानां प्राप्ते नरेषु जनने नरवत्प्रवृत्तिः । ज्ञानादिगूहनमुताध्ययनादिरत्र तज्ज्ञापनार्थमवसद्भगवान्गुरौ च ॥ ४ ॥ गुर्वर्थमेष मृतपुत्रमदात्पुनश्च रामेण सार्धमगमन्मधुरां रमेशः । पौरैः सजानपदबन्धुजनैरजस्रमभ्यर्चितो न्यवसदिष्टकृदात्मपित्रोः ॥५॥ सर्वेऽपि ते पतिमवाप्य हरिं पुरा हि तप्ता हि भोजपतिना मुमुदुर्नितान्तम् । किं वाच्यमत्र सुतमाप्य हरिं स्वपित्रोर्यत्राखिलस्य सुजनस्य बभूव मोदः ॥ ॥६॥ कृष्णाश्रयो वसति यत्र जनोऽपि तत्र वृद्धिर्भवेत्किमु रमाधिपतेर्निवासे । बृन्दावनं यदधिवासत आस सद्यश्चाहेन्द्रसद्मसदृशं किमु तत्र पुर्याम् ॥ ७ ॥ येनाधिवासमृषभो जगतां विधत्ते विष्णुस्ततो हि वरता सदने विधातुः । तस्मात्प्रभोर्निवसनान्मधुरा पुरी सा शश्वत्समृद्धजनसङ्कुलिता बभूव ॥ ८ ॥

SGDF
Sri Gangeshwari Digital Foundation

रक्षत्यजे त्रिजगतां परिरक्षकेऽस्मिन्सर्वान्यदून्मगधराजसुते स्वभर्तुः । कृष्णान्मृतिं पितुरवाप्य समीपमस्तिप्राप्ती शशंसतुरतीव च दुःखितेऽस्मै ॥ ९ ॥ श्रुत्वैव तन्मगधराज उरुप्ररूढबाह्वोर्बलेन नजितो युधि सर्वलोकैः । ब्रह्मेशचण्डमुनिदत्तवरैरजेयो मृत्यूज्झितश्च विजयी जगतश्चुकोप ॥ १० ॥ क्षुब्धोऽतिकोपवशतः स्वगदाममोघां दत्तां शिवेन जगृहे शिवभक्तवन्द्यः । शैवागमाखिलविदत्र च सुस्थिरोऽसौ चिक्षेप योजनशतं स तु तां परस्मै ॥ ११ ॥ अर्वाक्पपात च गदा मधुराप्रदेशात्सा योजनेन यदिमं प्रजगाद पृष्टः । एकोत्तरामपि शताच्छतयोजनेति देवर्षिरत्र मधुरां भगवत्प्रियार्थे ॥ १२ ॥ शक्तस्य चापि हि गदाप्रतिघातने तु शुश्रूषणं मदुचितं त्विति चिन्तयानः । विष्णोर्मुनिः स निजगाद हि योजनोनं मार्गं पुरो भगवतो मगधेशपृष्टः ॥ १३ ॥ क्षिप्ता तु सा भगवतोऽथ गदा जराख्यां तत्सन्धिनीमसुभिराशु वियोज्य पापाम् । मर्त्याशिनीं भगवतः पुनराज्ञयैव याता गिरीशसदनं मगधं विसृज्य ॥ १४ ॥ राजा स्वमातृत उतो गदया च हीनः क्रोधात्समस्तनृपतीनभिसन्निपात्य । अक्षौहिणीत्र्यधिकविंशयुतोऽतिवेलं दर्पोद्धतः सपदि कृष्णपुरीं जगाम ॥१५॥ सर्वां पुरीं प्रतिनिरुध्य दिदेश विन्दविन्दानुजौ भगवतः कुमतिः स दूतौ । तावूचतुर्भगवतेऽस्य वचोऽतिदर्पपूर्णं तथा भगवतोऽप्यपहासयुक्तम् ॥ १६ ॥ लोके प्रतीतबलपौरुषसाररूपस्त्वं ह्येक एष्य भवतो बलवीर्यसारम् । ज्ञात्वा सुते न तु मया प्रतिपादिते हि कंसस्य वीर्यरहितेन हतस्त्वया सः ॥ १७ ॥ सोऽहं हि दुर्बलतमो बलिनां वरिष्ठं कृत्वैव दृष्टिविषयं विगतप्रतापः । यास्ये तपोवनमथो सहितः सुताभ्यां क्षिप्रं ममाद्य विषयो भव चक्षुषोऽतः ॥ १८ ॥ साक्षेपमीरितमिदं बलदर्पपूर्णमात्मापहाससहितं भगवान्निशम्य । सत्यं तदित्युरुवचोऽर्थवदभ्युदीर्य मन्दं प्रहस्य निरगात्सहितो बलेन ॥१९॥ द्वारेषु सात्यकिपुरःसरमात्मसैन्यं त्रिष्वभ्युदीर्य

SGDF
Sri Gangeshwari Digital Foundation

भगवान्स्वयमुत्तरेण । रामद्वितीय उदगान्मगधाधिराजं योद्धुं नृपेन्द्र-
कटकेन युतं परेशः ॥२०॥ तस्येच्छयैव पृथिवीमवतेरुराशु तस्यायुधानि
सबलस्य सुभास्वराणि । शार्ङ्गासिचक्रदरतूणगदाः स्वकीया जग्राह दारुक-
गृहीतरथे स्थितः सः ॥२१॥ आरुह्य भूमयरथं प्रतियुक्तमश्वैर्वेदात्मकै-
र्धनुरधिज्यमथ प्रगृह्य । शार्ङ्गं शरांश्च निशितान्मगधाधिराजमुग्रं नृपेन्द्र-
सहितं प्रययौ जवेन ॥ २२ ॥ रामः प्रगृह्य मुसलं सहलं च यान-
मास्थाय सायकशरासनतूणयुक्तः । सैन्यं जरासुतसुरक्षितमभ्यधावद्धर्षान्न-
दन्नुरुबलोऽरिबलैरधृष्यः ॥ २३ ॥ उद्वीक्ष्य कृष्णमभियान्तमनन्त-
शक्तिं राजेन्द्रवृन्दसहितो मगधाधिराजः । उद्वेलसागरवदाश्वभियाय
कोपान्नानाविधायुधवरैरभिवर्षमाणः ॥ २४ ॥ तं वै चुकोपयिषुरग्रत
उग्रसेनं कृष्णो निधाय समगात्स्वयमस्य पश्चात् । दृष्ट्वाग्रतो मगधराट्
स्थितमुग्रसेनं कोपाच्चलत्तनुरिदं वचनं बभाषे ॥ २५ ॥ पापापयाहि
पुरतो मम राज्यकाम निर्लज्ज पुत्रवधकारण शत्रुपक्ष । त्वं जीर्णबस्त-
सदृशो न मयेह वध्यः सिंहो हि सिंहमभियाति न वै सृगालम् ॥२६॥
आक्षिप्त इत्थममुनाऽथ स भोजराजस्तूणात्प्रगृह्य निशितं शरमाशु तेन ।
छित्वा जरासुतधनुर्बलवान्ननाद विव्याध सायकगणैश्च पुनस्तमुग्रैः ॥२७॥
अन्यच्छरासनवरं प्रतिगृह्य कोपसंरक्तनेत्रमभियान्तमुदीक्ष्य कृष्णः ।
भोजाधिराजवधकाङ्क्षिणमुग्रवेगं बार्हद्रथं प्रतिययौ परमो रथेन ॥२८॥
आयान्तमीक्ष्य भगवन्तमनन्तवीर्यं चेदीशपौण्ड्रमुखराजगणैः समेतः ।
नानाविधास्त्रवरशस्त्रगणैर्ववर्ष मेरुं यथा घन उदीर्णरवो जलौघैः ॥२९॥
शस्त्रास्त्रवृष्टिमभितो भगवान्विवृश्च्य शार्ङ्गोत्थसायकगणैर्विरथाश्वसूतम् ।
चक्रे निरायुधमसौ मगधेन्द्रमाशु छिन्नातपत्रवरकेतुमचिन्त्यशक्तिः ॥
॥३०॥ नैनं जघान भगवान्सुशकं च भीमे भक्तिं निजां प्रथयितुं यश
उच्चधर्मम् । चेदीशपौण्ड्रकसकीचकमद्रराजसाल्वैकलव्यकमुखान्विरथां-
श्चकार ॥ ३१ ॥ ये चापि हंसडिभिकद्रुमरुक्मिमुख्या बाह्लीकभौम-

SGDF
Sri Gurgeshwari Digital Foundation

सुतमैन्द्पुरःसराश्च । सर्वे प्रदुद्रुवुरजस्य शरैर्विभिन्ना अन्ये च भूमिपतयो य इहासुरुर्व्याम् ॥ ३२ ॥ छिन्नायुधध्वजपताकरथाश्वसूतवर्माण उग्रशरताडितभिन्नगात्राः । स्रस्ताम्बराभरणमूर्धजमाल्यहीना रक्तं वमन्त उरु दुद्रुवुराशु भीताः ॥ ३३ ॥ शोच्यां दशामुपगतेषु नृपेषु सर्वेष्वात्तायुधेषु हरिणा युधि विद्रवत्सु । नानायुधाढ्यमपरं रथमुग्रवीर्यमास्थाय मागधपतिः प्रससार रामम् ॥ ३४ ॥ आधावतोऽस्य मुसलेन रथं बभञ्ज रामो गदामुरुतरोरसि सोऽपि तस्य । चिक्षेप तं च मुसलेन तताड रामस्तावुत्तमौ बलवतां युयुधात उग्रम् ॥ ३५ ॥ तौ चक्रतुः पुरुनियुद्धमपि स्म तत्र संचूर्ण्य सर्वगिरिवृक्षशिलासमूहान् । दीर्घं नियुद्धमभवत्समतयोस्तु वज्रादृढाङ्गतमयोर्बलिनोर्नितान्तम् ॥ ३६ ॥ श्रुत्वाथ शङ्खरवमम्बुजलोचनस्य विद्रावितानपि नृपानभिवीक्ष्य रामः । युध्यन्तमीक्ष्य च रिपुं ववृधे बलेन त्यक्त्वा रिपुं मुसलमाददं आश्वमोघम् ॥ ३७ ॥ तेनाहतः शिरसि संमुमुहेऽतिवेलं बार्हद्रथो जगृह एनमथो हली सः । तत्रैकलव्य उत कृष्णशरैः पलायन्नस्त्राणि रामशिरसि प्रमुमोच शीघ्रम् ॥ ३८ ॥ भीतेन तेन समरं भगवाननिच्छन्प्रद्युम्नमाश्वसृजदात्मसुतं मनोजम् । प्रद्युम्न एनमभियाय महास्त्रजालै रामस्तु मागधमथात्मरथं निनाय ॥ ३९ ॥ युद्ध्वा चिरं रणमुखे भगवत्सुतोऽसौ चक्रे निरायुधममुं स्थिरमेकलव्यम् । अंशेन यो भुवमगान्मणिमानिति स्म सक्रोधतन्त्रकगणेष्वधिपो निषादः ॥ ४० ॥ प्रद्युम्नमात्मनि निधाय पुनः स कृष्णः संहृत्य मागधबलं निखिलं शरौघैः । भूयश्चमूमभिविनेतुमुदारकर्मा बार्हद्रथं त्वमुचदक्षयपौरुषोऽजः ॥ ॥४१॥ व्रीडानताच्छविमुखः सहितो नृपैस्तैर्बार्हद्रथः प्रतिययौ स्वपुरीं स पापः । आत्माभिषिक्तमपि भोजवराधिपत्ये दौहित्रमग्रत उत प्रणिधाय मन्दः ॥ ४२ ॥ जित्वा तमूर्जितबलं भगवानजेशशक्रादिभिः कुसुमवर्षिभिरीड्यमानः । रामादिभिः सहित आशु पुरीं प्रविश्य रेमेऽभिवन्दितपदो महतां समूहैः ॥ ४३ ॥

SGDF
Sri Gargeshwari Digital Foundation

वर्धत्सु पाण्डुतनयेषु चतुर्दशं तु जन्मर्क्षमास तनयस्य सहस्रदृष्टेः। प्रत्याब्दिकं मुनिगणान्परिवेषयन्ती कुन्ती तदाऽऽस बहुकार्यपरा नयज्ञा॥॥ ४४ ॥ तत्काल एव नृपतिः सह माद्रवत्या पुंस्कोकिलाकुलितफुल्लवनं ददर्श। तस्मिन्वसन्तपवनस्पर्शेधितः स कन्दर्पमार्गणवशं सहसा जगाम॥ ४५॥ जग्राह तामथ तया रममाण एव यातो यमस्य सदनं हरिपादसङ्गी। पूर्वं शचीरमणमिच्छत एष विघ्नं शक्रस्य तद्दर्शनोपगतो हि चक्रे॥ ४६॥ तेनैव मानुषमवाप्य रतिस्थ एव पञ्चत्वमाप रतिविघ्नमपुत्रतां च। स्वात्मोत्तमेष्वथ सुरेषु विशेषतश्च स्वल्पोऽपि दोष उरुतामभियाति यस्मात्॥ ४७॥ माद्रीपतिं मृतमवेक्ष्य रुराव दूरात्तच्छुश्रुवुश्च पृथया सह पाण्डुपुत्राः। तेष्वागतेषु वचनादपि माद्रवत्याः पुत्रान्निवार्य तु पृथा स्वयमेव चागात्॥ ४८॥ पत्युः कलेवरमवेक्ष्य निशम्य माद्र्याः कुन्ती भृशं व्यथितहृत्कमलैव माद्रीम्। धिक्कृत्य चानुमरणाय मतिं चकार तस्याः स्वनो रुदितजः श्रुत आशु पार्थैः॥ ४९॥ तेष्वागतेष्वधिक आस विराव एतं सर्वेऽपि शुश्रुवुर्ऋषिप्रवरा अथात्र। आजग्मुरुत्तमकृपा ऋषिलोकमध्ये पत्नी नृपानुगमनाय च पस्पृधाते॥ ५०॥ ते सन्निवार्य तु पृथामथ माद्रवत्या भर्तुः सहानुगमनं बहुशोऽर्थयन्त्याः। संवादमेव निजदोषमवेक्ष्य तस्याश्चक्रुः सदावगतभागवतोच्चधर्माः॥५१॥ भर्तुर्गुणैरनधिकौ तनयार्थमेव माद्र्या कृतौ सुरवरावधिकौ स्वतोऽपि। तेनैव भर्तृमृतिहेतुरभूत्समस्तलोकैश्च नातिमहिता सुगुणापि माद्री॥ ५२॥ पाण्डोः सुता मुनिगणैः पितृमेधमत्र चक्रुर्यथावदथ तेन सहैव माद्री। हुत्वात्मदेहमुरुपापमदः कृतं च संमार्ज्य लोकमगमन्निजभर्तुरेव॥५३॥ पाण्डुश्च पुत्रकगुणैः स्वगुणैश्च साक्षात्कृष्णात्मजः सततमस्य पदैकभक्तः। लोकानवाप विमलान्महितान्महद्भिः किं चित्रमत्र हरिपादविनम्रचित्ते॥५४॥

पाण्डोः सुताश्च पृथया सहिता मुनीन्द्रैर्नारायणाश्रमत आशु पुरं

SGDF
Sri Gargeshwari Digital Foundation

स्वकीयम् । जग्मुस्तथैव धृतराष्ट्रपुरो मुनीन्द्रा वृत्तं समस्तमवदन्ननुजं मृतं च ॥ ५५ ॥ तूष्णीं स्थिते च नृपतौ तनुजे च नद्याः क्षत्तर्युताच्च उरुमोदमतीव पापाः । ऊचुः सुयोधनमुखाः सह सौबलेन पाण्डोर्मृतिः किल पुरा तनयाः क्व तस्य ॥ ५६ ॥ न क्षेत्रजा अपि मृतेपितरि स्वकीयैः सम्यङ् नियोगमनवाप्य भवाय योग्याः । तेषामितीरितवचोऽनुजगाद वायुराभाष्य कौरवगणान्गगनस्थ एव ॥ ५७ ॥ एते हि धर्ममरुदिन्द्रभिषग्वरेभ्यो जाताः प्रजीवति पितर्युरुधर्मसाराः । शक्याश्च नैव भवतां क्वचिदग्रहाय नारायणेन सततं परिरक्षिता यत् ॥ ५८ ॥ वायोरदृश्यवचनं परिशङ्कमानेष्वाविर्बभूव भगवान्स्वयमब्जनाभः । व्यासस्वरूप उरुसर्वगुणैकदेह आदाय तानगमदाशु च पाण्डुगेहम् ॥ ५९ ॥ तत्स्वीकृतेषु सकला अपि भीष्ममुख्या वैचित्रवीर्यसहिताः परिपूज्य सर्वान् । कुन्त्या सहैव जगृहुः सुभृशं तदाऽऽर्ता वैचित्रवीर्यतनयाः सह सौबलेन ॥ ६० ॥ वैचित्रवीर्यतनयाः कृपतो महास्त्राण्यापुश्च पाण्डुतनयैः सह सर्वराज्ञाम् । पुत्राश्च तत्र विविधा अपि बालचेष्टाः कुर्वत्सु वायुतनयेन जिताः समस्ताः ॥ ६१ ॥ पक्वोरुभोज्यफलसन्नयनाय वृक्षेष्वारूढराजतनयानभिवीक्ष्य भीमः । पादप्रहारमुरुवृक्षतले प्रदाय साकं फलैर्विनिपतत्सु फलान्यभुङ्क्त ॥६२॥ युद्धे नियुद्ध उत धावन उत्प्लवे च वारिप्लवे च निखिलान्सहितान्कुमारान् । एको जिगाय तरसा परमार्यकर्मा विष्णोः सुपूर्णसदनुग्रहतः सुनित्यात् ॥ ६३ ॥ सर्वान्प्रगृह्य विनिमज्जति वारिमध्ये श्रान्तान्विसृज्य हसति स्म स विष्णुपद्याम् । सर्वानुदूह्य च कदाचिदुरुप्रवाहां गङ्गां स तारयति सारसुपूर्णपौंस्यः ॥ ॥ ६४ ॥

द्वेषं ह्यृते न हि हरौ तमसि प्रवेशः प्राणे च तेन जगतीमनु तौ प्रपन्नौ । तत्कारणान्यकुरुतां परमौ करांसि देवद्विषां सततविस्तृतसाधुपौंस्यौ ॥ ६५ ॥ दृष्ट्वाऽमितान्यथ करांसि मरुत्सुतेन नित्यं कृतानि

SGDF
Sri Gangadhar Digital Foundation

तनया निखिलाश्च राज्ञाम् । तस्यामितं बलमुदीक्ष्य सदोरुवृद्धद्वेषा बभूवुरथ मन्त्रममन्त्रयंश्च ॥६६॥ ये ये हि तत्र नरदेवसुताः सुरांशाः प्रीतिं परां पवनजे निखिला अकुर्वन् । तांस्तान्विहाय दितिजा नरदेववंशजाता विचार्य वधनिश्चयमस्य चक्रुः ॥ ६७ ॥ अस्मिन्हते विनिहता अखिलाश्च पार्थाः शक्यो बलाच्च न निहन्तुमयं बलाढ्यः । छद्मप्रयोगत इमं विनिहत्य वीर्यात्पार्थं निहत्य निगडे च विदध्महेऽन्यान् ॥६८॥ एवं कृते निहतकण्टकमस्य राज्यं दुर्योधनस्य तु भवेन्न ततोऽन्यथा स्यात् । अस्मिन्हते निपतिते च सुरेन्द्रसूनौ शेषा भवेयुरथ सौबलिपुत्रदासाः ॥ ६९ ॥ एवं विचार्य विषमुल्बणमन्तकाभं क्षीरोदधेर्मथनजं तपसा गिरीशात् । शुक्रेण लब्धममुतः सुबलात्मजेन प्राप्तं प्रतोष्य मरुतस्तनयाय चादुः ॥ ७० ॥ संमन्त्र्य राजतनयैर्धृतराष्ट्रजैस्तु दत्तं स सूदमुखतोऽखिलभक्ष्यभोज्ये । ज्ञात्वा युयुत्सुगदितं बलवान्स भीमो विष्णोरनुग्रहबलाज्जरयाश्चकार ॥ ७१ ॥ जीर्णे विषे कुमतयः परमाभितप्ताः प्रासादमाशु विदधुर्हरिपादतोये । ज्ञात्वा युयुत्सुमुखतः स्वयमत्र चान्ते सुष्वाप मारुतिरमा धृतराष्ट्रपुत्रैः ॥ ७२ ॥ दोषान्प्रकाशयितुमेव विचित्रवीर्यपुत्रात्मजेषु नृवरं प्रति सुप्तमीक्ष्य । बध्वाभिमंन्त्रणदृढैरयसा कृतैस्तं पाशैर्विचिक्षुपुरुदे हरिपादजायाः ॥ ७३ ॥ तत्कोटियोजनगभीरमुदं विगाह्य भीमो विजृम्भणत एव विवृश्च्य पाशान् । उत्तीर्य सज्जनगणस्य विधाय हर्षं तस्थावनन्तगुणविष्णुसदातिहार्दः ॥ ७४ ॥ तं वीक्ष्य दुष्टमनसोऽतिविपन्नचित्ताः संमन्त्र्य भूय उरुनागगणानथाष्टौ । शुक्रोक्तमन्त्रबलतः पुर आह्वयित्वा पश्चात्सुपञ्जरगतान्प्रददुः स्वसूते ॥ ॥ ७५ ॥ दुर्योधनेन पृथुमन्त्रबलोपहूतांस्तत्सारथिः फणिगणान्पवनात्मजस्य । सुप्तस्य विस्तृत उरस्यमुचद्विशीर्णदन्ता बभूवुरमुमाशु विदश्य नागाः ॥ ७६ ॥ क्षिप्त्वा सुदूर उरुनागगणानथाष्टौ तद्वंशजान्स विनिहत्य पिपीलिकावत् । जघ्ने च सूतमपहस्तत एव भीमः सुष्वाप

SGDF
Sri Gargeshwari Digital Foundation

पूर्ववदनुत्थित एव तल्पात् ॥ ७७ ॥ तत्तस्य नैजबलमप्रतिमं निरीक्ष्य सर्वे क्षितीशतनया अधिकं विषेदुः । निःश्वासतो दर्शनादपि भस्म येषां भूयासुरेव भुवनानि च ते मृषाऽऽसन् ॥ ७८ ॥ दद्भिर्विदश्य न विकारममुष्य कर्तुं शेकुर्भुजङ्गमवरा अपि सुप्रयत्नाः । कस्यापि नेदृश-बलं श्रुतपूर्वमासीद्दृष्टं किमु स्म तनयेऽपि हिरण्यकस्य ॥७९॥ स्वात्मा-वनार्थमधिकां स्तुतिमेव कृत्वा विष्णोः स दैत्यतनयो हरिणाऽवितोऽ-भूत् । न त्वौरसं बलममुष्य स कृष्यते हि भृत्यैर्बलात्स्वपितुरौरसमस्य वीर्यम् ॥ ८० ॥ नैसर्गिकं प्रियमिमं प्रवदन्ति विप्रा विष्णोर्नितान्त-मपि सत्यमिदं ध्रुवं हि । नैवान्यथौरसबलं भवतीदृशं तदुत्साद्य एष हरिणैव सहैष नोऽर्थः ॥ ८१ ॥

कृष्णः किलैष च हरिर्यदुषु प्रजातः सोऽस्याश्रयः कुरुत तस्य बहुप्रतीपम् । सम्मन्त्र्य चैवमतिपापतमा नरेन्द्रपुत्रा हरेश्च बहु चक्रुरथ प्रतीपम् ॥ ८२ ॥ तैः प्रेरिता नृपतयः पितरश्च तेषां साकं बृहद्रथ-सुतेन हरेः सकाशम् । युद्धाय जग्मुरमुनाष्टदशेषु युद्धेष्वत्यन्तभग्नबल-दर्पमदा निवृत्ताः ॥ ८३ ॥ तेनागृहीतरथवाजिगजा नितान्तं शस्त्रैः परिक्षततनूभिरलं वमन्तः । रक्तं विशस्त्रकवचध्वजवाजिसूताः स्रस्ताम्बराः श्लथितमूर्धजिनो निवृत्ताः ॥ ८४ ॥ एवं बृहद्रथसुतोऽपि सुशोच्य-रूप आर्तो ययौ बहुश एव पुरं स्वकीयम् । कृष्णेन पूर्णबलवीर्यगुणेन मुक्तो जीवेत्यतीवविजितः श्वसितावशेषः ॥ ८५ ॥ एवं गतेषु बहुशो नतकन्धरेषु राजस्वजोऽपि मधुरां स्वपुरीं प्रविश्य । रामेण सार्धमखिलै-र्यदुभिः समेतो रेमे रमापतिरचिन्त्यबलो जयश्रीः ॥ ८६ ॥

व्यर्थोद्यमाः पुनरपि स सधार्तराष्ट्रा भीमं निहन्तुमुरुयत्न-मकुर्वताज्ञाः । राज्ञां सुतास्तमखिलं स मृषैव कृत्वा चक्रे जयाय च दिशां बलवान्प्रयत्नम् ॥ ८७ ॥ प्राचीं दिशं प्रथममेव जिगाय पश्चा-द्याम्यां जलेशपरिपालितया सहान्याम् । यौ तौ पुरातनदशाननकुम्भ-

SGDF
Sri Gargeshwari Digital Foundation

कर्णौ मातृष्वसातनयतां च गतौ जिगाय ॥ ८८ ॥ पूर्वस्तयोर्हि दमघोषसुतः प्रजातः प्राहुश्च यं नृपतयः शिशुपालनाम्ना । अन्यं वदन्ति च करूशनृपं तथान्यमातृष्वसातनयमेव च दन्तवक्रम् ॥८९॥ जित्वैव तावपि जिगाय च पौण्ड्रकाख्यं शौरेः सुतं सुतमजैदथ भीष्मकस्य । यः पूर्वमास दितिजो नरहेल्वलाख्यो रुक्मीति नाम च बभूव स कुण्डिनेशः ॥ ९० ॥ भागे त एव तनयस्य स एव वह्नेर्नाम्ना शुचेः स तु पितास्य हि मित्रभागः । राह्वंशयुक्तदनुजौ क्रथकैशिकाख्यौ भागौ तथाग्निसुतयोः पवमानशुन्ध्योः ॥ ९१ ॥ बन्धोर्निजस्य तु बलं सुपरीक्षमाणः शल्योऽपि तेन युयुधे विजितस्तथैव । भीमो जिगाय युधि वीरमथैकलव्यं सर्वे नृपाश्च विजिता अमुनैवमेव ॥ ९२ ॥ तद्बाहुवीर्यपरिपालित इन्द्रसूनुः शेषान्नृपांश्च समजैद्बलवानयत्नात् । साल्वं च हंसडिभिकौ च विजित्य भीमो नागाह्वयं पुरमगात्सहितोऽर्जुनेन ॥ ॥ ९३ ॥ तद्बाहुवीर्यमथ वीक्ष्य मुमोद धर्मसूनुः समातृयमजो विदुरः सभीष्मः । अन्ये च सज्जनगणाः सहपौरराष्ट्राः श्रुत्वैव सर्वयदवो जहृषुर्नितान्तम् ॥ ९४ ॥

कृष्णः सुयोधनमुखाक्रममाम्बिकेयं जानन्स्वपुत्रवशवर्तिनमेव गत्वा । श्वाफल्किनो गृहममुं धृतराष्ट्रशान्त्यै गन्तुं दिदेश गजनामपुरं परेशः ॥ ९५ ॥ सोऽयाद्गजाह्वयममुत्र विचित्रवीर्यपुत्रेण भीष्मसहितैः कुरुभिः समस्तैः । सम्पूजितः कतिपयानवसच्च मासाञ्ज्ञातुं हि पाण्डुषु मनःप्रसृतिं कुरूणाम् ॥ ९६ ॥ ज्ञात्वा स कुन्तिविदुरोक्तित आत्मना च मित्रारिमध्यमजनांस्तनयेषु पाण्डोः । विज्ञाय पुत्रवशगं धृतराष्ट्रमज्ञः साम्नैव भेदसहितेन जगाद विद्वान् ॥ ९७ ॥ पुत्रेषु पाण्डुतनयेषु च साम्यवृत्तिः कीर्तिं च धर्ममुरुमेषि तथार्थकामौ । प्रीतिं परां त्वयि करिष्यति वासुदेवः साकं समस्तयदुभिः सहितः सुराद्यैः ॥ ९८ ॥ धर्मार्थकामसहितां च विमुक्तिमेषि तत्प्रीतितः सुनियतं विपरीतवृत्तिः ।

SGDF
Sri Gargeshwari Digital Foundation

यास्येव राजवर तत्फलवैपरीत्यमित्थं वचो निगदितं तव कार्ष्णमद्य ॥ ॥ ९९ ॥ इत्थं समस्तकुरुमध्य उपात्तवाक्यो राजापि पुत्रवशगो वचनं जगाद । सर्वं वशे भगवतो न वयं स्वतन्त्रा भूभारसंहृतिकृते स इहावतीर्णः ॥ १०० ॥ एवं निशम्य वचनं स तु यादवोऽस्य ज्ञात्वा मनोऽस्य कलुषं तव नैव पुत्राः । इत्यूचिवान्सह मरुत्तनयार्जुनाभ्यां प्रायात्पुरीं च सहदेवयुतः स्वकीयाम् ॥ १०१ ॥ ज्ञानं तु भागवतमुत्तममात्मयोग्यं भीमार्जुनौ भगवतः समवाप्य कृष्णात् । तत्रोषतुर्भगवता सह युक्तचेष्टौ संपूजितौ यदुभिरुत्तमकर्मसारौ ॥ १०२ ॥ प्रत्युद्यमो भगवतापि भवेद्गदायाः शिक्षा यदा भगवता क्रियते न चेमम् । कुर्यामिति स्म भगवत्समनुज्ञयैव रामादशिक्षदुरुगायपुरः स भीमः ॥१०३॥ रामोऽपि शिक्षितमरीन्द्रधरात्पुरोऽस्य भीमे ददावथ पराणि हरेरवाप । अस्त्राणि शक्रतनयः सहदेव आर नीतिं तथोद्धवमुखात्सकलामुदाराम् ॥ १०४ ॥

कृष्णोऽथ चौपगविमुत्तमनीतियुक्तं सम्प्रेषयन्निदमुवाच ह गोकुलाय । दुःखं विनाशय वचोभिररे मदीयैर्नन्दादिनां विरहजं मम चाशु याहि ॥ १०५ ॥ मत्तो वियोग इह कस्यचिदस्ति नैव यस्मादहं तनुभृतां निहितोऽन्तरेव । नाहं मनुष्य इति कुत्र च वोऽस्तु बुद्धिर्ब्रह्मैव निर्मलतमं प्रवदन्ति मां हि ॥१०६॥ पूर्वं यदा ह्यजगरो निजगार नन्दं सर्वे न शेकुरथ तत्प्रविमोक्षणाय । मत्पादसंस्पर्शतः स तदातिदिव्यो विद्याधरस्तदुदितं निखिलं स्मरन्तु ॥ १०७ ॥ पूर्वं स रूपमदतः प्रजहास विप्रान्नित्यं तपःकृशतराङ्गिरसो विरूपान् । तैः प्रापितः सपदि सोऽजगरत्वमेव मत्तो निजां तनुमवाप्य जगाद नन्दम् ॥ १०८ ॥ नायं नरो हरिरयं परमः परेभ्यो विश्वेश्वरः सकलकारण आत्मतन्त्रः । विज्ञाय चैनमुरुसंसृतितो विमुक्ता यान्त्यस्य पादयुगलं मुनयो विरागाः ॥ १०९ ॥ नन्दं यदा च जगृहे वरुणस्य

SGDF
Sri Gargeshwari Digital Foundation

दूतस्तत्रापि मां जलपतेर्गृहमाशु यान्तम् । सम्पूज्य वारिपतिराह विमुच्य नन्दं नायं सुतस्तव पुमान्परमः स एषः ॥ ११० ॥ सन्दर्शितो ननु मयैव विकुण्ठलोको गोजीविनां स्थितिरपि प्रवरा मदीया । मानुष्यबुद्धिमपनेतुमजे मयि स्म तस्मान्मयि स्थितिमवाप्य शमं प्रयान्तु ॥ ॥ १११ ॥ श्रुत्वोद्धवो निगदितं परमस्य पुंसो वृन्दावनं प्रति ययौ वचनैश्च तस्य । दुःखं व्यपोह्य निखिलं पशुजीवनानामायात्पुनश्चरणसन्निधिमेव विष्णोः ॥ ११२ ॥ (१७३९) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये (श्रीकृष्णचरिते असुरसंहारो नाम) चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः

॥ ॐ ॥ एवं प्रशासति जगत्पुरुषोत्तमेऽस्मिन्भीमार्जुनौ तु सहदेवयुतावनुज्ञाम् । कृष्णादवाप्य वर्षत्रितयात्पुरं स्वमाजग्मतुर्हरिसुतेन विशोकनाम्ना ॥ १ ॥ सैरन्ध्रिकोदरभवः स तु नारदस्य शिष्यो वृकोदररथस्य बभूव यन्ता । या पिङ्गलाऽन्यभव आत्मनि संस्थितं तं संस्मृत्य कान्तमुरुगायमभूत्रिवक्रा ॥२॥ तं पञ्चरात्रविदमाप्य सुसारथिं स भीमो मुमोद पुनराप परात्मविद्याम् । व्यासात्परात्मत उवाच च फल्गुनादिदेवेषु सर्वविजयी परविद्ययैषः ॥ ३ ॥ सर्वानभागवतशास्त्रपथान्विधूय मार्गं चकार स तु वैष्णवमेव शुभ्रम् । क्रीडार्थमेव विजिगाय तथोभयात्मयुद्धे बलं चकर वाक्प्रभवेऽमितात्मा ॥ ४ ॥ नित्यप्रभूतसुशुभप्रतिभोऽपि विष्णोः श्रुत्वा परां पुनरपि प्रतिभामवाप । को नाम विष्ण्वनुपजीवक आस यस्य नित्याश्रयादभिहितापि रमा सदा श्रीः ॥ ५ ॥ व्यासादवाप परमात्मसुतत्वविद्यां धर्मात्मजोऽपि सततं

SGDF
Sri Gargeshwari Digital Foundation

भगवत्प्रपन्नः । ते पञ्च पाण्डुतनया मुमुदुर्नितान्तं सद्धर्मचारिण उरुक्रमशिक्षितार्थाः ॥ ६ ॥

यदा भरद्वाजसुतस्त्वसञ्चयी प्रतिग्रहोज्झो निजधर्मवर्ती । द्रौणिस्तदा धार्तराष्ट्रैः समेत्य क्रीडन्पयः पातुमुपैति सद्म ॥ ७ ॥ तस्मै माता पिष्टमालोड्य पातुं ददाति पीत्वैति तदैष नित्यम् । पीतक्षीरान्धार्तराष्ट्रान्समेत्य मया पीतं क्षीरमित्याह नित्यम् ॥ ८ ॥ नृत्यन्तमेनं पाययामासुरेते पयः कदाचिद्रसमस्य सोऽवैत् । पुनः कदाचित्स तु मातृदत्ते पिष्टे नेदं क्षीरमित्यारुराव ॥ ९ ॥ दृष्ट्वा रुवन्तं सुतमात्मजस्य स्नेहान्नियत्यैव जनार्दनस्य । सम्प्रेषितः कृपया चार्तरूपो द्रोणो ययावार्जयितुं तदा गाम् ॥ १० ॥ प्रतिग्रहात्सन्निवृत्तः स रामं ययौ न विष्णोर्हि भवेत्प्रतिग्रहः । दोषाय यस्मात्स पिताऽखिलस्य स्वामी गुरुः परमं दैवतं च ॥ ११ ॥ दृष्ट्वा चैनं जामदग्न्योऽप्यचिन्तयद्द्रोणं कर्तुं क्षितिभारापनोदे । हेतुं सुराणां नरयोनिजानां हन्ता चायं स्यात्सह पुत्रेण चेति ॥ १२ ॥ तेषां वृद्धिः स्यात्पाण्डवार्थे हतानां मोक्षेऽपि सौख्यस्य न सन्ततिश्च । योग्या सुराणां कलिजा सुपापाः प्रायो यस्मात्कलिजाः सम्भवन्ति ॥ १३ ॥ न देवानामाशतं पूरुषा हि सन्तानजाः प्रायशः पापयोग्याः । नाकारणात्सन्ततेरप्यभावो योग्यः सुराणां सदमोघरेतसाम् ॥ १४ ॥ अव्युच्छिन्ने सकलानां सुराणां तन्तौ कलिर्नो भविता कथञ्चित् । तस्मादुत्साद्याः सर्व एते सुरांशा एतेन साकं तनयेन वीराः ॥१५॥ एवं विचिन्त्याप्रतिमः स भार्गवो बभाष ईषत्स्मितशोचिषा गिरा । अनन्तशक्तिः सकलेश्वरोऽपि त्यक्तं सर्वं नाद्य वित्तं ममास्ति ॥ १६ ॥ आत्मा विद्या शस्त्रमेतावदस्ति तेषां मध्ये रुचितं त्वं गृहाण । उक्तः स इत्थं प्रविचिन्त्य विप्रो जगाद कस्त्वद्ग्रहणे समर्थः ॥१७॥ सर्वेशिता सर्वपरः स्वतन्त्रस्त्वमेव कोऽन्यः सदृशस्तवेश । साम्यं तवेच्छन्प्रतियात्यधो हि यस्मान्न चोत्थातुमलं

SGDF
Sri Gargeshwari Digital Foundation

कदाचित् ॥ १८ ॥ सर्वोत्तमस्येश तवोच्चशस्त्रैः कार्यं किमस्माकमनुद्धलानाम् । विद्यैव देया भवता ततोऽज सर्वप्रकाशिन्यमला सुसूक्ष्मा ॥ ॥ १९ ॥ इतीरितस्तत्त्वविद्यादिकाः स विद्याः सर्वाः प्रददौ सास्त्रशस्त्राः । अब्दद्विषट्केन समाप्य ताः स ययौ सखायं द्रुपदं महात्मा ॥ ॥२०॥ दानेऽर्धराज्यस्य हि तत्प्रतिज्ञां संस्मृत्य पूर्वामुपयातं सखायम् । सखा तवास्मीति तदोदितोऽपि जगाद वाक्यं द्रुपदोऽतिदर्पात् ॥ २१ ॥ न निर्धनो राजसखो भवेत यथेष्टतो विप्र गच्छेति दैवात् । इतीरितेऽस्याशु बभूव कोपो जितेन्द्रियस्यापि मुनेर्हरीच्छया ॥२२॥ प्रतिग्रहात्सन्निवृत्तेन सोऽयं मया प्राप्तो मत्पितुः शिष्यकत्वात् । पितुः शिष्यो ह्यात्मशिष्यो भवेत शिष्यस्यार्थः स्वीय एवेति मत्वा ॥ २३ ॥ सोऽयं पापो मामवज्ञाय मूढो दुष्टं वचोऽश्रावयदस्य दर्पम् । हनिष्य इत्येव मतिं विधाय ययौ कुरूञ्छिक्ष्यतां नेतुमेतान् ॥ २४ ॥ प्रतिग्रहाद्विनिवृत्तस्य चार्थः स्याच्छिष्येभ्यः कौरवेभ्यो ममात्र । एवं मन्वानः क्रीडतः पाण्डवेयान्सधार्तराष्ट्रान्पुरबाह्यतोऽख्यत् ॥ २५ ॥ विक्रीडतो धर्मसूनोस्तदैव सहाङ्गुलीयेन च कन्दुकोऽपतत् । कूपे न शेकुः सहिताः कुमारा उद्धर्तुमेनं पवनात्मजोऽवदत् ॥ २६ ॥ निष्पत्य चोद्धृत्य समुत्पतिष्ये कूपादमुष्माद्भृशनीचादपि स्म । सकन्दुकां मुद्रिकां पश्यताद्य सर्वे कुमारा इति वीर्यसंश्रयात् ॥२७॥ तदा कुमारानवदत्स विप्रो धिगस्त्रबाह्यां भवतां प्रवृत्तिम् । जाताः कुले भारतानां न वित्थ दिव्यानि चास्त्राणि सुरार्चितानि ॥ २८ ॥ इतीरिता अस्त्रविदं कुमारा विज्ञाय विप्रं सुरपूज्यपौत्रम् । सम्प्रार्थयामासुरथोद्धृतिं प्रति प्रधानमुद्रायुतकन्दुकस्य ॥ २९ ॥ स चाश्विषीकाभिरथोत्तरोत्तरं सम्प्रास्य दिव्यास्त्रबलेन कन्दुकम् । उद्धृत्य मुद्रोद्धरणार्थिनः पुनर्जगाद भुक्तिर्मम कल्प्यतामिति ॥ ३० ॥ यथेष्टवित्ताशनपानमस्य धर्मात्मजः प्रतिजज्ञे सुशीघ्रम् । तथैव तेनोद्धृतमङ्गुलीयं त्रिवर्गमुख्यात्मजवाक्यतोऽनु ॥३१॥

SGDF
Sri Gangeshwari Digital Foundation

पप्रच्छुरेनं सहिताः कुमाराः कोऽसीति सोऽप्याह पितामहो वः । वक्तेति ते दुद्रुवुराशु भीष्मं द्रोणोऽयमित्येव स तांस्तदोचे ॥३२॥ न राजगेहं स कदाचिदेति तेनादृष्टः स कुमारैः पुरातः । भीष्मो विद्यास्तेन सहैव चिन्तयन्नस्त्रप्राप्तिं तस्य शुश्राव रामात् ॥ ३३ ॥ श्रुत्वा वृद्धं कृष्णवर्णं द्विजं तं महास्त्रविद्यामपि तां महामतिः । द्रोणं ज्ञात्वा तस्य शिष्यत्व एतान्ददौ कुमारांस्तत्र गत्वा स्वयं च ॥३४॥ द्रोणोऽथ तानवदद्यो मदिष्टं कर्तुं प्रतिज्ञां प्रथमं करोति । तं धन्विनां प्रवरं साधयिष्य इत्यर्जुनस्तामकरोत्प्रतिज्ञाम् ॥ ३५ ॥ उन्मादनादीनि स वेद कृष्णादस्त्राण्यनापत्सु न तानि मुञ्चेत् । इत्याज्ञया केशवस्यापराणि प्रयोगयोग्यानि सदेच्छति स्म ॥ ३६ ॥ भीष्मादिभिर्भविता सङ्गरो नस्तदा नाहं गुरुभिर्नित्ययोद्धा । भवेयमेकः फल्गुनोऽस्त्रज्ञ एषां निवारकश्चेन्मम धर्मलाभः ॥ ३७ ॥ न बुद्धिपूर्वं वर इन्दिरापतेरन्यत्र मे ग्राह्य इतश्च जिष्णुः । करोतु गुर्वर्थमिति स्म चिन्तयन्भीमः प्रतिज्ञां न चकार तत्र ॥ ३८ ॥ तत्प्रेरितेनार्जुनेन प्रतिज्ञा कृता यदा विप्रवरस्ततः परम् । स्नेहं नितान्तं सुरराजसूनौ कृत्वा महास्त्राणि ददौ स तस्य ॥ ३९ ॥ स पक्षपातं च चकार तस्मिन्करोति चास्योरुतरां प्रशंसाम् । रहस्यविद्याश्च ददाति तस्य नान्यस्य कस्यापि तथा कथञ्चित् ॥ ॥ ४० ॥ भीमः समस्तं प्रतिभाबलेन जानन्स्नेहं त्वद्वितीयं कनिष्ठे । द्रोणस्य कृत्वा सकलास्त्रवेदिनं कर्तुं पार्थं नार्जुनवच्चकार ॥ ४१ ॥ नैवातियत्नेन ददर्श लक्ष्यं शुश्रूषायां पार्थमग्रे करोति । स्वबाहुवीर्याद्भगवत्प्रसादान्निहन्मि शत्रून्किमनेन चेति ॥ ४२ ॥

तदा समीयुः सकलाः क्षितीशपुत्रा द्रोणात्सकलास्त्राण्यवाप्तुम् । ददौ स तेषां परमास्त्राणि विप्रो रामादवाप्तान्यगतानि चान्यैः ॥ ४३ ॥ अस्त्राणि चित्राणि महान्ति दिव्यान्यन्यैर्नृपैर्मनसाप्यस्मृतानि । अवाप्य सर्वे तनया नृपाणां शक्ता बभूवुर्न यथैव पूर्वे ॥ ४४ ॥ नैतादृशाः

SGDF
Sri Gargeshwari Digital Foundation

पूर्वमासन्नरेन्द्रा अस्त्रे बले सर्वविद्यासु चैव । दौष्यन्तिमान्धातृमरुत्त-पूर्वाश्चैतत्समा नासुरुदारवीर्याः ॥ ४५ ॥ तदा कर्णोऽथैकलव्यश्च दिव्यान्यस्त्राण्याप्तुं द्रोणसमीपमीयतुः । सूतो निषाद इति नैतयोरदादस्त्राणि विप्रः स तु रामशिष्यः ॥४६॥ कर्णोऽनवाप्य निजमीप्सितमुच्चमानो यस्मादवाप पुरुषोत्तमतोऽस्त्रवृन्दम् । विप्रोऽप्ययं तमजमेमि भृगोः कुलोत्थमित्थं विचिन्त्य स ययौ भृगुपाश्रमाय ॥ ४७ ॥ स सर्ववेत्तुश्च विभोर्भयेन विप्रोऽहमित्यवददस्त्रवरातिलोभात् । जानन्नपि प्रददावस्य रामो दिव्यान्यस्त्राण्यखिलान्यव्ययात्मा ॥ ४८ ॥ अस्त्रज्ञचूडामणिमिन्द्रसूनुं विश्वस्य हन्तुं धृतराष्ट्रपुत्रः । एनं समाश्रित्य दृढो भवेतेत्यदाज्ज्ञात्वैवास्त्रमस्मै रमेशः ॥ ४९ ॥ ज्ञानं च भागवतमाप्य पराश्च विद्या रामादवाप्य विजयं धनुरग्रचयानम् । अब्दैश्चतुर्भिरथ च न्यवसत्तदन्ते हातुं न शक्त उरुगायमिमं स कर्णः ॥ ५० ॥ अङ्के निधाय स कदाचिदमुष्य रामः शिश्ये शिरो विगतनिद्र उदारबोधः । संसुप्तवत्सुरवरः सुरकार्यहेतोर्दातुं च वालिनिधनस्य फलं तदस्य ॥५१॥ तत्रास राक्षसवरः स तु हेतिनामा काले महेन्द्रमनुपास्य हि शापतोऽस्य । कीटस्तमिन्द्र उत तत्र समाविवेश कर्णस्य शापमुपपादयितुं सुतार्थे ॥ ॥ ५२ ॥ कर्णः स कीटतनुगेन किरीटिनैव ह्यूरोरधस्तलत औपरिगात्वचश्च । विद्धः शरेण स यथा रुधिरस्य धारां सुस्राव तं विगतनिद्र इवाह रामः ॥ ५३ ॥ किं त्वं न चालयसि मां रुधिरप्रसेके प्राप्तेऽपि पावनविरोधिनि कोऽसि चेति । तं प्राह कर्ण इह नैव मया विधेयो निद्राविरोध इति कीट उपेक्षितो मे ॥ ५४ ॥ जात्यास्मि सूत उत ते तनयोऽस्मि सत्यं तेनास्मि विप्र इति भार्गववंशजोऽहम् । अग्रेऽब्रुवं भवत ईश न हि त्वदन्यो माता पिता गुरुतरो जगतोऽपि मुख्यः ॥ ॥ ५५ ॥ इत्युक्तमात्रवचने स तु कीटकोऽस्य रामस्य दृष्टिविषयत्वत एव रूपम् । सम्प्राप्य नैजमतिपूर्णगुणस्य तस्य विष्णोरनुग्रहत आप

SGDF
Sri Gangeshwari Digital Foundation

विमानगः स्वः ॥ ५६ ॥ अथाह रामस्तमसत्यवाचं न ते सकाशे मम वासयोग्यता । तथापि ते नैव वृथा मदीया भक्तिर्भवेज्जेष्यसि सर्वशत्रून् ॥ ५७ ॥ अस्पर्धमानं न कथञ्चन त्वां जेता कश्चित्स्पर्धमानस्तु यासि । पराभूतिं नात्र विचार्यमस्ति प्रमादी त्वं भविता चास्त्रसङ्घे ॥ ॥ ५८ ॥ याहीति तेनोक्त उदारकर्मणा कर्णो ययौ तं प्रणम्येशितारम् ।

तथैकलव्योऽपि निराकृतोऽमुना द्रोणेन तस्य प्रतिमां वनेऽर्चयन् ॥ ५९ ॥ ततः कदाचिद्धृतराष्ट्रपुत्रैः पाण्डोः सुता मृगयां सम्प्रयाताः । अग्रे गच्छन्सारमेयो रुराव धर्मात्मजस्यात्र वने मृगार्थी ॥ ॥ ६० ॥ श्रुत्वा रावं सारमेयस्य दूराच्छरैर्मुखं शब्दवेधी पुपूरे । स एकलव्यो व्रणमस्य नाकरोच्छ्वा पूरितास्यः पाण्डवानभ्ययात्सः ॥ ६१ ॥ दृष्ट्वा चित्रं कुरवः पाण्डवाश्च द्रष्टुं कर्तारं मार्गयामासुरत्र । द्रोणाकृतिं मार्तिकीं पूजयन्तं ददृशुश्चैनं धनुरेवाभ्यसन्तम् ॥ ६२ ॥ पैशाचमेवैष पिशाचकेभ्यः पूर्वं विवेदास्त्रबृन्दं निषादः । दिव्यान्यस्त्राण्याप्तुमेतां च शिक्षां द्रोणं सदा पूजयति स्म भक्त्या ॥ ६३ ॥ दृष्ट्वा विशेषं तममुष्य पार्थो द्रोणायोचे त्वद्वचो मे मृषाऽऽसीत् । इत्युक्त एनं त्वभिगम्य दक्षिणां विप्रो ययाचे दक्षिणाङ्गुष्ठमेव ॥ ६४ ॥ तस्य प्रसादोपचितोरुशिक्षो निषादोऽदाद्दक्षिणाङ्गुष्ठमस्मै । ततः परं नास्य बभूव शिक्षा सन्मुष्टिहीनस्य समाऽर्जुनेन ॥ ६५ ॥ पुनः कृपालू रैवतपर्वते तं द्रोणः प्रादादस्त्रवराणि तस्मै । एकान्त एवास्य भक्त्या सुतुष्टो धन्विश्रेष्ठं कृतवानर्जुनं च ॥ ६६ ॥ (१८०५) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये (पाण्डवादीनामस्त्रविद्याभ्यासो नाम) पञ्चदशोऽध्यायः ॥ १५ ॥

SGDF
Sri Gargeshwari Digital Foundation

अथ षोडशोऽध्यायः

॥ ॐ ॥ काले त्वेतस्मिन्भूय एवाखिलैश्च नृपैर्युक्तो मागधो योद्धुकामः । प्रायाद्यदूंस्तत्र नित्याव्ययातिबलैश्चर्योऽपीच्छयागात्स कृष्णः ॥ १ ॥ सन्दर्शयन्बलिनामल्पसेनाद्युपस्कराणां बहुलोपस्करैश्च प्राप्ते विरोधे बलिभिर्नीतिमग्र्यां ययौ सरामो दक्षिणाशां रमेशः ॥२॥ सोऽनन्तवीर्यः परमोऽभयोऽपि नीत्यै गच्छञ्जामदग्न्यं ददर्श। क्रीडार्थमेकोऽपि ततोऽतिदुर्गं श्रुत्वा गोमन्तं तत्र ययौ सहाग्रजः ॥ ३ ॥ तदा दुग्धाब्धौ संसृतिस्थैः सुराद्यैः पूजां प्राप्तुं स्थानमेषां च योग्यम् । मुक्तस्थानादाप नारायणोऽजो बलिश्चागात्तत्र संद्रष्टुमीशम् ॥ ४ ॥ तत्रासुरावेशममुष्य विष्णुः सन्दर्शयन्सुप्तिहीनोऽपि नित्यम् । संसुप्तवच्छिश्य उदारकर्मा संज्ञायै देवानां मुखमीक्ष्याप्रमेयः ॥ ५ ॥ देवाश्च तद्भावविदोऽखिलाश्च निमीलिताक्षाः शयनेषु शिश्यिरे। तदा बलिस्तस्य विष्णोः किरीटमादायागाज्जहसुः सर्वदेवाः ॥ ६ ॥ नारायणे सर्वदेवैः समेते ब्रह्मादिभिर्हासमाने सुपर्णः । गत्वा पातालं युधि जित्वा बलिं च किरीटमादायाभ्ययाद्यत्र कृष्णः ॥ ७ ॥ तत्तस्य शीर्ष्णि प्रतिमुच्य नत्वा खगस्स्तुत्वा देवदेवं रमेशम् । स्मृत आगच्छेत्येव विसर्जितोऽमुना ययौ दुग्धाब्धिं यत्र नारायणोऽसौ ॥ ८ ॥ किरीटं तत्कृष्णमूर्ध्निप्रविष्टं तत्तुल्यमासीत्तस्य रूपेष्वभेदात् । तदिच्छया चैव नारायणस्य शीर्ष्ण्यप्यासीद्युगपद्दुग्धवार्धौ ॥ ९ ॥ पूर्वं प्राप्तान्येव दिव्यायुधानि पुनर्वैकुण्ठं लोकमितानि भूयः । तदावतेरू रौहिणेयस्य चैव भार्याप्यागाद्वारुणी नाम पूर्वा ॥१०॥ सैवापरं रूपमास्थाय चागाच्छ्रीरित्याख्यं सेन्दिरावेशमग्र्यम् । कान्तिश्चागात्तस्य सोमस्य चान्या भार्या द्वयोः पूर्वतना सुरूपा ॥११॥ ताभी रामो मुमुदे तत्र तिष्ठन्शशाङ्कपूर्णोद्रिक्तकान्तिः सुधामा । तस्या वारुण्याः प्रतिमा पेयरूपा कादम्बरी वारुणी तां पपौ

SGDF
Sri Gurgeshwari Digital Foundation

सः ॥ १२ ॥ एवं तयोः क्रीडतोः स्वैरमत्र राजन्यबृन्दानुगतो जरासुतः। गिरिं गोमन्तं परिवार्यादहत्तं दृष्ट्वा देवौ पुरुबृतुर्बलाढ्यौ ॥१३॥ गिरिस्ताभ्यां पीडितः सन्निमग्नो भूमौ पद्भ्यां योजनैकादशं सः। निष्पीडिताज्जलधारोद्धताऽस्माद्वह्निं व्याप्तं शमयामास सर्वम् ॥ १४ ॥ सेनां प्रविष्टौ सर्वराजन्यवृन्दं व्यमश्नतां देववरौ स्वशस्त्रैः। तत्रैव हंसो डिभिकश्चैकलव्यः सकीचकस्तौ शिशुपालपौण्ड्रकौ ॥ १५ ॥ भौमात्मजो दन्तवक्त्रश्च रुक्मी सौभाधिपो मैन्दमैन्दानुजौ च। अन्ये च ये पार्थिवाः सर्व एव क्रोधात्कृष्णं परिवार्याभ्यवर्षन् ॥ १६ ॥ शस्त्रैरस्त्रैर्द्रुमपूगैः शिलाभिर्भक्ताश्च ये शल्यबाह्लीकमुख्याः। सोमदत्तः सौमदत्तिर्विराटः पाञ्चालराजश्च जरासुतस्य। भयात्कृष्णं शरवर्षैरवर्षन्कारागृहे वासिता मागधेन ॥ १७ ॥ सर्वानेताञ्छरवर्षेण कृष्णो विस्रुतवाजिध्वजशस्त्रवर्मणः। कृत्वा वमच्छोणितानार्तरूपान्विद्रावयामास हरिर्यथा मृगान् ॥ १८ ॥ हत्वा सेनां विंशदक्षौहिणीं तां त्रिभिर्युक्तां रुक्मिणं नैव कृष्णः। रुक्मिण्यर्थे पीडयामास शस्त्राण्यस्य च्छित्वा विरथं द्रावयानः ॥ १९ ॥ जरासुतो रौहिणेयेन युद्धं चिरं कृत्वा तन्मुसलेन पोथितः। विमोहितः प्राप्तसंज्ञश्चिरेण क्रुद्धो गदां तदुदूरस्यभ्यपातयत् ॥२०॥ तेनाहतः सुभृशं रौहिणेयः पपात मूर्च्छाभिगतः क्षणेन। अजेयत्वं तस्य दत्तं हि धात्रा पूर्वं गृहीतो विष्णुना रामगेन ॥ ॥२१॥ तथाकृते बलभद्रे तु कृष्णो गदामादाय स्वामगान्मागधेशम्। तताड जत्रौ स तयाभिताडितो जगाम गां मूर्च्छयाऽभिप्लुताङ्गः ॥ २२ ॥ अथोत्तस्थौ रौहिणेयः सहैव समुत्तस्थौ मागधोऽप्यग्र्यवीर्यः। क्रुद्धो गृहीत्वा मौलिमस्याशु रामो वधायोद्यच्छन्मुसलं बाहुशाली ॥ २३ ॥ अथाब्रवीद्वायुरेनं न राम त्वया हन्तुं शक्यते मागधोऽयम्। वृथा न ते बाहुबलं प्रयोज्यममोघं ते यद्बलं तद्वदस्त्रम् ॥ २४ ॥ अन्यो हन्ता बलवानस्य चेति श्रुत्वा ययौ बलभद्रो विमुच्य। जरासुतं पुनरुद्यच्छ-

SGDF
Sri Gargeshwari Digital Foundation

मानं जघान कृष्णो गदया स्वयैव ॥ २५ ॥ तेनाहतः स्रस्तसमस्तगात्रः पपात मूर्च्छामभिगतः स राजा । चिरात्संज्ञां प्राप्य चान्तर्हितोऽसौ सम्प्राद्रवद्भीतभीतः सलज्जः ॥ २६ ॥ ययौ शिष्टै राजभिः संयुतश्च पुरं जीवेत्येव कृष्णेन मुक्तः । पुनर्युद्धं बहुशः केशवेन कृत्वा जितो राजगणैः समेतः ।

कृष्णो जित्वा मागधं रौहिणेययुक्तो ययौ दमघोषेण सार्धम् ॥ ॥ २७ ॥ पितृष्वसायाः पतिना तेन चोक्तः पूर्वं जितेनापि युधि स्म बान्धवात् । यामः पुरं करवीराख्यमेव महालक्ष्म्याः क्षेत्रसन्दर्शनाय ॥ ॥ २८ ॥ श्रुत्वा वाक्यं तस्य युद्धे जितस्य प्रीत्या युक्तस्यात्मना तद्युतोऽगात् ॥ २९ ॥ गन्धर्वोऽसौ दनुनामा नरोऽभूत्तस्मात्कृष्णे भक्तिमांश्चास राजा । पुरं प्राप्तांस्तान्स विज्ञाय पापः सृगालाख्यो वासुदेवः क्रुधाऽगात् ॥ ३० ॥ सूर्यप्रदत्तं रथमारुह्य दिव्यं वरादवध्यस्तिग्मरुचेः स कृष्णम् । योद्धुं ययावमुचच्चास्त्रसङ्घाञ्छिरस्तस्याथाशु जहार कृष्णः ॥ ॥ ३१ ॥ द्विधा कृत्वा देहमस्यारिणा च पुत्रं भक्तं तस्य राज्येऽभिषिच्य । स शक्रदेवं मणिभद्रः पुरा यो ययौ पुरीं स्वां सहितोऽग्रजेन ॥ ॥ ३२ ॥ नीतिं बलिष्ठस्य विहाय सेनां दूराद्युद्धं दर्शयित्वैव गुप्त्यै । स्वसेनायाः सर्वपूर्णात्मशक्तिः पुनः पुरीं प्राप्य सम्पूजितोऽवसत् ॥ ३३ ॥ ॥ (१८३९) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीकृष्णचरिते जरासन्धादिभङ्गो नाम षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः

॥ ॐ ॥ गतेऽथ चेदिपे स्वकं पुरं जनार्दनोऽशृणोत् । रमैव रुक्मिणीति योद्यतां स्वयंवराय ताम् ॥ १ ॥ स रुक्मिनामकोऽग्रजः श्रियो द्विषन्नमापतिम् । हरेः प्रदातुमुद्यतां न्यवारयद्धरिप्रियाम् ॥ २ ॥

SGDF Sri Gargeshwari Digital Foundation

प्रघोषिते स्वयंवरेऽथ तेन मागधादयः । समीयुरुग्रपौरुषाः ससाल्व-
पौण्ड्रचेदिपाः ॥ ३ ॥ तदा जगाम केशवो जवेन कुण्डिनं पुरम् ।
स्मृतोऽथ तेन पक्षिराट् समाजगाम केशवम् ॥ ४ ॥ पतत्रवायुनाऽस्य
ते नरेश्वराः प्रपातिताः । यदेदृशं पतत्रिणो बलं हरेः किमुच्यते ॥५॥
किमत्र नः कृतं भवेत्सुखाय हीति तेऽब्रुवन् । अथाब्रवीज्जरासुतो जयी
पयोब्धिमन्दिरः ॥ ६ ॥ किलैष पक्षिवाहनो यतश्च नान्यथा भवेत् ।
जिता वयं च सर्वशोऽमुनैकलेन संयुगे ॥७॥ अनेकशो न सङ्गतैर्जितः
कदाचिदेष हि । अमुष्य चाग्रजः पुरा निहन्तुमुद्यतो हि माम् ॥ ८ ॥
अदृश्यवाक्यतोऽत्यजत्प्रताडनात्सुपीडितम् । किमस्य तूच्यते बलं वयं
तृणोपमाः कृताः । समस्तशो मृधेमृधे हि येन चाक्षतेन हि ॥ ९ ॥
किमत्र कुर्वतां सुखं भवेदुदीर्णसङ्कटे । इति ब्रुवन्नवाङ्मुखं नृपश्चकार
विच्छविः ॥ १० ॥ अथाह चेदिभूपतिः सदन्तवक्रको वचः । पुरा
हरेर्हि पार्षदः प्रसन्नबुद्धिरेकदा ॥ ११ ॥ शृणुष्व राजसत्तम प्रभुं
शिवस्वयम्भुवोः । हरिं वदन्ति केचिदप्यदो भवेन्न वै मृषा ॥ १२ ॥
तथाऽऽवयोश्च दर्शने भवेत्कदाचिदूर्जिता । अमुष्य भक्तिरन्यथा पुनश्च
जायते क्रुधा ॥ १३ ॥ न कारणं च विग्रहे न संशयः परो हरिः ।
व्रजाम तं सुखार्थिनो वयं विहाय शत्रुताम् ॥ १४ ॥ इदं हि नः
शुभप्रदं न चान्यथा शुभं क्वचित् । इतीरितो जरासुतो ददर्श तौ
दहन्निव ॥१५॥ अथ प्रहस्य सौभराड्वचो जगाद मागधम् । विनिन्द्य
तौ क्रुधा स्फुरन्क्रुधा स्फुरन्तमीक्ष्य च ॥ १६ ॥ न तन्मृषा हरिः
स्वयं जनार्दनो वधाय नः । प्रजात एष यादवो वयं च दानवेश्वराः ॥
॥ १७ ॥ स्वधर्म एष नः सदा दृढप्रतीपता हरौ । स्वधर्मिणो हता
अपि प्रयाम सद्गतिं ध्रुवम् ॥१८॥ शिवश्च नः परा गतिर्गुरुर्भवानरि-
र्हरिः । इतीरितः स मागधो जगाद साधु साध्विति ॥ १९ ॥ तथैव
रुक्मिपूर्वकाः करूशचेदिपौ च तौ । विनिश्चयं कुबुद्धयो युधे च चक्रु-

SGDF
Sri Gargeshwari Digital Foundation

रूर्जितम् ॥ २० ॥ सदा प्रतीपकारिणौ भवाव कृष्ण इत्यपि । गुरोः प्रसादमाप्नुतां करूशचेदिभूभृतौ ॥ २१ ॥ पुनश्च ते त्वमन्त्रयन्सहैव पापबुद्धयः । ध्रुवं समागतो हरिर्लभेत रुक्मिणीमिमाम् ॥ २२ ॥ अयं त्रिलोकसुन्दरः सुरूपिणी च रुक्मिणी । मुखेन बाहुनाऽप्ययं समस्तलोकजिद्वशी ॥२३॥ समस्तवेदिनां वरं जितारिमग्र्यरूपिणम् । समस्तयोषितां वरा व्रजेत रुक्मिणी ध्रुवम् ॥२४॥ वयं च मानसंक्षयं नितान्तमाप्नुमस्तदा । न शक्नुमो निवारितुं शरैरमुं कथञ्चन ॥२५॥ अतः स्वयंवरे यथा न सङ्गमो हरेर्भवेत् । तथा विधानमेव नः सुनीतिरूर्जिता ध्रुवम् ॥ २६ ॥ अतो न देयमस्य नः सुभूभुजां समागमे । क्वचित्कदाचिदासनं न चार्घ्यपूर्वको विधिः ॥ २७ ॥ न चास्यति क्वचित्क्षितौ विमानितः पुरो हि नः । परासनस्थभूभुजां स मानितो हि दैवतैः ॥ २८ ॥ स दर्पमानसंयुतः क्रुधा प्रयास्यति ध्रुवम् । पुरीं स्वकां ततो वयं विधेम च स्वयंवरम् ॥ २९ ॥ इति स्म सर्वभूभुजां विनिश्चयं स कैशिकः । क्रथोऽवगम्य भीष्मकानुजोऽभ्ययाद्धरिं द्रुतम् ॥ ॥ ३० ॥ प्रणम्य पादपद्मयोर्निजं गृहं प्रवेश्य च । महासनं प्रदाय तौ प्रचक्रतुर्वरार्चनम् ॥ ३१ ॥

अथागमच्छतक्रतोर्वचः प्रगृह्य भूभुजः । जरासुतादिकान्पुमानुवाच चार्थवद्वचः ॥ ३२ ॥ अहं प्रियः शचीपतेः सदास्य चाक्षिगोचरः । सुरेन्द्र आज्ञयाऽवदन्नृपान्व ईश्वरो हि सः ॥ ३३ ॥ समस्तराजसत्पतिर्हरिर्न चान्य इत्यपि । वराभिषेकमीशितुः कुरुध्वमाश्वसंशयम् ॥३४॥ अतोऽन्यथा शिरस्यहं निपातयामि वोऽशनिम् । इतीदमिन्द्रशासनं कुरुध्वमित्यसौ ययौ ॥ ३५ ॥ तदीरितं निशम्य ते पुनः सुतप्तचेतसः । बभूवुरूचिरे वचः सुगर्वितो हि वासवः ॥३६॥ पुरा बिभेति नः सदा प्रति प्रति स्म वासवः । उताद्य कृष्णसंश्रयादृढं विभीषयत्यसौ ॥ ३७ ॥ अदृश्य एव देवराड्यदि स्म वज्रमुत्सृजेत् ।

SGDF
Sri Gangeshwari Digital Foundation

भवेम पीडिता वयं वरादमृत्यवोऽपि हि ॥३८॥ पुरा दिवि स्थितस्य च प्रमर्दने वयं क्षमाः । उताद्य यद्यमुं वयं व्रजेम कृष्ण एष्यति ॥ ॥ ३९ ॥ अतोऽभिषेचनाद्यदीह शार्ङ्गिणः शचीपतिः । न वज्रमुत्सृजेत्तदाभिषेचयाम तं वयम् ॥ ४० ॥ अतोऽन्यथा दनुर्यथा वरादमृत्युकोऽपि सन् । सुरेन्द्रवज्रताडितो बभूव कुक्षिगास्ययुक् ॥ ॥४१॥ तथैव कृष्णसंश्रयात्स नः शचीपतिर्नयेत् । इति स्म निश्चिता नृपा न यातयन्त शौरये ॥ ४२ ॥ समस्तशो जरासुतादिभिः कृतेऽभिषेचने । अतीव भग्नमानकान्न चानुयाति कश्चन ॥४३॥ समाश्रयं च केशवं तदैव जीवनार्थिनः । प्रकुर्युरासुरा अपीति देवकार्यसङ्गन्यः ॥ ॥ ४४ ॥ इतीक्ष्य पाकशासनोऽवदज्जरासुतादिकान् । सरुक्मिसाल्वचेदिपो न यातु मागधो हरिम् ॥ ४५ ॥ ततस्तु तान्विना परेऽधिराजराज इत्यमुम् । तदाभिषेक्तुमुद्यता नृपाः सुरेशशासनात् ॥ ४६ ॥ ततः शचीपतिर्निजं वरासनं हरेरदात् । विवेश तत्र केशवो नभस्थलावतारिते ॥ ४७ ॥ करे प्रगृह्य केशवो न्यवेशयत्सहासने । पतत्रिपुङ्गवं च तौ स भीष्मकानुजौ प्रभुः ॥ ४८ ॥ अथाखिला नरेश्वरा मुनीन्द्रसंयुता हरिम् । सुशातकौम्भकुम्भकैः प्रचक्रुराभिषेकिणम् ॥ ४९ ॥ विरिञ्चिशर्वपूर्वकैरभिष्टुतः सुरादिभिः । समस्तदेवगायकैः प्रगीत आस केशवः ॥ ५० ॥ अथाह भीष्मकं प्रभुः स्वयंवरः किल त्वया । अभीप्सितः सुताकृते शुभाय ते भवेन्न सः ॥५१॥ इयं रमा तवात्मजा बभूव तां हरेर्न चेत् । ददाति चेत्तदा पिता निरिन्दिरो व्रजेदधः ॥ ॥५२॥ हिताय चैतदीरितं तवान्यथा न चिन्तय । न योषिदिच्छया त्वहं ब्रवीमि पश्य यादृशः ॥ ५३ ॥ उदीर्य चैवमीश्वरश्चकार हाविरात्मनः । स विश्वरूपमुत्तमं विसङ्ख्यशीर्षबाहुकम् ॥ ५४ ॥ अनन्ततेजआततं विसङ्ख्यरूपसंयुतम् । विचित्रमौलिकुण्डलाङ्गदोरुहारनूपुरम् ॥ ॥ ५५ ॥ ज्वलत्सुकौस्तुभप्रभाप्रभासकं शुभाम्बरम् । प्रपश्य यादृशाः

SGDF
Sri Gargeshwari Digital Foundation

स्त्रियो ममेत्यदर्शयच्छ्रियम् ॥ ५६ ॥ अनन्तरूपिणीं परां मनुष्यदृष्टितोऽधिकाम् । स रुक्मिणीतनोरपि व्यदर्शयच्च देवताः ॥ ५७ ॥ तदद्भुतं समीक्ष्य तु प्रभीत आस भीष्मकः । पपात पादयोर्विभोः करोमि तत्तथेति च ॥ ५८ ॥ पुनश्च विश्वरूपतां पिधाय पद्मलोचनः । जगाम पक्षिवाहनः पुरीं स्वबाहुपालिताम् ॥ ५९ ॥

अपांपतिश्च मैथिलः स्वयंवरं कृतावपि । हरिं विनिश्चयादियं व्रजेदिति स्म चक्रतुः ॥ ६० ॥ स्वयंवरः क्षितेर्भुजां स्वधर्म इत्यतो द्वयोः । न दोष आस भीष्मको न केशवार्थमैच्छत ॥ ६१ ॥ अतो हरौ प्रबोध्य तं गते कृपालुसत्तमे । वशीकृते च भीष्मके नृपास्त्वमन्त्रयन्पुनः ॥ ६२ ॥ यशश्च धर्ममुत्तमं विधित्सता वृकोदरे । न केशवेन सूदितो जरासुतो हि मन्यते ॥ ६३ ॥ वराच्छिवस्य मामयं न हन्तुमीष्ट उत्तमात् । अतः शिवप्रसादतो जितोऽपि जेष्य उत्तरम् ॥ ॥ ६४ ॥ मृधेमृधे जितोऽपि सन्दृढाशया पुनःपुनः । समीहते युधे शिवं न चावमन्यते क्वचित् ॥ ६५ ॥ अतः पुनश्च भूमिपानुवाच बारुहद्रथः । धिगेव पौरुषं हि नो यदेष नोऽजयत्सदा ॥ ६६ ॥ अभूपतेर्न चासनं प्रदेयमित्युदाहृतम् । अमुष्य नस्तदन्यथा बभूव चिन्तितं नृपाः ॥ ६७ ॥ अयं नृपोत्तमाङ्गणे महेन्द्रपीठमारुहत् । समस्तराजराजतामवाप नोऽप्यनिच्छताम् ॥ ६८ ॥ अतः पुनः कथं हरिं वयं जयेम चिन्त्यताम् । यथा च भीष्मकात्मजामवाप्नुयाच्च चेदिराट् ॥६९॥ अयं हि दत्तपुत्रको ममौरसाद्विशिष्यते । अतो निवेश्य एष मे सुरूपिणी च रुक्मिणी ॥ ७० ॥ शिवागमेषु शिष्यकाः सरुक्मिसाल्वपौण्ड्रकाः । ममाखिला नृपास्ततः कुरुध्वमेतदेव मे ॥७१॥ इतीरिते तु सौभराट् जगाद रुक्मिसंविदा । स्वयंवरो निवर्तितः स्वसारमेष दास्यति ॥ ७२ ॥ न चातिवर्तितुं क्षमः पितास्य चेदिपाय ताम् । प्रदातुकाममात्मजं वयोगतस्तथाऽबलः ॥ ७३ ॥ स्वयं तु

SGDF
Sri Gurgeshwari Digital Foundation

कृष्ण एत्य नो विजित्य कन्यकां हरेत् । ततोऽस्य पूर्वमेव नो ह्यभावता कृता शुभा ।। ७४ ।। उपाय एष चिन्तितो मयात्र मागधेश्वर । मुनिं हि गर्गनामकं ह्यमुष्य शाल आक्षिपत् ।। ७५ ।। यदास्य षण्ढतोदिता मुनेः पुरोहितस्य च । परेण वृष्णयोऽहसंश्चुकोप गर्ग एषु हि ।।७६।। चकार च प्रतिश्रवं समार्जये सुतं द्रुतम् । अकृष्णतां य आनयेद्भुवोऽपि वृष्णिनाशकः ।। ७७ ।। यतो हि कृष्णसंश्रयाद्धतापहासिता वयम् । इति ब्रुवन्वनं ययौ तपश्च शैवमाचरत् ।। ७८ ।। स चूर्णमायसं त्वदन्ददर्श चाब्दतः शिवम् । वरं ततोऽभिपेदिवान्सुतं हरेरभावदम् ।। ।। ७९ ।। स विष्णुदैवतोऽपि सन्प्रविष्ट उल्बणासुरैः । व्यधाद्धरेः प्रतीपकं व्रतं तु नैष्ठिकं जहौ ।। ८० ।। तमार चासुराप्सरा बलिष्ठपुत्र-काम्यया । प्रविश्य गोपिकाङ्गनासमूहमध्यमुल्बणा ।। ८१ ।। स यावनेन भूभृता हि गोपिकाभिरर्चितः । अपुत्रकेण जानता मुनेर्मनोऽनुचिन्तितम् ।। ८२ ।। स चाप्सरस्तनौ सुतं निषिच्य यावनाय च । ददौ विमोहितः क्रुधा किमेतदीशवैरिणः ।। ८३ ।। स आश्रमाच्च नैष्ठिकाद्विदूषितः प्रतीपकृत् । हरेश्च तापमेयिवाञ्जगर्ह चात्मशेमुषीम् ।। ।।८४।। जगाम चारणं हरिं प्रपाहि मां सुपापिनम् । इति स्म विष्ण्वनुज्ञया चकार वैष्णवं तपः ।। ८५ ।। कुतो हि भाग्यमापतेन्मुनेः शिवार्चने सदा । भवादृशा हि दानवाः स्थिराः शिवार्चने सदा ।।८६।। सुतोऽस्य कालनामको बभूव कृष्णमर्दितुम् । सदैव कालकाङ्क्षणात्स यावनाभिषेचितः ।।८७।। तवैव शिष्य एष चातिभक्तिमान्हि शङ्करे । प्रभूतसेनया युतो बलोद्धतश्च सर्वदा ।। ८८ ।। तमेव यामि शासनात्त्वोपनीय सत्वरम् । विकृष्णकं विधाय च क्षितेस्तलं रमामहे ।।८९।। ततश्च रुक्मिणीं वयं प्रदापयाम चेदिपे । विनाश्य देवपक्षिणो यथेष्टमास्म सर्वदा ।। ९० ।। इतीरितो जरासुतो बभूव दुर्मना भृशम् । किरीटमण्डितं शिरश्चकार चाश्ववाग्भृशम् ।।९१।। करं करेण पीडय-

SGDF
Sri Gurgeshwari Digital Foundation

न्निशाम्य चात्मनो भुजौ । जगाद कार्यसिद्धये कथं प्रयाचये परम् ॥ ॥ ९२ ॥ सुदुर्गकार्यसन्ततिं ह्यगुः स्म मद्भुजाश्रयाः । समस्तभूतले नृपाः स चाहमेष मागधः ॥ ९३ ॥ कदाप्यचीर्णमद्य तत्कथं करोमि केवलम् । गिरीशपादसंश्रयः प्रभुः समस्तभूभृताम् ॥ ९४ ॥ इतीरितः स सौभराट् जगाद वाक्यमुत्तरम् । भवानपि स्म मुह्यते किमस्मदादयः प्रभो ॥९५॥ स्वशिष्यकैः कृतं तु यत्किमन्यसाधितं भवेत् । स्वशिष्य-दासवर्गकैः समर्थयन्ति भूभुजः ॥ ९६ ॥ अपि स्म ते बलाश्रय-प्रवृत्तयोऽस्मदादयः । पुमान्कुठारसङ्ग्रहादशक्त ईर्यते नु किम् ॥९७॥ कुठारसंमितो ह्यसौ तवैव यावनेश्वरः । विना भवद्बलं क्वचित्प्रवर्तितुं न हि क्षमः ॥ ९८ ॥ वरो हि कृष्णमर्दने वृतोऽस्य केवलं शिवात् । तदन्यशत्रुपीडनात्त्वमेव चास्य रक्षकः ॥ ९९ ॥ तवाखिलैरजेयता शिवप्रसादतोऽस्ति हि । विशेषतो हरेर्जये वरादयं विमृग्यते ॥१००॥ इतीरितेऽप्यतृप्तवत्स्थिते तु बार्हद्रथे । जगाम सौभमास्थितः स सौभ-राट् च यावनम् ॥ १०१ ॥

स कालयावनोऽथ तं जरासुतान्तिकागतम् । निशम्य भक्ति-पूर्वकं प्रणम्य चार्चयद्द्रुतम् ॥ १०२ ॥ जरासुतो हि दैवतं समस्त-केशवद्विषाम् । इति प्रणम्य तां दिशं तदीयमाश्वपूजयत् ॥ १०३ ॥ तदीरितं निशम्य च द्रुतं त्रिकोटिसङ्ख्यया । अक्षौहिणीकया युतः स्वसेनया निराक्रमत् ॥१०४॥ तदश्वमूत्रविष्ठया बभूव नामतः शकृत् । नदी सुवेगगामिनी कलौ च या वहेद्द्रुतम् ॥१०५॥ पुनः पुनर्नदीभवं निशाम्य देशसङ्क्षयम् । तदन्यदेशमूत्रितं व्यशोषयद्धि मारुतः ॥१०६॥ हरिश्च वैनतेययुग्विचार्य रामसंयुतः । सदातिपूर्णसंविदप्यजोऽथ लील-याऽस्मरत् ॥ १०७ ॥ युयुत्सुरेष यावनः समीपमागतोऽद्य नः । युयुत्सतामनेन नो जरासुतोऽभियास्यति ॥ १०८ ॥ स यादवान्हनि-ष्यति प्रभञ्जतस्तु कोपतः । पुरा जयाशया हि नो यदून्न जघ्निवा-

SGDF
Sri Gargeshwari Digital Foundation

नसौ ॥ १०९ ॥ निराशकोऽद्य यादवानपि स्म पीडयिष्यति । अतः समुद्रमध्यगा पुरीविधानमद्य मे ॥ ११० ॥ प्ररोचते निधानमप्यमुत्र सर्वसात्वताम् । उदीर्य चैवमीश्वरोऽस्मरत्सुरेशवार्धकिम् ॥ १११ ॥ स भौवनः समागतः कुशस्थलीं विनिर्ममे । निरम्बुके तु सागरे जनार्दनाज्ञया कृते ॥ ११२ ॥ महोदकस्य मध्यतश्चकार तां पुरीं शुभाम् । द्विषट्कयोजनायतां पयोब्धिमध्यगोपमाम् ॥ ११३ ॥ चकार लावणोदकं जनार्दनोऽमृतोपमम् । सभां सुधर्मनामिकां ददौ समीरणोऽस्य च ॥ ११४ ॥ शतक्रतोः सभां तु तां प्रदाय केशवाय सः । निधीन्समर्प्य सर्वशो ययौ प्रणम्य तं प्रभुम् ॥ ११५ ॥ समस्तदेवतागणाः स्वकीयमर्पयन्हरौ । विमुच्य पक्षिपुङ्गवं स योद्धु-मैच्छदच्युतः ॥ ११६ ॥ समस्तमाथुरान्प्रभुः कुशस्थलीस्थितान्क्षणात् । विधाय बाहुयोधकः स यावनं समभ्ययात् ॥ ११७ ॥ अनन्तशक्ति-रप्यजः सुनीतिदृष्टये नृणाम् । व्यवासयन्निजाङ्गनान्स लीलयैव केवलम् ॥ ॥११८॥ अनाद्यनन्तकालकं समस्तलोकमण्डलम् । यदीक्षयैव रक्ष्यते किमस्य वृष्णिरक्षणम् ॥ ११९ ॥ निरायुधं च मामयं वराच्छिवस्य न क्षमः । समस्तसेनया युतोऽपि योद्धुमित्यदर्शयत् ॥ १२० ॥ स कृष्णपन्नगं घटे निधाय केशवोऽर्पयत् । निरायुधोऽप्यहं क्षमो निहन्तु-मप्रियानिति ॥ १२१ ॥ घटं पिपीलिकागणैः प्रपूर्य यावनोऽस्य च । बहुत्वतो विजेष्य इत्यहिं मृतं व्यदर्शयत् ॥ १२२ ॥ किमत्र सत्य-मित्यहं प्रदर्शयिष्य इत्यजः । उदीर्य दूतमभ्ययात्स यावनं प्रबाधितुम् ॥ ॥ १२३ ॥ स बाहुनैव केशवो विजित्य यावनं प्रभुः । निहत्य सर्वसैनिकान्स्वमस्य यापयत्पुरीम् ॥१२४॥ महास्त्रशस्त्रसञ्चयान्सृजन्त-माशु यावनम् । न्यपातयद्रथोत्तमात्तलेन केशवोऽरिहा ॥ १२५ ॥ विवाहनं निरायुधं विधाय बाहुना क्षणात् । विमूर्च्छितं न चाहन-त्सुरार्थितं स्मरन्हरिः ॥१२६॥ पुरा हि यौवनाश्वजे वरप्रदाः सुरेश्वराः ।

SGDF
Sri Gangeshwari Digital Foundation

ययाचिरे जनार्दनं वरं वरप्रदेश्वरम् ॥ १२७ ॥ अनर्थको वरोऽमुना वृतोऽपि सार्थको भवेत् । अरिं भविष्ययावनं दहत्वयं तवेश्वर ॥१२८॥ तथास्त्विवति प्रभाषितं स्ववाक्यमेव केशवः । ऋतं विधातुमभ्ययात्स यौवनाश्वजान्तिकम् ॥१२९॥ ससंज्ञकोऽथ यावनो धरातलात्समुत्थितः । निपात्य यान्तमीश्वरं स पृष्ठतोऽन्वयात्क्रुधा ॥ १३० ॥ हरिर्गुहां नृपस्य तु प्रविश्य संव्यवस्थितः । स यावनः पदाऽहनन्नृपं स तं ददर्श ह ॥ १३१ ॥ स तस्य दृष्टिमात्रतो बभूव भस्मसात्क्षणात् । स एव विष्णुरव्ययो ददाह तं हि वह्निवत् ॥ १३२ ॥ वराच्छिवस्य दैवतै-रवध्यदानवान्पुरा । हरेर्वरान्निहत्य स प्रपेद आश्विमं वरम् ॥ १३३ ॥ सुदीर्घसुप्तिमात्मनः प्रसुप्तिभङ्गकृत्क्षयम् । स्वदृष्टिमात्रतस्ततो हतः स यावनस्तदा ॥ १३४ ॥ अतश्च पुण्यमाप्तवान्सुरप्रसादतोऽक्षयम् । स यौवनाश्वजो नृपो न देवतोषणं वृथा ॥ १३५ ॥ ततो हरिं निरीक्ष्य स स्तुतिं विधाय चोत्तमाम् । हरेरनुज्ञया तपश्चकार मुक्तिमाप च ॥ ॥ १३६ ॥ ततो गुहामुखाद्धरिर्विनिःसृतो जरासुतम् । समस्तभूप-संयुतं जिगाय बाहुनेश्वरः ॥ १३७ ॥ तलेन मुष्टिभिस्तथा महीरुहैश्च चूर्णिताः । निपेतुरस्य सैनिकाः स्वयं च मूर्च्छितोऽपतत् ॥ १३८ ॥ ससाल्वपौण्ड्रचेदिपान्निपात्य सर्वभूभुजः । स पुप्लुवे जनार्दनः क्षणेन तां कुशस्थलीम् ॥ १३९ ॥

ससंज्ञकाः समुत्थितास्ततो नृपाः पुनर्ययुः । जिगीषवोऽथ रुक्मिणीं विधाय चेदिपे हरिम् ॥१४०॥ समस्तराजमण्डले विनिश्चयादुपागते । सभीष्मके च रुक्मिणीं(णि) प्रदातुमुद्यते मु(त)दा ॥ १४१ ॥ समस्त-लोकयोषितां वरा विदर्भनन्दना । द्विजोत्तमं हरेः पदोः सकाशमाश्वयाप-यत् ॥१४२॥ निशम्य तद्वचो हरिः क्षणाद्विदर्भकानगात् । तमन्वया-द्धलायुधः समस्तयादवैः सह ॥१४३॥ समस्तराजमण्डलं प्रयान्तमीक्ष्य केशवम् । सुयत्तमात्तकार्मुकं बभूव कन्यकावने ॥१४४॥ पुरा प्रदानतः

SGDF
Sri Gargeshwari Digital Foundation

सुरेक्षणाच्छलाद्बहिर्गताम् । रथे न्यवेशयद्धरिः प्रपश्यतां च भूभृताम् ॥ ॥ १४५ ॥ जरासुतादयो रुषा तमभ्ययुः शरोत्तमैः । विधाय तान्निरायुधाञ्जगाम केशवः शनैः ॥ १४६ ॥ पुनर्गृहीतकार्मुकान्हरिं प्रयातुमुद्यतान् । न्यवारयद्धलायुधो बलाद्बलोर्जिताग्रणीः ॥ १४७ ॥ तदा सितः शिरोरुहो हरेर्हलायुधे स्थितः । प्रकाशमादिशद्बलं विजेतुमत्र मागधम् ॥ १४८ ॥ स तस्य मागधो रणे गदाप्रहारचूर्णितः । पपात भूतले बली विजित्य तं ययौ पुरीम् ॥ १४९ ॥ वरोरुवेषसंयुतोऽथ चेदिराट् समभ्ययात् । तमाससाद सात्यकिर्नदन्मृगाधिपो यथा ॥ ॥ १५० ॥ चिरं प्रयुध्य तावुभौ वरास्त्रशस्त्रवर्षिणौ । क्रुधा निरीक्ष्य तस्थतुः परस्परं स्फुरत्तनू ॥१५१॥ समानभावमक्षमी शिनेः सुतात्मजः शरम् । अथोद्बबर्ह तं शरं बलान्मुमोच वक्षसि ॥ १५२ ॥ स तेन ताडितोऽपतद्विसंज्ञको नृपात्मजः । विजित्य तं स सात्यकिर्ययौ प्रहृष्टमानसः ॥ १५३ ॥ अथापरे च यादवा विजित्य तद्बलं ययुः । पुरैव रुक्मिपूर्वकाः प्रजग्मुरच्युतं प्रति ॥ १५४ ॥ सहैकलव्यपूर्वकैः समेत्य भीष्मकात्मजः । हरिं ववर्ष सायकैः स सिंहवन्न्यवर्तत ॥ १५५ ॥ अक्षौहिणीत्रयं हरिस्तदा निहत्य सायकैः । अवाहनायुधं व्यधान्निषादपं शरैः क्षणात् ॥ १५६ ॥ शरं शरीरनाशकं समाददानमीश्वरम् । स एकलव्य आशु तं विहाय दुद्रुवे भयात् ॥ १५७ ॥ धनुर्भृतां वरे गते रणं विहाय भूभृतः । करूशराजपूर्वकाः क्षणात्प्रदुद्रुवुर्भयात् ॥ ॥ १५८ ॥ अथाससाद केशवं रुषा स भीष्मकात्मजः । शराम्बुधार आशु तं विवाहनं व्यधाद्धरिः ॥ १५९ ॥ चकर्त कार्मुकं पुनः स खड्गचर्मभृद्धरेः । रथं समारुहच्छरैश्चकर्त खड्गमीश्वरः ॥ १६० ॥ शरैर्वितस्तिमात्रकैर्विधाय तं निरायुधम् । प्रियावचः प्रपालयञ्जघान नैनमीश्वरः ॥ १६१ ॥ निबध्य पञ्चचूडिनं विधाय तं व्यसर्जयत् । जगज्जनित्रयोरिदं विडम्बनं रमेशयोः ॥ १६२ ॥ सदैकमानसावपि

SGDF
Sri Gurgeshwari Digital Foundation

स्वधर्मशासकौ नृणाम् । रमा हरिश्च तत्र तौ विजह्रतुश्च रुक्मिणा ॥
॥ १६३ ॥ अथाससाद सौभराट् हरिं शराम्बुवर्षणः । हरिः शरं यमोपमं मुमोच तस्य वक्षसि ॥ १६४ ॥ शरेण तेन पीडितः पपात मन्दचेष्टितः । चिरात्ससंज्ञकोऽगमत्त्रिनेत्रतोषणेच्छया ॥ १६५ ॥ समस्तराजसन्निधावयादवीं महीमिमाम् । करिष्य इत्युदीर्य सोऽव्यधात्तपोऽतिदुश्चरम् ॥ १६६ ॥ अथो विवेश केशवः पुरीं कुशस्थलीं प्रभुः । प्रियायुतोऽब्जजादिभिः समीडितः सुरेश्वरैः ॥ १६७ ॥

पुरा ततो हलायुधः प्रियां निजां पुरापि हि । स वारुणीसमाह्वयामवाप रेवतीं प्रभुः ॥ १६८ ॥ पतिं यथानुरूपिणं तदीयमेव पूर्वकम् । पिता तदीय ऐच्छत प्रवेत्तुमब्जसम्भवात् ॥ १६९ ॥ स तत्सदोगतो वरात्तदीयतः प्रगीतिकाम् । निशम्य नाविदद्गतं युगोरुकालपर्ययम् ॥ १७० ॥ नरानयोग्यगीतिका विमोहयेत्ततो नृपः । स मूढबुद्धिरन्ततोऽल्पकाल इत्यमन्यत ॥ १७१ ॥ स मूर्च्छितः प्रबोधितोऽब्जजेन तं त्वपृच्छत । सुतापतिं बलं च सोऽब्रवीद्युगात्यये बहौ ॥ १७२ ॥ स रैवतो बलाय तां प्रदाय गन्धमादनम् । गतोऽत्र चीर्णसत्तपा अवाप केशवान्तिकम् ॥ १७३ ॥ बलोऽपि तां पुरातनप्रमाणसंमितां प्रभुः । हलेन चात्मना समां चकार सत्यवाञ्छितः ॥
॥१७४॥ तया रतः सुतावुभौ शठोल्मुकाभिधावधात् । पुरार्यमांशकौ सुरावुदारचेष्टितो बलः ॥ १७५ ॥

जनार्दनश्च रुक्मिणीकरं शुभे दिनेऽग्रहीत् । महोत्सवस्तदाऽभवत्कुशस्थलीनिवासिनाम् ॥ १७६ ॥ चतुर्मुखेशपूर्वकाः सुरा वियत्यवस्थिताः । प्रतुष्टुवुर्जनार्दनं रमासमेतमव्ययम् ॥ १७७ ॥ मुनीन्द्रदेवगायकादयोऽपि यादवैः सह । विचेरुरुत्तमोत्सवे रमारमेशयोगिनि ॥ १७८ ॥ सुरांशकाश्च ये नृपाः समाहुता महोत्सवे । सपाण्डवाः समाययुर्हरिं रमासमायुतम् ॥ १७९ ॥ समस्तलोकसुन्दरौ

SGDF
Sri Gargeshwari Digital Foundation

युतौ रमारमेश्वरौ । समीक्ष्य मोदमाययुः समस्तलोकसज्जनाः ॥१८०॥ तया रमञ्जनार्दनो वियोगशून्यया सदा । अधत्त पुत्रमुत्तमं मनोभवं पुरातनम् ॥ १८१ ॥ चतुस्तनोर्हरेः प्रभोस्तृतीयरूपसंयुतः । तत-स्तदाह्वयोऽभवत्स रुक्मिणीसुतो बली ॥ १८२ ॥ पुरैव मृत्यवेऽवद-त्तमेव शम्बरस्य ह । प्रजातमब्जजाङ्कजस्तवान्तकोऽयमित्यपि ॥१८३॥ स मायया हरेः सुतं प्रगृह्य सूतिकागृहात् । अवाक्षिपन्महोदधा-वुपेक्षितोऽरिपाणिना ॥१८४॥ तमग्रसज्जलेचरः स दाशहस्तमागतः । कुमारमस्य तूदरे निरीक्ष्य शम्बरे ददुः ॥ १८५ ॥ विपाट्य मत्स्य-कोदरं स शम्बरः कुमारकम् । न्यवेदयन्मनोभवप्रियाकरे सुरूपिणम् ॥ ॥ १८६ ॥ अनङ्गतामुपागते पुरा हरेण साङ्गजे । वशं विरिञ्चिशापतो जगाम शम्बरस्य हि ॥ १८७ ॥ पुरा हि पञ्चभर्तृकां निशम्य कञ्जजोदिताम् । जहास पार्षतात्मजां शशाप तां ततस्त्वजः ॥१८८॥ भवासुरेण दूषितेति सा ततो हि मायया । पिधाय तां निजां तनुं जगाम चान्ययाऽसुरम् ॥ १८९ ॥ गृहेऽपि साऽऽसुरे स्थिता निज-स्वरूपतोऽसुरम् । न गच्छति स्म सा पतिं निजं समीक्ष्य हर्षिता ॥ ॥१९०॥ रसायनैः कुमारकं व्यवर्धयद्रतिः पतिम् । सुपूर्णयौवनोऽ-भवच्चतुर्भिरेव वत्सरैः ॥ १९१ ॥ पतिं सुपूर्णयौवनं निरीक्ष्य तां विलज्जतीम् । उवाच कार्ष्णिरम्ब ते कुचेष्टितं कथं त्विति ॥ १९२ ॥ जगाद साऽखिलं पतौ तदास्य जन्म चागतिम् । ततोऽग्रहीत्स तां प्रियां रतिं रमापतेः सुतः ॥ १९३ ॥ ददौ च मन्त्रमुत्तमं समस्तमायि-नाशकम् । भृगूत्थरामदैवतं रतिर्हरेः सुताय सा ॥ १९४ ॥ ततः स्वदारधर्षकं समाह्वयद्युधेऽङ्गजः । स शम्बरं स चैत्य तं युयोध शक्तितो बली ॥ १९५ ॥ स चर्मखड्गधारिणं वरास्त्रशस्त्रपादपैः । यदा न योद्धुमाशकद्धरेः सुतं न दृश्यते ॥१९६॥ सहस्रमायमुल्बणं त्वदृश्य-मम्बराद्गिरीन् । सृजन्तमेत्य विद्यया जघान कृष्णनन्दनः ॥ १९७॥

SGDF
Sri Gangeshwari Digital Foundation

स विद्यया विनाशितोरुमाय आशु शम्बरः । निकृत्तकन्धरोऽपत-द्वरासिनामुना क्षणात् ॥ १९८ ॥ निहत्य तं हरेः सुतस्तयैव विद्य-याम्बरम् । समास्थितः सभार्यया समं कुशस्थलीं ययौ ॥ १९९ ॥ समस्तवेदिनोर्मुनिर्नरान्विडम्बमानयोः । रमारमेशयोः सुतं जगाद तं स्म नारदः ॥ २०० ॥ स रुक्मिणीजनार्दनादिभिः सरामयादवैः । पितामहेन चादरात्सुलालितोऽवसत्सुखम् ॥ २०१ ॥

ततः पुरा स्यमन्तकं ह्यवाप सूर्यमण्डले । स्थिताद्धरेः स सत्रजित्सदात्र केशवार्चकः ॥ २०२ ॥ सदास्य विष्णुभाविनोऽप्यतीव लोभमान्तरम् । प्रकाशयन्रमापतिर्ययाच ईश्वरो मणिम् ॥ २०३ ॥ स तं न दत्तवांस्ततोऽनुजो निबध्य तं मणिम् । वनं गतः प्रसेनको मृगाधिपेन पातितः ॥२०४॥ तदा स सत्रजिद्धरिं शशंस सोदरान्तकम् । उपांशु वर्त्मना ततो हरिः सयादवो ययौ ॥ २०५ ॥ वने स सिंह-सूदितं पदैः प्रदर्श्य वृष्णिनाम् । प्रसेनमृक्षपातितं स सिंहमप्यदर्शयत् ॥ ॥ २०६ ॥ ततो निधाय तान्बिलं स जाम्बवत्परिग्रहम् । विवेश तत्र संयुगं बभूव तेन चेशितुः ॥ २०७ ॥ युयोध मन्दमेव स प्रभुः स्वभक्त इत्यजः । चकार चोग्रमंततः प्रकाशयन्स्वमस्य हि ॥ २०८ ॥ स मुष्टिपिष्टविग्रहो नितान्तमापदं गतः । जगाम चेतसाऽरणं रघूत्तमं निजं पतिम् ॥ २०९ ॥ स्मृतिं गते तु राघवे तदाकृतिं यदूत्तमे । समस्तभेदवर्जितां समीक्ष्य सोऽयमित्यवैत् ॥ २१० ॥ ततः क्षमाप-यन्सुतां प्रदाय रोहिणीं शुभाम् । मणिं च तं नुनाव स प्रपन्न आशु पादयोः ॥ २११ ॥ विधाय चक्रदारितं सुजीर्णदेहमस्य सः । युवानमाशु केशवश्चकार वेदनां विना ॥२१२॥ विधाय भक्तवाञ्छितं प्रियासहाय ईश्वरः । प्रगृह्य तं महामणिं विनिर्ययौ गुहामुखात् ॥२१३॥ गुहां प्रविष्टमीश्वरं बहून्यहान्यनिर्गतम् । प्रतीक्ष्य यादवास्तु ये गतास्तदा (गृहं) तु जहृषुः (तदाऽहृषुः) ॥२१४॥ समस्तवृष्णिसन्निधौ यदूत्तमः

SGDF
Sri Gargeshwari Digital Foundation

स्यमन्तकम् । ददौ च सत्रजित्करे स विच्छविर्बभूव ह ॥२१५॥ स दुर्यशो रमापतावनूच्य मिथ्यया तपन् । स्वपापहानकाङ्क्षया ददौ सुतां जनार्दने ॥ २१६ ॥ मणिं च तं प्रदाय तं ननाम च क्षमापयन् । मणिं पुनर्ददौ हरिर्मुमोद सत्यभामया ॥ २१७ ॥ रमैव सा हि भूरिति द्वितीयमूर्तिरुत्तमा । बभूव सत्रजित्सुता समस्तलोकसुन्दरी ॥ ॥ २१८ ॥ ततो हि सा च रुक्मिणी प्रिये प्रियासु तेऽधिकम् । जनार्दनस्य ते हरेः सदाऽवियोगिनी यतः ॥ २१९ ॥ अवाप साम्बनामकं सुतं च रोहिणी हरेः । चतुर्मुखांशसंयुतं कुमारमेव षण्मुखम् ॥ ॥ २२० ॥

इति प्रशासति प्रभौ जगज्जनार्दनेऽखिलम् । अगण्यसद्गुणार्णवे कदाचिदाययौ द्विजः ॥ २२१ ॥ जनार्दनः स नामतो रमेशपादसंश्रयः । समानितश्च विष्णुना प्रणम्य वाक्यमब्रवीत् ॥ २२२ ॥ क्षमस्व मे वचः प्रभो ब्रवीम्यतीवपातकम् । यतः सुपापदूतकस्ततो हि तादृशं वचः ॥ २२३ ॥ न तेऽस्त्यगोचरं क्वचित्तथापि चाज्ञया वदे । वदेति चोदितोऽमुना द्विजो जगाद माधवम् ॥ २२४ ॥ सुतौ हि साल्वभूपतेर्बभूवतुः शिवाश्रयौ । शिवप्रसादसम्भवौ पितुस्तपोबलेन तौ ॥ २२५ ॥ अजेयतामवध्यतां शिवाद्वरं समापतुः । जरासुतस्य शिष्यकौ तपोबलेन केवलम् ॥ २२६ ॥ महोदरं च कुण्डधारिणं च भूतकावुभौ । तथा जिताववध्यकौ दिदेश शङ्करस्तयोः ॥ २२७ ॥ तयोः सहाय एधतौ वराच्छिवस्य भूतकौ । अजेयतामवापतुर्न चान्यथाऽमरावपि ॥२२८॥ अजेयतामवध्यतामवाप्य तावुभौ शिवात् । पितुश्च राजसूयितां समिच्छतौ मदोद्धतौ ॥ २२९ ॥ जरासुतो गुरुत्वतो विरोद्धुमत्र नेच्छति । नृपांस्तु देवपक्षिणो विजित्य कर्तुमिच्छतः ॥ ॥ २३० ॥ स्वयं हि राजसूयितां जरासुतो न मन्यते । यतो हि वैष्णवं क्रतुं तमाहुरीश वैदिकाः ॥ २३१ ॥ इमौ पितुर्यशोऽर्थिनौ

SGDF
Sri Gargeshwari Digital Foundation

पराभवाय ते तथा । समिच्छतोऽच्युत क्रतुं भवन्तमूचतुश्च तौ ॥२३२॥
समुद्रसंश्रयो भवान्बहून्प्रगृह्य लावणान् । सुभारकानुपैहि नाविति क्षमस्व
मे वचः ॥ २३३ ॥ उदीर्य तं ननाम स प्र चाहसन्स्म यादवाः ।
हरिस्तु सात्यकिं वचो जगाद मेघनिःस्वनः ॥२३४॥ प्रयाहि सात्यके
वचो ब्रवीहि मे नृपाधमौ । समेत्य वां वरायुधैः करं ददाम्यसंशयम् ॥
॥ २३५ ॥ उपैत माशु संयुगार्थिनौ च पुष्करं प्रति । इतीरितः
शिनेः सुतो जगाम विप्रसंयुतः ॥ २३६ ॥ उपेत्य तौ हरेर्वचो जगाद
सात्यकिर्बली । विधाय तौ तृणोपमौ गिरा जगाम केशवम् ॥२३७॥
ततः पुरैव तावुभौ द्विजं हरस्वरूपिणम् । सुदुःखवासनामकं प्रचक्रतु-
स्तृणोपमम् ॥ २३८ ॥ दशत्रिकैः शतैर्वृतो यतीश्वरैः स सर्ववित् ।
विपाटितात्मकौपिनादिसर्वमात्रकोऽभवत् ॥ २३९ ॥ वरात्स्वसम्भवा-
दसौ न शापशक्तिमानभूत् । ततः समस्तभञ्जनोरुशक्तिमाप केशवम् ॥
॥ २४० ॥ स तान्समर्च्य माधवः प्रदाय चोरुमात्रकाः । ययौ च तैः
समन्वितो वधाय साल्वपुत्रयोः ॥ २४१ ॥ तमत्रिजं हरात्मकं यतो
हि वेद मागधः । ततोऽत्यजत्स्वशिष्यकौ निशम्य तत्प्रतीपकौ ॥२४२॥
हरौ तु पुष्करं गते मुनीश्वरैः समन्विते । समीयतुश्च तावुभावथात्र
हंसडीभिकौ ॥ २४३ ॥ स ब्रह्मदत्तनामकोऽत्र तत्पिताऽप्युपाययौ ।
समागतौ च भूतकौ शिवस्य यौ पुरःसरौ ॥२४४॥ विचक्रनामकोऽ-
सुरः पुरा विरिञ्चितो वरम् । अवध्यतामजेयतामवाप्य बाधतेऽसुरान् ॥
॥ २४५ ॥ स चाभवत्तयोः सखा सहायकाम्ययाऽगमत् । हिडिम्ब-
राक्षसोऽपि यः पुराऽऽप शङ्कराद्वरम् ॥ २४६ ॥ न जीयसे न वध्यसे
कुतश्चनेति तोषितात् । स चैतयोः सखाऽभवत्समाजगाम तत्र च ॥
॥ २४७ ॥ अक्षौहिणीदशात्मकं बलं तयोर्बभूव ह । विचक्रगं
षडात्मकं तथैकमेव राक्षसम् ॥ २४८ ॥ द्विरष्टसेनया युतौ सहैकयैव
तौ नृपौ । समीयतुर्युधे हरिं हरिश्च तौ ससार ह ॥ २४९ ॥ अथ

SGDF
Sri Gangeshwari Digital Foundation

द्वयोर्द्वयोरभूद्रणो भयानको महान् । हरिर्विचक्रमेयिवान्बलश्च हंस-
मुद्धतम् ॥ २५० ॥ तदास्य चानुजं ययौ शिनिप्रवीर आयुधी ।
गदश्च नामतोऽनुजो हरेः स रोहिणीसुतः ॥ २५१ ॥ पुरा स
चण्डको गणो हरेर्निवेदिताशनः । समाह्वयद्रणाय वै तयोः स तातमेव
हि ॥२५२॥ अक्षौहिणीत्रयान्विताः समस्तयादवास्तदा । त्रिलोचनानुगौ
च तौ न्यवारयन्स राक्षसौ ॥ २५३ ॥ हरिर्विचक्रमोजसा महास्त्रशस्त्र-
वर्षिणम् । विवाहनं निरायुधं क्षणाच्चकार सायकैः ॥ २५४ ॥ पुनश्च
पादपान्गिरीन्प्रमुञ्चतोऽरिणारिहा । शिरो जहार देवता विनेदुरत्र
हर्षिताः ॥ २५५ ॥ प्रसूनवर्षिभिः स्तुतश्चतुर्मुखादिभिः प्रभुः । ससार
तौ हरानुगौ प्रभक्षकौ स सात्वताम् ॥ २५६ ॥ समस्तयादवान्रणे
विधूय तौ जनार्दनम् । उपेत्य चांसगौ हरेरदंशतां सुकर्णकौ ॥२५७॥
स तौ भुजप्रवेगतो विधूय शङ्करालये । न्यपातयद्धलार्णवोऽमितस्य किं
तदुच्यते ॥ २५८ ॥ प्रभक्षयन्तमोजसा हिडिम्बमुद्धतं बलम् ।
सहोग्रसेनको ययौ पिता हरेः शरान्क्षिपन् ॥ २५९ ॥ तयो रथौ
सहायुधौ प्रभक्ष्य राक्षसो बली । प्रगृह्य तावभाषत प्रयातमाशु मे
मुखम् ॥ २६० ॥ तदा गदावरायुधः सहैव हंसभूभृता । प्रयुध्यमान
आययौ विहाय तं हलायुधः ॥ २६१ ॥ तमागतं समीक्ष्य तौ विहाय
राक्षसाधिपः । उपेत्य मुष्टिनाऽहनद्धलं स वक्षसि क्रुधा ॥ २६२ ॥
उभौ हि बाहुशालिनावयुध्यतां च मुष्टिभिः । चिरं प्रयुध्य तं बलोऽ-
ग्रहीत्स जङ्घयोर्विभुः ॥२६३॥ अथैनमुद्धतं बलाद्धलः स दूर आक्षिपत् ।
पपात पादयोजने स नाजगाम तं पुनः ॥ २६४ ॥ विहाय सैनिकांश्च
तौ नृपौ ययौ वनाय सः । निहत्य तस्य राक्षसान्हलायुधो ननाद ह ॥
॥ २६५ ॥ गदस्तु साल्वभूभृता वयोगतेन योधयन् । विवाहनं
निरायुधं चकार सोऽप्यपाद्रवत् ॥ २६६ ॥ सुतेन तस्य कन्यसा
युयोध सात्यकी रथी । वरास्त्रशस्त्रयोधिनौ विजहतुश्च तावुभौ ॥२६७॥

SGDF
Sri Gangeshwari Digital Foundation

चिरं प्रयुध्य सात्यकिः स हंसकन्यसा बली । शतं सपञ्चकं रणे चकर्त
तस्य धन्विनाम् ॥२६८॥ स खड्गचर्मभृद्रणेऽभ्ययात्सुतात्मजं शिनेः ।
स चैनमभ्ययात्तथा वरासिचर्मभृद्विभीः ॥ २६९ ॥ द्विषोडशप्रभेदकं
वरासियुद्धमश्रमौ । प्रदर्श्य निर्विशेषकावुभौ व्यवस्थितौ चिरम् ॥२७०॥
परस्परान्तरेषिणौ न चान्तरं व्यपश्यताम् । ततो विहाय सङ्गरं गतौ
निरर्थकं त्विति ॥ २७१ ॥ ततः स हंससंयुतो जगाम योद्धुमच्युतम् ।
क्षणेन तौ निरायुधौ चकार केशवः शरैः ॥ २७२ ॥ हतं च सैन्य-
मेतयोश्चतुर्थभागशेषितम् । क्षणेन केशवेन तद्भयादपेयतुश्च तौ ॥२७३॥
स पुष्करेक्षणस्तदा सुरैर्नुतोऽथ पुष्करे । उवास तां निशां प्रभुः
सयादवोऽमितप्रभः ॥ २७४ ॥ परे दिने जनार्दनो नृपात्मजौ
प्रविद्रुतौ । यमस्वसुस्तटे प्रभुः समाससाद पृष्ठतः ॥ २७५ ॥ स
रौहिणेयसंयुतः समन्वितश्च सेनया । स्वशिष्टसेनया वृतौ पलायिना-
ववारयत् ॥२७६॥ निवृत्य तौ स्वसेनया शरोत्तमैर्ववर्षतुः । सुकोपितौ
समस्तशो यदूनवार्यपौरुषौ ॥ २७७ ॥ अथाससाद हंसको हलायुधं
महाधनुः । अनन्तरोऽस्य सात्यकिं गदं च सर्वसैनिकान् ॥ २७८ ॥
स सात्यकिं निरायुधं विवाहनं विवर्मकम् । व्यधाद्गदं च तौ रणं
विहाय हापजग्मतुः ॥ २७९ ॥ विधूय सैनिकांश्च स प्रगृह्य चाप-
माततम् । हरिं जगाम चोन्नदन्महास्त्रशस्त्रवर्षणः ॥ २८० ॥ तमाशु
केशवोऽरिहा समस्तसाधनोज्झितम् । क्षणाच्चकार सोऽप्यगाद्विसृज्य तं
हलायुधम् ॥ २८१ ॥ हलायुधो निरायुधं विधाय हंसमोजसा ।
विकृष्टचापमागतं ददर्श तस्य चानुजम् ॥ २८२ ॥ स हंस आशु
कार्मुकं पुनः प्रगृह्य तं बलम् । यदाऽऽससाद केशवो न्यवारयत्तमोजसा ॥
॥ २८३ ॥ शिनेः सुतात्मजोऽप्यसौ विहाय हंसकानुजम् । रथान्तरं
समास्थितो जगाम तातमस्य च ॥२८४॥ वयोगतः पिता तयोर्युयोध
तेन वृष्णिना । शरं च कण्ठकूबरे व्यसर्जयत्स सात्यकेः ॥ २८५ ॥

SGDF
Sri Gargeshwari Digital Foundation

स सात्यकिर्दृढाहतो जगाम मोहमाशु च । सुलब्धसंज्ञ उत्थितः समाददेऽर्धचन्द्रकम् ॥ २८६ ॥ स तेन तच्छिरो बली चकर्त शुक्लमूर्धजम् । यदम्बयाभिकामितं पुरा पपात तत्क्षितौ ॥ २८७ ॥ नदंश्च सात्यकिर्हरेर्जगाम पार्श्वमुद्धतः । बलोऽपि हंसकानुजं युयोध सेनया युतम् ॥ २८८ ॥ हरिस्तु हंसमुल्बणैः शरैः समर्दयन्बलम् । जघान तस्य सर्वशो न कश्चिदत्र शेषितः ॥ २८९ ॥ स एक एव केशवं महास्त्रमुक्ससार ह । निवार्य तानि सर्वशो हरिर्निजास्त्रमाददे ॥२९०॥ स वैष्णवास्त्रमुद्यतं निरीक्ष्य यानतो महीम् । गतः पराद्रवद्भयात्पपात यामुनोदके ॥ २९१ ॥ वरास्त्रपाणिरीश्वरः पदाऽहनच्छिरस्यमुम् । स मूर्च्छितो मुखेऽपतन्महाभुजङ्गमस्य हि ॥ २९२ ॥ स धार्तराष्ट्रकोदरे यथा तमोऽन्धमेयिवान् । तथा सुदुःखसंयुतो वसन्मनोः परं म्रियेत् ॥ ॥ २९३ ॥ ततोऽन्धमेव तत्तमो हरेर्द्विडेति निश्चयात् । तदाऽस्य चानुजोऽग्रजं विमार्गयञ्जलेऽपतत् ॥ २९४ ॥ विहाय रोहिणीसुतं जले निमज्य मार्गयन् । अपश्यमान आत्मनो व्यपाटयच्च काकुदम् ॥ ॥ २९५ ॥ विहाय देहमुल्बणं तमोऽवतीर्य चाग्रजम् । प्रतीक्षमाण उल्बणं समत्ति तत्सुखेतरम् ॥ २९६ ॥

ततो हरिर्बलैर्युतो बलान्वितो मुनीश्वरैः । समं कुशस्थलीं ययौ स्तुतः कशङ्करादिभिः ॥२९७॥ स्वकीयपादपल्लवाश्रयं जनं प्रहर्षयन् । उवास नित्यसत्सुखार्णवो रमापतिर्गृहे ॥ २९८ ॥ (२१३७) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये श्रीकृष्णचरिते कृष्णविजयो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अथ अष्टादशोऽध्यायः

॥ ॐ ॥ यदा रामादवाप्तानि दिव्यास्त्राणि प्रपेदिरे । द्रोणात्कुमारास्तेष्वासीत्सर्वेष्वप्यधिकोऽर्जुनः ॥ १ ॥ निजप्रतिभया जान-

SGDF
Sri Gargeshwari Digital Foundation

न्सर्वास्त्राणि ततोऽधिकम् । नास्त्रयुद्धं क्वचिद्भीमो मन्यते धर्ममञ्जसा ॥
॥ २ ॥ न हि भागवतो धर्मो देवताभ्युपयाचनम् । ज्ञानभक्ती
हरेस्तृप्तिं विना विष्णोरपि क्वचित् ॥ ३ ॥ नाकाङ्क्ष्यं किमुतान्येभ्यो
ह्यस्त्रं काम्यफलप्रदम् । शुद्धे भागवते धर्मे निरतो यद्वृकोदरः ॥ ४ ॥
न काम्यकर्मकृत्तस्मान्नायाचद्देवमानुषान् । हरिश्च नार्थितस्तेन कदाचि-
त्काम्यलिप्सया ॥ ५ ॥ भिक्षामटंश्च हुङ्कारात्करवद्धैश्यतोऽग्रहीत् ।
नान्यदेवा नतास्तेन वासुदेवान्न पूजिताः ॥ ६ ॥ न प्रतीपं हरेः क्वापि
स करोति कथञ्चन । अनुपस्कारिणो युद्धे नाभियाति ह्युपस्करी ॥७॥
नापयाति युधः क्वापि न क्वचिच्छद्म वा(चा)चरेत् । न चौर्ध्वदैहिकानुज्ञा-
मवैष्णवकृतेऽकरोत् ॥८॥ न करोति स्वयं नैषां प्रियमप्याचरेत्क्वचित् ।
सख्यं नावैष्णवैश्चक्रे प्रतीपं वैष्णवे न तु (च) ॥९॥ परोक्षेऽपि हरेर्निन्दां
कृतो जिह्वां छिनत्ति च । प्रतीपकारिणो हन्ति विष्णोर्वैतानजीघनत् ॥
॥१०॥ न संशयं कदाप्येष धर्मे ज्ञानेऽपि वा(चा)ऽकरोत् । विद्योपजीवनं
नैव चकारापद्यपि क्वचित् ॥ ११ ॥ अतो न धर्मनहुषौ प्रत्युवाच
कथञ्चन । आज्ञयैव हरेर्द्रौणेरस्त्राण्यस्त्रैरशाम(त)यत् ॥१२॥ अदृश्योऽ-
लम्बुसो भग्नो नान्यत्र तु कथञ्चन । न ह्यस्त्रयुद्धे सदृशो द्रौणे-
रस्त्यर्जुनादृते ॥ १३ ॥ सर्ववित्त्वं ततो भीमे प्रदर्शयितुमीश्वरः ।
अदादाज्ञामस्त्रयुद्धे तथैवालम्बुसं प्रति ॥ १४ ॥ प्रत्यक्षीभूतदेवेषु
बन्धुज्येष्ठेषु वा नतिम् । मर्यादास्थितयेऽशासद्भगवान्पुरुषोत्तमः ॥१५॥
तत्रापि विष्णुमेवासौ नमेन्नान्यं कथञ्चन । आज्ञयैवास्त्रदेवांश्च प्रेरयामास
नार्थनात् ॥ १६ ॥

अन्वेनमेव तद्धर्मे कृष्णैका संस्थिता सदा । धृतराष्ट्रादपि वरं
ततो नात्मार्थमग्रहीत् ॥१७॥ नाशपद्धार्तराष्ट्रांश्च महापद्यपि सा ततः ।
न वाचा मनसा वापि प्रतीपं केशवेऽचरत् ॥ १८ ॥

अन्ये भागवतत्वेऽपि छिन्नधर्माः क्वचित्क्वचित् । स्यमन्तकार्थे

SGDF
Sri Gangeshwari Digital Foundation

रामोऽपि कृष्णस्य विमनाऽभवत् ॥१९॥ अवमेनेऽर्जुनः कृष्णं विप्रस्य शिशुरक्षणे । प्रद्युम्न उद्धवः साम्बोऽनिरुद्धाद्याश्च सर्वशः ॥ २० ॥ हरेरिष्टं सुभद्रायाः फल्गुने दानमञ्जसा । ज्ञात्वाऽपि रुरुधुः सम्यक्सात्यकिः कृष्णसंमितम् ॥ २१ ॥ कदाचिन्मन्यतेऽपार्थं धर्मजोऽपि नरं हरिम् । मत्वा बिभेज्जरासन्धवधे कृष्णमुदीरितुम् ॥ २२ ॥ बन्धनं शङ्कमानो हि कृष्णस्य विदुरोऽपि तु । कौरवेयसभामध्ये नावतारमरोचयत् ॥ २३ ॥ नकुलः करदानाय प्रेषयामास केशवे । अवमेने हरेर्बुद्धिं सहदेवः कुलक्षयात् ॥२४॥ देवकीवसुदेवाद्या मेनिरे मानुषं हरिम् । भीष्मस्तु भार्गवं राममवमेने युयोध च ॥ २५ ॥ द्रोणकर्णद्रौणिकृपाः कृष्णाभावे मनो दधुः । देवाः शिवाद्या अपि तु विरोधं चक्रिरे क्वचित् ॥२६॥ ऋषिमानुषगन्धर्वा वक्तव्याः किमतः परे । जन्मजन्मान्तराज्ञानादवजानन्ति यत्सदा ॥ २७ ॥

तस्मादेको वायुरेव धर्मे भागवते स्थितः । लक्ष्मीः सरस्वती चेति परशुक्लत्रयं स्मृतम् ॥ २८ ॥ सर्वमेतच्च कथितं तत्र तत्रामितात्मना । व्यासेनैव पुराणेषु भारते च स्वसंविदा ॥ २९ ॥

यदा ते सर्वशस्त्रास्त्रवेदिनो राजपुत्रकाः । बभूवू रङ्गमध्ये तान्भारद्वाजो व्यदर्शयत् ॥३०॥ रक्तचन्दनसत्पुष्पवस्त्रशस्त्रगुडोदनैः । संपूज्य भार्गवं राममनुजज्ञे कुमारकान् ॥ ३१ ॥ ते भीष्मद्रोणविदुरगान्धारीधृतराष्ट्रकान् । स राजमण्डलान्नत्वा कुन्तीं चादर्शयच्छ्रमम् ॥ ॥ ३२ ॥ सर्वैः प्रदर्शितेऽस्त्रे तु द्रोणादात्तमहास्त्रवित् । द्रौणिरस्त्राण्यमेयानि दर्शयामास चाधिकम् ॥ ३३ ॥ ततोऽप्यतितरां पार्थो दिव्यास्त्राणि व्यदर्शयत् । अविध्यन्माशके पादे पक्षिणः पक्ष्म एव च ॥ ३४ ॥ एवमादीनि चित्राणि बहून्येष व्यदर्शयत् । तदैव कर्ण आगत्य रामोपात्तास्त्रसम्पदम् ॥३५॥ दर्शयन्नधिकः पार्थादभूद्राजन्यसंसदि । कुन्ती निजसुतं ज्ञात्वा लज्जया नावदच्च तम् ॥ ३६ ॥

SGDF
Sri Gurgeshwari Digital Foundation

पार्थोऽसहंस्तं युद्धायैवाह्वयामास संसदि । रणायाक्षत्रियाह्वानं जानन्धर्मप्रतीपकम् ॥ ३७ ॥ भीमो निवार्य बीभत्सुं कर्णायादात्प्रतोदकम् । अक्षत्रसंस्कारयुतो जातोऽपि क्षत्रिये कुले ॥ ३८ ॥ न क्षत्रियो हि भवति यथा व्रात्यो द्विजोत्तमः । निरुत्तरे कृते कर्णे भीमेनैव सुयोधनः ॥ ३९ ॥ अभ्यषेचयदङ्गेषु राजानं पित्रनुज्ञया । धृतराष्ट्रः पक्षपातात्पुत्रस्यानुवशोऽभवत् ॥ ४० ॥ अभिषिक्ते तदा कर्णे प्रायादधिरथः पिता । सर्वराजसदोमध्ये ववन्दे तं वृषा तदा ॥ ४१ ॥ तुतुषुः कर्मणा तस्य सन्तः सर्वे समागताः । भीमदुर्योधनौ तत्र शिक्षासन्दर्शनच्छलात् ॥ ४२ ॥ समादाय गदे गुर्वी संरम्भादभ्युदीयतुः । देवासुरमनुष्यादि जगदेतच्चराचरम् ॥ ४३ ॥ सर्वं तदा द्विधाभूतं भीमदुर्योधनाश्रयात् । देवा देवानुकूलाश्च भीममेव समाश्रिताः ॥४४॥ असुरा आसुराश्चैव दुर्योधनसमाश्रयाः । द्विधाभूता मनुष्याश्च देवासुरविभेदतः ॥ ४५ ॥ जय भीम महाबाहो जय दुर्योधनेति च । हुङ्कारांश्चैव फट्कारांश्चक्रुर्देवासुरा अपि ॥ ४६ ॥ दृष्ट्वा जगत्सुसंरब्धं द्रोणोऽथ द्विजसत्तमः । नेदं जगद्विनश्येत भीमदुर्योधनाश्रयात् ॥४७॥ इति पुत्रेण तौ वीरौ न्यवारयदरिन्दमौ । स्वकीयायां स्वकीयायां योग्यतायां न तु क्वचित् ॥ ४८ ॥ युवयोः सम इत्युक्त्वा द्रौणिरेतौ न्यवारयत् । द्रोणाज्ञया वारितौ तौ ययतुः स्वं स्वमालयम् ॥ ४९ ॥ सुरासुरान्सुसंरब्धान्कालेन द्रक्ष्यथेऽति च । ब्रह्मा निवार्य ससुरो ययौ सेशः स्वमालयम् ॥ ५० ॥ कर्णं हस्ते प्रगृह्यैव धार्तराष्ट्रो गृहं ययौ । पार्थं हस्ते प्रगृह्यैव भीमः प्रायात्स्वमालयम् ॥ ५१ ॥ पार्थेन कर्णो हन्तव्य इत्यासीद्भीमनिश्चयः । वैपरीत्येन तस्यासीद्दुर्योधनविनिश्चयः ॥ ॥५२॥ तदर्थं नीतिमतुलां चक्रतुस्तावुभावपि । तथोत्कर्षे फल्गुनस्य यशसो विजयस्य च ॥ ५३ ॥ उद्योग आसीद्भीमस्य धार्तराष्ट्रस्य चान्यथा । भीमार्थं केशवोऽन्ये च देवाः फल्गुनपक्षिणः ॥ ५४ ॥

SGDF
Sri Gangeshwari Digital Foundation

आसन्यथैव रामाद्याः सङ्ग्रहेण हनूमतः । सुराः सुग्रीवपक्षस्थाः पूर्वमासंस्तथैव हि ॥ ५५ ॥ तदर्थमेव भीमस्य ह्यनुजत्वं सुरेश्वरः । आप पूर्वानुतापेन तेन भीमस्तथाऽकरोत् ॥५६॥ दुर्योधनार्थं कर्णस्य पक्षिणो दैत्यदानवाः । आसुः सर्वे ग्लहावेतावासतुः कर्णफल्गुनौ ॥ ५७ ॥

अथ पृष्टो दक्षिणार्थं द्रोण आह कुमारकान् । बध्वा पाञ्चालराजानं दत्तेत्यूचुस्तथेति ते ॥ ५८ ॥ ते धार्तराष्ट्राः कर्णेन सहिताः पाण्डवा अपि । ययुर्द्रोणेन सहिताः पाञ्चालनगरं प्रति ॥ ५९ ॥ अथाह भीमः सामर्थ्यविवेकाभीप्सया गुरुम् । गर्व एष कुमाराणामनिवार्यो द्विजोत्तम ॥ ६० ॥ गच्छन्त्वेतेऽग्रतो नैषां वशगो द्रुपदो भवेत् । निवृत्तेष्वकृतार्थेषु वयं बध्वा रिपुं तव ॥ ६१ ॥ आनयामो न सन्देह इति तस्थौ ससोदरः । सद्रोणकेषु पार्थेषु स्थितेष्वन्ये ससूतजाः ॥ ६२ ॥ ययुरात्तप्रहरणाः पाञ्चालान्तःपुरं द्रुतम् । कुमारान्ग्रहणेप्सूंस्तानुपयातानुदीक्ष्य सः ॥६३॥ अक्षौहिणीत्रितययुङ्गिःसृतो द्रुपदो गृहात् । ते शरैरभिवर्षन्तः परिवार्य कुमारकान् ॥ ६४ ॥ अर्दयामासुरुद्वृत्तांस्त्रियो बालाश्च सर्वशः । हर्म्यसंस्थाः स्त्रियो बाला ग्ला(ग्रा)वभिर्मुसलैरपि ॥६५॥ अत्यर्थमर्दयामासुः कुमारान्सुसुखैधितान् । द्रुपदस्य वरो ह्यस्ति सूर्यदत्तस्तपोबलात् ॥ ६६ ॥ आयोजनात्पुरमुप न त्वां जेष्यति कश्चन । इति तेन वरेणैव सुखसंवर्धिताश्च ते ॥६७॥ भग्नाः कुमारा आवृत्य दुद्रुवुर्यत्र पाण्डवाः । स्त्रीबालवृद्धसहितैः पाञ्चालैरप्यनुद्रुताः ॥ ६८ ॥ भीमार्जुनेति वाशन्तो ययुर्यत्र स्म पाण्डवाः । तान्प्रभग्नान्समालोक्य भीमः प्रहरतां वरः ॥ ६९ ॥ आरुरोह रथं वीरः पुर आत्तशरासनः । तमन्वयादिन्द्रसूनुर्यमौ तस्यैव चक्रयोः ॥ ॥ ७० ॥ युधिष्ठिरस्तु द्रोणेन सह तस्थौ निरीक्षकः । आयान्तमग्रतो दृष्ट्वा भीममात्तशरासनम् ॥७१॥ दुद्रुवुः सर्वपाञ्चाला विविशुः पुरमेव च । द्रुपदस्त्वभ्ययाद्भीमं सपुत्रः सह सेनया ॥ ७२ ॥ चक्ररक्षौ तु

SGDF
Sri Gargeshwari Digital Foundation

तस्यास्तां युधामन्यूत्तमौजसौ। धात्रर्यमावेशयुतौ विश्वावसुपरावसू ॥७३॥ सुतौ तस्य महावीर्यौ सत्यजित्पृष्ठतोऽभवत्। स मित्रांशयुतो वीरश्चित्रसेनो महारथः ॥ ७४ ॥ अग्रतस्तु शिखण्ड्यागाद्रथोदारः शरान्क्षिपत्। जनमेजयस्तमन्वेव पूर्वं चित्ररथो हि यः ॥ ७५ ॥ त्वष्टुरावेशसंयुक्तः स शरानभ्यवर्षत। तावुभौ विरथौ कृत्वा विचापौ च विवर्मकौ ॥ ७६ ॥ भीमो जघान तां सेनां सवाजिरथकुञ्जराम्। अथैनं शरवर्षेण युधामन्यूत्तमौजसौ ॥ ७७ ॥ अभीयतुस्तौ विरथौ चक्रे भीमो निरायुधौ। हस्तप्राप्तं च पाञ्चालं नाग्रहीत्स वृकोदरः ॥ ॥ ७८ ॥ गुर्वर्थमर्जुनस्योर्वी प्रतिज्ञां कर्तुमप्यृताम्। मानभङ्गाय कर्णस्य पार्थमेव न्ययोजयत् ॥ ७९ ॥ स शरान्क्षिपतस्तस्य पाञ्चालस्यार्जुनो द्रुतम्। पुप्लुवे स्यन्दने चापं छित्वा तं चाग्रहीत्क्षणात् ॥८०॥ सिंहो मृगमिवादाय स्वरथं चाभिपेदिवान्। अथ प्रकुपितं सैन्यं फल्गुनं पर्यवारयत् ॥ ८१ ॥ जघान भीमस्तरसा तत्सैन्यं शरवृष्टिभिः। अथ सत्यजिदभ्यागात्पार्थं मुञ्चञ्शरान्बहून् ॥ ८२ ॥ तमर्जुनः क्षणेनैव चक्रे विरथकार्मुकम्। घ्नन्तं भीमं पुनः सैन्यमर्जुनः प्राह मा भवान् ॥ ॥ ८३ ॥ सेनामर्हति राज्ञोऽस्य वीर हन्तुमशेषतः। सम्बन्धयोग्यस्तातस्य सखाऽयं नः सुधार्मिकः ॥८४॥ नेष्याम एनमेवातो गुरोर्वचनगौरवात्। स्नेहपाशं ततश्चक्रे बीभत्सौ द्रुपदोऽधिकम् ॥ ८५ ॥ ततः सेनां विहायैव भीमो बीभत्सुमन्वगात्। मुक्ता कथञ्चिद्भीमास्यात्सा सेना दुद्रुवे भयात् ॥८६॥ द्रुपदं स्थापयामासाथार्जुनो द्रोणसन्निधौ। पप्रच्छैनं तदा द्रोणः सख्यमस्त्युत नेति वा ॥८७॥ अस्तीदानीमिति प्राह द्रुपदोऽङ्गिरसां वरम्। अथाह द्रुपदं द्रोणः सख्यमिच्छेऽक्षयं तव ॥८८॥ न ह्यराज्ञो भवेत्सख्यं तवेतीदं कृतं मया। न विप्रधर्मो यद्युद्धमतस्त्वं न मया धृतः ॥ ८९ ॥ शिष्यैरेतत्कारितं मे तव सख्यमभीप्सता। अतः सख्यार्थमेवाद्य त्वद्राज्यार्धो हृतो मया ॥९०॥

SGDF
Sri Gargeshwari Digital Foundation

गङ्गाया दक्षिणे कूले त्वं राजैवोत्तरे त्वहम् । न ह्यराजत्व एकस्य सख्यं स्यादावयोः सखे ॥ ९१ ॥ इत्युक्त्वोन्मुच्य तं द्रोणो राज्यार्धं गृह्य चामुतः । ययौ शिष्यैर्नागपुरं न्यवसत्सुखमत्र च ॥ ९२ ॥ ब्राह्मण्यत्यागभीरुः सन्नागृह्णाद्धनुरप्यसौ । धार्तराष्ट्रैस्तु भीमस्य भयात्पादौ प्रणम्य च ॥ ९३ ॥ शरणार्थं याचितत्वात्सुपुत्रो युयुधे परैः । एवं हरीच्छयैवासौ क्षात्रं धर्ममुपेयिवान् ॥ ९४ ॥

द्रुपदस्तु दिवारात्रं तप्यमानः पराभवात् । भीमार्जुनबलं दृष्ट्वा चैच्छत्पाण्डवसंश्रयम् ॥ ९५ ॥ सम्बन्धीत्यर्जुनवचश्चिकीर्षुः सत्यमेव च । मार्दवं चार्जुने दृष्ट्वा सुतामैच्छत्तदर्थतः ॥ ९६ ॥ पुत्रं च द्रोणहन्तारमिच्छन्विप्रवरौ ययौ । याजोपयाजावानीयाथार्बुदेन गवां नृपः ॥ ॥ ९७ ॥ चकारेष्टिं च तद्भार्या द्विजाभ्यामत्र चाहुता । द्रुपदात्सुतलब्ध्यर्थं साऽहङ्काराद्व्यलम्बयत् ॥ ९८ ॥ किमेतयेत्यवज्ञाय तावुभौ विप्रसत्तमौ । अजुह्वतां तत्पुत्रार्थं पत्न्या प्राश्यं हविस्तदा ॥ ९९ ॥ हुते हविषि मन्त्राभ्यां वैष्णवाभ्यां तदैव हि । दीप्ताङ्गारनिभो वह्निकुण्डमध्यात्समुत्थितः ॥ १०० ॥ किरीटी कुण्डली दीप्तो हेममाली वरासिमान् । रथेनादित्यवर्णेन नदन्द्रुपदमाद्रवत् ॥ १०१ ॥ धृष्टत्वाद्द्योतनत्वाच्च धृष्टद्युम्न इतीरितः । मुनिभिर्द्रुपदेनापि सर्ववेदार्थतत्त्ववित् ॥ १०२ ॥ अन्वेनं भारती साक्षाद्वेदिमध्यात्समुत्थिता । प्राणो हि भरतो नाम सर्वस्य भरणाच्छ्रुतः ॥ १०३ ॥ तद्भार्या भारती नाम वेदरूपा सरस्वती । शंरूपमाश्रिता वायुं श्रीरित्येव च कीर्तिता ॥ ॥ १०४ ॥ आवेशयुक्ता शच्याश्च श्यामलायास्तथोषसः । ताश्चेन्द्रधर्मनासत्यसंश्रयाच्छ्रिय ईरिताः ॥ १०५ ॥ सा कृष्णा नामतश्चासीदुत्कृष्टत्वाद्धि योषिताम् । कृष्णा सा वर्णतश्चासीदुत्कृष्टानन्दिनी च सा ॥ १०६ ॥ उत्पत्तितश्च सर्वज्ञा सर्वाभरणभूषिता । सम्प्राप्तयौवनैवासीदजरा लोकसुन्दरी ॥ १०७ ॥ उमांशयुक्ता नितरां सर्वलक्षणसंयुता ।

SGDF
Sri Gargeshwari Digital Foundation

पूर्वं ह्युमा च देव्यस्ताः कदाचिद्भर्तृभिर्युताः ॥१०८॥ विलासं दर्शयामासुर्ब्रह्मणः पश्यतोऽधिकम् । शशाप तास्तदा ब्रह्मा मानुषीं योनिमाप्स्यथ ॥ १०९ ॥ तत्रान्यगाश्च भवतेत्येवं शप्ताः सुराङ्गनाः । विचार्य भारतीमेत्य सर्वमस्यै निवेद्य च ॥ ११० ॥ सहस्रवत्सरं चैनां शुश्रूषित्वा बभाषिरे । देवि नो मानुषं प्राप्यमन्यगात्वं च सर्वथा ॥ ॥ १११ ॥ तत्रापि मारुतादन्यं न स्पृशेम कथञ्चन । ब्रह्मणैव च शप्ताः स्मः पूर्वं चान्यत्र लीलया ॥ ११२ ॥ एकदेहत्वमाप्यैनं यदा वञ्चयितुं गताः । एकदेहा मानुषत्वमाप्स्यथ त्रिश उद्धताः ॥११३॥ त्रिशो मद्वञ्चनायेता इति तेनोदिता वयम् । अतस्त्वयैकदेहत्वमिच्छामो देवि जन्मसु ॥ ११४ ॥ चतुर्ष्वपि यतोऽस्माकं शापद्वयनिमित्ततः । चतुर्जन्मभवेद्भूमौ त्वां नान्यो मारुताद्व्रजेत् ॥ ११५ ॥ नियमोऽयं हरेर्यस्मादनादिर्नित्य एव च । अतस्त्वयैकदेहा नो नान्य आप्नोति मारुतात् ॥ ११६ ॥ इतीरिते तथेत्युक्त्वा पार्वत्यादियुतैव सा । विप्रकन्याऽभवत्तत्र चतस्रः पार्वतीयुताः ॥११७॥ एकदेहस्थिताश्चक्रुर्गिरीशाय तपो महत् । तद्देहस्था भारती तु रुद्रदेहस्थितं हरिम् ॥११८॥ तोषयामास तपसा कर्मैक्यार्थं धृतव्रता । तस्यै स रुद्रदेहस्थो हरिः प्रादाद्वरं प्रभुः ॥११९॥ अनन्ततोषणं विष्णोः स्वभर्त्रा सह जन्मसु । सर्वेष्वपीति चान्यासां ददौ शङ्कर एव च ॥ १२० ॥ वरं स्वभर्तृसंयोगं मानुषेष्वपि जन्मसु । ततस्तदैव देहं ता विसृज्य नलनन्दिनी ॥ ॥ १२१ ॥ बभूवुरिन्द्रसेनेति देहैक्येन सुसङ्गताः । तदासीन्मुद्गलोनाम मुनिस्तपसि संस्थितः ॥ १२२ ॥ चकमे पुत्रिकां ब्रह्मेत्यशृणोत्स कथान्तरे । अपाहसत्सोऽब्जयोनिं शशापैनं चतुर्मुखः ॥ १२३ ॥ भारत्याद्याः पञ्चदेवीर्गच्छ मानिन्न भूतये । इतीरितस्तं तपसा तोषयामास मुद्गलः ॥ १२४ ॥ शापानुग्रहमस्याथ चक्रे कञ्जसमुद्भवः । न त्वं यास्यसि ता देवीर्मारुतस्त्वच्छरीरगः ॥ १२५ ॥ यास्यति त्वं

SGDF
Sri Gangeshwari Digital Foundation

तदा मूर्च्छां गतो नैव विबुध्यसे । न च पापं ततस्ते स्यादित्युक्ते चैनमाविशत् ॥ १२६ ॥ मारुतोऽथेन्द्रसेनां च गृहीत्वाथाभवद्गृही । रेमे च स तया सार्धं दीर्घकालं जगत्प्रभुः ॥ १२७ ॥ ततो मुद्गल-मुद्बोध्य ययौ च स्वं निकेतनम् । ततो देशान्तरं गत्वा तपश्चक्रे स मुद्गलः ॥ १२८ ॥ सेन्द्रसेना वियुक्ताथ भर्त्रा चक्रे महत्तपः । तद्देहगा भारती तु केशवं शङ्करे स्थितम् ॥ १२९ ॥ तोषयामास तपसा कर्मैक्यार्थं हि पूर्ववत् । उमाद्या रौद्रमेवात्र तपश्चक्रुर्यथा पुरा ॥ ॥ १३० ॥ प्रत्यक्षे च शिवे जाते तद्देहस्थे च केशवे । पृथक्पृथ-क्स्वभर्त्राप्त्यै ताः पञ्चाप्येकदेहगाः ॥ १३१ ॥ प्रार्थयामासुरभवत्पञ्च-कृत्वो वचो हि तत् । शिवदेहस्थितो विष्णुर्भारत्यै तु ददौ पतिम् ॥ ॥ १३२ ॥ अन्यासां शिव एवाथ प्रददौ चतुरः पतीन् । देव्य-श्चतस्रस्तु तदा दत्तमात्रे वरेऽमुना ॥ १३३ ॥ देवानामवतारार्थं पञ्च-देव्यः स इत्यथ । नाजानन्नेकदेहत्वाच्चियोगात्क्षीरनीरवत् ॥ १३४ ॥ ताः श्रुत्वा स्वपतिं देवि नचिरात्प्राप्यसीति च । विष्णूक्तं शङ्करोक्तं च चत्वारः पतयः पृथक् ॥ १३५ ॥ भविष्यन्तीत्यथैकस्या मेनिरे पञ्चभर्तृताम् । रुरुदुश्चैकदेहस्था एकैवाहमिति स्थिताः ॥ १३६ ॥ अथाभ्यगान्महेन्द्रोऽत्र सोऽब्रवीत्तां वरस्त्रियम् । किमर्थं रोदिषीत्येव साऽब्रवीद्रुद्ररूपिणम् ॥ १३७ ॥ शङ्करं दर्शयित्वैव पञ्चभर्तृत्वमेष मे । वरार्थमर्थितः प्रादादिति तं शिव इत्यथ ॥ १३८ ॥ अजानञ्शक्र आहोच्चैः किमेतद्भुवनत्रये । मत्पालिते योषितं त्वं वृथा शपसि दुर्मते ॥ ॥ १३९ ॥ इतीरिते शिवः प्राह पत मानुष्यमाप्नुहि । अस्याश्च भर्ता भवसि त्वामेवैषा वरिष्यति ॥ १४० ॥ पश्यात्र मदवज्ञानात्पतितां-स्त्वादृशान्सुरान् । गिरेरधस्तादस्यैवेत्युक्तोऽसौ पाकशासनः ॥१४१॥ उद्बबर्ह गिरिं तं तु ददर्शात्र च तान्सुरान् । पूर्वेन्द्रान्मारुतवृषनासत्यां-श्चतुरः स्थितान् ॥ १४२ ॥ मानुषेष्ववताराय मन्त्रं रहसि कुर्वतः ।

SGDF
Sri Gargeshwari Digital Foundation

ततो वरेण्यं वरदं विष्णुं प्राप्य स वासवः ॥१४३॥ तत्प्रसादान्नरांशेन युक्तो भूमावजायत। मदवज्ञानिमित्तेन पतिता इति तान्सुरान् ॥१४४॥ मारुतादीन्मृषावादीरिति ब्रह्मा शिवं तदा। शशाप मानुषेषु त्वं क्षिप्रं जातः पराभवम् ॥ शक्रान्नरतनोर्यासि यस्मै त्वं तु मृषा वदः ॥१४५॥ मच्छप्तानां च देवीनामविचार्य मया यतः। पतियोगवरं प्रादा नावाप्स्यसि ततः प्रियाम् ॥ १४६ ॥ मानुषेषु ततः पश्चाद्भारती देहनिर्गताम्। स्वलोके प्राप्स्यसि स्वार्थे वरोऽयं ते मृषा भवेत् ॥१४७॥ एषा सा द्रौपदी नाम पञ्चदेवीतनुर्भवेत्। मृषावाग्येषु ते प्रोक्ता मारुताद्यास्तु तेऽखिलाः ॥१४८॥ तासां पतित्वमाप्स्यन्ति भारत्यैव तु पार्वती। संयुक्ता व्यवहारेषु प्रवर्तेत न चान्यथा ॥१४९॥ एते हि मारुताद्यास्ते देवकार्यार्थगौरवात्। जाता इति श्रुतिस्तत्र (तस्मात्) नावज्ञा तेऽत्र कारणम् ॥१५०॥ दीर्घकालं मनुष्येषु ततस्त्वं स्थितिमाप्स्यसि। इत्युक्त्वा प्रययौ ब्रह्मा सोऽश्वत्थामा शिवोऽभवत् ॥१५१॥ पञ्चदेवीतनुस्त्वेषा द्रौपदी नाम चाभवत् ॥ १५२ ॥ वेदेषु सपुराणेषु भारते चावगम्यते। उक्तोऽर्थः सर्व एवायं तथा पूर्वोदिताश्च ये ॥ १५३ ॥

मुमुदुः सर्वपाञ्चाला जातयोः सुतयोस्तयोः ॥१५४॥ मानुषान्नोपभोगेन संसर्गान्मानुषेषु च। मनुष्यपुत्रतायाश्च भावो मानुष एतयोः। अभून्नातितरामासीत्तदयोनित्वहेतुतः ॥ १५५ ॥ याजोपयाजौ तावेव दयिता द्रुपदस्य च। मातृस्नेहार्थमनयोर्ययाचे ददतुश्च तौ ॥ १५६ ॥ जातमात्मनि हन्तारं भारद्वाजो निशम्य तम्। यशोऽर्थमस्त्राणि ददावग्रहीत्सोऽपि लोभतः ॥१५७॥ रामास्त्राणां दुर्लभत्वात्त्रिदशेष्वपि वीर्यवान्। भीमार्जुनाभ्यां बद्धं तं श्रुत्वा पाञ्चालभूपतिम् ॥ १५८ ॥ प्राहिणोत्कृतवर्माणं पाण्डवानां जनार्दनः। पाण्डवेष्वतुलां प्रीतिं लोके ख्यापयितुं प्रभुः ॥ १५९ ॥ संमान्य पाण्डवान्सोऽपि शूरानुजसुतासुतः। तैर्मानितः कृष्णभक्त्या भ्रातृत्वाच्च हरिं ययौ ॥ १६० ॥

SGDF
Sri Gargeshwari Digital Foundation

ततः प्रभृति संत्यज्य देवपक्षा जरासुतम् । पाण्डवानाश्रिता भूपा ज्ञात्वा भैमार्जुनं बलम् ॥ १६१ ॥ विशेषतश्च कृष्णस्य विज्ञाय स्नेहमेषु हि । पराजिताश्च बहुशो कृष्णेनाचिन्त्यकर्मणा ॥ १६२ ॥ प्रतापादेव ते पूर्वं जरासन्धवशं गताः ॥१६३॥ न स्नेहात्तद्बलं ज्ञात्वा पार्थानां केशवस्य च । जन्मान्तराभ्यासवशात्स्निग्धाः कृष्णे च पाण्डुषु ॥ १६४ ॥ जरासन्धभयं त्यक्त्वा तानेव च समाश्रिताः । अपि तं बहुशः कृष्णविजितं नैव तत्यजुः ॥ असुराः पूर्वसंस्कारात्संस्कारो बलवान्यतः ॥ १६५ ॥ देवा हि कारणादन्यानाश्रयन्तोऽपि नान्तरम् । स्नेहं त्यजन्ति देवेषु तथाऽन्येष्वपि च स्फुटम् ॥ १६६ ॥ धृतराष्ट्रो बलं ज्ञात्वा (दृष्ट्वा) बहुशो भीमपार्थयोः । देवत्वाच्च स्वभावेन ज्येष्ठत्वाद्धर्मजस्य च ॥ सुप्रीत एव तं चक्रे यौवराज्येऽभिषेकिणम् ॥ ॥ १६७ ॥ भीमार्जुनावथो जित्वा सर्वदिक्षु च भूपतीन् । चक्रतुः करदान्सर्वान्धृतराष्ट्रस्य दुर्जयौ ॥ १६८ ॥ तयोः प्रीतोऽभवत्सोऽपि पौरजानपदास्तथा । भीष्मद्रोणमुखाः सर्वेऽप्यतिमानुषकर्मणा ॥१६९॥ ॥(२३०६)॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये भीमार्जुनदिग्विजयो नाम अष्टादशोऽध्यायः ॥१८॥

अथ एकोनविंशोऽध्यायः

॥ ॐ ॥ एवं शुभोच्चगुणवत्सु जनार्दनेन युक्तेषु पाण्डुषु चरत्स्वधिकं शुभानि । नास्तिक्यनीतिमतुलां गुरुदेवतादिसत्स्वज्ञसैव जगृहुर्धृतराष्ट्रपुत्राः ॥ १ ॥ नाम्ना कलिंगइति चासुरको द्विजोऽभूच्छिष्यः सुरेतरगुरोः शकुनेर्गुरुः सः । नीतिं स कुत्सिततमां धृतराष्ट्रपुत्रेष्वाधाद्रहो वचनतः शकुनेः समस्ताम् ॥ २ ॥ छद्मैव यत्र परमं न

SGDF
Sri Gargeshwari Digital Foundation

सुराश्च पूज्याः स्वार्थेन वञ्चनकृते जगतोऽखिलं च। धर्मादिकार्यमपि यस्य महोपधिः स्याच्छ्रेष्ठः स एव निखिलासुरदैत्यसङ्घात् ॥ ३ ॥ इत्यादिकुत्सिततमां जगृहुः स्म विद्यामज्ञात एव धृतराष्ट्रमुखैः समस्तैः। तेषां स्वभावबलतो रुचिता च सैव(षा) विस्तारिता च निजबुद्धिबलादतोऽपि ॥ ४ ॥ सम्पूर्णदुर्मतिरथो धृतराष्ट्रसूनुस्तातप्यमानहृदयो निखिलान्यहानि। दृष्ट्वा श्रियं परमिकां विजयं च पार्थेष्वाहेदमेत्य पितरं सह सौबलेन ॥ ५ ॥ ज्येष्ठस्य तेऽपि हि वयं हृदयप्रजाता नार्हत्वमेव गमिता भवतैव राज्ये। भ्रातुः कनीयस उतापि हि दारजाता अन्यैश्च राज्यपदवीं भवतैव नीताः ॥ ६ ॥ राज्यं महच्च समवाप्स्यति धर्मसूनुस्त्वत्तोऽथ चा(वा)नुजबलात्प्रसभं वयं तु। दासा भवेम निजतन्तुभिरेव साकं कुन्तीसुतस्य परतोऽपि तदन्वयस्य ॥७॥ नात्मार्थमस्ति मम दुःखमथातिशुद्धलोकप्रसिद्धयशसस्तव कीर्तिनाशः। अस्मिन्निमित्तमतिदुःखमतो हि सर्वेऽपीच्छाम मर्तुमथ नः कुरु चाप्यनुज्ञाम् ॥ ८ ॥ एवं स्वपुत्रवचनं स निशम्य राजा प्रोवाच नानुगुणमेतदहो मनस्ते। को नाम पाण्डुतनयेषु गुणोत्तमेषु प्रीतिं न याति निजवीर्यभवोच्चयेषु ॥ ॥ ९ ॥ ते हि स्वबाहुबलतोऽखिलभूपभूतिं मय्याकृषन्ति न च वः प्रतिषेधकास्ते। तस्माच्छमं व्रज शुभाय कुलस्य तात क्षेमाय नो भवति वो बलवद्विरोधः ॥ १० ॥ एवं ब्रुवत्यपि नृपे पुनराह पाप आश्रित्य सौबलमतं यदि नैव पार्थान्। अन्यत्र यापयसि नागपुरात्परेतान्दृष्ट्वाखिलानपि हि नो मुदमेहि पार्थैः ॥ ११ ॥ एवं निशम्य गदितं सुतहार्दपाशैराकृष्यताशु स नृपोऽरिधरेच्छयैव। प्रोवाच पुत्रमपि ते बलिनो हि पार्थाः शक्याः पुरात्तु न च (त्तनय) यापयितुं कथञ्चित् ॥ १२ ॥ इत्युक्त आह पितरं शकुनिं निरीक्ष्य सृष्टो मया विधिरिहाद्य शृणुष्व तं च। आसंस्त्रयोदशसमा हि पुरं प्रविष्टेष्वेतेषु तावदयमेव विधिर्मयेष्टः ॥ ॥ १३ ॥ द्रौणेर्हि नास्ति सदृशो बलवान्प्रतापी सोऽयं मया बहुविधैः

SGDF
Sri Gargeshwari Digital Foundation

परमैरुपायैः । नीतो वशं वशगतोऽस्य च मातुलेन साकं पिता तमनु चैष नदीप्रसूतः ॥१४॥ एवं हि सैनिकगणा अपि दानमानैः प्रायो वशं मम गता अपि चैष कर्णः । अस्त्रे बलेऽप्यधिक एव सुरेन्द्रसूनोर्जेष्ये च मन्त्रबलतस्त्वहमेव भीमम् ॥ १५ ॥ त्रिंशच्छतं परमकाः सुरदुर्लभाश्च दुर्वाससो हि मनवोऽद्य मया गृहीताः । अन्यत्र ते प्रविहिता न हि वीर्यवन्तः स्युर्भीम इत्यहममून्न नियोजयामि ॥ १६ ॥ ते वीर्यदा विजयदा अपि वह्निवारिस्तम्भादिदाः सकलदेवनिकायरोधाः । वृष्ट्याद्यभीप्सितसमस्तकरा अमूभिर्जेष्यामि भीममममुमेकमयातयामैः ॥ ॥१७॥ सौहार्दमेषु यदि चा(वा)तितरां करोषि तत्रापि नैव हि मया क्रियते विरोधः । वत्स्यन्तु वारणवते भवतु स्म राष्ट्रं तेषां तदेव मम नागपुरं त्वदर्थे ॥१८॥ एवं स्वपुत्रपरिपालनतो यशस्ते भूयाद्विनश्यति परप्रसवातिपुष्टौ । जाते बले तव विरोधकृतश्च ते स्युः स्वार्थं हि तावदनुयान्त्यपि केवलं त्वाम् ॥ १९ ॥ क्षत्तैक एव सततं परिपोषकोऽलं तेषां मम द्विडथ मन्त्रबलादमुष्य । पौराश्च जानपदिकाः सततं द्विषन्ति मां तेष्वतीवदृढसौहृदचेतसश्च ॥२०॥ एतेषु दूरगमितेषु निराश्रयत्वान्मामेव दुर्बलतया परितः श्रयन्ते । भीष्मादयश्च न हि तन्निकटे विरोधं कुर्युर्विनश्यति गतेषु हि सौहृदं तत् ॥ २१ ॥ भेदः कुलस्य भविता कुलनाशहेतुरस्माभिरेषु सहितेषु पुरेव सत्सु । तस्मादुपायबलतः प्रतियाप(त)नीयास्ते वारणावतमितो विहितोऽप्युपायः ॥२२॥ विष्णुर्जयन्त इति शम्भुसहाय आस्ते देवोत्सवश्च सुमहान्भविताऽत्र सुष्टु । भक्ताश्च ते हि नितरामरिशङ्खपाणौ त्वचोदिताः समुपयान्ति तमुत्सवं द्राक् ॥ ॥ २३ ॥ आज्ञाप्य मत्पुरुषतां पुरुषैर्मदीयैर्मध्यस्थवद्बहुगुणा उदिताश्च तत्र । तेषां पुरोऽत्र गमनाभिरुचिश्च जाता द्रष्टुं पुरं बहुगुणं ननु पाण्डवानाम् ॥ २४ ॥

इत्युक्तवत्यथ सुते स तथेत्युवाच प्राप्तेषु पाण्डुतनयेषु तदैव चोचे ।

SGDF
Sri Gargeshwari Digital Foundation

ज्ञात्वैव ते ऽपि नृपतेर्हृदयं समस्तं जग्मुः पितेति पृथया सह नीतिहेतोः ॥
॥ २५ ॥ भीमस्तदाऽऽह भविताऽत्र हि भैक्षचार इत्येव सम्यगनुविद्य निजं न कर्म । त्याज्यं त्विति प्रतिजगाद निजाग्रजाय यामो वयं न तु गृहात्स हि नः स्वधर्मः ॥२६॥ निष्काल(स)यन्ति यदि नो निजधर्मसंस्थान्योत्स्यामहेऽत्र न हि दस्युवधोऽप्यधर्मः । इत्यूचिवांसममुमाह च धर्मसूनुः कीर्तिर्विनश्यति हि नो गुरुभिर्विरोधे ॥ २७ ॥ इत्युक्तवाक्य(वन्त)ममुमग्रजमन्वगात्स भीमः प्रदर्श्य निजधर्ममथानुवृत्त्यै । दोषो भवेदुभयतो यत एव तेन वाच्यः स्वधर्म उत नः स्थितिरत्र कार्या ॥
॥ २८ ॥ कीर्त्यर्थमेव निजधर्मपरिग्रहाणे प्राप्तेऽग्रजस्य वचनात्प्रविहातुमेव । भीमस्य दोषमुभयं प्रविहातु(तिहन्तु)मीशो ज्येष्ठं चकार हरिरत्र सुतं वृषस्य ॥२९॥ हन्तव्यतामुपगतेषु सुयोधनादिष्वन्यो वधान्न हि भवेन्निजधर्म एव । पूर्वं वधेन हि समस्तश एव दोषास्तेषां प्रयान्ति विवृतिं च तदर्थतोऽपि ॥ ३० ॥ क्षत्ताथ चाह सुवचोऽन्त्यजभाषयैव धर्मात्मजं विषहुताशभयात्प्रतीताः । आध्वंत्विति स्म स तथेति वचोऽभ्युदीर्य प्रायाच्च वारणवतं पृथयाऽनुजैश्च ॥ ३१ ॥ तान्हन्तुमेव च तदा धृतराष्ट्रसूनुर्लाक्षागृहं सपदि काञ्चनरत्नगूढम् । कृत्वाभ्ययातयदमुत्र हि विष्णुपद्या स्वामात्यमेव च पुरोचननामधेयम् ॥ ३२ ॥ पूर्वं प्रहस्त इति यस्त्वभवत्सुपापः सोऽभ्येत्य पाण्डुतनयानभवच्च मन्त्री । दुर्योधनं प्रतिविहाय भवत्सकाशमायात इत्यवददेषु स कूटवाक्यम् ॥ ३३ ॥ दिव्यं गृहं च भवतां हि मयोपनीतं प्रीत्यैव पापमनुयातुमहं न शक्तः । युष्मासु धर्मधृतिमत्सु सदा निवत्स्य इत्यूचिवांसममुमाहुरहो सुभद्रम् ॥
॥ ३४ ॥ दृष्ट्वैव जातुषगृहं वसया समेतं तद्गन्धतो वृषसुतः पवमानजातम् । तं चातिपापमवदत्सुमुखैष पापो हन्तुं न इच्छति सदा भव च प्रतीतः ॥३५॥ क्षत्ताथ नीतिबलतोऽखिललोकवृत्तं जानन्स्वचारमुखतः खनकाय चोचे । उक्त्वैव धर्मतनयाय मदीयवाक्यं पूर्वोक्तमाशु कुरु

SGDF
Sri Gurgeshwari Digital Foundation

तत्र बिलं सुदूरम् ॥ ३६ ॥ चक्रे स चैवमथ वर्त्मवृतिच्छलेन द्वारं च तस्य स पिधाय ययौ गृहं स्वम् । भीमः पुरोचन उभावपि तौ वधाय छिद्रार्थिनौ मिथ उतोषतुरब्दकार्धम् ॥ ३७ ॥ तस्याग्रजा च सहिता सुतपञ्चकेन तत्रागमत्तदनु मारुतिरेष कालः । इत्थं विचिन्त्य स निशम्य च तान्प्रसुप्तान्भ्रातॄंश्च मातरमथाशु बिले न्यधात्प्राक् ॥ ३८ ॥ तं भागिनेयसहितं भगिनीं च तस्य पापां ददाह सगृहां पवमानसूनुः । साप्यागता हि गरलेन निहन्तुमेतान्भीमस्य पूर्वभुजिनो न शशाक चैतत् ॥ ३९ ॥ तप्तं तया ससुतया च तपो नितान्तं स्वां सूनुभिः सह बलाददितिस्तथाब्दात् । तस्या उदाच्च गिरिशो यदि पुत्रकैस्त्वं युक्ता न यासि मृतिमेष वरस्तवेति ॥ ४० ॥ जानन्निदं सकलमेव च भीमसेनो हत्वा सुतैः सह कुबुद्धिमिमां हि तं च । भ्रातॄंश्च मातरमुदूह्य ययौ बिलात्स निर्गत्य भीतिवशतोऽबलतां प्रयातान् ॥ ४१ ॥ ज्ञात्वा पुरोचनवधं यदि भीष्ममुख्यैर्वैचित्रवीर्यतनया अभियोधयेयुः । किन्नो भवेदिति भयं सुमहद्विवेश भीमं त्वृते च तनयान्सकलान्पृथायाः ॥ ॥ ४२ ॥ भीमोऽभयोऽपि गुरुभिः स्वसुखेन युद्धमप्रीयमाण उत धर्मजवाक्यहेतोः । ऊह्यैव तानपि ययौ द्युनदीं च तीर्त्वा क्षत्त्रातिसृष्टमधिरुह्य जलप्रयाणम् ॥ ४३ ॥ विश्वासिता विदुरपूर्ववचोभिरेव दाशोदिताभिरधिरुह्य च भीमपृष्ठम् । सर्वे ययुर्वनमथाभ्युदिते च सूर्ये दृष्ट्वैव सप्तमृतकान्नुरुदु(नरुदं)श्च पौराः ॥४४॥ हा पाण्डवानदहदेष हि धार्तराष्ट्रो धर्मस्थितान्कुमतिरेव पुरोचनेन । सोऽप्येष दग्ध इह दैववशात्सुपापः को नाम सत्सु विषमः प्रभवेत्सुखाय ॥ ४५ ॥ पौरेभ्य एव निखिलं ननु भीष्ममुख्या वैचित्रवीर्यसहितास्तु निशम्य हेति । ऊचुः सुदुःखितधियोऽथ सुयोधनाद्याः क्षत्ता मृषैव रुरुदुर्युयुजुश्च कर्म ॥४६॥

भीमोऽप्युदूह्य वनमाप हिडिम्बकस्य भ्रातॄन्पृथां च तृषितैरभियाचितश्च । पानीयमुत्तरपु(प)टेऽम्बुजपत्रनद्धं दूरादुदूह्य ददृशे स्वपतोऽथ

SGDF
Sri Gargeshwari Digital Foundation

तांश्च ॥४७॥ रक्षार्थमेव परिजाग्रति भीमसेने रक्षः स्वसारमभियापयते हिडिम्बीम् । सा रूपमेत्य शुभमेव ददर्श भीमं साक्षात्समस्तशुभलक्षणसारभूतम् ॥४८॥ सा राक्षसीतनुमवाप सुरेन्द्रलोकश्रीरेव शक्रदयिता त्वपरैव शच्याः । शापात्स्पृधा पतिमवाप्य च मारुतिं सा प्राप्तुं निजां तनुमयाचत भीमसेनम् ॥ ४९ ॥ तां भीम आह कमनीयतनुं न पूर्वं ज्येष्ठादुपैमि वनितां न हि धर्म एषः । सा चाह कामवशगा पुनरेतदेव स्वावेशयुग्घि मरुदग्र्यपरिग्रहस्य ॥ ५० ॥ सा भारती वरमिमं प्रददावमुष्यै स्वावेशमात्मदयितस्य च सङ्गमेन । शापाद्विमुक्तिमतितीव्रतपःप्रसन्ना तेनाप सा निजतनुं पवमानसूनोः ॥ ५१ ॥ ज्ञानं च नैजमभिदर्शयितुं पुनश्च प्राहेश्वरोऽखिलजगद्गुरुरिन्दिरेशः । व्यासस्वरूप इह चेत्य परश्च एव मां ते प्रदास्यति तदा प्रकरोषि मेऽर्थ्यम् ॥ ५२ ॥ काले तदैव कुपितः प्रययौ हिडिम्बो भीमं निहन्तुमपि तां च निजस्वसारम् । भक्षार्थमेव हि पुरा स तु तां न्ययुङ्क्त नेतुं च तानथ समासददाशु भीमम् ॥ ५३ ॥ सा भीममेव शरणं प्रजगाम तां च भ्रातॄंश्च मातरमथावितुमभ्ययात्तम् । भीमः सुदूरमपकृष्य सहोदराणां निद्राप्रभङ्गभयतो युयुधेऽमुना च ॥५४॥ तौ मुष्टिभिस्तरुभिरश्मभिरद्रिभिश्च युध्वा नितान्तरवतः प्रतिबोधितांस्तान् । सञ्चक्रतुस्तदनु सोदरसम्भ्रमं तं दृष्ट्वैव मारुतिरहन्नुरसि स्म रक्षः ॥ ५५ ॥ तद्भीमबाहुबलताडितमीशवाक्यात्सर्वैरजेयमपि भूमितले पपात । वक्त्रस्रवद्बहुलशोणितमाप मृत्युं प्रायात्तमोऽन्धमपि नित्यमथ क्रमेण ॥ ५६ ॥ हत्वैव शर्ववररक्षितराक्षसं तं सर्वैरवध्यमपि सोदरमात्रयुक्तः । भीमो ययौ तमनु सा प्रययौ हिडिम्बी कुन्तीं युधिष्ठिरमथास्य कृते ययाचे ॥ ॥५७॥ ताभ्यामनूक्तमपि यन्न करोति भीमः प्रादुर्बभूव निखिलोरुगुणाभिपूर्णः । व्यासात्मको हरिरनन्तसुखाम्बुराशिर्विद्यामरीचिविततः सकलोत्तमोऽलम् ॥ ५८ ॥ दृष्ट्वैव तं परममोदिन आशु पार्था मात्रा

SGDF
Sri Gangeshwari Digital Foundation

सहैव परिपूज्य गुरुं विरिञ्चेः । उल्लासिताश्च हरिणा परमातिहार्द-
प्रोत्फुल्लपद्मनयनेन तदोपविष्टाः ॥५९॥ तान्भक्तिनम्रशिरसः समुदीक्ष्य
कृष्णो भीमं जगाद नत आशु हिडिम्बया च । एतां गृहाण युवतीं
सुरसद्मशोभां जाते सुते सहसुता प्रतियातु चैषा ॥ ६० ॥ एवं ब्रुव-
त्यगणितोरुगुणे रमेशे ओमित्युदीर्य कृतवांश्च तथैव भीमः । स्कन्धेन
चोह्य विबुधाचरितप्रदेशान्भीमं प्रयात्युदय एव रवेर्हिडिम्बी ॥ ६१ ॥
सा नन्दनादिषु वनेषु विहृत्य तेन सायं प्रयाति पृथया सहितांश्च
पार्थान् । एवं ययावपि तयोरिह वत्सरार्धो जातश्च सूनुरतिवीर्यबलोप-
पन्नः ॥ ६२ ॥ देवोऽपि राक्षसतनुर्निर्ऋतिः पुरा य आवेशयुक्च
गिरिशस्य घटोत्कचाख्यः । पूर्वं घटोपममसुष्य शिरो बभूव केशा
निमेषत उदासुरतो हि नाम ॥६३॥ जाते सुते समयतो भगवत्कृतात्स
भीमो जगाद ससुतां गमनाय तां च । स्मृत्याभियान उभयोरपि सा
प्रतिज्ञां तेषां विधाय च ययौ सुरलोकमेव ॥ ६४ ॥

व्यासोऽपि पाण्डुतनयैः सहितो बकस्य रौद्राद्वराज्ञयवधापगतस्य
नित्यम् । यातो वधाय परमागणितोरुधामा पूर्णाक्षयोरुसुख आशु
तदैकचक्राम् ॥ ६५ ॥ तान्ब्राह्मणस्य च गृहे प्रणिधाय कृष्णः शिष्या
ममैत इति विप्रकुमाररूपान् । आयामि काल इतिताननुशास्य चायात्ते
तत्र वासमथ चक्रुरनूच्य वेदान् ॥ ६६ ॥ भिक्षामटत्सु सततं प्रति-
हुङ्कृतेन भीमो विशां सदन एव गृहप्रमाणम् । भाण्डं कुलालविहितं
प्रतिगृह्य गच्छत्याशङ्कयावगमनस्य तमाह धर्मः ॥ ६७ ॥ स्थूलं हि
सद्म पृथिवीसहितं त्वरक्ष उद्धृत्य वह्निमुखतस्तु तदेकदोष्णा । भाण्डं
तदर्थमुरुकुम्भकरेण दत्तं भिक्षां च तेन चरसि प्रतिहुङ्कृतेन ॥ ६८ ॥
धर्मस्य ते सुनियतेर्बलतश्च बोधो भूयात्सुयोधनजनस्य ततो भयं मे ।
मात्रा सहैव वस फल्गुनपूर्वकैस्त्वमानीतमेव परिभुङ्क्ष्व न तु व्रजेथाः ॥
॥ ६९ ॥ इत्युक्त आशु स चकार तथैव भीमस्तेऽपि स्वधर्मपरिरक्षण-

SGDF
Sri Gangeshwari Digital Foundation

हेतुमौनाः । भिक्षां चरन्त्यथ चतुर्ष्वपि तेषु यातेष्वेकत्र मातृसहितः स कदाचिदास्ते ॥ ७० ॥ तत्काल एव रुदितं निजवासहेतोर्विप्रस्य दारसहितस्य निशम्य भीमः । स्त्रीबालसंयुतगृहे शिशुलालनादौ लज्जेदिति स्म जननीमवदन्न चागात् ॥ ७१ ॥ जानीहि विप्ररुदितं कुत इत्यतश्च योग्यं विधास्य इति सा प्रययौ च शीघ्रम् । सा संवृतैव सकलं वचनं गृहेऽस्य शुश्राव विप्रवर आह तदा प्रियां सः ॥ ७२ ॥ दातव्य एव हि करोऽद्य च राक्षसस्य साक्षाद्बकस्य गिरिसन्निभभक्ष्यभोज्यः । पुंसाऽनसा च सहितानडुहा पुमांस्तु नैवास्ति नो प्रददतां च समस्तनाशः ॥ ७३ ॥ अन्यत्र याम इति पूर्वमुदाहृतं मे नैतत्प्रिये तव मनोगतमास तेन । यास्यामि राक्षसमुखं स्वयमेव मर्तुं भार्यैनमाह न भवानहमत्र यामि ॥ ७४ ॥ अर्थे तवाद्य तनुसंत्यजनादहं स्वां लोके सती प्रचरिते तदृते त्वधश्च । कन्याऽऽह चैनमहमेमि न कन्ययार्थ इत्युक्त आह धिगिति स्म स विप्रवर्यः ॥ ७५ ॥ कन्योदिता बत कुलद्वयतारिणीति जाया सखेति वचनं श्रुतिगं सुतश्च । आत्मैव तेन न तु जीवनहेतुतोऽहं धीपूर्वकं त्रशनके प्रतिपादयामि ॥ ७६ ॥ एवं रुदत्सु सहितेषु कुमारकोऽस्य प्राह स्वहस्तगतृणं प्रतिदर्श्य चैषाम् । एतेन राक्षसमहं निहनिष्य एवेत्युक्ते सुवाक्यमनु सा प्रविवेश कुन्ती ॥ ॥७७॥ पृष्टस्तयाऽऽह स तु विप्रवरो बकस्य वीर्यं बलं च दितिजारिभिरप्यसह्यम् । संवत्सरत्रययुते दशके करं च प्रातिस्विकं दशमुखस्य च मातुलस्य ॥ ७८ ॥ श्रुत्वा तमुग्रबलमत्युरुवीर्यमेव रामायणे रघुवरोरुशरातिभीतम् । विष्टं बिलेष्वथ नृपान्वशमाशु कृत्वा भीत्यैव तैस्तदनु दत्तकरं ननन्द ॥७९॥ एवं बलाढ्यममुमाशु निहत्य भीमः कीर्तिं च धर्ममधिकं प्रतियास्यतीह । सर्वे वयं च तमनुग्रगृहीतधर्मा यास्याम इत्यवददाशु धरासुरं तम् ॥ ८० ॥ सन्ति स्म विप्रवर पञ्चसुता ममाद्य तेष्वेक एव नरवैरिमुखाय यातु । इत्युक्त आह स न ते सुतवध्ययाहं

SGDF
Sri Gargeshwari Digital Foundation

पापो भवामि तव हन्त मनोऽतिधीरम् ॥ ८१ ॥ उक्त्वैनमाह च पृथा
तनये मदीये विद्याऽस्ति दिक्पतिभिरप्यविषह्यरूपा । उक्तोऽपि नो
गुरुभिरेष नियुङ्क्ष एतां वध्यस्तथापि न सुरासुरपालकैश्च ॥ ८२ ॥
उक्त्वैवमेत्य निखिलं च जगाद भीम उद्धर्ष आस स निशम्य महा-
स्वधर्मम् । प्राप्तं विलोक्य तमतीव विघूर्णनेत्रं दृष्ट्वा जगाद यमसूनुरुपेत्य
चान्यैः ॥ ८३ ॥ मातः किमेष मुदितो नितरामिति स्म तस्मै च सा
निखिलमाह स चाब्रवीत्ताम् । कष्टं त्वया कृतमहो बलमेव यस्य सर्वे
श्रिता वयममुं च निहंसि भीमम् ॥८४॥ यद्बाहुवीर्यपरमाश्रयतो हि
राज्यमिच्छाम एव निखिलारिवधं स्वधर्मम् । सोऽयं त्वयाद्य निशि-
चारमुखाय मातः प्रस्थाप्यते वद ममाशु कयैव बुद्ध्या ॥ ८५ ॥
इत्युक्तवन्तममुमाह सुधीरबुद्धिः कुन्ती न पुत्रक निहन्तुमयं हि शक्यः ।
सर्वैः सुरैरसुरयोनिभिरप्यनेन चूर्णीकृतो हि शतशृङ्गगिरिः प्रसूत्याम् ॥
॥ ८६ ॥ एष स्वयं हि मरुदेव नरात्मकोऽभूत्को नाम हन्तुमिममाप्त-
बलो जगत्सु । इत्येवमस्त्विति स तामवदत्परेद्युर्भीमो जगाम शकटेन
कृतोरुभोगः ॥ ८७ ॥ गत्वा त्वरन्बकवनस्य सकाशमाशु भीमः स
पायससुभक्ष्यपयोघटाद्यैः । युक्तं च शैलनिभमुत्तममन्नराशिं स्पर्शात्पुरैव
नरभक्षितुरत्तुमैच्छत् ॥८८॥ तेनैव चान्नसमितौ परिभुज्यमान उत्पाट्य
वृक्षममुमाद्रवदाशु रक्षः । वामेन मारुतिरपोह्य तदा प्रहारान्हस्तेन
भोज्यमखिलं सहभक्ष्यमादत् ॥ ८९ ॥ पीत्वा पयो त्वरित एन-
मवेक्ष्यमाण आचम्य तेन युयुधे गुरुवृक्षशैलैः । तेनाहतोऽथ बहुभि-
र्गिरिभिर्बलेन जग्राह चैनमथ भूमितले पिपेष ॥ ९० ॥ आक्रम्य
पादमपि पादतलेन तस्य दोर्भ्यां प्रगृह्य च परं विददार भीमः । मृत्वा
स चोरुतम एव जगाम पापो विष्णुद्विडेव हि शनैरनिवृत्ति चोग्रम् ॥
॥ ९१ ॥ हत्वा तमक्षतबलो जगदन्तकं स यो राक्षसो न वश आस
जरासुतस्य । भौमस्य पूर्वमपि नो भरतस्य राज्ञो भीमो न्यधापयदमुष्य

SGDF
Sri Gangeshwari Digital Foundation

शरीरमग्रे ॥ ९२ ॥ द्वार्येव तत्प्रतिनिधाय पुरः स भीमः स्नात्वा जगाम निजसोदरपार्श्वमेव । श्रुत्वाऽस्य कर्म परमं तुतुषुः समेता मात्रा च ते तदनु भीतियुताः पुरस्थाः ॥९३॥ दृष्ट्वैव राक्षसशरीरमुरुप्रभीता ज्ञात्वैव हेतुभिरथ क्रमशो मृतं च । विप्रस्य तस्य वचनादपि भीमसेन-भग्नं निशम्य परमं तुतुषुश्च तस्मै ॥ ९४ ॥ अन्नात्मकं करममुष्य च सम्प्रचक्रुः सोऽप्येनमाशु नरसिंहवपुर्धरस्य । चक्रे हरेस्तदनु सत्यवती-सुतस्य विष्णोर्हि वाक्प्रमुदिताः प्रययुस्ततश्च ॥ ९५ ॥ उत्पत्तिपूर्वक-कथां द्रुपदात्मजाया व्यासो ह्यनूच्य जगतां गुरुरीश्वरश्च । यातेत्य-चोदयदथाप्यपरे द्विजाग्र्यास्तान्ब्राह्मणा इति भुजिर्भवितेति चोचुः ॥ ॥९६॥ पूर्वं हि पार्षत इमाञ्जतुगेहदग्धाञ्श्रुत्वाऽतिदुःखितमनाः पुनरेव मन्त्रः । याजोपयाजमुखनिःसृत एवमेष नासत्यतार्ह इति जीवनमेषु मेने ॥ ९७ ॥ यत्र क्वचित्प्रतिवसन्ति निलीनरूपाः पार्था इति स्म स तु फल्गुनकारणेन । चक्रे स्वयंवरविघोषणमाशु राजा त्वन्यैरधार्यधनु-रीशवराच्च चक्रे ॥ ९८ ॥

तत्काल एव वसुदेवसुतोऽपि कृष्णः सम्पूर्णनैजपरिबोधत एव सर्वम् । जानन्नपि स हलिना सहितो जगाम पार्थान्निशम्य च मृतानथ कुल्यहेतोः ॥ ९९ ॥ सम्प्राप्य हस्तिनपुरं धृतराष्ट्रपुत्रान्संवञ्चयंस्तदनु-सारिकथाश्च कृत्वा । भीष्मादिभिः परिगतोऽप्रियवज्जगाम द्वारावती-मुदितपूर्णसुनित्यसौख्यः ॥ १०० ॥ तस्यान्तरे हृदिकसूनुरनन्तरं स्वं श्वाफल्किबुद्धिबलमाश्रित इत्युवाच । सत्राजिदेष हि पुरा प्रतिजज्ञ एनामस्मत्कृते स्वतनयां मणिना सहैव ॥ १०१ ॥ सर्वांश्च नः पुनरसाववमत्य कृष्णायादात्सुतां जहि च तं निशि पापबुद्धिम् । आदाय रत्नमुपयाहि च नौ विरोधे कृष्णस्य दानपतिना सह साह्यमेमि ॥ ॥ १०२ ॥ इत्युक्त आशु कुमतिः स हि पूर्वदेहे दैत्यो यतस्तदकरो-दथ सत्यभामा । आनन्दसंविदपि लोकविडम्बनाय तद्देहमस्य तिलजे

SGDF
Sri Gangeshwari Digital Foundation

पतिमभ्युपागात् ॥ १०३ ॥ श्रुत्वा तदीयवचनं भगवान्पुरीं स्वामायात एव तु निशम्य महोत्सवं तम् । पाञ्चालराजपुरुषोदितमाशु वृष्णिवर्यै-रगान्मुसलिना सह तत्पुरीं च ॥ १०४ ॥

भीमोऽपि रुद्रवररक्षितराक्षसं तं हत्वा तृणोपमतया हरिभक्त-वन्द्यः । उष्याथ तत्र कतिचिद्दिनमच्युतस्य व्यासात्मनो वचनतः प्रययौ निजैश्च ॥१०५॥ माङ्गल्यमेतदतुलं प्रतियात शीघ्रं पाञ्चालका-न्परमभोजनमत्र सिध्येत् । विप्रैरितस्तत इतीरितवाक्यमेते शृण्वन्त एव परिचक्रमुरुत्तराशाम् ॥ १०६ ॥ षण्णां च मध्यगमुदीर्णभुजं विशाल-वक्षस्थलं बहुलपौरुषलक्षणं च । दृष्ट्वैव मारुतिमसावुपलप्स्यतीह कृष्णा-मिति स्म च वचः प्रवदन्ति विप्राः ॥ १०७ ॥ रात्रौ दिवा च सततं पथि गच्छमानाः प्रापुः कदाचिदथ विष्णुपदीं निशायाम् । सर्वांश्च रक्षितुमगादिह पृष्ठतश्च भीमोऽग्र एव शतमन्युसुतोऽन्तरेऽन्ये ॥१०८॥ प्राप्ते तदोल्मुकधरेऽर्जुन एव गङ्गां गन्धर्वराज इह चित्ररथोऽर्धरात्रे । दृष्ट्वैव विप्ररहितानुदकान्तरस्थः क्षत्रात्मजा इति हि धर्षयितुं स चागात् ॥ १०९ ॥ हन्ताऽस्मि वो ह्युपगतानुदकान्तमस्या नद्याश्च मर्त्य-चरणाय निषिद्धकाले । इत्थं वदन्तममुमाह सुरेन्द्रसूनुर्गन्धर्व नास्त्र-विदुषां भयमस्ति तेऽद्य ॥ ११० ॥ सर्वं हि फेनवदिदं बहुलं बलं ते नार्थप्रदं भवति चास्त्रविदि प्रयुक्तम् । इत्युक्तवन्तममुमुत्तमयानसंस्थो बाणान्क्षिपन्नभिससार सुरेन्द्रभृत्यः ॥ १११ ॥ आग्नेयमस्त्रमभिमन्त्र्य तदोल्मुके स चिक्षेप शक्रतनयोऽस्य रथश्च दग्धः । तं चाग्निना परि-गृहीतमभिप्रगृह्य केशेषु सव्यकर्षाशु सुरेन्द्रसूनुः ॥ ११२ ॥ पार्थेन सन्धर्षितः शरणं जगाम धर्मात्मजं तमपि सोऽथ निजास्त्रमुग्रम् । सञ्जह एव तत आस च नामतोऽसावङ्गारवर्ण इति वर्णविपर्ययेण ॥ ११३ ॥ गन्धर्व उल्बणसुरक्तततनुः स भूत्वा स्वर्णावदात उत पूर्वमुपेत्य सख्यम् । पार्थेन दुर्लभमहास्त्रमिदं ययाचे जानन्नपि स्म न हि तादृशमेष वेद ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥११४॥ विद्या सुशिक्षिततमा हि सुरेन्द्रसूनौ तामस्य चावददसावपि कालतोऽस्मै । गन्धर्वगामवददन्वगदङ्घ्यविद्यां पश्चादिति स्म पुरुहूतसुतस्य वाक्यात् ॥ ११५ ॥ आधिक्यतः स्वगतसंविद एव साम्येनैवेच्छति स्म नियमं स धनञ्जयोऽत्र । धर्मार्थमेव स तु तां परिदाय तस्मै कालेन संविदममुष्य च धर्मतोऽयात् ॥ ११६ ॥ पार्थेन सोऽपि बहुलाश्च कथाः कथित्वा धौम्यस्य सङ्ग्रहणमाह पुरोहितत्वे । दास्यामि दिव्यतुरगानिति सोऽर्जुनाय वाचं निगद्य दिवमारुहदप्यगुस्ते ॥ ११७ ॥

ते धौम्यमाप्य च पुरोधसमुत्तमज्ञं विप्रात्मजोपमतया विविशुः पुरं च । पाञ्चालकस्य निखिलां ददृशुश्च तत्र मूर्धाभिषिक्तसमितिं समलङ्कृतां च ॥ ११८ ॥ राजन्यमण्डलमुदीक्ष्य सुपूर्णमत्र कृष्णां प्रगृह्य सहजः प्रगृहीतमालाम् । तेषां च मध्यमगमत्कुलवीर्यसम्पद्युक्तां विभूतिमथ चाह समस्तराज्ञाम् ॥ ११९ ॥ तांश्च प्रदर्श्य सकलान्स हुताशनांशश्चापं च तत्प्रतिनिधाय सपञ्चबाणम् । आहाभिभाष्य सकलान्नृपतीनथोच्चैर्दीप्यद्धुताशनवपुर्घनतुल्यघोषः ॥ १२० ॥ एतेन कार्मुकवरेण तरूपरिस्थमत्स्यावभासमुदके प्रतिवीक्ष्य येन । एतैः शरैः प्रतिहतो भवतीह मत्स्यः कृष्णाऽनुयास्यति तमद्य नरेन्द्रवीराः ॥१२१॥ इत्यस्य वाक्यमनु सर्वनरेन्द्रपुत्रा उत्तस्थुरुद्धतमदाश्चलकुण्डलास्याः । अस्त्रं बलं च बहु नैजमभीक्षमाणाः स्पर्धन्त एव च मिथः समलङ्कृताङ्गाः ॥१२२॥ केचिन्निरीक्ष्य धनुरेत्य न मे सुशक्यमित्येव चापययुरन्य उत प्रचाल्य । तत्राससाद शिशुपाल उरुप्रतापः सङ्गृह्य तत्समधिरोपणयत्न आसीत् ॥ ॥ १२३ ॥ माषान्तराय स चकर्ष यदैव कोट्या उन्नम्य तत्प्रतिजघान तमेव चाशु । अन्यत्र फल्गुनत एतदशक्यमेवेत्यज्ञो गिरीशवरतः स ययौ च भग्नः ॥ १२४ ॥ मद्रेश एत्य चकृषे स्थविरोऽपि वीर्याच्चेदीशतोऽप्यधिकमेव स मुद्गमात्रे । शिष्टेऽमुना प्रतिहतः स ययावशक्यं मत्वाऽऽत्मनस्तदनु भूपतयो विषण्णाः ॥१२५॥ सन्नेषु भूपतिषु

SGDF
Sri Gangeshwari Digital Foundation

मागध आससाद सोऽवज्ञयैव बलवीर्यमदेन दृप्तः । चापं चकर्ष चलपादतलो बलेन शिष्टे स सर्षपमितेऽभिहतोऽमुनैव ॥१२६॥ जानुन्यमुष्य धरणीं ययतुस्तदैव दर्पेण चास्थिरपदस्थितिमात्रहेतोः । रौद्राद्वरात्स जडतां गमितोऽथ राजा राज्ञां मुखान्यनभिवीक्ष्य ययौ स्वराष्ट्रम् ॥ १२७ ॥ प्रायो गतास्तदनु भूपतयोऽथ कर्णो दुर्योधनार्थमनुगृह्य धनुश्चकर्ष । रामादुपात्तशुभशिक्षितमात्रतोऽसौ रोमावशिष्टमकरोद्धनुषोऽन्तमाशु ॥ १२८ ॥ तस्मिंश्च तेन विहते प्रतिसन्निवृत्ते भीमार्जुनौ द्विजसदस्युपसन्निविष्टौ । उत्तस्थतू रविशशिप्रतिमानरूपौ विप्रेषु तत्र च भिया विनिवारयत्सु ॥ १२९ ॥ विप्राश्च केचिदतियुक्तमिमौ च वीरौ देवोपमाविति वचो जगदुस्ततस्तौ । दृष्ट्वैव कृष्णमुखपङ्कजमाशु चापसान्निध्यमाययतुरुत्तमवीर्यसारौ ॥१३०॥ तत्रार्जुनः पवनजात्प्रियतोऽप्यनुज्ञामादाय केशवमजं मनसा प्रणम्य । कृत्वा गुणान्वितमदो धनुरश्रमेण यन्त्रान्तरेण स शरैरधुनोच्च लक्ष्यम् ॥१३१॥ कृष्णा तदाऽस्य विदधे नवकञ्जमालां मध्ये च तां प्रतिनिधाय नरेन्द्रपुत्रौ । भीमार्जुनौ ययतुरच्युतमाभिनम्य क्षुब्धस्तदा नृपवराब्धिरिमावधावत् ॥१३२॥ द्रष्टुं हि (च) केवलगतिर्न तु कन्यकाया अर्थे न चापमिह वृष्णिवराः स्पृशन्तु । इत्याज्ञयैव वरचक्रधरस्य लिप्सामप्यत्र चक्रुरिह नैव यदुप्रवीराः ॥ १३३ ॥ भीमस्तु राजसमितिं प्रतिसम्प्रयातां दृष्ट्वैव योजनदशोच्छ्रयमाशु वृक्षम् । आरुज्य सर्वनृपतीनभितो ह्यतिष्ठदृष्ट्वा पलायनपराश्च बभूवुरेते ॥ १३४ ॥ भीमोऽयमेष पुरुहूतसुतोऽन्य एते पार्था इति स्म हलिने हरिरभ्यवोचत् । दृष्ट्वैव सोऽपि मुदमाप शिनेश्च पौत्रः खड्गं प्रगृह्य हर्षात्परिपुप्लुवेऽत्र ॥ १३५ ॥ प्रीतेषु सर्वयदुषु प्रपलायितेषु दुर्योधनादिनृपतिष्वखिलेषु भीमात् । कर्णोऽभ्यययाद्धरिहयात्मजमाशु मद्रराजो जगाम पवनात्मजमेव वीरः ॥१३६॥ विप्रेषु दण्डपटदर्भमहाजिनानि कोपात्क्षिपत्सु न विनाशनमत्र भूयात् । क्षत्रस्य

SGDF
Sri Gargeshwari Digital Foundation

वैरत इति द्रुपदे च कृष्णं विप्रांश्च याचति स मारुतिरार शल्यम् ॥
॥ १३७ ॥ वृक्षं त्वसौ प्रतिनिधाय च मद्रराजं दोर्भ्यां प्रगृह्य जवतो
गगने निधाय । बन्धुत्वतो भुविशनैरदधात्स तस्य विज्ञाय वीर्यमगम-
न्निजराजधानीम् ॥ १३८ ॥ पार्थोऽपि तेन धनुषा युयुधे स्म कर्णं
सोऽप्यत्र बाहुबलमाविरमुत्र चक्रे । तौ धन्विनावनुपमौ चिरमस्यतां
च सूर्यात्मजोऽत्र वचनं व्यथितो बभाषे ॥ १३९ ॥ त्वं फल्गुनो
हरिहयो द्विजसत्तमो वा मूर्तं न मे प्रमुखतः स्थितिमन्य ईष्टे । यो
वाऽसि कोऽपि यदि ते क्षममद्य बाणान्मुश्चान्यथैहि रणतस्त्विवति पार्थ
आह ॥ १४० ॥ कार्यं न मे द्विजवरैः प्रतियोधनेनेत्युक्त्वा ययौ
रविसुतः स सुयोधनाद्यैः । नागाह्वयं पुरम् ।

अथ द्रुपदात्मजां तामादाय चार्जुनयुतः प्रययौ स भीमः ॥१४१॥
अग्रेऽश्विपुत्रसहितः स तु धर्मसूनुः प्रायात्कुलालगृहमन्वपि भीमपार्थौ ।
भिक्षेति तैरभिहिते प्रजगाद कुन्ती भुङ्ध्वं समस्तश इति प्रददर्श
कन्याम् ॥१४२॥ प्रामादिकं च वचनं न मृषा तयोक्तं प्रायो हि तेन
कथमेतदिति स्म चिन्ता । तेषां बभूव वसुदेवसुतो हरिश्च तत्राजगाम परमेण
हि सौहृदेन ॥१४३॥ संभाष्य तैः स भगवानमितात्मशक्तिः प्राया-
न्निजां पुरममा यदुभिः समस्तैः । ज्ञातुं च तान्निशि स तु द्रुपदः स्वपुत्रं
प्रास्थापयत्स च निलीन इमानपश्यत् ॥ १४४ ॥ भिक्षान्नभोजिन
उतो भगिनीं निजां च तत्रातितृप्तहृदयामथ युद्धवार्ताम् । तेषां
निशम्य नदतां घनवद्गभीरं क्षत्रोत्तमा इति मतिं स चकार वीरः ॥
॥ १४५ ॥ प्रातस्तु तस्य जनितुर्वचसा पुरोधास्तान्प्राप्य मन्त्रविधिना
मरुदात्मजेन । सम्पूजितोऽतिविदुषा प्रतिगृह्य तांश्च प्रावेशयन्नृपति-
गेहममैव मात्रा ॥ १४६ ॥ तानागतान्समभिपूज्य निजात्मजां च
विप्रादियोग्यपृथगुक्तपदार्थजातैः । पूर्णान्गृहांश्चतुर एव दिदेश राजा
तत्रायुधादिपरिपूर्णगृहं च तेऽगुः ॥ १४७ ॥ चेष्टास्वराकृतिविवक्षित-

SGDF
Sri Gargeshwari Digital Foundation

वीर्यशौर्यप्रागल्भ्यपूर्वकगुणैः क्षितिभर्तृपुत्रान् । विज्ञाय तान्द्रुपद एत्य च धर्मसूनुं पप्रच्छ कोऽसि नरवर्य वदस्व सत्यम् ॥ १४८ ॥ स प्राह मन्दहसितः किमिहाद्य राजन्पूर्वं हि वर्णविषये न विशेष उक्तः । पुत्रीकृते तव सुतेन तु लक्ष्यवेध उक्तो नरेन्द्रसमितौ स कृतोऽप्यनेन ॥ ॥१४९॥ एवं ब्रुवाणमथ तं पृथया सहैव राजा वदेति पुनरेव ययाच एषः । सर्वं पृथाऽप्यवदतां स च तेन तुष्टो वाचं जगाद कृतकृत्य इहास्मद्य ॥१५०॥ पार्थार्थमेव हि मयैष कृतः प्रयत्नस्त्वं फल्गुनोऽन्य उत वाऽद्य करं सुतायाः । गृह्णात्विती‍रित इमं स तु धर्मसूनुराह स्म सर्व इति मे मनसि प्ररूढम् ॥ १५१ ॥ नात्र प्रमा मम हृदि प्रतिभात्यथापि धर्माचला मम मतिर्हि तदेव मानम् । इत्युक्तवत्यपि सहैव सुतेन राजा नैवैच्छदत्र भगवानगमच्च कृष्णः ॥ १५२ ॥ व्यासं तमीक्ष्य भगवन्तमगण्यपूर्णनित्याव्ययात्मगुणमाशु समस्त एव । नत्वाऽभिपूज्य वरपीठगतस्य चाज्ञामादाय चोपविविशुः सहितास्तदन्ते ॥ ॥ १५३ ॥ कृष्णस्तदाऽऽह नृपतिं प्रतिदेहि कन्यां सर्वेभ्य एव वृषवायुपुरन्दरा हि । नासत्यदस्रसहिता इम एव इन्द्राः पूर्वे च सम्प्रतितनश्च हरेर्हि पश्चात् ॥ १५४ ॥ एषां स्त्रियश्च निखिला अपि चैकदेहा(ः) पुत्री तवैव न ततोऽत्र विरुद्धता हि । इत्युक्तवत्यपि य(त)दा द्रुपदश्चकार संवादिनीं न धियमेनमथाह कृष्णः ॥ १५५ ॥ दिव्यं हि दर्शनमिदं तव दत्तमद्य पश्याशु पाण्डुतनयान्दिवि संस्थितांस्त्वम् । एतां च ते दुहितरं सह तैः पृथक्स्थां तल्लक्षणैः सह ततः कुरु ते यथेष्टम् ॥ १५६ ॥ इत्युक्तवाक्यमनु तान्स ददर्श राजा कृष्णप्रसादबलतो दिवि तादृशांश्च । एतान्निशाम्य चरणौ जगदीशितुश्च भीतो जगाम शरणं तदनादरेण ॥ १५७ ॥ दत्वाऽभयं स भगवान्द्रुपदस्य कार्ये तेनोमिति स्म कथिते स्वयमेव सर्वाम् । वैवाहिकीं कृतिमथ व्यदधाच्च धौम्ययुक्तः क्रमेण जगृहुर्निखिलाश्च पाणिम् ॥ १५८ ॥

SGDF
Sri Gargeshwari Digital Foundation

पाश्चालकेषु च महोत्सव आस राजा तुष्टोऽभवत्सह सुतैश्च निजैश्च सर्वैः। पौरैश्च जानपदिकैश्च यथैव रामे दत्वा सुतां जनक आप मुदं ततो नु ॥ १५९ ॥

उद्वाह्य तत्र निवसत्स्वथ(त्सु च) पाण्डवेषु श्रुत्वैव रामसहितः सह यादवैश्च। आदाय पारिबर्हं बहुलं स कृष्ण आयान्मुदैव पृथया सहितांश्च पार्थान् ॥ १६० ॥ दृष्ट्वैव तं मुमुदुराशु कुरुप्रवीरा आश्लिष्य कृष्णमथ नेमुरसौ च कृष्णाम्। दृष्ट्वा प्रदाय गृहयोग्यसमस्तभाण्डं सौवर्णमेभ्य उरुभूषणमच्युतोऽदात् ॥ १६१ ॥ देवाङ्गयोग्यशुभकुण्डलहारमौलि-केयूरवस्त्रसहितान्युरुभूषणानि। षण्णां पृथक्पृथगदात्पृथगेव योग्या-न्यन्यद्ददावथ पितृष्वसुरात्मयोग्यम् ॥ १६२ ॥ रत्नानि गोगजतुरङ्ग-रथान्सुवर्णभारान्बहूनपि ददावथ चाशिषोऽग्रयाः। व्यासोऽप्यदादिह परत्र च पार्षतोऽपि भूषारथाश्वगजरत्नसुकाञ्चनानि ॥१६३॥ दासीश्च दाससहिताः शुभरूपवेषाः साहस्रशो ददतुरत्र हरिर्नृपश्च। तासां विचित्रवसनान्युरुरत्नमालाः प्रत्येकशो ददतुरप्युरुभूषणानाम् ॥१६४॥ मासान्बहूनपि विहृत्य सहैव पार्थैः कृष्णो ययौ यदुपुरीं सहितो-ऽग्रजेन।

अन्तर्हिते भगवति प्रततोरुशक्तौ व्यासे च वत्सरमिहोषुरिमे च पार्थाः ॥१६५॥ वैचित्रवीर्यतनयाः सह सौबलेन कर्णेन सिन्धुपतिना रथहस्तियोधैः। भूरिःश्रवःप्रभृतिभिश्च सहैव हन्तुं पाश्चालराजमगुरेत्य पुरीं पुनस्ते ॥ १६६ ॥ तैरर्दिते स्वपुर आशु स सोमकानां राजा सुतैः सह ससैनिक उद्गतोऽभूत्। तेषां च तस्य च बभूव महान्विमर्दः पुत्रौ च तस्य निहतौ विधुताश्च सेनाः ॥ १६७ ॥ चित्रे हते समर आशु सचित्रकेतौ धावत्सु सैनिकवरेषु च पार्षतस्य। पार्था रथैरभिययु-र्धृतचापबाणा वैचित्रवीर्यतनयात्रविस्नुयुक्तान् ॥ १६८ ॥ तैस्तेषु पश्चसु समं प्रतियोधयत्सु भूरिश्रवाः सरविजो विरथं चकार।

SGDF
Sri Gargeshwari Digital Foundation

शक्रात्मजं तदनु पर्वतसन्निकाशं दोर्भ्यां तु मारुतिरुरुं तरुमुद्बबर्ह ॥
॥ १६९ ॥ आयान्तमीक्ष्य तरुहस्तमिमं समीरसूनुं सुयोधनमुखा
निखिलाः सकर्णाः । भूरिश्रवाः शकुनिभूरिजयद्रथाश्च सर्वेऽपि दुद्रुवु-
रथो विविशुः पुरं स्वम् ॥ १७० ॥ ज्ञात्वा समस्तमपि तद्विदुरोऽग्रजं
स्वं वर्धन्त एव तनया भवतो नरेन्द्र । इत्याह सोऽपि मुदितः स्वसुतेन
कृष्णा प्राप्तेति भूषणवराण्यदिशच्च वासः ॥ १७१ ॥ पार्था इति स्म
विदुरोऽवददाशु सोऽपि स्वाकारगूहनपरो यदि तर्ह्यतीव । भद्रं मृता
नहि पृथासहिताः स्म पार्थास्तेषां प्रवृत्तिमपि मे वद सर्वशस्त्वम् ॥
॥१७२॥ इत्युक्त आह विदुरः सहिडिम्बवध्यापूर्वां प्रवृत्तिमखिलामपि
लक्ष्यवेधम् । उद्वाहमप्यथ नदीजमुखाश्च सर्वे तुष्टा बभूवुरपि वत्सर-
मूषुरेवम् ॥ १७३ ॥

श्रुत्वाऽथ कृष्णमुपयान्तमुरु प्रदाय रत्नं च पाण्डुतनयेषु गतं
पुनश्च । तातप्यमानहृदयास्तु सुयोधनाद्या मन्त्रं प्रचक्रुरथ कर्णमुखा
ययुश्च ॥ १७४ ॥ युद्धाय तेषु पुनरेव रथैः प्रयातेष्वाहाग्रजं स
विदुरोऽपि नदीजमुख्यान् । एते हि पापतमचेतस एत्य पार्थान्युद्धाय
मृत्युमुपयान्ति न संशयोऽत्र ॥ १७५ ॥ भीमार्जुनौ विषहितुं नहि
कश्चनास्ति सामर्थ्ययुक्सुरवरेष्वपि वर्धितास्ते । ज्ञात्वैव वत्सरत एव
महानधर्मस्तेषामुपेक्षणकृतस्तदलं नियुङ्क्ष्व ॥ १७६ ॥ आनीतये च
विनियुज्य सुसान्त्वपूर्वमानीय योजय नृपेषु तथार्धराज्यम् । एवं कृते (तं)
तव भवेत्कुलवृद्धये हि धर्माय चोभयविनाशकरोऽन्यथा स्याः ॥१७७॥
इत्युक्तवत्यनु तथेत्यवदन्नदीजो द्रोणः कृपश्च विदुरं स नृपोऽप्युवाच ।
याह्यानयेति स च वेगवता रथेन तत्रागमत्तदनु तैरभिपूजितश्च ॥१७८॥
तत्काल एव वसुदेवसुतश्च कृष्णो व्यासश्च तानुपसमेत्य दुरन्तशक्ती ।
आदाय कुन्तिसहितान्विदुरेण युक्तौ नागाह्वयं पुरमितां सह भार्ययैव ॥
॥१७९॥ तेष्वागतेषु सुमहानभवत्प्रहर्षः पौरस्य जानपदिकस्य जनस्य

SGDF
Sri Gargeshwari Digital Foundation

चोच्चैः। भीष्मादिकाश्च मुदिताः प्रतिपूज्य गेहमावेशयन्सह नृपेण महोत्सवेन ॥ १८० ॥ कृष्णामपूजयदतीव च सौबली सा दुर्योधनस्य दयिता सहितात्र तेऽपि। ऊषुस्ततश्च निजपुत्रकदुर्विनीत्या कृष्णा-निमित्तमुरुभीतित आह भीमात् ॥ १८१ ॥ कुन्ति प्रयाहि सहिता स्नुषया गृहं स्वं भीमाद्बिभेमि निजपुत्रकदुर्विनीत्या। कृष्णा त्रिलोक-वनिताधिकरूपसारा यस्मादिति स्म ससुता प्रययौ गृहं सा ॥ १८२ ॥

ऊषुस्तथैव परिवत्सरपञ्चकं ते पाण्डोर्गृहे सुसुखिनोऽखिलभोग-युक्ताः। कृष्णा च तेषु पृथगेव चतुःस्वरूपा रेमे तथैकतनुरप्यभिमानि-भेदात् ॥ १८३ ॥ कन्यैव साऽभवदतः प्रतिवासरं च जन्माभवद्ध्यभि-मतेः पृथगेव नाशात्। प्रायो हि नाभिमतिनाशमवाप वाणी तस्मा-न्मरुच्च सकलेष्वभिविष्ट आसीत् ॥१८४॥ धर्मात्मजादिषु मरुत्प्रतिविष्ट एषां बुद्धिं विमोह्य रमते सततं तथा यत्। शुद्धैव सा हि तत एव दिनेदिने च संमोहतो मरणवद्भवतीह कन्या ॥ १८५ ॥ नो सुप्तिव-च्चिदमतोऽन्यवशत्वतो हि देहस्य संस्मृतित एव हरेर्न मोहः। नावेशवच्च तत एव मृतेः स्वरूपमेतत्त्वतः प्रतिदिनं जननाद्धि कन्या ॥ ॥ १८६ ॥ एवं स वायुरनुविष्टयुधिष्ठिरादिभीमात्मनैव रमते सततं तयैकः। अन्यादृशा हि सुरभुक्तिरतोऽन्यरूपा मानुष्यभुक्तिरिति नात्र विचार्यमस्ति ॥ १८७ ॥ वासिष्ठयादववृषावपि केशवौ तौ तत्रोषतुः परमसौहृदतो हि तेषु। ताभ्यामनन्तगुणपूर्णसुखात्मकाभ्यां पार्थाश्च ते मुमुदिरे युतसत्कथाभिः ॥ १८८ ॥

पूर्वं हि तेषु वनगेषु बभूव काशिराज्ञः सुताकृत उरुक्षितिपाल-योगः। तत्र स्वयंवरगतां धृतराष्ट्रपुत्रः कन्यां बलाज्जगृह आत्मबलाति-दृप्तः ॥ १८९ ॥ पूर्वं हि राजगणने मगधाधिराजः सङ्ख्यातइत्यतिरुषा प्रगृहीतकन्ये। दुर्योधने नृपतयो युयुधुः स्म तेन भग्नाश्च कर्णसहितेन सहानुजेन ॥ १९० ॥ भग्नेषु तेषु पुनरात्तशरासनेषु कर्णो जगाद

SGDF
Sri Gangeshwari Digital Foundation

धृतराष्ट्रसुतं प्रयाहि । युक्तः सहोदरजनैर्गुरुभीष्ममुख्यैर्युक्तस्य ते न पुरमेत्य हि धर्षणेशाः ॥१९१॥ एकान्ततो जयमवीक्ष्य च नानुयाति बार्हद्रथः पुरगतस्य जये न निष्ठा । द्रौणिं हि (च) रुद्रतनुमेष सदा विजानन्नो तेन युद्धमभिवाञ्छति रुद्रभक्तः ॥ १९२ ॥ एकोऽहमेव नृपतीन्प्रतियोधयिष्य एतैर्मयि प्रवि(ति)जितेऽपि न तेऽस्त्यकीर्तिः । एकं च तेऽनुजमिमे यदि पौरुषेण गृह्णीयुरत्र तव कीर्तिरुपैति नाशम् ॥ ॥ १९३ ॥ भीष्मादयोऽपि नहि योधयितुं समर्था राज्ञा ह्यनेन तत एव च बाह्लिकोऽस्य । भृत्यो बभूव नहि भीष्ममयं युधेऽगाद्राजा नहीति न च तेन विरोध आसीत् ॥ १९४ ॥ इत्युक्त आशु स विमृश्य ययौ पुरं स्वं कर्णोऽपि तैः प्रतियुयोध जिगाय चैतान् । कर्णस्य वीर्यमगणय्य जरासुतोऽपि ह्येकैकमेव नृपतिं स दिदेश योद्धुम् ॥ ॥ १९५ ॥ सर्वेषु तेषु विजितेष्वभिजग्मिवान्स योद्धुं बृहद्रथसुतोऽप्यमुना रथेन । तं चैव रामवरतो विरथं विशस्त्रं चक्रे स चैनमथ मुष्टिभिरभ्युपेतौ ॥ १९६ ॥ सन्धौ यदैव जरया प्रतिसन्धितस्य कर्णो जघान न परत्र तुतोष राजा । न ज्ञातमेतदपि हो हलिना तदेतज्ज्ञातं त्वया भव ततो मम भृत्य एव ॥ १९७ ॥ एवं विधं सुकुशलं बहुयुद्धशौण्डं न त्वां हनिष्य उत ते पितुरेव पूर्वम् । बाहोर्बलादभिहृतं हि मयाङ्गराज्यं तत्त्वं गृहाण युधि कर्मकरश्च मे स्याः ॥१९८॥ इत्युक्त आशु स तथैव चकार कर्णः पूर्वं हि तस्य निजराज्यपदैकदेशः । दुर्योधनेन विहितो मगधाधिराजं जित्वा वृकोदरहृतः पितुरेव दत्तः ॥ ॥ १९९ ॥ अङ्गाधिराज्यमुपलभ्य जरासुतस्य स्नेहं च सूर्यसुत आशु कुरूञ्जगाम । दृष्ट्वैव तं मुमुदिरे धृतराष्ट्रपुत्रा नानेन तुल्यमधिजग्मुरतो हरिं च ॥२००॥ उद्वाह्य काशितनयां गिरिजाभि(धि)विष्टां साक्षान्नरेषु जनितां प्रथमामलक्ष्मीम् । तस्यां सुतं त्वजनयत्पुर आस योऽक्षः कन्यां पुरा प्रियतमां च षडाननस्य ॥ २०१ ॥ पुत्रो बभूव स तु लक्षण-

SGDF
Sri Gangeshwari Digital Foundation

नामधेयः सा लक्षणेत्यधिकरूपगुणा सु(ऽऽस)कन्या। तस्यानुजाश्च निजयोग्यगुणा अवापुर्भार्याः पुनश्च स सुयोधन आप भार्याः ॥२०२॥ पूर्वं सुरान्तक इति प्रथितः सुतोऽभूद्दुःशासनस्य तदनु प्रतितप्यमानाः। दृष्ट्वैव पार्थबलवीर्यगुणान्समृद्धिं तां चैव ते प्रतिययुः स्म कलिङ्गदेशम्॥ ॥ २०३ ॥ आसीत्स्वयंवर उतात्र कलिङ्गराजपुत्र्याः सुवज्र इति यं प्रवदन्ति भूपाः। रौद्राद्वरादविजितस्य च तस्य कन्यां दृप्तो बलात्स जगृहे धृतराष्ट्रसूनुः ॥ २०४ ॥ तत्राथ रुद्रवरतः स जरासुतेन युक्तो बबन्ध च सुयोधनमाशु जित्वा। कर्णः पराद्रवदिह स्म सुतेषु पाण्डोर्यस्मात्स्पृधाऽगमदतः स पराजितोऽभूत् ॥२०५॥ दुर्योधनेऽनुजजनैः सहिते गृहीते भीष्माम्बिकेयविदुराग्रजवाक्यनुन्नः। भीमो विजित्य नृपतीन्सजरासुतांस्तान्हत्वा सुवज्रममुचद्धृतराष्ट्रपुत्रान् ॥ २०६ ॥

तेऽपि स्म कर्णसहिता मृतकप्रतीका नागाह्वयं पुरमथाययुरप्यमीषाम्। दृष्ट्वा विरोधमवदन्नृपतिश्च धर्मपुत्रं पुरन्दरकृतस्थलमाशु याहि ॥ २०७ ॥ तत्रार्धराज्यमनुभुङ्क्ष्व सहानुजैस्त्वं कोशार्धमेव हि गृहाण पुरा हि शक्रः। तत्राभिषिक्त उत कञ्जभवादिदेवैस्तत्रस्थ एव स चकार चिरं च राज्यम् ॥२०८॥ त्वं वीर शक्रसम एव ततस्तवैव योग्यं पुरं तदित आश्वभिषेचयामि। इत्युक्त आह स युधिष्ठिर ओमिति स्म चक्रेऽभिषेकमपि तस्य स आम्बिकेयः ॥ २०९ ॥ तस्याभिषेकमकरोत्प्रथमं स कृष्णो वासिष्ठनन्दन उरुर्मव चक्रवर्ती। यष्टाऽश्वमेधनिखिलात्मकराजसूयपूर्वैर्मखैः सततमेव च धर्मशीलः ॥२१०॥ इत्येव पार्षतसुतासहितेऽभिषिक्ते कृष्णोऽपि वृष्णिवृषभः स तथाभ्यषिञ्चत्। एवं च मारुतिशिरस्यभिषेकमेतौ सञ्चक्रतुः स्म युवराजपदे सभार्यम् ॥ २११ ॥ भीमे च पार्षतसुतासहितेऽभिषिक्ते ताभ्यामनन्तसुखशक्तिचिदात्मकाभ्याम्। अन्यैश्च विप्रवृषभैः सुकृतेऽभिषेके धर्मात्मजानु मुमुदुर्निखिलाश्च सन्तः ॥ २१२ ॥ तस्मिन्महोत्सववरे

SGDF
Sri Gangeshwari Digital Foundation

दिनसप्तकानुवृत्ते वसिष्टवृषभेण च वृष्णिपेण। कृष्णेन ते ययुरमा पृथया तथा च पाञ्चालराजसुतया स्थलमिन्द्रवासम् ॥२१३॥ कोशस्य चार्थसहितास्तु यदैव पार्था गच्छन्ति ताननुययुर्निखिलाश्च पौराः। ऊचुश्च हा बत सुयोधन एष पापो दूरे चकार ननु पाण्डुसुतान्गुणाढ्यान् ॥ २१४ ॥ भीमप्रतापमवलम्ब्य कलिङ्गबन्धान्मुक्तः सुतामपि हि तस्य पुरं निनाय। द्वेष्टयेवमप्यतिबलान्हि सदैव पार्थान्यामो वयं गुणिभिरद्य सहैव पार्थैः ॥ २१५ ॥ आज्ञापयत्यपि सभेरिरवेण पार्थान्नैवानुगच्छथ यदि व्रजथानु वोऽद्य। वित्तं हरिष्य इह सर्वमपीति तच्च पापः करोतु न वयं विजहाम पार्थान् ॥ २१६ ॥ सद्भिर्हि सङ्गतिरिहैव सुखैकहेतुर्मोक्षैकहेतुरुत तद्विपरीतमन्यत्। तस्माद्व्रजेम सह पाण्डुसुतैर्हि शक्रप्रस्थं त्विति स्म धृतचेतस आह धर्मः ॥ ॥२१७॥ प्रीतिर्यदि स्म भवतां मयि सानुजेऽस्ति तिष्ठध्वमत्र पितुरेव हि शासने मे। कीर्तिर्हि वोऽनुगमनात्पितुरत्ययेन नश्येन्न इत्यनुसरध्वमिहाम्बिकेयम् ॥ २१८ ॥ इत्येव तैः पुरजना निखिलैर्निषिद्धाः कृच्छ्रेण तस्थुरपि तान्मनसा त्वगच्छन्। प्राप्याथ शक्रपुरमस्मरतां च कृष्णौ देवेशवार्धकिमथागमदत्र सोऽपि ॥ २१९ ॥ वासिष्ठपेन यदुपेन च पाण्डवानां रत्नोत्करं कुरु पुरं पुरुहूतपुर्याः। सादृश्यतस्त्विवति नियुक्त उभौ प्रणम्य सर्वेश्वरौ स कृतवांश्च पुरं तथैव ॥ २२० ॥ देशं च नातिजनसंवृतमन्यदेशसंस्थैर्जनैरभिपुपूरिर आशु पार्थाः। तेषां गुणैर्हरिपदानतिहेतुतश्च राष्ट्रान्तरा इह शुभा वसतीः(तिं) स्म चक्रुः ॥२२१॥

प्रस्थाप्य दूरमनुजस्य सुतान्स राजा चक्रेऽभिषेकमपि तत्र सुयोधनस्य। दुःशासनं च युवराजमसौ विधाय मेने कृतार्थमिव च स्वमशान्तकामः ॥ २२२ ॥ पार्थाश्च ते मुमुदुरत्र वसिष्ठवृष्णिवर्योदितानखिलतत्त्वविनिर्णयांस्तु। शृण्वन्त एव हि सदा पृथिवीं च धर्माद्भुञ्जन्त आश्रितरमापतिपादयुग्माः ॥ २२३ ॥ (२५२९) ॥ इति

SGDF
Sri Gargeshwari Digital Foundation

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये पाण्डवराज्यलाभो नाम एकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः

॥ ॐ ॥ यज्ञोरुदाननरदेववन्द्यताप्रश्नर्षिपूजासु युधिष्ठिरोऽभूत् । धर्मानुशास्तिहरितत्त्वशंसनस्वराष्ट्ररक्षादिषु भीम आसीत् ॥ १ ॥ स्त्रीधर्मसंशासनभृत्यकोशरक्षाव्ययादौ गुणदोषचिन्तने । अन्तःपुरस्थस्य जनस्य कृष्णा ह्यासीद्धरेर्धर्मनिदर्शिनी च ॥ २ ॥ बीभत्सुरासीत्परराष्ट्रमर्दने तेनानियम्यांस्तु जरासुतादीन् । सकीचकादींश्च ममर्द भीमस्तस्यैव ते बलतो नित्यभीताः ॥ ३ ॥ राष्ट्रेषु भीमेन विमर्दितेषु जिताश्च युद्धेषु निरुद्यमास्ते । बभूवुरासीद्धरिधर्मनिष्ठः प्रायेण लोकश्च तदीयशासनात् ॥ ४ ॥ आजीविनां वेतनदस्तदाऽऽसीन्माद्रीसुतः प्रथमोऽथ द्वितीयः । सन्धानभेदादिषु धर्मराजपश्चाच्च खड्गी स बभूव रक्षन् ॥५॥ धृष्टद्युम्नस्तत्र सेनाप्रणेता शक्रप्रस्थे नित्यमास्तेऽतिहार्दात् । विशेषतो भीमसखा स आसीद्राष्ट्रं चैषां सर्वकामैः सुपूर्णम् ॥६॥ नावैष्णवो न दरिद्रो बभूव न धर्महानिश्च बभूव कस्यचित् । तेषां राष्ट्रे शासति भीमसेने न व्याधितो नापि विपर्ययान्मृतिः ॥ ७ ॥ युधिष्ठिरं यान्त्यथ दर्शनोत्सुकाः प्रतिग्रहायाप्यथ याजनाय । कार्यार्थिनो नैव वृकोदरेण कार्याणि सिध्यन्ति यतोऽखिलानि ॥ ८ ॥ गन्धर्वविद्याधरचारणाश्च सेवन्त एतान्सततं समस्ताः । यथा सुरेन्द्रं मुनयश्च सर्वे आयान्ति देवा अपि कृष्णमर्चितुम् ॥ ९ ॥ तेषां राष्ट्रे कार्तयुगा हि धर्माः प्रवर्तिता एव ततोऽधिकाश्च । वृद्धिश्च तस्मादधिका सुवर्णरत्नाम्बरादेरपि सत्यसम्पदाम् ॥ १० ॥

SGDF
Sri Gangeshwari Digital Foundation

अथोपयेमे शिशुपालपुत्रीं युधिष्ठिरो देवकीं नाम पूर्वाम्। स्वीयां भार्यां यत्सहजो धृष्टकेतुरनुह्लादस्सवितुश्चांशयुक्तः ॥ ११ ॥ तस्यां सुहोत्रो नामतः पुत्र आसीद्यश्चित्रगुप्तो नाम पूर्वं सुलेखः।

कृष्णा सैवाप्यन्यरूपेण जाता काशीशपुत्री यां प्रवदन्ति कालीम् ॥ ॥ १२ ॥ सा केवला भारती नान्यदेव्यस्तत्राविष्टास्तत्कृते काशिराजः। स्वयंवरार्थे नृपतीनाजुहाव सर्वांस्तेऽपि ह्यत्र हर्षात्समेताः ॥ १३ ॥ तेषां मध्ये भीमसेनांस एषा मालामधात्तत्र जरासुताद्याः। क्रुद्धा विष्णोराश्रितानां क्षि(नाक्षि)पन्त आसेदुरुच्चैः शिवमास्तुवन्तः ॥ १४ ॥ पूर्वं वाक्यैर्वैदिकैस्तान्स भीमो जिग्ये तर्कैः साधुभिः सम्प्रयुक्तैः। वेदा ह्यदोषा इति पूर्वमेव संसाधयित्वैव सदागमैश्च ॥ १५ ॥ वेदवाक्यं शैवशास्त्राणि चाहुर्वेदोज्झितानां बहुलां च निन्दाम्। तथा शाक्तेयस्कान्दसौरादिकानां तत्रैवोक्तं छन्दसां वैष्णवत्वम् ॥१६॥ विष्णोराधिक्यं तानि शास्त्राणि चाहुः शिवादिभ्यः कुत्रचिन्नैव वेदे। विष्णूत्कर्षः कथितो बौद्धपूर्वाश्चाहुर्विष्णुं परमं सर्वतोऽपि ॥ १७ ॥ लोकायताश्च क्वचिदाहुरग्र्यं विष्णुं गुरुं सर्ववरं बृहस्पतेः। सर्वागमेषु प्रथितोऽत एव विष्णुः समस्ताधिक एव मुक्तिदः ॥१८॥ तेष्वागमेष्वेव परस्परं च विरुद्धता ह्यन्यपक्षेषु भूपाः। प्रत्यक्षतश्चात्र पश्यध्वमाशु बलं बाह्वोर्विष्णुपदाश्रयस्य ॥ १९ ॥ पूर्वं हि गङ्गा मम विष्णुपूजाविघ्नार्थमायाद्धामकरेण सा मे। नुन्ना परस्ताद्बहुयोजनं गता पुरे कुरूणां शिव आगतस्तदा ॥ २० ॥ स व्याघ्ररूपी कपिलात्मकामुमां परीक्षयन्हन्तुमिवाद्रवद्द्रुतम्। स मे युद्धे विजितो मूर्च्छितश्च गदाप्रहारादास लिङ्गान्तरस्थः ॥ २१ ॥ व्याघ्रेश्वरं नाम लिङ्गं पृथिव्यां ख्यातं तदा तद्वदन्यत्र युद्धम्। तीरे गोमत्या हैमवते गिरौ हि जितस्तत्राप्यास शार्दूललिङ्गम् ॥ २२ ॥ एवं प्रत्यक्षे विष्णुपदाश्रयस्य बलाधिक्ये किमु वक्तव्यमत्र। विष्णोराधिक्ये क्षत्रियाणां प्रमाणं बलं विप्रे ज्ञानमेवेति

SGDF
Sri Gangeshwari Digital Foundation

चाहुः ॥ २३ ॥ मया केदारे विप्ररूपी जितश्च रुद्रोऽविशल्लिङ्गमेवाशु भीतः । ततः परं वेदविदामगम्यतां शापं प्रादाच्छङ्करो व्रीडितोऽत्र ॥ ॥ २४ ॥ एवं प्रत्यक्षे विष्णुबले प्रतीपं मनो यस्य ह्युत्तरं स ब्रवीतु । क्रोधाधिकश्चेत्क्षिप्रमायातु योद्धुमित्युक्तास्तेऽभ्या(ह्या)ययुरात्तशस्त्राः ॥ ॥ २५ ॥ विद्राव्य तान्बाणसङ्घैः समस्ताञ्जरासुतं गदया पोथयित्वा । बाहुभ्यां चैनं परिगृह्याशु विष्णोः पदोत्थायां प्राक्षिपद्देवनद्याम् ॥२६॥ स व्रीडितः प्रययौ मागधांश्च भूपैः समेतो भीमसेनो रथं स्वम् । आरुह्य काशीश्वरपूजितश्च ययौ काल्या शक्रसनामकं पुरम् ॥ २७ ॥ तस्यां त्रिलोकाधिकरूपसद्गुणैरासंमितायां रममाणः सुतं च । शर्वत्रातं नामाजनयत्पुरा यः समानवायुर्बलवीर्ययुक्तः ॥ २८ ॥

कृष्णोऽपि गत्वा द्वारवतीं सरामः सत्यापितुर्वधकर्तारमेव । शतधन्वानं हन्तुमैच्छत्स चैव ययाचेऽक्रूरं कृतवर्मानुयुक्तम् ॥ २९ ॥ तावब्रूतां सर्वलोकैककर्तुर्नावां विरोधं मनसाऽपि कुर्वः । कृष्णस्य सर्वेशितुरित्यनूक्त आरुह्य चाश्वीं भयतः पराद्रवत् ॥ ३० ॥ अन्वेव तं कृष्णरामौ रथेन यातौ शतं योजनानां दिनेन । गत्वा मृतायां बडवायां पदैव सम्प्राद्रवत्कृष्ण एनं पदाऽगात् ॥ ३१ ॥ छित्त्वा शिरस्तस्य चक्रेण कृष्णो जानन्नक्रूरे मणिमेतेन दत्तम् । अप्यज्ञवल्लोकविडम्बनाय परीक्ष्य वासोऽत्र नेत्याह रामम् ॥ ३२ ॥ अविश्वासात्स तु सक्रोध एव ययौ विदेहानवसत्पञ्च चाब्दान् । जानन्पार्थेभ्योऽहार्यतां केशवस्य वशीकर्तु धार्तराष्ट्रो बलं गात् ॥ ३३ ॥ बभूव शिष्योऽस्य तथा गदायामसन्निधानं केशवस्य प्रतीक्षन् । तदा ययाचे भगिनीं च तस्य स च प्रतिज्ञामकरोत्प्रदाने ॥३४॥ ज्येष्ठं ह्येनं केशवो नातिवर्तेदित्येव मेने धार्तराष्ट्रः स तस्मात् । जग्राह हस्तं दक्षिणं सत्यहेतोर्ददौ च रामः करमस्मै हलाङ्कम् ॥ ३५ ॥ रूपेण तस्या मोहितो धार्तराष्ट्रो विशेषतः कृष्णरामौ भगिन्याः । स्नेहाद्वशं यास्यत इत्यगृह्णाद्धस्तं हलाङ्कं हलिनो

SGDF
Sri Gargeshwari Digital Foundation

रिपुघ्नम् ॥ ३६ ॥ जाता देवक्यां सा सुभद्रेति नाम्ना भद्रारूपेणानकदुन्दुभेस्ताम् । कृत्वा पुत्रीं रोहिणीं स्वामरक्षत्पूर्वं तु याऽसीत्त्रिजटैव नाम्ना ॥ ३७ ॥ सीतायाः प्राङ्नित्यशुश्रूषणात्सा बभूव विष्णोर्भगिनी प्रिया च । उमाऽऽवेशाद्रूपगुणोपपन्ना पद्मेक्षणा चम्पकदामगौरी ॥३८॥ एतत्कृत्वा धृतराष्ट्रात्मजः स ययौ कुरून्निवसत्यत्र रामे । कृष्णोऽक्रूरं विवसन्तं भयेन सहार्दिक्यं चानयित्वा जगाद ॥ ३९ ॥ आनीय रामं च समस्तसात्वतां यदाऽवादीत्केशवः सन्निधाने । मणिस्त्वय्यास्ते दर्शयेत्येव भीतस्तदाऽक्रूरोऽदर्शयद्रत्नमस्मै ॥४०॥ अव्याजतामात्मनो दर्शयित्वा हलायुधे केशवस्तस्य जानन् । रत्नाकाङ्क्षामुग्रसेनस्य चैव मातुश्च साम्बस्य पुनर्बभाषे ॥ ४१ ॥ आस्तामक्रूरे मणिरन्यैरधार्यः सदा यज्ञाद्दानपतेः स धार्यः । न सत्या कृष्णावाञ्छितं किञ्चिदिच्छेत्तथापि तस्या योग्य इत्याह कृष्णः ॥ ४२ ॥ लब्ध्वा रत्नं दानपतिः सदैव सन्दीक्षितोऽभूद्यज्ञकर्मण्यतन्द्रः । प्रदर्श्य कृष्णो हलिने रत्नमेतच्छक्रप्रस्थं पाण्डवस्नेहतोऽगात् ॥ ४३ ॥

वसन्नजस्तत्र बहूंश्च मासान्सफल्गुनोऽयान्मृगयां कदाचित् । हत्वा मृगान्यमुनातीरसंस्थः सोऽन्यां कालिन्दीं ददृशे तत्स्वसारम् ॥ ४४ ॥ सा सूर्यपुत्री यमुनानुजाता तपश्चरन्ती कृष्णपत्नीत्वकामा । पृष्टाऽर्जुनेनाह समस्तमेतत्पत्नीं च तां जगृहे वासुदेवः ॥ ४५ ॥ ततो गत्वा नग्नजितो गृहं च स्वयंवरे सप्तवृषानगृह्णात् । सर्वैरग्राह्यानसुरान्वरेण शिवस्य यैर्निर्जिता भूमिपालाः ॥ ४६ ॥ ततो नीलां तस्य सुतां च लेभे पूर्वं नीला गोपकन्यापि याऽसीत् । सा देहेऽस्याः प्राविशत्पूर्वमेषा यस्मादेका द्विविधा सम्प्रजाता ॥ ४७ ॥ पितृष्वसुर्मित्रविन्दा सुता च कृष्णे मालामासृजद्राजमध्ये । विन्दानुविन्दौ भ्रातरावेव तस्या न्यषेधतां धार्तराष्ट्रार्थमुग्रौ ॥ ४८ ॥ जित्वाऽवन्त्यौ नृपतींश्चैव सर्वानादाय तां प्रययौ वासुदेवः । पितृष्वसुस्तनयां च द्वितीयां भद्रां दत्तामग्रही-

SGDF
Sri Gargeshwari Digital Foundation

भ्रातृभिः सः ॥ ४९ ॥ विश्वेषां देवानामवतारा हि पश्च ते कैकया भ्रातरोऽस्या हरेश्च । भक्ता नित्यं पाण्डवानां च तातो ह्येषां वशे शैब्यनामर्भुरग्रे ॥ ५० ॥ स्वयंवरो लक्ष्मणायास्तथाऽऽसीद्यथा द्रौपद्या लक्ष्यवेधात्मकः सः । मद्रेषु तस्याश्च पिता पिनाकं स्वयंवरार्थे जगृहे गिरीशात् ॥ ५१ ॥ लक्ष्यं च तत्सर्वतश्छन्नमेव द्वारं च तस्याप्युपरि स्म लक्ष्यात् । छिन्नेषुणा पातनीयं च तद्धि द्रौपद्यर्थात्तदशक्यं ततोऽलम् ॥ ५२ ॥ तत्राजग्मुर्मागधाद्याश्च सर्वे पार्था अपि द्रष्टुमिहाभ्युपाययुः । दुर्योधनाद्याश्च ससूतपुत्राः सज्जीकर्तुं धनुरप्युत्सहं ते ॥ ॥५३॥ केचिन्निपेतुर्धनुषैव ताडिता न वै केचिच्चालयितुं च शेकुः । दुर्योधनो मागधः सूतपुत्रः सज्जं कृत्वा लक्ष्यवीक्षां न शेकुः ॥ ५४ ॥ धनञ्जयः स्वात्मबलं प्रकाशयन्सज्जङ्कृत्वा धनुरक्षैच्च लक्ष्यम् । नैवाददे बाणमनिच्छयैव प्राप्यां जानन्केशवेनैव तां च ॥ ५५ ॥ भीमश्चापं लक्ष्यमप्येतदत्र द्रष्टुं च नैवैच्छदरीन्द्रधारिणः । योग्ये कर्मण्यायतंश्चापराधी स्यामित्यज्ञः पश्यमानो महात्मा ॥ ५६ ॥ कृष्णश्च तच्चापमधिज्यमाशु कृत्वाऽचिन्त्यश्छिन्नबाणेन लक्ष्यम् । अपातयद्दुन्दुभयश्च दिव्या नेदुः प्रसूनं ववृषुः सुराश्च ॥ ५७ ॥ कृष्णे ब्रह्माद्यैस्तूयमाने नरेन्द्रकन्या मालां केशवांसे निधाय । तस्थावुपास्याथ सर्वे नरेन्द्रा युद्धायागुः केशवं ह्यात्तशस्त्राः ॥ ५८ ॥ विद्राव्य तान्मागधादीन्स कृष्णो भीमार्जुनाभ्यां सहितः पुरीं स्वाम् । ययावेता अष्टमहामहिष्यः कृष्णस्य दिव्या लोकसुन्दर्य इष्टाः ॥ ५९ ॥ भैष्मी सत्या चैकतनुर्द्विधैव जाता भूमौ प्रकृतिर्मूलभूता । तयैवान्याः सर्वदानुप्रविष्टास्तासां मध्ये जाम्बवती प्रधाना ॥ ६० ॥ रामेण तुल्या जाम्बवती प्रियत्वे कृष्णस्यान्याः किञ्चिदूनाश्च तस्याः । यदाऽऽवेशो बहुलः स्याद्रमायास्तदा तासु प्रीयते केशवोऽलम् ॥ ६१ ॥ यदाऽऽवेशो ह्रासमुपैति तत्र प्रद्युम्नतो विंशगुणाधिकाः स्युः । अनादितस्ताः केशवान्नान्यसंस्था रेमे

SGDF
Sri Gargeshwari Digital Foundation

ताभिः केशवो द्वारवत्याम् ॥ ६२ ॥

एवं कृष्णे द्वारकामध्यसंस्थे गिरिं भूपा रैवतकं समाययुः । दुर्योधनाद्याः पाण्डवाश्चैव सर्वे नानादेश्या ये च भूपालसङ्घाः ॥ ६३ ॥ आत्मानं तान्द्रष्टुमभ्यागतान्स कृष्णो गिरौ रैवतके ददर्श । नमस्कृते सर्वनरेन्द्रमुख्यैः कृष्णे वैदर्भ्या सह दिव्यासनस्थे ॥ ६४ ॥ एत्याकाशान्नारदः कृष्णमाह सर्वोत्तमस्त्वं त्वादृशो नास्ति कश्चित् । इत्याश्चर्यो धन्य इत्येव शब्दद्वये तूक्ते वासुदेवस्तमाह ॥ ६५ ॥ दक्षिणाभिः साकमित्येव कृष्णं पप्रच्छुरेतत्किमिति स्म भूपाः । नारायणो मुनिमूचे वदेति शृणुध्वमित्याह स नारदोऽपि ॥ ६६ ॥ कूर्मो दृष्टो विष्णुपद्यां मयोक्तस्त्वमुत्तमो नास्त्यधिकस्तवेति । ऊचे गङ्गामुत्तमां सा जलेशमुमामूचे पृथिवीनामिकां सः ॥ ६७ ॥ या मादृशा देवतास्सर्वशस्ता धृतास्तया प्रथितत्वात्पृथिव्या । शिवं शेषं गरुडं चाह साऽपि परावनात्पर्वतनामधेयान् ॥ ६८ ॥ तैरेवाहं मत्समाश्चैव देव्यो ध्रियन्त इत्येव तमूचिरेऽथ । ब्रह्माणमेवोत्तममाह सोऽपि वेदात्मिकां प्रकृतिं विष्णुपत्नीम् ॥ ६९ ॥ सैका देवी बहुरूपा बभाषे युक्ता यदाहं ज्ञेन नारायणेन । यज्ञक्रियामानिनी यज्ञनाम्नी तदोत्तमा तत्प्रवेशात्तदाख्या ॥ ॥७०॥ विष्ण्वाविष्टा यज्ञनाम्नी तदङ्कस्थिता सोचे केशवो ह्युत्तमोऽलम् । न तत्समश्चाभ्यधिकः कुतः स्यादृषे सत्यं नान्यथेति स्म भूयः ॥ ७१ ॥ तयोक्तोऽहं नावतारेषु कश्चिद्विशेष इत्येव यदुप्रवीरम् । सर्वोत्तमोऽसीत्यवदं स चाह न केवलं मेङ्कगायाः श्रियोऽहम् ॥ ७२ ॥ सदोत्तमः किन्तु यदा तु सा मे वामार्धरूपा दक्षिणानामधेया । यस्मात्तस्या दक्षिणतः स्थितोऽहं तस्मान्नाम्ना दक्षिणेत्येव सा स्यात् ॥ ७३ ॥ सा दक्षिणामानिनी देवता च सा च स्थिता बहुरूपा मदर्धा । वामार्धो मे तत्प्रविष्टो यतो हि ततोऽहं स्यामर्धनारायणाख्यः ॥ ७४ ॥ तदाप्यस्या उत्तमोऽहं सुपूर्णो न मादृशः कश्चिदस्त्युत्तमो वा । इत्येवावादी-

SGDF
Sri Gargeshwari Digital Foundation

दक्षिणाभिः सहेति सर्वोत्तमत्वं दक्षिणानां स्मरन्सः ॥ ७५ ॥ ताभिश्चैताभिर्दक्षिणाभिः समेताद्वरिष्ठोऽहं जगतः सर्वदैव । मत्सामर्थ्यान्नैव चानन्तभागो दक्षिणानां विद्यते नारदेति ॥ ७६ ॥ उक्तं कृष्णेनाप्रतिमेन भूपा अन्योत्तमत्वं दक्षिणानां च शश्वत् । सेयं भैष्मी दक्षिणा केशवोऽयं तस्याः श्रेष्ठः पश्यत राजसङ्घाः ॥ ७७ ॥ प्रत्यक्षं वो वीर्यमस्यापि कुन्त्या युद्धेऽर्थितः केशवो वीर्यमस्यै । अदर्शयत्पाण्डवान्धार्तराष्ट्रान्भीष्मद्रोणद्रौणिकृपान्सकर्णान् ॥ निरायुधांश्चक्र एकक्षणेन लोकश्रेष्ठान्दैवतैरप्यजेयान् ॥७८॥ व्रतं भीमस्यास्ति नैवाभिकृष्णमियामिति स्माज्ञया तस्य विष्णोः । चक्रं रथस्याग्रहीत्स प्रणम्य कृष्णं स तं केशवोऽपाहरच्च ॥७९॥ एवं क्रीडन्तोऽप्यात्मशक्त्या प्रयत्नं कुर्वन्तस्ते विजिताः केशवेन । ततः सर्वे नेमुरस्मै पृथा च सविस्मया वासुदेवं ननाम ॥ ८० ॥ एवं विधान्यद्भुतानीह कृष्णे दृष्टानि वः शतसाहस्रशश्च । तस्मादेष ह्यद्भुतोऽत्युत्तमश्चेत्युक्त्वा नेमुस्तेऽखिला वासुदेवम् ॥ ॥८१॥ वाय्वाज्ञया वायुशिष्यः स सत्यमित्याद्युक्त्वा नारदो रुक्मिणीं च । स्तुत्वा पुष्पं पारिजातस्य दत्वा ययौ लोकं क्षिप्रमब्जोद्भवस्य ॥ ८२ ॥

साक्षात्सत्या रुक्मिणीत्येकसंविद्द्विधा भूता नात्र भेदोऽस्ति कश्चित् । तथापि सा प्रमदानां स्वभावप्रकाशनार्थं कुपितेवास सत्या ॥ ॥८३॥ साकं रुक्मिण्या राजमध्ये प्रवेशात्स्तवाद्दृषेः पुष्पदानाच्च देवीम् । कोपाननं दर्शयन्तीमुवाच विडम्बनार्थं कामिजनस्य कृष्णः ॥ ८४ ॥ दाताऽस्म्यहं पारिजातं तरुं त इत्येव तत्राथागमद्वासवोऽपि । सर्वैर्देवैर्भौमजितोऽप्यदित्यास्तेनैवाथो कुण्डलाभ्यां हृताभ्याम् ॥ ८५ ॥ तद्दैवागुर्मुनयस्तेन नुन्ना बदर्यास्ते सर्व एत्याशु कृष्णम् । ययाचिरे भौमवधाय नत्वा स्तुत्वा स्तोत्रैर्वैदिकैस्तान्त्रिकैश्च ॥ ८६ ॥ इन्द्रेण देवैः सहितेन याचितो विप्रैश्च सस्मार विहङ्गराजम् । आगम्य नत्वा पुरतः

SGDF
Sri Gargeshwari Digital Foundation

स्थितं तमारुह्य सत्यासहितो ययौ हरिः ॥८७॥ नित्यैव या प्रकृतिः स्वेच्छयैव जगच्छिक्षार्थं द्वादशीं भीमसंज्ञाम् । उपोष्य बभ्रे कोटिधाराजलस्य विष्णोः प्रीत्यर्थं सैव हि सत्यभामा ॥ ८८ ॥ तया युक्तो गरुडस्कन्धसंस्थो दूरानुयातो वज्रभृताऽप्यनुज्ञाम् । दत्वाऽमुष्मै प्रययौ वायुजुष्टामाशां कृष्णो भौमवधे धृतात्मा ॥ ८९ ॥ भौमो ह्यासीद्ब्रह्मवरादवध्यो न शस्त्रभृज्जीयस इत्यमुष्मै । दत्तो वरो ब्रह्मणा तद्वदेव तस्यामात्यानां तद्वदवध्यता च ॥ ९० ॥ भौमेन जेयत्वमपि ह्यमीषां दत्तं भौमाय ब्रह्मणा क्रोडरूपात् । विष्णोर्जातायास्य दुर्गं च दत्तं प्राग्जोतिषं नाम पुरं समस्तैः ॥ ९१ ॥ आसीद्बाह्ये गिरिदुर्गं तदन्तः पानीयदुर्गं मौरवं पाशदुर्गम् । तस्याप्यन्तः क्षुरधारोपमं तत्पाशाश्च ते षट्सहस्राः सुघोराः ॥९२॥ अभेद्यत्वमरिभिरतार्यता च दत्ता दुर्गाणां ब्रह्मणाऽऽराधितेन ॥ ९३ ॥ तस्यामात्याः पीठमुरौ निशुम्भहयग्रीवौ पञ्चजनश्च शूराः । सङ्कल्प्य तान्लोकपालानहं च ब्रह्मेत्यद्धा भाषमाणः स आस्ते ॥ ९४ ॥ हन्तुं कृष्णो नरकं तत्र गत्वा गिरिं दुर्गं गदया निर्बिभेद । वायव्यास्त्रेणोदकं शोषयित्वा चकर्त खड्गेन मुरस्य पाशान् ॥ ९५ ॥ अथाभिपेतुर्मुरपीठौ निशुम्भहयग्रीवौ पञ्चजनश्च शूराः । ताञ्छैलशस्त्रास्त्रशिलाभिवर्षिणश्चक्रे व्यसूंश्चक्रनिकृत्तकन्धरान् ॥ ९६ ॥ तेषां सुताः सप्त सप्तोरुवीर्या वरादवध्या गिरिशस्याभिपेतुः । तानस्त्रशस्त्राभिमुचः शरोत्तमैः समर्पयामास च मृत्यवेऽच्युतः ॥ ९७ ॥ हत्वा पञ्चत्रिंशतो मन्त्रिपुत्राञ्जगाम भौमस्य सकाशमाशु । श्रुत्वा भौमः कृष्णमायान्तमारादक्षौहिणीत्रिंशकेनाभ्ययात्तम् ॥ ९८ ॥ जघ्ने सेनां गरुडः पक्षपातैः पादं शेषं केशवः सायकौघैः । अथाससादाशु भौमोऽच्युतं तं मुञ्चन्बाणानस्त्रसम्मन्त्रितान्द्राक् ॥ ९९ ॥ विव्याध तं केशवः सायकौघैर्भौमः शतघ्नीं ब्रह्मदत्तामसुश्चत् ॥ १०० ॥ अच्छेद्योऽभेद्यो नित्यसंवित्सुखात्मा नित्याव्ययः

SGDF
Sri Gargeshwari Digital Foundation

पूर्णशक्तिः स कृष्णः । निगीर्य तां देववरः शतघ्नीं नित्याश्रान्तोऽदर्शयच्छ्रान्तवच्च ॥ १०१ ॥ बहून्वरान्ब्रह्मणोऽन्येष्वमोघान्मोघीकृतान्वीक्ष्य परात्परेशः । भवेत्कथञ्चिद्बहुमानेन युक्त इत्येव कृष्णोऽदर्शयच्छ्रान्तवत्स्वम् ॥ १०२ ॥ तदा दृप्तं नरकं वीक्ष्य देवी सत्याऽऽददे कार्मुकं शार्ङ्गसंज्ञम् । चकार तं यतमानं च भौमं निरायुधं विरथं च क्षणेन ॥१०३॥ आलिङ्ग्य कृष्णः सत्यभामां पुनश्च रथान्तरे संस्थितं भौममुग्रम् । सृजन्तमस्त्राण्यरिणा निकृत्तस्कन्धं मृत्योरर्पयामास शीघ्रम् ॥ १०४ ॥ स मन्त्रिभिर्मन्त्रिपुत्रैः समेतो जगाम कृष्णावज्ञयाऽन्धन्तमश्च । तदाविष्टो वायुरगाच्च कृष्णमन्तःपुरं प्राविशत्सत्ययेशः ॥ ॥१०५॥ तदा भूमिः पञ्चभूतावरा या यस्यां जज्ञे नरकः श्रीवराहात् । मूलप्रकृत्यैव भूम्या नितान्तमाविष्टा या साऽगमत्कृष्णपादौ ॥ १०६ ॥ साऽदित्यास्ते कुण्डले पादयोश्च निधाय पौत्रं भगदत्तसंज्ञम् । समर्पयामास तस्याभिषेकं प्राग्जोतिषे कारयामास कृष्णः ॥ १०७ ॥ संस्थाप्य तं सर्वकिरातराज्ये भौमाहृतं वैश्रवणाद्बलेन । शिवेन दत्तं धनदायातिसत्त्वं भगदत्तेऽधात्सुप्रतीकं रमेशः ॥१०८॥ करीन्द्रमेकं तं निधायैव तस्मिन्कृत्वा प्रसादं च वसुन्धरायाः । चतुर्दन्तान्षट्सहस्रान्करीन्द्रान्पयोऽब्धिजान्प्राहिणोद्द्वारवत्यै ॥ १०९ ॥ नराधिपान्देवगन्धर्वनागाञ्जित्वाऽऽनीतं हेमरत्नोच्चराशिम् । शतद्वयं योजनानां समृद्धं समन्ततः प्राहिणोत्स्वां पुरीं सः ॥ ११० ॥ महावीर्यैर्नैर्ऋतै राक्षसेन्द्रैर्भौमानीतैर्निर्ऋतिं योधयित्वा । स प्राहिणोत्सर्वरत्नोच्चराशिं गजांश्च नारायण आदिदेवः ॥ १११ ॥ तत्रापश्यत्कन्यका भूमिपानां भौमानीताः समरे तान्विजित्य । द्व्यष्टौ सहस्राणि शतं च रूपशीलोदारा अक्षताः सद्व्रतस्थाः ॥ ११२ ॥ काश्चित्तत्रासन्देवगन्धर्वकन्यास्तासां प्रधाना त्वष्टृपुत्री कशेरुः । पुत्रा अग्नेः पूर्वमासंश्च तेऽथ स्त्रीत्वप्राप्त्यै चक्रुरग्र्यं तपश्च ॥ ११३ ॥ भार्यात्वार्थे वासुदेवस्य योषित्तनुं तासामिच्छतीनां

SGDF
Sri Gangeshwari Digital Foundation

समीरः। अदाद्वरं तपसाऽऽराधितः सन्स्त्रीभूतास्ते बदरीं सम्प्रजग्मुः ॥
॥ ११४ ॥ नारायणं तत्र शु(शि)श्रूषमाणाः प्राप्याप्सरस्त्वं राजकुलेषु
जाताः। काश्चित्स्वर्गे ता निशम्यैव कृष्णं वव्रुः पतिं सर्वगुणाभि-
रामम् ॥ ११५ ॥ आजानदेवैः सर्वगुणैः समस्ताः स्वभावतोऽथेन्दिरा-
वेशतोऽतः। गुणाधिकास्ताः शिबिकासु कृष्ण आरोपयित्वा प्राहिणो-
द्द्वारवत्यै ॥ ११६ ॥ समन्ततो योजनानां शते द्वे प्रवृद्धमिन्द्रस्य स
रत्नपर्वतम्। नित्यामृतस्राविं जलेश्वरस्य छत्रं च दोर्भ्यां गरुडे न्यधा-
द्धरिः ॥ ११७ ॥ स्वयं च सत्यासहितः समारुहत्स चाश्रमेणैव ययौ
त्रिविष्टपम्। अभिप्रयातोऽखिललोकपालैर्जनार्दनः शक्रगृहं विवेश ॥
॥ ११८ ॥ सम्पूजितः सत्यभामासहायः शक्रेण शच्या सहितेन
सादरम्। ददावदित्या अपि कुण्डले शुभे समस्तदेवैर्मुनिभिश्च
वन्दितः ॥ ११९ ॥ तमासुरावेशवशादजानती सत्यां च सर्वप्रभवौ
जगत्प्रभू। निर्दोषसौख्यैकतनू शुभाशिषस्ताभ्यां ददौ साऽदितिरात्म-
पुत्रवत् ॥ १२० ॥

अथो सदानन्दचिदात्मदेहः स नन्दनोद्यानमजोऽनुरूपया।
अनन्तशक्तिः सह सत्यभामया विवेश रन्तुं प्रिययाऽखिलेश्वरः ॥१२१॥
तयाऽच्युतोऽसौ कनकावदातया सुकुङ्कुमादिग्धपिशङ्गवाससा। पूर्णेन्दु-
कोट्यौघजयन्मुखाब्जया रेमेऽमितात्मा जगदेकसुन्दरः ॥ १२२ ॥
सर्वर्तुनित्योदितसर्ववैभवे सुरत्नचामीकरवृक्षसद्वने। सदैव पूर्णेन्दु-
विराजिते हरिश्चचार देव्या पवनानुसेविते ॥ १२३ ॥ निर्दोष-
संवित्तनुरत्र सत्तरुं ददर्श सत्याऽमृतमन्थनोद्भवम्। सा पारिजातं
मणिकाञ्चनात्मकं समस्तकामप्रदमार्तिहारिणम् ॥ १२४ ॥ दृष्ट्वैव तं
सुस्मितचन्द्रिकास्फुरन्मुखारविन्दाऽसितलोललोचना। कपोलनिर्भात-
चलत्सुकुण्डला जगाद देवाधिपतिं पतिं सती ॥१२५॥ तरुर्जगज्जीवद
मे गृहाङ्गणे संस्थापनीयोऽयमचिन्त्यपौरुष। इतीरितस्तां कलशोपम-

SGDF
Sri Gangeshwari Digital Foundation

स्तनीमालिङ्ग्य देवस्तरुमुद्बबर्ह ॥ १२६ ॥ स तेन वृक्षेण सहैव केशवस्तया च देव्याऽऽरुहदग्र्यपौरुषम् । खगेश्वरं तच्च निशम्य शच्या प्रचोदितो वासव आगमत्सुरैः ॥ १२७ ॥ तानासुरावेशयुतान्हरेश्च बलप्रकाशाय समुद्यतान्सुरान् । न्यवारयच्छार्ङ्गशरासनच्युतैर्हरिप्रिया बाणवरैः समस्तशः ॥ १२८ ॥ निरायुधं वैश्रवणं चकार चिक्षेप चाब्धौ गरुडो जलेशम् । प्रधानवायोस्तनयं तु वायुं कोणाधिपं वह्नि-यमादिकानपि ॥१२९॥ निबोध्य शार्ङ्गोत्थरवैः स्वकां तनुमावेशिता-नामसुरैरगाद्धरिः । ते बोधितास्तेन रणं विसृज्य ययुर्विदित्वा तमनादिपूरुषम् ॥ १३० ॥ शिवं च शक्रार्थमुपागतं हरिर्व्यद्रावय-च्छार्ङ्गविनिःसृतैः शरैः । सवाहनो दूरतरे निपातितो गरुत्मता शम्भु-रगाच्छराहतः ॥ १३१ ॥ विद्राविते बाणगणैश्च शौरिणा हरे हरौ वज्रमवासृजद्द्रुतम् । शक्रोऽग्रहीत्तं प्रहसञ्जनार्दनः करेण वामेन स चापजग्मिवान् ॥ १३२ ॥ अपाहसत्तं जगदेकसुन्दरी हरिप्रियाऽथो जगदेकमातरम् । उवाच शक्रो जगतां जनित्रि प्रदर्शयामो वयमात्म-शैशवम् ॥ १३३ ॥ जगाम चाथो शरणं जनार्दनं सुरैर्वृतो देवपतिः क्षमापयन् । शृङ्गं च दत्वा मणिपर्वतस्य प्रणम्य देव्या सहितं जगद्गुरुम् ॥ १३४ ॥ ययाच एनं परिरक्षणाय शचीपतिः केशव-मर्जुनस्य । जगाद कृष्णोऽपि धरातले स्थिते न मय्यमुं कश्चन जेष्य-तीति ॥१३५॥ तमर्जुनार्थं वरमाप्य वासवः पुनःपुनश्चक्रधरं प्रणम्य । प्रसन्नदृष्ट्या हरिणाऽभिवीक्षितो ययौ महाभागवतः स्वमालयम् ॥१३६॥ कृष्णोऽप्यनुज्ञाप्य पुरन्दरं पुरीं निजां व्रजन्नभ्यधिकं व्यरोचत । किरीट-धारी चलकुण्डलोल्लसन्मुखाम्बुजः पीतपटः सकौस्तुभः ॥ १३७ ॥ विरोचमानस्य सदा जगत्प्रभोर्न वै विशेषः क्वचिदच्युतस्य । तथापि तत्स्मारयितुं वचो भवेदपेक्ष्य चाल्पज्ञमतिं पुराणगम् ॥ १३८ ॥

प्रविश्य चेशः स्वपुरीं स यादवैः सुपूजितोऽन्तःपुरमेत्य चाङ्गणे ।

SGDF
Sri Gargeshwari Digital Foundation

तरुं प्रियाया न्यदधद्गृहस्य सहैव शृङ्गेण च रत्नसद्भिरेः ॥ १३९ ॥
प्रदाय रत्नानि च सर्वसात्वतां यथेष्टतस्ता अपि कन्यकाः प्रभुः ।
उद्वाह्य रेमे पृथगेव रत्नप्रासादसंस्थाभिरनन्तरूपः ॥ १४० ॥ पृथ-
क्पृथक्तासु दशैव पुत्रका न्यधत्त कन्यामपि सर्वशः प्रभुः । प्रद्युम्न-
साम्बावपि भानुचारुदेष्णौ च तेषां नितरां गुणाधिकाः ॥ १४१ ॥
विवस्वतो योऽवरजोऽदितेः सुतः ख्यातश्च नाम्ना सवितेति कृष्णात् ।
जातः स सत्याजठरे(ऽत्र)सनाम्ना भानुस्तु भैष्म्या अपि चारुदेष्णः ॥
॥ १४२ ॥ स चारुदेष्णोऽपि हि विघ्नराजो येऽन्ये च कृष्णस्य सुताः
समस्ताः । ते चैव गीर्वाणगणास्तथान्ये ये द्वारकायां निवसन्ति
सर्वे ॥ १४३ ॥

तस्यां समस्तैरभिपूज्यमाने देवैः स्वपुर्यां निवसत्यनन्ते । ययौ
कदाचित्स तु रौक्मिणेयः साम्बेन साकं भुजगेन्द्रलोकम् ॥ १४४ ॥
अज्ञानतस्तैरभियोधितः स जिगाय सर्वानपि वासुकिं च । विद्राव्य
बाणैरथ रत्नसञ्चयान्समाददे नेमुरमुं ततस्ते ॥ १४५ ॥ तैः पूजितः
साम्बसहाय आशु मयं च मायाविनमस्त्रवर्षैः । विजित्य रुन्धानमनेन
पूजितो ययौ रथेनाम्बरगेन नाकम् ॥ १४६ ॥ तत्रैव कृष्णेन तु
पारिजाते हृते जयन्तं प्रजिगाय चाजौ । संस्पर्धयाऽऽयातममुष्य चानुजं
साम्बोऽजयद्वृषभं नाम शस्त्रैः ॥ १४७ ॥ अस्त्राणि तावस्त्रवरैर्निहत्य
तयोश्च ताभ्यां प्रतिदग्धयानौ । विद्राव्य तौ बाणवरैः सुरेन्द्रसम्पूजितौ
ययतुर्विद्यया खे ॥ १४८ ॥ स विद्यया साम्बमुदूह्य रत्या प्रदत्तया
रुक्मिणिनन्दनः पुरीम् । ययौ ततो नारद आगमद्द्रुतं ज्ञातुं हरेर्बहु-
भार्यासु वृत्तिम् ॥ १४९ ॥ तं द्व्यष्टसाहस्रगृहेषु दृष्ट्वा तावत्स्वरूपैर्विह-
रन्तमेकम् । सुविस्मितः प्रययौ तं प्रणम्य शक्रप्रस्थं पूजितश्चात्र
पार्थैः ॥ १५० ॥

स आज्ञया ब्रह्मण आह कृष्णां क्रमात्कर्तुं भीम एवैकसंस्थाम् ।

SGDF
Sri Gargeshwari Digital Foundation

अन्या देवीः स्थापयित्वा शरीरे तस्या भारत्याः पूर्णभोगार्थमेव ॥१५१॥ सुन्दोपसुन्दौ भ्रातरौ ब्रह्मवाक्यात्परस्परादन्यतो नैव वध्यौ। तिलोत्तमार्थे निहतौ परस्परं तयोर्वधार्थे सृष्टया तेन दैत्यौ ॥ १५२ ॥ अतः पृथग्वत्सरतो भवत्सु क्रमात्कृष्णा तिष्ठतां योऽन्ययुक्ताम्। पश्येद्योऽसौ वत्सरं तीर्थयात्रां कुर्यादिति स्माथ चक्रुस्तथा ते ॥ १५३ ॥

ततः कदाचिद्धर्मराजेन युक्तां शस्त्रागारे विप्रगोरक्षणार्थम्। शस्त्रादित्सुः फल्गुनोऽद्राक्सशस्त्रैर्दस्यून्हत्वा तीर्थयात्रोन्मुखोऽभूत् ॥ ॥१५४॥ युधिष्ठिराद्यैः सौहृदाद्वारितोऽपि ययौ सत्यार्थं स कदाचिद्द्युनद्याम्। कुर्वन्स्नानं मायया नागवध्वा हृतो लोकं भुजगानां क्षणेन ॥ १५५ ॥ तस्याः पिता गरुडेनात्तपत्युः पुत्राकाङ्क्षी चोदयामास पार्थम्। संवत्सरं ब्रह्मचर्ये तु पार्थैः कृष्णाहेतोः समये साधुबद्धम् ॥ १५६ ॥ पुनः पुनर्याचमानः स पार्थः पुत्रार्थमस्या भुजगेन तस्याम्। उत्पादयामास सुतं कुजांशं नाम्नेरावन्तं वरुणावेशयुक्तम् ॥ ॥ १५७ ॥ गुणाः पितुर्मातृजातिः सुतानां यस्मात्सतां प्रायशस्तेन नागः। बली च पार्थप्रथमोद्भवत्वान्मायाविदस्त्री च सुधार्मिकश्च ॥ ॥१५८॥ ततो ययावर्जुनस्तीर्थयात्राक्रमेण पाण्ड्यांस्तनयोऽस्य मात्रा। सह त्यक्तो भुजगैर्देवलोके सम्पूजितो न्यवसद्दैवतैश्च ॥ १५९ ॥ सत्यात्ययान्नैव दोषोऽर्जुनस्य तेजीयसश्चिन्तनीयः कथञ्चित्। श्रेष्ठापराधान्नान्यदोषस्य लेपस्तेजीयसां निर्णयोऽयं हि शास्त्रे ॥ १६० ॥ अतिस्नेहाच्चाग्रजाभ्यां तदस्य क्षान्तं सुता पाण्ड्यराजेन दत्ता। संवत्सरान्ते फल्गुनस्यानुरूपा चित्राङ्गदा वीरसेनेन तोषात् ॥ १६१ ॥ स वीरसेनस्त्वष्टुरंशो यमस्याप्यावेशयुक्सा च कन्या शची हि। तारादेहे सूर्यजस्याङ्गसङ्गात्स्वर्गं नागादन्तरिक्षादिहासीत् ॥ १६२ ॥ तेनैव हेतोर्नातिसामीप्यमासीत्तस्याः पार्थे पुत्रिकापुत्रधर्मात्। तस्यां जातो बभ्रुवाहोऽर्जुनेन पूर्वं जयन्तः कामदेवांशयुक्तः ॥ १६३ ॥ पुत्रं वीरं जनयि-

SGDF
Sri Gargeshwari Digital Foundation

त्वार्जुनोऽतो गच्छन्प्रभासं शापतो ग्राहदेहाः । अमूमुचच्चाप्सरसः स पश्च ताभिर्गृहीतः प्रविकृष्य तीरम् ॥ १६४ ॥ एवं हि तासां शापमोक्षः प्रदत्तो यदाखिला वो युगपत्सम्प्रकर्षेत् । एकस्तदा निजरूपाप्तिरेवेत्यलं तुष्टेन ब्राह्मणेनानतानाम् ॥ १६५ ॥ विप्रापहासात्कुत्सितयोनितस्ताः कन्यातीर्थे पाण्डवः सम्प्रमोच्य । प्राप्तः प्रभासं वासुदेवानुजां तां शुश्राव रामेण सुयोधनोद्यताम् ॥ १६६ ॥ विचिन्त्य कार्यं यतिरूपं गृहीत्वा कुशस्थलीं प्रययौ तं समीपे । प्राप्तं कृष्णः प्राहसत्संविजानन्सत्यासहायः शयनीयाधिरूढः ॥ १६७ ॥ सर्वज्ञा सा लीलया हासहेतुमपृच्छत्तं सोऽपि तस्यै बभाषे । लीलाभाजौ दर्शनार्थं पुनस्तावगच्छतां रैवतं शैलराजम् ॥ १६८ ॥ आक्रीडोऽसौ भोजवृष्ण्यन्धकानां तत्रापश्यत्केशवः फल्गुनं तम् । स्वसुर्दाने स प्रतिज्ञां रहोऽस्मै चक्रे कृष्णोऽथासदत्सर्ववृष्णीन् ॥ १६९ ॥ दृष्ट्वा गिरौ रौहिणेयो यतीन्द्रवेषं पार्थं ज्ञातियुक्तः प्रणम्य । चक्रे पूजां फल्गुनोऽपि प्रणामं गुणज्येष्ठोऽसीति चक्रे बलाय ॥ १७० ॥ सर्वज्ञं तं वाग्मिनं वीक्ष्य रामः कन्यागारे वर्षकाले निवासम् । सत्कारपूर्वं कारयेत्याह कृष्णं नैवेत्यूचे केशवो दोषवादी ॥ १७१ ॥ युवा बली दर्शनीयोऽतिवाग्मी नायं योग्यः कन्यकाऽऽगारवासम् । इत्युक्तवन्तं राम आहाप्तविद्ये नास्मिञ्छङ्केत्येव लोकाधिनाथम् ॥ १७२ ॥ नास्मन्मते रोचते त्वन्मतं तु सर्वेषां नः पूज्यमेवास्तु तेन । इत्युक्त्वा तं केशवः सोदरायै शुश्रूषस्वेत्याह सन्तं यतीन्द्रम् ॥ १७३ ॥ नित्याप्रमत्ता साधु सन्तोषयेति प्रोक्ता तथा साकरोत्सोऽपि तत्र । चक्रे मासान्वार्षिकान्सत्कथाभिर्वासं वाक्यं श्रद्दधानो हरेस्तत् ॥ १७४ ॥ संयाचितः फल्गुनेनाह वाक्यं यद्वासुदेवस्तन्न जानाति कश्चित् । ऋते पित्रोर्विपृथोः सात्यकेर्वा सुभद्रां ते प्रददानीति सत्यम् ॥ १७५ ॥ अस्त्रे शस्त्रे तत्त्वविद्यासु चैव शिष्यः शैनेयो वासुदेवेन्द्रसून्वोः । तस्मादस्मै कथयामास कृष्णः

SGDF
Sri Gargeshwari Digital Foundation

स्वशिष्यत्वाद्विपृथोश्चापि सर्वम् ॥ १७६ ॥ अन्ये सर्वे वासुदेवस्य पार्थान्प्रियान्नित्यं जानमाना अपि स्म । रामेणादिष्टा उद्धवोऽथाहुकाद्या हार्दिक्याद्या नैव दित्सन्ति जिष्णोः ॥१७७॥ दुर्योधने दातुमिच्छन्ति सर्वे रामप्रियार्थं जानमाना हरेस्तत् । अप्यप्रियं राक्षसावेशयुक्तास्तस्मात्सर्वान्वञ्चयामास कृष्णः ॥ १७८ ॥ प्रद्युम्नसाम्बप्रमुखाश्च वञ्चिता ययुस्तीर्थार्थं रामयुक्ताः समग्राः । पिण्डोद्धारं तत्र महोत्सवेषु स्वावर्तयत्सु क्वचिदूचे सुभद्रा ॥ १७९ ॥ यते तीर्थान्याचरन्बान्धवांस्त्वमद्राक्षीर्नः क्वचिदिष्टान्स्म पार्थान् । कुन्तीं कृष्णां चेत्याह पृष्टः स पार्थ ओमित्येषामाह चानामयं सः ॥ १८० ॥ भूयः साऽवादीद्भगवन्निन्द्रसूनुर्गतस्तीर्थार्थं ब्राह्मणेभ्यः श्रुतो मे । क्वचिद्दृष्टो भवतेत्योमिति स्म पार्थोऽप्यूचे क्वेति साऽपृच्छदेनम् ॥ १८१ ॥ अत्रैवेति स्मयमानं च पार्थं पुनः पुनः पर्यपृच्छच्छुभाङ्गी । सोऽप्याहोन्मत्ते सोऽस्मि हीति स्मयंस्तां फुल्लाक्षी तं सा ददर्शातिहृष्टा ॥ १८२ ॥ ततो हर्षाल्लज्जया चोत्पलाक्षी किञ्चिन्नोचे पार्थ एनामुवाच । कामाविष्टो मुख्यकालो ह्ययं नावुद्वाहार्थेऽस्त्विति सा चैनमाह ॥१८३॥ नातिक्रमो वासुदेवस्य युक्तस्तस्मात्तेन स्वपितृभ्यां च दत्ताम् । युक्तो निजैर्बन्धुभिश्चोत्सवे मां समुद्वहेत्यथ कृष्णं स दध्यौ ॥ १८४ ॥ मातापितृभ्यां सहितोऽथ कृष्णस्तत्रैवायाद्वासवश्चाथ शच्या । समं मुनीन्द्रैः फल्गुनेन स्मृतः स तत्रैवागात्प्रीतियुक्तो निशायाम् ॥ १८५ ॥ कृष्णस्ततः पुरुहूतेन साकं तयोर्विवाहं कारयामास सम्यक् । मातापितृभ्यां सात्यकिनापि युक्तो महोत्सवेऽन्याविदिते मुनीन्द्रैः ॥ १८६ ॥ ततः कृष्णः स्यन्दनं फल्गुनार्थे निधाय स्वं प्रययौ तद्रजन्याम् । गतेऽथ शक्रे रथमारुरोह प्रातः पार्थः सहितो भार्ययैव ॥ १८७ ॥ सर्वायुधैर्युक्तरथे समास्थिते गृहीतचापे फल्गुने द्वारवत्याम् । आसीद्रावः किं किमेतत्त्रिदण्डी कन्यां हरत्येष कोदण्डपाणिः ॥१८८॥ ततस्तु तं सतनुत्रं महेन्द्रदत्ते दिव्ये

SGDF
Sri Gargeshwari Digital Foundation

कुण्डले वाससी च । दिव्यानि रत्नानि विभूषणानि दृष्ट्वा बिभ्राणं रक्षिणोऽवारयन्स्म ॥ १८९ ॥ ततः स आबद्धतलाङ्गुलित्रः सतूणीरश्चापमायम्य बाणैः । चक्रेऽन्तरिक्षं प्रदिशो दिशश्च निरन्तरं शिक्षया विद्यया च ॥ १९० ॥ चक्रे सारथ्यं केशवेनैतदर्थं सुशिक्षिता तस्य सम्यक्सुभद्रा । तया पार्थो वारितो नैव कश्चिद्भिन्नत्वचं कृतवान्क्रीडमानः ॥ १९१ ॥ सुशिक्षयाऽत्यद्भुतया शरौघैर्विद्राव्य तान्भीषयित्वैव सर्वान् । निर्गत्य पुर्या विपृथुं ददर्श रामेण पुर्या रक्षणे सन्नियुक्तम् ॥ ॥ १९२ ॥ प्रियं कुर्वन्निव रामस्य सोऽपि व्याजेन पार्थं सेनयैवावृणोत्तम् । कृष्णादेशान्नैव पार्थस्य चक्रे सम्यग्रोधं युयुधे च छलेन ॥ ॥ १९३ ॥ एको ह्यसौ मरुतां सौम्यनामा शिश्रूषार्थं वासुदेवस्य जातः । तं यादवं शरवर्षैर्ववर्ष यथा क्षतं न भवेत्सव्यसाची ॥१९४॥ निरायुधं विरथं चैव चक्रे पार्थः सेनां तस्य नैवाहनच्च । दृष्ट्वा शरांस्तस्य तीक्ष्णांस्त्वचोऽपि न च्छेदकान्विपृथुस्तं तुतोष ॥ १९५ ॥ शिक्षां पार्थस्याधिकां मानयान उपेत्य पार्थं च शशंस सर्वाम् । आज्ञां विष्णोः सन्नियुध्यन्निवास्मै कृत्तायुधः फल्गुनेनैव पूर्वम् ॥ १९६ ॥ ततः पराजितवच्छीघ्रमेत्य शशंस सर्वं हलिनेऽथ सोऽपि । प्रद्युम्नसाम्बादियुतोऽथ कोपादायात्पुरीं हन्तुकामोऽर्जुनं च ॥ १९७ ॥ कृष्णोऽपि सर्वं विपृथोर्निशम्य प्राप्तः सुधर्मां विमना इवासीत् । अवाङ्मुखस्तत्र यदुप्रवीराः प्रद्युम्नाद्या आहुरुच्चैर्नदन्तः ॥१९८॥ मायाव्रतं तं विनिहत्य शीघ्रं वयं सुभद्रामानयामः क्षणेन । इत्युक्तवाक्यानवदद्धलस्तान्कृष्णाज्ञया यातु न स्वेच्छयैव ॥ १९९ ॥ ज्ञातव्यमेतस्य मतं पुरस्ताद्धरेर्विरोधे न जयो भवेद्वः । इत्युक्तवाक्ये हलिनि स्म सर्वे पप्रच्छुरानम्य जनार्दनं तम् ॥ २०० ॥ अथाब्रवीद्वासुदेवोऽमितौजाः शृण्वन्तु सर्वे वचनं मदीयम् । पुरैवोक्तं तन्मया कन्यकाया मायाव्रतोऽसौ नार्हति सन्निधिस्थितिम् ॥ २०१ ॥ तां मे वाचं नाग्रहीदग्रजोऽयं बहून्दोषा-

SGDF
Sri Gangeshwari Digital Foundation

न्व्याहरतोऽप्यतो मया । अनुल्लङ्घ्यत्वादग्रजोनुप्रवृत्तः कन्यागृहे वासने कूटबुद्धेः ॥ २०२ ॥ अतीतश्चायं कार्ययोगो समक्षं हृता कन्या नोऽत्र का मानहानिः । भूयस्तरां मानिनस्तस्य सा स्याज्ज्ञाता च वो विप्रुथोः पार्थताऽस्य ॥ २०३ ॥ देया च कन्या नास्ति पार्थेन तुल्यो वरोऽस्माकं कौरवेयश्च पार्थः । पौत्रश्च कृष्णस्य सुपूर्णशक्तेः पैतृष्वसेयो वीरतमो गुणाढ्यः ॥ २०४ ॥ अर्थ्योऽस्माभिः स्वयमेवाहरत्स शक्रात्मजो नात्र नः कार्यहानिः । अनुद्रुत्यैनं यदि वः स्यात्पराजयो हानिर्दृढं यशसो वो भवेत् ॥ २०५ ॥ जित्वा चैनं कन्यका चाहृता चेत्परामृष्टां नैव कश्चिद्धिलिप्सेत् । अतो न मे रोचते वोऽनुयानमित्यूचिवानास तूष्णीं परेशः ॥ २०६ ॥ श्रुत्वा हली कृष्णवाक्यं बभाषे मा यात चित्तं विदितं मयाऽस्य । अस्यानुवृत्तिर्विजयाय नः स्याच्छुभाय शान्त्यै परतश्च मुक्त्यै ॥ २०७ ॥ ततोऽर्जुनो यत्र तिष्ठ(ष्ठे)न्न कश्चित्पराभवं याति कृष्णाज्ञयैव । रथेन तेनैव ययौ सभार्यः शक्रप्रस्थं चाविशद्भ्रातृगुप्तम् ॥ २०८ ॥ सम्भावितो भ्रातृभिश्चातितुष्टैरूचेऽथ सर्वं तेषु यच्चात्मवृत्तम् । शान्तेषु वाक्यादात्मनो यादवेषु कृष्णो युक्तो हलिनाऽगाच्च पार्थान् ॥ २०९ ॥ सार्धं ययौ शकटै रत्नपूर्णैः शक्रप्रस्थं पूजितस्तत्र पार्थैः । ददौ तेषां तानि रामेण युक्तस्तथा कृष्णायै भूषणानि स्वसुश्च ॥ २१० ॥ मासानुषित्वा कतिचिद्रौहिणेयो ययौ पुरीं स्वां केशवोऽत्रावसच्च । बहून्वर्षान्पाण्डवैः पूज्यमानः प्रीतिं तेषामादधानोऽधिकां स्वाम् ॥ २११ ॥

आसन्कृष्णायाः पञ्च सुता गुणाढ्या विश्वेदेवाः पञ्च गन्धर्वमुख्यैः । आविष्टास्ते चित्ररथाभिताम्रकिशोरगोपालबलैः क्रमेण ॥ ॥ २१२ ॥ प्रतिविन्ध्यः श्रुतसोमः श्रुताख्यकीर्तिः श्रुतानीक उत श्रुतक्रियः । युधिष्ठिराद्यैः क्रमशः प्रजातास्तेषां द्वयोश्चावरजोऽभिमन्युः ॥ २१३ ॥ चन्द्रांशयुक्तोऽतितरां बुधोऽसौ जातः सुभद्रा-

SGDF
Sri Gangeshwari Digital Foundation

जठरेऽर्जुनेन । धर्मेरशक्रांशयुतोऽश्विनोश्च तथैव कृष्णस्य च सन्निधानयुक् ॥ २१४ ॥ सर्वेऽपि ते वीर्यवन्तः सुरूपा भक्ता विष्णोः सर्वशास्त्रेष्वभिज्ञाः । मोदं ययुः पाण्डवास्तैः सुतैश्च विशेषतः सात्वतीनन्दनेन ॥ २१५ ॥

ततः कदाचित्खाण्डवं कृष्णपार्थौ चिक्रीडिषू सत्यभामासुभद्रे । आदाय यातौ परिचारकैश्च रथेन गन्धर्ववरानुगीतौ ॥ २१६ ॥ स्वैरं तयोस्तत्र चिक्रीडतोश्च स्त्रीरत्नाभ्यां मन्दवातानुजुष्टे । वने प्रसूनस्तबकोरुराजिते जले च तिग्मद्युतिकन्यकायाः ॥ २१७ ॥ भूत्वा विप्रस्तौ ययाचेऽन्नमेत्य कृशानुरूचेऽनुमते रमेशितुः । पार्थः कीदृक्तेऽन्नमिष्टं वदेति स चावादीद्वह्निरहं वनार्थी ॥ २१८ ॥ प्रयाजान्देवाननुयाजांश्च शुक्रं हविर्दाने देवतानामयाचिषम् । बलह्रासस्तव भूयादिति स्म शप्त्वैव ते तांश्च ददुः पुरा मम ॥ २१९ ॥ पुनः पूर्तिः केन मे स्याद्बलस्येत्यब्जोद्भवं पृष्टवानस्मि नत्वा । यदा वनं खाण्डवं हि त्वमत्सि तदा बलं ते भवतीति सोऽब्रवीत् ॥ २२० ॥ शक्रस्येदं खाण्डवं तेन विघ्नं करोत्यसौ तेन वां प्रार्थयामि । इत्युक्ते तं पार्थ ऊचे यदि स्याद्रथो धनुश्चाथ शक्रं निरोत्स्ये ॥ २२१ ॥ नरावेशादन्नदानप्रतिश्रवात्स्वस्यापि शक्रस्य विरोधमैच्छत् । पार्थः कृष्णप्रेरणाच्चैव वह्निः पार्थे ययाचे शक्रविरोधशान्त्यै ॥ २२२ ॥ नहि स्वदत्तस्य पुनः स वैरं शक्रः कुर्यात्स्वयमिन्द्रो हि पार्थः । नाप्रेरितो विष्णुना तस्य रोधं पार्थः कुर्यादिति कृष्णं ययाचे ॥ २२३ ॥ न चायुक्तः केशवेनैष शक्त इति स्म कृष्णादाप भूयोऽप्यनुज्ञाम् । ययौ समीपं च हरेर्बदर्यामादाय चक्रं चामुतः केशवेऽदात् ॥ २२४ ॥ चक्रं गोमन्ते कृष्णमायाद्धि पूर्वं भक्त्या वह्निः केशवेऽदात्पुनस्तत् । चक्रं च विष्णोर्बहुधा व्यवस्थितं तदग्निदत्तं प्राक्तनं चैकधाऽऽसीत् ॥२२५॥ धनुश्च गाण्डीवमथाब्जजस्य करोति येनाखिलसंयतिं सः । अंशेन दत्तं तदुमापतेश्च

SGDF
Sri Gangeshwari Digital Foundation

शक्रस्य सोमस्य जलेशितुश्च ॥ २२६ ॥ तेनैव ते जिग्युरथो जगत्रयं प्रसादतस्ते क्रमशोऽब्जयोनेः । अनन्यधार्यं विजयावहं च भारेण लक्षस्य समं शुभावहम् ॥ २२७ ॥ रथं च शुभ्राश्वयुतं शुभावहं तूणी तथा चाक्षयसायकौ शुभौ । ध्वजं च रामस्य हनूमदङ्कमादाय सर्वं वरुणादर्जुनेऽदात् ॥ २२८ ॥ विशेषतो ध्वजसंस्थे हनूमत्यजेयता स्याज्ञयरूपो यतोऽसौ । सर्वं च तद्दिव्यमभेद्यमेव विद्युत्प्रभा ज्या च गाण्डीवसंस्था ॥ २२९ ॥ गाण्डीवमप्यास कृष्णप्रसादाच्छक्यं धर्तुं पाण्डवस्याप्यधार्यम् । देवैश्च तैर्ब्रह्मवराद्धृतं तद्ब्रह्मैव साक्षात्प्रभुरस्य धारणे ॥ २३० ॥ इन्द्रस्य दत्तश्च वरः स्वयम्भुवा तेनापि पार्थस्य बभूव धार्यम् । इन्द्रो ह्यसौ फल्गुनत्वेन जातस्ततः सोऽस्त्रैः शरशालां चकार ॥ २३१ ॥ आ(स) योजनद्वादशकाभिविस्तृतं पुरं चकाराशु पुरन्दरात्मजः । हुताशनोऽप्याशु वनं प्रगृह्य प्रभक्षयामास समुद्धतार्चिः ॥ २३२ ॥ प्रभक्ष्यमाणं निजकक्षमीक्ष्य सन्धुक्षयामास तदाशुशुक्षणिम् । अक्षोपमाभिर्बहुलेक्षणोऽम्भसां धाराभिराक्षुब्धमनाः क्षयाय ॥ ॥ २३३ ॥ अस्त्रैस्तु वृष्टिं विनिवार्य कृष्णः पार्थश्च शक्रं सुरपूगयुक्तम् । अयुध्यतां सोऽपि पराजितोऽभूत्प्रीतश्च दृष्ट्वा बलमात्मनस्तत् ॥ २३४ ॥ स्नेहं च कृष्णस्य तमर्जुने धृतं विलोक्य पार्थस्य बलं च तादृशम् । निवर्त्य मेघानतितुष्टचित्तः प्रणम्य कृष्णं तनयं समाश्लिषत् ॥२३५॥ विष्णुश्च शक्रेण सहैत्य केशवं समाश्लिषन्निर्विशेषोऽप्यनन्तः । स केवलं क्रीडमानः सशक्रः स्थितो हि पूर्वं युयुधे न किञ्चित् ॥ २३६ ॥ ब्रह्मा च शर्वश्च समेत्य कृष्णं प्रणम्य पार्थस्य च कृष्णनाम । सश्वक्रतुश्चापि शिक्षाप्रकर्षाच्चक्रुश्च सर्वे स्वास्त्रदाने प्रतिज्ञाम् ॥ ॥ २३७ ॥ अनुज्ञातास्ते प्रययुः केशवेन क्रीडार्थमिन्द्रो युयुधे हि तत्र । प्रीत्या कीर्तिं दातुमप्यर्जुनस्य ततस्तुष्टः सह देवैर्ययौ स्वः ॥ ॥ २३८ ॥ दैत्याश्च नागाश्च पिशाचयक्षा हताश्च सर्वे तद्वनस्था हि

SGDF
Sri Gargeshwari Digital Foundation

ताभ्याम् । ऋते चतुःपक्षिणश्चाश्वसेनं मयं च नान्यत्किञ्चिदासात्र मुक्तम् ॥ २३९ ॥ अयमग्ने जरितेत्यादिमन्त्रैः स्तुत्वा वह्निं पक्षिणो नैव दग्धाः । स चाश्वसेनः पुत्रकस्तक्षकस्य मात्रा ग्रस्तः प्रातिलोम्येन कण्ठे ॥ २४० ॥ छिन्नेऽर्जुनेनान्तरिक्षे पतन्त्यास्तस्याः शक्रेणावितश्छिन्नपुच्छः । वधान्मातुः पुच्छभङ्गाच्च रोषाद्धन्तुं पार्थं कर्णतूणीरगोऽभूत् ॥ २४१ ॥ मयः कृष्णेनात्तचक्रेण दृष्टो ययौ पार्थं शरणं जीवितार्थी । पार्थार्थमेनं न जघान कृष्णः स्वभक्तश्चेत्यतिमायं रमेशः ॥ ॥२४२॥ देवारिरित्येव मयि प्रकोपः कृष्णस्य तेनाहमिमं पुरन्दरम् । पार्थात्मकं शरणं यामि तेन कृष्णप्रियः स्यामिति तस्य बुद्धिः ॥२४३॥ प्राणोपकृत्प्रत्युपकारमाशु किं ते करोमीति स पार्थमाह । कृष्णप्रसादाद्धि भवान्विमुक्तस्तस्मै करोत्वित्यवदत्स पार्थः ॥ २४४ ॥ कृष्णोऽपि राज्ञेऽतिविचित्ररूपसभाकृतावादिशत्तां स चक्रे । अनिर्गमं प्राणिनामर्थितौ तौ हुताशनेनाथ विधाय जग्मतुः ॥ २४५ ॥ दृष्ट्वा च तौ पाण्डवाः सर्व एव महामुदं प्रापुरेतन्निशम्य । कृष्णोऽपि पार्थैर्मुमुदेऽनन्तशक्तिः सुखज्ञानप्रभवौदार्यवीर्यः ॥ २४६ ॥ (२७७५) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये खाण्डवदाहो (सुभद्राहरण खाण्डवदहनादि निरूपणं) नाम विंशोऽध्यायः ॥ २० ॥

अथ एकविंशोऽध्यायः

॥ ॐ ॥ जनार्दनाज्ञया मयः समस्तकौतुकोत्तराम् । सभां विधाय भूभृते ददौ गदां वृकोदरे ॥ १ ॥ स वायुधारितां गदां हि यौवनाश्वभूभृता । प्रसादतोऽस्य लम्भितामवाप्य मोदमाप ह ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

पुनश्च वत्सरद्वयं समुष्य केशवो ययौ । समर्चितश्च पाण्डवैर्वियोजनेऽस्य
चाक्षमैः ॥ ३ ॥ ततो वसन्स्वपुर्यजः क्वचिद्रविग्रहे हरिः । सदारपुत्र-
बान्धवः स्यमन्तपञ्चकं ययौ ॥ ४ ॥ पृथासुताश्च सर्वशः सदारपुत्र-
मातृकाः । क्षितीश्वराश्च सर्वशः प्रियाप्रियाश्च ये हरेः ॥ ५ ॥ तथैव
नन्दगोपकः सदारगोपगोपिकः । मुनीश्वराश्च सर्वशः समीयुरत्र च
प्रजाः ॥ ६ ॥ प्रियाश्च ये रमेशितुर्हरिं त्रिरूपमेत्य ते । वसिष्ठवृष्णि-
नन्दनौ भृगूत्तमं तथाऽर्चयन् ॥ ७ ॥ कृतार्थतां च ते ययू रमेशपाद-
दर्शनात् । रविग्रहे समाप्लुता भृगूद्वहोत्थतीर्थके ॥ ८ ॥ अनुग्रहं
विधाय स स्वकेषु केशवस्त्विवृत् । अयाजयच्च शूरजं मखैः समाप्त-
दक्षिणैः ॥ ९ ॥ समस्तलोकसंस्थितात्मभक्तिमञ्जनस्य सः । सुकाल-
दर्शनात्परं व्यधादनुग्रहं हरिः ॥ १० ॥ ततो ययौ स्वकां पुरीं पृथा-
सुतैः सहाच्युतः । चकार तत्र चाह्निकं क्रतुं महाश्वमेधिकम् ॥ ११ ॥
हयं सभीमफल्गुना हरे रथं समास्थिताः । व्यचारयन्हरेः सुता दिनस्य
पादमात्रतः ॥ १२ ॥ जिताः समस्तभूभृतो जरासुतादयः क्षणात् ।
वृकोदरादिभिस्तु तैर्हयश्च दिव्य आययौ ॥१३॥ हयश्च कृष्णनिर्मितो
दिनेन लक्षयोजनम् । क्षमो हि गन्तुमञ्जसा दिनाश्वमेधसिद्धये ॥१४॥
पराशरात्मजो हरिर्हरिं यदा त्वदीक्षयत् । तदाऽऽससाद हि द्विजस्तृणावहो
स्राव च ॥ १५ ॥ व्रजन्ति जन्मनोऽनु मे सदा सुता अदृश्यताम् ।
इतीरितोऽर्जुनोऽब्रवीदहं हि पामि ते सुतान् ॥ १६ ॥ सकृष्णराम-
कार्ष्णिभिः सुता न मेऽत्र पालिताः । क्व तेऽत्र शक्तिरित्यमुं जगाद
सोऽर्जुनं द्विजः ॥ १७ ॥ तदा जगाद फल्गुनो सुरैर्विदूषितात्मना ।
न विप्र तादृशोऽस्म्यहं यथैव केशवादयः ॥ १८ ॥ मया जिता हि
खाण्डवे सुरास्तथाऽसुरानहम् । निवातवर्मनामकान्विजेष्य उत्तरत्र हि ॥
॥ १९ ॥ उदीर्य चेति केशवं स ऊचिवान्व्रजाम्यहम् । इतीरितोऽ
वदद्धरिस्तवात्र शक्यते नु किम् ॥२०॥ विलज्जमानमीक्ष्य तं जगाद

SGDF
Sri Gargeshwari Digital Foundation

केशवोऽरिहा । व्रजेति स प्रतिश्रवं चकार हाप्यरक्षणे ॥ २१ ॥ वह्निं प्रवेक्ष्येऽशक्तश्चेदित्युक्त्वा सर्वयादवैः । ययौ न रामप्रद्युम्नावनिरुद्धं च केशवः ॥ न्ययोजयत्तत्साहाय्ये यशस्तेष्वभिरक्षितुम् ॥ २२ ॥ प्रियो हि नितरां रामः कृष्णस्यानु च तं सुतः । अनिरुद्धः कार्ष्णिमनु प्रद्युम्नाद्योऽजनिष्ट हि ॥ २३ ॥ रुक्मिपुत्र्यां रुक्मवत्यामाहृतायां स्वयंवरे ॥ २४ ॥ रतिरेव हि या तस्यां जातोऽसौ कामनन्दनः । पूर्वमप्यनिरुद्धाख्यो विष्णोस्तन्नाम्न एव च । आवेशयुक्तो बलवान्रूपवान्सर्वशास्त्रवित् ॥२५॥ तस्मात्तांस्त्रीनृते कृष्णः पार्थसाहाय्यकारणात् । न्ययोजयत्प्रसूतिकाले ब्राह्मण्याः स च फल्गुनः ॥ २६ ॥ अस्त्रैश्चकार दिग्बन्धं कुमारोऽथापि तत्क्षणात् । अदर्शनं ययौ पार्थो विषण्णः सह यादवैः ॥२७॥ अधिक्षिप्तो ब्राह्मणेन ययौ यत्र श्रियः पतिः ॥२८॥ अग्निं विविक्षन्तममुं निवार्य ययौ सविप्रः सहफल्गुनो हरिः । आशामुदीचीं बृहता रथेन क्षणेन तीर्त्वैव च सप्तवारिधीन् ॥ २९ ॥ ददुश्च मार्गं गिरयोऽब्धयस्तथा विदार्य चक्रेण तमोऽन्धमीशः । घनोदकं चाप्यतितीर्य तत्र ददर्श धाम स्वमनन्तवीर्यः ॥ ३० ॥ संस्थाप्य दूरे सरथं सविप्रं पार्थं स्वरूपे द्विचतुष्कबाहौ । समस्तरत्नोज्ज्वलदिव्यभूषणे विवेश नित्योरुगुणार्णवे प्रभुः ॥ ३१ ॥ सहस्रमूर्धन्युरुशेषभोग आसीनरूपेऽमितसूर्यदीधितौ । रमासहाये तटिदुज्ज्वलाम्बरे मुक्तैर्विरिञ्चादिभिरर्चिते सदा ॥ ३२ ॥ स्थित्वैकरूपेण मुहूर्तमीश्वरो विनिर्ययौ विप्रसुतान्प्रगृह्य । सुनन्दनन्दादय एव पार्षदास्ते वैष्णवा भूमितले प्रजाताः ॥ ३३ ॥ दर्पं निहन्तुं हरिरर्जुनस्य समानयद्विप्रसुतान्परेशः । प्रीतिर्महत्येव यतोऽर्जुने हरेः संशिक्षयामास ततः स एनम् ॥३४॥ अप्राकृतात्सदनाद्वासुदेवो निःसृत्य सूर्याधिकलक्षदीधितेः । रथं समारुह्य सपार्थविप्र आगात्सुतांश्चैव ददौ द्विजाय ॥ ३५ ॥ लोकशिक्षार्थमेवासौ प्रायश्चित्तं च चालने । चक्रे सार्धमुहूर्तेन समागम्य

SGDF
Sri Gargeshwari Digital Foundation

पुनर्मखम् ॥३६॥ ब्रह्मादीनागतांश्चैव सदा स्वपरिचारकान् । पूजयित्वा-
भ्यनुज्ञाय ब्राह्मणानप्यपूजयत् ॥ ३७ ॥ सस्नाववभृथं कृष्णः सदारः
ससुहृज्जनः । आयान्तं द्वारकां कृष्णं दन्तवक्रो रुरोध ह ॥ ३८ ॥
जघान गदया कृष्णस्तत्क्षणात्स विदूरथम् । विदूरथस्तमोऽगच्छद्दन्त-
वक्रे च योऽसुरः ॥ ३९ ॥ हरेश्च पार्षदः क्षिप्रं हरिमेव समाश्रितः ॥
॥ ४० ॥ कृष्णे प्राप्ते स्वलोकं च निःसृत्यास्मात्स्वरूपतः । एकीभावं
स्वरूपेण द्वारपेण गमिष्यति ॥ ४१ ॥

ततः कृष्णः पुरीमेत्य बोधयामास फल्गुनम् । किमेतद्दृष्टमित्येव
तेन पृष्टो रमापतिः ॥४२॥ अयं द्वीपः सागरश्च लक्षयोजनविस्तृतौ ।
तदन्ये तु क्रमेणैव द्विगुणेनोत्तरोत्तराः ॥ ४३ ॥ अन्त्याध्यर्धस्थलं हैमं
बाह्यतो वज्रलेप(वाज्रलेपि)कम् । एतत्सर्वं लोकनाम ह्येतस्माद्विगुणं तमः ॥
॥४४॥ अन्धं यत्र पतन्त्युग्रा मिथ्याज्ञानपरायणाः । घनोदकं तद्विगुणं
तदन्ते धाम मामकम् ॥४५॥ यत्तद्दृष्टं त्वया पार्थ तत्र मुक्तैरजादिभिः ।
सेव्यमानः स्थितो नित्यं सर्वैः परमपूरुषः ॥४६॥ लोकालोकप्रदेशस्तु
पञ्चाशल्लक्षविस्तृतः । सपञ्चाशत्सहस्रश्च तस्यापि गणनं तथा ॥ ४७ ॥
योजनानां पञ्चविंशत्कोटयो मेरुपर्वतात् । चतसृष्वपि दिक्षूर्ध्वमधश्चाण्डं
प्रकीर्तितम् ॥४८॥ अबग्नीरनभोऽहङ्कृन्महत्तत्त्वगुणत्रयैः । क्रमाद्दशगुणैरेत-
दावृतं परतस्ततः ॥४९॥ व्याप्तोऽहं सर्वगोऽनन्तोऽनन्तरूपो निरन्तरः ।
अनन्तशीर्षोऽनन्ताक्षोऽनन्तपादकरोरुकः । अनन्तगुणमाहात्म्यश्चिदानन्द-
शरीरकः ॥ ५० ॥ मद्वशा एव सर्वेऽपि त्वं चान्ये च धनञ्जय ।
मत्प्रसादाद्बलं चैव विजयश्चाखिला गुणाः ॥ ५१ ॥ तस्मान्न विस्मयः
कार्यो न दर्पश्च त्वयाऽनघ । मन्मना भव मद्भक्तो मद्याजी मां
नमस्कुरु ॥ ५२ ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ।
इत्युक्तः प्रणिपत्यैनं क्षमस्वेत्याह फल्गुनः ॥ ५३ ॥ उषित्वा कति-
चिन्मासान्ययुः सर्वेऽपि पाण्डवाः । अनुज्ञाताः केशवेन भक्तिनम्रधियो-

SGDF
Sri Gangeshwari Digital Foundation

ऽच्युते ॥ सम्भाविताः केशवेन सौहार्देनाधिकेन च ॥ ५४ ॥

ततः कदाचित्प्रवरे सभातले धर्मात्मजो राजभिर्भ्रातृभिश्च । वृतो निशम्यैव सभाः सुराणां यथास्थिता नारदमन्वपृच्छत् ॥ ५५ ॥ अन्तरिक्षं त्वया प्रोक्तं लक्षयोजनमुच्छ्रितम् । अर्धकोट्युच्छ्रितः स्वर्गो विमानावलिसङ्कुलः ॥५६॥ भुवः स्वर्गश्च कोट्यैव योजनानां प्रविस्तृतौ । महर्जनस्तपश्चैव क्रमादध्यर्धयोजनाः ॥ ५७ ॥ पञ्चाशत्कोटिविस्तारो योजनानां समस्तशः । यावन्त एते मिलितास्तत्प्रमाण उदीरितः ॥ ॥५८॥ सत्याख्यो ब्रह्मलोकस्तु यत्र ब्रह्मा विराजते । ततश्च द्विगुणः प्रोक्तो विष्णुलोकः सनातनः ॥ ५९ ॥ उत्तरोत्तरतः सर्वे सुखे शतगुणोत्तराः । अनन्तजनसम्पूर्णा अपि ते हीच्छया हरेः ॥ ६० ॥ अवकाशवन्तो दिव्यत्वात्पूर्यन्ते न कदाचन । सर्वकामसुखैः पूर्णा दिव्यस्त्रीपुरुषोज्ज्वलाः ॥ ६१ ॥ दिव्यरत्नसमाकीर्णं तथा पाताल-सप्तकम् । अधस्ताच्छेषदेवेन बलिना समधिष्ठितम् ॥ ६२ ॥ काम-भोगसमायुक्ता बहुवर्षसहस्रिणः । सप्तद्वीपेषु पुरुषा नार्यश्चोक्ताः सुरूपिणः ॥ ६३ ॥ एषां च सर्वलोकानां धाता नारायणः परः । विष्णुलोकस्थितो मुक्तैः सदा सर्वैरुपास्यते ॥ ६४ ॥ सेवका ब्रह्मणः सर्वे(श्चैव) वेदा देवाश्च सर्वशः । शक्रस्य मुनयः सर्वे हरिश्चन्द्रश्च भूमिपः ॥ ॥६५॥ अखिला अपि राजानः पाण्डुश्चास्मत्पिता मुने । यमस्यैवानुगाः प्रोक्ता राजभिस्तैर्यमेन च ॥ ६६ ॥ उपास्यमानो भगवान्रामो यम-सभातले ॥ ६७ ॥ उक्त इन्द्रेण चोपास्यो वामनात्मा जनार्दनः । प्रादुर्भावाश्च निखिला ब्रह्मणोपासिताः सदा । वरुणस्यानुगा नागास्तत्र मत्स्याकृतिर्हरिः ॥ ६८ ॥ गन्धर्वा धनदस्यापि तत्र कल्की हरिः प्रभुः । रुद्रस्योग्राणि भूतानि नृसिंहात्मा शिवेन च ॥ ६९ ॥ उपास्यते सदा विष्णुरित्याद्युक्तं त्वयाऽनघ । सर्वरत्नस्थलान्दिव्यान्देव-लोकान्प्रभाषता ॥ ७० ॥ तत्र मे संशयो भूयान्हरिश्चन्द्रः कथं नृपः ।

SGDF
Sri Gangeshwari Digital Foundation

ऐन्द्रं सभातलं प्राप्तः पाण्डुर्नास्मत्पिता मुने ॥ ७१ ॥ इत्युक्तो नारदः प्राह राजसूयकृतोन्नतिम् । हरिश्चन्द्रस्य तां दृष्ट्वा पिता मां प्राह पाण्डव (यमसभातले) ॥ ७२ ॥ (स्थितस्त्वामवदत्पाण्डू रामद्व्यसुदैवते ।) करोतु राजसूयं मे पुत्रो ज्येष्ठो(ऽजेयो)ऽनुजार्चितः । पालितो वासुदेवेन किं तस्यासाध्यमत्र हि ॥ ७३ ॥

एतच्छ्रुत्वा धर्मसुतो भ्रातृभिः सहितो वशी । अवाप्तिं राजसूयस्य मन्त्रयामास धर्मवित् ॥७४॥ सुकार्यमेतदित्यलं निशम्य सोदरोदितम् । अयातयत्स्वसारथिं स केशवाय भूपतिः ॥ ७५ ॥ तदैव केशवस्य याः स्त्रियस्तदीयतातकैः । सहोदरैश्च यापितः स दूत आप माधवम् ॥७६॥ प्रणम्य केशवं वचः स आह मागधेन ते । विवाहबान्धवा रणे विजित्य रोधिता गिरौ ॥ ७७ ॥ नृपायुतद्वयेन सोऽष्टविंशकैः शतैरपि । यियक्षुरुग्ररूपिणं त्रिलोचनं त्वयि स्थिते ॥ ७८ ॥ विमोचयस्व तान्प्रभो निहत्य मागधेश्वरम् । अवैदिकं मखं च तं विलुम्प धर्मगुप्तये ॥ ७९ ॥ इतीरितेऽथ सारथिं निशाम्य धर्मजस्य च । निशम्य तद्वचस्तदा जगाम पाण्डवालयम् ॥ ८० ॥ स पाण्डवैः समर्चितो मखाय धर्मजेन च । प्रपृष्ट आह माधवो वचो जगत्सुखावहम् ॥८१॥ क्रतुर्यथा विधानतः कृतो हि पारमेष्ठ्यकम् । पदं नयेत तत्पदे सुयोग्यमेव नान्यथा ॥ ८२ ॥ अयोग्यकान्महापदे विधातुरेष हि क्रतुः । समानयोग्यतागणात्करोति मुक्तिगं वरम् ॥ ८३ ॥ पुरा तु मुक्तितोऽधिकं स्वजातितः करोति च । अतस्त्रिशङ्कुपुत्रको नृपानतीत्य वर्तते ॥ ८४ ॥ सुरांशकोऽपि ते पिता विना हि राजसूयतः । न शक्ष्यति त्रिशङ्कुजाद्वरत्वमाप्तुमद्य तु ॥ ८५ ॥ तपश्चरन्समागते शचीपतौ पिता तव । मरुद्गणोत्तमः पुरा नतूत्थितः शशाप सः ॥ ८६ ॥ व्रजस्व मानुषीं तनुं ततो मृतः पुनर्दिवम् । गतोऽपि च स्वकां तनुं प्रवेष्टुमत्र नेशसे ॥ तदाधिकस्त्रिशङ्कुजो भविष्यति त्वदित्यथ ॥८७॥

SGDF
Sri Gangadhar Digital Foundation

क्षमापितश्च वासवो जगाद राजसूयतः । त्रिशङ्कुजाधिको भवानवाप्स्यति स्वकां तनुम् ॥ ८८ ॥ अतः सुकार्य एव ते युधिष्ठिर क्रतूत्तमः । भवद्भिरप्यवाप्यते स्वयोग्यताऽमुनाऽखिला ॥ ८९ ॥ उदीर्य चैवमीश्वरः क्रतोरमुष्य योग्यता । वृकोदरे यतोऽखिला चतुर्मुखत्वयोग्यत ॥९०॥ ततः सुपूर्णमस्य तत्फलं विधातुमञ्जसा । जगाद वायुवाहनो वचो युधिष्ठिरं त्विदम् ॥ ९१ ॥ क्व राजसूयमद्य ते जरासुते तु जीवति । जयेत्क एव तं युधा मृतो न योऽपि सीरिणा ॥ ९२ ॥ विरिञ्चशर्ववाक्यतः समस्तलोकजायिनि । स्थिते तु ते जरासुते न सेत्स्यति क्रतूत्तमः ॥९३॥ इतीरिते(तो) रथाङ्गिना जगाद धर्मनन्दनः । निवर्तितं मनः क्रतोरलं ममामुना प्रभो ॥ ९४ ॥ बभूविरे च भूभृतो न चाधिराज्यमापिरे । यदा च चक्रवर्तिनस्तदेदृशा न शत्रवः ॥ ९५ ॥ इतीरितेऽमुनाऽवदत्प्रधानमारुतात्मजः । पदं चतुर्मुखस्य वा सुसाध्यमेव यत्नतः ॥९६॥ निजानुभाववर्जिता हरेरनुग्रहोज्झिताः । महाप्रयत्नवर्जिता जना न जग्मुरुन्नतिम् ॥ ९७ ॥ स्थिरोऽनुभाव एव मे महाननुग्रहो हरेः । प्रयत्नमेकमग्रतो निधाय भूतिमाप्नुमः ॥ ९८ ॥ इतीरितेऽमुना हरिः समुद्यमात्प्रधानतः । स्थिते हि यज्ञकारणे वृकोदरे जगाद ह ॥ ९९ ॥ स एक एव पूरुषो जरासुतोऽद्य वर्तते । समस्तसद्विरोधिनां बलं कलेरनन्तरः ॥ १०० ॥ तथा सतां समाश्रयो यदुद्भवाः सतां गुणाः । स एक एव तादृशस्त्वया विचिन्त्य यात्यताम् ॥ १०१ ॥ यदि स्म तेन मागधो निहन्यते सतां जयः । विपर्ययेण चासतामिति स्म विद्धि नान्यथा ॥ १०२ ॥ स पारमेष्ठ्यसत्पदं प्रयात्यसंशयं युधि । य एव हन्ति मागधं स एव धर्मपालकः ॥ १०३ ॥ निहन्ति मागधेश्वरं स एव वैष्णवं जगत् । करोति शर्वपालितो यतः स बार्हद्रथः ॥ १०४ ॥ निहन्ति शैवनायकं य एव वैष्णवाग्रणीः । इति स्म भावसंयुते वदत्यजेऽबिभे-

SGDF
Sri Gurgeshwari Digital Foundation

न्नृपः ॥ १०५ ॥ युधिष्ठिरे ब्रुवत्यजं मखेन मे त्वलं त्विति ।
तमाह मारुतात्मजो निहन्मि मागधं रणे ॥ १०६ ॥ इतीरिते-
ऽवदद्धरिर्व्रजामहे वयं त्रयः । अहं च भीमफल्गुनौ निहन्तुमेव
मागधम् ॥ वृकोदरेण हन्यते यदि स्म मागधाधिपः ॥ १०७ ॥
मखश्च सेत्स्यते ध्रुवं जगच्च ते वशे भवेत् ॥ १०८ ॥ इतीरिते तु
शौरिणा जगाद धर्मनन्दनः । स शूरसेनमण्डलप्रहाणतो हरेस्त्रसन् ॥
॥ १०९ ॥ भयाद्धि यस्य माधुरं विहाय मण्डलं गताः । भवन्त
एव सागरं ततो बिभेम्यहं रिपोः ॥ ११० ॥ इमौ हि भीमफल्गुनौ
ममाक्षिणी सदा प्रभो । मनोनिभो भवान्सदा न वो विनाऽस्म्यहं(तः)
पुमान् ॥ १११ ॥ अतो न जीवितात्प्रियानहं रिपोर्बलीयसः ।
सकाशमात्महेतुतः प्रयातयामि वः प्रभो ॥ ११२ ॥ इतीरितेऽवद-
त्पुनर्वृकोदरोऽरिकक्षभुक् । यदीयनेतृका रमाविरिञ्चशर्वपूर्वकाः ॥११३॥
वशे च यस्य तद्बलं सुरासुरोरगादिनाम् । स एष केशवः प्रभुः क्व
चास्य बारुहद्रथः ॥ ११४ ॥ अधृष्यमस्ति मे बलं हरिप्रणायकस्य च ।
समस्तलोकनेतरि प्रभौ हि सर्वशक्तिता ॥ ११५ ॥ अजेयता तथार्जुने
हरेर्वरोद्भवाऽस्ति हि । अतो वयं त्रयोऽद्य तं प्रयाम मागधं रिपुम् ॥
॥११६॥ हनिष्य एव मागधं हरेः पुरो न संशयः । इतीरितेऽमुना
हरिर्जगाद धर्मनन्दनम् ॥ ११७ ॥ वयं त्रयः समेत्य तं प्रयातयाम
मृत्यवे । हनिष्यति स्फुटं रणे वृकोदरो जरासुतम् ॥ ११८ ॥ भयं
न कार्यमेव ते मया हतः स नेति ह । मया हि नीतिहेतुतः स्वयं न
हन्यते रिपुः ॥ ११९ ॥ स शर्वसंश्रयाग्रणीर्मदाश्रयोत्तमेन तु ।
निहन्यते यदा तदा प्रकाशितं हि मे बलम् ॥ १२० ॥ अतो न
शङ्कितं मनः कुरुष्व भूपते क्वचित् । प्रदर्शयामि तेऽनुजौ निहत्य
मागधेश्वरम् ॥ १२१ ॥ इतीरितः स विष्णुना विचार्य तद्गुणान्परान् ।
तथेति चाह ते त्रयः प्रतस्थुराशु मागधान् ॥ १२२ ॥

SGDF
Sri Gurgeshwari Digital Foundation

समेत्य मागधांस्तु ते शिवोरुलिङ्गमित्यलम् । सुमाल्यवस्त्रभूषणैः समर्चितं गिरिं ययुः ॥ १२३ ॥ स्वशीर्षतोऽपि चाद्दतं जरासुतेन ते गिरिम् । न्यपातयन्त बाहुभिस्तमस्य चोत्तमाङ्गवत् ॥१२४॥ अद्वारतस्ते नगरं प्रविश्य माषस्य नालेन कृतास्त्रिभेरीः । मु(पु)ष्टिप्रहा(दा)राद्वि-(बि)भिदुस्तस्य कीर्तिशास्त्रोपमा न्यक्कृतमागधेशाः ॥१२५॥ तथाऽपणेभ्यो बहुमाल्यगन्धान्प्रसह्य सङ्गृह्य शुभांश्च दध्रुः । अद्वारतस्तस्य गृहं च सस्नुः भोशब्दतस्तं च नृपं प्रसस्नुः ॥१२६॥ तान्विप्रवेषान्स निशाम्य राजा महाभुजान्स्नातकवेषयुक्तान् । द्वितीयवर्णान्प्रविचिन्त्य बाहूञ्ज्या-कर्कशान्वीक्ष्य बभाष एतान् ॥ १२७ ॥ के ष्ठा(स्था)थ किं हेतुत आगताश्च कुतश्च मे पर्वतलिङ्गभेदनम् । कृतं भवद्भिः कुत एव दुर्नयाः कृतास्तथान्ये द्विजवर्यवेषैः ॥ १२८ ॥ इति ब्रुवाणं भगवानुवाच कार्यं हि शत्रोरखिलं प्रतीपम् । इत्युक्त ऊचे नहि विप्रशत्रुरहं कुतो वो मम शत्रुता भवेत् ॥ १२९ ॥ इत्युक्तवाक्यं नृपतिं जगाद जनार्दनो नैव हि तादृशा द्विजाः । अहं रिपुस्तेऽस्मि हि वासुदेव इमौ च भीमार्जुननामधेयौ ॥ १३० ॥ यद्बान्धवान्नः पिशिताशिधर्मतो रौद्रे मखे कल्पयितुं पशुत्वे । इच्छस्यरे वेदपथं विहाय तं त्वां बलाच्छास्तु-मिहागता वयम् ॥ १३१ ॥ विमोक्षयामः स्वजनान्यदि त्वं न मोचयस्यद्य निगृह्य च त्वाम् । मुञ्चाथवा तानभियाहि चास्मात्रणाय मर्तुं कृतनिश्चयोऽत्र ॥ १३२ ॥ इतीरितोऽसौ मगधाधिपो रुषा जगाद नाहं शिवयागयुक्तान् । मोक्ष्ये पशून्युगपद्वा क्रमेण योत्स्ये च वोऽथापि चमूसहायान् ॥ १३३ ॥ निरायुधः सायुधो वा युष्मदिष्टायुधेन वा । एकोऽपि सकलैर्योत्स्ये ससैन्यो वा ससैनिकान् ॥१३४॥ इत्युक्तवन्त-मवददजितोरुबलो हरिः । एह्येकमेको वास्मासु ससैन्यो वा रणे नृप ॥ १३५ ॥ येन कामयसे योद्धुं तं न आसादय द्रुतम् । निरायुधः सायुधो वा त्वदभीष्टायुधेन वा ॥ १३६ ॥ इत्याह भगवा-

SGDF
Sri Gargeshwari Digital Foundation

ञ्छत्रुं यशो भीमे विवर्धयन् । घातयित्वा स्वशत्रुं च भीमसेनानुग्रहं परम् ॥१३७॥ भीमस्य कर्तुमिच्छंश्च भक्तिज्ञानादिवर्धनम् । तूणीकर्तुं रिपुं चैव निरायुधतयाऽगमत् ॥१३८॥ कृष्णभीमार्जुनस्तेन विप्रवेषाश्च तेऽभवन् । निरायुधः क्षत्रवेषो नैव योग्यः कथञ्चन ॥ १३९ ॥ ततो जग्मुर्विप्रवेषास्तूणीकर्तुं च मागधम् । मागधस्य ससैन्यस्य स्वगृहे संस्थितस्य च ॥ १४० ॥ निरायुधेन भीमेन समाह्वाने कृतेऽमितम् । धर्मं यशश्च भीमस्य वर्धयामास केशवः ॥ १४१ ॥ तृतीयमर्जुनं चैव समादाय ययौ रिपुम् । हरिस्तस्माच्च भीमस्य महाधिक्यं प्रकाशयन् ॥ ॥१४२॥ मुखेन मागधस्यैव वृण्वेकं न इति ब्रुवन् । वृण्वेकमस्मास्विति सः प्रोक्त आह जरासुतः ॥ १४३ ॥ कुर्यां नैवार्जुनेनाहमबलेनैव सङ्गरम् । पञ्चपञ्चाशदब्दोऽद्य ह्ययमेव तु बालवत् ॥ अबलत्वाद्युवाऽप्येष बाल एव मतो मम ॥ १४४ ॥ इत्युक्तोऽप्यर्जुनो नाह कुरु तर्हि परीक्षणम् । बाहुभ्यां धनुषा चेति शङ्कमानः पराजयम् ॥१४५॥ अतो भीमे बलाधिक्यं सुप्रसिद्धमभून्महत् । एतदर्थं हि कृष्णेन समानीतः स फल्गुनः ॥ १४६ ॥ जानन्कृष्णे बलं घोरमविषह्यं स मागधः । कुत्सयन्गोप इति तं भयान्नैवाह्वयत्प्रभुम् ॥ १४७ ॥ आह्वयामास भीमं तु स्याद्वा मे जीवनं त्विति ॥१४८॥ हनिष्यत्येव मां कृष्ण इत्यासीन्नृपतेर्भयम् । तस्मात्तं नाह्वयामास वासुदेवं स मागधः ॥ १४९ ॥ अर्जुने तु जिते कृष्णभीमौ मां निहनिष्यतः । त्रयाणां दुर्बलाह्वानान्नश्येत्कीर्तिश्च मे ध्रुवम् ॥ १५० ॥ इति मत्वाऽऽह्वयामास भीमसेनं स मागधः । कथञ्चिज्जीवितं वा स्यान्न तु नश्यति मे यशः ॥ १५१ ॥ इतीक्ष्य भीमं प्रतियोधनाय सङ्गृह्य राजा स जरासुतो बली । राज्ये निजं चात्मजमभ्यषिञ्चत्पुरा ख्यातं पत्रतापाख्यरुद्रम् ॥ १५२ ॥ बलं भीमे मन्यमानोऽधिकं तु गदाशिक्षामात्मनि चाधिकां नृपः । भीतो नियुद्धेऽस्य ददौ गदां स

SGDF
Sri Gargeshwari Digital Foundation

भीमाय चान्यां स्वयमग्रहीद्वली ॥ १५३ ॥ तदर्थमेवाशु गदां प्रगृह्य भीमो ययौ मागधसंयुतो बहिः । पुरात्सकृष्णार्जुन एव तत्र त्वयुध्यतां केशवपार्थयोः पुरः ॥१५४॥ वाचाऽजयत्तं प्रथमं वृकोदरः शिवाश्रयां विष्णुगुणप्रकाशया । ततो गदाभ्यामभिपेततुस्तौ विचित्रमार्गानभिदर्शयन्तौ ॥ १५५ ॥ तयोर्गदे तेऽशनिसन्निकाशे चूर्णीकृते देहमहाद्रढिम्ना । अन्योन्ययोर्वक्षसि पातिते रुषा यथाश्मनोः पांसुपिण्डौ सुमुक्तौ ॥१५६॥ सञ्चूर्णितगदौ वीरौ मुष्टिभिर्जघ्नतुर्मिथः । ब्रह्माण्डस्फोटसङ्काशैर्यथा केशवकैटभौ ॥ १५७ ॥ चचाल पृथ्वी गिरयश्च चूर्णिताः कुलाचलाश्चेलुरलं विचुक्षुभुः । समस्तवारांपतयः सुरासुरा विरिञ्चशर्वादय आसदन्नभः ॥१५८॥ सुरास्तु भीमस्य जयाभिकाङ्क्षिणस्तथाऽसुराद्या मगधाधिपस्य । पश्यन्ति सर्वे क्रमशो बलं स्वं समाददे मारुतनन्दनोऽपि ॥ १५९ ॥ मानयित्वा वरं धातुर्दिवसान्दश पञ्च च । वासुदेवाज्ञया भीमः शत्रुं हन्तुं मनो दधे ॥१६०॥ स प्रणम्य हृषीकेशं हर्षादाश्लिष्य फल्गुनम् । रिपुं जग्राह मुकुटे वारणं मृगराडिव ॥ १६१ ॥ पृष्ठेऽस्य जानुमाधाय कूर्मदेशं बभञ्ज ह । मृतिकाले पुनर्देहं विददार यथा पुरा ॥१६२॥ मर्मण्येव न हन्तव्यो मयायमिति मारुतिः । स्वपौरुषप्रकाशाय बभञ्जैनममर्मणि ॥१६३॥ भज्यमाने शरीरेऽस्य ब्रह्माण्डस्फोटसन्निभः । बभूव रावो येनैव त्रस्तमेतज्जगत्त्रयम् ॥ १६४ ॥ निहत्य कृष्णस्य रिपुं स भीमः समर्पयामास तदर्चनं हरेः । कृतां हि भीमेन समर्चनां तां समक्षमादातुमिहागतो ह्यजः ॥ १६५ ॥ स्वीकृत्य पूजां च वृकोदरस्य दृढं समाश्लिष्य च तं जनार्दनः । प्रीतो नितान्तं पुनरेव कृष्णं ननाम भीमः प्रणतोऽर्जुनेन ॥१६६॥ जग्मुः सुराश्चातितरां प्रहृष्टा ब्रह्मादयो दीनतराश्च दैत्याः । बलादुमेशस्य वरे प्रभग्ने वृकोदरेणाच्युतसंश्रयेण ॥ ॥१६७॥ सुतो ययौ शरणं तान्रमेशं भीमार्जुनान्सहदेवोऽस्य धीमान् ।

SGDF
Sri Gargeshwari Digital Foundation

रथं स्वसारं च ददौ स मारुतेर्ननाम कृष्णं परयैव भक्त्या ॥ १६८ ॥ रथो ह्यसौ वसुना वासुदेवाच्छक्रान्तरात्तो वसुवंशजत्वात् । जरासुतस्यास वृकोदरस्तं हरे रथं प्रार्पयामास तस्मै ॥ १६९ ॥ कृष्णोऽस्मरद्गरुडं स ध्वजेऽभूद्रथं कृष्णोऽथारुहत्पाण्डवाभ्याम् । भीमः कन्यां सहदेवस्य हेतोः समग्रहीदनुजस्यात्मनः सः ॥ १७० ॥ नकुलस्यादान्मद्रराजो हि पूर्वं स्वीयां कन्यां सा तथैषाप्युषा हि । एका पूर्वं तेऽश्विनोश्चैव भार्या यमौ रेमाते यदुषा अश्विभार्या ॥ १७१ ॥ ततः कृष्णाया-मग्रजभ्रातृभार्यावृत्तिं हि तौ चक्रतुर्माद्रिपुत्रौ । जरासुतस्यात्मजः केशवादीन्रत्नैः समभ्यर्च्य ययावनुज्ञया ॥ १७२ ॥ तदाज्ञया पितृ-कार्याणि कृत्वा तदाज्ञयैवासुचत्तान्नृपांश्च । तैः संस्तुतः केशवो भीम-पार्थयुक्तो ययौ भक्तिनम्रैर्यथावत् ॥ १७३ ॥ संभाविताः सहदेवेन सम्यक्प्रशस्य कृष्णं भीमसेनं च सर्वे । ययुर्गृहान्स्वानपतत्केशवद्विट् जरासुतोऽन्धे तमसि क्रमेण ॥ १७४ ॥

कृष्णश्च पार्थौ च तथैकयानं समास्थिता धर्मजमभ्यगच्छन् । तेषां शङ्खध्वनिसम्बोधितात्मा राजा प्रीतश्चातितरां बभूव ॥ १७५ ॥ द्वैपायनोऽथ भगवानभिगम्य पार्थानाज्ञापयत्सकलसम्भृतिसाधनाय । तं राजसूयसहितं परमाश्वमेधयज्ञं समादिशदनन्यकृतं विरिञ्चात् ॥१७६॥ कर्ता हि तस्य परमेष्ठिपदं प्रयाति यद्यन्यसद्गुणवरैः परमेष्ठितुल्यः । भीमे मखस्य फलमभ्यधिकं विधातुं व्यासः क्रतुं तमदिशद्गुरुरब्ज-जस्य ॥ १७७ ॥ असाधारणहेतुर्यः कर्मणो यस्य चेतनः । स एव तत्फलं पूर्णं भुङ्क्तेऽन्योऽल्पमिति स्थितिः ॥ १७८ ॥ विना विष्णुं निर्णयोऽयं स हि कर्मफलोज्झितः । हेतवोऽपि हि पापस्य न प्रायः फलभागिनः ॥१७९॥ देवाः पुण्यस्य दैत्याश्च मानुषास्तु द्विभागिनः । असाधारणहेतुश्च भीम एव प्रकीर्तितः ॥ १८० ॥ यज्ञस्यास्य जरासन्ध-वधात्कर्णजयादपि । जयाच्च कीचकादीनामन्यैर्जेतुमशक्यतः ॥१८१॥

SGDF
Sri Gargeshwari Digital Foundation

द्वितीयः फल्गुनश्चैव तृतीयस्तु युधिष्ठिरः । तस्माद्ब्रह्मपदप्राप्त्यै व्यासो भीमस्य तं क्रतुम् ॥ अनन्यकृतमादिश्य दिशां विजयमादिशत् ॥१८२॥

अथाब्रवीद्धनञ्जयो धनुर्ध्वजो रथो वरः । ममास्ति तद्दिशां जयो ममैव वाञ्छितः प्रभो ॥ १८३ ॥ इतीरितोऽखिलप्रभुर्जगाद सत्यमस्ति ते । समस्तसाधनोन्नतिर्महच्च वीर्यमस्ति हि(ते) ॥ १८४ ॥ तथापि कीचकादयो वृकोदराद्दते वशम् । न यान्ति नापि ते वशं प्रयाति कर्ण एव च ॥ १८५ ॥ बलाधिकोऽसि कर्णतस्तथापि नामृतः करम् । ददाति ते ह्यतिस्पृधा न वध्य एष तेऽद्य च ॥ १८६ ॥ सवर्मकुण्डलत्वतो न वध्य एष यत्त्वया । ततो वृकोदरो दिशं प्रयातु ते पितुः प्रियाम् ॥ १८७ ॥ जीवग्राहभयात्कर्णो ददाति करमञ्जसा । भीमाय नात्र सन्देहो जितोऽनेन च संयुगे ॥ १८८ ॥ अजेयौ शर्ववचनाद्रणे कीचकपौण्ड्रकौ । वशं प्रयातो भीमस्य तथाऽवध्योऽपि चेदिपः ॥ १८९ ॥ जीवग्राहभयं ह्येषां भीमान्मागधपातनात् । तस्मात्करं प्रयच्छन्ति जिता वा पूर्वमेव वा ॥ १९० ॥ प्रयाहि च त्वं धनदप्रपालितां दिशं द्वीपान्सप्त चाशेषदिक्षु । नागांश्च दैत्यांश्च तथाधरस्थान्विजित्य शीघ्रं पुनरेहि चात्र ॥ १९१ ॥ रथो हि दिव्योऽम्बरगस्तवास्ति दिव्यानि चास्त्राणि धनुश्च दिव्यम् । येऽन्ये च बाणप्रमुखा अजेयाः शर्वाश्रयास्तानपि भीम एतु ॥ १९२ ॥ तथा सुराश्चापि समस्तशोऽस्य बलिं प्रयच्छन्ति मदाज्ञयेतरे । दिशं प्रतीचीमथ दक्षिणां च यातां यमौ क्रमशो ह्यध्वरार्थे ॥ १९३ ॥ यशश्च धर्मश्च तयोरपि स्यादिति स्म कृष्णेन सुतेन काल्याः । उक्ते ययुस्ते तमभिप्रणम्य दिशो यथोक्ताः परमोरुसद्गुणम्(णाः) ॥ १९४ ॥

वृकोदरोऽजयन्नृपान्विराटमाससाद ह । जितेऽत्र कीचके रणे समाददे करं ततः ॥ १९५ ॥ ततः क्रमान्नृपाञ्जित्वा चेदीनां विषयं गतः । मातृवाक्याद्भयाच्चैव शिशुपालेन पूजितः ॥ १९६ ॥ मातृ-

SGDF
Sri Gargeshwari Digital Foundation

श्वसुर्गृहे चोष्य दिवसान्कतिचित्सुखम् । करं सुमहदादाय ततः पूर्वां दिशं ययौ ॥ १९७ ॥ क्रमेण सर्वान्निर्जित्य पौण्ड्रकं च महाबलम् । विरथीकृत्य कर्णं च करमादाय सर्वतः ॥ १९८ ॥ हिमवच्छिखरे देवाञ्जित्वा शक्रपुरोगमान् । क्रीडार्थं युध्यतस्तेभ्यस्तुष्टेभ्यो रत्नसञ्चयान् ॥ १९९ ॥ बाहुयुद्धेन शेषं च गरुडं च महाबलम् । क्रीडमानौ विनिर्जित्य भूषणान्याप तोषतः ॥ २०० ॥ ताभ्यां च दृढमाश्लिष्टः स्नेहविक्लिन्नया धिया । पोप्लूयमानः स ततोऽम्बुधौ बली जगाम बाणस्य पुरं हरं च । रणेऽजयद्वारणरूपमास्थितं क्रीडन्तमेतेन च तोषितो हरः ॥ २०१ ॥ पृष्टश्च गिरिशेनासौ विस्तरं दिग्जयस्य च । सिंहव्याघ्रादिरूपाश्च आत्मना विजिता यथा ॥ गरुत्मच्छेषशक्राद्या देवाः सर्वे तदब्रवीत् ॥ २०२ ॥ निशम्य शङ्करोऽखिलं मखस्य च प्रसाधकम् । हरिं ततो बलेः सुताद्ददौ च रत्नसञ्चयम् ॥ ॥ २०३ ॥ स बाणदैत्यतो महच्छिवेन दत्तमुत्तमम् । प्रगृह्य रत्नसञ्चयं स्वकं पुरं समाययौ ॥ २०४ ॥ स विप्रयादवेश्वरं द्विधा स्थितं जनार्दनम् । पुरो निधाय तद्वसु प्रभूतमानमत्तदा ॥ २०५ ॥ सोऽभिवन्द्याग्रजं चैव यथावृत्तं न्यवेदयत् । आत्मनः कृष्णयोः सर्वं धर्मराजाग्रतो मुदा ॥ २०६ ॥ यथा जिताः कीचकाद्या एकलव्यसहायवान् । यथा जितः पौण्ड्रकश्च कर्णाद्याश्च तथा परे ॥ २०७ ॥ यथा सिंहादितनवः शेषवीन्द्रेन्द्रपूर्वकाः । यथा गजतनुः शर्वस्तच्च सर्वमवर्णयत् ॥२०८॥ सम्भावितश्च कृष्णाभ्यां राज्ञा च स महाबलः । आज्ञया व्यासदेवस्य यज्ञाङ्गानि समार्जयत् ॥ २०९ ॥ ऊचे तं भगवान्व्यासो जितं सर्वं त्वयाऽरिहन् । जये सर्वस्य यज्ञोऽयं पूर्णो भवति नान्यथा ॥२१०॥ विरिञ्चः सर्वजित्पूर्वं द्वितीयस्त्वमिहाभवः । इत्युक्त्वैनं समाश्लिष्य यज्ञाङ्गानि समादिशत् ॥ २११ ॥

तदैवान्या दिशो जित्वा समीयुस्तस्य येऽनुजाः । सहदेवो

SGDF
Sri Gangeshwari Digital Foundation

दक्षिणाशां जित्वा रत्नान्युपाहरत् ॥ २१२ ॥ तत्र रुक्मी न युयुधे सहदेवेन वीर्यवान् ॥ २१३ ॥ जितः कृष्णेन पूर्वं यः शर्वादाप धनुर्वरम् । तपसा तोषितात्कृष्णादन्यानेवामुनाऽखिलान् ॥ २१४ ॥ विजेष्यसि यदा कृष्णविरोधस्ते तदा धनुः । मामेष्यतीति तेनोक्तो न व्यरुध्यत केशवे ॥ २१५ ॥ स्वसुः स्नेहाच्च कृष्णस्य यज्ञकारयितृत्वतः । भीमार्जुनबलाच्चैव माद्रेयाय ददौ करम् ॥ २१६ ॥ जिग्ये बलेनान्यनृपान्सहदेवः प्रतापवान् ॥ २१७ ॥ तथा स्मृतं समागतं घटोत्कचं विभीषणे । समादिशद्ययौ च सोऽप्यसौ ददौ महाकरम् ॥ ॥ २१८ ॥ पुरा हि राघवोदितं तदस्य सोऽखिलं तदा । विचार्य केशवं च तं बलं च भीमपार्थयोः ॥ दिवौकसश्च पाण्डवानवेत्य सोऽददात्करम् ॥ २१९ ॥ महौघरत्नसञ्चयं स आप्य भीमसेनजः । ययौ च माद्रिनन्दनं स चाययौ स्वकं पुरम् ॥ २२० ॥

नकुलः पश्चिमाशायां विजिग्येऽखिलभूभृतः । करमाप च वीरोऽसौ सौहार्दादेव मातुलात् ॥ आययौ च महारत्नसञ्चयेन स्वकं पुरम् ॥ २२१ ॥

अर्जुनः कपिवरोच्छ्रितध्वजं स्यन्दनं समधिरुह्य गाण्डिवी । यात एव दिशमुत्तरां तदा पार्वतेयकुनृपाः समाययुः ॥ २२२ ॥ त्रैगर्ताः पार्वतेयाश्च सहिताः पाण्डुनन्दनम् । अभ्येत्य बोधयामासुर्जानन्तस्तच्चिकीर्षितम् ॥ २२३ ॥ तान्विजित्य युगपत्स पाण्डवः सञ्जयन्क्रमश एव तां दिशम् । प्राव्रजच्च भगदत्तमूर्जितं तेन चास्य समभून्महारणः ॥ ॥२२४॥ सोऽभियुध्य सगजो दिनाष्टकं श्रान्त आह पुरुहूतनन्दनम् । ब्रूहि ते समरकारणं त्विति प्राह देहि करमित्यथार्जुनः ॥ २२५ ॥ सोऽप्यदात्करममुष्य वासवो मद्गुरुस्तव पितेति सादरम् । नैव जेतुमिह शक्ष्यसि त्वमित्यावदद्धरिवरास्त्रतेजसा ॥ २२६ ॥ स्नेहपूर्वं प्रदत्ते तु करे नैवाह चोत्तरम् । अर्जुनो व्यर्थकलहमनिच्छन्स्नेहयन्त्रितः ॥२२७॥

SGDF
Sri Gargeshwari Digital Foundation

पार्थो जित्वाऽष्टवर्षाणि षट्द्वीपानपरानपि । अजयच्चतुर्दिशमपि सर्वशस्त्रास्त्रतेजसा ॥ २२८ ॥ पातालसप्तकं गत्वा जित्वा दैतेयदानवान् । बलेश्च विष्णुवचनात्करं जग्राह सामतः ॥ २२९ ॥ जित्वा च वासुकिं भूरिरत्नमादाय सत्वरः । आजगाम पुरं स्वीयं वीरो वत्सरमात्रतः ॥ ॥ २३० ॥

सुवर्णरत्नगिरयश्चतुर्भिस्तैः समार्जिताः । चत्वारो योजनानां हि दश त्रिंशच्छतं तथा ॥ २३१ ॥ चतुःशतं च क्रमश उच्छ्रिता दिग्जयार्जिताः । प्रतीच्याद्यपसव्येन क्रमाद्दिग्भ्यः समार्जिताः ॥२३२॥ विश्वकर्मकृतत्वाच्चु पुरस्याल्पेऽपि च स्थले । अन्तर्गतास्ते गिरयस्तदद्भुतमिवाभवत् ॥२३३॥ ततो यज्ञः प्रववृते कृष्णद्वैपायनेरितः । ऋत्विजो मुनयोऽत्रासन्सर्वविद्यासु निष्ठिताः ॥ २३४ ॥ द्वैपायनोक्तविधिना दीक्षितं चक्रिरे नृपम् । ज्येष्ठत्वाद्याजमान्यं तु प्रणिधाय युधिष्ठिरे ॥ ॥ २३५ ॥ भीमार्जुनादयः सर्वे सह तेन समासिरे । ब्रह्माणीपदयोग्यत्वात्कृष्णैका यज्ञपत्न्यभूत् ॥ २३६ ॥ पदायोग्यतया नान्याः पत्न्यस्तेषां सहासिरे । आज्ञयैव जगद्धातुर्व्यासस्यानन्ततेजसः ॥२३७॥ स्थलमप्यत्र सर्वं हि रत्नहेममयं त्वभूत् । किमु पात्रादिकं सर्वं शिबिराणि च सर्वशः ॥ २३८ ॥ आहूतं दिग्जये पार्थैस्तदा लोकद्विसप्तकम् । सर्वमत्रागमद्ब्रह्मशर्वशक्रादिपूर्वकम् ॥ २३९ ॥ भीष्मो द्रोणश्च विदुरो धृतराष्ट्रः सहात्मजः । सस्त्रीका आययुस्तत्र बाह्लीकश्च सहात्मजः ॥२४०॥ तथैव यादवाः सर्वे बलभद्रपुरोगमाः । रुक्मिणीसत्यभामाद्या महिष्यः केशवस्य च ॥ २४१ ॥

तत्र सर्वजगदेकसङ्गमे तत्त्वनिर्णयकथा बभूविरे । प्राश्निकोऽत्र परिपूर्णचिद्घनो व्यास एव भगवान्बभूव ह ॥ २४२ ॥ तत्त्वनिर्णयकथासु निर्णयो वासुदेवगुणविस्तरोऽभवत् । नास्ति तत्सदृश उत्तमः कुतः पार एष न ततोऽन्य इत्यपि ॥२४३॥ बादरायणभृगूत्थरामयोः

SGDF
Sri Gurgeshwari Digital Foundation

शृण्वतोः परमनिर्णये कृते । मोदमानजनतासमागमेऽपृच्छदत्र नृपतिर्यतव्रतम् ॥ २४४ ॥ जानमानोऽपि नृपतिः कृष्णं पूज्यतमं हरिम् । संशयं भूभृतां भेत्तुं भीष्मं पप्रच्छ धर्मवित् ॥ २४५ ॥ नास्ति नारायणसममिति वादेन निर्णये । कृते ब्रह्मादिभिरपि कृष्णं मर्त्यं हि मेनिरे ॥ २४६ ॥ नृपास्तस्मादयं कृष्णो नारायण इति स्म ह । सम्यग्ज्ञापयितुं धर्मसूनुर्भीष्ममपृच्छत ॥ २४७ ॥ ब्रह्मादयः सुरा यस्माद्दृश्यन्ते मर्त्यवन्नृभिः । न चैवातितराभ्यासो नृणामस्ति मुनिष्वपि ॥ ॥ २४८ ॥ सर्वशास्त्रविदं भीष्मं जानन्त्येते नृपा अपि । तस्माद्भीष्ममपृच्छत्स कुलवृद्धत्वतस्तथा ॥ २४९ ॥ पितामहाग्र्यपूजार्हः कोऽत्र लोकसमागमे । ब्रह्मशर्वादयश्चात्र सन्ति राजान एव च ॥ २५० ॥ इति पृष्टोऽब्रवीद्भीष्मः कृष्णं पूज्यतमं प्रभुम् ॥ २५१ ॥ यद्यप्येकस्त्रिधा विष्णुर्वसिष्ठभृगुवृष्णिषु । प्रादुर्भूतस्तथाप्येते नृपा हि व्यासरामयोः ॥ विप्रत्वान्न विरुध्यन्ते तत एव च युक्तताम् ॥ २५२ ॥ मन्यन्ते नविरोधश्च तेषां तत्र हि तादृशः ॥ २५३ ॥ अविवादे प्रसिद्धिश्च नैवास्य भविता क्वचित् । तस्मात्कृष्णाय दातव्यमिति भीष्मेण चिन्तितम् ॥ २५४ ॥ कृष्णाय दत्ते राजानो विवादं कुर्युरञ्जसा । विवादेन च कीर्तिः स्याद्वासुदेवस्य विस्तृता ॥ ततः कृष्णायाग्र्यपूजा दत्ता पार्थैर्जगत्पुरः ॥ २५५ ॥ व्यासभार्गवयोः साक्षात्तदैक्यात्तदनन्तरम् । अग्र्यां पूजां ददुश्चान्यान्यथायोग्यमपूजयन् ॥ ॥ २५६ ॥

अग्र्योपहार उपयापित एव कृष्णे कोपादनिन्ददमुमाशु च चेदिराजः । श्रुत्वैव तत्पवनजोऽभिययौ नृपं तं हन्तुं जगद्गुरुविनिन्दकमृद्धमन्युः ॥ २५७ ॥ दूरेऽपि केशवविनिन्दनकारिजिह्वामुच्छेत्स्य इत्युरुतराऽस्य सदा प्रतिज्ञा । भीमस्य तं तु जगृहे सरिदात्मजोऽथ सम्प्रोच्य केशववचो निजयोर्वधाय ॥ २५८ ॥ मयैव वध्या-

SGDF
Sri Gargeshwari Digital Foundation

विति तावाह यत्केशवः पुरा । तच्छ्रुत्वा भीमसेनोऽपि स्थितो भीष्म-
करग्रहात् ॥ २५९ ॥ जानन्नपि हरेरिष्टं स्वकर्तव्यतयोत्थितः । भीम
एतावदुचितमिति मत्वा स्थितः पुनः ॥ २६० ॥ देवसङ्घभविनां
महानभूद्वीक्ष्य तोष इह केशवेऽधिकाम् । अर्चनां य इह मानुषो जनो
मध्य एव स तु संस्थितोऽभवत् ॥२६१॥ आसुरा इह सुयोधनादय-
स्तत्र ते विमनसो बभूविरे । दुर्वचोभिरधिकं च चेदिपः कृष्णमाच्छदुरु-
सद्गुणार्णवम् ॥ २६२ ॥ समाह्वयच्च केशवं युधे तमाशु केशवः ।
निवार्य तस्य सायकाञ्जघान चारिणा प्रभुः ॥ २६३ ॥ निकृत्तमान-
कन्धरः स भक्तिमानभूद्धरौ । तमाश्रितश्च योऽसुरो महातमः प्रपेदि-
वान् ॥ २६४ ॥ जयः प्रविश्य केशवं पुनश्च पार्षदोऽभवत् ।
असौ च पाण्डवैः क्रतुः प्रवर्तितो यथोदितः ॥ २६५ ॥
सुवर्णरत्नभारकान्बहून्नृपा उपानयन् । उपायने सुयोधनं नृपोऽदिश-
द्गृहेऽस्य च ॥ २६६ ॥ अभोजयंस्तथा द्विजान्यथेष्टभक्ष्यभोज्यकैः ।
सुवर्णरत्नभारकान्बहूंश्च दक्षिणां ददुः ॥ २६७ ॥ यदिष्टमास यस्य च
प्रदत्तमेव पाण्डवैः । समस्तमत्र सर्वशोऽथ सस्नुरुद्धता मुदा ॥२६८॥
नदत्सुरोरुदुन्दुभिप्रगीतदेवगायकाः । प्रनृत्तदिव्ययोषितः सुरापगां
व्यगाहयन् ॥ २६९ ॥ समस्तराजसंयुता विगाह्य जाह्नवीजले । पुरं
ययुः पुनश्च ते स्वसद्म चागमन्सुराः ॥ २७० ॥ गतेषु सर्वराजसु स्वकं
पुरं स्वकेषु च । सभीष्मकेषु सर्वशः सहाम्बिकेयकेषु च ॥ २७१ ॥
विचित्ररत्नकारिते रविप्रभे सभातले । सकेशवो वरासने विवेश धर्म-
नन्दनः ॥ २७२ ॥ तथैव रुक्मिणीमुखाः परिग्रहा रमेशितुः । तथैव
भीमफल्गुनावुपाविशन्हरेरुप ॥ २७३ ॥ सहैव वायुसूनुना तथैव
पार्षतात्मजा । उपैव रुक्मिणीं शुभां तथैव सत्यभामिनीम् ॥ २७४॥
यमौ च पार्षतादयो धनञ्जयान्तिकेऽविशन् । तथैव रामसात्यकी
समीप एव भूभृतः ॥ २७५ ॥ समासतां च सा सभा व्यरोचताधिकं

SGDF
Sri Gargeshwari Digital Foundation

तथा । यथा सभा स्वयम्भुवः समास्थिता च विष्णुना ॥ २७६ ॥ विचित्रहेममालिनः शुभाम्बराश्च तेऽधिकम् । स्फुरत्किरीटकुण्डला विरेजुरत्र ते नृपाः ॥२७७॥ विशेषतो जनार्दनः सभार्यको जगत्प्रभुः । यथा दिवौकसां सदस्यनन्तसद्गुणार्णवः ॥ २७८ ॥ उपासिरे च तं नृपाः समस्तशः सुहृद्गणाः ।

तदाऽजगाम खड्गभृत्सुयोधनः सहानुजः ॥ २७९ ॥ द्वारं सभाया हरिनीलरश्मिव्यूढं त्वजानन्स विहाय भित्तिम् । अभ्यन्तराणां दृशि नो विघातिनीं संस्फाटिकामाशु दृढं चुचुम्बे ॥ २८० ॥ प्रवेशयेतां च यमौ तमाशु सभां भुजौ गृह्य नृपोपदिष्टौ । तत्रोपविश्य क्षणमन्यतोऽगादमृष्यमाणः श्रियमेषु दिव्याम् ॥२८१॥ तत्रेन्द्रनीलभुवि रत्नमयानि दृष्ट्वा पद्मानि नीरमनसा जगृहे स्ववस्त्रम् । रत्नोरुदीधितिनिगूढजलं स्थलं च मत्वा पपात सहितोऽवरजैर्जलौघे ॥ २८२ ॥ तं प्राहसद्भगवता क्षितिभारनाशहेतोः सुसूचित उरुस्वरतोऽत्र भीमः । पाञ्चालराजसुतया च समं तथान्यैः स्वीयैस्तथानु जहसुर्भगवन्महिष्यः ॥ ॥२८३॥ मन्दस्मितेन किल सद्वदनेन्दुबिम्बो नारायणस्तु मुखमीक्ष्य मरुत्सुतस्य । नोवाच किञ्चिदथ धर्मसुतो निवार्य प्रास्थापयद्वसनमाल्यविलेपनानि ॥ २८४ ॥ कृष्णावृकोदरगतं बहुलं निधाय क्रोधं ययौ सशकुनिर्धृतराष्ट्रसूनुः । सुव्रीडितो नृपतिदत्तवराम्बरादीन्न्यक्कृत्य मार्गगत आह स मातुलं स्वम् ॥ २८५ ॥ यौ मामहसतां कृष्णाभीमौ कृष्णस्य सन्निधौ । तयोरकृत्वा सन्तापं नाहं जीवितुमुत्सहे ॥२८६॥ यदि मे शक्तिरत्र स्याद्घातयेयं वृकोदरम् । अग्रचपूजां च कृष्णस्य विलुम्पेयं न संशयः ॥ २८७ ॥ ईदृशं पाण्डवैश्वर्यं दृष्ट्वा को नाम जीवितम् । इच्छेत करदा येषां वैश्यवत्सर्वभूमिपाः ॥२८८॥ इत्युक्तः शकुनिर्वैरं दृढीकर्तुं वचोऽब्रवीत् । किं ते वैरेण राजेन्द्र भ्रातृभिर्बलिभिः पुनः ॥२८९॥ अनुजीवस्व तान्वीरान्गुणज्येष्ठान्बलाधिकान् । इतीरितो-

SGDF
Sri Gargeshwari Digital Foundation

ऽतिसंवृद्धकोप आह सुयोधनः ॥ २९० ॥ यदि तेषां तदैश्वर्यं न मां गच्छेदशेषतः । सर्वथा नैव जीवेयमिति सत्यं ब्रवीमि ते ॥ २९१ ॥ न तु बाहुबलाच्छक्यमादातुं तां श्रियं क्वचित् । नेन्द्रोऽपि समरे शक्तस्ताञ्जेतुं किमु मानुषाः ॥ २९२ ॥ इतीरितः पापतम आह गान्धारको नृपः । पापिनामखिलानां च प्रधानं चक्रवर्तिना(न)म् ॥२९३॥ यां यां श्रियं प्रदीप्तां त्वं पाण्डवेषु प्रपश्यसि । तामक्लेशत आदास्ये क्रीडन्नक्षैस्त्वदन्तिके ॥ २९४ ॥ इतीरितः प्रसन्नधीः सुयोधनो बभूव ह ।

प्रजग्मतुश्च तावुभौ विचित्रवीर्यजं नृपम् ॥ २९५ ॥ धृतराष्ट्रमथोवाच द्वापरांशोऽतिपापकृत् । नास्तिक्यरूपः शकुनिर्विवर्णं हरिणं कृशम् ॥ २९६ ॥ दुर्योधनं च तच्छ्रुत्वा कुत इत्याह दुर्मनाः । अब्रूतां तौ नृपायाशु द्वाभ्यां यन्मन्त्रितं पथि ॥२९७॥ श्रुत्वैव तन्नेत्यवदत्स भूपतिर्विरोधि धर्मस्य विनाशकारणम् । कुमन्त्रितं वो न ममैतदिष्टं स्वबाहुवीर्याप्तमहाश्रियो हि ते ॥ २९८ ॥ त्वयाऽपि निर्जित्य दिशो मखाग्र्याः कार्याः स्पृधो मा गुणवत्तमैस्तैः । विशेषतो भ्रातृभिरग्र्यपौरुषैरित्युक्त आहाशु सुयोधनस्तम् ॥२९९॥ यदि श्रियं पाण्डवानां नाक्षैराहर्तुमिच्छसि । मृतमेवाद्य मां विद्धि पाण्डवैस्त्वं सुखी भव ॥ ॥ ३०० ॥ यदि मज्जीवनार्थी त्वमानयाश्विह पाण्डवान् । सभायां देवनायैव न चाधर्मोऽत्र कश्चन ॥ ३०१ ॥ वेदानुजीविनो विप्राः क्षत्रियाः शस्त्रजीविनः । त्रुट्यते येन शत्रुश्च तच्छस्त्रं नैव चेतरत् ॥ ॥ ३०२ ॥ अतः स्वधर्म एवायं तवापि स्यात्फलं महत् । इत्युक्तो मा फलं मेऽस्तु तवैवास्त्विति सोऽब्रवीत् ॥ ३०३ ॥ एवं ब्रुवन्नपि नृप आविष्टः कलिना स्वयम् । पुत्रस्नेहाच्च विदुरमादिशत्पाण्डवान्प्रति ॥ ॥ ३०४ ॥ आविवेश कलिस्तं हि यदा पुत्रत्वसिद्धये । अंशेन तत आरभ्य नैवास्मादपजग्मिवान् ॥ ३०५ ॥ यावत्पुरं परित्यज्य वनमेव

SGDF
Sri Gargeshwari Digital Foundation

विवेश ह । तदन्तरा ततस्तस्य पापयुक्तं मनोऽभवत् ॥ ३०६ ॥ न्यवारयत्तं विदुरो महामतिः पापं कुलस्यापि विनाशकोऽयम् । समुद्यमो नात्र विचार्यमस्ति कथा न तस्मादयशश्च ते स्यात् ॥ ३०७ ॥ इति ब्रुवाणं कलहोऽत्र न स्यान्निवारयामो वयमेव यस्मात् । द्रष्टुं सुतान्क्रीडत एकसंस्थानिच्छामि पार्थांश्च सुयोधनादीन् ॥ ३०८ ॥ अतः क्षिप्रमुपानेयाः पार्था इति बलोदितः । ययौ स विदुरः पार्थान्द्वारकां केशवे गते ॥ ३०९ ॥

गते हि पार्थसन्निधेः सुयोधनेऽथ नारदः । शशंस धर्मसूनुना प्रचोदितोऽरिमागतम् ॥ ३१० ॥ क उद्यमी नृपेष्विति प्रपृष्ट आह नारदः । स सौभराड्वरं शिवादवाप वृष्णिनिर्जयम् ॥ ३११ ॥ पांसुमुष्टिं सकृद्ग्रासी बहूनब्दांस्तपश्चरन् । आजगाम हरादाप्य वरं कृष्णजये पुनः ॥ ३१२ ॥ स श्रुत्वा मागधवधं दिशां विजयमेव च । राजसूयक्रतुं चैव शिशुपालवधं तथा ॥ ३१३ ॥ यदून्प्रत्युद्यमं तूर्णं करोतीति निशम्य तत् । समैक्षद्धर्मजः कृष्णमुखशीतांशुमण्डलम् ॥ ॥ ३१४ ॥ अस्त्वित्युक्त्वा स गोविन्दः प्रेषयामास यादवान् । प्रद्युम्नादीन्दिनैःकैश्चित्स्वयं चागात्सहाग्रजः ॥ ३१५ ॥ विदुरस्तु ततो गत्वा धर्मराजमथाह्वयत् । भ्रातृभिर्वार्यमाणोऽपि कृष्णया च स धर्मराट् ॥ ३१६ ॥ सार्धं मात्रा भ्रातृभिश्च कृष्णया च ययौ द्रुतम् ॥ ॥३१७॥ ज्येष्ठाज्ञयैव विदुर आह्वयन्नपि धर्मजम् । नागन्तव्यमिति प्राह दोषानुक्त्वाऽक्षजान्बहून् ॥ ३१८ ॥ इतीह दोषसञ्चयस्तथापि ते पितुर्वचः । समीक्ष्य तद्द्वयं स्वयं कुरुष्व कार्यमात्मनः ॥ ३१९ ॥ इतीरितोऽपि पाण्डवो ययौ कलिप्रवेशतः । विचित्रवीर्यजं नृपं समासदत्ससैनिकः ॥ ३२० ॥

कल्यावेशान्नृपतिः प्रतिजज्ञे पूर्वमेव धर्मात्मा । आहूतो द्यूतकरणान्निवर्तेयं नैव वारितोऽपीति ॥ ३२१ ॥ तेनायात्स सुहृद्भि-

SGDF
Sri Gargeshwari Digital Foundation

र्निवार्यमाणो नागपुरमाशु । नहि धर्मो द्यूतकृतो विशेषतः क्षत्रियस्य लोकगुरोः ॥ ३२२ ॥ वैचित्रवीर्यतनयेन तु पाण्डुपुत्राः सम्भाविता-स्तमुप च न्यवसन्निशायाम् । प्रातस्तु भीष्ममुखराः सकलाश्च भूपा आसेदुराशु च सभां सह पाण्डुपुत्रैः ॥ ३२३ ॥ वैचित्रवीर्यनृपति-र्विदुरान्वितोऽस्य गान्धारराजसहितास्तनयाः सकर्णाः । प्राप्ताः सभातल-मथाह्वयदत्र धर्मराजं सुतः सुबलकस्य स देवनाय ॥ ३२४ ॥ सर्वाश्च तत्र कलिराविशदेव भीमपूर्वान्विनैव चतुरः सपृथां च कृष्णाम् । क्षत्तारमेव च ततो नहि भीष्ममुख्यैस्ते वारिताः कुलविनाशनकर्मवृत्ताः ॥ ॥ ३२५ ॥ भीमादिभिः स विदुरेण च वार्यमाणो द्यूते निधाय पण-मप्यखिलं स्ववित्तम् । गान्धारकेण विदिताक्षहृदा जितो द्राक्पाण्डोः सुतोऽथ नकुलं न्यदधात्पणाय ॥३२६॥ तस्मिञ्जितेऽथ सहदेवमथार्जुनं च भीमं च सोमकसुतां स्वमपि क्रमेण । राजा निधाय विजितोऽथ सुयोधनः स्वं सूतं दिदेश पृषतात्मजपुत्रिकायाः ॥ ३२७ ॥ सूतो गत्वा तदन्तं समकथयदिमां द्यूतमध्ये जिताऽसि क्षिप्रं चायाहि राज्ञां समितिमुरुतरामित्यथो साऽप्यवादीत् । नाहं यास्ये गुरूणां समितिमिति ययौ सोऽप्यमुं भीमभीतं ज्ञात्वा दुःशासनं सोऽप्यदिशदथ नृपो धार्तराष्ट्रोऽनुजं स्वम् ॥३२८॥ स पापपूरुषोत्तमः प्रगृह्य केशपक्षके । पुरः स्वमातुरानयत्सभामयुग्मवाससीम् ॥ ३२९ ॥ समाहृता रजस्वला जगाद भीष्मपूर्वकान् । अधर्म एष वार्यते न धर्मिभिर्भवद्विधैः ॥३३०॥ कथं छलात्मके द्यूते जिते धर्मजयो भवेत् । नहि द्यूतं धर्म्यमाहुर्विशेषेण च भूभुजाम् ॥ ३३१ ॥ ये धर्मं न वदन्तीह न ते वृद्धा इतीरिताः । अवृद्धमण्डितां नैव सभेत्याहुर्मनीषिणः ॥ ३३२ ॥ कथं द्यूते जिता चाहमजिते स्वपतौ स्थिते । समानधर्मिणीमाहुर्भार्यां यस्माद्विपश्चितः ॥ ॥ ३३३ ॥ सहैव कर्म कर्तव्यं पतौ दासे हि भार्यया । दासीत्वं मे पृथङ्न स्याज्जितेऽपि हि पतौ ततः ॥३३४॥ इत्युक्ता अपि भीष्माद्याः

SGDF
Sri Gangeshwari Digital Foundation

कल्यावेशेन मोहिताः । पृच्छ धर्मजमित्युक्त्वा तूष्णीमेव बभूविरे ॥ ॥ ३३५ ॥ दुर्योधनप्रतीपं हि न कश्चिदशकत्तदा । उवाच विदुरस्तत्र न धर्मोऽयमिति स्फुटम् ॥ ३३६ ॥ न तस्य वाक्यं जग्राह धृतराष्ट्रः सहात्मजः । ऊर्ध्वबाहुः स चुक्रोश देवानां ख्यापयंस्तदा ॥ ॥ ३३७ ॥ स्वाशक्तिं द्रौपदीं चाह जिता नैवासि धर्मतः । अधर्मो हि महानेतां सभामाक्रम्य तिष्ठति ॥ ३३८ ॥ एवं तु विदुरेणोक्ते विकर्णः पापकोऽपि सन् । आह डम्भार्थमेवात्र धर्मवित्त्वं प्रकाशयन् ॥ ॥३३९॥ अधर्म एवायमिति कर्णोऽथैनमभर्त्सयत् ॥ ३४० ॥ दृष्ट्वा भीमः क्लिश्यमानां च कृष्णां धर्मात्ययं धर्मराजे च दृष्ट्वा । राजा शास्यो युवराजेन धर्माच्चलन्यस्माद्वाक्यमिदं बभाषे ॥ ३४१ ॥ इमां न्यस्तवतो द्यूते धक्ष्णीयौ हि ते भुजौ । नैवमित्यर्जुनोऽवादीत्तमाहाथ वृकोदरः ॥ वक्तव्यं न तु कर्तव्यं तस्मान्नहि मया कृतम् ॥ ३४२ ॥ उत्तमे वचसा शिक्षा मध्यमेऽर्थापहारणम् । अधमे देहदण्डश्च तस्माद्वाच्यो युधिष्ठिरः ॥३४३॥ अथ कर्णोऽब्रवीत्कृष्णामपतिर्ह्यसि शोभने । धार्तराष्ट्रगृहं याहीत्यथ दुर्योधनोऽवदत् ॥ ३४४ ॥ परस्परविरोधार्थं पाण्डवानामिदं वचः ॥ ३४५ ॥ युधिष्ठिरो दुःखहेतुस्तवैको यद्येनमन्येन गुरुर्न एषः । इति ब्रूयुरथवा भीमपार्थावेकोऽपि वा भीम इहोत्सृजेत्त्वाम् ॥ ३४६ ॥ इत्युक्त ऊचे पवमानसूनुः पूज्योऽस्माकं धर्मजः संशयो न । गुरुश्चाहं वोऽखिलानां यतो हि बलज्येष्ठं क्षत्रमाहुर्महान्तः ॥ ॥ ३४७ ॥ बलज्यैष्ठ्ये यदि वः संशयः स्यादुत्तिष्ठध्वं सर्व एवाद्य वीराः । मृद्नामि वः पादतलेन सर्वान्सहानुबन्धान्यश्च मां योद्धुकामः ॥ ॥ ३४८ ॥ इति ब्रुवन्समुत्थितो नदन्वृकोदरो यदा । विघूर्णिता सभाऽखिला भयान्न चाह किञ्चन ॥३४९॥ भीष्मो द्रोणो विदुराद्याः क्षमस्व सर्वं त्वयोक्तं सत्यमित्येव हस्तौ । गृहीत्वैनं स्थापयामासुरस्मिन्स्थिते शान्तिं चापिरे धार्तराष्ट्राः ॥ ३५० ॥ निवारितो धर्मजेन

SGDF
Sri Gargeshwari Digital Foundation

गुरुभिश्चापरैस्तदा । माननार्थं गुरूणां तु भीमस्तान्न जघान ह ॥३५१॥ नैवात्यवर्तते ज्येष्ठं धर्मात्मानं युधिष्ठिरम् । तेषां पापाभिवृद्ध्यर्थं ज्येष्ठ-वृत्तिं च दर्शयन् ॥ ३५२ ॥

अथ दुर्योधनः पापो भीमसेनस्य पश्यतः । ऊरुं सन्दर्शयामास कृष्णायै भीम आह तम् ॥३५३॥ तवोरुमेनं गदयोरुवेगया बिभेत्स्य इत्येव पुनः सुयोधनः । ऊचे नान्यद्भवतामस्ति वित्तं द्यूते कृष्णं स्थापयध्वं पणाय ॥ ३५४ ॥ अथाब्रवीद्वृकोदरः कृतेऽवमानने हरेः । निपात्य भूतले हि ते शिरो मृदिष्य इत्यलम् ॥ ३५५ ॥ स वध्य एव मे सदा परोक्षतोऽपि यो हरिम् । विनिन्दयेदिति ध्रुवं प्रतिश्रुतं हि मारुतेः ॥ ३५६ ॥ पुनश्च पापवृद्धये तदैव नो जघान तम् । विकर्तनात्मजः पुनर्जगाद सोमकात्मजाम् ॥ ३५७ ॥ प्रयाहि भूभृतो हि नो गृहं न सन्ति पाण्डवाः । इतीरिते समुत्थितो वृकोदरोऽनु चार्जुनः ॥ उभौ च तौ युधिष्ठिरो न्यवारयत्तथाऽपरे ॥ ३५८ ॥ ततो निषण्णयोस्तयोः सुयोधनो वचोऽब्रवीत् । दुःशासनैषां वासांसि दासानां नो व्यपाकुरु ॥ ३५९ ॥ इत्युक्तोऽभ्यगमत्पार्थान्स्ववासांस्यथ ते ददुः । ते चीरवसना भूत्वा तानशिष्टान्प्रकाश्य च ॥ निषेदुश्च क्षमायां ते क्षमामालम्ब्य विस्तृताम् ॥ ३६० ॥ पुनर्दुर्योधनेनोक्तः पार्थानामथ पश्यताम् । चकर्ष वासो द्रौपद्यास्तदाऽवादीद्वृकोदरः ॥ ॥ ३६१ ॥ पापेषु पूर्वस्य तथाऽधमस्य वंशे कुरूणामुरुधर्मशालिनाम् । दुःशासनस्यास्य विदार्य वक्षः पिबामि रक्तं जगतः समक्षम् ॥ ३६२ ॥ विकृष्यमाणे वसने तु कृष्णा सस्मार कृष्णं सुविशेषतोऽपि । तदाऽन्य-दासीद्वसनं च तस्या दिव्यं सुसूक्ष्मं कनकावदातम् ॥ ३६३ ॥ पुनः पुनश्चैव विकृष्यमाणे दुःशासनेऽन्यानि च तादृशानि । बभूवुरन्तं न जगाम पापः श्रान्तो न्यषीदत्स्विन्नगात्रः सभायाम् ॥ ३६४ ॥ वस्त्रोच्चये शैलनिभे प्रजाते दुर्योधनः प्राह सञ्जातकोपः । प्रवेशयैनां गृहमेव

SGDF
Sri Gargeshwari Digital Foundation

शीघ्रं क्रिन्नश्चिरेणेति सुमन्दबुद्धिः ॥ ३६५ ॥ तच्छ्रुत्वा वचनं कृष्णा प्रतिज्ञामकरोत्तदा । भीमो दुर्योधनं हन्ता कर्णहन्ता धनञ्जयः ॥३६६॥ शकुनिं त्वक्षकितवं सहदेवो हनिष्यति । इत्युक्ते तत्तथेत्याह भीमसेनः सभातले ॥३६७॥ प्रतिज्ञामाददे पार्थस्तां माद्रीनन्दनस्तथा । नकुलः प्रतिजज्ञेऽथ शाकुनेयवधं प्रति ॥ ३६८ ॥ ततः सुयोधनानुजश्चकर्ष पार्षतात्मजाम् । गृहाय तां निशाम्य तु क्रुधाऽऽह मारुतात्मजः ॥ ॥ ३६९ ॥ अर्जुनार्जुन नैवात्र क्षमा मे तात रोचते । पतितस्यास्य देहस्य काष्ठविष्ठासमस्य च । फलानि त्रीणि शिष्यन्ते विद्या कर्म सुता इति ॥ १७० ॥ इति वेदोदितं वाक्यं न सुतो दारधर्षणे । दुष्टदारो न चाप्नोति लोकानर्धो हि दूषितः ॥ ३७१ ॥ अरक्षणाद्दूषितायां न त्यागाच्च शुभं भवेत् ॥ ३७२ ॥ अतोऽद्य सानुबन्धकान्निहन्मि धार्तराष्ट्रकान् । इति ब्रुवन्व्यलोकयद्रिपून्दहन्निवौजसा ॥ ३७३ ॥ ददर्श च महाघोरमादातुं परिघं रुषा । कर्तुं व्यवसितो बुद्ध्या निःशेषान्धार्तराष्ट्रकान् ॥ ३७४ ॥ तदा शिवा ववाशिरे सुयोधनाग्नि-गेहतः । तथैव तत्पितुर्गृहेऽप्यभूद्भयानकं बहु ॥ ३७५ ॥ निमित्ता-न्यतिघोराणि कुपिते मारुतात्मजे । दृष्ट्वाऽऽम्बिकेयो विदुरं पप्रच्छैषां फलं द्रुतम् ॥ ३७६ ॥ आह तं विदुरो ज्येष्ठं क्षणेऽस्मिंस्तव पुत्रकाः । सानुबन्धा न शिष्यन्ति वृकोदरबलाहताः ॥३७७॥ क्रीडसेऽर्भकवत्त्वं हि किं जितं किं जितं त्विति । अधर्मेण जितानत्र जितान्पश्यसि पाण्डवान् ॥ ३७८ ॥ स्त्रीषु द्यूतेषु वा दत्तं मदान्धेन नरेण वा । न दत्तमाहुर्विद्वांसस्तस्य बन्धुभिरेव च ॥ ३७९ ॥ आहार्यं पुनराहुश्च तथापि न तु पाण्डवैः । तत्कृतं तव पुत्राणां ख्यापयद्भिरशिष्टताम् ॥ ॥ ३८० ॥ इत्युक्त आहाम्बिकेयो निमित्तानां फलं कथम् । न भवेदिति स प्राह द्रुतं कृष्णा विमोच्यताम् ॥ ३८१ ॥ तोषयस्व वरैश्चैनामन्यथा ते सुतान्मृतान् । विद्धि भीमेन निष्पिष्टान्नात्र ते

SGDF
Sri Gargeshwari Digital Foundation

संशयो भवेत् ॥ ३८२ ॥ कृष्णा च पाण्डवाश्चैव तपोवृद्धिमभीप्सवः । तपसा नैव धक्ष्यन्ति तेन जीवन्ति ते सुताः ॥ ३८३ ॥ तथापि यदि कृष्णां त्वं न मोचयसि ते सुतान् । हनिष्यति न सन्देहो बलेनैव वृकोदरः ॥ ३८४ ॥ इतीरिते विनिर्भर्त्स्य पुत्रं दुःशासनं नृपः । अमोचयद्वरैश्चैनां छन्दयामास पार्षतीम् ॥ ३८५ ॥ छन्दिता सा वरैस्तेन धर्मे भागवते स्थिता । नैवात्मनो वरान्वव्रे वव्रे तेषां विमोक्षणम् ॥ ३८६ ॥ युधिष्ठिरस्य सभ्रातुः सराष्ट्रस्य विमोक्षणम् । ददौ नृपोऽस्या न पुनश्छन्द्यमानाऽपि साऽवृणोत् ॥३८७॥ भर्तुर्विष्णोश्च नान्यस्माद्वरस्वीकार इष्यते । एवं हि भगवद्धर्मस्तस्मात्सा नावृणोत्परम् ॥ ॥ ३८८ ॥ अधर्मतो हृतत्वात्तु तद्दानं न वरो भवेत् । इति मत्वा पाण्डवानां वव्रे कृष्णा विमोक्षणम् ॥ ३८९ ॥ श्वशुरादैहिकवराः क्षत्रियायास्त्रयो यतः । उक्ताः शतं च विप्राया धर्मे भागवते ततः ॥ हेतुना तेन वव्रे सा नान्यत्किञ्चिदतः परम् ॥ ३९० ॥

ततो विमुक्ताः प्रययुश्च पार्था गुरून्प्रणम्य स्वपुरं सकृष्णाः । दुर्योधनानन्तरजो जगाद तातं निजं पापकृतां प्रधानः ॥ ३९१ ॥ समस्तपाण्डवश्रियं समागतामहो पुनः । व्यमोचयो वृकोदराद्वधश्च नो ध्रुवं भवेत् ॥ ३९२ ॥ अतः पुनश्च पाण्डवान्समाह्वयस्व नः कृते । पुनश्च देवनं भवेज्जिता वनं प्रयान्तु च ॥ ३९३ ॥ तेनोक्तः स तदा राजा पाण्डवान्पुनराह्वयत् । पुनः पित्रा समाहूतो देवनाय युधिष्ठिरः ॥ ॥३९४॥ भ्रातृभिर्वार्यमाणोऽपि कृष्णया चागमत्सभाम् । द्वादशाब्दं वने वासमज्ञातं त्वेकवत्सरम् ॥ ३९५ ॥ वासं प्रसिद्धनृपतेः पुरे नैवातिदूरतः ॥३९६॥ कृष्णायाः पाण्डवानां वा दर्शनेऽज्ञातवासिनाम् । एकस्यापि समस्तानां द्वादशाब्दं पुनर्वनम् ॥ ३९७ ॥ वत्सराज्ञातवासं च त्यागेऽप्युक्तविधेस्तथा । दुर्योधनः पणं चक्रे बुद्ध्या दुःशासनोक्तया ॥ ॥ ३९८ ॥ गान्धारेण पुनश्चाक्षहृदयज्ञेन धर्मजः । पराजितो वनं

SGDF
Sri Gargeshwari Digital Foundation

यातुमैच्छत्सभ्रातृको यदा ॥३९९॥ तदा ननर्त पापकृत्सुयोधनानुजो हसन् । वदंश्च मारुतात्मजं पुनः पुनश्च गौरिति ॥ ४०० ॥ उवाच च पुनः कृष्णां नृत्यन्नेव सभातले । अपतिर्ह्यसि कल्याणि गच्छ दुर्योधनालयम् ॥ ४०१ ॥ एतेऽखिलाः षण्ढतिलास्तमोऽन्धं प्राप्ता न चैषां पुनरुत्थितिः स्यात् । इति ब्रुवाणोऽनुचकार भीमं तदा हसन्धार्तराष्ट्राश्च सर्वे ॥४०२॥ तदाऽकरोद्भीमसेनः प्रतिज्ञां हन्ताऽस्मि वो ह्यखिलान्सङ्गरेऽहम् । इतीरिते शरणं द्रोणमेव जग्मुः समस्ता धृतराष्ट्रपुत्राः ॥४०३॥ यत्र द्रोणस्तत्र पुत्रस्तत्र भीष्मः कृपस्तथा । न चात्येति गुरून्(रुं) भीम इति तं शरणं ययुः ॥४०४॥ अब्रवीद्धार्तराष्ट्रांश्च द्रोणो विप्रोऽपि सन्नहम् । सपुत्रः सकृपः शस्त्रं ग्रहीष्ये भवतां कृते ॥ ॥ ४०५ ॥ रक्षणे भवतां चैव कुर्यां यत्नं स्वशक्तितः । न तु भीमाद्रक्षितुं वः शक्तः सत्यं ब्रवीम्यहम् ॥ ४०६ ॥ ततो ययुः पाण्डवास्ते सभाया वनाय कृष्णासहिताः सुशूराः । गत्याऽनुचक्रे युवसिंहखेलगतिं भीमं धार्तराष्ट्रोऽपहस्य ॥ ४०७ ॥ दृष्ट्वा सभाया अर्धनिष्क्रान्तदेहो व्यावृत्य भीमः प्राह संरक्तनेत्रः । ऊरुं तवान्यं च रणे बिभेत्स्य इत्युक्त्वाऽसौ निर्गतोऽसत्सभायाः ॥ ४०८ ॥ प्रयातानन्तु तान्कुन्ती प्रययौ पुत्रगृद्धिनी । रोरुद्यमानां विदुरः स्थापयामास तां गृहे ॥४०९॥ प्रणम्य तां ययुः पार्थाः सकृष्णाः शीघ्रगामिनः । युधिष्ठिरोऽवाग्वदनो ययौ न क्रोधचक्षुषा । दहेयं कौरवान्सर्वानिति कारुणिको नृपः ॥ ॥ ४१० ॥ उद्धृत्य बाहू प्रययौ बाहुशाली वृकोदरः । आभ्यामेवाखिलाञ्छत्रूञ्छक्तो हन्तुमहं त्विति ॥ ४११ ॥ अबद्धकेशा प्रययौ द्रौपदी सा सभातलात् । मुक्तकेशा भविष्यन्ति धार्तराष्ट्रस्त्रियस्त्विति ॥ ॥ ४१२ ॥ वर्षन्पांसून्ययौ पार्थ इत्थं शत्रुषु सायकान् । वर्षयामीत्यभिप्रायः परमास्त्रविदां वरः ॥ ४१३ ॥ यमाववाङ्मुखौ यातौ नावयोः शत्रवो मुखम् । पश्यन्त्वस्यामवस्थायां इत्येव धृतचेतसौ ॥४१४॥

SGDF
Sri Gargeshwari Digital Foundation

प्रेतसंस्कारसूक्तानि पठन्धौम्योऽग्रतो ययौ । हतेषु धार्तराष्ट्रेषु मया कार्याः क्रिया इति ॥४१५॥ तानथानुययुः सूता रथैः परिचतुर्दशैः । सूदाः पौरोगवाश्चैव भृत्या ये त्वाप्तकारिणः ॥ ४१६ ॥ ततस्ते जाह्नवीतीरे वने वटमुपाश्रिताः । न्यषीदन्नागतान्दृष्ट्वा समस्तान्पुरवासिनः ॥ ४१७ ॥ ततस्तु ते सर्वजगन्निवासं नारायणं नित्यसमस्तसद्गुणम् । स्वयम्भुशर्वादिभिरर्चितं सदा भक्त्याऽस्मरन्भक्तभवापहं प्रभुम् ॥ ४१८ ॥ (३१९३) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये पाण्डववनप्रवेशो नाम एकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोध्यायः

॥ ॐ ॥ आगन्तुकामान्पुरवासिनस्ते संस्थाप्य कृच्छ्रेण कुरुप्रवीराः । रात्रौ प्रविष्टा गहनं वनं च किर्मीरमासेदुरथो नराशम् ॥ १ ॥ बकानुजोऽसौ निखिलैरजेयो वराद्गिरीशस्य निहन्तुकामः । सदारसोदर्यमभिप्रसस्रे भीमं महावृक्षगिरीन्प्रमुञ्चन् ॥ २ ॥ स संप्रहारं सह तेन कृत्वा भीमो निपात्याशु धरातले तम् । चक्रे मखे सङ्गरनामधेये प्रसह्य नारायणदैवते पशुम् ॥ ३ ॥ निहत्य रक्षोवनमध्यसंस्थास्तदा यतीनामयुतैः समेताः । अशीतिसाहस्रमुनिप्रवीरैर्दशांशयुक्तैः सहिता व्यचिन्तयन् ॥ ४ ॥ विचिन्त्य तेषां भरणाय धर्मजः सम्पूज्य सूर्यस्थितमच्युतं प्रभुम् । दिनेऽक्षयान्नं पिठरं तदाऽऽप रत्नादिदं कामवरान्नदं च ॥ ५ ॥ बभार तेनैव युधिष्ठिरस्तान्प्रत्येकशस्त्रिशतदासदासिकान् । सुवर्णपात्रेषु हि भुञ्जते ये गृहे तदीये बहुकोटिदासके ॥ ६ ॥ सत्सङ्गमाकाङ्क्षिण एव तेऽवसन्पार्थैः सहान्ये च

SGDF
Sri Gargeshwari Digital Foundation

मुनीन्द्रवृन्दाः । शृण्वन्त एभ्यः परमार्थसाराः कथा वदन्तश्च पुरातनास्तथा ॥ ७ ॥ एवं गजानां बहुकोटिवृन्दांस्तथा रथानां च हयांश्च वृन्दशः । विसृज्य रत्नानि नरांश्च वृन्दशो वने विजह्रुर्दिवि देववत्सुखम् ॥ ८ ॥ गवां लक्षं प्रददाति नित्यशः सुवर्णभारांश्च शतं युधिष्ठिरः । सभ्रातृकोऽसौ वनमाप्य शक्रवन्मुमोद विप्रैः सहितो यथासुखम् ॥ ९ ॥

पार्थेषु यातेषु किमत्र कार्यमिति स्म पृष्टो विदुरोऽग्रजेन । आहूय राज्यं प्रतिपादयेति प्राहैनमाहाथ रुषाऽऽम्बिकेयः ॥१०॥ ज्ञातं प्रतीपोऽसि ममात्मजानां न मे त्वया कार्यमिहास्ति किञ्चित् । यथेष्टतस्तिष्ठ वा गच्छ वेति प्रोक्तो ययौ विदुरः पाण्डुपुत्रान् ॥ ११ ॥ तस्मिन्गते भ्रातृवियोगकर्शितः पपात भूमौ सहसैव राजा । संज्ञामवाप्यादिशदाशु संजयं जीवामि चेदाशु ममानयानुजम् ॥ १२ ॥ इतीरितः संजयः पाण्डवेयान्प्राप्यानयद्विदुरं शीघ्रमेव । सोऽप्यागतः क्षिप्रमपास्तदोषो ज्येष्ठं ववन्देऽथ स चैनमाश्लिषत् ॥ १३ ॥ अङ्कं समारोप्य स मूर्ध्नि चैनमाघ्राय लेभे परमां मुदं तदा । क्षत्तारमायान्तमुदीक्ष्य सर्वे ससौबला धार्तराष्ट्रा अमर्षात् । सम्मन्त्र्य हन्तुं पाण्डवानामुतैकं छन्नोपथेनैव ससूतजा ययुः ॥ १४ ॥ विज्ञाय तेषां गमनं समस्तलोकान्तरात्मा परमेश्वरेश्वरः । व्यासोऽभिगम्यावददाम्बिकेयं निवारयाश्वेव सुतं तवेति ॥ १५ ॥ अवाप्य पार्थानयमद्य मृत्युं सहानुबन्धो गमिता ह्यसंशयम् । इतीरिते तेन निवारयेति प्रोक्तो हरिः प्राह न संवदे तैः ॥ १६ ॥ मैत्रेय आयास्यति सोऽपि वाचं शिक्षार्थमेतेष्वभिधास्यतीह । तां चेत्करोत्येष सुतस्तवास्य भद्रं तदा शप्स्यति त्वन्यथा सः ॥ १७ ॥ उक्त्वेति राजानमनन्तशक्तिर्व्यासो ययौ तत्र गतेषु तेषु । सुयोधनाद्येषु हतेषु पार्थैर्भूभारहानिर्न भवेदिति प्रभुः ॥ ॥ १८ ॥ सर्वाश्च चेष्टा भगवन्नियुक्ताः सदा समस्तस्य चितोऽचितश्च ।

SGDF
Sri Gurgeshwari Digital Foundation

तथापि विष्णुर्विनिवारयेत्क्वचिद्वाचा विधत्ते च जनान्विडम्बयन् ॥१९॥ मैत्रेय आगादथ भूपतिश्च पुत्रान्समाहूय सकर्णसौबलान् । सम्पूजयामास मुनिं स चाह दातुं राज्यं पाण्डवान्स प्रशंसन् ॥ २० ॥ विशेषतो भीमबलं शशंस किर्मीरनाशादि वदन्मुनीन्द्रः । श्रुत्वाऽहसंस्तद्धृतराष्ट्रपुत्र आस्फालयामास निजोरुमुग्रः ॥ २१ ॥ शशाप चैनं मुनिरुग्रतेजास्तवोरुभेदाय भवेत्सुयुद्धम् । इत्यूचिवान्धृतराष्ट्रानतोऽपि ययौ न चे(ष्ट)द्राज्यदस्त्वं तथेति ॥ २२ ॥ श्रुत्वा तु किर्मीरवधं स्वपित्रा पृष्टं (ष्ट)क्षत्त्रोक्तं सोऽत्रसद्धार्तराष्ट्रः ।

वने वसन्तोऽथ पृथासुतास्ते वार्तां स्वकीयां प्रार्पयामासुराशु ॥ ॥ २३ ॥ कृष्णे सोऽपि द्रुतमायात्ससत्यः सम्बन्धिनो ये च पाञ्चालमुख्याः । क्रुद्धं कृष्णं धार्तराष्ट्राय पार्थाः क्षमापयामासुरुच्चैर्गृणन्तः ॥ ॥ २४ ॥ गुणांस्तदीयानमितान्प्रणम्य तदा रुदन्ती द्रौपदी चाप पादौ । सा पादयोः पतिता वासुदेवमस्तौत्समस्तप्रभुमात्मतन्त्रम् ॥ ॥२५॥ अचिन्त्यनित्याव्ययपूर्णसद्गुणार्णवैकदेहाखिलदोषदूर । रमाब्जजेरेशसुरेन्द्रपूर्वबृन्दारकाणां सतताभिवन्द्य ॥ २६ ॥ समस्तचेष्टाप्रद सर्वजीवप्रभो विमुक्ताश्रय सर्वसार । इति ब्रुवन्ती सकलानुभूतं जगाद सर्वेशितुरच्युतस्य ॥ २७ ॥ यस्याधिकानुग्रहपात्रभूता स्वयं हि शेषेशविपादिकेभ्यः । श्रुत्वा समस्तं भगवान्प्रतिज्ञां चकार तेषामखिलाश्च योषाः ॥ पतीन्समालिङ्ग्य विमुक्तकेशा भीमाहतान्दर्शये नान्यथेति ॥ ॥ २८ ॥ तां सान्तयित्वा मधुरैः सुवाक्यैर्नारायणो वाचमिमां जगाद ॥ २९ ॥ यदीहाहं स्थितो नैवं भविताऽहं त्वयोधयम् । साल्वराजं दुरात्मानं हतश्चासौ सुपापकृत् ॥ ३० ॥ सन्निधानेऽथ दूरे वा कालव्यवहितेऽपि वा । स्वभावाद्वा व्यवहिते वस्तुव्यवहितेऽपि वा ॥ ३१ ॥ नाशक्तिर्विद्यते विष्णोर्नित्याव्यवहितत्वतः । तथापि नरलोकस्य करोत्यनुकृतिं प्रभुः ॥३२॥ दुष्टानां दोषवृद्ध्यर्थं भीमादीनां

SGDF
Sri Gargeshwari Digital Foundation

गुणोन्नतेः । युधिष्ठिरेऽतिवृद्धं तु राजसूयादिसम्भवम् ॥ ३३ ॥ धर्मं च सङ्क्रामयितुं कृष्णायामनुजेषु च । योग्यताक्रमतो विष्णुरिच्छयेत्थमचीक्लृपत् ॥ ३४ ॥ एधमानद्विडित्येव विष्णोर्नाम हि वैदिकम् ॥ ॥ ३५ ॥ स्वयोग्यताया अधिकं धर्मज्ञानादिजं फलम् । भीष्मद्रोणाम्बिकेयादेः पार्थेष्वेव निधापितुम् ॥ ३६ ॥ पुनश्च पापवृद्ध्यर्थमजो दुर्योधनादिषु । व्यासोऽम्बिकासुतं प्राह पार्था मेऽभ्यधिकं प्रियाः ॥ ॥३७॥ तेषां प्रवासनं चैव प्रियं न मम सर्वथा । इति दुर्योधनादीनां पापवृद्ध्यर्थमेव सः ॥ प्रिया इत्येवकथनात्पाण्डवानां शुभोन्नतेः ॥३८॥ गुरुत्वाद्भीमसेनस्य क्षमा द्यूतेऽर्जुनादिनाम् । नातिधर्मस्वरूपोऽत्र धर्मो भीमे निरौपधः ॥३९॥ द्रौपद्या अप्यतिक्लेशात्क्षमा धर्मो महानभूत् । सा हि भीममनो वेद न कार्यः शाप इत्यलम् ॥ ४० ॥ तस्माद्यथायोग्यतया हरिणा धर्मवर्धनम् ! कृतं तत्रासन्निधानं कारणं केशवोऽब्रवीत् ॥ ४१ ॥ साल्वं श्रुत्वा समायान्तं रौक्मिणेयादयो मया । प्रस्थापिता हि भवतां सकाशे ते ययुः पुरीम् ॥ तदा साल्वोऽपि सौभेन द्वारकामर्दयद्भृशम् ॥ ४२ ॥ प्रद्युम्न आशु निरगादथ सर्वसैन्यैरन्यैश्च यादवगणैः सहितोऽनुजैश्च । साल्वोऽवगम्य तनयं मम तद्विमानात्पापोऽवरुह्य रथमारुहदत्र योद्धुम् ॥४३॥ कृत्वा सुयुद्धममुना मम पुत्रकोऽसावस्त्राणि तस्य विनिवार्य महास्त्रजालैः । दत्तं मया शरममोघमथाददे तं हन्तुं नृपं कृतमतिस्त्वशृणोद्वचः खे ॥ ४४ ॥ नारायणेन हि पुरा मनसाभिक्लृप्तं कृष्णावतारमुपगम्य निहन्मि साल्वम् । इत्येव तेन हरिणापि स भार्गवेण विद्रावितो न निहतः स्वमनोऽनुसारात् ॥ ४५ ॥ वध्यस्त्वया नहि ततोऽयमयं च बाणश्चक्रायुधस्य दयितो नितराममोघः । मा मुञ्च तेन तमिमं विनिवर्तयेऽहं साल्वं हृदिस्थित इतीरितमीरणेन ॥ ॥ ४६ ॥ श्रुत्वा वचः स पवनस्य शरं त्वमोघं सञ्जह आशु स च साल्वपतिः स्वसौभम् । आरुह्य बालकलहेन किमत्र कार्यं कृष्णेन सङ्गर

SGDF
Sri Gargeshwari Digital Foundation

इति प्रययौ स्वदेशम् ॥ ४७ ॥ प्रद्युम्नसाम्बगदसारणचारुदेष्णाः सेनां निहत्य सह मन्त्रिगणैस्तदीयाम् । आह्लादिनः स्वपुरमाययुरप्यहं च तत्रागमं सपदि तैः श्रुतवानशेषम् ॥ ४८ ॥ यस्मिञ्छरे करगते विजयो ध्रुवः स्यान्मत्तेजसा तदनुसङ्ग्रहणात्सुतान्मे । यातं निशम्य रिपुमात्मपुरीं च भग्नां दृष्ट्वैव तेन तदनुव्रजनं कृतं मे ॥ ४९ ॥ तं सागरोपरिगसौभगतं निशाम्य मुक्ते च तेन मयि शस्त्रमहास्त्रवर्षे । तं संनिवार्य च मया शरपूगविद्धो मायां युयोज मयि पापतमः स साल्वः ॥ ५० ॥ ताः क्रीडया क्षणमहं समरे निशाम्य ज्ञानास्त्रतः प्रतिविधूय बहूंश्च दैत्यान् । हत्वाऽऽशु तं च गिरिवर्षिणमाशु सौभं वार्धौ न्यपातयमरीन्द्रविभिन्नबन्धम् ॥ ५१ ॥ तं स्यन्दने स्थितमथो विभुजं विधाय बाणेन तद्रथवरं गदया विभिद्य । चक्रेण तस्य च शिरो विनिकृत्त्य धातृशर्वादिभिः प्रतिनुतः स्वपुरीमगां च ॥ ५२ ॥ तस्मादिदं व्यसनमास हि विप्रकर्षान्मे कार्यतस्त्विवति निगद्य पुनश्च पार्थान् । कृष्णां च सान्त्वयितुमत्र दिनान्युवास सत्या च सोमकसुतामनुसान्त्वयन्ती ॥ ५३ ॥ पाण्डवानां च या भार्याः पुत्रा अपि च सर्वशः । अन्वेव पाण्डवान्याता वनमत्रैव संस्थिताः ॥ ॥ ५४ ॥ धृष्टद्युम्नस्ततः कृष्णां सान्त्वयित्वैव केशवम् । प्रणम्य समनुज्ञातो भागिनेयैः पुरं ययौ ॥ ५५ ॥ धृष्टकेतुश्च भगिनीं काशिराजः सुतामपि । पुरं ययतुरादाय कुन्त्यैवान्याः सह स्थिताः ॥ ॥ ५६ ॥ पार्वती नकुलस्यासीद्भार्या पूर्वं तिलोत्तमा । पूर्वोक्ते चैव यमयोर्भार्ये कुन्त्या निवारिताः ॥ ५७ ॥ सुभद्रामभिमन्युं च रथमारोप्य केशवः । पाण्डवानभ्यनुज्ञाय सभार्यः स्वपुरं ययौ ॥ ५८ ॥ कश्चित्कालं द्रौपदेया उष्य पाञ्चालके पुरे । ययुर्द्वारावतीमेव तत्रोषुः कृष्णपालिताः ॥ ५९ ॥

ततः परं धर्मराजो निर्विण्णः स्वकृतेन ह । भ्रातृभार्यापदे कृष्णां

SGDF
Sri Gurgeshwari Digital Foundation

स्थापयामास सर्वदा ॥ ६० ॥ ऊषुर्वने च ते पार्था मुनिशेषान्नभोजिनः ।
भुक्तवत्स्वेवानुजेषु भुङ्क्ते राजा युधिष्ठिरः ॥ ६१ ॥ अलङ्घ्यत्वात्तदा-
ज्ञाया अनुजाः पूर्वभोजिनः । तस्यानन्तरमेवैका भुङ्क्ते सा पार्षतात्मजा ॥
॥ ६२ ॥ एवं सदा विष्णुपरायणानां तत्त्वार्पणान्नैकभुजां प्रयातः ।
संवत्सरस्तत्र जगाद कृष्णा भीमाज्ञया धर्मराजं सुवेत्त्री ॥६३॥ अति-
मार्दवयुक्तत्वाद्धर्मराजश्चतुर्दशे । अपि वर्षे गुरुभयाद्राज्यं नेच्छेदिति
प्रभुः । मारुतिः प्रेषयामास कृष्णां प्रस्तावहेतवे ॥ ६४ ॥ क्षमा
सर्वत्र धर्मो न पापहेतुश्च दुर्जने । राज्ञां सामर्थ्ययुक्तानामिति संस्थाप्य
शाश्वतः ॥ ६५ ॥ हत्वा चतुर्दशे वर्षे धार्तराष्ट्रानराज्यदान् । कर्तुं
राज्यं पुरो गन्ता भवानीत्यग्रजेन ह ॥ ६६ ॥ कारयन्सत्यशपथं
विवादस्य क्रमेच्छया । आदिशत्प्रथमं कृष्णां भीमः सा नृपमब्रवीत् ॥
॥ ६७ ॥ नैव क्षमा कुजनतासु नृपस्य धर्मस्तां त्वं वृथैव धृतवानसि
सर्वकालम् । इत्युक्त आह नृपतिः परमा क्षमैव सर्वत्र तद्विधृतमेव
जगत्समस्तम् ॥ ६८ ॥ कर्ता च सर्वजगतः सुखदुःखयोर्हि नारायण-
स्तदनु दत्तमिहास्य सर्वम् । तस्मान्न कोपविषयोऽस्ति कुतश्च कश्चित्त-
स्मात्क्षमैव सकलेषु पुरोऽस्य धर्मः ॥ ६९ ॥ इत्युक्तवन्तं नृपमाह पार्षती
यदि क्षमा सर्वनरेषु धर्मः । राज्ञा न कृत्यं न च लोकयात्रा भवे-
ज्जगत्कापुरुषैर्विनश्येत् ॥ ७० ॥ सत्यं च विष्णुः सकलप्रवर्तको रमा-
विरिंचेशपुरःसराश्च । काष्ठादिवत्तद्वशगाः समस्तास्तथापि न व्यर्थता
पौरुषस्य ॥ ७१ ॥ तदाज्ञया पुरुषश्रेष्टमानश्चेष्टानुसारेण शुभाशुभस्य ।
भोक्ता न तच्चेष्टितमन्यथा भवेत्कर्ता तस्मात्पुरुषोऽप्यस्य वश्यः ॥ ७२ ॥
वृथा यदि स्यात्पौरुषं कस्य हेतोर्विधिर्निषेधश्च समस्तवेदगः । विधे-
र्निषेधस्य च नैव गोचरः पुमान्यदि स्याद्भवतो हि तौ हरेः ॥ ७३ ॥
तेनैव लेपश्च भवेदमुष्य पुण्येन पापेन च नैव चासौ । लिप्येत ताभ्यां
परमः स्वतन्त्रः कर्ता ततः पुरुषोऽप्यस्य वश्यः ॥ ७४ ॥ इतीरितो

SGDF
Sri Gargeshwari Digital Foundation

धर्मजः कृष्णयैव निरुत्तरत्वं गमितस्त्वभर्त्सयत् । कुतर्कमाश्रित्य हरेरपि त्वमस्वातन्त्र्यं साधयसीति चोक्त्वा ॥ ७५ ॥ छलेन तेन प्रतिभर्त्सिता सा क्षमापयामास नृपं यतः स्त्री । वाचालता नातितरां हि शोभते स्त्रीणां ततः प्राह वृकोदरस्तम् ॥ ७६ ॥

राजन्विष्णुः सर्वकर्ता न चान्यस्तत्तन्त्रमेवान्यदसौ स्वतन्त्रः । तथापि पुंसा विहितं स्वकर्म कार्यं त्याज्यं चान्यदत्यन्तयत्नात् ॥ ७७ ॥ प्रत्यक्षमेतत्पुरुषस्य कर्म तेनानुमेया प्रेरणा केशवस्य । स्वकर्म कृत्वा विहितं हि विष्णुना तत्प्रेरणेत्येव बुधोऽनु मन्यते ॥ ७८ ॥ तेनैति सम्यग्गमितस्य विष्णोर्जनोऽशुभो दैवमित्येव मत्वा । हित्वा स्वकं कर्म गतिं च तामसीं प्रयाति तस्मात्कार्यमेव स्वकर्म ॥ ७९ ॥ ज्ञातव्यं चैवास्य विष्णोर्वशत्वं कर्तव्यं चैवात्मनः कार्यकर्म । प्रत्यक्षैषा कर्तृता जीवसंस्था तथाऽऽगमादनुमानाच्च सर्वम् ॥ ८० ॥ विष्णोर्वशे तन्न हेयं द्वयं च जानन्विद्वान्कुरुते कार्यकर्म । तत्प्रेरकं विष्णुमेवाभिजानन्भवेत्प्रमाणत्रितयानुगामी ॥ ८१ ॥ पूर्णं प्रमाणं तत्त्रयं चाविरोधेनैकत्रस्थं तत्त्रयं चाविरोधि । पृथङ्मध्यं चाप्रमाणं विरोधि स्यात्तत्तस्मात्त्रयमेकत्र कार्यम् ॥ ८२ ॥ अज्ञः प्रत्यक्षं त्वपहायैव दैवं मत्वा कर्तृ स्वात्मकर्म प्रजह्यात् । विद्वाञ्जीवं विष्णुवशे विदित्वा करोति कर्तव्यमजस्रमेव ॥ ॥८३॥ स्वभावाख्या योग्यता या हठाख्या याऽनादिसिद्धा सर्वजीवेषु नित्या। सा कारणं प्रथमं तु द्वितीयमनादिकर्मैव तथा तृतीयः ॥८४॥ जीवप्रयत्नः पौरुषाख्यस्तदेतत्त्रयं विष्णोर्वशगं सर्वदैव । स कस्यचिन्न वशे वासुदेवः परात्परः परमोऽसौ स्वतन्त्रः ॥ ८५ ॥ हठश्चासौ तारतम्यस्थितो हि ब्रह्माणमारभ्य कलिश्च यावत् । हठाच्च कर्माणि भवन्ति कर्मजो यत्नो यतो हठकर्मप्रयोक्ता ॥ ८६ ॥ विना यत्नं न हठो नापि कर्म फलप्रदो वासुदेवोऽखिलस्य । स्वातन्त्र्यशक्तेर्विनियामको हि तथाप्येतान्सोऽप्यपेक्ष्यैव युङ्क्ते ॥ ८७ ॥ एतानपेक्ष्यैव फलं

तिम

SGDF
Sri Gargeshwari Digital Foundation

ददानीत्यस्यैव सङ्कल्प इति स्वतन्त्रता । नास्यापगच्छेत्स हि सर्वशक्ति-
र्नाशक्तता क्वचिदस्य प्रभुत्वात् ॥ ८८ ॥ तस्मात्कार्यं तेन क्लृप्तं स्वकर्म
तत्पूजार्थं तेन तत्प्राप्तिरेव । अतोऽन्यथा निरयः सर्वथा स्यात्स्वकर्म
विप्रस्य जपोपदेशौ ॥ ८९ ॥ विष्णोर्मुखाद्विप्रजातिः प्रवृत्ता मुखोत्थितं
कर्म तेनास्य सोऽदात् ॥९०॥ बाह्वोर्जातः क्षत्रियस्तेन बाह्वोः कर्मास्य
पापप्रतिवारणं हि । प्रवर्तनं साधु धर्मस्य चैव मुखस्य बाह्वोश्चाति-
सामीप्यतोऽस्य ॥९१॥ जपोपदेशौ क्षत्रियस्यापि विष्णुश्चक्रे धर्मौ यज्ञ-
कर्मापि विप्रे । वैश्यो यस्मादूरुजस्तेन तस्य प्रजावृद्धिस्तज्जकर्मैव धर्मः ॥
॥९२॥ तत्सादृश्यात्स्थावराणां च वृद्धिः करोरूर्वोः संनिकृष्टत्वहेतोः ।
वार्तात्मकं कर्म धर्मं चकार विष्णुस्तस्यैवांघ्रिजः शूद्र उक्तः ॥ ९३ ॥
गतिप्रधानं कर्म शुश्रूषणाख्यं सादृश्यतो हस्तपदोस्तथैव । हस्तोद्भवं
कर्म तस्यापि धर्मः सन्तानवृद्धिश्च समीपगत्वात् ॥ ९४ ॥ भुजावुरो
हृदयं यद्बलस्य ज्ञानस्य च स्थानमतो नृपाणाम् । बलं ज्ञानं चोभयं
धर्म उक्तः पाणौ कृतीनां कौशलं केवलं हि । तस्मात्पाण्योरूरुपदोरुप-
स्थितेर्विट्शूद्रकौ कर्मणां कौशलेतौ ॥ ९५ ॥ प्राधान्यतो धर्मविशेष
एष सामान्यतः सर्व एवाखिलानाम् । वयं हि देवास्तेन सर्वे हि कर्म
प्रायेण नो धर्मतामेति शश्वत् ॥ ९६ ॥ एतैर्धर्मैर्विष्णुना पूर्वक्लृप्तैः
सर्वैर्वर्णैर्विष्णुरेवाभिपूज्यः । तद्भक्तिरेवाखिलानां च धर्मो यथायोग्यं
ज्ञानमस्यापि पूजा ॥ ९७ ॥ पिता गुरुः परमं दैवतं च विष्णुः
सर्वेषां तेन पूज्यः स एव । तद्भक्तत्वाद्देवताश्चाभिपूज्या विशेषतस्तेषु
येऽत्यन्तभक्ताः ॥ ९८ ॥ संपूजितो वासुदेवः स मुक्तिं दद्यादेवा- तो
पूजितो दुःखमेव । स्वतन्त्रत्वात्सुखदुःखप्रदोऽसौ नान्यः स्वतन्त्रस्त-
द्वशा यत्समस्ताः ॥ ९९ ॥ स्वतन्त्रत्वात्सुखसज्ज्ञानशक्तिपूर्वैर्गुणैः पूर्ण
एषोऽखिलैश्च । स्वतन्त्रत्वात्सर्वदोषोज्झितश्च निःसीमशक्तिर्हि यतः
स्वतन्त्रः ॥ १०० ॥ दोषास्पृष्टौ गुणपूर्तौ च शक्तिर्निःसीमत्वाद्विद्यते

SGDF
Sri Gargeshwari Digital Foundation

तस्य यस्मात् । एवं गुणैरखिलैश्चापि पूर्णो नारायणः पूज्यतमः स्वधर्मैः ॥
॥ १०१ ॥ अस्माकं यत्तेन नातिक्षमैव धर्मो दुष्टानां वारणं ह्येव
कार्यं । हन्याद्दुष्टान्यः क्षत्रियः क्षत्रियांश्च विशेषतो युद्धगतान्स्मरन्हरिम् ॥
॥ १०२ ॥ स्वबाहुवीर्येण च तस्य बाहू चैतन्यमात्रौ भवतः सदेहौ ।
पापाधिकांश्चैव बलाधिकांश्च हत्वा मुक्तावधिकानन्दवृद्धिः ॥ १०३ ॥
प्रीतिश्च विष्णोः परमैव तत्र तस्माद्धन्तव्याः पापिनः सर्वथैव । ये
त्वक्षधूर्ता ग्रहणं गता वा पापास्तेऽन्यैर्घातनीयाः स्वदोर्भ्याम् । राजानं
वा राजपुत्रं तथैव राजानुजं चाभियातं निहन्यात् ॥ १०४ ॥ राज्ञः
पुत्रोऽप्यकृतोद्वाहको यः स घातनीयो न स्वयं वध्य एव । क्रूरं
चान्यद्धर्मयुक्तं परैस्तत्प्रसाधनीयं क्षत्रियैर्न स्वकार्यम् ॥ १०५ ॥ एवं
धर्मो विहितो वेद एव वाक्यं विष्णोः पञ्चरात्रेषु तादृक् । अक्षद्यूतं
निकृतिः पापमेव कृतं त्वया गर्हितं सौबलेन ॥ १०६ ॥ न कुत्र-
चिद्विधिरस्यास्ति तेन न तद्दत्तं द्यूतहृतं वदन्ति । भीतेन दत्तं द्यूतदत्तं
तथैव दत्तं कामिन्यै पुनराहार्यमेव ॥ १०७ ॥ एवं धर्मः शाश्वतो
वैदिको हि द्यूते स्त्रियां नाल्पमाहार्यमाहुः । यद्येषां वै भोग्यमल्पं
तदीयं भोगेन तद्बन्धुभिस्तच्च हार्यम् ॥ १०८ ॥ निवारणे पुरुषस्य
त्वशक्तौ तद्राज्यं नः पुनराहार्यमेव । त्वं धर्मनिष्ठश्चाग्रजश्चेति राज-
न्नृतेऽनुज्ञां न मया तत्कृतं च ॥ १०९ ॥ दाताऽस्यनुज्ञां यदि
तान्निहत्य त्वय्येव राज्यं स्थापयाम्यद्य सम्यक् । सत्यं पापेष्वपि कर्तुं
यदीच्छा तथापि मासा द्वादश नः प्रयाताः ॥ ११० ॥ वेदप्रमाण्या-
द्वत्सरास्ते हि मासैः सहस्राब्दं सत्रमुक्तं नराणाम् । अज्ञातमेकं
मासमुष्याथ शत्रून्निहत्य राज्यं प्रतिपाद(ल)यामः ॥ १११ ॥ मा
मित्राणां तापकस्त्वं भवेथास्तथाऽमित्राणां नन्दकश्चैव राजन् । ज्वल-
स्वारीणां मूर्ध्नि मित्राणि नित्यमाह्लादयन्वासुदेवं भजस्व ॥ ११२ ॥
स्वतन्त्रत्वं वासुदेवस्य सम्यक्प्रत्यक्षतो दृश्यते ह्यद्य राजन् । यस्मात्कृष्णो

SGDF
Sri Gangeshwari Digital Foundation

व्यजयच्छङ्करादीञ्जरासुतादीन्कादिवैरैरजेयान् ॥ ११३ ॥ ब्रह्मादीनां प्रकृतेस्तद्वशत्वं दृष्टं हि नो बहुशो व्यासदेहे। पाराशर्यो दिव्यदृष्टिं प्रदाय स्वातन्त्र्यं नोऽदर्शयत्सर्वं(दर्शयामास)लोके ॥११४॥ तस्माद्राजन्नभिनिर्याहि शत्रून्हन्तुं सर्वान्भोक्तुमेवाधिराज्यम्। एवं च ते कीर्तिधर्मौ महान्तौ प्राप्यौ राजन्वासुदेवप्रसादात् ॥ ११५ ॥

एवमुक्तोऽब्रवीद्भीमं धर्मपुत्रो युधिष्ठिरः। त्रयोदशाब्दस्यान्तेऽहं कुर्यामेव त्वदीरितम् ॥११६॥ सत्यमेतन्न सन्देहः सत्येनात्मानमालभे। लोकापवादभीरुं मां नातोऽन्यद्वक्तुमर्हसि ॥११७॥ तुदसे चा(ना)तिवाचा मां यद्येवं भीम मां (मा) वदेः। तदैव मेऽत्ययः कार्यो हन्तव्याश्चैव शत्रवः। नैतादृशैरिदानीं तु वाक्यैर्बाधितुमर्हसि ॥११८॥ भीष्मद्रोणादयोऽस्त्रज्ञा निवार्याश्च कथं युधि। पूज्यास्ते बाहुयुद्धेन न निवार्याः कथञ्चन ॥ ॥११९॥ अस्त्राणि जानन्नपि हि प्रयोजयसि न क्वचित्। तस्मात्तदैव गन्तव्यं विज्ञातास्त्रे धनञ्जये ॥ १२० ॥ इत्युक्तो भीमसेनस्तु स्नेहभङ्गभयात्ततः। नोवाच किञ्चिद्वचनं स्वाभिप्रेतमवाप्य च ॥ १२१ ॥ अभिप्रायो हि भीमस्य निश्चयेन त्रयोदशे। युधिष्ठिरस्य राज्यार्थे गमनार्थे प्रतिश्रवः ॥१२२॥ अन्यथाऽतिमृदुत्वात्स न गच्छेद्भिन्नधीः परैः। कृतकृत्ये तदा भीमे स्थिते धर्मात्मजो हि सः ॥ १२३ ॥ भीष्मद्रोणादिविजयः कथं स्यादिति चिन्तयन्। निवारणं गुरूणां हि भीम इच्छति न क्वचित् ॥ १२४ ॥ तस्मात्ते ह्यर्जुनेनैव निवार्या इत्यचिन्तयत्। आपद्येव हि भीमस्तान्निवारयति नान्यथा ॥ १२५ ॥ एवं चिन्तासमाविष्टं विज्ञायैव युधिष्ठिरम्। सर्वज्ञः सर्वशक्तिश्च कृष्णद्वैपायनोऽगमत् ॥ नृपतिं बोधयामास चिन्ताव्याकुलमानसम् ॥१२६॥ इमं मन्त्रं वदिष्यामि येन जेष्यति फल्गुनः। भीष्मद्रोणादिकान्सर्वांस्तं त्वं वद धनञ्जये ॥ १२७ ॥ इत्युक्त्वैवावदन्मन्त्रं सर्वदैवतदृष्टिदम्। न स्वयं ह्यवदत्पार्थे फलाधिक्यं यतो भवेत् ॥ १२८ ॥ भीष्मद्रोणादि-

SGDF
Sri Gangeshwari Digital Foundation

विजय एतावद्वीर्यमेव हि । अलं नातोऽधिकं कार्यमेतावद्योग्यमस्य च । फल्गुनस्येति भगवान्न स्वयं ह्यवदन्मनुम् ॥ १२९ ॥ गते व्यासे भगवति सर्वज्ञे सर्वकर्तरि । धर्मराजोऽवद(दिश)न्मन्त्रं फल्गुनाय रहस्यमुम् ॥ १३० ॥

तमाप्य फल्गुनो मन्त्रं ययौ ज्येष्ठौ प्रणम्य च ॥ १३१ ॥ यमजौ च समाश्लिष्य गिरिमेवेन्द्रकीलकम् ॥ १३२ ॥ तपश्चचार तत्रस्थः शङ्करस्थं हरिं स्मरन् । षण्मासेऽतिगतेऽपश्यन्मूकं नामासुरं गिरौ ॥ १३३ ॥ वराहरूपमायान्तं वधार्थं फल्गुनस्य च । तं ज्ञात्वा फल्गुनो वीरः सज्जं कृत्वा च गाण्डिवम् ॥ १३४ ॥ चिक्षेप वज्रसमितांस्तत्काये सायकान्बहून् ॥ १३५ ॥ किरातरूपस्तमनु सभार्यश्च त्रियम्बकः । स ममार हतस्ताभ्यां दानवः पापचेतनः ॥ १३६ ॥ तेनोक्तोऽसौ मयैवायं वराहोऽनुगतोऽद्य हि । तमविध्यो यतस्त्वं हि तद्युध्यस्व मया सह ॥ १३७ ॥ इत्युक्तः फल्गुनः प्राह तिष्ठ तिष्ठ न मोक्ष्यसे । इत्युक्त्वा तावुभौ युद्धं चक्रतुः पुरुषर्षभौ ॥ १३८ ॥ तत्राखिलानि शस्त्राणि फल्गुनस्याग्रसच्छिवः । ततोऽर्जुनस्तु गाण्डीवं समादायाभ्यताडयत् ॥ १३९ ॥ तदप्यग्रसदेवासौ प्रहसन्गिरिशस्तदा । बाहुयुद्धं ततस्त्वासीत्तयोः पुरुषसिंहयोः ॥ १४० ॥ पिण्डीकृत्य ततो रुद्रश्चिक्षेप च धनञ्जयम् । मूर्छामवाप महतीं फल्गुनो रुद्रपीडितः ॥ ॥ १४१ ॥ पूर्वं सम्प्रार्थयामास शङ्करो गरुडध्वजम् । अवराणां वरं मत्तो येषां त्वं सम्प्रयच्छसि ॥ १४२ ॥ अजेयत्वं प्रसादात्ते विजेयाः स्युर्मयाऽपि ते । इत्युक्तः प्रददौ विष्णुरुमाधीशाय तं वरम् ॥ तेनाजयच्छ्वेतवाहं गिरिशो रणमध्यगम् ॥१४३॥ केवलान्वैष्णवान्मन्त्रान्व्यासः पार्थाय नो ददौ । एतावताऽलं भीष्मादेर्जयार्थमिति चिद्घनः ॥१४४॥ केवलैर्वैष्णवैर्मन्त्रैः स्वदत्तैर्विजयावहैः । अतिवृद्धस्य पार्थस्य दर्पः स्यादिति चिन्तयन् (त्यचिन्तयत्) ॥ १४५ ॥ पार्थः संज्ञामवाप्याथ जयार्थ्या-

SGDF
Sri Gargeshwari Digital Foundation

राधयच्छिवम् । व्यासोदितेन मन्त्रेण तानि पुष्पाणि तच्छिरः ॥१४६॥
आरुहन्स तु तं ज्ञात्वा रुद्र इत्येव फल्गुनः । नमश्चक्रे ततः प्रादादस्त्रं
पाशुपतं शिवः ॥ १४७ ॥ अस्त्रं तद्विष्णुदैवत्यं साधितं शङ्करेण यत् ।
तस्मात्पाशुपतं नाम स्वान्यस्त्राण्यपरे सुराः ॥ ददुस्तदैव पार्थाय सर्वे
प्रत्यक्षगोचराः ॥ १४८ ॥ इन्द्रोऽर्जुनं समागम्य प्राह प्रीतोऽस्मि
तेऽनघ ॥ १४९ ॥ रुद्रदेहस्थितं ब्रह्म विष्ण्वाख्यं तोषितं त्वया ।
तेन लोकं ममागच्छ प्रेषयामि रथं तव ॥ १५० ॥ इत्युक्त्वा प्रययया-
विन्द्रस्तद्रथेनैव मातलिः । आयात्पार्थस्तमारुह्य ययौ तातनिकेतनम् ॥
॥ १५१ ॥ पूजितो दैवतैः सर्वैरिन्द्रेणाभिनिवेशितः । तेन सार्ध-
मुपासीदत्तस्मिन्नैन्द्रे वरासने ॥ १५२ ॥ प्रीत्या समाश्लिष्य कुरुप्रवीरं
शक्रो द्वितीयां तनुमात्मनः सः । ईक्षन्मुखं तस्य मुमोद सोऽपि ह्युवास
तस्मिन्वत्सरान्पञ्च लोके ॥ १५३ ॥ अस्त्राणि तस्मा अदिशच्च वासवो
महान्ति दिव्यानि तदोर्वशी तम् । सम्प्राप्य भावेन तु मानुषेण माता
कुलस्येति निवारिताऽभूत् ॥१५४॥ षण्ढो भवेत्येव तयाऽभिशप्ते पार्थे
शक्रोऽनुग्रहं तस्य चादात् । संवत्सरं षण्ढरूपी चरस्व न षण्ढता ते
भवती(विते)ति धृष्णुः ॥ १५५ ॥ ततोऽवसत्पाण्डवेयो गान्धर्वं
वेदमभ्यसन् । गन्धर्वाच्चित्रसेनाच्च तथाऽस्त्राणि सुरेश्वरात् ॥ १५६ ॥
सुभद्रयाऽभिमन्युना सह स्वकां पुरीं गतः । जनार्दनोऽत्र
संवसन्कदाचिदित्थमैक्षत ॥ १५७ ॥ मया वरो हिं शम्भवे प्रदत्त
आस पूर्वतः । वरं गृहीष्य एव ते सकाशतो विमोहयन् ॥ १५८ ॥
'त्वामाराध्य तथा शम्भो गृहीष्यामि वरं सदा । द्वापरादौ युगे भूत्वा
कलया मानुषादिषु ॥१५९॥ स्वागमैः कल्पितैस्त्वं च जनान्मद्विमुखा-
न्कुरु । मां च गोपय येन स्यात्सृष्टिरेषोत्तराधरा' ॥ १६० ॥ इति
वाक्यमृतं कर्तुमभिप्रायं विजज्ञुषी । प्रीत्यर्थं वासुदेवस्य रुक्मिणी
वाक्यमब्रवीत् ॥१६१॥ जातेऽपि पुत्रे पुत्रार्थं सा हि वेद मनोगतम् ।

SGDF
Sri Gargeshwari Digital Foundation

पुत्रो मे बलवान्देव स्यात्सर्वास्त्रविदुत्तमः ॥ १६२ ॥ इत्युक्तो भगवान्देव्या सम्मोहाय सुरद्विषाम् । ययौ सुपर्णमारुह्य स्वीयं बदरिकाश्रमम् ॥१६३॥ 'एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ १६४ ॥ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज । प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु ॥ १६५ ॥ अहं त्वां पूजयिष्यामि लोकसम्मोहनोत्सुकः । तमोऽसुरा नान्यथा हि यान्तीत्येतन्मतं मम' ॥ १६६ ॥ इत्युक्तं वचनं पूर्वं केशवेन शिवाय यत् । तत्सत्यं कर्तुमायान्तं(तं) कृष्णं बदरिकाश्रमम् ॥ सर्वज्ञा मुनयः सर्वे पूजयाश्चक्रिरे प्रभुम् ॥१६७॥ रात्रौ कृष्णे मुनिमध्ये प्रविष्टे घण्टाकर्णः कर्णनामा पिशाचौ । समायातां गिरिशेन प्रदिष्टौ कृष्णं द्रष्टुं द्वारकां गन्तुकामौ ॥ १६८ ॥ तौ दृष्ट्वा मुनिमध्यस्थं केशवं तदबोधतः । कृत्वा स्वजातिचेष्टाश्च ध्यानेनैनमपश्यताम् ॥ १६९ ॥ दृष्ट्वा हृदि स्थितं तौ तु कौतूहलसमन्वितौ । स्तुत्वा भक्त्या प्रणामं च बहुशश्चक्रतुः शुभौ ॥ १७० ॥ तयोः प्रसन्नो भगवान्स्पृष्ट्वा गन्धर्वसत्तमौ । चकार क्षणमात्रेण दिव्यरूपस्वरान्वितौ ॥ १७१ ॥ ताभ्यां पुनर्नृत्तगीतसंस्तवैः पूजितः प्रभुः । ययौ कैलासमद्रीशं चकारेव तपोऽत्र च ॥ १७२ ॥ स्वीयानेव गुणान्विष्णुर्भुञ्जन्नित्येन शोचिषा । शार्वं तपः करोतीव मोहयामास दुर्जनान् ॥ १७३ ॥ पूर्वं तेनोदितं यत्तल्लोकान्मोहयताञ्जसा । शर्वं प्रति तवाहं तु कुर्यां द्वादशवत्सरम् ॥ १७४ ॥ तपोऽसुराणां मोहाय सुराः सन्तु गतज्वराः । इति तस्मात्तदा कृष्ण एकाहेन बृहस्पतिम् ॥ ॥ १७५ ॥ स्वाज्ञया चारयामास क्षिप्रं द्वादशराशिषु । द्वादशाब्दमभूत्तेन तदहः केशवाज्ञया ॥ १७६ ॥ एकस्मिन्नह्नि भगवान्राशिं राशिं च वत्सरम् । कल्पयित्वोपवासादीन्मनसा नियमानपि ॥१७७॥ मासव्रतं सार्धशतश्वासकालैरकल्पयत् । मनसैव स्वभक्तानां द्वादशाब्द-

SGDF
Sri Gargeshwari Digital Foundation

व्रताप्तये ॥ १७८ ॥ तत्रास्य गरुडाद्यास्तु परिचर्यां स्वपार्षदाः । चक्रुर्होमादिकाश्चैव क्रियाश्चक्रे जनार्दनः ॥ स्वात्मानं प्रति पापानां शिवायेति प्रकाशयन् ॥ १७९ ॥ एवं स्थितं तमरविन्ददलायताक्षं ब्रह्मेन्द्रपूर्वसुरयोगिवरप्रजेशाः । अभ्याययुः पितृमुनीन्द्रगणैः समेता गन्धर्वसिद्धवरयक्षविहङ्गमाद्याः ॥१८०॥ शर्वोऽपि सर्वसुरदैवतमात्मदैवमायान्तमात्मगृहसन्निधिमाश्ववेत्य । अभ्याययौ निजगणैः सहितः सभार्यो भक्त्याऽतिसम्भ्रमगृहीतसमर्हणाग्र्यः ॥ १८१ ॥ अभ्येत्य पादयुगलं जगदेकभर्तुः कृष्णस्य भक्तिभरितः शिरसा ननाम । चक्रे स्तुतिं च परमां परमस्य पूर्णषाड्गुण्यविग्रहविदोषमहाविभूतेः ॥१८२॥ कृष्णोऽप्ययोग्यजनमोहनमेव वाञ्छंस्तुष्टाव रुद्रहृदिगं निजमेव रूपम् । रुद्रो निशम्य तदुवाच सुरान्समस्तान्सत्यं वदामि शृणुताद्य वचो मदीयम् ॥ १८३ ॥ विष्णुः समस्तसुजनैः परमोऽभ्युपेयस्तत्प्राप्तयेऽहमनिलोऽथ रमाऽभ्युपेयाः । एष ह्यशेषनिगमार्थविनिर्णयोऽर्थो यद्विष्णुरेव परमो मम चाब्जयोनेः ॥ १८४ ॥ अव्यक्ततः सकलजीवगणाच्च नित्यमित्येव निश्चय उतैतदनुस्मरध्वम् । इत्युक्तवत्यखिलदेवगणा गिरीशे कृष्णं प्रणेमुरतिवृद्धरमेशभक्त्या ॥१८५॥ उक्तैरन्यैश्च गिरिशवाक्यैस्तत्त्वविनिर्णयैः । कृष्णस्यैव गुणाख्यानैः पुनरिन्द्रादिदेवताः ॥ ज्ञानाभिवृद्धिमगमन्पुराऽपि ज्ञानिनोऽधिकम् ॥ १८६ ॥ सर्वदेवोत्तमं तं हि जानन्त्येव सुराः सदा । तथाऽपि तत्प्रमाणानां बहुत्वाद्यत्र (द्येऽत्र) संशयाः ॥१८७॥ युक्तिमात्रात्तेऽपि रुद्रवाक्यादपगतास्तदा ॥१८८॥ ततः कृष्णः सुतवरं त्वत्त आदास्य इत्यजः । यदुक्तवाञ्छिवं पूर्वं सत्यं कर्तुं तदब्रवीत् ॥ १८९ ॥ पुत्रं देहीति सोऽप्याह पूर्वमेव सुतस्तव । जातः प्रद्युम्ननामा यः स मद्दत्तः प्रवादतः ॥ १९० ॥ पुरा दग्धो मया कामस्तदाऽयाचत मां रतिः । देहि कान्तं ममेत्येव तदा तामहमब्रुवम् ॥१९१॥ उत्पत्स्यते वासुदेवाद्य(त्त)दा त्वं पतिमाप्स्यसि ।

SGDF
Sri Gargeshwari Digital Foundation

इत्यतोऽसौ मया दत्त इव देव त्वदाज्ञया ॥ १९२ ॥ दासोऽस्मि तव देवेश पाहि मां शरणागतम् । इत्युक्त्वाऽभिप्रणम्यैनं पुनराह सुरान्हरः ॥ ॥ १९३ ॥ यदर्थमेष आयातः केशवः शृणुतामराः ॥ १९४ ॥ योऽसुरो वक्रनामासीदवध्यो ब्रह्मणो वरात् । तदा जाताद्वासुदेवपुत्रात्कामादृते क्वचित् ॥ १९५ ॥ तं हन्तुमेव पुत्रं स्वं प्रद्युम्नमुदरेऽर्प्य च । आयात इह तं चापि ददाह स्वोदरात्सुतम् ॥ निःसारयित्वा कक्षं च दग्धं पश्यत देवताः ॥ १९६ ॥ ज्वालामालाकरालेन स्वतेजोवर्धितेन च । प्रद्युम्नेनैव तं दैत्यं दग्ध्वा वनसमन्वितम् ॥ पुनश्च स्वोदरे पुत्रं स्थापयामास केशवः ॥ १९७ ॥ सद्यो गर्भे पुनस्तं च रुक्मिण्यां जनयिष्यति ॥ १९८ ॥ पूर्ववत्क्षणमात्रेण युवा च स भविष्यति ॥ १९९ ॥ दृष्टमेतन्नारदाद्यैर्मुनिभिः सर्वमेव च । एवं क्रीडत्ययं देवः पूर्णैश्वर्येण केवलम् ॥ इत्युक्ते केशवं नेमुर्देवाः शक्रपुरोगमाः ॥ २०० ॥ ततो हरिर्ब्रह्मसुरेन्द्रमुख्यैः सुरैः स्तुतो गरुडस्कन्धसंस्थः । पुनःपुनः प्रणतः शङ्करेण स्तुतस्तृतीयेऽह्नि निजां पुरीमगात् ॥ २०१ ॥

कृष्णे प्रयाते निलयं पुरद्विषो रात्रौ पौण्ड्रो वासुदेवः समागात् । सहैकलव्येन निजेन मातुः पित्रा तथाऽक्षौहिणीकत्रयेण ॥२०२॥ पुरीं प्रभञ्जन्तममुं विदित्वा सरामशैनेययदुप्रवीराः । संयोधयामासुरथाभ्यवर्षच्छरैर्निषादाधिप एकलव्यः ॥ २०३ ॥ तदस्त्रशस्त्रैः सहसा विषण्णा यदुप्रवीरा विगतप्रदीपाः । सहैव रामेण शिनेश्च नप्त्रा समाविशन्स्वां पुरमेव सर्वे ॥ २०४ ॥ पुनः समादाय तथोरुदीपिका अग्रे समाधाय च रौहिणेयम् । विनिःसृता आत्तशस्त्राः स्वपुर्याः सिंहा यथा धर्षिताः सद्गुहायाः ॥ २०५ ॥ अथाससादैकलव्यं रथेन रामः शैनेयः पौण्ड्रकं वासुदेवम् । अयुध्यतां तौ सात्यकिः पौण्ड्रकश्च तथाऽन्योऽन्यं विरथं चक्रतुश्च ॥ २०६ ॥ ततो गदायुद्धमभूत्तयोर्द्वयोस्तथा रामश्चैकलव्यश्च

SGDF
Sri Gargeshwari Digital Foundation

वीरौ। कृत्वाऽन्योन्यं विरथं तौ गदाभ्यामयुध्यतां जातदर्पौ बलाग्र्यौ ॥
॥ २०७ ॥ तस्मिन्काले केशवो वैनतेयमारुह्यायाद्यत्र ते युद्धसंस्थाः ।
दृष्ट्वा कृष्णं हर्षसम्पूरितात्मा रामो हन्तुं चैकलव्यं समैच्छत् ॥ २०८ ॥
उद्यम्य दोर्भ्यां स गदां जवेन यदाऽपतद्रौहिणेयो निषादम् । बलं कोपं
चास्य दृष्ट्वैकलव्यः पराद्रवज्जीवितेच्छुः सुदूरम् ॥ २०९ ॥ विद्रावय-
न्रौहिणेयोऽन्वयात्तं भीतोऽपतच्चैकलव्योऽम्बुधौ सः । वेलान्तं तं
द्रावयित्वाऽत्र तस्थौ रामो गदापणिरदीनसत्त्वः ॥ २१० ॥ सुपापो-
ऽसावेकलव्यः सुभीतो रामं मत्वैवानुयान्तं पुनश्च । समुद्रेऽशीतिं
योजनानामतीत्य पश्चाद्दैक्षद्द्वीपमेवाधिरुह्य ॥२११॥ रामो विजित्यातिबलं
रणे रिपुं मुदैव दामोदरमाससाद ।

पौण्ड्रस्त्ववज्ञाय शिनिप्रवीरं निवार्यमाणोऽभिययौ जनार्दनम् ॥
॥ २१२ ॥ तं केशवो विरथं व्यायुधं च क्षणेन चक्रे स ययौ निजां
पुरीम् । प्रस्थापयामास पुनश्च दूतं कृष्णायैको वासुदेवोऽहमस्मि ॥
॥ २१३ ॥ मदीयलिङ्गानि विसृज्य चाशु समागच्छेथाः शरणं
मामनन्तम् । तद्दूतोक्तं वाक्यमेतन्निशम्य यदुप्रवीरा उच्चकैः प्राहसन्स्म ॥
॥ २१४ ॥ कृष्णः प्रहस्याह तवायुधानि दाताऽस्म्यहं लिङ्गभूतानि
चाजौ । इत्युक्तोऽसौ दूत एत्याह तस्मै स चाभ्यगाद्योद्धुकामो
हरिश्च ॥२१५॥ तं शातकौम्भे गरुडे रथस्थे स्थितं चक्रादीन्कृत्रिमा-
न्सन्दधानम् । श्रीवत्सार्थे दग्धवक्षस्थलं च दृष्ट्वा कृष्णः प्राहसत्पाप-
बुद्धिम् ॥ २१६ ॥ ततोऽस्त्रशस्त्राण्यभिवर्षमाणं विजित्य तं वासुदेवो-
ऽरिणैव । चकर्त तत्कन्धरं तस्य चानु मातामहस्याच्छिनत्सायकेन ॥
॥२१७॥ अपातयच्चाशु शिरः स तेन काशीश्वरस्येश्वरो वारणास्याम् ।
स च ब्रह्माहं वासुदेवोऽस्मि नित्यमिति ज्ञानादगमत्तत्तमोऽन्धम् ॥२१८॥
साहाय्यकृच्चास्य च काशिराजो यथैव किर्मीरहिडिम्बसाल्वाः । अन्ये
च दैत्या अपतंस्तमोऽन्धं तथैव सोऽप्यपतत्पापबुद्धिः ॥ २१९ ॥

SGDF
Sri Gargeshwari Digital Foundation

निहत्य तौ केशवो रौक्मिणेयं पुनर्वैदर्भ्यां जनयामास सद्यः । स चैकलव्यो रामजितः शिवाय चक्रे तपोऽजेयतां चाप तस्मात् ।।२२०।। स शर्वदत्तेन वरेण दृप्तः पुनर्योद्धुं कृष्णमेवाससाद । तस्यास्त्रशस्त्राणि निवार्य केशवश्चक्रेण चक्रे तमपास्तकन्धरम् ।। २२१ ।। स चाप पापस्तम एव घोरं कृष्णद्वेषान्नित्यदुःखात्मकं तत् । एवं यदूनामृषभेण सूदिते पौण्ड्रे तथा काशिराजे च पापे ।। २२२ ।। काशीशपुत्रस्तु सुदक्षिणाख्यस्तपोऽचरच्छङ्करायोरुभक्त्या । प्रत्यक्षगं तं शिवं पापबुद्धिः कृष्णाभावं याचते दुष्टचेताः ।।२२३।। कृत्यामस्मै दक्षिणाग्नौ शिवोऽपि दैत्यावेशाददादावृतात्मा ।। २२४ ।। स दक्षिणाग्निश्चासुरावेशयुक्तः सम्पूजितः काशिराजात्मजेन । वरादुमेशस्य विवृद्धशक्तिर्ययौ कृष्णो यत्र सम्पूर्णशक्तिः ।। २२५ ।। कृष्णस्तस्य प्रतिघातार्थमुग्रं समादिशच्चक्रमनन्तवीर्यः । जाज्वल्यमानं तदमोघवीर्यं व्यद्रावयद्वह्निमिमं सुदूरम् ।। २२६ ।। कृत्यात्मको वह्निरसौ प्रधानवह्नेः पुत्रश्चक्रविद्रावितोऽथ । सहानुबन्धं च सुदक्षिणं तं भस्मीचकाराशु सपुत्रभार्यम् ।। ।। २२७ ।। दग्ध्वा पुरीं वारणासीं सुदर्शनं पुनः पार्श्वं वासुदेवस्य चागात् । सुदक्षिणोऽसौ तम एव जग्मिवान्कृष्णद्वेषात्सानुबन्धः सुपापः ।। २२८ ।।

कृष्णः क्रीडन्द्वारवत्यां सुपूर्णनित्यानन्दः क्वचिदाह स्म भैष्मीम् । विडम्बयन्गृहिणामेव चेष्टा नित्याविरोधोऽपि तया विदोषया ।।२२९।। त्वया न कार्यं मम किञ्च भद्रे मयाऽरीणां मानभङ्गार्थमेव । समाहृताऽसीति सा चावियोगं सदा कृष्णेनात्मनोऽप्येव वेत्त्री ।।२३०।। स्त्रिया भेतव्यं भर्तुरित्येव धर्मं विज्ञापयन्ती दुःखितेवास देवी । तां सान्त्वयामास गृहस्थधर्मं विज्ञापयन्देवदेवोऽप्यदुःखाम् ।। २३१ ।।

एवं क्रीडत्यब्जनाभे रमायां कृष्णादिष्टो गोकुलं रौहिणेयः । प्रायादृष्ट्वा तत्र नन्दं यशोदां तत्पूजितः कृष्णवार्तां च पृष्टः ।। २३२ ।।

SGDF
Sri Gargeshwari Digital Foundation

मासौ तत्र न्यवसद्गोपिकाभी रेमे क्षीबो यमुनामाह्वयच्च । मत्तोऽय-
मित्येव नदीमनागतां चकर्ष रामो लाङ्गलेनाग्रच(नोग्र)वीर्यः ॥ २३३ ॥
पुनस्तया प्रणतः संस्तुतश्च व्यसर्जयत्तामथ नन्दगोपम् । आपृच्छ्य
चागाद्द्वारकां केशवाय न्यवेदयन्नन्दगोपादिभक्तिम् ॥ २३४ ॥ तदैव
मैन्दो विविदश्च भौमे हते सखाये दानवावेशयुक्तौ । आनर्तराष्ट्रं
वासुदेवप्रतीपौ व्यनाशयेतां वासुदेवोऽथ चोचे ॥ २३५ ॥ रामाय
सोऽदाद्वरमब्जनाभो वध्यावेतौ भवतां तेऽप्यवध्यौ । वराद्विरिञ्चस्य
तथाऽमृताशनादुभौ च मैन्दो विविदो व्रजेति ॥ २३६ ॥ गत्वा स
मैन्दं प्रथमं जघान क्रोधाद्युद्धायागतं रैवताग्रे । दिने परस्मिन्विविदं
जघान शिला वर्षन्तं मुसलेनाग्रचकर्मा ॥२३७॥ तयोराविष्टौ तावसुरौ
तमोऽन्धं प्राप्तौ च तावश्विनौ स्वं च लोकम् ॥ २३८ ॥

दुर्योधनस्यास पुत्री रतिर्या पूर्वं नाम्ना लक्षणा कान्तरूपा ।
स्वयंवरस्थां तां बलादेव साम्बो जग्राह सा चैनमासानुरक्ता ॥ २३९ ॥
बलाद्गृहीतां वीक्ष्य तां कर्णमुख्या दुर्योधनाद्या युयुधुः क्रोधदीप्ताः ।
कृच्छ्रेण तं विरथीकृत्य चैकं सर्वे समेता जगृहुर्धार्तराष्ट्राः ॥ कर्णेन
भूरिश्रवसा च सार्धं बाह्वोर्बलादेव दुर्योधनस्य ॥२४०॥ श्रुत्वैतद्वृष्णयः
सर्व एव समुद्यमं चक्रिरे कौरवेषु । निवार्य तान्बलभद्रः स्वयं ययौ
सहोद्धवः कौरवेयाञ्छमार्थी ॥ २४१ ॥ पुरस्य बाह्योपवने स्थितः स
प्रस्थापयच्चोद्धवं कौरवार्थे । आगत्य सर्वे कुरवोऽस्य पूजां चक्रुः स
चाहोग्रसेनस्य चाज्ञाम् ॥ २४२ ॥ आज्ञापयद्वो नृपतिः स्वयं नः
कुमारकः प्रगृहीतो भवद्भिः । एकः समेतैर्बहुभिर्बान्धवार्थं क्षान्तं तन्नो
मुञ्चताश्चेव साम्बम् ॥ २४३ ॥ आज्ञापयामास च उग्रसेन इत्युक्तमेव
तु निशम्य कुरुप्रवीराः । संश्राव्य दुष्टवचनानि बलं पुरं स्वं क्रोधा-
त्समाविविशुरत्र चुकोप रामः ॥ २४४ ॥ स्वलाङ्गलेन तत्पुरं विकृष्य
जाह्नवीजले । निपातयन्निवारितः प्रणम्य सर्वकौरवैः ॥ २४५ ॥

SGDF
Sri Gargeshwari Digital Foundation

सभार्यमाशु पुत्रकं सुयोधनाभिपूजितम् । सपारिबर्हमाप्य च प्रजग्मिवान्स्वकं पुरम् ॥ २४६ ॥ इत्यादिकर्माणि महान्ति रामस्यासम्छेषस्याच्युतावेशिनोऽलम् । यस्याच्युतावेशविशेषकालं ज्ञात्वा भीमोऽप्यस्य नोदेति युद्धे ॥ २४७ ॥ क्रीडायुद्धे बहुशो रौहिणेये व्यक्तिं विष्णोर्भीमसेनो विदित्वा । तात्कालिकीं पीड्यमानोऽपि तेन नैवोद्यमं कुरुते विष्णुभक्त्या ॥ २४८ ॥ तदा जयी प्रभवत्येष रामो नातिव्यक्तस्तत्र यदा जनार्दनः । तदा भीमो विजयी स्यात्सदैव विष्णोः केशावेशवान्यत्स रामः ॥ २४९ ॥

एतादृशेनैव रामेण युक्ते कृष्णे द्वार्वत्यां निवसत्यब्जनाभे । स्वप्नेऽनिरुद्धेन रता कदाचिद्बाणात्मजोषा चित्रलेखामुवाच ॥ २५० ॥ तमानयेत्यथ सा चित्रवस्त्रे प्रदर्श्य लोकान्समदर्शयत्तम् । पौत्रं विदित्वा वचनाच्च तस्याः कृष्णस्य तं चानयत्तत्र रात्रौ ॥ २५१ ॥ अनिरुद्धं गुणोदारमानीतं चित्रलेखया । प्राप्य रेमे बाणसुता दिवसान्सुबहूनपि ॥ ॥ २५२ ॥ गूढं कन्यागृहे तं तु ज्ञात्वा कन्याभिरक्षिणः । ऊचुर्बाणायादिशच्च किङ्करान्ग्रहणेऽस्य सः ॥ २५३ ॥ आगताननिरुद्धस्तान्परिघेण महाबलः । निहत्य द्रावयामास स्वयमायात्ततोऽसुरः ॥ ॥२५४॥ स तु युद्ध्वाऽतिकृच्छ्रेण नागास्त्रेण बबन्ध तम् ॥ २५५ ॥ अथ कृष्णः समारुह्य गरुडं रामसंयुतः । प्रद्युम्नेन च तत्रागात्प्रथमं तत्र वह्निभिः ॥ २५६ ॥ युद्ध्वैवाङ्गिरसा चैव क्षणाद्विद्राव्य तान्हरिः । विद्राव्य शर्वप्रमथानाससाद ज्वरं ततः ॥ २५७ ॥ तेन भस्मप्रहारेण ज्वरितं रोहिणीसुतम् । आश्लिष्य विज्वरं चक्रे वासुदेवो जगत्प्रभुः ॥ ॥ २५८ ॥ स्वयं विक्रीड्य तेनाथ कञ्चित्कालं जनार्दनः । निष्पिष्य मुष्टिभिश्चान्यं ससर्ज ज्वरमच्युतः ॥२५९॥ स्वयं जित्वाऽपि गिरिशभृत्यं नालमिति प्रभुः । स्वभृत्येनैव जेतव्य इत्यन्यं ससृजे तदा ॥ ज्वरेण वैष्णवेनासौ सुभृशं पीडितस्तदा ॥ २६० ॥ ग्रासार्थमुपनीतश्च

SGDF
Sri Gargeshwari Digital Foundation

जगाम शरणं हरिम् । तेन स्तुतः स भगवान्मोचयामास तं प्रभुः ॥
॥ २६१ ॥ क्रीडार्थमत्यल्पजनेष्वपि प्रभुः कथञ्चिदेव व्यजयद्ध्यर्थां
विना । इत्यादि मोहाय स दर्शयत्यजो नित्यस्वतन्त्रस्य कुतो
व्यथादयः ॥ २६२ ॥ यदा ज्वराद्या अखिलाः प्रविद्रुतास्तदा स्वयं
प्राप हरिं गिरीशः । तयोरभूद्युद्धमथैनमच्युतो विजृम्भयामास
विजृम्भणास्त्रतः ॥ २६३ ॥ विजृम्भिते शङ्करे निष्प्रयत्ने स्थाणूपमे
संस्थिते कञ्जजातः । दैत्यावेशाद्वासुदेवानभिज्ञं सम्बोधयामास सदुक्तिभिः
प्रभुः ॥ प्रगृह्य शर्वं च विवेश विष्णोः स तूदरं दर्शयामास तत्र ॥
॥२६४॥ शिवस्वरूपं स्तम्भितं बिल्वनाम्नि वने गिरीशेन च यत्तपः
कृतम् । शैवं पदं पाप्तुमेवाच्युताच्च तच्चावदत्कञ्जजः शङ्करस्य ॥२६५॥
व्यपेतमोहोऽथ वृषध्वजो हरिं तुष्टाव बाणोऽभिससार केशवम् ।
तस्याच्युतो बाहुसहस्रमच्छिनत्पुनश्चारिं जगृहे तच्छिरोऽर्थे ॥ २६६ ॥
तदा शिवेन प्रणतो बाणरक्षणकाम्यया । कृत्वा स्वभक्तं बाणं तं ररक्ष
द्विभुजीकृतम् ॥२६७॥ मोचयित्वाऽनिरुद्धं च ययौ बाणेन पूजितः ।
एवमग्नीनङ्गिरसं ज्वरं स्कन्दमुमापतिम् । बाणं चायत्नतो जित्वा
प्रायाद्द्वारवतीं प्रभुः ॥२६८॥ येनायत्नेन विजितः सर्वलोकहरो हरः ।
किं ज्वरादिजयो विष्णोस्तस्यानन्तस्य कथ्यते ॥ २६९ ॥ ईदृशानन्त-
सङ्ख्यानां शिवानां ब्रह्मणामपि । रमाया अपि यद्वीक्षां विना न
चलितुं बलम् ॥ २७० ॥ न च ज्ञानादयो भावा न चास्तित्वमपि
क्वचित् । अनन्तशक्तेः कृष्णस्य न चित्रं शूलिनो जयः ॥ २७१ ॥
चित्रलेखासमेतोषाऽन्वितपौत्रसमन्वितः । सरामः ससुतो वीन्द्रमारुह्य
द्वारकां गतः ॥ २७२ ॥ रेमे तत्र चिरं कृष्णो नित्यानन्दो निजे-
च्छया ॥ २७३ ॥ एवंविधान्यगणितानि यदूत्तमस्य कर्माण्यगण्य-
महिमस्य महोत्सवस्य । नित्यं रमाकमलजन्मगिरीशशक्रसूर्यादिभिः
परिणुतानि विमुक्तिदानि ॥ २७४ ॥

SGDF
Sri Gargeshwari Digital Foundation

एवं वसत्यमितपौरुषवीर्यसारे नारायणे स्वपुरि शक्रधनञ्जयोक्तः । सम्प्राप्य लोमशमुनिः सकलानि तीर्थान्याप्तुं स पाण्डुतनयेषु सहाय आसीत् ॥ २७५ ॥ पृथ्वीं प्रदक्षिणत एत्य समस्ततीर्थस्नानं यथाक्रमत एव विधाय पार्थाः । सम्पूज्य तेषु निखिलेषु हरिं सुभक्त्या कृष्णे समर्पयितुमापुरथ प्रभासम् ॥ सम्भावनाय सकलैर्यदुभिः समेतस्तेषां च रामसहितो हरिराजगाम ॥ २७६ ॥ पार्थैः सम्पूजितस्तत्र कृष्णो यदुगणैः सह ॥ २७७ ॥ पार्थान्सम्पूजयामासुर्वृष्णयश्चाज्ञया हरेः ॥ ॥२७८॥ तत्र भीमं तपोवेषं दृष्ट्वातिस्नेहकारणात् । दुर्योधनं निन्दयति रामे सात्यकिरब्रवीत् । २७९॥ सर्वे वयं निहत्याद्य सकर्णान्धृतराष्ट्रजान् । अभिमन्युं स्थापयामो राज्ये यावत्त्रयोदशम् ॥ २८० ॥ संवत्सरं समाप्यैव पुरं यास्यन्ति पाण्डवाः । ततो युधिष्ठिरो राजा राज्यं शास्तु पूर्ववत् ॥ २८१ ॥ एवं वदत्येव शिनिप्रवीरे जनार्दनः पार्थमुखान्युदीक्ष्य । उवाच शैनेय न पाण्डुपुत्राः परेण संसाधितराज्यकामाः ॥ २८२ ॥ स्वबाहुवीर्येण निहत्य शत्रूनाप्स्यन्ति राज्यं त इतीरितेऽमुना । तथेति पार्था अवदंस्ततस्ते कृष्णं पुरस्कृत्य ययुर्दशार्हाः ॥ २८३ ॥ क्रमेण पार्था अपि शैशिरं रिरिं समासदंस्तत्र कृष्णां सुदुर्गे । विषज्जन्तीं वीक्ष्य तैः संस्मृतोऽथ हैडिम्ब आयात्सहितो निशाचरैः ॥ २८४ ॥ उवाह कृष्णां स तु तस्य भृत्या ऊहुः पार्थांस्ते बदर्याश्रमं च । प्राप्यात्र नारायणपूजया कृतस्वकीयकार्या ययुरुत्तरां दिशम् ॥ २८५ ॥ अतीत्य शर्वश्वशुरं गिरिं ते सुवर्णकूटं निषधं गिरिं च । मेरोः प्राच्यां गन्धमादे गिरौ च प्रापुर्बदर्याश्रममुत्तमं भुवि ॥ २८६ ॥ तस्मिन्मुनीन्द्रैरभिपूज्यमाना नारायणं पूजयन्तः सदैव । चक्रुस्तपो ज्ञानसमाधियुक्तं सुतत्त्वविद्यां प्रतिपादयन्तः ॥ ॥ २८७ ॥

एवं बदर्यां विहरत्सु तेषु क्वचिद्रहः कृष्णया वायुसूनौ । स्थिते

SGDF
Sri Gangeshwari Digital Foundation

गरुत्मानुरगं जहार महाह्रदाद्वासुदेवासनाग्र्यः ॥ २८८ ॥ तत्पक्ष-
वातेन विचालिते तु तस्मिन्गिरौ कमलं हैममग्र्यम् । पपात कृष्णा-
भीमयोः सन्निधान उद्यद्भानोर्मण्डलाभं सुगन्धम् ॥२८९॥ दृष्ट्वाऽति-
गन्धं वरहेमकञ्जं कुतूहलाद्द्रौपदी भीमसेनम् । बहून्ययाचत्तादृशान्यानु-
भावमस्याविषह्यं जानती देवदैत्यैः ॥ तयाऽर्थितः सगदस्तुङ्गमेनं गिरिं
वेगादारुहद्वायुसूनुः ॥ २९० ॥ प्रशस्यमानः सुरसिद्धसङ्घैर्मृत्नन्दैत्या-
न्सिंहशार्दूलरूपान् । आसेदिवांस्तत्र हनूमदाख्यं निजं रूपं प्रोद्यदादित्य-
भासम् ॥ २९१ ॥ जानन्नप्येनं स्वीयरूपं स भीमश्चिक्रीड एतेन
यथा परेण । धर्मो देवानां परमो मानुषत्वे स्वीये रूपेऽप्यन्यवदेव
वृत्तिः ॥ २९२ ॥ अनादानं दिव्यशक्तेर्विशेषान्नरस्वभावे सर्वदा चैव
वृत्तिः । तस्माद्भीमो हनुमांश्चैक एव ज्यायः कनीयोवृत्तिमत्राभिपेदे ॥
॥२९३॥ सर्वे गुणा आवृता मानुषत्वे युगानुसारान्मूलरूपानुसारात् ।
क्रमात्सुराणां भागतोऽव्यक्तरूपा आदानतो व्यक्तिमायान्त्युरूणाम् ॥
॥ २९४ ॥ नैवाव्यक्तिः काचिदस्तीह विष्णोः प्रादुर्भावेष्वतिसुव्यक्त-
शक्तेः । इच्छाव्यक्तिः प्रायशो मारुतस्य तदन्येषां व्यक्तता कारणेन ॥
॥ २९५ ॥ तस्माद्भीमो धर्मवृद्ध्यर्थमेव स्वीये रूपेऽप्यन्यवद्वृत्तिमेव ।
प्रदर्शयामास तदाऽसुराणां मोहायैवाशक्तवच्छक्तरूपः ॥२९६॥ तद्रूप-
वृद्धिं भीमसेनोऽथ दृष्ट्वा श्रुत्वा हनूमन्मुखतः कथाश्च ॥ रामस्य
तच्चातुरात्म्यं च दिव्यं चातुर्युगं धर्ममप्यग्र्यमेव ॥ २९७ ॥
ध्वजाद्बीभत्सोर्गर्जनेनैव शत्रुपराभवे तेन दत्तेऽर्जुनस्य ॥ ययौ प्रणम्यै-
नमाश्वेव भीमः सौगंधिकं वनमप्यग्र्यरूपम् ॥ २९८ ॥ नरागम्यां
नलिनीमेत्य तत्र दृष्ट्वा पद्मान्यद्भुताकारवंति ॥ हैमानि दिव्यान्यति-
गंधवंति समासदद्वार्यमाणो नराशैः ॥ २९९ ॥ ते भीममात्तायुध-
मुग्ररूपं महाबलं रूपनवावतारम् ॥ न्यवारयन्क्रोधवशाः समेताः शतं
सहस्राण्ययुतानि संख्ये ॥ ३०० ॥ वराच्छिवस्यैव परैरजेयाः

SGDF
Sri Gangeshwari Digital Foundation

शस्त्रास्त्रवृष्टिं मुमुचुः सुभीमाम् ।। भीमेऽखिलज्ञे तपसां निधाने बलोदधौ शैवशास्त्रं वदंतः ।। ३०१ ।। तान्वैष्णवैरेव शास्त्रैः स भीमो विजित्य पूर्वं वाङ्मये सङ्गरे तु ।। शस्त्रास्त्रवर्षस्य कुर्वन्प्रतीपं जघ्नेऽखिलान्गदया तेषु वीरान् ।। ३०२ ।। वातेन कुंत्यां बलवान्स जातः शूरस्तपस्वी द्विषतां निहन्ता ।। सत्ये च धर्मे च रतः सदैव पराक्रमे शत्रुभिरप्रधृष्यः ।। ३०३ ।। तत्रापरांश्चैव बहूनसत्यं निरीश्वरं चाप्रतिष्ठं च लोकम् ।। सिद्धोऽहमीशोऽहमिति ब्रुवाणान्गुणान्विष्णोः ख्यापयन्वादतोऽजैत् ।। ३०४ ।। भिन्नं विष्णुमधिकं सर्वतश्च ब्रुवन्प्रवीराँह्लक्ष्मेषां निजघ्ने ।। ते तस्य वीर्यं च बलं च दृष्ट्वा विद्याबलं बाहुबलं तथैव ।। अशक्नुवन्तः सहिताः समस्ता हतप्रवीराः सहसा निवृत्ताः ।। ३०५ ।। विक्रम्य तान्गदयाऽसौ निहत्य विद्राव्य सर्वान्नलिनीं प्रविश्य ।। पीत्वाऽमृताम्भश्च ततोऽम्बुजानि दिव्यानि जग्राह कुरुप्रवीरः ।। ३०६ ।। अथो कलहशंसीनि निमित्तानि युधिष्ठिरः ।। दृष्ट्वा कृष्णामपृच्छच्च क्व भीम इति दीनधीः ।। ३०७ ।। सौगंधिकार्थं यातं तं श्रुत्वा कृष्णामुखान्नृपः ।। आरुह्य राक्षसश्रेष्ठान्कृष्णया भ्रातृभिः सह ।। ३०८ ।। ययौ वृकोदरो यत्र दृष्ट्वा चैनमवस्थितम् ।। उवाच मैवमित्येनं भीतो गिरिशकोपतः ।। ३०९ ।। देवेभ्यो मरणाद्भीता राक्षसा वित्तपाज्ञया ।। तदीयां नलिनीं ते हि रक्षन्त्यस्याश्रयो हरः ।। जानन्वित्तेश्वरो भीममाहात्म्यं न चुकोप ह ।। ३१० ।।

वसत्सु तत्र पार्थेषु पुनः कतिपयैर्दिनैः ।। उवाच भीमसेनस्य यशोधर्माभिवृद्धये ।। ३११ ।। पंचवर्णानि पुष्पाणि कृष्णा वीक्ष्याहृतानि तु ।। मारुतेन कुबेरस्य गृहान्नृभिरगम्यतः ।। ३१२ ।। अगम्योऽयं गिरिः सर्वैः कुबेरेणाभिपालितः ।। अद्य त्वयैव गन्तव्यो विधूयाखिलराक्षसान् ।। ३१३ ।। इत्युक्त आशु सगदः सधनुः सबाणो भीमो गिरींद्रमजितोरुबलो विगाहे ।। प्राप्तं निशम्य बलदैवत-

SGDF
Sri Gargeshwari Digital Foundation

स्नुनुमत्र पद्मत्रयं न्यरुणदुद्धतराक्षसानां ॥ ३१४ ॥ अग्रे निधाय
मणिमंतमजेयमुग्रं शंभोर्वराद्विविधशास्त्रमहास्त्रवृष्टया ॥ तान्सर्वराक्षस-
गणान्मणिमत्समेतान्भीमो जघान सपदि प्रवरैः शरौघैः ॥ ३१५ ॥
अवध्यांस्तान्क्षणेनैव हत्वा भीमो महाबलः ॥ रणे क्रोधवशान्सर्वानतिष्ठ-
द्गिरिमूर्धनि ॥ ३१६ ॥ ते हता भीमसेनेन प्रापुरंधंतमोऽखिलाः
॥ ३१७ ॥ हतः सौगंधिकवने मणिमांश्च पुनः कलौ ॥ जातो
मिथ्यामतिं सम्यगास्तीर्यापि तमोऽधिकम् ॥ ३१८ ॥ ततो वैश्रवणो
राजा महापद्मत्रये हते ॥ राक्षसानामवध्यानां सखाये मणिमत्यपि ॥
आरुरोह रथं दिव्यं योद्धुकामो वृकोदरं ॥ ३१९ ॥ असुरावेशतस्तस्य
भीमे क्रोधो महानभूत् ॥ स आजगाम भीमेन योद्धुं वित्तपतिः स्वयम्
॥ ३२० ॥ तस्मिन्काले भीमसेनस्य घोषं श्रुत्वा राजाऽपृच्छदाशु स्म
कृष्णाम् ॥ क्व भीम इत्येव तयोदितं च श्रुत्वा जगामाशु रक्षोंऽससंस्थः
॥ ३२१ ॥ सभ्रातृके मुनिभिः कृष्णया च गते राजन्नत्र भीमं कुबेरः ॥
दृष्ट्वाऽसुरावेशतो धर्मजं च किंचिन्मुक्तः स्नेहयुक्तस्तथाऽऽस ॥ ३२२ ॥
धृतायुधं भीममीक्ष्यापि किंचिद्दैत्यावेशाद्बहुमेने न भीमम् ॥ अगस्त्य-
शापं चावदत्स्वस्य पूर्वं सखायनाशे कारणं राजराजः ॥ ३२३ ॥
दैत्यावेशादुज्झितः शान्तभावो ददौ निजस्थानमेषां सुतुष्टः ॥ आवासार्थं
तेऽवसंस्तत्र पार्थास्तथान्येषां देवतानां गृहेषु ॥ ३२४ ॥

तत्रैव तेषां वसतां महात्मनामानंदिनामब्दचतुष्टये गते ॥
पंचाब्दमध्याप्य महांति चास्त्राणींद्रो गुर्वर्थे फल्गुनेनार्थितोऽभूत्
॥ ३२५ ॥ वधं वव्रे स्वशत्रूणामिंद्रः पार्थात्स्वरुपतः ॥ निवातकव-
चाख्यानामेषां ब्रह्मा वरं ददौ ॥ ३२६ ॥ अवध्यतां सुरैर्दैत्यैर्गन्धर्वैर्यक्ष-
राक्षसैः ॥ पुनरिंद्रेणार्थितोऽदाज्जहीमान्नरदेहवान् ॥ ३२७ ॥ इति
तेनार्जुनं शक्रः स्वात्मानं नरदेहगम् ॥ जगाद ताञ्जहीत्येव किरीटं स्वं
निबध्य च ॥ ३२८ ॥ ऐन्द्रं स्यन्दनमारुह्य पार्थो मातलिसंयुतः ॥

SGDF
Sri Gargeshwari Digital Foundation

गाण्डीवं धनुरादाय ययौ हन्तुं महासुरान् ॥ ३२९ ॥ शङ्खं ददुस्तस्य देवा देवदत्तः स शङ्खराट् ॥ नादयञ्छङ्खघोषेण धनुर्विस्फारयन्महत् ॥ ३३० ॥ दधानः कुण्डले दिव्ये शक्रदत्ते सुभास्वरे ॥ आससाद पुरं दिव्यं दैत्यानामिन्द्रनन्दनः ॥३३१॥ तस्य शङ्खध्वनिं श्रुत्वा गाण्डीवस्य च निःस्वनम् ॥ अभिसस्रुर्महावीर्या निवातकवचासुराः ॥ ३३२ ॥ तिस्रः कोट्यो दानवानां स्वयम्भुवरगर्विताः ॥ नानायुधै रणे पार्थमभ्यवर्षन्सुसंहताः ॥ ३३३ ॥ तेषां स शस्त्राणि किरीटमाली निवार्य गाण्डीवधनुःप्रमुक्तैः ॥ शरैः शिरांसि प्रचकर्त वीरो महास्त्रशिक्षाबलसम्प्रयुक्तैः ॥ ३३४ ॥ सर्वे हतास्तेन महारथेन ते दानवाः सोऽपि ययौ तथान्यान् ॥ पौलोमकालेयगणाभिधानान्षष्टिं सहस्राणि महारथानाम् ॥ ३३५ ॥ तानस्त्रशस्त्राण्यभिवर्षमाणान्धनञ्जयः पाशुपतास्त्रतो द्राक् ॥ दग्ध्वा ययौ पुनरेवेन्द्रसद्म तं सस्वजे प्रीतियुतश्च शक्रः ॥३३६॥ ययुरन्धन्तमश्चापि सर्वे देवद्विषोऽसुराः । अथानुज्ञाप्य पितरं रथेनैन्द्रेण भास्वता ॥ सोदर्याणां सकाशं स ययौ वज्रधरात्मजः ॥ ३३७ ॥ आयांतमीक्ष्य बीभत्सुं मुमुदुर्भ्रातरोऽधिकम् ॥ ऊषुश्च चतुरोऽब्दांस्ते पुनर्मेरौ प्रमोदिनः ॥ ३३८ ॥ कथाभिर्वासुदेवस्य ध्यानेनाभ्यर्चनेन च ॥ ययौ कालः सुखेनैव तेषां विष्णुरतात्मनाम् ॥ ३३९ ॥ नैव शत्रूननुत्साद्य नानादाय महद्यशः ॥ नाकृत्वा वासुदेवाज्ञां राज्ञां मुख्यगतिर्भवेत् ॥ ३४० ॥ तदन्येषां तु वर्णानां क्षमा बाह्येषु शत्रुषु ॥ प्रायो धर्म इति प्रोक्तो हरेराज्ञाऽखिलस्य च ॥ ३४१ ॥ इति भीमवचः श्रुत्वा ससोदर्यो युधिष्ठिरः ॥ राक्षसस्कन्धमारूढः कृष्णया चाययौ पुनः ॥ ३४२ ॥

पादेषु तेषु निवसत्सु हिमालयस्य याम्याश्रितेषु पवमानसुतः कदाचित् ॥ धन्वी मृगाननुचरन्सहसाऽऽससाद ह्यायोः सुतं नहुषमाजगरोरुरूपम् ॥ ३४३ ॥ पूर्वं हि वृत्रवधतोऽम्बुजनालतन्तुसंस्थे शचिप्रणयिनि

SGDF
Sri Gargeshwari Digital Foundation

प्रविचिन्त्य देवाः ॥ चक्रुस्त्रिलोकपतिमायुसुतं वरं च दत्वाऽक्षिगोचर-
तपोऽस्य बलं च सर्वम् ॥३४४॥ स सर्वसुरविप्रेन्द्रतपश्च बलमक्षयम् ॥
अवाप्य ववृधे नित्यं दर्पादैच्छच्छचीमपि ॥ ३४५ ॥ स इन्द्रवचना-
च्छच्या महर्षिगणवाहने । नियुक्तो वञ्चनायैव वाहयामास तानृषीन् ॥
॥३४६॥ स शचीप्रतिषेधार्थमगस्त्येन महात्मना । वेदप्रामाण्यविषये
पृष्टो नेत्याह मूढधीः ॥ प्रमाणमिति तेनोक्ते शिरस्येनं पदाऽहनत् ॥
॥३४७॥ तदा भृगुं तस्य जटासु लीनं कदाऽपि तस्याक्षिपथं न यातम् ।
आविश्य कञ्जप्रभवः शशाप व्रजाशु पापाजगरत्वमेव ॥ ३४८ ॥ षष्ठे
काले यस्त्वयाऽऽसादितः स्यात्स ते वशं यातु बलाधिकोऽपि । यदा
गृहीतं पुरुषं निहन्तुं न शक्ष्यसे यदि स त्वद्गृहीतः ॥ शक्तोऽपि
नात्मानमभिप्रमोचयेत्तदा तस्य स्यात्त्वत्तपोऽग्र्यं बलं च ॥३४९॥
सर्वदेवमुनीन्द्राणां यत्तपस्त्वामुपाश्रितम् । तच्च सर्वं तमेवैति नात्र कार्या
विचारणा ॥ ३५० ॥ यदा प्रश्नांस्त्वदीयांश्च कश्चित्परिहरिष्यति ।
दिवं गन्तासि च तदा विसृज्याजगरीं तनुम् ॥ ३५१ ॥ स्मृतिश्च
मत्प्रसादेन सर्वदा ते भविष्यति ॥ ३५२ ॥ भृगुदेहगतेनैवं शप्तः
कमलयोनिना । पपाताजगरो भूत्वा नहुषः क्षणमात्रतः ॥ ३५३ ॥
इन्द्रोऽप्यवाप स्वं स्थानमिष्ट्वा विष्णुं विपापकः । धर्मवृद्ध्यर्थमेवैतत्पाप-
मासीच्छचीपतेः ॥३५४॥ नहि लोकावनं पापं त्रैलोक्येशस्य वज्रिणः ।
वृत्रं हत्वा महानासेत्यादिवेदपदं च यत् ॥ ३५५ ॥ क्वचित्पापं च
पुण्यानां वृद्धये भवति स्फुटम् । वृत्रहत्या यथेन्द्रस्य जाता धर्माभि-
वृद्धये ॥ ३५६ ॥ देवानां वा मुनीनां वा भवेदेवं न वै नृणाम् ।
पापं यत्पुण्यमेवैतदसुराणां विलोमतः ॥ एवं स्कान्दे हि वचनं पापं
नैतच्छचीपतेः ॥३५७॥ नान्यस्य पदमाप्स्यन्ति तद्देवानां व्रतं परम् ।
तस्मात्ते नहुषं शक्रपदे निदधुरीश्वराः ॥ ३५८ ॥ तस्मिन्नेवं निपतिते
ब्रह्मणः शापकारणात् ॥ ३५९ ॥ अष्टाविंशतिमे प्राप युगे भीमस्त-

SGDF
Sri Gargeshwari Digital Foundation

मुल्बणम् । जानन्नेव तदीयं तत्तप आदातुमिच्छया ॥ ३६० ॥ यत्तत्सुराणां सर्वेषां मुनीनां च तपः स्थितम् । तद्गृहीतुं वश(गवदिच्छयैवास)मगादिच्छयैव स मारुतिः ॥ ३६१ ॥ देवानां हि नृजातानामल्पं व्यक्तं भवेद्बलम् । इच्छया व्यक्ततां याति वायोरन्येषु तच्च न ॥३६२॥ नित्यं व्यक्ता गुणा विष्णोरिति शास्त्रस्य निर्णयः । एवमन्येऽपि हि गुणा मानुषादिषु जन्मसु ॥ ३६३ ॥ देवानां मानुषादौ तु शक्येऽप्यव्यक्तताकृतेः । धर्मवृद्धिर्भवेत्तेषां प्रीतो भवति केशवः ॥ ३६४ ॥ तन्मानुषे बले तस्य वराद्धारितवत्स्थिते । दैवं बलं सुशक्तोऽपि व्यक्तं चक्रे न मारुतिः ॥ ३६५ ॥ आत्ममोक्षाय न प्रश्नान्व्याजहार न चाभिभूः । विद्योपजीवनं धर्मो विप्राणामपि नो यतः ॥ ३६६ ॥ किमुत क्षत्रियस्येति जानन्नपि वृकोदरः । तत्प्रश्नपरिहारेण नात्ममोक्षं समैच्छत ॥ ३६७ ॥ अयतन्तमपि ह्येनं चालनायापि नाशकत् । पूर्णोऽपि सर्वलोकानां बलेन नहुषस्तदा ॥ वेष्टयित्वैव तं भीमं स्थितोऽसौ नाशकत्परम् ॥३६८॥ भ्रातृमात्रादिषु स्नेहात्क्षिप्रमात्मविमोक्षणम् । इच्छन्नपि न मोक्षाय यत्नं चक्रे वृकोदरः ॥३६९॥ सर्वदेवमुनीन्द्राणां तप आदातुमत्रगम् । भ्रात्रादिषु स्नेहवशान्न स्थातव्यमिहेत्यपि ॥३७०॥ मन्वानः कालतो भङ्गं स्वयमेवैष यास्यति । आज्ञया वासुदेवस्य दार्ढ्यादेहस्य मे तथा ॥३७१॥ स्रस्ताङ्गे पतिते सर्पे यास्यामीति विचिन्तयन् । तस्थौ भीमो हरिं ध्यायन्स्वभावान्न तदिच्छया ॥ ३७२ ॥ तदैव ब्रह्मवचनात्पूर्वोक्तात्केशवाज्ञया । बलं तपश्च सर्वस्य तत्स्थमायाद्वृकोदरम् ॥ ॥ ३७३ ॥ पूरिते नहुषस्थेन तपसा च बलेन च । भीमे स नहुषोऽथासीत्स्रस्तभोगः शनैःशनैः ॥ ३७४ ॥

गते भीमे निमित्तानि दृष्ट्वा राजा युधिष्ठिरः । पप्रच्छ क्व गतो भीम इति कृष्णां चलन्मनाः ॥ ३७५ ॥ यातं मृगार्थं स निशम्य राजा तदूरुवेगात्पतितान्नगेन्द्रान् । दृष्ट्वा पथा तेन ययौ स

SGDF
Sri Gargeshwari Digital Foundation

तत्र दृष्ट्वा च सर्पावृतमन्वपृच्छत् ॥ ३७६ ॥ स कारणं नहुषात्सर्वमेव शुश्राव तत्प्रश्नमशेषतश्च । भ्रातृस्नेहाद्व्याकरोद्धर्मसूनुस्तदैव सोऽप्यारुहत्स्वर्गलोकम् ॥ ३७७ ॥ दिव्याम्बरे कुण्डलिनि स्वपूर्वे गते विमानेन स धर्मराजः । भीमश्चायात्स्वाश्रमायैव सर्वं युधिष्ठिरः कथयामास तत्र ॥ ३७८ ॥ श्रुत्वा कृष्णा भ्रातरश्चास्य सर्वे सर्वे मुनीन्द्रा भीमसेनेऽतिभक्ताः । व्रीडां ययुर्भीमसेनग्रहेण तथाऽब्रुवन्स्नेहतो भीमसेनम् ॥ ॥३७९॥ नैतादृशं साहसं तेऽनुरूपं शक्तोऽपि यत्स्वात्मविमोक्षणाय । नैवाकरोर्यत्नमतो निजानां महद्दुःखं हृदये प्रार्पयस्त्वम् ॥ ३८० ॥ मैवं पुनः कार्यमिति ब्रुवन्तः समाश्लिषन्सर्व एवैत्य भीमम् ।

ततोऽहोभिः कैश्चिदापुः कुरूणां राष्ट्रं पार्था मुनिमुख्यैः समेताः ॥ ॥ ३८१ ॥ ततोऽमितौजा भगवानुपागमन्नारायणः सत्यभामासहायः । सम्पूजितः पाण्डवैस्तैः समेतश्चक्रेऽथ सौहार्दनिमित्तसत्कथाः ॥ ३८२ ॥ कृष्णा च सत्या च परस्परं मुदा सम्भाषणं चक्रतुर्योषिदग्र्ये । परीक्षयन्त्या सत्यया सर्ववेत्त्या निर्दोषया चोदिता प्राह कृष्णा ॥ ३८३ ॥ स्त्रीधर्मानखिलांस्तत्र सत्यां निर्दोषसंविदम् । ज्ञात्वाऽपि कृष्णा प्रोवाच लोकशिक्षार्थमेव तु ॥ ३८४ ॥ क्रीडार्थमेव वचनं ज्ञात्वा सत्यासमीरितम् । तस्यानुसारि वाक्यानि तत्प्रीत्या एव साऽब्रवीत् ॥३८५॥ ततः कतिपयाहानि निरुष्यात्र जनार्दनः । ययौ सभार्यः स्वपुरीं पाण्डवाननुमान्य च ॥ ३८६ ॥

ततः कदाचिन्मृगयां गतेषु पार्थेषु राजा सैन्धव आससाद । सकोटिकाश्यः सबलश्च तेषां वराश्रमं सोऽत्र ददर्श कृष्णाम् ॥ ३८७ ॥ व्रजन्विवाहा(हारा)र्थमसौ निशाम्य कृष्णां कोटिं प्रेषयित्वैव काश्यम् । आयाहि मामित्यवदत्सुपापस्तया निरस्तो जगृहे करे च ॥ ३८८ ॥ तया धूतो निपपाताशु भूमौ पुनः ससञ्ज्ञोऽभ्यगमद्विलज्जः । ततोऽसहायत्वत एव कृष्णा धौम्यायोक्त्वा साग्निरन्वेहि मेति ॥ ३८९ ॥

SGDF
Sri Gurgeshwari Digital Foundation

समारुहत्सैन्धवस्यैव यानं सुखं न यासीति तमीरयित्वा । तदा निमित्तानि निशाम्य पार्थाः समाययुस्त्वरयैवाश्रमाय ॥ ३९० ॥ श्रुत्वा दासीवचनात्सर्वमेव चक्रुः क्षिप्रं सैन्धवस्यानुयानम् । आक्रोशमानं भीमसेनेति धौम्यं दृष्ट्वा तस्याग्रे सैन्धवं चातिपापम् ॥ ३९१ ॥ चक्रुर्नादान्सिंहवत्पाण्डुपुत्रा दृष्ट्वा कृष्णा चावतरद्रथात्तदा । धौम्येन सार्धं सा ययौ स्वाश्रमाय सैन्यं पार्थास्तत्र निजघ्नुरोजसा ॥ ३९२ ॥ अग्रे कृष्णां योऽवदत्सिन्धुराजं याहीति तं कोटिकाश्यं सुपापम् । छित्वा शिरो मृत्यवे भीमसेनो निवेदयामास तमः स चागात् ॥ ३९३ ॥ हत्वा सेनामखिलां सैन्धवस्य भीमार्जुनौ सयमं धर्मराजम् । विसृज्य धावन्तमथानुजग्मतुर्जयद्रथं विरथं फल्गुनोऽकः ॥ ३९४ ॥ पद्भ्यां धावन्तं भीमसेनो निगृह्य दत्वा प्रहारांश्च भृशं तमार्तम् । आदायाधा द्रौपदी पादयोश्च तं मोचयामास च धर्मसूनुः ॥ ३९५ ॥ दासो द्रौपद्या अहमित्येव वाक्ये तेनैवोक्ते भीमसेनोऽप्यमुञ्चत् । स व्रीडितोऽवाग्वदनो ययौ वनं पार्थाश्च तत्रोषुरतिप्रमोदिनः ॥ ३९६ ॥

मार्कण्डेयस्तदाऽऽगत्य तेषामकथयत्कथाः । बह्वचश्चैव विचित्राश्च भाषात्रयसमन्विताः ॥ ३९७ ॥ लोकदर्शनमाश्रित्य देवाश्च मुनयस्तथा । ब्रूयुः कथास्तत्र शिक्षा ग्राह्या नार्थः कथञ्चन ॥ ३९८ ॥ अर्थः समाधिभाषासु ग्राह्यः सर्वोऽप्यसंशयम् । परदर्शनभाषासु ज्ञेयं तद्दर्शनं तथा ॥ ३९९ ॥ ग्राह्यो नार्थो वैदिकं तु दर्शनं ग्राह्यमेव हि । अन्यार्थो गुह्यभाषासु ग्राह्य एवं विनिर्णयः ॥ ४०० ॥

जयद्रथस्तु भीमेन यदा पञ्चशिखीकृतः । तपसा शिवमाराध्य वव्रे पाण्डवरोधनम् । ऋतेऽर्जुनादर्जुनस्य तुष्टो हि तपसा शिवः ॥ ॥ ४०१ ॥ वने वसत्स्वेव च पाण्डवेषु चक्रे यज्ञं पौण्डरीकाख्यमेव । संस्पर्धया राजसूयस्य राजा दुर्योधनो नाप्यसौ तत्कलार्हः ॥ ४०२ ॥ दुर्योधनस्याज्ञया पाण्डवानां दुःशासनः प्रेषयामास दूतम् । आगच्छते-

SGDF
Sri Gargeshwari Digital Foundation

त्यवमानाय तं तु भीमोऽवादीद्रणयज्ञं स्वगम्यम् ॥ ४०३ ॥ ततो दिनैः कैश्चन धार्तराष्ट्राः सकर्णगान्धारनृपाः कुमन्त्रतः । सभार्यकाः पाण्डवान्द्रौपदीं च महैश्वर्यं दर्शयित्वाऽवमन्तुम् ॥ ४०४ ॥ ते स्यन्दनैः काञ्चनरत्नचित्रैर्महागजैस्तुरगैः पत्तिभिश्च । स्वलङ्कृताश्चित्रमाल्याम्बराश्च विनिर्ययुर्द्वैतवनाय शीघ्रम् ॥४०५॥ गवां दृष्टिच्छद्मना निर्गतांस्तान्ज्ञात्वा शक्रस्तेजसो भङ्गकामः । तत्सामर्थ्यं वरमस्मै प्रदाय तद्बन्धनायादिशच्चित्रसेनम् ॥ ४०६ ॥ स षष्टिसाहस्रककोटियूथपैर्गन्धर्वमुख्यैः संवृतोऽगात्सरस्तत् । यस्मिन्स्नातुं वाञ्छति धार्तराष्ट्रस्तदाज्ञया पुरुषास्तानथोचुः ॥ ४०७ ॥ स्नातुं समायास्यति धार्तराष्ट्रो राजेश्वरो निःसरध्वं तदस्मात् । तीर्थादाज्ञां धारयन्तश्च तस्येत्युक्ता गन्धर्वा जहसुस्तानथोच्चैः ॥४०८॥ ऊचुर्वयं मानयामस्तदाज्ञां त्रिलोकानां यः पतिः शक्रदेवः । न मानुषाणामपि चक्रवर्तिनां किंत्वल्पसारस्य सुयोधनस्य ॥ ४०९ ॥ इतीरिते कुपितो धार्तराष्ट्रो जघान गन्धर्ववराञ्छरौघैः । जघ्नुः सकर्णा अपि तस्य सोदरा जघ्नुश्च ते धार्तराष्ट्रस्य सेनाम् ॥ ४१० ॥ मुहूर्तमासीत्सममेव युद्धं तेषां तदा धार्तराष्ट्रस्य चैव । पुराम्भिन्दोर्वरतो मायया च गन्धर्ववीरा ववृधुस्ततः स्म ॥४११॥ तेजोभङ्गं तत्र सुयोधनस्य पार्थार्थमत्र प्रविधातुमेव । बलं ददावब्जजः केशवश्च गन्धर्वाणां तेऽभ्ययुर्धार्तराष्ट्रान् ॥ ४१२ ॥ स चित्रसेनः प्रथमं कर्णमेव युयोध पार्थस्पर्धया तेन युध्यन् । कर्णो नाशक्नोद्वचनाद्भार्गवस्य रामस्य नित्यामितषड्गुणस्य ॥ ४१३ ॥ स भग्नयानश्च विकर्णयानमास्थाय तस्यैव नियम्य वाजिनः । पराद्रवत्तेन सहैव शीघ्रं दुर्योधनश्चित्रसेनं युयोध ॥४१४॥ मुहूर्तमेतेन समं स युध्यन्नन्यैर्गन्धर्वैर्बहुभिर्माययैव । भग्ने रथे भूमितले स्थितः सन्गृहीत आसीच्चित्रसेनेन सङ्ख्ये ॥४१५॥ महाबलो धार्तराष्ट्रोऽपि शक्रवराद्विष्णोराज्ञया चाभिवृद्धे । स चित्रसेनेन धृतस्तदाऽऽसीद्बद्धः पाशैर्वैद्युतैरिन्द्रदत्तैः ॥ ४१६ ॥

SGDF
Sri Gargeshwari Digital Foundation

तस्यानुजा शकुनी राजभार्याः सर्वे बद्धाः शक्रदूतैः प्रणीताः । आदाय तानम्बरे सम्प्रयातेष्वरूरुवन्पाण्डवान्मन्त्रिणोऽस्य ॥ ४१७ ॥ समीपमागत्य पृथासुतानां पराभूतं वः कुलं शक्रभृत्यैः । धृतः सभार्यः सानुजो धार्तराष्ट्रस्तं मोचयध्वं भ्रातरं भारताग्र्याः ॥ ४१८ ॥ इत्युक्त ऊचे भीमसेनोऽग्रजं स्वं जाने राजन्यादृशोऽयं विमर्दः । ऐश्वर्यं स्वं दर्शयन्नः समागाद्दुर्योधनस्तेजसोभङ्गमिच्छन् ॥ ४१९ ॥ विज्ञाय तेषां मन्त्रितं वज्रबाहुरेतच्चक्रे नात्र नः कार्यहानिः । दिव्यं ज्ञानं स्वात्मनो दर्शयन्स एतावदुक्त्वा विरराम भीमः ॥४२०॥ एकाहयज्ञे दीक्षितेनैव राज्ञा सम्प्रेषितो भीमसेनोऽर्जुनश्च । समाद्रेयौ चित्रसेनं रणे तौ विजित्य दुर्योधनमाश्वमुश्वताम् ॥ ४२१ ॥ स चित्रसेनो वासवोक्तं च सर्वं कुमन्त्रितं धार्तराष्ट्रस्य चाह । पार्थस्य भीमस्य च तन्निशम्य सुव्रीडितो धृतराष्ट्रात्मजोऽभूत् ॥ ४२२ ॥ समाप्य यज्ञं च ततोऽभियातं सर्वे प्रापुर्धर्मराजं स चाशु । सम्पूज्य तूत्सृज्य च चित्रसेनमूचे गान्धारे न पुनः कार्यमीदृक् ॥ ४२३ ॥ स पाण्डवैर्मोचितः सानुगश्च सभार्यकः किञ्चिदतोऽपगम्य । सम्मेलनायोपविष्टश्च तत्र सुव्रीडितः सूतपुत्रं ददर्श ॥ ४२४ ॥ स चाह दिष्ट्या जयसि राजन्निति सुयोधनम् । व्रीडितो नेति तं चोक्त्वा यथावृत्तं सुयोधनः । उक्त्वा प्रायोपवेशं च चक्रे तत्र सुदुःखितः ॥ ॥ ४२५ ॥ कर्णदुःशासनाभ्यां च सौबलेन च देविना । अन्यैश्च याचमानोऽपि नैवोत्तस्थौ सुयोधनः ॥ ४२६ ॥ ततो निशायां प्राप्तायां स्वपक्षे प्रविषीदति । मन्त्रयित्वाऽसुरैः कृत्या निर्मिता होमकर्मणि ॥ ४२७ ॥ शुक्रेणोत्पादिता कृत्या सा प्रसुप्तेषु मन्त्रिषु । धार्तराष्ट्रं समादाय ययौ पातालमाशु च । अथ सम्बोधयामासुर्दैत्या दुर्योधनं नृपम् ॥ ४२८ ॥ त्वं दिव्यः पुरुषो वीरः सृष्टोऽस्माभिः प्रतोषितात् । तपसा शङ्कराद्वज्रकायोऽवध्यश्च सर्वदा ॥ ४२९ ॥

SGDF
Sri Gargeshwari Digital Foundation

अस्माकं पक्षभूतस्त्वं देवानां चैव पाण्डवाः ॥ ४३० ॥ इदानीं सर्वदेवानां वरात्त्वं विजितो रणे । वयं तथा करिष्यामो यथा जेष्यसि पाण्डवान् ॥ ४३१ ॥ कृष्णेन निहतश्चैव नरकः कर्णमा(स्थि)श्रितः । स च कृष्णार्जुनाभावं करिष्यति न संशयः ॥ ४३२ ॥ भीष्मादींश्च वयं सर्वानाविशामो जयाय ते । तपसा वर्धयिष्यामस्त्वा कर्णादींश्च सर्वशः ॥ ४३३ ॥ तस्माद्धत्वा पालयस्व राज्यं राजन्नपेतभीः । इदं कस्यापि नाख्येयं सुगुप्तं भूतिवर्धनम् ॥ ४३४ ॥ इत्युक्त्वा कृत्यया भूयः स्वस्थाने स्थापितो नृपः । उमया निर्मितात्मार्धमुत्तरं हरनिर्मितम् ॥ ॥४३५॥ ज्ञात्वैवावध्यतां चैव राज्ये बुद्धिं चकार सः । नोवाच कस्यचित्तेषु स्वानुभूतं सुयोधनः ।४३६॥ प्रभातायां तु शर्वर्यां पुनः कर्णोऽब्रवीद्वचः । भृत्यैस्तवैव पार्थैर्यन्मोचितोऽसि परंतप ॥ ४३७ ॥ तेन मान्योऽधिकं लोके यद्भृत्या एव तादृशाः । किमु त्वं राजशार्दूल तदुत्तिष्ठ स्थिरो भव ॥ ४३८ ॥ या च तेऽर्जुनमाहात्म्ये शङ्का सा व्येतु मे शृणु । यावन्नैवार्जुनं हन्यां पादौ प्रक्षालये स्वयम् ॥ ॥ ४३९ ॥ इत्युक्तोऽवरजैश्चैव सर्वैः शकुनिना तथा । याचितो रथमारुह्य ययौ नागपुरं द्रुतम् ॥ ४४० ॥

सकुण्डलं सकवचमवध्यं सूर्यनन्दनम् । ज्ञात्वेन्द्र उभयं तस्मादैच्छदादातुमुत्तमम् ॥ ४४१ ॥ तद्विज्ञाय रविः कर्णं स्वप्न उक्त्वा न्यवारयत् । सर्वथा दास्य इत्युक्ते प्राहाऽऽदेयं वरायुधम् ॥ ४४२ ॥ ददौ चोत्कृत्य कवचं कुण्डले च शचीपतेः । अमोघां शक्तिमादाय ज्ञात्वेन्द्रं द्विजरूपिणम् ॥ ४४३ ॥ ऋतेऽर्जुनादेकमेव वधिष्यस्यनयेति सः । दत्वा शक्तिं ययौ शक्रः सार्धं कवचकुण्डलैः ॥ ४४४ ॥

पार्था विमुच्यैव सुयोधनं तं वने वसन्तो मुदिताः सदैव । सहारणीभाण्डमथो मृगेण हृतं द्विजस्याशु निशम्य चान्वयुः ॥ ४४५ ॥ तस्मिन्नदृश्ये तृषिता एकैकमुदकार्थिनः । ययुर्युधिष्ठिरमृते सुप्तास्ते

SGDF
Sri Gargeshwari Digital Foundation

धर्ममायया ॥ ४४६ ॥ अदृश्येनैव धर्मेण वारिता वारिपायिनः । क्षत्रधर्मस्य रक्षार्थं न तत्प्रश्नान्विदांवराः ॥ ४४७ ॥ व्याचक्रुः शक्तिमन्तोऽपि पानीयार्थमरिन्दमाः ॥ ४४८ ॥ न विप्राणां च धर्मोऽयं विद्याया उपजीविनम् । क्षत्रियाणां च किमुत प्रसभं तेन ते पपुः ॥ ॥४४९॥ देवा अपि मनुष्येषु जाताः सुबलिनोऽपि हि । मानुषेणैव भावेन युक्ताः स्युः केशवादृते ॥ ४५० ॥ कार्येष्वेषां क्रमेणैव व्यक्तिमायान्ति सद्गुणाः । अतो भीमार्जुनौ धर्माद्त्युत्तमबलावपि ॥ देवमायां समाश्रित्य धर्मेण स्वापितौ क्षणात् ॥ ४५१ ॥ मुहूर्तमेव सा माया तयोराच्छादने क्षमा । ततः प्रबुद्धयोर्धर्मो नैव शक्तिशतांशभाक् ॥ ॥ ४५२ ॥ उक्तं पद्मपुराणे च तदेतत्सर्वमञ्जसा । तस्मान्नाशक्तिरनयोः सम्भाव्या भीमपार्थयोः ॥ ४५३ ॥ धर्मात्मजोऽथाजगामोदकान्तं दृष्ट्वा भ्रातॄंस्तत्र दुःखाभितप्तः । इच्छन्पातुं वारि संवारितश्च पित्रा बकाकारमितेन नापात् ॥ ४५४ ॥ अर्थे भ्रातॄणामैच्छदसौ तदीयप्रश्नप्रतिव्याहरणं दयालुः । ततो धर्मो यक्षतनुः स भूत्वा प्रश्नांश्चक्रे व्याकरोत्तान्स पार्थः ॥ ४५५ ॥ ततस्तुष्टो वरमस्मै ददौ स एकोत्थानं भ्रातृमध्ये स वव्रे । यद्येकः स्यान्नकुलोऽस्त्वित्यथाह तुष्टो धर्मः कथमेतत्कृतं ते ॥ ४५६ ॥ अतिप्रीतिर्भीमसेने तवास्ति बली चासौ राज्यहेतुस्तव स्यात् । इत्युक्त ऊचे माद्रिपुत्रं विहाय कुन्तीपुत्रो न मयोत्थापनीयः ॥ ४५७ ॥ स एवमुक्तो नितरां प्रीयमाण उत्थापयामास च तान्समस्तान् । यथेष्टरूपप्राप्तिमेषां पुनश्च स्वकामतो निजरूपाप्तिमादात् ॥ ४५८ ॥ अज्ञातवासेऽज्ञाततां सर्वदैव ददौ तेषां प्रीत एवानृशंस्यात् । एवं क्रीडन्पुत्र इत्यात्मनैव यशोधर्मावात्मनो वर्धयन्सः ॥ ४५९ ॥ युधिष्ठिरात्मनः स्वस्य यशोधर्माभिवृद्धये । कृत्वारण्यपहारादि पुनर्दत्वा च तत्स्वयम् ॥ दातुं विप्राय तद्धस्ते ययौ धर्मो दिवं पुनः ॥ ४६० ॥ ततो राजा भीमसेनार्जुनौ च सार्धं

SGDF
Sri Gargeshwari Digital Foundation

यमाभ्यामरणीं प्रदाय । मुदा युताः कृष्णया सार्धमेव सन्तुष्टुवुः कृष्णमनन्तमच्युतम् ॥ ४६१ ॥ (३६५४) ॥ इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये अरणीप्राप्तिर्नाम द्वाविंशोऽध्यायः ॥ २२ ॥

॥ अथ त्रयोविंशोऽध्यायः ॥

॥ ॐ ॥ नारायणानुग्रहतो यथावन्निस्तीर्य तान्द्वादशाब्दान्वने ते । विसृज्य च ब्राह्मणादीन्सधौम्यानज्ञातवासाय ततो मनो दधुः ॥१॥ गत्वा विराटस्य पुरीं निधाय हेतीः शम्यां छन्नरूपा बभूवुः । यतिः सूदः षण्डवेषोऽ(श्व)थ सूतवेषो गोपो गन्धकर्त्री च जाताः ॥ २ ॥ सर्वे विराटं ययुरत्र देववत्सम्भावितास्तेन शुभोरुलक्षणाः । युधिष्ठिरस्यैव शुश्रूषणं ते चक्रुर्हृदा वासुदेवस्य नान्यत् ॥ ३ ॥ परपाको गृहस्थस्य क्षत्रियस्य विशेषतः । न योग्य इति सूदस्य बभ्रे वेषं वृकोदरः ॥ ४ ॥ वैदिकव्यवहारेषु ज्ञानाधिक्यप्रसिद्धितः । जानीयुर्भीम इत्येव सूदवेष-स्ततोऽभवत् ॥५॥ स्त्रीयं वेदविदां सर्वं देवेशानां च किं पुनः । अतस्तेऽन्याश्रयं नैव चक्रुः स्वबलसंश्रयात् ॥ ६ ॥ शापादेवार्जुनः षण्डवेषोऽभून्नकुलस्तथा । क्षत्रियानन्तरत्वाच्च सूतजातेस्तथाऽभवत् ॥ ॥ ७ ॥ सूतस्यानन्तरत्वाच्च वैश्यजातेस्तथाऽभवत् । सहदेवो वैश्य-जातिर्गोपालस्तेषु चोत्तमः ॥ ८ ॥ ततो गोपालतामाप यतिः पूज्यो-ऽखिलैर्यतः । यतिरासीद्धर्मजोऽतः सोऽभ्यासार्थं सदैव च ॥ अक्षा-सक्तोऽभवत्पश्चाद्दर्शयिष्यन्स्वशिष्टताम् ॥ ९ ॥ भीमसेनसधर्मार्थं शूद्रा सैरन्ध्रिकाऽभवत् । द्रौपदी भर्तृसाधर्म्यं स्त्रीणां धर्मो यतः सदा ॥१०॥

अथाजगाम मल्लकः समस्तभूमिमण्डले । वरेण योऽजितो

SGDF
Sri Gargeshwari Digital Foundation

जयी शिवस्य सञ्जगर्ज च ॥ ११ ॥ तमीक्ष्य सर्वमल्लका विराटराज-संश्रयाः । प्रदुद्रुवुर्भयार्दितास्तदाऽवदद्युधिष्ठिरः ॥ १२ ॥ य एष सूद आशु तं निहत्यमल्लमोजसा । यशस्तवाभिवर्धयेत्समाह्वयाद्य तं नृप ॥ १३ ॥ इतीरिते समाहुतो जगाद मारुतिर्वचः । प्रसादतो हरेरहं निषूदयेऽद्य मल्लकम् ॥ १४ ॥ समस्तदेववृन्दतो महान्य एव केशवः । समस्तदेवनामवांस्तदीयभक्तितो बलम् ॥ १५ ॥ य एव देवनामधा इति श्रुतिर्जगाद हि । महांश्च देव एष तत्स मे जयं विधास्यति ॥ १६ ॥ युधिष्ठिराभिधश्च यो युधिष्ठिरे स्थितः सदा । त्वयि स्थितस्त्वमित्यसौ सदाऽभिधीयते हरिः ॥ १७ ॥ इति ब्रुवाणो मल्लं तमभियातो वृकोदरः । अनयन्मृत्युलोकाय बलाढ्यैरपि दुर्जयम् ॥ ॥ १८ ॥

एवं निवसतां तत्र पाण्डवानां महात्मनाम् । संवत्सरे द्विमासोने विजित्य दिश आगतः । कीचको मत्स्यनृपतेः श्यालो बलवतां वरः ॥ ॥ १९ ॥ स द्रौपदीमीक्ष्य मनोभवार्तः सम्प्रार्थयामास तया निरस्तः । मासे गते भगिनीं स्वां सुदेष्णां सम्प्रार्थयामास तदर्थमेव ॥ २० ॥ तया निषिद्धोऽपि पुनः पुनस्तां यदा ययाचेऽथ च साऽऽह कृष्णाम् । समानयाश्वेव सुरां मदर्थमितीरिता नेति भीताऽवदत्सा ॥ २१ ॥ बलात्तया प्रेषिता तद्गृहाय यदाऽगमत्तेन हस्ते गृहीता । विधूय तं प्राद्रवत्सा सभायै स्मृत्वाऽऽदित्यस्थं वासुदेवं परेशम् ॥ २२ ॥ अनुद्रुत्यैनां पातयित्वा पदा स संताडयामास तदा रविस्थः । नारायणो हेतिनामैव रक्षो न्ययोजयत्तददृश्यं समागात् ॥ २३ ॥ वायुस्तदाविश्य तु कीचकं तं न्यपातयत्तां समीक्ष्यैव भीमः । चुकोप वृक्षं च समीक्षमाणं तं वारयामास युधिष्ठिरोऽग्रजः ॥ २४ ॥ कृष्णा रात्रौ भीमसकाशमेत्य हन्तुं पापं कीचकं प्रैरयत्तम् । भीमस्य बुद्ध्या निशि सा कीचकं च जगाद गन्तुं शून्यगृहं स चागात् ॥ २५ ॥ तत्रैनमासाद्य

SGDF
Sri Gargeshwari Digital Foundation

च भीमसेनो विजित्य तं बाहुयुद्धे निहत्य । शिरो गुदे पाणिपादौ च तस्य प्रवेशयामास विमृद्य वीरः ॥ २६ ॥ अवध्यं तं निहतं वीक्ष्य तस्य पञ्चोत्तरं शतमेवानुजानाम् । सर्वे वराच्छङ्करस्य ह्यवध्यं सहैव कृष्णां तेन दग्धुं बबन्ध ॥ २७ ॥ सा नीयमाना कीचकैः संरुराव श्रुत्वैव तं भीमसेनो महान्तम् । उद्धृत्य वृक्षं तेन जघान सर्वानादाय कृष्णां पुनरागाद्गृहं च ॥ २८ ॥ एवं यत्नात्तपसा तैरवाप्तो वरः शिवादजयत्वं रणेषु । अवध्यता चैव षडुत्तरास्ते शतं हता भीमसेनेन सङ्ख्ये ॥ २९ ॥ गन्धर्व इत्येव निहत्य सर्वान्मुमोद भीमो द्रौपदी चाथ कृष्णाम् । याहीत्यूचे सा सुदेष्णाभयेन त्रयोदशाहं पालयेत्याह तां सा ॥ ३० ॥ अस्त्वित्यनेनामाह भयात्सुदेष्णा तथाऽवसन्पूर्णमब्दं च तेऽत्र ।

तदा पार्थान्प्रविचिन्त्याखिलायां पृथ्व्यां छन्नान्धार्तराष्ट्रस्य दूताः । अविज्ञाय प्रययुर्धार्तराष्ट्रमूचुर्हतं कीचकं योषिदर्थे ॥ ३१ ॥ तेनावदद्रौपदीकारणेन दुर्योधनो निहतं कीचकं तम् । भीमेनागुस्तत्र दुर्योधनाद्या भीष्मादिभिः सह कर्णेन चैव ॥ ३२ ॥ अग्रे ययौ तत्र योद्धुं सुशर्मा स गा विराटस्य समाजहार । श्रुत्वा विराटोऽनुययौ ससेनस्तं पाण्डवाश्चानु ययुर्विनार्जुनम् ॥ ३३ ॥ विजित्य सङ्ख्ये जगृहे विराटं तदा सुशर्मा तमयाद्वृकोदरः । स तस्य सेनां विनिहत्य मात्स्यं विमोच्य जग्राह सुशर्मराजम् ॥ ३४ ॥ युधिष्ठिरो मोचयामास तं च ततो रात्रौ न्यवसन्बाह्यतस्ते ॥ ३५ ॥

ततोऽपरदिने सर्वे भीष्मद्रोणपुरःसराः । रहितं कीचकैर्मात्स्यं शक्यं मत्वाऽभिनिर्ययुः ॥३६॥ कीचकस्य हिडिम्बस्य बककिर्मीरयोरपि । जरासन्धस्य नृपतेः कंसादीनां च सर्वशः ॥३७॥ न बाधनाय भीष्माद्या अपि शेकुः कथश्चन । तस्मात्ते कीचकं शान्तं श्रुत्वा मात्स्यं ययुर्मृधे ॥ ३८ ॥ यतिष्ये रक्षितुं भीमाद्धार्तराष्ट्रानिति स्वकाम् ।

SGDF
Sri Gangeshwari Digital Foundation

सत्यां कर्तुं प्रतिज्ञां तु ययौ द्रोणः सपुत्रकः ॥ ३९ ॥ यदि युद्धाय निर्यान्ति ज्ञाताः स्युः पाण्डवास्तदा । न चेद्विराटमनतं नमयिष्यामहे वयम् ॥ ४० ॥ इति मत्वा विराटस्य जगृहुर्गाः समन्ततः ॥ ४१ ॥ तदोत्तरः सारथित्वे प्रकल्प्य पार्थं ययौ तान्निशाम्यैव भीतः । ततोऽर्जुनः सारथिं तं विधाय कृच्छ्रेण संस्थाप्य च तान्ययौ कुरून् ॥४२॥ आदाय गाण्डीवमथ ध्वजं च हनूमदङ्कं सदरोऽग्रतो गाः । निवर्त्य युद्धाय ययौ कुरूंस्ताञ्जिग्ये सर्वान्द्वैरथेनैव सक्तान् ॥ ४३ ॥ एकीभूतान्पुनरेवानुयातान्सम्मोहनास्त्रेण विमोहयित्वा । जग्राह तेषामुत्तरीयाण्यृते तु भीष्मस्य वेदास्त्रघातं स एव ॥ ४४ ॥ विधाय भीष्मं विरथं जगाम तदा श्रुत्वा मत्स्यपतिर्जितान्कुरून् । मुमोद पुत्रेण जिता इति स्म तदाऽऽह षण्डेन जितान्युधिष्ठिरः ॥ ४५ ॥ तदा क्रुद्धः प्राहरत्तं विराटः सोऽक्षेण तद्भीमधनञ्जयाभ्याम् । श्रुतं तदा तौ कुपितौ निशाम्य न्यवारयत्तावपि धर्मसूनुः ॥ ४६ ॥ निजस्वरूपेण समास्थितान्नो यदि स्म नासौ प्रणिपातपूर्वकम् । क्षमापयेद्वध्य इत्यात्मरूपं समास्थितास्तस्थुरथापरे दिने ॥ ४७ ॥ तदा विराटासनमास्थितं नृपं युधिष्ठिरं वीक्ष्य विराट आह । किमेतदित्यूचिवानुत्तरोऽस्मै तान्पाण्डवान्गोग्रहणे च वृत्तम् ॥ ४८ ॥ ततो विराटो भयकम्पिताङ्गः प्रणम्य पार्थाञ्छरणं जगाम । ददौ च कन्यामुत्तरां फल्गुनाय पुत्रार्थमेव प्रतिजग्राह सोऽपि ॥ ४९ ॥

एवं विराटं मोचयित्वैव गाश्च तमस्यन्धे कीचकान्पातयित्वा । प्राप्तो धर्मः सुमहान्वायुजेन तस्यानु पार्थेन च गोविमोक्षणात् ॥ ५० ॥ अयातयन्केशवायाथ दूतान्सहाभिमन्युः सोऽपि रामेण सार्धम् ॥ अगादनंतानन्दचिद्वासुदेवो विवाहयामासुरथाभिमन्युम् ॥५१॥ आसीन्महानुत्सवस्तत्र तेषां दाशार्हवीरैः सह पाण्डवानाम् ॥ सपाञ्चालानां वासुदेवेन सार्धमज्ञातवासं समतीत्य मोदताम् ॥ ५२ ॥

SGDF
Sri Gangeshwari Digital Foundation

दुर्योधनाद्याः सूतपुत्रेण सार्धम् ससौबलेया युधि पार्थपीडिताः ॥ भीष्मादिभिः सार्धमुपेत्य नागपुरं मन्त्रं मन्त्रयामासुरत्र ॥ ५३ ॥ अज्ञातवासे फल्गुनो नोऽद्य दृष्टस्तस्मात्पुनर्यान्तु पार्था वनाय ॥ इति ब्रुवाणानाह भीष्मोऽभ्यतीतमज्ञातवासं द्रोण आहैवमेव ॥ ५४ ॥ तयोर्वाक्यं ते त्वनादृत्य पापा वनं पार्थाः पुनरेव प्रयान्तु ॥ इति स्म दूतं प्रेषयामासुरत्र जानन्ति विप्रा इति धर्मजोऽवदत् ॥ ५५ ॥ सौरमासानुसारेण धार्तराष्ट्रा अपूर्णताम् ॥ आहुश्चान्द्रेण मासेन पूर्णः कालोऽखिलोऽप्यसौ ॥ ५६ ॥ दिनानामधिपः सूर्यः पक्षमासाधिपः शशी ॥ तस्मात्सौम्याद्धमेवात्र मुख्यमाहुर्मनीषिणः ॥ ५७ ॥ सौम्यकालं ततो यज्ञे गृह्णन्ति न तु सूर्यजम् ॥ तदेतदविचार्यैव लोभाच्च धृतराष्ट्रजैः ॥ ५८ ॥ राज्यं न दत्तं पार्थेभ्यः पार्थाः कालस्य पूर्णताम् ॥ ख्यापयन्तो विप्रवरैरुपप्लाव्यमुपाययुः ॥ ५९ ॥ सवासुदेवा अखिलैश्च यादवैः पाञ्चालमात्स्यैश्च युताः सभार्याः ॥ उपप्लाव्ये ते कतिचिद्दिनानि वासं चक्रुः कृष्णसंशिक्षितार्थाः ॥६०॥ (३७१४) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये विराटपर्वकथानिरूपणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ अथ चतुर्विंशोऽध्यायः ॥

॥ ॐ ॥ ततः संमन्त्र्यानुमते कृष्णस्य स्वपुरोहितम् ॥ द्रुपदः प्रेषयामास धृतराष्ट्राय शान्तये ॥ १ ॥ स गत्वा धृतराष्ट्रं तं भीष्मद्रोणादिभिर्युतम् ॥ उवाच न विरोधस्त उत्पाद्यो धर्मसूनुना ॥ २ ॥ यस्य भीमार्जुनौ योधौ नेता यस्य जनार्दनः ॥ श्रुतास्ते भीमनिहता जरासन्धादयोऽखिलाः ॥३॥ यथा च रुद्रवचनादवध्या राक्षसाधिपाः॥

SGDF
Sri Gargeshwari Digital Foundation

तीर्थविघ्नकराः सर्वे तीर्थान्याच्छाद्य संस्थिताः ॥ ४ ॥ तिस्रः कोट्यो महावीर्या भीमेनैव निषूदिताः ॥५॥ भ्रातॄणां ब्राह्मणानां च लोकानां च हितैषिणा । ततो हि सर्वतीर्थानि गम्यान्यासन्नृणां क्षितौ ॥ ६ ॥ यथा जटासुरः पापः शर्वाणीवरसंश्रयात् । अवध्यो विप्ररूपेण वञ्चयन्नेव पाण्डवान् ॥ ७ ॥ ज्ञात्वाऽपि भीमसेनेन विप्ररूपस्य नो वधः । योग्य इत्यहतो भीमे मृगयार्थं गते क्वचित् ॥ ८ ॥ यमौ युधिष्ठिरं कृष्णां चादायैव पराद्रवत् । दृष्टो भीमेन तांस्त्यक्त्वा संसक्तस्तेनसङ्गरे ॥ ९ ॥ निपात्य भूमौ पादेन संचूर्णितशिरास्तमः । जगाम किमु ते पुत्राः शक्या हन्तुमिति स्म ह । निवातकवचाश्चैव हताः पार्थेन ते श्रुताः ॥ १० ॥ जानासि च हरेर्वीर्यं यस्येदमखिलं वशे । सब्रह्मरुद्रशक्राद्यं चेतनाचेतनात्मकम् ॥ ११ ॥ तस्मादेतैः पालितस्य धर्मजस्य स्वकं वसु । दीयतामिति तेनोक्तो धृतराष्ट्रो न चाकरोत् ॥ ॥ १२ ॥

ततः सहैव यदुभिः कृष्णं द्वारवतीं गतम् । युद्धसाहाय्यमिच्छन्तौ धार्तराष्ट्रधनञ्जयौ । युगपद्ययतुस्तत्र वेगेनाजयदर्जुनम् ॥ ॥ १३ ॥ दुर्योधनः शिरस्थान आसीनोऽभूद्धरेस्तदा । दर्पान्नाहं राजराज उपास्ये पादयोरिति ॥ १४ ॥ तयोरागमनं पूर्वं ज्ञात्वैव हि हरिः प्रभुः । असुप्तः सुप्तवच्छिश्ये तत्रातिष्ठद्धनञ्जयः ॥१५॥ प्रणम्य पादयोः प्रह्वो भक्त्युद्रेकात्कृताञ्जलिः ॥ १६ ॥ तमैक्षत्प्रथमं देवो जानन्नपि सुयोधनम् । स्वागतं फल्गुनेत्युक्ते पूर्वमागामहं त्विति ॥ ॥ १७ ॥ आह दुर्योधनस्तं च स्वागतेनाभ्यपूजयत् ॥ १८ ॥ तयोरागमने हेतुं श्रुत्वा प्राह जनार्दनः । एकः पूर्वागतोऽत्रान्यः पूर्वं दृष्टो मया यतः ॥ १९ ॥ समङ्करिष्ये युवयोरेकत्राहं निरायुधः । अन्यत्र दशलक्षं मे पुत्राः शूराः पदातयः ॥ २० ॥ इत्युक्ते फल्गुनः कृष्णं वव्रे तद्भक्तिमान्यतः । अन्यस्तत्राभक्तिमत्त्वाद्वव्रे गोपान्प्रयुध्यतः ॥२१॥

SGDF
Sri Gangeshwari Digital Foundation

पार्थानामेव साहाय्यं करिष्यन्नपि केशवः । तस्याभक्तिं दर्शयितुं चक्रे समवदीश्वरः ॥ २२ ॥ ततः पार्थेन सहितः पाण्डवान्केशवो ययौ । दुर्योधनो ययौ रामं स भयात्केशवस्य च । न साहाय्यं करोमीति प्राह तत्स्नेहवानपि ॥ २३ ॥ उपप्लाव्ये सभायां हि तत्पक्षीयं वचो ब्रुवन् । निराकृतः सात्यकिना समक्षं केशवस्य च ॥ २४ ॥ ततो दुर्योधनं नायात्स च हार्दिक्यसंयुतः ॥ २५ ॥ जगाम हास्तिनपुरमक्षौहिण्यो दशाभवन् । एका च धार्तराष्ट्रस्य नानादेश्यैर्नृपैर्युताः ॥ सप्त पाण्डुसुतानां च मात्स्यद्रुपदकैकयैः ॥ २६ ॥ धृष्टकेतुजरासंधसुतकाशिनृपैर्युताः । पुरुजित्कुन्तिभोजश्च चेकितानश्च सात्यकिः ॥ २७॥ पाण्डवान्सेनया युक्ताः समीयुर्देवपक्षिणः । विन्दानुविन्दावावन्त्यौ जयत्सेनोऽन्यकैकयाः । क्षेमधूर्तिर्दण्डधरः कलिङ्गोऽम्बष्ठ एव च ॥२८ श्रुतायुरच्युतायुश्च बृहद्बलसुदक्षिणौ । श्रुतायुधः सैंधवश्च राक्षसोऽलम्बुसस्तथा । अलायुधोऽलम्बलश्च दैत्या दुर्योधनं ययुः ॥ २९ ॥ गत्वा दुर्योधनाहूतो भगदत्तोऽपि तं ययौ ॥ ३० ॥ सपुत्रपौत्रो बाह्लीको भीष्मद्रोणकृपा अपि । प्रीत्यर्थं धृतराष्ट्रस्य बभूवुस्तत्सुतानुगाः ॥३१॥ पाण्ड्यश्च वीरसेनाख्यः पाण्डवानेव संश्रितः ॥ ३२ ॥ शल्यं च पाण्डवानेव यातं ज्ञात्वा सुयोधनः । सुसभाः कारयामास सर्वभोगसमन्विताः ॥ ३३ ॥ ता युधिष्ठिरक्लृप्ताः स मत्वा शल्योऽब्रवीदिदम् । य एताः कारयामास तदभीष्टं करोम्यहम् ॥ ३४ ॥ लीनः श्रुत्वा धार्तराष्ट्रः सत्यं कुर्वित्यभाषत । देहि मे युद्धसाहाय्यमिति सोऽपि यशोऽर्थयन् ॥ रक्षार्थमात्मवाक्यस्य तथेत्येवाभ्यभाषत ॥ ३५ ॥ स पाण्डवांस्ततो गत्वा तैरनुज्ञात एव च । तेजोवधार्थं कर्णस्य धनञ्जय कृतेऽर्थितः ॥३६॥ तथेत्युक्त्वा ययौ धर्मनन्दनं कौरवान्प्रति । ३७॥

सञ्जयं प्रेषयामास धृतराष्ट्रोऽथ शान्तये ॥ पाण्डवान्प्रत्यधर्मं च युद्धं स प्रत्यपादयत् ॥ ३८ ॥ हठवादेऽवदद्भीमो यं धर्मं द्रौपदी

SGDF
Sri Gargeshwari Digital Foundation

तथा । तमेवोक्त्वा धर्मजस्तु चकार च निरुत्तरम् ॥ ३९ ॥ कृष्णोऽपि तस्य धर्मस्य प्रामाण्यं प्रत्यपादयत् ॥ ४० ॥ ततो निरुत्तरः कृष्णं पाण्डवांश्च प्रणम्य सः । धृतराष्ट्रं ययौ तं च विनिन्द्य प्रययौ गृहम् ॥ ॥ ४१ ॥

निन्दितः सञ्जयेनासावाहूय विदुरं निशि ! पप्रच्छ सोऽवदद्धर्मं पार्थानां राज्यदापनम् ॥ ४२ ॥ ऐहिकस्य सुखस्यापि कारणं तदनिन्दितम् । अन्यथा सर्वपुत्राणां नाशं धर्मातिलङ्घनम् ॥ ४३ ॥ तत्र भावमकृत्वा स ज्ञानादिच्छन्नघक्षयम् । विष्णोः स्वरूपं पप्रच्छ सोऽस्मरच्च सनातनम् ॥ ४४ ॥ स आगत्यावदत्तत्त्वं विष्णोर्मायाविनः शुभा । न गतिश्चेत्यथ प्रातः सञ्जयः पाण्डवोदितम् ॥ अवदद्धृतराष्ट्राय सभायां कुरुसन्निधौ ॥ ४५ ॥ तच्छ्रुत्वा स तु भीतोऽपि पुत्रस्नेहानुगो नृपः । राज्यं नादात्पाण्डवानां

ततो धर्मसुतो नृपः ॥४६॥ यदुक्तवान्सञ्जयाय यदि दित्सति नः पिता । राज्यं तदा त्वमागच्छ विदुरो वा न चेन्न च ॥ तावथानागतौ ज्ञात्वा मन्त्रयामास शौरिणा ॥४७॥ सोऽप्याहाहं गमिष्यामि सभायामृषिसन्निधौ ॥ ४८ ॥ वक्ष्ये पथ्यानि युक्तानि यदि नासौ ग्रहीष्यति । वध्यः सर्वस्य लोकस्य स भवेत्सर्वधर्महा ॥४९॥ इत्युक्तो वैरमात्मोत्थं लोकमध्ये प्रहापयन् । लोकसङ्ग्रहणार्थाय भीमसेनोऽब्रवीद्वचः ॥ ५० ॥ नास्मन्निमित्तं नाशः स्यात्कुलस्यापि वयं कुलम् । रक्षितुं धार्तराष्ट्रस्य भवेमाधश्चरा इति ॥ ५१ ॥ इच्छताऽप्यखिलान्हन्तुं धार्तराष्ट्रान्दृढात्मना । भीमेनोक्तो वासुदेवो लोकसंग्रहणेच्छया ॥५२॥ वधं तेषां धर्ममेव लोके ख्यापयितुं हरिः । आक्षिपन्निव भीमं तं युद्धाय प्रैरयद्दृढम् ॥ ५३ ॥ अभिप्रायं केशवस्य जानन्भीमो निजं बलम् ॥ राज्ञां मध्येऽवदत्तच्च कृष्णोऽभ्यधिकमेव हि ॥ ५४ ॥ शशंस सत्यैः सद्वाक्यै राज्ञां मध्ये प्रकाशयन् ॥ वधं कुरूणां सद्धर्मं

SGDF
Sri Gargeshwari Digital Foundation

गुणान्भीमस्य चामितान् ॥ ५५ ॥ नित्यमेकमनस्कौ तावपि केशव-
मारुती । एवं लोकस्य संवादहेतोः संवादमकृताम् ॥ ५६ ॥ ततः
कृष्णोऽर्जुनं चैव कृपालुं सन्धिकामुकम् । हेतुमद्भिः शुभैर्वाक्यैरनुनीय
जगत्पतिः ॥ उक्तो मानुषया बुद्ध्या नकुलेन सुनीतिवित् ॥ ५७ ॥
शौर्यप्रकाशनायैव युद्धं योजयताद्भवान् । इत्युक्तः सहदेवेन युयुधानेन
चाच्युतः ॥ ५८ ॥ दस्यूनां निग्रहो धर्मः क्षत्रियाणां यतः परः ।
अतो न धार्तराष्ट्रैर्नः सन्धिः स्यादिति पार्षती ॥ ५९ ॥ जगाद कृष्णं
सोऽप्येनामोमित्युक्त्वा विनिर्ययौ ॥ ६० ॥ ससात्यकिः स्यन्दनवर्य-
संस्थितः पृथातनूजैरखिलैश्च भूमिपैः । अन्वागतो दूरतरं गिरा तान्संस्थाप्य
विप्रप्रवरैः कुरून्ययौ ॥ ६१ ॥

एकोऽपि कृष्णः (विष्णुः) स च भार्गवात्मा व्यासात्मकश्चानु-
गतो मुनीन्द्रैः (व्यासस्सशिष्यस्तदनन्यदृश्यः) ॥ ययौ तदुक्तेर्हि
गुणान्प्रवेत्तुं नान्यो हि शक्तस्तमृते यतः प्रभुम् ॥ ६२ ॥ स
वन्द्यमानोऽखिलराष्ट्रवासिभिः प्रसूनवर्षैरभिवर्षितः सुरैः । संस्तूयमानः
प्रणतोऽब्जजादिभिर्गजाह्वयं प्राप परोऽप्रमेयः ॥ ६३ ॥ स भीष्म-
मुख्यैः सरसाभियातः सहैव तैः प्रययौ राजमार्गे । दिदृक्षवस्तं
जगदेकसुन्दरं गुणार्णवं चाययुरत्र सर्वे ॥ ६४ ॥ सम्भावितस्तैः
परमादरेण विवेश गेहं नृपतेरनन्तः । स भीष्ममुख्यान्पुरतो निधाय
वैचित्रवीर्येण समर्चितोऽजः ॥ ६५ ॥ रौक्मे निषण्णः परमासने
प्रभुर्बभौ स्वभासा ककुभोऽवभासयन् ॥ ६६ ॥ यथोचितं तेषु विधाय
केशवो दौर्योधनं प्राप्य गृहं च पूजितः । पूजां तदीयां गुणवद्विडि-
त्यसौ जग्राह नो विदुरं चाजगाम ॥६७॥ स भीष्मपूर्वैरभियाचितोऽपि
जगाम नैषां गृहमादिदेवः । उपेक्षिता द्रौपदीत्यप्रमेयो जगाम गेहं
विदुरस्य शीघ्रम् ॥६८॥ स तेन भक्त्याऽभिगतः प्रसन्नः प्रविश्य चान्तर्गृह-
मीश्वरोऽजः। भक्त्याऽभिपूर्णेन ससम्भ्रमेण सम्पूजितः सर्वसमर्पणेन ॥६९॥

SGDF
Sri Gargeshwari Digital Foundation

परे दिनेऽसौ धृतराष्ट्रसूनुना सम्मानितः संसदि कौरवाणाम् । विवेश दिव्ये मणिकाञ्चनासने सार्धं मुनीन्द्रैः परमार्थवेदिभिः ॥७०॥ सम्पूजितो भीष्ममुख्यैः समस्तै रराज राजीवसमाननेत्रः । यथोचितास्तत्र विधाय वार्ता जगाद काले कलिकल्मषापहः ॥७१॥ वैचित्रवीर्यस्य (स्व)कुलस्य वृद्ध्यै प्रदेहि राज्यं तव सत्सुताय । यशश्च धर्मं परमं प्रसादं मम त्वमाप्नोषि त(स)दैव राजन् ॥ ७२ ॥ अतोऽन्यथा यशसो धर्मतश्च हीनः प्रतीपत्वमुपैषि मेऽतः । इतीरितः प्राह ममातिवर्तिनं सुतं स्वयं मे प्रतिबोधयेति ॥ ७३ ॥ स वासुदेवेन विबोधितोऽपि पापाभिसन्धिर्धृतराष्ट्रसूनुः । उत्थाय तस्मादनुजैरमात्यैर्नियन्तुमीशं कुमतिर्व्यधान्मतिम् ॥ ७४ ॥ ये ये तदा केशवसंयमाय न्यमन्त्रयंस्ते विबुधप्रतीपाः । अतो विकर्णप्रमुखा अपि स्म वध्यत्वमायन्न शुभां गतिं च ॥७५॥ कर्णः सुरांशो(ग्रचो)ऽपि सुयोधनार्थे न्यमन्त्रयद्भावतो नैव दुष्टः । अतो गतिश्चास्य सुशोभनाऽभूद्येऽत्रानुकूलाः परमस्य ते शुभाः ॥७६॥ ऋषिभिर्जामदग्न्येन व्यासेनाप्यमितौजसा । वासुदेवात्मकेनैवं त्रिरूपेणैव विष्णुना ॥ ७७ ॥ मातापितृभ्यां भीष्माद्यैरनुशिष्टोऽपि दुर्मतिः । दुर्योधनो मन्त्रयते मुकुन्दस्यानुबन्धनम् ॥ ७८ ॥ सात्यकिः कृतवर्मा च तच्छुश्रुवतुरञ्जसा । संस्थाप्य कृतवर्माणं रहः सात्यकिरत्र च ॥ अभ्येत्य केशवं प्राह दुर्योधनविनिश्चयम् ॥ ७९ ॥ जानन्नप्यखिलं कृष्णस्तच्छ्रुत्वा सात्यकेर्मुखात् । वैचित्रवीर्यमवदत्पश्यमामिति सर्वगम् ॥ ८० ॥ अथ तेनाहुते पुत्रे सामात्ये पुरुषोत्तमः । स्वरूपं दर्शयामास सर्वगं पूर्णषड्गुणम् ॥ ८१ ॥ तत्कालसूर्यामितदीप्तिसर्वजगद्धरं शाश्वतमप्रमेयम् । दृष्ट्वैव चक्षूंषि सुयोधनाद्या न्यमीलयन्दीधितिवारितानि ॥ ८२ ॥ पिधाय रूपं पुनरेव तद्धरिर्वैचित्रवीर्येण समर्थितः पुनः । कृत्वान्धमेव प्रययौ सुयोधनं सहानुगं पापतमं प्रकाश्य ॥ ८३ ॥ अनन्तशक्तिः पुरुषोत्तमोऽसौ शक्तोऽपि दुर्योधन-

SGDF
Sri Gurgeshwari Digital Foundation

चित्तनिग्रहे। नैव व्यधादेनमथोक्तकारिणं निपातयन्नन्धतमस्यनन्तः ॥ ॥ ८४ ॥

पुनश्च कुन्तीगृहमेत्य कृष्णस्तयोद्योगं धर्मसुतस्य शिष्टम्। श्रुत्वा ययौ सूर्यजमात्मयाने निधाय तस्यावददात्मजन्म ॥ आयाहि पार्थानिति तद्वचः स नैवाकरोन्मानितो धार्तराष्ट्रैः ॥ ८५ ॥ संस्थाप्य तं भगवान्द्रौणये च रहो वदन्मित्रभावं पृथाजैः। यावत्पितुर्मरणं सोऽपि मैत्रीं वव्रे पार्थैस्तं विसृज्याथ कृष्णः ॥ ८६ ॥ ययौ कुरून्पूर्वमेवोद्विसृज्य पृथासुतानां स सकाशमीशः ॥ ८७ ॥ सम्प्रार्थितः पृथया चैव कर्णः पार्थैर्योगं याहि सूनुर्ममासि। तेनाप्युक्ता वासविना विनाहं हन्यां सुतांस्ते न कथञ्चनेति ॥ ८८ ॥

ततो ययुः कौरवाः पाण्डवाश्च कुरुक्षेत्रं योद्धुकामाः सकृष्णाः। चक्रुश्च ते शिबिराण्यत्र सर्वे शुभे देशे पाण्डवाः कृष्णबुद्ध्या ॥ ८९ ॥ ॥ (३८०३) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये युद्धोद्योगो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

॥ अथ पञ्चविंशोऽध्यायः ॥

॥ ॐ ॥ ते सेने समरारम्भे समेते सागरोपमे। भीमभीष्ममुखे वीक्ष्य प्राह वासविरच्युतम् ॥ १ ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत। इत्युक्तः स तथा चक्रे पार्थोऽपश्यच्च बान्धवान् ॥ विससर्ज धनुः पापाशङ्की तत्राह माधवः ॥ २ ॥ स्वधर्मो दुष्टनिधनं धर्मज्ञानानुपालनम्। क्षत्रियस्य तमुत्सृज्य निन्दितो यात्यधो ध्रुवम् ॥ ॥३॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४ ॥ न च शोकस्त्वया कार्यो बन्धूनां

SGDF
Sri Gargeshwari Digital Foundation

निधनेच्छया। देहस्य सर्वथा नाशादनाशाच्चेतनस्य च ॥ ५ ॥ सृष्टिस्थित्यप्ययाऽज्ञानबन्धमोक्षप्रवृत्तयः। प्रकाशनियमौ चैव ब्रह्मेशादिक्षरस्य च ॥६॥ अक्षरप्रकृतेश्चैव(स्सन्तो) मत्त एव न चान्यतः ॥७॥ न मे कुतश्चित्सर्गाद्याः स्वातन्त्र्याद्गुणपूर्तितः। अतः समाधिकाभावात्सर्वं मद्वशमेव च ॥ ८ ॥ ज्ञात्वैषां निधनाद्यं च जीवादेरस्वतन्त्रताम्। अस्वातन्त्र्यान्निवृत्तौ च मामनुस्मर युध्य च ॥९॥ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ॥ १० ॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ११ ॥ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ १२ ॥ सुपूर्णसत्सर्वगुणदेहोऽहं सर्वदा प्रभुः। अस्पृष्टाखिलदोषैकनित्यसत्तनुरव्ययः ॥ १३ ॥ इत्युक्तो वासविः प्राह व्याप्तिं ते दर्शयेश मे। अथ दिव्यदृशं तस्य दत्वा व्याप्तं निजं वपुः ॥१४॥ देशतः कालतश्चैव पूर्णं सर्वगुणैः सदा। दर्शयामास भगवान्यावत्यर्जुनयोग्यता ॥ १५ ॥ तत्प्रार्थितः पुनः कृष्णस्तद्रूपं लोकमानतः। पूर्ववद्दर्शयामास पुनश्चैनमशिक्षयत् ॥ १६ ॥ ज्ञानं ज्ञेयं प्रकृत्यादि ज्ञापयन्पुरुषोत्तमः। तेनानुशिष्टः पार्थस्तु सशरं धनुराददे ॥ १६ ॥

अथ व्यूढेष्वनीकेषु नदन्वायुसुतोऽभ्यगात्। समितिं धार्तराष्ट्राणां ते तं सर्वे न्यवारयन् ॥ १८ ॥ ससृजुः शरवृष्टिं च भीमसेनस्य मूर्धनि। क्षिप्रं नैव प्रहर्तव्यं ज्ञातिषु प्रहरत्स्वपि ॥ इत्येवाप्रहरत्यस्मिञ्छत्रुभिः शरविक्षते ॥१९॥ अमुचन्धार्तराष्ट्रेषु शस्त्रवृष्टिं दुरासदाम्। सौभद्रप्रमुखा वीराः सर्वे पाण्डुसुतात्मजाः ॥२०॥ अपीडयंस्ताञ्छस्त्रौघैर्धार्तराष्ट्राः समन्ततः ॥२१॥ ररक्ष तान्वायुसुतो विसृजञ्छरसञ्चयान्। तत्र भीमशरैर्नुन्ना धार्तराष्ट्राः समन्ततः ॥ २२ ॥ भग्नांस्तानथ गाङ्गेयो दिव्यास्त्रविदधारयत्। अथ द्वन्द्वानि युद्धानि बभूवुर्विजिगीषताम् ॥

SGDF
Sri Gurgeshwari Digital Foundation

॥ २३ ॥ द्रोणपार्षतयोश्चैव शैनेयकृतवर्मणोः । दुःशासनेन वीरस्य माद्रेयस्य यवीयसः ॥२४॥ नकुलस्य विकर्णस्य कार्ष्णेयैर्दुर्मुखादिनाम् । वृत्ते द्वन्द्वे महायुद्धे तत्र धर्मजपक्षगाः ॥ २५ ॥ जिता विनैव शैनेयं सोऽजयद्धृदिकात्मजम् । अथ भीष्मद्रोणमुखैर्भगदत्तादिभिस्तथा ॥२६॥ विद्राव्यमाणं स्वबलं स्थापयामास मारुतिः । द्रोणं च भगदत्तं च कृपं दुर्योधनं तथा ॥ केवलं बाहुवीर्येण व्यजयद्भीमविक्रमः ॥ २७ ॥ हत्वोत्तरं मद्रराजो व्यद्रावयदनीकिनीम् ॥२८॥ अथ भीष्ममुदीर्णास्त्रं द्रावयन्तं वरूथिनीम् । ससौमदत्तिं सौभद्रसहायोऽर्जुन आसदत् ॥२९॥ सौभद्रं तत्र विक्रान्तमतीत्य द्युसरित्सुतः । द्रावयामास पाञ्चालान्पश्यतः सव्यसाचिनः ॥ ३० ॥ तस्य विक्रममालक्ष्य पार्थं तद्गौरवानुगम् । दृष्ट्वा युधिष्ठिरो राजा क्रुद्धः सेनामपाहरत् ॥ ३१ ॥ रात्रौ युधिष्ठिरश्चिन्तामाप्य पार्थं व्यगर्हयत् । स कृष्णाद्यैः सान्त्वितश्च पुनर्युद्धाय निर्ययौ ॥ ३२ ॥

एवं भीष्मो दशाहानि सैनापत्यं चकार ह । कृत्वा तु पाण्डवैर्युद्धं तत्कर्तुमकृतोपमम् ॥ ३३ ॥ कर्णोऽर्धरथ इत्युक्त्वा तावद्युद्धात्त्रयापितः । यावत्त्वं योत्स्यसे तावन्न योत्स्यामीति निर्गते ॥ ३४ ॥ कर्णेऽयुतरथानां च नित्यशो वधमाहवे । प्रतिजज्ञेऽकरोत्तच्च पुनश्चास्त्रविदां वरः ॥ ३५ ॥ सुसमर्थावपि वधे तस्य भीमधनञ्जयौ । स्नेहेन यन्त्रितौ तस्य गौरवाच्चान्ववर्तताम् ॥३६॥ बभूवुस्तत्र युद्धानि चित्राणि सुबहूनि च । तान्यम्बरे विमानस्था ब्रह्मरुद्रपुरःसराः ॥ ३७ ॥ अपश्यन्देवताः सर्वा गन्धर्वाप्सरसोऽसुराः ॥३८॥ धृष्टद्युम्नो महेष्वासः प्रतिव्यूह्यापगासुतम् । चक्रे युद्धानि सुबहून्यजेयः शत्रुभी रणे ॥३९॥ तत्रोद्दधार कृष्णोऽपि फल्गुनं मृदुयोधिनम् । दृष्ट्वा चक्रं तथोद्यम्य बाहुं भीष्माय जग्मिवान् ॥ ४० ॥ तेन स्तुतो गृहीतश्च फल्गुनेन प्रणम्य च । प्रार्थितो रथमारूढः पुनः शङ्खमपूरयत् ॥ ४१ ॥ ततो

SGDF
Sri Gargeshwari Digital Foundation

भीष्मोऽर्जुनश्चैव शस्त्रास्त्रैरभ्यवर्षताम् । अयत्नेन जितश्चैव फल्गुनेनापगा-
सुतः ॥ ४२ ॥ अयुतानि बहून्याजौ रथानां निजघान च । जिताः
सेनापहारं च चक्रुर्भीष्ममुखास्ततः ॥ ४३ ॥ कदाचिदग्रगो भीमो
भीष्मद्रोणौ विसारथी । कृत्वा विद्राव्य तानश्वान्भित्त्वा व्यूहं विवेश
ह ॥ ४४ ॥ पुनः संस्थापितरथौ विजित्यायत्नतो बली । यतमानौ
महेष्वासौ धार्तराष्ट्राञ्जघान ह ॥ ४५ ॥ पञ्चविम्शद्धतास्तत्र धार्तराष्ट्रा
महाबलाः । भगदत्तद्रौणिकृपशल्यदुर्योधनादयः ॥ ४६ ॥ सर्वे जिता
द्राविताश्च सेना च बहुला हता । विरथो व्यायुधश्चैव दृढवेध-
विमूर्च्छितः ॥ ४७ ॥ कृतो दुर्योधनः सर्वराज्ञां भीमेन पश्यताम् ।
ततोऽपहारं सैन्यस्य जिताश्चक्रुश्च कौरवाः ॥ ४८ ॥

दुर्योधनो निशायां च ययौ यत्र नदीसुतः । पीडितो भीम-
बाणैश्च क्षरद्गात्रो ननाम तम् । उवाच हेतुना केन वयं जी(क्षी)याम
सर्वदा ॥ ४९ ॥ पाण्डवाश्च जयं नित्यं लब्ध्वा हर्षमवाप्नुवन् । तमाह
भीष्मस्तेऽजेया देवास्ते धरणीं गताः । विशेषतः केशवेन पालिता-
स्तत्प्रियाः सदा ॥ ५० ॥ मानसोत्तरशैले हि पुरा ब्रह्मपुरःसराः ।
स्थिता देवास्तदाऽपश्यद्ब्रह्मैको हरिमम्बरे ॥ ५१ ॥ स्तुत्वा सम्पूज्य
भूमेः स भारावतरणाय तम् । प्रार्थयामास तेनोक्तं देवानामवदद्विभुः ॥
॥ ५२ ॥ अयं नारायणो देवः पूर्णानन्तगुणार्णवः । आज्ञापयति वः
सर्वान्प्रादुर्भावाय भूतले ॥ ५३ ॥ स्वयं च देवकीपुत्रो भविष्यति
जगत्पतिः ॥ ५४ ॥ एवं तेन समादिष्टा धर्मवाय्वादयोऽखिलाः ।
अभवन्पाण्डवाद्यास्ते सेन्द्राः सहमरुद्गणाः ॥ ५५ ॥ स च नारायणो
देवो देवकीनन्दनोऽभवत् । तेनैते पालिताः पार्था अजेया देवसर्गिणः ॥
तस्मात्तैः सन्धिमन्विच्छ यदीच्छस्यपराभवम् ॥ ५६ ॥ इत्युक्तो डम्भ-
बुद्ध्यैव नत्वा विष्णुं ततो ययौ । प्रातर्निर्यातयामास सेनां युद्धाय
दुर्मतिः ॥ ५७ ॥ दिव्यौषधेन भीष्मस्य भूत्वा स (च) निरुजस्ततः ।

SGDF
Sri Gargeshwari Digital Foundation

भीष्ममग्रे निधायैव ययौ युद्धाय दंशितः ॥ ५८ ॥

तत्रासीत्सुमहद्युद्धं भीमभीष्मानुयायिनाम् । पाण्डवानां कुरूणां च शूराणामनुवर्तिनाम् ॥ ५९ ॥ धृष्टद्युम्नस्तत्र भीमानुयायी दुर्योधनस्यावरजैः प्रयुध्यन् । सम्मोहनास्त्रेण विमोहयित्वा विकर्णपूर्वानहनच्च सेनाम् ॥ ६० ॥ ततो द्रोणस्तान्समुत्थाप्य सर्वान्विज्ञानास्त्रेणासदत्पार्षतं च । तं भीमसेनः सूतहीनं विधाय व्यद्रावयच्छत्रुगणाञ्छरौघैः ॥६१॥ अथासदत्कृतवर्मा रथेन धृष्टद्युम्नं सोऽभ्ययात्तावुभौ च । ववर्षतुः शरवर्षैरथोग्रैस्तत्राकरोद्विरथं द्रौपदिस्तम् ॥ ६२ ॥ तस्मिञ्जिते रथवीरे स्वयं तं दुर्योधनः पार्षतमाससाद । तं भीमसेनो विरथायुधं च कृत्वा बाणेनाहनज्जत्रुदेशे ॥ ६३ ॥ विमूर्च्छितं तं रुधिरौघमुच्चैर्वमन्तमाशु स्वरथे निधाय । कृपो ययौ मारुतिर्धार्तराष्ट्रीं व्यद्रावयत्पृतानां बाणपूगैः ॥६४॥ अथेन्द्रसूनुः केशवप्रेरितेन रथेन शत्रून्विधमञ्छरौघैः । रथात्रणे पञ्चविम्शत्सहस्रान्निनाय वैवस्वतसादनाय ॥६५॥ तमन्वयाद्युयुधानः सुधन्वा विद्रावयन्धार्तराष्ट्रस्य सेनाम् । तमभ्ययात्सौमदत्तिस्तयोश्च सुयुद्धमासीदतिभैरवास्त्रम् ॥ ६६ ॥ पुत्रान्दशास्याशु निहत्य वीरः स सात्यकेः सौमदत्तिः सकाशे । समर्दयामास शरीरदारणैः शरैरुभौ तौ विरथौ च चक्रतुः ॥ ६७ ॥ अथासिपाणिं युयुधानमाशु महासिहस्तेन च सौमदत्तिना । आसादितं वीक्ष्य रथं स्वकीयमारोपयामास सुतोऽनिलस्य ॥६८॥ सुयोधनः सौमदत्तिं स्वकीयरथे व्यवस्थाप्य च भीमसेनात् । अपाद्रवद्वासविर्भीष्ममाजौ समाससादाशु महेन्द्रकल्पः ॥ ॥ ६९ ॥ उभौ च तावस्त्रविदां प्रबर्हौ शरैर्महाशीविषसन्निकाशैः । ततक्षतुर्नाकसदां समक्षं महाबलौ संयति जातदर्पौ ॥ ७० ॥ स्वबाहुवीर्येण जितः स भीष्मः किरीटिना लोकमहारथेन । सेनामपाहृत्य ययौ निशायामासादितायामथ पाण्डवाश्च ॥ ७१ ॥

ततः परेद्युः पुनरेव भीमभीष्मौ पुरस्कृत्य समीयतुस्ते । सेने

SGDF
Sri Gangeshwari Digital Foundation

तदा सारथिहीनमाशु भीष्मं कृत्वा मारुतिरभ्ययात्परान् ॥ ७२ ॥
निपातितास्तेन रथेभवाजिनः प्रदुद्रुवुश्चावशिष्टाः समस्ताः । दुर्योधनाद्येषु पराजितेषु भीष्मद्रोणद्रौणिपुरःसरेषु ॥ ७३ ॥ महागजस्थो भगदत्त आगादादायन्बाणान्भीमसेनेऽमुचच्च । तेनातिविद्धे भीमसेनेऽस्य पुत्र उद्यच्छमानं पितरं निवार्य । घटोत्कचोऽभ्यद्रवदाशु वीरः स्वमायया हस्तिचतुष्टयस्थः ॥ ७४ ॥ स वैष्णवास्त्रं भगदत्तसंस्थं विज्ञाय विष्णोर्वरतो विशेषतः । अमोघमन्यत्र हरेर्मरुत्सुतः पुत्रे याते न स्वयमभ्यधावत् ॥ ७५ ॥ अनुग्रहादभ्यधिकादवध्यं जानन्नपि स्वं वासुदेवस्य नित्यम् । तद्भक्तिवैशेष्यत एव तस्य सत्यं वाक्यं कर्तुमरिं न चागात् ॥ ॥ ७६ ॥ यदा स्वपुत्रेण जितो भवेत्स किं स्वात्मनेत्येव तदा प्रवेत्तुम् । स विस्मृतास्त्रस्तु यदा भवेत तदा भीमो भगदत्तं प्रयाति ॥ ७७ ॥ ऋते भीमं चार्जुनं नास्त्रमेष प्रमुश्चतीत्येव हि वेद भीमः ॥ ७८ ॥ चतुर्गजात्मोपरिगात्मकश्च घटोत्कचः सुप्रतीकं च तं च । नानाप्रहारैर्वितुदंश्चकार सन्दिग्धजीवौ जगतः समक्षम् ॥ ७९ ॥ गजार्तनादं तु निशम्य भीष्ममुखाः समापेतुरमुं च दृष्ट्वा । महाकायं भीममममुष्य पृष्ठगोपं च वाय्वात्मजमत्रसन्भृशम् ॥ ८० ॥ ते भीतभीताः पृतनापहारं कृत्वाऽपजग्मुः शिबिराय शीघ्रम् ॥ ८१ ॥ दिने परे चैव पुनः समेताः परस्परं पाण्डवाः कौरवास्ते । तत्रासदन्नागसुतासमुद्भवः पार्थात्मजः शाकुनेयान्षडेकः ॥ ८२ ॥ तैः प्रासहस्तैः क्षतकायोऽतिरूढकोपः स खड्गेन चकर्त तेषाम् । शिरांसि वीरो बलवानिरावान्भयं दधद्धार्तराष्ट्रेषु चोग्रम् ॥ ८३ ॥ दृष्ट्वा तमुग्रं धृतराष्ट्रपुत्रो दिदेश रक्षोऽलम्बुसनामधेयम् । जह्यार्जुनिं क्षिप्रमिति स्म तच्च समासदन्नागसुतातनूजम् ॥ ८४ ॥ तयोरभूद्युद्धमतीवदारुणं मायायुजोर्वीर्यवतोर्महाद्भुतम् । ससादिनोऽश्वान्स तु राक्षसोऽसृजत्ते पार्थपुत्रस्य च सादिनोऽहनन् । ततस्त्वनन्ताकृतिमाशमार्जुनिं सुव(पू)र्णरूपोऽहनदाशु राक्षसः ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ ८५ ॥ हतं निशम्यार्जुनिमुग्रपौरुषो ननाद कोपेन वृकोदरात्मजः । चचाल भूर्नानदतोऽस्य रावतः ससागरागेन्द्रनगा भृशं तदा ॥ ८६ ॥ अलम्बुसस्तं प्रसमीक्ष्य मारुतेः सुतं बलाढ्यं भयतः पराद्रवत् । पराद्रवन्धार्तराष्ट्रस्य सेनाः सर्वास्तमाराथ सुयोधनो नृपः ॥ ८७ ॥ स भीमपुत्रस्य जघान मन्त्रिणो महाबलांश्चतुरोऽन्यांस्तथैव । हतावशेषेषु च विद्रवत्सु घटोत्कचोऽभ्याहनदाशु तं नृपम् ॥८८॥ स पीड्यमानो युधि तेन रक्षसा प्रवेशयामास शरं घटोत्कचे । दृढाहतस्तेन तदा बलीयसा घटोत्कचः प्रव्यथितेन्द्रियो भृशम् ॥ तस्थौ कथञ्चिद्भुवि पात्यमानः पुनः शरानप्यसृजत्सुयोधने ॥ ८९ ॥ चिरं प्रयुद्धौ नृपराक्षसाधिपौ परस्पराजेयतनू रणाजिरे । द्रोणादयो वीक्ष्य रिरक्षिषन्तः सुयोधनं प्रापुरमित्रसाहाः ॥९०॥ सद्रोणशल्यौ गुरुपुत्रगौतमौ भूरिश्रवः कृतवर्मादिकांश्च । ववर्ष बाणैर्गगनं समाश्रितो घटोत्कचः स्थूलतमैः सुवेगैः ॥ ९१ ॥ तमेकमग्र्यै रथिभिः परिष्कृतं निरीक्ष्य भीमोऽभ्यगमत्समस्तान् । द्रोणोऽत्र भीमप्रहितैः शरोत्तमैः सुपीडितः प्राप्तमूर्च्छः पपात ॥ ९२ ॥ द्रौणिं कृपाद्यान्ससुयोधनांश्च चकार भीमो विरथान्क्षणेन । निवार्यमाणांस्तु वृकोदरेण घटोत्कचस्तान्प्रववर्ष सायकैः ॥ ॥ ९३ ॥ तेनाम्बरस्थेन तरुप्रमाणैरभ्यर्दिताः कुरवः सायकौघैः । भूमौ च भीमेन शरौघपीडिताः पेतुर्नेदुः प्राद्रवंश्चातिभीताः ॥ ९४ ॥ सर्वांश्च ताञ्छिबिरं प्रापयित्वा विना भीष्मं कौरवान्भीमसेनः । घटोत्कचश्चानदतां महास्वनौ नादेन लोकानभिपूरयन्तौ ॥ ९५ ॥

दुर्योधनोऽथ स्वजनैः समेतः पुनः प्रायाद्रणभूमिं स भीष्मम् । जयोपायं भैमसेनेरपृच्छत्स्वस्यैव स प्राह न तं व्रजेति ॥९६॥ प्राग्जोतिषं चैव घटोत्कचाय सम्प्रेषयामास सुरापगासुतः । सम्प्राप्य हैडिम्बमयोधयद्बली स चार्दयामास सकुञ्जरं तम् ॥९७॥ तेनार्दितः प्राहिणोच्छूलमस्मै वियत्यवप्लुत्य तदा घटोत्कचः । प्रगृह्य शूलं प्रबभञ्ज जानु-

SGDF
Sri Gurgeshwari Digital Foundation

मारोप्य देवा जहृषुस्तदीक्ष्य ॥ ९८ ॥ तदा स तस्यैव पदानुगान्नृपो जघान तं मारुतिरभ्ययाद्रणे । स प्राहिणोद्भीमसेनाय वीरो गजं तमस्तम्भयदाशु सायकैः ॥ ९९ ॥ संस्तम्भिते बाणवरैस्तु नागे भीमस्याश्वान्सायकैरर्दयत्सः । सोऽभ्यर्दिताश्वोऽथ गदां प्रगृह्य हन्तुं नृपं तं सगजं समासदत् ॥ १०० ॥ स हन्तुकामेन रुषाऽभिपन्नो भीमेन राजा पुरतः पृष्ठतश्च । कृष्णेनास्त्रं वैष्णवं तद्गृहीतुं सहार्जुनेनापययौ स भीतः ॥ १०१ ॥ तस्मिन्गते भीमसेनार्जुनाभ्यां विद्राविते राजसङ्घे समस्ते । भीष्मः सेनामपहृत्यापयातो दुर्योधनस्तं निशि चोपजग्मिवान् ॥ १०२ ॥ संश्रावितः क्रूरवचः स तेन चक्रे प्रतिज्ञां मृत्युभयं विहाय । शक्त्या हनिष्यामि परानिति स्म चक्रे च तत्कर्म तथापरेद्युः ॥ १०३ ॥ तं शक्तितो जुगुपुर्धार्तराष्ट्रास्तेनार्दिताश्चेदिपाश्चालमात्स्याः । पराद्रवन्भीष्मबाणोरुभीताः सिंहार्दिताः क्षुद्रमृगा इवार्ताः ॥ ॥१०४॥ संस्थाप्य तान्भीष्ममभिप्रयान्तमलम्बुसोऽवारयत्पार्थसूनुम् । विजित्य तं केशवभागिनेयो भीष्मं ययौ धार्तराष्ट्रोऽमुमुर ॥ १०५ ॥ तद्युद्धमासीन्नृपपार्थपुत्रयोर्विचित्रमत्यद्भुतरूपमुग्रम् । समं चिरं तत्र धनुश्चकर्त ध्वजं च राजा सहसाऽभिमन्योः ॥ १०६ ॥ अथैनमुग्रैश्च शरैर्ववर्ष सूतं च तस्याशु जघान वीरः । तदाऽऽसदद्भीमसेनो नृपं तं जघान चाश्वान्धृतराष्ट्रजस्य ॥ १०७ ॥ द्रोणो द्रौणिर्भगदत्तः कृपश्च सचित्रसेना अभ्ययुर्भीमसेनम् । सर्वांश्च तान्विमुखीकृत्य भीमः स चित्रसेनाय गदां समाददे ॥ १०८ ॥ तामुद्यतां वीक्ष्य पराद्रवंस्ते स चित्रसेनश्च रथादवप्लुतः । सञ्चूर्णितो गदया तद्रथश्च तज्जीवनेनोद्धृषिताश्च कौरवाः ॥ १०९ ॥ भीष्मस्तु पाश्चालकरूशचेदिष्वहन्सहस्राणि चतुर्दशोग्रः । रथप्रबर्हानतितिग्मतेजा विद्रावयामास परानवीनिव ॥ ॥ ११० ॥ विद्राव्य सर्वामपि पाण्डुसेनां विश्राव्य लोकेषु च कीर्तिमात्मनः । सेनामपाहृत्य ययौ निशागमे संस्तूयमानो धृतराष्ट्रपुत्रैः ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ १११ ॥ द्रोणो विराटस्य पुरो निहत्य शङ्खं सुतं तस्य विजित्य तं च । विद्राव्य सेनामपि पाण्डवानां ययौ नदीजेन सहैव हृष्टः ॥११२॥ भीमार्जुनावपि शत्रून्निहत्य विद्राव्य सर्वांश्च युधि प्रवीरान् । युधिष्ठिरेणापहृते स्वसैन्ये भीतेन भीष्माच्छिबिरं प्रजग्मतुः ॥ ११३ ॥

युधिष्ठिरो भीष्मपराक्रमेण भीतो भीष्मं स्ववधोपायमेव । प्रष्टुं ययौ निशि कृष्णोऽनुजाश्च तस्यान्वयुस्तं स पितामहो यत् ॥ ११४ ॥ भीमार्जुनौ शक्नुवन्तावपि स्म नर्तेऽनुज्ञां हन्तुमिमं समैच्छताम् । पूज्यो यतो भीष्म उदारकर्मा कृष्णोऽप्यायात्तेन हि पाण्डवार्थे ॥ ११५ ॥

प्राप्यानुज्ञां भीष्मतस्ते वधाय शिखण्डिनं तद्वचसाऽग्रयायिनम् । कृत्वा परेद्युर्युधये विनिर्गता भीष्मं पुरस्कृत्य तथाऽपरेपि ॥ ११६ ॥ शिखण्डिनो रक्षकः फल्गुनोऽभूद्भीष्मस्य दुःशासन आस चाग्रे । अन्ये च सर्वे जुगुपुर्भीष्ममेव न्यवारयन्भीमसेनादयस्तान् ॥११७॥ भीष्माय यान्तं युयुधानमाजौ न्यवारयद्राक्षसोऽलम्बुसोऽथ । तं वज्रकल्पैरतुदद्वृष्णिवीरः शरैः स मायामसृजत्तदोग्राम् ॥ ११८ ॥ अस्त्रेण मायामपनुद्य वीरो व्यद्रावयद्राक्षसं सात्यकिस्तम् । तस्मिन्गते युयुधानो रथेन ययौ भीष्मं पार्थमन्वेव धन्वी ॥११९॥ द्रोणो द्रौणिर्धार्तराष्ट्रश्च राजा भूरिश्रवा भगदत्तः कृपश्च । शल्यो बाह्लीकः कृतवर्मा सुशर्मा सर्वाश्च सेना वारिता वायुजेन ॥ १२० ॥ स तान्मुहुर्विरथीकृत्य वीरः प्राग्जोतिषं सगजं द्रावयित्वा । न्यवारयत्फल्गुनं योद्धुकामं पार्थश्च देवव्रतमाससाद ॥ १२१ ॥ युधिष्ठिरं भीष्ममभिप्रयान्तं माद्रीसुताभ्यां सहितं नृवीरम् । न्यवारयच्छकुनिः सादिनां च युतोऽयुतेनैव वराश्वगेन ॥ १२२ ॥ तान्सादिनोऽश्वांश्च निहत्य सर्वान्विजित्य तं शकुनिं पाण्डवास्ते । प्रापुर्भीष्मं द्रौपदेयाश्च सर्वे तथा विराटद्रुपदौ कुन्तिभोजः ॥ १२३ ॥ धृष्टद्युम्नं भीष्ममभिप्रयान्तं न्यवारयत्सैन्धवस्तं स बाणैः । ह(त्वा)ताश्वसूतं सगणं द्रावयित्वा समासदद्भीष्ममेवाशु वीरः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥१२४॥ गुप्तोऽथ पार्थेन रणे शिखण्डी भीष्मं समासाद्य शरैरताडयत्। भीष्मः स्त्रीत्वं तस्य जानन्न तस्मै मुमोच बाणान्स तु तं तुतोद ॥१२५॥ शिखण्डिनं वारयामास बाणैर्दुर्मर्षणोऽमर्षणविह्वलेक्षणः । नात्येतुमेनमशकच्छिखण्डी दुःशासनः पार्थमवारयत्तदा ॥ १२६ ॥ स लोकवीरोऽपि दुरात्मनाऽमुना रुद्धोऽशकन्नैनमतीत्य यातुम् । भीष्मं पार्थः सायकाश्चास्य तस्मिन्ससञ्जिरे पर्वतेष्वप्यसक्ताः ॥ १२७ ॥ अमर्षयुक्तौ चिरमेव वीरावयुध्यतामर्जुनधार्तराष्ट्रौ । समं तदासीन्महदद्भुतं च दिवौकसां पश्यतां भूभृतां च ॥ १२८ ॥ तदा विराटद्रुपदौ कुन्तिभोजं कृष्णासुतान्कैकयांश्चेकितानम् । भूरिश्रवाः सोमदत्तो विकर्णः सकैकया वारयामासुरुच्चैः ॥ १२९ ॥ जित्वैव तांस्तेऽभिययुश्च भीष्मं तदार्जुनोऽतीत्य दुःशासनं च । भीष्मं शरैराच्छेदरिप्रमाथिभिः शिखण्डिनं धार्तराष्ट्राद्विमुच्य ॥ १३० ॥ स तैः समस्तैर्बहुभिः शस्त्रपूगैर्भृशं मर्मस्वर्दितश्चापमुक्तैः । शरैः समस्तान्विरथांश्चकार शैनेयपाञ्चालयुधिष्ठिराद्यान् ॥ १३१ ॥ स चेदिपाञ्चालकरूशमुख्यांस्त्रथोदारान्पञ्चविंशत्सहस्रान् । सम्प्रेषयामास यमाय बाणैर्युगान्तकालाग्निरिव प्रवृद्धः ॥ १३२ ॥ निरीक्ष्य तं सूर्यमिवातपन्तं सञ्चोदितो वासुदेवेन पार्थः । चिच्छेद तत्कार्मुकं लोकवीरो रणेऽर्धचन्द्रेण स चान्यदाददे ॥ ॥ १३३ ॥ चिच्छेद तच्चैवमष्टौ धनूंषि शक्तिं च चर्मासिवरं पराणि । धनूंषि दत्तानि नृभिर्नृपस्य सर्वाणि चिच्छेद स पाकशासनिः ॥१३४॥ ततः शरैः सूर्यकरप्रकाशैर्विव्याध सर्वेऽपि युधिष्ठिराद्याः । तैरर्दितो न्यपतद्भूतले स प्राणान्दधारापि तथोत्तरायणात् ॥ १३५ ॥

निपातितेऽस्मिन्मारुतिर्द्रोणमुख्यान्विद्राव्य तत्रागमदाशु तेऽपि । तदाऽऽयुधानि प्रणिधाय वीराः पार्थाः परे चैनमुपासदन्स्म ॥ १३६ ॥ प्रणम्य तं तद्वचनात्समीयुस्तस्मिन्दिने शिबिराण्येव सर्वे । परे दिने सर्व एवोपतस्थुर्भीष्मं यदूनां पतिना सहैव ॥ १३७ ॥ स पूर्वदिवसे

SGDF
Sri Gargeshwari Digital Foundation

पार्थदत्तबाणोपबर्हणः । तदापि तृट्परीतात्मा योग्यं पेयमयाचत ॥
॥ १३८ ॥ धार्तराष्ट्रैरविज्ञातं तदा विज्ञाय वासविः । वारुणास्त्रेण भित्त्वा स भुवि वारि सुगन्धि च । ऊर्ध्वधारामधादास्ये तर्पितोऽनेन सोऽवदत् ॥ १३९ ॥ यादृश्यस्त्रज्ञता पार्थे दृष्टाऽत्र कुरुनन्दनाः । यादृग्बाहुबलं भीमे संयुगेषु पुनःपुनः ॥ १४० ॥ यादृशं चैव महात्म्यमनन्तमजरं हरेः । विज्ञातं सर्वलोकस्य सभायां दृष्टमेव च ॥ १४१ ॥ उपारमत तद्युद्धं सुखिनः सन्तु भूमिपाः । यथोचितं विभक्तां च भुङ्ध्वं भूपाः सदा भुवम् ॥ १४२ ॥ इत्युक्तः स ययौ तूष्णीं धार्तराष्ट्रः स्वकं गृहम् । व्यासदत्तोरुविज्ञानात्सञ्जयादखिलं पिता ॥
॥ १४३ ॥ श्रुत्वा तदा पर्यतप्यत्पाण्डवाः कृष्णदेवताः । मुमुदुः शिबिरं प्राप्य सर्वे कृष्णानुमोदिताः ॥ १४४ ॥ (३९४७) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये भीष्मपातो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ अथ षड्विंशोऽध्यायः ॥

॥ हरिः ॐ ॥ अथाखिलानां पृथिवीपतीनामाचार्यमग्र्यं रथिनां सुविद्यम् । रामस्य विश्वाधिपतेः सुशिष्यं चक्रे चमूपं धृतराष्ट्रपुत्रः ॥१॥ कर्णोऽपि भीष्मानुमतो धनुष्मान्युद्धोद्यतोऽभूत्तदसत्कृतः पुरा । तस्मिन्स्थितेऽनात्तधनुस्तदैव रथं समास्थाय गुरुं समन्वयात् ॥ २ ॥ द्रोणो वृतो धार्तराष्ट्रेण धर्मसुतग्रहे तेन कृते प्रतिश्रवे । ज्ञात्वा यत्ताः पाण्डवास्तं समीयुर्युद्धाय तत्राभवदुग्रयुद्धम् ॥ ३ ॥ पतत्रिभिस्तत्र दुधाव शात्रवान्द्रोणो धनुर्मण्डलमन्त्रनिःसृतैः । तमाससादाशु वृकोदरो नदंस्तमासदन्द्रौणिकृपौ च मद्रराट् ॥ ४ ॥ स तान्विधूयाभ्यपतद्रणेऽ-

SGDF
Sri Gangeshwari Digital Foundation

ग्रणीर्द्रोणं तमन्वार्जुनिरभ्ययात्परान् । ववार तं मद्रपतिस्तयोरभूद्रणो महांस्तत्र गदां समाददे । शल्योऽथ भीमोऽभिययौ गदाधरस्तमेतयो-त्र बभूव सङ्गरः ॥ ५ ॥ उभावजेयौ गदिनावनुत्तमावतुल्यवीर्यौ प्रवरौ बलीयसाम् । विचेरतुश्चित्रतमं प्रपश्यतां मनोहरं तावभिनर्द-मानौ ॥ ६ ॥ गदाप्रपाताङ्कितवज्रगात्रौ ददर्श लोकोऽखिल एव तौ रणे । गदाभिघातेन वृकोदरस्य विचेतनः प्रापतदत्र मद्रराट् ॥ ७ ॥ भीमोऽपि कोपात्प्रचलत्पदः क्षितौ निधाय जानुं सहसोत्थितः क्षणात् ॥ ८ ॥ विचेतनं पतितं मद्रराजं विलोक्य भीमं च तमाह्वयन्तम् । रथं समारोप्य जनस्य पश्यतः पुरश्च भीमस्य कृपोपजग्मिवान् ॥ ९ ॥ विजित्य मद्राधिपमोजसाऽरिहा नदन्रथं प्राप्य निजं स मारुतिः । व्यद्रावयद्बाणगणैः परेषामनीकिनीं द्रोणसमक्षमेव ॥ १० ॥ विद्रावय-त्याशु कुरून्वृकोदरे विधूय सौभद्रमुखान्ससात्यकीन् । द्रोणोऽभिपेदे नृपतिं ग्रहीतुं तमाससादाशु धनञ्जयो रथी ॥ ११ ॥ सवासुदेवप्रयते रथे स्थितः शरैः शरीरांतकरैः समन्ततः । निहत्य नागाश्वरथान्प्रवर्त-यन्नदयताश्वेव च शोणितापगाः ॥ १२ ॥ निहन्यमानासु किरीटिना चमूष्वारक्षिते धर्मसुते तथाऽऽपदः । चमूं च भीमार्जुनबाणभग्नां द्रोणोऽ-पहृत्यापययौ निशागमे ॥ १३ ॥

स धार्तराष्ट्रेण युधिष्ठिराग्रहात्संश्रावितः क्रूरवचो निशायां । जगाद दूरं समराद्विनीयतां पार्थस्ततो धर्मसुतं ग्रहीष्ये ॥ १४ ॥ ततः सुशर्मा सहितो महारथैः संशप्तकैर्दूरतरं प्रणेतुम् । युद्धाय भीमानुजमाशु कृष्टो दुर्योधनेनोमिति सोऽप्यवादीत् ॥ १५ ॥ समाह्वायामासुरथोऽ-र्जुनं ते प्रातर्हुताशस्य दिशं रणाय । आयोधयत्तान्स च तत्र गत्वा भीमो गजानीकमथात्र चावधीत् ॥ १६ ॥ निहन्यमानेषु गजेषु सर्वशो विद्राव्यमाणेष्वखिलेषु राजसु । प्राग्ज्योतिषो धार्तराष्ट्रार्थितस्तं समागमत्सुप्रतीकेन धन्वी ॥ १७ ॥ विभीषिताः सुप्रतीकेन भीमहया

SGDF
Sri Gargeshwari Digital Foundation

न तस्थुस्तदनु स्म सात्यकिः । सौभद्रमुख्याश्च गजं तमभ्ययुश्चिक्षेप तेषां स रथानथाम्बरे ॥ १८ ॥ शैनेयपूर्वेषु रथोज्झितेषु भूमाववप्लुत्य कथञ्चिदेव । स्थितेषु भीमे च विभीषिताश्वान्संयम्य युध्यत्यपि कृष्ण ऐक्षत् ॥ १९ ॥ सङ्क्लेशितो वैष्णवास्त्रं विमुञ्चेत्प्राग्जोतिषो भीमसेने ततोऽहम् । याम्यर्जुनेनैव तदस्त्रमात्मनः स्वीकर्तुमन्येन वराद्धार्यम् ॥ ॥ २० ॥ इति स्म सञ्चिन्त्य सहार्जुनेन तत्रायथावथ पार्थं त्रिगर्ताः । न्यवारयमस्त्वाष्ट्रमस्त्रं स तेषु व्यवासृजन्मोहनायाशु वीरः ॥ २१ ॥ तदस्त्रवीर्येण विमोहितास्ते परस्परं कृष्णपार्थाविति स्म । जघ्नुस्तदा वासविस्तान्विसृज्य प्राग्जोतिषं हन्तुमिवाभ्ययाद्द्रुतम् ॥ २२ ॥ विसृज्य भीमं स च पार्थमेव ययौ गजस्कन्धगतो गजं तम् । सञ्चोदयामास रथाय तस्य चक्रेऽपसव्यं हरिरेनमाशु ॥ २३ ॥ मनोजवेनैव रथे परेण सम्भ्राम्यमाणेन तु तं गजः सः । प्राप्तुं शशाकाथ शरैः सुतीक्ष्णैरभ्यर्दयामास नृपं स वासविः ॥ २४ ॥ अस्त्रैश्च शस्त्रैः सुचिरं नृवीरावयुध्यतां तौ बलिनां प्रबर्हौ । अथो चकर्तास्य धनुः स पार्थः स वैष्णवास्त्रं च तदाऽङ्कुशेऽकरोत् ॥ २५ ॥ तस्मिन्नस्त्रे तेन तदा प्रमुक्ते दधार तद्वासुदेवोऽमितौजाः । तदंसदेशेऽस्य तु वैजयन्ती बभूव मालाखिललोकभर्तुः ॥ २६ ॥ दृष्ट्वैव तद्धारितमच्युतेन पार्थः किमर्थं विधृतं त्वयेति । ऊचे तमाहाशु जगन्निवासो मयाऽखिलं धार्यते सर्वदैव ॥ २७ ॥ न मादृशोऽन्योऽस्ति कुतः परो मत्सोऽहं चतुर्धा जगतो हिताय । स्थितोऽस्मि मोक्षप्रलयस्थितीनां सृष्टेश्च कर्ता क्रमशः स्वमूर्तिभिः । स वासुदेवादिचतुःस्वरूपः स्थितोऽनिरुद्धो हृदि चाखिलस्य ॥ २८ ॥ स एव च क्रोडतनुः पुराऽहं भूमिप्रियार्थं नरकाय चादाम् । अस्त्रं मदीयं वरमस्य चादामवध्यतां यावदस्त्रं सस्त्रनोः ॥ २९ ॥ अस्त्रस्य चान्यो न तु कश्चिदस्ति योऽवध्य एतस्य कुतश्च मत्तः । इति स्म तेनैव मया धृतं तदस्त्रं तदेनं जहि चास्त्रहीनम् ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ ३० ॥ इत्युक्तमाकर्ण्य स केशवेन सम्मन्त्र्य बाणं हृदये मुमोच । प्राग्जोतिषस्यापरमुत्तमं शरं गजेन्द्रकुम्भस्थल आश्वमज्ञयत् ॥ ३१ ॥ उभौ च तौ पेततुरद्रिसन्निभौ महेन्द्रवज्राभिहताविवाशु । निहत्य तौ वासविरुग्रपौरुषौ मुमोद साधु स्वजनाभिपूजितः ॥ ३२ ॥

अथाचलं वृषभं(कं) चैव हत्वा कनीयसौ शकुनेस्तं च बाणैः । विव्याध मायामसृजत्स तां च विज्ञानास्त्रेणाशु नाशाय चक्रे ॥ ३३ ॥ स नष्टमायः प्राद्रवत्पापकर्मा ततः पार्थः शरपूगैश्चमूं ताम् । विद्रावयामास तदा गुरोः सुतो माहिष्मतीपतिमाजौ जघान ॥ ३४ ॥ तदा भीमस्तस्य निहत्य वाहान्व्यद्रावयद्धार्तराष्ट्रीं चमूं च । भीमार्जुनाभ्यां हन्यमानां चमूं तां दृष्ट्वा द्रोणः क्षिप्रमपाजहार ॥ ३५ ॥ प्राग्जोतिषे निहते चाग्रहाच्च युधिष्ठिरस्यातिविषण्णरूपः । दुर्योधनोऽश्रावयद्दीनवाक्यान्यत्र द्रोणः सोऽपि नृपं जगाद ॥ ३६ ॥ पार्थे गते श्वो नृपतिं ग्रहीष्ये निहन्मि वा तत्सदृशं तदीयम् । इति प्रतिज्ञां स विधाय भूयः प्रातर्ययौ युद्धमाकाङ्क्षमाणः ॥ ३७ ॥

पद्मव्यूहं व्यूह्य परैरभेद्यं वराद्विष्णोस्तस्य मन्त्रं च जप्त्वा । पार्थाश्च तं प्रापुर्ऋतेऽर्जुनेन संशप्तकैर्युयुधे सोऽपि वीरः ॥ ३८ ॥ पार्था व्यूहं च तं प्राप्य नाशकन्भेत्तुमुद्यताः ॥ ३९ ॥ जानंश्च प्रतिभायोगात्काम्यं नैवाजपन्मनुम् । भीमो युधिष्ठिरस्तत्र तज्ज्ञं सौभद्रमब्रवीत् ॥ भिन्धि व्यूहमिमं तात वयं त्वामनु यामहे ॥ ४० ॥ स एवमुक्तो रथिनां प्रबर्हो विवेश भित्त्वा द्विषतां चमूं ताम् । अन्वेव तं वायुसुतादयश्च विवक्षवः सैन्धवेनैव रुद्धाः ॥ ४१ ॥ वरेण रुद्रस्य निरुध्यमानो जयद्रथेनात्र वृकोदरस्तु । विष्णोरभीष्टं वधमार्जुनेस्तदा विज्ञाय शक्तोऽपि न चात्यवर्तत ॥ ४२ ॥ जयद्रथस्येन वृषध्वजेन प्रयुध्यमानेषु वृकोदरादिषु । प्रविश्य वीरः स धनञ्जयात्मजो विलोडयामास परोरुसेनाम् ॥ ४३ ॥ स द्रोणदुर्योधनकर्णशल्यद्रौण्यग्रणीभिः कृतवर्म-

SGDF
Sri Gargeshwari Digital Foundation

युक्तैः । रुद्धश्चचाराखिलेष्वभीतः शिरांसि कृन्तंस्तदनुव्रतानाम् ॥४४॥ स लक्ष्मणं राजसुतं प्रसह्य पितुः समीपेऽनयदाशु मृत्यवे । बृहद्बलं चोत्तमवीर्यकर्मा वरं रथानामयुतं च पत्रिभिः ॥ ४५ ॥ द्रोणादयस्तं हरिकोपभीताः प्रत्यक्षतो हन्तुमशक्नुवन्तः । सम्मन्त्र्य कर्णं पुरतो निधाय चक्रुर्विचापाश्वरथं क्षणेन ॥ ४६ ॥ कर्णो धनुस्तस्य कृपश्च सारथिं द्रोणो हयानाशु विधूय सायकैः । सचर्मखड्गं रथचक्रमस्य प्रणुद्य हस्तस्थितमेव चक्रुः ॥ ४७ ॥ भीतेषु कृष्णादथ तद्वधाय तेष्वाससादाशु गदायुधं गदी । दौःशासनिस्तौ युगपच्च मम्रतुर्गदाभिघातेन मिथोऽतिपौरुषौ ॥ ४८ ॥ तस्मिन्हते शत्रुरवं निशम्य हर्षोद्भवं मारुतिरुग्रविक्रमः । विजित्य सर्वानपि सैन्धवादीन्युधिष्ठिरस्यानुमते न्यषीदत् ॥ ४९ ॥ व्यासस्तदा तानमितात्मवैभवो युधिष्ठिरादीन् ग्लपितानबोधयत् । विजित्य संशप्तकपूगमुग्रो निशागमे वासविराप साच्युतः ॥ ५० ॥ निशम्य पुत्रस्य वधं भृशार्तः प्रतिश्रवं सोऽथ चकार वीरः । जयद्रथस्यैव वधे निशायां स्वप्नेऽनयत्तं गिरिशान्तिकं हरिः ॥ ५१ ॥ स्वयमेवाखिलजगद्रक्षाद्यमितशक्तिमान् । अप्यच्युतो गुरुद्वारा प्रसादकृदहं त्विति ॥५२॥ ज्ञापयन्फल्गुनस्यास्त्रगुरुं गिरिशमञ्जसा । प्रापयित्वैनमेवैतत्प्रसादादस्त्रमुल्बणम् ॥ चक्रे तदर्थमेवास्य चक्रे रक्षां तदात्मिकाम् ॥ ५३ ॥ सान्त्वयित्वा सुभद्रां च गत्वोपप्लाव्यमच्युतः । योजयित्वा रथं प्रातः सार्जुनो योद्धुमभ्ययात् ॥५४॥

श्रुत्वा प्रतिज्ञां पुरुहूतसूनोर्दुर्योधनेनार्थितः सिन्धुराजम् । त्राताऽस्म्यहं सर्वथेति प्रतिज्ञां कृत्वा द्रोणो व्यूहमभेद्यमातनोत् ॥ ५५ ॥ स दिव्यमग्र्यं शकटाब्जचक्रं कृत्वा स्वयं व्यूहमुखे व्यवस्थितः । पृष्ठे कर्णद्रौणिकृपैः सशल्यैर्जयद्रथं गुप्तमधात्परैश्च ॥ ५६ ॥ अथार्जुनो दिव्यरथोपरि स्थितः सुरक्षितः केशवेनाव्ययेन । विजित्य दुर्मर्षणमग्रतोऽभ्ययाद्द्रोणं सुधन्वा गुरुमुग्रपौरुषः ॥ ५७ ॥ प्रदक्षिणीकृत्य

SGDF
Sri Gangeshwari Digital Foundation

तमाश्वगात्ततः कालात्ययं त्वेव विशङ्कमानः । रथं मनोवेगमथानयद्धरिर्यथा शराः पेतुरमुष्य पृष्ठतः ॥ ५८ ॥ विजित्य हार्दिक्यमथाप्रयत्नतः स इन्द्रसूनुः प्रविवेश तद्बलम् । विलोडयामास च सायकोत्तमैर्यथा गजेन्द्रो नलिनीं बलोद्धतः ॥ ५९ ॥ स उच्चकाशेऽतिरथो रथोत्तमे सवासुदेवो हरिणा यथेन्द्रः । चकर्त चोग्रो द्विषतां शिरांसि शरैः शरीरान्तकरैः समन्ततः ॥ ६० ॥ दृढायुमच्युतायुं च हत्वा विन्दानुविन्दकौ । शराभ्यां प्रेषयामास यमाय विजयो युधि ॥६१॥ सुदक्षिणं च काम्भोजं निहत्याम्बष्ठमेव च । श्रुतायुधं नदीजातं वरुणादाससाद ह ॥ ६२ ॥ यस्मादाद्वरुणो दिव्यममोघां महतीं गदाम् । स तु तेन शरैस्तीक्ष्णैरर्पितो विरथं क्षणात् ॥ ६३ ॥ चकार पार्थस्य रथमारुह्यारिधराय ताम् । गदां चिक्षेप सा तस्य वारुणेः शिर एव तु ॥ बिभेद शतधा शीर्णमस्तिष्कः सोऽपतद्भुवि ॥ ६४ ॥ अयुध्यन्तं स्वगदया यदि ताडयसि स्वयम् । तया विशीर्णमस्तिष्को भविष्यसि न संशयः ॥ ६५ ॥ अमोघा चान्यथा सेयं गदा तव भविष्यति ॥ ॥ ६६ ॥ इत्यब्रवीत्तं वरुणः पुरा तेन स केशवे । अयुध्यति गदाक्षेपात्तया शीर्णशिरा अभूत् ॥ ६७ ॥ हतेषु वीरेषु निजेषु सङ्घशो विद्रावितेष्वाकुलिते च सैन्ये । दुर्योधनो द्रोणमुपेत्य दीनमुवाच हा पार्थ उपेक्षितस्त्वया ॥ ६८ ॥ इतीरितोऽभेद्यममुष्य वर्म बध्वा महामन्त्रबलात्स विप्रः । जगाद येनैव बलेन पार्थैर्विरुध्यसे तेन हि याहि फल्गुनम् ॥ ६९ ॥ इतीरितो धार्तराष्ट्रः स चापमादाय सौवर्णरथोपरिस्थितः । जगाम पार्थं तमवारयच्च शरैरनेकैरनलप्रकाशैः ॥७०॥ विव्याध पार्थोऽपि तमुग्रवेगैः शरैर्न ते तस्य च वर्मभेदनम् । चक्रुस्ततो वासविर्दिव्यमस्त्रं तद्वर्मभेदाय समाददे रुषा ॥ ७१ ॥ सन्धीयमानं तु गुरोः सुतस्तच्चिच्छेद पार्थोऽथ सुयोधनाश्वान् । हत्वा तलेऽविध्यदथैनमुग्रैर्द्रौणिः शरैः पार्थमवारयद्युधि ॥ ७२ ॥ स द्रौणिकर्णप्रमुखै-

SGDF
Sri Gargeshwari Digital Foundation

र्धनञ्जयो युयोध ते चैनमवारयञ्छरैः । बभूव युद्धं तदतुल्यमद्भुतं जयद्रथार्थेऽद्भुतवीर्यकर्मणाम् ।।७३।। पार्थे प्रविष्टे कुरुसैन्यमध्यं द्रोणोऽविशत्पाण्डवसैन्यमाशु । स तद्रथानीकमुदारवेगैः शरैर्विधूय न्यहनच्च वीरान् ।। ७४ ।। स वीरवर्यः स्थविरोऽपि यूनां युवेव मध्ये प्रचचार धन्विनाम् । प्रपातयन्वीरशिरांसि बाणैर्युधिष्ठिरं चासददुग्रवीर्यः ।।७५।। नृपग्रहेच्छुं तमवेत्य सत्यजिन्न्यवारयद्द्रौपदिराशु वीर्यवान् । निवारितस्तेन शिरः शरेण चकर्त पाञ्चालसुतस्य विप्रः ।। ७६ ।। निहत्य तं वीरतमो रणोत्कटं युधिष्ठिरं बाणगणैः समर्दयत् ।। ७७ ।। स्वशक्तितस्तेन विधाय सङ्गरं निरायुधो व्यश्वरथः कृतः क्षणात् । स ऊर्ध्वबाहुर्भुवि संस्थितोऽपि ग्रहीतुमाजौ गुरुणाऽभिपन्नः ।। माद्रीसुतस्यावरजस्य यानमारुह्य वेगादपजग्मिवांस्ततः ।। ७८ ।। द्रोणं ततः शैशुपालिः सपुत्रो जारासन्धिः काशिराजः सशैब्यः । समासदन्कैकयाश्चैव पञ्च समर्दयन्बाणगणैश्च सर्वशः ।। ७९ ।। स तान्क्रमेणैव निकृत्तकन्धराञ्छरोत्तमैस्तत्र विधाय विप्रः । निनाय लोकं परमर्कमण्डलं व्रजन्ति निर्भिद्य यमूर्ध्वरेतसः ।। ८० ।। विधूयमाने गुरुणोरुसैन्ये पृथासुतानां पृतनाः परेषाम् । प्रायो रणे मारुतसूनुनैव हतप्रवीरा मृदिताः पराद्रवन् ।। ८१ ।। अलम्बुसो नाम तदैव राक्षसः समासदन्मारुतिमुग्रपौरुषम् । स पीडितस्तेन शरैः सुतेजनैः क्षणाददृश्यत्वमवाप मायया ।। ।।८२।। सोऽदृश्यरूपोऽनुचरानपीडयद्भीमस्य तद्वीक्ष्य चुकोप मारुतिः । अस्त्रज्ञतामात्मनि केशवाज्ञया सन्दर्शयन्नागतधर्मसङ्कटः ।।८३।। त्वाष्ट्रास्त्रमादत्त स काम्यकर्महीनोऽपि भीमस्तत उत्थिताः शराः । ते बाणवर्यास्तददृश्यवेधिनो रक्षो विदार्याविविशुर्धरातलम् ।। ८४ ।। तद्धन्यमानं प्रविहाय भीममपाद्रवद्दूरतरं सुभीतम् । ततस्तु भीमो द्विषतां वरूथिनीं विद्रावयामास शरैः सुमुक्तैः ।। ८५ ।। तदैव कृष्णातनयाः समेता जघ्नुः शलं संयति सौमदत्तिम् । अलम्बुसं प्राप तदा घटोत्कचः

SGDF
Sri Gurgeshwari Digital Foundation

परस्परं तौ रथिनावयुध्यताम् ॥ ८६ ॥ घटोत्कचस्तं विरथं विधाय खस्थं ख एवाभियुयोध संस्थितः । ततस्तु तं भीमसुतो निगृह्य निपात्य भूमौ प्रददौ प्रहारम् ॥ ८७ ॥ पदा शिरस्येव स पिष्टमस्तको ममार मध्ये पृथिवीपतीनाम् । तस्मिन्हते भैमसेनिः कुरूणां व्यद्रावयद्रथबृन्दं समन्तात् ॥ ८८ ॥ तदाऽऽसदत्कृतवर्मा रथेन सेनां पाण्डूनां शरवर्षं प्रमुञ्चन् । ददौ वरं तस्य हि पूर्वमच्युतः प्रीतः स्तुत्या सर्वजयं मुहूर्ते ॥ ८९ ॥ स तेन पाञ्चालगणान्विजिग्ये यमौ च भीमस्य पुरोऽथ तं च । विव्याध बाणेन स वासुदेववरं विजानन्न तदा समभ्ययात् ॥ ९० ॥ विनैव वृष्णीन्विजये वरो यदमुष्य तेनास्य हयान्स सात्यकिः । निहत्य बाणैरतुदत्स यानमन्यत्समास्थाय ततोऽपजग्मिवान् ॥ ९१ ॥ तदा हरिः पाञ्चजन्यं सुघोषमापूरयामास जयेऽभियुध्यति । कर्णादिभिर्द्रोणिमुखै रिपूणां बलप्रहाणाय परः परेभ्यः ॥ ॥९२॥ स पाञ्चजन्योऽच्युतवक्त्रवायुना भृशं सुपूर्णोदरनिःसृतध्वनिः । जगद्विरिञ्चेशसुरेन्द्रपूर्वकं प्रकम्पयामास युगात्यये यथा ॥ ९३ ॥ गाण्डीवघोषे च तदाभिभूते युधिष्ठिरो भीतभीतस्तदैत्य । शैनेयमूचे परसैन्यमग्ने पार्थे स्वयं युध्यति केशवः स्म ॥ ९४ ॥ न श्रूयते गाण्डिवस्याद्य घोषः संश्रूयते पाञ्चजन्यस्य रावः । तद्याहि जानीहि तमद्य पार्थं यदि स्म जीवत्यसहाय एषः ॥ ९५ ॥ इतीरितः सात्यकिरत्र विप्रान्सम्पूज्य वित्तैः परमाशिषश्च । जयाय तेभ्यः प्रतिगृह्य सेनामुखं ययौ भीमसेनानुयातः ॥ ९६ ॥ भीमस्तु सेनामुखमाशु भित्त्वा प्रावेशयद्युयुधानं चमूं ताम् । स युध्यमानो गुरुणाऽभ्युपेक्षितः सूतं निहत्य द्रावयामास चाश्वान् ॥ ९७ ॥ बलं विवृद्धं च तदाऽस्य सात्यकेर्विप्राशीर्भिः कृष्णवरादपि स्म । बलस्य वृद्धिर्हि पुराऽस्य दत्ता कृष्णेन तुष्टेन दिने हि तस्मिन् ॥ ९८ ॥ ततो विवृद्धोरुबलात्स सात्यकिः संस्थाप्य भीमं प्रययौ रथेन । तं बाणवर्षैः पृतनां समन्ता-

SGDF
Sri Gargeshwari Digital Foundation

न्निघ्नन्तमाजौ हृदिकात्मजोऽभ्ययात् ।।९९।। तयोरभूद्युद्धमतीव दारुणं तत्राकरोत्तं विरथं स सात्यकिः । विजित्य तं सात्यकिरुग्रधन्वा ययावतीत्यैव शिरांसि यूनाम् ।। १०० ।। कृन्तञ्छरैस्तं जलसन्ध आगमद्रणे गजस्कन्धगतोऽभियोद्धुम् । निवारयन्तं तमसह्यविक्रमं निहत्य बाणैः समरे स सात्यकिः ।।१०१।। विलोडयामास बलं कुरूणां निघ्नन्गजस्यन्दनवाजिपत्तिनः ।।१०२।। स पार्वतेयांश्च शिलाभिवर्षिणो निहत्य विद्राव्य च सर्वसैनिकान् । समासदत्केशवफल्गुनौ च बली तमाराथ(शु) च यूपकेतुः ।। १०३ ।। तयोरभूद्युद्धमतीवघोरं चिरं विचित्रं च म(हाविभीषणं)हद्विभीष(ण)म् ।।१०४।। परस्परं तौ तुरगान्निहत्य निपात्य सूतौ धनुषी निकृत्य । समीयतुश्चर्मवरासिधारिणौ विचित्रमार्गानपि दर्शयन्तौ ।। १०५ ।। स सौमदत्तिर्भुवि सात्यकिं रणे निपात्य केशेषु च सम्प्रगृह्य । पदाऽस्य वक्षस्यधिरुह्य खड्गमुदग्रहीदाशु शिरोऽपहर्तुम् ।। ।। १०६ ।। तद्वासुदेवस्तु निरीक्ष्य विश्वतश्चक्षुर्जगादाशु धनञ्जयं रणे । त्रायस्व शैनेयमिति स्म सोऽपि भल्लेन चिच्छेद भुजं परस्य ।। १०७ ।। स तेन चोत्कृत्तसखड्गबाहुर्विनिन्द्य पार्थं निषसाद भूमौ । प्रायोपविष्टः शरसंस्तरे हरिं ध्यायन्विनिन्दन्नसुरप्रवेशात् ।। १०८ ।। गतेऽसुरावेश उतातिभक्त्या ध्यायत्यमुष्मिन्गरुडध्वजं तम् । शैनेय उत्थाय निवार्यमाणः कृष्णार्जुनाद्यैरहरच्छिरोऽस्य ।।१०९।। तदा स्वकीयं रथमेतदर्थं क्लृप्तं ददौ सात्यकये ससूतम् । कृष्णोऽथ पार्थस्य हयास्तृषार्दितास्तदाऽसृजद्वारुणास्त्रं स पार्थः ।। ११० ।। तेनैव तीर्थं परमं चकार तथाश्वशालामपि बाणरूपाम् । ततो विमुच्यात्र हयानपाययद्धरिस्तदा वासविरार्दयत्परान् ।। १११ ।। युयोज कृष्णस्तुरगान्रथे पुनर्गतश्रमानुद्धृतसायकान्प्रभुः । प्रचोदिते तेन रथे स्थितः पुनस्तथैव बीभत्सुररीनयोधयत् ।। ११२ ।।

शिनिप्रवीरे तु गते युधिष्ठिरः पुनश्च चिन्ताकुलितो बभूव ह ।

SGDF
Sri Gangeshwari Digital Foundation

जगाद भीमं च न गाण्डिवध्वनिः संश्रूयते पाञ्चजन्यस्य रावः ॥११३॥ मया नियुक्तश्च गतः स सात्यकिर्भारं च तस्याधिकमेव मन्ये । तत्पाहि पार्थं युयुधानमेव त्वं भीम गत्वा यदि जीवतस्तौ ॥ ११४ ॥ इतीरितः प्राह वृकोदरस्तं न रक्षितं वासुदेवेन पार्थम् । ब्रह्मेशानावपि जेतुं समर्थौ किं द्रौणिकर्णादिधनुर्भृतोऽत्र ॥ ११५ ॥ अतो भयं नास्ति धनञ्जयस्य न सात्यकेश्चापि हरेः प्रसादात् । रक्ष्यस्त्वमेवात्र मतो मयाद्य द्रोणो ह्ययं त्वां यतते ग्रहीतुम् ॥ ११६ ॥ इतीरितः प्राह युधिष्ठिरस्तं न जीवमाने युधि मां घटोत्कचे । धृष्टद्युम्ने चास्त्रविदां वरिष्ठे द्रोणो वशं नेतुमिह प्रभुः क्वचित् ॥ ११७ ॥ यदि प्रियं कर्तुमिहेच्छसि त्वं मम प्रयाह्याशु च पार्थसात्यकी । रक्षस्व सञ्ज्ञामपि सिंहनादात्कुरुष्व मे पार्थशैनेयदृष्टौ ॥११८॥ तथा हते चैव जयद्रथे मे कुरुष्व सञ्ज्ञामिति तेन चोक्तः । भीमस्तु हैडिम्बममुष्य रक्षणे व्याधाच्च सेनापतिमेव सम्यक् ॥ ११९ ॥ स चाह सेनापतिरत्र भीमं प्रयाहि तौ यत्र च केशवार्जुनौ । न जीवमाने मयि धर्षितुं क्षमो द्रोणो नृपं मृत्युरहं च तस्य ॥ १२० ॥ इति ब्रुवाणं(णे) प्रणिधाय भीमः पुनःपुनस्तं नृपतिं गदाधरः । ययौ परानीकमधिज्यधन्वा निरन्तरं प्रवमन्बाणपूगान् ॥ ॥ १२१ ॥ न्यवारयत्तं शरवर्षधारो द्रोणो वचश्चेदमुवाच भीमम् । शिष्यस्नेहाद्वासविः सात्यकिश्च मया प्रमुक्तौ भृशमानतौ मयि ॥१२२॥ स्वीया प्रतिज्ञाऽपि हि सैन्धवस्य गुप्तौ मया पार्थकृते विसृष्टा । दास्ये न ते मार्गमहं कथञ्चित्पश्यास्त्रवीर्यं मम दिव्यमद्भुतम् ॥ १२३ ॥ इत्युक्तवाक्यः स गदां समाददे चिक्षेप तां द्रोणरथाय भीमः । उवाच चाहं पितृवन्मानये त्वां सदामृदुस्त्वां प्रति नान्यथा क्वचित् ॥ १२४ ॥ अमार्दवे पश्य च यादृशं बलं ममेति तस्याशु विचूर्णितो रथः । गदाभिघातेन वृकोदरस्य सस्तूतवाजिध्वजयन्त्रकूबरः ॥ १२५ ॥ द्रोणो गदामापतन्तीं निरीक्ष्य त्ववप्लुतो लाघवतो धरातले । तदैव दुर्योधनयापितं

SGDF
Sri Gargeshwari Digital Foundation

रथं परं समास्थाय शरान्ववर्ष ह ॥१२६॥ शरैस्तदीयैः परमास्त्रमन्त्रितैः प्रवृष्यमाणो जगदीरणात्मजः । शिरो निधायाशु पुरो वृषो यथा तमभ्ययादेव रथादवप्लुतः ॥ १२७ ॥ मनोजवादेव तमाप्य भीमो रथं गृहीत्वाम्बर आक्षिपत्क्षणात् । शक्तोऽप्यहं त्वां न निहन्मि गौरवा-दित्येव सं(सु)ज्ञापयितुं तदस्य ॥ १२८ ॥ सवाजिसूतः सरथः क्षितौ पतन्विचूर्णितोऽस्माद्गुरुरप्यवप्लुतः । तदा विशोकस्य रथं समानयत्तमा-रुहद्भीम उदारविक्रमः ॥ १२९ ॥ द्रोणोऽपि दुर्योधनदत्तमन्यं रथं समास्थाय युधिष्ठिरं ययौ । ग्रहीतुकामं नृपतिं प्रयान्तं न्यवारयत्संयति वाहिनीपतिः ॥ १३० ॥ विद्राविता द्रोणशरैः स्वसेनां संस्थाप्य भूयो द्रुपदात्मजः शरैः । द्रोणं निवार्यैव चमूं परेषां विद्रावयामास च तस्य पश्यतः ॥१३१॥ तयोरभूद्युद्धमतीवरौद्रं जयैषिणोः पाण्डवधार्तराष्ट्रयोः । अत्यद्भुतं सन्ततबाणवर्षमनारतं सुचिरं निर्विशेषम् ॥ १३२ ॥ ततः प्रायाद्भीमसेनोऽमितौजा मृद्नञ्छरैः कौरवराजसेनाम् । विन्दानुविन्द-प्रमुखा धार्तराष्ट्रास्तमासेदुर्द्वादश वीरमुख्याः ॥ १३३ ॥ विद्धः शरैस्तै-र्बहुभिर्वृकोदरः शिरांसि तेषां युगपच्चकर्त । हतेषु तेषु प्रवरेषु धन्विनां सत्यव्रतः पुरुमित्रो जयश्च ॥ १३४ ॥ वृन्दारकः पौरवश्चेत्यमात्याः समासेदुर्धार्तराष्ट्रस्य भीमम् ॥ १३५ ॥ स तैः पृषत्कैरवकीर्यमाणः सितान्विपाठान्युगपत्समादद । जहार तैरेव शिरांसि तेषां हतेषु तेष्वेव परे प्रदुद्रुवुः ॥ १३६ ॥ स सिंहवत्क्षुद्रमृगान्समन्ततो विद्राव्य शत्रू-न्हृदिकात्मजं रणे । अभ्यागमत्तेन निवारितः शरैः क्षणेन चक्रे विरथाश्वसूतम् ॥ १३७ ॥ स गाढविद्धस्तु वृकोदरेण रणं विसृज्याप-ययौ क्षणेन । विजित्य हार्दिक्यमथाशु भीमो विद्रावयामास वरूथिनीं ताम् । सम्प्रेषयन्सर्वनराश्वकुञ्जरान्यमाय यातो हरिपार्थपार्श्वम् ॥१३८॥ दृष्ट्वैव कृष्णविजयौ परमप्रहृष्टस्ताभ्यां निरीक्षित उत प्रतिभाषितश्च । संज्ञां नृपस्य स ददावपि सिंहनादाच्छ्रुत्वा परां मुदमवाप स चाग्रज-

SGDF
Sri Gargeshwari Digital Foundation

बुद्धिः ॥१३९॥ भीमस्य नानदत एव महास्वनेन विण्मूत्रशोणितमथो मृतिमापुरेके । भीतेषु सर्वनृपतिष्वमुमाप तूर्णं कर्णो विकर्णमुखरा अपि धार्तराष्ट्राः ॥ १४० ॥ हत्वा विकर्णमुत तत्र च चित्रसेनं सञ्चूर्णितं प्रविदधे रथमर्कसूनोः । घोरैः शरैः पुनरपि स्म स मृद्यमानः कर्णोऽपयानमकरोद्द्रुतमेव भीमात् ॥ १४१ ॥ आश्वास्य चैव सुचिरं पुनरेव भीमं युद्धाय याति धृतराष्ट्रसुतैस्तथान्यैः । तांश्चैव तत्र विनिहत्य तथैव कर्णो व्यश्वायुधः कृत उतापययौ क्षणेन ॥१४२॥ विकर्णचित्रसेनाद्या एवं वीरतमाः सुताः । कर्णस्य पश्यतो भीमबाणकृत्तशिरोधराः ॥१४३॥ निपेतुर्धृतराष्ट्रस्य रथेभ्यः पृथिवीतले । त्रयोविंशतिरेवात्र कर्णसाहाय्यकारिणः ॥ १४४ ॥ एकविंशतिवारं च व्यश्वसूतरथध्वजः । गाढमभ्यर्दितस्तीक्ष्णैः शरैर्भीमेन संयुगे ॥ १४५ ॥ प्राणसंशयमापन्नः सर्वलोकस्य पश्यतः । रणं त्यक्त्वा प्रदुद्राव रुदन्दुःखात्पुनः पुनः ॥ ॥१४६॥ द्वाविंशतिमयुद्धे तु रामदत्तं सुभास्वरम् । अभेद्यं रथमारुह्य विजयं धनुरेव च ॥ १४७ ॥ तद्दत्तमेव सङ्गृह्य तूणौ चाक्षयसायकौ । आससाद रणे भीमं कर्णो वैकर्तनो रुषा ॥ १४८ ॥ सुघोर आसीत्स तयोर्विमर्दो भीमस्य कर्णस्य च दीर्घकालम् । आकाशमाच्छादयतोः शरौघैः परस्परं चैव सुरक्तनेत्रयोः ॥ १४९ ॥ ततो भीमो महाबाहुः सहजाभ्यां च संयुतम् । त्वां तु कुण्डलवर्मभ्यां शक्नुयां हन्तुमञ्जसा ॥ ॥ १५० ॥ इति ज्ञापयितुं तस्य कुण्डले कवचं तथा । शरैरुत्कृत्य समरे पातयामास भूतले ॥ १५१ ॥ एवं तान्यपकृष्याहं हन्यां त्वामिति वेदयन् । पुनश्च बहुभिस्तीक्ष्णैः शरैरेनं समर्दयत् ॥१५२॥ ततस्तु भीमस्य बभूव बुद्धिरस्पर्धिनः सर्वजयो हि दत्तः । अमुष्य रामेण न च स्पृधाऽयं कर्णो मया युध्यति कृच्छ्रगो ह्ययम् ॥ १५३ ॥ तथापि मे भगवानत्यनुग्रहाज्जयं ददात्यात्मवचो विहाय । मया तु मान्यं वचनं हरेः सदा तस्माद्दास्ये विवरं त्वद्य शत्रोः ॥ १५४ ॥ एवं

SGDF
Sri Gurgeshwari Digital Foundation

स्मृत्वा तेन रन्ध्रे प्रदत्ते कर्णोऽस्त्रवीर्येण धनुर्न्यकृन्तत् । रश्मीन्हयानां च ततो रथं स तत्याज नैजं बलमेव वेदयन् ॥१५५॥ न मे रथाद्यै-र्धनुषा वापि कार्यमित्येव सञ्ज्ञापयितुं वृकोदरः । खमुत्पपातोत्तम-वीर्यतेजा रथं च कर्णस्य समास्थितः क्षणात् ॥१५६॥ भीतस्तु कर्णो रथकूबरे तदा व्यलीयताधः स वृकोदरो रथात् । अवप्लुतो ज्ञापयितुं स्वशक्तिं निरायुधत्वेऽप्यरिनिग्रहादौ ॥१५७॥ नैच्छन्नहीतुं विनिहन्तु-मेव वा रथं धनुर्वाऽस्य रणेऽपहर्तुम् । द्रोणस्य यद्वत्पूर्वमतीवशक्तो-ऽप्यमानयद्रामवचोऽस्य भक्त्या ॥१५८॥ सत्यां कर्तुं वासवेश्च प्रतिज्ञां सम्मानयन्वैष्णवत्वाच्च कर्णम् । दातुं रन्ध्रं सूर्यजस्य प्रयातः शरक्षेपार्थं दूरमतिष्ठदत्र ॥ १५९ ॥ ततः कर्णो दूरगतं वृकोदरं सम्मानयन्तं रामवाक्यं विजानन् । शरैरविध्यत्स च तानवारयद्गजैर्मृतैस्तांश्च चकर्त कर्णः ॥ १६० ॥ व्यसून्गजान्प्रक्षिपन्तं समेत्य संस्पृश्य चापेन वचश्च दुष्टम् । संश्रावयामास सुयोधनस्य प्रीत्यै प्रजानन्नपि तस्य वीर्यम् ॥ ॥ १६१ ॥ संश्रावयन्तं वचनानि रूक्षाण्यपाहनद्बाणगणैस्तदाऽर्जुनः । स वर्महीनः पार्थबाणाभितप्तो व्यपागमद्भीम आपातमयानम् ॥ १६२ ॥ कर्णो भीमे वासवीं नैव शक्तिं विमोक्तुमैच्छन्नैव बीभत्सुतोऽन्यान् । हन्यामिति प्राह यतः स कुन्त्यै यद्यप्यवध्यः स तयाऽपि भीमः ॥१६३॥ नारायणास्त्रं शिरसि प्रपातितं न यस्य लोमाप्यदहच्छिरःस्थितम् । किं तस्य शक्तिः प्रकरोति वासवी तथाऽन्यदप्यस्त्रशस्त्रं महच्च ॥ १६४ ॥ भीमः कर्णरथं प्राप्तः शक्तिं नादातुमैच्छत । अभिप्रायं केशवस्य जानन्हैडिम्बमृत्यवे ॥ १६५ ॥

ततः कर्णोऽन्यमास्थाय रथमर्जुनमभ्ययात् । दिव्यं रथं धनुश्चैव कृष्णबुद्ध्यार्जुनो हरेत् ॥ १६६ ॥ इति भीतस्तु तां शक्तिमादायार्जुन-मृत्यवे । युद्धायायाद्रथं चापं शक्तिं चैकत्र नाकरोत् ॥१६७॥ एकं हृतं चेदन्यत्स्यादिति मत्वा भयाकुलः । बिभेति सर्वदा नीतेः कृष्णस्या-

SGDF
Sri Gargeshwari Digital Foundation

मिततेजसः ॥ १६८ ॥ निश्चितो मरणायैव मृतिकाले तु तं रथम् । आरुह्यागाद्धि पूर्वं तु न कालं मन्यते मृतेः ॥ १६९ ॥ शक्तिं तु तद्रथगतां प्रसमीक्ष्य कृष्णः संस्थाप्य पार्थमपि सात्यकिमेव योद्धुम् । दत्वा स्वकीयरथमेव विरोचनस्य पुत्रेण सोऽदिशदमुष्य बलं प्रदाय ॥ ॥ १७० ॥ शिष्यं त्वशक्तमिह मे प्रतियोधनाय पार्थो ह्यदादिति स सात्यकिमीक्षमाणः । संस्पर्धयैव युयुधे विरथं चकार तेनैव सात्यकिरमुं हरियानसंस्थः ॥ १७१ ॥ न केशवरथे कश्चित्स्थितो याति पराजयम् । अतश्च सात्यकिर्नापि कर्णेनात्र पराजयम् ॥१७२॥ शस्त्रसङ्ग्रहकाले तु कुमाराणां व्रतं भवेत् । इत्युक्तं जामदग्न्येन धनुर्विद्या पुरा कृता ॥ १७३ ॥ तच्छत्रुवधरूपं च पूर्वासिद्धं च गूहितम् । अविरुद्धं च धर्मस्य कार्यं रामस्य तुष्टिदम् ॥ अनुपद्रवाय लोकस्येत्यतो भीमो व्रतं त्विदम् ॥ १७४ ॥ चकार तूबरेत्युक्तो हन्यामिति रहः प्रभुः ॥१७५॥ अनुपद्रवाय लोकस्य सुव्यक्तश्मश्रुमण्डलः । सुश्मश्रुं मां न कश्चिद्धि तथा ब्रूयादिति स्फुटम् ॥ तदर्जुनो विजानाति स्नेहाद्भीमोदितं रहः ॥ १७६ ॥ अर्जुनस्यापि गाण्डीवं देहीत्युक्ते निहन्मि तम् ॥१७७॥ गाण्डीवस्यागमं पूर्वं जानात्येव हि नारदात् । इति तच्च विजानाति भीम एको न चापरः ॥ १७८ ॥ प्रतिज्ञां भीमसेनस्य ब्रुवतः फल्गुने रहः । दुर्योधनस्तु शुश्राव तां च कर्णाय सोऽब्रवीत् ॥ १७९ ॥ अतूबरोऽपि तेनासौ तस्मात्तूबर इत्यलम् । उक्तः प्रकोपनायैव तस्मादर्जुनमब्रवीत् ॥ १८० ॥ जानासि मत्प्रतिज्ञां त्वं त्वत्प्रतिज्ञामहं तथा । अतो हन्तव्यतां प्राप्तो मम वैकर्तनोऽत्र हि ॥ ॥ १८१ ॥ प्रतिज्ञातो वधश्चास्य त्वयाऽपि मदनुज्ञया । अतस्त्वया मयैवायं हन्तव्यः सूतनन्दनः ॥ १८२ ॥ इत्युक्तो वासविः प्राह हन्तव्योऽयं मयैव हि । त्वदीयोऽहं यतस्तेन मत्कृतं त्वत्कृतं भवेत् ॥ ॥१८३॥ न त्वत्कृतं मत्कृतं स्याद्गुरुर्मम यतो भवान् । अतो मयैव

SGDF
Sri Gangeshwari Digital Foundation

हन्तव्य इत्युक्त्वा कर्णमब्रवीत् ॥१८४॥ रूक्षावचः श्रावितोऽयं भीमः कृष्णस्य शृण्वतः । यच्चाभिमन्युर्युष्माभिरेकः सम्भूय पातितः ॥१८५॥ अतस्त्वां निहनिष्यामि त्वत्पुत्रं च तवाग्रतः । इत्युक्तोऽन्यं रथं प्राप्य कर्ण आवीज्ञयद्रथम् ॥ १८६ ॥ द्रौणिकर्णाभिगुप्तं तं नाशकद्धन्तुमर्जुनः । तत्र वेगं परं चक्रे द्रौणिः पार्थनिवारणे ॥ १८७ ॥ न चैनमशकत्तर्तुं यत्नवानपि फल्गुनः । तयोरासीच्चिरं युद्धं चित्रं लघु च सुष्ठु च ॥ १८८ ॥ तद्दृष्ट्वा भगवान्कृष्णो लोहितायति भास्करे । अजिते द्रोणतनये त्वहते च जयद्रथे ॥ अर्जुनस्य जयाकाङ्क्षी ससर्ज तम ऊर्जितम् ॥ १८९ ॥ तमोव्याप्ते गगने सूर्यमस्तं गतं मत्वा द्रोणपूर्वाः समस्ताः । विशश्रमुः सैन्धवश्चार्जुनस्य हतप्रतिज्ञस्य मुखं समैक्षत ॥१९०॥ तदा हरेराज्ञया शक्रसूनुश्चकर्त बाणेन जयद्रथस्य । वह्निं विविक्षन्निव दर्शितः शिरस्तदा वचः प्राह जनार्दनस्तम् ॥१९१॥ नैतच्छिरः पातय भूतले त्वमितीरितः पाशुपतास्त्रतेजसा । दधार बाणैरनुपुङ्खपुङ्खैः पुनस्तमूचे गरुडध्वजो वचः ॥ १९२ ॥ इदं पितुस्तस्य करे निपात्यतां वरोऽस्य दत्तो हि पुराऽमुनाऽयम् । शिरो निकृत्तं भुवि पातयेद्यस्तवास्य भूयाच्च शिरः सहस्रधा ॥ १९३ ॥ इति स्म वध्योऽस्य पिताऽपि तेनेत्युदीरिते तस्य सन्ध्याक्रियस्य । अङ्के न्यधात्तच्छिर आशु वासविः ससम्भ्रमात्तद्भुवि च न्यपातयत् ॥ १९४ ॥ ततोऽभवत्तस्य शिरः सहस्रधा हरिश्च चक्रे तमसो लयं पुनः । तदैव सूर्ये सकलैश्च दृष्टे हाहेति वादः सुमहानथासीत् ॥ १९५ ॥ भीमस्तदा शल्यदुर्योधनादीन्कृपं च जित्वा व्यनदत्सुभैरवम् । कुर्वन्सहायं फल्गुनस्यैव तुष्टो बभूव शैनेययुतो हते रिपौ ॥ १९६ ॥ अपूरयत्पाञ्चजन्यं च कृष्णो मुदा तदा देवदत्तं च पार्थः । भीमस्य नादं सह पाञ्चजन्यघोषं श्रुत्वा निहतं सिन्धुराजम् ॥ ज्ञात्वा राजा धर्मसुतो मुमोद दुर्योधनश्चास सुदुःखितस्तदा ॥ १९७ ॥

SGDF
Sri Gangeshwari Digital Foundation

ततो द्रौणिमुखां सेनां सर्वां भीमोऽभ्यवर्तत । पार्थः कर्णमुखां शिष्टां ततोऽभज्यत तद्बलम् ॥१९८॥ शीर्णां सेनां प्रविविशुर्धृष्टद्युम्नपुरोगमाः । ततस्तं देशमापुस्ते यत्र भीमधनञ्जयौ ॥ १९९ ॥ तत एकीकृताः सर्वे पाण्डवाः सहसोमकाः । परान्विद्रावयामासुस्ते भीताः प्राद्रवन्दिशः ॥ २०० ॥ विद्राव्यमाणं सैन्यं तद्दृष्ट्वा दुर्योधनो नृपः । जयद्रथवधाच्चैव कुपितोऽभ्यद्रवत्परान् ॥ २०१ ॥ स भीमसेनं च धनञ्जयं च युधिष्ठिरं माद्रवतीसुतौ च । धृष्टद्युम्नं सात्यकिं द्रौपदेयान्सर्वानेकः शरवर्षैर्ववर्ष ॥ २०२ ॥ तं विव्यधुस्ते बहुभिः शिलीमुखैः स ताननादृत्य चकर्त बाणैः । धनूंषि चित्राणि महारथानां चकार सङ्ख्ये विरथौ यमौ च ॥ २०३ ॥ आदाय चापानि पराणि तेऽपि दुर्योधनं ववृषुः सायकौघैः । अचिन्तयित्वैव शरान्स एको न्यवारयत्तानखिलांश्च बाणैः ॥ २०४ ॥ तं गाहमानं द्विषतां बहूनां मध्ये द्रोणद्रौणिकृपप्रधानाः । दृष्ट्वा सर्वे जुगुपुश्चात्तचापा अनारतं बाणगणान्सृजन्तः ॥ २०५ ॥ सुयोधनः कर्णमाह जहि भीममिमं युधि । स आह नैष शक्यो हि जेतुं देवैः सवासवैः ॥ २०६ ॥ दैवाज्जीवाम्यहं राजन्युध्यंस्तेनातिपीडितः । अतो घटामहे शक्त्या जयो दैवसमाहितः ॥ ॥ २०७ ॥ दुर्योधनो द्रोणमाह सैन्धवस्त्वदुपेक्षया । पार्थेन निहतो भीमसात्यकिभ्यां च मे बलम् ॥ २०८ ॥ प्रतिज्ञा च परित्यक्ता पाण्डवस्नेहतस्त्वया । इत्युक्तः कुपितो द्रोणः प्रतिज्ञामकरोत्ततः ॥२०९॥ इतः परं नैव रणाद्रात्रावहनि वा क्वचित् । गच्छेयं नैव मोक्ष्यामि वर्म बद्धं कथञ्चन ॥ २१० ॥ मत्पुत्रश्च त्वया वाच्यः पाञ्चालान्नैव शेषय । सदौहित्रानिति प्रोक्त्वा विजगाहे निशागमे ॥ २११ ॥ चमूं परेषामभ्यागाद्धृष्टद्युम्नस्तमाशु च । द्रौणिदुर्योधनौ तत्र विरथीकृत्य मारुतिः ॥ द्रावयामास तत्सैन्यं पश्यतां सर्वभूभृताम् ॥ २१२ ॥ अक्षौहिण्यस्तु सप्तैव सेनयोरुभयोरपि । हतास्तासां च भीमेन तिस्रो

SGDF
Sri Gargeshwari Digital Foundation

द्वे फल्गुनेन च ॥२१३॥ सौभद्रसात्यकिमुखैस्तन्मध्ये षोडशांशकः । हैडिम्बपार्षतमुखैस्त्रयाच्च दशमांशकः ॥ २१४ ॥ भीष्मद्रोणदौणिभिश्च द्वे समं निहते तदा । तदन्यैर्मिलितैः सर्वैस्तच्चतुर्थांश्च एव च ॥२१५॥

ततो रात्रौ पञ्चभिश्च पार्थाः षड्भिश्च कौरवाः । अक्षौहिणीभिः संव्यूह्य युद्धं चक्रुः सुदारुणम् ॥ २१६ ॥ भीमं सेनां द्रावयन्तं पुनः कर्णः समासदत् । सकर्णं पुरतो भीमो दुष्कर्णं कर्णमेव च ॥ २१७ ॥ दुर्योधनस्यावरजौ निष्पिपेष पदा क्षणात् । रथाश्वध्वजसूतैश्च सहितौ न व्यपश्यताम् ॥२१८॥ निरायुधोऽहमिति मां त्वमात्थ परुषं वचः ॥ ॥ २१९ ॥ निरायुधः पदैवाहं त्वां हन्तुमशकं तदा । इति कर्णस्य तौ भीमः सञ्ज्ञया ज्ञापयन्भुवि ॥ पदा पिपेष कालिङ्गं मुष्टिनैव जघान ह ॥ २२० ॥ मुष्टिना त्वद्वधायाहं समर्थ इति किं वदे ॥ २२१ ॥ तस्मान्मया रक्षितस्त्वमिति ज्ञापयितुं प्रभुः । साश्वसूतध्वजरथः कलिङ्गो मुष्टिचूर्णितः ॥ २२२ ॥ केतुमांश्च पिता तस्य शक्रदेवः श्रुतायुधः । अक्षौहिण्या सेनया च सह भीमेन पातिताः ॥ २२३ ॥ खड्गयुद्धे पुरा भीष्मे सैनापत्यं प्रकुर्वति । कर्णानुजान्ध्रुवाद्यांश्च बहूञ्जघ्ने स वै निशि ॥ ॥ २२४ ॥ सञ्ज्ञां भीमकृतां ज्ञात्वा शक्तिं चिक्षेप चापराम् । कर्णः शक्तिर्मया दिव्या न मुक्ता तेन जीवसि ॥ २२५ ॥ इति ज्ञापयितुं तां तु ज्ञात्वा भीमः क्षणात्तदा । खमुत्पत्य गृहीत्वा च कर्णे चिक्षेप सत्वरः ॥२२६॥ यदि त्वया तदा मुक्ता शक्तिस्त्वां सा हनिष्यति । इति ज्ञापयितुं सा च कर्णरक्षणकाङ्क्षिणा ॥ २२७ ॥ मुक्ता दक्षभुजे साऽथ विदार्य धरणीं तथा । भित्त्वा विवेश कर्णस्य दर्शयन्ती निदर्शनम् ॥ २२८ ॥ ततो भीमः पुनस्तं तु रथमास्थाय चापभृत् । कर्णस्य पुरतः शत्रून्द्रावयामास सर्वतः ॥२२९॥ तं कर्णो वारयामास शरैः सन्नतपर्वभिः । भीमः कर्णरथायैव गदां चिक्षेप वेगतः ॥२३०॥ स तद्गदाभिघाताय स्थूणाकर्णास्त्रमासृजत् । तेनास्त्रेण प्रतिहता सा

SGDF
Sri Gargeshwari Digital Foundation

गदा भीममाव्रजत् ॥ २३१ ॥ भीमो गदां समादाय कर्णस्य रथमारुहत् । तया सञ्चूर्णयामास कर्णस्य रथकूबरम् ॥ २३२ ॥ एवं त्वच्चूर्णने शक्तो मत्कामात्त्वं हि जीवसि । एवं निदर्शयित्वैव पुनः स्वरथमाव्रजत् ॥ २३३ ॥ पुनः कर्णपुरः सेनां जघान बहुशो रणे । कर्णस्तु तं परित्यज्य सहदेवमुपाद्रवत् ॥ २३४ ॥ स तु तं विरथीकृत्य धनुः कण्ठेऽवसज्य च । कुत्सयामास बहुशः स तु निर्वेदमागमत् ॥ २३५ ॥ न हन्तुमैच्छत्तं कर्णः पृथायै स्वं वचः स्मरन् । तं विसृज्य रणे कर्णो जघ्ने पार्थवरूथिनीं ॥ ॥ २३६ ॥

ततो द्रौणिर्विविधैर्बाणसंघैर्जघान पार्थस्य चमूं समन्ततः । सा हन्यमाना रणकोविदेन नाशं(न शं) लेभे मृत्युनार्ता प्रजेव ॥२३७॥ दृष्ट्वा सेनां द्रौणिबलाभिभूतां तमाह्वयामास घटोत्कचो युधि । द्रौणिस्तमाहालमलं न वत्स पुत्रस्तातं योधयस्वाद्य मां त्वम् ॥ २३८ ॥ इत्युक्त ऊचे न पिता मम त्वं सखा पितुर्यद्यपि शत्रुसंश्रयात् । अरिश्च मेऽसीति तमाह यद्यरिं मां मन्यसे तद्वदहं करोमि ते ॥ २३९ ॥ इत्यूचिवाञ्छक्रधनुः प्रकाशं विष्फार्य चापं प्रकिरञ्छरौघान् । अभ्यागमद्राक्षसमुग्रवेगः स्वसेनया सोऽपि तमभ्यवर्तत ॥ २४० ॥ स रक्षसां लक्षसमावृतो बली नृभिश्च वीरैर्बहुभिः सुशिक्षितैः । अक्षौहिणीमात्रबलेन राक्षसः संक्षोभयामास गुरोः सुतं शरैः ॥ २४१ ॥ स तेन बाणैर्बहुभिः सुपीडितो विभिन्नगात्रः क्षतजाभिप्लुताङ्गः । व्यावृत्य नेत्रे कुपितो महद्धनुर्विष्फार्य बाणै रजनीं चकार ॥ २४२ ॥ सोऽक्षौहिणीं तां क्षणमात्रतः क्षरन्महाशरांस्तानपि राक्षसान्क्षयम् । निनाय पुत्रं च घटोत्कचस्य निष्ठचं पुरा योऽञ्जनवर्मनामकः ॥ २४३ ॥ निरीक्ष्य सेनां स्वसुतं च पातितं घटोत्कचो द्रोणसुतं शरेण । विव्याध गाढं स सुविह्वलो ध्वजं समाश्रितश्चाशु ससंज्ञकोऽभवत् ॥ २४४ ॥ उत्थाय

SGDF
Sri Gangeshwari Digital Foundation

बाणं यमदण्डकल्पं सन्धाय चापे प्रविकृष्य राक्षसे । मुमोच तेनाभि-
हतः पपात विनष्टसंज्ञः स्वरथे घटोत्कचः ॥ २४५ ॥ विमूर्च्छितं
सारथिरस्य दूरं निनाय युद्धाज्जगतोऽभिपश्यतः । द्रौणिश्च सेनां
निशितैः शरोत्तमैर्व्यद्रावयत्पाण्डवसोमकानाम् ॥ २४६ ॥ संज्ञामवा-
प्याथ घटोत्कचोऽपि क्रुद्धोऽविशत्कौरवसैन्यमाशु । विद्रावयामास च
बाणवर्षैः प्रकम्पयामास महारथांस्तदा ॥ २४७ ॥ तदैव पार्थं प्रति
योद्धुमागतं वैकर्तनं वीक्ष्य जगत्पतिर्हरिः । घटोत्कचं प्राहिणोच्छक्ति-
मुग्रां तस्मिन्मोक्तुं पार्थरक्षार्थमेव ॥ २४८ ॥ स कर्णमाहूय युयोध
तेन तस्यानु दुर्योधनपूर्वकाश्च ये । द्रोणेन चैतान्समरे स एको
निवारयामास ममर्द चाधिकम् ॥ २४९ ॥ ते बाध्यमाना बहुशो
बलीयसा कर्णं पुरोधाय तमभ्ययोधयन् । न विव्यथे तत्र रणे स कर्णः
स्ववीर्यमास्थाय महास्त्रवेत्ता ॥ २५० ॥ निवारयामास गुरोः सुतं
तदा भीमस्त्रिगर्तांश्छतमन्युनन्दनः । अलम्बको नाम तदैव राक्षसः
समासदद्भीमसुतं निहन्तुम् ॥ २५१ ॥ युद्ध्वा प्रगृह्यैनमथो निपात्य
घटोत्कचो भूमितलेऽसिनास्य । उत्कृत्य शीर्षं तु सुयोधनेऽक्षिपद्विषे-
दुरत्राखिलभूमिपालाः ॥ २५२ ॥ अलायुधोऽथागमदुग्रवीर्यो नरा-
शनस्तं स घटोत्कचोऽभ्ययात् । युद्ध्वा मुहूर्तं स तु तेन भूमौ निपात्य
तं यज्ञपशुं चकार ॥ २५३ ॥ अथास्य शिर उत्कृत्य क्रोधाद्दुर्योधनो-
रसि । चिक्षेप तेन सम्भ्रान्ताः सर्वे दुर्योधनादयः ॥ २५४ ॥
घटोत्कचबलख्यात्यै समर्थेनापि यो रणे । न हतो भीमसेनेन
हतेऽस्मिन्भैमसेनिना । सर्वे सञ्चोदयामासुः कर्णं शक्तिविमोक्षणे ॥२५५॥
अस्मिन्हते हतं सर्वं किं नः पार्थः करिष्यति । एवं सञ्चोद्यमानः स
धार्तराष्ट्रैः पुनःपुनः । हैडिम्बेनार्द्यमानैश्च स्वयं च भृशपीडितः ॥
॥ २५६ ॥ आदत्त शक्तिं विपुलां पाकशासनसम्मताम् ॥ २५७ ॥
तामम्बरस्थाय घटोत्कचाय शैलोपमायातुलविक्रमाय । चिक्षेप मृत्यो

SGDF
Sri Gargeshwari Digital Foundation

रसनोपमामलं प्रकाशयन्तीं प्रदिशो दिशश्च ॥ २५८ ॥ निर्भिन्नवक्षाः स तया पपात व्यचूर्णयच्छत्रुबलं हतोऽपि । तस्मिन्हते जहृषुर्धार्तराष्ट्रा उच्चुक्रुशुर्दुधुवुश्चाम्बराणि ॥ २५९ ॥

तदा ननर्त केशवः समाश्लिषच्च फल्गुनम् । ननाद शङ्खमाधमञ्जहास चोरुनिःस्वनः ॥ २६० ॥ तमपृच्छद्गुडाकेशः किमेतदिति दुर्मनाः । हते सुतेऽग्रजेऽस्माकं वीरे किं नन्दसि प्रभो ॥ २६१ ॥ तमाह भगवान्कृष्णो दिष्ट्या जीवसि फल्गुन । त्वदर्थं निहिता शक्तिर्विमुक्ताऽस्मिन्हि राक्षसे ॥ २६२ ॥ ततो युधिष्ठिरो दुःखादमर्षाच्चाभ्यवर्तत । कर्णं प्रति तमाहाथ कृष्णद्वैपायनः प्रभुः ॥ २६३ ॥ ययार्जुनो निहन्तव्यस्तयाऽसौ राक्षसो हतः । तन्माशुचस्त्वं राजेन्द्र दिष्ट्या जीवति फल्गुनः । इत्युक्त्वा प्रययौ व्यासस्ततो युद्धमवर्तत ॥ ॥ २६४ ॥ भीमार्जुनाभ्यामभिहन्यमाने बले कुरूणामितरैश्च पाण्डवैः । प्रदीपहस्ता अथ योधकाश्च सर्वेऽपि निद्रावशगा बभूवुः ॥ २६५ ॥ दृष्ट्वैव तानाह धनञ्जयस्तदा स्वप्स्यन्तु यावच्छशिनः प्रकाशः । इतीरिता आशिषः फल्गुनाय प्रयुज्य सर्वे सुषुपुर्यथास्थिताः ॥ २६६ ॥

पुनश्च चन्द्रेऽभ्युदिते युधे ते समाययुः शस्त्रमहास्त्रवर्षाः । तत्रायातः सात्यकिं सोमदत्तो भूरिश्च ताभ्यां युयुधे स एकः ॥२६७॥ हतौ च तौ पेततुस्तेन भूमौ बाह्लीक एनं समरे त्वयोधयत् । स सात्यकिं विरथीकृत्य बाणं वधाय तस्याशु मुमोच वीरः ॥ २६८ ॥ चिच्छेद तं भीमसेनस्त्रिधैव तस्मै शतघ्नीं प्रजहार बाह्लिकः । तया हतो विह्वलितो वृकोदरो जघान तं गदया सोऽपतच्च ॥ २६९ ॥ बाह्लीकः प्रार्थयामास पूर्वं स्नेहपुरःसरम् । भीम त्वयैव हन्तव्यो रणेऽहं प्रीतिमिच्छता । तदा यशश्च धर्मं च लोकं च प्राप्नुयामहम् ॥ २७० ॥ इत्युक्त आह तं भीमो नितरां व्यथितस्तदा । हन्यां नैवान्यथा युद्धे तत्ते शुश्रूषणं भवेत् ॥ २७१ ॥ इति तेन हतस्तत्र भीमसेनेन

SGDF
Sri Gangeshwari Digital Foundation

बाह्लिकः ॥ २७२ ॥ हते बाह्लीके कौरवा भीमसेनमभ्याजग्मुः कर्णसुयोधनाद्याः । द्रौणिं पुरस्कृत्य गुरुं च पार्षतः सभ्रातृकः सात्यकिना समभ्ययात् ॥ २७३ ॥ संशप्तकैरेव पार्थो युयोध तद्युद्धमासीदतिरौद्रमद्भुतम् । अक्षौहिणी तत्र भीमार्जुनाभ्यां निषूदिता रात्रियुद्धे समस्ता ॥ २७४ ॥

ततः सूर्यश्चाभ्युदितस्तदाऽतिघोरं द्रोणः कर्म युद्धे चकार । स पाञ्चालानां रथबृन्दं प्रविश्य जघान हस्त्यश्वरथान्नरांश्च ॥ २७५ ॥ विद्रावितास्तेन महारथाश्च नैवाविन्दञ्छर्म बाणान्धकारे । युवेव वृद्धोऽपि चचार युद्धे स उग्रधन्वा परमास्त्रवेत्ता ॥ २७६ ॥ रथार्बुदं तेन हतं च तत्र ततः सहस्रं गुणितं नराणाम् । ततो दशांशो निहतो हयानां गजार्बुदं चैव रणोत्कटेन ॥ २७७ ॥ तथा विराटद्रुपदौ शराभ्यां निनाय लोकं परमाजिमध्ये । ततो विजित्यैव गुरोः सुतादीन्धृष्टद्युम्नं भीमसेनो जुगोप ॥ २७८ ॥ धृष्टद्युम्नो भीमसेनाभिगुप्तो द्रोणं हन्तुं यत्नमुच्चैश्चकार । निवारयामास गुरुः शरौघैर्धृष्टद्युम्नं सोऽपि तं सायकेन ॥ २७९ ॥ विव्याध तेनाभिहतः स मूर्छामवाप विप्रो निषसाद चाशु ॥२८०॥ धृष्टद्युम्नः सत्वरं खड्गचर्मण्यादाय तस्याऽरुरुहे रथोत्तमम् । सञ्ज्ञामवाप्याथ गुरुः शरौघैः प्रादेशमात्रैर्व्यथयामास तं च ॥ २८१ ॥ स तैरतिव्यथितस्तद्रथाच्च परावृत्तः स्वरथं चारुरोह । सुसंरब्धौ तौ पुनरेव युद्धं सञ्चक्रतुर्वृष्टशराम्बुधारौ ॥ २८२ ॥ निवार्य शत्रून्स शरैर्ब्रह्मास्त्रमसृजद्द्विजः । तेन सन्दाहयामास पाञ्चालान्सुबहून्रणे ॥ पुरुजित्कुन्तिभोजश्च तेनान्येऽपि हतास्तदा ॥ २८३ ॥ भीमोऽर्जुनः सात्यकिश्च पर्यायेण गुरोः सुतम् । दूरतो वारयामासुर्महत्या सेनया सह ॥२८४॥ कर्णदुर्योधनादींश्च शल्यं भोजं कृपं तथा । भीमार्जुनौ शरौघेण वारयामसतू रणे ॥ २८५ ॥ तत्र भीमो गजानीकं जयत्सेनं च मागधम् । जघान सुबहूंश्चैव मागधानां रथव्रजान् ॥ २८६ ॥ अथ

SGDF
Sri Gangeshwari Digital Foundation

मालवराजस्य त्वश्वत्थामाभिदं गजम् । भीमसेनहतं दृष्ट्वा वासुदेव-प्रचोदितः ॥ अश्वत्थामा हत इति प्राह राजा युधिष्ठिरः ॥ २८७ ॥ अश्वत्थामवधं श्रुत्वा नाहं योत्स्य इति स्वयम् । पुरोक्तं धर्मजायैव तेन द्रोणो युधिष्ठिरम् ॥ २८८ ॥ ब्रूहि सत्यमिति प्राह सत्यमित्येव सोऽब्रवीत् । उपांशु कुञ्जरश्चेति द्रोणोऽतिव्यथितोऽभवत् ॥ २८९ ॥ तस्य भीमो रथेषां च गृहीत्वा न तवेदृशम् । योग्यं गुणवतो नित्यं परधर्मोपजीवनम् ॥२९०॥ इत्याह खस्था मुनयश्चालमेहीति तं तदा । ऊचुस्तदखिलं ज्ञात्वा द्रोणः शस्त्रमवासृजत् ॥२९१॥ सन्यस्य कर्माणि तदाऽखिलानि योगारूढः परमं वासुदेवम् । सर्वेश्वरं नित्यनिरस्तदोषं ध्यायन्मुक्त्वा देहमगात्स्वधाम ॥ २९२ ॥ तं केशवः पाण्डवा गौतमश्च यान्तं स्वलोकं ददृशुर्विहायसा ।

धृष्टद्युम्नः पाण्डवैर्वार्यमाणोऽप्यगात्खड्गं चर्म चादाय तत्र ॥२९३॥ छित्त्वाऽसिना तस्य शिरः पुनश्च रथं स्वकीयं त्वरया समास्थितः । दृष्ट्वा कृपस्तं सुभृशं भयार्दितः सम्प्राद्रवद्वाजिनमेकमास्थितः ॥ २९४ ॥ सञ्छिन्ने द्रोणशिरसि गर्हयामास वासविः । युधिष्ठिरश्च पाञ्चाल्यं सात्यकिश्चापि कोपितः ॥ २९५ ॥ धृष्टद्युम्नस्तु तावाह कथं भूरिश्रवा हतः । इति तं सात्यकिः क्रुद्धो गदापाणिः समभ्ययात् ॥ २९६ ॥ आह्वयामास पाञ्चाल्यस्तं धृतासिरविस्मयः । तदा जग्राह शैनेयं भीमः कृष्णप्रचोदितः । शमयामास पार्थं च पाञ्चाल्यस्नेहयन्त्रितः ॥२९७॥ ते वासुदेवेन तदा सुशिक्षिताः स्नेहं पुनः पूर्ववदापुरुत्तमम् । यत्ताश्च युद्धाय समुद्यताश्च तदाऽगमद्द्रौणिरप्यात्तधन्वा ॥ २९८ ॥ आश्रुत्य तातं निहतं प्रतिज्ञां चकार निःशेषरिपुप्रमाथने । नारायणास्त्रं विससर्ज कोपात्तदा भीता भीममृते समस्ताः ॥ २९९ ॥ युधिष्ठिरः प्राह विषण्ण-चेतनः शैनेयपूर्वाः प्रतियान्तु सर्वे । सभ्रातृकोऽहं द्रौणिवरास्त्रभग्नो भवेयमित्यत्र जगाद केशवः ॥ ३०० ॥ नमध्वमस्त्रस्य ततो विमोक्ष्य-

SGDF
Sri Gangeshwari Digital Foundation

थेत्यथ प्रणेमुश्च धनञ्जयादिकाः । सर्वे न भीमस्तदमुष्य मूर्ध्नि प्रपात सोऽस्त्राविव संस्थितोऽग्निः ॥ ३०१ ॥ अदह्यमाने भीमेऽपि वह्नौ वह्निरिव स्थिते । आ(अ)वेष्टयद्वारुणेन पार्थोऽत्रात्मप्रपत्तये ॥३०२॥ न देहे पतितास्त्रस्य बहिर्वेष्टनतः फलम् । तथापि स्नेहवशगो वेष्टयामास फल्गुनः ॥ ३०३ ॥ अमोघत्वं निजास्त्रस्य भीमस्यावध्यतामपि । साधयन्सार्जुनः कृष्णो भीमस्य रथमारुहत् ॥ ३०४ ॥ वेष्टितं वारुणास्त्रेण प्रविष्टं बाह्यतस्तदा । सहितत्वात्केशवेन नरत्वादथ फल्गुनम् ॥ ॥ ३०५ ॥ तदस्त्रं नादहत्ताभ्यां स्वरथादवरोपिते । भीम अच्छिन्नहेतौ च तदस्त्रं शान्तिमागमत् ॥ ३०६ ॥ शुद्धक्षत्रियधर्मेषु निरतो यद्वृकोदरः । वाहनादवतीर्यान्यैः प्रणतेऽपि निरायुधैः । सायुधः सरथी युध्यदविषह्यमपीश्वरैः ॥ ३०७ ॥ स्वधर्महानौ मित्राणां कर्तव्यं यन्निषेधनम् । अतः सोऽन्यानपि प्राह मा नमध्वमिति स्वयम् ॥ ३०८ ॥ नमस्कार्यमपि ह्यस्त्रं न नम्यं जीवनेच्छया । समरे शत्रुणा मुक्तं तस्मात्तं न चकार सः ॥ ३०९ ॥ अस्त्राभिमानी वायुर्हि देवताऽस्य हरिः स्वयम् । तस्माद्भीमस्वरूपत्वान्नादहच्चाग्निमग्निवत् ॥ ३१० ॥ मनसैवादरं चक्रे भीमोऽस्त्रे च हरौ तदा । क्षत्रधर्मानुसारेण न ननाम च बाह्यतः ॥ ३११ ॥ वासुदेवः स्वकीयास्त्रं भीमं चामोघमेव तु । साधयित्वाऽनन्तशक्तिः पुनरश्वानचोदयत् ॥ ३१२ ॥

पुनः प्रयोक्तुमस्त्रं तद्धार्तराष्ट्रोऽभ्यचोदयत् । द्रौणिर्न शक्यमित्युक्त्वा धृष्टद्युम्नं समभ्ययात् ॥ ३१३ ॥ आयान्तमीक्ष्यैव गुरोः सुतं तं धृष्टद्युम्नं सात्यकिरन्वयाद्रणे । उभौ च तौ सायकाभ्यामविध्यन्निपेततुस्तौ च विमूर्च्छितौ रणे ॥ ३१४ ॥ भीमस्याभ्यागतस्याश्वान्द्रौणिर्व्यद्रावयद्रणे । संस्थापयति तान्भीमे ददर्श द्रौणिमर्जुनः ॥ ॥ ३१५ ॥ ततोऽर्जुनस्तं प्रति योद्धुमागमद्रूक्षा वाचः श्रावयन्क्रुद्धरूपः । तत्राग्नेयं द्रौणिरमुञ्चदस्त्रं तेन व्याप्ता पृतना पाण्डवानाम् ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ ३१६ ॥ अक्षौहिणी निहता चात्र सेना पार्थं सयानं हरिरुज्जहार ॥
॥ ३१७ ॥ जीवन्तमालोक्य सुरेन्द्रनन्दनं द्रौणिः कोपात्कार्मुकं चापहाय । ययौ तमागत्य जगाद कृष्णो वेदान्तकृत्पूर्णषाड्गुण्यदेहः ॥
॥३१८॥ मा याहि साक्षाद्गिरिशः सुराणां कार्याय भूमौ बलवानजायथाः । महच्च कार्यं पुनरस्ति दृष्टं तवाशु तच्च प्रतिपादयेति ॥३१९॥
तथोदितः प्रातरिति ब्रुवाणो ययौ प्रणम्याखिलवेदयोनिम् । ययुस्तमन्वेव सुयोधनादयो दुःखानतास्ते शिबिराय भीताः ॥३२०॥ पार्थाश्च सर्वे मुदिता जनार्दनं परं स्तुवन्तः शिबिराय जग्मुः । तत्रापि रात्रावमितान्हरेर्गुणाननुस्मरन्तो मुमुदुः समेताः ॥३२१॥ (४२६८) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये नारायणास्त्रोपशमनं (द्रोणपर्वनिर्णयो) नाम षड्विंशोऽध्यायः ॥२६॥

॥ अथ सप्तविंशोऽध्यायः ॥

॥ ॐ ॥ अथानुज्ञामुपादाय द्रौणेर्दुर्योधनो नृपः । कर्णं सेनापतिं चक्रे सोऽगाद्युद्धाय दंशितः ॥ १ ॥ तत्राभवद्युद्धमतीवदारुणं पाण्डोः सुतानां धृतराष्ट्रजैर्गजे । तत्रोदयाद्रिप्रतिमे प्रदृश्यते भीमो यथोद्यत्सविताऽतिनिर्मलः ॥ २ ॥ तं कालयन्तं नृपतीन्क्षेमधूर्तिरभ्यागमत्तस्य गजं जघान च । तं वीर्यमत्तं प्रतिलभ्य भीमो निनाय मृत्योः सदनाय शीघ्रम् ॥ ३ ॥ निहत्य तं मारुतिरभ्यकृन्तच्छिरांसि यूनां परपक्षपातिनाम् । विक्षोभयामास च शत्रुसैन्यं सिंहो यथैव श्वसृगालयूथम् ॥
॥ ४ ॥ सङ्क्षोभ्यमाणं तदनीकमीक्ष्य द्रौणी रथेन प्रतिजग्मिवांस्तम् । तद्युद्धमासीदतिघोरमद्भुतं पुरा यथा नास च कस्यचित्कचित् ॥ ५ ॥
दृष्ट्वैव तदेवगन्धर्वविप्रा ऊचुर्नेदृग्दृष्टपूर्वं सुयुद्धम् । न चोत्तरं वाऽपि

SGDF
Sri Gargeshwari Digital Foundation

भविष्यतीदृक्कलां च सर्वाणि न षोडशीम(मि)युः ॥ ६ ॥ नैतादृशी ज्ञानसम्पद्बलं वा द्वयं कुतो वायुमृते शिवं तथा । द्वयोः समाहार इह द्वयोरपि ज्ञानस्य बाह्वोश्च बलस्य सूर्जितः ॥ ७ ॥ इतीर्यमाणे विबुधैर्नरोत्तमौ दिशः समस्ता गगनं च पत्रिभिः । निरन्तरं चक्रतुरुत्तमौजसौ दृष्ट्वैव तत्प्रीतिमगुर्महारथाः ॥८॥ शरासने मारुतिना निराकृते द्रौणिर्महास्त्राणि मुमोच तस्मिन् । तान्यस्त्रवर्यैर्बलवानविस्मयः संशामयामास सुतोऽनिलस्य ॥ ९ ॥ पुनः शरैरेव परस्परं तावयुध्यतां चित्रमलं च सुष्ठु । तदा तु भीमस्य शरैर्भृशार्दितो द्रौणिः पपाताशु दृढं विचेतनः ॥ ॥१०॥ भीमश्च विह्वलतनुः स तु किञ्चिदेव पूर्वं गते गुरुसुते प्रययौ क्षणेन । निर्धूतयुद्धश्रम आत्तधन्वा योद्धुं गजौघं प्रतिनादिताशः ॥११॥ तस्मिन्गजान्मर्दयति धार्तराष्ट्रो युधिष्ठिरम् । आगाद्युद्धाय तौ युद्धं राजानौ चक्रतुश्चिरम् ॥१२॥ तत्र तं विरथं चक्रे सहसैव युधिष्ठिरः । स गदामाददे गुर्वीं तं भीमोऽभ्यपतद्गदी ॥ १३ ॥ दृष्ट्वा कृपस्तं स्वरथमारोप्यापययौ ततः । तदैव कर्णनकुलौ भृशं बाणैरयुध्यताम् ॥ ॥ १४ ॥ नकुलं विरथं कृत्वा कर्णोऽथ प्रपलायिनम् । अनुद्रुत्य च वेगेन कण्ठे धनुरवासृजत् ॥ १५ ॥ उक्त्वा च परुषा वाचः कुन्त्या वचनगौरवात् । न जघानैव नकुलं विसृज्य च परान्ययौ ॥ १६ ॥ विन्दानुविन्दावथ कैकयौ रणे समासदत्सात्यकिरुग्रविक्रमः । तयोरमुष्याभवदुग्रवैशसं प्रवर्षतोरुत्तमसायकान्बहून् ॥ १७ ॥ ताभ्यां निरुद्धः सहसा जहार तत्रानुविन्दस्य शिरोऽथ विन्दः । युयोध शैनेयमथारथावुभौ परस्परं चक्रतुरुत्तमाहवे ॥ १८ ॥ ततश्च चर्मासिधरौ प्रचेरतुः श्येनौ यथाऽऽकाशतले कृतश्रमौ । निकृत्य चान्योन्यमुभौ च वर्मणी वरासिपाणी युगपत्समीयतुः ॥ १९ ॥ तत्रापहस्तेन शिरः सकुण्डलं जहार विन्दस्य मृधे स सात्यकिः । निहत्य तौ बन्धुजनैः सुपूजितो जगाम शत्रूनपरान्प्रकम्पयन् ॥ २० ॥

SGDF
Sri Gargeshwari Digital Foundation

कृपमायान्तमीक्ष्यैव तपसा मां प्रपीडयेत्। इति मत्वा पार्षतस्तु भीमं शरणमेयिवान् ॥ २० ॥ कर्णं समन्तात्प्रतिकालयन्तं वरूथिनी-मिन्द्रसुतः समभ्ययात् । क्षणात्तमाजौ विरथं च चक्रे ततोऽपहारं स चकार चम्वाः ॥ २२ ॥ पराजितः संयति सूर्यसूनुः सुतेन शक्रस्य स धार्तराष्ट्रम्। जगाद बाहुं प्रतिगृह्य पार्थो जिगाय मामन्यमनस्क-माजौ ॥ २३ ॥ कामं रथो मे धनुरप्यभेद्यं दत्तं भृगूणामधिपेन दिव्यम्। यन्ता न तादृङ्मम यादृशो हरिः शल्यो यदि स्यात्त्वदरिं निहन्याम् ॥ २४ ॥ इतीरिते सौत्यकृते स शल्यं प्रोवाच स क्रुद्ध इवाभवत्तदा। दुर्योधनो रथिनः सारथेस्तु व्यवर्णयन्नुत्तमतामशामयत् ॥ ॥ २५ ॥ बुद्ध्या बलेन ज्ञानेन धैर्याद्यैरपि योऽधिकः। रथिनः सारथिः स स्यादर्जुनस्य यथा हरिः ॥ २६ ॥ यथा शिवस्य ब्रह्माऽ-भूद्दहतस्त्रिपुरं पुरा। इत्यादिवाक्यैः संशान्त इव शल्योऽस्य सारथिः ॥ ॥ २७ ॥ बभूव तेन सहितः सेनां व्यूह्य रवेः सुतः। गच्छन्युद्धाय दर्पेण प्राह यो मेऽर्जुनं पुमान्। दर्शयेत्तस्य दास्यामि प्रीतो वित्तम-नर्गलम् ॥ २८ ॥ इति ब्रुवाणं बहुशः प्राह शल्यः प्रहस्य च। निवातकवचा येन हता दग्धं हि खाण्डवम् ॥ २९ ॥ को नाम तं जयेन्मर्त्यो दृष्टो वाऽपि स गोग्रहे। काकगोमायुधर्मा त्वं हंससिंहोपमं रणे ॥ ३० ॥ मा याहि पार्थं मा याहि हतोऽनेन यमक्षयम्। इत्युक्तो रविजो मद्रान्नितरां पर्यकुत्सयत् ॥ ३१ ॥ शल्योऽपि सर्व-देवेषु नीचमध्योत्तमा नराः। सन्तीत्युक्त्वाऽस्य सारथ्यं चक्रे पार्थ-हितेच्छया ॥ ३२ ॥ कर्णोऽपि शल्यनियतेन रथेन पार्थसेनामवाप्य विदुधाव शरैः समन्तात्। संरक्षितो युधि सुयोधनगौतमाद्यैराचार्यजेन च महास्त्रविदां वरेण ॥ ३३ ॥ तं भीमपार्षतशिनिप्रवराभिगुप्ता सा पाण्डवेयपृतनाऽभिववर्ष बाणैः। तां सूर्यसूनुरथ बाणवरैर्विदार्य सम्प्रा-द्रवच्छितशरैरथ धर्मसूनुम् ॥ ३४ ॥ कृत्वा तमाशु विरथं धनुरस्य

SGDF
Sri Gargeshwari Digital Foundation

कण्ठे सज्जं निधाय परुषा गिर आह चोच्चैः । दृष्ट्वैव मारुतिरमुं भृश-
मातुतोद दुर्योधनं विरथकार्मुकमाशु कृत्वा ॥ ३५ ॥ तं प्राणसंशयगतं
नृपतिं निरीक्ष्य कर्णं जगाद युधि मद्रपतिः प्रदर्श्य । यस्यार्थमेष
समरस्त्वमियं च सेना तं त्वं यमस्य सदनं प्रयियासुमद्य ॥ ३६ ॥
भीमेन पीडितममुं परिपाहि शीघ्रं किं ते युधिष्ठिरममुं हि युधाऽभि-
पीड्य । श्रुत्वाऽस्य वाक्यमतिहाय युधिष्ठिरं तं कर्णो ययौ नृपति-
रक्षणतत्परोऽलम् ॥ ३७ ॥ दृष्ट्वैव तं पवनसूनुरभि त्वियाय क्रोधा-
द्दिधक्षुरिव कर्णममेयधामा । राजावनाय शिनिपुङ्गवपार्षतौ च सन्दिश्य
कर्णमभिगच्छत आस रूपम् ॥ ३८ ॥ अन्ते कृतान्तनरसिंहतनोर्यथैव
विष्णोर्हरं ग्रसत आत्तसमस्तविश्वम् । तद्वेगतः प्रतिचचाल धरा समस्ता
विद्राविता च सकला प्रतिवीरसेना ॥ ३९ ॥ वैकर्तनेन शरसञ्चय-
ताडितः स बाणं च वज्रसदृशं प्रमुमोच तस्मिन् । तेनाहतो मृतकवत्स
पपात कर्णो भीमः क्षुरं च जगृहेऽभिययौ च पश्चाम् ॥४०॥ निन्दां
हरेश्च विदधाति परोक्षगोऽपि यस्तं प्रगृह्य करवाणि विजिह्वमेव । एवं हि
वायुतनयस्य सदा (महा) प्रतिज्ञा छेत्तुं स तेन रविजस्य ससार जिह्वाम् ॥
॥ ४१ ॥ आयान्तमन्तिकममुं प्रसमीक्ष्य शल्यो नेत्याह हेतुभिरहो न
मृषा प्रतिज्ञा । कार्या त्वयैव पुरुहूतसुतस्य जिह्वां मा तेन पातय
मरुत्सुत सूतसूनोः ॥४२॥ इत्युक्त्वा प्रमुखात्तस्य रथेनैव तु मद्रराट् ।
वैकर्तनमपोवाह सर्वलोकस्य पश्यतः ॥ ४३ ॥

जित्वा सूर्यसुतं भीमः कौरवाणामनीकिनीम् । सर्वां विद्रावया-
मास द्रौणिदुर्योधनावृताम् ॥४४॥ अक्षौहिणीत्रयं तेन तदा विलुलितं
क्षणात् । तदैव गुरुपुत्रोऽयात्पाण्डवानामनीकिनीम् ॥ ४५ ॥ विमृद्य
सकलां सेनां कृत्वा च विरथं नृपम् । धृष्टद्युम्नं यमौ चैव सात्यकिं
द्रौपदीसुतान् ॥ क्षणेन विरथीकृत्य सर्वांश्चक्रे निरायुधान् ॥ ४६ ॥
तान्भयदर्पात्रणतोऽपयातानन्वेव बाणावृतमन्तरिक्षम् । कुर्वन्ययौ धर्मराज-

SGDF
Sri Gangeshwari Digital Foundation

स्तमाह किं नः स्वधर्मे निरतान्विहंसि ॥ ४७ ॥ क्षत्रियान्परधर्मस्थो मा हिंसीरिति चोदितः । प्रहस्य तान्विहायैव ययौ यत्राच्युतार्जुनौ ॥ ॥ ४८ ॥ संशप्तकैस्तत्र संयुध्यमानं समाह्वयामास सुरेन्द्रसूनुम् । स बाणयुक्तं भुजगेन्द्रकल्पमुन्नम्य बाहुं युधये सुशूरम् ॥ ४९ ॥ पार्थः संशप्तकगणैः संसृष्टः समरार्थिभिः । आहूतो द्रौणिना चैव कार्यं कृष्णमपृच्छत ॥ चोदयामास च हयान्कृष्णो द्रौणिरथं प्रति ॥ ५० ॥ उभौ च तावस्त्रविदां प्रधानौ महाबलौ संयति जातदर्पौ । शरैः समस्ताः प्रदिशो दिशश्च द्रौणीन्द्रसूनू तिमिराः प्रचक्रतुः ॥ ५१ ॥ द्रौणिस्तदा स्यन्दनवाजिरोमस्वरोमकूपध्वजकार्मुकेभ्यः । शरानमोघान्सततं सृजानो बबन्ध पार्थं शरपञ्जरेण ॥५२॥ तस्मिन्निबद्धे हरिरप्रमेयो विबोधयामास सुरेन्द्रसूनुम् । आलिङ्गनेनास्य ददौ बलं च स उत्थितोऽस्त्राण्यमुचन्महान्ति ॥ ५३ ॥ निवार्य तान्यस्त्रवरैर्गुरोः सुतश्चिच्छेद च ज्यां युधि गाण्डिवस्य । ववर्ष पार्थं च शरैरथान्या ज्याऽऽसीत्तया गाण्डिवं सोऽप्ययुङ्क्त ॥५४॥ ततः शरेण कुपितः शितेन द्रौणिसारथेः । शिरो जहार कौन्तेयः सारथ्यं सोऽकरोत्स्वयम् ॥५५॥ शरान्विसृजता तेन सारथ्यमपि कुर्वता । शरकूटेन पार्थः स पुनर्बद्धो द्विजन्मना ॥ ॥ ५६ ॥ पुनरालिङ्ग्य कृष्णस्तमधाच्छत्रुविघातकम् । बलमस्मिंस्ततः पार्थ उत्तस्थौ शरचापभृत् ॥ ५७ ॥ ववर्ष च शरान्भूयो द्रोणपुत्रेऽरिमर्दनः । पुनस्तस्य तुतोद ज्यां द्रौणिः सन्धाय तां पुनः ॥ ५८ ॥ पार्थो द्रोणसुतस्याश्वरश्मींश्चिच्छेद सायकैः । विरश्मयो हया द्रौणेः पुनः पार्थशराहताः ॥५९॥ अपोहुर्दूरमेवास्मात्सोऽपि सन्धाय तान्पुनः । चिन्तयामास नैतस्मादधिकं शक्यतेऽर्जुने ॥ ६० ॥ सारथित्वात्केशवस्य ध्वजस्थत्वाद्धनूमतः । गाण्डीवत्वात्कार्मुकस्य चेषुध्योरक्षयत्वतः ॥६१॥ अवध्यत्वात्तथाऽश्वानामभेद्यत्वाद्रथस्य च । अतो योद्धुं समर्थोऽपि नाद्य यामि धनञ्जयम् ॥ ६२ ॥

SGDF
Sri Gargeshwari Digital Foundation

एवं स मत्वा प्रविवेश सेनां पाण्डोः सुतानामथ तं समभ्ययात् ।
पाण्ड्यस्तयोरास सुयुद्धमद्भुतं प्रवर्षतोः सायकपूगमुग्रम् ॥ ६३ ॥ अष्टा-
वष्टशता(गवा)न्यूहुः शकटानि यदायुधम् । अह्नस्तदष्टभागेन द्रौणिश्चिच्छेद
तत्र हि ॥ ६४ ॥ अथ तं विरथीकृत्य च्छित्वा कार्मुकमाहवे ।
सकुण्डलं शिरो द्रौणिर्जहार मुकुटोज्ज्वलम् ॥ ६५ ॥ अथ विद्रावयामास
पृतनां पाण्डवीं शरैः । तदा जघान पार्थोऽपि दण्डधाराख्यमागधम् ॥
॥ ६६ ॥ विद्राव्यमाणां पृतनां निरीक्ष्य गुरोः सुतेनाभ्यगमत्त्वरावान् ।
धृष्टद्युम्नस्तं स ऊचे सुपापं हनिष्ये त्वामद्य युद्धे गुरुघ्नम् ॥ ६७ ॥
इत्युक्तो दर्शयामास पार्षतः खड्गमुत्तमम् । अयं तव पितुर्हन्ता वदिष्यति
तवोत्तरम् ॥ ६८ ॥ इत्युक्त्वा धनुरादाय ववर्ष च शरान्बहून् । तयोः
समभवद्युद्धं तुमुलं रोमहर्षणम् ॥ ६९ ॥ तत्र तं पार्षतं द्रौणिः क्षणेन
विरथायुधम् । कृत्वाऽन्ताय शरांस्तीक्ष्णान्मुमोच न च तस्य ते ॥७०॥
त्वचं च चिच्छिदुर्द्रौणिः खड्गहस्तोऽभिजग्मिवान् । खड्गेन सोऽस्त्रशस्त्रै-
रप्यनिर्भिन्नत्वचं तदा ॥ ७१ ॥ मौर्व्या ममन्थ धनुषः पातयित्वा
धरातले । आकृष्यमाणं पार्षतं तं दृष्ट्वा कृष्णप्रचोदितः । पार्थो भीम-
श्चोभयतः शरैरभिविजघ्नतुः ॥ ७२ ॥ स ताभ्यां वज्रसमितैः शरैरभि-
हतो भृशम् । विसृज्य पार्षतं स्वीयमारुरोह रथं पुनः ॥ ७३ ॥
जगाम च ततोऽन्यत्र पाञ्चाल्योऽपि रथं पुनः । आरुह्यान्यं स्वात्तधन्वा
कृतवर्माणमभ्ययात् ॥ ७४ ॥ तयोरासीत्सुतुमुलं युद्धमद्भुतदर्शनम् ।
तत्र नातिप्रयत्नेन पाञ्चाल्यो विरथायुधम् ॥ ७५ ॥ चकार कृतवर्माणं
तमपोवाह गौतमः । अथ दुर्योधनो राजा माद्रेयावभ्ययाद्रणे ॥७६॥
ताभ्यां तस्याभवद्युद्धं घोरमद्भुतदर्शनम् । तत्र नातिप्रयत्नेन तेन तौ
विरथीकृतौ ॥ ७७ ॥ स्वयं युधिष्ठिरो राजा तदा तं समवारयत् ।
व्यश्वसूतध्वजं चक्रे तं च दुर्योधनो रणे ॥ ७८ ॥ अथाऽऽगतं सूर्यसुतं
पुनश्च जगाम भीमो रभसो रथेन । दुर्योधनं चास्य समक्षमेव चकार

SGDF
Sri Gangeshwari Digital Foundation

वीरो विरथं क्षणेन ॥ ७९ ॥ निवार्य कर्णं च शरैरमुष्य सूनोः सुषेणस्य शिरश्चकर्त । पपात भूमौ स पितुः समीपे यथा हतः सत्यसेनोऽमुनैव ॥ ८० ॥ यथैव कर्णावरजौ पुरैव निशायुद्धे कर्णपुरः प्रपातितौ । हतं तमीक्ष्यैव विकर्तनात्मजः क्रोधान्वितो भीमसेनं विहाय ॥ ययौ प्रमृद्यैव चमूं युधिष्ठिरं रथेऽपरे स्वश्वयुते व्यवस्थितम् ॥ ॥ ८१ ॥ न्यवारयेतां शिनिपुत्रपार्षतौ कृष्णासुताः सोमकसङ्घयुक्ताः । स तान्समस्तान्विरथान्विधाय युधिष्ठिरं प्राप युतं यमाभ्याम् ॥ ८२ ॥ निहत्य सोऽश्वान्युधि धर्मसूनोर्निरायुधौ तौ च यमौ चकार । तानेकयानोपगतान्पुनश्च ममर्द बाणैश्च वचोभिरुग्रैः ॥ ८३ ॥ तदैव मोक्षाय नृपस्य भीमो दुर्योधनं विरथं संविधाय । विव्याध मर्मस्वतितीक्ष्णसायकैस्तं दर्शयामास रवेः सुताय ॥ ८४ ॥ शल्यस्तदा धर्मसुतं विहाय कर्णो ययौ तत्र युधिष्ठिरोऽपि । गत्वा शनैः शिबिरं तत्र शिश्ये कर्णो यदा राजगर्द्धी(गृध्नी) जगाम ॥ ८५ ॥ द्रौणिः कृपश्चात्र तदैव जग्मतुस्तदा भीमो द्रौणिकर्णौ जगाम । कृपो नृपं रथमारोपयच्च विद्धं शरैर्भीमबाहुप्रमुक्तैः ॥ ८६ ॥ नृपं समादाय कृपेऽपयाते भीमार्दितौ द्रौणिकर्णौ शरौघैः । विहाय तं जग्मतुः सोमकानां चमूं शरौघैरभिपातयन्तौ ॥ ८७ ॥

अथात्र राजानमवक्षमाणो धनञ्जयो वासुदेवप्रणुन्नः । अभ्याययौ पार्षतः स्वां तु सेनां कर्णाहतां वीक्ष्य कुरूनपीडयत् ॥८८॥ न्यवारयत्समायातं कपिप्रवरकेतनम् । द्रौणिर्दुःशासनश्चैव धृष्टद्युम्नमवारयत् ॥ ॥ ८९ ॥ उभावतिरथौ तौ तु शस्त्रास्त्रैरभ्यवर्षताम् । दुःशासनः पार्षतश्च कुर्वन्तौ बाणजं तमः ॥ ९० ॥ तत्र दुःशासनेनाजौ स्तम्भितो द्रुपदात्मजः । यतमानोऽपि निर्यत्नः कृतो युद्धे निरायुधः ॥ ९१ ॥ तदाऽभवद्युद्धमतीवदारुणं द्रौणेस्तनूजेन तु वज्रपाणेः । तत्रापि बद्धः शरपञ्जरेण पार्थोऽपनुत्ताऽपि च (हि) गाण्डिवज्या ॥ ९२ ॥ पार्थोऽथ

SGDF
Sri Gargeshwari Digital Foundation

कृष्णैधितबाहुवीर्यो निहत्य सूतं गुरुपुत्रकस्य । छित्वा च रश्मीं-स्तुरगानमुष्य विद्रावयामास शरैः सुदूरम् ॥ ९३ ॥ अतीत्य पुत्रं तु गुरोः समागते पार्थे कर्णो द्रावयामास सेनाम् । पाण्डोः सुतानां शरवर्षधारो दुर्योधनश्चानु ययौ तमेव ॥ ९४ ॥ कर्णमायान्तमालोक्य द्रावयन्तं निजां चमूम् । धनुरन्यत्समादाय धृष्टद्युम्नो न्यवारयत् ॥ ॥ ९५ ॥ तयोरासीन्महद्युद्धं चिरं सममविश्रमम् । तदैव सात्यकि-र्वीरो दुर्योधनमवारयत् ॥९६॥ निवारितः सात्यकिना रणे दुर्योधनो नृपः । निहत्य सात्यकेरश्वान्द्रौपदेश्चापमच्छिनत् ॥ ९७ ॥ तदन्तरैव कर्णोऽपि पार्षताश्वानपोथ(पात)यत् । तयोर्विरथयोरेव(वं) भग्नं तत्पाण्डवं बलम् ॥ ९८ ॥

बलं स्वकीयं बहुधा विभिन्नं समीक्ष्य भीमो मृगराजकेतुः । कृत्वा धराकम्पकमुग्रनादं रणेऽभ्ययात्कौरवराजसैन्यम् ॥९९॥ नादेन बाणैश्च वृकोदरेण भग्नं तदा कौरवसैन्यमाशु । दिशो विदुद्राव सुयोधनोऽपि कृतो रणे तेन विवाहनायुधः ॥१००॥ दृष्ट्वैव तत्पाण्डवानां च सेना समावृत्ता क्षिप्रमवार्यविक्रमा । तया पुनः कौरवाणां बलं तद्भग्नं दूराद्दूरतरं प्रदुद्रुवे ॥ १०१ ॥ हन्यमानं दिशो यान्तं पाञ्चाल्यैर्भीम-संश्रयात् । दुर्योधनबलं दृष्ट्वा जज्वालाधिरथिः क्रुधा ॥ १०२ ॥ सोऽमोघं रामदैवत्यमस्त्रं भार्गवसञ्ज्ञितम् । सर्वास्त्रनाशकं दिव्यमप्रति-द्वन्द्वमाददे ॥१०३॥ तच्च भीमपुरोगेषु सैन्येष्वमुचदुल्बणम् । तदस्त्रं वर्जयामास भीमं रामप्रसादतः ॥१०४॥ अन्ये तु दुद्रुवुः केचिच्छिष्टाः प्रापुर्यमक्षयम् । न ह्यस्त्रं द्रावमाणांस्तद्धन्ति तेन सपार्षताः ॥ १०५ ॥ पाञ्चाला द्रौपदेयाश्च शैनेयाद्याश्च सर्वशः । पलायनेनोर्वरिता अर्जुनो-ऽप्यस्त्रमुद्यतम् ॥ १०६ ॥ वीक्ष्य प्रत्यस्त्रहीनं तदप्राप्यैव रवेः सुतम् । वासुदेवमिदं प्राह वर्जयित्वैव सूतजम् ॥ १०७ ॥ अन्यत्र यामि नैवास्मादस्त्राज्जीवनमन्यथा । इत्यूचिवांसं पार्थं तं कृष्णोऽप्राप्यैव

SGDF
Sri Gargeshwari Digital Foundation

सूतजम् ॥ १०८ ॥ अन्येनैव पथा भीमं प्रापयामास विश्वकृत् । तत्रार्जुनोऽवदद्भीमं याहि द्रष्टुं युधिष्ठिरम् ॥ १०९ ॥ प्रवृत्तिं विद्धि भूपस्य मां तु संशप्तका युधे । आह्वयन्ति हतोच्छेषास्तानहं यामि तद्युधे ॥ ११० ॥ इत्यूचिवांसं तमुवाच भीमो जानन्स्वबाह्वोर्बलमप्रमेयम् । संशप्तकान्सूतजं कौरवांश्च योत्स्येऽहमेकस्त्वमुपैहि भूपम् ॥ ॥१११॥ त्यक्त्वा रणं नाहमितो व्रजेयं न मां वदेत्कश्चन युद्धभीतम् । इति ब्रुवाणं तमनन्तशक्तिः प्रीतः कृष्णः प्रशशंसाधिकेष्टम् ॥ ११२ ॥

ययौ युधिष्ठिरं द्रष्टुं शिबिरं सार्जुनो हरिः । दृष्ट्वा तौ नृपतिः कर्णं हतं मत्वा शशंस ह ॥ ११३ ॥ अभिवाद्य हनिष्यामीत्युक्तः पार्थेन स क्रुधा । भृशं विनिन्द्य बीभत्सुमाह कृष्णाय गाण्डिवम् ॥ देहि पुत्रं स राधाया हनिष्यति न संशयः ॥ ११४ ॥ अथवा भीम एवैनं निवृत्ते त्वयि पातयेत् । त्वं तु कुन्त्या वृथा सूतः क्लीबो मिथ्याप्रतिश्रवः ॥ ११५ ॥ अहं तु सूतपुत्रेण क्लिष्टो मारुतितेजसा । जीवामीत्यग्रजेनोक्त उद्बबर्हासिमुत्तमम् ॥ ११६ ॥ वासुदेवस्तमाहेदं किमेतदिति सर्ववित् ॥ ११७ ॥ तमाह गाण्डिवं दातुं यो वदेत्तद्वधो मया । प्रतिज्ञातस्ततो हन्मि नृपमित्याह तं हरिः ॥११८॥ सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करम् । यत्सतां हितमत्यन्तं तत्सत्यमिति निश्चयः ॥ ११९ ॥ धर्मस्य वचनं श्रेयो धर्मज्ञानं तु दुष्करम् । यः सतां धारको नित्यं स धर्म इति निश्चयः ॥ १२० ॥ कौशिकाख्यो ब्राह्मणो हि लीनं ग्रामजनं क्वचित् । तस्करेष्वभिधायैव निरयं प्रत्यपद्यत ॥ १२१ ॥ कश्चिद्व्याधो मृगं हत्वा मातापितृनिमित्ततः । भक्षार्थमभ्यगात्स्वर्गमसुरोऽसौ मृगो यतः ॥ १२२ ॥ उपद्रवाय लोकस्य तपश्चरति दुर्मतिः । तस्मात्सद्धारको धर्म इति कृत्वा विनिश्चयम् । मा नृपं जहि सत्यां त्वं कुरु वाचं तिरस्कुरु ॥ १२३ ॥ इत्युक्तो बहुधाऽनिन्दत्क्रोधादेवार्जुनो नृपम् । त्वं नृशंसः कृतघ्नश्च निर्वीर्यः

SGDF
Sri Gurgeshwari Digital Foundation

परुषंवदः ॥ १२४ ॥ त्वत्तः सुखं नास्ति किञ्चिन्न मां गर्हितुमर्हसि । भीमो मां गर्हितुं योग्यो यो ह्यस्माकं सदा गतिः ॥ १२५ ॥ यो युध्यते सर्ववीरैरद्यापि त्वं तु निन्दकः । इत्याद्युक्त्वाऽऽत्मनाशाय विकोशं कृतवानसिम् ॥ १२६ ॥ पुनः कृष्णेन पृष्टः स स्वाभिप्रायमुवाच तम् । तच्छ्रुत्वा गर्हयित्वैनं पुनराह जनार्दनः ॥ १२७ ॥ मतिपूर्वं देहहानात्पापं महदवाप्यते । धर्मार्थकाममोक्षाणां साधनं देहतोऽस्ति यत् ॥ १२८ ॥ अतो मा त्यज देहं तु कुरु चात्मप्रशंसनम् । वधो गुरूणां त्वङ्कारः स्वप्रशंसैव चात्मनः ॥ १२९ ॥ इत्युक्तः स त्वहङ्काराच्छशंस स्वगुणानलम् ॥ १३० ॥ गुरुनिन्दाऽऽत्मपूजा च न धर्माय भवेत्क्वचित् । तथाप्यर्जुनहार्दं तत्सम्प्रकाश्य जनार्दनः ॥१३१॥ तस्य लज्जां समुत्पाद्य नाशयित्वा च तं मदम् । नाहं वेद परं धर्मं कृष्ण एव गतिर्मम ॥ १३२ ॥ इति भावं समुत्पाद्य दोषान्नाशयितुं हरिः । कारयामास तत्सर्वमर्जुनेन जगत्पतिः ॥ १३३ ॥ तत एतदविज्ञानात्कुपितो नृपतिर्भृशम् । आहास्तु राजा भीमस्त्वं युवा मां जहि च स्वयम् ॥ वनं वा विफलो यामीत्युक्त्वोत्तस्थौ स्वतल्पतः ॥ ॥ १३४ ॥ तं वासुदेवः प्रतिगृह्य हेतुमुक्त्वा सर्वं शमयामास नेता । पार्थश्च भूपस्य पपात पादयोः क्षमापयन्सोऽपि सुप्रीतिमाप ॥ १३५ ॥ तौ भ्रातरौ वासुदेवप्रसादान्महापदो मुक्तिमाप्यातिहृष्टौ । भक्त्या समस्ताधिपतिं शशंसतुस्त्वया समः को नु हरे हितो नः ॥ १३६ ॥

ततः प्रणम्य बीभत्सुरग्रजं परिरम्भितः । तेनाभिनन्दितः प्रीत्या चाशीर्भिः प्रययौ युधे ॥ १३७ ॥ तं शङ्कितं कर्णजये स्विन्नगात्रं हरिस्तदा । सङ्कीर्त्य पूर्वकर्माणि नरावेशं विशेषतः ॥ व्यञ्जयामास धैर्यं च तस्यासीत्तेन सुस्थिरम् ॥ १३८ ॥ भीमस्तदा शत्रुबलं समस्तं विद्रावयामास जघान चाजौ । वीरान्रणायाभिमुखान्स्वयन्त्रा कुर्वन्स वार्तां रममाण एव ॥१३९॥ तदाऽऽसदत्तं शकुनिः ससैन्यो दुर्योधन-

SGDF
Sri Gargeshwari Digital Foundation

स्वावरजैरुपेतः । तं भीमसेनो विरथं निरायुधं विधाय बाणैर्भुवि च न्यपातयत् ॥ १४० ॥ न जघ्निवांस्तं सहदेवभागं प्रकल्पितं स्वेन तदाऽक्षगोष्ट्याम् । तं मूर्च्छितं श्वासमात्रावशिष्टं दुर्योधनः स्वरथेनाप-निन्ये ॥ १४१ ॥ दुर्योधनस्यावरजा दशात्र प्रदुद्रुवुर्भीमसेनं विहाय । ततोऽर्जुनं वासुदेवं च दृष्ट्वा प्रीतः श्रुत्वा धर्मराजप्रवृत्तिम् ॥ १४२ ॥ पुनश्च निघ्नन्तमरिप्रवीरान्विद्रावयन्तं च निजां वरूथिनीम् । ससार दुःशासन आत्तधन्वा भीमोऽपि तं सिंह इवाभिपेदिवान् ॥ १४३ ॥ तं रूक्षवाचो मुहुरर्पयन्तं विधाय भीमो विरथं क्षणेन । प्रगृह्य भूमौ विनिपात्य वक्षो विदारयामास गदाप्रहारतः ॥ १४४ ॥ आक्रम्य कण्ठं च पदोदरेऽस्य निविश्य पश्यन्मुखमात्तरोषः । विकोशमाकाश-निभं विधाय महासिमस्योरसि सञ्चखान ॥ १४५ ॥ कृत्वाऽस्य वक्ष-स्युरुसत्तटाकं पपौ निकामं तृषितोऽमृतोपमम् । तच्छोणिताम्भो भ्रम-दक्षमेनं संस्मारयामास पुरा कृतानि ॥ १४६ ॥ वाक्सायकांश्चास्य पुरा समर्पितान्संस्मारयामास पुनःपुनर्भृशम् । दन्तान्तरं न प्रविवेश तस्य रक्तं ह्यपेयं पुरुषस्य जानतः ॥ १४७ ॥ तथापि शत्रुप्रतिभीषणाय पपाविवास्वाद्य पुनःपुनर्भृशम् । स्मरन्नृसिंहं भगवन्तमीश्वरं स मन्युसूक्तं च ददर्श भक्त्या ॥ १४८ ॥ यस्ते मन्यो इत्यतो नारसिंहं सोमं तस्मै चार्पयच्छोणिताख्यम् । युद्धाख्ययज्ञे सोमबुद्ध्याऽरिवक्ष इहेति साम्ना गदया विभिन्दन् ॥ १४९ ॥ उवाच वाचं पुरुषप्रवीरः सत्यां प्रतिज्ञां लोकमध्ये विधाय । याः सपतयस्ता अपतयो हि जाता या साऽपतिः सा सपतिश्च जाता ॥ १५० ॥ पश्यन्तु चित्रां परमस्य शक्तिं ये वै तिलाः षण्डतिला बभूवुः । एनं गृहीतं हि मया यदीह कश्चित्पुमा-न्मोचयतु स्ववीर्यात् ॥ १५१ ॥ इति ब्रुवाणः पुनरेव रक्तं पपौ सुधां देववरो यथा दिवि । पुनश्च सप्राणममुं विसृज्य नदन्ननर्तारिबले निरायुधः ॥ १५२ ॥ प्रत्यनृत्यन्पुरा येऽस्मान्पुनर्गौरिति गौरिति ।

SGDF
Sri Gargeshwari Digital Foundation

तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ॥ १५३ ॥ इति ब्रुवन्नृत्यमानोऽरिमध्य आस्फोटयञ्छत्रुगणानजोहवीत् । शशाक च द्रष्टुममुं न कश्चिद्वैकर्तनद्रौणिसुयोधनादिषु ॥ १५४ ॥ भयात्तु कर्णस्य पपात कार्मुकं निमीलयामास तदाऽक्षिणी च । सम्बोधितो मद्रराजेन युद्धे स्थितः कथञ्चित्स तु पार्थभागः । १५५ ॥ द्रौणिर्विहायैनमपाजगाम दूरं तदा भीमसेनो जगाद । पीतः सोमो युद्धयज्ञे मयाऽद्य वध्यः पशुर्मे हरये सुयोधनः ॥ १५६ ॥ इति ब्रुवन्मृतमुत्सृज्य शत्रुं दुर्योधनं चाशु रुषाऽभिदुद्रुवे। आयान्तमीक्ष्यैव तमुग्रपौरुषं दुद्राव भीतः स सुयोधनो भृशम् ॥ १५७ ॥ बलद्वयं चापययौ विहाय भयाद्भीमं कृष्णपार्थौ विनैव । आयोधनं शून्यमभून्मुहूर्तं ननर्त भीमो व्याघ्रपदेन हर्षात् ॥ १५८ ॥ सङ्कल्प्य शत्रून् गोवदेवाजिमध्ये शार्दूलवत्तच्चरितं निशाम्य । जहास कृष्णश्च धनञ्जयश्च शशंसतुश्चैनमतिप्रहृष्टौ ॥१५९॥ यदा स रङ्गः पवमानसूनुना शून्यः कृतस्तत्र मुहूर्तमात्रात् । दुर्योधनस्यावरजाः शरौघैरवीवृषन्भीममुदारसत्वम् ॥ १६० ॥ तान्मारुतिर्बाणवरैर्निकृत्तशीर्षान्यमायानयदाशु वीरः । तस्मिन्दिने विंशतिधार्तराष्ट्रा हतास्तदन्ये समरात्प्रदुद्रुवुः ॥ १६१ ॥

कर्माण्यनन्यौपयिकानि भीमे कुर्वत्येवं भीतभीतेऽरिसङ्घे । निमीलिताक्षे च भयेन कर्णे कर्णात्मजो नकुलं प्रत्यधावत् ॥ १६२ ॥ माद्रीसुतो वृषसेनं शरौघैरवारयत्तं विरथं चकार । कर्णात्मजः सोऽप्यसिचर्मपाणिस्तस्यानुगांस्त्रिसहस्रं जघान ॥१६३॥ कर्णात्मजस्तस्य सञ्छिद्य चर्म भीमार्जुनादीनपि बाणसङ्घैः । अवीवृषत्तस्य शरेण पार्थो ग्रीवाबाहूरून्युगपच्चकर्त ॥ १६४ ॥ एकेन बाणेन सुते हते स्वे वैकर्तनो वासविमभ्यधावत् । तयोरभूद्वैरथयुद्धमद्भुतं सर्वास्त्रविद्वरयोरुग्ररूपम् ॥ ॥१६५॥ पक्षग्रहास्तत्र सुरासुरास्तयोरन्ये च जीवा गगनं समाश्रिताः । महान्विवादोऽप्यभवत्तयोः कृते तदा गिरिशोऽवदद्ब्जयोनिम् ॥१६६॥

SGDF
Sri Gargeshwari Digital Foundation

सुरासुराणां भीमसुयोधनौ द्वौ समाश्रयौ तत्प्रियौ कर्णपार्थौ। प्राणोपमौ तेन चैतत्कृते ते सुरासुराः कर्तुमिच्छन्ति युद्धम् ॥ १६७ ॥ यदा विनाशो जगतां महान्स्यात्तेनानयोः सममेवास्तु युद्धम्। इतीरिते पद्मयोनिं जगाद कृष्णो यत्र जयश्च तत्र ॥१६८॥ कामो न कृष्णस्य मृषा भवेद्धि कामोऽस्य पार्थस्य जयं प्रदातुम्। इत्यूचिवान्वासवः फल्गुनस्य जयोऽस्तु कर्णस्य वधस्तथेति। उक्त्वाऽनमत्कञ्जभवं तथेति प्राहासुरान्देवताश्चाबभाषे ॥ १६९ ॥ न कर्णार्जुनयोरर्थे विरोधं कुरुत क्वचित्। भीमदुर्योधनार्थे वा पश्यन्त्वेव च सङ्गरम् ॥ इत्युक्ते शान्तिमापन्ना ददृशुः सङ्गरं तयोः ॥ १७० ॥ ववर्षतुस्तौ च महास्त्रशस्त्रैर्भीमो रथस्थोऽवरजं जुगोप। शैनेयपाञ्चालमुखाश्च पार्थमावार्य तस्थुः प्रसभं नदन्तः ॥ १७१ ॥ दुर्योधनद्रौणिमुखाश्च कर्णं ररक्षुरावार्य तदाऽऽस युद्धम् ॥ तत्रार्जुनं बाणगणैः स कर्णः सम्मर्दयामास विशेषयत्नो ॥ तदा नदन्भीमसेनो जगाद गदां समादाय समात्तरोषः ॥ १७२ ॥ अहं चैनं गदया पोथयामि त्वं वा जहीमं समुपात्तवीर्यः। कृष्णोऽपि तं बोधयामास सम्यङ्ङ्गरावेशं व्यञ्जयन्भूय एव ॥ १७३ ॥ समृद्धवीर्यः स तदा धनञ्जयः सुयोधनद्रौणिकृपान्सभोजान्। साकं च बाणैर्विरथांश्चकार विव्याध तानप्यरिहा सुपुङ्खैः ॥ १७४ ॥ ते किञ्चिद्दूरतस्तस्थुः पश्यन्तो युद्धमद्भुतम्। अमानुषं तत्पार्थस्य दृष्ट्वा कर्म गुरोः सुतः। गृहीत्वा पाणिना पाणिं दुर्योधनमभाषत ॥ १७५ ॥ दृष्टं हि भीमस्य बलं त्वयाऽद्य तथैव पार्थस्य यथा जिता वयम्। अलं विरोधेन समेत्य पाण्डवैः प्रशाधि राज्यं च मया समेतः ॥ १७६ ॥ धनञ्जयस्तिष्ठति वारितो मया जनार्दनो नैव विरोधमिच्छति। वृकोदरस्तद्वचने स्थितः सदा युधिष्ठिरः शान्तमनास्तथा यमौ ॥ १७७ ॥ हितार्थमेतत्तव वाक्यमीरितं गृहाण मे नैव भयादुदीरितम्। अहं ह्यवध्यो मम चैव

SGDF
Sri Gangeshwari Digital Foundation

मातुलो न शंकितुं मे वचनं त्वमर्हसि ॥ १७८ ॥ इतीरितः प्राह सुयोधनस्तं दुःशासनस्याद्य पपौ हि शोणितम् । शार्दूलचेष्टामकरोच्च भीमो न मे कथञ्चित्तदनेन सन्धिः ॥ १७९ ॥ इत्युक्तो द्रौणिरासीत्स तूष्णीं कर्णधनञ्जयौ । महास्त्रशस्त्रवर्षेण चक्रतुः खं निरन्तरम् ॥ ॥ १८० ॥ आग्नेयवारुणैन्द्रादीन्येतान्यन्योन्यमृत्यवे । ब्रह्मास्त्रमप्युभौ तत्र प्रयुज्यानदतां रणे । अन्योन्यास्त्रप्रतीघातं कृत्वोभौ च विचेरतुः ॥ ॥ १८१ ॥ क्रमेण वृद्धोरुबलेन तत्र सुरेन्द्रपुत्रेण विरोचनात्मजः । निराकृतो नागमयं शरोत्तमं ब्रह्मास्त्रयुक्तं विससर्ज वासवौ ॥ १८२ ॥ तं वासुदेवो रथमानमय्य मोघं चकारार्जुनतः किरीटम् । चूर्णीकृतं तेन सुरेन्द्रसूनोर्दिवं ययौ बाणगतश्च नागः ॥ १८३ ॥ नमिते वासुदेवेन रथे पञ्चाङ्गुलं भुवि । अपाङ्गदेशमुद्दिश्य मुक्ते नागे किरीटिनः ॥ १८४ ॥ भङ्क्त्वा किरीटं वियति गच्छति प्रभुणोदितः । बाणैस्तक्षकपुत्रं तं वासविः पूर्ववैरिणं ॥ १८५ ॥ हत्वा निपातयामास भूमौ कर्णस्य पश्यतः । ब्रह्मास्त्रस्यातिवेगित्वं प्राप्तं कर्णेन भार्गवात् ॥ १८६ ॥ पुनश्च पार्थेन महास्त्रयुद्धं प्रकुर्वतः सूर्यसुतस्य चक्रम् । रथस्य भूमिर्ग्रसति स्म शापादस्त्राणि दिव्यानि च विस्मृतिं ययुः ॥ १८७ ॥ उद्धर्तुकामो रथचक्रमेव पार्थं ययाचेऽवसरं प्रदातुम् । नेत्याह कृष्णोऽञ्जलिकं सुघोरं त्रिनेत्रदत्तं जगृहे च पार्थः ॥ १८८ ॥ सत्येन धर्मेण च सन्नियोज्य मुमोच कर्णस्य वधाय बाणम् । चिच्छेद तेनैव च तस्य शीर्षं सन्धित्सतो बाणवरं सुघोरम् ॥ १८९ ॥ अपराह्णेऽपराह्णस्य सूर्यजस्येन्द्रसूनुना । छिन्नमञ्जलिकेनाजौ सोत्सेधमपतच्छिरः ॥ १९० ॥ तस्मिन्हते दीनमुखः सुयोधनो ययौ समाहूय बलं सशल्यः । युधिष्ठिरः कर्णवधं निशम्य तदा समागत्य ददर्श तत्तनुम् ॥ १९१ ॥ शशंस कृष्णं च धनञ्जयं च भीमं च येऽन्येऽपि युधि प्रवीराः । गत्वा च ते शिबिरं मोदमाना

SGDF
Sri Gargeshwari Digital Foundation

ऊषुः सकृष्णास्तदनुव्रताः सदा ॥ १९२ ॥ (४४६०) ॥ इति श्रीमन्महाभारततात्पर्यनिर्णये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते कर्णपातो(वधो) नाम सप्तविंशोऽध्यायः ॥२७॥

॥ अथ अष्टाविंशोऽध्यायः ॥

॥ॐ॥ प्रभातायां तु शर्वर्यां गुरुपुत्रानुमोदितः। शल्यं सेनापतिं कृत्वा योद्धुं दुर्योधनोऽभ्ययात् ॥ १ ॥ तमभ्ययुः पाण्डवाश्च हृष्टा युद्धाय दंशिताः। तत्रासीत्सुमहद्युद्धं पाण्डवानां परैः सह ॥ २ ॥ अग्रे भीमः पाण्डवानां मध्ये राजा युधिष्ठिरः। पृष्ठे गाण्डीवधन्वाऽसीद्वासुदेवाभिरक्षितः ॥३॥ चक्ररक्षौ यमौ राज्ञो धृष्टद्युम्नश्च सात्यकिः। नृपस्य पार्श्वयोरास्तामग्रेऽन्येषां गुरोः सुतः ॥ ४ ॥ मध्ये शल्यः पृष्ठतोऽभूद्भ्रातृभिश्च सुयोधनः। चक्ररक्षौ तु शल्यस्य शकुनिस्तत्सुतस्तथा ॥ कृपश्च कृतवर्मा च पार्श्वयोः समुपस्थितौ ॥ ५ ॥ तत्राभवन्महद्युद्धं भीमस्य द्रौणिना सह। राज्ञः शल्येन च तथा घोररूपं भयानकम् ॥ ६ ॥ तत्र नातिप्रयत्नेन द्रौणिर्भीमेन सायकैः। विरथीकृतस्तथा धर्मसूनुः शल्येन तत्क्षणात् ॥ ७ ॥ आससाद तदा शल्यं कपिप्रवरकेतनः। तयोरासीन्महद्युद्धमद्भुतं रोमहर्षणम् ॥८॥ रथमन्यं समास्थाय द्रौणिर्भीमं समभ्ययात्। दुर्योधनश्च भीमस्य शरैरावारयद्दिशः ॥ ९ ॥ तावुभौ शरवर्षेण वारयामास मारुतिः। ताभ्यां तस्याभवद्युद्धं सुघोरमतिमानुषम् ॥ १० ॥ दुर्योधनस्यावरजान्द्रौपदेया युयुत्सुना। शिखण्ड्याद्यैर्मातुलैश्च सह सर्वान्न्यवारयन् ॥ ११ ॥ सहदेवस्तु शकुनिमुलूकं नकुलस्तथा। धृष्टद्युम्नश्च हार्दिक्यं सात्यकिः कृपमेव च ॥ १२ ॥ तेषां तदभवद्युद्धं चित्रं लघु च सुष्ठु च।

SGDF
Sri Gargeshwari Digital Foundation

शल्यस्तु शरसङ्घातैः पार्थस्यावारयद्दिशः ॥ १३ ॥ सोऽपि विव्याध विशिखैः शल्यमाहवशोभिनम् । तयोस्तु सममेवासीच्चिरं देवासुरोपमम् ॥ ॥ १४ ॥ ततः शरं वज्रनिभं मद्रराजः समादद्दे । तेन विव्याध बीभत्सुं हृदये स मुमोह च ॥ १५ ॥ उपलभ्य पुनः सञ्ज्ञां वासविः शत्रुतापनः । चिच्छेद कार्मुकं सङ्ख्ये मद्रराजस्य धीमतः ॥ १६ ॥ सोऽन्यत्कार्मुकमादाय मुमोचास्त्राणि फल्गुने । सौरं याम्यं च पार्जन्यं तान्यैन्द्रेण जघान सः ॥ १७ ॥ पुनर्न्यकृन्तत्तच्चापमिन्द्रसूनुरमर्षितः । शल्यो गदां समादाय चिक्षेपार्जुनवक्षसि ॥ १८ ॥ तदा मुमोह बीभत्सुस्तत उच्चुक्रुशुः परे । प्राप्तसञ्ज्ञः पुनः पार्थः शल्यं विव्याध वक्षसि ॥ स विह्वलितसर्वाङ्गः शिश्रिये ध्वजमुत्तमम् ॥ १९ ॥ समाश्वस्तः पुनर्बाणं यमदण्डनिभं रणे । मुमोच पार्थस्य स च निर्बिभेद स्तनान्तरम् ॥ २० ॥ तेन विह्वलितः पार्थो ध्वजयष्टिं समाश्रितः ॥ ॥ २१ ॥ समाश्वस्तः प्रचिच्छेद मद्रराजस्य कार्मुकम् । छत्रं ध्वजं च तरसा सारथिं च न्यपातयत् ॥ २२ ॥ तदाऽन्यं रथमास्थाय धर्मराजः शरोत्तमैः । चतुर्भिश्चतुरो वाहाञ्छल्यस्य निजघान ह ॥२३॥ शल्योऽन्यं रथमास्थाय सर्वांस्ताञ्छरवृष्टिभिः । छादयामास राजानं विरथं च चकार ह ॥२४॥ निहत्याश्वान्सात्यकेश्च धृष्टद्युम्नस्य चाभिभूः । चापे छित्वा च यमयोर्दध्मौ शङ्खं महास्वनम् ॥ २५ ॥ ततस्तु शल्यं समुदीर्यमाणं दृष्ट्वा रणे भीमसेनस्तरस्वी । न्यवारयद्बाणवरैरनेकैश्चकार चैनं विरथं क्षणेन ॥ २६ ॥ आस्थाय चान्यं रथमापतन्तं पुनश्च शल्यं भृशमेव मर्मसु । निर्भिद्य बाणैर्विरथं चकार पुनस्तृतीयं रथमारुरोह ॥ ॥ २७ ॥ आत्तान्यात्तान्यायुधान्यस्य भीमः सर्वाणि चिच्छेद बिभेद चास्य । मर्माणि बाणैर्नितरां पुनश्च स मुष्टिमुद्यम्य जगाम धर्मजम् ॥ ॥२८॥ तं भीमभिन्नमर्माणं विवर्माणं निरायुधम् । श्वासमात्रावशिष्टं च मरणायैव केवलम् ॥ २९ ॥ आत्मानमभिगच्छन्तं दृष्ट्वाऽन्यं रथ-

SGDF
Sri Gargeshwari Digital Foundation

मास्थितः । हन्तुकामो रणे वीरममोघां शक्तिमाददे ॥३०॥ दिव्यास्त्रैरभिसंयोज्य तां तदा धर्मनन्दनः । सत्यधर्मफलैश्चैव चिक्षेपास्य हृदि त्वरन् ॥ ३१ ॥ स भिन्नहृदयो भूमौ पपाताभिमुखो नृपम् । सत्यधर्मरतः शल्य इन्द्रस्यातिथितामगात् ॥ ३२ ॥

मद्रराजे हते वीरे सुशर्माऽर्जुनमभ्ययात् । संशप्तकावशिष्टैस्तमनयन्मृत्यवेऽर्जुनः ॥ ३३ ॥ दुर्योधनस्यावरजानवशिष्टान्वृकोदरः । सर्वाञ्जघान सेनां च निःशेषामकरोद्रणे ॥ ३४ ॥ उलूकं सहदेवोऽथ शकुनिं चातिपापिनम् । जघान द्रौणिहार्दिक्यकृपान्भीमार्जुनौ ततः ॥ ॥३५॥ बहुशो विरथीकृत्य पीडयित्वा पुनःपुनः । द्रावयामासतुस्ते तु भीषिता विविशुर्वनम् ॥ ३६ ॥ शैनेयेन गृहीतोऽथ सञ्जयोऽनन्तशक्तिना । व्यासेन मोचितोऽथैकः पार्थान्दुर्योधनोऽभ्यगात् ॥ ३७ ॥ तेषामभूत्तस्य च घोररूपं युद्धं स बाणैर्बहुशोऽर्जुनं च । चकार मूर्च्छाभिगतं युधिष्ठिरं यमावयत्नाद्विरथांश्चकार ॥३८॥ तं भीमसेनो विरथं चकार गजं समारुह्य पुनः समभ्ययात् । पुनश्च शैनेयशिखण्डिपार्षतान्यमौ नृपं च व्यदधान्निरायुधान् ॥ ३९ ॥ गजे च भीमेन शरैर्निपातिते समारुहद्वाजिवरं सुनिर्भयः । स तेन च प्रासकरो रणेऽरिहा चचार शैनेयमताडयच्च ॥४०॥ मुमोह तेनाभिहतः स सात्यकिर्यमावपि प्रासनिपीडितौ रथे । निषीदतुर्धर्मसुतं प्रयान्तं समीक्ष्य भीमोऽस्य जघान वाजिनम् ॥ ४१ ॥ प्रासे निकृत्ते तु वृकोदरेण विवाहनः सोऽपि ययौ सुयोधनः । आदाय गुर्वीं च गदां प्रयातो द्वैपायनस्योरुसरो विवेश ॥ ४२ ॥

एवमक्षौहिणीषट्कं भीमेन निहतं रणे । पञ्च पार्थेन निहता अर्धं कालिङ्गकानृते ॥४३॥ एकादशाक्षौहिणीभ्यः शिष्टमन्यैर्निषूदितम् । अक्षौहिणीचतुष्कं च पार्थानां द्रौणिना हतम् ॥ ४४ ॥ अन्यैरन्याः समस्तैश्च द्रोणकर्णमहाव्रताः । दुर्योधनो भीमसूनुः प्रायः सेनाहनः

SGDF
Sri Gangeshwari Digital Foundation

क्रमात् ॥ ४५ ॥ जयं लब्ध्वा नदत्स्वुच्चैः पाण्डवेषु महात्मसु । दुर्योधनो जलस्तम्भं कृत्वा मन्त्राञ्जजाप च ॥ ४६ ॥ मन्त्रा दूर्वाससा दत्ता मृतसञ्जीवनप्रदाः ॥ ४७ ॥ जले स्थित्वा जपन्सप्तदिनैः सर्वान्मृतानपि । उद्धरेद्धार्तराष्ट्रोऽयं स्युरवध्याश्च ते पुनः ॥ ४८ ॥ इति विद्याबलं तस्य ज्ञात्वा पाण्डुसुतास्ततः । अन्विष्यन्तः शुश्रुवुश्च व्याधेभ्यस्तं जले स्थितम् ॥४९॥ आगच्छंश्च ततस्तत्र पुरस्कृत्य जनार्दनम् । तदा जलात्समुन्मज्य त्रिभिर्द्रौणिपुरःसरैः मन्त्रयन्तं स्म ददृशुस्तान्दृष्ट्वा ते प्रदुद्रुवुः ॥ ५० ॥ दुर्योधनोऽविशत्तोयं दृष्ट्वा तं केशवाज्ञया । युधिष्ठिरः सुपरुषैर्वाक्यैरेनमथाह्वयत् ॥ ५१ ॥ अमर्षितोऽसौ धृतराष्ट्रपुत्रः श्वसंस्तदा दण्डहतो यथाऽहिः । उवाच शाठ्यात्तपसे वनाय यायां भवाञ्छासतु सर्वपृथ्वीम् ॥ ५२ ॥ तमाह धर्मजो राजा यस्त्वं कृष्णे समागते । सूच्यग्रवेधितां पृथ्वीं दातुं नैच्छः कथञ्चन ॥ ५३ ॥ घातयित्वा सर्वपृथ्वीं भीष्मद्रोणमुखानपि । दातुमिच्छसि सर्वां त्वं (च) पृथ्वीं नाद्य वयं पुनः ॥५४॥ अहत्वा प्रतिगृह्णीम एहि युद्धे स्थिरो भव । न कुरूणां कुले जातो यस्त्वं भीतो ह्यपोऽविशः ॥ ५५ ॥ इत्यादि रूक्षवचनं श्रुत्वा दुर्योधनो रुषा । जलस्तम्भात्समुत्तस्थौ श्वसन्नाशीविषो यथा ॥ ५६ ॥ उवाच चैक एवाहमकिरीटो विवर्मकः । भवन्तो बहवो वर्मशिरस्त्राणयुता अपि ॥ ५७ ॥ यद्येवमपि मे युद्धं भवद्भिर्मन्यसे समम् । सर्वैरेकेन वा युद्धं करिष्ये न च भीर्मम ॥ ॥ ५८ ॥ इत्युक्त आह धर्मात्मा वर्माद्यं च ददामि ते । वृणीष्व प्रतियोद्धारं पञ्चानां त्वं यमिच्छसि ॥ ५९ ॥ हत्वैकं भुङ्क्ष्व राज्यं त्वमन्ये याम वनं वयम् । हते वा त्वयि तेनैव भुञ्जीमश्चाखिलां भुवम् ॥ आधत्स्व चायुधं तेन जेतुमिच्छसि शात्रवान् ॥ ६० ॥ इत्युक्त ऊचे न हि दुर्बलैरहं योत्स्ये चतुर्भिर्भवदर्जुनादिभिः । भीमेन योत्स्ये गदया सदा हि मे प्रिया गदा नान्यदथायुधं स्पृशे ॥ ६१ ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रुत्वाऽस्य वाक्यं रभसा वृकोदरो गदां तदाऽध्यर्धभराधिकां मुदा ।
राज्ञो गदायाः प्रतिगृह्य वीरः समुत्थितो युद्धमनाः समुन्नदन् ॥६२॥
अथाह नारायण आदिदेवो युधिष्ठिरं कष्टमिदं त्वया कृतम् ।
न ह्येष राजा गदया रणे चरञ्शक्यो विजेतुं निखिलैः सुरासुरैः ॥६३॥
स निश्चयाद्वश्चतुरो निहन्यात्सहार्जुनान्भीमसेनः कथञ्चित् । हन्तैनमाजौ
न हि भीमतुल्यो बले क्वचिद्धार्तराष्ट्रः कृती च ॥ ६४ ॥ ऊरू भीमेन
भेत्तव्यौ प्रतिज्ञां रक्षता रिपोः । नाभेरधस्ताद्धननं जना आहुर्गदा-
मृधे ॥ ६५ ॥ अधर्म इति तत्कृष्णो लोकनिन्दानिवृत्तये । आपद्धर्मं
दर्शयितुं किञ्चिद्व्याजेन संयुतः ॥ ६६ ॥ भीमो हन्याद्धार्तराष्ट्रमित्यूचे
यद्यपि स्फुटम् । अव्याजेनापि शक्तोऽसौ बलं निःसीममाह च ॥
॥६७॥ आह शिक्षामप्यनूनां यत्नं दुर्योधनेऽधिकम् । न हि भीमो-
ऽतिप्रयत्नं कुर्यादिति गुणो ह्ययम् ॥६८॥ प्रतिज्ञापालनं धर्मो दुष्टेषु
च विशेषतः । इति धर्मरहस्यं तु वित्तः कृष्णवृकोदरौ ॥ ६९ ॥
नान्यस्ततो लोकनिन्दां व्यपनेतुमुभावपि । अनापद्यापदिव च दर्शयेतां
जनस्य तु ॥ ७० ॥ ततो भीमः सर्वलोकस्य धर्मं प्रकाशयन्वाक्यमिदं
जगाद । ऊरू तवाहं हि यथाप्रतिज्ञं भेत्स्यामि नैवात्र विचारणीयम् ॥
॥ ७१ ॥ इति ब्रुवन्तं प्रससार चाजौ दुर्योधनस्तत्र बभूव युद्धम् ।
भीमस्तदाग्र्यप्रकृतिं विधित्सुर्मन्दः स आदौ व्यचरज्जनार्थे ॥ ७२ ॥
दर्शयन्तौ गदामार्गं चित्रं तौ प्रविचेरतुः । बलभद्रोऽप्याजगाम तदा
तौ प्रतिवारितुम् ॥७३॥ वारितावपि तेनोभौ नैव युद्धं व्यमुञ्चताम् ।
ततो ददर्श तद्युद्धं मानितः कृष्णपूर्वकैः ॥७४॥ तौ शिक्षाबलसंयुक्तौ
मण्डलानि विचेरतुः । तत्र भीमं वञ्चयितुं धार्तराष्ट्रः शिरः क्षितौ ॥
॥ ७५ ॥ व्यधादुच्छ्रितसक्थीकस्तदा कृष्णाभ्यनुज्ञया । पृष्ठमूलेऽ-
हनद्भीमो भिन्नसक्थिश्च सोऽपतत् ॥ ७६ ॥ प्रतिज्ञापालनार्थाय नाभे-
र्नोपर्यधस्तदा ॥ ७७ ॥ गदायुद्धस्य मर्यादां यशश्चाप्यभिरक्षितुम् ।

SGDF
Sri Gargeshwari Digital Foundation

नाधस्तान्मध्य एवासौ निजघ्ने तं वृकोदरः ॥ ७८ ॥ एवं प्रतिज्ञा-
युग्मार्थं भग्नसक्थियुगं रणे । द्यूते कृष्णां निधेहीति यदवादीत्सुयोधनः ॥
तत्प्रतिज्ञानुसारेण भीमो मूर्धानमक्रमीत् ॥७९॥ 'ऋषभं मासमानाना-
मि'ति सूक्तं ददर्श ह । तेषां पुण्यानि विद्याश्च समादायैव सर्वशः ॥
तांश्चकार तमोगन्तॄंस्तस्य मूर्ध्नि पदाक्रमत् ॥८०॥ स्मारयामास कर्माणि
यानि तस्य कृतानि च । कृष्णबन्धे कृतो मन्त्र इति मूर्ध्नि पदाऽहनत् ॥
॥ ८१ ॥ पुनःपुनश्च तद्वीक्ष्य चुक्रोध मुसलायुधः । चुक्रोश नैव
धर्मोऽयमित्यसावूर्ध्वबाहुकः ॥ ८२ ॥ पुनः क्रोधातिताम्राक्ष आदाय
मुसलं हलम् । अभिदुद्राव भीमं तं न चचाल वृकोदरः ॥ ८३ ॥
अभये संस्थिते भीमे रामं जग्राह केशवः । आह धर्मेण निहतो भीमे-
नायं सुयोधनः ॥८४॥ न मण्डलेऽभिसारे वा नापसारे च नाभितः ।
अधो हन्याद्वञ्चयन्तमधो हत्वा न दुष्यति ॥ ८५ ॥ कृता प्रतिज्ञा च
वृकोदरेण भेत्स्ये तवोरू इति युक्तिपूर्वकम् । संश्रावयानेन तदेष धर्मतो
जघान दुर्योधनमग्र्यकर्मा ॥८६॥ वासुदेववचः श्रुत्वा धर्मच्छलमिति
ब्रुवन् । रौहिणेयो जगामाशु स्वपुरीमेव सानुगः ॥८७॥ तस्मिन्गते
वासुदेवं समपृच्छद्युधिष्ठिरः । धर्मोऽयमथवाऽधर्म इति तं प्राह केशवः ॥
॥ ८८ ॥ न साक्षाद्धर्मतो वध्या ये च पापतमा नराः । देवैर्हि
वञ्चयित्वैव हताः पूर्वं सुरारयः ॥ ८९ ॥ अतोऽयमप्यधर्मेण हतो
नात्रास्ति दूषणम् । भीष्मद्रोणौ च कर्णश्च यदैवोपाधिना हताः ॥९०॥
को नु दुर्योधने पापे हते दोषः कथञ्चन । प्रतिज्ञापालनायापि बिभेदोरू
वृकोदरः ॥९१॥ धर्मतश्च प्रतिज्ञेयं कृताऽनेनानुरूपतः । लोकतोऽपि
न धर्मस्य हानिरत्र कथञ्चन ॥ ९२ ॥ ये भीमस्याप्रभावज्ञा आपद्धर्मं
च मन्वते । अवध्यत्वे शिववराद्गदाशिक्षाबलादपि ॥ जरासन्धोपमो
यस्माद्धार्तराष्ट्रः सुविश्रुतः ॥९३॥ तस्मात्स धर्म एवायं भीमचीर्ण इति
ब्रुवन् । अपि संशयिनं चक्रे धर्मराजं जगत्पतिः ॥९४॥ भूभारक्षतिजो

SGDF
Sri Gangeshwari Digital Foundation

धर्मो मच्छुश्रूषात्मकश्च यः। भीमस्यैव भवेत्सम्यगिति बुद्ध्या परः प्रभुः ॥ ॥९५॥ स्वेनैव बलभद्राय जनाय च पुनःपुनः। श्रुत्वाऽप्युक्तं न तत्याज संशयं धर्मजो यतः ॥९६॥ ततोऽप्यसंशयं कृष्णो न चकार युधिष्ठिरम्। मुख्यधर्मं हि भगवान्बलायाह जनाय च ॥ ९७ ॥ धर्मेणैव हतो राजा धार्तराष्ट्रः सुयोधनः। इति यद्वक्ष्यति पुनर्निश्चयार्थेऽर्जुनाय च ॥ ॥ ९८ ॥ पुनःपुनर्धर्मत एव भीमो जघान राजानमिति ब्रुवन्तम्। जगाद कृष्णं स्फुरिताधरोष्ठः क्रोधात्सुपापो धृतराष्ट्रसूनुः ॥ ९९ ॥ त्वयैव पापे निहिता हि पार्थाः पापाधिकस्त्वं हि सदैक एव। इत्यूचिवांसं प्रजगाद कृष्णो न त्वत्समः पापतमः कदाचित् ॥१००॥ भीष्मादिहत्याऽपि तवैव पापं यदन्वयुस्त्वामपि(ति) पापनिश्चयम्। पापं च पापानुगतं च हत्वा कथञ्चनाप्यस्ति न चैव पापम् ॥ १०१ ॥ न पाण्डवेष्वस्ति ततो हि किञ्चित्पापं प्रयत्नाच्च निसर्गतोऽपि। गुणाधिकास्ते मदुपाश्रयाश्च को नाम तेष्वण्वपि पापमाह ॥ १०२ ॥ निसर्गतः पापतमस्त्वमन्यान्धर्मस्थितान्पापपथे निधाय। स्वयं च पापे निरतः सदैव पापात्सुपापां गतिमेव यासि ॥ १०३ ॥ इति ब्रुवन्तं पुनराह कृष्णं दुर्योधनः पापकृतां प्रधानः। स्वन्तोत्तमो नाम क एव मत्तः को नाम दोषोऽस्ति मया कृतोऽत्र ॥ १०४ ॥ इष्टं च यज्ञैश्चरितं च पूर्तैः पदं रिपूणां निहितं च मूर्ध्नि। मृत्युश्च सङ्ग्रामशिरस्यवाप्तो रणोन्मुखेनैव मया किमन्यत् ॥ १०५ ॥ इष्टा भोगा मया भुक्ताः प्राप्ता च परमा गतिः। दुःखिनो दुःखमाप्स्यन्ति पार्थास्ते कूटयोधिनः ॥ १०६ ॥ चन्द्रार्कसन्निभैः शूरैर्धार्मिकैः सद्भिरुज्झिता। केवला रत्नहीनेयं पाण्डवैर्भुज्यतां मही ॥ १०७ ॥ इत्युक्तवत्येव नृपे सुरेशैः प्रसूनवृष्टिर्विहिता पपात ह। तामेव बुद्धिं धृतराष्ट्रसूनोः कृत्वा दृढां पातयितुं तमोऽन्धे ॥ १०८ ॥ सम्भावयत आत्मानं वासुदेवं विनिन्दतः। तत्परांश्च कथं न स्यात्तमोऽन्ते च विशेषतः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ १०९ ॥ यदैकैकमलं तत्र दुःखाधिक्यं समुच्चयात् । इति तत्कारयित्वेश आह मोघं तवाखिलम् ॥ ११० ॥ नृशंसस्य कृतघ्नस्य गुणवद्द्वेषिणः सदा । यदि धर्मफलं ध्वान्तं सूर्यवत्स्यात्प्रकाशकम् ॥ ॥ १११ ॥ वदन्पुनः पुनरिदं धर्मतो हत इत्यपि । ख्यापयामास भगवाञ्जने निजजनेष्टदः ॥ ११२ ॥

प्रख्यापिते वासुदेवेन धर्मे सतां सर्वेषां हृद्यमासीत्समस्तम् । हतं च धर्मेण नृपं व्यजानन्पापोऽयमित्येव विनिश्चितार्थाः ॥ ११३ ॥ युधिष्ठिरो पापदर्शी सदैव ससंशयोऽभूत्सुमनोऽभिवृष्टया । स्नेहाद्द्रौणिः सञ्जयो रौहिणेयो दौर्योधनात्पापमित्येव चोचुः ॥ ११४ ॥

ततः कृष्णः पाण्डुपाञ्चालकैस्तैर्भृशं नदद्भिर्हर्षितैः समेतः । ययौ विरिञ्चेशसुरेन्द्रमुख्यैः सम्पूजितस्तैश्च रणाङ्गणात्स्मयन् ॥ ११५ ॥ ततः श्रुत्वा सञ्जयाद्दुःखतप्तं सम्बोधयिष्यन्पितरं युयुत्सुः । कृष्णस्य राज्ञश्च मतेऽनुयातो जगाम चान्वेव जनार्दनश्च ॥ ११६ ॥ धर्मयुक्तैश्च तत्त्वार्थैर्लोकवृत्तानुदर्शकैः । वाक्यै राजानमाश्वास्य प्रायात्पार्थान्पुनर्हरिः ॥ ११७ ॥ कालानुसारतो देवांश्चोपसंहर्तुमच्युतः । ययौ सपार्थशैनेयः कुरूणां शिबिरं निशि ॥ ११८ ॥ तदैव हार्दिक्यकृपान्वितोऽयात्सुयोधनं द्रौणिरमुं शयानम् । प्रभग्नसक्थिं श्वसृगालभूतैः सम्भक्ष्यमाणं ददृशे श्वसन्तम् ॥ ११९ ॥ स दुःखशोकाभिहतो विनिन्द्य पार्थान्मया भूप किमत्र कार्यम् । इत्याह निष्पाण्डवतां कुरुष्वेत्यमुं व्याधात्पांस्वभिषेकिणं नृपः ॥ १२० ॥ उच्छिद्य सन्ततिं पाण्डोः कृत्वा स्वक्षेत्रसन्ततिम् । तया भूरक्षणहृदा सोऽभिषिक्तस्तथेत्यगात् ॥ १२१ ॥ स कृष्णभीमपार्थानां भयादेव पुनर्वनम् । कृपसात्वतसंयुक्तो विवेश गहनं रथी ॥ १२२ ॥ तस्य चिन्तयतो द्रोणवधं दुर्योधनस्य च । नागान्निद्रा निशीथे च ध्वाङ्क्षान्न्यग्रोधवासिनः ॥ १२३ ॥ हतान्सुबहुसाहस्रानेकेनातिबलेन तु । कौशिकेन

SGDF
Sri Gargeshwari Digital Foundation

निरीक्ष्यैव प्राह तौ कृपसात्वतौ ॥ १२४ ॥ निदर्शनेन ह्येतेन प्रेरितः परमात्मना । यामि पाण्डुसुतान्हन्तुमित्युक्त्वाऽऽरुरुहे रथम् । निवारितोऽपि ताभ्यां स प्राद्रवच्छिबिरं प्रति ॥ १२५ ॥ अनुजग्मतुस्तावपि तं शिबिरद्वारि चैक्षत । उग्ररूपधरं रुद्रं स्वकीयां तनुमेव सः ॥१२६॥ परीतं वासुदेवेन बहुकोटिस्वरूपिणा । दृष्ट्वैव वासुदेवं तमत्रसद्द्रौतमीसुतः ॥१२७॥ वासुदेवाज्ञयैवात्र स्वात्मनाऽपि सदाशिवः । अयुध्यदग्रसच्चाशु द्रौणेः सर्वायुधान्यपि ॥ १२८ ॥ अचिन्त्या हरिशक्तिर्यद्दृश्यन्ते त्महनोऽपि हि । अतस्तया प्रेरितेन स्वात्मनैवाखिलेष्वपि ॥ ॥ १२९ ॥ आयुधेषु निगीर्णेषु द्रौणिर्यज्ञं तु मानसम् । चक्रेऽऽत्मानं पशुं कृत्वा स्वात्मस्थायैव विष्णवे ॥ १३० ॥ यज्ञतुष्टेन हरिणा प्रेरितः शङ्करः स्वयम् । आत्मने द्रोणपुत्राय ददौ सर्वायुधानि च ॥ ॥ १३१ ॥ उवाच चाहमादिष्टो विष्णुना प्रभविष्णुना । अरक्षं पार्थशिबिरमियन्तं कालमेव तु ॥ १३२ ॥ तदिच्छयैव निर्दिष्टो दास्ये मार्गं तवाद्य च । आयुधानि च सर्वाणि हन्तुं सर्वानिमाञ्जनान् ॥१३३॥ इत्युदीर्य प्रदायाशु सर्वा हेतीर्वृषध्वजः । तत्रैवान्तर्दधे सोऽपि प्रोवाच कृपसात्वतौ ॥ १३४ ॥ ये निर्यास्यन्ति शिबिराज्जहितं तांश्च सर्वशः । इत्युक्त्वा प्रविवेशान्तर्धन्वी खड्गी कृतान्तवत् ॥ १३५ ॥ पारावताश्वं स तदा शयानमुपेत्य पद्भ्यां समताडयच्च । वक्षस्यसाववदद्भीतनिद्रो जाने भवन्तं हि गुरोस्तनूजम् ॥१३६॥ समुत्थितं मां जहि शस्त्रपाणिं शस्त्रेण वीरोऽसि स वीरधर्मः । लोकाश्च मे सन्त्वथ शस्त्रपूता इति ब्रुवाणं स रुषा जगाद ॥ १३७ ॥ न सन्ति हि ब्रह्महणां (हि) सुलोका विशेषतश्चैव गुरुद्रुहां पुनः । न धर्मयुद्धेन वधार्हकाश्च ये त्वद्विधाः पापतमाः सुपाप ॥ १३८ ॥ अवश्यभाविनं मृत्युं धृष्टद्युम्नो विचिन्त्य तम् । तूष्णीं बभूव स्वप्नेऽपि नित्यं पश्यति तां मृतिम् ॥ १३९ ॥ द्रौणिं च कालरात्रिं च द्रोणपातादनन्तरम् । विशसन्तं कृषन्तीं च

SGDF
Sri Gurgeshwari Digital Foundation

स्वप्ने पश्यति(ऽपश्यद्धि) पार्षतः ॥१४०॥ समाक्षिपद्द्रोणसुतोऽस्य कण्ठे निबध्य मौर्वीं धनुषोऽप्युरःस्थः। ममन्थ कृच्छ्रेण विहाय देहं ययौ निजस्थानमसौ च वह्निः ॥१४१॥ ततः शिखण्डिनं हत्वा युधामन्यूत्तमौजसौ। जनमेजयं च पाञ्चालीसुतानभिययौ ज्वलन् ॥ १४२ ॥ तैरुत्थितैरस्यमानः शरैः खड्गेन जघ्निवान्। सर्वान्सव्यापसव्येन तथान्यान्पाण्डवात्मजान् ॥१४३॥ ऋत एकं भैमसेनिं काशिराजात्मजात्मजम्। तं तदान्तर्हितः शर्वः कैलासमनयत्क्षणात् ॥१४४॥ स शर्वत्रातनामाऽऽसीदतस्तत्रैव सोऽवसत्। पुराऽर्थितः स्वदौहित्रस्यामरत्वाय शङ्करः। काशिराजेन तेनासौ जुगोपैनं कृपायुतः ॥ १४५ ॥ वासुदेवमतं ज्ञात्वा साम्राज्याय परीक्षितः। वारयामास भूलोकं नैव याहीत्यमुं शिवः ॥ १४६ ॥ सामान्यतोऽपाण्डवाय द्रोणिनाऽप्यभिसन्धितम्। तद्रूपेणैव रुद्रेण विनैनमिति चिन्तितम् ॥ १४७ ॥ अस्त्रं ब्रह्मशिरश्चैनं न जघानैक्यतस्तयोः। चेकितानादिकांश्चैव जघानान्यांश्च सर्वशः ॥ १४८ ॥ स चेदिपाञ्चालकरूशकाशीनन्यांश्च सर्वान्विनिहत्य वीरः। शिशूंस्त्रियश्चैव निहन्तुमुग्रः प्राज्वालयत्तच्छिबिरं समन्तात् ॥ १४९ ॥ जिजीविषूंस्तत्र पलायमानान्द्वारि स्थितौ गौतमसात्वतौ च। निजघ्नतुः सर्वतः पार्षतस्य सूतस्त्वेकः शेषितो दैवयोगात् ॥ १५० ॥ खड्गेन प्रहृतं दृष्ट्वा हार्दिक्येन पपात ह। भूमौ प्रागेव संस्पर्शान्न ज्ञातस्तमसाऽमुना ॥ १५१ ॥ अन्यासक्ते समुत्थाय प्राद्रवद्यत्र पार्षती। तस्या अकथयत्सर्वं सा भीमायाह दुःखिता। प्राद्रवद्रथमारुह्य स धन्वी गौतमीसुतम् ॥ १५२ ॥ तदन्तरे द्रौणिरपि प्रयातः कृष्णासुतानां मुदितः शिरांसि। आदाय हार्दिक्यकृपानुयातो दुर्योधनं सन्निकृष्टप्रयाणम् ॥१५३॥ दृष्ट्वा तदुक्तं च निशम्य पापस्तुष्टोऽत्यजत्साध्विति देहमाशु। भीमार्जुनाभ्यामथ केशवाच्च भीताः पृथक्द्रौणिमुखाः प्रयाताः ॥ १४५ ॥

SGDF
Sri Gargeshwari Digital Foundation

तत्रैकलं द्रोणसुतं रथेन यान्तं रथी मारुतिरन्वधावत् । तमाद्र-
वन्तं प्रसमीक्ष्य भीतः पराद्रवद्द्रौणिरतिद्रुताश्वैः ॥ १५५ ॥ आद्रवन्तं
पुनर्दृष्ट्वा भीमं द्रोणात्मजो रुषा । आवृत्य युध्यन्विजितोऽस्त्रं ब्रह्मशिर
आददे ॥ १५६ ॥ एतस्मिन्नन्तरे कृष्णो धर्मजेनार्जुनेन च । तत्रागम-
त्तदस्त्रं च भीमं चाव्यर्थतां (चामोघतां) नयन् ॥ १५७ ॥ अवध्यो
भीमसेनस्तदस्त्रं चामोघमेव यत् । विष्णुनैवोभयं यस्मात्क्लृप्तं भीमोऽस्त्रमेव
तत् ॥ १५८ ॥ गायत्री तत्र मन्त्रो यद्ब्रह्मा तद्ध्यानदेवता । ध्येयो
नारायणो देवो जगत्प्रसविता स्वयम् ॥ १५९ ॥ ऊचे च पार्थयोः
कृष्णो यत्कृतं द्रौणिना पुरा । स्वायुधानां याचनं चाप्यशक्तेन
तदुद्धृतौ ॥ १६० ॥ पृष्टेनोक्तं त्वया हीनां कृत्वा दुर्योधनाय गाम् ।
दातुं तदायुधं मेऽद्येत्येवमुक्तेऽऽत्मनोदितम् । मैवं कार्षीः पुनरिति
ध्यायताब्धेस्तटे स्वमुम् ॥ १६१ ॥ तदस्त्रं प्रज्वलद्दृष्ट्वाऽपाण्डवत्व
विधित्सया । धरायां द्रौणिना मुक्तं कृष्णेन प्रेरितोऽर्जुनः ॥ १६२ ॥
स्वस्त्यस्तु द्रोणपुत्राय भूतेभ्यो मह्यमेव च । इति ब्रुवंस्तदेवास्त्रमस्त्र-
शान्त्यै व्यसर्जयत् ॥ १६३ ॥ अनस्त्रज्ञेषु मुक्तं तद्धन्यादस्त्रमुचं
यतः । गुरुभक्त्या ततो द्रौणेः स्वस्त्यस्त्वित्याह वासविः ॥ १६४ ॥
तदस्त्रयोस्तु संयोगे भूतानां संहृतिर्भवेत् । भूतानां स्वस्तिरप्यत्र
काङ्क्षिता करुणात्मना ॥ १६५ ॥ तथाप्यस्त्रद्वयं युक्तं भूतानां नाश-
कृद्भवम् । तस्मान्निवारयन्योगं तयोर्मध्येऽभवत्क्षणात् ॥ १६६ ॥
निःसीमशक्तिः परमः कृष्णः सत्यवतीसुतः । संस्थाप्यास्त्रद्वयं दूरे
तावाह पुरुषोत्तमः ॥ १६७ ॥ सन्ति ह्यस्त्रविदः पूर्वं प्रायश्चैतन्न तैः
कृतम् । लोकोपद्रवकृत्कर्म सन्तः कुर्युः कथं क्वचित् ॥ १६८ ॥
इत्युक्ते फल्गुनः प्राह मया मुक्तं महापदि । शान्त्यर्थमेव च विभो
क्षन्तव्यं भवता ततः ॥ १६९ ॥ द्रौणिरप्येवमेवाह तौ वेदपतिरब्रवीत् ।
निवर्त्यतामस्त्रमिति शक्रसूनुस्तथाऽकरोत् ॥ १७० ॥ निवर्तनाप्रभुं

SGDF
Sri Gangeshwari Digital Foundation

द्रौणिं वासुदेवोऽप्यभाषत ॥ १७१ ॥ क्षत्रतेजा ब्रह्मचारी कौमारादपि पाण्डवः । निवर्तने ततः शक्तो नायं द्रोणात्मजोऽपि सन् ॥१७२॥ अब्रह्मचर्यादित्युक्ते व्यासो द्रौणिमभाषत । निवर्तनासमर्थस्त्वं देहि नैसर्गिकं मणिम् ॥ १७३ ॥ जितः प्रागेव भीमेन भीमायैव महाप्रभम् । अपि केवलया वाचा पार्थेभ्योऽस्त्रं निवर्तय ॥ १७४ ॥ इत्युक्तो मूर्धजं रत्नं जरामरणनाशनम् । क्षुत्तृट्श्रमहरं दिव्यं गन्धध्वान्तहरं शुभम् ॥ १७५ ॥ उत्कृत्य भीमाय ददौ मुक्ताः पञ्चैव पाण्डवाः । अस्त्रादिति ततो वेदभर्ता वासविमब्रवीत् ॥ १७६ ॥ तात मुक्तं द्रौणिनाऽपि त्वमेवास्त्रं निवर्तय । इत्युक्तस्तं प्रणम्याशु सञ्जहारार्जुनोऽपि तत् ॥ १७७ ॥ यादवेशोऽथ गौतम्याः सुतमाहैकसन्ततेः । वाचा निवर्तयास्त्रं त्वमित्युक्ते द्रौणिरब्रवीत् ॥ १७८ ॥ पक्षपातादिच्छसि त्वं भागिनेयस्य सन्ततिम् । तत्रैव पातयाम्यस्त्रमुत्तरागर्भकृन्तने ॥ १७९ ॥ वासुदेवः पुनः प्राह यदि हन्तव्य एव ते । गर्भस्तथापि नैवास्त्रं पातयास्मिन्कथञ्चन ॥ १८० ॥ अभिमन्योर्मृतस्यैव देहे पातय मानद । एवं त्वदस्त्रनिहतं गर्भमुज्जीवयाम्यहम् ॥ ॥ १८१ ॥ पातये गर्भ एवाहमित्यूचे गौतमीसुतः । अथाह वासुदेवस्तमीषत्क्रुद्ध इव प्रभुः ॥ १८२ ॥ दुर्मते पश्य मे वीर्यं यत्ते शक्यं कुरुष्व तत् । उज्जीवयाम्यहं गर्भं यततः शक्तितोऽपि ते ॥१८३॥ सन्ततिर्वर्षसाहस्रं पाण्डवानां भवेद्भुवि । मत्पालितां न कश्चित्तां तावद्धन्तुं क्षमः क्वचित् ॥ १८४ ॥ जानामि ते मतिं दुष्टां जिघांसोः पार्थसन्ततिम् । चिकीर्षोर्धार्तराष्ट्रस्य तन्तुं भूयः सुदुष्करम् ॥ १८५ ॥ मदाज्ञया सा विफला भवित्री वाञ्छा मुमुक्षोर्विमुखस्य विष्णोः । यथैव तेनैव नराधिरूढो गम्यस्तव स्यान्न च भूमिभागः ॥१८६॥ दुर्गन्धयुक्तो व्रणसञ्चिताङ्गः सदाचरः (स्या)स्याद्विपिनेषु मन्दः(न्द) । यावद्भुवि स्यादिह पार्थतन्तुर्व्यासोऽपि तं प्राह तथेति देवः ॥ १८७ ॥ रूप-

SGDF
Sri Gargeshwari Digital Foundation

द्वयेनापि हरेस्तथोक्तो जगाद कालीतनयं स कृष्णम् । त्वया सह स्यान्मम सङ्गमो विभो यथेष्टतः स्यान्न च मेऽत्र विघ्नः ॥ १८८ ॥ इत्युक्त ओमिति प्राह भगवान्बादरायणः । तं प्रणम्य ययौ सोऽपि स्वप्न दृष्टमनुस्मरन् ॥१८९॥ स्वप्ने हि द्रौपदेयानां वधो दृष्टोऽत्मना निशि । अर्जुनेन प्रतिज्ञातं द्रौपद्यै स्ववधं प्रति ॥ १९० ॥ निबध्यानयनं चैव तेनैव शिबिरं प्रति । मुञ्चेति द्रौपदीवाक्यं नेति भीमवचस्तथा ॥ १९१ ॥ कृष्णवाक्यान्मणिं हृत्वा देशान्निर्यापणं तथा । इत्यादि स्वप्नदृष्टं यत्प्रायः सत्यमभूदिति । चिन्तयन्प्रययौ दे(दा)वं द्रौणिः शस्त्रभृतां वरः ॥१९२॥ स कृष्णोक्तमपि प्राप्य बादरायणशिष्यताम् । प्राप्योत्तरद्वापरे च वेदान्संविभजिष्यति ॥ १९३ ॥ ततः सप्तऋषिर्भूत्वा पाराशर्यप्रसादतः । एकीभावं स्वरूपेण यास्यत्यच्युतनिष्ठया ॥ १९४ ॥

कृपोऽथ पाण्डवान्प्राप्य गौरवात्पूजितश्च तैः । अभूदाचार्य एवासौ राज्ञां तत्तंतुभाविनाम् ॥ १९५ ॥ बादरायणशिष्यत्वं पुनः प्राप्य भजन्नमुम् । साकं स्वभागिनेयेन भाव्येको मुनिसप्तके ॥१९६॥ कृतवर्मा द्वारवतीं ययौ कृष्णानुमोदितः ॥ १९७ ॥ कृष्णायै तं मणिं दत्वा भीमस्तां पर्यसान्त्वयत् । विकोपा भीमवाक्येन राज्ञे सा च मणिं ददौ ॥ १९८ ॥ राजार्हे च मणौ दत्ते मह्यं भीमेन लौकिकाः । स्त्रीपक्षपातं राजा च शङ्केयुर्मारुतेरिति ॥ १९९ ॥ मणिं राज्ञे ददौ कृष्णा भर्तृप्रियहिते रता । सोऽप्याबध्य मणिं मूर्ध्नि रेजे राजा गवामिव ॥ २०० ॥

वेदेश्वरेणापि यदूत्तमेन कृष्णेन युक्तास्तत आशु पार्थाः । ययुः सभार्या निजराजधानीं हत्वेव सन्तोऽन्तररीन्स्वराज्यम् ॥ २०१ ॥ युधिष्ठिरस्यानु विचित्रवीर्यसुतस्य पादावभिवन्दमानम् । आकृष्य भीमं परमेश्वरोऽयोमयाकृतिं धात्पुरतो नृपस्य ॥ २०२ ॥ भीमाकृतिं तां स सुयोधनेन कारायि(पि)तामभ्यसने गदायाः । आश्लिष्य चूर्णीकृतवान-

SGDF
Sri Gargeshwari Digital Foundation

सृग्वमन्हा तात भीमेति वदन्पपात ॥ २०३ ॥ तमाह कृष्णो न
हतोऽद्य भीमो न च त्वयाऽन्यैरपि शक्यतेऽसौ । हन्तुं स्वबुद्धिः
प्रथिता त्वयाऽद्य पापा हि ते बुद्धिरद्यापि राजन् ॥ २०४ ॥ स्वबुद्धि-
दोषादतिपापशीलपुत्राख्यपापानि विवर्धयित्वा । नीतो वशं तैः फलमद्य
भुञ्जन्न क्रोधितुं चार्हसि भीमसेने ॥ २०५ ॥ इत्युक्ते शान्तबुद्ध्यैव
राज्ञाऽऽहूतो वृकोदरः । अभ्यवन्दत तत्पादावनुजाद्याश्च तस्य ये ॥२०६॥
वज्राच्च दृढदेहत्वादविकारे वृकोदरे । न दोषो विवृतोऽस्य स्यादिति
कृष्णेन वञ्चितः ॥ २०७ ॥ सर्वानाश्लिष्य च प्रेम्णा युयोज नृप
आशिषः । कुलनाशकरः पापः शापयोग्यस्तव ह्यहम् ॥ २०८ ॥
इत्युक्त्वैव प्रणमतो गान्धारी सुपदाङ्गुलीः । ददर्श धर्मराजस्य पटान्तेन
प्रकोपिता ॥ २०९ ॥ तस्याः क्रोधाग्निनिर्दग्धनखः स कुनखोऽभवत्
॥ २१० ॥ वन्दमानं पुनर्भीममाह सा क्रोधविह्वला । अधर्मतः कथं
भीम सुतं मे त्वं निजघ्निवान् ॥ २११ ॥ इत्युक्तेऽस्याः शमयितुं
क्रोधमग्रे वृकोदरः । प्राह न प्राणसन्देहे पापं स्यात्पापिनो वधे ॥२१२॥
इत्युक्त्वा तां पुनः प्राह प्रतिज्ञाहानिमन्तरा । न मेऽस्ति प्राणसन्देह इति
जानन्वृकोदरः ॥ २१३ ॥ यथाप्रतिज्ञं भ्रातृव्यान्रणे मम निजघ्नुषः ।
कोऽ(का)धर्मः क्षत्रजातेस्तु तद्धानौ जीवनं नहि ॥ २१४ ॥ पापा न
शुद्धधर्मेण हन्तव्या इति च श्रुतिः । अन्यवत्पापहननं (न ?) पापायेत्याह
हि श्रुतिः ॥ अतोऽसुरान्नैकृतिकान्निकृत्या घ्नन्ति देवताः ॥ २१५ ॥
निकृत्या निकृतिं हन्यान्निकृत्या नैव धार्मि(कं)कान् । इति श्रुतिर्हि
परमा पठ्यते पैङ्गिभिः सदा ॥२१६॥ इत्युक्ता तं पुनः प्राह कथं ते
नरशोणितम् । पीतं नरेणैव सता न पीतमिति सोऽब्रवीत् ॥ २१७॥
दन्तान्तरं न मे प्राप शोणितं त्वत्सुतस्य तत् । प्रतिज्ञापालनायापि
प्रतिकर्तुं च तत्कृतम् ॥ २१८ ॥ भीषणाय च शत्रूणां पीतवच्च
प्रदर्शितम् । वेददृष्टश्च धर्मोऽयमि(म)ति पापजनं प्रति ॥ २१९ ॥

SGDF
Sri Gangeshwari Digital Foundation

इत्युक्तोवाच नैवान्धद्वयस्यास्य वृकोदर। घ्नता पुत्रशतं यष्टिमात्रं चोर्वरितं त्वया ॥२२०॥ तामाह भीमः पापिष्ठा वधयोग्यापराधिनः। सर्वे हता इति पुनः साऽऽह येनाकृतस्तव। अपराधः स एकोऽपि किं नास्तीत्यवदत्स ताम् ॥ २२१ ॥ सर्वैः समेतैः कृष्णस्य बन्धनाय विनिश्चितम् ॥ २२२ ॥ अन्यानि च सुपापानि कृतान्यत्र पुराऽपि च। वासुदेवं सभासंस्थं ब्रुवाणं धर्मसंहिताम् ॥ २२३ ॥ पुनःपुनरवज्ञाय यान्तं दुर्योधनं बहिः। सर्वेऽन्वगच्छन्नित्यादीन्यभिप्रेत्य वृकोदरः ॥ २२४ ॥ नैकोऽप्यनपराधी मे स्वयं ताननुशिक्षितुम्। असमर्था मयि क्रोधं किं करोषि निरर्थकम् ॥ २२५ ॥ इत्युक्ता साऽभवत्तूष्णीं क्रमात्सर्वैश्च पाण्डवैः। वन्दिता व्यासवाक्याच्च किञ्चिच्छान्ता च साऽभवत् ॥ २२६ ॥

तस्या याश्च स्नुषाः सर्वास्ताभिः सह पुरस्कृताम्। कृत्वा तं धृतराष्ट्रं च विदुरादींश्च सर्वशः ॥२२७॥ पाण्डवाः प्रधनस्थानं सभार्याः पृथया सह। कृष्णाभ्यां च ययुस्तत्र गान्धार्यास्तपसो बलम् ॥२२८॥ जानन्पाण्डवरक्षार्थं चिकीर्षुस्तत्तपो व्ययम्। वेदेश्वरो ददौ चक्षुर्दिव्यं सत्यवतीसुतः ॥२२९॥ तेन दृष्ट्वा प्रेतदेहान्सर्वांस्तत्र समाकुला(लान्)। शशाप यादवेशानं त्वयाऽस्मत्कुलनाशनम् ॥ यत्कृतं तत्तव कुलं गच्छत्वन्योन्यतः क्षयम् ॥२३०॥ इत्युक्तो भगवान्कृष्णः स्वचिकीर्षितमेव तत्। अस्त्वेवमित्याह विभुरीश्वरोऽप्यन्यथा कृतौ ॥ २३१ ॥ तेन तस्यास्तपो नष्टं हीना साऽतो हि भर्तृतः ॥ २३२ ॥ नाशयेद्धि स्वयं विष्णुः स्वयोग्यादधिकान्गुणान् ॥ २३३ ॥ तत आश्लिष्य भर्तॄणां देहान्प्ररुदतीः स्त्रियः। सर्वा दुर्योधनादीनां दर्शयामास केशवः ॥२३४॥ कृष्णायै सा च तं देवमस्तुवत्पूर्णषड्गुणम्। ततो देहान्प्रसिद्धानां पार्थाः समदहन्सताम्। अन्येषां धृतराष्ट्रादीन्पुरस्कृत्यैव कांश्चन ॥ २३५ ॥ स्वैतैः पञ्चभिरेव स्वैः सरस्वत्यां प्र(वि)चिक्षिपुः। स्नेहान्नृपो यमौ च

SGDF
Sri Gargeshwari Digital Foundation

स्नानाजौ तस्मिन्न्ययोजयन् ॥ शवाः प्रायो बहुत्वेन तत्र तत्रैव संस्थिताः ॥ २३६ ॥ ततो ददत्सु पानीयं गङ्गायां स्वजनस्य तु । पृथा कर्णाय दत्तेति पार्थानाहाग्रजं च तम् ॥ २३७ ॥ ततो हाहेति विलपन्राजा परमदुःखितः । शशाप सर्वनारीणां गुह्यं हृदि न तिष्ठतु ॥ ॥ २३८ ॥ हा मातस्तव धृत्यैव वयं सर्वे भृशं हताः । ज्येष्ठं पितृसमं हत्वा प्रतिपत्स्याम कां गतिम् ॥ २३९ ॥ एवं वदन्तं कौन्तेयं वासुदेवः सनारदः । शमयामास सद्वाक्यैर्गुणान्कर्णस्य चाब्रवीत् ॥२४०॥ ततस्ते प्रेतकार्याणि चक्रुः सर्वेऽपि सर्वशः । सर्वेषामधिराज्ये च स्थितोऽभूत्पाण्डवाग्रजः ॥ २४१ ॥ (४७०१) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये दुर्योधनवधादिपाण्डवस्वपुरप्रवेशो नाम अष्टाविंशोऽध्यायः ॥ २८ ॥

॥ अथ एकोनत्रिंशोऽध्यायः ॥

॥ ॐ ॥ यदैव कृष्णौ सकलाधिराज्ये युधिष्ठिरं यौवराज्ये च भीमम् । विप्रैर्युतावभिषिच्याशिषश्च युक्ता दत्वा हर्षयामासतुस्तौ ॥१॥ तदैव चार्वाक इति प्रसिद्धं रक्षस्त्रिदण्डीयतिरेव भूत्वा । युधिष्ठिरं गर्हयामास विप्रास्त्वां गर्हयन्तीति सुपापशीलः ॥ २ ॥ श्रुत्वैव तद्दुःखितमाशु धर्मजं दृष्ट्वा विप्राः शेपुरमुं भृशार्ताः । अगर्हितं नित्यमस्माभिरेनं यतोऽवोचो गर्हितमद्य पाप ॥ भस्मीभवाश्वेव ततस्त्वितीरिते क्षणादभूत्पापतमः स भस्मसात् ॥ ३ ॥ भस्मीकृतेऽस्मिन्यतिवेषधारिणि युधिष्ठिरं दुःखितं वृष्णिसिंहः । प्रोवाच नायं यतिरुग्रकर्मा सुयोधनस्यैव सखा सुपापः । रक्षोऽधमोऽयं निहतोऽद्य विप्रैस्तन्मा शुचः कृतकार्योऽद्य राजन् ॥ ४ ॥ इतीरितः शान्तमनाः स विप्रान्सन्तर्पयामास धनैश्च

SGDF
Sri Gangeshwari Digital Foundation

भक्त्या ॥ ५ ॥ असान्त्वयच्च बान्धवान्स्वपौरसंश्रयादिकान् । ददौ यथेष्टतो धनं ररक्ष चानुपूर्ववत् ॥ ६ ॥ स भीष्मद्रोणकर्णानां वधाद्दुर्योधनस्य च । पापशङ्की तप्यमानो राज्यत्यागे मनो दधे ॥ ७ ॥ सोऽनुजैः कृष्णया विप्रैरप्युक्तो धर्मशासनम् । भीमं सम्प्रार्थयित्वैव न वेत्सीत्याह फल्गुनम् ॥ ८ ॥ तस्मिन्क्रुद्धे नृपं प्राहुर्विप्रास्त्वत्तोऽपि धर्मवित् । शक्रोऽर्जुन इति श्रुत्वाऽप्येतद्धर्मे ससंशयम् ॥९॥ मत्स्नेहादेव सर्वेऽपि धर्मोऽयमिति वादिनः । इत्येवं शङ्कमानं तमूचतुर्विप्रयादवौ ॥ १० ॥ कृष्णौ धर्मोऽयमित्येव शास्त्रयुक्त्या पुनःपुनः । नातिनिश्चितबुद्धिं तं तदाऽपि पुरुषोत्तमौ ॥ ११ ॥ हतपक्षगतत्वेन त्वच्छङ्काया अगोचरः । यतो भीष्मस्ततो याहि तमित्यूचतुरव्ययौ ॥ ॥ १२ ॥

स ताभ्यां भ्रातृभिश्चैव मुनिभिश्च समन्वितः । भीष्मं ययौ लज्जितेऽस्मिंस्तं भीष्मायाह केशवः ॥ १३ ॥ पृच्छेत्युक्तः स भीष्मेण पप्रच्छाखिलमञ्जसा । अत्रोवाचाखिलान्धर्मान्कृष्णो भीष्मशरीरगः ॥ ॥१४॥ भीष्मोऽप्याह हरिं पार्था बोधनीयास्त्वयैव हि । का शक्तिर्मम देवेश पार्थान्बोधयितुं प्रभो ॥१५॥ इत्युक्तो भगवानाह त्वत्कीर्त्यै त्वयि संस्थितः । प्रवक्ष्याम्यखिलान्धर्मान्सूक्ष्मं तत्त्वमपीति ह ॥१६॥ राज्ञः प्रथमतो धर्मो भगवद्धर्मपालनम् । तदर्थं कण्टकोद्धारो धर्मा भागवता अपि ॥ १७ ॥ मनोवाक्कर्मभिर्विष्णोरच्छिद्रत्वेन चार्चनम् । पूर्णाशेषगुणो विष्णुः स्वतन्त्रश्चैक एव तु ॥ तद्वशं सर्वमन्यच्च सर्वदेति विनिश्चयः ॥ १८ ॥ देवताक्रमविज्ञानमपूजाऽन्यस्य वै हरेः ॥ १९ ॥ पूजा भागवतत्वेन देवादीनां च सर्वशः । वृथा कर्माकृतिः क्वापि निराशीस्त्वं सदैव च ॥ २० ॥ विष्णोर्भागवतानां च प्रतीपस्याकृतिस्सदा । परस्परविरोधे तु विशिष्टस्यानुकूलता ॥ २१ ॥ प्रियं विष्णोस्तदीयानामपि सर्वं समाचरेत् । धर्ममप्यप्रियं तेषां नैव किंश्चि-

SGDF
Sri Gargeshwari Digital Foundation

त्समाचरेत् ॥ २२ ॥ साम्ये विरोधे च बहूननुवर्तेत वैष्णवान् । एते साधारणा धर्मा ज्ञेया भागवता इति ॥ २३ ॥ तत्त्वविज्ञापनं धर्मो विप्रस्य तु विशेषतः । शारीरदण्डसन्त्यागः पुत्रभार्यादिकानृते ॥२४॥ तत्रापि नाङ्गहानिः स्याद्वेदना वा चिरं न तु । न चार्थदण्डः कर्तव्यो विप्रैर्वैश्यादिभिः क्वचित् ॥ २५ ॥ शारीरदडण्डविषये वैश्यादीनां च विप्रवत् । यथालब्धेन वर्तेत भिक्षया वा द्विजोत्तमः ॥ २६ ॥ शिष्ययाज्योपलब्धैर्वा क्षत्रधर्मेण वाऽऽपदि । महापदि विशां धर्मैः क्षत्रियः सुरविप्रयोः ॥ २७ ॥ अन्यत्र सर्ववित्तेन वर्तेतैतांश्च पालयन् । विरोधिनः क्षत्रियाच्च प्रसह्यैव हरेद्धनम् ॥ २८ ॥ सामादिक्रमतो धर्मान्वर्तयेद्दण्डतोऽन्ततः । अपलायी सदा युद्धे सतां कार्यमृते क्वचित् ॥ २९ ॥ कृषिवाणिज्यगोरक्षाकुसीदं वैश्यजीवनम् । परिचर्यैव शूद्रस्य वृत्तिरन्ये स्वपूर्ववत् ॥ ३० ॥ वर्तेयुर्ब्राह्मणाद्याश्च क्रमात्पूज्या हरिप्रियाः । हरिभक्तावनुच्चस्तु वर्णोच्चो नातिपूज्यते ॥ ३१ ॥ विना प्रणामं पूज्यस्तु वर्णहीनो हरिप्रियः । आदरस्तत्र कर्तव्यो यत्र भक्तिर्हरेर्वरा ॥ ३२ ॥ ज्ञापनं क्षत्रियाणां च धर्मो विप्राभ्यनुज्ञया । तदभावे तु वैश्यानां शूद्रस्य परमापदि ॥ ३३ ॥ वर्णेष्वङ्गेष्ववर्णस्तु न ज्ञानी स्यात्कथञ्चन । इति श्रुतेरवर्णस्य ज्ञापनप्राप्तिरेव न ॥ ३४ ॥ ज्ञेयं सर्वं त्रिवर्णस्थैः स्त्रीभिर्वेदान्विनाऽखिलम् । स्वीयपुन्नियतिः स्त्रीणां स्वदारनियतिर्नृणाम् ॥ ३५ ॥ धर्मो गुणोत्तमानां तु स्मृत्यैवान्धन्तमो व्रजेत् । गुणसर्वस्वहानिः स्यादुत्तरोत्तरतोऽत्र च ॥ ३६ ॥ अधोऽधोऽधिकदोषः स्यात्स्त्रीणामन्यत्र मध्यतः । वेदा अप्युत्तमस्त्रीभिः कृष्णाद्याभिरिवाखिलाः ॥ ३७ ॥ देव्यो मुनिस्त्रियश्चैव नरादिकुलजा अपि । उत्तमा इति विज्ञेयाः सच्छूद्रैरप्यवैदिकम् । ज्ञेयमन्यैर्हरेर्नाम निजकर्तव्यमेव च ॥ ३८ ॥ सर्वथान्धन्तमो याति वरं सदृशमेव च । यो विष्णोर्मन्यते किञ्चिद्गुणैः कैश्चिदपि क्वचित् ॥३९॥ ब्रह्मेशानादि-

SGDF
Sri Gangeshwari Digital Foundation

कमपि भेदं वा यो न मन्यते। भेदद्दक्तद्गुणादौ वा प्रादुर्भावगतेऽपि यः ॥ ४० ॥ प्राकृतं देहमथवा दुःखाज्ञानश्रमादिकम्। मन्यते तारतम्यं वा तद्भक्तेष्वन्यथैव यः ॥ ४१ ॥ मनोवाक्तनुभिर्यो वा तस्मिंस्तद्भक्त एव वा। विरोधकृद्विष्ण्वधीनादन्यत्किञ्चिदपि स्मरन् ॥ ४२ ॥ अन्याधीनत्वविच्चास्य सर्वपूर्त्यविदेव च। भक्तिहीनाश्च ते सर्वे तमोऽन्धं यान्त्यसंशयम् ॥ ४३ ॥ तत्त्वे संशय युक्ता ये सर्वे ते निरयोपगाः। दोषेभ्यस्ते गुणाधिक्ये नैव यान्त्यधमां गतिम् ॥ ४४ ॥ गुणदोष-साम्ये मानुष्यं सर्वदैव पुनःपुनः। यावद्दोषक्षयश्चोर्ध्वा गतिः क्रमश एव तु ॥ ४५ ॥ सर्वदोषक्षये मुक्तिरात्मयोग्यानुसारतः। भक्तिज्ञानोन्नतावेव स्वर्गश्च शुभकर्मणः ॥ ४६ ॥ इत्यादि धर्मसर्वस्वं भीष्मस्थेनैव विष्णुना ॥४७॥ पार्थानां गदितं

तत्तु श्रुत्वा धर्मसुतोऽनुजान्। पप्रच्छ विदुरं चैव सारं धर्मादिषु त्रिषु ॥ ४८ ॥ आह क्षत्ता धर्ममेव सारमर्थं च मध्यमम्। नीचं कामं निष्फलत्वादर्थमेवार्जुनोऽब्रवीत् ॥ ४९ ॥ सारं स द्विविधो ज्ञेयो दैवो मानुष एव च। दैवो विद्या हिरण्यादिर्मानुषः परिकीर्तितः ॥ ॥ ५० ॥ मध्यमो धर्म एवात्र साध्यं साधनमेव च। विद्याह्वयोऽर्थो धर्मस्य विद्ययैव विमुच्यते ॥ ५१ ॥ मानुषोऽर्थोऽपि विद्यायाः कारणं सुप्रयोजितः। तुष्टोऽर्थेन गुरुर्यस्मात्कैवल्यं दातुमप्यलम् ॥ ५२ ॥ धर्मार्थतां विनाप्यर्थैस्तुष्येयुर्गुरुदेवताः। यद्यनुद्देशितो धर्मोऽप्यर्थ-मेवानुसंव्रजेत् ॥५३॥ गुरुताऽर्थगतैव स्यात्कामोऽधस्ताद्धि निष्फलः। यमावत्र विदांश्रेष्ठावर्जुनोक्तमनूचतुः ॥ ५४ ॥ अथाह भीमः प्रवरः सुतत्त्वदर्शा समस्तानभिभाष्य हर्षात्। स्मयन्न कामादतिरिक्तमस्ति किञ्चिच्छुभं क्वावरतां स यायात् ॥ ५५ ॥ काम्यं हि कामाभिधमाहु-रार्याः काम्याः पुमर्थाः सहसा धनैर्यत्। अकाम्यतां यात्यपुमर्थ एव पुमर्थितत्वाद्धि पुमर्थ उक्तः ॥ ५६ ॥ विज्ञानभक्त्यादिकमप्यतीव-

SGDF
Sri Gargeshwari Digital Foundation

तत्साधनं काम्यबहिष्कृतं चेत् । न साधनं स्यात्परमोऽपि मोक्षो न साध्यतां याति विना हि कामात् ॥५७॥ परात्परोऽप्यादिपुमान्हरिश्च स्वस्येतरेषामपि काम्य एव । अकामितोऽवाग्गतिमेव दद्यात्कामः पुमर्थोऽखिल एव तेन ॥ ५८ ॥ इच्छैव कामोऽस्तु तथापि नैतामृते हि चिच्चं(त्तं) घटकुड्यवत्स्यात् । सारस्ततः सैव चिदात्मिकापि सा चेतना गूढतनुः सदैव ॥ ५९ ॥ न प्रश्नयोग्यः पृथगेव कामस्तेनैष राजन्यदि तारतम्यम् । इच्छस्ययं ते त्रिविधो हि वेद्यो धर्मार्थयुक्तः परमो मतोऽत्र ॥६०॥ एकाविरोधी यदि मध्यमोऽसौ द्वयोर्विरोधी तु स एव नीचः । तस्मात्स्वबुद्धिप्रमदाभिरेव कामं रमेथा अनुरूपकामः ॥६१॥ राजन्न कामादपरं शुभं हि परो हि कामो हरिरेव येन । प्राज्ञः सुहृच्चन्दनसारलिप्तो विचित्रमाल्याभरणैरुपेतः ॥ इदं वचो व्याससमासयुक्तं सम्प्रोच्य भीमो विरराम वीरः ॥ ६२ ॥ प्रशस्य भीममन्यांश्च राजा मोक्षमथास्तुवत् । स्वयुक्तेरप्रतीपत्वान्निराचक्रे न मारुतिः ॥ ॥ ६३ ॥ (४७६४) ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये धर्मसारनिरूपणं (समस्तधर्मनिर्णयो) नाम एकोनत्रिंशोऽध्यायः ॥ २९ ॥

॥ अथ त्रिंशोऽध्यायः ॥

॥ ॐ ॥ अथ कृष्णमनुस्मृत्य भीष्मे स्वां वसुतां गते । कृत्वा कार्याणि सर्वाणि गङ्गामाश्वास्य दुःखिताम् ॥ १ ॥ आश्वासितश्च कृष्णाभ्यां धर्मजो दुःखितः पुनः । पराशरसुतेनोक्तः कृष्णेनानन्तराधसा ॥ २ ॥ अपापे पापशङ्कित्वादश्वमेधैर्यजाच्युतम् । कुरुष्व(कुरु) राज्यं (च) धर्मेण पालयापालकाः प्रजाः ॥ ३ ॥ इत्युक्तः स तथा

SGDF
Sri Gargeshwari Digital Foundation

चक्रे त्यक्त्वा भोगांश्च कृत्स्नशः। गोव्रतादिव्रतैर्युक्तः पालयामास मेदिनीम् ॥ ४ ॥ ददौ देयानि मुख्यानि यथाकाममखण्डितम्। नैवार्थी विमुखः कश्चिदभूद्योग्यः कथञ्चन ॥ ५ ॥ भ्रष्टा च दाताऽखिलराजनम्यो यष्टा च धर्मात्मज एव तत्र। बभूव पाण्डोर्गृहमावसंश्च राजाधिराजो वनितानिवृत्तः ॥ ६ ॥

भीमस्तु दौर्योधनमेव सद्म प्रपेदिवानूर्जितवीर्यलब्धम्। कृष्णासहायः सुरराजयोग्यानभुङ्क्त भोगान्युवराज एव ॥ ७ ॥ कृष्णा च पार्थांश्चतुरो विहाय सुव्यक्तसारस्वतशुद्धभावा। रराज राजावरजेन नित्यमनन्ययोगेन शिखेव वह्नेः ॥ ८ ॥ प्रीत्यैव विज्ञानयुजाऽन्यपार्थैः संवादतः परिहृता गतभाविकाले। अपि स्वकीयं पतिमेव भीममवाप्य सा पर्यचरन्मुदैव ॥ ९ ॥ रराज राजावरजस्तया स द्विरूपया सोमककाशिजातया। श्रिया भुवा चैव यथाऽब्जनाभो निहत्य सर्वान्दितिजान्पयोऽ(महा)ब्धौ ॥१०॥ सर्वोत्तुङ्गो नामतः प्राणवायोरंशो निशायां गुरुपुत्रसूदितः। माताऽस्य देवीति च रौहिणेयी भीमप्रियाऽऽसीद्य पुरा सैव(ऽस्यैव) राका ॥ ११ ॥ अन्याश्चासुर्वासुदेव्यो दिशो या आपश्च पूर्वं विंशतिरग्र्यरूपाः। ताभिर्युक्तो दैवतैरप्यलभ्यानभुङ्क्त भोगान्विबुधानुगार्चितः ॥ १२ ॥ ररक्ष धर्मानखिलान्हरेः स निधाय विप्राननुशास्य युक्तान्। सद्वैष्णवान्विदुषः पञ्चपञ्च सवेतनान्ग्राममनु स्वकीयान् ॥ १३ ॥ दधार दण्डं तदवर्तिषु स्वयं जग्राह चान्वेव मुदाऽथ तद्व(द्वत)ान्। तद्वृत्तमन्यैरपि विप्रवर्यैः संशोधयन्सर्वमसौ यथाव(व्यधा)त् ॥ १४ ॥ नावैष्णवः कश्चिदभूत्कुतश्चिन्नैवान्यनिष्ठो न च धर्महन्ता। न विध्यवर्ती न च दुःखितोऽभून्नापूर्णवित्तश्च तदीयराष्ट्रे ॥ १५ ॥ वासिष्ठवृष्णिप्रवरौ प्रपश्यतां ताभ्यां च भीमेन मुनीश्वरैश्च। संशिक्षितानां प्रथमाद्युगाच्च गुणाधिकः कलिरासीत्प्रजानाम् ॥ १६ ॥ शुभं महत्स्वल्पफलं कृते हि विपर्ययेणाशुभमेष दोषः। तद्धीनमप्युच्चशुभं

SGDF
Sri Gargeshwari Digital Foundation

कृताद्युगाच्चक्रे कलिं मारुतिरच्युताश्रयात् ॥ १७ ॥

धनञ्जयः प्रोद्यतदण्ड आसीत्सदाऽन्यचक्रेषु निजाग्रजेरितः । विभीषयित्वा नृपतीन्सरत्नान्पदोर्नृपस्याग्रभुवो न्यापतयत् ॥ १८ ॥ तदैव कृष्णस्य मुखारविन्दाद्विनिःसृतं तत्त्वविनिर्णयामृतम् । पिबन्सुताद्याधिमसौ क्रमेण त्यजंश्च रेमे(ऽ)विरतातिभोगः ॥ १९ ॥ दुःशासनस्यावसथं सुभद्राचित्राङ्गदासहितोऽध्यावसंश्च । सचन्द्रिकाकान्तिरनूनबिम्बो नभःस्थितश्चन्द्र इवात्यरोचत्(त) ॥ २० ॥ समस्तभृत्याश्रितवेतनानां माद्रेय आसीत्प्रथमः प्रदाता । स दुर्मुखस्यावसथेऽवसच्च समद्रराजात्मज(याऽ)अग्रचवर्ती ॥२१॥ सन्धानभेदानुगतप्रवृत्तिस्तिष्ठंश्च दुर्मर्षणशुभ्रसद्मनि । नृपाङ्गरक्षः प्रगृहीतखड्गस्तस्यानुजो मागधकन्ययाऽऽसीत् ॥ २२ ॥ सेनापतिः कृप आसीद्युयुत्सुः ससञ्जयो विदुरश्चाम्बिकेयम् । पार्थेरिताः पर्यचरन्स्वयं च सर्वे यथा दैवतमादरेण ॥ ॥ २३ ॥

द्विरूपकृष्णप्रहितेषु पाण्डुषु क्षितिं प्रशासत्सु न कश्चनातुरः । न चाक्रमान्मृत्युरभून्न नार्यो विभर्तृका नो विधुरा नराश्च ॥ २४ ॥ शब्दादयश्चासुरतीवहृद्या निकामवर्षी च सुरेश्वरोऽभूत् । प्रजा अनास्पृष्टसमस्ततापा अनन्यभक्त्याऽच्युतमर्चयन्ति ॥ २५ ॥ पृथ्वी च गावः ससरस्वतीका निकामदोहा अभवन्सदैव । अब्दाब्धिनद्यो गिरिवृक्षजङ्गमाः सर्वेऽपि रत्नप्रभवा बभूवुः ॥ २६ ॥ कृष्णाश्रयात्सर्वमिदं वशे ते विधाय सम्यक्परिपालयन्तः । दिवीव देवा मुमुदुः सदैव मुनीन्द्रगन्धर्वनृपादिभिर्युताः ॥ २७ ॥ समुज्ज्वला पाण्डवकीर्तिनारी पदं निधायासुरपक्षमूर्धसु । वराभये चैव सतां कराभ्यां कृष्णप्रसूता जगदण्डमावृणोत् ॥ २८ ॥ पातालपादां पृथिवीनितम्बामाकाशमध्यां करसन्तताशाम् । ग्रहर्क्षताराभरणां द्युवक्षसं विरिञ्चलोकस्थलसन्मुखाम्बुजाम् ॥ २९ ॥ विकुण्ठनाथाभयहस्तमादरान्मूर्ध्ना वहन्तीं वरभारताख्याम् ।

SGDF
Sri Gurgeshwari Digital Foundation

निशम्य तामीक्ष्य समस्तलोकाः पवित्रिता वेदिभवामिवान्याम् ॥३०॥
प्रपालयत्स्वेव धरां सकृष्णेष्वद्धैव पार्थेषु कलिर्बलिश्च । सुपाप-
दैत्यौ क्व च राष्ट्रविप्लवं सञ्चक्रतुस्तच्छ्रुतमाशु पार्थैः ॥ ३१ ॥ नृपेण
कृष्णेन च साधु चोदितो भीमस्तदा तौ सगणौ विजित्य । बलिं
प्रविद्राव्य कलिं निबध्य समानयत्कृष्णनृपेन्द्रयोः पुरः ॥ ३२ ॥
पप्रच्छ तं कृष्णपुरो युधिष्ठिर उदारधीः । कले किमिति मे राष्ट्रं
विप्लावयसि दुर्मते ॥ ३३ ॥ इत्युक्त आह कालोऽयं दुर्योधननिपातनम् ।
आरभ्य मम तत्र त्वं बलादाक्रम्य तिष्ठसि ॥ ३४ ॥ ततो मया कृतो
राष्ट्रविप्लवस्ते नराधिप । तमाह राजा राज्ञां हि बलाद्राज्यं प्रवर्तते
॥ ३५ ॥ अपि कालभवं राष्ट्रं त्वदीयं मादृशैर्नृपैः । ह्रियते बलवद्भिर्हि
राज्याशा ते कुतस्तदा ॥ ३६ ॥ कालो वा कारणं राज्ञो राजा वा
कालकारणम् । इति ते संशयो मा भूद्राजा कालस्य कारणम् ॥ ३७ ॥
तमुवाच कलिः काले मदीये त्वादृशः कुतः । राजानं पूर्वमाविश्य
विप्रांश्च स्यामहं नृप ॥ ३८ ॥ वासुदेवसहायेषु तेजो युष्मासु मे नहि ।
क्व राजाऽसावृते युष्मान्यो मया नाभिभूयते ॥ ३९ ॥ मदीयकाले
भूपाल विप्रदेवविरोधिनि । मदृष्टिपाते क्व गुणाः क्व वेदाः क्व
सुयुक्तयः ॥ ४० ॥ जगाद नृपतिः सत्यं कले वक्ष्यनृतोऽपि सन् ।
मोचये त्वार्तवचनाद्यदाऽस्मत्सन्ततेः परम् ॥४१॥ विलुम्पस्यखिलान्धर्मान्
करं तत्रापि नोऽर्पय । सीमाधिर्बहुवाक्यं च तुलामाने च मे करः
॥ ४२ ॥ नैवातिक्रमेतेषां कुरु सर्वात्मना क्वचित् । तमाह भगवा-
न्कृष्णो यावत्पाण्डवसन्ततिः ॥ ४३ ॥ तावन्न ते भवेच्छक्तिः प्रवृत्त-
स्यापि भूतले । पाण्डवेभ्यः परं यावत्क्षेमकः क्रमवर्धिता ॥ ४४ ॥
क्षेमकात्परतः पूर्तिं शक्तिस्ते यास्यति ध्रुवम् । न द्रष्टव्यं
भूतलं ते कुत एव स्पृशेर्ध्रुवम् ॥ ४५ ॥ यावत्पार्था अहं चात्र
ततो भुवि पदं कुरु । इत्युक्तो वासुदेवेन मोचितो धर्मजेन च ॥४६॥

SGDF
Sri Gargeshwari Digital Foundation

तान्प्रणम्य ययौ पारे समुद्रस्याश्रयद्गुहाम् । पार्थाश्च कृष्णसहिता रक्षन्तः क्ष्मां मुदं ययुः ॥ ४७ ॥

एवं पार्थान्प्रतिष्ठाप्य शक्रप्रस्थे तु सार्जुनः । क्रीडन्दिव्याः कथाः प्राह पुत्रशोकापनुत्तये ॥ ४८ ॥ गीतोक्तं विस्मृतं चास्मै पुनर्विस्तरतोऽवदत् । वाणी प्राणो वासुदेव इत्येतैरखिलं ततम् ॥ ४९ ॥ सर्वोत्तमत्वमेतेषां सर्वमेतद्वशे जगत् । उत्तरोत्तरमेतेऽपि गुणोच्चास्तद्वशे परे ॥ ५० ॥ इत्थं हरेर्वशे सर्वं गुणपूर्णश्च स प्रभुः । एक एव न चान्योऽस्ति प्राणोच्चा तदधो रमा ॥ ५१ ॥ स हुताश इति प्रोक्तो हुतमत्त्यखिलं यतः । वाक्प्राणमध्यगो नित्यं धारयत्यखिलं जगत् ॥ ५२ ॥ स ईशो ब्रह्मरुद्राद्या जीवा एव प्रकीर्तिताः । एतस्यानादिसद्भक्ता मुक्तियोग्या हि ते स्मृताः ॥ ५३ ॥ अनादिद्वेषिणो येऽस्मिंस्तमोयोग्याः सुपापिनः । मिश्रा मध्या इति ज्ञेयाः संसारपरिवर्तिनः ॥ ५४ ॥ एवं जीवास्त्रिधा प्रोक्ता भवन्त्येते न चान्यथा । तारतम्यं च विज्ञेयं लिंगैर्दैहिकमानसैः ॥ ५५ ॥ विष्णोर्लिंगानुसारित्वात्तारतम्यात्तदीक्षणम् । विष्णोस्तदनुगानां च प्रीतिकृद्धर्म ईरितः ॥ ५६ ॥ अधर्मोऽन्य इयं निष्ठा प्रलापः किङ्करिष्यति । एवमाद्यनुशास्याजः पार्थं पार्थैः सुसत्कृतः ॥ ५७ ॥ कथञ्चित्तानवस्थाप्य सुदूरानुगतान्प्रभुः । सुभद्रासहितः प्रायाद्यानेन द्वारकां पुरीम् ॥५८॥

समाधिविरतोदङ्कपरिपृष्टः पथि प्रभुः । हतं दुर्योधनं प्राह सभ्रातृसुतसैनिकम् ॥ ५९ ॥ तं शिष्यवधकोपेन शप्तुमात्मानमुद्यतम् । केशवोऽशमयद्वाक्यैर्विश्वरूपं प्रदर्श्य च ॥ ६० ॥ मद्भक्तो नितरामेष मदाराधनतत्परः । मामवज्ञाय निरयमनुत्थानं व्रजेदिति ॥ ६१ ॥ कृपया वासुदेवेन बोधितः शान्तमानसः । पश्चात्तापाभितप्तात्मा तमेव शरणं ययौ ॥ ६२ ॥ तस्मै देवोऽभयं दत्वा प्रेषयिष्येऽमृतं तव । दातुं शक्रमिति प्रोक्त्वा ययौ द्वारवतीं प्रभुः ॥ ६३ ॥ अथादिदेश

SGDF
Sri Gangeshwari Digital Foundation

देवेशं वासुदेवोऽमृतं मुनेः। देहीति वञ्चयिष्यामीत्याह सोऽपि क्षमापयन् ॥ ६४ ॥ ओमित्युक्तो भगवता तत्स्नेहात्स शचीपतिः। सुजुगुप्सितमातङ्गवेषो भूत्वा मुनिं ययौ ॥ ६५ ॥ मूत्रस्रोतसि सौधं च निधाय कलशं वशी। मूत्रयन्निव तं प्राह वासुदेवः सुधामिमाम् ॥ ६६ ॥ महर्षे प्रेषयामास तवार्थे तां पिबेति च। स मूत्रमिति मत्वा तं याहीत्येवाह भर्त्सयन् ॥ ६७ ॥ वञ्चयित्वैव तं शक्रो ययौ प्रीतः स्वमालयम्। असाधारणमन्नं हि देवानाममृतं सदा। अन्य-पीतिस्ततस्तस्य देवानां परमाप्रिया ॥ ६८ ॥ आत्मदत्तप्रसादाच्च स्वापराधात्प्रचालिते। उदङ्के वासुदेवस्तु युक्तमित्येव मन्यते ॥ ६९ ॥

स्वपुरीं प्राप्य यदुभिः पूजितः शूरसूनवे। वृत्तान्तं कथयामास केशवो यदुसंसदि ॥ ७० ॥ वधमन्तरितं सूनोः सात्वतेशेन सात्वती। प्रणम्य कथयेत्यूचे तत आह जनार्दनः ॥ ७१ ॥ ततः सुदुःखिताः शूरपुत्राद्या अभिमन्यवे। श्राद्धदानानि बहुशश्चक्रुः केशवसंयुताः ॥ ७२ ॥

निवसत्यत्र देवेशे धर्मराजः क्रतूत्तमम्। अश्वमेधमनुष्ठातुं नाविन्दद्वित्तमञ्जसा ॥ ७३ ॥ हतशेषात्क्षात्रसङ्घात्करं नैच्छद्दयापरः। न च मध्यमकल्पेन यष्टुं तस्य मनो गतम् ॥ ७४ ॥ विज्ञाय नित्य-विज्ञातनिखिलो बादरायणः। आविर्भूतो हिमवतः शृङ्गं यत्राभि-सङ्गतम् ॥ ७५ ॥ मेरुशृङ्गेण यत्रैव विष्णुः स्वात्मानमव्ययम्। लोकस्य सङ्ग्रहायेजे कर्मबन्धोज्झितोऽपि सन् ॥ ७६ ॥ शङ्कराद्याः सुरा यत्र मरुतश्चेजिरे हरिम्। दानवो वृषपर्वा च तत्रास्ति धनमक्षयम् ॥ ७७ ॥ तच्छङ्करशरीरस्थं जामदग्न्यं हरिं परम्। इष्ट्वैवानुज्ञया तस्य स्वीकृत्य यज तेन च ॥ ७८ ॥ इत्याह व्यासवाक्यात्तु भीमोऽप्याह (नृपोत्तमं) युधिष्ठिरम् ॥७९॥ धनस्य देवता विष्णुर्जामदग्न्योऽखिलेश्वरः। स शङ्करशरीरस्थो यज्ञोच्छिष्टधनाधिपः ॥ ८० ॥ तेनैव

SGDF
Sri Gargeshwari Digital Foundation

विष्णुना दत्तमर्जुनायास्त्रमुत्तमम् । कार्याण्यन्यानि चास्माकं कृतान्येतेन विष्णुना ॥ ८१ ॥ स ब्रह्मरुद्रशक्रादिपददाताऽखिलेश्वरः । स्वतन्त्रः परतन्त्रांस्तानावर्तयति चेच्छया ॥ ८२ ॥ प्रियोऽस्माकं प्रियास्तस्य सर्वदैव वयं नृप । अतस्तदभ्यनुज्ञातधनेनैव यजामहे ॥ ८३ ॥ सोऽयं पितामहोऽस्माकं व्यासस्तन्नः प्रदास्यति । इत्युक्त्वा तं पुरस्कृत्य कृष्णद्वैपायनं ययुः ॥ ८४ ॥ धनं कृष्णः समादाय समन्ताच्छत-योजनम् । ददौ तेषां तेऽपि चोहुर्हस्त्यश्वोष्ट्रनरादिभिः ॥ ८५ ॥ युधिष्ठिरमृते सर्वे भीमसेनपुरोगमाः । यज्ञार्थमूहिरे भूरि स्वर्णमुद्यद्रवि-प्रभम् ॥ ८६ ॥

तदैव वासुदेवोऽपि सभार्यः ससुभद्रया । आगच्छद्धस्तिनपुरं पथ्युदङ्केन पूजितः ॥ ८७ ॥ तत्कामवर्षिणो मेघांस्तस्य दत्वोदकार्थिनः । सफलं स्ववरं कृत्वा जगाम गजसाह्वयम् ॥ ८८ ॥ असन्नेष्वेव पार्थेषु व्यासे च पुरुषोत्तमे । प्रविवेश पुरं कृष्णस्तदाऽसूतोत्तरा मृतं ॥ ८९ ॥ द्रौण्यस्त्रस्त्रदितं बालं दृष्ट्वा कुन्त्यादिकाः स्त्रियः । शरण्यं शरणं जग्मुर्वासुदेवं जगत्पतिम् ॥ ९० ॥ प्रत्यक्षमात्मना गर्भे रक्षितं प्रसवे हतम् । पुनरुज्जीवयामास केशवः पार्थतन्तवे ॥ ९१ ॥ तदैव विविशुः पार्थाः सकृष्णाः सधनोच्चयाः । सर्वे मुमुदिरे दृष्ट्वा पौत्रं केशवरक्षितम् ॥ ९२ ॥ ददौ दानानि बहुशो धर्मपुत्रो युधिष्ठिरः । पौत्रजन्मनि हृष्टात्मा वासुदेवं ननाम च ॥ ९३ ॥ कुन्तीकृष्णासुभद्रा-भिर्वैराट्यादिभिरेव च । पाण्डवैः पुरुषैरन्यैः संस्तुतः प्रणतो हरिः ॥ ९४ ॥

ततः कृष्णाभ्यनुज्ञाताः पाराशर्यसदस्यकाः । आरेभिरेऽश्वमेधं ते मुनिभिर्ब्रह्मवादिभिः ॥ ९५ ॥ सर्वयज्ञात्मकं तेषामश्वमेधं जगत्पतिः । कारयामास भगवान्कृष्णद्वैपायनः स्वयम् ॥ ९६ ॥ साधनानि च सर्वाणि शालां चैव हिरण्मयीम् । पवमानसुतश्चक्रे कृष्णद्वैपायनेरितः

SGDF
Sri Gangeshwari Digital Foundation

॥ ९७ ॥ अथानुमन्त्रितोत्सृष्टं पुरोहितपुरस्कृतम् । तुरङ्गं कृष्ण-
सारङ्गमनुवव्राज वासविः ॥ ९८ ॥ स जित्वा रुन्धतः सर्वा-
न्नृपतीञ्छस्त्रतेजसा । चारयामास सर्वेषु राष्ट्रेष्वविजितोऽरिभिः ॥ ९९ ॥
युधिष्ठिराज्ञया तेन न कश्चिन्निहतस्तदा । आहूताश्च नृपास्तेन
यज्ञार्थं प्रीयताऽखिलाः ॥ १०० ॥ मळूरं क्रमात्प्राप्तस्तत्रैनं
बभ्रुवाहनः । अभ्ययादर्घ्यपाद्याद्यैस्तमाह विजयः सुतम् ॥ १०१ ॥
योद्धुकामोऽर्घ्यमादाय त्वयाद्याभिगतो ह्यहम् । न प्रीये पौरुषं धिक्ते
यन्मेध्याश्वो न वारितः ॥ १०२ ॥ तदाऽपि पितृभक्त्यैनमयुध्यन्त-
मुलूपिका । आह युध्यस्व तत्प्रीत्यै गुरोः कार्यमसंशयम् ॥ १०३ ॥
प्रीणनायैव युध्यस्व पित्रे सन्दर्शयन्बलम् । इत्युक्तो युयुधे पित्रा बलं
सर्वं प्रदर्शयन् ॥ १०४ ॥ अर्जुनस्तु सुतस्नेहान्मन्दं योधयति
स्मयन् । स तु सर्वायुधक्षेपेऽप्यविकारं धनञ्जयम् ॥ १०५ ॥ दृष्ट्वा
बाल्यात्परीक्षार्थं मन्त्रपूतं महाशरम् । चिक्षेप पित्रे दैवेन तेनैनं मोह
आविशत् ॥ १०६ ॥ मूर्च्छितं तं गुरुं दृष्ट्वा तद्भक्त्या भृशदुःखितः ।
प्रायोपविष्टस्तन्माता विललापातिदुःखिता ॥१०७॥ विजगर्ह तदोलूपी
धिग्जगत्त्रयपूजितम् । अजीघनो मे भर्तारं पुत्रेणैवाविजानता ॥१०८॥
लोकवीरं पतिं हत्वा न मे कार्यं सुतेन च । पतिलोकमहं यास्ये तृप्ता
भव कलिप्रिये ॥१०९॥ इत्युक्त्वा मरणायैव तां विनिश्चितमानसाम् ।
धरायां विलुठन्तीं च दृष्ट्वा भुजगनन्दिनी ॥ ११० ॥ नागलोकात्स-
मादाय विशल्यकरणीं क्षणात् । उत्थापयामास पतिं त्रिलोकातिरथं
तया ॥ १११ ॥ प्रहस्योवाच च तदा श्रुतं वाक्यं पुरा मया ।
सुरलोके सुरैः प्रोक्तं भीष्माद्या नातिधर्मतः । यद्धतास्तेन दोषेण
पार्थस्तेनातिवेदनाम् ॥ ११२ ॥ रणे व्रजेदिति न तत्परतः स्यादिति
ह्यहम् । वचनादेव देवानां युध्येत्यात्मजमब्रुवम् ॥ ११३ ॥ देवा-
नामेव संकल्पान्मूर्च्छितश्चार्जुनोऽभवत् । भुक्तदोषफलश्चायं पुनर्भोक्ष्यति

SGDF
Sri Gargeshwari Digital Foundation

नान्यतः ॥ ११४ ॥ अन्येन पतितस्यास्य यशो नश्येत्त्रिलोकगम् । नार्जुनस्य यशो नश्येदिति देवैरिदं कृतम् ॥ ११५ ॥ इत्युक्तः प्रीतिमापेदे पुत्रभार्यायुतोऽर्जुनः । यज्ञार्थं तावथाहूय पूजितः प्रययौ ततः ॥ ॥ ११६ ॥

द्वारकायाः समीपस्थं प्रद्युम्नाद्याः सुता हरेः । प्रसह्याश्वमथाजहुराह्वयन्तोऽर्जुनं युधे ॥ ११७ ॥ सुभद्राहरणं मार्ष्टुं नीतेऽश्वे तैर्धनञ्जयः । गौरवाद्वासुदेवस्य मातुलस्य च केवलम् ॥ ११८ ॥ मातुलायाब्रवीदश्वं हृतं पौत्रैरबन्धुवत् । स निर्भर्त्स्य कुमारान्स्तान्मेध्यमश्वममोचयत् ॥ ११९ ॥ मातुलं स प्रणम्याथ यज्ञार्थं तान्निमन्त्र्य च । गच्छन् गजाह्वयं दूतमग्रतोऽयातयन्नृपे ॥ १२० ॥ सकृष्णः सहसोदर्यः श्रुत्वाऽसौ प्राप्तमर्जुनम् । प्रीतो बाष्पातिपूर्णाक्षो भ्रातृस्नेहादभाषत ॥ १२१ ॥ वासुदेव न पश्यामि दुर्लक्षणमथार्जुने । केन दुर्लक्षणेनायं बहुदुःखी प्रवासगः ॥ १२२ ॥ पृष्टस्तं केशवः प्राह भ्राता ते दीर्घपिण्डिकः । तेनायं दुःखबहुल इत्युक्त्वा पुनरेव च ॥ १२३ ॥ वदन्तमेवं पाञ्चाली कटाक्षेण न्यवारयत् । समस्तलक्षणाभिज्ञाः कृष्णः सत्या वृकोदरः ॥ १२४ ॥ कृष्णा च पञ्चमो नास्ति विद्या शुद्धेयमञ्जसा । प्रसङ्गात्प्राप्तुमिच्छेत्तां विद्याशीलो युधिष्ठिरः ॥ १२५ ॥ इति लोभात्तु पाञ्चाली वासुदेवं न्यवारयत् ॥ १२६ ॥ तद्गौरवाद्वासुदेवो नोत्तरं प्रत्यभाषत । विस्मारयामास च तं प्रब्रुवाणः कथान्तरम् ॥ १२७ ॥ उदरस्य किञ्चिदाधिक्यं वृषणाधिक्यमेव च । सव्यबाहोस्तथाधिक्यं दुर्लक्षणमथार्जुने ॥ १२८ ॥ तन्नोक्तं वासुदेवेन दृश्यमानमपि स्फुटम् । ज्ञानानन्दह्रासकरा ह्येते दोषाः सनातनाः ॥ १२९ ॥ समस्तजीवराशौ तु दुर्लक्षणविवर्जितौ । पूर्णचित्सुखशक्त्यादेर्योग्यौ कृष्णा च मारुतिः ॥ १३० ॥ अनादिदुःखहीनत्वे सुखाधिक्ये च लक्षणम् । रुक्मिणीसत्यभामादिरूपायाः श्रिय एव तु

SGDF
Sri Gargeshwari Digital Foundation

॥ १३१ ॥ मुख्यं ततोऽतिमुख्यं तु स्वातन्त्र्यादेरशेषतः । गुणराशेः परं लिङ्गं नित्यं व्यासादिरूपिणः । विष्णोरेव न चान्यस्य स ह्येकः पूर्णसद्गुणः ॥ १३२ ॥ साश्वेऽर्जुने यज्ञवाटं प्रविष्टेऽस्य सहोदराः । पूजिताः पूजयामासुर्मुदिताः सहकेशवाः ॥ १३३ ॥

ततः स यज्ञो यदुवीररक्षितो व्यासोपदिष्टो मुनिभिः प्रवर्तितः । अशोभतालं सकलैर्नृपैश्च समागतैर्विप्रवरैश्च जुष्टः ॥ १३४ ॥ सकृष्णयुग्मेन च भार्गवेण त्रिधा विभक्तेन परेण पुंसा । अधिष्ठितोऽशोभत विश्वमेतद्विश्वादिरुपेण यथैव तेन ॥ १३५ ॥ यथा विरिञ्चस्य पुराऽऽस यज्ञो यथैव शक्रस्य शतक्रतुत्वे । तथैव सोऽभूद्विधिशर्वशक्रपूर्वैः सुरैराविरलं कृतोऽधिकम् ॥ १३६ ॥ न देवगन्धर्वमुनिःस्वधर्ममर्त्यादिकेष्वास स योऽत्र नास । स्वलंकृतैर्नाकिजनैः सकान्तैररूरुचन्नाकवदेतदोकः ॥ १३७ ॥ तत्रैव तत्त्वानि ससंशयानि निःसंशयान्यासुरलं विवादे । परस्परोत्थे हरिणा त्रिरूपिणा संस्थापितान्यग्र्यवचोभिरुच्चैः ॥ १३८ ॥ प्रगीतगन्धर्ववरः प्रनृत्तसदप्सराः सन्ततवादिविप्रः । विवेचयद्देवनृपौघ एको रराज राजाऽखिलसत्क्रतूनाम् ॥ १३९ ॥ समस्तदेव्यः सहवासुदेव्यः स्वलङ्कृताः फुल्लमुखारविन्दाः । विचेरुरत्रैव सहाप्सरोभिर्निषेदुरप्यच्युतसत्कथारमाः ॥ १४० ॥ न वै मुमुक्षुर्न बुभूषुरत्र न वै विवित्सुश्च कुतो बुभुक्षुः । नासत्यकामा अभवन्कुतश्चित्प्रदातरि प्राज्ञवरेऽनिलात्मजे ॥ १४१ ॥ दिनेदिने तत्र महान्नपर्वताः सभक्ष्यसारा रसवन्त ऊर्जिताः । नद्यः पयःसर्पिरजस्रपूर्णाः समाक्षिकाद्या अपि पायसह्रदाः ॥ १४२ ॥ ह्रदा महान्तस्त्रिदशादियोग्याः सुयोगयुक्ता हरिचन्दनादेः । तथाञ्जनालक्तकमुख्यमण्डनद्रव्याग्र्यवाप्यो मणिकाञ्चनोद्भवाः ॥ १४३ ॥ यथेष्टपानाशनभोगशिष्टाः सहस्रशो मारुतिनाऽपि कारिताः । गन्धा रसाद्याश्च समस्तभोगा दिवीव तत्रासुरतीवहृद्याः ॥ १४४ ॥ नैतादृशः कश्चन भूतपूर्वो मखो विना राम-

SGDF
Sri Gargeshwari Digital Foundation

विरिञ्चवज्रिणाम् । मखानिति प्रोचुरशेषलोका दृष्ट्वा मखं तं पुरुषोत्त-
मेरितम् ॥ १४५ ॥ स एवमद्धा हरिदैवतः क्रतुः पञ्चाश्वमेधात्मक उच्च-
कल्पः । दिनेदिने स्वृद्धगुणो बभूव मुदावहो वत्सरपञ्चकत्रयम् ॥१४६॥
यज्ञावसाने निखिलाश्च पाण्डवाः कृष्णा च पृथ्वीमखिलां सवित्ताम् ।
माङ्गल्यमात्रं दयिताशरीरे निधाय सर्वाभरणानि चैव ॥ १४७ ॥
समर्पयामासुरजे वरेण्ये व्यासे विभागाय यथोक्तमृत्विजाम् । प्रियो
विभागो यदमुष्य विष्णोरतो विभागार्थमिवार्पयंस्ते ॥ १४८ ॥ हृदा
समस्तं हरयेऽर्पितं तैः स हि द्विजस्थोऽपि समस्तकर्ता । देहेन्द्रिय-
प्राणमनांसि चेतनैः सहैव तस्मा अतिसृज्य नेमुः ॥ १४९ ॥
त्वदीयमेतन्निखिलं वयं च न त्वस्मदीयं क्व च किञ्चनेश । स्वतन्त्र
एकोऽसि न कश्चिदन्यः सर्वत्र पूर्णोऽसि सदेति हृष्टाः ॥ १५० ॥
ततो विभक्ते मुनयोऽवदंस्ते प्रत्यर्पयामो वयमेषु राज्यम् । पूर्णा
हिरण्येन वयं धरायाः प्रपालने योग्यतमा इमे हि ॥ १५१ ॥ पार्थाः
सभार्या द्विजवाक्यमेतन्निशम्य कृष्णाय पुनः प्रणम्य । ऊचुस्तपो
नोऽस्तु वनेऽर्पयित्वा राज्यं मखान्ते त्वयि धर्मलब्धम् ॥ १५२ ॥
इतीरितः प्राह स बादरायणो मुनीश्वरैरप्यभियाचितः प्रभुः । हिरण्य-
मेव स्वमिदं मुनीनां मदाज्ञया भुङ्ध्वमशेषराज्यम् ॥१५३॥ समर्पितं
मे फलवच्च तस्मात्पुनर्ग्रहो नैव च दोषकारी । पितामहोऽहं भवतां
विशेषतो गुरुः पतिश्चैव ततो मदर्हथ ॥ १५४ ॥ इतीरितास्ते प्रतिपद्य
राज्यं ददुर्हिरण्यं निखिलं च तस्मै । विभज्य विप्रान्स निजं च भागा-
मदात्पृथायै निखिलं प्रसन्नः ॥ १५५ ॥ सभार्यकाणां वररत्नभूषणा-
न्यशेषतः पुत्रभुवां प्रदाय । पृथक्पृथग्योग्यवरांस्तथैभ्यः प्रादात्प्रभुस्ते
मुदिताः प्रणेमुः ॥ १५६ ॥ तद्यज्ञपञ्चकमजस्त्रिगुणां स एभ्यः
सद्दक्षिणां क्रतुपतिर्निखिलामवाप्य । चक्रेऽश्वमेधत्रयमेकमेकं तेषां
हरिर्बहुसुवर्णकनामधेयम् ॥ १५७ ॥

SGDF
Sri Gangeshwari Digital Foundation

सकृष्णेष्वथ पार्थेषु सुस्नातावभृथेष्वलम् । पश्चेन्द्रवद्विराजत्सु स्तूयमानेष्वपीश्वरैः ॥ १५८ ॥ स्तूयमाने च तद्यज्ञे क्रोधो नकुलतां गतः । कृत्वोग्रगर्जनं यज्ञं तांश्च यज्ञकृतोऽखिलान् ॥ १५९ ॥ गर्हयन्नूचिवानित्थं भार्यापुत्रस्नुषान्वितः । सक्तुप्रस्थमदाद्विप्र उञ्छवृत्तिः सुभक्तितः ॥ १६० ॥ धर्मायातिथये तस्य कलां नार्हति षोडशीम् । यज्ञोऽयमिति हेतुं च विप्रैः पृष्टोऽभ्यभाषत ॥ १६१ ॥ अतिथेस्तस्य पादोदक्लिन्नपार्श्वो हिरण्मयः । एको ममाभूदपरः सर्वतीर्थोदकेष्वपि ॥ १६२ ॥ मज्जतोऽवभृथेष्वद्धा यज्ञानामत्र चादरात् । नाभूदित्यथ तत्तत्त्ववेदिभिर्मुनिपुङ्गवैः ॥ १६३ ॥ कृष्णेन च तमोऽन्धं तं प्रापयद्भिः स्मिते कृते । अदर्शनं जगामाशु तमः प्राप च कालतः ॥ १६४ ॥ तदर्थमेव हैरण्यः पार्श्वस्तस्याभवत्पुरा । कृष्णस्य पाण्डवानां च मखादेश्च गुणान्बहून् । वदन्तो भर्त्सयाश्चक्रुस्तन्मतज्ञा मधुद्विषः ॥ १६५ ॥ श्राद्धार्थं हि पयः पूर्वं जमदग्नेरदूषयत् ॥ १६६ ॥ नाकुलेनैव रूपेण क्रोधस्तं पितरोऽशपन् । भव त्वं नकुलस्तावद्यावद्धर्मादिकान्सुरान् ॥१६७॥ क्षेप्स्यसीति तमो घोरं भूयः पापेन यात्वयम् । इत्यभिप्रेत्य तैः शप्तस्तथा कृत्वा तमोऽभ्यगात् ॥ १६८ ॥ यद्यप्यल्पधनत्यक्तं वित्तं बहुफलं भवेत् । तथाप्यनन्तफलदाः कर्तुरेव महागुणाः ॥ १६९ ॥ सतां प्रीतिश्च तत्रापि सद्वरो हरिरेव हि । पार्थेभ्योऽभ्यधिकः कर्ता समो वा को गुणैर्भवेत् ॥ १७० ॥ सतां च प्रवरो विष्णुः सद्भिर्मुनिवरैर्युतः । प्रत्यक्षतः कारयति पार्थैः प्रियतमैश्च तैः ॥ १७१ ॥ यं मखप्रवरं तस्य समं किं शुभसाधनम् । पठन्ति पैङ्गिनश्चैतान्मन्त्रानन्वर्थकानिह ॥ १७२ ॥ 'अवैष्णवकृतं कर्म सर्वमन्तवदुच्यते । अनन्तं वैष्णवकृतं तत्र वर्णक्रमात्परम् ॥ १७३ ॥ वैष्णवैरपि मर्त्यैर्यत्कृतं शतगुणं ततः । गान्धर्वं कर्म तस्माच्च पितृभिर्मुनिभिस्ततः ॥ १७४ ॥ देवशक्रशिवब्रह्मकृतं तस्मात्क्रमेण च । शतोत्तर-

SGDF
Sri Gargeshwari Digital Foundation

मिति ज्ञेयं नान्यद्ब्रह्मकृतोपमम् ॥ १७५ ॥ वैष्णवत्वं क्रमाद्वृद्धं ब्रह्मान्तं जीवराशिषु । फलाधिक्यं कर्मणां हि विष्णोः प्रीत्यैव नान्यथा' ॥ ॥ १७६ ॥ इति तेन न पार्थानां कर्मणाऽन्यत्समं क्वचित् । गुणैर्ज्ञानादिभिः क्वापि तस्मात्क्रोधः स तामसः । विनिन्द्य तान्सुसत्वस्थांस्तमोऽन्धमुपजग्मिवान् ॥ १७७ ॥ अथ पृष्टो वासुदेवः सुरविप्रादिसंसदि । युधिष्ठिरेण संहृष्टो जगादाशेषतः प्रभुः ॥ १७८ ॥ ते च श्रुत्वाऽखिलान्धर्मान्भक्त्या परमया युताः । पूजयन्तो जगन्नाथमापुश्च परमां मुदम् ॥ १७९ ॥ (४९४३) इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये आश्वमेधिके त्रिंशोऽध्यायः ॥ ३० ॥

॥ अथ एकत्रिंशोऽध्यायः ॥

॥ ॐ ॥ यज्ञेश्वरेणाभियुतेषु भक्त्या महीं प्रशासत्सु पृथासुतेषु । यियक्षुरागान्निशि विप्रवर्यो युधिष्ठिरं वित्तमभीप्समानः ॥ १ ॥ प्रातर्ददानीति नृपस्य वाक्यं निशम्य विप्रस्त्वरितो मखार्थे । भीमं ययाचे स नृपोक्तमाशु निशम्य चादान्निजहस्तभूषणम् ॥ २ ॥ अनर्घ्यमग्निप्रतिमं विचित्ररत्नान्वितं विप्रवरस्तदाप्य । ययौ कृतार्थोऽथ च नन्दिघोषमकारयद्वायुसुतनुस्तदैव ॥ ३ ॥ अकालजं तं तु निशम्य राजा पप्रच्छ दूतैस्तमुवाच भीमः । यन्मर्त्यदेहोऽपि विनिश्चितायुरभून्नृपस्तेन ममास हर्षः ॥ ४ ॥ इतीरितोऽसौ नृपतिस्त्वरेत धर्मार्थमित्यस्य मतं प्रपूजयन् । जगाद साध्वित्यथ भूय एव धर्मे त्वरावानथ सम्बभूव ॥ ५ ॥

अथाम्बिकेयं विषयेषु सक्तं दुःसङ्गदुष्टं कृतभूरिदोषम् । समस्त-

SGDF
Sri Gargeshwari Digital Foundation

राजाप्ययहेतुभूतं विचार्य तं मारुतिरन्वकम्पत ॥ ६ ॥ अकुर्वतस्तीक्ष्णतपः कुतश्चिन्नैव स्वलोकाप्तिरमुष्य भूयात् । रागाधिकोऽयं न तपश्च कुर्यादि-त्यस्य वैराग्यकराणि चक्रे ॥७॥ आज्ञां परैरस्य निहन्ति सोदरैर्वधूजनै-रप्यभि(ति)पूजितेऽस्मिन् । स निष्टनत्येवमपीतरैः स्वैः(स)सं(सु)पूजितो नास तदा विरागः ॥ ८ ॥ सर्वेऽपि पार्थास्तमृते सभार्या वैचित्रवीर्यं परमादरेण । पर्यैव चक्रुः सततं सभार्यं कृष्णा च न स्यात्तनयार्तिमा-निति ॥ ९ ॥ स प्रीयमाणो नितरां च तेषु नैवाधिकं प्रीयते भीमसेने । स्मरन्सुतांस्तेन हतान्समस्तानपि प्रभावं परमस्य जानन् ॥ ॥ १० ॥ तस्यापनेतुं विषयेषु सक्तिं द्वेषं तथैवात्मनि भीमसेनः । जगाद माद्रीसुतयोः समक्षमास्फोट्य संशृण्वत एव तस्य ॥ ११ ॥ ताविमौ मे भुजौ वृत्तौ पीनौ चन्दनरूषितौ । ययोरन्तरमासाद्य जरठस्य सुता हताः ॥१२॥ यमौ तद(म)न्वमोदेतां तत्स्नेहाद्गौरवादपि । नैव तत्कृष्णया ज्ञातं पृथया च सपुत्रया ॥ १३ ॥ तच्छ्रुत्वोत्पन्ननिर्वेदं क्षत्ता ज्येष्ठस्य वर्धयन् । उवाच जीविताशा ते ननु राजन्गरीयसी ॥ ॥ १४ ॥ अहो गरीयसी जन्तोर्जीविताशा यया भवान् । भीमाप-वर्जितं पिण्डमादत्से गृहपालवत् ॥ १५ ॥ न चापराधो भीमस्य ब्रुवतस्त्वामिदं वचः । अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ ॥ १६ ॥ हृतं क्षेत्रं धनं यस्य किं भीमेन कृतं त्वयि । अलमासज्जत-स्तेऽद्य निर्वेदकरमीरितम् ॥१७॥ उपकाराय भीमेन तव द्वेषं त्यजात्र यत् । विमुच्य द्वेषकामौ त्वं वने तीर्थनिषेवकः ॥१८॥ तपसाऽऽराधय हरिं ततः पूतो भविष्यसि । इत्युक्तो द्वेषमुत्सृज्य भीमे निर्वेदमागतः ॥ ॥१९॥ अनुज्ञां तपसे प्राप्तुमुपवासपरोऽभवत् । अनश्नन्तं चतुर्थेऽह्नि धृतराष्ट्रं युधिष्ठिरः ॥२०॥ ज्ञात्वा सम्प्रार्थयामास भोजनार्थं पुनःपुनः । अनुज्ञां वनवासाय त्वत्तः प्राप्यैव सर्वथा ॥ २१ ॥ भोक्ष्येऽन्यथा नेति वदन्धृतराष्ट्रः श्रमान्वितः । उपवासकृशो भार्यां शिश्रिये मूर्च्छितः

SGDF
Sri Gangeshwari Digital Foundation

क्षणात् ॥ २२ ॥ शन्तमेन करेणाथ धर्मजस्तं मृदु स्पृशन् । शनैः सञ्ज्ञामगमयदब्रवीच्च सुदुःखितः ॥ २३ ॥ पुरस्कृत्य युयुत्सुं त्वं कुरु राज्यमकण्टकम् । वयमेव त्वदर्थाय कुर्मः सर्वे तपो वने ॥ २४ ॥ नेत्याह धृतराष्ट्रस्तं कुलधर्मो हि नो वने । अन्ते देहपरित्यागस्तन्ममाज्ञातुमर्हसि ॥ २५ ॥ तयोर्विवदतोरेवं कृष्णद्वैपायनः प्रभुः । सर्वज्ञः सर्वकर्तेश आविर्भूतोऽब्रवीन्नृपम् ॥ २६ ॥ तपसाऽशेषदोषाणां क्षयकाममिमं नृपम् । अनुजानीहि नैवास्य धर्मविघ्नकरो भव ॥ २७ ॥ काले निर्वेदमापन्नस्तपसा दग्धकिल्बिषः । शुभां गतिमयं यायादन्यथा न कथञ्चन ॥ २८ ॥ इत्युक्तो धर्मराजस्तमनुजज्ञे स चाशितः । शिक्षयामास सद्धर्मान्नीतिं च विदुषेऽप्यलम् ॥ २९ ॥ केवलस्नेहतो राज्ञे शुश्राव विनयात्स च । अनुज्ञाय गृहं प्राप्ते धर्मज्ञे(जे)विदुरं पुनः ॥ ३० ॥ श्राद्धाय वित्तमाकाङ्क्षन्प्रेषयामास तद्वचः । श्रुत्वा युधिष्ठिरो भीममाह दातव्यमद्य नः ॥ ३१ ॥ पुत्रपौत्राप्तबन्धूनां श्राद्धेच्छोर्वित्तमञ्जसा । तमाह भीमः पापानां विमुखानां मधुद्विषः ॥ पारलौकिकसाहाय्यं न कार्यमितरार्थतः ॥ ३२ ॥ तत्तेनापि हि वित्तेन पुत्रश्राद्धं करिष्यति । तज्ज्ञात्वा ददतां दोषो भवेदिति विचिन्तयन् ॥ ॥ ३३ ॥ कष्टात्कष्टतरं यान्तु सर्वे दुर्योधनादयः । भीष्मादीनां वयं श्राद्धकर्तारस्तेन किं ततः ॥ ३४ ॥ कानीनत्वात्तु कर्णस्य सहास्माभिः पृथैव हि । श्राद्धकर्मण्यधिकृता किं तस्मै दीयते धनम् ॥३५॥ इत्युक्तवन्तं नृपतिरर्जुनश्चोचतुः पुनः । यियासोर्याचमानस्य निजबाहुबलार्जितम् ॥ ॥३६॥ देहि वित्तं परमतः किं त्वमेषोऽभियाचते । इत्युक्तमपि नेत्येव ब्रुवाणं शुद्धधार्मिकम्॥३७॥ अप्रीत्या जोषमास्वेति प्रोच्योवाच युधिष्ठिरः। कोशतो यद्बहिर्वित्तं दानभोगादिकारणम् ॥ ३८ ॥ मम सन्निहितं सर्वं तत्पित्रे चार्पितं मया । एवमेवार्जुनोऽप्याह विदुरं पुनरूचतुः ॥ ॥ ३९ ॥ मुख्यधर्मरते भीमे न पिता क्रोद्धुमर्हति ॥ ४० ॥ इत्युक्तो

SGDF
Sri Gargeshwari Digital Foundation

वित्तमादाय गत्वा क्षत्ताऽग्रजेऽब्रवीत् । युधिष्ठिरार्जुनौ भक्तिं नितरां त्वयि चक्रतुः ॥ ४१ ॥ नातिहृष्टस्त्वदाज्ञाया भीमस्तन्मा क्रुधोऽत्र च । शुद्धे क्षत्रियधर्मे हि निरतो यद्वृकोदरः ॥ ४२ ॥ नृपार्जुनौ धर्मरतावपि लोककृपापरौ । अजातकोपस्तच्छ्रुत्वा धृतराष्ट्रः प्रशान्तधीः ॥ ॥ ४३ ॥ कृत्वा श्राद्धानि सर्वेषां महादानान्यनारतम् । दशरात्रं ददौ शुद्धमनसा निर्ऋणत्वधीः ॥ ४४ ॥

सर्वं समर्प्य गोविन्दे पार्थेभ्योऽन्येभ्य एव च । स्वजनेभ्यः समादाय स्ववन्नेत्रेभ्य उच्चधीः ॥ ४५ ॥ अनुज्ञां निर्गतः प्राह पौरजानपदान्नृपः । धर्मतो रक्षिता यूयमस्मत्पूर्वैर्महात्मभिः ॥ ४६ ॥ न चाहं परमस्नेहाद्युष्माभिः सुकृपालुभिः । अरक्षितेति कथितः प्रमादादपि सज्जनाः ॥ ४७ ॥ इष्टं च यज्ञैः पूर्तैश्च चरितं युष्मदाश्रयात् । पुत्रस्तु मम पापात्मा सर्वक्षत्रविनाशकः ॥ ४८ ॥ सर्वातिशङ्की मूढश्च वृद्धानां शासनातिगः । सौभ्रात्रं येन संत्यज्य पाण्डवेषु महात्मसु । कृतं विरूपं सुमहत्कुर्याद्यन्नापरः क्वचित् ॥ ४९ ॥ अप्रियाणि च कृष्णस्य सुबहून्याचरत्कुधीः । प्रायस्तेनापि मन्देन युष्मास्वप्यशिवं कृतम् ॥ ५० ॥ भ्रातरोऽस्य च सर्वेऽपि तच्छीलमनुवर्तिनः । हताश्च स्वेन पापेन ससुतामात्यबान्धवाः ॥ ५१ ॥ सोऽहं वयोगतश्चैव पुत्रादिभिरभिप्लुतः । तत्सम्बन्धात्कृ(न्धकृ)तं पापं स्वकृतं चाप्यपेशलम् ॥ ५२ ॥ पाण्डवेषु सकृष्णेषु तपसा मार्ष्टुमुद्यतः । तत्र मामनुजानीध्वं कृपया मित्रवत्सलाः ॥ ५३ ॥ मत्प्रियार्थमपि स्नेहः पाण्डवेषु महात्मसु । क्रियमाणोऽपि कर्तव्यो भूय एव सदाऽचलः ॥ ॥ ५४ ॥ ते हि मे पुत्रकाः सन्त इहामुत्र च सौख्यदाः । इत्युक्ते स्वगुणानुच्चैः कीर्तयद्भिः सुदुःखितैः ॥ ५५ ॥ पर्यश्रुनयनैः कृच्छ्रात्पौरजानपदैश्चिरात् । अनुज्ञातो ययौ पार्थैरनुयातः सुदूरतः ॥ ५६ ॥ सञ्जयो विदुरश्चैनं सभार्यमनुजग्मतुः । अनुवव्राज तं कुन्ती वनाय

SGDF
Sri Gargeshwari Digital Foundation

कृतनिश्चया ॥ ५७ ॥ वार्यमाणाऽपि तनयैः सभार्यैर्भृशदुःखितैः । संस्थाप्य तान्सुकृच्छ्रेण ययौ साऽन्वेव तं नृपम् ॥५८॥ सन्दर्शितपथो राजा कुन्तीविदुरसञ्जयैः । गान्धारीसहितः प्राप कुरुक्षेत्रं जगद्गुरोः ॥ ॥ ५९ ॥ क्रमेणैवाश्रमं व्यासदेवस्य सुरपूजितम् ॥ ६० ॥ त्रिवत्स-रेणा(राद)स्य निजस्य लोकप्राप्तिं सभार्यस्य जगाद तत्र । ब्रह्माङ्गजस्तेन भृशं प्रतीतो व्यासोपदिष्टं व्यचरत्तपोऽग्र्यम् ॥ ६१ ॥

सक्षत्तृगान्धारिपृथे ससञ्जये तपोभिराराधयति प्रभुं हरिम्। वैचित्र-वीर्येऽत्र सदारबन्धुभृत्याश्च पार्था दृशये समाययुः ॥६२॥ क्षत्तैकतामत्र युधिष्ठिरेण प्राप्तोऽथ भार्यासहितं ससञ्जयम् । उपास्यमानेषु विचित्र-वीर्यपुत्रं पृथां चैव पृथासुतेषु ॥ ६३ ॥ प्रादुर्बभूवामितशक्तितेजो-ज्ञानाद्भुतैश्वर्यसुखादिरूपः । व्यासो हरिस्तत्र समीक्ष्य सर्वे सम्पूजया-मासुरुदग्रभक्त्या ॥ ६४ ॥ तैः पूजितस्तत्र निषण्ण आह यद्यद्यदिष्टं प्रवदन्तु तत्तत् । दास्यामि तस्याद्य तदित्यमुष्मिन् भक्त्युच्छ्रयः पाण्डुसुतैः सदारैः ॥६५॥ वृतोऽत्र कुन्तीरविसूनुजन्ममृत्यूत्थदोषापगमं ययाचे ॥६६॥ तेषां प्रदत्तेष्वभिवाञ्छितेषु वैचित्रवीर्यः सह भार्ययैव । सम्मन्त्र्य निःशेषरणेहतानां सन्दर्शनं प्रार्थितवांस्तमीशम् ॥ ६७ ॥ ततस्तु ते सत्यवतीसुतस्य सर्वेश्वरस्याज्ञया सर्व एव । समागताः स्वर्ग-लोकात्क्षणेन दत्ता च दिव्या दृगमुष्य राज्ञः ॥ ऊषुश्च रात्रिं परमाज्ञयैव सर्वे स्वभार्यासहिता यथा पुरा ॥ ६८ ॥ तृप्तः सदारो नृपतिश्च तत्र सर्वेऽपि दृष्ट्वा परमाद्भुतं तत् । अथाज्ञयैवास्य परस्य सर्वाः स्त्रियो निजेशैः सहिता ययुः स्वः ॥ ६९ ॥ विनोत्तरां तां तु कथां निशम्य पारीक्षितोऽयाचत तातदृष्टिम् । तं चानयामास तदैव कृष्णो ह्यचिन्त्य-शक्तिः स विकुण्ठलोकात् ॥ ७० ॥ दृष्ट्वा स पारीक्षित आप तुष्टिं स्वतातमीशेन समाहृतं पुनः । सम्पूज्य तं कृष्णमपीशवन्द्यं क्षमापया-मास परीक्षितात्मजः ॥ चक्रे च विस्रम्भमतीव भारते पुनश्च तत्र

SGDF
Sri Gargeshwari Digital Foundation

स्व(त्य)जनैः समेतः ॥ ७१ ॥

पार्थाः पुनः प्राप्य पुरं स्वकीयं धर्मेण पृथ्वीं परिपालयन्तः । भोगानरागा अजुषन्त योग्यान्युक्ता जगद्धातरि वासुदेवे ॥ ७२ ॥ वर्षत्रयान्तेऽत्मसमाहिताग्निं त्यक्ताग्निभिस्तैर्वनमालिहद्भिः । ते शुश्रुवुर्धृतराष्ट्रं सभार्यं सहैव कुन्त्या परिदग्धदेहम् ॥७३॥ वीटा(व्रीळा)मुखं ध्यानपरं निशम्य स्वर्यान्तमात्मीयपितृव्यमाशु । समेत्य भर्त्रा प्रतिपूज्यमानां कुन्तीं च तप्ता विदधुः क्रियाश्च ॥ ७४ ॥ ते विष्णुभक्त्या परिपूतकर्मभिर्ज्ञानेन चान्ते तमनुस्मरन्तः । पार्थैः सुपुत्रैः सुकृतोर्ध्वकर्मभिर्वृद्धिं शुभस्यापुरनप्ययां शुभाः(म्) ॥ ७५ ॥ गावद्गणिन्र्याससकाशमेत्य शुश्रूषया तस्य पुनर्निजां गतिम् । प्रपेदिवान्पाण्डुसुताश्च कृष्णं प्रतीक्षमाणाः पृथिवीमशासन् ॥ ७६ ॥ अष्टादशाब्दाः पृथिवीं समस्तां प्रशासतामेवमगुर्महात्मनाम् । अरिक्तधर्मार्थसुखोत्तमानामनुज्झितानन्तपदस्मृतीनाम् ॥ ७७ ॥ (५०२०) इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये धृतराष्ट्रस्वर्गारोहणं नाम एकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ अथ द्वात्रिंशोऽध्यायः ॥

॥ ॐ ॥ ततः कुरुक्षेत्रमवाप्य कृष्णो दीक्षां प्रपेदे द्विषडब्दसत्रे । स एव च व्यासभृगूद्वहात्मा चक्रेऽत्र सादस्यमजोऽप्रमेयः ॥१॥ तत्रर्त्विजो दक्षभृगुप्रधानाः पार्था यदूनां प्रवरैः समेताः । ब्रह्मेशशक्रप्रमुखाः सुराश्च चक्रुः सुसाचिव्यमनन्तदासाः ॥२॥ सर्वे च जीवा वसुधातलस्था येऽन्येऽन्तरिक्षद्युमुखोत्तरेषु । वसन्ति नारायणपादसंश्रयास्ते चात्र सर्वे मुमुदुः सनागाः ॥३॥ सुनिर्णयस्तत्त्वविनिर्णयार्थिनां तत्त्वस्य चाभूदिह वादशी-

SGDF
Sri Gargeshwari Digital Foundation

लिनाम् । मिथो विवादात्सुरभूसुराणां वाक्याद्धरेर्व्यासभृगूद्वहात्मनः ॥४॥ धर्मार्थकामानखिलानवापुस्तदर्थिनो मुक्तिमपीह कृष्णात् । यथेष्टपानाशनवाससो जना विचेरुरत्रामरमानवादयः ॥५॥ क्षेत्रं तदासीद्धरिलोकसंमितं यदीयुरत्राखिलसज्जना युतिम् । नानाप्तकामाश्च (यत)तो बभूवुर्निर्यत्नदृश्यश्च यतोऽत्र केशवः ॥६॥ द्वादशाब्दं महासत्रमेवमेतादृशं हरिः । समाप्यावभृथस्नातः पूजयित्वाऽखिलाञ्जनान् ॥ ७ ॥ अनुजज्ञे क्रमेणैव वत्सरेण समागतान् ।

स्वकुलं सञ्जिहीर्षुः स विप्रशापमजीजनत् ॥ ८ ॥ उपदिश्य परं ज्ञानमुद्धवायामुनाऽऽश्रमम् । बदर्याख्यं प्रापयित्वा सप्तमाब्दं शतोत्तरम् ॥ ९ ॥ प्रतीक्षन्पालयामास पार्थैः सह भुवं प्रभुः । समारब्धं कलियुगं यदा दुर्योधनोऽपतत् । षट्त्रिंशाब्दं पुनः कृष्णः कृतमेवान्ववर्तयत् ॥ १० ॥ कृतादपि विशेषोऽयं यत्पुण्यस्याधिकं फलम् । अल्पमेव च पापस्य कालात्कृष्णाज्ञया तथा ॥ ११ ॥ एवं सुधार्मिके लोके हरिभक्तिपरायणे । नष्टेषु कलिलिङ्गेषु युगवृत्तिमभीप्सवः ॥ १२ ॥ ब्रह्मरुद्रादयो देवाः स्तुत्वा केशवमव्ययम् । व्यज्ञापयन्स्वलोकाप्तिमोमित्याह स चाच्युतः ॥१३॥ प्राचुर्ये सज्जनस्य स्यान्न कलेर्वृद्धिरञ्जसा । इति स्वकुलसंहृत्यै प्रभासमनयत्प्रभुः ॥१४॥ पुण्यक्षेत्रेऽपि न मृतिः स्वगृहेऽप्यतिधर्मदा । गत्वैवाल्पमपि क्षेत्रं स्यान्महत्फलमित्यजः ॥१५॥ प्रकाशयितुमेवैतान्प्रभासाय कुशस्थलात् । नीत्वा दानानि सद्धर्मास्तैरकारयदच्युतः ॥ १६ ॥ ते ततः शापदोषेण कृष्णेनैव विमोहिताः । मैरेयमत्ता अन्योन्यं निपात्य स्वां तनुं गताः॥ ॥ १७ ॥ तद्दृष्ट्वा बलदेवोऽपि योगेन स्वां तनुं जहौ ॥ १८ ॥

ततः परेऽशोगणितानुभावः स्वसारथिं पाण्डवानां सकाशम् । स्वलोकयानप्रतिबोधनाय स्वस्यानु चैषां त्वरयाऽभ्यपात्तयत् ॥ १९ ॥ अथाऽऽसतः पिप्पलमूल ईशितुरूरुस्थितं पादतलं सुताम्रम् । दृष्ट्वा

SGDF
Sri Gargeshwari Digital Foundation

जरा नाम ससर्ज शल्यं भक्तोऽप्यलं रोहितं शङ्कमानः ॥ २० ॥
अच्छेद्याभेद्यदेहस्य शल्ये पादमुपस्थिते । समीपमागतो व्याधो दृष्ट्वा
भीतोऽपतद्भुवि ॥ २१ ॥ विप्रवाक्यं मानयानः कारयित्वाऽमुना हरिः ।
पापं मां जहि देवेति याचन्तमनयद्दिवम् ॥ २२ ॥ पादप्रहारदोषेण
तं भृगुं व्याधतां गतम् । पश्चात्तापेन भक्त्या च सुप्रीतस्तच्छरीरिणम् ।
स्वाज्ञाप्राप्तविमानेन दिवं निन्ये जनार्दनः ॥ २३ ॥ नीचा योनिर्नी-
(नीचां योनिं नी)च नीचकर्माप्तं नीचकर्मतः । अदुष्टत्वात्तु मनसो भक्ति-
लोपो न चाप्यभूत् ॥२४॥ भृगोरत्राबुद्धिपूर्वं नातिदोषकृदप्यभूत् ॥२५॥
ततो विरिश्चेशपुरन्दराद्याः पुरः स्तुवन्तोऽभिययुः प्रणम्य । कृष्णं स
चाश्वेव ययौ स्वलोकं स्वतेजसा सर्वमिदं प्रकाशयन् ॥ २६ ॥ गोपाल-
मन्त्रं भजतां फलप्रदस्त्वेकेन रूपेण स भुव्यदृश्यः । तस्थौ द्वितीयेन
च सूर्यमण्डले तृतीयमासीच्छिवपूजितं वपुः ॥ २७ ॥ सम्पूजितं
ब्रह्मलोके चतुर्थं कञ्जोद्भवेनाथ परं स्वधाम । समाप्तवानं वपुरस्य पश्चमं
भक्त्यान्वयुर्देववराः स्वशक्त्या ॥ २८ ॥ तत्तेजसा ते प्रविमुष्टदृष्टयः
पुरुष्टुताद्या अमितोरुदीधितेः । यावत्स्वगम्यं त्वनुगम्य तस्थुर्निमीलि-
ताक्षा विहतोर्ध्वचाराः ॥ २९ ॥ वीन्द्रेशशेषानुगतः स्वयम्भूर्धामप्रविष्टं
तमजं प्रणम्य । वीन्द्रादिकैरप्ययुतः स्वपित्राऽऽश्लिष्टो रहश्चाकथयत्तथाऽ-
स्तौत् ॥ ३० ॥ स पूर्वरूपेण समाप्य चैक्यं विभज्य चेच्छानुसृतोऽथ
रेमे । हरिः श्रिया ब्रह्ममुखैश्च मुक्तैः सम्पूज्यमानोऽमितसद्गुणात्मा ॥
॥ ३१ ॥ ब्रह्माऽपि शर्वादियुतः स्वलोकं प्राप्तः पुनस्तत्र गतं च
कृष्णम् । रेमेऽभिपश्यन्प्रतिपूजयंस्तं सुराश्च सर्वे रविबिम्बसंस्थम् ॥
॥ ३२ ॥ यतो न दर्शिता भ्रान्तिः प्रादुर्भावेष्वपि क्वचित् । देहत्या-
गानुसारेण हरिणा तदिहाच्युतः ॥ ३३ ॥ मोहयित्वाऽसुरानन्धन्तमः
प्रापयितुं प्रभुः । चिदानन्दैकदेहोऽपि त्यक्तं देहमिवापरम् । सृष्ट्वा
स्वदेहोपमितं शयानं भुव्यगाद्दिवम् ॥ ३४ ॥

SGDF
Sri Gargeshwari Digital Foundation

दारुकोक्त्या समायातः पार्थस्तमदहत्तदा ॥ ३५ ॥ रौहिणेयादिकानां च शरीराणि प्रधानतः । दारुको विष्णुलोकं तु पुनराप यथागतम् ॥३६॥ तथैव जनमोहाय प्राप वह्नावदृश्यताम् । रुक्मिण्यगाद्धरेः पार्श्वं सत्या कृत्वा तपस्तथा ॥ ३७ ॥ चिदानन्दैकदेहेऽपि द्विरूपे इव ते यतः । एकैवातः कृष्णवत्ते दुष्टान्मोहयतस्तथा ॥ ३८ ॥ अन्या महामहिष्यस्तु त्यक्त्वा देहं हुताशने । काश्चित्काश्चिच्च तपसा त्यक्तदेहा हरिं ययुः ॥ ३९ ॥ रौहिणेयादिकानां च भार्या वह्निमुखे तनुम् । त्यक्त्वा स्वभर्तॄनेवापुः सर्वा एव पतिव्रताः ॥४०॥ वसुदेवः पार्थमुखाच्छ्रुत्वैतद्योगमास्थितः । त्यक्त्वा देहं कश्यपत्वं प्राप कृष्णानुरागतः ॥ ४१ ॥ तस्यार्जुनोऽश्वमेधाग्नावन्त्यकर्माकरोत्तदा । त्यक्तदेहास्तस्य भार्या वह्नौ प्रापुस्तमेव च ॥ ४२ ॥ स्त्रियो बालांस्तथाऽऽदाय धनं चैव धनञ्जयः । विनिर्ययौ द्वारवत्यास्तां च जग्रास सागरः ॥ ४३ ॥

स्त्रीबालसहिते पार्थ एकस्मिन्पथि गच्छति । शापात्सुपापा आभीराः स्त्रीजनाञ्जह्रुरुद्धताः ॥ ४४ ॥ यास्ताः षोडशसाहस्रवनिताः शतसंयुताः । कृष्णशापान्म्लेच्छवशं ययुर्दर्पनिमित्ततः ॥४५॥ ह्रियमाणे धने चैव वनितासु च वासविः । युयुत्सुर्गाण्डिवं सज्यं कृच्छ्रेणैव चकार ह ॥४६॥ क्षीणास्तस्य शरा दैवान्नास्त्राणि स्मृतिमाययुः । स तद्दैवकृतं ज्ञात्वा संस्मरन्पुरुषोत्तमम् । निघ्नन्शत्रून्गाण्डिवेन शेषं रक्षन्कुरूनगात् ॥ ४७ ॥ तदा कुरुक्षेत्रगतं जगद्गुरुं सुपूर्णविज्ञानबलाब्धिसत्सुखम् । तमेव वासिष्ठकुलोद्भवं हरिं निरीक्ष्य दुःखेन पपात पादयोः ॥४८॥ स तेन पुंसां प्रवरेण हेतुभिः सम्बोधितोऽज्ञानतमोंऽशुमालिना । संस्थाप्य चेतः पुनरेव तस्मिञ्जहौ शुचः प्रायश एव धैर्यात् ॥४९॥ स्त्रियो म्लेच्छहृताः कृष्णप्रेषिताद्दाल्भ्यतः पुनः । गोविन्दैकादशीं श्रुत्वा कृत्वा सारस्वते जले ॥ ५० ॥ निमज्ज्य

SGDF
Sri Gargeshwari Digital Foundation

वायोर्वचनात्त्यक्तदेहा दिवं ययुः ।

अर्जुनस्तु कुरुक्षेत्रे हार्दिक्ययुयुधानयोः । सुतौ सारस्वते चैव देशे राज्येऽभ्यषेचयत् ॥ ५१ ॥ अनिरुद्धसुतं वज्रं प्रियं कृष्णस्य सद्गुणम् । स शूरसेनेन्द्रप्रस्थराजानमकरोद्वशी ॥ ५२ ॥ स्त्रीबालांश्च धनं चैव तस्मिन्संस्थाप्य फल्गुनः । ययौ भ्रातॄनशेषं च वृत्तं तेषामवर्णयत् ॥ ५३ ॥ ते वै वियोगसमयं स्मरन्तो मुरवैरिणः । अभ्यषिञ्चन्भागवतं महाराज्ये परीक्षितम् ॥ ५४ ॥ स्त्रीहारिणां च म्लेच्छानां वधायैनमयोजयन् । कृतं च तेन तत्कर्म वोढ्रा पैतामहीं धुरम् ॥५५॥ समयं परिरक्षद्भिर्न पार्थैरेव तत्कृतम् ॥ ५६ ॥ वासुदेवपदा स्पृष्टभूकण्टकसमुद्धृतिः । समयः पाण्डवानां हि तस्यैवानुगतिः परम् ॥५७॥ अनुव्रजद्भिर्विश्वेशं नास्माभिर्भूस्तदुज्झिता । भोक्ष्या रक्ष्याऽपि वा तेषामित्येव समयः पुरा ॥ ५८ ॥ तत्र काली भीमभार्या वैष्णवं योगमास्थिता । कृष्णयैकत्वमापन्ना त्यक्त्वा देहं तु मानुषम् ॥ ५९ ॥ सुभद्राद्यास्तु या भार्याः पार्थानां तु तदाज्ञया । युयुत्सुश्चात्र शिक्षार्थं पौत्रस्यैवावसन्पुरे ॥ ६० ॥

सन्त्यज्य राजचिह्नानि वैष्णवं योगमास्थिताः । वीराध्वानं ययुः सर्वे कृष्णया सह पाण्डवाः ॥ ६१ ॥ प्रागुदीचीं दिशं पूर्वं ययुस्तत्रार्जुनो धनुः । नात्यजल्लोभतस्तत्तु समुद्रमुप पावकः । दृष्ट्वा ययाचे राजानं तदुक्तः प्रास्यदम्बुधौ ॥ ६२ ॥ प्रातिभाव्यं तु वरुणे निस्तीर्याग्निरदृश्यताम् । ययौ तेऽपि ययुः क्षिप्रं प्लवन्तः सप्तवारिधीन्॥ ॥ ६३ ॥ अहोभिः सप्तभिर्योगं समारूढाः प्रदक्षिणम् । कृत्वा क्वचिदसज्जन्त आसेदुर्गन्धमादनम् ॥६४॥ तत्र नारायणक्षेत्रे तेषां तन्वोऽपतन्क्रमात् । द्रौपदीसहदेवादिपश्नानां तत्र मारुतिः ॥६५॥ सदेहनाकानिच्छ(च्छु)त्वाद्देहप्रपतनं हि तत् ॥ ६६ ॥ तेषामिहेति याथार्थ्यं जानन्पप्रच्छ धर्मजम् । केन केनापतद्देहो दोषेण न इति क्रमात् ॥६७॥

SGDF
Sri Gargeshwari Digital Foundation

मृतिकाले हि यो यस्य दोषं वक्त्यृणमोचनम् । तस्मात्स्यादुक्तदोषस्ये-
त्याह तच्छ्रुतिरेव तत् ॥ ६८ ॥ ऋणमोक्ष(ण)ाय सर्वेषां भीमो दोषान-
वादयत् ॥ ६९ ॥ सोऽपीच्छापतितान्देहानजानञ्शुद्धकर्मणाम् । अपश्य-
न्कारणं प्राह दोषात्स्यादेवमित्यपि । राजा सम्भावनामात्रान्न हि कार्य-
मकारणम् ॥ ७० ॥ स्वच्छन्दमृत्यवो योगाद्देहानुत्सृज्य पाण्डवाः ।
कृष्णा चापुः परं स्थानं यन्नायान्त्यपि देवताः ॥ ७१ ॥ इति श्रुतेर्न
ते पापाद्देहांस्तत्यजुरूर्जिताः ॥ ७२ ॥ ऋणान्युन्मुच्य दोषोक्त्या स्वानां
भीमः स्वकां तनुम् । तत्याज परमं ध्यायन्नाप च स्थानमुत्तमम् ।
इति स्कान्दपुराणोक्तं व्यासवाक्यमृषीन्प्रति ॥ ७३ ॥ भीमादृते हि
चतुर्षु पक्षपातस्तु वासवौ । योग्य एवेति कृष्णाया न दोषः
स्यात्कथञ्चन ॥ ७४ ॥ नीतिरूपे वीर्यबले महान्त्येषां यतः क्रमात् ।
प्राणत्वाद्भोगशक्तिश्च न हि दोषाय मारुतेः ॥ ७५ ॥ यथा स्वरूप-
विज्ञानमात्मन्यपि न दोषकृत् । इति व्यासस्मृतेरेषामुक्तदोषोद्भवः
कथम् ॥ ७६ ॥ कदाचिदतिमानोऽपि त्रयाणामेषु जायते । तथाऽपि
तत्फलं नैतत्तारतम्यं हि मुक्तिगम् ॥ ७७ ॥ गुणदोषाधिकाल्पत्वादत्र-
स्थमपि हि श्रुतम् । प्रारब्धकर्मनाशे हि पतेद्देहोऽप्यपापिनः ॥७८॥
युधिष्ठिरोऽपि हि स्वर्गं बुभुजे नैव तत्तनुः । अतिमानादयो दोषाः
कुत एव हि मारुतेः ॥७९॥ अनादिकालतः सर्वदोषहीना गुणाधिकाः ।
सर्वजीवगणेभ्यो ये ते हि वायुत्वमाप्नुयुः । ऋजवो नाम ये देवा देवा-
नामपि देवताः ॥ ८० ॥ अभावं ह्यतिमानादेर्भीमस्याह च केशवः
॥ ८१ ॥ यत्किञ्चात्मनि कल्याणं सम्भावयसि पाण्डव । सहस्रगुण-
मप्येतत्त्वयि सम्भावयाम्यहं ॥ ८२ ॥ इति तस्माद्यथा युद्धे धर्महानि-
ममन्यत । एवमत्राप्यधर्मेण देहपातं नृपोऽब्रवीत् ॥ ८३ ॥ पूज्येभ्यः
पूर्वमेवैषां देहपातमभीप्सताम् । तत्कामाद्देहपातोऽभून्न पापान्मुच्यतां
यथा ॥ ८४ ॥ न हि पापफलं मुक्तौ देहपातः कथञ्चन । किन्तु

SGDF
Sri Gargeshwari Digital Foundation

कर्मक्षयादेव तथा सर्वत्र निश्चितः ॥ ८५ ॥

तेषु स्वलोकान्प्राप्तेषु धर्मजः स्वात्मना सह । ययौ पुरो देवरथस्तदाऽस्यावततार ह ॥८६॥ रथमारुहेति कथितो रथिना पुरतः शुनः । आरोहमब्रवीन्नैतद्युक्तमित्याह सोऽपि तम् (तु) ॥ ८७ ॥ नारुहेयं विना श्वानमिति तेन स्थिरोदिते । स्वरूपं दर्शयामास धर्मो ह्यात्तः श्वरूपताम् ॥ ८८ ॥ आनृशंस्यपरत्वेन कीर्तिमेवात्मनो वृषः । ख्यापयामास कौन्तेयरूपिणो धर्मसूक्तिभिः ॥८९॥ ततः स रथमारुह्य लोकानामुत्तरोत्तरम् । अतिक्रम्याखिलान्प्राज्ञो जगाम श्रीपतिप्रियः ॥ ९० ॥ सर्वेषामुत्तरं लोकमैन्द्रं प्राप्येदमेव ते । स्थानमित्युदितो देवैर्दुर्योधनमवैक्षत ॥ ९१ ॥ सभ्रातृकं ज्वलन्तं च सर्वेषामुपरि स्थितम् । तं दृष्ट्वा परमक्रुद्धो निमील्यनयने शुभे ॥ ९२ ॥ भ्रातरो मे क्व कृष्णा च कर्णाद्याः क्व च बान्धवाः । धृष्टद्युम्नादयः पुत्रा हैडिम्बाद्याश्च सर्वशः ॥ ९३ ॥ यादवाश्चेति पप्रच्छ देवास्ते च तमब्रुवन् । किं ते तैः स्वकृतं कर्म भुज्यतेऽत्र न चापरैः ॥ ९४ ॥ इत्युक्त आह पापोऽयं पृथिवीक्षयकारकः । सर्वातिशङ्की मित्रध्रुङ्नारायणपराङ्मुखः ॥ ९५ ॥ नास्तिकोऽतिशठः क्रूरो द्वेष्टा विष्णोश्च तद्भुवाम् । कथं दुर्योधनः स्थानं सर्वोत्तममवाप्तवान् ॥ ९६ ॥ कथं च सर्वधर्मज्ञा नारायणपरायणाः । संस्थिताः परमे धर्मे दृश्यन्तेऽत्र न मत्प्रियाः ॥ ९७ ॥ यत्र सन्तस्तु ते सन्ति तत्र स्थातव्यमेव मे । निरयेऽपि न चात्रापि ह्यनेन सह पापिना ॥ ९८ ॥ अस्य वीरतमस्येदं धार्तराष्ट्रस्य युज्यते । इत्युक्त्वा देवता दूतं स्वानां सन्दर्शनार्थिनः ॥ ९९ ॥ राज्ञः सम्प्रेषयामासुस्तत्सन्दर्शितवर्त्मना । दुर्गन्धेन सुकृच्छ्रेण तमसा प्रावृतेन च ॥ १०० ॥ गत्वैव कियतीं भूमिं तद्दुर्गन्धासहो नृपः । इच्छन्निवर्तनं तत्र स्वानां वाच इवाशृणोत् ॥१०१॥ क्षणं तिष्ठ महाराज सन्निधानबलात्तव । वेदना नो न महतीत्येतच्छ्रुत्वा युधिष्ठिरः ॥ १०२ ॥ के

SGDF
Sri Gargeshwari Digital Foundation

यूयमिति पप्रच्छ दीनध्वनिविशङ्कितः । भीमोऽहमर्जुनः कर्ण इत्याद्युक्तमिवाश्रृणोत् ॥ १०३ ॥ श्रुत्वा तत्कृपयाऽऽविष्टः शोकामर्षसमन्वितः । आह दूतं यथेष्टं त्वं गच्छ नाहमितो व्रजे ॥ १०४ ॥ न च स्वर्गेण मे कार्यं त्यक्त्वा स्वजनमीदृशम् । इत्युक्तः प्रययौ दूतस्तस्थावत्र(वेव) युधिष्ठिरः ॥ १०५ ॥ ततोऽत्र देवाः पुरुहूतपूर्वकाः समाययुः स्नेहवशाद्युधिष्ठिरे । तेष्वागतेष्वेव न तत्र वाचो दीना न दुर्गन्धतमोऽप्यपश्यत् ॥ १०६ ॥ स्वर्गोत्तमं देशमपश्यदेतदभ्रान्तचेताः स युधिष्ठिरस्तदा । आहात्र धर्मः पुनरात्मसद्यशः प्रकाशयन्पाण्डुसुताभिधं स्वम् ॥ १०७ ॥ धर्माद्विशिष्टा हि सदाऽनृशंसता दृष्टा च सा त्वय्यधिका त्रिशो मया । शक्रोऽप्युवाचैनमिदं मृषा ते प्रदर्शितं द्रोणकृते मृषागिरः ॥ १०८ ॥ कृच्छ्रादिदं ते कथितं न चातिविस्रम्भ आसीत्तव कृष्णवाक्ये । न ह्याज्ञया वासुदेवस्य किञ्चित्पापं भवेत्सर्वविधर्मिणोऽपि ॥ १०९ ॥ ब्रह्मापरोक्षेऽपि विकर्म सूचकं प्रारब्धपापस्य विषाशनं यथा । पश्यात्र भीमप्रमुखान्सुखस्थान्सम्पूज्यमानांस्त्रिदशैः सुरूपान् ॥ ११० ॥ कुतः परब्रह्मदृशां सुशुद्धसत्कर्मणां विष्णुपरायणानाम् । परेण योगेन विसृष्टतन्वां दुःखं भवेद्देववराधिपानाम् ॥ १११ ॥ एते हि देवप्रवराः पृथिव्यां जाता भुवो भारजिहीर्षुमीशम् । प्रतोष्य तद्भावितबुद्धिकर्मभिः पुनश्च तेनैव सहाऽपिरे दिवम् ॥ ११२ ॥ न ते नृपाद्यापि हि मानुषो गतो भावस्ततो द्वेष्टि सुयोधनादीन् । निमज्ज्य तद्विष्णुपदोदकेऽत्र विसृज्य देहं भज देवभावम् ॥ ११३ ॥ सुयोधनाद्या यदिमे सुपापा आरब्धपुण्यक्षयमाप्य नित्ये । निःशेषसौख्योज्झितनित्यदुःखेऽवशाः पतिष्यन्त्यपुनर्निवृत्ताः ॥ ११४ ॥ देवांशजा ये तु समस्तशस्ते स्वमूलरूपं समवाप्य काले । स्वतारतम्यानुसृतां विमुक्तिं प्राप्स्यन्ति नात्रापि विचार्यमस्ति ॥ ११५ ॥ इत्युक्त आश्वेव निमज्ज्य गङ्गां धर्मात्मजस्तत्र विसृज्य देहम् । सद्यो बभौ दैवतमाप्य कायं विसृष्ट-

SGDF
Sri Gangeshwari Digital Foundation

रोषादिसमस्तदोषः ॥ ११६ ॥

स तु प्रपश्यन्स्वजनं समस्तं स्वमूलरूपातिसमीपसंस्थम् । ददर्श भीमं च मरुत्समीपे मध्ये ज्वलन्तं मरुतां गणस्य ॥ ११७ ॥ ददर्श कृष्णामपि तत्समीपे श्रिया ज्वलन्तीं समतीत्य चान्याः । स्प्रष्टुं च संस्कारवशादियेष निषिध्य तं प्राह सुराधिराजः ॥ ११८ ॥ एषा हि साक्षाज्जगतां प्रियस्य प्राणात्मनो जीववरेश्वरस्य । प्राणप्रिया श्रीरिति नाम यस्याः शमात्मकेऽस्मिन्रमते सदैका ॥ ११९ ॥ युष्मच्चतुर्देह-गतस्य वायोर्वायुप्रिया भीमतनोस्तथैव । भोगाय सृष्टा पुरुषोत्तमेन युष्मत्प्रियार्थं भवतां च दारैः ॥ १२० ॥ प्रीतिस्ततो ह्यभ्यधिका बभूव भीमस्य चास्यास्तदनु स्म पार्थे । ततो भवत्स्वेव यथा क्रमेण गुणानुसारेण समीरणस्य ॥ १२१ ॥ इयं हि सा शुद्धतनुः प्रजाता शच्यादियोगापगताग्र्यदेहा । यूयं च सर्वे मरुतो विशेषसंयोगहीनाः स्वशरीरसंस्थाः ॥१२२॥ स्पर्शोऽपि नास्याः पवमानपत्न्याः सुपूतताऽलं भवतामिदानीम् । न चोत्तरत्रापि भवेत्कथञ्चिद्दिवौकसां मानुषदेहिनो यथा ॥ १२३ ॥ इतीरितं तं प्रतिसन्निवृत्तं विनाशयन्मानुषवासनां स्वयम् । समाश्लिषच्छुद्धतनुः स्तनोत्थो धर्मो हरेः सोऽभवदाशु तत्समः ॥ १२४ ॥

ततस्तु पार्था अखिलाः स्वमूलरूपैः सहैवाविशुर्मुदान्विताः । स्वीयानि सद्मानि ततोऽप्यनूनभोगाः सदारा न्यवसंश्च तत्र ॥ १२५ ॥ तत्रापि कृष्णेन समागमोऽभूत्पुरेव तेषामपि तत्पराणाम् । चिक्रीड एभिः सहितस्तथैव कृष्णोऽपि तद्वत्सरथोऽर्जुनेन ॥ १२६ ॥ अन्ये तु देवांशभवाः समस्ताः स्वमूलरूपैक्यमवापुराशु । कर्मक्षयादेव

सुरेतरास्तु पुण्यक्षयं प्राप्य भुवि प्रजाताः ॥ १२७ ॥ चतुः-सहस्रं त्रिशतोत्तरं ते संवत्सराणामनुभूय दिव्यान् । भोगान्नरत्वेऽपि सदेश्वरोऽहमसज्जगच्चेति धिया(यो)ऽऽप्नुवंस्तमः ॥ १२८ ॥ दुःखेऽपि

SGDF
Sri Gangeshwari Digital Foundation

तेषामिह तारतम्यं कलेः परं दुःखमिहाखिलाच्च । (य)तथा विरिञ्चस्य व(प)रं सुखं स्यान्मुक्तौ हरिद्वेषकृतो विशेषः ॥१२९॥ केचित्पिशाचासुरराक्षसत्वमवाप्य विष्णोरपि तत्पराणाम् । द्वेषात्तमोऽन्धं त्वरया समाप्नुयुर्देवाः स्वकाले निजयोग्यमुक्तिम् ॥ १३० ॥

चतुःसहस्रे त्रिशतोत्तरे गते संवत्सराणां तु कलौ पृथिव्याम् । जातः पुनर्विप्रतनुः स भीमो दैत्यैर्निगूढं हरितत्त्वमाह ॥ १३१ ॥ तदैव कृष्णाऽपि भुवि प्रजाता प्रीत्यै हरेरन्धतमस्यपातयत् । महासुरान्विष्णुपरार्जुनाद्याः कृते प्रजाता हरितोषणाय । पुनश्च ते स्थानमवाप्य सर्वे स्वीयां(यं) परान्ते तु विमुक्तिमाप्नुयुः ॥१३२॥ वायुत्वमाप्तः स हनूसदंशो ब्राह्मं पदं प्राप्य वृकोदरश्च । वागीश्वर(री)त्वं गतयैव कृष्णया सहैव मुक्तिं गमिताऽखिलोत्तमाम् ॥ १३३ ॥ भुवि द्युलोके च विरिञ्चतायां मुक्तौ च ताभ्यामधिकं समस्तात् । सन्तोष्यते पूर्णगुणो रमेशः सदैव नित्योर्जिततद्रतिभ्याम् ॥ १३४ ॥ 'भूषन्न योधि बभ्रूषु नम्रते' 'बळित्था तद्वपुषे धायि दर्शतम्' । 'तां सु ते कीर्तिं मघवन्महित्वे'-त्यादि सूक्तानि च तत्प्रमाणम् ॥ १३५ ॥ अन्यानि वाक्यानि च वैदिकानि सपञ्चरात्रोक्तिपुराणकानि । पृष्टश्च भीष्मोऽत्र युधिष्ठिरेण तन्मोक्षधर्मेष्वपि किञ्चिदाह ॥ १३६ ॥

एवं प्रयातेषु सकेशवेषु स्वानेव लोकान्यदुपाण्डवेषु । परीक्षिताद्यास्तु तदन्वयोत्था व्यासानुशिष्टाः पृथिवीमरक्षन् ॥ १३७ ॥ तैः क्षेमकान्तैरिह भारतादिशास्त्राणि शृण्वद्भिरशेषविद्भिः । व्यासप्रसादाच्च कलौ च धर्मो ज्ञानं च सुत्रातमगान्न नाशम् ॥ १३८ ॥

संवत्सराणां च सहस्रके गते प्राप्तेषु वि(च)द्यामखिलेषु सत्सु । दग्धाः पुरा ये त्रिपुर(रं)घ्नतैव रुद्रेण जाताः पृथिवीतले ते ॥ १३९ ॥ अदर्शनं सर्वमुनीन्द्रवृन्दैः सहैव सज्ज्ञानमहानिधा(दा)ने । व्यासे प्रयातेऽपि सुतत्त्वविद्या तत्सम्प्रदायादपि तैरवाप्ता ॥ १४० ॥ उत्सादितत्वात्तु

SGDF
Sri Gargeshwari Digital Foundation

दुरागमानां तत्सम्प्रदायस्य च नाशितत्वात् । प्रसारितत्वाच्च सदागमानां पापा अपि ज्ञानमवापुरेतत् ॥ १४१ ॥ शुना पुरोडाशमिवावलीढं वेदश्रुतिं चान्त्यजनैरवाप्ताम् । अनन्तदुःखाप्तिसुयोग्यदैत्यैर्विद्यामवाप्तां तु न सेहिरे सुराः ॥ १४२ ॥ नावाग्गतिः क्वापि सुवेदिनां भवेत्प्राप्यं सुखं नित्यमवश्यमेभिः । प्राप्यं तमोऽन्धं त्वसुरैर्न मुक्तिः कदाचिदप्येतदश्चिंतयन्सुराः ॥ १४३ ॥ ज्ञानप्रदानाय सतां तदन्यज्ञानप्रणाशाय च विष्णुनैते । क्लृप्तास्ततस्ते सविरिञ्चिशर्वा विज्ञापयामासुरुपेत्य विष्णुम् ॥१४४॥ क्षीरोदधेरुत्तरतीरनि(वि)ष्ठितैरभिष्टुतः सुष्टुतिभिः पुरुष्टुतः । प्रदाय तेषामभयं रमापतिः क्षणादभूच्चारुतमाकृतिः शिशुः ॥१४५॥ यस्त्रैपुराणां प्रथमोऽत्र जातः शुद्धोदनेत्येव जिनेति चोक्तः । क्षेत्रे गयाख्येऽस्य शिशुं प्रजातं सम्प्राप्य दूरेऽत्र बभूव विष्णुः ॥ १४६ ॥ अजानमानाः स्वशिशुं गतं तं शिशुं हरिं वीक्ष्य निजं स्म मेनिरे । तेषां तदा वैदिककर्म वीक्ष्य सम्प्राहसत्तद्वपुषैव केशवः ॥ १४७ ॥ तं जातमात्रं प्रहसन्तमीक्ष्य सुविस्मितैः पृष्ट उवाच विष्णुः । बुद्धोऽहमित्येव सुनित्यबोधाज्जगाद चैषामथ बुद्धदर्शनम् ॥ १४८ ॥ तथाप्यविश्वासमवेक्ष्य तेषां सस्मार देवानखिलाञ्जनार्दनः । विज्ञाय ते तस्य मनोगतं निजान् प्रचिक्षिपुर्हेतिगणानमुष्मिन् ॥ १४९ ॥ स जातमात्रः शिवपूर्वकाणां शूलादिहेतीरखिला निगीर्य । दैत्यातिमोहाय निजं च चक्रं स्वमुक्तमाश्वेव वशी समग्रहीत् ॥१५०॥ तदासनत्वेन विधाय तस्मिन्समास्थितं देवगणाः प्रणम्य । जग्मुः स्वधामानि वचांसि चास्य स्वीचक्रुराश्वेव जिनादिदैत्याः ॥ १५१ ॥ ते ज्ञानधर्मावपहाय पापा विमोहिता देववरेण सर्वे । जग्मुस्तमोऽन्धं क्षणिकं समस्तं ज्ञानं न सचेति दृढं स्मरन्तः ॥ १५२ ॥ नारायणः प्रा(णोऽप्या)प्य सुरेन्द्रबृन्दं वृत्तं च तेषामखिलं निगद्य । पृष्टश्च तैराह निजं हृदिस्थं बौद्धागमार्थं सृतिबन्धमोचनं ॥१५३॥ क्षणादयः क्षणिकास्तद्विशेषा यतः प्रयान्त्येव निसर्गतोऽखिलाः । ततः स्थिर-

SGDF
Sri Gargeshwari Digital Foundation

त्वेऽपि विशेषसंश्रयादुक्तं क्षणस्थायि मया समस्तम् ॥ १५४ ॥ तद्वान्विशेषश्च यतो न भिन्नौ सदा स्वनिर्वाहकशक्तियुक्तौ । अतः क्षणस्थायि समस्तमेतत्स्थिरात्मकं चेति हि नास्ति भेदः ॥ १५५ ॥ ज्ञोऽहं सदैकः परमो मयैतत्सदाऽननीयं च यतोऽस्वतन्त्रम् । ज्ञानात्मकं विश्वमतो मयोक्तं जडस्वरूपं च किमु स्म चेतनम् ॥ १५६ ॥ शं शीलकोऽहं यत एव चोच्चः शूनामकस्तद्धि मया नि(वि)धेयम् । शून्याभिधं दोषविरुद्धरूपो दोषोज्झितोऽन्यस्त्वखिलादनामा ॥ १५७ ॥ एनैव साध्यं त्वसदेव नामतस्त्वभाव एनैव भवेद्यतस्तत् ॥ इत्यादि बोद्धव्यमिदं समस्तं मयोदितं क्वापि न हेयमस्ति ॥ १५८ ॥ इत्यादि देवान्प्रतिबोधयंश्च देवैः सहोवास स बुद्धदेवः । गत्वा स्वधामाप्यपरेण रूपेणास्ते पृथक्कृतनुर्यथेष्टम् ॥ १५९ ॥ ततस्तु बुद्धोदितपक्षसंस्थो जिनोऽपि चक्रे मतमन्यदेव । बौद्धेन जैनेन मतेन चैवं दैत्यांशकाः प्रीतिमगुः समस्ताः ॥ १६० ॥ प्रशान्तविद्येत्यभिधं तथाऽन्यद्बुद्धोक्तशास्त्रं त्रिदशा अवाप्य । तोषं ययुर्वेदसमस्तसारं यामाश्रितानामचिरेण मुक्तिः ॥ १६१ ॥ अन्ये मनुष्या अपि भारताद्यं सत्सम्प्रदायं परिगृह्य विष्णुम् । यजन्त आपुः परमां गतिं

तत्र सेहिरे क्रोधवशादिदैत्याः ॥ १६२ ॥ शैवं तपस्ते विपुलं विधाय जगद्विमोहोर्जितशक्तिमस्मात् । प्राप्य प्रजाता भुवि मोहनं च चक्रुः कुतर्कैरभिदां वदन्तः ॥ १६३ ॥ तेषां प्रपाताय सतां विमुक्त्यै जन्मास भीमस्य यदुक्तमत्र । दुर्गा पुनर्विप्रकुलेऽवतीर्णा हनिष्यति व्रातमथासुराणाम् ॥ १६४ ॥

ततः कलेरन्तमवाप्य धर्मज्ञानादिकल्याणगुणप्रहीने । लोके विरिञ्चत्रिपुरघ्नशक्रपूर्वाः पयोऽब्धिं त्रिदशाः प्रजग्मुः ॥ १६५ ॥ नारायणस्तैः स्तुतिपूर्वमर्थितो भवाय लोकस्य स शम्फलाख्ये । ग्रामे मुनेर्विष्णुयशोऽभिधस्य गृहे बभूवाविरचिन्त्यशक्तिः ॥ १६६ ॥

SGDF
Sri Gargeshwari Digital Foundation

कलेस्तु कात्कारत एव कल्की ज्ञानं कलं कं सुखमेव तद्वान् । कल्कीति वा तेन समस्तदस्युविनाशनं तेन दिनाद्व्यधायि ॥ १६७ ॥ अधर्मवृत्तं विमुखं हरेश्च निहत्य निःशेषजनं तुरङ्गी । संस्थापयामास स धर्मकेतुं ज्ञानं स्वभक्तिं च निजप्रजासु ॥ १६८ ॥

इत्याद्यनन्तानि हरेरुदारकर्माणि रूपाणि च सद्गुणाश्च । नित्यव्यपेताखिलदोषकस्य ब्रह्मेत्यनन्तेति च नाम येन ॥ १६९ ॥ आनन्दतीर्थाख्यमुनिः सुपूर्णप्रज्ञाभिधो ग्रन्थमिमं चकार । नारायणेनाभिहितो बदर्यां तस्यैव शिष्यो जगदेकभर्तुः ॥ १७० ॥ यस्तत्प्रसादादखिलांश्च वेदान्सपञ्चरात्रान्सरहस्यसङ्ग्रहान् । वेदेतिहासांश्च पुराणयुक्तान्यथावदन्या अपि सर्वविद्याः ॥ १७१ ॥ समस्तशास्त्रार्थविनिर्णयोऽयं विशेषतो भारतवर्त्मचारी । ग्रन्थः कृतोऽयं जगतां जनित्रं हरिं गुरुं प्रीणयताऽमुनैव ॥ १७२ ॥ विनिर्णयो नास्त्यमुना विना यद्विप्रस्थितानामिह सर्ववाचाम् । तद्ब्रह्मसूत्राणि चकार कृष्णो व्याख्या तथैषामयथाकृताऽन्यैः ॥ १७३ ॥ निगूहितं यत्पुरुषोत्तमत्वं सूत्रोक्तमप्यत्र महाऽसुरेन्द्रैः । जीवेश्वरैक्यं प्रवदद्भिरुग्रैर्व्याख्याय सूत्राणि चकार चाविः ॥ १७४ ॥ व्यासाज्ञया भाष्यवरं विधाय पृथक्पृथक् चोपनिषत्सु भाष्यम् । कृत्वाऽखिलान्यं पुरुषोत्तमं च हरिं वदन्तीति समर्थयित्वा ॥ १७५ ॥ तनुस्तृतीया पवनस्य सेयं सद्भारतार्थप्रतिपादनाय । ग्रन्थं चकारेममुदीर्णविद्या यस्मिन्नमन्ते हरिपादभक्ताः ॥ १७६ ॥ 'तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥ १७७ ॥ निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासःशवसा क्रन्त सूरयः । यदीमनु प्रदिवो मध्व आधवे गुहासन्तं मातरिश्वा मथायति' ॥ १७८ ॥ इत्यादिवाक्योक्तमिदं समस्तं तथा पुराणेषु च पञ्चरात्रे । अत्रोदिता याश्च कथाः समस्ता वेदेतिहासादिविनिर्णयोक्ताः ॥ १७९ ॥ तस्मादयं ग्रन्थवरोऽखिलानां धर्मादिमोक्षान्तपुमर्थहेतुः । किञ्चो(किंचो)दितैरस्य गुणैस्ततोऽ-

SGDF
Sri Gargeshwari Digital Foundation

न्यैर्नारायणः प्रीतिमुपैत्यतोऽलम् ॥ १८० ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् । वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ १८१ ॥ यः सर्वगुणसम्पूर्णः सर्वदोषविवर्जितः । प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ॥ १८२ ॥ (५२०२) इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये पाण्डवस्वर्गारोहणं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीः

श्रीमदानन्दतीर्थ (पूर्णप्रज्ञ) भगवत्पादाचार्य विरचित

सर्वमूलान्तर्गत इतिहास-पुराणप्रस्थान ग्रन्थाः

३. श्रीमद्भागवततात्पर्यनिर्णयः

१५८५-१९३२

श्रीमदानन्दतीर्थ (पूर्णप्रज्ञ) भगवत्पादाचार्य विरचिताः

सर्वमूलानन्तर्गताः प्रकीर्ण ग्रन्थाः

१. कन्दुक (कृष्ण) स्तुतिः १९३३

२. बिल्वमङ्गलः साधुः १९३४

३. न्यासपद्धतिः १९३५-६

SGDF
Sri Gurgeshwar Digital Foundation

॥ श्रीः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

श्रीमद्भागवततात्पर्यनिर्णयः

प्रथमः स्कन्धः

प्रथमोऽध्यायः

॥ ॐ ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ सृष्टिस्थित्यप्ययहानियतिदृशितमोबन्धमोक्षाश्च यस्मादस्य श्रीब्रह्मरुद्रप्रभृतिसुरनरस्त्रीशशश्वात्मकस्य । विष्णोर्व्यस्ताः समस्ताः सकलगुणनिधिः सर्वदोषव्यपेतः पूर्णानन्दोऽव्ययो यो गुरुरपि परमश्चिन्तये तं महान्तम् ॥

जन्माद्यस्येत्यादि[1] । तं परं धीमहि । अन्वयात् । 'यतो वा इमानि भूतानि जायन्त' इत्यादिश्रुतिस्मृतिभ्यः । इतरतः तर्कतः । चेतनाद्धि पित्रादेः पुत्रादिरुत्पद्यते । अभिज्ञः सर्वज्ञः । अतो युज्यते । 'यं कामये तं तमुग्रं कृणोमि' । 'मम योनिरि'त्यन्येषां तदपेक्षत्वात् । न चान्यापेक्षोऽसौ । स्वराट् । कुतः । तेने ब्रह्म हृदा य आदिकवये । स हि 'विश्वा जातानि परिता बभूव' । नान्यः । हृदा स्नेहेन । 'यो

श्रीमद्भागवतम्

प्रथमः स्कन्धः

प्रथमोऽध्यायः

(केवलं तात्पर्यसम्बद्धाः श्लोकाः)

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः ॥ तेजोवारिमृदां यथा विनिमयो यत्र

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्माणं विदधाति पूर्वमि'ति च। आत्मत एव हि तस्य बुद्धिप्रकाशः। न च प्रसादं विना ज्ञातुं शक्यः। मुह्यन्ति यं सूरयः। न च तृप्तः प्रवर्तते। किन्तु मृषा वृथैव। भित्वा मृषाश्रुरितिवत्। 'देवस्यैष स्वभावोऽयमि'ति। यत्रेतिविशेषणान्नान्यत्र। स्वविषय एव वृथा। जीवेश्वरजडानां सर्गस्त्रिसर्गः। एकस्य तेजसो बहुत्ववदीश्वरसर्गः। वारिनिमित्तप्रतिबिम्बवज्जीवसर्गः। मृदो घटादिवदव्यक्ताज्जडसर्गः। न च मायामयी सृष्टिः। धाम्ना स्वेन सदा निरस्तकुहकम्। तद्धाम्ना श्रियोऽपि निरस्तकुहकत्वं मुक्तानां च। न च मुक्तवत्पूर्वं बन्धभाक्त्वम्। सदा निरस्तकुहकत्वात्। सत्यं निर्दुःखनित्यनिरतिशयानन्दानुभवरूपम्। परं सम्पूर्णगुणम्। परत्वसाधकं जन्मादीत्यादि। तन्त्रभागवते च। 'सृष्टिस्थित्यप्ययेहादेः श्रुतिस्मृतिसमन्वयात्। युक्तितश्चेतृपूर्वादेः श्रीब्रह्मभवपूर्विणः॥ सुरगन्धर्वमनुजपितृदैत्यात्मनः पृथक्। कर्ता विष्णुरजो नित्यः सर्वज्ञत्वान्न चापरः॥ अनन्याधिपतिश्चासौ गरीयान् ब्रह्मणो यतः। तत्प्रसादमृते तस्य नान्यो वेत्ताऽस्ति कश्चन॥ तेजसो रूपवद्रूपं बहुधा कुरुते हरिः। वारिस्थतेजःप्रतिमा जीवास्तस्माद्विनिर्गताः॥ कुलालेन मृदा यद्वन्निर्मीयन्ते घटादयः। विष्णुनैवं प्रकृत्यैव निर्म्यते जगदीदृशम्॥ एष त्रिसर्गो विष्णोस्तु वृथा लोकस्य चावृथा। इन्द्रजालविधां सृष्टिं मन्यन्ते ज्ञानदुर्बलाः॥ नित्यं निरस्तेन्द्रजाले स्वत एव कथं भवेत्। अक्षमाः सत्यसृष्टौ हि मायासृष्टिं वितन्वते॥ अनन्ताचिन्त्यविभवः कथं तामीहते हरिः। निर्दुःखपूर्णानन्दत्वाद्यमाहुः सत्यमच्युतम्॥ निर्दोषगुणपूर्णत्वात्परं चाहुर्जनार्दनम्। एवंविधानुभावो यः स कथं निन्दितं सृजेत्॥ स्वप्नादिकं परो देवः प्राणादिस्थस्तनोत्यसौ। केवलस्य परस्यास्य मायासृष्टिर्न युज्यते॥ तस्माद्बाधायुताः सर्वे स्वप्नाद्या ये त्वकेवलाः। इदं

त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥ १॥

SGDF
Sri Gurgeshwari Digital Foundation

न बाध्यते सर्वं जगत्केवलजं यतः ॥ मोक्षवत्केवलस्यास्य शक्त्या सम्यग्विजृम्भितम् । एतद्रहस्यं परमं ब्रह्मसूत्रपदोदितम् ॥ ये त्वेवं न विजानन्ति ते हि यान्त्यधरं तमः । ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ॥ सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः । ये त्वेतदनुतिष्ठन्ति पारम्पर्यागतं मम ॥ ते यान्ति परमं स्थानं मयैवोदितमञ्जसे'-त्यादि । 'वैधर्म्याच्च न स्वप्नादिवदि'ति च । 'प्रधान्वस्य महतो महानि सत्यासत्यस्य करणानि वोचमि'त्यादि । ब्रह्मसूत्रमहाभारत-गायत्रीवेदसम्बन्धश्चायं ग्रन्थः । उक्तं च गारुडे । 'अर्थोऽयं ब्रह्म-सूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः । पुराणानां साररूपः साक्षाद्भगवतोदितः । द्वादशस्कन्धसंयुक्तः शत-विच्छेदसंयुतः । ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध' इति ॥ १ ॥

[2]अधिकारिविषयफलान्युच्यन्ते धर्म इति । प्रोज्झितकैतवः फलानपेक्षया । ईश्वरार्पणेन परमः । 'तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् । अजातशत्रवः शान्ताः साधवः साधुभूषणाः । मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढामि'त्यादि सतां लक्षणम् । सतां मात्सर्य-मर्जुनस्य एकलव्य इव कुत्रचिद्दृश्यते । तद्वर्जनीयमुत्तमेषु ज्ञानार्थिना । महासंहितायां च 'उत्तमेष्वात्मनो नित्यं मात्सर्यं परिवर्जयेत् । कुरुते यत्र मात्सर्यं तत्तत्स्याविहीयत' इति । नित्यनिरस्तदोषपूर्णगुणं वास्तवम् । नित्यसंहितायां च 'निरस्ताखिलदोषं यदानन्दादिमहागुणम् । सर्वदा परमं ब्रह्म तस्माद्वास्तवमीयत' इति । वस्तु अप्रतिहतं नित्यम् । स्कान्दे च 'वसनाद्वासनाद्वस्तु नित्याप्रतिहतं यतः । वासेनेदं यतस्तुन्न-मतस्तद्ब्रह्म शब्द्यत' इति । किं वा परैः अर्थकामादिकथनैः । गारुडे

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् । श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥ निगम-

SGDF
Sri Gargeshwari Digital Foundation

च 'धर्मार्थकाममोक्षाणामेकमेव पदं यतः। अवरोधो हृदीशस्य पृथग्वक्ष्ये न तानहमि'ति। सद्यःशब्दः आपेक्षिक इति तत्क्षणादिति। न चासम्पूर्णाधिकारिणां तत्क्षणादवरुध्यत इति सद्यःशब्दः। अधिकारिविषयफलानां स्मरणात्फलाधिक्यं भवति। वामने च 'अधिकारं फलं चैव प्रतिपाद्यं च वस्तु यत्। स्मृत्वा प्रारभतो ग्रन्थं करोतीशो महत्फलमि'ति ॥ २ ॥

[3]ज्ञातफलस्यापि प्रशंसाविधिभ्यां क्षिप्रप्रवृत्तिर्भवतीति प्रशस्य विधत्ते। निगमकल्पतरोरिति। भगवता गलितम्। शुकेन द्रवीकृतम्। उक्तं च ब्रह्माण्डे 'धर्मपुष्पस्त्वर्थपत्रः कामपल्लवसंयुतः। महामोक्षफलो वृक्षो वेदोऽयं समुदीरितः। शातितानि फलानीह कृष्णद्वैपायनेन तु। भारतादीनि यानीह तथा भागवतं भुवि। आर्द्रीकृतानि तानीह शुकप्रभृतिर्जनैः। ख्यापयद्भिर्गुरुप्रोक्तान्वेदार्थान् ग्रन्थनिष्ठितान्। कानिचिद्दर्शयामास वृक्षस्याग्रे फलानि तु। व्याचक्षमाणो वेदार्थं भगवाँल्लोकपूजितः। एतेषामथ तेषां वा रसं पिबत सज्जनाः। आमोक्षान्महती तृप्तिरहो मे पश्यतो भवेदि'ति ॥ ३ ॥

[4]प्रकारान्तरेण पुरुषार्थशङ्कानिवृत्त्यर्थमाख्यायिका। पाद्मे च 'आख्यायिकाः प्रदर्श्यन्ते सर्ववेदेषु सर्वशः। द्योतयन्त्यस्तु महतां तात्पर्यं तत्र तत्र ह। अलाभः पुरुषार्थस्य प्रोक्तमर्थमृते त्विति। द्योतनाय महाराज श्रद्धावृद्ध्यर्थमेव चे'ति ॥ ४ ॥

[7]यानि भगवज्ज्ञातान्यन्यैरप्यृषिभिर्ज्ञायन्ते तानि वेत्थ। उक्तं हि ब्रह्माण्डे 'द्वैपायनेन यद्बुद्धं ब्रह्माद्यैस्तन्न बुध्यते। सर्वबुद्धं स वै वेद

कल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्। पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥ नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः। सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥ यानि वेदविदां श्रेष्ठो भगवान् बादरायणः। अन्ये च मुनयः सूत

SGDF
Sri Gurgeshwari Digital Foundation

तद्बुद्धं नान्यगोचरमि'ति ॥७-८॥ विवशः[14] बह्वभ्यासात्। उक्तं च ब्रह्मवैवर्ते। 'शारीराद्वाचिकाभ्यासो वाचिकान्मानसो भवेत्। मानसाद्विवशान्मुच्येन्नान्यथा मुक्तिरिष्यत'इति ॥ १४ ॥ [18]आत्ममायया स्वरूपभूतेच्छया। 'महामायेत्यविद्येति नियतिर्मोहिनीति च। प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यत' इति स्कान्दे। विष्णुसंहितायां च 'इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिरिति त्रिधा। शक्तिशक्तिमतोश्चापि न भेदः कश्चनेष्यत' इति ॥ १८ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवततात्पर्यनिर्णये प्रथमस्कन्धे प्रथमोऽध्यायः ॥ ॥ १ ॥

द्वितीयोऽध्यायः

[2]अनुपेतं देहादिभिः। अनभिमानात्। अकातरः कातरवद्दर्शयन्। उक्तं च स्कान्दे 'नित्यतृप्तः परानन्दो योऽव्ययः परमेश्वरः। यस्य पुत्रफलं नैव यज्ज्ञातं जगदीदृशम्। यदधीनश्रियोऽपाङ्गाद्ब्रह्मरुद्रादिसंस्थितिः। स पुत्रार्थं तपस्तेपे व्यासो रुद्रस्य चेश्वरः। कातर्यं दर्शयामास वियोगे लौकिकं हरिः'॥ 'कर्माणि कुरुते विष्णुः कीनाश इव दुर्बल' इति चोद्योगे। 'देवत्वे देववच्चेष्टा मानुषत्वे च मानुषी'ति विष्णुधर्मे। सर्वभूतहृदयम्। अहङ्कारात्मकत्वात्। 'अहङ्कारात्मको

परापरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्सर्वं तत्वतस्तदनुग्रहात्। ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्। ततः सद्यो विमुच्येत यं बिभेति स्वयं भवः ॥१४॥ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः। लीला विदधतः स्वैरं ईश्वरस्यात्ममायया ॥ १८ ॥

द्वितीयोऽध्यायः

सूत उवाच—यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव। पुत्रेति तन्मयतया तरवोऽपि नेदुस्तं सर्वभूतहृदयं मुनि-

SGDF
Sri Gangeshwari Digital Foundation

रुद्रः शुको द्वैपायनात्मज' इति स्कान्दे ॥२॥ [3]स्वानुभावं ब्रह्म ॥३॥ [11]अद्वयं असमाधिकम् । तथा च भाल्लवेयश्रुतिः 'स पुरुषः सोऽद्वय इति न ह्येनमभि कश्चन न ह्येनमति कश्चनेती'ति । 'सोऽद्वयः पुरुषस्तस्मान्न समो नाधिको ह्यत'इति महासंहितायाम् । तत्त्वशब्दार्थस्तत्रैवोक्तः । 'अतीतानागते काले यत्तादृशमुदीर्यते । कुतश्चिदन्यथा नेयात्तत्तत्त्वं तत्त्वतो विदुरि'ति ॥ ११ ॥ [12]सत्तामात्रमानन्दमात्रम् । तथा च पैङ्गिश्रुतिः 'अथ कस्मादुच्यते सत्तेति नन्दति नन्दयति चेती'ति । न कार्यकारणविषयविशेषितवैषयिकज्ञानम् । केवलमेव तज्ज्ञानम् । स्रष्टृत्वादिभिः कार्यकारणविशेषितं च । तन्त्रभागवते च । 'विषयापेक्षि न ज्ञानं विषयैश्च विशेषितम् । यत्तदानन्दमात्रं च तद्ब्रह्मेत्यवधार्यतामि'ति । यत्किञ्चिदलोकसिद्धम् ॥ १२ ॥ [13]यस्मात्परमात्मैव तत्त्वं तस्मात्तमेव पश्यन्ति मुनयः ॥ १३ ॥ [22]आत्मनीश्वर इति न जीवैक्यमुच्यते । परेषामपि ब्रह्मादीनां यतोऽवरत्वं स परावरः । 'भेददृष्ट्याभिमानेने'ति हि कापिलेये । 'ब्रह्म प्रधानमुपयान्त्यगताभिमाना' इति च । 'विद्याऽऽत्मनि भिदाबोधः' । 'यत्र हि द्वैतमिव भवति' । 'अन्यमीशमस्य महिमानमिति' । 'अनश्नन्नन्यो अभिचाकशीति' । 'छायातपौ ब्रह्मविदो वदन्ति' । 'एको बहूनां विदधाति कामान्' । 'सत्यः सो अस्य महिमा' । 'सत्यमेनमनु विश्वे मदन्ति' । 'यत्र पूर्वे साध्याः सन्ति देवाः' । 'शृण्वे वीर उग्रमुग्रं दमायन्नि'त्यादि

मानतोऽस्मि ॥ २ ॥ यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम् । संसारिणां करुणयाऽऽह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥३॥ वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥ सत्तामात्रं तु यत्किञ्चित्सदसच्चाविशेषणम् । उभाभ्यां भाष्यते साक्षाद्भगवान् केवलः स्मृतः ॥ १२ ॥ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्युक्तया । पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतिगृहीतया ॥ १३ ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते

SGDF
Sri Gargeshwari Digital Foundation

च। 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्'। 'बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वहे'ति मोक्षधर्मे। 'भेददृष्ट्याऽभिमानेन पश्यन्तो यान्ति तत्पदमि'त्यादि वायुप्रोक्ते। 'अनुपपत्तेस्तु न शारीरः'। 'भेदव्यपदेशाच्च'। 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते'। 'पृथगुपदेशादि'त्यादि च। सत्यत्वं च भेदस्योक्तं भाल्लवेयश्रुतौ। 'स्थाणुर्होच्चक्राम स प्रजापतिमुवाच कोऽसि केस्थ कः स इति होवाच। योऽस्मि येऽस्थ यः स इति। अथ हैनमुपाक्रोशत्। सत्यं भिदा सत्यं भिदा सत्यं भिदेति। मैवारुवण्यो मैवारुवण्यो मैवारुवण्य इती'ति। 'सत्यमेनम्'। 'सत्यः सो अस्य महिमे'ति चोक्तम्। महासंहितायां च। 'त्रिविधं जीवसङ्घं च परमात्मानमव्ययम्। तेषां भेदं च ये सत्यं विदुर्मोहविवर्जिताः। ते यान्ति परमं स्थानं विष्णोरेवाचलं ध्रुवम्। जीवेश्वरभिदां भ्रान्तिं केचिदाहुरपण्डिताः। अनारतं तमो यान्ति परमात्मविनिन्दनात्। पराधीनश्च बद्धश्च स्वल्पज्ञानसुखेहितः। अल्पशक्तिः सदोषश्च जीवात्माऽनीदृशः परः। वदता तु तयोरैक्यं किं तेनादुष्कृतं कृतम्। अन्तर्याम्यैक्यवाचीनि वचनानीह यानि तु। तानि दृष्ट्वा भ्रमन्तीह दुरात्मानोऽल्पचेतसः। अस्म्यस्मित्वमहंस्वात्मेत्यभिधागोचरो यतः। सर्वान्तरत्वात्पुरुषस्त्वंतर्यामी नियामयन्। अतो भ्रमन्ति वचनैरासुरा मोहतत्परैः। तन्मोहने परा प्रीतिर्देवानां परमस्य च। अतो महान्धकारेषु पतन्त्यज्ञानमोहिता' इत्यादि ॥ २२ ॥ [24]विष्णोरेव त्रिसञ्ज्ञाः। वामने च। 'ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः। ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः। पृथगेव स्थितो देवो विष्णुरूपी

सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २२ ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां

SGDF
Sri Gargeshwari Digital Foundation

जनार्दन'इति । त्रयोऽपि गुणा विष्ण्वाश्रयाः । तथापि सत्वतनौ जीवे श्रेयांसि स्युः ॥२४॥ [25]मेघरूपत्वाद्धूम उत्तमः ॥२५॥ [27]सात्विकानां वासुदेवे भक्तिरुत्पद्यते ॥ २७ ॥ [28]भूतेशप्रजेशादीन् ॥ २८ ॥ [31]आत्ममायया स्वेच्छया । सदसद्रूपया प्रकृत्या च ॥ ३१ ॥ [32]तया सदसद्रूपया । विज्ञानेन विजृम्भितः । विज्ञानेनैव सम्पूर्णः ॥ ३२ ॥ [34]तद्गुणानेव भुङ्क्ते न दोषान् । 'सर्वत्र सारभुग्देवो नासारं स कदाचने'ति वामनपुराणे । अनश्नन्नित्यशुभापेक्षया परवशत्वापेक्षया क्लृप्त्यपेक्षया च । 'अक्लृप्त्या च स्वतन्त्रत्वादशुभस्य च वर्जनात् । अभोक्ता शुभभोक्तृत्वाद्भोक्तेत्येव च तं विदुः । अन्यूनानधिकत्वाच्च पूर्णस्वानन्दभोजनात् । विरागाच्च परस्यास्य भोक्तृत्वप्रतिषेधनमि'ति स्कान्दे ॥ ॥ ३४ ॥ इति प्रथमस्कन्धतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

[1]व्यक्त्यपेक्षया जगृह इति । तथा हि तन्त्रभागवते । 'अहेयमनुपादेयं यद्रूपं नित्यमव्ययम् । स एवापेक्ष्य रूपाणां व्यक्तिमेव

स्युः ॥ २४ ॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः । तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनम् ॥ २५ ॥ मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ । नारायणकलाः शान्ताः भजन्ति ह्यनसूयवः ॥२७॥ रजस्तमःप्रकृतयः समशीलान् भजन्ति वै । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २८ ॥ स एवेदं ससर्जाग्रे भगवानात्ममायया । सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥ ३१ ॥ तया विलसितेष्वेषु गुणेषु गुणवानिव । अन्तः प्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥ ३२ ॥ असौ गुणमयैर्भावैः भूतसूक्ष्मेन्द्रियात्मभिः । स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥ ३४ ॥

तृतीयोऽध्यायः

सूत उवाच—जगृहे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं

SGDF
Sri Gargeshwari Digital Foundation

जनार्दनः । अगृह्णाद्व्यसृजच्चेति कृष्णरामादिकां तनुम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया । तमसा ह्युपगूढस्य यत्तमःपानमीशितुः । एतत्पुरुषरूपस्य ग्रहणं समुदीर्यते । कृष्णरामादिरूपाणां लोकव्यक्तिमपेक्षये'ति । महदादिभिः सम्भूतं अन्तर्गतमहदादि । न महदादिशरीरम् । 'यस्मिन्नेताः षोडशकलाः प्रभवन्ती'ति श्रुतिः । 'यत्किञ्चिदिह लोके वै देहबद्धं विशां पते । सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः । ईश्वरो हि महद्भूतं प्रभुर्नारायणो विराट् । भूतान्तरात्मा विज्ञेयः सगुणो निर्गुणोऽपि च । भूतप्रलयमव्यक्तं शुश्रूषुर्नृपमत्तमे'ति मोक्षधर्मे । 'नासीदहो न रात्रिरासीन्नासदासीत्तन्महद्वपुस्तदाऽभवद्विश्वरूपं सा विश्वरूपस्य रजनी'ति भाल्लवेयश्रुतिः । 'न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा । न योगित्वादीश्वरत्वात्सत्यरूपोऽच्युतो विभुरि'ति वाराहे । 'सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचित् । परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वशः । सर्वे सर्वगुणैः पूर्णाः सर्वे भेदविवर्जिताः । अन्यूनानधिकाश्चैव गुणैः सर्वैश्च सर्वतः । देहिदेहभिदा चैव नेश्वरे विद्यते क्वचित् । तत्स्वीकारादिशब्दस्तु हस्तस्वीकारवत्स्मृतः । वैलक्षण्यान्न वा तत्र ज्ञानमात्रार्थमीरितम् । केवलैश्वर्यसंयोगादीश्वरः प्रकृतेः परः । जातो गतस्त्विदं रूपं तदित्यादि व्यवक्ष्यत'इति महावाराहे । 'एकमेवाद्वितीयं' 'नेह नानाऽस्ति किञ्चन' । 'एवं धर्मान्पृथक्पश्यन्नि'त्यादि च । तस्यैवास्थूलत्वाद्यैश्वर्ययोगात् । तथा च कौर्मे । 'अस्थूलश्चानणुश्चैव स्थूलोऽणुश्चैव सर्वतः । अवर्णः सर्वतः प्रोक्तः श्यामो रक्तान्तलोचनः । ऐश्वर्ययोगाद्भगवान्विरुद्धार्थोऽभिधीयते । तथापि दोषाः परमे नैवाहार्याः कथञ्चन । गुणा विरुद्धा अपि तु समाहार्याश्च सर्वत'इति ॥ विष्णुधर्मोत्तरे च 'गुणाः सर्वेऽपि युज्यन्ते ह्यैश्वर्यात्पुरुषोत्तमे । दोषाः कथञ्चिन्नैवात्र युज्यन्ते परमो हि सः । गुणदोषौ माययैव केचिदाहुरपण्डिताः । न तत्र माया मायावी

SGDF
Sri Gargeshwari Digital Foundation

तदीयौ तौ कुतो ह्यतः। तस्मान्न मायया सर्वं सर्वमैश्वर्यसम्भवम्। अमायो हीश्वरो यस्मात्तस्मात्तं परमं विदुरि'ति ॥ १ ॥ [3]यस्यावयवसंस्थानैः। 'नाभ्या आसीदन्तरिक्षमि'त्यादि। सत्वं साधुगुणम्। ज्ञानबलरूपं वा। 'बलज्ञानसमाहारः सत्वमित्यभिधीयत'इति मात्स्ये ॥ ॥३॥ [5]निधानम्। अत्रैकीभवन्त्यन्तत इति। अंशांशेन सामर्थ्यैकदेशेन। ब्राह्मे च 'यच्छक्त्यैकांशसम्भूतं जगदेतच्चराचरमि'ति ॥ ५ ॥ '[6]कुमारो नाम भगवान्स्वयं स्वस्मादजायत। दिदेश ब्रह्मणे ब्रह्म ब्रह्मचर्ये स्थितो विभुः। यस्मात्सनत्कुमारश्च ब्रह्मचर्यमपालयत्। यः स्थाणोः स्थाणुतां प्रादाद्भगवानव्ययो हरिरि'ति ब्राह्मे ॥ ६ ॥ '[8]अवतारस्तृतीयोऽस्य देवर्षिः प्रथितो दिवि। महिदासस्त्वैतरेयो यस्तन्त्रं नारदेऽवददि'ति च ॥ ८ ॥ [9]धर्मकलासर्गः धर्मे स्वांशावतारः। लोकदृष्ट्याऽत्मशमोपेतम् ॥ ९ ॥ तन्त्रं [10]साङ्ख्यं वेदानुसारि। पाद्मे च 'कपिलो वासुदेवाख्यस्तन्त्रं साङ्ख्यं जगाद ह। ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च। तथैवासुरये सर्ववेदार्थैरुपबृंहितम् ॥ सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह। सांख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितमि'ति ॥ १० ॥ [11]आन्वीक्षिकीं तत्त्वविद्याम्। 'आन्वीक्षिकी कुतर्काख्या तथैवान्वीक्षिकी परे'ति मात्स्ये ॥ ११ ॥ [14]पृथुशरीराविष्टं

षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ॥ ३ ॥ एतन्नानावताराणां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥ ५ ॥ स एव प्रथमं देवः कौमारं सर्गमास्थितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥६॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी। भूत्वाऽऽत्मोपशमोपेतमकरोद्दुश्चरं तपः ॥ ९ ॥ पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये साङ्ख्यं तत्वग्रामविनिर्णयम् ॥ १० ॥ षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनुसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ऋषिभिर्याचितो

SGDF
Sri Gargeshwari Digital Foundation

रूपम् । 'आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुज'इति पाद्मे । उश इच्छायाम् । सत्यकामः ॥ १४ ॥ [21]रामात्पूर्वमप्यस्ति व्यासावतारः । 'तृतीयं युगमारभ्य व्यासो बहुषु जज्ञिवानि'ति कौर्मे ॥ २१ ॥ [23]आवेशो बलभद्रे । 'शङ्खचक्रभृदीशेशः श्वेतवर्णो महाभुजः । आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतमि'ति महावाराहे ॥२३॥ [24]मोहनार्थं दानवानां बालरूपं पथि स्थितम् । पुत्रं तं कल्पयामास मूढबुद्धिर्जिनः स्वयम् । ततः सम्मोहयामास जिनाद्यानसुरांशकान् । भगवान्वाग्भिरुग्राभिरहिंसावाचिभिर्हरिरि'ति ब्रह्माण्डे ॥२४॥ [26]विदासिनः उन्नतात् भिन्नाद्वा । 'त्रिविधाः पुरुषा लोके नीचमध्यविदासिन' इति ब्राह्मे । 'चतुर्धा वर्णरूपेण जगदेतद्विदासितमि'ति च ॥ २६ ॥ [28]एते प्रोक्ता अवताराः । मूलरूपी कृष्णः स्वयमेव । 'जीवास्तत्प्रतिबिम्बांशा वराहाद्याः स्वयं हरिः । दृश्यते बहुधा विष्णुरैश्वर्यादिक एव त्वि'ति ब्रह्मवैवर्ते ॥ २८ ॥ [30]एतज्जडरूपम् । 'नारायणवराहाद्याः परमं रूपमीशितुः । जैवं तु प्रतिबिम्बाख्यं जडमारोपितं हरेः । एवं हि त्रिविधं तस्य रूपं विष्णोर्महात्मन'इति पाद्मे ॥३०॥ [31]दृश्यत्वं जडरूपत्वम् । 'अविज्ञाय परं देहमानन्दात्मानमव्ययम् । आरोपयन्ति जनिमत्पञ्च-

---

भेजे नवमं पार्थिवं वपुः । दुग्धवानोषधीर्विप्रास्तेनायं च उशत्तमः ॥१४॥ ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१ ॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरम् ॥ २३ ॥ ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥२४॥ अवतारा ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः । यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ २८ ॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः । मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ॥ ३० ॥ यथा नभसि मेघौघा रेणुर्वा पार्थिवोऽनिले । एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥ अतः परं यदव्यक्तमव्यूढगुण-

SGDF
Sri Gurgeshwari Digital Foundation

भूतात्मकं जडमि'ति स्कान्दे ॥३१॥ [32]अतः परं जडेश्वरयोः परम् । अव्यूढगुणबृंहितं अनादिकाले कदाचिदप्यनपगतसत्वादिगुणबृंहितम् । अदृष्टाश्रुतवस्तुत्वात्पुनर्भवः ॥ ३२ ॥ [33]अविद्यया जीवकृते परमेश्वरे प्रतिषिद्धे इति ब्रह्मदर्शनम् ॥३३॥ [34]विशारदः परमेश्वरः । तन्मतिर्माया । यदा नैनं शोचयामीत्युपरता तदा सम्पन्न एव ॥ ३४ ॥ '[35]अप्रयत्नात्स्वतन्त्रत्वात्फलानां च विवर्जनात् । क्रियायाश्च स्वरूपत्वादकर्तेति च तं विदुः । कर्तृत्वं भ्रान्तिजं प्राहुरतत्त्वविदो जनाः । ऐश्वर्यजं तु कर्तृत्वं सम्यक्तत्त्ववेदिन'इति पाद्मे ॥ ३५ ॥ '[40]धर्मः कं शरणं गत इत्यस्य तमेव व्यासरूपिणमिति परिहार उच्यते इदं भागवतमित्यादिना ॥ ४० ॥ इति प्रथमस्कन्धतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

[4]निर्विकल्पकः । मदीयं तदीयमिति भेदमपहाय सर्वमीश्वराधीनमिति विज्ञाय स्थितः । 'साम्यमीश्वररूपेषु सर्वत्र तदधीनताम् । पश्यति ज्ञानसम्पत्त्या विनिद्रो यः स योगविदि'ति ब्राह्मे ॥४॥ [13]तृतीये

बृंहितम् । अदृष्टाश्रुतवस्तुत्वात्सजीवो यः पुनर्भवः ॥ ३२ ॥ यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा । अविद्यात्मनिकृते इति तद्ब्रह्मदर्शनम् ॥ ॥ ३३ ॥ यद्येषोपरता देवी माया वैशारदी मतिः । सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥ एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च । वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥ इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥

चतुर्थोऽध्यायः

तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः । एकान्त गतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ सूत उवाच ॥ द्वापरे समनुप्राप्ते तृतीये युग-

SGDF
Sri Gargeshwari Digital Foundation

द्वापरे युगे पर्यवसाने प्राप्ते सति ॥ १३ ॥ '[14-17]नित्यज्ञानस्य चिद्दृष्टिर्लोकदृष्टिव्यपेक्षया। सर्वज्ञोऽप्यज्ञवद्देवः सर्वशक्तिरशक्तवत्। प्रत्यापयति लोकानामज्ञानं मोहनाय चे'ति कौर्मे ॥ १४-१७ ॥ [24]भारतं ब्राह्मणादीनां वेदार्थपरिवित्तये। त एव वेदास्त्वन्येषां नर्ते तत्कस्यचित्सुखमि'ति स्कान्दे ॥ २४ ॥ [25]अतोषोऽनलम्बुद्धिः। 'श्रुत्वा कथां न तुष्यामि हरेरद्भुतकर्मण'इति मात्स्ये ॥ २५ ॥ [26]अप्रसादश्च स एव। 'कः प्रसन्नो भवेद्दिव्यां कथां शृण्वन्हरेः परामि'ति च ॥ २६ ॥ [27]आचारापेक्षया धृतव्रतत्वादि परिपूर्णस्य ॥ २७, २८ ॥ [28]दैह्यः देहरूपः। आत्मना विभुः स्वत एव व्याप्तः। 'तस्य सर्वावतारेषु न विशेषोऽस्ति कश्चन। देहदेहिविभेदश्च न परे विद्यते क्वचित्। सर्वेऽवतारा व्याप्ताश्च सर्वे सूक्ष्माश्च तत्त्वतः। ऐश्वर्ययोगाद्भगवान् क्रीडत्येवं जनार्दन' इति महासंहितायाम्। अवतारप्रयोजनासम्पत्त्याऽसम्पन्न इव। ब्रह्मवर्चसयुक्तानामुत्तमः ॥२९॥ [30]पुनरपेक्षितत्वान्न प्रायेण निरूपिताः।

पर्यये। जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १३ ॥ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः। विविक्त एक आसीन उदिते रविमण्डले ॥ १४ ॥ परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा। युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥१५॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम्। अश्रद्दधानान्निःसत्वान् दुर्मेधान् ह्रसितायुषः ॥ १६ ॥ दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन चक्षुषा। सर्ववर्णाश्रमाणां यद्दध्यौ चिरममोघदृक् ॥ १७ ॥ स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा। कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह। इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ २४ ॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः। सर्वात्मकेनाऽपि यदा नातुष्यद्धृदयं ततः ॥२५॥ नातिप्रसन्नहृदयः सरस्वत्यास्तटे शुचौ। वितर्कयन् विविक्तस्थ इदं प्रोवाच धर्मवित् ॥ २६ ॥ धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः। मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ॥ २७ ॥ भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः। दृश्यते यत्र धर्मो हि स्त्रीशूद्रादिभिरप्युत ॥ २८ ॥ अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः। असम्पन्न इवाभाति ब्रह्मवर्चस्विसत्तमः ॥ २९ ॥ किं

SGDF
Sri Gargeshwari Digital Foundation

'यथा तु भारते देवो न तथाऽन्येषु केषुचित्। उच्यते न तथापीशं जानन्त्यज्ञा जनार्दनमि'ति स्कान्दे ॥ ३० ॥ [31]खेदोऽनलम्बुद्धिः। 'अतुष्टिरप्रसादश्च खेदोऽतृप्तिस्तथैव च। अनलत्वं वदन्त्येते सर्वे पर्याय-वाचका' इति ब्राह्मे। मन्यमानस्य स्वेच्छया ॥ ३१ ॥ इति प्रथम-तात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

[2]शारीरमानसयोरभेदादुभयथापि युज्यते। स्वतन्त्रत्वादात्मनैव ह्यलम्बुद्धिः ॥ २ ॥ [4]शोचसि प्रकाशयसि। 'अजस्रेण शोचिषा शोशुचान' इति हि श्रुतिः ॥ ४ ॥ '[5]ज्ञानशक्तिस्वरूपोऽपि ह्यज्ञाशक्तं वदेद्धरिः। अज्ञानां मोहनायेशस्तेन मुह्यन्ति मोहिता' इति पाद्मे ॥ ॥ ५ ॥ [9]धर्मादीनामल्पकथनेन पूर्तिः। न वासुदेवमहिम्नोऽति-कथितस्यापि ॥ ९ ॥ [10]वायसं तीर्थं वयोमात्रानुजीवि शास्त्रम् ॥१०॥ [12]परोक्षज्ञानं न शोभते। अपरोक्षज्ञानं न भक्त्या विनोत्पद्यते। 'यस्य

वा भागवता धर्मा न प्रायेण निरूपिताः। प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३० ॥ तस्यैवं खिन्नमात्मानं मन्यमानस्य खिद्यतः। कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥ ३१ ॥

पञ्चमोऽध्यायः

नारद उवाच ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना। परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥ जिज्ञासितमधीतं च ब्रह्म यत्त-त्सनातनम्। तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उवाच ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे। तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥ ५ ॥ यथा धर्मादयो ह्यर्था मुनिवर्यानुकीर्तिताः। न तथा वासुदेवस्य महिमा ह्यनु-वर्णितः ॥९॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं न गृणीत कर्हिचित्। तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा न्यपतन् मिमङ्क्षया ॥ १० ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः

SGDF
Sri Gargeshwari Digital Foundation

देवे परा भक्तिः'। 'यमेवैष वृणुते तेन लभ्यः'। 'यद्वासुदेवशरणा विदुरञ्जसैवे'त्यादेः ॥ १२ ॥ [13]शुचिश्रवाः विष्णुः। समाधिना समाधिभाषया। स्मरणं ग्रन्थकृतिः। स्मरन्ति चेत्यादेः ॥ १३ ॥ [15]प्रवृत्तिधर्मकृते ॥ १५ ॥ [16]अनन्तपारस्य विभोः सकाशाद्यत्सुखम् ॥ ॥ १६ ॥ [20]इतरोऽपि भगवान्विश्वमिव। स्वातन्त्र्यात् ॥ २० ॥ [27]मयि स्थिते ब्रह्मणि स्थीयतामत्रेतीश्वरेच्छया परिकल्पितम् ॥ २७ ॥ [40]त्वमीश्वरोऽपि ॥ ४० ॥ इति प्रथमतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

[11]मृगयाजीविनां खेटो वाटी पुष्पोपजीविनाम्। ग्रामो बहुजनाकीर्णो राजराजाश्रयं पुरम्। जलस्थलमतिस्फीतं पत्तनं कीर्त्यते

शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ १२ ॥ अतो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः। उरुक्रमस्याखिलबन्धमुक्तये समाधिनाऽनुस्मर यद्विचेष्टितम् ॥ १३ ॥ जुगुप्सितं धर्मकृतेऽनुशासनं स्वभावरक्तस्य महान् व्यतिक्रमः। यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥ विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम्। प्रवृत्तमानस्य गुणैरनात्मनस्ततो भवान् दर्शय चेष्टितं विभोः ॥ १६ ॥ इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवः। तद्धि स्वयं वेद भवांस्तथाऽपि प्रादेशमात्रं भवतः प्रदर्शितम् ॥२०॥ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम। यथाऽहमेतत्सदसत् स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥ २७ ॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम्। प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा ॥ ४० ॥

षष्ठोऽध्यायः

स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान्। खेटान् पट्टनवाटीश्च

SGDF
Sri Gangeshwari Digital Foundation

बुधैरि'ति स्कान्दे ॥ ११ ॥ [21]उभयं द्वितीयं नापश्यं तमेवापश्यम् ॥ ॥ २१ ॥ इति प्रथमतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

[2]शम्यां प्रास्य तत्र शालां कृत्वा यत्र यज्ञः क्रियते स शम्याप्रासः ॥ २ ॥ [4]भक्तियोगेन सम्यक्प्रणिहिते लोकानां मनसि ॥ ४ ॥ [14]स्वात्मन एव विप्रियं न भर्तुः । प्रयोजनाभावाद्विप्रियमिव च तस्य प्रियमिति हि प्रस्तापोक्तम् ॥ १४ ॥ [15-56]स्वप्नोऽयम् । 'पार्थानुयातमात्मानं द्रौणिः स्वप्ने ददर्श ह । बन्धनं चात्मनस्तत्र द्रौपद्या चैव मोक्षणमि'ति स्कान्दे । तस्मान्नैषीकविरोधः ॥ १५-५७ ॥ इति प्रथमतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

[23]भक्तियोगविधानविषयम् ॥ २३ ॥ [28]अपुनर्भवं दर्शयति ॥

वनान्युपवनानि च ॥ ११ ॥ प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽति निर्वृतः । आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥ २१ ॥

सप्तमोऽध्यायः

सूत उवाच ॥ ब्रह्मनद्याः सरस्वत्याः आश्रमः पश्चिमे तटे । शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः ॥ २ ॥ भक्तियोगेन मनसि सम्यक्प्रणिहितेऽमले । अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयाम् ॥४॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि । अपाहरद्विप्रियमेतदस्य जुगुप्सितं कर्म विगर्हयन्ती ॥१४॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना । यदाऽरुदद्वाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटिमाली ॥ १५ ॥ बन्धनं द्रविणादानं स्थानान्निर्यापणं तथा । एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ ५७ ॥

अष्टमोऽध्यायः

तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः ॥ २३ ॥ विपदः सन्तु नः शश्वत्तत्र तत्र जगत्पते ।

SGDF
Sri Gangeshwari Digital Foundation

॥ २८ ॥ [31]तत्तद्योग्यतया समत्वम् ॥ ३१ ॥ [41]यर्हि भवतो दर्शनं तदा यदूनामस्माकं नामरूपे ॥ ४१ ॥ इति प्रथमतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'[5]यः पदातिं हन्ति स भवति चातुर्मास्ययाजी यः सादिनं सोऽग्निष्टोमस्य यो हन्ति गजरथौ सोऽश्वमेधराजसूयाभ्यामि'त्यादि शाश्वतं वचः ॥ ५ ॥ '[41]असङ्गश्चाव्यथोऽभेद्योऽनिग्राह्योऽशोष्य एव च । विद्धोऽसृगश्रितो बद्ध इति विष्णुः प्रदर्श्यते । असुरान्मोहयन्देवः क्रीडयैव सुरेष्वपि । मानुषान्मध्यया दृष्ट्या न मुक्तेषु कथञ्चने'ति स्कान्दे ॥ ४१, ४५ ॥ इति प्रथमतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

॥ ॐ ॥ '[4]अमात्या मन्त्रिणो दूताः श्रेणयश्च पुरोहिताः ।

भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ २८ ॥ मन्ये त्वां कालमीशानामनादिनिधनं परम् । समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥ ३१ ॥ ते वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः । भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ४१ ॥

नवमोऽध्यायः

नैनो राज्ञः प्रजाभर्तुः धर्मो युद्धे वधो द्विषाम् । इति मे न तु बोधाय कल्पते शाश्वतं वचः ॥ ५ ॥ युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलङ्कृतास्ये । मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ ४१ ॥ (नि)शित विशिखहतो विशीर्णदंशः क्षतज परिप्लुत आततायिनो मे । प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्मुदे मुकुन्दः ॥ ४५ ॥

दशमोऽध्यायः

निशम्य भीष्मोक्तमथाच्युतोदितं प्रवृत्तविज्ञानविधूत विभ्रमः ।

SGDF
Sri Gangeshwari Digital Foundation

पुरं जनपदं चेति सप्त प्रणिधयः स्मृता' इति ब्राह्मे ॥ ४ ॥ [20]पालनानुग्रहजयान् गौणेऽण्डे संस्थितो हरिः । करोत्यसौ बहिःसंस्थो न करोतीव निर्गुण'इति पाद्मे । अतो नानुरूपानुरूपाश्च ॥ २० ॥ [22]सत्वादिशक्तिषु ॥ २२ ॥ [23]श्रीर्भूर्दुर्गेति या भिन्ना जीवमाया महात्मनः । आत्ममाया तदिच्छा सा गुणमाया जडात्मिके'ति महासंहितायाम् ॥ अप्रसिद्धेस्तद्गुणानामनामासौ प्रकीर्तितः । अप्राकृतत्वाद्रूपस्याप्यरूपोऽसावुदीर्यत'इति वासुदेवाध्यात्मे ॥२३॥ [26]सात्विकानामनुग्राहकः । 'अगुणोऽपि परो देवो ह्यनुगृह्णाति सात्विकान् । देवांस्तु मानवान्मध्यानुपेक्ष्य क्लेश्यतेऽसुरानि'ति ब्रह्मदर्शने । 'सात्वतः सात्विकस्नेहात्सत्वो ह्यानन्दरूपत'इति ब्रह्मवैवर्ते । 'धारकत्वाद्धर्मरूपो ह्यैश्वर्यादेर्भगो ह्यसौ । सत्यमानन्दरूपत्वादृतो ज्ञानस्वरूपतः । यशो ह्यलं प्रसिद्धत्वाद्दया हि करुणाकर'इति तन्त्रभागवते । एवंविधगुणस्वरूपाणि रूपाणि दधद्युगेयुगे ॥ २६ ॥ '[31]अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुमि'ति महाकौर्मे ॥ ॥ ३१ ॥ [33]स्नेहमात्रात् ॥ ३३ ॥ [37]गविष्ठ आदित्यः । 'असौ वाव

शशास गामिन्द्र इवाजिताश्रयः प्रणिध्युपात्तामनुजानुवर्तितः ॥ ४ ॥ अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः । नानुरूपाऽनुरूपाश्च निर्गुणस्य गुणात्मनः ॥ २० ॥ स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि । अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मा निशि सुप्तशक्तिषु ॥ २२ ॥ स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् । अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रिकृत्॥२३॥ यदा ह्यधर्मेण तमोऽधिका नृपा जीवन्ति तत्रैष हि सात्वतः किल । धर्मं भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ॥२६॥ एताः पुरा स्त्रीत्वमवाप्तये समं निरस्तशोकं बत साधु कुर्वते । यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याकृतिभिर्हृदि स्पृशन् ॥३१॥ अजातशत्रुः पृतनां गोपीथाय मधुद्विषः । परेभ्यः शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम् ॥ ३३ ॥ तत्र तत्र च तत्रत्यैर्हरिः प्रत्युद्यतार्हणः । सायं भेजे दिशं

SGDF
Sri Gargeshwari Digital Foundation

गविष्ठोऽप्सूदेत्यप्स्वस्तमेती'ति माध्यन्दिनायनश्रुतिः ॥३७॥ [46]कुरूणां मधूनां च नः ॥४६॥ [75]तदाश्रया बुद्धिः । तज्ज्ञानिनामपि प्रकृतिस्थानां न तत्सङ्गः किमु तस्येति व्यत्यासदृष्टान्तः । 'व्यत्यासोऽनन्वयश्चैव प्रसिद्धो भूत एव च । सर्वसांहार(रि)कश्चेति दृष्टान्तः पञ्चधा स्मृत'इति ब्राह्मे ॥ ७५ ॥ [76]मतयो यथा यथामति मेनिरे ॥ ७६ ॥ इति प्रथमतात्पर्ये दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

[19]रामो दाशरथिर्यथा अधिकदृष्टान्तः । 'ऊर्णनाभ्यादिको- विष्णोर्विष्णुर्विष्णोस्तथैव च । विष्णुर्जीवस्य दृष्टान्ता ऊनसाम्याधिकाः क्रमादि'ति ब्राह्मे ॥ १९ ॥ '[31]पूरयन्ति दिशः सोमं देवा गावः सरस्वती'ति गारुडे ॥ ३१ ॥ इति प्रथमतात्पर्ये एकादशोऽध्यायः ॥ ॥ ११ ॥

द्वादशोऽध्यायः

'[5]तत्प्राणे प्रपन्न उदतिष्ठदि'ति श्रुतिः ॥ ५ ॥ [12]यदुकुलक्षय-

---

पश्चाद्गविष्ठो गां गतस्तदा ॥ ३७ ॥ यर्ह्यम्बुजाक्षाऽऽपससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमः क्षणो भवेद्रवेर्विनाऽक्ष्णामिव नस्तवाच्युत ॥ ४६ ॥ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न युज्यते सदाऽऽत्मस्थैः यथा बुद्धिस्तदाश्रया ॥७५॥ तं मेनिरे खला मूढाः स्त्रैणं चानुव्रतं रहः । अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ७६ ॥

एकादशोऽध्यायः

ब्राह्मणाः ऊचुः ॥ पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः । ब्रह्मण्यः सत्यसन्धश्च रामो दाशरथिर्यथा ॥ १९ ॥ स राजपुत्रो ववृध आशु शुक्ल इवोडुपः । आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥३१॥

द्वादशोऽध्यायः

प्रत्युज्जग्मुः प्रहर्षेण प्राणांस्तन्व इवागतान् । अभिसङ्गम्य विधिव-

SGDF
Sri Gargeshwari Digital Foundation

मेष्यत् । 'शापं श्रुत्वा ब्राह्मणानामुद्धवः खिन्नमानसः । उदासीनं तथा कृष्णमिव सुप्रीतमेव च ॥ न शिष्यमाणं स्वकुलं स्वर्यियासुं च केशवम् । ज्ञात्वा पप्रच्छ भगवत्स्वरूपं तमुपह्वरे ॥ मैत्रेयोऽपि तदैवागाज्जिज्ञासुस्तत्त्वमुत्तमम् । तयोरदात्स भगवान् ज्ञानं निर्मलमञ्जसा ॥ षड्विंशद्वत्सरात्पूर्वं स्वर्गतेः पुरुषोत्तमः । प्रेषयामास च हरिरुद्धवं बदरीमनु ॥ कलापग्रामिणां वक्तुमेतत्तत्त्वमशेषतः । विदुरं तीर्थयात्रास्थमन्तराले स उद्धवः ॥ दृष्ट्वा नशिष्यमाणं च कुलं जिगमिषुं हरिम् । कथयित्वा बदर्यां च कलापग्रामवासिनाम् ॥ प्रोच्य तत्त्वमशेषेण वासुदेवमुखोद्गतम् । षड्विंशद्वर्षगमने पुनरागतिमात्मनः ॥ तेषामुक्त्वा पुनः कृष्णसन्निधौ विचचार ह । मैत्रेयो विदुरायैतदूचिवान्कृष्णचोदितः ॥ विदुरः पाण्डवानां च विना यदुविनाशनम् । षट्त्रिंशद्वर्षतः पूर्वं ज्ञात्वाऽप्यप्रियमेव तत् ॥ नावोचद्विदुरो धीमांस्तस्मान्नाप्रियमावदेदि'ति पाद्मे ॥ 'तावच्छशासक्षितिमेकचक्रामेकातपत्रामजितेन पार्थ' इति चोपरि ॥ 'विदुरं चागतं पुनरि'ति च । भारते चैकविंशद्वर्षात्पूर्वं विदुरस्य युधिष्ठिरभाव उक्तः ॥ १२ ॥ [15]योऽर्यमा दण्डमबिभ्रत्स वर्षशतं यावच्छूद्रत्वं बभार । 'न देवानां न देवीनां सामस्त्येन जनिर्भुवि । अंशांशेनैव जायन्ते सर्वे त्वाजानजादयः' ॥ १५ ॥ '[20]संहर्ता भगवान्विष्णुः काल इत्यभिधीयते । अथवा गुणसर्वस्वं कालशब्दो व्यनक्ति ही'ति स्कान्दे ॥२०॥ [28]स्वैरज्ञातगतिः विविक्तगतिः ॥२८॥ [31]पितरौ कुन्तीधृतराष्ट्रौ । न चापश्यत् । तस्य मनसि तेषां विपद्भावो

त्वरिष्वङ्गाभिवन्दनैः ॥ ५ ॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् । यथानुभूतं भ्रमता विना यदुकुलक्षयम् ॥ १२ ॥ अबिभ्रदर्यमा दण्डं यथाघमघकारिषु । यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो । स एष भगवान् कालः सर्वेषां नः समागतः ॥ २० ॥ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् । इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः ॥२८॥ अजातशत्रुः कृतमैत्रो

SGDF
Sri Gargeshwari Digital Foundation

बभूव । अन्यथा महाभारतविरोधात् । स्कान्दे च । 'भीमसन्तर्जितो राज्ञस्त्वनुज्ञां प्राप्य यत्नतः । धृतराष्ट्रो वनेवासमकरोद्वत्सरत्रयम् । विदुरस्तद्दिदृक्षार्थमागतेषु वनं पुरा । पाण्डवेषु तु राजानं प्रविश्यैकत्वमागतः । ततो दावाग्निना दग्धं धृतराष्ट्रं च सौबलीम् । श्रुत्वा कुन्तीं च चिन्तां ते प्रापुः पाण्डुसुतास्तदा ॥ तांस्तदा नारदो विद्वान् शमयामास धर्मवित् । उक्त्वोत्तमां गतिं तेषां निष्ठां तात्कालिकीं तथे'त्यादि ॥ ॥३१॥ [32]ब्रह्माण्डे च । 'धृतराष्ट्रे मृते सूतः सञ्जयः पाण्डुसूनवे । गतिं शशंस कुन्त्याश्च गान्धारीधृतराष्ट्रयोरि'त्यादि ॥ पितृव्योऽपि धृतराष्ट्र एव । द्विरुक्तिस्तात्पर्यार्था । 'यत्राधिकं तत्परता बहुवारमपि ध्रुवम् । तद्वदन्ति महाप्राज्ञा लोकवेदानुसारत'इति ब्रह्मतर्के ॥ ३२ ॥ [34]पितृव्यौ गान्धारीधृतराष्ट्रौ ॥ ३४ ॥ [37]मुषितोऽस्मीति प्रलापः ॥ ३७ ॥ क्व [40]गतावित्यदृष्टयपेक्षया ॥ ४० ॥ [44]अपरिहार्यत्वादशोच्याः ॥ ४४ ॥ [51]गमनकाले सह भ्रात्रा ॥ ५१ ॥ [53]आस्त इत्याद्यतीतार्थे । 'स एष तर्ह्यध्यास्त आसनं पार्थिवोचितमि'त्यादिवत् । 'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च

हुताग्निर्विप्रान्नत्वा तिलगोवस्त्ररुक्मैः । गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत् पितरौ सौबलीं च ॥ ३१ ॥ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः । अम्बा वा हतपुत्रार्ता पितृव्यः क्व गतो इतः ॥३२॥ पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून् । अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥ ३४ ॥ संजय उवाच—अहं च व्यंसितो राजन् पित्रोर्वः कुलनन्दन । न वेद साध्व्या गान्धार्या मुषितोऽस्मि महात्मभिः ॥ ३७ ॥ राजोवाच—नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः । अम्बा वा हतपुत्रार्ता क्व गता च तपस्विनी । कर्णधार इवापारे सीदतां पारदर्शनः ॥ ४० ॥ यन्मन्यसे ध्रुवं लोकमध्रुवं चाथवोभयम् । सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥ ४४ ॥ धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया । दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥ ५१ ॥ स्नात्वा त्रिषवणं तस्मिन् हुत्वा चाग्नीन्यथा-

SGDF
Sri Gargeshwari Digital Foundation

सिध्यति बाहुलकेने'ति महाव्याकरणे । 'व्यासादयो वर्तमानमतीतानागते तथा । व्यत्यस्यापि वदन्त्यद्धा मोहनार्थं दुरात्मनाम् ।। पौर्वापर्यं यतो नैव सदैव परिवर्तनात् । अतश्च व्यत्ययादेतद्वदन्ति ज्ञानचक्षुष' इति ब्राह्मे ।। ५३ ।। [55]विज्ञानात्मा विरिञ्चोऽयं यस्तस्मिंल्लीयते जगत् । यादांसि सागरे यद्वत्स क्षेत्रज्ञे जनार्दने । हृदिस्थे च स च व्याप्ते स्वात्मन्येकीभवत्युत ।। प्रलयौ भेदवन्तौ तु पूर्वोक्तौ ब्रह्मकृष्णयोः । अन्तस्थस्य बहिष्ठे तु तस्य तस्मिन्नभेदत'इति ब्रह्मवैवर्ते । काले तस्य तत्र लयो भविष्यतीति ध्यानमात्रं विलापनम् ।। 'अविद्यमानमपि यो ध्यायेतैवं विनिश्चितः । उच्यते तस्य कर्तेति तथैव मुनयोऽमलाः । जगद्विलापयामासुरित्युच्यन्तेऽथ तत्स्मृतेः ।। न च तत्स्मृतिमात्रेण लयो भवति निश्चितमि'ति नारदीये । 'स्वरूपं जायमानं च आकाशं च घटे द्विधा ।। स्वरूपं जायमानं तु घटे निर्भेदमेव तु । भिन्नवद्व्यवहाराय समर्थं तल्लये भवेत् । तद्वद्देवावतारेषु देहस्थश्च हरिः स्वयम् । भिन्नवद्व्यवहाराय शक्तो लीने जगत्यपि । स एव पूर्ववज्ज्ञेयो निर्विशेषेण केशवः । जायमानं घटे जाते जायते तल्लयेन तु । तस्माद्भिन्नं महाकाशादेवं जीवोऽपि कीर्तितः ।। उपाधेश्चैव नित्यत्वान्नैव जीवोऽपि नश्यति । स्वरूपत्वादुपाधेश्च न भिन्नोपाधिकल्पनम् ।। न चाभिन्नत्वमीशेन चिन्मात्रत्वं च युज्यत' इति ब्रह्मतर्के ।। ५५ ।। [56]त्रिगुणात्मिका तथा ज्ञानं विष्णुशक्तिस्तथैव च । मायाशब्देन भण्यन्ते शब्दतत्वार्थवेदिभिरि'ति नाममहोदधौ । अत्र सत्वादयो मायागुणाः । 'परावरे तथैवारादुभयार्थाभिधायिन' इति च ।। ५६ ।। [60]एतत्सर्वं

विधि। अब्भक्ष उपशान्तात्मा स आस्ते विगतेक्षणः ॥५३॥ विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् । ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥ ५५ ॥ ध्वस्तमायागुणोद्रेको निरुद्धकरणाशयः । निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना ॥ ५६ ॥ विदुरस्तु तदाश्चर्यं निशम्य कुरुनन्दन । हर्षशोकयुतस्तस्माद्गन्ता तीर्थनिषेवकः ॥ ६० ॥

SGDF
Sri Gangeshwari Digital Foundation

पूर्वमेव ज्ञात्वा तस्मादेव कारणाद्विदुरस्तीर्थानि ययौ ॥ ६० ॥ इति प्रथमतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

[2]मासशब्देनाहान्युच्यन्ते । तथाहि महाभारते । 'अहस्तु मासशब्दोक्तं यत्र चिन्तायुतं व्रजेत् । एवं वत्सरभाद्यं च विपरीते विपर्यय' इति नाममहोदधौ ॥ २ ॥ [8]अङ्गं पृथिवीम् । 'यदा त्यागादिरुच्येत पृथिव्याद्यङ्गकल्पना । तदा ज्ञेया नहि स्वाङ्गं कदाचिद्विष्णुरुत्सृजेदि'ति ब्रह्मतर्के ॥ ८ ॥ [14]अग्नौ पदं करोति । 'यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोती'ति हि श्रुतिः ॥ १४ ॥ [34]यथाऽन्येषां सुखं भविष्यति तथा । नित्यसुखत्वाद्धरेः । 'अत्युत्तमानां कुशलप्रश्नो लोकसुखेच्छया । नित्यदाऽऽप्तसुखत्वात्तु न तेषां युज्यते क्वचिदि'ति नारदीये ॥ ३४ ॥ [39]पूर्वं चिरोषितः ॥ ३९ ॥ इति त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

[10]यत्पदयोः पतिताया अश्रुप्रधानः । यैः कबरं स्पृष्टं तत्स्त्रियः

त्रयोदशोऽध्यायः

व्यतीताः कतिचिन्मासास्तदा तु शतशो नृपः । ददर्श घोररूपाणि निमित्तानि भृगूद्वह ॥२॥ अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः । यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥ मृत्युदूतः कपोतोऽग्नावुलूकः कम्पयन् मनः । प्रत्युलूकश्च हुङ्कारैरनिद्रौ शून्यमिच्छतः ॥१४॥ भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः । कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥ ३४ ॥ कच्चित्तेऽनामयं तात ! भ्रष्टतेजा विभासि मे । अलब्धमानोऽवज्ञातः किंवा तात चिरोषितः ॥ ३९ ॥

चतुर्दशोऽध्यायः

पत्न्यास्तवापि मखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः-

SGDF
Sri Gargeshwari Digital Foundation

तत्पदयोः पतितत्वादेव । स विमुक्तकेश्यो न्यकृत ॥ १० ॥ [21]स रथो हयास्ते । तादृशा इत्यर्थः । त इषव इतीव । 'सदृशे वा प्रधाने वा कारणे वा तदित्ययम् । शब्दः सङ्घटते भेदे विद्यमानेऽपि तत्त्वत'- इति ब्रह्मतर्के । तद्रथहयानां दाहोक्तेः ॥ २१ ॥ इति प्रथमतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

[1]ज्ञानिनां प्रारब्धस्यैव विनिर्मथनं योग्यस्य(स्यैव) । 'महता कारणेनैव प्रारब्धान्यपि कानिचित् । कर्माणि क्षयमायान्ति ब्रह्मदृष्टिमतः क्वचिदि'ति भविष्यत्पर्वणि । तेषामपि काम्यकर्मफलदृष्टेश्च ॥१॥ [2]तम आदिनिरोधश्च प्रारब्धकर्मणैव । 'ज्ञानादिव्यक्तिरव्यक्तिः सुखदुःखादिकं तथा । सुदृष्टब्रह्मतत्त्वानां भवत्यारब्धकर्मणे'ति ब्रह्मवैवर्ते ॥ २ ॥ [3]ब्रह्मसम्पत्तिरवगतिः । 'भगवन्तं विनाऽन्यत्र प्रवृत्त्यादिप्रकाशनम् । प्रारब्धकर्मणैव स्यात्कदाचिज्ज्ञानिनामपि । तां द्वैतदृष्टिं मे देव छिन्धि ज्ञानवरासिने'ति ब्राह्मे । तदेव सञ्छिन्नद्वैतसंशयत्वम् । लीनप्रकृतित्वं नैर्गुण्यं च लीनप्रकृतिनैर्गुण्यम् । तस्मादसूक्ष्मशरीरत्वादनारब्धकर्ममूलत्वात् । असम्भवः पुनरुत्पत्तिवर्जितः । ज्ञानोदयकाल एवैवंभूतः

स्सभायाम् । स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्यो यैस्तत् स्त्रियो न्यकृत- तत्स विमुक्तकेश्यः ॥ १० ॥ तद्वै धनुस्त इषवः स रथो हयास्ते सोऽहं रथी नृपतयो यत आमनन्ति । सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूषे ॥ २१ ॥

पञ्चदशोऽध्यायः

सूत उवाच ॥ वासुदेवाङ्घ्र्यभिध्यान परिबृंहितरंहसा । भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥१॥ गीतं भगवता ज्ञानं यत्तत्सङ्ग्राममूर्धनि । कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः ॥ २ ॥ विशोको ब्रह्मसम्पत्त्या संछिन्नद्वैतसंशयः । लीनप्रकृतिनैर्गुण्यादलिङ्गत्वाद-

SGDF
Sri Gangeshwari Digital Foundation

सन्पुनरभ्यगच्छत् । 'प्रकृतिं स्वात्मसंश्लिष्टां गुणान्सत्वादिकानपि । कर्माणि सूक्ष्मदेहं च जायमाना हरेर्दृशिः । दहेदथापि सन्दग्धेन्धनवत्तत्पुनः पुनः । यावदारब्धकर्म स्यादाविर्वापि तिरो व्रजेदि'ति ब्रह्मतर्के ॥ ३ ॥ [7]पौत्रत्वे योग्यत्वमनवमत्वम् ॥ 'इन्द्राद्युत्तमताऽन्येषां समता वा स्वके कुले । उत्तमत्वमुपास्त्यादि योग्यता वा निगद्यत' इति ब्रह्मतर्के ॥ ७ ॥ [10-11]प्राणमपाने तं व्याने । समानोदानौ तेषु । तांश्च मूलप्राणे । आत्मा हृदिस्थो विष्णुः । ब्रह्म सर्वगतम् । 'उमा वागात्मिका रुद्राज्जाता सा मन आत्मनः । प्राणाह्वयात्स वायोश्च सोऽपानादात्मरूपतः ॥ स्वरूपादेव स व्यानादुदानो व्यानतस्तथा । तस्मात्समानो व्यानाच्चाप्यपानः प्राण एव च ॥ अपानात्तिसृभिश्चापि समानोदानयोर्जनिः । त्रयाणामथ पञ्चानामनाद्या प्राणतो भवः ॥ एकस्यैव स्वरूपाणि प्राणस्यैतानि पञ्च च । स च प्राणो हरेर्जातो हृदिस्थादात्मनो मतः ॥ स आत्मा ब्रह्मणो जातो विश्वरूपाज्जनार्दनात् । एतेषां ब्रह्मपर्यन्तं विलयोत्पत्तिचिन्तनम् ॥ ब्रह्मयज्ञ इति प्रोक्तः सर्वसंसारमोचक'इति नारायणाध्यात्मे ॥ 'अस्यास्मिन्विलयो भवतीत्येवं विज्ञानमाहुतिः । न तु तत्कालविलयस्त्वन्यो वा तस्य दर्शनादि'ति ब्रह्मतर्के ॥ १०, ११ ॥ [13]नावर्तेत वीरगतिम् ॥ १३ ॥ [15]आत्मनः स्वरूपमात्यन्तिकं ज्ञात्वा ॥ १५ ॥ इति पञ्चदशोऽध्यायः ॥ १५ ॥

सम्भवः ॥३॥ स्वराट् पौत्रं विनीतं तमात्मनोऽनवमं गुणैः । तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाह्वये ॥ ७ ॥ वाचं जुहाव मनसि तत्प्राण इतरे परम् । धृत्या ह्यपानं सोत्सर्गं तत्परत्वे ह्यजोहवीत् ॥१०॥ त्रित्वे हुत्वाऽथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः । सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये ॥ ११ ॥ उदीचीं प्रविवेशाऽशां गतपूर्वां महात्मभिः । हृदि ब्रह्मपरं ध्यायन्नावर्तेत गतो यतः ॥ १३ ॥ ते साधु कृतसर्वार्था ज्ञात्वाऽत्यन्तिकमात्मनः । मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम् ॥ १५ ॥

SGDF
Sri Gurgeshwari Digital Foundation

षोडशोऽध्यायः

[5]कोऽसावित्याक्षेपः। कलिमित्युक्तत्वात् ॥ ५ ॥ [6]अथेति पक्षान्तरे वा यदि ॥६॥ [7]अन्यथा चेदायुषो सद्व्यय इत्यर्थः। 'यद्यर्थे च विकल्पार्थे वाशब्दः समुदीर्यत'इति नाममहोदधौ ॥ ७ ॥ [9]एतदर्थं हि मृत्युरुपहूतः। अहो नृलोके पीयेतेति ॥ ९ ॥ [17]स्निग्धेषु पाण्डुषु विष्णोः सारथ्यादिभिर्विशेषतो भक्तिं करोति ॥ १७ ॥ [27-30]त्यागो मिथ्याभिमानवर्जनम्। 'मिथ्याभिमानविरतिस्त्याग इत्यभिधीयत' इति नारायणाध्यात्मे ॥२७॥ [28]एकान्ततः शुभभागित्वं सौभाग्यम्। 'शुभैकभागी सुभगो दुर्भगस्तद्विपर्यय'इति गीताकल्पे ॥२८॥ '[27]शमः प्रियादिबुद्ध्युज्झा [28]क्षमा क्रोधाद्यनुत्थितिः। [27]महाविरोधकर्तुश्च सहनं तु तितिक्षणमि'ति पाद्मे। 'स्वयं सर्वस्य कर्तृत्वात्कुतस्तस्य प्रियाप्रिये' इति च। 'प्रियमेव यतः सर्वमप्रियं नास्ति कुत्रचित्। स्वयमेव यतः कर्ता शान्तोऽतो हरिरीश्वर'इति ब्रह्मतर्के ॥ [29]मानः परेषाम् ॥ २९ ॥

षोडशोऽध्यायः

शौनक उवाच—कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः। नृदेवचिह्नधृक्शूद्रः कोऽसौ गां यः पदाऽहनत् ॥५॥ तत्कथ्यतां महाभाग यदि विष्णुकथाश्रयम्। अथवाऽस्य पदाम्भोजमकरन्दलिहां सताम् ॥६॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः। क्षुद्रायुषां नृणामङ्ग मर्त्यानां मृतिमृ(मि)च्छताम् ॥ ७ ॥ एतदर्थं हि भगवान् आहूतः परमर्षिभिः। अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ ९ ॥ सारथ्यपार्षदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामैः। स्निग्धेषु पाण्डुषु जगत्प्रणतस्य विष्णोर्भक्तिं करोति नृपतिश्चरणारविन्दे ॥ १७ ॥ सत्यं शौचं दया दानं त्यागः सन्तोष आर्जवम्। शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ २७ ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो धृतिः स्मृतिः। स्वातन्त्र्यं कौशलं कान्तिः सौभगं मार्दवं क्षमा ॥ २८ ॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः। गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहङ्कृतिः ॥ २९ ॥ इमे

SGDF
Sri Gargeshwari Digital Foundation

'[30]गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरीश्वरः। न विष्णोर्न च मुक्तानां कोऽपि भिन्नो गुणो मत'इति ब्रह्मतर्के ॥ ३० ॥ इति प्रथमतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

'[2]बिभ्यतमिव मेहन्तम् ॥ २ ॥ [21]असतां सूचकस्य न दोषस्तथापि सतां न सूचनीयमिति दर्शयितुम्। ज्ञातुं शक्यत्वाच्च राज्ञः। 'यद्यधर्मः कृतः सद्भिः स न वाच्यः कथञ्चन। असत्कृतधर्मं तु वदन्धर्ममवाप्नुयादि'ति व्याससमृतौ ॥ २१ ॥ [22]तस्य गोचरत्वेऽपि भूतानामगोचरेति ज्ञापयितुं वा ॥ २२ ॥ [32]ब्रह्मयज्ञा वितानयज्ञाश्च ॥ ॥ ३२ ॥ [33]इष्टात्ममूर्तिरिच्छातनुः ॥ ३३ ॥ [40]विहितातिरेकेण न सेवेत ॥ ४० ॥ इति प्रथमतात्पर्ये सप्तदशोऽध्यायः ॥ १७ ॥

चाऽन्ये च भगवन्नित्या यत्र महागुणाः। प्रार्थ्या महत्त्वमिच्छद्भिः न च यान्ति स्म कर्हिचित् ॥ ३० ॥

सप्तदशोऽध्यायः

वृषं मृणालधवलं मेहन्तमिव बिभ्यतम्। वेपमानं पदैकेन सीदन्तं शूद्रपीडितम् ॥ २ ॥ न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ। पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥१७॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक्। यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥२१॥ अथवा देवमायाया नूनं गतिरगोचरा। चेतसो वचसश्चापि भूतानामिति निश्चयः ॥२२॥ न वर्तितव्यं यदधर्मबन्धो धर्मेण सत्येन च वर्तितव्ये। ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं ब्रह्मवितानयज्ञाः ॥ ३२ ॥ यस्मिन् हरिर्भगवानीज्यमान इच्छात्ममूर्तिर्यजतां शं तनोति। कामानमोघान् स्थिरजङ्गमानामन्तर्बहिर्वायुरिवेश आत्मा ॥ ३३ ॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित्। विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥ ४० ॥

SGDF
Sri Gargeshwari Digital Foundation

अष्टादशोऽध्यायः

[3]'विज्ञानमात्मयोग्यं स्याज्ज्ञानं साधारणं स्मृतमि'ति भागवततन्त्रे ॥ ३ ॥ [13]सम्यक्स्वरूपाभिव्यक्तिरभावो जननस्य च । अप्रयत्नात्ततो वृद्धिहेतोः सत्सङ्गतिर्वरे'ति वायुप्रोक्ते ॥१३॥ [19]अनन्तो देशतः कालतश्च ॥ १९ ॥ [22]परमहंसाश्रमप्राप्यं सत्यं ब्रह्म ॥ २२ ॥ [26]स्वतो मनः स्थितिर्विष्णौ ब्रह्मभाव उदाहृत'इति ब्रह्माण्डे ॥ २६ ॥ [29]अप्रीतिर्मद्वशो नायमिति मत्सर ईरित'इति नाममहोदधौ ॥ २९ ॥ [36]कौशिकी कुशपाणिः ॥ ३६ ॥ [43]सेना पराकिणी प्रोक्ता वरूथो गुप्तिरुच्यत'इत्यभिधानम् ॥ ४३ ॥ [44]विड्राष्ट्रं पशुरुत्सेको भ्रमरश्चेति कथ्यत' इति च ॥ ४४ ॥ [50]स्वकृतो गुणस्तस्यैव यतः ॥ ५० ॥ इति प्रथमतात्पर्ये अष्टादशोऽध्यायः ॥ १८ ॥

अष्टादशोऽध्यायः

उत्सृज्य सर्वतः सङ्गं विज्ञानाजितसंस्थितिः । वैयासकेर्जहौ शिष्यो गङ्गायां स्वकलेवरम् ॥ ३ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ १३ ॥ कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य । योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद्यमनन्तमाहुः ॥ १९ ॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गमूढम् । व्रजन्ति यत्पारमहंस्यसत्यं यस्मिन्नहिंसोपरमश्च धर्मः ॥ २२ ॥ प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपारतम् । स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥२६॥ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः । ब्राह्मणं प्रत्यभूद्ब्रह्मन् मत्सरो मन्युरेव च ॥ २९ ॥ इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान् । कौशिक्यप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥३६॥ तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य पशोर्विलुम्पकाः । परस्परं घ्नन्ति शपन्ति वृञ्जते पशून्स्त्रियोऽर्थान् पुरुदस्यवो जनाः ॥ ४४ ॥ साधवः प्रायशो लोके परैर्द्वन्द्वेषु योजिताः । न व्यथन्ति न हृष्यन्ति यत आत्मा गुणाश्रयः ॥ ५० ॥

SGDF
Sri Gargeshwari Digital Foundation

एकोनविंशोऽध्यायः

[17]गङ्गायामुदक एव किञ्चिद्दक्षिणभागे प्रासादे । तथाहि महाभारते ॥ १७ ॥ इति प्रथमतात्पर्ये एकोनविंशोऽध्यायः ॥१९॥

विंशोऽध्यायः

'[4]कैशोरयौवनाभ्यन्तः काल आपीच्यमुच्यत' इत्यभिधानम् ॥ ॥ ४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवत-तात्पर्यनिर्णये प्रथमस्कन्धे विंशोऽध्यायः ॥ २० ॥ प्रथमस्कन्धः समाप्तः ॥ १ ॥

द्वितीयः स्कन्धः

प्रथमोऽध्यायः

श्रीगुरुभ्योनमः ॥ [1]यः पर इति ॥ १ ॥ [2]अपश्यताम् ॥२॥

एकोनविंशोऽध्यायः

इति स्म राजा व्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः । उदङ्-मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुते न्यस्तभारः ॥ १७ ॥

विंशोऽध्यायः

श्यामं सदापीच्यवयोङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन । प्रत्युत्थिता मुनयश्चासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥ ४ ॥

द्वितीयः स्कन्धः

प्रथमोऽध्यायः

श्री शुक उवाच—वरीयानेष ते प्रश्नः कृतो लोकहितं नृप । आत्म-वित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥ श्रोतव्यानीह राजेन्द्र नृणां सन्ति सहस्रशः । अपश्यतामात्मतत्वं गृहेषु गृहमेधिनाम् ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

[3]निद्रया ॥ ३ ॥ [4]असत्सु अभद्रेषु । 'सद्भावे साधुभावे चे'ति वचनात् ॥४॥ [7]ध्यानापेक्षया प्रायेण । नैर्गुण्यस्था मुक्ताः । 'एतत्साम गायन्नास्त'इति श्रुतेः ॥ ७ ॥ [8]द्वापरे च आदौ च कृष्णावतारापेक्षया । 'व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजनदि'ति स्कान्दे ॥८॥ [9]परिनिष्ठितोऽपि मुक्तिरस्य भविष्यतीति निश्चितोऽपि । 'उदरं संशयः प्रोक्तः परिनिष्ठा विनिश्चय'इत्यभिधाने ॥ 'ऋष्युत्तमा देवताश्च विमुक्तौ परिनिश्चिताः । तथाप्यधिकसौख्यार्थं यतन्ते शुभकर्मसु ॥ विमुक्तास्तु स्वभावेन नित्यं ध्यानादितत्परा'इति गारुडे ॥ ९ ॥ [18]शुभार्थे भगवति ॥ १८ ॥ [19]विषयेभ्यो निर्गत्य तत्रैव मनोयुङ्क्त्वाऽन्यन्न स्मरेत् ॥ १९ ॥ [21]भद्रं हरिम् ॥ २१ ॥ [22]यच्छब्दः प्रश्ने । 'यतश्चोदेति सूर्य'इत्यादिवत् । 'यच्छब्दस्तु परामर्शे प्रश्नार्थे चाभिभण्यत'-इत्यभिधाने ॥ यथेत्यस्य जितासन इत्यादि । यत्र स्थूले ॥ यादृशीत्यस्य विशेष इत्यादि ॥२२॥ [24]विशेष आण्डकोशः । 'शिलावत्तस्य देहोऽयमण्डकोशस्तु सावृतिः । तत्तन्त्रत्वान्न तत्संस्थदुःखभोगोऽस्य न

निद्रया ह्रीयते नक्तं व्यवायेन नवं वयः । दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥३॥ देहापत्यकलत्रादिष्वात्मदैन्येष्वसत्स्वपि । तेषु प्रसक्तो निधनं पश्यन्नपि न पश्यति ॥ ४ ॥ प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः । नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥७॥ इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥ ॥ ८ ॥ परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ९ ॥ नियच्छेद्विषयेभ्योऽक्षान् मनसा बुद्धिसारथिः । मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा । मनो निर्विषयं युङ्क्त्वा ततः किञ्चिन्न संस्मरेत् । पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ १९ ॥ यस्यां सन्धार्यमाणायां योगिनो भक्तिलक्षणः । आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥ राजोवाच—यथा सन्धार्यते ब्रह्मन् धारणा यत्र सम्मता । यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥ २२ ॥ विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् । यत्रेदं दृश्यते विश्वं भूतं

SGDF
Sri Gargeshwari Digital Foundation

क्वचिदि’ति ब्रह्मवैवर्ते ॥ २४ ॥ ‘[25]अण्डकोशो विराट्प्रोक्तो विशेषेण प्रकाशनात् । वैराजस्तद्गतो विष्णुरथवा सर्वतो वर’इति भागवततन्त्रे ॥ ॥ २५ ॥ [26]प्रतिमापेक्षयाऽङ्गानि स्वरूपापेक्षया तज्ज्ञानि तदाश्रितानि च ॥ २६ ॥ [30-31]बहुरूपत्वादंष्ट्रार्यमेन्द्रू इत्यादि । ‘प्रतिमापेक्षयाङ्गानि भूरादीनि स्वरूपतः । तदाश्रितानि तज्ज्ञानि बह्वङ्गत्वं बहुत्वत’- इति ब्रह्मतर्के ॥ ३०, ३१ ॥ इति द्वितीयतात्पर्ये प्रथमोऽध्यायः ॥१॥

द्वितीयोऽध्यायः

॥ ॐ ॥ [2]एष हरिः । यदपार्थैर्ध्यायति । तत्रार्थान्न विन्दते । ‘सर्वनामा यतो विष्णुस्तदन्यार्थान्न तु स्मरेत् । स्मरंस्तु यावदर्थः स्यादन्यथा स्वात्महा स्मृत’ इति ब्रह्माण्डे ॥ ४, २३॥ [6]एतमितस्त्वं प्रेत्याभिसम्भविताऽस्मी’ति नियतार्थः ॥ ६ ॥ ‘[7]यथैकस्तु बहून्सुप्ता-

---

भव्यं भवच्च यत् ॥ २४ ॥ आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते । वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः ॥ २५ ॥ पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् । महातलं विश्वसृजः सुगल्फौ तलातलं वै पुरुषस्य जङ्घे ॥ २६ ॥ द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च । तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥ ३० ॥ छन्दांस्यनन्तस्य गिरो गृणन्ति दंष्ट्रार्यमेन्द्रुगणा द्विजानि । हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ॥ ॥ ३१ ॥

द्वितीयोऽध्यायः

श्री शुक उवाच—एवं पुरा धारणयाऽऽत्मयोनिर्नष्टां स्मृतिं प्रत्यवरुह्य तुष्यन् । तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः ॥ ॥ १ ॥ शब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः । परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः ॥ २ ॥ एवं स्वचित्ते स्वत एव सिद्ध आत्माप्रियोऽर्थो भगवाननन्तः । तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥ स सर्वविद्ध्यनुभूश्च

SGDF
Sri Gangadhareshwar Digital Foundation

नसुप्तः पश्यति प्रभुः । एवमीशो बहूञ्जीवानज्ञान्पश्यति नित्यदृगि’ति व्योमसंहितायाम् । ‘स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती’ति च । ‘यथेष्टभवनाद्विष्णुरनुभूः परिकीर्तितः । उदधिः कर्मणामीशः सर्वः पूर्णगुणो यतः । सत्यः केवलसारत्वान्नियमो नियतेरज’- इति बृहत्संहितायाम् ॥ ७ ॥ [13]चिन्तामयं चिन्ताप्रधानम् । ‘यस्मात्सश्चिन्तितो विष्णुश्चिन्तितं प्रददात्यजः । तस्माच्चिन्तामयं देवं वदन्ति ज्ञानचक्षुष’इति च ॥ १३ ॥ [15]स्थवीयः पातालमेतस्येत्यादि ॥१५॥ ‘[16-17]भक्त्या प्राणं वशं नीत्वा जितप्राणो भवत्युते’ति षाड्गुण्ये ॥१६॥ ‘जीवस्थो भगवान्विष्णुः क्षेत्रज्ञ इति गीयते । देहस्थोऽपि स एवात्मा व्याप्तोऽप्यात्मेति भण्यत’इति तत्त्वनिर्णये । हरौ हरेर्भवेन्नीतिस्तदेकत्वस्य चिन्तनम् । अन्यत्र तन्नियम्यादिचिन्तनं नीतिरुच्यत’इति प्रकाशसंहितायाम् ॥ १७ ॥ [18]कालो वायुः । ‘हरिश्च प्रकृतिश्चैव ब्रह्मवायू तथैव च । सुपर्णशेषरुद्राश्च शक्रः सूर्ययमावपि । अग्निर्यमानुजश्चैव कालशब्देरिताः क्रमात् । पूर्वोक्तास्त्वपरोक्तानां प्रभवः सर्वशो मता’इत्युद्दामसंहितायाम् ॥ १८ ॥ [21-22]उदानगत्या ब्रह्मनाड्या । ‘अथैकयोर्ध्व उदान’ इति श्रुतेः । ‘प्राणापानाविडायां च

सर्व आत्मा यथा सुप्तजनेक्षितैकः । तं सत्यमानन्दनिधिं भजेत सर्वात्मनाऽतोऽन्यत आत्मघातः ॥ ७ ॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् । ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयाऽवतिष्ठते ॥ १३ ॥ यावन्नजायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः । तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत् ॥ १५ ॥ स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग लोकम् । काले च देशे च मनो न सज्जेत् प्राणान्नियच्छेन् मनसा जितासुः ॥ १६ ॥ मनश्च बुद्ध्याऽमलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि । आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १७ ॥ न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे । न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम् ॥ १८ ॥ नाड्यां स्थितं

SGDF
Sri Gangeshwari Digital Foundation

पिङ्गलायां च वर्ततः । व्यानः सन्धिषु सर्वत्र उदानो ब्रह्मनाडिगः । सर्वत्रैव समानस्तु समं चरति सर्वग'इति भारते ॥ २१ ॥ परं चिन्तयन् ॥२२॥ '[23-24]चिन्मात्राणीन्द्रियाण्याहुर्मुक्तानामन्यदैव तु । तान्येव जडयुक्तानि ह्यभिन्नानि स्वरूपत'इति ब्राह्मे ॥ पवनस्याप्यन्तरात्मा यः तम् । पवनश्चान्तरात्मा चेति वा । 'ईयुस्त्रीन्कर्मणा लोकाञ्ज्ञानेनैव तदुत्तरान् । तत्र मुख्या हरिं यान्ति तदन्ये वायुमेव तु अपक्का येन ते यान्ति वायुं वा हरिमेव वा । स्थानमात्राश्रितास्ते तु पुनर्जनिविवर्जिता' इति ब्रह्मतर्के ॥ २३, २४ ॥ [25]हरेः शैंशुमारं चक्रम् । वैश्वानरोदस्तात् । 'वैश्वानरे द्युनद्यां वा सूर्ये वा देह एव वा । विधूय सर्वपापानि यान्ति किंस्तुघ्नकेशवमि'ति ब्रह्माण्डे ॥ २५ ॥ '[26]पितृयानं देवयानं ब्रह्मयानमिति त्रिधा । गच्छन्वैश्वानरं याति तस्मान्मार्गः स ईरितः ॥ २६ ॥ '[27]दक्षिणाः पिङ्गलाः सर्वा इडा वामाः प्रकीर्तिताः । नाड्योऽथ मध्यमाः प्रोक्ताः सुषुम्ना वेदपारगैरि'ति भागवततन्त्रे ॥ 'देवयानस्य मार्गस्था अहःशब्दाभिसञ्ज्ञिताः । पितृयानस्य मार्गस्था रात्रिशब्दाह्वया मता'इति बृहत्तन्त्रे ॥ 'शतायुर्मरणं चैव कालिकं परमावृतिरि'त्यभिधाने ॥ पिङ्गलाभिः शतायुषा अहः-

---

हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः । ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २१ ॥ तस्माद् भ्रुवोरन्तरमुन्नयेत निरुद्धसप्ताश्वपथोऽनपेक्षः । स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन् विसृजेत्परङ्गतः ॥ २२ ॥ यदि प्रयास्यत्यथ पारमेष्ठ्यं वैहायसानामुत यद्विहारम् । अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥२३॥ योगेश्वराणां गतिमामनन्ति बहिस्त्रिलोक्याः पवनान्तरात्मा । न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥२४॥ वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा । विधूतकल्कोथ हरेरुदस्तात् प्रयाति चक्रं नृप शैंशुमारम् ॥२५॥ योऽन्तः पचति भूतानां यस्तपत्यण्डमध्यगः । सोऽग्निर्वैश्वानरो मार्गो देवानां पितॄणां मुनेः ॥ ॥२६॥ देवयानं पिङ्गलाभिरहान्येति शतायुषा । रात्रीरिडाभिः पितॄणां

SGDF
Sri Gurgeshwari Digital Foundation

सञ्ज्ञं देवयानमेति। इडाभी रात्रिसञ्ज्ञं पितृयानम्। 'विषुवत्ता ब्रह्मयानो विशेषेण सुखं यतः। पिङ्गला देवयानं स्यात्पिङ्गाख्यसुखदं यतः। इडाऽन्नदानात्पितृणामेवं मार्गाः प्रकीर्तिता' इति ब्रह्मतर्के ॥२७॥ [28]अशेषजगदाधारः शिंशुमारो हरिः परः। सर्वे ब्रह्मविदो नत्वा तं यान्ति परमं पदमि'ति ब्रह्माण्डे ॥ तद्विष्णोर्विश्वाधारं रूपं प्रतिपद्य यत्र कल्पायुषस्तं महर्लोकमुपैति। 'मन्वन्तरायुषः स्वर्ग्या महर्लोके तु काल्पिकाः। आब्रह्मणो जनाद्यास्तु महर्लोकेऽपि ये वरा' इति ब्राह्मे ॥ ॥२८॥ [30]ऋते सत्यलोके। अनिदंविदां अब्रह्मविदाम्। दुरन्तदुःखं च प्रभवश्च। 'सर्वदुःखविहीना ये मुक्ताः प्रायस्तु तादृशाः। अमुक्तास्तु जनाद्येषु विशेषेण तु सत्यगा' इति वाराहे ॥ विष्णोर्लोकं तदैवैके यान्ति कालान्तरे परे। आज्ञयैव हरेः केचिदपूर्तैः केचिदञ्जसा। विहृत्यैवान्यलोकेषु मुच्यन्ते ब्रह्मणा सहे'ति वामने ॥ २९, ३० ॥ [31]ब्रह्मणा सह विशेषं पृथिवीम्। तेनात्मना पृथिव्यात्मना। ज्योतिर्मय अग्निप्रधानः। आकाशवत्सर्वगतश्च नित्य इति। परमात्मसदृशं किञ्चित्। 'ज्ञानिनः प्रलये सर्वे ब्रह्मणा सह पार्थिवम्। परमात्मानमाविश्य वारिस्थं तत्समन्विताः। अग्निस्थं तद्युताश्चैव तेन नीताश्च वायुगम्। नभोगतं तेन नीता मनःस्थं तद्युतास्तथा। ततो बुद्धिस्थमीशेशं ततोऽहङ्कारगं हरिम्। ततो विज्ञाननामानं महत्तत्त्वगतं हरिम्। तत आनन्दनामानमव्यक्तस्थं जनार्दनम्। प्राप्य नावृत्तिमायान्ति शान्ति-

---

विषुवत्तां सुषुम्नया ॥ २७ ॥ तद्विश्वनाभिं त्वभिपद्य विष्णोरणीयसा विरजेनात्मनैकम्। नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥ २८ ॥ अथो अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वम्। निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यम् ॥ ॥ २९ ॥ न यत्र शोको न जरा न मृत्युर्नार्तिर्नचोद्वेगः ऋते कुतश्चित्। यच्चित्ततोदः क्रिययाऽनिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥ ३० ॥ ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनाऽपोऽनलमूर्ति च त्वरन्। ज्योति-

SGDF
Sri Gurgeshwari Digital Foundation

(ती)भूता निरामयाः ॥ येषां पदान्तरापेक्षा वाय्वादीनां महात्मनाम् । आवृत्य ते पुनर्यान्ति ज्ञानिनोऽपि निरामयाः । अनावृत्तिमसंमूढाः परानन्दैकभागिन'इति ब्रह्मतर्के ॥ 'भूम्यब्गमन्ननामानं प्राणमग्न्यादिसंस्थितम् । मानसं मन आदिस्थं विज्ञानं महति स्थितम् । आनन्दमव्यक्तगतं क्रमशो यान्ति देवताः । ब्रह्माद्याः केचिदेवात्र तदन्ये क्रमशोऽपरानि'ति बृहत्तन्त्रे ॥ ३१ ॥ '[32]पञ्चेन्द्रियैर्ये विषया एष्टव्याः सर्वतो वराः । मानसांश्चाखिलान्प्राप्य मुक्तौ मोदन्ति देवताः । तथोद्रिक्तनिजानन्दा नित्यानन्दा असंवृता'इति षाड्गुण्ये ॥ ३२ ॥ [33]भूतसूक्ष्मेन्द्रियैश्च सह अनादिर्भगवानाकाशगो मनोमयं याति । नादवत्त्वात्सनातनः । 'नादेन तेन महता सनातन इति स्मृत'इति मोक्षधर्मे ॥ विविधकार्ययुक्तं विकार्यम् । देवमयं देवप्रधानम् । 'मनःस्थितो हरिर्नित्यं सर्वदेवेषु संस्थितः । देवप्रधानकॉल्लोकान्करोत्यनुगतः सदे'ति वाराहे ॥ भूतसूक्ष्माणि पञ्चभूतानि जीवाश्च । 'पञ्चभूतैश्च शब्दाद्यैरिन्द्रियैर्जीवराशिभिः । युक्त आकाशगो विष्णुर्मनःस्थमुपगच्छती'ति वामने । योऽसावनादिर्मनोमयस्तमिति वा । विपर्ययश्चेत्तस्यैव गन्तृत्वमिति ज्ञापयितुम् । मतिस्थेन तेन मनःस्थेन च सह विज्ञानतत्वं याति ॥ ३३ ॥ [34]गुणसंनिरोधं निर्गुणं वासुदेवम् ॥ [35]एतां गतिं गतो न विषज्जते । 'वासुदेवाश्रिता देवा ब्रह्माद्या मुक्तबन्धनाः । भेददृष्ट्याभिमानेन चावृत्तिं नैव यान्ति ते । भुञ्जते तु

र्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥ ३१ ॥ घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्या स्पर्शं त्वचैव। श्रोत्रेण चोपेत्य नभोगुणं तत् प्रायेण नावृत्तिमुपैति योगी ॥ ३२ ॥ स भूतसूक्ष्मेन्द्रियसन्निकर्षात् सनातनोऽसौ भगवाननादिः । मनोमयं देवमयं विकार्यं संसाद्य मत्या सह तेन याति ॥३३॥ विज्ञानतत्वं गुणसन्निरोधं तेनात्मनाऽऽत्मानमुपैति शान्तिम् । आनन्दमानन्दमयोऽवसाने सर्वात्मके ब्रह्मणि वासुदेवे ॥३४॥ एतां गतिं भागवतो गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग । एते सृती ते

SGDF
Sri Gargeshwari Digital Foundation

पृथग्भोगान्नानन्दं तत्स्वरूपकम् । स्वरूपं च पृथक्तेषामाविष्टग्रहवद्भवे-दि'ति ब्रह्माण्डे ॥ ३४, ३५॥ यद्भगवानाह । [36]अतो भागवताख्या-द्ग्रन्थाच्छिवः पन्था न ॥ ३६ ॥ [37]तद्भावतं पुराणमपश्यत् । 'नित्य-ज्ञानेन सिद्धं च पुनः पुनरवेक्षते । लीलयैव हरिर्देवो दुष्टानां मोहनाय चे'ति ब्रह्मतर्के (पाद्मे) ॥ ३७ ॥ [38]लक्षितश्चास्मिन्पुराणे बुद्ध्यादीनां पारवश्यदर्शनादन्यो नियन्ताऽस्तीति । 'समाधावसमाधौ च निः-स्वतन्त्रस्य देहिनः । अन्यो नियन्ता भगवान्वासुदेवः परः प्रभुरि'ति ब्रह्मतर्के ॥३८॥ [39]यस्माद्भगवतैष एवोक्तस्तस्मात्स एव श्रोतव्यादिः ॥ ॥ ३९ ॥ इति द्वितीयतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

[8]अकामो धर्मकामो वा मोक्षकामोऽपि यो भवेत् । अथवा सर्वकामो यः स विष्णुं पुरुषं यजेदि'ति स्कान्दे ॥ ९ ॥ [17]तस्यायुषः उत्तमश्लोकवार्तया ऋते यः क्षणः स नीत एव वृथा ॥ १० ॥ इति द्वितीयतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

नृप वेदगीते त्वयाभिपृष्टेऽथ सनातने च । ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः ॥३५॥ न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह । वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥३६॥ भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदपश्यद्धि कूटस्थे रतिरात्मन्यतो भवेत् ॥३७॥ भगवान् सर्वभूतेषु लक्षितश्चात्मना हरिः । दृश्यैर्बुद्ध्यादिभि-र्द्रष्टा लक्षणैरनुमापकैः ॥ ३८ ॥ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ३९ ॥

तृतीयोऽध्यायः

राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत् । कामकामो यजेत्सोममकामः पुरुषं पुमान् ॥ ९ ॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥

SGDF
Sri Gurgeshwari Digital Foundation

चतुर्थोऽध्यायः

[2]अन्येषां नित्यं निरूढा। तदा विशेषतो जहौ ॥२॥ '[4]आप्तेः सर्वगुणानां य आत्मनामतया हरिम्। उपास्ते नित्यशो विद्वानाप्तकामस्तदा भवेदि'ति वामने ॥४॥ [1]गृहीतशक्तित्रितयायेति। 'इच्छा ज्ञानं क्रिया चेति नित्याः शक्तय ईशितुः। स्वरूपभूता अपि तु भेदवद्व्यावहारिका'इति प्रकाशसंहितावचनान्नित्यगृहीतशक्तित्वमेव ॥ ॥ १२ ॥ [13]अखिलसत्वमूर्तये। पूर्णसाधुभावस्वरूपाय। निःशेषगुणपूर्णत्वात्सत्व इत्येव तं विदुरिति महासंहितायाम् ॥१३॥ '[19]वेदानुसारिवशगः स्वेच्छया तु हरिर्यतः। अतः स्वतन्त्रमप्याहुः प्राज्ञा वेदमयेति हे'त्यध्यात्मे ॥ १९ ॥ इति द्वितीयतात्पर्ये चतुर्थोऽध्यायः ॥ ॥ ४ ॥

पञ्चमोऽध्यायः

[1]विजानीहि विज्ञापय। 'व्यत्ययो भेदस्वातन्त्र्यकरणेष्वि'ति

चतुर्थोऽध्यायः

आत्मजायासुतागारपशुद्रविणबन्धुषु। राज्ये चाविकले नित्यं निरूढां ममतां जहौ ॥ २ ॥ संस्थां विज्ञाय सन्यस्य कर्म त्रैवर्गिकं च यत्। वासुदेवे भगवति स्वात्मभावं दृढं गतः ॥४॥ श्री शुक उवाच— नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया। गृहीत शक्तित्रितयाय देहिनामन्तर्भुवायानुपलभ्यवर्त्मने ॥१२॥ भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्वमूर्तये। पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥ स एष आत्माऽऽत्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः। गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम् ॥ १९ ॥

पञ्चमोऽध्यायः

नारद उवाच—देवदेव नमस्तेऽस्तु भूतभावन पूर्वज। तद्विजानीहि

SGDF
Sri Gargeshwari Digital Foundation

वचनात् ॥ १ ॥ '[2]तद्वशत्वादिदं रूपं हरेर्नैव स्वरूपत' इति मानससंहितायाम् । 'अधिष्ठानमिति प्रोक्तं मूलाधारं विचक्षणैः । यत्स्थितं दृश्यते वस्तु संस्थानं तदुदीरितम् । उभयं हरिरेवास्य जगतो मुनिपुङ्गवे'ति वामने ॥ 'हरिः परोऽस्य जगतो ह्यव्यक्तादेश्च कृत्स्नशः । अतस्तत्परमेवेदं वदन्ति मुनयोऽमला' इति सात्वतसंहितायाम् । 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते । विद्यमाने विभेदेऽपि मिथो नित्यं स्वरूपत'इति भविष्यत्पर्वणि ॥ २ ॥ [4]तदधिकं ज्ञातुं पूर्वपक्षं दर्शयति । एकः सृजसीत्यादिना ॥ ४ ॥ '[6]त्वदधीना यतः सत्ता अवरस्यापि केशव । अतः स्वरूपतः सम्यक्सति भेदेऽपि तद्भवानि'ति मात्स्ये ॥ ६ ॥ [10]नानृतमित्याक्षेपः ॥ १० ॥ '[12-13]मुख्या माया हरेः शक्तिरमुख्या प्रकृतिर्मता । अथामुख्यतमा चैव माया हीना प्रकीर्तिता' ॥ १२, १३ ॥ [14]परः अधिकः । 'तद्वदेव स्थितं यत्तु तात्त्विकं तत्प्रचक्षत'इति कौर्मे ॥ १४ ॥ [15-16]वेदप्रतिपाद्येषु स पर इत्यादि । 'गम्येज्यज्ञेयवाच्येषु याज्येषु च परो हरिः । तपसा युज्यमानानां सर्वलोकेभ्य एव चे'ति वाराहे ॥ १५, १६ ॥ [18]युगपत्क्रम-

---

यज्ज्ञानमात्मतत्वनिदर्शनम् ॥ १ ॥ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं विभो । यत्संस्थं यत्परं यच्च तत्तत्वं वद तत्वतः ॥ २ ॥ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः । एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥ नाहं वेद परन्त्वस्मान्नावरं न समं विभो । नामरूपगुणैर्भाव्यं सदसत्किञ्चिदन्यतः ॥६॥ नानृतं बत तच्चापि यथा मां प्रब्रवीषि भो । अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥१०॥ तस्मै नमो भगवते वासुदेवाय धीमहि । यन्मायया दुर्जयया मां विदन्ति जगद्गुरुम् ॥ १२ ॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया । विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ १३ ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । वासुदेवात्परो ब्रह्मन् नैवान्योऽर्थोऽस्ति तत्वतः ॥ १४ ॥ नारायणपरा वेदा देवा नारायणाङ्गजाः । नारायणपरा लोका नारायणपरा मखाः ॥ ॥ १५ ॥ सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः । स्थितिसर्गनिरोधेषु

SGDF
Sri Gangeshwari Digital Foundation

शोऽपि वेत्यस्य परिहारः 'सत्वं रजस्तम'इति। 'नित्यं गृहीताः सत्वाद्याः स्थित्यादिषु विशेषतः। युगपत्क्रमशश्चैव गृह्णाति भगवान्स्वयमि'ति ब्रह्मवैवर्ते ॥ १८ ॥ '[19]ज्ञानेन्द्रियैश्च मनसा सत्वं बध्नाति पूरुषम्। रजः कर्मेन्द्रियैर्नित्यं शरीरेण तमस्तथा॥ आन्तरं यत्तु कर्तृत्वं तत्सत्वेनाभिमन्यते। रजसा त्वभिमन्येत करणैः कर्मकारणैः॥ शारीरं वेदनाद्यं तु तमसा ह्यभिमन्यते। अकर्ता करणैर्हीनः शरीरेण विवर्जितः॥ नित्यज्ञातस्वरूपोऽसौ गुणैरेवाभिमन्यते। एवं जीवः परेणैव प्रेरितः संसृतिं व्रजेत्। न परः संसृतिं क्वापि स्वातन्त्र्यादधिकत्वतः॥ एवं जीवपरौ भिन्नौ किमन्यच्छ्रोतुमिच्छसी'ति पाद्मे॥ मायिनं ज्ञानिनं स्वतः ॥ १९ ॥ [20]लिङ्गैर्ज्ञापकैः। त्रिगुणैः। एतैर्लिङ्गैः। स्वप्रसादा-ज्जीवेन लक्षितगतिः। 'स्वप्रसादादिमं जीवः पश्येत्तेन स्वलक्षित'इति षाड्गुण्ये ॥ २० ॥ [21]स्वया मायया स्वशक्त्या। 'यत्रान्यहेत्वभावः स्यादीश्वरेच्छादिना विना। तदिच्छा हि यदृच्छा स्यादतस्तत्र यदृच्छ-ये'ति ब्रह्मतर्के। 'कालकर्मस्वभावादि नित्ययेशेच्छया सदा। प्राप्तमेव विशेषेण सृष्ट्यादावुन्नयत्यज'इति च॥ विबुभूषुः बहुधा बुभूषुः। 'ईशो बह्वीः पुरः सृष्ट्वा तत्रैव बहुरूपताम्। तत्तन्नियामकतया प्राप्तुं कालाद्युपादद' इति च ॥ २१ ॥ [22]प्रकृतेः परिणामस्वभावतः। 'गुणकालस्वभावेभ्य ईशेनाधिष्ठितत्वतः। जगदादि महत्तत्त्वमभूत्त-स्येच्छया हरेरि'ति षाड्गुण्ये ॥ २२ ॥ '[23]भूतानि द्रव्यनामानि ज्ञानं

गृहीता मायया विभोः ॥१८॥ कार्यकारणकर्तृत्वे द्रव्यज्ञान क्रियाश्रयाः। बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥ स एष भगवान् लिङ्गैस्त्रिभिरेतैरधोक्षजः। स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः॥ ॥२०॥ कालं कर्म स्वभावं च मायेशो मायया स्वया। आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥ कालाद्गुणव्यतिकरात्परिणामस्वभावतः। कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥ महतस्तु विकुर्वाणा-

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानेन्द्रियाण्यपि । क्रियां कर्मेन्द्रियाण्याहुस्तन्मूलत्वादहं त्रिधे'ति गारुडे ॥ २३ ॥ '[24]विशिष्टकार्यशक्तित्वाद्देवा वैकारिकाः स्मृताः ॥ अतिजाज्वल्यमानत्वात्तैजसानीन्द्रियाण्यपि । तामसानि तु भूतानि यतस्तावन्न तूभयमि'ति पाद्मे ॥ २४ ॥ 'ज्ञानेन्द्रियाणां देवानां ज्ञानशक्तिरुदीरिता । क्रिया कर्मेन्द्रियाणां च भूतानां द्रव्यशक्तिते'ति स्कान्दे । 'द्रव्यं तु द्रवणप्राप्यं द्वयोर्विवदमानयोः । पूर्वं वेगाभिसम्बन्धादाकाशस्तु प्रदेशत'इति प्रकाशसंहितायाम् ॥२५॥ '[26]पञ्चेन्द्रियाभिमेयत्वान्मात्रा गुण इतीरित' इति मात्स्ये । 'शब्देनैव परो द्रष्टा ज्ञायते जगदेव चे'ति विष्णुसंहितायाम् ॥ २६ ॥ '[27]सर्वचेष्टयितृत्वात्तु प्राणोऽभिभवशक्तितः । ओजस्त्वनभिभाव्यत्वात्सहश्च स्वेच्छया कृतेः । बलं विधारकत्वाच्च विधृतिर्वायुरुच्यत'इति भारते ॥२७॥ '[30]अनाद्यनन्तोऽपि हरिर्वैकारिकगणेष्वजः । अवतीर्णः पदाङ्गुष्ठमध्यास्ते विश्वभुग्विभुः । पाददेवस्तु यज्ञोऽन्यस्तं प्रविश्य हरिः स्वयम् । सर्वं विधारयन्देहे वर्ततेऽनन्तशक्तिधृगि'ति वह्निपुराणे ॥ ३० ॥ [33]सदसत्त्वं व्यक्ताव्यक्तत्वम् । नः भयम् । अदो ब्रह्माण्डम् । ब्रह्माण्डं हि वदन्तीति जीवानां भयकारणम् । तत्र हि संस्मृतिः । 'आकाशवायू त्वव्यक्ताावितरेऽण्डे प्रकाशिताः । तथात्वाद्बाह्यभूतानामण्डस्थानां च

द्रजः सत्त्वोपबृंहितात् । तमः प्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥२३॥ सोऽहङ्कार इति प्रोक्तो विकुर्वन् समभूत्त्रिधा । वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥ २४ ॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभोः । तामसादपि भूतादेर्विकुर्वाणादभून्नभः ॥ २५ ॥ तस्य मात्रागुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः । नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः ॥ २६ ॥ परान्वयाच्छब्दवांश्च प्राण ओजः सहोबलम् । वायोरपि विकुर्वाणात् कालकर्मस्वभावतः ॥ उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत् ॥२७॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश । दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ ३० ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः । सदसत्त्वमुपादाय नो भयं ससृजुर्ह्यदः ॥ ३३ ॥ वर्ष-

SGDF
Sri Gargeshwari Digital Foundation

सा गतिरि'ति मात्स्ये ॥ ३३ ॥ [34]कालकर्मस्वभावस्थ अजीवः परमेश्वरः । अजीवः स्वात्मानमजीजनत् । तदण्डं यथा स्वात्मानं प्रसूते तथा चकार । 'यः प्राणधारणं प्राणप्रसादात्कुरुतेऽनिशम् । स जीव इति सन्दिष्टस्तदन्योऽजीव उच्यते । यत्प्रसादात्स तु प्राणः कुरुते स्वस्य धारणमि'ति वायुप्रोक्ते ॥ 'कालकर्मस्वभावस्थो वासुदेवः परः पुमान् । अकरोदण्डमुद्बुद्धमात्मप्रसवकारणमि'ति ब्रह्माण्डे ॥ जीव इति वा । 'प्राणं धारयते यस्मात्स जीवः परमेश्वरः । अजीवोऽपि महातेजास्त्वथवा जीवयञ्जगदि'ति स्कान्दे ॥ ३४ ॥ '[35]अण्डे जातौ पुमांसौ द्वौ हरिर्ब्रह्मा तथैव च । अनादिस्तु हरिस्तत्र ब्रह्मा सादिरुदाहृत' इति च ॥३५॥ '[36]हरेरवयवैर्लोकाः सृष्टा इति विकल्पनम् । साक्षात्सत्यमतोऽन्यस्माद्व्यावहारिकमुच्यत'इति मात्स्ये ॥३६॥ '[37]ब्राह्मणो मुखमित्येव मुखाज्जातत्वहेतुतः । यथावदच्छ्रुतौ तद्वज्जीवो ब्रह्मेति वाग्भवेदि'ति ब्राह्मे ॥ ३७ ॥ इति द्वितीयतात्पर्ये पञ्चमोऽध्यायः ॥ ॥ ५ ॥

षष्ठोऽध्यायः

[3]तीर्थानां शास्त्राणाम् ॥ ३ ॥ [5]याज्ञिका रोममूलस्था रोमान्तस्थास्तु तत्परे । उद्भिदो वासुदेवस्य लिङ्गगास्तु जरायुजा इति पाद्मे ।

पूगसहस्रान्ते तदण्डमुदकेशयम् । कालकर्मस्वभावस्थो जीवोऽजीवमजीजनत् ॥ ३४ ॥ स एष पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः । सहस्रोर्वङ्घ्रिबाह्वक्षिः सहस्राननशीर्षवान् ॥ ३५ ॥ यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः । ऊर्व्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥३६॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः । ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ॥ ३७ ॥

षष्ठोऽध्यायः

रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी । कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ ३ ॥ रोमाण्युद्भिज्जजातीनां यैर्वा

SGDF
Sri Gangeshwari Digital Foundation

हरेः श्मश्र्वाश्रया विद्युच्छिला लोहा नखाश्रया' इत्याग्नेये ॥ ५ ॥ [6-7]ब्राह्मणवैश्यादीन्वर्जयितुं प्रायश इति। 'मोक्षः शान्तिश्च शरणं निर्वाणं चाभिधीयत'इति ब्राह्मे। 'भेजे खगेन्द्रध्वजपादमूलमि'ति च। स्वोत्पत्त्यङ्गेषु देवानामन्येषां पादमूलतः। मुक्तिस्तु विहिता विष्णोर्निर्दिष्टेषु यथावच'इत्यध्यात्मे ॥ ६, ७ ॥ '[12]कुमारब्रह्मरुद्राद्या हरेर्मध्यात्समुद्गता'इति वामने। आत्मेति मध्यदेहश्च सर्वदेहोऽपि वा भवेत्। मनोबुद्धिरहङ्कारश्चित्तं जीवश्च कथ्यते। अथवा स्वयमेवेति वायुर्ब्रह्मापि वा भवेत्। मुख्यतो ब्रह्म परममात्मशब्देन भण्यत'इति नाममहोदधौ ॥ ११, १२ ॥ '[15]देहेन्द्रियादिभेदेन निर्भेदोऽपि हरिः स्वयम्। भण्यते केवलैश्वर्यादनाद्यानन्दचिद्धन'इति गारुडे। 'सर्वं पुरुष एवेति भण्यते भेदवज्जगत्। तदधीनं तु सत्तादि यतो ह्यस्य सदा भवेदि'ति ब्रह्मतर्के। 'वितस्तिमात्रं हृदयमास्थाय व्याप्नुते जगदि'ति गारुडे ॥ १५ ॥ [17]पश्यन्त्स्वधिष्ण्यं देहं स बहिष्ठान्विषयानपि। एवमण्डान्तरं पश्यन्बहिः सर्वं च पश्यती'ति वामने ॥ १६ ॥ [18]अव्यक्तमात्मनोऽन्नं च महदादि विनाशि च। यदतीतः परो विष्णुः स एवातो विमोक्षद'इति नारदीये ॥ १८ ॥ '[19]स्वरूपांशो विभिन्नांश इति द्वेधांश इष्यते। अनन्तासनवैकुण्ठपद्मनाभाः स्वयं हरिः। जीवा

यज्ञस्तु सम्भृतः। केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥ ५ ॥ बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम्। विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ॥ ६ ॥ सर्वकामवरस्यापि हरेश्चरण आस्पदम् ॥७॥ उदरं विदितं पुंसो हृदयं मनसः पदम्। धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥ ११ ॥ विज्ञानस्य च तत्वस्य परस्यात्मा परायणम्। अहं भवान् भवश्चैव य इमे मुनयोऽग्रजाः ॥ १२ ॥ ग्रहर्क्षकेतवस्तारास्तडितस्तनयित्नवः। सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ॥ तेनेदमावृतं विश्वं वितस्तिमधितिष्ठता ॥ १५ ॥ स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ ॥ १६ ॥ महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः। पादोऽस्य सर्वा भूतानि पुंसः स्थितिविदो विदुः ॥१८॥ अमृतं क्षेममभयं

SGDF
Sri Gargeshwari Digital Foundation

इमे विभिन्नांशा धर्माधर्मादिसंयुता'इति वामने ॥ १९ ॥ [18]सर्वस्य यथावत्स्थितिविदः ॥ '[19]त्रिमूर्धा सन् हरिर्धत्ते द्युत्रयं मूर्धभिस्त्रिभिः। अनन्तासनवैकुण्ठनारायणपुराणि तु। बहुलक्ष्मोच्छ्रितेष्वेषु स वसत्यमृतो हरिरि'ति मात्स्ये। 'अनन्तासनवैकुण्ठनारायणपुराणि तु। त्रीणि धामानि वै विष्णोस्त्रिलोकाद्बहिरेव च। अदायादास्तु पुत्राणामुद्रिक्त-ज्ञानचक्षुषः। नारायणपरा देवा एवं तान्याप्नुवन्ति' च ॥ '[20]स [21]एवान्यस्वरूपेण शक्रलोकसमीपगः। इज्यो यज्ञपुमान्नाम ज्ञानिनां गृहिणां पदम्। यतीनां ध्रुवलोकस्थो वनिनां मेरुमध्यगः। आदित्य-मण्डलस्थस्तु ज्ञानिनां ब्रह्मचारिणामि'ति ब्रह्माण्डे। 'त्रिपात्स एव भगवान्सर्वप्राणिषु संस्थितः। निरन्नेषु च विद्वत्सु त्रिदशेष्वितरेषु चे'त्यध्यात्मे। 'तस्माद्धरेरण्डमभूदण्डादपि चतुर्मुखः। स विरा-ण्नामकस्तस्मादधिको हरिरेव तु ॥ १९, २०, २१ ॥ '[22]अण्डाज्जातस्य तस्यान्यद्रूपं पद्मादभूद्धरेः। यदोभयात्मको जज्ञे ब्रह्मा लोकपितामहः। तदैव सोऽतिरिक्तोऽभूच्छर्वपूर्वपराज्ञनात् ॥ २२ ॥ '[23-27]त्रिलोक-स्थानगं विष्णुमयजच्च समाहितः। तद्रूपभूतांस्त्रींल्लोकान् पशून्कृत्वा महामना'इति गारुडे ॥ २३-२७ ॥ [26]सूत्रं मीमांसासूत्रम् ॥ २६ ॥

त्रिमूर्ध्नोऽधायि मूर्धसु। पादास्त्रयो बहिस्त्वासन्न प्रजानां य आश्रयाः ॥ १९ ॥ अन्तस्त्रिलोक्यास्त्वपरो गृहमेधैर्बृहद्व्रतः। सृती विचक्रमे विष्वक् साशनानशने उभे ॥२०॥ यदविद्या च विद्या च पुरुषस्तूभया-श्रयः। तस्मादण्डाद्विराट् जज्ञे भूतेन्द्रियगुणाश्रयः ॥ २१ ॥ तद्द्रव्य-मत्यगाद्विश्वं गोभिः सूर्य इवाश्रयम्। यदास्य नाभ्यान्नलिनादहमासं महात्मनः ॥ २२ ॥ नाविन्दं यज्ञ सम्भारान् पुरुषावयवानृते। तेषु यज्ञाश्च पशवः सवनस्पतयः कुशाः ॥ २३ ॥ इदं च देवयजनं कालश्चोरुगुणान्वितः। वसून्योषधयः स्नेहा रसलोहमृदो जलम् ॥ २४ ॥ ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम। नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च ॥ २५ ॥ देवतानुक्रमः कल्पः सङ्कल्पः सूत्रमेव च। गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् ॥ २६ ॥ ततस्ते

SGDF
Sri Gangeshwari Digital Foundation

[30]यस्मात्तमेवायजन् तस्मादिदं तस्मिन्नाहितम्। 'नित्यं गृहीताः सत्वाद्या
जीववज्जडवन्न तु। मिथ्यामानात्स्वरूपत्वात्स्वातन्त्र्याद्धहिरेव त्वि'ति
ब्रह्मतर्के ॥३०॥ '[32]सदिति व्यक्तमुद्दिष्टमसद्व्यक्तमुच्यते। गम्या-
गम्यस्वरूपत्वात्तत्सत्तादिर्हरेर्यतः। अतस्तस्मादन्यदेव ह्यनन्यदिति
भण्यत'इति च ॥ ३२ ॥ '[35]सर्वजीवनिकायेषु ब्रह्मवायू हरेर्विदौ।
न चान्यस्तादृशो वेत्ता यावद्वेत्ति हरिः स्वयम्। तावत्तावपि नो विष्णुं
जानीतो लोकवन्दिताविति ब्रह्माण्डे ॥ ३५ ॥ '[38]स्वयमेव स्वरूपाणि
मत्स्यकूर्मादिकान्यजः। स्वात्मन्येवेच्छया सृष्ट्वा तैर्देवादीन्प्रपात्यसौ ॥
संयच्छत्यसुरान्विष्णुः कल्पे कल्पे जगत्प्रभुः। तिरोहितं स्वरूपं च
प्रकाशयति शाश्वत'इति भागवततन्त्रे ॥ ३८ ॥ '[39-40]ऋतं तदात्मना
ज्ञप्तेः सत्यं साधुत्वतः परम्। सम्यक्संस्थमदूष्यत्वाच्छुद्धं दोषोज्झित-
त्वतः। केवलं तादृशाभावात्प्रत्यगन्तरवस्थितेः। एतदेतादृशं तत्त्वं
यो वेद स विमुच्यत'इति ब्रह्मतर्के ॥ ३९, ४० ॥ '[41]यः शेते
[44]प्रलये विष्णुः शून्यनामा महाकृतिः। स तु नारायणो नाम नराणा-

---

भ्रातर इमे प्रजानां पतयो नव। अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः
॥ २८ ॥ ततश्च मनवः काल ईजिरे ऋषयोऽपरे। पितरो विबुधा दैत्या
मनुष्याः क्रतुभिर्विभुम् ॥ २९ ॥ नारायणे भगवति तदिदं विश्व-
माहितम्। गृहीतमायोरुगुणे सर्गादावगुणे स्वतः ॥ ३० ॥ इति तेऽभि-
हितं तात यथेदमनुपृच्छसि। नान्यद्भगवतः किञ्चिद्भाव्यं सदसदा-
त्मकम् ॥ ३२ ॥ नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं
सुमङ्गलम्। यः स्वात्ममायाविभवं स्वयं गतो नाहं नभस्वांस्तमथापरे
कुतः ॥ ३५ ॥ स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः। आत्माऽत्म-
न्यात्मनाऽऽत्मानं स संयच्छति पाति च ॥ ३८ ॥ विशुद्धं केवलं ज्ञानं
प्रत्यक्सम्यग्व्यवस्थितम्। सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥३९॥
ऋतं विन्दन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः। यदा तदैवासत्तर्कैस्तिरो-
धीयेत विप्लुतम् ॥ ४० ॥ आद्योऽवतारः पुरुषः परस्य कालः स्वभावः
सदसन्मनश्च। द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु

SGDF
Sri Gangeshwari Digital Foundation

मयनत्वतः । रूपं द्वितीयं भवति दीपाद्दीपान्तरं यथा । सिसृक्षोस्तस्य पुरुष इत्याहुस्तद्विदो जनाः । स रमाया द्वितीये तु रूपे प्रकृतिसंज्ञिते । वीर्यमाधत्त पुरुषो महांस्तस्मादजायत । योऽसौ हिरण्यगर्भाख्यः पुरुषः सोऽपि भण्यते । श्रद्धेत्युक्ता तु तत्पत्नी साऽपि प्रकृतिरुच्यते । प्रलये त्वशरीरौ तौ विभागेन व्यवस्थितौ । शरीरं प्राप्य पुरुषात्संयोगं तौ प्रचक्रतुः । ततः पुनर्महत्तत्त्वं प्रजातं जगदङ्कुरम् । स्वस्यैव पुत्रतां यातमहङ्कारस्ततोऽजनी'ति व्योमसंहितायाम् । पुरुषस्तस्यैवाद्योऽवतारः । कालादयो रूपवत् । अस्वरूपमपि प्रियत्वात् । 'पुरुषाद्या हरेरूपं ब्रह्माद्यास्तत्प्रियाः स्मृताः । स्वरूपभूता नैवैते तत्सन्निधियुता अपी'ति पाद्मे । 'कालो वस्तुस्वभावश्च प्रकृतिः प्राण एव च । मनश्च पञ्चभूतानि विकारास्त्रिगुणा अपि । न स्वरूपं हरेरेतत्तथाप्येषु हरिः स्थित'इति पाद्मे । सत्प्राणः । 'सदिति प्राण'इति श्रुतेः । 'द्रव्यं तु पञ्चभूतानि विकारोऽण्डमुदाहृतम् । विराजं गरुडं प्राहुः स्वराडिन्द्र उदाहृत'इति षाड्गुण्ये । सर्वं तु रूपवद्विष्णोर्विशेषेण विभूतिमत् । अतिप्रियत्वा-न्नैवैतत्स्वरूपमपि भण्यत' इति स्कान्दे । 'स्वतो महत्वं तु महोविशेष-प्राप्तिशक्तिता । विभूतिर्लक्षणोन्नाहो लक्ष्मीशब्देन भण्यत'इति ब्रह्मतर्के । 'प्रधानत्वेन सर्वस्मान्मत्स्यकूर्मादयो हरेः । अवताराः श्रुतौ ख्याताः स एवैते ततः स्मृताः । न स्वरूपं तु ब्रह्माद्याः स्मृता मायाविभूतयः । स्वेच्छयैषां विशिष्टत्वं कुरुते तत्तथा स्मृत'इति व्योमसंहितायाम् ॥

चरिष्णु भूम्नः ॥ ४१ ॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदाद-यश्च । स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ॥४२॥ गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः । ये वा ऋषीणा-मृषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ॥ ४३ ॥ अन्ये च ये प्रेत पिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः । यत्किञ्च लोके भगवन्महस्व-दोजःसहस्वद्बलवत् क्षमावत् । ह्रीः श्रीर्विभूत्यात्मवदद्भुतार्णं तत्तत् परं रूपवदस्वरूपम् ॥४४॥ प्राधान्यतो यानृषय आमनन्ति लीलावतारान्

SGDF
Sri Gurgeshwari Digital Foundation

'यज्ञशब्दोदितौ द्वौ तु देवौ लोकपुरस्कृतौ । एको नारायणस्तत्र रुद्रच्छिन्नस्तथापरः । स तु यज्ञाभिमानी स्यात्तत्पतिः केशवः स्मृत'इति पाद्मे ॥ ४१-४५ ॥ इति द्वितीयतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

'[2]क्रियाभिमानाद्यज्ञोऽसाविन्द्रसूनुः प्रकीर्तितः । यज्ञेशत्वात्स्वयं विष्णुर्यज्ञो रुचिसुतः स्मृत'इति पाद्मे । हरिरिति ज्ञात्वेशावास्यमित्यादिनाऽनूक्तः । 'त्रयी श्रुतिर्नित्यवाक्च वेदोऽनुवचनं तथे'ति ह्यभिधानम् ॥ २ ॥ [4]अमर्यीं विष्णुप्रधानाम् ॥ ४ ॥ मे [5]तपतः सतः । सः नः अर्थे । सनात्पूर्वम् । 'ब्रह्मणस्तपतः पूर्वं विष्णुर्जात उरुक्रमः । सर्वलोकहितार्थाय येन रूपं प्रकाशितम् । यश्च पाति सदा लोकानजितो जयतां वरः । तस्माद्रुद्रः समुत्पन्नः सर्वसंहारकृद्विभुः । एते त्रिपुरुषाः प्रोक्ताः सृष्टिस्थित्यन्तकारिणः । निमित्तमात्रं तौ देवौ विष्णुः सर्वस्य कारणमि'ति स्कान्दे ॥ ५ ॥ '[6]नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मतः । अनन्तो नरनामाऽत्र

पुरुषस्य भूम्नः । आपीयतां कर्मकषायशोषाननुक्रमिष्ये त इमान् सुपेशलान् ॥ ४५ ॥

सप्तमोऽध्यायः

जातो रुचेरजनयत्सुयशाः सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् । लोकत्रयस्य महतीमहरद्यदार्तिं स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥ अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाऽहमिति यद्भगवान् स दत्तः । यत्पादपङ्कजपरागपवित्रदेहा योगर्धिमापुरमयीं यदुहैहयाद्याः ॥ ४ ॥ तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्सुतपसस्तपतः स नोऽभूत् । प्राक्कल्पसम्प्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥५॥ धर्मस्य दक्षदुहितर्यजनि स्वमूर्त्यां नारायणो नर इति स्वतपःप्रभावः । दृष्टात्मनो भगवतो नियमावलोपं

SGDF
Sri Gargeshwari Digital Foundation

तस्मिंस्तु नरनामवान् । विशेषेण स्वयं विष्णुर्निवसत्यम्बुजेक्षणः । तस्माच्चतुर्धा धर्मस्य जातो विष्णुरितीरित'इति षाड्गुण्ये ॥६॥ '[8]अवतारो महाविष्णोर्वासुदेव इतीरितः । यो ध्रुवाय निजं प्रादात्स्थानमन्यानधिष्ठितमि'ति प्रकाशसंहितायाम् ॥ ८ ॥ '[9]पृथुर्नाम महाराजस्तत्र विष्णुः स्वयं प्रभुः । पृथुनामा चतुर्बाहुः प्रविष्टस्तेन चार्थित'इति महासंहितायाम् ॥ ९ ॥ [10]यद्रूपं परमहंसप्राप्यं पदमामनन्ति ॥१०॥ 'छन्दांसि [11]च मखाश्चैव देवा लोकाश्च सर्वशः । सर्वे विष्णौ स्थिता यस्मादतः सर्वमयो ह्यसावि'ति महासंहितायाम् ॥ ११ ॥ [12]क्षोणीमयनौकाश्रयत्वात्क्षोणीमयः ॥ १२ ॥ '[16]हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगद्विभुरि'ति मात्स्ये ॥१६॥ 'ऐन्द्रं [18]पदं नान्तरीयं फलं तु हरितोषणम् । जगद्दातुर्बलेर्यस्मादानन्दोद्रिक्तता भवेदि'ति ब्रह्मतर्के । शीर्षाख्यं मानम् ॥१८॥

देवस्त्वनङ्गपृतना घटितुं न शेकुः ॥६॥ विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनाय । तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥८॥ यद्वेनमुत्पथगतं द्विजवाक्यवज्रनिष्पिष्टपौरुषभगं निरये पतंतम् । त्रात्वाऽर्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग् हृदि योगचर्याम् । यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥ २० ॥ सत्रे ममास भगवान् हयशीर्ष एषः साक्षात् स यज्ञपुरुषस्तपनीयवर्णः । छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥ मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिल जीवनिकायकेतः । विस्रंसितानुरुभये सलिले मुखान्म आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥ स्मृत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः । चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥ १६ ॥ नार्थो बलेरयमुरुक्रमपादशौचमम्भः शिवं धृतवतो विबुधाधिपत्यम् । यो वै प्रतिश्रुतमृतेऽपि च शीर्षमाणमात्मन्यमङ्ग मनसा हरयेऽभिमेने ॥ १८ ॥ तुभ्यं च नारद

SGDF
Sri Gangeshwari Digital Foundation

'[19]ऐतरेयो हरिः प्राह नारदाय स्वकां तनुम्। यत्प्रापुर्वैष्णवा नान्ये यद्दते न सुखं परमि'ति ब्राह्मे ॥ १९ ॥ '[20]मन्वन्तरेषु भगवान् चक्रवर्तिषु संस्थितः। चतुर्भुजो जुगोपैतदुष्टराजन्यनाशकः। राजराजेश्वरेत्याहुर्मुनयश्चक्रवर्तिनम्। वीर्यदं परमात्मानं शङ्खचक्रगदाधरमि'ति सत्यसंहितायाम् ॥२०॥ [23]प्राणादिक्लेशः ॥२३॥ [24]दूरस्था सुहृद्यस्य भगवतः स दूरेसुहृत्। सुशोषोऽग्निः। 'अग्निः सुशोषः कक्षघ्नस्तिमिरारिर्हिरण्यद' इति ह्यभिधाने ॥ २४ ॥ [25]विनेष्यति विनाशं एष्यति। दारहर्तुः भगवतः॥ 'धनुर्विस्फूर्जितैर्नष्टो रावणः पूर्वमेव तु। पुनः शरै राममुक्तैः सानुबन्धो विनश्यती'ति स्कान्दे ॥ ॥ २५ ॥ '[26]राम एको ह्यनन्तांशस्तत्र रामाभिधो हरिः। शुक्लकेशात्मकस्तिष्ठन्नमयामास वै जगदि'ति ब्राह्मे। 'विष्णोर्नान्येन कर्माणि परेषां तन्निबन्धनमि'ति मात्स्ये ॥२६॥ '[27]सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यत' इति तन्त्रमालायाम्। इतरथा विष्णुर्न चेत्। स्वमहिम-

---

भृशं भगवान् विवृद्धभावेन साधु परितुष्ट उवाच योगम्। ज्ञानं च भागवतमात्मसुतत्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव ॥ १९ ॥ चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति। दुष्टेषु राजसु दमं विदधत्स्वकीर्तिं सत्ये त्रिपिष्ट उशतीं प्रथयंश्चरित्रैः ॥ २० ॥ कृत्स्नप्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे। तिष्ठन् वनं सदयितानुज आविवेश यस्मिन् विरुध्य दशकन्धर आर्तिमृच्छत् ॥ २३ ॥ तस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः। दूरेसुहृन्मथितरोषसुशोषदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः ॥ २४ ॥ वक्षस्स्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विलम्बितककुब्जयरूढहासः। सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरितैस्ससैन्यः ॥ २५ ॥ भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः। जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि ॥२६॥ तोकेन जीवहरणं यदुलूपिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः। यद्रिङ्गतोऽन्तरगतेन दिवि-

SGDF
Sri Gangadhwari Digital Foundation

निबन्धनत्वेन न भाव्यम् ॥ २७ ॥ [28]दिव्यमिव स्तुत्यमिव । तदपेक्षया । अन्येषां स्तुत्यमेव यत्तस्य तच्च दिव्यमिव ॥ २९ ॥ '[31]अन्यथाज्ञानहेतुर्या वाक् सा जल्पिः प्रकीर्तिते'ति तन्त्रमालायाम् ॥ '[29-31]यत्तु सर्वात्मनाऽज्ञानं निशा सा परिकीर्तिते'ति कौर्मे ॥ ३१ ॥ [33]कलपदं च आयतं च । 'सप्तस्वरसमाहारो मूर्च्छनेति प्रकीर्तिते'ति गान्धर्वे ॥ ३३ ॥ [34-35]विद्वेषिणोऽप्युदासीना भक्ता अपि न संशयः । हरेर्हि सदनं यान्ति व्यक्तं भक्तैस्तु गम्यते । आरभ्य तम आमुक्तेः कृष्णस्य सदनं यतः । अव्यक्तहरिलोकत्वादन्येषामन्यलोकते'ति बृहत्संहितायाम् ॥ 'रामभीमार्जुनादीनि विष्णोर्नामानि सर्वशः । रमणाभयवर्णाद्याः शब्दवृत्तेर्हि हेतवः । हरिर्हि तत्र तत्रस्थो रमणादीन्करोत्यजः ॥ अतस्तस्यैव नामानि व्याजादन्यगतानि तु । व्यवहारप्रवृत्त्यर्थं दुष्टानां मोहनाय चे'ति स्कान्दे ॥ ३४, ३५ ॥ [36]तृतीये सप्तमे चैव षोडशे पञ्चविंशके । अष्टाविंशे युगे कृष्णः सत्यवत्यामजायत । व्यासाचार्यस्तु पूर्वेषु चरमे स्वयमेव तु । विव्यास वेदांश्चक्रे च भारतं वेदसंमितमि'ति

स्पृशोर्वा उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यम् ॥ २७ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निनाशु विपिने परिदह्यमाने । उन्नेष्यति व्रजमितोऽवसितान्तकालं नेत्रे पिधाय्य सबलोऽनधिगम्यवीर्यः ॥ २९ ॥ नन्दञ्च मोक्ष्यति भयाद्वरुणस्य पाशाद् गोपान् बिलेषु पिहितान् मयसूनुना च । जल्प्यावृतं निशि शयानमतिश्रमेण लोकं विकुण्ठ उपधास्यति गोकुलं स्म ॥ ३१ ॥ क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन । उद्दीपितस्मररुजां व्रजसद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥ ३३ ॥ ये च प्रलम्ब-खर-दर्दुर-केश्यरिष्ट-मल्लेभ-कंस यवनाः कुज-पौण्ड्रकाद्याः । अन्येऽपि शाल्व-कपि-बल्वल-दन्तवक्र-सप्तोक्ष-शम्बर-विदूरथ-रुक्मिमुख्याः ॥ ३४ ॥ ये वा मृधे समिति शालिन आत्तचापाः काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः । यास्यन्त्यदर्शनमिता बलपार्थभीम व्याजाह्वयेन हरिणा निलयं तदीयम् ॥३५॥ कालेनमीलितदृशामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः । आविर्हितस्त्वनुयुगं सहि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥३६॥

SGDF
Sri Gangeshwari Digital Foundation

च ॥ ३६ ॥ '[39]हरीच्छया विभूतिर्या ब्रह्मादीनां सदा भवेत् । इच्छया वा बहुविधस्तेषु विष्णुः स्वयं स्थितः । अतो मायाविभूतित्वं तेषां मत्स्यादिकाः स्वयमि'त्यध्यात्मे ॥ ३९ ॥ [41]विदुर्नान्तम् । अनन्तत्वात् ॥ ४१ ॥ [42]देवमायां विदन्ति । संसारमतितरन्ति च ॥ ॥ ४२ ॥ [46]तत्परायणास्तच्छीलास्तच्छिक्षाश्च ॥ ४६ ॥ '[47]अव्यक्ताद्यनहंमानादात्मतत्त्वं हरिः स्मृतः । अशब्दश्चाप्रसिद्धत्वाच्छान्तः पूर्णसुखत्वत'इति ब्रह्मतर्के ॥ ४७ ॥ [49]भावस्वभावो भक्तिस्वभावः । तेन निर्मितस्य सत्पुरुषस्य प्रसिद्धः । 'भावो भक्तिः प्रणामश्च प्रावण्यमपि चादर'इत्यभिधानात् ॥ ४९ ॥ '[50]सत्तादिर्यत्स्वतो विष्णोस्तस्मादन्यः स सर्वतः । यत्सत्तादिरतोऽन्यस्य नान्यत्वं भेदिनोऽपि त्वि'ति ब्रह्माण्डे ॥ ५० ॥ '[53]आक्षिप्यते किमित्येतद्यतोऽल्पफलता भवेत् ।

सर्गे तु योऽहमृषयो नव ये प्रजेशाः स्थानेऽथ धर्ममखमन्वमरावनीशाः । अन्ते त्वधर्महरमन्युवशाः सुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥ ॥ ३९ ॥ नान्तं विदाम्यहममी मुनयः प्रजेशा मायाबलस्य पुरुषस्य कुतोऽपरे ये । गायन् गुणान् दशशताननं आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥ ४१ ॥ येषां स एव भगवान् दययेदनन्तः सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् । ते वै विदन्त्यतितरन्ति च देवमायां नैषां ममाहमितिधीः श्वसृगालभक्ष्ये ॥ ४२ ॥ ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः । यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग् जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥ शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्वम् । शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥ ४७ ॥ स श्रेयसामपि विभुर्भगवान् यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धः ॥ देहे स्वधातुविगमे तु विशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥ ४९ ॥ सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ॥५०॥ नृजन्मनि न तुष्येत किं फलं यमनश्वरे । कृष्णे यद्यपवर्गेशे भक्तिः स्यादनपायिनी ॥ ५३ ॥

SGDF
Sri Gargeshwari Digital Foundation

वस्तुनो यस्य चाल्पत्वं पुंसो वा नेति चोच्यत' इति प्रकाशसंहितायाम् ॥ ॥ ५३ ॥ इति द्वितीयतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

[11]निजावयवेभ्यः सृष्टाः । बाह्यावयवा लोकैः कल्प्यन्ते ॥११॥ [12-14]जीवे कर्मसमावापः । परमेश्वरेण गृह्यते । गुणिनां महदादि-जीवानां सामर्थ्ये परिमाणम् । देवासुरेभ्यो मघवानित्यादि ॥ १२, १४ ॥ [18]श्रेणीनामङ्गरक्षकाणां युद्धेषूच्यते ॥ १८ ॥ [19]हेतुलक्षणं ब्रह्मलक्षणम् ॥ १९ ॥ [20]योगतो लिङ्गभङ्गः पूर्वोक्तः । पानेन ते देवेत्यादि पश्चात् ॥२०॥ [23]द्वेधा वावात्ममाया तद्रूपा तद्वशा चेति । तद्वशया संसारयति । स्वरूपया विमोचयत्युदास्ते तद्वशां विमुक्तस्य इतरयैनं रमयत्येष आत्मे(त्मै)ष आनन्द' इति सौकारायणश्रुतिः ॥२३॥ [25]यस्मादनुतिष्ठन्ति तस्मात्परमेष्ठी प्रमाणम् ॥ २५ ॥ '[27]बालोऽपि स गुरुत्वेन मुनिभ्यो ब्रह्मणा यतः । दत्तोऽतो ब्रह्मरातेति नाम

अष्टमोऽध्यायः

पुरुषावयवैर्लोकाः स पालाः पूर्वकल्पिताः । लोकैरमुष्यावयवाः स पालैरिति शुश्रुम ॥११॥ यावान्कल्पो विकल्पो वा यथा कालोऽनुमीयते । भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः ॥ १२ ॥ यस्मिन् कर्मसमवायो यथा येनोपगृह्यते । गुणानां गुणिनां चैव परिमाणं सुविस्तरम् ॥ १४ ॥ नृणां साधारणो धर्मः सविशेषश्च यादृशः । श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् ॥ १८ ॥ तत्वानां परिसङ्ख्यानं लक्षणं हेतुलक्षणम् । पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥ १९ ॥ योगेश्वरैश्वर्यगतिं लिङ्गभङ्गं च योगिनाम् । वेदोपवेदधर्माणामितिहासपुराणयोः ॥ २० ॥ यथात्मतन्त्रो भगवान् विक्रीडत्यात्ममायया । विसृज्य च यथा माया-मुदास्ते साक्षिवद्विभुः ॥ २३ ॥ अत्र प्रमाणं हि भवान् परमेष्ठी यथात्मभूः । अपरे ह्यनुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥ २५ ॥ स उपा-मन्त्रितो राज्ञा कथायामिति सत्पतेः । ब्रह्मरातो भृशं प्रीतो विष्णुरातेन

SGDF
Sri Gargeshwari Digital Foundation

वैयासकेरभूदि'ति ब्राह्मे ॥ २७ ॥ '[28]यत्र ब्रह्मान्तरोत्पत्तिः ब्रह्मकल्पः स ईरित'इति च ॥ २८ ॥ इति द्वितीयतात्पर्ये अष्टमोऽध्यायः ॥८॥

नवमोऽध्यायः

[1-2]परस्य अर्थव्यतिरिक्तस्य । यदधातुमत इत्यस्य ह्युत्तरम् ॥ 'अशरीरस्य जीवस्य शरीरोत्पत्तिकारणम् । ईश्वरेच्छा प्राथमिका तां विना न हि किश्चन ॥ द्वितीया प्रकृतिः प्रोक्ता तद्रूपा हि गुणास्त्रयः । तेषां संपातजो भावो ममाहमिति या मतिः । देहात्परस्य देहित्वमहंभावमृते कुतः । यथारजस्तमोभावैर्विना स्वप्नो न जायते । निद्रा कामाद्यभावेन तद्वद्देहः क्व तान्विना । तस्मात्प्रकृत्यैव पुमान्मानुषादिविकारया । मानुषादिरिवाभाति नित्यचैतन्यरूपवान् ॥ ॥ १, २ ॥ [3]यदा स्वरूपं जानाति कालप्रकृतिवर्जितम् । वासुदेवप्रसादेन तदा मुक्तो भवत्यसावि'ति भविष्यत्पुराणे ॥ ३ ॥ [4]यतो भगवदुक्तं प्रमाणमतस्तदुक्तं पुराणं त्वत्प्रश्नानामुत्तरत्वेन वक्ष्ये ॥ ४ ॥ [8]तपो ब्रह्म । 'तपसोऽध्यजायते'ति श्रुतेः । अखिललोकप्रकाशनं यत् तदालोचयामास । तपतां तपीयानित्यनेनात्युत्तमोत्तमत्वमुक्तं भवति ।

संसदि ॥ २७ ॥ आह भागवतं नाम पुराणं ब्रह्म सम्मितम् । ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥ २८ ॥

नवमोऽध्यायः

श्री शुक उवाच—आत्ममायामृते राजन् परस्यानुभवात्मनः । न घटेतार्थसम्बन्धः स्वप्ने द्रष्टुरिवाञ्जसा ॥ १ ॥ बहुरूप इवाऽभाति मायया बहुरूपया । रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥ यर्हि चायं महित्वे स्वे परस्मिन् कालमाययोः । रमते गतसम्मोहस्त्यक्त्वोदास्ते तदोभयम् ॥ ३ ॥ आत्मतत्वविशुद्ध्यर्थं यदाह भगवानृतम् । ब्रह्मणेऽदर्शयद्रूपमव्यलीकव्रताद्दतः ॥ ४ ॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः । अतप्यत स्माखिललोकतापनं तपस्तपीयां-

SGDF
Sri Gargeshwari Digital Foundation

'महान्महीयसामादिं ब्रूयादत्युत्तमोत्तमम् । यत्राधिकं वदेत्किञ्चिज्ज्ञेयोऽर्थस्तत्र चाधिक'इति व्यासनिरुक्ते ॥ 'तपोरूपं परं ब्रह्म ब्रह्माऽचिन्तयदञ्जसे'ति षाड्गुण्ये ॥ ८ ॥ [9]यत् यतः । 'यत्तदित्यादयः शब्दाः पञ्चम्यन्ताः प्रकीर्तिता'इति च ॥ ९ ॥ [10]मायातीतत्वात् ॥ १० ॥ [14]प्रेङ्खश्रिताः याः विभूतयः । 'सत्वं तु शोभनत्वं स्यात्तद्युक्ताः सात्वता मता' इत्यध्यात्मे ॥१४॥ '[15]मुक्तैः स्वपार्षदैः पूर्वैर्ब्रह्माद्यैश्चैव संयुतम् । ब्रह्मा ददर्श तपसा भगवन्तं हरिं प्रभुमि'ति गारुडे ॥१५॥ [16]इच्छाद्या मोचिकाद्याश्च अणिमाद्याश्च शक्तयः । प्रदिष्टा वासुदेवाद्या दामोदरपरास्तथा । अङ्गानि विमलाद्यास्तु प्रह्वयाद्यात्मादिका मताः । एवं षोडशभिश्चैव पञ्चभिश्च हरिः स्वयम् । चतुर्भिश्च वृतो नित्यं तत्स्वरूपाश्च शक्तय'इति भागवततन्त्रे ॥ १६ ॥ [22]मनीषितं तपः ॥ २२ ॥ [23-24]कर्मविमोहिते इदंकार्यमित्यजानति । हृदयं प्रियम् । 'प्रियं हृदयमुद्रिक्तं कान्तमित्यभिधीयत'इत्यभिधानात् । 'तपः प्रियं सदा विष्णोस्तपसैवाप्यते हरिः । स्वयं च तपसैवेदं बिभर्ति ज्ञानमेव हि ।

स्तपतां समाहितः ॥८॥ तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परं न यत्परम् । व्यपेतसङ्क्लेशविमोहसाध्वसं सन्दृष्टवद्भिर्विबुधैरभिष्टुतम् ॥ ९ ॥ न वर्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः । न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥ १० ॥ प्रेङ्खंस्थिता याः कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती । ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ॥ ॥१४॥ सुनन्दनन्द प्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् । भृत्यप्रसादाभिमुखं दृगासवैः प्रसन्नहासारुणलोचनाननम् ॥ १५ ॥ किरीटिनं कुण्डलिनं चतुर्भुजं पीतांशुकं वक्षसि लक्षितं श्रिया । अध्यर्हणीयासनमास्थितं विभुं वृतं चतुः षोडश पञ्चशक्तिभिः ॥ १६ ॥ मनीषितानुभावोऽयं मम लोकावलोकनम् । यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥ २२ ॥ प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते । तपो मे हृदयं साक्षादात्माऽहं तपसोऽनघ ॥ २३ ॥ सृजामि तपसैवेदं ग्रसामि

SGDF
Sri Gangeshwari Digital Foundation

तपःशब्दाभिधं प्रोक्तं ज्ञानरूपो हरिर्यतः। ज्ञानवीर्यो ज्ञानबलो ज्ञानानन्द उदाहृत'इति बृहत्संहितायाम् ॥ २३, २४ ॥ '[31]येन येन यथा ज्ञात्वा नियतं मुक्तिराप्यते। तद्विज्ञानमिति प्रोक्तं ज्ञानं साधारणं स्मृतमि'ति वामने ॥ ३१ ॥ [33]परं स्वतन्त्रं न। विष्णोरधीनं प्राक्-सृष्टेस्तथैव च लयादनु। अस्य सत्वप्रवृत्त्यादि विशेषेणाधिगम्यते। स्वातन्त्र्यं स्थितिकाले तु कथञ्चिद्बुद्धिमोहतः। प्रतीयमानमपि तु तस्मान्नैवेति गम्यते। जनिष्येऽहं लयिष्येऽहमिति न ह्यभिसन्धितः। अतो जीवनमप्येतद्भवेदीशाभिसंहितम्। अतः स्वरूपभेदेऽपि ह्यात्मैवेद-मिति श्रुतिः। वदत्यस्येशतन्त्रत्वाद्यथाऽशक्तस्त्वसन्निति। विद्यन्ते हि तदा जीवाः कालकर्मादिकं तथा। क्वान्यथा हि पुनः सृष्टिः पूर्व-कर्मानुसारिणी'ति ब्रह्मतर्के। त्वमेतच्च परं न भवेत्। स्वतन्त्रं न॥ ॥ ३३ ॥ [34]अर्थवदिव प्रतीयते। न च परमात्मन्यर्थवत्प्रतीयते। अर्थं प्रयोजनमृते। न हि जीवप्रकृतिभ्यामीश्वरस्यार्थः। 'मुख्यतो विष्णुशक्तिर्हि मायाशब्देन भण्यते। उपचारतस्तु प्रकृतिर्जीवश्चैव हि भण्यत'इति च। यथाऽऽभासो जीवः। 'सर्वं परे स्थितमपि नैव तत्रेति भण्यते। यतो हरेर्न जीवेन जीवनं न हरौ ततः। जीवः प्रकृतिरप्यत्र यतो नैव हि बन्धकृत्। कर्म चाफलदातृत्वात्कालश्चा-परिणामनात्। यथा छत्रधराद्यास्तु रथस्था अपि सर्वशः। रथिनो नैव भण्यन्ते एवं हरिगता अपि ॥ ३४ ॥ '[35]यथा महान्ति भूतानि शरीरेषु बहिस्तथा। एवं हरिश्च भूतेषु बहिश्च व्याप्तिहेतुतः। तस्मा-

---

तपसा पुनः। बिभर्मि तपसा विश्वं वीर्यं मे दुस्तरं तपः ॥ २४ ॥ श्री भगवानुवाच—ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम्। सरहस्यं तदङ्गं च गृहाण गदितं मया ॥ ३१ ॥ अहमेवासमेवाग्रे नान्यद्यत्सद-सत्परम्। पश्चादहं त्वमेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥३३॥ ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि। तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥३४॥ यथा महान्ति भूतानि भूतेषूच्चावचेषु च। प्रविष्टान्य-

SGDF
Sri Gargeshwari Digital Foundation

तत्स्थो न तत्स्थश्च प्रोच्यते हरिरीश्वर'इति च ॥३५॥ [36]अन्यभावाभावकाले देशे च तद्विद्यमानाविद्यमानशक्तिमांश्चेत्यन्वयव्यतिरेकौ ॥ ॥ ३६ ॥ '[39]सर्वस्यापि प्रधानत्वात्स सर्वमय ईर्यत'इति च ॥ ३९ ॥ [42]मायां माहात्म्यं विविदिषुः । अन्येषां माहात्म्यपतेः । 'मुख्यतो विष्णुमाहात्म्यं मायाशब्दोदितं भवेत् । प्रधानत्वाच्च मातृत्वान्मेयत्वं चैव तस्य ही'ति च ॥ ४२ ॥ '[45]हरिर्व्यासादिरूपेण सर्वज्ञोऽपि स्वयं प्रभुः । शृणोति नारदादिभ्यो मोहायैषां प्रसिद्धय'इति पाद्मे ॥४५॥ '[46]विराड्ब्रह्मा समुद्दिष्टस्तद्गतः परमो यतः । अतो वैराजमित्येनमाहुरीशत्वतो विराडि'ति बृहत्संहितायाम् ॥ ४६ ॥ इति द्वितीयतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

'[3]महदाद्यण्डपर्यन्तः सर्गोऽण्डे ब्रह्मणस्तु यः । अनुसर्ग इति प्रोक्तः पौरुषश्चेति कथ्यते । पञ्चभूतसमूहेन जातः पुरुष उच्यते । बहुत्वात्तत्र भूतानां तावत्त्वात्तत्त्वमेकजमि'ति व्योमसंहितायाम् ॥ ३ ॥

प्रविष्टानि तथा तेषु न तेष्वहम् ॥३५॥ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः । अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ३६ ॥ अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः । सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥ ३९ ॥ मायां विविदिषुर्विष्णोर्मायेशस्य महामुनिः । महाभागवतो राजन् पितरं पर्यतोषयत् ॥४२॥ नारदः प्राह मुनये सरस्वत्यास्तटे नृप । ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥४५॥ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदम् । यथाऽसीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४६ ॥

दशमोऽध्यायः

श्री शुक उवाच—अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः । मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥ भूतमात्रेन्द्रियधियां जन्मसर्ग उदाहृतः । ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

'[6]अनुप्रविश्य परमं जीवस्य शयनं तु यत् । सहैव शक्तिभिः स्वीयैरिच्छाद्यैरप्रकाशितैः । सन्निरोध इति प्रोक्तो विमुक्तिर्यत्र मोक्षिणामि'ति नारदीये ॥ ६ ॥ '[7]सृष्टिस्थित्यप्ययाभासा यद्बलाद्यत्र च स्थिताः । तद्ब्रह्म जगदाधारं वासुदेवेति तद्विदुरि'ति भागवततन्त्रे ॥७॥ [8]आधिभौतिकेन रूपेण हि चक्षुःप्रकाशयोः सम्यक्त्वपरिज्ञानम् ॥८॥ सुप्तावपि यः सर्वं वेत्ति जीवानां स परः । 'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती'ति श्रुतेः । सुप्त्याश्रयाणामप्याश्रयः ॥९॥ [10]विनिर्गतः प्रकाशितः । 'अण्डं प्रविष्टो यो विष्णुः सोऽण्डं भित्त्वा प्रकाशितः ॥ [11]सोऽपोऽसृजत्ततो नारा नरो नाशात्परो यत'इति नारायणाध्यात्मे ॥ ॥ १०- ११ ॥ '[13]तत्तन्नियामकत्वेन बहुत्वं प्राप्तुमीश्वरः । अण्डं स्ववीर्यं तत्स्थः सन् कामादन्तस्त्रिधा व्यधादि'ति च । 'अन्तःस्थितहरेः कामादण्डे ब्रह्मा ततोऽजनि । तत्र देवाश्च सञ्जाताः पुनस्तत्त्वात्मकाः प्रभोरि'ति च ॥१३॥ '[27]मलादिकं कदाचित्तु ब्रह्मा लोकाभिपत्तये । आत्मनो निर्ममे कामात्सर्वेषामभवत्ततः । वशित्वात्तस्य दिव्यत्वादिच्छया भवति प्रभोरि'ति च ॥ २७ ॥ '[33]स्थूलं भगवतो रूपं

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः । मुक्तिर्हित्वाऽन्यथा रूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥ आभासश्च निरोधश्च यतस्तत्त्रयमीयते । स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥ आध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः । यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ॥ ॥ ८ ॥ एतदेकतमाभावे यदा नोपलभामहे । त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥९॥ पुरुषोऽण्डं विनिर्भिद्य यदाऽसौ स विनिर्गतः । आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥ तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् । तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ ॥ एको नानात्वमन्विच्छन् योगतल्पात्समुत्थितः । वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ १३ ॥ उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् । ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥ एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया । मह्यादिभिश्चावरणैरष्टभिर्बहि-

SGDF Sri Gargeshwari Digital Foundation

ब्रह्मदेह उदाहृतः । तत्तन्त्रत्वाच्च सूक्ष्मं च शङ्खचक्रगदाधरमि'ति चाध्यात्मे ॥ ३३ ॥ [34]निर्विशेषणं निरतिशयम् ! 'अस्य काव्यस्य कवयो न समर्था विशेषण'इतिवत् ॥ ३४ ॥ [35]मायासृष्टे जगति ये अविपश्चितः ॥३५ '[36]नामैव वाचकत्वेन नामरूपक्रिया अपि। वाच्यत्वेन हरिर्देवो नियामयति चैकराडि'ति च । 'कर्तृत्वात्तु सकर्माऽसौ निष्फलत्वादकर्मक' इति च ॥ ३६ ॥ [37-40]प्रजापत्यादीन्धत्ते ॥ ३७-४० ॥ '[41]तामसास्तामसा दैत्याः प्रधानादेव शत्रवः । तामसाराजसास्तेषामनुगास्तेषु सात्विकाः । अनाख्यातासुराः प्रोक्ता मानुषा दुष्टचारिणः । राजसास्तामसाश्चैव मध्या राजसराजसाः । राजसाः सात्विकास्तत्र मानुषेषूत्तमा गणाः । देवाः पृथगनाख्याताः स्मृताः सात्विकतामसाः । अतात्विकास्तथाख्याताः स्मृताः सात्विकराजसाः । सात्विकाः सात्विकास्तत्र तात्विकाः परिकीर्तिताः । तेषां च सात्विकाः शेषगरुत्मद्रुद्रतत्स्त्रियः । ततोऽपि देवी ब्रह्माणी ब्रह्मा चैव ततः स्वयम् ॥ ४१ ॥ [42]सात्विकेषु त्रिषु यदा त्वेकस्य प्रतिबाधनम् । रजस्तमोभ्यां विष्णुर्हि तदा प्रादु-

---

रावृतम् ॥ ३३ ॥ अतःपरं सूक्ष्मतममव्यक्तं निर्विशेषणम् । अनादिमध्यनिधनं नित्यं वाङ्मनसोः परम् ॥ ३४ ॥ अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टेऽविपश्चितः ॥३५॥ स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक् । नामरूपक्रिया धत्ते सकर्माकर्मकः परः ॥ ३६ ॥ प्रजापतीन् मनून् देवानृषीन् पितृगणान्पृथक् । सिद्धचारणगन्धर्वान् विद्याध्रान् सुरगुह्यकान् ॥ ३७ ॥ किन्नराप्सरसो नागान् सर्पान् किम्पुरुषानपि । मातृरक्षः पिशाचांश्च प्रेतभूतविनायकान् ॥३८॥ कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि । खगान् मृगान् पशून् वृक्षान् गिरीन्नृप सरीसृपान् ॥ ३९ ॥ द्वि(वि)विधाश्चतुर्विधाश्चान्ये जलस्थलनभौकसः । कुशलाकुशलमिश्राणां कर्मणां गतयस्त्विमाः ॥ ४० ॥ सत्वं रजस्तम इति तिस्रः सुरनृनारकाः । तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा ॥ ४१ ॥ यदैवैकतमोऽन्याभ्यां स्वभाव उपहन्यते । तदैवेदं जगद्धाता भगवान् धर्मरुपधृक् । पुष्णाति स्थापयन् विश्वं तिर्यङ् नर-

SGDF
Sri Gargeshwari Digital Foundation

र्भवत्यजः । राजसांस्तामसान्हत्वा सात्विकान्वर्धयिष्यती'ति स्कान्दे ॥ ॥ ४२ ॥ '[43]मत्स्यादिरूपी पोषयति नृसिंहो रुद्रसंस्थितः । विलापयेद्विरिश्चस्थः सृजते विष्णुरव्यय'इति वामने ॥ ४३ ॥ [44]भगवत्तमः । ना पुरुषः ॥ ४४ ॥ [45]जन्मकर्माणि विधीयत इति क्रियाविशेषणम् । 'प्रतिषेधाय बन्धस्य जीवानां परमेशितुः । स्वेच्छयैव तु कर्तृत्वं नित्यारूढं चिदात्मकमि'ति भविष्यत्पुराणे ॥ रूप उपरिभाव इति धातुः । 'सुभद्रां रथमारोप्ये'त्यादिवच्च । 'स्वाभाविकी ज्ञानबलक्रिया चे'ति च ॥ ४५ ॥ [46]अन्यकल्पानां साधारणः । यत्रैव प्राकृतवैकृताः सर्वसर्गाः । अन्यब्रह्मकल्पानां च साधारणः ॥४६॥ इति द्वितीयस्कन्धतात्पर्ये दशमोऽध्यायः ॥ १० ॥ द्वितीयस्कन्धः संपूर्णः ॥ २ ॥

तृतीयः स्कन्धः

प्रथमोऽध्यायः

श्रीगुरुभ्यो नमः ॥ '[1-2]युद्धकाले तु विदुरस्तीर्थयात्रां गतोऽपि

सुरात्मभिः ॥ ४२ ॥ ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः । सन्नियच्छति तत्काले घनानीकमिवानिलः ॥ ४३ ॥ इत्थम्भावेन कथितो भगवान् भगवत्तमः । नेत्थम्भावेन हि परं द्रष्टुमर्हन्ति सूरयः ॥ ४४ ॥ न चास्य जन्मकर्माणि परस्य न विधीयते । कर्तृत्वं प्रतिषेधार्थं माययाऽरोपितं हि तत् ॥ ४५ ॥ अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः । विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥ ४६ ॥

तृतीयः स्कन्धः

प्रथमोऽध्यायः

श्री शुक उवाच —एवमेतत्पुरा पृष्टो मैत्रेयो भगवान् किल । क्षत्रा

SGDF
Sri Gurgeshwari Digital Foundation

सन्। प्राय आस्ते गजपुरे पाण्डवानां व्यपेक्षये'ति स्कान्दे ॥ १, २ ॥ [6-7]यदा ददाह । यदा केशाभिमर्शः प्राप्त इति यदाशब्दो हेत्वर्थः । 'यदा तदेति हेत्वर्थे कालार्थे चापि भण्यत'इत्यभिधानम् ॥ ६, ७ ॥ [20-21]सुहृद्विनष्टिं यदुकुलविनष्टिमेष्याम् । 'विदुरस्तु प्रभासस्थः शापं सङ्क्षेपतोऽशृणोत् । यदूनां विस्तरात्पश्चादुद्धवाद्यमुनामन्वि'ति स्कान्दे । भारतविरोधाच्चान्यथा ॥ २०, २१ ॥ [23]प्रत्यङ्गमुख्यो विष्णुः । 'ब्रह्मा प्रत्यङ्गवान् विष्णुः सम्यग्लक्षणवत्तम'इति तन्त्रमालायाम् ॥ २३ ॥ '[26]पद्मो ब्रह्मा समुद्दिष्टः पद्मा श्रीरपि चोच्यत'इति ब्राह्मे । 'लोकानां सुखकर्तृत्वमपेक्ष्य कुशलं विभोः । पृच्छयते सततानन्दात्कथं तस्यैव पृच्छयत'इति पाद्मे ॥ २६ ॥ [27]वरतर्पणेन भर्तृतर्पणेन ॥ २७ ॥ '[29]आधिर्मनोवरूथं च आत्मा स्वमिति चोच्यत'इत्यभिधानम् ॥ २९ ॥

वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ १ ॥ यदा त्वयं मन्त्रकृद्वो भगवानखिलेश्वरः । कौरवेन्द्रपुरं हित्वा प्रविवेशात्मसात्कृतम् ॥ २ ॥ श्री शुक उवाच—यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः । भ्रातुर्यविष्ठस्य सुतान् विबन्धून् प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥ यदा सभायां कुरुदेव देव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् । न वारयामास नृपः स्नुषाया अस्रैर्हरन्त्याः कुचकुङ्कुमानि ॥ ७ ॥ इत्थं व्रजन् भारतमेव वर्षं कालेन यावद्गतवान् प्रभासम् । तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥ २० ॥ तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निनाश्रयम् । संस्पर्धया दग्धमथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीम् ॥ २१ ॥ अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः । प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात् कृष्णमनुस्मरन्ति ॥२३॥ कच्चित् पुराणौ पुरुषौ स्वनाभ्यपद्मानुवृत्त्येह कलावतीर्णौ । आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥२६॥ कच्चित् कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमङ्ग शौरिः । यो वै स्वसॄणां पितृवद्ददाति वरान् वदान्यो वरतर्पणेन ॥ २७ ॥ कच्चित्सुखं सात्वत वृष्णिभोजदाशार्हकाणामधिपः स आस्ते । यमभ्यषिञ्चच्छतपत्रनेत्रो नृपासनाधिं

SGDF
Sri Gurgeshwari Digital Foundation

[37]अघं व्यमुञ्चत् । पुनरपराधबुद्धिं हित्वाऽऽस्ते ॥ ३७ ॥ '[44]न देहयोगो हि जनिर्विष्णोर्व्यक्तिर्जनिः स्मृते'त्याग्नेये । 'हरिः कर्ताप्यकर्तेति फलाभावेन भण्यत'इति च ॥ ४४ ॥ इति तृतीयतात्पर्ये प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

[13]त्रिलोकस्याज्ञानं बत । 'आनन्दरूपं दृष्ट्वाऽपि लोको भौतिकमेव तु । मन्यते विष्णुरूपं च अहो भ्रान्तिर्बहुस्थिते'ति स्कान्दे ॥ १३ ॥ '[19]असुरा अपि ये विष्णुं शङ्खचक्रगदाधरम् । भक्तिपूर्वमवेक्षन्ते ज्ञेया भागवता इति ॥ विद्विषन्ति तु ये विष्णुमृषिपुत्रा अपि स्फुटम् । असुरास्तेऽपि विज्ञेया गच्छन्ति च सदातमः ॥ जीवद्वयसमायोगाद्धिरण्यकमुखाः परे । भक्तिद्वेषयुताश्च स्युर्गतिस्तेषां यथा निजा । कंसपूतनिकाद्याश्च बान्धवादियुता यतः । जीवद्वयसमायोगाद्गतिद्वयजिगीषवः । सर्वथा भक्तितो मुक्तिर्द्वेषात्तम उदीरितम् । नियमस्त्वनयोर्नित्यं मोहायान्यवचो भवेदि'ति ब्राह्मे ॥ २४ ॥ इति तृतीयतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

परिहृत्य दूरात् ॥ २९ ॥ किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुञ्चत् । यस्याङ्घ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम् ॥ ॥३७॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् । नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रम् ॥ ४४ ॥

द्वितीयोऽध्यायः

यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः । कार्त्स्न्येन चात्रोपगतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥ १३ ॥ मन्येऽसुरान् भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् । ये संयुगेऽचक्षत तार्क्ष्यपुत्रस्यांसे सुनाभायुधमापतन्तम् ॥ २४ ॥

SGDF
Sri Gangeshwari Digital Foundation

तृतीयोऽध्यायः

[3]भीष्मककन्याया अर्थे सवर्णमात्रतया आहूताः । एषां श्रियो जिहीर्षयाऽऽह्वानबुद्धिर्भगवता कृता । 'सुपर्णः सुपरानन्दात्काकुत्स्थो वाचि संस्थिते'रिति पाद्मे ॥ ३ ॥ '[9]उत्तमैः सर्वतः साम्यं किञ्चित्साम्यमुदीर्यत'इत्याग्नेये ॥ ९ ॥ '[19]केवलं भगवज्ज्ञानं साङ्ख्यमित्यभिधीयत'इत्यध्यात्मे ॥१९॥ '[22]सर्वदापि विरक्तः सन् भासयीत विरागिवत् । कादाचित्कः कुतस्तस्य लोकशिक्षार्थमिष्यत'इति पाद्मे ॥ तेनापि विरागः प्रदर्शितः ॥२२॥ [23]अतः कोऽन्यो विस्रम्भं कुर्यात् ॥ ॥ २३ ॥ '[25]एष्यच्च निश्चितं यत्तदतीतत्वेन भण्यते । चक्रवत्परिवृत्तेर्वा दुष्टानां मोहनाय वे'ति स्कान्दे ॥ २५-२८ ॥ इति तृतीयतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

तृतीयोऽध्यायः

समाहुता भीष्मककन्यया ये श्रियः सवर्णेन जिहीर्षयैषाम् । गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥ ३ ॥ तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः । एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥९॥ भगवानपि विश्वात्मा लोकवेदपथानुगः । कामान् सिषेवे द्वार्वत्यामसक्तः साङ्ख्यमास्थितः ॥ १९ ॥ तस्येत्थं रममाणस्य संवत्सरगणान् बहून् । गृहमेधेषु योगेषु विरागः समजायत ॥२२॥ दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् । को विश्रम्भेत योगेन योगेश्वरमनुव्रतः ॥ २३ ॥ ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयः । ययुः प्रभासं संहृष्टा रथैर्दैवविमोहिताः ॥ २५ ॥ तत्र स्नात्वा पितॄन्देवान् ऋषींश्चैव तदम्भसा । तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः ॥ २६ ॥ हिरण्यं रजतं शय्यां वासांस्यजिनकम्बलान् । हयान् रथनिभान् कन्यां धरां वृत्तिकरीमपि ॥ ॥ २७ ॥ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्पणम् । गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः ॥ २८ ॥

SGDF
Sri Gargeshwari Digital Foundation

चतुर्थोऽध्यायः

[3-4]आत्ममायायाः आत्मसामर्थ्यस्य गतिं पूर्वमेवावलोक्य । 'ज्ञात्वा कतिपयैर्वर्षैः पूर्वमेव जनार्दनः । मौसलं ज्ञानसन्तत्या उद्धवं बदरीं नयत् । स ज्ञानं तत्र विस्तीर्य पुनर्द्वारवतीं ययौ ॥ ३, ४ ॥
[5]पूर्वमेवोपदिष्टोऽपि हरिणा ज्ञानमुद्धवः । स्वर्गारोहणकाले तु पुनः पप्रच्छ केशवम् । पुनः श्रुत्वा बदर्यां तु वर्षत्रयमुवास ह । ज्ञानं संस्थाप्य पश्चाच्च स्वेच्छया स्वर्गतः प्रभुरि'ति गारुडे ॥ ५-९ ॥
[28]आकृतिं पृथिवीम् । 'शरीरमाकृतिर्देहः कुः पृथ्वी च मही तथे'-त्यभिधानम् ॥ २८ ॥ 'पृथिवीलोकसन्त्यागो देहत्यागो हरेः स्मृतः । नित्यानन्दस्वरूपत्वादन्यन्नैवोपलभ्यते ॥ दर्शयेज्जनमोहाय सदृशीं

चतुर्थोऽध्यायः

उद्धव उवाच—अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम् । तया विभ्रंसितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥ १ ॥ तेषां मैरेयदोषेण विषमीकृतचेतसाम् । निम्लोचति रवावासीद्वेणूनामिव मर्दनम् ॥ २ ॥ भगवानात्ममायाया गतिं तामवलोक्य सः । सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥ ३ ॥ अहं चोक्तो भगवता प्रसन्नार्तिहरेण ह । बदरीं त्वं प्रयाहीति स्वकुलं सञ्जिहीर्षुणा ॥ ४ ॥ अथापि तदभिप्रेतं जानन्नहमरिन्दम । पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं विचिन्वन् दयितं पतिम् । श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥६॥ श्यामावदातं विरजं प्रशान्तारुणलोचनम् । दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च ॥ ७ ॥ वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम् । अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ॥ ८ ॥ तस्मिन् महाभागवतो द्वैपायनसुहृत्सखा । लोकाननुचरन् सिद्ध आससाद यदृच्छया ॥९॥ राजोवाच—निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः । स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥ २८ ॥ श्री शुक उवाच—ब्रह्मशापापदेशेन कालेनामोघ-

SGDF
Sri Gargeshwari Digital Foundation

मृतकाकृतिम्। नटवद्भगवान्विष्णुः परज्ञानाकृतिः स्वयमि’ति स्कान्दे॥ ‘राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवैहि यथा नटस्ये’ति च॥ २९॥ ‘[31]उत्तमैरधिकत्वं वा साम्यं वा विजयोऽपि वा। उच्यतेऽपि तु नीचानां मोहार्थं वाप्युपेक्षया। मूढदृष्ट्यनुसाराद्वा किञ्चित्साम्येन वा क्वचिदि’ति ब्रह्मतर्के॥ ३१॥ इति तृतीयतात्पर्ये चतुर्थोऽध्यायः॥ ४॥

पञ्चमोऽध्यायः

[10]ऋते अवगमे। ऋ गताविति धातोः। तेषां तात्पर्यावगमे कृष्णकथामृतौघ एवासौ यतः॥ १०॥ [12]यस्मिन् भारते हरेः कथायां ग्राम्यसुखानुवादैर्मतिर्न गृहीता। ‘भारतान्नाधिकं विष्णोर्महिमावाचकं क्वचित्। भारतान्न विरागाय भारतान्न विमुक्तय’इति पाद्मे॥ १२॥ [13]सा ग्राम्यसुखानुवादैर्न गृहीता हरेः कथायां विवर्धमाना मतिः॥१३॥ इति तृतीयतात्पर्ये पञ्चमोऽध्यायः॥ ५॥

वाञ्छितः। संहृत्य स्वकुलं नूनं त्यक्ष्यन् देहमचिन्तयत्॥ २९॥ नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्निर्जितः प्रभुः। अतो मद्वत्पुनर्लोकं ग्राहयन्निह तिष्ठतु॥ ३१॥

पञ्चमोऽध्यायः

परावरेषां भगवान् कृतानि श्रुतानि मे व्यासमुखादभीक्ष्णम्। न तृप्नुमः कर्णसुखावहानां तेषामृते कृष्णकथामृतौघात्॥१०॥ मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः। यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता न हरेः कथायाम्॥ १२॥ सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः। हरेः सदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते॥ १३॥

SGDF
Sri Gargeshwari Digital Foundation

षष्ठोऽध्यायः

[1]आत्मनां विभुर्जीवाधिपतिः ॥ १ ॥ '[2]परमात्मा यतो जीवं मेनेऽसन्तमशक्तितः । असन्नसावतो नित्यं सत्यज्ञानो यतो हरि'-रित्याग्नेये ॥ 'शक्यत्वाच्छक्तयो भार्याः शक्तिः सामर्थ्यमुच्यत'इति ब्रह्मतर्के ॥ 'सुप्तिस्तु प्रकृतेः प्रोक्ता अतीव भगवद्रतिः । अनास्थाऽन्यत्र च प्रोक्ता विष्णोश्चक्षुर्निमीलनमि'ति व्योमसंहितायाम् ॥ २ ॥ [6]अंशो जीवः । 'कालजीवगुणादीनामभिमानी चतुर्मुखः । सर्वजीवाभिमानित्वादंश इत्येव चोच्यत'इति ब्राह्मे ॥ ६ ॥ [11-14]कालमायांशयोगतः । कालात्परिणामात् । प्रकृतेर्हिरण्यगर्भाच्च ॥ ११-१४ ॥ [16]कालमायांशलिङ्गिनः । तन्निमित्तशरीराः । हिरण्यगर्भस्यैव कालाभिमानी जीवाभिमानीति द्विविधं रूपम् । 'कालजीवाभिमानेन रूपद्वन्द्वी चतुर्मुख'इति पाद्मे ॥१६॥ [18]ब्रह्मविद्या हरेरुछाया तदंशो हि सुरेष्वपि । सर्वविद्याः

षष्ठोऽध्यायः

मैत्रेय उवाच—भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः । आत्मेच्छानुगतो ह्यात्मा नानाशक्त्युपलक्षितः ॥ १ ॥ स वा एष तदा द्रष्टा नापश्यद्विश्वमेकराट् । मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥ ॥ २ ॥ सोऽप्यंशगुणकालात्मा भगदृष्टिगोचरः । आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ॥ ६ ॥ कालमायांशयोगेन भगवद्वीक्षितं नभः । तामसादनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ॥११॥ अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः । ससर्ज रूपतन्मात्रां ज्योतिर्लोकस्य लोचनम् ॥१२॥ अनिलेनान्वितं ज्योतिर्विकुर्वत् परवीक्षितम् । आधत्ताम्भो रसमयं कालमायांशयोगतः ॥१३॥ ज्योतिषाम्भोऽनु संसृष्टं विकुर्वत् परवीक्षितम् । महीं गन्धगुणामाधात् कालमायांशयोगतः ॥ १४ ॥ एते देवाः कला विष्णोः कालमायांशलिङ्गिनः । नानात्वात् स्वक्रियानीशाः प्रोचुः प्राञ्जलयो विभुम् ॥ १६ ॥ ऋते यदस्मिन् भव ईश जीवास्तापत्रयेणाभि-

SGDF
Sri Gangeshwari Digital Foundation

श्रियः प्रोक्ताः प्रधानांशश्चतुर्मुख'इति ब्राह्मे ॥ १८ ॥ [19]द्युसरितो धरायाश्च ॥ १९ ॥ '[25]वायोश्च प्रकृतेर्विष्णोर्जयो भक्त्यैव नान्यथे'ति दत्तात्रेययोगे ॥ २५ ॥ [26]त्रिभिरात्मभिः कालमायांशैः ॥ २६ ॥ [29]सत्प्रमुखा महदादयः ॥ २९ ॥ इति तृतीयतात्पर्ये षष्ठोऽध्यायः ॥ ॥ ६ ॥

सप्तमोऽध्यायः

'[2]शक्तत्वाच्छक्तयो विष्णोर्महदाद्या रमा तथा । स्वरूपशक्तिः शक्तित्वान्मुख्यशक्तिर्हि सा यत'इति ब्रह्मतर्के ॥ समेत्यासतीनां असमेतानां प्रसुप्तलोकतन्त्राणां अनाविर्भूतलोकसृष्टिशक्तीनाम् । 'तनुते येन कार्यं यत्तन्त्रं साधनमुच्यते । कारणानां स्वशक्तिर्वा प्रधानं साधनं यत'इति ब्रह्मतर्के ॥ १ ॥ '[2]शब्दाद्या नभ आद्याश्च मनोयुक्तेन्द्रियाणि च । अहङ्कारो महांश्चैव त्रयोविंशतिको गणः ॥ देवतेन्द्रिययोरैक्यान्न पृथग्गणनं तयोः । प्रकृतिस्तु चतुर्विंशा पञ्चविंशो हरिः स्वयम् ॥ यदा जडांशस्वीकारो जीवस्तत्पञ्चविंशकः । षड्विंशको

हता न शर्म । आत्मन् लभन्ते भगवंस्तवाङ्घ्रिच्छायांशविद्यामत आश्रयेम ॥ १८ ॥ मार्गन्ति यत्ते मुखपद्मनीडैश्छन्दः सुपर्णैर्ऋषयो विविक्ते । यस्याघमर्षो द्युसरिद्धरायाः परं पदं तीर्थपदः प्रपन्नाः ॥ १९ ॥ तथाऽपरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् । त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते ॥ २५ ॥ तत्ते वयं लोकसिसृक्षयाऽद्य त्वया विसृष्टास्त्रिभिरात्मभिर्यै । सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत्प्रतिकर्तवे ते ॥२६॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन् करवाम किं ते । त्वं नः स चक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहेण ॥ २९ ॥

सप्तमोऽध्यायः

ऋषिरुवाच—इति तासां स्वशक्तीनामसतीनां समेत्य सः । प्रसुप्त लोकतन्त्राणां निशाम्य गिरमीश्वरः ॥ १ ॥ कालसंज्ञां यदा देवीं बिभ्र-

SGDF
Sri Gurgeshwari Digital Foundation

महाविष्णुः श्रिया वा सप्तविंशक'इति तत्त्वनिर्णये ॥ 'त्रयोविंशति तत्त्वानि प्राविशद्रमया सह । कालाख्यया स्वयं विष्णुः शक्यत्वा-च्छक्तिरूपया ॥ २ ॥ [3]सर्वचेष्टकरूपेण स्वसामर्थ्येन केशवः । तानि भिन्नानि तत्त्वानि योजयामास चांशत'इति च ॥ ३ ॥ [4]मात्राभिरंशैः 'ईश्वरो दैवमुद्दिष्टं सर्वस्यापि प्रभुत्वत'इति च ॥ ४ ॥ [7]आत्मशक्तिः प्रकृतिः ॥ ७ ॥ [8]पुरुषेणात्मभूतेनेति योऽण्डमसृजत्स एष इत्युक्तः । 'आद्योऽवतारो विष्णोस्तु पुरुषो नाम कीर्तितः । असृजत्स महत्तत्त्वं स एवाण्डं समाविशत् ॥ ८ ॥ [9]स ब्रह्मणो हृदिस्थत्वाद्धृदयं चेति कीर्त्यत'इति च । 'प्राणादिपञ्चकं चैव तथा नागादिपञ्चकम् । सनाग-कूर्मकृकलदेवदत्तधनञ्जयाः । एवं तु दशधा प्राण अध्यात्मादित्रिधा-खिला' इति च व्योमसंहितायाम् ॥ 'प्राणः प्रथमजो यस्तु प्रधानो वायुरीरितः । त्वगात्माद्यास्तु तत्पुत्रा द्विधाभूतमुदाहृतमि'ति तत्त्व-निर्णये ॥ ९ ॥ '[26]अहं सत्वमि'ति द्वेधा ब्रह्मनाड्या अवान्तरम् । कर्तृनामा ह्यहङ्कारस्त्वहंनाड्यां व्यवस्थितः । तत्त्वनाड्यास्तथा चित्त-मभिमानो हरस्तथा । अहंनाड्यां सत्वनाड्यां ब्रह्मा चैव व्यवस्थितः ॥ ॥२६॥ '[24]आत्मनाड्यां तथा बुद्धिस्तत्रस्थश्च बृहस्पति'रिति च ॥२४॥

च्छक्तिमुरुक्रमः । त्रयोविंशतितत्वानां गणं युगपदाविशत् ॥ २ ॥ सोऽनुप्रविष्टो भगवान् चेष्टारूपेण तं गणम् । भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥३॥ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः । प्रेरितोऽ-जनयत्स्वाभिर्मात्राभिरपि पूरुषम् ॥४॥ स वै विश्वसृजां गर्भो दैवकर्मात्म-शक्तिमान् । विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥७॥ एष ह्यशेष-सत्वानामात्मांशः परमात्मनः । आद्योवतारो यत्रासौ भूतग्रामो विभाव्यते ॥८॥ साध्यात्मं साधिदैवं च साधिभूतमिति त्रिधा । विराट् प्राणो दशविध एकधा हृदयेन च ॥९॥ आत्मानं चास्य निर्भिन्नं वाचस्पति-रुपाविशत् । बुद्ध्या स्वांशेन येनासौ निश्चयं प्रतिपद्यते ॥२४॥ अहं चास्य विनिर्भिन्नमभिमानोऽविशत्पदम् । कर्त्रा स्वांशेन येनासौ कर्तव्यं प्रति-पद्यते ॥२५॥ सत्वं चास्य विनिर्भिन्नं महान् धिष्ण्यमुपाविशत् । चित्ते-

SGDF
Sri Gangeshwari Digital Foundation

'[30]ब्रह्माभिमानी तु भृगुरजनि ब्रह्मणो मुखात् ॥३०॥ [31]क्षत्राभिमानी तु मनुर्ब्रह्मबाह्वोरजायत ॥३१॥ [32]ऊर्वोर्विडभिमानी च वास्तुः ॥३२॥ [33]पादात्कृतिस्थिता । एते पूर्वं हरेर्जाता ब्रह्मणस्तदनन्तरम् । एवं रुद्राच्च वायोश्च तदन्तस्थहरेर्यत'इति षाड्गुण्ये ॥ ३३ ॥ '[35]अधिकत्वाद्देवशब्दो दैवतेष्वधिको यतः । दैवं हरिः कर्ममूलं कृतिरित्येव भण्यते । व्याप्तत्वादात्मशब्दश्च श्रीपतित्वाच्च माधव'इति च ॥ ३५ ॥ '[39-40]आत्मा ब्रह्मा न वेद । अहं रुद्रः । 'गुणपूर्तेरात्मशब्दो ब्रह्मा हीनत्वतो हरः । अहं शब्दस्तथाप्येतौ न जानीतो हरिं परमि'ति ब्राह्मे । भगवतो मायां भगवतो महिमानम् । 'माया तु महिमा प्रोक्ता प्राचुर्ये तु मयड्यत'इति पाद्मे । आत्मवर्त्मा परमात्मगतिः ॥ ३९, ४० ॥ इति तृतीयतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

[3]क्रीडाया मुत् । अर्हस्यापूर्णसुखस्य । अन्यतः अरतेः ॥ ३ ॥

नांशेन येनासौ विज्ञानं प्रतिपद्यते ॥ २६ ॥ मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरुद्वह । यत्रोन्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः ॥३०॥ बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः । यो जातस्त्रायते वर्णान् पौरुषात्कण्टकक्षतात् ॥ ३१ ॥ विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः । वैश्यस्तदुद्भवो वार्तां नृणां यस्समवर्तयत् ॥ ३२ ॥ पद्भ्यां भगवतो जज्ञे शुश्रूषाकर्मसिद्धये । तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥३३॥ एतत् क्षत्तर्भगवतो दैवकर्मात्मरूपिणः । कः श्रद्दध्यादुदाहर्तुं योगमायाबलोदयम् ॥ ३५ ॥ अतो भगवतो माया मायिनामपि मोहिनी । यत्स्वयं चात्मवर्त्माऽऽत्मा न वेद किमुतापरे ॥ ३९ ॥ यतोऽप्राप्य निवर्तन्ते वाचश्च मनसा सह । अहं चान्य इमे देवास्तस्मै भगवते नमः ॥ ४० ॥

अष्टमोऽध्यायः

क्रीडायामुद्यतोऽर्हस्य कामं चिक्रीडिषान्यतः । स्वतस्तृप्तस्य तु कथं

SGDF
Sri Gurgeshwari Digital Foundation

[6]दुर्भगक्लेशशरीरस्थत्वात्तस्यापि भाव्यम् । न च तद्युज्यते ॥ ६ ॥ [9]सेयं भगवतो माया । अयं हि भगवन्महिमा । तस्य कार्पण्यं बन्धनादि न युज्यत इति यदुक्तं तन्न्याय्यमेव । दुर्भगादिशरीरस्थस्यापि तद्दोषास्पर्श एव तन्महिमेत्यर्थः । 'कथं देहपरो देवो न लिप्येत हि बन्धनैः । कथं न दुःखी स भवेद्दुःखी चेदीश्वरः कुतः । महिमा परमस्यैष यद्देहस्थो न बाध्यते । यद्दुःखी स ईशानो मायेति महिमोच्यते । प्रधानं मय इत्याहुः प्राधान्यान्मयता भवेत् । अतो मायामयं प्राहुर्महामायमनामयमि'ति भाल्लवेयश्रुतिः ॥ 'अलुप्तबोधरूपत्वान्नासौ प्राकृतदेहवान् । न च सृष्ट्यादिकं भ्रान्तिर्भ्रान्तिवादा हि दानवाः । अतो भ्रान्त्यादिसम्बन्धो नास्य क्वचन युज्यते ॥ ९ ॥ '[10-12]भ्रान्त्या जीवस्य संसार ईशज्ञानाद्विलीयते । भ्रान्तिर्देहाद्यभिमतिरीशज्ञानाद्विनश्यती'ति ब्रह्माण्डे ॥ १०-१२ ॥ [13]इन्द्रियोपरामाख्यः पुरुषार्थो मुक्तिः ॥१३॥ [15-18]स्वरूपसामर्थ्याश्रयम् । यद्व्याहृतम् । अपार्थं निर्मूलं च देहसम्बन्धित्वाद्याभाति । विश्वमूलं ब्रह्म च यन्ममज्ञानाद्बहिर्न भवति । तस्मादुभयत्र धावति । तस्मादन्तरितोऽस्मि । तथापि तां प्रतीतिं

निर्वृतस्य सदात्मनः ॥ ३ ॥ देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः । अविलुप्तावबोधात्मा संयुज्येताजया कथम् ॥ ५ ॥ भगवानेष एवैकः सर्वक्षेत्रेष्ववस्थितः । अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ ६ ॥ सेयं भगवतो माया न्याय्यं येन विरुध्यते । ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम् ॥९॥ यथार्थेन विनाऽमुष्य पुंस आत्मविपर्ययः । प्रतीयत उपद्रष्टुः स्वशरीरश्छेदनादिकः ॥ १० ॥ यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः । दृश्यते सन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ॥११॥ स वै निवृत्तिधर्मेण वासुदेवानुकम्पया । भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥ १२ ॥ यदेन्द्रियोपरामार्थो द्रष्टात्मनि परे हरौ । विलीयन्ते तदा क्लेशाः संसुप्तस्यैव कृत्स्नशः ॥ १३ ॥ विदुर उवाच— सञ्छिन्नः संशयो मह्यं तव सूक्तासिना विभो । उभयत्रापि भगवन् मनो मे सम्प्रधावति ॥ १५ ॥ साधु तद्व्याहृतं विद्वन्नात्ममायायनं हरेः ।

SGDF
Sri Gargeshwari Digital Foundation

पराणुदे । 'आत्मनस्तु गुणाभावं वदतो नत्वसत्यता । अपृष्टस्य दमार्थं च गुणायैव भवत्यपी'ति व्यासस्मृतेः । विद्यमानमप्यनुभवमन्यथा वदति विदुरः । 'द्रोणद्रौणिकृपाः पार्था भीष्मो विदुरसञ्जयौ । ये चान्ये तत्र देवांशाः सम्यक्तत्त्वापरोक्षिण'इति स्कान्दे ॥ १५-१८ ॥ [21-24]विराजं ब्रह्माणम् । 'ब्रह्माणं प्राविशद्विष्णुः सहस्राक्षः सहस्रपादि'ति ब्राह्मे ॥ 'अनुप्रविश्य ब्रह्माणं प्राणं दशविधं तथा । इन्द्रियाणीन्द्रियार्थांश्च वर्णांश्चैवासृजद्धरिरि'ति गारुडे ॥ २१-२४ ॥ [29]विकर्षणं विभागः ॥ २९ ॥ इति तृतीयतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'[4]आधार आश्रयो धिष्ण्यं निधानं चाभिधीयत'इत्यभिधानम् ॥ ॥ ४ ॥ '[13]उदकं वायुना शुष्कं भिन्नं पद्ममभूद्धरेरि'ति पाद्मे ॥१३॥ [14]आत्मा विष्णुरस्य योनिः ॥ १४ ॥ '[15]पद्मसंस्थाद्धरेस्तत्र ब्रह्माऽजनि

आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः ॥ १६ ॥ यश्च मूढतमो लोके यश्च बुद्धेः परं गतः । तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥ १७ ॥ अर्थाभावं विनिश्चित्य प्रतीतस्याप्यनात्मनः । तां चापि युष्मच्चरणसेवयाऽहं पराणुदे ॥१८॥ सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् । तेभ्यो विराजमुद्धृत्य तमनुप्राविशद्विभुः ॥२१॥ वर्णाश्रमविभागांश्च रूपशीलस्वभावतः । ऋषीणां जन्म कर्माणि वेदस्य च विकर्षणम् । यज्ञस्य च वितानानि योगस्य च पथः प्रभो ॥ २९ ॥

नवमोऽध्यायः

स्वमेव धिष्ण्यं बहुमानयन्तं यं वासुदेवाभिधमामनन्ति । प्रत्यक्धृताक्षाम्बुजकोशमीषदुन्मीलयन्तं विबुधोदयाय ॥ ४ ॥ तस्यात्मसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् । गुणेन कालानुगतेन विद्धः शुष्यंस्तदाभिद्यत नाभिदेशात् ॥१३॥ स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधितेन । स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ॥१४॥ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् ।

SGDF
Sri Gurgeshwari Digital Foundation

चतुर्मुख'इति च। सर्वगुणावभासं पृथिव्यात्मकम्। पृथिव्यां हि सर्वे शब्दादयो गुणा अवभासन्ते। 'तस्यासनविधानार्थं पृथिवी पद्म-मुच्यत'इति मोक्षधर्मे। 'प्रधानवाचकस्त्वेकश्चानन्यः केवलः स्वयमि'ति ब्राह्मे ॥ १५ ॥ [18]सता ब्रह्मणा। 'स ब्रह्माऽचिन्तयत् कुतो नु पद्मं ब्रह्मणः स्यादिती'ति मैत्रायणश्रुतिः ॥ १८ ॥ [26]भिन्नमन्येभ्यो विलक्षणम् ॥ २६ ॥ '[29]तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे'ति मोक्षधर्मे ॥ २९ ॥ [31]सूर्येन्दुवाय्वग्न्यादिभिस्त्रिधाम्नो विष्णोरगच्छद्भिः प्राधानिकैः। 'मुक्तवाय्वादिभिर्विष्णुं वृतं ब्रह्मा ददर्श ह। तदन्या-भावतो नान्यदतस्तत्स्रष्टुमैच्छते'ति ब्रह्माण्डे ॥ ३१ ॥ इति तृतीय-तात्पर्ये नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

[1]स्वतो नास्ति तदधीनविद्यमानमप्यशुद्धम्। यच्च स्वनानात्वं तदपि स्थानभेदादसदेव भाति। 'एकोऽपि स्थाननानात्वान्नानेव

तस्मिन् स्वयं वेदमयो विधाता स्वयम्भुवं यं स्म वदन्ति सोऽभूत् ॥ १५ ॥ तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः। परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥ १६ ॥ क एष योसावहमब्ज पृष्ठ एतत्कुतो वाऽब्जमनन्यदप्सु। अस्तिह्यधस्तादिह किञ्चनैतदधिष्ठितं यत्र सतानुभाव्यम् ॥ १८ ॥ पुंसां स्वकामाय विविक्त-मार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मम्। प्रदर्शयन्तं कृपया नखेन्दुमयूख-भिन्नाङ्गुलिचारुपत्रम् ॥ २६ ॥ परार्घ्य केयूर मणिप्रवेकपर्यस्तदोर्दण्ड-सहस्रशाखम्। अव्यक्तमूलं भुवनाङ्घ्रिपेन्द्र महीन्द्रभोगैरधिवीतवल्कम् ॥ ॥ २९ ॥ निवीतमाम्नायमधुव्रताश्रयस्वकीर्तिमय्या वनमालया हरिम्। सूर्येन्दुवाय्वाग्न्यगमत्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदम् ॥ ३१ ॥

दशमोऽध्यायः

ब्रह्मोवाच—ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते

SGDF
Sri Gargeshwari Digital Foundation

हरिरीयते। सर्वान्तर्यामिणस्तस्य न भेदो विद्यते क्वचिदि'ति ब्रह्मवैवर्ते ॥ १ ॥ [2-3]यन्नाभिपद्मभवनादहमाविरासम्। यच्चेदं भगवत्स्वरूपमानन्दमात्रं पश्यामि। यच्चाश्रितोऽस्मि अतः परं नास्ति। अतो न ज्ञायत इति अवद्यमत्युत्तमापेक्षया। अनादि गृहीतमेव नेदानीं गृह्यते। 'यत्तद्दिव्यं हरेरूपं क्षीरसागरमध्यगम्। ज्ञानानन्दैकमात्रं च न ततः परमं क्वचित्। अनादिनित्याद्व्यक्तात्तस्माज्जज्ञे चतुर्मुख'-इत्यध्यात्मे। भूतेन्द्रियाणामात्मकम्। यच्चाप्नोतीत्यादेः ॥ २, ३ ॥ '[5]हृदि व्यक्तं तु यद्रूपं हरेर्गन्धः स उच्यते। उत्तमानां तु पादेन सर्वं रूपं तु भण्यते। गन्धगन्धवतोर्यस्मान्न भेदः क्वचनेष्यत'इति ब्रह्मतर्के ॥ ५ ॥ [9]मायाबलं भगवदिच्छाबलम्। 'ज्ञेयत्वं दुर्घटस्यापि घटनाधिकशक्तिता। अभेद ईश्वरेणापि सृष्ट्यादावन्तरङ्गता। उच्येत यस्याः सा माया हरेरिच्छाऽथवा बलम्। भगवत्तन्त्रता यस्यास्तद्भार्यात्वं सुरूपता। उच्येत माया सा तु श्रीर्दोषयुक्ता जडा स्मृता। परिणामिनी च यस्यास्तु दोषाश्चेतनता तथा। शैवली नाम सा माया जगद्बन्धात्मिका सदे'ति ब्रह्मतर्के। 'ध्याये मंस्ये तथा पश्ये श्रृणोमीति विभक्तता। जीवस्य तु हरेरिच्छाबलादिन्द्रियभुक्तय' इति षाड्गुण्ये। इन्द्रियाणां भोगार्थम्। व्यर्थापि यज्ञादिक्रियार्था ॥ ९ ॥ [10]अर्थै-

---

भगवतो गतिरित्यवद्यम्। नान्यत्त्वदस्ति भगवन्नपि तत्व शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ॥ १ ॥ रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय। आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासम् ॥ २ ॥ नातः परं परम यद्भवतः स्वरूपमानन्दमात्रमविकारमविद्धवर्चः। पश्यामि विश्वसृजमेकमविश्वमाद्यं भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ॥ ३ ॥ ये तु त्वदीयचरणाम्बुजकोशगन्धं जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम्। भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयाम्बुरुहात्स्वपुंसाम् ॥५॥ यावत्पृथक्त्वमयमात्मन इन्द्रियार्थं मायाबलं भगवतो जन ईश पश्येत्। तावन्न संसृतिरसौ प्रतिसङ्क्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था ॥ ९ ॥ अध्याहृतार्थ-

SGDF
Sri Gurgeshwari Digital Foundation

रध्याहृतानि करणानि येषाम् । 'अज्ञानं तु निशा प्रोक्ता दिवा ज्ञानमुदीर्यत'इति स्कान्दे ॥ १० ॥ [11]तत्तद्वपुस्तेषां प्रणयसे । 'यादृशो भावितस्त्वीशस्तादृशो जीव आभवेदि'ति तन्त्रसारे। 'तं यथा यथोपासते तदेव भवती'ति च ॥ ११ ॥ [12]सर्वभूतदयया सुरगणैर्हृद्याराधितस्त्वं बद्धकामैर्जनैरुपचितोपचारैर्नातिप्रसीदसि । 'आराधितो यो ब्रह्माद्यैर्भक्तिज्ञानदयादिभिः । किं तस्य कामुकजनैः कृतया परिचर्यये'ति सत्यसंहितायाम् ॥ १२ ॥ '[14]ईशस्यापूर्णताज्ञानं विष्णोरन्यस्य चेशता । भेदस्तस्यावतारेषु जीवस्येशत्वमेव च । तथा जीवत्वमीशस्य जडाभेदस्तयोरपि । भेदमोह इति प्रोक्तः स सदा न हरौ क्वचित् । अन्येषां तत्प्रसादेन शनैर्याति सतामपी'ति स्कान्दे ॥ १४ ॥ [15]भक्तिविवशाः । 'ये भक्त्या विवशा विष्णोर्नाममात्रैकजल्पकाः । तेऽपि मुक्तिं व्रजन्त्याशु किमु तद्ध्यायिनः सदे'ति व्योमसंहितायाम् ॥ १५ ॥ '[16]ब्रह्मादिभावो विष्णोस्तु तन्नियामकता भवेत् । मत्स्यादिता तत्स्वभावो नान्यथा क्वचिदिष्यत'इति वामने । 'अनन्तासनवैकुण्ठक्षीराब्धिस्थो हरिस्त्रिपादि'ति च ॥ १६ ॥ '[17]नित्यज्ञानदृशा नित्यं लवकालमपीश्वरः ।

करणा निशि निःशयाना नानामनोरथधियः क्षणभङ्गनिद्राः । दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥१०॥ त्वद्भावयोग परिभावितहृत्सरोजा ये सच्छ्रुतेक्षितपथा ननु नाथ पुंसाम् । यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे तदनुग्रहाय ॥११॥ नातिप्रसीदसि तथोपचितोपचारैराराधितः सुरगणैर्हृदिबद्धकामैः । यं सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदन्तरात्मा ॥ १२ ॥ शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै । विश्वोदयस्थितिलयेषु निमित्तलीलाऽऽरामाय ते नम इदं चकृमेश्वराय ॥ ॥ १४ ॥ यस्यावतारगुणकर्मविडम्बनानि नामानि येऽसुविगमे विवशा गृणन्ति । ते नैकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये ॥ १५ ॥ यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलाः । भूत्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय ॥ १६ ॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं

SGDF
Sri Gangeshwari Digital Foundation

पश्येत्तात्कालिकं चैव तस्मादनिमिषो हरिः। कालस्यानिमिषत्वं च लवादेर्नित्यवीक्षणादि'ति तन्त्रसारे ॥ १७ ॥ [19]अनिरस्तरतिर्नित्यरतिः ॥ १९ ॥ '[23]स्वसामर्थ्यात्स्वकर्माणि रमया सह केशवः। कुरुते स्वयमेवैष कानिचित्पुरुषोत्तम'इति नारदीये ॥ २३ ॥ '[22]आत्मशब्दस्य मुख्यार्थो विष्णुरेकः सनातनः। सन्देहदेहमनसो बुद्धिजीवाः स्वयं तथा। ब्रह्माप्यमुख्याः क्रमश उत्कर्षो ह्यात्मता भवेदि'ति प्रकाशसंहितायाम् ॥ २२ ॥ [29]प्रार्थनमपि मत्प्रेरणमेव ॥ २९ ॥ '[30]तप आलोचनं प्रोक्तं विद्या निष्ठा प्रकीर्तिते'ति कपिलसंहितायाम् ॥ ३० ॥ '[31]देहेदेहे हरिस्तस्मिंल्लोकाः सर्वे प्रतिष्ठिताः। अङ्गुष्ठमात्रेऽपि परे परशक्तिर्यतो विभुरि'ति च। आत्मनि स्थिते मयि ॥३१॥ [33]स्वरूपेण मयोपेतं हृदिस्थं जीवरूपं हि परमेश्वरसहितं भवति। 'त्यक्त्वा देहाद्यात्मभावं जीवरूपे हृदि स्थिते। दृष्ट्वात्मभावं तं चापि हरिपादाब्जसंस्थितम्। यदा पश्यत्यापरोक्ष्यात्तदा मुक्तिं व्रजत्यसावि'ति दत्तात्रेय-

---

त्वदुदिते भवदर्चने स्वे। यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ १७ ॥ तिर्यङ् मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयाऽऽत्मकृतसेतुपरिप्सया यः। रेमेऽनिरस्तरतिरप्युपलब्धकाष्ठस्तस्मै नमो भगवते पुरुषोत्तमाय ॥१९॥ सोऽयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान् भगेन। तेनैव मे दृशमनुस्पृशताद्यथाऽहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ ॥ २२ ॥ एष प्रपन्नवरदो रमयाऽऽत्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः। तस्मिन् स्वविक्रम इदं सृजतोऽपि चेतो युञ्जीत कर्मशमलं च यथा विजह्याम् ॥ २३ ॥ श्री भगवानुवाच—मा वेदगर्भ गास्तन्द्रीं सर्ग उद्यममावह। तन्मया चोदितं ह्यग्रे यन्मां प्रार्थयते भवान् ॥ २९ ॥ भूयश्च तप आतिष्ठ विद्यां चैव मदाश्रयाम्। ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान् ॥ ३० ॥ तत आत्मनि योगेन भक्तियुक्तः समाहितः। द्रष्टाऽसि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनि ॥ ३१ ॥ यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः। स्वरूपेण मयोपेतं पश्यन् स्वाराज्य-

SGDF
Sri Gangeshwari Digital Foundation

योगे ॥ ३३ ॥ '[36]भूतेन्द्रियमनोबुद्धित्रिगुणादिषु सर्वशः । युक्तं नियामकतया पश्यञ्जानाति केशवमि'ति च ॥ ३६ ॥ '[39]सार्वज्ञादि-गुणैर्युक्तं सत्वादिगुणवर्जितम् । यो जानाति हरिं तस्य प्रीतो भवति केशव'इति व्योमसंहितायाम् ॥ ३९ ॥ '[40]आधिकारिकदेवानां स्वाधि-काराधिकामनम् । भवति प्रीतये विष्णोर्भक्त्याद्यैरपि यत्सदे'ति च ॥ ॥ ४० ॥ [41]निःश्रयेसं राज्यम् । मोक्षेऽपि रञ्जनीया मत्प्रीतिरेव । 'मुक्तस्यापि हरेः प्रीतिः सर्वतोऽप्यनुरज्यत'इति वामने ॥ ४१ ॥ '[42]सर्वतोऽपि प्रियो ह्यात्मा तस्यापि प्रियतां हरिः । आपादयति यत्तस्मात्स्वात्मनोऽपि प्रियो हरिरि'ति ब्रह्मवैवर्ते ॥४२॥ इति तृतीय-तात्पर्ये दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

[4]आत्मनि परमेश्वरे मन आवेश्य ॥ ४ ॥ [9]अनिमित्तस्य ब्रह्मार्पणबुद्ध्या कृतस्य । 'अ इति ब्रह्मे'ति श्रुतेः ॥ ९ ॥ [10]लक्षणं लक्ष्यमात्मा च स्वरूपमिति कथ्यत' इत्यभिधानम् ॥ १० ॥ [11]गुण-

---

मृच्छति ॥३३॥ ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् । यन्मां त्वं मन्यसे युक्तं भूतेन्द्रियगुणात्मभिः ॥ ३६ ॥ प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया । यदस्तौषीद्गुणमयं निर्गुणं माऽनुवर्णयन् ॥३९॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् । तस्याहं सम्प्रसीदेयं सर्वकामवरेश्वरः ॥४०॥ पूर्तेन तपसा यज्ञैर्दानैर्योगैः समाधिना । राज्यं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥४१॥ अहमात्माऽऽत्मनां धातः प्रेष्ठः सन् प्रेयसामपि । अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ॥४२॥

एकादशोऽध्यायः

मैत्रेय उवाच—विरिञ्चोऽपि तथा चक्रे दिव्यं वर्षशतं तपः । आत्मन्यात्मानमावेश्य यथाऽऽह भगवानजः ॥४॥ एतावान् जीवलोकस्य संस्था-भेदः समासतः । धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठिनः ॥९॥ विदुर उवाच—यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः । कालाख्यं लक्षणं ब्रह्मन् यथा-वर्णय नः प्रभो ॥ १० ॥ मैत्रेय उवाच—गुणव्यतिकराकारो निर्विशेषोऽप्रति-

SGDF
Sri Gangeshwari Digital Foundation

व्यतिकरमाकरोति तद्द्रष्टा। अप्रतिष्ठितोऽन्यत्र। 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नी'ति श्रुतिः। तदुपादानम्। गुणव्यतिकरोपादानकर्तारम् ॥११॥ [12]सृष्ट्याद्यर्थत्वेन तस्य पुरुषस्य। ब्रह्मविष्णुमहेश्वरइति त्रीणि रूपाण्यात्मना सृष्टानि। ब्रह्म निर्मातृकम्। मायया सामर्थ्येन। तत्र यत्संहर्त्रीश्वराख्यं रूपं तत्कालाख्यम्। कल छेदन इति धातोः। 'अथ त्रयी वाव प्रकृतिः सत्वं रजस्तम इति तां नारायणः पर्यपश्यदनन्यप्रतिष्ठः तं वा एतमाहुः पुरुष इति पूर्णो ह्येष भवति स त्रेधा बभूवैषां गुणानामुपादानाय विष्णुर्वाव सत्वस्य रजसो ब्रह्मेशो नाम तमसः स आविवेश। ब्रह्मा ब्रह्माणं नाम चतुर्मुखं ईश ईशानं नाम पञ्चमुखं यो वा ईश ईशानमाविवेश तं वा एनं काल इत्याचक्षते काल इत्याचक्षत' इति सौकरायणश्रुतिः॥ १२ ॥ [13]सृष्टिश्च प्रलयश्चैव संसारो मुक्तिरेव च। देवऋषिप्रभृतयो लोका भूरादयस्तथा। अनाद्यनन्तकालीनाः सर्वदैकप्रकारतः। जगत्प्रवाहः सत्योऽयं नैव मिथ्या कथञ्चन। ये त्वेतदन्यथा ब्रूयुः सर्वहन्तार एव ते। देवैर्ब्रह्मादिभिः शप्ता ऋषिभिर्मानुषादिभिः। सेतिहासैस्तथा वेदैः सर्वे यान्त्यधरं तमः। सर्वब्रह्मत्ववेत्तारो जीवब्रह्मत्ववेदिनः। अन्यसाम्यविदो विष्णोर्विष्णुद्वेष्टार एव च। सर्वे यान्ति तमो घोरं न चैषामुत्थितिः क्वचिदि'ति स्कान्दे॥ १३ ॥ '[14]तामसस्य पदार्थस्य सत्वं हि लयकारणम्। सात्विकस्य तमश्चैव तयोरपि रजः क्वचित्। गुणतोऽयं लयः प्रोक्तो द्रव्यतस्तु विरोधिना। कालतः कालसङ्ख्याको लयः सर्वस्य वस्तुन'-

---

ष्ठितः। पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत् ॥११॥ विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया। ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना॥ ॥१२॥ यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशम्। सर्गो नवविधस्तस्य प्राकृतो वैकृतश्च यः ॥ १३ ॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसङ्क्रमः। आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः॥ १४ ॥ द्वितीय-

SGDF
Sri Gargeshwari Digital Foundation

इति ब्रह्मतर्के। तमसो रजस्तु द्विगुणं रजसः सत्वमेव च। परिमाणत एवं स्युस्त्रयः प्रकृतिजा गुणाः। तत्र सत्वं केवलं स्याद्रजस्यपि शताधिकम्। सत्वं रजःशतांशं तु तमस्तत्र प्रकीर्तितम्। तमस्यपि तथा सत्वं तमसस्तु दशोत्तरम्। तद्दशांशेन तु रजो मूलजं यद्रजस्तु तत्। विलये दशांशतः सत्व एकांशेन तमस्यपि। मिश्रितं भवति ह्येतां साम्यावस्थां विदुर्बुधाः। यदा तु तद्रजः सर्वं तमसा सह सङ्गतम्। तदा त्वाहुर्महत्तत्त्वं तच्चतुर्भागसम्भवम्। तत्र त्रिभागो रजस एकोंऽश-स्तमसस्तथा। तदाहुर्ब्रह्मणो रूपं गुणवैषम्यनामकम्। तदेव केवलं सत्वमितरापेक्षया भवेत्। श्रीर्मूलसत्वं विज्ञेया भूर्मूलं रज उच्यते। मूलं तमस्तथा दुर्गा महालक्ष्मीस्त्रिमूलिका। गुणेभ्यो गुणमूलाच्च योऽतीतः स जनार्दनः॥ १४॥ [15]यद्रजो मूलरजसि मूले तमसि यद्रजः। तमश्च मूले तमसि महत्तत्त्वं तदात्मकम्। दशांशास्तत्र सत्वं स्युरेकांशो रज एव तु। तद्दशांशं तमो ज्ञेयमहङ्कारस्तदात्मकः। स रुद्रस्तामसो ज्ञेयो विरिञ्चापेक्षयैव तु। इतरापेक्षया सत्वं सत्वाद्या-स्तद्वदस्य च। तत्तमोंऽशात्सात्विकांशो मन आद्याः प्रकीर्तिताः। रजसोंशस्त्विन्द्रियाणि तमसोंऽशश्च खादय'इत्यादि तत्त्वविवेके ॥१५॥ [15-16]भूतानि द्रव्यशक्तीनि भूतेषु द्रवणं यतः। तथा तन्मात्रशक्तीनि शब्दाद्यात्मकता यतः। क्रियाशक्तीनि वागाद्यानीन्द्रियाणीतराणि तु। ज्ञानशक्तीनि मनसा देवाश्च ज्ञानशक्तयः। एतेषां मूलभूतत्वादहङ्कार-स्त्रिशक्तिमान्। मानुषापेक्षया देवाः सात्विकाः परिकीर्तिताः। तत्रापि सात्विकाः प्रोक्तास्तात्विका यास्तु देवताः। तत्रापि सात्विको रुद्र-स्तत्रापि तु चतुर्मुखः। अविकारौ ब्रह्मरुद्रौ देहभेदादिसम्भवे। विकारवन्त इन्द्राद्यास्तस्माद्वैकारिका मताः। त एवेन्द्रियरूपेण यत-

---

स्त्वहमस्तत्र द्रव्यज्ञानक्रियादयः। भूतसर्गस्तृतीयस्तु तन्मात्रद्रव्य-शक्तिमान् ॥ १५॥ चतुर्थ ऐन्द्रियः सर्गो यस्तुज्ञानक्रियात्मकः।

SGDF
Sri Gargeshwari Digital Foundation

स्त्वतिविकारिणः। ज्ञानमात्रगुणोद्रिक्तास्तस्मात्तैजसनामकाः। अविकारित्वयोग्यत्वं निवृत्तं हीन्द्रियेषु तु। वैकारिकत्वनामापि ततस्तेषां न विद्यते। यथा विप्रकुले मूर्खो मूर्ख इत्यभिधीयते। विद्यायोग्यत्वतः शूद्रो न मूर्खो मूर्ख एव सन्। तामसानि हि भूतानि किञ्चिद्व्यवहितत्वतः। ज्ञानस्य सुष्टुज्ञत्वेऽपि पूर्णज्ञानो हरिः स्वयमि'ति च ॥१६॥ [17]अबुद्धिपूर्वमिव तु ब्रह्मणो हरिबुद्धितः। अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः। तामसानां तु भूतानां सहस्रं सत्वभागिनाम्। शतांशरजसामेकतमसां सर्ववेदिनाम्। केवलस्तामसो योंऽशः साऽविद्या पञ्चपर्विका। जाताऽतिकृष्णा तद्देहाद्दैत्यरक्षःपिशाचकाः ॥१७॥ [25]यद्रजो भौतिकं तेन मानुषाणां सदा जनिः। तमोगूढेन रजसा त्वितरस्थास्नुचारिणाम् ॥ २५ ॥ [27-28]भौतिकेन तु सत्वेन गूढं ब्रह्मण आण्डजम्।

वैकारिको देवसर्गः पञ्चमो यन्मयं मनः ॥ १६ ॥ षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ॥१७॥ रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥ १८ ॥ वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः ॥ १९ ॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः। अविदो भूरितमसो घ्राणज्ञा हृदिवेदिनः ॥ ॥२०॥, गौरजो महिषः कृष्णः सूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥२१॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥२२॥ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्यकौ। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥ २३ ॥ कङ्कगृध्रबकश्येनभासबल्लूरबर्हिणः। हंससारस चक्राह्वकाकोलूकादयः खगाः ॥ २४ ॥ अर्वाक् स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम्। रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः ॥२५॥ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम। वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥ २६ ॥ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥ २७ ॥ भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः। दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः ॥

SGDF
Sri Gangeshwari Digital Foundation

रूपं तत्रापि तु तमः शतांशेन प्रकीर्तितम्। तज्जो रुद्रस्ततस्त्वेव-मिन्द्रादीनां पुनर्जनिः। गूहितं भूतरजसा तत्सत्वं मानुषा यदा। देवा एवंगुणास्त्वेते सर्वं व्याप्य व्यवस्थिताः। गुणातीतं च यद्रूपं ब्रह्मादीनां सुखात्मकम्। चिद्रूपं तच्च सत्वस्यैवोत्कर्षो यत्र विद्यते। तच्चोत्कृष्टं तमो यत्र हीनं तत्र स्वभावतः। उपगूहने तु नैवास्ति विशेषो नित्यचिन्मये। प्रकृतेर्गुणरूपाया मूलिकायाश्च न क्वचित्। विशेषः परमे तत्त्वे वासुदेवे कुतः पुनरि'ति च॥ २७, २८॥ [13]अव्यक्ताद्याः पृथिव्यन्ताः सर्वाः प्रकृतयः स्मृताः। तदुपादानकः सर्गः प्राकृतः परिपठ्यते। अण्डं तु विकृतं ज्ञेयं तज्जो वैकृत उच्यते॥ १३॥ [17]पञ्चपर्वा त्वविद्या तु भूतेभ्यो हरिणा पुरा। उद्धृत्य ब्रह्मणि क्षिप्ता सा पुनस्तेन निःसृता। तत्स्रष्टृत्वज्ञापनाय तस्मात्सा प्राकृता मते'ति च॥१७॥ [18]एते गुणा हरेः सम्यक्स्वातन्त्र्यविषयाः सदा। स्वतन्त्राः प्रकृतेश्चापि ब्रह्मणोऽन्येषु तु क्रमात्। देवेष्वेव तदन्येषु परतन्त्रा हि ते मता' इति च। स्थास्नुभिर्नियमान्मुख्या स्थितेर्गतिरवाप्यते। प्रायः परोपकर्तृत्वात्ते मुख्यस्रोतसः स्मृताः॥ १८॥ [20]नाधो नोर्ध्वं तिरश्चां तु पुनस्तत्रैव यज्जनिः। यज्ञोपयोगं च सतामुपकारं विनापि च। तिर्यक्स्रोतस इत्येव प्रोच्यन्ते ज्ञानिभिस्ततः॥२०॥ [25]प्रायोऽधोगमनं यस्मात्प्रयत्नेन विना भवेत्। अर्वाक्स्रोतस इत्येव मानुषाः परि-कीर्तिताः॥ २५॥ [19]नियमादूर्ध्वगन्तारो देवा मोक्षैकभागिनः। ऊर्ध्वस्रोतस इत्येव तस्मात्ते परिकीर्तिता'इति ब्राह्मे॥ १९॥ [25]तिरश्चां स्थावराणां च बुद्धिपूर्वप्रवर्तिनाम्। असुराणां रक्षसां वापि पिशाचानां तथैव च। अर्वाक्स्रोतस्त्वमुद्दिष्टं नियमादसुरादिनामि'ति च॥२५॥ [19]मुख्यस्रोतस इत्यस्यार्थ उत्स्रोतस इति। 'ऊर्ध्व इत्येव यैस्तूच्चतम एवाभिधीयते। ऊर्ध्वस्रोतस एतस्मादेवा एव न तत्परे। उच्छब्द उच्चमात्रेऽपि तस्मात्स्थास्नुषु भण्यत इति' च॥ १९॥ [20]तिरश्चीनाः

SGDF
Sri Gargeshwari Digital Foundation

स्थावराश्च अन्तःस्पर्शा इतीरिताः। यत्प्रत्यक्षानुमानाभ्यां हृद्गज्ञानं न शास्त्रत'इति पाद्मे। यदप्रयत्नाद्धृदयङ्गमं तदेव जानन्ति नो शास्त्र-युक्तिभ्यामित्यर्थः॥ अष्टाविंशद्विशेषेण यज्ञेषूपकृतं यतः। तिरश्चां तावदेतस्माद्गण्यन्ते शास्त्रवेदिभिः॥ २०॥ [21-24]गौरजो महिषः कृष्णः सूकरो गवयो रुरुः। अव्युष्ट्रौ च खराश्वौ च तथैवाश्वतरोऽपरः। गौरश्च शरभश्चैव चमरी श्वसृगालकौ। वृको व्याघ्रश्च मार्जारो हरिश्च शशशल्यकौ। कपिर्गजश्च गोधाद्या जलजाः पक्षिणस्तथे'ति ब्रह्माण्डे। कूर्मो जलजत्वेनाष्टाविंशत्स्वन्तर्भूतोऽपि पञ्चनखत्वप्रदर्शनार्थं पृथगुक्तः। 'तत्तदाकारसंयुक्तान्सृज्यान्स्रष्टारमेव च। यः सदा संस्मरेद्योगी न स भूयोऽभिजायत' इति स्कान्दवचनात्प्रसिद्धानामपि द्विशफादीनां स्मरण-विधानार्थमुक्तिः। 'उच्यते सुप्रसिद्धं च स्मरणार्थं च कुत्रचित्। अप्रसिद्धज्ञापनार्थं द्विधा शास्त्रवचः स्मृतमि'ति षाड्गुण्ये। 'वल्गूरो नृत्त-पक्षी च सलल्कश्च कथ्यत'इत्यभिधाने॥ २१-२४॥ '[20]अष्टाविंश-त्प्रधानास्तु तिरश्चां यास्तु जातयः। यो यस्य सदृशस्त्वन्यः स तत्रान्त-र्गतो भवेत्। जलजान्तर्गताः सर्पाः कीटाद्या याश्च जातयः। तेषां जलप्रधानत्वाच्छरीरस्य तु सर्वश'इति सत्यसंहितायाम्॥२०॥ [25]रजो-निष्ठास्तमोनिष्ठा द्वेधाऽर्वाक्स्रोतसः स्मृताः। असुराद्यास्तमोनिष्ठा मानुषास्तु रजोऽधिका' इति व्योमसंहितायाम्। दुःखे च सुखमानिनो-ऽसुराः। 'सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी'ति वचनात्॥ 'सुखे सुखैकभावास्तु देवा नैवं तु दानवा'इति षाड्गुण्ये॥ २५॥ '[26]कुमारन्तीति कौमारो देवानामण्डजोद्भवः। वैकारिकाणां जनना-त्प्राकृतो वैकृतश्च सः। वैकारिकेष्वेवान्येषामीषद्योगित्वहेतुतः। उभयात्मकत्वं तेनैव प्रोच्यन्तेऽष्टगणा अपी'ति च॥ देवसर्गश्चेति चकारार्थ उभयात्मकइति वैकारिकस्तु देवसर्गः प्राकृतत्वेनोक्तः॥२६॥ '[27-28]प्रोक्ता अष्टविधा देवा विबुधाः सर्व एव तु। पितॄणां शतमेवात्र

SGDF
Sri Gargeshwari Digital Foundation

असुरास्त्रिंशदेव च । गन्धर्वाप्सरसां चैव द्विशतं परिकीर्तितम् । सप्ततिर्यक्षरक्षस्सु त्रिंशच्चारणजातिषु । शतं सिद्धास्तथान्यासु सप्ततिः सर्वजातिषु । ऊर्ध्वस्रोतस एते वै अन्येऽर्वाक्स्रोतसः स्मृताः । वैकारिकेषु देवेषु एते वै मुख्यभोगिनः । अभोगिनस्तदन्ये तु देवा एते ततः स्मृताः । सर्वज्ञास्ते सहाराध्या भक्तास्तेष्वन्तरेव च । नृत्तगानादिकर्तारो वाहनादिकृतस्तथा । सिद्धसिद्धेतिवक्तारश्चाराश्चैषां क्वचित्क्वचित् । सेवाकरा इति ह्येतैर्भेदैरष्टविधा मताः । अन्ये च ये तु सर्वज्ञा विबुधास्ते प्रकीर्तिताः । तथान्ये कर्मभिस्तैस्तैरष्टभेदान्तरं गता'इति तत्त्वविवेके । 'यदि देवादयो दोषाज्जायेरन्मानुषादिषु । तथापि देवा विज्ञेयाऽसुराद्यास्तु तथा ध्रुवमि'ति च ॥ २७, २८ ॥ [29]गुणाप्लुतो हरिर्नित्यं गुणानां मध्यगो यतः । अनहंवेदनात्तस्य गुणासंस्पर्श एव चे'ति च ॥ 'सृष्ट्वा देवादिदेहान्स आत्मानं बहुधाऽकरोत् । तन्नियन्तृतयाऽऽत्मानं प्रकृतिं देहभेदत'इति नारदीये । 'कर्ता च करणं चैव कर्म चैव स्वयं हरिः । आत्मनो बहुधाभावे प्रकृतेस्तु स्वतन्त्रत'इत्याग्नेये ॥ २९ ॥ इति तृतीयतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

[1]कालपरिमाणं दर्शयितुं द्रव्यपरिमाणं दृष्टान्तत्वेन दर्शयति । 'मनुष्या देवलोकेऽपि विशेषेणैव दर्शने । अंशांशित्वविशेषं तु यस्य द्रष्टुं न शक्नुयुः । चरमो विशेष इति तं मुनयो ब्रूयुरञ्जसा । परमाणुः

॥ २८ ॥ अतः परं प्रवक्ष्यामि वंशान्मन्वन्तराणि च । एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः । सृजत्यमोघसङ्कल्प आत्मैवात्मानमात्मना ॥ ॥ २९ ॥

द्वादशोध्यायः

मैत्रेय उवाच—चरमस्तु विशेषाणामनेकासंयुतः सदा । परमाणुः

SGDF
Sri Gargeshwari Digital Foundation

स विज्ञेयः कणादाद्या निरंशिनम् । अनन्तांशयुतत्वेऽपि यं ब्रूयुर्भ्रान्तिदर्शनात् । ततोऽपि परमाणुत्वं तदंशानां तु यद्यपि । अनन्तत्वाद्विवेकार्थमस्योक्ता परमाणुते'ति तत्त्वविवेके । अनेकांशैरा समन्ताद्युतः ॥ १ ॥ [2]कालतो देशतो गुणतश्च परममहत्त्वं सतः परब्रह्मण एव । सच्छब्दोऽन्यत्राप्युपचारतो भवतीत्यतः पदार्थस्येति । सत्पदस्य यो मुख्याभिधेयस्तस्य । 'मुख्याभिधेयस्त्वर्थः स्याद्वाच्यमन्यच्च भण्यते । अमुख्ये स्वर्थशब्दस्तु नीचोपरिहितो भवेदि'ति ब्रह्मतर्के । यद्वेव समः प्लुषिणेत्यादिनाऽन्यत्र स्थितस्य तत्परिमाणत्वमप्यस्तीत्यतः स्वरूपावस्थितस्येति । जगदावरकस्य स्वरूपस्य ततः किञ्चिन्महत्वमित्यतः कैवल्यमिति । तत्रापि बहुविधानि रूपाणि तस्य सन्तीत्यविशेष इति । सर्वगते प्रादेशमात्रमपि विद्यत इत्यतो निरन्तर इति । परब्रह्मणो यः केवलभावः । अण्डाद्यन्तःप्रविष्टं तदावरकं तस्यैव परमपुरुषादिरूपान्तरं तदेकदेशं (प्रादेशः प्रादेशमात्रादिविशेषं) च विना यत्सर्वगतं रूपं तदेव परममहान् । 'कालकोटिविहीनत्वं कालानन्त्यं विदुर्बुधाः । देशकोटिविहीनत्वं देशानन्त्यं तथैव च । गुणानामप्रमेयत्वं वस्त्वानन्त्यं विदो विदुः । आनन्त्यं त्रिविधं नित्यं हरेर्नान्यस्य कस्यचित् । तस्य सर्वस्वरूपेष्वप्यानन्त्यं तु त्रिलक्षणम् । तथापि देशतस्तस्य परिच्छेदोऽपि विद्यते । परिच्छेदस्तथा व्याप्तिरेकरूपेऽपि युज्यते । तस्याचिन्त्याद्भुतैश्वर्याद्व्यवहारार्थमेव च । गुणतः कालतश्चैव परिच्छेदो न कुत्रचित् । व्याप्तत्वं देशतोऽप्यस्ति सर्वरूपेषु यद्यपि । न च भेदः क्वचित्तेषामणुमात्रोऽपि विद्यते । तथापि विद्यतेऽणुत्वं यस्मादैश्वर्ययोगतः । तस्माद्वुद्ध्यवतारार्थमव्याप्तत्वं च भण्यते । यत्तस्य व्यापकं रूपं परं नारायणाभिधम् । शून्यं ब्रह्मेति तत्प्राहुर्द्वितीयं स्रष्टृ यत्ततः । परमः पुरुषो नाम मितं तद्देशतो विभोः । तृतीयं वासुदेवाख्यं जगदावरकं

स विज्ञेयो नृणामैक्यभ्रमो यतः ॥१॥ सत एव पदार्थस्य स्वरूपावस्थितस्य

SGDF
Sri Gangeshwari Digital Foundation

मितम्। देशतो जगदाविष्टं तुरीयं विष्णुनामकमि’ति ब्रह्मतर्के ॥ सर्वगतस्यापि ब्रह्मरूपस्य कालादिरूपया प्रकृत्या समव्याप्तावपि दार्ष्टान्तिकान्तर्भावात्तदन्यस्मिन्नवस्थानाच्च स्वरूपावस्थितस्येत्युक्तम्। ‘देव्यां कालादिरूपिण्यां स्थितं ब्रह्मापि सर्वगम्। उच्यतेऽनन्यगं यस्मादात्मवत्सा हरेर्विभोः। महदादिगतं यत्तु तदन्यगतमुच्यत’ इति ब्राह्मे ॥ २ ॥ [3-4]अनुमितः शास्त्रलोकानुसारेण ज्ञातः। ‘अनुमेति द्वयं प्राहुर्यथाज्ञानं च लिङ्गजमि’त्यभिधानम् ॥ ‘यावन्तं देवलोकस्थो मानुषस्त्ववधारयेत्। महाप्राज्ञो देवजूकः स कालः परमाणुकः। सर्गाद्यैरनवच्छिन्नस्तदनन्तर इत्यपि। तथैव परमाण्वादिविशेषात्मापि नो भवेत्। पूर्वापरादिभेदो न स कालः परमो महानि’ति ब्रह्मतर्के ॥ स्वरूपावस्थितस्य कैवल्यमविशेषो निरन्तर इत्येतानि विशेषणानि क्रमेण परममहतः कालस्याप्यत्रोक्तानि। ‘देशतः कालतश्चैव वस्तुतश्च त्रिधा हरेः। यथानन्त्यं न चान्यस्य प्रकृतेर्देशकालतः। तथा शब्दस्य कालस्य देशानन्त्यं न कालतः। कालशब्दात्मिका सैव तथापि तु हरेः सदा। नास्याः सामर्थ्यलेशोऽपि ज्ञानानन्दगुणेष्वपि। ज्ञेयस्तदवरो वायुः शेषवीन्द्रहरास्ततः। अवरास्तत इन्द्राद्या गुणैः सर्वैर्न संशय’इति ब्रह्मवैवर्ते ॥ ‘अण्वादिकालसंस्थानभोक्तृत्वात्परमेश्वरः। अण्वादिनामवाच्योऽसौ कालश्चेत्यभिधीयत’इति च ॥ सतो ब्रह्मणः अविशेषं स्वरूपं यः कालः कालान्तर्यामी तदेव ब्रह्म भुङ्क्ते। तदपि ब्रह्म परममहान्। तस्यापि त्रिधा परिच्छेदाभावात्। सर्वं सर्वत्र भोक्ताऽपि विशेषादेकभोक्तृवत्। स्थितो हरिरचिन्त्यात्मा निजैश्वर्यादजो विभुरि’ति ब्रह्मतर्के ॥ ३, ४ ॥ [5]अगात् दृष्टिविषयं प्राप्य ज्ञात इत्यर्थः ॥ ५ ॥

यत्। कैवल्यं परममहानविशेषो निरन्तरः ॥ २ ॥ एवं कालोऽप्यनुमितः सौक्ष्मे स्थौल्ये च सत्तम। संस्थानभुक्त्या भगवानव्यक्तोऽव्यक्तभुग्विभुः ॥ ३ ॥ स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्। सतोऽविशेषभुग्यस्तु स कालः परमो महान् ॥४॥ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः। जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥ ५ ॥ लघूनि

SGDF
Sri Gangeshwari Digital Foundation

[8]राशिभेदात् । ऊनातिरेकात्सप्त वेति ॥ ८ ॥ '[9]काकणिकाचतुष्कं तु विंशांशेत्यभिधीयते । कृष्णलेत्यपि तं ब्रूयुस्तैश्चतुर्भिस्तु माषकम् । चतुरङ्गुलदीर्घे तु कृते माषचतुष्टये । यावत्स्यात्परिणाहेन तावद्द्वारं विधीयते । प्रस्थस्य नाडीपात्रस्य षट्दलस्य शुभे जले । भाराधिक्ये-नोदकेन क्षिप्रं पूर्तिर्भविष्यति । अतिशैत्ये कलङ्के च ना(माघे)ध्येनैव तु पूरणम् । तस्माद्वसन्तकाले तु प्रयागस्थोदकेन तु । नाडीशुद्धि-परीक्षा स्यादन्यथा न समं भवेदि'ति पाद्मे ॥ निर्मलेन समोष्णेन नित्यसूर्यांशुवारिणा । प्रवाहगेन कार्या स्यात्कालशुद्धिः सदैव त्वि'ति ब्रह्माण्डे ॥ ९ ॥ [10]यत्रोभयोः स शब्दः स्यात्तत्र द्विवचनेऽप्युभ' इत्यभिधानम् ॥ १० ॥ '[14]इडावत्सरनामाऽसौ नक्षत्रद्वादशे स्थितः । तिथीनां द्वादशावर्ते यो हरिः सोऽनुवत्सरः । वत्सरो यः स्थितस्त्वह्नां षष्ट्युत्तरशतत्रये । गुर्वावर्ते द्वादशांशे यः स्थः स परिवत्सरः । सौर-द्वादशके मासे यः स्थः संवत्सरो हरिः । एवं स कालनामाऽपि कालस्थः परमेश्वर'इति ब्रह्मतर्के ॥ १४ ॥ '[13]सर्वदा दर्शनात्तस्या-निमिषत्वं विदुर्बुधाः । सततं गमनाद्वापि कालस्थस्य महात्मन'इति च ॥ १३ ॥ [15]अभ्रमाय भूतभेदकः । क्रतुभिः स्वप्रज्ञाभिः । 'भूतानां ज्यैष्ठ्यकानिष्ठ्यज्ञप्त्यै यज्ञादिवृत्तये । बोधयन्सृज्यशक्तिं च कालस्थो वर्तते हरिरि'ति तन्त्रप्रकाशिकायाम् ॥ १५ ॥ [23]दिनस्थो

वै समाम्नाता दश पञ्च च नाडिका । ते द्वे मुहूर्तं प्रहरः षड्यामः सप्त वा नृणाम् ॥ ८ ॥ द्वादशार्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः । स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थं जलं पिबेत् ॥९॥ यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे । पक्ष पञ्चदशाहानि शुक्लः कृष्णश्च मानद ॥ १० ॥ ग्रहर्क्ष-ताराचक्रस्थः परमाण्वादिना जगत् । संवत्सरावसानेन पर्यैत्यनिमिषो विभुः ॥ १३ ॥ संवत्सरः परिवत्सर इडावत्सर एव च । अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥ १४ ॥ यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः । कालाख्यया गुणमयीं क्रतुभिर्वितन्वन् तस्मै बलिं हरत वत्सरपञ्चकाय ॥ १५ ॥ निशावसान

SGDF
Sri Gargeshwari Digital Foundation

भगवान्भोक्ता ॥ २३ ॥ '[24]युगैकसप्ततेरूर्ध्वं सार्धाष्टादशलक्षकम् । वत्सराणां मनोर्भुक्तिः सहस्रंचतुरुत्तरम् । शतानां प्रलयश्चैव पञ्चोत्तरमथापि च । आद्येषु षट्सु प्रथमे द्विसहस्रं प्रकीर्तितम् । वत्सराणां मनोरन्तरेवमिन्द्रादीनां भवेदि'ति महावाराहे ॥ २४ ॥ '[27]ब्रह्मणा कालनाम्ना तु सह शेते हरिर्निशी'ति ब्राह्मे ॥ २७ ॥ [32]अस्य ब्रह्मणः । ब्रह्मणो दिनमित्युक्तत्वात् । 'नायुर्मानं भगवतः कस्मिन्रूपेऽपि विद्यते । अनादित्वादमध्यत्वादनन्तत्वाच्च सोऽव्यय'इति हरिवंशेषु ॥ ३२ ॥ '[38]यमः कालो मानुषाणां तस्य कालः सुदर्शनः । तस्यापि रुद्रस्तत्कालो ब्रह्मा दुर्गाऽपि तस्य तु । सा ब्रह्मप्रलये देवी वर्तते चक्ररूपिणी । संहरन्ती सदा लोकान्सैव ब्रह्मादिषु स्थिता । तस्या नियामको विष्णुः परः कालः स उच्यते । कालाभिमानिनी सैव प्रभुर्न जगदीशितुः । तस्याः प्रभुः स एवेशो विष्णुः सर्वेश्वरेश्वर'इति च ॥ ३८ ॥ '[39-41]दशेन्द्रियाणि च मनो भूतान्यण्डगतानि तु । विकारा इति विज्ञेया भूताहंमहतः पर'इति च ॥ 'पृथिवीं विशेष इत्याहुः शब्दादीनां बहुत्वतः । सा सूक्ष्मत्वाद्वृणोत्यण्डं द्विगुणा तु दशोत्तराः । अबादयः प्रकृत्यन्ता अष्टप्रकृतयः स्मृता'इति च । अन्तर्गताः शरीराणि । शरीराणां बहुत्वेन अतीतानागतैस्तथा । अस्यैव देवकायेषु प्रतिप्रति च दर्शनात् ।

आरब्धो लोककल्पोऽनुवर्तते । यावद्दिनं भगवतो मनून् भुञ्जंश्चतुर्दश ॥ ॥ २३ ॥ स्वं स्वं कालं मनुर्भुङ्क्ते साधिकामेकसप्ततिम् । मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः । भवन्ति चैते युगपत्सुरेशाश्चानु ये च तान् ॥ २४ ॥ तमो मात्रामुपादाय प्रतिसंरुद्धविक्रमः । कालेनानुगतः शेष आस्ते तूष्णीं दिनात्यये ॥ २७ ॥ एवंविधैरहोरात्रैः कालगत्योपलक्षितैः । अपेक्षितमिवास्यापि परमायुर्वयः शतम् ॥ ३२ ॥ कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते । अव्याकृतस्यानन्तस्य ह्यनादेर्जगदात्मनः ॥ ३७ ॥ कालोऽयं परमाण्वादिद्विपरार्धान्त ईरितः । नैवेष्टे स प्रभुर्भूम्न ईश्वरो धाम मानिनाम् ॥ ३८ ॥ विकारैः षोडशभि(शै)र्युक्तो विशेषादिभिरावृतः । अण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥३९॥

SGDF
Sri Gargeshwari Digital Foundation

विष्णुसामर्थ्यतोऽण्डानां बहुत्वं नान्यथा भवेदि'ति ब्रह्मतर्के ॥ 'एक-मण्डं बहुत्वेन प्रत्येकं रोमकूपगम्। ब्रह्माऽपश्यत्तथाऽऽत्मानं हरेस्तेषु पृथक्पृथगि'ति ब्रह्माण्डे ॥ 'बृहदण्डमभूदेकमि'ति च भारते ॥ ॥ ३९, ४० ॥ [41]धाम गृहमण्डराशयः ॥ ४१ ॥ इति तृतीय-तात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

'[2]तमस्तु शार्वरं प्रोक्तं मोहश्चैव विपर्ययः। तदाग्रहो महामोह-स्तामिस्रः क्रोध उच्यते। मरणं त्वन्धतामिस्रमविद्या पञ्चपर्विके'ति भारते ॥ तमोऽज्ञानं विपर्यासो मोहोऽन्ये तु तदाग्रहा' इति हरिवंशेषु ॥ २ ॥ [4-23]कालतो बलतश्चैव ज्ञानानन्दादिकैरपि। सर्वै-र्गुणैर्विष्णुरेव श्रेष्ठस्तदवमा रमा। अनन्तांशेन कालात्तु समा तस्या-श्चतुर्मुखः। अवरो बहुलांशेन तत्समो वायुरुच्यते। नियमाद्वायुरेवैको ब्रह्मत्वं याति नापरः। तस्मात्समानता मुक्तौ वायुत्वे किञ्चिदूनता। दशवर्षं तु तत्पश्चाज्जननं तत्स्त्रियोरपि। आनन्दादिस्तद्दशांशः कालः संवत्सरात्परः। यावत्पश्चाज्जनिस्तावत्पूर्वं देहक्षयो भवेत्। ब्रह्मवाय्वोस्तु ये देव्यौ तद्दशांशः सुखादिकः। शेषस्य गरुडस्यापि कालो दिव्य-सहस्रकः। शेषरुद्रौ ब्रह्मवायू यथा तद्वत्परस्परम्। तद्देव्यस्तद्दशांशाः स्युस्ततस्त्विन्द्रादयो मताः। एवं मुक्तौ च पूर्वं च नान्यथा क्वचि-

---

दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्। लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥ ४० ॥ यमाहुरक्षरं ब्रह्म सर्वकारणकारणम्। विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥ ४१ ॥

त्रयोदशोऽध्यायः

ससर्जाग्रेऽथ तामिस्रमन्धतामिस्रमादिकृत्। महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ॥ २ ॥ सनकं च सनन्दं च सनातनमथात्मभूः।

SGDF
Sri Gargeshwari Digital Foundation

दिष्यते। अन्यथोक्तिर्यत्र च स्यात्तन्मोहार्थं भविष्यति। पूर्वापर-विपर्यासो बहुरूपत्वहेतुत' इति विष्णुकृततत्त्वविवेके ॥ 'अथात आनन्दस्य मीमांसा'। 'देवासुरेभ्यो मघवान्प्रधान'इत्यादि च। 'इन्द्राद्याः सनकाद्याश्च दक्षाद्या येऽपि चापरे। ऋषयो मनवो देवास्तद्वशा ये च केचन। उमाया अवराः सर्वे गुणैः सर्वैर्न संशयः। तत्समो न भविष्यो वा न भूतोऽद्यतनोऽपि वा। ऋते हरिं ब्रह्मवायू शेषवीन्द्रान्सभार्यकान्। शङ्करं चेति वेत्तव्यमन्यन्मोहार्थमुच्यत'इति विष्णुकृततत्त्वनिर्णये ॥ ४ ॥ '[33]यां तत्याज विभुर्ब्रह्मा मानुषी वाक्च सा स्मृता। सरस्वती निजा भार्या देवीं वाचं तु तां विदुरि'ति च ॥ ३३ ॥ '[35]अभिमानितः शब्दतश्च ब्रह्मा वेदान्ससर्ज ह। यज्ञादींश्चक्लृपे वाचा तथा सर्वाभिमानिनः ॥ ३५ ॥ '[38]इतिहासपुराणे तु श्रुत्वा हरिमुखात्स्वयम्। भारतादीन्विना पश्चाद्धरिणाऽन्यैश्च निर्मितानि'ति ॥ ३८ ॥ '[42]प्राजापत्यं ब्रह्मचर्यमेकभार्यर्तुगामिते'ति व्यासस्मृतौ ॥ 'वार्ता यायावरं ज्ञेयमेकाहित्वमसञ्चय'इति च ॥ ४२ ॥ '[43]वैखानसा मूलभक्षाः फलभक्षा उदुम्बराः। वालखिल्याः सर्वभक्षाः फेनपा वत्सफेनपा'इति च ॥ ४३ ॥ '[44]आन्वीक्षिकी तन्त्रविद्या सा च वेदानुसारिणी। विष्णुप्रोक्ता शिवाद्युक्ता ज्ञेया वेदबहिष्कृता।

सनत्कुमारं च मुनिं निष्क्रियानूर्ध्वरेतसः ॥ ४ ॥ स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन्। प्रजापतिपतिस्तन्वीं तत्याज व्रीडितस्तदा ॥३३॥ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः। कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात्। कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा ॥३४॥ चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह। धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥३५॥ आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः। स्थापत्यं चासृजद्वेदं क्रमात् पूर्वादिभिर्मुखैः ॥ ३८ ॥ सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा। वार्ताऽसञ्चयशालीनं शिलोञ्छ इति वै गृहे ॥४२॥ वैखानसा वालखिल्यौदुम्बराः फेनपा वने। न्यासे कुटीचकः पूर्वं बह्वूदो हंसनिष्क्रियौ ॥ ४३ ॥ आन्वीक्षकी त्रयी वार्ता दण्डनीतिस्तथैव च। एवं

SGDF
Sri Gangeshwari Digital Foundation

दण्डनीती राजधर्मस्त्रयी वेदाः प्रकीर्तिताः । वार्ता वाणिज्यकादिः स्यादेताभिर्यत्तु जीवनम् । तदान्वीक्षिक्यादिनाम ब्रह्मणा निर्मितं पुरे'ति च । प्रणवः पूर्ववक्त्रात् । 'प्रणवः पूर्ववक्त्रेण भूराद्याश्च मुखत्रयात् । प्रदक्षिणमवर्तन्त वेदाश्चैवाश्रमास्तथे'ति ब्राह्मे ॥ ४४ ॥ '[46]स्पर्शास्तस्याभवञ्जीवात्स्वरा देहात्प्रजज्ञिरे । ऊष्माण इन्द्रियेभ्यश्च अन्तस्था बलतो विभोरि'ति च ॥ 'यस्माद्यज्जायते चाङ्गात्तत्तदङ्गाभिधं भवेदि'ति च ॥ ॥ ४६ ॥ '[47]शब्दब्रह्मात्मको ब्रह्मा सर्वशब्दाभिधो यतः । ऋते नारायणादीनि नाम्नां स विषयो यतः । व्यक्तं ब्रह्माण्डमुद्दिष्टमव्यक्तं महदादि च । तद्व्यापकत्वाद्ब्रह्मा तु व्यक्ताव्यक्तात्मकः स्मृत'इति च ॥ ॥ ४७ ॥ '[49]ऋषीणां भूरिवीर्याणामिति सिंहावलोकनम् । यत्र पश्चात्तनः श्रेष्ठस्तत्र सिंहावलोकनमि'ति ब्रह्मतर्के ॥ ४९ ॥ [51]केन व्याप्तत्वात्कायः ॥५१॥ इति तृतीयतात्पर्ये त्रयोदशोऽध्यायः ॥१३॥

चतुर्दशोऽध्यायः

'[33-34]ब्रह्मजस्तु हिरण्याक्षः प्रथमं दंष्ट्रया हतः । स एव पार्षदाविष्टो द्वितीयः(यं) कर्णताडनात् । पूर्वं लयोदके मग्नां द्वितीयं तेन मज्जिताम् । भुवमुद्धरतैवासौ हरिणा क्रोडमूर्तिने'ति ब्रह्माण्डे ॥

व्याहृतयश्चासन् प्रणवेनास्पदं गताः ॥४४॥ स्पर्शास्तस्याभवन् जीवात्स्वरो देह उदाहृतः । ऊष्माण इन्द्रियाण्याहुरन्तस्था बलमात्मनः ॥४६॥ स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः । शब्दब्रह्मात्मनस्तात व्यक्ताव्यक्तात्मनः प्रभोः ॥ ४७ ॥ ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् । ज्ञात्वा तद्धृदये भूयश्चिन्तयामास कौरव ॥४९॥ एवं युक्तिमतस्तस्य दैवं चावेक्षतस्तदा । कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ५१ ॥

चतुर्दशोऽध्यायः

स्वदंष्ट्रयोद्धृत्य महीं विलग्नां स उत्थितः संरुरुहे रसायाः । तत्रापि

SGDF
Sri Gargeshwari Digital Foundation

'व्यत्यासेनापि चोच्यन्ते अविवेकेन कुत्रचित् । दुष्टानां मोहनार्थाय तत्र तत्र कथाः क्वचिदि'ति स्कान्दे ॥ अविवेकेनेत्यस्य विविच्य नोच्यत इत्यर्थः । न तु कर्तुरविवेकः । 'सर्वज्ञस्य कुतोऽज्ञानं व्यास-स्योदारकर्मणः । दुष्टानां मोहनार्थाये'ति च ॥ ३३, ३४ ॥ इति तृतीयतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

'[28]पिशाचचर्यामचरद्रुद्रो विष्ण्वाज्ञयैव तु । गर्भिणीवधनोदार्थ-महो विष्णुर्विडम्बकृदि'ति वाराहे ॥ २८ ॥ '[41]विष्णुहस्तवधाल्लोको भक्तस्यान्यस्य न क्वचित् । तथाप्यसुरमोहाय न विविक्तं क्वचित्क्वचि-दि'ति स्कान्दे ॥ 'हिरण्यकशिपुश्चापि भगवन्निन्दया तम'इति च ॥ ॥ ४३, ४४ ॥ '[45]स्वतः सद्गतियोग्यस्य पुत्रादेर्हेतुता भवेत् । योग्यता-ऽनादिभक्तिः स्यादयोग्यस्य कुतो गतिरि'ति ब्रह्मतर्के ॥ ४५ ॥ इति तृतीयतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

दैत्यं गदया पतन्तम् सुनाभसन्दीपिततीव्रमन्युः ॥ ३३ ॥ जघान रुन्धान-मसह्यविक्रमः सलीलयेभं मृगराडिवाम्भसि । तद्रक्तपङ्काङ्किततुण्डगण्डो यथा गजेन्द्रो जगतीं विभिन्दन् ॥ ३४ ॥

पञ्चदशोऽध्यायः

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च मायया । आज्ञा-करी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडम्बनम् ॥ २८ ॥ कश्यप उवाच—कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् । भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥४३॥ पुत्रस्यैव च पुत्राणां भवितैकः सतां मतः । गायन्ति यद्यशः शुद्धं भगवद्यशसा समम् ॥ ४४ ॥ योगैर्हेमेव दुर्वर्णं भावयिष्यन्ति साधवः । निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुम् ॥४५॥ मैत्रेय उवाच—श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम् । पुत्रयोश्च वधं कृष्णाद्विदित्वाऽऽसीन्महामनाः ॥ ५० ॥

SGDF
Sri Gargeshwari Digital Foundation

षोडशोऽध्यायः

[14]अनिमित्तेन विष्ण्वर्पणेन ॥ १४ ॥ '[17]मुक्ताश्चैवाधिकारस्था द्वेधा वैकुण्ठलोकगाः । अमुक्तानां भ्रमः क्वापि न मुक्तानां कचिद्भवे-दि'ति भविष्यत्पुराणे । 'कृष्णात्मनां न रज आदधुरि'ति च ॥१७॥ '[18]तिरश्चीनाः स्थावराश्च सर्वे ज्ञानाद्विकुण्ठगाः । अमुक्ता मुक्तिमायान्ति नियमात्कर्मणः क्षय'इति च ॥ १८ ॥ [19]भक्तैरर्चिते सति भगवता तुलसिकाभरणे कृते तस्या गन्धार्थं तपो बहु मानयन्ति ॥ १९ ॥ [23]अरचनानुवादाः ॥ २३ ॥ [24]ये नृगतिं ज्ञानादियोग्यां न प्रपन्नाः । ते मोहाद्भगवदाराधनं न कुर्वन्ति । धर्मज्ञानवर्जिता मानुषा एव न भवन्तीत्यर्थः ॥ २४ ॥ [28]वक्रस्थया भ्रुवा सह निर्गतेन ॥ २८ ॥

षोडशोऽध्यायः

वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठमूर्तयः । ये नित्यमनिमित्तेन धर्मेणाराधयन् हरिम् ॥१४॥ वैमानिकाः सललनाश्चरितानि यत्र गायन्ति लोकशमलक्षपणानि भर्तुः । अन्तर्जले तु विकसन् मधुमाधवीनां गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः ॥१७॥ पारावतान्यभृत-सारस-चक्रवाक-दात्यूह-हंस-शुक-तित्तिर-बर्हिभिस्तत् । कोलाहले विरचिते चिरमात्र-योच्चैर्भृङ्गाधिपे हरिकथामनुगायमाने ॥ १८ ॥ मन्दार-कुन्द-कुरवोत्पल-चम्पकोर्ण-पुन्नाग-नाग-बकुलाम्बुज-पारिजाताः । गन्धेऽर्चिते तुलसिका-भरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयन्ति ॥ १९ ॥ त(य)त्सङ्कुलं हरिपदानतिमात्रदृष्टैर्वैदूर्य मारकतहेममयैर्विमानैः । येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः ॥ २० ॥ यन्न व्रजन्त्यघभिदोऽरचनानुवादाः शृण्वन्ति येऽन्यविषयाः कुकथा मतिघ्नीः। यास्तु श्रुता हतभगैर्नृभिरात्तवीर्यास्तास्तान् क्षिपन्त्यशरणेषु तमस्सु हन्त ॥ २३ ॥ येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्व विषयं सहधर्म यत्र । नाराधनं भगवतो वितरन्त्यमुष्य सम्मोहिता विततया ननु मायया ते ॥ २४ ॥ मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयाऽसित चतुष्टयबाहुमध्ये । वक्त्रभ्रुवा कुटिलया स्फुटनिर्गतेन

SGDF
Sri Gangeshwari Digital Foundation

‘[30]जयस्य विजयस्यापि कदाचिद्ब्रह्मशापतः । कृष्णावतारपर्यन्तं प्रातिकूल्यं च जायत’इति नारदीये ।। ३० ।। [32]युवयोर्यथा विरुद्धस्वभावत्वं तद्वद्भगवद्विषय इह शङ्कनीयः कः ? तस्मान्निषेधो व्यर्थ इत्यर्थः ।।३२।। [33]समस्तकुक्षौ स्थिते भगवति नहि भेदः । अस्मिँल्लोके । अन्तस्थभगवद्रूपं बहिष्ठैक्येन पश्यन्ति नभो नभसीव । तत्र प्रत्युदरभेदनिमित्तं भयं युवाभ्यां व्युत्पादितं किम् सर्वान्तर्यामित्वेनाभयस्य भयमस्तीति भावः कुतः । अन्यथा किमिति निवारणम् । ‘सर्वोदरगतं ब्रह्म ये भेदेन विचक्षते । सर्वत्रापि भयं तेषां मृतानां तम एव चे’ति तत्त्वविवेके ।। ३३ ।। [34]त्रयो रिपवो देहत्रये ।। ३४ ।। [36]सुरहेलनस्यापि दण्डो भवति । अत्र स्थितयोः पुनः पूर्ववन्मोहो न स्यादंशिनोः ।।३६।। [38]केसरा रश्मयः ।। ३८ ।। ‘[39]कौस्तुभो ब्रह्मणो रूपं प्राणश्चूडामणिस्तथे’ति च ।। ३९ ।। ‘[42]अविद्यमानकरणं विद्यमानस्मृतिस्तथा ।

रक्तेक्षणेन च मनाग्रभसं दधानौ ॥ २८ ॥ तान् वीक्ष्य वातरसनांश्चतुरः कुमारान् वृद्धान् दशार्धवयसो विदितात्मतत्वान् । वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥ ३० ॥ को वा इहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणामपि सतां विषमस्वभावः । तस्मिन् प्रशान्तपुरुषे गतविग्रहे वां कोवात्मवत्कुहकयोः परिशङ्कनीयः ॥ ३२ ॥ न ह्यन्तरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः । पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य ॥ ३३ ॥ तद्वा अमुष्य परमस्य विकुण्ठभर्तुः कर्तुं न युक्तमिति धीमहि मन्दधीभ्याम् । लोकानितो व्रजतमन्तरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र ॥ ३४ ॥ भूयानघाद्धि भगद्भिरकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषम् । मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोऽधः ॥ ३६ ॥ तं त्वागतं प्रतिहृतौपयिकं स्वपुम्भिस्तेऽचक्षताक्षविषयं स्वसमाधिगम्यम् । हंसश्रियोर्व्यजनयोः शिववायुलोलशुभ्रातपत्रशशिकेसरशीकराम्बुम् ॥ ३८ ॥ कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशन्तम् । श्यामे पृथावुरसि शोभितया श्रिया स्वश्रीवामणिं सुभगयन्तमिवात्मधिष्ण्यम् ॥ ३९ ॥ अत्रोपसृष्टमिति चोत्स्मृतमिन्दिरायाः स्वानां धिया विरचितं

SGDF
Sri Gargeshwari Digital Foundation

उभयं रचनं प्रोक्तं पूर्वसिद्धेषु तु स्मृतिरि'ति शब्दनिर्णये ॥ ४२ ॥ [43]अक्षरजुषामपि तद्रूपसेवाभ्यासिनामपि ॥ ४३ ॥ '[48]भक्तिज्ञान-परीपाकात्किञ्चित्पूर्वं च मुच्यते । दर्शनेन हरेस्तत्र नानन्दः पूर्णतां व्रजेदि'ति ब्रह्मतर्के ॥ अतोऽनपेक्षाणामानन्दोद्रेको मोक्षेच्छुभ्यः । तेषां परिपाकतः पूर्वं ब्रह्मदृष्ट्या मुक्तिप्राप्तेः । 'मुमुक्षोः केवलो भक्तो मुक्तावपि सुखी भवेदि'ति च ॥ ४८ ॥ '[49]यावत्परमभक्तैस्तु भुज्यते दुःखमुल्बणम् । तावन्मुक्तौ सुखोद्रेकस्तत्र चेद्भक्तिवर्धनमि'ति च ॥ ॥ ४९ ॥ इति तृतीयतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

'[6]सर्वोत्तमोऽपि भगवान्विप्रादेः पूजनाय तु । गुणलब्धिं ततो ब्रूते नित्यपूर्णगुणोऽपि सन् । ब्रूयुश्चान्ये क्वचित्तत्तु तदुक्तेरनुसारतः । उपादत्ते वरांश्चापि लोकानां मोहनाय चे'ति कौर्मे ॥ ६ ॥ [7]विप्राणां

बहुसौष्ठवाढ्यम् । मह्यं भवस्य भवतां च भजन्तमङ्गं नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ॥ ४२ ॥ तस्यारविन्दनयनस्य पदारविन्दकिञ्जल्क-मिश्रतुलसीमकरन्दवायुः । अन्तर्गतः स्वविवरेण चकार तेषां संक्षोभ-मक्षरजुषामपि चित्ततन्वोः ॥ ४३ ॥ नात्यन्तिकं विगणयन्त्यपि ते प्रसादं किं चान्यदर्पितभयं भ्रुव उन्नयैस्ते । येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४८ ॥ कामं व्रजेम वृजिनैर्निरयेषु नष्टाश्चेतोऽलिवद्यदि नु ते पदयो रमेत । वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥ ४९ ॥

अथ सप्तदशोऽध्यायः

तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे । तद्ध्येवात्मकृतं मन्ये यत्स्वपुम्भिरसत्कृताः ॥ ४ ॥ यस्यामृतामलयशः श्रवणावगाहः सद्यः पुनाति जगदाश्वपचं विकुण्ठः । सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥ ६ ॥ यत्सेवया चरणपद्म

SGDF
Sri Gargeshwari Digital Foundation

चरणपद्मपवित्ररेणोः सेवया प्रतिलब्धशीलं श्रीर्न जहातीति यत्। अतश्छिन्द्याम्। 'अनुक्ताश्च गुणा विष्णोरुक्ता दोषा न तस्य तु। अज्ञानाद्दोषविज्ञानं गुणज्ञानं यथार्थत'इति पैङ्गिश्रुतिः॥ 'विप्राणां चापि भक्तानामन्येषां च जनार्दनः। ब्रह्मणः शङ्कराद्वापि देवताभ्यस्तथैव च। आत्मनश्च श्रियश्चैव सकाशात्प्रियतामपि। पूज्यतामत्ययुक्तं च वदेत्क्वापि विमोहयन्नि'ति स्कान्दे॥ ७॥ [13]देवीं द्योतमानाम्। ऋषिकुल्यां ऋषिकुलस्तुतिपराम्॥ १३॥ '[15]तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमि'-त्युक्तम्॥ १५॥ [18]धर्मस्यापि दुर्ज्ञेयः॥ १८॥ [20]मधुव्रतपतेः सारग्राहिणां पतेः। अङ्घ्रिस्थतुलसीलोकं स्थानमुरसिस्थापि स्पर्धयेव कामयाना। 'लब्ध्वाऽपि वक्षसि पदमि'ति च॥ २०॥ [21]परम-भागवतत्वेन तस्यामत्यादरः। न तु कामात्। 'हरिभक्तिर्हरेः प्रीति-र्ज्ञानानन्दादयो गुणाः। अधिकारे च मुक्तौ च ब्रह्मवाय्वोश्च तत्स्त्रियोः। शेषवीन्द्रहराणां च तत्स्त्रीणां वासवादिनाम्। यथाक्रमं तु विज्ञेया भूमौ कारणतोऽन्यथा। देहस्य लक्षणं चैव भूमावप्यन्यथा भवेत्। ब्रह्मादिषु क्रमेणैव नित्यं स्याद्देहलक्षणम्। श्रियोऽधिका गुणाः सर्वे सर्वेभ्यो नियमेन तु। उक्ताश्चैवाप्यनुक्ताश्च ततो विष्णोर्न संशय'इति तत्त्व-

---

पवित्ररेणोः सद्यः क्षताखिलमलं प्रतिलब्धशीलम्। न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थमितरे नियमोऽर्हते मत्॥ ७॥ ब्रह्मोवाच— अथ तस्योशतीं देवीमृक्रिकुल्यां सरस्वतीम्। आस्वाद्य मन्युदष्टानां तेषामात्माऽप्यतृप्यत॥ १३॥ ते योगमाययाऽऽरब्धपारमेष्ठ्यमहोदयम्। प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः कम्पितत्वचः॥ १५॥ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव। धर्मस्य परमो गुह्यो निर्विकारो भवान् मता॥ १८॥ यं वै विभूतिरुपयाप्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसः धृतपादरेणुः। धन्यार्पिताङ्घ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना॥ २०॥ यस्तां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परम-भागवतप्रसङ्गः। स त्वं द्विजानुपथपुण्यरजःपुनीतिः श्रीवत्सलक्ष्म

SGDF
Sri Gangeshwari Digital Foundation

निर्णये ॥२१॥ '[22]धारणाद्भगवान्धर्मो यमनाद्यम उच्यत'इति शब्द-निर्णये। 'अनन्तासनवैकुण्ठक्षीरसागरगैस्त्रिभिः। रक्षां करोति भगवान्कपिलः सत्ववर्धनात्। असत्वोऽपि रजश्चैव तमश्चापि निरस्य त्वि'ति मूर्तिभेदे॥ 'कपिलो वरदश्चैव विकल्पश्चे'ति कथ्यत'इति च। अतः सत्वस्य कारणत्वमात्रं कपिलो वरदा तनुः॥ २२॥ [23]आत्मैव गोपो गोपको यस्य तदात्मगोपम्॥ २३॥ '[24]असुरा अप्रियाश्चापि नित्यानन्दान्न लोकवत्। निषेध्यबुद्धिविषयमप्रियं हि हरेर्मतमि'ति च। तस्मादनभीष्टमिव॥ २४॥ '[26]अन्तर्भक्ता बहिःक्रुद्धा हिरण्याद्या हरिं प्रति। सर्वक्रुद्धाः शम्बराद्या अन्तः क्रोधवशास्तथे'ति च॥ २६॥ '[28]स्वरूपश्रीस्तथा भार्या द्वेधा श्रीस्तु हरेर्मते'ति च॥२८॥ '[31]अन्तर्भक्ता बहिर्वैरा हिरण्याद्या हरेर्मताः। तत्र भक्त्याऽभवन्पूता द्वेष आवेशकान्गतः। ब्रह्मजा असुरा ये तु विष्णोः पार्षदतां गताः। कल्याद्याश्च हरेर्द्वेषमन्तः कृत्वा तमोगता' इति च॥ तस्मात्संरम्भोऽल्पफलः कथ्यत एव। भक्तियोग एव ब्रह्महेलननिस्तारकः॥ ३१॥ इति तृतीयतात्पर्ये सप्तदशोऽध्यायः॥ १७॥

किमगा भगभाजनत्वम्॥ २१॥ धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थम्। नूनं भृतं तदभिघाति रजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य॥२२॥ न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृष स्वर्हणेन सुसूनृतेन। तर्ह्येव नंक्ष्यति शिवस्तव देव पन्था लोकोऽग्रहीष्यदृषभस्य हि यत्प्रमाणम्॥ २३॥ तत्तेऽनभीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः। नैतावता त्र्यधिपतेर्बत विश्वभर्तुस्तेजः क्षतिस्त्ववनतस्य स ते विनोदः॥ २४॥ श्रीभगवानुवाच—एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरम्भसंभृतसमाध्यनुबद्धयोगौ। भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव विहितस्तदवैत विप्राः॥ २६॥ भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च। प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम्॥ २८॥ मयि संरम्भयोगेन निस्तीर्य ब्रह्महेलनम्। प्रत्येष्यतं सकाशं मे कालेनाल्पीयसा पुनः॥ ३१॥

SGDF
Sri Gangeshwari Digital Foundation

अष्टादशोऽध्यायः

[5]'फट्कारश्चैव फूत्कारस्तथा किलकिलादयः। अनुकारशब्दा विज्ञेया ये चान्ये तादृशा मता'इत्यभिधानम् ॥ ५ ॥ [9]टङ्कारोऽप्यनुकारशब्दः। 'नाशस्तत्र सृगालानां शिवानां चान्यथास्वर'इत्याग्नेये ॥ ॥९॥ [11]खात्कारोऽप्यनुकारशब्दः ॥ ११ ॥ [31]'न देवानां प्रजापानां विजेता वरतो विना। बलेन विद्यया वापि न समस्तत्पतीन्विना। वरोऽपि तादृशो यावच्छरीरं नान्यदेहग'इति तत्त्वनिर्णये ॥२२, ३१॥ इति तृतीयतात्पर्ये अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

[21]अनेककल्पजननेतृत्वात्सहस्रणीः ॥ २१ ॥ [25]'अक्षतः क्षतव-

अष्टादशोऽध्यायः

ववौ वायुः सुदुःस्पर्शः फट्कारारववान् मुहुः। उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः ॥ ५ ॥ अन्तर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम्। सृगाला अपि टङ्कारैः प्रणेदुरशिवाः शिवाः ॥ ९ ॥ खरोष्ट्राः कर्कशैः क्षत्तः खुरैर्घ्नन्तो धरातलम्। खात्काररभसा मत्तः पर्यधावन् वरूथशः ॥ ११ ॥ मनोवीर्यमदोत्सिक्तमधृष्यमकुतोभयम्। भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः ॥ २२ ॥ तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशयेश्वभिर्वृतः। यस्त्वद्विधानामसतां प्रशान्तये रूपाणि धत्ते सदनुग्रहेच्छया ॥ ३१ ॥

एकोनविंशोऽध्यायः

तयोः स्पृधोः स्निग्धगदाहताङ्गयोः क्षतस्रवाघ्राणविवृद्धयुद्धयोः। विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः ॥ १९ ॥ दैत्यस्य यज्ञावयवस्य मायया गृहीतवाराहतनोर्महात्मनः। कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥ २० ॥ आसन्नशौण्डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम्। विलक्ष्य दैत्यं भगवान् सहस्रणीर्जगाद नारायणमादिसूकरम् ॥ २१ ॥ न यावदेष वर्धेत

SGDF
Sri Gangeshwari Digital Foundation

द्विष्णुरसमः समवत्तथा । अजितो जितवच्चैव ज्ञोऽज्ञवच्च प्रकाशयेत् । सर्वरूपेष्वनन्तोऽपि ब्रह्माद्याश्चैव तन्मतेः । अनुसारितया ब्रूयुः कुर्युश्च स न दुःखभागि'ति ब्रह्माण्डे ॥ २५ ॥ '[26]आदरं तु मुखं विन्द्याच्छम्बट्कारं तु भक्षणमि'त्यभिधानम् ॥ २६ ॥ '[27]मध्याह्नस्त्वभिजित्प्रोक्त आषाढोत्तर एव च । श्रवणस्यापि पूर्वार्धो विषुवं चाभिजित्स्मृतमि'ति च ॥२८॥ इति तृतीयतात्पर्ये एकोनविंशोऽध्यायः ॥१९॥

विंशोऽध्यायः

'[5]धर्मः सत्य इति प्रोक्तो धर्मश्चापि हरेः प्रिय' इति ब्राह्मे ॥५॥ '[22]यथेच्छयैव सर्वं तु मनसा देहतोऽपि वा । कर्तुं शक्तोऽपि शस्त्राद्या लीलैवानन्तशक्तित'इति वाराहे ॥ २२ ॥ इति तृतीयतात्पर्ये विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

'[1]सृष्टौ लये तारतम्यं देवानां ज्ञायते स्फुटम् । तारतम्यपरिज्ञाने महातात्पर्यमिष्यते । अतस्तद्बहुशस्तू(शः सू)क्तमन्यच्चैतत्प्रकाशकमि'ति

स्वां वेलां प्राप्य दारुणः । स्वां देवमायामास्थाय तावज्जह्येनमच्युत ॥ ॥२५॥ एषा घोरतमा सन्ध्या लोकशम्बट्करी प्रभो । उपसर्पति सर्वात्मन् सुराणां जयमावह ॥२६॥ अधुनैवाभिजिन्नाम योगो मौहूर्तिकोऽभ्यगात् । शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम् ॥ २७ ॥

विंशोऽध्यायः

गदायामपविद्धायां हाहाकारे च निर्गते । मानयामास तं धर्मं सुनाभं चास्मरद्विभुः ॥५॥ प्रादुष्कृतानां मायानां आसुरीणां विनाशनम् । सुदर्शनास्त्रं भगवान् प्रायुङ्क्त च ततस्त्रिपात् ॥ २२ ॥

एकविंशोऽध्यायः

महीं प्रतिष्ठामध्यास्य योऽसौ स्वायम्भुवो मनुः । कान्यध्यतिष्ठ-

SGDF
Sri Gargeshwari Digital Foundation

वामने ॥ १ ॥ [12]महतो ब्रह्मवायू च तद्भार्ये चाभिमानिनः ॥ १२ ॥
‘[13]अहमः शेषवीन्द्रौ च रुद्रेन्द्रौ कामतत्स्त्रियः । मनसस्त्वनिरुद्धश्च चन्द्र-
श्चान्ये यथोदितम् । एवं क्रमो व्यत्ययस्तु सूक्ष्मस्थूलविभेदतः । सृष्टौ
गुणे च ज्ञानादौ मुक्तिस्थे वाप्ययं क्रमः । नियमेनान्यथोक्तिस्तु मोहा-
यासुरजन्मनामि’ति वाराहे ॥१३॥ [15]निरात्मकः न व्यक्तस्तत्रात्मा ॥
॥१५॥ [17]संस्थया स्वया भगवति स्थितसामर्थ्येन ॥१७॥ ‘[28]जानन्नपि
समर्थोऽपि क्वचिद्ब्रह्मा हरेः प्रियम् । ज्ञात्वा करोति कर्माणि ह्यज्ञव-
च्चाप्यशक्तवदि’ति च ॥ २८ ॥ ‘[41]व्यसृजन्मलवद्देहं बाह्यं न तु निजं
पुरा । ब्रह्मा तच्चाहरादित्वं प्राप देवादिदैवतमि’ति कौर्मे ॥ ४१ ॥
‘[42]ऊर्जे सारान्नमुद्दिष्टं तदेव पितृभक्षणमि’ति ब्राह्मे ॥ ४२ ॥ [50]ये
पुरा सृष्टा देवाः । ‘दृष्ट्वा तु पौरुषीं सृष्टिं देवाः सुकृतमूचिर’इति

द्वाराणि मार्गायावरजन्मनाम् ॥ १ ॥ ये मरीच्यादयो विप्रा यस्तु
स्वायम्भुवो मनुः । ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ॥ १० ॥
सद्वितीयाः किमसृजन् स्वतन्त्रा उत कर्मभिः । आहोस्वित् संहताः सर्व
इदं स्म समकल्पयन् ॥ ११ ॥ मैत्रेय उवाच—दैवेन दुर्वितर्क्येण परेणा-
निमिषेण च । जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥ १२ ॥ रजः
प्रधानान्महतस्त्रिलिङ्गो दैवचोदितात् । जातः ससर्ज भूतादिर्वियदादीनि
पञ्च च ॥ १३ ॥ सोऽशयिष्टाधिसलिल आण्डकोशो निरात्मकः । साग्रं
वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः ॥ १५ ॥ सोऽनुविष्टो भगवता यः
शेते सलिलाशये । लोकसंस्थां यथा पूर्वं निर्ममे संस्थया स्वया ॥
॥१७॥ ततो हसन् स भगवानसुरैर्निरपत्रपैः । अन्वीयमानस्तरसा क्रुद्धो
भीतः परापतत् ॥ २४ ॥ सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः ।
विमुञ्चात्मतनुं घोरामित्युक्तो विमुमोच ह ॥ २८ ॥ जगृहुस्तद्विसृष्टां तां
जृम्भणाख्यां तनुं प्रभोः । निद्रादीन्द्रियविक्लेदो यया भूतेषु दृश्यते ।
तयोच्छिष्टान् धर्षयन्ति तमुन्मादं प्रचक्षते ॥ ४१ ॥ ऊर्जस्वन्तं मन्यमान
आत्मानं भगवानजः । साध्यान् गणान् पितृगणान् परोक्षेणासृजत्प्रभुः
॥ ४२ ॥ स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः । तदा मनून्
ससर्जान्ते मनसा लोकभावनान् ॥ ४९ ॥ तेभ्यः स व्यसृजद्देहं परः
पुरुष आत्मनः । तां दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम् ॥ ५० ॥

SGDF
Sri Gangeshwari Digital Foundation

च ॥ ५० ॥ '[52]यत्रापि तु हरेर्नाम तदन्यत्र प्रयुज्यते । तदान्तरहरेस्तत्र गृहीतिर्नान्यथा भवेत् ॥ स्वातन्त्र्यादवरत्वं च परस्यापि प्रयुज्यते । स्थितस्यापि यथा राज्ञः स्वानां जयपराजयावि'ति पाद्मे ॥ अतो हृषीकेशो ब्रह्मान्तर्यामी ॥ ५२ ॥ इति तृतीयतात्पर्ये एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

[8]शब्दविषयं ब्रह्म ॥ ८ ॥ [18]अनन्तछि(छ)दि अनन्तावयवम् । 'तृतीयोऽतिशय'इति महाव्याकरणे । 'मथनान्मिथिलो जात' इत्यादिवच्च ॥ १८ ॥ [50-51]स्वायम्भुवो मनुश्चैव पृथुश्चैवार्जुनावपि । ब्रह्मशेषविपा रुद्र इन्द्र ऋष्यादयस्तथा । विष्ण्वावेशयुताः सर्वे न तु विष्णुस्वरूपका'इति तत्त्वनिर्णये ॥ ५० ॥ इति तृतीयतात्पर्ये द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

[16]स्वया कान्त्याऽन्याः क्षिपन्ती श्रीर्यथा तद्वत्स्थिताम् ॥ १६ ॥

तपसा विद्यया युक्तो योगेन सुसमाधिना । आदावृषीन् हृषीकेशः ससर्जाभिमताः प्रजाः ॥ ५२ ॥

द्वाविंशोऽध्यायः

तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे । दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥ ८ ॥ न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व । षण्णेम्यनन्तच्छिदि यत्त्रिनाभि करालस्रोतो जगदाच्छिद्य धावत् ॥ १८ ॥ नूनं चङ्क्रमणं देव सतां संरक्षणाय ते । वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी ॥ ५० ॥

त्रयोविंशोऽध्यायः

कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः । क एव ते तनयां नाद्रियेत स्वयैव कान्त्या क्षिपतीमिव श्रियम् ॥ १६ ॥

SGDF
Sri Gargeshwari Digital Foundation

'[29-30]ज्ञानानन्दस्वरूपेभ्यो रोमभ्योऽस्य कुशादयः । विधुन्वतः प्रयागे तु वराहवपुषोऽभवन् । रोमाणि तानि देवस्य रूपाण्यासन्सहस्रश'इति स्कान्दे । त एवासन् तेभ्य एवासन् । 'सप्तसु प्रथमे'ति सूत्रात् ॥ ॥ २९, ३० ॥ '[35]गतसारं यातयामं यामः सार इहोच्यत'इति नारदीये ॥ ३५ ॥ [37]पर्यासे मानुषत्वेनावस्थानेऽपि ॥ ३७ ॥ इति तृतीयतात्पर्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

[18]देहली द्वारबन्धः ॥ १८ ॥ [20]कृत्रिमान् शोभार्थं कृतान् ॥ ॥ २० ॥ [30]आदर्शे ददर्श ॥ ३० ॥ [38]उद्गुणपानवीच्यः उत्तमामृत-

---

अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे । अतो धर्मान् पारमहंस्यमुख्यान् शुक्लोपदिष्टान् बहुमन्येऽविहिंस्रान् ॥ १९ ॥ बर्हिष्मती नाम पुरी सर्वसम्पत्समन्विता । न्यपतन्यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः ॥ २९ ॥ कुशाकाशास्त एवासंल्लसद्धरित वर्चसः । ऋषयो यैः पराभाव्य यज्ञघ्नान्यज्ञमीजिरे ॥ ३० ॥ अयातयामास्तस्या सन् यामाः स्वान्तरयापनाः । शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥३५॥ शरीरा मानसा दिव्याः पर्यासे ये च मानुषाः । भौतिकाश्च कथं क्लेशा बाधन्ते हरिसंश्रयम् ॥ ३७ ॥

चतुर्विंशोऽध्यायः

द्वास्सु विद्रुमदेहल्या भातं वज्रकपाटिमत् । शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिष्ठितम् ॥ १८ ॥ हंसपारावतव्रातैस्तत्र तत्र निकूजितम् । कृत्रिमान् मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥ २० ॥ अथादर्शे स्वमात्मानं स्रग्विणं विरजाम्बरम् । विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितम् ॥ ३० ॥ दृष्ट्वा कृतशिरःस्नानं सर्वाभरणभूषितम् । निष्कग्रीवं वलयिनं कूजत्कांञ्चननूपुरम् ॥ ३१ ॥ तस्मिन्नलुप्तमहिमा प्रिययानुषक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने । बभ्राज उत्कचक उद्गुणपानवीच्यस्ता-

SGDF
Sri Gangadhar Digital Foundation

वीचीयुक्तः । 'प्राप्तषोडशवर्षः सन्नावीच्य इति कथ्यत'इत्यभिधानम् ॥ ॥ ३८ ॥ इति तृतीयतात्पर्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

'[1]मालिनी शालिनी माल्या चार्या भार्येति चोच्यत'इति च ॥ ॥१॥ '[6]नावतारेष्वपि हरेर्देहः शुक्लादिसम्भवः । तथापि शुक्लसंस्थः सन्मातृदेहं प्रविश्य च । विलाप्य शुक्लं तत्रैव केवलज्ञानरूपकः । उदेति भगवान्विष्णुः काले लोकं विमोहयन्नि'ति महावाराहे ॥ अग्निरिव दारुणीति व्यक्तिस्थानमात्रत्वे दृष्टान्तः ॥६॥ '[10]महागुणाभिपूर्णत्वं सत्वमित्युच्यते बुधैरि'ति वामने ॥१०॥ '[10-17]सम्यग्ज्ञानं तु साङ्ख्यं स्यात्तदर्थो योग उच्यत'इति कापिलेये ॥ १७ ॥ '[26]युगत्रयावतारेण त्रियुगश्चेति कथ्यत'इति पाद्मे ॥२६॥ [31]यानि यानि ब्रह्मादिरूपाणि रोचन्ते स्वजनानां तान्येव ते व्यक्त्यर्थमभिरूपाणि । 'व्यक्तो भवेद्धरिस्तत्र यत्स्थानं रचितं सतामि'ति कौर्मे ॥ ३१ ॥ [33]वेदैर्वृतत्वाद्भगवां-

---

राभिरावृत इवोडुपतिर्नभस्थः ॥ ३८ ॥ तस्मिन् विमान उत्कृष्टां शय्यां रतिकरीं श्रिता । न चाबुध्यत तं कालं पत्याऽपी(वी)च्येन सङ्गता ॥४५॥

पञ्चविंशोऽध्यायः

मैत्रेय उवाच—निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः । दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥ १ ॥ तस्यां बहुतिथे काले भगवान् मधुसूदनः । कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥ ६ ॥ भगवन्तं परं ब्रह्म सत्वेनांशेन शत्रुहन् । तत्वसङ्ख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥ १० ॥ ज्ञानविज्ञानयोगेन कर्मणामुद्धरंश्च यः । कालोपसृष्टं यत्साङ्ख्यं वक्ष्यत्यासुरये विभुः । हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥ १७ ॥ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् । विविक्त उपसङ्गम्य प्रणम्य समभाषत ॥ २६ ॥ तान्येव तेऽभिरुपाणि रूपाणि भगवंस्तव । यानि यनीह रोचन्ते स्वजनानामरूपिणः ॥३१॥ परं प्रधानं पुरुषं महान्तं

SGDF
Sri Gangeshwari Digital Foundation

स्त्रिवृदित्युच्यते बुधैरि'ति च ।।३३।। [35]सत्यलौकिके यथार्थज्ञानविषये । आभासो ज्ञानमालोको लोकाभासश्च कथ्यत' इत्यभिधानम् ।। ३५ ।। [40]विश्वमेतदेतादृशं असारं यतः । अत ईश्वरं विज्ञाय । नाख्यात्युपप्लवः दुःखाज्ञानाद्युपद्रवो न ।। ४० ।। '[45-46]अनन्याधीनशक्तित्वाद्धरिः स्व इति चोच्यत'इति मात्स्ये । प्रत्यग्रः प्रत्यग्रतिः ।। 'भूतगर्भश्च भूतस्थः पूर्ण एवंद्विरूपवान् । अत आत्मेति तं प्राहुः सदैवाप्तगुणो यत' इति च ।। ४५, ४६ ।। इति तृतीयतात्पर्ये पञ्चविंशोऽध्यायः ।। ३५ ।।

षड्विंशोऽध्यायः

[11]नारायणो ब्रह्मवायू वीन्द्रशेषौ हरस्तथा । कामः शक्रो गुरुर्दक्षो मन्वाद्या भास्करादयः । सर्वजीवाश्च क्रमशः पुरुषाख्याभिशब्दिताः । एतत्पत्न्यो बन्धशक्तिः स्त्रियः सर्वास्तथा जडम् । क्रमात्प्रकृतिशब्दोक्तास्तज्ज्ञानाद्विप्रमुच्यत' इति दत्तात्रेययोगे ।। ११ ।। '[13-14]परमात्मादिकं देहे यदध्यात्मं तदीरितमि'ति च । 'सुखं शरीर-

---

कालं कविं त्रिवृतं लोकपालम् । आत्मानुभूत्याऽनुगतप्रपञ्चं स्वच्छन्दशक्तिं कपिलं प्रपद्ये ॥ ३३ ॥ श्री भगवानुवाच—मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके । अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥ ३५ ॥ विश्वमेतद्धि शास्त्रेण विज्ञायात्मानमीश्वरम् । मुनिः शान्तमनोवाक्यस्तदा नाख्यात्युपप्लवः ॥ ४० ॥ निरहङ्कृतिर्निर्ममश्च निर्द्वन्द्वः समदृक् स्वदृक् । प्रत्यग्रः शान्तधीर्धीरः प्रशान्तोर्मिरिवोदधिः ॥ ४५ ॥ आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् । अपश्यत् सर्वभूतानि भगवत्यपि चात्मनि ॥ ४६ ॥

षड्विंशोध्यायः

तं त्वा गताऽहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम् । जिज्ञासया प्रकृतेः पूरुषस्य नमामि सद्धर्मविदां वरिष्ठम् ॥ ११ ॥ श्रीभगवानुवाच—योग आध्यात्मिकः पुंसाम्मतो निश्रेयसाय मे । अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य वै ॥१३॥ तमिमं ते प्रवक्ष्यामि यमवोचं पुराऽनघे ।

SGDF
Sri Gangeshwari Digital Foundation

भोग्यं तु दुःखं सर्वं तथैव च। मुक्तौ विलयमायाति नित्यानन्दस्तु भुज्यत'इति च॥ १३, १४॥ '[16-17]बाह्ये सुखे त्वनासक्तेरसुखं दुःखवर्जनात्। अदुःखं हरिभक्त्यैव नित्यानन्दं यदा मनः। तदा तं परमात्मानं पश्यत्यात्मप्रसादत'इति कापिलेये। अभेदात्स्वावतारेषु निरन्तर उदाहृतः। गुणदेहेन्द्रियाभेदात्केवलोऽसदृशत्वतः। अखण्डपूर्णशक्तित्वादहमेकः सदा मत'इति च॥ १६-१७॥ '[18]बन्धशक्तिः प्रकृत्याख्या विष्णुशक्त्या वियुज्यत' इति च॥ १८॥ '[22]यादृशी मयि भक्तिः स्यात्तादृश्यन्यत्र नैव चेत्। अनन्यभक्तिरुद्रेकात्सा ययैव तरेत्सृतिमि'ति च॥ २२॥ '[23]एकः पूर्णो हरिर्नान्यस्तदन्ये तद्वशा मताः। इति ज्ञानं स्थिरं यत्तदैकात्म्यज्ञानमुच्यत' इति ब्रह्माण्डे॥२३॥ '[31]शुक्लेन जनिरन्येषां हरेः स्वतनुवैव तु। नित्योदितज्ञानतनोः कुतः स्याच्छुक्लतो जनिरि'ति गारुडे॥ ३१॥ '[32-33]आनुश्राविककर्माऽसौ श्रुत्युक्तं यो न लङ्घयेदि'ति भविष्यत्पर्वणि। 'सदा सर्वगुणाढ्यत्वात्सत्वो विष्णुरुदीर्यत' इति कापिलेये। अपूर्णभक्तेर्मुक्तौ तु न सुखं पूर्तिमेष्यति। अतस्तादृशमुक्तेश्च भक्तिः पूर्णा गरीयसी'ति च॥

ऋषीणां श्रोतुकामानां योगमुर्वङ्गनैपुणम्॥१४॥ अहं ममाभिमानोत्थैः कामलोभादिभिर्मलैः। वीतं यदात्मनः शुद्धमदुःखमसुखं समम्॥१६॥ तदा पुरुष आत्मानं केवलं प्रकृतेः परम्। निरन्तरं स्वयञ्ज्योतिरणिमानमखण्डितम्॥१७॥ ज्ञानवैराग्ययुक्तेन भक्तियोगेन चात्मना। परिपश्यत्युदासीनां प्रकृतिं च हतौजसम्॥ १८॥ मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्। मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः॥ २२॥ मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च। तपन्ति विविधास्तापा नैकात्म्यगतचेतसः॥२३॥ मैत्रेय उवाच—विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाऽभिजातः। तत्वाम्नायं यत्प्रवदन्ति साङ्ख्यं प्रावोचद्वै भक्तिवितानयोगम्॥ ३१॥ श्रीभगवानुवाच—देवानां गुणलिङ्गानामानुश्राविककर्मणाम्। सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या॥ ३२॥ अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी। जरयत्याशु या कोशं

SGDF
Sri Gargeshwari Digital Foundation

॥ ३२, ३३ ॥ '[34]नेच्छन्ति सायुज्यमपि फलत्वेन हरिर्यदि । ददाति भक्तिसन्तुष्ट आज्ञात्वेनैव गृह्णते । तादृशानां सुखाधिक्यं पुनर्मुक्तौ भविष्यती'ति च ॥ ३४ ॥ [41]आदानादिकर्तृत्वादात्मा ॥ ३८ ॥ इति तृतीयतात्पर्ये षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

[4]स परमो न जायते न म्रियत इति प्रसिद्धं हि । देहाद्युपाधिभिरात्तधर्मो जीवोऽपि स्वप्नवद्भ्रान्त्या जायते म्रियते च । भ्रान्तित्वाद्देहात्मत्वस्य । किमु सर्वज्ञत्वस्वतन्त्रत्वादिवैलक्षण्ययुक्त ईश्वरः । 'परस्य जन्ममृत्याद्याः स्युः स्वतन्त्रस्य किं पुनः । जीवस्यापि यतो भ्रान्त्या जन्ममृत्यादिसङ्गतिरि'ति महाकौर्मे ॥ ३, ४ ॥ [5]उपागतां समीपस्थाम् ॥ ५ ॥ [6]मुमुहे मोहयामास । तदेतन्मे विजानीहि । कृत्वा विवाहमित्यादिवत् । 'यत्र कारयितातीवस्वतन्त्रस्तत्र कर्तृता । प्रोच्यते तु यथा ब्रह्म त्वज्ञं संसारभागिती'ति च । 'लये वाप्यथवा सृष्टौ त्वन्तरालेऽपि न क्वचित् । प्रकृत्या रहितं ब्रह्म कदाचिदपि तिष्ठती'ति कापिलेये ॥ ६ ॥ [7]एवं पराभिध्यानेन परमात्मेच्छया । प्रकृतेः

निगीर्णमनलो यथा ॥ ३३ ॥ नैकात्म्यतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः । येऽन्योन्यतो भागवताः प्रसज्य संभाजयन्ते मम पौरुषाणि ॥३४॥ न कर्हिचिन्मत्पराः शान्तरूपा नंक्ष्यन्ति मे नोऽनिमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥ ३८ ॥

सप्तविंशोध्यायः

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः । प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥ ३ ॥ न जातो न म्रियेतात्मा स हि देहाद्युपाधिभिः । निमित्तैरात्तधर्मोऽयं यथा स्वप्ने तदीक्षिता ॥ ४ ॥ स एव प्रकृतिं सूक्ष्मां देवीं गुणमयीं विभुः । यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ५ ॥ गुणैर्विचित्रां सृजतीं सरूपाः प्रकृतिं प्रजाः । विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ६ ॥ एवं

SGDF
Sri Gargeshwari Digital Foundation

कर्तृत्वं जीव आत्मनि मन्यते ॥७॥ '[8]विष्णोः सुराणां गुरूणां नित्या जीवस्वतन्त्रता । यत्तु तस्यान्यतन्त्रत्वं तज्ज्ञानाद्विनिवर्तत'इति च ॥ अकर्तुरीशस्य सकाशात् । 'अक्लिष्टत्वादकर्तासावकार्यत्वादथापि वे'ति च । 'एष कर्ता न क्रियते कारणं च जगत्प्रभुरि'ति भारते ॥ ८ ॥ '[9]ब्रह्मादिभिः सर्गकरी श्रीर्विष्णुबलसंश्रयात् । सुखदुःखप्रदो विष्णुः स्वयमेव सनातनः । कर्तृत्वं सुखदुःखानामन्येषां तु तदाज्ञया । भोक्तृत्वं सुखदुःखानां करोत्येको हरिः स्वयम् । भोक्तृत्वमात्रहेतुत्वं जीवे नान्यत्र कुत्रचिदि'ति भविष्यत्पर्वणि ॥ 'प्रकृतिं पुरुषं चैव विद्ध्यनादी' इति च ॥ ९ ॥ '[11]व्यक्ताव्यक्तात्मकं यत्तद्विद्यात्सदसदात्मकम् । असर्गा केवलाऽव्यक्ता सिसृक्षुरुभयात्मिका । व्यक्तैव कार्यरूपा तु प्रकृतिस्त्रिविधा मता । कार्यतः सा प्रधानत्वात्प्रधानमिति कीर्त्यते । अविशेषा ह्यकार्यत्वात्सा च श्रीर्विष्णुसंश्रये'ति हरिवंशेषु ॥ 'विशेषः कार्यमुद्दिष्टं विशेषाद्दृश्यते यत'इति पाद्मे ॥ ११ ॥ '[15]बुद्धिरध्यवसानाय संशयं कुरुते मनः । अभिमानो ह्यहङ्कारश्चित्तं स्मरणकारणमि'ति स्कान्दे ॥ १५ ॥ '[16]हरिस्तु निर्गुणं ब्रह्म श्रीर्ब्रह्म सगुणं स्मृता । तदङ्गजानि तत्त्वानि तस्मात्तद्रूपमुच्यत'इति हरिवंशेषु । 'पुरुषो हृदिस्थः परमः कालः सर्वगतो हरिः । अथवा रुद्रदेहस्थो हरिः काल इतीरित' इति ब्राह्मे ॥ पौरुषं प्रभावम् । पुरुषस्य प्रकर्षेण

पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् । कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥७॥ तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् । भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥८॥ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः । भोक्तृत्वे सुखदुःखानां पुरुषं(ः) प्रकृतेः परम्(ः) ॥९॥ श्री भगवानुवाच—यत्र त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ ॥ ११ ॥ मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मनः । चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरुपया ॥ १५ ॥ एतावानेव सङ्ख्यातो ब्रह्मणः सगुणस्य हि । सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः ॥ १६ ॥ प्रभावं पौरुषं

SGDF
Sri Gangeshwari Digital Foundation

भावं व्याप्तं रूपम् । एके सम्यग्ज्ञानिनः । अप्राकृताः ॥ ॥ १७ ॥ '[20]प्रकृतेः क्षोभकं रूपं दैवं नारायणात्मकम् । प्रकृतौ महतः स्रष्टा परमः पुरुषो मतः ॥ २० ॥ '[22]तदेव वासुदेवाख्यं महत्तत्त्वनियामकम् ॥ २२ ॥ [27]सङ्कर्षणाख्यस्तु हरिः सूक्ष्माहङ्कार-यामकः । स्थूलाहङ्कारनियमी विष्णुः प्रद्युम्ननामकः । अनिरुद्धो मनस्तत्त्वनियन्ता भगवान्हरिः । महत्तत्त्वादिजीवास्तु ब्रह्मशेषाङ्गजा-स्तथा । सूक्ष्मस्थूलविभेदेन कामजश्चानिरुद्धक'इति कापिलेये ॥२७॥ '[21]अङ्के रमयते यस्मात्केशवो जगदङ्कुरः । महान्तं योऽसृजज्जीवमोहकं च तमोऽग्रसदि'ति च ॥ २१ ॥ [22]यद्वासुदेवाख्यं भगवद्रूपं ततो महदात्मकं चित्तं जायते । 'सत्वशब्देन चोच्यन्ते पूर्णानन्दादयो गुणा'-इति च । महत्तत्त्वगतो योऽसौ वासुदेवाभिधो हरिः । स चित्तजनकः प्रोक्तः प्राणिनां च पृथक्पृथगि'ति च ॥ २२ ॥ [23]चित्तस्य स्वच्छ-त्वादयः पृथग्गुणा उच्यन्ते स्वच्छत्वमित्यादि । 'स्तिमितोदकचित्तादे-रविकारोऽल्पविक्रये'ति तत्त्वविवेके । 'वृत्तिः स्वभावो वृत्तं च स्थिति-रित्यभिधीयत'इति शब्दनिर्णये । वृत्तिभिर्लक्षणं प्रोक्तमिति स्वाभाविकं लक्षणमित्यर्थः ॥ २३ ॥ '[24]ज्ञानप्रधानस्तु महानहङ्कारः क्रियाधिकः । इतरापेक्षया सोऽपि ज्ञानाधिक इतीरित'इति च ॥ २४ ॥ '[26]देवता-धिकृतं यत्तदधिदैवमिति स्मृतमि'ति च । वैकारिकोऽधिदैवमित्यादि

प्राहुः कालमेके यतोऽभयम् । अहङ्कारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥ १७ ॥ दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्यं साऽसूत महत्तत्वं हिरण्मयम् ॥ २० ॥ विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः ॥ २१ ॥ यत्तत्सत्वगुणं स्वच्छं शान्तं भगवतः पदम् । यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥ २२ ॥ स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥ २३ ॥ महत्तत्वाद्विकुर्वाणात् भगवद्वीर्यसम्भवात् । क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत ॥ २४ ॥ वैकारिकोऽधिदैवं तु बुद्धिः प्राणश्च तैजसः । तामसस्त्वर्थमात्रं च

SGDF
Sri Gargeshwari Digital Foundation

पञ्चम्यर्थे । 'सप्तसु प्रथमा यत्र स्वातन्त्र्यं यद्विवक्षितमि'ति शब्दनिर्णये ॥२६॥ '[28]मनोरूपेण कर्तृत्वं देहरूपेण कार्यता । इन्द्रियात्मतया चैव करणत्वमहङ्कृतेः । यतो मनस्यहंभावस्तस्मात्कर्तृ मनः स्मृतम् । स्वभावकर्तुर्जीवस्य त्वासन्नोपाधि तद्यतः । कर्मज्ञाने करणता यतः करणमिन्द्रियम् । कार्यं देहः समुद्दिष्ट उत्पाद्यत्वात्पुनःपुनरि'ति तत्त्वविवेके ॥ 'शान्तरूपो देवपिता घोरः करणसृष्टितः । तावज्ज्ञानस्याप्रकाशान्मूढो भूतपिता स्मृतः । त्रिरूपोऽयमहङ्कारः शेष इत्येव तं विदुरि'ति तत्त्वविवेके ॥ २८ ॥ [31]द्रव्यस्फुरणे यद्विशेषज्ञानम् । 'सामान्यं मनसा जातं (ज्ञानं) विशेषाद्बुद्धिजं भवेत् ॥३१॥ '[32]अचलः संशयो बुद्धेश्चलो मानस उच्यते । चञ्चला तु स्मृतिर्बुद्धेश्चित्तजैव स्थिरा स्मृतिरि'ति च ॥ 'येन यज्ज्ञायते वस्तु तत्तल्लक्षणमुच्यते । तत्स्वरूपं पृथक्चेति द्विविधं कवयो विदुरि'ति कापिलेये ॥ ३२ ॥ '[37]प्रधानवायुः सूत्रात्मा महता सह जायते । तैजसश्च खजः स्पर्श इत्याद्यास्तत्सुताः स्मृताः । तदाविष्टा अन्यजीवास्तदाधाराश्च तद्बला' इति च ॥ ३७ ॥ [35]अर्थाश्रयत्वं अर्थविषयत्वम् । 'शब्देनैव यतो ज्ञेयो हरिर्लिङ्गं तु तस्य तत् । स्पर्शाद्यभावात्तन्मात्रा नभसश्चेति कीर्त्यते । स्पर्शादयश्च तन्मात्रा इतरे पूर्वसंस्थितेः । तिष्ठत्येको गुणो भूते प्रत्येकं पञ्चसु स्थितः । शब्दो वर्णात्मको नित्यो ध्वनिराकाशसम्भवः । आकाश एव सूक्ष्मस्तु ध्वनिरित्येव शब्द्यते । स एव व्यज्यमानस्तु भवेत्कर्णैकगोचर'इति

गुणव्यतिकरस्त्रिवृत् ॥ २६ ॥ कर्तृत्वं, करणत्वं च कार्यत्वं चेति लक्षणम् । शान्तघोरविमूढत्वमिति वा स्यादहङ्कृतेः ॥२८॥ तैजसात्तु विकुर्वाणात् बुद्धितत्वमभूत्सति । द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहात् ॥ ३१ ॥ संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तिभिः पृथक् ॥ ३२ ॥ तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः । प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३३ ॥ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च । तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥ ३५ ॥ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः । स्पर्शोऽ-

SGDF
Sri Gargeshwari Digital Foundation

च ॥ ३५ ॥ [37]नभसः शब्दतन्मात्राच्छब्दतन्मात्रगुणात् । 'स्पर्शादयोऽपि वाय्वादेः सूक्ष्मावस्था प्रकीर्तिता' इति च । 'सूक्ष्मेन्द्रियाणि सन्त्येव स्युः स्थूलान्यप्यहङ्कृतेः । भूतेभ्यश्चोपचीयन्ते पुनर्ब्रह्मशरीरत'-इति च ॥ ३७ ॥ '[39]प्राप्नोति वायुः सर्वं तु स्वत एव हरेस्तथा । अतः प्राप्तिरिति प्राहुर्वायुं भूतपतिं प्रभुम् । प्रधानवायुरन्येषु नित्याविष्टो यतस्ततः । तद्गुणास्तेषु चोच्यन्ते नीचता नास्य तत्कृते'ति ब्रह्मवैवर्ते । 'स्वरूपमपि कर्मेति विषयत्वादुदीर्यत'इति शब्दनिर्णये ॥ ३९ ॥ [41]व्यक्तिसंस्थात्वं व्यक्तत्वेन स्थितिः । गुणता प्रकाशत्वम् । 'आलोको गुण इत्येव प्रकाशश्चेति कथ्यत'इत्यभिधानम् । 'तेजस्त्वमथ चोग्रत्वं क्रौर्यमित्यपि चोच्यत'इत्यभिधानम् ॥ ४१ ॥ '[45]उदनं बिन्दुभावः स्यात्स्यन्दनं स्रवणं स्मृतिमि'त्यभिधानम् । पृथिव्यग्न्यपेक्षया भूयस्त्वं देहे ॥ ४५ ॥ [48]भावनमुत्पादकत्वम् । 'ब्रह्मस्थानं तु पृथिवी शरीरे ब्रह्मदर्शनादि'ति कापिलेये । सद्विशेषणं विशेषेणव्यक्तत्वम् । 'असदव्यक्तनाम स्याद्व्यक्तं सदिति चोच्यत'इति ब्राह्मे । सर्वसत्वगुणोद्भेदः शरीरे हि सर्वप्राणिनां गुणा व्यज्यन्ते संसारावस्थायाम् । 'शरीरं पार्थिवं ज्ञेयमिन्द्रियाण्यौदकानि तु । तैजसः कोष्ठगो वह्निश्छिद्रमाकाशसम्भवम् । प्राणा वायुमयाः सर्वे प्रत्येकं पञ्चधा पुनरि'ति कापिलेये ॥ ॥ ४८ ॥ '[54]अचेतनाद्यतस्त्वण्डाद्ब्रह्मा समजनि स्फुटम् । अतो

भवत्ततो वायुस्त्वक् स्पर्शस्य च सङ्ग्रहः ॥३७॥ चालनं व्यूहनं प्राप्तिनेतृत्वं द्रव्यशब्दयोः । सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ॥ ३९ ॥ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च । तेजस्त्वं तेजसः साध्वि रुपमात्रस्य वृत्तयः ॥ ४१ ॥ क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोदनम् । तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ॥ ४५ ॥ भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम् । सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ॥ ४८ ॥ ततस्तेनानुविद्धेभ्यस्तत्वेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्माण्डमित्याहुर्विराड्ब्रह्मा प्रकाशनादि'ति च ॥ ५४ ॥ '[61]यज्ञनामा तु देवोऽन्यो विज्ञेयः पाददेवता। तदाविष्टो हरिर्नित्यं तमाहुः पाद-दैवतम्। तस्येन्द्रियाभिमानित्वं कुतः पूर्णामलात्मन'इति च ॥ ६१ ॥ '[64]चैत्योऽपि भगवान्विष्णुरन्तर्यामी चतुर्मुखात्। स्वेच्छया व्यक्ति-मगमत्ततोऽसौ ब्रह्मजः स्मृत'इति च ॥ ६४ ॥ '[70]यज्ञान्तस्थः स्वयं पादौ विशन्नोत्थापयद्धरिः। शक्तोऽपि ब्रह्मवाय्वोस्तु बलज्ञप्त्यै जनार्दनः। तत्स्थ उत्थापयामास ब्रह्मदेहं विशन्प्रभुरि'ति च ॥७०॥ [72]ब्रह्मा बृहस्पतिः। 'यस्मिन्ब्रह्मा राजनि पूर्व एती'ति श्रुतिः। 'बृहस्पतिः पुरोधाश्च ब्रह्मा च ब्रह्मणस्पतिरि'त्यभिधानम्॥ ७२ ॥ '[73]अंशेन सुप्तो ब्रह्माऽपि अंशेन निरगात्तथा। स्वदेहाद्वायुसहितो विष्णुना च जगत्प्रभुः। तमुत्थापयितुं देवास्तानृते त्रीन्महाबलान्। नाशक्नुवुस्त्वेकसंस्थास्ततस्ते त्वविशंस्त्रयः। उदतिष्ठद्ब्रह्मदेहस्तदा तेषां प्रभावतः। विशेषेण हरेरेव प्रभावेन श्रियः पतेः। चित्ताभिमानी ब्रह्मैव क्षेत्रज्ञस्तद्गतो हरिः। प्राणो वायुरिति प्रोक्तस्तयोरीशो हरिः स्वयमि'ति च ॥ ७३ ॥ इति तृतीयतात्पर्ये सप्तविंशोऽध्यायः ॥२७॥

अष्टाविंशोऽध्यायः

'[5]अज्ञानं सुप्तिशब्दोक्तं स्वप्नश्चैव विपर्यय' इति भारते ॥ ५ ॥

यस्मादुदतिष्ठदसौ विराट् ॥ ५४ ॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट्। पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ॥ ६१ ॥ मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः। अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥ ६४ ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्ततो विराट्। नाडीर्नद्यो लोहितेन नोदतिष्ठत्ततो विराट् ॥ ७० ॥ बुध्या ब्रह्मापि हृदयं नोदतिष्ठत्ततो विराट्। रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्ततो विराट् ॥ ॥ ७२ ॥ चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा। विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥ ७३ ॥

अष्टाविंशोऽध्यायः

प्रबुध्य स्वप्नसुप्तिभ्यां संस्मरन्नात्मवैशसम्। वैतथ्यं व्यभिचारं च

SGDF
Sri Gargeshwari Digital Foundation

[11]बुद्धेरवस्थानं निद्रादि ॥ ११ ॥ [12]असति प्रलये । 'शेषस्य प्रतिबिम्बास्तु देवाः शेषस्तु ब्रह्मणः । स परब्रह्मणश्चैव ते स्वबिम्बप्रदर्शकाः । ततः स्वबिम्बद्वारेण परमात्मप्रदर्शनमि'ति ब्रह्मतर्के ॥ १२ ॥ [14-15]यो विनिद्रः स सत्यदृक् ॥ १४, १५ ॥ [16]यः अनष्टो नष्टवन्नाज्ञासिषमिति मन्यमानः स आतुरो द्रष्टा जीवः ॥ १६ ॥ [17]साहङ्कारं द्रव्यं जीवः तस्यावस्थानमनुग्राहकश्च परमात्मा । 'नित्यदृक्परमात्माऽसौ मृतवद्यो न किञ्चन । जानाति जीवः स ज्ञेयः परमात्मा तदाश्रय'इति हरिवंशेषु ॥ १७ ॥ इति तृतीयतात्पर्ये अष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

'[1]सबीजो वैष्णवो योगो निर्बीजस्त्वन्यदैवतः । बीजं विष्णुर्हि जगतः शाखाद्याश्चान्यदेवता'इति कौर्मे ॥ १ ॥ '[6]समाधिरप्रयत्नेन मनसः संस्थितिर्भवेदि'ति च । सर्वस्मरणाशक्तावेकाङ्गे । 'यावन्न च्यवते मन'इत्युक्तत्वात् । 'सर्वं स्मर्तुमशक्तः सन्नेकाङ्गं चिन्तयेद्बुध'इति

नासौ ध्यायेद्यतो भयम् ॥ ५ ॥ निवृत्तबुध्यवस्थानो दूरीभूतान्यदर्शनः । उपलभ्यात्मनाऽऽत्मानं चक्षुषेवार्कमात्म(मेक)दृक् ॥ ११ ॥ मुक्तलिङ्गः सदाभासमसति प्रतिपद्यते । सतो बन्धुं सम चक्षुः सर्वानुस्यूतमद्वयम् ॥१२॥ एवं त्रिवृदहङ्कारो भूतेन्द्रियमनोगुणैः । स्वाभासैः लक्षितोऽनेन सदाभासेन सत्यदृक् ॥ १४ ॥ भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया । लीनेषु सत्सु यस्तत्र विनिद्रो निरहङ्क्रियः ॥ १५ ॥ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा । नष्टेऽहङ्करणे द्रष्टा नष्टवित्त इवातुरः ॥ ॥ १६ ॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते । साहङ्कारस्य द्रव्यस्य योऽवस्थानमनुग्रहः ॥ १७ ॥

एकोनत्रिंशोऽध्यायः

श्री भगवानुवाच—योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे । मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥ १ ॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् । वैकुण्ठलीलाभिध्यानं समाधानं तथाऽऽत्मनः

SGDF
Sri Gangeshwari Digital Foundation

च ॥ ६ ॥ '[27]ब्रह्मा चित्ताभिमानेन चैत्यस्तन्नियमाद्धरिः । स च ब्रह्मा हरेः कण्ठे कौस्तुभत्वेन भासत'इति भागवततन्त्रे ॥ २७ ॥ '[29]साक्षाच्छ्रीस्तु हरे रूपमिन्दिरा तु तदाश्रयादि'ति च ॥ २९ ॥ '[32]न पृथग्दिदृक्षेत् । तमेव दिदृक्षेदित्यर्थः ॥ ३२ ॥ [33]चित्तबडिश-वियोगो ध्यानानन्तरसमाधिः ॥ ३२ ॥ [34]मुक्ताश्रयं विष्णुविषयम् । स्वचित्तं जीवचैतन्ये ततं निर्वाणमृच्छति । शरीराभिमानं जहाति । स्वचिदभिमानेन ॥ ३४ ॥ '[35]असत्कर्ता तु जीवः स्यात्सत्कर्ता परमेश्वर'इति शब्दनिर्णये । 'दुर्दुःखमिति विज्ञेयं खं सुखं च तयो-र्यतः । प्रदाता परमो विष्णुस्तस्माद्दुःखादिनामवानि'ति हरिवंशेषु ॥ ॥ ३५ ॥ [41]अनन्यभावेन तद्रूपाणामभेदेन । तदात्मतां तस्या-

---

॥ ६ ॥ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम् । ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः ॥१८॥ स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम् । प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ॥ १९ ॥ तस्मिंल्लब्धपदं चित्तं सर्वावयवसंस्थितम् । विलक्ष्यैकत्र संयुज्यादङ्गे भगवतो मुनिः ॥ २० ॥ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन । मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥२७॥ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुन्तलवृन्द-जुष्टम् । मीनद्वयाश्रियमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतन्द्रित उल्ल-सद्भ्रु ॥ २९ ॥ ध्यानायनं रहसि तद्बहुलाधरोष्ठभासारुणायिततनुद्विज-कुन्दपङ्क्ति । ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्याऽऽर्द्रयाऽर्पित-मना न पृथग्दिदृक्षेत् ॥ ३२ ॥ एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकप्रमोदः । औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥ ३३ ॥ मुक्ताश्रयं यर्हि निर्विषयं स्वचित्तं निर्वाणमृच्छति मनः सहसा यथाऽर्चिः । आत्मानमत्र पुरुषोऽव्यव-धानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ३४ ॥ सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये । हेतुत्वमप्यसति कर्तरि दुःखयोर्नं स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ॥ ३५ ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । ईक्षेतानन्यभावेन भूतेषु च तदात्मताम् ॥

SGDF
Sri Gargeshwari Digital Foundation

दानादिकर्तृत्वं च भूतविषये ॥ ४१ ॥ [43]प्रकृतिं पराभाव्य तदुत्तमत्वेनैव सदावतिष्ठते परः । 'सर्वभूतस्थमीशेशं जेतारं प्रकृतेरपि । अविशेषं सदैवैकं चिन्तयन्विप्रमुच्यत'इति च ॥ ४३ ॥ इति तृतीयतात्पर्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

[2]यथा साङ्ख्येपूक्तं तथा कथितम् । यत्साङ्ख्यमूलं तल्लक्षणं प्रचक्षते ॥ १, २ ॥ [9]तद्रूपाणां पृथग्भावः ॥ ९ ॥ [10]अपृथग्भावः स सात्विकः । 'अज्ञोऽर्चयेदेवार्चायामन्यथा दोषवान्भवेत् । ज्ञस्त्वर्चयन्स गुणवानन्यथा दोषवान्न त्वि'ति कापिलेये ॥१०॥ [26]अन्तरोदरं भिन्नं ब्रह्म । आत्मस्थमन्यस्थं च ब्रह्म यो भेदेन पश्यति । 'उदरं ब्रह्मे'ति श्रुतेः ॥ २६ ॥ [28]प्राणभृतश्चलनयुक्ताः 'पशुवृक्षादिभेदेन जीवा एव स्वतः स्थिताः । संसृतौ व्यत्ययस्तेषां मुक्तौ तत्तत्स्वरूपता । तत्र स्थावरमुक्तेभ्यो वरा जङ्गममुक्तकाः । तेभ्यो मानुषमुक्ताश्च विप्रमुक्तास्ततोऽधिकाः । ततोपदेशमात्रेण मुक्तेभ्यो वेदवेदिनः । अर्थज्ञा ऋषयस्तेभ्योऽतो देवाः संशयच्छिदः । पूर्णधर्मा ततस्त्विन्द्रो निःसङ्गो

॥ ४१ ॥ तस्मादिमां स्वां प्रकृतिं देवीं सदसदात्मिकाम् । दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥ ४३ ॥

त्रिंशोऽध्यायः

देवहूतिरुवाच—लक्षणं महदादीनां प्रकृतेः पुरुषस्य च । स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकम् ॥ १ ॥ यथा साङ्ख्येषु कथितं यन्मूलं तत्प्रचक्षते । भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥ २ ॥ विषयानभिसन्धाय यश ऐश्वर्यमेव च । अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ॥ ९ ॥ कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् । यजेद्यष्टव्यमिति वाऽपृथग्भावः स सात्विकः ॥ १० ॥ आत्मनश्च परस्यापि यः करोत्यन्तरोदरम् । तस्य भिन्नदृशो मृत्युर्विधत्ते भयमुल्बणम् ॥ २६ ॥ जीवा श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे । ततः सचित्ताः प्रवरास्तत-

SGDF
Sri Gangeshwari Digital Foundation

गरुडस्ततः । भक्तिपूर्णो हरेर्ब्रह्मा तस्मान्नान्योऽधिकस्ततः । मुक्तौ वा संसृतौ वापि सम्यगेषु हि ते गुणा इति कापिलेये ॥ २८ ॥ [34]जीव-कलया सह भूतानि बहुमानयंस्तदालयत्वेनेश्वरं प्रणमेत् ॥ ३४ ॥ [35]एकतरभावेऽन्यतरस्य नियतत्वादेकतरेणैव ॥ ३५ ॥ [36]सर्वकर्माणि यस्य विचेष्टानिमित्तानि तत्कर्म विचेष्टितम् ॥ ३६ ॥ [37]भिन्नदृशां ईश्वरापेक्षयाल्पदृशाम् । 'भिन्नमल्पं विजानीयादभिन्नं पूर्णमिष्यत'इति शब्दनिर्णये ॥३७॥ '[39]यथायोग्यातिरेकेण न द्वेष्यश्च प्रियो हरेरि'ति कापिलेये ॥ ३९ ॥ इति तृतीयतात्पर्ये त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः

[13]कीनाशः कर्षको मतः ॥ १३ ॥ [16]उत्तारमुद्गतिं विन्द्यात् ॥ ॥ १६ ॥ '[24]त्रिभिर्मुहूर्तैर्द्वाभ्यां वा दिनैर्दशभिरेव वा । पक्षान्मासेन वा याति यमलोकमितो गत'इति नारदीये ॥२४॥ [29]अत्रैवेत्येवशब्दः सामीप्यार्थे । 'सामीप्ये च प्रधाने च एवशब्दोऽवधारण'इति शब्द-

---

श्चेन्द्रियवृत्तयः ॥ २८ ॥ मनसैतानि भूतानि प्रणमेद्बहुमानयन् । ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥ ३४ ॥ भक्तियोगश्च योगश्च मया मानव्युदीरितः । ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥ ३५ ॥ यत्तद्भगवतो रूपं ब्रह्मणः परमात्मनः । परं प्रधानात्पुरुषाद्दैवं कर्मविचेष्टितम् ॥ ॥३६॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते । भूतानां महदादीनां यतो भिन्नदृशां भयम् ॥ ३७ ॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः । आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् ॥ ३९ ॥

एकत्रिंशोऽध्यायः

एवं स्वभरणाकल्पं तत्कलत्रादयस्तदा । नाद्रियन्ते यथापूर्वं कीनाश इव गोजरम् ॥ १३ ॥ वायुनोत्क्रमतोत्तारकफसंरुद्धनासिकः । कासश्वास-कृतायासः कण्ठो घुरुघुरायते ॥ १६ ॥ योजनानां सहस्राणि नवतिर्नव-चाध्वनः । त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाम् ॥ २४ ॥ अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते । या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥ २९ ॥

SGDF
Sri Gargeshwari Digital Foundation

निर्णये । अत्राप्यस्तीत्यर्थः ।। २९ ।। इति तृतीयतात्पर्ये एकत्रिंशोऽध्यायः ।। ३१ ।।

द्वात्रिंशोऽध्यायः

‘[2]नानाविधा गर्भवृद्धिः कर्मभेदाद्भविष्यति । अतो नानाविधं ग्रन्थे गर्भसंस्थानमुच्यत’इति षाड्गुण्ये ।। २ ।। ‘[12]वध्रयस्त्विन्द्रियाण्याहुर्हृषीकाणीति चोच्यत’इति शब्दनिर्णये ।।१२।। [17]कतमः सुखतमः ।। ।। १७ ।। [20]अशरीरवत्परमात्मवत् । परमात्मन एव देहोऽपि तद्वशत्वात् ।। २० ।। ‘[12-20]तत्त्वज्ञानं तु देवानां गर्भस्थानां भविष्यति । उत्तमानामृषीणां वाप्यन्येषां बहुजन्मगमि’ति स्कान्दे ।। १२, २० ।। [36]खण्डितात्मावसायिषु जीवमात्रज्ञानिषु ।। ३६ ।। ‘[40]मयः प्रधान उद्दिष्टो माया तद्वश उच्यत’ इति षाड्गुण्ये ।। ४० ।। ‘[41]सत्पुंसु च तथा स्त्रीषु न सङ्गो दोषमावहेत् । यथायोग्यं गुणायैव दोषकृद्दुष्टजन्तु-

---

द्वात्रिंशोऽध्यायः

कलिलं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् । दशाहेन तु कर्कन्धुः पेश्यण्डं वा ततः परम् ॥ २ ॥ नाथमानो ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः । स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ॥ १२ ॥ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः । तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥ १७ ॥ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरमेदमशरीरवदस्य देहे । यद्दत्तया स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीपम् ॥ २० ॥ तेष्वशान्तेषु मूढेषु खण्डितात्मावसायिषु । सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥ ३६ ॥ तत्सृष्टिसृष्टसृष्टेषु को न्वखण्डितधीः पुमान् । ऋषिं नारायणमृते योषिन्मय्येह (य्यात्म) मायया ॥ ३९ ॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् । या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलम् ॥ ४० ॥ सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः । मत्सेवया प्रतिलब्धात्मलाभो(भावो) वदन्ति

SGDF
Sri Gangeshwari Digital Foundation

ष्वि'ति वाराहे ॥ ४१ ॥ [45]जीवभूतेन जीवकर्मभूतेन ॥ ४५ ॥ [48]चक्षुःसकाशाद्द्रष्टुर्द्रष्टृत्वमक्ष्णोर्योग्यता ॥४८॥ [50]केवलं ज्ञानं पुरुषार्थः । देहादिष्वसङ्गिनो जीवस्य तन्निमित्तसुखदुःखादयो न सन्ति किमुत देहस्याचेतनत्वात् ॥ ५० ॥ इति तृतीयतात्पर्ये द्वात्रिंशोऽध्यायः ॥३२॥

त्रयस्त्रिंशोऽध्यायः

'[3]ईषद्भक्तो भगवति सुकर्मा स्वर्गमेष्यति । अभक्तो निरयं याति सुकर्माऽपि न संशय'इति वामने ॥ ३ ॥ '[12]अभिमानेन पूर्ण-

---

यां निरयद्वारमस्य ॥ ४१ ॥ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् । भुञ्जान एव कर्माणि करोत्यविरतं पुमान् ॥ ४५ ॥ यथाऽक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा । तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वं योग्यताऽनयोः ॥ ४८ ॥ आत्मनः केवलं ज्ञानमर्थो देहाद्यसङ्गिनः । सुखदुःखादयो भावा न देहस्य न चात्मनः ॥ ५० ॥

त्रयस्त्रिंशोऽध्यायः

श्री भगवानुवाच—अथ गृहमेधीयान् धर्मानेवावसन् गृहे । धर्ममर्थं च कामं च दोग्धि भूयः पिपर्ति तान् ॥ १ ॥ स चापि भगवद्धर्मात्काममूढः पराङ्मुखः । यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयाऽन्वितः ॥ २ ॥ तच्छ्रद्धयाऽऽक्रान्तमतिः पितृदेवव्रतः पुमान् । गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ ॥ यदा चाहीन्द्रशय्यायां शेतेऽनन्तासनो हरिः । तदा लोका लयं यान्ति त एते गृहमेधिनाम् ॥ ४ ॥ ये स्वधर्मं न दुह्यन्ति धीराः कामार्थहेतवे । निःसङ्गा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ॥ ५ ॥ निवृत्तिधर्मनिरता निर्ममा निरहङ्कृताः । स्वधर्माख्येन सत्वेन परिशुद्धेन चेतसा ॥ ६ ॥ सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम् । परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ॥७॥ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते । तावदध्यासते लोके परस्य परिचिन्तकाः ॥ ८ ॥ क्ष्माऽम्भोऽनलानिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतः प्रतिसञ्जिहीर्षुः । अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परं स्वमनुभूय परः स्वयम्भूः ॥ ९ ॥ एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः । तेनैव साकममृतं पुरुषं पुराणं ब्रह्म

SGDF
Sri Gangeshwari Digital Foundation

ज्ञानेन ॥ १२ ॥ [13]सङ्कल्य लये परमेश्वरं प्रविश्य । यथापूर्वं प्रजायते उच्चनीचादिभावेन जायते । अगुणव्यतिकरे बहिः श्वेतद्वीपे निर्गच्छति ॥ ॥ १३ ॥ '[14]गुणव्यतिकराभावेऽप्युच्चनीचादिपूर्ववत् । विष्णोश्चैव विमुक्तानां न कदाचन गच्छती'ति गारुडे । गुणव्यतिकरे असति । प्रलये प्राप्ते पुनः परमेश्वरमायान्ति ॥ १४ ॥ '[13]ब्रह्मा देवैः परिवृतः प्रलये परमेश्वरम् । प्रविश्य सर्गे तु पुनः श्वेतद्वीपे प्रमोदते ॥ [14]ज्ञान-धर्मफलांस्तत्र भोगान्भुक्त्वा लये पुनः । नारायणं समाविश्य ज्ञानं व्यक्तं निजं सुखम् । भुञ्जते त्वेवमेवैषां काले संसर्गनिर्गमौ । नित्यौ नित्यसुखं चैव सृष्टौ भोगास्तथोत्तमाः । यथापूर्वं हरेः सर्वगुणैर्नीचो-च्चता तथा । ब्रह्मणश्च तथान्येषामन्येषां च यथापदमि'ति स्कान्दे ॥ १३, १४॥ '[21]अत्यल्पभक्ता विष्णौ च सदा श्राद्धादिकारिणः । पितृलोकं समाविश्य स्वसन्ताने पुनःपुनः । [19]क्षिप्रमेव प्रजायन्ते ये तु भक्ति-विवर्जिताः । अन्यसामान्यवेत्तारस्तदन्योत्तमवेदिनः । तद्भक्तिनिन्दका-श्चैव यान्त्येव निरयं ध्रुवम् । अपि धर्मैकनियमा नात्र कार्या विचारणे'ति च ॥ [21]मुक्तियोग्यास्तु देवाद्या मानुषा यज्ञभोगिनः । मनुष्यभेदाः श्राद्धादिकृतो विद्वेषिणोऽसुरा' इति च ॥१७,२१॥ '[28]मत्स्यकूर्मादिरूपं च विष्णोर्ज्ञानैकमात्रकम् । तन्मन्यन्ते भौतिकं तु ये गच्छन्त्यधरं तम'-

---

प्रधानमुपयान्त्यगताभिमानाः ॥ १० ॥ आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः । योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥११॥ भेददृष्ट्याऽ-भिमानेन निःसङ्गेनापि कर्मणा । कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ॥ ॥ १२ ॥ स सङ्कल्य पुनः काले कालेनेश्वरमूर्तिना । जातेऽगुणव्यतिकरे यथापूर्वं प्रजायते ॥ १३ ॥ ऐश्वर्यं पारमेष्ठ्यं तत्तेऽपि धर्मविनिर्मितम् । निषेव्य पुनरायान्ति गुणव्यतिकरे सति ॥ १४ ॥ ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः । कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः॥१६॥ ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति । पतन्ति विवशा देवैः सद्यो विभ्रंशितोदयाः ॥ २१ ॥ ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् । अव-

SGDF
Sri Gargeshwari Digital Foundation

इति ब्राह्मे ॥ २८ ॥ '[29]एकादशेन्द्रियात्मा च पञ्चभूतात्मकस्तथा । सर्वाभिमानी भगवान्स्वराडिन्द्रः पुरन्दरः । इदमण्डं जगत्सर्वं शक्रदेहं विदुर्बुधाः । तत्पतिस्त्रिगुणो रुद्रस्तस्य ब्रह्मा ततो हरिरि'ति वामने ॥ यथैतान्पश्यन्ति तद्वदेव ज्ञानात्मकं मत्स्यादिरूपं पश्यन्त्यज्ञाः ॥ ॥ २९ ॥ '[32]ज्ञानभक्ती विना नैव मुक्तिः कस्यापि विद्यते । तयोरेकतरेणापि विष्णुगेनोभयं विना । एवमप्येतयोरेकभावेऽन्यनियतेर्ध्रुवम् । एकेनापि भवेन्मुक्तिस्तदर्थं त्वन्यसाधनमि'ति हरिवंशेषु ॥ ३२ ॥ इति तृतीयतात्पर्ये त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः

[2]भूतेन्द्रियार्थात्ममयं तेभ्यः प्रधानम् । 'त्वं प्रधानमयो देव प्रधानादधिको यत'इति वाराहे ॥२॥ [5]देहतन्त्रः देहप्रकाशः । 'ततिः प्रकाशो विस्तारस्तन्त्रं चेत्यभिधीयत'इति तन्त्रमालायाम् ॥ ५ ॥ '[27]जीवोपाधिप्रभृतय आमुक्तेः सर्वदेहिनाम् । नियमात्सन्त्यभावस्तु निष्फलत्वादुदीर्यत'इति वाराहे ॥ २७ ॥ इति श्रीमद्भागवततृतीयस्कन्धतात्पर्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुस्त्रिंशोऽध्यायः समाप्तः ॥ ३४ ॥ तृतीयस्कन्धः सम्पूर्णः ॥

भात्यर्थरूपेण भ्रान्त्याशब्दादिधर्मिणाम् ॥ २८ ॥ यथा महानहङ्कारस्त्रिवृत्पञ्चविधः स्वराट् । एकादशविधस्तस्य वपुरण्डं जगद्यतः ॥ २९ ॥ ज्ञानं योगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः । द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥ ३२ ॥

चतुस्त्रिंशोऽध्यायः

देवहूतिरुवाच—अथाप्ययान्ते सलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते । गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ त्वं देहतन्त्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये । यथावतारास्तव सूकरादयस्तथाऽयमप्यात्मपथोपलब्धये ॥५॥ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये । निवृत्तजीवभावत्वात् क्षीणक्लेशाऽऽप्तनिर्वृतिः ॥ २६ ॥

SGDF
Sri Gargeshwari Digital Foundation

चतुर्थः स्कन्धः

प्रथमोऽध्यायः

॥ श्रीवेदव्यासाय नमः ॥ 'पुनःपुनः कथां प्राहुरभ्यासादुत्तमं फलम् । विज्ञापयितुकामास्तु विद्वांसस्तत्रतत्र त्वि'त्याग्नेये ॥ १ ॥ '[28]ब्रह्मस्थश्चैव रुद्रस्थः स्वयं चापि हरिः प्रभुः । प्रजां त्रिपुरुषसमां यच्छत्वित्यत्रिरैच्छत । तस्मात्सब्रह्मरुद्राभ्यां सह विष्णुर्जगत्पतिः । आगत्य तु त्रिमूर्त्यंशान्पुत्रान्प्रादाज्जनार्दनः । भावित्वाच्चैव कार्यस्य लोकानां मोहनाय चे'ति ब्रह्मवैवर्ते ॥ १७, २२ ॥ [30]तत्स्थविष्णव-पेक्षया ते वयमिति ॥ २८-३० ॥ '[33]ब्रह्मणो नावतारोऽस्ति सन्निधानं तु केवलम् । ऋते विष्णोरात्मनश्च तदंशोक्तिः प्रवेशत'इति च । 'सृष्टिभेदाद्विरूपं तु कथा पञ्चोत्तरं शतम् । वैरूप्यमन्यद्विज्ञेयं तात्पर्या-न्मोहनाय'चेति स्कान्दे । 'ऋते तु पाण्डवकथां कार्ष्णां रामायणं तथा । विष्णोर्ब्रह्मादिनां चैव क्रमाद्व्यत्यस्तशक्तिताम् । एतदापादकं चान्यद्दते

चतुर्थः स्कन्धः

प्रथमोऽध्यायः

मैत्रेय उवाच—मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे । आकूति-र्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥ १ ॥ मैत्रेय उवाच—ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदांवर । सह पत्न्या ययौ ऋक्षं कुलाद्रिं तपसि स्थितः ॥ ॥ १७ ॥ अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः । वितायमानयशसो मुदाऽऽश्रमपदं ययुः ॥ २२ ॥ एको मयेह भगवान् विबुधप्रधानश्चित्ती-कृतः प्रजननाय कथं नु यूयम् । अत्रागतास्तनुभृतां मनसोऽपि दूरा बूत प्रसीदत महानतिविस्मयो मे ॥ २८ ॥ मैत्रेय उवाच—इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः । प्रत्यूचुः श्लक्ष्णया वाचा प्रहसन्तो मुनिं प्रभो ॥ २९ ॥ देवा ऊचुः—यथा कृतस्ते सङ्कल्पो भाव्यं तेनैव नान्यथा । तत् सङ्कल्पस्य ते ब्रह्मन् यद्वै ध्यायसि ते वयम् ॥ ३० ॥ सोमोऽभू-द्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् । दुर्वासाः शङ्करस्यांऽशो

SGDF
Sri Gargeshwari Digital Foundation

कल्पादिभेदतः। कथाभेदस्तु विज्ञेयो मोहायैतेषु भिन्नते'ति वाराहे ॥ ॥ ३३ ॥ '[59]नरे विष्णुः समाविष्टः स्वयं नारायणो हरिः। अर्जुने च नरावेशः कृष्णो नारायणः स्वयमि'ति तत्त्वविवेके। खे रूपभेदो (वाय्वादिकः)ऽभ्रादिः। 'यथाकाशस्थितो नित्यमि'त्यादि च। 'यथाकाशे विमानादिरूपभेदः प्रतीयते। तथा हरौ जगदिदं तत्सामर्थ्यात्प्रतीयत'इति ब्राह्मे ॥ ५६, ५९ ॥ [66]अप्रौढेव अस्वीकृतेव ॥ ६६ ॥ इति चतुर्थतात्पर्ये प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

'[22]ये ज्ञानविषयाः शापा मुक्तिगास्तेऽधिकारिणाम्। कादाचित्कास्ते भवन्ति नैव ते सार्वकालिकाः। तेषां ज्ञानस्य मुक्तेश्च तारतम्यस्य चैव हि। भगवन्नियतत्वात्तु शापादिर्नात्र कारणमि'ति वाराहे ॥ २२ ॥ '[26]गिरिः प्राणः समुद्दिष्टस्तत्सुता वेदवाक्स्मृता। पुष्पं स्वर्गादयः प्रोक्ताः फलं मोक्ष उदाहृतमि'ति वामने ॥ 'अनङ्गो मन्मथो मन्था कामोऽङ्गज उदाहृत'इति शब्दनिर्णये ॥ २६ ॥ इति चतुर्थतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

निबोधाङ्गिरसः प्रजाः ॥ ३३ ॥ देवा ऊचुः—यो मायया विरचितं निजमात्मनीदं खेरूपभेदमिव तत्प्रतिचक्षणाय। एतेन धर्मसदने ऋषिमूर्तिनाऽद्यप्रादुश्चकार पुरुषाय नमः परस्मै ॥ ५६ ॥ ताविमौ वै भगवतो हरेरंशाविहागतौ। भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥५९॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा। अप्रौढेवात्मनाऽऽत्मानमजहाद्योगसंयुता ॥ ६६ ॥

द्वितीयोऽध्यायः

नन्दिरुवाच—य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि। द्रुह्यत्यज्ञः पृथक् दृष्टिस्तत्वतो विमुखो भवेत् ॥ २२ ॥ गिरेः सुतायाः पुष्पिण्या मधुगन्धेन भूरिणा। मथ्ना चोन्मथितात्मानः सम्मुह्यन्तु सुरद्विषः ॥ २६ ॥

SGDF
Sri Gargeshwari Digital Foundation

तृतीयोऽध्यायः

[23]विशेषेण धीयते चिन्त्यते । 'रुद्रेण धीयते विष्णुर्विष्णोर्ध्येयो न कश्चने'ति ब्रह्मवैवर्ते ॥२३॥ इति चतुर्थतात्पर्ये तृतीयोऽध्यायः ॥३॥

चतुर्थोऽध्यायः

[15]ब्रह्मरसासवार्थिभिः शिष्याणां मनोऽलिभिः । 'सनकादयो रुद्रशिष्यास्तेषामन्ये तु योगिनः । ब्रह्मशिष्यस्तथा रुद्रो ब्रह्मा नारायणस्य चे'ति ब्राह्मे ॥ १५ ॥ [16]ब्रह्मादयो ब्रह्मपुत्राः । 'सुपर्णशेषप्राणेशब्रह्मविष्णून्गिरां श्रियम् । ऋते नमन्ति नो रुद्रं क एव पुरुषार्थभागि'ति गारुडे ॥ १६ ॥ [20]आब्रह्मणि सम्यग्ज्ञानिनि । 'आब्रह्मस्थितधीर्जीवन्मुक्तश्चेत्यभिधीयते । यस्तस्य न निवृत्तं च प्रवृत्तं कर्म चेष्यते । यत्तु देवाः प्रकुर्वन्ति स महानियमः स्मृतः । स्वर्गाद्यर्थं प्रवृत्तं स्यान्निवृत्तं मुक्तये तु यत् । स महानियमो नाम कर्म यत्त्वाधिकारिकम् । महतो नियमाद्विष्णोः प्रीत्या मुक्तौ सुखोन्नतिः । केचिन्निवृत्तमित्याहुर्महानियममप्युते'ति भविष्यत्पुराणे ॥ 'यदि देवाश्च ऋष्याद्या निन्द्यन्ते यत्र कुत्रचित् । न तावता गुणैर्हीनाः स्थित-

---

तृतीयोऽध्यायः

सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः । सत्त्वं च यस्मिन् भगवान् वासुदेवोत्वधोक्षजो मे मनसा विधीयते ॥ २३ ॥

चतुर्थोऽध्यायः

यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः । लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान् द्रुह्यति विश्वबन्धवे ॥१५॥ किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने । तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणावसृष्टम् ॥ १६ ॥ कर्म प्रवृत्तं च निवृत्तमप्युत (ऋतं) वेदे विविच्यो-

SGDF
Sri Gargeshwari Digital Foundation

प्रज्ञा हि ते मताः । यथायोग्यं तु तात्पर्यं निन्दाया अन्यदेव त्वि'ति गारुडे ॥ २० ॥ इति चतुर्थतात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

[4]न चापरं तस्मादवरं न चिन्तयती । परन्तु विष्ण्वादिकं चिन्तयती चशब्दात् । 'रुद्रं च ब्रह्मवायू च विष्णुं चैव श्रियं गिरम् । उमा चिन्तयती देहं तत्याजान्यं न चास्मरदि'ति तत्त्वनिर्णये ॥ ४ ॥ इति चतुर्थतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

'[26]वीरभद्राख्यरूपेण स्वेन पूर्वं ययौ हरः । मूलरूपेण पश्चात्तु गत्वा दक्षमथावधीत् । तत्रोपेन्द्रेण हरिणा जितो धर्मात्मजेन च । अन्याञ्जिगाय प्रययौ कैलासं स्वं निकेतनमि'ति ब्राह्मे ॥ २२-२४ ॥ इति चतुर्थतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

भयलिङ्गमाश्रितम् । विरोधि तद्यागपदेककर्तरि द्वयं तथाऽऽब्रह्मणि कर्म नर्च्छति ॥ २० ॥

पञ्चमोऽध्यायः

ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम् । ददर्श देहे हतकल्मषा सती सद्यः प्रजज्वाल समाधिजाग्निना ॥ ४ ॥

षष्ठोऽध्यायः

आक्रम्योरसि दक्षस्य शितधारेण हेतिना । छिन्दन्नपि तदुद्धर्तुं नाशक्नोत्त्र्यम्बकस्तदा ॥ २२ ॥ शस्त्रैरस्त्रान्वितैरेनमनिर्भिन्नत्वचं हरः । विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ २३ ॥ दृष्ट्वा संज्ञपने योगं पशूनां स पतिर्मखे । यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥

SGDF
Sri Gangeshwari Digital Foundation

सप्तमोऽध्यायः

[3]त्रिमूर्तिगेन रूपेण नारायणो नाययौ ॥ ३ ॥ [7]यज्ञ इन्द्रः । 'यज्ञो यज्ञपतिस्त्विन्द्रः पुरुहूतः पुरुष्टुत'इत्यभिधानम् । तस्यात्मतन्त्रस्य । तस्य विष्णोर्मनोवशस्य । 'नाहं चेन्द्रो न चैवान्ये यत्तत्त्वं न विदुः परम् । तस्य विष्णोर्वशे रुद्रो मम वायोरथापि वा । नान्यस्य कस्यचित्पुंसस्तस्येत्थं वः कुतः कृतमि'ति ब्रह्मवैवर्ते । 'मुमुक्षवो ब्रह्मणश्च शिवादिन्द्रादिभिस्तथा । श्रुत्वा ज्ञानं परं गुह्यं मुच्यन्ते ब्रह्मणा सहे'ति कौर्मे ॥ ७ ॥ [40]महत्तमस्तेजस्वितमोऽर्कस्य सकाशादपि । 'तेजोऽर्थ उत्तमार्थे च पूज्यार्थे च प्रयुज्यते । महच्छब्दो महःशब्दो मान्यशब्दस्तथैव चे'ति शब्दनिर्णये ॥ ४० ॥ [43]अन्तर्याम्यपेक्षया शक्तेः शिवस्य च परमिति । 'क्रियन्ते स्तुतयोऽन्यत्र तदन्तर्याम्यपेक्षया । न जीवेषु गुणाः पूर्णा यथायोग्या हि तद्गता'इति ब्राह्मे । 'तद्वशत्वात्स्वरूपं तु विष्णोः सर्वमुदीर्यते । स्वरूपं स च सर्वत्र बिम्बत्वादेव तूच्यते । साक्षात्स्वरूपं मत्स्याद्या विष्णोर्नान्यत्कथञ्चन । तस्मादन्यगता दोषा न तस्मिन्पुरुषोत्तम'इति तत्त्वनिर्णये ॥४२,४३॥ [44]अभिपत्तये प्रतीकाराय ।

सप्तमोऽध्यायः

सञ्छिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्याः समाकुलाः । स्वयम्भुवे नमस्कृत्य कात्स्न्येनैतन्न्यवेदयन् ॥ २ ॥ उपलभ्य पुरैवैतद्भगवानब्जसम्भवः । नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्वम् । विदुः प्रमाणं बलवीर्ययोर्वा तस्यात्मतन्त्रस्य क उद्बिधित्सेत् ॥ ७ ॥ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवन्दिताङ्घ्रिः । उत्थाय चक्रे शिरसाभिवन्दनं महत्तमोऽर्कस्य यथैव विष्णोः ॥ ४० ॥ श्री ब्रह्मोवाच—जाने त्वामीश विश्वस्य जगतो योनिबीजयोः । शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ॥ ४२ ॥ त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः । विश्वं सृजसि पास्यत्सि क्रीडयोर्णपदो यथा ॥ ४३ ॥ त्वमेव धर्मार्थदुघाऽभि-

SGDF
Sri Gargeshwari Digital Foundation

सूत्रेण दोषसूचकेन ॥ ४४ ॥ [46]तव त्वाम् । 'चतुर्थे षष्ठी'ति सूत्रात् ॥ 'विष्णवधीना जगत्सत्ता प्रतीतिश्चेष्टितं गतिः । इति यन्नियतं ज्ञानमपृथग्दर्शनं स्मृतम् । मिथ्याज्ञानं पृथग्ज्ञानमिति वेदविदो विदुः । यथैवार्थस्तथाज्ञानमपृथग्दृष्टिरुच्यत' इति गारुडे ॥ ४६ ॥ [48]यदा यस्मात् । 'हृदयस्य द्रवीभावस्त्वनुकम्पेति कथ्यते । उपकारं कर्तुमिच्छा कृपेत्याहुर्मनीषिण' इति शब्दनिर्णये ॥४८॥ [49]मायया विष्णवधीनया बन्धकशक्त्या । 'विष्णुमाया हरेरिच्छा बन्धशक्तिश्च तद्वशा । सर्वत्रगा हरेरिच्छा बन्धशक्तिर्ज्ञवर्जिते'ति शब्दनिर्णये ॥४९॥ इति चतुर्थतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

'[26]उत्पत्तिर्हरिरूपाणां व्यक्तिरेव न संशयः । उत्पत्तिरेव जीवानां देहोत्पत्तिरितीर्यत'इति तत्त्वनिर्णये । 'जडमाया न तस्यास्ति शरीरत्वेन कुत्रचित् । सृष्ट्वा तया शरीराणि तत्स्थितेः पुरुषः स्मृतः ।

पत्तये दक्षेण सूत्रेण विसर्जिताद्ध्वरः । त्वय्येव लोकेऽवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दधते धृतव्रताः ॥४४॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव । भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोभिभवेद्यथा पशोः ॥४६॥ पृथग्दृशः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम् । परान् दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान् मावधीद्दैव भवान् पृथग्विधान् ॥४७॥ येऽस्मिन्यदा पुष्करनाभमायया दुर्लङ्घ्यया स्पृष्टधियः पृथग्दृशः । कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात् कृताः कथम् ॥ ४८ ॥ भवान् हि पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक् । तया हतात्मस्वनुकर्मचेतः स्वनुग्रहं कर्तुमिहार्हसि प्रभो ॥ ॥ ४९ ॥

अष्टमोऽध्यायः

अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः । यथामति गृणन्ति स्म कृतानुग्रहविग्रहम् ॥ २४ ॥ दक्ष उवाच—शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् । तिष्ठंस्तयैव पुरुषत्व-

SGDF
Sri Gangadhara Digital Foundation

मायामयशरीरायामपि विष्णुः स्वयं स्थितः । तस्मात्प्राकृत इत्येव जीववत्तं वदन्ति हि । अदृष्टत्वेऽपि तद्धर्मस्तद्गत्वादेव कारणादि'ति तत्त्वविवेके ॥ ॥ २६ ॥ '[27]अधिदैवं उत्तमदैवम् । यद्यज्ञभागार्थं यज्ञभुग्देवताशरीरे आस्थाः । 'भुङ्क्ते यज्ञभुजो देवानाविश्य पुरुषोत्तम'इति च ॥ २७ ॥ [29]आशिषोऽपि तत एव भवन्तीत्यतश्चशब्दः ॥ २९ ॥ '[31]अव्यक्तादि-पदार्थानां विशेषज्ञानिनाऽपि तु । न देहो वैष्णवो ज्ञेय आनन्दः प्राकृतो न ही'ति तन्त्रसारे । पदार्थभेदग्रहः पदार्थविशेषज्ञः । 'भेदोऽन्तरं विशेषश्च सूक्ष्मेक्षा चाभिधीयत'इति तत्त्वनिर्णये ॥ ३१ ॥ [34]ईश्वरान् ॥ ३४ ॥ [37]माया ह्येषा भवदीया । भगवत्सामर्थ्यमेव । 'भगवन्महिमैवासौ यद्दृश्यो भगवान्स्वयमि'ति च ॥३७॥ [38]न पृथग्य आत्मनः । अन्यथा यो न पश्यति । 'पृथग्ज्ञानं तदित्याहुर्यत्किञ्चि-द्वीक्ष्यतेऽन्यथा । ज्ञानज्ञेयाविरोधेन त्वपृथग्वस्तुनो दृशिः । केचिद्भेदं विनिन्दन्ति ह्यासुरज्ञानवृत्तयः । निराकुर्वन्त्यथो मन्दा भेदस्य परमार्थ-ताम् । ये तु तत्त्वविदो मुख्या भेदं ब्रह्मान्यवस्तुनोः । परमार्थमिति

मुपेत्य तस्यामास्ते भवानपरिशुद्धमिवामनन्ति ॥ २६ ॥ ऋत्विज ऊचुः— तत्त्वं न ते वयमनञ्जनरुद्रशापात् कर्मण्यवग्रहधियो भगवन्विदामः । धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदस्त्वमास्थाः ॥ ॥ २७ ॥ रुद्र उवाच—तव वरद वराङ्घ्रावाशिषा चानभिध्ये ह्यपि मुनिभिरसक्तैरादरेणार्हणीये । यदि रचितधियं मां विद्धि लोकापविद्धं जगति न गणयेयं त्वत्परानुग्रहेण ॥२९॥ नैतत्स्वरूपं भवतोऽसौ पदार्थ-भेदग्रहः पुरुषो यावदीक्षेत् । ज्ञानस्य चार्थस्य गुणस्य चाश्रया(सतो) न्मायामयाद्व्यतिरिक्तो यतस्त्वम् ॥ ३१ ॥ ऋषय ऊचुः—अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे । विभूतयो यत उपसेदुरीश्वरान्न मन्यते स्वयमनुवर्तिनीं भवान् ॥ ३४॥ लोकपाला ऊचुः—दृष्टं किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्दृष्ट्या दृश्यते येन विश्वम् । माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पञ्चभिर्भासि भूतैः ॥ ३७ ॥ योगेश्वरा ऊचुः—प्रेयान्न तेऽन्योऽस्त्यमृतप्रिय प्रभो विश्वात्मनीक्षेन्न

SGDF
Sri Gargeshwari Digital Foundation

ज्ञात्वा नित्यं विष्णुमुपासत'इति गारुडे । हे भृत्येश । तयाऽनन्य-वृत्त्योपधावतामस्माकमनुग्रहोऽस्त्येव । तथापि पुनरनुगृहाण । 'यथार्थ-ज्ञानिनो नान्यः प्रियो विष्णोस्तु कश्चन । तथाप्यधिकसन्तुष्ट्यै प्रसीदे-त्यर्थनं पुनरि'ति च ॥ ३८ ॥ '[39]प्रकृत्या जडया मिथ्याज्ञानं जनयतीश्वरः । तस्य भ्रमश्च सत्वाद्या न सन्ति परमेशितुरि'ति च ॥ ॥ ३९ ॥ '[41]यज्ञो यज्ञपुमांश्चैव यज्ञेशो यज्ञभावनः । यज्ञभुक्चेति पञ्चात्मा यज्ञेष्विज्यो हरिः स्वयम् । आश्रावयास्तुश्रौषड्यजाथो येयजा-महे । वषट्कारान्तकैर्नित्यं यजुर्भिः पञ्चभिर्विभुरि'ति तन्त्रसारे ॥४१॥ '[45]सर्वशब्दाभिधेयत्वं सर्वान्तर्यामिकत्वतः । न तु सर्वस्वरूपत्वात्सर्व-भिन्नो यतो हरिरि'ति मात्स्ये ॥ 'अन्तर्यामिस्वरूपेण ब्रह्मरुद्राद्यभिन्नता । न तु जीवस्वरूपेण जीवा भिन्ना यतो हरेः । विशेषाभेदवचनं सन्निधानविशेषतः । सन्निधानं तु तत्प्रोक्तं सामर्थ्यव्यञ्जनं हरेरि'ति भविष्यत्पर्वणि ॥ ४५ ॥ '[54]हरेर्वशत्वदृष्टिस्तु भूतानामपृथग्दृशिः । प्रियत्वदृष्टिरथवा ब्रह्मादीनां विशेषत'इति गारुडे ॥५२॥ सर्वभूतात्मना

पृथग्य आत्मनः । अथापि भृत्येश तयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ॥ ३८ ॥ जगदुद्भवस्थितिलयेषु लीलया प्रविभज्यमानगुणयाऽऽ-त्ममायया । रचितात्मभेदमतये स्वसंस्थया व्यतिवर्तितभ्रमगुणात्मने नमः ॥ ३९ ॥ अग्निरुवाच—यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहाम्य-ध्वर आज्यसिक्तम् । तं यज्ञियं पञ्चविधं च पञ्चभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम्(नित्यम्) ॥ ४१ ॥ ब्राह्मणा ऊचुः—त्वं क्रतुस्त्वं हवि-स्त्वं हुताशः स्वयं त्वं हि मन्त्रा समिद्दर्भपात्राणि च । त्वं सदस्यर्त्विजो दम्पती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥ ४५ ॥ तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि । देहात्मबुद्धिर्भूतानि भेदेनाज्ञोऽनु-पश्यति ॥ ५२ ॥ यथा पुमान्न स्वाङ्गेषु शिरः पाण्यादिषु क्वचित् । पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥ ५३ ॥ त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मना ब्रह्मन् स शान्तिमधिगच्छति ॥

SGDF
Sri Gargeshwari Digital Foundation

सर्वभूतान्तर्यामित्वेन ॥ ५४ ॥ [55]उभयतः सोमतो हविषश्च ॥ ५५ ॥ '[59]शक्तित्वाद्विष्णुशक्तिस्तु शक्तिशब्देन चोच्यते। शक्यत्वात्प्रकृतिश्चापि स्वापः सृष्टिं विना हरौ। रतिस्तस्यास्तु कथितो नह्यन्यः स्वाप उच्यत' इति तन्त्रसारे ॥ ५९ ॥ '[64]स्वाहाद्वारेण नदीतीरे शरकानने चच्छर्दे' ति भारतोक्तेः ॥ ६४ ॥ इति चतुर्थस्कन्धतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'[7]आविष्टा हरिणा जीवा ब्रह्मा दक्षो मनुः पृथुः। शक्राद्या ऋषयश्चैव मत्स्यव्यासादयो हरिरि' ति ब्रह्मवैवर्ते ॥ ७ ॥ '[8]प्रियव्रतोत्तानपादप्रमुखेषु हरिः स्वयम्। आविष्टः सर्वभूतेषु ऋषभाद्याः स्वयं हरिरि' ति हरिवंशेषु ॥ ८ ॥ [31]विविधकल्पने विद्यमानेऽपि ॥ ३१ ॥ [54]परिणततया एकस्मिन्नेव भूते न ॥ ५४ ॥ [61]मन्त्रहृदयेन मन्त्रेण च नमः शब्देन च ॥६१॥ [72]तस्यैव योग्यत्वाल्लोकपालानां दुष्करम्।

॥ ५४ ॥ मैत्रेय उवाच—एवं भगवताऽऽदिष्टः प्रजापतिपतिर्हरिम्। अर्चित्वा क्रतुना स्वेन देवानभागवतो(उभयतोऽ)यजत् ॥ ५५ ॥ तमेव दयितं भूयस्त्ववाप पतिमम्बिका। अनन्यभावैकगतिः शक्तिः सुप्तेव पूरुषम् ॥ ५९ ॥ पीत्वाऽन्तरजरं वन्हिश्वच्छर्द शरकानने। कुमारोऽभूत्ततस्तस्मै स्तनं षट्कृत्तिका ददुः ॥ ६४ ॥

नवमोऽध्यायः

अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह। स्वायम्भुवस्यापि मनोर्हरेरंशांशजन्मनः ॥ ७ ॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ। वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ८ ॥ विकल्पे विद्यमानेऽपि न ह्यसन्तोषहेतवः। पुंसो मोहमृते भिन्ना यल्लोका निजकर्मभिः ॥ ३१ ॥ स्मयमानमभिध्यायेत् सानुरागावलोकनम्। नियमेनैकभूतेन मनसा वरदर्षभम् ॥ ५४ ॥ परिचर्या भगवतो यावतीः पूर्वसेविताः। ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्तये ॥ ६१ ॥ सुदुष्करं कर्म कृत्वा लोकपालैरपि

SGDF
Sri Gargeshwari Digital Foundation

'नाशक्यं देवतानां तु यदन्यैः शकितं क्वचित्। शक्ता अपि न कुर्वन्ति यदन्यविहितं बुधा' इति ब्राह्मे ॥७२॥ [74]दृष्ट्या निरूपणया। आदेशेन उपदेशेन ॥ ७४ ॥ '[80]यत्र देवैः कृते विघ्ने खण्डितो न पुमान्भवेत्। तत्र तद्यशसे विघ्नं कुर्युर्न तु विघातने। यत्र खण्डितता तत्र खण्डनायैव केवलम्। सत्यकामा यतो देवास्ते चित्ताद्यभिमानिनः। अतो विमोहनायैव प्राप्नुयुस्ते पराजयम्। तेषामशक्तितोक्तिश्च विमोहाय सुरद्विषामि'ति ब्रह्माण्डे ॥८०॥ [81]भूतेन्द्रियाश्रयं भगवद्रूपम् ॥८१॥ [84]विश्वं भगवन्तम्। आत्मनो द्वारं सर्व जीवोत्पत्त्यादिद्वारम्। लोकानामेव निरुच्छ्वासः लोकपालास्तदर्थमेव शरणं ययुः। 'ध्यातुर्ध्रुवस्य कीर्त्यर्थं हरिणा सह देवताः। लोकोच्छ्वासं निरुध्याथ श्वासार्थं च हरिं ययुः। अन्यप्रवृत्तयस्तेभ्यो न तेषामन्यतः क्वचित्। स्वोत्तमेभ्यस्तु देवेभ्यस्तेषां स्युः स्वप्रवृत्तय' इति तत्त्वनिर्णये ॥ ८४ ॥ [85]अखिलसत्वसमूहस्य। 'तेजः शक्तिः समूहश्च गृहं धामेति कथ्यत' इति तत्त्वनिर्णये ॥ ८५ ॥ इति चतुर्थतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

[10]परब्रह्मणि स्थितस्य ध्यानादिकं विना न भवति। सुप्तौ

प्रभुः। एष एष्यत्यचिरतो यशो विपुलयंस्तव ॥ ७२ ॥ तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम्। समाहितः पर्यचरदृष्ट्याऽऽदेशेन पूरुषम् ॥ ७४ ॥ देवाश्चक्रुस्तपोविघ्नं त्रासयन्तः स्वमायया। सर्पेभसिंहकूष्पाण्डैस्ताञ्नापश्यत्परं गतः ॥ ८० ॥ सर्वतो मन आकृष्य हृदि भूतेन्द्रियाश्रयम्। ध्यायन् भगवतो रूपं नाद्राक्षीत्किञ्चनापरम् ॥ ८१ ॥ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया। लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८४ ॥ देवा ऊचुः—नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्वधाम्नः। विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥ ८५ ॥

दशमोऽध्यायः

या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा

SGDF
Sri Gangeshwar Digital Foundation

दृष्टत्वात् ॥ १० ॥ [12]ये स्वाः सम्पदः स्मरन्ति ते त्वां न स्मरन्ति । ये भगवद्भक्तसङ्गाः ते स्वाः सम्पदो न स्मरन्ति ॥ १२ ॥ '[13]पश्यमानोऽपि तु हरिं न तु वेत्ति कथञ्चन । वेत्ति किञ्चित्प्रसादेन हरेरथ गुरोस्तथे'ति ब्रह्मतर्के ॥ १३ ॥ [15]वधिं अवधिम् । अल्लोपेन । संसारस्यावधिभूतं त्वामास्थिताः । सहैवास्ते ॥ १५ ॥ '[16]आनुपूर्वी श्रुतिश्चैव त्रयी चाम्नाय उच्यत' इत्यभिधानम् ॥१६॥ [17]तव पादमूलं भजत आचार्यस्याशिष्टयः शिक्षाः सत्याशीः प्रदा एव । तथापि अस्मान् शिष्यान् विशिष्टफलप्राप्तये पुनः परिपाति भवान् ॥१७॥ '[31]आधिपत्यमनित्यं तु ध्रुवलोकस्य यद्ध्रुवे । न तु तत्स्थानगन्तॄणां यतीनां गतिरुत्तमा । तस्यापि मुक्तिर्नियता नियतं चापि तत्पदम् । तथापि कामनानिन्दा ध्रुवेण सुकृता बते'ति भविष्यत्पर्वणि ॥ ३१ ॥ '[33]द्वितीयस्य स्वतन्त्रस्य त्वभावाद्द्वयवर्जितः । ईश्वरश्चेशितव्यस्य भावात्स परमेश्वर'इति

स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ माभूत्किम्वन्तकासिलुलितात्पततां विमानात् ॥ १० ॥ ते न स्मरन्त्यतितरां प्रियमीशमाद्यं स्वान् सम्पदः सुतसुहृद्गृहवित्तदारान् । ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥ १२ ॥ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिर्विरचितं सदसद्विशेषम् । रूपं स्थविष्ठमज ते महदाद्यशेषं नातः परं परम वेद्मि न यत्र वाचः ॥ १३ ॥ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः । (ये) यद्बुद्ध्यवस्थितमण्डितया स्वबुद्ध्या द्रष्टाऽऽस्थिता वधिमतो व्यतिरिक्त आस्से ॥१५॥ यस्मिन्विरुद्धगतयोऽप्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्या । तद्ब्रह्म विश्वभवमेकमविश्वमाद्यमानन्दमात्रमविकारमहं प्रपद्ये ॥ १६ ॥ सत्याशिषो हि भगवंस्तवपादमूलमाशिष्टयोऽनुभजतः पुरुषार्थमूर्तेः । अप्येवमार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ ॥ १७ ॥ ततो गन्ताऽसि मत्स्थानं सर्वलोकनमस्कृतम् । उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिः ॥ २५ ॥ अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत । भवच्छिदः पादमूलं गत्वा याचे तदन्तवत् ॥ ३१ ॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् । तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्य-

SGDF
Sri Gangeshwari Digital Foundation

हरिवंशेषु ॥ ३३ ॥ '[35]हरौ नियतचित्तत्वाद्गृहवत्तत्प्रवेशनात् । मोक्षं तादात्म्यमित्याहुर्न तद्रूपत्वतः क्वचिदि'ति भविष्यत्पर्वणि ॥ तच्चित्ततैव तादात्म्यम् । 'नैकात्मतां मे स्पृहयन्ती'त्युक्तत्वात् । 'हरीच्छितेच्छुतैकात्म्यं न तेनैकस्वरूपते'ति च । 'कामेन मे काम आगादि'ति च श्रुतिः ॥ ३५ ॥ '[53]कलभश्चैव कन्यानां करिणी बालमङ्गल' इति राजनीतौ ॥ ५३ ॥ इति चतुर्थतात्पर्ये दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

'[47]हरिरक्लिष्टकारित्वादयस्कान्तवदुच्यते । कामकर्मस्वभावेषु काले चावस्थितो हरिः । सर्वकारणभूतः संस्तत्तन्नाम्नाऽभिधीयत' इति सत्यसंहितायाम् ॥४७॥ इति चतुर्थतात्पर्ये एकादशोऽध्यायः ॥११॥

द्वादशोऽध्यायः

[4]परमेश्वरं विनाऽहं त्वं कर्तेति भ्रान्तिः । 'नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुरि'ति मोक्षधर्मे । विपर्ययो दुःखादिः सुखादिरूपस्य ॥ ४ ॥ [6]आत्मसामर्थ्याख्यया शक्त्या युक्तम् । गुणमय्या

हृद्रुजा ॥ ३३ ॥ भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः । तादात्म्यं यच्छतो मौढ्यान्म(न्मा)नो मे भिक्षितं बत । ईश्वरात् क्षीणपुण्येन पुलकानिव चाधनः ॥ ३५ ॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः । आरोप्य करिणीं हृष्टस्तूयमानोऽविशत्पुरम् ॥ ५३ ॥

एकादशोऽध्यायः

निमित्तमात्रं तत्रात्मा निर्गुणः पुरुषर्षभः । व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ ४७ ॥

द्वादशोऽध्यायः

न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव । काल एव हि भूतानां प्रभुरप्ययभावयोः ॥ ३ ॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि । स्वाप्नीव भात्यनुध्यानाद्यया बन्धविपर्ययः ॥ ४ ॥ भजस्व भजनीयाङ्घ्रिम-

SGDF
Sri Gargeshwari Digital Foundation

विरहितम् ॥ ६ ॥ [7]निरन्तरं भगवत्पादमानसम् ॥ ७ ॥ [10]द्रव्य-क्रियादेवतानां विषयम् । अकर्मफलप्रदं मोक्षफलप्रदम् ॥ १० ॥ '[11]विश्वः पूर्णस्तथा सर्वः समस्तश्चाभिधीयत'इत्यभिधानम् ॥ ११ ॥ '[15]अन्यथात्वात्क्षिप्रनाशाज्जगत्स्वप्नादिवत्स्मृतम् । वर्तमानं नियत्यैव सदैव परमात्मनी'ति वाराहे ॥ 'महामायेत्यविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यत'इति स्कान्दे ॥ १५ ॥ [10]स्थूले पातालादिके । शिलावत्प्रतिमारूपे । 'शिलावत्प्रतिमैषा हि विष्णोर्लोकचतुर्दशी'ति च ॥ १७ ॥ '[26]शिशुमारो ध्रुवश्चैव संस्थितौ यत्पुरे सदा । तत्पश्यन्ति न यान्त्यन्ये लोकं यान्ति सुरान्विने'ति च ॥ २५, २६ ॥ [49]मनसा परमात्मानं प्रति सन्तुष्टः ॥ ४९ ॥ इति चतुर्थतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

भवाय भवच्छिदम् । युक्तं विरहितं शक्त्या गुणमय्याऽऽत्ममायया ॥ ॥ ६ ॥ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशङ्कितः । वरार्हणोऽस्यम्बुजनाभपादयोर्निरन्तरं त्वां वयमङ्ग शुश्रुम ॥ ७ ॥ अथा-यजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः । द्रव्यक्रियादेवतानां कर्माकर्मफलप्रदम् ॥ १० ॥ सर्वात्मन्यच्युते सर्वे तीव्रौघां भक्तिमुद्वहन् । ददर्शात्मनि भूतेषु तमेवावस्थितं विभुम् ॥११॥ मन्यमान इदं विश्वं मायारचितमात्मनि । अविद्यारचितस्वप्नगन्धर्वनगरोपमम् ॥ १५ ॥ तस्या विशुद्धकरणः शिव-वार्विगाह्य बद्ध्वासनं जितमरुन्मनसाऽहृताक्षः । स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहितो विसृजन् समाधौ ॥ १७ ॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परम् । आतिष्ठ तच्चन्द्रदिवाकरा-दयो ग्रहर्क्षताराः परियन्ति दक्षिणम् ॥२५॥ अनास्थितं ते पितृभिरन्यै-रप्यङ्ग कर्हिचित् । आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम् ॥ २६ ॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः । नेच्छंस्तत्रात्मनाऽऽत्मानं सन्तुष्ट इति सिध्यति ॥ ४९ ॥

SGDF
Sri Gargeshwari Digital Foundation

त्रयोदशोऽध्यायः

[9]स्वरूपं जीवस्य बिम्बरूपं परमात्मानम् । 'भिन्नस्वरूपमभिदं स्वरूपं तु द्विधा हरेः । भिन्नस्वरूपं ब्रह्माद्या मत्स्याद्यभिदमुच्यत'इति गारुडे ॥ ९ ॥ '[11]कल्पः कल्पाभिमानी सन् शिंशुमारानुगःस्थितः । वत्सरो राज्यमकरोत्पित्रा दत्तं महाबल' इति ब्राह्मे । 'चक्रे नारायणः साक्षात्किस्तुघ्नः कल्पमात्मजमि'ति पाद्मे ॥ ११ ॥ '[33]अनपत्योऽपि सद्धर्मा लोकजिन्नात्र संशयः । देवैस्तु पृथुजन्मार्थे हविरङ्गस्य नो हृतम् ॥ अनपत्यत्वकर्माऽसौ बालहत्या कृता पुरा । अतो दुष्टोऽभवत्पुत्र इष्टो विष्णुरतः पृथुरि'ति वामने ॥३३॥ '[39]मृत्युर्देवो यमभ्राता वेनमाता-महोऽसुरः ॥ [40]पीडां वेनेति च प्राहुर्वेनोऽसौ पीडनाद्भूदि'ति च ॥ ॥ ३९, ४० ॥ इति चतुर्थतात्पर्ये त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

[22]सर्वलोकान्सङ्गृह्णातीति तत्सङ्ग्रहः । 'सर्वस्य ग्रहणाद्विष्णुः सर्व-

---

त्रयोदशोऽध्यायः

अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः । स्वरूपमवरुन्धानो नात्मनोऽन्यं तदैक्षत ॥ ९ ॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समन्त्रिणः । वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम् ॥ ११ ॥ सदस्या ऊचुः—नरदेवेह भवतो नाघं हि मनाक् स्थितम् । अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः ॥ ३१ ॥ तथा साद (ध)य भद्रं ते आत्मानं सप्रजं नृप । इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥३२॥ यथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः । यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥३३॥ स बाल एव पुरुषो मातामहमनुव्रतः । अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥३९॥ स शरासनमुद्यम्य मृगयुर्वनगोचरः । हन्त्यसाधुर्मृगान् दीनान् वेनोऽसावित्यरौज्जनः ॥ ४० ॥

चतुर्दशोऽध्यायः

तं सर्वलोकामरयज्ञसङ्ग्रहं त्रयीमयं द्रव्यमयं तपोमयम् । यज्ञै-

SGDF
Sri Gangeshwari Digital Foundation

सङ्ग्रह उच्यते। वेदस्य तद्वक्तृकत्वात्प्राधान्यं तु त्रयीमयः। सर्वं तद्विषयत्वेन मुख्यं सर्वमयस्तत'इति स्कान्दे ॥ २२ ॥ '[23]विष्णोः सन्निहितत्वात्तु सर्वे देवा हरेः कला'इति च ॥ २३ ॥ '[35]अहं ब्रह्मेति वेनस्तु ध्यायन्नापाधरं तमः। तद्राद्धान्तो महीं व्याप्तो भेर्या ख्याप-यतोऽनिशम्। आसुरा राक्षसाश्चैव पिशाचास्तत्पथि स्थिताः। भूमौ तत्पृथुना सर्वं निरस्तं महितात्मना। पुनः कलियुगे प्राप्ते अष्टाविंशतिमे मनोः। वैवस्वतस्य समये जाताः क्रोधवशा भुवि। ख्यापयन्ति

विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि ॥ २२ ॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः। स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेलनं नार्हसि वीर चेष्टितुम् ॥ २३ ॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः। बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान् ॥ २९ ॥ मैत्रेय उवाच—इत्थं विपर्ययमतिः पापीया-नुत्पथं गतः। अनुनीयमानस्तद्याञ्चां न चक्रे भ्रष्टमङ्गलः ॥ ३० ॥ इति तेऽसत्कृतास्तेन द्विजाः पण्डितमानिना। भग्नायां हव्ययाञ्चायां तस्मै विदुर चुक्रुधुः ॥ ३१ ॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः। जीवन् जगदसावाशु कुरुते भस्मसाद्ध्रुवम् ॥ ३२ ॥ नायमर्हत्यसद्वृत्तो नरदेव-वरासनम्। यो वै यज्ञपतिं विष्णुं विनिन्दत्यनपत्रपः ॥ ३३ ॥ को वैनं परिचक्षीत वेनमेकमृतेऽशुभम्। प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनम् ॥३४॥ इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः। निजघ्नुर्हुङ्कृतैर्वेनं हतमच्युत-निन्दया ॥ ३५ ॥ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरम्। सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३६ ॥ एकदा मुनयस्ते तु सरस्व-सलिलाप्लुताः। हुत्वाग्निं सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३७ ॥ वीक्ष्योत्थितान् महोत्पातानाहुर्लोकभयङ्करान्। अप्यभद्रमनाथाया दस्यु-भ्यो न भवेद्भुवः ॥ ३८ ॥ एवं ब्रुवत्सु ऋषिषु धावतां सर्वतो दिशम् ॥ पांसुः समुत्थितो भूमेश्चोराणां वसुलुम्पताम् ॥ ३९ ॥ तदुपद्रवममाज्ञाय लोकस्य वसुलुम्पताम्। भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसताम् ॥ ॥ ४० ॥ चोरप्रायं जनपदं हीनसत्त्वमराजकम्। लोका नावारयन् शक्ता अपि तद्दोषदर्शिनः ॥४२॥ ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः। स्रवते ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा ॥ ४२ ॥ नाङ्गस्य वंशो

SGDF
Sri Gargeshwari Digital Foundation

दुरात्मानो मणिमांस्तत्पुरःसर' इति भविष्यत्पुराणे ॥ ३५ ॥ '[47]त्र्यंशो वेनः समुद्दिष्टः सत्वांशः पृथुतामगात् । रजोंऽशश्च दिवं यातो निषादस्तामसोऽभवत् । स्वयं वेनश्चतुर्थस्तु महातमसि पातित' इति कौर्मे । 'पापरूपी पृथग्जातो निषादो वेनदेहतः । यस्मात्तस्मात्पृथोः पुत्राद्रजो वेनो दिवं ययावि' ति गारुडे ॥४७॥ '[50]पृथुहैहयादयो जीवास्तेष्वाविष्टो हरिः स्वयम् । विशेषावेशतस्तेषु साक्षाद्धर्यंशतावचः । किंस्तुघ्नव्यासऋषभकपिला मत्स्यपूर्वकाः । आकूतिजैतरेयौ च धर्मजत्रयमेव च । धन्वन्तरिर्हयग्रीवो दत्तात्रेयश्च तापसः । स्वयं नारायणस्त्वेते नाणुमात्रविभेदिनः । बलतः स्वरूपतश्चैव गुणैरपि कथञ्चने' ति तत्त्वनिर्णये । 'तत्र सन्निहिता श्रीश्च यत्र सन्निहितो हरिः । नास्य सन्निधिमात्रेण रमा पत्नीत्वमाव्रजेत् । साक्षादेव तु साक्षाच्च हरेः सन्निधितः क्वचित् । गोप्यादिरूपा भवति विपरीतं न तु क्वचिदि' ति च ॥ ५० ॥ इति चतुर्थतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

राजर्षेरेष संस्थातुमर्हति। अमोघवीर्या हि नृपा वंशेऽस्मिन् केशवाश्रयाः ॥ ४३ ॥ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः । ममन्थुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४४ ॥ काकक्रृष्णोऽतिह्रस्वाङ्गो ह्रस्वबाहुर्महाहनुः । ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ॥ ४५ ॥ तं तु तेऽवनतं दृष्ट्वा किङ्करोमीतिवादिनम् । निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥ ॥ ४६ ॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः । योऽपाहरज्जायमानो वेनकिल्बिषमुल्बणम् ॥ ४७ ॥ मैत्रेय उवाच— अथ तस्य पुनर्विप्रैर्विपन्नस्य महीपतेः । बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥४८॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः । ऊचुः परमसन्तुष्टा विदित्वा भगवत्कलाम् ॥ ४९ ॥ ऋषय ऊचुः— एष विष्णोर्भगवतः कला भुवनपावनी । इयं च लक्ष्म्याः(क्ष्मीः) सम्भूतिः पुरुषस्यानपायिनी ॥ ५० ॥

SGDF
Sri Gurgashrivari Digital Foundation

पञ्चदशोऽध्यायः

[3]तत्र सन्निहितः साक्षाद्भगवान् । 'ब्रह्मण्यनन्ते गरुडे रुद्रे कामे शचीपतौ । अनिरुद्धे मनौ चैव पृथौ च कृतवीर्यजे । नारदे चैवमाद्येषु विशेषात्सन्निधिर्हरेः । सुदर्शनादिष्वस्त्रेषु तथा सन्निहितो हरिः । नरलक्ष्मणौ बलश्चैव शेषस्यांशाः प्रकीर्तिताः । तथा भरतशत्रुघ्नौ चक्रशङ्खावुदाहृतौ । प्रद्युम्नश्च कुमारश्च स्कन्दः कामांशजाः स्मृता'इति स्कान्दे । 'वैन्ये पृथौ सन्निहितो राजरूपी जनार्दन'इति ब्राह्मे ॥ ३ ॥ इति चतुर्थतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

[20]यल्लोके निरर्थकं तद्भगवद्रूपेषु प्रतीतनानात्वदृष्टान्तेन पश्यन्ति सन्तः । 'मत्स्यरूपादिनानात्वदृष्टिवद्यन्निरर्थकमि'ति पाद्मे । 'एवं धर्मान्पृथक् पश्यन्ति'ति च ॥ २० ॥ इति चतुर्थतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

'[2]राज्ञा समानवयसः श्रेणयस्त्वङ्गरक्षका' इत्यभिधानम् ॥ २ ॥

पञ्चदशोऽध्यायः

एष साक्षाद्धरेरंशो जातो लोकरिरक्षया । इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥ ३ ॥

षोडशोऽध्यायः

सूत उवाच—नालं वयं ते महिमानुवर्णने यो देवदेवोऽवततारमायया । वेनाङ्गजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रुमुर्धियः ॥ ॥ २ ॥ अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयाऽवतीर्णः । यस्मिन्नविद्यारचितं निरर्थकं पश्यन्ति नानात्वमिव प्रतीतम् ॥ २० ॥

सप्तदशोऽध्यायः

ब्राह्मणप्रमुखान् वर्णान् भृत्यामात्यपुरोधसः । पौरान् जानपदान्

SGDF
Sri Gangeshwari Digital Foundation

[6]पूर्वतनानां कथासम्बन्धेन हरेर्यशः ॥ ६ ॥ '[29]ब्रह्मादिजीवदेहास्तु मायादेहाः प्रकीर्तिता' इति वाराहे ॥२९॥ [30]स परतः ईश्वर इत्याक्षेपः ॥ ॥ ३० ॥ '[33]विरुद्धशक्तयो यस्य नित्या युगपदेव च। तस्मै नमो भगवते विष्णवे सर्वजिष्णव'इति च ॥ ३३ ॥ इति चतुर्थतात्पर्ये सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

'[15]गुणाः स्वरूपभूताश्च बाह्याश्चेति द्विधा मताः। स्वरूपभूता व्यज्यन्ते हरेर्बाह्यान् दुहुः पर'इति ब्राह्मे ॥ १५ ॥ '[16]प्रतिमन्वन्तरं प्रायः प्रह्लादाद्या बभूविर'इति च ॥ १६ ॥ '[31]गोष्ठं घोष इति प्रोक्तो व्रजस्तत्पालसंस्थितिरि'त्यभिधानम् ॥ ३१ ॥ इति चतुर्थतात्पर्ये अष्टादशोऽध्यायः ॥ १८ ॥

श्रेणीः प्रकृतीः समपूजयत् ॥ २ ॥ यच्चान्यदपि कृष्णस्य ब्रह्मन् भगवतः प्रभोः। श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥ ६ ॥ धरण्युवाच— नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवेऽगुणात्मने। नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥ नूनं तवेशस्य समीहितं जनैः स्वमायया दुर्जययाऽकृतात्मभिः। न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतः स ईश्वरः ॥३०॥ सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्याक्रियाकारकचेतनात्मभिः। तस्मै समुन्नद्धविरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥ ३३ ॥

अष्टादशोऽध्यायः

कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन्। हिरण्मयेन पात्रेण वीर्यमोजोबलं पयः ॥ १५ ॥ दैतेया दानवा वत्सं प्रल्हादमसुरर्षभम्। विधाय दुदुहुः क्षीरमयःपात्रे सुराऽऽसवम् ॥ १६ ॥ ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च। घोषान् व्रजांश्च शिबिरान्नगरान् खेटखर्वटान् ॥ ॥ ३१ ॥

SGDF
Sri Gargeshwari Digital Foundation

एकोनविंशोऽध्यायः

'[17]देवाः शक्ताश्च मोहाय दर्शयेयुरशक्तवत् । ऋषीणां चैव राज्ञां च नहि ते देवतासमाः । आज्ञया वा हरेः क्वापि कार्यतो वा क्वचित्क्वचिदि'ति गारुडे ॥ 'प्रणिपातादिकं दैवैर्क्रीष्यादिषु जनार्दने । क्रियतेऽतो न तेषां हि तेजोभङ्गः कथञ्चन । अत्युत्तमानामवरे तेजोभङ्गो न विद्यते । यथा नराणां तिर्यक्षु प्रायः साम्ये हि स स्मृत'इति स्कान्दे ॥ १७ ॥ '[25]धर्मोपमस्त्वधर्मोऽयमुपधर्मः स उच्यत'इति हरिवंशेषु ॥ २५ ॥ इति चतुर्थतात्पर्ये एकोनविंशोऽध्यायः ॥१९॥

विंशोऽध्यायः

'[7]अन्येषामावृतो विष्णुः स्वस्यानावृत एव च ॥ ७ ॥ '[8]आत्मा सर्वस्य जगतः स्वस्यात्माऽन्यो न विद्यते । सुषुप्तवच्च निर्दुःखो जाग्रद्वच्च प्रवृत्तिमान् । अनन्यसदृशत्वाच्च केवलोऽसौ हरिः स्मृत'इति तन्त्रसारे । 'आत्मनैवावगम्यत्वाद्धरिरेषः सुषुप्तवत् । केवलत्वेन विज्ञेयो मुक्तिस्तद्वद्दुःखते'त्यध्यात्मे ॥ ८ ॥ '[12]हरिरक्लिष्टकारित्वादुदासीन इतीर्यत'इति

एकोनविंशोध्यायः

एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा । अन्वधावदतिक्रुद्धो रावणं गृध्रराडिव ॥ १६ ॥ सोऽश्वं रूपं च तद्धित्वा तस्मावन्तर्हितः स्वराट् । धीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥ १७ ॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु । प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥ ॥ २५ ॥

विंशोऽध्यायः

एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः । सर्वगोऽनावृतः साक्षी निरात्माऽनात्मनः परः ॥ ७ ॥ देहाद्यपार्थास्तद्धर्मा न स्युस्तद्द्रष्टुरात्मनः । कैवल्यं तस्य वै धर्मः सुषुप्तं तन्निदर्शनम् ॥ ८ ॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् । कूटस्थमिममात्मानं यो वेदाप्नोति

SGDF
Sri Gangeshwari Digital Foundation

च ॥ १२ ॥ '[13]जीवाद्भिन्नस्य मनसो गुणाः सत्वादयो मताः। तज्ज्ञात्वा न विकुर्वीत स्वस्वरूपं मनस्तथे'ति षाड्गुण्ये ॥ १३ ॥ '[19]आयासदुःखव्रीडादीन्प्रायशः सुखिनोऽपि तु। नियमाद्दर्षिभूतेषु मोहायादर्शयन्सुरा' इति ब्रह्मतर्के ॥ १९ ॥ '[20]अपक्वभक्तियुक्ता ये न तेषां विष्णुदर्शनम्। प्रायो भवति दुःखस्य त्वभावः प्रायशो भवेदि'ति प्रकाशसंहितायाम् ॥ 'जगत्समस्तं विश्वं च निखिलं पूर्णमुच्यत'-इत्यभिधानम् ॥ २० ॥ '[29]धिष्ण्यं तेजश्च सामर्थ्यं महिमा धाम चोच्यत' इत्यभिधानम् ॥ अल्पपुण्यत्वान्न मद्भक्तियोग्य इति न मन्तव्यम्। यतः फल्ग्वप्युरु करोषि वात्सल्यात्। विना वात्सल्यं श्रियाऽपि किं तव ॥२९॥ [30]अथान्यच्च। अतः वात्सल्यादेव ॥३०॥ '[37]भूतेषु हरिरित्येव हर्यर्पणधिया तथा। सर्वभूतेषु च हरेः पूजा कार्याऽऽत्मवेदिभिरि'ति पाद्मे ॥ ३७ ॥ इति चतुर्थतात्पर्ये विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

'[10]देवेभ्य ऋषयो भूपाश्चोच्यन्ते शक्तिमत्तया। क्वचित्क्वचि-

शोभनम् ॥ १२ ॥ भिन्नस्य लिङ्गस्य गुणप्रवाहं द्रव्यक्रियाकारकचेतनात्मनः। दृष्ट्वाऽऽसु सम्पत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः ॥ १३ ॥ स्पृशन्तं पादयोः शीर्ष्णा व्रीडितं स्वेन कर्मणा। शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ १९ ॥ भगवानपि विश्वात्मा पृथुनोपहृतार्हणः। समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः ॥ २० ॥ जन्तोर्जगत्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितम्। करोषि फल्ग्वप्युरू दीनवत्सल स्व एव धिष्ण्येऽभिरतस्य किं तया ॥ २९ ॥ भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम्। भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥ ३० ॥ यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः। सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ॥ ३७ ॥

एकविंशोऽध्यायः

को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः।

SGDF
Sri Gargeshwari Digital Foundation

न्मोहनार्थं कादाचित्काच्च हेतुत’इति नारदीये ॥ १० ॥ ‘[26]प्रकाश-
वद्भुवो देवा मानुषाश्चापि केचने’ति वाराहे ॥ २६ ॥ ‘[29]एकात्मा
हरिरुद्दिष्टः प्रधानत्वात्समस्तत’इति च ॥ प्राय इत्यवधारणाक्षेपः ।
‘प्रायःपदं स्यात्प्राचुर्ये चाक्षेपात्मावधारणे । अर्थतोऽवधृतिः क्षेपो मुखा-
क्षेपोऽवधारणमि’ति च ॥ २९ ॥ [33]सम्पद्यते प्राप्यते ॥ ३३ ॥
[34]प्रधानादीन् गृहीत्वा जीवं प्राप्य पुण्यकर्मभिर्ज्ञायते । यथा गुणव-
दिन्धनेऽग्निर्मथनादिना ॥ ३४ ॥ [37]हरिरिन्द्रो यच्चरणाभिवन्दना-
दनपायिनीं लक्ष्मीमाप । सोऽपि विष्णुर्ब्राह्मणप्रियः । ‘यत्प्रसादेन
देवेन्द्रो वेदोदितयशा अभूत् । सोऽपि विष्णुरमेयात्मा सदा ब्राह्मण-
वत्सल’इति हरिवंशेषु ॥ ३७ ॥ ‘[39]तस्मान्मोक्षसुखात्परं हविर्भुजां
देवानामप्यत्र संसारेऽस्ति किम् ? ॥ ३९ ॥ [40]पारमहंस्यवर्या गावो
यस्य ॥ ४० ॥ ‘[45]वेनस्थो राजसो जीवः पृथुना स्वर्गतिं गतः । स्वयं

लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥
अस्ति यज्ञपतिर्नाम केषाञ्चिदिह सत्तमाः । इहामुत्र च लक्ष्यन्ते
ज्योत्स्नावत्यः क्वचिद्भुवः ॥ २६ ॥ ईदृशानामथान्येषामजस्य च भवस्य
च । प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृतः ॥ २८ ॥ राज्यस्वर्गाप-
वर्गाणां प्रायेणैकात्महेतुता । दौहित्रादीनृते मृत्योः शोच्यान् धर्मविमो-
हितान् ॥ २९ ॥ असाविहानेकगुणाध्वरैः सता पृथग् विधैर्द्रव्यगुण-
क्रियोक्तिभिः । सम्पद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनस्वरूपतः
॥ ३३ ॥ प्रधानकालाय कर्मसङ्ग्रहः शरीरशेषं प्रतिपद्य चेतनः । क्रिया-
फलत्वेन विभुर्विभाव्यते यथाऽनलो दारुषु तद्गुणात्मकः ॥ ३४ ॥
ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् । अवाप
लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥ ३७ ॥ पुमांल्ल-
भेताप्यतिवेलमात्मनः प्रसादतोऽत्यन्तशमं स्वतः स्वयम् । यन्नित्य-
सम्बन्धनिषेवया ततः परं किमत्रास्ति सुखं हविर्भुजाम् ॥ ३९ ॥
अश्नात्यनन्तः खलु तत्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः । न वै
तथा चेतनया बहिष्कृते हुताशने पारमहंस्यवर्यगुः ॥ ४० ॥ पुत्रेण जयते

SGDF
Sri Gangeshwari Digital Foundation

तु तम एवाप सात्त्विकः पृथुतामगादि'ति ब्रह्माण्डे ॥ ४५ ॥ [48]अहो वयमित्यादि तत्स्थपरमेश्वरापेक्षया । 'यो ब्रह्मक्षत्रमाविश्ये'ति वचनात् ॥ ॥ ४८ ॥ इति चतुर्थतात्पर्ये एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

'[9]सर्वज्ञाश्च विरिञ्चाद्या न जानीयुर्हरिं परम् । हेतवो जगतोऽप्यस्य यथासौ वेद केशव'इति तन्त्रसारे ॥ ९ ॥ '[16]हरेस्तु प्रतिमा प्राज्ञास्तत्रस्थः केशवः स्वयम् । ददाति ज्ञानमीशेशः परमात्मा स्वयं विभुरि'ति च ॥१६॥ [20]कषणेन गच्छतीति कषायः पापं तदुभयमेव मलम् । 'रतिः परात्मनि हरावन्यत्रारतिरेव च । पुमर्थसाधनं ज्ञेयं नातोऽन्यन्मुख्यमिष्यत'इति ॥ २० ॥ [26]अबीजं हृदयं बीजहृदयं विना । 'जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्यमेव च । बाह्योपाधिर्लयं

लोक इति सत्यवती श्रुतिः । ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः ॥ ॥४५॥ हिरण्यकशिपुश्चापि भगवन्निन्दया तमः । विविक्षुरत्यगात्सूनोः प्रल्हादस्यानुभावतः ॥ ४६ ॥ वीरवर्य पितः पृथ्व्याः समाः सञ्जीव शाश्वतीः । यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ॥ ४७ ॥ अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुन्दनाथाः । यदुत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनंक्षि ॥ ४८ ॥

द्वाविंशोऽध्यायः

नैव लक्ष्यते लोको लोकान् पर्यटतोऽपि यान् । यथा सर्वदृशः सर्वे आत्मानं येऽस्य हेतवः ॥ ९ ॥ व्यक्तं ह्यात्मवतामात्मा भगवानात्मभावनः । स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः ॥ १६ ॥ अस्त्येव राजन् भवतो मधुद्विषः पादारविन्देऽस्य गुणानुवादिनी । रतिः सदा या विधुनोति नैष्ठिकी कामं कषाय मलमन्तरात्मनः ॥ २० ॥ शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सम्यग्विमृशेषु हेतुः । असङ्ग आत्मव्यतिरिक्तवस्तुनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥ २१ ॥ हरेर्मुहुस्तत्परकर्णपूरया गुणाभिधानेन विजृम्भमाणया । भक्त्या ह्यसङ्गः सदसत्परात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥ २५ ॥ यदा रति-

SGDF
Sri Gargeshwari Digital Foundation

याति मुक्तावन्यस्य तु स्थितिः। सर्वोपाधिविनाशे हि प्रतिबिम्बः कथं भवेत्। कथं चात्मविनाशाय प्रयत्नः सेत्स्यति क्वचित्। अपुमर्थता च मुक्तेः स्यादभावात्पुंस एव तु। ज्ञानज्ञेयाद्यभावाच्च सर्वथा नोपपद्यते। तस्मादेतन्मतं येषां तमोनिष्ठा हि ते मता'इति स्कान्दे ॥ २६ ॥ [27]दग्धाशयः। बीजाशयनाशे तद्गुणानां ज्ञानादीनामभावान्न किञ्चिद्विचक्षीत। परात्मनोर्यदा व्यवधानं संसारावस्थायां तदा स्वप्न इवेत्येतावद्बीजहृदयनाशे त्वपुरुष एव। आत्मनाश एवेत्यर्थः। अतः संसारावस्थैवोत्तमा स्यात्। 'भिदा यदि न दृश्येत जीवात्मपरमात्मनोः। मुक्तौ तदा विमोक्षाय को यत्नं कर्तुमर्हती'ति ब्रह्माण्डे ॥ 'मग्नस्य हि परेऽज्ञाने किं न दुःखकरं भवेत्। प्रवृत्तिधर्ममेवाहं मन्ये भरतसत्तमे'ति मोक्षधर्मेषु ॥ २७ ॥ [30]एवंविधाज्ञानकारणमाह। इन्द्रियैर्विषयाकृष्टैरित्यादि। 'बहुस्मरणशक्तिस्तु चेतनेत्युच्यते बुधैरि'ति शब्दनिर्णये ॥ ॥ ३० ॥ '[35]स्वपक्षपातस्त्वभ्यासाद्भोगार्थं व्यापृतस्य तु। भवेत्ततोऽनेकशास्त्रयथार्थस्मरणेशिता। नश्यत्यतः स्मृतेर्नाशाद्भगवत्पक्षपातिता। विनश्येत्तेन चैवास्य भवेज्ज्ञानविपर्ययः। न च ज्ञानविपर्यासादन्यन्नाशकरं क्वचित्। सर्वस्यैतस्य मूलं हि दुष्टसंसर्ग एव तु। दुष्टसङ्गो विरक्तस्याप्यन्यथाज्ञानकारणम्। दुष्टसङ्गाद्धि विष्णोश्च स्वात्मत्वं मन्यते बुधः। अभावं स्वात्मनोऽन्यस्य मुक्तिं चापि निरात्मतामि'त्यादि

ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा। दहत्यवीजं हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥ २६ ॥ दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे। परात्मनोर्यद्व्यवधानं पुरस्तात् स्वप्ने यथा पुरुषस्तद्विनाशे ॥ २७ ॥ इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतो मनः। चेतनां हरते बुद्धेः स्तुम्बस्तोयमिव ह्रदात् ॥३०॥ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये। तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥३१॥ न कुर्यात्कर्हिचित्सङ्गं तमस्तीव्रं तितीर्षुणा। धर्मार्थकाममोक्षाणां यदत्यन्तविघातकम् ॥ ३४ ॥ तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते। त्रैवर्ग्यार्थो यतो नित्यं कृतान्तभयसंयुतः ॥ ३५ ॥

SGDF
Sri Gargeshwari Digital Foundation

स्कान्दे ॥ ३५ ॥ '[37]मनोमात्रं हरेर्यस्मान्मनसा मीयते जगत् । व्याप्ते मनसि विष्णोश्च स्थितत्वाद्वासनामयम् । वस आच्छादनेत्यस्माद्धातोर्वा वासनामयम् । अतो विष्णोरनीहायां लीयते सकलं जगत् ॥ ३७ ॥ '[38]अनीहावस्थ एवासौ मुमुक्षुभिरवाप्यते । एवं विद्वान्बन्धशक्तिं व्युदस्य हरिमाप्नुते । प्रकृतिर्भिदा च माया च भ्रमश्चेत्यभिधीयते । बन्धशक्तिर्यया लोको बम्भ्रमीत्यनिशं भुवी'ति तन्त्रसारे ॥ ३८ ॥ '[39]अनुवृत्तिरिति प्राज्ञैर्जीवन्मुक्तिरुदीर्यत'इति शब्दनिर्णये ॥ ३९ ॥ '[40]सर्वसत्ताप्रदत्वात्तु सर्वतत्त्वं हरिः स्मृतः । सर्वत्र विततत्वाद्वा सोऽहं त्वमिति चोच्यते । सर्वान्तर्यामकत्वात्तु न जीवात्मत्वतो हरिरि'ति तत्त्वनिर्णये ॥ त्वमनयोः स्थावरजङ्गमयोर्मध्ये एको जीवः विष्वगाधिः नानादुःखःसन् हृदि स्थितमवैहि अहं च स जीवोऽस्मि ज्ञानान्महान्भवामि यः क्षेत्रवित् ॥ सर्वस्य प्रत्यक्चकास्ति स भगवानिति । 'व्यवधानेनान्वयोऽपि योग्यतापेक्षया भवेदि'ति शब्दनिर्णये ॥ 'अभिमानस्त्वहङ्कार आत्मा चेत्यभिधीयत'इति च ॥४०॥ '[41]यत्स्वरूपतया भातमज्ञानां गगनादिकम् । विवेकज्ञानिनां रज्जौ सर्पमावद्विधूयते । तन्नित्यमुक्तभावेन निरस्तप्रकृतिं भजेदि'ति ज्ञानविवेके ॥ 'न भ्रान्तिर्जगतो दृष्टिर्न भ्रान्तिर्हरिदर्शनम् । अन्योन्यात्मतया दृष्टिर्भ्रान्तिरित्यवधार्यतामि'ति च । 'मायेति ज्ञाननाम स्यान्मायेति प्रकृतिस्तथा ।

मनोमात्रमिदं विश्वं यथा स्वप्ने मनः क्रिया । क्रिया च वासनामात्रं साऽनीहायां प्रलीयते ॥ ३७ ॥ आत्मा त्वनीहया साक्षात्स्वयं ज्योतिः प्रसिध्यति । एवं व्युदस्यात्ममायां जानंस्तूपरमेन्मुनिः ॥३८॥ न यत्र निद्रा मूर्च्छा वा नार्थदृक् च मनोरथः । नानुवृत्तिर्न प्रलयस्तद्ब्रह्म परमं विदुः ॥३९॥ तत्वं नरेन्द्र जगतामथ तस्थुषां च देहेन्द्रियासुधिषणात्मभिरावृतानाम् । यः क्षेत्रवित्त्वमनयोर्हृदि विष्वगाधिः प्रत्यक्चकास्ति भगवांस्तमवैहि सोऽस्मि ॥४०॥ यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुतिः स्रजि वाहिबुद्धिः । तं नित्यमुक्तपरिशुद्ध-

SGDF
Sri Gangeshwari Digital Foundation

ज्ञानं स्वरूपं विष्णोस्तु प्रकृतिर्न हरेस्तनुः । एवं विवेकिनो विश्वं ब्रह्म-
रूपेण नेष्यत'इति वाराहे ॥ ज्ञानप्रकृत्याख्यमायाद्वयस्य विवेकज्ञाना-
त्सदसतोर्विष्ण्वात्मतया प्रतीतिः स्रज्यहिबुद्धिरिव विधूयत इत्यर्थः ।
'पञ्चभूतात्मकं देहं विष्णोः पश्यन्त्ययोगिनः । तथा न योगिराद्धान्तो
ज्ञानं देहो यतो हरेरि'ति षाड्गुण्ये ॥ ४१ ॥ [42]द्विमतयः जगति
भगवति च प्रतीतियुक्ता अपि भक्तिविशेषात्तत्त्वं नोद्ग्रथयन्ति । प्रति-
संसारं गुणास्तेषां विरुद्धा एव प्रतीयन्ते यतः । 'नैजः सर्वगुणोत्कर्षः
सर्वेभ्यो महदुच्यत'इति शब्दनिर्णये । 'अनाद्यन्तं परं ब्रह्म न देवा
ऋषयो विदुः । एकस्तद्वेद भगवान्प्रभुर्नारायणः स्वराडि'ति मोक्ष-
धर्मेषु ॥ ४२ ॥ '[64-65]गुरुविप्रेषु भक्त्या च परेषां हितकृत्तया ।
प्रश्रयेण च कीर्त्या च पृथू राममनुव्रत'इति ब्रह्माण्डे । 'न गुरुर्न च
धर्मोऽस्ति रामदेवस्य कुत्रचित् । तथापि धर्मरक्षार्थं गुरुभक्तिमदर्शय-
दि'ति वाराहे ॥६४, ६५॥ इति चतुर्थतात्पर्ये द्वाविंशोऽध्यायः ॥२२॥

त्रयोविंशोऽध्यायः

'[11]आविर्भावतिरोभावौ ज्ञानस्य ज्ञानिनोऽपि तु । अपेक्ष्याज्ञ-

---

विबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥ ४१ ॥ यत्पादपङ्कजपलाश-
विलासभक्त्या कर्माशयग्रथितमुद्ग्रथयन्ति सन्तः । तत्वं न तद्विमत-
योऽपि विरुद्धमार्गस्रोतोगुणास्तमरणं भज वासुदेवम् ॥ ४२ ॥ यैरीदृशी
भगवतो गतिरात्मवाद एकान्ततो निगमभिः प्रतिपादिता नः । तुष्यन्त्व-
दभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रम् ॥ ४९ ॥
बृहस्पतिर्ब्रह्मवादे आत्मतत्वे स्वयं हरिः । भक्त्या गो-गुरु-विप्रेषु विष्व-
क्सेनानुवर्तिषु ॥ ६४ ॥ ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ।
कीर्त्योर्ध्वगीतया पुम्भिस्त्रैलोक्ये तत्र तत्र ह । प्रविष्टः कर्णरन्ध्रेषु स्त्रीणां
रामः सतामिव ॥ ६५ ॥

त्रयोविंशोऽध्यायः

तस्यानया भगवतः परिशुद्धकर्मसत्वात्मनस्तदनुसंस्मरणानुपूर्व्या ।

SGDF
Sri Gargeshwari Digital Foundation

स्तथा ज्ञानमुत्पन्नमि’ति चोच्यत’इति तन्त्रसारे ॥ ११ ॥ ‘[12]अपरोक्षतया वृत्तिज्ञानभेदनिरीक्षणम्। स्वरूपज्ञानसंस्थित्या ज्ञानत्याग उदीर्यते। स्वरूपज्ञानतः सम्यग्रतिर्विष्णुकथासु चे’ति ब्रह्मतर्के ॥१२॥ [13]ब्रह्मणि भूतः ॥१३॥ ‘[15]अस्येदं कारणमिति ज्ञानमेव विलापनम्। समाधिकाले विज्ञेयं देहादेर्दर्शनात्पुनरि’ति च ॥ १५ ॥ ‘[18]मायेति प्रकृतिश्चेति मायाजीवश्च कथ्यते। शेतेऽनुकेशवं यस्मात्तस्मादनुशयोऽपि च। एतैस्तु नामभिर्वाच्या श्रीर्विष्णोरनपायिनी। तयैवानुशयी जीवस्तथा बद्धो यतः सदा। पुरुषः शयनात्पूर्षु तथा हानादहं स्मृतः। अप्राकृततनुत्वात्तु स्वरूपं हरिरुच्यते। नित्यचिद्दर्शनान्नित्यं ब्रह्म पूर्णत्वतः सदे’ति भागवततन्त्रे ॥१८॥ ‘[25]अनपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैरि’ति शब्दनिर्णये ॥ २५ ॥ इति चतुर्थतात्पर्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

‘[11]राजपुत्रीं शुकीमग्निरावर्तन्तीं प्रदक्षिणम्। आदायान्तरधाद्दानसमये

ज्ञानं विरक्तिमदभून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशम् ॥ ॥११॥ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन। तावत्तु योगगतिभिर्यतिरप्रयत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् ॥ १२ ॥ एवं स वीरप्रवरः संयोज्यात्मानमात्मनि। ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरम् ॥१३॥ उत्सर्पयन्नसून् मूर्ध्नि क्रमेणावेश्य निःस्पृहः। वायुं वायौ क्षितौ कायं तेजस्तेजजस्ययूयुजत् ॥१५॥ इन्द्रियाणि समस्तानि तन्मात्राणि यथोद्भवम्। भूतादिस्तान् समुत्क्षिप्य महत्यात्मनि सन्दधे ॥ १७ ॥ तं सर्वगुणविन्यासं जीवे मायामये न्यधात्। तं चानुशयमात्मस्थमसावनुशयी पुमान्। ज्ञानवैराग्यवीर्येण स्वरूपस्थो ऽयधात्प्रभुः ॥ १८ ॥ अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम्। सर्वात्मना पतिं भेजे यज्ञेशं श्रीवधूरिव ॥ २५ ॥

चतुर्विंशोऽध्यायः

सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम्। यां वीक्ष्य चारुसर्वाङ्गीं

SGDF
Sri Gargeshwari Digital Foundation

मन्मथातुर'इति ब्राह्मे ॥ ११ ॥ [29]मां श्रियम्। 'ऋजवो नाम ये देवा योग्या ब्रह्मपदस्य तु। त एव शतजन्मानि विशेषोपासका हरेः। प्राप्य ब्रह्मपदं पश्चाच्छ्रियं प्राप्यानुमोदिताः। तया ततो हरिं यान्ति वसन्ति हरिसन्निधौ। अनादिकालभक्ताश्च ज्ञानिनस्ते न संशयः। विशिष्टा ज्ञानभक्त्यादौ सर्वजीवनिकायतः। सर्वदापि विशेषेण शतजन्मप्रयत्नतः। स्वपदप्राप्तिरुद्दिष्टा ततो मुक्तिरवाप्यते। तथैव चत्वारिंशद्भिः पदं शैवं च जन्मभिः। विंशद्भिरैन्द्रं दशभिरन्येषामप्युदीरितमि'ति षाड्गुण्ये ॥ २९ ॥ [30]अथ एवमनादिभक्तोऽहं यतः अतः प्रिया यूयम् ॥३०॥ '[33]सर्वान्तर्यामिकत्वात्तु सर्वनामा जनार्दनः। न तु सर्वस्वरूपत्वात्सर्वेशोऽसौ हरिर्यत' इति ब्रह्मतर्के ॥ ३३ ॥ [55]स्वाराज्यस्य इन्द्रादेः ॥५५॥ '[58]सङ्गो भागवतैर्भूयानपुनर्भवमात्रतः। यतो विशिष्टमानन्दं मुक्तौ जनयति स्फुटमि'ति च ॥ ५८ ॥ [59]अङ्घ्र्योर्जातयोः कीर्तितीर्थयोः ॥ ५९ ॥ [61]विश्वस्मिंस्थितमपि न भात्यज्ञानाम् ॥ ६१ ॥ [62]यस्य जीवादिभ्यो भेदबुद्धिः। स दिवा

किशोरीं सुष्ठ्वलङ्कृताम्। परिक्रमन्तीमुद्वाहे चकमेऽग्निः शुकीमिव ॥११॥ स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततः परं हि माम्। अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं(हं) विविधैः कलात्यये ॥ २९ ॥ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा। न मे भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥ ३० ॥ रुद्र उवाच—जितं त आत्मविद्धुर्याः स्वस्तये स्वस्तिरस्तु वः। भवतां राधसे राध्यं सर्वस्मा आत्मने नमः ॥ ॥ ३३ ॥ भवान् भक्तिमतां लभ्यो दुर्लभः सर्वदेहिनाम्। स्वराज्यस्याप्यभिमता एकान्तेनात्मविद्गतिः ॥५५॥ क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम्। भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ ५८ ॥ अथानघाङ्घ्र्योस्तव कीर्तितीर्थयोरन्तर्बहिः स्नानविधूतपाप्मनाम्। भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्सङ्गमोऽनुग्रह एष नस्तव ॥ ५९ ॥ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्न च (व) भाति यत्। तत्त्वं ब्रह्म परंज्योतिराकाश इव विस्तृतम् ॥ ६१ ॥ यो माययेदं पुरुरूपयाऽसृजद्बिभर्ति भूयः क्षपये-

SGDF Sri Gargeshwari Digital Foundation

सम्यग्ज्ञानं सम्यग्ज्ञानिविषया सत्यैवेत्यर्थः । 'रात्रिरज्ञानमुद्दिष्टं सम्यग्ज्ञानं दिवा स्मृतमि'ति शब्दनिर्णये ॥ 'जीवेभ्यो जडतश्चैव भेदज्ञानं हरेः सदा । वास्तवं ज्ञानमुद्दिष्टं तेन मुक्तिरवाप्यत'इति षाड्गुण्ये ।.६२॥ [63]भूतेन्द्रियान्तःकरणैरुपलक्ष्यते ॥ ६३ ॥ [64]सुप्तशक्तिः स्वात्मन्येवाप्तशक्तिः । 'प्रकृतेः स्वाप उद्दिष्टो हर्यन्यस्य त्वदर्शनम् । विशेषेण हरौ चापि रतिर्ज्ञानात्मिका यत'इति सत्यसंहितायाम् ॥६४॥ '[65]अवधारणे घशब्दःस्यात्सारमात्रं तु सारघमि'ति शब्दनिर्णये ॥ ६५ ॥ [68]अस्मादेतद्भवतीत्युपपत्त्यपेक्षां विनापि स्वभावत एव ॥ ६८ ॥ [69]अहरहः क्लेशमोक्षः सुप्तौ । तावद्वेदेत्याक्षेपो दौर्लभ्यज्ञापनार्थम् ॥ ६९ ॥ इति चतुर्थतात्पर्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

'[8]यथावत्कर्म कर्तुस्तु ज्ञानसाहाय्यकारकम् । अन्यथाकुर्वतः कर्म निरयाय भविष्यति । तथापि कर्म निन्दन्ति न यतः कर्तुमञ्जसा ।

दविक्रियः । यद्भेदबुद्धिः सदिवाऽऽत्म संस्थया तमात्मतन्त्रं भगवन्प्रतीमहि ॥ ६२ ॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये । भूतेन्द्रियान्तःकरणोपलक्षणं वेदे च तन्त्रे च त एव कोविदाः ॥ ॥ ६३ ॥ त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्वतमो विभिद्यते । महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः ॥ ६४ ॥ सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन । अथो विदुस्त्वां पुरुषं सन्तमत्र भुङ्क्ते हृषीकैर्मधु सारघं यतः ॥ ६५ ॥ कस्त्वत्पदाब्जं विजहाति पण्डितो यत्ते पुमानप्ययमब्जकेतनः । विशङ्कयाऽस्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश ॥६८॥ यत्स्पृष्टोऽहरहर्मुक्तक्लेशः शेतेऽमृताम्बुधौ । तावद्वेदाथ तत्तेऽङ्घ्रिं जनोऽनुसरते च तत् ॥ ६९ ॥

पञ्चविंशोऽध्यायः

नारद उवाच—श्रेयस्त्वं कतमद्राजन् कर्मणाऽऽत्मन ईहसे । दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह (ये)चेष्यते ॥ ४ ॥ एते त्वां संप्रतीक्षन्ते स्मरंतो वैशसं तव । सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ॥ ८ ॥

SGDF
Sri Gargeshwari Digital Foundation

शक्यं ज्ञानफलस्यापि बहुत्वान्मोहनाय चे'ति ब्रह्माण्डे ॥ ८ ॥ '[10]देव-जीवाभिमानी तु ब्रह्मैव तु चतुर्मुखः। मानुषाणां तु जीवानामभिमानी पुरञ्जनः। स तु राजा हरेः पुत्रस्त्वासुराणां कलिः स्वयम्। जीव-संसृतिवत्तस्मात्पुरञ्जनकथापि तु। तस्माज्जीवसृतिज्ञप्त्यै पुरञ्जनकथां मुनिः। नारदोऽश्रावयद्विद्वान्नृपं प्राचीनबर्हिषम्। प्रायस्तु तत्कथा जीवे स्थिता प्रत्येकशोऽपि तु। प्रत्येकं यत्तु युज्येत तदुन्नेयं यथा तथा। उक्तं भागवतेऽप्येतत्पुराणे यावदिष्यते। प्रत्येकशस्तु जीवानां तदन्य-त्तस्य केवलमि'ति तन्त्रभागवते ॥१०॥ '[21]ये पुरञ्जनभृत्याद्या भार्याद्याः सर्व एव च। तेऽपि मानुषबुद्ध्यादेर्विज्ञेया अभिमानिनः। गायत्र्या-द्यास्तु देवानां तेऽपि चैतेषु संस्थिताः। अलक्ष्मीद्वापराद्यास्तु आसुरा-स्तेऽपि मानुषा' इति च ॥ २१ ॥ '[52]दक्षिणश्रोत्रमार्गेण देवलोकं व्रजत्यसौ। वामश्रोत्रेण पितॄणामिति वेदविदो विदुरि'ति प्रवृत्ति-तन्त्रे ॥ ५२ ॥ इति चतुर्थतात्पर्ये पञ्चविंशोऽध्यायः ॥ २५ ॥

अत्र ते कथयिष्येऽहमितिहासं पुरातनम्। पुरञ्जनस्य चरितं निबोध गदतो मम ॥९॥ आसीत्पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः। तस्या-विज्ञातनामाऽऽसीत्सखा विज्ञातचेष्टितः ॥ १० ॥ यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम्। भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः ॥ २० ॥ तेषां परिवृढो राजन् सर्वेषां बलिमुद्वहन्। सस्त्रीकाणां सखा तस्या बहुरूपोऽग्रणीः स्त्रियाः ॥ २१ ॥ पञ्चद्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा। पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ॥ ४७ ॥ खद्योताविर्मुखी च प्राग्द्वारावेकत्र निर्मिते। विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥ ४८ ॥ नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते। अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥ ४९ ॥ मुख्यानाम पुरस्ता-द्द्वास्तयाऽऽपणबहूदनौ। विषयौ याति पुरराट् रसज्ञविपणान्वितः ॥ ॥५०॥ पितृभूर्नाम पुर्या द्वार्दक्षिणेन पुरञ्जनः। राष्ट्रं दक्षिणपाञ्चालं याति श्रुतधरान्वितः ॥ ५१ ॥ देवभूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः। राष्ट्र-मुत्तरपाञ्चालं याति श्रुतधरान्वितः ॥ ५२ ॥

SGDF
Sri Gangeshwari Digital Foundation

षड्विंशोऽध्यायः

6अलुब्धो लोकोपकारार्थं घ्नन्नात्मार्थादधिकमपि हन्यात् । 'उपकारः सतां येन तत्कृत्वा नैव दुष्यति । अतीव निन्दितमपि बहुहिंसायुगेव वा । अथवा ज्ञानिनः कर्म न दुष्टमपि लिप्यत'इत्यध्यात्मे ॥ ॥ ६ ॥ इति चतुर्थतात्पर्ये षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

'25अलौकिकं च शास्त्रीयं कर्तव्यं लौकिकं कुतः । लोकार्थं शास्त्रहा याति निरयं त्वितरः सुरानि'ति पाद्मे ॥ २५ ॥ इति चतुर्थतात्पर्ये सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः

'40स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती'ति श्रुतिप्रसिद्धः । स्वप्न इवेति दृष्टान्तत्वेनोच्यते । स्वप्ने हि जीवस्यास्वातन्त्र्यं प्रसिद्धम् । अतस्तत्र परमेश्वराधीनत्वं प्रसिद्धमेव । अतो जीवव्यतिरिक्त

षड्विंशोऽध्यायः

आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः । न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥ ५ ॥ तीर्थेषु श्रुतिदुष्टेषु राजा मेध्यपशून् वने । यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥ ६ ॥ य एवं कर्म नियतं विद्वान्कुर्वीत वा न वा । कर्मणा तेन राजेन्द्र ज्ञानेन स न लिप्यते ॥७॥

सप्तविंशोऽध्यायः

द्वाविमावनुशोचन्ति बालावसदवग्रहौ । यल्लोकशास्त्रोपनतं न राति न तदिच्छति ॥२५॥ अथो भजस्व मां भद्र भजतीं मे दयां कुरु । एतावान् पौरुषो धर्मो यदार्ताननुकम्पते ॥ २६ ॥

अष्टाविंशोऽध्यायः

स व्यापकतयाऽऽत्मानं व्यतिरिक्ततयाऽऽत्मनि । विद्वान् स्वप्न

SGDF
Sri Gargeshwari Digital Foundation

ईश्वरः सिद्धः । 'स्वप्नो यतो न स्वतन्त्रस्तत्र तद्दर्शकः परः । जीवादन्यस्तु विज्ञेयः स विष्णुरवधार्यतामि'ति वाराहे ॥४०॥ [57]इन्द्रियाणि यत्र सङ्गृह्यन्ते स गोलकेन्द्रियसङ्ग्रहः ॥ ५७ ॥ '[62]जीवसत्ताप्रदत्वाच्च सदृशत्वाच्च केशवः । कथ्यते तदभेदेन न तु जीवः स्वरूपत'इति च ॥ ॥ ६२ ॥ इति चतुर्थतात्पर्ये अष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

'[20]सुखवद्दूरतो दृश्यं तत्काले दुःखमेव यत् । मृगतृष्णेत्यतः प्राहुर्भोगं वैषयिकं बुधा' इति शब्दनिर्णये ॥ २० ॥ [33]तत्प्रतिक्रियाऽपि दुःखमेव ॥ ३३ ॥ '[36]संसृतेः स्वप्नसाम्यं तु यथार्थज्ञानवर्जनमि'ति च । 'जाग्रत्यविद्यमानं तु देहात्मत्वादि केवलम् । अविद्यमानं स्वप्ने तु जाग्रत्त्वज्ञानमेव चे'ति पाड्गुण्ये ॥३६॥ '[43]प्रजापतिपतिर्ब्रह्मा विरिञ्चश्चेति कथ्यत' इति शब्दनिर्णये ॥ ४३ ॥ '[46]मन्त्रलिङ्गैर्व्यवच्छिन्नं वेदशब्दोक्तमात्रकम् । वेदो वदन्नपि हरिं न सम्यग्वक्ति कुत्रचित् । नारोहयत्यनुभवमप्रसिद्धस्वरूपतः । अथाप्यनु-

---

इवामृश्य साक्षिणं विरराम ह ॥ ४० ॥ पञ्चेन्द्रियार्था आरामा द्वारो घ्राणादयः प्रभो । तेजोऽबन्नानि कोष्ठानि गोलकेन्द्रियसङ्ग्रहः ॥ ५७ ॥ अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भो । न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥ ६२ ॥

एकोनत्रिंशोऽध्यायः

पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः । आकूतिर्विक्रमो बाह्ये मृगतृष्णां प्रधावति ॥२०॥ दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु । जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ॥३३॥ नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् । द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥ ३५ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते । मनसा लिङ्गरूपेण स्वप्ने विचरतो यथा ॥ ३६ ॥ प्रजापतिपतिः साक्षाद्भगवान् गिरिशो मनुः । दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥ ४३ ॥ शब्दब्रह्मणि दुष्पारे चरन्त

SGDF
Sri Gurgeshwari Digital Foundation

भवारोहः प्रसन्ने केशवे भवेत् । किञ्चिदेव सुसम्यक् च स्वयं त्वनुभवत्यमुमि'ति वाराहे ॥ ४६ ॥ '[49]यदा त्वनुभवी भूयाच्छब्दमात्रानुरोधनम् । त्यक्त्वाऽथ तं विदुः प्राज्ञास्त्यक्तवेद इति स्म ह । यदैव त्यक्तवेदः स्यादथास्मान्मुच्यते भयात् । प्रायस्तु वैदिका एव रुद्राद्या अपि वै पुरा । वैदिकस्त्यक्तवेदश्च ब्रह्मैवैकः प्रजापतिः । ततस्तु केशवं भक्त्या सम्पूज्य बहुजन्मसु । त्यक्तवेदत्वमापन्नाः प्रसादात्परमेष्ठिन'इति महासंहितायाम् । 'केवलं वेदशब्देन जानन्वैदिक उच्यते । वेदं विनाप्यनुभवाज्ज्ञानंस्तु त्यक्तवैदिक'इत्यध्यात्मे ॥ 'तत्त्वं वेदानुसारेण चिन्तयन्वैदिको भवेत् । वेद ऊहामनुसरेद्यस्य स त्यक्तवैदिक'इति षाड्गुण्ये ॥ ४९ ॥ '[57]चित्तिर्बुद्धिरिति ज्ञेया चित्तं तु स्मृतिकारणमि'ति शब्दनिर्णये ॥ ५७ ॥ '[76]प्राणेन्द्रियान्तःकरणभेदेन त्रिविधं मतम् । पञ्च पञ्चैव ते सर्वे प्राणबुद्धीन्द्रियाणि च । कर्मेन्द्रियाणि च तथा तस्मात्पञ्चविधं स्मृतम् । लिङ्गं षोडशकं प्राहुर्मनसा सह तत्पुनरि'ति ब्राह्मे ॥७६॥ '[82]देहादिव्यतिरेकेण चिद्रूपोऽहमिति स्फुटम् । सदैवानुभवो भक्तिर्विष्णौ तद्दर्शनादनु । यस्यासौ मुच्यते क्षिप्रं संसारान्नात्र संशय' इति हरिवंशेषु ॥ ८२ ॥ '[83]संसारस्थमिदं सर्वमनित्यत्वाद्वृथा यतः । अतः प्राहुः स्वप्नसमं प्राज्ञा जगदिदं मृषे'ति विष्णुसंहितायाम् । 'सुषुप्तिस्वप्नयोश्चैव स्वर्गव्योम्नोस्तथैव च । अन्योन्यनामता ज्ञेया मनोबुद्ध्योस्तथैव चे'ति शब्दनिर्णये ॥ अतो भूतं भव-

---

उरुविस्तरे । मन्त्रलिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुः परम् ॥ ४६ ॥ यदा यस्यानुगृह्णाति भगवानात्मभावितः । स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ४९ ॥ स त्वं विचक्ष्व मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्तिम् । जह्यङ्गनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ॥५७॥ भक्तिः कृष्णे दया जीवेष्वकुण्ठज्ञानमात्मनि । यदि स्यादात्मनो भूयादपवर्गस्तु संसृतेः ॥ ८२ ॥ अदृष्टं

SGDF
Sri Gangeshwari Digital Foundation

द्भविष्यच्च स्वप्न इत्यर्थः । 'रहो ब्रह्म तथा यज्ञः स्वः सत्यमिति गीयत' इति च ॥ ८३ ॥ इति एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

'[3]पुरेषु त्वञ्जनाज्जीवः पुरञ्जन इतीरितः । पुराणां जननाद्विष्णुर्व्यञ्जकत्वं तयोरपी'ति तन्त्रभागवते ॥ ३ ॥ [17]दिव्यवर्षसहस्राणामिति सहस्रशब्दो बहुत्ववाची । 'मानुषाणां वत्सराणां लक्षद्वादशकं पुरा । प्रचेतोभिरियं पृथ्वी पालिताऽव्याहतेन्द्रियैरि'ति ब्रह्माण्डे ॥ १७ ॥ [20]यज्ञो ब्रह्म विष्ण्वाख्यं ब्रह्म यथानुभवं न व्यवह्रियते । 'सूक्ष्मेण मनसा विज्ञो वाचा वक्तुं न शक्नुम'इति भारते ॥२०॥ [26]सु अनिष्ठमनसि । 'अनवस्थितबुद्धीनां द्वितीयं दृश्यते हरेः । सम्यक्स्वस्थितबुद्धीनामिदं सर्वं हरेर्वश'इति च । 'नित्यं गृहीताः सत्वाद्या विग्रहाश्च त्रयः सदा । ज्ञानानन्दात्मकास्ते तु विग्रहा निर्गुणास्तथा । द्वौ तत्र ब्रह्मरुद्रस्थावेको वैकुण्ठधामग' इति प्रवृत्तसंहितायाम् ॥२६॥ '[24]हरणाज्ज्ञानरूपत्वाद्धरिमेधा विभुः स्मृत'इति च । 'हरिः सर्वगुणात्मत्वात्सत्व इत्यभिधीयत'इति षाड्गुण्ये ॥ २४ ॥ इति चतुर्थतात्पर्ये त्रिंशोऽध्यायः ॥ ३० ॥

दृष्टवन्नक्षयेद्भूतं स्वप्नवदन्यथा । भूतं भवद्भविष्यच्च सुप्तं सर्वैरहो रहः ॥ ८३ ॥

त्रिंशोऽध्यायः

मैत्रेय उवाच—प्रचेतसोऽन्तरुदधौ पितुरादेशकारिणः । जपयज्ञेन तपसा पुरञ्जनमतोषयन् ॥ ३ ॥ दिव्यवर्षसहस्राणां सहस्रमहतौजसः । भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम ॥ १७ ॥ न व्यवह्रियते यज्ञो ब्रह्मैतद्ब्रह्मवादिभिः । न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः ॥ २० ॥ शुद्धाय शान्ताय नमः स्वनिष्ठमनस्यपार्थे विलसद्द्वयाय । नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥ २३ ॥ नमो विशुद्धसत्वाय हरये हरिमेधसे । वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥२४॥

SGDF
Sri Gargeshwari Digital Foundation

एकत्रिंशोऽध्यायः

'[12]पारिव्राज्यं ब्रह्मसत्रं न्यास इत्यभिधीयत'इत्यभिधानम् ।। सर्वभूतात्मनि हरौ मेधा यत्र तद्ब्रह्मसत्रं सर्वभूतात्ममेधः । 'हरिमेधास्तु संन्यासो हरौ मेधाऽत्र यद्भवेदि'ति षाड्गुण्ये ।। २ ।। [13]तावत्पर्यन्तमेव फलमित्यवधिः ।।१३।। '[16]आत्मभावः शरीरे तु द्रव्यभ्रम उदाहृतः । क्रियाभ्रमस्त्वहं कर्ता मदीयानीन्द्रियाणि तु । कारकभ्रम इत्युक्तस्त एते विभ्रमा यदा । श्वासादिवृत्तिलोपेन प्राणा उद्योगिनस्तदा । विलीयन्ते प्राणभक्त्या नित्यं स्वापवतां स्फुटम् । उद्योग एव जाग्रत्स्याद्योगिनां मुक्तिसिद्धय'इत्यध्यात्मे ।। १६ ।। '[18]पूर्णो विष्णुः स एवैक इति भावो य ईरितः । आत्मैकभाव इति तं विदुर्ब्रह्मात्मदर्शिन'इति सत्यसंहितायाम् ।। १८ ।। [19]सङ्कल्पश्च विकल्पश्च ऋते विष्णुप्रसादतः । नैव सम्भवतो विष्णोः समाभावात्तु सोऽद्वय इति तन्त्रभागवते ।।१९।। [22]अधनाश्च त एवात्मधनाश्चाधनात्मधनाः ।। २२ ।। '[23]श्रियं देवांश्च

एकत्रिंशोऽध्यायः

मैत्रेय उवाच—तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् । स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात् ॥ १ ॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा । प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ॥ २ ॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थितः । सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥ १३ ॥ एतत्परं तज्जगदात्मनः पदं सकृद्विभातं सवितुर्यथा प्रभा । यथाऽसवो जाग्रति सुप्तवृत्तयो द्रव्यक्रियाकारकविभ्रमात्ययः ॥ १६ ॥ तेनैकमात्मनमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् । स्वतेजसाध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १८ ॥ निरस्तसङ्कल्पविकल्पमद्वयं द्वयापवादो परमोपलम्भनम् । अनादिमध्यान्तमजस्रनिर्वृतिं संज्ञप्तिमात्रं भजतामुया दृशा ॥१९॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः । श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥ २२ ॥ श्रियमनुचरतीं तदर्थिनश्च

SGDF
Sri Gurgeshwari Digital Foundation

भृत्यत्वान्मनुते बहु केशवः। नात्मार्थाय यतस्ते तु भक्त्या सर्वोत्तमोत्तमा'इति च ॥ २३ ॥ '[26]सर्वोत्तमत्वाद्विष्णुर्हि माय इत्येव शब्द्यत' इति व्योमसंहितायाम्। 'देवानत्युत्तमन्मुनीन्विना के शैंशुमारकम्। हरेर्ग्रहं प्रविष्टास्तु ध्रुवो देवाश्च तद्गता'इति मात्स्ये ॥ २६ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवतचतुर्थस्कन्धतात्पर्ये एकत्रिंशोऽध्यायः ॥ ३१ ॥ समाप्तश्चतुर्थस्कन्धः ॥

पञ्चमः स्कन्धः

प्रथमोऽध्यायः

॥ हरिः ॐ ॥ '[19]विहितो यस्य यो धर्मो विष्णुना प्रभविष्णुना। तेन मुक्तिर्भवेत्तस्य तं गुरुर्वेद सर्वविदि'ति प्रवृत्तसंहितायाम् ॥ १६ ॥ '[31]पूर्वसृष्टान् रथावृत्त्या स्थूलांश्चक्रे प्रियव्रतः। समुद्रांस्तेन तत्कर्तेत्याहुरेनं प्रियव्रतमि'ति गारुडे ॥ ३१ ॥ इति पञ्चमस्कन्धतात्पर्ये प्रथमोऽध्यायः ॥ १ ॥

द्विपदपतीन् विबुधांश्च यः स्वपूर्णः। न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत्पुमान् रसज्ञः ॥ २३ ॥ त्यक्त्वा स्त्रैणं च तं गच्छन् दृष्टो मे पथ्युदारधीः। पञ्चवर्षो मदादेशैः संराध्य पुरुषेश्वरम् ॥ २५ ॥

पञ्चमः स्कन्धः

प्रथमोऽध्यायः

गद्यं ॥ या वा इह तद्रथचरणनेमिकृत परिखास्ताः सप्तसिन्धव आसन् यत एव कृताः सप्त भुवो द्वीपाः ॥ ३१ ॥

SGDF
Sri Gargeshwari Digital Foundation

द्वितीयोऽध्यायः

'[17]परिहासप्रलापादिष्वनर्था वाग्भवेत्क्वचिदि'ति शब्दनिर्णये ॥ ॥ १७ ॥ इति पञ्चमस्कन्धतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

'[18]नास्ति विष्णोः सम इति जानन्तोऽप्यृषयः सदा ॥ तज्ज्ञापनाय लोकानामन्येषां प्रार्थयन्सममि'ति ब्रह्माण्डे ॥ १८ ॥ इति पञ्चमतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

'[3]दुष्टानां मोहनार्थाय यज्ञ इन्द्रपदे स्थितः । पस्पर्ध ऋषभेणैव स्वरूपेण हरिः स्वयमि'ति वाराहे ॥ ३ ॥ इति पञ्चमतात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥

द्वितीयोऽध्यायः

का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायाऽसि कापि भगवत्परदेवतायाः। विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान् मृगयसे विपिने प्रमत्तान् ॥ ८ ॥

तृतीयोऽध्यायः

श्री भगवानुवाच—गद्यं ॥ अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्य आत्मजो मया सदृशो भूयादिति, ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १८ ॥

चतुर्थोऽध्यायः

यस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष, तदवधार्य भगवान् ऋषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमज(माज्ञ)नाभं नामाभ्यवर्षीत् ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

पञ्चमोऽध्यायः

[5]क्रियाफलं तावदेव । कर्मात्मकं कर्मवशम् ॥५॥ [6]अविद्यया प्रयुङ्क्ते ॥ ६ ॥ '[8]ब्रह्माद्या याज्ञवल्क्याद्या मुच्यन्ते स्त्रीसहायिनः । बध्यन्ते केचनैतेषां विशेषं च विदो विदुरि'ति सत्यसंहितायाम् ॥ ८ ॥ '[10]आत्मनो विहितं कर्म वर्जयित्वाऽन्यकर्मणः । कामस्य च परित्यागो निरीहेत्याहुरुत्तमा'इति च ॥ १० ॥ '[12]सर्वस्मादुत्तमो विष्णुरिति ज्ञानमुदाहृतम् । प्रतिजीवं येन मुक्तिस्तद्धि ज्ञानं विदां मतमि'ति च । 'ज्ञानं विष्णोरुत्तमत्वे तदेव प्रतिपूरुषम् । विशेषेण तु विज्ञानं तच्च जानाति सर्ववित् । द्वात्रिंशल्लक्षणैर्युक्तस्तीक्ष्णदंष्ट्रश्च सौम्यदृक् । घोर-रुक्चेति पुरुषः स सर्वज्ञ उदाहृत'इत्यध्यात्मे ॥ 'षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः । सप्तपादश्चतुर्हस्तः स देवैरपि पूज्यत'इति वायु-प्रोक्ते ॥ न्यग्रोधमण्डलो व्यामो बाहू न्यग्रोध उच्यत'इति च ॥१२॥ '[20]नाभिरित्यथ नाम स्याद्धरेः सर्वाश्रयो यत'इति कौर्मे । तत्तस्य मम शुश्रूषणम् ॥ २० ॥ [22]द्विजदेवानां देवः ॥ २२ ॥ [26]विविक्तदृष्टि-

---

पञ्चमोऽध्यायः

पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् । तावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥ ५ ॥ पुंसः स्त्रिया मिथुनीभाव एष तयोर्मिथो हृदयग्रन्थिमाहुः । यतो गृहक्षेत्रसुताप्त वित्तैर्जनस्य मोहोऽयमहं ममेति ॥ ८ ॥ हरौ गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च । सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ मत्कर्मभिर्मत्कथया च नित्यं मत्पादसङ्गाद्गुण-कीर्तनान्मे ॥ १० ॥ सच्छ्रद्धया ब्रह्मचर्येण शश्वदसम्प्रमादेन जयेन वाचाम् । सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ॥ १२ ॥ तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सुनाभम् । अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २० ॥ देवासुरेभ्यो मघवान् प्रधानो दक्षादयो ब्रह्मसुताश्च तेषाम् । भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥२२॥ सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि

SGDF
Sri Gargeshwari Digital Foundation

जीवानां धिष्ण्यतया परमेश्वरस्य भेददृष्टिः । 'उपपादयेत्परात्मानं जीवेभ्यो यः पदेपदे । भेदेनैव न चैतस्मात्प्रियो विष्णोस्तु कश्चने'ति पाद्मे ॥ 'यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रिय'इति च ॥ २६ ॥
इति पञ्चमस्कन्धतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

'[2]महैश्वर्यस्वरूपो हि भगवान्नृषभो विराट् । नैश्वर्याणि स्वकीयानि ख्यापयामास सर्ववित् । उत्तमानां ज्ञापनार्थं धर्मतत्त्वस्य केशवः । तेषामैश्वर्यभोगे हि मनः सक्तिं व्रजेद्यदि । आनन्दो मुक्तिगो ह्रासं विकर्मकरणाद्व्रजेत् । धर्माधर्मविहीनोऽपि भगवानृषभस्ततः । तेषां धर्मस्थापनार्थं नाविश्चक्रे परां स्थितिम् । देवानां नाशुभाद्ध्रासः शुभात्काचित्सुखोन्नतिः । आधिकारिकजीवानामेवमन्येषु तद्द्वयम् । अल्पाधिकारिणां तत्र ह्रासोऽपि भवति ध्रुवम् । अशुभाभावजोन्नाहो महाधीकारिणामपि । अशुभे कृते न भवति तारतम्याच्च स स्मृतः । प्रजापाश्च तथा देवा महाधीकारिणः स्मृताः । ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम् । गन्धर्वाणां तथा राज्ञां विंशदन्यासु जातिषु । अल्पाधिकारिणः प्रोक्ता अनधीकरिणः पर'इति ब्रह्माण्डे ॥ २ ॥

भूतानि सुता ध्रुवाणि । सम्भावितव्यानि पदेपदे वो विविक्तदृष्टिस्तदुताईणं मे ॥ २६ ॥

षष्ठोऽध्यायः

इति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽधिगतपरममहानन्दानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेवे आत्मनोऽव्यवधानेनानन्तरोदरभावेन सिद्धसमस्तार्थैः परिपूर्णो योगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा हृदयेन अभ्यनन्दत् ॥ ५-५-३३ ॥ ऋषिरुवाच—सत्यमुक्तं किन्त्विह वा एके मनसो विसम्भमनवस्थानस्य घटकिराट इव न

SGDF
Sri Gangeshwari Digital Foundation

'[6]विष्णोः कलेवरत्यागो भूत्यागोऽन्यो न विद्यते। कलेवरत्यागोऽन्येषां पञ्चत्वं समुदीरितमि'ति कौर्मे ॥ अनर्थान्तरभावेन अर्थान्तरं नास्तीति मनसा ॥ ६ ॥ [7]अभिमानाभासेन अभितो ज्ञानप्रकाशेन ॥ ७ ॥ '[9]ज्ञानानन्दात्मको देहो ऋषभस्य महात्मनः। तादृशेनैव मनसा क्रमंस्तु कुटचाचले। दावाग्निमनुविश्याथ तत्रस्थः प्रादहज्जगत्। एवमग्नेरभिव्यक्तस्तस्थौ विष्णुः सनातनः। ऋषभत्वेन सङ्गोप्य धर्मानद्यापि तत्रगः। आस्ते स वासुदेवात्मा वासुदेवोऽहमित्यजः॥ सदा स्थितः [10]स्थितिं तां तु सुश्रावार्हो दुरात्मवान्। पूर्वं तु पौण्ड्रको नाम वासुदेवः सुदुर्मतिः। जातिस्मरो द्विधा शास्त्रं पाषण्डं निर्ममे नृपः। एकं तु वासुदेवाख्यं वासुदेवोऽहमित्यपि। कुत्सितं वासुदेवत्वप्रतिपादकमात्मनः। लोकार्थं चापरमपि चकारार्हतनामकम् ॥ ९ ॥ '[11]तत्प्रशिष्यः क्रमुर्नाम न जानंस्तन्मतं परम्। वासुदेवात्मतां सर्वजीवानामवदत्कुधीः। क्रम्वाख्यं शास्त्रमकरोदभेदप्रतिपादकम्। कुशास्त्रं सर्ववेदानां विरुद्धं तामसालयम्। तद्दृष्ट्वाऽद्यापि वर्तन्ते वर्तिष्यन्ति कलौ तथा। अशौचा अव्रताचारा वासुदेवोऽहमित्यपी'ति ब्राह्मे ॥ ११ ॥ '[14]विशेषाद्भारते पुण्यं चरेयुः पापमप्यथ। तथैव भगवद्भक्तिं पृथिव्यां

सङ्गच्छति ॥२॥ अथैवमखिललोकपालललामो विलक्षणो जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्स्वभावो योगिनां साम्परायविधिमनुशिक्षयन् स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥ तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनो देह इमां जगतीमभिमानाभासेन चङ्क्रममाणः ॥ ७ ॥ अथ समीरवेगविधुतवेणुनिकर्षोपजातो दावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥९॥ येन ह वा कलौ मनुजापसदा देवमाया विमोहिताः स्वविधिनियोगशौचाचारविहीना देवहेलनादीन्यपव्रतानि निजेच्छया गृह्णाना अस्नानाचमनाशौचकेशोल्लुञ्छनादीनि कलिनाऽधर्मबहुलोपहतधियो ब्रह्म ब्राह्मण यज्ञपुरुष लोकविदूषकाः प्रायेण भविष्यन्ति ॥११॥ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत्।

SGDF
Sri Gangeshwari Digital Foundation

नान्यवर्षगा' इति ब्रह्माण्डे ॥ १४ ॥ [16]योगमायां योगमायाफलं बाह्यम् । 'नित्योदस्ता योगशक्तिरनपेक्ष्यं फलं यतः । नित्यस्वरूपभूतापि बहिःफलविवर्जनात् । अकर्मेत्युच्यते यद्वन्मोक्षः फलविवर्जनादि' ति पाद्मे ॥ १६ ॥ '[18]नाद्रियन्ते तु ये मोक्षं पूर्वं तेषां परं सुखम् । स्वयोग्यं व्यज्यते मुक्तौ तच्चोक्तं तारतम्ययुगि' ति व्योमसंहितायाम् ॥ १८ ॥ '[19]ब्रह्मणोऽन्यस्य नो पूर्णां दद्याद्भक्तिं जनार्दनः । मुक्तिं ददाति सर्वेषां मुक्तानां को ह्यधीशिते' ति ब्रह्मतर्के ॥ १९ ॥

इति पञ्चमतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

'[13]परोरजाऽरजस्कत्वात्त्रयीड्यत्वात्त्रयीसुतः । गुणात्ययात्तुरीयश्च जातवेदाश्च सर्ववित् । हंसो दुःखादिहानेन जीवेशत्वाच्च गृध्रराट् । कालः सर्वनियन्तृत्वात्परमात्मा प्रकीर्तित' इति तन्त्रनिरुक्ते ॥ १३ ॥

इति पञ्चमतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारयन्ति ॥१४॥ को न्वस्य काष्ठामपरोऽनुगच्छेत् मनोरथेनाप्यभवाय योगी । यद्योगमायां स्पृहयन्त्युदस्तां ह्यसत्तया येन कृतप्रयत्नाः ॥ १६ ॥ यस्यामेव कवय आत्मानमविरतविविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परयानिर्वृत्त्या ह्यापवर्गिकमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नैवाद्रियन्ते भागवतत्वेनैव परिसमाप्तसर्वार्थाः ॥१८॥ राजन् पतिर्गुरुरलं भवतां यदूनां दैवप्रियः कुलपतिः क्व च किङ्करो वः । अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥१९॥

सप्तमोऽध्यायः

परोरजः सवितर्जातवेदो देवस्य भर्गो मनसेदं जजान । सुरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिराभिमः ॥ १३ ॥

SGDF
Sri Gargeshwari Digital Foundation

दशमोऽध्यायः

[9]अशेषभगवत्प्रियाणां निकेतः स एव भरतो मानुषापेक्षया। 'तत्कालस्थितभक्तेषु मानुषेष्वृषभात्मजः। वरोऽपि धिक्कृतो राज्ञा सुहृदा वैष्णवेष्वपी'ति गारुडे ॥९॥ '[10]भरणादिकृद्धरिरिति चिन्तयन्नृपमब्रवीदि'ति च ॥ १० ॥ [11]देहेन जातस्य देहाभिमानिनः। 'देहमानी देहजातो विदेहो मानवर्जित'इति च ॥ ११ ॥ '[12]प्राणयुक्तेररत्या च जडं जीवन्मृतं स्मृतमि'ति च। स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यता ॥ १२ ॥ '[13]देवेषु तन्नियत्या च त्वदादेर्व्यावहारिकम्। मनुष्येषु विशेषः को व्यवहारमृते वद। व्यत्यासान्न हि देवेषु व्यत्यासः स्वामितां गत'इति च ॥ १३ ॥ ([26]ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथञ्चन। न पुनः सदवज्ञाने कल्पकोटिशतैरपि)। स्वतो महदवज्ञानाद्रुद्रोऽप्यात्मानमादहेदि'ति च ॥ २६ ॥ इति पञ्चमतात्पर्ये दशमोऽध्यायः ॥ १० ॥

दशमोऽध्यायः

एवं बह्वबद्धमभिभाषमाणं नरदेवाभिमानिनं रजसा तमसाऽनुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह ॥ ९ ॥ ब्राह्मण उवाच—त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः। गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति चासौ न विदां प्रवादः ॥ १० ॥ स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड् भयं कलिरिच्छा जरा च। निद्राऽरतिर्मन्युरहं मदश्च देहेन जातस्य हि मे न सन्ति ॥११॥ जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम्। स्वस्वामिभावो ध्रुव एष यत्र तर्ह्युच्यतेऽसाविति कृत्ययोगः ॥ १२ ॥ विशेषबुद्धेर्विवरं मनाक् च पश्यामि यत्र व्यवहारतोऽन्यत्। क ईश्वरस्तत्र किमीशितव्यमथाऽपि राजन् करवाम किं ते ॥ ॥ १३ ॥ न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि। महद्विमानात् स्वकृतात् हि मादृक् धक्षत्यदूरादपि शूलपाणिः ॥ २६ ॥

SGDF
Sri Gurgeshwari Digital Foundation

एकादशोऽध्यायः

'[2]न वेदेष्वल्पबुद्धीनां ब्रह्मतत्त्वं समीक्ष्यते । महाबुद्धिस्तु वेदेषु पश्येद्ब्रह्मैव केवलमि'ति च ॥ २ ॥ [5]स मायारचित अन्तरात्मा मनः ॥ ५ ॥ '[7]क्षेत्रवित्तु हरिः प्राणः साक्षी ताभ्यां पुमान्सरेदि'ति च ॥ ७ ॥ [9]पदं विषयम् । 'एकादशेन्द्रियद्वारा स्युरेकादशवृत्तयः । शब्दाद्यास्तदभीमानास्तदिच्छाश्चैव पञ्चशः । स्पर्शान्तर्भावतः कर्मखानां नैव पृथग्गतिः ॥९॥ [10]एकादशैव चेष्टाः स्युरिन्द्रियाणां पृथक्पृथक् । गोलकास्तदधिष्ठानं चैकादशनिगद्यते ॥ १० ॥ '[11]एष संसृतिसंभारो द्वादशैवाथवा भवेत् । दशकं विषयाणां च ममाहमिति च द्वयम् । द्वयमेव ममाहं वा संसृतिस्त्वहमेव वे'ति च ॥ अर्तिरुपस्थविषयः ॥११॥

एकादशोऽध्यायः

ब्राह्मण उवाच—अकोविदः कोविदवादवादान् वदस्यथो नातिविदां वरिष्ठः । न सूरयो हि व्यवहारमेनं तत्वावमर्शेन सहामनन्ति ॥१॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु । न वेदवादेषु हि तत्ववादः प्रायेण(शु)सिद्धो नु चकास्ति साधु ॥ २ ॥ यावन्मनो रजसा पूरुषस्य सत्वेन वा तमसा वाऽनुरुद्धम् । चेतोभिराकूतिभिरातनोति निरङ्कुशः कुशलं चेतरं वा ॥४॥ स वासनात्मा विषयोपरोक्तो गुणप्रवाहो विकृतः षोडशात्मा । चित्रं पृथङ्नामभी रुपमेदमन्तर्बहिष्ठः स्वपुरैस्तनोति ॥ ५ ॥ दुःखं सुखं व्यतिमिश्रं च तीव्रं कालोपपन्नं फलमाव्यनक्ति । आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटम् ॥ ६ ॥ तावानयं व्यवहारः सदा वै क्षेत्रज्ञसाक्ष्योर्भवति स्थूलसूक्ष्मः । तस्मात् मनोलिङ्गमदो वदन्ति गुणागुणस्यास्य परावरस्य ॥७॥ गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् । यथा प्रदीपो घृतवर्तिमाश्थितो श्थितिं सधूमां भजति ह्यन्यदा स्वम् ॥ ८ ॥ पदं तथा गुणकर्मानुबद्धं बहिर्मनः श्रयतेऽन्यत्र तत्वम् । एकादशासन्मनसोऽस्य वृत्तीराकूतयः पञ्च धियोऽभिमानाः ॥९॥ मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमिम् । गन्धाकृतिस्पर्शरसश्रवांसि विसर्गगत्यर्त्यभिजल्पशिल्पाः ॥१०॥ एकादशं स्वीकरणं ममेति मायामहं द्वादश-

SGDF
Sri Gargeshwari Digital Foundation

[12]द्रव्यं देहादि । स्वभावो योग्यता । जीवस्य क्षेत्रज्ञतः स्युः मिथः स्वतश्च न स्युः ॥ १२ ॥ [14]स्वमाययाऽऽत्मन्व्यवधीयमानः स्वेच्छया स्वस्मिन्नेव तिरोहितत्वेन स्थितः । 'स्वात्माधारः स्वेच्छयैव जीवदृष्टेस्तिरोहितः । क्षेत्रज्ञेत्युच्यते विष्णुर्जीवस्थः पुरुषोत्तम'इति च ॥१४॥ [18]अभिमानादेव संसारोऽन्यथा नेति परिहारः ॥ १८ ॥ इति पञ्चमतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

[5]यस्मान्मूलकारणभूतो विष्णुरेव । अतो मुख्यं सर्वकारणत्वं तस्यैव । मूलाश्रयविवक्षा यदि न स्यात्कुतः पृथिव्यां चलतीति व्यवहारः ? यतोऽवान्तराश्रया बहवः सन्त्यङ्घ्र्याद्याः ॥ ५ ॥ [7]एवं मूलगोप्तृत्वं च विष्णोरेव ॥ ७ ॥ [9]आश्रयत्वात्क्षितिरिति निर्वचने क्षितिशब्दोऽपि तस्मिन्नेव । परमाणुमात्रायाः पृथिव्या अयुक्तत्वा-

---

मेकमाहुः ॥११॥ द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः । सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ १२ ॥ क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात् स्वयं ज्योतिरजः परेशः । नारायणो भगवान् वासुदेवः स्वमाययाऽऽत्मन् व्यवधीयमानः ॥ १४ ॥ भ्रातृव्यमेनं त्वमदभ्रवीर्यमुपेक्षयाऽध्येधितमप्रमत्तः । गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोहम् ॥ १८ ॥

द्वादशोऽध्यायः

ब्राह्मण उवाच—अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः । तस्याऽपि चाङ्घ्र्योरधिगुल्फजङ्घाजानूरुमध्योरःशिरोधरांसाः ॥५॥ अंसेऽधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते । यस्मिन् भवान् रूढनिजाभिमानो राजाऽस्मि सिन्धुष्विति दुर्मदान्धः ॥६॥ शोच्यानिमांस्त्वानधिकस्तवाधिविष्टया निगृह्णन् निरनुग्रहोऽसि । जनस्य गोप्तेति विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥७॥ एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानं परमाणवो ये । अविद्यया मनसा

SGDF
Sri Gangeshwari Digital Foundation

त्परमाणवोऽप्यस्याविद्ययैवाधारत्वेन कल्पिताः ॥ ९ ॥ [10]एवं सर्वं तथा प्रकृत्यैव कल्पितं विष्णोरन्यत् । एवं प्रकृत्याधारः स्वयमनन्याधारो विष्णुरेव । अतः सर्वशब्दाश्च तस्मिन्नेव । 'राजा गोप्ताऽऽश्रयो भूमिः शरणं चेति लौकिकः । व्यवहारो न तत्सत्यं तयोर्ब्रह्माश्रयो विभुः । गोप्ता च तस्य प्रकृतिस्तस्या विष्णुः स्वयं प्रभुः । तव गोप्त्री तु पृथिवी न त्वं गोप्ता क्षितेः स्मृतः । अतः सर्वाश्रयश्चैव गोप्ता च हरिरीश्वरः । सर्वशब्दाभिधेयश्च शब्दवृत्तेर्हि कारणम् । सर्वान्तरः सर्वबहिरेक एव जनार्दनः । शिर आधारता यद्वद्ग्रीवायास्तद्वदेव तु । आश्रयत्वं च गोप्तृत्वमन्येषामुपचारत'इति च ॥ १० ॥ इति पञ्चमतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

'[18]ऋते हैहयवैन्यादीनार्षभस्येह कः समः । यस्योपदेशात्सिन्ध्वीशो ददर्श कपिलं प्रभुमि'ति च । युज्यते अनेनेति योगो हरिः ॥ १८ ॥ [29]साङ्ख्यशिरसे उत्तमज्ञानस्वरूपाय ॥ २९ ॥ इति पञ्चमतात्पर्ये त्रयोदशोऽध्यायः ॥ १३ ॥ १४ ॥

कल्पितास्ते येषां समूहेन कृतो विशेषः ॥ ९ ॥ एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् । द्रव्यस्वभावाशयकालकर्मनाम्नयाऽजयाऽवैहि कृतं द्वितीयम् ॥ १० ॥

त्रयोदशोऽध्यायः

यज्ञाय धर्मपतये विधिनैपुणाय योगाय साङ्ख्यशिरसे प्रकृतीश्वराय । नारायणाय हरये नम इत्युदारं गायन् मृगत्वमपि यः समुदाजहार ॥ २९ ॥

SGDF
Sri Gurgeshwari Digital Foundation

पञ्चदशोऽध्यायः

'7प्रियव्रतो गयश्चैव कर्मदेवसमो गुणैरि'ति षाड्गुण्ये ॥ ७ ॥
इति पञ्चमतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

'7यथा भागवते तूक्तं भौवनं कोशलक्षणम् । तस्याविरोधतो योज्यं सर्वग्रन्थान्तरस्थितम् । मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे । राहुसोमरवीणां च मण्डलाऽद्विगुणोक्तिताम् । विनैव सर्वमुन्नेयं योजना भेदतोऽत्र त्वि'ति ब्रह्माण्डे ॥ ७ ॥ इति पञ्चमतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

'1वाराहे वामपादं तु तदन्येषु तु दक्षिणम् । पादं कल्पेषु

पञ्चदशोऽध्यायः

तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति । गयं नृपं कः प्रतियाति कर्मभिर्यज्वाऽभिमानी बहुविद्धर्मगोप्ता ॥ समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ७ ॥

षोडशोऽध्यायः

राजोवाच—इत्युक्तस्त्वया भूमलण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमाः सह दृश्यते ॥१॥ एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रस्तावतान्तर्भूम्यां प्रविष्टः ॥ ७ ॥

सप्तदशोऽध्यायः

श्री शुक उवाच—तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तः प्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिरभिधीयमानाऽति-

SGDF
Sri Gangeshwari Digital Foundation

भगवानुज्जहार त्रिविक्रम' इति च ॥ १ ॥ '[16]अनन्तान्तःस्थितो विष्णुरनन्तश्च सहामुना । पूज्यते गिरिशेनेश इलावृतगतेन त्वि'ति च ॥ 'जीवव्यपेक्षया चैव तथाऽन्तर्याम्यपेक्षया । मिश्रास्तु स्तुतयो ज्ञेया विष्णोरन्यत्र केवलमि'ति च ॥ १६ ॥ इति पञ्चमतात्पर्ये सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

'[5]अप्रयासेन कर्तृत्वमकर्तृत्वमिहोच्यते । महाशक्तित्वतस्तच्च युज्यते परमस्य त्वि'ति तन्त्रसारे ॥ ५ ॥ '[17]कामदेवस्थितं विष्णुमुपास्ते श्री रतिंस्थिता । कामदेवं रतिश्चापि विष्णोस्तु प्राकृतां तनुमि'ति ब्रह्माण्डे ॥ १७ ॥ '[27]स्पर्धन्त इव देवास्तु हरिणा यत्र कुत्रचित् । हरेरेवाज्ञया कापि दैत्यावेशादथापि वे'ति च ॥ २७ ॥

महताकालेन सहस्रोपलक्षणेन दिवो मूर्धन्यवततार ॥१॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञां आत्मसमाधिरूपेण सन्निधायैतदभिगृणन् भव उपधावति ॥ १५ ॥ ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यातायानन्तायाव्यक्ताय नम इति ॥ १६ ॥

अष्टादशोऽध्यायः

विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतम् । युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुनि ॥५॥ केतुमाले भगवान् कामदेवस्वरूपेणास्ते लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां च तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसङ्ख्यानानां यासां गर्भा महापुरुष महास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते निपतन्ति॥१५॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेता अहस्सु तद्भर्तृभिरुपेतोपास्ते ॥ इदं चोदाहरति ॥ ॥ १७ ॥ यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक्समेत्य च । पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपस्थास्नु यदत्र दृश्यते ॥ २७ ॥

SGDF
Sri Gangeshwari Digital Foundation

[31]उपलम्भनादयथा।' यथा दृष्टं तथा न तिष्ठत्यन्यथाभवतीत्यर्थः ॥
॥ ३१ ॥ '[32]सर्वान्तर्यामिकत्वात्तु सर्वनामा हरिः स्वयम्। न तु
सर्वस्वरूपत्वाद्रूपत्वमुपचारत'इति च ॥ ३२ ॥ [33]दशावतार इत्यादि-
सङ्ख्या विनीयते विशेषेण नीयते तज्ज्ञानं तद्रूपमेव हि ॥ ३३ ॥
[36]क्रियार्थैर्यज्ञाद्यर्थैरिन्द्रादिनामभिरीरितात्मने ॥ ३६ ॥ [37]मायागुणै-
स्तदिच्छानुसारिभिः। 'द्रव्येशः शङ्करः प्रोक्तः क्रियेशो गरुडः स्मृतः।
करणेशस्तथा ब्रह्मा वायुराधारपः स्मृत'इति ब्रह्मतर्के ॥ ३७ ॥ इति
पञ्चमतात्पर्ये अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

'[7]यस्य सम्यक्च भवति ज्ञानं भक्तिस्तथैव च । निश्चितस्तस्य मोक्षः स्यात्सर्वपापकृतोऽपि तु। यो ममत्वादिना दोषः स त्वन्यविषयः

यद्रूपमेतन्निजमायया अर्पितमर्थस्वरूपं बहुरूपरूपितम्। सङ्ख्या न यस्यास्त्ययथोपलम्भनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ॥३१॥ जरायुजं स्वेदजमण्डजोद्भिजं चराचरं देवर्षिपितृभूतमैदम्। द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥३२॥ यस्मिन्नसङ्ख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम्। सङ्ख्या यया तत्त्वदृशा विनीयते तस्मै नमः साङ्ख्यनिदर्शनाय हि ॥ ३३ ॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु योनिष्विव जातवेदसम्। मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥ द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने। तथैव तत्रातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥

एकोनविंशोध्यायः

न जन्म नूनं महतो न सौभगं न चाङ्ग बुद्धिर्नाकृतिस्तोषहेतुः। तै(ति)र्यग्विसृष्टानपि नो वनौकसश्चकार सख्ये च स लक्ष्मणाग्रजः ॥७॥ यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिन्तयन्। शङ्केत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥ तन्नः

SGDF
Sri Gangeshwari Digital Foundation

स्मृत'इति च ॥ ७ ॥ '[28]अनधीकारिणो देवाः स्वर्गस्था भारतोद्भवम् । वाञ्छन्त्यात्मविमोक्षार्थमुद्रेकार्थेऽधिकारिण'इति कौर्मे ॥ २८ ॥ इति पञ्चमतात्पर्ये एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

'[5]सूर्यसोमाग्निवारीरविधातृषु यथाक्रमम् । प्लक्षादिद्वीपसंस्थास्तु स्थितं हरिमुपासत'इति च ॥५॥ '[24]अनाम्लं तु दधि क्षीरं क्षीरं सान्द्रं तथा 'दधी'ति शब्दनिर्णये ॥ २४ ॥ इति पञ्चमतात्पर्ये विंशोऽध्यायः ॥ २० ॥ २१ ॥

प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज । भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः सुभावितं इति ॥ १५ ॥ यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य दत्तस्य कृतस्य शोभनम् । तेनाब्जनाभस्मृतिजन्मनः स्याद्वर्षे हरिर्यद्भजतां शन्तनोति ॥ २८ ॥

विंशोऽध्यायः

मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् धूम्रवर्णो हिरण्यग्रीवो मेघमाल इति सेतुशैलाः अरुणा अनुगुणा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः यासां जलोपस्पर्शनविधूतरजस्तमसोऽहं सपतङ्गोध्यायनसत्याङ्गसंज्ञाश्चत्वारो वर्णा सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यात्मानं यजन्ते ॥ ४ ॥ प्रत्नस्य विष्णोरूपं यत्सत्यर्तस्य ब्रह्मणः । अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहि ॥ इति ॥ ५ ॥ तथा बहिः क्रौञ्चद्वीपः कुशद्वीपाद्द्विगुणसमानेन क्षीरोदेन परित उपक्लृप्तो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौञ्चोनाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥ १८ ॥ एवं परस्तात् क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परित उपक्लृप्तः । यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको, यस्य हि महान् सुरभिगन्धस्तं द्वीपमनुवासयति ॥ २४ ॥

SGDF
Sri Gargeshwari Digital Foundation

द्वाविंशोऽध्यायः

'[32]ज्ञानानन्दात्मके विष्णौ शिंशुमारवपुष्यथ । ऊर्ध्वलोकेषु संव्याप्त आदित्याद्यास्तदाश्रिता'इति ब्रह्माण्डे ॥ ३२ ॥ इति पञ्चमतात्पर्ये द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

[38]इलावृतस्थस्तुतिवत्पातालमूलस्थस्तुतिर्योजनीयाऽनन्तविषया ॥ ॥ ३८ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते पञ्चमस्कन्धतात्पर्ये त्रयोविंशोऽध्यायः ॥ २३ ॥ २४ ॥ पञ्चमस्कन्धः सम्पूर्णः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

द्वाविंशोऽध्यायः

ग्रहर्क्षतारामयमादिदैविकं रूपं हरे मन्त्रकृतस्त्रिकालम् । नमस्यतस्तुवतो नश्यते वै स्वयं त्रिकालं कृतमाशु पापम् ॥ ३२ ॥

त्रयोविंशोऽध्यायः

ध्यायमानः सुरासुरोरुगसिद्धगन्धर्वविद्याधर मुनिगणैरनवरतमदमुदितविकृतिविह्वललोचनः सुललितमुखरितामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्ष्यामुदारलीलो बिभर्ति ॥३८॥ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन् । यद्रूपं ध्रुवमकृतं यदेकमात्मन् नानाधात्कथमु ह वेद तस्य वर्त्म ॥ ४१ ॥

SGDF
Sri Gangeshwari Digital Foundation

षष्ठः स्कन्धः

प्रथमोऽध्यायः

॥ हरिः ॐ ॥ '[40]वेदानां प्रथमो वक्ता हरिरेव यतो विभुः । अतो विष्ण्वात्मका वेदा इत्याहुर्वेदवादिन' इति शब्दनिर्णये ॥ ४० ॥ इति षष्ठतात्पर्ये प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

[14]नारायणोऽयमित्यन्यहेलनविषयत्वेनोक्तमघहरम् । 'सर्वथाऽघहरं विष्णोर्नाम तद्भक्तिपूर्वकम् । अभक्त्योदाहृतं नैव फलदातृ भविष्यति । नामस्वामितया तस्य स्मरणं जायते यतः । भक्तस्यातो नामकीर्तिः सङ्केतादावपीरिता । अजामिलोऽपि स्मरणाद्भक्त्या मृत्योरमुच्यते' ति नारदीये ॥१४॥ इति षष्ठतात्पर्ये द्वितीयोऽध्यायः ॥२॥

तृतीयोऽध्यायः

[12]ओतं प्रोतं पटवत् । 'यथा कन्थापटाः सूत्र ओताः प्रोताश्च

षष्ठः स्कन्धः

प्रथमोऽध्यायः

यमदूता ऊचुः—वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः । वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुम ॥ ४० ॥

द्वितीयोऽध्यायः

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा । वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥

तृतीयोऽध्यायः

यम उवाच—परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र

SGDF
Sri Gangeshwara Digital Foundation

संस्थिताः। एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितमि’ति स्कान्दे॥ ॥ १२ ॥ इति षष्ठतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

[24]गुणो यथा गुणिनः। कश्चित्पुरस्थितो गुणभूतः प्रधानभूतस्य राज्ञः ममासौ सखेति राज्ञा चिन्तितमपि न जानाति। ‘यथा राज्ञः प्रियत्वं तु भृत्यो वेद न चात्मनः। तथा जीवो न यत्सख्यं वेत्ति तस्मै नमोस्तु त’इति स्कान्दे ॥ २४ ॥ ‘[25]देहमानी वैश्रवणो मरुतः प्राणमानिनः। इन्द्राद्या इन्द्रियात्मानो रुद्रोऽन्तःकरणात्मकः। नैते विन्दन्ति स्वात्मानं परं वापि विमोहिताः। जीवाभिमानी ब्रह्मा तु सर्वं वेद प्रजापतिः। सोऽपि वेद हरिं नैव सम्यक्स्वैव हि सर्वविदि’ति च ॥ २५ ॥ [26]केवलया स्वसंस्थया। स्वप्नसुषुप्त्यादौ मनस उपरमाज्जीवस्यास्वातन्त्र्यदर्शनेऽपि स्वप्नप्रबोधादिदर्शनादन्य ईश्वरस्तन्नियामकोऽस्तीति ज्ञायते। जीवेच्छाभावात्केवलत्वम्। ‘यदोपरामो मनसः स्वप्नसुप्तिलयादिषु। तदावस्थाप्रबोधादिकारणत्वेन केशवः। अस्वतन्त्र्याच्च जीवस्य विद्यतेऽन्यो नियामकः। जीवप्रवृत्त्यानुकूल्याज्ज्ञायतेऽसौ तदा विभुरि’ति हरिवंशेषु ॥२६॥ [27]इच्छादिरूपेण त्रिवृद्भिः। ‘इच्छादित्वेन

विश्वम्। यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥ ॥ १२ ॥

चतुर्थोऽध्यायः

न यस्य सख्यं पुरुषो वेत्ति सख्युः सखा वसन् संवसतः पुरेऽस्मिन्। गुणो यथा गुणिनोऽव्यक्तदृष्टिस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥ देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत्। सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ २५ ॥ यदोपरामो मनसो नामरूपरूपस्य दृष्टिस्मृतिसंप्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥२६॥ मनीषिणोऽन्तर्हृदि-

SGDF
Sri Gangeshwari Digital Foundation

त्रिविधा विमलाद्यास्तु शक्तयः । विष्णोः स्वरूपभूता यास्ताभ्य-
स्तन्नामिकाः पराः । जायन्ते तत्प्रसादेन ताश्च पीठे प्रपूजयेत् । तद्भिन्न-
जीवास्तस्यैव । प्रसादात्तत्समीपगा'इति तन्त्रनिर्णये । 'दशेन्द्रियाणि च
मनो बुद्धिप्राणप्रधनकाः । चतुर्दशैषां परमः पाश्वदृश्यो हरिः स्मृतः ।
बुद्धेर्भेदेन चैतेषु पाश्वदृश्योऽथ संस्थितेरि'ति च ॥ २७ ॥ '[28]इयत्ता
तु विशेषः स्यादानन्दादौ तदुज्झितेः । सर्वैर्विशेषै रहित उच्यते हरि-
रव्ययः । अप्राकृतस्वरूपत्वान्निर्मायश्चेति कथ्यत' इति च । 'तद्रूप-
सदृशं रूपं यतः सर्वस्य सर्वदा । सर्वरूपो यतः शब्दमुख्यार्थः सर्व-
नामक'इति च । अलौकिकत्वान्नो विष्णुर्निरुक्तोऽतो निरूपितः ।
तथापि वेदेषूक्तत्वादुक्तो रूपी स एव चे'ति व्योमसंहितायाम् ॥२८॥
[30]सप्तविभक्त्यर्थस्य कालस्य प्रकारस्य च हेतुर्ब्रह्मैव । 'विभक्त्यर्थस्य
कालस्य प्रकाराणां च कारणम् । एक एव परो विष्णुः सर्वसत्ताप्रद-
त्वत'इति भविष्यत्पर्वणि ॥ 'अनन्यः सदृशाभावादेको रूपाद्यभेदत'-
इति च ॥ ३० ॥ '[32]मदन्यो नास्ति सर्वेश इति विद्यासुरं मतम् ।
अस्तीति दैवमुभयोर्हरिरेव ह्यपेक्षितः । निषेधविध्योर्विषयः फलदाता
च केशवः । तादृग्बुद्धेः कारणं च स्थानयोश्चोच्चनीचयोरि'ति च ॥
॥ ३२ ॥ '[33]तत्कर्मणामदृष्टत्वादनामा चाप्यदर्शनात् । अरूपस्त्ववत-
तारेण रूपकर्माणि दर्शयेत् । नित्यरूपो नित्यकर्माऽप्यव्यक्तत्वमपेक्ष्य

सन्निवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः । वह्निं यथा दारुणि पाश्व-
दृश्यं मनीषया निष्कृषन्तीह गूढम् ॥ २७ ॥ स वै समाशेषविशेषमाया-
निषेधनिर्वाणसुखानुभूतिः । स सर्वनामा स च विश्वरूपः प्रसीदता-
मनिरुक्तात्मशक्तिः ॥ २८ ॥ यस्मिन् यतो येन च यस्य यस्मै यं यो यथा-
कुरुते कार्यते वा । परावरेषां परमं प्राक् स्वसिद्धं तद्ब्रह्म तद्धेतुरनन्य-
देकम् ॥ ३० ॥ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्ध-
धर्मयोः । अपेक्षितं किञ्चन सांख्ययोगयोः समं परं ह्यनुकूलं बृहत्तत् ॥
॥ ३२ ॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः ।

SGDF
Sri Gangeshwari Digital Foundation

तु। अरूपकर्मेत्युदितो रूपकर्मोज्झितेर्न त्वि'ति प्रकाशसंहितायाम्। 'अनामा सोऽधिकार्थत्वादव्यक्तत्वादरूपकः। कंसारित्वादिसाम्यार्थोऽव्यक्तरूपोऽवतारग' इति च। 'लोकदृष्ट्याधिकार्थानि मूलनामानि केशवे। अथ दामोदरादीनि लोकदृष्ट्या समानि तु। आनन्दोऽव्यक्त रूपस्तु मूलरूपमुदाहृतम्। स एव व्यक्तिमापन्नः प्रादुर्भाव उदीरित'-इति च ॥ ३३ ॥ '[34]स्वदेहस्थं हरिं प्राहुरधमा जीवमेव तु। मध्यमाश्चाप्यनिर्णीतं जीवाद्भिन्नं जनार्दनम्। पूर्णानन्दादिगुणकं सर्वजीव विलक्षणम्। उत्तमास्तु हरिं प्राहुस्तारतम्येन तेषु च। बुद्धिशुद्ध्यनुसारेण यथाप्राणं शरीरगम्। श्वासमात्रं जनाः प्राहुरनिर्णीतं च मध्यमाः। देवदेवेश्वरं सूत्रमानन्दं प्राणवेदिन'इति च ॥ ३४ ॥ '[45]विशेषव्यक्तिपात्रत्वाद्ब्रह्माद्यास्तु विभूतयः। तदन्तर्यामिणश्चैव मत्स्याद्या विभवाः स्मृता'इति तन्त्रनिर्णये ॥ ४५ ॥ '[46]तपोऽभिमानी रुद्रस्तु विष्णोर्हृदयमाश्रितः। विद्यारूपा तथैवोमा विष्णोस्तनुमुपाश्रिता। शृङ्गाराद्याकृतिगतः क्रियात्मा पाकशासनः। अङ्गेषु क्रतवः सर्वे मध्यदेहे च धर्मराट्। प्राणोवायुश्चित्तगतो ब्रह्माद्याः खेषु देवता'इति च ॥ यदाश्रितं यद्भवति तत्तन्नामकमीरितमि'ति शब्दनिर्णये ॥४६॥ [47]संज्ञानमात्रं यदिदं त्वया तपसा दृष्टं मम रूपं तदेवाग्र आसीत्। 'नानावर्णो हरिस्त्वेको बहुशीर्षभुजोरुपात्। आसील्लये तदन्यत्तु सूक्ष्मरूपं श्रियं विना। असुप्तः सुप्त इव च मीलिताक्षो भवेद्धरिः। अन्यत्रानादराद्विष्णौ श्रीश्च लीनेव कथ्यते। सूक्ष्मत्वेन हरौ स्थानाल्लीनमन्यदपीष्यत'-

---

नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥ ३३ ॥ यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति। यथाऽनिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥ ३४ ॥ ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः। विभूतयो मम ह्येता भूतानां भूति हेतवः ॥ ४५ ॥ तपो मे हृदयं ब्रह्म तनुर्विद्या क्रियाऽऽकृतिः। अङ्गानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥ ४६ ॥ अहमेवेदमासाग्रे नान्यत्किञ्चान्तरं बहिः। संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४७ ॥

SGDF
Sri Gargeshwari Digital Foundation

इति मात्स्ये ॥ ४७ ॥ [48]गुणतः अनन्ते । 'प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते । तदानन्त्यं तु गुणतस्ते चानन्ता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव चे'ति तन्त्रभागवते ॥ ४८ ॥
इति षष्ठतात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

अष्टमोऽध्यायः

[17]सनत्कुमारोऽवतु कामदेवात् । 'सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः । सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः । स मां योग्येतरात्कामात्पातु विश्वेश्वरः प्रभुरि'ति च । देवर्षिवर्यः पुरुषान्तरार्चनात् । विष्णोरपरिवारत्वदृष्ट्या देवान्तरार्चनात् । 'महिदासो देवऋषिः पातु मां विष्णुरव्ययः । तदनर्पितकर्मभ्यस्तदस्मरणतस्तथे'ति च ॥ १७ ॥
'[31]यथा हि भगवानेव सदसन्नियामकतया सदसद्रूप उच्यते । सत्येनानेन मां देवः पातु विष्णुश्चतुर्भुज' इति च ॥ ३१ ॥
'[33]एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः । तत्तच्छक्तिप्रदत्वेन स्वयमेव व्यवस्थितः । सत्येनानेन मां देवः पातु सर्वेश्वरो हरि'रिति च ॥३३॥

मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे । यदासीत्तत एवाद्यः स्वयम्भूः समभूदजः ॥ ४८ ॥

अष्टमोऽध्यायः

सनत्कुमारोऽवतु कामदेवाद्धयशीर्षो मां देवहेलनात् । देवर्षिवर्यः पुरुषान्तरार्चनात् कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् । सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ॥ ३१ ॥ यथैकात्म्यानुभावेन विकल्परहितः स्वयम् । भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः । पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वदा ॥ ३३ ॥ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा । पदा वा संस्पृशेत्सद्यः

SGDF
Sri Gurgeshwari Digital Foundation

'[43]गुरुशिष्ययोरयोग्यत्वाद्गुरुवृत्तेरपूर्तितः। अप्रसादाद्गुरोर्विद्या न तथोक्तफलप्रदे'ति च॥ 'विद्याः कर्माणि च सदा गुरोः प्राप्ताः फलप्रदाः। अन्यथा नैव फलदाः प्रसन्नोक्ताः फलप्रदा'इति च तन्त्रसारे ॥ ४३ ॥
इति षष्ठतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'[20]कालोऽन्तकः प्रधानं च मृत्युरव्यक्तमित्यपि। उच्यते प्रकृतिः सूक्ष्मा श्रीर्भूर्दुर्गेति नामभिः। सैव ब्रह्मादिभयदा विष्णोश्च वशवर्तिनी। अभयापि बिभेतीव तद्वशत्वादुदीर्यत'इति मात्स्ये ॥२०॥
'[23]यत्र वायूदपद्मादिरूपेण प्रकृतिः स्थिता। एकस्तत्राबिभेद्ब्रह्मा विचार्य भयमत्यगात्। अन्तर्गतो हरिस्तस्य ध्यातो भयमपानुददि'ति च॥ 'जनिष्यतां जनानां तु स्वभावानां प्रसिद्धये। ज्ञानादिगुणपूर्णस्य ब्रह्मणोऽपि क्षणार्धगाः। भयादिका भवन्तीव कथं तस्मिन्स्थिरालया'-इति च॥ 'भगवत्प्रीतये नित्यं ब्रह्मणो ये भयादयः! न वृथा तस्य भावः स्यात्कश्चित्तेऽपि क्षणार्धगाः। अज्ञानं च चतुर्वारं द्विवारं भयमेव च। शोकोऽपि तावान्नान्यत्र कदाचिद्ब्रह्मणो भवेत्। तत्रापि भगवत्प्रीत्या उन्नत्यैवास्य तद्भवेदि'ति ब्रह्मतर्के ॥ २३ ॥ [24]लिङ्गमेव पश्यामः। 'कदाचिदभिमानस्तु देवानामपि सन्निव। प्रायः कालेषु

साध्वसात्स विमुच्यते ॥ ३६ ॥ एतां विद्यामधिगतो विश्वरूपात् शतक्रतुः। त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४३ ॥

नवमोऽध्यायः

देवा ऊचुः—वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः। हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः॥ ॥ २० ॥ पुरा स्वयम्भूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराले। एकोऽरविन्दात्पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः ॥२३॥ य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम्। वयं च यस्यापि

SGDF
Sri Gangeshwar Digital Foundation

नास्त्येव तारतम्येन सोऽपि त्वि'ति च ॥ २४ ॥ '[28]श्रीवत्सः प्रकृतिर्ज्ञेया ब्रह्माख्यः कौस्तुभः पुमान् । तदतीतैः षोडशभिः स्वरूपैरप्युपास्यत'इति च । श्रीवत्सकौस्तुभौ विनाऽऽत्मतुल्यैः प्रकृतिपुरुषातीतत्वात्सप्तदशरूपाण्यपि तुल्यानीत्यर्थः । आत्मभूतैश्च तुल्यैश्च आत्मतुल्यैः । 'अपुंप्रकृत्यधीनत्वाद्वासुदेवादिका हरेः । तुल्याश्च केशवाद्याश्च न च भिन्नाः कथञ्चने'ति तन्त्रसारे ॥ श्रीवत्सकौस्तुभाभ्यां तु विनाभावं प्रदर्शयन् । पुंप्रकृत्यात्मकाभ्यां स धत्ते नित्यं जनार्दनः । यदस्याभ्यामतीतत्वं यद्वशो नानयोर्हरिः । श्रीवत्सकौस्तुभाभ्यां तु विनाभावः स एव त्वि'ति च ॥ 'आत्मैव सप्तदशधा स्वयं भूत्वा जनार्दनः । मध्यस्थावृतिरूपेण क्रीडते पुरुषोत्तम'इति च ॥२८॥ '[30]वयः सर्वस्य वयनाद्भगवान्पुरुषोत्तम' इति च । 'मा तन्तुश्छेदिव यतो धियं म'इति श्रुतिः ॥ ॥ ३० ॥ '[31]देवलोकात्पितृलोकान्निरयाच्चापि यत्परम् । तिसृभ्यः परमं स्थानं वैष्णवं विदुषां गतिरि'ति माहात्म्ये ॥ ३१ ॥ '[33]अथ तत्र भगवान् किं देवदत्तवदित्याक्षेपः । अचिन्त्यशक्तेरनन्तगुणस्य कुतः पारतन्त्र्यादिकमित्यभिप्रायः । उपरतसमस्तमायामये प्राकृतस्वभाव-

---

पुरः समेताः पश्याम लिङ्गं पृथगीशमानिनः ॥ २४ ॥ आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ । पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ॥ ॥ २८ ॥ देवा ऊचुः—नमस्ते यज्ञवीर्याय वयसे उत ते नमः । नमस्ते अस्तु चक्राय नमोऽस्तु पुरुहूतये ॥ ३० ॥ यत्ते गतीनां तिसृणामीशितुः परमं पदम् । नार्वाचीनो विसर्गस्य धातुर्वेदितुमर्हति ॥३१॥ ॐ नमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटितपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारेणापावृते आत्मलोके स्वयमुपलब्धो निजसुखानुभवो भवान् दुरवबोध इव तव विहारयोगो यदशरणोऽशरीर इदमनपेक्षितास्मत्समवायः स आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हंसि ॥३२॥ अथ तत्र भगवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशल-

SGDF
Sri Gangeshwari Digital Foundation

वर्जिते । केवलं स्वात्ममायां निजसामर्थ्यम् । स्वरूपद्वयाभावादित्यादि समाधानम् । 'स्वतन्त्रः परतन्त्रो वा ज्ञोऽज्ञो दुःखी सुखी नु किम् । इत्यादि संशयः क्व स्याज्ज्ञानिनां पुरुषोत्तमे । तस्यानन्तगुणत्वाच्च पूर्ण-शक्तित्वतो हरेः । स्वातन्त्र्यादिकमेवास्य विदो जानन्ति निश्चयात् । घटकत्वाद्दुर्घटस्य दुर्ज्ञेयत्वाच्च सर्वशः । तच्छक्तेरविदो जीवं परतन्त्रं वदन्त्यमुम् । एवं दुर्घटया शक्त्या ज्ञोऽज्ञानां परमेश्वरः । यथा रज्जुः सर्पधिया रज्जुबुद्ध्यावगम्यते । तथा यथार्थबुद्ध्या च मिथ्याबुद्ध्याऽव-गम्यते स्वेच्छयैव महाविष्णुः फलदश्चानुसारत'इति तन्त्रभागवते । त्रिनयनो नृसिंहरूपी । 'विष्णोर्नृसिंहनामानि त्रिनेत्रोग्रादिकानि तु'ति शब्दनिर्णये । 'विविधं भावपात्रत्वात्सर्वे विष्णोर्विभूतय'इति च ॥ ३३ ॥ '[35]निरुपक्रमो हरिर्नित्यमप्रयत्नो ह्युपक्रमेदि'ति च ॥

फलमुपाददाति। अहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः । नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनवितर्कविकल्पविचारप्रमाणाभास-कुतर्कशास्त्रकलिलान्तःकरणदुरवग्रहवादिनां च विवादानवसरे उपरत-समस्तमायामये केवलस्वात्ममायामन्तर्धाय को नु दुर्घट इव भवति स्वरूप-द्वयाभावात्। समविषममतीनां मतमनुचरसि। यथा रज्जुखण्डः सर्पादि-धियाम्। स एव पुनः सर्ववस्तुषु वस्तुस्वरूपः सर्वेश्वरः सकलजग-त्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः । अथ ह वाव तव महिमामहामृतरससमुद्रविप्रुषाऽसकृ-ल्लीढया स्वमनसि निष्यन्दमाननिरवरतसुखेन विस्मारितदृष्टश्रुतविषय-सुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि निरन्तरनिर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थ-कुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपरिवर्तः । त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोक-मनोहरानुभाव तवैव विभूतयोऽभूवन् दितिजदनुजादयश्चापि तेषामनुप-क्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभि-र्यथापराधं दण्डमधथावतीर्य ॥ ३३ ॥ हंसाय दभ्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय। सत्सङ्ग्रहाय भवपान्थनिजाश्रयाय

SGDF
Sri Gangeshwari Digital Foundation

॥३५॥ [39]यदि सोऽपि तथाविधः अत्युत्तमो न भवति चेत् ॥ ३९ ॥ [40]युष्मत्कामो मत्प्रिय एव । अन्यथा न दद्यामिति भावः । 'विष्णोः प्रियं कामयन्ति देवा नैवाप्रियं क्वचित् । यद्यप्रियं कामयन्ति न रातीशो हितो हि स'इति तन्त्रभागवते ॥ ४० ॥ '[45]समर्था अपि याचन्ते देवा मुन्यादिकान्क्वचित् । आज्ञयैव हरेस्तेषां यशोऽर्थमपि नान्यथे'ति च ॥ ४५ ॥ इति षष्ठतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

'[6]आज्ञयैव महाविष्णोः कार्यार्थमपि च क्वचित् । नीचानपि च याचन्ते स्वात्मनो गुणवत्तराः । नीचवाक्यं वदेयुश्च सुरा नैतावता क्वचित् । तेजःक्षितिर्भवेदेषां जनकस्य यथार्भकादि'ति तन्त्रमालायाम् ॥ ॥ ६ ॥ इति षष्ठतात्पर्ये दशमोऽध्यायः ॥ १० ॥ ११ ॥

द्वादशोऽध्यायः

[11]मन्यतेऽनीशमीश्वरम् । 'अनीशं जीवरूपेण परमात्मानमीश्वरम् ।

शश्वद्धरिष्ठगतये हरये नमस्ते ॥३५॥ न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् । तस्य तानिच्छतो यच्छे यदि सोऽपि तथाविधः ॥ ३९ ॥ स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्मभिः । न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ॥४०॥ मघवन्यात भद्रं वो दध्यंचमृषिसत्तमम् । विद्याव्रततपःसारं गात्रं याचत माचिरम् ॥ ४१ ॥ तस्मिन्विनिहते यूयं तेजोऽस्त्रायुधसम्पदः । भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ॥ ४५ ॥

दशमोऽध्यायः

तथाभियाचितो देवैर्ऋषिराथर्वणो महान् । मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥ नूनं स्वार्थपरो लोको न वेद परसङ्कटम् । यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥

द्वादशोऽध्यायः

पुरुषः प्रकृतिर्व्यक्तमात्मभूतेन्द्रियाशयाः । शक्नुवन्त्यस्य सर्गादौ

SGDF
Sri Gargeshwari Digital Foundation

ये मन्यन्ते तान्समीक्ष्य स्नेहान्निरयभाग्भवेदि'ति च। 'हिरण्यगर्भः पुरुष आत्मा वायुरुदाहृतः। शेषोऽव्यक्तस्तथैवेन्द्र आशयः समुदाहृत'-इति च ॥११॥ [33]सन्धितः समयेनेन्द्रो वृत्रेणाथो करग्रहः। समुद्रतीरे विचरन्फेनेन वधमस्य तु। नर्मणा जहि फेनेन वाचयित्वा सुरेश्वरः। पादस्पर्शविवादं च कृत्वा युद्धाय दंशितः। फेने वज्रं समावेश्य विष्णुयुक्तं व्यसर्जयत्। अपानुदच्छिरस्तस्य ध्यायतो वत्सरेण स' इत्याग्नेये ॥ ३३ ॥ इति षष्ठतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

'[1]प्रारब्धकर्मणैवैषां क्लृप्तदुःखस्य सूचकम्। इदानींतनकर्म स्याद्व्रण-हेतुर्यथा रणः। देवादीनां स्थितप्रज्ञभावान्नैवान्यथा भवेत्। प्रारब्धमपि तु क्वापि किञ्चिद्विघटितं भवेदि'ति च ॥ १ ॥ इति षष्ठतात्पर्ये त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

'[5]नवकोट्यस्तु देवानामृषयः शतकोटयः। नारायणायनाः सर्वे ये केचित्तत्परायणा'इति च। 'नारायणायना देवा ऋष्याद्यास्तत्परायणाः।

न विना यदनुग्रहम्। अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ॥ ११ ॥ वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन्समन्तात्परिवर्तमानः। न्यपातयत्ता-वदहर्गणेन यो ज्योतिषामयनेवार्त्रहत्ये ॥ ३३ ॥

त्रयोदशोऽध्यायः

वृत्रे हते त्रयो लोका विना शक्रेण भूरिद। सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेन्द्रियाः ॥ १ ॥ श्री शुक उवाच—एवं सञ्चोदितो विप्रै-र्मरुत्वानहनद्रिपुम्। ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥

चतुर्दशोऽध्यायः

मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा

SGDF
Sri Gangeshwari Digital Foundation

ब्रह्माद्याः केचनैव स्युः सिद्धो योग्यसुखं लभन्नि'ति तन्त्रभागवते ॥५॥ '[14]सन्तापक्रोधरागादिष्वनर्थकवचः क्वचिदि'ति शब्दनिर्णये ॥ १४ ॥ इति षष्ठतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

'[12]मनसो द्वेषरागाभ्यां पुण्यपापसमुद्भवः। पुत्रादि पुण्यपापाभ्यां तस्मात्सर्वं मनोभवमि'ति नारदीये ॥ १२ ॥ '[29]द्रव्यात्मकः स्थूलदेहः क्रियाकर्मेन्द्रियाणि च। ज्ञानेन्द्रियाणि च मनो ज्ञानात्मकमुदाहृतमि'ति ब्रह्मवैवर्ते ॥ 'कार्यकारणयोरेकशब्दव्यवहृतिर्भवेदि'ति शब्दनिर्णये ॥ २९ ॥ '[30]अनन्यापेक्षतस्त्वेको हरिरन्यद्द्वयं स्मृतम्। अन्यापेक्षत्वतस्तेन प्राप्तत्वाद्द्वैतमुच्यत'इति च ॥ ३० ॥ '[35]रुद्राद्याः शेषदेहस्थं विष्णुं संकर्षणाभिधम्। शेषान्तर्यामिणं ज्ञात्वा स्वपदं प्रापुरञ्जसे'ति तन्त्रभागवते ॥ ३५ ॥ '[36]द्वैतेन बन्धसंत्यागाद्द्वैतत्यागी भवत्युते'ति शब्दनिर्णये। देहाद्येऽहंममाभिमानो भ्रमः। 'तेषां तेषां पदान्येव वैष्णवानि पदानि तु। तेषां महित्वं च तथा हरेस्तद्वशगं

कोटिष्वपि महामुने ॥ ५ ॥ तस्यैकदा तु भवनमङ्गिरा भगवानृषिः। लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥

पञ्चदशोऽध्यायः

तस्मादन्यन्मनोमात्रं जह्यहंममतातमः। वासुदेवे भगवति मनो धेह्यात्मनीश्वरे ॥१२॥ अधुना पुत्रिणां तापो भवतैवानुभूयते। एवं दारा गृहा रायो विविधैश्वर्यसम्पदः ॥ २५ ॥ दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः। कर्माभिध्यायतो नानाकर्माणि मनसोऽभवन् ॥ २८ ॥ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः। देहिनो विविधक्लेशसन्तापकृदुदाहृतः ॥२९॥ तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः। द्वैते ध्रुवार्थविस्रम्भं त्यजोपशममाविश ॥३०॥ नारद उवाच—इमां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम। यां धारयन्सप्तरात्राद्द्रष्टा सङ्कर्षणं विभुम् ॥३५॥ यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य।

SGDF
Sri Gangeshwari Digital Foundation

यतः। अतुल्यानधिकं चैव तस्य तस्यैव मुक्तिगम्। स्वस्यैव पूर्वमाहात्म्यमपेक्ष्य न हरेः क्वचित्। माहात्म्यमन्यप्राप्यं स्यान्न ते विष्णाविति श्रुतेरि'ति तन्त्रभागवते ॥ 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते। तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरिरि'ति स्कान्दे ॥ तत्प्रसादलभ्यत्वात्तदीयमपि तेनातुलमनधिकं चान्यमाहात्म्यम् ॥३६॥ इति षष्ठतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

[9]एष नित्योऽव्ययः:। 'अनित्यसम्बन्धयुताः पित्राद्या नित्ययुग्घरिरि'ति च। आत्मानं चावताररूपेण सृजते ॥ ९ ॥ '[11]भोक्ता सद्गुणभोक्तृत्वान्न भोक्ता तदवृद्धितः। अचिन्त्यशक्तितस्तच्च युज्यते परमेशितुरि'ति च ॥ ११ ॥ [21]बाह्यमनस्युपरते चिन्मात्रमनसा सह प्राप्यः ॥२१॥ [22]मृन्मयेष्विव मृज्जातिः। 'पृथिवीपर्वताश्चैव मृन्मयाः समुदीरिताः। तेषु मृज्जातयः सर्वे जायन्ते स्थावरादय'इति च ॥२२॥ [29]अन्यान्तर्यामिणं विष्णुमुपास्यान्यसमीपगः। भवेद्योग्यतया तस्य पदं वा प्राप्नुयान्नर'इति नारदीये ॥ अनेन प्रकारेण मुहुस्तत्सकाशमभ्ययात्। 'शेषान्तर्यामिणं विष्णुं चित्रकेतुरुपास्य तु। शेषाविष्टहरेश्चापि वरा-

---

सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिराद्रुपैति ॥ ३६ ॥

षोडशोऽध्यायः

एष नित्योऽव्ययः सूक्ष्म एकः सर्वाश्रयः स्वदृक्। आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥ नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम्। उदासीन इवासीनः परावरदृगीश्वरः ॥ ११ ॥ वचस्युपरते प्राप्यो य एको मनसा सह। अनामरूपचिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते। मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः। जगाम देवदेवस्य शेषस्य चरणान्तिकम् ॥ २९ ॥

SGDF Sri Gangeshwari Digital Foundation

न्प्राप्याप सद्गतिमि'ति तन्त्रमालायाम् ॥ २९ ॥ '[51]हरिस्तु सर्वभूतानि तदन्तर्याम्यपेक्षया। तिङ्पदान्यपि सर्वाणि सुप्पदानि तथैव च। तस्मिन्नेव प्रवर्तन्ते मुख्यवृत्त्या विशेषत'इति च ॥ ५१ ॥ [52]लोकं चात्मनि सन्ततं वासनारूपेण ॥ ५२ ॥ [54]मायामात्राणि प्रकृतिनिर्मितानि ॥ ५४ ॥ [56]प्रतिबोधेऽन्वेति स्वयमपि प्रतिबुद्धः। सुप्तावस्वपन्व्यतिरिच्येत ॥ ५६ ॥ '[57]सर्वभिन्नं परात्मानं विस्मरन्संसरेदिह। अभिन्नं संस्मरन्याति तमो नास्त्यत्र संशय'इति च ॥ ५७ ॥ इति षष्ठतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

[13]एषां पक्षे तदवताराणामनुध्येयपदाब्जयुग्मम्। 'विष्णुर्ब्रह्मप्राणवीन्द्ररुद्रदारानप्यृते हरः। ध्येयो हरेः पार्षदाद्यैर्ध्यायन्हरिचतुर्मुखौ। प्राणमेषां तथा दारान्न स्वतन्त्रतया क्वचिदि'ति तन्त्रमालायाम् ॥ १३ ॥

तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वस्थामलान्तःकरणोऽभ्ययान्मुनिः। प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमा तमनादिपूरुषम् ॥ ३१ ॥ स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपसेचयन्मुहुः। प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम् ॥ ३२ ॥ अहं वै सर्वभूतानि भूतात्मा भूतभावनः। शब्दब्रह्म परंब्रह्म ममोभे शाश्वती तनू ॥५१॥ लोके विततमात्मानं लोकं चात्मनि सन्ततम्। उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ॥ ५२ ॥ एवं जागरणादीनि जीवस्थानानि चात्मनः। मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः। अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ॥५६॥ यद्येष विस्मृतः पुंसो मद्भावो भिन्न आत्मनः। ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥ ५७ ॥

सप्तदशोऽध्यायः

एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम्। यः क्षत्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्ड्यः ॥ १३ ॥ नैवात्मा

SGDF
Sri Gargeshwari Digital Foundation

'[22]सेवायोग्यातिरेकेण स्थानामपि न दास्यति । अपराधातिरेकेण नान्यस्यातः समो हरिरि'ति माहात्म्ये ॥ २२ ॥ '[19]यत्तद्भगवता कृतं तदेव नियतं भवेत् ॥ १९ ॥ [20]अतोऽन्येषां वरः शापो गुणदोषप्रकर्तृता । स्वतः प्राप्ता भेदकृतिर्वासनारूपिणो यथा । विद्यमानस्य मनसि पुनः स्वप्नेषु दर्शनम् । भगवद्वशता यस्मात्सर्वेषां ज्ञेयमेव तदि'ति प्रकाशसंहितायाम् ॥२०॥ [37]प्रतिशप्तुमलं तमः । 'देवा एव तदन्येभ्यः शक्ता नास्त्यत्र संशयः । अशक्ता अपि शक्तानां शक्ताः शापादिषु स्फुटम् । तथाप्यशक्तैर्विहिताः शापाद्याः शक्तिमत्सु वै । अत्यल्पाश्चाल्पकालाश्च न सम्यक्प्रभवन्ति च । यत्नेनापोहितुं शक्या उत्तमैस्तु न संशयः । उत्तमेषु कृताः शापाः कर्तॄणां ज्ञानपुण्ययोः । निःशेषेण निहन्तारस्तदनुग्रहमन्तरा । सदारयोर्ब्रह्मविष्ण्वोर्वरशापादयोऽखिलाः । तदन्येन कृताः सर्वे निष्फला एव निश्चयात् । न चाप्यवान्तराः शापा भवन्त्येषां तु कुत्रचित् । वरा विष्णोः श्रियश्च स्युर्ब्रह्मणश्च यथाक्रमम् । उत्तमैरधमानां तु वराः शापा यथोदितम् । सम्पूर्णफलदा एव नात्र कार्या विचारणे'ति स्कान्दे ॥ ३७ ॥ इति षष्ठतात्पर्ये सप्तदशोऽध्यायः ॥ १७ ॥ १८ ॥

न परश्चापि कर्ता स्यात्सुखदुःखयोः । कर्तारं मन्यतेऽत्राज्ञ आत्मानं परमेव च ॥ १९ ॥ गुणप्रवाह एतस्मिन्कः शापः को न्वनुग्रहः । कः स्वर्गो नरकः को वा किं दुःखं सुखमेव च ॥ २० ॥ न चास्य कश्चिद्दयितः प्रतीपो न ज्ञातिबन्धुर्न परो न च स्वः । समस्य सर्वत्र निरञ्जनस्य कुतोनुरागः कुत एव रोषः ॥२२॥ देहिनां देहसंयोगाद्द्वन्द्वानीश्वरलीलया । सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव च ॥ २९ ॥ अविवेककृतः पुंसो ह्यर्थभेद इहात्मनि । गुणदोषविकल्पश्च भिदेव स्वप्नकल्पिता ॥ ३० ॥ इति भागवतो देव्याः प्रतिशप्तुमलं तमः । मूर्ध्ना सञ्जगृहे शापमेतावत्साधुलक्षणम् ॥ ३७ ॥

SGDF
Sri Gargeshwari Digital Foundation

एकोनविंशोऽध्यायः

[11]इज्या क्रिया । 'अन्तर्यामी तु यज्ञादेर्विष्णुरिज्यादिनां रमा । तत्तच्छब्दैस्ततो वाच्यौ न तु सर्वस्वरूपतः । अन्तर्यामी श्रियश्चापि विष्णुरेव न संशयः । नान्तर्यामी कश्चिदस्ति विष्णोः क्वापि कुतश्चने'ति ब्रह्मतर्के ॥ ११ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवतषष्ठस्कन्धतात्पर्ये एकोनविंशोऽध्यायः ॥ १९ ॥ षष्ठ-स्कन्धः सम्पूर्णः ॥

सप्तमः स्कन्धः

प्रथमोऽध्यायः

श्रीगुरुभ्यो नमः ॥ '[6]बाध्यादिस्थो हरिर्नित्यं बाध्यतादिगतेऽप्यपि । गीयते न तु बाध्यत्वाद्यदोषयुतत्वत'इति भविष्यत्पर्वणि ॥ ॥६॥ [6-9]दधिस्थघृतवत्काष्ठे वह्निवच्च जनार्दनः । देहेन्द्रियासुजीवेभ्यो

एकोनविंशोध्यायः

तस्या अधीश्वरः साक्षात्त्वमेकः पुरुषः परः । त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥११॥ गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् । त्वं हि सर्वशरीरात्मा श्रीः शरीरेन्द्रियाशया ॥ १२ ॥ नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः । यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ । तथेमा उत्तमश्लोक सन्तु सत्या महाशिषः ॥ १३ ॥

सप्तमः स्कन्धः

प्रथमोऽध्यायः

निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः । स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ ६ ॥ ज्योतिरादिरिवाभाति सङ्घातान्न

SGDF
Sri Garibhasri Digital Foundation

विविच्य ज्ञायते न त्वि'ति च ॥ ६, ९ ॥ [11]प्रधानपुंभ्यां सह ॥११॥ [12]काले कालविषयेऽपीशिता । देहादिकारणत्वात्सुरानीकमिव स्थितं सत्वम् । 'स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः । अप्रियश्चासुराणां स स्वभावात्तूभयं नृणाम् । देशकालौ गुणाश्चैव भक्त्यादीनप्यपेक्ष्य तु । योग्यतां च तथा कर्म सम इत्यभिधीयते । स्वतः प्रियोऽपि देवाना-मुत्पाद्यैव गुणानिमान् । इतरेषां तथा दोषान्सुखदुःखे ददात्यजः । उभयं तु मनुष्याणामतः सम इतीरितः । अनादिनियताश्चैव गुणदोषाः सुरादिषु । यथाक्रमं पुनश्चैव नियमाद्वर्धितास्तथा । विष्णुनैव ततो नित्यं विषमश्च जनार्दन'इति ब्रह्मतर्के ॥ 'न विष्णोर्विषमत्वं तु योग्यता-पेक्षया क्वचित् । योग्यतायास्तन्नियत्या विषमत्वं भवेदिती'ति स्कान्दे ॥ 'विषमत्वं तु दोषाय शुभाशुभविपर्यये । अतस्तादृशवैषम्यं ब्रह्मसूत्रे निराकृतम् । शुभाशुभनियन्तृत्वं न दोषो गुण एव सः । अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोरि'ति तन्त्रनिर्णये ॥ १२ ॥ '[21]नियमा-द्भुज्यते पुंभिर्धर्माधर्मफलं मृतौ । कैश्चिदत्रापि भुज्येत तस्मान्नाधर्म-माचरेदि'ति भारते ॥ २० ॥ [26]कैवल्याद्देहाद्यभावादेव ॥ २६ ॥ [27]अकर्तुस्तस्यान्यः कर्ता न विद्यते । इदं एषा (हिंसा) । 'व्यत्ययोऽतिशय-कुत्सनभेदेष्वि'ति सूत्रात् । कथञ्चिन्नेक्षते पृथक् । तत्रैव मनसोऽभि-निवेशेन तदन्यं नेक्षते । वैरादीनामेकतमेनापि यो युञ्ज्यात् स नेक्षत

विद्यते । विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ ९ ॥ कालं चरन्तं सृजतीश आश्रयः प्रधानपुम्भ्यां नरदेव सत्यकृत् । स तत्र-तत्रोभयसिद्धिमाशुयाल्लिङ्गात्मनो लिङ्गगुणाश्च सन्ति ॥ ११ ॥ य एष राजन्नपि काल ईशिता सत्वं सुरानीकमिवैधयत्यजः । तत्प्रत्यनीकानसुरा-न्सुरप्रियो रजस्तमस्कान्प्रमिणोत्युरुश्रवाः ॥ १२ ॥ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम् । श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः ॥२०॥ यन्निबन्धोऽभिमानोऽयं तद्वधात्प्राणिनां वधः । तथा न यस्य कैवल्यादभि-मानोऽखिलात्मनः ॥ २६ ॥ परस्येदमकर्तुर्हि हिंसा केनास्य कल्प्यते ।

SGDF
Sri Gargeshwari Digital Foundation

इति स्वभावकथनं न विधिः । 'कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् । मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः' । 'तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' ॥ 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परंभावमजानन्तो मम भूतमहेश्वरम्' ॥ 'मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः' ॥ 'यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् । तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् । हिरण्यकशिपुश्चापि भगवन्निन्दया तमः । विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः' ॥ 'वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु । भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः । अन्यावेशकृतं यत्तु तद्वराद्यैरपोह्यते । तद्विरुद्धस्वभावानामन्यथा न कथञ्चने'त्यादेः ॥ यस्मादेव कोऽप्युपद्रवो नास्ति भगवतस्तस्मादेव द्वेषादिनापि मनो योक्तुं शक्यते तत्प्रेरणया । तादृशानां तदेव चिन्तयति च । अन्यथा आत्मनो दुःखकारणं द्वेषादिकं कथं सर्वनियामको हरिरुत्पादयेत् ॥ २७ ॥ [28]तत्रैव हेतुः । यथा वैरानुबन्धेनेति । यथा वैराभिनिवेशिनः तथा भक्त्याभिनिवेशिनो न सन्ति । तत्कथमन्यथा भक्तानेव बहून्हरिः कुर्यादिति भावः ॥ २८ ॥ [29]कीटः पेशस्कृतेत्यादि चैद्यादीनां भक्तियुतत्वप्रतिपादनम् ॥ २९ ॥ [27]स्नेहाद्यायतननाशादिनाऽप्युपद्रवोऽस्य नास्तीति निर्वैरेणेत्याद्युक्तम् ॥ २७ ॥ '[28]ततः कनीयसा एव देवा ज्यायसा आसुरा' इति श्रुतिः । तन्मयतां मनसस्तत्राभिनिवेशनम् । 'मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ ।

तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा । स्नेहात्कामेन वा युञ्ज्यात्कथञ्चिन्नेक्षते पृथक् ॥ २७ ॥ यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् । न तथा

SGDF
Sri Gargeshwari Digital Foundation

न तथाऽऽग्रहिणो भक्ता ऋते ब्रह्माणमव्ययमि'ति हरिवंशेषु ॥ २८ ॥ [29]योगः स्नेहः । संरम्भभययुक्तस्नेहेन । 'प्रीतिः स्नेहस्तथा योगः प्रेमबन्ध इतीर्यत'इति शब्दनिर्णये ॥२९॥ [30]वैरयुक्तयाऽप्यनुचिन्तया तमापुः । 'अनुचिन्तेति तामाहुर्भक्तिपूर्वा तु या स्मृतिरि'ति च ॥ 'स्नेहादन्नं ददातीति स्वाकर्षणभयेऽपि च । विद्यमानेऽप्यल्पकोपे सङ्गतिस्नेहतस्तथा ॥ पेशस्कृद्रूपतां कीटो यथा याति तथैव तु । चैद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि ॥ निजस्वभावया भक्त्या नीता हरिसरूपताम् । तथा हि करुणो विष्णुरन्यावेशाद्यदि द्विषन् ॥ हीयते किं ममानेन नित्यानन्दस्वरूपिणः । देहबन्धयुतानां हि द्वेषिणाऽपकृतं भवेत् ॥ मम को ह्यपराध्येत निर्दोषसुखरूपिणः । अतो मय्यपराधस्तु स्वस्मिन्नेव न मे भवेत् ॥ अतो यच्चासुरावेशात्कृतमेतेन दुष्कृतम् । अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् ॥ इति मत्वा मोचयति चैद्यादीनपि केशव'इतिं ब्रह्माण्डे ॥ ३० ॥ [31]कामादिभिरपि यथावद्भक्त्या सहैव मन आवेश्य तदघं यत्तु द्वेषादिकृतमघं यथाभूतया भक्त्या हित्वा ॥ ३१ ॥ '[32]गोप्यः कामयुता भक्ताः कंसाविष्टः स्वयं भृगुः । ज्ञेयो भययुतो भक्तश्चैद्यादिस्था जयादयः । विद्वेषसंयुता भक्ता वृष्णयो बन्धुसंयुताः । बहुमानस्नेहसाम्याद्देवा भक्ताः प्रकीर्तिताः । स्नेहोपसर्जना देवबहुमानान्मुनीश्वराः । बहुमानोऽपि देवानामृषिभ्योऽप्यधिको मतः । ब्रह्मवीन्द्रेन्द्रकामादेरितरेषां यथाक्रममि'ति ब्रह्मतर्के ॥ ३२ ॥

भक्तियोगेन इति मे निश्चिता मतिः ॥ २८ ॥ कीटः पेशस्कृता रुद्धः कुड्ये यान्तमनुस्मरन् । संरम्भभययोगेन विन्दते तत्स्वरूपताम् ॥ २९ ॥ एवं कृष्णे भगवति मायामनुज ईश्वरे । वैरेण धूतपाप्मानस्तमापुरनुचिन्तया ॥ ३० ॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः । आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ ३१ ॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥३२॥

SGDF
Sri Gangeshwari Digital Foundation

[33]कतमोऽपि भक्तियोगो न वेनस्य । तस्मात्केनापि प्रकारेण उपायेनैव मनो निवेशयेत् । नानुपायेन । 'उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायका'इति शब्दनिर्णये ।। ३३ ।। [34]स्वतो भक्ताश्चैद्यादयोऽपि परावेशाद्द्वेषिण इत्यत्र हेतुर्मातृष्वस्रेय इत्यादि ।। ३४ ।। [38-39]द्वास्थाविति अनेनाधिकारस्थत्वमुक्तम् । 'अधिकारस्थिताश्चैव विमुक्ताश्च द्विधा जनाः । विष्णुलोकस्थितास्तेषां वरशापादियोगिनः । अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च । विमुक्त्यनन्तरं तेषां वरशापादयो न तु । देहेन्द्रियासुयुक्ताश्च पूर्वं पश्चान्न तैर्युताः । अप्यभीमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युता'इति तन्त्रसारे ।। ३८, ३९ ।। [44]सर्वभूतात्मनि भूतम् ।। ।।४४।। '[45]हिरण्यकशिपुर्भूतममन्यत मृतौ हरिम् ।। अतो भयानको जातस्तत्र राजानमेव च । मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः । मृतिकाले हरिं चैव मत्वा भक्त्यैव केवलम् । द्वास्थत्वं हरिमाविश्य प्रापैव मनुजोऽपि त्वि'ति गारुडे ।। (वि० अ० २ श्लो० ९) 'विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवाचकाः । विष्णोर्गुणह्रासवाचः श्रीब्रह्मादेस्तथा क्रमात् । विष्ण्वादिद्वेषतश्चैव सुखवाचस्तथाऽखिलाः । मोहनार्थाः समुद्दिष्टा यथार्थद्योतकास्तथे'ति प्रकाशसंहितायाम् ।। ४५ ।। [48]वैरानुबन्धः वैरयुक्ता भक्तिः । 'अनुबन्धस्तु भक्तिः स्याद्बन्धः स्नेह उदाहृत'-इति च ।। ४८ ।। इति सप्तमतात्पर्ये प्रथमोऽध्यायः ।। १ ।।

कतमोऽपि न वेनस्य पञ्चानां पूरुषं प्रति। तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३३ ॥ मातृष्वस्रेयो वश्चैद्यो दन्तवक्त्रश्च पार्थिव । पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ ॥ ३४ ॥ पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः । दिग्वाससः शिशून्मत्वा द्वाःस्थौ तान्प्रत्यषेधताम् ॥ ३८ ॥ अशापन्कुपिता एवं युवां वासं न चार्हथः । रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ॥ ३९ ॥ तं सर्वभूतात्मभूतं प्रशान्तं समदर्शनम् । भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ॥ ४४ ॥ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवः सुतौ । रावणः कुम्भकर्णश्च सर्वलोकप्रतापिनौ ॥४५॥ वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्म्यताम् । नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४८ ॥

SGDF
Sri Gurgeshwari Digital Foundation

द्वितीयोऽध्यायः

'[23-24]विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम्। हरिरेव हि सर्वस्य मूलं सम्यङ्मतो नृपे'ति ब्राह्मे ॥ २३, २४ ॥ [22]धत्तेऽसावात्मनो लिङ्गं जीवमनआदीनामाधारं ब्रह्म ॥२२॥ [23-24]लिङ्गवानिव। जीव इव। 'असमं समतामेति भ्रान्तिदृष्ट्यैव केवलम्। जीवेन ब्रह्म न समं तत्त्वदृष्ट्या कथञ्चने'ति षाड्गुण्ये ॥ 'यथोदचलनाद्वृक्षप्रतिबिम्बप्रचालनात्। तटस्थवृक्षचलनं कल्पयेदबुधो नरः। तथा मनसिजैर्दोषैराभासे दूषिते नरः। आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत्। आत्मनश्चक्षुषो भ्रान्त्या यथा पश्येद्भ्रमं भुवः। तथैव स्वात्मनो दोषादोषवद्ब्रह्म पश्यती'ति ब्रह्मतर्के ॥ २३, २४ ॥ [26]विवेकस्मृतिः अविवेकिन एव विवेकित्वभ्रान्तिः। 'अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे। असुरावेशतस्त्वन्यान्हरिस्तोतॄन्द्विषन्ति चे'ति पाद्मे ॥ २६ ॥ [37]यत्रोद्भवस्तत्र गतं अदर्शनं गतम्। 'अदर्शनादिहायातः पुनश्चादर्शनं गत'इति भारते ॥ ३७ ॥ [41]अन्यतम आत्मा परमात्मा। 'सुविरुद्ध-

---

द्वितीयोऽध्यायः

तावद्यात भुवं यूयं ब्रह्मक्षत्रसमेधिताम्। सूदयध्वं तपो यज्ञस्वाध्यायव्रतदानकान् ॥ १० ॥ विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान्। देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥११॥ नित्य आत्माऽव्ययः शुद्धः सर्ववित्सर्वगः परः। धत्ते वासात्मनो लिङ्गं मायया विसृजन्गुणान् ॥२२॥ यथाम्भसा प्रचलता तरवोऽपि चला इव। चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ॥ २३ ॥ एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान्। याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥ सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः। अविवेकश्च चिन्ता च विवेकः स्मृतिरेव च ॥ २६ ॥ यम उवाच—अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः। यत्रोद्भवस्तत्र गतं मनुष्यं स्वयं सधर्मा अनुशोचन्त्यपार्थम् ॥३७॥ भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति कालेन भवन्ति सर्वशः। न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो

SGDF
Sri Gargeshwari Digital Foundation

स्वरूपत्वाजीवादन्यतमो हरिरि'ति वामने ॥४१॥ [43]भगवन्माहात्म्यकथनेन सर्वस्य तद्वशत्वात्स एव भजनीयो न शोकेन प्रयोजनमि'ति फलितार्थः। 'देहदारुगतौ प्राणवह्नी सर्वगतं नभः। देहादिभ्यो यथा भिन्ना न लिप्यन्ते च तद्गुणैः। तथा जीवगतो विष्णुर्जीवाद्भिन्नो न तद्गुणैरि'ति च ॥ ४३ ॥ [44-48]इन्द्रियवान् जीवः। भजत्युत्सृजति ह्यन्यः परमात्मा। स एव श्रोताऽनुवक्ता च। 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता स योऽतोऽश्रुत'इत्यादेः ॥ मुख्यप्राणोऽपि स्वतो न श्रोता किमु जीव इति। अयं ननु सुयज्ञ इत्याक्षेपः। यश्च सुयज्ञः सोऽपि स्वतः श्रोतुं वक्तुं न च शक्तः। अतस्तस्यानुशोकेन किमित्यर्थः। 'अन्यो जीवो चितो देहात्तद्वशो देह उच्यते। पश्यामीत्यभिमानोऽस्य चक्षुराद्यभिमानवान् ॥ न तद्वशाश्चक्षुराद्या न दृष्ट्यादौ स ईश्वरः। चक्षुराद्या मनो जीवो दृष्ट्यादिश्चापि यद्वशे ॥ स प्राण इति विज्ञेयो ज्ञाता मन्ता च स प्रभुः। तस्यापि ज्ञातृमन्तृत्वं न स्वतः शक्यते क्वचित् ॥ यस्तस्य ज्ञातृमन्तृत्वदाता स भगवान्हरिः। स्वतो ज्ञाता च मन्ता च द्रष्टा श्रोता च केशवः ॥ ज्ञानादिदो न तस्यान्यः सर्वस्य ज्ञानदो हरिः। स देहान्भजते विष्णुः स्वेच्छयैवोत्सृजत्यपि ॥ यावद्देहस्थितो विष्णुस्तावज्जीवो विपर्ययः। तावत्क्लेशादयश्चास्य वृथा चेन्द्रियवृत्तयः ॥ यदोत्सृजति देहं स हरिः सर्वात्मना विभुः। तदा तदभिमानी तु जीवो मुच्येत संसृतेः ॥ अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ। देहाभिमानी त्वेकोऽत्र न मानी मानदः पर'इति गारुडे। 'इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते। अतन्मानाद्धरिः प्रोक्त-

---

निबध्यते ॥४१॥ यथाऽनलो दारुषु भिन्न ईयते यथाऽनलो देहगतः पृथक् स्थितः। यथा नभः सर्वगतं न सज्जते तथा गुणैः सर्वगुणाश्रयः परः ॥ ४३ ॥ सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ। यः श्रोता योऽनुवक्तेह न स दृश्येत कर्हिचित् ॥ ४४ ॥ वितथाभिनिवेशोऽयं

SGDF
Sri Gargeshwari Digital Foundation

स्त्वदेहोऽनिन्द्रियस्तथा। जीवानभिमते देहे न विष्णुर्जीवति स्थितः। अतश्चादेह उद्दिष्टः परमात्मा सनातन'इति प्रकाशसंहितायाम्॥ स चान्यः श्रोतुर्वक्तुश्चेति चशब्दः। भूतेन्द्रियमनोरूपान्। 'लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेवचे'ति शब्दनिर्णये॥ ४४-४८॥ [47]आत्मा परमात्मा। कर्मबन्धनो जीवः। ततः परमात्मनो विपरीतः॥ ४७॥ [48]मृषा वृथा। स्वप्नदृष्टवित्तादिवत्। 'लेपाभिमानी जीवस्तु स्वरूपानुभवी न च। मुक्तेः प्राक्तेन मान्युक्तो न मानी विष्णुरुच्यते। सर्वं ममेति-पश्यन्नप्यलेपाभिमतिर्यतः। सम्यक्स्वरूपानुभवात्स्वतन्त्रत्वाददोषत' इति ब्रह्मतर्के॥ ४८॥ '[58]अहंममाभिमानादि त्वयथोत्थमनित्यकम्। महदादि यथोत्थं च नित्या चापि यथोत्थिता। अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च। यथार्थभूतश्च पर एक एव जनार्दन' इति च॥ ५८॥ '[60]क आत्मा कः पर' इति देहाद्यपेक्षया। 'न हि देहादिरात्मा स्यान्न च शत्रुरुदीरितः। अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम्। यस्तु देहगतो जीवः स हि नाशं न गच्छति। ततः शत्रुविवृद्धौ वा स्वनाशे शोचनं कुतः। देहादिव्यतिरिक्तौ तु जीवेशौ प्रतिजानताम्। अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा। शत्रुनाश-स्तथाऽज्ञाननाशो नान्यः कथश्चने'ति ब्रह्मवैवर्ते॥ ६०॥ इति सप्तम-तात्पर्ये द्वितीयोऽध्यायः॥ २॥

तृतीयोऽध्यायः

'[11]जानतामपि कर्तव्यं कर्मात्मसदृशं सदा। तत्रात्मसदृशा-

यद्गुणेष्वर्थदृग्वचः। यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा॥ ४८॥ हिरण्यकशिपुरुवाच—बाल एवं प्रवदति सर्वे विस्मितचेतसः। ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम्॥ ५८॥ क आत्मा कः परो वात्र स्वीयः पारक्य एव च। स्वपराभिनिवेशेन विना ज्ञानेन देहिनः॥ ६०॥

तृतीयोऽध्यायः

श्रूयतां किं न विदितं तवाथापि निवेद्यते। दृष्ट्वा चराचरमिदं तपो-

SGDF Sri Gurgeshwari Digital Foundation

ज्ञानाद्रागाद्यैर्वा विमोहिताः। जानन्तोऽपि ह्यसदृशं कर्म कुर्युर्ऋते विभुम्। चतुरास्यं स नायोग्यं कर्म कुर्यात्कथञ्चने'ति नारदीये ॥ 'तपसा विद्यया वापि ज्ञानध्यानादिनाऽथवा। व्यस्तैः समस्तैरपि वा कुर्वतां यत्नमुत्तमम्। संहारविक्षेपशतैर्बहुकोटिभिरेव वा। न शक्यन्ते समारोढुं स्वात्मायोग्यपदानि तु। तथाप्याचरतां कुर्युर्दैत्यानां सुरनायकाः। विघ्नं तु तपआदीनां वैयर्थ्यस्यापनुत्तय'इति प्रकाशसंहितायाम् ॥ ११ ॥ [12]वैष्णवादिभिर्ब्रह्मनिर्मितैः। 'ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतदृक्तथे'ति शब्दनिर्णये ॥ १२ ॥ '[14]भवाय श्रेयसे चैव न कश्चित्तदपेक्षते। मधुकैटभयोश्चैव हिरण्यादेस्तथैव च। नान्यो ब्रह्मपदं वाञ्छत्यृजून्योग्यान्विना क्वचित्। ततः श्रेयांसि वाञ्छन्ति न तु तत्पदमाप्नुयुरि'ति ब्रह्माण्डे ॥ 'भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष उदाहृतः। वृद्धस्य न पुनर्ह्रासो भूतिरित्येव कथ्यत'इति शब्दनिर्णये ॥ 'सकामं तु तपः क्रूरं लोकानां भयकृद्भवेत्। इतरच्छान्तये सर्वलोकानां भवति ध्रुवमि'ति प्रकाशिकायाम् ॥ 'ब्रह्माणभजद्ब्रह्मपदार्थं स हिरण्यक'-इति स्कान्दे ॥ १४ ॥ [21]जितः वशीकृतः। 'पराभूतं वशस्थं च

योगसमाधिना ॥ ९ ॥ अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम्। तदहं वर्धमानेन तपो यज्ञसमाधिना ॥ १० ॥ कालात्मनोश्च नित्यत्वात्साधयिष्ये तथाऽऽत्मनः ॥११॥ अन्यथेदं विधास्येऽहमयथापूर्वमोजसा। किमन्यैः कलिनिर्धूतैः कल्पान्तैर्वैष्णवादिभिः ॥१२॥ इति शुश्रुम निर्बन्धं तपः परममास्थितः। विधत्स्वानन्तरं युक्तं स्वयं त्रिभुवनेश्वर ॥ १३ ॥ तवासनं हि जगतां पारमेष्ठ्यं जगत्पते। भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १४ ॥ तपन्तं तपसा लोकान् यथा भावितते रविम्। विलक्ष्य विस्मितः प्राह हसंस्तं हंसवाहनः ॥१७॥ ब्रह्मोवाच—उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप। वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १८ ॥ व्यवसायेन तेऽनेन दुष्करेण मनस्विभिः। तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ॥ २१ ॥ ततस्त आशिषः सर्वा ददाम्यसुर पुङ्गव। मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं न च निष्फलम् ॥ २२ ॥ स

SGDF
Sri Gargeshwari Digital Foundation

जितमित्युच्यते बुधैरि'ति शब्दनिर्णये ॥ २१ ॥ '[27]प्रायस्तु स्तुति-शब्देषु मिश्रा वाचो हरिं विना । केचिज्जीवगुणास्तत्र तन्नियन्तुर्हरेः परे । एकस्थानैककार्यत्वाद्विष्णोः प्राधान्यतस्तथा । जीवस्य तदधीनत्वान्न भिन्नाधिकृतं वच'इति ब्रह्मतर्के ॥ २७ ॥ [28]त्रिवृता प्रकृत्या ॥ ॥ २८ ॥ [30]प्राणेन सह ॥ ३० ॥ [31]सप्ततन्तून्सप्तक्रतून् ॥ ३१ ॥ [32]जीवानां प्राणधारकः ॥ ३२ ॥ '[33]परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः । तस्मान्न व्यतिरिक्तं त्वदित्याहुर्वेदवेदिन'इति पाद्मे । विद्याश्च कलाश्च विद्याकलाः । 'महाविद्याः कलाश्चैव त्वत्तनावाश्रिता यतः । विद्यातनुरिति प्राहुरतस्त्वां तत्त्ववेदिन'इति च । त्रिपृष्ठः तुरीयः । 'ब्रह्मणोऽप्यधिकं विष्णुं जानन्नपि हिरण्यकः । ब्रह्माणं तद्गुणैः स्तौति तद्वविष्णुविवक्षये'ति च ॥३३॥ इति सप्तमतात्पर्ये तृतीयोऽध्यायः ॥३॥

निरीक्ष्याम्बरे देवं हंसवाहनमास्थितम् । ननाम शिरसा भूमौ तद्दर्शन-महोत्सवः ॥२५॥ उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम् । हर्षाश्रु-पुलकोद्भेदो गिरा गद्गदयाऽगृणत् ॥२६॥ हिरण्यकशिपुरुवाच—कल्पान्ते कालसृष्टेन योऽन्धेन तमसाऽऽवृतम् । अभिव्यनक् जगदिदं स्वयं ज्योतिः स्वरोचिषा ॥२७॥ आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति । रजः-सत्वतमोधाम्ने पराय महते नमः ॥ २८ ॥ नम आद्याय बीजाय ज्ञान-विज्ञानमूर्तये । प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥२९॥ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् । चित्तस्य चित्तिर्मन इन्द्रियाणां पतिर्महाभूतगुणाशयेशः ॥ ३० ॥ त्वं सप्ततन्तून्वितनोषि तन्वा त्रय्या चतुर्होत्रकविद्यया च । त्वमेक आत्माऽऽत्मवतामनादि-रनन्तपारः कविरन्तरात्मा ॥ ३१ ॥ त्वमेव कालोऽनिमिषो जनाना-मायुर्लवाद्यावयवैः क्षिणोषि । कूटस्थ आत्मा परमेष्ठ्यजो महान् त्वं जीवलोकस्य च जीव आत्मा ॥ ३२ ॥ त्वत्तः परं नापरमप्यनेजदेजच्च किञ्चिद्व्यतिरिक्तमस्ति । विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३३ ॥

SGDF
Sri Gangeshwari Digital Foundation

चतुर्थोऽध्यायः

'[4]स्वतो भक्ता हिरण्याद्याः परावेशाद्धरौ द्विष'इति च ॥ ४ ॥ '[13]आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः। मरुतश्चैव विश्वे च साध्याश्चैव च तद्गताः। अतस्त्रय इति प्रोक्ताश्चत्वारो मानुषाः स्मृता'-इति स्कान्दे ॥ 'उपायनं ददुः सर्वे विना देवान्हिरण्यक'इति च। 'अयज्ञभागेष्वपि तु सुरशब्दः प्रदृश्यते। यज्ञभागभुजस्त्वेव त्रय इत्यभिशब्दिता'इति च ॥ 'यत्र क्व च यशस्थानमन्येषामिति केशवः। सर्वत्रापि तु देवानामित्यन्यान्पूजयेत्क्वचिदि'ति च ॥ १३ ॥ '[32-35]अन्येषां हरिसाम्यं तु किञ्चित्साम्यमुदीरितम्। सम्यक्साम्यं तु मत्स्यादेरिति शास्त्रस्य निर्णय'इति च ॥ ३२-३५ ॥ इति सप्तमतात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

'[12]स्वातन्त्र्येणान्यसद्भावनिषेधाय श्रुतिस्त्वियम्। अन्योऽसा-

---

चतुर्थोऽध्यायः

एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः। भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥ तस्मिन् महेन्द्रभवने महाऽसुरो महाबलो निर्जितलोक एकराट्। रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥ १२ ॥ तमङ्ग मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः। उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसाम्पदम् ॥ ॥ १३ ॥ निर्वैराय प्रशान्ताय स्वसुताय महात्मने। प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥२९॥ आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः। दासवत्सन्नतार्याङ्घ्रिः पितृवद्दीनवत्सलः ॥ ३२ ॥ यस्मिन् महागुणा राजन् गृह्यन्ते कविभिर्मुहुः। न तेऽधुनाभिधीयन्ते यथा भगवतीश्वरे ॥ ॥ ३५ ॥

पञ्चमोऽध्यायः

प्रह्लाद उवाच—परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः।

SGDF
Sri Gargeshwari Digital Foundation

वन्योऽहमि'तिपश्यन्नज्ञ इति स्म ह। आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः। आह तद्ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु। स्वरूपसत्ता कर्तृत्वं भोगो मोक्षस्तथैव च। मुक्तस्यावस्थितिश्चैव सर्वं विष्णोर्वशे सदे'ति ब्रह्मतर्के ॥ १२ ॥ [23]आत्मस्थत्वेन वेदनमात्मनिवेदनम्। 'मुक्तस्यापि ममान्तस्थो नियन्तैव हरिः सदा। इति ज्ञानं समुद्दिष्टं सम्यगात्मनिवेदनमि'ति च ॥ २३ ॥ [28]क्व तदात्ममानो मम ? ॥ ॥ २८ ॥ इति सप्तमतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

'[28]अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृत'इति च ॥ ॥ २८ ॥ [29]प्रकृत्या तमसाऽऽवृतत्वाद्धरेरैश्वर्यं न ज्ञायते ॥ २९ ॥ '[30]विष्णोर्गृहत्वाद्भूतेषु दया कार्या विजानते'ति च ॥३०॥ '[31]काङ्क्षतो

विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ ११ ॥ स यदाऽनुगतः पुंसां पशुबुद्धिर्विभिद्यते। अन्य एष तथान्योऽहमिति देहगता सती ॥ १२ ॥ प्रह्लाद उवाच—श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥ गुरुपुत्र उवाच—न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो। नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं क्व तदात्ममानः ॥ २८ ॥

षष्ठोऽध्यायः

परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु। भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २६ ॥ गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा। एक एव परो ह्यात्मा भगवान् ईश्वरोऽव्ययः ॥२७॥ प्रत्यगात्मस्वरूपेण कालरूपेण च स्वयम्। व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्यो विकल्पितः ॥ २८ ॥ केवलानुभवानन्दस्वरूपः परमेश्वरः। माययान्तर्हितैश्वर्य ईड्यते गुणसर्गया ॥ २९ ॥ तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम्। भावमासुरमुन्मुच्य तया तुष्यत्यधोक्षजः ॥ ३० ॥ तुष्टे च तत्र किमलभ्यमनन्त

SGDF
Sri Gangeshwari Digital Foundation

मोक्षगमपि सुखं नाकाङ्क्षतो यथे'ति च ॥ ३१ ॥ इति सप्तमतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

'[18]षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु । तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेदि'ति च ॥ १८ ॥ [19]हेतुत्वाद्विष्ण्वधीनत्वं शरीरस्य ॥१९॥ '[23]अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः । जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृत'इति च ॥ २३ ॥ [25]बुद्धेर्जीवस्य । 'सत्वबुद्ध्यादिशब्दैस्तु जीवोऽपि क्वचिदीर्यते । जागृ(ग्र)दाद्याः कर्म चैव सुखदुःखे च तस्य हि । जागृ(ग्र)दादेः परो द्रष्टा सुखनिष्ठो हरिः स्मृतः ॥ २५ ॥ '[26]स जीवेन सह स्थानात्तत्स्वरूपः प्रदृश्यते । अज्ञदृष्टया न ज्ञदृष्टया यथा गन्धयुतोऽनिलः ॥ २६ ॥ '[27]अदृष्टेर्जीवपरयोर्भेदस्याप्नोति संसृतिम् । अभेदनिश्चयाद्याति तमो नास्त्यत्र संशय' इति च ॥ २७ ॥ [26]बुद्धिभेदैर्जीवानां तारतम्यज्ञापकैः ॥ २६ ॥ '[27]दुःखरूपोऽपि संसारो बुद्धिपूर्वमवाप्यते । यथा स्वप्ने शिरश्छेदं

आद्ये किं तैर्गुणव्यतिकरैरिह येऽनुसिद्धाः । धर्मादिभिः किमगुणेन च काङ्क्षितेन सारं जुषां चरणयोरुपगायतां नः ॥ ३१ ॥

सप्तमोऽध्यायः

जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः । फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः । अविक्रियः स्वदृग्वश्यो व्यापकोऽसङ्ग्यनावृतः ॥ १९ ॥ अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः । विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥२२॥ देहस्तु सर्वसङ्घातो जगत्तस्थुरिति द्विधा । अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ॥ २३ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः । ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥२५॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः । सरूपमात्मनो धत्ते गन्धैर्वायुरिवान्वयात् ॥२६॥ एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः । अज्ञान-

SGDF
Sri Gargeshwari Digital Foundation

स्वयं कृत्वाऽऽत्मनो वशः । ततो दुःखमवाप्येत तथा जागरितेऽपि तु । जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तत'इति च ॥ २७ ॥ [30]धियः प्रवाहस्योपरमः परमेश्वरे रमणम् ॥ ३० ॥ [38]तद्भावभावः । तद्यथा-स्वरूपम् भक्तिः ॥ ३८ ॥ '[36]केचिद्भक्ता विनृत्यन्ति गायन्ति च यथेप्सितम् । केचित्तूष्णीं जपन्त्येव केचिच्चोभयकारिण'इति च ॥३६॥ [39]ब्रह्मनिर्वाणसुखं ब्रह्मनिमित्तनिर्वाणसुखम् ॥ ३९ ॥ [40]अशेषदेहिनां सामान्यतो हृदिस्थत्वेन ॥ ४० ॥ '[44]अप्रयासेन करणमनीहा प्रोच्यते बुधैरि'ति च ॥ ४४ ॥ '[51]व्यञ्जनाज्जगतो विष्णुर्बीजं न परिणामत'-इति च ॥ ५१ ॥ [56]अच्युततां च्युतिवर्जनम् ॥ ५६ ॥ इति सप्तम-तात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

मूलोऽपार्थोऽपि पुंसः स्वप्न इवाप्यते ॥ २७ ॥ तस्मात् भवद्भिः कर्तव्यः कर्मणां त्रिगुणात्मनाम् । बीजनिर्हरणे योगः प्रवाहो परमो धियः ॥३०॥ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि । यदाऽति हर्षोत्पुलकाश्रुगद्गदः प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३६ ॥ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् । मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्मगतिर्गतत्रपः ॥ ३७ ॥ तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः । निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३८ ॥ अधोक्षजालापमिहा-शुभात्मनः शरीरिणः संसृतिचक्रशातनम् । तद्ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३९ ॥ कोऽतिप्रयासोऽसुर-बालका हरेरुपासने स्वे हृदि छिद्रवत्सतः । अस्यात्मनः सख्युरशेष-देहिनां सामान्यतः किं विषयोपपादनैः ॥ ४० ॥ सुखाय दुःखमोक्षाय सङ्कल्प इह कर्मणः । सदाऽऽप्नोतीह या दुःखमनीहायां सुखोन्नतिम् ॥४४॥ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः । भूतैर्महद्भिः स्वकृतैः कृतानां बीजसंज्ञितः ॥५१॥ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः । खगा-मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ॥ ५६ ॥

SGDF
Sri Gangadharan Digital Foundation

अष्टमोऽध्यायः

[44]तद्विप्रलुप्तमिति सादृश्याभेदवचनम् । आलोचनमेव तपः । 'यस्य ज्ञानमयं तप'इति श्रुतेः ॥४४॥ [51]नटनं तु कथाबन्धो नाट्यकं भावदर्शनमि'ति गान्धर्वे ॥ ५१ ॥ इति सप्तमतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'[2]अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः । नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नो ययौ ॥ २ ॥ '[3]प्रह्लादे चैव वात्सल्यदर्शनाय हरेरपि । ज्ञात्वा मनस्तथा ब्रह्मा प्रह्लादं प्रेषयत्तदा । एकत्रैकस्य वात्सल्यं विशेषाद्दर्शयेद्धरिः । अवरस्यापि मोहाय क्रमेणैवापि वत्सल'-इति ब्रह्माण्डे ॥ ३ ॥ [10]द्विषड्गुणयुतात् । 'ज्ञानं च सत्यं च दमः शमश्च ह्यमात्सर्यं ह्रीस्तितिक्षाऽनसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रता द्वादश ब्राह्मणस्ये'ति भारते ॥ १० ॥ [20]कर्तृकर्मक्रियादीनां

अष्टमोऽध्यायः

ऋषय ऊचुः—त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज । तद्विप्रलुप्तममुनाद्यशरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४४ ॥ गन्धर्वा ऊचुः—वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः । स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५१ ॥

नवमोऽध्यायः

साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् । अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शङ्किता ॥ २ ॥ प्रह्लादं प्रेषयामास ब्रह्माऽवस्थितमन्तिके । तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥ विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् । मन्ये तदर्पितमनोवचनात्मगेहप्राणः पुनाति सकलं न तु भूरिमानः ॥ १० ॥ यस्मिन् यतो

SGDF
Sri Gangeshwari Digital Foundation

सत्तावृत्तिस्तथैव च। विष्णवधीनं यतः सर्वं सर्वरूपस्तदुच्यत' इति ब्रह्मतर्के ॥ २० ॥ [21]दशेन्द्रियप्राणमनोऽरम्। मूलं मन एव संसारचक्रस्य ॥ २१ ॥ [26]रमादीनामिदानीं नार्पितः ॥२६॥ [27]रमादीनामधिकोदयोऽपि सेवाधिकत्वादेव ॥ २७ ॥ '[26-27]श्रीब्रह्मब्राह्मीवीन्द्रादित्रिकतत्स्त्रीपुरुष्टुताः। तदन्ये च क्रमादेव सदा मुक्तौ सृतावपि। हरिभक्तौ च तज्ज्ञाने सुखे च नियमेन तु। परतः स्वतः कर्मतो वा न कथञ्चित्तदन्यथे'ति ब्रह्मतर्के ॥ २६-२७ ॥ [31]यथा वृक्षश्च वृक्षदाहश्च दैवकालाधीनत्वाद्दैवं कालश्चेत्युच्यते एवं त्वदधीनत्वात्सर्वस्य सर्वं त्वमित्युच्यसे, स्वतस्तद्भिन्नोऽपि ॥ अहं चान्यश्च परमेश्वर एवेत्यपार्था भ्रान्तिः। तदधीनत्वादेव स इत्युच्यते। न स्वरूपत्वादित्यर्थः ॥ ३१ ॥ [32]तुर्यस्थितः ॥ ३२ ॥ [33]जगदात्मकमब्जमपि भगवद्वशत्वात्तद्वपुः। स्थावराणां तु सर्वेषां देवता याऽभिमानिनी। विशेषाद्वटबीजे च साऽश्वत्थे च व्यवस्थिता ॥ अदृश्या कणिका नाम

यर्हि च येन यस्य यस्मै यथायमुत यस्त्वपरः परो वा। भावं करोति विकरोति पृथक् स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम् ॥ २० ॥ मायामनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः। छन्दोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥२१॥ क्वाऽहं रजः प्रभव ईश तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा। न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरप्रसादः ॥ २६ ॥ नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथापि। संसेवया सुरतरोरिव ते प्रसादः सेवानुरूप उदयो न परावरत्वम् ॥२७॥ त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था। यद्यस्य जन्मनिधनं स्थितिरीक्षणं च तद्वै तदेव खलु कालवदुष्टितर्वोः ॥ ३१ ॥ न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषासनो निजसुखानुभवो निरीहः। योगेन मीलितदृगात्मनि वीतनिद्रस्तुर्यस्थितो ननु तमोऽनुगुणांश्च युङ्क्ते ॥ ३२ ॥ तस्यैव ते वपुरिदं निजकाल शक्त्या सञ्चोदितं प्रकृतिधर्मिण आत्मगूढम्। अम्भस्यनन्त-

SGDF
Sri Gurgeshwari Digital Foundation

सा वृक्षान्व्यञ्जयत्यपि। अतो बीजमिति प्रोक्ता सा जातेऽप्यङ्कुरे स्थिता ॥ एवं हरिः कारणेषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं नात्र दृश्यत'इति च ॥ ३३ ॥ [36]मायामयं ज्ञानस्वरूपम् । सदुपलक्षणसन्निवेशं आनन्दादिलक्षणसमुदायरूपम् ॥ ३६ ॥ '[35]गन्धाख्या देवता यद्वत्पृथिवीं व्याप्य तिष्ठति। एवं व्याप्तं जगद्विष्णुं ब्रह्माऽऽत्मस्थं ददर्श हे'ति च ॥ ३५ ॥ [44]प्रायेण देवमुनयः । 'आश्रितेषु कृपा कार्या विशेषात्तात्त्विकैः सुरैः । मुनिभिश्च तथा कैश्चित्कैश्चित्कार्याऽखिलेष्वपि । तथापि तात्त्विकसुरकृपाविषयतां गताः । एत एव विमुच्यन्ते तदन्ये न कथञ्चने'ति च ॥ ४४ ॥ [47]कार्यकारणरूपे तद्वशत्वापेक्षया साक्षात्स्वरूपापेक्षया स्वरूपादन्यद्रूपं न ॥ ४७ ॥ इति सप्तमतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

[19]जन्मान्तरपितृभिस्त्रिसप्तभिः ॥ १९ ॥ '[22]ऋते तु तात्त्विका-

---

शयनाद्विरमत्समोघेर्नाभेरभूत्स्वकणिकावटवन्महाब्जम् ॥३३॥ तत्सम्भवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स बहिर्विचिन्वन् । नाविन्ददब्दशतमप्सु निमज्जमानो जातेऽङ्कुरे कथमिहोपलभेत बीजम् ॥ ॥ ३४ ॥ स त्वात्मयोनिरतिविस्मित आश्रितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः। त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श ॥३५॥ एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकरणनयनाभरणायुधाढ्यम्। मायामयं सदुपलक्षणसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चिः ॥ ३६ ॥ प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरन्ति विजनेन परार्थनिष्ठाः । नैतद्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥४४॥ रूपे इमे सदसती तव वेददृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य । युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥

दशमोऽध्यायः

श्री भगवान् उवाच—त्रिसप्तभिः पिता पूतः पितृभिः सह तेऽनघ । यत्साधोऽस्य कुले जातो भवान् वै कुलपावनः ॥ १९ ॥ भवन्ति पूरुषा

SGDF
Sri Gangeshwari Digital Foundation

न्देवान्नारदादींस्तथैव च। प्रह्लादादुत्तमः को नु विष्णुभक्तौ जगत्त्रय'-इति स्कान्दे ॥ २२ ॥ [29]मधुकैटभौ भक्त्यभावाद्दूरौ भगवतो मृतौ। तम एव क्रमादाप्तौ भक्त्या चैद्यो हरिं ययौ ॥ २३ ॥ '[31]यथा हिरण्यकस्यादादन्तःस्थितहरीरितः। तथा नादात्तदन्यस्य ब्रह्मा दैत्यस्य कस्यचिदि'ति च ॥ ३१ ॥ '[40]पौण्ड्रके नरके चैव साल्वे कंसे च रुग्मिणि। आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमापिरे। असुरास्तु स्वयं ते तु महातमसि पातिता'इति च। तदात्मानस्तत्राविष्टास्तद्भक्ताः। वैरोपसर्जनेनानुबन्धेनेत्यन्वयः ॥ ४० ॥ [46]भगवान्येन गम्यत इत्यनेन भागवतधर्मेणैव भगवान् गम्यते न द्वेषादिनेत्युपसंह्रियते ॥ वृत्तानुकथनं च तदर्थत्वेनैव। ज्ञानस्य विशेषा याथात्म्यादयः। 'भक्तिर्ज्ञानं विरक्तिश्च नवकः श्रवणादिकः। धर्मो भागवतः प्रोक्तस्तद्भक्तेषु तथा नवे'ति तन्त्रसारे ॥ ४६ ॥ [50]निर्वाणसुखं अशरीरसुखम्। 'एतद्बाण-मवष्टभ्ये'ति श्रुतेः ॥५०॥ इति सप्तमतात्पर्ये दशमोऽध्यायः ॥१०॥

एकादशोऽध्यायः

[1]तदधीनं वा सर्वं न वेति संशयं रुद्रस्याहनत्। अल्पकेनैव

लोके मद्भक्तास्त्वामनुव्रताः। भवान् मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २२ ॥ कुरु ते प्रेतकार्याणि पितुः पूतस्य सर्वशः। मदङ्गस्पर्शनेनाङ्ग लोकान् यास्यति सुप्रजाः ॥ २३ ॥ श्री भगवान् उवाच—मैवं विधोऽसुराणां ते प्रदेयः पद्मसम्भव। वरः क्रूरनिसर्गाणामहीनाममृतं यथा॥ ॥३१॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः। जहुस्ते ते तदात्मानः कीटाः पेशस्कृतो यथा ॥४०॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः। अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४३ ॥ धर्मो भागवतानां च भगवान् येन गम्यते। आख्यानेऽस्मिन् समाख्यातमाध्यात्मिकमशेषतः ॥ ॥४६॥ स वा अयं ब्रह्म महद्भिमृग्यं कैवल्यनिर्वाणसुखानुभूतिः। प्रियः सुहृद्वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ५० ॥

एकादशोऽध्यायः

नारद उवाच—स एष भगवान् राजन् व्यतनोद्विततं यशः। पुरा

SGDF Sri Gargeshwari Digital Foundation

मयेन रुद्रस्य प्रतीकारं कृत्वा ॥ १ ॥ [2]कस्मिन्कर्मणि मयो विपरीतं चकार ॥ २ ॥ '[3]सापेक्षं न तु दोषाय यत्र सिद्धमपेक्षितमि'ति शब्दनिर्णये ॥ ३ ॥ [14]विष्णुनाऽऽदिष्टं व्यपोहितुं देवोऽसुरोऽन्यो वा न समर्थः ॥ १४ ॥ इति सप्तमतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

[11]अनाद्यनन्तकालेषु मुक्तौ संसार एव च। मयिस्थश्चोदयत्येको विष्णुर्मा सर्वदैव तु। इति सम्प्रीतिकं ज्ञानं विद्यादात्मसमर्पणम्। बहिस्थेश्वरदासत्वं दास्यमित्युच्यते बुधैरि'ति तन्त्रमालायाम् ॥ ११ ॥ '[30]हरिरस्मिंस्थित इति स्त्रीणां भर्तरि भावना ॥ शिष्याणां च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु। भृत्यानां स्वामिनि तथा हरिभाव उदीरित'इति च ॥ ३० ॥ इति सप्तमतात्पर्ये द्वादशोऽध्यायः ॥१२॥

त्रयोदशोऽध्यायः

'[10]बहुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते। अद्वैतज्ञानमित्येतद्द्वैतज्ञानं तदन्यथा। यथाज्ञानं तथा वस्तु यथावस्तु तथा मतिः ॥

रुद्रस्य देवस्य मयेनानन्तमायिना ॥ १ ॥ राजोवाच—कस्मिन् कर्मणि देवस्य यशोऽभूज्जगदीशितुः। यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यताम् ॥ २ ॥ नारद उवाच—निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः। मायिनां परमाचार्यं मयं शरणमाययुः ॥ ३ ॥ देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन। आत्मनोऽन्यस्य वाऽऽदिष्टं दैवेनापोहितुं द्वयोः ॥ ॥ १४ ॥

द्वादशोऽध्यायः

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः। सेवेज्याऽवनतिः सख्यं दास्यमात्मसमर्पणम् ॥ ११ ॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा। हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ ३० ॥

त्रयोदशोऽध्यायः

कल्पयेदात्मनो यावदाभासमिदमीश्वरः। द्वैतं तावन्न विरमेत्ततो

SGDF
Sri Gurgeshwari Digital Foundation

नैव ज्ञानार्थयोर्भेदस्तत एकत्ववेदनमि'ति च ॥ १० ॥ [14]'गुरोराज्ञानुरोधेन दूरस्थो वा गृही भवेदि'ति च ॥ १४ ॥ '[15]अप्रविष्टः सर्वगतः प्रविष्टस्त्वनुरूपवान् । एवं द्विरूपो भगवान्हरिरेको जनार्दन' इति च ॥ ॥ १५ ॥ '[24]कार्यस्य कारणलयज्ञानमात्रं विलापनमि'मि च ॥२४॥ [28]परः कविर्बृहस्पतिः ॥ २८ ॥ '[29]चित्तं हिरण्यगर्भे तु विलाप्य परमात्मनि । क्षेत्रज्ञाख्ये लापयेच्च ततो नान्यत्स्मरेद्बुध'इति च ॥२९॥ [31]आत्मानं परमात्मानम् । अद्वयः ततोऽन्यस्मृतिवर्जितः । दग्धयोनिर्यथानलइति कृत्याभावमात्रम् । 'न हरिं स्मरतः कृत्यं दग्धेन्धनहुताशवदि'ति च ॥३१॥ इति सप्तमतात्पर्ये त्रयोदशोऽध्यायः ॥१३॥

चतुर्दशोऽध्यायः

[4]आत्मनि परमात्मनि ॥ ४ ॥ [7]अप्रयोजनपक्षं न संश्रयेत् । 'नाप्रयोजनपक्षी स्यान्न वृथा शिष्यबन्धकृत् । न चोदासीनशास्त्राणि

ह्यस्य विपर्ययः ॥१०॥ एतच्चान्यद्गृहस्थस्य समाम्नातं यतेरपि । गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥ दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः । गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥ १३ ॥ अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् । भूतैः स्वधाममिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥ आत्मन्यग्नीन् समारोप्य संन्यस्याहं ममात्मताम् । कारणेषु न्यसेत् सम्यक् सङ्घातं तु यथार्हतः ॥ २४ ॥ अप्सु प्रवेशयेज्जिह्वाङ्ग्यैर्घ्राणं क्षितौ न्यसेत् । मनोमनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ॥ २८ ॥ कर्माण्यध्यात्मना रुद्रे यदहंसम्मताः क्रियाः । सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥ इत्यक्षरतयात्मानं चिन्मात्रमवशेषितम् । ज्ञात्वा द्वयोथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥

चतुर्दशोऽध्यायः

एक एव चरेद्भिक्षुः आत्मारामोऽनपाश्रयः । सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥ पश्येदात्मन्यदो विश्वं परे सदसतोऽद्वये । आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् । अतिवादांस्त्यजेत्तर्कान् पक्षं कञ्चिन्नसंश्रयेत् ॥७॥

SGDF
Sri Gargeshwari Digital Foundation

न विरुद्धानि चाभ्यसेत् ॥ ७ ॥ '[8]न व्याख्ययोपजीवेत न निषिद्धान्समाचरेत् । एवं भूतो यतिर्याति तदेकशरणो हरिमि'ति समाचारे ॥ ॥८॥ [44]चित्ते मनोवृत्त्यभिमानिनि । अर्थविभ्रमे अर्थेषु भ्रममाणे । 'चित्ताख्याग्नेरधीनं हि जगदेतद्विचिन्तयेत् । मनोनामेन्द्रवशगमग्निं च प्रविचिन्तयेदि'त्यादि च ॥ ४४ ॥ '[46]अशास्त्रीयत्वान्मुखतः शास्त्रापेतमिदं विदुः । शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयत'इति च ॥ ॥ ४६ ॥ इति सप्तमतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

[14]नभश्छदिः नभोव्याप्यस्थितः परमात्मा ॥१४॥ [22]सप्तम्यादित्रयं चैव तथा चैत्र(व)त्रयोदशी । चतस्रस्त्वष्टकाः प्रोक्ताः सर्वपक्षाद्विशेषत'इति च व्यासस्मृतौ ॥ हेमन्ते शिशिरे चैव नित्यश्राद्धं गुणोत्तरमि'ति च ॥ जीवेन रूपेण सह ॥२२॥ '[39]ब्रह्मादिस्थावरान्तेषु न विशेषो हरेः क्वचित् । व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति चे'ति ॥

न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून् । न व्याख्यामुपजीवेत नारम्भान्नाऽऽरभेत्क्वचित् ॥८॥ विकल्पं जुहुयाच्चित्ते तन्मनस्यर्थविभ्रमे । मनो वैकारिके हुत्वा मायायां वै जुहोत्यमुम् ॥ ४४ ॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमनुवर्णितम् । व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्प्रियः ॥ ॥ ४६ ॥

पञ्चदशोऽध्यायः

कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् । क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥१४॥ तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके । चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥ २२ ॥ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः । शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥२८॥ तेष्वीशो भगवान् राजंस्तारतम्येन वर्तते । तस्मात्पात्रं हि पुरुषो यावानात्मा

SGDF
Sri Gargeshwari Digital Foundation

॥ ३९ ॥ ‘[42]शिलावत्प्रतिमाः सन्तो विप्राद्याश्च हरेः स्मृता’इति च ॥ ४२ ॥ इति सप्तमतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

‘[52]यज्ञाभिमानिनो देवान्स्मरन्तीन्द्रियमानिनाम् । वशगांस्तान्मनोमानिसुरेन्द्रस्य वशे स्थितान् । वेदात्मिकायाः पार्वत्यास्तां रुद्रस्य वशे स्थिताम् । वर्णत्रयात्मकं रुद्रं शेषे तु प्रणवात्मके । बिन्दुरूपसरस्वत्यां तं तां तस्यां पुनर्न्यसेत् । मूलस्थानादरूपायां तां वायौ तं जनार्दने । प्रकृतावथवा प्राणं तामेव पुरुषोत्तम’इति ब्रह्मतर्के ॥ ५२ ॥ [54]स्वराडिन्द्रः ॥५४॥ ‘[55]विश्वाद्या अनिरुद्धाद्यास्ते द्विधा सम्प्रकीर्तिताः । विष्णुरूपास्तदन्ये च तान्सर्वान्याति मोक्षगः । तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः । ते दिवं प्रापयन्त्येनं सा वायुं स हरिं पृथक् । विश्वादिरूपं तुर्यं च वासुदेवश्च नापर’इति च । अधिको भूत्वा सुखादिभिः ॥ ५५ ॥ ‘[56]भक्तिमान्मार्गविन्नैव नीचां गतिमवाप्नुयाद्’ति च ॥ ५६ ॥ [57]ग्लापकत्वात्तमः ॥ ५७ ॥ [58]दुर्घटत्वादर्थत्वेन

यथेयते ॥ ३९ ॥ पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः । तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥ ४२ ॥

षोडशोऽध्यायः

निषेकादि श्मशानान्तैः संस्कारैः संस्कृतो द्विजः । इन्द्रियेषु क्रिया यज्ञान् ज्ञानदीपेषु जुह्वति ॥ ५२ ॥ ओङ्कारं बिन्दुनादे तु तं तु प्राणे महत्यमुम् । अग्निः सूर्यो दिवा वायुः शुक्लो राकोत्तरः स्वराट् ॥५४॥ विश्वोऽथ तैजसः प्राज्ञस्तुर्य आत्मा समन्वयः । देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः ॥ ५५ ॥ आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते । य एते पितृदेवानामयने देवनिर्मिते । शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ ५६ ॥ आदावन्ते जना नाशं बहिरन्तः परावरम् । ज्ञानं ज्ञेयं वचो वाच्य तमो ज्योतिश्च सत्स्वयम् ॥ ५७ ॥ अबाधितोपि ह्याभासो यथा वस्तुतया स्मृतः । दुर्घटत्वादैन्द्रियकं

SGDF
Sri Gangeshwar Digital Foundation

परमेश्वरेणैव कल्पितम् ॥ ५८ ॥ '[59]छाया रीतिः प्रकारश्च भावश्चे-त्यभिधीयत'इति शब्दनिर्णये। क्षित्यादीनां पदार्थानां कतमोऽपि प्रकारो न घटते। परमेश्वरकल्पितत्वात्कार्यमित्येव वक्तुं युक्तम्। न ह्यपां सङ्घातमात्रं पृथिवी। न च विकारमात्रम्। न हि कालुष्यादि-विकारमात्रेण पृथिवी भवति। न चाद्भ्यः पृथक्स्थितिः। न च वस्तु-द्वयवत्सहावस्थानमात्रम् ॥ ५९ ॥ [60]एवमवयवावयविनोरपि ॥६०॥ [61]न च सादृश्यमात्रम् ॥ वस्तुभेदे हि तद्युज्यते। तस्मात्स्वप्न एव। जाग्रत्स्वप्नौ यथा विशेषतो दृश्येते तथा पृथिव्यबादिविशेषो दुर्घटोऽ-पीश्वरकल्पनयैवासौ दृश्यते। 'कार्यकारणवस्तूनां विशेषो न निरूपितः। तथापीशेच्छयैवासौ दृश्यते नियतोऽपि चे'ति च ॥ ६१ ॥ [69]अतीत-महाकल्पे अतीतब्रह्मकल्पे। 'ब्रह्मकालः परश्चेति महाकल्पश्च कीर्तित'-इति च ॥ ६९ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवतसप्तमस्कन्धतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥ समाप्तश्चायं-स्कन्धः ॥

तद्वदर्थविकल्पितम् ॥ ५८ ॥ क्षित्यादीनामिहार्थानां छाया न कतमापि हि। न सङ्घतो विकारोऽपि न पृथङ्नान्वितोऽपि वा ॥ ५९ ॥ धातवो-ऽवयवित्वाच्च तन्मात्रावयवैर्विना। न स्युर्ह्यसत्यवयविन्यासन्नावयवा इव ॥ ६० ॥ स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः। जाग्रत्स्वप्नौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥ अहं पुराऽभवं कश्चिद्गन्धर्व उपबर्हणः। नाम्नाऽतीते महाकल्पे गन्धर्वाणां सुसंमतः ॥ ६९ ॥

SGDF
Sri Gargeshwari Digital Foundation

अष्टमः स्कन्धः

तृतीयोऽध्यायः

श्रीवेदव्यासाय नमः ।। [3]यत इति स्रष्टृत्वम् । येनेति प्रवर्तकत्वम् । य इति सत्ताप्रदत्वम् । न सन्ति यदुपेक्षयेत्युक्तत्वात् । 'उत्पन्नस्यापि यत्सत्ता हरेस्तत्स इतीर्यते । हरेर्विश्वं भिन्नमपि परमोऽसौ यतो विभु-रि'ति ब्रह्मतर्के ।। ३ ।। इति अष्टमतात्पर्ये तृतीयोऽध्यायः ।। ३ ।।

पञ्चमोऽध्यायः

'[25]अनुग्राह्यतया पक्षा देवा नात्मार्थतो हरेरि'ति च ।। २५ ।। '[27]छाया त्वविद्या सम्प्रोक्ता जन्यविद्या तपःस्मृतम् । जीवगृध्रस्य तौ पक्षावधऊर्ध्वपथोः पृथक् । तौ विष्णोस्तु न विद्येते नित्यविद्या-स्वरूपिण' इति च ।। २७ ।। [28]गुणत्रयनाभि । विद्युद्ब्रह्म । 'विद्युद्ब्रह्मे-त्युपासीते'ति श्रुतेः । 'जगच्चक्रस्याक्षभूतो बलरूपश्च केशव'इति च ।।

अष्टमः स्कन्धः

तृतीयोऽध्यायः

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् । योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ॥ ३ ॥

पञ्चमोऽध्यायः

न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः । अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्वतमांसि काले ॥२२॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय चाभ्यधात् । स्तुतिमद्भुतदैवीभिर्गीर्भिस्त्ववहितेन्द्रियः ॥२५॥ विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् । छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥२७॥ अजस्य चक्रं त्वजये-र्यमाणं मनोमयं पञ्चदशारमाशु । त्रिणाभि विद्युद्चलमष्टनेमि यदक्षमाहु-

SGDF
Sri Gangeshwari Digital Foundation

॥२८॥ [30]आत्मा च आत्मगुणाश्च निर्जिता येन ॥३०॥ '[33]सूर्यसोम-यमेन्द्रादीनृतेऽन्ये लोकपा अपि ॥ अद्भिर्जीवन्ति सोमाच्च महेन्द्रादीनृतेऽखिलाः । अपां सोमस्य चेन्द्राद्याः सर्वे वै जीवनप्रदा'इति च ॥ ॥ ३३ ॥ [35]समुद्रे उदरे ॥ ३५ ॥ [36]अमृतस्येति मुक्तेरित्यस्य विशेषणम् ॥ ३६ ॥ इति अष्टमतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

'[39]अनन्तोढो मन्दरस्तु यदा वैवस्वतान्तरम् । अमृतार्थं सुपर्णोढो रैवतस्यान्तरे मनोरि'ति ब्राह्मे ॥ ३९ ॥ इति अष्टमतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

'[46]रुद्रस्य यशसोऽर्थाय स्वयं विष्णुर्विषं विभुः । न सञ्जह्रे

स्तमृतं प्रपद्ये ॥ २८ ॥ न यस्य कश्चातितिपिपर्ति मायां यया जनो मुह्यति वेद नार्थम् । तं निर्जितात्मात्मगुणं परेशं नमामि भूतेषु समं चरन्तम् ॥ ॥ ३० ॥ अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्द्धमानाः । लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३३ ॥ सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्ध आयुः । ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ॥ ३४ ॥ अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा । अन्तः समुद्रे पचतः स्वधातून् प्रसीदतां नः स महाविभूतिः ॥ ३५ ॥ यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् । द्वारं च मुक्तेरमृतस्य मृत्योः प्रसीदतां नः स महाविभूतिः ॥ ३६ ॥

षष्ठोऽध्यायः

अवरोप्य गिरिं स्कन्धात्सुपर्णः पततां वरः । ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥

सप्तमोऽध्यायः

तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यवीर्यम् । भीताः

SGDF
Sri Gangeshwari Digital Foundation

समर्थोऽपि वायुं चोचे प्रशान्तय'इति च ॥ ४६ ॥ '[32]तत्र तत्र स्तुतिपदैर्हरिरेव तु तद्गतः । स्तूयतेऽतो युक्तमेव गुणाधिक्यवचोऽपि त्वि'ति च ॥ ३२ ॥ इति अष्टमतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

प्रजा दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥ १९ ॥ त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः । तं त्वा भवन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥ गुणमय्या स्वशक्त्याऽस्य सर्गस्थित्यप्ययान् विभो । धत्से यदा स्वदृक् भूमन् ब्रह्मविष्णुशिवाभिधाम् ॥ २३ ॥ त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनम् । नानाशक्तिभिराभासस्त्वमात्मा जगदीश्वरः ॥ ॥२४॥ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः । कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनन्ति ॥ २५ ॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम् । कालो गतिस्तेऽखिल-देवतात्मनो दिशश्च कर्णौ रसनं जलेशः ॥ २६ ॥ नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः । परावरात्मा द्रुहिणस्तवात्मा सोमो मनो द्यौर्भगवान् शिरस्ते ॥२७॥ कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा रोमाणि सर्वौषधिवीरुधस्ते । छन्दांसि साक्षात्तव सप्तधातवस्त्रयीमयात्मन् हृदयं स धर्मः ॥ २८ ॥ मुखानि पञ्चोपनिषत्तवेश यैस्त्रिंशदष्टोत्तरमन्त्र-वर्गः । यत्तच्छिवाख्यं परमात्मतत्त्वं देव स्वयं ज्योतिरवस्थितिस्ते ॥२९॥ छाया त्वधर्मो मृड यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि । साक्षान्मनुः शास्त्रकृतस्तवेक्षा छन्दोमयो देवऋषिः पुराणः ॥३०॥ न ते गिरित्राखिल-लोकपाल विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् । ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्रह्म निरस्तभेदम् ॥ ३१ ॥ कामाध्वरत्रिपुरकालहराद्यनेकभूत-द्रुहः क्षपयतः स्तुतये न तत्ते । यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्नि-स्फुलिङ्गशिखया भसितं तवेश ॥३२॥ ये त्वात्मराम गुरुभिर्हृदि चिन्ति-ताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसेऽभितप्तम् । कत्थंत उग्रवपुषं निरतं श्मशाने ते भूतभूतिमविदस्तव हीनलज्जाः ॥ ३३ ॥ तत्तस्य ते सदसतोः परतः परस्य नान्तः स्वरूपगमने प्रभवन्ति भूम्नः । ब्रह्मादयः किमुत संस्तवने वयन्तु तत्सर्गसर्गविषया अपि भक्तिमात्रम् ॥ ३४ ॥ एतत्परं प्रपश्यामो न परं ते महेश्वर । मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्त-कर्मणः ॥ ३५ ॥ निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः । प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ॥ ४६ ॥

SGDF
Sri Gargeshwari Digital Foundation

अष्टमोऽध्यायः

'[23]अनाद्यनन्तकालेऽपि विष्णुमेवाश्रिता रमा। अन्येषां ज्ञापनार्थाय दोषानुक्त्वेतराञ्जहावि'ति च ॥ २३ ॥ '[35]तेषां सत्याच्चालनार्थं हरिर्धन्वन्तरिर्विभुः। समर्थोऽप्यसुराणां तु स्वहस्तादमुचत्सुधामि'ति च ॥ ३५ ॥ इति अष्टमतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'कालनेम्यादयः सर्वे हरिणा निहता अपि। शुक्रेणोज्जीविताः सन्तः पुनस्तेनैव पातिता' इति च ॥५६॥ इति अष्टमतात्पर्ये नवमः ॥ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

अष्टमोऽध्यायः

नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न सङ्गवर्जितम्। कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥ १९ ॥ श्री शुक उवाच—एवं विमृश्याव्यभिचारिसद्गुणं पदं निजैकाश्रयि सद्गुणाश्रयम्। वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥२२॥ तस्यांसदेश उशतीं नवकञ्जमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम्। तस्थौ निवीय निकटे तदुरःस्वधाम सव्रीडहासविकसन्नयनेन भीता ॥ २३ ॥ धन्वन्तरिरिति ख्यातो आयुर्वेददृगिज्यभाक्। तमालोक्यासुराः सर्वे- कलशं चामृताहृतम् ॥३४॥ लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन्। नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने ॥ ३५ ॥

नवमोऽध्यायः

दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः। तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥५६॥

एकोनविंशोऽध्यायः

यजन्ति यज्ञक्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः। स एष विष्णुर्वरदोऽस्तु वाऽपरो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥११॥ यद्यप्यसावधर्मेण मां बध्नीयादनागसम्। तथाप्येनं न हिंसिष्ये लीनं ब्रह्मतनुं रिपुम् ॥ १२ ॥

SGDF
Sri Gargeshwari Digital Foundation

द्वाविंशोऽध्यायः

'[9-12]बलिरप्यसुरावेशात्स्तुवन्नपि जनार्दनम् । आक्षिपत्यन्तरा क्वापि प्रह्लादो नित्यभक्तिमानि'ति ब्रह्माण्डे ॥ ९-१२ ॥ इत्यष्टमतात्पर्ये द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

'[61]अनन्तशक्तिर्भगवान्मत्स्यरूपी जनार्दनः । क्रीडार्थं याचयामास स्वयं सत्यव्रतं नृपमि'ति मात्स्ये ॥ ६१ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवताष्टमस्कन्धतात्पर्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

द्वाविंशोऽध्यायः

श्री भगवानुवाच—वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलातलम् । मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् । मद्दर्शनमहाह्लादध्वस्तकर्मनिबन्धनः ॥ १० ॥ श्री शुक उवाच—आज्ञां भगवतो राजन् प्रह्लादो बलिना सह । बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृताञ्जलिः ॥ ११ ॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः । प्रणतस्तमनुज्ञातः प्रविवेश महाबिलम् ॥ १२ ॥

त्रयोविंशोऽध्यायः

तमाह सातिकरुणं महाकारुणिकं नृपम् । यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल । कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥ ॥१४॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमुपनीतं प्रत्युपादत्त हत्वा । दितिजमकथयद्यो ब्रह्म सत्यव्रताय तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥ ६१ ॥

SGDF
Sri Gargeshwari Digital Foundation

नवमः स्कन्धः

श्रीवेद्व्यासाय नमः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

षष्ठोऽध्यायः

'[85]ब्रह्मादिभक्तिकोट्यंशादंशो नैवाम्बरीषके। नैवान्यस्य च कस्यापि तथापि हरिरीश्वरः। तात्कालिकोपचेयत्वात्तेषां यशस आदिराट्। ब्रह्मादयश्च तत्कीर्तिं व्यञ्जयामासुरुत्तमाम्। मोहनाय च दैत्यानां ब्रह्मादेर्निन्दनाय च। अन्यार्थं च स्वयं विष्णुर्ब्रह्माद्याश्च निराशिषः। मानुषेषूत्तमत्वाच्च तेषां भक्त्यादिभिर्गुणैः। ब्रह्मादेर्विष्ण्वधीनत्वज्ञापनाय च केवलम्। दुर्वासाश्च स्वयं रुद्रस्तथाप्यन्यायय-मुक्तवान्। तस्याप्यनुग्रहार्थाय दर्पनाशार्थमेव चे'ति गारुडे ॥ ८५ ॥ इति नवमतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥ ७ ॥

अष्टमोऽध्यायः

'[93]नित्यपूर्णसुखज्ञप्तिस्वरूपोऽसौ यतो विभुः। अतोऽस्य राम-इत्याख्या तस्य दुःखं कुतोऽण्वपि। तथापि लोकशिक्षार्थमदुःखो

नवमः स्कन्धः

षष्ठोऽध्यायः

एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे। क्रियाकलापैः समुवाह भक्तिं यया विरिञ्चादिमधश्चकार ॥८५॥ श्री शुक उवाच— अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः। वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः ॥ ८६ ॥

अष्टमोऽध्यायः

रक्षोऽधमेन वृकवद्विपिने समक्षं वैदेहराजदुहितर्यपि यापितायाम्।

SGDF
Sri Gargeshwari Digital Foundation

दुःखवर्तिवत् । अन्तर्हितां लोकदृष्ट्या सीतामासीत्स्मरन्निव । ज्ञापनार्थं पुनर्नित्यसम्बन्धं स्वात्मनः श्रिया । अयोध्याया विनिर्गच्छन्सर्वलोकस्य चेश्वरः । प्रत्यक्षं तु श्रिया सार्धं जगामानादिरव्ययः' ॥ ९३ ॥ इति नवमतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

'[17]नक्षत्रमास गणितं त्रयोदशसहस्रकम् । ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलम् ॥ १७ ॥ '[22]रामो रामो राम इति सर्वेषामभवत्तदा । सर्वो राममयो लोको यदा रामस्त्वपालयदि'ति स्कान्दे ॥ ॥ २२ ॥ इति नवमतात्पर्ये नवमोऽध्यायः ॥ ९ ॥ १० ॥ ११ ॥ ॥ १२ ॥ १३ ॥

चतुर्दशोऽध्यायः

'[8]जामदग्न्यो वरं वव्रेऽनन्तशक्तिरपि स्वयम् । पितुर्मान्यत्वसिध्यर्थं लोके लोकेश्वरः प्रभुः । अपापमपि देवेशं पितरः संन्यवर्तयन् । अजानन्तोऽस्य माहात्म्यं मोहितास्तस्य मायया । मोहयन्मायया लोकं चक्रे चापचितिं वधे । पुण्यपापादिनिर्मातुः कुतः पापादिसङ्गतिरि'ति च ॥ ८ ॥ इति नवमतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥ १५ ॥ १६ ॥

भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसङ्गिनामिति रतिं प्रथयंश्चचार ॥ ९३ ॥

नवमोऽध्यायः

स्त्रीपुंप्रसङ्ग एतादृक् सर्वत्र त्रासमावहः । अपीश्वराणां किमुत ग्राम्यस्य गृहमेधिनः ॥ १६ ॥ तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः । त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १७ ॥ पुरुषो रामचरितं श्रवणैरुपधारयन् । आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ॥ २२ ॥

चतुर्दशोऽध्यायः

रामः सञ्चोदितः पित्रा भ्रातॄन् मात्रा सहावधीत् । प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ॥ ६ ॥ उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा । पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥ ८ ॥

SGDF
Sri Gurgeshwari Digital Foundation

सप्तदशोऽध्यायः

[37]द्वाजमिमं भर । उचथ्यस्य क्षेत्रजो बृहस्पतेर्जात इति । द्वयोर्जातत्वाद्द्वाजः । बृहस्पतेर्बीजः प्रजासन्ततिर्येन भृता बृहस्पतेर्भरद्वाजः ॥ ॥३७॥ '[39]भरद्वाजो मरुद्भिश्च भृतो जातो द्वयोर्यत' इति पाद्मे ॥३९॥ इति नवमतात्पर्ये सप्तदशोऽध्यायः ॥ १७ ॥ १८ ॥ १९ ॥ इति नवमतात्पर्यं सम्पूर्णम् ॥

दशमः स्कन्धः (पूर्वार्धः)

प्रथमोऽध्यायः

श्रीवेदव्यासाय नमः ॥ [41]स्वप्ने यथा दृष्टश्रुतस्मृत्यनुसारिदेहं प्राप्नोति । अपस्मृतिर्मृतः । पूर्वदेहस्मरणाभावात् । अनभिमानतः ॥ ॥४१॥ [42]यतो यतः । यत्र यत्र मनो धावत्यात्मपश्चानां मध्ये तत्र तत्र तेन दैवेन सह जायते गुणानुबद्धः सन् । 'दैवगान्धर्वपित्र्येषु

सप्तदशोऽध्यायः

तं त्यक्तुकामां ममतां भर्तुस्त्यागविशङ्किताम् । नामनिर्वचनं तस्य श्लोकमेतं जगुः सुराः ॥ ३७ ॥ मूढे भर द्वाजमिमं भरद्वाजं बृहस्पतेः । त्राता तु दुःखात्पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३८ ॥ चोद्यमाना सुरैरेवं मत्वा तं देवमात्मजम् । व्यसृजन्मरुतोऽबिभ्रन्दत्तोऽयं वितथेऽन्वये ॥३९॥

दशमः स्कन्धः पूर्वार्धः

प्रथमोऽध्यायः

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः । दृष्टश्रुताभ्यां मनसाऽनुचिन्तयन् प्रपद्यते तत्किमपि ह्यपस्मृतिः ॥४१॥ यतो

SGDF
Sri Gangeshwari Digital Foundation

मानुषेष्वासुरेषु च। यत्रयत्र मनो याति तत्रतत्रोपजायते। स्वगुणस्यानुसारेण सत्वादिविनिबन्धन'इति गारुडे। 'देवादित्वं योग्यतया तत्सकाशस्त्वनुस्मृतेः। श्वेतद्वीपादि तत्रापि योग्यतामप्यपेक्ष्य तु। विष्णोः स्थानं विनाऽन्यत्र वायुशक्रादिनामपि। त्रैलोक्यदेशभेदेषु योग्यता न त्वपेक्षिते'ति नारदीये॥ ४२॥ [43]विभाव्यते विविधं भाव्यते। स्वमायारचितेषु विष्णुमायारचितेषु। रागानुगतः पुमान् जीवो विविधं मुह्यति। 'यथैवोदशरावेषु सूर्यादिः प्रतिबिम्बितः। वायुना चलितो भाति छिन्नभिन्नादिरूपवान्। एवं विष्ण्विच्छया जातगुणेषु प्रतिबिम्बितः। छिन्नो भिन्नो मृतोऽस्मीति बहुधा प्रतिपद्यते। तदेव च दृढीभूत उदके निःशरावके। छेदभेदादि नाप्नोति निश्चलं प्रतिबिम्बितम्। एवं गुणैर्विमुक्तस्तु जीवो नाप्नोति दुःखिताम्। शरावद्गुणाः प्रोक्ता अज्ञानं तु द्रवत्ववत्। दृढीभूतोदवज्जीवस्तज्ज्ञानं प्रतिबिम्बवत्। नित्यान्तःकरणं चैव प्रतिबिम्बश्च तद्गतः। द्वयमेव विमुक्तस्य न किञ्चिज्जडमिष्यते। सूर्यकान्तादिवत्तस्य स्वरूपं द्वयमप्युत। तस्मान्न हन्तुं शक्योऽसौ केनचिज्जीव आत्मवान्। तस्मात्स्वजीवनार्थाय न परद्रोहमाचरेत्। हन्यते चाज्ञभावेन परेषां द्रोहमाचरन्नि'ति तन्त्रभागवते॥ 'परः स्वो हरिरुद्दामा इति नामचतुष्टयम्। विष्णोर्गुह्यं तु यो वेद सर्वपापैः प्रमुच्यत'इति प्रकाशिकायाम्॥ 'स्वतन्त्रत्वात्सुखत्वाच्च स्वनामा विष्णुरुच्यत'इति पाद्मे॥ ४३॥ [51]कुण्डादिस्थाग्नेर्दारुयोगादौ स्वतः प्रवृत्त्यभावात्। 'यथा कुण्डस्थित-

---

यतो धावति दैवचोदितं मनो विकारात्मकमात्मपञ्चसु। गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते॥ ४२॥ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते। एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति॥४३॥ अग्नेर्यथा दारुवियोगयोगयो-

SGDF Sri Gangeshwari Digital Foundation

स्याग्नेर्दैवाद्दारूपसंनमेत् । देहयोगो वियोगश्च तथा दैवान्न चान्यथे’ति वामने ॥ ५१ ॥ इति दशमतात्पर्ये प्रथमोऽध्यायः ॥ १ ॥

तृतीयोऽध्यायः

‘[19]आविश्य पितरं विष्णुः स्वरूपेणैव मातरम् । विडम्बनार्थं लोकस्य निर्जनिश्चाप्यथाविशत् । आनन्दमात्रदेहेन जातवत्सम्प्रदृश्यत’इति च ॥ १९ ॥ ‘[27]सच्छब्द उत्तमं ब्रूयादानन्दं दिति वै वदेत् । येति ज्ञानं समुद्दिष्टं पूर्णानन्ददृशिस्ततः । सत्यशब्दोदितं तादृग्रूपं नित्यं यतो हरेः । सत्यव्रतस्ततो विष्णुः सद्भूतत्रयमुच्यते । त्यं तदन्यत्समुद्दिष्टं तत्परत्वात्तु तत्परः । वेदमुख्यार्थरूपत्वात्त्रिसत्यो भगवान्हरिः । सत्यस्य चोत्तमानन्दज्ञानदातृत्वतः सदा । सत्यस्य सत्यो भगवान्सत्यस्थो जगति स्थितः । जगन्नेतृत्वतः सत्यनेता विष्णुः प्रकीर्तितः । अत्तृत्वाच्च तदादानात्सत्यात्मा चोच्यते विभुरि’ति तन्त्रभागवते ॥ २७ ॥ ‘[28]जगद्वृक्षाश्रया ह्येषा प्रकृतिस्तु गुणत्रयम् । मूलं मात्राः शिफास्तस्य उत्पित्सुत्वादिकास्तथा । षट्प्रकारास्तु विटपा देवगन्धर्वदानवाः । राक्षसाश्च पिशाचाश्च तिर्यञ्चानुषतस्थुषः । इन्द्रियाण्यस्य पत्राणि द्वारो द्वारो नव स्मृताः । प्रवृत्तं च निवृत्तं च फलद्वयमुदीरितम् ।

रदृष्टतोऽन्यन्न निमित्तमस्ति । एवं हि जन्तोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥

तृतीयोऽध्यायः

भगवानपि विश्वात्मा भक्तानामभयङ्करः । आविवेशांशभागेन मन आनकदुन्दुभेः ॥ १७ ॥ ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी । दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं नभस्तः ॥१९॥ ब्रह्मभवावूचतुः—सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये । सत्यस्य सत्यमुत सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥२७॥ एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चशिफः षडात्मा । सप्तत्व-

SGDF
Sri Gangeshwari Digital Foundation

धर्मादयस्त्वत्र रसा मोक्ष एकफलस्य तु । प्रवृत्ताश्च निवृत्ताश्च पक्षिणो द्विविधा मताः । कारणस्य सदा सत्वात्प्रवाहेण च सन्नसौ । न कदाचिन्न भूतोऽसौ न चैव न भविष्यति । स्वतो वा परतो वापि सन्नतोऽसौ जगत्तरुः । अस्य स्वर्गादिकृद्विष्णुः सदानन्दैकरूपक'इति च ॥ २८ ॥ '[32]सदा सर्वगुणाढ्यत्वात्सत्ववान्हरिरुच्यते । न तु सत्वगुणात्मत्वाद्यतस्त्रिगुणवर्जित'इति नारदीये ॥ 'भगवत्पादपोतोऽसौ नान्यपोतसमो भवेत् । सन्निधायैव शिष्येषु तदेव प्राप्नुयुर्यत'इति वामने ॥ 'भगवत्पादनौकाया नेयं नौकोपमा भवेत् । तया तीर्त्वा तु तामेव प्राप्य तिष्ठन्ति तत्र यदि'ति ब्राह्मे ॥ अतस्तामेव याताः ॥३२॥ '[35]विशुद्धसत्वब्रह्मादेः शरीरे संस्थितो हरिः । तेषामादेशमार्गेण वेदाद्यैरर्चयन्ति तमि'ति भागवततन्त्रे ॥ ३५ ॥ '[36]सत्वं ब्रह्मादिदेहाख्यं ज्ञानरूपं तमोनुदम् । यदि न स्यात्तदा सत्वप्रकाशानुमितो विभुः । यदि न स्यात्परो विष्णुः कथं विद्वज्जना अमुम् । अर्चयन्तीति तत्त्वस्य जिज्ञासुभिरधोक्षजः । कथं ज्ञायेत कस्यापि निर्गुणत्वात्परो विभुरि'ति तन्त्रभागवते ॥३६॥ '[37]लोकसिद्धार्थनाम्नः स राहित्यान्नामवर्जितः । अरूपोऽप्राकृतत्वाच्च सत्वाभावात्तथाऽगुणः । अकर्माऽक्लिष्टकारित्वान्नित्यत्वादज एव च । अलौकिकार्थसन्नाम्नामनन्तत्वाज्जनार्दनः ।

गष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः ॥२८॥ त्वमेक एवास्य सतः प्रसूतिः स्थानं विधानं त्वमनुग्रहश्च । त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये ॥ २९ ॥ त्वय्यम्बुजाक्षाखिलसत्वधाम्नि समाधिनावेशितचेतसो ये । त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्स पदं भवाब्धिम् ॥३१॥ स्वयं समुत्तीर्य सुदुस्तरं द्युमन्भवार्णवं भीममदभ्रसौहृदाः । भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥ ॥३२॥ सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेय उपानयं वपुः । वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ॥३५॥ सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदाऽपमार्जनम् । गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वा गुणः ॥३६॥ न नामरूपे गुणकर्मजन्मभि-

SGDF
Sri Gargeshwari Digital Foundation

अनन्तनामा परमः सुसुखज्ञानरूपवान्। तानि चास्य सुदिव्यानि सुगन्धीनि सुभान्ति च। शुभलक्षणपूर्णानि सुवर्णानि महान्ति च। यदतोऽनन्तरूपोऽसौ पूर्णानन्दादिभोजनात्। बलैश्वर्यसुवीर्यादिपूर्णासङ्ख्यगुणत्वतः। अनन्तगुण एवासौ ते चाभिन्ना गुणा हरेः। परस्परमभिन्नाश्च सर्वे धर्माश्च तद्गताः। अभिन्नानि च रूपाणि सर्वाणि जगदीशितुः। प्राकृतस्य तु नामादेरीक्षिता पुरुषोत्तमः। अनामादिवचोभिस्तु स एषोऽर्थोऽनुमीयते। अनामत्वादि चान्यच्च ज्ञानिनां मनसेङ्ग्यते। तेनैव चोद्य एषोऽर्थस्तस्माज्ज्ञेय इति प्रभुरि'ति ब्रह्मतर्के॥ देवक्रियायाः प्रतियन्ति। भगवत्प्रेरणादेव जानन्ति। 'नामरूपादि विष्णोस्तु न शक्यं ज्ञातुमञ्जसा। तथापि तत्प्रसादेन जानन्ति परमर्षय' इति पाद्मे॥ ३७॥ [38]यस्मान्नामरूपादयः सन्ति तस्माच्छृण्वन् गृणन्। क्रियासु क्रियमाणासु प्रेरकत्वेन पूज्यत्वेन च। 'सर्वक्रियासु कर्तृत्वपूज्यत्वेन जनार्दनम्। यो वेत्ति नैति संसारं तत्प्रसादान्न संशय'इति क्रियायोगे॥ ३८॥ '[39]खं नाभिश्चरणौ क्षितिरि'ति भवतः पदो भुवः। 'पदाद्याश्रयणाद्विष्णोः पृथिव्यादि पदादिकम्। तज्जत्वाद्वाथ सादृश्याद्यथानुर्भूमिगं पदमि'ति ब्रह्मतर्के॥ ३९॥ '[40]अज्ञानादेव मन्यन्ते विष्णोर्जनिमृती नराः। स्थितिरूपस्य चान्यस्मात्स्थितिं मोक्षाश्रयस्य हि। स्वेच्छया हि जनिं भङ्गं स्थितिं चासौ करोत्यजः।

निरूपितव्ये तव तस्य साक्षिणः। मनोवचाभ्यामनुमेयवर्त्मनो देवक्रियायाः प्रतियन्त्यथापि हि॥३७॥ शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मङ्गलानि ते। क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पते॥३८॥ दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः। दिष्ट्याङ्कितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकम्पिताम्॥३९॥ न तेऽभवस्येश भवस्य कारणं

SGDF
Sri Gargeshwari Digital Foundation

सर्वस्य जगतो यस्मात्तज्जन्मादिः कुतो भवेदि'ति च ॥ ४० ॥ इति दशमतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

'[15]बहिश्च विद्यमानत्वादप्रविष्टो जगद्धरिः। प्रविष्टवच्च तत्रैव पूर्णरूपत्वतो विभुः। अप्रवेशः प्रवेशश्च प्रविष्टोपमता तथा। बहिरन्तर्गतस्य स्यादित्याहुः शब्दवेदिन'इति च ॥१५॥ '[16-17]महदादिस्त्वविकृत ईषद्विकृतरूपत'इति च ॥ अनुगता इव प्रविष्टा इव। पूर्वोक्तवद्बहिरपि विद्यमानत्वात्। अन्तश्च देवतानामविभक्तशक्तित्वात्पूर्वोत्पन्नत्वात्तत्त्वानामण्डप्रवेशमात्रम्। व्यक्तिविशेषादुत्पत्तिरित्युपचर्यते। अण्डजो ब्रह्मेत्यादि। 'महद्रूपादिना ब्रह्मा देवाश्चैव प्रजज्ञिरे। अण्डे त्वेषामभिव्यक्तिर्जनिरित्यभिधीयत'इति च ॥ १६, १७ ॥ [18]ग्राह्यगुणविषयबुद्ध्यनुमेयलक्षणः। ग्राह्यगुणेष्वस्वातन्त्र्यात्तज्ज्ञापकोऽन्योऽस्तीति ज्ञायते। 'ज्ञातापि सर्वभावानां ज्ञायते ज्ञानलिङ्गतः। जिघृक्षोर्ग्रहणाभावादस्वातन्त्र्यप्रतीतितः। सर्वत्राव्यवधानेन द्रष्टृत्वात्सर्ववस्तुनः। आन्तरं बाह्यमित्येव विशेषो नास्ति कश्चने'ति तन्त्रभागवते। जीवस्य ग्रहणशक्तिरपि तस्येत्यपिशब्दः। एवं शरीरमुत्पाद्य ज्ञायसे। सर्वस्य सम्पूर्णस्य। 'सर्वः सम्पूर्णसामर्थ्यात्सर्वात्मा सर्वभक्षणात्। अनन्या-

---

विना विनोदं बत तर्कयामहे। भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभवाश्रयात्मनि ॥ ४० ॥

चतुर्थोऽध्यायः

स एव स्वपृकृत्येदं सृष्ट्वा यत्त्रिगुणात्मकम्। तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥१५॥ य एतेऽविकृता भावाः सप्त ते विकृतैः सह। नानावीर्याः पृथग्भूता विराजं शयनं तव ॥ १६ ॥ सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव। प्रागेव विद्यमानत्वान्न तेषां इह सम्भवः ॥ १७ ॥ एवं भवान्बुद्ध्यनुमेयलक्षणो ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः। अनावृतत्वा-

SGDF
Sri Gargeshwari Digital Foundation

श्रयतश्चात्मवस्तुत्वमभिधीयत' इति च। आत्मन्येव वासादात्मवस्तु। परमात्मनोऽपि शरीरे सन्निधानादेवाबुधैरस्वव्यतिरेकतो ज्ञायसे। यथा-नुकूलवादं वेदवचनं विना प्रवर्तमानं न तन्मनीषितम्। सम्यक्। 'अभीरुदमेकमेको अस्मि निष्षाळभीद्वा किमु त्रयः करन्ति। खलेन पर्षान्प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्रा' इति जीवेशयो-र्भेदे व्यक्तं वचः परः पुमानुपाददे। 'प्रविष्टत्वाच्छरीरेषु जीव एवेति दुर्धियः। मन्यन्ते परमात्मानं न तन्मतमनुव्रजेत्। वेदवादविरोधित्वा-दनुयाता तमो विशेत्। यतः पर्यङ्कशयन आह विष्णुः सनातनः। इदं जगत्सर्वमथेदशानि भूरीणि वा मामभियान्ति सङ्ख्ये। धान्यानि यद्वत्खलगानि मर्त्याः सञ्चूर्णयिष्याम्यहमेक एवे'ति ब्रह्माण्डे। चेति फलतोऽपि तमो यान्तीति। 'ऐकात्म्यज्ञानतो यान्ति तमो भेदात्परं पदम्। स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददृशिर्भवेदि'ति ब्रह्मवैवर्ते ॥१८॥ '[20]अनीहोऽक्लिष्टकारित्वात्तथाऽविकृत एव सन्। सर्वं करोति तद्युक्त-मैश्वर्यात्पूर्णशक्तित'इति ब्राह्मे। अगुणश्चेत्कथं गुणैः सृष्टयादिकृदिति तदाश्रयत्वात्। 'अगुणोऽगुणदेहत्वात्सगुणो गुणधारणात्। ऐश्वर्यादि-गुणत्वाद्वा वासुदेव इतीर्यत'इत्याग्नेये ॥ २० ॥ '[21]जगतां वर्धयन्सत्वं यदा रक्षति केशवः। हयग्रीवादिरूपेण शुक्लवर्णस्तदा विभुः। वर्धयंस्तु रजो येन जगदुत्पादयेद्धरिः। तद्रक्तं जामदग्न्यादिरूपं येन विनाशयेत्। वर्धयंस्तु तमो लोके तत्कृष्णं यादवादिकम्। सर्वत्र सर्वं कुरुते विशेष-स्तत्र कीर्तितः। ज्ञानदानादिना रक्षा महतां सम्प्रकीर्तिता। रागदानेन

द्बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ १८ ॥ यदात्मनो दृश्यगुणेषु सन्निधेर्व्यवस्यसेऽस्वव्यतिरेकतोऽबुधैः। विनानुवादं न च तन्मनीषितं सम्यग्वचो व्यक्तमुपाददत्पुमान् ॥ १९ ॥ त्वत्तोऽस्य जन्म-स्थितिसंयमान्विभो वदन्त्यनीहादगुणादविक्रियात्। त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यसे गुणैः ॥ २० ॥ त्वमस्य लोकस्य विभो

SGDF
Sri Gangeshwari Digital Foundation

महतां सृष्टिः सृष्टिरुदीर्यते । असतां तु मनोवृद्धिं कुर्वन्पातयते यदा । सतां विवर्धनार्थाय कृष्णरूपी तदा हरिः । ज्ञानाद्युत्पत्तिकृच्चापि रूपं रक्तं विभोः स्मृतम् । तमोविनाशकमपि कृष्णं विष्णोरुदाहृतम् । आचार्यादिषु रागार्थे शुद्धसत्वात्मकं रजः । यतो व्यपेक्षितं नाशे तमसोऽपि ततः परम् । तमो द्वेषात्मकं शुद्धं सत्वात्मकमुदीर्यते । एवं सृतिगतानां तु रागाद्या न गुणोद्भवाः । शुद्धज्ञानात्मकाः सर्वे मुक्तानां नात्र संशयः । सर्वत्र सर्वकृच्चापि हयग्रीवादिरूपकः । ज्ञानादिरक्षको विष्णुर्जामदग्न्यादिरूपवान् । ज्ञानाद्युत्पादको नित्यं कृष्णादिर्दोषनाशकः । एकरूपोऽपि भगवान्बहुरूप इवेयते । अचिन्त्यैश्वर्यरूपत्वात्पूर्णानन्दैकरूपक'इति ब्रह्मतर्के । 'स्वेच्छया तु गुणान्विष्णुर्नामरूपान्करोत्यजः । गुणानामाश्रयत्वात्तु भवेत्स गुणबृंहित'इति तन्त्रभागवते ॥ २१ ॥ '[22]सतां सुखविवृद्ध्यर्थमसतां पीडनं हरेः । यावच्चासुरदुःखं स्यात्तावद्देवसुखं भवेत् । तत्रापि तारतम्येन ब्रह्मणोऽभ्यधिकं सुखम् । यावत्क्षीणं तमस्तावत्प्रकाशस्य तु वर्धनम् । सर्वस्माच्च कलेः पीडा ब्रह्मणोऽभ्यधिकं सुखम् । तस्मात्सतां रक्षणाय सर्वकर्म हरेः स्मृतमि'ति ब्रह्मतर्के ॥ २२ ॥ '[25]सर्वाशुभविनिर्मुक्तगुणमात्रो यतो हरिः । सत्तामात्रमतः प्राहुर्निर्विशेषोऽखिलोत्तमः । अनादरान्निरीहश्च सेहः सर्वकृती यत'इति तन्त्रभागवते ॥ यस्य तद्रूपं सत्वम् । 'सप्तसु प्रथमे'ति सूत्रात् ॥ २५ ॥ [26]अशेषसंज्ञः सर्वनामा ॥ २६ ॥ [27]चेष्टते अनेनेति चेष्टाः ॥२७॥ इति दशमतात्पर्ये चतुर्थोऽध्यायः ॥४॥

रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर । राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानां निहनिष्यसे चमूम् ॥ २२ ॥ देवक्युवाच—रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् । सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपम् ॥ २५ ॥ नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु । व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यतेऽशेषसंज्ञः ॥ २६ ॥ योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् । निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ २७ ॥

SGDF
Sri Gangeshwari Digital Foundation

पञ्चमोऽध्यायः

'[1]पूतनाकंसनरकशिशुपालादिषु द्विधा । जीवाः सन्तस्त्वसन्तश्च तत्र बन्ध्वादिरूपिणः । विष्णोः सन्त इति ज्ञेया असन्तः शत्रुरूपिणः । शुभजीवप्रकाशेन कदाचिच्छुभबुद्धयः । विपर्ययेऽन्यथा च स्युः शुभास्तत्र हरिं ययुः । असुराश्च तमो घोरं यदि तत्रैव मध्यमाः । मध्यमां गतिमेवापुरेकदेहगता अपी'ति गारुडे ॥१॥ [19]अयमात्मा परमात्मा ॥ ॥ १९ ॥ [20-21]यतः परमात्मनो नैकविधमैक्यं विपरीतज्ञानेन यतश्च संसृतिर्न निवर्तते । स एव न विपर्येति । (पुत्रादिकं तु विपर्येति) तस्मात्तस्मिन्नेव स्थितिं कृत्वा माऽनुशोच । 'अहं ब्रह्मास्मि देवोऽस्मि नास्मि केवलमानुषः । जातोऽस्मि वर्धे धनवान्म्रीय इत्यादिका सदा । देहादिषु च देवेषु परे ब्रह्मणि चाभिदा । मोहाद्यन्मायया नित्यं दृश्यतेऽधममध्यमे । स ईशो न विपर्येति सर्वेशत्वात्कदाचन । पुत्रादिकं विपर्येति पित्रादिश्च यतो भवेदि'ति ब्राह्मे ॥ 'तल्लक्षणैर्विहीनः सन्ब्रह्मदेवोऽस्मि चेति तु । असुराः प्रतिपद्यन्ते जन्मादीन्मानुषा जना' इति च ॥ 'परब्रह्मण एकस्य ब्रह्मास्मीति विचिन्तनम् । परब्रह्मेति रामादिलक्षणैरवधारयेत् । देवोऽस्मीति च देवानां तच्च ज्ञेयं स्वलक्षणैः । मर्त्यानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते । अन्यथाप्रतिपत्त्या तु तमो यान्ति विनिश्चयात् । अन्यथा प्रतिपद्यन्ते आसुरा नियतं जनाः ।

पञ्चमोऽध्यायः

बहिरन्तःपुरद्वारः सर्वाः पूर्ववदावृताः । ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥ मा शोचेथां महाभागावात्मजान् स्वकृतं भुजः । जन्तवो न सदैकत्र दैवाधीनाः सहासते ॥ १८ ॥ भुवि भौमानि भूतानि यथा यान्त्यपयान्ति च । नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥१९॥ यतोऽनेकविधोऽभेदो यत आत्मविपर्ययः । देहयोगवियोगश्च संसृतिर्न निवर्तते ॥ २० ॥ तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ।

SGDF
Sri Gargeshwari Digital Foundation

घोरं तमश्च ते यान्ति तथा ज्ञानात्परं सुरा'इति च ॥ २०, २१ ॥ [26-27]देहिनामज्ञानप्रभवा यातनाः स्वपरेति भिदा हन्ति । 'देवोऽहं मानुषो वेति विशेषं तत्र चापि तु । तथैव परमात्मानं विशेषं ब्रह्म-जीवयोः । सम्यग्भेदेन यः पश्येत्स हन्त्यज्ञानसम्भवाः । यातनाः परमात्मानं तत्प्रसादाच्च गच्छती'ति ब्रह्माण्डे ॥ 'भगवद्दर्शनाद्यस्य विरोधाद्दर्शनं पृथक् । पृथग्दृष्टिः स विज्ञेयो न तु सद्भेददर्शन'इति च भविष्यत्पुराणे ॥ 'स्वरूपभेदो हि परजीवयोर्जीवगो मिथः । परस्परेण वस्तूनां विशेषः शास्त्रदर्शितः । सद्भेदोऽयं समुद्दिष्टस्त्वसद्भेदं च मे शृणु । स्वरूपाणां गुणानां च विष्णोर्भेदः परस्परात् । सर्वस्य विष्णु-तन्त्रत्वं शत्रुमित्रादिभेदिता । यच्चान्यच्छास्त्रविद्विष्टमसद्भेदः स ईरितः । सद्भेददर्शनान्मोक्षस्त्वसद्भेदात्तमो व्रजेत् । सद्भेदादर्शनाच्चैव तमो मोक्ष-स्तथेतरादि'ति च ॥ २६, २७॥ इति दशमतात्पर्ये पञ्चमोऽध्यायः॥ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

एकादशोऽध्यायः

'[30]रूप्यत्वात्तु जगद्रूपं विष्णोः साक्षात्सुखात्मकम् । नित्यपूर्णं समुद्दिष्टं स्वरूपं परमात्मन'इति वामने ॥ ३० ॥ [31]देहे । 'विष्णुः सर्वगुणोद्रेकात्काल इत्यभिधीयत'इति च ॥ ३१ ॥ '[32]प्रकृत्यादे-

---

मानुशोच यतः सर्वः स्वकृतं विन्दतेऽवशः ॥ २१ ॥ एवमेतन्महाराज यथा वदसि देहिनाम् । अज्ञानप्रभवा हन्ति स्वपरेति भिदा यतः ॥ २६ ॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः । मिथो घ्नन्ति न पश्यन्ति भावै-र्भावान् पृथग्दृशः ॥ २७ ॥

एकादशोऽध्यायः

कृष्ण कृष्ण महायोगिन् त्वमाद्यः पुरुषः परः । व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ॥ ३० ॥ त्वमेकः सर्वभूतानां देह आत्मे-न्द्रियेश्वरः । त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः ॥ ३१ ॥ त्वं

SGDF
Sri Gargeshwari Digital Foundation

स्तद्वशत्वात्प्रकृत्यादिरुदीर्यते। यथा राजा भृत्यकृतात्स्वयं कर्तेत्युदीर्यते। तथा देहं स्वतन्त्रत्वात्स्वयमित्याहुरञ्जसे'ति पाद्मे ॥३२॥ [33]स्वात्मना गृह्यमाणः ॥ ३३ ॥ '[34]छन्नोऽन्येषां न तु स्वस्य भगवान्पुरुषोत्तमः ॥ ॥३४॥ [35]तस्यावतारा देहस्था अदेहस्था इति द्विधा। अन्तर्याम्यादिरूपाणि देहस्थानि विदो विदुः। मत्स्यकूर्मादिरूपाणि नदेहस्थानि हृत्पतेः। अन्यातुल्यैरतिशयैर्मनसो नियमादिभिः। ज्ञायन्ते तानि रूपाणि नित्यपूर्णानि सर्वशं'इति महाकौर्मे ॥ ३५ ॥ इति दशमतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥ १२ ॥ १३ ॥

चतुर्दशोऽध्यायः

'[34]दण्डोऽपि भगवच्चीर्णो ममैषोऽनुग्रहः स्मृतः। इति भक्त्या चिन्तयतां शुभकारी भवत्यलम्। तत्रापि कुर्वतां द्वेषं तमः प्राप्त्यै तथा भवेदि'ति च ॥ 'अपुनर्भवमात्रात्तु हरिसामीप्यमुत्तमम्। तत्रापि स्पर्शयोग्यत्वं यथा वेदविदो विदुरि'ति पाद्मे ॥३४॥ [39]भूताय सर्वदा-

---

महान् प्रकृतिः सूक्ष्मरजःसत्वतमोमयी। त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥३२॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः। कोन्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंस्थितेः ॥ ३३ ॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे। आत्मद्योतैर्गुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३४ ॥ यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः। तैस्तैरतुल्यातिशयैस्तिर्यग्योनिष्वसङ्गतैः ॥ ३५ ॥

चतुर्दशोऽध्यायः

नागपत्न्य ऊचुः—न्याय्यो हि दण्डः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय। रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंस्यम् ॥ ॥३३॥ अनुग्रहोऽयं भवता कृतो हि नो दण्डोऽसतां ते खलु कल्मषापहः। यद्दन्दशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव संमतः ॥ ३४ ॥ कस्यानुभावोऽस्य न देव विद्महे तवाङ्घ्रिरेणुस्पर्शाधिकारः। यद्वाञ्छया श्रीर्ललनाऽचरत्तपो विहाय कामान् सुचिरं धृतव्रता ॥३६॥ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्। न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति त्वत्पादरजः प्रपन्नाः ॥ ३७ ॥ नमस्तुभ्यं भगवते पुरुषाय

SGDF
Sri Gurgeshwari Digital Foundation

विद्यमानाय ॥३९॥ [40]अप्राकृताय ॥४०॥ [41]कालनाभाय कालाश्रयाय। 'विश्वस्य तदधीनत्वाद्विश्वं विष्णुरुदीर्यते। मूलहेतुत्वतो हेतुः कर्ता प्रातिस्विकं कृते'रित्याग्नेये ॥ ४१ ॥ [46]गुणप्रदीपाय गुणज्ञापकाय। गुणात्मस्थोदयाय। गुणात्मिका प्रकृतिः तस्यां स्थित उदयस्वरूपो हरिः ॥ ४६ ॥ [48]अविश्वाय जीवेभ्योऽन्यस्मै। 'शरीरेषु प्रविष्टत्वाद्विश्वो जीव उदीर्यते। जीवस्य तदधीनत्वाद्विश्वो विष्णुरिति स्मृतः। तस्योत्पत्त्यादिहेतुत्वाद्विश्वहेतुश्च कीर्त्यत'इति मात्स्ये ॥ ४८ ॥ '[49]हरेः स्वरूपशक्तिर्या कालशक्तिरुदीर्यते। सदा सर्वगुणात्मत्वाद्दुर्गा वाप्यवरा ततः। सर्वसंहारकारित्वाद्वायुः सर्वस्य जीवनात्। कालाभिमानिनावेतौ दुर्गावायुश्च कीर्तिताविति' प्रकाशसंहितायाम् ॥ ४९ ॥ '[50]अन्तःप्रियं बहिश्चेति द्विधा प्रियमुदाहृतम्। अन्तःप्रिया हरेः सन्तः सर्वं चापि हरेः प्रियम्। असन्तश्चापि संहार ईषदन्तः प्रिया इव। तदपेक्षया तथा सन्तो विशेषान्तःप्रिया स्थिता' इति षाड्गुण्ये। 'सुखान्तं प्राप्नुयुर्यस्माद्देवाः शान्ता उदाहृताः। अशान्ता मानुषाः प्रोक्ता विमूढा आसुरा मता'इति प्रकाशसंहितायाम्। कर्मपरीप्सया कर्मप्रवर्तनार्थम्। सर्वशरीरेषु स्थातुः ईहतः प्राणस्य सकाशात्। प्राणसकाशाद्धि कर्म प्रवर्तनमिच्छति भगवान्। 'वायोः सकाशाज्जगतः प्रवृत्तिं कारयत्यजः।

महात्मने। भूतावासाय भूताय पराय परमात्मने ॥३९॥ ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये। अगुणायाविकाराय नमस्तेऽप्राकृताय च ॥ ४० ॥ कालाय कालनाभाय कालावयवसाक्षिणे। विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥ ४१ ॥ नमो गुणप्रदीपाय गुणात्मस्थोदयाय च। गुणप्रत्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः। अविश्वाय च विश्वाय तद्द्रष्ट्रे विश्वहेतवे ॥ ४८ ॥ त्वं ह्यस्य जन्म स्थितिसंयमान् विभो गुणैरनीहोऽकृत कालशक्तिधृक्। तस्मात्स्वभावात्प्रतिबोधयस्व नः समीक्षयाऽमोघविहार ईहसे ॥४९॥ तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शान्ता अशान्ता उत मूढयोनयः। शान्ताः

SGDF
Sri Gargeshwari Digital Foundation

प्राणप्राणमतः प्राहुर्विष्णुं वायोरपि प्रभुमि'ति च ॥ ५० ॥ [57]धातुर्गुणविसर्जनम्। हिरण्यगर्भसकाशाद्गुणभूता सृष्टिरस्य जगतः। प्राधान्येन विष्णोरेव। 'विष्णुः प्रधानतः स्रष्टा गुणस्रष्टा चतुर्मुख'इति नारदीये॥ ॥ ५७ ॥ इति दशमतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

'[12]विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यते। ब्राह्मणानामपीडायै बलिभिः क्षत्रियादिभिः। विष्णोश्च विष्णुभक्तानां शापाद्यान्ति तमोऽखिलम्। तथापि चासुरावेशाच्छपेयुर्हरिमप्यहो। अतस्तु सौभरेः शापं नात्यवर्तत्खगेश्वरः। अन्यथा तूत्तमानां हि नाधमैः शाप इष्यते। वरोऽपि दत्तस्त्वधिकैर्नाधमाधिक्यकारणम्। विष्णोरपि वरस्तस्मान्नाधिक्यँ सम्प्रयच्छति। क्रमशः श्रीविरिञ्चादेः कथञ्चित्केनचित्क्वचित्। न च दद्याद्धरिस्तादृग्दद्याद्वा बाह्यमेव त्वि'ति ब्रह्माण्डे ॥ १२ ॥ इति दशमतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

[23]श्रीदामा कृष्णमुवाह। हरिवंशादिवचनात्। 'बहुमानविरोधे

प्रियास्तेह्यधुनाऽवितुः सतां स्थातुश्च ते कर्मपरीप्सयेहतः ॥५०॥ त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्जनम्। नानास्वभाववीर्यौजो योनिबीजाशयाकृति ॥ ५७ ॥

पञ्चदशोऽध्यायः

अत्र प्रविश्य गरुडो यदि मत्स्यान्सखादति। सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहम् ॥११॥ तत्कालियः परं वेद नान्यः कश्चित्सलेलिहा। अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः ॥ १२ ॥

षोडशोऽध्यायः

उवाह कृष्णो भगवान् श्रीदामानं पराजितः। वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥ २३ ॥

SGDF
Sri Gangeshwari Digital Foundation

तु व्यत्यासः शब्दतोऽर्थतः। कार्योऽनिरुक्तदेवानां गुणसिद्ध्यै न चान्यथा। विष्णुर्ब्रह्म तथा वायुरनिरुक्ताः प्रकीर्तिताः। तत्पत्न्यश्चेतर-गुणा व्यत्यस्यास्तेष्वसंशय' इति ब्रह्मतर्के ॥ २३ ॥ इति दशमतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥ १७ ॥ १८ ॥

एकोनविंशोऽध्यायः

[7]'श्रीदेवी वेणुमाविश्य रेमे कृष्णमुखाम्बुजे। पपौ च तद्गतं गीतं सुरा इतरभाण्डगा' इति तन्त्रभागवते ॥ ७ ॥ इति दशमतात्पर्ये एकोनविंशोऽध्यायः ॥ १९ ॥ २० ॥ २१ ॥

द्वाविंशोऽध्यायः

[16]फलरूपः स कर्मण इत्याद्यवान्तरेश्वरविषयम्। 'स्वभावे कर्मणि च यः सत्वादिषु गुणेषु च। स्थितो विष्णुः सर्वकर्ता पृथक्संस्थश्च सर्वगः। गुणकर्मस्वभावादिशब्दवाच्यश्च केशवः। तेन जातं फलं यस्मात्कर्मणः फलमीर्यते। न चासौ कर्मफलवान्नास्य किञ्चिन्न शक्यते। तदन्यावान्तरेशानां तद्वशत्वं यतः सदा। कर्मणः फलरूपत्वमतस्तेषा-मुदीर्यते। नान्यकर्मवशत्वं तु तेषां विष्णुं विना क्वचित्। स च ब्राह्मणगिर्यादिनामा विष्णुरजः परः ॥ १६ ॥ [18]एतस्मात्कारणात्कृष्णः

एकोनविंशोऽध्यायः

इति वेणुरवं राजन्सर्वभूतमनोहरम्। श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेभिरे ॥७॥ गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदरा-धरसुधासरसाप्यगेयम्। भुङ्क्ते स्वयं यदवशिष्टरसौघमार्गे हृष्टत्वचोऽश्रु मुमुचुस्तरवः सदर्भाः ॥ १० ॥

द्वाविंशोऽध्यायः

अस्ति चेदीश्वरः कश्चित्फलरूपः स कर्मणः। कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः ॥ १४ ॥ स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते। स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥ १६ ॥ तस्मात्सुपूजयेत्कर्म

SGDF
Sri Gargeshwari Digital Foundation

शक्रस्य विमदाय तु। गिर्यादिस्थितमात्मानं पूजयामास बल्लवैः ॥१८॥
'[31]अत्यल्पस्त्वसुरावेशो देवानां च भविष्यति। प्राणमेकमसौ हित्वाऽऽ-
खणाश्मसमः स्मृतः। तस्मिन्नप्यसुरावेशे गते प्रकृतिरेव त्वि'ति च ॥
॥ ३१ ॥ इति दशमतात्पर्ये द्वाविंशोऽध्यायः ॥ २२ ॥ २३ ॥
॥ २४ ॥

पञ्चविंशोऽध्यायः

[4]विशुद्धसत्वं विगतशुद्धसत्वम्। यस्मात्त्रिगुणसम्बन्धस्त्वयि न
विद्यते। यत्राग्रहणमनुबन्धः। तपोमयं ज्ञानात्मकम् ॥४॥ [5]पुनर्गुण-
संप्रवाहस्य कारणत्वात्तद्धेतवः ॥ ५ ॥ '[7]असतां च सतां चैव हरि-
रेवानुशासकः। सतां तु श्रेयसे सैव ह्यनुशास्तिर्भविष्यति। असतां
विपरीताय लङ्घयित्वाऽनुशासनमि'त्याग्नेये ॥७॥ '[11]आवेशो वसुदेवादौ
देहादानं हरेः स्मृतम्। देहादानं तदन्येषां जन्मेति कवयो विदुः।
तथाप्यसुरमोहाय ग्रन्थेषु बहुधैव त्वि'ति पाद्मे ॥ ११ ॥ इति पञ्च-
विंशोऽध्यायः ॥ २५ ॥ २६ ॥

स्वभावस्थः स्वकर्मकृत्। अञ्जसा येन वर्तेत तदेवास्य हि दैवतम् ॥१८॥
श्री शुक उवाच—कालात्मना भगवता शक्रदर्पजिघांसया। प्रोक्तं निशम्य
नन्दाद्याः साध्वगृह्णन्त तद्वचः ॥ ३१ ॥

पञ्चविंशोऽध्यायः

इन्द्र उवाच—विशुद्धसत्त्वं तव धाम शान्तं तपोमयं ध्वस्तरज-
स्तमस्कम्। मायामयोऽयं गुणसम्प्रवाहो न विद्यते तेऽग्रहणानुबन्धः ॥
॥४॥ कुतो नु तद्धेतव ईश मन्युलोभादयो येऽबुधलिङ्गभावाः। अथापि
दण्डं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ॥ ५ ॥ ये मद्विधाः
स्युर्जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तं मदम्। हित्वाऽऽर्यमार्गं
प्रभजन्त्यपस्मया ईहा खलानामपि तेऽनुशासनम् ॥ ७ ॥ स्वच्छन्देनात्त-
देहाय विशुद्धज्ञानमूर्तये। सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥११॥

SGDF
Sri Gangeshwari Digital Foundation

सप्तविंशोऽध्यायः

'[13]कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः। सम्यक्कृष्णं परब्रह्म ज्ञात्वा कालात्परं ययुः। पूर्वं च ज्ञानसंयुक्तास्तत्रापि प्रायश-स्तथा। अतस्तासां परं ब्रह्म गतिरासीन्न कामतः। न तु ज्ञानमृते मोक्षो नान्यः पन्थेति हि श्रुतिः। कामयुक्ता तदा भक्तिर्ज्ञानं चातो विमुक्तिगाः। अतो मोक्षेऽपि तासां च कामो भक्त्याऽनुवर्तते। अतो-दकत्वेन सदा द्वेषिणामधरं तमः। मुक्तिशब्दोदितं चैद्यप्रभृतौ द्वेष-भागिनः। भक्तिभागी पृथङ्मुक्तिमगाद्विष्णुप्रसादतः। कामस्त्वशुभ-कृच्चापि भक्त्या विष्णोः प्रसादकृत्। द्वेषिजीवयुतं चापि भक्तं विष्णु-र्विमोचयेत्। अहोऽतिकरुणा विष्णोः शिशुपालस्य मोक्षणादि'ति स्कान्दे॥ जगत्प्रपितामहे जारबुद्धिर्न युक्ता तथापि। ब्रह्मतया न सम्यक्। 'श्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा'। 'रमाया दत्तक्षणमि'ति वचनात्॥ १३॥ [15]कामिनः कामित्वं क्रोधिनः क्रोधित्वमेव सर्वदा भवतीति तन्मयता। 'विमुक्तावपि कामिन्यो विष्णुकामा व्रजस्त्रियः। द्वेषिणश्च हरौ नित्यं द्वेषेण तमसि स्थिता' इति च। 'भक्त्या हि नित्यकामित्वं न तु मुक्तिं विना भवेत्। अतः कान्ततया वापि मुक्तिर्भक्तिमतां हरौ। स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरस्त्रियः। काश्चित्काश्चिन्न कामेन भक्त्या केवलयैव तु। मोक्षमायान्ति नान्येन

सप्तविंशोऽध्यायः

तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः। जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥११॥ राजोवाच—कृष्णं विदुः परं कान्तं न तु ब्रह्मतया-मुने। गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥१२॥ श्री शुक उवाच—उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथागतः। द्विषन्नपि हृषीकेशं किमुता-धोक्षजप्रियाः ॥ १३ ॥ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप। अव्यक्तस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥१४॥ कामं क्रोधं भयं मोहं मैत्रीं

SGDF
Sri Gangeshwari Digital Foundation

भक्तिं योग्यां विना क्वचिदि'ति पाद्मे । 'भक्त्या वा कामभक्त्या वा मोक्षो नान्येन केनचित् । कामभक्त्याऽप्सरस्त्रीणामन्येषां नैव कामतः । उपास्यः श्वशुरत्वेन देवस्त्रीणां जनार्दनः । जारत्वेनाप्सरस्त्रीणां कासांचिदिति योग्यता । योग्योपासां विना नैव मोक्षः कस्यापि सेत्स्यति । अयोग्योपासनाकर्तुरनर्थश्च भविष्यति । तस्मात्तु योग्यतां ज्ञात्वा हरेः कार्यमुपासनमि'ति भद्रिकायाम् । 'पतित्वेन श्रियोपास्यो ब्रह्मणा मे पितेति च । पितामहतयाऽन्येषां त्रिदशानां जनार्दनः । प्रपितामहो मे भगवानिति सर्वजनस्य तु । गुरुः श्रीब्रह्मणोर्विष्णुः सुराणां च गुरोर्गुरुः । मूलभूतो गुरुः सर्वजनानां पुरुषोत्तमः । गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णुः सनातनः । इत्येवोपासनं कार्यं नान्यथा तु कथञ्चने'ति वाराहे ॥ १५ ॥ इति दशमतात्पर्ये सप्तविंशोऽध्यायः ॥ २७ ॥ २८ ॥ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

'[24]मानवो बदरः सिंधुः शशिनस्तु त्रिनामकम् । यो वेद मुच्यते रोगैर्विष्णुनाम्नेव संसृतेरि'ति स्कान्दे ॥ २४ ॥ इति दशमतात्पर्ये त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ३४ ॥

सौहृदमेव वा । नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥ न चैवं विस्मयः कार्यो भवता भगवत्यजे । योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥

त्रयस्त्रिंशोऽध्यायः

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली । बदरपाण्डुवदनो मृदुगण्डम्मण्डयन् कनककुण्डललक्ष्म्या ॥२४॥

SGDF
Sri Gargeshwari Digital Foundation

पञ्चत्रिंशोऽध्यायः

'[24]आदिनो राक्षसाः प्रोक्तास्तदन्तत्वाज्जनार्दनः । आद्यन्त इति विज्ञेयः परेशो ब्रह्मणीशनादि'ति ब्राह्मे ॥ २४ ॥ इति दशमतात्पर्ये पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

[11]तत्सन् तथैवसन् ॥ ११ ॥ [12]शुम्भन्ति शोभयन्ति । 'शुम्भनं शोभनं शुम्भं शुभपर्यायवाचका'इत्यभिधानम् ॥ १२ ॥ [30]वैन्यपार्थबलेशादावाविष्टं पुरुषोत्तमम् । अपेक्ष्य तद्गुणाः सर्वे तज्जीवानामभाविनः । अप्युच्यन्ते पुराणेषु विशेषात्सन्निधिर्यत'इति माहात्म्ये ॥ ॥ ३० ॥ इति दशमतात्पर्ये षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ३७ ॥

पञ्चत्रिंशोऽध्यायः

त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताऽशेषविशेषकल्पनम् ।
क्रीडार्थमाद्यन्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वताम् ॥ २४ ॥

षट्त्रिंशोऽध्यायः

य ईक्षिताऽहं रहितोऽप्यसत्सतोः स्वतेजसाऽपास्ततमोऽभिदाभ्रमः ।
स्वमाययाऽऽत्मन् रचितेषु तत्सन्प्राणादिभिर्जन्तुषु भाति चित्रधा ॥११॥
यस्याखिलामीवहभिः सुमङ्गलैर्वाचो विमिश्रा गुणकर्मजन्मभिः । प्राणन्ति शुम्भन्ति पुनन्ति वै जगद्यास्तद्विरक्ताः स्युरशोभना मताः ॥ १२ ॥
पदानि तस्याखिललोकपालकिरीटचूडामणिपादरेणोः । ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवाङ्कुशाद्यैः ॥ २४ ॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती । अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३० ॥
पृष्ट्वाऽथ स्वागतं तस्मै निवेद्य परमासनम् । प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हमाहरत् ॥ ३६ ॥

SGDF
Sri Gurgeshwari Digital Foundation

अष्टत्रिंशोऽध्यायः

[3]तवाङ्गेभ्यो भूताः ॥ ३ ॥ [4]अन्यात्मतया गृहीताः । मत्तोऽन्ये जीवात्मान एत इति भगवता गृहीताः । 'अहं परो हि मद्भिन्ना जीवात्मानोऽल्पबुद्धयः । मद्वशाः सर्व एवेति ब्रह्मादीन्मन्यते हरिरि'ति स्कान्दे ॥ 'यथा हरिः स्वमात्मानं वेद तद्वद्रमापि न । ब्रह्मा च कुत एवान्ये विदन्त्येव तथापि त्वि'ति माहात्म्ये ॥ ४ ॥ '[5]स्थितो ब्रह्मादिदेवेषु साधिभूतेषु चेश्वरः । आत्मशब्दोदितनरेष्वपि यस्माज्जनार्दनः । साध्यात्मः साधिभूतश्च साधिदैवेति चोच्यत'इत्यध्यात्मे ॥ ॥ ५ ॥ '[6]सर्वदेवेष्वपि हरिः सर्वदेवनियामकः । नामवान्सर्वदेवानां सर्वपूजां तथाऽत्त्यसावि'ति च ॥६॥ [13]अविद्यया भगवदिच्छया ॥१३॥ [14]त्वयैव प्रकल्पिताः । 'विष्णोरङ्गसमुद्भूता विष्णोरङ्गानि देवताः । उच्यन्ते सर्ववेदेषु स्वरूपा भेदिनोऽपि त्वि'ति च ॥१४॥ '[17]भूतामेव बिभर्तीशो ह्यवतारतनुं सदा । बिभर्तीत्युच्यतेऽथापि मोहाय व्यत्त्य-

---

अष्टत्रिंशोऽध्यायः

भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि । सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ॥ ३ ॥ नैते स्वरूपं विदुरात्मनस्ते अजादयोऽन्यात्मतया गृहीताः । अजोऽनुबद्धः सगुणैरजाया गुणात्परं वेद न ते स्वरूपम् ॥ ४ ॥ त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् । साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ५ ॥ त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः । यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥६॥ तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे । गुणप्रवाहोऽयमविद्यया सकृत्प्रवर्तते देव नृतिर्यगात्मसु ॥ ॥ १३ ॥ अग्निर्मुखं तेऽवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः । द्यौः कं सुरेन्द्रास्तव बाहवोर्णवः कुक्षिर्मरुत्प्राणबलं प्रकल्पितम् ॥ ॥१४॥ यानियानीह रूपाणि क्रीडनार्थं बिभर्षि हि । तैरामृष्टशुचो लोका

SGDF
Sri Gangadhar Digital Foundation

पेक्षये’ति तत्त्वनिर्णये ॥ १७ ॥ ‘[22]प्रद्युम्ने चानिरुद्धे च बलदेवे च केशवः । सन्निधानं विशेषेण करोति जगतां पतिः । तत्र कृष्णः स्वयं विष्णुः परमानन्दलक्षणः । पाराशर्यश्च भगवान्स्वयमेव जनार्दन’-इति च ॥ ‘तत्तद्गतस्यैव हरेस्तत्तन्नामानि चाञ्जसा । औपचारिकनामानि तदन्येषामिति स्थितिरि’ति शब्दनिर्णये ॥ २२ ॥ इति दशमतात्पर्ये अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः

(वि. अ. ९४ श्लो. ५०) ‘सर्वोत्तमोऽपि भगवान् गुणा(ण)-भावं जनार्दनः । दर्शयेद्वसुदेवादेरात्मनो जीवतामपि । अज्ञाऽशक्त्यादि-भावस्तु कुतस्तस्याखिलेशितुः । कुतो दोषाः सर्वगुणपूर्णस्यानन्दवारिधे-रि’ति वामने ॥ २, ९ ॥ इति दशमतात्पर्ये त्रिचत्वारिंशोऽध्यायः ॥ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ पूर्वार्धः सम्पूर्णः ॥

मुदा गायन्ति ते यशः ॥ १७ ॥ नमस्ते वासुदेवाय नमः सङ्कर्षणाय च । प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २२ ॥

त्रिचत्वारिंशोऽध्यायः

उवाच पितरावेत्य साग्रजः सात्वतर्षभः । प्रश्रयावनतः प्रीणन्नम्ब ताततेति सादरम् ॥ २ ॥ नास्मत्तो युवयोस्तात नित्योत्कण्ठितयोरपि । बाल्यपौगण्डकैशोराः पुत्राभ्यामभवन्क्वचित् ॥ ३ ॥ न लब्धो दैवहतयोर्वासो नौ भवदन्तिके । ये बालाः पितृगेहस्था विन्दते ललिता मुदम् ॥ ४ ॥ सर्वार्थसम्भवो देहो जनितः पोषितः पुनः । न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥ यस्तयोरात्मजः कल्प आत्मना च धनेन च । वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् । गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः ॥ ७ ॥ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः । मोघमेते व्यतिक्रान्ता दिवसा वामनर्चतोः ॥ ८ ॥ तत्क्षन्तुमर्हथस्तात मातर्नौ परतन्त्रयोः । अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदोर्भृशम् ॥ ९ ॥

SGDF
Sri Gurgeshwari Digital Foundation

दशमः स्कन्धः (उत्तरार्धः)

द्विपञ्चाशोऽध्यायः

श्रीवेदव्यासाय नमः ॥ '[21]सर्वावताराभिन्नोऽपि सर्वशक्तिरपि स्वयम्। पूज्यपूजकनीचोच्चं मोहनाय दुरात्मनाम्। अखण्डैकरसो विष्णुर्दर्शयेत्तत्र तत्र ही'ति षाड्गुण्ये ॥२१॥ इति दशमतात्पर्ये द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशोऽध्यायः

'[8]बहूनि स्थानजातानि कृष्णस्य क्षीरसागरे। कानिचिन्मुक्तगम्यानि नामुक्तैस्त्रिदशैरपि। गन्तुं शक्यान्यथान्यानि गम्यान्यन्यैरपि क्वचित्। तत्र देवाश्च योगीन्द्रा भक्ताश्चान्ये जनार्दनम्। गत्वाऽर्चयन्ति देवेशं बलिस्तत्रागमत्क्वचित्। तस्य तत्रासुरावेशात्पापबुद्धिरजायत। तद्व्यक्त्यर्थं जगन्नाथः शिश्ये सुप्तवदव्ययः। तदा स पापया बुद्ध्या किरीटमहरत्प्रभोः। तं जित्वा गरुडस्तत्तु हृत्वा गोमन्तमाव्रजत्।

दशमः स्कन्धः (उत्तरार्धः)

द्विपञ्चाशत्तमोऽध्यायः

प्रणामं चक्रतुर्वीरौ यथान्यायमतन्द्रितौ। इदं चोवाच भगवान् कृष्णस्तं मुनिपुङ्गवम् ॥२१॥ नमस्ते भार्गव श्रीमन् जामदग्न्य तपोधन। रामकृष्णौ स्मृतावावां क्वचित्ते श्रवणं गतौ ॥ २२ ॥ इत्युक्तस्तेन धर्मात्मा वासुदेवेन भार्गवः। निरीक्ष्य माधवौ प्राह प्रीत्युत्फुल्लमुखेक्षणः ॥ २३ ॥ स्वागतं ते यदुश्रेष्ठ साम्रजाय महात्मने। जाने त्वां यदुषूत्पन्नं भगवन्तमधोक्षजम् ॥ २४ ॥ कार्याणां कारणं पूर्वं जगतामादिपूरुषम्। नमस्ते पुण्डरीकाक्ष विश्वलोकैककारण ॥ २५ ॥

त्रिपञ्चाशदध्यायः

एतस्मिन्नेव काले तु क्षीरोदे सागरोत्तमे। निवासे देवदेवस्य शङ्खचक्रगदाभृतः ॥७॥ उपासीनो महाबाहुः श्रीमान्वैरोचनो बलिः। जहार

SGDF
Sri Gargeshwari Digital Foundation

तत्र कृष्णस्य शिरसि किरीटममुचत्प्रभोरि'ति माहात्म्ये ॥ ८ ॥ [35]ब्रह्मस्थो ब्रह्मनामाऽसौ रुद्रस्थो रुद्रनामकः। तयोरपि नियन्तैकः स्वयमेव जनार्दन'इति स्कान्दे ॥ ३५ ॥ इति दशमतात्पर्ये त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥ ५४-७० ॥

एकसप्ततिरध्यायः

[9]नीतच्छित् भगवता प्राप्तभेदः ॥ ९ ॥ इति दशमतात्पर्ये एकसप्ततिरध्यायः ॥ ७१ ॥

द्विसप्ततिरध्यायः

[11-13]अम्मयाद्यभिमानिनो देवाः उरुकालेनैव पुनन्ति। गुरूपदेशं प्रापयित्वा। भेदकृतः अन्यथाज्ञानिनः। विपश्चितस्तु प्रत्यक्षदर्शनादन्यथाज्ञानमेवापनयन्ति। 'प्राकृतैर्दृश्यमानं तु न द्रवं तीर्थमुच्यते। देवाश्च न शिलामात्राः किन्तु तत्रान्तरस्थिताः। गुरूपदेशं तु विना न ते दृश्याः कथञ्चन। न ज्ञायते च तद्रूपमन्यथाज्ञानिनां च ते। कोपाच्छापं प्रयच्छन्ति तस्माद्गुरुमुपाव्रजेत्। तस्मात्तीर्थानि देवाश्च नित्यं

देवदेवस्य किरीटं रत्नचित्रितम् ॥ ८ ॥ हिरण्यगर्भत्वमुपेत्य मूले सृजस्यशेषं भुवनं स एव। नारायणात्मन्परिपासि भूयो जहार चान्ते भगवन् शिवात्मना ॥ १५ ॥ रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम्। सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ॥ ३५ ॥

एकसप्तत्यध्यायः

सत्यभामोवाच—यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार। जित्वर्क्षराजमथ रत्नमदात्स तेन नीतच्छिदादिशत मां प्रभवेऽपि दत्ताम् ॥ ९ ॥

द्विसप्तत्यध्यायः

नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥ नाग्निर्न सूर्यो न च चन्द्रतारकं न भूर्जलं खं

SGDF
Sri Gangeshwari Digital Foundation

विद्वत्सु संस्थिता'इति गारुडे ॥ 'भिन्नस्याभेदतो दृष्टिरपि भेददृशिर्मता। वस्तुयाथात्म्यतस्तस्य भिन्नत्वादिति सूरिभिः। अन्यथाज्ञानमेवातो भेदज्ञानं विनिन्दितम्। न विद्यमानभेदस्य दर्शनं निन्दितं क्वचित्। शिला देवइति ज्ञानं देवोऽस्मीति तु या दृशिः। उत्तमस्याधमत्वेन नीचस्योच्चतया दृशिः। असमस्य समत्वेन समस्यासमदर्शनम्। द्रवं तीर्थमितिज्ञानं देहोऽहमिति या मतिः। असद्भार्यादिषु स्वीयदर्शनं चैवमादिकम्। भेदज्ञानमिति प्रोक्तं या चान्याप्यन्यथामतिः। तस्मात्तदपहानाय संसेव्या गुरवो वराः। तत्रस्था देवताः सर्वाः प्रीयन्ते गुरुपूजया। नैवान्यथैषां प्रीतिः स्याद्गुरूक्तिमपहाय तु। तस्मात्पूजाविशेषेण सतां कार्या नृणां सदा। भक्तिस्तु तारतम्येन विशिष्टे त्वधिका भवेदि'ति स्कान्दे ॥ 'उत्तमा अपि देवेशा अवरान्विदुषो नृणाम्। पूजायै सम्प्रयच्छन्ति परोक्षत्वप्रिया यतः। तेषु स्थित्वा स्वयं पूजां गृह्णन्त्यनुपमां सदा। ज्ञानानि च प्रयच्छन्ति तस्मादेवंविदा सदा। पूजिताः स्युः सुरवराः सब्रह्माणः सकेशवा'इति वामने ॥ ११-१३ ॥ [19]हृदयं प्रियं हृद्ययनात् ॥ १९ ॥ इति दशमतात्पर्ये द्विसप्ततिरध्यायः ॥ ७२ ॥ ७३ ॥ ७४ ॥

पञ्चसप्ततिरध्यायः

[38]भवानेव भवतः सदृशः ॥ ३८ ॥ [39]नृपपदं नृपशब्दवाच्य-

श्वसनोऽथ वाङ्मनः। उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया ॥ १२ ॥ यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः। यत्तीर्थबुद्धिश्च जलेन कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः। यत्रोपलब्धं सुव्यक्तमव्यक्तं च ततः परम् ॥ १९ ॥

पञ्चसप्तत्यध्यायः

रुक्मिण्युवाचः—नन्वेतदेवमरविन्दविलोचनाह यद्वै भवान्न भवतः सदृशो विभूम्नः। क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥३८॥ सत्यं भयादिव गुणेभ्य उरुक्रमान्तः शेते समुद्र-

SGDF
Sri Gangeshwari Digital Foundation

मात्रम् । न तु मुख्यतो नृपालकत्वम् । अन्धन्तमःप्रति विधुतम् ॥३९॥ [40]तवेहितमनु मे ईहितानि भवन्ति ॥ ४० ॥ [41]यतः किञ्चिन्मात्रं नास्ति किन्तु सर्वमेवास्ति ॥ ४१ ॥ [42]फलात्मा सुखात्मा । अतएव पुरुषैरर्थ्यस्वरूपः । तेषां भवतश्च समुदितः समो गुणो नास्ति । यश्च कोऽपि । त्रय्यां च रतयोः । वेदोक्तकर्तृत्वेन सुमतीनां त्रयीरतत्वम् । प्रतिपाद्यत्वेन भवतः । सुखदुःखिनोः । केवलं परिपूर्णसुखो भवान् । भगवज्ज्ञानपर्यन्तं दुःखिनस्ते । 'अल्पसम्पूर्णशक्तित्वादल्पपूर्णसुखत्वतः । अल्पसम्पूर्णदर्शित्वान्न साम्यं जीवकृष्णयोरि'ति ब्रह्माण्डे ॥ त्रय्यां चेति चशब्दः स्मृतिष्वपीति ॥ ४२ ॥ [43]अब्जो ब्रह्मा । 'सोऽब्ज एव पुरुषं समुद्धृत्यामूर्च्छयदि'ति श्रुतिः । 'अब्जः सम्भूतो हिरण्यगर्भ इत्यष्टावि'ति च ॥ ४३ ॥ [46]सन्मुखरितं सद्भिः प्रधानीकृतम् । मर्त्याशिषोरुभयं जनं प्रति अर्थोऽयमिति विविक्तदृष्टिः । कामरूपं त्वामविगणय्य ॥ ४६ ॥ [47]भ्रमः तिरन्नं यस्याः सा भ्रमतिः तस्याः भ्रमत्याः । विपरीतज्ञानिनां भक्षकाया इत्यर्थः । श्रुतिभिः प्रमाणेन ।

उपलम्भनमात्र आत्मा । योऽनित्यकेन्द्रियगुणैः कृतविग्रहस्त्वं त्वत्सेवया नृपपदं विधुतं तमोऽन्धम् ॥३९॥ त्वत्पादपद्ममकरन्दजुषां मुनीनां वर्त्म-स्फुटं नृपशुभिर्ननु दुर्विभाव्यम् । यस्मादलौकिकमिवेहितमीश्वरस्य भूमंस्तवेहितमथो अनु मे भवन्ति ॥ ४० ॥ निष्किञ्चनो ननु भवान्न-यतोऽस्ति किञ्चिद्यस्मै बलिं बलिभुजोऽप्यहरन्त्यजाद्याः । न त्वा विद-न्त्यसुतृपोऽन्तिकमाढ्यतान्धाः प्रेष्ठः सतां बलिभुजामपि योऽन्तरास्से ॥४१॥ त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वाञ्छया सुमतयो विसृजन्ति कृत्स्नम् । तेषां विभो समुदितो भवतः प्रसादस्त्रय्याश्च यश्च रतयोः सुख-दुःखिनोर्न ॥ ४२ ॥ त्वं न्यस्तदण्ड मुनिभिर्गदितानुभाव आत्मात्मदश्च जगतामिति मे वृतोऽसि । मुक्त्वा भवद्भ्रुवदुदीरितकालगन्धध्वस्ताशिषो-ऽब्जभवनाकपतीन् कुतोऽन्यान् ॥ ४३ ॥ का स्त्री वृणीत तव पादसरोज-गन्धमाघ्राय सन्मुखरितं जनतापवर्गम् । लक्ष्म्या लयन्त्वविगणय्य गुणालयाढ्यं मर्त्याशिषोरुभयमर्थविविक्तदृष्टिः ॥ ४६ ॥ तं त्वाऽनुरूप-

SGDF
Sri Gargeshwari Digital Foundation

'अभ्रमा भ्रमतामत्री या देवैरपि पूज्यते । तस्यै नमोऽस्तु ते देव्यै विष्णुवक्षस्थलाश्रय' इति नारदीये ॥ ४७ ॥ [48]खरगोऽश्वबिडालवत्स्त्रीणां भृत्याः ॥ ४८ ॥ '[49]आनन्दश्मश्रुरानन्दकेश आपादनखात्सर्व एवानन्दः । स एष विष्णुरजोऽमृतोऽचलो ब्रह्म य एवमेवं वेद । आनन्द एव स भवत्यानन्दस्य सार्ष्टितां सलोकतां सायुज्यमाप्नोती'ति माध्यन्दिनायनश्रुतिः ॥४९॥ [50]अनतिरिक्तदृष्टेः भक्त्यनुसार्यनुग्रहस्य । 'य एष देवः परोऽजरोऽमरस्तं वा एनमाहुर्भक्त इति । भक्त्या हि सोऽनुगृह्णाति । भक्त्यैवेदं वृणुते श्रियं विरिञ्चं रुद्रं इन्द्रमापिपीलिकम् । नाभक्तं वृणुते नाभक्तमनुगृह्णाति । यावान्वाव स भक्तस्तावच्छ्रेष वृणुते तावच्छ्रेषोऽनुगृह्णाति । नाधिकं वृणुते नाधिकमनुगृह्णाति । नावरं वृणुते नावरमनुगृह्णाति । अथातो भक्तिमीमांसा भवति । युवा स्यात्साधुयुवाऽध्यायकः । आशिष्ठो द्रढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तेन पूर्णा स्यात् । स एको मानुषो भक्तो भवति । ते ये शतं मानुषा भक्ता एतावान्मानुषो गन्धर्वः । ते ये शतं मानुषा गन्धर्वाः एतावान् देवगन्धर्वः । ते ये शतं देवगन्धर्वाः एतावांश्चिरलोकः पैतृकः । ते ये शतं चिरलोकाः पैतृकाः । एतावांश्चिरलोको दैविकः । ते ये शतं चिरलोका दैविकाः । एतावत्यतात्त्विकदेवता । ते ये शतमतात्त्विक्यो देवताः । एतावती तात्त्विकदेवता । (या)स्ते ये शतं तात्त्विक्यो देवताः । एतावान्पुरुहूतः । ते ये शतं पुरुहूताः । एतावान् वाव रुद्रः

मभजं जगतामधीशमात्मानमत्र च परत्र च कामरूपम् । स्यान्मे तवाङ्घ्रिशरणं श्रुतिभिर्भ्रमत्या ये वै भजन्ति उत यान्त्यनृतापवर्गम् ॥४७॥ कस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहेषु खरगोऽश्वबिडालभृत्याः । यत्कर्णमूलमरिकर्शन नोपयायाद्युष्मत्कथा मृडविरिञ्चसभासु गीता ॥४८॥ त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम् । जीवच्छवं भजति काममतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्री ॥ ॥४९॥ अस्त्यम्बुजाक्ष मम ते चरणानुराग आत्मन् रतस्य मयि चानतिरिक्त-

SGDF
Sri Gurgeshwari Digital Foundation

ये ते शतं रुद्राः। एतावान्वाव विरिश्चस्ते ये शतं विरिश्चाः। एतावती श्रीर्भक्त्या भवति। तद्यावती वाव भक्तिस्तावज्ज्ञानं भवति। यावद्वाव तज्ज्ञानं तावदानन्दो मौक्तिकोऽथैष एव परमानन्दो योऽसौ हरिर्विश्वो विनोदोऽपनोदः संस्का(हा)रको विकारकोऽधिकारक एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति पौत्रायणश्रुतिः॥ 'मिलितौ वा एतौ भगवतो यदनुग्रहश्च भक्तिश्च यो वानुग्रही स भक्तो यो भक्तः सोऽनुग्रही। यो वानुगृहीतो ब्रह्मणा स भक्तो यो भक्तस्तं वा ब्रह्मानुगृह्णाति यावान्वै ब्रह्मणोऽनुग्रहस्तावती भक्तिर्यावती भक्तिस्तावान्वै ब्रह्मणोऽनुग्रहः। प्रकृतौ वै ब्रह्मणोऽनुग्रहः परमस्तदवरो वाव महति तदवरोऽथ रुद्रे तदवरः पुरुहूते। अथ देवर्षिपितृषु मनुष्येष्वि'ति धर्मश्रुतिः॥ तस्यामेव रजस उद्रेचनादुपात्तरजोऽतिमात्रत्वम्। 'अथ त्रिगुणा ह्येव प्रकृतिरगुणो वाव विष्णुः स यदा अरजा रजोऽस्या उद्वर्धयत्येषा वाव सृष्टिः। स यदा ह्यसत्वः सत्वमुद्वर्धयत्येषा वाव स्थितिः। स यदा ह्यतमास्तमोऽस्या उद्वर्धयत्येष वाव लयो नैनमेते गुणा अभ्युपस्पृशन्ति। नैष एतान्गुणानभ्युपस्पृशत्यगुणो ह्येष भवति। अत्रैष श्लोको भवति। निर्गुणस्य गुणादानं प्रकृतेर्गुणवर्धनम्। न कदाचिद्गुणैरेष स्पृश्यते परमो हि स' इति चाक्रायणश्रुतिः॥ ५०॥ [51]कन्याप्रदानवादे रतिर्यथा नालीकं भवति प्रायः तथा ते वचः क्वचिदपि नालीकं भवत्येव॥ ५१॥ [52]यामसतीं बुधो न बिभृयात्। यां च तां बिभ्रद्दृष्टादृष्टच्युतो भवति। तस्या अपि पुंश्चल्यास्त्वयि मनो नवं नवमभ्येति। 'अमुग्धैव तु मुग्धेव त्वदुःखा दुःखितेव च। श्रीर्दर्शयेद्धरिश्चैव नैवैतौ मोहदुःखिनौ। मिथोऽपि तादृग्वचनमाकारं चैव लीलया। दर्शयन्तौ नृणां मोहं

दृष्टेः। यद्ध्वंस्य वृद्धय उपात्तरजोऽतिमात्रो मामीक्षसे तदु ह नः परमानुकम्पा॥ ५०॥ नैवालीकं भवत्येव वचस्ते मधुसूदन। अम्बाया इव हि प्रायः कन्यावादरतिः क्वचित्॥ ५१॥ मुग्धायाश्चापि पुंश्चल्या मनो-

SGDF
Sri Gurgeshwari Digital Foundation

कुर्यास्तां शास्त्रदर्शनादि'ति कापिलेये ॥५२॥ इति दशमतात्पर्ये पञ्चसप्ततिरध्यायः ॥ ७५ ॥

षट्सप्ततिरध्यायः

[6]गात्रान्तराण्यप्यपिदधुः। पिधातव्येभ्योऽन्यान्यपि। येषां पिधानेन क्लेशो भवत्यात्मनः। निजभर्तुरप्यपिदधुः। निर्लज्जा इत्यकामो भवत्यसाविति भयात् ॥ ६ ॥ '[50]न स्नेहभङ्गो देव्यास्तु न भयं केशवस्य तु। स्नेहभीत इवाथापि नोचे रुग्मिवधे हरिरि'ति ब्रह्माण्डे ॥ ॥ ५० ॥ इति दशमतात्पर्ये षट्सप्ततितमोऽध्यायः ॥ ७६–७९ ॥

अशीतितमोऽध्यायः

[15]अजितं जरासन्धं भगवत एव श्रुत्वा। तथाहि सभापर्वणि पश्चादिग्विजयोक्तेः। 'पूर्वाः कथाः परं ब्रूयुः पराः पूर्वं तथैव च। मोहनार्थाय दुष्टानां सर्वं व्यत्यासयिष्यते। विस्तारे तु यदुक्तं स्यात्तद्ग्राह्यमविरोधतः। सङ्क्षेपोक्तविरोधे तु गुणोक्तिश्च सतां यथे'ति शब्दनिर्णये। 'जरासन्धं निहत्यैव पाण्डवैस्तु दिशो जिताः। प्रसादाद्वासुदेवस्य राजसूयः क्रतुः कृत' इति मात्स्ये ॥ १५ ॥ इति दशम-

---

ऽभ्येति नवं नवम्। बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥ ५२ ॥

षट्सप्तत्यध्यायः

रामा गृहे विरहतः पुरतः कराभ्यां बद्धेक्षणाः स्वदयितस्य मुदा हसन्त्यः। गात्रान्तराण्यपि दधुर्निजपूरुषस्य क्लेशावहान्यपि तदङ्गजभङ्गभीताः ॥ ६ ॥ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा। रुक्मिणीबलयो राजन् स्नेहभङ्गभयाद्धरिः ॥ ५० ॥

अशीतितमाध्यायः

तद्देवदेव भवतश्चरणारविन्दसेवानुभावमिह पश्यतु लोक एषः। ये त्वां भजन्ति न भजन्त्यपि वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृञ्जयानाम् ॥ ॥ ५ ॥ श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः। आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ १५ ॥

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्ये अशीतितमोऽध्यायः ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ॥ ८५ ॥

षडशीतितमोऽध्यायः

'[38]जानन्साल्वकृतां मायामजानन्निव केशवः। अन्ववर्तत किञ्चित्तु ततस्तामहरद्विभुः। एवमेव तु सर्वत्र परमात्मा सनातनः। विद्धत्व-ग्रधिरस्रावी कथञ्चिदजयत्परम्। इत्यादि दर्शयेद्विष्णुर्मोहयन्मायया जगत्। चिदानन्दघनस्यास्य कुतो वेधादि सङ्गतेरि'ति ब्रह्माण्डे ॥ 'यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु। मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से' इत्याद्या च श्रुतिः ॥ ३८ ॥ इति दशमतात्पर्ये षडशीतितमोऽध्यायः ॥ ८६-९३ ॥

चतुर्नवत्यध्यायः

'[12]सनकाद्याः समाः सर्वे तत्र श्रेष्ठः कुमारकः। मरुतश्च समाः सर्वे सप्त तेषु प्रधानका' इति ऋक्संहितायाम् ॥ १२ ॥ '[13]श्रीर्भूमि-रिति रूपाभ्यां प्रकृतिर्विष्णुना सह। शेते श्रुतिस्वरूपेण स्तौति ब्रह्मलये

षडशीतितमाध्यायः

ततः शाल्वः समुत्पत्य खड्गेनानकदुन्दुभेः। उत्कृत्य शिर आदाय खस्थं सौभं समाविशत् ॥३७॥ ततो मुहूर्तात्प्रकृतावुपस्थितस्तत्रानुतिष्ठ-त्स्वजनानुसङ्गतः। महानुभावस्तदबुध्यतासुरीं मायां स शाल्वप्रकृतां मयोदिताम् ॥ ३८ ॥

चतुर्नवतितमाध्यायः

श्रीभगवानुवाच—स्वायम्भुवं ब्रह्मसत्रं जनलोकेऽभवत्पुरा। तत्र-त्यानां मानसानां मुनीनामूर्ध्वरेतसाम् ॥ ९ ॥ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तमीश्वरम्। ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते ॥ १० ॥ तत्रा-प्ययमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि। तुल्यश्रुततपः शीलास्तुल्य-स्वीयारिमध्यमा ॥ ११ ॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे ॥१२॥ सनन्दन उवाच—स्वसृष्टमिदमापीय शयानं सह शक्तिभिः। तदन्ते

SGDF
Sri Gargeshwari Digital Foundation

हरिम् । एकाऽप्यनन्तरूपा सा वाक्यभेदात्सरस्वती । अनादिनिधना नित्या स्तौति नारायणं प्रभुमि'ति ज्योतिःसंहितायाम् ॥ १३ ॥ '[15]सर्वदा जयतो विष्णोर्जयस्तस्य प्रकाशनम् । श्रवणं दृष्टिरित्यादि प्रार्थ्यं तज्ज्ञापनं स्मृतम् ॥ शृणोति पश्यति ह्येष जयतीत्यादिकं स्वतः । जय पश्य शृणुष्वेति तत्तज्ज्ञापनमेव त्वि'ति विमलसंहितायाम् ॥१५॥ '[13]श्रीर्भूर्दुर्गेति या भिन्ना प्रकृतिः शक्तिरुच्यते । विष्णोः स्वरूपशक्तेः सा शक्यत्वाच्छक्तिरेव तु । नित्याव्यवहितत्वाच्च विशेषाच्छक्तिनामिका । यथैव पङ्कजं ब्रह्मा रुद्र इत्यादिकं पदम् । ताभिः शयानं पुरुषं सैव तु श्रुतिरूपिणी । अस्तौत्प्रकाशयात्मानं प्रकृतिं जीवबन्धनम् । जहि दोषैर्यया सर्वे गुणा जीवस्य संवृता' इति तन्त्रभागवते । 'श्रीः परा प्रकृतिः प्रोक्ता ब्रह्माणी त्ववरा ततः । उमाशचीमुखास्तस्या अवराः सम्प्रकीर्तिताः ॥ १३ ॥ '[15]अथाऽन्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते । स्वगुणाच्छादिका त्वेका परमाच्छादिकाऽपरा । स्वगुणाच्छादिकां हत्वा परमाच्छादिकां परः । व्याघुट्य मोक्षपदवीं ददाति पुरुषोत्तमः । अजे द्वे अपि ते प्रोक्ते अनन्ताच्छादिनी हरेः । न विष्णुं छादयत्येषा तज्ज्ञानं छादयेत्परम् । जीवस्यैव न तत्रापि ब्रह्मादेरस्ति सा क्वचित् । सर्वावरे ते प्रकृती सततं दुःखितेऽपि च । पिशाचवत्समुद्दिष्टे पुरुषस्याधिकारिणः । प्रेरकास्तु तयोर्देव्य इन्दिराद्याः सुखात्मिका' इति महातत्त्वविवेके ॥१५॥ '[14]राजवज्जयशब्दाद्या नित्यबुध्य(द्ध)स्य बोधनम् । विडम्बमात्रं कैवास्य निद्रा विद्यापतेर्हरेरि'ति कापिलेये ॥ १४ ॥ [15]दोषैर्दुःखाद्यैर्जीवगुणा आनन्दाद्या आवृता यया सा दोषगृहीतगुणा । त्वमसि यदात्मना समवरुद्धसमस्तभगः । यस्मात्त्वं स्वतएवानपगत-

---

बोधयांचक्रुस्तल्लिङ्गैः श्रुतयः परम् ॥ १३ ॥ यथा शयानं सम्राजं बन्दिनस्तत्पराक्रमैः । प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयन्त्यनुजीविनः ॥१४॥ श्रुतय ऊचुः । जयजय जह्यजामजित दोषगृहीतगुणां त्वमसि यदात्मना

SGDF
Sri Gargeshwari Digital Foundation

पूर्णैश्वर्यादिगुणोऽसि। अतस्त्वदाभासस्य जीवस्य प्रकृतिगृहीतत्वादेव नैश्वर्याद्या गुणा अवभासन्ते। जगदोकसां श्रीब्रह्मादीनामप्यखिल-शक्त्यवबोधक। क्वचित्सृष्टिकाले आत्मना जीवेन प्रकृत्या च प्रवर्ततस्ते अनुचरे द्वेऽदो विधिनिषेधरूपेण। अन्यदा स्तुतिमात्रो न तु जीवानां प्रयोजकः। तस्मात्सृष्टिं कृत्वा वेदैर्जीवान्बोधयित्वा तत्स्थामजां जहि। 'जयजय हनहन प्रकृतिं द्रावयद्रावय भिन्धिभिन्धि दुःखं तमोरतिम्। अजित परम रमेशान वासुदेव वैकुण्ठ नारायण हृषीकेशानया हि जीवगुणा विसंवृता अधिसंवृताः। एष ह्यानन्दोऽजरोऽमरोऽधिशक्तिमां-स्त्वदाभासस्त्वया तथादिसम्भाव्यो यतः परः परमेश्वरः परज्ञानः परानन्दः परशक्तिः परश्रीः परयशाः परप्रवृत्तिर्नित्यमेव त्वं स्वतोऽसि त्वं रमायास्त्वं विरिञ्चस्य रुद्रेन्द्रसूर्यसोममुखानामदभ्रशक्तिदोऽसि प्रवर्तकोऽसि निवर्त-कोऽसि अजोऽस्यनन्तोऽसि सृजतो हि ते श्रुतयोऽनुवर्तन्ते नैवासृजतः। कं वा विदधते कं वा निषेधन्ति स्तुतिमात्रा एव ते स्युः प्रभो विभो समास्व व्यास्वोत्तिष्ठ प्रचर विचर सन्धिनु सन्धिनु मा ते क्षणोऽ-त्यागान्मा ते क्षणोऽत्यागादि'ति शाण्डिल्यश्रुतिः॥ 'लयस्य त्वष्टमो भागः सृष्टिकाल उदाहृतः। तत्रैव वेदसञ्चारो ह्यन्यदा स्तुतिमात्रका' इति नारदीये। सृष्टिकाल एव गुणवृत्तयः। सर्वदा निर्गुणे परमेश्वर एव वर्तन्ते श्रुतय इति 'कथं चरन्ति श्रुतय'इत्यस्य परिहारः। यत्प्राप्त्यर्थं यन्नियमाद्विधिनिषेधा वर्तन्ते स त्वमित्यादि विधिनिषेधानां स्तुतिपरत्वम्। 'विध्यादीनां नियन्ता यः पूज्यः प्राप्यश्च तद्वताम्। इत्यादिस्तुतिरूपेण विध्यादिश्रुतयोऽपि तु। हरिं वदन्ति सर्वेषां तन्नामत्वादथापि चे'ति श्रुतिनिर्णये। पृथक् श्रुतित्वान्न पूर्वापरसम्बन्धः। उपलक्षणत्वादनन्तत्वाच्छ्रुतीनां सर्वश्रुत्यर्थोपबृंहितत्वाच्चैतेषां श्लोकानां न सर्वश्रुतीनां पृथगुक्तिः। 'सर्वश्रुत्यर्थसम्पन्नान्श्लोकान्सत्यवतीसुतः।

समवरुद्धसमस्तभगः। अज जगदोकसामखिलशक्त्यवबोधक ते क्वचि-

SGDF
Sri Gangeshwari Digital Foundation

एकैकशाखास्तुल्यर्थान् जगौ सर्वोपलक्षणान् । बबन्ध तान्भागवते प्रतिश्लोकं पृथक्श्रुतिरि'ति तन्त्रभागवते ॥ (१) ॥ १५ ॥ [16]अविकृततमोविषये त्वमुदगाः । मूलप्रकृतेरपि त्वमधिको यतः । अतो बृहत्त्वेन ते स्वरूपमुपलब्धम् । इत इदमधिकमितोऽपीदमधिकमिति सर्वाधिकत्वेन ततोऽधिकाभावेनावशेषितत्वेन । 'द्वितीयार्थे तृतीयार्थे चतुर्थ्यर्थे च सप्तमी । पञ्चम्यर्थे च सम्प्रोक्ता विषयेति च तां विदुरि'ति महाव्याकरणे । तमसोऽधिको भवानित्यर्थः । अतस्त्वं सर्वोत्तम इत्येव त्वयि मनोवचनाचरितानि दधतां नायथा तानि भवन्ति । यथा भूमौ पदं निक्षिपामीति प्रवर्ततो भूमेर्नान्यत्र भवन्ति । उदकवृक्षादेर्भूम्यन्तर्भावात् । 'आधारशक्तियुक्तत्वाद्भूरुदं च प्रकीर्तितम् । सापि वाय्वन्तरङ्गैव स ह्याधारोऽखिलस्य चे'ति महासंहितायाम् । अत इति हेत्वर्थे तथेत्यर्थे च । तस्माद्बृहत्त्वेनादधुरिति । 'अतःशब्दस्तु हेत्वर्थे तथेत्यर्थे च वर्तते । उभयार्थे च भवति यथा शब्दविदो विदुरि'ति शब्दनिर्णये । उपलब्धं वेदेषु । बृहद्भिर्दृष्टमवशेषितं यत्स्वरूपमीशस्य तमोऽधिकस्य । 'सर्वाधिकत्वेन तमो हि दुर्गा ततस्तथैनं विबुधा यथाऽगुरि'त्यौद्दालकायनश्रुतिः । अनिर्देश्यमप्येकदेशेन निर्दिष्टं भवतीत्युक्तं कथमयथाभवन्तीत्यनेन । यथा सर्वां भूमिमसञ्चरन्नप्येकदेशसञ्चारेण भूसञ्चारी भवति तथेति । 'निरपेक्षबृहत्त्वस्य ज्ञानाज्ज्ञातं भवेत्परम् । बृहत्त्वमेव तु गुणैः सर्वैरुद्दिश्यते यत'इति मान्यसंहितायाम् ॥ (२) ॥ १६ ॥ अनन्याश्रयत्वात्स्वधामा परमः । तेन विधुता दुःखाद्या आशयगुणाः उत्पत्त्याद्याः कालगुणाश्च येषां ते मुक्तास्तापान् जहुरिति किं पुनः । कथामृताब्धि-

---

दजयाऽऽत्मनाऽनुचरतोऽनुचरेन्निगमः ॥ १५ ॥ बृहदुपलब्धमेतदवशेषतया यत उदगास्तमस्यविकृतेऽविकृतः । अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवन्ति भुवि दत्तपदानि नृणाम् ॥ १६ ॥ इति सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणं तव कथामृताब्धिमवगाह्य तपांसि

SGDF
Sri Gargeshwari Digital Foundation

मवगाह्यापि जहुरिति यदिति हेत्वर्थ इतिशब्दः । 'त्यजन्ति तापं य उ ते भवत्कथा इति स्म मुक्ताः किमु ते स्वरूपगाः । परावरेशेशपदं भजन्तः परं परानन्दमनारतं त' इतीन्द्रद्युम्नश्रुतिः ॥ (३) ॥ १७ ॥ चरमोत्तममध्यमादिषु पुरुषेषु यस्तव स्वरूपं प्रथयेत् । स पुरुषविधं त्वामन्वेति । 'ब्रह्मैव मुक्तिगेष्वादिः सुरास्तदवरोत्तमाः । मध्यमा ऋषिगन्धर्वाश्चरमा मानुषोत्तमा'इति प्राभावल्याम् ॥ 'असक्तो देहपुर्येष जीववद्देहगोऽपि यत् । अथवा पुंविधातृत्वात्पुंविधः पुरुषोत्तम'इति पुरुषोत्तमतन्त्रे ॥ 'अनिशमुच्छ्वसन्त्यसुखोद्धरितास्तव रिपवो दृतिवत्तमसि प्रविष्टाः । तव गुणप्रथनाः परिहाय तमः परियान्ति ते पदमजस्रमनन्तसुखमि'ति पैङ्गिश्रुतिः ॥ (४) ॥ १८ ॥ यर्हि यस्माद्ब्रह्मवर्त्मनि । सूक्ष्मदृत्त्वाच्छार्कराक्ष्यनामानः । प्राणं प्रत्युरुगृणीहीतिवचनादुदरनामकं ब्रह्मोपासते । यस्माच्चारुणयो हृद्ययनाद्धृद्यनामकम् । तस्मादेव तत्समुपेत्य कृतान्तमुखे न पतन्ति । इतरेऽपि परिसरः प्राणः पद्धतिर्मार्गो यस्य स परिसरपद्धतिः । 'कस्मिन्न्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि । कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति । स प्राणमसृजते'ति श्रुतिः । 'प्राण एवैनमनुप्रविशति प्राणमितरा देवताः न प्राणादपरः परमनुप्रविशति प्राण एवैनमनुभुङ्क्ते प्राणमितरा देवताः न प्राणादपरः परमनुभुङ्क्ते प्राण एवैनमन्वानन्दीभवति । प्राणमितरा देवता न प्राणादपरः परमानन्दीभवति तस्मादाहुः प्राणः पद्धतिरिती'ति हिरण्यनाभश्रुतिः । अतः परिसरस्य पद्धतिरिति वा । ततो हृदः । नन्दनपथा ब्रह्मनाडीद्वारा शिर उदगाद्यत्परमं ब्रह्म तत्समुपेत्य । पुनरिहैव हृदादिषु स्थितं यत् ।

जहुः । किमुत पुनः स्वधामविधुताशयकालगुणाः परम भजन्ति ये पदमजस्रसुखानुभवम् ॥ १७ ॥ दृतय इवोच्छ्वसन्त्यसुहृदो यदि ते महदहमादयोऽण्डमसृजन् यदनुग्रहतः । पुरुषविधान्वयोऽत्र चरमोत्तममध्यमादिषु यस्तव सदसतः परं प्रथयेदविशेषमृतम् ॥१८॥ उदरमुपासते यर्हि वर्त्मनि सूक्ष्मदृशः परिसरपद्धतिं हृदयमारुणयो दहरम् । तत

SGDF
Sri Gargeshwari Digital Foundation

‘तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपदे तस्मात्प्रपदे इत्याचक्षते । शफाः खुरा इत्यन्येषां पशूनां तदूर्ध्वमुदसर्पत्ता ऊरू अभवतामुरुगृणीहीत्यब्रवीत्तदुरमभवदुर्वेव मे कुर्वित्यब्रवीत्तदुरोऽभवदुदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयंब्रह्मेत्यारुणयो ब्रह्माहैव ता ई ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत यच्छिरोऽश्रयत तच्छिरोऽभवत्तच्छिरसः शिरस्त्वं ता एताः शीर्षञ्छ्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक्प्राणः श्रयन्तेऽस्मिन्छ्रियो य एवमेतच्छिरसः शिरस्त्वं वेदे’त्याद्या श्रुतिः ॥ (५) ॥ १९ ॥ [20]विचित्रयोनिषु विशन् जीवः तद्वदज्ञानां चकास्सि । अनलो यथा । स्वकृतं दार्वादि तदपनयने गच्छंस्तत्स्थापने तिष्ठन्ननुवर्तते । एवमेव स्वकृतशरीराद्यनुवर्तसे तद्गतः सन् । भरतमतो वायुज्ञातः । अन्यथाभवन्तीष्वपि योनिषु अनन्यथाभूत्वैव बहुविधं तिष्ठन्तं भवन्तं त्वत्समीपस्थबुद्ध्यो महान्तस्तवाभि विपत्य मनसाऽधिगम्य मनसि त्वां नयन्ति । ‘रतत्वाद्भात्मके विष्णावथवापि जगद्भृतेः । भरतो वायुरुद्दिष्टो भारती तत्सरस्वती’ति नामसंहितायाम् । ‘योनिवेश्याह्वयो जीवस्त्वज्ञानां तद्वदेव तु । प्रकाशते परो देवस्तेन यान्त्यधरं तमः । सर्वहेतुतयैवेशं प्राणो जानाति तत्त्वतः । तेन चासौ परो देवस्तत्परं याति केशवम् । इन्धानानयने त्वग्निर्यथैवानीयते सह । एवं देहगतो विष्णुः सह गच्छेन्निजेच्छया । अशाश्वतेषु देहेषु शाश्वतं बहुधा स्थितम् । निचाय्य मनसा सन्तो जानन्ति निकटेच्छव’इति तन्त्रभागवते ॥ ‘यो जीववद्योनिषु भात्यनन्तो मूढैस्तमोगैर्भरताधिगम्यः । निचाय्य तं शाश्वतमात्मसंस्थं तदिच्छवो त्मन्यदधुर्महान्तमि’ति कमठश्रुतिः ॥ (६) ॥ २० ॥ [21]सर्वपुरुषेषु सर्वधीषु च

उदगाच्च नन्दनपथाथ शिरः परमं पुनरिह यत्समेत्य न पतन्ति कृतान्तमुखे ॥ १९ ॥ स्वकृतविचित्रयोनिषु विशन्निव हेतुतया भरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः । अपि वितथास्वमूष्ववितथोरुविधं मनसि निकटधियो नयन्त्यभिविपत्य तव ॥ २० ॥ प्रक्रमवत्स्वसत्कृतं सर्वेषु

SGDF
Sri Gangeshwari Digital Foundation

स्थित्वा श्रीब्रह्मादिषु प्रकर्षेण क्रमेण स्वात्मनैव सत्कृतं अण्डाद्यन्तर्बहिश्च असच्चरणे पापाचारे स्थित्वा पापाचारमपि स्वात्मनः पूजात्वेनैव कारयन्तं त्वां वदन्ति । तस्याधोगत्यर्थम् । तस्मात्सर्वं तव स्वकृतमेव वदन्ति । 'निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवंचित्रमर्चे'त्याद्या श्रुतिः ॥ 'श्रीब्रह्मरुद्रपूर्वेषु क्रमात्स्थित्वा जनार्दनः । स्वात्मानमर्चयत्यद्धा बहिरन्तरसत्सु च । असतामधमाचारो हरिदृष्टयाऽऽत्मपूजनम् । तस्याधोगमनायेति श्रुति-राहाखिलक्रियमि'ति तन्त्रभागवते । स्वकृतमित्यनन्यापेक्षया ॥ (७) ॥ ॥२१॥ [22]भवमध्यविनिःश्वसिता इति यतः । अतो विमृशन्ति कवयो निगमावपनं त्वाम् । चरितमहामृताब्धिपरिवर्तपरिश्रमणा इति यत् । अतो भवमध्यविनिःश्वसिताः मुक्ताः निगमानामावपनं स्थानं त्वां विमृश्य यज्ञादिभिर्भजन्त उपासते । निगमविषये आयतवाङ्मनसः । निगमानां ततो व्यक्तेस्तत एव फलप्रदत्वात्तद्विषयत्वाच्च निगमावपनम् । परिवर्तो मथनम् । 'विमथ्य वेदाब्धिमतिश्रमेण ज्ञात्वा परेशं मुनयो विमुक्ताः । मृशन्ति यज्ञैश्च यजन्ति नित्यं उपासते वेदफलप्रदं तमिति कुशिकश्रुतिः ॥ (८) ॥ २२ ॥ [23]त्वत्प्राप्त्यनुसारित्वाच्छरीरं प्रियव-त्पश्यन्ति । सर्वप्रियतमे सर्वादाऽनादिकर्तरि च त्वयि । तथाहि तेऽभिमुखाः । 'न किञ्चिदभिवाञ्छन्ति यतयः सुसदाश्रयाः । प्रेष्ठस्य परमस्याप्त्यै प्रियवद्देहदृष्टय'इति विमदश्रुतिः ॥(९)॥२३॥ [24]अन्यथो-

---

पुरुषेषु सर्वासु धीषु स्थित्वा त्वां तु बहिरन्तरसच्चरणेऽपि । तव पुरुष वदन्त्यखिलशक्तिधृतः स्वकृतम् ॥ २१ ॥ इति विमृशन्ति कवयो निगमा-वपनं यजन्त उपासते भवमध्यविनिश्वसिताः । दुरवगमात्मतत्वनिगमा-यतवाङ्मनसश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः ॥ २२ ॥ न परि-लषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः । त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरन्ति तथोन्मुखास्त्वयि हि ते प्रिय आत्मनि च ॥ २३ ॥ न च रमन्त्यहो असदुपासनयाऽऽत्महनो

SGDF
Sri Gangadhwaj Digital Foundation

पासनयाऽऽत्महनोऽसूर्यान्नाम लोकान्नित्यनिरतिशयदुःखान्निरस्तसमस्तसुखान्प्राप्नुवन्ति। तदेतन्न च रमन्ति अनुभवन्ति च। नित्यदुःखमिति चशब्देनोक्तम्। असुर्यशब्देन च श्रुतौ सुष्ठ्वरमणरूपत्वादसुरप्राप्यत्वाच्च। यत्रानुशयनं कुर्वन्तस्तमस्येव भ्रमन्ति। अभवा जन्मवर्जिताः। आत्महन इत्येषशब्दो भगवद्भक्तद्वेषिणामपि सम इति दर्शयति। निभृतमोक्षहृदययोगयुज इत्यादि। ये मुनयो ह्ययनं भगवन्तं निभृतमोक्षहृदयेन वायुना योगेन युक्ता नियमिताः सन्त उपासते तेषामरयोऽपि तदेव तमो ययुः। परिपूर्णमोक्षार्थं ज्ञानं यस्य स निभृतमोक्षहृदयः। 'असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना'इति श्रुतिः॥ 'नित्यदुःखसुसम्पूर्णं निरस्तानन्दमव्ययम्। तमो यान्त्यन्यथाज्ञानाद्द्वेषाद्वा हरिसंश्रय'इति प्राणसंहितायाम्॥ 'निभृतो मोक्षवित्प्राणस्तद्योगात्तत्प्रसादतः। जानन्ति परमं दैवं नान्यथा तु कथञ्चने'ति भागवतसंहितायाम्॥ (१०)॥ २४॥ [25]हे स्मरणादेव स्वनुरक्त तत्ते स्वरूपं भवानेव वेद। उरगेन्द्रभोगदण्डे विषक्तबुद्धेस्तेऽङ्घ्रिसरोजसुधाम्। वयमपि समासमदृशः। सर्वमाहात्म्यस्य वेदैरपि वक्तुमशक्यत्वादसमदृशः। वेदागम्यमाहात्म्यस्यापि वेदैरेव गम्यत्वात्समदृशः। अतः कोऽन्यो वक्तुं वेद। को ह्यस्मांस्त्वां चर्तेऽपेतजन्मलयः यत उदगादुत्पत्तिमानेव ऋषिर्ब्रह्मा। प्राप्तपदा अप्राप्तपदाश्च देवगणाः। 'त्वं वेत्थ नापरस्ते स्वरूपं न नित्यवाङ्नागभोगप्रियस्य। कुतो ब्रह्मा प्राप्तलोकाश्च देवास्तथाऽप्राप्ता जनिमन्तो यतोऽस्मादि'ति संकृतिश्रुतिः॥ 'महिम्नः सर्वशोऽनुक्तेर्वेदाश्चासमदर्शिनः। तस्यापि वेदगम्यत्वात्तथैव समदर्शिन'-

---

यदनुशया भ्रमन्त्यभवाः कुशरीरभृतः। निभृतमोक्षहृदययोगयुजो हृदयं मुनय उपासते तदरयोऽपि ययुः स्मरणात्॥२४॥ स्वनुरागतद्भवानुरगेन्द्रभोगदण्डविषक्तधियो वयमपि ते समासमदृशोऽङ्घ्रिसरोजसुधाम्। क इह वेद नु वक्तुमपेतजन्मलयो यत उदगादृषिरनुदेवगणा उभये॥२५॥

SGDF
Sri Gargeshwari Digital Foundation

इति तन्त्रभागवते ॥ (११) ॥ २५ ॥ [26]शास्त्रमपकृष्य प्रलये शास्त्रस्य प्रवृत्त्यभावात्। असतः सूक्ष्मरूपात्सतः स्थूलरूपस्य परमेश्वरपर्यन्तं यथाक्रमं जन्ममृतिं च सर्वस्मात्परमात्मनि भेदं च विपणं फलापेक्षामृते ये स्मरन्ति। तेषां ध्वनिमुपविश। आरुवतो वायोः प्रसादात्तथा स्मरन्ति। 'नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यत्। किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद्गहनं गभीरमि'त्यादिश्रुतिः॥ 'सूक्ष्माणि महदादीनि स्थूलान्यण्डादिकानि च। उभयं त्वग्निरापश्च न किञ्चित्प्रलयेऽभवदि'ति प्रकाशसंहितायाम् ॥ 'सर्ववेदादिरूपेण प्राणस्यारुवतः सदा। प्रसादाद्ये विजानन्ति सूक्ष्मात्स्थूलजनिं क्रमात्। मृतिं च सर्वजीवादेरीशस्य व्यतिरिक्तताम्। जानन्ति ये निराकाङ्क्षा-स्तेषां वाचि जनार्दन'इति तन्त्रभागवते ॥ (१२) ॥ २६ ॥ अबोध-कृता त्रिगुणबद्धता यस्माज्जीवस्यापि तस्मात्तदवबोधरसे त्वयि सा न विद्यते। त्रिगुणात्मकं मनस्तवापि विद्यत इत्यसतां पक्षः। मनुजाना-मादयो देवास्त्रिगुणातीतत्वाद्भवतो भवानेव परमानन्दः। त्वदन्यत्सर्वं जीवजातमार्तमित्येव विमृशन्ति। 'सत्वादिजं देहमथो मनश्च सत्वादि-बद्धं च वदन्त्यसन्तः। परं पुमांसं न सुरास्तु तर्हिं जीवाः सुदृष्टाः परमार्तरूपा' इति सूकरायणश्रुतिः॥ 'त्रैगुण्यदेहेन्द्रियकमासुरा जानते हरिम्। त्रिगुणातीतमीशेशमतः पूर्णसुखं सुराः। जानन्ति गुणबद्धत्वा-ज्जीवानार्तांश्च कृत्स्नशः। अनार्तस्य प्रसादेन तेषामार्तिविनाशनमि'ति चैतन्यविवेके ॥ (१३) ॥ २७ ॥ [8]यथा कनकस्य विविधकृतं

तर्हि न सन्नचासदुभयं न च कालजवः किमपि न तत्र शास्त्रमपकृष्य शयीत यदा। जनिमसतः सतो मृतिमजात्मनि ये च भिदां विपणमृते स्मरन्त्युपविश ध्वनिमारुवतः ॥ २६ ॥ त्रिगुणमयः पुमानिति यदबोध-कृता त्वयि न तु भवेत्तदवबोधरसे। सदिवमनस्त्रिवृत्त्वयि भवत्यसतां मनुजादयो विमृशन्त्यशेषमिदमार्त्ततयाऽऽत्मविदः ॥२७॥ न हि विकृतं

SGDF
Sri Gangeshwari Digital Foundation

कुण्डलादिकं कनकं विना परित्यक्तुं न शक्यते तथा स्वकृतं जगदनुप्रविष्टो भगवान्मूलरूपं विना परित्यक्तुं न शक्यः । आत्मतया एकरूपत्वात् । रसितं आत्मना प्रकाशितं जगत्प्रविष्टस्तस्मात्सर्वगतो विष्णुरिति ज्ञातव्यमित्यर्थः । इत्थं ये ज्ञात्वा परिचरन्ति तव स्वरूपं ते ऋतात्मकब्रह्मप्राप्तिविरुद्धत्वान्निर्ऋत्याख्यसंसारस्य शिरः स्फुटं पदा क्रमन्ति । 'सर्वगं ये प्रपश्यन्ति ब्रह्मानन्दमजाक्षरम् । एकमेवाद्वयं नित्यं निर्ऋतेस्ते शिरोगता'इति सौकरायणश्रुतिः ॥ 'यथैव कुण्डलं त्यक्त्वा नादातुं कनकांशकम् । तस्यैव तदवस्थत्वात्केवलाभेदतः स्फुटम् । एवं सुरासुरनरेष्वास्थितो भगवान्हरिः । नैव भेदेन मन्तव्यो जीवभेदे तु सत्यपि । ये तथाऽभिन्नमीशेशं पश्यन्ति परमर्षयः । ऋतप्राप्तिविरुद्धत्वात्संसारं निर्ऋतेः शिरः । अगणय्य पदाऽऽक्रम्य वैष्णवं निलयं ययुरि'ति गारुडे ॥ (१४) ॥ २८ ॥ [29]वयति गा इव यः सुरादिकांस्तन्मनसो जगद्पुनञ्छुचयो न परे । 'स एक ईशः परिपूर्णशक्तिर्बलिंहरा इतरे स्युः सुराः सुखिन'इत्यारुणिश्रुतिः । 'विष्णुना देवता बद्धा विष्णवे च बलिप्रदाः । विष्णुरासां पतिर्नित्यं न विष्णोर्बन्धकः क्वचिदि'ति वामने ॥(१५)॥२९॥ [30]स्थिरचरजातयो ये तेऽनिमित्तयुजः स्युः । भगवन्नियमादेव संसारयुजः स्युः । विरहे मुक्तौ । यदि परस्य सकाशान्मुनिरेवेत्युदीक्षयेत्स परः । विमुक्ताः सन्तो येन परेण तस्य विमुक्तसतः । 'नान्यः पन्था अयनाय विद्यत' इतिश्रुतिः ।

त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्ट इदमात्मतया रसितम् । तव ये परिचरन्त्यखिलतत्वनिकेततया ननु ते पदाक्रमन्त्यविगणय्य शिरो निर्ऋतेः ॥ २८ ॥ परिवयसे पशूनिव गिरा विबुधानपि तांस्त्वयि दृढसौहृदा ननु पुनन्ति न ते विमुखाः । त्वमेकः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहन्ति समदन्ति च येऽनिमिषाः ॥ २९ ॥ वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ।

SGDF
Sri Gargeshwari Digital Foundation

मुक्तिस्तस्मादेवेत्यङ्गीकर्तव्यम् । अतो बन्धोऽपि तत एवेत्यर्थः । 'सतां विमुक्तिदाद्विष्णोर्मुक्तिर्यद्यभ्युपेयते । बन्धोऽपि तत एव स्याद्यस्मादेकस्तयोः पतिरि'ति स्कान्दे ॥ 'आत्मानं मुक्तिदं विष्णुर्यदि पुंस उदीक्षयेत् । सुप्रसन्नस्तदा बन्धस्तत एवेति सेत्स्यती'ति ब्राह्मे ॥ 'खण्डाधीशाः सार्वभौमस्य यद्वद्ब्रह्मेशाद्याः कुर्वते तेऽनुशास्तिम् । त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णवि'त्युदारशाण्डिल्यश्रुतिः ॥(१६)॥३०॥ [31]यस्य परमस्य ते कश्चिदपरः स्वतन्त्रो नास्ति । अनपरस्य प्राणोत्तमस्य । अत्र जीवसमुदाये । व्ययतः विशेषेणायतः सर्वज्ञस्य । यथा प्राणस्य नापरः स्वतन्त्रस्तद्वत्प्राणः श्रीरन्यो वा त्वां विना स्वतन्त्रो नास्ति । हे शून्यतुल समानवर्जित । सर्वं सन्दधतस्ते । यदि ततः प्राणात्तनुभृतो जीवा ध्रुवास्तर्ह्यपरिमिताः सन्ति हे सर्वपूर्ण । 'एकमेवाद्वितीयम्' । 'एकं परञ्ज्योतिरनन्यमद्वयमि'त्यादिनियमो जीवानां शास्तता नेत्यत्र नहि । किन्तु स्वगतभेदस्य ईश्वरान्तरस्य अस्वतन्त्रस्य निषेधे । 'अतोऽन्यदार्तम्' । 'नेह नानाऽस्ति किञ्चन' । 'न तत्समश्चाभ्यधिकश्च दृश्यत'इत्यादि तथा ब्रुवते च ॥ 'तव स्वतन्त्रो नापरो यद्वदत्र प्राणान्नान्यस्तुल्यशून्यस्य सन्धिन् । प्राणाधीना अमिता जीवसङ्घाः प्राणो वशे ते प्रकृतिश्च भूमन्नि'ति महाशालीनश्रुतिः ॥ 'स्वतन्त्रो नापरः कश्चिद्विष्णोः प्राणमृते क्वचित् । यथा प्राणात्परो नास्ति स्वतन्त्रो जगति क्वचित् । तथा प्राणो रमा चैव न विष्णोः पृथगीश्वरौ । यद्युच्यन्ते प्राणतन्त्रा बहवः पुरुषा इति । सत्यमेव ह्यसङ्ख्याता न नियम्य निषेधकाः । एकाद्वितीयश्रुतयः किंत्वीशान्तरवारकाः । तथा स्वगतभेदस्य तदतन्त्रनिषेधका'इति ब्रह्माण्डे ॥ 'स्वरूप-

---

स्थिरचरजातयः स्युरज ये त्वनिमित्तयुजो विरह उदीक्षयेद्यदि परस्य विमुक्तसतः ॥ ३० ॥ न हि परमस्य कश्चिदपरोऽनपरस्य भवेद्व्ययत इवात्र यस्य च शून्यतुल सन्दधतः । अपरिमिता ध्रुवास्तनुभृतो यदि

SGDF
Sri Gurgeshwari Digital Foundation

मस्मरत्कृष्ण एकं स्वस्मिन्नभेदतः। अतत्तन्त्रस्य राहित्यादनन्यं सदृशोज्झितेः। अद्वयं नित्यनिर्वृत्या भावनिर्वृतिमीश्वरमि'ति तन्त्रभागवते॥ 'अधिकस्य समस्यापि स्वतन्त्रस्य च वर्जनात्। एक एवाद्वितीयोऽसौ न शास्यजनवर्जनादि'ति कौर्मे ॥(१७)॥३१॥ [32]अनन्तमदुष्टतयाऽनुजानताऽऽचार्येण सन्तताद्भवात्परिमुच्यते। अबद्धश्च प्रकृतिपरेशौ विनाऽन्यो न विद्यते। यतस्तयोरेवोद्भवो न घटते। ततस्तयोरजयोरसुभृत उद्भवन्ति। देशतः कालतश्च यत्र परमस्तत्र प्रकृतिर्यत्र प्रकृतिस्तत्र परम इत्युभययुजोः। 'मुच्यते तत्त्वसंबुद्धादाचार्यात्पुरुषो भवात्। एतावेव स्वतोऽबद्धौ परमः प्रकृतिस्तथे'ति कलापश्रुतिः॥ 'सम्यग्ज्ञानवदाचार्यान्मुच्यते पुरुषो भवात्। द्वावेव नित्यमुक्तौ तु प्रकृतिःपरमस्तथे'ति वामने॥ 'देशतः कालतश्चैव समव्याप्तावुभावजौ। ताभ्यामुभययोगाभ्यां जायन्ते पुरुषाः पर' इति कौण्ठरव्यश्रुतिः॥(१८)॥३२॥ [33]हे तत ओत इमे विबुधनामार्थभूता गुणास्त्वयि निलिल्युः। परमेऽमृतार्णवे मधुन्यशेषरसा इव। अतः पूर्णगुणत्वाद्भवतो नृणां मध्ये सुधियः। तव मायया त्वदिच्छयैव। त्वयि कुशलं विधातुं प्रभवः। तत्र कुशलं भेद एव। सर्वस्मादन्यो विशिष्टगुणः पर इति दर्शनम्। स्वगतया सुष्ठ्वन्यैरनवगतया। तथा त्वत्प्रसादादनुवर्तिना कथं मुहुर्भवभयं भ्रुकुटी सृजति। 'यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा। यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्याः'। 'त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो नभूना। असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि' इत्यादि

सर्वे ततो न हि न शास्यतेति नियमो ब्रुवते च तथा॥ ३१॥ अजन परिमुच्यतेऽत्र भवात्सततात्समनुजानता ततमनन्तमदुष्टतया। न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजोर्भवन्त्यसुभृतो जलबुद्बुदवत्॥ ३२॥ त्वयि त इमे ततो विबुधनामगुणाः परमेऽमृत इवार्णवे मधुनि लिल्युर-

SGDF
Sri Gangeshwari Digital Foundation

श्रुतिः ॥ 'ब्रह्मेशेन्द्रादिसन्नाम्नां येऽर्थभूता गुणा मताः । पूर्तीशितृत्वद्रष्टृत्वप्रमुखास्ते हरेः सदा । अतस्तु सर्वनामाऽसौ सर्वकर्ता च केशव'-इति पाद्मे ॥ 'आनन्दत्वादनामाऽसावुत्कृष्टत्वादुनामकः । एतन्नामद्वयं विष्णोर्ज्ञात्वा पापैः प्रमुच्यत'इति स्कान्दे ॥ 'अन्याविज्ञातया विष्णोः शक्त्यैव कुशलं जनाः । कुर्वन्ति कुशले तूच्चं भेददर्शनमेव तु । पूर्णानन्दादिसम्पत्तिं विष्णोर्ज्ञात्वेतरेषु च । तदपेक्ष्य विप्लुण्मात्रत्वज्ञानं तद्भेददर्शनम् । अनाद्यनन्तभेदोऽयं स्वभावः परजीवयोः । स्वतो वा परतो वापि न कदाचित्प्रणश्यति । एवं ज्ञानवतां विष्णुर्बहुजन्मनि दास्यति । अनुवृत्तिर्यद्यनल्पा स हि सर्वेश्वरः प्रभुरि'ति प्रमाणसंहितायाम् ॥ 'यः पिता जनिता चैव कल्पको नित्यपोषकः । प्रापकः सर्वदेवानां पदानां पुरुषोत्तमः । सर्वदेवाभिधावाच्यो भूतभव्यभवत्प्रभुः । विचार्य सर्ववेदैश्च ब्रह्माद्याश्च यजन्ति च । त्रिगुणात्मकस्य स्रष्टारस्तथापि न यजन्ति तम् । यतः पूर्णेशशक्त्यैव तेषां यजनमिष्यते । अतः सर्वेश्वरो विष्णुरेक एव महागुण'इति महासंहितायाम् ॥ (१९) ॥

॥३३॥ [34]भवच्चरणेषु सुजातस्थानाः । उत्तमयोग्यतायुक्ताः हृषीकाण्येव महत्तुरगाः । वायुरेवोदात्तः । 'रथोपरि स्वीकरणादुदात्तः सारथिर्मत'इति व्यासनिरुक्ते ॥ 'जयो विष्णोश्च वायोश्च भक्त्या तत्प्रीतिसाधनम् । जगदीशयोः कुतो ह्येतोः सर्वशक्त्योर्बलाज्जय'इति पवनविजये ॥ तेषां तानि साधनानि सुखस्यापि शान्तिमति पूर्णसुखे त्वयि न सन्ति । गुर्वभावात् । विभवे जीवन्मुक्ते गुरावुद्यति उपदिशति सर्वरसे परमात्मनि श्रयत एव । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते

शेषरसाः । नृषु तव मायया स्वगतया कुशलं त्वयि सुधियोऽङ्ग भेदमनुधातुमनुप्रभवः । कथमनुवर्तिनां भवभयं तव भ्रुकुटी सृजति मुहुर्नृणाम् ॥ ३३ ॥ इह भवच्चरणेषु सुजातभुवो जितहृषीकवायुभिरुदात्तमहत्तुरगैः । य इह यतन्त्यनतिलोलमुपायविदो व्यसनशतान्विताः-

SGDF
Sri Gargeshwari Digital Foundation

कथिता ह्यर्थाः प्रकाशन्ते महात्मन'इति श्वेताश्वतरश्रुतिः ॥ 'देवा अपि सुयोगाढ्या यतन्तः सर्वसाधनैः । पुत्रदारादिभिः सार्धं नाश्वसन्तीह संसृतौ । गुरोरनुग्रहमृते साधनं न हरेः प्रियम् । गुरूपदेशात्तु परं प्राप्नोत्येव न संशयः । षण्णवत्यङ्गुलो यस्तु तालास्यो दशतालकः । दशप्रादेशकः सप्तपादो हस्तचतुष्टयः । कलमत्रयाङ्गुलश्चैव वाग्मी सन्देहवर्जितः । वासुदेवैकशरणो गुरुरित्युच्यते बुधैः । गुरुलक्षणसम्पूर्णः साक्षादेव चतुर्मुखः । ततः शेषेन्द्रवीन्द्राद्याः क्रमेणैव प्रकीर्तिता'इति गुरुविवेके ॥ देवा योग्यतया जाता विष्णुपादाम्बुजाश्रयाः । तथापि साधनैस्तेषां तत्प्राप्तिर्गुर्वनुग्रहादि'ति तत्वोद्योगे ॥ (२०) ॥ ३४ ॥ ॥ (२१) ॥ ३५ ॥ [36]इति लोके परिदृश्यमानप्रकारेण चरतां विजने मोक्षविषये कः सुखयति । सुष्ठुनिरस्तभगे अतस्त्वामेव सन्तं ज्ञात्वा भवतः पदाम्बुजं हृदा निविशन्ति । हरावसथमहङ्कारं न कुर्वन्ति । 'ब्रह्माज्ञात्वेति लोकप्रवृत्तिं प्रवर्ततां को नु मोक्षं ददाति । अतो ब्रह्मोपासते साधु धीरा नाहंभावस्तेषु रुद्राधिवास'इति महारवश्रुतिः ॥ 'महाभाग्यं तु कैवल्यमज्ञानां कः प्रदास्यति । अतः सन्तो विजानन्ति हरिं ते त्वनहङ्कृता'इति स्कान्दे ॥ (२२) ॥ ३६ ॥ [37]इदमप्यपालकं ईश्वरवर्जितम् । न मत्तोऽन्य ईश्वरश्चेतनत्वादित्यादितर्कैर्वदन्ति चेत् । अथोइत्यनेन तदपि वचनं भगवत्प्रेरणयैवेत्युक्तम् । 'तस्मादतो अथेत्येतद्धेत्वर्थे समुदीरितमि'ति शब्दनिर्णये ॥ 'असत्यमप्रतिष्ठं ते जग-

---

मपहाय गुरोश्चरणम् ॥ ३४ ॥ वणिज इवोत्क्लसन्त्यक्तकर्णधरा जलधौ स्वजनसुतात्मदारधनधामधराः । सुखशान्तिमति त्वयि हि सन्ति न तानि नृणां विभव उद्यति श्रयत आत्मनि सर्वरसे ॥ ३५ ॥ इति सदजानतां मिथुनतो रतये चरतां सुखयति को न्विहाद्य विजने स्वनिरस्तभगे । भुवि पुण्यतीर्थसदना ह्यषयो निविशन्त्यतस्त्वाऽनु भवतः पदाम्बुजं हृदाऽघभिदं दधति । सकृन्मनस्त्वयि चिदात्मनि नित्यखे न पुनरुपासते पुरुषसार हरावसथम् ॥ ३६ ॥ इदमप्यथो वदन्ति चेन्ननु तर्का व्यभिचरन्ति

SGDF
Sri Gangeshwari Digital Foundation

दाहुरनीश्वरमि'ति च। वेदोक्तो जीवव्यतिरिक्तेश्वरो न तर्कैरपनेतुं शक्यः। यतस्तर्का व्यभिचारिणः। मृषैव क्वचित्तर्कः॥ इष्टसाधनादिर्तर्कस्तु व्यभिचारी। शरीरसम्मित आत्मेत्यादिदर्शनपरिकल्पितस्तु मृषैव। ततो भयबुद्धीनां बुद्धिव्यवहितये भवन्ति। न तु धीराणाम्। विकल्पः वेदविरुद्धकल्पना। अन्धपरम्परयैवान्वहमुषितः। यस्माद्भारत्यपि भ्रमति बहुधा वदति। 'बहूक्तिरन्यथाज्ञप्तिः परिवृत्तिश्च कथ्यते। भ्रम इत्येव विद्वद्भिस्तथा चङ्क्रमणं क्वचिदि'ति शब्दनिर्णये॥ उरुवृत्तिभिरूढजवा अनन्तगुणाकरत्वाद्भगवतः बहुगुणकर्माणि वक्तुं वेगवती वेदवाक्। अतो वेदेऽपि बहुधावचनात्तदर्थनिर्णयाभावाद्विरुद्धकल्पना युक्ताऽसुराणाम्। यस्माद्गर्भस्थस्य जीवस्येश्वरत्वं नास्ति अतो निधनानन्तरं च नरकादिगमनान्न विद्यते। अनिमित्तकं भगवन्निमित्तमेव। तस्मान्तरा भाति मृषा त्वयि जीवे। न तु वस्तुतस्त्वं जीवः। एकरसे प्रधानसारे। न च जीवो वस्तुतः सर्वोत्तमसारः। मृषैव तथा मन्यन्ते। अतो भ्रान्त्या द्रविणवानभिजन्मवानित्यादि विरुद्धकल्पनापथैरुपगीयते। यतो भवानेव द्रविणवान्। यतश्च तपो दमाद्या अभिजन्मकारणभूता गुणाश्च भवत एव। अतो मिथ्यामनोविलासं जीवेश्वरत्वं बुधा अवयन्ति। 'गुणा एवाभिजात्याख्यास्तद्वानेवाभिजातिमान्। अतोऽभिजात्यवान्विष्णुस्तदन्ये तूपचारत'इति शब्दनिर्णये॥ 'ये जीवमीशं प्रवदन्ति तर्कैस्तच्चेश्वरो वचनं सन्दधाति। नासीदादौ मरणे नोऽभविष्यन्मृषा ततो हीशितृत्वं स्वपेष्वि'ति विपरीतश्रुतिः॥ 'ये जगत्प्रवदन्त्यज्ञा जीवादन्येशवर्जितम्। तेषामपि तु तां वाचमीश एव ददात्यजः। न च तर्कैर्भवेदीशो जीवो वेदविरोधतः। व्यभिचारिणो यतस्तर्का इष्टसाधनगा अपि। क्वचित्क्वचिन्मृषातर्काः कणादादिप्रदर्शिताः। तत्त्वनिर्णयभीरूणां व्यवधानकरास्ततः। नैव तु स्थिरबुद्धीनां

क्वचित्क्वचिन्मृषा च। ततो भयदृग्व्यवहितये विकल्प उषितोऽन्वहमन्ध-

SGDF
Sri Gurgeshwari Digital Foundation

कुर्युस्ते बुद्धिचालनम्। पारम्पर्येण चाज्ञानामुक्त्या लोकेषु विस्तृतम्। पठ्यते चाप्यहरहर्न तु विद्वन्मुखोद्गतम्। अनन्तगुणकर्मत्वादीशस्योक्तौ सुवेगिता। वक्त्यभेदमिवाज्ञानां नाभेदं कुत्रचिच्छ्रुतिः। एक आत्माऽद्वयेत्यादिपदानामर्थनिर्णये। न वर्तते श्रुतिर्यस्माद्गुणान्तरकुतूहलात्। अथवा मोहनार्थाय सुरारीणामनर्हतः। कुत्रचिन्निर्णयवचः सुराणामर्थसिद्धये। नहीशितृत्वं गर्भस्थे नाप्यसौ निरयोपगे। मृषैव ईश्वराभेदः सर्वोत्कर्षश्च जीवगः। धनवत्त्वं च कर्तृत्वं बलवत्त्वं च विष्णवि। अतो जीवेश्वराभेदं मिथ्येति कवयो विदुरि'ति तन्त्रभागवते॥ 'जीवस्य जगतश्चैव यदीशाभेदतो वचः। अतात्विकं जगच्चेति विष्ण्वधीनत्ववाचकम्। अभेदस्तु कुतस्तस्य परमस्यावरेण तु। मिथ्यात्वं च कुतस्तस्य जगतो नित्यवर्तनादि'ति वाराहे॥ (२३)॥ ३७॥ (२४)॥ ३८॥

39 श्रुतिषु तवानुगीतान् गुणान् जुषन् पुमानुदगादस्मात्संसारात्तव सरूपतां च भजति। तदनुगुणस्मरणमनुगुणांश्च जुषन्निति चशब्दः कर्मणि चेत्यस्मिन्नर्थे। यच्चायं पुमानात्तभगां त्वयाऽपहृतभगां प्रातिस्विकीं पूर्वोक्तां द्विविधां कष्टां प्रकृतिं जहाति। जिहाति हन्ति च तदपि त्वमेव जहासि जिहासि च। उतेति त्यागवधयोः समुच्चयार्थे। 'जिहाति रावणं सङ्ख्ये राघवः परमास्त्रविदि'ति स्कान्दे॥ 'स्वातन्त्र्यात्प्रकृतित्यागकर्ता नारायणः परः। यद्यप्येषा जीवसंस्था हन्ता च भगवान्प्रभुरि'ति गारुडे। महसि महीयसे पूजयसि पूज्यसे चात्मनैव। 'स्मरन् ब्रह्मगुणान्नित्यं मुक्तो ब्रह्मसरूपताम्। दुर्भगां प्रकृतिं त्यक्त्वा

परम्परया भ्रमति भारती च तवोरुवृत्तिभिरूढजवा॥ ३७॥ न यदिदमग्र आस न भविष्यदतो निधनादनिमित्तकमन्तरा त्वयि विभाति मृषैकरसे। अत उपगीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमिदमित्यवयन्ति बुधाः॥ ३८॥ उदगात्पुमाननुगीतगुणांश्च जुषन्भजति सरूपतां तदनु त्वमुत जहासि जिहासिताम्। अहिरिव त्वचं परमात्त-

SGDF
Sri Gargeshwari Digital Foundation

हत्वा चान्यां दुरन्वयाम्। याति तच्च परेशानात्स हि पूज्योऽथ पूजकः। तस्यैकस्य स्वतन्त्रत्वात्स चानन्तगुणो विभुरि'ति कौशिकश्रुतिः ॥(२५)॥ ॥ ३९ ॥ [40]अज्ञानामनवगतान्तकादनधिरूढब्रह्मपदात्। 'स यथा-कामो भवति। तत्क्रतुर्भवति। यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यत इति तु कामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येती'ति श्रुतिः। 'निषिद्धकामयुक्तानामसतां तु विशेषतः। दुर्ज्ञेयो भगवान्विष्णुर्हृदिस्थोऽ-स्मृतहारवत्। अकामत्वेन भजतां ददात्यभयमन्तकात्। पूर्णानन्दादि तेऽश्नन्ति पूर्णानन्दादिकाः स्वतः। ब्रह्मणो ब्रह्मसम्पत्तिमत आह श्रुतिः स्फुटम्। न परब्रह्मताऽवाप्तिर्न ते विष्णाविति श्रुतेः। परब्रह्मता चैषां ब्रह्मलोकात्परा गतिः। न परब्रह्मरूपत्वमेतमेवेति च श्रुतेः। अन्येषां म्रियमाणानां प्राणा भागत एव तु। देवतास्वेकतां यान्ति भागतोऽनुव्रजन्ति तम्। ज्ञानिनां मुच्यमानानां नैव यान्ति स्वदेवताः। तेनैव सह संयान्ति ततोऽनुत्क्रमणः(ण) श्रुतिरि'ति ब्रह्मतर्के ॥ 'देवाश्च ऋषयश्चैव सुभक्त्या कामिनोऽपि तु। मुच्यन्ते नियमादेव पश्यन्ति च हरिं न ने'ति स्कान्दे ॥ (२६) ॥ ४० ॥ [41]परमेश्वरस्यावगमात्तदवगमा श्रीः। तया च गम्यत्वादर्थः परमस्तेन बद्धत्वात्सिता श्रीर्गुणात्मिका च। सगिरः। वाक्पूर्वकाणीन्द्रियाणि श्रियो विष्णोश्च नानुकूल्येन ययुः। अनुययुश्च हंसकुलगीतपरम्परया। यथा तुषावृतानां तण्डुलानां रजस्पृष्टिर्नास्ति एवं रजोरूपान्मनुष्यान्न वान्ति श्रुतयः। वयसा सह महता कालेनापि। अतस्त्वयि सफलं पतन्ति न पतन्ति च विधि-

---

भर्गां महसि महीयसेऽष्टगुणोऽपरिमेयभर्गः ॥ ३९ ॥ यदि न समुद्धरन्ति यतयोऽपि हृदि कामजडादुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणिः। अनुतृप्तयोगिनामभयो भगवन्ननवगतान्तकादनधिरूढपदाद्भवतः ॥ ४० ॥ तदवगमार्थसितासितयोर्गुणविगुणयोर्नहि देहभृतां सगिरः। अनुययुरत्र

SGDF
Sri Gangeshwari Digital Foundation

निषेधरूपेण बन्धनात्मिकाः। 'जानाति प्रकृतिर्विष्णुं ज्ञेयो विष्णुस्तु निर्गुणः। तावुभौ न विजानन्ति ऋते ब्रह्मपरम्परामि'ति महोपनिषदि॥ 'अन्ये सर्वे श्रिया बद्धाः श्रीर्बद्धा विष्णुनैव तु। बन्धश्च विष्णुतन्त्रत्वं मुक्तानां च श्रियस्तथा। अमुक्तानां तु बद्धत्वं जन्ममृत्यादिदुःखिता। हेयो बन्धश्च सैव स्यान्न तु स्वोच्चवशे स्थितिः। गुणात्मिका च सा देवी निर्गुणः पुरुषोत्तमः। सैव विष्णुं विजानाति ज्ञेयो ज्ञाता च केशवः। न तावन्ये विजानन्ति विना हंसपरम्पराम्। तथापि नैव जानन्ति मानुषा असुरास्तथा। निष्फलैवासुरे तस्माच्छ्रुतिर्बन्धाय केवला। निषेधविध्युत्क्रमणात्तमस्येव विनिक्षिपेत्। निष्फला सफला चैव मानुषाणां तु मध्यतः। सफलैव तु देवानां नियतं मुक्तिदायिनी। श्रीगरुड उवाच। के हंसाः कः परो हंसः के च पारावता गणाः। के च तित्तिरयस्तत्र के शुकाः के च वायसाः। श्रीभगवानुवाच। परो हंसोऽहमेवैको हंसा ब्रह्माण एव तु। पारावता देवतास्तु मुनयस्तित्तिराः स्मृताः। मानुषास्तु शुकाः प्रोक्ता आसुराश्चैव वायसाः। प्राप्यं प्राप्तं यतो नित्यं पूर्णं सर्वोत्तमं मया। अतः परमहंसोऽहं मदनन्तरमेव तु। यतः प्राप्तमिवाशेषं सर्वजीवोत्तमं शुभम्। अतो ब्रह्मपदे योग्या जीवा हंसाः प्रकीर्तिताः। तेषां परम्पराप्राप्तं यैर्ज्ञानं नियमेन तु। ते मुच्यन्ते नैव चान्ये गुरुर्ब्रह्मा यतो नृणाम्। दैवतं त्वहमेवैको मामवित्त्वा न मुच्यते। परं प्रति यतो नीचा ब्रह्मणः सर्वदेवताः। पारावतास्ततः प्रोक्तास्तैस्तीर्णा संसृतिर्यतः। तित्तिरा मुनयस्तस्मात्कासुखत्वात्तु मानुषाः। शुका इति समुद्दिष्टा वयोमात्रसुखत्वतः। वयसोऽन्ते तु दुःखित्वादसुरा वायसाः स्मृताः। एवं पञ्चविधा जीवाः षष्ठोऽहं परमेश्वरः। न मत्समोऽधिको वापि कश्चि-

---

हंसकुलगीतपरम्परया न तुषावरणा इव रजांसि वान्ति। वयसा सह यच्छ्रुतयस्त्वयि सफलं पतन्ति न पतन्ति बन्धनाः॥ ४१॥ इत्यशेष-

SGDF
Sri Gargeshwari Digital Foundation

दस्ति द्विजोत्तमे'ति गारुडे ॥ (२७) ॥ ४१ ॥ [43]व्योमायनमहात्मभिः ब्रह्माश्रयेषूत्तमैः ॥ ४३ ॥ '[48]कथाः कथयतीशस्य व्यासस्यान्ते स नारदः । स्तुत्यर्थं तस्य देवस्य ज्ञापनाय न तु क्वचित् । पूर्णज्ञानामृतस्यास्य न तु ज्ञप्तिः पराद्भवेत् ॥ ४८ ॥ [50]ऋषिरूपी यतो विष्णुः स्वयमेव जनैः श्रुत'इति ब्राह्मे । ऋषिणा ऋषिरूपेण ॥ ५० ॥ इति श्रीमद्भागवतदशमस्कन्धतात्पर्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्नवत्यध्यायः ॥ ९४ ॥ दशमस्कन्धः सम्पूर्णः ॥

एकादशः स्कन्धः

द्वितीयोऽध्यायः

श्रीवेदव्यासाय नमः ॥ '[6]आत्मनो भजने बुद्धिमुत्पाद्य फलदाः

समाम्नायपुराणोपनिषद्रसः । समुद्धृतः पूर्वजैस्तैर्व्योमायनमहात्मभिः ॥ ॥४३॥ एवं स गुरूणाऽऽदिष्टो गृहीत्वा श्रद्धयाऽऽत्मवान् । पूर्णः सद्यस्ततो राजन् प्राह वीरव्रतो गुरुम् ॥ ४५ ॥ नारद उवाच—नमस्तस्मै भगवते कृष्णायामलमूर्तये । यो धाता सर्वभूतानामभयो यस्य ते कलाः ॥ ४६ ॥ इत्याद्यमृषिमामन्त्र्य तच्छिष्यांश्चामलात्मकान् । ततोऽगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥ ४७ ॥ सभाजितो भगवता कृतासनपरिग्रहः । तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतम् ॥ ४८ ॥ यो ह्यात्मा जगदादिमध्यनिधनो योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविष्ट ऋषिणा चक्रे पुनः संहिताम् । यं सम्पद्य जहात्यजामनुशायी सुप्तः कुलायं तथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥ ५० ॥

एकादशः स्कन्धः

द्वितीयोऽध्यायः

भूतानां देवचरितं दुःखाय च सुखाय च । सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥ भजन्ति ये यथा देवान् देवा अपि तथैव

SGDF
Sri Gargeshwari Digital Foundation

सुराः । उत्तमानां जनानां तु निकृष्टानां विपर्ययः । शुभाशुभफलानां तु कर्मणां विबुधाः सदा । प्रवर्तका यथायोग्यमृषयः करुणाः सदा । सुखमिच्छन्ति भूतानां प्रायो दुःखासहा नृणाम् । तथापि तेभ्यः प्रवरा देवा एव हरेः प्रिया'इत्युद्दामसंहितायाम् ॥ ६ ॥ '[38]आत्मनो देह-गेहादि द्वयशब्देन भण्यते । अविद्यमानं जीवस्य प्रतिभाति तदीयवत् । जाग्रद्वत्तु यथा स्वप्नः प्रतिभाति मनोरथः । विद्यमानवदेवैतद्देहादीश-वशे स्थितम् । विभाति स्ववशत्वेन सैषा संसृतिरुच्यते । तस्मात्तद्विषयं त्यक्त्वा मनो विष्णौ निवेशयेदि'ति हरिवंशेषु ॥ ३८ ॥ '[40]केचि-दुन्मादवद्भक्ता बाह्यलिङ्गप्रदर्शकाः । केचिदान्तरभक्ताः स्युः केचि-च्चैवोभयात्मकाः । मुखप्रसादाद्दार्ढ्याच्च भक्तिर्ज्ञेया न चान्यत'इति वाराहे ॥४०॥ '[41]सर्वं हरेर्वशत्वेन शरीरं तस्य भण्यते । अनन्याधि-पतित्वाच्च तदनन्यमुदीर्यते । न चाप्यभेदो जगता विष्णोः पूर्णगुणस्य त्वि'ति हरिवंशेषु ॥ ४१ ॥ '[45]पूर्णत्वादात्मशब्दोक्तः कश्चित्सर्व-नरोत्तमः । सोऽपि नारायणो नान्यः स च सर्वेषु संस्थितः । तद्वशा इतरे सर्वे श्रीब्रह्मेशपुरःसराः । स एव तु स्वभक्तेषु स्थित्वाऽनुग्रह-कारकः । अज्ञेष्वज्ञानयन्ता च द्विषत्सु द्वेषकारकः । तत्प्रेरितास्तदन्ये तु प्रियद्वेषादिकारिणः । अतस्तत्प्रेरणादेव प्रेमाद्या मम जज्ञिरे । इति पश्यति यो बुद्ध्या स तु भागवतोत्तमः ॥ ४५ ॥ [46]सर्वाधिकं

तान् । छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ ६ ॥ अविद्यमानो-प्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथो यथा । तत्कर्मसङ्कल्प-विकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात् ॥ ३८ ॥ एवंव्रतश्च प्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः । हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन् । सरित्समुद्रांश्च हरेः शरीरं यत्किञ्च भूतं प्रणमेदनन्यम् ॥ ४१ ॥ हरिरुवाच—सर्वभूतेषु यः पश्येद्भगवद्भाव-मात्मनः । भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥४५॥ ईश्वरे तदधीनेषु

SGDF
Sri Gangeshwari Digital Foundation

पृथग्विष्णुं क्षीरसागरवासिनम् । ज्ञात्वा तत्र प्रेमयुक्तस्तद्भक्तेषु च मैत्रयुक् । कृपावांश्च तदज्ञेषु तद्द्वेषिणामुपेक्षकः । तद्वशत्वं न जानाति सर्वस्य जगतोऽपि तु । [47]तमाहुर्मध्यमं भक्तमर्चायामेव संस्थितम् । विष्णुं ज्ञात्वा तदन्यत्र नैव जानाति यः पुमान् । तारतम्यं च तद्भक्तेर्न जानाति कथञ्चन । अवजानंश्च तद्भक्तानात्मनो भक्तिदर्पितः । उपेक्षकोऽपि वा तेषु न स्मरेदथवापि तान् । मानुषेषु यथा कश्चित्किञ्चिदुच्चः प्रदृश्यते । एवमेवोच्चतां विष्णोरल्पां पश्यति चान्यतः । ते तु भक्ताधमाः प्रोक्ताः स्वर्गादिफलभागिनः । तैर्विघ्निता अधो यान्ति तद्भक्तानामुपेक्षकाः । कुर्युर्विष्णावपि द्वेषं देवा देवावमानिनः । पूजिता विष्णुभक्तिं च नावज्ञेयास्ततः सुराः । उपेक्षकेषु देवानां भक्तिनाशं स्वयं हरिः । करोति तेन विभ्रष्टाः संसरन्ति पुनःपुनः । अधो वा यान्ति विद्वेषात्पूज्या देवास्ततः सदा । यस्तान्द्वेष्टि स तं द्वेष्टि यस्ताननु स चानु तम् । ऐकात्म्यमागतं विद्धि देवैस्तद्भक्तिपूरितैः । उपेक्षकस्तु देवानां यदैव निरयोपगः । तदा तु किमु वक्तव्यमुपेक्षायां जनार्दने । विष्णोरुपेक्षकं सर्वे विद्विषन्त्यधिकं सुराः । पतत्यवश्यं तमसि हरिणा तैश्च पातितः । भुङ्क्ते स्वर्गफलं नित्यं निरयं नैव गच्छति । विष्णोस्तु मध्यमो भक्तो जायते मानुषेषु च । अस्मरन्देवता यस्तु भजते पुरुषोत्तमम् । योग्यः संस्मरते देवानयोग्यो द्वेष्टि केशवम् । यस्तूत्तमो भागवतः स मुक्तिं परमां व्रजेत् । विष्णुना सर्वदेवैश्च मोदते सह नित्यद(ा)'इति च ॥ ४६, ४७ ॥ [48]विष्णोर्मायां विष्ण्विच्छाधीनाम् । 'विष्णोरिच्छानुसार्यैतज्ज्ञात्वा योग्यं न चाधिकम् । हृष्यति द्वेष्टि वा यस्तु स वै भागवतोत्तम'इति च ॥ 'सतां वृद्धिकरो

बालिशेषु द्विषत्सु च । प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ॥ ४६ ॥ अर्चायामेव हरये पूजां यः श्रद्धयेहते । न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वाऽपीन्द्रियैरर्थान्यो न द्वेष्टि न

SGDF
Sri Gangeshwari Digital Foundation

धर्मस्त्वसतां ह्रासकारकः । अयं तु निश्चितो धर्मो ह्यधर्मोऽन्यो विनिश्चितः । हर्षः सत्सु तथाऽसत्सु धर्मो धर्मविपर्ययः । तेषां वृद्धौ तथा हानौ सर्वं ज्ञेयमशेषतः । एतदर्थं च धर्माणां मर्यादा वैदिकादिका । मूलधर्मविरुद्धा तु सा न ग्राह्या कथञ्चने'ति च ॥ ४८ ॥ [49]देहेन्द्रिय-प्राणधियां त्रिधैव त्वभिमानिनः । तत्रोत्तमा देवतास्ता सर्वदोषविवर्जिताः । गुणैः सर्वैः सुसम्पन्ना विरिञ्चादुत्तरोत्तरम् । मध्यमा गुणदोषेता असुरा अवमा मताः । ते सर्वे दोषसंयुक्ता आचित्तादुत्तरोत्तरम् । तेभ्योऽन्यो मानुषो जीवस्ताभ्यां देवासुरावपि । जीवाभिमानिनश्चैव त्रिविधाः सम्प्रकीर्तिताः । जीवमान्युत्तमो ब्रह्मा मध्यमः स्वयमेव तु । अधमः कलिरुद्दिष्टस्तत्र मध्यमनीचयोः । मृतिजन्मक्षुधादुःख-प्रभृत्यखिलमेव तु । नोत्तमस्य तु जीवस्य देहादेश्च कथञ्चन । जन्मादि-कृतदुःखं तु देहमान्यसुरस्य ह । सुप्त्याद्यप्ययजं दुःखमसुरेन्द्रिय-मानिनः । क्षुन्निमित्तं तु यद्दुःखं प्राणमान्यसुरस्य तत् । भयतर्षादिजं दुःखं मनोमान्यसुरस्य च । केवलं त्वान्तरं दुःखं बुद्धिमान्यसुरस्य तत् । नीचोऽस्मीति तु यद्दुःखमहंमान्यसुरस्य तत् । अतीतादिस्मृतेर्दुःखं चित्तमान्यसुरस्य च । जीवमान्यसुरस्य स्यात्सर्वं तत्समुदायतः । एवमेव सुखं देवेषूभयं मध्यमेषु च । असुराणामधर्मस्य वृद्ध्या सुखमपीष्यते । देवानां नैव केनापि दुःखं प्रीतिस्तु धर्मतः । अधर्मोऽपि प्रीतये स्यादसुराणामधोगतेः । देवानां पुण्यपापाभ्यां सुखमेवोत्तरोत्तरम् । तेषां दुःखादिकं किञ्चिदसुरावेशतो भवेत् । प्राणस्य नासुरावेश आख-णात्समसमो हि सः । सम्पूर्णानुग्रहाद्विष्णोः प्राणः पूर्णगुणो मतः । असुराणां सुखाद्याश्च देवावेशादुदीरिताः । स्वतस्तु निर्गुणाः सर्वे सर्व-दोषात्मका मताः । विविच्यैवं जगत्सर्वं स्वात्मानं च पृथक्स्थितम् ।

हृष्यति । विष्णोर्मायामिमां पश्यन्स वै भागवतोत्तमः ॥४८॥ देहेन्द्रिय-प्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः । संसारधर्मैरविमुह्यमानः

SGDF
Sri Gargeshwari Digital Foundation

सर्वतश्च पृथक्सन्तं विष्णुं सर्वोत्तमोत्तमम् । जानन्ति ये भागवतास्त उक्ता उत्तमोत्तमा' इति ब्रह्मतर्के ॥ देहेन्द्रिययोर्जन्माप्ययौ ॥ ४९ ॥ [52]चित्ते विद्यमाने । स्वात्मनि केवलात्मभावे मोक्षे च । यस्य जीवपरयोरभेदो नास्ति । 'न क्वापि जीवं विष्णुत्वे संसृतौ मोक्ष एव च । यः पश्यति सुरादींश्च यथोत्कर्षं प्रपश्यति । स सर्वभूतसमदृग्विष्णुं सर्वोत्तमं स्मरन्नि' ति हरिवंशेषु ॥ 'नैवं त्वयाऽनुमन्तव्यं दृष्टो जीवो मयेति ह । सर्वभूतगुणैर्युक्तं देवं त्वं ज्ञातुमर्हसी' ति च मोक्षधर्मेषु ॥ 'नैवं त्वयाऽनुमन्तव्यं जीवात्माहमिति क्वचित् । सर्वैर्गुणैः सुसम्पन्नं दैवं मां ज्ञातुमर्हसी' ति च वाराहे ॥ ५२ ॥ इति एकादशतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

[3]आत्मप्रसिद्धये भूतानां भगवज्ज्ञानार्थम् ॥ ३ ॥ [5-6]एवं गुणान्भुञ्जानो भगवान् । तं सृष्टं मन्यमानो जीव इह सज्जते । 'शरीरे दोषहानेन गुणभोक्तारमीश्वरम् । शरीरस्थतया जीवं मन्यमानः पतत्यधः । तत्सृष्टा हि सदा जीवा देहादेर्जनिमत्त्वतः । नित्यानन्दैकदेहोऽसौ विष्णुस्तत्वैकताऽनयोरि' ति च ॥ ५, ६ ॥ '[7]आभूतसम्प्लवा-

---

स्मृत्या हरेर्भागवतप्रधानः ॥४९॥ न यस्य स्वः पर इति चित्ते स्वात्मनि वा भिदा । सर्वभूतसमः शान्तः स वै भागवतोत्तमः ॥ ५२ ॥

तृतीयोऽध्यायः

अन्तरिक्ष उवाच — एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज । ससर्जोच्चावचान्यादौ स्वयमात्मप्रसिद्धये ॥ ३ ॥ एवं सृष्टा स भूतानि स्थविष्ठैः पञ्चधातुभिः । एकधा दशधाऽऽत्मानं विभजन् जुषते गुणान् ॥ ॥४॥ गुणैर्गुणान् स भुञ्जान आत्मप्रद्योतितैः प्रभुः । मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥५॥ कर्माणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत् । तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरम् ॥६॥ इत्थं कर्मगतीर्गच्छन् बहु-

SGDF
Sri Gangeshwari Digital Foundation

जन्म जीवेशत्वं विजानतः । ततः पतत्यधो यस्मादुत्थानं नैव तु क्वचिदि'ति च ॥ ७॥ '[8]कालाख्यः कलनाद्विष्णुर्व्यक्तमव्यक्तगं नयन्नि'ति च ॥ ८ ॥ [13]अव्यक्तं विशतीत्युक्त्वा तस्य विस्तारो वारिणा हृतगन्धेत्यादि । 'सङ्क्षेपविस्तराभ्यां तु कथयन्ति मनीषिणः । बहुवारस्मृतेस्तस्य फलबाहुल्यकारणादि'ति शब्दनिर्णये ॥ १३ ॥ [15]नभ आत्मनि लीयत इत्युक्त्वेन्द्रियाणीत्याद्यपि विस्ताराय ॥१५॥ [16]आत्मनि बुद्धौ ॥१६॥ '[17]त्रिवर्णावरणादुक्ता त्रिगुणानां हरेर्मतिः । गुणात्मकत्वात्प्रकृतिस्त्रिवर्णेति प्रकीर्त्यते । तत्र तु प्रकृतिस्तार्या तारिका तु हरेर्मतिः । उभयं विष्णुमायोक्तं ज्ञातव्यमुभयं तथे'ति च ॥ 'बहूनां सहनिर्देश एकयाऽभिधयैव तु । तयैवाभिधया तेषां परामृश्यैकमुच्यते । तामेतामान्तरीं रीतिं विदुः शब्दविदो जना' इति च ॥ १७ ॥ [21]मण्डलवर्तिनः युद्धरङ्गस्थाः ॥ २१ ॥ [23]देवाः सजाया मुच्यन्ते मानुषा उभयात्मकाः । विजाया एव योगेशा तेषां या यैव योग्यता ।

भद्रावहः पुमान् । आ भूतसम्प्लात्सर्गप्रलयावश्नुतेऽवशः ॥ ७ ॥ धातूपप्लव आसन्नेऽव्यक्तं द्रव्यगुणात्मकम् । अनादिनिधनः कालो ह्यव्यक्ताय विकर्षति ॥ ८ ॥ वारिणा हृतगन्धा भूः सलिलत्वाय कल्पते । सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥१३॥ कालात्मना हृतगुणं नभ आत्मनि लीयते । इन्द्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ १५ ॥ प्रविशन्ति ह्यहङ्कारं स्वगुणैरहमात्मनि ॥ १६ ॥ एषा माया भगवतः सर्गस्थित्यन्तकारिणी । त्रिवर्णा वर्णिताऽस्माभिः किं भूयः श्रोतुमिच्छसि ॥ १७ ॥ राजोवाच—यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः । तरन्त्यजः स्थूलधियो महर्ष इदमुच्यताम् ॥१८॥ प्रबुद्ध उवाच—कर्माण्यारभमाणानां दुःखहत्यै सुखाय च । पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥१९॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना । गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥२०॥ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् । अतुल्यातिशयध्वंसाद्यथा मण्डलवर्तिनाम् ॥ २१ ॥ तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः । अमाययाऽनुवृत्त्या च तुष्येदात्माऽ-

SGDF
Sri Gangeshwari Digital Foundation

तथा तथैव मुच्यन्ते नान्यथा तु कथञ्चने'ति संदृश्ये ॥२३॥ [24]सन्तस्तु त्रिविधाः प्रोक्ता उत्तमा मध्यमाधमाः । उत्तमा देवतास्तत्र ऋष्याद्या मध्यमा मताः । अधमा मानुषोत्कृष्टास्ते चापि त्रिविधा मताः । तत्राधमेषु येषां तु सङ्गो विघ्नाय वै भवेत् । तेषामुत्तमसङ्गस्य तेषां सङ्गं परित्यजेत् । आदौ तु तेषामपि च सङ्ग उत्तमसङ्गतेः । साधनत्वान्न तु त्याज्यो यदि त्यक्तुं न शक्यते । तदा तेऽपि तथा नेया यथा विघ्नो न वै भवेत् । तदुच्चसङ्गतेः क्वापि तदा दोषो न जायते । प्रयोजनाय तेषां तु सङ्गः सर्वात्मनेष्यते । सर्वथा चैव देवेषु सङ्गो मुनिगणेषु च । भाव्यो हि तं विना नैव पुरुषार्थः क्वचिद्भवेत् । विशेषतः स्वोत्तमेषु विना सङ्गं न मुच्यते । स्वनीचेषु तु देवेषु विना-सङ्गं न पूर्यते । तस्मात्सतस्तूत्तमेष्वेषु सङ्गं कार्यो विशेषतः । अना-द्यनन्तकालेषु न च हाप्यः कथञ्चन । सतां तदुत्तमेशेशे किमु विष्णौ परात्पर'इति गारुडे ॥ 'बह्वपेक्षो हि जिज्ञासुरतो देहादिवृत्तये । किञ्चित्सत्स्वपि सङ्गी स्यादशक्ये सति वर्तने । कृतकृत्यस्त्यजेत्सङ्गं सदा गुरुसुरादिषु । सङ्गी स्यान्न हि तत्सङ्गं विना तु सुखभाग्भवेत् । तस्मादनाद्यनन्तैव सक्तिर्गुरुसुरादिषु । अन्यत्र कृत्यापेक्षा स्यादिति सङ्गविनिर्णय' इति भविष्यत्पर्वणि ॥ २४ ॥ [27]श्रद्धा भागवते तन्त्रे वेदे भारतपञ्चमे । विष्णोरव्यवधानेन वक्तृत्वात्सर्वथा भवेत् । कला विद्यास्वनिन्दा च व्यवधानेन केशवे । प्रवेशाद्यतिभिः कार्या ह्यन्यथा नरकं व्रजेत् । श्रन्नामास्तिक्यबुद्धिः स्यात्सा चैव द्विविधा मता । अत्रोक्तमस्तीत्येकाऽत्र ममात्रास्ति प्रयोजनम् । इत्यन्या तत्र पूर्वा तु यतेः कार्या कलास्वपि । द्वितीया न तु कर्तव्या पञ्चरात्रविरोधिषु । सदैव निन्दा सर्वैश्च ब्रह्मादिस्थावरान्तकैः । सम्यकार्या तद्विना च तमो यान्ति

ऽत्मदो हरिः ॥२३॥ सर्वतो मनसो सङ्गमादौ सङ्गश्च साधुषु । दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥२४॥ श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र

SGDF
Sri Gargeshwari Digital Foundation

विनिश्चयात् । कुर्वन्त्येव सुरास्तत्र तदन्येषां तमो भवेत् । पञ्चरात्रं च वेदाश्च मूलरामायणं तथा । पुराणं भागवतं चैव भारतं च विभिद्यते । एतेष्वपि यथा विष्णोराधिक्यप्रतिपादनम् । तद्भक्तानां च क्रमशः स एवार्थो न चापरः । अन्यथादृश्यमानं तु मोहायैव विनिर्दिशेत् । तस्मात्सर्वेषु शास्त्रेषु विष्णोराधिक्यमेव तु । क्रमेण च तदीयानां प्रतिपाद्यं न चापरमि’ति ब्रह्माण्डे । ‘अन्धंतमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्यायाᳮ रता’इति च । ‘गृहिणोऽप्यल्पबोधस्य न कलासु प्रयोजनम् । आवर्तयेद्वेदतन्त्रं मुख्योक्तो हरिरत्र ही’ति हरिवंशेषु ॥ २७ ॥ [30]कृष्णात्मनाथेषु मनुष्येष्वपि सौहृदं किमु देवेषु महत्सु देवादिषु ॥ ३० ॥ [36]अहेतुः स्वस्य हेतुरन्यो नास्ति । बहिः प्रलये मुक्तौ च ॥ ३६ ॥ ‘[37]ब्रह्माद्या यं न जानन्ति करणाद्यभिमानिनः । जानन्त्यनुग्रहाच्चास्य प्रधानाग्निं यथार्चिषः । अग्निपुत्रा नमस्तस्मै यमाह श्रीश्च तत्स्फुटम् । वेदरूपा परं देवं वैलक्षण्यात्समस्ततः । आनन्दो नेदृशानन्द इत्युक्ते लोकतः परम् । प्रतिभाति न चाभाति यथावद्दर्शनं विने’ति ब्रह्मतर्के । बोधकः परमेश्वरः । ईदृशानन्दो न भवतीति निषेधवचनार्थ एव न सिध्यति विलक्षणानन्दाभाव इत्यर्थतः सिद्धिः ॥ ३७ ॥ ‘[38]त्रिगुणात्मकं प्रधानं च रजः सत्वं तमस्तथा । प्राणो महानहङ्कारो जीवास्तदभिमानिनः । ज्ञानात्मकानीन्द्रियाणि तथा कर्मात्मकानि च । शब्दाद्यर्थाः सुखं

चापि हि । मनोवाक्कायदण्डश्च सत्यं शमदमावपि ॥२७॥ एवं कृष्णात्म नाथेषु मनुष्येषु च सौहृदम् । परिचर्याश्चोभयत्र महत्सु नृषु साधुषु ॥३०॥ पिप्पलायन उवाच—स्थित्युद्भवप्रलयहेतुरहेतुरस्य यः स्वप्नजागरसुषुप्तिसुसन्बहिश्च । देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि तदवैहि परं नरेन्द्र ॥ ३६ ॥ नैनं मनो विशति वागुत चक्षुरात्मा प्राणेन्द्रियाणि च यथानलमर्चिषः स्वाः । शब्दोऽप्यबोधकनिषेधतयाऽऽत्ममूलमर्थोक्तमाह यदृते न निषेध्यसिद्धिः ॥३७॥ सत्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं

SGDF
Sri Gargeshwari Digital Foundation

दुःखमिति प्रोक्तं द्विधा फलम् । एतत्सर्वं हरे रूपमित्याहुर्ज्ञानदुर्बलाः । स एव बहुशक्तित्वाद्भाति चैषां तथा तथा । एवं कारणकार्याख्यं समस्तं हरिमेव तु । केचित्पश्यन्ति च व्यस्तं केचिदाहुरपण्डिताः । एवं कारणकार्येभ्यः परमानन्दरूपिणम् । अज्ञानाद्बहुधा प्राहुरेकं सन्तं सुदुर्जनाः । रूप्यत्वात्तद्वशत्वाच्च तद्रूपं चैतदीर्यते । न तु तस्य स्वरूपत्वान्निर्दोषानन्दरूपिणः । कथं जडाजडैक्यं स्यात्कुतः पूर्णाल्पमोदयोः । पूर्णाल्पज्ञानयोश्चैव पूर्णशक्त्यल्पशक्तयोः । निर्दुःखदुःखान्वितयोः स्वतन्त्रपरतन्त्रयोः । अतः सर्वगुणैर्युक्तं सर्वदोषविवर्जितम् । अन्याभेदेन विज्ञाय तम एव प्रपद्यते । निष्कृष्टं सर्वतो विष्णुं सर्वतश्च विलक्षणम् । ज्ञात्वा पूर्णगुणं यान्ति मुक्तिं नास्त्यत्र संशय'इति तन्त्रभागवते ॥३८॥ '[39]अहं हि जीवसञ्ज्ञो वै मयि जीवः सनातनः । मैवं त्वयाऽनुमन्तव्यं दृष्टो जीवो मयेति ह । अहं श्रेयो विधास्यामि यथाधीकारमीश्वर'इति मोक्षधर्मेषु । 'यथेन्द्रियगतः प्राणस्तेषां शक्त्या विकल्प्यते । दृष्टिदः श्रुतिदश्चेति मतिदो ज्ञानदस्तथा । इत्यादिभेदतो वाच्य एक एव महाबलः । दृष्ट्यादिशक्तिस्तस्यैव ततो नान्यस्य कस्यचित् । एवं तद्रूपकं ब्रह्म तत्तच्छक्त्या विकल्प्यते । एकमेव महाशक्तिप्राणस्यापि बलप्रदमि'ति हरिवंशेषु ॥ ३९ ॥ '[40]पेशो जरायुरुद्दिष्टः सुवर्णं पेश उच्यते । मृदुपिण्डश्च पेशं स्यात्क्वचिद्द्रुमपीष्यत'इत्यभिधानम् । अवनिस्थितेषु स्वेदजेषु । भूस्वेदेन हि प्रायो जायन्ते । तदा कूटस्थे परमात्मन्यास जीवः । यं परमात्मानमृते सुप्त्यनुस्मृतिरेव न । 'देहादेहान्तरगतौ प्रविशेत्प्राणमेव तु । जीवः प्राणः परात्मानमेवं सुप्तावपि

महानहमिति प्रवदन्ति जीवम् । ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥३८॥ नासौ जजान न मरिष्यति नैधतेऽसौ न क्षीयते स च न विध्यति चारिणा हि । सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥३९॥ अण्डेषु पेशिषु

SGDF
Sri Gargeshwari Digital Foundation

स्फुटम् । तदन्या देवताः सर्वाः प्राणस्यैव वशे स्थिताः । ईषच्च सुप्तवद्यान्ति नैव मानुषजीववत् ॥ स्वर्गस्थानां न तु स्वापः प्रायो देहेऽपि नाज्ञता । मृतिसुप्तिप्रबोधादेर्नियन्ता हरिरेकराट् । तमृते नैव चावस्था नावस्थावान्न च स्मृतिः । ततस्तु देवदेवेशः प्राणः प्राणेश्वरो हरिः । न हरेरीशिता त्वन्यः स हि सर्वाधिको मत'इति हरिवंशेषु ॥ ४० ॥ '[44]जानन्तोऽपि हि दुर्ज्ञेयः प्रश्नोऽयं ज्ञानिनामपि । इति वेदयितुं ब्रह्मपुत्रा नोचुर्निमेः पुर'इति तन्त्रभागवते ॥ ईश्वरात्मत्वात् ईश्वरविषयत्वात् ॥ ४४ ॥ [46]अज्ञः सन्नाचरन् । विकर्मणा मृत्योर्मृत्युमुपैति । स एवेश्वरार्पितं कुर्वाणः सिद्धिं लभते ॥ [46-47]अज्ञात्वा कुर्वतः कर्म स्खलनात्पापकारणम् । तदेवार्पयतो विष्णोर्नैव पापाय तद्भवेत् । मनोदोषविहीनस्य न तु दोषवतः क्वचित् । सत्सु केशवपूर्वेषु क्रमशो भक्तिहीनता । असद्भक्तिस्तथा स्नेहो बहुमानमथापि वा । स्वोत्तमानां प्रियत्यागादात्मप्रियचिकीर्षया । अधिकेष्वेव नीचोच्चभक्तिव्यत्यास एव वा । स्वोत्तमस्यात्मनश्चैव समस्नेहोऽथवा भवेत् । कार्येषु बहुमाने वा स्वात्मनः समतापि वा । आधिक्ये किमु वक्तव्यमात्मनः शक्तिहापनम् । शक्तस्याशक्तवत्कर्म मनोदोषा इतीरिता'इति कर्मतन्त्रे ॥ ॥ ४६, ४७ ॥ [49-50]अव्यग्रत्वेनाचार्यं लब्ध्वा । 'परीक्ष्यैव गुरुः शिष्यं शिष्योऽपि गुरुमाव्रजेत् । अन्यथा नरकायैव प्रायश्चित्तं गुरो-

---

तरुष्ववनिस्थितेषु प्राणेन जीव उपधावति तत्र तत्र । छन्ने मतीन्द्रियगुणेऽहमिव प्रसुप्ते कूटस्थ आस यमृते तदनुस्मृतिर्न ॥ ४० ॥ आविर्होत्र उवाच—कर्माकर्मविकर्मेति वेदवादो न लौकिकः । वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः ॥४४॥ नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः । विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ४६ ॥ वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यं लभते सिद्धिं रोचनार्थं फलश्रुतिः ॥४७॥ लब्ध्वा चाव्यग्रमाचार्यं तेन सन्दर्शितागमः । महापुरुषमभ्यर्चेन्मूर्त्याऽभिमतयाऽऽत्मनः ॥ ४९ ॥ शुचिः सम्मुख आसीनः प्राणसंयमनादिभिः ।

SGDF
Sri Gurgeshwari Digital Foundation

स्तथे'ति च ॥ ४९, ५० ॥ '[51]द्रव्यलिङ्गं शिलाद्यं स्यादात्मलिङ्गं मनोमयम् । अथवा स्थण्डिले चैव विष्णोर्लिङ्गं प्रकीर्तितमि'ति च ॥ ॥ ५१ ॥ [55]तन्मयं तत्प्रधानम् । 'विष्णोर्भृत्योऽहमित्येव सदा स्याद्भगवन्मयः । नैवाहं विष्णुरस्मीति विष्णुः सर्वेश्वरो ह्यज'इति च ॥ स्वादानात्स्वात्मनो व्याप्त्या विष्णुः स्वात्मेति कथ्यते । न तु जीवस्वरूपत्वात्स हि जीवेश्वरः प्रभुरि'ति शब्दनिर्णये ॥ ५५ ॥ इति एकादशतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

'[3]विष्णोस्तु पुरुषाख्यानि त्रीणि रूपाण्यतो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं देहिनां देहे तानि ज्ञात्वा विमुच्यत'इति माहात्म्ये ॥ ३ ॥ [4]यत्काये ॥ ४ ॥ '[5]ब्रह्मणिस्थोऽसृजद्विष्णुः स्थित्वा रुद्रे त्वभक्षयत् । पृथक्स्थित्वा जगत्पाति तद्ब्रह्माद्याह्वयो हरिरि'ति ब्राह्मे ॥ रजसा तमसा च ब्रह्मरुद्रदेहसृष्टेः । राग-

---

पिण्डं संशोध्य संन्यासकृतरक्षोऽर्चयेद्धरिम् ॥ ५० ॥ अर्चादौ हृदये वापि यथा लब्धोपचारकैः । द्रव्यक्षित्यात्मलिङ्गानि निष्पाद्य प्रोक्ष्य चासनम् ॥५१॥ पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः । हृदयादि कृतन्यासो मूलमन्त्रेण चार्चयेत् ॥ ५२ ॥ आत्मानं तन्मयं ध्यायन् मूर्तिं सम्पूजयेद्धरेः । शेषमाधाय शिरसि स्वधाम्न्युद्वास्य सत्कृतम् ॥ ५५ ॥ एवमग्न्यर्कतोयादावर्चयेद्धृदये च यः । यज्ञेश्वरं स्वमात्मानमचिरान्मुच्यते हि सः ॥ ५६ ॥

चतुर्थोऽध्यायः

भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् । स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ॥ ३ ॥ यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि । ज्ञानांशकेन विशतो बलमोजईहासत्वादिभिः स्थितिलयोद्भव आदिकर्ता ॥४॥ आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः । रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ॥

SGDF
Sri Gargeshwari Digital Foundation

क्रोधकारणत्वाच्च ॥ ५ ॥ [6]स्वविषयज्ञानरूपः प्रभावरूपश्च ॥ ६ ॥ '[7]ज्ञानरूपानपि सुरान्विना प्राणं क्वचित्परे । आविशन्ति ह्यतस्तेषामज्ञानादि न तु स्वत'इति देवतत्त्वे । 'अथैनमेवमाग्नेयोऽयं मध्यमः प्राणः । एवमेता देवताः पाप्मना विद्धाः तं हासुरा ऋत्वा विदध्वंसुर्यथाऽश्मानमाखणमृत्वा विध्वंसतैवं हैव विध्वंसमाना विष्वञ्चो विनेशुः' ॥ ७ ॥ '[10]सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैनां मृत्युमत्यवहत सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवदि'त्यादि श्रुतिश्च ॥ स्वभागं बलिं ददतो विघ्नमूर्ध्नि यदि भवान्पदं धत्ते । तर्हि नान्यस्य बलिः ॥१०॥ '[17]कुमारनामा तु हरिर्ब्रह्मचारिवपुः स्वयम् । सनत्कुमाराय परं प्रोवाच जगदीश्वर'इति स्कान्दे ॥ 'विष्णोः सनत्कुमाराख्याच्छुश्रुवुर्ज्ञानमुत्तमम् । सनत्कुमारप्रमुखा योगेशाः परमेश्वरा'इति प्रकाशसंहितायाम् ॥ १७ ॥ '[19]सुपर्णा ऋषयो व्यासं नाथमानाययुः सदा । ध्वान्तं निवारयास्माकं मुमुग्धीति च वादिन' इति व्यासतन्त्रे ॥ 'स्मरणात्तु नृसिंहस्य शक्रो मुक्तो बृहद्वधात् । हिरण्यकहृताश्चापि तथैवाप्सरसां गणा'इति भयभञ्जने ॥ १९ ॥ '[20]उपेन्द्ररूपी भगवान्प्रतिमन्वन्तरं प्रभुः । असुरान्हन्ति नियतं श्राद्ध-

---

॥५॥ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः । नैष्कर्म्यलक्षणमुवाच चचार योगं योऽद्यापि चास्त ऋषिवर्यनिषेविताङ्घ्रिः॥ ॥ ६ ॥ इन्द्रोऽपिनाक्यसुखमेष जिघृक्षतीति कामं न्ययुङ्क्त सगणं स बदर्युपाख्यम् । गत्वाऽप्सरोगणवसन्तसुमन्दवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥ त्वां सुन्वतां सुरकृता बहवोऽन्तरायास्त्वान् को विलङ्घ्य परमं व्रजतात् पदं ते । नान्यस्य बर्हिषि बलिर्ददतः स्वभागं धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥ १० ॥ हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान् पिता नः । विष्णुः शिवाय जगतां कलयाऽवतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥१७॥ संस्तुन्वतोऽब्धिपतितांश्छ्रमणान्नृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टम् । देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्ने सुरेन्द्रमभयाय सतां नृसिंहे ॥१९॥ देवासुरे युधि-

SGDF
Sri Gangeshwari Digital Foundation

देवे च वामन'इति वामने ॥ २० ॥ इति एकादशतात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

'[10]ये तु विष्णुमवज्ञाय श्रियमेव ह्युपासते। उपेक्ष्य वा हरिं ते तु भूत्वा याज्याः पतन्त्यध'इति प्रवृत्तिसंहितायाम् ॥ १० ॥ '[11]व्यवायामिषमद्यानि हरेः पूजार्थमेव तु। वामदेव्यो नाम यज्ञो व्यवायो हरिपूजनम्। पितृयज्ञो देवयज्ञो मांसेन हरिपूजनम्। व्यवाययज्ञे मद्यं तु सोमात्मकतयेष्यते। क्षत्रियादेर्न विप्राणां विप्रो दोषेण लिप्यते। अरागतः प्रवृत्तिः स्याद्रागो दोषस्य कारणम्। घ्राणभक्षोऽथवा यज्ञे दैवे सर्वस्य चेष्यते। पैष्टमद्यस्य माध्व्यादि क्षत्रियस्य न दुष्यति। दैवे रत्यैव च प्रीतिर्विष्णोः पुत्रात्तु मानुषे। तस्माद्विहितमात्रेषु रागं मुक्त्वा यथाविधि। समाहितो हरिं स्मृत्वा वर्तन्याजी हरेर्भवेदि'ति क्रियाविधाने। यज्ञान्विहाय न चोदना ॥११॥ '[13]यज्ञेष्वालम्भनं प्रोक्तं देवतोद्देशतः पशोः। हिंसानाम तदन्यत्र तस्मात्तां नाचरेद्बुधः। यतो यज्ञे मृता ऊर्ध्वं यान्ति दैवे च पैतृके।

स दैत्यपतीन् सुरार्थे हत्वान्तरेषु भुवनान्यदधात्कलाभिः। भूत्वाथ वामन इमामहरद्बलेः क्ष्मां याञ्चाछलेन समदाददितेः सुतेभ्यः ॥ २० ॥

पञ्चमोऽध्यायः

वदन्ति तेऽन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः। यजन्त्यसृष्टान्नविधानदक्षिणा वृत्त्यै परं घ्नन्ति पशूनतद्विदः ॥ ८॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरम्। वेदोपगीतं च न शृण्वते बुधा मनोरथानां प्रवदन्ति वार्तया ॥ १० ॥ लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्न हि तत्र चोदना। व्यवस्थितिस्तेषु विहाय यज्ञान् सुराग्रहैरासुरवृत्तिरिष्टा ॥ ११ ॥ यद्घ्राणभक्षो-विहितः सुरायास्तथा पशोरालभनं न हिंसा। एवं व्यवायः प्रजया न

SGDF Sri Gangeshwari Digital Foundation

अतो लाभादालभनं स्वर्गस्य न तु मारणमि'ति च ॥१३॥ [15]स्वात्मानं स्वस्मिन्नाप्तं च। 'आप्तत्वादात्मशब्दोक्तं स्वस्मिन्नपि परेषु च। जीवादन्यं न पश्यन्ति श्रुत्वैवं विद्विषन्ति च। एतांस्त्वमासुरान्विद्धि लक्षणैः पुरुषाधमानि'ति हरिवंशेषु ॥ १५ ॥ '[35]ध्रुवं तयैव मुच्येत यां मूर्तिं प्रदिशेद्गुरुः। शिष्याणां योग्यताऽभिज्ञो विघ्नहानिस्तु तद्युगे। अवतीर्णहरेर्मूर्त्या तत्पूर्वयुगजेन च। नृसिंहमूर्त्या च तथा यां चान्यां प्रदिशेद्गुरुरि'ति स्वाभाव्ये ॥ ३५ ॥ '[42]सर्वात्मना हरेर्भक्ता देवेशा एव केवलम्। देवास्तु सर्वथाभक्ता भक्ता एवेतरे स्मृताः। हरिभक्त्याधिकेष्वेव किङ्करश्चाप्यृणी तथा। हरिभक्तो नेतरेषां वासुदेवव्यपाश्रयात्। द्विधैव स्वोत्तमर्णानि दातव्यानीतराणि च। दातव्येभ्यो विमुच्येत नेतरेभ्यः कथञ्चन। कथं देवाद्यनुपकृतो भक्तो मोक्षेऽपि वर्तयेत्। बिम्बत्वात्तदधीनं हि स्वरूपं सर्वशो यत'इति जीवनिर्णये ॥ ४२ ॥ '[43]उदकैश्च नमस्कारैः स्तुतिभिर्मनसा तथा। यतिभिश्चापि सम्पूज्या देवा मोक्षमियासुभिः। मध्ये विष्णुमनुस्मृत्य नान्यथा तु कथञ्चने'ति समयाचारे ॥ 'प्राधान्येन हरिर्ध्येयस्तत्सम्बन्धात्सुरादयः। ध्येया नान्यत्क्वचिद्ध्यायेद्धरावनुपयोगि यदि'ति हरिसंहितायाम् ॥ ४३ ॥ '[49]पौण्ड्रकादिषु दैत्येषु सुरांशाः सन्ति सर्वशः। बहुमानफलं विष्णोस्ते

रत्यै इमं विशुद्धं न विदुः स्वधर्मम् ॥१३॥ द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम्। मृतके सानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः ॥१५॥ एवं युगानुरूपोऽसौ भगवान् युगवर्तिभिः। मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ॥ ३५ ॥ कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः। यत्र सङ्कीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह। यतो विन्देत परमां शान्तिं नश्यति संसृतिः ॥ ॥ ३७ ॥ देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन्। सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिचर्यया च ॥ ४२ ॥ स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः ॥४३॥ वैरेण यं नृपतयः शिशुपाल-

SGDF
Sri Gurgeshwari Digital Foundation

यान्त्यादाय सद्गतिम् । विद्वेषस्य फलं यत्तु तदादायासुरास्तमः । यान्त्यतो नैव विद्वेषो विष्णोः कार्यः कथञ्चने'त्यंशविवेके ॥ ४९ ॥
इति एकादशतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

[8]यः प्रकाशरूपः'॥ ८ ॥ '[12]अस्पर्धिनी स्पर्धिनीव श्रीरास्ते वनमालया । न हि स्पर्धादयो दोषाः संविद्रूपां स्पृशन्ति तामि'ति वामने ॥ १२ ॥ [14]तनुभृदायुषि संबद्धः अश्वेति तनुभृदायुषि रज्यमानाः । 'ब्रह्मणा संपरित्यक्तो मृत इत्युच्यते नर'इति भारते ॥ [15]कालमात्रः कालनिर्माता ज्ञाता च । सृष्टिलयाद्यर्थम् । नित्यत्वेन च । अव्यक्तस्यापि स्रष्टृत्वात्काल एवं भूतः तस्मादप्युत्तमस्त्वम् । 'कालाज्जीवात्तथाऽव्यक्तान्महतश्चोत्तमो यतः । उत्तमः पुरुषस्तस्माद्भगवान्विष्णुरच्युत'इति च ॥ १४ ॥ '[16]नारायणाख्यः परमः शेते

पौण्ड्रसाल्वादयो गतिविलासविलोकनाद्यैः । ध्यायन्त आकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियः पुनः किम् ॥ ४९ ॥

षष्ठोऽध्यायः

त्वं मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः । नैतैर्भवानजितकर्मभिरज्यते वै यः स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ॥८॥ स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः । यः सात्विकैः समविभूतिभिरात्मवद्भिर्व्यूह्यार्चितः सवनशः समविक्रमैश्च ॥१०॥ पर्युष्टया पतितया वनमालयेयं संस्पर्धिनी भगवती प्रतिपक्षवच्छ्रीः । यः सुप्रणीतममुयाऽर्हणमाददानो भूयात्सदाऽङ्घ्रिरशुभाशयधूमकेतुः ॥ १२ ॥ नस्योतगाव इव यस्य वशे भवन्ति देवाश्च यस्तनुभृदायुषि रज्यमानाः । कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥ १४ ॥ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमात्रः । सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् ॥ १५ ॥ त्वत्तः

SGDF
Sri Gargeshwari Digital Foundation

लक्ष्म्यान्वितो लये। स एव पुरुषाख्यं तु द्वितीयं रूपमात्मनः। कृत्वा रमायां पुरुषनामानं तु चतुर्मुखम्। प्रधानाख्यां च गायत्रीं ससर्ज पुरुषात्मकः। चतुर्मुखः स पुरुषो महत्तत्त्वाभिधं पुनः। प्रधाननाम्न्यां गायत्र्यां ससर्जात्मानमेव तु। श्रद्धाभिधां च गायत्रीं ताभ्यां शेषोऽन्वजायते'त्यादि सृष्टिविक्षेपे ॥ १६ ॥ [17]येऽन्ये ज्ञानिनः स्वतः परिहृतान्विषयान्बिभ्यति ॥ १७ ॥ [19]सर्वे बिभ्रतस्तव ॥१९॥ [25]वत्सराणां शतं चैव ऋतूनां पञ्चविंशकम्। अवतीर्णस्य कृष्णस्य यदा प्रागात्तदा हरिम्। स्वस्थानगमनापेक्षी ब्रह्मा तुष्टाव सामरः ॥ २५ ॥ '[27]संवत्सरद्वयं चैव पश्चात्स्थित्वा जनार्दनः। अभिपेदे परं स्थानं चातुर्मास्याधिकं पुनरि'ति भविष्यत्पुराणे ॥ २७ ॥ '[31]सतामपि कलौ प्राप्ते विकारो मनसो भवेत्। तस्माद्यदूंश्च संजह्रे नैते स्युः पापिनस्त्विति। पुनर्लोकविवृद्ध्यर्थमौत्तरेयादिकान्हरिः। आविश्य रक्षामकरोज्जगतः पुरुषोत्तमः। स्वात्मनः सह यानेन पुरुषार्थोऽधिको भवेत्। इत्यनुग्रहबुद्ध्या च संजह्रे स्वकुलं विभुरि'ति च ॥ ३१ ॥

प्रधानमधिकृत्य पुमान्स्ववीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः। सोऽयं त्वयाऽनुगत आत्मन आण्डकोशं हैमं ससर्ज बहिरावरणैरुपेतम् ॥ १६ ॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान्। अर्थान् जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहृतानपि बिभ्यति स्म ॥ १७ ॥ बिभ्रत्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हन्तुम्। आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्तीर्थद्वयं शुचिषदस्तदुपस्पृशन्ति ॥१९॥ यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम। शरच्छतं व्यतीयाय पञ्चविंशाधिकं प्रभो ॥ २५ ॥ ततः स्वधाम परमं विशस्व यदि मन्यसे। सलोकाँल्लोकपालान्नः पाहि वैकुण्ठ किङ्करान् ॥ २७ ॥ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतम्। लोकं जिघृक्षत्रौद्धं मे वेलामिव महार्णवः ॥ ३० ॥ यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलम्। गन्ताऽस्म्यनेन लोकोऽयमुद्वेलेन विनङ्क्ष्यति ॥ ३१ ॥ वयञ्च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन् सुरान्। भोजयित्वोशिजो विप्रान्नाना-

SGDF
Sri Gargeshwari Digital Foundation

'[50]आत्मनोर्द्वमतां ब्रूयुरुत्तमा अपि सर्वशः। कदाचिदेव स्वगुणान्स्निग्धेष्वेव हि साधव'इति नारदीये ॥ ५० ॥ इति एकादशतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

[7]विद्धि मायां मनोमयीम्। मन्मनः प्रधानप्रकृतिनिर्मिताम्। 'प्रकृतिः सा परा मह्यं रोदसी लोकधारिणी। ऋता सत्याऽमराऽजय्या लोकानामात्मसञ्ज्ञिते'ति मोक्षधर्मेषु ॥ ७ ॥ '[8-9]स्वर्गाद्याश्च गुणाः सर्वे दोषाः सर्वे तथैव च। आत्मनः कर्तृताभ्रान्त्या जायन्ते नात्र संशयः। परमात्मानमेवैकं कर्तारं वेत्ति यः पुमान्। स मुच्यतेऽस्मात्संसारात्परमात्मानमेति चे'ति भारते ॥ इदं मया क्रियत, इदं मया न क्रियत, इदं विपरीतं क्रियत इतिबुद्धिभेदो रजस्तमोगुणनिमित्तो भ्रमः। सर्वं हि परमेश्वरः करोति। 'आत्मशब्दोदितो ब्रह्मा परमात्माऽभिधो ह्यहम्। सर्वं ब्रह्मणि वीक्षेत मयि ब्रह्माणमेव चे'ति कालसंहितायाम् ॥ ८, ९ ॥ '[10]आत्मभूतः आत्मवद्भूतः। आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुने'ति वचनात् ॥१०॥ '[11-12]कर्तृत्वमात्मनो

गुणवताऽन्धसा ॥ ३८ ॥ तेषु दानानि पात्रेषु श्रद्धयाऽर्प्य महान्ति वै। वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवम् ॥३९॥ स्मरन्तः कीर्तयन्तस्ते कृतानि गदितानि च। गत्युत्स्मितेक्षणोत्क्ष्वेलि यन्नृलोकविडम्बनम् ॥५०॥

सप्तमोऽध्यायः

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः। नश्वरं गृह्यमाणं च विद्धि मायां मनोमयीम् ॥ ७ ॥ पुंसो युक्तस्य नानार्थो भ्रमः सगुणदोषभाक्। कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥ ८ ॥ तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत्। आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥९॥ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम्। आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे ॥ १० ॥ दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते। गुण-

SGDF
Sri Gargeshwari Digital Foundation

यस्माज्ज्ञाननिष्ठो न मन्यते । अतः कुर्वन्नपि सदा दोषबुद्ध्या न निन्दितम् । गुणबुद्ध्या न विहितं किन्त्वीशप्रेरितोऽस्म्यहम् । स एव च मयि स्थित्वा निन्द्यानिन्द्ये करोत्यजः । न मे दोषो न च गुणः कर्तृत्वाभावतः स्फुटम् । स्वतन्त्रत्वान्न चेशस्य येऽज्ञास्तेषु भवेदपि । इति मत्वा निवर्तेत निन्द्यात्कुर्याद्गुणानपी'ति बोद्धव्ये ॥ 'अनित्या मे गुणा न स्युर्दोषा नैव कथञ्चन । इति मत्वा शुभं कुर्यान्निवर्तेदशुभादपि । ज्ञानी त्वकर्तृतामानादीशकर्तृत्वनिश्चयात् । किन्तु पूर्णगुणायैव न तु दोषापनुत्तये । न चाल्पगुणसिद्ध्यर्थं बालवत्कृतनिश्चय'इति वैशारद्ये ॥ 'वैलक्षण्याद्धरेर्भिन्नं तत्तन्त्रत्वात्तदात्मकम् । इति विश्वं प्रपश्यन्ति ज्ञाननिष्ठा हरेः प्रिया'इति सार्वज्ञे ॥ ११, १२ ॥ [14]योगो देवादिषु तेन न्यस्त इति योगविन्यासः । 'ज्ञानं तु योगशब्दोक्तं युज्यतेऽनेन यत्सुखम् । क्वचिद्योग उपायः स्यात्क्वचिच्चित्तनिरोधनमि'ति दत्तात्रेययोगे ॥ अत्र ज्ञानमुपायश्च ॥ १४ ॥ [17]अभगवत्स्वरूपत्वात्तनुभृत्त्वम् । बहिरर्थापेक्षयैव च तेषां मोहः । परमसुखसाधनादन्योऽर्थो बहिरर्थः । 'अशरीरः सदा विष्णुः पूर्णानन्दत्वतः सदा । इच्छा च क्रीडयैवास्य न फलाय यतो विभोः । अतो बाह्यार्थकामोऽपि निष्काम इति कथ्यते । ब्रह्मा निरभिमानित्वाच्छरीर्यप्यशरीरवान् । नित्यानन्दोपयोग्यन्यकामस्योज्झितितः सदा । बहिरर्थविनिर्मुक्तस्तथापि तनुधारणात् । अमूढो मूढ इतिवदुच्यते च सरस्वती । रुद्राद्यास्त्वभीमानाद्बहिरर्थयुजस्तथा । सर्वेषां ब्रह्मपदवीयोग्यानां पूर्वमेव तु । अभावस्त्वपरोक्षस्य मोहो ज्ञानस्य भण्यते । ब्रह्मणस्त्वंशरूपेषु

बुद्ध्या च विहितं न करोति यथाऽर्भकः ॥ ११ ॥ सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चलः । पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः ॥ १२ ॥ उद्धव उवाच—योगेश योगविन्यास योगात्मन्योगसम्भव । निःश्रेयसाय मे प्रोक्तस्त्यागः सन्यासलक्षणः ॥ १४ ॥ सत्यस्य ते स्वसदृश आत्मन आत्मनोऽन्यं वक्तारमीश विबुधेऽष्वपि नानुचक्षे । सर्वे विमोहितधियस्तव

SGDF
Sri Gargeshwari Digital Foundation

भारत्या ज्ञानवर्जनम् । ब्रह्मगायत्रिभावे तु नांशावतरणं क्वचित् । शतजन्मसु पूर्वं तु ज्ञानोदय उदीर्यते । आपरोक्ष्येण पारोक्ष्यात्पूर्णज्ञानं सदैव तु । शतजन्मगतायाश्च आपरोक्षोज्झितिर्भवेत् । क्वचित्क्वचित्सरस्वत्यामंशावतरणेष्विति' शक्तिविवेके ॥ 'अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराणि वा एतानी'ति च श्रुतिः । 'श्रुतिभिस्तनितत्वात्तु स्तनयित्नुर्हरिः स्मृतः । अभ्रं भूतानि भरणाच्छ्रीर्वायुर्भरतः स्मृतः । विद्युत्तु भारती प्रोक्ता एत एवाशरीरिणः । व्यत्यासेनापि नाम स्यादेतेषां महतां सदे'त्यभयनिरुक्ते ॥ १७ ॥ '[18]विष्णोर्वायोरनन्तस्य त्रिभिरंशैर्नरः स्मृतः । सेन्द्रैश्चतुर्भिः पार्थस्तु द्वाभ्यां तु बललक्ष्मणावि'त्यंशविवेके ॥ १८ ॥ [19]लोके तत्त्वे च विचक्षणाः । 'पारोक्ष्येणैव तत्त्वं तु लोकं चापि विदन्ति ये । तेऽपि सत्स्नेहनिर्मुक्तास्तमो यान्ति विनिश्चयात् । आपरोक्ष्यान्न च ज्ञानं तेषामुत्पाद्यते क्वचिदि'ति षाड्गुण्ये ॥ १९ ॥ [30]केवलात्मनः शरीरमात्रपरिग्रहस्य ॥ ॥ ३० ॥ [38]परार्थैकान्तसम्भवम् । आत्मनो वृद्धिश्च परार्थेति । 'सज्जनार्थेऽनुमन्येत ऐहिकीं वृद्धिमात्मनः । पारत्रिकीमैहिकीं च प्रीतये गुरुदेवयोः । देवतानां च सर्वेषां स्वोत्तमानां च सर्वश'इति च ॥ ३८ ॥ '[42]जीवान्तर्यामको विष्णुरात्मनामा समीरितः । तस्य तु ब्रह्मरूपत्वाद्बहिरन्तस्तथैव च । पश्येदाकाशवद्व्याप्तिमसङ्गत्वं च

मायये मे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ १७ ॥ तस्माद्भवन्तमनवद्यमनन्तपारं सर्वज्ञमीश्वरमखण्डविकुण्ठधिष्ण्यम् । निर्विण्णधीरहमहर्वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये ॥ १८ ॥ श्री भगवानुवाच— प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः । समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम् । ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ ३० ॥ शश्वत्परार्थसर्वेहां परार्थैकान्तसम्भवम् । साधु शिक्षेत भूमेश्च अनुशिक्षं व्रतान्तरम् ॥३८॥ अन्तर्बहिश्च स्थिरजङ्गमेषु ब्रह्मात्मभावेन समन्वयेन । व्याप्त्या व्यवच्छेद-

SGDF
Sri Gangeshwari Digital Foundation

भेदोऽपि न विष्णोः क्वचिदिष्यते। पारमार्थ्येन नास्त्येव तदन्यत्तद्वशं यतः। अनाद्यनन्तकालेषु विद्यमानमपि ध्रुवम्। अतो मायामयं प्राहुः सर्वं तद्वशगं यत' इति मायावैभवे॥ 'स्वाधीनं सदिति प्रोक्तं पराधीनमसत्स्मृतम्। अविद्यमानमेतस्माज्जगदाहुर्विपश्चितः। अनाद्यनन्तकालेषु विद्यमानमपि ध्रुवम्। अस्वातन्त्र्यात्तु नास्त्येवेत्येवं वाच्यं जगत्सदा। सदा वृत्तेर्विद्यमानमिति ब्रूयाद्यदि क्वचित्। तथापि नाशवद्धीदं प्रवाहाद्ध्यस्य नित्यता। अतो निवर्त्यमित्याहुः प्रपञ्चो ह्यस्ति यद्यपि। विष्णोरिच्छावशत्वाच्च मायामात्रमिति स्फुटम्। परमार्थं त्वेकमेव स्वातन्त्र्याद्विष्णुमव्ययम्। यदि कल्पयतीदं स स एव विनिवर्तयेत्। विष्णुस्तस्मात्तद्वशत्वान्नास्तीति द्वैतमुच्यते। स्वातन्त्र्येण हरौ ज्ञाते पराधीनत्वनिश्चयात्। इत्याहुरुपदेष्टार आचार्यास्तत्त्ववेदिनः॥ यथैव राजन्विज्ञाते नान्योऽस्तीति स्फुटं वचः। स्वातन्त्र्यात्पारतन्त्र्याच्च तद्भृत्यादिषु सत्स्वपि। यथैकछत्रवांश्चैव एकवीर इतीव च। तथैव सर्वप्राधान्याददद्वितीयो हरिः स्मृतः। एवं मुक्ता विजानन्ति सायुज्यं प्रापिता विभोः। अनन्तकालं पश्यन्तो जगदेतच्चराचरम्। तस्यैतस्य ह्यविज्ञानात्केवलभ्रान्तिरूपकम्। जगदुक्त्वा तमो यान्ति ईशितव्येशशापत' इति च॥ 'पुत्रा मे यदि विद्यन्ते मरिष्यन्त्येव ते ध्रुवम्। यदि राज्यं करोत्येष नश्यत्येतदसंशयमि'ति धृतराष्ट्रवचनात्। 'प्रपञ्चो यदि विद्येते'त्यादि। 'यदिशब्दस्त्ववस्तुत्वे चास्वातन्त्र्ये च संशये। अवस्तुशब्दश्चाशक्ते ह्यल्पशक्तौ च कीर्त्यत' इति शब्दनिर्णये॥ ७॥
'[34]भगवद्भार्यतायोग्याः काश्चिदप्सरसःस्त्रियः। रमाऽऽवेशात्कदाचित्स्युस्तास्वेका पिङ्गलाऽभवत्। तदन्यासां महान्दोषो भगवद्भर्तृतास्मृताविʼति स्वाभाव्ये॥३४॥ इति एकादशतात्पर्ये अष्टमोऽध्यायः॥८॥

तमस्यग्नौ पतङ्गवत्॥७॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम्। तं विक्रीयात्मनैवाहं रेमेऽनेन यथा रमा॥३४॥ सन्तुष्टा श्रद्दधत्येतद्यथालाभेन जीवती। विहराम्यमुनैवाहमात्मना रमणेन वै॥ ३९॥

SGDF
Sri Gargeshwari Digital Foundation

नवमोऽध्यायः

'[10]असज्जनैस्तु संवासो न कर्तव्यः कथञ्चन। यावद्यावच्च बहुभिः सज्जनैः स तु मुक्तिद'इति षाड्गुण्ये ॥ १० ॥ '[12]बाह्यं मनो विलीनं स्यान्मुक्तौ चिन्मात्रकं मनः। तेनैवानुभवेत्सर्वं स्वात्माभिन्नेन मुक्तिद'-इति मुक्तितत्त्वे ॥१२॥ '[17-18]कालप्रकृतिजीवादौ लयेऽसत्यप्रवर्तनात्। तन्निमित्तस्य कार्यस्य विष्णुरेक इतीर्यते। स हि कालादिकं सर्वं वर्तयत्यमितद्युतिरि'ति तत्त्वलये ॥ 'प्रकृतिश्च गुणाश्चैव शक्यत्वाच्छक्तयः स्मृताः। विष्णोः स्वरूपभूता तु शकनाच्छक्तिरुच्यत'इति शक्तिविवेके ॥ १७, १८ ॥ '[22]भयादपि हरिं भक्त्या चिन्तयंस्तत्स्वरूपताम्। पेशस्कारिवदायाति द्विषन् द्वेषसरूपताम्। सुखरूपस्य हि द्वेषो दुःखरूप इतीर्यते। तस्माद्दुःखं सदा याति द्वेषवान्पुरुषोत्तमे। नृसिंहद्वेषतो दुःखं रक्षोरूपेण रावणः। अगाच्च रामविद्वेषाच्छिशुपालस्तथैव च। ततो भक्त्या परं यातो द्वेषरूपस्त्वधोगतिम्। तस्मात्सर्वगुणोद्रेकिविद्वेषात्सर्वदोषवान्। भवेदिति सरूपत्वं द्वेषादेः पुरुषस्य ही'ति भागवततन्त्रे ॥ 'तं यथा यथोपासते तदेव भवति'। 'तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव

नवमोऽध्यायः

वासो बहूनां कलहो भवेद्वार्ता द्वयोरपि। एक एव चरेत्तस्मात् कुमार्या इव कङ्कणः ॥ १० ॥ यस्मिन् मनो लब्धपदं यदेतच्छनैः शनैर्मुञ्चति कर्मरेणून्। सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिन्धनम् ॥ १२ ॥ एको नारायणो देवः पूर्वसृष्टं स्वमायया। संहृत्य कालकलया कल्पान्त इदमीश्वरः ॥१६॥ एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः। कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥ १७ ॥ सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः। परावराणां परम आस्ते कैवल्यसंज्ञितः ॥ १८ ॥ यत्र यत्र मनो देही धारयेत्सकलं धिया। स्नेहाद्द्वेषा-

SGDF
Sri Gargeshwari Digital Foundation

प्रश्वसित्यभूरित्यसुरास्ते ह पराबभूवुरि'त्यादि च ॥ २२ ॥ '[23]सत्य-प्यत्यल्पविद्वेषे भोजनं दास्यतीति तु। स्नेहबाहुल्यतः कीटः पेशस्कारिसमो भवेत्। द्वेषे सर्वात्मना नष्टे स्नेहे चैव विवर्धति। सरूपता तदैव स्यात्कीटस्यैवं हरेरपि। अत्यल्पोऽपि हरेर्द्वेषः स्नेहस्यानुदयङ्करः। सोऽयं विशेषो नान्यस्य फलदाता च केशवः। न हि पेशस्कृतः किञ्चित्फलदातृत्वमिष्यते। स्वातन्त्र्याद्विद्विषां चैव केशवो न सुखप्रद'इति स्वातन्त्र्यविवेके ॥ २३ ॥ [25]सत्त्वनिधनः सत्त्वं निधीयतेऽस्मिन्परमेश्वर इति। 'सततमतिशयेनोच्चैरर्करूप'इति सततात्युदर्को भगवान् ॥ २५ ॥ [26]बीजार्थमारोहणादिकं कुर्वन्निति ॥ २६ ॥ '[31]एकस्मात्तु गुरोर्ज्ञानं जायते नैव कस्यचित्। एकस्मादेव जायेत योग्याद्ब्रह्मपदस्य तु। स्वयं चोपदिशेज्ज्ञानं वैरिञ्चिपदयोगिनि। अनुग्रहात्तेन चापि ज्ञानं दत्वा विमुक्तिदः। ज्ञानं प्राप्य बहुभ्योऽपि नर्ते मुक्तिश्चतुर्मुखात्। ज्ञानमप्राप्य तेषां तु ज्ञानदो विष्णुरेव ही'ति गुरुविवेके ॥ ३१ ॥ इति एकादशतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

द्भयाद्वाऽपि याति तत्तत्सरूपताम् ॥ २२ ॥ कीटः पेशस्कृतं ध्यायन् कुड्यान्तेन प्रवेशितः। याति तत्साम्यतां राजन् पूर्वरूपमसन्त्यजन् ॥२३॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः। स्वात्मोपशिक्षितां बुद्धिं श्रृणु मे वदतः प्रभो ॥ २४ ॥ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्वनिधनं सततात्युदर्कम्। तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसङ्गः ॥ २५ ॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान् पुष्णाति यः प्रियचिकीर्षितमावितन्वन्। सोऽन्ते सकृच्छ्रम-वरुद्धमनाः स्वदेहं सृष्ट्वा स्वबीजमवसीदति वृक्षधर्मा ॥ २६ ॥ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलम्। ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ३१ ॥

SGDF
Sri Gargeshwari Digital Foundation

दशमोऽध्यायः

[3]बुद्धिगुणैः कामक्रोधादिभिरभेदो विफलः । 'वस्तुस्थिते-रन्यथात्वं नानात्वमिति कीर्तितम् । ज्ञानस्यैव तु नानात्वान्न स्यात्कामाद्यहंमतिः ॥ कामादिषु स्वधीस्थेषु केवलं जीवसंस्थितिः । इति बुद्धिरभेदः स्यात्स न कार्यः कथञ्चन ॥ अदुष्टकामश्चिद्रूपो जीवाभिन्नः स्वरूपतः । दुष्टकामो मनोधर्मस्तस्माद्धेयः सदैव स' इति विवेके ॥३॥ '[4]निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमि'ति भारते ॥ ४ ॥ '[5]मामेव नित्यं ध्यायेद्यो मदात्मा स प्रकीर्तित'इति च ॥ ५ ॥ '[11]अदेहधर्मवान्विष्णुर्देहधर्मवदीर्यते । जीवस्त्वदेहधर्माऽपि परतो देहधर्मवान् । स्वयं त्वनभिमानः सन्नज्ञानामेव दर्शयेत् । विष्णुर्जीवस्त्वभीमानी यावद्विष्णुपदं व्रजेदि'ति विष्णुसंहितायाम् ॥ अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विह भण्यते । तस्मादेकं परं ब्रह्म वस्तुशब्दोदितं सदे'ति लक्षणे ॥११॥ '[13]पिशाचवत्स्थिता माया तूच्यते जीवगा सदा । दह्यन्ते तद्गुणाः सर्वे सा च प्रातिस्विकी नर'इति वैभाव्ये ॥ एतच्छब्देन दुःखादिरपरोक्षतयोच्यते । 'क्वचिद्विश्वं क्वचिद्ब्रह्म क्वचिन्निन्द्यमुदीर्यत'इति तन्त्रनिरुक्ते । 'बाह्यान्तः-

---

दशमोऽध्यायः

सुप्तस्य विषयालोको ध्यायतो वा मनोरथः । नानात्मकत्वाद्विफलस्तथा भेदोऽन्यधीगुणैः ॥ ३ ॥ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् । जिज्ञासायां सम्प्रवृत्तो नाद्रियेत्कर्मचोदनाम् ॥ ४ ॥ यमानभीक्ष्णं सेवेत नियमान् मत्परः क्वचित् । मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकम् ॥ ५ ॥ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान् । अन्तःप्रविष्ट आधत्ते एवं देहगुणान् परः ॥ ९ ॥ तस्माज्जिज्ञासयाऽऽत्मानमात्मस्थं केवलं परम् । सङ्गम्य निरसेदस्य वस्तुबुद्धिं यथाक्रमम् ॥ ११ ॥ वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसम्प्रसूतिम् । गुणांश्च सन्दह्य

SGDF
Sri Gangadharan Digital Foundation

नित्यश'इति तन्त्रभागवते ॥ ४२ ॥ '[44]गुणान्जीवस्य चेष्टव्यान्सिद्धान्विष्णोर्गुणांस्तथा। तत्तदृष्ट्या विचिन्वीत पृथगेव सुधीः सदे'ति लोकतत्त्वे। 'मधुनाम सुखं विन्द्यान्माधुर्यं सुखहेतुता। सुखे रतिर्वा सम्प्रोक्ता शब्दतत्त्वविचक्षणैरि'ति शब्दनिर्णये ॥ ४४ ॥ [45]दूरत एव भजनीयः। 'पराभवो धर्षणः स्यादवज्ञानमथापि वा। न तत्सत्सु सदा कुर्यात्सह शय्यासनं न चे'ति षाड्गुण्ये ॥ ४५ ॥ '[46-47]जीवस्य छन्नतां शिक्षेत्प्रविष्टत्वं परात्मनः। तत्तद्गुणविडम्बं च वह्नेः सर्वमथापि वा। अल्पदारौ यथाऽल्पोऽग्निरेवमल्पशरीरगः। दृश्यते परमात्माऽपि स्थूलः स्थूलशरीरग' इति वैभवे ॥ ४६, ४७ ॥ '[49]अवयव्यवयवानां च गुणानां गुणिनस्तथा। शक्तिशक्तिमतोश्चैव क्रियायास्तद्वतस्तथा। स्वरूपांशांशिनोश्चैव नित्याभेदो जनार्दने। जीवस्वरूपेषु तथा तथैव प्रकृतावपि। चिद्रूपायामतोऽनंशा अगुणा अक्रिया इति। हीना अवयवैश्चेति कथ्यन्ते तेऽत्यभेदतः। पृथग्गुणाद्यभावाच्च नित्यत्वादुभयोरपि। विष्णोरचिन्त्यशक्तेश्च सर्वं सम्भवति ध्रुवम्। क्रियादेरपि नित्यत्वं व्यक्त्यव्यक्तिविशेषणम्। भावाभावविशेषेण व्यवहारश्च तादृशः। विशेषस्य विशिष्टस्याप्यभेदस्तद्वदेव तु। सर्वं चाचिन्त्यशक्तित्वाद्युज्यते परमेश्वरे। तच्छक्त्यैव तु जीवेषु चिद्रूपप्रकृतावपि। भेदाभेदौ तदन्यत्र ह्युभयोरपि दर्शनात्। कार्यकारणयोश्चापि निमित्तं कारणं

मसङ्गमात्मनो मुनिर्नभोवद्धिततस्य भावयेत् ॥ ४२ ॥ तेजोऽम्ब्वन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः। न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ॥४३॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थवन्नृणाम्। मुनिः पुनात्यघान्मित्रमीक्षणस्पर्शकीर्तनैः ॥ ४४ ॥ तेजस्वी तपसा दीप्तो दुर्धर्षो दूरभाजनः। सर्वभक्षोऽपि युक्तात्मा नादत्ते पापमग्निवत् ॥ ४५ ॥ क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छताम्। भुङ्क्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभम् ॥ ४६ ॥ स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः। प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवैधसि ॥४७॥ कालनद्योघवेगेन भूतानां

SGDF
Sri Gargeshwari Digital Foundation

विने'ति ब्रह्मतर्के । 'आत्मनि चैवं विचित्राश्च हि' । 'सर्वोपेता च तद्दर्शनात्' । 'सर्वधर्मोपपत्तेश्च' । 'स्वाभाविकी ज्ञानबलक्रिया च' । 'यत्रासप्तऋषीन्पर एकमाहुरि'त्यादेश्च ॥ 'विना दोषांच्छ्रुतमद्धाऽवगम्यं तथा स्मृतं परमे सत्यरूपम् । नैवासत्यं क्वचिदस्मिन्परेशे सर्वं युक्तं पूर्णशक्तेः सदैवे'ति च विश्वम्भरश्रुतिः । तस्मादेकस्मिन्नपि शरीरे भेदाभेदात्प्रभवाप्ययौ युज्येते । न च विरोधः । स्थूलसूक्ष्मवत् । आपेक्षिकमत्रापि युज्यते ॥४९॥ '[51]बुद्धिसंस्थस्त्वात्मभेदो व्यक्तस्थो जीव उच्यते । तेनैव सह संस्थानात्परात्मा स्थूलबुद्धिभिः । जीववल्लक्ष्यते विष्णुर्यथैवाम्बुस्थितार्कवत् । परमार्कः पारिमाण्याद्वर्तुलत्वादिना तथा । अर्कस्वरूपानभिज्ञैः शिरःपादादिवर्जितः । अचेतनश्च कल्प्येत तत्तेजोमात्रदर्शिभिः । सूर्यदेहादिभिन्नं हि तेजोमण्डलमेव तु । दृश्यते स्थूलमतिभिरेवमेव जनार्दन'इति प्रभासके ॥ ५१ ॥ इति एकादशतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

'[7]महतां वनिताकामः पतत्यन्धे तमस्यलम् । अन्यत्र निरयं याति दुःखवान्स्याद्विपर्यय'इति धर्मसंहितायाम् ॥ 'मोहकारणभूतां तु मायेत्याहुर्मनीषिणः । अविद्यमानं मेत्युक्तं तज्ज्ञापयति यत्स्वयम् । कुत्रचिज्ज्ञानरूपं सल्लाभरूपं च भण्यते । मयं प्राचुर्यमुद्दिष्टं माया स्यात्प्रचुरेत्यपी'ति तन्त्रनिरुक्ते ॥ 'स्वतन्त्रं परमार्थाख्यं स्वतन्त्रैका हरेर्मतिः । सैव माया समुद्दिष्टा मुख्यतस्तत्स्वरूपिका । मतिमन्मति-

---

प्रभवाप्ययौ । नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषाम् ॥ ४९ ॥ बुद्धिसंस्थेन भेदेन व्यक्तस्थ इव तद्गतः । लक्ष्यते स्थूलमतिभिरात्मा चाम्बुस्थितार्कवत् ॥ ५१ ॥

अष्टमोऽध्यायः

दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः । प्रलोभितः पतत्यन्धे-

SGDF
Sri Gangeshwari Digital Foundation

करणाज्जन्यं ज्ञानं नश्यति मुक्तिगे । स्वरूपज्ञानतो भोगान्मुक्तौ भुङ्क्ते यथेष्टत'इति मुक्तितत्त्वे ॥ १३ ॥ '[14-15]देहापेक्षमनित्यत्वं जीवानां जननं तथा । स्वतस्त्वजाश्च नित्याश्च बहवः सुखरूपिणः । उत्तमा जीवसङ्घास्तु नीचा वै नित्यदुःखिन'इति जीवतत्त्वे ॥ १४, १५ ॥ '[17]स्वाधिकानां वशत्वात्तु परमं सुखमेव तु । तदन्येषां वशे यस्तु किं सुखं तस्य भण्यताम् । स्वाधिकानां वशत्वं च तेषु भक्तिमतः सुखम् । तदन्येषां तु दुःखाय तस्माद्भक्तोऽधिको भवेदि'ति च ॥ १७ ॥ [18]विदुषामपि देहमानिनां यदा न विद्यते सुखं तदा दुःखमूढाना-महङ्कारिणां च किम्वित्यर्थः । 'पुनःशब्दे प्रस्तुतार्थे तथा शब्द उदीर्यत' इति शाब्दे ॥ १८ ॥ [19]ये तु विद्वत्त्वेन प्रसिद्धाः प्राकृतानां तेऽप्यद्धा न विदुर्देहाभिमानिनश्चेत् । दुःखमूढा अधीराऽहङ्कारिणो विशेषतोऽप्यविद्यमानगुणाभिमानिनः ॥ १९ ॥ [31]गुणसंयुक्तः कर्म-फलानि भुङ्क्ते ॥ ३१ ॥ [32-33]यावत्स्याद्गुणवैषम्यमित्यादि य उपासीरंस्ते मुह्यन्ति ॥ ३२, ३३ ॥ [34]असति गुणव्यतिकरे

यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः ॥ १३ ॥ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः । नानात्वमथ नित्यत्वं लोककालागमात्मनाम् ॥ ॥१४॥ मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी तथा । तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥ १५ ॥ एवमप्यत्र सर्वेषां देहिनां देहयोगतः । कालावयवतः सन्ति भावा जन्मादयोऽसकृत् ॥ १६ ॥ तत्रापि कर्मणां कर्तुरस्वातन्त्र्यं च लक्ष्यते । भोक्तुश्च सुखदुःखानां को न्वर्थो विवशं भजेत् ॥ १७ ॥ न देहिनां सुखं किञ्चिद्विद्यते विदुषामपि । तथा च दुःखमूढानां वृथाहङ्कारिणां परम् ॥ १८ ॥ यदि प्राप्तिं विघातं च जानन्ति सुखदुःखयोः । तेऽप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥१९॥ अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः । अमानी मानदः कल्पो मैत्रः कारुणिकः कविः ॥ ३१ ॥ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः । नानात्वमात्मनो यावत्पारतन्त्र्यं तदैव हि ॥ ३२ ॥ यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयं । य एतत्समुपासीरंस्ते मुह्यन्ति शुचाऽर्पिताः ॥३३॥

SGDF
Sri Gargeshwari Digital Foundation

कालादिना मानं मामेवाहुरिति स्वसिद्धान्तः। 'कालः सर्वगुणोद्रेकादाप्तत्वादात्मनामकः। आगमोऽवगतेरस्य लोको ज्ञानस्वरूपतः। स्ववशत्वात्स्वभावोऽयं धारणाद्धर्म इत्यपि। उपासते सदा मुक्ताः परानन्दैकभागिनः। तदेतत्तत्त्वमज्ञात्वा प्राहुर्दुर्मतयः परे। यावत्तु गुणवैषम्यं तावन्नानात्वमात्मनः। भेदबुद्धिस्तु यावत्स्यात्तावदीश्वरतन्त्रता। यावदीश्वरतन्त्रत्वं तावत्तस्माद्भयं भवेत्। उपासते य एवं तु नित्यशोके पतन्ति ते। महातमस्यनानन्दे तस्मान्नैवं विचिन्तयेत्। तस्मान्नित्यं तु नानात्वं जीवानामीशतन्त्रता। स्वाधिकानां वशत्वं च मुक्तावपि सदेष्यते। एवं ज्ञात्वा विमुच्यन्ते परानन्दं व्रजन्ति च' इति तन्त्रभागवते ॥ ३४ ॥ [35]अदेही परमात्मा। बध्यते चेत्कथं बध्यते ॥ ३५ ॥ [37]नित्यमुक्तो नित्यबद्ध इत्येकजीववादिमतानुसारेण चोदयति। 'शिष्योऽपि पूर्वपक्षस्थस्तदेवात्ममतं ब्रुवन्। नैव दुष्यत्यसत्येन स्थिरत्वार्थं हि तद्वच' इति विक्षेपे। 'न मे मोक्षो न बन्धनम्'। 'एकस्यैव ममांशस्य जीवस्यैवं महामते। बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरत्। अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि त' इत्यादिपरिहारात् ॥३७॥ इति एकादशतात्पर्ये दशमोऽध्यायः ॥१०॥

एकादशोऽध्यायः

[1]मे गुणतः। मद्वशसत्वादेः। अमायत्वान्निर्गुणोऽहं बन्धमोक्षौ

काल आत्मागमो लोकः स्वभावो धर्म एव च। इति मां बहुधा प्राहुर्गुणव्यतिकरेऽसति ॥३४॥ उद्धव उवाच—गुणेषु वर्त्तमानोऽपि देहजेष्वनपावृतः। गुणैर्न बध्यतेऽदेही बध्यते वा कथं विभो ॥ ३५ ॥ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर। नित्यमुक्तो नित्यबद्ध एक एवेति मे मतिः॥ ॥ ३७ ॥

एकादशोऽध्यायः

श्रीभगवानुवाच—बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।

SGDF
Sri Gargeshwari Digital Foundation

न चापि मे । मदधीनस्य जीवस्य बन्धमोक्षौ सदैव त्वि'ति स्वाभाव्ये ॥१॥ '[2]स्वप्नोऽयमित्यविज्ञानात्स्वप्ने दुःखमुपाश्नुते । निज-स्वरूपानुभवराहित्यात्तद्वदेव तु । जाग्रद्दुःखमपि प्रोक्तं विष्णुतत्त्वं न पश्यतः । तस्मात्तदस्वभावत्वात्सदप्येतदवास्तवमि'ति लोकसंहितायाम् ॥ ॥२॥ '[3]विद्याऽविद्ये मम तनू प्रतिमावत्सदोदिते । सदा तद्व्यतिरिक्तस्य नित्यज्ञानसुखात्मनः । मदिच्छावशगे नित्यमविद्यानिर्मिता गुणाः । सत्वाद्या मदधीनत्वादविद्याया न मे गुणाः । अविद्या चैव विद्या च गुणाः सत्वादिका अपि । देहोत्पत्तिः सुखं दुःखं सर्वमेतन्मदिच्छया । अतोऽहं बन्धमोक्षाभ्यां रहितो नित्यमेव तु । मुक्तशब्दोदितो बन्ध-राहित्यान्न विमोकत'इति कालसंहितायाम् । 'श्रीस्तु विद्या समुद्दिष्टा दुर्गाऽविद्या प्रकीर्तिता । ते त्वनादी हरेरिच्छानियते सर्वदैव त्वि'ति मायावैभवे ॥ '[4]भिन्नांशस्यैव जीवस्य बन्धमोक्षौ न मे क्वचित् । अभिन्नांशास्तु मत्स्याद्यास्तेजसः कालवह्निवत् । जीवा भिन्नांशकास्तत्र तेजसः प्रतिबिम्बवदि'ति वैलक्षण्ये ॥ '[5]मुक्तस्य तु न मे मोक्षो बन्धाभावात्कथश्चन । मुक्त इत्यपि नामैतद्दीप्यतेऽसौ दिवाकरः । इति वद्बन्धराहित्यान्न तु वृक्षादिदीप्तिवत् । कादाचित्कतया वाच्यं बन्धाभावादमोक्षतः । जीवस्य बन्धमोक्षस्तु मत्प्रसादात्कदाचने'ति तत्त्वोदये । मुक्तस्य विष्णोः । 'नित्यशुद्धबुद्धमुक्तसत्यसुखाद्वय-प्रत्यगेकपूर्णइत्यतः पदान्वयादि'त्यादिवचनात् । बद्धो जीवः । 'बद्धा जीवा इमे सर्वे पूर्वबन्धसमन्वयात् । नित्यमुक्तत्वतो विष्णुर्मुक्तनामा

गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥ १ ॥ शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया । स्वप्ने यथाऽऽत्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥२॥ विद्याऽविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । मोक्षबन्ध-करी आद्ये मायया मे विनिर्मिते ॥ ३ ॥ एकस्यैव ममांशस्य जीवस्यैवं महामते । बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरत् ॥ ४ ॥ अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते । विरुद्धधर्मिणोस्तात स्थितयोरेक-

SGDF
Sri Gangeshwari Digital Foundation

सदोदितः । अबद्धत्वादमोक्षोऽपि दीप्यतेऽसौ रविर्यथे'ति ब्रह्मसंहितायाम् ॥ ३ ॥ '[6-7]अनत्तृत्वं हरेर्दुःखानत्तृत्वादुच्यते सदा । विषयान्विनापि पूर्णत्वात्स्वरूपानन्दभोगिनः । सुखमत्त्येव हि सदा सर्वत्रापि स्थितं विभुः । स्वादोरदनवद्भ्यत्ति जीवोऽस्वाद्वपि यत्सदा । अनारतं पारवश्यात्स्वाद्वत्तीति ततः श्रुति'रिति भोगनिर्णये ॥ अस्वादु स्वादुवद्भ्यत्ति जीवो नैवं जनार्दनः । अतो नात्तीतिवचनमश्नतोऽपि सुखं सदे'ति परभोगे । साशनानशनत्वेन नरदेवौ यथोदितौ । अत्तिं विनाऽप्यदौर्बल्यात्तथानत्तिर्हरेर्भुज' इति स्वाभाव्ये । तदेव प्रोक्तं निरन्नोऽपि बलेन भूयानिति । स्वयं त्वत्त्येव तथापि नादननिबन्धनं तस्य बलमित्यर्थः । 'यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति । इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश । यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे । तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेदे'त्यादिवाक्यशेषात् । वृक्षे स्थित्वा मध्वदः सुपर्णा यस्मिन्नश्नन्ति । सुपर्णे निविशन्ते तदाधारत्वेन सुवते च । तस्यैव सुपर्णस्य स्वादु पिप्पलं अन्यस्तु स्वादुवदश्नाति न स्वादु । यावत्पितरं परमात्मानं न वेदेत्यर्थः । 'सुपर्णौ द्वौ शरीरस्थौ जीवश्च परमस्तथा । पारवश्यादनाज्जीवस्तत्रात्तीति श्रुतौ श्रुतः । स्ववशेनादनाद्विष्णुर्नात्तीत्यत्रापि संश्रुतः । स एव हि शुभस्यात्ता जीवोऽत्तास्यैव वेदनादि'ति कूर्मसंहितायाम् ॥ 'सर्वं वा अत्तीति तददितेरदितित्वम्' । 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः' । 'अत्ता चराचरग्रहणात्' । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे'त्यादेश्च । 'जीवो मुक्तोऽपि नो जीवान्परमात्मानमेव च । वेत्ति सर्वात्मना

धर्मिणि ॥ ५ ॥ सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे । एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ॥६॥ आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः । योऽविद्य-

SGDF
Sri Gargeshwari Digital Foundation

विष्णुर्वेत्त्येकः पुरुषोत्तमः । तस्य प्रसादतः किञ्चिद्ब्रह्माद्या अपि जानते । अन्यजीवानपेक्ष्यैको जानाति च चतुर्मुखः । सामस्त्येन तदन्ये तु लेशज्ञानाः क्रमात्स्मृता'इति विनिर्णये ॥ 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तपे'त्यादि च । 'अज्ञा जीवास्तु कथ्यन्ते मुक्ता अप्यल्प-वेदनात् । ज्ञइत्येवोच्यते नित्यं सर्ववेत्तृत्वतो हरिरि'ति वैशेष्ये ॥ 'अनाद्यविद्ययाऽन्धत्वं जीवस्य यदि योग्यता । प्रयत्नश्चानुकूलः स्यादन्त-वद्भवति ध्रुवम् । नित्यमेवान्यथान्धत्वमयोग्या मानुषादयः । बद्धत्वं सर्वजीवानां नियमान्नित्यमेव तु । बद्धत्वं विष्ण्वधीनत्वमन्धत्वं तद-दर्शनम् । अतः क्वचिदनित्यत्वमन्धताया भविष्यति । मुक्तस्यापि तु बद्धत्वमस्ति यत्स हरेर्वशः । मुक्ताख्या दुःखमोक्षात्स्याद्बद्धाख्या हर्यधीनता । नित्यबद्धा अपि ततो मुक्ता दुःखविमोक्षतः । नित्य-मुक्तस्त्वेक एव हरिर्नारायणः प्रभुः । स्वतन्त्रत्वात्स्वतन्त्रत्वं तस्यैकस्य न चापर' इति मुक्तविवेके ॥ 'शतं सहस्राणि चतुर्दशेह परा गति-र्जीवगणस्य दैत्य । आरोहणं तत्कृतमेव विद्धि स्थानं तथा निःसरणं च तेषाम्' ॥ 'कृष्णो मुक्तैरिज्यते वीतमोहैः' । 'मुक्तानां परमा गतिरि'ति भारते ॥ 'कलाः पञ्चदश त्यक्त्वा श्वेतद्वीपनिवासिनाम् । मुक्ताख्या विष्ण्वधीनास्ते स्वाधिकानां वशे स्थिताः । न चास्मादधिकं किञ्चित्सुखमस्ति हरिं विना । नित्यमुक्तः स एवैकः स्वतन्त्रः स यतः सदे'ति माहात्म्ये ॥ ६, ७ ॥ '[8-9]शरीरस्थोऽपि विद्वत्त्वान्न विष्णु-र्बध्यते क्वचित् । अविद्वत्त्वात्तु तत्रैव देहे जीवस्तु बध्यते । स्वप्न-दृग्वदिमे जीवा हरिः स्वप्नोत्थितो यथा । सदा तमोविहीनोऽपि ज्ञापनार्थमुदीर्यत'इति विवेके । गुणैरपि गुणेषु अप्रधानैर्जीवैरप्रधानेषु

याऽन्धः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥७॥ देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः । अदेहोऽपि देहस्थः कुमतिः स्वप्न-दृग्यथा ॥ ८ ॥ इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च । गृह्यमाणेष्वहं

SGDF
Sri Gangeshwar Digital Foundation

विषयेषु । 'आत्मनो वशगैर्जीवैरात्मनो वशगेषु च । दुःखेषु गृह्यमाणेषु मन आदिभिरिन्द्रियैः । अहं दुःखीति नैवेशस्त्वहङ्कुर्यात्परः पुमान् । जीवगं त्वेव तद्दुःखं विष्णुः पश्यति सर्वदा । अतो न दुःखभाग्विष्णुः स्वातन्त्र्यात्पुरुषोत्तमः । पारतन्त्र्यादहं दुःखीत्येवं जीवः प्रपश्यति । तस्मात्स दुःखभागुक्तो यावदीशः प्रसीदती'ति स्वातन्त्र्ये ॥ ८, ९ ॥ [10]गुणभाव्येन कर्मणा गुणभूतः अस्वतन्त्रोऽहमस्मिन्कर्मणीति भावनीयेन । 'अस्वतन्त्रः स्वतन्त्रोऽस्मीत्येवं जीवः प्रभावयन् । बध्यते हीशकोपेन राजभावेन भृत्यवदि'ति च ॥ १० ॥ [11]एवं विरक्तः शयने । एवमस्वातन्त्र्येण नित्यबद्धोऽपि एवमात्मनोः स्वातन्त्र्यपारतन्त्र्ययोर्विद्वान् जीवोऽप्यविद्वज्जीववन्न बध्यते । एवं विद्वानित्यन्वयः । 'नित्यबद्धोऽपि जीवो य आत्मनो नित्यबद्धताम् । विष्णुना नित्यमुक्तत्वं तस्य वेत्ति स मुच्यते ॥ तदधीनत्वबन्धे तु विद्यमानेऽप्यदुःखभाक् । देहस्थोऽपि न दुःखी स्यादन्यवत्किमु मुक्तिग' इति प्राथम्ये ॥ 'नानात्वमिति वै मिथ्याज्ञानं कुत्रचिदुच्यते । वस्तुयाथात्म्यतोऽन्यत्वाज्ज्ञानस्योज्झो विवक्षित'इति वाह्लभ्ये ॥ ११ ॥ '[16]दोषश्चैव गुणश्चोभावीशतन्त्रौ न मे वशौ । इति जानन्न दोषः स्याद्वर्जितोऽल्पगुणेन चे'ति प्राथम्ये ॥१६॥ '[18]स्थितिशब्देन नियमः क्वचिज्जीवनमुच्यते । उत्थितत्वं क्वचिच्चैव

कुर्यान्न विद्वान्यस्त्वविक्रियः ॥ ९ ॥ दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा । वर्तमानोऽबुधस्तत्र कर्ताऽस्मीति निबध्यते ॥१०॥ एवं विरक्तः शयन आसनाटनमज्जने । दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ ११ ॥ न तथा बध्यते विद्वांस्तत्रतत्राददन् गुणान् । प्रकृतिस्थोऽप्यसंसक्तो यथा खं सवितानिलः ॥१२॥ वैशारद्येक्षया सङ्गशितया च्छिन्नसंशयः । प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥ १३ ॥ न स्तुवीत न निन्देत कुर्वतः साध्वसाधु वा । वदतो गुणदोषाभ्यां वर्जितः समदृङ् मुनिः ॥१६॥ शब्दब्रह्मणि निष्णातो न निष्णीयात् परे यदि । श्रमस्तस्य श्रमफलो

SGDF
Sri Gangeshwari Digital Foundation

क्वचिद्गतिविरोधिते'ति शब्दनिर्णये ॥ १८ ॥ '[20]दुग्धदोहां तु गां रक्षेत्क्षीरमात्रप्रयोजनः । यथा तद्वद्धरेरन्यवाचोधारणमिष्यत'इति हरिवंशेषु ॥ २० ॥ [21]अर्थादन्यथात्वेन मनसः परिवर्तनं नानात्वभ्रमः । 'जीवस्येशत्वविज्ञानं जीवानामेकता तथा । ईशस्य बहुता ज्ञानमीशस्यानीशता तथा । जगतोऽसत्यताज्ञानं नानात्वभ्रम उच्यत'इति विवेके ॥ ॥ २१ ॥ [28]स्वेच्छोपात्तपृथग्वपुः । वसुदेवादिशरीरं स्वेच्छया येन स्वीकृतमिति । 'नित्यानन्दशरीरोऽपि वसुदेवादिदेहगः । प्रदर्शयेज्जनिं स्वस्य नित्यं देहविवर्जितः । वसुदेवादिदेहेषु प्रवेशस्तस्य भण्यते । देहोपादानमिति तु न ह्यन्यो देह इष्यते । अन्याभिमतदेहेषु प्रविष्टः सर्वदा हरिः । नान्यानभिमतो देहो विष्णोरस्ति कदाचन । अतोऽशरीरो भगवान्पुत्रताभिमतिस्तु या । वसुदेवादिकानां तु सैव मिथ्यामतिर्भवेत् । अन्याहंभावयुग्देह एवासौ हरिरास्थितः । न तदन्येषु देहेषु क्वचित्तस्य प्रवेशनम् । मम पुत्रस्त्वयमिति भ्रमणाय यदा हरेः । वसुदेवादिदेहेषु तनूपात्तिस्तु सा गतिः । अनुपात्तशरीरस्य तनूपात्तिरितीष्यते । तद्देहं पितृदेहत्वे उपादत्ते यतो हरिरि'ति प्रकाशसंहितायाम् ॥ २८ ॥ [33]ज्ञात्वाज्ञात्वेति वीप्सा । 'ज्ञात्वाऽपि मम माहात्म्यं तत्रोत्सुकतया पुनः । विशेषाच्च विशेषेण ज्ञात्वा मामश्नुतेऽ-

---

ह्यधेनुमिव रक्षतः ॥ १८ ॥ गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजाश्च । वित्तन्त्वतीर्थीकृतमङ्ग वाचं हीनां च यो रक्षति दुःखदुःखी ॥ १९ ॥ यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवप्राणनिरोधमस्य । लीलावतारेहितकर्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ॥२०॥ एवं जिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि । उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥ २१ ॥ त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः । अवतीर्णोऽसि भगवन् स्वेच्छोपात्तपृथग्वपुः ॥२८॥ ज्ञात्वा ज्ञात्वाऽथ ये वै मां यावान्यश्चास्मि यादृशः । भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥ ३३ ॥

SGDF
Sri Gargeshwari Digital Foundation

धिकमि'ति विज्ञाने ॥ ३३ ॥ '[44]सर्वदेवोत्तमो वायुरिति ज्ञानान्न चापरम् । प्रियमस्ति हरेः किञ्चित्तथा वायोर्हरेर्विदः । भारतीवायुलक्ष्मीणामात्मनश्च यथाक्रमम् । आधिक्यज्ञानतो विष्णुः सर्वतः सम्प्रसीदती'ति माहात्म्ये ॥ 'वायुर्भीमो भीमनादो महौजाः सर्वेषां च प्राणिनां प्राणभूतः । अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्ट' इति मोक्षधर्मेषु ॥ 'तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरथ पुनर्मृत्युं जयति य एवं वेदे'ति च । 'पञ्चभूतमनोबुद्धिरुद्राणां प्रतिदेहकम् । बाह्यतश्चापि नेतृत्वाद्वायुर्व्यष्टिसमष्टिक' इति प्रभञ्जने ॥४४॥ '[45]स्वात्मनिस्थो हरिः पूज्य आत्मनामाऽशनादिकैः । तत्सम्बन्धादात्मशब्दो जीवे स्यादुपचारत'इत्यात्मसंहितायाम् ॥ ४५ ॥ इति एकादशतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

'[2]सङ्गस्तु गुणसम्प्रीतिर्गुणवत्त्वेऽतिनिश्चयात् । स चेद्धरौ भवेत्तेन मुच्यते नात्र संशयः । अपरोक्षदृशेर्हेतुर्भवेत्स स्याद्यदि क्षमः । अन्यथा सुखभागेव यद्दृशिर्मोक्षकारणमि'ति दर्शने ॥२॥ '[8]ज्ञात्वाऽपि

सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् । भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ॥४२॥ वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया । वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥ ४४ ॥ स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि । क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत माम् ॥ ४५ ॥ धिष्ण्येष्वेतेषु मद्रूपं शङ्खचक्रगदाऽम्बुजैः । युक्तं चतुर्भुजं शान्तं ध्यायन्नर्चेत्समाहितः ॥ ४६ ॥

द्वादशोऽध्यायः

श्री भगवानुवाच—न रोधयति मां योगो न साङ्ख्यं धर्म एव च । न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं च दक्षिणाः ॥ १ ॥ व्रतानि यज्ञाश्छन्दांसि तीर्थानियमा यमाः । यथाऽवरुन्धेन्मत्सङ्गः सर्वदुःखापहो हि माम् ॥ २ ॥ केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये

SGDF
Sri Gurgeshwari Digital Foundation

हरिविद्वेषी तमो याति न संशयः । विशेषरूपस्याज्ञोऽपि गुणवत्त्वेऽतिनिश्चितः । गुणसम्प्रीतिमान्नित्यं तं दृष्ट्वा मुक्तिमेष्यति । अथवा सुखभागेव स्याद्यावद्दर्शनोपग'इति व्यक्ते ॥ ८ ॥ [9]'हरिसङ्गविहीनस्तु हरेर्दर्शनवानपि । न मुच्यतेऽखिलाज्ञोऽपि तमो याति चे निश्चयात् । गुणैरन्यैर्विहीनोऽपि तद्भक्तेष्वपि च क्रमात् । सङ्गवान्सुखभागेव स्याद्गुणैर्मुक्तिमेति वा । स्वभक्तसङ्गहीनस्य व्युत्क्रमात्सङ्गिनोऽपि वा । स्वसङ्गविघ्नकृद्विष्णुस्तत्सङ्गेतेषु तत्र चे'ति सत्सङ्गे ॥ 'गोपिकाद्या दिवं गत्वा हरिं ज्ञात्वा यथातथम् । परं पदं ययुः पूर्वसङ्गादेव शुभोचिता' इति च ॥ 'श्रोतव्यं च श्रुतं चैव वक्तव्यं कार्यमेव च । निवर्त्य च हरेः पूजेत्येवं कुर्यान्न चाक्रमात् । एवं कृत्वा तु संन्यासी सर्वोत्सङ्गाद्धरौ स्मृतः । अन्यथा नैव संन्यासी निष्क्रियोऽपि शिला यथे'ति कर्मविवेके ॥ 'नाहं कर्ता तु सर्वस्य कर्तैको विष्णुरव्ययः । इति वित्त्वा तु संन्यासी नान्यथेति कथञ्चने'ति निवृत्ते ॥ 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वर'इति च ॥९॥ [16]वायौ मुख्यधियेत्युक्त्वा विशेषतो गोपिकाप्रशंसनात्संशयः शृण्वत इति चोदयति ॥ १६ ॥ [17]गोपिका अपि मामापुः किमु वाय्वाद्या इति दर्शयितुं गोपिकाप्रशंसनम् । सर्वैर्गुणैः सर्वोत्तमस्तु वायुरेव । स एव च हिरण्यगर्भ इति दर्शयितुमाह ।

मूढधियो नागाः सिद्धा मामीयुरञ्जसा ॥ ८ ॥ यं न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः । व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ॥९॥ मत्कामा रमणं जारमस्वरूपविदोऽबलाः । ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ॥१३॥ तस्मात्त्वमुद्धवोत्सृज्य चोदितां प्रतिचोदनाम् । प्रवृत्तञ्च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥ १४ ॥ मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यस्मिन्नस्त्यकुतोभयम् ॥ १५ ॥ उद्धव उवाच—संशयः शृण्वतो वाचं तव योगेश्वरेश्वर । न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः ॥१६॥ श्री भगवानुवाच—य एष जीवो विवरप्रसूतिः

SGDF
Sri Gargeshwari Digital Foundation

य एष जीवो विवरप्रसूतिरित्यादि । विशेषेण वराणामहङ्कारादीनामपि प्रसूतिकर्ता । प्राणेन विष्णुना घोषेण वेदात्मिकया प्रकृत्या । मनोमात्रादयश्च हिरण्यगर्भस्य देव्याः परमात्मनश्च व्यक्तिस्थानानीत्युक्तम् । 'प्राणेन घोषेण च सह विवरप्रसूतिर्मनोमयं रूपमुपैती'त्यादिना ॥१७॥ [18]तत्रापि विशेषतो भगवत एव व्यक्तिस्थानमित्याह । यथाऽनल इत्यादिना ॥ १८ ॥ [20]विशेषेण श्लिष्टशक्तिः । अनपगतसामर्थ्यः । यथैकं कलमादिबीजं भूमावुप्तं बह्वङ्कुरं भवति एवं परमात्मानुगृहीतो ब्रह्माऽहङ्कारादिषु बहुधा व्यक्तीभवति । 'सुपर्णशेषरुद्रादिप्रसूतिश्च चतुर्मुखः । सर्वजीवोत्तमो जीवो गुणैर्ज्ञानसुखादिभिः । विष्णुभक्त्यादिभिः सर्वैर्नियमात्सर्वकालिकम् । मुक्तावपि न सन्देहः स हि देवेन विष्णुना । प्राणप्राणेन जगतामीशेन रमया तथा । वेदात्मिक्या च सहितः सूक्ष्मः सन्मनसि स्थितः । वीन्द्रादीनां तु सर्वेषां मात्रावर्णस्वरेषु च । स्थूलरूपी सदा तिष्ठन्नेवं श्रोत्रादिखेषु च । सर्वेषां प्रेरको ह्येको ज्ञानानन्दबलैस्त्रिवृत् । नित्यशक्तिः सर्वगः सन्बहुधेव प्रतीयते । तस्मिन्नोतमिदं सर्वं पटे लक्षणतन्तुवत् । स एव वायुरुद्दिष्टो वायुर्हि ब्रह्मतामगात् । विशेषतो हरेर्व्यक्तिस्थानान्येतानि सर्वशः । मनआदीन्यहङ्कारो ब्रह्मा वेदात्मिका रमा । त्रिगुणात्मिका च सैव श्रीः सैवोक्ता संविदात्मिका । तस्या अपि नियन्तैको विष्णुः सर्वेश्वरेश्वरः । यथा दारुषु सूक्ष्मः सन्मथितोऽग्निः समिध्यते । तथा वेदादिषु हरिर्मथितः सम्प्रदृश्यते । व्यक्तिस्थानान्यथैतानि वेदादीनि हरेर्विदुरि'ति

प्राणेन घोषेण गुहां प्रविष्टः । मनोमयं सूक्ष्ममुपैति रूपं मात्रा स्वरो वर्ण इति स्थविष्ठम् ॥ १७ ॥ यथाऽनलः खेऽनिलबन्धुरुष्माबलेन दारुण्यधिमथ्यमानः । अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी ॥१८॥ एवं गतिः कर्मरतिर्विसर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च । सङ्कल्पविज्ञानमथाभिमानः सूत्रं रजःसत्वतमोविकारः ॥ १९ ॥ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको जगतां यथाऽद्यः । विश्लिष्टशक्तिर्बहुधेव

SGDF
Sri Gargeshwari Digital Foundation

तन्त्रभागवते ॥ 'मनसि व्यक्ततां यामि तस्माद्व्यक्तिर्हि मे मन'इति भारते ॥ २० ॥ '[21]यथैव वस्त्रे दीर्घं च तिर्यक्चापि सुसंस्थिता । तन्तुभिः क्रियमाणैव पद्माद्याकारसंस्थितिः । यथा जीर्णानि वस्त्राणि तन्त्वाधाराणि वा पुनः । कन्थावयवभूतानि तद्वदेतच्चतुर्मुखे । सोऽपि तद्वद्धरौ नित्यं संस्थितः श्रीरपि स्फुटमि'ति प्रातिस्विके ॥ २१ ॥ '[22]जगद्वृक्षस्य बीजे द्वे ब्रह्मा चैव सरस्वती । मूलभूतानि कर्माणि मनो बुद्धिरहङ्कृतिः । नालत्वेन समुद्दिष्टाः खमाद्याः स्कन्धसंज्ञिताः । एकादशेन्द्रियाण्येव शाखास्तु त्रिगुणास्त्वचः । प्रवृत्तं च निवृत्तं च फले अस्य प्रकीर्तिते । पुष्पमैहिकमुद्दिष्टं रसाः शब्दादयस्तयोः । प्रवृत्ताश्च निवृत्ताश्च पक्षिणस्तत्र संस्थिताः । वृक्षस्य पृथिवीवच्छ्रीर्विष्णुराकाशवायुवत् । तस्या अपि सदाधार एवं ज्ञात्वा विमुच्यत'इति निवृत्ते ॥२२॥ '[24]प्राकृतान्तःकरणजं ज्ञानमस्त्रं सृतिच्छिदम् । तदेव तेन संछेद्यं चित्तं प्रकृतिसम्भवम् । तेनैव सह संत्याज्यं नैव पूर्वं कथञ्चन । ज्ञानं प्रकृतिजं चापि मूलनाशे विनश्यति । ततः परं स्वरूपेण ज्ञानेनैव जनार्दनम् । वेत्ति मुक्तस्तथाऽऽत्मानं जीवानन्यांश्च सर्वश'इति माहात्म्ये ॥ २४ ॥ '[22]बीजभूतावपि ह्यस्य ब्रह्मा चैव सरस्वती । न रिष्यतो जगत्सृष्टौ वटवृक्षादिबीजवत् । स्वकार्यतो महान्तौ च गुणतो रूपतस्तथा । पृथिव्युदकवत्तस्माद्बीजत्वं न तु बीजवत् । व्यञ्जकत्वान्न चाल्पत्वान्महाक्ष्मावद्रमा स्मृता । अण्डो महाक्ष्मा सम्प्रोक्तस्ततः पृथ्व्युदकं तथा । जायते नित्यशस्तस्माद्भुक्तं भुक्तं न हीयते । तत्राप्युदकवद्ब्रह्मा मृद्वच्चापि सरस्वती । जलाधारा यतो मृच्च सर्वत्रापि व्यवस्थिता । अन्यथा तु रजो भूता नीयते वायु-

---

भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥ २० ॥ यस्मिन्निदं प्रोतमशेषमोतं पटे यथा तन्तुवितानसंस्था । य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते ॥ २१ ॥ द्वे अस्य बीजे शतमूलस्त्रिनालः पञ्चस्कन्धः पञ्च-

SGDF
Sri Gargeshwari Digital Foundation

नाऽखिला। अथवा सर्वनाशः स्याज्जलाधारा ततः स्मृता। वटादि-बीजवत्तस्य पुण्यापुण्यमुदीरितम्। बाह्योदवच्चाग्निवच्च विष्णुरेव प्रकीर्तित'-इति सत्यसंहितायाम्॥ श्रियादेरप्ययनत्वाद्बाह्योदवत्। ब्रह्मादेरपि लयकर्तृत्वादग्निवत्। आधारत्वात्सुखदत्वाच्च वायुवत्। अवकाशप्रद-त्वाद्व्योमवद्विष्णुः। 'व्रीह्यादिवत्तु मूलत्वं कर्मणां जगतः स्मृतम्। उदवत्पृथिवीवच्च ब्रह्मणो वाच एव च। मूलभूवच्छ्रियश्चैव मूलभूरण्ड-मुच्यते। बाह्योदाग्नीरखंवत्तु विष्णोर्बीजत्वमिष्यत'इति विश्वसंहितायाम्॥ देहेन्द्रियमनोवाक्षु स्थितो भक्त्यादिसाधकः। सुपर्णशेषरुद्रादेरपि ब्रह्मा चतुर्मुखः। अतो भक्त्यादिकाः सर्वे गुणास्तस्यैव सर्वगाः। अतिरिक्ताश्च सम्पूर्णाः सुपर्णादेः शताधिकाः। सुपर्णादिभिरज्ञातास्तदभीमानवर्जिताः। ब्रह्मणस्तु पुनः सन्ति तेषां कर्ता जनार्दनः। तस्मात्सर्वाधिको ब्रह्मा गुणैः सर्वैर्न संशयः। वर्णस्थो वर्णनामाऽसौ स्वरस्थः स्वरनामकः। मनःस्थश्च मनोनामा तन्नामा चक्षुरादिगः। तस्य सर्वाणि नामानि मुख्यतः कवयो विदुः। तत्स्थानत्वादिन्द्रियादेर्वर्णादेश्चोपचारतः। एवमस्योपचारेण विष्णोः साक्षात्तु मुख्यत'इति शब्दनिर्णये॥ कृष्ण-प्रियाभ्यो गोपीभ्यो भक्तितो द्विगुणाधिकाः। महिष्योऽष्टौ विना यास्ताः कथिताः कृष्णवल्लभाः। ताभ्यः सहस्रसमिता यशोदा नन्द-गेहिनी। ततोऽप्यभ्यधिका देवी देवकी भक्तितस्ततः। वसुदेवस्ततो जिष्णुस्ततो रामो महाबलः। न ततोऽभ्यधिकः कश्चिद्भक्त्यादौ पुरुषोत्तमे। विना ब्रह्माणमीशेशं स हि सर्वाधिकः स्मृत'इत्यन्तर्यामि-संहितायाम्॥ 'पापद्वेषादिका दोषा अवराणां न संशयः। भक्त्यादि-गुणपूगस्तु पराणामा विरिञ्चतः। स्वातन्त्र्यात्सर्वदेहेषु स्थितानामपि

रसप्रसूतिः। दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलः खं प्रविष्टः॥ ॥२२॥ अदन्ति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः। हंसाय एवं बहुरूपमिष्टं मायामयं वेद स वेद वेदम्॥२३॥ एवं गुरूपासनयैक-

SGDF
Sri Gangeshwari Digital Foundation

सर्वशः । स्पृश्यन्ते नैव दोषैस्ते गुणदानैकतत्परा' इति विवेके ॥ 'यदु किञ्चेमाः प्रजाः । शोच्यन्त्यमैवासां तद्भवति । पुण्यमेवामुं गच्छति । न ह वै देवान्पापं गच्छती'ति च ॥ २२-२४ ॥ इति एकादशतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

[2]धर्मात्पुनः सत्वोद्रेकः । सत्वोद्रिक्तया बुद्ध्या पुनः सत्वोद्रेकात्पुनर्धर्मोद्रेकः ॥ २ ॥ [7]वेदो वृत्तिज्ञानम् । 'मुक्ताश्चाधीयते वेदान् जडज्ञानबहिष्कृताः । स्वरूपभूतज्ञानेन पश्यन्तः सर्वमञ्जसे'ति तात्त्विके ॥ ॥ ७ ॥ [18]प्रश्नो बीजमस्येति प्रश्नबीजं परिहारम् । गुणानां चेतसश्च कर्म कारणमिति मन्वानः कर्मधीः । 'ब्रह्मा पृष्टस्तु योगीन्द्रैः सनकाद्यैर्मनोगतैः । कारणं विषयेष्वद्धा कर्मेति प्रत्यपद्यत । हेतुरन्योऽपि तत्रास्तीत्येवं जानन्नपि प्रभुः । विशेषतो मनस्तत्र नाधाज्ज्ञानन्हरेः प्रियम् । स्वात्मना परिहारोक्तिस्तदा ह्यासीद्धरेः प्रिया । अतः स तत्प्रियं जानन्नाकरोत्तद्विचारणम् । तमेवाचिन्तयद्देवः प्रश्ननिर्णयकारणात् । भ्रमतीव मनः क्वापि ब्रह्मणो विष्णुमायया । सर्वज्ञस्यापि

भक्त्या विद्याकुठारेण शितेन धीरः । विवृश्च्य जीवाशयमप्रमत्तः सम्पद्य चात्मानमथ त्यजास्त्रम् ॥ २४ ॥

त्रयोदशोऽध्यायः

श्री भगवानुवाच—सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः । सत्वेनान्यतमौ हन्यात्सत्वं सत्वेन चैव हि ॥ १ ॥ सत्वाद्धर्मो भवेच्छुद्धात्पुंसो मद्भक्तिलक्षणः । सात्विकोपात्तया ज्ञानं ततो धर्मः प्रवर्तते ॥ २ ॥ वेणुसङ्घर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनम् । एवं गुणव्यत्ययजो वेदः शाम्यति तद्यथा ॥७॥ अप्रमत्तो हि युञ्जीत मनो मय्यर्पयन् शनैः । अनिर्विण्णो यथाकालं जितश्वासो जितासनः ॥१३॥ सनकादय ऊचुः— गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो । कथमन्योन्यसन्त्यागो मुमुक्षोः सन्तितीर्षतः ॥ १७ ॥ श्री भगवानुवाच—एवं पृष्टो महान्देवः स्वयम्भू-

SGDF
Sri Gangeshwari Digital Foundation

तत्रात्मा वक्तुमिच्छेज्जनार्दनः। तज्ज्ञात्वा चिन्तितं तस्य चिन्तयत्यमुमेव तु। न स्वयं चिन्तयत्यर्थं स हि तद्भाववित्सदा। अन्ये त्वज्ञानसंयुक्ता मोहमीयुर्यथाक्रमम्। तस्य मध्यन्दिने सूर्ये क्षोभवत्क्षोभमात्रकम्। नैवाज्ञानं यथा सूर्ये तमो नास्ति कदाचने'ति भावविवेके॥॥ १८॥ [22]आत्मनो वस्तुनः परमात्मवस्तुन एकत्वं यद्यङ्गीकृतम्। तदा कथं प्रश्नो घटेत॥ [23]न हि परमात्मनोऽन्योऽत्र ब्रह्मणा पूज्यः स्यादभिवदनादिना। तस्माद्ब्रह्मणो वन्द्यः परमात्मैव स चैक एव अतः कथं प्रश्नः परिहारो वा॥ २२॥ वस्तुतः समानेषु हिरण्यगर्भावरत्वात्तद्वन्द्यत्वाभावापेक्षया। तस्माद्ब्रह्मणो वन्दनानन्तरं विचारो न घटते। तस्मात्को भवानिति वाचा प्रारब्धः प्रश्नो निरर्थकः॥ २३॥ [24]यस्मान्मन आदिभिर्गृह्यमाणमहं न भवाम्येव। स्वयमपि प्रसादात्कथंचिद्गृह्यत इत्यत आह। मत्तोऽन्यदिति। यन्मनआदिभिर्विचार्य मत्तोऽन्यत्वेनैव ज्ञायते। तदहं न भवाम्येवेति बुध्यध्वम्। विचारितस्यापि पुनः संशयकारणं परिकल्प्य संशयो न कर्तव्यः। अतः को भवानिति नारब्धव्यः, गुणेष्वाविशते चेत इत्येव प्रश्न आरब्धव्यः। 'न युष्माकमपि प्रश्नो घटेतायं कथञ्चन। मामृते न हि वन्द्योऽस्ति विरिञ्चेः क्वापि कश्चन। अभिवन्दितपादं मां विरिञ्चेन कथं पुनः। पृच्छथान्ये समा यस्मादवरत्वे चतुर्मुखात्। देवा मनुष्याः पितरो गन्धर्वा असुरास्तथा। इति पञ्चात्मकं सर्वं ब्रह्मणस्त्ववरं यतः। यन्मदन्यद्विचारेण गृह्यते तन्न चास्म्यहम्। इति जानीध्वमद्धैव मत्प्रसादाद्धि मदृशिः। अन्यत्स्वभावतो दृश्यं मम प्रेरणयैव तु। तस्माद्विवक्षितार्थे तु प्रश्नारम्भो

भूतभावनः। ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः॥ १८॥ वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः। कथं घटेत वो विप्रा वक्तुं वाऽनेक आश्रयः॥२२॥ पञ्चात्मकेषु भूतेषु समानेषु च वस्तुतः। को भवानिति वः प्रश्ने वाचारम्भो निरर्थकः॥२३॥ मनसा वचसा दृष्ट्या गृह्यतेऽन्यै-

SGDF
Sri Gargeshwari Digital Foundation

न मद्रत'इति तन्त्रभागवते ॥ 'इदं हि सर्वं भगवानिवेतर'इति च । 'प्रकृतेर्व्यतिरिक्तो यः पुरुषश्चेति कथ्यते । तं विद्यात्परमात्मानं वासुदेवेति यं विदुरि'ति भारते ॥ 'प्रकृतेः प्राकृताच्चैव व्यतिरिक्तं गुणाधिकम् । ये विदुः परमात्मानं ते यान्ति परमं पदमि'ति च ॥ 'नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह । बहूनां पुरुषाणां हि यथैका योनिरुच्यते । तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमि'ति च ॥ ॥२४॥ [25]मय्येव मनो यस्य स मदात्मा तस्योभयं देहे दग्धमभवत् ॥ ॥२५॥ [26]मत्स्वरूपे तदुभयं त्यजेत् । मयि स्थिताश्चेतो गुणाश्चेति । 'विष्णुस्था विषयाः सर्वे विष्णावेव मनो मम । इति मय्यर्पयन्सर्वं त्यजेत्तत्तन्न बाधत'इति साम्ये ॥ २६ ॥ [28]गुणचेतसां त्याग एव बन्धत्यागः ॥ २८ ॥ '[30]भिन्नस्य त्वेकभावेन तथैकस्य च भेदतः । ज्ञानं नानार्थधीः प्रोक्ता नानात्वादर्थतद्धियोरि'ति ब्रह्मतर्के ॥ ३० ॥ '[31]अभिदा किङ्कृतैतेषां भावानां परमेश्वरे । यतोऽसत्वमशक्तत्वाद्भावानां तस्य शक्तता । ततः सत्वं साधुभावः सत्वमित्युच्यते बुधैः । साधुभावश्च शक्तस्य ततोऽन्याऽसाधुता ततः । अभेदे जगतो विष्णोर्या वाचो ये च हेतवः । स्वप्नजाग्रत्कल्पकवत्सर्वे ते भ्रमदर्शिता'इति शाश्वत्संहितायाम् ॥ ३१ ॥ '[32]दक्षिणाक्षिस्थितो विष्णुर्भुङ्क्तेऽर्थान् जाग्रदास्थितान् । कण्ठसंस्थस्तथा स्वप्नान् जीवानन्दं च सुप्तिगः । श्रुत्यन्वया-

---

रपीन्द्रियैः । अहमेव मत्तोऽन्यदिति बुध्यध्वमञ्जसा ॥२४॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः । जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ॥ ॥२५॥ गुणेषु वा विशेच्चित्तमभीक्ष्णं गुणसेवया । गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥ २६ ॥ यर्हि संसृतिबन्धोऽयमात्मनो गुणवृत्तितः । मयि तुर्ये स्थितो जह्यात्त्यागस्तु गुणचेतसाम् ॥ २८ ॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः । जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ ॥३०॥ असत्वादात्मनोऽन्येषां भावानां किं कृताऽभिदा । गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥ यो जागरे बहुविधान् क्षणधर्मिणो-

SGDF
Sri Gargeshwari Digital Foundation

त्स्मृतिभ्यश्च स एकः परमेश्वरः । अस्वतन्त्रस्य जीवस्य स्वतन्त्रो जाग्रदादिदः । स्वयं स्वप्नादिहीनः सन्क्रीडते पुरुषोत्तम'इति तत्त्वे ॥ 'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती'त्यादि च ॥ ३२ ॥ [34]जाग्रदादिषु परमात्मभेदं विभ्रमं वीक्षेत । जाग्रदादिकरो देवः परमात्मैक एव तु । इति वीक्षेत सततं मुच्यते संसृतेरत'इति प्रकाशसंहितायाम् ॥ यदा विभ्रमोऽयमिति दृष्टस्तदैव विनष्टः । श्रुतियुक्तिभिर्विचारितेऽतिलोलः । क्षिप्रं विनश्यतीत्यर्थः । अलातस्य चक्राकारत्वभ्रमवत् परमात्मभेदभ्रमः । त्रिगुणैस्तत्कार्यैः पापादिभिश्च बद्धः सन् विज्ञानरूपं परमात्मानं भ्रान्त्या बहुधा पश्यति । 'देहभेदेष्ववस्थासु प्रादुर्भावेषु चैकलम् । ज्ञानानन्दैकसद्रूपं भ्रान्त्या भिन्नं प्रपश्यति । सा च भ्रान्तिर्विनश्येत यदा भ्रान्तित्ववेदनम् । अतिक्षिप्रं विनश्येच्च न स्थिरं दिग्भ्रमादिवत् । त्रिगुणैर्बद्धिता जीवा ज्ञप्तिमात्रं जनार्दनम् । पश्यन्ति बहुधा स्वप्ने यथैकं बहुधा क्वचित् । अभिन्नोऽपि विभिन्नेषु व्यवहारो यथा भवेत् । तथैव व्यवहाराय शक्तत्वान्नैव दूषणम् । ईशस्य तु तदन्येषामपि यच्छक्तिदायक'इति ब्रह्मतर्के ॥ अलातभ्रामको यदा निवर्तते तदैव भ्रमो निवर्तते । तद्वद्यदा भ्रमनिवृत्तिमिच्छति तदैव गुरूपसदनान्निवर्तयितुं शक्यः । 'अशक्योऽप्यपि शक्योऽयं विनिवर्तयितुं भ्रमः । ईशस्थो गुरुसम्पत्त्या यदि शुद्धमनाः पुमानि'ति सम्यग्ज्ञाने ॥ ३४ ॥ [35]निपातमन्धं तमः मोक्षमारभ्य तावत्पर्यन्तं स्मृतिर्यस्माज्ज्ञानिनो वर्तते अतो मूढेषु अविद्याव्यवस्थितो भ्रमो यद्यपि

र्थान् भुङ्क्ते समस्तकरणो हृदि तत्सदृक्षान् । स्वप्नेऽथ सुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ ३२ ॥ ईक्षेत विभ्रममिमं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रम् । विज्ञानमेकमुरुधेव विभाति माया स्वप्ने यथा त्रिगुणसर्गकृतो विकल्पः ॥ ३४ ॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततर्षस्तूष्णीं भवेन्निजसुखानुभवो निरीहः । सन्दृश्यते

SGDF
Sri Gurgeshwari Digital Foundation

संदृश्यते तेन तथापि भ्रमाय न भवति । फलं हि निपातं स्मरति ॥ ॥ ३५ ॥ [36]त्रिगुणसर्गकृतो विकल्प इत्युक्तं ज्ञानिनोऽपि देहवत्त्वेन त्रिगुणित्वाद्विकल्पो भवतीत्यत आह । देहं च नश्वरमिति ॥ ३६ ॥ '[37]आदरो भजनं भक्तिर्बहुमानं च सेवनम् । पर्यायवाचकाः सर्वे स्मृतिस्तज्जन्म कर्म चे'ति शब्दनिर्णये ॥ ३७ ॥ '[40]अपूर्णगुणरूपास्तु सम्पूर्णगुणरूपकम् । भजन्ति परमं ब्रह्म देवास्त्रिगुणवर्जितमि'ति कालसंहितायाम् ॥ ४० ॥ इति एकादशतात्पर्ये त्रयोदशोऽध्यायः ॥१३॥

चतुर्दशोऽध्यायः

'[4]रुद्रमिन्द्रं कुमारं च विनैवान्याग्रजो मनुः । ब्रह्मपुत्रेष्वादिसृष्टावन्यथात्वं पुनर्जनेरि'ति स्कान्दे ॥ 'पूर्वसृष्टौ पूर्वजा ये तेऽधिकाः सर्वतो गुणैः । अनाद्यनन्तकालेषु मुक्तावपि यथाक्रममि'ति निबन्धे ॥ अनेन पारम्पर्येण केषाञ्चिदेव देवादीनाम् ॥ ४ ॥ '[11]मद्भक्तिवर्जितं श्रेयो ये मन्यन्ते दुराशयाः । तेषामन्ते तमो घोरमनन्तं प्राप्यते ध्रुव-

---

क्व च यदीदमवस्तु बुध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरा निपातात् ॥३५॥ देहं च नश्वरमवस्थितमुत्थितं च सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् । दैवादुपेतमुत दैववशादपेतं वासो यथा परिवृतं मदिरामदान्धः ॥ ३६ ॥ देहोऽपि दैववशगः खलु कर्मयावत्स्वारम्भकं प्रतिसमीक्षत एव सासुः । तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३७ ॥ मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं परमात्मानं साम्यासङ्गादयो गुणाः ॥ ४० ॥

चतुर्दशोऽध्यायः

श्री भगवानुवाच—कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता । मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥ तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा । ततो भृग्वादयोऽगृह्णन्सप्त ब्रह्म महर्षयः ॥४॥ एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम् । पारम्पर्येण केषाञ्चित्पाखण्डमतयोऽपरे ॥ ८ ॥ आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मिताः । दुःखोदर्का-

SGDF
Sri Gargeshwari Digital Foundation

मि'ति मान्यसंहितायाम् ॥ ११ ॥ '[15]कृपानिमित्ता या प्रीतिर्नीच-भक्तेषु साऽधिका। आन्तरे(रै)व तु या प्रीतिः सा तूच्चेषु यथाक्रमम्। यथा कश्चित्स्वमात्मानं प्रियां पुत्रमथापि वा। अतिहाय कृपायुक्तो भिक्षवेऽन्नं ददात्यपि। कदाचिदेव न पुनः स्वात्मादेः सार्वकालिकम्। योगक्षेमवहत्वं च नित्यं स्वात्मादिषु स्फुटम्। एवमेव परेशस्य भक्तेषु श्रियजादिष्वि'ति प्रियविवेके॥ 'यादवेभ्यश्च सर्वेभ्य उद्धवो भगवत्प्रियः। उद्धवाच्च प्रियतमः प्रद्युम्नस्तु महारथः। तस्मादपि प्रियतमो रामः कृष्णस्य सर्वदा। नैव तस्मात्प्रियतमो विनैकं तु चतुर्मुखम्। सर्वेऽभ्योऽपि प्रियतमा हरेः श्रीरेव वल्लभा। नैव तस्याः प्रियतमो विना स्वात्मानमेव त्वि'ति यादवाध्यात्मे ॥ १५ ॥ [16]स्वाङ्घ्रिरेणुभिस्तं शोधयामीत्यनुव्रजामि। 'अनुगच्छति विष्णुस्तु स्वभक्तं तस्य शुद्धये। तस्याङ्घ्रिरेणुभिर्वातनीतैरग्रेसरैः शुचिः। अग्रतो गमने विष्णोः पदा स्पृष्टं रजो भवेत्। अतः स्वभक्तं पूयेयेत्यनुव्रजति केशव'इति सङ्ख्याने ॥ १६ ॥ '[24]चित्तद्रवस्तथा स्थैर्यं प्रसादो भक्तिलक्षणम्। आधिक्येन तु तत्रापि स्थैर्यमेव विशेषतः। दम्भस्य चलभक्तेश्च यस्मादश्चादिकं भवेत्। दम्भादिपरिहारार्थं निगूहीयाच्च धीरधीः। अत आध्यात्मिकक्लेशैराधिभूताधिदैविकैः। वाक्यैश्च वेदतन्त्राद्यैरुपदेशैश्च तादृशैः। बलवच्छासनैर्वापि यस्य भक्तिर्न चाल्यते। स एव परमो भक्तो विष्णोर्हृदयवल्लभ'इति भक्तिविवेके ॥२४॥ '[29]केशवे त्वन्यथाबुद्धिः सैव स्त्री सम्प्रकीर्तिता। त्रिकालदुःखदत्वेन पुंसा सह निवास-

---

स्तमोनिष्ठाः क्षुद्रानन्दाः शुचाऽर्पिताः ॥११॥ न तथा मे प्रियतम आत्मयोनिर्न शङ्करः। न च सङ्कर्षणो न श्रीर्न वात्मा च यथा भवान् ॥ १५ ॥ निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्। अनुव्रजाम्यहं नित्यं पूयेय स्वाङ्घ्रिरेणुभिः ॥ १६ ॥ वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥२४॥ स्त्रीसङ्गसङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान्। क्षेमे विविक्त आसीन-

SGDF
Sri Gargeshwari Digital Foundation

नात्' ॥ २९ ॥ [30]जुष्टत्वाद्योषिदित्युक्ता वननाद्वनितेति च । प्रमादकरणत्वात्तु प्रमदेति च गीयते । त्यजेत्तत्सङ्गिनां सङ्गं बुभूषुः पुरुषः सदा । न तादृशः क्वचिद्दोषः पुरुषस्यासुखावहः । क्षुद्रपापानि पापानि चोपपातकपातके । महापातकनामानि सुमहापातकान्यपि । तथा स्वस्तिमहान्तानि पातकानि विदो विदुः । पिपीलिकवधादीनि क्षुद्रपापोदितानि च । पापमस्थिमतां हत्या फलचौर्यादिरेव वा । परदारादिकं चापि ह्युपपातकसंज्ञितम् । पातकं शूद्रहत्यादि ब्रह्महत्यादिकं महत् । देवस्वहरणादीनि सुमहान्ति विदो विदुः । देवावज्ञा सतां चैव ततोऽपि सुमहत्तरा । महन्महत्तरा तस्य अवज्ञा केशवे तु या । केशवस्य समोऽस्तीति केशवोऽस्म्यहमित्यपि । ब्रह्माद्याः केशवात्मानः श्रीर्वा निर्गुण इत्यपि । मुक्तस्य तद्भावमतिररूपत्वमतिस्तथा । त्रिगुणात्मकदेहोऽस्याप्यस्तीत्यपि तु या मतिः । जन्ममृत्यादिबुद्धिर्वा दुःखज्ञानादिसाधनम् । तस्यापि परतन्त्रत्वविज्ञानं च तदुत्तमः । अस्तीति या मतिस्तस्य वशादन्यस्य कस्यचित् । अस्तीति भावनेत्याद्या अवज्ञा सम्प्रकीर्तिता' इति धर्मविवेके ॥ 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्' । 'अपि चेत्सुदुराचारो भजते मामनन्यभागि'त्यादि च ॥ 'बाध्यमानोऽपि मद्भक्त' इत्यादि च । 'परदारदृशिः प्रोक्ता क्षुद्रपातकसंज्ञिता । उपपातकं तद्गतिश्च वर्णबाह्येषु पातकम् । महापातकसंज्ञं तु पित्रादेर्दारधर्षणम् । दारदृष्टिः स्वोत्तमानां मानुषाणां स्वभावतः । सुमहापातकं प्रोक्तं तद्गतिः सुमहत्तरः । ऋषिदारेषु मनसो गतिरेव ततोऽधिका । देवदाराभिकामानां सङ्गिसङ्गस्ततोऽधिकः । किमु विष्णोस्ततो योषित्सङ्गस्य व्यत्ययस्थितेः । न समं पातकं क्वापि न हि स्वस्त्यभिगामिनः । अवज्ञाता माधवादेस्तस्मात्तं दूरतस्त्यजेत् । मानुषेषु तु दुःखित्वं क्षुद्रपापफलं स्मृतम् । पापात्तु वर्णबाह्यत्वं तिर्यग्योनिगति-

---

श्चिन्तयेन्मामतन्द्रितः ॥ २९ ॥ न तथाऽस्य भवेत्क्लेशो बन्धश्चान्य-

SGDF
Sri Gargeshwari Digital Foundation

स्तथा। सहस्रवर्षनरकं क्षुद्रपातकजं फलम्। उपपातकतश्चापि नरकं युगमात्रकम्। चतुर्युगावसानं तु पातकस्य फलं स्मृतम्। महापातकजन्यं च कल्पावधि समीरितम्। सुमहापातकाच्चापि यावद्ब्रह्मलयो भवेत्। तत्पराणां पातकानां फलमन्धन्तमः स्मृतम्। अधोऽधो दुःखबहुलं विष्णुदाराभिमर्शनात्। वधादपि हि दारस्य धर्षणं कोपकारणम्। तस्माद्देव्यः सदा वन्द्या अग्निवन्नाभिकामत'इति धर्मतत्त्वे ॥ ३० ॥ '[35]उपास्य प्राणतोऽनुज्ञां हृदिस्थात्प्राप्य सेवकः। अनुज्ञानन्तरं मासाद्वशे प्राणो भविष्यति। प्रसादभाक्त्वं सम्प्रोक्तं प्राणविष्ण्वोर्जयस्त्विति ॥ न हि सर्वविजेतारौ विजेयौ केनचित्क्वचित्। अपेक्षितं फलं येन दीयते तज्जितं त्विति। यथा जिता वसुमती यथा मोक्षपदं जितमि'ति प्रभञ्जने ॥ ३५ ॥ '[43]व्योमेति व्याप्तशब्दः स्याद्विशेषादोतता यत'- इति शब्दनिर्णये ॥ व्योम्नि धारयेत् सर्वाङ्गेषु धारयेदित्यर्थः। तच्च धारणं त्यक्त्वा स्वत एव मनसस्तत्रैव समाहितत्वादन्यत्किमपि न चिन्तयेत्। 'यावत्समग्रस्मरणमचलं केशवे भवेत्। समग्रं चिन्तयेत्तावद्यदा तु विचलेत्ततः। प्रत्यङ्गं धारणं कुर्यान्मनो यावत्समग्रगम्। प्रत्यङ्गाभ्यासतो यावत्समग्रे सुस्थिरं मनः। तदा पुनः समग्रं तु धारयेद्यत्नतो बुधः। यदा तु धारणोत्साहं विना तत्राचलं मनः। तिष्ठेत्त्यक्त्वा तमुद्योगं शङ्खचक्राम्बुजाङ्किते। आरूढचेताः परमे शृङ्गारैकधामनि। नैवान्यच्चिन्तयेत्तस्मात्पूर्णानन्दाच्चतुर्भुजात्। यतोऽन्यस्मरणे तस्मान्मनश्चलति सुस्थिरम्। धारणार्थप्रयत्नेन तस्मात्तदुभयं त्यजेत्। यावत्स्वारूढचेताः स्याद्विष्णो रूपे चतुर्भुज'इति ध्यानयोगे ॥

प्रसङ्गतः। योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥ ३० ॥ एवं प्रणवसंयुक्तं प्राणसंयममभ्यसेत्। दशकृत्वस्त्रिषवणं मासादर्वाग्जिताऽनिलः ॥ ३५ ॥ तत्सर्वं व्यापकं चित्तमाकृष्यैकत्र धारयेत्। नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥ ४३ ॥ तत्र लब्धपदं चित्तमाकृष्य

SGDF
Sri Gangeshwari Digital Foundation

॥ ४३ ॥ [45]परमात्मानं मां स्वदेहे पश्यन्ति। जीवं ज्योतिर्मयि संयुतं प्रपश्यन्ति। 'समाधियोगे सम्पूर्णे हृदि पश्यन्ति केशवम्। जीवं तत्प्रतिबिम्बं च तेनैव सह संस्थितम्। तदाधारं तदन्तस्थं तेनैव सदृशं तदा। आनन्दज्ञानशक्त्याद्यैः सदा तदवरं गुणैः। जीवन्मुक्तौ च मुक्तौ वा सततं तद्वशे स्थितमि'ति। 'स्वयं प्रकाशरूपत्वाज्जीवोऽपि ज्योतिरुच्यत'इति च तत्त्वप्रतिपत्तौ ॥ ४५ ॥ [46]द्रव्यज्ञानक्रियाविषये भ्रमरूपं मनो लयं याति ॥ ४६ ॥ इति एकादशतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

[3]मय्येव प्राधान्येन सन्ति अन्येषूपचारत इति मत्प्रधानाः। 'सर्वाधिका अणिमाद्या विष्णोर्नान्यस्य कस्यचित्। स्वाभाविका विरिञ्चस्य तत्प्रसादात्पराधिका'इति स्वाभाव्ये ॥ गुणभूतानामन्यासामपि सिद्धीनां ता एव हेतवः। स्वतस्तास्वेवाष्टस्वन्यासामन्तर्भावात्। 'निःसीमाष्टगुणाभावात्सिद्धयोऽष्टादश स्मृताः। देवेभ्योऽन्यत्र देवानां सिद्धयोऽष्टैव सम्मता' इति प्राकाश्ये ॥ ३ ॥ [4-5]शक्तिप्रेरणमेवेशितृत्वं असङ्ग एव वशित्वम्। 'यादृशानन्दकामः स्यात्तादृशानन्दसम्भवः। भोगान्विनैव

व्योम्नि धारयेत्। तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तयेत् ॥४४॥ एवं समाहितमतिर्मामेवात्मानमात्मनि। विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतम् ॥ ४५ ॥ ध्यानेनेत्थं सुतीव्रेण युञ्जतो योगिनो मनः। संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥ ४६ ॥

पञ्चदशोऽध्यायः

श्री भगवानुवाच—सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः। तासामष्टौ मत्प्रधाना ता एव गुणहेतवः ॥३॥ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः। प्राकाश्यं श्रुतदृष्टेषु शक्तेः प्रेरणमीशिता ॥ ४ ॥ गुणेष्वसङ्गो वशिता यत्कामस्तदवाप्स्यति। एता मे सिद्धयः सौम्य अष्टा-

SGDF
Sri Gargeshwari Digital Foundation

प्राकाम्यमणिमादेः पृथक् तत'इति च ॥ ४, ५ ॥ [6]अनूर्मिमत्त्वं प्राकाम्येऽन्तर्भूतम् । दूरश्रवणदर्शनं त्रिकालज्ञत्वम् । परचित्ताद्यभिज्ञता च प्रकाश्यान्तर्भूतानि । मनोजव इत्यादिषट्कं प्राप्त्यन्तर्भूतम् । अन्यत्सर्वमीशत्वान्तर्भूतमपि परमेशत्वाभावे पृथगित्यष्टादश । अग्न्यर्काम्बुविषादीनामित्यादिशब्दोक्ताः । शस्त्रास्त्रनखदन्तताडनशापादिभिरप्रतिहतिः पृथगेव सिद्धिः सप्तदशी । अप्रतिहता आसमन्ताद्गतिर्यस्या आज्ञायाः साऽप्रतिहतागतिः । अद्वन्द्वमप्रतिहतं त्रिकालज्ञत्वम् । अग्न्यर्काम्बुविषाणां प्रतिस्तम्भाश्चतस्रः सिद्धयः । दूरश्रवणदर्शने द्वे सिद्धी । 'गरिम्णः सैव हेतुः स्यान्महिमा हेतुधारणा । प्रायोऽष्टसिद्धिकथनेष्वथो न पृथगुच्यत'इति च ॥ 'प्राप्तिप्राकाश्ययोश्चापि धारणैकापि सम्भवेत् । अत ऐक्येन तामुक्त्वा गरिमाणं पृथक्कचिदि'ति च ॥ दूरश्रवणदर्शने द्वे सिद्धी । 'मूलभूतास्तु सिद्धीनां देवानामष्टसिद्धयः । सर्वसिद्धिप्रधानास्तास्तज्ज्ञा अष्टादश स्मृताः । अष्टस्वन्तर्गतास्तास्तु तदपेक्षतयाल्पका' इति च ॥ कामरूपत्वस्याणिमादित्रयेऽप्यन्तर्भावोऽष्टसिद्धिपक्षे अग्न्यर्कस्तम्भ एकैव सिद्धिः अदाहत्वात् । अग्न्यादिप्रतिस्तम्भस्य वशित्वेऽपि । अनूर्मिमत्त्वाद्यष्टादशपृथक्सिद्धिपक्षेऽग्न्यर्कस्तम्भयोः पृथक्त्वम् । तस्मिन्पक्षे तासां सकाशात्प्रधानाष्टौ मत्प्रधाना इति व्याख्या । 'अनूर्मिमत्त्वसिद्धिस्तु प्राकाम्यान्तर्गता मता । दूरश्रुतिर्दूरदृष्टिस्त्रिकालज्ञत्वमेव च । परचित्ताद्यभिज्ञानं प्राकाश्यान्तर्गतानि च । अणिमादित्रयान्तश्च कामरूपत्वमिष्यते । अग्न्यर्काम्बुविषादीनां प्रतिस्तम्भो वशित्वतः । मनोजवः कामरूपं परकायप्रवेशनम् । स्वच्छन्दमृत्युता देवैः सह क्रीडेष्टसाधनम् । प्राप्तावन्तर्गतान्याहुराज्ञाऽप्रतिहतिस्तथा । अग्निस्तम्भो रविस्तम्भ उदकस्तम्भ एव च । विषस्तम्भस्तथा शस्त्रशापादिस्तम्भ एव च । ईशत्वान्तर्गतान्याहुरपराजय एव च । एवमष्टादशाष्टाभ्यो जायन्ते सिद्धयः

वौत्पत्तिका मताः ॥५॥ अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनम् । मनोजवः

SGDF
Sri Gangeshwari Digital Foundation

क्रमात् । अष्टादशभ्यश्चान्यास्तु जायन्ते सिद्धयोऽमिताः । अनूर्मिमत्त्वं दुःखस्याभावमात्रमुदाहृतम् । यथेष्टानन्दसम्प्राप्तिः प्राकाम्यमिति कीर्त्यते । दुःखाभावोऽपि प्राकाम्ये नेतरे सुखितेष्यते । प्राकाश्यं सर्ववेदादिज्ञानमेव विदो विदुः । सहस्रयोजनान्ते तु दूरदर्शनमिष्यते । दूरश्रवणमप्येवं तस्मिन्नेव युगे स्थिते । वेदादिकं विना प्रोक्तं त्रिकालज्ञानिता बुधैः । शरीरस्थं विना देहे परचित्ताद्यभिज्ञता । अन्येन्द्रियैर्दर्शनादि यथासङ्कल्पवेगिता । प्राप्तिरित्युच्यते सद्भिः स्वमनःसमवेगिता । मनोजव इतिप्रोक्तः पश्वाद्याकारता तथा । कामरूपत्वमुद्दिष्टं स्वदेहत्यागतः परे । परकायप्रवेशः स्याद्युगादर्वाक्तना स्मृता । स्वच्छन्दमृत्युता देवैः क्रीडा चेन्द्रादिभिर्विना । यथासङ्कल्पसिद्धिश्चाप्यन्नपानसुतादिषु । चक्षुर्दृश्येष्वणुत्वं तु अणिमा सम्प्रकीर्तिता । महिमा चापि सम्प्रोक्ता त्रिलोकान्तरपूरणा । चक्षुर्दृश्यैर्विवाह्यत्वं लघिमा चापि कीर्तिता । त्रिलोकसमभारस्तु गरिमा चापि कीर्तिता । पूर्वशक्तेः कोटिगुणशक्त्युद्रेकस्तथेशिता । भुविस्थैः प्राणिभिश्चोक्तकरणं चापि कीर्त्यते । आज्ञाऽप्रतिहतिर्ब्राह्माद्दर्वागस्त्रविघातनम् । विना महातपस्वींश्च शापाप्रतिहतिः स्मृता । अपराजयो मनुष्येभ्यो वशित्वं चाप्यलोलता । दाहादिसहनं चापि प्रतिस्तम्भ इतीर्यते । इति षड्विंशतिः प्रोक्ता गरिम्णा सह सप्त वा । विंशतिश्च सुरेभ्योऽन्यद्देवेष्वष्टैव सिद्धयः । यतो निःसीमकास्तेषां देवानामष्टसिद्धयः । अतोऽष्टादशसिद्धीनां तदन्तर्भाव इष्यते । देवेष्विन्द्रेशवायुश्रीविष्णूनामुत्तरोत्तरम् । सिद्धयः परिपूर्णास्तु विष्णोरेकस्य नान्यगा'इत्यैश्वर्ये ॥ 'श्रुतेषु तु यथायोगं क्षिप्रग्रहणमेव तु । उक्तं प्राकाश्यमन्येषां देवानामश्रुतेष्वपि । ऋषीणां मिश्रभावेन भासते किञ्चिदश्रुतम् । विषयेभ्योऽधिकसुखव्यक्तिः प्राकाम्यमेव तु । इतरेषां सुराणां तु निःसीमानन्दभोजनम् । एवमेव तु

कामरूपं परकायप्रवेशनम् ॥ ६ ॥ स्वच्छन्दमृत्युर्देवानां सह क्रीडानु-

SGDF
Sri Gargeshwari Digital Foundation

निःसीमा देवानामष्टसिद्धयः। उत्तरोत्तरमत्रापि यावद्विष्णुः स पूर्णभुगि'ति हरिवंशेषु ॥ 'अग्न्यादिशक्तिसंस्तम्भ अग्न्यादिस्तम्भ इष्यत'- इति कौर्मे ॥ एकस्मात्सिद्धयो विष्णोः स्थानभेदात्पृथग्विधाः। एकस्थानगताद्वा स्युः सुस्थिरोपासना यदी'ति भारते ॥ ६ ॥ [10]भूतसूक्ष्माणामात्मनि परमाणुस्थितेऽणुरूपे। 'तन्मात्रावयवे सूक्ष्मे परमाण्वभिधानके। प्रत्येकमणुरूपं तु विष्णुं ध्यायन्नणुर्भवेदि'ति कापिलेये॥ 'आकाशवत्सूक्ष्मतां यो व्यापित्वेनैव मन्यते। तन्मात्रव्यापिनं विष्णुं चिन्तयन्स तथा भवेदि'ति च ॥१०॥ [11]महति व्याप्ते। महत्तत्त्वस्य पृथगुक्तेः। अस्मात्स्थूलतां प्राप्नुवानीत्यपेक्षायां तस्मात्प्राप्नोति। ततोऽन्यस्मादित्यपेक्षायां तस्मादिति पृथक्पृथक् ॥ ११ ॥ [12]परमाणुमये भूतानां सकाशादतिशयेनाणुरूपे। कालसूक्ष्माणामात्मनि ॥ १२ ॥ [13]अहंतत्त्वस्थिते मयि ॥ १३ ॥ [14]सूत्रे स्थिते मयि। गृहे पीठ इतिवत्। अव्यक्तजन्मनः अव्यक्तस्यापि किञ्चित्स्थूलत्वकर्तुः। 'तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे'ति मोक्षधर्मेषु ॥ 'अजरादमरादमूर्तितः शाश्वततमस' इति च। 'अव्यक्तस्याजन्मवतो विकारो जनिरुच्यत'इति हरिवंशेषु ॥ मे सकाशान्विन्दते। परमेष्ठिप्रसादादन्येषां भवतीति पारमेष्ठ्यम्। सर्वगुणानां ज्ञानमूलत्वादुपलक्षणत्वेन प्राकाश्यं पारमेष्ठ्यमित्युक्तम्। 'सर्वेगुणास्तु प्राणस्य परमात्मप्रसादतः। प्राण-

---

दर्शनम्। यथा सङ्कल्पसंसिद्धिराज्ञाऽप्रतिहता गतिः ॥७॥ त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञता। अग्न्यर्काम्बुविषादीनां प्रतिस्थम्भो पराजयः ॥ ॥ ८ ॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयन्मनः। अणिमानमवाप्नोति तन्मात्रोपासको मम ॥१०॥ महत्यात्मन्मयि परे यथा संस्थं मनो दधत्। महिमानमवाप्नोति भूतानां च पृथक् पृथक् ॥ ११ ॥ परमाणुमये चित्तं भूतानामपि रञ्जयन्। कालसूक्ष्मात्मके योगी लघिमानमवाप्नुयात् ॥१२॥ धारयन् मय्यहंतत्वे मनो वैकारिकेऽखिलम्। सर्वेन्द्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः ॥ १३ ॥ महत्यात्मनि यः सूत्रे धारयन्मयि

SGDF
Sri Gargeshwari Digital Foundation

विष्णोः प्रसादेन भारत्याः सम्प्रकीर्तिताः । प्रसादात्तु त्रयाणां वाप्य-नन्तादेः सदा गुणा' इति माहात्म्ये ॥ १४ ॥ [15]सर्वत्राधीश्वरत्वादौ विद्यमानेऽपि तत्रतत्रोक्ताधीश्वरत्वादिगुणविशिष्टत्वेन तत्रतत्रोपासनमिति विशेषः । 'तं यथायथोपासते तदेव भवती'ति च श्रुतेः । 'उपासतः सत्य इति सत्यसङ्कल्पता भवेत् । ईशत्वमीश्वर इति गुणं तं तं यथा हरिमि'ति विशेषे ॥ 'शुद्धः श्वेतः सुखी श्वेतः श्वेतवर्णः क्वचिद्भवेदि'ति शब्दनिर्णये ॥ १५ ॥ [19]आकाशस्यात्मनि तत्राकाश उपलब्धानां आसमन्तात्स्थितानां भूतानां वाचः । हंसो जीवः 'त्यागात्पूर्वशरीराणां नवानां सश्रयेन च । जीवं हंस इति प्राहुस्तद्धेतुत्वाद्धरिं परमि'ति भारते ॥ १९ ॥ [21]मनसि मनस्तत्त्वे वायुना संयोज्य मनोऽनुदेहं मनस्तत्त्वे मद्धारणा ॥ २१ ॥ '[22]गजादिरूपमाकाङ्क्षन्गजादिस्थित-मीश्वरम् । ध्यायन् गजादिरूपः [23]स्यात्परकायस्थितं हरिम् । ध्याय-न्विशेत्परे काये वायावन्तर्गतः पुमान् । प्राणनामा हरिः प्रोक्तस्तस्मि-न्वायुः समाश्रितः । वायावन्तर्गतो जीवो देहादेहं प्रयास्यति ॥ २२ ॥ '[24]षडाधारस्थितं विष्णुं ध्यायन्नायुः क्षयं विना । यदि मृत्युमभीप्सेत

मानसम् । प्राकाश्यं पारमेष्ठ्यं मे विन्दतेऽव्यक्तजन्मनः ॥ १४ ॥ विष्णौ चाधीश्वरे चित्तं धारयन् कालविग्रहे । स ईशत्वमवाप्नोति क्षेत्रे क्षेत्रज्ञ-चोदनम् ॥ १५ ॥ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि । धारयन् श्वेततां याति षडूर्मिरहितोऽमरः ॥१८॥ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् । तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ ॥ १९ ॥ मनो मनसि संयोज्य देहं तदनु वायुना । मद्धारणानुभावेन तत्रात्मा यत्र वै मनः ॥ २१ ॥ यदा मन उपादाय यद्यद्रूपं बुभूषति । तत्तद्भजेन्मनो रूपं मद्योगबलमाश्रितः ॥२२॥ परकायं विशन् सिद्धमात्मानं तत्र भावयेत् । पिण्डं हित्वा विशेत्प्राणो वायुभूतः षडङ्घ्रिवत् ॥२३॥ पार्ष्ण्याऽऽपीड्य गुदं प्राणं हृदुरः कण्ठमूर्धसु । आरोप्य ब्रह्मरन्ध्रेण ब्रह्म नीत्वोत्सृजे-त्तनुम् ॥२४॥ विहरिष्यन् सुराक्रीडे मत्स्थं सत्वं विभावयेत् । विमाने-नोपतिष्ठन्ति सत्ववृत्तिं सुरस्त्रियः ॥ २५ ॥ यथा सङ्कल्पयेद्बुद्ध्या यथा

SGDF
Sri Gargeshwari Digital Foundation

तथा प्राप्नोत्यसंशयम् ॥ २४ ॥ [28]त्रिकालप्रेरकं विष्णुं ध्यातुः कालत्रयज्ञता ॥२८॥ '[29]अग्न्यादिषु हरिं ध्यायन् तत्प्रतिस्तम्भको भवेदि'ति हरिसंहितायाम् ॥ २९ ॥ [23]आत्मानं परमात्मानं तत्रतत्र परकाये भावयेत् । तदा वायौ स्थितः । प्राणः परमात्मा तत्र गच्छति तमनु जीवोऽपि गच्छति । वायौ भूतो वायुभूतः ॥ २३ ॥ [24]प्राणं परे ब्रह्मणि नीत्वा । 'प्राणस्थं प्राणनामानं बर्हिष्ठे ब्रह्मनामके । विष्णुं विष्णावनुस्मृत्य विसृजेद्देहमञ्जसे'ति प्रभञ्जने ॥ 'अनेयस्य हरेर्नीतिस्तद्गतस्य हरेः स्मृतिः । न हि नेयः क्वचित्क्वापि केनचित्स्ववशत्वत'-इति च ॥ २४ ॥ [27]मम भावना मद्भावः । 'भावो मनश्च भक्तिश्च क्वचिदभ्यास इष्यत' इति शब्दनिर्णये ॥ २७ ॥ [31]उपासनयाऽपरोक्ष्यं कृतवतः, पुनरुपासनं कार्यकाले कुर्वतः कार्यसिद्धिरित्यतो योगधारणया पुनरित्युक्तम् ॥ ३१ ॥ '[32]उपास्य वायुं प्रथमं वायौ सुष्ठ्वपरोक्षिते । अनुज्ञातस्ततस्तद्वं तत्रतत्र हरिं स्मरेत् । कृत्वापरोक्षं तं चापि कालेकाले स्मरेत्पुनः । अभीष्टकार्यसिद्धिः स्यात्तस्य नास्त्यत्र संशयः । अकामो यदि वायुं च ध्यात्वा दृष्ट्वा हरिं तथा । न किञ्चित्कामयेत्पश्चात्स क्षिप्रं मुक्तिमेष्यति ॥३२॥ '[33]यदि योगैः फलं भुङ्क्ते पुनः काममपास्य तु । तेनैव क्रमयोगेन वायुं दृष्ट्वा हरिं तथा । एष्टव्या मुक्तिपदवी नान्यथा तु कथञ्चन । पूर्वदृष्टिर्हि कामार्थे पश्चान्मोक्षार्थमिष्यते । येषां तु

वा मत्परः पुमान् । मयि सत्ये मनो युञ्जंस्तथा तत्समुपाश्नुते ॥ २६ ॥ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् । कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम ॥ २७ ॥ मद्भक्त्या शुद्धसत्वस्य योगिनो धारणाविदः । तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥ २८ ॥ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः । मद्योगश्रान्तचित्तस्य यादसामुदकैर्यथा ॥ २९ ॥ उपासकस्य मामेवं योगधारणया पुनः । सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ॥३१॥ जितेन्द्रियस्य दान्तस्य जितश्वासात्मनो मुनेः । मद्धारणां धारयतः का नु सिद्धिः सुदुर्लभा ॥ ३२ ॥ अन्तरायान्वदन्त्येतान्युञ्जतो

SGDF
Sri Gurgeshwari Digital Foundation

जन्मतः सिद्धिस्तेषां दोषो न विद्यत' इति निवृत्ते ॥ ३३ ॥ [34]यैर्यैः कैश्चित्कैश्चिदेव जन्मादिभिः योगगतिं व्रजेत् । 'जन्मादिभिः कैश्चिदेव प्राप्यते योगजं फलम् । योगेन सर्वं प्राप्येत योगे यत्नं ततः कुर्वि'ति च ॥ 'कश्चिदर्थे च यच्छब्दः प्रश्नार्थे च क्वचिद्भवेत् । क्वचित्परामर्शवाची क्वचिदाक्षेपवाचक' इति तन्त्रनिरुक्ते ॥ ३४ ॥ इति एकादशतात्पर्ये पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

'[9]सृष्टिस्थित्यादिहेतुत्वाद्भूतानि हरिरुच्यते । न तु भूतस्वरूपत्वात्स हि सर्वेश्वरेश्वर' इति वस्तुतत्त्वे ॥ ९ ॥ [10-11]स्वस्वजात्युत्तमत्वं तु भवेद्यद्रूपसन्निधेः । विभूतिरूपं तत्प्रोक्तमिन्दिरादिषु संस्थितम् । तथा बहिःस्थितं रूपं विभूतीत्येव शब्दितम् । सर्वसाधारणं रूपमन्तर्यामीति चोच्यते । यथा कृष्णात्मना दुष्टहन्ता व्यासात्मना समः । असमोऽप्येकरूपोऽपि सामर्थ्यात्पुरुषोत्तम' इति च ॥ ब्रह्मरुद्रेन्द्रजीवेभ्यः पृथगेव व्यवस्थितम् । विभूतिरूपं विष्णोस्तु तद्भश्रेष्ठ्यैककारणम् ।

योगमुत्तमम् । मया सम्पद्यमानस्य कालक्षपणहेतवः ॥३३॥ जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः । योगेनाप्नोति ताः सर्वा यैर्यैर्योगगतिं व्रजेत् । सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः ॥ ३४ ॥

षोडशोऽध्यायः

याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूतेः । ता मह्यमाख्याह्यनुभाविताास्ते नमामि ते तीर्थपदाङ्घ्रिपद्मम् ॥ ५ ॥ श्री भगवानुवाच—एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर । युयुत्सुना विशसने सपत्नैरर्जुनेन वै ॥ ६ ॥ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकम् । ततो निवृत्तो हन्ताऽहं हतोऽयमिति लौकिकः ॥७॥ स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः । अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ॥ ८ ॥ अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः । अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ९ ॥ अहं गतिर्गतिमतां कालः कलयतामहम् ।

SGDF
Sri Gargeshwari Digital Foundation

तदेव ब्रह्मरुद्रादिनामभिर्वाच्यमञ्जसा। तदेव देवेष्विन्द्रोऽस्मि तथा रुद्रेषु शङ्करः। इत्यादिनोक्तं कृष्णेन नेन्द्राद्या जीवसश्रया'इति गीताकल्पे॥ गतिर्ज्ञानम्। 'प्रधानो ज्ञानिनां ब्रह्मा ज्ञानमानी हृदिस्थितः। स एव कालमानी तु संहर्तॄणां प्रभुः स्मृत'इति विभूतौ॥ 'आनन्दानुभवस्तूम उत्कृष्टानुभवात्स्मृतः। तद्युक्तत्वं यथा सौम्यं गुणानामधिकं हि तत्। भक्त्यादिगुणपूगोऽपि दुःखहेतुत्वभावनात्। निष्फलो भवति ह्यद्धा प्रीतस्य सफलो भवेत्। तस्मादानन्दमानं तु गुणेषूत्कृष्टमुच्यते। तस्याभिमानी ब्रह्मैको भक्तिज्ञानादिकस्य च। श्रद्धाभिमानिनी देवी तथैव तु सरस्वती। तदन्येषां गुणानां तु तदन्ये विबुधाः स्मृताः। गुणानां तु प्रभुर्ब्रह्मा तस्मादेकश्चतुर्मुखः। औत्पत्तिकगुणो नाम शुभप्राप्त्यैकयोग्यता। तस्याभिमानी प्राणस्तु स हि सर्वगुणाधिक'इति च। गुणिनां मध्ये गुणिनि स्थितमौत्पत्तिकगुणरूपं सूत्रमित्यर्थः। 'गुणिनां गुणयोग्यत्वं यत्सर्वगुणिषु स्थितम्। वायुस्तदभिमान्येकः सर्वगुण्यधिकस्तत' इति प्रभञ्जने। रूपान्तरत्वादेकस्यापि बहुस्थानेषु प्राधान्योक्तिर्नो विरुध्यते। गुणान्तरोक्तेश्च 'रामः शस्त्रभृतां वृष्णीनां वासुदेव' इत्यादिवत्॥ १०, ११॥ [12]पदानि वाच्यानि छन्दसाम्। 'स्वयूथानामथाधिक्ये स्वजातीनामथापि वा। यत्कारणं विभूत्याख्यं विष्णोस्तद्रूपमुच्यत'इति प्राधान्ये॥ वर्णेशानि पदान्याहुः पादाश्चापि तदीश्वराः। पादानामीश्वरार्धर्चा तदीशा ऋच एव च। ऋचामधीशा वर्गाश्च तेषां सूक्तमधीश्वरम्। सूक्ताधीशास्तथाध्यायास्तदधीशास्तथाष्टकाः। तदधीशास्तथा शाखा वेदाश्चापि तदीश्वराः। वेदानामीश्वरा वाच्या वाच्यानामीश्वरो हरिः। न हरेरीश्वरः कश्चित्कदाचित्क्वापि विद्यत'इति च॥

गुणानां चाप्यहं सौम्यं गुणिन्यौत्पत्तिको गुणः॥ १०॥ गुणिनामप्यहं सूत्रं महतां च महानहम्। सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः॥११॥ हिरण्यगर्भो देवानां मन्त्राणां प्रणवस्त्रिवृत्। अक्षराणामकारोऽस्मि पदानि

SGDF
Sri Gangeshwari Digital Foundation

पद्यन्त इति पदानि वाच्यानि । 'पदं पदसहस्रेण यश्चरन्नापराध्यत' इतिवत् । 'पदं तु वाचकं प्रोक्तं क्वचिद्वाच्यमपीष्यत' इति शब्दनिर्णये ॥ १२ ॥ '[13]सर्ववेदाभिमानिन्यो देव्यो लक्ष्मीस्ततोऽधिका । वेदाभिमानिनी साक्षात्सा विष्णोर्दूरतः स्थिता । यज्ञाख्या सैव विष्णोस्तु या तूरःस्थलमाश्रिता । हरिणा रतियोगस्था दक्षिणाख्यापि सैव तु । उत्तरोत्तरतः साऽपि विशिष्टा दक्षिणा सुखे । एवं वेदाभिमानिभ्यो देवीभ्यः सर्व एव तु । तदर्थरूपाः पतयस्तस्यास्तस्यास्तथोत्तमाः । शच्या इन्द्रस्ततश्चोमा तस्या रुद्रस्ततस्तथा । भारती प्राण एवास्यास्ततः श्रीस्तद्वरो हरिरि'ति वैशिष्ये ॥ 'ऋते रुद्रादिकानिन्द्रः सर्वदेवाधिकः स्मृतः । ऋते भीमं फाल्गुनश्च पाण्डवेभ्यो वरस्तथा । तथा शुक्रः कवीशस्तु बृहस्पत्यादिकानृते । यमः संयमतामीशः शङ्करादीन्विनैव त्वि'ति गीताकल्पे ॥ १३ ॥ '[19]गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम् । प्राधान्योक्तिर्यतित्वस्य गार्हस्थ्यस्य क्वचित्क्वचिदि'त्याश्रमविवेके ॥१९॥ '[22]वसिष्ठोऽभ्यधिकस्तेषु मानुषाणां पुरोधसामि'ति त्रैकाल्ये ॥ २२ ॥ [24]जीवेशादिभेदवादी विकल्पः । ख्यातिवादिनां ज्ञानवादिनाम् । 'जीवेशादिविशेषं यो याथार्थ्येन प्रकल्पयेत् । कलिमारभ्य वा विष्णोराधिक्यादुत्तरोत्तरम् । नियमेनैव केनापि न हेयं स विकल्पकः । सर्वज्ञानिविशेषेभ्यः स ज्ञानी सर्वथाऽधिक'इति विज्ञाने ॥ 'भेददृष्ट्याभिमानेने'त्युक्तम् । 'विद्यात्मनि भिदा बोध'इति च वक्ष्यति ॥ २४ ॥ '[25]शतरूपा वरा स्त्रीणां पुंसा-

---

छन्दसामहम् ॥ १२ ॥ इन्द्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट् । आदित्यानामहं विष्णू रुद्राणां नीललोहितः ॥१३॥ नागेन्द्राणामनन्तोऽहं मृगेन्द्रः शृङ्गिदंष्ट्रिणाम् । आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ ॥१९॥ पुरोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः । स्कन्दोऽहं सर्वसेनान्यामग्रण्यां भगवानजः॥२२॥ योगानामात्मसंरोधो मन्त्रोऽस्मि विजिगीषताम् । आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनाम् ॥ २४ ॥ स्त्रीणां तु

SGDF
Sri Gargeshwari Digital Foundation

मभ्यधिको मनुः। तयोरप्यधिकौ नित्यमिन्द्राणीन्द्रौ शुभैर्गुणैरि'ति वैशेष्ये ॥ २५ ॥ '[29]ऐश्वर्यादिगुणैः षड्भिः सामग्र्यात्सर्वदेवताः। भगवच्छब्दवाच्याश्च साक्षात्तु भगवान्हरिः। निरपेक्षं तु सामग्र्यं तस्य सर्वाधिकं यत'इति च। अतो भगवतां देवानाम्। 'सर्वभागवताधीश उद्धवो भगवत्प्रियः। तस्मादभ्यधिको जिष्णुः प्रियत्वे भक्तितो हरेः। तस्मादभ्यधिको रामः कृष्णा त्वभ्यधिका ततः। तस्या अभ्यधिको भीमो न तु तत्सदृशः क्वचिदि'ति च। 'यत्किञ्चात्मनि कल्याणं सम्भावयसि पाण्डव। सहस्रगुणमप्येतत्त्वयि सम्भावयाम्यहम्। धर्मो ज्ञानं तथा मोक्षो यशः कीर्तिस्तथैव च। त्वय्यायत्तमिदं सर्वं लोकस्यापि न संशय'इति भारते ॥ २९ ॥ '[32]विष्णोः श्रियो ब्रह्मणश्च वायोः सङ्कर्षणस्य च। सुपर्णस्य च सम्प्रोक्ताः प्रत्येकं नवमूर्तयः। पूज्याः सात्वततन्त्रेषु तत्राद्या मूर्तयो हरेः। प्रधानास्ता हि सर्वासां मूर्तीनां हरिमूर्तयः। अभेदादेव मूर्तीनामेकमूर्तिश्च सा स्मृते'ति सहस्रावरणे। श्रियादिनवमूर्तीनां मध्ये स्वकीयनवमूर्तिरहमित्यर्थः। 'स्वरूपतश्च गुणतो न विशेषः कथञ्चन। विष्णोस्तु नवमूर्तीनां पूज्या च नवधेष्यत'इति च। अतो स्वनवमूर्तीनामन्येभ्योऽन्यनवमूर्तीनामपि प्राधान्यकारणं सन्निधानमात्मनस्तास्वप्यस्तीति पुरेतिविशेषणम्। प्रथमपूज्यास्ता इत्यर्थः। 'नारायणः परं ब्रह्म वासुदेवादिकास्तथा। नरसिंहवराहौ च परञ्ज्योतिर्हरेर्नव। इन्दिरा च रमा लक्ष्मीर्हिरण्या गगना तथा। रक्ता रक्ततरा भूतिर्विभूतिश्च श्रियो नव। ब्रह्मा चतुर्मुखो धाता विधाता विधिरेव च। कर्ता विरिञ्चो भूतेशः शतानन्दश्च ता नव। धनञ्जयमृते चैव वायोस्तु नवमूर्तयः। शेषोऽनन्तो नरश्चैव लक्ष्मणो

शतरूपाऽहं पुंसां स्वायम्भुवो मनुः। नारायणो मुनीनां च कुमारो ब्रह्मचारिणाम् ॥ २५ ॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहम्। किंपुरुषाणां च हनूमान्विद्याध्राणां सुदर्शनः ॥ २९ ॥ ओजः सहो बलवतां

SGDF
Sri Gargeshwari Digital Foundation

बल एव च। सङ्कर्षणो नीलवासा जगद्रक्षो जलेशयः। सुपर्णो गरुडश्चैव वैनतेयो महाशनः। नववर्णः पञ्चवर्णः पन्नगाशोऽमृताकरः। तथैव सर्ववेदात्मा सुपर्णो नवधा स्मृत'इति च ॥ ३२ ॥ '[37]यस्य यस्य स्वभावो यस्तत्तन्नामा हरिः परः। नियामकः स्वभावस्य तत्तच्छब्दादि-नामवान्। वैशेष्याख्या विभूतिश्च विभूतिश्च स्वभावजा। द्विधा विभूतिर्विज्ञेया विष्णोस्तु परमात्मन'इति च ॥ 'सत्वादिनाम विष्णोस्तु सत्वादिस्थस्य केवलम्। जीवस्थस्य च तन्नाम जीवादेरुपचारत'इति च॥३७॥ [39]कालेन सर्वगुणात्मकेन मया असङ्ख्यत्वात्तथा न क्रियते। नाविज्ञानात्। 'अनन्तमिति वेत्तीशस्त्वनन्तं त्वन्तवत्तथा। अनन्तस्य हि सङ्ख्याने न तु सर्वज्ञता भवेत्। अनन्तमपि वेत्तीशः प्रत्येकं च विशेषतः। सर्वज्ञत्वान्न सङ्ख्यानमसङ्ख्यस्य कुतो हि से'ति च ॥३९॥ [41]यथा वाचाऽभिधीयते। नामादिकं जीवादीनां ते सर्वे शब्दामनो-विकाराः ॥४१॥ [42]स्वतो मय्येव सर्वशब्दास्तस्मान्मय्येव वाचं यच्छ। आत्मानं परमात्मानं मय्येव लक्ष्यत्वेन यच्छ ॥ ४२ ॥ [43]यो मयि न संयच्छति। तस्य ज्ञानं स्रवति ॥ ४३ ॥ '[44]वाङ्मनः प्राणबुद्ध्यादी-न्नियच्छेत्केशवे परे। सर्वशब्दाभिधेयत्वं तस्य ज्ञात्वा विशेषतः।

कर्माहं विद्धि सात्वताम्। सात्वतां नवमूर्तीनामादिमूर्तिरहं पुरा ॥३२॥ विश्वावसुः पूर्वचित्तिर्गन्धर्वाप्सरसामहम्। भूधराणामहं स्थैर्यं गन्ध-मात्रमहं भुवः ॥३३॥ पृथिवी वायुराकाश आपो ज्योतिरहं महान्। विकारः पुरुषोऽव्यक्तं रजः सत्वं तमः परः। अहमेतत्प्रसङ्ख्यानं ज्ञानं तत्वविनिश्चयम् ॥ ३७ ॥ सङ्ख्यानं परमाणूनां कालेन क्रियते मया। न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ॥३९॥ एतास्ते कीर्तिताः सर्वाः सङ्क्षेपेण विभूतयः। मनोविकारा एवैते तथा वाचाऽभिधीयते ॥४१॥ वाचं यच्छ मनो यच्छ प्राणं यच्छेन्द्रियाणि च। आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ॥४२॥ यो वै वाङ्मनसी सम्यक् न संयच्छेद्धिया यतिः। तस्य व्रतं तपो ज्ञानं स्रवत्यामघटाम्बुवत् ॥४३॥ तस्माद्वचो

SGDF
Sri Gargeshwari Digital Foundation

मुख्यवृत्त्याऽभिधेयत्वमन्येषां मनसो भ्रमात् । तस्मात्तथा चिन्तयतः सर्वेज्ज्ञानं यथातथम् । तस्मान्मनो वचः प्राणान्माधवैकपरायणान् । कुर्यात्तद्धि तपो ग्राह्यं महाधर्मोत्तमश्च स'इति धर्मविवेके ॥ 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनी'ति च ॥ ४४ ॥ इति एकादशतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

'[5]विना प्रसादं विष्णोर्न धर्मं ब्रह्माभिवक्ष्यति । तत्प्रसादेन वक्तुं तु ब्रह्मा शक्ष्यति नापर'इति प्राधान्ये । कलाः प्राणाद्याः । 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुं ज्योतिरापःपृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकेषु नाम च ता इमाः षोडशकलाः पुरुषायणा' इतिश्रुतेः ॥ '[50]प्रतिमावद्धरेरूपं तिर्यङ्नरसुरादयः । साक्षाद्रूपाणि मत्स्यादीन्यभिन्नान्येव सर्वदे'ति च ॥ ५ ॥ इति एकादशतात्पर्ये सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

'[14]असम्पूज्य न्यसिष्णूंस्तु देवा वै पातयन्त्यधः । सुसम्पूज्य न्यसिष्णूंस्तु देवा एवानुजानते । अथवा तद्यशोवृद्ध्यै विघ्नन्तीव पुनः-

---

मनः प्राणान् नियच्छेत् मत्परायणः । मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ॥ ४४ ॥

सप्तदशोऽध्यायः

वक्ता कर्ताऽविता नान्यो धर्मस्याच्युत ते भुवि । सभायामपि वैरिञ्च्यां यत्र मूर्तिधराः कलाः ॥ ५ ॥

अष्टादशोऽध्यायः

विप्रस्य वै संन्यसतो देवा दारादिरूपिणः । विघ्नं कुर्वन्त्ययं

SGDF
Sri Gangeshwari Digital Foundation

पुनः । तात्पर्याद्विघ्नितो देवैर्नोत्थातुं शक्नुयात्क्वचिदि'ति देवहार्दे ॥ ॥१४॥ '[27]त्रिगुणा प्रकृतिर्माया तज्जत्वाद्विश्वमीदृशम् । अनाद्यनन्तकालेषु मायेत्याहुर्विपश्चितः । अचेतनत्वान्नैवैतत्प्रयोजकतया स्मरेत् । चेतनत्वं स्वतन्त्रत्वं स चैको विष्णुरेव तु । आयस्तु फलमुद्दिष्टं प्रोक्तं मायेति निष्फलम् । फलाल्पत्वात्तु मायैषा सम्प्रोक्ता त्रिगुणादिका । महाफलप्रदत्वात्तु विष्णुराय इतीरित'इति निवृत्ते ॥ २७ ॥ '[30]वेदेन सह वादो यो वेदवाद इतीरितः । तर्केण वेदस्यान्यार्थकल्पनं तं विदो विदुः । तन्न कुर्यात्कदाचिच्च तत्कुर्वन्वेदहा भवेदि'ति च । 'योगसाङ्ख्यकणादाक्षपादा वै हेतुवादिनः । पश्वीशशाक्तबुद्धाद्या पाषण्डा इति कीर्तिता'इति च ॥ ३० ॥ '[33]भूतानामेक एवात्ताऽथैको भूतेषु सन्ततः । एको भूतानि चादत्ते तस्मादेकात्मकानि त्वि'ति भद्रमाने ॥ 'घटादिषु महाकाशो निर्विशेषश्च सन्ततः । घटावयवरूपस्तु तथैवान्यो घटानुगः । घटनाशेऽप्यनाशः सन्मध्यमाकाश इष्यते । एकदेशाभिमानित्वादित्याकाशास्त्रयः स्मृताः । महाकाशो विघ्नराजो विघ्नास्तत्र तु मध्यमाः । क्षुद्रविघ्नास्तदितर एवमात्मा त्रिधा स्मृतः । महाखवत्परस्त्वात्मा जीवा मध्यखवत्स्मृताः । घटानुगखवत्प्रोक्ता असुरा नित्यदुःखिनः । महाकाशवशाः सर्वे आकाशा इतरे स्मृताः । परमात्मवशे तद्वज्जीवाः सर्वेऽपि संस्थिताः । एवं विष्ण्वात्मकमिदं जगत्पश्येद्यतिः सदे'ति विनिर्णये ॥ ३३ ॥ '[37]स्वभावतो धर्मपरो न विधेश्चकितश्चरेत् । अल्पं फलं च चकिते स्वभावे फलमुत्तममि'ति च ॥ ३७ ॥

ह्यस्मानाक्रम्य समियात्परम् ॥ १४ ॥ यदेतंदात्मनि जगन्मनोवाक्प्राणसम्भृतम् । सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥ २७ ॥ वेदवादरतो न स्यान्न पाखण्डी न हैतुकी । शुष्कवादविवादेन कञ्चित्पक्षं न संश्रयेत् ॥ ३० ॥ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः । खं यद्वदुपपात्रेषु भूतान्येकात्मकानि च ॥ ३३ ॥ शौचमाचमनं स्नानं न तु चोदनया चरेत् । अन्यांश्च नियमान् ज्ञानी यथाऽहं लीलयेश्वरः ॥ ३७ ॥

SGDF
Sri Gargeshwari Digital Foundation

(विधि)[38]विरुद्धत्वेन कल्पनं विकल्पः । 'निषिद्धं मनसा कल्प्य भीतो विहितमाचरेत् । अज्ञो ज्ञस्य तु सङ्कल्पः स्वभावाद्विहितानुगः । शरीरधर्मिणः क्वापि निषिद्धेऽपि मनो व्रजेत् । तथापि तस्य नानर्थो मोक्षे चैवान्यथा व्रजेदि'ति धर्मतत्त्वे ॥ ३८ ॥ '[40]शुश्रूषेत्सहितस्तावद्यावज्ज्ञानोदयो गुरुम् । ततः परं च शुश्रूषेद्यथा तस्य प्रियं भवेदि'ति च ॥ ४० ॥ इति एकादशतात्पर्ये अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

'[1]त्रिगुणा प्रकृतिर्माया पश्येत्तन्मात्रकं जगत् । निर्मिमीते जगत्सर्वमतो मायेति सा स्मृते'ति प्रभवे ॥ 'इदं ज्ञानं हरेः पूजा हरेरेवोदितं सदा । हर्यधीनं च सर्वत्रेत्येवं न्यासो हरौ स्मृत'इति च ॥१॥ '[7]अन्यस्थं निर्मितं जीवे जन्मादि हरिणा यतः । तस्मान्मायेति तत्प्राहुर्माया निर्माणमुच्यते । न हि जीवस्य जन्मादि स्वतो नित्यस्य सम्भवेत् । सृष्टेः प्राक् प्रलये चैव यतो जन्मादि नास्य हि । तस्मान्मध्येऽपि नास्यास्ति देहादिस्थं तु विष्णुना । कर्मभिर्निर्मितं जीवे प्रलये यन्न जीवगम् । यन्न विद्येत हि लये यन्न विद्येत मुक्तिगे । जीवस्य न स्वभावोऽसौ प्रायेणेतिविनिश्चित' इति प्राकाशिकायाम् ॥ 'मायेत्युक्तं निर्मितं तु यतो जन्मादि निर्मितम् । देहादिगं परेशेन

न हि तस्य विकल्पाख्या क्रिया मद्वीक्षया हता । आदेहान्तं क्वचित्ख्यातिस्ततः सम्पद्यते मया ॥ ३८ ॥ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् । अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ॥ ३९ ॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः । यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥ ४० ॥

एकोनविंशोऽध्यायः

श्री भगवानुवाच—यो विद्याश्रुतसम्पन्न आत्मवानानुमानिकः । मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥ १ ॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायान्तराऽऽपतति नाद्यपवर्गयोर्यः । जन्मादयोऽस्य

SGDF
Sri Gangeshwari Digital Foundation

माया जन्मादि तेन त्वि'ति प्रकृते ॥ मां प्रति वद । तस्य देहादे-र्जन्मादयोऽस्य चिदानन्दरूपस्य तव स्युः किम् । अस्वतन्त्रत्वादवस्तुनो जगतः आद्यन्तयोः यज्जीवस्यास्ति तदेतस्य स्वाभाविकम् । संसारेऽपि अन्यदभिमाननिमित्तं प्रलये विद्यमानस्य कथं जन्मादि स्यादितिभावः ॥ तदा नाशाद्देहादेस्तु युज्यते । मुक्तिगमेव जीवस्य स्वाभाविकम् । किमु लयेऽप्यविद्यमानं स्वतः स्यादित्यर्थः । 'आद्यन्तयोरनुगमादाद्यन्त-रहितस्य तु । आद्यन्ते भाविनो मध्ये कथमन्यादृशं वपुरि'ति ब्रह्मतर्के ॥ 'अनित्यत्वात्तु देहस्य तस्य जन्मादिकं भवेत् । मुक्तिप्रलयसम्बन्धे कथं जीवे तदिष्यत'इति च ॥ 'अनित्यस्य गुणा मध्ये भवेयुः स्वत एव तु । न तु स्वतस्तु नित्यस्य कादाचित्कगुणैर्युति'रिति च ॥ ७ ॥ [15]एतदेव च विज्ञानं तथापि न तथैव ॥ १५ ॥ '[14]ज्ञात्वा तत्त्वानि तेष्वीशं सर्वतत्त्वेश्वरं प्रभुम् । जानञ्ज्ञानी भवेत्स्वस्य योग्यं ज्ञानं विशेषतः । पूर्वोक्त एव यो जानन्स विज्ञानी भवत्युते'ति प्रभासे ॥ ॥ १४ ॥ [16]नः तत्त्वानां मध्ये येन यद्यत्र स्थित्वा च स्युः । तदेव सत् । 'सत्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे । अस्वातन्त्र्यान्न चान्येषामसत्वं विद्धि भारते'ति भारते ॥ १६ ॥ [17]विकल्पाद्विरुद्ध-कल्पनात् ॥ १७ ॥ '[27]एकः प्रधानमुद्दिष्टो विष्णोः प्राधान्यदर्शनम् । ऐकात्म्यदर्शनं प्रोक्तं सर्वज्ञानोत्तमं च तदि'ति त्रैकाल्ये ॥ २७ ॥

वद मां तव तस्य किं स्युराद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये ॥ ७ ॥ न वैकादशपञ्चत्रीन् भावान्भूतेषु येन वै । ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम् ॥१४॥ एतदेव हि विज्ञानं न तथैकेन येन यत् । स्थित्युत्पत्त्य-प्यया न स्युर्भावानां त्रिगुणात्मनाम् ॥ १५ ॥ आदावन्ते च मध्ये च यज्ञं सृज्यं यदन्वयात् । पुनस्तत्प्रतिसङ्क्रामे यच्छिष्येत तदेव सत् ॥ १६ ॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् । प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥ १७ ॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनम् । गुणे-ष्वसङ्गो वैराग्यमैश्वर्यं चाणिमादयः ॥ २७ ॥ दरिद्रो यस्त्वसन्तुष्टः

SGDF
Sri Gangeshwari Digital Foundation

'[45]विषये दोषबुद्धिःसन्निन्द्रियाणां वशे स्थितः ॥ कृपणः स तु सम्प्रोक्तो गुणबुद्धिर्विपर्यय'इति विवेके ॥ 'पुरुषार्थमतिर्यस्य विषयेष्वेव देहिनः । विपरीतः स विज्ञेयः स्वात्मनो विपरीतत'इति निवृत्ते ॥ वित्तासन्तोषमात्राद्दरिद्रः । सर्वविषयसङ्गी विपरीतः ॥ ४५ ॥ इति एकादशतात्पर्ये एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

'[5]स्वतः सर्वगुणात्मा तु विष्णुरेकः सनातनः । अन्यत्सर्वं तत्प्रियत्वाद्गुणो दोषस्तथाऽप्रियम् । एवं ज्ञानवतां दृष्टिरज्ञः सन्नावगच्छति । कालदेशविशेषेषु प्रीतिभेदमवेक्ष्य तु । अविज्ञानवतस्तस्य मर्यादा वेदतः कृता । गुणदोषभिदा नास्ति भगवत्प्रियमन्तरा । गुणदोषदृशेर्दोषो ह्यन्यत्र भगवत्प्रियात् । गुणा यद्दोषतामीयुर्दोषाश्च गुणतां क्वचित् । अतो दोषो न दोषः स्यादगुणोऽपि गुणो भवेत् । भगवत्प्रीतिविज्ञानाद्गुणदोषभिदां यदि । पश्येत्तत्तु गुणायैव विपर्यासं न कारयेत् । गुणदोषभिदा क्वापि स्वातन्त्र्येण न हि क्वचिदि'ति ब्रह्मनये ॥ स्वतस्तु गुणदोषत्वदृशेर्भेदेन वस्तुनाम् । दोषोऽथ गुण एव स्याद्भगवत्प्रीतितो गुणः । दोषस्तु तद्वैपरीत्यादितिदृष्ट्या भवेद्गुणः । कालदेशविशेषेण प्रीत्यज्ञानाज्जगत्स्थितेः । मर्यादा गुणदोषाणां कृता वेदेषु सर्वदे'ति परायणे ॥ एतदेवोच्यते । 'स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । विपर्ययस्तु दोषः स्यादुभयोरेष निर्णय'इति

कृपणो योऽजितेन्द्रियः । गुणेष्वसक्तधीरीशो गुणसङ्गी विपर्ययः ॥४५॥ एते उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः । किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥ ४६ ॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जनम् ॥ ४७ ॥

विंशोऽध्यायः

गुणदोषभिदादृष्टिर्नियमात्तेन हि स्वतः । नियमेनापवादश्च भिदाया इति हि भ्रमः ॥ ५ ॥ श्रीभगवानुवाच—योगास्त्रयो मया प्रोक्ता नृणां

SGDF
Sri Gargeshwari Digital Foundation

च ॥ ५ ॥ '[7]सनकाद्या ज्ञानयोगा भक्तियोगास्तु देवताः । मानुषाः कर्मयोगास्तु त्रिधैते योगिनः स्मृताः । सर्वेषां सर्वयोगैश्च प्राप्या मुक्तिर्न संशयः । तथापि तु विशेषेण स स तेषां विधीयते ॥ ७ ॥ '[8]भगवद्गुणानुसारेण वेदार्थो नीयते हि यैः । भक्तियोगास्तु ते प्रोक्तास्तादृशा हि सुराः सदा । अङ्गानुसारि वेदार्थं ज्ञात्वा तदनुसारतः । भगवद्गुणा यैर्नीयन्ते ते प्रोक्ता ज्ञानयोगिनः । कर्माणि शास्त्रतो ज्ञात्वा तत्प्राधान्यानुसारतः । विज्ञाता यैर्गुणा विष्णोर्ज्ञेयास्ते कर्मयोगिनः । भक्तिर्ज्ञानं च किञ्चित्तु पश्चात्तेष्वपि जायते । तथापि ते कर्मयोगाः कर्मपूर्वत्वकारणात् । भगवद्गुणानुरागित्वमधिकं भक्तियोगिनाम् । तस्मात्तेऽभ्यधिका ह्येषु देवा एव विशेषतः । ईषद्वैराग्यमल्पं तु पूर्वं देवेषु जायते । पश्चाद्विरागोऽभ्यधिको देवानां नात्र संशयः । ज्ञानाधिक्यं तु देवानां भक्त्याधिक्यं तथैव च । विरागोऽभ्यधिकस्तेषां सदैव सनकादिनाम् । ज्ञानाधिक्यान्मनुष्येभ्यो भण्यन्ते ज्ञानयोगिनः । न तु ज्ञानाधिकास्ते वै देवेभ्यस्तु कथञ्चन । देवानामपि कर्मित्वं विद्यते यद्यपि स्फुटम् । तथापि प्रत्यवायित्वान्मनुष्याः कर्मयोगिनः । त्रियोगाभ्यधिको ब्रह्मा सर्वेभ्यः परमो विभुः । महायोगेश्वरेशेशस्तस्माद्ब्रह्मा चतुर्मुख'इति त्रियोगे ॥८॥ [17]मार्गणवच्छरीरान्ते पतति ॥ ॥ १७ ॥ [27]स्वतोऽशुद्धानां कर्मणाम् । अनेन गुणदोषविधानेन नियमःकृतः । स्वतोऽशुद्धत्वेऽपि कर्मणां विध्यनुसारेणानुष्ठाने गुणत्व-

---

श्रेयो विधित्सया । ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥ ॥६॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु । तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कर्मिणाम् ॥७॥ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् । न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥८॥ नृदेहमासाद्य सु दुर्लभं यः प्लवं सुकल्पं गुरुकर्णधारम् । मयाऽनुकूलेन नभस्वतेरितः पुमान्भवाब्धिं न तरेत्समार्गणः ॥ १७ ॥ कर्मणां जात्यशुद्धानामनेन नियमः कृतः । गुणदोषविधानेन त्वंहसां त्याजनेच्छया ॥ २७ ॥

SGDF
Sri Gargeshwari Digital Foundation

मेवेत्यर्थः ॥ २७ ॥ [31]हृदयग्रन्थिः अन्तःकरणाख्यो बन्धः ॥ ३१ ॥ [32]मद्भक्तियुक्तस्य भक्त्यनुसारिज्ञानवैराग्ये विनाऽन्यस्माज्ज्ञानाद्वैराग्याच्च न श्रेयो भवेत् । 'रागिणोऽपि विमुच्यन्ते देवा नास्त्यत्र संशयः । रागापनोदनार्थं च ज्ञानं साध्यं यतीश्वरैरि'ति च ॥ 'स्मर्तव्या विषये दोषा यतिभिर्न तु दैवतैः । हरिरेव सदा पूज्य इत्यर्थं दैवतैरपी'ति च ॥ वैराग्यार्थमपि विषयदोषादिज्ञानं सनकादीनां भाव्यं देवानां तदपि भगवद्भजनस्यैव सारतापरिज्ञानार्थमेवेत्यर्थः ॥३२॥ [35]रागिणोऽपि ते भक्तियोगिनो भक्तिफलत्वेन किमपि नापेक्षन्ते ॥ ३५ ॥ '[36]यदि दद्याद्भक्तियोगफलं मोक्षमपीश्वरः । भक्तियोगफलत्वेन न तद्गृह्णीयुरेव ते । कामिनोऽपि स्वयं कामान्भुञ्जते न फलात्मना । तस्माद्विरागेऽप्यधिका देवा एव हि तादृशा' इति च ॥ ३६ ॥ '[38]उत्तमो भक्तियोगस्तु ज्ञानयोगस्तु मध्यमः । अधमः कर्मयोगश्च ब्रह्मैको मुख्यभक्तिभाक् । ज्ञानमप्यधिकं तेषां नियतं भक्तियोगिनाम् । उदेति भगवद्भक्त्या तद्वन्न ज्ञानयोगिनः । भक्त्यंशकं यतो ज्ञानं ज्ञानस्नेहात्मिका च सा । तथापि ज्ञानयोगित्वं मानुषज्ञानतोऽधिकम् । भक्तियोगे

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु । वेद दुःखात्मकान् कामान् परित्यागेऽप्यनीश्वरः ॥२८॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चाऽस्य कर्माणि मयि दृष्टेऽखिलाऽऽत्मनि ॥ ३१ ॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानान्न च वैराग्यात्प्रायः श्रेयो भवेदिह ॥ ३२ ॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ ३३ ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति ॥ ३४ ॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमकल्मषम् । तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३५ ॥ न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम । वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ ३६ ॥ एवमेतान्मयाऽऽदिष्टाननुतिष्ठन्ति मे पथः । क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ॥ ३८ ॥

SGDF
Sri Gurgeshwari Digital Foundation

ततो यत्नः कार्यो विद्वद्भिरञ्जसे'ति च ॥ ३८ ॥ इति एकादशतात्पर्ये विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

[3]विवेकेन पुण्याधिक्यं भवतीति विचिकित्सार्थं गुणदोषौ विधीयेते । 'पञ्चभूतात्मकत्वेन समता सर्ववस्तुषु । हरिसन्निधिवैशेष्याद्विशेषश्च महान्सदे'ति वैशेष्ये ॥ ३ ॥ [6]धातुः परमेश्वरः । 'यद्यद्धरेः सन्निहितं तत्तच्छुद्धतरं मतम् । स्वतः शुचितमो विष्णुः सान्निध्यं च स्वभावत'इति च ॥ एतेषां जीवानाम् ॥ ६ ॥ '[8]नदीसमुद्रगिरय आश्रमाश्च वनानि च । नगराणि च दिव्यानि शालग्रामादयस्तथा । तेषां समीपगाश्चैव देशा योजनमात्रतः । कर्मण्यास्तु समाख्यातास्तदन्ये कीकटाः स्मृताः । तदन्येऽपि तु ये देशाः कृष्णसारोषिताः स्वतः । कर्मण्या एव ते ज्ञेया यदि नाध्युषिताः खलैः । खलैरध्युषिताश्चापि यदि सद्भिरधिष्ठिताः । कर्मण्या इति विज्ञेया विष्णुलिङ्गानि यत्र चे'ति स्कान्दे ॥ ८ ॥ '[15]आन्तरः सन्निधिर्विष्णोर्बाह्यसन्निधिरेव च । द्विविधः सन्निधिः प्रोक्तः कृत्रिमो बाह्य उच्यते । स्वाभाविकस्त्वान्तरः स्यात्प्रतिमाजीवगो यथे'ति च ॥१५॥ [16]तद्विदामेव न तिर्यगादीनाम् । 'वर्षाच्चतुर्दशादूर्ध्वं ये न विद्युः शुभाशुभम् । तेषामज्ञानजो दोषः सुमहान्कर्मजादपि । तिरश्चामिन्द्रियासक्तेर्न दोषो-

---

एकविंशोऽध्यायः

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु । द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाऽशुभौ ॥ ३ ॥ भेदेन नामरूपाणि विषमाणि समेष्वपि । धातुशुद्ध्यै विकल्प्यन्त एतेषां स्वार्थसिद्धये ॥६॥ कृष्णसारोऽथ देशानां ब्राह्मणानां शुचिर्भवेत् । कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणः ॥८॥ मन्त्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणम् । धर्मः सम्पाद्यते सद्भिरधर्मस्तु विपर्ययैः ॥१५॥ क्वचिद्गुणोऽपि दोषः स्याद्दोषोऽपि विधिना गुणः । गुण-

SGDF
Sri Gargeshwari Digital Foundation

ऽज्ञानजो भवेत् । गुणोऽपि नैव कश्चित्स्याद्यतो ज्ञानबहिष्कृता' इति च । अतो मूर्खाणामदोष इति न ॥ १६ ॥ [17]समानकर्माचरणे आत्मयोग्य-कर्माचरणे । पूर्वमपतितो येन पतति । प्रायश्चित्तत्वेन तत्समानकर्मा-चरणेऽपि न दोषः तप्तसुरापानवद्देहत्यागिनः । तथा शयानः शूद्रोऽपि न पतति लशुनभक्षणादिभिः ब्राह्मणादिपातकैः । औत्पत्तिको यतस्तस्य तादृशगुणसङ्गः । अतः स्वायोग्य एव कर्मणि पतति । 'त्रैवर्णिकाः सञ्चरन्तो वेदकर्मप्रवर्तनात् । शयानः शूद्र उद्दिष्टो वेदकर्माप्रवर्तनात् । न तस्याभक्ष्यजो दोषः शुश्रूषायां प्रवर्ततः । यथा सुवर्णस्य मलं शुल्बं ताम्रस्य नैव तत् । एवं विप्रादिदोषैस्तु न शूद्रो दोषितामियात् । मलं तु तस्यापि मलं यथैवं शूद्रजन्मनः । स्वधर्मप्रतिरूपस्य चरणं दोषदं मतमि'ति च समाचारे ॥ 'शूद्रस्यापि हरेर्दीक्षां प्रविष्टस्य तु विप्रवत् । अभक्ष्यादिकृतो दोषः स हि शूद्रो हि मुख्यत' इति विष्णु-तन्त्रे ॥ १७ ॥ [18]सर्वतोऽप्यभिमानविमोकेन परमात्मसमर्पणमेव दोष-हानिदमित्याह यतोयत इत्यादिना । 'मयि सर्वाणि कर्माणि संन्यस्या-ध्यात्मचेतसे'त्यादेश्च ॥१८॥ '[22]दोषिणो गुणवत्त्वेन श्रूयन्ते विषयाः सदा । असतां सङ्गतेस्तेषु दोषाः श्रोतुं सुदुर्लभाः । अतो नित्यगुण-ध्यानात्तद्गुणे प्रीतिमान्भवेत् । अतस्तत्र भवेत्कामः कामिनं कलि-राविशेत् । अधर्मज्ञानरूपेण कलिनाविष्टदेहिनः । सत्सु क्रोधो दुर्विष-

---

दोषार्थनियमस्तद्विदामेव बाधते ॥ १६ ॥ समानकर्माचरणे पतितानां न पातकम् । औत्पत्तिको गुणैः सङ्गो न शयानः पतत्यधः ॥ १७ ॥ यतो यतो निवर्तेत विमुच्येत ततस्ततः । एष धर्मो नृणां क्षेमः शोकमोह-भयापहः ॥१८॥ विषयेषु गुणाध्यानात्पुंसः सङ्गस्ततो भवेत् । सङ्गादेव भवेत्कामः कामादेव कलिर्नृणाम् ॥१९॥ कलेर्दुर्विषहः क्रोधस्तमस्तदनु-वर्तते । तमसा ग्रस्यते पुंसश्चेतना व्यापिनी ततः ॥२०॥ तथा च रहितः साधो जन्तुः शून्याय कल्पते । ततोऽस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च ॥ २१ ॥ विषयाभिनिवेशेन नात्मानं वेद नापरम् । वृक्षजीविकया

SGDF
Sri Gargeshwari Digital Foundation

हस्ततस्तमसि पात्यते। अन्धे तमसि मग्नस्य चेतनेन्द्रियसन्तता। सुखानुभवशक्तिर्या सा विनश्यति सर्वदा। तदा शमूनभावेन शून्य इत्युच्यते नरः। सर्वात्मना तु सम्भ्रंशस्तस्य दुःखविवर्धनः। अमूर्च्छितस्यैव भवेन्मृत्यनन्तरमेव च। दुःखाख्याविषयावेशान्नात्मानं परमेव च। यथावद्वेत्ति पतितस्तमस्यन्धे कदाचन। वृक्षवद्वृश्चयते नित्यं निष्प्रयोजनजीवनः। नित्यदुःखपरीतायुर्दृतिवत्प्रश्वसित्यपी'ति तन्त्रभागवते। स्वार्थस्य सुखस्य भ्रंशो विपरीतमतिशयेन जनयतीति स्वार्थविभ्रंशः॥ तस्मात्स्वर्गादिविषयेष्वपि नेच्छेत॥ २२॥ '23-25फलस्य श्रुतिरेवेयं न कामकुसुमश्रुतिः। स्वर्गादिकामनायुक्तस्त्वैहिकेष्वपि सज्जते। तत्रापि देवकामेभ्यो विशेषं चाभिवाञ्छति। ततस्तमसि पातः स्यादतो वेदः कथं हि तान्। काम्यत्वेनाभिचक्षीत सर्वं जानन्स्वयं सदे'ति॥ नः श्रेयोरोचनं अस्मत्सकाशाच्छ्रेयो मोक्षाख्यं तदेव रोचयति फलश्रुतिः। कुसुमस्यानित्यतादिदोषज्ञानान्मोक्षस्यादोषत्वज्ञानाच्च। ईषदुत्तमस्य श्रोतुर्विवक्षया। बुधो वेदः कथं युञ्ज्यात्। अन्तरालागतोऽपि स्वर्ग एवं विधः किमु साक्षात्फलरूपो मोक्ष इति रोचकः। अनेकब्रह्मकालप्राप्यत्वान्मोक्षस्य तावन्तं कालं तप एव कर्तुं न शक्यत इति मन्दाधिकारिणां स्वर्गादिष्वप्यभिरुचिर्भवति तान्प्रत्यन्ते मोक्ष एव भवति। अन्तरालेऽप्येवंविधस्वर्गादिकं सुखं भवति। तस्माद्विहितं कर्म कर्तव्यमिति रोचयति। उत्तमानां तु यस्मादेतादृशमप्यनित्यत्वादिदोषवत्स्वर्गादिकं तस्मान्मोक्षफल एव वेद इति दर्शयति। न हि सर्वप्रमाणोत्तमो वेदोऽल्पफले पर्यवसितः। 'मन्दाधिकारिणां

जीवन् व्यर्थं ग्रस्तवयाः श्वसन्॥ २२॥ फलश्रुतिरियं नृणां नः श्रेयो रोचनं परम्। श्रोतुर्विवक्षया प्रोक्तं यथा भैषज्यरोचनम्॥ २३॥ उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च। आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु॥ २४॥ न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि।

SGDF
Sri Gangeshwari Digital Foundation

नित्यं तपसैव प्रतीक्षितुम्। मोक्षो न शक्यतेऽधैर्यात्ततः स्वर्गादिकं वदेत्। स्वर्गादिष्वल्पफलतां ज्ञापयित्वा विमोक्षदम्। एवं वक्तुं तूत्तमानां नित्यो वेदः प्रवर्तते। इक्षुदण्डं ददानीति यथा भैषज्यरोचनम्। एवं मन्देषूत्तमेषु मोक्षमाहात्म्यमुच्यते। नह्यल्पफलभाग्वेदो वासुदेवैकसंश्रय'इति विचारे ॥ २३-२५ ॥ '[27]अयोग्यभार्यापुत्रादिकामिताऽनर्थसाधिनी। योग्यकामाद्धरेः प्रीतिरतो ब्रह्मादयोऽमलाः। भार्यापुत्रादिसंयुक्ता वासुदेवमुपासत'इति च ॥ २७ ॥ [26]एवं वेदस्य व्यवसितम्। फलश्रुतिं कुसुमिताम्। फलं मोक्षः। तद्विषयां श्रुतिं स्वर्गादिकुसुमविषयां वदन्ति ॥ २६ ॥ '[27]नित्यानन्दो हरेर्भक्तिज्ञानाद्याः स्वर्गशब्दिताः। पुत्रभार्यापवित्ताद्यं सर्वं मोक्षगतं फलम्। उद्दिश्य स्वर्गकामस्य यजनं श्रुतिचोदितम्। तदविज्ञाय पुष्पाख्यमनित्यं स्वर्गमिच्छवः। यजन्ति मन्दमतयो वेदवादपरायणा'इति च ॥ 'स्त्रीभिर्वा यानैर्वे'त्यादि च ॥२७॥ '[29]मोक्षाख्यं फलमेवात्र स्वर्गादिवचनं तु यत्। पुष्पस्वर्गादिवत्तस्य वचनं मन्दरोचनमि'ति च ॥ 'असुराणामयं स्वर्गशब्दः पुष्पात्मकं वदेत्। देवानां हरिसम्प्राप्तिं वेदो विष्णुपरो यत'इति च ॥ २९ ॥ [27]स्वलोकं स्वाश्रयम् ॥ २७ ॥ [28]कोऽसावाश्रयः मां ते ये उक्थेन प्राणेन शास्याः। 'विष्णवभक्तान् सदा वायुः शासयेत्तमसि क्षिपन्। विष्णुभक्तान्विमोक्षाय प्रापयित्वा सुखं नयेदि'ति च ॥ 'पथ एकः पीयाय तस्करो यथाँ एष वेद निधीनामि'ति च। मे मताविज्ञानात्परोक्षविषयात्मकाः। परोक्ष-

---

कथं युञ्ज्यात् पुनस्तेषु तांस्तमोविशतो बुधः ॥ २५ ॥ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः। फलश्रुतिं कुसुमितामवेदज्ञा वदन्ति हि ॥२६॥ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः। अग्निमुग्धा धूमितान्ताः स्वलोकं न विदन्ति ते ॥२७॥ न ते मामङ्ग जानन्ति हृदिस्थं य इदं यतः। उक्थशास्रोद्यसुतृपो यथा नीहारचक्षुषः ॥ २८ ॥ ते मे मतमविज्ञाय परोक्षविषयात्मकाः। वृथा पशून्विनिघ्नन्ति हिंस्यन्ते प्रेत्य तैस्तु ते ॥

SGDF
Sri Gargeshwari Digital Foundation

मन्धन्तमः । तद्विषयस्वरूपाः । तद्गमनार्थस्वरूपाः । 'अन्धन्तमः परोक्षं च पश्चकष्टं तथोच्यत'इति सुव्यक्ते ॥ तेषामासुराणां यदा हिंसायां कामः । तदा यज्ञ एव न चोदना । यद्यदात्मनो हिंसितुमिष्टं तत्तद्विहितमिति प्रापयन्ति कुतर्कैः । 'आसुरोऽविहितां हिंसां विहितत्वेन वर्णयेत् । आसुरा याज्ञिकाः सर्वे नारायणपराङ्मुखा'इति च ॥ २८ ॥ '[32]विष्णुं विहाय ये देवान्पितॄन् भूतेशमेव वा । साम्येन वा पूजयन्ति ते ज्ञेया आसुरा गणा' इति च । तामसेष्वेव रजःसत्वतमोनिष्ठाः । 'तामसेषु तु ये सत्वा निरयप्रचुरास्तु ते । ईषत्स्वर्गादिसंयुक्ता एवं निष्ठाश्च ते स्मृताः । केवलं निरये निष्ठा ये ते तामसराजसाः । अन्धे तमसि ये निष्ठास्ते वै तामसतामसाः । एवं त्रिभेदयुक्तास्तु याज्ञिका विष्णुवर्जिता' इति हरिवंशेषु ॥ ३२ ॥ '[35]ब्रह्मत्वं पूर्णता प्रोक्ता तद्यस्य स्वत एव तु । स ब्रह्मात्मा समुद्दिष्टो वासुदेवः सनातन'इति च ॥ ३५ ॥ [36]प्राणेन्द्रियमनोभिर्मीयते । 'मेयत्वान्मय उद्दिष्टो वेदः प्राणादिभिः सदे'ति वाराहे ॥ 'अन्तो विनाश उद्दिष्टः पारः परिमितिस्तथा । अनन्तपारो वेदोऽयं ताभ्यां स रहितो यत'इति व्यासस्मृतौ ॥ ३६ ॥ [35]भूम्ना ब्रह्मणा अतिमहापरिपूर्णेन ॥ ३५ ॥ [38-40]आस्पर्शरूपिणा आस्पर्शो विष्णुस्तं रूपयति प्रकाशयतीत्यास्पर्शरूपि प्राणस्य मनः । आसमन्तात्स्पर्शा भोगा अस्यैवेत्यास्पर्शः । 'भुङ्क्ते

हिंसायां यदि कामः स्यादज्ञ एव न चोदना ॥ २९ ॥ हिंसाविहारा-ह्यालब्धैः पशुभिः स्वसुखेच्छया । यजन्ते देवता यज्ञैः पितॄन् भूतपतीन् खलाः ॥ ३० ॥ रजःसत्वतमोनिष्ठा रजःसत्वतमोजुषः । उपासते इन्द्रमुख्यान् देवादीन् यथैव माम् ॥३२॥ वेदा ब्रह्मात्मविषयास्त्रिकाण्ड-विषया अपि । परोक्षवादो वेदोऽयं परोक्षं मम च प्रियम् ॥३५॥ शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम् । अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्र-वत् ॥३६॥ मयोपबृंहितं भूम्ना ब्रह्मणाऽनन्तशक्तिना । भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ॥ ३७ ॥ यथोर्णनाभिर्हृदयादूर्णामुद्वहते मुखात् ।

SGDF
Sri Gargeshwari Digital Foundation

यदखिलान्स्पर्शानास्पर्शो विष्णुरुच्यते । तस्य प्रकाशकं नित्यं नमस्ये प्राणमेकलम् ।। प्राणस्यैव मनो नित्यं वासुदेवं प्रकाशयेदि'ति वायुप्रोक्ते ।। 'मीयन्तेऽनेन छन्दांसि प्राणश्छन्दोमयस्तत'इति च । 'त्रिमात्रमादितः कृत्वा यावच्चानन्तमात्रकाः ।। प्रणवास्ते विभेदेन ह्यनन्ताः परिकीर्तिताः । एकमात्रोत्तराः सर्वे वासुदेवाभिधायकाः । तेषां व्याख्यानरूपा हि सर्वे वेदाः प्रकीर्तिताः । ॐकारव्यञ्जितास्तस्मात्सदोच्चार्या हरेः प्रियैरि'ति प्रणवमाहात्म्ये ।। 'गुह्यदर्शनभाषे च भाषा चैव समाधिका । तिस्रस्तु मूलभाषाः स्युरेकैका च त्रिधा पुनः । गुह्यदर्शनसंज्ञा च गुह्यगुह्या तथाऽपरा । एवमादि क्रमेणैव त्वेकाशीतिविभेदिताः । भाषास्तत्र च गुह्या च प्रसिद्धार्थेष्वनन्विता । गुह्यार्थतत्परैवान्धो मणिमित्यादिका च सा । दर्शनान्यवलम्ब्यैव पशुपत्यादिनां तु या । बहुश्रुतिविरुद्धं तु वदेत्सा दर्शनात्मिका । अन्ते निषेधसंयुक्ता भस्मस्नानादिका च सा । यथा प्रदृश्यमानार्था समाधिः सा प्रकीर्तिता । विष्णुः परम इत्याद्या सा च विद्वद्भिरीरिते'ति भाषाविवेके । 'भस्मस्नानविधानं तु श्रुत्युक्तं दर्शनानुगम् । भस्मस्नानं ततोऽग्राह्यं विधानं तु नृसिंहगमि'ति स्कान्दे । गायत्र्या उष्णिक् चतुर्वर्णाधिकेत्यादि चतुरुत्तरैः जगत्यन्तानामेव चतुरुत्तरत्वनियमः ।। ३८-४० ।। '[41]छन्दस्तु नवपादं यज्जगदित्युच्यते बुधैरि'ति छन्दोविधाने ।।४१।। [42-43]विविधरूपत्वेन कल्पनं विकल्पः चत्वारि वागित्यादि । तत्र वागित्यनुवादः । 'विधिभागे हरेः पूजैवाभिधाने च तद्गुणाः । विकल्पे तद्बहुत्वं चाप्यपोहे तु

आकाशाद्घोषवान् प्राणो मनसा स्पर्शरूपिणा ॥३८॥ छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः । ओङ्कारेष्वञ्जितां स्पर्शस्वरोष्मान्तस्थभूषिताम् ॥ ॥ ३९ ॥ विचित्रभाषावितता छन्दोभिश्चतुरुत्तरैः । अनन्तपारां बृहतीं सृजत्यक्षिपते स्वयम् ॥४०॥ गायत्र्युष्णिगनुष्टप् च बृहती पङ्क्तिरेव च । त्रिष्टुप् जगत्यातिच्छन्दो ह्यष्टयत्यष्टि जगद्विराट् ॥ ४१ ॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद

B SGDF Sri Gargeshwari Digital Foundation

दतप्रियम् । उच्यते सर्ववेदेषु तच्च वेद स एव ही'ति आगमतात्पर्ये । 'सुरा हरेर्गुणाः प्रोक्तास्ते मे स्युरिति चिन्तनम् । सुरापानमिति प्रोक्तं तन्न कुर्यात्कथञ्चन ।। ब्राह्मणो विष्णुरुद्दिष्टः स नास्तीत्यभिचिन्तनम् । ब्रह्महत्या समुद्दिष्टा तां न कुर्यात्कथञ्चन । इत्याद्यपोहवाक्यार्थश्चिन्त्यो विष्णुर्बुधैर्जनैरि'त्यादि च । मदन्यः कश्चन कोऽपि न वेद ।। [44]अभिदश्च स एव अश्च अभिदा तं अभिदां मामास्थाय मायामात्रं मदिच्छानिर्मितं शरीरादिकं अनूद्योपासनादिकं विधाय मोक्षरूपेण तच्छरीरादिकं प्रतिषिध्य प्रशाम्यति । 'सर्वावताररूपेषु निर्भेदत्वाददोषतः । अभिदा विष्णुरुद्दिष्टस्तमेवोक्त्वा तदिच्छया । निर्मितं दैहिकं बन्धं तस्योपासन एव तु । प्रतिषिध्य विमोक्षे तु स्वभावोपास्तिरूपतः । प्रतिशाम्यति वेदोऽयं वासुदेवैकसंश्रय'इति च । अभिदामास्थाय कोऽपि शब्दो मेति वा ।। ४२, ४३ ।। इति एकादशतात्पर्ये एकविंशोऽध्यायः ।। २१ ।।

द्वाविंशोऽध्यायः

[4]मायां मदीयां मत्सामर्थ्यम् । 'विष्णोः सामर्थ्यमालम्ब्य तत्त्वसङ्ख्यां मुनीश्वराः । चक्रुर्हि तदविज्ञाय विवदन्त्यल्पबुद्धयः । तत्रापि कारणं विष्णोः शक्तिर्यस्या विकारतः ।। ४ ।। [4-6]अव्यक्तादेर्विकल्पोऽयं मनसः सम्प्रजायते । विरुद्धकल्पनं तच्च वासुदेवैकनिष्ठया । निरहङ्कारया नश्येद्विवादैकाश्रयं हि तदि'ति तन्त्रभागवते ।। [6]यासां

कश्चन ॥ ४२ ॥ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्य इत्यहम् ॥ ४३ ॥ एतावान् सर्ववेदार्थः शब्द आस्थाय माऽभिदाम् । मायामात्रमनूद्यान्ते प्रतिषिध्य प्रशाम्यति ॥ ४४ ॥

द्वाविंशोऽध्यायः

श्री भगवानुवाच—युक्तयः सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा । मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ॥४॥ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा । एवं विवदतां हेतुः शक्तयो मे दुरत्ययाः ॥५॥ यासां

SGDF
Sri Gangeshwari Digital Foundation

सकाशादव्यक्तादिव्यतिकराद्विकल्पो विरुद्धकल्पः। स हि विवादाश्रयः। तत्त्वसङ्ख्या विवक्षाभेदेन बहुधा भवति ॥ ४-६ ॥ [10]सर्वथा जीवादन्यः परमेश्वरोऽङ्गीकर्तव्यः। जीवस्य स्वत एव ज्ञानायोगात् ॥ १० ॥ [11]स च पुरुषरूपेण तत्स्थितो ज्ञानमुत्पादयति। ईश्वररूपेण बहिःस्थितः फलं ददाति। न च तयोः स्वरूपयोः किञ्चिद्वैलक्षण्यम्। तयोश्चान्यत्व-कल्पना तत्स्वरूपादपगमनप्रयोजनाऽनर्थकारिणीत्यर्थः। ज्ञानस्वरूपस्य जीवस्य कथं ज्ञानोत्पादनमित्यतो वक्ति। ज्ञानं च प्रकृतेर्गुण इति। जन्यज्ञानं प्रकृतेर्गुणः। 'स्वरूपभूतज्ञानं तु सदा जीवस्य विष्णुना। नियतं प्राकृतं ज्ञानं भक्त्या तेनैव दीयत'इति च ॥ ११ ॥ [12]जन्य-ज्ञानस्य प्राकृतत्वं साधयति। प्रकृतेर्गुणसाम्ये त्वित्यादिना॥ '[13]अन्तःस्थः पुरुषो नाम ज्ञानदः सर्वदेहिनाम्। बहिःस्थ ईश्वरो नाम ज्ञानादिफलदो हरिरि'ति मात्स्ये ॥ 'पुरुषाख्यो हृद्गतस्तु विष्णुर्जीवविबोधकः। फल-दात्रा तु बाह्येन य ईशेन भिदां वदेत्। तथैवान्यस्वरूपेषु विष्णोर्यो भेददर्शकः। ये च जीवेश्वराभेदं पश्यन्तोऽनर्थभागिन'इति ब्राह्मे ॥ कालो भगवान् ॥ १२ ॥ [14]नवैकादश पञ्च त्रीणीत्युक्तानि पुरुषः प्रकृतिरित्यादीनि ॥१४॥ [16]उत्सर्गस्य द्विविधत्वात्पञ्चकद्वयम् ॥१६॥

व्यतिकरादासीद्विकल्पो वदतां पदम्। प्राप्ते शमदमे व्येति वादस्तमनु-शाम्यति ॥ ६ ॥ अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम्। स्वतो न सम्भवेद्यस्मात्ततोऽन्यः पुरुषो भवेत् ॥१०॥ पुरुषेश्वरयोरत्र न वैलक्षण्य-मण्वपि। तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः ॥ ११ ॥ प्रकृतेर्गुण-साम्ये तु प्रकृतेर्नात्मनो गुणाः। सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्त-हेतवः ॥१२॥ सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते। गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥ १३ ॥ पुरुषः प्रकृतिर्व्यक्तमहङ्कारो नभो-ऽनिलः। ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ १४ ॥ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः। वाक्पाण्युपस्थपाय्वङ्घ्रि-कर्माण्यङ्गोभयं मनः ॥ १५ ॥ शब्दः स्पर्शो रसो गन्धो रूपं चेत्यर्थ-जातयः। गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १६ ॥ सर्गादौ

SGDF
Sri Gurgeshwari Digital Foundation

[17]त्रीनिति त्रिगुणानिति वक्तुं गुणप्रवृत्तिमाह सर्गादावित्यादिना ॥१७॥ [18]कार्यकारणभावादन्योऽन्यानुप्रवेशो युक्त इति वक्तु सृष्ट्युक्तिः। 'सृज्यस्रष्टृस्वरूपत्वादन्योऽन्यानुप्रवेशिनः। तिष्ठन्ति तात्त्विका देवा विशेषप्राप्तिकारणादि'ति नैसर्गे ॥ १८ ॥ [14]अन्वेकमप्येष्वित्युक्तत्वात्पुरुषो हिरण्यगर्भः। 'यदा पुरुषशब्देन विरिञ्चस्यैव वाच्यता। परस्य पृथगुक्त्यैव व्यक्तस्तत्र तु शङ्करः। तदाऽहङ्कारशब्देन स्कन्दस्यैव वचो भवेदि'ति विवेके ॥ १४ ॥ [19]सत्वादीन् गत्यादींश्च विना परमात्मना सह षड्विंशतिः। महदहङ्कारौ ब्रह्मरुद्रौ अङ्गीकृत्य स्कन्दं विना परमात्मना सह पञ्चविंशतिः। 'विषयेन्द्रियप्रकृतिदेवताः परमात्मना। पञ्चविंशतितत्त्वानि सङ्ख्यातानि विदो विदुरि'ति च। 'ज्ञानशब्दोदितो ब्रह्मा तदाधारो हरिः स्मृत'इति च ॥ ततो ज्ञानं विना परमात्मानमङ्गीकृत्यैव देहेन्द्रियाण्यसुश्च नव तत्त्वानि। 'सर्वदेहाभिमानी तु देहिनां तु दिवाकरः। इन्द्रियात्मेन्द्र एवैकः प्राणो नाम प्रजापतिरि'ति च ॥ १९ ॥ [21]अवयविनो जन्म तैः खलु ॥ २१ ॥ '[22]भूतानि मात्राश्च परस्तत्त्वैकादशकं स्मृतमि'ति च। भूतमात्रेत्यारम्भात्तत्सिद्धेरेकादशानां पृथगनुक्तिः ॥ [23]आत्मना सहैव मन उच्यते। 'आत्मनः सन्निधिस्थत्वान्मनसस्तु तदुक्तितः। उक्तो भवेत्परात्मापि तत्त्वषोडशकं

प्रकृतिर्ह्यस्य कार्यकारणरूपिणी। सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्तमीक्षते ॥ ॥ १७ ॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेच्छ(क्ष)या। लब्धवीर्याः सृजन्त्यण्डं संहताः प्रकृतेर्बलात् ॥ १८ ॥ सप्तैव धातव इति यत्रार्थाः पञ्च खादयः। ज्ञानमात्मोभयाधारस्ततो देहेन्द्रियासवः ॥१९॥ षडित्यत्रापि भूतानि पञ्च षष्ठः परः पुमान्। तैर्युक्त आत्मसम्भूतैः सृष्ट्वेदं समुपाविशत् ॥ २० ॥ चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्मनः। जातानि तैरिदं जातं जन्मावयविनः खलु ॥ २१ ॥ सङ्ख्याने सप्तदशके भूतमात्रेन्द्रियाणि च। पञ्चपञ्चैकमनसा आत्मा सप्तदशः स्मृतः ॥ २२ ॥ तद्वत्षोडशसङ्ख्यान आत्मना मन उच्यते। भूतेन्द्रियाणि पञ्चैव मन

SGDF
Sri Gurgeshwari Digital Foundation

यदे’ति च। आत्मशब्देन च ब्रह्मा परमात्मा चोभावुच्येते। ‘भूतेन्द्रियाणि च मनो ब्रह्मा विष्णुस्तथैव च। एवं त्रयोदशैवाहुस्तत्त्वानि मुनयो वरा’इति च। ‘आत्मेति परमात्मा च विरिञ्चश्चापि कथ्यते। वायुर्मनश्च देहश्च स्वयमित्यपि कुत्रचिदि’ति प्रत्यये ॥२२॥ [25]यद्यपि परमात्मा प्रकृतिश्च विलक्षणौ तथापि तयोर्वैलक्षण्यं न लक्ष्यते। ‘अन्तरं च भिदा चेति वैलक्षण्यं प्रकीर्तितमि’ति च। तद्वैलक्षण्यं कुतो न दृश्यत इति प्रश्नाभिप्रायः॥ २५॥ [26]अन्योन्याधारत्वमेव दृश्यते। न तु परमेश्वरस्यानन्याधारत्वेन प्रकृत्याधारत्वं मन्दमतीनामित्यर्थः॥ ॥ २६॥ ‘[27]आधारः प्रकृतेर्विष्णुर्नाधारस्तु हरेः क्वचित्। तथाप्यव्यक्तगो यद्वद्दृश्यते मन्दचेतसामि’ति पाद्मे॥ २७॥ [28]प्रकृतिःपुरुषश्चेत्येव अन्योऽन्यविलक्षणावेव। एष विकल्पः। वैलक्षण्यादर्शनं विरुद्धकल्पनमेव। यस्माद्गुणव्यतिकरात्मकः सर्गो विकारनिमित्तः स च गुणव्यतिकरस्त्रिविधः। सत्वरजस्तमसामेकैकप्राधान्येन तत्र तमःप्रधानानामेव विरुद्धकल्पनं तस्मात्तम एवात्र कारणमित्यर्थः॥ २८॥ [29]तत्रापि प्रकृतिरेव कारणं ईश्वरेच्छा च। विकाराज्जातत्वाद्वैकारिक इत्युच्यते अहङ्कारस्त्रिविधोऽपि। ‘वैकारिको महांश्चैव तथाऽहङ्कार एव च। तथैव सात्विकश्चांशो वैकारिक इति त्रिधे’ति शब्दनिर्णये॥ २९॥

आत्मा त्रयोदश ॥२३॥ इति नाना प्रसङ्ख्यानं तत्वानामृषिभिः कृतम्। सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनम्॥ २४॥ उद्धव उवाच— प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ। अन्योऽन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः॥ २५॥ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथाऽऽत्मनि। एतन्मे पुण्डरीकाक्ष महान्तं संशयं हृदि। छेत्तुमर्हसि पद्मेश वचोभिस्तत्वनैपुणैः॥ २६॥ त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तत्नुशक्तितः। त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः॥ २७॥ श्री भगवानुवाच— प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ। एष वैकारिकः सर्गो गुणव्यतिकरात्मकः॥२८॥ ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धिं च गुणैर्विधत्ते। वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत्॥ २९॥

SGDF
Sri Gangeshwari Digital Foundation

[30]अध्यात्ममिन्द्रियाणि । तैरेव विपरीतं ज्ञानं जायते । 'अहङ्कारे विद्यमाने भ्रमो भवति नान्यदा । सम्यग्ज्ञानं हरेः शक्त्या तन्मुक्तस्य विशेषतः । देवतानुग्रहो नित्यो मुक्तस्यापि ह्यपेक्षते । नित्यं तत्प्रतिबिम्बत्वाज्जीवानामेव कृत्स्नशः । बाह्यज्ञानं च मुक्तस्य न जडाहङ्कृतेः क्वचित् । किन्तु स्वरूपशक्त्यैव देवेभ्यश्चाभिजायत'इति ब्रह्मतर्के ॥ 'पश्यन्नपि जगत्सर्वं चिद्बलेनैव पश्यति। कुतो मुक्तस्य तु जडं चिद्रूपस्य व्यपेक्षत'इति च। एषामुपरमे मुक्तौ। चक्षुरितिपुनर्वचनमवधारणार्थम् ॥ ३० ॥ [32]योऽसौ भ्रमहेतुर्विकारः स गुणक्षोभकृतः आत्मा तु परिज्ञानस्वरूपो न गुणक्षोभकृतः ॥ ३२ ॥ [33]भिदा विपर्ययेण विद्यमानं नास्ति अविद्यमानमस्तीति विवादः । 'असदस्ति च सन्नास्तीत्येवं भेदाद्विवादनम् । सदैव हरिपादाब्जविमुखानां प्रवर्तत'इति च ॥ ३३ ॥ [38]विषयाभिनिवेशेन उत्तरदेहाभिनिवेशेन पूर्वदेहास्मरणं यत्तन्मृत्युः ।। ईदृशं वर्तमानं आयएष्यत्सः अतीत इति त्रैविध्यं भाति विज्ञाय वस्तुनि विज्ञाते सति दीर्घलोपः । अत्रात इतिवत् । 'क्षैप्रे दीर्घलोप'इति सूत्रात् । अयमेवात्मानात्मनोर्विशेषहेतुः । यथा प्रायोऽसज्जनोऽसज्जनमेव जनयतीति पितृज्ञानात्पुत्रदौरात्म्यं ज्ञायते । एवमनित्यत्वादनात्मत्वं देहादेरित्यर्थः ॥ ॥ ३८ ॥ [44]सोऽयमेवेति मृषा । 'स चायमिति तु ज्ञानं न मृषायं स

दृग्रूपमर्कश्च परत्र रन्ध्रे परस्परं सिध्यति न स्वतोऽसौ । आत्मा यदेषामुपराम आद्यः स्वयाऽनुभूत्याऽखिलसिद्ध्यसिद्धिः ॥ ३० ॥ एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तम् ॥३१॥ योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलो जगतः प्रसूतिः । अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च ॥३२॥ आत्मा परिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः । व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ ३३ ॥ विषयाभिनिवेशेन नात्मानं यत्स्मरेन्मनः । जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः ॥ ३८ ॥ ईदृशायास विज्ञाय त्रैविध्यं भाति वस्तुनि । बहिरन्तर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥ ४१ ॥ सोऽयं

SGDF
Sri Gangeshwari Digital Foundation

एव तु । इति ज्ञानं मृषैव [35]स्याद्भेदाभेदौ यतस्तनोः । अभेद एव जीवस्य नित्यं प्रत्येकशः पृथक् । दीपदेहनदीवारिफलादीनां पृथक् स्वतः । भेदाभेदौ परिज्ञेयौ कार्यकारणयोरपि । गुणस्य गुणिनश्चैव जातिव्यक्त्योस्तथैव च । तथाऽवयव्यवयवयोः क्रियायास्तद्वतस्तथा । एवं जडेषु नियमश्चिद्रूपेष्वभिदैव त्वि'ति च ॥ 'ये धर्मा नियमेनैव धर्मिणो न वियोगिनः । जडस्था अप्यभिन्नास्ते भिन्नाभिन्ना वियोगिन'इति च ॥ ४४ ॥ [48]अभिज्ञाद्वयलक्षणौ अभिमानमात्रौ ॥ ४८ ॥ [49]तरोर्बीजविकारदृष्टान्तेन विद्वान्देहाभिमानं त्यक्त्वा संयमं याति । परमात्मनश्च भेदं जानाति प्रकृत्यादेः । 'बीजाद्यवस्थासंयुक्ताद्वृक्षाद्द्रष्टा यथा पृथक् । एवं विकारिणो विष्णुर्जीवश्च पृथगेव त्वि'ति च ॥ ४९ ॥ '[52]दुःखशोकादयः सर्वे ज्ञेया बुद्धिगुणा इति । सुखज्ञाने तु जीवस्य भक्तिः स्नेहस्तथैव च । विपर्ययेणासुराणां जीवबुद्धिगुणा इती'ति च ॥ 'आत्मनोऽपि गुणा बुद्धिकृतबुद्धिगुणा इति । उच्यन्ते सुखदुःखाद्याः परमात्मकृता यथे'ति त्रैकाल्ये ॥५२॥ [54]मृषा वृथा । 'अल्पप्रयोजनं यत्तन्मृषेत्येव तदुच्यत' इति शब्दनिर्णये । आत्मनः स्वत एव दुःखाद्याः सुखादिवदिति मिथ्याबुद्धिरिति वा ॥ ५४ ॥ इति एकादशतात्पर्ये द्वाविंशोऽध्यायः ॥ २२ ॥

दीपोऽर्चिषां यद्वत्स्रोतसां तदिदं जलम् । सोऽयं पुमानिति नृणां मृषागीर्भिर्मृषायुषाम् ॥ ४४ ॥ आत्मनः पितृपुत्राभ्यां अनुमेयौ भवाप्ययौ । भवाप्ययौ हि वस्तूनां अभिज्ञाद्वयलक्षणौ ॥ ४८ ॥ तरोर्बीजविकाराभ्यां यो विद्वान् जन्मसंयमौ । तरोर्विलक्षणे द्रष्ट एवं द्रष्टा तनोः पृथक् ॥४९॥ नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् । एवं बुद्धिगुणान् पश्यन्नीहोऽप्यनुकार्यते ॥५२॥ यथा मनोरथधियो विषयानुभवो मृषा । स्वप्नदृष्टश्च दाशार्ह तथा संसार आत्मनः ॥ ५४ ॥

SGDF
Sri Gargeshwari Digital Foundation

त्रयोविंशोऽध्यायः

[48]सात्विकमनोविवक्षया देवशब्दः ॥ ४८ ॥ [49]तामसमनोविवक्षया शत्रुशब्दः । 'एकस्थानाधिपत्ये तु भिन्नानामपि युज्यते । अभेदेन परामर्शः सादृश्येनापि वस्तुनोरि'ति प्रयोगे ॥४९॥ '[48]ऋते द्वे ब्रह्मणी कस्य मनो याति वशं क्वचित् । श्रियं सरस्वतीं वापि याति वा तत्प्रसादत'इति पाद्मे ॥ ४८ ॥ [49]उदासीनानां रिपुं सम्यग्ज्ञानवतां न रिपुत्वं शक्यत इत्यर्थः ॥ ४९ ॥ [50]अभिमानमात्रेणैव जीवस्य देहेन सम्बन्ध इति मनोमात्रम् । मनसा निर्माणमिति । अहमन्य इत्यपि देहमात्रे मन्यन्ते । 'देहमात्रं स्वमात्मानं यः परं चाभिपश्यति । अन्धे तमसि मग्नस्य नोत्तारस्तस्य कुत्रचिदि'ति च ॥ ५० ॥ '[51]जनशब्दः स्वतो जीवे क्वचिद्देहे च वर्तत'इति प्रयोगे ॥ ५१ ॥ [52]अयोग्यक्रोधादेर्मन एव कारणम् । 'अविकाराश्च ते देवा विकारा इति शब्दिताः । अभिमानाद्विकारस्य स्वतः शक्ता अपि ध्रुवमि'ति च ॥ ५२ ॥ [53]न ह्यात्मनः स्वभावादन्यद्भवति । यदि दृश्यते तथापि मृषा स्यात् । सुखरूपं दुःखं न भवति । अतो मन एव तथा दर्शयति । 'जीवस्य

त्रयोविंशोऽध्यायः

मनोवशेऽन्ये हि भवन्ति देवा मनश्च नान्यस्य वशं समेति । भीमो हि देवः सहसः सहीयान्युञ्ज्याद्वशे तं स हि देवदेवः ॥ ४८ ॥ तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदन्तन्न विजित्य केचित् । कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्रैरुदासीनरिपुं विमूढाः ॥ ४९ ॥ देहं मनोमात्रमिदं गृहीत्वा ममाहमित्यन्धधियो मनुष्याः । एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति ॥ ५० ॥ जनोऽस्य हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् । जिह्वां क्वचित्सन्दशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥ ५१ ॥ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् । यदङ्गमङ्गेन विहन्यते क्वचित् क्रुध्येत कस्मै पुरुषः स्वदेहे ॥ ५२ ॥ आत्मा यदि स्यात् सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः । न

SGDF
Sri Gangeshwari Digital Foundation

सुखरूपस्य न दुःखं क्वचिदिष्यते । अतो मनोऽभिमानेन दुःखी भवति नान्यथे'ति भारते ॥ ५३ ॥ [54]गृह्यमाणत्वाद्ग्रहो देहः ॥ ५४ ॥ [55]अजडत्वे आत्मनः ॥५५॥ [56]तदात्मनः कालाधीनस्य । 'स्वातन्त्र्यमात्मशब्दोक्तं स्वरूपमपि कुत्रचिदि'ति विवेके ॥ यथाग्नेर्हिमस्य च नैव दुःखं तापनिमित्तं जडत्वात् । एवं जडत्वाद्देहस्यापि कालादिसम्बन्धे विद्यमानेऽपि न दुःखं युक्तम् । 'सदा कालादिसम्बन्धाद्दुःखं देहस्य युज्यते । तथापि नैव दुःखी स जडत्वान्नियमेन तु । आत्मनः सुखरूपत्वान्न दुःखं युज्यते क्वचित् । तस्मान्मनोभ्रमेणैव दुःखी जीवो न चान्यथा । सर्वेषां मनसो नेता मनोरूपस्त्रिलोचनः । तद्वशाः सर्वदेवाश्च तेनैव सुखदुःखिनः । नियन्ता तस्य च प्राणस्ततोऽपि बलवत्तरः । तन्नियन्ता हरिः साक्षात्परमानन्दलक्षण'इति तात्पर्ये ॥५६॥ [57]आत्मनः मनसः ॥ भौमयोर्विकारयोः उभयमनसोः सतोर्दुःखं भवति । ग्रहस्य ग्रहणरूपस्य मनसः सत एव । जडे मनसि सत्येव । तदात्मनो मनसः सतः । संसृतिरूपिणः आत्मनो जीवस्य यथा तथा न हि परस्य अमनस्त्वादतो मनोऽन्वयव्यतिरेक इति भावः ॥५७॥ इति एकादशतात्पर्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात् क्रुध्येत कस्मै न सुखं न दुःखम् ॥ ५३ ॥ ग्रहा निमित्तं सुखदुःखयोश्चेत् किमात्मनोऽजस्य जनस्य ते वै । ग्रहैर्ग्रहस्यैव भवन्ति पीडाः क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ॥ ५४ ॥ कर्मास्तु हेतुः सुखदुःखयोर्वै किमात्मनस्तद्धि जडेऽजडत्वे । देहे स्ववित्पुरुषोऽयं सुपर्णः क्रुध्येत कस्मै न हि कर्ममूलम् ॥ ५५ ॥ कालोऽस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मनोऽसौ । नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुध्येत कस्मै न परस्य वोद्धुः ॥ ५६ ॥ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धः शापितोऽपि वा । ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ॥ ५७ ॥

SGDF
Sri Gangeshwari Digital Foundation

चतुर्विंशोऽध्यायः

'[2]यथैवार्थस्तथा ज्ञानं ज्ञानार्थैक्यमुदाहृतम् । तथा कृतयुगे प्रायस्तदन्येषु तु कस्यचिदि'ति ब्रह्मतर्के ॥ २ ॥ [3]फलं रूपयतीति फलरूपः । ज्ञानार्थैक्येन सत्यं पश्चात्तद्द्विधा समभवत् । तच्छब्दार्थात्मकमुभयं बृहत्तरम् ॥ ३ ॥ [4]ज्ञानाभिमानी पुरुषः स ब्रह्मा समुदाहृतः । अर्थाभिमानी प्रकृतिर्गायत्री सा प्रकीर्तिता । तयोर्नियामको विष्णुः श्रीश्चानुग्राहिका स्मृता । वायुस्तु ब्रह्मणः पुत्रः प्रकृतौ समजायत । त्रिगुणात्मा समुद्दिष्टः प्रायः सत्वात्मकस्तथा । गायत्री चैव सावित्री तथैव च सरस्वती । एवं त्रिरूपा प्रकृतिरेका सत्वादिभेदतः । तासु वीर्यं समुत्सृष्टं ब्रह्मणैकत्वमागतम् । स सूत्रात्मा समुद्दिष्टो वायुर्लोकप्रणायकः । तस्यापि सूत्रं भगवान्धारणाद्विष्णुरव्ययः । सूत्रपुत्रस्त्वहङ्कारः स रुद्रः समुदाहृतः । सूत्रात्मना महांश्चापि सहजातश्चतुर्मुखः । तस्यापि पुत्रोऽहङ्कारः सचानन्त उदाहृतः । अनन्तादपि रुद्रोऽभूद्ब्रह्मणश्चेति स त्रिधा । वैकारिको ब्रह्मजस्तु तैजसो वायुजः स्मृतः । तामसोऽनन्तजश्चैव स एको गुणभेदत' इति प्राथम्ये ॥ ४ ॥ '[7]चिदचिद्यद्वशे सर्वं स रुद्रश्चिदचिन्मय'इति च ॥७॥ '[10]चिदानन्दशरीरस्तु प्रविष्टोऽण्डे

चतुर्विंशोऽध्यायः

आसीज्ज्ञानमथो ह्यर्थश्चैकमेवाविकल्पितम् । यदा विवेकनिपुणा आदौ कृतयुगे जनाः ॥ २ ॥ तन्मया फलरूपेण केवलेन विकल्पितम् । वाङ्मनो गोचरं सत्यं द्विधा समभवद्बृहत् ॥३॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका । ज्ञानं त्वन्यतमो भोगः पुरुषः सोऽभिधीयते ॥४॥ तमो रजः सत्त्वमिति प्रकृतेरभवन् गुणाः । मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन वा ॥ ५ ॥ तेभ्यः समभवत्सूत्रं मत्सूत्रेण च संयुतम् । ततो विकुर्वतो जातो योऽहङ्कारो विमोहकः ॥ ६ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् । तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः ॥ ७ ॥ तस्मिन्नहं समभवमण्डे सलिलसंस्थिते । मम नाभ्यामभूत्पद्मं विश्वाख्यं

SGDF
Sri Gangeshwari Digital Foundation

हरिः स्वयम् । तन्नाभेर्भूतदेहोऽभूत्पद्मादपि चतुर्मुखः । चतुर्मुखस्तु सर्वाण्डव्याप्तदेहो महातपाः । हरिस्तु सर्वव्याप्तोऽपि भूतदेहो न तु क्वचित् । नैवास्य प्राकृतो देहः प्रादुर्भावेष्वपि क्वचिदि'ति निवृत्ते ॥ ॥१०॥ [14]महरादीनामपि भक्तियोगोऽपेक्षित एव आधिक्येनापेक्षितत्वाद्भक्तियोगस्य मद्गतिरित्युक्तम् । 'नैव विष्णावभक्तस्य महर्लोकादिका गतिः । भक्त्युद्रेकात्क्रमादूर्ध्वं यावद्विष्णुप्रवेशनम् । एवं ज्ञानं विना सापि महर्लोकादिका गतिः । ज्ञानोद्रेकात्क्रमादूर्ध्वं यावद्विष्णुप्रवेशनम् । नित्यशो भगवद्रूपस्यापरोक्ष्येण दर्शनम् । मुहूर्तमात्रं ज्ञानं स्यान्महाज्ञानं ततोऽधिकम् । ज्ञानेन ब्रह्मलोकः स्यान्महाज्ञानाद्धरेर्गतिः । सदैवाखण्डितं ज्ञानं तप इत्युच्यते बुधैः । अपरोक्षदृशा युक्तं नित्यं षण्मात्रकालया । अपरोक्षदृशा नित्यं एकमात्रायुजा युतम् । योगनाम्ना समुद्दिष्टं ध्यानं नित्यमखण्डितम् । तच्चतुर्भागया नित्यमपरोक्षदृशा युतम् । पादयोगाख्यमुद्दिष्टं ध्यानं नित्यमखण्डितम् । पादयोगान्महर्लोको जनोलोकस्तु योगतः । तपसस्तु तपोलोकः प्राप्यते नान्यतः क्वचिदि'ति ध्यानयोगे ॥१४॥ [15]कालात्मना ज्ञानाद्यात्मना ॥१५॥ '[17]प्रकृतेस्तु विकाराणां कोट्यंशो भेद इष्यते । तथैवाकाशतो भेदः सोऽपि नाभेदवर्जितः । भेदाभेदमतः प्राहुरभेदं वा तयोर्बुधा'इति विवेके ॥१७॥ '[18]पारमार्थिकसत्यत्वं स्वातन्त्र्यमभिधीयते । तद्विष्णोरेव नान्यस्य तदन्येषां सदास्तिते'ति च॥ यद्ब्रह्मोपादाय पूर्वः प्रकृत्यादि-

---

तत्र चात्मभूः ॥ १० ॥ अधो सुराणां नागानां भूमेरोकोऽसृजत्प्रभुः । त्रिलोक्या गतयः सर्वाः कर्मणां त्रिगुणात्मनाम् ॥१३॥ योगस्य तपसश्चैव ज्ञानस्य गतयोऽमलाः । महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः ॥ १४ ॥ मया कालात्मना धात्रा कर्मयुक्तमिदं जगत् । गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति ॥ १५ ॥ यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य तत् । विकारो व्यवहारार्थो यथा तैजसपार्थिवाः ॥ १७ ॥ यदुपादाय पूर्वस्तु

SGDF
Sri Gangeshwari Digital Foundation

रादिरन्तश्च यद्ब्रह्मणि यस्मात्तस्माद्ब्रह्म परमार्थसत्यम् ॥ १८ ॥ [19]परः पुरुषो हिरण्यगर्भः कालोऽपि रूपान्तरेण स एव । 'कालाभिमानी ब्रह्मा तु काल इत्यभिशब्दितः । सर्वजीवाभिमानी स परःपुरुष उच्यते । प्रकृतिर्नाम तत्पत्नी प्रकृतेरभिमानिनी । सा प्रसूते जगत्सर्वं सूत्रमारभ्य सर्वश'इति च । आधारो व्यञ्जकश्चैव प्रसविता च केशवः । 'कालप्रकृतिपुंसां च तन्मूलप्रकृतेरपि । आधारो व्यञ्जकश्चैव सर्वस्यापि नियामक'-इति च ॥ १९ ॥ [20]यावत्स्थितिरस्ति तावदुत्पत्तिरस्त्येव । यावदीक्षणं यावत्प्रलयः स्यादिति भगवतः स्मरणम् ॥ २० ॥ '[21]विशेषेण गुणोद्रेकाद्विशेषः पृथिवी स्मृते'ति प्रवृत्ते । पञ्चत्वानन्तरमविशेषाय ॥२१॥ '[22]देव्यामोषधिमानिन्यां लीयतेऽन्नाभिमानिनी'त्यादि च ॥ २२ ॥ '[25]विकारजत्वात्तु महान्वैकारिक उदाहृतः । ईशनादीश्वरश्चैव ब्रह्मा बृंहणतः स्मृत'इति च ॥ २५ ॥ '[29]गायत्री चैव सावित्री तथैव च सरस्वती । एवं त्रिरूपा प्रकृतिर्ब्रह्मपत्नी प्रकीर्तिता । महत्तत्त्वात्मको ब्रह्मा तज्जत्वात्तत्र लीयते । गुणाधिकः पतिरपि तस्याः सत्वादिभेदतः । त्रिविधा मूलरूपायां प्रकृत्यां सा प्रलीयते । प्रकृतिर्मूलरूपा सा ब्रह्मपत्नी जगन्मया । पुरुषाभिधे विरिञ्चे तु स स्वस्मिन्कालसञ्ज्ञिते ।

भावो विकुरुते परम् । आदिरन्तो यतो यस्मिंस्तत्सत्यमभिधीयते ॥१८॥ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म-तत्त्रितयन्त्वहम् ॥१९॥ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः । महान् गुणविसर्गोऽर्थः स्थित्यन्तो यावदीक्षणम् ॥ २० ॥ विराण्मयाऽऽसाद्यमानो लोककल्पविकल्पकः । पञ्चत्वायाविशेषाय कल्पते भुवनैः सह ॥ ॥२१॥ अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते । धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते ॥ २२ ॥ योनिर्वैकारिके सौम्य लीयते महतीश्वरे । शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ॥ २५ ॥ स लीयते महान्स्वेषु गुणेषु गुणवत्तमः । तेऽव्यक्ते सम्प्रलीयन्ते तत्काले लीयतेऽव्यये ॥२६॥ कालो मायामये जीवे जीव आत्मनि मय्यजे । आत्मा केवल आत्मस्थो

SGDF
Sri Gargeshwari Digital Foundation

कालाभिधो विरिञ्चस्तु महालक्ष्म्यां विलीयते । जीवमायेति यामाहुः सा च सत्वादिभेदतः । त्रिविधैकत्वमापाद्य विष्णावेव विलीयते । हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः प्रकीर्तितः । पुरुषेणापि सामीप्यं प्रकृतेर्लय उच्यते । ब्रह्मा च प्रकृतिश्चैव मुक्तिगौ विलये यतः । अतस्तौ भिन्नदेहौ तु ज्ञानमात्रौ समीपगावि'त्यादि च ॥ २९ ॥ इति एकादशतात्पर्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

'[3]राजसेऽपि यदा दुःखं तामसे किमुतेति तत् । राजसे दुःखवचनं तामसेऽतिविवक्षये'ति प्रद्योते ॥ ३ ॥ '[24]नैर्गुण्यसाधनं यत्तन्निर्गुणं परिकीर्तितमि'ति च । 'यथाशास्त्रोक्तविज्ञानं केवलं ज्ञानमुच्यते । स्वदृष्टशास्त्रानुकूल्याददृष्टानां च भक्तितः । गुणानां तु हरौ भावं विनिश्चित्यैतदाश्रयात् । यथाशास्त्रानुसन्धानं ज्ञानं तु हरिसंश्रयमि'ति च ॥ २४ ॥ '[27]श्रुतशास्त्रानुसारेण या श्रद्धा परमात्मनि । सा सात्विकी तदन्यस्याप्यनुसारेण निर्गुणा । अश्रुत्वाऽपि प्रमाणं यो वासुदेवैकसंश्रयः । स निर्गुणो भागवतः समुद्दिष्टो मनीषिभिरि'ति

विकल्पोपायलक्षणः ॥ २७ ॥ एष साङ्ख्यविधिः प्रोक्तः संशयग्रन्थिहेतिकः । प्रतिलोमाऽनुलोमाभ्यां परावरदृशा मया ॥ २९ ॥

पञ्चविंशोऽध्यायः

कामईहामदस्तृष्णास्थम्भ आशीर्भिदा सुखम् । मनोत्साहो यशः प्रीतिर्धार्ष्ट्यवीर्यबलोद्यमाः ॥ ३ ॥ क्रोधो लोभोऽनृतं हिंसा माया दम्भो क्षमा कलिः । शोकमोहौ विषादार्ती निद्राऽऽशाभीरनुद्यमः ॥४॥ कैवल्यं सात्विकं ज्ञानं कर्मनिष्ठं तु राजसम् । प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥ २४ ॥ सात्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः । तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥२६॥ सात्विकयाध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायां तु

SGDF
Sri Gargeshwari Digital Foundation

च ॥२७॥ '[29]परोक्षज्ञानमात्मोत्थमापरोक्ष्येण दर्शनम्। विष्ण्वाश्रयं सुखं नित्यं गमयेत्तत्प्रसादतः। न तु विष्णोः स्वरूपं तु सुखं केनचिदाप्यते। तस्यैव विषयत्वात्तु तत्सुखं चेति भण्यते। परोक्षज्ञानगो यस्माद्विषयः स्वमनोगतः। अत आत्मोत्थमित्येव सुखमाहुर्विपश्चित'-इति च ॥२९॥ [31]दृष्टं श्रुतं बुद्ध्या दृष्टं चानु परं ब्रह्म ध्यायेत् ॥३१॥ '[34]सत्वाद्गुणाज्जातमपि व्यवधानं विनैव तु। मुक्तिदं निर्गुणं प्रोक्तं व्यवधानेन सात्विकमि'ति ब्राह्मे ॥ ३४ ॥ इति एकादशतात्पर्ये पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः

'[2]वस्तु स्वतन्त्रमुद्दिष्टमस्वतन्त्रमवस्तु चे'ति माहात्म्ये ॥ ३ ॥ [35]भगवतोऽपि सतां मध्ये प्रधानत्वात्सन्तोऽहमेव चेत्युक्तम्। 'विष्णोश्च सत्प्रधानत्वान्न सतां विद्यते परम्। इत्याहुर्वेदविदुषः स हि सर्वेश्वरेश्वर'इति च ॥ ३५ ॥ इति एकादशतात्पर्ये षड्विंशोऽध्यायः ॥ २६ ॥

निर्गुणा ॥ २७ ॥ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम्। तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥ २९ ॥ सर्वे गुणमया भावाः पुरुषाव्यक्तनिष्ठिताः। दृष्टं श्रुतमनुध्यायेद्बुद्ध्या वा पुरुषर्षभ ॥ ३१ ॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसम्भवम्। मयैव ब्रह्मणा पूर्णो न बहिर्नान्तरश्चरेत् ॥ ३४ ॥

षड्विंशोऽध्यायः

गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया। गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः। वर्तमानोऽपि न पुमान्युज्यतेऽवस्तुभिर्गुणैः ॥२॥ सङ्गं न कुर्यादसतां शिश्नोदरतृपां क्वचित् ॥३॥ सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः। देवता बान्धवाः सन्तः पिता माताऽहमेव च ॥ ३५ ॥

SGDF
Sri Gargeshwari Digital Foundation

सप्तविंशोऽध्यायः

[22]जीवः कला यस्याः सा जीवकला भगवन्मूर्तिः । 'हृदिस्था या हरेर्मूर्तिर्जीवो यत्प्रतिबिम्बकः । यद्वशे वर्तते जीवः स तु जीवकला स्मृता । शब्दैः सर्वात्मनाऽनुक्तेर्नादान्तस्था च सा मते'ति विवेके ॥ ॥ २२ ॥ '[23]व्याप्तो भूतश्च नित्यं यदात्मभूतो हरिस्ततः । जीवस्य तत्प्रधानत्वं तन्मयत्वमुदाहृतमि'ति तन्त्रभागवते ॥ 'व्याप्तोऽपि भगवान्विष्णुर्देहे सर्वगतत्वतः । भक्तस्य फलदो यस्माद्व्याप्तिकृत्तस्य तेन स'-इति च ॥ २३ ॥ [30]स्वस्य विष्णुसूक्तेन धाम सूक्तं समुद्रादूर्मिरिति । 'नितरां रञ्जयेद्यस्मात्पावमानं तु मण्डलम् । विष्णुनीराजनं तस्माद्विद्वद्भिः समुदाहृतमि'ति च ॥ ३० ॥ [43]मम कर्माणि कीर्तयित्वाऽभितो नयन्सर्वेषां प्रकाशयन्मत्कथाः श्रावयन्नित्यभिनयपदार्थः ॥ ४३ ॥ [51-52]नैरपेक्ष्येण भक्तियोगेनैव साम्यमित्यर्थः । 'निर्दुःखत्वं हरेः साम्यं न तादृशसुखात्मता । सर्वोत्तमः सदानन्दः कथं कस्य कदाप्यत'इति प्रवृत्ते ॥ 'आधिपत्यं त्रिलोकस्य योग्यानामिन्द्रता स्मृता । अयोग्यानां त्रिलोकेऽपि पूज्यत्वं समुदाहृतम् । तद्भवेत्परया भक्त्या विष्णोरालयकारिणः । ततोऽप्युद्रिक्तया भक्त्या विष्णुं पूजयतः सदा । अवाप्यते ब्रह्मलोकस्ततोद्रिक्तश्च मुच्यत'इति च ॥ ५१, ५२ ॥ इति एकादशतात्पर्ये सप्तविंशोऽध्यायः ॥ २७ ॥

सप्तविंशोऽध्यायः

पिण्डे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम । अण्वीं जीवकलां ध्यायेन्नादान्ते सिद्धभाविताम् ॥२२॥ तयाऽऽत्मभूतया पिण्डे व्याप्ते सम्पद्य तन्मयः । आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत् ॥ २३ ॥ स्वस्य धर्मानुवाकेन महापुरुषविद्यया । पौरुषेणापि सूक्तेन धामनीराजनादिभिः ॥ ३० ॥ उपगायन् गृणन्नृत्यन्कर्माण्यभिनयन्मम । सत्कथाः श्रावयन् शृण्वन्मुहूर्तक्षणिको भवेत् ॥ ४३ ॥ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम् । पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥ ५१ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति । स भक्तियोगं लभते एवं यः पूजयेत माम् ॥ ५२ ॥

SGDF
Sri Gangeshwari Digital Foundation

अष्टाविंशोऽध्यायः

"[1]न प्रशंसेत निन्द्यांस्तु प्रशंस्यान्नैव निन्दयेत्। उभयं यः करोत्येतदसत्यात्स पतत्यधः। यः प्रशंस्यान्न प्रशंसेन्निन्द्यो येन न निन्द्यते। सोऽपि तद्वदधो याति यतोऽरिवदुदासक'इति सत्कारे ॥ प्रकृत्या पुरुषेण च सहैकेन परात्मना व्याप्तमेकात्मकम्। तथा पश्यत एव यथार्थज्ञानं भवति ॥ १ ॥ '[3]तैजसाहङ्कृतेर्जात इन्द्रियग्रामके परात्। निद्रया वशमापन्ने जीवः स्यान्नष्टचेतनः। अतो विष्णोर्वशे सर्वं तेन व्याप्तमिति स्मरेदि'ति च ॥ 'निद्रा चैव सुनिद्रा च द्विधा निद्रा प्रकीर्तिता। तत्र निद्रा भवेन्नित्या सुनिद्रा मृतिकालगे'ति पाद्मे। 'मनोमात्रस्वरूपत्वात्स्वप्नो मायेति कथ्यत'इति च। तथा नानार्थदं मन एव। मनसा हि विषयाः प्रतीयन्ते ॥३॥ [4]एकं तु शुभमुद्दिष्टमशुभं द्वैतमुच्यते। पुंसोऽशुभस्य किं भद्रं किमभद्रं विशेषतः। सर्वदाऽशुभरूपत्वाद्विशेषोऽत्यल्प एव ही'ति भारते ॥ द्वैतस्याशुभस्य पुरुषस्य कियदल्पमेव हि भद्रमभद्रं वा स्वयोग्यादाधिक्येन न भवति यत्नवतोऽपीत्यर्थः। अतस्तद्विषये ध्यातमुक्तं च शुभमनृतमेव। 'उच्यते ध्यायते वापि कुनरं प्रति यच्छुभम्। असत्यमेव भवति स्वभावोऽसत्यमेव यदि'ति प्रद्योते ॥ ४ ॥ [5]स्वभावतोऽशुभस्याशुभदेहादिकं नाशुभकारणं तर्हीत्यत आह। छायाप्रत्युदकाभासा इति।

अष्टाविंशोऽध्यायः

श्री भगवानुवाच—परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्। विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥१॥ परस्वभावकर्माणि यः प्रशंसति निन्दति। स आशु भ्रश्यते स्थानादसत्याभिनिवेशतः ॥ २ ॥ तैजसे निद्रयाऽऽपन्ने पिण्डस्थो नष्टचेतनः। मायां प्राप्नोति मृत्युं वा तद्वि नानार्थदं मनः ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्। वाचोदितं तदनृतं मनसा ध्यातमेव च ॥ ४ ॥ छाया प्रत्युदकाभासा

SGDF
Sri Gangeshwari Digital Foundation

सप्तविंशोऽध्यायः

[22]जीवः कला यस्याः सा जीवकला भगवन्मूर्तिः । 'हृदिस्था या हरेर्मूर्तिर्जीवो यत्प्रतिबिम्बकः । यद्वशे वर्तते जीवः स तु जीवकला स्मृता । शब्दैः सर्वात्मनाऽनुक्तेर्नादान्तस्था च सा मते'ति विवेके ॥ ॥ २२ ॥ '[23]व्याप्तो भूतश्च नित्यं यदात्मभूतो हरिस्ततः । जीवस्य तत्प्रधानत्वं तन्मयत्वमुदाहृतमि'ति तन्त्रभागवते ॥ 'व्याप्तोऽपि भगवान्विष्णुर्देहे सर्वगतत्वतः । भक्तस्य फलदो यस्माद्व्याप्तिकृत्तस्य तेन स'-इति च ॥ २३ ॥ [30]स्वस्य विष्णुसूक्तेन धाम सूक्तं समुद्रादूर्मिरिति । 'नितरां रञ्जयेद्यस्मात्पावमानं तु मण्डलम् । विष्णुनीराजनं तस्माद्विद्वद्भिः समुदाहृतमि'ति च ॥ ३० ॥ [43]मम कर्माणि कीर्तयित्वाऽभितो नयन्सर्वेषां प्रकाशयन्मत्कथाः श्रावयन्नित्यभिनयपदार्थः ॥ ४३ ॥ [51-52]नैरपेक्ष्येण भक्तियोगेनैव साम्यमित्यर्थः । 'निर्दुःखत्वं हरेः साम्यं न तादृशसुखात्मता । सर्वोत्तमः सदानन्दः कथं कस्य कदाप्यत'इति प्रवृत्ते ॥ 'आधिपत्यं त्रिलोकस्य योग्यानामिन्द्रता स्मृता । अयोग्यानां त्रिलोकेऽपि पूज्यत्वं समुदाहृतम् । तद्भवेत्परया भक्त्या विष्णोरालयकारिणः । ततोऽप्युद्रिक्तया भक्त्या विष्णुं पूजयतः सदा । अवाप्यते ब्रह्मलोकस्ततोद्रिक्तश्च मुच्यत'इति च ॥ ५१, ५२ ॥ इति एकादशतात्पर्ये सप्तविंशोऽध्यायः ॥ २७ ॥

सप्तविंशोऽध्यायः

पिण्डे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम । अण्वीं जीवकलां ध्यायेन्नादान्ते सिद्धभाविताम्॥२२॥ तयाऽऽत्मभूतया पिण्डे व्याप्ते सम्पद्य तन्मयः । आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत् ॥ २३ ॥ स्वस्य धर्मानुवाकेन महापुरुषविद्यया । पौरुषेणापि सूक्तेन धामनीराजनादिभिः ॥ ३० ॥ उपगायन् गृणन्नृत्यन्कर्माण्यभिनयन्मम । सत्कथाः श्रावयन् शृण्वन्मुहूर्तक्षणिको भवेत् ॥ ४३ ॥ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम् । पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥ ५१ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति । स भक्तियोगं लभते एवं यः पूजयेत माम् ॥ ५२ ॥

SGDF
Sri Gargeshwari Digital Foundation

अष्टाविंशोऽध्यायः

‘[1]न प्रशंसेत निन्द्यांस्तु प्रशंस्यान्नैव निन्दयेत्। उभयं यः करोत्येतदसत्यात्स पतत्यधः। यः प्रशंस्यान्न प्रशंसेन्निन्द्यो येन न निन्द्यते। सोऽपि तद्वदधो याति यतोऽरिवदुदासक’इति सत्कारे ॥ प्रकृत्या पुरुषेण च सहैकेन परात्मना व्याप्तमेकात्मकम्। तथा पश्यत एव यथार्थज्ञानं भवति ॥ १ ॥ ‘[3]तैजसाहङ्कृतेर्जात इन्द्रियग्रामके परात्। निद्रया वशमापन्ने जीवः स्यान्नष्टचेतनः। अतो विष्णोर्वशे सर्वं तेन व्याप्तमिति स्मरेदि’ति च ॥ ‘निद्रा चैव सुनिद्रा च द्विधा निद्रा प्रकीर्तिता। तत्र निद्रा भवेन्नित्या सुनिद्रा मृतिकालगे’ति पाद्मे। ‘मनोमात्रस्वरूपत्वात्स्वप्नो मायेति कथ्यत’इति च। तथा नानार्थदं मन एव। मनसा हि विषयाः प्रतीयन्ते ॥३॥ [4]एकं तु शुभमुद्दिष्ट-मशुभं द्वैतमुच्यते। पुंसोऽशुभस्य किं भद्रं किमभद्रं विशेषतः। सर्वदाऽशुभरूपत्वाद्विशेषोऽत्यल्प एव ही’ति भारते ॥ द्वैतस्याशुभस्य पुरुषस्य कियदल्पमेव हि भद्रमभद्रं वा स्वयोग्यादाधिक्येन न भवति यत्नवतोऽपीत्यर्थः। अतस्तद्विषये ध्यातमुक्तं च शुभमनृतमेव। ‘उच्यते ध्यायते वापि कुनरं प्रति यच्छुभम्। असत्यमेव भवति स्वभावोऽसत्यमेव यदि’ति प्रद्योते ॥ ४ ॥ [5]स्वभावतोऽशुभस्याशुभ-देहादिकं नाशुभकारणं तर्हीत्यत आह। छायाप्रत्युदकाभासा इति।

अष्टाविंशोऽध्यायः

श्री भगवानुवाच—परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्। विश्व-मेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥१॥ परस्वभावकर्माणि यः प्रशंसति निन्दति। स आशु भ्रश्यते स्थानादसत्याभिनिवेशतः ॥ २ ॥ तैजसे निद्रयाऽऽपन्ने पिण्डस्थो नष्टचेतनः। मायां प्राप्नोति मृत्युं वा तद्वि नानार्थदं मनः ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्। वाचोदितं तदनृतं मनसा ध्यातमेव च ॥ ४ ॥ छाया प्रत्युदकाभासा

SGDF
Sri Gangeshwari Digital Foundation

'व्यपेक्ष्य जीवं देहादि निःशक्तत्वादवस्त्वपि। पुनः शुभाशुभनृणां यच्छेदेव शुभाशुभम्। छायानीहारकाभासा निःशक्ता अपि कार्यदाः। एवं शुभादिदेहादेर्भवेत्कार्यं शुभादिकमि'ति सुमते॥ 'नीहारः प्रत्युदं चैव धूम्रमित्यभिशब्द्यत'इति शब्दनिर्णये॥ ५॥ [6]इदं विश्वं सृजति त्राति हरति च स्वयं स्वात्मनैव सृज्यते त्रायते ह्रियते च। 'दीपाद्दीपान्तरं यद्वत्सृष्टिरीशस्य कीर्त्यते। एतावत्कालमाशिष्ये मानुषेष्विति चिन्तनम्। विष्णोस्त्राणं समुद्दिष्टं स्वस्यैव स्वेच्छयैव तु। दीपेदीपान्तरस्येव ह्येकीभावश्च संहृतिरि'ति च॥ 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत'इति च॥६॥ [7]आत्मनः परमेश्वरस्य तस्मादन्यो भावो नास्ति। 'सृष्टिः स्थितिश्च संहारो भावनं समुदाहृतम्। तद्यः करोति पुरुषः स भाव इति कीर्त्यत' इति विवेके। अन्येन सृष्टिः स्थितिः संहार इति त्रिविधा मतिर्विद्वद्भिर्नैव निरूपिता निर्मूला प्रमाणवर्जिता। 'अन्यस्मात्सृष्टिसंहारौ स्थितिश्च परमात्मनः। निरूपिता न विद्वद्भिः प्रमाणाभावतो हरेरि'ति ब्रह्मतर्के॥ ७॥ [8]अन्यतः सृष्टिः स्थितिः संहार इति त्रयं गुणमयं सत्त्वादिगुणाधीनम्। 'गुणसम्बन्धयोग्यानामुत्पत्त्याद्याः स्युरन्यतः। सर्वदा निर्गुणस्यास्य सर्गाद्याः स्युः कुतोऽन्यत'इति च॥८॥ '[10]असमर्थमसत्प्रोक्तं सत्समर्थं प्रकीर्तितमि'ति च॥ १०॥ '[13]फलवान्मोक्षहेतुत्वान्नित्यानन्दादपार्थकः। जीवात्मनस्तु संसारः स्वप्नवच्चश्चल-

---

ह्यसन्तोऽप्यर्थकारिणः। एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम्॥ ॥५॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः। त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः॥६॥ तस्मान्न ह्यात्मनोऽमुष्मादन्यो भावो निरूपितः। निरूपितेयं त्रिविधा निर्मूला मतिरात्मनि॥ ७॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतम्॥ ८॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा। आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह॥ १०॥ श्री भगवानुवाच— यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम्। संसारः फलवांस्तावदपार्थोऽप्य-

SGDF
Sri Gurgeshwari Digital Foundation

त्वत'इति तत्त्वविवेके ॥ १३ ॥ [14]संसृत्यभावस्यैव फलरूपत्वान्निरर्थ एव संसार इत्यवधारयति। अर्थेऽपीति। 'उच्यते निष्फलत्वेन यदत्यल्पफलं भवेदि'ति च ॥ १४ ॥ [15]अतोऽफलवत्त्वावधारणार्थं च पुनर्वचनम् ॥ १५ ॥ [16]अहङ्कारस्य सकाशाद्दृश्यन्ते। नात्मनः स्वतः। 'अहङ्कारात्तु संसारो भवेज्जीवस्य न स्वतः। कुतश्चिदानन्दतनोः स्वरूपेच्छायुतस्य स'इति तन्त्रभागवते ॥ १६ ॥ [17]देहेन्द्रियप्राणमनसामभिमानयुक्तः। सूत्रं महानित्याद्यधिकारनामभिर्युक्तः। प्रधानजीवो हिरण्यगर्भोऽप्याधावति संसारे किमुतान्य इत्याशयः। 'संसारयुग्यो ब्रह्माऽपि सर्वजीवेश्वरेश्वरः। विष्ण्वधीनः सदा ज्ञानी किमुतान्येऽल्पचित्तिन'इति सत्तत्त्वे ॥ १७ ॥ [18]अमूलं विष्णुमूलम्। बहुरूपेण तेनैव रूप्यते मनआदीनां विषयः ॥ १८ ॥ [19]केवलं स्वतन्त्रम्। आद्यन्तयोर्यत्स्वतन्त्रं तदेव मध्येऽपि स्वतंन्त्रम्। परं ब्रह्म ज्ञानविवेकादिस्वरूपं परिपूर्णगुणत्वात्कालः। अन्यतो विविक्तत्वाद्विवेकः। सर्वं निगमयति प्रापयतीति निगमः। सर्वैरालोच्यत्वात्तपः। प्रतिप्रत्यक्षेषु स्थितत्वात्प्रत्यक्षम्। आचार्यसम्प्रदायसिद्धत्वादैतिह्यम्। अनुमेयत्वादनुमानम् ॥ १९ ॥ [20]हिरण्यखचितत्वेन हिरण्यप्रधानं हिरण्मयम्। शङ्खमश्वकरथादिषु मध्येऽपि केवलं प्राधा-

---

विवेकतः ॥ १३ ॥ अर्थेऽप्यविद्यमानेऽपि संसृतिर्न निवर्तते। ध्यायतो विषयान् ह्यस्य स्वप्नेऽनर्थागमो यथा ॥ १४ ॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायया। भक्त्या चैव यथा लब्धैर्हृदि भावेन चैव हि ॥१५॥ शोकहर्षभयक्रोध लोभमोहस्पृहादयः। अहङ्कारस्य दृश्यन्ते जन्ममृत्युश्च नात्मनः ॥१६॥ देहेन्द्रियप्राणमनो जीवोऽन्तरात्मा गुणकर्ममूर्तिः। सूत्रं महानित्युरुधेहगीतः संसार आधावति कालतन्त्रः ॥ १७ ॥ अमूलमेतद्बहुरूपरूपं मनो वचः प्राणशरीरकर्म। ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां विचरत्यतृष्णः ॥ १८ ॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानम्। आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ ॥ १९ ॥ यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य। तदेव

SGDF
Sri Gargeshwari Digital Foundation

'व्यपेक्ष्य जीवं देहादि निःशक्तत्वादवस्त्वपि । पुनः शुभाशुभनृणां यच्छेदेव शुभाशुभम् । छायानीहारकाभासा निःशक्ता अपि कार्यदाः । एवं शुभादिदेहादेर्भवेत्कार्यं शुभादिकमि'ति सुमते ॥ 'नीहारः प्रत्युदं चैव धूम्रमित्यभिशब्द्यत'इति शब्दनिर्णये ॥ ५ ॥ [6]इदं विश्वं सृजति त्राति हरति च स्वयं स्वात्मनैव सृज्यते त्रायते ह्रियते च । 'दीपाद्दीपान्तरं यद्वत्सृष्टिरीशस्य कीर्त्यते । एतावत्कालमाशिष्ये मानुषेष्विति चिन्तनम् । विष्णोस्त्राणं समुद्दिष्टं स्वस्यैव स्वेच्छयैव तु । दीपेदीपान्तरस्येव ह्यैकीभावश्च संहृतिरि'ति च ॥ 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत'इति च ॥६॥ [7]आत्मनः परमेश्वरस्य तस्मादन्यो भावो नास्ति । 'सृष्टिः स्थितिश्च संहारो भावनं समुदाहृतम् । तद्यः करोति पुरुषः स भाव इति कीर्त्यत' इति विवेके । अन्येन सृष्टिः स्थितिः संहार इति त्रिविधा मतिर्विद्वद्भिर्नैव निरूपिता निर्मूला प्रमाणवर्जिता । 'अन्यस्मात्सृष्टिसंहारौ स्थितिश्च परमात्मनः । निरूपिता न विद्वद्भिः प्रमाणाभावतो हरेरि'ति ब्रह्मतर्के ॥ ७ ॥ [8]अन्यतः सृष्टिः स्थितिः संहार इति त्रयं गुणमयं सत्त्वादिगुणाधीनम् । 'गुणसम्बन्धयोग्यानामुत्पत्त्याद्याः स्युरन्यतः । सर्वदा निर्गुणस्यास्य सर्गाद्याः स्युः कुतोऽन्यत'इति च ॥८॥ '[10]असमर्थमसत्प्रोक्तं सत्समर्थं प्रकीर्तितमि'ति च ॥ १० ॥ '[13]फलवान्मोक्षहेतुत्वान्नित्यानन्दादपार्थकः । जीवात्मनस्तु संसारः स्वप्नवच्चञ्चल-

---

ह्यसन्तोऽप्यर्थकारिणः । एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम् ॥ ॥५॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः । त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥६॥ तस्मान्न ह्यात्मनोऽमुष्मादन्यो भावो निरूपितः । निरूपितेयं त्रिविधा निर्मूला मतिरात्मनि ॥ ७ ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतम् ॥ ८ ॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा । आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह ॥ १० ॥ श्री भगवानुवाच— यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् । संसारः फलवांस्तावदपार्थोऽप्य-

SGDF
Sri Gargeshwari Digital Foundation

त्वत'इति तत्त्वविवेके ॥ १३ ॥ [14]संसृत्यभावस्यैव फलरूपत्वान्निरर्थ एव संसार इत्यवधारयति । अर्थेऽपीति । 'उच्यते निष्फलत्वेन यदत्यल्पफलं भवेदि'ति च ॥ १४ ॥ [15]अतोऽफलवत्त्वावधारणार्थं च पुनर्वचनम् ॥ १५ ॥ [16]अहङ्कारस्य सकाशाद्दृश्यन्ते । नात्मनः स्वतः । 'अहङ्कारात्तु संसारो भवेज्जीवस्य न स्वतः । कुतश्चिदानन्दतनोः स्वरूपेच्छायुतस्य स'इति तन्त्रभागवते ॥ १६ ॥ [17]देहेन्द्रियप्राणमनसामभिमानयुक्तः । सूत्रं महानित्याद्यधिकारनामभिर्युक्तः । प्रधानजीवो हिरण्यगर्भोऽप्याधावति संसारे किमुतान्य इत्याशयः । 'संसारयुग्यो ब्रह्माऽपि सर्वजीवेश्वरेश्वरः । विष्णवधीनः सदा ज्ञानी किमुतान्येऽल्पचित्तिन'इति सत्तत्त्वे ॥ १७ ॥ [18]अमूलं विष्णुमूलम् । बहुरूपेण तेनैव रूप्यते मनआदीनां विषयः ॥ १८ ॥ [19]केवलं स्वतन्त्रम् । आद्यन्तयोर्यत्स्वतन्त्रं तदेव मध्येऽपि स्वतंन्त्रम् । परं ब्रह्म ज्ञानविवेकादिस्वरूपं परिपूर्णगुणत्वात्कालः । अन्यतो विविक्तत्वाद्विवेकः । सर्वं निगमयति प्रापयतीति निगमः । सर्वैरालोच्यत्वात्तपः । प्रतिप्रत्यक्षेषु स्थितत्वात्प्रत्यक्षम् । आचार्यसम्प्रदायसिद्धत्वादैतिह्यम् । अनुमेयत्वादनुमानम् ॥ १९ ॥ [20]हिरण्यखचितत्वेन हिरण्यप्रधानं हिरण्मयम् । शङ्खमश्वकरथादिषु मध्येऽपि केवलं प्राधा-

---

विवेकतः ॥ १३ ॥ अर्थेऽप्यविद्यमानेऽपि संसृतिर्न निवर्तते । ध्यायतो विषयान् ह्यस्य स्वप्नेऽनर्थागमो यथा ॥ १४ ॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायया । भक्त्या चैव यथा लब्धैर्हृदि भावेन चैव हि ॥१५॥ शोकहर्षभयक्रोध लोभमोहस्पृहादयः । अहङ्कारस्य दृश्यन्ते जन्ममृत्युश्च नात्मनः ॥१६॥ देहेन्द्रियप्राणमनो जीवोऽन्तरात्मा गुणकर्ममूर्तिः । सूत्रं महानित्युरुधेहगीतः संसार आधावति कालतन्त्रः ॥ १७ ॥ अमूलमेतद्बहुरूपरूपं मनो वचः प्राणशरीरकर्म । ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां विचरत्यतृष्णः ॥ १८ ॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानम् । आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ ॥ १९ ॥ यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव

SGDF
Sri Gangeshwari Digital Foundation

न्येन व्यवहार्यमाणं तदेव । 'रथोपस्थे परिष्कारात्पूर्वं दारुमयाद्रथात् । सुवर्णं व्यवहाराय मुख्यं रथपरिष्कृतम् । मध्ये चान्ते रथोपस्थान्निष्कृष्य पृथगास्थितम् । यद्वदेवं हरिः साक्षाज्जगदेहात्पृथक् स्थितः । पूर्वं जगति संस्थश्च जगदन्ते पृथक्स्थितः । स एव मुख्यो जगतः स्वातन्त्र्यात्परमेश्वर'इति ब्रह्मतर्के ॥ सुरपितृमनुजादिकल्पनादिभिरित्याद्यन्तर्याम्यपेक्षया । 'यथा सुवर्णमकृतं क्रियते कुण्डलादिकम् । पुनरेकीभवत्यद्धा तद्वद्विष्णुरजोऽपि सन् । सुराद्यन्तःस्थितो भूत्वा पुनरेकीभवेद्विभुरि'ति च ॥ 'तत्तन्नियामकस्यैव नाम सर्वं सुरादिकम् । तत्सम्बन्धादुदीर्येत व्यवहृत्यै सुरादिष्वि'ति शब्दनिर्णये ॥ 'एकलं केवलं चेति स्वतन्त्रमभिधीयते । स्वतन्त्रस्तु हरिः साक्षात्परिष्कृतहिरण्यवदि'ति प्रवृत्ते । 'प्रत्येकं न तु दार्वादि स्वतन्त्रं विक्रियागतम् । महाफलं स्यात्स्वर्णं तु स्वतन्त्रं विक्रियोपगम् । तद्वत्स्वतन्त्रो भगवान्प्रवृत्तावन्यदन्यथे'ति च ॥ २० ॥ [21]मोक्षदं संसारदं तमःप्रदं चेति त्रिपदस्थं विज्ञानम् । तदिच्छायाः सत्व एतत्सर्वमस्ति अन्यथा नास्तीत्यन्वयव्यतिरेकौ । तदेव केवलं सत्यमिति सर्वत्र सम्बध्यते । 'स्वातन्त्र्यमेव सत्यत्वं विष्णोरन्यस्य सत्यता । प्रवाहतः सदाऽस्तित्वं पुंप्रकृत्योः सदाऽस्तिते'ति वस्तुतत्त्वे ॥ २१ ॥ [22]मध्ये च तत्केवलं नेति सम्बध्यते । 'तत्स्वातन्त्र्येण नैवास्ति यदुत्पत्तिविनाशवत् । स्वातन्त्र्येणास्तिता तस्य यत्सत्ताज्ञानदं सदे'ति वैभवे ॥२२॥ '[23]जगतो नास्तिता सैव या पराधीनता सदा । अभावस्तु कुतस्तस्य यद्विभातीह सर्वदे'ति प्राकाश्ये ॥ 'अविद्यमानता नाम जगतः परतन्त्रता । यथा-

---

मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥ २० ॥ विज्ञानमेतत्त्रिपदस्थमङ्ग गुणत्रयं कारणकार्यकर्तृ । समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम् ॥२१॥ न यत्पुरस्तादुत यन्न पश्चान्मध्ये च यन्न व्यपदेशमात्रम् । भूतं प्रसिद्धं च परेण यद्यत्तदेव सत्स्यादिति मे मनीषा ॥२२॥ अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः । ब्रह्म स्वयंज्योति-

SGDF
Sri Gargeshwari Digital Foundation

ऽशक्तस्तु पुत्रादिरसन्नित्युच्यते जनैरि' ति विवेके ॥ अतो ब्रह्मण एव विभाति । द्वितीयं ब्रह्मप्रकृतिः । आत्मा जीवः प्रकृतीन्द्रियविषयजीवादिविचित्रं जगद्ब्रह्मत एव विभातीत्यर्थः ॥ २३ ॥ [25]वायुरेव स्वयं प्राणस्तत्रस्थे चोदतेजसी । उदेन तेजसा चैव प्राणस्य हि कृतं वपुरि' ति प्रकाशिकायाम् ॥ 'प्राणस्य वायुरूपस्य भूतत्रयकृतं वपुः । ततो हि पार्थिवं नात्र खं चात्यल्पमुदाहृतमि' ति सन्धारणे ॥ सत्वं मूलबुद्धिः । अहं शृणोम्यहं स्पृशाम्यहं पश्यामीति सर्वार्थेषु समत्वादहङ्कारोऽर्थसाम्यम् । 'न देहो नेन्द्रियप्राणमनोबुद्ध्यहमादयः । विष्णुश्चिदानन्दतनुः स हि जीवाधिपः सदे' ति सत्तत्त्वे ॥ २५ ॥ [26]भगवतो गुणदोषाभावेऽपि जीवस्य सङ्गोऽवर्जनीय एव मुक्तिपर्यन्तम् । 'समाहितेन जीवेन विक्षिप्ते वा न तु क्वचित् । विशेषो विद्यते विष्णोस्तथापि तु समाहिते । प्रीतो भवति वै नित्यं सर्वधर्मकृतोऽपि चे' ति पाद्मे ॥ २६ ॥ [32]आत्मस्थमतिः परमात्मस्थमतिः । परमात्मनोऽन्यत्पारतन्त्र्यादेः ॥ ३२ ॥ '[33]नानामानविरुद्धं हि स्वातन्त्र्यं जगतः सदा । स्वतन्त्रो भगवान्विष्णुरेक एव न संशय' इति च ॥ वस्तुतया स्वतन्त्रत्वेन विरुद्धं तथा न मन्यते । 'अस्त्येव स्वाप्नमखिलं वासनारूपमात्मनि । जाग्रदेतदिति ज्ञानं यत्तदेव भ्रमात्मकम् । तद्वज्जगदिदं

रतो विभाति ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥२३॥ नात्मा वपुः पार्थिवमिन्द्रियाणि देवा ह्यसुर्वायुजलं हुताशः । मनोऽन्नमात्रं धिषणा च सत्त्वमहङ्कृतिः खं क्षितिरर्थसाम्यम् ॥२५॥ समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेत्तत्सुविविक्तधाम्नः । विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैर्विगतै रवेः किम् ॥२६॥ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वा त्रिगुणैर्न सज्जते । तथाऽक्षरं सत्त्वरजस्तमोमलैरहङ्कृतं संसृतिहेतुभिः परम् ॥२७॥ तथापि सङ्गः परिवर्जनीयो गुणेषु मायारचितेषु तावत् । मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत तमः कषायम् ॥२८॥ तिष्ठन्तमासीनमुत व्रजन्तं शयानमुक्षन्तमदन्तमन्नम् । स्वभावमन्यत्किमपीह मानमात्मानमात्मस्थमतिर्न वेद॥३२॥ यदि स्म पश्यत्यसदिन्द्रियार्थं नानानुमानेन विरुद्धमन्यत्।

SGDF
Sri Gargeshwari Digital Foundation

सर्वं विद्यमानं न संशयः । स्वतन्त्रमेतदिति तु यज्ज्ञानं तद्भ्रमात्मकमि'ति च ॥ 'उत्थितो नैव जाग्रत्त्वं क्वचित्स्वप्नस्य पश्यति । स्वातन्त्र्यमेवं जगतो ज्ञानवान्नैव पश्यती'ति विवेके ॥ ३३ ॥ [34]भगवद्गुणविषयं तत्कर्मविषयं चेति गुणकर्मचित्रम् । आत्मनि परमात्मविषयं एतन्न जानामीत्यप्यविविक्तम् । 'अन्यैर्ज्ञातेऽपि वाऽज्ञाते न विशेषो हरेः क्वचित् । तेषामेव विशेषः स्यादज्ञानापगमेन त्वि'ति च ॥ ३४ ॥ '[36]ज्ञानानन्दाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः । अद्वितीयो महाविष्णुः पूर्णत्वात्पुरुषः स्मृत'इति च ॥ ३६ ॥ '[37]एतावानात्मसम्मोहो यद्विरुद्धस्य कल्पनम् । यत्परात्माश्रयाज्जीवान्निश्चयेन न पश्यती'ति तन्त्रभागवते । अचलमिति क्रियाविशेषणम् ॥ ३७ ॥ [38]अयं व्यर्थवादो न भवति किन्त्वर्थवादः । जगत्परमेश्वरं च द्वयं विन्दन्ति ज्ञानिनः । 'पञ्चभूतात्मकं विश्वं भ्रान्तिसिद्धमपण्डिताः । वदन्ति पण्डितास्त्वद्धा जगदाहुरबाधितम् । प्रवाहरूपेण सदा विष्णोरिच्छावशे स्थितमि'ति च ॥ ३८ ॥ इति एकादशतात्पर्ये अष्टाविंशोऽध्यायः ॥ ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

'[7]आत्मान्तरात्मा परमात्मेति मूर्तित्रयं हरेः । जाग्रत्स्वप्नसुषुप्तीनां

न मन्यते वस्तुतया मनीषी स्वप्नं यथोत्थाय तिरोदधानम् ॥ ३३ ॥ पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमङ्ग । निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ ३४ ॥ एष स्वयं ज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः । एकोऽद्वितीयो वचसां विरामो येनेरिता वागसवश्चरन्ति ॥ ३६ ॥ एतावानात्मसम्मोहो यद्विकल्पस्तु केवले । आत्माऽमृते स्वमात्मानमचलं यन्न पश्यति ॥ ३७ ॥ यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम् । व्यर्थो नाप्यर्थवादोऽयं द्वयं विन्दन्ति सूरयः ॥३८॥

एकोनत्रिंशोऽध्यायः

श्री शुक उवाच—इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः

SGDF
Sri Gangeshwari Digital Foundation

सृष्ट्यादेश्च प्रवर्तकमि’ति त्रैकाल्ये ॥७॥ [11]पृथक्स्वयमेव सत्रेण बहुभिः सह वा मम यात्रामहोत्सवं कुर्यात् ॥ ११ ॥ ‘[13]सर्वभूतेष्वस्ति विष्णुरिति भावः सतां मतः ॥ १३ ॥ [15]अर्चने सर्वभूतानामादित्ये तद्गतात्मने’ति च ॥१५॥ ‘[18]ब्रह्मणात्तमिदं सर्वं यत्किञ्चित्सचराचरम् । इति पश्येत यो विद्वान्स हि ब्रह्मात्मविन्मत’इति ब्राह्मे ॥ १८ ॥ ‘[21]नयादिर्दुर्नयः प्रोक्तो यन्नयं सोऽतिसर्वदे’ति शब्दतत्त्वे ॥ २१ ॥ ‘[22]एकदा ज्ञातरूपेण यन्न तिष्ठति सर्वदा । चञ्चलत्वात्सत्यमपि ह्यनृतं जगदुच्यत’इति च ॥ ‘सर्वदैकप्रकारत्वात्सत्यं ब्रह्म सदोच्यत’इति च ॥ २२ ॥ इति एकादशतात्पर्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

[2]तनुमत्यजत् । अतिशयेनाहरत् । अज हरण इति धातोः ।

स्वशक्तिभिः । गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेम मनोहरस्मितः ॥७॥ पृथक् सत्रेण वा मह्यं मम यात्रामहोत्सवम् । कारयेन्नृत्यगीताद्यैर्महाराजविभूतिभिः ॥ ११ ॥ इति सर्वाणि भूतानि मद्भावेन महाद्युते । सभाजयेन्मन्यमानो ज्ञानं केवलमाश्रयन् ॥ १३ ॥ नरेष्वभीक्ष्णं मद्भावः पुंसो भावयतोऽचिरात् । स्पर्धा माया तिरस्कारं साहङ्कारऽपि याति हि ॥१५॥ सर्वं ब्रह्मात्मकं तस्य विद्ययाऽऽत्ममनीषया । परिपश्यति च परं परमात्मानमच्युतम् ॥ १८ ॥ अहं हि सर्वकल्पानां सध्रीचीनो मतो मम । मद्भावः सर्वभूतेषु मनोवाक्कायकर्मभिः ॥ १९ ॥ यो योऽपरो मनोधर्मः कल्पते निष्फलाय ते । तदायासो निरर्थः स्यान्नयादेरिव सत्तम ॥ २१ ॥ एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम् ॥ २२ ॥

त्रिंशोऽध्यायः

ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः । प्रेयसीं सर्वनेत्राणां तनुं

SGDF
Sri Gargeshwari Digital Foundation

भूलोकात्स्वर्गलोकं प्रत्यहरदित्यर्थः ॥२॥ [3]कः सुखरूपः । अनुमानः कवीनां मानानुसारी ॥३॥ इति एकादशतात्पर्ये त्रिंशोऽध्यायः ॥३०॥

एकत्रिंशोऽध्यायः

[6]आग्नेय्या धारणया स्वतनुमदग्ध्वा स्वकं धामाविशत् । 'आग्नेय्याऽन्ये धारणया दग्ध्वा देहं परं पदम् । यान्ति देवाः समस्ताश्च तेषामन्यां तनुं हरिः । नृसिंहरूपी सर्वेषां भित्त्वा ताभिरलङ्कृतः । नृत्यते प्रलये देवः स्वयं कृष्णादिरूपवान् । अदग्ध्वैव तनुं याति नित्यानन्दस्वरूपत'इति तन्त्रभागवते ॥६॥ [11]तनुभृद्वज्जननवदप्ययवच्च ईहा तनुभृज्जननाप्ययेहा । 'प्रजापतिश्चरति गर्भे अन्तः अजायमानो बहुधा विजायत'इति च । 'अजातो जातवद्विष्णुरमृतो मृतवत्तथा । मायया दर्शयेन्नित्यमज्ञानां मोहनाय चे'ति ब्राह्मे ॥ ११ ॥ [13]शेषितं वपुर्बलभद्रादीनाम् । 'जगतो मोहनार्थाय भगवान्पुरुषोत्तमः । दर्शयेन्मानुषीं चेष्टां तथा मृतकवद्विभुः । प्रकाशयेददेहोऽपि मोहाय च दुरात्मनाम् । मायया मृतकं देहं तदा सृष्ट्वा प्रदर्शयेत् । कुतो हि मृतकं तस्य मृत्यभावात्परात्मन'इति च ॥ १३ ॥ '[20]अग्नावन्तर्दधे

स कथमत्यजत् ॥२॥ प्रत्याक्रष्टुं नयनमबला यत्र मग्नं न शेकुः कर्णाविष्टं न सरति यशो यत्सतामात्मलग्नम् । यच्छ्रीवाक्यं जनयति रतिं किन्नु मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ॥ ३ ॥

एकत्रिंशोऽध्यायः

लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलाम् । योगधारणयाऽग्नेय्याऽदग्ध्वा धामाविशत्स्वकम् ॥६॥ राजन्परस्य तनुभृज्जननाप्ययेहां मायाविडम्बनमवैहि यथा नटस्य । सृष्ट्वाऽऽत्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते ॥ ११ ॥ तथाप्यशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् । नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥१३॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः । उपगृह्य पतींस्तात चितामारुरुहुः स्त्रियः । रामपत्न्यश्च तं देहमुपगृह्याग्नि-

SGDF
Sri Gargeshwari Digital Foundation

भैष्मी सत्यभामा वने तथा। न तु देहवियोगोऽस्ति तयोः शुद्ध-चिदात्मनोरि'ति च ॥ २० ॥ इति श्रीमद्भागवतैकादशस्कन्धतात्पर्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते एकत्रिंशोऽध्यायः ॥ ३१ ॥ एकादशस्कन्धः सम्पूर्णः ॥

द्वादशः स्कन्धः

चतुर्थोऽध्यायः

श्रीवेदव्यासाय नमः ॥ [20]न यत्र वाच इत्यादि कालाख्यस्य ब्रह्मणः स्वरूपम् ॥ २० ॥ '[23]जीवविष्णोरभेदश्च देहयोगवियोजने। विष्णोर्दुःखं व्रणित्वादि पराभावस्तथैव च। अस्वातन्त्र्यं च वेदादा-वुक्तवद्भासते विभोः। क्वचित्क्वचिद्विमोहाय दैत्यानां च दुरात्मना-मि'ति ब्रह्माण्डे ॥ २३ ॥ '[25]प्रत्येकं विष्णुरूपाणां भ्रान्तिमात्रा भिदा मता। जगतश्चैव विष्णोश्च सत्यो भेदः सदैव तु। यथाऽऽकाशघनौ

माविशन् ॥ १९ ॥ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः। कृष्ण-पत्न्योऽविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ २० ॥

द्वादशः स्कन्धः

चतुर्थोऽध्यायः

तत एकोदकं विश्वं ब्रह्माण्डविवरान्तरम्। तदा भूमेर्गन्धगुणं ग्रसन्त्याप उपप्लवे ॥ १३ ॥ न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी। न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥ ॥२०॥ बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम्। अन्वयव्यतिरेकाभ्या-माद्यं तावदवस्तु यत् ॥ २३ ॥ बुद्धेर्जागरणं स्वप्नं सुषुप्तिरिति होच्यते।

SGDF
Sri Gangeshwari Digital Foundation

नित्यं भिन्नावेव परस्परम्। एवमीशो जगच्चैव भिन्नावेव परस्परमि'ति च॥ २५॥ '[27]अवयव्यवयवाभेदात्कोव्यंशो भेद ईरितः। सोऽपि भेदो न चाभेदात्पृथगेव प्रवर्तते। अवयव्यवयवानां च कार्यकारण-वस्तुनाम्। एक एव नियन्ताऽसौ हरिर्नारायणः पर'इति च॥२७॥ '[30]महाकाशो बहिःस्थश्च घटाद्यन्तःस्थ एव च। द्वेधा समुदितोऽन्यौ च द्वावाकाशौ प्रकीर्तितौ। घटरूपस्तदन्यश्च महाकाशात्परो लघुः। महाकाशवदेवात्र परमात्मा सनातनः। घटान्तःस्थमहाकाशप्रतिमोऽन्त-र्गतो हरिः। घटस्थान्तर्गताकाशो महाकाशात्परो मतः। तद्वद्देवादयः सर्वे जीवा मुक्त्युपयोगिनः। तमोगाश्चैव ये सर्वे घटरूपखवन्नरा'इति तत्त्वसंहितायाम्॥ ३०॥ इति द्वादशस्कन्धतात्पर्ये चतुर्थोऽध्यायः॥ ॥ ४॥

पञ्चमोऽध्यायः

'[23]स्वसन्तानोद्भवं कीर्त्या योजयन् जनमेजयम्। शक्तोऽप्य-शक्तवद्यष्टुरिन्द्र आसीदुपेक्षकः। एवमेव ऋषीणां च कीर्तिं योजयताऽमुना। कृतोपेक्षा महेन्द्रेण किमु विष्णुः परात्परः। तस्माद्विष्णो-

---

मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि॥ २५॥ यथा जलधरा व्योम्नि भवन्ति न भवन्ति च। ब्रह्मणीदं तथा विश्वमुपयात्युदयाप्ययम्॥२६॥ एते ह्यवयवाः प्रोक्ताः सर्वावयविनामिह। विनाऽर्थेन प्रतीयेरन् पटस्येवाङ्ग तन्तवः॥ २७॥ यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः। अन्योऽन्यापाश्रयात्सर्वमाद्यन्तवदवस्तु च॥ २८॥ न हि सत्यस्य नानात्व-मविद्वान्यदि मन्यते। नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरपि॥ ३०॥

पञ्चमोऽध्यायः

ब्रह्मभूतस्य राजर्षेर्देहो हि गरलाग्निना। बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनाम्॥ १३॥ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः। सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते॥२०॥ तच्छ्रुत्वा जुहुवुर्विप्राः

SGDF Sri Gargeshwari Digital Foundation

रशक्यं न भूतभव्यभवत्स्वपि । न चानिष्टं गुणैरेष पूर्णो नारायणः सदे'ति वामने ॥२३॥ इति द्वादशस्कन्धतात्पर्ये पञ्चमोऽध्यायः ॥५॥

नित्यादोषस्वरूपाय गुणपूर्णाय सर्वदा । नारायणाय हरये नमः प्रेष्ठतमाय मे ॥ १ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवततात्पर्यनिर्णये द्वादशस्कन्धः समाप्तः ॥

॥ श्रीमद्भागवततात्पर्यनिर्णयः समाप्तः ॥

सहेन्द्रं तक्षकं मखे । तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता ॥२१॥ इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः । बभूव सम्भ्रान्तमतिः सविमानः सतक्षकः ॥ २२ ॥ तं पतन्तं विमानेन सह तक्षकमम्बरात् । विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥ २३ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

रशक्यं न भूतभव्यभवत्स्वपि । न चानिष्टं गुणैरेष पूर्णो नारायणः सदे'ति वामने ॥२३॥ इति द्वादशस्कन्धतात्पर्ये पञ्चमोऽध्यायः ॥५॥

नित्यादोषस्वरूपाय गुणपूर्णाय सर्वदा । नारायणाय हरये नमः प्रेष्ठतमाय मे ॥ १ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवततात्पर्यनिर्णये द्वादशस्कन्धः समाप्तः ॥

॥ श्रीमद्भागवततात्पर्यनिर्णयः समाप्तः ॥

सहेन्द्रं तक्षकं मखे । तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता ॥२१॥ इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः । बभूव सम्भ्रान्तमतिः सविमानः सतक्षकः ॥ २२ ॥ तं पतन्तं विमानेन सह तक्षकमम्बरात् । विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥ २३ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

‘श्रीसर्वमूलग्रन्था’ इति साम्प्रदायिकैरनुमताः

सप्तत्रिंशद्ग्रन्थाः समाप्ताः

॥ श्रीमध्वेशार्पणमस्तु ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीसर्वमूलग्रन्थानन्तर्गताः परन्तु श्रीमदानन्दतीर्थभगवत्पादैः
रचितत्वेन साम्प्रदायिकैरनुमता ग्रन्था:

१. कन्दुक(कृष्ण)स्तुतिः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक-
लक्ष्मीहयग्रीवाय नमः ॥

ॐ अम्बरगङ्गाचुम्बितपादः
पदतलविदलितगुरुतरशकटः ।
कालियनागक्ष्वेलनिहन्ता
सरसिजनवदलविकसितनयनः ॥ १ ॥

कालघनालीकर्बुरकायः
शरशतशकलितसुररिपुनिवहः ।
सन्ततमस्मान्पातु मुरारिः
सततगसमजवखगपतिनिरतः ॥ २ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिता कृष्णस्तुतिः सम्पूर्णा

SGDF
Sri Gargeshwari Digital Foundation

२. बिल्वमङ्गलः साधुः

SGDF
Sri Gargeshwari Digital Foundation

३. न्यासपद्धतिः

॥ श्री नृसिंहाय नमः ॥

नत्वा नारायणं देवं पूर्णं ब्रह्माक्षरोदितम् ।
यतेराचरणं वक्ष्ये पूर्णं शास्त्रानुसारतः (क्ष्य) ॥ १ ॥

अरुणोदयवेलायामुत्थाय हरिमानसैः । (य, सेः)
शौचादिकं यथान्यायं कृत्वा दन्तान्विशोधयेत् (या) ॥ २ ॥

कटिशौचं भृशं कुर्यात् शुध्यर्थं जलसंस्थितः । (मृरा, मृदा, र्थ, तं)
स्नानं कुर्यात् यथोक्तेन विधिना नियतो यतिः ॥ ३ ॥

धृतोर्ध्वपुण्ड्रो विधिना प्रकल्प्यासनमच्युते । (तौ, ल्पा)
मनोनिविश्याष्टमन्त्रान् यथाशक्ति जपेच्छुचिः (ना) ॥ ४ ॥

द्वादशसाहस्रवृर्तिं परंब्रह्माक्षरं जपेत् ।
दण्डोदकं जपशोचे दद्याद्विधिविधानतः ॥ ५ ॥
(जपाशौचे, जपश्रान्ते, जपशान्त्यै, जपस्यान्ते)

देवतां परमां सम्यक् पूजयेच्च विधानतः ।
भिक्षाकाले विधानेन चरेद्भिक्षाटनं यतिः (ते, न) ॥ ६ ॥

एकस्य भिक्षाचरणं जघन्यमिति चोदितम् ।
अनेकभिक्षाचरणं मुख्यधर्मो यतेः स्मृतः ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

त्रिपञ्चसप्तसद्मानि गच्छेन्नातोऽधिकं व्रजेत् ।
॥ बुधः ॥ भिक्षाग्रहणकाले तु गृह्णीयाद्दातृतो जलम् ॥ ८ ॥

भिक्षान्ने तज्जलं प्रोक्ष्यं पुनर्ग्राह्यं विदा जलम् । (त)
निवेदयेत्तदन्नं तु वारिजस्योदकेन तु ॥ ९ ॥

प्रोक्ष्य देवाय महते मूलमन्त्रेण वाग्यतः । (न्त्र)
तदन्नं भक्षयेत्स्वस्थो ह्यजवद्धरिमानसः (यो, स) ॥ १० ॥

त्रिवारमुदकस्नानं यतेः शास्त्रेषु चोदितम् ।
अशक्तस्य यतेः शास्त्रे द्विवारं स्नानचोदना (स्त्र) ॥ ११ ॥

अत्यन्ताशक्तविषये त्वेकस्नानं स्मृतं बुधैः ।
वेदान्तशास्त्राभ्यसनं मुख्यधर्मो यतेः स्मृतः (स्त्र) ॥ १२ ॥

ध्येयो नारायणो नित्यं सृष्टिस्थित्यन्तकारकः । (ध्या)
भक्तानां मुक्तिदो नित्यमन्यथाज्ञानिनां तमः (नात्त) ॥ १३ ॥

पूर्णप्रज्ञेन मुनिना व्यासवाक्यसमुद्धृतिः ।
न्यासधर्मस्य विषये शुभा सङ्क्षेपतः कृता ॥

इति श्रीमदानन्दतीर्थभगवत्पा(दा)चार्यविरचिता
न्यासपद्धतिः समाप्ता

श्रीः श्रीः श्रीः

शके १८१० सर्वधारिसंवत्सर अधिक चैत्रवद्य १२ सोमवारदलि बेलगावियलि लेखन समाप्ति ।

॥ श्री मध्वेशार्पणमस्तु ॥

SGDF
Sri Gurgeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ श्री दिग्विजय रामोविजयते ॥

श्रीमदुत्तरादिमठाधीश श्री १०८ श्री सत्यप्रमोदतीर्थरु अलंकरिसिद



श्रीमट्टीकारायर वृंदावन—मळखेड.

श्रुतिक्षीराब्धिमामथ्य धीमंदरमहीभृता ।

प्राप्ता न्यायसुधा येन तं जयीन्द्रमहं भजे ॥

SGDF

SGDF
Sri Gargeshwari Digital Foundation